वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

तृतीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९४

॥ श्रीः ॥

वाचस्पत्यम्

(बृहत् संस्कृताभिधानम्)

गवर्नमेंटसंस्कृतमहाविद्यालय-दर्शन-व्याकरणाध्यापक-

श्रीतारानाथ-तर्कवाचस्पति-भट्टाचार्येण

सङ्कलितम्

तेनैव संस्कृतम्

तृतीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

विक्रम सं० २०१८] [ई० १९६२

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१
मुद्रक : विद्याविलास प्रेस, वाराणसी-१

The
Chowkhamba Sanskrit Series Office,
P. O. Box 8, Varanasi-1
(INDIA)
1962
Phone : 3145

PK
925
137
V. 3.
920662

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO. 94

VACHASPATYAM

(A Comprehensive Sanskrit Dictionary)

COMPILED BY

SRI TARANATHA TARKAVACHASPATI

Professor of Grammar and Philosophy
Govt. Sanskrit College, Calcutta.

VOL. III

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1 (India) Phone : 3145
1962

LIBRARY
AUG 17 1964
UNIVERSITY OF TORONTO

~~920662~~

वर्णः	स्वरः	कालः	स्थानम्	आभ्यन्तरप्रयत्नः	बाह्यप्रयत्नाः ।
अ	उदात्तानुदात्तस्वरिताः	एकमात्रो ह्रस्वः	कण्ठः	विवृतम्	संवारनादघोषाः अल्पप्राणश्च
आ	उदा० ३	द्विमात्रो दीर्घः	कण्ठः	विवृतम्	संवारनादघोषाः अल्पप्राणश्च
अ३	उदा० ३	त्रिमात्रः प्लुतः	सः	तत्	ते च
इ	उदा० ३	एकमात्रो ह्रस्वः	तालु	तत्	ते च
ई	उदा० ३	द्विमात्रो दीर्घः	तत्	तत्	ते च
इ३	उदा० ३	त्रिमात्रः प्लुतः	तत्	तत्	ते च
उ	उदा० ३	एकमात्रो ह्रस्वः	ओष्ठौ	तत्	ते च
ऊ	उदा० ३	द्विमात्रो दीर्घः	तौ	तत्	ते च
उ३	उदा० ३	त्रिमात्रः प्लुतः	तौ	तत्	ते च
ऋ	उदा० ३	एकमात्रो ह्रस्वः	मूर्द्धा	तत्	ते च
ॠ	उदा० ३	द्विमात्रो दीर्घः	सः	तत्	ते च
ऋ३	उदा० ३	त्रिमात्रः प्लुतः	सः	तत्	ते च
ऌ	उदा० ३	एकमात्रो ह्रस्वः	दन्तमूलम्	तत्	ते च
ऌ३	उदा० ३	त्रिमात्रः प्लुतः	तत्	तत्	ते च
अस्य दीर्घाभावेऽपि लकारद्वययोगात् द्विमात्रता			दन्तमूलम्	तत् ईषत्स्पृष्टं च	ते च
ए	उदा० ३	द्विमात्रो दीर्घः	कण्ठतालुनी	विवृतम्	ते च
ए३	उदा० ३	त्रिमात्रः प्लुतः	कण्ठतालुनी	तत्	ते च
ऐ	उदा० ३	द्विमात्रो दीर्घः	कण्ठतालुनी	तत्	ते च
ऐ३	उदा० ३	त्रिमात्रः प्लुतः	कण्ठतालुनी	तत्	ते च
ओ	उदा० ३	द्विमात्रो दीर्घः	कण्ठोष्ठौ	तत्	ते च
ओ३	उदा० ३	त्रिमात्रः प्लुतः	कण्ठौष्ठौ	तत्	ते च
औ	उदा० ३	द्विमात्रो दीर्घः	कण्ठौष्ठौ	तत्	ते च
औ३	उदा० ३	त्रिमात्रः प्लुतः	कण्ठौष्ठौ	तत्	ते च
एषामनुनासिकत्वे उदा०		यथाप्राप्तम्	यथास्थानं नासिकाऽपि	तत्	यथप्राप्तं बाह्याः
ं अनुस्वारस्य	०	०	नासिका	स्पृष्टम्	संवारनादघोषा महाप्राणश्च
: विसर्गस्य	०	०	कण्ठः	स्पृष्टम्	विवारश्वासाघोषा महाप्राणश्च
ᳵक ᳵख	०	०	जिह्वामूलम्	स्पृष्टम्	विवारादयः महाप्राणश्च
ᳶप ᳶफ	०	०	ओष्ठौ	स्पृष्टम्	विवारादयः महाप्राणश्च
क	०	अर्द्धमात्रा	कण्ठमूलम्	स्पृष्टम्	विवारश्वासाघोषा अल्पप्राणश्च
ख	०	अर्द्धमात्रा	तत्	तत्	विवारादयः महाप्राणश्च
ग	०	सा	तत्	तत्	संवारनादघोषा अल्पप्राणश्च
घ	०	सा	तत्	तत्	संवारादयः महाप्राणश्च
ङ	०	सा	तत् नासा च	तत्	संवारादयः अल्पप्राणश्च
च	०	अर्द्धमात्रा	तालु	तत्	विवारादयः अल्पप्राणश्च
छ	०	सा	तत्	तत्	विवारादयः महाप्राणश्च
ज	·	सा	त	तत्	संवारादयः अल्पप्राणश्च

वर्णः	स्वरः	कालः	स्थानम्	आभ्यन्तरप्रयत्नः	बाह्यप्रयत्नाः ।
झ	०	अर्द्धमात्रा	तालु	स्पृष्टम्	संवारादयः महाप्राणश्च
ञ	०	सा:	तालु नासा च	तत्	संवारादयः अल्पप्राणश्च
ट	०	सा	मूर्द्धा	तत्	विवारादयः अल्पप्राणश्च
ठ	०	सा	सः	तत्	विवारादयः महाप्राणश्च
ड	•	सा	सः	तत्	संवारादयः अल्पप्राणश्च
ढ	•	सा	सः	तत्	संवारादयः महाप्राणश्च
ण	०	सा	सः नासा च	तत्	संवारादयः अल्पप्राणश्च
त	•	सा	दन्तमूलम्	तत्	विवारादयः अल्पप्राणश्च
थ	•	सा	तत्	तत्	विवारादयः महाप्राणश्च
द	•	सा	तत्	तत्	संवारादयः अल्पप्राणश्च
ध	•	सा	तत्	तत्	संवारादयः महाप्राणश्च
न	•	सा	तत् नासा च	तत्	संवारादयः अल्पप्राणश्च
प	०	सा	ओष्ठौ	तत्	विवारादयः अल्पप्राणश्च
फ	०	सा	तौ	तत्	विवारादयः महाप्राणश्च
ब	•	सा	तौ	तत्	संवारादयः अल्पप्राणश्च
भ	•	सा	तौ	तत्	संवारादयः महाप्राणश्च
म	•	सा	तौ नासा च	तत्	संवारादयः अल्पप्राणश्च
य	०	सा	तालु	ईषत् स्पृष्टम्	संवारादयः अल्पप्राणश्च
र	०	सा	मूर्द्धा	ईषत् स्पृष्टम्	विवारादयः अल्पप्राणश्च
ल	०	सा	दन्तमूलम्	तत्	ते एव
व	•	सा	दन्तोष्ठौ	तत्	ते एव
यवलानामनुनासिकत्वे		०	यथास्थानं नासाऽपि	तत्	ते एव
श	०	सा	तालु	अर्द्धस्पृष्टम्	विवारादयः महाप्राणश्च
ष	•	सा	मूर्द्धा	तत्	ते एव
स	•	सा	दन्तमूलम्	तत्	ते एव
ह	०	सा	कण्ठः	अर्द्धस्पृष्टम्	संवारादयः महाप्राणश्च
कँ खँ गँ घँ इत्ययमानाम्		सा	यथास्थानं नासिका च	स्पृष्टम्	यथाप्राप्तं बाह्याः
ह्ण ह्न ह्म ह्य ह्र ह्ल ह्व			उरः यथास्थानञ्च	यथाप्राप्तम्	संवारादयः महाप्राणश्च

उदात्तादीनां सूचक चिह्नानि तु ऊर्द्ध्वरेखाचिह्नितः अकारादिवर्ण उदात्तः, अधोरेखाचिह्नितः अनुदात्तः, ऊर्द्ध्वाधोरेखारहितः स्वरित इति । तत्र अचामेव स्वरकृतविभागः, न तु व्यञ्जनानां तेषामुदात्तादिस्वराभावात् ।

स्वरवर्णविभागादि ।

स्वरवर्णा अकारादयः औकारान्ताः शिक्षामते द्वाविंशतिस्त्रयोविंशतिर्वा "स्वरा विंशतिरेकश्च" "दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुत एव चेति" च शिक्षोक्तेः । तथाहि ह्रस्वदीर्घप्लुतभेदेन अ, इ, उ, ऋ, इत्येते द्वादश ऌकारः ह्रस्व एव तस्य दीर्घाभावात् । ए, ऐ, ओ औ, इत्येते दीर्घप्लुतभेदात् अष्टौ इत्येकविंशतिः ॡकारस्य लकारद्वययुक्तत्वेन ईषत्स्पृष्टतया दुष्पृष्टत्वेन द्वाविंशतिः प्लुतत्वे त्रयोविंशतिर्भेदाः स्थूलाः । तेषां च प्रत्येकमुदात्तानुदात्तस्वरितभेदैः त्रैविध्येन ६६ भेदाः ६९ वा भेदाः । पुनस्तेषामनुनासिकाननुनासिकभेदाभ्यां द्वैविध्यात् १३२ । १३८ वा सूक्ष्मा भेदाः सर्व्वेषाञ्चैषां स्वयं राजमानत्वात् उदात्तादिस्वरवत्त्वाच्च स्वरशब्दवाच्यता ।

तन्त्रमते तु अनुस्वारविसर्गसहिताः अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ, ॡ, इत्येते दश ए, ऐ, ओ, औ, इत्येते चत्वारः इत्येते षोडश । पाणिनीयमते ॡकारस्य यथा दीर्घत्वाभावेऽपि लकारद्वययुक्त ह्रस्वऌकारैकमात्रया द्विमात्रत्वसाम्यात् दीर्घत्वव्यवहारस्तथा ॡकारादिशब्दे उक्तः । अनुस्वारविसर्गयोश्च अक्षरसमाम्नायसूत्रेषु अ, इ, उण्, इत्यादिषु माहेश्वरेषु चतुर्द्दशसु सूत्रेषु आम्नानाभावेऽपि भाष्यकृता अट्सूपसंख्यानेऽपि न स्वरवर्णत्वम् "अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" इत्युक्त्या स्वयंविराजमानत्वाभावात् उदात्तादिस्वरवत्त्वाभावाच्च । तयोः स्वरवर्णत्वाभावेऽपि अट्सूपसंख्यानञ्च षत्वणत्वकार्य्यार्थम् । तेन हवींषि इत्यादौ अनुस्वारव्यवधानेऽपि षत्वम् । अत्र च नुम्स्थानिकानुस्वारस्यैव निमित्तता न तद्भिन्नस्य, तेन सुहिंसु पुंसु इत्यादौ न षत्वम् । णत्वं तु सर्व्वानुस्वारव्यवायेऽपि तेन बृंहणं बृंहणमित्यादौ णत्वम् "अट्कुप्वाङ्नुम्व्यवायेऽपीत्युक्तेः तत्र अड्ग्रहणेनैवानुस्वारप्राप्तेरनुस्वारमात्रव्यवाये णत्वार्थं नुम्ग्रहणम् न तु षत्ववत् नुम्स्थानिकस्यैव ग्रहणमित्युक्तोदाहृतौ णत्वम् । सर्व्वेषां स्वरवर्णोच्चारणे विवृतं दूरावस्थानरूपम् आभ्यन्तरप्रयत्नः "विवृतमूष्मणां स्वराणाञ्च" इति "अचोऽस्पृष्टाः इति चोक्तेः । एषां वाह्यप्रयत्नास्तु घोषनादसंवाराः "कण्ठमध्ये तु घोषाः स्युः संवृता नादभागिनः" इत्युक्तेः । यथा चैषां दूरावस्थानं तथा सरलायामस्माभिरुक्तं तच्च आभ्यन्तरप्रयत्नशब्दे उक्तम् । एतेषामुच्चारणस्थानानि प्रदर्श्यन्ते । अ इति वर्णः कण्ठमूलोच्चार्य्यः "जिह्वामूले तु कुः प्रोक्तः" इत्युक्तेः । तत्र अ इति ह्रस्ववर्णः एकमात्रत्वात् । स च उदात्तानुदात्तस्वरितभेदात् त्रिधा, त्रिविधोऽपि अनुनासिकाननुनासिकरूपद्वैविध्यात् षड्विधः । एवं आ इति दीर्घः द्विमात्रत्वात् तस्य च तथैव षड्विधत्वम् । अ३प्लुतवर्णः त्रिमात्रत्वात् तस्यापि उक्तरीत्या षाड्विध्यम् तथा च अइत्येतत् अष्टादशानां संज्ञा पारिभाषिकी कारतकारपरत्वे स्वरूपपरता । एवम् इ, इति तालव्यः "इचुयशानां तालु" इत्युक्तेः । तस्यापि इ, ई, इ३ इति ह्रस्वदीर्घप्लुतसंज्ञा एकमात्रद्विमात्रत्रिमात्रताभेदात् तेषाञ्च प्रत्येकमुक्तरीत्या षाड्विध्यमित्यष्टादशविधता । तथाच इ, इति अष्टादशानां संज्ञा तपरत्वे कारपरत्वे च स्वरूपपरता । उ इति वर्णः ओष्ठोच्चार्य्यः "ओष्ठजावुपू" इत्युक्तेः स च ह्रस्वदीर्घप्लुतरूपः एकमात्रद्विमात्रत्रिमात्रताभेदात् त्रिविधः तेषां प्रत्येकमुक्तरीत्या षाड्विध्यमित्याष्टादशविधता । एवञ्च उ, इत्यष्टादशानां संज्ञा तपरत्वे कारपरत्वे च स्वरूपपरता । ऋ, इति मूर्द्धस्थानोच्चार्य्यः "ऋटुरषाणां मूर्द्धा" इत्युक्तेः स च ह्रस्वदीर्घप्लुतरूपः त्रिधा एकमात्रत्वादिभेदात् । तेषाञ्च प्रत्येकमुक्तरीत्या षाड्विध्यात् अष्टादशविधता । "ऋऌवर्णयोर्मिथः सावर्ण्यम्" इत्युक्तेः ऌकारस्य च द्वादशभेदसहिता अष्टादशभेदाः तेन ऋ इति त्रिंशतां संज्ञा इति भेदः । तपरत्वे कारपत्वे च स्वरूपपरता । ऌवर्णः दन्तमूलोच्चार्य्यः "ऌतुलसानां दन्ताः" इत्युक्तेः तस्य दीर्घाभावात् ह्रस्वप्लुतभेदेन द्वैविध्यम् तयोश्च प्रत्येकमुक्तरीत्या षाड्विध्यात् द्वादशविधतेति ऌवर्णः द्वादशानां संज्ञा तपरत्वे कारपरत्वे च स्वरूपपरता । अ, इ, उ, ऋ, ऌ, इत्येषां वर्णपरत्वे अष्टादशादीनामुक्तानां संज्ञा । अधिकं सूचीपत्रे द्रष्टव्यम् एप्रभृतीनां विभागादि तत्तच्छब्दादौ उक्तः

अकारादीनामनुक्ता वाचकशब्दाः तन्त्रोक्ता वर्णाभिधाने दर्शितास्तेऽत्र क्रमेणोच्यन्ते यथा

अ "अः श्रीकण्ठः सुरेशश्च ललाटं चैकमात्रकः । पूर्णोदरी वृत्तिमेषौ सारस्वतप्रियंवदः । महाग्राह्मी वासुदेवो धनेशः केशवोऽमृतम् । कीर्त्तिर्निवृत्तिर्वागीशो नरकारिर्हरोमरुत् । ब्रह्मा रामानुजो ह्रस्व कामश्च प्रणवाद्यकः । ब्रह्माणी कामरूपश्च कामेशीवासिनी वियत् । विश्वेशः श्रीविष्णुकण्ठौ प्रतिपत्तिथिरश्विनी । अर्कमण्डलं वर्णाद्यो ब्राह्मणः कामकर्षिणी" ।

आ "आकारो विजयोऽनन्तो दीर्घच्छायो विनायकः। क्षीरोदधिपयोदश्च पाशो दीर्घास्यवृत्तके। प्रचण्डएकजो रुद्रो नारायणइभेश्वरः। प्रतिष्ठा मानदा कान्तो विश्वान्तकगजान्तकौ। पितामहोद्वितान्तोभ्रूः क्रिया कान्तिश्च सम्भवः। द्वितीया मानदा काशी विघ्नराजः कुजोविषत्। सुरान्तकश्च हृदयञ्चाङ्गुष्ठोभगमालिनी।

इ "इःसूक्ष्मा शाल्मली विद्या चन्द्रः पूषा सुगुह्यकः। सुमित्रः सुन्दरो घोरः कोटरी कोटरःपयः। भ्रूमध्यो माधवस्तुष्टिर्दक्षनेत्रञ्च नासिका। शान्तः कान्तिः कामिनी च कामो विघ्नविनायकः। नेपालो भरणो रुद्रो नित्यक्लिन्ना च पावकः"।

ई "ईर्मूर्त्तिःस्त्री महामाया लोलाक्षी वामलोचनम्। गोविन्दः शेखरः पुष्टिः सुभद्रा रतिसंज्ञकः। विष्णुर्लक्ष्मीर्महेशश्च वह्निगुह्यःपरापरः। कालोत्तरी भेरुण्डा रतिश्च पाण्डुवर्द्धनः। शिवोत्तमः शिवा तुष्टिश्चतुर्थी विन्दुमालिनी। वैष्णवी वल्लवी जिह्वा कामकला सनादिका। पावकः कोटरः कीर्त्तिर्मोहिनी कालकारिका। कुचद्वन्द्वं तर्ज्जनीशो शान्तिस्त्रिपुरसुन्दरी।

उ "उः शङ्करोवर्त्तुलाक्षो भूतःकल्याणवाचकः। अमरेशो दक्षकर्णः षड्वक्त्रो मोहनः शिवः। उग्रःप्रभुर्धृतिर्विष्णुः विश्वकर्म्मा महेश्वरः। शत्रुघ्नश्च कटिः पुष्टिः पञ्चमी वह्निवासिनी। कामघ्नः कमलावेशो मोहिनी विघ्नहृन्महो। तटस्थः कुटिला श्रोत्रं पारद्वीनो वृषोदरः"।

ऊ "ऊःकण्टकोरतिः शान्तिः क्रोधनोमधुसूदनः। कामः राजकुजेशश्च महेशोवामकर्णकः। अर्घीशोभैरवः सूक्ष्मो दीर्घघोणा सरस्वती। विलासिनी विघ्नकर्त्ता लक्ष्मणो रूपकर्षिणी। महाविद्येश्वरी षष्ठी षण्डोभूःकान्यकुब्जकः"।

ऋ "ऋःसुदीर्घसुखी रुद्रोदेवमाता त्रिविक्रमः। भारभूतिः क्रिया हारोरेचिका नासिका धृतिः। एकपादः शिरोमाला मण्डना शान्तिनी जलम्। कर्णः कामलता मेषो निर्जनिर्गणनायकः। रोहिणी शिवदूती च पूर्णो गिरिश्च सप्तमी"।

ॠ "ॠःक्रोधी तिथीशोवामोवामनी गोसुखी धृतिः। ऊर्द्धमुखो निशानाथः पद्ममाला विनष्टधीः। शशिनी मोचिका श्रेष्ठा दैत्यमाता प्रतिष्ठिता। एकदन्ताह्वयोमातात्वरिता मिथुनोदया। कोमला श्यामला मेधा तारकापतिरष्टमी। ब्रह्माख्यमरकीलाले पावकोगन्धक यथा।

ऌ ऌःस्थाणुः श्रीधरः शुभ्रो मेधोधूम्रो वकोवियत्। देवयोनिर्दक्षगण्डोरुद्रः काकोदरी शुभा। शान्तिकृत् स्वस्तिका शक्री माया च भ्रामरी शुभा। विश्वेश्वरी दीर्घजिह्वा महास्त्री लाङ्गली परा। चन्द्रिका पार्थिवोधूम्रा द्विदन्तः कामवर्द्धनः। शुचिस्मिता च नवमी कान्तिरायतकेश्वरः। चित्तस्याकर्षणकरी तुरीया कुलसुन्दरी"।

ॡ ॡकारः कमलाकर्षी हृषीकेशोऽभधृव्रतः। सूक्ष्मा कान्तिर्वामगण्डोरुद्रःकामोदरी शुभा। दशमी सुस्थिरोमाता नीलपीतोगजाननः। कामिनी विश्वपः कालो नित्यशुद्धः शुचिः क्षती। सूर्य्योधैर्य्याकर्षिणी च एकाक्षी दनुजप्रसूः"।

एकारादीनां वाचका तत्तच्छब्दे उक्ता। एषामधिष्ठातृदेवताश्च तत्रैवोक्ता यथा "अकारे भीषणा कीर्त्तिर्विद्युज्जिह्वेति कीर्त्तिता। आकारे तामसी कालजिह्वाख्या कालभैरवी। इकारे गर्जिनी चण्डा ज्ञेया रुद्रभयङ्करी। ईकारे सूचिनी ख्याता चण्डोग्रा धूम्रभैरवी। उकारे कालरक्ताख्या प्रचण्डा चण्डवल्लभा। विद्या ह्यूकारगा प्रोक्ता तालजङ्घा कपालिनी। ऋकारे कालिका देवी पिष्टकाली भयङ्करी। ॠकारे स्यान्महारौद्री ज्वालिनी योगिनीत्यपि। संहारिणी ऌकारे स्यान्मेघनादोग्रवासिनी। रुद्रचण्डा कालरात्री ॡकारे च कपालिनी"। एकारादीनामधिष्ठातृदेवताश्च एकारादिशब्दानामादौ दर्शिताः अकारादीनां ध्येयरूपञ्च कामधेनुतन्त्रे दर्शितं यथा

अ "शृणु तत्त्वमकारस्य अतिगोप्यं वरानने!। शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा। पञ्चदेवमयं वर्णं शक्तित्रयसमन्वितम्। निर्गुणं त्रिगुणोपेतं स्वयं कैवल्यमूर्त्तिमत्। विन्दुतत्त्वमयं वर्णं स्वयं प्रकृतिरूपकम्"।

आ "आकारं परमाश्चर्य्यं शङ्खज्योतिर्मयं प्रिये!। ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं प्रिये!। पञ्चप्राणमयं वर्णं स्वयं परमकुण्डलीम्"।

इ "इकारं परमानन्दं सुगन्धकुसुमच्छविम्। हरिब्रह्ममयं वर्णं सदारुद्रयुतं प्रिये।। सदा शक्तिमयं देवि! गुरुब्रह्ममयं तथा। सदाशिवमयं वर्णं परं ब्रह्मसमन्वितम्। हरिब्रह्मात्मकं वर्णं गुणत्रयसमन्वितम्। इकारं परमेशानि! स्वयं कुण्डलीमूर्त्तिकम्"।

ई "ईकारं परमेशानि स्वयं परमकुण्डलीम्। ब्रह्मविष्णुमयं वर्णं तथा रुद्रमयं सदा। पञ्चदेवमयं वर्णं पीतविद्युल्लताकृतिम्। चतुर्ज्ञानमयं वर्णं पञ्चप्राणमयं सदा"।

उ "उकारं परमेशानि ! अधःकुण्डलिनीं स्वयम् । पीतचम्पकसङ्काशं पञ्चदेवमयं सदा । पञ्चप्राणमयं देवि ! चतुर्वर्गप्रदायकम् ।

ऊ "शङ्खकुन्दसमाकारमूकारं परकुण्डलीम् । पञ्चप्राणमयं वर्णं पञ्चदेवमयं सदा । पञ्चप्राणयुतं वर्णं पीतविद्युल्लतां यथा । धर्मार्थकाममोक्षस्य सदा सुखप्रदायकम्" ।

ऋ "ऋकारं परमेशानि कुण्डलीमूर्त्तिधारकम् । अत्र ब्रह्मा च विष्णुश्च रुद्रश्चैव वरानने ! । सदाशिवमयं वर्णं सदा-ईश्वरसंयुतम् । पञ्चवर्णमयं वर्णं चतुर्ज्ञानमयं तथा । रक्तविद्युल्लताकारमृकारं प्रणमाम्यहम् ।

ॠ "ॠकारं परमेशानि ! स्वयं परमकुण्डलीम् । पीतविद्युल्लताकारं पञ्चदेवमयम् सदा । चतुर्ज्ञानमयं वर्णं पञ्चप्राणयुतं सदा । त्रिशक्तिसहितं वर्णं प्रणमामि सदा प्रिये ।

ऌ "ऌकारं चञ्चलापाङ्गि ! कुण्डलीं परदेवताम् । अत्र ब्रह्मादयः सर्व्वे तिष्ठन्ति सततं प्रिये ! । पञ्चदेवमयं वर्णं चतुर्ज्ञानमयं सदा । पञ्चप्राणयुतं वर्णं तथा गुणत्रयात्मकम् । बिन्दुत्रयात्मकं वर्णं पीतविद्युल्लतां यथा ।

ॡ ॡकारं परमेशानि ! पूर्णचन्द्रसमप्रभम् । पञ्चदेवात्मकं वर्णं पञ्चप्राणात्मकं सदा । गुणत्रयात्मकं वर्णं तथा बिन्दुत्रयात्मकम् । चतुर्व्वर्गप्रदं देवि ! स्वयं परमकुण्डलीम् । एकारादीनां ध्येयरूपाण्येकारादिशब्देषु उक्तानि"।

इति वाचस्पत्ये स्वरविभागादि ।

व्यञ्जनवर्णविभागादि

व्यञ्जनवर्णाः त्रिविधाः स्पर्शान्तस्थोष्मभेदात् तत्र कादयो मावसानाः स्पर्शाः, यरलवा अन्तःस्था शषसहा ऊष्माणः । "आत्मा बुद्ध्या समेत्यार्थान् मनोयुङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते तेषां विभागः पञ्चधा मतः । स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः" इति शिक्षोक्तेः सर्वेषां वर्णानां प्राणवायुजन्यत्वम् । तथाहि चेतनेन ज्ञातार्थविवक्षया तद्बोधकशब्दनिष्पादनाय प्रेरितमन्तःकरणं मूलाधारस्थितमनलं चालयति तच्चालितश्चानलस्तत्स्थलस्थानिलचालनाय प्रभवति तच्चालितेन चानिलेन तत्रैव सूक्ष्मरूपेणोत्पादितः शब्दः परा वागित्यभिधीयते । ततोनाभिदेशपर्य्यन्तं चलितेन तेन तद्देशसंयोगादुत्पादितः शब्दः पश्यन्तीति कीर्त्त्यते एतद्द्वयस्य सूक्ष्मसूक्ष्मतरतया ईश्वरयोगिमात्रगम्यता नास्मदीयश्रुतिगोचरता । ततस्तेनैव हृदयदेशं परिसरता हृदयसंयोगेन निष्पादितः शब्दो मध्यमेत्युच्यते सा च स्वकर्णपिधानेन ध्वन्यात्मकतया सूक्ष्मरूपेण कदाचिदस्माकमपि समधिगम्या । ततो मूर्द्धपर्य्यन्तमाक्रमता तेन आहत्य मूर्द्धानं तत्प्रतिघातेन ततः परावृत्य मुखविवरे कण्ठादितत्तत्स्थानेषु स्वाभिघातेनोत्पादितः शब्दो वैखरीत्युच्यते । इत्येवं वर्णोत्पत्तिस्तेषाञ्च विभागः पञ्चधा तद्यथा स्वरतः१ उदात्तानुदात्तस्वरितभेदात् अचां त्रैविध्यम् तथाकालतोऽपि २ त्रैविध्यम् "उदात्तमनुदात्तञ्च स्वरितञ्च स्वरास्तथा । ह्रस्वोदीर्घः प्लुतश्चेति कालतो नियमा अचि" इत्युक्तेः अचामेव स्वरवत्त्वात्तथात्वम् कालस्तु उच्चारणकालभेदः स च यद्यपि अचामेवोक्तस्तथापि "एकमात्रोभवेद्ध्रस्वोद्विमात्रोदीर्घ उच्यते । त्रिमात्रस्तु प्लुतोज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम्" इत्युक्तेः व्यञ्जनानामप्यर्द्धमात्राकालेनोच्चार्य्यत्वात् कालकृतविभागोऽस्त्येव । मात्राकालस्तु "दशगुर्वक्षरैः प्राणः षड्भिः प्राणैर्विनाड़िका" इत्युक्तेः विनाड़िकायाः पलात्मिकायाः षष्टितमभागरूपकालार्द्धभागो मात्रा "द्विमात्रो दीर्घ उच्यते" इत्युक्तेः दीर्घस्य गुरुतया पलषष्टितमभागत्वात् तथा च १५ पञ्चदशानुपलात्मककालः अर्द्धमात्राकालः त्रिंशदनुपलात्मकः कालः एकमात्राकालः, विपलात्मकः कालः द्विमात्रकालः सार्द्धविपलात्मक कालः त्रिमात्रकालः । तत्तत्कालोच्चार्य्यत्वात् वर्णानां कालकृतविभागवत्त्वम् । इयांस्तु विशेषः स्वराणामिव व्यञ्जनानां न ह्रस्वादिविभागः किन्तु सर्वेषामर्द्धमात्रत्वमेवेति । स्थानतो(३)विभागो यथा "अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलञ्च दन्ताश्च नासिकौष्ठौ च तालु चेति" सामान्यत उक्त्वा वर्णभेदेन स्थानविशेषः शिक्षायामुक्तः यथा "हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् । औरस्यन्तं विजानीयात् कण्ठ्यमाहुरसंयुतम् । कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू । स्युर्मूर्द्धन्या ऋटुरषा दन्त्या ऌतुलसाः स्मृताः । जिह्वामूले तु कुः प्रोक्तः दन्त्योष्ठ्यो वः स्मृतो बुधैः । ए ऐ तु कण्ठ्यतालव्यावोऔ कण्ठोष्ठजौ स्मृतौ । अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयो

भवेत् । ओकारौकारयोस्तद्वदिति" "अनुस्वारयमानाञ्च नासिका स्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः" इति च। यद्यपि सर्व्वेषां वर्णानामुच्चारणे कण्ठव्यापार आवश्यकस्तथापि चकाराद्युच्चारणे ताल्वादिव्यापारोऽधिकोऽप्यपेक्षित इति तन्मात्रामात्रकृतत्वेन वर्णानां वैलक्षण्यम् । "जिह्वामूले तु कुः प्रोक्तः" इति पाणिनिशिक्षाभिधानात् कवर्गस्य कण्ठमूलीयत्वम् कण्ठ्यत्वव्यवहारस्तु कण्ठशब्दस्य कण्ठमूलपरतया भाक्त एव तवर्गस्य दन्तमूलीयत्वेऽपि दन्त्यत्ववत् अन्यथा भग्नदन्तस्य तदनुच्चारापत्तेः । जिह्वामूलीयस्य आश्रयस्थानभागित्वेनोक्तेः तदाश्रयस्य कोरपि जिह्वामूलस्थानत्वौचित्यात् । दन्तोष्ठौ इत्यादावुभयोरेव वकारस्थानत्वं नतु प्रत्येकस्य तथासति दन्त्यौष्ठ्य इत्येव परिशिष्येत । अतस्तस्य दन्तौष्ठोभयकार्य्यभाक्त्वम् एवमन्येऽपि द्रष्टव्यम् । यमानां प्रातिशाख्यप्रसिद्धानां कँखँगँघँ इत्येषां यम्प्रत्याहारसंज्ञाबोधितानाञ्च नासिकापि स्थानमधिकमुपदिश्यते । तत्र च यमेत्युपलक्षणम् "अमोऽनुनासिका नह्रौ" इत्युक्त्या हकाररकारभिन्नानाम् अम्प्रत्याहारबोधितानाम् नासिकास्थानत्वविधानात् तासामनुगतः स्थानत्वेनेत्यनुनासिक शब्दव्युत्पत्त्या नासिकास्थानत्वप्राप्तेश्च । तत्र नह्राविति पुनः हकाररकारयोः पर्य्युदासः । "मुखनासिकावचनोऽनुनासिकः" पा० सूत्रे मुखपदस्य कण्ठादितत्तत्स्थानपरतया यमानामुभयस्थानत्वम् । अयोगवाहा अनुस्वाराः विसर्गाश्च जिह्वामूलीयोपध्मानीययोरपि विसर्गविशेषरूपत्वेनाश्रयस्थान भागित्वम् । आश्रयस्थानभागित्वञ्च यमाश्रित्यैते उच्चार्य्यन्ते तत्स्थानभागित्वमतः विसर्गस्य कखयोः परयोर्जिह्वामूलोच्चार्य्यमाणयोराश्रयत्वेन तत्स्थानभागित्वात् जिह्वामूलीयरूपान्वितनामता समुन्नेया । पफयोः परयोरोष्ठोच्चार्य्यमाणयोराश्रयत्वेनोपाध्मानीयता । उप पश्च आध्मायेते अनेन स्थानेनेति व्युत्पत्तेः उपाध्मानशब्द ओष्ठवचनः । तत्स्थानोच्चार्य्यत्वादन्वितनामता चावधेया । अतएव कौमुद्यां "जिह्वामूलीयस्य जिह्वामूलमुपाध्मानीयस्योष्ठौ"इत्युक्तम् । यद्यपि सर्व्वेषां वर्णानामाकाशस्थानत्वं करणत्वञ्च कण्ठादीनां तदुत्पत्तौ युक्तं तथापि तेषां स्थानत्वव्यवहारः ताल्वादौ वर्णाभिव्यञ्जकवर्णजनकवायुसंयोगाधारे वर्णाधारत्वारोपेण भाक्त एव । तत्तत्स्थानेषु जिह्वाग्रादिसम्बन्धेन वर्णोत्पत्त्या जिह्वाग्रादिस्थिते तत्सम्बन्धजनकप्रयत्नविशेषे आभ्यन्तरप्रयत्नवाच्ये स्पृष्टतादावेव करणत्वव्यवहारः इति मञ्जूषायां स्थितम् ।

प्रयत्नाः ४ आभ्यन्तरप्रयत्नाः अनुप्रदानानि ५ बाह्यप्रयत्नास्तैरपि वर्णानां विभागः । तत्र वर्णभेदे प्रयत्नभेदादिकं बाह्याभ्यन्तरप्रयत्नस्वरूपनिरूपणपूर्व्वकं शब्दार्थरत्नेऽस्माभिर्निरूपितं यथा

आभ्यन्तरप्रयत्नास्तु वर्णोत्पत्तेः प्राग्भाविनः, बाह्यास्तु तदुत्पत्तेः पश्चाद्भाविन इति विवेकः । तथा हि नाभिदेशात् प्रयत्नप्रेरितः प्राणवायुरूर्द्ध्वमाक्रमन् उरःप्रभृतीनि स्थानान्याहत्य वर्णान् तदभिव्यञ्जकध्वनींश्च उत्पादयति तत्र वर्णोत्पत्तेः प्राक् जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादिकं यदा सम्यक् स्पृशन्ति तदा स्पृष्टता प्रयत्नः, यदा ईषत् स्पृशन्ति तदा ईषत्स्पृष्टता, तेषां समीपावस्थाने संवृतता, दूरावस्थाने विवृतता इत्येवमाभ्यन्तरप्रयत्नभेदैः वर्णानां भेदाः । अतएव इचवर्गयशानां तालव्यत्वाविशेषेऽपि चवर्गोच्चारणे कर्त्तव्ये तालुस्थाने जिह्वाग्रादीनां सम्यक्स्पर्शः, यकारोच्चारणे तु ईषत्स्पर्शः, शकारोच्चारणे समीपावस्थानम् इवर्णोच्चारणे दूरावस्थानमिति भेदः । एतेषां आभ्यन्तरत्वम् ओष्ठप्रभृतिकाकलीध्वनिजनककाकलस्थानपर्य्यन्तरूपास्यान्तर्गततत्तत्स्थानेषु जिह्वाग्रादीनां प्रागुक्तस्पर्शादिचतुष्टयरूपाभ्यन्तरकार्य्यकारित्वात् वर्णोत्पत्त्यव्यवहितप्राग्भावित्वाच्च बोध्यम् । विवारसंवारौ तु गलबिलस्य विकाशाविकाशात्मकौ बाह्यौ प्रयत्नौ विवृतसंवृताभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादिति विवेक्तव्यम् ।

अथ वर्णभेदेनाभ्यन्तरप्रयत्नभेदस्तावदभिधीयते । तत्र कादिमावसानानां स्पृष्टता, अतएव तेषां सम्यक्स्पर्शवत्त्वेन स्पर्शपदवाच्यता । यणः ईषत्स्पृष्टता । तेषाञ्च स्पृष्टविवृतयोर्मध्यस्थितत्वेन लौकिकव्यवहारेष्वपि शषसहानां वर्ग्याणाञ्च मध्यस्थितत्वेन चान्तःस्थाशब्दवाच्यता । शषसहानाम् अचाञ्च विवृतता । शषसहानाञ्च ऊष्मशब्दाभिधेयवायुप्रधानत्वात् ऊष्मशब्दवाच्यता। अचाञ्च स्वयंराजमानत्वात् उदात्तादिस्वरवत्त्वाच्च स्वराभिधेयता "अचः स्वयं विराजन्ते" इत्युक्तेः "उदात्तमनुदात्तञ्च स्वरितञ्च स्वरास्त्रयः । ह्रस्वोदीर्घः प्लुतश्चेति कालतो नियमा अचि" इति चोक्तेः । तत्र ह्रस्वस्य संवृतता । "संवृतं त्वेकमात्रं स्यात् विवृतन्तु द्विमात्रकम्"इत्युक्तेः ह्रस्वस्यैकमात्रतया प्रयोगे संवृतता प्रक्रियायान्तु विवृततैव । तत्र मूलं "अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलस्तथा ।

शेषाः स्पृष्टा हलः प्रोक्ता” इति शिक्षावाक्यमेव बोध्यम्। अत्राचः स्पर्शाभावरूपविवृतत्ववन्तः यणः यरलवास्त्वीषत् पृष्टा इत्यर्थः नेमदृत्यर्द्धवाचो। शलः शषसहा नेमस्पृष्टा अर्द्धस्पृष्टा अर्थादर्द्धविवृताः “स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्”इत्येकवाक्यत्वात्। एते च स्थानप्रयत्नाः सवर्णसंज्ञायामुपयुक्ताः। बाह्यप्रयत्नास्तु आन्तरतम्यपरीक्षायामेवोपयोगिन इति “तुल्यास्यप्रयत्नं सवर्णमिति”पा० सूत्रभाष्यादौ स्पष्टम्। तेन तकारस्थाने शिवारश्वासघोषाल्पप्राणरूपबाह्यप्रयत्नसाम्येन चकारटकारादेश इति “स्थानेऽन्तरतमः” इति सूत्रभाष्ये स्पष्टम् बहुसमानधर्मत्वमेवान्तरतम्ये हेतुरिति बोध्यम्।

बाह्याः प्रयत्नाश्चाष्टविधाः काकलकाधःस्थलगलबिलसङ्कोचविकाशश्वासोत्पादकध्वनिविशेषघोषाल्पघोषप्राणात्वमहत्त्वरूपकार्य्यकरा यथाक्रमं विवारसंवारश्वासनादघोषाघोषाल्पप्राणमहाप्राणनामानो मन्तव्याः। प्रयत्नप्रेरितो वायुर्व्वर्णानभिव्यञ्जन् यत्नविशेषेण गलबिलविकाशादीनपि सम्पादयति अतो गलबिलविकाशादिकरत्वादास्यबहिर्द्देशकार्य्यकरत्वात् चैते बाह्या इति। ते च “खयां यमाः खयः+कःपौ विसर्गः शरएव च। एते श्वासानुप्रदाना अघोषाश्च विवृण्वते। कण्ठम्, अन्ये तु घोषाः स्युः संवारा नादभागिनः। अयुग्मा वर्गयमगायणश्चाल्पासवः स्मृताः” इतिशिक्षान्तकौमुद्युक्तदिशावसेयाः। खयां स्थाने जाता ये यमाः कँ खँ गँ घँ इत्येते प्रातिशाख्यप्रसिद्धाः खयः, जिह्वामूलीयोपध्मानीयविसर्गाः शरः शषसाश्च एते श्वासा अघोषाः कण्ठं विवृण्वत च। अन्ये एतद्भिन्नाः सर्वे वर्णा घोषसंवारनादरूपबाह्यप्रयत्नवन्तः। वर्गीयप्रथमतृतीयपञ्चमवर्णाः पूर्व्वोक्ताः प्रथमतृतीयवर्गजातयमाश्च यणः यरलवाः एते अल्पप्राणाः उक्तिभ्यः सर्व्वे महाप्राणाः इति विवेकः।

तदेवं परस्परविभाजकैर्बाह्याभ्यन्तरप्रयत्नैः स्वरकालविशेषैर्वर्णानां परस्परविलक्षणरूपता। प्रांशवो हि वर्णाः पुरस्कृत्यैव कञ्चिद्विशेषम् विलक्षणतामासादयन्ति तत्र वर्णविभाजकानि सूचीपत्रे द्रष्टव्यानि

काव्यादौ विन्यस्तवर्णानां फलमुक्तं वृत्तरत्ना॰ टी॰ यथा गणप्रसङ्गेनाक्षरशुद्धिरप्यभिधीयते “अक्षरे परिशुद्धे च नायको भूतिमश्नुते” इत्युक्तेरक्षरशुद्धेरावश्यकत्वात्। “अशुभात् सम्पत्तिर्भवति शमिवर्णाद्गनशतान्युवर्णाद्ख्यातिः, धरभषक्षवर्णात् वराहतात्। तथाह्येव: सौख्यं ङञणरहितादक्षरगणात् पद्यादौ विन्यासात् भरवहलपूर्वैर्विरहितात्”। भरवहलास्तत्पूर्वाणि यान्यक्षराणि तैर्विरहितादित्यर्थः। हलवर्णानां फलान्युक्तानि तत्रैव। “कः खो गो घश्च लक्ष्मीं वितरति, वियशो ङ, स्तथा चः सुखं, छः प्रीतिं, जो मित्रलाभं, भयमरणकरौ झञो, टठौ खेददुःखे,। डः शोभां, ढो विशोभां, भ्रमणमथ च णस्तस्तु सं, थस्तु युद्धं, दो, धः, सौख्यं, मुदं, नः, सुखभयमरणक्लेशदुःखं पवर्गः। यो लक्ष्मीं, रस्तु दाहं, व्यसनमथ लवौ शः सुखं, षस्तु खेदं, सः-सौख्यं, हस्तु खेदं, विलयमपि च लः, क्षः समृद्धिं करोति। संयुक्तं चेह न स्यात् सुखमरणपटुर्वर्णविन्यासंयोगं पद्यादौ, गद्यरक्ते, पदसि च सकले, प्राकृतादौस मोऽयम्”। एतेषां फलाधारनिरूपणमपि तत्रैव “नायको वर्ण्यते यत्र फलं तस्य समादिशेत्। अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम्”। तस्य प्रतिप्रसवोऽप्युक्तः। “देवता वर्ण्यते यत्र क्वापि काव्ये कवीश्वरैः। मित्रामित्रविचारो वा न तत्र फलकल्पना। देवतावाचकाः शब्दा ये च भद्रादिवाचकाः”।

इति वाचस्पत्ये व्यञ्जनवर्णविभागादि।

क

व्यञ्जनवर्णभेदः ककारः कण्ठ्यः अर्द्धमात्रः। तस्य तन्त्रे वाचकाः शब्दा वर्णाभिधाने उक्ता यथा। “कः क्रोधीशो महाकाली कामदेवःप्रकाशकः। कपाली तेजसः शान्तिर्वासुदेवो जयानलः। चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः। अनन्तः पार्थिवो बिन्दुस्तापिनी परमात्मकः। वर्गाद्यश्च सुखी ब्रह्मा ‘वर्णाद्योऽम्बः’शिवोजलम्। माहेश्वरो तुला पुष्पं मङ्गलस्वरणं करः। निव्याकामेश्वरी सुख्यः कामरूपो गजेन्द्रकः। श्रीपुरं रमणोरक्त कुसुमा परमार्थकः”।

क पु॰ कै-शब्दे कच—दीप्तौ वा ड १ब्रह्मणि २विष्णौ ३कामदेवे ४अग्नौ ५वायौ ६यमे ७सूर्य्ये ८आत्मनि ९दक्षे-प्रजापतौ १०राजनि ११कामपन्यौ १२मयूरे” मेदि॰। १३विहगे शब्दचि॰। १४चित्ते १५देहे १६काले १७घने मेघे १८शब्दे अनेकार्थकोषः १९प्रकाशे च एकाक्षरकोषः। २०शिरसि न॰ “द्वाभ्यामोष्ठौ द्विरनुभव्य

चैकेन चालयेत् करम्। सुखप्राप्तनेत्रश्रोत्रनाभ्युरस्कं भुजौ क्रमात्" तन्त्रसारः कं शिरः २। जले ३ सुखे च न० मेदि० ४ केशे पु० धरणी। तत्र ब्रह्मणि "दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः" शा०ति०। कः ब्रह्मा। तट्टीका "कस्मै त्वा काय त्वा" यजु०२०,४। काय सुखाय प्रजापतये इत्येके। "कस्यासि कोनामासीति प्रजापतिर्वै कोनाम" शत० ४,५,६,४। "कस्त्वोयाज्यानुवाक्या कोहि प्रजापतिः" ६,२,२,५, प्रजापतिर्वै कस्तस्मा एवंतदिमां वषट्करोति" ६,४,३,४। दक्षप्रजापतौ "तत· प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा। षष्टिं स जनयामास दुहितॄः पितृवत्सलाः। दश धर्माय कायेन्द्रोर्द्विषट् त्रिनव दत्तवान्" भाग०६,३,२०, काय दक्षप्रजापतये द्विषट् द्वादश। "तेभ्यस्तु च्छन्दांस्यृषयो मेढ्रतः कः" भाग०८,५,२८। कः प्रजापतिः। "यस्मात् पितामहोभूतः प्रभुरेकः प्रजापतिः। ब्रह्मा सुरगुरुः स्थाणुर्मनुः कः परमेष्ठ्यथ" भा०आ०१अ०। "मारीचमाशु विशिखेन यथा कमुग्रः" ८,८,१० कं दक्षम्। सुखे "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सहोवाच जानाम्यहं यत्प्राणो ब्रह्म कञ्च तु खञ्च न जानामीति तेऽहोचुः यद्वाव कं तदेव खं यदेव खं तदेव कमिति" छा०उप०। अत्र सुखस्वरूपतया ब्रह्मरूपत्वम्। यथाह तद्भाष्ये "तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यग्नयः ऊचुः यद्वाव यदेव वयं कमवोचाम तदेव खमाकाश इत्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजात्सुखान्निवर्त्तितं स्यान्नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यः। यदेव खमाकाशमवोचाम तदेव च कं सुखमिति जानीहि एवञ्च सुखेन विशेष्यमाणं खं भौतिकादचेतनात् खान्निवर्त्तितं स्यान्नीलोत्पलवदेव"। अत्र कंशब्द एव मान्ताव्ययम् इत्यन्ये। जले "कं शवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः" विदग्धमु०। "के यूयं स्थल एव सम्प्रति वयम्" सा० त०। कः देवताऽस्य अण्। "कस्येत्" पा० इत् वृद्धिः। काय प्रजापतिदैवते विवाहभेदे। "त्रींस्त्रीन् कायोढजासुतः" मनुः।

कंय त्रि० कमित्यव्ययम् सुखार्थकं तदस्त्यस्य य। सुखान्विते शु। कंयु व—कंव इत्यप्यत्र त्रि० सर्व्वत्र वा यथि परसवर्णौ अनुनासिकौ यँकारवँकारौ

कंवूल न० ताजकग्रन्थोक्ते वर्षलग्नकालिकग्रहयोगभेदे कवूल कवूलमप्यत्र। तत्स्वरूपादिनिरूपणं तत्रैव यथा "कार्य्येशलग्नेशयोरित्थशालादित्थशालतः। कंवूलं चेन्मध्यादिभेदैर्नानाविधं स्मृतम्। यदीन्दुः स्वर्क्षोच्चस्थस्तादृशौ लग्नकार्य्यपौ। इत्थशाले कवूलं तदुत्तमोत्तममुच्यते। स्वीयहद्दाद्रेकाणाङ्कभागस्थेनेत्थशालतः। मध्यमोत्तमकंवूलं हीनाधिकृतिनोत्तमम्। उत्तमाधमता नीचरिपुगेहस्थितेन चेत्। स्वहद्दादिगतश्चन्द्रः स्वभोच्चस्थेत्थशालकृत्। मध्यमोत्तममेतच्च पूर्व्वस्मात्तु विशिष्यते। स्वहद्दादिपदस्थेन कंवूलं मध्यमध्यमम्। मध्यमाधमकंवूलं हीनाधिकृतिखेटजम्। अधमाधमकंवूलं नीचारिभगखेटजम्। इन्दुः पदोनः स्वर्क्षोच्चस्थितेनाप्युत्तमं तु तत्। स्वहद्दादिगतेनापि पूर्व्ववन्मध्यमुच्यते। पदोनेनापि मध्यं स्यादिति युक्तं प्रतीयते। नीचारिस्थेनेत्थशालेऽधमं कंवूलमुच्यते। नीचशत्रुभगश्चन्द्रः स्वभोच्चस्थेत्थशालकृत्। अधमोत्तमकंवूलं स्वहद्दादिगतेन चेत्। इत्थशाले कंवूलं तदुच्यतेऽधममध्यमम्। पदोनेनेत्थशाली चेत् कंवूलं मध्यमं स्मृतम्। नीचारिभस्थखेटेन नीचारिभगतः शशी। इत्थशाली कवूलं तदधमाधममुच्यते। मेषे रविः कुजोवापि वृषे कर्कोऽथ वा शशी। तत्रेत्थशाले कंवूलमुत्तमोत्तममेव तत्। वृश्चिकस्थः शशी भौमः कर्के तत्रेत्थशालतः। अधमाधमकंवूलं कार्य्यविध्वंसदुःखदम्। एवं पूर्व्वोक्तभेदानामुदाहरणयोजना। उक्तलक्षणसम्बन्धादूहनीया विचक्षणैः"।

कंस पु० कम—स। तैजसद्रव्ये, कांस्ये, १ताम्ररङ्गमिश्रणजनितधातुद्रव्ये। (कांसा) २स्वर्णरजतादिनिर्म्मितपानपात्रे आढक इति प्रसिद्धे ३परिमाणे च अमरः। वर्त्तुलाकारे यज्ञिये ४पात्रभेदे। "औदुम्बरे कंसे चमसे वा सर्व्वौषधं समानीय सम्भृतत्र" शत० १४,८,३,१, "कंसे कंसाकारे वर्त्तुलाकारे" भाष्यम्। पृषो० तालव्यान्त इति केचित्। कंसपरिमाणञ्च "शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः। शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकः। भाजनं कांस्यपात्रञ्च चतुःषष्टिपलश्च सः" भा०प्र० उक्तेः चतुःषष्टिपलात्मकाढकरूपम्। उग्रसेनसुतभेदे कृष्णद्वेष्ये ५नृपभेदे पु०। कंसोत्पत्तिकथा तन्नामनिर्व्वचनञ्च हरिवं० ८५अ० उक्तं यथा कंसं प्रति नारद उवाच "हन्त ते कथयिष्यामि वृत्तं राजन्! यथार्थतः। द्रुमिलस्य च माता ते संवादञ्च समागमम्। सुयामुनं नाम गिरिं तव माता रजस्वला। प्रेक्षितुं सहिता स्त्रीभिर्गता वनकुतूहलात्" इत्युपक्रम्य यदृच्छयात्रागतस्य सौभपतेर्द्रुमिलस्य तां दृष्ट्वा कामयमानस्य तां प्रति उप-

सेनमूर्त्त्या गत्वा तस्याःसङ्गमे कंसोत्पत्तिरिति तत्रोक्तम्। “एवमुक्ता दानवेन्द्रो गमनाय मनो दधे। हृच्छयाविष्टहृदयो दृष्ट्वा तामसितेक्षणाम्। वाय्व्युपस्पृश्य बलवान् ध्यानमेवान्वचिन्तयत्। मुहूर्त्तं ध्यातमात्रे तु दृष्टं ज्ञानबलात्ततः। उग्रसेनस्य पत्नीति ज्ञात्वा हर्षमवाप सः। उग्रसेनस्य वै रूपं कृत्वा स्वं परिवर्त्त्य च। उपासर्पन्महाबाहुः प्रसभं दानवेश्वरः। स्मयमानश्च शनकैर्व्याहामितवीर्य्यवान्। उग्रसेनस्य रूपेण मातरं ते व्यधर्षयत्। सा पतिस्निग्धहृदया भावेनोपससर्प तम्। शङ्किता चाभवत् पश्चात्तस्य गौरवदर्शनात्। सा तस्मादुत्थिता भीता न त्वं मम पतिर्ध्रुवम्। कस्य त्वं विकृताचारो येनास्मि मलिनीकृता। एकपत्नीव्रतमिदं मम संदूषितं त्वया। पत्युर्मे रूपमास्थाय नीचनीचेन कर्म्मणा। किं मां वक्ष्यन्ति रुषिता बान्धवाः कुलपांसुलाम्। जुगुप्सिता च वत्स्यामि पतिपक्षैर्निराकृता। धिक् त्वामीदृशमत्यान्तं दुष्कुलं व्युत्थितेन्द्रियम्। अविश्वास्यमनार्य्यञ्च परदाराभिमर्षणम्। स तामाह प्रवञ्जन्तीं क्षिप्तः क्रोधेन दानवः। अहं वै द्रुमिलो नाम सौभस्य पतिरूर्ज्जितः। किं मां क्षिपसि रोषेण मूढे! पण्डितमानिनि!। मानुषं पतिमाश्रित्य नीचं मृत्युवशे स्थितम्। व्यभिचाराद्भ दुष्यन्ति स्त्रियः स्त्रीमानगर्व्विते।। न ह्यासां नियता बुद्धिर्मानुषीणां विशेषतः। श्रूयन्ते हि स्त्रियो बह्व्यो व्यभिचारव्यतिक्रमैः। प्रसूता देवसदृशान् पुत्त्रानमितविक्रमान्। अतीव हि त्वं स्त्रीलोके पतिधर्म्मवती सती। शुद्धा केशान् विधुन्वन्ती भाषसे यद्यदिच्छसि। कस्य त्वमिति यच्चाहं त्वयोक्तो मत्तकाशिनि!। कंसस्तस्माद्रिपुध्वंसी तव पुत्त्रो भविष्यति। सा सरोषा पुनर्भूत्वा निन्दन्ती तस्य तं वरम्। उवाच व्यथिता देवी दानवं दुष्टवादिनम्। धिक् ते वृत्तं सुदुर्वृत्त! यः सर्व्वा निन्दसि स्त्रियः। सन्ति स्त्रियो नीचवृत्ताः सन्ति चैव पतिव्रताः। यास्त्वेकपत्न्यः श्रूयन्तेऽरुन्धतीप्रमुखाः स्त्रियः। याभिर्धृताः प्रजाः सर्व्वा लोकाश्चैव कुलाधम!। यस्त्वया मम पुत्त्रो वै दत्तो वृत्तविनाशनः। न मे बहुमतस्त्वेष शृणु चापि यदुच्यते। उत्पत्स्यति दुमान्नीच! पतिवंशे ममाव्ययः। भविष्यति स ते मृत्युर्यश्च दत्तस्त्वया सुतः। द्रुमिलस्त्वेवमुक्तस्तु जगामाकाशमेव तु”। कांस्यशोधनद्रव्यं कंसकशब्दे वक्ष्यते कांस्यशोधनमारणविधानगुणाः भावप्र० उक्ता यथा “अथ कांस्यस्य रीतेश्च शोधनन्त्वभिधीयते। पत्तलीकृतपत्राणि कांस्यस्याग्नौ प्रतापयेत्। निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये त्रिधा त्रिधा। एवं कांस्यस्य रीतेश्च विशुद्धिः संप्रजायते”। अथ मारणविधिः “अर्कक्षीरेण संपिष्टो गन्धकस्तेन लेपयेत्। समेन कांस्यपत्राणि शुद्धान्यम्लद्रवैर्मुहुः। ततोमूषापुटे धृत्वा पचेत् गजपुटेन च। एवं पुटद्वयात् कांस्यं रीतिश्च म्रियते ध्रुवम्” एवं मारितयोः कांस्यस्य रीतेश्च गुणाः “कांस्यं कषायं तीक्ष्णोष्णं लेखनं विशदं सरम्। गुरु नेत्रहितं रूक्षं कफपित्तहरं परम्”।

“कंसमन्थशूर्पपाय्यकाण्डान्तं द्विगौ” पा० द्विगुसमासे आद्युदात्तता। द्विकंसः। द्वौ कंसौ परिमाणमस्येति तद्धितार्थद्विगुः। कंसशब्दोऽर्द्धर्चादि। “का काली का मधुरा का शीतलवाहिनी गङ्गा। कं सं जघान कृष्णः कम्बलवन्तं न बाधते शीतम्” विदग्धमुखमण्डने समानप्रश्नोत्तरदर्शनात् दन्त्यमध्य एव। ६उग्रसेनकन्याभेदे स्त्री सा च देवभागभार्य्या “कंसा कंसवती कङ्का सुतनूराष्ट्रपालिका। उग्रसेनदुहितरो वसुदेवानुजस्त्रियः”। “देवभागस्य कंसायां चित्रकेतुबृहद्बलौ” भाग० ९,२४,२२,

कंसक न० कंसमेव स्वार्थे कन्। १कांस्ये तदुत्पत्तिगुणादि भावप्र० उक्तं यथा “ताम्रत्रपुजमाख्यातं कांस्यं घोषश्च कंसकम्। उपधातुर्भवेत् कांस्यं द्वयोस्तरणिरङ्गयोः। कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः। संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः”। “कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरम्। गुरु नेत्रहितं रूक्षं कफपित्तहरं परम्”। कंसमिव “इवे प्रतिकृतौ” पा० कन्। २कांस्यजाते काशीशे उपधातुभेदे। “काशीशं धातुकाशीशं पांशुकाशीशमित्यपि। तदेव किञ्चित् पीतन्तु पुष्पकाशीशमुच्यते। काशीशमम्लमुष्णञ्च तिक्तञ्च तुवरं तथा। वातश्लेष्महरं केश्यं नेत्रकण्डूविषप्रणुत्। मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम्” भावप्र० तद्गुणादि।

कंसकार पु० कंसं तन्मयपात्रं करोति कृ–अण् उप० स०। (कांसारि) वर्णसङ्करजातिभेदे “वैश्यायां ब्राह्मणाज्जातो ह्यम्बष्ठो गान्धिकोवणिक्। कंसकारशङ्खकारौ ब्राह्मणात् संबभूवतुः” ब्र० वै० पु०। तेनैतस्याम्बष्ठवत् द्विजसंस्कार इति किन्तु सा जातिर्देशान्तरे प्रसिद्धा। गौड़देशवासिनस्तु शूद्राः। “विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः। ततो

बभूवुः पुत्राश्च षडेते शिल्पकारिणः । मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः । कुम्भकारः कंसकारः षडेते शिल्पिनोवराः” ब्रह्मवै०पु० तेनास्य शूद्राजातत्वात् “मातृवद्वर्णसङ्कराः” इत्युक्तेः शूद्रत्वम् । उशनसा तु तस्य प्रतिलोमवर्णसङ्करत्वमुक्तम् । “नृपायां वैश्यसंसर्गात् आयोगव इति स्मृतः । तन्तुवायो भवन्त्येते वस्त्रकांस्योपजीविनः । शिल्पिकाः केचिदत्रैव जीवनं वस्तुनिर्म्मितम् । आयोगवेन विप्रायां जातास्ताम्रोपजीविनः” ।

कंसकृष् पु० कंसं कृष्टवान् कृष-क्विप् ६त० । वासुदेवे तेन हि तस्य सभामध्ये कर्षणेन मारणात्तथात्वं यथाह हरि०८६ अ० । “क्षिप्ते पितरि चुक्रोध नन्दगोपे च केशवः । म्लातोवाद्य व्यथां दृष्ट्वा विसंज्ञाञ्चैव देवकीम् । स सिंह इव वेगेन केशवो जातविक्रमः । आरुरुक्षुर्महाबाहुः कंसनाशार्थमच्युतः । रङ्गमध्यादुत्पपात कृष्णः कंससमान्तिके । अस-जहायुना क्षिप्तो यथाखस्थो घनाघनः । ददृशुर्नहि तं सर्वे रङ्गमध्यादवप्लुतम् । केवलं कंसपार्श्वस्थं ददृशुः पुरवासिनः । सोऽपि कंसस्तदायस्तः परीतः कालधर्म्मणा । आकाशादिव गोविन्दं मेने तत्रागतं विभुम् । स कृष्णेनायतं कृत्वा बाहुं परिघसन्निभम् । मूर्द्धजेषु परामृष्टः कंसो वै रङ्गसंसदि । मुकुटश्चापतत्तस्य काञ्चनो वज्रभूषितः । शिरसस्तत्र कृष्णेन परामृष्टस्य पाणिना । हस्तेन परामृष्टस्य कंसोनिश्चेष्टतां गतः । तथैव च विसंमूढो विह्वलः समपद्यत । निरस्तहीतश्च केशेषु गतासुरिव निश्वसन् । न शशाक मुखं द्रष्टुं कंसः कृष्णस्य वै तदा । विकुण्डलाभ्यां कर्णाभ्यां च्छिन्नहारेण वक्षसा । विलम्बाभ्याञ्च बाहुभ्यां गात्रावसृतभूषणैः । भ्रंशितेनोत्तरीयेण सहसा चलितानन्नः । चेष्टमानः समाक्षिप्तः कंसः कृष्णेन तेजसा । चकर्ष च महारङ्गे मञ्चाभिष्क्रम्य केशवः । केशेषु तं बलाद्गृह्य कंसं लेखार्हतां गतम् । कृष्यमाणः स कृष्णेन भोजराजो महाद्युतिः । समाजवाटे परिखा देहकृष्टा चकार ह । समाजवाटे विक्रोश्य विकृष्य च गतायुषम् । कृष्णो विसर्ज्जयामास कंसदेहमदूरतः” । “निषेदिवान् कंसकृषः स विष्टरे” माघः । कंसजित्कंसारातिकंसहादयोऽप्यत्र

कंसवती स्त्री उग्रसेनदुहितृभेदे देवश्रवसः पत्न्याम् कंसशब्दे उदा० । “कंसवत्यां देवश्रवसः सुवीरइषुमांस्तथा” भाग० ६,२४,२ ।

कंसार न० कंसं तदाकारम् ऋच्छति ऋ-अण् उप०स० । कांस्ये तस्य च कंसवच्छुभ्रत्वात् तथात्वम् “यत्किञ्चित् कंसारं तदस्यि” ऐत० ब्रा० । [१कांस्यधातौ त्रिका

कंसास्थि न० कंसमस्थीव कठिनत्वात् व्याघ्रा० उपमितस०

कंसिक त्रि० कंसेन चतुःषष्टिपलमानेन क्रीतः “कंसाट्टिठन्” पा० टिठन् इकार उच्चारणार्थः । १कंसेन क्रीते स्त्रियां टित्वात् ङीप् । अध्यर्द्धपूर्वद्विगोस्तु तस्य लुक् । अध्यर्द्धकंस सार्द्धकंसेन क्रीते त्रि० । द्विकंस द्वाभ्यां कंसाभ्यां क्रीते त्रि० ।

कंसोद्भवा स्त्री कंस इव शुभ्रत्वादुद्भवति उद्+भू-अच् । सौराष्ट्र्यां मृत्तिकायां तस्याः शुभ्रत्वात् कंसतुल्यत्वम् ।

कक इच्छायाम् सक० गर्व्वे चापले च अक०भ्वा०आत्म०सेट् । ककते अककिष्ट चकके [चकङ्के प्रनिकङ्कते न णत्वम् ।

कक गतौ भ्वा० इदित् आत्म०सक०सेट् । कङ्कते । अकङ्किष्ट

ककन्द पु० कक-अन्दच् । १स्वर्णे उणादिकोषः २नृपे उज्ज्व०

ककर पु० कक-अरच् । पक्षिभेदे । “हेमन्ताय ककरांञ्छिशिराय विककरान्” यजु०२४,२० । ककरः पक्षिविशेषः

ककरघा(हा)ट पु० कं विषं करहाटेऽस्य इत्य इ०वा षः । मूलविषे वृक्षभेदे । “तत्र क्लीतकाश्वमारगुञ्जासुगन्धगर्गरककरघा(हा)टविद्युच्छिखाविजयानीत्यष्टौ मूलविषाणि” सुश्रु० । धमध्यस्तु “अन्त्रपाचक कर्त्तरीयसौरीय ककरघाट करम्भनन्द नवराटकानि सप्त त्वक्सारनिर्यासविषाणि” सुश्रुतोक्ते त्वक्सारनिर्यासविषे २वृक्षभेदे ।

ककर्द्दु पु० कस्य कर्द्दनं हिंसनम् कर्द्द-भावे उन् ६त० । सुखनाशने । “ककर्द्दवे वृषभोयुक्त आसीत्” ऋ० १०,१०२,६ ककर्द्दवे हिंसनाय” भा० ।

ककाटिका स्त्री कृकाटिका पृषो० । १घाटायाम् २ललाटास्थिभेदे च “मस्तिष्कमस्य कतमोललाटं ककाटिकां प्रथमोयः कपालम्” अथ० १०,२,८ ।

ककुञ्जल पुंस्त्री कं जलं कूजयति कूज-अलच् पृषो० हुम् ह्रस्वश्च । चातकपक्षिणि राजवल्लभः स्त्रियां ङीष् ।

ककुत्सल न० ककुत्स्थलं वेदे पृषो० । ककुद्रूपे स्थले “यदि वा इह ते मनः ककुत्सलमिव जामयः । अभ्येनं भूम ऊर्णुहि” अथ०१८,४,६६, जामयो नवोढाः ककुत्स्थलं वस्त्रेण यथा आर्णुवन्ति तथैव मन आच्छादय इत्यर्थः । लोके तु ककुत्स्थलमित्येव ।

ककुत्स्थ पु० वृषरूपधरस्य शक्रस्य ककुदि तिष्ठति स्था क । पुरञ्जयापरनाम्नि इक्ष्वाकुपुत्रशशादपुत्रे नृपभेदे । तन्नामनिरुक्तिः चरिते यथा “इक्ष्वाकौ संस्थिते ताते शशादस्ताभ्यपद्यत । शशादस्य तु दायादः ककुत्स्थोनाम वीर्य्यवान् । इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् । पूर्व्वमाडीबके युद्धे कक-

त्स्थस्तेन सः स्तुतः" हरिवं० १० अ०। "शासदीजे हरि यज्ञैः शशाद इति विश्रुतः। पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः। ककुत्स्थ इति चाप्युक्तः शृणु नामानि कर्मभिः। कृतान्त आसीत् समरो देवानां सह दानवैः। पार्ष्णिग्राहो वृतो वीरो देवैर्दैत्यपराजितैः। वचनाद्देवदेवस्य विष्णोर्विश्वात्मनः प्रभोः। वाहनत्वे वृतस्तस्य बभूवेन्द्रो महावृषः। सन्नद्धो धनुर्दिव्यमादाय विशिखान् शितान्। स्तूयमानस्तमारुह्य युयुत्सुः ककुदि स्थितः। तेजसाप्यायितो विष्णोः पुरुषस्य परात्मनः। प्रतीच्यां दिशि दैत्यानां न्यरुणत्त्रिदशैः पुरम्। तैस्तस्य चाभूत् प्रधनं तुमुलं लोमहर्षणम्। यमाय भल्लैरनयद्दैत्यान् येऽभियुर्मृधे। तस्येषुपाताभिमुखं युगान्ताग्निमिवोल्बणम्। विसृज्य दुद्रुवुर्दैत्या हन्यमानाः स्वमालयम्। जित्वा पुरं धनं सर्व्वमयच्छद्वज्रपाणये। प्रत्ययच्छत् स राजर्षिरिति नामभिराहुतः" भाग० ९, ६, ११ "इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ इत्याहितलक्षणोऽभूत्" रघुः। तस्यापत्यं शिवा० अण्। काकुत्स्थ तदपत्ये। "काकुत्स्थ ईषत् स्मयमान आस्त" भट्टिः।

ककुद् स्त्री कं सुखं कौति कु-शब्दे क्विप् तुक् च पृषो० तस्य दः। वृषस्कन्धपृष्ठस्थमांसपिण्डाकारे, (झुंड) इति ख्याते १वृषाङ्गभेदे २श्वेतच्छत्रादौ नृपचिह्ने, ३प्रधाने, ४पर्व्वताग्रभागे च। "स्कन्धं विहत्य ककुदि पाणिना प्राक्षिपच्छनैः" भा० अनु० २९ अ०। ककुदिस्थितः ककुत्स्थशब्दे उदा०।

ककुद पु० न० कस्य देहस्य सुखस्य वा कुं भूमिं ददाति दा-क। (झुँट) इति ख्याते १वृषाङ्गभेदे, २प्रधाने, ३नृपचिह्ने, छत्रादौ, ४पर्व्वताग्रभागे च। "इक्ष्वाकुवंश्यः ककुदं नृपाणाम्" रघुः। "नृपतिककुदं दत्त्वा यूने सितातपवारणम्" रघुः। "स राजककुदव्यग्रपाणिभिः पार्श्ववर्त्तिभिः" रघुः। बहु० अवस्थायामन्त्यलोपः समा०। अजातककुत् अल्पवयाः वृषः। पूर्णककुत् तरुणः। पर्व्वतभेदे चान्त्यलोपः त्रिककुत् त्रिकूटगिरिः।

ककुदाक्ष त्रि० ककुदं राजचिह्नमश्नोति धारकत्वेन व्याप्नोति अश-अण् उप० स०। राजचिह्नधारके। तस्यापत्यम् रेवत्या० ठक्। काकुदाक्षिक तदपत्ये पुंस्त्री

ककुदावर्त्त पु० ककुदि आवर्त्तः। ककुदिस्थे दुष्टरोमावर्त्तभेदे। तस्य प्राणिस्थत्वात् निन्द्यत्वाच्च मत्वर्थे इनि। ककुदावर्त्तिन् तच्चिह्नयुक्ते निन्द्ये वृषे।

ककुद्मत् पु० ककुदस्त्यस्य मतुप् यवादि० न मस्य वः। १वृषे। "दर्पकलः ककुद्मान्" कुमा०। "अशोभतोच्चैर्नदितं ककुद्मताम्" माघः। "मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः" "दृप्तः ककुद्मानिव चित्रकूटः" रघुः। ककुद् सादृश्येनास्त्यस्य मतुप्। २ककुत्सदृशे बहुलोदकसंघातयुक्ते। "ऊर्म्मिः मधुर्म्मिः ककुद्मान्" यजु० ९, ६, ककुद्मान् ककुच्छब्देन वृषस्कन्धे उन्नतप्रदेश उच्यते सादृश्ये मतुप् तत्सामान्यादुदकनिचयैर्युक्तः" वेददी०। ३"ऋषभौषधौ" राजनि० ४पर्व्वते स्वामी

ककुद्मती स्त्री ककुदिव मांसपिण्डोऽस्त्यस्याः मतुप् यवा० न मस्य वः ङीप्। कट्याम् अमरः

ककुद्मिन् पु० ककुद्+अस्त्यर्थे मिनि। १वृषे २पर्व्वते च। "अष्टौ सहस्राणि ककुद्मिनामहम्" भा० आश्व० १०२ अ०। ४रैवते नृपे पु०। "आनर्त्तस्य तु दायादो रेवोनाम महाद्युतिः। आनर्त्तविषयश्चासीत् पुरी चास्य कुशस्थली। रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्म्मिकः" हरिवं० १० अ०।

ककुद्मिसुता स्त्री ६त०। बलरामभार्य्यायां रेवत्याम्। ककुद्मिकन्यादयोऽप्यत्र "ककुद्मिकन्यावक्त्रान्तर्वाससलब्धाधिवासया" माघः।

तस्याः पूर्व्वकालिकायामपि बलदेवपरिणयकथा यथा "रेवस्य रैवतः पुत्रः ककुद्मी नाम धार्म्मिकः। ज्येष्ठः पुत्रशतस्यासीद्राज्यं प्राप्य कुशस्थलीम्। स कन्यासहितः श्रुत्वा गान्धर्वं ब्रह्मणोऽन्तिके। मुहूर्त्तभूतं देवस्य गतं बहुयुगं प्रभो। आजगाम युवैवाथ स्वां पुरीं यादवैर्वृताम्। कृतां द्वारवतीं नाम्ना बहुद्वारां मनोरमाम्। भोजवृष्ण्यन्धकैर्गुप्तां वासुदेवपुरोगमैः। ततस्तद्रैवतो ज्ञात्वा यथातत्त्वमरिन्दम!। कन्यां तां बलदेवाय सुव्रतां नाम रेवतीम्। दत्त्वा जगाम शिखरं मेरोस्तपसि संश्रितः। रेमे रामोऽपि धर्म्मात्मा रेवत्या सहितः सुखी" १० अ०। युधिष्ठिर उवाच "कथं बहुयुगे काले समतीते द्विजोत्तम!। न जरा रेवतीं प्राप्ता रैवतं वा ककुद्मिनम्। मेरुं गतस्य वा तस्य शर्यातेः सन्ततिः कथम्। स्थिता पृथिव्यामद्यापि श्रोतुमिच्छामि तत्त्वतः। नारद उवाच। न जरा क्षुत्पिपासा वा न मृत्युर्भरतर्षभ!। ऋतुचक्रं न भवति ब्रह्मलोके सदाऽनघ। ककुद्मिनस्तु तं लोकं रैवतस्य गतस्य ह। हृता पुण्यजनैस्तात राक्षसैः सा कुशस्थली" भा० हरि० ११ अ०।

ककुन्दर न० कस्य शरीरस्य पृष्ठदेशस्य कुं भूमिं दृणाति दृ—शा० खच्। पृष्ठवंशाधःस्थे गर्त्ताकारे कूपके "सक-

द्विभक्तचतरस्रक(कु)कुन्दरविभागः रथाङ्गाकारसंस्थितश्च नितम्बविभागः” दशकुमा० । “कक्षौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे” याज्ञ० “ककुन्दरे जघनकूपकौ” मिता० । पृषो० कुकुन्दरमपि तत्रार्थे ।

ककुभ् स्त्री कं प्रकाशं स्कुभ्नाति स्कुन्भ–क्विप् पृषो० । १दिशि, २शोभायाम्, ३चम्पकमालायाम्, ४शास्त्रे, ५रागिणीभेदे च । “अष्टौ व्यख्यत् ककुभः पृथिव्याः” ऋ० १,५८,१ । “दाधर्थ्य प्राचीं ककुभं पृथिव्याः” ७,९,२ । ६प्राणे । “ककुप्छन्दः” यजु० १५,४ । “कं सुखं शरीरे स्कुभ्नाति धारयतीति ककुप्, कं सुखं कोपयति दीपयतीति कुप-दीप्तौ चुरादि क्विप् । पूर्वत्रपक्षे सलोपश्छान्दसः ककुप् प्राणः “प्राणो वै ककुप् छन्दः इति श्रुतेः” वेददी० । द्वितीयपक्षे पान्तमिति भेदः । वैदिके ७छन्दोभेदे । “उक्षा वयः ककुप्छन्दः” यजु०१४,९ “आद्यन्तावष्टाक्षरौ पादौ मध्यमौ द्वादशाक्षरौ ककुप्” वेददी० । कात्या० सर्वा० ५अ० । “द्वितीयश्चेदुष्णिक् त्रिपदान्त्यो द्वादशकः आद्यश्चेत् पुर उष्णिक् मध्यमश्चेत् ककुप्” इति तल्लक्षणमुक्तम् । “सर्वाः ककुभः” आश्व० श्रौ० ६,१,२ । ककुभरागिणीरूपमुक्तम् संगीतदामो०“पीतं वसाना वसनं सकेशी वने रुदन्ती पिकनादद्दूना । विलोकयन्ती ककुभोऽतिभीता मूर्त्तिः प्रदिष्टा ककुभस्तथेयम्” ।

ककुभ पु० कं वातं स्कुभ्नाति स्कुन्भ-क पृषो० । १वीणाङ्गे, तस्याः स्वरगाम्भीर्य्यसम्पादनार्थमधोवद्धालाबूमयभाण्डे । कस्य वातस्य कुः भूमिः भात्यस्मात् ककु+भा–क । विस्तीर्णशाखाभिः वातभूमिप्रकाशकेऽर्ज्जुनवृक्षे, स च तद्गुणादि भावप्रका०उक्तं यथा “ककुभः शीतलोभग्नक्षतक्षयविषास्रजित् । मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत्” । “मध्येसमुद्रं ककुभः पिशङ्गी” माघः तांस्तण्डुलोन्नतिनिम्नोन्नानविस्तीर्णकुक्षौ ककुभोलूखले” दशकु०कालक्षेपं ककुभसुरभौ पर्व्वते पर्वते ते मेघदू० । ३रागभेदे च ४रागिणीभेदे स्त्री । ककुभ इवाचरति ककुभ+क्विप्-अच् । ५सर्जित त्रि०निघ० “ककुभं रूपं वृषभस्य रोचते” यजु०८,४९ । ककुभं महत्” वेददी० [ङीप् । नलीनामगन्धद्रव्ये शब्दच०

ककुभादनी स्त्री ककुभ इवाद्यते तुल्यरसत्वात् अद-ल्युट्

ककुम्मती स्त्री वैदिकेच्छन्दोभेदे “एकस्मिन्पञ्चकेछन्दः शङ्कुमती षट्के ककुम्मतीति” कात्या०सर्व्वानु० तल्लक्षणमुक्तम् ।

ककुह त्रि० कस्य सूर्य्यस्य कुं भूमिं जिहीते उच्छ्रितत्वात् गच्छति हा–क ईत० । १उच्छ्रिते २महति निघण्टुः । “ककुहं चित्त्वा कवे ! मन्दन्तु धृष्णविन्दवः” ऋ०८,४५,१४ । “ककुहः सोम्योरस इन्दुरिन्द्राय” ९,६७,८ । ककुहः ककुहस्तीति निघण्टौ पाठान्तरम् तदर्थे ।

कक्क हासे भ्वा० पर० अक० सेट् । कक्कति । अकक्कीत् । चकक्क । कक्कटः । प्रनिकक्कति कादित्वान्न णत्वम् ।

कक्कट पुंस्त्री कक्क–अटन् । मृगविशेषे स च अश्वमेधे अनुमतिदेवताकः पशुः । “न्यङ्कुः कक्कटस्तेऽनुमत्यै” यजु० २४,३२ । वेदो मृगभेदः न्यङ्कुरपि, कक्कटः सएव, ते तयोऽनुमत्यै” वेददी० । स्त्रियां जातित्वात् ङीष् ।

कक्कुल पु० कक्क–उलच् । वकुलवृक्षे नलितविस्तारः ।

कक्कोल पु० ककते गच्छति क्विप् कक्, कोलति संस्त्यायति कुल-अच् कोलः कक् चासौ कोलश्चेति कर्म्म० । गन्धद्रव्यसाधने वृक्षे (कांकोल) इति वङ्गभाषाख्याते (वनकपूर) इति पाश्चात्त्यख्याते । “आकम्पितकक्कोलैः नमेरुकुसुमपांशुपातिभिः” काद० । “कक्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम् । आस्यदुर्गन्धिहृद्रोगकफवातामयास्यहृत्” भावप्र० तद्गुणाः “जातीफललवङ्गकक्कोलमेषाञ्च षट्पलम् । प्रोक्तमाचमनमिति” तन्त्रसारः ।

कक्कोलक पु० इदमर्थे कन् । १कक्कोलवृक्षजाते गन्धद्रव्ये (वनकपूर) इति ख्याते । तस्य कोषे फलवत्त्वात् कोषफल इति प्रसिद्धिः २स्थूलमरिचे राजनि० । [चकक्ख ।

कक्ख हासे भ्वादि०पर०अक०सेट् । कक्खति अकक्खीत् ।

कक्खट त्रि० कक्ख–अटन् । १कठिने अमरः । २हासान्विते त्रि०

कक्खटपत्रक पु० कक्खटं प्रकाशान्वितं पत्रमस्य । (पाट) वृक्षभेदे शब्दमा० [भूमौ वर्ण्णलेखनसाधने द्रव्यभेदे त्रिका० ।

कक्खटी स्त्री कक्ख–अटन् गौ० ङीष् । कठिन्याम् (खडी)

कच्छ पु० कष हिंसादौ स । १उत्तरीयवस्त्रस्य पश्चाद्भागस्थे अञ्चले (आंचल) २लतायाम्, ३शुष्कतृणे, ४शुष्कवने च मेदि० । ५पार्श्वभागे, ६राजान्तःपुरे, ७बाहुमूले ८पृष्ठप्रदेशनिहिताधोंऽशुकस्यैकदेशे (काछा) ९हास्तिबन्धनरज्ज्वां, १०काञ्च्याम्, ११पकोष्ठके, १२गृहभित्तौ, १३साध्ये १४स्वर्ज्जासदे मेदि० १५कच्छरोगभेदे च (कांकविराली) स्त्री । १६पापे न० हेम० । “प्रक्षिप्योद्वर्षिषं कक्षे” माघः० । “क्रोष्टा वराहं निरतक्त कक्षात्” ऋ० १०,२८,४ । “कृष्टकक्षवनप्रस्था प्रसन्नजलनिम्नगा” भा० व० १८२ “कक्षान्तरगतोवायुर्जीमूत इव गर्जति” रामा० “यथोद्धरति निर्द्दाता कक्षं धान्यं च रक्षति” मनुः । “कक्षघ्नः शिशिरघ्नश्च” “महाकक्षे विलोकयः । न दृष्टे

र्द्दित चात्मानं यो रक्षति स जीवति" भा० आ०१४५ अ० । "अयमग्निर्दहन् कक्षमितश्चायाति भीषणः" भा० आ०८३६६ अरण्ये "अग्निर्महाकक्षमिवान्तकाले"भा० व० १२० अ०। १७ बाहुमाले स्त्रीत्वमपि "कक्षैः कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः" भा०स० २२ अ० । वस्त्राञ्चले तु पुंस्त्री "चित्रहस्तादिकं कृत्वा कक्षाबन्धञ्च चक्रतुः" भा०६०२ । "वामे पृष्ठे तथा नाभौ कक्षत्रयमुदाहृतम् । एभिः कक्षैः परीधत्ते योविप्रः स शुचिः स्मृतः" स्मृतिः "परिधानात् वहिःकक्षा निबद्धा ह्यासुरी भवेत्"योगिया०। १८नौकाङ्गे हेम० । बाहुमूले (वगल) "वैदूर्य्यरूपान् प्रतिमुच्य काञ्चनानक्षान् स कक्षे परिन्यस्य वाससा" भा०वि०२५ श्लो०। प्रकोष्ठे "आ पञ्चम्यास्तु कक्षाया नैनं कश्चिदवारयत्" रामा०। "क्रान्तानि पूर्व्वं कमलासनेन कक्षान्तराण्यद्रिपतेर्विवेश" कुमा० "करेणुकाभिरम्यन्यकक्षान्तरम्"काद० १६परिकरे"आबद्धनिविडकक्षैः"काद०। कक्षारोगस्तु "बाहुपार्श्वांसकक्षासु कृष्णस्फोटां सवेदनाम् । पित्तप्रकोपात् संभूतां कक्षामिति विनिर्द्दिशेत्" । कक्षाभागेषु ये स्फोटाः जायन्ते मांसदारुणाः । अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः । सप्ताहात् द्वादशाहा पक्षाद्वा घ्नन्ति मानवम्" सुश्रुते उक्तलक्षणः । "हरिविल्लां गन्धनाम्नीं कक्षां विस्फोटकांस्तथा । पित्तजस्य विसर्पस्य क्रियया साधयेत् भिषक्" सुश्रु० २०कच्छे जलप्राये विश्वः ।

कक्षक पु० जनमेजयसर्पसत्रहते वासुकिकुलजसर्पभेदे । "हिरण्यबाहुः शरणः कक्षकः कालदन्तकः । एते वासुजकिजानागाः प्रविष्टा हव्यवाहनम्" भा०आ०५८अ० ।

कक्षतु द० कक्ष इव तन्यते विटपं तन—बा० डु । वृक्षभेदे तस्य फलम् अञ् प्लक्षा० न लुक् । क्राक्षतव तत्फले न० चतुरर्थ्याम् उवर्णान्तत्वात् अण् । काक्षतव तत्सन्निकृष्टदेशादौ त्रि० ।

कक्षधर न० कक्षां धारयति धृ—अच् नि०कुत्सः । सुश्रुतोक्ते वक्षःकक्षयोरन्तराखस्थानस्थिते मर्म्मस्थानभेदे ।"विशेषतस्तु यानि सक्थियुगुल्मजानुविटपानि तानि बाह्नोर्मणिबन्धकूर्परकक्षधराणि । वङ्क्षणदृषणयोरन्तरे विटपम् एवं वक्षःकक्षयोर्मध्ये कक्षधरमिति" लक्षित्वा कक्षधरे पक्षाघात:"सुश्रुते तद्वेधे पक्षाघात उक्तः ।।स्त्रियां ङीप् ।

कक्षप पुंस्त्री कच्छे जलप्राये पिबति पा-क०७त० । कूर्म्मे

कक्षरुहा स्त्री कक्षे जलप्राये रोहति रुह—क । (नागरमुथा) नागरमुस्तायाम् राजनि० तस्याभक्षप्रायभवत्वात्तथात्वम् ।

कक्षशाय पुंस्त्री कक्षे शुष्कतृणे शेते शी—ण । कुक्कुरे शब्दमाला । स्त्रियां ङीप् ।

कक्षशायु पुंस्त्री कक्षे शेते शी-उण् । कुक्कुरे राजनि० ।

कक्षसेन पु० "परीक्षितोऽभवन् पुत्राः सर्व्वे धर्म्मार्थकोविदाः । कक्षसेनोग्रसेनौ तु चित्रसेनश्च वीर्य्यवान्" भा० आ० ६४ अ० उक्ते परिक्षिन्नृपपुत्रभेदे । अयञ्च परिक्षित् आविक्षितःपुत्रः "आविक्षतः परिक्षित्तु" इत्युपक्रमात् । "अलर्कः कक्षसेनस्य गयो गौराश्व एव चेति" यमसभासदर्शने उक्तम् । तस्याश्रमश्च अवन्तिदेशस्यासितगिरिस्थः । "अवन्तिषु प्रतीच्यां वै" इत्युपक्रम्य "बहुमूलफलोपेतोऽसितोनाम पर्व्वतः । आश्रमं कक्षसेनस्य पश्यस्तत्र युधिष्ठिर !" भा० व० ८६अ० । तस्य च संन्यासकथा । "कक्षसेनस्तु राजर्षिर्वसिष्ठाय महात्मने । न्यासं यथावत् संन्यस्य जगामाशु महायशाः" भा० अनु० १०७अ० । तस्य प्रातःस्मर्य्यतामाह भा०अनु० १६७अ० । "कक्षसेनश्च राजर्षिर्येचान्ये नानुकीर्त्तिताः , कल्यमुत्थाय योनित्यं सन्ध्येऽह्न्यस्तमयोदये । पठेच्छुचिरनावृत्तः सधर्म्मफलभाग्भवेत्"। "कक्षसेनार्ष्टिषेणौ च सिन्धुद्वीपश्च पार्थिवः । एते चान्ये च बहवः सिद्धिं परमिकां गताः" भा०अश्व०६१अ० । २ऋषिभेदे च । यस्यापत्यमभिप्रतारी । "अथ शौनकञ्च कापेयमभिप्रतारिणं काक्षसेनिं परिवेष्यमाणौ ब्रह्मचारी विभिक्षे" छा०उ० कक्षसेनस्यापत्यम् इञ् भा० ।

कक्षा स्त्री कष—स । १उत्तरीयवस्त्रे २काञ्च्याम् ३मध्यबन्धने ४हस्तिबन्धने च विश्वः ५मध्ये देसंशयकोटौ ७तुल्यतायाञ्च । समकक्षः । कक्षीकृतः क्रोडीकृतः । ८राजान्तःपुरे च तत्र मध्यबन्धने"दृशे परैःसह हढवद्धकक्षया" माघः "कक्षा मध्यबन्धनम्" मल्लि० कक्षशब्दे उक्तार्थेषु च

कक्षापट पु० कक्षाकारः पटः । कौपिने हला० ।

कक्षाय नामधातुः पापचिकीर्षायाम् । "सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम्" वार्त्ति० क्यङ् । कक्षायते कक्षं (पापम्) चिकीर्षति । अकक्षायिष्ट कक्षायाञ्चभूव आस चक्रे ।

कक्षावेक्षक पु० कक्षं वनमुपवनं साम्यं स्त्रीबाहुमूलं वा कक्षां राजशुद्धान्तःपुरीं वाऽवेक्षते अव+ईक्ष—ण्वुल् । १शुद्धान्तपालके, २उद्यानपालके, ३रङ्गाजीवे, ४जारे करौ द्वाःस्थे च मेदि० ।

काक्षिन् त्रि० कक्षं पापमस्त्यस्य सुखा० इनि । पापयुक्ते

कक्षीवत् पु० कक्ष्या अस्त्यस्य मतुप् नि० संज्ञायां संप्रसारणं दीर्घश्च । स्फोटायने ऋषिभेदे हेमच०। अन्यत्र कक्ष्यावत् कक्ष्यायुक्ते । "सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः" निरु० श्रुतिः कक्षीवान् कक्ष्यावान् निरु० । मनुष्यकक्ष एवाभिप्रेतः इति निरु० । "शतं कक्षीवाँ असुरस्य" ऋ०१,१२६,२, "अहं मनुरभवं सूर्य्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः" ऋ०४, २६,१, "कक्षीवान् दीर्घतमसः पुत्रस्तत्संज्ञकः" भा० । अयञ्चाङ्गिरोगोत्रोत्पन्नः । "यवक्रीतश्च रैभ्यश्च अर्वावसु परावसू । औशिजश्चैव कक्षीवान् बलश्चाङ्गिरसः सुताः" भा०अनु०१५०अ० । "यवक्रीतोऽथ रैभ्यश्च कक्षीवानौशिजस्तथा" भा०अनु०१६५अ० । अयञ्च गोत्रप्रवर्त्तकः "कक्षीवतामाङ्गिरसौचथ्यगौतमौशिजकाक्षीवतेति। आश्व० श्रौ० १२,११,२, कक्षीवतोऽपत्यम् अण् । काक्षीवत तत्पुत्रे प्रवरर्षिभेदे । "कक्षीवन्तं य औशिजः इति श्रुतिमधिकृत्य उशिजः पुत्रः उशिग् वष्टेः कान्तिकर्म्मणः" निरुक्तोक्तेः औशिजशब्द तालव्यमध्यएव साधुः भारते मूर्द्धन्यमध्यपाठः लिपिकरप्रमादकृत एव। एवं श्रुतिसूत्र भारतादौ पा०सूत्रे च ईकारमध्यपाठदर्शनात् हेम०कक्षीवच्छब्द एव । शब्दकल्पद्रुमे कक्षावच्छब्दकल्पनं निर्मूलम् ।

कक्षेयु पु० "रौद्राश्वस्य घृताचीसम्भूते पुत्रभेदे । "रौद्राश्वस्य महेष्वासा दशाप्सरसि सूनवः" इत्युपक्रम्य "ऋचेयुरथ कक्षेयुः कृकणेयुश्च वीर्य्यवान्" इत्यादिना तस्य दश पुत्रा दर्शिताः भा०आ०९०अ० "आयुःशुपश्च राजर्षिः कक्षेयुश्च नराधिपः" भा० अनु०१६५अ० । "रौद्राश्वस्य घृताच्यां वै दशाप्सरसि सूनवः। ऋचेयुः प्रथमस्तेषां कृकणेयुस्तथैव च । कक्षेयुः स्थण्डिलेयुश्च" हरिवं०३१

कक्षोत्था स्त्री० कक्षात् जलप्रायदेशादुत्तिष्ठति उद्+स्था—क ५त० । भद्रमुस्तायां राजनि० । (नागरमुथा) तस्याजलप्रायदेशजत्वात्तथात्वम् ।कक्षोद्भवादयोऽप्यत्र ।

कक्ष्य त्रि० कक्षे भवः यत् । "कक्षोवीरुधिदोर्मूले कच्छे शुष्क वने तृणे" इति विश्वोक्तकक्षादि १भवे । २रुद्रभेदे पु० । "नमो वन्याय च कक्ष्याय च" यजु०१६,३२, रुद्राध्याये रुद्रभेदकथने। ३कक्षपूरके त्रि०। "स्येन आसामदितिः कक्ष्योमदः" ऋ० ५,४४,११, "कक्ष्यः कक्षापूरकः मदः" भा० । कक्षे मध्ये भवः यत् । ४उत्तरीयवस्त्रे ५हर्म्यादिप्रकोष्ठे राजगृहादेर्भित्त्यावच्छिन्ने ६देशे राजगृहादेः ७प्रारब्धकोष्ठके ८सादृश्ये ९कक्ष्यवन्धरज्जौ १०काञ्च्यां मेखलारज्जौ ११वस्त्राञ्चले १२गजमध्यबन्धनरज्जौ च स्त्री । स्वार्थे यत् । १३उद्योगे १४परिकरबन्धने च स्त्री । "ते वतीत्य जनाकीर्णां कक्ष्यास्तिस्रो नरर्षभाः" भा०स०२० अ० । "अभिगम्य गृहं भ्रातुः कक्ष्यामपि विगृह्य च" भा०। अत्र क्लीवमपि "अन्ये चहरयोह्यस्या गृहकक्ष्यान्तास्तथा" रामा० । १५गुञ्जायां शब्दर० । १६पार्श्वभागे न० । "शोभितं हेमकक्ष्याभिश्च हेमपट्टैर्विभूषितम्" । रामा० "परार्थे बद्धकक्ष्याणां तादृशां सम्भवः कुतः" पुरा०। १७अङ्गुलौ स्त्री निघण्टुः।

कक्ष्यावत् पुंस्त्री कक्ष्यास्त्यस्य मतुप् मस्य वः । ऋषिसंज्ञाभावात् न संप्र०। हस्तिनि हेमच० स्त्रियां ङीप् ।

कक्ष्यावेक्षक पु० कक्षावेक्षकार्थेषु ।

कख हासे भ्वा० पर०अक०सेट् एदित् घटादि वोपदेवः । कखति एदित्त्वात् अकखीत् । अकाखि णिच् कखयति । पा० मते नास्य एदित्त्वं तेन अकखीत्-अकाखीत् इतिभेद न वा तन्मते घटादि । तेन काखयत्येव । कादित्वात् प्रनिकखति इत्यादौ न णत्वम् ।

कख्या स्त्री कख-यत् । हर्म्यादिप्रकोष्ठे कक्षार्थे शब्दर० ।

कग क्रियामात्रे भ्वादि० पर० सक० अक० च सेट् एदित् वोप० । कगति अकगीत् । पा० नेदित्त्वम् तेन अकगीत् अकागीत् कागयति । अकागि प्रनिकगति न णत्वम् ।

कङ्क पुंस्त्री ककि-अच् । १पक्षिभेदे । (काँक) । "कङ्कपत्रः शिलोमुखः" इत्युक्तेस्तस्य पक्षेण शरपुङ्खः क्रियते ।"शरास्तयोस्तु बभूवुः कङ्कबर्हिणवाससः" भा० वि०५८ । सच पक्षी सुरमासुतकुलजः "अनलायाःशुकी पुत्री कङ्कस्तु सुरमासुतः" भा०आ०६६ अ०। २महाराजचूते राजनि०। ३क्षत्रियमात्रे शब्दमाला । ४यमे ५छद्मना द्विजवेशधरे मेदि० "कङ्कोनाम द्विजोभूत्वा मताक्षः प्रियदेवनः" भा० व०२अ० । युधिष्ठिरस्य छद्मना द्विजवेशतया तथात्वम् । ६वसुदेवानुजभेदे "देवमीढस्य शूरस्य मारिषा नाम पत्न्यभूत् । तस्यां स जनयामास दश पुत्रान् क्रमेण च । वसुदेवं देवभागं देवश्रवसमानकम् । सृञ्जयं श्यामकं कङ्कं शमीकं वत्सकं वृकम्" इत्युक्त्वा "कङ्कस्य कर्णिकायां वै ऋतधामाजयावपि" इति तत्पुत्रोत्पत्तिरुक्ता ।

"कृतवर्म्मा ह्यनाधृष्टिः शमीकः समितिञ्जयः । कङ्कः शङ्कुश्च कुन्तिश्च सप्तैते वै महारथाः" भा०स०१२ । ७उग्रसेनकन्याभेदे स्त्री । "तेषां (उग्रसेनसुतानाम्)

स्वसारः पञ्चासन् कंसा कंसवती तथा। सुतनू राष्ट्रपाली च कङ्का चैव वराङ्गना" हरि० ३८।

कङ्कट पु० कं देहं कटति क+कट–मुम् च, ककि लौल्ये अटन् वा। १कवचे। "सर्वायुधैः कङ्कटभेदिभिश्च" रघुः तेन निर्वृत्तादि कुमुदा० चतुरर्थ्याम् ठक्। कङ्कटिक तन्निर्वृत्तादौ त्रि०। चतुरर्थ्यां काशा० इल। कङ्कटिल तदर्थे। प्रेक्षा० चतुरर्थ्याम् इनि। कङ्कटिन् तदर्थे त्रि०। अस्त्यर्थे इनि। तद्युक्ते बद्धकवचे त्रि०। उभयत्र स्त्रियां ङीप्। स्वार्थे कन्। कङ्कटकोऽप्यत्र।

कङ्कण न० कं शुभं कणति कम्–कण–अच्। १करभूषणे, २भूषणमात्रे च ३शेखरे ४हस्तसूत्रे च विश्वः "सिन्दूरितानेकपकङ्कणाङ्किताः" माघः "उत्क्षिप्तं करकङ्कणद्वयमिदम् बद्धा दृढं मेखला" सा० द०। कङ्कणशब्दस्य करभूषणार्थत्वेऽपि तत्काले करवृत्तित्वसूचनाय कर्णावतंसे कर्णशब्दवत् करशब्दप्रयोगः। भूषणमात्रे "के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः। नाथ! मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम्" सा० द०। कमित्यव्ययम् जलार्थकं तस्य कणः। ५जलकणे पु०। "नितम्बे पत्राली नयनयुगलं कङ्कणभरम् सखे हारावाप्तिः स्तिलकमभूत् पाणिकमलम्। अरण्ये कर्णाट! त्वदरिवनितानां विधिवशादपूर्व्वोऽयं भूषाविधिरजनि" उद्भटः।

कङ्कणीका स्त्री पुनः पुनः कणति कण–यङ्–लुक्–ईकन् "चङ्कणः कङ्कण च" उणा० कङ्कणादेशश्च। क्षुद्रघण्टिकायाम्" उज्ज्वल० दा० चङ्कणः–अच् कङ्कणादेशश्च गौरा० ङीष्। कङ्कणीत्यपि तत्रैव भरतः। अत्र मूलं मृग्यम्।

कङ्कत पु० ककि–अतच्। १नागबलावृक्षे। तक+गतौ अतच् पृषो०। २अल्पविषे डुण्डुभे सर्पे पुंस्त्री जातित्वात् स्त्रियां ङीष्। "कङ्कतो न कङ्कतोऽथ सतीनकङ्कतः" ऋ० १,१९१,१। "कङ्कतोऽल्पविषः सतीनं जलम् तत्र कङ्कतः जलडुण्डुभः" भा०। ३केशप्रसाधन्याम् न० (काँकुइ)। "शिरसीव कङ्कतमपेतमूर्द्धजे" माघः पुंस्त्वमपि "कृत्रिमः कङ्कतः शतदन्य एषः। अपास्याः केश्यं मलमप शीर्षण्यं लिखात्" अथ० १४,२,६८ प्रसाधनीगुणाश्च सुश्रुते उक्ताः "केशप्रसाधनी केश्या रजोजन्तुमलापहा" अस्य स्त्रीत्वमपि तत्र गौ० ङीष्। कङ्कती तत्रार्थे विश्वामरौ। स्वार्थे कन्। कङ्कतिका तत्र कङ्कतं तद्धुसंस्कारः प्रयोजनमस्य छ। कङ्कतीय केशप्रसाधनपरे ऋषिभेदे "तद्धैतच्छाण्डिल्यः कङ्कतीयेभ्योऽहरहः कर्म प्रदिश्य प्रवव्राज" शत० ब्रा० ८, ४,४,१२। गृह्यस्य च तस्यैव केशसंस्कारप्रयोजनत्वात्

कङ्कत्रोटि पु० कङ्कस्य त्रोटिरिव चञ्चुरस्य। १मत्स्यभेदे (कांकला) ब० अच् समा०। कङ्कत्रोटोऽप्यत्र। स्त्रियां जातित्वात् ङीष्

कङ्कपत्र पु० कङ्कस्य पत्रं पत्रं पक्षोऽस्य। पुङ्खे तत्पक्षयुक्ते १शरे "हयांश्च रजतप्रख्यान् कङ्कपत्रैः शिलाशितैः" भा० वि० १८ "छित्त्वा च तानाशुगैश्च कङ्कपत्रान् शिलाशितान्" भा० आश्व० ७८ अ०। ६त०। २कङ्कखगस्य पक्षे च। कङ्कस्य पत्रं यत्र। ३तत्पक्षयुक्ते "नखप्रभाभूषितकङ्कपत्रे सक्ताङ्गुलिः सायकपुङ्ख एव" रघुः। तदस्त्यस्य इनि। कङ्कपत्रिन् कङ्कपत्रयुक्ते बाणे पु० "विव्याध दशभिर्बाणैस्त्वरितः कङ्कपत्रिभिः" भा० व० ५७ अ०। "पुनरेवाहनत् पार्थं हृदये कङ्कपत्रिभिः" भा० वि० ५९।

कङ्कपर्व्वन् पु० कङ्कः कङ्कमुखमिव पर्व्वास्य। सर्पभेदे। "तिरश्चिराजेरसितात् पृदाकोः परि संभृतम्। तत् कङ्कपर्व्वणो विषमियं वीरुदनीनशत्" अथ० ७,५६,१,

कङ्कपुरी स्त्री कं सुखं तेन कायति प्रकाशते कै–क कर्म०। काशीपुर्य्यां तस्यां वसतां हि सुखबाहुल्यात् तथात्वम्। "असिं ह्युपसृत्य पुनःपुनः स (अगस्त्यः) प्रासादमालाः परितोविलोकयन्। उवाच नेत्रे! स चले! प्रपश्यतं काशीं युवां कङ्कपुरीं त्वियं वत" काशी० २अ०।

कङ्कमाला स्त्री ककि–चापले घञ् कङ्कं चापल्यं करचापल्यं मलते धारयति मल–धृतौ अण् उप० स०। करतालीवाद्यशब्दे० तत्र हि करचापल्यात् तथात्वम्।

कङ्कमुख पु० कङ्कस्य मुखमिव मुखमस्य। (साँड़ाशि) १संदंशे सुश्रुतोक्ते २शल्योद्धारार्थे यन्त्रभेदे न०। "तत्र नानाप्रकाराणां व्यालानां मृगपक्षिणां मुखैर्मुखानि यन्त्राणां प्रायशः सदृशानि तानि" इत्युक्त्वा "तत्र स्वस्तिकयन्त्राण्यष्टादशाङ्गुलप्रमाणानि सिंहव्याघ्रवृकतरक्ष्वृक्षद्वीपिमार्ज्जारशृगालमृगैर्वारुककाककङ्ककुररचासभासशशघात्युलूकचिल्लिश्येनगृध्रक्रौञ्चभृङ्गराजाञ्जलिकर्णावभञ्जननन्दिमुखमुखानि मसूराकृतिभिः कीलैरवबद्धानि मूलेऽङ्कुशवदावृत्तवारङ्गाण्यस्थिविनष्टशल्योद्धरणार्थमुपदिश्यन्ते" इति तल्लक्षणमुक्तम्। अस्य प्रशंसाऽपि तत्रैव। "निवर्त्तते दाध्वगाहने च शल्यं प्रगृह्योद्धरते च यस्मात्। यन्त्रेष्वतः कङ्कमुखं प्रधानं स्थानेषु सर्व्वेष्वधिकारि चैव"।

कङ्कर त्रि० कं सुखं किरति क्षिपति कॄ–अच्। कुत्सिते हेमच०। कं जलं धार्य्यतेऽत्र कम्+कॄ–आधारे अप्। २तक्रे न०।

कङ्करोल पु० कङ्क इव लोलः लस्य रः। अङ्कोठवृक्षे (आँको-

ङ्) बङ्गभाषा (टेरा) हिन्दिभाषा । [राजवल्लभः ।

कङ्कलोद्य न० कङ्क इव लोड्यते लोड-ण्यत् । चिञ्चोडमूले

कङ्कवाज प्र० कङ्कस्य वाज इव वाजः पक्षोऽस्य । कङ्कपत्रे वाण-भेदे कङ्कपक्षोऽप्यत्र । कङ्कस्य वाजः जातोऽस्य तार० इतच् । कङ्कवाजित कङ्कपक्षयुक्ते शायके । "अताडयदमेयात्मा नवभिः कङ्कवाजितैः" भा०भी० ११७अ० । [कत्वात्तथात्वम्

कङ्कशत्रु पु० ६त० । पृश्निपर्ण्याम् शब्दच० । तस्याः कङ्कनाश-

कङ्कशाय पु० कङ्क इव शेते शी–ण । कुक्कुरे शब्दमाला

कङ्का स्त्री ककि–अच् १गोशीर्षचन्दने शब्दमाला २उग्र-सेनदुहितृभेदे च कंसशब्दे दृश्या० ।

कङ्काल पु० कं सुखं शिरो वा कालयति क्षिपति कल–अच् । त्वङ्मांसरहितशरीरारम्भकेऽस्थिसञ्चये अस्थिपञ्जरे ।

कङ्कालमालिन् पु० कङ्कालानां मालाऽस्त्यस्य इनि । महादेवे

कङ्कालय पु० कङ्कालं याति या–क । देहे ।

कङ्गु पु० ककि-उन् । (काङ्नी) तृणधान्यभेदे हिरूपकोषः । उग्रसेनस्य पुत्रभेदे कंसभ्रातरि । "कंसः सुनामा न्यग्रोधः कङ्कुःशङ्कुः सुहूस्तथा । राष्ट्रपालश्च सृष्टिश्च तुष्टिमानुग्र-सेनजाः" भाग० ९,२४,१४ ।

कङ्कु(ङ्गु)ष्ठ न० कङ्कुः तृणभेदः तत्र तत्समीपे तिष्ठति स्था–क षत्वम् । पर्वतोयमृत्तिकाभेदे । "हिमवत्-पादशिखरे कङ्कु(ङ्गु)ष्ठं नाम जायते । तत्रैकं नलि-काख्यं स्यात्तदन्यद्रेणुकं स्मृतम् । पीतप्रभं गुरु स्निग्धं तत्र श्रेष्ठं च रेणुकम् । कङ्कु(ङ्गु)ष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् । कृमिशोथोदराध्मानगुल्मानाहकफा-पहम्" भावप्र० अत्र पृषो० कस्य गः कङ्गुष्ठमपि ।

कङ्कूष पु० ककि–ऊषन् । आभ्यन्तरदेहे । "कर्णाभ्यां ते कङ्कू-षेभ्यः कर्णशूलं विसल्यकम् । सर्वं शीर्षण्यं ते रोगं बहि-र्मन्त्रयामहे" अथ० ९,८,२ ।

कङ्केर पु० ककि–एरन् । काकभेदे त्रिका० ।

कङ्केलि पु० कम् सुखं तदर्थं केलिरत्र । अशोकवृक्षे राजनि०

कङ्केल्ल पु० ककि-बा–एल्ल । वास्तूके शब्दमाला ।

कङ्केल्लि पु० कङ्क-बा० एल्लि पृषो० । अशोकवृक्षे त्रिका० ।

कङ्कट न० कम् सुखलक्षणेन खल–बा०ड । पापभोगे शब्दमा० ।

कङ्गु स्त्री कं सुखमङ्गति गच्छति गत्या० कु शकन्ध्वा० । (काङ्निनी) धान्यभेदे 'सा च चतुर्विधा तासां गुणाः भावप्र० उक्ताः । "स्त्रियां कङ्गुः प्रियङ्गु द्वे कृष्णरक्तसितास्तथा । पीता, चतुर्विधा कङ्गुस्तासां पीता वरा स्मृता । कङ्गुस्तु भग्नस-न्धानवातकृद्बृंहणो गुरुः । रूक्षा श्लेष्महरातीव वाजिनां गुणकृद् भृशम्" । अमार्यजातिवाचित्वात् वा ऊङ् । "आर्य्यास्तु यत्रशब्दाद्दीर्घसूक्तविशेषं प्रतियन्ति म्लेच्छास्तु कङ्गुम्" अधिकरणमा० स्वार्थे कन् तत्रैव । "कङ्गुका त्रि-फला लोध्रं काशीशं श्रवणाह्वया" सुश्रु० । इयञ्च ग्राम्य ओषधिः । "तिलमाषव्रीहियवाः प्रियङ्गवो गोधूमाश्चेति सप्त ग्राम्या ओषधयः" इति तैत्तिरीयसंहिताभाष्यधृता स्मृतिः प्रियङ्गुः कङ्गुः । अष्टादशधान्यमध्ये च अस्याग्रह-णम् अष्टादशधान्यशब्दे ५२५ पृ० तत्प्रमाणम् ।

कङ्गुनी स्त्री कङ्गु कङ्गुशब्देन नीयते ज्ञायते नी–बा० कर्मणि ड गौरा० ङीष् । (काङ्गनी) धान्यभेदे राजनि० ।

कङ्गुनीपत्रा स्त्री कङ्गुन्याः पत्रमिव पत्रमस्याः । पण्या-ख्याख्ये तृणभेदे राजनि० ।

कङ्गुल पु० कङ्गुं लाति गृह्णात्यनेन ला–बा० घञर्थे करणे क ६त० । १पाणौ हस्ते शब्दच० ।

कच रवे भ्वा० पर० अक० सेट् । कचति अकचीत् अकाचीत् चकाच । प्रनिकचति । [कञ्चति अकञ्चीत् कचञ्च ।

कच बन्धे सक० दीप्तौ अक० भ्वादि० पर० इदित् सेट् ।

कच बन्धे सक० दीप्तौ अक० भ्वादि० आत्म० सेट् । कचते अक-चिष्ट चकचे कचः । "चचाम मधु माध्वीकं त्यक्त्वा स्वाचकचे वरम्" भट्टिः । कादित्वान्न णत्व प्रनिकचति ।

कच पु० कच–अच् । १केशे, २बृहस्पतिपुत्रे, ३शुष्कव्रणे, ४मेघे शब्दमा० हस्तिन्यां स्त्री० मेदिनी । भावे घ । ५बन्धे ६शोभायाञ्च । कचार्थचरितञ्च भा०आ० ७६,७७ अ० यथा "जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् । पौरोहित्येन याज्यार्थे काव्यन्तूशनसं परे । ब्राह्मणौ तावुभौ नित्यमन्योन्यस्पर्द्धिनौ भृशम् । तत्र देवा निजघ्नु-र्यान् दानवान् युधि सङ्गतान् । तान् पुनर्जीवयामास काव्यो विद्याबलाश्रयात् । ततस्ते पुनरुत्थाय योधया-ञ्चक्रिरे सुरान् । असुरास्तु निजघ्नुर्यान् सुरान् सम-रमूर्द्धनि । न तान् संजीवयामास बृहस्पतिरुदा-रधीः । नहि वेद स तां विद्यां यां काव्यो वेत्ति वीर्य्य-वान् । सञ्जीवनीं ततो देवा विषादमगमन् परम् । ते तु देवा भयोद्विग्नाः काव्यादुशनसस्तदा । ऊचुः कचमुपा-गम्य ज्येष्ठं पुत्रं बृहस्पतेः । भजमानान् भजस्वास्मान् कुरु नः साह्यमुत्तमम् । या सा विद्या निवसति ब्राह्मणेऽ-मिततेजसि । शुक्रे तामाहर क्षिप्रं भागभाङ्नो भवि-ष्यसि । वृषपर्व्वसमीपे हि शक्यो द्रष्टुं त्वया द्विजः । रक्षते दानवांस्तत्र न स रक्षत्यदानवान् । तमारा-

धयितुं शक्तो भवान् पूर्व्ववयाः कविम्। देवयानीञ्च दयितां सुतां तस्य महात्मनः त्वमाराधयितुं शक्तो नान्यः कश्चन विद्यते। शीलदाक्षिण्यमाधुर्य्यैराचारेण दमेन च। देवयान्यां हि तुष्टायां विद्यां तां प्राप्स्यसि ध्रुवम्। तथेत्युक्त्वा ततः प्रायाद्बृहस्पतिसुतः कचः। तदाभिपूजितो देवैः समीपं वृषपर्व्वणः। स गत्वा त्वरितो राजन्! देवैः सम्प्रेषितः कचः। असुरेन्द्रपुरे शुक्रं दृष्ट्वा वाक्यमुवाच ह। ऋषेरङ्गिरसः पौत्रं पुत्रं साक्षात् बृहस्पतेः। नाम्ना कचमिति ख्यातं शिष्यं गृह्णातु मां भवान्। ब्रह्मचर्य्यं चरिष्यामि त्वय्यहं परमं गुरौ। अनुमन्यस्व मां ब्रह्मन्! सहस्रं परिवत्सरान्। शुक्र उवाच। कच! सुस्वागतं तेऽस्तु प्रतिगृह्णामि ते वचः। अर्च्चयिष्येऽहमर्च्च्यं त्वामर्च्चितोऽस्तु बृहस्पतिः। वैशम्पायन उवाच कचस्तु तं तथेत्युक्त्वा प्रतिजग्राह तद्व्रतम्। आदिष्टं कविपुत्त्रेण शुक्रेणोशनसा स्वयम्। व्रतस्य प्राप्तकालं स यथोक्तं प्रत्यगृह्णत। आराधयन्नुपाध्यायं देवयानीञ्च भारत!। नित्यमाराधयिष्यंस्तां युवा यौवनगोचरे। गायन् नृत्यन् वादयंश्च देवयानीमतोषयत्। स शीलयन् देवयानीं कन्यां सम्प्राप्तयौवनाम्। पुष्पैः फलैः प्रेषणैश्च तोषयामास भारत!। देवयान्यपि तं विप्रं नियमव्रतधारिणम्। गायन्ती च ललन्ती च रहः पर्य्यचरत्तदा। पञ्चवर्षशतान्येवं कचस्य चरतो व्रतम्। तत्रातीयुरथो बुद्ध्वा दानवास्तं ततः कचम्। गा रक्षन्तं वने दृष्ट्वा रहस्येकममर्षिताः। जघ्नुर्बृहस्पतेर्द्वेषाद्विद्यारक्षार्थमेव च। हत्वा शालावृकेभ्यश्च प्रायच्छल्लवशः कृतम्। ततो गावो निवृत्तास्ता अगोपाः स्वनिवेशनम्। ता दृष्ट्वा रहिता गाश्च कचेनाभ्यागता वनात्। उवाच वचनं काले देवयान्यथ भारत!। देवयान्युवाच। आहुतञ्चाग्निहोत्रन्ते सूर्य्यश्चास्तङ्गतः प्रभो!। अगोपाश्चागता गावः कचस्तात! न दृश्यते। व्यक्तं हतो मृतो वापि कचस्तात भविष्यति। तं विना न च जीवेयमिति सत्यं ब्रवीमि ते। शुक्र उवाच। अयमेहीति संशब्द्य मृतं संजीवयाम्यहम्। ततः सञ्जीवनीं विद्यां प्रयुज्य कचमाह्वयत्। आहूतः प्रादुरभवत् कचो हृष्टोऽथ विद्यया। हतोऽहमिति चाचख्यौ पृष्टो ब्राह्मणकन्यया। स पुनर्देवयान्योक्तः पुष्पाहारो यदृच्छया। वनं ययौ ततो विप्रो ददृशुर्दानवाश्च तम्। पुनस्तं पेषयित्वा तु समुद्राम्भस्यमिश्रयन्। चिरं गतं पुनः कन्या पित्रे तं समावेदयत्। विप्रेण पुनराहूतो विद्यया गुरुदेहजः। पुनरावृत्य तद्वृत्तं न्यवेदयत तद्यथा। ततस्तृतीयं हत्वा तं दग्ध्वा कृत्वा च चूर्णशः। प्रायच्छन् ब्राह्मणायैव सुरायामसुरास्तदा। देवयान्यथ भूयोऽपि पितरं वाक्यमब्रवीत्। पुष्पाहारः प्रेषणकृत् कचस्तात! न दृश्यते। शुक्र उवाच। बृहस्पतेः सुतः पुत्त्रि! कचः प्रेतगतिं गतः। विद्यया जीवितोऽप्येवं हन्यते करवाणि किम्। मैवं शुचो मा रुदो देवयानि! न त्वादृशी मर्त्यमनु प्रशोचेत्। यस्मात्तव ब्रह्म च ब्राह्मणाश्च सेन्द्रा देवा वसवोऽथाश्विनौ च। सुरद्विषश्चैव जगच्च सर्व्वमुपस्थाने सन्नमन्ति प्रभावात्। अशक्योऽसौ जीवयितुं द्विजातिः सञ्जीवितो बध्यते चैव भूयः। देवयान्युवाच। यस्याङ्गिरा वृद्धतमः पितामहो बृहस्पतिश्चापि पिता तपोनिधिः। ऋषेश्च पौत्त्रं तमथापि पुत्त्रं कथं न शोचेयमहं न रुद्याम्। स ब्रह्मचारी च तपोधनश्च सदोत्थितः कर्म्मसु चैव दक्षः। कचस्य मार्गं प्रतिपत्स्ये न भोक्ष्ये प्रियो हि मे तात! कचोऽभिरूपः। वैशम्पायन उवाच। स पीडितो देवयान्या महर्षिः समाह्वयत् संरम्भाच्चैव काव्यः। असंशयं मामसुरा द्विषन्ति ये मे शिष्यानागतान् सूदयन्ति। अब्राह्मणं कर्त्तुमिच्छन्ति रौद्रास्ते मां यथा प्रस्तुतं दानवैर्हि। अप्यस्य पापस्य भवेदिहान्तः कं ब्रह्महत्या न दहेदपीन्द्रम्। गुरोर्भीतो विद्यया चोपहूतः शनैर्वाचं जठरे व्याजहार। तमब्रवीत् केन पथोपनीतो ममोदरे तिष्ठसि ब्रूहि विप्र। कच उवाच। भवत्प्रसादान्न जहाति मां स्मृतिः स्मरामि सर्व्वं यच्च यथा च वृत्तम्। न त्वेवं स्यात्तपसः सङ्क्षयो मे क्लेशं ततो घोरमिमं सहामि। असुरैः सुरायां भवतोऽस्मि दत्तो हत्वा दग्ध्वा चूर्णयित्वा च काव्य!। ब्राह्मीं मायासुरी चैव माया त्वयि स्थिते कथमेवातिवर्त्तेत्। शुक्र उवाच। किन्ते प्रियं करवाण्यद्य वत्से! वधेन मे जीवित स्यात् कचस्य। नान्यत्र कुक्षेर्मम भेदनेन दृश्येत् कचो मद्गतो देवयानि!। देवयान्युवाच। द्वौ मां शोकावग्नितुल्यौ दहेतां कचस्य नाशस्तव चैवोपघातः। कचस्य नाशे मम नास्ति शर्म्म तवोपघाते जीवितुं नास्मि शक्ता। शुक्र उवाच। संसिद्धरूपोऽसि बृहस्पतेः सुत यत्त्वां भक्तं भजते देवयानी। विद्यामिमां प्राप्नुहि जीवनीं त्वं न चेदिन्द्रः कचरूपी त्वमद्य। न निवर्त्तेत् पुनर्ज्जीवन् कश्चिदन्यो ममोदरात्। ब्राह्मणं वर्ज्जयित्वैकं तस्माद्विद्यामवाप्नुहि। पुत्त्रो भूत्वा भावय भावितो मामस्माद्देहादुपनिष्क्रम्य तात!। समी-

श्चैषा धर्म्मवतीमवेत्त्यां गुरोः सकाशात् प्राप्य विद्यां सविद्यः। वैशम्पायन उवाच। गुरोः सकाशात् समवाप्य विद्यां भित्त्वा कुक्षिं निर्विचक्राम विप्रः। कचोऽभिरूपस्तत्क्षणं ब्राह्मणस्य शुक्लात्यये पौर्णमास्यामिवेन्दुः। दृष्ट्वा च तं पतितं ब्रह्मराशिमुत्थापयामास मृतं कचोऽपि। विद्यां सिद्धां तामवाप्याभिवाद्य कचस्ततस्तं गुरुमित्युवाच। यः श्रोत्रयोरमृतं सन्निषिञ्चेद्विद्यामविद्यस्य यथा ममायम्। तं मन्येऽहं पितरं मातरञ्च तस्मै न द्रुह्येत् कृतमस्य जानन्। ऋतस्य दातारमनुत्तमस्य निधिं निधीनां चतुरन्वयानाम्। ये नाद्रियन्ते गुरुमर्च्चनीयं पापाल्लोकांस्ते व्रजन्त्यप्रतिष्ठाः। वैशम्पायन उवाच। सुरापानाद्वञ्चनां प्राप्य विद्वान् संज्ञानाशं चैव महातिघोरम्। दृष्ट्वा कचञ्चापि तथाभिरूपं पीतं तथा सुरया मोहितेन। समन्युरुत्थाय महानुभावस्तदोशना विप्रहितं चिकीर्षुः। काव्यः स्वयं वाक्यमिदं जगाद सुरापानं प्रति वै जातशङ्कः। यो ब्राह्मणोऽद्यप्रभृतीह कश्चिन्मोहात् सुरां पास्यति मन्दबुद्धिः। अपेतधर्म्मो ब्रह्महा चैव स स्यादस्मिँल्लोके गर्हितः स्यात् परे च। मया चेमां विप्रधर्म्मोक्तिसीमां मर्य्यादां वै स्थापितां सर्व्वलोके। सन्तो विप्राः शुश्रुवांसो गुरूणां देवा लोकाश्चोपशृण्वन्तु सर्व्वे। इतीदमुक्त्वा स महानुभावस्तपोनिधीनां निधिरप्रमेयः। तान् दानवान् दैवविमूढबुद्धीनिदं समाहूय वचोऽभ्युवाच। आचक्षे वो, दानवा बालिशाः स्थ सिद्धः कचो वत्स्यति मत्सकाशे। सञ्जीवनीं प्राप्य विद्यां महार्थां तुल्यप्रभावो ब्राह्मणो ब्रह्मभूतः। वैशम्पायन उवाच। एतावदुक्त्वा वचनं विरराम स भार्गवः। दानवा विस्मयाविष्टाः प्रययुः स्वं निवेशनम्। गुरोरुष्य सकाशे तु दशवर्षशतानि सः। अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम्।

वैशम्पायन उवाच। समावृत्तव्रतं तन्तु विसृष्टं गुरुणा तदा। प्रस्थितं त्रिदशावासं देवयान्यब्रवीदिदम्। ऋषेरङ्गिरसः पौत्र! वृत्तेनाभिजनेन च। भ्राजसे विद्यया चैव तपसा च दमेन च। ऋषिर्यथाङ्गिरा मान्यः पितुर्म्मम महायशाः। तथा मान्यश्च पूज्यश्च मम भूयो बृहस्पतिः। एवं ज्ञात्वा विजानीहि यद्ब्रवीमि तपोधन!। व्रतस्थे नियमोपेते यथा वर्त्ताम्यहं त्वयि। स समावृत्तविद्यो मां भक्तां भजितुमर्हसि। गृहाण विधिवत् पाणिं मम मन्त्रपुरस्कृतम्। कच उवाच। पूज्यो मान्यश्च भगवान् यथा तव पिता मम। तथा त्वमनवद्याङ्गि! पूजनीयतरा मम। प्राणेभ्योऽपि प्रियतरा भार्गवस्य महात्मनः। त्वं भद्रे। धर्म्मतः पूज्या गुरुपुत्त्री सदा मम। यथा मम गुरुर्नित्यं मान्यः शुक्रः पिता तव। देवयानि! तथैव त्वं नैवं मां वक्तुमर्हसि। देवयान्युवाच। गुरुपुत्त्रस्य पुत्त्रो वै ननु त्वमपि मे पितुः। तस्मात् पूज्यश्च मान्यश्च ममापि त्वं द्विजोत्तम। असुरैर्हन्यमाने च कच! त्वयि पुनः पुनः। तदा प्रभृति या प्रीतिस्तां त्वमद्य स्मरस्व मे। सौहार्द्दे चानुरागे च वेत्थ मे भक्तिमुत्तमाम्। न मामर्हसि धर्म्मज्ञ। त्यक्तुं भक्तामनागसम्। कच उवाच। अनियोज्ये नियोगे मां नियुनक्षि शुभव्रते!। प्रसीद सुभ्रु! त्वं मह्यं गुरोर्गुरुतरा शुभे!। यत्रोषितं विशालाक्षि! त्वया चन्द्रनिभानने!। तत्राहमुषितो भद्रे! कुक्षौ काव्यस्य भाविनि!। भगिनी धर्म्मतो मे त्वं मैवं वोचः सुमध्यमे!। सुखमस्म्युषितो भद्रे न मन्युर्व्विद्यते मम। आपृच्छे त्वां गमिष्यामि शिवमाशंस मे पथि। अविरोधेन धर्म्मस्य स्मर्त्तव्योऽस्मि कथान्तरे। अप्रमत्तोत्थिता नित्यमाराधय गुरुं मम। देवयान्युवाच। यदि मां धर्म्मकामार्थे प्रत्याख्यास्यसि याचितः। ततः कच! न ते विद्या सिद्धिमेषा गमिष्यति। कच उवाच। गुरुपुत्त्रीति कृत्वाहं प्रत्याचक्षे न दोषतः। गुरुणा चाननुज्ञातः काममेवं शपस्व माम्। आर्षं धर्मं ब्रुवाणोऽहं देवयानि! यथा त्वया। शप्तो नार्होऽस्मि शापस्य कामतोऽद्य न धर्म्मतः। तस्माद्भवत्या यः कामो न तथा स भविष्यति। ऋषिपुत्त्रो न ते कश्चिज्जातु पाणिं ग्रहीष्यति। फलिष्यति न ते विद्या यत्त्वं मामात्थ तत्तथा। अध्यापयिष्यामि तु यं तस्य विद्या फलिष्यति। वैशम्पायन उवाच। एवमुक्त्वा द्विजश्रेष्ठो देवयानीं कचस्तदा। त्रिदशेशालयं शीघ्रं जगाम द्विजसत्तमः"।

कचग्रह पु० कचानां ग्रहोयत्र। केशाकर्षणेन धर्षणे "शापयन्त्रितपौलस्त्यबलात्कारकचग्रहैः" "अशंसीत रुदधुः कचग्रहैः" रघुः। [हृदस्थाने त्रिका०।

कचङ्गन न० कच–दीप्तौ अच् कर्म्म० शकन्ध्वा०। करशून्य

कचङ्गल पु० कच–बा० अङ्गलच्। समुद्रे त्रिका०।

कचप न० कच–कपन्। शाकपत्रे उज्ज्वलदत्तः।

कचपक्ष पु० कचानां समूहः कच+पक्ष। केशसमूहे अमरः एवं केशपक्षादयोऽप्यत्र।

कचपाश पु०कचानां समूहः कच+पाशप्। केशसमूहे अमर

एवं केशपाशादयोऽप्यत्र। "केशपाशे मनाये" विक्र० "तं केशपाशं प्रसमीक्ष्य कुर्य्युः" कुमा०।

कचमाल पु० कचं कचकान्तिं मलते मल–धृतौ अण्। उप०स०। धूमे हारा०।

कचरिपुफला स्त्री कचस्य रिपुः फलमस्याः। शठोद्वृक्षे राजनि०। [केशहस्तादयोऽप्यत्र।

कचहस्त पु० कचानां समूहः कच+हस्त। केशसमूहे अमरः

कचाकचि अव्य० कचेषु कचेषु गृहीत्वा प्रवृत्तं युद्धम् कर्म्मव्यतीहारे स० इच् समा० पूर्व्वदीर्घश्च। केशेषु केशेषु ग्रहणपूर्व्वके प्रवृत्ते युद्धे एवं केशाकेशिप्रभृतयोऽप्यत्र अव्य०।

कचाकु त्रि० कच इव अकति वक्रं गच्छति अक–उण्। १दुःशीले तस्य हि वक्रगतित्वात्तथात्वम् २सर्पे पु० ३दुराधर्षे त्रि० मेदि०। तयोः कुटिलगतित्वात् तथात्वम्।

कचाग्र न० ६त०। १केशाग्रभागे २तत्परिमिते त्रसरेणुष्टकभागे च। बालाग्रादयोऽप्यत्र "बालाग्रशतभागस्य शतधा कल्पितस्य च भागोजीवः स विज्ञेयः" श्रुतिः।

कचाचित त्रि० कचैरालुलायितैः आचितः। विकीर्णकेशे "कचाचितौ विष्वगिवागजौ गजौ" किरा०। [ङीप्।

कचाटुर पुंस्त्री कच इवाटति अट+उरच्। दात्यूहे स्त्रियां

कचामोद पु०कचमामोदयति आ+मुद-णिच्–अच्। (वाला) इति ख्याते गन्धद्रव्ये। [देशादौ।

कचिक त्रि० कच+चतुरर्थ्यां कुमुदा०ठक्। केशादूरभव-

कचु स्त्री कच–उन्। स्वनामख्याते कन्दभेदे "कदली दाडिमी धान्यं हरिद्रा मानकं कचुः। बिल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिकाः" दुर्गो०त०। कचुस्था कालिका।

कचेल न० कच्यते बध्यतेऽनेन कच–बा० एलच्। लेख्यपत्रबन्धने सूत्रादौ त्रिका०। [षिते मेदिन्यमरौ।

कच्चट न० कुत्सितं चटति चट-अच् बा० कोः कत्। कुत्-

कच्चर त्रि० कुत्सितं चरति चर–अच् कोः कत्। कुत्सिते मेदिन्यमरौ।

कच्चित् अव्य० काम्यते कम–णिच्–कन् चीयते निश्चीयते यस्मात् कम्+चि-क्विप् पृषो० मस्य दः। स्वाभिलषितज्ञापनाय कृते कामप्रवेदनरूपे १प्रश्ने, २हर्षे, ३मङ्गले च। कच्चिन्महर्षेस्त्रिविधं तपस्तत्""कच्चिदुपप्लवोवः"इति च रघुः।

कच्चिदध्याय पु० भारतान्तर्गते नारदेन कृतप्रश्नेन भङ्ग्या राजनीतिज्ञापके ग्रन्थभेदे स च भा०सभा०५अ०

"नारद उवाच। कच्चिदर्थाश्च कल्पन्ते धर्म्मे च रमते मनः। सुखानि चानुभूयन्ते मनश्च न विहन्यते। कच्चिदाचरितां पूर्व्वैर्नरदेव! पितामहैः। वर्त्तसे वृत्तिमक्षुद्रां धर्म्मार्थसहितां त्रिषु। कच्चिदर्थेन वा धर्म्मं धर्म्मेणार्थमथापि वा। उभौ वा प्रीतिसारेण न कामेन प्रबाधसे। कच्चिदर्थञ्च धर्म्मञ्च कामञ्च जयतां वर!। विभज्य काले कालज्ञ! समं वरद! सेवसे। कच्चिद्राजगुणैः षड्भिः सप्तोपायांस्तथानघ!। बलाबलेन सम्यक् त्वं चतुर्द्दश परीक्षसे। कच्चिदात्मानमन्वीक्ष्य परांश्च जयतां वर!। तथा सन्धाय कर्म्माणि अष्टौ भारत! सेवसे। कच्चित् प्रकृतयः सप्त न लुप्ता भरतर्षभ!। आढ्यास्तथा व्यसनिनः स्वनुरक्ताश्च सर्व्वशः। कच्चिन्न कृतकैर्दूतैर्ये चाप्यपरिशङ्किताः। त्वत्तो वा तव चामात्यैर्भिद्यते मन्त्रित तथा। मित्रोदासीनशत्रूणां कच्चिद्वेत्सि चिकीर्षितम। कच्चित् सन्धिं यथाकालं विग्रहं चोपसेवसे। कच्चिद्वृत्तिमुदासीने मध्यमे चानुमन्यसे। कच्चिदात्मसमा वृद्धाः शुद्धाः सम्बोधनक्षमाः। कुलीनाश्चानुरक्ताश्च कृतास्ते वीर! मन्त्रिणः। विजयो मन्त्रमूलो हि राज्ञो भवति भारत!। कच्चित् संवृतमन्त्रैस्ते अमात्यैः शास्त्रकोविदैः। राष्ट्रं सुरक्षितं तात! शत्रुभिर्न विलुप्यते। कच्चिन्निद्रावशं नैषि कच्चित् कालेऽपि बुध्यसे। कच्चिच्चापररात्रेषु चिन्तयस्यर्थमर्थवित्। कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह। कच्चित्ते मन्त्रितो मन्त्रो न राष्ट्रं परिधावति। कच्चिदर्थान् विनिश्चित्य लघुमूलान् महोदयान्। क्षिप्रमारभसे कर्त्तुं न विघ्नयसि तादृशान्। कच्चिन्न सर्व्वे कर्म्मान्ताः परोक्षास्ते विशङ्किताः। सर्व्वे वा पुनरुत्सृष्टाः संसृष्टं चात्र कारणम्। आप्तैरलुब्धैः क्रमिकैस्ते च कच्चिदनुष्ठिताः। कच्चिद्राजन्! कृतान्येव कृतप्रायाणि वा पुनः। विदुस्ते वीर! कर्म्माणि नानवाप्तानि कानि चित्। कच्चित् कारणिका धर्म्मे सर्व्वशास्त्रेषु कोविदाः। कारयन्ति कुमारांश्च योधमुख्यांश्च सर्व्वशः। कच्चित् सहस्रैर्मूर्खाणामेकं क्रीणासि पण्डितम्। पण्डितो ह्यर्थकृच्छ्रेषु कुर्य्यान्निःश्रेयसं परम्। कच्चिद्दुर्गाणि सर्व्वाणि धनधान्यायुधोदकैः। यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्द्धरैः। एकोऽप्यमात्यो मेधावी शूरो दान्तो विचक्षणः। राजानं राजपुत्त्रं वा प्रापयेन्महतीं श्रियम्। कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च। त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः। कच्चिद्द्विषामविदितः प्रतिपन्नश्च सर्व्वदा। नित्योद्युक्तो रिपून् सर्व्वान् वीक्षसे रिपुसूदन!। कच्चिद्विनयसम्पन्नः कुलपुत्त्रो बहुश्रुतः। अनसूयुरसङ्कीर्णः सत्कृतस्ते पुरोहितः।

कच्चिदग्निषु ते युक्तो विधिज्ञो मतिमानृजुः । हुतञ्च होष्यमाणञ्च काले वेदयते सदा । कच्चिदङ्गेषु निष्णातो ज्योतिषः प्रतिपादकः । उत्पातेषु हि सर्व्वेषु दैवज्ञः कुशलस्तव । कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः । जघन्याश्च जघन्येषु भृत्याः कर्म्मसु योजिताः । अमात्यानुपधातीतान् पितृपैतामहान् शुचीन् । श्रेष्ठान् श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्म्मसु । कच्चिन्नोग्रेण दण्डेन भृशमुद्विजसे प्रजाः । राष्ट्रं तवानुशासन्ति मन्त्रिणो भरतर्षभ ! । कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा । उग्रं प्रतिग्रहीतारं कामयानमिव स्त्रियः । कच्चिद्धृष्टः शूरश्च मतिमान् धृतिमान् शुचिः । कुलीनश्चानुरक्तश्च दक्षः सेनापतिस्तव । कच्चिद्बलस्य ते मुख्याः सर्व्वयुद्धविशारदाः । धृष्टावदाता विक्रान्तास्त्वया सत्कृत्य मानिताः । कच्चिद्बलस्य भक्तञ्च वेतनञ्च यथोचितम् । संप्राप्तकाले दातव्यं ददासि न विकर्षसि । कालातिक्रमणादेते भक्तवेतनयोर्भृताः । भर्त्तुः कुप्यन्ति दौर्गत्यात् सोऽनर्थः सुमहान् स्मृतः । कच्चित् सर्व्वेऽनुरक्तास्त्वां कुलपुत्राः प्रधानतः । कृष्टाः प्राणांस्तवार्थेषु संत्यजन्ति सदा युधि । कच्चिन्नैको बहूनर्थान् सर्व्वशः साम्परायिकान् । अनुशास्ति यथाकामं कामात्मा शासनातिगः । कच्चित् पुरुषकारेण पुरुषः कर्म्म शोभयन् । लभते मानमधिकं भूयो वा भक्तवेतनम् । कच्चिद्विद्याविनीतांश्च नरान् ज्ञानविशारदान् । यथार्हं गुणतश्चैव दानेनाभ्युपपद्यसे । कच्चिद्दारान् मनुष्याणां तवार्थे मृत्युमीयुषाम् । व्यसनं चाभ्युपेतानां बिभर्षि भरतर्षभ ! । कच्चिद्भयादुपगतं क्षीणं वा रिपुमागतम् । युद्धे वा विजितं पार्थ ! पुत्रवत् परिरक्षसि । कच्चित्त्वमेव सर्व्वस्याः पृथिव्याः पृथिवीपते ! । समश्चानभिशङ्क्यश्च यथा माता यथा पिता । कच्चिद्व्यसनिनं शत्रुं निशम्य भरतर्षभ ! । अभियासि जवेनैव समीक्ष्य त्रिविधं बलम् । यात्रामारभसे दिष्ट्या प्राप्तकालमरिन्दम ! । पार्ष्णिमूलञ्च विज्ञाय व्यवसायं पराजयम् । बलस्य च महाराज ! दत्त्वा वेतनमग्रतः । कच्चिच्च बलमुख्येभ्यः परराष्ट्रे परन्तप ! । उपच्छन्नानि रत्नानि प्रयच्छसि यथार्हतः । कच्चिदात्मानमेवाग्रे विजित्य विजितेन्द्रियः । परान् जिगीषसे पार्थ ! प्रमत्तानजितेन्द्रियान् । कच्चित्ते यास्यतः शत्रून् पूर्व्वं यान्ति स्वनुष्ठिताः । साम दानञ्च भेदश्च दण्डश्च विधिवद्गुणाः । कच्चिन्मूलं दृढं कृत्वा परान् यासि विशाम्पते ! । तांश्च विक्रमसे जेतुं जित्वा च परिरक्षसि । कच्चिदष्टाङ्गसंयुक्ता चतुर्व्विधबला चमूः । बलमुख्यैः सुनीता ते द्विषतां प्रतिबाधिनी । कच्चिल्लवञ्च मुष्टिञ्च परराष्ट्रे परन्तप ! । अविहाय महाराज ! निहंसि समरे रिपून् । कच्चित् स्वपरराष्ट्रेषु बहवोऽधिकृतास्तव । अर्थान् समधितिष्ठन्ति रक्षन्ति च परस्परम् । कच्चिदभ्यवहार्य्याणि गात्रसंघर्षणानि च । घ्रेयाणि च महाराज ! रक्षन्त्यनुमतास्तव । कच्चित् कोषश्च कोष्ठञ्च वाहनं द्वारमायुधम् । आयश्च कृतकल्याणैस्तव भक्तैरनुष्ठितः । कच्चिदाभ्यन्तरेभ्यश्च बाह्येभ्यश्च विशाम्पते ! । रक्षस्यात्मानमेवाग्रे तांश्च स्वेभ्यो मिथश्च तान् । कच्चिन्न पाने द्यूते वा क्रीडासु प्रमदासु च । प्रतिजानन्ति पूर्व्वाह्णे व्ययं व्यसनजं तव । कच्चिदायस्य चार्द्धेन चतुर्भागेण वा पुनः । पादभागैस्त्रिभिर्व्वापि व्ययः संशोध्यते तव । कच्चिज्ज्ञातीन् गुरून् वृद्धान् वणिजः शिल्पिनः श्रितान् । अभीक्ष्णमनुगृह्णासि धनधान्येन दुर्गतान् । कच्चिच्चायव्यये युक्ताः सर्व्वे गणकलेखकाः । अनुतिष्ठन्ति पूर्व्वाह्णे नित्यमायव्ययं तव । कच्चिदर्थेषु संप्रौढान् हितकामाननुप्रियान् । नापकर्षसि कर्म्मभ्यः पूर्व्वमप्राप्य किल्विषम् । कच्चिद्विदित्वा पुरुषानुत्तमाधममध्यमान् । त्वं कर्म्मस्वनुरूपेषु नियोजयसि भारत ! । कच्चिन्न लुब्धाश्चौरा वा वैरिणो वा विशाम्पते ! । अप्राप्तव्यवहारा वा तव कर्म्मस्वनुष्ठिताः । कच्चिन्न चौरैर्लुब्धैर्वा कुमारैः स्त्रीबलेन वा । त्वया वा पीड्यते राष्ट्रं कच्चित्तुष्टाः कृषीवलाः । कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहन्ति च । भागशो विनिविष्टानि न कृषिर्देवमातृका । कच्चिन्न बीजं भक्तञ्च कर्षकस्यावसीदति । पादिकञ्च शतं वृद्ध्या ददास्यृणमनुग्रहम् । कच्चित् स्वनुष्ठिता तात ! वार्त्ता ते साधुभिर्ज्जनैः । वार्त्तायां संश्रितस्तात लोकोऽयं सुखमेधते । कच्चिच्छूराः कृतप्रज्ञाः पञ्च पञ्च स्वनुष्ठिताः । क्षेमं कुर्व्वन्ति संहत्य राजन् ! जनपदे तव । कच्चिन्नगरगुप्त्यर्थं ग्रामा नगरवत् कृताः । ग्रामवच्च कृताः प्रान्तास्ते च सर्व्वे त्वदर्पणाः । कच्चिद्बलेनानुगताः समानि विषमाणि च । पुराणि चौरा निघ्नन्तश्चरन्ति विषये न ते । कच्चित् स्त्रियः सान्त्वयसि कच्चित्ताश्च सुरक्षिताः । कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे । कच्चिदात्ययिकं श्रुत्वा तदर्थमनुचिन्त्य च । प्रियाण्यनुभवन् शेषे न त्वमन्तःपुरे नृप ! । कच्चित् द्वौ प्रथमौ यामौ रात्रेः सुप्त्वा विशाम्पते ! । संचिन्तयसि

धर्म्मार्थौ याम उत्थाय पश्चिमे । कच्चिदर्थयसे नित्यं मनुष्यान् समलङ्कृतः । उत्थाय काले कालज्ञैः सह पाण्डव ! मन्त्रिभिः । कच्चिद्रक्ताम्बरधराः खड्गहस्ताः स्वलङ्कृताः । उपासते त्वामभितो रक्षणार्थमरिन्दम ! । कच्चिद्दण्ड्येषु यमवत् पूज्येषु च विशाम्पते ! । परीक्ष्य वर्त्तसे सम्यगप्रियेषु प्रियेषु च । कच्चिच्छारीरमाबाधमौषधैर्नियमेन वा । मानसं वृद्धसेवाभिः सदा पार्थापकर्षसि । कच्चिद्वैद्याश्चिकित्सायामष्टाङ्गायां विशारदाः । सुहृदश्चानुरक्ताश्च शरीरे ते हिताः सदा । कच्चिन्न लोभान्मोहाद्वा मानाद्वापि विशाम्पते ! । अर्थिप्रत्यर्थिनः प्राप्तान् पश्यसि कथञ्चन । कच्चिन्न लोभान्मोहाद्वा विश्रम्भात् प्रणयेन वा । आश्रितानां मनुष्याणां वृत्तिं त्वं संरुणत्सि वै । कच्चित् पौरा न सहिता ये च ते राष्ट्रवासिनः । त्वया सह विरुध्यन्ते परैः क्रीताः कथञ्चन । कच्चिन्न दुर्ब्बलः शत्रुर्बलेन परिपीडितः । मन्त्रेण बलवान् कच्चिदुभाभ्याञ्च कथञ्चन । कच्चित् सर्व्वेऽनुरक्तास्त्वां भूमिपालाः प्रधानतः । कच्चित् प्राणांस्त्वदर्थेषु संत्यजन्ति त्वयादृताः । कच्चित्ते सर्व्वविद्यासु गुणतोऽर्च्चा प्रवर्त्तते । ब्राह्मणानाञ्च साधूनां तव निःश्रेयसी शुभा । कच्चिद्धर्म्मे त्रयीमूले पूर्व्वैराचरिते जनैः । यतमानस्तथा कर्त्तुं तस्मिन् कर्म्मणि वर्त्तसे । कच्चित्तव गृहेऽन्नानि स्वादून्यश्नन्ति वै द्विजाः । गुणवन्ति गुणोपेतास्तवाध्यक्षं सदक्षिणम् । कच्चित् क्रतूनेकचित्तो वाजपेयांश्च सर्व्वशः । पुण्डरीकांश्च कार्त्स्न्येन यतसे कर्त्तुमात्मवान् । कच्चिज्ज्ञातीन् गुरून् वृद्धान् दैवतांस्तापसानपि । चैत्यांश्च वृक्षान् कल्याणान् ब्राह्मणांश्च नमस्यसि । कच्चिच्छोको न मन्युर्व्वा त्वया प्रोत्पाद्यतेऽनघ ! । अपि मङ्गलहस्तश्च जनः पार्श्वेऽनुतिष्ठति । कच्चिदेषा च ते बुद्धिर्वृत्तिरेषा च तेऽनघ । आयुष्या च यशस्या च धर्म्मकामार्थदर्शिनी । एतया वर्त्तमानस्य बुद्ध्या राष्ट्रं न सीदति । विजित्य च महीं राजा सोऽत्यन्तं सुखमेधते । कच्चिदार्य्यो विशुद्धात्मा क्षारितश्चौरकर्म्मणि । अदृष्टशास्त्रकुशलैर्न लोभाद्बध्यते शुचिः । दुष्टो गृहीतस्तत्कारी तज्ज्ञैर्दृष्टः सकारणः । कच्चिन्न मुच्यते स्तेनो द्रव्यलोभान्नरर्षभ ! । उत्पन्नान् कच्चिदाढ्यस्य दरिद्रस्य च भारत ! अर्थान्न मिथ्या पश्यन्ति तवामात्या हृता धनैः । नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् । अदर्शनं ज्ञानवतामालस्यक्षिप्तचित्तताम् । एकचिन्तनमर्थानामनर्थज्ञैश्च चिन्तनम् । निश्चितानामनारम्भं मन्त्रस्यापरिरक्षणम् । अमङ्गल्यप्रयोगञ्च प्रसङ्गं विषयेषु च । कच्चित्त्वं वर्ज्जयस्येतान् राजदोषांश्चतुर्द्दश । प्रायशो यैर्विनश्यन्ति कृतमूला हि पार्थिवाः । कच्चित्ते सफला वेदाः कच्चित्ते सफलं धनम् । कच्चित्ते सफला दाराः कच्चित्ते सफलं श्रुतम् । युधिष्ठिर उवाच । कथं वै सफला वेदाः कथं वै सफलं धनम् । कथं वै सफला दाराः कथं वै सफलं श्रुतम् । नारद उवाच । अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् । रतिपुत्त्रफला दाराः शीलवृत्तफलं श्रुतम् । वैशम्पायन उवाच । एतदाख्याय स मुनिर्नारदो वै महातपाः । पप्रच्छानन्तरमिदं धर्म्मात्मानं युधिष्ठिरम् । नारद उवाच । कच्चिदभ्यागता दूराद्वणिजो लाभकारणात् । यथोक्तमवहार्य्यन्ते शुल्कं शुल्कोपजीविभिः । कच्चित्ते पुरुषा राजन् पुरे राष्ट्रे च मानिताः । उपानयन्ति पण्यानि उपधाभिरवञ्चिताः । कच्चिच्छृणोषि वृद्धानां धर्म्मार्थसहिता गिरः । नित्यमर्थविदां तात ! तथा धर्मार्थदर्शिनाम् । कच्चित्ते कृषितन्त्रेषु गोषु पुष्पफलेषु च । धर्मार्थञ्च द्विजातिभ्यो दीयते मधुसर्पिषी । द्रव्योपकरणं किञ्चित् सर्व्वदा सर्व्वशिल्पिनाम् । चातुर्म्मास्यावरं सम्यक् नियतं संप्रयच्छसि । कच्चित् कृतं विजानीषे कर्त्तारञ्च प्रशंससि । सतां मध्ये महाराज ! सत्करोषि च पूजयन् । कच्चित् सूत्राणि सर्व्वाणि गृह्णासि भरतर्षभ ! । हस्तिसूत्राश्वसूत्राणि रथसूत्राणि वा विभो । कच्चिदभ्यस्यते सम्यग्गृहे ते भरतर्षभ ! । धनुर्व्वेदस्य सूत्रं वै यन्त्रसूत्रञ्च नागरम् । कच्चिदस्त्राणि सर्व्वाणि ब्रह्मदण्डश्च तेऽनघ । विषयोगास्तथा सर्व्वे विदिताः शत्रुनाशनाः । कच्चिदग्निभयाच्चैव सर्व्वं व्यालभयात्तथा । रोगरक्षोभयाच्चैव राष्ट्रं स्वं परिरक्षसि । कच्चिदन्धांश्च मूकांश्च पङ्गून् व्यङ्गानबान्धवान् । पितेव पासि धर्म्मज्ञ ! तथा प्रव्रजितानपि । षडनर्था महाराज ! कच्चित्ते पृष्ठतः कृताः । निद्रालस्यं भयं क्रोधो मार्द्दवं दीर्घसूत्रता । वैशम्पायन उवाच । एताः कुरूणामृषभो महात्मा श्रुत्वा गिरो ब्राह्मणसत्तमस्य । प्रणम्य पादावभिवाद्य तुष्टो राजाब्रवीन्नारदं देवरूपम् । युधिष्ठिर उवाच । एवं करिष्यामि यथा त्वयोक्तं प्रज्ञा हि मे भूय एवाभिवृद्धा । उक्त्वा तथा चैव चकार राजा लेभे महीं सागरमेखलाञ्च” ।

कच्छः त्रि० केन जलेन छृणाति दीप्यते छाद्यते वा छृ—छद—बा० ड । जलप्राये देशे । “स्वच्छन्दोच्छलदच्छ-

कच्छकुहरच्छातेतराम्बुच्छटा" काव्यप्र० "चमूचरैः कच्छभुवां प्रदेशः" माघः। २तटे ३नौकाङ्गे च पु० ४परिधानाञ्चले, स्त्री (काछा) हेम० ५वाराह्याम्, ६चीरिकायाञ्च (झिल्लि) स्त्री मेदि० ७देशभेदे पु०स च देशः वृह० सं० कूर्म्मविभागे दक्षिणस्यां दिशि उक्तः "अथ दक्षिणेन लङ्केत्युपक्रम्य" कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः" तत्सीमा च "गणेश्वरात् पूर्व्वभागे समुद्रस्योत्तरे तटे । कच्छदेशः समाख्यातः" शक्तिसङ्गम० त० उक्ता । ८तुन्नवृक्षे पु० (तुँद) हेम०। ९मुखसम्पुटे १०आकाशाच्छादने ११कूर्म्मकर्परे च निरु० कच्छपशब्दे विवृतिः कक्षाशब्दे उदा०।

कच्छक पु० कच्छ+संज्ञायां कन्। तुन्नवृक्षे (तुँद) मेदिनिः

कच्छटिका स्त्री कच्छः कच्छप्रदेशमटति अट—अच् शक० संज्ञायां कन् अत इत्त्वम् । १कच्छायाम् (काछा) २वस्त्राञ्चले" शब्दार्थर० ।

कच्छप पुंस्त्री "कच्छमात्मनो मुखसंपुटं पाति यद्दि किञ्चिद्दृष्ट्वा शरीर एव मुखसम्पुटं प्रवेशयति संपुटे हि कच्छशब्दः प्रसिद्धः प्राणिवाच्यकच्छपुट इति । कच्छेन कटाहेन (कर्परेण) इतराङ्गाणि पाति वा । अथ वा कच्छेन मुखसम्पुटेन पिबतीति कच्छः खमाकाशं छादयतिः कच्छः । खच्छः खच्छदः अयमपीतरो नदीकच्छ एतदीयमुदकं तेन च्छाद्यते" इति च निरुक्तोक्तेः कच्छं पाति कच्छेन पाति वा कच्छेन पिबतीति वा पा—ड । १कूर्म्मे स्त्रियां जातित्वात् ङीष् सा च २वीणाभेदे ३कच्छपस्त्रियाञ्च । ४क्षुद्ररोगभेदे स्त्री ५कुबेरनिधिभेदे ६मल्लबन्धभेदे च पु० मेदि० । कच्छपीरोगश्च भाव० प्रका० दर्शितः "ग्रथिताः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः । कफानिलाभ्यां पिडकाः सा स्मृता कच्छपी बुधैः" कच्छपोन्नता मध्ये प्रोन्नता प्रान्ते नता । इयञ्च प्रमेहरोगोपेक्षायां दशविधपिडकान्तर्गता । निधिभेदः एकादिशब्दे नवसंख्यायां दर्शितस्तत्र द्रष्टव्यः । स्वार्थे कन् कच्छपिकाऽपि रोगभेदे । "सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः" वैद्यकम् । कच्छपमांसगुणाः भावप्र० उक्ताः "कच्छपो बलदो वातपित्तनुत् पुंस्त्वकारकः" । अयञ्च भक्ष्यपञ्चनखान्तर्गतः "शशकः शल्लकी गोधा खड्गी कूर्म्मश्च पञ्चमः । भक्ष्याः पञ्चनखेष्वेते" इति मनूक्तेः "पञ्च पञ्चनखान् भुञ्जीतेति" श्रुतिः । अत्र परिसंख्यैतदतिरिक्तपञ्चनखानां भोजननिवृत्तिफलकत्वादित्याकरे स्पष्टम् । समुद्रमन्थनकाले एतद्रूपी मन्दरधारणार्थं भगवानवततार यथाह भाग० १,३अ० भगवतश्चतुर्विंशत्यवतारकथने । "सुरासुराणामुदधिं मथ्नतां मन्दराचलम् । दध्रे कमठरूपेण पृष्ठ एकादशे विभुः।" १७श्लो०। "मथ्यमानेऽर्णवे सोऽद्रिरनाधारोह्यपोऽविशत् । ध्रियमाणोऽपि बलिभिर्गौरवात् पाण्डुनन्दन ! । ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः । आसन् स्वपौरुषे नष्टे दैवेनातिबलीयसा । विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्य्योऽवितथाभिसन्धिः। कृत्वा वपुः काच्छपमद्भुतं महत् प्रविश्य तोयं गिरिमुज्जहार । समुत्थितं वीक्ष्य कुलाचलं पुनः समुद्यता निर्म्मथने सुरासुराः । दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् । सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं परिभ्रमन्तं गिरिमङ्ग पृष्ठतः। बिभ्रत्तदावर्त्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेयः" भाग० ८,७, ७विश्वामित्रसुते मुनिभेदे क॰शब्दे प्रमाणम् ।

कच्छरुहा स्त्री कच्छे जलप्राये रोहति रुह—क । दूर्व्वायाम् जटाधरः तस्या जलप्रायदेशभवत्वात्तथात्वम् ।

कच्छादि पु० पाणिन्युक्ते जातार्थे अण्प्रत्ययनिमित्ते शब्दगणे स च गणः "कच्छ सिन्धु वर्णु गन्धार मधुमत् कम्बोज कश्मीर साल्व कुरु अनुषण्ड द्वीप अनूप अजवाह विजापक कुलून रङ्कु, एते च देशविशेषवाचकाः तत्र जातादि अण् काच्छ इत्यादि ।

कच्छु (च्छू) स्त्री कष—हिंसायां "कषच्छश्चेति" उणा० ऊ वृषो० वा ह्रस्वः । "सूक्ष्मा बाह्याः पिडकाः स्राववत्यः पामेत्युक्ताः कण्डुमत्यः सदाहाः । सैव स्फोटैस्तीव्रदाहैरुपेता ज्ञेया पाण्योः कच्छूरुग्रा स्फिचोश्च" उक्ते रोगभेदे (खोस) । [भेदे पटोले राजनि०

कच्छुघ्नी स्त्री कच्छुं हन्ति हन—टक् ङीप् ह्रस्वश्च। हपुषा-

कच्छुर त्रि० कच्छूरस्त्यस्य र "कच्छ्वा ह्रस्वश्च" पा० ह्रस्वः । रविधौ दीर्घप्रयोगार्थं ह्रस्वविधिः १कच्छूरोगयुते २व्यभिचारयुते पुरुषे च पु० ३पामरे त्रि० मेदि०।

कच्छुरा स्त्री कच्छुः साध्यत्वेनास्त्यस्याम् ह्रस्वश्च । १शूकशिम्ब्याम् २शठ्याम् ३दुरालभायाञ्च मेदि० ४धान्यभेदे? ४पाश्यपोद्दृक्षे

कच्छुराक्षस न० "दन्ती निम्बदलञ्चैभिः पृथक्कर्षमितैर्भिषक्। कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितैः । अर्कस्नुह्योश्च दुग्धेन पृथक्पलमितेन च । गोमूत्रस्याढकेनापि शनैर्मृद्वग्निना पचेत् । अभ्यङ्गेन हरेदेतत् कच्छुं साध्यतामपि पामानञ्च तथा कण्डूं त्वग्व्याधिमधिरामयान् ।

कच्छुराक्षसनाशनं तैलं हारीतभाषितम्” इति भावप्रकाशोक्ते तैलभेदे।

कच्छुमती स्त्री कच्छुः साधनत्वेनास्त्यस्याः मतुप् ङीप्। स्वर्णशिम्ब्याम् तत्सेवनेहि कच्छूरोगजननात् तथात्वम्

कच्छोटिका स्त्री कच्छस्य उटस्तृणादिकमिव इवार्थे कन्। चेलाञ्चले (काछा) हेमच०। [शय्याम् रत्नमाला।

कच्छोर पु० केन च्छुर्य्यते छुर–लेपे कर्म्मणि घञ्।

कच्ची स्त्री कचु वा०ङीप्। (कचु) प्रसिद्धे कन्दभेदे। “महिषासुरयुद्धेषु कच्चीरूपासि सुव्रते !। मम वैरिविनाशाय पूजां गृह्ण प्रसीद मे “दुर्गार्चापद्धतिस्थ तत्पूजामन्त्रः। “कच्ची तु भेदिका गुर्व्वी कटुका पिच्छिला तथा। आमवातपित्तकरी भिषग्भिः परिकीर्त्तिता” राजवल्लभः।

कज रोदे (सौत्रः) इदित् पर०अक०सेट्। कञ्जति अकञ्जीत् चकञ्ज रोदोऽत्र जन्म तेनास्याकर्म्मकता। कञ्जारः।

कज न० के जले जायते जन–ड। पङ्कजे राजनि०।

कज्जल न० कुत्सितं जलमस्मात् कोः कद्। अञ्जने (काजल) तस्य संयोगाच्छुभ्रमप्युदकमसितं भवतीति तस्य तथात्वम् अञ्जनशब्दे ८४ पृ० विवृतिः। “सकज्जलं ताम्रघटे च घृष्टं सर्पियुतं तुत्थकमञ्जनञ्च” सुश्रु०। “गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः” काव्यप्र०। २लेखनसाधने द्रव्ये च (कालि) “असितगिरिनिभं स्यात् कज्जलं सिन्धुपात्रम्”पुष्पदन्तस्तवः। मेघे पु०शब्दमा० मत्स्यभेदे पुंस्त्री स्त्रियां गौ०ङीष्। शब्दर०। कज्जलं जातमस्य इतच्। कज्जलित जातकज्जले त्रि०। वमध्योऽपि एकाक्षरकोषेऽयं पठितः कज्जलमिवाचरति कज्जल+क्विप् ततः अच् गौरा०ङीष् ५भिश्रितरसगन्धके स्त्री। स्वार्थे कन् तत्रार्थे “शुद्धं सूतं तथा गन्धं खल्ले तावद् विमर्दयेत्। यावत् सूतं न दृश्येत किन्तु कज्जलवत् भवेत्। एषा कज्जलिका ख्याता दृंहणी वीर्य्यवर्द्धिनी। मात्रानुपानयोगेन सर्वव्याधिविनाशिनी” वैद्यकम्।

कज्जलध्वज पु० कज्जलं ध्वज इवास्य। दीपे त्रिका०।

कज्जलरोचक पु न० कज्जलं रोचयति रुच–णिच्–अच्। (पिलसुज)। वङ्गभाषायां प्रसिद्धे। दीपाधारे जटाध०

कञ्चट न० कचि–अटच्। (काचड़ादाम) जलतण्डुलीये जलजशाकभेदे “पानीयतण्डुलीयोयस्तृकञ्चटसदाहृतम्। कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु। (चकराद) (हिन्दिभाषा) भावप्र०।

कञ्चटादि न० चक्रदत्तोक्ते अतीसारवेगरोधके औषधभेदे “कञ्चटजम्बुदाडिमशृङ्गाटकपत्रबिल्वह्रीवेरम्। जलध्वनिगतसहितं गङ्गावेगमपि रुन्ध्यात्”।

कञ्चड पु० कचि–वा०अडन्। चक्रमर्द्दनद्वक्षे शब्दचन्द्रिका

कञ्चार पु० कचि–भावे घञ् कञ्चं प्रकाशमृच्छति ऋ–अण् कं जलं चारयति किरणेन चर–णिच् अण् वा। सूर्य्ये जटाधरः। २अर्कवृक्षे च। [२क्षुद्रस्फोटे वैद्यकम्।

कञ्चिका स्त्री कचि–ण्वुल्।१वंशशाखायाम् (कञ्ची) शब्दच०

कञ्चुक पु०कचि–दीप्तिबन्धयोः वा०उकन्। १वारबाणे २योधादेर्वाणाङ्कितसन्नाहे ३लौहमये कवचे ४सर्पनिर्म्मोके (खोलस)अमरः४चोलके(काचुलि)५वस्त्रमात्रे उणा०को० ६वर्द्धापकगृहीताङ्गस्थितवस्त्रे (पुत्रादेर्जन्मोत्सवे भृत्यादिभिः स्वामिनोऽङ्गात् बलत्कारेण गृहीते वस्त्रे) हेमच०।७ओषधीभेदे स्त्री गौरा० ङीष् मेदि०। ८क्षीरीशवृक्षे रत्नमा० “बलानि शूराश्च घनाश्च कञ्चुकाः “घनसंवृतकञ्चुकः कश्चिदिभेन्द्रगजाजिनकञ्चुकः” माघः “अन्तःकञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः”रत्ना०। “सख्यं किं करवाणि यान्ति शतधा यत् कञ्चुके सन्धयः” अमरुश०। “सुभाषितरसास्वादजातरोमाञ्चकञ्चुकाः” पञ्चतन्त्रम्। “कञ्चुकं तूलगर्भञ्च तूलिकां सूपवीतिकाम् काशी०। सोऽस्य जातः तारका० इतच्। कञ्चुकित जातकञ्चुके त्रि०।

कञ्चुकालु पु० कञ्चुकोऽस्त्यस्य आलुच्। सर्पे शब्दच०।

कञ्चुकिन् पु० कञ्चुक+अस्त्यर्थे इनि। “अन्तःपुरचरोवृद्धो विप्रो गुणगणान्वितः। सर्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते” इत्युक्तलक्षणे १राज्ञामन्तःपुराधिकारिणि “अन्तःकञ्चुकिकञ्चुकस्य” रत्ना०। २द्वारपाले, ३सर्पे ४जारे, ५यवे, ६चणके च राजनि०। सुपक्वपकञ्चुकावृतत्वात्तयोस्तथात्वम्। ७आवद्धकवचे त्रि०

कञ्चुलिका स्त्री कचि–उलच् गौरा०ङीष् स्वार्थे कन् ह्रस्वे टाप्। स्त्रीणां कूर्पासवस्त्रे(काँचली)हेम०“त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीम् लक्ष्मीमित्यभिधायिनि प्रियतमे”सा०द०। कनभावे। कञ्चुलीत्यप्यत्र।

कञ्चूल न० कचि-दीप्तौ ऊलच्। स्त्रीगात्राभरणे उज्ज्व०

कञ्ज पु० कम् जले जायते। चतुरानने हिरण्यगर्भे “अप एव ससर्ज्जादौ तासु वीजमवासृजत्” “तस्मिन् जज्ञे स्वयं ब्रह्मा” मनूक्तेस्तस्य जलेजातत्वात्तथात्वम्। २पद्मे “चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरम्” भाग०३,२,८। २अमृते च न० मेदिनिः। तत्र पद्मस्य जलजातत्वात् अमृतस्य समुद्रोत्पन्नत्वात्तथात्वम् अमृतशब्दे विवृतिः। कम्

शिरसि जायते जन कर्त्तरि—ड । ४केशे पु० मेदिनिः ।

कञ्जक पुंस्त्री कजि-सौत्रधातुः ण्वुल् । (मयना) पक्षिभेदे शब्दच० । स्त्रियां जातित्वात् ङीष् ।

कञ्जज पु० कञ्जात् विष्णुनाभिपद्मात् जायते जन—ड । हिरण्यगर्भे चतुर्मुखे ब्रह्मणि शब्दरत्ना० । यथा च ब्रह्मणो विष्णुनाभिजातकमलादुद्भवस्तथा वर्णितं भाग० ३,८,१८,श्लो० "सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः । उवास तस्मिन् सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः । चतुर्युगानाञ्च सहस्रमप्सु स्वपन् स्वयोदीरितया स्वशक्त्या । कालाख्ययासादितकर्मतन्त्रो लोकानपीतान् ददृशे स्वदेहे । तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् । गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् । स पद्मकोषः सहसोदतिष्ठत् कालेन कर्मप्रतिबोधितेन । स्वरोचिषा तत् सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः । तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत् सर्वगुणावभासम् । तस्मिन् स्वयं वेदमयो विधाता स्वयम्भुवं यं प्रवदन्ति सोऽभूत् । तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः । परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि । तस्मात् युगान्तश्वसनावघूर्णजलोर्मिचक्रात् सलिलाद्विरूढम् । उपाश्रितः कञ्जमु लोकतत्त्वं नात्मानमद्धाविददादिदेवः"।

कञ्जन पु० कं सुखं जनयति जन-णिच्-अण् । १कन्दर्पे त्रिका० (मयना) २पक्षिभेदे शब्दच० ।

कञ्जनाभ पु० कञ्जं पद्मं नाभावस्य संज्ञायाम् अच् समा० । विष्णौ । "व्यज्येदं स्वेन रूपेण कञ्जनाभस्तिरोदधे" भाग० २,९,४४ ।

कञ्जर पु० कजि—अरन् कं जलं जृणाति वा जृ-अच् वा । १सूर्य्ये २अर्कवृक्षे ३हस्तिनि ४चतुर्मुखे ५उदरे च उणा० ।

कञ्जल पु० कजि-कलच् । (मयना) पक्षिभेदे शब्दचन्द्रिका । स्त्रियां जातित्वात् ङीष् ।

कञ्जार पु० कजि आरन् कं जलं जारयति वा जृ-णिच् अण् । १सूर्य्ये २अर्कवृक्षे ३चतुर्मुखे ४गजे ५उदरे ६मुनिभेदे च मेदि० ।

कञ्जिका स्त्री कजि—ण्वुल् टाप् अत इत्त्वम् (वामनहाटी) । ब्रह्मयष्टिकायाम् शब्दर० । [चकाट । प्रनिकटति न णत्वम् ।

कट गतौ भ्वादि० पर० सक० सेट् । कटति अकटीत् अकाटीत्

कट गतौ भ्वादि० इदित् पर० सक० सेट् । कण्टति अकण्टीत् । चकण्ट कण्टकः । प्रनिकण्टति न णत्वम् ।

कट गतौ भ्वादि० पर० सक० सेट् । कटति अकटीत् अकाटीत् चकाट इदित् तेन नेट् कटुः । प्रनिकटति न णत्वम् ।

कट वृतौ वर्षणे च भ्वादि० पर० सक० सेट् । कटति एदित् अकटीत् चकाट । कटः कटुः प्र+प्रकाशे अक० प्रकटति प्रकटः । णिच्—प्र+प्रकाशने सक० । घटादि० प्रकटयति प्रकटितः प्रकटयन् । युच् प्रकटना । नामधातुरित्यन्ये

कट पु० कट-कर्म्मणि च कर्त्तरि अच् वा । १हस्तिगण्डे मदवर्षणात् तथात्वम् "यद्दन्तिनः कटकटाहतटं मिमङ्क्षोः" माघः "कण्डूयमानेन कटं कदाचित् वन्यद्विपेनोन्मथिता त्वगस्य" "कटप्रभेदेन करीव पार्थिवः" २गण्डमात्रे स्वेदवर्षणात् तथात्वम् "तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः" रघुः । नलाख्ये ३तृणभेदे अमरः । येन (मादुर दड़मा) प्रभृतिद्रव्यं विरच्यते तस्य च स्त्र्यादेरावरणसाधनत्वेन कटत्वम् ४तन्निर्म्मिते आसनभेदे च अमर "गोऽश्वोष्ट्रयानप्रासादस्रस्तरेषु कटेषु" मनुः । "वत्सोपक्लिन्नकटवत्तिष्ठन्नेवावसीदति" भा० स० १९ घ२ श्लो० । "ददार करजैरूरावेरकां कटकृद्यथा" भा० १,२१८,२ । ५कुसूले (मराइ) भरतः तस्य तृणादिरज्जुभिरावृतत्वात्तथात्वम् ६आवरणकारके त्रि० उत्कटः । ७अतिशये उत्कटे । ८शरे ९समये आचारे मेदि० । १०उशीरादितृणमात्रे धर० कटाग्निः ११शवे प्रेते कटपूतनः १२शवरथे (शवहरणार्थरथे) १३ओषधिभेदे १४श्मशाने हेमच० । कटप्रूः १५तृणकाष्ठे (तक्ता) शब्दरत्ना० । १६क्रियाकारकसाक्षि त्रि० हेमच० । १७द्यूतक्रीड़ासाधनद्रव्यभेदे च । "अनेनाहृतसर्वस्वः पावरपतनाच्च शोषितशरीरः । नर्द्दितदर्शितमार्गः कटेन विनिपातितो यामि" मृच्छक० उत्तरपदस्थे कटशब्दे परे पूर्वपदस्योदात्तता । दाक्षिकटः सि० कौ० १८श्रोणौ पुंस्त्री मेदि० स्त्रीत्वे गौरा० ङीष् । ङीषन्तः १९कटुक्याम् वैद्यकम् । [कटुक्याम् अमरः

कटंवरा स्त्री कटं वृणोति कट+वृ—खच् मुम् च् । (कट्की)

कटक अस्त्री कट-क्वुनादि० वुन् अर्द्धर्चादि । १हस्तभूषणे वलये, "कटककुण्डलादिवत्" सा० द० । २पर्वतमध्यभागे "प्रफुल्लवृक्षैः कटकैरिव स्वैः" कुमा० । "मार्गैषिणी सा कटकान्तरेषु" रघुः । "सद्रत्नचित्रकटकासु बृहच्छिलासु" माघः । ३चक्रे च अमरः । ४हस्तिदन्तमण्डले । ५सामुद्रलवणे ६राजधान्याञ्च" मेदि० । ७नगर्य्याम् शब्दरत्ना ८सेनासघे हेमच० "स च दिग्विजयक्रमेणागत्य चन्द्रभागातीरे समावेशितकटको वर्त्तते "अगाच्च कटकं सर्वम्" हितो० ९पर्वतसमभूभागे सानौ विश्वः "जलाकीर्णेषु देशेषु

कटकेषु परेषु च" भारते विराटपर्व्वणि ८७२ श्लोकः।

कटकट त्रि० कटप्रकारः प्रकारे द्वित्वम्। १अत्यन्तातिशयिते सर्व्वोत्कृष्टे २महादेवे पु० "नमोनाभाय नाभ्याय नमः कटकटाय च" भा० शा० २८६अ० शिवनामोक्तौ। अव्यक्तानुकरणे डाच् कटकटा तदनुकरणशब्दे अव्य०। "ततः कटकटाशब्दो बभूव सुमहात्मनोः" भा० व० १५७अ०।

कटकार त्रि० कटं करोति कृ—अण् उप० स०। १कटकारिणि शिल्पिभेदे "शूद्रायां वैश्यतश्चौर्य्यात् कटकारः इति स्मृतः" उशनसोक्ते २वर्णसङ्करभेदे पुंस्त्री स्त्रियां ङीष्। "वशिष्ठशापतस्तेषां केचित् पारशवास्तथा। वैखानसेन केचित्तु केचिद्भागवतेन च। वेदशास्त्रावलम्बास्ते भविष्यन्ति कलौ युगे। कटकारास्ततः पश्चान्नारायणगणाः स्मृताः"। उशनसा तेषां कलौ वैखानसादिसंसर्गेण वेदधर्म्मनिष्ठत्वप्राप्तिः वैष्णवत्वप्राप्तिश्चोक्ता। कृ—क्विप्। कटकृदप्यत्र "एरकां कटकृद्यथा" भाग० १,२,१८।

कटकिन् पु० कटकोऽस्त्यस्य इनि। १पर्वते त्रिका० २कटकयुक्ते त्रि०

कटकीय त्रि० कटकाय वलयाय हितः अपूपा० छ। वलयशोधने स्वर्णादौ पक्षे यत्। कटक्य तत्रार्थे त्रि०।

कटकोल पु० कटति वर्षति स्रवति कट—अच् कटस्य निष्ठीवनरूपजलस्य कोलः घनीभावो यत्र कुल—संस्त्याने आधारे घञ् वा। पतद्ग्रहे (पिकदानी) त्रिका०।

कटखादक त्रि० कटमपि खादति—खाद—ण्वुल्। १सर्वभक्षके शवखादके २जम्बुके पुंस्त्री कटस्यावरणस्य सं मध्यस्थितच्छिद्रमत्ति खद—ण्वुल्। काचनिर्म्मितकलसे तस्य छिद्राभावात् तथात्वम्" मेदि०।

कटघोष पु० कटप्रधानो घोषः आभीरपल्ली। प्राग्देशभवे ग्रामभेदे ततः "प्राचां कटादेः" पा० जातादौ छ। कटघोषीय तज्जातादौ त्रि०। एवं कटपल्वल कटनगरी कटपल्ली इत्यादयः प्राग्देशस्थितग्रामभेदेषु। ततः जातादौ छ कटपल्वलीय कटनगरीय कटपल्लीय इत्यादयः तत्तद्ग्रामजातादौ त्रि०

कटङ्कट पु० कटं शवं कटति ज्वालया आवृणोति कट—बा० अच्। १अग्नौ "कटङ्कटाय भावाय नमः पञ्चपलाय च" आग्निपु० "स्वक्षो कालकटङ्कटः" भा० अनु० १७अ०। शिवनामसु कालाग्निरूपतया तस्य कालकटङ्कटनामता। उपचारात् वह्निजे २स्वर्णे ३चित्रकवृक्षे तस्य तन्नामनामत्वात् ४गणेशे च। गणपतिकल्पे याज्ञ० स्मृतौ "मितश्च संमितश्चैव तथा शालकटङ्कटौ। कुष्माण्डो राजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः" "मितसम्मितादिभिर्विनायकस्य नामभिः स्वाहान्तैर्जुहुयादिति" मिताक्षरायामुक्तेः।

कटङ्कटेरी स्त्री कटङ्कटं वह्निजं सुवर्णन्तत्कान्तिमीरयति ईर—गतौ अण् उप० स० अणन्तत्वात् ङीप् गौ० ङीष् वा। १हरिद्रायां त्रिका० तस्याः स्वर्णतुल्यपीतवर्णत्वात् तथात्वम्। २दारुहरिद्रायां रत्नमाला "नीलोत्पलोशीरकटङ्कटेरी" सुश्रु०

कटदानम् न० कट देहावर्त्तनं दीयतेऽत्र दा—ल्युट्। भगवतः पार्श्ववर्त्ताख्ये (करोटदेओया) कर्म्मणि। तन्निमित्तोत्सवादि भाद्रशुक्लैकादश्यादौ सन्ध्यायां श्रवणनक्षत्रमध्यपादयोगेन कार्य्यम्। "प्राप्ते भाद्रपदे मासि एकादश्यां सितेऽहनि। कटदानं भवेद्विष्णोर्महापूजा प्रवर्त्तते" एका० त० वराहपु०। "कटदानं पार्श्वपरिवर्त्तः" रघु०। अत्र कालव्यवस्था उत्थानैकादशीशब्दे ११०७पृ० उक्ता।

कटपूतन पु० कटस्य शवस्य पूतं पवित्रतां तनोति तन+अच्। प्रेतभेदे। "वान्ताश्युल्कामुखः प्रेतोविप्रोधर्म्मात् स्वकाच्च्युतः। अमेध्यकुणपाशोस्यात् क्षत्रियः कटपूतनः" मनुः अमेध्यकुणपभक्षकत्वं तस्य धर्म्मोऽप्यनेन दर्शितः।

कटप्रू पु० कटे श्मशाने प्रवते प्रु—गतौ क्विप् नि० दीर्घश्च। २महादेवे तस्य श्मशानवासित्वात् तथात्वम्। कटं श्मशानं प्रवते कटेन शवेन प्रवते वा। २राक्षसे ३विद्याधरे च मेदि० तयोः यथाक्रमं श्मशानवासित्वात् प्रेतवाहनत्वाच्च तथात्वम्। कटेन देवनसाधनद्रव्येण प्रवते। ४अक्षदेवके त्रि० मेदि०। कटात् समयात् आचारात् तमतिक्रम्य प्रवते। ५कामचारिणि त्रि०। कटं नलहर्यं प्रवते। ६कीटभेदे च उज्ज्वलदत्तः

कट(टि)प्रोथ पुं न० कटस्य कट्याः कटेर्वा प्रोथोमांसपिण्डः। १स्फिचि कटिदेशस्थे मांसपिण्डे, अमरः।

कटभङ्ग पु० कटस्य सैन्यसंघस्य भङ्गो यस्मात्। १सैन्यसंघभङ्गहेतौ नृपमल्यौ। कटानामोषधीनां भङ्गः छेदनम्। २शस्यानां हस्तादिना छेदने च मेदि०।

कटभी स्त्री कट इव भाति भा—क गौरा० ङीष्। १ज्योतिष्मतीलतायाम् राजनि० २लताभेदे भावप्र०। सा च "कटभी स्वादुरुष्णा च मधुरेणुः कटम्भरः। कटभी तु प्रमेहार्शोनाडीव्रणविषक्रमीन्। हन्त्युष्णा कफकुष्ठघ्नी कटूष्णा च कीर्त्तिता। तत्फलं तुवरं ज्ञेयं विशेषात् कफशुक्रहृत्। भा० प्र० उक्तपर्य्यायगुणा। ३अपराजितायाञ्च श्वेतापराजिता (काँटाशिरीष) वृक्षभेदः रत्नमाला।

कटमालिनी स्त्री कटानां किण्वाद्योषधीनां माला साधनत्वे-

नास्त्यस्याः इति ङीप्। मदिरायां तस्याः किण्वाद्योषधि-गणप्रभवत्वात्तथात्वम्।

कटम्ब पु०कट-धातूनामनेकार्थत्वात् वादने अम्बच्। १वादित्रे उज्ज्व० कट्यते आव्रियते शत्रुपुरमनेन करणे अम्बच्। २वाणे उणादिकोषः।

कटम्भर पु० कटं गुणातिशयं बिभर्त्ति भृ-खच् मुम्। १कटभीवृक्षे भावप्र०। २श्योनाकवृक्षे राजनि०। ३नागवलायां स्त्री अमरः (गन्धभादाल)४प्रसारिण्याम्। (कट्की) ५रोहिण्याम्। ६हस्तिन्याम्। ७कलम्बिकायां गोलायाम्। ८वर्षाभ्वि।(पुनर्णवा)९मूर्व्वायाञ्च स्त्री मेदि०।

कटव्रण पु०कट उत्कटो व्रणोयुद्धकण्डुरस्य। भीमसेने त्रिका०।

कटशर्करा स्त्री कटः नलः शर्करेव मिष्टरसत्वात् यस्याः। (नाटा) गाङ्गेरुकीलतायाम् हारा०।

कटा(ठा)कु पु० कट(ठ)—कृच्छ्रजीवने काकु। १विहगे कण-शीनानास्थानतआहाराहरणेन कृच्छ्रजीवनात्तस्य तथात्वम् उज्ज्वलदत्तेन तु कठ कृच्छ्रजीवने इत्युक्तेरयं ठान्तमध्य एव कटेस्तु तदर्थत्वाभावात् कठेः तद्गतरूपतदर्थत्वाञ्च।

कटाक्ष पु०कटं गण्डम् अक्षति व्याप्नोति अच्। अपाङ्गदृष्टौ। अमरः “हरिणाक्षि! कटाक्षेण आत्मानमवलोकय” उद्भ-टः। “आमोक्ष्यन्ते त्वयि मधुकरश्रेणयस्ते कटाक्षाः” मेघ० “तवोन्तरे अनुरतं कटाक्षैः” माघः। “भ्रमयति भवि भूयस्ते लपाङ्गः कटाक्षः” शङ्कराचार्य्यः।

कटाग्नि पु० कटेन वीरणादिवेष्टनेन जातोऽग्निः। वीरणा-दिना वेष्टनेन जाते अग्नौ “क्षेत्रवेश्मवनग्रामविवीतखल-दाहकाः। राजपत्न्यभिगामी च दग्धव्यास्ते कटाग्निना” या० “कटैर्वीरणमयैर्वेष्टयित्वा दहेत्” मिता०। ‘उभा-वपि तु तावेव ब्राह्मण्या गुप्तया सह। विप्लुतौ शूद्र-वद्दण्ड्यौ दग्धव्यौ वा कटाग्निना” मनुः। [मूले शब्दर०

कटायन न० कटस्य तन्नामासनस्यायनमुत्पत्तिसाधनम्। वीरण-

कटार पु०कट—बा०आरन्। १नागरे २कामिनि च शब्दमा०

कटाल त्रि० दुष्टः कटः अस्त्यस्य सिध्मादि० लच् “जटाघटा कटाकलाःक्षेपे” पा० ग० निर्देशात् आत्वम्। दुष्ट-गण्डयुक्ते।

कटाह पु० कटमाहन्ति आ+हन—ड। १तैलादिपाकपात्र-भेदे (कडाइ) २कूर्म्मपृष्ठे ३द्वीपभेदे। ४जायमानशृ-ङ्गापमहिषशिशौ च मेदि०। ५नरकभेदे हारा०।६खर्परे शब्दरत्ना०। ७कूपे ८स्तूपे ९कच्छे च इति केचित्। “सर्व्विनः कटकटाहतटं मिमङ्क्षोः” माघः। “अ-स्मिन् महामोहमये कटाहे सूर्य्याग्निना रात्रिदिनेन्धनेन। मासर्त्तुदर्व्वीपरिघट्टनेन भूतानि कालः पचतीति वार्त्ता” भा०व०३१२अ०।

कटि(टी) स्त्री कट—इन्। १श्रोणिदेशे (काकाल)। कृदिकारा-न्तत्वात् वा ङीप्। “सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृ-ष्टजः। कट्यां कृताङ्को निर्वास्यः” मनुः। ‘कटिश्च तस्या-तिकृतप्रमाणा” भा० व०१०५४। “सव्येन च कटीदेशे गृह्य वाससि पाण्डवः” भा०व्या०१६२ “कटिस्तु हरते मनः” सा०द०। तत्र तच्छब्दस्य प्राण्यङ्गत्वमुक्तम्। ङीबन्तः २पिप्पल्यां स्त्री मेदि०

कटित्र न०कटिं त्रायते त्रै—क। १कास्त्रराम्, २कटिवस्त्रे, ३कटिवर्म्मणि च मेदि०। “स्फुरत् किरीटकेयूरकटित्र-कङ्कणम्” भाग० ६,१६,२७।

कटिन् पु० कटोऽस्त्यस्य प्राशस्त्येन इनि। १प्रशस्तगण्डे गजे। कट+चतुरर्थ्यां प्रेक्षा० इनि। २कटनिर्वृत्तादौ त्रि० स्त्रियामुभयतो ङीप्

कटिप त्रि० कटिं पाति पा—क। कटिरक्षके। ततः सङ्का० चतुरर्थ्यां ण्य। काटिप्य कटिपनिर्वृत्तादौ त्रि०

कटिमालिका स्त्री कटौ मालेव कन्। (चन्द्रहार) (गोट) कटिभूषणे। हेमच०

कटिरोहक पु० कट्या हस्तिकट्या तं रोहति रुह-ण्वुल् ३त०। हस्तिपश्चाद्भागेन हस्त्यारोहके शब्दमा०।

कटिल्ल पु० कट-बा०इल्ल। कारवेल्ले (करेला)। ततः स्वार्थे कन् तत्रैव अमरः। [स्फला०

कटिशीर्षक पु० कटिः शीर्षमिव संज्ञायां कन्। कटिदेशे-

कटिशूल पु०कटिस्थं शूलम्। कटिदेशस्थे कफवातिके शूल-रोगभेदे; शूलप्रसङ्गात् तद्भेदनिदानादि भावप्र०दर्शितमु-च्यते यथा “दोषैः पृथक्समस्तामद्वन्द्वैः शूलोऽष्टधा भवेत्। सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः। प्रभुः कर्त्ता। अथ वातिकस्य विप्रकृष्टं निदानसम्प्राप्तिपूर्व्वकं लक्षणमाह। व्यायामयानादतिमैथुनाञ्च प्रजागराच्छीतजलातिपानात्। कलायमुद्गाढ़ककोरदूषादत्यर्थरूक्षाध्यशनाभिघातात्। क-षायतिक्तातिविरूढ़जान्नविरुद्धवल्लूरकशुष्कशाकैः। विट्शुक्र-मूत्रानिलसन्निरोधाच्छोकोपवासादतिहास्यभावात्। वायुः प्रवृद्धो जनयेद्धि शूलं हृत्पृष्ठपार्श्वत्रिकवस्तिदेशे। (त्रिकं पृष्ठवंशाधरसन्धिस्थानकट्यादि) जीर्णे प्रदोषे च घना-गमे च शीते च कोपं समुपैति गाढम्। मुहुर्मु-हुश्चोपशमप्रकोपौ विण्मूत्रसंस्तम्भनतोदभेदैः। संस्वेद-

नाभ्यञ्जनमर्द्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमं प्रयाति। व्यायामो मल्लयुद्धादिः यानं तुरगरथादि। मैथुनं स्त्रीसेवा। प्रजागरः रात्रौ, एषामतियोगात्, शीतलजलप्रभूतपानात् कलायस्त्रिपुटः (मटर) आढकी तुवरी कोरदूषः कोरदूषः अतिरूक्षद्रव्यसेवा अध्यशनं भुक्तस्योपरि भोजनम् अभिघातो लोष्टादिभिः, कषायतिक्तरससेवा। विरूढजाद्यम् विरूढं सङ्कुरितमन्नम् कलायचणकादि तज्जमन्नरूपभक्ष्यम्। वल्लूरकं शुष्कमांसम्। तस्य शूलस्य देशमाह। हृदादीति तत्र हृच्छूलस्य पृथगपि लक्षणं पठन्ति। "कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः। हृदयस्थः प्रकुरुते शूलमुच्छ्वासरोधकम्। स हृच्छूल इति ख्यातो रसमारुतकोपजः"। अथ पार्श्वशूलस्यापि लक्षणमाह। "कफं निगृह्य पवनः सूचीभिरिव निस्तुदन्। पार्श्वस्थः पार्श्वयोः शूलं कुर्य्यादाध्मानसंयुतम्। तेनोच्छ्वसिति वक्त्रेण नरोऽन्नञ्च न काङ्क्षति। निद्राञ्च नाप्नुयादेव पार्श्वशूलः प्रकीर्त्तितः"। वस्तिशूलस्यापि लक्षणमाह। "संरोधात् कुपितो वायुर्वस्तिं संश्रित्य तिष्ठति। वस्तेरध्वनि नाड़ीषु ततः शूलोऽस्य जायते। विण्मूत्रवातसंरोधी वस्तिशूलः स उच्यते"। प्रकृतमनुसरति जीर्णे भुक्ते। प्रदोषे रात्र्यागमे रात्रिभवशीतेन। वातप्रकोपात्। घनागमे वर्षासु मेघोदये च। तथैव पैत्तिकमाह। क्षारातितीक्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थयूषैः। कट्वम्लसौवीरसुराविकारैः क्रोधानलायासरविप्रतापैः। ग्राम्यातियोगादशनैर्विदग्धैः पित्तं प्रकुप्याथ करोति शूलम्। तृष्णामोहदाहार्त्तिकरं हि नाभ्यां संस्वेदमूर्च्छाभ्रमशोषयुक्तम्। मध्यंदिने कुप्यति चार्द्धरात्रे निदाघकाले जलदात्यये च। शीते च शीतैः समुपैति शान्तिं सुस्वादुशीतै रतिभोजनैश्च। निष्पावो राजमाषः। सौवीरं सन्धानभेदः। सुराविकारैः "परिपक्वान्नसन्धानसमुत्पन्ना सुरा मता"। तस्याः विकारैः। रविप्रतापः आतपः। ग्राम्यातियोगो मैथुनाधिक्यम्। विदाहीत्युक्तापि अशनैर्विदग्धैरिति बोधयति अविदाहिवस्तुनोऽपि पित्तवशाद्विदाहित्वं भवतीति। जलदात्यये शरदि। शीतैर्वातादिभिः। श्लैष्मिकमाह। आनूपवारिजकिलाटपयोविकारैर्मांसेक्षुपिष्टकृशरतिलशष्कुलीभिः, अन्यैर्बलासजनकैरपि हेतुभिश्च श्लेष्मा प्रकोपमुपगम्य करोति शूलम्। हृल्लासकासदनारुचिसंप्रसेकैरामाशये स्तिमितकोष्ठशिरोगुरुत्वैः। भुक्ते सदैव हि रुजं कुरुतेऽतिमात्रम् सूर्य्योदयेऽथ शिशिरे कुसुमागमे च। आनूपं बहुलजलदेशजं भक्ष्यम्। वारिजं शालूकादि। "पक्वं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका। तक्रेण तत्कूर्चकं स्यात्तयोः पिण्डः किलाटकः"। पयोविकारः पायसादिः पिष्टं माषादिः। अन्यैः गुर्वादिभिः। स्तिमितमार्द्रपटावगुण्ठितमिव यत्कोष्ठं शिरश्च तयोर्गुरुत्वैः सह। सूर्य्योदय इति त्रिधा विभक्तदिवसप्रथमभागस्योपलक्षणम्। शिशिरे तत्र कफस्यातिसञ्चयात् कुसुमागमे वसन्ते। द्वन्द्वजमाह। द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजम्। (तस्य भेदा स्त्रयो वक्ष्यन्ते) त्रिदोषजमाह। सर्वेषु देशेषु च सर्वलिङ्गं विद्याद्भिषक् सर्वभवं हि शूलम्। सुकष्टमेनं विषवज्रकल्पं विवर्ज्जनीयं प्रवदन्ति तज्ज्ञाः। सर्वेषु देशेषु हृत्पृष्ठपार्श्वत्रिकवस्तिनाभ्यामाशयेषु सर्वभवं त्रिदोषजम्। अथामजमाह। आटोपहृल्लासवमीगुरुत्वस्तैमित्यमानाहकफप्रसेकैः। कफस्य लिङ्गेन समानलिङ्गमामोद्भवं शूलमुदाहरन्ति। कफस्य कफशूलस्य। आमोद्भवं आमादुद्भवो यस्य तम्। अत्रामशूले जाते पश्चाद्दोषसम्बन्धः अतएवास्य शूलस्याष्टमत्वमुक्तम्। तच्च प्रथममामाशये भवति पश्चात् सम्बन्धिभिर्दोषैर्वस्तिनाभिहृत्पार्श्वकुक्षिषु भवति यथादोषसम्बन्धम्। आमशूलस्य दोषविशेषेण देशविशेषमाह। वातात्मकं वस्तिगतं वदन्ति पित्तात्मकञ्चापि वदन्ति नाभ्याम्। हृत्पार्श्वकुक्षौ कफसन्निविष्टं सर्वेषु देशेषु च सन्निपातात्। हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ। कफसन्निविष्टं कफेनाविष्टम्। "वस्तौ हृत्कटिपार्श्वेषु स शूलः कफवातिकः। कुक्षौ हृन्नाभिमध्ये तु स शूलः कफपैत्तिकः। दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः। तन्त्रान्तरोक्तमामशूलमाह। "अतिमात्रं यदा भुक्तं पावके मृदुताङ्गते। स्थिरीकृतन्तु तत्कोष्ठे वायुराहत्य तिष्ठति। यदान्नं न गतं पाकं तच्छूलं कुरुते भृशम्। मूर्च्छाध्मानं विदाहञ्च हृत्क्लेशम विलम्बितम्। कम्पं वान्तिमतीसारं प्रमेहं जनयेदपि; अविपाकोद्भवं शूलमेतमाहुर्मनीषिणः"। अविपाकोद्भवं आमोद्भवमित्यर्थः। अथ शूलस्योपद्रवानाह वेदनातितृषा मूर्च्छा आनाहो गौरवारुची। कासः श्वासो वमिर्हिक्का शूलस्योपद्रवा स्मृताः। अथास्य साध्यत्वादिकमाह। एकदोषानुगः साध्यः कृच्छ्रसाध्यो द्विदोषजः। सर्वदोषान्वितो घोरस्त्वसाध्यो भूर्य्युपद्रवः। अथारिष्टमाह। वेदनातितृषा मूर्च्छा आनाहो गौरवं ज्वरः। भ्रमोऽरुचिः कृशत्वञ्च बलहानिस्तथैव च। उपद्रवा दशैवेते यस्य शूलेषु

नास्ति सः। अथ शूलस्यैव भेदं परिणाममाह। स्वैर्निदानैः प्रकुपितो वातः सन्निहितो यदा। कफपित्ते समावृत्य शूलकारी भवेद्बली। भुक्ते जीर्य्यति यच्छूलं तदेव परिणामजम्। स्वैर्निदानैरित्यादिना निदानपूर्व्विका संप्राप्तिरुक्ता भुक्ते जीर्यतीत्यादिना लक्षणमुक्तम्। समावृत्य व्याप्य तस्य लक्षणमप्येतत् समासेनाभिधीयते। आध्मानाटोपविण्मूत्रविबन्धारतिवेपनैः। स्निग्धोष्णोपशमप्रायं वातिकं तद्वदेत् भिषक्। तृष्णा दाहा रतिस्वेदकट्वम्ललवणोत्तरम्। शूलं शीतशमप्रायं पैत्तिकं लक्षयेत् बुधः। छर्द्दिहृल्लाससंमोहस्वल्परुक् दीर्घसन्ततिः। कटुतिक्तोपशान्तौ च विज्ञेयञ्च कफात्मकम्। संसृष्टलक्षणं बुद्धा द्विदोषं परिकल्पयेत्। त्रिदोषजमसाध्यं स्यात् क्षीणमांसबलानलम्। अथान्नद्रवनामानं शूलविशेषमाह। जीर्णे जीर्य्यति चाप्यन्ने यच्छूलमुपजायते। पथ्यापथ्यप्रयोगेण भोजनाभोजनेन वा। न शमं याति नियमात् सोऽन्नद्रव उदाहृतः। नेदं शूलमसाध्यं चिकित्साभिधानात्"। उभयथा प्रयोगात् क्लीवत्वमप्यस्य।

कटिशृङ्खला स्त्री ६त०। कटिधार्य्यक्षुद्रघण्टिकायाम् हारा०

कटिसूत्र न० कटौ धार्य्यं सूत्रं शाक०। कटिधार्य्ये कार्पासरचिते धातुमये वा सूत्रे (घुनसी गोट) हेमा०। "प्रवरमणिमयमुकुटकुण्डलकटकहारकटिसूत्रकेयूरनूपुराद्यङ्गभूषणविभूषितम्" भाग० ५,२,४। अत्र सर्वत्र मणिमयेति विशेषणम् प्राचुर्य्ये मयट्। तेन "कटिसूत्रं न धारयेत्" इति न स्मृतिविरोधः केवलसूत्रस्यैव कटौ धारणनिषेधात्। सूत्रञ्च कार्पासमेव ऊर्णामयादेस्तु न धारणनिषेधः।

कटीतल पु० कट्यां तलमासदमस्य। १वक्रखड्गे त्रिका० यतोऽसौ कटिदेशे धार्य्यते। ६त०। कट्यास्तले २नितम्बे न०।

कटीर पु० कट–ईरन्। १कन्दरे २जघनदेशे च उज्ज्व० ३नितम्बे ४कर्णाजटाधरः। ततः स्वार्थे कन्। कटीरक नितम्बे त्रिका०

कटु न० कटति सदाचारमावृणोति रसनामावृणोति वर्षति आवृणोति नासादितो जलम्, कट–उन्। १अकार्य्ये अमरः २दूषणे त्रि०; ३रसभेदे(भाल)४तद्वति अमरः त्रि०। स्त्रियां वा ङीप्। तद्रसगुणाः भावप्र० उक्ताः "कटुरसश्च तोक्ष्णश्च विशदो वातपित्तकृत्। श्लेष्मघ्नश्चक्षुराग्नेयः क्रिमिकण्डूविषापहः। रूक्षत्वाद्दहरश्चापि मेदःस्थौल्यापकर्षणः। नन्दो नासिकाक्षिजिह्वायोद्वेजको मतः। दीपनः पाचनो रुच्यो नासिकाशोषणो भृशम्। क्लेदमेदोवसामज्जाशकृन्मूत्रोपशोषणः। स्रोतःप्रकाशको रूक्षो मेध्यो वर्चोविबन्धकृत्। आग्नेयः अधिकाग्न्यंशः। मेध्यो मेधायै हितः। वर्चोविबन्धकृत् मलबन्धं करोति। अतियुक्तस्य कटुरसस्य गुणाः। सोऽतियुक्तो भ्रान्तिदाहमुखतालोष्ठशोषकृत्। कण्ठादिपीड़ामूर्च्छान्तर्दाहदो बलकान्तिहृत्"। कटुरसस्याग्निजन्यपित्तकार्य्यत्वं सुश्रुते उक्तं यथा "कटूष्णलवणा आग्नेया" इत्युपक्रम्य "औष्ण्यतैक्ष्ण्यरौक्ष्यलाघववैशद्यगुणलक्षणं पित्तं तस्य समानयोनिः कटुको रसः सोऽस्यौष्ण्यादौष्ण्यं वर्द्धयति तैक्ष्ण्यात्तैक्ष्ण्यं रौक्ष्याद्रौक्ष्यं लाघवाल्लाघवं वैशद्याद्वैशद्यमिति"। श्लेष्मोपक्रमे चोक्तं तत्रैव "पुनरन्ययोनिः कटुको रसः स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वात् माधुर्य्यमभिभवति रौक्ष्यात् स्नेहम्, लाघवात् गौरवम् औष्ण्यात् शैत्यम्, वैशद्यात् पैच्छिल्यम्"। ५परुषे च। "स्मरणकटु निनादमेकवाक्यं विवव्रुः" रघुः "कण्ठमाकुण्ठयिष्यामि कटूक्तिवचने पटुम्" नैषधम्।

वाक्यस्य कटुत्वञ्च दुष्टार्थवाचकत्वम् रसविपरीतवर्णयुक्तत्वञ्च। तत्र रसभेदे वर्णभेदानां कटुत्वमकटुत्वञ्च सा० द० दर्शितम्। शृङ्गारकरुणशान्तेषु "मूर्द्धिवर्गान्त्यवर्णेन युक्ताः टठडढान् विना। रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः"। वीरवीभत्सरौद्रेषु च "वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ। उपर्य्यधो द्वयोर्वा सरेफः टठडढैः सह। शकारश्च षकारश्च तस्य व्यञ्जकतां गताः"। ६मत्सरिणि ७सुगन्धौ त्रि० मेदि० "सप्तच्छदक्षीरकटुप्रवाहम्" रघुः। कटुः सुरभिः "कटुतिक्तकषायास्तु सौरभ्येऽपि प्रकीर्त्तिताः" यादवोक्तेः। ८अप्रिये त्रिका०। ९दुर्गन्धौ शब्दमा०। (कट्वी) १०कटुक्याम् स्त्री अमरः गुणवचनत्वात् वा ङीष् कट्वा।

कटुक पु० कटु–स्वार्थे कन्। कटुरसे "यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकां च स्रावयति स कटुकः" सुश्रु० २तद्वति त्रि० "उपर्य्युपविश्रान्तकटुकधूमप्रवृत्त(?)प्रयोग वर्द्धिततिमिरेण" काद०। ३परुषे च त्रि०। "परुषं ये न भाषन्ते कटुकं निष्ठुरं तथा" भा० अनु० ६४५ श्लो०। ४उग्रे त्रि० "ततः प्रावर्त्तत पुनः संग्रामः कटुकोदयः" भा० व० २८६ अ०। ५पटोले पु० राजनि०। ६सुगन्धिद्रव्ये शब्दरत्ना०। ७कुटजवृक्षे (कुड़चि) ८अर्कवृक्षे (आकन्द) शब्दच० ९राजसर्षपे च पु० हारा०। १०शुण्ठीपिप्पलीमरिचरूपे त्रिकटुके न० मेदि०।

कटुकत्रय न० कटुकानां कटुरसानां त्रयम्। शुण्ठीपिप्पली

मरिचरूपे त्रिकटुनि। "कुक्कुटाण्डकपालानि कर्षुनं कटुकत्रयम्" सुश्रु०। कटुकत्रिकमप्यत्र न०।

कटुकन्द पु० कटुः कन्दो मूलं यस्य। १शिग्रुवृक्षे (सजिना) २आर्द्रके, च (आदा) मेदिनिः।

कटुकफल पु० कटुकं फलमस्य। कक्कोले राजनि०।

कटुका स्त्री कटु+संज्ञायां कन्। (कट्की) १कटुरोहिण्याम्, राजनि० २ताम्बूल्यां, (पान) शब्दच० ३राजिकायां, (राइसरिषा) ४तिक्तालाबुके (तितलाउ) च रत्नमा०। ५कटुरसयुक्तस्त्रियाञ्च। तत्र (कट्की) द्रव्यस्य पर्य्याय-गुणादि भावप्र० उक्तं यथा। "कटुी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा। अशोका मत्स्यशकला च-क्राङ्गी शकुलादनी। मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी। कटुी तु कटुका पाके तिक्ता रूक्षा हिमा लघुः। भेदिनी दीपिनी हृद्या कफपित्तज्वरापहा। प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्"

कटुकालाबु(बू) स्त्री विपाके कटुका अलाबु(बूः) कर्म०। (तितलाउ)अलाबूभेदे रत्नमाला। कटुतुम्बी शब्दे विवृतिः "प्रत्यहं कटुकालाबुस्वेदप्रारब्धदन्तुरताप्रतीकारेण" काद० "कटुकालाबुकृतवेधनसर्षपसर्पनिर्मोकैः" सुश्रु०।

कटुकी स्त्री कटु+स्वार्थे कन् गौरा० ङीष्। (कट्की) १कटुकायाम्। कटुकाशब्दे गुणपर्य्यायादि। [मशके जटा०।

कटुकीटक पु० कटुः दंशेन दुःखदत्वात् कीटः स्वार्थे कन्।

कटुक्वाण पु० कटुस्तीक्ष्णः क्वाणो यस्य। (तितिर) टिट्टिभ-पक्षिणि हेमच०। [मूले च राजनि०।

कटुग्रन्थि पुंन० कटुर्ग्रन्थिरस्य। १पिप्पलीमूले, २शुण्ठी-

कटुङ्कृता स्त्री कटु दूषितं करोति कृ-ड पृषो० मुम् तस्य भावः तल्। "नित्यकर्म्मसमाचारनिष्ठुरत्वे कटुङ्कृता" हारा० उक्तार्थे।

कटुचातुर्जातक न० चतुर्भ्योजातकं ततः स्वार्थे अण् कर्म०। एलात्वक्पत्रकमरिचात्मकद्रव्यचतुष्के राजनि०। [रत्ना०।

कटुच्छद पु० कटुश्छदः पत्रं यस्य। तगरवृक्षे (टगर) शब्द-

कटुतिक्तक पु० कटुश्चासौ तिक्तश्चेति अल्पार्थे कन्। १भूनिम्बे, वैद्य० २शणवृक्षे राजनि०।

कटुतिक्ता स्त्री विपाके कटुः स्वादे तिक्ता। कटुतुम्ब्याम्। स्वार्थे कन् अत इत्त्वम्। कटुतिक्तिका तत्रैव राजनि०।

कटुतुण्डी स्त्री कटु तुण्डमस्याः। (कट्तराइ) लताभेदे राजनि० स्वार्थे कन् अत इत्त्वं कटुतुण्डिकापि तत्रैव। "कटुतुण्डी कटुः पाके रसे तिक्ता च सा मता। कफशान्तिविषघ्नी-

चारुच्याश्वकफपित्तनुत् सदा पथ्या च सा प्रोक्ता राजनि० उक्तगुणा।

कटुतुम्बी स्त्री विपाके कटुस्तुम्बी। (तितलाउ) अलाबुभेदे भावप्र० तद्गुणादि उक्तं यथा "इक्ष्वाकुः कटुतुम्बी स्यात् सा तुम्बी च महाफला। कटुतुम्बी हिमा हृद्या पित्तकास-विषापहा। तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत्"।

कटुत्रय न० शुण्ठीपिप्पलीमरिचरूपे त्रिकटुनि राजनि०। कटुत्रिकमप्यत्र।

कटुदला स्त्री कटु दलं यस्याः। (कांकुड़) कर्कट्याम् राजनि०

कटुनिष्पाव पु० कर्म०। नदीशनिकटदेशजाते निष्पावधा-न्यभेदे राजनि०।

कटुपत्र पु० कटु पत्रमस्य। पर्पटे शिताज्जके राजनि०।

कटुपत्रिका स्त्री कटु पत्रमस्याः बहु० कप् अत इत्त्वम्। कण्टकारीवृक्षे राजनि०।

कटुपाक त्रि० कटुः पाकोऽस्य। यस्य पाककाले कटुत्वं १तादृशद्रव्ये "कटुपाकः सरो हृद्यो गुग्गुलुः स्निग्धपिच्छिलः"। "क्षौमं तैलं बलवहम् कटुपाकमचाक्षुषम्" सुश्रु०। इत्यादिनानास्थाने दर्शितम्। कर्म०। २कटुरसरूपेण पाके। तथा पाकश्च भावप्र० दर्शितः "जाठरेणाग्निना योगाद्यदुदेति रसान्तरम्। रसानां परिणामान्ते स विपाक इति स्मृतः। मिष्टः पटुश्च मधुरमम्लोऽम्लं पच्यते रसः।(पटुरत्र लवण रसः)"कटुतिक्तकषायाणां पाकः स्यात् प्रायशः कटुः" वाग्भटः "त्रिधा रसानां पाकः स्यात् स्वाद्वम्लकटुकात्मकः" तत्फलमुक्तं भावप्र० "श्लेष्मकृन्मधुरःपाको वातपित्तहरो मतः। अम्लस्तु कुरुते पित्तं वातश्लेष्मगदापहम्। कटुः करोति पवनं कफं वातन्तु नाशयेत्। विशेष एष रसतो विपाकानां निदर्शितः" तथा च षण्णामपि रसानां पाके त्रैविध्यमेव मधुराम्लकटुभेदात्। सुश्रुते तु पाकत्रैविध्यं निराकृत्य द्विधैव पाकः समर्थितः यथा

"तस्माद्वीर्य्यं प्रधानमिति। नेत्याहुरन्ये। विपाकः प्रधानमिति कस्मात्? सम्यङ्मिथ्याविपाकादिह सर्व्वद्रव्याण्यभ्यवहृतानि सम्यक् मिथ्या विपक्वानि गुणं दोषं वा जनयन्ति। तत्राहुरन्ये प्रतिरसं पाक इति। केचि-त्त्रिविधमिच्छन्ति मधुरमम्लं कटुकं चेति तत्तु न सम्यक् भूतगुणादागमाच्चाम्लो विपाको नास्ति पित्तं हि विदग्धमम्लतामुपैत्याग्नेर्मन्दत्वात्। यद्येवं लवणोऽप्यन्यः पाको भविष्यति श्लेष्मा हि विदग्धो लवणतामुपैति मधुरो म-धुरस्याम्लोऽम्लस्यैवं सर्व्वेषामिति केचिदाहुः दृष्टान्तं चो-

पद्दिशन्ति यथा तावत् क्षीरं स्थालीगतमभिपच्यमानं मधुरमेव स्यात्तथा शालियवमुद्गादयः प्रकीर्णाः स्वभावमुत्तरकालेऽपि परित्यजन्ति तद्वदिति । केचिद्वदन्त्यबलवन्तोबलवतां वशमायान्तीत्येवमनवस्थितिस्तस्मादसिद्धान्त एष । आगमे हि द्विविध एव पाको मधुरः कटुकश्च तयोर्मधुराख्यो गुरुः कटुकाख्यो लघुरिति तत्र पृथिव्यप्तेजोवाय्वाकाशानां द्वैविध्यं भवति गुणसाधर्म्याद्गुरुता लघुता च पृथिव्यापश्च गुर्व्यः शेषाणि लघूनि तस्माद्द्विविध एव पाक इति । भवन्ति चात्र । द्रव्येषु पच्यमानेषु येष्वम्बुपृथिवीगुणाः निर्वर्त्तन्तेऽधिकास्तत्र पाको मधुर उच्यते । तेजोऽनिलाकाशगुणाः पच्यमानेषु येषु त । निर्वर्त्तन्तेऽधिकास्तत्र पाकः कटुक उच्यते" । कटुपाकोऽस्त्यस्य इनि । कटुपाकिन् कटुपाकयुक्ते त्रि० स्त्रियां ङीप् । "औद्दालकं रुचिकरम्" इत्युपक्रमे "पित्तकृत् कटुपाकि च" सुश्रुतः कटुविपाकादयोऽप्यत्र ।

कटुफला स्त्री कटु फलं यस्य । पटोले तस्य पत्रतिक्तत्वेऽपि फले कटुपाकत्वेन तथात्वम् २श्रीवल्लीवृक्षे च राजनि० ।

कटुभङ्ग पु० कटुः भङ्ग एकदेशो यस्य । शुण्ठ्याम् त्रिका० ।

कटुभद्र पु० कटुरपि भद्रः हितकारी कर्म०। शुण्ठ्याम् राजनि०

कटुमञ्जरिका स्त्री कटु तीक्ष्णा मञ्जरी अस्यस्याः अच् गौरा० ङीप् । अपामार्गे । राजनि० ।

कटुमोद न० कटु मोदोऽस्य । जवादिनामसुगन्धिद्रव्ये राजनि०

कटुर न० कटति वर्षति रसान्तरं मन्थनेन कट–उरच् । तक्रे जटाधरः ।

कटुरव पुंस्त्री कटुः परुषः रवोऽस्य ।१मण्डूके राजनि० स्त्रियां जातित्वात् ङीष् ।२कठोररवयुक्ते त्रि० कर्म० ३परुषशब्दे पु०

कटुरोहिणी स्त्री कटुः सती रोहति रुह–णिनि । कटुकायाम् (कट्की) अमरः ।

कटुवर्ग पु० कटूनां वर्गः समुदायः । सुश्रुतोक्ते कटुरसानां द्रव्याणां वर्गे स च वर्गो यथा "पिप्पल्यादिः सुरसादिः शिग्रुमधुशिग्रुमूलकलशुनसुमुखशीतशिवकुष्ठदेवदारुहरेणुकावल्गुजफलचण्डागुग्गुलुमुस्तलाङ्गलकीशुकनासापीलुप्रभृतीनि सालसारादिश्च प्रायशः कटुकोवर्गः" । तत्र पिप्पल्यादिः सुरसादिः सालसारादिश्च तत्रैवोक्तो यथा १पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसातिविषावचाविडङ्गानि कटुरोहिणी चेति" पिप्पल्यादिः ।"२सुरसाश्वेतसुरसाफणिज्झकार्जकभूस्तृणसुगन्धकसुमुखकालमालकासमर्दक्षवकखरपुष्पाविडङ्गकट्फलसुरसीनिर्गुण्डीकुलाहलोन्दुरुकर्णिकाफञ्जीप्राचीनामलकाकमाच्यो विषमुष्टिकश्चेति"। २सुरसादि"३सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचन्दनकुचन्दनशिंशपाशिरीषासनधवार्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति" ३सालसारादि।

कटुवार्त्ताकी स्त्री कर्म०। श्वेतकण्टकारिकायाम् राजनि०

कटुवीजा स्त्री कटु वीजं यस्याः । पिप्पल्याम् राजनि० ।

कटुशृङ्गाल न० कटूनां शृङ्गायं प्राधान्यायालति पर्य्याप्नोति अल-अण् । सुवर्णशाके राजनि० ।

कटुस्नेह पु० कटुःस्नेहोऽस्य । गौरसर्षपे राजनि० ।

कटूत्कट न० कटुषु उत्कटम् । १आर्द्रके रत्नमाला । संज्ञायां कन् । कटूत्कटक २शुण्ठ्यां न० राजनि० ।

कटोदक न० कटाय प्रेताय देयमुदकम् शा० त०। प्रेताय तर्पणार्थं देये जले । "हिरण्यकशिपुर्भ्रातुः सम्परेतस्य दुःखितः । कृत्वा कटोदकादीनि" भाग० ७,२,१६ । "कटोदकं प्रेताय देयमुदकम्" श्रीधरः ।

कटोर न० कथ्यते दृश्यते निषिच्यते भक्ष्यद्रव्यमत्र कट-आधारे ओलच् लस्य रः । भक्ष्यद्रव्यदानार्थे मृदादिपात्रभेदे । "रसाद्यं देवकीदत्तं पात्रे काञ्चननिर्म्मिते । कटोराणां चतुःषष्टिः पात्रस्योभयतः स्थिता" जैमिनिभा० आश्व०८अ० । स्वार्थे कन् तत्रैवार्थे न० । "स्तबकर्पटसंयुतकाचकूप्यां दत्त्वा सुखं मोहनलोहसूत्रैः । निष्कासितो धूपरसस्तु तस्य सौगन्धिकैः काचकटोरके यः" । भेरत०। अतिक्षुद्रे तथाभूतपात्रे स्त्री कटोरा

कटोल पु० कटति आवृणोत्यन्यरसम् कट–ओलच् । १कटुरसे २कटुरसयुक्ते त्रि० सि०कौ०। चण्डाले पुंस्त्री उणादिको० स्त्रियां ङीष्। स्वार्थे कन् । तत्रार्थे । कटोलकस्य चण्डालस्येव पादाऽस्य उपमानपूर्व्वकत्वेऽपि हस्त्यादि० नान्त्यलोपः। कटोलकपादः इत्येव ।

कटोलवीणा स्त्री ६त०। चण्डालस्य वाद्यभेदे (केन्दुडा) शब्दर०

कट्फल पु० कटति आवृणोत्यन्यरसं कट–क्विप् कट्फलमस्य । कटुरसतयाऽन्यरसावरकफलके (कायफल) इति ख्याते श्रीपर्णीवृक्षे अमरः । तत्पर्य्यायगुणादि भावप्र० उक्त यथा "कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकाऽपि च । श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च । कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् । हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुचीः" । २मार्ज्जार्य्यां स्त्री

रत्नमा० ३हठ्यां ४काकमाच्यां ५देवदाल्यां ६वार्त्ताक्यां ७महागोर्व्वारौ च स्त्री राजनि०।

कट्फलादिचूर्ण चक्रद० कासरोगाधिकारोक्ते चूर्णभेदे यथा "कट्फलं कतृणं भार्गी मुस्तधान्यं वचाभया। शृङ्गी पर्पटकं शुण्ठी सुराह्वा च जले शृतम्। मधुहिङ्गुयुतं पेयं कासे वातकफात्मके। कण्ठरोगे क्षये शूले श्वासहिक्काज्वरेषु च"।

कट्वङ्ग पु० कटु अङ्गमस्य। श्योनाकवृक्षे (शोना) अमरः। कटूनि उग्राणि अङ्गानि यस्य। २सूर्य्यवंश्ये दिलीपनृपे पु० त्रिका०।

कट्वर न० कट-वर्षादौ ष्वरच्। १व्यञ्जने उज्ज्व०। २दधिसरे रत्नमा० "दध्नस्तु ससरस्यात्र तक्रं कट्वरमुच्यते" वैद्यकोक्ते ३तक्रभेदे च [(कटकी) २कटुकायाञ्च भावप्र०।

कट्वी स्त्री कटु स्त्रियां ङीष्। १कटुरसान्वितायां स्त्रियां

कठ आध्याने (उत्कण्ठापूर्व्वकस्मरणे) वा चुरा० उभ० पक्षे भ्वा० पर० सक० सेट् इदित्। कण्ठयति ते कण्ठति। अचकण्ठत् त अकण्ठीत्। कण्ठयां बभूव आस चकार चक्रे चकण्ठ-कण्ठितः कण्ठा।

कठ कृच्छ्रजीवने भ्वादि० पर० अक० सेट्। कठति अकठीत्-अकाठीत्। चकाठ। कठरः कठेरः कठिनः कठोरः।

कठ आध्याने (उत्कण्ठापूर्व्वकस्मृतौ) इदित् भ्वा० आत्म० सक० सेट्। प्रायेणोत्पूर्व्वः उत्कण्ठते उदकण्ठिष्ट। उच्चकण्ठे। उत्कण्ठितः उत्कण्ठा "उत्कण्ठायां हृदि न कुरुते कारणानां सहस्रम्"। "देवाशोधसि वेतसीतरुतले चेतः समुत्कण्ठते" काव्य०प्र०।

कठ पु० कठ-अच्। १मुनिविशेषे कठेन प्रोक्तमधीयते वैशम्पायनान्तेवासित्वात् णिनि तस्य "कठचरकात् लुक्" पा० लुक्। २तदृष्टशाखाध्यायिषु पुं० ब०व०। स्त्रियां तु वेदशाखावाचित्वेन जातित्वात् ङीष् कठी इत्येव। ३स्वरभेदे ४स्वरभेदे च" हेम०। "वैशम्पायनान्तेवासिनश्च आलम्बुरङ्ग कमल ऋचभाऽऽरुणि ताण्ड्य श्यामायन कठकलापिन्" इति नव। कठशाखा च यजुर्व्वेदे ऋग्वेदे चास्ति सैव स्वरभेदः। "दंशमुख्ययोर्यजुषि काठके" इत्यस्य वा०स्त्रस्य व्याख्यायां सि०कौ० "यजुःशब्दोऽत्र न मन्त्रमात्रपरः किन्तु वेदोपलक्षकः तेन ऋगात्मकोऽपि मन्त्रो यजुर्वेदस्थे भवति किञ्च ऋग्वेदेऽपि भवति स चेन्मन्त्रो यजुषि कठशाखायां दृष्टः यजुषीति किम् "देवान् जिगाति सुम्नयुः"। बह्वृचानामप्यस्ति कठशाखा ततोभवति प्रत्युदाहरणमिति हरदत्तः"। २मन्त्रेतरवेदभागरूपब्राह्मणे "ईशाकेनकठप्रश्नमुण्डमाण्डूक्यतित्तिरिः इति उपनिषच्छब्दे दर्शितमुक्तिकोपनिषद्वाक्ये कठेति निर्देशात्। तत्र कठवल्लीत्वेन प्रसिद्धम्। सा च कृष्णयजुर्ब्राह्मणरूपा "उशन् ह वै वाजश्रवसः" इत्याद्या। शब्दकल्पद्रुमे त्रिकाण्डशेषप्रमाणेन ब्राह्मण इति पुंलिङ्गनिर्देशेन विप्रपरतोक्तिश्चिन्त्या त्रिकाण्डशेषे ब्राह्मणपर्य्याये ठान्तनानार्थे च कठशब्दस्यादर्शनात्। [त्रिका०

कठमर्द पु० कठं कष्टजीवनं मृद्नाति मृद-अण्। शिवे

कठर त्रि० कठ-अरन्। कठिने उणा०।

कठशाठ पु० ऋषिभेदे ततः तेन प्रोक्तमधीयते णिनि। काठशाठिन् तत्प्रोक्तछन्दोध्यायिषु पु०ब०व०।

कठाहक पुंस्त्री कठं कठिनमाहन्ति-आ+हन ड ताडशं कं शिरोऽस्य। दात्यूहे शब्दर०।

कठिका स्त्री कठ-बा० वुन्। (खडी) कठिन्याम्।

कठिञ्जर पु० कठ-इन् कठिं कठिनं जरयति जृ-णिच् बा० अच् मुम् च। तुलस्याम् अमरः।

कठिन त्रि० कठ-इनन्। १क्रूरे, २निष्ठुरे, ३कठोरे, ४स्तब्धे च मेदि० ५स्थाल्याम् स्त्री हारा० न० च ६गुडस्य शर्कारायां विश्वः। "नवजलधरश्यामाः पश्यन् दिशो भवतीं विना कठिनहृदये! जीवत्येव प्रिये! स तव प्रियः" "न विदीर्य्ये कठिनाः खलु स्त्रियः" कुमा० "पराभवत् कठिनकठोरकामिनीत्यादि" माघः। "नितान्तकठिनां रुजं मम न वेद सा मानसीम्" विक्रमो०। "गण्डाभोगात् कठिनविषमामेकवेणीं करेण" मेघ० तस्य भावः त्व। कठिनत्व कठिनभावे न०। तल्। कठिनता तद्भावे स्त्री। ष्यञ्। काठिन्य तद्भावे न०। काठिन्यञ्च द्रव्यस्य आरम्भकसंयोगविशेषात् स्पर्शविशेषः। शब्दादेस्तु दुर्बोधत्वम्। [जातित्वात् ङीष्।

कठिनपृष्ठ पु० कठिनं पृष्ठमस्य। १कच्छपे राजनि० स्त्रियां

कठिनी स्त्री कठिन+गौरा०ङीष्। भूमौ लेखनसाधने द्रव्ये। खठिकायाम्। "कठिनीः क्षिणोतीति" नैषधम् "गुणिजनगणनारम्भे न पतति कठिनी ससम्भ्रमा यस्य। तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति" नीतिसारः। स्वार्थे कन् कठिनिकाप्यत्रार्थे।

कठेर त्रि० कठ-कृच्छ्रजीवने एरक्। कृच्छ्रजीविनि उज्ज्व०।

कठेरणि पु० ऋषिभेदे ततो गोत्रापत्ये अणो बहुत्वे वा लुक्। काठेरणाः कठेरणयः तद्गोत्रापत्येषु पुंस्त्री ब० व०

कठेरु पु० कठ-एरु। चामरवाते। शब्दचि०।

कठोर त्रि॰ कठ+ओरन् । १कठिने, २पूर्णे, च शब्दचि॰ । "कठोरतारापतिलाञ्छनच्छविरिति" माघः । 'पराक्रमवत् कठिनकठोरकामिनीत्यादि'' माघः 'स्वार्थे कन्' पाक्षिके च । ''कलाकलापालोचनकठोरमतिभिः'' काद॰ ।

कठोल त्रि॰ कठ-ओलच् । कठिने कठोरे अमरः ।

कड भक्षणे सक॰ मदे अक॰ तुदा॰ सेट् पर॰ । कडति अकडीत् अकाडीत् चकाड । कडारः कड्म्बः । प्रणिकडति ।

कड दर्पे भ्वा॰ इदित् ञित्त्वात् उभ॰ ङित्त्वात् अफलवत्कर्त्तर्य्यपि आत्म॰ अक॰ सेट् । कण्डति ते । अकण्डीत् अकण्डिष्ट चकण्ड चकण्डे । अयं वितुषीकरणार्थे व्यापारभेदे च । (काँड़ान) कण्डति तण्डुलम् इति केचित् ।

कड खण्डे भेदे(वितुषीकरणार्थ व्यापारे)च (काँड़ान) चुरादि॰ इदित् उभ॰ सक॰ सेट् । कण्डयति ते अचकण्डत् त । कण्डयाम् बभूव आस चकार चक्रे । कण्डनम् कण्डितः कण्डयन् कण्ठयितुम् । कण्डयित्वा कण्डना ।

कड त्रि॰ कड-मदे अच् । मूर्खे हला॰ । स्वार्थे क । २भक्षणीये च कडङ्गरम् । [भेदे रत्नमा॰ ।

कडक न॰ कड-अच् संज्ञायाम् कन् । (करकच्) लवण-

कडङ्गर न॰ कडं भक्षणीयं शस्यादि गिरति अभ्यन्तरे निवेशयति गॄ-अच् नि॰ मुम् । वुषे सुक्षादेः फलशून्यनालिकाकाण्डे अमरः ।

कडङ्गरीय त्रि॰ कडङ्गरमर्हति । बुषभक्षणयोग्ये गवादौ । ''नीवारपाकादिकडङ्गरीयैः'' रघुः ।

कड(ल)त्र न॰ गड-सेचने अत्रन् ''गडेरादेश कः'' उणा॰ गस्य कः डलयोरेकत्वात् वा लः १श्रोणौ २भार्य्यायाञ्च उज्ज्वलदत्तः । कलत्रशब्दे उदा॰ ।

कडम्ब पु॰ कड-अम्बच् । १शाकनाड़िकायाम्(डँटा)अमरः । २कोणे प्रान्तभागे च उणादिवृत्तिः ।

कडम्बी स्त्री कडम्बो भूयसा विद्यतेऽस्याः अर्श आद्यच् गौरा॰ ङीष् । (कलमी) शाकभेदे शब्दरत्ना॰ तस्याः कडम्बभूयस्त्वात् तथात्वम् कलम्बीशब्दे उदा॰ ।

कडवक पु॰ ''अपभ्रंशनिबन्धेऽस्मिन् सर्गाः कडवकाभिधाः'' सा॰ द॰ उक्ते अपभ्रंशनिबन्धानामध्यायविरामसूचके सर्गे ।

कडार पु॰ गड-सेचने आरन् गस्य कादेशः । १पिङ्गलवर्णे । २तद्वति त्रि॰ । ''करभकण्ठकडारमाशाः'' माघः । ३दासे पु॰ मेदि॰ । तस्य सेचनकर्त्तृत्वात् तथात्वम् । कड-दर्पे आरन् । ४दृप्ते त्रि॰ कडारशब्दस्य कर्म्मधारये वा पूर्वनिपातः । कडारजैमिनिः जैमिनि-कडारः बहुव्रीहौ तु न । ''कडारपुरुषोत्तमः'' सि॰कौ॰ । ''कडाराः कर्मधारये'' पा॰ बहुत्वात्तद्गणोऽत्र विवक्षितः स च गणः । कडार, गडुल, खञ्ज, खोड़, काण, कुण्ठ, खलति, गौर, वृद्ध, भिक्षुक, पिङ्ग, पिङ्गल, तनु, जरठ, बधिर, मठर, कुब्ज, वर्बर" ।

कडितुल पु॰ कट्या तुल्योऽत्र पृषो॰ टस्य डः । खड्गे शब्दर॰ कटिव्यासस्य लिङ्गदण्डाधिकतया खड्गस्य च निस्त्रिंशत्वेन त्रिंशदधिकाङ्गुलतया च तयोः साम्येन तथात्वम् । कड भक्षणे इन् तस्य तुल्योऽत्र । हिंसकतुल्यत्वाद्वा खड्गस्य तथात्वम् ।

कड्ड कार्कश्ये भ्वा॰ पर॰ अक॰ सेट् । कड्डति अकड्डीत् । चकड्ड-प्रनिकड्डति डोपधत्वात् क्विपि डट् कड् ।

कण आर्त्तस्वरे भ्वा॰ पर॰ अक॰ सेट् । कणति अकाणीद् अकणीत् । ऋदित् । णिचि अचीकणत् त अचकणत् त । चकाण प्रनिकणति ।

कण गतौ भ्वा॰ पर॰ सक॰ सेट् । कणति अका(क)णीत् । घटादि॰ । णिचि कणयति ते ।

कण निमीलने वा चुरा॰ पर॰ अक॰ सेट् । काणयति ते । अचीकणत् त । काणयाम् बभूव आस चकार चक्रे काणः पक्षे पर॰ भ्वा॰ कणति अक(का)णीत् चकाण ।

निमीलनञ्च नेत्रादेः पक्ष्मावरणं शावयवसङ्कोचनञ्च ।

कण पु॰ कण-निमीलने अच् । १धान्यादेरतिसूक्ष्मांशे, राजनि॰ २लेशे च वयवाल्पत्वेन तयोरवयवसङ्कोचनत्वात्तथात्वम् ''तिलातसीसर्षपकणांस्तान प्रकिरेत्''सुश्रु॰ । ''हादग्राहं कणाशता''याज्ञ॰ ''नयनयुगलं कज्जलभरम्''उद्भटः । ''उद्यानानां नवजलकणैर्यूथिकाजालकानि'' मेघ॰ । कणभक्षः कणादः । ३वनजीरके स्त्री गौरा॰ ङीष् । अल्पार्थे टाप् । ४क्षुद्रांशे. ५जीरके ''शुण्ठीपादमिता कणार्द्धमिता दीप्याग्न्यावाग्न्योः क्रमात्''वैद्यकम् । 'द्राक्षावल्लीनागवल्ली कणावल्लीशताहृतम्'' काशी॰ । ६पिप्पल्याम्, ७श्वेतजीरके च राजनि॰ । "कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि"मनुः अल्पार्थे स्त्रीत्वमपि "कदलीफलमध्यस्थं कणामात्रमपक्वकम्" तिथित॰ । (कुमेरापोका) । ७कुम्भरीमक्षिकायां स्त्री मेदि॰ । ८महिषाख्यगुग्गुलौ न॰ "महिषाख्यं कणं दारु सिह्लकं सागुरुं सितम् । शङ्खं जातीफलं श्रीशे धूपानि स्युः प्रियाणि वै" ति॰ त॰ वामपु॰ । "कणं महिषाख्य गुग्गुलुः" रघु॰ भीमसेनो भीमवत् कणगुग्-

गुलु: कण इत्युत्तरपदलोपात्तथेति चिन्तनीयम् ।

कणगुग्गुलु पु० कण–निमीलने अच् कर्म्मधा० । महिषाख्य-गुग्गुलौ राजनि० । प्रसङ्गात् गुग्गुलुभेदगुणादिकं भावप्र० दर्शितमुच्यते ।"महिषाख्यो महानीलः कुमुदः पद्म इत्यपि । हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः । भृङ्गाञ्जनसवर्णस्तु महिषाख्य इति स्मृतः । महानीलस्तु विज्ञेयः स्वनामसमलक्षणः । कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः । हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम् । महिषाख्यो महानीलो गजेन्द्राणां हिता वुभौ । हयानां कुमुदः पद्मः स्वस्त्यारोग्यकरौ परौ । विशेषेण मनुष्याणां कनकः परिकीर्त्तितः । कदाचिन्महिषाख्यश्च ख्यातः कैश्चिन्नृणामपि । गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णः पित्तलः सरः । कषायः कटुकः पाके कटू रूक्षो लघुः परः । भग्नसन्धानकृद् वृष्यः सूक्ष्मः स्वर्य्यो रसायनः । दीपनः पिच्छिलो बल्यः कफवातव्रणापहः । मेदोमेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् । पिड़काग्रन्थिशोफार्शोगण्डमालाः कृमीन् जयेत् । माधुर्य्याच्छमयेद्वातं कषायत्वाच्च पित्तहा । तिक्तत्वात् कफजित्तेन गुग्गुलुः सर्वदोषहा । स नवो वृंहणो वृष्यः पुराणस्त्वतिलेखनः । स्निग्धः काञ्चनसङ्काशः पक्वजम्बूफलोपमः । नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः । शुष्को दुर्गन्धकश्चैव त्यक्तप्रकृतिवर्णकः । पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्य्यवर्ज्जितः । अम्लं तीक्ष्णमजीर्णञ्च व्यवायं श्रममातपम् । मद्यं रोषञ्च त्यजेत् सम्यग्गुणार्थी पुरसेवकः"।

कणजीर पु० कर्म्मधा० । श्वेतजीरके राजनि० ।

कणजीरक पु० कर्म्म० अल्पार्थे कन् । क्षुद्रजीरके रत्नमा० जीरकपर्य्यायभेदगुणादि भावप्र० दर्शितं यथा 'जीरको जरणो जाजी कणा स्याद्दीर्घजीरकः । कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः । कालाजाजी तु सुषवी कालिका चोपकालिका । पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका । उपकुञ्ची च कुञ्ची च वृहज्जीरक इत्यपि । जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु । संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् । ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम् । चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्" ।

कणप पु० कणान् लौहगुलिकाः पिबति पा–क । यन्त्रभेदे (वन्दुक)येन यन्त्रेण आग्नेयद्रव्ययोगेन गर्भसंभृता लौहगुलिकास्तारका इव विकीर्य्यन्ते तादृशे यन्त्रे "अयःकणपचक्राश्मभुशुण्ड्युद्यतबाहवः" भा० आ० ८२५७ श्लो० नीलकण्ठ व्याख्यायां अयःकणपम् लौहमयमिति क्लीवतया प्रयोगश्चिन्त्यः अमरे "आतपः क्षत्रिये नाभिः कणपः क्षुरकेदर:" इति पुंस्त्वनिर्द्देशात् तत्र कुणप इति पाठान्तरम् ।"चापचक्रकणपकर्पणप्रासपट्टिशमुषलतोमरादिप्रहरणजालम्"दशकुमा०पा–ण्यनि । कणपायिन् इत्यपि तत्र ।"परिघान् भिन्दिपालांश्च भुशुण्डीः कणपायिनः" भा०कर्ण०७४४श्लो० । कणपानपि इति पाठः

कणभ पु० कण इव भाति भा–क । अग्निप्रकृतिके सुश्रुतोक्ते कीटभेदे ।"त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः । चत्वार एते कणभाव्याख्यातास्तीव्रवेदनाः" सुश्रु० । स्वार्थे कन् तत्रार्थे । "कौण्डिन्यकः कणभकः" इत्युपक्रम्य "एते ह्यग्निप्रकृतयश्चतुर्विंशतिरेव च । तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः" सुश्रु० ।

कणलाभ पु० कणानां लाभोयस्मात् । १पेषणसाधनयन्त्रभेदे (याँता) स घाडस्तेनास्त्यस्य अर्श०अच् ।२आवर्त्ते त्रिका० (जलेरघूर्णी) तस्य पेषणयन्त्रवत् आवर्त्तनात् तथात्वम्

कणशस् अव्य०कणशब्दात् अल्पार्थात् कारकार्थवृत्तेः वीप्सार्थे शस् । कारकार्थवृत्तेः कणशब्दस्य वीप्सान्वितेऽर्थे "तदिदं कणशोविकीर्य्यते पवनैर्भस्म कपोतकर्बुरम्"कुमा० ।

कणाटीन पुंस्त्री कणायाटति अट्–ईनन् । खञ्जनपक्षिणि शब्दर० स्त्रियां ङीष् ।

कणाटीर पुंस्त्री कणायाटति अट–ईरन् । खञ्जनखगे शब्दरत्ना० । स्त्रियां ङीष् । स्वार्थे कन् । कणाटीरकोऽप्यत्र

कणाद पु०कणमत्ति अद–अण् उप० स० । १वैशेषिकसूत्रकारे काश्यपगोत्रे मुनिभेदे तन्मतमौलूक्यशब्दे दर्शितम् । २कलादे स्वर्णकारे च शारसुन्दरी ।

कणिक पु० कणोविद्यतेऽस्य अस्त्यर्थे ठन् । १गोधूमचूर्णे, (मयदा) राजनि० २अतिसूक्ष्मांशे, ३अग्निमन्थवृक्षे च स्त्री मेदि० । स्वार्थे ठन् ४अल्पार्थे "नाभेरभूत् स्वकणिकाद्वटधन्महाब्जम्" भाग० ७,९,३३, कणैव स्वार्थे कन् । कणिका५जीरके । मेदि०।६अल्पांशे ७तण्डुलभेदे च रायमुकुटः ।"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन" मेघ०

कणित न० कण–आर्त्तस्वरे भावे क्त । १पीड़ितानां शब्दे । कर्त्तरि क्त । २तत्कर्त्तरि त्रि० ।

कणिश न० कणो विद्यतेऽस्य इनि कणी तं श्यति शो–क । शस्यमञ्जर्य्यां धान्यादिशीर्षे अमरः ।

कणीक त्रि० कण–ईकन् ।१अल्पे उणादिकोषः।

कणीचि पु० कण–"कृवणिभ्यामीचिः"उणा०ईचि ।१पल्लव्यां

२मशासे च रभसः। ३युग्मिताया लतायां ४गुञ्जायां शकटे च स्त्री मेदि० वा ङीप्।

कणीयस् त्रि० कण+ईयसु। अत्यन्ताल्पे स्त्रियां ङीप्।

कणे अव्य०कण–ए। श्रद्धाप्रतिघाते अस्य "कणेमनसी श्रद्धा प्रतिघाते" पा०गतित्वम्। तेन कणेहत्य पयः पिबतीत्यादौ गतित्वात् समासे ल्यप्। श्रद्धाप्रतिघातं हत्वेत्यर्थः।

कणेर पु० कण एर–। १कर्णिकारवृक्षे २वेश्यायां ३हस्तिन्यां च स्त्री उणादिकोषः। [कारवृक्षे पु०मेदि०।

कणेरु स्त्री कण–एरु। १वेश्यायां २करिण्याञ्च ३कर्णि-

कण्ट त्रि०कटि–अच्। कण्टके। कण्टफलः

कण्टक पु०न० कटि–ण्वुल्। १क्षुद्रशत्रौ, २क्षुद्रशत्रौ, ३रोमाञ्चे, अम० ४मत्स्याद्यस्थि ५द्रुमाङ्गे (कांटा) मेदि० ६केन्द्रे दीपिका"लग्नाम्बुद्यूनकर्माणि केन्द्रसंज्ञञ्च कण्टकम्" इति ज्योतिषोक्तेः लग्न तच्चतुर्थसप्तमदशमस्थानरूपं केन्द्रम्। "चेत् कण्टके पनफरे तु ग्रहाः समस्ताः स्यादिक्कवाल इति राज्यसुखाप्तिहेतुः"नील०। "अष्टमस्थे निधानाये कण्टके पापवर्जिते" षट्प०। तत्र क्षुद्रशत्रौ "सर्वकण्टकपापिष्ठं हेमकारं तु पार्थिवः" "कण्टकानाञ्च शोधनम्" "एवमादीन् विजानीयात् प्रकाशान् लोककण्टकान्" "कण्टकोद्धरणे नित्यमातिष्ठेत् यत्नमुत्तमम्" मनुः। रोमाञ्चे "प्रीतिकण्टकितत्वचः" कुमा०। उपचारात् वादे ७दोषभेदे। "एवं क्षुद्रकण्टका उद्धर्त्तव्याः" सर्व्वद०।

कण्टकद्रुम पु०कण्टकप्रधानोद्रुमः शा०त०। वर्वुरप्रभृतौ कण्टकान्विते वृक्षे। "किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्। भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकद्रुमाः" मृच्छ०।"दैतेयचन्दनवने जातोऽयं कण्टकद्रुमः" भाग० ७,५,१७,। २शाल्मलिवृक्षे (शिमुलगाछ) राजनि० कण्टकोऽस्त्यस्य वाहुल्येन इनि कर्म्मधा०। काण्टकिद्रुमोऽप्युभयत्र। एवं कण्टकवृक्षकण्टकिवृक्षादयोऽप्युभयत्र

कण्टकप्रावृता स्त्री ३त०। घृतकुमार्य्याम् राजनि०।

कण्टकफल पु० कण्टकान्वितं फलं यस्य। पनसवृक्षे (काटाल) कण्टकिफलोऽप्यत्र अमरः। २गोक्षुरवृक्षे (गोखुरी) रत्नमाला

कण्टकवृन्ताकी स्त्री कण्टकान्विता वृन्ताकी शा०त०। वार्त्ताक्याम् (वेगुण) राजनि०। तस्यावृन्ते कण्टकान्वितत्वात् तथात्वम्. [शब्दच०

कण्टकश्रेणि स्त्री कण्टकानां श्रेणिर्यत्र। कण्टकार्य्याम्

कण्टकस्थल पु० वृह०सं० कूर्म्मविभागे आग्नेय्यामुक्तदेशभेदे। स च देशः "आग्नेय्यां दिशि कोसलेत्युपक्रमे "किष्किन्ध्याकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः"इत्युक्तः। [जन्तुभेदे राजनि०स्त्रियां ङीष्।

कण्टकागार पुंस्त्री कण्टकमागिरति आ+गृ–अण्।(सरट्)

कण्टकाढ्य पु० कण्टकैराढ्यः। कुब्जके कण्टकयुक्तपुष्पप्रधाने वृक्षभेदे राजनि०।

कण्टकार पु० कण्टकमृच्छति ऋ–अण्। १शाल्मलिवृक्षे (शिमुल) राजनि०। २विकङ्कते (वँइची) शब्दरत्ना०। ३स्वनामख्यातवृक्षे स्त्री भावप्र० "किट्टाणञ्" सूत्रे तद्धितारणन्तस्यैव ग्रहणमते गौरा०ङीष्। अन्यमते अणन्तत्वात् ङीप् इति भेदः। कण्टकारा(री)णां समूहः रक्षता० अञ्। काण्टकार तत्समूहे। तत्र गणे कण्टकारशब्दस्य पाठेऽपि लिङ्गविशिष्टपरिभाषया कण्टकारीशब्दस्यापि ग्रहणात्।

कण्टकारिका स्त्री कण्टकान् ऋच्छति कण्टक+ऋ–ण्वुल्। १स्वनामख्याते वृक्षे। फलेऽपि हरितक्यादित्वात् लुक् तत् फलेऽपि स्त्री। "कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका। कण्टालिका कण्टकिनी धावनी वृहती तथा। उभे च वृहत्यौ। यत आह शाश्वतः "क्षुद्रायां क्षुद्रभण्टाक्यां वृहतीति निगद्यते"। श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका। गर्भदा चन्द्रभा चन्द्रा चन्द्रपुष्पा प्रियङ्करी। कण्टकारी सरा तिक्ता कटुका दीपनी लघुः। रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान्। निहन्ति पीनसं पार्श्वपीडाक्रिमहृदामयान्। तयोः फलं कटु रसे पाके च कटुकं भवेत्। शुक्रस्य रेचनं भेदि तिक्तं पित्ताग्निकृल्लघु। हन्यात् कफमरुत् कण्डूकासमेदःक्रिमिज्वरान्। तद्वत्प्रोक्ता सिता क्षुद्रा विशेषाद् गर्भकारिणी" भावप्र० पर्य्यायभेदगुणा उक्ताः "कण्टकारीफलं तिक्तं कटुकं दीपनं लघु। रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम्" भावप्र०

कण्टकारीघृत न० चक्रद० उक्ते घृतभेदे "कण्टकारीगुडूचीभ्यां पृथक्त्रिंशत्पलाद्रसे। प्रस्थः सिद्धो घृताद्वातकासनुद्वह्निदीपनः".

कण्टकार्य्यादिपाचन न०चक्रद० उक्ते पाचनभेदे "कण्टकार्य्यमृता भार्गी नागरेन्द्रयवासनम्। भूनिम्बञ्चन्दनं मुस्तं पटोलं कटुरोहिणी। कषायं पाययेदेतत्पित्तश्लेष्मज्वरापहम्। दाहतृष्णारुचिच्छर्दिकासहृत्पार्श्वशूलनुत्"

कण्टकाल पु॰ कण्टं कण्टकाकारं फले कालयति चुरा॰ कल–अण्। पनसवृक्षे शब्दच॰। [यवासवृक्षे राजनि॰

कण्टकालुक पु॰ कण्टकायालति पर्य्याप्नोति अल–उकञ्।

कण्टकाशन पु स्त्री कण्टकमश्नाति अश–युच्। उष्ट्रे त्रिका॰ स्त्रियां ङीष्। एवं कण्टकभक्षकादयोऽप्यत्र।

कण्टकाष्ठील पुंस्त्री कण्टकमष्ठीलमिवास्य। मत्स्यभेदे त्रिका॰ स्त्रियां ङीप्।

कण्टकित त्रि॰ कण्टको रोमाञ्चो जातोऽस्य तार॰ इतच्। जातपुलके "प्रीतिकण्टकितत्वचः" कुमारः। "व्याशोट वरः कण्टकितप्रकोष्ठः" रघुः।

कण्टकिन् पुंस्त्री कण्टकोऽस्त्यस्य कण्टक+इनि। मत्स्ये शब्दर॰ स्त्रियां ङीप्। २खदिरवृक्षे पु॰ शब्दमाला ३मदनवृक्षे (मयना) रत्नमा॰। ४गोक्षुरे ५वंशे ६वदरवृक्षे च राजनि॰। ७कण्टकयुक्तमात्रे त्रि॰।

कण्टकिफल पु॰ कण्टकि कण्टकयुक्तं फलमस्य। पनसे स्त्रियां ङीप् सा च १वार्त्ताक्यां शोथझिण्ट्यां ३मधुखर्ज्जूर्य्याञ्च राजनि॰ तस्य पर्य्यायगुणादि भाव॰उक्तं यथा "पनसः कण्टकिफलः पनसोऽतिबृहत्फलः 'पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम्। तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशम्। बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतव्रणान्। आमन्तदेव विष्टम्भि वातलन्तुवर गुरु। दाहकृत् मधुरं बल्यं कफमेदोविवर्द्धनम्। पनसोद्भूतवीजानि वृष्याणि मधुराणि च। गुरूणि बद्धविट्कानि सृष्टमूत्राणि संवदेत्"। अन्यच्च। "मज्जा पनसजोवृष्यो वातपित्तकफापहः। विशेषात् पनसोवर्ज्यः गुल्मिभिर्मन्दवह्निभिः"। [भेदे शब्दच॰।

कण्टकिल पु॰कण्टक+अस्त्यर्थे इलच्। (वेडवाश)। वंश-

कण्टकिलता स्त्री कण्टकिनी लता कर्म॰। (शशा) त्रपुषीलतायाम् राजनि॰

कण्टकी स्त्री कण्टक+अर्शआदित्वादच् गौरा॰ङीष्। वार्त्ताकीभेदे। (काँटावेगुण) राजवल्लभः। "कण्टकी कटु तिक्ता च रक्तपित्तप्रकोपिनी। कण्डूकच्छूहरा नित्यं दीपनी परिकीर्त्तिता" इत्युक्तगुणा। २कर्म्मणि च "यातुधानेभ्यः कण्टकीकारीम्" यजु॰ ३०८। "कण्टकी कर्म्म तत्कारिणीम्" वेददीपः।

कण्टकीद्रुम पु॰कण्टकी द्रुमः पृषो॰दीर्घः खदिरवृक्षे रत्नमा॰

कण्टकीफल पु॰ कण्टकि फलमस्य पृषो॰दीर्घः। पनसे भरतः

कण्टकुरण्ट पु॰कण्टप्रधानः कुरण्टः। झिण्ट्याम्(झं.टि,राजनि॰

कण्टतनु स्त्री कण्टा कण्टकान्विता तनुर्यस्याः। बृहत्याम् राजनि॰। [राजनि॰

कण्टदला स्त्री कण्टं कण्टकाचितं दलं यस्याः। केतक्याम्।

कण्टपत्र पु॰ कण्टं कण्टकान्वितं पत्रं यस्य। विकङ्कतवृक्षे। (वँइची) शब्दमाला [ब्रह्मदण्ड्याम् राजनि॰।

कण्टपत्रफला स्त्री कण्टं कण्टकान्वितं पत्रं फलञ्च यस्याः।

कण्टपाद पु॰ कण्टः कण्टकान्वितः पादो मूलं यस्य। विकङ्कतवृक्षे। (वँइची) राजनि॰।

कण्टफल पु॰ कण्टं कण्टकान्वितं फलं यस्य। १गोक्षुरे, २पनसे, ३धूस्तूरे, ४लताकरञ्जे, ५एरण्डभेदे च राजनि॰। (देवताड) ६देवतालीलतायाम् स्त्री राजनि॰।

कण्टल पु॰ कण्ट+मत्वर्थीयो लच्। वर्वुरे(वावला)शब्दच॰।

कण्टवल्ली स्त्री कण्टा कण्टकान्विता वल्ली। श्रीवल्लीवृक्षे राजनि॰

कण्टवृक्ष पु॰ कण्टप्रधानोवृक्षः। तेजःफलवृक्षे राजनि॰।

कण्टाफल पु॰कटि–भावे अ कण्टा वेष्टनम् तया तदुपलक्षितं फलमस्य। पनसे (काटाल) शब्दमाला।

कण्टार्त्तगला स्त्री कण्टा तद्युक्ता आर्त्तगला कर्म॰। नीलझिण्ट्याम्। (नीलझाँटि) राजनि॰।

कण्टालु स्त्री कण्टाय कण्टकाय अलति पर्य्याप्नोति अल उण्। १वार्त्ताक्यां २वंशे ३बृहत्यां ४वर्वुरे च राजनि॰।

कण्टाह्व न॰ कण्टं कण्टकमाह्वयते स्पर्द्धते आ+ह्वे-क। कटुकन्दे राजनि॰।

कण्टिन् त्रि॰ कण्ट+अस्त्यर्थे इनि। १खदिरे २अपामार्गे (आपाङ)३गोक्षुरे (गोक्षुरी)४कलायभेदे च राजनि॰। ५कण्टकयुक्ते त्रि॰स्त्रियां ङीप्, सा च कण्टकार्य्यां भावप्र॰

कण्ठ पु॰ कण–ठ ठस्य नेत्त्वम् कठि–अच् वा। १ग्रीवापुरोभागे गले "मनोरथः कण्ठपथं कथं सः" नैष॰। नीलकण्ठः शितिकण्ठः कालकण्ठः। "सवाष्पकण्ठस्खलितैः पदैरियम्"। "असत्यकण्ठार्पितबाहुबन्धना" कुमा॰। "कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे" मेघ॰। "कण्ठं ते कुण्ठयिष्यामि" नैष॰ कण्ठदेशे च सुषुम्णानाडीमध्यस्थ षट्चक्रान्तर्गतं विशुद्धाख्यं चक्रमस्ति। "तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोड़शपङ्कजम्। स्वरैः षोड़शभिर्युक्तं धूम्रवर्णैर्महाप्रभम्। विशुद्धतत्त्वमाख्यातमाकाशाख्यं महाद्भुतम्" गौत॰त॰। विशुद्धचक्रे विवृतिः। २मदनवृक्षे, ३समीपे ४होमकुण्डाद्बाह्ये ऽङ्गुलिमितस्थाने च "खातबाह्येऽङ्गुल कण्ठः सर्व्वकुण्डेष्वयं क्रमः" ति॰पु॰त॰। ५कण्ठध्वनौ ६ध्वनि

मात्रे च हेमच०। “सा मुक्तकण्ठं, व्यसनातिभारात्” रघुः मुक्तकण्ठध्वनि यथा तथेत्यर्थः। अस्य स्वाङ्गत्वेन उपसर्ज्जनत्वे संयोगोपधत्वेऽपि ङीप्। किमिदं किन्नरकण्ठि! सुप्यते” रघुः। स्वरद्वारा किन्नरकण्ठसाम्यम्। “ऊर्द्ध्वविस्तृतदोःपाणिन्टमाने पौरुषं त्रिषु। कण्ठोगलोऽथ” इत्यमरे त्रिष्विति पदस्य उत्तरान्वयभ्रमेण शब्दकल्पद्रुमादौ कण्ठशब्दस्य त्रिलिङ्गत्वोक्तिः प्रामादिकी। “पौरुषं पुरुषस्याथ भावे कर्मणि तेजसि। ऊर्द्ध्वविस्तृतदोःपाणिमाने स्यादभिधेयवत्” मेदिन्यां मानभेदे पौरुषशब्दस्यैव वाच्यलिङ्गत्वोक्तेस्तदेकवाक्यतया पौरुषशब्दस्यैव त्रिलिङ्गत्वं युक्तं न तु तस्य कण्ठान्वयित्वम्। युक्तञ्चैतत् पुरुषः प्रमाणमस्येत्यर्थे पुरुषहस्तिभ्यामण् चेति” पा० सूत्रे विहिताणन्ततया अस्येति वाक्यबोधित लिङ्गत्वमिति।

कण्ठकूणिका स्त्री कण्ठ इव तद्ध्वनिरिव कूणयति कूण–ण्वुल्। वीणायां हेम०। वीणायाः कण्ठतुल्यस्पष्टध्वनिकत्वात्तथात्वम्।

कण्ठतलासिका स्त्री कण्ठतले अश्वकण्ठ स्थाने आस्ते आस-ण्वुल्। अश्वपावावेष्टकचर्म्मादौ शब्दच०।

कण्ठदघ्न त्रि०कण्ठः परिमाणमस्य दघ्नच्। गलपरिमाणे“यथोपपत्कदघ्नं वा कण्ठदघ्नं वा” शत० ब्रा० १२,२,१,२।

कण्ठधान पु० देशभेदे स च वृह० कूर्मविभागे ‘उत्तरतः कैलासः” इत्युपक्रम्य “तक्षशिलपुष्कलावतकैलावतकण्ठधानाश्च” उत्तरत उक्तः।

कण्ठनीड़क पु० कण्ठे निकटस्थे नीड़े कायति शब्दायते कै–क (चिल)। पक्षिभेदे त्रिका०।

कण्डनीलक पु०कण्ठं नीलयति धारकस्य स्वशिखाकज्ज्वलेन। नील+णिच्–ण्वुल्। (मशाल)महादीपे शब्दमाला।

कण्ठपाशक पु० कण्ठे पाश इव कायति प्रकाशते कै–क। गजगलावेष्टनरज्जुाम् शब्दमाला। [दड़िगाधा)।

कण्ठबन्ध पु०७त०। गले बन्धने। उद्बन्धने। (गलाय-

कण्ठभूषा स्त्री ६त०। गलाभरणे अमरः।

कण्ठमणि पु० कण्ठे धार्य्योमणिः। गले धार्य्ये मणिभेदे।

कण्ठशालूक न०सुश्रुतोक्ते गलगते मुखरोगभेदे“कण्टगतास्तु रोहिण्यः पञ्च, कण्ठशालूकमिति विभज्य“कोलास्थिमात्रः कफसम्भवो यो ग्रन्थिर्गले कण्ठकशूकभूतः। खरः स्थिरः शस्त्रनिपातसाध्यस्तं कण्ठशालूकमिति ब्रुवन्ति”सुश्रु०लक्षितम् “विस्राव्य कण्ठशालूकं साधयेत् तुण्डकेरिवत्” सुश्रु०।

कण्ठशुण्ठी स्त्री सुश्रुतोक्ते तालुगते मुखरोगभेदे स च रोगः “तालुगतास्तु गलशुण्ठिकेत्युपक्रम्य “श्लेष्मासृग्भ्यां तालुमूलात् प्रवृद्धो दीर्घः शोफाध्मानवस्तिप्रकाशः। तृष्णाश्वासकासकृत् संप्रदिष्टो व्याधिर्वैद्यैः कण्ठशुण्डीति नाम्ना” इति लक्षितः। गलशुण्ठीत्यप्यत्र स्त्री।

कण्ठसूत्र न० “यं कुर्वते वक्षसि वल्लभस्य स्तनाभिघातं निविड़ोपघातात्। परिश्रमार्त्ताः शनकैर्विदग्धास्तत् कण्ठसूत्रं प्रवदन्ति तज्ज्ञाः” इत्युक्तलक्षणे सुरतबन्धभेदे; “तस्य निर्दयरतिश्रमालसाः कण्ठसूत्रमपदिश्य योषितः”रघुः।

कण्ठाग्नि पु० कण्ठे अग्निः पाकाग्निर्यस्य। विहगे, तस्य गलाधःकरणमात्रेणैवान्नादेः पाकाद्दीप्ताग्नित्वात् तथात्वम्

कण्ठाल पु० कठि–आलच्। १शूरणे(ओल)२युद्धे, ३नौकाङ्गे, ४खनित्रे विश्वः। ५गोणीभेदे ६जालगणिकायां च मेदिनिः स्त्री। [भेदे। हेमच०

कण्ठिका स्त्री कण्ठग्रोभूष्यतयाऽस्त्यस्याः ठन्।(एकनर)गलाभरण

कण्ठी स्त्री क्षुद्रः कण्ठः अल्पार्थे ङीप्।१अश्ववेष्टनरज्ज्वाम्। शब्दमा०। २गले अमरटीकायां भरतः कण्ठीरवः।

कण्ठीरव पुंस्त्री कण्ठ्यां रवो यस्य। १सिंहे२मत्तगजे, “कण्ठीरवमहापद्हेण”दशकुमा०। ३कपोते च राजनि० स्त्रियां ङीष्। वासकवृक्षे स्त्री गौ०ङीष्। राजनि०

कण्ठेकाल पु० कण्टे कालः कण्ठे कालोऽस्य वा सप्तम्या अलुक्। महादेवे। हेमच०।

कण्ठ्य त्रि० कण्ठे भवादि“शरीरावयवाद् यत्”पा० यत। १गलभवे“कीर्त्तितं तालुजानान्तु कण्ठ्यानां कर्म्म चोच्यते” सुश्रु०। “भवस्य ‘कण्ठ्यं रुद्रस्यान्तःपार्श्व्यम्” यजु० ३९,८, कण्ठ्यं गलभवं मांसम्”वेददी०।२अकुहविसर्जनीयवर्णेषु च। “अकुहविसर्ज्जनीयानां कण्ठ” इत्युक्तवर्णानां तथात्वम्। ‘अर्द्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत्”शिक्षा “कण्ठ्यमाङ्कुरसंयुतम्” शिक्षा कण्ठाय कण्ठस्वराय हितं यत्। ३कण्ठस्वरहितकारके “सर्व्वदोषहरा लघ्वी कण्ठ्या मूलकपत्रिका” सुश्रु०।“यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः” सुश्रु०। अस्य च यदन्तद्व्यचकतया आद्युदात्तस्वरः।

कण्डन न० कडि–ल्युट्। मुसलादिना तण्डुलादेर्निस्तुषता सम्पादने १व्यापारे(काडान)“न हि व्रीह्यादिलवनकण्डनपेषणादौ च सविज्ञानानाम्” छा० उ०भा०। कण्ड्यते कर्म्मणि ल्युट्। तण्डुलादेः कण्डनसाध्ये (कुड़ो) इति

ख्याते २द्रव्यभेदे । "क्रियां कुर्य्यात् भिषक् पश्चाच्छालितण्डुलकण्डनैः" सुश्रु० । "अथ पलितं तण्डुलकण्डन प्रदिग्धगात्रीम्" सुश्रु० ।

कण्डनी स्त्री कण्ड्यतेऽनेन कडि–करणे ल्युट् । १मूषले २उदूखले च "कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" मनुः

कण्डरा स्त्री कडि–अरन् । १महास्नायौ महानाड्यां हेमच० तासां विवृतिः भावप्रका० यथा 'महत्यः स्नायवः प्रोक्ताः कण्डरास्तास्तु षोडश । प्रसारणाकुञ्चनयोर्दृष्टं तासां प्रयोजनम् । चतस्रो हस्तयोस्तासां तावत्यः पादयोः स्मृताः । ग्रीवायामपि तावत्यस्तावत्यः पृष्ठसङ्गताः"। तत्र पादहस्तगतानां कण्डराणां नखाः प्ररोहाः, ग्रीवानिबन्धनानामधोभागगतानां प्ररोहो मेढ्रः, पृष्ठनिबन्धानां प्ररोहो नितम्बमूर्द्धोरुवक्षस्तनपिण्डाः" । "पार्ष्णिं प्रत्यङ्गुलीनां तु कण्डरा याऽनिलार्द्दिता" "तलं प्रत्यङ्गुलीनां तु कण्डरा बाहुपृष्ठतः" इति च सुश्रुतः ।

कण्डरीक पु० सप्तजातिस्मरमध्ये विप्रभेदे तेषां पूर्वजन्मवृत्तान्तसहिता कथा हरिवंशे दर्शिता यथा "भगाल्वस्य चरितं कण्डरीकस्य चैव हि" इत्युपक्रम्य।

"वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च । खसृमः पितृवर्त्ती च नामभिः कर्म्मभिस्तथा । कौशिकस्य सुतास्तात शिष्या गर्गस्य भारत ! । पितर्य्युपरते सर्व्वे व्रतवन्तस्तदाऽभवन् । नियोगात्ते गुरोस्तस्य गां दोगध्रीं समकालयन् । समानवत्सां कपिलां सर्व्वे न्यायागतां तदा । तेषां पथि क्षुधार्त्तानां बाल्यान्मोहाच्च भारत । क्रूरा बुद्धिः समभवत्तां गां वै हिंसितुं तदा । तान् कविः खसृमश्चैवा वोचतां नेति वै तदा । न चाशक्यन्त ताभ्यां ते तदा वारयितुं द्विजाः । पितृवर्त्ती तु यस्तेषां नित्यं श्राद्धान्वितो द्विजः । स सर्व्वानब्रवीद्भ्रातॄन् कोपाद्धर्म्मे समाहितः । यद्यवश्यं प्रहन्तव्यं पितॄनुद्दिश्य साध्विमाम् । प्रकुर्व्वीमहि गां सम्यक् सर्व्वे एव समाहिताः । एवमेषाऽपि गौर्द्धर्मं प्राप्स्यते नात्र संशयः । पितॄनभ्यर्च्य धर्म्मेण नाधर्म्मो नो भविष्यति । तथेत्युक्त्वा तु ते सर्व्वे प्रोक्षयित्वा च गान्ततः । पितृभ्यः कल्पयित्वैनामुपायुञ्जन्त भारत ! । उपयुज्य च गां सर्व्वे गुरोस्तस्य न्यवेदयन् । शार्द्दूलेन हता धेनुर्वत्सोऽयं प्रतिगृह्यताम् । आर्ज्जवात् स तु वत्सं तं प्रतिजग्राह वै द्विजः । मिथ्योपचर्य्य ते तन्तु गुरुमन्यायतो द्विजाः । कालेन समयुज्यन्त सर्वे एवायुषः क्षये । ते वै क्रूरतया हिंसा अनार्य्यत्वाद्गुरौ तथा । उग्रा हिंसाविहाराश्च सप्ताजायन्त सोदराः । लुब्धकस्यात्मजास्तात । बलवन्तो मनीषिणः । पितॄनभ्यर्च्य धर्म्मेण प्रोक्षयित्वा च गान्तदा । स्मृतिप्रत्यवमर्षश्च तेषां जात्यन्तरेऽभवत् । जाता व्याधा दशार्णेषु सप्त धर्मविचक्षणाः । स्वधर्मनिरताः सर्वे लोभानृतविवर्ज्जिताः । तावन्मात्रं प्रकुर्व्वन्ति यावता प्राणधारणम् । शेषं ध्यानपराः कालमनुध्यायन्ति कर्म तत् । नामधेयानि चाप्येषामिमान्यासन् विशाम्पते ! । निर्वैरो निर्वृतिः क्षान्तो निर्मन्युः कृतिरेव च । वैधसो मातृवर्त्ती च व्याधाः परमधार्मिकाः । तैरेवमुषितैस्तात हिंसाधर्मपरैः सदा । माता च पूजिता वृद्धा पिता च परितोषितः । यदा माता पिता चैव संयुक्तौ कालधर्मणा । तदा धनूंषि ते त्यक्त्वा वने प्राणानवासृजन् । शुभेन कर्म्मणा तेन जाता जातिस्मरा मृगाः । त्रासानुत्पाद्य संविग्ना रम्ये कालञ्जरे गिरौ । उन्मुखो नित्यवित्रस्तः स्तब्धकर्णो विलोचनः । पण्डितो घस्मरो नादी नामतस्तेऽभवन्मृगाः । तमेवार्थमनुध्यान्तो जातिस्मरणसम्भवम् । आसन् वनेचरा दान्ता निर्द्वन्द्वा निष्परिग्रहाः । ते सर्वे शुभकर्म्माणः सधर्म्माणो वनेचराः । योगधर्ममनुध्यान्तो विहरन्ति स्म तत्र ह । मरुं साध्य जहुः प्राणान् लब्धाहारास्तपस्विनः । तेषां मरुं साधयतां पदस्थानानि भारत ! । तथैवाद्यापि दृश्यन्ते गिरौ कालञ्जरे नृप ! । कर्म्मणा तेन ते तात ! शुभेनाशुभवर्ज्जिताः । शुभाच्छुभतरां योनिं चक्रवाकत्वमागताः । शुभे देशे शरद्वीपे सप्तासन् वै जलौकसः । त्यक्त्वा सहचरीधर्मं मुनयो धर्मचारिणः । सुमनाः शुचिवाक् शुद्धः पाञ्चकम्भिच्छद्रदर्शनः । सुनेत्रश्च स्वतन्त्रश्च शकुना नामतः स्मृताः । पञ्चमः पाञ्चिकस्तत्र सप्तजातिषु जायत । षष्ठस्तु कण्डरीकोऽभूद्ब्रह्मदत्तस्तु सप्तमः । तेषान्तु तपसा तेन सप्तजातिकृतेन वै । योगस्य चाभिनिर्वृत्या प्रतिभर्त्सनाच्च शोभनात् । पूर्व्वजातिषु यद्वृत्तं श्रुतं गुरुकुलेषु वै । तथैवावस्थिता बुद्धिः संसारेष्वपि वर्त्तताम् । ते ब्रह्मचारिणः सर्वे विहङ्गाः ब्रह्मवादिनः । योगधर्ममनुध्यान्तो विहरन्ति स्म तत्र ह । ते योगधर्मनिरताः सप्त मानसचारिणः । पद्मगर्भोऽरविन्दाक्षः क्षीरगर्भः सुलोचनः । उरुबिन्दुः सुबिन्दुश्च हेमगर्भस्तु सप्तमः । वाय्वम्बुभक्षाः सततं शरीराण्युपशोषयन् । तत्र ते शकुना राजंश्चत्वारो योगधर्मिणः । योगभ्रष्टास्त्रयश्चैव देहन्यासकृतोऽभवन् । काम्पिल्ये नगरे ते तु ब्रह्मदत्तपुरोगमाः । जाताः सप्त महात्मानः सर्वे विगतकल्मषाः

स्नानध्यानतपःपूता वेदवेदाङ्गपारगाः । स्मृतिमन्तोऽत्र चत्वारस्त्रयस्तु परिमोहिताः । सुतस्तस्याणुहाख्यस्य ब्रह्मदत्तो महायशाः । यथा ह्यासीत् पितृभावे सप्तस्वः पूर्वचिन्तितः । छिद्रदर्शी सुनेत्रश्च तथा बाभ्रव्यवत्सयोः । जातौ श्रोत्रियदायादौ वेदवेदाङ्गपारगौ । सखायौ ब्रह्मदत्तस्य पूर्वजातिसहोषितौ । पाञ्चालः पाण्डिकस्तत्र कण्डरीकस्तथाऽपरः । पाञ्चालो बह्वृचस्त्वासीदाचार्य्यत्वं चकार ह । द्विवेदः कण्डरीकस्तु च्छन्दोगोऽध्वर्युरेव च । सर्वसत्त्वरुतज्ञस्तु राजासीदणुहात्मजः । पाञ्चालकण्डरीकाभ्यां तस्य सख्यमभूत्तदा । ते ग्राम्यधर्म्मनिरताः कामस्य वशवर्त्तिनः । पूर्वजातिकृतेनासन् धर्मकामार्थकोविदाः" प्रसङ्गागतमन्यदुपवर्ण्य तेषु चतुर्णां वध्यमानश्लोकश्रावणाय ब्राह्मणनियोजनमुक्त्वा मुक्तिमुपवर्ण्य पूर्वमिष्टानां मुक्तिदर्शनायोक्तं यथा । "अथ राजा शिरःस्नातो लब्ध्वा नारायणाद्वरम् । प्रविवेश पुरं प्रीतो रथमारुह्य काञ्चनम् । तस्य रश्मीन् प्रत्यगृह्णात् कण्डरीको द्विजर्षभः । चामरव्यजनञ्चापि बाभ्रव्यः समवाक्षिपत् । इदमन्तरमित्येवं ततः स ब्राह्मणस्तदा । श्रावयामास राजानं श्लोकं तं सचिवौ च तौ । [सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ । चक्रवाकाः शरद्वीपे हंसाः सरसि मानसे । तेऽभिजाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः । प्रस्थिता दूरमध्वानं यूयं तेभ्योऽवसीदथ] । तच्छ्रुत्वा मोहमगमद्ब्रह्मदत्तो नराधिपः । सचिवश्चास्य पाञ्चाल्यः कण्डरीकस्तथैव च । स्रस्तरश्मिप्रतोदौ तौ पतितव्यजनावुभौ । दृष्ट्वा बभूवुरस्वस्थाः पौराश्च सुहृदस्तथा । मुहूर्त्तमेव राजा स सह ताभ्यां रथे स्थितः । प्रतिलभ्य ततः संज्ञां प्रत्यागच्छदरिन्दम ! । ततस्ते तत् सरः स्मृत्वा योगतत्त्वमुपलभ्य च । ब्राह्मणं विपुलैरर्थैर्भोगैश्च समयोजयन् । अभिषिच्य स्वराज्ये तु विष्वक्सेनमरिन्दमम् । जगाम ब्रह्मदत्तोऽथ सदारो वनमेव ह । कण्डरीकोऽपि धर्मात्मा साङ्ख्ययोगमनुत्तमम् । प्राप्य योगगतिं सिद्धो विशुद्धः स्वेन कर्म्मणा" हरिवं० २१,२२,२३,२४ अ० ।

कण्डिका स्त्री कडि–ण्वुल् । वेदैकदेशे । सा च अध्यायप्रपाठकाद्यन्तर्गतब्राह्मणवाक्यसंघरूपा । छान्दोग्यादौ उदा० ।

कण्डु स्त्री कडि–मृगय्वादि० उ । १गात्रघर्षणे, २तत्कारके रोगे च (चुलकानी) । "पामेत्युक्ता पिडकाः कण्डुमत्यः" भावप्र० ।

कण्डुर पु० कण्डुं राति रा–क । १कारवेल्ललतायाम् (करेला) राजनि० २शूकशिम्ब्याम् (आलकुशी) ३अत्यम्लपर्ण्यां स्त्री राजनि० ।

कण्डू गात्रविघर्षणे गृहीतकर्मकत्वेन अक० घर्षणमात्रे प्राप्यकर्षणमत्रोपाधिः सक० उभ० सेट् स्वार्थे यक् । कण्डूयति ते अकण्डूयीत् अकण्डूयिष्ट कण्डूयाम्–बभूव–आस चकार चक्रे । कण्डूयनं कण्डूयितः कण्डूः कण्डूया कण्डूयन् कण्डूयमानः "कण्डूयमानेन कटं कदाचित्" रघुः "मृगीमकण्डूयत कृष्णसारः" कुमारः । "न संहताभ्यां पाणिभ्याम् कण्डूयेदात्मनः शिरः" मनुः "शृङ्गे कृष्णमृगस्य वामनयनं कण्डूयमानां मृगीम्" शकु० । कण्ड्वादिश्च धातुः प्रातिपदिकञ्च "धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि । आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः" इत्युक्तेः । यकः कित्त्वकरणसामर्थ्यात् धातुत्वं प्रातिपदिकत्वे तत्करणं व्यर्थं स्यात् प्रातिपदिकस्य गुणाप्रसक्तेः दीर्घकरणाच्च प्रातिपदिकत्वम् आर्द्धधातुकयकारे धातोः दीर्घसम्भवेन दीर्घपाठो वृथा स्यात् अत उभयरूपत्वम् ।

कण्डू स्त्री कण्डूय–क्विप् अलोपयलोपौ सम्पदा० क्विप् । १कण्डूयने गात्रघर्षणे (चुलकान) २तत्साधनरोगे (चुलकुनी) "कपोलकण्डूः करिभिर्विनेतुम्" कुमा० । "सकण्डूः पिडका श्यावा बहुस्रावा विचर्चिका" भावप्र० । [कुशी) चन्द्र०

कण्डूकारी स्त्री कण्डूं करोति कृ–ट । शूकशिम्ब्यां (आल-

कण्डूघ्न पु० कण्डूं हन्ति हन–टक् । १आरग्वधे (सोन्दाल) २गौरसर्षपे च राजनि० ।

कण्डूति स्त्री कण्डूय–भावे क्तिन् अलोपयलोपौ । कण्डूयने (चुलकान) हला० । "सुभग ! त्वत्कथारम्भे कर्णे कण्डूतिलालसा" सा० द० "कण्डूतिवन्मनसिजं विषहेत धीरः" भाग० ७,९,४५ ।

कण्डूमका स्त्री "कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते" सुश्रुतोक्ते कीटभेदे । कीटशब्दे विवृतिः

कण्डूयन न० कण्डूय–भावे ल्युट् । गात्रघर्षणभेदे (चुलकान) "कण्डूयनैर्दंशनिवारणैश्च" रघुः । "तद्भावभाविते चित्ते वल्लभस्य कथादिषु । मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम्" । "नेशः कण्डूयनेऽङ्गानामासनोत्थनचेष्टने" भाग० ३,३१,२७ । दीक्षितस्य तत्साधनद्रव्यम् "कृष्णविषाणां त्रिवलिं पञ्चवलिं वोत्सामां दद्यायामासभीत

तया कण्डूयनम्” कात्या० ७,२,२९,३० उक्तम्। “यदा कण्डूरुत्पद्यते दीक्षितेन तया कण्डूयनं कार्य्यम्” कर्कः। यजमानपत्न्यास्तु कण्डूयने। “पृथुमुखोयज्ञियवृक्षशङ्कुः कण्डूयने” कात्या० ७,५,८। “विपुलाग्रो यज्ञियवृक्षस्योदुम्बरपलाशादेः शङ्कुः पत्न्याः कण्डूयनकर्मणि भवति स च प्रादेशमात्रः” कर्कः। करणे ल्युट्। २ कण्डूयनसाधने स्त्रियां ङीप्। “कण्डूयन्यभिषेकेण प्रक्षिप्यते “प्र पर्वतस्येति” कात्या० १५,६,८। कण्डूयनी कृष्णविषाणा” कर्कः।

कण्डूया स्त्री कण्डूय–अ–स्त्रीत्वात् टाप्। कण्डूयने।

कण्डूरा स्त्री कण्डूं राति रा–क। (आलकुशी) कपिकच्छ्वाम् अमरः। [राजनि० २कण्डूयुक्ते त्रि०।

कण्डूल पु० कण्डू+अस्त्यर्थे लच्। १कण्डूकारके शूरणे।

कण्डोल पु० कडि–ओलच्। १नलादिनिर्म्मिते धान्यादिस्थापनपात्रे (डोल) अमरः। २उष्ट्रे पुंस्त्री० उणा० स्त्रियां ङीष्। स्वार्थे कन् तत्रार्थे। कण्डोलकस्य पादाविव पादावस्य हस्त्या० नान्त्यलोपः। कण्डोलकपादः उष्ट्रपात्।

कण्डोलवीणा स्त्री कण्डोल इव वीणा। (कैँदड़ा) चण्डालवीणायाम् अमरः। कचित् कटोलवीणेति पाठः।

कण्डोली स्त्री कण्डोलस्तदाकारोऽस्त्यस्याः अच् गौ० ङीष्। चण्डालवीणायां (कैँदड़ा) शब्दच०।

कण्डोष पु० कण्डूमाप्नोषो यस्मात्। १शूककीटे शब्दच० (शुयोयापोका) तत्स्पर्शे हि देहे कण्डूसंघस्य जायमानत्वात्तस्य तथात्वम्।

कण्व त्रि० कण–क्वन्। १मेधाविनि निघ०। २स्तोतरि त्रि० “प्रदक्षिणो दिव्यः कण्वहोतारः” ऋ० ५,४१,४। “कण्वाःस्तोतारः होतारः” भा०। “आतूर्षञ्च कण्वमन्तं नद्याविद्या” ऋ० ८,२,१२, “कण्वमन्तम् कणतिः शब्दकर्म्मा कण्वाः स्तोतारः कण्वगोत्रा वा तैर्युक्तम्” भा०। वेदे भस्य न यः। लोके कण्ववत् इत्येव। कण्यते अपोह्यते कन्। ३पापे न० “कण्वविकोपीयाम्” वार्त्ति०। पौरवे ४नृपभेदे पु०। “ऋतेयोरन्तिनारोऽभूत्त्रयस्तस्यात्मजा नृपाः। सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः। तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्या द्विजातयः” भाग० ९,२०,२,३। काश्यपगोत्रोत्पन्ने ५मुनिभेदे स च गोत्रप्रवर्त्तकः। “कण्वानामाङ्गिरसाजमीढकाण्वेति” आश्व० श्रौ० १२,१०१, “यामस्य कण्वोऽअदुहत् प्रपीनां सहस्रधारां पयसा मही गाम्” यजु० १७,७४, एतदधीतशाखायाः काण्वशाखात्वेन प्रसिद्धिः। “यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः। जगृहु र्वाजसंन्यस्ताः काण्वमाध्यन्दिनादयः” भाग० १२,६,६७। तदपत्यस्य काण्वस्य शुक्लयजुर्वेदाध्येतृत्वमुक्तम् बहुषु अणो लुक्। “पिबतो अश्विना मधु कण्वानां सवने सुतम्” ऋ० ८,८,३ अयञ्च मुनिः काश्यपगोत्रः “महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनम्” भा० आ० ६७। तस्य चाश्रमः। “मालिनीमभितो राजन्नदीं पुण्यजलां तथा” तत्रोक्तेः कण्वसुताशब्दे वक्ष्यमाणात् भा० वाक्याच्च हिमवत्प्रस्थे मालिनीनदीतीरेऽस्ति। तस्याश्रमयात्रादौ पुण्यविशेषो यथा। “कण्वाश्रमं ततो गच्छेत् श्रीजुष्टं लोकपूजितम्। धर्म्मारण्यं हि तत् पुण्यमाद्यञ्च भरतर्षभ !। यत्र प्रविष्टमात्रो वै सर्व्वपापैः प्रमुच्यते। अर्च्चयित्वा पितॄन् देवान् नियतो नियताशनः। सर्व्वकामसमृद्धस्य यज्ञस्य फलमश्नुते” भा० व० ८२ अ०। ६स्तुत्ये त्रि० “स इदग्निः कण्वतमः कण्वसखार्य्यः” ऋ० १०,११५,५, “कण्वतमः स्तुत्यतमः” भा०

कण्वरथन्तर न० कण्वेन गीतं रथन्तरम्। सामगानभेदे। वैश्यस्तोमे “कण्वरथन्तरं पृष्ठं भवति” श्रुतिः तच्च साम “पुनानः सोम” इत्यादिषु गीतम् उत्तरार्चि० ४प्र० श०२० द्रष्टव्यम्।

कण्वसुता स्त्री कण्वस्य ऋषेः प्रतिपालिता सुता। शकुन्तलायाम् सा च विश्वामित्रात् मेनकायामुत्पन्ना जातमात्रा च तया परित्यक्ता शकुन्तैरक्षिता कण्वेन प्रतिपालिता दुष्मन्तेन गान्धर्व्वविधिना व्यूढा। कण्वदुहित्रादयोऽप्यत्र। तज्जन्मकथा भा० आ० ७१अ० “तप्यमानः किल पुरा विश्वामित्रो महातपाः। भृशं सन्तापयामास शक्रं सुरगणेश्वरम्। तपसा दीप्तवीर्य्योऽयं स्थानान्मां च्यावयेदिति। भीतः पुरन्दरस्तस्मान्मेनकामिदमब्रवीत्। गुणैरप्सरसां दिव्यैर्मेनके ! त्वं विशिष्यसे। श्रेयो मे कुरु कल्याणि ! यत्त्वां वक्ष्यामि तच्छृणु। असावादित्यसङ्काशो विश्वामित्रो महातपाः। तप्यमानस्तपो घोरं मम कम्पयते मनः। मेनके ! तव भारोऽयं विश्वामित्रः सुमध्यमे !। संशितात्मा सुदुर्धर्ष उग्रे तपसि वर्त्तते। स मां न च्यावयेत् स्थानात्तं वै गत्वा प्रलोभय। चर तस्य तपोविघ्नं कुरु मे प्रियमुत्तमम्। रूपयौवनमाधुर्य्यचेष्टितस्मितभाषितैः। लोभयित्वा वरारोहे ! तपसस्तं निवर्त्तय” तत्सहायतया वायुप्रेषणं कृत्वा “कण्व उवाच। एवमुक्तस्तया शक्रः सन्दिदेश सदागतिम् प्रातिष्ठत तदा काले मेनका वायुना सह। अथापश्यत्

दुरारोहा तपसा दग्धकिल्बिषम् । विश्वामित्रं तप्यमानं मेनका भीरुराश्रमे । अभिवाद्य ततः सा तं प्राक्रीडदृषिसन्निधौ । अपोवाह च वासोऽस्या मारुतः शशिसन्निभम् । साऽगच्छत्त्वरिता भूमिं वासस्तदभिलिप्सती । स्मयमानेव सव्रीडं मरुता वरवर्णिनी । पश्यतस्तस्य तत्वर्षेरप्यग्निसमतेजसः । विश्वामित्रस्ततस्तान्तु विषमस्थामनिन्दिताम् । गृद्धीं वाससि संभ्रान्तां मेनकां मुनिसत्तमः । अनिर्द्देश्यवयोरूपामपश्यद्विवृतां तदा । तस्या रूपगुणं दृष्ट्वा स तु विप्रर्षभस्तदा । चकार भावसंसर्गं तया कामवशङ्गतः । न्यमन्त्रयत चाप्येनां सा चाप्यैच्छदनिन्दिता । तौ तत्र सुचिरं कालमुभौ व्याहरतां तदा । रममाणौ यथाकामं यथैकदिवसं तथा । जनयामास स मुनिर्मेनकायां शकुन्तलाम् । प्रस्थे हिमवतो रम्ये मालिनीमभितो नदीम् । जातमुत्सृज्य तं गर्भं मेनका मालिनीमनु । कृतकार्य्या ततस्तूर्णमगच्छच्छक्रसंसदम् । तं वने विजने गर्भं सिंहव्याघ्रसमाकुले । दृष्ट्वा शयानं शकुनाः समन्तात् पर्य्यवारयन् । नेमां हिंस्युर्वने बालां क्रव्यादा मांसगृद्धिनः । पर्य्यरक्षन्त तां तत्र शकुन्ता मेनकात्मजाम् । उपस्प्रष्टुं गतश्चाहमपश्यं शयितामिमाम् । निर्जने विपिने रम्ये शकुन्तैः परिवारिताम् । आनयित्वा ततश्चैनां दुहितृत्वे न्यवेशयम् । शरीरकृत् प्राणदाता यस्य चान्नानि भुञ्जते । क्रमेणैते त्रयोऽप्युक्ताः पितरो धर्म्मशासने । निर्ज्जने तु वने यस्मात् शकुन्तैः परिवारिता । शकुन्तलेति नामास्याः कृतञ्चापि ततो मया । एवं दुहितरं विद्धि मम विप्र ! शकुन्तलाम् । शकुन्तला च पितरं मन्यते मामनिन्दिता" । तस्याश्च दुष्मन्तेन गान्धर्व्वविधिना परिणयकथा तत्रैवोक्ता ।

कण्वाय नामधातुः कण्व+तत्करणे क्यङ् आत्म०अक० सेट् । कण्वं करोति कण्वायते अकण्वायिष्ट कण्वयाम् बभूव आस चक्रे । कण्वायितः कण्वाया ।

कत पु० कं जलं शुद्धं तनोति तन—ड । १कतकवृक्षे २ऋषिभेदे च । कतस्य गोत्रापत्यम् गर्गा०यञ् । कात्य तद्गोत्रापत्ये बहुत्वे तु तस्य लुक् कताः कतगोत्रापत्येषु ब० व० । यञन्तत्वात् यूनिफक् । कात्यायनः तद्गोत्रयुवापत्ये । तस्य छात्राः अण् फकोलुक् । कातीयाः तदीयच्छात्रेषु बहु०व० । कतर्षेश्च विश्वामित्रादुत्पत्तिः विश्वामित्रपुत्रकथने हरिवं०२७अ० । "देवश्रवाः कतश्चैव यस्मात् कात्यायनाः स्मृताः । शालावत्यां, हिरण्याक्षो रेणोर्जज्ञेऽथ रेणुमान् । साङ्कृतिर्गालवश्चैव मुद्गलश्चेति विश्रुताः । मधुच्छन्दोऽजयश्चैव-देवलश्च तथाऽष्टकः । कच्छपोहारितश्चैव विश्वामित्रस्य ते सुताः तेषां ख्यातानि गोत्राणि कौशिकानां महात्मनाम्"

कतक पु० तक—हासे वा०घ कस्य जलस्य तको हासः प्रकाशो यस्मात् ५ब० । (निर्म्मली) वृक्षभेदे राजनि० । तस्य हि फलसम्पर्कात् जलप्रसादः "फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् । न नामग्रहणादेव तस्य वारि प्रसीदति" मनुः । "कतकस्य फलं नेत्र्यं जलनिर्म्मलताकरम् । वातश्लेष्महरं शीतं मधुरं तुवरं गुरु" भावप्र० तद्गुणादुक्तम् । तस्य फलम् अण् तस्य लुक् तत्फले न० । "जलप्रसादि कतकं तत्फलं कतकं स्मृतम्" भावप्र० उक्तेः वृक्षपरत्वेऽपि न० अयञ्च सुश्रुते काकोल्यादिरित्युपक्रम्य कतकगिलोड्ये त्यादिना मधुरवर्गे उक्तः । [कतकवृक्षे राजनि०

कतफल पु० कं तनोति प्रसन्नम् तन—ड तादृशं फलमस्य ।

कतम त्रि० किम्+डतम् । बहूनां मध्ये जातयादिभिर्निर्द्धारणार्थप्रश्नविषये एकस्मिन् पदार्थे "कतमा कतमर्क्, कतमत् कतमत् साम,कतमः कतम उद्गीथः" छा०उ० । डतरा कतर द्वयोर्मध्ये जात्यादिभिर्निर्द्धारणार्थप्रश्नविषये त्रि० "यद्येनसुज्झसि तदा कतरोवरस्ते" नैष० "अथैतयोः पथा कतरेण चलितानामपि क्षुद्राण्यसकृदावर्त्तीनि भूतानि" छा०उ० । डतरडतमान्तत्वादनयोः सर्व्वनामकार्य्यं कतमस्मै कतरस्मै क्लीबे स्वमोरद्डु कतमत् कतरत् "कतरन्नो गरीयो यद्वा जयेम यदि वा नोजयेयुः" गीता । "कतमद्दूरं यं युद्धं यत्राजैषीर्धनञ्जयम्" "तथैव कतमद्युद्धं यस्मिन् कृष्णाजिता पुरा" भा०वि०५०अ० । "कतरकतमौ कर्म्मधारये" पा० उक्तेः कर्म० प्रकृतिस्वरः धारये ।

कतमाल पु० तम घञ् ह्रस्वः कस्य जलस्य तमाय शोषणाय अलति पर्य्याप्नोति अ-ल—अच् । वह्नौ गन्धमाला तस्य जलशोषणहेतुत्वात्तथात्वम् कचमालः खचमालः इत्यपि पाठान्तरे तत्रार्थे पु० ।

कति त्रि०ब० व० किं परिमाणमेषां किम्+डति । संख्यापरिमाणविशेषविषयप्रश्नविषये पदार्थे । "कति देवाःत्रो च इश च" छा०उ० । अस्य संख्यावत्कार्य्यभागित्वात् स्त्रियां न ङीप् । पूरणे डट् थुक् च । कतिथ कियत्संख्यापूरणे त्रि०स्त्रियां ङीप् । धाच् । कतिधा कियत्प्रकारे अव्य० "कत्यस्य विष्ठाः कत्यक्षराणि कति होमासः कतिधा समिद्ध" यजु० २३,५७ । वीप्सार्थे कारकवृत्तेस्ततः शस् । कतिशस कियद्वारादौ अव्य० कतिशो ददाति

कतिपय त्रि॰ति॰कति+अयच् पुक् च। कतिशब्दार्थे २परिमिते च; "वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव" माघः "कतिपयैः परिमितैः" मल्लि॰। "संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः" मेघ॰ "पोटायुवतिस्तोककतिपयेत्यादि॰पा॰ सूत्रस्य प्रायिकत्वान्न उत्तरनिपातः" मल्लि॰। ब्राह्मणा कतिपय इत्यादि। अस्य जसि वा श्री कतिपये कतिपया वा "परिष्कुर्वन्त्यर्थान् सहृदय धुरीणाः कतिपये" रसगङ्गा॰। "एवैवं सम्प्रदाः सुः कतिपये वापरा" शत॰ब्रा॰५,१,२,१०। अद्रव्यवाचित्वे अस्मात् वा करणे पञ्चमी। कतिपयेन मुक्तः कतिपयान्मुक्तो वा समासे तत्र पञ्चम्या अलुक्। द्रव्यपरत्वे तु कतिपयेन विषेण मुक्त इत्येव "षट्कतिकतिपयचतुरामिति" पा॰ निर्देशात् तस्यासंख्यावाचकत्वेऽपि पूरणे डट्, थुक् च। कतिपयथ कतिपयपूरणार्थे त्रि॰ स्त्रियां ङीप्।

कत्तृण कुत्सितं तृणं प्रा॰स॰कोः कदादेशः। १ष्टग्नौ (घ।कुशिया) मेदिनिः। २कुम्भिकायां (पान-)रत्नमाला ३सुगन्धितृणे अमरः। अस्य गुणादि भावप्र॰ उक्तम् "कत्तृणं रौहिषं देवजग्धं सौगन्धिकं तथा। भूतिकं व्यामपौरञ्च श्यामकं धूमगन्धिकम्। रौहिषं तुवरं तिक्तं कटुपाकं व्यपोहति। हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान्" (सौगँधिया हिन्दिभाषा)।

कत्तोय न॰कुत्सितं तोयम् ईषद्वा तोयं यत्र। मद्ये त्रिका॰

कत्त्रि त्रि॰न॰त्र॰कुत्सितास्त्रयः प्रा॰स॰कोः कद्। कुत्सितेषु त्रिषु। ततो जातादौ ढकञ् कात्त्रेयक तज्जातादौ त्रि॰।

कत्त्र्यादि पु॰ पाणिन्युक्ते जाताद्यर्थे ढकञ्प्रत्ययनिमित्ते शब्दसमूहे स च गणः कत्त्रि उम्भि पुष्कर पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उख्या ग्राम। (कुड्याया यलोपश्च) गणसूत्रम्।

कत्थ श्लाघायाम् (आत्मगुणाविष्करणे) स्वीकृतकर्मकत्वात् अक॰ भ्वा॰ आ॰ सेट्। कत्थते अकत्थिष्ट चकत्थे। कत्थमानः कत्थनम् कत्था कत्थितम्। "गर्जितेन वृथा किं ते कत्थितेन च मानुष!। कृत्वैतत् कर्मणा सर्वं कत्थेथा मा चिरं कृथाः" भा॰आ॰१,१५२ अ॰। "परोक्षमिव मे राजन्! कत्थसे शत्रुकर्षण!" भा॰व॰७२अ॰ "कृत्वा कत्थिष्यते न कः" भट्टिः "जनस्य गोप्तास्मि विकत्थमानः" भाग॰ ५,१२,७। आर्षप्रयोगे पदव्यत्ययात् पर॰। "तथाऽभिगम्य वित्तानि को विकत्थेद्विचक्षणः" भा॰ वि॰ ५॰ अ॰। प्रथमादेऽपि सक॰। कत्थन्त उपपरुषं निरतं श्मशाने" भाग॰ ८,७,२७। "कत्थन्ते प्रलपन्ति" श्रीधरः। विवेकेन कथने। "कोऽविकत्थितुमर्हति" भा॰प॰ २५,२३। कर्त्तरि युच् कत्थनः।

कत्पय न॰ कं सुखमित्याचरति क+क्विप् शतृ कत् सुखकरं पयोऽस्य वेदे नि॰ष समा॰। सुखकरजले। "त्वं चिदित्था कत्पयं शयानम्" ऋ॰ ५,३२,६। "कत्पयं सुखकरं पयो यस्य तम्" भा॰। निरुक्ते ६,२ इमान्त्यमधिकृत्योक्तम् "सुखपयसं सुखमस्य पयः" इति लोके तु कत्पयश् इत्येद।

कत्र शैथिल्ये अद॰ चुरा॰ उभ॰ अक॰ सेट्। कत्रयति ते अचकत्रत् त। "तद्धलादन्त्यदीर्घश्च पुक् चेत्यङ्गापयत्यपि" इत्युक्तेः वा दीर्घः पुक् च। कत्रापयति ते इत्यपि। कत्राम् बभूव आस चकार चक्रे। एवं कत्रापयाम् बभूवेत्यादि।

कत्सवर न॰ कद्–वैकल्ये ए कत्सः विह्वलता त्रियते इ–अप्। स्कन्धे शब्दच॰।

कथ वाक्यरचनायां अद॰ चुरा॰ उभ॰ सक॰ सेट्। कथयति ते अचीकथत् त अचकथत् त। कथयाम् बभूव आस चकार चक्रे। कथितः कथयित्वा कथयितुम्–कथनम्। कथा "तं जनाः कथयन्तीह यावत् भवति गौरियम्" भा॰अनु॰२१६८ "हन्त ते कथयिष्येऽमुमितिहासं पुरातनम्" भा॰४,४५.६। "कथाच्छलेन बालानां नीतिस्तदिह कथ्यते" हितो॰ "यो मनुः कथितेऽष्टमः" देवी॰ "प्रत्येकं कथिताह्येताः संक्षेपेण द्विजर्षभाः" मनुः।

अनु+अनुवादे कथितस्य कथने अन्वादेशे अनुकथयति अनुवदति प्राद्युपसर्गे प्रकर्षादिना कथने अस्य ब्रुवर्थतया द्विकर्मकत्वम् तत्र गौणे कर्मणि लकारः।

कथक त्रि॰ कथ–ण्वुल्। १वाचके २तत्त्वनिर्णयार्थं वादरूपकथाकर्त्तरि च कथकस्य कथायां नियमविशेषः खण्डने दर्शितः यथा।

"अथ कथायां वादिनोर्नियममेतादृशं मन्यन्ते प्रमाणादयः सर्वतन्त्रसिद्धान्ततया सिद्धाः पदार्थाः सन्तीति कथकाभ्यामभ्युपेयम् इति। तदपरे न क्षमन्ते। तथाहि प्रमाणादीनां सत्त्वं यदभ्युपेयं कथकेन, तत् कस्य हेतोः? किं तदनभ्युपगच्छद्भ्यां वादिप्रतिवादिभ्यां तदभ्युपगमसाहित्यनियतस्य तस्य प्रवर्त्तयितुमशक्यत्वात् १, उत कथकाभ्यां प्रवर्त्तनीयशास्त्रव्यवहारं प्रति हेतुभावात् २, उत लोकसिद्धत्वात् ३ अथ वा तदनभ्युपगमस्य तत्त्वनिर्णयविजयप्रतिपक्षकत्वात् ४। न तावदाद्यः तदनभ्युपगच्छतोऽपि वाग्व्यवहा-

ध्यमिकादेर्वाग्व्यवहाराणां सविस्तराणां प्रतीयमानत्वात् तस्यैव वा अनिष्पत्तौ भवतस्तन्निराकरणप्रयासानुपपत्तेः। कोयमपूर्व्वः प्रमाणादिसत्त्वाभ्युपगमात्मा वाक्स्तम्भनमन्त्रो भवताभ्यूहितो नूनं यस्य प्रभावाद्भगवता सुरगुरुणा लोकायतसूत्राणि न प्रणीतानि, तथागतेन वा मध्यमागमा नोपदिष्टाः, भगवत्पादेन वा बादरायणीयेषु सूत्रेषु भाष्यं नाभाषि। प्रमाणाद्यनभ्युपगमेऽपि प्रवर्त्तन्तां तन्मते वाचोयुक्तयः तास्तु साधनबाधनक्षमा न भवन्ति तावतेति ब्रूम इति चेन्न प्रमाणाद्यनभ्युपगमप्रवर्त्तितत्वं तदीयसाधनबाधनाक्षमतायां न नियामकं किन्तु सद्दूषणाभासलक्षणयोगित्वमित्यवश्याभ्युपेयं भवता येनाभ्युपगम्यापि प्रमाणादीनि प्रवर्त्तिताः मतान्तरानुसारिभिर्व्यवहारा अभ्युपगतप्रमाणादिसत्त्वैर्मतान्तरव्यवहारानुसारिभिरपरैस्तथाभूताइति कथ्यन्ते। यदि त्वसद्दूषणसद्दूषणाभासलक्षणं न भवान् दर्शयितुमीष्टे तदा अनभ्युपगम्य प्रमाणादि भवता प्रवर्त्तितोऽयं व्यवहारइति मतमत्सरयोच्यमानेऽपि नाकक्षमादरः अन्यथाभ्युपगम्य प्रमाणादीनि भवता प्रवर्त्तितोऽयं व्यवहारइत्येतावता भवदीयो व्यवहाराभास इत्यस्माभिरपि वक्तुं शक्यतएव। ननु यदि प्रमाणादीनि न सन्ति व्यवहारएव धर्म्मी कथं सिद्ध्येत् दूषणादिव्यवस्था वा कथं स्यात् सर्व्वविधिनिषेधानां प्रमाणाधीनत्वात्। मैवम्। न ब्रूमोवयं न सन्ति प्रमाणादीनीति स्वीकृत्य कथारभ्येति किन्नाम सन्ति न सन्ति वा प्रमाणादीनीत्यस्यां चिन्तायामुदासीनैः। यथा स्वीकृत्य तानि भवता व्यवह्रियते तथा व्यवहारिभिरेव कथा प्रवर्त्त्यतामिति। अन्यथा न सन्ति प्रमाणादीनीति मतमस्माकमारोप्य यदिदम्भवता दूषणमुक्तं तदपि न वक्तुं शक्यं कीदृशीं मर्य्यादामाश्रित्य प्रवर्त्तितायां कथायां दूषणमुक्तं किं प्रमाणादीनां सत्त्वमभ्युपगम्योभाभ्यां प्रवर्त्तितायां कथायां उतासत्त्वमभ्युपेत्य, अथैकेन सत्त्वमपरेण चासत्त्वमङ्गीकृत्य। न तावदाद्यः अभ्युपगतप्रमाणादिसत्त्वं प्रति तादृक्पर्य्यनुयोगानवकाशात् द्वितीये तु स्वतोऽप्यापत्तेः न तृतीयः तथैव कथान्तरस्य प्रसक्तः उभयाभ्युपगमानुरोधित्वाच्च कथानियमस्य। अन्यथा स्वाभिप्रायमाश्रित्य तेनापि तद्दूषयित्वा यत्किञ्चिद्वागात्मनि दूषणेऽभिहिते कस्य जयो व्यवतिष्ठताम् प्रमाणाद्यभ्युपगन्तुरेव यावन्नियममभरयन्यथा महती स्यात्। तस्मात् प्रमाणादिसत्त्वासत्त्वाभ्युपगमौदासीन्येन व्यवहारनियमे समयं बद्ध्वा कथायां प्रवर्त्तितायां भवतेदं दूषणमुक्तं युक्तमेव तथा सति स्यात्। योऽयं भवान् स्वाभिप्रायमपि नावधारयितुं शक्तोऽतिदूरतस्तस्मिन् पराभिसन्धानावधारणप्रत्याशा। अथ वादीकृत्य दुर्वैतण्डिकं तस्मिन् बोधोऽभिधीयतइत्येव नेष्यते निग्रहादयस्तु तस्य कथानधिकारं ज्ञाप्यन्ते अतएव भाष्यकारः "स प्रयोजनमनुयुक्तो यदि प्रतिपद्यत" इत्याह स नतु प्रतिपद्यत इति। मैवम् निग्रहादीन् प्रत्यपि चार्व्वाकादेर्दोषोऽयमित्येवाभिधातव्यम्। कथञ्च तथा स्यात् तस्य कथाप्रवेशाप्रवेशयोस्तुल्याबाधनत्वात्कथायामेव हि निग्रहः। नापि द्वितीयः तथाहि स्यादेवं यदि कथकप्रवर्त्तनीयवाग्व्यवहारं प्रति प्रमाणादीनां हेतुता तत्सत्त्वानभ्युपगमे निवर्त्तेत नचैवं सम्भवति तथासति तत्सत्त्वानभ्युपगन्तॄणां वाग्व्यवहारस्वरूपमेव न निष्पद्येत हेत्वनुपपत्तेः। उक्तञ्चायमर्थो यन्माध्यमिकादिवाग्व्यवहाराणां स्वरूपापलापो न शक्यत इति। अथ मन्यसे कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाश्चाभ्युपगतः यत्सत्तदभ्युपगम्यत इतिस्थितेरिति। मैवम् कयापि नियमस्थित्या प्रवृत्तायां कथायां कथकवाग्व्यवहारं प्रति हेतुत्वात् प्रमाणादीनां सत्त्वं सत्त्वाश्चाभ्युपगम भवता प्रसाध्यः कथनात्पूर्व्वं तत्तत्त्वावधारणं वा परपराजयं वा अभिलषद्भ्यां कथकाभ्यां यावता विना तदभिलषितं न पर्य्यवस्यति तावदनुरोद्धव्यम् तत्र व्यवहारनियमस्यानुबन्धादेव द्वाभ्यामपि ताभ्यां सम्भाव्यतइति। व्यवहारनियमसमयमेव बध्नीतः सच प्रमाणेन तर्केण च व्यवहर्त्तव्योवादिना प्रतिवादिनापि कथाकृतत्त्वज्ञानविपर्य्ययलिङ्गप्रतिज्ञाहान्याद्यन्यतमं निग्रहस्थानं तस्य दर्शनीयम् तदुत्पादने प्रथमस्य भङ्गोव्यवहर्त्तव्योऽन्यथा द्वितीयस्यैव तादृशेतरौ च जेतृतया व्यवहर्त्तव्यौ, प्रामाणिकः पक्षसात्त्विकतया व्यवहर्त्तव्यइत्यादिरूपः। अत एव वाग्व्यवहारनियमबन्धेऽपि हेतुर्वक्तव्यः तथा च सोऽपि हेतुः कथायां प्रवृत्तायामभिधातुं युक्त इति प्रमाणसत्त्वाभ्युपगमहेत्वभिधानवत् प्रत्यवस्थानमनवकाशं द्वाभ्यामपि वादिभ्यां विचारप्रवृत्त्याभिलष्यमाणतत्त्वव्यवस्थाजयमूलत्वेन व्यवहारनियमस्य स्वेच्छयैव परिगृहीतत्वात्। नचैवं प्रमाणानुपलब्धेच्छामात्रगृहीतमूलत्वान्मूलापरिशुद्धिसम्भवेन सर्व्वविचारविचार्य्यतत्फलविप्लवापत्तिः स्यात्। अविद्याविद्यमानादिपारम्पर्य्यायातस्य लोकव्युत्पत्तिगृहीतसंवादस्य च तस्यान्यथाभावासम्भाव्यतालक्षणस्वतःसिद्धशुद्धत्वात्। न च प्रमा-

कादीनां सत्तापीत्थमेव ताभ्यामङ्गीकर्त्तुमुचिता तादृशव्यवहारनियममात्रेणैव कथाप्रवृत्त्युपपत्तेः प्रमाणादिसत्ताभ्युपेत्यापि तथा व्यवहारनियमव्यतिरेके कथाप्रवृत्तिं विना तत्त्वनिर्णयस्य जयस्य वाऽभिलषितस्य कथकयोरपर्य्यवसानात्। नापि तृतीयः लोकव्यवहारो हि प्रमाणव्यवहारो वा स्यात् पामरादिसाधारणव्यवहारो वा। नाद्यः। विचारप्रवृत्तिमन्तरेण तस्य दुर्निरूपत्वात् तदर्थमेव च पूर्व्वं नियमस्य गवेषणात्। नापि द्वितीयः शरीरात्मतादीनामपि तथा सति भवता स्वीकर्त्तव्यताऽऽपातात्। पश्चात्तद्विचारबाध्यतया नाभ्युपेयतइति चेत् तर्हि प्रमाणादयोऽपि यदि विचारबाध्या भविष्यन्ति तदा नाभ्युपेया एव अन्यथा तूपगन्तव्या इति लोकव्यवहारसिद्धतया सत्त्वमभ्युपगम्यतइति तावन्न भवति। नापि चतुर्थः यादृशोभवता प्रमाणादीन्यभ्युपगम्य व्यवहारनियमः कथायामालम्ब्यते तस्यैव प्रमाणादिसत्त्वासत्त्वानुसरणोदासीनैरस्माभिरप्यवलम्बनात्। तस्य यदि मां प्रति फलातिप्रसञ्जकत्वं तदा त्वां प्रत्यपि समानः प्रसङ्गः”।

“वाद्युक्तसाध्यनियमच्युतोऽपि कथकैरुपाधिरुद्भाव्य” अनु०चि०। २कथोपजीविनि नाटकाचार्य्ये कथाप्राणे। शब्दरत्ना०।

कथङ्कथिक त्रि० कथङ्कथमिति, प्रष्टृत्वेनास्त्यस्य कथम् कथम्+वा०ठन् टिलोपः। कथं कथमिति प्रश्नकारके। तस्य भावः तल्। कथङ्कथिकता पृच्छायां स्त्री हेमच०।

कथङ्कारम् अव्य०कथम्+णमुल्।१कथंकृत्वेत्यर्थे“कथङ्कारमनालम्बा कीर्त्तिर्द्यामधिरोहति” माघः “अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्” पा० सिद्धाप्रयोगः व्यर्थत्वात् प्रयोगानर्हः” सि०कौ० उक्तेः अनर्थकात् तत्त्वः णमुल्। २कथमित्यर्थे च।

कथञ्चन अव्य० कथम्+चन मुग्धबोधः “असाकल्ये तु चिच्चन”इत्यमरोक्तेः पा०तादृशप्रत्ययाभावात् चन शब्दे–अच्। कथम् चनअसकलमिति पदद्वयमिति भेदः। चनशब्दे विवृतिः। १असकले २कथमित्यर्थे एकांशेनेत्यर्थे च। “न विभाग: कथञ्चन” स्मृतिः। “न वै जनोजातु कथञ्चन व्रजेत्”भाग०१,५,२०। “अनतिक्रमणीयो हि विधी राजन् कथञ्चन” भा० स्त्री०८अ०। “पदार्थः षड्यान्वेति विभागे न कथञ्चन” हरिकारिका।

कथञ्चित् अव्य०। कथम+चित् मुग्धबो० पा०न चित् प्रत्ययः “किन्तु चिदव्यय”असाकल्ये चिच्चन इत्यमरोक्तेः।“किं वृत्तं चिदुत्तरम्”पा०उक्तेश्च पदद्वयमिदम्। १असाकल्यान्विते कथमित्यर्थे २कष्टेनेत्यर्थे च “अधःकथञ्चिद्धृतभूमिभागः” कुमा०।“कथञ्चित् फणिनां गणैरधः”माघः। ततः स्वार्थे विनया०ठक् तान्तत्वात् क। कथञ्चित्कः। कष्टभवे त्रि०।

कथन्ता स्त्री कथम्+भावे तल्। किंप्रकारतायाम्।

कथम् अव्य० किम्+प्रकारार्थे थमु कादेशश्च। कस्मिन् प्रकारेइत्यर्थे। “सानुबन्धाः कथं न स्युः सम्पदोऽपि निरापदः” रघुः “अवाप्यते वा कथमन्यथा द्वयं तथाविधं प्रेम पतिश्च तादृशः” कुमा० “कथं नु शक्योऽनुनयो महर्षेः” रघुः “सा प्रक्रिया या कथमित्यपेक्षा” मीमा० तत्र “कथमितीतिकर्त्तव्याकाङ्क्षा” कात्या० १, २,१८सू०भा० कर्कः। प्रसङ्गात् तत्र कुत्र कर्मणि कथमाकाङ्क्षोत्थाप्येतिकर्त्तव्यरूपाङ्गस्यग्रहणमस्ति कुत्र वा नास्ति तदेतत् कात्यायनसूत्रभाष्ययोर्दर्शितमत्र प्रदर्श्यते। “अथेदं विचार्यते द्विप्रकारं कर्म नित्यं काम्यं च तत्र नित्यं प्रकृत्येदं विचार्यते किं सर्वाङ्गोपेतं कर्त्तव्यम्? उत यावन्त्यङ्गानि कर्त्तुं शक्नोति तावद्भिरङ्गैरुपेतमिति? किं तावत् प्राप्तम्? सर्वाङ्गोपेतमेव कर्त्तव्यमिति कुतः? भावनांशस्य कथम्भावस्य सर्वैरङ्गैः परिपूरणेन सर्वाङ्गोपेतस्यैव प्रधानस्य फलवत्त्वात् अन्यथा अङ्गाम्नानस्य वैयर्थ्यापत्तेः तस्मात् सर्वाङ्गोपेतमेव कर्त्तव्यमित्येवं प्राप्तआह। “विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदात्” कात्या०१,२,१८,सू० “नित्यकर्मणि अग्निहोत्रदर्शपूर्णमासादिके विगुणेऽपि अङ्गहीनेऽपि कृते फलनिर्वृत्तिः प्रत्यवायपरिहाररूपस्य फलस्य निष्पत्तिर्भवत्येव अङ्गप्रधानभेदात् यतोऽङ्गानि च प्रधानानि च भिन्नानि नित्येषु चेतिकर्त्तव्यता नास्ति। कुतइतिकर्त्तव्यता नास्ति? अपूर्वाभावात् अपूर्वप्रयुक्ता हीतिकर्त्तव्यता, सा च तस्मिन्नसति न भवितुमर्हतिकथम् अपूर्वाभावः? फलाभावात् कालान्तरभाविफलसिद्ध्यर्थं ह्यपूर्वं कल्प्यम् तच्चासति फले कल्पयितुं न शक्यते तस्मात् नित्येषु यागस्यैव भाव्यत्वम् न फलस्य। तस्मात् पौर्णमास्याममावास्यायां वाग्निमुद्दिश्य पुरोडाशस्त्यक्तव्य इत्येतच्चदुपदिश्यते तेन दृष्टार्थानि यान्यङ्गानि संनिपत्योपकारकाणि यैर्विना प्रधानभूतयागनिष्पत्तिर्न भवति, अन्यथानुपपत्त्या, तावद्भिरुपेतं प्रधानं कर्त्तव्यम् नाङ्गानि। अङ्गान्तराणि तु काम्यप्रयोगार्थम्। अतोऽग्निकालपुरोडाशमात्रमादरणीयम् अन्यदङ्गजातमदृष्टार्थं नादरणीयमिति। कथं तर्हीदृशे निष्फले पुरुषस्य प्रवृत्तिः? इति चेत् उच्यते प्रत्य-

वायानुत्पत्त्यर्था प्रवृत्तिर्न तु फलार्था, विहिताकरणाद्धि प्रत्यवायः श्रूयते । (मनुना) "अकुर्वन्विहितं कर्म प्रायश्चित्तीयते नरः" इति अतोनित्यकर्मणो निष्फलत्वादपूर्वा भावादितिकर्त्तव्यता नास्तीति हीनाङ्गस्यैव प्रयोगइति केचित् सिद्धान्तमाहुः । तदेतन्नोपपद्यते कथम् ? भावनातो हि तिस्र आकाङ्क्षा जायन्ते किं केन कथमिति, तत्र कथमितीतिकर्त्तव्यताकाङ्क्षा नित्येऽप्यस्ति तस्मात्तत्राप्यस्त्येति कर्त्तव्यता । सत्यम् ? अस्त्येवेहाप्याकाङ्क्षात्रयम् तथापि किम् आकाङ्क्षायाः समानपदोपात्तेन यागेनैव पूरणात् निर्वृत्त्युपयोगिन्येवेतिकर्त्तव्यता कथमाकाङ्क्षया गृह्यते न त्वदृष्टोपयोगिप्रयाजाद्यङ्गम् अदृष्टस्य साध्यस्याभावादिति चेत् न यागस्य स्वतोऽपुरुषार्थत्वेन प्रवृत्त्यनुपपत्त्या समानपदोपात्तं यागमुत्सृज्य सर्वेषामभिमतस्य प्रत्यवायपरिहारस्येह भाव्यतया कल्पनात् ननु सर्वेषामभिमतः स्वर्गः किमिति न कल्प्यते ? इति चेत् तस्य शरीरारम्भहेतुतया मोक्षविरोधित्वेन मुमुक्षूणामनभिप्रेतत्वात् प्रत्यवायपरिहारस्तु तैरपीष्यत एव । कथम् ? तस्मिन् पापे एतज्जन्मोपार्ज्जिते भवान्तरोपार्ज्जिते वा स्थिते सति तदुपभोगहेतुभूतशरीरारम्भावश्यंभावेन मोक्षाभावात् । अतो मोक्षार्थिनाप्यवश्यं पापक्षय एषितव्य एव समीहितफलाय, इतरथाऽप्रक्षीणे पापे फलाप्राप्तेः । तस्मान्नित्यानि कर्माणि पापक्षयस्योपायत्वेन नोद्यमानानीतिकर्त्तव्यतामपेक्षन्त एव । धर्मशास्त्रेषु च यथैवाकरणे प्रत्यवायः स्मृतः तथैव करणादपि पापक्षयः श्रूयते (मनुना) "पूर्व्वां सन्ध्यां जपंस्तिष्ठन् नैशमेनो व्यपोहति" इत्यादिभिः "नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयमिति" च । तस्मान्नित्येऽप्यस्त्येव प्रत्यवायपरिहाररूपं फलम् । तस्मात् नित्यान्यपि कर्माणि सर्वाभिमतस्य पापक्षयस्योपायत्वेन नोद्यमानानीतिकर्त्तव्यतामपेक्षन्त एव । ततश्च सर्वाङ्गोपेतामामनुष्ठानं कश्चिदपि सर्व्वदा कर्तुं न शक्नोति । जीवनादिनिमित्ते च तानि विधीयन्ते निमित्तस्य चैतदेव रूपं यत् तस्मिन् सति नैमित्तकमवश्यं कर्त्तव्यम् तेन यावज्जीवं कर्त्तव्यम् सर्वाङ्गोपेतं च कर्त्तव्यमिति दुःशकमेव तेन यथा शक्नुयादित्युपपद्यते तावश्यमन्यतरस्मिन्हातव्ये निमित्ते सति नैमित्तिकस्य कर्त्तव्यत्वं प्रधानवाक्ये श्रूयते तद्यदि कस्य चिदङ्गस्यानुरोधेन सति निमित्ते नैमित्तिकं न क्रियेत ततः प्रधानवाक्यविरोधः स्यात् प्रधानमात्रं स्मृत्या निमित्ते सति विधीयते अङ्गानि तु तदर्थतया प्रकरणेन गृह्यन्ते अतस्तानि प्रधानवाक्यगतावश्यकत्वानुरोधेन यथाशक्त्युपसंहर्त्तव्यानि इतरथा प्रधानस्यावश्यकर्त्तव्यत्वं श्रुतं हीयेत तस्मात् प्रधानाविरोधेनाङ्गानि यथा शक्त्युपसंहर्त्तव्यानि । नन्वेवं हीनाङ्गादपि प्रधानात् फलसिद्धेरभ्युपगमात् समर्थोऽप्यङ्गानि परित्यक्ष्यतीति नैवम् शक्तस्य कामतोऽङ्गे त्यज्यमाने वैगुण्यं स्यादेव । अङ्गोपदेशं निमित्तं चालोच्योभयानुरोधेन यावन्त्यङ्गानि कर्तुं शक्नोति तावद्भिरुपेतं प्रधानमेनः क्षपयतीति शास्त्रार्थोऽवधार्य्यते तावतैव शास्त्रवशात् फलनिष्पत्तिः इति साधूक्तम् "विगुणे फलनिर्वृत्तिरङ्गप्रधानभेदादिति" । एतच्च प्रयोगविध्यनुत्थाप्येष्वङ्गेषूच्यते यद्धि कुर्यादित्युच्यते तत् यथाशक्त्युपवक्ष्यते । यानि तु स्वभावसिद्धानि विध्यन्तरसिद्धानि चोपजीव्यन्ते यथा लोके धनार्जनादि, वेदेऽपि काले विद्याग्नयश्च तेषां स्वरूपेणैवाधिकारिविशेषणत्वं द्रव्यवान् विद्यावानग्निमानिति । एतदुक्तं भवति अङ्गं हि विधिबलादुपादीयते निमित्तानुरोधाद्वा त्यज्यते उभयानुग्रहार्थं वा शक्तं प्रत्युपादीयते अशक्तं प्रति त्यज्यते इति नान्या गतिरस्ति तत्रोभयानुग्रहो युक्तो यदि सम्भवति, सम्भवश्चोपादेयेष्वङ्गेषु यथाशक्ति व्रीहीन् सम्पादयेत् यथाशक्त्यवहन्यादिति आहवनीयादि स्वरूपं तु नानेन विधिनोपादीयते तस्मादग्निमान् विद्यावान् द्रव्यवान् जीवंश्च यजेतेत्येवमाश्रीयते अतो विद्याग्निकालाद्यपरित्यागेनान्येषामङ्गानां यथाशक्त्यनुष्ठानं सिद्धम् । तथा चोक्तम् तन्त्ररत्ने "यानि प्रयोगविधिना कर्त्तृरूपादेयत्वेनाङ्गानि नोद्यन्ते तेषामेव शक्तिपरिमितत्वम् यावन्ति शक्नुयात् तावन्ति कुर्य्यादिति यानि तु विध्यन्तरप्रयुक्तानि स्वयंसिद्धानि वाङ्गत्वेन गृह्यन्ते तानि स्वरूपत एवाधिकारिविशेषणम् यथाग्न्यादीनि तेषामुपादानस्य प्रयोगविधिनानुपादनाच्च यावदुक्तोत्युपलम्भः सम्भवति । किन्तु तदपेक्षोविधिस्तद्वन्तमेवाधिकरोति तेन सपत्नीकस्यार्थवस्य आम्नातोपासनस्याविशिष्टस्याग्निमतो विद्यावतः यज्ञोपादिकालस्य योगिनोऽधिकारो नान्यस्येति । एवं चाप्रतिसमाधेयाङ्गवैकल्येऽप्यग्न्यादिमानधिक्रियेतैव आधानं तु न कुर्य्यात्तस्य नैमित्तिकत्वादिति" प्रायश्चित्तविधानाच्च" इत्यत्र प्रायश्चित्तविधानादप्येवं ज्ञायते यद्विगुणेऽपि फलनिर्वृत्तिर्भवतीति । यदि च विगुणात् फलं न स्यात्तर्हि प्रायश्चित्तं न विदधीत न हि निष्फलस्याङ्गैः सम-

र्मास्ति अस्ति च विधानम् तस्माद्विगुणादपि फलं भवतीति। येषां मते नित्येषु फलाभावेनापूर्व्वाभावात् तदर्थेतिकर्त्तव्यता नास्ति तेषां प्रायश्चित्तविधानमत्यन्तानुपपन्नम्। इतिकर्त्तव्यतायां तु निमित्ते भेदने जाते वैगुण्यात्तत्परिहारायापरं होमाख्यमङ्गं भिन्ने जुहोतीत्यादिकस्तत्पन्नं सत् क्रियत एव पक्षान्तरे त्वसत्यामिति कर्त्तव्यतायां भेदने जातेऽपि नास्ति वैगुण्यम् गुणहानिर्हि वैगुण्यम् असति गुणे कस्य हानिः स्यात् ततश्चासत्पक्ष एव प्रायश्चित्तविधानमुपपन्नमिति। "तथा च दृष्टम्" सू०। नित्यं कर्म यथा कथञ्चित् स्वताङ्गपरित्यागेनापि यथाशक्त्यङ्गोपेतमनुष्ठातव्यत्वेन श्रुतौ दृष्टम्। तथा हि "यत् पयो न स्यात् केन जुहुयात्" इति व्रीहियवाभ्यामित्यादि "न वा इह तर्हि किञ्चनासीदथैतदहूयत सत्यं श्रद्धया" इत्यन्तेन ग्रन्थेन तथा "तदैव यादृक्कीदृक् च होतव्यमिति" शाखान्तराच्च। तस्माद्विगुणेऽपि नित्ये प्रत्यवायपरिहाररूपं फलं भवति अत एवोक्तं कर्काचार्य्यैः "उपात्तदुरितक्षयो वा उत्पत्स्यमानदुरितप्रतिबन्धो वा भवत्येवेति"। अथ काम्ये कर्म्मणि चिन्त्यते। काम्येऽपि विगुणे फलाभिनिष्पत्तिर्भवत्येव। यतस्तत्राप्यङ्गानि प्रधानानि च भिन्नानि। अश्वमेधे च काम्ये प्रायश्चित्तविधानमप्यस्ति अश्वं प्रकृत्य "अथातः प्रायश्चित्तीनां यद्यश्वोवडवां स्कन्देद्धायव्यं पयोऽस्तु निर्वपेद्य यदि स्रामो विन्देदित्यादि तथा पञ्चशारदीयेऽपि "उत्सृष्टान् पशून् प्रकृत्य ताण्ड्ये प्रायश्चित्तविधानं दृश्यते "अपोनप्त्रियोऽप्सु म्रते" इत्यादिकं यदि च विगुणादपि काम्यात् फलं न स्यात् प्रायश्चित्तविधानं व्यर्थमेव स्यात् तथा च दृष्टं विगुणमपि काम्यं फलोत्पादकं वेदे दृष्टम्। कारीरीमिष्टिं प्रकृत्य श्रूयते "यदि वर्षेत्तावत्येव जुहुयादिति" अत्रासमाप्तायाम् एव कारीर्यां तत्फलं दृष्टिरूपं वेदे दृष्टम् अतो विगुणेऽपि काम्ये फलं सिध्यतीति पूर्व्वपक्षिते सिद्धान्तमाह। "न श्रुतिलक्षणत्वात्" सू०। यदुक्तम् विगुणेऽपि काम्ये फलं सिध्यतीति तन्न कुतः श्रुतिलक्षणत्वात् काम्यस्य, यतः काम्यं सगुणमेव सर्व्वाङ्गोपेतमेव श्रुत्या लक्षितम् फलसाधनत्वेन विहितम् तत्राङ्गलोपे काम्यमानफलस्यानुत्पत्तेः तत्र प्रधानस्य त्यागे यथा फलं नास्ति एवमङ्गत्यागेऽपि, फलसाधनत्वं हि शास्त्रैकसमधिगम्यं ततो यदङ्गं प्रधानं वा यावच्छब्दोपात्तम् तस्य लोपे साधनत्वं नास्ति अतो यदा सर्व्वाङ्गोपेतं कर्त्तुं शक्नोति तदैव तत्र प्रवर्त्तेत न तु यथाशक्ति। न हि तत्राङ्गत्यागे प्रमाणमस्ति प्रधानवाक्यम्, अत्यागेऽप्यविरोधात् न हि तस्यावश्यकत्वं केनचिदुक्तं यतः औदासीन्यं न लभ्येत। कामश्रुतिस्तु समर्थेऽपि वर्त्तमाना स्वार्थतां न जहातीति नाङ्गत्यागे प्रभवति। निमित्तश्रुतिस्तु निमित्ते सत्यक्रियमाणे नैमित्तिके प्रीयेतेति वैषम्यम्। अतो निमित्ते सति नित्यस्यावश्यकर्त्तव्यत्वश्रवणात् सर्व्वदा सर्व्वाङ्गोपेतस्य केनापि कर्त्तुमशक्यत्वाद्यथा शक्नुयात्तथा कुर्य्यादित्येवं कल्प्यते काम्ये त्ववश्यकर्त्तव्यत्वाभावादेवं कल्पयितुं न शक्यते अतः काम्यं विगुणं फलं न साधयत्येवेति सिद्धम्" कथमो योगे गर्हायां "विभाषा कथमि लिङ् च" पा०। लिङ् चात् लट्। "त्वं धर्मं त्यजेस्त्यजसि वा पक्षे कालत्रयलकाराः। तत्र भविष्यति नित्यं लृङ् भूते वेति भेदः। कथं नाम तत्र भवान् धर्ममत्यक्ष्यत्" सि०कौ०। गर्हायामित्यनुवर्त्तनाभावे अगर्हायामपीति प्राञ्चः। तेन "मनस्तु यं नोज्झति जातु यातु मनोरथः कण्ठपथं कथं सः" इत्यादौ अगर्हायामपि लिङ्।

कथमपि अव्य० कथम् च अपि च द्व०; १अतिकष्टेनेत्यर्थे २अतिगौरवेणेत्यर्थे च। "विसृज्य कथमप्युमाम्" कुमा० "कथमपि चरणोपलैश्चलद्भिः" माघः "तिष्ठद्भिः कथमपि" किरा०। "कथमपि गुरुशोका मा रुदन् माङ्गलिक्यः" भट्टिः। पदद्वयमित्येके।

कथम्भाव पु० कमित्यस्य भावः। १किं प्रकारतायाम् भू—प्राप्तौ घञ् ६त०। २कस्यचित् प्रकारस्य प्राप्तौ ३कथमित्यपेक्षायाञ्च। कथमित्याकाङ्क्षया प्राप्तिर्यस्य। इतिकर्त्तव्यारूपे अङ्गे त्रि० कथंशब्दे कर्कव्याख्यायाम् उदा०।

कथम्भूत त्रि० कथं किंप्रकारं भूतः प्राप्तः भू—प्राप्तौ क्त २त०। १किंप्रकारप्राप्ते २कीदृशे च।

कथा स्त्री कथ—णिच् अङ्। १कथने, "अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिणाम्" "आम्नागमानुमानाभ्यां साध्यं त्वां प्रति का कथा" रघुः। "का कथा बाणसन्धाने ज्याशब्देनैव दूरतः" शकु०। "सत्त्वासत्त्वकथा वृथा" खण्डनखा०। "कथाप्रसङ्गेन मिथः सखीमुखात्" नैष०। "कथाप्रसङ्गेन जनैरुदाहृतात्" किरा०। "प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः। परम्पराश्रया या स्यात् सा मताख्यायिका बुधैः" इत्युक्तलक्षणे २स्तोकसत्यप्रबन्धरूपे वाक्ये। प्रबन्धरूपवाक्यसमुदायात्मकत्वाच्च कादम्बर्य्यादीनां कथात्वं तत्र

शब्दस्वरूपदृष्टान्तस्य सततत्वात् अन्यस्य सर्वस्य मिथ्या भूतस्यैव कविना कल्पनेन प्रबन्धनात्। पञ्चप्रतिपक्षोपन्यासेन विचाररूपे ४वाक्ये च। विचाराङ्गकथा हि त्रिविधा वादजल्पवितण्डाभेदात् तत्र "प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः"। "यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपलम्भो जल्पः" "स प्रतिपक्षस्थापनाहीनो वितण्डा" गौ० सू०। वादादयो वक्ष्यिता विशेषस्तत्तच्छब्दे वक्ष्यते। कथायां साधु कथादि० ठक्। काथिक कथाप्रियो त्रि०।

कथादि पु० पाणिन्युक्ते तत्र साधावित्यर्थे ठक्प्रत्ययनिमित्ते शब्दगणे स च गणः "कथा विकथा विश्वकथा संकथा वितण्डा कुष्ठविद् जनवाद जनेवाद जनोवाद इति संपद् गुण गण आयुर्वेद"।

कथानक न० कथ्यतेऽत्र कथ-बा० आनक्। (कहानि) (गल्प) ख्याते कथाविशेषे यथा वेतालपञ्चविंशत्यादि तत्र उपाख्यानबाहुल्येन कथानकतया व्यवहारः।

कथान्तर न० कथाया अन्तरम् अवकाशः। 'कथावसरे "कर्त्तव्योऽस्मि कथान्तरेषु भवता" शकुन्त०। "कर्त्तव्योऽस्मि कथान्तरे" भा०व०१५१अ०। अन्या कथा मयूर०व्यंसकस्० समासपदविपर्ययः।२अन्यस्यां कथायाम् वादान्तरे। [मुखे।

कथापीठ स्त्री कथायाः पीठमिव। कथाप्रस्तावसूचके ग्रन्थ-

कथाप्रसङ्ग पु० कथायाः प्रसङ्गः। १कथायामासक्तौ "कथाप्रसङ्गेन मिथः सखीमुखात्" नैष०। २विषवैद्ये त्रि० विष: "कथाप्रसङ्गेन जनैरुदाहृतात्" किरा०। कथाप्रसङ्गानां विषवैद्यानामिमैः प्रभुभिर्जनैरित्यर्थः। कथायां प्रसङ्गो यस्य। ३जल्पाके अनवरतं गल्पकारके त्रि०शब्दरत्ना०। ४वातुले" त्रि० मेदिनिः।

कथाप्राण पु० कथया प्राणिति जीवति प्र+अन-अच्। कथोपजीविनि नाटकाचार्ये शब्दर०। [प्रारम्भांशभेदे।

कथामुख न० कथाया आमुखम्। कथाप्रस्तावाख्ये ग्रन्थ

कथाशेष त्रि० कथा कथनमात्रं शेषोऽस्य। १मृते मरणाद्धि जनस्य कथामात्रमवशिष्यते, एवं शब्दशेषनामशेष कथावशेषादयोऽप्यत्र। अतएव नैषधे "कथाशेष सिष्यध्वमिति प्रमील्य सः" मरणपरतया कथाशेषमिष्यध्वमिति प्रयुक्तम्। इत०। २कथासमाप्तौ पु०

कथित त्रि० कथ-गौणकर्म्मासमभिव्याहारे मुख्ये कर्म्मणि-क्त। १उक्ते २आख्यातादिना वाच्येऽर्थे च "अकथितञ्च" पा०। ३किञ्चिद्रूपेण प्रतिपादिते त्रि०४परमेश्वरे पु० इन्द्रियेभ्यः परत्वेन तस्य कथितत्वात्तथात्वम्। "इन्द्रियेभ्यः पराह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इत्यनेनेश्वरस्यैव सर्व्वेभ्यः परत्वेन कथितत्वम्। अतएव "संसारमूतः कथितः"विष्णु सं०तस्य सहस्रनामसु ४कथित इत्येकं नाम व्याख्यातं च भाष्येऽस्मद्रूपेणैव, गौणे कर्म्मणि क्त। यस्यावबोधाय कश्चिदर्थः प्रतिपाद्यते ५तस्मिन्नर्थे त्रि० भावे क्त, ६कथने न०।"पूर्व्वैरकथितैः पुराविदः"रघुः।

कथितपदता स्त्री कथितं पूर्व्वमुक्तं पदं यत्र वाक्ये तस्य भावः तल्। अलङ्कारोक्ते पुनरुक्तताख्ये वाक्यदोषभेदे "अधिकन्यूनकथितपदता इतरेतराः" सा० द०। वाक्यमात्रगतदोषगणनावाक्यम् "रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन्" अत्र लीलाशब्दस्य द्विःप्रयोगात् कथितपदत्वं वाक्ये दोषः उद्देश्यप्रतिनिर्द्देश्ये तु नायं दोषः। यथा "उदेति सविता ताम्रस्ताम्र एवास्तमेति च" इत्यादौ ताम्रशब्दस्योद्देश्यप्रतिनिर्द्देशभावान्नोक्तदोषः।

कथीकृत त्रि० अकथा कथा सम्पद्यमाना क्रियते स्म कथा+च्वि-कृ-क्त। कथामात्रावशेषिते "अवगम्य कथीकृतं वपुः" कुमा०

कद रोदने, वैक्लव्ये अक०आह्वाने सक० भ्वा० इदित् पर० सेट्। कन्दति अकन्दीत्। चकन्द कन्दनम् प्रतिकन्दति

कद विक्लवीभावे दिवा० आत्म०अक० सेट्। कद्यते अकदिष्ट। चकदे। घटादि णिच्-कदयति ते। कदनम् णिच्-ल्युट्। कदनम् कद्यतेः क्रदयतेर्वा क्विप् कद्।

कद् अव्य०। कद-क्विप। किंशब्दार्थे। "कद्व्रत आहनो वीच्या नृन्" ऋ० १०,१०,६, न यत् पुरा चकृमा कद्ध" ऋ०१०,४, "कद्ध कदा खलु" भा०। कद्ध च सा क्रतम्। "कद्ध महीरधृष्टा" ऋ० ८,६६,९,१०। "कद्ध "कदा खलु" भा०। [२सुखदायके च त्रि०।

कद पु० कं ददाति दा-क। १मेघे शब्दर० २जलदायके

कदक न० कदः मेघ इव कायति प्रकाशते उपरिभागे अम्बराच्छादकत्वात् कै-क। १विताने (चाँदोया) हेम०।

कदक्षर न०कुत्सितमक्षरम् कोः कद्। कुत्सितवर्णे।

कदग्नि पु०कुत्सितोऽग्निः कोः कद्। मन्दाग्नौ। बहु०। मन्दाग्नियुक्ते त्रि०।

कदध्वन् कुत्सितोऽध्वा कोः कद् न समा०। दुष्पथे

कदन न० कद-णिच्-घटादि०करणे ल्युट्। १पापे, बाधे

ल्युट्। २मर्द्दने, ३मारणे च। आधारे ल्युट्। ४युद्धे। “तथा प्रजानां कदनं विदधुः कदनप्रियाः” भाग० ७,२,११। “संसारचक्रकदनात् ग्रसता प्रणीतः” भाग० ७,९,१६। कद—भावे ल्युट्। ५विह्वलतायाम्।

कदन्न न० कुत्सितमन्नं कोः कद्। कुत्सितान्ने। शास्त्रेऽभक्ष्यत्वेन वैद्यकेऽपथ्यत्वेन च कीर्त्तितमन्नञ्च कदन्नम्।

कदपत्य न० कुत्सितमपत्यं कोः कद्। मूर्खादिरूपे कदाचारयुते चापत्ये। “कदपत्यभृतं दुःखं येन विन्दन्ति दुर्भरम्” भाग० ४,१३,२७। “कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात्” भा० ४, १३,४२।

कदम्ब पु० कद—करणे अम्बच्। दर्शनेन विरहिवैक्लव्यसाधने (कदम) वृक्षे अमरः। “एकद्वारे चतुश्चक्रं वनमालाविभूषितम्। कदम्बकुसुमाकारं लक्ष्मीनारायणं विदुः” शालग्रामलक्षणे पुरा०। “कदम्बमुकुलस्थूलैरभिवृष्टां प्रजाश्रुभिः” रघुः “कदम्बमुकुले दृष्टिः समारोपिता” उद्भटः। “कदम्बो मधुरः शीतः कषायो लवणो गुरुः। सरोविष्टम्भकृद्रूक्षः कफस्तन्यानिलप्रदः” भावप्र० तद्गुणा उक्ताः। तस्य भेदास्तत्रैव। “नीपो महाकदम्बः स्यात् धारा कदम्ब इत्यपि। द्वितीयोऽल्पप्रमाणश्च वृत्तपुष्पः कदम्बकः”। हारिद्रस्तुरजोधवः। धूलीकदम्बको धाराकदम्बः षट्पदप्रियः। वृत्तपुष्पः केशराढ्यः प्रावृषेण्यः कदम्बकः। नीपो महाकदम्बोऽपि तथा बहुफलो मतः” इति भरतः। अत्र प्रावृषेण्य इत्युक्तिर्गौडादिदेशाभिप्रायेण मथुरादौ चैत्रेऽपि तत्पुष्पोत्पादाः स्वाभिः प्रत्यक्षतो बहुशो दृष्टत्वात् अत एव “यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः” काव्यप्र० चैत्रमासे तत्पुष्पवर्णनमुपपद्यते। एतेन कदम्बपदं केलिकदम्बपरमिति” सा० द० रामचरणव्याख्यानं मथुरादिदेशानभिगमनमूलकम्। तेन देशभेदात्तस्य वसन्तप्रावृड्भयभवत्वमिति न्यायः। कविभिस्तु वर्षाकाल एव तद्वर्णनं क्रियते यथा माघे रैवतकपर्व्वतवर्णने। वर्षर्त्तुवर्णनमधिकृत्य “विहगाः कदम्बसुरभाविह गाः कलयन्त्यनुक्षणमनेकलयम्”। भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः”। वर्षावर्णने च तत्रैव “नवनीपवनीरभि” तस्य च प्रावृषेण्यत्वादेव “कदम्बं चूरणं तथैवेत्यादिना हरिशयने भोजननिषेधः। इति” त्वत्सम्पर्कात् पुलकितमिव प्रौढपुष्पैः कदम्बैः” मेघदू० आषाढमधिकृत्यैव तद्वर्णनप्रणयनात्। इति तस्य प्रावेण्यत्वमपि। कदम्बवृक्षश्च मेरुविष्कम्भपर्वतरूपमन्दरस्य विशेषचिह्नरूपः “विष्कम्भशैलाः खलु मन्दरोऽस्य सुगन्धशैलो विपुलः सुपार्श्वः। तेषु क्रमात् सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलकाख्याः। सि० शि०। अस्य सुमेरोः।

कदम्बक पु० स्वार्थे कन्। १कदम्बवृक्षे। संज्ञायां कन् संघर्षेण विह्वलीकरणसाधने २समूहे न० अमरः। “गजकदम्बकमेचकमुच्चकैः” माघः। “पृथुकदम्बकदम्बकराजितम्” किरा०। “कदम्बकं वातमजं मृगाणाम्” भट्टिः कदम्ब इव कायति कै—क। ३हरिद्रौ ४सर्षपे च राजनि० कदम्बकोरकोपरिस्थसूक्ष्मांशतुल्यफलत्वात्तस्य तथात्वम्। ५देवताड़वृक्षे न० रत्नमा०।

कदम्बकोरकन्याय पु० कदम्बपुष्पस्य यथा सर्व्वावयवेषु युगपत्कोरकाणामुत्पत्तिस्तादृशे एकदोत्पत्तौ दृष्टान्तभेदे शब्दानामुत्पत्तिर्हि द्विविधा। “वीचितरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता। कदम्बकोरकन्यायादुत्पत्तिः कस्यचिन्मते” भाषा० उक्ता। दशदिक्षु दश शब्दा उत्पद्यन्ते ततश्चान्ये दश शब्दा इत्येवं कदम्बकोरकोत्पत्तिवत् सर्वासु दिक्षूपर्य्युपरि शब्दानामुत्पत्तिरिति कस्य चिन्मतम् न्यायमते तु वीचितरङ्गन्यायेनैव तदुत्पत्तिरिति भेदः।

कदम्बद पु० कदम्बः तदुपरिस्थः सूक्ष्मांश इव दीयते खण्ड्यते दो—खण्डने कर्म्मणि बञर्थे क। सर्षपे शब्दचन्द्रिका तस्य कदम्बकोरकोपरिस्थितसूक्ष्मांशतुल्यफलत्वात्तथात्वम्।

कदम्बपुष्पा स्त्री कदम्बस्येव पुष्पमस्यास्ति अर्श० अच्। मुण्डितिका इत्यि (मुण्डेरी) रत्नमाला तत्र पुष्पमिव पुष्पमग्राः विपक्षे तु ङीप्। कदम्बपुष्पी तत्रैवार्थे राजनि०।

कदम्बभ्रमवृत्त न० कदम्बवत् भ्रमस्य वृत्तं गोलचेत्रम्। सि० शि० उक्ते गोलवृत्तभेदे। तद्बन्धप्रकारस्तत्रैव “तत्रापमवृत्तप्राच्या याम्या सौम्या च दिक् सदा। कदम्बभ्रमवृत्तं च बध्नीयात् परितो भुवात्। कोणे तु विषवत्स्थां पंक्तवत्या क्रान्तिशिञ्जिनी। सर्व्वतः समवृत्ताच्च याम्योदक् कुजसंगमे। तत्तिर्य्यग्गतसूत्राणां योगः स समसंज्ञकः। समभ्रुवः कदम्बानामुपरि द्युचरायेत। सूत्राणि वृत्तरूपाणि वलयानि तदन्तरे। अयनं वलनं मध्ये स्यात् समध्रुवसूत्रयोः। कदम्बध्रुवसूत्रान्तरायनं च विभेयदात्। कदम्बसमसूत्रान्तः स्फुटं सर्वदिशां च तत्”।

कदम्बवादिन् पु० कदम्ब इति वादः संज्ञा अस्त्यस्य णिनि। कदम्बसंज्ञायुक्ते नीपे। “कदम्बवादिनो नीपान् दृष्ट्वा बकदलिनैरिव। समन्ततो भ्राजमानं कदम्बककदम्बकैः”

काशी० । कदम्बककदम्बकैः कदम्बसमुदायैः स्तबुल्यक-दम्बशब्दवाच्यान् नीपान् महाकदम्बान् दृष्ट्वा कण्ट-कितैर्जातपुलकैरिवेत्युत्प्रेक्षा । [लतायाम् राजनि० ।

कदम्बी स्त्री कद–करणे अम्बच् गौरा० ङीष् । देवदाली-

कदर पु० कं जलं दृणाति दृ–अच् । १श्वेतखदिरे तस्य सेव-नात् मुखस्थितस्य श्लेष्मणा संहतरूपजलस्य दारणात् "कदरो विशदोवर्ण्योमुखरोगकफास्रजित्" इति भावप्र० तद्गुणमध्ये मुखकफनाशित्वोक्तेस्तथात्वम् । २पायसभेदे (छेड़ापायस) न० शब्दमाला । तस्य अम्लादियोगात् दुग्धान्तर्गतजलदारणात् तथात्वम् । कदः विह्वलकारिका अरा अस्य । ३क्रकचे(करात)मेदि०सुश्रु-तोक्ते ४क्षुद्ररोगभेदे स च रोगः "समासेन चत्वारिंशत् क्षुद्ररोगा भवन्तीत्युद्दिश्य" "कदरम् अजगल्लिक इत्यादि-ना विभज्य "शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः। मेदोरक्तानुगैश्चैव दोषैर्बाधद्यापि वा । कोलमात्रः सरु-क्स्रावी जायते कदरस्तु सः" लक्षितः (पाएरजाहुडा) तत्र विभागे कदरमित्युक्तेर्नपुंसकताप्यस्य ।

कदर्थ पु०कुत्सितोऽर्थः कोः कद् । कुत्सितपदार्थे । ततः त-त्करोतीति" णिच् । कदर्थयति कुत्सितमर्थं करोती-त्यर्थः । ततः क्त कदर्थितः । कुत्सितार्थीकृते । "भ्रष्ट-भूषणकदर्थितमाल्यः"माघः। ल्युट् । कदर्थनम् कुत्सि-तार्थकरणे । युच् । कदर्थना तत्रैव स्त्री । अकदर्थं कदर्थं करोति च्वि कदर्थीकृ-क्त । कदर्थीकृत अभूतकदर्थे कदर्थ-तया कृते त्रि०। "केशैः कदर्थीकृतवीर्य्यसारः" किरा० ।

कदर्य्य त्रि० कुत्सितोऽर्य्यः स्वामी कुगतिस०कोः कद् । सति विभवे १अदातरि,क्षुद्रे ।"आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पातयन् । यो लोभात् सञ्चिनोत्यर्थान् स कदर्य्य इति स्मृतः"इत्युक्तलक्षणे २अर्थसञ्चयकारके च ।"दोषितस्य कद-र्य्यस्य बद्धस्य निगड़स्य च" "आत्रेयस्य कदर्य्यस्य वदान्यस्य च वार्द्धुषेः" मनुः "उवाच न मे जनपदे कदर्य्यो न म-द्यपोनानाहिताग्निर्नाविद्वान् न स्वैरी" छा० उ० ।

कदल पु० कद–इवा०कलच्। १रम्भावृक्षे मेदि० । २पृश्नौ (चाकुलिया) ३डिम्बिकायाम् (डिमि) शाल्मलिवृक्षे च स्त्री मेदि० । अजादेराकृतिगणत्वात् टाप् ।

कदली स्त्री काय जलाय दल्यते त्वगादौ जलबाहुल्यात् गौरा० ङीष् । १रम्भावृक्षे, अमरः । कदली गुणादि भावप्र० उक्ता यथा । "कदली वारणा मोचाम्बुसारांशुम-तीफला । मोचाफलं स्वादु शीतं विष्टम्भि कफनुद्-गुरु । स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित् । पक्वं स्वादु हिमं पाके स्वादु वृष्यञ्च बृंहणम् । क्षुत्तृष्णा-नेत्रगदहृन्मेहघ्नं रुचिमांसकृत् । माणिक्यमर्त्त्यामृत-चम्पकाद्या भेदाः कदल्याबहवोऽपि सन्ति । उक्ता गुणा-स्तेष्वधिका भवन्ति निर्दोषता स्याल्लघुता च तेषाम्"।

रम्भायाश्च स्तम्भे जलाधिकयुक्तत्वात् शैत्याधिक्य-युक्तपत्रत्वाच्चतथात्वम् "कदली कदली करभः करभः करिराजकरः करिराजकरः"प्रसन्नरा० । अत्र द्वितीय कदलीपदम् शैत्यादिगुणयोगात् गौणमिति सा०द० सम-र्थितम् "ऐकान्तशैत्यात्कदलीविशेषाः" कुमा० । २वैजय-न्त्याम्कदल्याकारपत्ररूपवस्त्रवत्त्वात् तथात्वम् अत-एव माघे कदल्याः कामवैजयन्तीत्वेनोत्प्रेक्षणम् तदीया-कारसाम्यात् यथा । "जगद्वशीकर्त्तुमिमाः स्मरस्य प्रभा-वनीके तनवैजयन्तीः । इत्यस्य तेने कदलीर्मधुश्रीः प्र-वनी केतनवैजयन्ती"माघः ।"क्रीडाशैलः कनककदलीवेष्टन-प्रेक्षणीयः""यासत्यूरुःसरसकदलीस्तम्भगौरवलत्वम्"मेघ०। स्वार्थे कन् रम्भावृक्षादौ । "अभ्युन्नमत्कदलिकावनरा-जिरम्यैः" माघः । ३हस्तिपताकायां हारा० । "कद-लिका कामकारिणः"काद० । ४मृगभेदे "कदलीमृगमो-कानि कृष्णश्यामारुणानि च । काम्बोजः प्राहिणोत्तस्मै" भा० स०४७अ०"मोकानि अजिनानि" नीलक० । तेन तस्य काम्बोजदेशस्थत्वं गम्यते तस्य च कदलीस्तम्भवदभ-ङ्गुरपादकत्वात्तथात्वम् । कदल्याः फलं पुष्पं वा अण् तस्य लुप् लुपि स्त्रीप्रत्ययस्यापि लुक् । कदल तत्फले न० ।"पनसे कदलं कदले च घृतं घृते च लवणं लवणे च दधि"वैद्यकम् ।"कदली लवनी धात्री"इत्यादौ तु उपचारात् तत्फलपरता । संघे खण्ड च । कदलीखण्डतत्संघे न०।

कदलीकन्द पु० ६त० । रम्भामूले तद्गुणाश्च भावप्र०उक्ता यथा "शीतलः कदलीकन्दो बल्यः केश्योऽम्लपित्तजित् । वह्निकृद्दाहहारी च मधुरो रुचिकारकः" । "कन्दः कदल्यादलितोनितान्तं संस्वेदितो हिङ्गुघृतेन राद्धः। उद्भूलितः सैन्धवरेणुनाथ मरीचसंम्पर्कित एष रुच्यः"

कदलीकुसुम न० ६त० । (मोचा) कदलीपुष्पे । "कद-ल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु । वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत्"भावप्र०तद्गुणा उक्ताः । कदलीपुष्प-रम्भापुष्पादयोऽप्यत्र न०

कदलीदण्ड पु० ६त० । (थोड़) ख्याते कदलीस्तम्भमध्यस्थे पदार्थे "कृतः क्षिप्तः सलिलविहृतः कृतृतन्तुः प्रभिन्नः

कम्बोर्भसा जलावरहितः चारजम्बीरपुटः। मध्ये मध्ये तत्त्वकाञ्चितेनार्द्रकेणातिपूर्णः खाद्यभूयं भवति सुतरां गर्भदण्डः कदल्याः। योनिदोषहरोदण्ड कादल्योऽल्पकदरं जयेत्। रक्तपित्तहरः शीतः सुरूच्योऽग्निप्रवर्द्धनः” भावप्र० तद्गुणाद्युक्तम्।

कदा अव्य० कस्मिन् काले किम्+दा—कादेशः। कस्मिन्काले इत्यर्थे अनद्यतने काले तु तदर्थे वा र्हिल् कर्हि कदा वा। “कदा काश्यां गमिष्यामि कदा द्रक्ष्यामि शङ्करम्। इति ब्रुवाणः सततं काशीवासफलं लभेत्” काशीख०। “न पादौ धावयेत् कांस्ये कदा चिदपि भाजने” मनुः “कदा वाराणस्यामिह सुरधुनीरोधसि वसन्” “कदा वृन्दारण्ये विमलयमुनातीरपुलिने” “कदायोध्यामध्ये विमलसरयूतीरपुलिने। “विभाषा कदाकर्ह्योः” पा० एतद्योगे भव्ये लट्। “कदा कर्हि भुङ्क्ते भोक्ष्यते भोक्ता वा” सि० कौ०। अव्ययत्वात् ततो भवार्थे ट्युल् तुट् च। कदातन कस्मिन् काले भवे त्रि०स्त्रियां ङीप्

कदाकार त्रि० कुत्सिताकारोऽस्य कोः कदु। १कुत्सिताकारे कुगति स०। २कुत्सिताकारे पु०।

कदाख्य पु० कुत्सिता आख्या यस्य कदादेशः। (कुड़) १इति कुष्ठौषधौ शब्दच०। २कुत्सिताख्ये त्रि०। कुगतिस०। ३कुत्सिताख्यायां स्त्री।

कदाचन अव्य० कदा+चन मुग्ध०। अनिर्द्धारिते कस्मिंश्चित् काले इत्यर्थे “कदाचन स्तरीरसि” श्रुतिः। “पञ्चाननगते भानौ पक्षयोरुभयोरपि। चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन” ति०त० पु०। कदा+चित् मुग्ध०।

कदाचित् कदापीत्यर्थे अव्य०। “ततः कदाचिदुर्वश्यां भैरवो मैथुनं ययौ” कालिका०। “कण्डूयमानेन कटं कदाचित्” रघुः। पा०चिन्नप्रत्ययाभावात् “अधाकल्ये तु चिन्नेत्यमरोक्ते च पदद्वयमिति विवेक्तव्यम्।

कदामत्त पु० कदाचिन्मत्तः। ऋषिभेदे ततः गोत्रापत्ये इञ्। कादामत्ति तदपत्ये पुंस्त्री तस्य बहुत्वे उपका० वा इञो लुक्। कादामत्तयः कदामत्ताः।

कदुष्ण न० ईषत् उष्णम् ईषदर्थककोः कदु। १ईषदुष्णे स्पर्शे २तद्वति त्रि०। “व्रजन् कदुष्णं पुरमाविवेश” भट्टिः। “कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणः” “कदुष्णं कर्णयोर्देयमेतद्वा वेदनापहम्” सुश्रु०। पक्षे कादेशः कोष्ण तदर्थयोः “भुवं कोष्णेन कुण्डोध्नी” रघुः। पक्षे कवादेशः कवोष्ण उक्तार्थे त्रि०।

कद्रुङ कार्कश्ये भ्वा०कड्डवत् दोपधत्वात् क्विप् कद्रु इति भेदः

कद्रथ पु० कुत्सितोरथः कोः कदु। कुत्सिते रथे “युधि कद्रथवद्भीमं बभञ्ज ध्वजशालिनम्” भट्टिः।

कद्रु पु० कद—रु। १पिङ्गलवर्णे। २तद्वति त्रि० “प्राजापत्यं कद्रुमालभेत” तैत्ति० २,१,४,२, ३कर्वुरवर्णे पु० ४तद्वति त्रि० “वासः कृष्णं कद्रु” कात्या० २२,४,१२, “कद्रु कर्वुरं वासः” संपद्व्या०। संज्ञायामूङ्। कद्रू ईनागमातरि दक्षप्रजापतेः कन्याभेदरूपे कश्यपपत्नीभेदे स्त्री “कद्रूस्तु सुषुवे नागान्” भा० आ०। काद्रवेयशब्दे विवृतिः। “प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश। अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा। क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः। कद्रूश्च मनुजव्याघ्र! दक्षकन्यैव भारत” भा० आ०६५अ०। “लोका भारतशार्दूल! कश्यपस्य निबोध मे। अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खशा। सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा। कद्रुर्मुनिश्च राजेन्द्र! तास्वपत्यानि मे शृणु भा०हरि०३अ०

कद्रुण त्रि० कद्रुरस्त्यस्य पामा० न। पिङ्गलवर्णान्विते।

कद्रु(द्रू)पुत्र पु० ६त० पृषो०वा ह्रस्वः। १सर्पे। कद्रु(द्रू)सुतादयोऽप्यत्रार्थे। तस्य कद्रूतनयत्वं काद्रवेयशब्दे वक्ष्यते।

कद्र्यञ्च् त्रि०कस्मिन्नञ्चति किम्+अन्+अञ्चु—क्विप् अद्र्यादेशः किमः कः। अनिश्चितदेशगन्तरि कस्मिन् गन्तरि अनिश्चितदेशगमने। शसादावपि अल्लोपदीर्घौ। कद्रीचः कद्रीचा इत्यादि। स्त्रियां ङीप् अल्लोपदीर्घौ। कद्रीची। “सा कद्रीची कं स्विदर्धं परागात्” ऋ० १,१६४,१७।“कद्रीची कगतेत्यनिश्चितगमनादित्थं प्राप्नवती” भा०।

कद्वत् त्रि० कः कशब्दोऽस्त्यस्य मतुप् मस्य वः पृषो०। कशब्दयुक्ते मन्त्रादौ स्त्रियां ङीप्। “कद्वत्यो याज्यानुवाक्याः कोहि प्रजापतिः” शत०ब्रा० ६,२,२,५।

कद्वद त्रि०कुत्सितं वदति वद-अच् कोः कदादेशः। गर्हितवाक्यवादिनि अमरः “येन जातं प्रियापाये कद्वदं हंसकोकिलम्” भट्टिः। २दुःश्रवशब्दयुक्ते च “वागविदां वरमकद्वदो नृपः” माघः।

कद्वर त्रि० कं जलमिवाचरति क+क्विप् शत कता व्रियते वृ-कर्म्मणि अप्। दधिस्नेहे तक्रभेदे कद्वरे त्रिकाण्ड०।

कधप्रिय पु०कस्यं प्रीणाति प्री—क वेदे पृषो०। स्वस्यप्रिये। “कस्य जयः कधप्रिये भुजे” ऋ०१,३० २। स्वस्य प्रीणाति प्री-क्विप् वेदे पृषो०। कधप्री तत्रैवार्थे। “कस्य

"नूनं कधप्रियः पिता पुत्रं न हस्तयोः दधिध्वे वृक्तबर्हिषः" ऋ० १,३८,१ ।

कन प्रीतौ अक० गतौ सक० भ्वा० पर० सेट् । कनति अकनीत्-अकानीत् चकान । प्रनिकनति । ईदित् । कान्तः । ओदित् वर्त्तमाने क्त । कान्तोवर्त्तते । कान्तिः । कननम् । "अविक्रीतो अकानिषं पुनर्यन्" ऋ० ४,२४,९,

कनक न० कनी दीप्तौ वुञादि० वुन् । १स्वर्णे अमरः । २पलाशवृक्षे ३नागकेसरे ४धस्तूरे ५काञ्चनारवृक्षे ६कालीयकवृक्षे ७चम्पकवृक्षे च पु० मेदि० । ८कासमर्द्दवृक्षे पु० राजनि० ९बाष्पातरौ शब्दमा० ।"सुप्तः सन् कनकपलाशकर्णिकारान्" सुश्रु० । "सौदामन्या कनकनिकषस्निग्धया दर्शयोर्व्वीम्" "नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः"। अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः" मेघ० "कनककुण्डलवान् किरिटी" विष्णुध्यानम् "कनकचम्पकमेतद्रोचनालोहितेन" माघः । "अद्यापि तां कनकचम्पकदामगौरीम्" चौरप० । कूर्मविभागे वृह० सं० "अपरस्याम् मणिमान्वित्-क्ष्म तारक्षितिवृद्धवैश्यकनकशकाः" इत्युक्ते १०पश्चिमदेशस्थदेशभेदे पु० । कनकस्येम् परिमाणम् अण् । कानक तत्परिमाणे निष्कादौ त्रि० । काञ्चनोत्पत्तिकथा च अग्निरेतःशब्दे ५९पृष्ठे उक्ता । भावप्र० तदुत्पत्तिगुणादिकमुक्तं यथा "पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनाम् । मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः । वशिष्ठश्चेति सप्तैते कीर्त्तिताः परमर्षयः । पत्नीर्विलोक्य लावण्यलक्ष्मीसम्पन्नयौवनाः । कन्दर्पदर्पविध्वस्तचेतसो जातवेदसः । पतितं यद्धरापृष्ठे रेतस्तद्धेमतामगात् । कृत्रिमञ्चापि भवति तद्रसेन्द्रस्य वेधतः । तारं शुल्बोत्थितं स्निग्धं कोमलं गुरु हेम यत् ।(तत् उत्तमम्)तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम्। दाहे छेदे सितं श्वेतं कषे त्याज्यं लघु स्फुटम् । सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् । स्वादु तिक्तञ्च तुवरं पाके च स्वादु पिच्छिलम् । पवित्रं वृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् । हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत् । विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित् । बल्यं सवीर्यं हरते नराणां रोगव्रजान् पोषयतीह काये । असौख्यसंज्ञापि सदा सुवर्णमशुद्धमेतन्मरणञ्च कुर्यात् । असम्यग्मारितं स्वर्णं बलं वीर्यञ्च नाशयेत् । करोति रोगान् मृत्युञ्च तद्धन्याद्यत्नतस्ततः" ।

कनकक्षार पु० कनकस्य द्रावणाय क्षारः । (सोहागा) टङ्के राजनि० । तत्सम्पर्कात् हि झटिति कनकं द्रवति ।

कनकदण्ड न० कनकस्य दण्डोयत्र । राजच्छत्रे त्रिका० कनकच्छत्रादयोऽप्यत्र ।

कनकध्वज पु० धृतराष्ट्रपुत्रभेदे । "दीर्घबाहुर्महाबाहुर्व्यूढोरः कनकध्वजः" भा० आ० ११७अ० । तत्पुत्रकीर्त्तने ।

कनकपल पुंस्त्री कनकमिव पलं मांसमस्य । मत्स्यभेदे हारा० स्त्रियां ङीष् । तत्राद्यन्तयोर्मत्स्यपर्य्यायकथनात् मध्ये सुवर्णपलरूपपरिमाणार्थकताकल्पनं शब्दकल्पद्रुमादौ प्रमादिकमेव । ६त० । कनकस्य कर्षचतुष्टयरूपपलपरिमाणे न० ।

कनकपत्र न० कनकनिर्म्मितम् पत्रं पत्राकारं भूषणम् । (कानपात) १कनकमयकर्णाभरणभेदे । "अद्यापि तन्मनसि सम्परिवर्त्तते मे रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या । जीवेति मङ्गलवचः परिहृत्य कोपात् कर्णे-कृतं कनकपत्रमनालपन्त्या" चौरप० । "कनकपत्रालङ्कृतया" काद० । [प्रतीलतायाम् राजनि०

कनकप्रभा स्त्री कनकस्य प्रभेव प्रभा यस्याः । महाज्योति

कनकप्रसवा स्त्री कनकमिव प्रसवः पुष्पं यस्याः । स्वर्णकेतक्याम् राजनि० ।

कनकमय त्रि० कनकस्य विकारः मयट् । स्वर्णविकारे "आधत्ते कनकमयस्य यत्र लक्ष्मीम्" किरा० । [राजनि०

कनकरम्भा स्त्री कनकवर्णफलिका रम्भा शा०त० । स्वर्णकदल्याम्

कनकरस पु०कनकवर्णोरस उपरसः । १हरिताले राजनि० तस्य स्वर्णवर्णत्वात् पारदतुल्यगुणतयोपरसत्वाच्च तथात्वम् । उपरसाश्च भावप्र० दर्शिताः यथा । "गन्धोहिङ्गुलमभ्रतालकशिलाः स्रोतोऽञ्जनं टङ्कणम् । राजावर्त्तकचुम्बकौ स्फटिकया शङ्खो खटी गैरिकम् । कासीसं रसकं कपर्द्दसिकता वोलाश्च कङ्कुष्ठकम् सौराष्ट्री च मता अमी उपरसाः सूतस्य किञ्चिद्गुणैः" । (सूतस्य पारदस्य) "स्वर्णवर्णं गुरु स्निग्धम् इत्यनेन तस्य गुणादिकमुक्तम् तत्रैव । ततश्च स्वर्णवर्णत्वात् पारदात् किञ्चिदूनगुणकत्वाच्चास्य तथात्वम् । ६त० । स्वर्णस्य द्रवीभूते २रसे च ।

कनकलोद्भव पु० कनतीति कना दीप्ता कला अवयवः तया उद्भवति उद्+भू-अच् । (धूना) शालनिर्य्यासे । राजनि०

कनकसूत्र न० कनकनिर्म्मितं सूत्रम् । (सोनारतार) स्वर्णसूत्रे

कनकाङ्गद न० कनकमयमङ्गदम् । स्वर्णमये केयूरे । "कनकाङ्गदद्युतिरस्य" माघः । तदस्त्यस्य मतुप् मस्य वः । कनका-

कृदवत् इति। कनकाङ्गदिन् तद्युक्ते त्रि० विष्णौ पु० "महावराहोगोविन्दः सुषेणः कनकाङ्गदी" विष्णुस०।

कनकाचल पु० कनकमयोऽचलः। १सुमेरुपर्व्वते, धान्याचलादिषु दशसु दानीयपर्व्वतेषु मध्ये दानीये स्वर्णपर्व्वते च। हेमशैलस्वर्णशैलादयोऽप्यत्र। तद्दानकालपरिमाणादि मत्स्यपु० उक्तं यथा "प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः। गुड़ाचलस्तृतीयस्तु चतुर्थो हेमपर्व्वतः। पञ्चमस्तिलशैलः स्यात् षष्ठः कार्पासपर्वतः। सप्तमो घृतशैलश्च रत्नशैलस्तथाष्टमः। राजतो नवमस्तद्वद्दशमः शर्कराचलः। वक्ष्ये विधानमेतेषां यथावदनुपूर्व्वशः। अयने विषुवे पुण्ये व्यतीपाते दिनक्षये। शुक्लपक्षे तृतीयायामुपरागे शशिक्षये। विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः। शुक्लायां पञ्चदश्यां वा पुण्यर्क्षे वा विधानतः। धान्यशैलादयो देयाः यथा शास्त्रविधानतः। तीर्थे वायतने वापि गोष्ठे वा भवनाङ्गने। मण्डपं कारयेद्भक्त्या चतुरस्रमुदङ्मुखम्। प्रागुदक्प्रवणं तद्वत् प्राङ्मुखं वा विधानतः। गोमयेनानुलिप्तायां भूमावास्तीर्य वै कुशान्। तन्मध्ये पर्वतं कुर्य्याद्विष्कम्भपर्व्वतान्वितम्"। विधानयुक्तविष्कम्भपर्व्वतनिर्म्माणप्रकारादि धान्यपर्व्वत हेमाद्रे वक्ष्यते। अस्य परिमाणमुक्तं मत्स्यपु०। "अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम्। यस्य प्रसादाद्भवनं विरिञ्चेर्याति मानवः। उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः। तदर्द्धेनाधरस्तद्वत् अल्पवित्तोऽपि शक्तितः। दद्यादेकपलादूर्द्ध्वं यथा शक्त्या विमत्सरः। धान्यपर्व्वतवत् सर्व्वं विदध्यात् विधिमुत्तमम्। विष्कम्भशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत्"।

कनकाध्यक्ष पु० ७त०। सुवर्णरक्षणादावधिकृते अमरः।

कनकायु पु० धृतराष्ट्रपुत्रभेदे तत्पुत्रगणने भा० आ० ६७अ० "उग्रायुधोभीमरथः कनकायुर्दृढायुधः"।

कनकार पु० कनकं दीप्तं यथा ऋच्छति सर्व्वतो व्याप्नोति ऋ-अण्। कोविदारवृक्षे। राजनि०।

कनकालुका स्त्री कनकनिर्म्मिता आलुः संज्ञायां कन्। भृङ्गारे (झारी) सौवर्णकलसभेदे अमरः।

कनकावतीमाधव कनकावतीं माधवञ्चाधिकृत्य कृतो ग्रन्थः अण् आख्याधिकायाम् तस्य लुक्। कनकावतीमाधववृत्तान्ताख्यापके शिल्पकरूपनाटकभेदे तल्लक्षणं शिल्पकशब्दे वक्ष्यते।

कनकाह्व पु० कनकस्याह्वा आह्वा यस्य। १सुवर्णनामनामके नागकेशरे न०। २धूस्तूरे पु०। अमरः कनकाह्वयोऽप्यत्र राजनि०। पुष्पे न०।

कनखल पु०। १तीर्थभेदे तच्च तीर्थं गङ्गाद्वारसमीपस्थम् यथोक्तं भा० व० ९०अ० "बिभेद तरसा गङ्गां गङ्गाद्वारं युधिष्ठिर पुण्यं तद्ख्यायतं राजन्! ब्रह्मर्षिगणसेवितम्। सनत्कुमारः कौरव्य! पुण्यं कनखलं तथा। पर्व्वतश्च पुरुर्नाम यत्र जातः पुरूरवाः"। तस्य माहात्म्यमुक्तम् "गङ्गाद्वारे कुशावर्त्ते विल्वके नीलपर्व्वते। तथा कनखले स्नात्वा धूतपाप्मा दिवं व्रजेत्" भा० अनु० २५। "विशेषो वै कनखले प्रयागे परमं महत्। यत्राकार्य्यशतं कृत्वा कृतं गङ्गावसेचनम्। सर्व्वं तत्तस्य गङ्गापो दहत्यग्निरिवेन्धनम्" भा० व० ८५अ०। "ततो गच्छेत धर्म्मज्ञ नमस्कृत्य महागिरिम्। स्वर्गद्वारेण यत्तुल्यं गङ्गाद्वारं न संशयः" इत्युपक्रम्य "ततः कनखले स्नात्वा त्रिरात्रोपोषितो नरः। अश्वमेधमवाप्नोति स्वर्गलोकञ्च विन्दति" भा० व० ८४। तत्तीर्थस्य २समीपस्थपर्व्वते च "एते कनखला राजन्नृषीणां दयिता नृप!। एषा प्रकाशते गङ्गा युधिष्ठिर! महानदी" भा० व० १२५ अ० "तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णाम्" मेघ० "तीर्थं कनखलं नाम गङ्गाद्वारेऽस्ति पावनम्। यत्र काञ्चनपातेन जाह्नवी देवदन्तिना उशीनरगिरिप्रस्थाद्भित्त्वात्मवतारिता" कथासरित्सागरः।

कनन त्रि० कन–युच्। काणे एकनेत्रे हेमच०

कनल त्रि० कन–अलच्। दीप्ते। तेन निर्वृत्तादि अरीहणा० चतुरर्थ्याम् वुञ्। कानलक तन्निर्वृत्तादौ त्रि०

कनवक पु० यदुवंश्ये वसुदेवभ्रातरि शूरस्य पुत्रभेदे। शूरात् वसुदेवोत्पत्तिमुक्त्वा। "देवभागस्ततोजज्ञे तथा देवश्रवाः पुनः। अनाधृष्टिः कनवको वत्सवानथ गृञ्जिमः" हरि० ३५। तत्रैव "तन्द्रिजस्तन्द्रिपालश्च सुतौ कनवकस्य तु"

कना स्त्री कनि नामधातु–अच्। कनिष्ठायाम्। "पुनस्तदा वहति यत् कनाया दुहितुः" ऋ० १०,६१,५।

कनि नामधातु युवानं अल्पं वा करोति णिच्–कनादेशः उभय० सक० सेट्। कनयति ते। "कौसने कनयन्ति च" भट्टिः

कनिक्रद त्रि० क्रन्द–यङ् लुक् अच्–चुत्वाभावः निगागमश्च। अत्यन्तक्रन्दितरि। "इमं मा हिंसीरेकशफं पशुं कनिक्रदम्" यजु० १३,४८। दाधर्तीत्यादि पा० सू० कनिक्रददिति प्रकृतिभागमात्रनिपातः तेनान्यप्रत्ययेऽपि रूपं भवत्येव।

कनिष्ठ त्रि० अतिशयेन युवा अल्पो वा इष्ठन् कनादेशः। १अतितरुणे २अत्यल्पे। ३अनुजे पुंस्त्री। ४दुर्बलाङ्गुलौ

अल्पाङ्गुलौ (कडेआङ्गुल) स्त्री मेदि० । ५कनिष्ठस्य भार्य्यायां६अल्पवयस्कायां स्त्रियाम् स्त्री । तत्र पुंयोगलक्षणं ङीषं वयोवाचिलक्षणं ङीपं च बाधित्वा अजादिपाठात् टाप् । ७नायिकाभेदे सा च रसमञ्जर्य्यां धीराऽधीराधीराधीराभेदेन त्रिविधेति विभज्य परिणीतत्वे सति भर्त्तृ न्यूनस्नेहा कनिष्ठेति लक्षयित्वा धीराधीरादिज्येष्ठकनिष्ठयोरुदाहरणमुक्तम् तत्र धीरे ज्येष्ठाकनिष्ठे यथा "एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्राक्तयोरेकां पल्लवितावगुण्ठनवतीमुत्कन्धरीं दृष्टवान्" । अन्यस्याः सविधं समेत्य निभृतं व्यालोलहस्ताङ्गुलिव्यापारैर्वसनाञ्चलं चपलयन् स्वापच्युतिं क्रीडतोन् । अधीरे ज्येष्ठाकनिष्ठे यथा "अन्तः कोपकषायिते प्रियतमे पश्यन् घने कानने पुष्पस्यावचयाय नम्रवदनामेकां समायोजयन् । अर्द्धोन्मीलितलोचनाञ्चलचमत्काराभिरामाननां कोराभाधरपल्लवां नववधूमन्यां समालिङ्गति"। धीराधीरे ज्येष्ठाकनिष्ठे यथा "धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेणीदृशोः प्रीतये रत्नद्वन्द्वमनन्तकान्तिरुचिरं मुष्टिद्वये न्यस्तवान् । एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः प्रियो हस्ताहस्तिमिषात् स्पृशन् कुचतटीमानन्दमाविन्दति" । ८अत्यल्पपरिमिते त्रि० ।

"गायत्री छन्दसां कनिष्ठा" तैत्ति० ६,१,६,२ । वैदिकछन्दसां गायत्र्याः प्रथमत्वेन उष्णिगादितोऽल्पाक्षरत्वात् कनिष्ठत्वम्"तद्धे कनिष्ठं छन्दः यद् गायत्री प्रथमा छन्दसां युज्यते" शत० १,८,२,१० ।

९उत्तरकालजाते त्रि०।"गर्द्दभः कनिष्ठं पशूनां प्रजायते" तैत्ति०५,१,५,५।"अथ यदजाः कनिष्ठानि पात्राणि खलु प्रजायन्ते तस्मादेतास्त्रिः संवत्सरस्य विजायमाना द्वौ त्रीन् विजनयन्त्यः कनिष्ठाः कनिष्ठानि हि पात्राणि खलु प्रजायन्ते" शत०ब्रा० ४,५,५,६ । १०अधःपदे ११अधरे च त्रि०।"छाययैवायं पुरुषः पाप्मनानुषक्तः सोऽस्य एव कनिष्ठो भवत्यधःपदमिवेयस्तते तत्कनिष्ठमिति" शत०ब्रा० २,२,३,२। १२परजातमात्रे । "अन्वञ्चोऽमात्रा अधोनिवीताः प्रलम्बशिखाः ज्येष्ठप्रथमाः कनिष्ठजघन्याः"आ० ४,२,६ । "यो यः कनिष्ठः स पृष्ठतो गच्छेत् नारा० "पुत्रः कनिष्ठः ज्येष्ठायां कनिष्ठायाञ्च पूर्वजः" मनुः । "सर्वं ज्येष्ठः कनिष्ठश्च संहरेतां यथोदितम्" "येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यात् मध्यमं धनमिति" मनुः "वर्त्तितः स्यादरविन्द्रमिन्दुकनिष्ठेन रुटिमा"अमरः ।

कनिष्ठायाः अपत्यं ढक्-इनुक् । कानिष्ठिनेय कनिष्ठाया अपत्ये ।"कृते कानिष्ठिनेयस्य भरतस्य विवासितम्"भट्टिः। १२महादेवे पु० "नमो ज्येष्ठाय कनिष्ठाय च" यजु० १६,३२ । तस्य च "अणोरणीयान् महतोमहीयान्" इति श्रुत्या अणुतरत्वक्तोक्तेः कनिष्ठत्वम् ।

कनिष्ठपद न० बीजगणितोक्ते ज्येष्ठापेक्षया न्यूनत्वान्विते पदे वर्गमूले । वर्गप्रकृतौ तदानयनप्रकारः स प्रयोजनं तत्र दर्शितं यथा

"इष्टं ह्रस्वं तस्य वर्गः प्रकृत्या क्षुण्णोयुक्तोवर्जितोवा स येन । मूलं दद्यात् क्षेपकं तं धनर्णं मूलं तच्च ज्येष्ठमूलं वदन्ति ॥ ह्रस्वज्येष्ठक्षेपकान्न्यस्य तेषां तानन्यान् वाधोनिवेश्य क्रमेण । साध्यान्येभ्योभावनाभिर्बहूनि मूलान्येषां भावना प्रोच्यतेऽतः । वज्राभ्यासौ ज्येष्ठलघ्वोस्तदैक्यं ह्रस्वं लघ्वोराहतिश्च प्रकृत्या । क्षुण्णा ज्येष्ठाभ्यासयुग्ज्येष्ठमूलं तत्राभ्यासः क्षेपयोः क्षेपकः स्यात् ॥ ह्रस्वं वज्राभ्यासयोरन्तरं वा लघ्वोर्घातोयः प्रकृत्या विनिघ्नः । घातो यश्च ज्येष्ठयोस्तद्वियोगो ज्येष्ठं क्षेपोऽत्रापि च क्षेपघातः ॥ इष्टवर्गाहृतः क्षेपः क्षेपः स्यादिष्टभाजितः । मूले ते स्तोऽथ वा क्षेपः क्षुण्णः क्षुण्णे तदा पदे ॥ इष्टवर्गप्रकृत्योर्यद्विवरं तेन वा भजेत् । द्विघ्नमिष्टं कनिष्ठं तत् पदं स्यादेकसंयुतौ ॥ ततोज्येष्ठमिहानन्त्यं भावनाभिस्तथेष्टतः" ॥ उदाहरणम् । "कोवर्गोऽष्टहतः सैकः कृतिः स्याद्गणकोच्यताम् । एकादशगुणः कोवा वर्गः सैकः कृतिर्भवेत् ॥ प्रथमोदाहरणे

न्यासः प्र ८ क्षे १ अत्रैकमिष्टं ह्रस्वं प्रकल्प्य जाते मूले सक्षेपे क १ ज्ये ३ क्षे १ । एषां भावनार्थं न्यासः

प्र ८ क १ ज्ये ३ क्षे १ । क १ ज्ये ३ क्षे १

वज्राभ्यासौ ज्येष्ठलघ्वोरित्यादि प्रथमकनिष्ठ द्वितीयज्येष्ठमूलाभ्यासः ३ द्वितीयकनिष्ठ १ प्रथमज्येष्ठमूलाभ्यासः ३ अनयोरैक्यं ६ कनिष्ठपदं स्यात् कनिष्ठयोराहतिः १ प्रकृतिगुणा ८ ज्येष्ठयोरभ्यासेन ९ अनेन युता १७ ज्येष्ठपदं स्यात् क्षेपयोराहतिः क्षेपकः स्यात् १ प्राङ्मूलक्षेपाणाम् एभिः सह भावनार्थं न्यासः

प्र ८ क १ ज्ये ३ क्षे १ । क ६ ज्ये १७ क्षे १

भावनया लब्धे मूले क ३५ ज्ये ९९ क्षे १

एवं पदानामानन्त्यम्

द्वितीयोदाहरणे रूपमिष्टं कनिष्ठम् प्रकल्प्य तद्वर्गात्प्रकृति-

गुणात् ११ रूपद्वयमपास्य मूलं ज्येष्ठं ३ अत्र भावनार्थं न्यासः प्र ११ क १ ज्ये ३ क्षे २। क १ ज्ये ३ क्षे २ प्राग्वल्लब्धे चतुःक्षेपमूले क ६ ज्ये २० क्षे ४ इष्टवर्गहृतः क्षेप इत्यादिना जाते रूपक्षेपमूले क ३ ज्ये १० क्षे १ अतस्तुल्य भावनया वा कनिष्ठज्येष्ठमूले जाते क ६० ज्ये १९९ क्षे १ एवमनन्तमूलानि।

अथवा रूपं कनिष्ठं प्रकल्प्य जाते पञ्चक्षेपपदे क १ ज्ये ४ क्षे ५। अतस्तुल्यभावनया मूले क ८ ज्ये २७ क्षे २५। इष्टवर्गहृत इत्यादिना पञ्चकमिष्टं प्रकल्प्य जाते रूपक्षेपपदे क ८/५ ज्ये २७/५ क्षे १

अनयोः पूर्व्वमूलेभ्यः मूलभावनार्थं

न्यासः प्र ११ क ८/५ ज्ये २७/५ क्षे १।

क ३ ज्ये १० क्षे १ भावनया लब्धे मूले क १६१/५ ज्ये ५६४/५ क्षे १। अथ वा ह्रस्वं वज्राभ्यासयोरन्तरमित्यादिना कृतया भावनया जाते मूले क १ ज्ये ४ क्षे ५" चक्रवालेन तदानयनप्रकारः चक्रवालशब्दे वक्ष्यते। कनिष्ठमूलमप्यत्र न०। [स्वार्थे कन् ।२कनिष्ठशब्दार्थे त्रि०।

कनिष्ठक न० कनिष्ठमिव कायति कै–क। भूकदम्बे राजनि०

कनिष्ठिका स्त्री कनिष्ठैव स्वार्थे कन्। (कडे आङ्गुल) क्षुद्राङ्गुलौ "द्विः कनिष्ठिकया" कात्या० ७,७,१८। पञ्चमे षष्ठे च माने अनामिकामुत्सृज्यैतया कनिष्ठिकया द्विर्वारम्" कर्कः। "परिवर्त्त्यपरिवर्त्त्याङ्गुलकनिष्ठिकाभ्यामादाय पलाशपूटे प्रास्यति" कात्या० १,५,७,१। [हेमच०।

कनी स्त्री कन–अच् गौरा० ङीष्। १दुहितरि २कन्यायाञ्च

कनीचि स्त्री कन–बा० ईचि। १गुञ्जायां (कुँच) शब्दर०। २सपुष्पलतायाम् ३शकटे च उणादि०। अयं मूर्द्धन्यमध्य एव न मध्यस्तु ग्रामादिकः"स्वकणिस्वामीचिः" उज्ज्वलदत्तेन णान्तकणेरेव पठनात्

कनीन त्रि०कन–प्रीतौ ईनन्। १कमनीये। "सद्योजातो वृषभः कनीनः"ऋ० ३,४८,१।"कनीनः कमनीयः"भा० "भिनत् कनीन ओदनं पच्यमानम्" ऋ० ८,६९,१४। "जारः कनीन इव चक्षदानः" ऋ० १,११७,१८।

कनीनका स्त्री "कनीनका कन्या कमनीया भवति क्वेयं नेतव्येति वा कमनेनानीयत इति वा कमतेर्वा कान्तिकर्म्मणः" निरुक्तोक्ता व्युत्पत्तिः पृषो०। १कन्यायाम् "कनीनकेव विद्रधे नवे द्रुपदे अर्भके" ऋ०४,३२,२३, इमामृचमधिकृत्य ४,१५,निरुक्ते प्रागुक्ता निरुक्तिर्दर्शिता। भाष्यकृता तु कनीनका कमनीयशालभञ्जिकेति व्याख्यातम् तेन २तदर्थेऽपि कनीनका कन्या काम्यत्वेनास्त्यस्याः अर्श० अच्। ३कन्याकामे पु०। "जनिष्ट योषा पतयत् कनीनकः"ऋ०१०,४०,९,। कनीनकः कन्याकामः"इति भा०। कनीन इव कायति कै-क। ४कनीनिकायां म०सुश्रु०"ततः कनीनकगतम्" तत्रोक्तिः अक्षिशब्दे ४५पृ० विवृतिः

कनीनिका स्त्री कन–कनि–वा ईनन् संज्ञायां कन् टाप् अत इत्त्वम्। १अक्षितारायां २कनिष्ठाङ्गुलौ च मेदि०। अक्षिशब्दे४५पृ० विवृतिः [अमरटीका

कनीनी स्त्री कनि–नामधा० ईनन्. ङीष्। कनिष्ठाङ्गुलौ

कनीयस् त्रि० अयमनयोरतिशयेन युवा अल्पो वा ईयसुन् कनादेशः। द्वयोर्मध्ये १अल्पतरे, "अन्नं कनीयो भविष्यति" छा०उप०। २युवतरे, ३अनुजे भ्रातरि पु०। "कथं कनीयानहमुत्सहेयम्?" भट्टिः "कनीयान् वृषमुत्सृजेत्" स्मृतिः 'कलत्रवानहं बाले कनीयांसं भजस्व मे'' रघुः। स्त्रियां ङीप्।

कनीयस न०कन–दीप्तौ अच् कनः सूर्य्यस्तस्येदं कनीयं तथाभूततया सीयते अवसीयते सो–घञर्थे कर्मणि क। १ताम्रे। हेमच० ताम्रस्य सूर्य्यदेवाकत्वात्तथात्वम्। कनीयस्+स्वार्थे वा० अच्। २कनीयसि कनिष्ठे त्रि०। "अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयसम्" "ययातिर्नाहुषोराजा पूरुं पुत्रं कनीयसम्"भा० आ० ८६अ०।

कन्त त्रि० कमित्यव्ययं कं सुखमस्त्यस्य कम्+त। सुखयुक्ते एवम् "शङ्कम्भ्यां बभयुस्तितुतयसः" पा० कम्+ति कन्ति कम्+तु। कन्तु तत्रार्थे त्रि०।

कन्तु पु० कम–तुन्। १कामदेवे २हृदये न०उणा०। कम्+तु सुखान्विते त्रि०। [तदपत्ये पुंस्त्री।

कन्यक पु० ऋषिभेदे ततोगोत्रे गर्गा० यञ्। कान्यक्य तद्गो-

कन्यरी स्त्री कम– अरन् पृषो० युक् च गौरा० ङीष्। दुष्प्रवेशायां तीक्ष्णकण्टकयुक्ते वृक्षभेदे राजनि०। आरन् युक्। कन्यारीत्यप्यत्र राजनि०।

कन्था स्त्री कम–थन्। मृण्मयभित्तौ (कांथ)स्यूतग्रथितजीर्णवस्त्रखण्डे। (कांथा) "भिक्षा प्राणस्य रक्षार्थं कन्था-शीतनिवारिणी। अचला केशवे भक्तिः विभवैः किं प्रयोजनमिति" पुरा०। "कन्थां वहसि दुर्बुद्धे! गर्द्दभेनापि दुर्वहाम्" शङ्करदि०अस्य तत्पुरुषे "संज्ञायां कन्थोशीनरेषु" पा० ज्ञापकता सौशमिकन्थम्। संज्ञाभावे श्रोयोनरभेदे च न। दाक्षिकन्था सि०कौ०।

कान्द पुंन०कन्दति कन्दयति कन्द्यते वा कदि-अच्–णिच्–अच्

घञ् वा । १सूरणे (ओल) २यस्रमात्रमूले, ३गृञ्जने च (गाँजर) ४मेघे पु॰ मेदि॰ । मेघनामनामके ५कर्पूरे च पु॰ "कन्दमूलफलाशिनः" चातुर्मास्यव्रतविधिः "कन्दोद्भेदा वैद्रुमा वारिणीव" माघः "वने निवसतां तेषां कन्दमूलफलाशिनाम्" भा॰ अनु॰ ४१ अ॰ । कन्दभेदास्तेषां विशेषगुणाश्च सुश्रु॰ दर्शिताः यथा "कन्दानत ऊर्द्ध्वं वक्ष्यामः । विदारीकन्दशतावरीविसमृणालशृङ्गाटककशेरुकपिण्डालुकमध्वालुकहस्त्यालुककाष्ठालुकशङ्खालुकरक्तालुकेन्दीवरोत्पलकन्दप्रभृतीनि ।

रक्तपित्तहराण्याहुः शीतानि मधुराणि च । गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च । मधुरो बृंहणो वृष्यः शीतः स्वर्य्योऽतिमूत्रलः । विदारीकन्दो बल्यस्तु पित्तवातहरस्तु सः । वातपित्तहरी वृष्या स्वादुतिक्ता शतावरी । महती चैव हृद्या च मेधाग्निबलवर्द्धिनी । ग्रहण्यर्शोविकारघ्नी वृष्या श्वेता रसायनी । कफपित्तहरास्तिक्तास्तस्या एवाङ्कुराः स्मृताः । अविदाहि विसम्प्रोक्तं रक्तपित्तप्रसादनम् । विष्टम्भि दुर्ज्जरं रूक्षं विरसं मारुतावहम् । गुरुविष्टम्भिशीतौ च शृङ्गाटककशेरुकौ । पिण्डालुकं कफकरं गुरु वातप्रकोपणम् । सुरेन्द्रकन्दः श्लेष्मघ्नो विपाके कटुपित्तलत् । शेषाः करीरा गुरवः कफमारुतकोपनाः । स्थूलसूरणमाणकप्रभृतयः कन्दा ईषत्कषायाः कटुका रूक्षा विष्टम्भिनो गुरवः कफवातलाः पित्तहराश्च । माणकं स्वादु शीतञ्च गुरु चापि प्रकीर्त्तितम् । स्थूलकन्दस्तु नात्युष्णः सूरणो गुदकीलहा । कुमुदोत्पलपद्मानां कन्दा मारुतकोपनाः । कषायाः पित्तशमना विपाके मधुरा हिमाः । वाराहकन्दः श्लेष्मघ्नः कटुको रसपाकतः । मेहकुष्ठक्रिमिहरो बल्यो वृष्यो रसायनः" । भावप्र॰ उक्तगुणादि तत्तच्छब्दे द्रष्टव्यम् । माधवनिदानोक्ते ६योनिरोगभेदे पु॰ । "दिवास्वप्नादति क्रोधाद्व्यायामादतिमैथुनात् । क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा । पूयशोणितसङ्काशो लकुचाकृतिसन्निभः । उत्पद्यते यदा योनौ नाम्ना कन्दस्तु योनिजः" स चतुर्विधः वातपित्तकफसन्निपातजभेदैः । "रूक्षं विवर्णं स्फुटितं वातिकं तम् विनिर्द्दिशेत् । दाहरोगज्वरयुतं विद्यात् पित्तात्मकन्तु तम् । नीलपुष्पप्रतीकाशं कण्डूमन्तं कफात्मकम् । सर्व्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः । सन्निपातात्मकोऽसाध्यः शेषाः कृच्छ्रप्रसाधनाः" ।

कन्दगुडूची स्त्री कन्दोद्भवा गुडूची शाक॰ । १गुडूचीभेदे, राजनि॰ (सुथ्नी) इति ख्याते २कन्दे च शब्दच॰

कन्दट न॰ कदि-अटन् । श्वेतोत्पले (शादासुँदि) शब्दरत्ना॰

कन्दफला स्त्री कन्दात् फलं यस्याः । क्षुद्रकारवेल्वायाम् । (छोटउच्छा) राजनि॰

कन्दबहुला स्त्री कन्दैर्बहुला । त्रिपर्णिकावृक्षे राजनि॰

कन्दमूल न॰ कन्दरूपं मूलमस्य । मूलके (मूलो) राजनि॰

कन्दर न॰ कम् जलेन दीर्य्यते दृ-कर्म्मणि अप् । १आर्द्रके २अङ्कुरे च राजनि॰ ३गुहाकारे पर्वतनितम्बस्थाने पुंस्त्री अमरः । स्त्रीत्वे गौरा॰ ङीष् स्वामी । ४गुहायां स्त्री टाप् अमरटीकान्तरम् "निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्" मेघ॰ । "विदूरगं प्रतिभयमस्य कन्दरम्" माघः "नानामलप्रस्रवणैर्नानाकन्दरसानुभिः" भाग॰ ४,६,१०, "अन्यार्थमेव शरणमुटजं वाद्रिकन्दरम्" भाग॰ ७,१२,१८, कन्दस्य सन्निकृष्टदेशादि अश्मादि॰ चतुरर्थ्यां र । कन्दर ५कन्दसन्निकृष्टदेशादौ त्रि॰ । कं गजशिरो दीर्य्यतेऽनेन करणे अप् । ६अङ्कुशे मेदि॰

कन्दराकर पु॰ ६त॰ । पर्व्वते मेदिनिः ।

कन्दराल पु॰ कन्दरायाङ्कुरायालति-अल-अच् । १गर्द्दभाण्डवृक्षे २प्लक्षवृक्षे (पाकुड़) ३आक्षोटवृक्षे च राजनि॰ संज्ञायां कन् । ४प्लक्षवृक्षे पु॰ शब्दरत्ना॰ ।

कन्दरोद्भवा स्त्री कन्दरे उद्भवति उद्+भू-अच् । १क्षुद्रपाषाणभेदीवृक्षे राजनि॰ २कन्दरोद्भवमात्रे त्रि॰ । ३गुडूचीभेदे स्त्री राजनि॰ [राजनि॰

कन्दरोहिणी स्त्री कन्दात् रोहति रुह-णिनि । गुडूचीभेदे

कन्दर्प पु॰ कम् सुखं तस्मै तत्र वा दृप्यति कम्+दृप+अच्, कम् कुत्सितो दर्पोऽस्मात् वा । १कामदेवे अमरः । "तस्य निश्चित्य कन्दर्पमगमत् पाकशासनः" कुमा॰ । २सङ्गीतोक्ते ध्रुवभेदे । "त्रयोविंशतिवर्णाड्घ्रिर्ध्रुवःकन्दर्पसंज्ञकः । वीरे श्च करुणे वा स्यात् खण्डताले विधीयते" सङ्गी॰ दा॰

कन्दर्पकूप पु॰ कन्दर्पस्य कूप इव । स्त्रीचिह्नभेदे जटाधरः ।

कन्दर्पकेलि पु॰ कन्दर्पेण केलिः । कामहेतुके केलौ तमधिकृत्य कृतोग्रन्थः अण् आख्यायिकायां तस्य लुक् । प्रहसनभेदे ।

कन्दर्पजीव पु॰ कन्दर्पं जीवयति वर्द्धयति जीव-णिच्-अण् । कामवृद्धिकारफलके पनसवृक्षे राजनि॰ ।

कन्दर्पमथन पु॰ कन्दर्पं मथ्नाति मथ-ल्यु । १महादेवे कन्दर्पशत्रुकामहादयोऽप्यत्र पु॰ । [त्रिका॰ ।

कन्दर्पमुषल पु॰ कन्दर्पं मूषल इव । पुरुषचिह्नभेदे ।

कन्दर्पशृङ्खल पु० "नारीपदद्वयं न्यस्य कान्तस्योरुद्वयोपरि। कटिञ्चोल्लयेदाशु बन्धः कन्दर्पशृङ्खलः" रतिमञ्जर्युक्ते रतिबन्धभेदे।

कन्दल त्रि० कदि–कलच्। १कलापे २उपरागे ३नवाङ्कुरे ४कलध्वनौ च मेदि० ५अपवादे शब्दर०। ६कलहभेदे (वागयुद्ध) ७कपाले च पु० धरणिः। गौरा० ङीष् कन्दली ८मृगभेदे ९गुल्मभेदे च स्त्री मेदि०। सा च भूमिकदली, "द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपीति" शब्दार्णवोक्तेः "ध्वजांशुकैस्तर्जितकन्दलीवनः" माघः। "आविर्भूतप्रथममुकुला कन्दलीश्चानुकच्छम्" मेघ० पुष्पे न०। "विडम्ब्यमाना नवकन्दलैस्ते" रघुः। "द्विदलकन्दलकम्पनलालितः" माघः "निष्पीडितेन्दुकरकन्दलजोऽनुसेकः" उत्तररामः०। १०वोले पु० भावप्र०।

कन्दलता कन्दप्रधाना लता। माषके राजनि०।

कन्दलीकुसुम न० कन्दल्या इव कुसुममस्य। शिलीन्ध्रे। ६त०। १भूमिकदलीपुष्पे च। [राजनि०

कन्दवर्द्धन पु० कन्देन वर्द्धते वृध–ल्यु। शूरणे (ओल)

कन्दवल्ली स्त्री कन्दाकारा वल्ली। वन्ध्याकर्कोट्याम् राजनि०।

कन्दशाक न० कन्दप्रधानः शाकः। कन्दप्रधाने शाके कन्दशब्दे दर्शितकन्दवर्गशाके शूरणादौ। "सर्वेषां कन्दशाकानां शूरणः श्रेष्ठ उच्यते" भावप्र०। [राजनि०

कन्दशूरण पु० कन्देषु शूरणः श्रेष्ठः। (ओल) शूरणे-

कन्दसार न० कन्दानां सारोऽत्र। १नन्दनवने त्रिका०। कन्दः सारोऽस्य। कन्दप्रधाने चोलादौ त्रि०। २कन्दशब्दे दर्शितकन्दवर्गे त्रि०।

कन्दाढ्य पु० कन्दे नाढ्यः। भूमिकन्दे राजान०। [राजनि०।

कन्दामृता स्त्री कन्दप्रधानाऽमृता। कन्दप्रधाने गुडूचीभेदे

कन्दार्ह पु० कन्देषु अर्हः पूज्यः। शूरणे राजनि०। "सर्वेषां कन्दशाकानां शूरणःश्रेष्ठ उच्यते इत्युक्तेस्तस्य कन्देषु प्रधानत्वात्तथात्वम्।

कन्दालु पु० कन्दैमालुरिव। १काशालौ २भूमिकन्दे ३तिपर्णिकायाञ्च राजनि०। [राजनि०।

कन्दिन् त्रि० कन्दोऽस्त्यस्य इनि। १कन्दयुक्ते। २वोले पु०

कन्दिरी स्त्री कन्द–इरच् गौरा० ङीष्। लज्जालुवृक्षे वैद्य०

कन्दी स्त्री कन्दोऽस्त्यस्य अच् गौरा० ङीष्। मांसकन्द्याम्।

कन्दु पुंस्त्री स्कन्द उ सलोपश्च। (ताओया) १स्वेदनीपात्रे "कन्दुपक्वं तैलपक्वमिति" स्मृतिः २तण्डुलादेः भर्जनपात्रमात्रे च (भोजना खाला) "गोकुले कन्दुशालायां तैलयन्त्रे चुयन्त्रयोः" स्मृतिः। "कन्दुपक्वानि तैलेन पायसं दधि सक्तवः। द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि" ति० त० कूर्म्मपु०।

कन्दुक पु० कं सुखं ददाति दा–मितद्रुवा० डु संज्ञायां कन् कन्दु+यावादि० कुमारीक्रीडनकत्वेन कन् वा। १वस्त्रादिनिर्म्मिते उत्पातनावपातनक्रीडासाधनद्रव्यभेदे (गेंदो)। "स्तनाङ्गरागारुणिताच्च कन्दुकात्"। "क्लमं ययौ कन्दुकलीलयापि या" "सा कन्दुकैः कृत्रिमपुत्रकैश्च" कुमा०। "कराभिघातोत्थितकन्दुकेयम्" रघुः "तटभुवि कन्दुकविभ्रमं बभार" माघः। "इदं कन्दुकं यत्र येभ्यस्तुभ्योगः" वृ०र०टीकोक्ते २त्रयोदशाक्षरपादके छन्दोभेदे न०।

कन्दुकेश्वर न० काशीस्थे ज्येष्ठस्थानस्थे शिवलिङ्गभेदे कन्दुकखेलनप्रकारः तदाविर्भावकथा च काशी० ६५अ० दर्शिता "स्वैरं विहरतस्तस्य ज्येष्ठस्थाने महेशितुः। कौतुकेनैव विक्रीडच्छिवा कन्दुकलीलया। उदञ्चन्त्याञ्चदङ्गानां लाघवं परितन्वती। निश्वासामोदमिलितभ्रमराकुलितेक्षणा। भ्रश्यद्धम्मिल्लसन्माल्यसुपुटीकृतभूमिका। स्विद्यत्कपोलपत्रालीस्रवदम्बुकणोज्ज्वला। स्फुटच्चोलांशुकपथनिर्यदङ्गप्रभाचिता। उल्लसत्कन्दुकास्फालातिशोणितकराम्बुजा। कन्दुकानुगसंदृष्टिनर्त्तितभ्रूलताञ्चला। मृडानी किल खेलन्ती ददृशे जगदम्बिका। अन्तरीक्षचराभ्यां च दितिजाभ्यां मनोहरा। कटाक्षिताभ्यामिव वै समुपस्थितमृत्युना। विदलोत्पलसंज्ञाभ्यां दृप्ताभ्यां वरतो विधेः। तृणीकृतत्रिजगतीपुरुषाभ्यां स्वदोर्बलात्। देवीं परिजिहीर्षू तौ विषमेषुप्रपीडितौ। दिवोऽवतेरतुः क्षिप्रं मायां स्वीकृत्य शाम्बरीम्। धृत्वा पारिषदीं मूर्त्तिं मायातावम्बिकान्तिकम्। तावत्यन्तं सुदुष्टत्वादतिचञ्चलमानसौ। सर्व्वज्ञेन परिज्ञातौ चाञ्चल्याल्लोचनोद्भवात्। कटाक्षिताथ देवेन दुर्गा दुर्गविघातिनी। विज्ञातनेत्रसंज्ञा तु सर्वज्ञार्द्धशरीरिणी। तेनैव कन्दुकेनाथ युगपच्च जघान तौ। महाबलौ महादेव्या कन्दुकेन समाहतौ। परिभ्रम्यपरिभ्रम्य तौ दुष्टौ विनिपेततुः। वृन्तादिव फले पक्वे तालादनिललोलिते। दम्भोलिना परिहृते शृङ्गे इव महागिरेः। तौ निपात्य महादैत्यावकार्य्यकरणोद्यतौ। ततः परिणतिं यातो लिङ्गरूपेण कन्दुकः। कन्दुकेश्वरसंज्ञं च तल्लिङ्गमभवत्तदा। ज्येष्ठेश्वरसमीपे तु सर्व्वदुष्टनिवारणम्। कन्दुकेशस्य तूत्पत्तिं यः श्रोष्यति मुदान्वितः। पूजयिष्यति यो भक्त्या तस्य दुःखभवं कुतः। कन्दुकेश्वरभक्तानां मानवानां

निरेनसाम्। योगक्षेमं सदा कुर्य्याद्भवानी भयनाशिनी। मृडानी तस्य लिङ्गस्य पूजां कुर्य्यात् सदैव हि। तत्रैव देव्याः सान्निध्यं पार्व्वत्या भक्तसिद्धिदम्। सर्व्वोपसर्ग संघातविघातकरणं परम्। कन्दुकेशं महालिङ्गं काश्यां यैर्न समर्च्चितम्। कथं तेषां भवानीशौ स्यातां सर्व्वेप्सितप्रदौ। द्रष्टव्यं च प्रयत्नेन तल्लिङ्गं कन्दुकेश्वरम्। कन्दुकेश्वरनामाऽपि श्रुत्वा वृजिनसन्ततिः। क्षिप्रं क्षयमवाप्नोति तमः प्राप्योष्णगुं यथा”। कन्दुकेशमप्यत्र।

कन्दुपक्क त्रि॰ जलोपसेकं विना कन्दुपात्रे पक्वं तण्डुलादि। शुष्कतया भ्रष्टतण्डुलादौ। “कन्दुपक्कानि तैलेनेत्यादि ति॰त॰ कूर्मपु॰। कन्दुशब्दे उदा॰।

कन्दशाला स्त्री कन्दुपाकार्था शाला शा॰त॰(कानशाला) कन्दुपाकार्थं शालायाम् “गोकुले कन्दशालायां तैलयन्त्रेक्षुयन्त्रयोः। अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च” स्मृतिः। [शब्दरत्ना॰।

कन्दोट पु॰ कदि–ओटन्। १श्वेतोत्पले २नीलोत्पले न॰।

कन्दोत पु॰ कन्दे मूले अतः वेञ्–क्त। कुमुदे। त्रिका॰।

कन्दोद्भवा स्त्री कन्दादुद्भवोऽस्याः। गुडुचीभेदे।

कन्ध पु॰ कं जलं दधाति धा–क। १मेघे शब्दरत्ना॰। तन्नामनामके २मुस्ते च।

कन्धर पु॰ कं जलं शिरो व धारयति धृ–अच्। १मेघे मेदि॰। तन्नामनायके २मुस्ते च। ३मारिषशाके (नटियाशाक) राजनि॰। ४ग्रीवायाञ्च शारसुन्दरी। ग्रीवायां स्त्री अमरः। “कन्धराबाहुसक्थ्नाञ्च भङ्गे मध्यमसाहसम्” याज्ञ॰ “उत्कन्धरं दारुक इत्युवाच” माघः “कवाटवक्षाः परिणद्धकन्धरः” रघुः। [५समुद्रे पु॰ राजनि॰।

कन्धि स्त्री कं शिरोजलं वा धीयतेऽत्र आधारे कि। १ग्रीवायां

कन्न न॰ कन्यते प्राप्यते दुःखमनेन कन–गतौ वा करणे क्त। १पापे २मूर्च्छायाञ्च शब्दमाला।

कन्यका स्त्री अज्ञाता कन्या+अज्ञातार्थे कन् क्षिपकादित्वात् नेत्त्वम्। “अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी। दशमे कन्यका प्रोक्ता अतऊर्द्ध्वं रजस्वला” इत्युक्तायां दशमवर्षीयां स्त्रियां तस्याद्दशमवर्षादर्वाक् रजोयुक्ततया अज्ञातत्वात्तथात्वम्। स्वार्थे कन्। २कन्याशब्दार्थे “राक्षसो युद्धहरणात् पैशाचः कन्यकाच्छलात्” “सुवासिनीबालवृद्धगर्भिण्यातुरकन्यकाः। संभोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम्” याज्ञ॰। “कन्यकातनयकौतुकक्रियाम्”। “स बद्धवैखानस कन्यकानि” रघुः। ३नायिकाभेदे रसमञ्जर्य्याम् स्वकीयापरकीयासामान्यवनितेति प्रथमं त्रिधा विभज्य अप्रकटितपरपुरुषानुरागा परकीयेति लक्षयित्वा सा च द्विविधा परोढा कन्यका चेति विभज्य कन्यायाः पित्राद्यधीनत्वात् परकीयत्वमिति समर्थ्य अस्या गुप्ता एव सर्वाश्चेष्टा इत्युक्त्वा उदाहृतम् यथा “किञ्चित् कुञ्चितहारयष्टिसरलभ्रुवल्लिसाचिस्मितप्रान्तभ्रान्तविलोचनद्युतिभुजापर्य्यन्तकर्णोत्पलम्। अङ्गुल्याङ्गुरदङ्गुलीयकरुचा गण्डस्थकण्डूयनं कुर्वाणा नृपकन्यका सुकृतिनं सव्याजमालोकते”

कन्यकाजात पु॰ ५त॰। कानीने व्यासकर्णप्रभृतौ “कानीनः कन्यकाजातोमातामहसुतोमतः” स्मृतेस्तस्य मातामहपुत्रता

कन्यकापति पु॰ ६त॰। जामातरि शब्दरत्ना॰।

कनयना स्त्री कन्यामाचष्टे कन्या+णिच्–भावे युच्। कन्याख्याने कन्याह्वाने। “स्तोमं जुषेथां युवशेव कन्यनाम्” ऋ॰८,२५,५, “कन्यनां कन्याह्वानम्” भा॰।

कनयला स्त्री कनयतेर्भावे यत् कन्यं कमनीयतां लाति गृह्णाति ला–क। कन्यायाम्। “दृषयन्तीव कन्यला” ऋ॰५,५,२, मुद्रितपुस्तके एषा ऋक् न दृश्यते पुस्तकान्तरेऽस्ति।

कन्यस पु॰ कन–अल्पार्थे॰ नि॰ कन्यः कन्यत्वेन काम्यत्वेन सीयते अवसीयते सो–घञर्थे क। १कनिष्ठे भ्रातरि शारसुन्दरी “रामस्य कन्यसोभ्राता” रामा॰। २कन्यसी कनिष्ठायां भगिन्यां स्त्री। वयोवाचित्वात् ङीप्। “अभिजित् स्पर्द्धमाना तु रोहिण्याः कन्यसी स्वसा। इच्छन्ती ज्येष्ठतां देवी तपस्तप्तुं वनं गता” भा॰ व॰ २२९अ॰। ३अधमे त्रि॰ “कन्यसं षड्भिरुद्दिष्टम्” अङ्गुलिपरिमाणे कालि॰ पुरा॰।

कन्या स्त्री कन–यत् अघ्न्या॰ नि॰। “कन्यायाः कनीन् चेति निर्देशात्” “वयसि प्रथमे” पा॰ न ङीप्। १अनूढायां स्त्रियां २अनूढदुहितरि “अक्षतापयमा कन्या” शा॰ द॰। ३मेषादितः षष्ठे राशौ च। निरुक्तौ ४,१५। अन्यैव निरुक्तिरुक्ता। “कन्या कमनीया भवति क्वेयं नेतव्येति कमनेनानीयते इति वा कनतेर्वा स्यात् कान्तिकर्मणः” तत्र सर्व्व पृषो॰ साधु। भा॰ व॰ ३०६अ॰ अन्यैव निरुक्तिर्दर्शिता “सर्वान् कामयते यस्मात् कमेर्धातोश्च भामिनि!। तस्मात् कन्येह सुश्रोणि! स्वतन्त्रा वरवर्णिनि!” ४योषिन्मात्रे। “अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम्” पुरा॰। “आचारलाजैरिव पौरकन्याः” रघुः ५दुहितृमात्रे “नरेन्द्रकन्यास्तमवाप्य सत्पतिम्” रघुः।

"ब्राह्मणाद्वैश्यकन्यायामम्बष्ठोनाम जायते" "निषादः शूद्रकन्यायां यः पारशव उच्यते"। "क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जन्तुरुग्रोनाम प्रजायते" मनुः तत्र अनूढदुहितरि "कन्यायां दत्तशुल्कायां ज्यायांश्चेत् वर आव्रजेत्" कात्या० स्मृतिः "पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता। सा कन्या वृषली ज्ञेया हरंस्तां न विदुष्यति, विष्णुः। "ऋतुत्रयमुपास्यैव कन्या कुर्य्यात् स्वयंवरम्। ऋतुत्रये व्यतीते तु प्रभवत्यात्मनः सदा" विष्णुः। ५ अनूढ़स्त्रीमात्रे "प्रसह्य कन्याहरणं राक्षसोविधिरुच्यते"। "योऽकन्यां दूषयेत् कन्याम्"। "अभिषह्य तु यः कन्यां कुर्य्यात् दर्पेण मानवः" इति च याज्ञ०। "कन्यैव कन्यां या कुर्य्यात् तस्याः स्याद्द्विशतो दमः"। "या तु कन्यां प्रकुर्य्यात् स्त्री सद्योवै मौण्ड्यमर्हति" मनुः "कन्यैवाक्षतयोनिर्या" स्मृतिः। "सह चान्यया स्थविरराजकन्यया" माघः। "सैकान्ते पुनःकन्याभिस्तत्क्षणोज्झितपट्टकम्" रघुः। कन्याया भावः। कन्यात्व संज्ञात्वान्न पुंवद्भावः। पुरुषसङ्गरहितावस्थायां "कन्यात्वे दूषिते चापि कथं यास्ये द्विजोत्तम !" भा० आ० ६०। विवाहयोग्यावस्थायाञ्च। "प्रादाच्च तस्यै कन्यात्वं पुनः स परमद्युतिः" भा० आ० १११अ०। कन्यादानविक्रययोर्गुणदोषौ यथा। "कन्यां ये तु प्रयच्छन्ति यथाशक्ति स्वलङ्कृताम्। विवाहकाले संप्राप्ते यथोक्तसदृशे वरे। क्रमात् क्रमं क्रतुशतमनुपूर्वं लभन्ति ते। श्रुत्वा कन्याप्रदानन्तु पितरः प्रपितामहाः। विमुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते। ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति। ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्माद्यैः पूजितः सुरैः। दिव्येन तु विवाहेन यस्तु कन्यां प्रयच्छति। भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति। गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति। गन्धर्वलोकमासाद्य क्रीडते देववच्चिरम्। शुल्केन दत्त्वा यो कन्यां तां पश्चात् सम्यगर्च्चयेत्। स किन्नरैश्च गन्धर्वैः क्रीडते कालमक्षयम्। (शुल्केन गोमिथुनरूपशुल्कोपलक्षितेनार्षेण) न मन्युं कारयेत्तासां पूज्याश्च सततं स्त्रिये। ब्रह्मदेया विशेषेण ब्राह्मी भोज्या सदा भवेत्। कन्यायां ब्रह्मदेयायामभुञ्जन् सुखमश्नुते। अथ भुञ्जीत यो मोहात् भुक्त्वा स नरकं व्रजेत्। अप्रजायाश्च कन्यायां न भुञ्जीयात् कदाचन। दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि'। यः कन्यापालनं कृत्वा करोति यदि विक्रयम्। विक्रेता धनलोभेन कुम्भीपाकं स गच्छति। कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी। कृमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश। मृतश्च व्याधयोनौ च स लभेज्जन्म निश्चितम्। विक्रीणीते मांसभारं वहत्येव दिवानिशमिति" ब्रह्मवैवर्त्तपुराणम्। विवाह्यकन्यालक्षणमुपयमशब्दे उक्तम्। उद्वाहशब्देऽधिकं दृश्यम्। "स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्म्मसु" इत्युक्तेः सुतपदस्य पुंस्त्वाविवक्षया कन्यापुत्रसंस्कारेषु वृद्धिश्राद्धे प्राप्ते "स्त्रीणामप्येवमेव स्यात्" मनूक्तेश्च सर्वसंस्कारेषु च प्राप्तेषु च निष्क्रमभिन्नकन्यासंस्काराणाममन्त्रककतया कर्त्तव्यता तत्रापि वृद्धिश्राद्धनिषेधमाह महानि०त०९५ प०। "कन्याया निष्क्रमो नास्ति वृद्धिश्राद्धं न विद्यते"। वृद्धिश्राद्धनिषेधेऽपि विवाहे वृद्धिश्राद्धमिष्यत एव "कन्यापुत्रविवाहेषु वृद्धिश्राद्धं विधीयते इति" स्मृतेः। "नामान्नप्राशनं चूड़ां कुर्य्यात् स्त्रीणाममन्त्रकम्"। इति "जातकर्मादि चूड़ान्तं कुमार्य्याश्चाप्यमन्त्रकम्। कर्त्तव्यं पञ्चभिर्वर्षैरेकं निष्क्रमणं विनेति" च। तेन निष्क्रमणभिन्नाः संस्काराः अमन्त्रकाः कार्य्याः। विवाहस्य चोपयनस्थानीयत्वात् न तदाचरणम् इति भेदः ६ईदृक्कुमार्य्याम् मेदि० ७स्थूलैलावायां ८वाराहीकन्दे ९कन्याकर्कच्छाञ्च राजनि०। "म्नौ चेत् कन्या" इत्युक्तलक्षणे चतुरक्षरपादके १०छन्दोभेदे च। कन्याराशिश्च उत्तरफाल्गुन्याःशेषपादत्रयहस्तचित्रार्द्धनक्षत्रघटितः राशिचक्रे षष्ठः १५० सार्द्धशतांशोत्तराशीत्युत्तरशतांशपर्य्यन्तस्त्रिंशदंशात्मकः। तदधिष्ठातृदेवतास्वरूपञ्च। "कन्या प्लवस्था सुताः। कन्या शस्यहुताशयुक्" इति जातकप०। उक्तम् तस्य राशेश्च वर्णादिकमुक्तम् नील०ता० यथा। "पाण्डुर्हिमात् स्त्री द्वितनुर्यमाख्या निशा मरुत् शीतसमोदयः स्त्री। कन्याऽर्द्धशब्दा शुभभूमिवैश्यरूक्षाल्पसङ्ग प्रसवा शुभा च"। तत्रास्य राशेः पाण्डुवर्णः द्विपदराशिता स्त्रीराशिता द्विस्वभावात्मकता दक्षिणदिगभिमुखता रात्रिरूपता वातप्रकृतित्वं शीतवीर्य्यं समराशित्वम्। भूमिरूपता। अर्द्धशब्दः शुभस्वामिकत्वम् वैश्यवर्णः रूक्षत्वम् अल्पसङ्गोऽल्पप्रसवः अक्रूररूपत्वञ्च। तच्च जन्मप्रश्नलग्नफलाद्युपयोगार्थमुक्तम् अस्य स्वामी बुधः। अन्यत्वास्य शीर्षोदयत्वमुक्तम् "कन्यां गते पृषच्चि" "अप्राप्ते भास्करे कन्याम" इति च ज्यो०

कन्याका स्त्री कन्यैव कन् अनुकपुंस्त्वात् न ह्रस्वः। कन्यायां शब्दर०।

कन्याकाल पु० कन्यात्वोपलक्षितः कालः शा०त०। अशिवा-

होपलक्षिते काले विवाहकालश्च उपयमशब्दे उक्तः।

कन्याकुब्ज पु॰ कन्याः कुब्जाः यत्र। कान्यकुब्जदेशे हेम॰ "कन्याकुब्जेऽपिवत् सोममिन्द्रेण सह कौशिकः" भा॰ व॰ २७अ॰। कन्यानां संघः अण् कान्यं तत् कुब्जं यत्र कान्यकुब्जोऽप्यत्र। यथा च तद्देशे कन्यानां वायुना कुब्जत्वं कृतं यथा वर्णितम् रामा॰ आ॰ काण्डे।

"कुशनाभस्तु राजर्षिः कन्याशतमनुत्तमम्। जनयामास धर्म्मात्मा घृताच्यां रघुनन्दन!। तास्तु यौवनशालिन्यो रूपवत्यः स्वलङ्कृताः। उद्यानभूमिमागत्य प्रावृषीव शतह्रदाः। गायन्त्यो नृत्यमानाश्च वादयन्त्यस्तु राघव!। आमोदं परमं जग्मुर्वराभरणभूषिताः। अथ ताश्चारुसर्वाङ्ग्यो रूपेणाप्रतिमा भुवि। उद्यानभूमिमागम्य तारा इव घनान्तरे। ताः सर्व्वा गुणसम्पन्ना रूपयौवनसंयुताः। दृष्ट्वा सर्व्वात्मको वायुरिदं वचनमब्रवीत्। अहं वः कामये सर्व्वा भार्य्या मम भविष्यथ। मानुषस्त्यज्यतां भावो दीर्घमायुरवाप्स्यथ। चलं हि यौवनं नित्यं मानुषेषु विशेषतः। अक्षयं यौवनं प्राप्ता अमर्य्यश्च भविष्यथ। तस्य तद्वचनं श्रुत्वा वायोरक्लिष्टकर्म्मणः। अपहस्य ततो वाक्यं कन्याशतमथाब्रवीत्। अन्तश्चरसि भूतानां सर्व्वेषां सुरसत्तम!। प्रभावज्ञाश्च ते सर्व्वाः किमर्थमवमन्यसे। कुशनाभसुता देव! समस्ताः सुरसत्तम!। स्थानाच्च्यावयितुं देवं रक्षामस्तु तपो वयम्। मा भूत् स कालो दुर्म्मेधः! पितरं सत्यवादिनम्। अवमन्य स्वधर्म्मेण स्वयंवरमुपास्महे। पिता हि प्रभुरस्माकं दैवतं परमञ्च सः। यस्य नो दास्यति पिता स नो भर्त्ता भविष्यति। तासां तु वचनं श्रुत्वा हरिः परमकोपनः। प्रविश्य सर्वगात्राणि बभञ्ज भगवान् प्रभुः। ताः कन्या वायुना भग्ना विविशुर्नृपतेर्गृहम्। प्रविश्य च सुसम्भ्रान्ताः सलज्जाः साश्रुलोचनाः। स च ता दयिता भग्नाः कन्याः परमशोभनाः। दृष्ट्वा दीनास्तदा राजा सम्भ्रान्त इदमब्रवीत्। किमिदं कथ्यतां पुत्त्र्यः! को धर्म्ममवमन्यते। कुब्जाः केन कृताः सर्व्वाश्चेष्टन्त्यो नाभिभाषथ"।

कन्याकूप पु॰ तीर्थभेदे। "कन्याकूपे उपस्पृश्य बलाकायां कृतोदकः" भा॰ अनु॰ २५ अ॰।

कन्याट पु॰ कन्या अटायत्र आधारे घञ्। वासभवने त्रिका॰ स्त्रीणां वासस्थाने एव गतिविधानात् अन्यत्र गतिनिषेधाच्च तस्य तथात्वम्।

कन्यातीर्थ न॰ १कुरुक्षेत्रस्थे कुञ्जरसमीपस्थतीर्थभेदे कुञ्जरतीर्थमुपक्रम्य "ततो गच्छेत धर्मज्ञः कन्यातीर्थमनुत्तमम्। कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत" भा॰ व॰ ८२ अ॰। समुद्रकावेरीसङ्गमनिकटस्थे २तीर्थभेदे च; "ततो गच्छेत कावेरीं वृतामप्सरसां गणैः। तत्र स्नात्वा नरो राजन्! गोसहस्रफलं लभेत्। ततस्तीरे समुद्रस्य कन्यातीर्थमुपस्पृशेत्। तत्रोपस्पृश्य राजेन्द्र! सर्वपापैः प्रमुच्यते" ८५ अ॰। अप्सरोरूपकन्याश्रितत्वेन तस्य कन्यातीर्थत्वम्।

कन्याधन न॰ कन्याकाले लब्धं धनम्। स्त्रीधनभेदे शुल्कादौ। अनूढायास्तस्य मरणे तादृग्धने भ्रातुरधिकारः "भगिनी शुल्कं सोदर्य्याणाम्" गौतमोक्तेः।

कन्यापति पु॰ ६त॰। जामातरि जटाधरः।

कन्यापाल पु॰ कन्याप्रधानः पालः। १पालाख्ये वणिग्जातिभेदे त्रिका॰ स्त्रियां ङीप्। उप॰ स॰। २कन्यायाः पालके त्रि॰।

कन्याभर्त्तृ पु॰ कन्याभिः प्रार्थनीयः भर्त्ता। १कार्त्तिकेये तस्य सौन्दर्य्यातिशयात् सर्वभामिनीभिर्भर्त्तृत्वेन प्रार्थनात् तथात्वम्। "आग्नेयश्चैव स्कन्दश्च" इत्युपक्रम्य "कन्याभर्त्ता विभक्तश्च स्वाहेयो रेवतीसुतः" भा॰ व॰ २२१ कार्त्तिकेयनामसु तन्नाम पठितम्। ६त॰। २जामातरि पु॰।

कन्यामय न॰ कन्या+प्राचुर्य्ये मयट्। कन्याप्रचुरे अन्तःपुरे

कन्याराम पु॰ बुद्धभेदे त्रिका॰।

कन्यावेदिन् पु॰ कन्यां दुहितरमाविन्दति आ+विद-णिनि। जामातरि। "कन्यां कन्यावेदिनश्च पशून् मुख्यान् सुतानपि" या॰ द्वितीयाश्राद्धस्य प्रश॰-जामातृलाभरूपं फलमुक्तम्।

कन्याश्रम न॰ तीर्थभेदे। "ततः कन्याश्रमं गच्छेत् नियतो ब्रह्मचर्य्यवान्। त्रिरात्रोपोषितो राजन्! नियतो नियताशनः। लभेत् कन्याशतं दिव्यं स्वर्गलोकञ्च गच्छति" भा॰ व॰ ८३।

कन्यासंवेद्य न॰ तीर्थभेदे। "कन्यासंवेद्यमासाद्य नियतो नियताशनः। मनोः प्रजापतेर्लोकानाप्नोति पुरुषर्षभ!। कन्यायां ये प्रयच्छन्ति दानमण्वपि भारत!। तदक्षयमिति प्राहुर्ऋषयः संशितव्रताः" भा॰ व॰ ८४।

कन्याह्रद पु॰ तीर्थभेदे। "यस्य कन्याह्रदे वासो देवलोकं स गच्छति" भा॰ अनु॰ २५ अ॰।

कनिका स्त्री कन्यैव कन् कास्यत्वे मोऽकृष्टत्वात् वा अवहूस्वम्। कन्यायां शब्दरत्ना॰।

कनुरष न० कन–इन् कन्या दीप्त्या श्रोषति उष–क । हस्त-
पुच्छे हारा० ।   [काप प्रनिकपति न षत्वम् कपोलः।
कप चलने (सौत्र:)पर०सक०सेट् । कपति अका(क)पोत् च-
कप चलने भ्वादि० इदित् आत्म०अक०सेट् । कम्पते अक-
म्पिष्ट चकम्पे । कम्पा कम्पनम् कम्पितः कम्पमानः
कम्पितुम् कम्प्रः कम्पित्वा ।"समुद्राश्च चकम्पिरे" देवीमा०
"चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः" रघुः ।
"महाकटितटश्रोण्यः कम्पमानाः पयोधरैः" भा०व०४२।
णिचि कम्पयति अचिकम्पत् । अत फलवत्कर्त्तर्य्यपि
पर० "क्ष्मां कम्पयन्त्योनिपतन्ति चोल्काः"। आर्षे
क्वचित् न पर० "अकम्पयत मेदिनीम्" रामा० ।
अनु+दयायामनुपहे सक० 'प्रकम्पेनेनानुचकम्पिरे सुराः"
माघः स्वार्थे णिच् तत्रार्थे "प्रथमा दृष्टिविधानुकम्पयत"
कुमा० । कर्म्मणि अनुकम्प्यते 'अनुकम्प्यतामयं
जनः पुनर्दर्शनेन शकु०।
आ+ईषच्चलने । "अनोकहाकम्पितपुष्पगन्धिः" रघुः ।
सम्यक्कम्पने च 'मत विज्ञानवतामेको धनवानाकम्प-
यते" छा०उप० ।   [१४,२,२,१७ ।
उद्+ऊर्द्ध्वतश्चालने । "कृत्वोर्द्ध्वमनुकम्पयति" शत०ब्रा०
प्रति+प्रतिरूपकम्पने यथा स्वस्य कम्पनं तत्तुल्यमन्यस्य कम्पनं
प्रतिरूपकम्पनम् । "गतेन भूमिं प्रतिकम्पयंस्तटम्" मा०
वि० २० ।   [र्हसि" गीता ।
वि+विशेषेण चलने । "स्वधर्ममपि चावेक्ष्य न विकम्पितुम-
सम्+सम्यक् चलने । "यस्य ज्यातलनिर्घोषात् समकम्पन्त
शत्रवः" भा० विरा० १६अ० ।
कप पु० कानि जलानि पाति पा–रक्षणे-क । १वरुणे
जलपतित्वात् तस्य तथात्वम् पा-पाने क । २जलपा-
यिनि त्रि० । ३असुरविशेषेषु तेषां धर्म्मविशेषप्रतिपा-
दनं ब्राह्मणकर्त्तृकवधकथा च यथा ।
"देवाऊचुः मदास्यव्यतिषिक्तानामस्माकं लोकपूजित ! ।
बलेन छन्ना भूमिः कपैश्च त्रिदिवं प्रभो ! । ब्रह्मोवाच ।
गच्छध्वं शरणं विप्रानाशु सेन्द्रादिवौकसः । प्रसाद्य
तानुभौ लोकाववाप्स्यथ यथा पुरा । ते ययुः शरणं
विप्रानूचुस्ते कान् जयामहे । इत्युक्तास्ते द्विजान् प्राहुर्ज्ज-
यतेह कपानिति । भूगतान् हि विजेतारो वयमित्यब्रुवन्
द्विजान् । ततः कर्म्म समारब्धं ब्राह्मणैः कपनाशनम् ।
तच्छ्रुत्वा प्रेषितोदूतो ब्राह्मणेभ्यो धनी कपैः। (धनी त-
न्नामा दूतः) भूगतान् ब्राह्मणानाह धनी कपवचो यथा ।
भवद्भिः सदृशाः सर्व्वे कपाः किमिह वर्त्तते । सर्व्वे-
वेदविदः प्राज्ञाः सर्व्वे च क्रतुयाजिनः । सर्व्वे सत्यव्रता-
श्चैव सर्व्वे तुल्या महर्षिभिः। श्रीश्चैव रमते तेषु धारयन्ति
श्रियञ्च ते । वृथा दारान्न गच्छन्ति वृथा मांसं न भुञ्जते ।
दीप्तमग्निं जुह्वते च गुरूणां वचनेस्थिताः। सर्व्वे च नियता-
त्मानोबालानां संविभागिनः । उपेत्य शनकैर्यान्ति न सेवन्ति
रजस्वलाम् । स्वर्गतिञ्चैव गच्छन्ति तथैव शुभकर्म्मिणः । अभुक्त
वत्सु नाश्नन्ति गर्भिणीवृद्धकादिषु । रमन्ते न च दीव्यन्ति दिवा
चैव न शेरते । एतैश्चान्यैश्च बहुभिर्गुणैर्युक्तान् कथं कपान् ।
विजेष्यथ ? निवर्त्तध्वं निवृत्तानां शुभं हि वः। ब्राह्मणा
ऊचुः । कपान् वयं विजेष्यामोये देवास्ते वयं स्मृताः। तस्माद्
वध्याः कपाश्चाकं धनिन् ! याहि यथागतम् । धनी गत्वा
कपानाह न वोविप्राः प्रियङ्कराः गृहीत्वा ऽस्त्राण्यतोवि-
प्रान् कपाः सर्व्वे समाद्रवन् समुदग्रायुधान् दृष्ट्वा कपान्
सर्व्वे द्विजातयः । व्यसृजन् ज्वलितानग्नीन् कपानां
प्राणनाशनान् । ब्रह्मसृष्टाहव्यभुजः कपान् हत्वा सना-
तनाः। नभसीव यथाऽभ्राणि व्यराजन्त नराधिप ! । हत्वा
वै दानवान् देवाः सर्व्वे संभूय संयुगे। तेनाभ्यजानन् हि
तदा ब्राह्मणैर्निहतान् कपान् । अथागम्य महातेजा
नारदोऽकथयद्विभो । यथा हता महाभागैस्तेजसा ब्राह्मणैः
कपाः। नारदस्य वचः श्रुत्वा प्रीता सर्व्वे दिवौकसः । प्रश-
शंसुर्द्विजांश्चापि ब्राह्मणांश्च यशस्विनः । तेषां तेजस्तथा
वीर्य्यं देवानां ववृधे ततः । अवाप्नुवंश्चामरत्वं त्रिषु लो-
केषु पूजितम्" । भा० अनु० १५७अ० ।
कपट स्त्री कप-अटन्, कं ब्रह्माणमपि पटति आच्छादयति
पट–अच् ६त० वा न्यर्ङ्चादि । यथास्थितवस्तुनोऽन्यथा
प्रकाशनरूपे हृदयस्थभावनिगूहनरूपे च छद्मे अमरः।"मयि
सकपटं किञ्चित् क्वापि प्रणीतविलोचने" सा०द० ।"नरे-
न्द्रसिंह ! कपटं न वोढुं त्वमिहार्हसि" भा०आ०७४ ।
कपटस्य भावः ष्यञ् । कापट्य न० तल् कपटता स्त्री त्व
कपटत्व न० कपटभावे । कापट्यञ्च अन्यथास्थितवस्तुनोऽ-
न्यथाप्रकाशनरूपव्यापारभेदः छन्नतमावस्य प्रच्छा-
दनञ्च । कपटमस्त्यस्य ठन् । कपटिक कपटयुक्ते शब्द-
र० । इनि कपटिन् कपटयुक्ते त्रि० स्त्रियां ङीप् ।
साच (चिड़ा) नामगन्धद्रव्ये राजनि० । कप–अटन् ।
गौरा०ङीष् कपटी । परिमाणभेदे (एक आँजला) शब्दर०।
कपटधारिन् त्रि० कपटं धारयति धृ–णिनि । कपटयुक्ते
शब्दर० स्त्रियां ङीप ।

कपटपटु त्रि० कपटे पटुः ७त० । १कुहकव्यवहारदक्षे २ऐन्द्रजालिकप्रभृतौ च । "छलयन् प्रजास्त्वमनृतेन कपटपटुरैन्द्रजालिकः" माघः

कपटेश्वरी स्त्री कमिव शुभ्रं पटमस्तुल्यं फलमीष्टे ईश-वरच् । श्वेतकण्टकारीवृक्षे राजनि० । तस्याः श्वेतफलस्य जलवच्छुद्धपटाकारत्वात् तथात्वम् ।

कपन पु० कप(सौ०)–ल्यु । कम्पने घुणादौ कृमौ "कपनाः कम्पनाः कृमयो भवन्ति" निरु०६.४, "इदं कपनेव वेधसः" ऋ० ५.५४.६. कपनाः कम्पनाः कृमयः इदं घुणादयः" भा० । "सैष दाशरथरामोरामः" इत्यादिवत् पाद पूरणार्थः कपनेवेत्यत सन्धिः ।

कपर्द पु० पर्व पूरणे क्विप् रात् वलोपे परः पूर्त्तिः कस्य गङ्गाजलस्य परा पूर्त्या दायति शुध्यति क+पर्+दै–क । १हरजटायाम् । केन सुखेन परा पूर्त्या दीयते दा–घञर्थे क। २वराटके अल्पार्थे कन् स्वार्थे पुंस्त्री० । स्त्रीत्वे टाप् अत इत्वम् । कपर्दिकाप्यत्र । कपर्दकभेदाश्च राजनि० दर्शिता यथा । १सुवर्णवर्णा सिंही २धूम्रवर्णा व्याघ्री, ३पीतपृष्ठा सितोदरा मृगी, ४श्वेतवर्णा हंसी ५नातिदीर्घिका विदन्ता", कपर्दस्य उपरभेदः भावप्र० उक्तः महाकार्य कनकसंग्रहे दर्शितम् । तस्य गुणाश्च ततोक्ता यथा "कपर्दो दाहपित्तास्रघ्नः शीतलः सरः" । राजनि० तु "कपर्दः कटुतिक्तोष्णः कर्णशूलव्रणापहः । गुल्मशूलनेत्रदोषनाशनः परिकीर्त्तितः" ।"पञ्चाङ्गान् सौवर्णान् कपर्दान्" यजु० । "यद्यहमिमं शकुपरावं विक्रीय इव कपर्दकान् प्राप्नोमि" हितो०

कपर्दिन् पु० कपर्दः अस्त्यस्य इनि ।१महादेवे । "नमो रुद्राय तवसे कपर्दिने" यजु० १६,४७, २जटायुक्तमात्रे त्रि० स्त्रियां ङीप् । "भयावव्यालवलया वेणीबन्धकपर्दिनी । हरानुकारिणी पातु लीलया पार्वती जगत्" सा०द०

कपर्दीश पु० काशीस्थे शिवलिङ्गभेदे । "काशेश्वरकपर्दीशौ चरणावतिनिर्मलौ"काशीख०३३अ० ।

कपाट पुंस्त्री० कं वातं पाटयति तद्गतिं रुणद्धि पट–णिच्–अण् । द्वारावरणे वातरोधके समामख्याते काष्ठमये द्रव्ये । "भोगद्वारकपाटपाटनकरो मातान्नपूर्णेश्वरो" अन्नपूर्णास्तवः । अर्द्धर्चादि अमरः । अणन्तत्वात् स्त्रियां ङीप् । कपाटीत्यप्यन्ये ।"कपाटविस्तीर्णमनोरमोरः–"माघः "कपाटवक्षाः परिणद्धकन्धरः" रघुः । "कपाटयुक्तमपातं पमं भूम्याश्च भारत ! "भा०आ०१४७अ० । "कपाटयन्त्रदुर्द्धर्षा बभूवुः सकुड्योपलाः" भा० व० २८३ अ० । अल्पार्थे कन् । कपाटिका स्वल्पकपाटे (खिड़कीर कवाट) कपाटिका+स्वार्थे शर्करा०कण् । कापाटिक तत्रार्थे न०स्वार्थिकप्रत्ययाः प्रकृतलिङ्गान्यतिवर्त्तन्ते इत्युक्तेः लिङ्गातिक्रमः

कपा(वा)टघ्न त्रि० कपा(वा)टं हन्ति घ्नाति हन–टक् । कपाटघातशक्तियुक्ते चौरभेदे । (डाकाइत) ।

कपाटसन्धि पु० कपाटं सन्धीयतेऽत्र सम्+धा आधारे कि । द्वारकाष्ठेन कपाटयोजनसन्धिभेदे ।

कपाटसन्धिक पु० सुश्रुतोक्ते कर्णबन्धरूपकर्णरोगभेदे तत्र हि "एवं विवर्द्धितः कर्णश्छिद्यते तु द्विधा नृणाम् । दोषतो वाभिघाताद्वा सन्धानं तस्य मे शृणु । तत्र समासेन पञ्चदश कर्णबन्धनाकृतयः" इत्युद्दिश्य "नेमिसन्धान इत्युपक्रम्य "कपाटसन्धिकोऽर्द्धकपाटसन्धिकः" इत्यादिना विभज्य । "अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपाटसन्धिकः" इति वर्णितः । उत्पलभेद्यकशब्दे१२२९०विवृतिः ।

कपाल पुंस्त्री० कं जलं शिरो वा पालयति पाल–अण् कप-सौ० आलन् वा । १घटादेरवयवे "कपालतद्वतसंयोगात् संयोगजस्तद्व्ययोः" भाषा०। २समूहे च मेदि० । ३शिरोऽस्थ्नि (माथारखुलि) नरशिरः कपालं शुचिप्राण्यङ्गत्वाच्छङ्खादिवदनुमानाप्रामाण्यमिति मथुरानाथः "कपालनेत्रान्तरलब्धमार्गैः" कुमा०। "कपालि वा स्यादथ चन्द्रशेखरम्" "कपालमेवामलशेखरश्रीः" कुमा० । ५यत्यादेर्भिक्षापात्रे "कपालं वृक्षमूलानि कुचेलमसहायता । समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्" मनुः । "नग्नो मुण्डः कपालेन भिक्षार्थी क्षुत्पिपासितः" मनुः "कपालपाणिः पृथिवीमटतां चीरसंवृतः" रामा०।६अण्डादीनामवयवे च।"द्राक् पक्ष्माग्रकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदरेत्यादि" चौरप० "कुक्कुटाण्डकपालानि सुमनोमुकुलानि च"। कुक्कुटाण्डकपालानि कतकं मधुकं समम्" सुश्रु०। ७भर्ज्जनपात्रभेदे (खोला) । "कपालभ्रष्टान् संक्तून् कारयित्वा" सुश्रु० । ८यज्ञियपुरोडाशादिसंस्काराधारे मृण्मयपात्रभेदे । "अष्टनः कपालाद्धविषि" पा० । अष्टाकपालः पुरोडाशः एवमेकादशकपाल इत्यादि । "कपालानि चोपदधाति पुरोडाशं चाधिश्रयति" तैत्ति० १,६,८,२ । "अग्नये गायत्राय त्रिवृते राथन्तरायाष्टाकपाल,इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हतायैकादशकपालो, विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो द्वादशकपालो, मित्राव-

रुणाभ्यामानुष्टुभाभ्यामेकविंशाभ्यां वैराजाभ्यां पयस्या वृहस्पतये, पाङ्क्ताय त्रिणवाय शाक्कराय चरुः सवित्र औष्णिहाय त्रयस्त्रिंशाय रैवताय द्वादशकपालः प्राजापत्यश्चरुरदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्या अष्टाकपालः” यजु० २९,६० । कुष्ठरोगभेदे न० हेमच० तल्लक्षणम् यथा । “कृष्णारुणकपालाभः यद्रूक्षं परुषं तनु । कपालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्” माधवनि० । सुश्रुते महाकुष्ठान्यरुणोडुम्बरर्ष्यजिह्वकपाल काकणकपुण्डरीकदद्रुकुष्ठानीति विभज्य कृष्णकपालिकाप्रकाशानि कपालकुष्ठानीति लक्षितम् ।

कपालनालिका स्त्री कपालस्य सूत्रसमूहस्य नालिकेव निःसरणहेतुत्वात् । सूत्रसंवनिःसारणहेतौ तर्क्वौ (टीको) त्रिका० ।

कपालभृत् पु० कपालं ब्रह्मणः शिरोऽस्थिमयं पात्रं बिभर्त्ति भृ–क्विप् । १शिवे महादेवे अमरः । तस्य यथा ब्रह्मशिरःकपालभृत्त्वा तथा कपालमोचनशब्दे वक्ष्यते २कपालधारके भिक्षुके च त्रि० । कपालधारकादयोऽप्यत्र ।

कपालमालिन् पु० कपालानां माला विद्यतेऽस्य इनि । १शिवे कपालमोचनशब्दे विवृतिः “कपालमालिने नित्यं सुवर्णमुकुटाय च”भा०आश्व०८अ० । २दुर्गायां स्त्री ङीप् ।

कपालमोचन न० कपालं मुच्यतेऽत्र मुच–आधारे ल्युट् । काशीस्थे तीर्थभेदे । आमूलं तत्कथा काशीख०३१अ० यथा “पुरा पितामहं विप्र ! मेरुशृङ्गे महर्षयः । प्रोचुः प्रणम्य लोकेशं किमेकं तत्त्वमव्ययम् । स मायया महेशस्य मोहितो लोकसम्भवः । अविज्ञाय परं भावमात्मानं प्राह वर्णिनम् । जगद्योनिरहं धाता स्वयम्भूरेक ईश्वरः । अनादिमदहं ब्रह्म मामनर्च्य न मुच्यते । प्रवर्त्तको हि जगतामहमेव निवर्त्तकः । नान्यो मदधिकः सत्यं कश्चित् क्वापि सुरोत्तमः । तस्यैवं ब्रुवतो धातुः क्रतुर्नारायणांशजः । प्रोवाच प्रहसन्वाक्यं रोषताम्रविलोचनः । अविज्ञाय परन्तत्त्वं किमेतत् प्रतिपाद्यते । अज्ञानं योगयुक्तस्य नचैतदुचितन्तव । अहं कर्त्ता हि लोकानां यज्ञो नारायणः परः । न मामनादृत्य विधे ! जीवनं जगतामज ! । अहमेव परं ज्योतिरहमेव परा गतिः । मत्प्रेषितेन भवता सृष्टिरेषा विधीयते । एवं विप्रकृतौ मोहात् परस्परजयैषिणौ । पप्रच्छतुः प्रमाणज्ञानाम्नायांश्चतुरोऽपि तौ । विधिक्रतू ऊचतुः । वेदाः प्रमाणं सर्व्वत्र प्रतिष्ठां परमाश्रिताः । यूयमेव न सन्देहः किन्तत्त्वं प्रतितिष्ठत । श्रुतय ऊचुः । यदि मान्यावयन्देवौ ! सृष्टिस्थितिकरौ ! विभू ! । तदा प्रमाणं वक्ष्यामो भवत्सन्देहभेदकम् । इत्युक्तमिदमाकर्ण्य प्रोचतुस्तौ श्रुतीः प्रति । युष्मदुक्तं प्रमाणं नौ तत्त्वं तत्सम्यगुच्यताम् । ऋगुवाच । यदन्तःस्थानि भूतानि यतः सर्व्वं प्रवर्त्तते । यदाहुस्तत् परं तत्त्वं स रुद्रस्त्वेक एव हि । यजुरुवाच । यो यज्ञैरखिलैरीज्यो यो योगेन समीज्यते । येन प्रमाणं वयं वां हि स एकः सर्व्वदृक् शिवः । सामोवाच । येनेदं भ्राम्यते विश्वं योगिभिर्यो विचिन्त्यते । यद्भासा भासते विश्वं स एकस्त्र्यम्बकः परः । अथर्व्वोवाच । यं प्रपश्यन्ति देवेशं भक्त्यानुग्राहिणो जनाः । तमाहुरेकं कैवल्यं शङ्करं दुःखतस्करम् । श्रुतीरितं निशम्येत्थं तावतीव विमोहितौ । स्मित्वाहतुः क्रतुविधी महामर्षयुतौ मुने ! । कथं प्रमथनाथोऽसौ रममाणो निरन्तरम् । दिगम्बरः पितृवने शिवया धूलिधूसरः । विटङ्कवेशो जटिलो वृषगो व्यालभूषणः । परं ब्रह्मत्वमापन्नः क्व तत्सङ्गविवर्जितम् । तदुदीरितमाकर्ण्य प्रणवात्मा सनातनः । अमूर्त्तो मूर्त्तिमान् भूत्वा हसमान उवाच तौ । प्रणव उवाच । नह्येष भगवान् शक्त्या आत्मनो व्यतिरिक्तया । कदाचिद्रमते रुद्रो लीलारूपधरो हरः । असौ हि भगवानीशः स्वयं ज्योतिः सनातनः । आनन्दरूपा तस्यैषा शक्तिर्नागन्तुका शिवा । इत्येवमुक्तेऽपि तदा मखमूर्त्तेरजस्य हि । नाज्ञानमगमन्नाशं श्रीकण्ठस्यैव मायया । प्रादुरासीत्ततो ज्योतिरुभयोरन्तरे महत् । पूरयन्निजया भासा द्यावाभूम्योर्यदन्तरम् । ज्योतिर्मण्डलमध्यस्थोऽदृश्यपुरुषाकृतिः । प्रजज्वालाथ कोपेन ब्रह्मणः पञ्चमं शिरः । आवयोरन्तरं कोऽसौ बिभृयात् पुरुषाकृतिम् । विधिः संभावयेद्यावत्तावत् सहि त्रिलोकितः । क्षणात् क्षणेन च महान् पुरुषो नीललोहितः । त्रिशूलपाणिर्भालाक्षो नागोडुपविभूषणः । हिरण्यगर्भस्तं प्राह जाने त्वां चन्द्रशेखरम् । भालस्थलान्मम पुरा रुद्रः प्रादुरभूद्भवान् । रोदनाद्रुद्रनामापि योजितोऽसि मया पुरा । मामेव शरणं याहि पुत्र रक्षां करोमि ते । अथेश्वरः पद्मयोनेः श्रुत्वा गर्ववतीं गिरम् । स कोपतः समुत्पाद्य पुरुषं भैरवाकृतिम् । प्राह पङ्कजजन्माऽसौ शास्यस्ते कालभैरव । कालवद्राजसे यस्मात् कालराजस्ततो भवान् । विश्वं भर्त्तुं समर्थोऽसि भरणाद्भैरवः स्मृतः । त्वत्तो भेष्यति कालोऽपि

ततस्त्वं कालभैरवः । आमर्दयिष्यति भवान् दुष्टो दुष्टात्मनो यतः । आमर्दक इति ख्यातिं ततः सर्व्वत्र यास्यति । यतः पापानि भक्तानां भक्षयिष्यति तत्क्षणात् । पापभक्षण इत्येतत्तव नाम भविष्यति । या मे मुक्तिपुरी काशी सर्व्वाभ्योऽपि गरीयसी । आधिपत्यञ्च तस्यास्ते कालराज ! सदैव हि । तत्र ये पापकर्त्तारस्तेषां शास्ता त्वमेव हि । शुभाशुभं न तत् कर्म चित्रगुप्तो लिखिष्यति । एतान् वरान् प्रगृह्याथ तत्क्षणात् कालभैरवः । वामाङ्गुलिनखाग्रेण चकर्त्त च शिरोविधेः । यदङ्गमपराध्नोति कार्य्यन्तस्यैव शासनम् । अतो येन कृता निन्दा तच्छिन्नं पञ्चमं शिरः । यज्ञमूर्त्तिधरो विष्णुस्ततस्तुष्टाव शङ्करम् । भीतो हिरण्यगर्भोऽपि जजाप शतरुद्रियम् । आश्वास्य तौ महादेवः प्रीतः प्रणतवत्सलः । प्राह स्वमूर्त्तिमपरां भैरवं तं कपर्द्दिनम् । मान्योऽध्वरेशो भवता तथा शतधृतिस्त्वयम् । कपालं वैधसञ्चापि नीललोहित ! धारय । ब्रह्महत्यापनोदाय व्रतं लोकाय दर्शयन् । चर त्वं सततं भिक्षां कपालिव्रतमास्थितः । इत्युक्त्वान्तर्हितो देवः प्रीतः प्रणतवत्सलः । उत्पाद्य कन्यामेकान्तु ब्रह्महत्येति विश्रुताम् । रक्ताम्बरधरां रक्तां रक्तस्रगनुलेपनाम् । दंष्ट्राकरालवदनां लल्लज्जिह्वातिभीषणाम् । अन्तरीक्षकपादाभ्यां पिबन्तीं रुधिरं बहु । कर्त्तृकर्परहस्ताढ्यां स्फुटं पिङ्गोग्रतारकाम् । जनयन्तीं महोद्वेगं भैरवस्यापि भीषणाम् । यावद्वाराणसीन्दिव्यां पुरीमेष गमिष्यति । तावत्त्वं भीषणे ! कालमनुगच्छोग्ररूपिणि ! । सर्व्वत्र ते प्रवेशोऽस्ति मुक्त्वा वाराणसीं पुरीम् । नियोज्य तामिति शिवोऽप्यन्तर्धानं गतस्ततः । तत्सान्निध्याद्भैरवोऽपि कालोऽभूत् कालकालनः । स देवदेववाक्येन बिभ्रत् कापालिकं व्रतम् । कपालपाणिर्विश्वात्मा चचार भुवनत्रयम् । नात्याक्षीच्चापि तं देवं ब्रह्महत्यातिदारुणा । सत्यलोकेऽपि वैकुण्ठे महेन्द्रादिपुरीष्वपि । त्रिजगत्पतौ रुद्रोऽपि अतीति जगतीचरन् । प्रतितीर्थं भ्रमन्नापि विमुक्तो ब्रह्महत्यया । अनेनैवानुभावेन महिमा त्ववगम्यताम् । ब्रह्महत्यापनोदिन्याः काश्याः कलशसम्भव ! । सन्ति तीर्थान्यनेकानि बहून्यायतनानि च । अखिलत्रिलोकिगो काश्याः कलामर्हन्ति षोड़शीम् । तावद्गर्जन्ति पापानि ब्रह्महत्यादिकान्यलम् । यावन्नाम न शृण्वन्ति काश्याः पापदवानलैः । प्रमथैः सेव्यमानोऽपि त्रिलोकीं विचरन् हरः । कापालिको ययौ देवो नारायणनिकेतनम् । अथायान्तं महाकालं त्रिनेत्रं धृतकुण्डलम् । महादेवांशसम्भूतं भैरवं भीषणाकृतिम् । पपात दण्डवद्भूमौ दृष्ट्वा तं गरुड़ध्वजः । देवाश्च मुनयश्चापि देवनार्य्यः समन्ततः । निपेतुः प्रणिपत्यैनं प्रणतः कमलापतिः । शिरस्यञ्जलिमारोप्य स्तुत्वा बहुविधैः स्तवैः । क्षीरोदमथनोद्भूतां प्राह पद्मालयां हरिः । प्रिये ! पद्मानयने ! धन्याऽसि शुभगेऽनघे ! । धन्योऽहं देवि ! सुश्रोणि ! यत् पश्यावो जगत्पतिम् । अयं धाता विधाता च लोकानां प्रभुरीश्वरः । अनादिशरणं दान्तः परः षड्विंशसम्मितः । सर्व्वज्ञः सर्व्वयोगीशः सर्व्वभूतैकनायकः । सर्व्वभूतान्तरात्मायं सर्व्वगः सर्व्वदः सदा । यं विनिद्रा विनिःश्वासाः शान्ता ध्यानपरायणाः । धिया पश्यन्ति हृदये सोऽयमद्य निरीक्ष्यताम् । यं विदुर्वेदतत्त्वज्ञा योगिनो जितमानसाः । अरूपो रूपवान् भूत्वा सोऽयमायाति सर्व्वगः । अहो विचित्रं देवस्य चेष्टितं परमेष्ठिनः । यस्याख्यां शृण्वतो नित्यं न देहः सोऽपि देहभृत् । यं दृष्ट्वा न पुनर्जन्म लभ्यते मानवैर्भुवि । सोऽयमायाति भगवान् त्र्यम्बकः शशिभूषणः । पुण्डरीकदलायामे धन्ये मेऽद्य विलोचने । ययोरतिथितां नीतो लोकाद्रूपधरो हरः । धिक्धिक् पदन्तु देवानां परं दृष्ट्वा तु शङ्करम् । लभ्यते यत्र निर्व्वाणं सर्व्वदुःखान्तकृच्छिवः । देवत्वादशुभं किञ्चिद्देवि ! लोके न विद्यते । दृष्टापि सर्व्वदेवेशं यन्मुक्तिं न लभामहे । एवमुक्त्वा हृषीकेशः संप्रहृष्टतनूरुहः । प्रणिपत्य महादेवमिदमाह वृषध्वजम् । किमिदं देवदेवेन सर्व्वज्ञेन त्वया विभो ! । क्रियते जगतां धात्रा सर्व्वपापहराव्यय ! । क्रीड़ेयन्तव देवेश ! त्रिलोचन ! महाद्युते ! । किंकारणं विरूपाक्ष ! चेष्टितं ते स्मरार्द्दन ! । किमर्थं भगवन् शम्भो ! भिक्षाश्चरसि शङ्कर ! । संशयो मे जगन्नाथ ! नतत्रैलोक्यराज्यद ! । एवमुक्तस्ततः शम्भुर्विष्णुमेतदुदाहरत् । ब्रह्मणस्तु शिरश्छिन्नमङ्गुल्यग्रनखेन ह । तदाप्रभृत्यहं विष्णो ! चराम्येतद्व्रतं शुभम् । एवमुक्तो महेशेन पुण्डरीकविलोचनः । स्मित्वा किञ्चिन्नतशिराः पुनरेवं व्यजिज्ञपत् । यथेच्छसि तथा क्रीड़ सर्व्वविघ्नविनायक ! । मायया मां महादेव ! न छादयितुमर्हसि । नाभीकमलकोषात्तु कोटिशः कमलासनान् । कल्पे कल्पे सृजामीश त्वन्नियोगबलाद्विभो ! । त्यज मायामिमां देव ! दुस्तरामकृतात्मभिः । मदादयो महादेव ! मायया तव मोहिताः । यथावद्भावगच्छामश्चेष्टितन्ते शिवापते ! ।

संहारकाले संप्राप्ते सदेवानखिलान् मुनीन्। लोकान् वर्णाश्रमवतो हरिष्यसि यदा हर!। तदा क्व ते महादेव! पापं ब्रह्मवधादिकम्। पारतन्त्र्यं न ते शम्भो! स्वैरं लीडस्ततोभवान्। व्यतीतब्रह्मणामस्थ्नां स्रक् कण्ठे तेऽवभासते। यदा तदा क्वानुगता त्वां हत्या ब्रह्मणोऽनघ। कृत्वापि सुमहत् पापं त्वां यः स्मरति भावतः। आधारं जगतामीश! तस्य पापं विलीयते। यथा तमो न तिष्ठेत सन्निधावंशुमालिनः। तथा च तव भक्तस्य पापं नश्यति तत्क्षणम्। यश्चिन्तयति पुण्यात्मा तव पादाम्बुजद्वयम्। ब्रह्महत्याभवमपि पापन्तस्य व्रजेत् क्षयम्। तव नामानुरक्ता वाग्यस्य पुंसो जगत्पते!। अप्यद्रिकूटतुलितं नैनस्तमनुधावति। रजसा तमसा विवर्जितं क्व नु पापं परितापदायकम्। क्व च ते शिवनाम मङ्गलं जनजीवातु जगद्रुजापहम्। यदि जातु चिदन्यकद्विवस्तव नामौष्ठपुटाद्विनिःसृतम्। शिव! शङ्कर! चन्द्रशेखरेत्य सकृन्नाम न संसृतिः पुनः। परमात्मन्! परं धाम स्वेच्छाविष्टतविग्रह!। कुतूहलं तवेशेदं क्व पराधीनता शिवे। अद्य धन्योऽस्मि देवेश! यन्न पश्यन्ति योगिनः। पश्यामि त्वां जगन्मूलमव्ययं परमेश्वरम्। अद्य मे परमो लाभस्त्वद्य मे मङ्गलं परम्। त्वद्दर्शनामृतप्राशस्य तृणं स्वर्गापवर्गकम्। इत्थं वदति गोविन्दे विमला पद्मया तया। मनोरथवती नाम भिक्षा पात्रे समर्पिता। भिक्षाटनाय देवोऽपि निरगात् परया मुदा। हृदानुयायिनीन्तान्तु समाहूय जनार्द्दनः। संप्रार्थ्य ब्रह्महत्यां विमुञ्चेति त्रिशूलिनम्। ब्रह्महत्योवाच। अनेनापि मिषेणाहं संसेव्याद्य वृषध्वजम्। आत्मानं पावयिष्यामि क्व पुनर्भवदर्शनम्। सा तत्याज न तत्पार्श्वं व्याहृतापि सुरारिणा। तमूचेऽथ हरिं शम्भुः स्मेराक्षो वचनं शुभम्। त्वद्वाक्यामृतपानेन तुष्टोऽस्मि बहुमानद!। वरं वृणीष्व गोविन्द! वरदोऽस्मि तवानघ!। न माद्यन्ति तथा भैक्षैर्भिक्षवोऽप्यतिसंस्कृतैः। यथा मान सुधापानैर्नन्तु भिक्षाटनज्वराः। विष्णुरुवाच। एष एव वरः श्लाघ्यो यदहं देवताधिपत्। पश्यामि त्वां देवदेवं मनोरथपथातिगम्। अनभ्रेयं सुधावृष्टिरनायासो महोत्सवः। अयत्नो निधिलाभोऽयं वीक्षणं हरते सताम्। अवियोगस्तु मे देव। त्वदङ्घ्रियुगलेन वै। एष एव वरः शम्भो! नान्यं कञ्चिद्वरं वृणे। श्रीभैरव उवाच। एवं भवतु ते देव! यत्त्वयोक्तं महामते!। सर्व्वेषामेव देवानां वरदस्त्वं भविष्यसि। अनुज्ञाप्येति दैत्यारिं सेन्द्रादिभुवने चरन्। भेजे विमुक्तिजननीं नाम्ना वाराणसीं पुरीम्। यत्र स्थितानां जन्तूनां कलां नार्हन्ति षोडशीम्। अपि ब्राह्माणि देवानां पदानि विपदास्पदम्। वरं वाराणसीवासो जटामुण्डोदिगम्बरः। नान्यत्र छत्रसम्पन्नवसुधामण्डलेश्वरः। वरं वाराणसी भिक्षा न लक्षाधिपतान्यतः। लक्षाधीशोविशेद्गर्भं तद्भिक्षाशी न गर्भभाक्। भिक्षापि यत्र भिक्षुभ्यो दत्ताऽमलकसम्मिता। सुमेरुणापि तुलिता वाराणस्यां गुरुर्भवेत्। वर्षाशनं हि यो दद्यात् काश्यां सीदत्कुटुम्बिने। यावन्त्यन्नानि तावन्ति युगानि स दिवीज्यते। वाराणस्यां षड्भोज्यं योदद्याच्चिरूपायिने। स कदाचित् तृट्क्षुधा नो दुःखं भुङ्क्ते नरर्षभ!। वाराणस्यां निवसतां यत्पुण्यमुपजायते। तदेव संवासयितुः फलं त्वविकलं भवेत्। ब्रह्महत्यादिपापानि यस्या नाम्नोऽपि कीर्त्तनात्। त्यजन्ति पापिनं काशी सा केनेहोपमीयते। क्षेत्रे प्रविष्टमात्रेऽथ भैरवे भीषणाकृतौ। हाहेत्युक्त्वा ब्रह्महत्या पातालतलमाविशत्। कपालं ब्रह्मणो रुद्रः सर्व्वेषामेव पश्यताम्। हस्तात्पतितमालोक्य ननर्त्त परया मुदा। विधेः कपालं नामुञ्चत् करमत्यन्तदुस्त्यजम्। हरस्य भ्रमतः क्वापि तत् काश्यां क्षणतोऽपतत्। शूलिनो ब्रह्मणो हत्या नापैति क्वैव या क्वचित्। सा काश्यां क्षणतो नष्टा कथं काशी न दुर्लभा। वाराणसीति काशीति महामन्त्रमिमं जपन्। यावज्जीवं त्रिसन्ध्यन्तु जन्तुर्जातु न जायते। अविमुक्तं महाक्षेत्रं स्मरन् प्राणांस्तु यस्त्यजेत्। दूरदेशान्तरस्थोऽपि सोऽपि जातु न जायते। आनन्दकाननं यस्य चित्तं स्मरते सदा। तत्क्षेत्रनामस्मरणात् स भूयोऽभिजायते। रुद्रावासे वसेन्नित्यं नरो नियतमानसः। एनसामपि सम्भारं कृत्वा तस्माद्विमुच्यते। महाश्मशानमासाद्य यदि दैवाद्विपद्यते। पुनः श्मशानशयनं न क्वापि लभते पुमान्। कपालमोचनं काश्यां ये स्मरिष्यन्ति मानवाः। तेषां विनङ्क्ष्यति क्षिप्रमिहान्यत्रापि पातकम्। आगत्य तीर्थप्रवरे स्नानं कृत्वा विधानतः। तर्पयित्वा पितॄन् देवान् मुच्यते ब्रह्महत्यया"।

भैरवमहादेवयोरभेदात् महादेवे कपालभृत्त्वादिव्यपदेशः। "कपालमोचनं तीर्थं सर्व्वपापप्रमोचनम्। तत्र स्नात्वा नरव्याघ्र! सर्व्वपापैः प्रमुच्यते" भा० व० ८२ अध्याये।

कपालशिरस पुं० कपालं शिरसि यस्य। महादेवे "अक्षय-

तत्र बहवोविहृत्य शरदां शतम्। तपसा दिवमारूढाः कपालशिरसा सह"।

कपालस्फोट पु० ६त०। शिरःस्फोटने (माथाफोड़ा)

कपालाधिकरण न० जैमिनिसूत्रोक्ते अधिकरणभेदे तच्चाधिकरणं ४,१, पादे यथ.

"अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तात्दर्थो हि विधीयते" जै० सू०। दर्शपूर्णमासयोः श्रूयते "कपालेषु पुरोडाशं श्रपयति" इति तथा "पुरोडाशकपालेन तुषानुपवपति" इति तत्र संदेहः किम्? उभयं कपालानि प्रयोजयति? पुरोडाशश्रपणं तुषोपवापश्च उत श्रपणं प्रयोजकं न तुषोपवापः? इति किं प्राप्तम्? विनिगमनायां हेतोः अभावात् उभयम् इति प्राप्ते उच्यते अर्थाभिधानम् प्रयोजनसम्बन्धाभिधानं यस्य यथा पुरोडाशकपालम् इति पुरोडाशार्थंकपालं पुरोडाशकपालम् कथम् एतदवगम्यते? पुरोडाशं तावत् तस्मिन् काले नास्ति येन वर्त्तमानः सम्बन्धः कपालेन स्यात् तेनैव हेतुना नभूतः सएव, कपालस्य पुरोडाशेन भविष्यता सम्बन्धः भविष्यता सम्बन्धश्च तन्निमित्तस्य भवति तस्मात् पुरोडाशेन प्रयुक्तं यत् कपालं तेन तुषा उपवप्तव्याः इति कपालं स्यात् न चेत् न, तेन तुषा उपवप्तव्याभवन्ति तस्मात् न तुषोपवापः कपालानाम् प्रयोजकः प्रयोजकं तु श्रपणम्" एवञ्च सति चरौ पुरोडाशाभावे यदा तुषानुपवप्तुम् कपालमुपादीयते न, तत्पुरोडाशम्" भा०।

कपालि पु० कं ब्रह्मशिरः पालयति प्रतकाले पाल–इन्। महादेवे त्रि० "कपालिं त्रिपुरान्तकम्" भा०स०४५अ०।

कपालिका स्त्री कपाल+अल्पार्थे कन् अत इत्त्वम्। १भग्नमृण्मयखण्डे (खापरा)। कपालिकैव शर्करा० स्वार्थेऽण्। कापालिक तत्रार्थे न० स्वार्थिकत्वेऽपि क्वचित् लिङ्गातिक्रमनियमात्। नाधितिष्ठेत्तु पं जातु केशभस्मकपालिका." भा०अनु०१०४ अ०।

"अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः"। "अप्सुमनोऽस्थोनि गोबालांस्तुषान् भस्मकपालिकाः" मनुः। "कृष्णकपालिकाप्रकाशानि अपालकुष्ठानि" सुश्रुतः "सुश्रुतोक्ते २दन्तरोगभेदे स च "दन्तगतास्तु दालनः कृमिदन्तको दन्तहर्षोभञ्जनकः शर्करा कपालिका श्यावदन्तकोऽनुमोक्षहेति" विभज्य "दलन्ति दन्तवल्कानि यदाशर्करया सह। ज्ञेया कपालिका सैव दशनानां विनाशिनी" सुश्रुते लक्षितः ३कपालावयवे "कपालिकाभ्यां कपालं कपालाभ्यां च घटआरभ्यते" न्यायकन्दली।

कपालिन् पु० कपालमस्त्यस्य इनि। १महादेवे २कपालयुक्ते त्रि० "कपालि वा स्यादथ चन्द्रशेखरम्" कुमा० स्त्रियां ङीप सा च ३दुर्गायाम्" हेम०। शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन्। ब्रह्महा द्वादशवर्षाणि मितभुक् शुद्धिमाप्नुयात्" याज्ञ० "तन्मालभ्भस्मकपाल्यवसत् पिशाचैः" भाग० ४,४,१७। ४जातिभेदे पुंस्त्री पराशरः। जातिशब्दे तज्जातिविवृतिः। स्त्रियां ङीप् "नटी कपालिनो वेश्या कुलटा नापिताङ्गना" तन्त्रे कुलनारीकीर्त्तने। कपालमस्त्यस्य भोजपात्रत्वेन ठन् कपालिक। कपालाधारेभोजिनि जातिभेदे च। तस्येदमण्। कापालिक तत्सम्बन्धिनि त्रि०कपालमोचनशब्दे उदा० "कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा। ज्ञानात् कृच्छ्राब्दमुद्दिष्टमज्ञानादैन्दवद्वयम्" प्रा०वि०आपस्त०।

कपि पु० कपि–इन् नलोपश्च। १वानरे अमरः। "नश्यन्ति ददर्श इन्दूनि कपीन्द्रः" भट्टिः। "कपितकपिकपोलक्रोडताम्रतमांसि" उद्भटः। "विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः। प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत्" मनुः "रामायणमिव कपिकथासमाकुलम्" काद०। २शिह्लके (शिलारस)। गन्धद्रव्यभेदे तस्य कपिजातत्वात्" भाव०प्र०कपिनामतोक्तेश्च तथात्वम्। ३नारायणे च। मेदि०। "कपिलः कपिरव्ययः" विष्णुस०। कं जलं रश्मिभिः पिबतीति कपिर्वराहो वा "कपिर्वराहः इति वचनात्" भा०। कादुदकात् भूमिं पाति उद्धरति पाक। ४वराहे। ५धात्रिकायां (आमला) शब्दमा०। ६करञ्जभेदे शब्दच०। कपिक्रोडवर्णत्वात् ७रक्तचन्दने। तद्वर्णे ८पिङ्गले च पु०। तद्वर्णवति त्रि०। कपेः शाखामृगत्वम् मांसगुणाश्च सुश्रुते दर्शिताः। "मद्गुमूषिकवृक्षशायिकावकुशपूतिघासशाखामृगप्रभृतयः पर्णमृगाः" "मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिणे हिताः। सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशना."

कपिकच्छू स्त्री कपीनामपि कच्छूः यस्याः५ब०।(आल्कुशी) कपिकण्डूहेतौ शूकशिम्ब्याम् अमरः। तद्गुणा भावप्र० उक्तायथा "कपिकच्छूर्भृशं वृष्या मधुरा बृंहणी गुरुः। तिक्ता वातहरी बल्या कफपित्तास्रनाशिनी। तद्बीजं वातशमनं स्मृतं वाजीकरं परम्"।

कपिकच्छुफलोपमा स्त्री कपिकच्छूफलस्य उपमा यत्र तस्य

फलत्वात्। जतुकालतयां राजनि० तस्याश्च तुल्यफलत्वात्तथात्वम्। [(आल्कुशी) शूकशिम्ब्याम् भरतः

कपिकच्छूरा स्त्री कपिभ्यः कच्छूं राति ददाति रा—क।

कपिकन्दुक न० अपि+कदि–उक अतोलोपः कस्य शिरसः पिकन्दुकम्। शिरोऽस्थ्नि शब्दच०।

कपिका स्त्री कपिरिवराट् इव कायति प्रकाशते तथात्वात् कै—क। नीलसिन्धुवारवृक्षे राजनि०।

कपिकेतन पु० कपिर्हनूमान् केतने यस्य। अर्ज्जुने कपिध्वजे "सान्त्वपूर्वमिदं वाक्यमब्रवीत् कपिकेतनः" भा० आश्व०८२। यथा च तस्य कपिकेतनता तथावर्णितं भा०व०१५१अ०। "एवमुक्तस्तु हनुमान् भीमसेनमभाषत। भ्रातृत्वात् सौहृदाच्चैव करिष्यामि प्रियं तव। चमूं विगाह्य शत्रूणां परशक्तिसमाकुलाम्। यदा सिंहरवं वीर! करिष्यसि महाबल!। तदाहं वृंहयिष्यामि स्वरवेण रवं तव। विजयस्य ध्वजस्थश्च नादान् मोक्ष्यामि दारुणान्। शत्रूणां ये प्राणहराः सुखं येन हनिष्यथ"। कपिध्वजादयोऽप्यत्र।

कपिकोलि पु० कपीनां प्रियः कोलिः। (शेयाकुल) कोलिभेदे रत्नमा०।

कपिचूड़ा स्त्री कपीनां चूड़ेव। आम्रातकवृक्षे राजनि०। तत्फलस्य कपिचूडातुल्यतया तथात्वम्। [स्त्रिका०

कपिचूत पु० कपीनां चूत इव प्रियत्वात्। आम्रातकवृक्षे

कपिज पु० कपितोजायते जन—ड। कपितैले तुरुष्के (शिलारस) राजनि०।

कपिजङ्घिका स्त्री कपेर्जङ्घेव जङ्घा यस्याः संज्ञायां कन्। तैलपिपीलिकायां (तेलोपोका) राजनि० तस्याः कपितदीयजङ्घातुल्यत्वात्तथात्वम्।

कपिञ्जल पुंस्त्री "कपिरिव जवते ईषत् पिङ्गलो वा कमनीयं शब्दं पिञ्जयतीति वा" निरुक्तोक्ता व्युत्पत्तिः पृषो०। १पक्षिभेदे चातके राजवल्ल० जलयाचनाय तस्य रम्यशब्दकरणात् तथात्वम्। २तित्तिरौ त्रिका०। तित्तिरिरिह श्वेत एव ग्राह्यः। "वर्त्तिकालाववर्तीर कपिञ्जलकतित्तिराः। कलिङ्गाः कुक्कुटाद्याश्च विष्किराः समुदाहृताः। विकीर्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किराः। कपिञ्जल इति प्राग्भैः कथितो गौरतित्तिरिः" भावप्र० उक्तेः अतएव 'वसन्ताय कपिञ्जलानालभेत ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीन्" यजु० ४,२० । कपिञ्जलतित्तिरीणां भेदेन निर्देशः "कपिञ्जलः कपोत उलूकः शशस्ते निर्ऋत्यै" यजु० २४,३८ तस्य चारत्यत्वात् तत्तद्देवतोद्देशेन उत्सर्ग एवालालभनम्। "कपिञ्जलादीनुत्सृजन्ति पर्य्यग्निकृतान्" कात्या० ४०,६,८ उक्तेः। कपिञ्जलमांसगुणाश्च भावप्र० उक्ताः कपिञ्जलादीन् विष्किरानुक्त्वा "विष्किराः मधुराः शीताः कषायाः कटुपाकिनः। बल्यावृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृताः"। कपिञ्जलशब्दस्यावर्णान्तत्वेन द्व्यच्त्वाज्भिन्नत्वेन च अवर्णशब्देन समासे न आद्युदात्तत्वम्। "अवर्णे चावर्णं द्व्यच् त्र्यच्" पा० सूत्रात्

कपिञ्जलन्याय पु० बहुत्वस्य त्रित्वपर्य्यवसायिताख्यापके न्यायभेदे स च न्यायो यथा "वसन्ताय कपिञ्जलानालभेतेति" श्रुत्या कपिञ्जलगतं बहुत्वं बोधितं तच्च विवक्षितं विधेयसंख्यात्वात् कपिञ्जलस्यान्यतोऽप्राप्तत्वात् विधेयत्वं बहुत्वं च त्रित्वमारभ्य परार्द्धपर्य्यन्तपर्य्यवसन्नमिलनव्यवसायेनाप्रवृत्त्या वेदाप्रामाण्यापत्तिरिति प्राप्तेराह "प्रथमोपस्थितेस्तन्त्रत्वात्" जै० सू०। त्रित्वोत्पत्त्यनन्तरं त्रित्वसहितैकत्वबुद्ध्या चतुष्टं जन्यते तत्र त्रित्वस्य प्रथमोपस्थितत्वात् वेदबोध्यबहुत्वस्य तत्रैव पर्य्यवसानाद्ध्यवसायः संख्यायाम् एकत्वस्येव बहुत्वसंख्यायायां त्रित्वस्यैव प्रथमोपस्थितत्वात्तत्रैव वेदतात्पर्य्यात्। अपेक्षाबुद्धिसहकृतैकत्वत्रयेण त्रित्वम् एवं तथाविधैकत्वचतुष्केण चतुष्टं जन्यते इति मते तु कारणीभूतापेक्षाबुद्धिविषयत्वेन प्रथमोपस्थितत्रित्वस्यैव वेदबोध्यता नातोऽप्रवृत्तिः अतएव वैया०भू० संख्यायाम् एकत्वसंख्याया एव ग्रहणे कपिञ्जलालम्भवाक्ये त्रित्वग्रहणं दृष्टान्तीकृतं यथा "अभेदैकत्वसंख्याया वृत्तौ भानमिति स्थितिः। कपिञ्जलालम्भवाक्ये त्रित्वं न्यायादपोह्यते"। "बहुत्वगणनायां त्रित्वस्यैव प्रथमोपस्थितत्वात् तद्रूपेणैव भानवदेकत्वस्य सर्वतः प्रथमोपस्थितत्वमस्तीति भावः"।

कपितैल न० कपिभिः शिलायादारणेन निष्पादितं तैलम्। सिह्लके तुरुष्के गन्धद्रव्यभेदे (शिलारस) "सिह्लकस्तु तुरुष्कः स्याद्यतोयवनदेशजः। कपितैलञ्च संख्यातं तथा च कपिनामकः" भावप्र०। तेन तुरुष्कस्य यवनदेशोद्भवशिलादलनेन कपिभिरुद्भावनात्तस्य तथात्वम्।

कपित्थ पु० कपिस्तिष्ठत्यत्र तत्फलप्रियत्वात् स्था—क पृषो०। (कएतवेल) वृक्षभेदे "विराहान्ते विराटान्ते कपित्थवद्रामनः" भाग०४,८,६७। अस्य गुणपर्य्यायादि भावप्र० उक्तं यथा। "कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः। कपिप्रियो दधिफलस्तथा दन्तशठोऽपि च। कपित्थमामं

सङ्ग्राहि कषायं लघु लेखनम्। पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित्। स्वादम्लन्तुवरङ्कण्ठशोधनं ग्राहि दुर्जरम्"। अपिच "कपित्थमामं कण्ठघ्नं विषदं ग्राहि वातलम्। मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्" सुश्रुते अम्लवर्गेऽयं पठितः अम्लशब्दे तद्वाक्यं दर्शितम्। हारीतेनास्य भक्षणं सर्वदा निषिद्धं यथा 'न वटप्लक्षोदुम्बरनीपदधित्थमातुलाङ्गानि भक्षयेत्। कपित्थोऽस्यत्र देशे पुष्करा० इनि कपित्थिनी स्त्री कपित्थयुक्तदेशे। तस्य सन्निकृष्टदेशादि काशा० इनि। कपित्थिन् तत्सन्निकृष्टदेशादौ त्रि०। [कटफले राजनि०

कपित्थत्वक् पु० कपित्थस्य त्वगिव त्वक् वल्कलमस्य। एलवालु-

कपित्थपर्णी स्त्री कपित्थस्य पर्णमिव पर्णमस्याः गौ० ङीष्। कपित्थतुल्यपत्रिकायां चित्रपत्रिकायां वृक्षभेदे रत्ना०।

कपित्थाष्टक न० चक्रदत्तोक्ते चूर्णभेदे। यथा "यमानीपिप्पलीमूलचतुर्जातकनागरैः। रोचनाग्निजलाजाजीधान्यसौवर्चलैः समैः। वृक्षाम्लधातकी कृष्णा बिल्वदाडिमतिन्दुकैः। त्रिगुणैः षड्गुणसितैः कपित्थाष्टगुणैः कृतः। चूर्णोऽतिसारग्रहणीक्षयगुल्मगलामयान्। कासं श्वासारुचिं हिक्कां कपित्थाष्टमिदं जयेत्" चक्रद०।

कपित्थास्य पुंस्त्री कपित्थमिवास्यं यस्य। गोलाङ्गूलाख्ये वानरभेदे त्रिका०। तस्य कपित्थाकारमुखत्वात्तथात्वम् जातित्वेऽपि संयोगोपधत्वात् स्त्रियां टाप्।

कपिनामन् पु० कपेर्नाम नाम यस्य। सिह्लके भावप्र०। कपितैलशब्दे तद्वाक्यं दृश्यम्।

कपिपिप्पली स्त्री कपिः कपिवर्णा रक्ता पिप्पलीव। १रक्तापामार्गे वैद्य०। २सूर्य्यावर्त्तवृक्षे रत्नमा०।

कपिप्रभा स्त्री कपावपि प्रभा स्वगुणप्रसारोऽस्याः। (आलकुशी) कपिकच्छ्वाम् शब्दरत्ना०। [२सुग्रीवे च

कपिप्रभु पु० ६त०। १रघुनाथे रामचन्द्रे शब्दरत्ना०।

कपिप्रिय पु० ६त०। १आम्रातकवृक्षे राजनि०। २कपित्थे भावप्र०। कपितैलशब्दे तद्वाक्यमुक्तम्।

कपिरथ पु० कपिर्हनुमान् रथ इव वाहनमस्य। १श्रीरामे शब्दरत्ना०। कपिर्हनुमानृरथोऽस्य। २अर्ज्जुने कपिकेतनशब्दे तन्नामताकारणं दर्शितम्।

कपिल पु० कब वर्णे इलच् बस्य पश्च, कपि+सिध्मा० लच् वा। सांख्यशास्त्रप्रवर्त्तके १मुनिभेदे कर्द्दमप्रजापतेर्देवहूतिगर्भजपुत्ररूपे २भगवदवतारभेदे। ३वह्नौ ४कुक्कुरे च हेम०। (शिलारस) ५सिह्लके रत्नमा०। ६पिङ्गलवर्णे। ७तद्वति त्रि० अमरः। नच वर्णः नीलपीतमिश्रितवर्ण इति रमसः रोचनाच्छविरित्यन्ये। साङ्ख्यमतञ्च द्विविधं सेश्वरनिरीश्वरभेदात् तत्र सेश्वरसांख्यशास्त्रं भगवदवतारः कपिलः प्रणीतवान्। निरीश्वरसांख्यन्तु अग्न्यवतारः कपिलः" "अग्निः स कपिलो नाम सांख्यशास्त्रप्रवर्त्तकः" इति स्मृतेः। तत्र निरीश्वरसांख्यप्रवृत्त्यादि यथा सां० का० उक्तं यथा "पुरुषार्थं ज्ञानमिदं गुह्यम्परमर्षिणा समाख्यातम्। स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम्। एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ। आसुरिरपि पञ्चशिखाय तेन बहुधा कृतन्तन्त्रम्। शिष्यपरम्परायातमीश्वरकृष्णेन चैतदार्य्याभिः। संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धान्तम्। सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य। आख्यायिकाविरहिताः परवादविवर्ज्जिताश्चापि" विवृतञ्चैतदस्माभिः सा० त० कौ० व्याख्योपक्रमे यथा

"अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इत्यादिकसूत्रजातात्मकं षडध्यायीरूपं शास्त्रम् कपिलमुनिः आसुरिनामानं मुनिमुपलक्षीकृत्य प्रणिनाय तेनापि ततः श्रुत्वा तदर्थानुगुणं संक्षिप्तपरं शास्त्रं स्वशिष्याय पञ्चशिखाय प्रदिष्टमेवं लोके प्रचारमुपगतेऽस्मिन् शास्त्रे ईश्वरकृष्णेन विहृदयै शाख्यायिकापरवादनिराकरणवर्जं षष्टिपदार्थप्रतिपादनाय द्वासप्ततिरार्य्याः निर्म्मिताः। एतच्छास्त्रस्य तु "सङ्ख्यां प्रकुर्व्वते यस्मात् प्रकृतिं च प्रचक्षते। तत्त्वानि च चतुर्व्विंशत् तेन साङ्ख्यं प्रकीर्त्तितम्" इति महाभारतवाक्यानुसारेण प्रकृतिपुरुषसम्यग्विवेकज्ञानरूपसङ्ख्यायाः, प्रकृत्यादिचतुर्विंशतितत्त्वसङ्ख्यायाश्च प्रतिपादनात् साङ्ख्यशब्दाभिधेयता। तदिदं शास्त्रं चिकित्साशास्त्रमिव चतुर्व्यूहम् यथा रोगः रोगनिदानं रोगनिवृत्त्युपायः रोगनिवृत्तिरित्येते पदार्थाः चिकित्साशास्त्रगताः एवं हेयं दुःखं, तन्निदानं चित्तादि, तन्निवृत्त्युपायो विवेकसाक्षात्कारः, दुःखनिवृत्तिश्चेत्येते पदार्थाः अत्र शास्त्रे प्राधान्येनोपदिष्टाः प्रसङ्गागतास्त्वन्ये। प्रकृतेः साम्यावस्थापन्नगुणत्रयात्मिकायाः सर्गभेदेऽप्येकत्वं, स्वर्गापवर्गरूपप्रयोजनवत्त्वम्, परार्थतया प्रवृत्तिमत्त्वञ्च, असङ्गस्य चेतनस्य पुरुषस्य प्रकृतिकार्य्येभ्यो भेदः, अकर्तृत्वं जन्ममरणादिव्यवस्थान्यथानुपपत्त्या बहुत्वञ्च, प्रकृतेः पुरुषस्य चोभयोः अस्तित्वं, संयोगः, वियोगश्च स्थूलसूक्ष्मभूतानां स्थितिरित्येते दश पदार्थाः मौलिकाः। तथा अविद्या-

ऽस्मितारागद्वेषाभिनिवेशात्मकाः पञ्च विपर्य्ययाः इन्द्रियादीनां स्वस्वव्यापारेऽसामार्थ्यम् "बाधिर्य्यं कुष्ठितान्धत्वं जड़ताऽजिघ्रता तथा। मूकता कौण्यपङ्गुत्वं क्लैव्योदावर्त्तमन्दता"। इत्येकादशविधम्, नवधा तुष्टयोऽष्टधा सिद्धयः तासां विपर्य्ययः सप्तदशधा इत्येवमष्टाविंशतिः नवधा तुष्टयोऽष्टौ सिद्धयइत्येवं षष्टिः पदार्थाः "प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता। पारार्थ्यञ्च तथानैक्यं वियोगो योग एव च। शेषवृत्तिरकर्तृत्वं मौलिकार्थाः स्मृता दश। विपर्य्ययः पञ्चविधस्तथोक्ता नवतुष्टयः। करणानामसामर्थ्यमष्टाविंशतिधा मतम्। इति षष्टिः पदार्थानामष्टाभिः सिद्धिभिः सह"। इति राजवार्त्तिकोक्ता उपदिष्टाः। प्रकृतिपुरुषविवेकोपदेशाय प्रवृत्तं शास्त्रं प्रथमं चेतनाचेतनत्वेन पदार्थद्वैविध्यं सूचयाम्बभूव। तत्र चेतनाः पुरुषा जन्मादिव्यवस्थान्यथानुपपत्तेर्बहवः। प्रकृत्यादयः चतुर्विंशतिः पदार्थाः संहतपरार्थाः अचेतनाश्च। अचेतनाअपि प्रकृत्यादयः पुरुषस्य भोगापवर्गार्थं वत्सवृद्ध्यर्थं क्षीरमिव प्रवर्त्तन्ते। तत्प्रवृत्तौ च अनाद्यविद्या मिथ्याज्ञानजन्यवासनासहकृता पुरुषेण संयोगं सम्पादयन्ती हेतुः। पुरुषसंयुक्ता च साम्यावस्थापन्नगुणत्रयात्मिका प्रकृतिः महत्तत्त्वाकारेण परिणमते इदमित्थमेवेतिनिश्चयात्मकवृत्तिविशिष्टमन्तःकरणमेव महत्तत्त्वसंज्ञकम्। तच्च पुनः इदं मम अनेनाहं कार्य्यं निष्पादयामीत्येवमहङ्कारात्मकवृत्तिविशिष्टान्तःकरणरूपाऽहङ्काराकारेण परिणमते। सोऽपि सूक्ष्मभूतरूपशब्द तन्मात्रस्पर्शतन्मात्ररूपतन्मात्ररसतन्मात्रगन्धतन्मात्राकारेण परिणमते। तानि च श्रोत्रत्वङ्नयनरसनाजिह्वाख्य-पञ्चज्ञानेन्द्रिय-वाक्पाणिपादपायूपस्थाख्य-पञ्चकर्म्मेन्द्रिय-सङ्कल्पविकल्पात्मकवृत्तिकमनोरूपेण, आकाशवायुज्वलनजलभूमिरूपमहाभूताकारेण च परिणमन्ते। तएते चतुर्विंशतिः पदार्थाः "प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात् पञ्च तन्मात्राणि, तन्मात्रेभ्य एकादशेन्द्रियाणि पञ्च भूतानि चेति" सूत्रोपदिष्टाः। तेभ्य एव च भौतिकब्रह्माण्डचतुर्विधप्राणिदेहादीनामुत्पत्तिः। प्रकृतिश्चैवं भूयोभूयः स्वव्यापारानुपभाय दर्शयित्वा भूयोभूयो भुज्यमानेषु तेषु क्रमशः पुरुषस्य वैराग्यमुत्पाद्य आत्मात्मकार्य्येभ्यः पुरुषस्य विवेकज्ञानं साधयित्वा च दृष्टात्मविवेकं पुरुषं प्रति स्वव्यापारदर्शवेन कृतकृतार्थतया निवर्त्तते। तन्निवृत्तौ च तत्कार्य्यसकलपदार्थव्यापारनिवृत्तिरित्यतः सकार्य्यप्रकृति वृत्तिनिवारणाय प्रयत्नः कार्य्यः। तन्निवृत्तिश्च विवेकज्ञानसाध्या इतेयवं विवेकसाधनायेदं शास्त्रं प्रवृत्तम्। विवेकश्च यत् वस्तु यथास्थितम् तत्तथारूपेण ज्ञानम् तत्र पुरुषस्य निःसङ्गतया क्रियाशून्यतया चापरिणामित्वेन कर्तृत्वाभावात् प्रकृतिकार्य्यबुद्धिरेव कर्त्री कृतिसमानाधिकरण्येनैव तत्फलस्य सुखदुःखादेः तन्निष्ठतैव। पुरुषे तु प्रधानकार्य्यबुद्धेश्चिदात्मनि प्रतिबिम्बात् दुःखादेरपि पुरुषे प्रतिबिम्बनं तेन च पुरुष उपतप्यते, बुद्धेर्दुःखनिवृत्तौ च नैव तस्योपताप इत्यतः प्रतिबिम्बरूपदुःखभोक्तृत्वेन आत्मानं जानन् पुरुष उपतप्यमान इव भवति। ततश्च प्रकृतेर्भिन्नतया तत्कार्य्यसुखादिशून्यतया ज्ञातः पुरुषः प्रतिबिम्बाकारैः दुःखैर्न संबध्यते इत्येवं प्रकृत्यादीनां चतुर्विंशतितत्त्वानां पुरुषस्य च असाधारणधर्म्मविशेषकथनद्वारा तयोर्विवेकज्ञानोपयोग्युपदेशायैवेदम् शास्त्रं प्रवृत्तम् यथा च तयोर्विवेकस्तथा शास्त्रे तन्मूलके द्वासप्ततिकारिकात्मके प्रबन्धे च आख्यायिकापरवादनिराकरणवर्जमीश्वरकृष्णेन दर्शितम्"। तत्र सांख्यमतं सर्वदर्शनसंग्रहे इत्यं समग्राहि

"सङ्क्षेपेण हि साङ्ख्यशास्त्रे चतस्रो विधाः सम्भाव्यन्ते कश्चिदर्थः प्रकृतिरेव, कश्चिद्विकृतिरेव, कश्चिद्विकृतिः प्रकृतिश्च, कश्चिदनुभय इति। तत्र केवला प्रकृतिः प्रधानपदेन वेदनीया मूलप्रकृतिः नासावन्यस्य कस्याश्चिद्विकृतिः, प्रकरोतीति प्रकृतिरिति व्युत्पत्त्या सत्त्वरजस्तमोगुणानां साम्यावस्थाया अभिधानात् तदुक्तं "मूलप्रकृतिरविकृतिरिति"। मूलञ्चासौ प्रकृतिश्च मूलप्रकृतिः महदादेः कार्य्यकलापस्यासौ मूलं न तस्य प्रधानस्य मूलान्तरमस्ति अनवस्थापातात्। न च वीजाङ्कुरवदनवस्थादोषो न भवतीति वाच्यं प्रमाणाभावादिति भावः। विकृतयश्च प्रकृतयश्च महदहङ्कारतन्मात्राणि। तदप्युक्तं "महदाद्याः प्रकृतिविकृतयः सप्तेति" अस्यार्थः प्रकृतयश्च ताः विकृतयश्चेति प्रकृतिविकृतयः सप्त महादादीनि तत्त्वानि तत्रान्तःकरणादिपदवेदनीयं महत्तत्त्वमहङ्कारस्य प्रकृतिः मूलप्रकृतेस्तु विकृतिः। एवमहङ्कारतत्त्वमभिमानापरनामधेयं महतो विकृतिः प्रकृतिश्च पञ्चतन्मात्रादीनाम् तत्राहङ्कारतत्त्वं तामसं सत् पञ्चतन्मात्राणां सूक्ष्माभिधानां प्रकृतिः, तदेव सात्त्विकं सत्प्रकृतिरेकादशेन्द्रियाणां बुद्धीन्द्रियाणां चक्षुःश्रोत्रघ्राणरसनात्वगाख्यानां, कर्म्मेन्द्रियाणां वाक्पाणिपादपायूपस्थाख्यानामुभयात्मकस्य मनसश्च। रजसस्तूभयत्र क्रियोत्पादनद्वारेण कारणत्वमस्तीति न वैयर्थ्यम्। तदुक्तमीश्वरकृष्णेन "अभिमानोऽ-

हङ्कारस्तस्माद्द्विविधः प्रवर्त्तते सर्गः । एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव । सात्त्विकएकादशकः प्रवर्त्तते वैकृतादहङ्कारात् । भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् । बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थानि कर्म्मेन्द्रियाण्याहुः । उभयात्मकमत्र मनः सङ्कल्पविकल्पात्मकमिन्द्रियञ्च साधर्म्यादिति" ।

विवृतञ्च तत्त्वकौमुद्यामाचार्य्यवाचस्पतिभिः । केवला विकृतिस्तु वियदादीनि पञ्च भूतानि एकादशेन्द्रियाणि च तदुक्तं "षोड़शकस्तु विकारः" इति षोड़शसङ्ख्यावच्छिन्नो गणः षोड़शको विकार एव न प्रकृतिरित्यर्थः यद्यपि पृथिव्यादयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः तत्त्वान्तरोपादानत्वं चेह प्रकृतित्वमभिमतं गोघटादीनां स्थूलत्वेन्द्रियग्राह्यत्वयोः समानत्वेन तत्त्वान्तरत्वाभावात् । तत्र शब्दस्पर्शरूपरसगन्धतन्मात्रेभ्यः पूर्व्वपूर्व्वसूक्ष्मभूतसहितेभ्यः पञ्च भूतानि वियदादीनि क्रमेणैकद्वित्रिचतुःपञ्चगुणानि जायन्ते । इन्द्रियसृष्टिस्तु प्रागेवोक्ता । तदुक्तम् "प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः । तस्मादपि षोड़शकात् पञ्चभ्यः पञ्च भूतानीति" । अनुभयात्मकः पुरुषः तदुक्तं "न प्रकृतिर्न विकृतिः पुरुष" इति । पुरुषस्तु कूटस्थनित्योऽपरिणामी न कस्यचित् प्रकृतिर्नापि विकृतिः कस्यचिदित्यर्थः । एतत्पञ्चविंशतितत्त्वसाधकत्वेन प्रमाणत्रयमभिमतं तदप्युक्तं "दृष्टमनुमानमाप्तवचनञ्च सर्व्वप्रमाणसिद्धत्वात् । त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धीति" । इह कार्य्यकारणभावे चतुर्द्धा विप्रतिपत्तिः प्रसरति । असतः सज्जायत इति सौगताः सङ्गिरन्ते । नैयायिकादयः सतोऽसज्जायत इति । वेदान्तिनः सतो विवर्त्तः कार्य्यजातं न वस्तुसदिति । सांख्याः पुनः सतः सज्जायत इति । तत्रासतः सज्जायत इति न प्रामाणिकः पक्षः असतो निरुपाख्यस्य शशविषाणवत्कारणत्वानुपपत्तेः तुच्छातुच्छयोस्तादात्म्यानुपपत्तेश्च । नापि सतोऽसज्जायते कारकव्यापारात् प्रागसतः शशविषाणस्येव सत्तासम्बन्धलक्षणोत्पत्त्यनुपपत्तेः नहि नीलं निपुणतमेनापि पीतं कर्त्तुं पार्य्यते । ननु सत्त्वासत्त्वे घटस्य धर्म्माविति चेत्तदचारु असति, धर्म्मिणि तद्धर्म्म इति व्यपदेशानुपपत्त्या धर्म्मिणः सत्त्वापत्तेः । तस्मात् कारकव्यापारात् प्रागपि कार्य्यं सदेव, सतश्चाभिव्यक्तिरुपपद्यते यथा पीड़नेन तिलेषु तैलस्य दोहेन सौरभेयीषु पयसः । असतः करणे शिलापि निदर्शनं न दृश्यते । किञ्च कार्य्येण सम्बद्धं कारणं तज्जनकम् असम्बद्धं वा प्रथमे कार्य्यस्य सत्त्वमायातं सतोरेव सम्बन्ध इति नियमात् चरमे सर्वं कार्य्यजातं सर्वस्माज्जायेत असम्बद्धत्वाविशेषात् । तदप्युक्तमपि साङ्ख्याचार्य्यैः "असत्त्वान्नास्ति सम्बन्धः कारणैः सत्त्वसङ्गिभिः । असम्बद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिरिति" । अथैवं मन्येथा असम्बद्धमपि तत् तदेव जनयति यत्र यच्छक्तं शक्तिश्च कार्य्यदर्शनोन्नेयेति तन्न सङ्गच्छते तिलेषु तैलजननशक्तिरित्यत्र तैलस्यासत्त्वे सम्बद्धत्वासम्बद्धत्वविकल्पेन तच्छक्तिरिति निरूपणायोगात् । कार्य्यकारणयोरभेदाच्च कार्य्यस्य सत्त्वं कारणात् पृथक् न भवति पटस्तन्तुभ्यो न भिद्यते तद्धर्म्मत्वात् यदेवं न तदेवं यथा गौरश्वः, तद्धर्म्मश्च पटस्तस्मान्नार्थान्तरम् । तर्हि प्रत्येकं त एव प्रावरणकार्य्यं कुर्य्युरिति चेत् संस्थानभेदेनाविर्भूतपटभावानां प्रावरणार्थक्रियाकारित्वोपपत्तेः यथा हि कूर्म्मस्याङ्गानि कूर्म्मशरीरे निविशमानानि तिरोभवन्ति निःसरन्ति चाविर्भवन्ति एवं कारणस्य तन्त्वादेः पटादयो विशेषा निःसरन्त आविर्भवन्त उत्पद्यन्त इत्युच्यन्ते निविशमानास्तिरोभवन्तो विनश्यन्तीत्युच्यन्ते न पुनरसतामुत्पत्तिः सतां वा विनाशः । यथोक्तं भगवद्गीतायाम् "नासतो विद्यते भावो नाभावो विद्यते सतः" इति । ततश्च कार्य्यानुमानात् तत्प्रधानसिद्धिः । तदुक्तम् "असदकरणादुपादानग्रहणात् सर्व्वसम्भवाभावात् । शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्य्यमिति" । नापि सतो ब्रह्मतत्त्वस्य विवर्त्तः प्रपञ्चः बाधानुपलम्भात् अधिष्ठानारोप्ययोश्चिज्जडयोः कलधौतशुक्त्यादिवत् सारूप्याभावेनारोपासम्भवाच्च । तस्मात् सुखदुःखमोहात्मकस्य तथाविधकारणमवधारणीयं तथा च प्रयोगः विमतं भावजातं सुखदुःखमोहात्मककारणकं तदन्वितत्वात् यद्येनान्वीयते तत्तत्कारणकं यथा रुचकादिकं सुवर्णान्वितं सुवर्णकारणकं तथाचेदं तस्मात्तथेति । तत्र जगत्कारणे येयं सुखात्मकता तत् सत्त्वं, या दुःखात्मकता तद्रजः, या च मोहात्मकता तत्तम इति त्रिगुणात्मककारणसिद्धिः तथा हि प्रत्येकं भावास्त्रैगुण्यवन्तोऽनुभूयन्ते यथा मैत्रदारेषु सत्यवत्यां मैत्रस्य सुखमाविरस्ति तं प्रति सत्त्वगुणप्रादुर्भावात् तत्सपत्नीनां दुःखम् ताः प्रति रजोगुणप्रादुर्भावात् । तामलभमानस्य चैत्रस्य मोहो भवति तं प्रति तमोगुणसमुद्भवात् । एवमन्यदपि घटादिकं लभ्यमानं सुखाकरोति परैरपि ह्रियमाणं दुःखाकरोति उदासीनस्योपेक्षाविषयत्वेनोपतिष्ठते उपेक्षाविषयत्वं नाम मोहः इह-चैविक्ते इत्य-

स्वाद्वातो मोहयत्त्वनिष्पत्तेः उपेक्षणीयेषु चित्तवृत्त्यनुदयात्। तस्मात् सर्वं भावजातं सुखदुःखमोहात्मकं त्रिगुणप्रधानकारणकमवगम्यते। तथाच श्वेताश्वतरोपनिषदि श्रूयते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजा जनयन्तीं सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति। अत्र लोहितशुक्लकृष्णशब्दा रञ्जकत्वप्रकाशकत्वावरकत्वसाधर्म्यात् रजःसत्त्वतमोगुणत्वप्रतिपादनपराः।

नन्वचेतनं प्रधानं चेतनानधिष्ठितं महदादिकार्य्ये न व्याप्रियते अतः केनचिच्चेतनेनाधिष्ठात्रा भवितव्यं तथाच सर्व्वार्थदर्शी परमेश्वरः स्वीकर्त्तव्यः स्यादिति चेत् तदसङ्गतम् अचेतनस्यापि प्रधानस्य प्रयोजनवशेन प्रवृत्त्युपपत्तेः दृष्टञ्च अचेतनं चेतनानधिष्ठितं पुरुषार्थाय प्रवर्त्तमानं यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्त्तते यथा जलमचेतनं लोकोपकाराय प्रवर्त्तते तथा प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवर्त्स्यति। तदुक्तम् "वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्येति"। यस्तु परमेश्वरः करुणया प्रवर्त्तक इति परमेश्वरास्तित्ववादिनां डिण्डिमः स प्रायेण गतः विकल्पानुपपत्तेः स किं सृष्टेः प्राक् प्रवर्त्तते सृष्ट्युत्तरकालं वा आद्ये शरीराद्यभावेन दुःखानुत्पत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः, द्वितीये परस्पराश्रयप्रसङ्गः करुणया सृष्टिः सृष्ट्या च कारुण्यमिति। तस्मादचेतनस्यापि चेतनानधिष्ठितस्य प्रधानस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तः प्रधानपुरुषसंयोगनिमित्तः। यथा निर्व्यापारस्याप्ययस्कान्तस्य सन्निधानेन लोहस्य व्यापारः तथा निर्व्यापारस्य पुरुषस्य सन्निधानेन प्रधानव्यापारो युज्यते। प्रकृतिपुरुषसम्बन्धश्च पङ्ग्वन्धवत्परस्परापेक्षानिबन्धनः। प्रकृतिर्हि भोग्यतया भोक्तारं पुरुषमपेक्षते पुरुषोऽपि भेदाग्रहाद्बुद्धिच्छायापत्त्या तद्गतं दुःखत्रयं वारयमाणः कैवल्यमपेक्षते। तत्प्रकृतिपुरुषविवेकनिबन्धनम्। न च तदन्तरेण युक्तमिति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। यथा खलु कौचित् पङ्ग्वन्धौ पथि सार्थेन गच्छन्तौ दैवकृतादुपप्लवात् परित्यक्तसार्थौ मन्दमन्दमितस्ततः परिभ्रमन्तौ भयाकुलौ दैववशात् संयोगमुपगच्छेतां तत्र चान्धेन पङ्गुः स्कन्धमारोपितः ततः पङ्गुदर्शितेन मार्गेणान्धः समीहितं स्थानं प्राप्नोति पङ्गुरपि स्कन्धाधिरूढः। तथा परस्परापेक्षप्रधानपुरुषनिबन्धनः सर्गः। यथोक्तम् "पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि सम्बन्धस्तत्कृतः सर्गः" इति। ननु पुरुषार्थनिबन्धना भवतु प्रकृतेः प्रवृत्तिः निवृत्तिस्तु कथमुपपद्यते? इति चेदुच्यते यथा भर्त्रा दृष्टदोषा स्वैरिणी भर्त्तारं पुनर्नोपैति यथा वा कृतप्रयोजना नर्त्तकी निवर्त्तते तथा प्रकृतिरपि। यथोक्तम् "रङ्गस्य दर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात्। पुरुषस्य तथात्मानं प्रकाश्य विनिवर्त्तते प्रकृतिरिति"। एतदर्थं निरीश्वरसाङ्ख्यशास्त्रप्रवर्त्तककपिलानुसारिणां मतमुपन्यस्तम्"।

तत्र मूलीभूतमादिमं तत्त्वसमासाख्यसूत्रं तदुक्तार्थप्रवचनात् षडध्याय्याः सांख्यप्रवचनसंज्ञेति यथोक्तं तद्भाष्ये "नन्वेवमपि तत्त्वसमासाख्यसूत्रैः सहास्याः षडध्याय्याः पौनरुक्त्यमिति चेत् नैवम् संक्षेपविस्तररूपेणोभयोरप्यपौनरुक्त्यात् अतएवाऽस्याः षडध्याय्याः योगदर्शनस्येव साङ्ख्यप्रवचनसंज्ञा युक्ता। तत्त्वसमासाख्यं हि यत् सङ्क्षिप्तं साङ्ख्यदर्शनं तस्यैव प्रकर्षेणास्यां निर्वचनमिति, विशेषस्त्वयं यत् षडध्याय्यां तत्त्वसमासाख्योक्तार्थविस्तरमात्रं योगदर्शने त्वभ्युपगमवादप्रतिषिद्धस्यैवेश्वरस्य निरूपणेन न्यूनतापरिहारोऽपीति" षडध्याय्यां च क्रमेणैतेऽर्था यथा "हेयहाने तयोर्हेतू व्यूहा एते यथाक्रमम्। चत्वारः शास्त्रमुख्यार्थाः आद्याध्याये प्रपञ्चिताः। संक्षिप्तसांख्यसूत्राणामर्थस्यात्र प्रपञ्चनात्। शास्त्रं योगवदेवैतत् सांख्यप्रवचनाभिधम्"१ लिङ्गदेहस्य घटकं यत् सप्तदशसंख्यकम्। प्रधानकार्य्यं तत्सूक्ष्मं द्वितीयाध्यायगामि च २। अत्यन्तस्यपर्य्यन्तः कार्य्योऽव्यक्तस्य भात्मनः। तृतीयोक्तोविवेकोऽत्र परवैराग्यसाधनम् ३। अध्यायत्रितयोक्तस्य विवेकस्यान्तरङ्गकम्। आख्यायिकाभिः संप्रोक्तं तुर्य्येऽध्याये समासतः ४। स्वसिद्धान्तविरुद्धार्थवादिनो ये कुवादिनः। पञ्चमे तान् निराकृत्य स्वसिद्धान्तो दृढीकृतः ५। शास्त्रमुख्यार्थविस्तारस्तन्त्राख्योऽनुक्तपूरणैः। षष्ठाध्याये कृतः पश्चादुक्तार्थस्योपसंहृतः।

सेश्वरसांख्यतन्तु पातञ्जलमतत्वेन प्रसिद्धम् तन्मतञ्च पतञ्जलिशब्दे दर्शयिष्यते। तदेव मतं कर्दमप्रजापतेर्देवहूतावाविर्भूय भगवदवतारकपिलः मातरमुपदिदेश तच्च भाग० ३,२५,२९अध्यायेषु वर्णितम् यथा। "अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक्। यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः। ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम्। यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम्। अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः

परः । प्रत्यग्धाम स्वयं ज्योतिर्विश्वं येन समन्वितम् । स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः । यदृच्छयैवोपगतामभ्यपद्यत लीलया । गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः । विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया । एवं पराभिध्यानेन कर्त्तृत्वं प्रकृतेः पुमान् । कर्म्मसु क्रियमाणेषु गुणैरात्मनि मन्यते । तदस्य संसृतिर्बन्धः पारतन्त्र्यञ्च तत्कृतम् । भवत्यकर्त्तुरीशस्य साक्षिणो निर्वृतात्मनः । कार्य्यकारणकर्त्तृत्वे कारणं प्रकृतिं विदुः । भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परम् । देवहूतिरुवाच । प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ! । ब्रूहि कारणयोरस्य सदसच्च यदात्मकम् । भगवानुवाच । यत्तत् त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् । प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् । पञ्चभिः पञ्चभिः ब्रह्म चतुर्भिर्दशभिस्तथा । एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः । महाभूतानि पञ्चैव भूरापोऽग्निर्म्मरुन्नभः । तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे । इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः । वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते । मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् । चतुर्द्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया । एतावानेव संख्यातो ब्रह्मणः सगुणस्य च । सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः । प्रभावं पौरुषं प्राहुः कालमेके यतोभयम् । अहङ्कारविमूढस्य कर्त्तुः प्रकृतिमीयुषः । प्रकृतेर्गुणसाम्यस्य निर्व्विशेषस्य मानवि ! । चेष्टा यतः स भगवान् काल इत्युपलक्षितः । अन्तः पुरुषरूपेण कालरूपेण योबहिः । समन्वेत्येष सत्त्वानां भगवानात्ममायया । दैवात् क्षुभितधर्म्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्य्यं साऽसूत महत्तत्त्वं हिरण्मयम् । विश्वमात्मगतं व्यञ्जन् कूटस्थोजगदङ्कुरः । स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः । यत्तत् सत्त्वगुणं स्वच्छं शान्तं भगवतः पदम् । तदाहुर्व्वासुदेवाख्यं चित्तं तन्महदात्मकम् । स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथा पां प्रकृतिः परा । महत्तत्त्वाद्विकुर्व्वाणाद्भगवद्वीर्य्यसम्भवात् । क्रियाशक्तिरहङ्कारस्त्रिविधः समपद्यत । वैकारिकस्तैजसश्च तामसश्च यतोभवः । मनसश्चेन्द्रियाणाञ्च भूतानां महतामपि । सहस्रशिरसं साक्षात् यमनन्तं प्रचक्षते । सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् । कर्त्तृत्वं करणत्वञ्च कार्य्यत्वञ्चेति लक्षणम् । शान्तघोरविमूढत्वमिति वा स्यादहङ्कृतेः । वैकारिकाद्विकुर्व्वाणान्मनस्तत्त्वमजायत । यत्संकल्पविकल्पाभ्यां वर्त्तते कामसम्भवः । यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरम् । शारदेन्दीवरश्यामं संराध्यं योगिभिः शनैः । तैजसात्तु विकुर्व्वाणाद्बुद्धितत्त्वमभूत् सति ! । द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः । संशयोऽथ विपर्य्यासोनिश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् । तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः । प्राणस्य हि क्रियाशक्तिर्बुद्धेर्व्विज्ञानशक्तिता । तामसाच्च विकुर्व्वाणाद्भगवद्वीर्य्यचोदितात् । शब्दमात्रमभूत्तस्मान्नभः श्रोत्रन्तु शब्दगम् । अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च । तन्मात्रत्वञ्च नभसोलक्षणं कवयोविदुः । भूतानां छिद्रदातृत्वं बहिरन्तरमेव च । प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम् । नभसः शब्दतन्मात्रात् कालगत्या विकुर्व्वतः । स्पर्शोऽभवत्ततोवायुस्त्वक् च स्पर्शस्य संग्रहः । मृदुत्वं कठिनत्वञ्च शैत्यमुष्णत्वमेव च । एतत् स्पर्शस्य स्पर्शत्वं तन्मात्रत्वञ्च नभस्वतः । चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः । सर्व्वेन्द्रियाणामात्मत्वं वायोः कर्म्माभिलक्षणम् । वायोश्च स्पर्शतन्मात्रात् रूपं दैवेरिताद्भूत् । समुत्थितं ततस्तेजश्चक्षूरूपोपलम्भनम् । द्रव्याकृतित्वं गुणता व्यक्तिसंस्थत्वमेव च । तेजस्त्वं तेजसः साध्वि ! रूपमात्रस्य वृत्तयः । द्योतनं पचनं पानमदनं हिममर्द्दनम् । तेजसोवृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च । रूपमात्राद्विकुर्व्वाणात्तेजसो दैवनोदितात् । रसमात्रमभूत्तस्मादम्भोजिह्वा रसग्रहः । कषायोमधुरस्तिक्तः कट्वम्ल इति नैकधा । भौतिकानां विकारेण रसएकोविभिद्यते । क्लेदनं पिण्डनं तृप्तिः प्राणनाप्यायनोदनम् । तापापनोदो भूयस्त्वमम्भसो वृत्तयस्त्विमाः । रसमात्राद्विकुर्व्वाणादम्भसो दैवनोदितात् । गन्धमात्रमभूत्तस्मात् पृथ्वी घ्राणस्तु गन्धगः । करम्भपूतिसौरभ्यशान्तोग्राम्लादिभिः पृथक् । द्रव्यावयववैषम्याद्गन्ध एकोविभिद्यते । भावनं ब्रह्मणःस्थानं धारणं सद्विशेषणम् । सर्व्वसत्त्वगुणोद्भेदः पृथिवीवृत्तिलक्षणम् । नभोगुणविशेषोऽर्थो यस्य तत् श्रोत्रमुच्यते । वायोर्गुणविशेषोऽर्थो यस्य तत् स्पर्शनं विदुः । तेजोगुणविशेषोऽर्थो यस्य तच्चक्षुरुच्यते । अम्भोगुणविशेषोऽर्थो यस्य तद्रसनं विदुः । भूमेर्गुणविशेषोऽर्थो यस्य घ्राणः स उच्यते । परस्य दृश्यते धर्म्मोह्यपरस्मिन् समन्वयात् । अतोविशेषो भावानां भूमा-

येनोपलभ्यते । एतान्यसंहत्य यदा महदादीनि सप्त वै । कालकर्म्मगुणोपेतो जगदादिरुपाविशत् । ततस्तेनानुविद्धेभ्यो युक्तेभ्योऽण्डमचेतनम् । उत्थितं पुरुषो यस्मात् उदतिष्ठदसौ विराट् । एतदण्डं विशेषाख्यं क्रमवृद्धैर्यथोत्तरैः । तोयादिभिः परिवृतं प्रधानेनावृतं बहिः । यत्र लोकवितानोऽयं रूपं भगवतो हरेः । हिरण्मयादण्डकोषादुत्थाय सलिलेशयात् । तमाविश्य महादेवो बहुधा निर्बिभेद खम् । निरभिद्यतास्य प्रथमं मुखं वाणी ततोऽभवत् । वाण्यावह्निरथो नासे प्राणतो घ्राण एतयोः । घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः । तस्मात् सूर्य्योऽन्वभिद्येतां कर्णौ श्रोत्रं ततो दिशः । निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः । ततओषधयश्चासन् शिश्नं निर्बिभिदे ततः । रेतस्तस्मादाप आसन्निरभिद्यत वै गुदम् । गुदादपानोऽपानाच्च मृत्युर्लोकभयङ्करः । हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् । पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः । नाड्योऽस्य निरभिद्यन्त ताभ्यो लोहितमाभृतम् । नद्यस्ततः समभवन्नुदरं समभिद्यत । क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् । अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् । मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः । अहङ्कारस्ततो रुद्रः चित्तं चैत्यस्ततोऽभवत् । एते ह्यभ्युत्थिता देवा नैवास्योत्थापनेऽशकन् । पुनराविविशुः खानि तमुत्थापयितुं क्रमात् । वह्निर्वाचा मुखं भेजे नोदतिष्ठत्ततो विराट् । घ्राणेन नासिके वायुर्नोदतिष्ठत्ततो विराट् । अक्षिणी चक्षुरादित्यो नोदतिष्ठत्ततो विराट् । हस्ताविन्द्रो बलेनैव नोदतिष्ठत्ततो विराट् । विष्णुर्गत्यैव चरणौ नोदतिष्ठत्ततो विराट् । नाडीर्नद्यो लोहितेन नोदतिष्ठत्ततो विराट् । क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्ततो विराट् । बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्ततो विराट् । श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्ततो विराट् । त्वचं रोमभिरोषध्यो नोदतिष्ठत्ततो विराट् । रेतसा शिश्नमापस्तु नोदतिष्ठत्ततो विराट् । गुदं मृत्युरपानेन नोदतिष्ठत्ततो विराट् । रुद्रोऽभिमत्या हृदयं नोदतिष्ठत्ततो विराट् । चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत । यथा प्रसुप्तं हृदयं प्राणेन्द्रियमनोधियः । प्रभवन्ति विना येन नोत्थापयितुमोजसा । तमस्मिन् प्रत्यगात्मानं धिया योगप्रवृत्तया । भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्”

इति भागवते तृतीयस्कन्धे षड्विंशाध्याये कपिलवचः । “प्रकृतिस्थोऽपि पुरुषो नाज्यते प्राकृतैर्गुणैः । अविकारादकर्त्तृत्वान्निर्गुणत्वाज्जलार्कवत् । स एष यर्हि प्रकृतेर्गुणेष्वपि विषज्जते । अहङ्क्रियाविमूढात्मा कर्त्तास्मीत्यभिमन्यते । तेन संसारपदवीमवशोऽभ्येत्य निर्वृतः । प्रासङ्गिकैः कर्म्मदोषैः सदसन्मिश्रयोनिषु । अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्त्तते । ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा । अतएव शनैश्चित्तं प्रसक्तमसतां पथि । भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशम् । यमादिभिर्योगपथैरभ्यसन् श्रद्धयान्वितः । मयि भावेन सत्येन मत्कथाश्रवणेन च । सर्व्वभूतसमत्वेन निर्वैरेणाऽप्रसङ्गतः । ब्रह्मचर्य्येण मौनेन स्वधर्म्मेण बलीयसा । यदृच्छयोपलब्धेन सन्तुष्टो मितभुङ्मुनिः । विविक्तशरणः शान्तो मैत्रः करुण आत्मवान् । सानुबन्धे च देहेऽस्मिन् न कुर्व्वन्नसदाग्रहम् । ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च । निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः । उपलभ्यात्मनात्मानं चक्षुरेवार्कमात्मदृक् । मुक्तलिङ्गं सदाभासमसति प्रतिपद्यते । सतो बन्धुमसच्चक्षुः सर्व्वानुस्यूतमद्वयम् । यथा जलस्थ आभासः स्थलस्थेनावदृश्यते । स्वाभासेन तथा सूर्य्यो जलस्थेन दिवि स्थितः । एवं त्रिवृदहङ्कारो भूतेन्द्रियमनोमयैः । स्वाभासैर्लक्षितोऽनेन सदाभासेन सत्यदृक् । भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया । लीनेष्वसति यस्तत्र विनिद्रो निरहङ्क्रियः । मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा । नष्टेऽहङ्करणे द्रष्टा वित्त इवातुरः । एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते साहङ्कारस्य द्रव्यस्य योऽवस्थानमनुग्रहः । देवहूतिरुवाच । पुरुषं प्रकृतिर्ब्रह्मन् ! न विमुञ्चति कर्हिचित् । अन्योन्यापाश्रयत्वाच्च नित्यत्वादनयोः प्रभो ! यथा गन्धस्य भूमेश्च न भावो व्यतिरेकतः । अपां रसस्य च यथा तथा बुद्धेः परस्य च । अकर्त्तुः कर्म्मबन्धोऽयं पुरुषस्य यदाश्रयः । गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथम् ? । क्वचित्तत्त्वावमर्षेण निवृत्तं भयमुल्वणम् । अनिवृत्तनिमित्तत्वात् पुनः प्रत्यवतिष्ठते । श्रीभगवानुवाच । अनिमित्तनिमित्तेन स्वधर्म्मेणामलात्मना । तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरम् । ज्ञानेन दृष्टतत्त्वेन वैराग्येण बलीयसा । तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना । प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् । तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः । भुक्तभोगा परित्यक्ता दृष्टदोषा च नित्यशः ।

नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च। यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत्। स एव प्रतिबुद्धस्य न विमोहाय कल्पते। एवं विदितत्त्वस्य प्रकृतिर्मयि मानसम्। युञ्जतो नापकुरुत आत्मारामस्य कर्हिचित्। यदैवमध्यात्मरतः कालेन बहुजन्मना। सर्व्वत्र जातवैराग्य आब्रह्मभवनान्मुनिः। मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा। निःश्रेयसं स्वसंस्थानं कैवल्याख्यं मदाश्रयम्। प्राप्नोतीहाञ्जसा धीरः स्वदृशा च्छिन्नसंशयः। यत् गत्वा न निवर्त्तेत योगी लिङ्गविनिर्गमे। यदा न योगोपचितासु चेतो मायासु सिद्धस्य विसज्जतेऽम्ब!। अनन्यहेतुष्वथ मे गतिः स्यादात्यन्तिको यत्र न मृत्युहासः" भाग० ३स्क०२७अ० "योगस्य लक्षणं वक्ष्ये सबीजस्य नृपात्मजे!। मनो येनैव विधिना प्रसन्नं याति सत्पथम्। स्वधर्माचरणं शक्त्या विधर्माच्च निवर्त्तनम्। दैवाल्लब्धेन सन्तोष आत्मविच्चरणार्च्चनम्। ग्राम्यधर्म्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा। मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनम्। अहिंसा सत्यमस्तेयं यावदर्थपरिग्रहः। ब्रह्मचर्य्यं तपः शौचं स्वाध्यायः पुरुषार्चनम्। मौनं सदासनजयः स्थैर्य्यं प्राणजयः शनैः। प्रत्याहारश्चेन्द्रियाणां विषयान्मनसा हृदि। स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणा। वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः। एतैरन्यैश्च पथिभिर्म्मनो दुष्टमसत्पथम्। बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः। शुचौ देशे प्रतिष्ठाप्य विजितासनमासनम्। तस्मिन् स्वस्तिकमासीन ऋजुकायः समभ्यसेत्। प्राणस्य शोधयेन्मार्गं पूरकुम्भकरेचकैः। प्रतिकूलेन वा चित्तं यथास्थिरमचञ्चलम्। मनोऽचिरात् स्याद्विरजं जितश्वासस्य योगिनः। वाय्वग्निभ्यां यथा लोहं ध्मातं त्यजति वै मलम्। प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्विषान्। प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्। यदा मनः स्वविरजं योगेन सुसमाहितम्। काष्ठां भगवतो ध्यायेत् स्वनासाग्रावलोकनः। प्रसन्नवदनाम्भोजं पद्मगर्भारुणेक्षणम्। नीलोत्पलदलश्यामं शङ्खचक्रगदाधरम्। लसत्पङ्कजकिञ्जल्कपीतकौशेयवाससम्। श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम्। मत्तद्विरेफकलया परीतं वनमालया। परार्द्ध्यहारवलयाकिरीटाङ्गदनूपुरम्। काञ्चीगुणोल्लसच्छ्रोणिं हृदयाम्भोजविष्टरम्। दर्शनीयतमं शान्तं मनोनयनवर्द्धनम्। अपीच्यदर्शनं शश्वत् सर्व्वलोकनमस्कृतम्। सन्तं वयसि कैशोरे भृत्यानुग्रहकातरम्। कीर्त्तन्यतीर्थयशसं पुण्यश्लोकयशस्कर-म्। ध्यायेद्देवं समग्राङ्गं यावन्न च्यवते मनः। स्थितं व्रजन्तमासीनं शयानं वा गुहाशयम्। प्रेक्षणीयेहितं ध्यायेत् शुद्धभावेन चेतसा। तस्मिन् लब्धपदं चित्तं सर्व्वावयवसंस्थितम्। विलक्ष्यैकत्र संयुज्यादङ्गे भगवतो मुनिः। सञ्चिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम्। उत्तुङ्गरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयान्धकारम्। यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्द्ध्न्यधिकृतेन शिवः शिवोऽभूत्। ध्यातुर्म्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवत श्चरणारविन्दम्। जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवन्दितया विधातुः। ऊर्व्वोर्निधाय करपल्लवरोचिषा यत् संलालितं हृदि विभोरभवस्य कुर्य्यात्। ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ। व्यालम्बिपीतवरवाससि वर्त्तमानकाञ्चीकलापपरिरम्भिनितम्बविम्बम्। नाभीह्रदं भुवनकोषगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मम्। व्यूढं हरिन्मणिवृषस्तनयोरमुष्य ध्यायेत् द्वयं विशदहारमयूखगौरम्। वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधानम्। कण्ठञ्च कौस्तुभमणेरधिभूषणार्थं कुर्य्यान्मनस्यखिललोकनमस्कृतस्य। बाहूंश्च मन्दरगिरेः परिवर्त्तनेन निर्णिक्तबाहुवलयानधिलोकपालान्। संचिन्तयेद्दशशतारमसह्यतेजः शङ्खञ्च तत् करसरोरुहराजहंसम्। कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्द्दमेन। मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कण्ठे। भृत्यानुकम्पितधियेह गृहीतमूर्त्तेः सञ्चिन्तयेद्भगवतो वदनारविन्दम्। यद्विस्फुरन्मकरकुण्डलवल्गितेन विद्योतितामलकपोलमुदारनासम्। यत् श्रीनिकेतमलिभिः परिसेव्यमानम् भृत्या स्वया कुटिलकुन्तलवृन्दजुष्टम्। मीनद्वयाश्रयमधिक्षिपदब्जनेत्रम् ध्यायेन्मनोमयमतन्द्रित उल्लसद्भ्रु। तस्यावलोकमधिकं कृपयाऽतिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः। स्निग्धस्मितानुगुणितं विपुलप्रसादम् ध्यायेच्चिरं विततभावनया गुहायाम्। हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारम्। संमोहनाय रचितं निजमायया स्य भ्रूमण्डलं मुनिकृते मकरध्वजस्य। ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुन्दपङ्क्ति। ध्यायेत् स्वदेहकुहरेऽवसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथक् दिदृक्षेत्। एवं हरौ भगवति

प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात्। औत्कण्ठ्यबाष्पकलया मुहुरर्द्द्यमानस्तच्चापि चित्तबडिशं शनकैर्व्वियुङ्क्ते। मुक्ताश्रयं यदि तु निर्व्विषयं विरक्तं निर्व्वाणमृच्छति मनः सहसा यथार्च्चिः। आत्मानमत्र पुरुषेऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः। सोऽप्येतया चरमया मनसो निवृत्त्या तस्मिन्महिम्न्यवसितः सुखदुःखबाह्ये। हेतुत्वमप्यसति कर्त्तरि दुःखयोर्यत् स्वात्मन् ! विधत्त उपलब्धपरात्मकाष्ठः। देहञ्च तन्न चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यगमत् स्वरूपम्। दैवादपेतमुत दैववशादुपेतं वासो यथा परिकृतं मदिरामदान्धः। देहोऽपि दैववशगः खलु कर्म्म यावत् स्वारम्भकं प्रतिसमीक्षत एव सासुः। तं सप्रपञ्चमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तु। यथा पुत्राच्च वित्ताच्च पृथङ्मर्त्त्यः प्रतीयते। अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा। यथोल्मुकाद्विस्फुलिङ्गाद्धूमाद्वापि स्वसम्भवात्। अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात्। भूतेन्द्रियान्तःकरणात् प्रधानाज्जीवसंज्ञितात्। आत्मा तथा पृथग्द्रष्टा भगवान् ब्रह्मसंज्ञितः। सर्व्वभूतेषु चात्मानं सर्व्वभूतानि चात्मनि। ईक्षेतानन्यभावेन भूतेष्वपि तदात्मताम्। स्वयोनिषु तथा ज्योतिरेकं नाना प्रतीयते। योनीनां गुणवैषम्यात् तथात्मा प्रकृतिस्थितः। तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकाम्। दुर्व्विभाव्यां पराभाव्य स्वरूपेणावतिष्ठते” इति भा० ३स्क० २८अ०।

“देवहूतिरुवाच। लक्षणं महदादीनां प्रकृतेः पुरुषस्य च। स्वरूपं लक्ष्यतेऽमीषां येन तत् पारमार्थिकम्। यथा सांख्येषु कथितं यन्मूलं तत् प्रचक्षते। भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो !। विरागो येन पुरुषो भगवन् ! सर्व्वतो भवेत्। आचक्ष्व जीवलोकस्य विविधा मम संसृतीः। कालस्येश्वररूपस्य परेषाञ्च परस्य ते। स्वरूपं वत कुर्व्वन्ति यद्धेतोः कुशलं जनाः। लोकस्य मिथ्याभिमतेरचक्षुषश्चिरं प्रसुप्तस्य तमस्यनाश्रये। श्रान्तस्य कर्म्मस्वनुविद्धया धिया त्वमाविरासीः किल योगभास्करः। श्रीमैत्रेय उवाच। इति मातुर्व्वचः श्लक्ष्णं प्रतिनन्द्य महामुनिः। आबभाषे कुरुश्रेष्ठ ! प्रीतस्तां करुणार्द्दितः। श्रीभगवानुवाच। भक्तियोगो बहुविधो मार्गैर्भवति ! भाव्यते। स्वभावगुणमार्गेण पुंसां भावो विभिद्यते। अभिसन्धाय यद्धिंसां दम्भं मात्सर्य्यमेव वा। संरम्भी भिन्नदृग्भावं मयि कुर्य्यात् स तामसः। विषयानभिसन्धाय यश ऐश्वर्य्यमेव वा। अर्च्चादावर्च्चयेद्यो मां पृथग्भावः स राजसः। कर्म्म निर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्। यजेत् यष्टव्यमिति वा पृथग्भावः स सात्त्विकः। मद्गुणश्रुतिमात्रेण मयि सर्व्वगुहाशये। मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ। लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्। अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे। सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत। दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः। स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। येनातिव्रज्य त्रिगुणां मद्भावायोपपद्यते। निषेवितानिमित्तेन स्वधर्म्मेण महीयसा। क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः। मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवन्दनैः। भूतेषु मद्भावनया सत्त्वेनासङ्गमेन च। महतां बहुमानेन दीनानामनुकम्पया। मैत्र्या चैवात्मतुल्येषु यमेन नियमेन च। आध्यात्मिकानुश्रवणान्नामसंकीर्त्तनाच्च मे। आर्ज्जवेनार्य्यसङ्गेन निरहङ्क्रियया तथा। मद्धर्म्मणो गुणैरेतैः परिसंशुद्ध आशयः। पुरुषस्याञ्जसाभ्येति श्रुतिमात्रगुणं हि माम्। यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात्। एवं योगरतं चेत आत्मानमविकारि तत्। अहं सर्व्वेषु भूतेषु भूतात्मावस्थितः सदा। तमवज्ञाय मां मर्त्त्यः कुरुतेऽर्च्चाविडम्बनम्। यो मां सर्व्वेषु भूतेषु सन्तमात्मानमीश्वरम्। हित्वार्च्चां भजते मौढ्यात् भस्मन्येव जुहोति सः। द्विषतः परकाये मां मानिनो भिन्नदर्शिनः। भूतेषु बद्धवैरस्य न मनः शान्तिमृच्छति। अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयाऽनघे!। नैव तुष्येऽर्च्चितोऽर्च्चायां भूतग्रामावमानिनः। अर्च्चादावर्च्चयेत्तावदीश्वरं मां स्वकर्म्मकृत्। यावन्न वेद स्वहृदि सर्व्वभूतेष्ववस्थितम्। आत्मनश्च परस्यापि यः करोत्यन्तरोदरम्। तस्य भिन्नदृशो मृत्युर्व्विदधे भयमुल्वणम्। अथ मां सर्व्वभूतेषु भूतात्मानं कृतालयम्। अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा। जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे। ततः सचित्ताः प्रवराः ततश्चेन्द्रियवृत्तयः। तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः। तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः। रूपभेदविदस्तत्र ततश्चोभयतोदतः। तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात्। ततो वर्णाश्च चत्वारस्तेषां ब्राह्मण उत्तमः। ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः। अर्थज्ञात् संशयच्छेत्ता ततः श्रेयान् स्वकर्म्मकृत्। मुक्तसङ्गस्ततो भूयान् दोग्धा न धर्म्ममात्मनः। तस्मिन्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः। मय्यर्पितात्मनः

पुंसोमयि संन्यस्तकर्मणः । न पश्यामि परं भूतमकर्त्तुः समदर्शनात् । मनसैतानि भूतानि प्रणमेद्बहु मानयन् । ईश्वरो जीवकलया प्रविष्टो भगवानिति । भक्तियोगश्च योगश्च मया मानव्युदीरितः । ययोरेकतरेणैव पुरुषः पूरुषं व्रजेत् । एतद्भगवतोरूपं ब्रह्मणः परमात्मनः । परं प्रधानं पुरुषं दैवं कर्म विचेष्टितम् । रूपभेदास्पदं दिव्यं काल इत्यभिधीयते । भूतानां महदादीनां यतोभिन्नदृशां भयम् । योऽन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः । स विष्ण्वाख्योऽधियज्ञोऽसौ कालः कलयतां प्रभुः । न चास्य कश्चिद्दयितो न द्वेष्यो न च बान्धवः । आविशत्यप्रमत्तोऽसौ प्रमत्तंजनमन्तकृत् । यद्भयाद्वाति वातोऽयं सूर्य्यस्तपति यद्भयात् । यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् । यद्वनस्पतयोभीता लताश्चौषधिभिः सह । स्वे स्वे कालेऽभिगृह्णन्ति पुष्पाणि च फलानि च । स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः । अग्निरिन्धे सगिरिभिर्भूर्न मज्जति यद्भयात् । नभोददाति श्वसतां पदं यन्नियमाददः । लोकं स्वदेहं तनुते महान् सप्तभिरावृतम् । गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात् । वर्त्तन्तेऽनुयुगं येषां वश एतच्चराचरम् । सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः । जनं जनेन जनयन् मारयन् मृत्युनान्तकम्”भाग० ३२९ अ०।

भगवदवतार एव कपिलः सगरसन्ततीर्हुङ्कारेण भस्मीचकार यथोक्तं रामा० आ० ४० अ० “यस्येयं वसुधा कृत्स्ना वासुदेवस्य धीमतः । महिषी माधवस्यैषा स एव भगवान् प्रभुः । कापिलं रूपमास्थाय धारयत्यनिशं धराम् । तस्य कोपाग्निना दग्धा भविष्यन्ति नृपात्मजाः । पृथिव्याश्चापि निर्भेदो दृष्ट एव सनातनः । सगरस्य च पुत्राणां विनाशोऽदीर्घदर्शिनाम्”इति ब्रह्मवाक्यमुपवर्ण्य रामं प्रति विश्वामित्रेणोक्तम् । “ततः प्रागुत्तरां गत्वा सागराः प्रथितां दिशम् । रोषादभ्यखनन् सर्वे पृथिवीं सगरात्मजाः । ते तु सर्वे महात्मानो भीमवेगाः महाबलाः । ददृशुः कपिलं तत्र वासुदेवं सनातनम् । हयञ्च तस्य देवस्य चरन्तमविदूरतः । प्रहर्षमतुलं प्राप्ताः सर्वे ते रघुनन्दन ! । ते तं यज्ञहनं ज्ञात्वा क्रोधपर्य्याकुलेक्षणाः । खनित्रलाङ्गलधरा नानावृक्षशिलाधराः । अभ्यधावन्त संक्रुद्धास्तिष्ठतिष्ठेति चाब्रुवन् । अस्माकं त्वं हि तुरगं यज्ञियं हृतवानसि । दुर्मेधस्त्वं हि संप्राप्तान् विद्धि नः सगरात्मजान् । श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ! । रोषेण महताविष्टो हुङ्कारमकरोन्मुनिः । ततस्तेनाप्रमेयेण कपिलेन महात्मना । भस्मराशीकृताः सर्वे काकुत्स्थ ! सगरात्मजाः”। अत्र प्रागुत्तरामिति भूमध्यस्थलङ्कापेक्षया तत्स्थानस्य तथात्वात् । वस्तुतः सिद्धेशः कपिलोऽपि भगवदवतारएव । “पञ्चमे कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्” भा० १,३,११ उक्तेः “सिद्धानां कपिलो मुनिः” गीतोक्तेश्च अग्न्यवतारकथनन्तु कल्पभेदाभिप्रायमित्यविरोधः । स च प्रत्यहं तर्पणीयर्षिभेदः “सनकश्च सनन्दश्च तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा” ब्रह्मपु० तर्पणमन्त्रलिङ्गात् । “कपिलः पिङ्गलः पिङ्गः” इत्यमरे पिङ्गलकपिलयोः पर्य्यायत्वेऽपि तयोरीषद्भेदोऽस्त्येव अतएव सुश्रुते “अत ऊर्द्धं प्रणवर्णान् षड्ग्राम इत्युपक्रम्य नीलः पीतः हरितः श्यामः कर्बुरः कृष्णः रक्तः कपिलः पिङ्गलः इति कपिलपिङ्गलयोर्भेदेन निर्देशः । “वाताय कपिला विद्युत्”सि० कौ०। ८ सुश्रुतोक्ते मूषिकभेदे “पूर्व्वमुक्ताः शुक्रविषा मूषिका ये समासतः । नामलक्षणभैषज्यैरष्टादश निबोध मे । लालनः पुत्रक इत्यादिना “श्वेतेन महता सार्द्धं कपिलेनाखुना तथेति विभज्य । तद्दंशोपद्रवचिकित्सा तन्त्रोक्ता यथा“कपिलेन व्रणक्लेदो ज्वरो ग्रन्थ्युद्गमस्तथा । चौद्रेण लिह्यात्त्रिफलां श्वेतां चापि पुनर्नवाम्” सुश्रुतोक्ते ९ लूताभेदे स्त्री यथा ।

“विश्वामित्रो नृपवरः कदाचिदृषिसत्तमम् । वशिष्ठं कोपयामास गत्वाश्रमपदं किल । कुपितस्य मुनेस्तस्य ललाटात्स्वेदबिन्दवः । अपतन्दर्शनादेव मधस्तात्तीक्ष्णवर्च्चसः । लूने तृणे महर्षीणां धेन्वर्थं सम्भृतेऽपि च । ततो जातास्त्विमा घोरा नानारूपा महाविषाः । अपकाराय वर्त्तन्ते नृपसाधनवाहने । यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिन्दवः । तस्माल्लूतेति भाष्यन्ते संख्यया ताश्च षोडश । कष्टसाध्यास्तथाऽसाध्या लूताश्च द्विविधाः स्मृताः । तासामष्टौ कष्टसाध्या वर्ज्ज्यास्तावत्य एव तु । त्रिमण्डला तथा श्वेता कपिला पीतिका तथा । आलमूत्रविषा रक्ता कसना चाष्टमी स्मृता । ताभिर्दष्टे शिरोदुःखं कण्डूर्दंशे च वेदना । भवन्ति च विशेषेण गदाः श्लैष्मिकवातिकाः । सौवर्णिका लाजवर्णा जालिन्येणीपदी तथा । कृष्णाग्निवर्णा काकाण्डा मालागुणाष्टमी स्मृता । ताभिर्दष्टे दंशकोथः प्रवृत्तिः क्षतजस्य च । ज्वरो-

दाहोऽतिसारश्च गदाःस्युश्च त्रिदोषजाः। पिडका विविधाकारा मण्डलानि महान्ति च। शोफा महान्तो मृदवो रक्ताःश्यावाश्चलास्तथा। सामान्यं सर्वलूतानामेतदादंशलक्षणम्। विशेषलक्षणं तासां वक्ष्यामि सचिकित्सितम्” इत्युपक्रम्य “आदंशे पिडका ताम्रा कपिलायाः स्थिरा भवेत्। शिरसो गौरवं दाहस्तिमिरं भ्रमणेव च”१०गोविशेषे स्त्री कपिलादानशब्दे विवृतिः। कपिलानां नरश्चैव। शतस्य फलमश्नुते”भा०व०८३ अ०। “क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोऽथ वा पुनः। यः पिबेत् कपिलाक्षीरं न ततोऽन्योऽस्त्यपुण्यकृत्” प्रा०वि० आप०।“कापिलं यः पिबेच्छूद्रो नरकेण विपच्यते”प्रा०वि०भवि०पु० तत्र शूद्रस्य कपिलाक्षीरपाणे महापातकं तत्पाननिषेधस्तु क्षत्रियवैश्ययोरपीति भेदः। ११नदीभेदे स्त्री “कज्जलाचलशैलात्तु पूर्वस्मिन् शुभपर्वतः। शच्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः। तत्पूर्वस्यां महादेवि! नदी कपिलसंज्ञिता। तां च स्नात्वा नरोगङ्गास्नानजं फलमाप्नुयात्” कालिपु० ८१अ० १२कपिलपुष्पायां शिंशपायां स्त्री राजनि०। १३रेणुकाख्यगन्धद्रव्ये १४पुण्डरीकदिग्गजस्त्रियाञ्च हारा०१५गटहकन्यायां १६शिंशपामात्रे १७राजनीतौ च स्त्री राजनि०। कपिलवर्णायां स्त्रियां तु टाबेव वर्णवाचित्वेऽपि अनुदात्तत्वाभावात् “नोद्वहेत कपिलां कन्याम्” मनुः कुक्कुरजातिस्त्रियान्तु जातित्वात् ङीप्। कूर्म्मविभागे नैरृतदिक्स्थे १८देशभेदे पु०‘ नैरृत्यां दिशि देशाः” इत्युपक्रम्य “कपिलनारीमुखानर्त्ताः” इति वृ०सं०। अत्र कपिलनारीमुख इत्येकं नाम इत्यन्ये। [न्विते।

कपिलक त्रि० सौ० कप–इलच् स्वार्थे क रस्य लः। कम्पा-

कपिलकादि पु० पाणिन्युक्ते रकारस्थाने लकारादेशनिमित्ते शब्दगणे स च गणः कपिलक निर्वीलक लोमानि पांशुल काल शुक्ल कपिलिका तर्पिलिका तर्पिलि”। यथा कपिरक+कपिलक एवं निर्वीरक+निर्वीलक इत्यादि।

कपिलद्युति पु०कपिला द्युतिरस्य।१सूर्य्ये शब्दच०। कर्म्म० २कपिलायां द्युतौ स्त्री।

कपिलद्राक्षा स्त्री कपिला द्राक्षा। द्राक्षाभेदे राजनि०

कपिलद्रुम पु०कर्म्म०। काञ्चीनामसुगन्धिवृक्षे शब्दच०।

कपिलधारा स्त्री कपिलेव शुभ्रा धारा यस्याः संज्ञात्वात् “ङ्यापोः संज्ञाछन्दसोर्बहुलम्” इति” पा० ह्रस्वः। १गङ्गायां हेमच०। कपिलानां तदीयसंख्यानां धारा संज्ञायां “ङ्यापोरिति”पा० ह्रस्वः।२कपिलादीनां दुग्धधारायां ३तत्कृते काश्या उत्तरस्थे नाम्ना तीर्थभेदे च उपचारात् तयोरभेदात्। तदाविर्भावादि काशी०६२अ०।‘एतस्मिन्नन्तरे प्राप्ता गोलोकात् पञ्च धेनवः। सुनन्दा सुमनाश्चापि सुशीला सुरभिस्तथा। पञ्चमी कपिला चापि सर्वाघौघविघट्टिनी। वात्सल्यदृष्ट्या गर्भस्य तासामूधांसि सुस्रुवुः। ववर्षुः पयसां पूरैस्तदूधांसि पयोधराः। धारासारैरविच्छिन्नस्तावद्यावद्ध्रदोऽभवत्। पयःपयोधिरिव स द्वितीयः प्रेक्षि पार्षदैः। देवेशसमधिष्ठानात्तत्तीर्थमभवत् परम्। कपिलाह्रद इत्याख्यां चक्रे तस्य महेश्वरः। ततो देवाज्ञया सर्वे स्नातास्तत्र दिवौकसः। आविरासुस्ततस्तीर्थादथ दिव्यपितामहाः। तान् दृष्ट्वा ते सुराः सर्वे तर्पयाञ्चक्रिरे मुदा। अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा। इत्याद्यादिव्यपितरस्तृप्ताः शम्भुं व्यजिज्ञपन्। देवदेव! जगन्नाथ! भक्तानामभयप्रद। अस्मिंस्तीर्थे त्वदभ्यासाज्जाता नस्तृप्तिरक्षया। तस्माच्छम्भो! वरं देहि प्रसन्नेनान्तरात्मना। इति दिव्यपितॄणां स श्रुत्वा वाक्यं वृषध्वजः। शृण्वतां सर्वदेवानामिदं वचनमब्रवीत्। सर्वः, सर्वपितॄणां वै परं तृप्तिकरं परम्। श्रीदेवदेव उवाच। शृणु विष्णो! महाबाहो! शृणु त्वं च पितामह!। एतस्मिन् कापिले तीर्थे कापिलेयपयोभृते। ये पिण्डान् निर्वपिष्यन्ति श्रद्धया श्राद्धदा नराः। तेषां पितॄणां सन्तृप्तिर्भविष्यति मदाज्ञया। अन्यं विशेषं वक्ष्यामि महातृप्तिकरं परम्। कुहूसोमसमायोगे दत्तं श्राद्धमिहाक्षयम्। संवर्त्तकाले संप्राप्ते जलराशिजलान्यपि। क्षीयन्ते न क्षयं श्राद्धं याति सोमकुहूकृतम्। अमासोमसमायोगे श्राद्धं यद्यत्र लभ्यते। तीर्थे कापिलधारेऽस्मिन् गयया पुष्करेण किम्। गदाभृद् भगवान् यत्र यत्र त्वं च पितामह!। वृषध्वजोऽप्यहं यत्र फल्गुस्तत्र न संशयः। दिव्यान्तरीक्षभौमानि यानि तीर्थानि सर्व्वतः। तान्यत्र निवसिष्यन्ति दर्शे सोमदिनान्विते। कुरुक्षेत्रे नैमिषे च गङ्गासागरसङ्गमे। ग्रहणे श्राद्धतोयद् स्यात्तत्तीर्थे वृषभध्वजे। अस्य तीर्थस्य नामानि यानि दिव्यपितामहाः!। तान्यहं कथयिष्यामि भवतां तृप्तिदान्यलम्। मधुस्रवेति प्रथममेषा पुष्करिणी मता। घृतकुल्या ततो ज्ञेया ततोऽसौ क्षीरनीरधिः। वृषभध्वजतीर्थञ्च तीर्थं पैतामहं ततः। ततो गदाधराख्यं च पितृतीर्थं ततः परम्। ततः कापिलधारं वै सुधाखनिरियं पुनः। ततः शिवगयाख्यं च ज्ञेयं तीर्थमिदं शुभम्। एतानि दश नामानि तीर्थस्यास्य पितामहाः। भवतां तृप्तिकारीणि वि

नापि श्राद्धतर्पणैः। सूर्य्येन्दुसङ्गमे यत्र पितॄणां तृप्तिकारकाः। ब्राह्मणान् भोजयिष्यन्ति तेषां श्राद्धमनन्तकम्। श्राद्धे पितॄणां संतृप्त्यै दास्यन्ति कपिलां शुभाम्। येऽत्र, तेषां पितृगणोऽश्नीत् क्षीरोदरोधसि। वृषोत्सर्गः कृतो यैस्तु तीर्थेऽस्मिन् वृषभध्वजे। अश्वमेधपुरोडाशैः पितरस्तैस्तु तर्पिताः। गयातोऽष्टगुणं पुण्यं अस्मिंस्तीर्थे पितामहाः। अमायां सोमयुक्तायां श्राद्धैः कापिलधारिके। येषां गर्भेऽभवत् स्रावो ये दन्तजननान्मृताः। तेषां तृप्तिर्विशेषेण तीर्थे कापिलधारिके। अदत्तमौञ्जीदामानो ये चाऽदारपरिग्रहाः। तेभ्योनिर्वपितं पिण्डमिह ह्यव्ययतां व्रजेत्। अग्निदाहे मृताये वै नाग्निदाहश्च येषु वै। ते सर्वे तृप्तिमायान्ति तीर्थे कापिलधारिके। और्द्ध्वदेहिकहीना ये षोडशश्राद्धवर्जिताः। ते तृप्तिमधिगच्छन्ति वृतकुल्या नि वापिताः। अपुत्राश्च मृताये वै येषां नास्त्युदकप्रदः। तेऽपि तृप्तिं परां यान्ति मधुस्रवसि तर्पिताः। अपमृत्युमृताये वै चौरविद्युज्जलादिभिः। तेषामिह कृतं श्राद्धं जायते सुगतिप्रदम्। आत्मघातेन निधनं येषामिह विकर्म्मिणाम्। तेऽपि तृप्तिं लभन्तेऽत्र पिण्डैः शिवगयाकृतैः। पितृगोत्रे मृता ये वै मातृपक्षे च ये मृताः। तेषामत्र कृतःपिण्डोभवेदव्ययतृप्तिदः। पत्नीवर्गे मृताये वै मित्रवर्गे च ये मृताः। ते सर्वे तृप्तिमायान्ति तर्पिता वार्षभध्वजे। म्लेच्छक्षेत्रविशां वंशे शूद्रवंशेऽन्त्यजेषु च। येषां नाम गृहीत्वा वहीयते ते समुद्धृताः। तिर्य्यग्योनिश्रिताये वै ये पिशाचत्वमागताः। तेऽप्यूर्द्ध्वगतिमयान्ति तृप्ताः कापिलधारिके। ये तु मानुषलोकेऽस्मिन् पितरोमर्त्त्ययोनयः। ते दिव्ययोनयः सर्वे मधुस्रवसि तर्पिताः। ये दिव्यलोके पितरः पुण्यैर्देवत्वमागताः। ते ब्रह्मलोके गच्छन्ति तृप्तास्तीर्थे वृषध्वजे। कृते क्षीरमयं तीर्थं त्रेतायां मधुमत् पुनः। द्वापरे सर्पिषा पूर्णं कलौ जलमयं भवेत्। सीमावहिर्गतमपि श्रेयं तीर्थमिदं शुभम्। मध्येवाराणसि श्रेयं मम सान्निध्यतो नरैः। काशीस्थितैर्यैतोऽदर्शि ध्यजोमे वृषलाञ्छनः। वृषध्वजेन नाम्नातः स्थास्यन्त्यत्र पितामहाः। पितामहेन सहितो गदाधरसमन्वितः। रविणा पार्षदैः सार्द्धं तिष्ठामोऽत्र पितामहाः"!। कापिलधारिककापिलधारादयोऽप्यत्र।

कपिलफला स्त्री कपिलं फलमस्याः। द्राक्षाभेदे राजनि०।

कपिलशिंशपा स्त्री कर्म०। पीतपुष्पयुतायां शिंशपायाम् राजनि०। रक्तपीतमिश्रितवर्णस्य पिङ्गलतया पीताधिक्यवर्णमात्रपरतया पीतपुष्पायां वृत्तिरिति बोध्यम्।

कपिलस्मृति स्त्री कपिलप्रणीता स्मृतिः। "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इत्यादिके षडध्यायीरूपे सांख्यशास्त्रे तस्य शास्त्रस्य च स्मृतित्वं वेदार्थानुभवपूर्व्वकं मुनिप्रणीतत्वात् अतएव "स्मृत्यनवकाशदोषप्रसङ्ग इत्यादि शा० सू० भाष्ये कपिलस्मृतेरनवकाशदोषमाशङ्क्य मानवादिस्मृत्यन्तरानवकाशदोषात् साङ्ख्यमतं प्रत्याख्यातम् "असङ्गोऽयं पुरुष" इत्यादिष्वेव तस्य शास्त्रस्य साकाशत्वेन न निरवकाशत्वमिति व्यवस्थापितञ्च।

कपिलाञ्जी स्त्री कपिलमञ्जि इव पुष्पमस्याः। १पीतपुष्पायां शिंशपायाम् २सुवर्णक्षीरौ च राजनि०।

कपिलाचार्य्य पु० कर्म०। विष्णौ। "महर्षिः कपिलाचार्य्यः कृतज्ञोमेदिनीपतिः"वि०स०। "महर्षिः कपिलाचार्य्य इति सविशेषणमेकं नाम। महांश्चासौ ऋषिश्चेति महर्षिः कृत्स्नस्य वेदस्य दर्शनात् कपिलश्चासौ आचार्य्यश्चेति सांख्यञ्च शुद्धात्मतत्त्वज्ञानम् "शुद्धात्म तत्त्वविज्ञानं साङ्ख्यम्" इत्यभिधीयते इति व्यासस्मृतेः। "ऋषिं प्रसूतं कपिलं महान्तमिति" श्रुतेः। "सिद्धानां कपिलोमुनिरिति" स्मृतेश्च तस्य तथात्वम्" भा०।

कपिलातीर्थ न० कुरुक्षेत्रस्थे तीर्थभेदे। कुरुक्षेत्रमुपक्रम्य रामह्रदादिषु स्नानमुक्त्वा। "कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः। तत्र स्नात्वार्चयित्वा च पितॄन् स्वान् दैवतान्यपि। कपिलानां सहस्रस्य फलं विन्दति मानवः" भा०व०८२। [इन्द्रे। त्रिका०।

कपिलाश्व पु० कपिलरूपेणाश्वहरणात् कपिलवर्णाश्वयोगाच्च

कपिलादान न० ६त० वक्ष्यमाणविधिना कपिलायाः गोर्दाने तद्विधानादि हेमा०दा०आदित्यपु०।"कपिलां ये प्रयच्छन्ति चेलच्छन्नां स्वलङ्कृताम्। सुवर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम्। श्वेतवस्त्रपरिच्छन्नां घण्टास्वनरवैर्युताम्। (घण्टास्वनरवैर्घण्टाशब्दकोलाहलैः)। "सहस्रं योगवां दत्ते कपिलां चापि सुव्रतः। सममेव तयोः पुण्यं प्राह ब्रह्मविदांवर!। यावन्ति रोमकूपाणि कपिलाङ्गे भवन्ति हि। तावत्कोटिसहस्राणि वर्षाणां दिवि मोदते। "स्वर्णशृङ्गीं रौप्यखुरां मुक्तालाङ्गूलभूषिताम्। कांस्योपदोहनां धेनुं वस्त्रच्छन्नामलङ्कृताम्। दत्त्वा द्विजेन्द्राय नरः स्वर्गलोके महीयते। दशधेनुप्रदानेन तुल्यैका कपिला मता" याज्ञवल्क्यः "हेमशृङ्गी शफै रौप्यैः सुशीला वस्त्रसंवृता। सकांस्यपात्रा दातव्या क्षीरिणी गौः सद-

क्षिणा। दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसंमितान्। कपिला पुनस्तारयति भूयस्त्वासप्तमं कुलम्” व्यासः “हेमशृङ्गीं रौप्यखुरां वस्त्रकांस्योपदोहनाम्। सवत्सां कपिलां दत्त्वा वंशान् सप्त समुद्धरेत्। यावन्ति तस्या रोमाणि सवत्साया भवन्ति हि। सुरभीलोकमासाद्य रमते तावतीः समाः”। लोकोत्तरे “घण्टाचामरसंयुक्ता किङ्किणीजालमण्डिता। दिव्यवस्त्रसमायुक्ता हेमदर्पणभूषिता। पयस्विनी सुशीला च तरुणी वत्सकान्विता। कपिलैवं प्रदातव्या शिवस्याग्रे विधानतः” दानमन्त्रस्तु मत्स्यपुराणे “कपिले! सर्वभूतानां पूजनीयाऽसि रोहिणी। तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे” इति। रोहितवर्णाधिक्यात् रोहिणी। स्वर्णशृङ्गादिमानमुक्तम् हे॰ दा॰ कूर्म्मपु॰ “दशसौवर्णिके शृङ्गे खुराः पञ्चपलान्विताः। पञ्चाशत्पलिकं ताम्रं कांस्यं चैतावदेव तु। वस्त्रन्तु त्रिगुणं धेन्वा दक्षिणा च चतुर्गुणा। एतैरलङ्कृतां धेनुं घण्टाभरणभूषिताम्। कपिलां विप्रमुख्याय दत्त्वा मोक्षमवाप्नुयात्। द्विगुणोपस्करोपेता महती कपिला स्मृता। दत्ता सा विप्रमुख्याय स्वर्गमोक्षफलप्रदा। सप्तजन्मकृतात् पापान्मुच्यते दश संयुतः। यान् यान् प्रार्थयते कामांस्तांस्तान् प्राप्नोति मानवः। अन्ते स्वर्गापवर्गौ च फलमाप्नोति संयतः”। २समानवर्णवत्ससहितकपिलधेनुदाने च “समानवत् सां कपिलां धेनुं दत्त्वा पयस्विनीम्। सुव्रतां वस्त्रसंपन्नाम् ब्रह्मलोके महीयते” हेमाद्रिदा॰ भारतवाक्यम्

कपिलावट पु॰ कपिलया गोलकस्थया कृतोऽवटः गर्त्तः। गङ्गाद्वारसमीपस्थे तीर्थभेदे। कनखलतीर्थशब्दे “कपिलावटं ततो गच्छेत्” भा॰व॰अ॰।

कपिलाह्रद पु॰ कपिलाभिः कृतो ह्रदः। काश्या उत्तरसोमास्थे तीर्थभेदे कपिलधाराशब्दे विवृतिः। “ततो वाराणसीं गत्वा अर्च्चयित्वा वृषध्वजम्। कपिलाह्रदे नरः स्नात्वा राजसूयमवाप्नुयात्” भा॰व॰८४अ॰।

कपिलिका स्त्री कपिला+संज्ञायां कन् अत इत्त्वम्। शतपदीभेदे। (काणकोड़ा) “शतपद्यस्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ” सुश्रु॰

कपिलेश न॰ कपिलेन प्रतिष्ठापितमीशलिङ्गम् शा॰त॰। काशीस्थे शिवलिङ्गभेदे “कपिलेशं महालिङ्गं कपिलेन प्रतिष्ठितम्। मुच्यन्ते कपयोऽप्यस्य दर्शनात् किमु मानवाः” काशीख॰ प्रतिष्ठितं प्रा॰ष्ठापितमन्तर्भूतण्यर्थत्वात्।

कपिलोमन्(मा) स्त्री कपेर्लोमेव लोम मञ्जरी अस्याः समन्तत्वात् वा डाप्। रेणुकानामकगन्धद्रव्ये राजनि॰।

कपिलोमफला स्त्री कपिलोमान्यपि फलति कण्डूदानाय प्रभवति फल—अच्। (आलकुशी) शूकशिम्ब्याम् राजनि॰।

कपिलोह न॰ कपिवर्णं पिङ्गलं लोहं धातुः। पित्तले। हेमच॰। [त्यास् रत्नमा॰।

कपिल्लिका स्त्री कपिः कपिवर्णा वल्लिका पृषो॰। गजपिप्प-

कपिवक्त्र पु॰ कपेर्वक्त्रमिव वक्त्रमस्य। नारदे त्रिका॰। पर्वतर्षिशापात्तस्य तथात्वम् यदाह भा॰ शा॰३०अ॰। “नारदः पर्वतश्चैव द्वावृषी लोकसत्तमौ। मातुलो भागिनेयश्च देवलोकादिहागतौ। विहर्त्तुकामौ सम्प्रीत्या मानुषेषु पुरा विभो!। हविःपवित्रभोज्येन देवभोज्येन चैव हि। नारदो मातुलश्चैव भागिनेयश्च पर्वतः। तावुभौ तपसोपेताववनीतलचारिणौ। भुञ्जानौ मानुषान् भोगान् यथावत्पर्यधावताम्। प्रीतिमन्तौ मुदा युक्तौ समयञ्चैव चक्रतुः। यो भवेद्धृदि सङ्कल्पः शुभो वा यदि वाऽशुभः। अन्योन्यस्य स आख्येयो मृषा शापोऽन्यथा भवेत्। तौ तथेति प्रतिज्ञाय महर्षी लोकपूजितौ। सृञ्जयं श्वैत्यमभ्येत्य राजानमिदमूचतुः। आवां भवति वत्स्यावः कञ्चित्कालं हिताय ते। यथावत् पृथिवीपाल! आवयोः प्रगुणीभव। तथेति कृत्वा राजा तौ सत्कृत्योपचचार ह। ततः कदाचित्तौ राजा महात्मानौ तपोधनौ। अब्रवीत् परमप्रीतः सुतेयं वरवर्णिनी। एकैव मम कन्या या सा वां परिचरिष्यति। दर्शनीयाऽनवद्याङ्गी शीलवृत्तसमाहिता। सुकुमारी कुमारी च पद्मकिञ्जल्कसुप्रभा। परमं सौम्यमित्युक्ते ताभ्यां राजा शशास ताम्। कन्ये! विप्रावुपचर देववत्पितृवच्च ह। सा तु कन्या तथेत्युक्त्वा पितरं धर्म्मचारिणी। तथा निदेशं राज्ञस्तौ सत्कृत्योपचचार ह। तस्यास्तेनोपचारेण रूपेणाप्रतिमेन च। नारदं हृच्छयस्तूर्णं सहसैवाभ्यपद्यत। ववृधे हि ततस्तस्य हृदि कामो महात्मनः। यथा शुक्लस्य पक्षस्य प्रवृत्तौ चन्द्रमाः शनैः। न च तं भागिनेयाय पर्वताय महात्मने। शशंस हृदयं तीव्रं व्रीडमानः स धर्मवित्। तपसा चेङ्गितेनैव पर्वतोऽथ बुबोध तम्। कामार्त्तं नारदं क्रुद्धः शशापैनं ततो भृशम्। कृत्वा समयमव्यग्रो भवान् वै सहितो मया। यो भवेद्धृदि सङ्कल्पः शुभो वा यदि वाऽशुभः। अन्योन्यस्य स आख्येय इति तद्वै मृषा कृतम्। भवता वचनं ब्रह्मंस्तस्मादेव शपाम्यहम्। न हि कामं प्रवर्त्तन्तं भवानाचष्ट मे पुरा। सुकुमार्य्यां कुमार्य्यां ते तस्मादेष शपा-

व्यहम्। ब्रह्मचारी गुरुर्य्यस्त्वात्तपस्वी ब्राह्मणश्च सन्। अकार्षीत्समयभ्रंशमावाभ्यां यः कृतो मिथः। शपस्ये तस्मात्तु संक्रुद्धो भवन्तं तं निबोध मे। सुकुमारी च ते भार्य्या भविष्यति न संशयः। वानरस्यैव ते रूपं विवाहात्प्रभृति प्रभो!। संद्रक्ष्यन्ति नरास्त्वन्ये स्वरूपेण विनाननम्। स तद्वाक्यन्तु विज्ञाय नारदः पर्व्वतं तथा। अशपत्तमपि क्रोधाद्भागिनेयं स मातुलः। तपसा ब्रह्मचर्य्येण सत्येन च दमेन च। युक्तोऽपि नित्यधर्म्मश्च न वै स्वर्गमवाप्स्यसि। तौ तु शप्त्वा भृशं क्रुद्धौ परस्परममर्षणौ। प्रतिजग्मतुरन्योन्यं क्रुद्धाविव गजोत्तमौ। पर्व्वतः पृथिवीं कृत्स्नां विचचार महामतिः। पूज्यमानो यथान्यायं तेजसा स्वेन भारत!। अथ तामलभत्कन्यां नारदः सृञ्जयात्मजाम्। धर्म्मेण विप्रप्रवरः सुकुमारीमनिन्दिताम्। सा तु कन्या यथाशापं नारदं तं ददर्श ह। पाणिग्रहणमन्त्राणां नियोगादेव नारदम्। सुकुमारी च देवर्षिं वानरप्रतिमाननम्। नैवावमन्यत तदा प्रीतिमत्येव चाभवत्। उपतस्थे च भर्त्तारं न चान्यं मनसाऽप्यगात्। देवं मुनिं वा यक्षं वा पतित्वे पतिवत्सला। ततः कदाचिद्भगवान् पर्व्वतोऽनुचचार ह। वनं विरहितं किञ्चित्तत्रापश्यत्स नारदम्। ततोऽभिवाद्य प्रोवाच नारदं पर्वतस्तदा। भवान् प्रसादं कुरुतात् स्वर्गादेशाय मे प्रभो!। तमुवाच ततो दृष्ट्वा पर्वतं नारदस्तथा। कृताञ्जलिमुपासीनं दीनं दीनतरः स्वयम्। त्वयाऽहं प्रथमं शप्तो वानरस्त्वं भविष्यसि। इत्युक्तेन मया पश्चाच्छप्तस्त्वमपि मत्सरात्। अद्यप्रभृति वै वासं स्वर्गे नावाप्स्यसीति ह। तव नैतद्धि सदृशं पुत्रस्थाने हि मे भवान्। निवर्त्तयेतां तौ शापावन्योन्येन तदा मुनी। श्रीसमृद्धं तदा दृष्ट्वा नारदं देवरूपिणम्। सुकुमारी प्रदुद्राव परपत्यभिशङ्कया। तां पर्व्वतस्ततो दृष्ट्वा प्रद्रवन्तीमनिन्दिताम्। अब्रवीत्तव भर्त्तैष नात्र कार्य्या विचारणा। ऋषिः परमधर्म्मात्मा नारदो भगवान् प्रभुः। तवैवाभेद्यहृदयो मा तेऽभूदत्र संशयः। साऽनुनीता बहुविधं पर्व्वतेन महात्मना। शापदोषञ्च तं भर्त्तुः श्रुत्वा प्रकृतिमागता। पर्व्वतोऽथ ययौ स्वर्गम् नारदोऽभ्यगमद्गृहान्"। कपिवक्त्रकोशाम्रादयोऽप्यत्र। ६त०वानरमुखे न०।

कपिवदान्य पु० कपिषु वदान्यो बहुफलत्वेन तत्प्रदानात्। आम्रातकवृक्षे। शब्दच०। [अमरः।

कपिवल्ली स्त्री कपिरिव तल्लोमतुल्या वल्ली। गजपिप्पल्याम्

कपिश पु० कपिः कपिनामाऽस्त्यस्य लोमा० श। १सिह्लके (शिलारस) मेदि०। कपिं कपिवर्णं श्यति शो—क। २कृष्णपीतमिश्रितवर्णे पु० ३तद्युक्ते त्रि० अम०। "मधुकरविटपानमिता तरुपङ्क्तीर्बिभ्रतोऽस्य विटपानमिताः। विपाकपिशङ्गलता—रजसा रोधश्चकास्ति कपिशं गवता" माघः। अत्र तरुपङ्क्तेः कृष्णत्वात् पिशङ्गलतारजोयोगात् श्यावत्वम्। ४रक्तकृष्णमिश्रवर्णे पु० ५तद्वति त्रि० "सन्ध्याभ्रकपिशस्तस्य विराधोनाम राक्षसः" रघुः। "ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी" विक्र०। "नीपं दृष्ट्वा हरितकपिशं केसरैरर्द्धरूढैः" मेघ०। तत्तुल्यवर्णत्वात् ६मद्यभेदे न० हला०। "पामानपश्यत् कपिशं पिपासतः" माघः ७माधवीलतायां मेदि० स्त्री। ८उत्कलदेशसमीपस्थे नदीभेदे। "स तीर्त्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः। उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ" रघुः।

कपिशाञ्जन पु० कपिशमञ्जनं यत्र। शिवे त्रिका०। तस्य श्वेतत्वेनाञ्जनस्य कृष्णत्वात्तयोर्मिश्रणात् तथात्वम्।

कपिशापुत्र पु० कपिशायाः पुत्रः। पिशाचे शब्दरत्ना०।

कपिशी स्त्री कपिश+वर्णवाचित्वात् ङीष्। १माधव्यां २सुरायाञ्च शब्दकल्पद्रुमे मेदिनिजटाधरवाक्यं प्रमाणत्वेनोक्तम्। तच्चिन्त्यं "कपिशस्त्रिषु श्यावे स्त्री माधव्यां सिह्लके पुमान्" इति मेदिन्यां स्त्रीमात्रोक्तेः ङीषन्ततानुक्तेश्च। "वर्णात्तोपधादनुदात्तात् तोनः" "अन्यतो ङीष्" पा० सूत्रयोः तोपधभिन्नवर्णवाचिनोऽनुदात्तान्तप्रातिपदिकात् स्त्रियां ङीष् स्यात् सि० कौ० व्याख्यानात् कपिशशब्दस्यानुदात्तत्वाभावेन ङीषोऽप्रसक्तेः "लघावन्ते द्वयोश्च बह्वषो गुरुः" फिट्सूत्रेण तस्य पिशङ्गकल्माषयोरिव गुरुयुक्तत्वाभावेन अनुदात्तत्वाभावात् अतएव "ईषद्बद्धरजःकणाग्रकपिशा चूते नवा मञ्जरीति" विक्रमोर्वश्यामृटाबन्ततया प्रयोगः। तथा च स्त्रीत्वेऽपि कपिशा इत्येवंरूपेण भवितव्यं न ङीषन्तेनेति द्रष्टव्यम्। किञ्च उक्तमेदिनिवाक्ये तस्य सुरार्थताऽपि न दृश्यते प्रत्युत "कश्यं मद्यन्तु मैरेयं कपिशं कापिशायनम्" हलायुधोक्तेः मद्ये क्लीवत्वमेव। अतएव "ग्राम्यानपश्यत् कपिशं पिपासतः" इति माघे क्लीबतयैव प्रयुक्तम्।

कपिशीका स्त्री कपिशैव स्वार्थे का० ईकन्। मदिरिकायां त्रिका०।

कपिशीर्ष न० कपीनां प्रियं शीर्षमस्य शाक०। प्राकाराग्रे त्रिका०। कपीनां प्राकाराद्यवासित्वं हि लोकप्रसिद्धम्।

कपिशीर्षक न० कपेः शीर्षमिव कायति कै—क । हिङ्गुले । शब्दच० ।

कपिष्ठल पु० "कपिष्ठलो गोत्रे" पा० नि० षत्वम् । गोत्रप्रवर्त्तके ऋषिभेदे तस्य गोत्रापत्यम् इञ् । कापिष्ठलि तद्गोत्रापत्ये बहुत्वे उपका० इञो वा लुक् । कापिष्ठलयः कपिष्ठलाः । गोत्रादन्यत्र न षत्वम् ईत० । कपिस्थल वानरस्थाने न० ।

कपिस्कन्ध पु० दानवभेदे "उद्योगं परमं चक्रुर्दानवायुद्धदुर्मदाः" इत्युपक्रम्य "काञ्चनाक्षः कपिस्कन्धोव्याघ्राक्षः स्थितकम्पनः" हरिवं० १४० अ० ।

कपीकच्छू स्त्री कपिकच्छू+संज्ञायां वा दीर्घः । शूकशिम्ब्याम् (आलकुशी) शब्दर० ।

कपीज्य पु० कपिभिरिज्यते यज—क्यप् ३त० । १क्षीरिकावृक्षे । जटाध० । २रामचन्द्रे । कपिषु श्रेष्ठः ७त० । ३सुग्रीवे च ।

कपीत पु० कं जलवर्णं श्वेततरमपीतः अपेरतो लोपः । श्वेतवुह्नावृक्षे रत्नमा० ।

कपीतन पु० कपीनाम् ईं लक्ष्मीं तनोति तन—अच् । १आम्रातकवृक्षे २शिरीषवृक्षे ३गर्द्दभाण्डवृक्षे च अमरः ४अश्वत्थवृक्षे मेदि० । ५गुवाकवृक्षे ६विल्ववृक्षे च शब्दर० । एतेषां यथायथम् कपित्वयशोभयमञ्जरीकत्वात् तत्प्रियफलकत्वाच्च तथात्वम् ।

कपीन्द्र पु० कपिरिन्द्र इव । १हनुमति शब्दच० । "मध्नन्ति ददर्श द्वन्द्वानि कपीन्द्रः" भट्टिः । ६त० । कपीनामिन्द्रे स्वामिनि २सुग्रीवे कपीनां यथेष्टं नियोक्तरि ३रामे तदभेदात् ४विष्णौ च । "शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः" भा० अनु० १२अ० विष्णुनामकीर्त्तने ।

कपीवत् पु० वसिष्ठपुत्रभेदे । "और्वोवसिष्ठपुत्रश्च स्तम्बः काश्यप एव च । कपीवानकपीवांश्च दत्तोलिश्च्यवनस्तथा । वसिष्ठपुत्राः सप्तासन्" हरिवं० २६१अ० । [शरीरवरभेदे ।

कपीवह न० वहति वह—अच् ६त० "ढकीवहे" पा० दीर्घः ।

कपीष्ट पु० कपीनामिष्टः । १राजादनीवृक्षे २कपित्थे च राजनि० ।

कपुच्छल न० कस्य शिरसः पुच्छमिव लाति—ला—क । १केशचूडायाम् । "अथातस्तृतीये वर्षे चूडाकरणं कपुष्टिका" गोभि० । "कपुच्छलाख्या केशचूड़ा तस्याः संस्कारःकपुष्टिका" सं०त० रघु० । कस्य जलस्य पुच्छमिव लाति ला-क । २सुगपस्थाने । "इदमेव कपुच्छलमयं दण्डः हे भवतो हौ होमौ—वाह" शत० ब्रा० ७,४,१,३६ । "इदमेव इत्यायं सुस्टितेण कपुच्छलम् सुगपस्थानीयम्" भा० । अत सूत्रे कपुच्छलमिति मुद्रितपु० पाठः भाष्ये तु कष्टहलमिति पाठः तत्र कस्य जलस्य घृते पूरणाय स्थलति गच्छतीति व्युत्पत्तिः । वेदे परोक्षवचनत्वात् पृषो० साधुत्वम् । "इदमेव कपुच्छलमयं दण्डः स्वाहाकारः" शत० ब्रा० ९,२,१,१० ।

कपुष्टिका स्त्री कस्य शिरसः पुच्छं पोषणाय कायति कै—क कस्य पुच्छं हितं वा कन् । केशचूडासंस्कारकर्मणि" कपुच्छलशब्दे गोभिलवाक्यमुदाहृतम् ।

कपूय त्रि० कुत्सितं पूयते पूयी—विसरणे अच् पृषो० उलोपः । कुत्सिते "अथ य इह कपूयचरणा अभ्याशोह ते कपूययोनिमापद्येरन्" छा० उ० । "मघवा यः कसखः यस्य कपूयाः सखायः" निरु० ६,१८ ।

कपृथ् त्रि० कुत्सितं प्रथयति प्रथि—क्विप् वेदे नि० संप्र० कुत्सितप्रथयितरि । "ऐदीषे यस्य रम्बतेऽन्तरा सक्थ्या कपृत्" ऋ० १०,८६,१७, "कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये" ऋ० १०,१०१'१२,

कपोत पुंस्त्री कब—वर्णे ओत वस्य पत्त्व, कौ वायुः पोत इव यस्य वा । पारावते (पायारा) अमरः "कपोतको गुरुस्त्रिग्धो रक्तपित्तानिलापहः । संयाही शुक्रलः शीतः सुस्वादु रुचिकारकः" भाव० तन्नुणा उक्ताः । (घुघु) इति ख्याते २चित्रकण्ठे धूसरवर्णे वनकपोते मेदिनिः । कपोतजातिस्तु त्रिधा गृहकपोतवनकपोतचित्रकपोतर्ण इति भेदात् । वृह०स० तेषां दिवासञ्चारित्वमुक्तम् ।

"श्यामाश्येनशशघ्नवञ्जुलशिखिश्रीकर्णचक्राह्वयाश्चाषाण्डीरकखञ्जरीटकशुकध्वाङ्क्षाः कपोतास्त्रयः । भारद्वाजकुलालकुक्कुटखरा हारीतगृध्रौ कपिः फेण्टः कुक्कुटपूर्णकुटचटकाश्चोक्ता दिवासञ्चराः" । तत्र च कपोतविशेषाणाम् गृहप्रवेशादरिष्टमुक्तं "यानासनशय्यानिलयनं कपोतस्य सद्मनिवेशनं वा । अशुभप्रदं नराणां जातिविभेदेन कालोऽन्यः । आपाण्डुरस्य वर्षाच्चित्रकपोतस्य चैव षण्मासात् । कुङ्कुमधूम्रस्य फलं सद्यः पाकं कपोतस्य" । अपाण्डुरस्य ईषत्पाण्डोर्धूसरस्य "रक्तपादाः कपोताश्च" रामा०उ० ६रिष्टसूचने विधा० पा० भारते शान्तिपर्व्वणि तस्य गृहप्रवेशनेऽरिष्टमुक्तं यथा ।

"युधिष्ठिर उवाच । कपोतोयदि गाङ्गेय ! निविशत्यालयं नृणाम् । कथं शान्तिर्भवेत् तस्य छिन्नमेतद्वदस्व मे । भीष्म उवाच । प्रविष्टे सदनं राजन् ! कपोतेभयकादिषु । उत्पन्नं जायते यस्य नाम कार्य्यं विचार-

था। अथ वा सद्मनःस्वामी त्वरितं मृत्युमाप्नुयात्। गेहिनी वा सुतो वापि राजा कुप्यति वा भृशम्। येन केन प्रकारेण प्रोत्सन्नं जायते गृहम्। न च संपद्यते राजन्! कपोते सदनं गते। निर्विशेत्सदनं यस्तु कपोतो विघ्नकारकः। स हन्तव्योऽन्तकस्यास्य मेदसा जुहुयात् सुधीः। जीवनेच्छा कपोते चेद्विधानान्तरमस्ति तत्। शालीनां पिष्टमादाय पयसालोड्य तत् पुनः। विदधीत कपोतस्य रूपं शास्त्रविचक्षणः। गुडेनोदरमापूर्य्य मुखं शर्करया पुनः। मधुना चरणौ तस्य पक्षौ धान्येन पक्षिणः। ततो वह्निमुखं कृत्वा होमयेत् प्रयतः सुधीः। "देवाः कपोताः" इत्येष यजने मन्त्र उत्तमः। खगं पिष्टमयन्तु जुहुयात् सर्पिषा युतम्। शतधा तं खगं कृत्वा भागशः परिकल्पयेत्। शिरसोऽप्यष्टभागांस्तु त्रिंशन्त्रिंशच्च पादयोः। सवितुर्हेति शिरसा वसुभ्योयजनं स्मृतम्। मनोज्योतिर्जुषतेति पक्षौ चन्द्रमसे हुनेत्। यस्त्वं सुकृतेति च पादं दक्षिणमग्नये। चरणं वाममश्विभ्यां जुहुपादश्विमन्त्रतः। "श्येनस्य पक्षा" इति च बाहू रुद्राय वै हुनेत्। तिलव्रीहीन् व्याहृतिभिर्गृहानुद्दिश्य संहुनेत्। ग्रहांश्चैव पुनः पूज्य यजमानाभिषेचनम्। सालङ्कारां सवत्सां च कामदोहां पयस्विनीम्। धेनुं दद्यात्सुराणां च दक्षिणार्थं विशेषतः। आचार्य्याय सुशीलाय श्रोत्रियाय कुटुम्बिने। ब्राह्मणान् भोजयेत् पश्चाद्यथाशक्ति च दक्षिणाम्। एवं कृते विधाने तु कपोतः शान्तिकृद्भवेदिति"। ज्यो॰त॰ अद्भुतशान्तौ अरिष्टशुक्रा उक्तविषये कपोतं विशेष्य शान्त्यन्तरमुक्तम् यथा "गृध्रः कङ्कः कपोतश्च उलूकः श्येन एव च। चिल्लश्च चर्मचिल्लश्च भासः पाण्डुर एव च। गृहे यस्य पतन्त्येते गेहं तस्य विपद्यते। षण्मासात्तथा वर्षान्मृत्युः स्याद्गृहमेधिनः। पत्न्याः पुत्रस्य वा मृत्युर्द्रव्यस्यापि विनश्यति। ब्राह्मणाय गृहं दत्त्वा दत्त्वा तन्मूल्यमेव वा। गृह्णीयाद्यदि रोचेत शान्तिञ्चैमां प्रयोजयेत्"। वैष्णवामृते व्यासः। "महयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज!। महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः। उत्पातान् दारुणान् पुंसां दुर्निमित्ताननेकशः। तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः। अत्र मण्डलब्राह्मणीयो मन्त्रः। "नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहेति"। छन्दोगपरिशिष्टम्। "अथातोऽरजस्वलाभिगमने गोऽश्वभार्य्यासु गमने यमजजनने विजातीयजनने वा काककङ्कगृध्रवकश्येनभासचिल्लकपोतानां गृहप्रवेशे महिषस्योपरि विश्रामणे एषामेव क्रियमाणे गृहद्वारारोहणे वाद्भुतेषु कल्पदृष्टेन विधिनाऽग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोति" अद्भुताय अग्नये स्वाहा, सोमाय, विष्णवे, रुद्राय, वायवे, सूर्य्याय, मृत्यवे, विश्वेभ्यो देवेभ्यः स्वाहेति"। कपोतं विशेषयति शौनकः "रक्तपादः कपोताख्य आरण्यौकाः शुकच्छविः। स चेच्छालां विशेच्छालासमीपस्थ व्रजेद्यदि। अन्येषु गृहमध्ये वा वल्मीकस्योद्गमादिषु"। कल्पदृष्टेन विधिना गृह्योक्तेन प्रायश्चित्ताज्याहुतीः अद्भुतदोषप्रशमनार्थाः सप्ताज्याहुतीः अद्भुतायाग्नये स्वाहा इत्यादि मन्त्रैः। तत्र स्थालीपाकेतिकर्त्तव्यतायां पायसचरुभिरेतेभ्यो देवेभ्यो जुहुयात्" रघु॰। छन्दोगप॰। "पश्चात् घृतपायसेन ब्राह्मणान् भोजयित्वा गोवरं दत्त्वा शान्तिर्भवतीति"। इदन्तु हितोक्तत्रिविधकपोतभिन्नकपोतानाम् गृहस्थेन अवश्यपोष्यता यथाह ज्यो॰त॰भारतम्। "पारावतामयूराश्च शुका वैशारिकास्तथा। गृहस्थेन सदा पोष्या आत्मनः श्रेय इच्छता" अत्र प्रागुक्तकपोतत्रिकस्यैवारिष्टसूचकत्वं नान्यस्येति व्यवस्था अतएव प्रागुक्तभारते विघ्नकारक इति विशेषणम्। कपोतस्य प्रतुदः यथाह भावप्र॰। "हारीतोधवलःपाण्डुश्चित्र पक्षो हहच्छुकः। कपोतः शकरीटस्तु पिकाद्याः प्रतुदाः स्मृताः। प्रतुद्य भक्षयन्त्येते तुण्डेन प्रतुदास्ततः" तेषां सामान्यमांसगुणाश्च तत्रैवोक्ताः "प्रतुदाः मधुराः पित्तकफघ्नास्तुवरा हिमाः। लघवो बद्धवर्चस्का किञ्चिद्वातकराः स्मृताः"। "आवर्त्तिभिर्गृहकपोतशिरोधराभैः" माघः। कपोतोऽस्त्यस्य नडादि॰ छ कुक् च। कपोतकीय कपोतयुक्ते त्रि॰ तस्मिन् भवः अण् बिल्वका॰ छमात्रस्य लुक्। कापोतक तत्र भवादौ त्रि॰। २सुश्रुतोक्ते कपोताभे मूषिकभेदे च कपोताभशब्दे उदा॰। [राजने राजनि॰

कपोतक न॰ कपोत इव कायति प्रकाशते कै—क। सौवो-

कपोतचरणा स्त्री कपोतस्य चरणश्चरणाकारोऽस्त्यस्याः अर्श॰ अच्। १नलीनामगन्धद्रव्यसाधने हृच्चे जटाधरः। कपोताङ्घ्रिरप्यत्र अमरः। ईत॰। २कपोतपादे उ॰।

कपोतपाक पुंस्त्री कपोतःपाको डिम्बः। कपोतशिशौ तेषां व्रातः ञ्य। कपोतपाक्यः तस्य स्त्रियां बहुषु लुक्। कपोतपाकाः स्त्रियां तु न लुक्-कपोतपाक्याः इत्येव।

कपोतपाद त्रि॰ कपोतस्य पादाविव पादावस्य हस्त्यादि॰

पाठात् नान्त्यलोपः समासान्तः। कपोततुल्यचरणे। स्त्रियां वा ङीप्।

कपोतपालिका स्त्री पालयति पाल+ण्वुल् ६त०। गृह स्तम्भाग्रप्रसारितदारुभेदे सौधादिप्रान्ते काष्ठादिरचिते पक्षिवासस्थाने विटङ्के (पायराखोप)। अमरः।

कपोतपाली स्त्री कपोतं पालयति अण् गौरा०ङीष् ६त० टिड्ढाणञित्यत्राद्यन्तयोः साहचर्यात् तद्धितान्तस्यैव सि० कौ० ग्रहणात् न ङीप् सुग्ध० तु ईप् उप० स० इति भेदः। कपोतपालिकार्थे विटङ्के हेमाचु०। "कपोतपालीषु निकेतनानाम्" माघः!

कपोतरोमन् पु० कपोतरूपधारिवह्निवरात् प्राप्ते उशीनरपुत्रे राजभेदे। तत्कथा भा० व० १९६अ०। "कपोत उवाच।"वैश्वानरोऽहं ज्वलनो धूमकेतुः"इत्युपक्रम्य "यामेतां श्येनीं मम निष्क्रयाय प्रादाद्भवानथिमोत्कृत्य राजन्!। एतद्वो लक्ष्म शिवं करोमि हिरण्यवर्णं रुचिरं पुण्यगन्धम्। एतासां प्रजानां पालयिता यशस्वी सुरर्षीणामथ सम्मतो भृशम्। एतस्मात् पार्श्वात् पुरुषोजनयिष्यति कपोतरोमेति च तस्य नाम"। २यदुवंश्ये कुकुरस्य नृपतेः पौत्रे नृपभेदे च"कुकुरस्य सुतो वृष्णिर्वृष्णेस्तु तनयस्तथा। कपोतरोमा तस्याथ तित्तिरिस्तनयोऽभवत्"हरिवं० ३८अ०।

कपोतलुब्धकीय न०कपोतं लुब्धकञ्चाधिकृत्य कृतो ग्रन्थः "इन्द्राच्छः"पा०छ। भारतान्तर्गते गृहस्थस्य प्राणदानेनाप्यातिथ्यावश्यकर्त्तव्यतासूचके आख्यायिकाभेदे तत्कथा भा०शा०१४६अ०।

"स पत्न्या वचनं श्रुत्वा धर्म्मयुक्तिसमन्वितम्। हर्षेण महता युक्तो वाक्यव्याकुललोचनः। तं वै शाकुनिकं दृष्ट्वा विधिदृष्टेन कर्म्मणा। स पक्षी पूजयामास यत्नात्तं पक्षिजीविनम्। उवाच स्वागतं तेऽद्य ब्रूहि किं करवाणि ते। सन्तापश्च न कर्त्तव्यः स्वगृहे वर्त्तते भवान्। तद्ब्रवीतु भवान् क्षिप्रं किं करोमि किमिच्छसि। प्रणयेन ब्रवीमि त्वां त्वं हि नः शरणागतः। अरावप्युचितं कार्य्यमातिथ्यं गृहमागते। छेत्तुमप्यागते छायां नोपसंहरते द्रुमः। शरणागतस्य कर्त्तव्यमातिथ्यं हि प्रयत्नतः। पञ्चयज्ञप्रवृत्तेन गृहस्थेन विशेषतः। पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमे। तस्य नायं न च परो लोको भवति धर्म्मतः। तद्ब्रूहि मां सुविस्रब्धो यत्त्वं वाचा वदिष्यसि। तत् करिष्याम्यहं सर्वं मा त्वं शोके मनः कृथाः। तस्य तद्वचनं श्रुत्वा शकुनेर्लुब्धकोऽब्रवीत्। बाधते खलु मे शीतं सन्त्राणं हि विधीयताम्। एवमुक्तस्ततः पक्षी पर्णान्यास्तीर्य्य भूतले। यथाशक्त्या हि पर्णेन ज्वलनार्थं द्रुतं ययौ। गत्वाऽङ्गारकर्मान्तं गृहीत्वाऽग्निमथागमत्। ततः शुष्केषु पर्णेषु पावकं सोऽप्यदीपयत्। स संदीप्तं महत् कृत्वा तमाह शरणागतम्। प्रतापय सुविस्रब्धः स्वगात्राण्यकुतोभयः। स तथोक्तस्तथेत्युक्त्वा लुब्धो गात्राण्यतापयत्। अग्निप्रत्यागतप्राणस्ततःप्राह विहङ्गमम्। हर्षेण महताऽऽविष्टो वाक्यं व्याकुललोचनः। तथेमं शकुनिं दृष्ट्वा विधिदृष्टेन कर्म्मणा। दत्तमाहारमिच्छामि त्वया क्षुद्बाधते हि माम्। स तद्वचः प्रतिश्रुत्य वाक्यमाह विहङ्गमः। न मेऽस्ति विभवो येन नाशयेयं क्षुधान्तव। उत्पन्नेन हि जीवामो वयं नित्यं वनौकसः। सञ्चयो नास्ति चास्माकं मुनीनामिव भोजने। इत्युक्त्वा तं तदा तत्र विवर्णवदनोऽभवत्। कथं नु खलु कर्त्तव्यमिति चिन्तापरस्तदा। बभूव भरतश्रेष्ठ गर्हयन् वृत्तिमात्मनः। मुहूर्त्ताल्लब्धसंज्ञस्तु स पक्षी पक्षिघातिनम्। उवाच तर्पयिष्ये त्वां मुहूर्त्तं प्रतिपालय। इत्युक्त्वा शुष्कपर्णैस्तु समुज्ज्वाल्य हुताशनम्। हर्षेण महताऽऽविष्टः स पक्षी वाक्यमब्रवीत्। ऋषीणां देवतानाञ्च पितॄणाञ्च महात्मनाम्। श्रुतः पूर्व्वं मया धर्म्मो महानतिथिपूजने। कुरुष्वानुग्रहं सौम्य! सत्यमेतद्ब्रवीमि ते। निश्चिता खलु मे बुद्धिरतिथिप्रतिपूजने। ततः कृतप्रतिज्ञो वै स पक्षी प्रहसन्निव। तमग्निं त्रिः परिक्रम्य प्रविवेश महामतिः। अग्निमध्ये प्रविष्टन्तु लुब्धो दृष्ट्वा तु पक्षिणम्। चिन्तयामास मनसा किमिदं वै कृतं मया। अहो मम नृशंसस्य गर्हितस्य स्वकर्म्मणा। अधर्म्मः सुमहान् घोरो भविष्यति न संशयः। एवं बहुविधं भूरि विललाप स लुब्धकः। गर्हयन् स्वानि कर्माणि द्विजं दृष्ट्वा तथागतम्"।

कपोतवङ्का स्त्री कपोतो वङ्क्यते प्रतार्य्यतेऽनया वञ्च–करणे घञ्। ब्राह्मीवृक्षे राजनि०। इमाञ्च सुश्रुते वीरतर्व्वादिगणे उक्ता तद्गुणा उक्ता यथा। "वीरतरुसहचरद्वयदर्भवृक्षादनीगुन्द्रानलकुशकाशाश्मभेदकाग्निमन्थमोरटावसुकवसिरभल्लूककुरण्टकेन्दीवरकपोतवङ्काः श्वदंष्ट्रा चेति। वीरतर्व्वादिरित्येष गणोवातविकारनुत्। अश्मरीशर्करामूत्रकृच्छ्राघातरुजापहः"। "कपोतवङ्कामूलं हि पिबेदम्लसुरादिभिः" सुश्रु०। भावप्र० "ब्राह्मी

कपोतवङ्का च सोमवल्ली सरस्वती”इत्येव पाठः तत्र क-
पोतवल्लीति पाठकल्पनं प्रामादिकं सुश्रुतैकवाक्यतया
कपोतवङ्केति पाठस्यैव न्याय्यत्वात्।

कपोतवर्णी स्त्री कपोतस्य वर्ण इव वर्णोऽस्याः गौरा॰ ङीप्।
सूक्ष्मैलायां राजनि॰ तत्फलस्य कपोततुल्यशुभ्रत्वात्तथात्वम्

कपोतवाणा स्त्री कपोतस्यातृपाद इव बाणस्तत्तुल्याकारोऽस्याः।
नलीकनामगन्धद्रव्ये राजनि॰ शरतुल्यरूपत्वात्तस्यास्तथात्वम्।

कपोतवृत्ति स्त्री कपोतानामिव सञ्चयोद्धरणेनाहृतस्य व्ययेन
वृत्तिः। कपोततुल्यायां १सञ्चयरहितजीविकायाम् तस्याश्च
सञ्चयराहित्यं कपोतलुब्धकीयशब्दे दर्शितवाक्ये स्फुटम्।
कपोतानां वृत्तिरिव वृत्तिरस्य। २तथावृत्तियुक्ते त्रि॰।
“कपोतवृत्तिर्मासनिचयः संवत्सरनिचयोवा। संवत्सर-
निचये पूर्व्वनिचितमाश्वयुज्यां त्यजात्” विष्णु स॰
वानप्रस्थधर्मकथने। [(बामनहाटी) राजनि

कपोतवेगा स्त्री कपोतस्य वेगो यस्याः ५ब॰। ब्राह्मीवृक्षे।

कपोतसार न॰ कपोतः तद्वर्णः इव सारोऽस्य कृष्णत्वात्।
स्रोतोऽञ्जने राजनि॰। [कापोताञ्जनमिति पाठान्तरम्।

कपोताञ्जन न॰ कपोतवर्णमञ्जनम्। स्रोतोऽञ्जने अमरः

कपोताभ पु॰ कपोतस्याभेवाभाऽस्य। १कपोतवर्णे हेम॰ तस्य ना-
नावर्णत्वेऽपि कपोताञ्जनादौ कृष्णवर्णो गृह्यते क्वचित् क-
र्व्वुरवर्णोऽपि “तदिदं भवा कपोतकर्व्वुरमिति” कुमार-
प्रयोगात् कर्व्वुरवर्णस्य लक्ष्याधिक्यात् कपोतवर्णत्वम्।
सुश्रुतोक्ते २मूषिकभेदे। “पूर्व्वमुक्ताः शुक्रविषा मूषि-
का ये समासतः। नामलक्षणभैषज्यैरष्टादश निबोध तान्”
इत्युपक्रम्य “लालन”इत्यादीन् “मूषिकश्च कपोताभस्तथै-
वाष्टादश स्मृताः” इति विभज्य “अरुणेनानिलं
क्रुद्धोवातजान् कुरुते गदान्। महाकृष्णेन पित्तञ्च श्वेते-
न कफमेव च। महता कपिलेनासृक् कपोतेन चतुष्टयम्।
भवन्ति चैषां दंशेषु ग्रन्थिमण्डलकर्णिकाः। पिड़कोपच-
याशोथाः शोषश्च भृशदारुणः”इत्युक्तम्। रूपचतुष्टयं
वातपित्तकफरक्तजविकाररूपम्”।[तस्य तन्नामकत्वात्तथात्वम्

कपोतारि पु॰ कपोतस्यारिः ६त॰। श्येनपक्षिणि शब्दर॰

कपोती स्त्री कपोतजातिः स्त्री ङीष्। १कपोतजातिस्त्रियाम्।
२यूपभेदे च। “अथ यस्यैतदकस्य सतः स्थूलदकाप्यं
भवति सह कपोती नाम यूपः योह तादृशं यूपं
कुरुते वाह्याद्युषोऽस्य लोकमेति तस्मात्तादृशमायुष्का-
मोयूपं न कुर्वीत” शत॰ ब्रा॰ ११,७,२,२। “वक्रः
सन्नतीस्तस्यापद्य भवति स कपोती यूप कपोतास्य
स्रीपवित्रपवित्रैयमास्यात्” भा॰। तेनात्र केनचित्
कपोतिन् इति शब्दस्य कल्पनं भाष्यविरुद्धत्वादुपेक्ष्यम्।

कपोल पु॰ स्त्री॰ कप-ओलच्। गण्डे गल्ले (गाल)
अमरः। “कपोलकण्डूः करिभिर्विनेतुम्” कुमा॰।
“कपोलपाटलादेशि बभूव रघुचेष्टितम्” रघुः।“लोलाभिः
सुरकरिणां कपोलकाषः” किरा॰ “यस्याः कपोलैः कल-
धौतधामस्तम्भेषु”। “कपोलभित्तीरिव लोध्रगौरीः”
माघः कपोलाभित्तय इव विस्तीर्णत्वात् उपमि॰स॰।
एवं कपोलफलकादयः प्रस्तीर्णकपोले।

कप्यास न॰ आसतेऽनेन आस करणे घञ् ६त॰। कपि-
पृष्ठान्तभागे “तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी”
छा॰ उ॰। “कपेर्मर्कटस्यासस् कप्यासः आसेरुपवेशनार्थस्य
करणे घञ् कपिपृष्ठान्तो येनोपविशति” भा॰।

कफ पु॰ केन जलेन फलति फल—ड। शरीरस्थे धातु-
भेदे श्लेष्मणि। “प्राणप्रयाणसमये कफवातपित्तैः कण्ठा-
वरोधनविधौ स्मरणं कुतस्ते” उद्भटः। कफस्य स्वरूप-
स्थानकर्मादिकं भावप्र॰ उक्तं यथा।

“श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छलः शीतलस्तथा।
तमोगुणाऽधिकः स्वादुर्विदग्धो लवणो भवेत्। एकः
श्लेष्मा नामस्थानकर्मभेदैः पञ्चविधः। अथ श्ले-
ष्मणां सामान्याह “कफस्यैतानि नामानि क्लेदनश्चाव-
लम्बनः। रसनः स्नेहनश्चापि श्लेष्मणः स्थानभेदतः
अथ क्लेदनादीनां स्थानान्याह। आमाशयेऽथ हृदये कण्ठे
शिरसि सन्धिषु। स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्य-
नुक्रमात्। दोषाणां सकलशरीरव्यापिनामपि पञ्च
स्थानानीति बाहुल्याभिप्रायेणोक्तानि। तथाच वाग्-
भटः “इति प्रायेण दोषाणां स्थानान्यविकृतात्मनाम्।
व्यापिनामपि जानीयात् कर्माणि च पृथक् पृथक्”। इति
चरकश्च “ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्द्ध संश्रयाः”
इति अथ तत्तत्स्थानगतस्य श्लेष्मणः कर्माण्याह।
क्लेदनः क्लेदयत्यन्नमामाशयस्थोऽपरानपि। अनुगृह्णाति
च श्लेष्मस्थानान्युदककर्म्मणा। अयमर्थः क्लेदनोऽन्नं
क्लेदयति तेन संहतमन्नं भेदं प्राप्नोति। अपरानपि
श्लेष्मस्थानानि हृदयादीनि मार्गेण गत्वा तत्र तत्र-
हृदयालम्बनसंधारणरसग्रहणसमस्तेन्द्रियतर्पणसन्धिसं-
श्लेषणाद्युदककर्मभिरनुगृह्णाति उपकरोति। तथाच
“रसयुक्तात्मवीर्येण हृदयस्यावलम्बनम्। त्रिकसन्धा-
रणं चापि विदधात्यवलम्बनः। त्रिकं शिरोबाहुद्वय-

सन्धिः। उभावपि यतः सौम्यौ तिष्ठतश्चान्तिके यतः। ततो रसान्विजानीतो रसनारसनौ समौ। रसना रसनेन्द्रियं रसनः कण्ठस्थकफः। स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः। श्लेष्मणः सर्वसन्धीनां संश्लेषं विदधात्यसौ"। अन्यत्र वैद्यकेऽन्यथानामान्युक्तम्। "अवलम्बकइत्येकः क्लेदकः श्लेषकोऽपरः। बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः। तल्लक्षणानि यथा "कफधाम्नां तु शेषाणां यत् करोत्यवलम्बनम्। ततोऽवलम्बकाख्याति श्लेष्मा प्राप्नोत्युरःस्थितः"। आमाशयाश्रितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः। श्लेष्मकः श्लेषणात् सन्धेः स च सन्धौ व्यवस्थितः। रसनावस्थितः श्लेष्मा बोधको रसबोधनात्। शिरसि प्रस्थितश्चासौ तर्पको नेत्रतर्पणात्" कफस्थानानि "उरः कण्ठः शिरः क्लोमपर्वाण्यामाशयो रसः। मेदो घ्राणञ्च जिह्वा च कफस्थानमुरःपरम्"। अविकृतकफस्य कर्माणि यथा सुखबोधे "स्नेहोबन्धः स्थिरत्वञ्च गौरवं वृषता बलम्। क्षमा धृतिरलोभश्च कफकर्माविकारजम्" कफसामान्यलक्षणं यथा "माधुर्य्यस्नेहगौरवशैत्यपैच्छिल्य गुणलक्षणः श्लेष्मा तस्य समानयोनिर्मधुरो रसः सोऽस्य माधुर्य्यान्माधुर्य्यं वर्द्धयति स्नेहात् स्नेहं गौरवाद्गौरवं शैत्यात् शैत्यं पैच्छिल्यमिति तस्य पुनरन्ययोनिः कटुको रसः स श्लेष्मणः प्रत्यनीकत्वात् कटुकत्वान्माधुर्य्यमभिभवति रौक्ष्यात् स्नेहं लाघवाद्गौरवमौष्ण्यात् शैत्यं वैशद्यात्पैच्छिल्यमिति" सुस्रु०। विशेषतस्तन्निदानादिकमुक्तं सुश्रुते

"दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवकनैषधेत्कटमाषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपोदकमांसवसाविसमृणालकसेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा प्रकोपमापद्यते। शीतैः शीतकाले च वसन्ते च विशेषतः। पूर्व्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति"।

सुश्रुते कफविकारे हेतुरुक्तो यथा "विषमोवातजान् रोगान् तीक्ष्णपित्तनिमित्तजान्। करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान्" वयोभेदे कफाद्याधिक्यमाह तत्रैव "बाले विवर्द्धते श्लेष्मा मध्यमे पित्तमेव तु। भूयिष्ठं वर्द्धते वायुर्वृद्धे तान्वीक्ष्य योजयेत्। देशभेदोऽपि कफहेतुस्तत्रोक्तः "कफवातरोगभूयिष्ठश्चानूपः"। कफशाम्य एव तद्दर्णाणां क्लेदनादेराप्यधर्मत्वात् यथोक्तम् सुश्रुते।

"शीतस्तिमितस्निग्धमन्दगुरुसान्द्रमृदुपिच्छिलरसबहुलमौत्कषायाम्ललवणं मधुररसप्रायमाप्यं तत् स्नेहनप्रह्लादनक्लेदनबन्धनविष्यन्दनकरमिति"। अधिकमाकरे दृश्यम्।

कफकर त्रि० कफं तद्विकारं करोति कृ–अच्। कफविकारकारके द्रव्यभेदे स च द्रव्यभेदः सुश्रुते उक्तः "काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदामहामेदाच्छिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मकप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधूकञ्चेति। काकोल्यादिरयं पित्तशोणितानिलनाशनः। जीवनो वृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा"।

अन्यत्र "कफपित्तकरा मत्स्याः कफपित्तकरं दधि"। सुश्रुतेऽपि। सामान्यत उक्तं यथा "कटुकं मूलकं श्लेष्माणं वर्द्धयति स्निग्धवीर्य्यत्वात्" "वसुधाजलजाताभ्यां बलासं परिवर्द्धते" बलासं कफः। कफकृत्कफवर्द्धनादयोऽप्यत्र। "प्रमेहकृत् स्यात् कफकृच्च सर्वम्" वैद्यकम्।

कफकूर्चिका स्त्री कफं कूर्चति निकरोति कुर्च–विकारे ण्वुल्। लालायाम् आस्रावने (लाल)। हेम०।

कफघ्नी कफं तद्विकारं हन्ति टक् ङीप्। १ हवुसाभेदे राजनि०। २ कफहन्तृद्रव्यभेदे त्रि० तानि द्रव्याणि सुश्रुते दर्शितानि यथा "आरग्वधमदनगोपघोण्टाकुटजपाठाकण्टकीपाटलामूर्व्वेन्द्रयवसप्तपर्णनिम्बकुरुण्टकदासीकुरुण्टकगुडूचीचित्रकशार्ङ्गेष्टाकरञ्जद्वयपटोलकिराततिक्तकानि सुषवी चेति। आरग्वधादिरित्येष गणः श्लेष्मविषापहः"। "वरुणार्त्तगलशिग्रुमधुशिग्रुतर्कारीमेषशृङ्गीपूतीकानक्तमालमोरटाग्निमन्थसैरीयकद्वयविम्बीवसुकवसिरचित्रकशतावरीविल्वाजशृङ्गीदर्भा वृहतीद्वयञ्चेति। वरुणादिर्गणो ह्येष कफमेदोनिवारणः"।

"सालसारा जकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचन्दनकुचन्दनशिंशपाशिरीषासनधवार्ज्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति। सालसारादिरित्येष गणः कुष्ठविनाशनः। मेहपाण्डुामयहरः कफमेदोविशोषणः", "रोध्रसावररोध्रपलाशकुटन्नटाशोकफञ्जीकट्फलैलवालुकसल्लकीजिङ्गिनीकदम्बसालाः कदली चेति। एष रोध्रादिरित्युक्तो मेदःकफहरो गणः"। "अर्कालर्ककरञ्जद्वयनागदन्तीमयूरकभार्गीरास्नेन्द्रपुष्पीक्षुद्रश्वेतामहाश्वेतावृश्चिकाल्यलवणातापसवृक्षश्चेति। अर्कादिको गणो ह्येष कफमेदोविषापहः"। "सुरसाश्वेतसुरसाफणिज्झकार्य्यकगन्धकभूस्तृणसुमुखकालमालकासमर्द्दक्षवकखरपुष्पाविडङ्गकट्फलसुर

सीनिर्गुण्डीकुलाहलोन्दुरुकर्णिकाफञ्जीप्राचीबलकाकमाच्यो विषमुष्टिकश्चेति । सुरसादिर्गणो ह्येष कफहृत्कृमिसूदनः" । "पिप्पलीपिप्पलीमूलचव्यचित्रकशृङ्गवेरमरिचहस्तिपिप्पलीहरेणुकैलाजमोदेन्द्रयवपाठाजीरकसर्षपमहानिम्बफलहिङ्गुभार्गीमधुरसातिविषावचाविडङ्गानि कटुरोहिणी चेति । पिप्पल्यादिः कफहरः प्रतिश्यायानिलारुचीः । निहन्याद्दीपनो गुल्मशूलघ्नश्चामपाचनः" । "एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकबालुकगुग्गुलुसर्जरसतुरुष्ककुन्दुरुकाऽगुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति । एलादिको वातकफौ निहन्याद्विषमेव च" । "वृहतीकण्टकारिकाकुटजफलपाठा मधुकञ्चेति । पाचनीयो वृहत्यादिर्गणः पित्तानिलापहः । कफारोचकहृद्रोगमूत्रकृच्छ्ररुजापहः" । "पटोलचन्दनकुचन्दनमूर्व्वागुडूचीपाठाः कटुरोहिणी चेति । पटोलादिर्गणः पित्तकफारोचकनाशनः" ।

"ऊषकसैन्धवशिलाजतुकासीसद्वयहिङ्गूनि तुत्थकञ्चेति ऊषकादिः कफं हन्ति गणो मेदोविशोषणः" । "मुस्ताहरिद्रादारुहरिद्राहरीतक्यामलकविभीतककुष्ठहैमवतीवचापाठाकटुरोहिणीशार्ङ्गष्टाऽतिविषाद्राविडीभल्लातकानि चित्रकश्चेति । एष मुस्तादिको नाम्ना गणः श्लेष्मनिषूदनः" । "हरितक्यामलकविभीतकानि त्रिफला । त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशनी" ।

"पिप्पलीमरीचशृङ्गवेराणि त्रिकटुकम् । त्र्यूषणं कफमेदोघ्नं मेहकुष्ठत्वगामयान् । निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि" । "आमलकीहरीतकीपिप्पल्यश्चित्रकश्चेति । आमलक्यादिरित्येष गणः सर्वज्वरापहः । चक्षुष्यो दीपनो वृष्यः कफारोचकनाशनः" । "लाक्षारेवतकुटजाऽश्वमारकट्फलहरिद्राद्वयनिम्बसप्तच्छदमालत्यस्त्रायमाणा चेति । कषायतिक्तमधुरः कफपित्तार्त्तिनाशनः" । "बिल्वाग्निमन्थटुण्टुकपाटलाकाश्मर्य्यश्चेति महत् । सतिक्तं कफवातघ्नं पाके लघ्वग्निदीपनम् । मधुरानुरसञ्चैव पञ्चमूलं महत् स्मृतम्" । "कुशकाशनलदर्भकाण्डेक्षुका इति तृणसंज्ञकः । मूत्रदोषविकारञ्च रक्तपित्तं तथैव च । अन्त्यः प्रयुक्तः क्षीरेण शीघ्रमेव विनाशयेत् । एषां वातहराद्यावन्त्यः पित्तविनाशनः । पञ्चकौ श्लेष्मशमनावितरौ परिकीर्त्तितौ" इति विशेषत उक्तम् । सामान्यतस्तु तत्रैवोक्तम् "अम्लं कपित्थं श्लेष्माणं शमयति रूक्षवीर्य्यत्वात् मधुरं क्षौद्रञ्च" । रसभेदस्य तद्धेतुता तत्रोक्ता । "ये रसा श्लेष्मशमना भवन्ति यदि तेषु वै । स्नेहगौरवशैत्यानि बलासं वर्द्धयन्ति ते" (बलास कफम्) तत्पाकपरिपाटी तत्रैवोक्ता । "श्लेष्मा विदग्धो लवणतामुपैति" स्वतेजोनिलजैः श्लेष्मा शमं याति शरीरिणाम् । "तत्र यद्रसे गुणा वीर्य्यसंज्ञकाः शीतोष्णस्निग्धरूक्षमृदुतीक्ष्णपिच्छिलविशदास्तेषां तीक्ष्णोष्णावाग्नेयौ । शीतपिच्छिलावम्बुगुणभूयिष्ठौ । पृथिव्यम्बुगुणभूयिष्ठः स्नेहः । तोयाकाशगुणभूयिष्ठं मृदुत्वं । वायुगुणभूयिष्ठं रौक्ष्यम् । क्षितिसमीरणगुणभूयिष्ठं वैशद्यम् । गुरुलघुविपाकावुक्तगुणौ । तत्रोष्णस्निग्धौ वातघ्नौ । शीतमृदुपिच्छिलाः पित्तघ्नाः । तीक्ष्णरूक्षविशदाः श्लेष्मघ्नाः । गुरुपाको वातपित्तघ्नः । लघुपाकः श्लेष्मघ्नः । तेषां मृदुशीतोष्णाः स्पर्शग्राह्याः । पिच्छिलविशदौ चक्षुःस्पर्शाभ्याम् । स्निग्धरूक्षौ चाक्षुषौ । शीतोष्णौ सुखदुःखोत्पादनेन । गुरुपाकः सृष्टविण्मूत्रतया कफोत्क्लेशेन च । लघुर्बद्धविण्मूत्रतया मारुतकोपेन च" ।

"तीक्ष्णोष्णं मूत्रलं हृद्यं कफघ्नं कटुपाकि च" सुश्रु० । तन्नाशकद्रव्यगुणभेदाः संक्षिप्यान्यत्रोक्ताः । "गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः । श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः" । तन्निवारणोपाया अन्यत्रोक्ता यथा "रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवन स्त्रीसेवाध्वनियुद्धजागररतिक्रीड़ापदाघातनम् । धूमात्युष्णशिरोविरेकवमनस्वेदोपनाहादिकं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत्" ।

कफहन्तृ कफहादयः श्लेष्महन्तृश्लेष्महादयोऽप्यत्र त्रि० ।

कफणि पुंस्त्री केन जलेन फणति स्फुरति इन् । भुजमध्यपर्व्वणि । कूर्परे (कनुइ) हेमच० स्त्रीत्वे वा ङीष् ।

कफल त्रि० कफः साध्यत्वेनास्त्यस्य लच् । कफदायके "वेणोः करीराः कफला मधुरा रसपाकतः" सुश्रु० ।

कफवर्द्धन पु० कफं तद्विकारं वर्द्धयति वृध–णिच्–ल्यु । १पिण्डीतकवृक्षे त्रिकाण्ड० । २कफवृद्धिकारके त्रि० ।

कफविरोधिन् पु० कफं विरुणद्धि वि+रुध–णिनि । १मरिचे राजनि० । कफविरोधकारके २कफविकारनाशके त्रि० ।

कफान्तक पु० कफमन्तयति अन्त+तत्करोतीति णिच्–ण्वुल् । १वर्वुरवृक्षे राजनि० । २कफविकारनाशके त्रि० ।

कफारि पु० ६त० । १शुण्ठ्याम् राजनि० २कफनाशके त्रि० ।

कफिन् त्रि० कफोऽस्त्यस्य कफ+इनि । १श्लेष्मप्रधाने जने ।

अमरः स्त्रियां ङीप्। कफिनी तस्य भावः तल्। कफिता स्त्री त्व। कफित्व न० कफयुक्तत्वे।

कफेलू पु० कफं लाति ला–कू नि०। श्लेष्मातकतरौ उज्ज्वल० रूपमञ्जरी। शब्दक० कफयुक्ते त्रि० सि० कौ० "प्रमाद-तयोक्तं यदुक्तं तच्चिन्त्यं सि०कौ० "कफं लाति कफेलूः श्लेष्मातकः निपातनादेत्वम्" इत्युक्तेः तत्र तदर्थत्वा-दर्शनात्।

कफोणि पुंस्त्री केन जलेन फणति इन् पृषो० ओत्वम्। भुजमध्यपर्व्वणि कूर्परे (कनुइ) अमरः। स्त्रियां वा ङीप्।

कफोड पु० कफोणि+नैरुक्ते पृषो०। (कनुइ) कूर्परे। "कति स्तनौ व्यदधुः कः कफोडः" अथ० १०, ४, २,

कब स्तुतौ वर्णे च भ्वा०सक०प०सेट्। कबति अकबिट चकाब ऋदित् णिचि अचकाबत्। प्रनिकबति।

कबन्ध पु०कं जलं बध्नाति बन्ध–अण्, केन वायुना बध्यते, बन्ध–कर्म्मणि घञ्, कोवायुः प्राणकबन्ध्यते संबध्यतेऽत्रा धारे घञ् वा यथायथं वाक्यम्। १उदरे तस्य पीतजलनिरोधनात् तथात्वम्। २धूमकेतौ, प्रवहवा-युना निचीयमानत्वात्तस्य तथात्वम् ३राहौ, तस्य च्छिन्नमस्तकत्वेऽपि अमृतपानात् जीवनसत्त्वेन क्रिया-वत्त्वात् तथात्वम् ४राक्षसभेदे च मेदि० ५जले अमरः तस्य प्राणवायुधारकत्वात् तथात्वम् "आ-पोमयः प्राणः" इति छा०उ० श्रुतेस्तस्य प्राणधारण करत्वम् "पञ्चदशाहानि माऽशीः काममपः पिबापोमयः प्राणो न पिबतस्ते विच्छेत्स्यते" छा०उ० जलपानं विना प्राणविच्छेदस्योक्तेस्तथात्वम्। "मनुष्याणां सहस्रेषु हतेषु हृतमूर्द्धसु। तदावेशात् कबन्धः स्यादेकोऽमूर्द्धा क्रियान्वितः" इत्युक्तलक्षणे शिरःशून्ये क्रियायुक्तदेहे अस्त्री अमरः। "कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः" देवीमा०। "नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं पत्तीनां दश कोटयो निपतिता एकः कबन्धो रणे। तादृक्कोटि कबन्धनर्त्तनविधौ खेलज्ज्वलत् खे शिरस्तेषां कोटिनिपातने रघुपतेः कीदृग्घण्टारवः" प्राचीनगाथा। "यस्य नेष्यति वपुः कबन्धताम्" चलितोर्द्ध्वकबन्धसम्पदः" माघः। "कश्चित् द्विषत्खड्गहृतोत्तमाङ्गः सद्यो विमानप्रभुता-मुपेत्य। वामाङ्गसंसक्तसुराङ्गनः स्वं नृत्यत् कबन्धं समरे ददर्श"। "उत्थितं ददृशेऽन्यच्च कबन्धेभ्यो न किञ्चन" रघुः। तद्देहस्य शिरःशून्यत्वेऽपि वायोः सम्यग्निःसर-णाभावेन वायुना सम्बन्धसत्त्वात् क्रियासम्भव इति बोध्यम् ७मेघे निरुक्ते ५, ४ "निचीनवारं वरुणं कबन्धम्" इत्यृचम-धिकृत्योक्तम् "कबन्धं मेघम् कमुदकं भवति तदस्मिन् धीयते, उदकमपि कबन्धमुच्यते बन्धिरनिभृतत्वे कमनिभृतञ्च इति" तत्रोक्तेः तत्र पृषो०साधुत्वम्। कबन्धराक्षसकथा च भा०व० २७७अ० यथा। "दुःखशोकसमाविष्टौ वैदेहीहरणार्द्दितौ। जग्मतुर्दण्डकारण्यं दक्षिणेन परन्तपौ। वने महति त-स्मिंस्तु रामः सौमित्रिणा सह। ददर्श मृगयूथानि द्रव-माणानि सर्व्वशः। शब्दञ्च घोरं सत्त्वानां दावाग्नेरिव वर्द्धतः। अपश्यतां मुहूर्त्ताच्च कबन्धं घोरदर्शनम्। मेघ-पर्व्वतसङ्काशं शालस्कन्धं महाभुजम्। उरोगतविशालाक्षं महोदरमहामुखम्। यदृच्छयाथ तद्रक्षः करे जग्राह लक्ष्मणम्। विषादमगमत् सद्यः सौमित्रिरथ भारत!। स राममभिसंप्रेक्ष्य कृष्यते येन तन्मुखम्। विषण्णश्चा-ब्रवीद्रामं पश्यावस्थामिमां मम। हरणञ्चैव वैदेह्या मम चायमुपप्लवः। राज्यभ्रंशश्च भवतस्तातस्य मरणं तथा। नाहं त्वां सह वैदेह्या समेतं कोशलागतम्। द्रक्ष्यामि पृथिवीराज्ये पितृपैतामहे स्थितम्। द्रक्ष्यन्त्यार्य्यस्य धन्या ये कुशलाजशमीजलैः। अभिषिक्तस्य वदनं सोमं शान्तघनं यथा। एवं बहुविधं धीमान् विललाप स लक्ष्मणः। तमुवाचाथ काकुत्स्थः सम्भ्रमेष्वप्यसम्भ्रमः। मा विषीद नरव्याघ्र! नैष कश्चिन्मयि स्थिते। छिन्ध्यस्य दक्षिणं बाहुं छिन्नः सव्यो मया भुजः। इत्येवं वदता तस्य भुजो रामेण पातितः। खड्गेन भृशतीक्ष्णेन नि-कृत्तस्तिलकाण्डवत्। ततोऽस्य दक्षिणं बाहुं खड्गेन जघ्निवान् बली। सौमित्रिरपि संप्रेक्ष्य भ्रातरं राघवं स्थितम्। पुनर्जघान पार्श्वे वै तद्रक्षो लक्ष्मणो भृशम्। गतासुरपतद्भूमौ कबन्धः सुमहांस्ततः। तस्य देहाद्विनिः-सृत्य पुरुषो दिव्यदर्शनः। ददृशे दिवमास्थाय दिवि सूर्य्य इव ज्वलन्। पप्रच्छ रामस्तं वाग्मी कस्त्वं प्रब्रूहि पृच्छतः। का माया किमिदं चित्रमाश्चर्य्यं प्रतिभाति मे। तस्याचचक्षे गन्धर्व्वो विश्वावसुरहं नृप!। प्राप्तो ब्राह्मणशा-पेन योनिं राक्षससेविताम्। रावणेन हृता सीता राम! लङ्काधिवासिना। सुग्रीवमभिगच्छ त्वं स ते सख्यं करि-ष्यति। एषा पम्पा शिवजला हंसकारण्डवैर्युता। ऋष्यमूकस्य शैलस्य सन्निकर्षे तडागिनी। वसते तत्र सु-ग्रीवश्चतुर्भिः सचिवैः सह। भ्राता वानरराजस्य वालि-नो हेममालिनः। तेन त्वं सह सङ्गम्य दुःखमूलं निवे-दय। समानशीलो भवतः साहाय्यं स करिष्यति।

एतावच्छक्यमस्माभिर्वक्तुं द्रष्टासि जानकीम्। प्रव वानरराजस्य विदितो रावणालयः। इत्युक्तान्तर्हितो दिव्यः पुरुषः स महाप्रभः। विस्मितं जग्मतुश्चोभौ प्रवीरौ रामलक्ष्मणौ"। "वधनिर्धूतशापस्य कबन्धस्योपदेशतः" रघुः

कबन्धिन् पु० १ऋषिभेदे "अथ कबन्धी कात्यायन उपेत्य पप्रच्छ" प्रश्नोप०। अस्त्यर्थे इनि। २उदकयुक्ते त्रि० 'अग्निमृणोन मरुतः कबन्धिनः" ऋ०५,५४,८। "कबन्धिनः उदकवन्तः" भा०। स्त्रियां ङीप्।

कबित्थ पु० कपयस्तिष्ठन्त्यत्र तत्फलप्रियत्वात् स्था–क पृषो० पस्य बः। कपित्थशब्दे अमरटीका। [हिरूपकोषः।

कबिल पु० कब्–वर्णे इलच्। १कपिलवर्णे २तद्वति त्रि०।

कम् अव्य० कम–णिङभावपक्षे विच् चादि। १पादपूरणे,२जले, कन्नम्।२मस्तके ४सुखे,शब्दर०कन्तिः कन्तुः ५मङ्गले, ६निन्दायाम् शब्दचिन्ता०। "अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पादपूरणास्ते ऽमिताक्षरेष्वनर्थकाः कमीमिद्विति" यथा "यवीत मर्त्याय कमरिया" ऋ०४,३०,६, "कमिति पादपूरणम्"निरु० १,६, उक्तेः पादपूरणार्थता "तन्वं शयुवे हवे कम्" ऋ० १,१२३,११,"अत्र कमिति पादपूरणे अथवा कमिति सुखवचनम् सुखं यथा भवतीति" भा०"एवेदेषा पुरुतमा दृशे कम् १,१२४,६, "कम् सुखेन" भा० "वरमयः सरप्वरस्याय कमलम्" ऋ० २,१३,१२, "कं सुखेन"भा०। ७जलधारके मेघे"पिन्वसि त्वचं कं चित्"ऋ०,१,१२६,२, "कं चित् जलधारिणं मेघम्" भा०। ८सुखकरे "पश्विणं तोग्याय कम्"ऋ० १,१८२.५, "कम् सुखकरम्" भा० ता: अस्त्यर्थे "कंशम्भ्यां वभयुस्तितुतयसः" पा० वादयः सप्त प्रत्ययाः। कंव कम्भ कंयु कन्ति कन्त कन्त कंय एते सुखान्विते त्रि०।

कम वाञ्छायां भ्वा० आ०सक०सेट्। अतः स्वार्थे णिङ् आर्द्धधातुके वा। कामयते कामयीत कामयताम् अकामयत। अचीकमत। णिङभावपक्षेऽपि चङ् अचकमत। कामयाम् बभूव आस चक्रे चकमे। कामयिता–कमिता कामयिषीष्ट–कमिषीष्ट। कामयिष्यते–कमिष्यते। कामनीयः कमनीयः काम्यः। कामयितव्यः–कमितव्यः। कामी। कामयिता–कमिता कान्तिः कान्तः। कान्तिः। कर्त्तरि अच् कमः कर्मण्युपपदे अण्। स्वर्गकामः। उदित् कामयित्वा कामित्वा कान्त्वा। कामुकः कम्रः कमनः कामयमानः नि० कामयानः। काम्यते काम्यमानः। घञ् कामः सुव कामना। "नरपतिरचकमे मृगयारतिम्" "निष्क्रान्ते मयि चकमे कुबेरात्" "भीमकान्तैर्नृपगुणैः" "नवं वयः कान्तमिदं वपुश्च" रघुः। "सोऽकामयत बहु स्यां प्रजायेय" श्रुतिः "रमणीकमनीयकपोलतले"सा०द०टी०।"स चेत् कामयते दातुं तत्र मामरिसूदन!" भा० आ०१७२। "सर्वान् कामयते यस्मात्" कत्याशब्दे उक्तम्। "प्रीत्या युक्ता: कामितं सर्वयस्ते" भा० आ० ५८ "कामयाञ्चक्रिरे कान्ताः सतस्तुष्टानिशाचराः" "अकम्पनस्ततो योद्धुं चकमे रावणाज्ञया" भट्टिः। आर्षे क्वचित् पर०। "एवं रूपं जलं यो वै कामयेत्स्पृष्टुं कवे।" भा० व० ५८ अ०। "न च सीता दशग्रीवं मनसापि हि कामयेत्" "अकामोऽपि बलात् कामं दर्शनादेव कामयेत्" रामा०।

अनु+कामनानुरूपकामनायाम्। अनुकामयते।

अभि+आभिमुख्येन कामनायाम्। "दासीं कन्यासहस्रेण यस्मिन्नभिकामये" भा०आ०१८।

नि+निःशेषकामनायाम्।"या तस्य ते पादसरोरुहार्हणं निकामयेत् साऽखिलकामलम्पटा" भाग० ५स्क०१८,२२। अतिशये च "निकामतप्ता विविधेन वह्निना" कुमा०

प्र+प्रकर्षेण कामनायां अतिशये। प्रकामः।

कम वाञ्छायां चुरा० आ०सक० सेट् उदित् कविकल्पद्रुमः। णिङन्तकमवत् सर्वम्। किन्तु तत्र उदित्प्रयोजनं चिन्त्यम्।

कमक त्रि० कम–णिङभावे अच् स्वार्थे क। १कामुके २गोत्रप्रवर्त्तके २ऋषिभेदे पु०। ततः गोत्रापत्ये इञ्। कामकि तद्गोत्रापत्ये पुंस्त्री बहुषु उपका० तस्य लुक्। कमकाः कामकयः।

कमठ पुंस्त्री कम–अठन्। १कूर्मे कच्छपशब्दे विवृतिः स्त्रियां जातित्वात् ङीष्।"कमठपृष्ठकठोरमिदं धनुः"महाना०। २विष्णोरेकादशे अवतारभेदे। "सुरासुराणामुदधिं मथ्नतां मन्दराचलम्। दध्रे कमठरूपेण पृष्ठे एकादशे विभुः" भाग० १,३,१७। ३मुनीनां जलपात्रभेदे न० विश्वः। ४वंशे पु० शब्दर०। ५दैत्यभेदे पु० हेमच०। ६शल्लकीवृक्षे पु० धरणिः।

कमण्डलु पुंन० मण्डनं मण्डः कस्य जलस्य मण्डं व्याति–ला–कु अर्द्धर्चादि। करङ्के संन्यासिनां ब्रह्मचारिणाञ्च १जलपात्रभेदे, अमरः।"मेखलामजिनं दण्डमुपवीतं कमण्डलुम्"।"वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम्"मनुः। "अशेषतीर्थोपहृताः कमण्डलोः" माघः। "कमण्डलुकपालेन शिरसा च मृजावता" भट्टिः। २प्लक्षवृक्षे,

मेदिनिः । ३चतुष्पाज्जातौ च पुंस्त्री "कमण्डलुशब्दश्च-तुष्पाद्ज्जातिभेदः" सि०कौ० । तस्यापत्यम् चतुष्पा-द्भ्यो ढञ् पा० ढञ् "लोपोऽकद्र्वाः" पा० उ-लोपः । कामण्डलेय तदपत्ये पुंस्त्री । तस्य कर्म भावो वा युवादि०अण् । कामण्डलव तद्भावे तत्कर्मणि च न०।

कमण्डलुतरु पु० कमण्डलुतुल्याकृतिस्तरुः कर्म० । १प्लक्षवृक्षे रत्नमा० । कमण्डलुद्रुमादयोऽप्यत्र ।

कमन त्रि० कम–णिङ्भावे ताच्छील्ये युच् । १कमनीये अ-भिरूपे २कामुके च मेदि० । "कम्रा कमना युवतिः" सि०कौ० । कमनच्छदः । "त्रिभुवनकमनं तमालवर्णं रविकरगौरवराम्बरं दधानम्" (वपुः) भाग० १,९,३३ । करणे युच् । ३कन्दर्पे । ४अशोकवृक्षे च पु० मेदि० । ५ब्राह्मणे पु०हेमच० । [हेमच०। स्त्रियां ङीप् ।

कमनच्छद पुंस्त्री कमनः सुन्दरः छदोऽस्य । १कङ्कपक्षिणि ।

कमनीय त्रि० कम–णिङ्भावे कर्मणि अनीयर् । १सुन्दरे, "रमणीकमनीयकपोलतले परिपीतपटीरसरैरलसः" सा० द० टी० । "रुचिरं कमनीयतरा गमिता" माघः। २कामनायोग्ये वाञ्छनीये च । "अनन्यनारीकमनीयम-ङ्कम्" कुमा० । कमनीयस्य भावः "योपधात्गुरूपोत्त-माद्वुञ्" पा० वुञ् । कामनीयक तद्भावे न० ।

कमन्तक पु० कम–बा० झ स्वार्थे क । ऋषिभेदे तस्य गोत्रा-पत्यम् इञ् । कामन्तकि तद्गोत्रापत्ये पुंस्त्री बहुत्वे उपका० इञोलुक् । कामन्तकयः कमन्तकाः ।

कमन्ध न० जले रायमुकुटेपरमतेनोक्तम् । तत्र हि कबन्धमिति स्वयं व्याख्याय कमन्धम् इति ममध्यपाठे कम् अन्धस् इति नामद्वयमेकीयमतेनोक्ता कमन्धमित्येक नाम परम-तत्वेनोक्तम् ।

कमर त्रि० कम–णिङ्भावे अरच्। कामुके उज्ज्वल० ।

कमल न० कम–वृषादि०कलच् । १पद्मे तद्भेदस्य त-द्वयवभेदस्य च गुणादि भावप्र० उक्तं यथा

"कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् । तृष्णा-दाहास्रविस्फोटविषवीसर्पनाशनम् । विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्। रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् । धवलं कमलं शीतं मधुरं कफपित्तजित् । तस्मादल्पगुणं किञ्चिदन्यद् रक्तो-त्पलादिकम् । मूलनालदलोत्फुल्लफलैः सम-दिता पुनः । पद्मिनी प्रोच्यते प्राज्ञैर्बिसिन्यादिश सा स्मृता । आदिशब्दान्नलिनी कमलिनीत्यादि । पद्मिनी शीतला गुर्वी मधुरा लवणा च सा । पित्त-रक्तकफनुद्रूक्षा वातविष्टम्भकारिणी । अथ नवपत्रादि । संवर्त्तिका नवदलं बीजकोषस्तु कर्णिका । किञ्जल्कः केश-रः प्रोक्तः मकरन्दो रसः स्मृतः । मृणालं पद्मनालं स्यात्तथा बिसमिति स्मृतम् । संवर्त्तिका हिमा तिक्ता कषाया दाहतृट्प्रणुत् । मूत्रकृच्छ्रगुदव्याधिरक्तपित्त विनाशिनी । पद्मस्य कर्णिका तिक्ता कषाया मधुरा हिमा । मुखवैशद्यकृल्लघ्वी तृष्णास्रकफपित्तनुत् । किञ्जल्क शीतलो वृष्यः कषायो ग्राहकोऽपि सः । कफपित्तत्तृ-षादाहरक्तार्शोविषशोथजित् । मृणालं वृष्यमधुरं पित्तदाहास्रजिद्गुरु । दुर्ज्जरं स्वदुपाकञ्च स्तन्यानिल-कफप्रदम् । संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणम्" । "नवावतारं कमलादिवोत्पलम्" रघुः । "प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः" "धारापातैस्त्वमिव कम-लान्यभ्यवर्षन्मुखानि" मेघ० "अमलकमलराशेः"लीला० "न कमलं कमलस्य यदम्भसि" माघः। कमलयोनिः कम-लासनः । २क्लोम्नि ३भेषजे ४सलिले ५ताम्रे हेम० ६मृगभेदे पुंस्त्री स्त्रियां ङीष् ७लक्ष्म्यां दवरनाय्यां स्त्री मेदि०।८सारसपक्षिणि अमरः कमलनामनामत्वा-त्तस्य स्त्रियां ङीष् । १०स्वनामख्याते जम्बीरभेदे स्त्री "रम्भाफलं तिन्तिडीकं कमलानागरङ्गकम् । फला-न्येतानि भोज्यानि एभ्योऽन्यानि विवर्जयेत्" तन्त्रसा० पुरश्चरणनियमे । तद्गुणाश्च भावप्र०उक्ता यथा । "मि-ष्टनिम्बूफलं स्वादु गुरु मारुतपित्तनुत् । गररोगविषध्वं-सि कफोत्क्लेशि च रक्तहृत् । शोषारुचितृषाच्छर्दिहरं बल्यञ्च बृंहणम्"११मिथिलास्थे नदीभेदेस्त्री । १२छन्दो-भेदे स्त्री । तल्लक्षणं वृत्तरत्नावल्यां द्विधोक्तम् यथा"द्विगुण-नगणसहितः समपदइह हि विहितः । फणिपतिमति-विमला क्षितिप ! भवति कमलेति" "दशभिः प्रमिता सग-णाविहिताः पुनरेकमितोमिहितोगुरुरन्ते । यदि सत्-कवयोविलसन्मतयोऽभिधया कमलेति तदाकलयन्ते" (गोलापी) १३पाटलवर्णे १४तद्वति त्रि०। "अवलाय स्वाहा कमलाय स्वाहा पृश्नये स्वाहा तैत्ति० ७,३,१८,१ । अस्य गुणवचनत्वात् स्त्रियां बह्वादि० वा ङीष् । कमली कमलानां संघः खण्ड । कमलखण्ड पद्मसंघे न० तस्य देयः पुस्त्र० इनि । कमलिनी भावप्र० उक्ते बीज-कोषादौ स्त्री "कमलिनीमलिना द्विरदालये" उद्भटः । "उक्तोमलयतालेन लघुमध्ये स्फुरेद्गुरुः । सप्तदशाक्षरै-

युक्तः कमलोऽयं भयानके"सङ्गीतदामोदरोक्ते १५मु बभेदे पु०

कमलकीट पु० कमलवर्णः कीटः । कीटभेदे तत्र भवादौ पलद्या० अण् । कामलकीट तद्भवे त्रि० ।

कमलकीरक पु० कमलवर्णः कीर इव कायति कै–क । कीटभेदे तत्र भवादौ पलद्या० अण् । कामलकीरक तद्भवे त्रि० ।

कमलज पु० कमलात् विष्णोर्नाभिकमलाज्जायते जन–ड । १ब्रह्मणि चतुर्मुखे कञ्जजशब्दे विवृतिः। "अखियमद्दूनकमलजयमिन्दुलभूदिति" इत्यत्र ०। तदभेदात् २रोहिणीनक्षत्रे च तस्य तदधिष्ठितत्वात्तथात्वम् । ३पद्मजातमात्रे मध्वादौ त्रि०। कमलजातपद्मजातादयोऽप्यत्र ।

कमलभिदा स्त्री ६त० । कमलपाटने तत्र भवादौ पलद्या० अण् । कामलभिद तद्भवे त्रि०।

कमलयोगि पु०कमलं विष्णुनाभिकमलं योनिरुत्पत्तिस्थानमस्य। १चतुर्मुखे ब्रह्मणि । कञ्जजशब्दे विवृतिः । पद्मयोन्यादयोऽप्यत्र । ६त०। २कमलानामुत्पत्तिस्थाने स्त्री ।

कमलवीज न०६त०। (कमलगट्टा) पद्माक्षे भावप्र०तद्गुणा उक्ता यथा "पद्मवीजं हिमं स्वादु कषायं तिक्तकं गुरु। विष्टम्भि वृष्यं रूक्षञ्च गर्भसंस्थापकं परम् । कफवातकरं बल्यं ग्राहि पित्तास्रदाहनुत्" ।

कमलाकर पु० कमलानामाकरः उत्पत्तिस्थानम् । १पद्माकरे तड़ागे । २पद्मानां समूहे च । "हरिदश्वःकमलाकरानिव"रघुः। कमलाकरभट्टनिर्मिते ३स्मृतिनिबन्धभेदे ।

कमलादि त्रि० वार्त्तिकोक्ते संचार्थे खण्डप्रत्ययनिमित्ते शब्दगणे स च गणः"कमल अम्भोज पद्मिनी नलिनी कुमुद सरोजपद्म नलिन कैरविणी" आकृतिगणः तेन कदलीखण्डमित्यादि सिद्धिः।

कमलापति पु० ६त० । नारायणे समुद्रात् लक्ष्म्या आविर्भूतिमुपवर्ण्य तया विवेचनापूर्वकं नारायणस्य पतित्वेन वरणं भाग० ८,८ अ० वर्णितं यथा
"ततस्ततोनूपुरवल्गुशिञ्जितैर्विसर्पती हेमलतेव सा बभौ । विलोकयन्ती निरवद्यमात्मनः पदं ध्रुवं चाव्यभिचारिसद्गुणम् । गन्धर्व्वसिद्धासुरयक्षचारणत्रैपिष्टपेयादिषु नान्वविन्दत । नूनं तपो यस्य न मन्युनिर्जयोज्ञानं क्वचित्तच्च न सङ्गवर्ज्जितम् । कश्चिन्महांस्तस्य न कामनिर्जयः स ईश्वरः किं परतोव्यपाश्रयः । धर्म्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम् । वीर्य्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्ज्जितः ।
क्वचिच्चिरायुर्न हि शीलमङ्गलं क्वचित्तदप्यस्ति न वेद्यमायुषः। यत्रोभयं कुत्र च सोऽप्यमङ्गलः सुमङ्गलः कश्च न काङ्क्षते हि माम् । एवंविमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतागुणाश्रयम् । वव्रे वरं सर्व्वगुणैरपेक्षितं रमा मुकुन्दं निरपेक्षमीप्सितम् । तस्यां स देश उशतीं नवकञ्जमालां माद्यन्मधुव्रतवरूथगिरोपघुष्टाम् । तस्थौ निधाय निकटे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता । तस्याः श्रियस्त्रिजगतोजनको जनन्या वक्षोनिवासमकरोत् परमं विभूतेः । श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् । शङ्खतूर्य्यमृदङ्गानां वादित्राणां पृथक् स्वनः । देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् । ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुम् । ईडिरेऽवितथैर्म्मन्त्रैस्तल्लिङ्गैः पुष्पवर्षिणः । श्रिया विलोकिता देवाः सप्रजापतयः प्रजाः । शीलादिगुणसम्पन्ना लेभिरे निर्वृतिं पराम् । निःसत्वा लोलुपा राजन्निरुद्योगा गतत्रपाः । यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः" । पद्मापतिकमलाकान्तादयोऽप्यत्र ।

कमलालया स्त्री कमलमालयो यस्याः । लक्ष्म्याम् ।

कमलारुख पु० ६त० ! नारायणे "शान्यमाप कमलाखण्डविवक्षसेनेनेत्यादि" माघः ।

कमलासन पु० कमलमासनं यस्य । चतुरानने ब्रह्मणि । "क्रान्तानि पूर्व्वं कमलासनेनेन"कुमा०

कमलासनस्थ पु० कमलं विष्णोर्नाभिकमलरूपमासनम् ; तत्र तिष्ठति स्था–क । विधातरि यथा च तस्य विष्णुनाभिकमलेस्थितिस्तथा कञ्जजशब्दे उक्तम् ।

कमलिनी स्त्री कमलानां देशः "पुष्करादिभ्योदेशे" पा०. पुष्क०इनि । १कमलाधारदेशे पद्माकरे शब्दर० २कमलसमुदायरूपपद्मलतायाञ्च : "प्रफुल्लिताः कमलिनीरिव द्विपः" रघुः

कमलोत्तर न०कमलमिवोत्तरमुत्कृष्टम् । कुसुम्भपुष्पे अमरः

कमा स्त्री कम–णिङ्भावे वा० स्त्रियां भावे अ । शोभायाम् राजनि० ।

कमितृ त्रि०कम–णिङभावपक्षे तृच् । कामुके स्त्रियां ङीप् । कमित्री "अनुकाभिकाभीकः कमिता" पा० । अतिशयेन कमिता ईयसुन् तृणोलोपः । कमीयस् कान्ततरे त्रि० स्त्रियां ङीप् । इष्ठन् कमिष्ठ कान्ततमे त्रि०

कम्प पु०कपि–चलने घञ् । गात्रादिकम्पे १वेपथौ । "यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः" भाग०३.७.११

कम्पश्चलनं स च वातादिना प्रेरणात् स्थावरस्य भूम्यादेर्भवति देहादेस्तु मनसोविकारभेदेन वातादिधातुना च चालनात् भवति। स च रसविशेषे निर्वेदादिव्यभिचारिभावविशेषजन्यः यथोक्तं सा० द० निर्वेदादिव्यभिचारिभावान् विभज्य तेषां लक्षणाभिधाने "आवेगः सम्भ्रमस्तत्र" इत्युपक्रम्य "गजादेः स्तम्भकम्पादिः"। "शौर्य्यापराधादिभवं भवेच्चण्डत्वमुग्रता। तत्र स्वेदः शिरःकम्पतर्ज्जनाताडनादयः"। मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः। भूपातकम्पप्रस्वेदफेनलालादिकारकः"। "निन्दाक्षेपापमानादेरमर्षोऽभिविनिष्टता। नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्ज्जनादिकृत्"। "परकीयात्मदोषाद्यैः शङ्कानर्थस्य तर्कणम्। वैवर्ण्यकम्पवैस्वर्य्यैर्भूमीक्ष्योत्कम्पनादिकृत्"। "निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः"। "रत्यायासमनस्तापक्षुत्पिपासादिसम्भवा। ग्लानिर्निष्प्राणता कम्पकार्श्यानुत्साहतादिकृत्"; कम्पश्च भयानकरसस्यानुभावः यथाह तत्रैव भयानकं प्रकृत्य "अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम्। प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः"। रौद्ररसस्य व्यभिचारिभावश्च यथाह तत्रैव रौद्रं प्रकृत्य "उग्रतावेगरोमाञ्चस्वेदवेपथवोमदः। मोहामर्षादयश्चात्र भावाः स्युर्व्यभिचारिणः"। शृङ्गारादौ तु तदीयव्यभिचारिभावभेदेनैव कम्पादिजन्यते इति भेदः। ज्वरादिकृतकम्पस्तु वैद्यके प्रसिद्धः। तद्विवृतिर्ज्वरशब्दे दृश्या। दिङ्मात्रमुक्तं भावप्र० "व्यथावेपथुनिद्रानाशविष्टम्भादयो वातजाः"। शीतानिलेन च देहस्य कम्पो जायते। अतएव "सहसा सहसा कृतवेपथुः" माघे वर्णितम्।

कम्पन त्रि० कपि–युच्। १कम्पयुक्ते। भावे ल्युट्। २चलने न० मेदि०। णिच्–युच्। ३कम्पयितरि त्रि० "दुन्दुभे त्वं सपत्नानां घोषाद्धृदयकम्पनः"। दुन्दुभिपूजामन्त्रः। "प्रकम्पनेनानुचकम्पिरे सुराः" माघः "एवमुक्ता जरत्कारुर्भर्त्ता हृदयकम्पनम्" भा० आ० ४७ अ०। ४शिशिरे ऋतौ पु०। ५अस्त्रभेदे च। "प्रासैस्तथा गदाभिश्च परिघैः कम्पनैस्तथा" "जड़ता गद्गदा वाणी रात्रौ निद्रा भवत्यपि। प्रस्तब्धे नयने चैव मुखमाधुर्य्यमेव च। कपोलवणस्य लिङ्गानि सन्निपातस्य लक्षयेत्। मुनिभिः सन्निपातोऽयमुक्तः कम्पनसंज्ञकः" भावप्र० उक्ते ६सान्निपातिकज्वरभेदे पु०।

कम्पलक्ष्मन् पु० कम्पः लक्ष्म यस्य। वायौ त्रिका० तस्य स्थावराणां चलनहेतुत्वात् तथात्वम्।

कम्पा स्त्री कपि–भावे अ। चलने हेमच०। [हेमच०।

कम्पाक पु० कम्पया चलनेन कायति प्रकाशते कै–क। वायौ

कम्पित न० कपि–भावे क्त। १कम्पे शब्दच० कपि–णिच् भावे क्त। २चालने "अनोकहाकम्पितपुष्पगन्धिः" रघुः कर्त्तरि क्त। ३कम्पयुक्ते त्रि०। णिच्–कर्म्मणि क्त। ४चालिते त्रि० "अतिचपलकपिकुलकम्पितकम्पिलच्युतपल्लवफलशबलैः" काद० "आद्यकोलतुलितां प्रकम्पनैः कम्पितास्" माघः।

कम्पिन् त्रि० कम्प–णिनि। १कम्पयुक्ते णिच् णिनि। २कम्पयितरि "गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः। अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः" ति० त० पु०।

कम्पिल पु० कम्प–इलच्। रोचन्याम् (कमलागुड़ि) अमरः। स्वार्थे० कम्पीलकम्पिल्लशब्दौ तत्रार्थे रामसुकुटादयः।

कम्पिल्ल पु० कपि–इल्ल। रोचने वृक्षभेदे। "कम्पिल्लः कर्कशचन्द्रो रक्ताङ्गोरोचनोऽपि च। कम्पिल्लः कफपित्तास्रक्रिमिगुल्मोदरव्रणान्। हन्ति रेची कटूष्णश्च मेहानाहविषास्रनुत्" भावप्र०। २नगरभेदे "देवीं कम्पिल्लवासिनीम्" यजु० २३, १८, काम्पीलेति पाठान्तरम्। काम्पीले नगरे वासिनीम्" वेददी० कम्पिल्ल वृक्षश्करञ्जभेदः (लाटाकरञ्जा) इत्येके "अतिचपलकपिकुलकम्पितकम्पिलच्युतपल्लवफलशबलैः" काद० स्वार्थे कन् कम्पिल्लकोऽप्युक्तार्थे।

कम्प्र त्रि० कपि–णिच् कर्म्मणि यत्। चालनीये "सत्यधर्म्म इवाकम्प्यः" रामा०।

कम्र त्रि० कपि–र। कम्पशीले "विधाय कम्प्राणि सुखानि कम्प्रति" नैष०। [प्रनिकम्बति

कम्ब गतौ भ्वा० पर० सक० सेट्। कम्बति अकम्बीत् चकम्ब

कम्बर पु० कम्ब–अरन्। १चित्रवर्णे २तद्वति त्रि० शब्दर०।

कम्बल पु० कम्ब–कलच् कं, कुत्सितं शिरोऽम्बु वा बलति बल संवरे अच् वा। १सर्पभेदे २गवादेर्गलस्थरोमवद्गलास्नायां, ३प्रावारे, ४कृमौ च। ५स्वनामख्याते मेषलोमनिर्म्मिते वस्त्रासनादौ, ६जले न० ७उत्तरासङ्गे च मेदि०। ८मृगभेदे पुंस्त्री० जटा० स्त्रियां ङीष्। "न तथा सुखयत्यग्निर्न प्रावाराश्च कम्बलाः" रामा०। "कम्बलवन्तं न बाधते शीतम्"। विदग्धमु०। कम्बलनागश्च नागलोकपतिः "ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदत्तादयो महाभोगिनो महामर्षा निवसन्ति" भाग० ५, २४, ४२। "कम्बलाश्वतरौ चापि नागः कालीयकस्तथा" भा० आ० ३५, नागनामकीर्त्तने। अयञ्च वरुणसभास्थः "कम्बलाश्वतरौ

नागौ धृतराष्ट्रबलाहकौ” भा० स० ६ अ० इत्युरगसभ्यकथने । तदधिष्ठिते प्रयागस्थे ८तीर्थभेदे च । ‘प्रयागं सुप्रतिष्ठानं कम्बलाश्वतरौ तथा । तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः’ भा० व० ८५ अ० । प्रयागस्थतीर्थकथने ।

कम्बलबर्हिष पु० अन्धकनृपस्य पुत्रभेदे “कुकुरोभजमानश्च शुचिः कम्बलबर्हिषः” भाग० ६,२४,११ । अन्धकस्येति शेषः । “कुकुरभजमानशुचिकम्बलबर्हिषाख्याश्चत्वारोऽन्धकस्य पुत्राः” तट्टीकायां, श्रीधरधृतपराशरवाक्यम्

कम्बलहार त्रि० कम्बलं हरति हृ–अण् उप० स० । १कम्बलहारके । २ऋषिभेदे पु० तस्य गोत्रापत्यम् इञ् । काम्बलहारि तदपत्ये पुंस्त्री बहुत्वेऽस्त्रियां तस्य लुक् । कम्बलहाराः तद्गोत्रापत्येषु । [बहु० । २तद्वर्णयुक्ते त्रि० ।

कम्बलार्ण न० कम्बलरूपमृणम् वृद्धिः । १कम्बलरूपे ऋणे

कम्बलिका स्त्री क्षुद्रः कम्बलः ई–स्वार्थे कन् ह्रस्वः । १क्षुद्रकम्बले । २कम्बलमृगजातिस्त्रियाञ्च । ततः चतुरर्थ्यां पक्षा० फक् । काम्बलकायन तत्सन्निकृष्टदेशादौ त्रि० ।

कम्बलिन् त्रि० कम्बलः गलकम्बलः प्रशस्तोऽस्त्यस्य कम्बल+प्राशस्त्ये इनि । वृषे “गन्त्री कम्बलिवाह्यकम्” अमर० ।

कम्बलिवाह्यक न० कम्बलिना वृषेण वाह्यम् वह–कर्मणि ण्यत् संज्ञायां कन् । वृषवाह्ये शकटे गन्त्र्याम् अमरः ।

कम्बलीय त्रि० कम्बलाय हितं छ । कम्बलसाधने ऊर्णायाम् । संज्ञायान्तु “कम्बलाच्च संज्ञायाम्” पा० यत् कम्बल्यम् ऊर्णापलशते न० ।

कम्बि स्त्री कम्बति अच्छादयनया कम्ब–गतौ करणे इन् । दर्व्याम् अमरः (हाता) वा ङीप् कम्बीत्यप्यत्र

कम्बु पुंन० कम–उन् बुक् च, कम्ब–गतौ मृगय्वा० उन् वा । १शङ्खे अमरः । “कम्बोः सपत्नीकृतः” मुरारिः । “महात्मा चारुसर्वाङ्गः कम्बुग्रीवो महाभुजः” भा० व० १६ अ० । २गजे ३शम्बूके ४वलये च मेदि० । ५कर्बुरवर्णे पु० ६तद्वति त्रि० । ७ग्रीवायाम् ८नलके च (फाँपाहाड़) स्त्री हेम० स्त्रीत्वे अप्राणिजातित्वात् वा ऊङ् । वलयवाल शङ्खमयः सधवाधार्य्यालङ्कारभेदः । “शतं दासीसहस्राणि तरुण्यो हेमवर्णिकाः । कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृताः” भा० स० ५१ अ० ।१“पिनद्धकम्बुः पाणिभ्यां तृतीयां प्रकृतिं गतः” भा० वि० २ अ० ग्रीवार्थे “प्रतिमुच्य कुण्डले दीर्घे च कम्बूपरि हाटके शुभे” भा० वि० ११ अ० ।

कम्बुकण्ठी स्त्री कम्बुरिव कण्ठोऽस्याः स्वाङ्गत्वात् ङीष् । १कम्बुग्रीवायाम् । स्वार्थे कन् कम्बुकण्ठिकाप्यत्र । बहु० २तथाकण्ठयुक्ते त्रि० स्त्रियां स्वाङ्गत्वात् वा ङीष् ।

कम्बुका स्त्री कम्बुरिव काण्डेन कायति कै–क । १अश्वगन्धायाम् रत्नमा० । स्वार्थे कन् । कम्बुशब्दार्थे २ग्रीवायाम् स्त्री

कम्बुकाष्ठा स्त्री कम्बु चित्रवर्णं काष्ठमस्याः । अश्वगन्धायाम् । राजनि० ।

कम्बुग्रीवा स्त्री कम्बुरिव रेखात्रययुता ग्रीवा । शङ्खतुल्यरेखात्रययुक्तायां १ग्रीवायाम् । कम्बुरिव ग्रीवास्य । २तथाभूतग्रीवायुक्ते त्रि० ।

कम्बुग्रीवादि पु० कम्बुग्रीवा आदि र्यस्य । घटत्वजातिव्यञ्जके आकृतिभेदे कम्बुग्रीवाद्युद्बुध्नोदरप्रभृतयोहि घटत्वजातिव्यञ्जकाः । कम्बुग्रीवादेश्च गुरुत्वात् नावच्छेदकत्वं तेन कम्बुग्रीवादिमान्नास्तीत्यादौ कम्बुग्रीवादेर्नाभावप्रतियोगितावच्छेदकत्वम् किन्तु “सम्भवति लघौ गुरौ तदभावादिति” न्यायात् समनियतं अनतिरिक्तवृत्ति घटत्वमेव तत्रावच्छेदकम् । इतरत्र गुरुधर्म्मस्यावच्छेदकत्वानङ्गीकारेऽपि शक्यताया अवच्छेदकत्वं स्वीक्रियतएवातः कम्बुग्रीवादिमानिति पदस्य कम्बुग्रीवादिमत्त्वमेव शक्यतावच्छेदकं न घटत्वमिति भेदः इत्याकरे स्थितम् ।

कम्बुपुष्पी स्त्री कम्बुः शङ्ख इव पुष्पमस्याः । शङ्खपुष्प्याम् राजनि० । [इति ङीप् । शङ्खपुष्प्याम् राजनि० ।

कम्बुमालिनी स्त्री कम्बूनां तत्समपुष्पाणां माला अस्त्यस्याः

कम्बू त्रि० कम्ब–गतौ कू अम्बूहनूभूजम्बू कम्बू इत्यादि० नि० । १परद्रव्यापहारके उज्ज्वल० । कम्बुशब्दात् स्त्रीत्वे ऊङ् । २कम्बुशब्दार्थे स्त्री ।

कम्बोज पु० कम्ब–ओज । १हस्तिभेदे, २शङ्खभेदे मेदि० “पञ्चनदं समारभ्य म्लेच्छाद्दक्षिणपूर्वतः । कम्बोजदेशः इत्युक्तः” इत्युक्ते ३देशे च । कम्बोजे जातादि कच्छा० अण् । काम्बोज तज्जातादौ त्रि० मनुष्यतत्स्थयोस्तु वुञ् । काम्बोजको मनुष्यः काम्बोजकं हसितमित्यादीति भेदः । बहुत्वे तु तस्य लुक् कम्बोजाः कम्बोजजातेषु । काम्बोजस्य राजानः “कम्बोजाल्लुक्” पा० लुक् । कम्बोजास्तद्राजेषु । “कम्बोजाः समरे सोढुं तस्य वीर्य्यमनीश्वराः” रघुः । अत्र काम्बोजा इत्यपपाठः राजनि “कम्बोजाल्लुक्” पा० लुग्विधानात् । कम्बोजाभिजनपरत्वे दीर्घपाठः समर्थनीयः इत्येके । कम्बोजोऽभिजनोऽस्य सिन्ध्वा० अण् । काम्बोज कम्बोजदेशाभिजने त्रि० । अयञ्च देशः वृह० स० कूर्म्मविभागे नैर्ऋत्यां दिशि कथितः यथा “नैर्ऋत्यां दिशि देशाः पह्लव

कम्बोजसिन्धुसौवीराः मुण्डशब्देन समासे मयूरव्यं॰ पूर्वनिपातः कम्बोजमुण्ड इत्येव । कम्बोजदेशस्थक्षत्रियास्तु यवनैः क्रियालोपात् शूद्रत्वमाप्ताः यथाह मनुः । “शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चौड्रद्रविड़ाः कम्बोजाः यवनाः शकाः । पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः”

कम्बोजादि वार्त्तिकोक्ते तद्राजप्रत्ययस्य लुग्निमित्ते शब्दगणे स च गणः “कम्बोज चोल केरल शक यवन”

कम्बातायिन् पु॰ कम्बुरिवातायी । शङ्खतुल्यश्वेतपूर्व्वकाये शङ्खचिल्ले ।

कम्भ त्रि॰ कम्+मत्वर्थे भ । १जलयुक्ते २सुखयुक्ते च ।

कम्भारी स्त्री कं जलं बिभर्ति कम्+भृ–अण् उप॰स॰। गाम्भार्य्याम् (गाम्भार) । राजनि॰ । मुग्ध॰ मते षण् तस्य षित्त्वात् ईप् । सि॰ कौ॰ मते तु गौरा॰ ङीष् इति भेदः । तस्याः शीतवीर्य्यत्वात्तथात्वम् ।

कम्भु न॰ कं जलं तद्वच्छैत्यं बिभर्त्ति–भृ–डु । उशीरे राजनि॰ तस्य शीतवीर्य्यत्वात् तथात्वम् ।

कम्र त्रि॰ कम–णिङभावे र । मैथुनेच्छायुक्ते १कामुके अमरः। २मनोहरे च ।“कम्रा कमनाः युवतिः”सि॰कौ॰

कय त्रि॰ किम्+पृषो॰ वेदे कयादेशः । किंशब्दार्थे “न किं सहन्त्य पर्य्येता कयस्य चित्” ऋ॰१,२७,८ । “नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिः” १२९,५ “नरोऽभिमातिं कयस्य चित्” ८,२५,१५ ।

कयस्था स्त्री कं जलं याति या–ड तथा सती तिष्ठति स्था क । काकोल्याम् क्षीरस्वामी

कयाधू स्त्री जम्भासुरकन्यायां हिरण्यकशिपुभार्य्यायाम् “हिरण्यकशिपोर्भार्य्या कयाधूर्नाम दानवी । जम्भस्य तनया दत्ता सुषुवे चतुरः सुतान् । संह्लादं प्रागनुह्लादं प्रह्लादं ह्लादमेव च” भा॰ ६,१८,६ ।

कर पु॰ कीर्य्यते विक्षिप्यतेऽनेन कॄ–करणे अप् । १हस्ते हस्तिशुण्डे च तयोर्जलादिक्षेपसाधनत्वात् तथात्वम् २कर्म्मणि अप् ।३किरणे मेदिनिः । तत्र हस्तकिरणयोः “प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता । अवलम्बनाय दिनभर्त्तुरभून्न पतिष्यतः करसहस्रमपि” “स्थितः कराग्रैरसमस्तपातिभिः”माघः। हस्ते“केशाश्चीवोमधःकायं संस्पृशेत् धरणीमपि । यदि स्पृशति चैतानि भूयःप्रक्षालयेत् करम्” आ॰ त॰ देवलः नेत्रसहित्तिः “वामः काञ्चनपिञ्जरे नृपकराम्भोजं तनूमार्जनम्” उद्भटः। “तथा वामकरे दश”मनुः । कं सुखं राति रा क । ४राजग्राह्ये राजस्वे तत्र राजग्राह्यहस्तयोः “असम्भवद्बुधनरसा शताक्षिपरिषेविता । करं न सहते राजन् ! भूमिर्नववधूरिव” ।“तन्वि तव कुचावेतौ नियतं चक्रवर्त्तिनौ । आसमुद्रक्षितीशोऽपि भवान् यत्र करप्रदः” उद्भटः। यथा च राज्ञा करनिवेशनं राष्ट्रे करणीयं तथा मनुनोक्तम् यथा

“क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् । योगक्षेमञ्च सम्प्रेक्ष्य वणिजो दापयेत् करान् । यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणाम् । तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान् । यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः । तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः । पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः । धान्यानामष्टमो भागः षष्ठो द्वादश एव वा । आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् । गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च । पत्रशाकतृणानाञ्च वैदलस्य च चर्म्मणाम् । मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च । म्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् । न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषये वसन् । यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा । तस्यापि तत्क्षुधा राष्ट्रमचिरेणैव सीदति । श्रुतवृत्ते विदित्वाऽस्य वृत्तिं धर्म्म्यां प्रकल्पयेत् । संरक्षेत् सर्व्वतश्चैनं पिता पुत्त्रमिवौरसम् । संरक्ष्यमाणो राज्ञा यं कुरुते धर्म्ममन्वहम् । तेनायुर्वर्द्धते राज्ञो द्रविणं राष्ट्रमेव च । यत्किञ्चिदपि वर्षस्य दापयेत् करसंज्ञितम् । व्यवहारेण जीवन्तं राजा राष्ट्रे पृथग्जनम् । कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः । एकैकं कारयेत् कर्म्म मासि मासि महीपतिः । नोच्छिन्द्यादात्मनो मूलं परेषाञ्चातितृष्णया । उच्छिन्दन् ह्यात्मनो मूलमात्मानं तांश्च पीडयेत्” व्याख्यातञ्चेदं कुल्लूकभट्टेन

“क्रयविक्रयमित्यादि । कियता मूल्येन क्रीतमिदं वस्त्रलवणादि द्रव्यं विक्रीयमाणञ्चात्र कियल्लभ्यते कियद्दूरादानीतं किमस्य वणिजो भक्तव्ययेन शाकसूपादिना परिव्ययेन लग्नं किमस्यारण्यादौ चौरादिभ्योरक्षयः रूपेण क्षेमप्रतिविधानेन गतं, कोऽस्य इदानीं लाभयोग इत्येतदवेक्ष्य वणिजः करान् दापयेत् । यथेति । यथा राजाऽवेक्षणादिकर्म्मणः फलेन, यथा च कार्षिकवणिगादा-

कृषिवाणिज्यादिकर्म्मणां फलेन सम्बध्यते । तथा निरूप्य राजा सर्व्वदा राष्ट्रात् करान् गृह्णीयात् । अत्र दृष्टान्तमाह यथेत्यादि । यथा जलौकोवत्सभ्रमराः स्तोकस्तोकानि रक्ततोयमधूनि अदन्त्येवं राजा मूलधनमनुच्छिन्दताऽल्पोऽल्पो राष्ट्रादाब्दिकः करो ग्राह्यः । तमाह पञ्चाशद्भागो राज्ञा ग्रहीतव्यः । एव धान्यानां षष्ठोऽष्टमो द्वादशो वा भागो ग्राह्यः भूम्युत्कर्षापकर्षापेक्षया कर्षणादिक्लेशलाघवगौरवापेक्षोऽयं बह्वल्पग्रहणविकल्पः । आददीतेत्यादि । पत्रशाकतृणानामित्यादि । द्रुशब्दोऽत्र वृक्षवाचकः वृक्षादीनां अश्ममयान्तानां षष्ठोभागो राज्ञा ग्रहीतव्यः । म्रियमाणइति । क्षीणधनोऽपि राजा श्रोत्रियब्राह्मणात् करं न गृह्णीयात् न च तदीयदेशे वसन् श्रोत्रियः बुभुक्षया अवसादं गच्छेत् । यस्मात् यस्येत्यादि । यस्य राज्ञो देशे श्रोत्रियः क्षुधाऽवसन्नो भवति तस्य राष्ट्रमपि दुर्भिक्षादिभिः क्षुधा शीघ्रमवसादं गच्छति । अत एवमतः श्रुतेति । शास्त्रज्ञानानुष्ठाने ज्ञात्वा अस्य तदनुरूपां धर्म्यादनपेतां जीविकामुपकल्पयेत् चौरादिभ्यश्चैनम् औरसं पुत्त्रमिव पिता रक्षेत् । यस्मात् संरक्ष्यमाणइत्यादि । स च श्रोत्रियो राज्ञा सम्यग्रक्ष्यमाणो यं धर्म्मं प्रत्यहं करोति तेन राज्ञ आयुर्द्धनराष्ट्राणि वर्द्धन्ते । यदिति । राजा स्वदेशशाकपर्णादिस्वल्पमूल्यवस्तुक्रयविक्रयादिना जीवन्तं निकृष्टजनं स्वल्पमपि कराख्यं वर्षेण दापयेत् । कारुकानिति । कारुकान् सूपकारादीन् शिल्पिभ्य ईषदुत्कृष्टान् शिल्पिनश्च लोहकारादीन् शूद्रांश्च देहक्लेशोपजीविनो भारिकादीन् मासि मास्येकं दिनं कर्म्म कारयेत् । नोच्छिन्द्यादिति । प्रजास्नेहात् करशुल्कादेरग्रहणमात्मनो मूलोच्छेदः अतिलोभेन प्रचुरकरादिग्रहणे परेषां मूलोच्छेदः एतदुभयं न कुर्य्यात् यस्मात् आत्मनो मूलमुच्छिद्य कोषक्षयादात्मानं पीडयेत् । पूर्व्वार्द्धात् परेषाञ्चेत्यपि संबध्यते परेषां मूलमुच्छिद्य तांश्च पीडयेत्"।

भार० शा० ८७अ० विस्तरेणोक्तं यथा

"विक्रयं क्रयमध्वानं भक्तञ्च सपरिच्छदम् । योगक्षेमञ्च सम्प्रेक्ष्य वणिजां कारयेत करान् । उत्पत्तिं दानवृत्तिञ्च शिल्पं संप्रेक्ष्य चासकृत् । शिल्पं प्रति करानेवं शिल्पिनः प्रति कारयेत् । उच्चावचकरा दाप्याः महाराज्ञा युधिष्ठिर । यथा यथा न सीदेरंस्तथा कुर्य्यान्महीपतिः । फलं कर्म्म च सम्प्रेक्ष्य ततः सर्व्वं प्रकल्पयेत् । फलं कर्म्म च निर्हेतु न कश्चित् संप्रवर्त्तते । यथा राजा च कर्त्ता च स्यातां कर्म्मणि भागिनौ । समवेक्ष्य तथा राज्ञा प्रणेयाः सततं कराः । नोच्छिन्द्यादात्मनो मूलं परेषाञ्चापि तृष्णया । ईहाद्वाराणि संरुध्य राजा सम्प्रतिदर्शनः । प्रद्विषन्ति परिख्यातं राजानमतिखादिनम् । प्रद्विष्टस्य कुतः श्रेयो नाप्रियो लभते फलम् । वत्सौपम्येन दोग्धव्यं राष्ट्रमक्षीणबुद्धिना । भृतो वत्सो जातबलः पीडां सहति भारत ! । निकायं कुरुते वत्सो भृशं दुग्धो युधिष्ठिर ! । राष्ट्रमप्यतिदुग्धं हि न कर्म्म कुरुते महत् । यो राष्ट्रमनुगृह्णाति परिरक्षन् स्वयं नृपः । सञ्जातमुपजीवन् स लभते न महत् फलम् । आपदर्थञ्च निर्यातं राजा न इह विन्दते । राष्ट्रञ्च कोषभूतं स्यात् कोषो वेश्मगतस्तथा । पौरजानपदान् सर्व्वान् संश्रितोपाश्रितांस्तथा । यथाशक्त्यनुकम्पेत सर्व्वान् स्वल्पधनानपि । वाह्यं जनं भेदयित्वा भोक्तव्यो मध्यमः सुखम् । एवं नास्य प्रकुप्यन्ति जनाः सुखितदुःखिताः । प्रागेव तु धनादानमनुभाष्य ततः पुनः । सन्निपत्य स्वविषये भयं राष्ट्रेषु दर्शयेत् । इयमापत् समुत्पन्ना परचक्रभयं महत् । अपि चान्ताय कल्पन्ते वेणोरिव फलागमः । अरयो मे समुत्थाय बहुभिर्दस्युभिः सह । इदमात्मवधायैव राष्ट्रमिच्छन्ति बाधितुम् । अस्यामापदि घोरायां सम्प्राप्ते दारुणे भये । परित्राणाय भवतः प्रार्थयिष्ये धनानि वः । प्रतिदास्ये च भवतां सर्व्वञ्चाहं भयक्षये । नारयः प्रतिदास्यन्ति यद्धरेयुर्ब्बलादितः । कलत्रमादितः कृत्वा सर्व्वं वो विनशेदिति । अपि चेत् पुत्त्रदारार्थमर्थसञ्चय इष्यते । नन्दामि वः प्रभावेण पुत्त्राणामिव चोदये । यथाशक्त्युपगृह्णामि राष्ट्रस्यापीडया च वः । आपत्स्वेव हि वोढव्यं भवद्भिः पुङ्गवैरिव । न प्रियं सततं कार्य्यं धनं कस्याश्चिदापदि । इति वाचा मधुरया श्लक्ष्णया सोपचारया । स्वरश्मीनभ्यवसृजेद्योगमाधाय कालवित् । प्राकारं भृत्यभरणं व्ययं सङ्ग्रामतो भयम् । योगक्षेमञ्च सम्प्रेक्ष्य गोमिनः कारयेत् करम् । उपेक्षिता हि नश्येयुर्गोमिनोऽरण्यवासिनः । तस्मात्तेषु विशेषेण मृदुपूर्व्वं समाचरेत् । सान्त्वनं रक्षणं दानमवस्था चाप्यभीक्ष्णशः । गोमिनां पार्थ ! कर्त्तव्यः संविभागश्च प्रियाणि च । अजस्रमुपयोक्तव्यं फलं गोमिषु भारत ! । प्रभावयन्ति राष्ट्रञ्च व्यवहारं कृषिं तथा । तस्माद्गोमिषु यत्नेन प्रीतिं कुर्य्याद्विचक्षणः । दयावानप्रमत्तश्च

करान् सम्प्रणयेन्नृप ! । सर्व्वत्र क्षेमचरणं सुलभं नाम गोमिषु । न ह्यतः सदृशं किञ्चिद्वरमस्ति युधिष्ठिर !"। "मधुदोहं दुहेद्राष्ट्रं भ्रमरा इव पादपम् । वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत् । जलौकावत् पिबेद्राष्ट्रं मृदुनैव नराधिपः । व्याघ्रीव च हरेत् पुत्रान् सन्दशेन्न च पीडयेत् । यथा शल्यकवानाखुः पदं धूनयते सदा । अतीक्ष्णेनाभ्युपायेन तथा राष्ट्रं समापिबेत् । अल्पेनाल्पेन देयेन वर्द्धमानं प्रदापयेत् । ततो भूयस्ततो भूयः क्रमवृद्धिं समाचरेत् । दमयन्निव दम्यानि शश्वद्भारं विवर्द्धयेत् । मृदुपूर्व्वं प्रयत्नेन पाशानभ्यवहारयेत् । सकृत्पाशावकीर्णास्ते न भविष्यन्ति दुर्द्दमाः । उचितेनैव भोक्तव्या न भविष्यन्ति यत्नतः । तस्मात् सर्व्वसमारम्भो दुर्लभः पुरुषं प्रति । यथामुख्यान् सान्त्वयित्वा भोक्तव्य इतरो जनः । ततस्तान् भेदयित्वा तु परस्परविवर्जितान् । भुञ्जीत सान्त्वयंश्चैव यथासुखमयत्नतः । न चास्थाने न चाकाले करांस्तेभ्यो निपातयेत् । आनुपूर्व्व्येण सान्त्वेन यथाकालं यथाविधि" ६०अ० । प्रजाभ्यः करादानप्रकारः रथा शब्दवक्ष्यमाणप्रकारवत् समूह्योऽनुसन्धेयः । अत एव सा०कौ० "यथा हि ग्रामाध्यक्षाः कौटुम्बिकेभ्य करमादाय विषयाध्यक्षाय प्रयच्छन्ति विषयाध्यक्षश्च सर्व्वाध्यक्षाय स च भूपतये" इत्युक्तम् ।

४हस्ताकारे हस्तनक्षत्रे । हेत्वादौ कर्म्मोपपदे कृ—कर्त्तरि ट । तत्तत्कर्म्मकारके त्रि० यथा कर्म्मकरः श्रेयस्करः यशस्करः स्त्रियां ङीप् कर्म्मकरी दासी यशस्करी विद्येत्यादि । दिवाविभादिपूर्व्वात् अहेत्वादावपि ट । तत्तदुपपदार्थकारके त्रि० तानि च "दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु" पा० दर्शितानि दिवाकरः निशाकरः। अहेत्वादावितोऽन्यत्र अण् । कुम्भकार इत्यादि ।

करक पुंन० किरति विक्षिपति करोति वा जलमत्र कॄ—कृ—वा वुञादि० संज्ञायां वुन् । कमण्डलौ "उपवीतमलङ्कारं स्रजं करकमेव च" मनुः २दाडिमवृक्षे ३पक्षिभेदे पुंस्त्री स्त्रियां जातित्वात् ङीष् । ४मेघोपले (शिला) पुंस्त्री । करकोद्भवकारणं तज्जलगुणाश्च भावप्र० दर्शिताः यथा । "दिव्यवाय्वग्नियोगात् संहताः खात् पतन्ति याः । पाषाणखण्डवच्चापस्ताः कारक्योऽमृतोपमाः । करकाजं जलं रूक्षं विशदं गुरु सुस्थिरम् । दारुणं शीतलं सान्द्रं पित्तहृत् कफवातकृत्"। (खाटा) ५करङ्कभेदे रत्नमा० स्वार्थे कन् । ६राजकरे ७हस्ते च । ८पलाशवृक्षे हारा० । ९कोविदारवृक्षे १०बकुलवृक्षे ११करीरे १२नारिकेलास्थ्नि च (माला) पु० राजनि० ।

करकङ्कणन्याय पु० कङ्कणशब्दस्य करभूषणार्थकत्वेऽपि यथा करशब्दप्रयोगस्तत्काले तत्संलग्नताद्योतनार्थः तद्रूपदृष्टान्तसूचके न्याये ।

करकच पु० "शनिभार्गवजीवज्ञकुजसोमार्कवासरे । षष्ठ्यादितिथयः सप्त क्रमात् करकचाः स्मृताः" ज्यो० उक्ते योगभेदे । तथा च शनौ षष्ठी, शुक्रे सप्तमी, गुरौ अष्टमी, बुधे नवमी, कुजे दशमी, सोमे एकादशी, रवौ द्वादशी तिथिः करकच इत्यर्थः ।

करकच्छपिका स्त्री कच्छपस्तदाकारोऽस्त्यस्याः ठन् करे हस्ते स्थिता कच्छपिका । अङ्गुलिसन्निवेशभेदरूपायां कूर्म्ममुद्रायाम् । "करकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः । तत्र संस्कृतपुष्पेण पूजयेदात्मनो वपुः" कालिकापु० ५६अ० ।

करकण्टक पुंन० करस्य कण्टक इव । नखे त्रिका० ।

करकपात्रिका स्त्री करकः कमण्डलुरूपा पात्रिका । कमण्डलुरूपपात्रे । [करकशब्दे भावप्र० वाक्यमुक्तम् ।

करकाज न० करकातो जायते जन—ड । करकाभवे जले

करकाम्भस् पु० करकाया इव शीतलमम्भोऽस्य । नारिकेले त्रिका० । तज्जलस्यातिशीतत्वात्तथात्वम् । ६त० तदीयजले न० । [कायुर्विरोचनः" भा० आ० ११६अ० ।

करकायु पु० धृतराष्ट्रपुत्रभेदे । "उग्रायुधोबलाकी च कर-

करकासार पु० ६त० । शिलावृष्टौ

करकुड्मल न० करः कुड्मलमिव । मुकुलिताङ्गुलौ करे कर मुकुलकरकमलकरकोषादयोऽप्यत्र ।

करग्रह पु० करो गृह्यतेऽत्र ग्रह—आधारे अप् । विवाहे तत्र करग्रहणेनैव हि संस्कारो विधीयते इति तस्य तथात्वम् । ६त० ।२हस्तधारणे ३प्रजाभ्यः करादाने च पाणिग्रहकरग्रहणादयोऽप्युभयत्र ।

करग्रहारम्भ पु० करग्रहस्य प्रजाभ्यः करादानस्यारम्भः। (पुण्या)वार्षिककरग्रहणारम्भे । करग्रहारम्भदिननक्षत्रादिकं प्रसङ्गादुच्यते "तीक्ष्णोग्रवर्ज्जीतरभेषु लग्ने शीर्षोदये भानुदिने शुभाह्ने। कुर्य्यादनुक्तानि समीहितानि करग्रहारम्भमपि प्रजाभ्यः" ज्यो० तत्र तीक्ष्णगणाः ६,९, १८,१९ आर्द्रादयः, उग्रगणाः पूर्व्वोत्तरमघाःवह्निः

कृत्तिका तदितरेषु नक्षत्रेषु। मीनोदयाः मिथुन-सिंहकन्यातुलावृश्चिककुम्भमीनाः ताहशे लग्ने।

करग्राह पु० करं गृह्णाति ग्रह–अण्। १पत्यौ भर्त्तरि २हस्तग्राहकमात्रे ३राजस्वादायके च त्रि०। शब्दचि०। करग्राहीत्यप्युभयत्र स्त्रियां ङीप् पाणिग्राहादयोऽप्यत्र

करघर्षण पु० कराभ्यां घृष्यते घृष–कर्मणि ल्युट्। दधिमन्थनदण्डे हारा०। भावे ल्युट् ६त०। करेण घर्षणे न०।

करङ्क पु० कीर्य्यते जलमत्र कृ–अप् करोऽङ्को गर्भोऽस्य शक०। १नारिकेलास्थ्नि (खोल), २कमण्डलौ ३पात्रभेदे च "ताम्बूलकरङ्कवाहिनी" काद०। कस्य शिरसः रङ्क इव (माथारखुली), ४मस्तकखर्परे मेदिनिः। ५इक्षुभेदे राज०।

करङ्कशालि पु० करङ्क इव शालते शाल–इन्। इक्षुभेदे। राजनि०। [२सिन्दूरपुष्पीवृक्षे च राजनि०।

करच्छद पु० कर इवावरकश्छदोऽस्य। १शाखोटवृक्षे (सिहडा)

करज पु० करे जायते जन–ड। १नखे "न छिन्द्यात् करजैस्तृणम्" मनुः। तन्नामनामके २व्याघ्रनखाख्यगन्धद्रव्ये च (नखी)। मेदिनिः। ३हस्तजातमात्रे त्रि०। कं शिरः जलं वा रञ्जयति रन्ज–णिच्–अण् नि०। (करमचा) ४करञ्जवृक्षे। अमरः।

करजाख्य न० करजस्य नखस्याख्या आख्या यस्य। नखीनामगन्धद्रव्ये रत्नमा०। [वृक्षभेदे राजनि०।

करजोडि पु० कुटा० जुड–बन्धे इन् बा० गुणः। (हातजोडा)

करञ्ज पु० कं शिरः जलं वा रञ्जयति अण्। (करन्चा) इति ख्याते वृक्षे। करञ्जपर्य्यायगुणादि भावप्र० उक्तं यथा। "करञ्जो नक्तमालश्च करजश्चिरबिल्वकः। घृतपूर्णकरञ्जोऽन्यः प्रकीर्य्यः पूतिकोऽपि च। स चोक्तः पूतिकरजः सोमवल्कश्च स स्मृतः। करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषहृत्। कुष्ठोदावर्त्तगुल्मार्शो व्रणक्रिमिकफापहः। तत्पत्रं कफवातार्शःक्रिमिशोथहरं परम्। भेदनं कटुकं पाके वीर्य्योष्णं पित्तलं लघु। तत्फलं कफवातघ्नं मेहार्शःकफक्रिमिकुष्ठजित्। घृतपूतिकरञ्जोऽपि करञ्जसदृशो गुणैः"। उदकीर्य्यपर्य्याये तु स्त्रीत्वमपि गौरा० ङीष्। भावप्र० "उदकीर्य्यस्तु तोयोऽन्यः षड्ग्रन्था हस्तिवारुणी। मर्कटी वायसी चापि करञ्जी करभञ्जिका"। तद्गुणाश्च तत्रैवोक्ताः "करञ्जी स्तम्भनी तिक्ता तुवरा कटुकाग्निनी। वीर्य्योष्णा वमिपित्तार्शःक्रिमिकुष्ठप्रमेहजित्"। तत्तैलगुणाश्च। "करञ्जतैलं सुस्निग्धं वातहृत् स्थिरदीप्तिकृत्। नेत्रामयवातरोगकुष्ठकण्डूविषूचिकाः। नाशयेत्तीक्ष्णउष्णञ्च लेपनाद्व्रणदोषहृत्" राजनि०। स्वार्थे कन् करञ्जकोऽप्यत्र पु० "यस्तु संवत्सरं पूर्णं दीपं दद्यात् करञ्जके। सुवर्णवर्णामृतहस्तः प्रजा तस्य विवर्द्धते" भा० आनु० १२७अ०। अन्यमते करञ्जभेदाश्चत्वारः। (डहरकरमचा) (लाटाकरञ्जा) (काँटाकरमचा)" (अश्वकरमचा) इति भाषाप्रसिद्धनामभेदात् "यत् पर्ण्पघ्न उत वा करञ्जे" ऋ० १०।१०४८,८। [(कण्टवेल) राजनि०।

करञ्जफल पु० करञ्जस्य फलमिवाम्लं फलं यस्य। कपित्थे

करट पु० किरति मदम्–कृ–अटन्। १गजगण्डे "कथं प्रभिन्नकरटं हस्तिनं वनगोचरम्। उपस्थाय महाभागं करेणुः शूकर स्पृशेत्" भा० व० २७७। हस्तिगण्डे स्त्रीत्वमपि। "ईषादण्डं महानागं प्रभिन्नकरटामुखम्। शशकोह्वयसे युद्धे कर्ण! पार्थं धनञ्जयम्" भा० क० ३९अ० स्त्रीत्वप्रयोगात्। २काके पुंस्त्री अमरः। स्त्रियां ङीष्। "वरमिह गङ्गातीरे शरटः करटः कृशः शुनीतनयः" गङ्गास्त०। ३कुसुम्भवृक्षे पु० ४निन्द्यजीविनि त्रि०। स्त्रियां करटा। ५नवश्राद्धे एकादशाहादिकर्त्तव्ये श्राद्धे ६दुर्द्दुरूढे ७उत्क्षेपकतके ८वादित्रि ९वाद्यकभेदे १०दुर्द्दशे ११वाद्यभेदे च पु० मेदि०। दुर्द्दुरूढस्त्रियसेदाभिप्रायेण "मालवाः मालवाश्चैव तथैवापरमल्लवाः। कुलिन्दाः कालकाश्चैव कुण्डकाः करटास्तथा" भा० भी० ९अ०। आहर करट इत्युच्यतेऽत्र कर्मणि आहरशब्देनास्य। मयू०ग०। आहरकरट तथा विधे कर्मणि। ददुःखेन दोह्यायां गवि हेमच०। स्वार्थे कन्। काके पुंस्त्री शब्दर०। स्त्रियां ङीष्। १२स्तेयशास्त्रप्रवर्त्तके कर्णीसुते पु० "कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः। तस्याख्यातौ उपायौ द्वौ विपुलाचलसंज्ञकौ" काद० टीका।

करटिन् पु० करटोऽस्त्यस्य प्राशस्त्येन करट+इनि। गजे "दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः" रसगङ्गा०

करटु पु० कृ–अटु। (करकटिया) इति नामके विहगे। हेम०

करण न० क्रियतेऽनेन कृ–करणे ल्युट्। १व्याकरणोक्ते साधकतमे कारकभेदे "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत् तदा स्मृतम्" हरिका०। विवक्ष्यते इत्यनेनान्यस्यापि विवक्षायां करणत्वम् भवतीति सूचितम्। अतएवाह "स्थाल्या पच्यते इत्येष प्रयोगो दृश्यते यतः" "साधकतमं करणम्" पा०। तमब्ग्रहणेनाव्यवहितव्यापारवत्त्वं सूचितम्। तत्रापि हेतुकरणयोर्जनकत्वसाम्ये क्रियामात्रविषयत्वं व्यापारवत्त्वं

च करणस्य विशेषः तदुक्तं “द्रव्यादिविषयो हेतुः करणं चरितक्रियम्”। चरितक्रियं व्यापारद्वारा क्रियामात्रविषयम् इत्यर्थः। “स्वराणामूष्मणाञ्चैव विवृतं करणं स्मृतम्” शिक्षा। “भिषक् कर्त्ताथ करणं रसा दोषास्तु कारणम्” सुश्रु०। “न तस्य कार्य्यं करणञ्च विद्यते” श्रुतिः २इन्द्रिये अमरः तस्य ज्ञानक्रियायाम् साधनत्वात्तथात्वम्। यथा च इन्द्रियाणां ज्ञानक्रियायां साधनत्वं तथा इन्द्रियशब्दे उक्तम्। तच्च सांख्ये त्रयोदशविधमित्युक्त्वा तेषां मध्ये अन्तःकरणानां द्वारित्वमितरेषां द्वारत्वमुक्तं यथा सां० का० कौ०

“करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्। कार्य्यञ्च तस्य दशधाहार्य्यं धार्य्यं प्रकाश्यञ्च” का० “करणं त्रयोदशविधमिन्द्रियाण्येकादश बुद्धिरहङ्कारश्चेति त्रयोदशप्रकारं करणं कारकविशेषः करणम्। न च व्यापारावेशं विना कारकत्वमिति व्यापारमाह तदाहरणधारणप्रकाशकरम् यथायथं तत्र कर्मेन्द्रियाणि वागादीन्याहरन्ति यथास्वमुपाददते स्वव्यापारेण प्राप्नुवन्तीति यावत् बुद्ध्यहङ्कारमनांसि तु स्ववृत्त्या प्राणादिलक्षणया धारयन्ति, बुद्धीन्द्रियाणि प्रकाशयन्ति। आहरणधारणादिक्रियाणां सकर्मकतया किं कर्म, कतिविधं? चेत्यत आह कार्य्यञ्च तस्येति तस्य त्रयोदशविधस्य करणस्य दशधा आहार्य्यं धार्य्यं प्रकाश्यञ्च कार्य्यम्। आहार्य्यं व्याप्यं कर्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दा यथायथं व्याप्याः ते च यथायथं दिव्यादिव्यतया दश इत्याहार्य्यं दशधा। एवं धार्य्यम् अप्यन्तःकरणादि लक्षणया वृत्त्या शरीरं, तच्च पार्थिवादि पाञ्चभौतिकं शब्दादीनां पञ्चानां समूहः पृथिवीति, ते च पञ्च दिव्यादिव्यतया दशेति धार्य्यमपि दशधा। एवं बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धा यथायथं व्याप्याः ते च यथायथं दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधेति” कौ० “अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम्। साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्” का० “अन्तःकरणं त्रिविधं बुद्धिरहङ्कारो मन इति शरीराभ्यन्तरवर्त्तित्वादन्तःकरणम्। दशधा बाह्यमिन्द्रियं त्रयस्यान्तःकरणस्य विषयाख्यं विषयमाख्याति विषयसङ्कल्पाभिमानाध्यवसायेषु कर्त्तव्येषु द्वारीभवति तत्र बुद्धीन्द्रियाण्यालोचनेन, कर्मेन्द्रियाणि तु यथास्वं व्यापारेण। बाह्यान्तरयोः करणयोर्विशेषान्तरमाह साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम्, साम्प्रतकालं वर्त्तमानकालं बाह्यमिन्द्रियं वर्त्तमानसमीपमनागतमतीतमपि वर्त्तमानम् अतो वागपि वर्त्तमानकालविषया भवति। त्रिकालमाभ्यन्तरं करणं तद्यथा नदीपूरभेदादभूद्वृष्टिः, अस्ति धूमादग्निरिह नगनिकुञ्जे, असत्युपघातके पिपीलिकाण्डसञ्चरणाद्भविष्यति वृष्टिरिति, तदनुरूपाश्च सङ्कल्पाभिमानाध्यवसाया भवन्ति। कालस्य वैशेषिकाभिमत एको न अनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयं यैरुपाधिभेदैरनागतादिभेदं प्रपद्यते सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः, कृतमत्रान्तर्गडुना कालेनेति सांख्याचार्य्याः। तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति” कौ० साम्प्रतकालानां बाह्येन्द्रियाणां विषयं विवेचयति। “बुद्धीन्द्रियाणि तेषां पञ्च विशेषाविशेषविषयाणि। वाग्भवति शब्दविषया शेषाणि तु पञ्चविषयाणि” का० “बुद्धीन्द्रियाणि तेषां दशानामिन्द्रियाणां मध्ये पञ्च विशेषाविशेषविषयाणि विशेषाः स्थूलाः शब्दादयः शान्तघोरमूढाः पृथिव्यादिरूपाः, अविशेषास्तन्मात्राणि सूक्ष्माः शब्दादयः विषयपदेन भूतभाविनावपाकरोति विशेषाश्चाविशेषाश्च विशेषाविशेषास्त एव विषया येषां बुद्धीन्द्रियाणां तानि तथोक्तानि। तत्रोर्द्ध्वस्रोतसां योगिनाञ्च श्रोत्रं स्थूलशब्दतन्मात्रविषयं, स्थूलशब्दविषयमेव नः। एवं तेषां त्वक् स्थूलसूक्ष्मस्पर्शविषया, अस्मदादीनान्तु स्थूलस्पर्शविषयैव। एवं चक्षुरादयोऽपि तेषामस्मदादीनाञ्च रूपादिषु द्रष्टव्याः। एवं कर्मेन्द्रियेषु मध्ये वाग्भवति शब्दविषया स्थूलशब्दविषया तद्धेतुत्वात् न तु शब्दतन्मात्रस्य हेतुः तस्याहङ्कारिकत्वेन वागिन्द्रियेण सहैककारणकत्वात्। शेषाणि तु चत्वारि पायूपस्थपाणिपादाख्यानि पञ्चविषयाणि पाण्याद्याहार्य्याणां घटादीनां पञ्चशब्दार्थत्वादिति” कौ०। साम्प्रतं त्रयोदशसु करणेषु केषाञ्चित् प्रधानभावं सहेतुकमाह। “सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्। तस्मात्त्रिविधं करणं द्वारि द्वाराणि शेषाणि” का०। “द्वारि प्रधानं शेषाणि करणानि बाह्येन्द्रियाणि द्वाराणि तैरुपनीतं सर्वं विषयं समनोऽहङ्कारा बुद्धिर्यस्मादवगाहतेऽध्यवस्यति तस्माद्बाह्येन्द्रियाणि द्वाराणि द्वारवती च सान्तःकरणा बुद्धिरिति” कौ०। “न केवलं बाह्यानीन्द्रियाण्यपेक्ष्य प्रधानं बुद्धिरपि तु ये अप्यहङ्कारमनसी द्वारिणी ते अप्यपेक्ष्य बुद्धिः प्रधानमित्याह। “एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः। कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति” का०।

"यथा हि ग्रामाध्यक्षाः कौटुम्बिकेभ्यः करमादाय विषयाध्यक्षाय प्रयच्छन्ति विषयाध्यक्षश्च सर्व्वाध्यक्षाय, स च भूपतये, तथा वाह्येन्द्रियाण्यालोच्य मनसे समर्पयन्ति मनश्च सङ्कल्प्याहङ्काराय, अहङ्कारश्चाभिमत्य बुद्धौ सर्वाध्यक्षभूतायाम्, तदिदमुक्तं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्तीति। वाह्येन्द्रियमनोऽहङ्काराश्च गुणविशेषाः गुणानां सत्त्वरजस्तमसां विकाराः। ते तु परस्परविरोधशीला अपि पुरुषार्थेन भोगापवर्गरूपेण एकवाक्यतां नीताः यथा वर्त्तितैलवह्नयः सन्तमसापनयरूपप्रकाशाय मिलिताः प्रदीपाः, एवमेते गुणविशेषा इति योजना"।

न्यायादिमते इन्द्रियाणामेकादशविधता वेदान्तपरिभाषामते दशविधतेति भेदः इन्द्रियशब्दे उक्तः। "वपुषा करणोज्झितेन सा" "करणापायविभिन्नवर्णया" रघुः। "करणैरन्वितस्यापि पूर्व्वाणां कथञ्चन" याज्ञ०। "आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या" वेणी०। अत्र करणं वाह्येन्द्रियम्। आधारे ल्युट्। ३देहरूपे देहे अमरः करणाश्रयत्वात् तस्य तथात्वम्। "उपमानमभूत् विलासिनां करणं यत्तव कान्तिमत्तया" कुमा०। भावे ल्युट्। ४क्रियायाम्। "प्र ते पूर्व्वाणि करणानि" ऋ० ४,१६,१०। "आवाहनाग्नौकरणरहितमपसव्यवत्" याज्ञ०। "इलस्य करणे चापि व्यादिष्टाः सर्वशिल्पिनः" भा०व०२५४अ०। "कृतस्य करणं नास्तीति" प्राचीनगाथा। ५सेतिकर्त्तव्यताके अनुष्ठाने ६व्यापारमात्रे च। ७ज्योतिषोक्तेषु तिथ्यर्द्धात्मकेषु ववादिषु तेषामानयनप्रकारः सूर्य्यसि०रङ्गना० उक्तो यथा।

"ध्रुवाणि शकुनिर्नागं तृतीयं तु चतुष्पदम्। किन्तुघ्नं तु चतुर्दश्याः कृष्णायाश्चापरार्धतः" सू० सि०। "कृष्णपक्षीयायाश्चतुर्दश्यास्तिथेर्द्वितीयार्धाद्द्वितीयार्धमारभ्येत्यर्थः। चकार एवार्थे। तेनान्यतिथेरेतत्तिथिपूर्व्वार्धस्य च निरासः। ध्रुवाणि स्थिराणि करणानि। तान्याह। शकुनिरिति। चतुष्पदं तृतीयमित्यनेन शकुनिनागयोः क्रमेणाद्यद्वितीयत्वं सूचितम्। तुकारात् क्रमेण तिथ्यर्धेषु भवन्ति। किन्तुघ्नं चतुर्थम्। तदन्तावधिद्योतकः तेनोक्तातिरिक्तं स्थिरकरणं नास्तीति सूचितम्। अथ चरकरणान्याह" रङ्ग०। "ववादीनि ततः सप्त चराख्यकरणानि च। मासेऽष्टकृत्व एकैकं करणानां प्रवर्त्तते" सू० सि०। "ततः स्थिरकरणपूर्व्वमनन्तरं ववादीनि चरसञ्ज्ञककरणानि सप्त भद्रान्तानि शुक्लप्रतिपद्द्वितीयार्धतश्चतुर्थ्यन्तं भवन्तीति चार्थः। ननु पञ्चम्यादितः कानि करणानि भवन्तीत्यत आह मासे इति। चरकरणानां ववादीनां सप्तानां मध्ये एकैकमेकैकं करणं मासे स्थिरकरणकालोनितत्रिंशत्तिथ्यात्मकमासे स्वल्पान्तरत्वान्मासपदग्रहणम्। अष्टकृत्वोऽष्टवारः प्रवर्त्तते प्रकर्षेण तिष्ठति भवतीत्यर्थः। तथा च पञ्चम्याद्यर्धादेतानि पुनः पुनः परिभ्रमन्ति। कृष्णचतुर्दश्याद्यार्धपर्यन्तमिति भावः। ननु स्थिरकरणोक्तावपरार्धत इत्युक्त्या तेषां चतुर्णां तिथ्यर्धभोगेन शुक्लप्रतिपदाद्यर्धपर्यन्तं क्रमेणावस्थानं युक्तं चरकरणानां तु केवलोक्त्या तदनन्तरं कृष्णचतुर्दश्याद्यार्धपर्यन्तमेक एव परिभ्रमोऽस्त्वित्यतस्तदुत्तरं कथयन्नन्यदप्याह" रङ्ग०। "तिथ्यर्द्धभोगं सर्वेषां करणानां प्रकल्पयेत्। एषा स्फुटगतिः प्रोक्ता सूर्यादीनां खचारिणाम्" सू० सि०। "सप्तानां चरकरणानां प्रत्येकं तिथ्यर्द्धमासौ भोगश्च तं तिथ्यर्धकालमितावस्थानं प्रकल्पयेत्। "एकत्र निर्णीतः शास्त्रार्थोऽपरत्र भवतीति" न्यायात् करणत्वेनैषामप्यवस्थानं तत्तुल्यं कुर्यादित्यर्थः। अत एव "तिथ्यर्धं करणं स्मृतम्" इत्युक्त्या चान्द्रमासे त्रिंशत्तिथ्यात्मके षष्टिकरणानां सन्निवेशाच्चरकरणानामेव परिभ्रमणे प्रतिमासमनियततिथिभोगकं करणं भवतीति तद्वारकप्रतिमासनियततिथिभोगककरणकसिद्ध्यर्थं चरकरणानामष्टवारपरिभ्रमणोत्तरमवशिष्टतिथ्योश्चतुर्ष्वर्धेषु स्थिरकरणान्युक्तानीति तात्पर्यम्। तत्रापि कृष्णचतुर्दश्यपरार्धतस्तत्कल्पनं तदिच्छानियामकं स्वतन्त्रेच्छस्य नियोगानर्हत्वात्" रङ्ग०

करणानि च ववबालवकौलवतैतिलगरवणिग्विष्टिभद्राख्यानि सप्त चरकरणानि। स्थिरकरणानि शकुन्यादीनीतिदशसंख्यानि। ८जातिभेदे पुंस्त्री अमरः स्त्रियां जातित्वात् ङीष्। तज्जातिश्च व्रात्यात् क्षत्रियात् सवर्णायामुत्पन्नः जातिभेदः "झल्लोमल्लश्च राजन्यात् व्रात्याल्लिच्छिविरेव च। नटश्च करणश्चैव खशो द्रविड एव च" मनुः। करणरूपवर्णसङ्करस्यैव कायस्थनामता तस्य कर्मविशेषपरिपाकेण तज्जातिप्राप्तिस्तस्य वृत्तिभेदश्च ब्रह्मवै०पु०जन्मखण्डे ८५उक्तो यथा। "तैलचौरस्तैलकीटो भूत्वा कीटस्त्रिजन्मकम्। ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः। नमःकुण्डे वर्षशतं स्थित्वा स्वर्णवणिग् भवेत्। जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत्। विश्वैकविपकर्त्ता च भक्ष्यदातुर्धनं हरेत्। कायस्थेनोदरस्थेन मातुर्मांसं न खादितम्। तत्र नास्ति कृपा तस्य दन्ताभावेन

चौरजम्। स्वर्णकारः स्वर्णवणिक् कायस्थश्च ब्रजेश्वर!। नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले। हृदयं क्षुरधाराभं तेषाञ्च नास्ति सादरम्। यतेषु सज्जनः कोऽपि कायस्थो नेतरौ च तौ। सुबुद्धिः शिवभक्तश्च शास्त्रज्ञो धर्म्ममानसः"। ८वर्णसङ्करजातिभेदे पुंस्त्री "शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्द्विजन्मनोः" ब्रह्मवै० पु०। कायस्थश्च चतुर्व्विधः व्रात्यक्षत्रियः शूद्रावैश्ययोर्जातः करणनाम्ना प्रसिद्धः अम्बष्ठः चित्रगुप्तजातश्चेति प्रकारश्च। कायस्थशब्दे विवृतिः। तस्य वृत्तिमाह पराशरः। "धनधान्याध्यक्षता च राजसेवा तथैव च। द्विजातेः परिचर्य्या च दुर्गान्तःपुररक्षणम्। एषा पारशवस्योक्ता उग्रस्य करणस्य च प्रोक्ता उभयता वृत्तिरुभयत्र शुभप्रदा"। "नृत्यवादित्रगीतानां प्रयोगत्रयभेदिनाम्। संस्थानं ताड़नं रोधः करणानि प्रचक्षते" राजकन्दर्पोक्ते तालव्यवस्थापके १०ताड़नाविशेषे न०। "शिखरासक्तमेघानाम् व्यज्यन्ते यत्र वेश्मनाम्। अनुगर्ज्जितसन्दिग्धाः करणैर्मुरजस्वनाः" कुमा०। सर्वकरणप्रयोक्तृत्वात् ११परमेश्वरे न० "करणं कारणं कर्त्ता विकर्त्ता च मतो गुरुः" विष्णु०सं०। भवाद्यर्थे ततः काशा० ठञ् ञिठ च इकार उच्चारणार्थः। कारणिक तद्भवे स्त्रियां ठञि ङीप् ञिठि टाप्। १२क्रियासाधनस्त्रियां स्त्री ङीप्। क्रियते क्रियाविशेषोऽस्याम् आधारे ल्युट् ङीप्। वीजगणितोक्ते यस्य वर्गमूलादिकं स्पष्टं न प्रतीयते तत्क्रियाविशेषद्वारा तत्करणविषये राशिभेदे स्त्री। सा च षड्विधा सङ्कलनव्यवकलनगुणभागवर्गवर्गमूलरूपभेदात्। तत्क्रियाविशेषो वीजगणिते दर्शितो यथा। "अथ करणी षड्विधा। तत्र सङ्कलनव्यवकलनयोः करणसूत्रं वृत्तद्वयम्। योगं करण्योर्महतीं प्रकल्प्य वधस्य मूलं द्विगुणं लघुञ्च। योगान्तरे रूपवदेतयोः स्तो वर्गेण वर्गं गुणयेद्भजेच्च। लघ्व्या हृतायास्तु पदं महत्याः सैकं निरेकं स्वहतं लघुघ्नम्। योगान्तरे स्तः क्रमशस्तयोर्वा पृथक् स्थितिः स्याद्यदि नास्ति मूलम्। उदाहरणम्। द्विकाष्टमित्योस्त्रिभसंख्ययोश्च योगान्तरे ब्रूहि पृथक्करण्योः। त्रिसप्तमित्योश्च चिरं विचिन्त्य चेत् षड्विधं वेत्सि सखे! करण्याः।

न्यासः क२। क ८ योगे जातम् क १८ अन्तरे च क २

न्यासः क ३। क २७ योगे जातम् क ४८ अन्तरे च क १२ न्यासः क ३। क ७ अनयोर्योगे मूलाभावात् पृथक् स्थितिरेव योगे जातम् क ३ क ७ अन्तरे च क ३ क ७ इति करणीसङ्कलनव्यवकलने।

गुणनोदाहरणम्। द्वित्र्यष्टसंख्यागुणकः करण्या गुण्यस्त्रिसंख्या च सपञ्चरूपा। वधं प्रचक्ष्वाशु विपञ्चरूपे गुणेऽथ वा त्र्यर्कमिते करण्याः। न्यासः गुणकः क २ क ३ क ८ गुण्यः क ३ रू ५

अत्र गुण्ये गुणके वा भाज्ये भाजके करणीनां करण्योर्वा यथासम्भवं लाघवार्थं योगं कृत्वा गुणनभजने कार्य्ये तथा कृते जातो गुणकः क १८ क ३ गुण्यः क २५ क ३ गुणिते जातम् रू ३ क ४५० क ७५ क ५४।

अथ वर्गादौ विशेषसूत्रं वृत्तम्। क्षयो भवेच्च क्षयरूपवर्गश्चेत्साध्यतेऽसौ करणीत्वहेतोः। ऋणात्मिकायाश्च तथा करण्या मूलं क्षयो रूपविधानहेतोः।

न्यासः गुणकः क २५ क ३ क १२ गुण्यः क २५ क ३

अत्र गुणके करण्योर्योगे कृते गुणकः क २५ क २७ गुणिते जातम् क ६२५ क ३७५ क ७५ क ८१ एतासु अनयोः क ६२५ क ८१ मूले रू २५ रू ९ अनयोर्योगे जातम् रू १६ अनयोः क ३७५ क ७५ अन्तरे योग इति जातो योगः क ३०० यथाक्रमं न्यासः रू १६ क ३०० इति करणीगुणनम्। पूर्व्वगुणनफलस्य स्वगुणच्छेदस्य भागार्थं न्यासः भाज्यः क ९ क ४५० क ७५ क ५४ भाजकः क २ क ३ क ८ अत्र क २ क ८ एतयोः करण्योर्योगे कृते जातम् क १८ क ३ "भाज्याच्छेदः शुध्यति प्रच्युतः सन्" इत्यादिकरणेन लब्धो गुण्यः रू ५ क ३

न्यासः भाज्यः क २५६ क ३०० भाजकः क २५ क ३ क १२ करण्योर्योगे कृते जातम् क २५ क २७

अत्रादौ त्रिभिर्गुणयित्वा धनकरण्योः ऋणकरण्योश्च योगं विधाय पश्चात्सप्तविंशत्या गुणयित्वा शोधिते लब्धं रू ५ क ३ अत्रापि पूर्व्ववल्लब्धो गुण्यः रू ५ क ३

अथ वाऽन्यथोच्यते। धनर्णताव्यत्ययमीप्सितायाश्छेदे करण्या असकृद्विधाय। तादृक्छिदा भाज्यहरौ निहन्यादेकैव यावत्करणी हरः स्यात्। भाज्यास्तया भाज्यगताः करण्यो लब्धाः करण्यो यदि योगजाः स्युः। विश्लेषसूत्रेण पृथक् च कार्य्यास्तथा यथा प्रष्टुरभीप्सिताः स्युः। तथा च विश्लेषसूत्रं वृत्तम्। वर्गेण योगकरणी विहृता विशुध्येत् खण्डानि तत्कृतिपदस्य यथेप्सितानि। कृत्वा

तद्दीयकृतयः खलु पूर्व्वलब्ध्या क्षुस्ता भवन्ति पृथगेवमिमाः करण्यः ।

न्यासः भाज्यः क ६ क ५४० क ७५ क ५४ भाजकः क १८ क ३ अत्र भाजके विमितकरण्याः ऋणत्वं प्रकल्प्य क १८ क ३ अनेन भाज्ये गुणिते योगे च कृते जातम् क २६२५ क ६७५ भाजके च क २२५ अनया भाज्ये हृते लब्धम् क २५ क ३

न्यासः भाज्यः क २५६ क ३०० भाजकः क २५ क २७ अत्र भाजके पञ्चविंशतिकरण्याधनत्वं प्रकल्प्य क २५ क २७ भाज्ये गुणिते धनर्णकरणीनामन्तरे च कृते जातम् क १०० क १२ भाजके च क ४ अनया भाज्ये हृते लब्धम् क २५ क ३ इदानीं पूर्व्वोदाहरणे गुण्ये भाज्ये कृते न्यासः भाज्यः क ६ क ४५० क ७५ क ५४ भाजकः क २५ क ३ । अत्रापि त्रिकरण्याः ऋणत्वं प्रकल्प्य भाज्ये गुणिते युते च जातम् क ८०१२ क १४५२ भाजके च क ४८४ अनया हृते भाज्ये लब्धो गुणकः क १८ क ३ । पूर्व्वं गुणके खण्डत्रयमासीदिति योगकरणीयम् १८ विश्लेष्या तत्र वर्गेण योगकरणी विहृता विशुद्ध्येदिति नवात्मकवर्गेण ९ विहृता सती शुध्यतीति लब्धं २ नवानां मूलम् ३ अस्य खण्डे, १, ४, पूर्व्वलब्ध्या २ गुणिते, २, ८, एवं जातो गुणकः क २ क ३ क ८ इति करणीभजनम् ।

करणीवर्गादेरुदाहरणम् । द्विकत्रिपञ्चप्रमिताः करण्यस्तासां कृतिं त्रिद्विकसङ्ख्ययोश्च । षट्पञ्चकत्रिद्विकसम्मितानां पृथक् पृथङ्मे कथयाशु विद्वन् ! । अष्टादशाष्टद्विकसम्मितानां कृतीकृतानां च सखे ! पदानि ।

न्यासः प्रथमः क २ क३ क ५ । द्वितीयः क ३ क २ । तृतीयः क ६ क ५ क ३ क २ । चतुर्थः क १८ क ८ क २

स्थाप्योऽन्त्यवर्गश्चतुर्गुणान्त्यनिघ्न इत्यनेन गुणः पृथग्गुणकखण्डसमइत्यनेन वा जाताः क्रमेण वर्गाः प्रथमः रू १० क २४ क ४० क ६० । द्वितीयः रू ५ क २४ । तृतीयः रू १६ क १२० क ७२ क ६० क ४८ क ४० क २४ अत्रापि करणीनां यथासम्भवं योगं कृत्वा वर्गवर्गमूले कार्य्ये तद्यथा क १८ क ८ क २ आसां योगः क ७२ अस्या वर्गः क ५१८४ अस्या मूलं रू ७२ । इति करणीवर्गः ।

करणीमूले सूत्रं वृत्तद्वयम् । वर्गे करण्या यदि वा क-रण्योस्तुल्यानि रूपाण्यथ वा बहूनाम् । विशोधयेद्रूपकृतेः पदेन शेषस्य रूपाणि युतोनितानि । पृथक्तदर्द्धे करणीद्वयं स्यान्मूलेऽथ बह्वी करणी तयोर्या । रूपाणि तान्येव कृतानि भूयः शेषाः करण्यो यदि सन्ति वर्गे ।

उदाहरणम् । द्वितीयवर्गस्य मूलार्थं न्यासः रू ५ क २४ रूपकृतेः २५ करणीतुल्यानि रूपाणि २४ अपास्य शेषम् १ अस्य मूलेन १ ऊनाधिकरूपाणामर्द्धे जाते मूलकरण्यौ क २ क ३

प्रथमवर्गस्य न्यासः रू १० क २४ क ४० क ६० रूपकृतेः १०० चतुर्विंशतिचत्वारिंशत्करण्योस्तुल्यानि रूपाण्यपास्य शेषम् ३६ अस्य मूलेन ६ ऊनाधिकरूपाणामर्द्धे जाते, २, ८, तत्रापीमां २ मूलकरणीं द्वितीयां रूपाण्येव प्रकल्प्य पुनः शेषकरणीभिः सः एव विधिः कार्य्यस्तत्रेयं रूपकृतिः ६४ अस्याः षष्टिरूपाण्यपास्य शेषम् ४ अस्य मूलम् २ अनेनोनाधिकरूपाणामर्द्धे, ३, ५, जाते मूलकरण्यौ क ३ क ५ मूलकरणीनां यथाक्रमं न्यासः क २ क३ क५

तृतीयवर्गस्य न्यासः रू १६ क १२० क ७२ क ६० क४८ क ४० क २४ रूपकृतेः २५६ करणीत्रितयस्यास्य क ४८ क ४० क २४ तुल्यानि रूपाण्यपास्योक्तवज्जाते खण्डे, २, १४, महती रूपाणीत्यस्याः १४ कृतिः १९६ अस्याः करणीद्वयस्यास्य क ७२ क १२० तुल्यरूपाण्यपास्योक्तवज्जाते खण्डे, ६, ८, पुनारूपकृतेः ६४ षष्टिरूपाण्यपास्योक्तवत्खण्डे, ३, ५, एवं मूलकरणीनां यथाक्रमं न्यासः क ६ क ५ क ३ क २

चतुर्थस्य न्यासः रू ७२ क ० इयमेव लब्धा मूलकरणी ७२ पूर्व्वं खण्डत्रयमासीदिति वर्गेण योगकरणी विहृता शुध्यतीति षट्त्रिंशतोमूलम् ६ एतस्य खण्डानां, १, २, ३, कृतयः, १, ४, ९, पूर्व्वलब्ध्यानया २ क्षुस्ताः, २, ८, १८, एवं पृथक्करण्योजाताः क २ क ८ क १८ ।

अथ वर्गगतर्णकरणीमूलानयनार्थं सूत्रं वृत्तम् । ऋणा-त्मिका चेत्करणी कृतौ स्याद्धनात्मिकां तां परिकल्प्य साध्ये । मूले करण्यावनयोरभीष्टा क्षयात्मिकैका सुधियावगम्या ।

उदाहरणम् : त्रिसप्तमित्योर्वद मे करण्योर्विश्लेषवर्गं कृतितः पदं च ।

न्यासः क ३ क७ यद्वा क ३ क ७ अनयोर्वर्गः समएव रू १० क ८४अत्र वर्गे ऋणकरण्याधनत्वं प्रकल्प्य

प्राग्वल्लघ्वकरण्योरेकाभीष्टा क्षयगता स्यादिति जातम् क ३ क ७ वा क ३ क ७

उदाहरणम् । द्विकत्रिपञ्चप्रमिताः करण्यः स्वस्वर्णगास्वधनर्णगा वा । तासां कृतिं ब्रूहि कृतेः पदं च चेत् षड्विधा वेत्सि सखे ! करण्याः ।

न्यासः क २ क ३ क ५ वा क २ क ३ क ५ आसां वर्गः समएव जाताः रू १० क २४ क ४० क ६० ।

अत्र करणीकरण्योस्तुल्यानि धनरूपाणि १०० रूपकृतेः १०० अपास्य शेषस्य मूलम् ० अनेनोनाधिकरूपाणामर्द्धे क ५ क ५ अत्रैका क्षयम् क ९ अन्या रूपाणीति न्यासः रू ५ क २४ पूर्ववज्जाते करण्यौ धने एव । क ३ क २ यथाक्रमं न्यासः क २ क ३ क ५ अथवानयोः क क २४ क ६० तुल्यानि धनरूपाणि ८४ रूपकृते १०० रूपाख्योक्तवज्जाते मूलकरण्यौ क ७ क ३ अनयोर्महती क्षयं क ७ तान्येव रूपाणि प्रकल्प्य रू ७ क ४० अतः प्राग्वत्करण्यौ क ५ क २ अनयोरपि महती क्षयमिति यथाक्रमं न्यासः क ३ क २ क ५

अथ द्वितीयोदाहरणे प्राग्वत्प्रथमपक्षे मूलकरण्यौ क ५ क ५ अनयोरेका क्षयं क ५ तान्येव रूपाणीति कणोत्पन्ने करणीखण्डे क्षये एवेति यथाक्रमं न्यासः क ३ क २ क ५ द्वितीयपक्षेणापि यथोक्ताएव मूलकरण्यः क ३ क २ क ५ एवं बुद्धिमतानुक्रमपि ज्ञायते इति पूर्वैर्नोयमर्थो विस्तीर्योक्तः बालावबोधार्थं तु मयोच्यते ।

एकादिसङ्कलितमितकरणीखण्डानि वर्गराशौ स्युः । वर्गे करणीत्रितये करणीद्वितयस्य तुल्यरूपाणि । करणीषट्के तिसृणां दशचतसृणां तिथिषु च दशानाम् रूपकृतेः प्रोह्य पदं ग्राह्यं चेदन्यथा न सत् क्वापि । उत्पन्नप्रमानयैवं मूलकरण्यात्पया चतुर्गुणया । यासामपवर्त्तः स्याद्रूपकृतेस्ता विशोध्याः स्युः । अपवर्त्तादपि लब्धामूलकरण्योभवन्ति ताश्चापि । शेषविधिना न यदि ताभवन्ति मूलं तदा तदसत् । करणीवर्गराशौ रूपैरवश्यं भवितव्यम् एककरण्यावर्गे रूपाण्येव । द्वयोः स्वरूपैका करणी । तिसृणां तिस्रः । चतसृणां षट् । पञ्चानां दश । षसां पञ्चदश इत्यादि । अतोद्व्यादीनां वर्गेषु एकादिसङ्कलितमितानि कतणीनां खण्डानि रूपाणि यथाक्रमं स्युः । अथ यदि उदाहरणे तावन्ति न भवन्ति तदासौ योगकरणी विश्लेष्या वा भवतीति कृत्वा मूलं ग्राह्यमित्यर्थः । वर्गे करणीत्रितये करणीद्वितयस्य तुल्यरूपाणीति स्पष्टार्थम् । उदाहरणम् । वर्गे यत्र करण्योदन्तैःसिद्धैर्गजैर्मिताश्चिद्वन् ! । रूपैर्द्दशभिरुपेताः किम्मूलं ब्रूहि तस्य स्यात् । न्यासः रू १० क ३२ क २४ क ८ अत्र वर्गे करणीत्रितये करणीद्वितयस्य तुल्यानि रूपाणि प्रथमं रूपकृतेरपास्य मूलं ग्राह्यं पुनरेकस्याएवं क्रियमाणेऽत्र पदं नास्तीत्यतोऽस्य करणीगतमूलाभावः । अथानियमेन सर्व्वकरणीतुल्यानि रूपाण्यपास्य मूलमानीयते तदिदम् क २ क ८ समागच्छति इदमसत् यतोऽस्य वर्गोयम् रू १८ अथ वा दन्तगजमितयोर्योगं कृत्वा रू १० क ७२ क २४ आनीयते तदिदमप्यसत् रू २ क ६ ।

उदाहरणम् । वर्गे यत्र करण्यस्तिथिविश्वहुताशनैश्चतुर्गुणितैः । तुल्यादशरूपाढ्याः किम्मूलं ब्रूहि तस्य स्यात् । क ६० क ५२ क १२ अत्र किल वर्गे करणीत्रयमस्तीति न्यासः रू १० तत्करणीद्वयस्य द्विपञ्चाशद्द्वादशमितस्य क ५२ क १२ तुल्यरूपाण्यपास्य ये मूलकरण्यावुत्पद्येते क ८ क २ तयोरल्पयानया २ चतुर्गुणया ८ द्विपञ्चाशद्द्वादशमितयोरपवर्त्तोन स्यादतस्ते न शोध्ये यतउक्तमुत्पन्नप्रमानयैवमित्यादि । अत्राल्पयैकयेत्युपलक्षणम् तेन कचिन्महत्यापि तदा मूलकरणीरूपाणि प्रकल्प्यान्ये करणीखण्डे साध्ये सा महती प्रकल्प्येत्यर्थः उदाहरणम् । अष्टौ षट्पञ्चाशत् षष्टिः करणी त्रयं कृतौ यत्र । रूपैर्दशभिरुपेतं किम्मूलं ब्रूहि तस्य स्यात् । न्यासः रू १० क ८ क ५६ क ६०अत्राद्यखण्डद्वये क ८ क ५६ शोध्यते उत्पन्नयाल्पया चतुर्गुणया ८ तयोः खण्डयोरपवर्त्तनक्षे खण्डे । १ । ७ । परं शेषविधिना मूलकरण्यौ नोत्पद्येते अतस्ते खण्डे न शोध्ये अन्यथा तु शोधने कृते मूलं नायातीत्यतस्तदसत् । उदाहरणम् । चतुर्गुणात् सूर्य्यतिथीषुरुद्रनागर्त्तवोयत्र कृतौ करण्यः । सर्वस्वरूपाश्च तत्पदं ते यद्यस्ति बीजेपटुताभिमानः ।

न्यासः रू १३ क ४८ क ६० क २० क ४४ क ३२ क २४ अत्र करणीषट्के तिसृणां करणीनां तुल्यानि रूपाणि प्रथमं रूपकृतेरपास्य मूलं ग्राह्यं पश्चाद्द्वयोस्ततएकस्याएवं कृतेऽत्र मूलाभावः । अथान्यथा तु प्रथममाद्यकरण्यास्तुल्यानि रूपाण्यपास्य पश्चाद्द्वितीयतृतीयोस्ततः शेषाणां रूपकृतेर्विशोध्यानि तन्मूलम् क १ क २ क ५ क ५ तदिदमप्यसत् यतोऽस्य वर्गोयम् रू २३ क ८ क ८० क १६० । येरस्य मूलानयनस्य नियमोन कृतस्तेषामिदं दूषणम् एवंविधवर्गे करणीनामासन्नमूलकरणेन मूलान्या-

नीय रूपेषु प्रक्षिप्य मूलं वाच्यम् । अथ महतीरूपाणो-त्युपलक्षणम् । यतः क्वचिदल्पापि ।

तत्रोदाहरणम् । चत्वारिंशदशीतिर्द्विशतोरुत्थाः क रणयेत् । सप्तदशरूपयुक्तास्तत्र कृतो त्रिम्पदं ब्रूहि ।

न्यासः रू १७ क ४० क ८० २०० शोधिते जाते खण्डे क १० क ७ पुनः लब्धौ करणौ रूपाणि कृत्वा लब्धे करण्यौ क ५ क २ । एवं मूलकरणीनां न्यासः क १० क ५ क २ । इति करण्याः षड्विधाः। [मस्तके ।

करणत्राण न० करणैर्हस्तादिभिस्त्रायते त्रै–कर्मणि ल्युट् ।

करणव्यापार पु० ६त० । करणजन्यजनकत्वविशिष्टे करण-जन्ये व्यापारभेदे । यथा छेदनादिक्रियायां छेद्यदा त्रादिसंयोगः तस्य हि दात्रजन्यत्वात् दात्रजन्यच्छेदनज-नकत्वाच्च तथात्वम् । एवमिन्द्रियाणां विषयसंयोगः तस्य हि इन्द्रियजन्यत्वात् इन्द्रियजन्यप्रत्यक्षज्ञानजनकत्वाच्च तथात्वम् न्यायमते अनुमितौ परामर्शः शाब्दबोधे पदार्थ-स्मृतिः । उपमितौ उपदेशवाक्यार्थस्मृतिः । यथायथमु-ह्यम् । सांख्यमतसिद्धकरणव्यापारभेदस्तु करणशब्दे उक्ताः।

करणाधिप पु० ६त० । १जीवे तदधिष्ठानेनैव करणानां स्वस्वकार्य्येषु प्रवृत्तेस्तस्य तदधिपत्वम् २इन्द्रियाधिष्ठात-देवभेदे च । तत्र बाह्येन्द्रियाधिष्ठातारश्च शा० ति० उक्ता यथा “दिग्वातार्कप्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः । श्रोत्रादीनां दशानां तु”: तथा च श्रोत्रस्य दिक् । त्वचो वायुः । नेत्रस्य अर्कः । रसनायाः प्र-चेता; नासिकायाः अश्विसुतौ । वाचः वह्निः, पाणेरिन्द्रः पादस्य उपेन्द्रोविष्णुमूर्त्तिभेदः । पायोः मित्रः सूर्य्य-मूर्त्तिभेदः । उपस्थस्य कः प्रजापतिः । अन्तःकरणानान्तु मनसश्चन्द्रः, बुद्धेश्चतुर्मुखः, अहङ्कारस्य रुद्रश्चित्तस्याच्यु-तोविष्णुमूर्त्तिभेदः । करणाधिपानाञ्च सर्वेषामधिपः प-रमेश्वरः । करणाधिपाधिपः परमेश्वरः।

करण्ड पु०कृ–कर्मणि अण्डन् । १मधुकोषे (मौचाक) तस्य म-क्षिकाभिश्चिरमधुसञ्चयनेन क्रियमाणत्वात् तथात्वम् वा० कृ–अण्डच् । २खड्गे यत्र् वित्तिपरेतुत्वात् तस्य तथात्वम् करण्डस्तदाकारोऽस्त्यस्य अर्श० अच् । ३कारण्डवखगे पुंस्त्री स्त्रियां जातित्वेऽपि संयोगपधत्वात् न ङीष् किन्तु टाप् । ४दलाढके च मेदि०।५वंशादिरचितपुष्पा-दिपात्रभेदे (साजि) “शुष्कवनलतानिर्मितं महाकुसुमकर-ण्डकेन” काद०। समुद्गे (कौटा) अमरः । “दीपभाज-नभ्रमरकरण्डकप्रभृत्यनेकोपकरणयुक्तः” दशकुमा० ।

७यकृति कालखण्डे शब्दचि०। ८पुष्पभाण्डे स्त्री टाप् अत इत्त्वम् करण्डिका । उज्ज्वलदत्तः ।

करण्डिन् पु० करण्डस्तदाकारोऽस्त्यस्य इनि । मत्स्ये त्रिका०।

करतल ७त०। ६त० १हस्तस्य तले (हातेरतेलो) । “नखानि विधुयक्षया करतलेन तस्याविघ्नोत्” उद्भटः “करतलगत-मपि नश्यति” हितो०। करस्तलमिव । २हस्ते च ।

करताल(क) न० करेण तालो यत्र वा कप् । झल्लके वाद्ये (खरताल) “शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् । दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत्” ति० त० पु० तत्र झल्लकं कांस्यनिर्म्मितकरतालकमिति” रघु० ।

करताली स्त्री करेण दीयमानस्तालो यत्र गौरा० ङीष् । १वाद्यभेदे (खरताल) त्रिका० । ६त० । २करतलशब्दे (हाततालि) । पु० क्वचित् स्त्रीत्वमपि “यथा न स्या-दालीकपटकरतालीपटुरवः” उद्भटः स्वार्थे कन् अत इत्त्वम् । करतालिकापि करतलशब्दे “उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः” नैष० ।

करतोया स्त्री करतोयं हरपार्वतीविवाहच्युतजलं अ-स्यस्याः हेतुत्वेन अच् । नदीभेदे सदानीरायाम् अमरः । गौरीविवाहे शङ्करकरच्युतजलभवत्वात् तस्यास्तथात्वम् । अस्याश्च यथा सदानीरत्वं तथोक्तं स्मृतौ “प्रथमं कर्कटे देवी त्र्यहं गङ्गा रजस्वला । सर्वा रक्तवहानद्यः करतोया-ऽम्बुवाहिनीति” तेनान्यनदीनामिवास्याः उक्तकाले रक्त-वहत्वाभावात् सदानीरवाहित्वात्तथात्वम । “करतोयां समासाद्य त्रिरात्रोपोषितोनरः । अश्वमेधमवा-प्नोति प्रजापतिकृतोविधिः” भा० व० ८५ । “करतो-यां कुरङ्गे च त्रिरात्रोपोषितो नरः । अश्वमेधमवाप्नोति विगाह्य प्रयतः शुचिः” भा० अनु० २१अ० । अस्त्यर्थे इनि करतोयिन्यप्यत्र । “प्रभासं मानसं तीर्थं पुष्क-राणि महत् सरः । पुण्यञ्च नैमिषं तीर्थं बाहुदां क-तोयिनीम्” अनु० प० ।

करद त्रि० करं राजस्वं ददाति दा–क । १राजस्वदायके । “कश्चिन्न शूद्रेण न हीनजेन वैश्येन वा करदेनोप-पन्ना” भा० आ० १६२अ० । “य इमे पृथिवीपालाः करदास्तव पार्थिव !” भा० व० २५४ अ० “भ्रातृभिर्जि-त्वरैर्द्विषाम्” माघः । २त्राणार्थं हस्तदायके त्रि०।

करद्रुम पु० किरति समन्तात् शाखाः कृ–अच् नित्यक० । कारस्करवृक्षे राजनि० ।

करहिष् पु० १गोत्रभेदे २वेदशाखिभेदे च । “तामेताः कर-

द्विष उपासते तस्मात्ते सर्व्वमायुर्यन्ति” ता० २,१५,४, “करद्विषोनाम गोत्रभेदाः शाखिभेदा वा” भा० ।

करन्धम पु० करं धमति ध्मा–खश् मुम् च । १इक्ष्वाकुवंश्ये खनीनेत्रपुत्रे सुवर्च्चोन्टपे तस्य तन्नामनिरुक्तिः भा०आश्व० ४अ०। “खनीनेत्रस्य दुर्द्धर्षतामुक्त्वा “तमपास्य च तद्राज्ये तस्य पुत्रं सुवर्च्चसम् । अभ्यषिञ्चन्त राजेन्द्र ! मुदिताह्यभवस्तदा । स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तथा । नियतोवर्त्तयामास प्रजाहितचिकीर्षया । ब्रह्मण्यः सत्यवादी च शुचिः शमदमान्वितः । प्रजास्तञ्चान्वरज्यन्त धर्म्मनित्यं मनीषिणम् । तस्य धर्म्मप्रवृत्तस्य व्यशीर्य्यत् कोषवाहनम् । तं क्षीणकोषं सामन्ताः समन्तात् पर्य्यपीडयन् । स पीड्यमानो बहुभिः क्षीणकोषाश्ववाहनः । आर्त्तिमार्च्छत् परां राजा सह भृत्यैः पुरेण च । न चैनमभिहन्तुं ते शक्नुवन्ति बलक्षये । स प्रवृत्तो हि राजा स धर्म्मनित्यो युधिष्ठिर ! । यदा च परमामार्त्तिं गतोऽसौ सपुरो न्टपः । ततः प्रदध्मौ स करं प्रादुरासीत्ततोबलम् । ततस्तानजयत् सर्वान् प्रत्यमित्रान्नराधिपान् । एतस्मात् कारणाद्राजन् ! विश्रुतः स करन्धमः । तस्य कारन्धमः पुत्रस्त्रेतायुगमुखेऽभवत्” २पाणिन्धमे मुखमारुतप्रयोगेण हस्ताध्मायकमात्रे त्रि०।

करन्धय त्रि० करं धयति धे–खश् मुम् च । हस्तलेहके ।

करन्यास पु० करे करावयवे न्यासः । तन्त्रोक्तमन्त्रभेदेन अङ्गुष्ठतर्ज्जनीमध्यमानामाकनिष्ठातरतलपृष्ठेषु न्यासभेदे “अङ्गन्यासः करन्यासो बीजन्यासस्तथैव च” बटुकस्त० ।

करपत्त्र न०करात् पतति–पत–ष्ट्रन् । (करात) १क्रकचे दारुभेदके अस्त्रभेदे अमरः । “स्फुटञ्च पत्त्रैः करपत्रमूर्त्तिभिर्वियोगहृद्दारुणि दारुणायसे” नैष० क्षेतकवर्णने । तच्च सुश्रुतोक्तशस्त्रभेदः । तत्र हि “विंशतिः शस्त्राणि”इत्युद्दिश्य “मण्डलाग्रकरपत्रेत्यादिना” विभज्य “तत्र मण्डलाग्रकरपत्रे स्यातां छेदने भेदने चेति”तस्योपयोग उक्तः । करावेव पत्त्रं वाहनं यत्र । २जलक्रीडायाम जटाधरः। तत्र हि हस्ताभ्यां जलमुत्तोल्य परस्परं क्रीड्यते ।

करपत्त्रवत् पु०करपत्त्रं तदाकारः पत्रमन्त्यस्य मतुप् मस्य वः । तालवृक्षे शब्दच० ।

करपत्त्रिका स्त्री करौ पत्त्रमिव वाहनमस्याः कप् अत इत्त्वम् । जलक्रीडायां जटा० । हस्ताभ्यां जलोत्तोलनेन अन्योन्यं तत्क्रीडारचनात्तस्यास्तथात्वम् ।

करपर्ण पु० करः हस्त इव पर्णं यस्य । (भ्येंट) १भिण्डातकवृक्षे २रक्तैरण्डे च (लालभेरण्डा) राजनिघण्टुः ।

करपल्लव पु० करस्य पल्लव इव । १अङ्गुलौ । करः पल्लव इव रक्तत्वात् । २करकिसलये । “करपल्लवसङ्गीनि तैरस्मान् रक्ष सर्वतः” देवीमा० ।

करपात्त्र न० करः पात्रमिव यत्र । १जलक्रीड़ाभेद हारा० करकृपेणैव पात्रेण जलोत्तोलनेन तत्क्रीड़ाकरणात्तस्यास्तथात्वम् । कर एव पात्रम् । २हस्तरूपे पात्रे च । “करपात्रे स्थिते तोये कृत्वा मूत्रपुरीषके । आचरं तत् भवेत्तोयं पीत्वा चान्द्रायणं चरेत्” आ० त० स्मृतिः ।

करपाल पु०करं पालयति पाल-अण् उप०स० । १खड्गे अमरटीका । गौरा० ङीष् । २हस्तयष्टौ (सोंटा) स्त्री जटा० । खुल् टाप् अतइत्त्वम् । करपालिकाऽप्यत्र स्त्री । सा च एकधारास्त्रभेदे क्षीरस्वामी ।

करपीडन पु० करस्य वधूकरस्य पोड़नं ग्रहणं वरेण यत्र । १विवाहे “सुतपरिणयात् परमासान्तः सुताकरपीड़नम्” मु०चि० । पाणिपीडनादयोऽप्यत्र ।

करबाल पु० करस्य बालः शिशुरिव । १नखे शब्दमा० । करं वलति संवृणोति बल–संवणे अण् उप० स० । २खड्गे (तरवाल) भरत: ‘शक्तीश्च विविधास्तीक्ष्णाः करबालांश्च निर्मलान्”भा०आ०२७। खुल् अत इत्त्वम् । करबालिका अस्त्रभेदे स्त्री ।

करभ पु० कृ-अभच्, करे भाति भा-क वा । मणिबन्धात् कनिष्ठापर्य्यन्ते करस्य १बाह्यदेशे, अमरः । २करिशावके, “कदली कदली करभः करभः” प्रसन्नरा० “करभोरु रतिप्रश्ने द्वितीये पञ्चमेऽप्यहम्” विद्यासु० ३उष्ट्रशिशौ (नखी) नाम ४गन्धद्रव्ये, ५उष्ट्रमात्रे पुंस्त्री मेदि० । स्त्रियां ङीष् ‘करभकण्ठकडारभासाः”माघः “स तु हस्तस्य परिघं करञ्च करभोपमम्” भाग० ६,१२,२१ । “व्यजायन्त खरा गोषु करभाऽश्वतरीषु च” भा०मौष० २अ० । करोाबभेत्यस्याः क्विप् भी बा० ह गौरा० ङीष् वा ।६करभी हस्तिकाख्याम् स्त्री (विछाति) स्वार्थे कन् करभक। उष्ट्राद्यर्थे पुंस्त्री । स्त्रियां करभिका ।

करभकाण्डिका स्त्री करभप्रियं काण्डमस्याः कप् अत इत्त्वम् । उष्ट्रकाण्डीवृक्षे राजनि० ।

करभञ्जिका स्त्री भन्ज–ण्वुल् ६त० । करमर्द्दभेदे भावप्र०

करभप्रिया स्त्री ६त० । १क्षुद्रदुरालभायाम् राजनि० उष्ट्रप्रियत्वात्तस्यास्तथात्वम् ।२उष्ट्रयोषिति च ।

करभवल्लभ पु० ६त० । १उष्ट्रप्रिये पीलुवृक्षे, २कपित्थवृक्षे

च राजनि०। २करभप्रियमात्रे त्रि०। स्त्रियां टाप्।

करभादनी स्त्री करभैरद्यते अद–कर्म्मणि ल्युट् ङीप्। उष्ट्रप्रियायां दुरालभायाम् राजनि०

करभिन् पुंस्त्री करभः करावयवभेदस्तदाकारः शुण्डोऽस्त्यस्य इनि। गजे राजनि० तस्य शुण्डे करभाकारत्वात् तथात्वम्। स्त्रियां ङीप्। [अण्। सिंहे शब्दर०।

करभीर पु० करभिणं गजमीरयति पलायनाय प्रेरयति ईर–

करभूषण न० करो भूष्यतेऽनेन भूष–करणे ल्युट्। १कङ्कणे (काङ्गनि) हस्तभूषणे अमरः। करं भूषयति भूष–णिच–अणु। २हस्तभूषणमात्रे त्रि०। [उत्तमस्त्रियाम्।

करभोरु स्त्री करभ इव ऊरुर्यस्याः ऊङ्। प्रशस्तोरुकायां

करमट्ट पु० करं हस्तिशुण्डमट्टति अट्ट–अनादरे बा० ख मुम् च। १गुवाकवृक्षे त्रिका०। तस्य हस्तिशुण्डवत्-काण्डत्वात्तथात्वम्।(पाणिया आमला) २वृक्षे इत्येके।

करमरिन् त्रि० किरत्यत्र दस्यान् कॄ–आधारे अप् करो बन्धनागारः तत्र म्रियते बा० इनि। (कयेदी) बन्दिनि त्रिका०। तस्य बन्धनागारे मरणात्तथात्वम्।

करमर्द्द पु० करं मृद्नाति मृद-अण् उप०स०।(पाणियाआमला) वृक्षे राजनि०। ण्वुल् करमर्दकोऽप्यत्र। तत्स्पर्शे हि करकण्डूरिति तस्य तथात्वम्। "बृहद्दीर्घफलाभ्यां तु करमर्द्द द्वयं मतम्। करमर्द्दद्वयं त्वाममस्लं गुरु तृषापहम्। उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम्। तत् पक्वं मधुरं रुच्यं लघु पित्तसमीरजित्" भावप्र० 'करमर्द्दाल्लघुफला सा ज्ञेया करमर्द्दिका"इति तत्रोक्ते लघुफलकेऽत्र स्त्री

करमर्द्दिन् पु० करं मृद्नाति णिनि ईत०। करमर्द्दे (पाणिया आमला) वृक्षे रत्नमा०।

करमाल पु० करः हस्तिशुण्ड इव तदाकृतिर्मालाऽस्य। धूमे हेम०। क्रमेण हस्तिशुण्डाकारेण प्रसरणात्तस्य तथात्वम्

करमाला स्त्री करः कराङ्गुलिपर्व्व मालेव जपसंख्याहेतुत्वात्। "आरभ्यानामिकामध्यं दक्षिणावर्त्तयोगतः। तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता" इत्युक्तलक्षणायां जपसंख्यार्थं कराङ्गुलिपर्व्वरूपायां मालायाम्। अत्र विशेषस्तन्त्रसा० उक्तः यथा सनत्कुमारसंहितायाम् "तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात्। तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्व्विका। पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्"। क्रममाह तत्रैव "अनामामध्यमारभ्य कनिष्ठादित एव च। तर्ज्जनीमूलपर्य्यन्तं दशपर्व्वसु संजपेत्", तत्रैव। "अनामामूलमारभ्य कनिष्ठादित एव च। तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत्"। एतद्वचनन्तु अष्टोत्तरशतविषयम् विष्णुविषयञ्च। शक्तिविषये पुनः "अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका। मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्वणि। तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्"। अन्यच्च "अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च। मध्यमामूलपर्य्यन्तं संजपेदष्टपर्व्वसु"। इदमपि अष्टोत्तरशतविषयम्। हंसपारमेश्वरे "पर्व्वत्रयमनामायाः परिवर्त्तेन वै क्रमात्। पर्व्वत्रयं मध्यमायास्तर्ज्जन्येकं समाहरेत। पर्व्वद्वयन्तु तर्ज्जन्या मेरुं तद्विद्धि पार्वति!। शक्तिमाला समाख्याता सर्व्वतन्त्रप्रदीपिता। श्रीविद्यायामयं विशेषः। "अनामामूलमारभ्य प्रादक्षिण्यक्रमेण च। मध्यमामूलपर्य्यन्तं दशपर्व्वसु संजपेत्"। अन्यच्च "मध्यमाया अनामाया मूलाग्रञ्च द्वयं द्वयम्। कनिष्ठायाश्च तर्ज्जन्यास्त्रयं पर्व्व महेश्वरि!। अनामामध्यमयोश्च मेरुःस्यात् द्वितयं शुभम्। प्रादक्षिण्यक्रमाद्देवि। जपेत् त्रिपुरसुन्दरीमिति" यामलात् "कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण तु। तर्ज्जनीमूलपर्य्यन्तं जपेदष्टसु पर्व्वसु" इति श्रीक्रमवचनाच्च। इदमपि तथैव। मुण्डमालातन्त्रे "अनामिकाद्वयं पर्व्व कनिष्ठादिक्रमेण तु। तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता। अङ्गुलीं न वियुञ्जीत किञ्चिदाकुञ्चिते तले। अङ्गुलीनां वियोगाच्च छिद्राच्च स्रवते जपः"। अन्यत्रापि। "अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने। पर्व्वसन्धिषु यज्जप्तं तत् सर्व्वं निष्फलं भवेत्। गणनाविधिमुल्लङ्घ्य यो जपेत् तज्जपं यतः। गृह्णन्ति राक्षसास्तेन गणयेत् सर्व्वथा बुधः। जपसंख्या तु कर्त्तव्या नासंख्यातं जपेत् सुधीः। असंख्याकारकस्यास्य सर्व्वं भवति निष्फलम्। हृदये हस्तमारोप्य तिर्य्यक् कृत्वा कराङ्गुलीः। आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत्"। गायत्रीजपे विशेषः विधानपा० गायत्रीहृदये "अनामिकामध्यरेखावध्यधः प्रक्रमेण च। तर्ज्जन्यादिगतान्ते च अक्षमाला करे स्थिता" अनामिकाया मध्यरेखामादिं कृत्वा तर्जन्या आदिरेखा अन्ते यस्याः सेयं करे स्थिता मालेत्यर्थः विधानपा०। तत्रैव यमः। "सहस्रपरमां देवीं शतमध्यां दशावराम्। गायत्रीं तु जपेन्नित्यं सर्व्वकल्मषनाशिनीम्। पर्व्वभिस्तु जपेद्देवीमन्यत्रानियमः स्मृतः। गायत्र्या वेदं पात् गदितं ब्रह्मणा स्वयम्। अङ्गुष्ठाग्रेण यज्जप्तं यज्जप्तं

मेरुलङ्घनात्। असंख्यातं तथा जप्तं तत्सर्वं निष्फलं भवेत्” मदनपारिजाते तु मध्यमाया इयं पर्वेतिपाठः। आ०त० यद्वः। “तिस्रोऽङ्गुल्यस्त्रिपर्व्वाणो मध्यमा चैकपर्विका। अनामामध्यमारभ्य जप एवमुदाहृतः” काम्ये मालाऽभावे एवास्याम्नाता नित्ये तु सर्वथैव म्नाता यथाह योगिनीत०। “नित्यं जपं करे कुर्य्यान्न काम्यमवरोधनात्। काम्यमपि करे कुर्य्यात् मालाऽभावे प्रियंवदे!। तत्राङ्गुल्या जपं कुर्य्यात् साङ्गुष्ठाङ्गुलिभिर्जपेत्। अङ्गुष्ठेन विना कर्म कृतं तन्निष्फलं भवेत्” उत्पत्तितन्त्रे १प० “नित्यं नैमित्तिकं काम्यं करे कुर्य्याद्विचक्षणः। करमाला महादेवि! सर्वदोषविवर्जिता। छिन्नभिन्नादिदोषोऽपि करे नास्ति कदाचन। अन्यथा तु करे देवि! माला भवति तादृशी। ग्रन्थिः सा कुण्डलीशक्तिः पञ्चाशद्वर्णरूपिणी। अतएव महेशानि! करमाला महाफला”। ततश्च दक्षिणेनेति प्रागुक्तेः दक्षहस्तपर्वभिरेव दशसंख्यजपः कार्य्यः। शतादिजपे तु दक्षिणहस्तेन कृतजपदशसंख्यायाः प्रत्येकं दशकसंख्यागणना वामहस्तस्थितनिर्द्दिष्टपर्व्वक्रमेण कार्य्या तथा च दशकस्य दशकेन गणने शतसंख्यापूर्त्तिः। अधिकाष्टसंख्या तु दक्षहस्तेनैव प्रागुक्तरीत्या कार्य्येति तत्त्वम्।

करमुक्त न० करे स्थापयित्वा मुच्यते शत्रुं प्रति क्षिप्यते मुच–क्त (वड़शी) अस्त्रभेदे हेमच०।

करम्ब त्रि०कृ–कर्मणि अम्बच्। १मिश्रिते। भावे अम्बच्। २मिश्रणे पु०। हेमच०।३करम्भे इत्यमरटीकायां नीलकण्ठः

करम्बित त्रि० करम्बो मिश्रणं जातोऽस्य तार० इतच्। मिश्रिते “मधुकरनिकरकरम्बितेति”जयदेवः।

करम्भ पु० केन जलेन रभ्यते सिच्यते रभ-घञ् मुम् च। १दधिमिश्रितसक्तुषु अमरः “धानावन्तं करम्भिणमपूपवन्तम्” ऋ०३,५२,१.। “पूषण्वते ते चकृमा करम्भम्” ऋ०३,५२,७,“अतषानिव यवान् कृत्वा तानीषदिवोपतप्य करम्भपात्राणि तेषां कुर्व्वन्ति” शत० ब्रा० २,५,२,४, २उदमन्थे “धानाः करम्भः सक्तवः परिवापः पयो दधि” यजु० १९,२१, “करम्भः उदमन्थः” वेददी०। “रूपं बदरमुपवाका करम्भस्य” २२। “करम्भादिति पूषणम्” ऋ०६,५६,१। ३भ्रष्टयवमात्रे। “कामधियस्त्वयि रचिता न परमारोहन्ति यथा करम्भवीजानि” भाग० ३,२६,२७, “करम्भवीजानि भर्जितयववीजानि”श्रीधरः। “करम्भवालुकातापान् कुम्भोपाकांश्च दारुणान्” मनुः। करम्भपाकार्थं वालुकावदातापोयेषु इति। “करम्भवालुकां तप्तामायसीश्च शिलाः पृथक्” भा० स्वर्गा०२अ०। निरयवर्णने। द्रव्यावयववैषम्यात् ४मिश्रगन्धे। “करम्भपूतिसौरभ्यशान्तोग्राम्लादिभिः पृथक्”एकोविभिद्यते गन्धः” भाग० ३,२६,४२, “करम्भोमिश्रगन्धः”श्रीधरः। ५प्रियङ्गुवृक्षे ईशतावर्य्यांञ्च राजनि०। स्वार्थे कन् करम्भक तत्रार्थे

करम्भि पु० यदुवंश्ये नृपभेदे। “करम्भिः शकुनेः पुत्रोदेवरातस्तदात्मजः” भाग० ९,२४,२,

कररुह पु०करे रोहति रुह–क।१नखे अमरः। वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै”मेघ०। २कृपाणे च(तरवार)

करर्द्धि स्त्री करेण ऋद्धिर्यत्र।१करताल्याम्। त्रिका०शे०।२हस्तसम्पत्तौ च।

करवी स्त्री कस्य वायोः रवोऽत्र गौ० ङीष्। १हिङ्गुपत्रे करेण वीयते वी–क्विप्। २करव्यांञ्च त्रिका०

करवीर पु० करं वीरयति चु० वीर विक्रान्तौ अण्। १कृपाणे खड्गे,२स्वनामख्याते ३वृक्षे,४देशभेदे च मेदि०।५श्मशाने, हेम०। ब्रह्मावर्त्तदेशस्थदृषद्वतीनदीतीरस्थचन्द्रशेखरराजपुरे च। करवीरवृक्षभेदगुणाश्च भाव० उक्ता यथा। “करवीरः श्वेतपुष्पः शतकुम्भोऽश्वमारकः। द्वितीयोरक्तपुष्पश्च चण्डद्रोणः शुभस्तथा। करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्। व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम्। वीर्य्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम्!। ७तीर्थभेदे। “करवीरपुरे स्नात्वा विशालायां कृतोदकः। देवह्रद उपस्पृश्य ब्रह्मभूतो विराजते” भा० अनु० २५अ०। करवीरपुरञ्च चेदिदेशसन्निकृष्टं गोमन्तपर्व्वतात् त्रिदिनगम्यमार्गे स्थितम्। यथोक्तं हरिवं०१००अ० “राज्ञां पराजयं युद्धे गोमन्तेऽचलसत्तमे। श्रवणाद्धारणाच्चास्य स्वर्गलोकं व्रजन्ति ते। तद्गच्छाम महाराज! करवीरं पुरोत्तमम् त्वयादिष्टेन मार्गेण चेदिराज! शिवाय च। ते स्यन्दनगताः सर्व्वे पवनोत्पातिभिर्हयैः। भेजिरे दीर्घमध्वानं मूर्त्तिमन्त इवाग्नयः। ते त्रिरात्रोषिताः प्राप्ताः करवीरं पुरोत्तमम्। शिवाय च शिवे देशे निविष्टास्त्रिदशोपमाः” तत्पुराधीशश्च सृगालनामा नृपतिस्तदप्याह तत्रैव १०१अ० “तानागतान् विदित्वाऽथ सृगालो युद्धदुर्म्मदः। पुरस्य धर्षणां मत्वा निर्जगामेन्द्रविक्रमः”।

करवीरक पु०करवीर इव कायति कै–क। १अर्ज्जुनवृक्षे राजनि० स्वार्थे कन्। २करवीरार्थे। करं वीरयति ण्वुल्। ३खड्गे शब्दमा०। करवीरे भवः कन्। ४करवीरभूतज-

रूपे विषभेदे न॰ हेमच॰ [कन्दे राजनि॰ ।

करवीरकन्दसंज्ञ पु॰ करवीरकस्य संज्ञा संज्ञाऽस्य । तैल

करवीरभुजा स्त्री करवीरस्य भुज इव भुजोऽस्याः । आढ-
क्याम् (अरहर) राजनि॰ [(अरहर) शब्दचि॰

करवीरभूषा स्त्री करवीरस्य भूषेव भूषा यस्याः। आढक्याम् ।

करवीराद्य न॰ करवीरमाद्यं यत्र । “करवीरपुष्पं जात्यसनमल्लिकायाश्च । एतैः समन्तु तैलम् नाशार्शो-नाशनञ्च श्रेष्ठम्” इति चक्रदत्तोक्ते तैलभेदे ।

करवीरी स्त्री कृ-भावे अप् कराय विक्षेपाय वीरः पुत्रोऽस्याः । १अदितौ तत्पुत्राणां सुरक्षेपकत्वात्तस्यास्तथात्वम् । कं सुखं राति रा-क करः सुखदः वीरः पुत्रोऽस्याः। २पुत्रवत्यां स्त्रियाञ्च मेदि॰ सर्वतः गौरा॰ ङीष् ।

करवीर्य्य पु॰ करवीरे पुरे भवः यत् । धन्वन्तरिं प्रति आयुर्वेदज्ञानाय प्रश्नकारके ऋषिभेदे । “काशिराजं दिवोदासं धन्वन्तरिमौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः” सुश्रु॰ ।

करशाखा स्त्री करस्य शाखेव । अङ्गुलौ अमरः । अङ्गुलशब्दस्य परिमाणविशेषे पारिभाषिकत्वेऽपि अस्य तदर्थे पारिविभाषिकत्वकल्पनं शब्दकल्पद्रुमे निर्मूलमेव ।

करशीकर पु॰ करस्य हस्तिहस्तस्य शीकरः । हस्तिहस्तात् निर्गते जलकणे अमरः

करशुद्धि स्त्री ६त॰ । फड़ितिमन्त्रेण गन्धपुष्पाभ्यां हस्तयाः शोधने । “आदाष्टशादिकन्यासः करशुद्धिस्ततः परम्” तन्त्रसा॰ ।

करशूक पु॰ करस्य शूकः इवोव । नखे । त्रिका॰ ।

करस् न॰ कृ-असुन् । कर्मणि । “प्र ते पूर्वाणि करणानि विप्रा विद्वाँ आह विदुषे करांसि” ऋ॰ ४,१९,२० । “करांसि कर्माणि” भा॰।

करसूत्र न॰ ६त॰। विवाहादौ हस्ते मङ्गलार्थं बध्यमाने सूत्रे ।

करस्थालिन् पु॰ करः स्थालीवास्यस्य व्रीह्या॰ इनि । महादेवे “नलस्तालः करस्थाली ऊर्द्ध्वसंहननो महान्” भा॰ अनु॰ १७ अ॰ शिवसहस्रनामकथने । तस्य कालरूपेण सर्वभूतानां करद्वपस्थाल्यैव पचनात्तथात्वम् ।

करस्न पु॰करणं करः कृ-बा॰ अप् तं स्नाति करोति धातूनामनेकार्थत्वात् स्ना-क । कर्मकरे बाहौ निरु॰ “रेवत्-स्वमा करस्ना दधिषे वपूंषि” ऋ॰ २,१८,५ । करस्ना कर्माणि प्रस्नातारौ बाहू” भा॰ “पृथू करस्ना बहुला गभस्ती” ऋ॰६.१९,२ । एतामृचमधिकृत्य “करस्ना बाहू कर्मणां प्रस्नातारौ” निरु॰ ६.१६ निरुक्तिर्दर्शिता ।

करहाट पु॰करैः सूर्य्यकिरणैः हाट्यते दीप्यते हट-दीप्तौ णिच् कर्मणि घञ् । १पद्मादिमूले, अमरः करं हाटयति हट-णिच् अण् । २मदनद्रुमे, ३देशभेदे च । मेदिनि: । ४पिण्डीतकतरौ राजनि॰।

करहाटक पु॰ करं हाटयति हट-दीप्तौ णिच्-ण्वुल् । १मदनवृक्षे । करहाटकार्जुनककुभेत्यादि सुश्रु॰ । ६त॰। २हस्ताभरणे सुवर्णे । अमरः । [हारा॰ ।

कराङ्गण न॰करस्य राजस्वादानस्याङ्गणम् । राजस्वादानस्थाने ।

कराघात पु॰ ६त॰ । करतलाघाते चपेटाघाते (चापडमारा)

कराट त्रि॰कराय विक्षेपायाटति अट्+अच् । विकटे शब्दचि॰

करामर्द्द पु॰ करमामृद्नाति आ+मृद-अण् उप॰ स॰ । करमर्द्दे शब्दर॰।

करामुक पु॰ कीर्य्यते कॄ-कर्मणि अप् करमम्बु यतः कप् । (पाणिया आमला) करमर्द्दभेदे शब्दच॰ । [राजनि॰ ।

कराम्लक पु॰ करं कीर्य्यमाणमम्लं यतः कप् । करमर्द्दवृक्षे

करायिका स्त्री कर इवाचरति कर+आचारे क्यङ् ण्वुल् । १बलाकायाम् तस्याः सङ्कुचितहस्तवत् प्रकाशमानत्वात्तथात्वम् । २कूटपूर्य्याम् शब्दचि॰ [त्रिका॰ ।

करारोट पु॰ करे आरोटते रुट-दीप्तौ अच् । अङ्गुरीयके

कराल पु॰ कराय विक्षेपायालति पर्य्याप्नोति करं लाति ला-क वा । १सर्जरसयुक्ततैले (तेलधुना) २कृष्णकुठेरके (कालतुलसी)३तुङ्गे ४दन्तुरे उन्नतदन्ते (दाँतो) ५भयानके त्रि॰ मेदि॰ । “करालवदनां घोराम्” “घोरदंष्ट्रां करालास्याम्” श्यामाध्यानम् । “वपुर्महोरगस्येव करालफणमण्डलम्” रघुः “लम्बा कराला विनता तथैव बहुपुत्रिका” “दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका” (पूतना) सुश्रु॰ । (अनन्तमूल) ६शारिवौषधौ स्त्री राजनि॰। गौरा॰ङीष् ।७अग्नेर्जिह्वाभेदे जटाधरः । सा च तामसी यथाह शा॰ति॰ “विश्वमूर्त्तिः स्फुलिङ्गिन्यौ धूम्रवर्णा मनोजवा । लोहिताख्या कराली च काली तामस्य ईरिताः” । संज्ञायां कन् अत इत्वम् । करालिका राजसवह्निजिह्वायाम् । “पद्मरागा सुवर्णान्या लतायां भद्रलोहिता । लोहितानन्तरं श्वेता धूमिनी च करालिका । राजस्योरसना वह्नेर्विहिताः काम्यकर्मसु” अग्निजिह्वशब्दे दर्शितवाक्यन्तु सामान्यविषयम् । ८दन्तरोगभेदे पु॰। “शनैः शनैर्विकुरुते वायुर्दन्तसमाश्रितः। करालान् विकटान् दन्तान् करालो न स

शिध्यात"भावप्र०। तादृशरोगयुक्तत्वात् दन्तुरस्य तथात्वम्। "तप्तस्नेहे पचेत् पूर्वं वेसवारकसंयुतम्। पाकप्रापिततसौरभ्यं करालं सूदकैर्मतम्"पाकशास्त्रोक्ते स्नेहपक्वे १०वेसवारे न०।(कडि)११कस्तूरीमृगे पुंस्त्री"एणहरिणर्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्कमृगमातृकाप्रभृततयो जङ्गलाः मृगाः कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या वस्तिशोधनाश्च"सुश्रुते मृगभेदानुक्त्वा तद्गुणा उक्ताः। १२दैत्यभेदे पु०। "सप्तमः कालवदनः करालः कौशिकः शरः" हरिवं४२ असुरनामकथने। "सप्तमः-कालवदनः करालः केशिरेव च"हरिवं० २६२ अ०। स्वार्थे कन् करालकः उक्तार्थे कृष्णतुलस्याम् पु०रत्ना०।

करालत्रिपुटा स्त्री करालानि त्रीणि पुटान्यस्याः। लङ्काधान्ये त्रिकाण्डिकायाम् राजनि०।

करालभैरव न० तन्त्रभेदे। म०त० कूर्मपु० हिमालयं प्रति देवीवाक्यम्। "करालभैरवञ्चापि यामलं वाममाश्रितम्। एवंविधानि चान्यानि मोहनार्थानि यानि तु। मया सृष्टानि चान्यानि मोहायैषां भवार्णवे" [वृक्षे हेमच०।

करालिक त्रि० कराणां करतुल्यशाखानामालिर्यत्र कप्।

करास्फोट पु०करेण आस्फोटः शब्दो यत्र। वक्षःस्थले सङ्कुचितरूपेण स्थापिते एकबाहौ इतरकराघातेन ताड़ने (तालठोका)। ६त०। २कराघाते।

करिक पु० करो विक्षेपोऽस्त्यस्य ठन्। विट्खदिरे शब्दच०

करिकणवल्ली स्त्री करिकणः गजपिप्पल्यवयव इव वल्ली। चविकावृक्षे (चइ) राजनि०।

करिका स्त्री करोतिविलेखनमस्त्यस्याम् अर्श० अच् अत इत्त्वम्। नखरेखायाम् वैज०। [चूर्णे शब्दचि०

करिकुसुम्भ पु०करी नागकेशरस्तस्य कुसुम्भ इव। नागकेशर-

करिज पुंस्त्री करितोजायते जन—ड। हस्तिशिशौ शब्दरत्ना०

करिणी स्त्री करिन्+स्त्रियां ङीप्। १हस्तिन्याम् अमरः "त्वाषावसन्नमदधारकपोलभागाः सम्पादयन्ति करिणः करणीभ्रमं नः" धनञ्जयविज०। २देवताभेदे शब्दचि०।

करिदारक पु०१करिणं दृणाति हिनस्ति दृ-ण्वुल्। सिंहे। शब्दर०स्त्रियां टाप् अत इत्त्वम्। [शब्दचि०

करिनासिका स्त्री करिणोनासेवाकारोऽस्याः। यन्त्रभेदे

करिन् पुंस्त्री करः शुण्डः प्राशस्त्येनास्त्यस्य इनि। हस्तिनि गजे "बृंहितं करिगर्जितम्"अमरः "मुक्ताफलाय करिणम् हरिण पलाय" व्या०उदा०। "अरिकरिहरणार्थं योजनानामशीत्या" लीला०। "करीव सिक्तं पृषतैः पयोमुचाम्" "कटप्रभेदेन करीव पार्थिवः"रघुः "आयामवद्भिः करिणां घटाशतैः"माघः। २अष्टसंख्यायाम् एकाआदिशब्दे विवृतिः। करिभेदादिकम् पृ० ९५९ इभशब्दे उक्तम्। तन्नामनामके ३नागकेशरे पु०।

करिप पु० करिणं पाति पा—क। हस्तिपके (माहुत)। चूर्णादि० अप्राणिवाचकषष्ठ्यन्तात् अस्याद्युदात्तता। वनकरिप इत्यादि। [राजनि०

करिपत्र न० करो तत्कर्ण इव पत्रमस्य। तालिपत्रवृक्षे

करिपथ पु० ६त०अच् समा०। हस्तिगमनयोग्ये पथि ततः संज्ञायां कन् देवपथादि०तस्य लुक्। करिपथनामके देशभेदे पु०। [पिप्पल्याम् अमरः

करिपिप्पली स्त्री करिपूर्वपदयुक्ता पिप्पली शा०त०। गज-

करिपोत पु० ६त०। हस्तिशावके हारा०।

करिबन्ध पु० करिणं बध्नात्यत्र बन्ध-आधारे घञ्। १हस्तिबन्धस्तम्भे हारा०। भावे घञ् ६त०। २गजबन्धने च

करिभ न० करीव भाति भा—क। कुञ्जभेदे त्रिका०।

करिमाचल पुंस्त्री मच-शाठ्ये घञ् करिणि माचं शाठ्य लाति ला-क। १सिंहे त्रिका०। गजमाचलादयोऽप्यत्र। स्त्रियां जातित्वात् ङीष्।

करिमुख पु० करिणोमुखं मुखमस्य। १गणेशे यथा चास्य गजवक्त्रता तथा इभाननशब्दे ९८१पृ०उक्तम्। ६त०। २गजस्य मुखे न०।

करिर पुंन० कृ—इरन्। गूढपत्रे उष्ट्रप्रिये मरुभूमिजे करीरे वृक्षभेदे। शब्दरत्ना०। करीरशब्दे गुणादि।

करिरत न० "भूगतस्तनभुजास्यमस्तकामुन्नतां स्वयमधोमुखीं स्त्रियम्। क्रामति स्वकरकृष्टमेहने वल्लभे करिरतं तदुच्यते" इत्युक्तलक्षणे १रतिबन्धभेदे शब्दचि० करिपदमिति पाठान्तरे"करिपदमित्यपि तत्रार्थे। ६त०२गजरमणे च।

करिव त्रि० करिणं वाति वा—क। करिगते अप्राणिषष्ठ्यन्तात्तस्य चूर्णा० आद्युदात्तता। वनकरिव इत्यादि

करिशावक पु० गजशिशौ "यावत्पञ्चाब्दमेतस्मिन् करभः कलभोऽपि च" शब्दर० उक्ते पञ्चाब्दपर्य्यन्ते हस्तिबालके।

करिष्ठ त्रि० अतिशयेन कर्त्ता इष्ठन् तृणोलोपः। कर्तृतमे "पुरु सखिभ्य आसुति करिष्ठः" ऋ०७,९७,७। ईयसुन्। करीयस् कर्त्तृतरे त्रि० स्त्रियां ङीप्।

करिष्यमाण त्रि०कृ—भविष्यति शानच् स्यट्। कर्त्तव्ये। वेदे तु नि० मानलोपः। "यानि करिष्या कृणुहि प्रवृद्ध!"

ऋ॰ १,१६५,९, "करिष्या कर्त्तव्यानि" भा॰ । द्वितीयास्थाने ध्याट् ।

करिसुन्दरिका स्त्री करीव सुन्दरी संज्ञायां कन् । नागयटौ वस्त्रशोषणाय मङ्कुस्थापियन्त्रभेदे हारा॰ ।

करिस्कन्ध न॰ करिणां समूहः स्कन्धच् । गजसमूहे । हेम॰ । गजस्य २स्कन्धे पुंन॰ ।

करीर पु॰ कृ—ईरन् । १घटे मेदि॰ । २वंशाङ्कुरे अमरः । (बाँशेरकोँड) ३अङ्कुरमात्रे भावप्र॰ वंशस्तक्का "तत्करीरः कटुः पाके रसे रूक्षो गुरुः सरः । कषायः कफकृत् स्वादुर्विदाही वातपित्तलः" तद्गुणा उक्ताः । "हिमांशुवंशस्य करीरमेव मां निशम्य किन्नासि फलेग्रहिस्पृहा" नैष॰ । आनिन्यिरे वंशकरीरनीलैः" माघः । "वंशशब्दस्याम्नानताहेतोरलूनतायाः प्रतिपत्त्यर्थत्वाच्च पौनरुक्त्यम् अतएव एकार्थं पदम् न प्रयोज्यमित्युक्त्वा करिकलभकर्णावतंसादिषु प्रतिपात्तिविशेषकरेषु न दोष इत्याह वामनः" मल्लि॰ । तेन वंशाङ्कुरार्थकस्यापि करीरशब्दस्य प्रतिपत्तिविशेषार्थं वंशशब्दप्रयोग इति तत्त्वम् । ४गूढपत्रे मरुभूमिजे उष्ट्रप्रिये वृक्षभेदे भावप्र॰ । "करीरः कटुकस्तिक्तः स्वेद्युष्णोभेदनः स्मृतः । दुर्नामकफवातामगरशोथव्रणप्रणुत्" भावप्र॰ ४चीरिकायां भिल्लाम् (झिँझिपोका) ५हस्तिदन्तमूले च स्त्री उणा॰ । अस्य प्रस्थशब्देन समासे करीरप्रस्थे कर्क्यादि॰ नाद्युदात्तता । मध्वा॰ चतुरर्थ्यां मतुप् मस्य वः । करीरवत् तत्सन्निकृष्टदेशादौ त्रि॰ स्त्रियां ङीप् ।

करीरकुण न॰ करीरस्य पाकः पीलवा॰ पाके कुणच् । तत्पाके

करीरिका स्त्री करीरमिवाकारोऽस्त्यस्य ठन् । हस्तिदन्तमूले त्रिका॰ ।

करीरी स्त्री कृ—ईरन् गौरा॰ ङीष् । चीरिकायां (झिँझिपोका) १झिल्लाम् २गजदन्तमूले च मेदि॰ ।

करीष पुंन॰ । कृ—ईषन् । १शुष्कगोमये (घुटिया । "करीषमिष्टकाङ्गारान् शर्करा वालुकास्तथा" मनुः । २पशुपुरीषमात्रे च "उच्छुष्ककलभपुरीषपांशुला" कादम्ब॰ । करीषाग्निः (घुटेर आगुन) ।

करीषगन्धि पु॰ करीषस्य गन्ध इव गन्धोऽस्य इत् समा॰ । करीषतुल्यगन्धयुक्ते तस्यापत्यमण् स्त्रियां ष्यङ् कारीषगन्ध्या तदीयस्त्र्यपत्ये । तस्याः पुत्रपतिशब्दाभ्यां समासे सं प्र॰ दीर्घश्च । कारीषगन्धीपुत्रः कारीषगन्धीपतिः एवं परमकारीषगन्धीपुत्र इत्यादि उपसर्ज्जने तु न अतिकारीषगन्ध्यापुत्र इत्याद्येव सि॰ कौ॰ ।

करीषङ्कषा स्त्री करीषं कषति हिनस्ति कष-खच् मुम् च । वात्यायाम् तस्याः गोमयशोषणात्तथात्वम् ।

करीषिन् त्रि॰ करीषस्य देशः पुष्करा॰ इनि न मतुप् । १करीषयुक्तदेशे स्त्रियां ङीप् । करीषमाश्रयत्वेनास्त्यस्याः इनि ङीप् । गोमयाधिष्ठातृदेव्यां २लक्ष्म्याम् स्त्री । "गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्" श्रीसूक्तम् ।

करुण त्रि॰ करोति मनः आनुकूल्याय कृ—उनन् । दयायुक्ते २रसभेदे पु॰ तल्लक्षणाद्युक्तं सा॰ द॰ यथा "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् । धीरैः कपोतवर्णोऽयं कथितो यमदैवतः । शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् । तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः । अनुभावा दैवनिन्दा भूपातक्रन्दितादयः । वैवर्ण्योच्छ्वासनिश्वासस्तम्भप्रलपनानि च । निर्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः । विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः" ।

शोच्यं विनष्टबन्धुप्रभृति । यथा राघवानन्दे । "विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः । अनयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकर्त्तनम्" । अत्र हि रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावप्युदाहार्य्यम् । परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः । अस्य करुणविप्रलम्भाद्भेदमाह । शोकस्थायितया भिन्नो विप्रलम्भादयं रसः । विप्रलम्भे रतिः स्थायी पुनः सम्भोगहेतुकः" ३परदुःखहरणेच्छायां दयायां स्त्री । "अहो विधे त्वां करुणा रुणद्धि नः" नैष॰ । "प्रायःसद्योभवति करुणावृत्तिरार्द्रान्तरात्मा" मेघ॰ । "करुणाविमुखेन मृत्युना" रघुः । दुःखितेषु दया करुणा साऽस्त्यस्य अर्श॰ अच् विषयत्वेन । ४करुणाविषये दीने त्रि॰ । "अभिशं निर्जरकरुणः करुणम्" माघः । "करुणं दीनं यथा तथेति" मल्लि॰ । "अनुरोदितीव करुणेन पत्रिणां विरुतेन" माघः । "विरुतैः करुणस्वनैरियम्" कुमा॰ । (करुणस्वनेषु) ५वृक्षभेदे पु॰ त्रिका॰ । "पिकात् वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणे वियोगिनाम्" नैष॰ । "करुणस्य फलं स्नेहवातामसेदशं पुनः ; नाशनं पित्तकोपस्य शमनं परिकीर्त्तितम्" इति तत्फलगुणाश्च वैद्यकोक्ताः । ६बुद्धभेदे पु॰ त्रिका॰ । ७परमेश्वरे ८भूताभयकारके परिव्राजके पु॰ शब्दच॰ ।

करुणमल्ली स्त्री करुणा करुणाविषयः मल्ली । १नवमल्लिकायाम् शब्दच॰ । तत्पुष्पस्यातिसुकुमारत्वात् करुणा-

प्रयत्नेन हृदय चीयमानतया तस्यास्तथात्वम् ।

करुणविप्रलम्भ पु० शृङ्गाररसभेदे । शृङ्गारशब्दे सा० द० उक्तं यथा

"विप्रलम्भोऽथ सम्भोग इत्येष द्विविधो मतः । तत्र यत्र तु रतिः प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ । अभीष्टं नायकं नायिकां वा । स च पूर्व्वरागमानप्रवासकरुणात्मकश्चतुर्द्धा स्यात्" ।

करुणानिधि पु० करुणा निधीयतेऽत्र नि+धा—आधारे कि उप० स० । करुणाधारे दयायुक्ते करुणानिधानादयोऽप्यत्र । [यस्य ; अत्यन्तकरुणायुक्ते ।

करुणापर त्रि० करुणायां परः आसक्तः करुणा परा वा

करुणामय त्रि० करुणा+प्राचुर्य्ये मयट् । प्रचुरकरुणावति "काकुत्स्थं करुणामयं गुणनिधिम्, विप्रप्रियं धार्मिकम्" महाना० स्त्रियां ङीप् करुणामयी ।

करुणिन् त्रि० करुणाऽस्त्यस्य सुखा० इनि । कृपायुक्ते स्त्रियां ङीप् । सिद्धे सुखादिपहणम् ठनादिनिवृत्त्यर्थमिति सि० कौ० । तेन सुखादिभ्यो न मतुप् । आर्षे तु क्वचिदिष्यते ।

करुत्थाम पु० तुर्वसुवंश्ये दुष्मन्तपुत्रभेदे । "तुर्वसोश्च सुतो वह्निरित्युपक्रम्य "दुष्मन्तस्य तु दायादः करुत्थामः प्रजेश्वरः "हरिवं० ३२अ० ।

करुन्धम पु० तुर्वसुवंश्ये त्रैसानोः पुत्रे नृपभेदे । "करुन्धमस्तु त्रैसानोर्मरुत्तस्य चात्मजः" हरिवं० ३२अ० ।

करुम पु० पिशाचभेदे । ये शालाः परिनृत्यन्ति सायं गर्द्दभनादिनः । कुसूला ये च कुक्षिलाः ककुभाः करुमाः स्रिमाः । तानोषधे ! त्वं गन्धेन विषूचीनान् विनाशय" अथ० ८, ६, १० ।

करू स्त्री कृ—हिंसायाम् ऊ । १कर्त्तने । "चतुर्दश वा आसां करूकराणि" शत० ब्रा० २२, २, ४, १० । कर्म्मणि ऊ । २कृत्ते च । "वामं देवः करूवती" ऋ० ४, ३०, २४ । "करूलती कृत्तदन्तः" भा० इषो० दन्तस्य लतादेशः पूष्णोभग्नदन्तत्वेन तथात्वम् ।

करूष पु० कृ—ऊषन् । १देशभेदे यस्याधिपतिर्द्दन्तवक्रः "एष मद्रान् वशे कृत्वा कुरूंश्च सह सोमकैः । चेदिकाशिकरूषांश्च कुरुलक्ष्मीं वहिष्यति" भा० आ० १२२ अ० । "शिशुपालः सहसुत: करूषाधिपतिस्तथा" भा० स० ४अ० । करूषाणां जनपदानां राजा अण् तद्राजत्वात् बहुषु तस्य लुक् । करूषाः तद्राजेषु "दन्तवक्रः करूषश्च करभोमेघवाहनः" भा० स० १२अ० । एकत्वेऽपि लुक् आर्षः । अस्य तालव्यमध्यताऽपि भर्गादिगणे तथापाठात् ततो भर्गा० स्त्रियां न तद्राजप्रत्ययस्य लुक्" सि० कौ० ।

करूषज पु० करूषदेशे जायते जन—ड । दन्तवक्रे नृपभेदे "ताविहाथ पुनर्जातौ शिशुपालकरूषजौ" भा० भा० ७, १०, ३० । तौ जयविजयौ विष्णोःपार्षदौ ।

करूषाधिपति पु० ६त० । दन्तवक्रे नृपे । "काश्मीरराजो गोनर्द्दः करूषाधिपतिस्तथा" हरिवं० ९ । करूषाधिपादयोऽप्यत्र ।

करेऽट पु० करे अटति अट—अच् अलुक् स० । नखे त्रिका०

करेऽटव्या स्त्री करेऽटनं व्ययति व्ये—ड टाप् । धनच्छूपक्षिणि त्रिका० । [ख्याते खगे · अमरः ।

करेटु पु० केन मस्तकेन रेटति रेट—कु । (करकटिया) इति

करेणु पु० क—एणु(नु)के मस्तके रेणुरस्य वा । १गजे अमरः । "त्रस्तः समस्तजनहासकरः करेणोः" माघः । उत्क्षिप्तगात्रः स्म विडम्बयन्नभ:—करेणुरारोहयते निषादिनम्" माघः "स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः" माघः । २कर्णिकारवृक्षे विश्वः । ३गजस्त्रियां स्त्री अमरः । "गजाय गण्डूषजलं करेणुः" कुमा० । "करेणुभिर्द्दन्तमृणालभङ्गाः" रघुः । करेणुदुग्धगुणाश्च सुश्रुते "अश्वायाश्चैव नार्य्याश्च करेणूनाञ्च यत् पयः । तत्त्वनेकौषधिरसप्रसादं प्राणदं गुरु । मधुरं पिच्छिलं शीतं स्निग्धं श्लक्ष्णं मृदु स्थिरम्" सामान्यत उक्ता । "हस्तिन्याः मधुरं वृष्यं कषायानुरसं गुरु । स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम्" उक्ताः । "करेणुः सबहुक्षीरा कन्देन गजरूपिणी । हस्तिकर्णपलाशस्य तुल्यपर्णा द्विपर्णिनी" सुश्रुतोक्तलक्षणायाम् ४ओषधौ स्त्री तदुत्पत्तिकालश्च तत्रैवोक्तः । "करेणुस्तत्र कन्या च छत्रातिच्छत्रके तथा । गोलोमी चाजलोमी च महती श्रावणी तथा । वसन्ते कृष्णसर्पाख्यो गोलोमी च प्रतायते" स्वार्थे कन् करेणुकाप्यत्र स्त्री । रायमुकुटस्तु करेणूशब्दं दीर्घान्तं पठित्वा हस्तिनि पुंस्त्रीत्याह ।

करेणुभू पु० करेणौ भवति भू—क्विप् । १हस्तिशास्त्रप्रवर्त्तके पालकाव्यमुनौ हेमच० । २हस्तिजातमात्रे त्रि० ।

करेणुमती स्त्री नकुलस्य भार्य्याभेदे । "नकुलस्तु चैद्यां करेणुमतीं भार्य्यामुदावहत्तस्यां पुत्रं निरमित्रं नामाजनयत्" भा० आ० ९५ अ० ।

करेणुसुत पु० ६त० । पालकाव्ये मुनौ त्रिका० ।

करेनर पु० तुरुष्कनामगन्धद्रव्ये करेवरोऽप्यत्र राजनि० ।

करेन्दुक पु० करेण किरणेनेन्दुरिव भायति कै–क । भूतृणे राजनि० ।

करोट न० के शिरसि रोटते रुट्–दीप्तौ अच् । शिरोऽस्थ्नि । (माथारखुलि) इनन् करोटिरप्यत्र स्त्री वा ङीप् अमरः । "वपुषि भटकरोटिन्यस्तकीलालसिन्धुः" धनञ्ज० ।

करोटक पु० नागभेदे "आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा" भा०आ० ३५ अ० नागनामकीर्त्तने । अत्र कर्कोटार्थाभिधानं प्रामादिकमेव । उपक्रमे ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" इति कर्कोटकस्य पृथगुक्तेस्ततो भिन्न एवायमिति तत्त्वम् । [प्रनिकर्कति ।

कर्क हासे सौत्रः पर०अक० सेट् । कर्कति अकर्कीत् । चकर्क

कर्क पु० करोति करोति क्रियते वा कृ–क तस्य नेत्त्वम् कर्क–अच् वा । १वह्नौ २श्वेताश्वे अमरः ३दर्पणे ४घटे ५मेषाद्यवधिचतुर्थे राशौ ६कुलीरे ७कर्कटवृक्षे (काँकडाशिङ्गा) च हेम० । ८कात्यायनश्रौतसूत्रभाष्यकारे पु० ।

कर्कखण्ड पु० कर्कः श्वेताश्वयुक्तः खण्डः भूमिखण्डो यत्र देशभेदे । "मागधान् कर्कखण्डांश्च निवेश्य विषये त्मनः" भा० व० २५२अ० :

कर्कचिर्भटि स्त्री कर्कवर्णा चिर्भटी । कर्कटीभेदे । राजनि० ।

कर्कट पु० सौ०कर्क–अटन् । क्षुद्रामलकवत्क्षुद्रफलके १वृक्षभेदे २जलजन्तुभेदे कुलीरे । (काँकडा) "गणनाटत्करकर्कटोत्करम्" नैष० राजनि० । (करकटिया) ३पक्षिभेदे । ४अलाबूवृक्षे च मेदि० । ५पद्मकन्दे जटा० मेषादितश्चतुर्थे ६राशौ "पादः पुनर्वसोरन्त्यः पुष्योऽश्लेषा च कर्कटः" ज्यो०त०उक्तसपादनक्षत्रद्वयात्मकः । तथा च ३६०अंशात्मके राशिचक्रे ९०अंशोत्तरम् ३० त्रिंशदंशात्मकः स राशिः । "मेषाः स्वनामसदृशाकृतयो भवन्ति" ज्यो०त०उक्तेस्तस्य कुलीराकृतित्वम् । अस्य वर्णाद्युक्तं नील०ता० "बहुप्रजाबहुपदः कुलीरश्चरोऽङ्गना पाटलहीनशब्दः । शुभः कफी स्निग्धजनोऽम्बुचारी समोदयी विप्रनिशोत्तरेशः" तथा च अस्य बहुप्रजाश्लिष्टता बहुपदता चरराशित्वं स्त्रीरूपता पाटलवर्णता हीनशब्दता शुभत्वं शुभस्वामिकता च । कफप्रकृतित्वं स्निग्धजनत्वम् जलचरत्वम् समराशित्वम् विप्रवर्णत्वम् निशाबलित्वम् उत्तरदिग्धुस्त्वञ्च । अयं च कीटराशिः "कर्कटवृश्चिकमीना धनुषश्चान्त्यार्द्धञ्च कीटसंज्ञाः स्युः" इत्युक्तेः तत्र समत्वं युग्मराशित्वं समपरिमाणञ्च । "ओजोऽथ युग्मं विषमः समश्च" "क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च" इत्युक्तेः "हस्वास्तिमिगोऽविघटा मिथुनधनुःकर्किमृगतुलाश्च समाः" इत्युक्तेश्च । "पृष्ठोदयाविमिथुना दिवा शीर्षोदयाः परे" इत्युक्तेः अस्य शीर्षोदयत्वम् । अस्याधिपः चन्द्रः ।कुजशुक्रबुधेन्द्वर्क सौम्यशुक्रावनीभुवाम् ।—क्षेत्राणि स्यु रजादयः इत्युक्तेः "मेषकर्कटयोर्मध्ये गाढं तपति भास्करः" तिथि० पु० । "कर्कटे प्रथमं देवी त्र्यहं गङ्गा रजस्वला" स्मृतिः । (काँकुड) ७एर्वारौ स्त्री गौरा० ङीष् भावप्र० । तस्याः गुणाः भावप्र० उक्ता यथा । "एर्वारुः कर्कटी प्रोक्ता कथ्यन्ते तद्गुणा अथ । कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः । रुच्या पित्तहरा साऽमा पक्वा तृष्णाग्निपित्तकृत्" । अस्याः पाकप्रकारस्तु । "त्वग्बीजरहिता प्रौढ़ा गुलिकाकारखण्डिता । तलिता हुष्टे तप्ते कर्कटी वावलेहिता । विपाच्य खण्डं घृतदुग्धषाड्ं विभावितं वल्लजशर्कराभ्याम् । सतैलवाषञ्च कटुष्णमेतत् प्रतिक्षणं रोचनमातनोति" । ङीबन्तः । ८शाल्मलौ मेदि० । ९सर्पे शब्दरत्ना० । १०देवदालीलतायां १२घोषिका१३वृक्षे राजनि० । १४कर्कटजातिस्त्रियाञ्च । "यथा च कर्कटी गर्भमाधत्ते मृत्युमात्मनः" भा०शिरा०२७२श्लो० । कर्कटस्य कोषस्थता तन्मांसगुणाश्च भावप्रका० उक्ता यथा । "शङ्खः शङ्खनखश्चापि शुक्तिशम्बूककर्कटाः । जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिताः । कोषस्था मधुराः स्निग्धा वातपित्तहरा हिमाः । "ताम्रचूडकर्कटकृष्णमत्स्यशिशुमारवराहवसाः" सक्षीरं कर्कटरसे सिद्धं चात्र घृतं पिबेत्" सुश्रु० । स्मृतौ चास्याभक्ष्यतोक्ता तच्चाभक्ष्यशब्दे दर्शितम् । कर्कटस्य शृङ्गाकारोऽस्त्यस्य अर्श०अच् । तुलाप्रान्तनिखेये कर्कटशृङ्गाकारे आयसे १५कीलकभेदे" पु०मिता०१६करटके पु० च । तत्पादाग्रतुल्याग्रत्वात्तस्य तथात्वम् । १७कर्कटशृङ्गाम् स्त्री ङीप् भाव०प्र० ।

कर्कटक न० कर्कट इव कायति कै–क । १यन्त्रभेदे (कम्पास) "फणिमुखकाकचञ्चुदंशकपुरुषशीर्षकयोगचूर्णयोगवर्त्तिकामानसूत्रकर्कटकरज्जुदीपभाजनभ्रमरकरण्डकप्रभृत्यनेकोपकरणयुक्तः" दशकुमा० । कर्कटः वृक्ष इव कायति कै क । २इक्षुभेदे शब्दचिन्ता० । स्वार्थे कन् । ३कुलीरे अमरः ।

कर्कटशृङ्गी स्त्री कर्कट इव शृङ्गं यस्याः । (कांकडाशिङ्गा) १वृक्षभेदे । स्वार्थे कन् कर्कटशृङ्गिकाप्यत्र । "शृङ्गी

कर्कटशृङ्गी च स्यात् कुलीरविषाणिका। अजशृङ्गी च वक्रा च कर्कटाख्या च कीर्त्तिता। शृङ्गी कषाया तिक्तोष्णा कफवातक्षयज्वरान्। श्वासोर्द्ध्ववाततृट्कास हिक्कारुचिवमीन् हरेत्" भावप्र० तद्गुणादि उक्तम्

कर्कटाक्ष पु० कर्कट इवाक्षि ग्रन्थिभेदोऽस्य। कर्कट्याम् (काँकुड) रत्नमाला। [शृङ्ग्याम् भावप्र०।

कर्कटाख्या स्त्री कर्कटस्याख्याख्या यस्याः। (काँकडाशिङ्गा)

कर्कटाङ्गा स्त्री कर्कटस्याङ्गं शृङ्गमिव शृङ्गमप्यस्याः अजा० टाप्। शृङ्ग्याम्। राजनि०। [बिल्ववृक्षे राजनि०।

कर्कटाह्व पु० कर्कटमाह्वायते कण्टकाकारत्वात् आ+ह्वे—क।

कर्कटि स्त्री कर्कं कण्टकमटति इन् शक०। (काँकुड) १एर्वारौ शब्दचि०। वा ङीप् अत्रार्थे, २शाल्मलीवृक्षे ३कर्कटशृङ्ग्याञ्च। मेदि०।

कर्कटिनी स्त्री कर्कटस्येवाकारोऽस्त्यस्याः इनि ङीप्। दारुहरिद्रायाम् राजनि०। [शब्दरत्ना०।

कर्कटु पु० कर्क— मृगया० नि०। (करकटिया) पक्षिभेदे

कर्कन्धु स्त्री कर्कं कण्टकं दधाति धा—कू नि० मुम्। १बदर्य्याम् (कुल) "कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाशङ्कया" सा० द०। तस्य पुंस्त्वमपि। "पुंसि स्त्रियाञ्च कर्कन्धूर्बदरी कोलमित्यपि। फेनिलं कुवलं घोण्टा सौवीरं बदरं महत्। अजप्रिया कुहा कोली विषमोभयकण्टका। पच्यमानं सुमधुरं सौवीरं बदरं महत्। सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम्। बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम्। सौवीरं लघु सम्पक्कं मधुरं कोलमुच्यते। कोलन्तु बदरं ग्राहि रुच्युष्णञ्च वातलम्। कफपित्तकरञ्चापि गुरु सारकमीरितम्। कर्कन्धूः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः। अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक्। स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्। शुष्कं भेद्यग्निकृत् सर्वं लघु तृष्णाक्लमास्रजित्" फले न०। "दम्भोहपं कर्कन्धूनि" यजु० १९,२३, कर्कन्धूनां पाकः पील्वादि० कुणच्। कर्कन्धूकुण तत्पाके न०। प्रस्थपरे कर्क्यादि० कर्कन्धूप्रस्थ इत्यादौ नाद्युदात्तता। ततः मध्वा० चतुरर्थ्यां मतुप्। कर्कन्धूमत् तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप्। कर्कन्धूमती। तस्याः अदूरभवः सुवास्त्वा० अण्। कार्कन्धूमत तददूरदेशभवे त्रि०।

कर्कफल न० कर्क—हासे अच् कर्कं प्रकाशान्वितं सत् फलति फल-अच्। क्षुद्रामलके राजनि०।

कर्कर पु० कर्क—हासे—अरन्। १दर्पणे, मेदि० २चूर्णसाधने चुक्रपाषाणखण्डे कङ्करे (काँकर)। कर्क—घञ् कर्कं हासं राति—रा—क। ३दृढे ४कठिने त्रि० मेदि०। "किं नो शर्करकर्करैः प्रियशतैराक्रम्य विक्रीयते" अमरुश०। "करीरः कर्करोऽर्करुक्" माघः। २सुन्दरे शब्दचि०।

कर्कराङ्ग पु० कर्कर इवाङ्गं यस्य। खञ्जने कालकण्ठविहङ्गमे शब्दमा०।

कर्कराट् पु० कर्कं हासं रटति रट-क्विप्। कटाक्षे जटाधरः।

कर्कराटुक पु० कर्कं कठिनं रटति रट—उकञ्। (करकटिया) विहङ्गभेदे शब्दर०।

कर्करान्धुक पु० कर्करः कठोरः अतिशयितान्धाकारवत्त्वात् अन्धुः कूपः संज्ञायां कन्। अत्यन्तान्धकारवति कूपे। त्रिका०।

कर्कराल पु० कर्करः सन् अलति अल—अच्। चूर्णकुन्तले हेमच०। तस्य इतरकेशापेक्षया कठिनत्वात्तथात्वम्।

कर्करिका स्त्री कर्कर इवास्त्यस्याः अच् संज्ञायां कन् अत इत्त्वम्। नेत्रखर्जूभेदे शब्दचि०। तत्र हि नेत्रे कङ्करयुक्ततेवोपलभ्यत इति तस्यास्तथात्वम्।

कर्करी स्त्री कर्कं हासं राति रा—क गौरा० ङीष्। (झारी) १सनालपात्रे, अमरः कन्दोर्घृतादिपक्वनिष्काशनसाधने (जाजरा)२द्रव्ये च शब्दचि०। कर्कं राति रा—ईकक्। कर्करीकोऽप्यत्र। कर्करी+स्वार्थे कन् न ह्रस्वः कर्करीका तत्रार्थे स्त्री। [उज्ज्वल०।

कर्करीक न० कर्क—फर्फरीका० ईकन् नि०। शरीरे

कर्करेट पु० कर्कं ककेति शब्दं रेटत्यस्मात् रेट—अपादाने घञ्। अर्द्धचन्द्रे गलहस्ते (गलाटिपि) गलामर्द्दने हि कर्कशब्दकरणात्तस्य तथात्वम्।

कर्करेटु पु० कर्केति शब्दं रेटति उन् उण० स०। (करकटिया) पक्षिभेदे अमरः।

कर्कश पु० कृञ् हिंसायां त्रिच् कः सन्+कशति—कर्क-अच् कर्क+लोमादि० श, करे कशति कश—शब्दे अच् शक० वा। १काम्पिल्लवृक्षे (गुड़ारोचनी) अमरः। २कासमर्दे (काल्कासेन्दा) ३इक्षुवृक्षे ४खड्गे च हेम०। ५साहसिके कठोरे च त्रि० अमरः "वेणुकर्कशपर्वया" रघुः। "ऐरावतास्फालनकर्कशेन" कुमा०। "कृष्णा स्तब्धावलिप्ता वा जिह्वा शूना च यस्य वै। कर्कशा वा भवेद्यस्य सोऽचिराद्द्विजहाऽसून्" सुश्रु०। कर्कशं परिजीर्णञ्च कृमिजुष्टमदेशजम्। वर्जयेत् पत्रशाकन्तु" सुश्रु० "सुरद्विपास्फालन-

कर्कशाङ्गुलौ" रघुः । ६काठिनयुक्ते त्रि० अमरः ७क्रूरे ८निर्दये च त्रि० मेदि० । ९दुर्बोधे च "तर्के वा भृशकर्कशे मम समं लीलायते भारती" प्रसन्न० । १०अत्यन्ते च "तस्य कर्कशविहारसम्भवम्" रघुः कर्कशस्य भावः त्व । कर्कशत्व न० तल् कर्कशता स्त्री । ष्यञ् । कार्कश्य न० इमनिच् कर्कशिमन् पु० कर्कशभावे "नागेन्द्रहस्तास्त्वचि कर्कशत्वात्" कुमा० । "आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम्" माघः । कार्कश्यञ्च स्पर्शभेदः । "स्पर्शनेन्द्रियविज्ञेयाः शीतोष्णश्लक्ष्णकर्कशमृदुकठिनाः" इत्यादिसुश्रुतोक्तेस्तस्य स्पर्शनेन्द्रियग्राह्यता । स च पार्थिवगुणभेदः । अन्यद्रव्ये तु कार्कश्यव्यवहारोभाक्तः । सुश्रुतोक्तेषु चिकित्सोपयोगिविंशतिगुणेषु ११गुणभेदे ते च गुणा यथा

"अत ऊर्द्ध्वं प्रवक्ष्यामि गुणानां कर्म्मविस्तरम् । कर्म्मभिस्त्वनुमीयन्ते नानाद्रव्याश्रया गुणाः । ह्लादनः स्तम्भनः शीतो मूर्च्छातृट्स्वेददाहजित् । उष्णस्तद्विपरीतः स्यात् पाचनश्च विशेषतः । स्नेहमार्दवकृत् स्निग्धो बलवर्णकरस्तथा । रूक्षस्तद्विपरीतः स्याद्विशेषात् स्तम्भनः खरः । पिच्छिलो जीवनो बल्यः सन्धानः श्लेष्मलो गुरुः । विशदो विपरीतोऽस्मात् क्लेदाचूषणरोपणः । दाहपाककरस्तीक्ष्णः स्रावणो मृदुरन्यथा । सादोपलेपबलकृद्गुरुस्तर्पणबृंहणः । लघुस्तद्विपरीतः स्याल्लेखनो रोपणस्तथा । दशाद्याः कर्म्मतः प्रोक्तास्तेषां कर्म्मविशेषणैः । दशैवान्यान् प्रवक्ष्यामि द्रवादींस्तान्निबोध मे । द्रवः प्रक्लेदनः सान्द्रः स्थूलः स्याद्बन्धकारकः । श्लक्ष्णः पिच्छिलवज्ज्ञेयः कर्कशो विशदो यथा । सुखानुबन्धी सूक्ष्मश्च सुगन्धो रोचनो मृदुः । दुर्गन्धो विपरीतोऽस्माद्धृल्लासारुचिकारकः । सरोऽनुलोमनः प्रोक्तो मन्दो यात्राकरः स्मृतः । व्यवायी चाखिलं देहं व्याप्य पाकाय कल्पते । विकाशी विकसन्नेवं धातुबन्धान् विमोचयेत् । आशुकारी तथाशुत्वाद्धावत्यम्भसि तैलवत् । सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतःस्वनुसरः स्मृतः । गुणा विंशतिरित्येवं यथावत्परिकीर्त्तिताः" । १२वृश्चिकालीवृक्षे स्त्री राजनि०

कर्कशच्छद कर्कशः छदः पत्रमस्य । (शेओड़ा) १शाकोटवृक्षे शब्दमा० २पटोले च त्रिका० कर्कशदलोऽप्यत्र । ३कोषातक्यां स्त्री टाप् राजनि० । कर्कशदला दग्धवृक्षे राजनि० ।

कर्कशवाक्य न० कर्म्म० । निष्ठुरवाक्ये परुषवाक्ये शब्दर० ।

कर्कशिका स्त्री कर्कश—संज्ञायां कन् अत इत्त्वम् । वनकोलिवृक्षे रत्नमा० । [शिश्रितवत्सु पु हारा० ।

कर्कसार न० कर्कः कठिनः सारोऽस्य । करम्भे दधिकर्कारु पु० कर्कं हासं श्वेततामृच्छति ऋ—उण् । १कुष्माण्डे । (पाड़कुमड़ा) । अमरः तस्य पक्वे फले श्वेततायुक्तत्वात् तथात्वम् । अस्य स्त्रीत्वमपि "कर्कारुर्ग्राहिणी शीत रक्तपित्तहरा गुरुः । पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्" इति भावप्र० उक्तेः । २एर्वारुकर्कारुकुष्माण्डप्रभृतीनां तैलानि मधुराणि" सुश्रु० तयोर्भेदनिर्देशात् विशेषकुष्माण्ड एव एर्वारुरिति बोध्यम् । "एर्वारुकं सकर्कारु पक्वं स्यात् कफवातकृत् । सक्षारं मधुरं रुच्यं दीपनं नातिपित्तलम् । सक्षारं मधुरञ्चैव शीर्षहन्तं कफापहम् । भेदनं दीपनं हृद्यमानाहाष्ठीलनुल्लघुः वपुः" । इति कर्कारोः "पित्तघ्नं तेषु कुष्माण्डम् बालं मध्यं कफावहम् । पक्वं लघूष्णं क्षारं च दीपनं वस्तिशोधनम्" । इति कुष्माण्डस्य च भेदेन गुणभेदोक्तेस्तयोर्भेदः

कर्कारुक पु० कर्कं हासमृच्छति ऋ—उकञ् दैत० । कालिन्दवृक्षे (खेंडो) हारा० कालिन्दशब्दे गुणादि वक्ष्यते

कर्कि पु० कर्क—इन् । कर्कटराशौ । "कर्किमीनधनुर्भ्याञ्च हरिः कीटघटेन च" ज्यो०त० ।

कर्की कर्क—हासे अच् गौरा० ङीष् । कुष्माण्ड्याम् (कांकुड़)

कर्कोतन पुं न० रत्नविशेषे । "रत्नान्याह गरुड़पुराणे" का० त०

"तेषु रक्षोविषव्यालव्याधिघ्नान्यघहानि च । प्रादुर्भवन्ति रत्नानि तथैव विगुणानि च । वज्रं मुक्तामणयः सपद्मरागाः समरकताः प्रोक्ताः । अपि चेन्द्रनीलमणिवैदूर्य्याः पुष्परागाश्च । कर्कोतनकं सपुलकं रुधिराख्यसमन्वितं तथा स्फटिकम् । विद्रुममणिश्च यत्नादुद्दिष्टं संग्रहे तज्ज्ञैः" इत्युद्दिश्य । "वायुर्नखान् दैत्यपते र्गृहीत्वा चिक्षेप साधाद्य वनेषु हृष्टः । ततः प्रसूतं पवनोपपन्नं कर्कोतनं पूज्यतमं पृथिव्याम्; वर्णेन तद्रुधिरशोभमधुप्रकाशमाताम्रपीतदहनोज्ज्वलितं विभाति । नीलं पुनः शबलितं परुषं विभिन्नं व्याध्यादिदोषहरणेन न तद्विभाति । स्निग्धा विशुद्धाः समरागिणश्च आपीतवर्णा गुरवो विचित्राः । त्रासव्रणव्याधिविवर्जिताश्च कर्कोतनास्ते परमाः पवित्राः । पत्रेण काञ्चनमयेन तु वेष्टयित्वा हस्ते गलेऽथ धृतमेतदतिप्रकाशम् । रोगप्रणाशनकरं कलिनाशनञ्च आयुष्करं कुलकरञ्च सुखप्रदञ्च । एवंविधं बहुगुणं मणिमावहन्ति कर्कोतनं शुभमलं कतरे नरा ये । ते पूजिता बहुधना बहुबान्धवाश्च नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति । एके पिनद्ध-

विकृताकुलनीलभासः प्रम्लानरागकलुषिताः कलुषा विरूक्षाः । तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः कर्केतनस्य सदृशं वपुरुद्वहन्ति । कर्केतनं यदि परीक्षितवर्णरूपं प्रत्यग्रभास्वरदिवाकरसुप्रकाशम् । तस्योत्तमस्य मणिशास्त्रविदः महिम्ना तुल्यन्तु मूल्यमुदितं तुलितस्य कार्य्यम्” ७५अ०

कर्कोट(क) पु० कर्क—ओट । १नागभेदे स च अष्टनागान्तर्गतः । “अनन्तोवासुकिः पद्मो महापद्मोऽपि तक्षकः । कर्कोटः कुलिकः शङ्ख इत्यष्टौ नागनायकाः” त्रिका० । ति०त० पुराणान्तरे गारुड़े च द्वितीयार्द्धे “कुलिकः कर्कटः शङ्ख इति पाठः । अयञ्च नागपञ्चम्यां पूज्यः यथाह तत्रैव । “शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः । वासुकिः शङ्खकश्चैव कालियो मणिभद्रकः । ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ” इति । अयञ्च कद्रूपुत्रभेदः । “शेषः प्रथमतोजातोवासुकिस्तदनन्तरम् । ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ” भा० आ० ३५अ० नागनामकथने । कर्कोटकनागस्य नारदशापेन जडताप्राप्तिकथा नलेन सह संवादश्च भा० व० ६६अ०

“उत्सृज्य दमयन्तीन्तु नलो राजा विशाम्पते ! । ददर्श दावं दह्यन्तं महान्तं गहने वने । तत्र शुश्राव शब्दं वै मध्ये भूतस्य कस्यचित् । अभिधाव नलेत्युच्चैः पुण्यश्लोकेति चासकृत् । मा भैरिति नलश्चोक्त्वा मध्यमग्नेः प्रविश्य तम् । ददर्श नागराजानं शयानं कुण्डलीकृतम् । स नागः प्राञ्जलिर्भूत्वा वेपमानो नलन्तदा । उवाच विद्धि मां नाम्ना नागं कर्कोटकं नृप ! । मया प्रलब्धो महर्षिर्नारदः सुमहातपाः । तेन मन्युपरीतेन शप्तोऽस्मि मनुजाधिप ! । तिष्ठ त्वं स्थावर इव यावदेव नलः क्वचित् । इतो नेता हि तत्र त्वं शापान्मोक्ष्यसि मत्कृतात् । तस्य शापान्न शक्नोमि पदाद्विचलितुं पदम् । उपदेक्ष्यामि ते श्रेयस्त्रातुमर्हति मां भवान् । सखा च ते भविष्यामि मत्समो नास्ति पन्नगः । लघुश्च ते भविष्यामि शीघ्रमादाय गच्छ माम् । एवमुक्त्वा स नागेन्द्रो बभूवाङ्गुष्ठमात्रकः । तं गृहीत्वा नलः प्रायादुद्देशं दावविवर्जितम् । आकाशदेशमासाद्य विमुक्तं कृष्णवर्त्मना । उत्स्रष्टुकामं तं नागः पुनः कर्कोटकोऽब्रवीत् । पदानि गणयन् गच्छ स्वानि नैषध ! कानिचित् । तत्र तेऽहं महाबाहो ! श्रेयो धास्यामि यत् परम् । ततः सङ्ख्यातुमारब्धमदशद्दशमे पदे । तस्य दष्टस्य रूपं तत् क्षिप्रमन्तरधीयत । स दृष्ट्वा विस्मितस्तस्थावात्मानं विकृतं नलः । स्वरूपधारिणं नागं ददर्श स महीपतिः । ततः कर्कोटको नागः सान्त्वयन् नलमब्रवीत् । मया तेऽन्तर्हितं रूपं न त्वां विद्युर्जना इति । यत्कृते चासि निकृतो दुःखेन महता नल ! । विषेण स मदीयेन दुःखं त्वयि निवत्स्यति । विषेण संवृतैर्गात्रैर्यावत्त्वां न विमोक्ष्यति । तावत्त्वयि महाराज ! दुःखं वै स निवत्स्यति । अनागा येन निकृतस्त्वमनर्हो जनाधिप ! । क्रोधादसूययित्वा तं रक्षा मे भवतः कृता । न ते भयं नरव्याघ्र ! दंष्ट्रिभ्यः शत्रुतोऽपि वा । ब्रह्मविद्भ्यश्च भविता मत्प्रसादान्नराधिप ! । राजन्! विषनिमित्ता च न ते पीड़ा भविष्यति । संग्रामेषु च राजेन्द्र ! शश्वज्जयमवाप्स्यसि । गच्छ राजन्नितः सूतो बाहुकोऽहमिति ब्रुवन् । समीपमृतुपर्णस्य स हि वेदाक्षनैपुणः । अयोध्यां नगरीं रम्यामद्य वै निषधेश्वर ! । स तेऽक्षहृदयं दाता राजाश्वहृदयेन वै । इक्ष्वाकुकुलजः श्रीमान् मित्रञ्चैव भविष्यति । भविष्यसि यदाक्षज्ञः श्रेयसा योक्ष्यसे तदा । समेष्यसि च दारैस्त्वं मा स्म शोके मनः कृथाः । राज्येन तनयाभ्याञ्च सत्यमेतद्ब्रवीमि ते । स्वं रूपञ्च यदा द्रष्टुमिच्छेथास्त्वं नराधिप ! । संस्मर्त्तव्यस्तदा तेऽहं वासश्चेदं निवासयेः । अनेन वाससाच्छन्नः स्वं रूपं प्रतिपत्स्यसे । इत्युक्त्वा प्रददौ तस्मै दिव्यं वासोयुगं तदा । एवं नलं समादिश्य वासो दत्त्वा च कौरव ! । नागराजस्ततो राजंस्तत्रैवान्तरधीयत” ।

७२अ० “तस्याक्षहृदयज्ञस्य शरीरान्निःसृतः कलिः । कर्कोटकविषं तीक्ष्णं मुखात् सततमुद्वमन्”। ७८अ० ।“कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्” संज्ञायां कन् २बिल्ववृक्षे पु० राजनि० । ३फललताभेदे (काँकुड) गौरा० ङीष् ‘कर्कोटकीफलं कुष्ठहृल्लासारुचिनाशनम् । श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम् । द्वित्रिभिन्नमरिचैः परिपूर्णगर्भं तैलेन रञ्जितसुसैन्धवपातयोगम् । वाह्लीकयुक्तपयसा विहिताभिषेकं कर्कोटकीफलमिदं रुचिकृत्तदत्यम्”। वैद्यके तद्गुणपाकादि ।४पीतघोषावृक्षे स्त्री राजनि०। स्वार्थे कन् अत इत्त्वम् । कर्कोटिका (काकरोल) वृक्षे (काँकुड) ५कुष्माण्ड्याञ्च स्त्री राजनि० ।

कर्कोटवापी स्त्री कर्कोटनागवासेन कृता वापी । काशीस्थे

ती भेदे। "कर्कोटशाखा ईशाने मरीचेः कुण्डमुत्तमम्" काशीख०।

कर्कादि पु० प्रस्थेपरे अवृद्धपूर्व्वपदस्य आद्युदात्ततापर्य्युदा सविषये पाणिन्युक्ते शब्दगणभेदे स च "कर्की मघी मकरी कर्कन्धू करीर कन्दुक कवल बदरी" कर्कीप्रस्थः।

कर्ष्वरिका स्त्री पूरिकाभेदे (कचुरी) पाकराजेश्वरः। तत्-पाकप्रकारः भावप्र० उक्तो यथा "माषाणां पिष्टिका पूर्य्या लवणार्द्रकहिङ्गुभिः। तया पिष्टिकया पूर्णा समिता कृतपोलिका। ततस्तैलेन पक्वा सा पूरिका कथिता बुधैः। रुच्या स्वाद्वी गुरुस्निग्धा बल्या पित्तास्रदूषिका। चक्षु-स्तेजोहरी चोष्णा पाके वातविनाशिनी। तथैव घृत पक्वापि चक्षुष्या रक्तपित्तहृत्"।

कर्चरी स्त्री कं जलं चुय्यतेऽत्र चुर—पृषो०क गौरा० ङीष्। जलशून्ये शुष्कफलखण्डे (कचरी) पाश्चात्त्यभाषाप्रसिद्धे द्रव्ये "क्षीराम्लकृतसंस्कारा शुष्का स्नेहविपाचिता। अ-रोचकादिरोगाणां कर्चरी कण्ठकर्त्तरी। कर्चरी रुचिकृ-द्बल्या सुस्वादुरतिलेखनी। उष्णा पित्तकरी प्रोक्ता कफकृत् सारिका स्मृता" भावप्र०।

कर्चूर न० कर्ज्ज ऊर+पृषो०। १स्वर्णे। २कर्बूरवर्णे ३तद्वति त्रि० अमरटीका (कचूर)प्रसिद्धे ४गन्धसारे शठ्याम् पु० भावप्र०। तद्गुणादि "कर्चूरो वेधमुख्यश्च द्रा-विडः कल्पकः शठी। कर्चूरो दीपनो रुच्यः कटुक-स्तिक्त एव च। सुगन्धिः कटुपाकः स्यात् कुष्ठार्शोव्रणका-सनुत्। उष्णोलघुर्हरेच्छ्वासं गुल्मवातकफक्रिमीन्" ५हरिताले न० वैज०। "रराज कर्चूरपिशङ्गवाससः" माघः। "कर्चुरः हरितालम्" मल्लि०।

कर्चूरक पु० कर्चूर+स्वार्थे कन् स इव कायति कै-क वा। (काँचा) १हरिद्रायाम् क्षीरस्वा०। तस्याः शठ्याकृतित्वात् तथात्वम्। २कर्चूरशब्दार्थे च। [चकर्ज्ज पनिकर्ज्जति।

कर्ज्ज पीडायाम् भ्वा० पर० सक० सेट्। कर्जति अकर्जीत्।

कर्ण भेदने अदन्तचुरादि० उभ० सक० सेट्। कर्णयति ते अचकर्णत् त। कर्णयाम्—बभूव ..० चकार चक्रे। कर्णयिता कर्णयिष्यति। कर्णनम् कर्णः कर्णितः कर्णयितुम्। कर्णयन् कर्णयमानः। कर्णयित्वा आकर्ण्य कर्णी। कर्णते अकर्णि अकर्णिषाताम् अकर्णयिषाताम् आ+कर्ण—श्रवणे। "आकर्णयन्नुत्सुकहंसनादान्" भट्टिः। "मिथस्तदाकर्णनसज्जकर्णया" देशाकर्ण्य सुश्रुतेन चरक--प्रोक्तेन नानेऽखिलम्। "अदस्तदाऽकर्णि फलाढ्यजीवि-तम्" इति च नैष०। "आकर्ण्य सम्मति कृतं चरणायुधा-नाम्" सा०द०।

कर्ण पु०। कर्ण्यते आकर्ण्यतेऽनेन कर्ण करणे अच् कीर्य्यन्ते शब्दा वायुनाऽत्र कृ—नन् वा। १श्रोत्रे शब्द-ज्ञानसाधने इन्द्रियभेदे तदाधारे २गोलके च। श्रोत्रञ्च कर्णशष्कुल्यवच्छिन्ननभोरूपमिति नैयायिकादयः। सात्त्विकाकाशस्य(?)ांश इति वेदान्तिनः सांख्यादयश्च प्रोचुः। तन्नाद्यमते शब्दोत्पत्तिदेशे श्रोत्रस्य गम-नाभावेन अन्यत्रोत्पन्नशब्दग्रहणासम्भवः। तथा हि आकाशस्यैकत्वेऽपि उपाधिभेदेन भेदात् यदीयकर्ण-शष्कुलीप्रदेशे शब्दसमवायस्तस्यैव श्रावणम् नान्यस्य, ततश्च वीचितरङ्गन्यायेन कदम्बकोरककन्यायेन वा शब्दोत्पत्तावपि शब्दोत्पत्तिदेशस्य श्रोतुश्च विभिन्नदेशस्थतया न शब्दोप-लब्धिः स्यात्। अतस्तद्देशस्थस्य शीघ्रं धावमानस्य वा-योः संयोगविभागादयः श्रोतुः शब्दादभिव्यञ्जकाः। तदेतत् शङ्कापूर्व्वकम् मीमांसाभाष्ये समर्थितम् यथा।

"यदि शब्दं संयोगविभागा एवाभिव्यञ्जन्ति न कुर्व्वन्ति, आकाशविषयत्वाच्छब्दस्य, आकाशस्यैकत्वात्, य एवापरस्य श्रोत्राकाशः, स एव देशान्तरेष्वपीति सुघ्न-स्थैः संयोगविभागैरभिव्यक्तः पाटलिपुत्रेऽप्युपलभ्येत?। यस्य पुनः कुर्व्वन्ति, तस्य वायवीयाः संयोगविभागा वाय्वाश्रितत्वाद्वायुष्वेव करिष्यन्ति। यथा, तन्तवः तन्तु-ष्वेव पटं, तस्य पाटलिपुत्रेष्वनुपलम्भो युक्तः, सुघ्नस्थ-त्वात्तेषाम्। यस्याप्यभिव्यञ्जन्ति, तस्याप्येष न दोषः, दूरे सत्याः कर्णशष्कुल्याः अनुपकारकाः संयोगविभागाः। तेन दूरे यच्छ्रोत्रं तेन नोपलभ्यते" इति। नैतदेवं, अप्राप्ताश्चेत् संयोगविभागाः श्रोत्रस्योपकुर्युः सन्निकृष्टविप्र-कृष्टदेशस्थौ युगपच्छब्दमुपलभेयाताम् न च युगपदुपल-भेते। तस्मात्प्राप्ताः उपकुर्वन्ति, न चेदुपकुर्वन्ति, तस्मादनिमित्तं शब्दोपलम्भने संयोगविभागौ इति"। नैतदेवं, अभिघातेन हि प्रेरिताः वायवस्तिमितानि वाय्-न्तराणि प्रतिबाधमानाः सर्व्वतोदिक्कान् संयोगविभागान् उत्पादयन्ति, यावद्वेगमभिप्रतिष्ठन्ते। ते च (संयो-गविभागाः) वायोरप्रत्यक्षत्वात् नोपलभ्यन्ते। अनु-परतेष्वेव तेषु शब्दः उपलभ्यते, नोपरतेषु। अतो न दोषः। अत एव चानुवातं दूरादुपलभ्यते शब्दः"। वेदान्त्यादिमते शब्दस्य पञ्चभूतगुणतया शब्दाधारं वायुना झटिति कर्णदेशे यथावेगं धावमानेन कर्णप्रापणसम्भव

स्तेन शब्दोपलम्भः। तन्मते श्रवणेन्द्रियस्य प्राप्यकारित्वोक्तिरप्येतत्परेति बोध्यम्।
कर्णस्याविशालदेशस्य दिक् इति करणाधिकरणशब्दे उक्तम्। कर्णप्राधान्याच्च शब्दग्राहकेन्द्रियस्यापि "कर्णे कृतं कनकपत्रमनालयन्त्या" चौर०। "मिथस्तदाकर्ण्य नसज्जकर्णया" नैष०। "तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः" रघुः श्रवणेन्द्रियस्य सूक्ष्मत्वेऽपि तदाधाराभिप्रायेण "श्रवणम्बितकर्णशष्कुलीकलशीकं रचयन्नशोचत" नैष० वाक्यम्। २सुवर्णालीवृक्षे मेदि०। त्रिकोणादिक्षेत्रे ४भुजकोटिसंयोजकरेखाभेदे तद्रेखामानज्ञानोपायश्च लीला० उक्तः यथा "इष्टाद्बाहो यः स्यात्तत्स्पर्द्धिन्यां दिशीतरो बाहुः। त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः। तत्कृत्योर्योगपदं कर्णो, दोःकर्णवर्गयोर्विवरात्। मूलं कोटिः, कोटिश्रुतिकृत्योरन्तरात् पदं बाहुः" इति उदा०दिङ्मात्रमत्रोच्यते भुजः ४ कोटिः ३ अनयोर्वर्गः १६,९. तयोर्योगः २५ तस्य मूलम् ५ तथाच चतुष्कलबाहुके त्रिकलकोटिके क्षेत्रे कर्णमानम् पञ्च हस्ताः। अधिकं क्षेत्रव्यवहारशब्दे वक्ष्यते। अस्य च भुजकोटिभेदनात् कृतिद्वारा तयोर्वर्गव्यापनाच्च कर्णत्वम्। ५कुटिले च "व्याघारयन्त् प्राणभृतः कर्णसहिताः" कात्या० १७,६,०। "कर्णेन वक्रतया सहिताः" सं०प०व्या० "वक्रतया कौटिल्येन" इति कात्या० ५,४,१५ सू०व्या० कर्कः। कुन्त्याः कन्यावस्थायां सूर्य्यात् जाते स्वनामख्याते ६वसुषेणे तदुत्पत्तिकथा यथा "शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत्। तस्य कन्या पृथा नाम रूपेणासदृशी भुवि। पितुः स्वस्रीयपुत्राय सोऽनपत्याय वीर्य्यवान्। अग्रमग्र्यं प्रतिज्ञाय स्वस्यापत्यस्य वै तदा। अग्रजातेति तां कन्यां शूरोऽनुग्रहकाङ्क्षया। अददत् कुन्तिभोजाय स तां दुहितरं तदा। सा नियुक्ता पितुर्गेहे ब्राह्मणातिथिपूजने। उग्रं पर्य्यचरद्घोरं ब्राह्मणं संशितव्रतम्। निगूढ़निश्चयं धर्म्मे यं तं दुर्वाससं विदुः। तमुग्रं शंसितात्मानं सर्वयत्नैरतोषयत्। तुष्टोऽभिचारसंयुक्तमाचचक्षे यथाविधि। उवाच चैनां भगवान् प्रीतोऽस्मि सुभगे! तव। यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि। तस्य तस्य प्रसादात्त्वं देवि! पुत्रान् जनिष्यसि। एवमुक्ता च सा बाला तदा कौतूहलान्विता। कन्या सती देवमर्कमाजुहाव यशस्विनी। प्रकाशकर्त्ता भगवांस्तस्यां गर्भं दधौ तदा। अजीजनत् सुतं तस्यां सर्वशस्त्रभृतां वरम्। सकुण्डलं सकवचं देवगर्भं श्रियान्वितम्। दिवाकरसमं दीप्त्या चारुसर्वाङ्गभूषितम्। निगूहमाना जातं वै बन्धुपक्षभयात् तदा। उत्ससर्ज जले कुन्ती तं कुमारं यशस्विनम्। तमुत्सृष्टं जले गर्भं राधाभर्त्ता महायशाः। राधायाः कल्पयामास पुत्रं सोऽधिरथिस्तदा। चक्रतुर्नामधेयञ्च तस्य बालस्य तावुभौ। दम्पती वसुषेणेति दिक्षु सर्वासु विश्रुतम्। स वर्द्धमानो बलवान् सर्वास्त्रेषूद्यतोऽभवत्। वेदाङ्गानि च सर्वाणि सम्भाप जयतां वरः। यस्मिन् काले जपन्नास्ते धीमान् सत्यपराक्रमः। नादेयं ब्राह्मणेष्वासीत्तस्मिन् काले महात्मनः। तमिन्द्रो ब्राह्मणोभूत्वा पुत्रार्थे भूतभावनः। ययाचे कुण्डले वीरं कवचञ्च सहाङ्गजम्। उत्कृत्य कर्णोह्यददत् कवचं कुण्डले तथा। शक्तिं शक्रो ददौ तस्मै विस्मितश्चेदमब्रवीत्। देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम्। यस्मिन् क्षेप्स्यसि दुर्द्धर्ष! स एको न भविष्यति। पुरा नाम च तस्यासीद्वसुषेण इति क्षितौ। ततो वैकर्त्तनः कर्णः कर्मणा तेन सोऽभवत्। आमुक्तकवचो वीरो यस्तु जज्ञे महायशाः। स कर्ण इति विख्यातः पृथायाः प्रथमः सुतः। स तु सूतकुले वीरो वृद्धे राजसत्तम। कर्णं नरवरश्रेष्ठं सर्वशस्त्रभृतां वरम्। दुर्य्योधनस्य सचिवं मित्रं शत्रुविनाशनम्। दिवाकरस्य तं विद्धि राजन्नंशमनुत्तमम्"। तस्याङ्गदेशाधिपतिप्राप्तिः अङ्गाधिपशब्दे उक्ता। कर्णोऽस्यस्य प्राशस्त्येन अर्श०अच्। ७लम्बकर्णे त्रि०। "खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभः" यजु० २४,४०। "कर्णो लम्बकर्णः" वेददी०। ८अरित्रे च पु० कर्णः "स्रोतमरित्रस्त्विति" दुर्गः। कर्णधारः। "हृतकर्णेव नौर्जले" रामा०।

कर्णक पु० कर्णयति विभिद्य आयते कर्ण—ण्वुल्। हस्त्यादीनां १पत्रशाखादौ तेषां दारुस्फोटनेन जायमानत्वेन तथात्वम्। "अथौदुम्बरीमादधाति ऊर्ग्वै रस उदुम्बर ऊर्ज्जैवैनमेतद्रसेन प्रीणाति कर्णकवती भवति पशवो वै कर्णकाः" "यदि कर्णकवतीं न विन्देत् दधिद्रप्समुपहत्यादध्यात्" शत०ब्रा०। ९,२, ३,४०। "कर्णकशब्देनात्र पत्रशाखादिकं विवक्ष्यते" भा०। पशूनाञ्च कर्णकशब्दवाच्यत्वञ्च पत्रशाखादिना पुष्टिमत्त्वात् इत्यपि तत्रैवोक्तम् पलाशाद्य कर्णाकारत्वादपि कर्णकत्वमित्यपि बोध्यम् हस्तानां दारुस्फोटे २रोगे च। "प्रत्यवसृप्ता सकर्णका" कात्या० १८,४,६। "कर्णको दारुस्फोटो रोगस्तद्वती चौदुम्बरी" सं०प०। "कर्णकाभावे दधिद्रप्सकाः" कात्या० १८,४,७। ततः तारादि० इतच्। कर्णकित जातपत्रादौ त्रि०।

कर्णकण्डू स्त्री ७त०। कर्णगतरोगभेदे कर्णगतरोगशब्दे विवृतिः।

कर्णकीटी स्त्री कर्णं यति भिनत्ति अच् स्वल्पः कीटः अल्पार्थे ङीप् कर्णे कर्म०। शतपद्याम् (काणकार्) । हेमच० । [स्तनिकर्णकोऽप्यत्र ।

कर्णकृमि पु० कर्णगतरोगशब्दे सुश्रुतोक्ते कर्णरोगभेदे

कर्णक्ष्वेड पु० ७त० सुश्रुतोक्ते कर्णगतरोगभेदे कर्णगतरोगशब्दे विवृतिः ।

कर्णगतरोग पु० कर्णे गतोरोगः । सुश्रुतोक्ते कर्णगते रोगभेदे तद्भेदनिदानादि तत्रैवोक्तं यथा ।

"अथातः कर्णगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः । १कर्णशूलं २प्रणादश्च ३बाधिर्य्यं ४क्ष्वेड एव च । कर्णस्रावः ५कर्णकण्डूः ६कर्णगूथ ७स्तथैव च । कृमि८कर्णप्रतीनाहौ विद्रधि १०र्द्विविध ११स्तथा । कर्णपाकः १२पूतिकर्ण १३स्तथैवार्शश्चतुर्व्विधम् १४,१५,१६,१७ । तथार्बुदं सप्तविधं १८,२४, शोथश्चापि चतुर्विधः २५,२८ । एते कर्णगतारोगा अष्टाविंशतिरीरिताः । समीरणः श्रोत्रगतोऽन्यथाचरः समन्ततः शूलमतीव कर्णयोः । करोति दोषैश्च यथास्वमावृतः स कर्णशूलः १कथितो दुराचरः । यदा तु नाडीषु विमार्गमागतः स एव शब्दाभिवहासु तिष्ठति । शृणोति शब्दान् विविधांस्तदा नरः प्रणाद २मेनं कथयन्ति चामयम् । स एव शब्दाभिवहा यदा सिराः कफानुयातो व्यनुसृत्य तिष्ठति । तदा नरस्याप्रतिकारसेविनो भवेत्तु बाधिर्य्य३मसंशयं खलु । श्रमात्क्षयाद्रूक्षकषायभोजनात् समीरणः शब्दपथे व्यवस्थितः । विरिक्तशीर्षस्य च शीतसेविनः करोति हि क्ष्वेड४मतीव कर्णयोः । शिरोऽभिघातादथवा निमज्जतो जले प्रपाकादथवापि विद्रधेः । स्रवेत्तु पूयं श्रवणोऽनिलावृतः स कर्णसंस्राव५ इति प्रकीर्त्तितः । कफेन कण्डूः प्रचितेऽथ कर्णयो र्भृशं भवेत् स्रोतसि कर्णसंज्ञिते । विशोषिते श्लेष्मणि पित्ततेजसा नृणां भवेत् स्रोतसि कर्णगूथकः६। स कर्णगूथो द्रवतां यदा गतो विलायितो घ्राणमुखं प्रपद्यते । तदा स कर्णप्रतिनाहसंज्ञितो ७भवेद्विकारः शिरसोऽर्द्धतापनः । यदा तु मूर्च्छन्त्यथ वापि जन्तवः सृजन्त्यपत्यान्यथवापि मक्षिकाः । तदञ्जनत्वाच्छ्रवणो निरुच्यते भिषग्भिराद्यैः कृमिकर्णकस्तु ८ सः । क्षताभिघातप्रभवस्तु विद्रधि१०र्भवेत्तथा दोषकृतोऽथवा पुनः । स रक्तपीतारुणमस्रमास्रवेत्प्रतोदधूमायनदाहचोषवान् । भवेत्प्रपाकः ११खलु पित्तकोपतो विकोथविक्लेदकरश्च कर्णयोः । स्थिते कफे स्रोतसि पित्ततेजसा विलाय्यमाने भृशसम्प्रतापनात् । अवेदनो वाप्यथवा सवेदनो घनं स्रवेत्पूति सपूतिकर्णकः १२ । प्रदिष्टलिङ्गान्यर्शांसि १४,१५,१६,१७ तत्त्वतस्तथैव शोथा१८–२४र्बुद२५–२८लिङ्ग, मीरितम् । मया पुरस्तात्प्रसमीक्ष्य योजयेदिहैव तानि प्रयतो भिषग्वरः" । [२रोगभेदे च ।

कर्णगूथ न० ६त० । १कर्णमले कर्णगतरोगशब्दे सुश्रुतोक्ते

कर्णगोचर पु० कर्णस्य कर्णव्यापारजन्यबोधस्य गोचरः विषयः । श्रवणयोग्ये विषये ।

कर्णग्राह पु० कर्णमरित्रं गृह्णाति ग्रह–अण् उप०स० । कर्णधारे नाविके । तस्यापत्यं रेवत्या० ठक् । कार्णग्राहिक तदपत्ये पुंस्त्री० ।

कर्णच्छिद्र न०६त० । कर्णरन्ध्रे "कर्णच्छिद्रे वर्त्तमानं कीटं क्लेदमलादि वा । हरेच्चापहरेद्धीमानथवापि शलाकया" सुश्रु० ।

कर्ण(र्णे)जप त्रि० कर्णे जपति वा सप्तम्या अलुक् । खले सूचके । "कर्णेजपैराहितराजकोभा" भट्टिः । अण् कर्णजापोऽप्यत्र ।

कर्णजलूका स्त्री कर्णे जलूकेव । शतपद्याम् (काणकार्) कर्णजलौकस् इत्यप्यत्र शब्दरत्ना० । कर्णजलौकाऽप्यत्र अमरः । कर्णजलौकस् इत्यपि तत्रार्थे भरतः ।

कर्णजाह न० कर्णस्य मूलम् कर्ण+जाहच् । कर्णमूले "कर्णजाहविलोचनेति" भट्टिः ।

कर्णजित् पु० कर्णं जितवान् जि–भूते क्विप् । अर्ज्जुने तस्य तज्जयकथा भा०क० ९१ अ० । तयोर्युद्धमुक्ता "ततोऽर्ज्जुनस्तस्य शिरोजहार, वृत्रस्य वज्रेण यथा महेन्द्रः । शरोत्तमेनाञ्जलिकेन राजन् । तदा महास्त्रप्रतिमन्त्रितेन" । कर्णहाम्वदयोऽप्यत्र ।

कर्णताल(ड) पु०६त० तस्य स वा । कर्णताडने । "अन्त्यत स्फुटमतकर्णताडया" माघः । [(डका) त्रिका० ।

कर्णदर्पण पु० कर्णे दर्पण इव । कर्णभूषणभेदे (कानत-

कर्णदुन्दुभि पु० कर्णे दुन्दुभिरिव तत्तुल्यध्वनिहेतुत्वात् । शतपद्याम् । (काणकार) शब्दमा० तस्याः कर्णप्रवेशे हि दुन्दुभिवद्ध्वानजननात्तस्यास्तथात्वम् ।

कर्णधार पु० कर्णमरित्रं धारयति धृ–अण् उप०स० । १नाविके (माझी) अमरः । "अकर्णधारा जलधौ विप्लवेतेह नौरिव" हितो० । "शाङ्गिलाशु वकर्णधारेति" सा०द० । २दुःखादिनिवारके त्रि० । "अकर्णधारा

पृथिवी शून्येव प्रतिभाति मे। गते दशरथे स्वर्गं रामे च रण्यमाश्रिते” रामा०।

कर्णनाद पु० कर्णे अङ्गुल्यापिहितकर्णे नादः ध्वनिभेदः। अङ्गुल्यापिहितकर्णे (भों भों) इत्याकारे मध्यमाशब्दस्वरूपे ध्वनिभेदे। “मध्यमा श्रुतिगोचरा” इत्युक्तेस्तस्यास्तथात्वम्।

कर्णपत्रक पु० पत्रमिव कायति कै–क कर्णे पत्रक इव। कर्णपाल्याम्। “कनीनिके चाक्षिकूटे शष्कुली कर्णपत्रकौ। कर्णौ शङ्खौ भ्रुवौ दन्तावेष्टावोष्ठौ ककुन्दरे” याज्ञ०। “कर्णपत्रकौ कर्णपाल्यौ” मिता०।

कर्णपथ पु० कर्ण एव पन्थाः अच् समा०। कर्णरन्ध्ररूपे शब्दप्रवेशनयोग्ये मार्गे।

कर्णपरम्परा स्त्री ६त०। श्रवणपरम्परायाम्। (काणाकाणि) “तेनैव च क्रमेणैष गतः कर्णपरम्पराम्। प्रवादो बहुलीभावं सर्व्वत्रापि पुरे ययौ” कथासरित्सा०। एकस्य सकाशादन्येन श्रुत्वाऽन्यस्य कथने तेनापि पुनरन्यस्य कथने एवं परम्परया श्रवणे अस्य वृत्तिः।

कर्णपराक्रम पु० श्रपभ्रंशयोग्यबहुच्छन्दोयुक्ते काव्यभेदे।

कर्णपर्वन् न० भारतान्तर्गते अष्टमे पर्व्वणि। तत्पर्व्वणि कथासंग्रहश्च भा०आ०१अ० यथा

“अतः परं कर्णपर्व प्रोच्यते परमाद्भुतम्। सारथ्ये विनियोगश्च मद्रराजस्य धीमतः। आख्यानं यत्र पौराणं त्रिपुरस्य निपातनम्। प्रयाणे परुषश्चात्र संवादः कर्णशल्ययोः। हंसकाकीयमाख्यानं तत्रैवाक्षेपसंहितम्। बधः पाण्ड्यस्य च तथा अश्वत्थाम्ना महात्मना। दण्डसेनस्य च ततो दण्डस्य च बधस्तथा। द्वैरथे यत्र कर्णेन धर्मराजो युधिष्ठिरः। संशयं गमितो युद्धे मिषतां सर्वधन्विनाम्। अन्योन्यं प्रति च क्रोधो युधिष्ठिरकिरीटिनोः। तत्रैवानुनयः प्रोक्तो माधवेनार्ज्जुनस्य हि। प्रतिज्ञापूर्वकञ्चापि वक्षोदुःशासनस्य च। भित्त्वा वृकोदरो रक्तं पीतवानत्र संयुगे। द्वैरथे यत्र पार्थेन हतः कर्णो महारथः। अष्टमं पर्व निर्दिष्टमेतद्भारतचिन्तकैः। एकोनसप्ततिः प्रोक्ता अध्यायाः कर्णपर्वणि। चत्वार्य्येव सहस्राणि नवश्लोकशतानि च। चतुःषष्टिस्तथा श्लोकाः पर्वण्यस्मिन् प्रकीर्त्तिताः”। “कर्णपर्वण्यपि तथा भोजनं सार्व्वकामिकम्। विप्रेभ्यः संस्कृतं सम्यग्दद्यात् संयतमानसः” भा०स्वर्गा० ६अ०।

कर्णपाक पु० सुश्रुतोक्ते कर्णरोगभेदे कर्णगतरोगशब्दे विवृतिः

कर्णपालि(ली) स्त्री ६त०। १कर्णपालके कर्णांशभेदे। (काणेर पाता) तदंशयश्च मांसपेशीभेदः यथाह भावप्र० मांसपेशीसंख्याविभागे “यथार्द्रभूम्यां युक्तो वायुः स्रोतांसि दारयेत्। अनुप्रविश्य पिशितं पेशीर्विभजते तथा। मांसपेश्यः समाख्यातास्तृणां पञ्च शतानि च” इत्युपक्रम्य “गण्डयोश्चतस्तः कर्णयोर्द्वे” इत्युक्तम्। “कर्णशोथो भवेत् पाल्याम्” “कुर्व्वन्ति पीडिकां पाल्याम्” “लिह्यात् स शष्कुलीन् पालेः”। कर्णरोगे भावप्र० “लिह्यात् निर्मांसीकुर्य्यात्” भावप्र०। कर्णं पालयति पाल+अण् उप०स० गौरा० ङीष्। (काणवाला) २कर्णालङ्कारभेदे हारा०

कर्णपाल्यामय पु० ७त०। कर्णव्यधदोषजे सुश्रुतोक्ते कर्णपालिरोगभेदे स च सुश्रुते सोपद्रवो दर्शितः यथा “कर्णपाल्यामयान्नॄणां पुनर्व्वक्ष्यामि सुश्रुत!। कर्णपाल्यां प्रकुपिता वातपित्तकफास्त्रयः। द्विधा वाप्यथ संसृष्टाः कुर्व्वन्ति विविधा रुजः। विस्फोटः स्तब्धता शोफः पाल्यां दोषे तु वातिके। दाहविस्फोटजननं शोथः पाकश्च पैत्तिके। कण्डूः सश्वयथुः स्तम्भो गुरुत्वञ्च कफात्मके। यथादोषञ्च संशोध्य कुर्यात्तेषां चिकित्सितम्। स्वेदाभ्यङ्गपरीषेकैः प्रलेपासृग्विमोक्षणैः। मृद्वीं क्रियां बृंहणीयैर्यथास्वं भोजनैस्तथा। य एवं वेत्ति दोषाणां चिकित्सां कर्त्तुमर्हति। अत ऊर्द्धं नामलिङ्गैर्व्वक्ष्ये पाल्यामुपद्रवान्। उत्पाटकश्चोत्पुटकः श्यावः कण्डूयुतो भृशम्। अवमन्थः सकण्डूको ग्रन्थिको जम्बुलस्तथा। स्रावी च दाहवांश्चैव स्त्वेषां क्रमशः क्रियाम्”।

कर्णपिशाची स्त्री देवीभेदे। तन्मन्त्रसारे मूलं दृश्यम्।

कर्णपुर न० ६त० अच् समा०। चम्पानगर्य्याम् हेमच०।

कर्णपुष्प पु० कर्ण इव पुष्पं यस्य। मोरटालतायाम् राजनि०।

कर्णपूर पु० कर्णं पूरयति पूर-अण्। १कर्णाभरणे, २नीलोत्पले, ३शिरीषवृक्षे मेदिनिः। ४अशोकवृक्षे राजनि०। एतेषां पुष्पैः स्त्रीकर्णस्य भूषा भवतीति तेषां तथात्वम्। “वक्षाश्चौरश्चिकुरनिकुरः कर्णपूरो मयूरः” प्रसन्नरा०। “मञ्जानवोऽलाङ्कुरकर्णपूरः” “विलम्बिनीलोत्पलकर्णपूरा” रघुः।

कर्णपूरक पु० कर्णं पूरयति पूर–ण्वुल्। १कदम्बवृक्षे राजनि०। स्वार्थे कन्। २कर्णाभरणे ३नीलोत्पले, ४शिरीषवृक्षे ५अशोकवृक्षे च राजनि०। एतेषां पुष्पैः स्त्रीकर्णस्य भूषा भवतीति तेषां तथात्वम्।

कर्णपूरण न० ६त०। सुश्रुतोक्तैः तैलादिना कर्णस्य पूरणे

"स्नेहसारोऽयं पुरुषः प्राणाश्च स्नेहभूयिष्ठाः स्नेहसाध्याश्च भवन्ति स्नेहो हि पानानुवासनमस्तिष्कशिरोवस्त्युत्तरवस्तिनस्यकर्णपूरणगात्राभ्यङ्गभोजनेषूपयोज्यः" सुश्रु० ।

कर्णप्रणाद पु० कर्णगतरोगशब्दे सुश्रुतोक्ते कर्णरोगभेदे ।

कर्णप्रतिनाह कर्णरोगभेदे कर्णगतरोगशब्दे विवृतिः

कर्णप्राय पु० देशभेदे स च बृ० सं० नैरृत्यामुक्तः । "नैरृत्यां दिशि देशाः" इत्युपक्रम्य "कर्णप्रायपारशवशूद्राः" १४,१८ , [राजनि० ।

कर्णफल कर्णः फलमिवास्य । मत्स्यभेदे (कानचिमाछ)

कर्णभूषण न० कर्णं भूषयति भूष–ल्यु । कर्णाभरणे अमरः ।

कर्णमल न० ६ त० । कर्णस्थे मलाकारे पदार्थे (काणेर खल) हारा० । कर्णमलोत्पत्तिप्रकारः भावप्र० उक्तो यथा ।
"ततो मांसाग्निना पुनः पच्यमानः पञ्चाहोरात्रात् सार्द्धदण्डांश्च यावन्मांसेष्वेव तिष्ठति ततः पच्यमानात्तस्मान् मलं निर्गच्छति तद्व्यानवायुना क्षिप्तं कर्णावागत्य कर्णविड् भवति" । कर्णविण्मूर्द्धयोऽप्यत्र । [हेम० ।

कर्णमो(टि)टी स्त्री कर्णं मोटयति इन् वा ङीप् । दुर्गाभेदे

कर्णयोनि त्रि० कर्णः योनिः स्थानमस्य । कर्णग्राह्ये विषये ।
"अश्वत्थो यस्य कर्णयोनयः" ऋ० २,२४,८ । "कर्णयोनयः श्रोत्रेन्द्रियग्राह्याः" भा० ।

कर्णल त्रि० कर्णः कर्णशक्तिरस्त्यस्य सिध्मा० लच् । प्रशस्तश्रवणशक्तियुक्ते ।

कर्णलता स्त्री कर्णस्य लतेव । कर्णपाल्याम् (काणेरपाता) स्वार्थे कन् अत इत्वम् । कर्णलतिकापि तदर्थे हेम० ।

कर्णवंश पु० कर्णः कर्णाकारो वंशोऽत्र । मञ्चे हारा० । तस्य पादेषु वंशाकारत्वात्तथात्वम् ।

कर्णवर्जित त्रि० ३ त० । १बधिरे (काला) श्रोत्रशून्ये । २सर्पे पु० स्त्री शब्दच० । स्त्रियां जातौ ङीष् । तस्य चक्षुःश्रवस्त्वात्तथात्वम् । बाधिर्यञ्च श्रवणशक्तिशून्यत्वम् ।

कर्णविष् स्त्री कर्णस्य विट् । कर्णमले (काणेरखल) "वसा शुक्रमसृङ्मज्जामूत्रविड्घ्राणकर्णविट् । श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः" मनुः । "शोधयेत् कर्णविट्कान्तु भिषक् सम्यक् शलाकया" सुश्रु० ।

कर्णवेध पु० विध–घञ् ६त० । शास्त्रोक्तविधानेन कर्णयोर्वेधने । तत्प्रकारकालमुहूर्त्तादिकं मुहूर्त्तचिन्तामणिपीयूषधारयोरुक्तं यथा ।

"हित्वा तांश्चैत्रपौषावमहरिशयनं जन्ममासञ्च रिक्तां युग्माब्दं जन्मताराम् ऋतुमुनिवसुभिः संमिते मास्यथो वा । जन्माहात् सूर्यभूपैः परिमितदिवसे ज्ञेज्यशुक्रेन्दुवारेऽथौजाब्दे विष्णुयुग्मादितिमृदुलघुभैः कर्णवेधः प्रशस्तः । संशुद्धे मृतिभवने त्रिकोणकेन्द्रत्र्यायस्थैः शुभखचरैः कवीज्यलग्ने । पापाख्यैररिसहजायगेहसंस्थैर्लग्नस्थे त्रिदशगुरौ शुभावहः स्यात्" चिन्ता० ।

"आरभ्य जन्मदिवसं यावत्त्रिंशद्दिनं भवेत् । जन्ममासः स विज्ञेयो गर्हितः सर्वकर्मसु" इति व्यासवचनोक्तम् जन्ममासम् । रिक्तान्तिथिम् ४,९,१४ । युग्माब्दं समवर्षं द्वितीयचतुर्थादिकम् । जन्मतारां प्रथमदशमैकोनविंशतिकात्मिकां हित्वा । उक्तञ्च व्यवहारोच्चये । "न जन्ममासे न च चैत्रपौषे न जन्मताराशु हरौ प्रसुप्ते । तिथौ च रिक्ते न च विष्टिदुष्टे कर्णस्य वेधो न समानवर्षे" इति । अत्र चैत्रस्य निषेधो मीनार्कविषयः पौषनिषेधोऽपि धनुरर्कविषयः अन्यथा "कार्त्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा । कर्णवेधं प्रशंसन्ति शुक्ले पक्षे शुभेऽहनीति" व्यासवचनमसङ्गतं स्यात् । अत्र कार्त्तिकशुक्लपक्षैकादशीतः परः कार्त्तिकः प्रशस्तः पूर्वत्र देवशयनसत्त्वान्निषेधः । अत्र जन्ममासे वचनान्तराण्यप्याह प्रयोगपारिजाते व्यासः । "यो जन्ममासे क्षुरकर्मयात्रां कर्णस्य वेधं कुरुते विमोहात् । मूढः स रोगी धनपुत्रनाशं प्राप्नोति गूढं निधनं तदाश्विति" । विहितकालमाह ऋत्विति ऋतवः षट् मुनयः सप्त वसवोऽष्टौ एतैः संमिते गणिते मासि षष्ठमासे सप्तममासेऽष्टममासे वा । अथो वा जन्माहात् सूर्यैर्भूपैर्द्वादशभिः षोड़शभिर्वा परिमिते गणिते दिवसे सौरसावने कर्णवेधः प्रशस्त उक्तः यदाह जगन्मोहने वशिष्ठः "मासे षष्ठे सप्तमे वाष्टमे वा वेध्यौ कर्णौ द्वादशे षोड़शेऽह्नि । मध्ये चाह्नः पूर्वभागे न रात्राविति" यदा तु षष्ठमासादौ कर्णवेधश्चिकीर्षितः तदा तिथीनाह जगन्मोहने वशिष्ठः "द्वितीया दशमी षष्ठी सप्तमी च त्रयोदशी । द्वादशी पञ्चमी शस्ता तृतीया कर्णवेधने" इति । ज्ञेज्य शुक्रेन्दुवारे इति बुधबृहस्पतिशुक्रचन्द्रवारेषु प्रशस्तः कर्णवेधः यदाह जगन्मोहने वशिष्ठः "भूमिजार्कात्मजार्काणां वारान् संवर्जयेत् सुधीः । जीवेन्दुजेन्दुशुक्राणां दिवसाः परिपूजिताः" इति । अथेति अथौजाब्दे विषमवर्षे वा कर्णवेधः प्रशस्तः । सूर्यबले सतीत्यपि ध्येयं यदाह राजमार्त्तण्डः "अर्केऽनुकूले शशिनि प्रशस्ते ताराबले चन्द्रविवृद्धिपक्षे । अयुग्मवर्षे शुभदं शिशूनां कर्णस्य वेधं मुनयो वदन्ति" अत्र कर्णस्येत्येकवचनं पशुैकत्वाधिकरणन्यायेनाविवक्षितं तेन द्वयोरपि कर्णयोर्वेधः । विष्ण्विति श्रवणा धनिष्ठा-

पुनर्वसुचित्राहस्ताधनिष्ठारेवत्यश्विनीपुष्यहस्तनक्षत्रैरुपलक्षिते काले कर्णवेधः प्रशस्तः । उक्तं हि श्रीपतिना "पौष्णवैष्णवकराश्विनचित्रापुष्यशाक्रपुनर्वसुभैर्वा । सेन्दवैः श्रवणवेधविधानं निर्दिशन्ति मुनयो हि शिशूनाम्" । नारदेनापि "चित्रादित्याश्विविष्णन्त्यरविमित्रवसूडुषु । समेगेऽब्देषु बालानां कर्णवेधक्रियां हितेति" गर्गेणोत्तरात्रयमप्युक्तम् । "पुष्ये धनिष्ठास्वदितौ हरीन्द्वत्वाष्ट्रे करेऽन्त्ये तिसृषूत्तरासु । दस्रे समेतेऽप्यथ कर्णवेधो नेष्टाश्च सर्वेऽष्टमराशिसंस्थाः" इति । अत्रैच्छिकोऽविकल्पः । अत्र जन्मनक्षत्रनिषेधः सर्वथादिषिद्धः । तदुक्तं दीपिकायाम् "जन्मनक्षत्रगश्चन्द्रः प्रशस्तः सर्वकर्मसु । क्षौरभेषजशस्त्राध्वकर्त्तनेषु विवर्जयेत्" कृती छेदने इति धात्वर्थानुसारात् कर्त्तनशब्देन कर्णवेधो विवक्षितः । तथा च स्मर्य्यते । "जन्मनि मासि विवाहः शुभदो जन्मर्क्षजन्मराश्योश्च । अशुभं वदन्ति गर्गाः श्रुतिवेधक्षौरयात्रास्विति" । "सूतिभवनेऽष्टमस्थाने संशुद्धे सर्वपहवर्जिते सति । यदाह जगन्मोहने वशिष्ठः "न कश्चिदिष्टोऽष्टमराशिसंस्थस्तिथिद्वयस्त्रावमसंज्ञकं चेति" अत्र विहितलग्नानि प्रयोगपारिजाते नारदेनोक्तानि । "वृषभे मिथुने मीने कुलीरे कन्यकासु च । तुलाचापे च कुर्वीत कर्णवेधं शुभावहम् । मेषश्च मकरश्चैव मध्यमा गुरुणोदितौ । सिंहवृश्चिककुम्भाश्च अधमत्वाद्विवर्जिताः" इति । अतएवोक्तं वराहसंहितायाम् "लाभे तृतीये च शुभैः समेते क्रूरैर्विहीने शुभराशिलग्ने । वेध्यौ तु कर्णौ त्रिदशेज्यलग्ने" इति शुभाश्चन्द्रबुधगुरुशुक्राः तेषां राशयः कर्कमिथुनकन्यावृषतुलाधनुर्मीनास्तेषामन्यतमे लग्ने क्रूरैर्विहीने सतीत्यर्थः । पन्थकदीपिकाकारमतमाश्रित्याह कश्चित् । कर्णेज्ययोर्लग्ने वृषतुलाधनुर्मीनानामन्यतमे लग्ने सति त्रिकोणे ५,९, केन्द्रे १,४,७,१० त्र्याय ३,११, स्थितैः शुभग्रहैस्तथा पापाख्यैर्ग्रहैररिसहजायगेहसंस्थैः षष्ठतृतीयैकादशस्थानस्थितैरुपलक्षिते तथा लग्नस्थे त्रिदशगुरौ सति कर्णवेधः शुभावहः शुभकारकः स्यात् उक्तञ्च दीपिकायाम् "सौम्यैस्त्र्यायत्रिकोणकण्टकगतैः पापैस्त्रिलाभारिगैरोजाब्दे श्रुतिवेध ईज्यसितयोर्लग्नेऽनुकूले शुभे" इति गुरु "कर्णवेधादिकार्येषु नेष्टाः सर्वेऽष्टमस्थिताः । कर्णवेधो विनिर्दिष्टो लग्नस्थे च बृहस्पतौ । तदभावेऽन्यकेन्द्रस्थे तदभावे त्रिकोणगे" इति अत्र कर्णवेधप्रकारो रत्नमालायाम् "शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः । सौचिको वेधयेत् कर्णौ सूच्या द्विगुणसूत्रया" कर्णरन्ध्रे विशेषमाह देवलः "कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः । तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः" शालङ्कायनः "अविद्धकर्णैर्यद्भुक्तं लम्बकर्णैस्तथैव च । दग्धकर्णैश्च यद्भुक्तं तद्वै रक्षांसि गच्छतीति" । कर्णवेधप्रकारः कर्णव्यधविधिशब्दे वक्ष्यमाणसुश्रुतोक्तोऽवनुसन्धेयः ।

विधा० पा० । श्रीधरः "हरिहरकरचित्रासौम्यपौष्णोत्तराद्यादितिवसुषु घटालीसिंहवर्ज्ये सुलग्ने । शशिबुधगुरुकाव्यानां दिने पर्वरिक्तारहिततिथिषु शुद्धे नैधने कर्णवेधः । सुनक्षत्रे शुभे चन्द्रे सुस्थे शीर्षोदये शुभे । दिनच्छिद्रव्यतीपातविष्टिवैधृतिवर्जिते । शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः । सौचिको वेधयेत् कर्णौ सूच्या द्विगुणसूत्रया । शातकुम्भमयी सूचिर्वेधने तु शुभप्रदा । राजती वायसी वापि यथा विभवतः शुभा । सुभूमौ प्राङ्गणे रम्ये शुचौ देशेऽम्बरे रवेः । सन्निधौ वेधयेत् कर्णौ स्त्रीपुंसोर्वामदक्षिणौ । क्रमेण पूर्वं वेध्यौ द्वौ शिशोरायुष्यवर्द्धनौ" । अन्यत्रेऽप्युक्तम् "शुक्लसूत्रसमायुक्तताम्रसूच्याथ वेधयेत् । वेधात् तृतीये नक्षत्रे चालयेदुष्णवारिणा । रोपणार्थं सुशुध्यर्थं बालसंपत्तिमाप्नुयात् । एवं छिन्ने च भिन्ने च हित्वा योज्यानि योजयेत्" विष्णुधर्मोत्तरे पुष्करः "शिशोरेवाथ कर्तव्यं कर्णवेधं यथा शृणु । पूर्वाह्णे पूजनं कृत्वा केशवस्य हरस्य च । ब्रह्मणश्चन्द्रसूर्याभ्यां दिगीशानान्तथैव च । नासत्ययोः सरस्वत्या ब्राह्मणानां गवां तथा । गुरूणां, मण्डलं कृत्वा तत्र दत्त्वा वरासनम् । तत्रोपवेशयेत्तत्र धात्रीं शुक्लाम्बरां तथा । अलङ्कृतं तदुत्सङ्गे बालं कृत्वा तु सान्त्वनैः । धृतस्य निश्चलः सम्यक् कर्णयुग्मं रसाङ्कितम् । विध्येदलङ्कृते छिद्रे सकृदेवात्र लाघवात् । प्राग्दक्षिणे कुमारस्य भिषग्वामे तु योषितः । शिशोर्विवधं न कार्य्यं यावदाभरणक्षमम् । कर्णवेधदिने विप्राः सांवत्सरचिकित्सकौ । पूज्याश्च विविधा नार्य्यः सुहृदश्च तथा द्विजैः" । अत्र पुरुषकर्णरन्ध्रवृद्धिविषये विशेषमाह हेमाद्रौ देवलः "कर्णरन्ध्रे रवेश्छाया न विशेदग्रजन्मनः । तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुरातनाः" । तत्प्रमाणं प्रसङ्गान्तरेणाह शङ्खः । "अङ्गुष्ठमानशुषिरौ कर्णौ न भवतो यदि । तस्मै श्राद्धं न दातव्यं यदि चेद् सुर भवेत् तस्य श्राद्धेऽपात्रतामाह शालङ्कायनः । "अविद्धकर्णैर्यद्भुक्तं लम्बकर्णैस्तथा च यत् । दग्धकर्णैश्च यद्भुक्तं तद्वै रक्षांसि गच्छति" । विधा० पा० । तथा च कर्णवेधः

संस्कारः किन्तु श्राद्धादौ पात्रतासम्पादकोऽदृष्टविशेषजनकः क्रियाभेदः इत्याकरे स्थितम्। शलाकामानं कर्णवेधनीशब्दे वक्ष्यते। अत्र कालादिर्प्रतिप्रसवः ज्यो॰त॰ मार्त्तण्डव्यवहारराजमार्त्तण्डकृत्यचिन्तामणिषु "यदापत्यद्वयं तिष्ठेत् सम्भवोऽप्यपरस्य च। षट्कर्णं तं विजानीयात् गर्हितश्च त्रयस्य च। इत्याशङ्क्य द्वयोर्मध्ये शुद्धिर्यस्याथ वत्सरे। कर्णवेधो हितस्तस्य नात्र ज्येष्ठविचारणा। षटकर्णोत्पत्तिमाशङ्क्य भानोः शुद्धा समेऽपि च। कर्णौ वेध्यौ न दोषः स्यादन्यथा मरणं भवेत्"

कर्णवेधनी स्त्री कर्णौ विध्यते अनया विध—करणे ल्युट् ङीप्। कर्णवेधसाधने शलाकायां तन्मानादिः मदनरत्ने वृह॰प॰। "सौवर्णी राजपुत्रस्य, राजती विप्रवैश्ययोः। शूद्रस्य चायसी सूची मध्यमाष्टाङ्गुलात्मिका"। अस्य त्रिकाण्डप्रमाणतया शब्दकल्पद्रुमे हस्तिकर्णवेधन्यर्थकतोक्तिः नालीकर्णारेतिपर्य्यायोक्तिश्च प्रामादिकी। त्रिकाण्डशेषे हि "न ना गात्रावरे नाली कर्णरोकन्तु वेधनोत्येव पाठस्यैव दर्शनात् कर्णच्छिद्रस्य वेधनीपर्य्यायतया नालीशब्दस्य गात्रावरपर्य्यायतायाश्च ततः प्रतीतेः हस्त्यवयवार्थकशब्दकथनप्रकरणे तत्कर्णवेधन्यस्तपर्य्यायकथनानौचित्यात्।

कर्णवेष्ट पु॰ कर्णौ वेष्ट्येते अनेन। १कुण्डले। क्रोधवशासुरांशे २द्वापरयुगीयनृपभेदे च। "गणः क्रोधवशो नाम यस्ते राजन्! प्रकीर्त्तितः। ततः संजज्ञिरे वीराः क्षिताविह नराधिपाः। मर्द्दकः कर्णवेष्टश्च सिद्धार्थः कीचकस्तथा" भा॰ आ॰ ६७अ॰। स्वुलू, कर्णवेष्टकोऽप्यत्रैव। कर्णवेष्टकाय हितम् छ यत् वा। कर्णवेष्टकीय—कर्णवेष्टक्य तद्धिते सुवर्णादौ त्रि॰। भावे ल्युट्। कर्णवेष्टन कर्णभूषणे न॰। करणे ल्युट्। कुण्डले अमरः। ततः ताभ्यां सम्पादी ठक्। कार्णवैष्टकिक कार्णवेष्टनिक कर्णवेष्टन(के)न शोभमाने त्रि॰ "कार्णवेष्टनिकं सुखम्" भट्टिः।

कर्णव्यधविधि पु॰ कर्णव्यधस्य कर्णवेधस्य विधिः। सुश्रुतोक्ते कर्णवेधप्रकारभेदे स च प्रकारः सुश्रुते दर्शितो यथा "अथातः कर्णव्यधबन्धविधिमध्यायं व्याख्यास्यामः। रक्षाभूषणनिमित्तं बालस्य कर्णौ विध्येते षष्ठे मासि सप्तमे वा शुक्लपक्षे प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु कृतमङ्गलस्वस्तिवाचनं धात्र्यङ्के कुमारमुपवेश्य बालक्रीडनकैः प्रलोभ्याभिसान्त्वयन् भिषग्वामहस्तेनाकृष्य कर्णं दैवकृते छिद्रे आदित्यकरावभासिते शनैः शनैर्दक्षिणहस्तेन ऋजु विध्येत् प्रतनुकं सूच्या बहलमारया पूर्वं दक्षिणं कुमारस्य, वामं कन्यायास्ततः पिचुवर्त्तिं प्रवेशयेत्। सम्यक् विद्धमामतैलेन परिषेचयेत्। शोणितबहुत्वेन वेदनया चान्यदेशविद्धमिति जानीयान्निरुपद्रवतया तद्देशविद्धमिति। तत्राज्ञेन यदृच्छया विद्धासु सिरासु कालिकामर्मरिकालोहितिकास्तूपद्रवा भवन्ति। तत्र कालिकायां ज्वरो दाहः श्वयथुर्वेदना च भवति। मर्मरिकायां वेदना ज्वरो ग्रन्थयश्च। लोहितिकायां मन्यास्तम्भापतानकशिरोग्रहकर्णशूलानि भवन्ति। तेषु यथास्वं प्रतिकुर्वीत। क्लिष्टजिह्माप्रशस्तसूचीव्यधाद्गाढतरवर्त्तित्वाद्दोषप्रकोपादप्रशस्तव्यधाद्वा यत्र संरम्भो वेदना वा भवति तत्र वर्त्तिमुपहृत्याशु मधुकैरण्डमूलमञ्जिष्ठायवतिलकल्कैर्मधुघृतप्रगाढैरालेपयेत्तावद्यावत्सुरूढ इति सुरूढं चैनं पुनर्विध्येत् विधानन्तु पूर्वोक्तमेव। तत्र सम्यग्विद्धं श्लक्ष्णवर्त्तिं स्थूलतरां दद्यात्परिषेकं तमेव। अथ व्यपगतदोषोपद्रवे कर्णे वर्द्धनार्थं लघुवर्द्धनकं कुर्यात्। भवति चात्र। एवं विवर्द्धितः कर्णश्छिद्यते तु द्विधा नृणाम्। दोषतो वाभिघाताद्वा सन्धानं तस्य मे शृणु।

तत्र समासेन पञ्चदशकर्णबन्धनाकृतयः। तद्यथा— नेमिसन्धानक उत्पलभेद्यको वल्लूरक आसङ्गिमो गण्डकर्ण आहार्य्यो निर्वेधिमो व्यायोजिमः कपाटसन्धिकोऽर्द्धकपाटसन्धिकः संक्षिप्तो हीनकर्णो वल्लीकर्णो यष्टिकर्णः काकौष्ठक इति। तेषु पृथुलायतसमोभयपालिर्नेमिसन्धानकः। वृत्तायतसमोभयपालिरुत्पलभेद्यकः। ह्रस्ववृत्तसमोभयपालिर्वल्लूरकः। अभ्यन्तरदीर्घैकपालिरासङ्गिमः। बाह्यदीर्घैकपालिर्गण्डकर्णः। अपालिरुभयतोऽप्याहार्य्यः। पीठोपमपालिरुभयतः क्षीणपुत्रिकाश्रितो निर्वेधिमः। स्थूलाणुसमविषमपालिर्व्यायोजिमः। अभ्यन्तरदीर्घैकपालिरितराल्पपालिः कपाटसन्धिकः। बाह्यदीर्घैकपालिरितराल्पपालिरर्द्धकपाटसन्धिकः। तत्र दश एते कर्णबन्धविकल्पाः साध्यास्तेषां स्वनामभिरेवाकृतयः प्रायेण व्याख्याताः। संक्षिप्तादयः पञ्चासाध्यास्तत्र शुष्कशष्कुलिरुत्सन्नपालिरितराल्पपालिः संक्षिप्तः। अनधिष्ठानपालिः पर्य्यन्तयोः क्षीणमांसो हीनकर्णः। तनुविषमाल्पपालिर्वल्लीकर्णः, ग्रथितमांसस्तब्धसिराततः सूक्ष्मपालिर्यष्टिकर्णः। निर्मांससंक्षिप्ताग्राल्पशोणितपालिः काकौष्ठकपालिरिति। बद्धेष्वपि तु शोथदाहरागपाकपिड-

कास्रवयुक्ता न विवृद्धिमुपयान्ति। भवन्ति चात्र। यस्य पालिद्वयमपि कर्णस्य न भवेदिह। कर्णपीठं समे मध्ये तस्य विद्ध्वा विवर्द्धयेत्। बाह्यायामिह दीर्घायां सन्धिराभ्यन्तरो भवेत्। आभ्यान्तरायां दीर्घायां बाह्यसन्धिरुदाहृतः। एकैवतु भवेत्पालिः स्थूला पृथ्वी स्थिरा च या। तां द्विधा पाटयित्वा तु छित्त्वा चोपरि सन्धयेत्। गण्डादुत्पाद्य मांसेन सानुबन्धेन जीवता। कर्णपालिमपालेस्तु कुर्य्यान्निर्लिख्य शास्त्रवित्। अतोऽन्यतमं बन्धं चिकीर्षुरग्रोपहरणीयोक्तोपसंभृतसम्भारं विशेषतश्चात्रोपहरेत् सुरां मण्डं क्षीरमुदकं धान्याम्लं कपालचूर्णञ्चेति। ततोऽङ्गनां पुरुषं वा ग्रथितकेशान्तं लघु भुक्तवन्तमाप्तैः सुपरिगृहीतञ्च कृत्वा बन्धमुपधार्य्य छेद्यभेद्यलेख्यव्यधनैरुपपन्नमुपपाद्य कर्णशोणितमवेक्षेत तद्दुष्टमदुष्टं वेति। तत्र वातदुष्टे धान्याम्लोष्णोदकाभ्यां, पित्तदुष्टे शीतोदकपयोभ्यां, श्लेष्मदुष्टे सुरामण्डोष्णोदकाभ्यां प्रक्षाल्य कर्णौ पुनरवलिख्यानुन्नतमहीनमविषमञ्च कर्णसन्धिं सन्निवेश्य स्थितरक्तं सन्दध्यात्। ततो मधुघृतेनाभ्यज्य पिचुप्लोतयोरन्यतरेणावगुण्ठ्य सूत्रेणानवगाढमशिथिलञ्च बद्ध्वा कपालचूर्णेनावकीर्य्याचारिकमुपदिशेद्द्विव्रणीयोक्तेन विधानेनाचरेत्। भवतश्चात्र। विघट्टनं दिवास्वप्नं व्यायाममतिभोजनम्। व्यवायमग्निसन्तापं वाक्श्रमञ्च विवर्ज्जयेत्। आमतैलपरीषेकं त्रिरात्रमवचारयेत्। ततस्तैलेन संसृष्टं त्र्यहादपनयेत् पिचुम्। न चासंशुद्धरक्तमतिप्रवृत्तरक्तं वा सन्दध्यात्। स हि वातदुष्टे रक्ते रूढोऽपि परिपुटनवान्, पित्तदुष्टे दाहपाकरागवेदनावान्, श्लेष्मदुष्टे स्तब्धः कण्डूमान्, अतिप्रवृत्तरक्ते श्यावशोफवान्। क्षीणोऽल्पमांसो न वृद्धिमुपैति। स यदा सुरूढो निरुपद्रवः सवर्णो भवति तदैनं शनैःशनैरभिवर्द्धयेत्। अतोऽन्यथा संरम्भदाहपाकरागवेदनावान् पुनश्छिद्यते वा। अथास्याप्यदुष्टस्याभिवर्द्धनार्थमभ्यङ्गः। तद्यथा गोधाप्रतुदविष्किरानूपौदकवसामज्जानौ पयःसर्पिस्तैलं गौरसर्षपजञ्च यथालाभं सम्भृत्यार्कालर्कबलातिबलानन्तापामार्गाश्वगन्धाविदारिगन्धाक्षीरशुक्लाजलशूकमधुरवर्गप्रतिवापं तैलं वा पाचयित्वा स्वनुगुप्तं निदध्यात्। स्वेदितोन्मर्दितं कर्णं स्नेहेनानेन योजयेत्। अथानुपद्रवः सम्यक् बलवांश्च विवर्द्धते। यवाश्वगन्धायष्ट्याह्वैस्तिलैश्चोद्वर्त्तनं हितम्। शतावर्य्यश्वगन्धाभ्यां पयस्यैरण्डजीवनैः। तैलं विपक्वं सक्षीरमभ्यङ्गात् पालिवर्द्धनम्। ये तु कर्णा न वर्द्धन्ते विधिनानेन योजिताः। तेषामपाङ्गदेशे तु कुर्यात् प्रच्छानमेव तु। बाह्यच्छेदं न कुर्व्वीत व्यापदस्तु ततो ध्रुवाः। बद्धमात्रन्तु यः कर्णं सहसैवाभिवर्द्धयेत्। आमकोशीसमाध्मातः क्षिप्रमेव विमुच्यते। जातरोमा सुवर्त्मा च श्लिष्टसन्धिः समः स्थिरः। सुरूढोऽवेदनो यस्तु तं कर्णं वर्द्धयेच्छनैः। अमिताः कर्णबन्धास्तु विज्ञेयाः कुशलैरिह। यो यथा सुनिविष्टः स्यात्तं तथा विनियोजयेत्"। एवं वेधप्रकाराभिज्ञेनैव भिषजा कर्णवेधः कारयितव्यः

कर्णशष्कुली स्त्री कर्णस्य शष्कुलीव। १कर्णगोलके, "अवलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत" नैष०। "कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्"मुक्ता०२तन्मध्याकाशे च।

कर्णशूल न०६त०। कर्णरोगभेदे। कर्णगतरोगशब्दे विवृतिः

कर्णशोभन त्रि०कर्णं शोभयति शुभ-णिच्-ल्यु। कर्णाभरणे "उत नः कर्णशोभना पुरूणि" ऋ० ८,७८,३,

कर्णश्रव त्रि० श्रूयते श्रवः शब्दः कर्णेन श्रवः श्रवणयोग्यः शब्दोयत्र। श्रवणयोग्यशब्दधारे वय्वादौ "कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने" मनुः।

कर्णसंस्राव पु० कर्णरोगभेदे कर्णगतरोगशब्दे विवृतिः।

कर्णसू स्त्री कर्णं सूते सू-क्विप्। पृथायां कुन्त्याम् तत्प्रसवकथा कर्णशब्दे उक्ता। कर्णजनन्यादयोऽप्यत्र।

कर्णस्फोटा स्त्री कर्णे स्फोटो विदारणं यस्याः। (काणफाटा) लताभेदे राजनि०। "कर्णस्फोटा कटुस्तिक्ता हिमा च परिकीर्त्तिता। सर्व्वग्रहभूतविषदोषव्याधिविनाशिनी" राजनि०

कर्णस्रोतस् न० कर्णस्य स्रोत इव। कर्णमले

कर्णस्रोतोभव पु० कर्णस्रोतसो विष्णुकर्णमलाद्भवति भू-अच्, भवत्यस्मात् अपादाने अप् कर्णस्रोतो भवोयस्य वा। विष्णुकर्णमलोद्भूते मधुनामके कैटभनामके चासुरे। "कर्णस्रोतो भवञ्चापि मधुं नाम महासुरम्। तमुग्रमुग्रकर्म्माणमुग्रां बुद्धिं समास्थितम्। ब्रह्मणोऽपचितिं कुर्व्वन् जघान पुरुषोत्तमः" भा० अनु० ६६अ०। यथाचास्य विष्णुकर्णोद्भवः तथा कैटभशब्दे वक्ष्यते।

कर्णहीन त्रि० ३त०। १वधिरे बाधिर्य्यप्राप्तिश्च पापविशेषजन्या यथाह शाता०स०। "काकघातो कर्णहीनो दद्याद्गामसितप्रभाम्"। २सर्पे च पुंस्त्री चक्षुःश्रवस्त्वात्तस्य तथात्वम्। स्त्रियां जातित्वात् ङीष्।

कर्णाकर्णि पु० कर्णे कर्णे गृहीत्वा प्रवृत्तं कथनम् कर्म-व्यतिहारे स० इच् समा०। (काणाकाणि) कर्णपरम्परया श्रवणयोग्येऽन्योन्यकथने "कर्णाकर्णि हि कपयः कथयन्ति च तत्कथाम्" रामा०।

कर्णाट पु० "रामनाथं समारभ्य श्रीरङ्गान्तं शिवेश्वरि!। कर्णाटदेश इत्युक्तो राज्यसाम्राज्यदायकः" शक्तिसङ्ग० उक्ते देशभेदे अयञ्च देशः कूर्म्मविभागे द०स० दक्षिणस्याम् उक्तः। "अथ दक्षिणेन लङ्केत्युपक्रम्य "कर्णाटमहाटविचित्रकूटेत्यादि" "कोङ्कवेङ्कटकान् दक्षिणकर्णाटान् देशान् यदृच्छयोपगतः" भाग०५,६,८, "तेषां मूर्द्ध्नि ददाति वामचरणं कर्णाटराजप्रिया" उद्भटः। कर्णाटजनपदे भवः अण्। कर्णाटभवे त्रि० स्त्रियां ङीप् "कार्णाटीचीनपीनस्तनवसनदशान्दोलनस्पन्दमन्दः" उद्भटः। बहुषु तस्य लुक्। कर्णाटाः तद्देशवासिषु। तस्य राजन्यपि अण्। कार्णाट तद्देशनृपे। तस्य बहुषु लुक्। एकत्वे न। "अरण्ये कार्णाट त्वदरिवनितानां शिशिरयात्" उद्भटः। ह्रस्वपाठे कर्णाटशब्दस्य तन्नृपे वाचकेति भेदः। २हंसपदीलतायां स्त्री राजनि०। ३रागिणीभेदे संगीतदामो०। सा तु मालवरागस्य भार्य्या। कर्णाटे प्रसिद्धा अण् ङीप् कार्णाटी। अनुप्रासाङ्गवृत्तिभेदे "कार्णाटी कवर्गेणानुप्रासवतीति सरस्व० तद्वाक्यञ्च अलङ्कारशब्दे २८८ पृ० दर्शितम्।

कर्णाटक पु० गोत्रप्रवर्त्तके ऋषिभेदे तस्य गोत्रापत्यम् इञ्। कार्णाटकि। यस्कादि० तस्यास्त्रियां बहुषु लुक्। कर्णाटकास्तद्गोत्रापत्येषु। स्त्रियां तु कर्णाटकी इत्येव

कर्णाट्ट न० कर्णः तिर्य्यग्रेखाकारत्वात् इवाट्टम्। गृहभेदे तच्छिल्पलक्षणम् "विभिदुस्ते मणिस्तम्भान् कर्णाट्टशिखराणि च" भा० व० २६४ अ० ३० श्लोकव्याख्यायां नीलकण्ठेनोक्तं यथा। "कर्णस्तिर्य्यग्यानं तेन प्रकारेण यत्पाषाणादिविस्तरेण क्रियते तत्तद्गृहविशेषं कर्णाट्टमिति वदन्ति तद्धि दिक्कोणस्य चतुरस्रस्योपरि विदिक्कोण चतुरस्रं तदुपरि दिक्कोणं तदुपरि पुनर्विदिक्कोणमित्येवं क्रमेणोत्तरोत्तरमल्पप्रमाणैश्चतुरस्रैः समाप्यम् इति प्रसिद्धम्"। तत्र कर्णाटेति पाठः प्रामादिकः नीलकण्ठेन कर्णाट्टपदस्यैव व्याख्यानात्।

कर्णादि त्रि० पाणिन्युक्ते जाहच्प्रत्ययनिमित्ते १शब्दगणे स च गणः। कर्ण अक्षि नख मुख केश पाद गुल्फ भ्रू शृङ्ग दन्त ओष्ठ पृष्ठ, कर्णजाहम् अक्षिजाहमित्यादि। चातुरर्थ्यां फिञ्प्रत्ययनिमित्ते पाणिन्युक्ते २शब्दगणे च स च गणः "कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद आनडुह्य पाञ्चजन्य स्फिज् कुम्भी कुन्ती जित्वन् जीवन्त कुलिश आण्डीवत जव जैत्र आनक" कर्णस्य सन्निकृष्टदेशादि। कार्णायनि तत्सन्निकृष्टदेशादौ त्रि०।

कर्णानुज पु० ६त०। युधिष्ठिरे त्रिका०। [(काणेरपाता)

कर्णान्दू (न्दू) पुंस्त्री कर्णस्यान्दुरिव। कर्णपाली। हेम०

कर्णाभरणक पु० कर्णाभरणमिव कायति पुष्पद्वारा कै—क। आरग्वधे वृक्षे। (सोन्दाल) राजनि०

कर्णारा स्त्री हस्तिकर्णवेधन्याम् शब्दकल्पद्रुमे त्रिकाण्डप्रामाण्येनोक्तं तच्च मूले न दृश्यते इत्युक्तं कर्णवेधनीशब्दे।

कर्णारि पु० ६त०। १अर्ज्जुने कर्णजिच्छब्दे तत्कथा (आजन) २नदीसर्ज्जवृक्षे राजनि०। [रिणां कर्णचालने त्रिका०

कर्णास्फाल पु० आ+स्फुर—णिच्—स्फालादेशः ६त०। क-

कर्णि पु० कर्ण-इनि। १कर्णाकारफलके शरभेदे शब्दचि०। भावे इन्। २भेदने च

कर्णिका स्त्री कर्ण—ण्वुल् कर्णे भवः अलङ्कारः इकन् अत इत्वम्। १कर्णाभरणभेदे (काण्) २करिशुण्डाग्रवर्त्तिन्यङ्गुल्याकारे पदार्थे ३पद्मबीजकोषे च अमरः। "यस्यामवस्थितः सर्व्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः" भाग० ५,१६,७, ४कलुकादिदन्तपरम्परायाम् (कड़ा) ५करमध्याङ्गुलौ च मेदि०। ६लेखन्यां हारा०। ७अग्निमन्थवृक्षे ८अजशृङ्गीवृक्षे च राजनि० कर्णो दृढोऽस्त्यस्य ठन्। ९दृढकर्णे त्रि०।

कर्णिकाचल पु० कर्णिकायां स्थितोऽचलः। सुमेरुपर्वते हेमच०। यथा चास्य तथारूपेण स्थिति तथा कर्णिकाशब्दे" भाग०५,१६,७श्लो०उक्तं तच्च कर्णिकाशब्दे उक्तम् कर्णिकापर्वतादयोऽप्यत्र।

कर्णिकार पु० कर्णिं भेदनं करोति कृ—अण् उप० स०। (मणियारी) १वृक्षभेदे, २आरग्वधवृक्षभेदे च (छोट सोन्दाल) शोधनरूपमलभेदकत्वात् तयोः तथात्वम्। "कर्णिकारः परिव्याधः पादपोत्पलः इत्यपि। "कर्णिकारः कटुस्तिक्तस्तुवरः शोधनो लघुः। रञ्जनः सुखदः शोथश्लेष्मास्रव्रणकुष्ठनुत्" भावप्र० गुणादि उक्तम् "वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः" कुमा०। "अनन्तरञ्च कश्चित् कर्णिकारगौरः" दशकु०।

कर्णिकिन् पु० कर्णिका हस्ताग्राङ्गुलिरस्त्यस्य इनि। ह-

स्तनि अटा० स्त्रियां ङीप्।२वर्षपर्वतभेदे च शब्दचि०।

कर्णिन् त्रि० कर्ण-अस्त्यर्थे तुन्दा० इलौ वा इनि। वृहत्कर्णयुक्ते लम्बकर्णे लम्बकर्णमानन्तु विधानपारि० शङ्खलिखितायाह तुः। "हनुमूलादधः कर्णौ लम्बौ तु परिकीर्त्तितौ। कर्णौ तु द्व्यङ्गुलौ शस्ताविति शातातपोऽब्रवीत्"। "अर्द्धहारार्द्धकेयूरायार्द्धकुण्डलकर्णिने" भा० अनु० १४अ०। स्त्रियां ङीप्। सा सुश्रुतोक्ते २योनिरोगभेदे च सा च "विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसङ्कुले" इत्युद्दिश्य "उदावर्त्ता तथा वन्ध्या—अप्रजानन्दा तु या योनिः कर्णिनी चरणाद्वयम्। श्लैष्मिका सकफा ज्ञेया" इत्यादिना ता विभज्य "अर्णिन्यां कर्णिका योनौ श्लेष्मासृग्भ्यां तु जायते" इति लक्षिता। "वर्त्तिं प्रदद्यात् कर्णिन्यां शोधनद्रव्यसंभृताम्। प्रसंसिनीं घृताभ्यक्तां क्षीरस्विन्नां प्रवेशयेत्" सुश्रु०। ३कुटिलावयवयुक्ते वाणभेदे पु०। "करोति कर्णिनो यस्तु यस्तु खड्गादिकृच्चरः। प्रयान्ति ते विशसने नरके भयदारुणे" विष्णुपु० २अं० ६अ०। "कर्णिनो वाणविशेषान्" श्रीधरः। अत्र पक्षे तुन्दा० इलौ वा इलच् कर्णिलः, पक्षे ठन् कर्णिक, मतुप् मस्य वः, कर्णवत् द्व्यङ्गुलात् दीर्घकर्णे हनुभागादधोलम्बकर्णे त्रि०। मतुपि स्त्रियां ङीप्।

कर्णी स्त्री कर्ण—इन् वा ङीप्। कर्णिशब्दार्थे वाणभेदे तस्मिन्परे "अतः कृकमिकंसकुम्भपात्रकुशाकर्णीषु" पा० अतःपर विसर्गस्य नित्यं सः। अयसा निर्मिता कर्णी अयस्कर्णीत्यादि। २मूलदेवमातरि स्त्री कर्णीसुतः।

कर्णीमत् पु० कर्णिवाणविशेषाकारः फलेऽस्त्यस्य मतुप्। संज्ञायां दीर्घः। आरग्वधे (सोदाल) शब्दचि०।

कर्णीरथ पु० कर्णः सामीप्येनास्त्यस्य कर्णी स्कन्धः तेन ई शोभा यस्य न समासान्तः कप् स चासौ रथो रथतुल्यं वाहनं कर्म०। स्कन्धवाह्ये याने (पालकी) इत्यादौ। शब्दचि०तु अन्यथा व्युत्पत्तिर्दर्शिता यथा। कर्णसाध्यक्रिया उपचारात् सर्वः कर्णोऽस्यास्ति इनि। कर्णी चासौ रथश्च। शब्दमात्रेण रथो न वस्तुतो रथः। यद्वा सामीप्यात् कर्णशब्देन स्कन्धो लक्ष्यते सोऽस्यास्ति वाहनत्वेन इनि कर्णी चासौ रथश्च। उभयत्र अन्येषामपीति पा० दीर्घः इति"। "कर्णीरथस्थां रघुवीरपत्नीम्" रघुः।

कर्णीसुत पु० ६त०। मूलदेवे त्रिका० हारा० च। स च कंसासुरः इति शब्दकल्पद्रुमः तन्मूलं मृग्यं कंसस्य कर्णीमातृकत्वाभावात् काद० टीकायामुक्तस्तेयशास्त्रप्रवर्त्तकमूलदेवस्यैव तन्नाम न तु उग्रसेनजस्य नाम। अतएव "कर्णीसुतकथेव सन्निहितविपुलाचला" काद० व्या० "कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः। तस्य ख्यातौ सखायौ द्वौ विपुलाचलसंज्ञकौ" टी० उक्तम्। "कर्णीसुतप्रहिते च पथि मतिमकरवम्" दशकु०।

कर्णेचुरचुरा स्त्री पात्रेसमिता० समासः। (काणफुसलान) कर्णजपने। सुप्तारोहा० असाद्युदात्तता। एवं कर्णेटिरटिरा अपि तत्रार्थे तथा द्युदात्तता च। शब्दर०।

कर्णेन्दु पु० कर्णे इन्दुरिव। अर्द्धचन्द्राकृतिकर्णालङ्कारभेदे

कर्णोपकर्णिका स्त्री कर्णादुपकर्णोऽस्त्यस्याः ठन् अत इत्वम्। (काणाकाणि) परस्परश्रवणरूपे प्रवादे "प्रागेव कर्णोपकर्णिकया श्रुतापवादक्षुभितहृदय." पञ्चत०।

कर्णोर्ण पु० कर्णे ऊर्णाधिकं लोम यस्य। मृगभेदे। "कर्णोर्णैः कपदश्वास्यैर्निर्जुष्टं वृकनाभिभिः" भाग० ३,६,१५.

कर्ण्य त्रि० कर्णे भवः शरीरावयवत्वात् यत्। १कर्णभवे मलादौ। कर्ण—कर्मणि यत् २भेद्ये च।

कर्त्त शैथिल्ये शिथिलीकरणे आरम्भसंयोगशिथिलतापादने अ० चु० सक० सेट्। कर्त्तयति ते मतान्तरे कर्त्तापयति ते अचकर्त्तत्—त कर्त्तयाम्-बभूव आस चकार चक्रे। कर्त्तयिता कर्त्यात् कर्त्तयिषीष्ट कर्त्तयिष्यति ते। कर्त्तनीयः कर्त्तयितव्यः। कर्त्तयिता कर्त्तितः। कर्त्तनं कर्त्तना। कर्त्तयितुम् कर्त्तयित्वा आकर्त्त्य। कर्मणि कर्त्त्यते अकर्त्ति अकर्त्तयिषाताम्—अकर्त्तिषाताम् कर्त्तिता—कर्त्तयिता कर्त्तयिष्यते कर्त्तिष्यते—"एवाहं सर्वं दुर्भूतं कर्त्तं कृत्वा कृताकृतम्" अथ०१०,१, २२। "अपि कर्त्तं मवर्त्तयोऽयज्यून्" ऋ० १,१२१,१३।

कर्त्त पु० कर्त्तयति शिथिलीकरोति कर्त्त—अच्। १कूपे "त्वाध्वं कर्त्तादवपद्रो यजत्राः!" यजु० ३३.५१, "कर्त्तात् कूपात्" वेददी०। कृत-भावे घञ्। २भेदे च। "दभ्रवर्द्धनिरस्य यतयो यमकर्त्तहेतिम्" भाग० २,७,४८, कृत-चञ्। ३छेदके त्रि०। "वृकस्य कर्त्तादवपदो यजत्राः" ऋ० २,३०,६। "हे यजत्राः अवपदः आपदः कर्त्तात् कर्त्तुः" भा०।

कर्त्तन न० कृत-भावे ल्युट्। १छेदने। "गुल्मगुच्छक्षुपलतापतानौषधिवीरुधाम्। पूर्वस्मृतादर्द्धदण्डः स्थानेषूक्तेषु कर्त्तने" "प्रातिलोम्ये वधः पुंसः स्त्रीणां नासादिकर्त्तनम्" याज्ञ० कर्त्त-ल्युट्। २शिथिलीकरणे करणे ल्युट्। ३कर्त्तनसाधने त्रि०। स्त्रियां ङीप् कर्त्तनी। कृत-कर्त्तरि ल्यु। ४भेदकर्त्तरि त्रि०।

कर्त्तरी स्त्री कृत–घञ् कर्त्तं राति रा–क गौरा॰ ङीष् । कृपाण्याम्, पत्रीकृतहिरण्यादेः छेदनसाधने(कातारी) २अस्त्रभेदे "ददर्श कर्त्तरीयन्त्रमन्तःपरिसंस्थितम् । मनःपवनवेगेन भ्रममाणं महारयम् । अपि सूक्ष्मं मशकं यत् खण्डयति कोटिशः" काशी॰ । केशादिकर्त्तनसाधने (काँचि) ३अस्त्रे, "क्रूरमध्यगतश्चन्द्रो लग्नं वा क्रूरमध्यगम् । कर्त्तरी नाम योगोऽयम्" इति ज्योतिषोक्ते ४योगभेदे च । कर्त्तरीयोग उपयमशब्दे १२५९,६० तत्प्रतिप्रसवविशेषोऽपि उक्तः । कृत–अरि–कर्त्तरिरित्यप्यत्र स्त्री । "क्षुरकर्त्तरिसंदंशैस्तस्य रोमाणि निर्हरेत्" सुश्रु॰ । "मासो कर्त्तरिकारकौ" मूक॰चि॰ । अत्र "ङ्यापोरिति" पा॰ ह्रस्वः" पीयू॰ । वस्तुतः क्षुरकर्त्तरिसदंशैरित्यत्र द्वन्द्वे ह्रस्वाप्रसक्तेः ह्रस्वान्तोऽपि कर्त्तरिशब्दोऽस्तीति गम्यते । स्वार्थे कन् । कर्त्तरिकाप्यत्र स्त्री ।

कर्त्तव्य त्रि॰ कृ अवश्यार्थे तव्य । कर्तुं योग्ये । "हीनसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः" चाणक्यः । "शौचं यथार्हं कर्त्तव्यं वाराम्बोदकवारिभिः" "महाव्याहृतिभिर्होमः कर्त्तव्यः स्वयमन्वहम्" मनुः "मनस्याहितकर्त्तव्याः" कुमा॰ । कृत–कर्मणि तव्य । २छेद्ये त्रि॰ । "पुत्रः सखा वा भ्राता वा पिता वा यदि वा गुरुः । रिपुस्थानेषु वर्त्तन्तः कर्त्तव्या भूतमिच्छता" भा॰शा॰१४०अ॰ उभयतो तव्य । ३अवश्यकरणे ४अवश्यच्छेदने च न॰ ।

कर्त्तृ त्रि॰ कृ–तृन् तृच् वा । १क्रियानिष्पादके क्रियोत्पादकयत्नयुक्ते तत्र तृन्नयोगकर्मणि न षष्ठीतिभेदः । स च कारकचक्रप्रयोजकत्वात् स्वतन्त्रः यथाह पा॰ "स्वतन्त्रः कर्त्ता" । "क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः । कर्त्ता स्यात्" सि॰कौ॰ । व्याकृतञ्चैतदस्माभिः सरलायाम् यथा "स्वतन्त्र इति यण्ष्यनादिप्रत्ययसमभिव्याहृतधातूपात्तप्रधानीभूतव्यापाराश्रयत्वमितरव्यापारानधीनव्यापारवत्त्वम् वा कर्त्तृत्वं बोध्यम् कर्मबोधकप्रत्ययसमभिव्याहारे फलस्यैव प्रधानतया बोधस्तोकर्त्तृमते कर्मादिव्यावृत्त्यर्थं यण्ष्यनादिसमभिव्याहृतेति । णिजन्तस्थले प्रयोज्यस्य स्वातन्त्र्यवारणाय प्रधानव्यापारेति । हरिणा तु स्वातन्त्र्ये विशेषो दर्शितो यथा । "धातूपात्तक्रिये नित्यं कारके कर्त्तृतेष्यते" इति सामान्यतोऽभिधाय "प्राधान्यतः शक्तिलाभात् प्रागभावापादनादपि । तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्त्तनात् । अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् । आरादुपकारत्वात् स्वातन्त्र्यं कर्त्तुरिष्यते" इति अस्यायमर्थः इतरव्यापारात् प्रागपि प्राधान्येनात्मशक्तेः कर्त्तृव्यापारस्य सत्त्वात्, तथाच इतरव्यापारानधीनव्यापारवत्त्वादित्यर्थः इतरकारकाणाञ्च कर्त्तुः प्रयोज्यत्वात्, न तथा, दात्रादेः कुठारादिवत् कर्त्तुः प्रतिनिध्यसम्भवात् कारकान्तराप्रयोगेऽपि कर्त्तुः प्रयोगात्, आरात् साक्षाद्धातूपात्तफलजनकव्यापारवत्त्वाच्च स्वातन्त्र्यं कर्त्तुरिति । कौ॰विवक्षितइति कर्मकरणादेरपि तत्तद्व्यापारस्य धातुनाभिधाने कर्त्तृत्वमिति द्योतनाय । "उत्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके । व्यापारभेदापेक्षायां करणत्वादिसम्भवः" इति हरिणा विवक्षावशात् सर्वेषां कर्त्तृत्वस्वीकारात् । भाष्यकृता तु "पर्य्याप्तं करणाधिकरणकर्मणामेव कर्त्तृत्वं निदर्शितमपादानादीनां कर्त्तृत्वानिदर्शनाय" इत्युक्तत्वात् करणाधिकरणकर्मणामेव विवक्षया कर्त्तृत्वमिति नापादानसंप्रदानयोरिति विवेकः" । कारकव्यापारभेदश्च मञ्जूषायां दर्शितः संक्षिप्य ततोऽस्माभिः शब्दार्थरत्ने दर्शितो यथा "कर्त्तुः कारकान्तरप्रवर्त्तनव्यापारः । करणस्य क्रियाजनकाव्यवहितव्यापारः । क्रियाफलेनोद्देश्यकव्यापारश्च कर्मणः । कर्त्तृकर्म्मव्यवहितक्रियाधारणव्यापारोऽधिकरणस्य । प्रेरणानुमत्यादिव्यापारः सम्प्रदानस्य, अवधिभावोपगमव्यापारोऽपादानस्येति । तत्र करणाधारकर्मकर्त्तृणां क्रियाजनकत्वं स्फुटम् तैर्विना क्रियानुत्पत्तेः फलरूपक्रियाजनकत्वेन विशिष्टक्रियाजनकत्वाच्च कर्म्मणस्तथात्वं घटं करोति कटं करोतीत्यादौ च बुद्धिस्थघटादेरपि पूर्व्वकालत्वेन करणादिहेतुत्वात्तथात्वमतएव तेषु कर्त्तृत्वविवक्षया काष्ठं पचति स्थाली पचति ओदनः पच्यते इत्यादिप्रयोगः । अपादानस्य अवधिभावोपगमेन हेतुत्वात् सम्प्रदानस्य च दातृबुद्धिस्थतया पूर्व्वकालत्वेन हेतुत्वाच्च क्रियानिर्व्वाहकत्वेऽपि न कर्त्तृत्वविवक्षा अनभिधानात् तदुक्तं भाष्येऽपादानादीनां कर्त्तृत्वानिदर्शनायेत्यन्तमनुपदं सरलायामन्यांशे दर्शितम् । स च प्रवृत्तिनिवृत्त्योरुभयोरपि सम्पादकः "प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः । स कर्त्ता नाम विज्ञेयः कारकाणां प्रयोजकः" इत्युक्तेः । स च पञ्चविधः "क्रिया स्वस्य भवेत् कर्त्ता हेतुकर्त्ता प्रयोजकः । अनुमन्ता ग्रहीता च कर्त्ता पञ्चविधः स्मृतः" गोपालभट्टा॰ अतएव मनुना "अनुमन्ता विशसिता नियन्ता क्रयविक्रयी । संस्कर्त्ता चोपहर्त्ता च षडेते घातकाः स्मृताः" इति पञ्चा-

शातकर्तृत्वमुक्तम् काशी०ख० "स्वादकोशातकस्तथेति" चतुर्थचरणे पाठः। तेन अष्टानां कर्तृत्वमुक्तम्। स च प्रकारान्तरेण त्रिविधः "त्रिधैव ज्ञायते कर्त्ता विशेषेण क्रियां प्रति। योग्यत्वप्रतिषिद्धत्वविशेषणपदान्वयैः" भट्टका०। अस्यार्थः क्रियां प्रति प्रकारत्रयेण कर्त्ता विज्ञायते तस्य विवरणम् "स्वाध्यायोऽध्येतव्यः" इत्यत्र योग्यत्वेन त्रैवर्णिकः, १। "अहरहर्दद्यात् दीक्षितो न ददाति" इत्यत्र प्रतिषिद्धत्वेन दीक्षितेतरः परः २। "स्वर्गकामो यजेत" इत्यत्र विशेषणपदान्वयेन स्वर्गकामः कर्त्ता ज्ञायते ३,। स च प्रकारान्तरेण त्रिविधः सात्त्विकादिभेदात् यथाह गीता "मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः। सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते" "रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः। हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः" "अयुक्तः प्राकृतः स्तब्धः शठो नैकृतिकोऽलसः। विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"। कर्त्तृपदस्य क्रियाश्रये कृत्याश्रये वा मतभेदेन रूढं न तु यौगिकमित्येतत् शब्दशि० भट्टमतदर्शनप्रस्तावे दर्शितं यथा

"अथ क्रियाजन्यत्वाविशेषेऽपि यत्नजन्यत्वाजन्यत्वाभ्यां घटाङ्कुरयोः कृताकृतत्वव्यवहारात्तृजन्तकृधातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयत्वबोधकत्वाच्च कृञो यत्नार्थत्वं, क्रियामात्रार्थत्वे कृञः, क्रियाश्रयः कर्तृपदार्थः स्यात्। तथा च कारकमात्रेऽतिप्रसङ्गः एवञ्च कृञो यत्नार्थत्वेन आख्यातविवरणात् तस्यापि यत्नोऽर्थः। तदुच्यते। "कृताकृतविभागेन कर्त्तृरूपव्यवस्थया। यत्न एव कृतिः पूर्वा परस्मिन् सैव भावना" सैवाख्यातार्थो भावनेति चेत्। बीजेनाङ्कुरः कृतः सर्गादिना सुखं कृतं बीजमङ्कुरं करोतीति यत्नं विनापि व्यवहारात्" "कर्तृपदञ्च न यौगिकं तथा हि कृञो यत्नार्थत्वे तिङः कृत्यर्थत्वे वा धातुप्रत्ययार्थयोः कृतिकृञोर्वा परस्परमनन्वयः कृतौ कृतिजन्यत्वस्य तद्विषयत्वस्य वाऽभावात् कृतिविशिष्टस्य कृतिनिराकाङ्क्षत्वादिति। एवं कृञः क्रियार्थत्वे लटश्च क्रियाश्रयवाचकत्वे तयोः परस्परमन्वय एवेति उभयदर्शने कर्तृपदं कर्मादिपदवद्रूढमेव। रूढिश्च कृत्याश्रये क्रियाश्रये वेत्यन्यदेतत् तथा च कृताकृतविभागेन च कर्तृरूपव्यवस्थया च न कृञो यत्नार्थत्वमिति क्रियाख्यातस्य करोतेश्च न यत्नार्थत्वम् पाकाय यतते पाकं करोतीत्यादौ यत्नद्वयस्य यत्नविषयकयत्नस्य वाऽप्रतीतेः प्रकृतिप्रत्ययार्थयोश्च साम्येनान्वयानुपपत्तेः पौनरुक्त्यात् एकत्रैव विध्यनुवाददोषाच्च" इत्यादिकम् भट्टमतम्। स्वमते तु कृञः यत्नार्थत्वमिति भेदः तच्च कृधातुशब्दे दर्शयिष्यते। शब्द०प्र० कर्तृपदं यौगिकमिति व्यवस्थाप्य तल्लक्षणमुक्तं यथा

"तिङा विकरणान्तस्य धातोरर्थस्तु यादृशः। स्वार्थे यादृशि बोध्यस्तत्कर्तृत्वं तदिहोच्यते। सविकरणेन यद्धातुनोपस्थाप्यो यादृशार्थस्तदुत्तरतिङा स्वोपस्थाप्ययादृशार्थोऽनुभावयितुं शक्यस्तद्धातूपस्थाप्यस्य तस्य तदेव कर्तृत्वं कारकमित्यर्थः। कर्मत्वादौ धातुनोपस्थाप्योऽर्थस्तिङानुभाव्योऽपि न विकरणान्तेनेति न तत्र प्रसङ्गः। पचति जानातीत्यादौ स्वोपस्थाप्यकृत्याश्रयत्वादौ धातूपस्थाप्यस्य पाकवृद्ध्यादेरन्वयः पचाद्युत्तरतिङा बोध्य इति पाकस्य यत्नवत्त्वं, ज्ञानस्याश्रयत्वमेव नश्यतीत्यत्र नाशस्य प्रतियोगित्वं प्रतिबिम्बतद्धत्यत्र भ्रमात्मनः प्रतिबिम्बस्य प्रकारत्वमेव कर्तृत्वम्। कर्तृशब्दस्तु अवयववृत्तिलभ्ये कृत्याश्रये यौगिकएव न तु शक्यार्थकः प्रकारान्तरालभ्यस्यैव शक्यत्वात् निरूढलक्षणया शक्त्यैव चाश्रयत्वस्य तत्र प्रत्यायनात्। घटस्य कर्त्तृत्वादौ चानुकूलत्वं षष्ठ्यर्थः फलस्य प्रायशः कृतिविषयत्वात् घटाद्युपभोगानुकूलकृतिश्च न घटाद्यनुकूला प्रमाणाभावात् अतो न घटादिभोक्तुस्तत्कर्तृत्वप्रसङ्गः। क्रियाश्रये कर्तृशब्दो रूढस्तेन रथादेर्गत्यादिकर्तृत्वमपि मुख्यमेवेति तु न युक्तम्। क्रिया हि नात्र स्पन्दस्तेन तस्य पाककर्तृत्वानुपपत्तेः प्रत्युत तण्डुलादेरेव तथात्वापत्तेः नापि धात्वर्थमात्रम् अतएव, नापि स्पन्दनानुकूलव्यापारः चलनानुकूलव्यापारवतः कारकमात्रस्य चलनकर्तृत्वापत्तेः। अग्नि जुहोतीत्यादावप्यदादेरुत्तरं लुप्तस्यैव विकरणस्य प्रतिसन्धाने भोजनकर्तृत्वादेरवगम इति। तदप्रतिसन्धानेऽपीति मतेनाह। यगन्तभिन्नधात्वर्थवत्तया योऽनुभाव्यते। लटा स्वार्थः स धात्वर्थः कर्तृता वा निगद्यते। यगन्तभिन्नधातूपस्थाप्ययादृशार्थप्रकारयदर्थधर्म्मिकान्वयबोधं प्रति लटः सामर्थ्यं स एवार्थो धातूपस्थाप्यतदर्थस्य कर्तृत्वम् पच्यत इत्यादौ धातोरर्थवत्तया स्वार्थकर्मत्वं लटानुभाव्यमपि न यगन्तभिन्नस्य, पच्यते तण्डुल इत्यादौ तु तादृशस्य धातोरर्थवत्तया तिङैव स्वार्थकर्मत्वमनुभाव्यते न तद्विशेषेण लटेति तद्व्युदासः। अपादानत्वादिभेदेन षड्विधत्वमितोक्तानुक्तत्वभेदेन कारकस्य द्वैविध्यमप्यस्तीति तदनुक्तता न्यूनत्वमत आह। धात्वर्थस्य

मितया तिङाद्यैरनुभाव्यते। यत्तदुक्तं धर्मतया त्वनुक्तं कारकं भवेत्। धात्वर्थस्य विशेषणतया तिङाद्यनुभाव्यत्वमेव कारकस्योक्तत्वं तद्विशेषणतया तदनुभाव्यत्वमेव चानुक्तत्वं नतु धातुसाकाङ्क्षप्रत्ययस्याभिधेयत्वमात्रमुक्तं तथात्वे पचति इत्यादावपि कर्म्मत्वादेरुक्तत्वापत्तेः। पचति पच्यत-इत्यादौ तिङा, पाचकः पच्यमानइत्यादौ च कृता, कर्तृत्वं कर्म्मत्वञ्च धात्वर्थविशेष्यत्वेनानुभाव्यते तथा पचनं काष्ठं, दानीयो द्विजः, भीमोगजः, शयनं गृहमित्यादौ यथाक्रमं करणत्वादि व्युत्पत्तिवैचित्र्येण पदार्थैकदेशेऽपि कर्तृत्वादौ धात्वर्थस्य पाकादेरन्वयात्। केचित्तु साम्प्रतं विसर्गरुः परुषतामपि" "विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतम्"इत्यादौ निपातेन क्वचित् कर्म्मत्वकारकस्योक्तत्वम्। धातुभेदेन कर्म्मत्वकारकस्योक्ततायां नियममाह। दुहादिभ्यः प्रत्ययेन मुख्यकर्म्मत्वमुच्यते। णिजन्तेभ्यः कर्तृताख्या तदभावेऽन्यकर्म्मता। दुहाद्युत्तरप्रत्ययेन मुख्यं साक्षाद्धात्वर्थतावच्छेदकं यत्कर्मत्वं तदेवोच्यते धात्वर्थविशेष्यत्वेनानुभाव्यते तेन गौः पयो दुह्यते दुग्धा वेत्यत्र पयःकर्मकमोचनानुकूलव्यापारजन्यमोचनवती गौरित्येवं बोधः। तत्र मोचनावच्छिन्नव्यापारस्य धातुवाच्यतया मोचनस्यैव साक्षाद्धात्वर्थतावच्छेदकफलत्वात्। वह्निप्रभृतेर्गत्यवच्छिन्नव्यापारः। क्षेषु गत्यवच्छिन्नविकर्षणं वाच्यमतः साक्षात् तद्वाच्यतावच्छेदकं गतिमत्त्वमेव फलं न तु तद्घटकसंयोगादि। तथाच 'भारोभवनं नीयते' इत्यादौ 'शाखा ग्रामं कृष्यते'इत्यादौ च यथाक्रमं भवनकर्मकगत्यनुकूलव्यापारजन्यगतिमान् भारः, ग्रामकर्मकगत्यवच्छिन्नविकर्षणकर्म्मताश्रयः शाखेत्याकारकबोधयोरुत्पत्त्यैव सम्पत्तौ दुहादेर्गौणकर्मत्वं, नीवह्यादेः प्रधानत्वमित्याद्युक्तिभेदेन विधिद्वयं शाब्दिकानामनादेयम्। णिजन्तोत्तरं कर्म्मतावाचिप्रत्ययस्थले तु मूलधातोः कर्तृतायाः कर्मतातिदेशसम्भवे तादृशमेव कर्मत्वं धात्वर्थस्य विशेष्यतया तिङाद्यैर्बोध्यते यथा चैत्रोग्रामं गम्यते गमितो-वेत्यादौ ग्रामकर्मकव्यापारजन्यगमनस्य कर्त्ता चैत्र-इत्यादि। यत्र तु न तदतिदेशस्तत्र मूलधातोः कर्मत्वमेव तदर्थविशेष्यतया तैरुच्यते यथा 'ओदनः पाच्यते खाद्यते वा भृत्येन भर्त्रा'इत्यादौ तत्र भर्तृकर्तृकव्यापाजन्यस्य भृत्यकर्तृकपाकादेः कर्मतयौदनादिरेव बोध्यते 'मैत्रेण पूगं खाद्यमानश्चैत्रोव्रजतीत्यादौ' कर्मणि शानजादिप्रत्ययः प्राक् परिचिन्तितः"।

न्यायादिमते कृतिमानेव कर्त्तृशब्दवाच्यः इत्यतः कर्त्तृत्वमात्मधर्म्मः। सांख्यमते बुद्धेर्योऽयं कर्तृत्वाभिनिवेशस्तदुपरागादकर्त्तुः पुरुषस्यापि तदभिमानः। तदेतत् सां० प्र० सू० भाष्ययोर्दर्शितम् यथा

"उपरागात् कर्त्तृत्वं चित्साचिध्याच्चित्साचिध्यात्"सू०। "अत्र यथायोग्यमन्वयः। पुरुषस्य यत् कर्त्तृत्वं तद्बुद्ध्युपरागात्। बुद्धेश्च या चित्ता सा पुरुषसान्निध्यात्। एतदुभयमवास्तवमित्यर्थः। यथाग्न्ययसोः परस्परं संयोगविशेषात् परस्परधर्मव्यवहार औपाधिको यथा वा जलसूर्ययोः संयोगात् परस्परधर्मारोपस्तथैव बुद्धिपुरुषयोरिति भावः"भा०।

पुरुषस्य यथाऽकर्त्तृता तथा सां०कौ० व्यवस्थापितं यथा "तस्माच्च विपर्यासात्सिद्धं साक्षित्वमस्य पुरुषस्य। कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च"का०।"तस्माच्चेति चः पुरुषस्य बहुत्वेन सह धर्म्मान्तराणि समुच्चिनोति विपर्यासादित्युक्तो त्रैगुण्यविपर्ययादित्यनन्तरोक्तं सम्बध्येत अतःसन्निधानाय तस्मादित्युक्तम् अनन्तरोक्तं हि सन्निधानादिदमोविषयो विप्रकृष्टश्च तद इति विप्रकृष्टं त्रिगुणमविवेकीत्यादि सम्बध्यते। तस्मात् त्रिगुणादेः यो विपर्यासः स पुरुषस्यात्रिगुणत्वं विवेकित्वमविषयत्वमसाधारणत्वं चेतनत्वमप्रसवधर्मित्वञ्च। तत्र चेतनत्वेन अविषयत्वेन च साक्षित्वद्रष्टृत्वे दर्शिते चेतनोहि द्रष्टा भवति नाचेतनः साक्षी च दर्शितविषयोभवति यस्मै प्रदर्श्यते विषयः स साक्षी यथा हि लोके अर्थिप्रत्यर्थिनौ विवादविषयं साक्षिणे दर्शयतः एवं प्रकृतिरपि स्वचरितं विषयं पुरुषाय दर्शयतीति पुरुषः साक्षी। न चाचेतनोविषयो वा शक्योविषयं दर्शयितुमिति चैतन्यादविषयत्वाच्च भवति साक्षी अतएव द्रष्टापि भवति अत्रैगुण्याच्चास्य कैवल्यम् आत्यन्तिको दुःखत्रयाभावः कैवल्यं तच्च तस्य स्वाभाविकादेवात्रैगुण्यात् सुखदुःखमोहरहितत्वात्सिद्धम्। अतएवात्रैगुण्यान्माध्यस्थ्यं सुखी हि सुखेन तृप्यन्,दुःखी हि दुःखं द्विषन्न मध्यस्थो-भवति तदुभयरहितस्तु मध्यस्थइत्युदासीन इति चाख्यायते। विवेकित्वादप्रसवधर्मित्वाच्चाकर्त्तेति सिद्धम्। स्यादेतत् प्रमाणेन कर्त्तव्यमर्थमवगम्य चेतनोऽहं चिकीर्षन् करोमीति कृतिचैतन्ययोः सामानाधिकरण्यमनुभवसिद्धं तदतश्चिन्त्यते नावकल्प्यते चेतनस्याकर्तृत्वमकर्तुश्चाचैतन्यादित्यत आह"कौ० "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्तृत्वे च तथा कर्त्तेव भवत्युदासीनः"का०।

"चतश्चैतन्यकर्तृत्वे भिन्नाधिकरणे युक्तितः सिद्धे तस्माद्भ्रान्तिरियमित्यर्थः। लिङ्गं महदादिसूक्ष्मपर्य्यन्तं वक्ष्यति भ्रान्तिबीजं तत्संयोगस्तन्निदानम् अतिरोहितार्थमन्यत्" कौ०। तदेतन्मतञ्च शास्त्रमुक्तावल्यां निराकृतं यथा "एतेन प्रकृतिः कर्त्री पुरुषः पुष्करपलाशवन्निर्लेपः किन्तु चेतनः कार्य्यकारणयोरभेदात् कार्य्यनाशे कार्य्यरूपतया नाशः स्यादित्यकारणत्वं तस्य बुद्धिगतचैतन्याभिमानार्थानुपपत्त्या तद्रूकल्पनम्। बुद्धिश्च प्रकृतेः प्रथमः परिणामः। सैव महत्तत्त्वमन्तःकरणमप्युच्यते। तत्सत्त्वासत्त्वाभ्यां पुरुषस्य संसारापवर्गौ। तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः। पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्। ममेदं कर्त्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया चेतनप्रतिबिम्बादतात्त्विको दर्पणस्येव मुखोपरागः। इदमिति विषयोपराग इन्द्रियप्रणालिकया परिणतिभेदस्तात्त्विको निश्वासाभिहतदर्पणस्येव मलिनिमा। कर्त्तव्यमिति व्यापारावेशः। तेनांशत्रयवतो बुद्धेस्तत्परिणामेन ज्ञानेन पुरुषस्यातात्त्विकः सम्बन्धो दर्पणमलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानादिवत् सुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मा अपि बुद्धेरेव कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना परिणामित्वादिति सांख्यमतमपास्तम् कृत्यदृष्टभोगानामिव चैतन्यस्यापि सामानाधिकरण्यप्रतीतेस्तद्भिन्ने मानाभावाच्चेतनोऽहं करोमीति प्रतीतेः। बुद्धेः परिणामित्वाच्चैतन्यांशे भ्रम इति चेत् कृत्यंशे किं नेष्यते। अन्यथा बुद्धेर्नित्यत्वे तत्पूर्व्वमसंसारापत्तिः। अचेतनायाः प्रकृतेः कार्य्यत्वात् बुद्धेरचैतन्यं कार्य्यकारणयोस्तादात्म्यादिति चेन्न असिद्धेः कर्त्तुर्जन्यत्वे मानाभावात् वीतरागजन्मादर्शनादनादित्वम्। अनादेर्नाशासम्भवान्नित्यत्वम्" मुक्ता०। वेदान्तिमते आविद्यिकजीवस्यैवौपाधिकं कर्तृत्वं शा० सू० भा० व्यवस्थापितम् यथा।

"कर्त्ता शास्त्रार्थवत्त्वात्"। तद्गुणसारत्वाधिकारेणैवापरोऽपि जीवधर्म्मः प्रपञ्च्यते। कर्त्ता चायं जीवः स्यात् कस्मात् शास्त्रार्थवत्त्वात् एवञ्च यजेत जुहुयात् दद्यादित्येवंविधं विधिशास्त्रमर्थवद्भवति अन्यथा तदनर्थकं स्यात्। तद्धि कर्त्तुः सतः कर्त्तव्यविशेषमुपदिशति न चासति कर्तृत्वे तदुपपद्यते। तथेदमपि शास्त्रमेवमर्थवद्भवति "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष" इति भा०। "विहारोपदेशात्" सू०। "इतश्च जीवस्य कर्तृत्वं यज्जीवप्रक्रियायां सन्ध्ये स्थाने विहारमुपदिशति "स ईयतेऽमृतो यत्र काममिति" "स्वे शरीरे यथाकामं परिवर्त्तते" इति च भा०। "उपादानात्" सू०। "इतश्चास्य कर्तृत्वं यज्जीवप्रक्रियायामेव करणानामुपादानं सङ्कीर्त्तयति। "तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति"। "प्राणान् गृहीत्वेति च" भा०। "व्यपदेशाच्च क्रियायां न चेन्निर्द्देशविपर्य्ययः" सू०। "इतश्च जीवस्य कर्तृत्वं यदस्य लौकिकीषु वैदिकीषु च क्रियासु कर्तृत्वं व्यपदिश्यते 'विज्ञानं यज्ञं तनुते कर्म्माणि तनुतेऽपि चेति"। ननु विज्ञानशब्दो बुद्धौ समधिगतः कथमनेन जीवस्य कर्तृत्वं सूच्येतेति नेत्युच्यते जीवस्यैवैष निर्द्देशो न बुद्धेः न चेज्जीवस्य स्यात् निर्द्देशविपर्य्ययः स्यात् विज्ञानेनेत्येवं निरदेक्ष्यत्। तथा ह्यन्यत्र बुद्धिविवक्षायां विज्ञानशब्दस्य करणविभक्तिनिर्द्देशो दृश्यते "तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति"। इह तु "विज्ञानं यज्ञं तनुत" इति कर्तृसमानाधिकरण्यनिर्द्देशात् बुद्धिव्यतिरिक्तस्यैवात्मनः कर्तृत्वं सूच्यत इत्यदोषः। अत्राह यदि बुद्धिव्यतिरिक्तो जीवः कर्त्ता स्यात् स स्वतन्त्रः सन् प्रियं हितं चैवात्मनो नियमेन सम्पादयेत् न विपरीतं, विपरीतमपि तु सम्पादयन्नुपलभ्यते। न च स्वतन्त्रस्यात्मन ईदृशी प्रवृत्तिरनियमेनोपपद्यते इति अत उत्तरं पठति" भा०। "उपलब्धिवदनियमः" सू०। यथायमात्मोपलब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टञ्च उपलभते एवमनियमेनैवेष्टमनिष्टञ्च सम्पादयिष्यति। उपलब्धावप्यस्वातन्त्र्यमुपलब्धिहेतूपादानोपलम्भादिति चेन्न विषयविकल्पनमात्रप्रयोजनत्वादुपलब्धिहेतूनाम् उपलब्धौ त्वनन्यापेक्षत्वमात्मनः चैतन्ययोगात्। अपि चार्थक्रियायामपि नात्यन्तमात्मनः स्वातन्त्र्यमस्ति देशकालनिमित्तविशेषापेक्षत्वात्। न च सहायापेक्षस्य कर्त्तुः कर्तृत्वं निवर्त्तते। भवति ह्येधोदकाद्यपेक्षस्यापि पक्तुः पक्तृत्वम्। सहकारिवैचित्र्याच्चेष्टानिष्टार्थक्रियायामनियमेन प्रवृत्तिरात्मनो न विरुध्यते" भा०। "शक्तिविपर्य्ययात्" सू०। "इतश्च विज्ञानव्यतिरिक्तो जीवः कर्त्ता भवितुमर्हति। यदि पुनर्विज्ञानशब्दवाच्या बुद्धिरेव कर्त्री स्यात्ततः शक्तिविपर्य्ययः स्यात् करणशक्तिर्बुद्धेर्हीयेत कर्तृशक्तिश्चापद्येत। सत्याञ्च बुद्धेः कर्तृशक्तौ तस्या एवाहंप्रत्ययविषयत्वमभ्युपगन्तव्यम् अहङ्कारपूर्व्विकाया हि प्रवृत्तेः सर्व्वत्र दर्शनात् अहं गच्छाम्यहं भुञ्जेऽहं

पिबामीति च तस्याश्च कर्तृशक्तियुक्तायाः सर्व्वार्थकारित्वात् सर्व्वार्थकारि करणमन्यत् कल्पयितव्यं यतोऽपि हि सन् कर्त्ता करणमुपादाय क्रियासु प्रवर्त्तमानो दृश्यत इति। ततश्च संज्ञामात्रे विसंवादः स्यात् न च वस्तुभेदः कश्चित् करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमात्” भा० “समाध्यभावाच्च” सू०। “योऽप्ययमौपनिषदात्मप्रतिपत्तिप्रयोजनः समाधिरुपदिष्टो वेदान्तेषु “आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः” “सोऽन्वेष्टव्यः स विजिज्ञासितव्यः” “ओमित्येवं ध्यायेत आत्मानम्” इत्येवंलक्षणः सोऽप्यसत्यात्मनः कर्तृत्वे नोपपद्येत, तस्मादप्यस्य कर्तृत्वसिद्धिः” भा०। “यथा च तक्षोभयथा” सू० “एवं तावत् शास्त्रार्थवत्त्वादिभिर्हेतुभिः कर्तृत्वं शारीरस्य प्रदर्शितं तत्पुनः स्वाभाविकं वा स्यादुपाधिनिमित्तं वेति चिन्त्यते। तत्र तैरेव शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकं कर्तृत्वम् अपवादहेत्वभावादित्येवं प्राप्ते ब्रूमः। न स्वाभाविकं कर्तृत्वमात्मनः सम्भवति अनिर्म्मोक्षप्रसङ्गात्। कर्तृत्वस्वभावत्वे ह्यात्मनो न कर्तृत्वान्निर्मोक्षः सम्भवति अग्नेरिवौष्ण्यात्। न च कर्तृत्वादनिर्मुक्तस्यास्ति पुरुषार्थसिद्धिः कर्तृत्वस्य दुःखरूपत्वात्। ननु स्थितायामपि कर्तृत्वशक्तौ कर्तृत्वकार्य्यपरिहारात् पुरुषार्थः सेत्स्यति तत्परिहारश्च निमित्तपरिहारात् यथाग्नेर्दहनशक्तियुक्तस्यापि काष्ठवियोगाद्दहनकार्य्याभावस्तद्वत् न, निमित्तानामपि शक्तिलक्षणेन सम्बन्धेन सम्बद्धानामत्यन्तपरिहारासम्भवात्। ननु मोक्षसाधनविधानान्मोक्षः सेत्स्यति न साधनायत्तस्यानित्यत्वात्। अपि च नित्यशुद्धबुद्धमुक्तात्मप्रतिपादनान्मोक्षसिद्धिरभिमता तादृगात्मप्रतिपादनञ्च न स्वाभाविके कर्तृत्वेऽवकल्पते। तस्मादुपाधिधर्म्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकम्। तथा च श्रुतिः “ध्यायतीव लेलायतीव” इति। “आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः” इति चोपाधिसंयुक्तस्यैवात्मनो भोक्तृत्वादिविशेषलाभं दर्शयति। न हि विवेकिनां परस्मादन्यो जीवो नाम कर्त्ता भोक्ता वा विद्यते “नान्योऽतोऽस्ति द्रष्टेत्यादि” श्रवणात्। पर एव तर्हि संसारी कर्त्ता भोक्ता च प्रसज्येत परस्मादन्यश्चेच्चितिमान् बुद्ध्यादिसंघातव्यतिरिक्तो न स्यात् न अविद्याप्रत्युपस्थापितत्वात् कर्तृत्वभोक्तृत्वयोः। तथा च शास्त्रं “यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीति” अविद्यावस्थायां कर्तृत्वभोक्तृत्वे दर्शयित्वा विद्यावस्थायां ते एव कर्तृत्वभोक्तृत्वे निवारयति “यत्र त्वस्य सर्व्वमात्मैवाभूत्तत् केन कं पश्येदिति”। तथा स्वप्नजागरितयोरात्मन उपाधिसम्पर्ककृतं श्रमं श्येनस्येवाकाशे विपरिपततः श्रावयित्वा तदभावं सुषुप्ते प्राज्ञेनात्मना संपरिष्वक्तस्य श्रावयति “तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तर”मित्यारभ्य “एषास्य परमा गतिरेषास्य परमा संपत् एषोऽस्य परमो लोक एषोऽस्य परमानन्दः” इत्युपसंहारात्। तदेतदाहाचार्य्यः “यथा च तक्षोभयथेति”। तत्वर्थे चायं चः पठितः। नैवं मन्तव्यं स्वाभाविकमेवात्मनः कर्तृत्वम् अग्नेरिवौष्ण्यमिति। यथा च लोके तक्षा वास्यादिकरणहस्तः कर्त्ता दुःखी भवति स एव स्वगृहं प्राप्तो विमुक्तवास्यादिकरणः स्वस्थो निर्वृत्तो निर्व्यापारः सुखी भवति एवमविद्याप्रत्युपस्थापितद्वैतसंयुक्त आत्मा स्वप्नजागरितावस्थयोः कर्त्ता दुःखी भवति स तच्छ्रमापनुत्तये स्वमात्मानं परं प्रविश्य मुक्तकार्य्यकरणसंघातोऽकर्त्ता सुखी भवति संप्रसादावस्थायां, तथा मुक्त्यवस्थायामप्यविद्याध्वान्तं विद्याप्रदीपेन विधूयात्मैव केवलो निर्वृत्तः सुखी भवति। तक्षदृष्टान्तश्चैतावतांशेन द्रष्टव्यः तक्षा हि विशिष्टेषु तक्षणादिषु व्यापारेष्वपेक्ष्यैव प्रतिनियतानि करणानि वास्यादीनि कर्त्ता भवति स्वशरीरेण त्वकर्त्ता, एवमयमात्मा सर्व्वव्यापारेष्वपेक्ष्यैव मनआदीनि करणानि कर्त्ता भवति स्वात्मना त्वकर्त्तैवेति नत्वात्मनस्तक्ष्ण इवावयवाः सन्ति यैर्हस्तादिभिरिव वास्यादीनि तक्षा मनआदीनि करणान्यात्मोपाददीत न्यसेद्वा। यत्तूक्तं शास्त्रार्थवत्त्वादिभिर्हेतुभिः स्वाभाविकमात्मनः कर्तृत्वमिति तत्र विधिशास्त्रं तावद्यथाप्राप्तं कर्तृत्वमुपादाय कर्त्तव्यविशेषमुपदिशति न कर्तृत्वमात्मनः प्रतिपादयति। न च स्वाभाविकमस्य कर्तृत्वमस्ति ब्रह्मात्मत्वोपदेशादित्यवोचाम। तस्मादविद्याकृतं कर्तृत्वमुपादाय विधिशास्त्रं प्रवर्त्तिष्यते। कर्त्ता विज्ञानात्मा पुरुष इत्येवंजातीयकमपि शास्त्रमनुवादरूपत्वाद्यथाप्राप्तमेवाविद्याकृतं कर्तृत्वमनुवदिष्यति। एतेन विहारोपादाने परिहृते तयोरप्यनुवादरूपत्वात्। ननु सन्ध्ये स्थाने सुषुप्तेषु करणेषु “स्वे शरीरे यथाकामं परिवर्त्तते” इति विहार उपदिश्यमानः केवलस्यात्मनः कर्तृभाव इति, तथोपादानेऽपि “तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति” करणेषु कर्म्मकरणविभक्ती श्रूयमाणे केवलस्यैवात्मनः कर्तृभावं गमयत इति। अत्रोच्यते न तावत् सन्ध्ये स्थाने

ऽप्यन्तमात्मनः करणविरमणमस्ति "सधीः स्वप्नो भूत्वेमं लोकमतिक्रामतीति" तत्रापि धीसम्बन्धश्रवणात्। तथा च स्मरन्ति "इन्द्रियाणामुपरमे मनोऽनुपरतं यदि। सेवते विषयानेव तद्विद्यात् स्वप्नदर्शनमिति"। कामादयश्च मनसो वृत्तय इति श्रुतिः ताश्च स्वप्ने दृश्यन्ते तस्मात् समना एव स्वप्ने विहरति। विहारोऽपि तत्रत्यो वासनामय एव न पारमार्थिकोऽस्ति। तथा च श्रुतिरिवकारानुबद्धमेव स्वप्नव्यापारं वर्णयति "उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन्निति"। लौकिका अपि तथैव स्वस्वप्नं कथयन्ति (आरुक्षमिव गिरिशृङ्गम्) अद्राक्षमिव वनराजिमिति। तथोपादाने यद्यपि करणेषु कर्मकरणविभक्तिनिर्देशस्तथापि तत्संयुक्तस्यैवात्मनः कर्तृत्वं द्रष्टव्यं केवले कर्तृत्वासम्भवस्य दर्शितत्वात्। भवति च लोकेऽनेकप्रकारा विवक्षा (योधा युध्यन्ते) (योधैः राजा युध्यते) इति च। अपि चास्मिन्नुपादाने करणव्यापारोपरममात्रं विवक्ष्यते न स्वातन्त्र्यं कस्यचित्, अबुद्धिपूर्वकस्यापि स्वापे करणव्यापारोपरमस्य दृष्टत्वात्। यस्त्वयं व्यपदेशो दर्शितः "विज्ञानं यज्ञं तनुते" इति स बुद्धेरेव कर्तृत्वं प्रापयति विज्ञानशब्दस्य तत्र प्रसिद्धत्वात् मनोऽनन्तरपाठाच्च "तस्य श्रद्धैव शिरः" इति विज्ञानमयस्यात्मनः श्रद्धाद्यवयवत्वसंकीर्त्तनात् श्रद्धादीनाञ्च बुद्धिधर्मत्वप्रसिद्धेः "विज्ञानं देवाः सर्वे ब्रह्म ज्येष्ठमुपासते" इति च वाक्यशेषात् ज्येष्ठत्वस्य बुद्धौ प्रसिद्धत्वात् "स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञ" इति च श्रुत्यन्तरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणात्। न च बुद्धेः शक्तिविपर्ययः करणानां कर्तृत्वाभ्युपगमे भवति सर्वकारकाणामेव स्वव्यापारेषु कर्तृत्वस्यावश्यंभावित्वात्। उपलब्ध्यपेक्षं त्वेषां करणत्वं सा चात्मनः। न च तस्यामप्यस्य कर्तृत्वमस्ति नित्योपलब्धिस्वरूपत्वात्। अहङ्कारपूर्वकमपि कर्तृत्वं नोपलब्धुर्भवितुमर्हति अहङ्कारस्याप्युपलभ्यत्वात्। न चैवं सति करणान्तरकल्पनाप्रसङ्गः बुद्धेः करणत्वाभ्युपगमात्। समाध्यभावस्तु शास्त्रार्थवत्त्वेनैव परिहृतः। यथाप्राप्तमेव कर्तृत्वमुपादाय समाधिविधानात्। तस्मात् कर्तृत्वमप्यात्मन उपाधिनिबन्धनमेवेति स्थितम्" भा०। "अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते" इति गीतया कर्तृत्वस्याहङ्काराधीनतयौपाधिकत्वं सूचितमिति द्रष्टव्यम्"।

तथा चान्तःकरणोपहितचैतन्यमेव जीवः स एव वेदान्तिमते कर्त्तेति तत्त्वम्। तस्य च ईश्वराधीनतयैव कर्तृत्वं तदपि "परात्तु तच्छ्रुतेः" इत्यादिशा० सूत्रभाष्ययोर्व्यवस्थापितं तच्च ईश्वरशब्दे दर्शितमिति। स्त्रियां ङीप् कर्त्री। "कर्त्तरि कृत्" "कर्तृकरणयोस्तृतीया" "अकर्त्तरि च कारके" "कर्त्तुरीप्सिततमं कर्म" "कर्त्तुरुपमानादाचारे क्यङ्" "शेषात् कर्त्तरि परस्मैपदम्" पा० "कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्" हरिः २तत्प्रयोजके "तत्प्रयोजको हेतुश्च" पा० "अकर्त्तर्य्यृणे" पा०। कर्त्तुर्भावः त्व कर्त्तृत्व न० तल् कर्त्तृता स्त्री कृत्याश्रयत्वे क्रियाश्रयत्वे च। तत्र नैयायिकमते आख्यातस्य कृतौ शक्तिः वैयाकरणमते कर्त्तरि शक्तिः "कर्त्तरि कृत्" "लः कर्मणि च भावे चाकर्मकेभ्यः" पा० सूत्राभ्यां तथैव प्रतिपादनात् "कर्त्तरि कृत्" इत्यतः कर्त्तृपदस्यैव परसूत्रेऽनुवृत्तेः लकारस्यापि तदर्थकतेत्याकरे स्थितम्। अधिकमाख्यातशब्दे उक्तम्। "न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः" गीता। ३परमेश्वरे पु० तस्य सर्वकर्तृत्वात् "एतेषां पुरुषाणां स कर्त्ता यस्य वैतत् कर्म स वै वेदितव्यः" इति श्रुतेस्तस्य तथात्वम् यथा च तस्य सर्वकर्त्तृत्वं तथा ईश्वरशब्दे दर्शितम्। "करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः" विष्णुस०। कृत—तृच्। ४छेदके त्रि० स्त्रियां ङीप् "क्रोधहा क्रोधकृत्कर्त्ता" विष्णुस०। क्रोधकृतां दैत्यानां कर्त्ता भेदकः इत्येकं नामेति" भा० (कात) ५क्षुद्रखड्गे न०। तस्य कर्त्तनहेतुत्वात् तथात्वम् "चतुर्भुजां खड्गाक्षीं तु दक्षेण कर्तृखर्परौ" ताराध्यानम्। ६शस्त्रिकायां स्त्री ङीप्। "कर्त्रीञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम्" ताराध्यानम्। उभयमपि उग्रताराशब्दे दर्शितम्। (कातारी) ७कर्त्तर्य्याम् शब्दरत्ना०। स्वार्थे क। कर्तृकापि क्षुद्रखड्गे स्त्री "हास्ययुक्तां त्रिनेत्राञ्च कपालकर्तृकाकराम्" तन्त्रसा० श्यामाध्यानम्। किरति विक्षिपति कायम् कृ—विक्षेपे तृच्। स्वरादिहेतुके दराहादौ। ततोऽस्त्यर्थे मतुप् कर्तृमत् कर्तृयुक्ते त्रि० स्त्रियां ङीप्। "ह्रस्वनुड्भ्यां मतुप्" पा० अस्य उदात्तत्वम्। कर्तृशब्दे उपपदे दिवाविभेत्यादिना कृञः टः। कर्तृकर कर्तृकारके तत्प्रयोजके। स्त्रियां ङीप्। इष्ठे ईयसि च तृणो लोपः करिष्ठः करीयान्। तृचस्तु न लुक्। डिद्भावे कर्त्तिष्ठः कर्त्तीयानिति भेदः।

कर्त्त शैथिल्यकरणे अद०चुरा०उभय०सक०शैथिल्ये अक० सेट्। कर्त्तयति ते कर्त्तापयतीत्येके अचकर्त्तत्। कर्त्तयाम्-

बभूव आस्थचकार चक्रे । कर्त्त्र्यते अकर्त्तिं—अकर्त्तिषाताम्-अकर्त्तयिषाताम् । प्रनिकर्त्तयति । क्त कर्त्तितः ।

कर्त्रभिप्राय पु० कर्त्तारमभिप्रैति संबध्नाति अभि+प्र+इण—अच् उप०स०।१कर्त्तृसम्बन्धिनि । "स्वरितञितः कर्त्त्रभिप्राये क्रियाफले" पा० । अत्र क्रियाफलस्वरूपञ्चास्माभिःशब्दार्थरत्ने निरूपितं यथा ।

"स्वरितञिद्धातूत्तरतङः कर्तृगामिन्येव सति क्रियाफले कर्तृवाचकत्वं नान्यथा तत्र फलञ्च न धातूपस्थाप्यं जानात्यादीनां ज्ञानरूपफलस्य समवायेन कर्तृनिष्ठतया सर्व्वदैव जानीते इत्येव प्रयोगापत्तेः जानातीत्यादेरपलापापत्तेश्च नेष्यते तु तथा शास्त्रकारैः । नापि क्रियाजन्येतनदक्षिणादिरूपलाभादि गौणं फलमिह विवक्षितं तथा सति सूदादेस्ताडनफलवत्त्वेन सूदः पचते ऋत्विजो यजन्ते इत्यादिप्रयोगापत्तेः । किन्तु फलतीतिव्युत्पत्त्या प्रयोजनापरनामकक्रियाजन्यदृष्टस्वर्गादिरूपमेव मुख्यं फलं ग्राह्यं यथोक्तं हरिणा "यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः । तत् प्रधानं फलं तासां न लाभादि प्रयोजनमिति"। प्रसिद्ध्यर्थं निष्पत्त्यर्थं पचादयः पाकादयः तासां पचादीनां प्रधानं फलं तदित्यर्थः फलस्य प्राधान्यञ्चेतरापेक्षया बोध्यं तेन इतरेच्छानधीनेच्छाविषयत्वस्य तस्य सुखादिष्वेव सत्त्वेऽपि क्वचित् साक्षात्सुखादिरूपप्रयोजनालाभे तत्साधनरूपेतरफलस्यापि ग्रहणमिति द्रष्टव्यम् तेन "अपाद्वदः" पा०इत्यादिसूत्रविहिततङः सुखादिरूपमुख्यप्रयोजनाभावेऽपि कर्तृवाचकत्वम्" ।

कर्त्तुरभिप्रायो यत्र । २कर्त्तुरभिप्रायविषये त्रि० उक्तपाणिनिसूत्रस्य "आत्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वेनेति" शब्दचि० व्याख्यानात्तदर्थता अत एव पा० सूत्रस्योभयार्थता । तदेतत्शब्द० प्र०विवृतं यथा "अतोभयपदिधातूनां यत्र क्रियाफलं कर्तृनिष्ठं तत्रात्मनेपदं यत्र च कर्तृभिन्ननिष्ठं तत्र परस्मैपदं साधु "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति सूत्रेण कर्त्तारमभिप्रैति सम्बध्नातीति व्युत्पत्त्या कर्तृसम्बद्धे क्रियाफल एवात्मनेपदस्य विधानात् । अतएव "स्वरिज्ञिण्यन्तधातूनां कर्तृनिष्ठे क्रियाफले । आत्मनेपदमुद्दिष्टं तदनिष्ठे पदान्तरम्" इत्यपिपाणिनीयाः पठन्ति । तदनुसृत्यैव दानादिस्थले स्वगते फले ददे इत्येवं, परगते तु ददानीत्येव वाक्यं प्रयुञ्जते वृद्धाः । "स्वर्गकामोयजेत" इत्यादौ च सामान्यतः श्रुतमपि फलं कर्तृनिष्ठमेव "शास्त्रदेशितं फलमनुष्ठातरीति" मीमांसयोत्सर्गतस्तथा कल्पमादिति प्राञ्चः । चिन्तामणिकृतस्तु यत्र क्रियाफले कर्त्तुरभिप्रायइच्छा तत्रैवात्मनेपदमिति सूत्रार्थस्तेन याजकादौ दक्षिणादिलाभेच्छयैव यागादिकरणे यजन्ति याजकाः पठन्ति पाठकाः इति परस्मैपदम् । परगतस्यापि यागादिफलस्येच्छया तत्करणे तु यजन्ते याजकाइत्यादिकः साधुरेव प्रयोगोऽतएव "पितृस्वर्गकामः पुत्रकरिष्ट्या यजेत" इत्यादावप्यात्मनेपदम् "धनकामोगणपतिं शक्तिकामोऽर्च्चयेद्धरिम्" इत्यादौ च परस्मैपदं सङ्गच्छते" इत्याहुः । [अकर्द्दीत् चकर्द्द प्रनिकर्द्दति ।

कर्द्द कुत्सितरवे उदरशब्दे च भ्वा०पर०अक०सेट् । कर्द्दति

कर्द्द पु० कर्द्द—अच् । कर्द्दमे । शब्दर० ।

कर्द्दट पु० कर्द्दं कर्दमं कारणत्वेनाटति प्राप्नोति अट—अच् ईत० शक० । १करहाटे पद्मकन्दे २कर्द्दमगन्तरि त्रि० । मेदि० । कर्द्द—अटन् । ३पङ्के पु०मेदि० ।

कर्द्दन न० कर्द्द—भावे ल्युट् । उदरशब्दे हेमच० ।

कर्द्दम इ० कर्द्द—अम (कादा) १पङ्के अमरः । "तरितः कुर्व्वती गाधाः पथशाश्यानकर्द्दमान्" रघुः । करणे अम । २पापे उणादिकोषः । तस्य कुत्सितशब्दहेतुत्वात्तथात्वम् । ३मांसे न० शब्दचि० । तत्सेवने हि उदरशब्दोजायते इति तस्य तथात्वम् । कर्दमश्छाया कारणत्वेनास्त्यस्य अर्श० अच् । ब्राह्मणेश्छायायाजाते ४प्रजापतिभेदे । "छायायाः कर्द्दमोजज्ञे देवहूत्याः पतिः प्रभुः" भाग० ३,१२,१४, "प्रजाः सृजेति भगवान् कर्द्दमो ब्रह्मणोदितः। सरस्वत्यांतपस्तेपे सहस्राणां समा दश । ततः समाधियोगेन क्रियायोगेन कर्द्दमः । संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषम्" भाग०३,२१,अष्टमश्लोकादौ। ततः कपिलस्य प्रादुर्भावोवर्णितः । तन्नामनिरुक्तिः" ब्रह्मवै० पु०प्र०ख० दर्शिता यथा । "वेदेषु कर्दमः शब्दश्छायायां वर्त्तते स्फुटम् । बभूव कर्दमाद्ब्राह्मः कर्दमस्तेन कीर्त्तितः"। तेन ५छायायामपि । ततः ऋश्यादि०चतुर्थ्यां क । कर्दमकपङ्कसन्निकृष्टदेशादौ त्रि० कर्दमोजातोऽस्य तारका० इतच् । कर्दमित जातकर्दम त्रि० । अर्श० मत्वर्थे अच् । कर्दम ईकर्दमयुक्ते त्रि०। काश्या० चतुरर्थ्यां ठञ् ञिठौ कार्दमिक कर्दमसन्निकृष्टदेशादौ त्रि० ठञि स्त्रियां ङीप् । मत्वर्थे इनि कर्द्दमिन् पु०तद्युक्ते त्रि० सुद्दृष्ट्वे पु० वैद्य० तस्य कर्दमसमीपजातत्वात्तथात्वम् । पृषो० कर्द्दमोत्यपि तत्रार्थे ।

कर्द्दमक पु० कर्दमे कायति प्रकाशते कै-क । शालिभेदे,

तस्य पङ्के एव हि प्ररोह इति तस्य तथात्वम्। "रक्तशालिशष्टिककङ्गुकमुकुन्दकपाण्डुकपीतकप्रमोदककालकासनकपुष्पककर्दमकशकुनाहृतसुगन्धककलमनीवारकोद्रवोद्दालकश्यामाकगोधूमवेणुयवादयः" सुश्रु०।

कर्द्दमाटक पु० कर्द्दमे इव आटोगतिरत्र कप्। विष्ठादिनिक्षेपस्थाने शब्दरत्ना०। [प्रचुरकर्दमयुक्तदेशे।

कर्द्दमिनी स्त्री कर्द्दमानां देशः पुष्करा० इनि।

कर्पट पुंन० कृ-कर्म्मणि विच्-कर्-पटः कर्म०। १छिन्ने जीर्णे वस्त्रखण्डे (लाताकानि), २मलिनवस्त्रे। करस्थः पटः शक०। घर्म्मादिमार्ज्जनार्थं हस्तन्यस्ते। ३वस्त्रखण्डे। ४कषायरक्ते वस्त्रे च। "नीलशैलस्य पूर्वस्मिन् स्वरूपं प्रतिपादितम्। नाभिमण्डलपूर्वस्यां भस्मकूटस्य दक्षिणे। पूर्वस्यां कर्पटो नाम पर्वतोयमरूपष्टक्"कालिका ८१अ० उक्ते। ५पर्वतभेदे पु०। [कादौ शब्दरत्ना०।

कर्पटिक त्रि० कर्पट-अस्त्यर्थे ठन्। कर्पटवस्त्रयुक्ते भिक्षु-

कर्पण पु० कृप-ल्युट् करा० लत्वाभावः। आयसे शस्त्रभेदे। "चापचक्रकणपकर्पणप्रासपट्टिशमुषलतोमरादिप्रहरणजालसम्प्रयुक्तानः" दशकु०।

कर्पर पु०कृप्-अरन् लत्वाभावः। १कपाले घटावयवे २शीर्षास्थनि, अमरः (माथार खुली), ३शस्त्रभेदे (कात) ४कटाहे च मेदिनी ५उडुम्बरे वृक्षे शब्दच०।

कर्पराश पु० ६त०। कपालांशे (खावरा) शब्दचि०।

कर्पराल पु० कर्पर इवालति अल-अच्। पर्वतपीलुभेदे। (आखरोट) कन्दराले रमानाथः।

कर्पराशिन् पु० कर्परेऽश्नाति अश-भोजने णिनि। वटुकभैरवे। "श्मशानवासी मांसाशी कर्पराशी मखान्तकृत्" वटुकस्तवः। [त्यम्। कर्परोरूपे तुत्ये हेम०।

कर्परिकातुत्थ कर्पर्य्येव स्वार्थे कन् कर्परिका सैव तु-

कर्परी स्त्री कृप-अरन्-लत्वाभावः गौ०ङीष्।१दारुहरिद्राक्षारभवे तुत्थे(तुँते) अम०।२रसके भावप्र० खर्परीति वाऽत्र पाठः। रसकश्चोपरसभेदः उपरसभेदाश्च उपरसशब्दे उक्ताः भावप्र० तद्गुणाद्युक्तं यथा "कर्परीतुत्थकं तुत्थादन्यत् रसकं स्मृतम्। ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः"। तुत्थसामान्यं तु नोपरस इति भेदः।

कर्पास पुंन० कृ-पास। वस्त्रहेतुतूलयोनौ (कापास) वृक्षभेदे अमरः। गौरा०ङीष्। तत्रैव स्त्री भावप्र०। "कर्पासी तुण्डकेरी च समुद्रान्ता च कथ्यते। कर्पासिका लघुः कोष्णा मधुरा वातनाशिनी। तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम्। तत्कर्णं पिडकानाशि पूयस्रावविनाशनम्। तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु" इति तत्रोक्तेः।

कर्पासफल न० ६त०। (फाकाटो) कर्पासबीजे।

कर्पूर पुंन०कृप्-ऊरन् बा० ऊर लत्वाभावः। स्वनामख्याते गन्धद्रव्ये, तद्गुणाः भावप्र० उक्ताः, यथा "कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः। सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः। दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः। कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः। पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम्। (अथ चिनिया कर्पूर) "चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः। कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः। कर्पूरो नूतनस्तिक्तः स्निग्धसोष्णस्तदाहदः। चिरस्थोदाहशोषघ्नः स शीतः शुभकृत् परः"। तस्य च "पोताशः भीमसेनः सितकरः शङ्कराबालुकसंज्ञः पांशुः पिञ्जः अब्दसारः हिमवालुकः जूतिका तुषारः हिमशीतलः पत्रिका" भेदात् द्वादश भेदा राजनि०। ततः काशा० चतुरर्थ्यामिञ् इल। कर्पूरिल तत्सन्निकृष्टदेशादौ त्रि०। शुभ्रादिपाठात् तन्नामके। २नरभेदे तस्यापत्यं शुभ्रा०ढक्। कार्पूरेय तदपत्ये पुंस्त्री। [कचूरे शब्दच०।

कर्पूरक पु० कर्पूर इव कायति कै-क। (कचुर) नामद्रव्ये

कर्पूरतिलका स्त्री उमासखीभेदे विजयायाम् शब्दमाला।

कर्पूरतैल न० कर्पूरस्य तैलमिव स्नेहः। कर्पूरस्नेहरूपे हिमतैले तैलभेदे राजनि०। "कटूष्णं हिमतैलं स्यात् कफवातामयापहम्। दन्तदार्ढ्यकरं चित्तकारकं परिकीर्त्तितम्" राजनि०।

कर्पूरनालिका स्त्री "घृताढ्यया समितया लम्बं कृत्वा पुटं ततः। लवङ्गोल्वणकर्पूरयुतया सितयाऽन्वितम्। पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका। संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका" भावप्र० उक्ते पाकभेदसिद्धे भक्ष्यभेदे।

कर्पूरमणि पु० कर्पूरवर्णो मणिः। रत्नभेदे, "कर्पूरमणिनामायं युक्त्या वातादिदोषनुत्" राजनि०। कर्पूराश्मादयोऽप्यत्र पु०।

कर्पूररस पु० कर्पूर इव शुभ्रोरसः पारदः। पाकविशेषेण कर्पूरवत्कृते पारदे रसकर्पूरे तत्पाकप्रकारः भावप्र० उक्तो यथा—

"अथ कर्पूररसस्य विधिः तत्र पारदस्य संक्षिप्तं शोधनं कर्त्तव्यम्। शुद्धसूतसमं कुर्य्यात् प्रत्येकं गैरिकं सुधीः। इष्टिकां खटिकां तद्वत् स्फटिकां सिन्धुजन्म च वल्मीकं क्षारलवणं भाण्डरञ्जकमृत्तिकाम्। सर्वाण्येतानि सञ्चूर्ण्य वास-

सा चापि शोधयेत् । खटिका(खरी)(स्फटिका)(फट्किरी) सिन्धुजन्म सैन्धवम् । वल्मीकम् (वल्माटी) क्षारलवणम् (खारिलोण)भाण्डरञ्जकमृत्तिका(काविसा)। एभिश्चूर्णैर्युतं सूतं यामद्वयं विमर्दयेत् । तच्चूर्णसहितं सूतं स्थाली-मध्ये परिक्षिपेत् । तस्याः स्थाल्यामुखे स्थालीमपरां धा-रयेत् समाम् । सन्धिं लेपयेत्तयोः संयो-ज्य मुद्रयेद्भूयोभूयः संशोष्य मुद्रयेत् । सम्यग्विशोष्य मुद्रां तां स्थालीं चुल्ल्यां विधारयेत् । वह्निं निरन्तरं दद्याद्याव-द्दिनचतुष्टयम् । अङ्गारोपरि तद्यन्त्रं रक्षेद्यत्नादहर्निशम् । शनैरुद्घाटयेद्यन्त्रमूर्ध्वस्थालीगतं रसम् । कर्पूरवत् सुविमलं गृह्णीयाद्गुणवत्तरम् । तदेव कुसुमचन्दनकस्तूरीकुङ्कुमैर्युक्तम् । खादन् हरति फिरङ्गव्याधिं सोपद्रवं सपदि । विन्दति वह्नेर्दीप्तिं पुष्टिं वीर्य्यं बलं विपुलम् । रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततम्” ।

कर्पूरस्तव पु० कर्पूरशब्दघटितः स्तवः । “कर्पूरं मध्यमान्त्य-स्वरपररहितम्” इत्यादिके तन्त्रोक्ते श्यामास्तवभेदे ।

कर्पूरा स्त्री कर्प-खर्जू० ऊर-बत्वाभावः । हरिद्राभेदे । “दार्वी मेदाक्षगन्धा च सुरभी दारुदारु च । कर्पूरा पद्मपत्रा स्यात् सुरीमत् सुरतापकाः” भावप्र० तत्प-र्य्यायः । मदनपाले तु हरिद्रायाः पञ्चधा विभागमुक्त्वा तद्गुणा उक्ताः, यथा “दार्वी दारुहरिद्रा स्यात् पीतदारु च पञ्चधा । कटङ्कटेरी पीतद्रुः स्वर्णवर्णा कटङ्कटी । दार्वी तद्वद्विशेषात्तु मूत्रकर्णास्यरोगनुत्” ।

कर्पूरिन् त्रि०कर्पूरोऽस्त्यस्य इनि । कर्पूरयुक्ते ततः सुवास्त्वा० चतुरर्थ्याम् अण् । कार्पूर तस्यादूरभवदेशादौ त्रि० ।

कर्फर पु० कीर्य्यते विच् फल्यते फलः प्रतिविम्बः कः कीर्य्यमाणः फलः प्रतिविम्बं यत्र तस्य रः । दर्पणे जटाधरः तत्र हि प्रतिविम्बस्य पतनात् तस्य तथात्वम् ।

कर्ब गतौ भ्वा०पर०सक०सेट् । कर्बति अकर्बीत् । चकर्ब ।

कर्बु पु०कर्ब-उ । १चित्रवर्णे २तद्वति त्रि० “अनन्ता रश्मयस्तस्य दीपवद्यः स्थितो हृदि । सितासिताः कर्बुनीलाः कपि-लाः पीतलोहिताः” याज्ञ० । स्वार्थे कन् तत्रार्थे

कर्बुदार पु०कर्बुः सन् दारयति मलं दृ-णिच्-अच् कर्म्म० । १कोविदारवृक्षे २श्वेतकाञ्चने च रत्नमा० ३नीलझिण्ट्यां शब्दच० । “कोविदारकर्बुदारादिष्वित्यादि” सुश्रु० । तस्य तैलन्तु मधुरम् । “प्रियालकर्बुदारस्योर्म्य बिल्वपुत्रीवक कर्कारुकाम्राण्डप्रभृतीनां तैलानि मधुराणि” सुश्रु० । “अत्र यूथिकेत्याद्युपक्रमे कर्बुदारकोविदारप्रभृतीनि स्वादूनि शीतकानि रक्तपित्तहराणि च । कफघ्नान्य-निलं कुर्य्युः संग्राहीणि लघूनि च” इति सुश्रुतेन कोवि-दारादस्य भेदस्य निर्द्देशात् ततोऽस्य भेदः इति बोध्यम् ।

कर्बुदारक पु०कर्बुः सन् दारयति कफं दृ-णिच्-ण्वुल् । श्लेष्मान्तकवृक्षे राजनि० ।

कर्बुर पु० कर्ब-गतौ मद्गुरा० उरच् । १चित्रवर्णे शबले इतरवर्णेन सह संपर्कादस्य तथात्वम् । २तद्वति त्रि० “पवनैर्भस्म कपोत-कर्बुरम्” कुमा० । ओष्ठमध्योऽप्ययं बवयोरभेदात् दन्त्यमध्यो-ऽपीति शब्दचि० । ३पापे नरकादिगतिहेतुत्वात्तस्य तथा-त्वम् । ४नादेयनिष्पावधान्ये राजनि० कर्बुरवर्णत्वा-त्तस्य तथात्वम् । ५जले न० मेदि० नीचगतित्वात्तस्य तथात्वम् । कर्ब-दर्पे, मद्गुरा० उरच् दन्त्यमध्यः । ६स्वर्णे न० मेदि० इतरधातुभ्यस्तस्योत्कर्षेण दर्पयोगात्तथात्वम् । तन्नामनामके ७धुस्तूरे च अम० । ८शठ्यां० अमरटीका ९राक्षसे पु० अमरे पाठान्तरम् दर्पयुक्तत्वात्तस्य तथात्वम् । १०कृष्णटङ्कायां (पाकल) स्त्री: टाप् मेदि० ११बर्बरायां (बावुइ तुलसी) स्त्री जटा० गौरा० ङीष् कर्बुरी । १२दुर्गायां स्त्री त्रिका० ।

कर्बुरफल पु० कर्बुरं फलमस्य । शाकरुण्डवृक्षे राजनि० ।

कर्बू(र्वू)र पु०कर्ब-गतौ कर्व-दर्पे वा खर्जूरा० ऊर । १रा-क्षसे उणा० । २यवां च अमरः ३कर्चूरे (कामा) ह-रिद्रायाम् शब्दर० । भावप्र० कर्चूर इत्येव पाठः । ४स्व-र्णे ५हरिताले न० शब्दचि० वैजयन्त्याम् कर्बरमिति पाठः कर्बूरशब्दे उदा० । ६चित्रवर्णे पु० ७तद्वति त्रि० अमरटीका स्वार्थे कः । कर्बूरकमप्यत्रार्थेषु ।

कर्म्मकर त्रि० कर्म करोति भृत्यः कृ-ट । वेतनेन कर्मकारके स्त्रियां ङीप् । “प्रोचुः प्राञ्जलयः स्त्रियः वयं कर्मकरी-स्तुभ्यम्” भाग० ३,२३,२६ । अतः स्थाने यस् वाधेः । ताच्छील्ये ट । २दासे कर्मकरपर्य्याये “चिकित्सकौ कर्मकरौ कामरूपसमन्वितौ । लोके चरन्तौ मर्त्यानां कथं सोममिहार्हतः ?” भा० व० १२४ अ० । “नाभुक्तवति नास्नाते नासंविष्टे च भर्त्तरि । न संविशामि ना-श्नामि सदा कर्मकरेष्वपि” भा० व० २३२ । स्त्रियां ङीप् । कृ-हिंसायां मनू कर्म हिंसां करोति हेत्वादौ ट । ३यमे पु० मेदि० । सर्वप्राणिहिंसायां तस्याधिकृततया च तस्य तथात्वम् । ४मूर्वालतायाम् स्त्री मेदि० । कर्मकरश्च दासभेदस्तस्य भेदकर्मादिकं मिता०नारदेनोक्तं यथा । “शुश्रूषकः पञ्चविधः शास्त्रे दृष्टोमनीषिभिः । चतुर्विधः

कर्म्मकरास्तेषां दासास्त्रिपञ्चकाः। शिष्यान्तेवासिभृतकाश्चतुर्थस्त्वधिकर्म्मकृत्। एते कर्म्मकरा ज्ञेया दासास्तु गृहजादयः। सामान्यमस्वतन्त्रत्वमेषामाहुर्मनीषिणः। जातिकर्म्मकरस्तूक्तो विशेषो वृत्तिरेव च। कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च। अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम्। गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम्। गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम्। अशुभङ्कर्म्म विज्ञेयं शुभमन्यदतः परम्”मिति—“तत्र शिष्यो वेदविद्यार्थी। अन्तेवासी शिल्पादिषु। मूल्येन यः कर्म्म करोति स भृतकः। कर्म्मकृतामधिष्ठाता अधिकर्म्मकृत्। अशुचिस्थानम् उच्छिष्टप्रक्षेपणार्थं गर्त्तादिकम्। अवस्करः गृहमार्जितपांश्वादिनिचयस्थानम्। उज्झनं त्यागः। भृतकश्चात्र त्रिविधः। तदुक्तम् “उत्तमस्त्वायुधीयोऽत्र मध्यमस्तु कृषीवलः। अधमो भारवाही स्यादित्येवन्त्रिविधो भृतः” इति।

कर्म्मकर्त्तृ पु० कर्म्मैव कर्त्ता। व्याकरणोक्ते कर्म्मणः कर्त्तृत्वविवक्षया प्राप्तकर्त्तृत्वभावे कर्म्मणि। “क्रियमाणन्तु यत् कर्म्म स्वयमेव प्रसिध्यति। सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुः” व्या० का०। कर्म्मकर्त्तरि च कार्य्यभेदातिदेशमाह “कर्म्मवत् कर्म्मणा तुल्यक्रियः” पा०। सि० कौ० विवृतमेतत् यथा

“कर्त्तरि तु कर्म्मस्थया क्रियया तुल्यक्रियः कर्त्ता कर्म्मवत् स्यात्। कार्य्यातिदेशोऽयम्। तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। कर्त्तुरभिहितत्वात् प्रथमा। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। ननु भावे लकारे कर्त्तुर्द्वितीया स्यादस्मादतिदेशादिति चेन्न लकारवाच्य एव कर्त्ता कर्म्मवत्। लिङ्याशिष्यङिति द्विलकारकात् इत्यनुवृत्तेः भावे प्रत्यये च कर्त्तुर्लकारेणानुपस्थितेः। अतएव कृत्यक्तखलर्थाः कर्म्मकर्त्तरि न भवन्ति किन्तु भाव एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्म्मस्था क्रिया विक्लित्तिर्द्विधाभवनञ्च। सैवेदानीं कर्त्तृस्था न तु तत्तुल्या? सत्यम्। कर्म्मत्वकर्त्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। कर्म्मणेति किम्? करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। किञ्च—कर्त्तृस्थक्रियेभ्यो मा भूत्, गच्छति ग्रामः, आरोहति हस्ती, अधिगच्छति शास्त्रार्थः, स्मरति श्रद्दधाति वा। यत्र कर्म्मणि क्रियाकृतो विशेषो दृश्यते, यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु तत्र कर्म्मस्था क्रिया, नेतरत्र। न हि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च कर्म्मस्था, तेन कारिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्। ज्ञानेच्छादिवद्यत्नस्य कर्त्तृस्थत्वात् एतेन अनुव्यवस्यमानेऽर्थ इति व्याख्यातम्” इदमस्माभिः सरलायां व्याख्यातम् यथा—“उत्प्रवृत्तिमात्रे कर्त्तृत्वं सर्व्वत्रैवास्ति कारके। व्यापारभेदापेक्षायां करणत्वादिसम्भवः” इति वाक्यमनुसन्धानः कर्त्तृत्वकर्म्मत्वादिकं व्यवस्थाप्य कार्य्यविशेषाय कर्म्मातिदेशकसूत्रमवतारयति कर्त्तरि त्विति। कर्म्मस्थया कर्म्ममात्रस्थया क्रियया फलेन “फलव्यापारयोर्धातुः” इत्युक्तेः “धात्वर्थः क्रियोच्यते” इत्युक्तेश्चेत्यर्थः। तुल्यक्रियः समानाधिकरणक्रिय इत्यर्थः। किन्तु कर्म्मस्वभावकएव कार्य्यातिदेशार्थं कर्म्मणेति पदम् “कर्म्मस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्म्मवत्। कर्त्तृस्थेऽपि च धात्वर्थे कर्म्मकर्त्ता च कर्त्तृवत्” इत्युक्तेः “कर्म्मस्थः पचतेर्भावः कर्म्मस्थाश्च भिदादयः” इत्युक्तेः भिदादयः कर्म्ममात्रस्थाः। गमनादयस्तु कर्त्तृस्थाः “कर्त्तृस्थो बुध्यतेर्भावः कर्त्तृस्थाश्च गमादयः” इत्युक्तेः। “व्यत्ययो बहुलम्लिङ्याशिष्यङिति” सूत्रयोः सन्धिजातद्विलकारमध्ये एकलकारस्यानुवृत्तेरित्यर्थः। कृत्यक्तखलर्थाइत्यत्र क्तग्रहणं प्रायिकं सिनोग्रास इत्यादौ कर्म्मकर्त्तरि क्तस्य दर्शनादिति बोध्यम्। वास्तविकभेदाभावेऽप्यौपाधिकभेदोऽस्तीत्याह कर्म्मत्वकर्त्तृत्वावस्थेति तथा चावस्थाभेदेन क्रियाभेदात् कर्त्तुः कर्म्मस्थक्रियया तुल्यक्रियत्वमिति भावः। नेतरत्रेति। “निर्व्वर्त्त्ये च विकार्य्ये च कर्म्मवद्भाव इष्यते। न तु प्राप्ये कर्म्मणीति सिद्धान्तोऽयं व्यवस्थितः” इति हर्य्युक्तेः क्रियाकृतविशेषवतोरेव निर्व्वर्त्त्यविकार्य्ययोः कर्म्मवद्भावो न तु तद्रहिते प्राप्ये इति सिद्धान्तो द्योतित इति भावः” अत्र च यथा बोधाधिक्यं तथा शब्द० प्र० उक्तं यथा

“अथ भिद्यते अभेदि कुसूलः स्वयमित्यादौ भिदाद्यनुकूलव्यापारस्वरूपस्य तत्कर्त्तृत्वस्य कथं कुसूलादावन्वयः भिदादेः परस्मैपदित्वेन तदर्थधर्म्मितया कर्त्तृत्वबोधने पदान्तरस्यासामर्थ्यात् यगिणोर्निर्गुणत्वाच्चेत्यत आह। एकक्रियाधर्म्मितया कर्त्तृताकर्म्मतोभयोः। बोधने कर्म्मताकाङ्क्षापेक्ष्योऽत्र गतो भवेत्। कर्म्मताकाङ्क्षा कर्म्मतान्वयस्यैवानुकूला आत्मनेपदयगादिसमभिव्याहाररूपाकाङ्क्षा व्युत्पत्तिवैचित्र्यादपेक्षणीया न तु कर्त्तृत्वान्वयस्य परस्मैपदविकरणादिसन्दंशरूपा यद्येवं तण्डुलः स्वयमेव पच्यते इत्यपि प्रयोगः

स्यात् सामग्र्योर्मिथोविरोधेन विभिन्नकर्म्मावच्छिन्ने प्रत्ययानां युगपत्कर्तृताकर्म्मत्वयोरनुभावकत्वस्याव्युत्पन्नत्वात्। अतएव पचेलिमौ मैत्रतण्डुलावित्यादिको न प्रयोगः “आत्मने भौव्यधातूनां सनन्तण्यन्तयोः किरः। श्रिन्यिपण्योस्तथा ब्रूञः कर्तृकर्मत्वबोधने। यगिणौ न दुहेर्नो यगजन्तस्य च तस्य च। इण् वा स्यादुक्तधातूनां नित्यं तत्रात्मनेपद”मिति हरिस्मृतेः। स्वयं विकुरुते युवेत्यादौ, स्वयं चिकीर्षते कट इत्यादौ, स्वयं कटः कारयते गौरुत्पुच्छयते चोरयते इत्यादौ, स्वयमेव किरते करीत्यादौ, स्वयं श्रयीते पणीते वा मालिकेत्यादौ, स्वयं ब्रूते कथेत्यादौ, स्वयं दुग्धे गौरित्यादौ, धात्वर्थकर्तृकर्म्मत्वयोर्युगपदन्वये कर्म्मत्वाभ्ययानुकूलस्य यकोनापेक्षा, तथा स्वयं व्यकृत युवा, स्वयमचिकीर्षत कट इत्यादौ, इण्येऽपि एवं स्वयमवापि अवपिष्ट वा केदार इत्यादौ, स्वरान्तस्य धातोः स्वयमदुग्ध अदोहि वा गौरित्यादौ, दुहेरार्थस्य तदुभयभानार्थमिणोऽनावश्यकत्वमतएवान्तसर्गं तदिति। “विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः” (कुमा०) इत्यादौ तु यकोगतिश्चिन्त्या। ननु शाकः पचता भुज्यते इत्यादितः कुतः पाकादौ शाकादिकर्मत्वावगमः तदर्थस्यैव कर्मत्वस्य धात्वर्थे धर्म्मिणि साकाङ्क्षत्वादत आह। सकर्मकैकधात्वर्थकर्तृकापरकर्मता। यत्रान्वेत्यस्य कर्मत्वे प्रथमैवानुशिष्यते। सकर्मताकत्वविशिष्टैकधात्वर्थकर्तृकर्तृकस्यापरस्य धातुनिपातयोरन्यतरार्थस्य कर्मत्वं यत्र धर्म्मिण्यन्वेति तदीयत्वेनानुभाव्ये कर्म्मत्वे प्रथमैवानुशिष्यते नतु द्वितीयादिरपेक्ष्यते तेन शाकः सकर्मताकपाककर्तृकर्तृताकभोजनकर्मतावानित्याद्यन्वयधीस्तत्र स्यात्। अतएव “प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते” इति पठन्ति। शक्तिः कारकमिति शाब्दिकाः। कर्मतामात्रन्तु न्यायः, तेन हस्तेन पचता भुज्यते शाक इत्यादौ नाभिहिताधिकारीयप्रथमा शक्तिः”। अत्राभिहिताधिकारीयप्रथमाशक्तिरिति तु अनभिहिताधिकारीया न तृतीयाशक्तिरित्येतत् परम् अभिहिते प्रथमा इत्येतदधिकाराभावात् अनभिहिते इत्यस्यैवाधिकारादिति चिन्त्यम्। ६त०। २कर्मकारके त्रि०। स्त्रियां ङीप्। कृ-क्विप् ६त०। कर्मकृद्यत्र। कर्मकरपत्न्ये शब्दा०।

कर्म्मकाण्ड न० कर्मणां कर्त्तव्यताप्रतिपादकं काण्डम्। कर्मणां कर्त्तव्यताप्रतिपादके वेदभागे कर्मकाण्डस्यारम्भप्रयोजनञ्च बृह० उ० भाष्ये दर्शितं यथा। “तत्रास्य कर्मकाण्डेन सम्बन्धोऽभिधीयते। सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः सर्वपुरुषाणां निसर्गत एव तत्प्राप्तिपरिहारयोरिष्टत्वात्। दृष्टविषये चेष्टानिष्टप्राप्तिपरिहारोपायज्ञानस्य प्रत्यक्षानुमानाभ्यामेव सिद्धत्वान्नागमान्वेषणा। न चासति जन्मान्तरसम्बन्ध्यात्मास्तित्वविज्ञाने जन्मान्तरेष्टानिष्टप्राप्तिपरिहारेच्छा स्यात् स्वभाववादिदर्शनात्। तस्माज्जन्मान्तरसम्बन्ध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारोपायविशेषे च शास्त्रं प्रवर्त्तते। “येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके” इत्युपक्रम्य “अस्तीत्येवोपलब्धव्यः” इत्येवमादिनिर्णयदर्शनात्। “यथा च मरणं प्राप्य” इत्युपक्रम्य “योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्” इति च, स्वयं ज्योतिरित्युपक्रम्य “तं विद्याकर्मणी समन्वारभेते पुण्यो वै पुण्येन कर्मणा भवति”। ज्ञपयिष्यामीत्युपक्रम्य “विज्ञानमयः” इति च व्यतिरिक्तात्मास्तित्वम्। तत्प्रत्यक्षविषयमेवेति चेन्न वादिविप्रतिपत्तिदर्शनात्। न हि देहान्तरसम्बन्धिन आत्मनः प्रत्यक्षेणास्तित्वविज्ञाने लोकायतिका बौद्धाश्च नः प्रतिकूलाः स्युः नास्त्यात्मेति वदन्तः। न हि घटादौ प्रत्यक्षविषये कश्चिद्विप्रतिपद्यते नास्ति घट इति। स्थाण्वादौ पुरुषादिदर्शनान्नेति चेत् न निरूपितेऽभावात्। न हि प्रत्यक्षेण निरूपिते स्थाण्वादौ विप्रतिपत्तिर्भवति। वैनाशिकास्त्वहमितिप्रत्यये जायमानेऽपि देहान्तरव्यतिरिक्तस्य नास्तित्वमेव प्रतिजानते। तस्मात् प्रत्यक्षविषयत्वलक्षणात् प्रत्यक्षादात्मास्तित्वसिद्धिः। तथानुमानादपि। श्रुत्यात्मास्तित्वे लिङ्गस्य दर्शितत्वात् लिङ्गस्य च प्रत्यक्षविषयत्वाच्चेति चेत् न जन्मान्तरसम्बन्धस्याग्रहणात् आगमेन त्वात्मास्तित्वेऽवगते वेदप्रदर्शितलौकिकलिङ्गविशेषैश्च तदनुसारिणो मीमांसकास्तार्किकाश्चाहम्प्रत्ययलिङ्गानि च वैदिकान्येव स्वमतिप्रभवाणीति कल्पयन्तो वदन्ति प्रत्यक्षश्चानुमेयश्चात्मेति। सर्वथाप्यस्त्यात्मा देहान्तरसम्बन्धीत्येवम्प्रतिपत्तुर्देहान्तरगतेष्टानिष्टप्राप्तिपरिहारोपायविशेषार्थिनस्तद्विशेषज्ञापनाय कर्मकाण्डं समारब्धम्”। अधिकारिभेदेनैव कर्मकाण्डे प्रवृत्तिः “लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ!। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्” इति गीतायामपि द्वैविध्योक्तेः अतएव “तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन

तपसा नाशकेन” इति श्रुत्यैव कर्मणां विविदिषाहेतुतोक्तेः विविदिषायामेव कर्मकाण्डप्रतिपाद्यकर्मणामुपयोग इत्याकरे स्थितम् ।

कर्म्मकार त्रि० कर्म्म करोति अभृत्या अण् उप० स०। विना वेतनेन १कर्म्मकारके (वेगार) (कामार) इति प्रसिद्ध सङ्कीर्णजातिभेदे जातिशब्दे विवृतिः।“हरिणाक्षि ! कटाक्षेण आत्मानमवलोकय । नहि खड्गो विजानाति कर्म्मकारं स्वकारणम्” उद्भटः ।

कर्म्मकारिन् त्रि०कर्म्म करोति कृ—णिनि स्त्रियां ङीप् । कर्म्मकारके“तान् विदित्वा सुचरितैर्गूढैस्तत्कर्म्मकारिभिः”मनुः

कर्म्मकीलक पु० कर्म्मणा कीलक इव । रजके जातिभेदे । त्रिका० । [कर्म्मक्षमं देहं चात्मोधर्म्म इवाश्रितः” रघुः ।

कर्म्मक्षम त्रि०कर्म्मणि क्षमः ७त०। कर्मकरणसमर्थे “आत्म-

कर्म्मक्षेत्र न० कर्म्मणां क्रियानुष्ठानानां क्षेत्रम् । जम्बुद्वीपान्तर्गते नवसु वर्षेषु अनुष्ठानदेशे भारते वर्षे । नववर्षाण्युक्त्वा “अत्रापि भारतमेव वर्षं कर्मक्षेत्रम् । अन्यान्यष्टवर्षाणि स्वर्गिणां पुण्यशेषोपभोगस्थानानि भौमस्वर्गपदानि व्यपदिशन्ति”भाग०५,१७,१२,१३,कर्मभूमिरप्यत्र स्त्री ।“उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः” इत्युपक्रम्य “कर्मभूमिरियं स्वर्गमपवर्गञ्च यच्छति” । “अत्र सम्प्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति च । तिर्य्यक्त्वं नारकित्वञ्च मध्यं चातश्च गम्यते । न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते” विष्णु पु० पराशरवाक्यम् ।

कर्म्मग्रन्थि पु० कर्मणां ग्रन्थिर्बन्धनमस्मात् । अज्ञानजन्यवासनारूपे दोषे तस्यैव सकलप्रवृत्तिहेतुत्वात्तस्य कर्मबन्धनहेतुत्वात्तथात्वम् ।

कर्म्मचण्डाल पु० कर्मणा चण्डाल इव । “असूयकः पिशुनश्च कृतघ्नो दीर्घरोषकः । चत्वारः कर्मचण्डाला जन्मतश्चापि पञ्चमः” वशिष्ठोक्तेषु असूयकादिषु चतुर्षु । २राहौ च । “उत्तिष्ठ गम्यतां राहो ! त्यज्यतां चन्द्रसङ्गमः । कर्मचण्डाल ! योगोत्थं मम पापक्षयं कुरु” पहणमुक्तिस्नानमन्त्रः । राहोश्च असूयकत्वाद्दीर्घदोषवत्त्वाच्च तथात्वम् ।

कर्मचित् त्रि०चितवान् चि—भूते क्विप् ६त० । १कृतकर्मणि । कर्मणि क्विप् ६त०। २कर्मणा चीयमाने च“कर्ममयान् कर्मचितस्ते कर्मणैवाधीयन्ते कर्मणा चीयन्ते’’ शत०ब्रा०। १०,५,३,९ ।

कर्मचित त्रि०कर्मणा चितः चि—क्त । कर्मानुष्ठाने “तद्यथेह कर्मचितोलोकः क्षीयते एवमेवामुत्र पुण्यचितः”वेदपरि०श्रुतिः

कर्मचेष्टा स्त्री कर्मणि क्रियायै चेष्टा । क्रियानुष्ठानार्थं चेष्टायाम् “आत्मजन्या भवेदिच्छा, इच्छाजन्या भवेत् कृतिः । कृतिजन्या भवेच्चेष्टा, चेष्टाजन्या क्रिया भवेत्” इत्युक्तेः चेष्टायाः क्रियाहेतुत्वेन तथात्वम् “कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी” मनुः ।

कर्मचोदना स्त्री कर्मणि कर्मावबोधने चोदना विधिः । कर्मविषये १प्रेरणारूपे विधौ “कर्मावबोधनं चोदना क्रियायाः प्रवर्त्तकं वचनमिति” मीमा० भा० । चोद्यते प्रवर्त्त्यतेऽनया वा०करणे ल्युट् ७त०। २कर्मप्रवृत्तिहेतौ ज्ञानज्ञेयज्ञातृरूपेऽर्थे च । “ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना” गीता । “ज्ञानमिष्टसाधनमितिबोधः, ज्ञेयमिष्टसाधनं कर्म, परिज्ञाता तज्ज्ञानाश्रयः त्रिविधा कर्मचोदना चोद्यते प्रवर्त्त्यतेऽनयेति चोदना ज्ञानादित्रितयं कर्मप्रवृत्तिहेतुरित्यर्थः । यद्वा चोदनेति विधिरुच्यते तदुक्तं भट्टैः—“चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः” इति ततश्चायमर्थः-उक्तलक्षणं त्रिगुणात्मकं ज्ञानादित्रयमवलम्ब्य कर्मविधिः प्रवर्त्तते इति”श्रीधरः ।

कर्मज त्रि० कर्मणो कर्मजन्यादृष्टात् जायते जन—ड । कर्महेतुके रोगादौ । रोगादिव्याधयो हि नानाविधाः यथोक्तं भावप्र०—

“तेष स्वाभाविकाः केचित्केचिदागन्तवः स्मृताः । मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः । तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः । क्षुत्पिपासा सुषुप्सा च जरामृत्युप्रभृतयः । अथवा स्वस्वभावादुत्पत्ते जाता स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्धत्वादयः । आगन्तवोऽभिघातादिजनिताः । अथवा जन्मोत्तरभाविनः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथ वोन्मादापस्मारमूर्च्छाभ्रममोहतमः संन्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः । कर्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे । कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः । तत्र कर्मजाः व्याधय यस्मात्तनन्दुष्कर्मभवकेवलभोगनाश्यम् प्रायश्चित्तनाश्या वा ततो जाताः न तु दुष्टवातादिदोषेण जनितास्तथा । यथाशास्त्रन्तु निर्णीतो यथाव्याधिचिकित्सितः । न शमं

याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः । दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः । ननु मिथ्याहारविहारिणामपि प्राक्तनदुष्कृतेन भैषज्यं दृश्यत एव । ततो दोषजेष्वपि प्राक्तनं दुष्कर्म्मैव कारणम् तत् कथं दोषजा इत्युच्यन्ते ? । दोषजेष्वपि वस्तुतः आदिकारणं दुष्कर्म वर्त्तत एव किन्तु तत्र मिथ्याहारविहारदूषिता दोषा हेतवो दृश्यन्त इति दोषजा इत्युच्यन्त इति समाधिः । कर्मदोषोद्भवाः । स्वल्पदोषा गरीयांसस्ते ज्ञेयाः कर्मदोषजाः। अत्र कारणं दुष्कर्म प्रबलं यतो दोषाल्पत्वेऽपि व्याधेर्गरीयस्त्वन्तत्कर्मक्षयादेव क्षीणं भवति। दोषाः स्वल्पा अपि निदानत्वेनोक्ता दृश्यन्त एवेति दोषाणां कारणतां मन्यन्त इति । कर्मक्षयात् कर्मकृता दोषजाः स्वस्वभेषजैः । कर्मदोषोद्भवा यान्ति कर्मदोषक्षयात् क्षयम् । दोषजाः स्वस्वभेषजैरिति दोषजेष्वादिकारणम् दुष्कर्म तद्भेषजार्थद्रव्यव्ययादिजनित दुःखभोगेन कटुतिक्तकषायाद्यहृद्यभक्षणादिजनितदुःखभोगेन च क्षयं यान्ति । येषां दुष्टा हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः । २कायिकवाचिकमानसकर्मभवे स्थावरादिजन्मनि “शुभाशुभफलं कर्म्म मनोवाग्देहसम्भवम् । कर्मजा गतयो नृणामुत्तमाधममध्यमाः” ३कर्म्मजातमात्रे पापादिदोषे च “तथा दहति वेदज्ञः कर्म्मजं दोषमात्मनः” मनुः। क्रियाजन्ये ४संयोगे ५विभागे च।“अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः। कीर्त्तितस्त्रिविधस्त्वेष आद्यो ऽन्यतरकर्मजः । तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः । आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः । मेषयोः सन्निपातो यः स द्वितीय उदाहृतः । कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः। तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्त्तितः । अभिघातो नोदनञ्च शब्दहेतुरिहादिमः । शब्दाहेतुर्द्वितीयः स्याद्विभागोऽपि त्रिधा भवेत् । एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः । विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्” भाषा० ६वेगाख्यसंस्कारे च “मूर्त्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित्” भाषा० ७वटवृक्षे पु० जटा० । ८कलियुगे पु० शब्दर० । क्रियाजकर्मभवादयोऽप्यत्रार्थे । ९धर्माधर्म्मरूपे गुणभेदे अदृष्टे वेदान्तिमते कर्मणः सूक्ष्मावस्थापन्ने १०संस्कारभेदे ११स्वर्गे १२नरके च अदृष्टद्वारा तयोः कर्मजन्यत्वात्तथात्वम् ।

कर्म्मजित् पु० जरासन्धवंश्ये मागधे नृपभेदे “अथ मागधराजानो भाविनो ये वदामि ते भविता सहदेवस्य (जरासन्धपुत्रस्य) मार्ज्जारिर्यच्छ्रुतश्रवाः । ततोऽयुतायुस्तस्यापि निरमित्रोऽथ तत्सुतः । सुनक्षत्रः सुनक्षत्रात् बृहत्सेनोऽथ कर्म्मजित्” भाग० ९,२२,३० ।

कर्म्मठ त्रि० कर्मणि घटते कर्म्मन्+अठच् । कर्म्मनिष्पादनार्थं घटमाने ।“स कर्मठः कर्म्म सुतानुबन्ध”भट्टिः ।

कर्म्मणि स्त्री कर्म्म नयति समाप्तिम् नी-बा०डि णत्वम् । कर्म्मसमाप्तौ कर्त्तव्यायां प्रायश्चित्तेष्टौ । “कर्म्मणिरेव तत्र प्रायश्चित्तिः” शत० ६,६,४,९ ।

कर्म्मण्य त्रि० कर्म्मणा सम्पादि यत् । १कर्म्मणा सम्पन्ने शौर्य्ये सि०कौ०। कर्म्मणि साधु यत् ।२कर्मकुशले सि०कौ०। “यतो वीरः कर्मण्यः सुदक्षः” ऋ० ३,४,९ ।“अकर्मण्यं तिथिमलं विद्यादेकादशीं विना” ति०त० । ३वेतने स्त्री क्षीरस्वामी । वेतनेन हि कर्मसाधनात् तस्य तथात्वम् ।

कर्मण्यभुज् त्रि० कर्मण्यां वेतनं भुङ्क्ते भुज–क्विप् ङ्यापोरिति ह्रस्वः । वेतनेन कर्मकारके भरण्यभुगित्यमरपाठान्तरमिति क्षीर०।

कर्मदेव पु० कर्मणा देवः प्राप्तदेवभावः । त्रयस्त्रिंशद्देवभेदे । “स एकः कर्मदेवानामानन्दः ये कर्मणा देवानपि यन्ति श्रोत्रियस्य चाकामहतस्य ते,ये शतं कर्मदेवानामानन्दाः” तै०उ० । “कर्मदेवा ये वैदिकेनाग्निहोत्रादिना केवलेन देवानपि यन्ति, देवा इति त्रयस्त्रिंशद्धविर्भुजः। इन्द्रस्तेषां स्वामी तस्याचार्य्यो बृहस्पतिः । प्रजापतिर्विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिस्वरूपः संसारमण्डलव्यापी” शाङ्कर भा०। त्रयस्त्रिंशच्च देवाः आनन्दगिरिणा दर्शिताः । “अष्टौ वसवः एकादश रुद्राः द्वादशादित्याः इन्द्रः प्रजापतिश्चेति” २कर्मणा देवलोकं गते च । “स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसम्पद्यन्ते अथ ये शतं कर्मदेवानामानन्दाः” शत० ब्रा०१४,७,१,३५ । ये अग्निहोत्रादिश्रौतकर्मणा देवलोकं प्राप्नुवन्ति ते कर्मदेवाः” भा० ।

कर्मदेवताऽप्यत्र स्त्री । “ज्योतिष्टोमादिना स्वर्गं प्राप्ताः स्युः कर्मदेवताः” शब्दचि० । “अस्मिन् कल्पेऽश्वमेधादि कर्म कृत्वा महत्पदम् । अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवताः” इति शब्दचि० पु० ।

कर्म्मदोष पु० कर्म्मैव दोषः,कर्म्मणि दोषः,कर्महेतुर्दोषो वा । १दुष्टे पापजनके हिंसादौ कर्मणि । “संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन्” शरीरजैःकर्मदोषैर्याति

स्थावरतां नरः” मनुः। २कर्म्मजन्ये पापादौ “मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते” मनुः। “कर्मदोषैः पापैः” कुल्लू०। विहिताकरणाविहिताचरणरूपे ३कर्मविषयदोषे च। “अवेक्षेत गतीर्नृणां कर्मदोषसमुद्भवाः” मनुः। “विहिताकरणाविहिताचरणरूपकर्मदोषजन्या गतीः” कुल्लू०। ४सकलकर्महेतौ मिथ्याज्ञानजन्यवासनारूपे दोषे च। “दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम्” इत्यादि० गौत०सू०मिथ्याज्ञानजन्यवासनारूपदोषस्य सकलप्रवृत्तिरूपकर्म्महेतुत्वोक्तेस्तस्य तथात्वम्।

कर्म्मधारय पु० व्याकरणोक्ते समानाधिकरणपदघटिते समासाधीनलक्षणाम्बून्ये समासभेदे “समानाधिकरणस्तत्पुरुषः कर्मधारयः” पा०। तल्लक्षणादिकं शब्द०प०उक्तं यथा “क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्। तादात्म्येन, भवेदेष समासः कर्मधारयः। क्रमिकं यन्नामद्वयं तयोरेकस्य नाम्नोऽर्थे धर्म्मिणि० तादात्म्येनापरनाम्नोऽर्थस्यान्वयबोधं प्रति समर्थं तादृशं नामद्वयं कर्मधारयः नीलोत्पलमित्यादावुत्पलादिपदस्यार्थे नीलादिपदार्थस्य तादात्म्येनान्वयः, तथा पुरुषसिंह इत्यादावपि पुरुषादावुत्तरपदलभ्यस्य सिंहादिसदृशस्य पुरुषः सिंह इवेत्यादिविग्रहे प्रायेणोपमेयस्योपमानैरिति कर्मधारयानुशासनात्। कुम्भस्य समीपमित्याद्यर्थकस्तूपकुम्भादिर्न तादात्म्येनान्वयबोधकः, प्रवलमपद्रव्यमित्यादेः संग्रहाय नामपदस्य धातुभिन्नोपलक्षकत्वात् सार्थकसामान्यपरत्वेऽपि क्षत्यभावाच्च। नीलमुत्पलमित्यादौ तु समानविभक्तिकं नामद्वयं स्वार्थयोरभेदान्वयं बोधयदपि न क्रमिकं विभक्त्या व्यवधानात्। यदि च तादात्म्येन नीलादिनामार्थस्यान्वयबुद्धौ नीलादिनामोत्तरनामोपस्थाप्यत्वं तन्त्रमतोन तत्राभेदसम्बन्धेन नीलादेरन्वयः, परन्तु विशेषणविभक्त्युपस्थापिते तादात्म्यएवाधेयत्वेन, नीलघटपटावित्यादौ च नीलपदाव्यवहितेन घटपटेत्येवंद्वन्द्वात्मकनाम्नोपस्थापिते घटे पटे च नीलस्य तादात्म्येनान्वयाच्च व्यभिचारः। स्तोकं पचति धान्येन धनं, प्रकृत्या पटुरित्यादावपि स्तोकादेर्न धात्वाद्यर्थे तादात्म्येनान्वयः किन्तु द्वितीयाद्यर्थे तादात्म्यएवाधेयत्वेनेत्यादिकं विभाव्यते तदा क्रमिकत्वमनुपादेयमेव। राजपुरुष इत्यादिकस्तु तत्पुरुषोन पूर्व्वपदलभ्यतराजसम्बन्धिनस्तादात्म्येनान्वयबोधकसमासविग्रहयोस्तुल्यार्थकत्वहान्यापत्तेः, परन्तु राजसम्बन्धस्यैव। अतएव राजपुरुषइत्यादौ पूर्व्वपदे षष्ठ्यर्थसम्बन्धे लक्षणेति मणिकृदुक्तमपि सङ्गच्छते। यथा च नामार्थयोर्भेदेनान्वयेऽपि न क्षतिस्तथोपरिष्टाद्वक्ष्यते। किञ्चिद्विशिष्टसुवर्थानवच्छिन्नस्यैव वा तादात्म्येनान्वयबोधकत्वमुक्तनिरुक्तौ निवेश्यम्। नचैवमपि पञ्चपुल्यादिद्विगौ द्विगाव्यं गच्छत इत्यादिस्थलीये द्वितयाद्यभिन्नगार्ग्यादिबोधकाव्ययीभावे चातिव्याप्तिस्तदन्यत्वेनापि विशेषणीयत्वात्। अत्र च मानुषब्राह्मणो ब्राह्मणमानुष इत्याद्यप्रयोगाद्विशेषणविशेष्ययोर्यत्र मिथस्तादात्म्येन व्यभिचारस्तत्रैव कर्मधारयः साधुः प्रमेयधूम इत्यादौ तु नरस्य शरीरं राहोः शिर इत्यादाविव तादात्म्यसम्बन्धार्थकषष्ठ्या तत्पुरुषएवेति वृद्धाः। चन्दनतरुर्विन्ध्यगिरिर्वसन्तसमय इत्यादिप्रयोगस्य प्रामाणिकत्वात् विशेष्यस्यैव विशेषणव्यभिचारित्वं कर्मधारये तन्त्रं न तु विशेषणस्यापि तद्व्यभिचारित्वम्। पुरुषोत्तम इत्यत्र चोत्तमत्वं न नित्यज्ञानादिमत्त्वं किन्तु भ्रमविधुरत्वम्। अतएव तत्र पुरुषस्येव, पुरुषेऽपि तस्य व्यभिचारसत्त्वादुत्तमपुरुष इत्यपि कर्मधारयः साधुरिति तु नव्याः। तदाद्युत्तरपदकः कर्मधारयः प्रायशोनेष्यते नीलतदस्तीत्यादितोजात्वपि नीलोत्पलादेरस्तित्वाद्यप्रतीतेः। “पक्वयज्ञोजनं रस्यमामतद्भुक्तं इथा। नीलयद्रसन्नास्वाद्यः कटुतद्रूपमीक्ष्यते” इत्यादिप्रयोगात् क्वचिदिष्यतेऽपि। प्रयुक्तश्च जुमरनन्दिना परमः स इत्याद्यर्थे परमसः परमतावित्यादि। तत्पुरुषोऽप्येतेन व्याख्यातः। ननु विशेष्यतया नामार्थप्रकारकान्वयबुद्धिमात्रं प्रत्येव नामोत्तरविभक्त्युपस्थाप्यत्वं तन्त्रं नतु तादात्म्यसम्बन्धानवच्छिन्नतत्प्रकारताकबुद्धिं प्रति गौरवादतोनामार्थयोर्नीलोत्पलयोरन्वयासम्भवात् कर्मधारयादिकः समासोन यौगिकः किन्तु नीलोत्पलत्वादिविशिष्टे रूढएव तदुक्तं भर्तृहरिणा “अबुधान् प्रत्युपायाश्च विहिताः प्रतिपत्तये। शब्दान्तरत्वादत्यन्तं भेदोवाक्यसमासयोः” इति वैयाकरणाः, तन्मन्दं नीलोत्पलमित्यादौ समुदाये रूढ्यप्रतिसन्धानेऽपि नीलादिप्रत्येकपदोपस्थितया तयोस्तादात्म्येनान्वयबोधस्यानुभविकत्वेन गौरवस्य प्रामाणिकत्वादन्यथा नामार्थस्यान्वयबोधसामान्यं प्रत्येव नामोत्तरनामोपस्थाप्यत्वं तन्त्रमुरीकृत्य नीलमानयेत्यादौ नामार्थसुवर्थयोर्नान्वयबोधः, परन्तु सुबन्तभागस्य नीलविशिष्टकर्मत्वादौ रूढिरेवेत्यपि किन्न रोचयेः?। नच समासस्याशक्तत्वे नीलोद्रव्यञ्च घट इत्यादाविव नीलघटोद्रव्यमित्यादावपि घटे धर्मिण्येकत्र द्वयमिति न्यायेन नीलद्रव्ययोस्तादात्म्येनान्वयापत्तिरिति वाच्यम्,

नामार्थस्य मुख्यविशेष्यताक इव तादात्म्यावच्छिन्नविधेयता-केऽपि बोधे नाम्नः प्रथमान्तस्य तन्त्रत्वात् । विधेयत्वन्तु विषयतावच्छेदकतान्यप्रकारत्वं प्रकारताप्रभेदोवैतदन्य-देतत् पटमित्यादौ तु पटादिर्न तादात्म्येन विधेय इति न तत्र व्यभिचारः । ननु नीलं पीतञ्चोत्पलं यत्र इत्यर्थे नीलपीतोत्पलं शरदित्यादिको बहुव्रीहिरिव नीलं पीतञ्चोत्पलमित्यर्थे नीलपीतोत्पलं पुष्पमित्या-दिकः कर्म्मधारयोऽप्येकत्र द्वयमिति न्यायेन नीलपीताभ्या-मवच्छिन्नोत्पलनिष्ठधर्म्मिताकधीजनकः कथं न स्यात् ? इति चेन्न "बहुपदे बहुव्रीहिरिव नेतरोद्वन्द्वान्यः समास" इत्यत्र शिष्टिबलेन बहुव्रीहेरेव स्वनिविष्टनामद्वयोपस्थाप्यार्थद्वया-वच्छिन्नतादृशनामान्तरार्थनिष्ठविषयताकबोधं प्रति हेतु-त्वेन समासान्तरस्य तादृशधियं प्रत्यसमर्थत्वात् । नील-पीतोत्पले रम्ये पीतनीलोत्पलाश्रितमित्यादौ तु नीलो-त्पलं पीतोत्पलञ्च रम्यमित्याकारकएव बोधो न तु नीलं पीतञ्च यदुत्पलं तद्रम्यमित्याकारः। अतएव द्वन्द्वात् परस्य प्रत्येकाभिसम्बन्धसूचनार्थं नीलपीते च ते उत्पले चेत्यादि-क्रमेण तत्र विग्रहं वर्णयन्ति न तु नीलं पीतञ्च तदुत्पल-ञ्चेत्यादिकम् । घटस्य नाधिकरणमित्यादिविग्रहे घटानधिकरणमित्यादिकस्तु मध्यपदप्रधानस्तत्पुरुषेण बहुनामगर्भो नवैकत्र द्वयमितिन्यायेन स्वार्थस्य बोधक इति सम्प्रदायविदः" ।

अत्र समासे विशिष्टार्थे न शक्तिर्न वा लक्षणेति शब्दचि० स्थितौ यथा

"कर्म्मधारये तु न शक्तिर्नवा लक्षणा ताभ्यां विनापि विवक्षितार्थान्वयबोधोपपत्तेः ननु नीलघटयोः सामाना-धिकरण्यप्रतीतेस्तत्र लक्षणैव अन्वयप्रकारत्वादिना तस्य भाने राजपुरुषादौ षष्ठ्यर्थोपस्थितिरपि तथास्तु अत्र ब्रूमः—कर्म्मधारये सामानाधिकरण्यं नामार्थयोर-भेदो वा गुणगुणिनोः समवायो वानुभूयते सचान्वय-एव नत्वन्वयप्रतियोगी अतोऽन्वयप्रतियोगिनोरुपस्थि-तिर्नामपदाक्षत्यर्थं वेति न तदर्थं लक्षणा। राजपुरुष इत्यत्र तु राजसम्बन्धिपुरुषयोरन्वयोऽनुभूयते । राज-सम्बन्धिनश्चान्वयप्रतियोगिन उपस्थितिर्न राजपदे षष्ठ्यर्थ-लक्षणां विना, राज्ञः पुरुषं राजसम्बन्धिनं पुरुषं राजपुरुषमानयेत्यादौ पर्य्यायत्वाद्राजसम्बन्धिनः पुरुषे-ऽन्वयोभासते राजसम्बन्धो अन्वयप्रतियोगित्वेन । एवञ्च बहुव्रीहौ सर्व्वत्रान्यपदस्य षष्ठीतत्पुरुषे पूर्व्वपदस्य-परम्परतया लाक्षणिकत्वात् ताभ्यां कर्म्मधारयो बलवान् सर्व्वेषां पदानां स्वार्थपरतया मुख्यत्वात् । अतएव "एत-यैव इष्ट्या निषादस्थपतिं याजयेत्" इत्यत्र कर्म्मधारय एव मुख्यत्वे शब्दस्वरसात् षष्ठीतत्पुरुषे च षष्ठ्यर्थे लक्षणा-पत्तेः" । वैयाकरणास्तु समासमात्रे विशिष्टार्थेऽतिरिक्तां शक्तिं कल्पयन्तस्तदस्वीकारे दोषं वर्णयन्ति यथा वैया०भू० "अपि च समासे विशिष्टशक्त्यस्वीकारे राजपुरुषश्चित्रगुः नीलोत्पलमित्यादौ सर्व्वत्रानन्वयप्रसङ्गः । राजपदादेः सम्बन्धिनि लक्षणायामपि तण्डुलः पचतीत्यादौ कर्म्म-त्वादिसंसर्गेण तण्डुलादेः पाकादावन्वयवारणाय प्राति-पदिकार्थप्रकारकबोधं प्रति विभक्तिजन्योपस्थितेर्हेतुताया आवश्यकत्वात् पुरुषादेस्तथात्वाभावात् । तण्डुलः शुभ्र इत्यादौ च प्रातिपदिकार्थकप्रथमार्थे तण्डुलादेस्तस्य च शुक्ले अभेदेनैवान्वयः । शुभ्रेण तण्डुलेनेत्यादौ च विशे-षणविभक्तिरभेदार्था पार्ष्णिकोवान्वय इति नातिप्रसङ्गः । तथा च समासे परस्परमन्वयासम्भवादावश्यिकैव समुदायस्य तादृशे विशिष्टार्थे शक्तिः" । "तन्मतसूक्तरीत्या सर्व्वत्र समासे शक्तिरस्तु च तथाविग्रहस्तथापि षष्ठीतत्पुरुषकर्म्मधारययोः शक्तिमत्त्वाविशेषान्निषादस्थपत्यधिकरणसिद्धान्तसिद्धिर्न स्यात् इत्यत आह । "पर्य्यवस्यच्छाब्दबोधावदूरप्राक्क्षणस्थिते । शक्तिपक्षेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम्" ।

"पर्य्यवस्यंश्चासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्क्षणश्च तदानीन्तनलाघवमादायाधिकरणविरोध इत्यर्थः । अयं भावः—निषादस्थपतिपदं समासशक्तिपक्षे निषादरूपे निषादानाञ्च स्वपतौ निषादस्वामिके पुरुषान्तरे चेत्येवं सर्व्वत्र शक्तत्वान्नानार्थकम् । तथा च "नानार्थे तात्पर्य्या-द्विशेषावगतिः" इति न्यायेन तत्कल्पनायां पदद्वये पूर्व्वोप-स्थितार्थे एवोपस्थित्यादिलाघवात् तत्कल्पनमिति । परे-षामपि सति तात्पर्य्ये वृत्तेः प्रवेशयेतिवक्ष्यमाणादुर्व्वा-रत्वात्तात्पर्य्यमेव कल्प्यकोटौ अवशिष्यत इति दिक्" । "पुंवत्कर्म्मधारयजातीयदेशीयेषु" "तत्पुरुषेऽसञ्ज्ञकर्म्म-धारयः" पा० । "द्वन्द्वोद्विगुरपि चाहं सततमव्ययीभावः । तत्पुरुष ! कर्म्मधारय येन स्यां सदा बहुव्रीहिः" उद्भटः ।

कर्म्मन् पु'न० कृ—कर्म्मणि मनिन् सर्व्वधात्वादि०पा० अमरे तु न० । व्याकरणपरिभाषिते कर्त्तुः क्रियाफलाश्रयतयाभी-प्सिततमे पदार्थे "कर्त्तुरीप्सिततमं कर्म्म" पा० । व्या-ख्यातञ्चैतत् सि०कौ० यथा—

“कर्त्तुः क्रियया आप्तुमिष्टतमङ्कर्मसंज्ञं स्यात्। कर्त्तुः किम्? माषेष्वश्वं बध्नाति। कर्मण ईप्सिता माषा न तु कर्त्तुः। तमब्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते। कर्मेत्यनुवृत्तौ पुनःकर्मग्रहणमाधारनिवृत्त्यर्थम्, अन्यथा गेहं प्रविशतीत्यत्र न स्यात्”। विवृतञ्चैतदस्माभिः सरलायां यथा कर्त्तुरित्यादि। कर्त्राप्तुमिष्यमाणं कर्मेत्यर्थः। “धातूपात्तव्यापाराश्रयः कर्त्ता” इति वक्ष्यते। आप्तिश्च सम्बन्धः, स च कर्तृविशेषणीभूतक्रियारूपव्यापारद्वारकएवानुपस्थितकल्पने मानाभावात्, एवञ्च कर्त्रा स्वनिष्ठक्रियारूपव्यापारप्रयोज्यफलेन सम्बद्धुमिष्यमाणं कर्मेत्यर्थः, तदेतदाह कर्त्तुः क्रियया आप्तुमिति। क्रियया धातूपात्तव्यापारेण, आप्तुं धातूपात्तफलद्वारा सम्बन्धुम्। फलव्यापारयोर्धातूपात्तत्वन्तु “फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः” इत्यनेन सिद्धम्। तच्च कर्म सप्तविधम्, यथोक्तं हरिणा “निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्। तच्चेप्सिततमं कर्म चतुर्द्धान्यत्तु कल्पितम्। औदासीन्येन यत् प्राप्यं यच्च कर्त्तुरनीप्सितम्। संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्” इति। तत्र निर्वर्त्त्यादीनां लक्षणादिकमपि तेनैवोक्तं यथा—“यदसज्जायते सद्वा जन्मना यत्प्रकाशते। प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा। तन्निर्वर्त्त्यं विकार्यञ्च कर्म द्वेधा व्यवस्थितम्। प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत्। किञ्चित् गुणान्तराधानात् सुवर्णादिविकारवत्। क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते” इति, “सती वा विद्यमाना वा प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्त्यत्वं प्रचक्षते” इति च। तदयं लक्षणनिष्कर्षः-प्रकृतिवाचकपदासमभिव्याहृतपदोपस्थाप्यत्वे सति क्रियाजन्योत्पत्तिरूपफलवत्त्वं निर्वर्त्त्यत्वम् यथा घटं करोतीत्यादौ घटादेः क्रियाजन्योत्पत्तिमत्त्वान्निर्वर्त्त्यत्वम्। प्रतीयमानप्रकृतिविकृतिभावत्वे सति क्रियानिर्वाह्यविशिष्टसत्त्वोत्पत्तिरूपान्यतरफलवत्त्वं विकार्य्यत्वम्, यथा सुवर्णं कुण्डलं करोतीत्यादौ सुवर्णस्य पूर्वरूपविशिष्टसत्त्वफलवत्त्वात् कुण्डलस्य चोत्पत्तिमत्त्वादुभयोरपि विकार्य्यत्वम्। क्रियाकृतासाधारणधर्मप्रकारकप्रतीतिविषयतानाश्रयत्वे सति क्रियाजन्यफलवत्त्वे नोद्देश्यत्वम्, प्राप्यत्वं यथा ग्रामं गच्छतीत्यादौ ग्रामादेः कर्त्तृसाधारणसंयोगरूपफलवत्त्वेऽपि क्रियाकृतश्रमादिरूपासाधारणविशेषफलस्यानाधारत्वेन तादृशफलप्रकारकबोधाविषयत्वात् प्राप्यत्वम्। निर्वर्त्त्यविकार्य्ययोस्तु क्रियाजन्योत्पत्त्यादिफलस्य कर्ममात्रनिष्ठतया असाधारण्येन तद्वत्त्वान्नातिप्रसङ्ग इति बोध्यम्। कर्त्तुरनुद्देश्यत्वे सति क्रियाजन्यफलवत्त्वम्, औदासीन्य प्राप्तं यथा ग्रामं गच्छन् तृणं स्पृशतीत्यादौ तृणादेरनुद्देश्यत्वेऽपि क्रियाजन्यसंयोगरूपफलवत्त्वेनोदासीनकर्मता। द्विष्टसाधनत्वे सति क्रियाफलवत्त्वं, द्वेष्यं यथा अन्नं बुभुक्षुर्विषं भुङ्क्ते इत्यादौ विषस्य तथात्वम्। कारकविशेषसंज्ञान्तरेणाविवक्षितत्वे सति कर्मोपकारकत्वम्, संज्ञान्तरैरनाख्यातत्वम् यथा गां पयो दोग्धीत्यादौ गवादेः कारकान्तरसंज्ञया अविवक्षया दुग्धोपयोगितया कर्मत्वम्। व्यक्तीभविष्यति चेदमुपरिष्टात्। कारकान्तरसंज्ञापूर्व्वकत्वं यथा ‘जलधिमधिशेते’ इत्यादौ जलधेराधारसंज्ञकतया प्राप्तत्वेऽपि ‘अधिशीङ्स्थासां कर्म” पा० इत्यादिनाकर्मसंज्ञया कर्मत्वम्। पयसेति भुजिक्रियां प्रति पयसः प्रकृष्टोपकारकत्वविवक्षायां तस्येप्सिततमत्वात् पयः पिबतीति स्यादेव। इह तु तथा विवक्षाविरहेणान्नभोजनं प्रति तस्याङ्गतया करणत्वमात्रं विवक्षितमिति न ओदनस्य कर्मत्वम्। सहार्थे तृतीयेति तु न्याय्यम्, तस्याप्रधानत्वात्तमपा बोधयितुमशक्यत्वात्” ।

कर्मताबोधनप्रकारलक्षणादिक शब्द०प्र० अन्यथोक्तं यथा “यगन्तधातोरर्थोयस्तिङा स्वार्थेऽनुभाव्यते। यत्रासौ कर्मता नाम कारकं कर्तृतेतरः” यगन्तस्य यद्धातोरुत्तरस्थतिङा यत्र स्वार्थे तदीयोयाद्दशोऽर्थोऽनुभावयितुं शक्यते, तद्धातूपस्थाप्यतादृशक्रियायां स तिङर्थः कर्तृताभिन्नः कर्मत्वं नाम कारकमित्यर्थः। ग्रामोगम्यत इत्यत्र गमधातूपस्थाप्यायाः संयोगावच्छिन्नक्रियायाः स्वजन्यत्वसम्बन्धेन तिङ्पदोपस्थाप्ये संयोगे एवान्वयो न तु त्यज्यत इत्यादाविव विभागादौ धात्वर्थतावच्छेदकस्यैव फलस्य बोधने कर्मविहितप्रत्ययानां धातुसाकाङ्क्षत्वादतः संयोगस्यैव तत्र गतिक्रिया कर्मत्वं नतु विभागादेः, तेन तरोस्त्यागिनि खगे तरुं गच्छतीत्यादिकोन प्रयोगः। गम्यते रथः स्वयमेवेत्यादौ (गम्यत इति त्वनुशासनविरुद्धं कर्त्तृस्वभावकतया कर्मवत् क्रियाया अप्रसक्तेः)। कर्मत्वमिवानुकूलव्यापारवत्त्वलक्षणं कर्त्तृत्वं धात्वर्थस्य धर्म्मोऽपि न तत्कर्तृताभिन्नमिति तद्व्युदासः। ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्रामइव चैत्रेऽपि सत्त्वाच्चैत्रेण गम्यते चैत्र इत्यपि प्रयोगः स्यात्, तिङर्थसंयोगस्य जन्यत्वस्वाश्रयप्रतियोगिकत्वोभयसम्बन्धेन धात्वर्थगतेः साकाङ्क्षत्वेन चैत्रकर्तृकगत्याश्रयप्रतियोगिकत्वविशिष्टस्य संयोगस्य चैत्रे बाधितत्वात्। अतएव चैत्रोग्रामं गच्छति

इतिवत् चैत्रश्चैत्रं गच्छतीत्यपि न प्रयोगः, तत्रापि द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिकत्वसम्बन्धेनैव साकाङ्क्षतया द्वितीयान्तसभ्यस्य चैत्रीयत्वविशिष्टसंयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव क्रियायामन्वयेन चैत्रप्रतियोगिकसंयोगाश्रयवृत्तिगतेश्चैत्रे बाधितत्वात्। यत्तु फलमिव क्रियायामप्यिदं परसमवेतत्वमपि कर्मताख्यवाचिप्रत्ययस्यार्थः, परन्तु तिङां स्वार्थफलान्वयिप्रतियोगिकं, द्वितीयादिरूपा तु प्रकृत्यर्थप्रतियोगिकं प्रत्याय्यते तथा च चैत्रकर्तृकस्य चैत्रान्यसमवेतगमनस्याप्रसिद्धत्वेन चैत्रे तज्जन्यसंयोगस्यासम्भवाच्चैत्रेण गम्यते चैत्र इत्यादिकोन प्रयोगः। एवं चैत्रान्यसमवेतस्य चैत्रे बाधाच्चैत्रश्चैत्रं गच्छतीत्यादिरपि। चैत्रेण गम्यते ग्राम इत्यादौ तु चैत्रकर्तृकस्य ग्रामभिन्नसमवेतस्य गमनस्य जन्यो यः संयोगस्तद्वान् ग्राम इत्यन्वयबोधनेन किञ्चिद्बाधकमिति प्राच्यैरुक्तं तन्न युक्तम्, संख्याकालातिरिक्तस्य तिङर्थस्य धात्वर्थविशेष्यत्वनियमेन तिङर्थस्य परसमवेतत्वादेर्धात्वर्थगत्याद्यन्वयायोगात् प्रथमान्तोपस्थाप्यग्रामादेरभेदान्यसम्बन्धेनान्यत्र प्रत्ययार्थे तिङर्थे वान्वयस्यादृष्टचरत्वेनाव्युत्पन्नत्वात्, चैत्रेण गम्यते द्रव्यं, द्रव्यं गच्छति चैत्र इत्यादौ द्रव्यान्यसमवेतस्य गत्यादेरप्रसिद्धत्वेनायोग्यतापत्तेश्च। नव्यास्तु फलमिव भेदोऽपि कर्मत्ववाचिप्रत्ययस्यार्थस्तथा च चैत्रेण गम्यते ग्राम इत्यत्र तिङर्थभेदस्य सामानाधिकरण्यसम्बन्धेन धात्वर्थविशेष्यत्वात् प्रतियोगित्वसम्बन्धेन प्रथमान्तार्थे ग्रामादौ विशेषणत्वाच्च व्युत्पत्तिविरोधो नवातिप्रसङ्गः चैत्रकर्तृकगमनाश्रयवृत्तिभेदप्रतियोगित्वस्य चैत्रे विरहात् चैत्रं गच्छतीत्यादावपि प्रतियोगित्वसम्बन्धेन चैत्रान्वितस्य द्वितीयार्थभेदस्य सामानाधिकरण्यसम्बन्धेन धात्वर्थगतावन्वयात्तादृशगतेश्चैत्रे बाधाच्चैत्रं गच्छति चैत्र इत्यादिकोन प्रयोगः। प्रतियोगिता च उभयावृत्तिधर्मावच्छिन्नं धर्मद्वयानवच्छिन्नं वा ग्राह्यमतो द्रव्यं गच्छतीत्यादौ गतौ द्रव्यभेदसामानाधिकरण्यविरहेऽपि न क्षतिरिति प्राहुस्तच्चिन्त्यम्। वृक्षं खगस्त्यजतीत्यादौ विभागावच्छिन्नक्रिया त्यजेरर्थः द्वितीयायास्तु विभागस्तेन वृक्षावधिकविभागवती या विभागावच्छिन्नक्रिया तद्वान् खग इत्याकारकस्तत्र बोधः। वृक्षावधिकविभागवत्त्वञ्च जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव क्रियायां ग्राह्यमतः खगाद्यवधिकविभागस्य खगादावसत्त्वात् खगं त्यजति खग इत्यादिकोन प्रयोगः। खगेन त्यज्यते खग इत्यपि प्रयोगः प्रागुक्तरीत्या निरसनीयः। प्राञ्चस्तु ग्रामं गच्छति त्यजतीत्यादौ सर्वत्र क्रियामात्रं धात्वर्थस्त्यजिगम्योः पर्यायत्वेऽपि न क्षतिः, गम्यर्थक्रियायां संयोगस्यैव त्यज्यर्थक्रियायाञ्च विभागस्यैव बोधकतायाः कर्मप्रत्ययेषु व्युत्पन्नत्वात् तरुं त्यजतीत्यादौ संयोगस्य तरुं गच्छतीत्यादौ च विभागस्य द्वितीयादितो नावगमः परैरपि समभिव्याहृतधात्वर्थतावच्छेदकफलस्यैव द्वितीयादिबोध्यताव्युत्पत्तेरभ्युपेतव्यत्वात् अन्यथातिप्रसङ्गात्। नचैवं स्पन्दोन स्पन्द इत्यादेरिव त्यागोन गतिरित्यादेरपि वाक्यस्य निराकाङ्क्षतापत्तिस्तत्र त्यजिगम्योर्विभागाद्यवच्छिन्नक्रियावाचकत्वेनैवान्वययोग्यत्वासम्भवात्। द्वितीयासाकाङ्क्षतुमन्तधातुत्वप्रयुक्तएव च धातूनां सकर्मकत्वव्यवहारोनतु फलावच्छिन्नक्रियावाचित्वप्रयुक्तः ग्रामं स्पृशतावव्याप्तत्वात्। स्पृत्यर्थधातूनां कर्मणि षष्ठ्या इव द्वितीयाया अपि साधुत्वात्। एवञ्च ग्रामं गच्छति तरुं त्यजतीत्यादौ ग्रामसंयोगजनकक्रियावांस्तरुविभागजनकक्रियावानित्याकारक एव बोधो नतु ग्रामसंयोगजनकसंयोगावच्छिन्नक्रियावांस्तरुविभागजनकविभागावच्छिन्नक्रियावानित्याकारकः, संयोगविभागयोरुभयथाभानस्य नीलघटजनकदण्डवानित्यादौ घटादेरिव निराकाङ्क्षत्वेनासम्भवादनुभवबाधितत्वाच्चेत्याहुः। परे तु संयोगः क्रिया च द्वयमेव प्रत्येकं गमिशक्यं तयोर्जन्यजनकभावस्तु वाक्यार्थमर्यादया भासते एवार्थयोरन्ययोगव्यवच्छेदयोरिव, गम्यर्थयोः संयोगक्रिययोर्मिथएव साकाङ्क्षत्वाच्च नैकमात्रे गमिप्रयोगः। पुष्पवन्तपदे चन्द्रत्वसूर्यत्वाभ्यामिव विभिन्नरूपाभ्यां प्रकृतेऽपि संयोगत्वक्रियात्वाभ्यां गमधातोरेकशक्तिस्वीकारेऽपि न क्षतिः। इयांस्तु विशेषो यत्तत्र सूर्यशशिनोर्मिथोनान्वयः भवति तु संयोगक्रिययोस्तथेति तथाच ग्रामं गच्छतीत्यत्र द्वितीयाया आधेयत्वं प्रतियोगित्वं वार्थस्तेन तदन्वितस्य संयोगस्य क्रियायामन्वयात् ग्रामवृत्तिस्तत्प्रतियोगिकोवा यः संयोगस्तद्विशिष्टक्रियावानित्याकारकस्तत्र बोधः, तरुं त्यजतीत्यत्राप्याधेयत्वमवधित्वं वा द्वितीयार्थस्तेन तदन्वितस्य धात्वर्थविभागस्य धात्वर्थान्तरे क्रियायामन्वयात्तरुवृत्तिस्तदवधिकोवा योविभागस्तद्विशिष्टक्रियावानित्याकारकोबोधः संयोगादिवैशिष्ट्यञ्च जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव ग्राह्यम् अतो नातिप्रसङ्गः। सकर्मकत्वमपि धातोः स्वार्थफलावच्छिन्नस्वार्थक्रियान्वयबोधकत्वं जानातीत्यादौ सकर्मकत्वव्यवहा-

रोमान्त इत्याहुः। (फलव्यापारयोर्धातुरित्यनुसारिणः)

तण्डुलं पचतीत्यत्र रूपादिपरावृत्तिफलकतेजःसंयोगावच्छिन्नक्रिया पचेरर्थः, तन्निविष्टे च निरुक्ते तेजःसंयोगे तण्डुलस्याधेयत्वेनान्वयः परमाणुं पचतीत्यपि प्रयुज्यत एव अत एव "स्वतन्त्राः परमाणवः पच्यन्ते" इति किरणावल्यामाचार्य्याः। ओदनं पचतीत्यादौ तु तण्डुलादावोदनादिपदस्य लक्षणा तत्र क्रियायामन्वितमनुकूलत्वं द्वितीयार्थ इत्यपि कश्चित्। वृक्षं छिनत्तीत्यादावारम्भकसंयोगविरोधिविभागावच्छिन्नक्रिया छिदेरर्थस्तन्निविष्टे च संयोगे विभागे वा स्वाश्रयवृत्तित्वसम्बन्धेन वृक्षादेरन्वयः। पुष्पेण विष्णुं यजतीत्यत्र प्रीत्यवच्छिन्नसमन्त्रकद्रव्यत्यागो यजेरर्थः, प्रीतौ विष्णोराधेयत्वेन द्रव्ये च पुष्पादेरभेदेनान्वयस्तेन विष्णुनिष्ठप्रीतिहेतुर्यो मन्त्रकरणकः पुष्पाभिन्नद्रव्यत्यागस्तद्वान् इत्याकारस्तत्र बोधः, स्वत्वध्वंसजनकेच्छापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्व एव वा पुष्पादेराधेयत्वेन तत्रान्वयस्तेन द्रव्येण विष्णुं यजतीत्यादौ द्रव्यस्य द्रव्याभिन्नत्वेन साकाङ्क्षत्वेऽपि न क्षतिः। पितरमाराधयति उपास्ते पूजयतीत्यादौ गौरवप्रयुक्तप्रीत्यवच्छिन्नक्रिया धात्वर्थस्तन्निविष्टयोर्गौरवप्रीत्योः क्रमेण विषयत्वाधेयत्वाभ्यां पित्रादेरन्वयस्तेन पितृगोचरगौरवप्रयुक्ता या पितृनिष्ठप्रीतिहेतुक्रिया तद्वानित्येवं तत्र बुद्धिः। गौरवं पुनराराध्यत्वावगाही ज्ञानप्रभेदो येयं भक्तिरित्युच्यते। पित्रादिसेवायाश्च मन्त्रकरणकत्वाभावान्न तत्र पितरं यजतीत्यादिकः प्रयोगः। परमात्मानमुपास्ते इत्यादौ तु गौरवप्रयुक्तक्रियामात्रे धातुर्लक्षणा नातः परमेश्वरे प्रीतिविरहादयोग्यत्वापत्तिः। घृतं जुहोतीत्यादौ वह्न्यादिकरणकपतनावच्छिन्नमन्त्रकरणकक्रिया हुधातोरर्थः, प्रोक्ते च पतने घृतस्याधेयत्वेनान्वयस्तेनाग्न्याधिकरणकस्य घृतवृत्तिपतनस्यानुकूलमन्त्रकरणकक्रियावानित्येवं तत्र बोधस्तादृशी च क्रिया घृतस्य करादेः प्रसारणन्युब्जीकरणादिरेव। अत एव घृतादेः परित्यागित्वविरहादृत्विगादेर्न यष्टृत्वं किन्तु होतृत्वमेव। वह्नौ जुहोतीत्यत्र सप्तम्यन्तस्यार्थेन धात्वर्थनिविष्टे पतनेऽन्वेति वह्निवृत्तित्वविशिष्टपतने तद्वृत्तितिङर्थस्यान्वये निराकाङ्क्षतापत्तेः परन्तु तदवच्छिन्नक्रियायामेव। प्रतिमादौ घृतादिस्नपनं मन्त्रकरणकमपि नाग्न्यधिकरणकं वह्नौ घृतस्य प्रक्षेपमात्रमग्न्यधिकरणकतत्पतनानुकूलमपि न मन्त्रकरणकमतस्तदुभयं न होमः। प्राजापत्येऽपि होमे मानस एव मन्त्रः करणम्। यद्वा वह्निसंयोगावच्छिन्नपतनानुकूलमन्त्रकरणकक्रियैव जुहोत्यर्थस्तेन घृतं जुहोतीत्यत्र वह्निसंयोगजनकं यद् घृतस्य पतनं तदनुकूलमन्त्रकरणकक्रियाविशेषवानित्याकारको बोधः। न चैवं हुधात्वर्थतावच्छेदकीभूतसंयोगात्मकफलशालित्वेन वह्न्यादेस्तदर्थकर्म्मतया वह्निं जुहोतीत्यादिकप्रयोगापत्तिः साक्षाद्धात्वर्थतावच्छेदकीभूतस्यैव फलस्याश्रयिणः कर्मत्वादन्यथा गगने लोष्ट्रमुत्क्षिपतीत्यादौ गगनादेरुत्क्षेपणादिकर्मतयाऽध्याहारतापत्तेः ऊर्द्ध्वसंयोगफलकक्रियावच्छिन्नव्यापारस्यैवोत्क्षेपणत्वात्। न चोत्क्षेपणत्वादिकं जातिरेव तत्र धात्वर्थतावच्छेदकम्, प्रवेशनत्वादिना सङ्करेण तस्य जातित्वायोगात् लोष्ट्रादेस्तत्कर्मत्वाप्रसङ्गाच्च। अत एव परम्परया दुहाद्यर्थतावच्छेदकीभूतबहिःक्षरणशालित्वेन पयःप्रभृतेस्तत्कर्मत्वसम्पत्त्यर्थम् "अकथितञ्च" इति सूत्रान्तरस्य प्रणयनमपि पाणिनेः सङ्गच्छते। धनं प्रतिगृह्णातीत्यत्र पुण्यार्थकदानजन्यस्वत्वस्य जनकः स्वीकारः प्रतिग्रह इति फलीभूतस्वत्ववत्तया धनस्य कर्मत्वं, विक्रयादेर्दानविशेषत्वेऽपि न तस्य पुण्यजनकत्वमतस्तल्लब्धस्य स्वीकारो न प्रतिग्रहः। ग्रामं क्रीणातीत्यत्र मूल्यदानजन्यस्वत्वस्य जनकः स्वीकारः, स्वत्वजनकं मूल्यदानमेव वा क्रयस्तत्फले च स्वत्वे ग्रामस्याधेयत्वेनान्वयस्तेन ग्रामनिष्ठस्य मूल्यदानजन्यस्वत्वस्यानुकूलस्वीकारवान्, ग्रामनिष्ठं यत्स्वत्वं तदनुकूलमूल्यदाता वेति तत्र बोधः। ग्रामं विक्रीणातीत्यत्र मूल्यग्रहणजन्यस्य परस्वत्वस्य जनकमूल्यग्रहणमेव वा विक्रयस्तेन ग्रामनिष्ठस्य मूल्यग्रहणजन्यपरस्वत्वस्यानुकूलो यो ग्रामस्य त्यागस्तद्वान्, ग्रामनिष्ठं यत् परस्वत्वं तदनुकूलमूल्यग्रहणवानिति वा तत्र बोधः। मूल्यञ्च पणपुराणादिकमेव राजनिर्दिष्टं नतु द्रव्यमात्रं तेन तिलादीन् दत्त्वा माषादीनां विनिमये विप्राणां तिलविक्रयादिदोषस्यानवकाश इत्युक्तमेव। नरकं पततीत्यत्र भोगावच्छिन्नं पातित्यमेव पतेरर्थस्तेन नरकभोगानुकूलपातित्यवानित्याकारकस्तत्र बोधः। नरकपतित इति द्वितीयातत्पुरुषोदाहरणमपि वृत्तिकारस्य, एतदभिप्रायकमेव पतनक्रियायास्तथात्वे तु नरके पततीत्यादिरेव युक्तः प्रयोगः। स्वर्गं गच्छतीत्यादौ स्वर्गादिपदस्येव प्रकृते नरकपदस्यापि तद्देशपरत्वात्। धनं लभते प्राप्नोतीत्यादौ स्वत्वावच्छिन्नो व्यापारो धात्वर्थः, तन्निविष्टे च स्वत्वे धनादेराधेयत्वेनान्वयः। ननु यगन्तधात्वर्थविशेष्यतापन्नक्रियाऽर्थीयटि

कर्मत्वं तदा दुहादेर्मुख्यकर्मत्वव्याप्तिः। गोमेन गौः पयोदुह्यतइत्यादौ गोपकर्त्तृकव्यापारजन्यं यत् पयःकर्मकमोचनं तद्वती गौरित्येवमन्वये मोचनबहिःक्षरणयोर्द्वयोरेव दुहधात्वर्थतावच्छेदकफलत्वेऽपि गौणं यन्मोचनरूपं तस्यैव कर्मत्वस्तिङाद्यैर्बोधनात् "गौणं कर्म दुहादिभ्यस्तिङाद्यैरभिधीयते" इति व्युत्पत्तेरतः प्रकारान्तरेण कर्मत्वं निर्व्वक्ति। यस्य धातोर्य्यदर्थे यः प्रकारीभूय भासते। द्वितीयया कारितोऽर्थस्तद्वा तत्कर्मतोच्यते। यद्धातोर्यादृशार्थे द्वितीयया यादृशः स्वार्थोऽनुभाव्यते तद्धात्वर्थक्रियायां तत्कर्मत्वम्। तञ्च गां दोग्धि पयइत्यादिप्रयोगात् पयःप्रभृतेरप्यक्षतम्। पाकं कुरुते इत्यादौ यत्ने प्रकारीभूतमपि विषयत्वं न यतेरर्थे। भजते ग्राममित्यादौ भूधात्वर्थे प्राप्तौ तथाभूतमपि संयोगत्वादिकं न तदर्थोत्पत्तौ प्रकारः। चौरं रुजन् पयः परिपकुर्व्वन्नित्यादावेव रुजादिधात्वर्थहिंसादेर्द्वितीयार्थकर्मतायां विशेष्यत्वं सुलभं यत्पानजादेर्णिजादिगणान्तर्गतत्वेन तदन्तधातोः कर्मणि षष्ठ्याः प्रतिषिद्धत्वात्। दिवः करणस्य कर्मत्वोपदेशात् अक्षान् दीव्यतीत्यत्र द्वितीयार्थः करणत्वमपि गौणकर्मत्वमेव, अतएवाक्षा दीव्यन्ते द्यूतकारैरित्यादौ क्रीड़ाकरणतायामेव विहितास्तिङादिकर्मप्रत्ययाः। दुहादयस्तु फलावच्छिन्नक्रियाहेतुव्यापारवाचित्वादेव द्विकर्मकास्तेन गां पयोदोग्धि गोपइत्यत्र दुहेर्मोचनानुकूलव्यापारोऽर्थइति तत्रत्यमोचने गोराधेयत्वेन पयसः कर्मत्वेनान्वयात् पयःकर्मताकं यद्गोवृत्तिमोचनं तदनुकूलव्यापारवान् इत्याकारकबोधस्तत्र बहिःक्षरणावच्छिन्नव्यापारोमोचनं तदनुकूलव्यापारोदोहनमतोधात्वर्थतावच्छेदकीभूतं बहिःक्षरणरूपं फलमादाय पयसोमोचनात्मकस्य तदादाय गोः कर्मत्वमवसेयम्। एवं शिष्यं धर्मं वदति, वक्ति, ब्रूते, उपदिशत्याचष्टे, इत्यादौ प्रतिपत्त्यवच्छिन्नव्यापारोवदप्रभृतिधात्वर्थ इति तन्निविष्टायां प्रतिपत्तौ शिष्यस्याधेयत्वेन धर्मस्य च विषयत्वेनान्वयाद्धर्मविषयिणी या शिष्यनिष्ठा प्रतिपत्तिस्तदनुकूलव्यापारवान् इत्याकारकोबोधस्तादृशव्यापारश्च धर्मः सेव्यतामित्यादिकोगुर्व्वाद्यभिलापः। मल्लं शतानि जयतीत्यत्र ग्रहणावच्छिन्नपराभवोजयतेरर्थः तथा च शतस्य ग्रहणानुकूलोयः मल्लकर्मकपराभवस्तत्कर्त्तेत्येवं तत्र बोधः. पराभवश्च तिरस्कारः। प्रजाः शतं दण्डयतीत्यत्र ग्रहणावच्छिन्नशासनं दण्डार्थस्तथा च शतग्रहणानुकूलं यत् प्रजानां शासनं तत्कर्त्तेत्येवं तत्र बोधः। शासनं नियन्त्रणम्। सुधां समुद्रं मथ्नातीत्यत्र उत्थानावच्छिन्नोन्मन्थनं धात्वर्थस्तेन सुधोत्थानानुकूलं यत्समुद्रस्योन्मन्थनं तत्कर्त्तेत्यर्थः। उन्मन्थनमालोड़नम्। पान्थं पन्थानं पृच्छतीत्यत्र अभिधानावच्छिन्नव्यापारः पृच्छा,तथाच पान्थनिष्ठं यत्पथोऽभिधानं तदनुकूलव्यापारवानित्येवं तत्र बोधः। अभिधानमभिलापस्तदनुकूलव्यापारश्च केन पथा गन्तव्यमित्यादिप्रश्नः। नृपमर्थं प्रार्थयते याचते भिक्षते इत्यादौ दानाय प्रेरणं धात्वर्थस्तथा च नृपनिष्ठं यदर्थस्य दानं तत्प्रेरणावानित्यर्थः। प्रेरणा प्रवर्त्तना, सा च दीयतामित्याद्यभिलापरूपा। ग्राममजां वहति नयतीत्यादौ गत्यवच्छिन्नव्यापारोवहिप्रभृतेरर्थस्तेन ग्रामकर्मकं यदजादिनिष्ठं गमनं तदनुकूलव्यापारवानित्येवं तत्र बोधस्तादृशव्यापारः प्रकृते गलरज्ज्वाकर्षणादिः। पुत्रं धर्ममनुशास्तीत्यादावनुशासनं देशनया प्रवर्त्तना, तथा च पुत्रनिष्ठस्य देशनया प्रवर्त्तनस्यानुकूलव्यापारवानित्यर्थः तथाविधोव्यापारः सन्ध्यां विधेहि अग्निमाधेहीत्याद्युपदेशरूपः। शाखां ग्रामाकर्षतीत्यत्र गतिहेतुकर्षणं धात्वर्थस्तेन ग्रामकर्मकं यच्छाखागमनं तदनुकूलविकर्षणवानित्यर्थः। विकर्षणं नम्रीकरणम्। गामवरुणद्धि व्रजमित्यत्र गतिप्रतिरोधहेत्वावरणमवरुधेरर्थस्तेन गोगतिप्रतिरोधस्यानुकूलं यद्व्रजस्यावरणं तत्कृतिमानित्यन्वयधीः। वृक्षं फलान्यवचिनोति इत्यत्र छिदाहेतुर्विघट्टनं चिनोतेरर्थस्तथा च फलकर्मकच्छिदानुकूलं यद्वृक्षस्य विघट्टनं चालनं तद्वानित्येवं तत्र बोधः। उत्क्षिपत्यादिकस्तु धातुः सफलक्रियाहेतुव्यापारवाच्यपि न दुहादिः। यदुक्तमभियुक्तैः "दुहिर्वदत्यर्थजिदाप्दण्डमन्थिपृच्छार्थनार्थौ नयनार्थशास्ति। कृषीरुधिर्वित्रञ्च तथार्थवृत्तौ द्विकर्मकोऽयं कथितो दुहादिः"। तथार्थवृत्तौ निरुक्ततच्च दर्थवृत्तौ। "गतिभोजनधीप्राप्तिशब्दार्थभौव्यधातुषु। कर्त्तृत्वं हेतुविहितण्यन्तेष्वेतेषु कर्मतेति" शाब्दिकस्मृतः, गोपान् गमयति, द्विजान् गमयति, द्विजान् भोजयति, गुरूननुज्ञापयति, शिष्यान् पाठयति, सुतान् स्नापयतीत्यादौ मूलधात्वर्थस्य कर्त्तृत्वलक्षणं गौणमेव कर्मत्वं द्वितीयार्थः। तथा च गोपकर्त्तृकगत्यनुकूलव्यापारवानित्याकारस्तत्र बोधः। पुत्रान् प्रीतिम् प्रापयतीत्यादौ च प्राप्तिर्न गतिः चैत्रोग्रामं भावयते, ग्रामस्य भावक

इत्यादौ प्रागुक्तस्य भक्षेः स्वार्थविहितण्यन्तस्य कर्त्तुः कर्म्मतानिरासाय णिच्च हेतुनिहितत्वमनुसृतम्।"हिंसाया-मेव भुज्यर्थभक्षेरेवं वहेरपि। ण्यन्तस्य कर्त्तुः कर्म्मत्वं क्रियया वाहनं यदि" इति स्मरणाद्भक्षयति मूषिकान् मार्जा-रम्, भक्षयति लतां छागमित्यादेरेव भक्षेः कर्त्तरि कर्म्मता न तु भक्षयत्योदनं भृत्येनेत्यादौ, भक्षयति प्रजाः परि-जनैः कुनृप इत्यादौ तु न भोजनं भक्षेरर्थः। वाह-यति रथमश्वान् सारथिः वाहयति गोणीं वृषभान् वा-हिक इत्यादावेव वाहयति भारं भृत्येन धनिक इत्यादौ स्वचेष्टया वाहकेन धनिकादिः। "हृक्रोस्तु कर्त्तुः क-र्म्मत्वं ण्यन्तत्वे स्याद्विभाषया। अभिवादिदृशोरेवमा-त्मनेपद इष्यते" इत्युक्तेर्हारयति कारयति वा पटं कुविन्देनेत्यत्रेव कुविन्दमित्यत्रापि कुविन्दस्य गौण कर्म्मत्वादागमः। तथा अभ्यवहारयत्योदनं तनयं तनयेन वा जननी, विकारयति चित्तं चित्तेन वा वसन्त इत्यपि प्रमाणम्। परन्तु पूर्व्वयोरप्राप्तावेतयोस्तु प्राप्तावेव कर्म्मत्वस्य वैकल्पिकोविधिः। गुरुमभिवादयते सुतं सुतेन वा गृहस्थः, भृत्यं दर्शयते भार्य्यां भार्य्यया वा पति-रित्यादौ तु द्वयोः प्राप्तावभिवादयतेरप्राप्तौ सः। अनात्मनेपदस्थले तु पन्थानं पथिकं दर्शयति, पुत्रेण मित्रमभिवादयतीत्यादौ यथाप्राप्तमेव कर्म्मत्वादिकम्। कांश्चिदर्थान् निर्णाययति, चैत्रेणौदनं खादयति, आदयति वा दारैः क्रन्दयति पुत्रेण मित्रमाह्वाययतीत्यादौ तु नीप्रभृतेर्वहाद्यर्थकत्वेन तत्कर्त्तुः कर्म्मत्वं प्रसक्तमपि "न नीखाद्यादिशब्दाय क्रन्दिह्वयतिषु कश्चित्। हेतुण्यन्तेषु कर्त्तृत्वं कर्म्मता स्यात्तङादिष्विति" भर्त्तृहरिवचनान्नि-षिध्यते। अत्र च कश्चित्तङादिष्वितिकथनाच्चैत्रेणार्थं निर्णाय्यमानस्तिष्ठति, मैत्रेण पूपं खाद्यमानोब्रूते इ-त्यादौ कर्म्मविहितयगानजादेर्नानुपपत्तिरिति वदन्ति। सुखं प्राप्नोतीत्यादौ प्राप्तिरुत्पत्तिः परम्परया तदा-श्रयत्वञ्च तिङर्थः। घटं जानातीत्यत्र विषयत्वं विष-यिता वा द्वितीयार्थः। दिवाकरस्तु संस्कारावच्छिन्नमेव ज्ञानं जानात्यर्थस्तत्स्थले मुख्यमेव कर्म्मत्वं घटादे-रित्याह तन्मन्दं ज्ञानमित्यादितः संस्काराप्रतीते-र्लाघवेन ज्ञानत्वस्यैव जानात्यर्थतावच्छेदकत्वात् घटस्योपे-क्षात्मकज्ञाने निर्विकल्पके वा घटं जानातीतिप्रयोगस्या-प्रसङ्गाच्च। अतएव प्राकट्यावच्छिन्नज्ञानमेव तत्र धा-त्वर्थ इति तत्त्वावच्छेदकीभूतज्ञाततावत्त्वादेव घटादेर्ज्ञान-

कर्म्मतेति भट्टमतमप्यनादेयं ज्ञानविषयतातिरिक्तायां ज्ञाततायां मानाभावादन्यथा ज्ञाततायाइव कृततादे-रप्यतिरिक्तायाः कल्पनापत्तेः। वह्निमनुमिनोमि व्यापा-दयामीत्यादौ विषयतानामको विषयताप्रभेदएव द्विती-यार्थः पर्व्वतोवह्निमानित्याद्यनुमितावापत्तौ वा पर्व्वत-मनुमिनोमीत्याद्यप्रयोगात् विषयतावच्छेदकत्वभिन्नप्रका-रत्वमेव तत्र द्वितीयार्थ इत्यपि वदन्ति। घटं पश्यति शब्दं शृणोत्यनुभवतीत्यादौ दर्शनाद्यर्थकधातुयोगे सा-क्षात्कारत्वनिरूपितमेव विषयत्वं कर्म्मत्वं घटादेरुप नीतचाक्षुषादौ तादृशाप्रयोगात्। आकाशं न पश्यती-त्यादौ पुनरन्वयोवक्ष्यते। तण्डुलपाकं करोतीत्यत्र चिकीर्षाजन्यतावच्छेदकः क्रियायामुद्देश्यताख्योविषयता-विशेष एव द्वितीयार्थः कृतौ भासते, तेन तण्डुलपा-कत्वप्रकारककृतेस्तण्डुलविषयत्वेऽपि पाकदशायां त-ण्डुलं करोतीत्यादिकोन प्रयोगः पाकदशायामोदनं करोतीत्यादौ च द्वितीयाया अनुकूलत्वे लक्षणा तण्डुला-दिकर्म्मकृतिस्तु नौदनादिजनिका प्रमाणाभावात्। वर्त्त-मानस्तु कृत्स्थले धातुना उत्पत्त्यनुकूला कृतिरुच्यते इति तत्रौदनस्य मुख्यमेव कर्म्मत्वमतएव यत्र कृतिमात्रं धात्व-र्थस्तत्र न द्वितीया यथा घटाय यतत इत्यादावित्याह तच्च कृत्यादिपदाद्यत्नमात्रप्रतीत्या यत्नत्वावच्छिन्नस्यैव करोत्यर्थत्वात्। मीमांसार्णवे तु पाककृतौ तण्डु-लादेरुपादानविधयैव फलविधयौदनादेरपि विषयत्व-मुक्तं यदाह वल्लेश्वरः "सिद्धं साध्यं फलञ्चेति प्रवृत्ते-र्विषयस्त्रिधा। तत्र सिद्धमुपादानं क्रिया साध्यं फलं सुखमिति" तथा च तन्मते तण्डुलपक्तृदशायामोदनं करोतीत्यादिप्रयोगे फलत्वेन विषयतैव द्वितीयार्थः। मासं जीवति, क्रोशं स्वपिति, गोदोहं तिष्ठति, कुरून् क्रीडतीत्यादावधिकरणत्वं गौणमेव कर्म्मत्वं सुपाऽनु-भाव्यते "कालानामध्वमानानां क्रियाणां नीवृतामपि। आधारता ध्रौव्यधातोः कर्म्मता स्याद्विभाषयेति स्मृतेः"। "कर्म्मणि द्वितीया" "कर्म्मण्यण्" पा०। सकर्म्मकः अकर्म्मक इत्यादि। २वैशेषिकमतसिद्धे मूर्त्तद्रव्याश्रिते क्रियारूपे पदार्थभेदे। तल्लक्षणादि कणादसूत्रवृत्त्योर्दर्शितं यथा— "एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्म्मल-क्षणम्" सू० "गुणानन्तरमुद्दिष्टस्य कर्म्मणोलक्षणमाह एकमेव द्रव्यम् आश्रयो यस्य तदेकद्रव्यं न विद्यते गुणो-ऽस्मिन्नित्यगुणं, संयोगविभागेष्वनपेक्षकारणमिति स्वोत्

पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षमित्यर्थः तेन समवायिकारणापेक्षायां पूर्व्वसंयोगाभावापेक्षायाञ्च नासिद्धत्वम् स्वोत्पत्त्यनन्तरोत्पत्तिकानपेक्षत्वं वा विवक्षितं पूर्वसंयोगध्वंसस्य स्वोत्पत्त्यनन्तरानुत्पत्तिकत्वात् अभावत्वेन तस्य व्यवच्छेद्यसम्बन्धाभावात् । नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्मत्वं, चलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वं वा, गुणान्यनिर्गुणमात्रवृत्तिजातिमत्त्वं स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिविभागकारणतावच्छेदकजातिमत्त्वं वा । स चायं चलतीति प्रत्ययसाक्षिकः पदार्थो नाविरलदेशोत्पादनादिनोपपाद्यः क्षणभङ्गस्यापि निराकरिष्यमाणत्वात् । लक्षणस्य इतरभेदसाधकताप्रकारः पूर्व्वोक्त एव” उपस्कृ० “संयोगविभागवेगानां कर्म समानम्” सू०। “कचिदेकस्य कर्मणोऽनेककार्य्यकारित्वमाह, कारणमित्यनुषङ्गः यत्र द्रव्ये कर्मोत्पन्नं तेन समं यावद्द्रव्यं संयुक्तमासीत् तावत्सङ्ख्यकान् विभागान् जनयित्वा तावतः संयोगानपि पुनरन्यत्र जनयति वेगं पुनरेकमेव स्वाश्रये करोति वेगपदं स्थितिस्थापकस्याप्युपलक्षयति” उपस्कृ० “न द्रव्याणां कर्म” सू० । “ननु क्रियावता द्रव्येणारम्भकसंयोगे जनिते तेन च द्रव्यमारब्धं यत्तदपि कर्मजन्यमेव कर्मणस्तत्पूर्व्ववर्त्तित्वादत आह कर्म द्रव्याणां न कारणमित्यर्थः । कुत एवमत आह” उपस्कृ० “व्यतिरेकात्” सू० । “व्यतिरेकादिति निवृत्तेरित्यर्थः उत्तरसंयोगेन कर्मणि विनष्टे द्रव्यमुत्पद्यते इति न कर्मणो द्रव्यकारणत्वं विनश्यदवस्थस्य कर्म न द्रव्यकारणम् । किञ्च कर्म द्रव्यस्यासमवायि कारणं वा अपेक्षिनिमित्तकारणं वा, न तावदाद्यः, द्रव्यस्यासमवायिकारणनाशनाश्यत्वेन अवयवकर्मनाशादेव द्रव्यनाशापत्तेः। न द्वितीयः, महापटनाशेऽवस्थितसंयोगेभ्य एव खण्डपटोत्पत्तौ निष्कर्मणामेवावयवानां द्रव्यारम्भदर्शनाद्व्यभिचारात्” उपस्कृ० । “गुणवैधर्म्यान्न कर्मणां कर्म” सू० । ‘ननु यथा द्रव्याणां द्रव्यं कार्य्यं गुणानाञ्च गुणस्तथा किं कर्मणामपि कर्म कार्य्यम् ? इत्यत आह · कार्य्यमिति शेषः द्रव्यगुणयोः सजातीयारम्भकत्वं साधर्म्यमुक्तं “तत्र कर्म कर्मसाध्यं न विद्यते” इति सूत्रेण कर्मणां कर्मजनकत्वं प्रतिषिद्धमेव तदिहानूद्यते इति भावः” उपस्कृ० । “असमवायात् सामान्यकार्य्यं कर्म न विद्यते” सू० “असमवायादित्यत्र द्रव्ययोर्द्रव्येषु इति योज्यं, तथा च न द्रव्ययोरेकं कर्म समवैति न वा द्रव्येष्वेकं कर्म समवैति तेन सामान्यस्य अदायस्य कार्य्यं कर्म न विद्यते । अत्रापि निर्दिष्टनाशो न मत्तावचन: यदि कर्म व्यासज्यवृत्ति स्यात् ! एकस्मिन् चलति, द्वयोर्द्रव्ययोर्बहुषु च द्रव्येषु चलतीति प्रत्ययः स्यात् ! नचैतत् ,तस्मान्न कर्म व्यासज्यवृत्तीत्यर्थः। ननु शरीरतदवयवानां कर्म शरीरतदवयवैर्बहुभिरारभ्यत एव कथमन्यथा शरीरे चलति करचरणादावपि चलतीति प्रत्ययः, एवमन्यत्राप्यवयविनीति चेन्न अवयविकर्मसामग्र्या अवयवकर्मसामग्रीव्याप्तत्वात् तथोपलब्धेः न तु वैपरीत्यम्, नह्यवयवे चलति सर्वत्रावयविनि चलतीति प्रत्ययः अन्यथा कारणाकारणसंयोगात् कार्य्याकार्य्यसंयोगोऽपि न स्यात्,कारणकर्मणैव कार्य्यस्यापि संयोगोपपत्तेः” उपस्कृ० “ननु मूर्त्तगुणानां कार्य्याणां कारणगुणपूर्वकत्वं स्वाश्रयगुणपूर्व्वकत्वञ्चोक्तं द्रव्यकर्मणोश्च न कर्म कारणमित्युक्तं, तथा च कर्मणः किमपि न कार्य्यमित्यायातं, तथाचातीन्द्रियाणां सूर्य्यादिगतीनाम् अनुमानमपि दुर्लभं,लिङ्गाभावात् अत: संयोगविभागवेगानां कर्मेति सूत्रोक्तमेव स्मारयन्नाह “संयोगविभागाश्च कर्मणाम्” सू० “जन्या इति शेषः व्यक्त्यभिप्रायेण बहुवचनं संस्कारोऽप्युपलक्षणीयः । ननु द्रव्यकर्मणी न कर्मकार्य्ये इति पूर्वमुक्तम्, संयोगविभागौ तु संयोगविभागकार्यावेव, तथा चेदानीं कर्मणः कारणत्वाभिधानं विरुद्धमित्यत आह’ उपस्कृ० । ‘कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम्” सू० । “कारणसामान्यपदेन तत्प्रकरणमुपलक्ष्यते तेन कारणसामान्याभिधानप्रकरणे द्रव्यकर्मणो प्रति कर्मणोऽकारणत्वमुक्तं न तु सर्वथाप्यकारणमेव कर्मेति विवक्षितं येन “संयोगविभागाश्च कर्मणामिति” सूत्रं व्याहन्येतेति भावः” उपस्कृ० ।

तच्च कर्म पञ्चविधम् “उत्क्षेपणं तथावक्षेपणमाकुञ्चनं तथा । प्रसारणञ्च गमनं कर्माण्येतानि पञ्च च” भाषा० अत्रेदं बोध्यम् । न्यायमतार्थकत्ववादिमतेऽस्य यत्नार्थकधातुनिष्पन्नत्वेऽपि उक्तलक्षणक्रियामात्रे रूढत्वं न तु यौगिकत्वम् । तच्च कर्त्तृशब्दे प्रदर्शिते कर्मादिशब्दवत् कर्त्तृपदस्य रूढत्वप्रतिपादनपरे शब्दचि०वाक्ये उक्तम् । तत्र उत्पत्त्यनुकूलव्यापारमात्रार्थकत्ववादिमते तु यौगिकत्वमिति भेदः। व्याकरणमते श्व्यापारमात्ररूपक्रियायाम् “व्यापारोभावना सैवोत्पादना सैव च क्रिया । कृञोऽकर्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते” इति हरिणा

तज्जोयत्वार्थकत्वनिरासेन कर्मपर्य्यायक्रियाशब्दस्य व्यापारार्थकत्वस्योक्तेः। क्रिया च धातुप्राप्यव्यापारभेदः अधिकं क्रियाशब्दे वक्ष्यते ।४शास्त्रविहिते अग्निहोत्रादियागादौ तच्च त्रिविधम् "नित्यं नैमित्तिकं काम्यं कर्म चैवं त्रिधा मतम्"इति व्यासोक्तेः। तत्र नित्यमकरणे प्रत्यवायानुबन्धि सन्ध्यावन्दनादि। नैमित्तिकं निमित्तनिश्चयाधीनकर्त्तव्यताकं जातेष्ट्यादि । काम्यं कामनावत्कर्त्तव्यमश्वमेधादि । पुनः प्रकारान्तरेण तत्त्रिविधं सात्त्विकराजसतामसभेदात् । तल्लक्षणान्युक्तानि गीतायां यथा "नियतं सङ्गरहितमरागद्वेषतः कृतम् । अफलप्रेप्सुना कर्म्म यत्तत् सात्त्विकमुच्यते १ । यत्तु कामेप्सुना कर्म्म साहङ्कारेण । वा पुनः । क्रियते बहुलायासं तद्राजसमुदाहृतम् २। अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् । मोहादारभ्यते कर्म्म तत्तामसमुदाहृतम्"३ । "नियतं नित्यतया विहितं, सङ्गरहितमभिनिवेशशून्यम् । अरागद्वेषतः पुत्रादिप्रीत्या वा शत्रुद्वेषेण वा यत् कृतं न भवति फलं प्राप्तुमिच्छतीति फलप्रेप्सुस्तद्विलक्षणेन निष्कामेण कर्म्म यत् कृतं कर्म्म तत् सात्त्विकमुच्यते १। यत्तु कर्म कामेप्सुना फलं प्राप्तुमिच्छुना साहङ्कारेण वा मत्समः कोऽन्यः श्रोत्रियोऽस्तीत्येव निरूढाहङ्कारयुक्तेन च क्रियते तच्च पुनर्बहुलायासमतिक्लेशयुक्तम् तद्राजसमुदाहृतम्२ । अनुबध्यत इत्यनुबन्धं पश्चाद्भावि शुभाशुभं क्षयं वित्तक्षयं हिंसां परपीड़ां पौरुषञ्च स्वसामर्थ्यमनपेक्ष्यापर्य्यालोच्य केवलं मोहादेव यत् कर्म्मारभ्यते तत्तामसमुदाहृतम्"३ श्री० ५:। प्रकारान्तरेण तत्त्रिविधं शुक्लकृष्णशुक्लकृष्णभेदात् तत्र शुक्लं हिंसाद्यनपेक्षं पुण्यजनकं स्वाध्यायादि । कृष्णं शास्त्रनिषिद्धं पापजनकं ब्रह्महत्यादि । कृष्णशुक्लम् हिंसादिसहितं वेदविहितं पुण्यापुण्यजनकं पशुयागादि । कर्मविपाकशब्दे उदा० । तच्च प्रकारान्तरेण द्विविधं, प्रवृत्तं निवृत्तं च यथाह मनुः "इह चामुत्र वा काम्यं प्रवृत्तं कर्म्म कीर्त्त्यते । निष्कामं ज्ञानपूर्वन्तु निवृत्तमुपदिश्यते । प्रवृत्तं कर्म्म संसेव्य देवानामेति सार्ष्टिताम् । निवृत्तं सेव्यमानस्तु भूतान्यत्येति पञ्च वै"।"कामनापूर्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं, तदेव कर्म कामनारहितं पुनर्ब्रह्मज्ञानाभ्यासपूर्वकं संसार, निवृत्तिहेतुत्वात् निवृत्तमुच्यते" मनु०त०रघुन० विहितकर्माचरणप्रकारः कर्मयोगशब्दे दृश्यः । ५कृषौ च "तद्यथेह कर्मचितोलोकः क्षीयते" श्रुतिः "फलस्य कर्मनिष्पत्तेर्लोकवत्" जै०सू० । अत्र कर्मशब्दः कृषिवैदिककर्मोभयपरः । "एष एव साधु कर्म कारयति तं यमेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयतीति" श्रुतिः । "फलं कर्मायत्तम्" मीमांसकाः ।

कर्मनाशा स्त्री कर्म नाशयति नश-णिच्-अण् । कीकटदेशस्थे नदीभेदे,यस्या जलस्पर्शेन सर्वपुण्यकर्माणि नश्यन्ति । "कर्मनाशाजलस्पर्शादिना नाश्यस्तसौ मतः" भाषा०।

कर्मनिष्ठ त्रि० कर्मणि निष्ठा यस्य । १यागादिकर्मासक्ते "ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथाऽपरे । तपःस्वाध्यायनिष्ठाश्च कर्मनिष्ठास्तथा परे" मनुः । ७त० ।२कर्मासक्तौ स्त्री ।

कर्मन्द पु० भिक्षुसूत्रकारके ऋषिभेदे कर्मन्देन प्रोक्तं भिक्षुसूत्रमधीयते इनि । कर्मन्दिन् तत्प्रोक्तभिक्षुसूत्राध्यायिषु ब०व० सि०कौ० । इनेर्बहुत्वे पा० विधानात् अमरे एकवचनप्रयोगश्चिन्त्यमूलः ।

कर्मपथ पु० कर्मणां कायिकादीनां पन्थाः अच् समा० । "कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम् । मनसा त्रिविधम् चैव दश कर्मपथांस्त्यजेत्" भा० अनु० १३ अ० उक्तेषु दशसु शुभाशुभकर्ममार्गेषु ते च दशकर्मपथास्तत्रैवोक्ताः यथा "प्राणातिपातः स्तैन्यञ्च परदारमथापि वा । त्रीणि पापानि कायेन सर्वशः परिवर्जयेत् । असत्प्रलापं पारुष्यं पैशुन्यमनृतन्तथा । चत्वारि वाचा राजेन्द्र! न जल्पेन्नानुचिन्तयेत् । अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम् । कर्मणां फलमस्तीति त्रिविधं मनसा चरेत् । तस्माद्वाक्कायमनसा नाचरेदशुभं नरः। शुभाशुभान्याचरन् हि तस्य तस्याश्नुते फलम्"।

कर्मप्रवचनीय पु०कर्म क्रियां प्रोक्तवान् इति कर्मप्रवचनीयः कर्त्तरि भूते चानीयर् ।"कर्मप्रवचनीयाः"इत्यधिकृत्य पाणिन्युक्ते अन्वादिषु शब्देषु । ते हि संप्रति क्रियां न कथयन्ति नापि द्योतयन्ति किन्तु क्रियानिरूपितसम्बन्धविशेषं द्योतयन्तीति तेषां तथात्वं यथोक्तं हरिणा"क्रियाया द्योतकोनायं सम्बन्धस्य न वाचकः। नापि क्रियापदाक्षेपी सम्बन्धस्य तु भेदकः" इति"अधिपरी अनर्थकौ"इत्यादेस्तद्द्योतकत्वाभावेऽपि योग्यतया तथात्वम् । अन्वाद्यर्थभेदे तत्संज्ञकाः सूत्रे चार्था पा०दर्शिताः यथा"कर्मप्रवचनीयाः" इत्यधिकृत्य "अनुर्लक्षणे" "तृतीयार्थे" "हीने" "उपोऽधिके च" "अपपरी वर्जने" "आङ्मर्यादावचने" "लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्य्यनवः" "अभिरभागे" "प्रतिः प्रतिनि-

श्चिप्रतिदानयोः” “अधिपरी अनर्थकौ” “सुः पूजायाम्” “अतिरतिक्रमणे च” “अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु” “अधिरीश्वरे” पा० । “कर्मप्रवचनीययुक्ते द्वितीया” पा० ।

कर्म्मन्यास पु० कर्मणां विहितकर्मणां विधिना न्यासः त्यागः, कर्मणाम् ईश्वरार्पणबुद्ध्याऽनुष्ठीयमानानां फलस्य न्यासो वा । विहितकर्मणां विधानेन १त्यागरूपप्रव्रज्यायाम् ईश्वरार्पणबुद्ध्यानुष्ठानेन २कर्मफलत्यागे च । कर्मसंन्यासोऽप्यत्र ।

कर्मफल न० कर्मणां शास्त्रविहितानां निषिद्धानां वा फलम् । शुभाशुभकर्मणां १सुखदुःखादिरूपे । फले तत्र विहितकर्मणां फलाभिसन्धौ तत्तत्फलप्राप्तिः अनभिसन्धाने परम्परया चित्तशुद्ध्या मुक्तिप्राप्तिरिति भेदः । यथाह म० त० विष्णुपु० “विशिष्टफलदाः काम्या निष्कामाणां विमुक्तिदाः” गीतापि “युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् अयुक्तः कामकारेण फले सक्तोनिबध्यते”। युक्तः ईश्वराय कर्माणि न फलायेत्येवं समाहितः, फलं त्यक्त्वा फलमनभिसन्धाय कर्माणि कुर्वन्नपीति शेषः । शान्तिमाप्नोति सत्वशुद्धिपापक्षयसंन्यासनिष्ठां क्रमेण प्राप्नोतीत्यर्थः । अयुक्तस्तद्बहिर्मुखः कामकारेण कामप्रेरिततया कामतः प्रवृत्तेरिति यावत् । फले सक्तः मम फलायेदं कर्म तत्करोमीत्येवं फले सक्तोनिबध्यते” म० त० रघु० । “विष्णुपुराणे । “कर्म्माण्यसङ्कल्पिततत्फलानि सन्न्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिंल्लयं ते त्वमलाः प्रयान्ति”। तां कर्ममहीं भारतवर्षरूपाम् “पितृन्नमस्ये दिवि ये च मूर्त्ताः कामप्रदाः काम्यफलाभिसन्धौ—विमुक्तिदा येऽनभिसंहितेषु” प्रा० त० इयिचास्तरः अधिकं कर्मयोगशब्दे वक्ष्यते । कर्मफलानामीश्वरस्यैव दातृत्वमिति वेदान्तिनः । मीमांसकमते धर्मादेव फलमिति भेदः । तच्च ईश्वरशब्दे दर्शिते “फलमत उपपत्तेः” इत्यादिके शा० सूत्रभाष्ये दर्शितम् “यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते” “न मे कर्मफले स्पृहा” गीता । कर्मरङ्गस्य फलम् शा० मध्यपदलोपः । (कामरङ्गा) २फले मेदि० ।

अथ कर्मणां फलमस्ति न वेति सन्देहे निरूप्यते, तत्र कर्म्मणः प्ररोचनार्थतया न फलमस्तीति श्रीभागवतवचनं श्रीधरव्याख्यानञ्चोपजीव्य म० त० निर्णीतं यथा—

“वेदोक्तमेव कुर्वाणोनिःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः” भाग० ११,३,४८ । “वेदोक्तमेव कुर्वाणो न तु निषिद्धम् । ननु कर्म्मणि क्रियमाणे तस्मिन्नावश्यकतत्फलञ्च स्यात्, न तु नैष्कर्म्यरूपा फलसिद्धिः । अतएवाह ‘निःसङ्ग’ इति अनभिनिवेशितवान् ईश्वरेऽर्पितं न फलोद्देशेन । फलस्य श्रुतत्वात् कर्मणि कृते फलं भवत्येवेत्यत आह ‘रोचनार्था’ इति कर्मणि रुच्युत्पादनार्था । अतएव तत्रैव “फलश्रुतिरियं नृणां न श्रेयोरोचनं परम् । श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम् । उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च । आसक्तमनसोमर्त्या आत्मनोऽनर्थहेतुषु । न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि । कथं युञ्ज्यात् पुनस्तेषु तांस्तमोविशतोबुधः । एवं व्यवस्थितं केचिदविज्ञाय कुबुद्धयः । फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि”। “इयं फलश्रुतिर्न श्रेयः, परमपुरुषार्थपरा भवति किन्तु बहिर्मुखानां मोक्षविवक्षया अवान्तरकर्मफलैः कर्मसु रुच्युत्पादनमात्रम् । यथा भैषज्ये औषधे रुच्युत्पादनम् । यथा “पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान् । पित्रैवमुक्तः पिबति तिक्तमप्यतिबालकः” । अत्र तिक्तनिम्बादिपानस्य न खलु खण्डादिलाभ एव प्रयोजनम्, किन्त्वारोग्यम् । तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्माणि विधत्ते । ननु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते, कुत एवं व्याख्यायते, यथाश्रुतसंवादघटनादित्याह उत्पत्त्येति, द्वाभ्याम् । उत्पत्त्या स्वभावत एव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्य्यादिषु स्वजनेषु पुत्रदारादिषु परिणामतोदुःखहेतुषु अतस्तान् स्वार्थं परमसुखमविदुषः अजानतः अतो नतान् प्रह्वीभूतान् बुधोवेदोयद्बोधयति तदेव श्रेय इति विश्वसितानित्यर्थः । तानेवंभूतान् वृजिनाध्वनि पापे वर्त्मनि देवादियोनौ वा भ्राम्यतः पुनस्तमोभूतवृक्षादियोनौ विशतः, ‘पशुकाम” इति आयुरिन्द्रियादिकाम इति च पुत्रादिकाम” इति च कथ पुनस्तेषु स्वयं बुधोवेदोयुञ्ज्यात् । तथासत्यनाप्तः स्यादिति भावः । कथं तर्हि कर्म्ममीमांसकाः कर्म्मफलपरां वदन्ति तत्राह एवमिति व्यवस्थितम् । वेदस्याभिप्रायमविज्ञाय कुसुमिताम् अवान्तरफलरोचनतया रमणीयां परं फलश्रुतिं वदन्ति कुतस्ते कुबुद्धयः ? तदाह—हि यस्मात् वेदज्ञा व्यासादयः तथा न वदन्तीति अतएव निष्कामकर्म्मणात्मज्ञानमित्युक्तम् । यथा—“अयमेव क्रियायोगो ज्ञानयोगस्य साधकः । कर्म्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते”। सोऽपि दुरितक्षयद्वारा न साक्षात् । तथा च “ज्ञानमुत्

पद्यते पुंसां भयात् पापस्य कर्म्मणः । श्रुतिः "तमेतमात्मानं ब्राह्मणा विविदिषन्ति वेदानुवचनेन ब्रह्मचर्य्येण तपसा दानेन श्रद्धया यज्ञेनानशनेन चे"ति "अतएव यज्ञादीनां ज्ञानयोग्यताञ्चावधार्य्य निष्कामेषु कर्मसु प्रवर्त्तयते । पण्डितेनापि मूर्खः काम्ये कर्म्मणि न प्रवर्त्तयितव्यः इत्याह षष्ठस्कन्धे— "स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म हि । न राति रोगिणेऽपथ्यं वाञ्छतेऽपि भिषक्तमः"। राति ददाति"। म०त० रघु० ।

इदमपि ज्ञाननिष्ठाप्रशंसामात्रम् अन्यथा संसारस्य धर्म्मा-धर्म्ममूलकतया धर्म्मकार्य्यस्य फलाभावे कथं सुखादिभोगः, कथं वा संसारप्रवृत्तिः । किञ्च ईश्वरपक्षे दर्शिते "फलमत उपपत्तेः" इत्यादिके शा०सूत्रभाष्ये धर्म्मस्य फलदातृत्व-मतनिवारणेनेश्वरस्यैव फलदातृत्वं यदुक्तं तद्विरुद्धं स्यात् । एकान्ततोऽसति कर्म्मणः फले कथमीश्वरस्य तद्दातृत्वोक्तिः सङ्गच्छते ।

अतएव तत्रैव भाग० ११,३, ४६ । "परोक्षवादो वेदोऽयं बालानामनुशासनम् । कर्ममोक्षाय कर्म्माणि विधत्ते ह्यगदं यथा" इति पूर्व्वतरवाक्ये कर्म्मणां कर्म-मोक्षस्यैव मुख्यफलत्वमुक्तं न तु फलाभावः । व्याहृत-श्चैतत् श्रीधरेण यथा—"ननु स्वर्गाद्यर्थं कर्म्माणि विधत्ते न कर्ममोक्षार्थं तत्राह बालानामनुशासनं यथा भवति तथा तत्र दृष्टान्तः अगदम् औषध यथा पिता बालमगदं पाययन् खण्डलड्डुकादिभिः प्रलोभयन् पाययति ददाति च तानि, नैतावताऽगदपानस्य तल्लाभः प्रयोजनं अपि चारोग्यं तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् कर्ममोक्षायैव कर्म्माणि विधत्ते" । तत्र दृष्टान्ते ददाति च तानीति वदता दार्ष्टा-न्तिकेऽपि खण्डलड्डुकादिदानवत् फलवत्त्वं सूचितं किन्तु तस्य न मुख्योद्देश्यत्वम् तत्रारोग्यस्थानीयमोक्ष-स्यैवेति सुस्थितं कर्म्मणः फलवत्त्वमिति दिक् ।

कर्म्मबन्ध न० कर्म्मणा बन्धः शरीरसम्बन्धः । १कर्मजन्यादृष्टेन पूर्वदेहसम्बन्धरूपे संसारे "कर्मबन्धं प्रहास्यसि" गीता कर्म्मबन्धनमप्यत्र । कर्म बन्धनं बन्धसाधनं यस्य । कर्मरूपबन्धनसाधनयुक्ते त्रि० । "लोकोऽयं कर्म बन्धनः" गीता । [जन्यसुखदुःखादेर्भोगे तत्साक्षात्कारे ।

कर्म्मभोग पु० कर्म्मणां कर्मजन्यसुखदुःखादेर्भोगः । कर्म-

कर्म्मभू स्त्री कर्म्मणः कृषिकर्म्मणो भूः । १कृष्टभूमौ (चषाक्षेत) हेमच० २भारतवर्षे च । [दीर्घमूलत्वात्तस्य तथात्वम् ।

कर्म्ममूल न० कर्म्मणोमूलमिव मूलमस्य । कुशदले शब्दच० ।

कर्म्ममीमांसा स्त्री ६त० । कर्म्मविषयकशाब्दमतक्षया संशय पूर्वपक्षसिद्धान्तनिर्णयात्मके कर्म्मविषयके विचारशास्त्रभेदे सा च "अथातोधर्मजिज्ञासा" इत्यादिका जैमिनिप्रणीता

कर्म्मयुग न०क—हिंसायाम् आधारे मनिन् कर्मधा० । कलि-युगे त्रिका० तस्य हिंसाप्रधानकर्माधारत्वात् तथात्वम् ।

कर्म्मयोग पु० कर्मसु योगः कौशलम् । फलसाधनस्यापि कर्मणोऽफलसाधनत्वापादानरूपे १कौशलभेदे २फलसिद्ध्य-सिद्ध्योः समत्वभावने च । यथा च तत्कौशलं तथा भावनं च कर्त्तव्यं तथा गीतायां नानास्थानेषु दर्शितं यथा

"एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु । बुद्ध्या युक्तोयया पार्थ ! कर्मबन्धं प्रहास्यसि । नेहाभि-क्रमनाशोऽस्ति प्रत्यवायो न विद्यते । स्वल्पमप्यस्य धर्मस्य त्रायते महतोभयात् । व्यवसायात्मिका बुद्धिरेकेह कुरु-नन्दन ! । बहुशाखाह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् । यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः । वेदवा-दरताः पार्थ ! नान्यदस्तीतिवादिनः । कामात्मानः स्वर्ग-परा जन्मकर्मफलप्रदाम् । क्रियाविशेषबहुलां भोगैश्व-र्य्यगतिं प्रति । भोगैश्वर्य्यप्रसक्तानां तयापहृतचेतसाम् । व्यवसायात्मिका बुद्धिः समाधौ न विधीयते । त्रैगुण्य-विषयावेदा निस्त्रैगुण्यो भवार्जुन ! । निर्द्वन्द्वोनित्यसत्त्वस्थो-निर्योगक्षेम आत्मवान् । यावानर्थ उदपाने सर्वतः सं-प्लुतोदके । तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजा-नतः । कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्म्म फलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्म्मणि । योगस्थः कुरु कर्म्माणि सङ्गं त्यक्त्वा धनञ्जय ! । सिद्ध्यसिद्ध्योः समोभूत्वा समत्वं योग उच्यते । दूरेण ह्यवरं कर्म्म बुद्धियोगाद्धनञ्जय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः । बुद्धियुक्तोजहातीह उभे सुकृतदुष्कृते । तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम् । कर्म्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धवि-निर्मुक्ताः पदं गच्छन्त्यनामयम्" ।

अधिकारिभेदेन कर्म्मयोगस्यानुष्ठानप्रकारमाह गीता "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ ! । ज्ञानयोगेन सांख्यानां कर्म्मयोगेन योगिनाम् । न कर्म्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते । न च सन्न्यस-नादेव सिद्धिं समधिगच्छति । न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् । कार्य्यते ह्यवशः कर्म सर्व्वः प्रकृतिजै-र्गुणैः । कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा

चरन्। इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते। यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन!। कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते। नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः। शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः। यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय! मुक्तसङ्गः समाचर। सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्। देवान् भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ। इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः। यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्विषैः। भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्। अन्नाद्भवन्ति भूतानि पर्ज्जन्यादन्नसम्भवः। यज्ञाद्भवति पर्ज्जन्यो यज्ञः कर्मसमुद्भवः। कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्। तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्। एवं प्रवर्त्तितं चक्रं नानुवर्त्तयतीह यः। अघायुरिन्द्रियारामो मोघं पार्थ! स जीवति। यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्य्यं न विद्यते। नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः। तस्मादसक्तः सततं कार्य्यं कर्म समाचर। असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः। कर्मणैव हि संसिद्धिमास्थिता जनकादयः। लोकसंग्रहमेवापि संपश्यन् कर्त्तुमर्हसि। यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते। न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किञ्चन। नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि। यदि ह्यहं न वर्त्तेयं जातु कर्मण्यतन्द्रितः। मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ! सर्व्वशः। उत्सीदेयुरिमे लोका न कुर्य्यां कर्म चेदहम्। सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः। सक्ताः कर्मण्यविद्वांसो यथा कुर्व्वन्ति भारत!। कुर्य्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्। न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्। जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन्। प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्व्वशः। अहङ्कारविमूढात्मा कर्त्ताहमिति मन्यते। तत्त्ववित्तु महाबाहो! गुणकर्मविभागयोः। गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते। प्रकृतेर्गुणसंमूढाः सज्जन्ते गुणकर्मसु। तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत्। मयि सर्व्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा। निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः"।

"एवं ज्ञात्वा कृतं कर्म पूर्व्वैरपि मुमुक्षुभिः। कुरु कर्मैव तस्मात्त्वं पूर्व्वैः पूर्व्वतरैः कृतम्। किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः। तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात्। कर्मणो ह्यपि बोद्धव्यं बोद्धव्यञ्च विकर्मणः। अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः। कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः। स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत्। यस्य सर्व्वे समारम्भाः कामसंकल्पवर्जिताः। ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः। त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः। कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति सः। निराशीर्यतचित्तात्मा त्यक्तसर्व्वपरिग्रहः। शारीरं केवलं कर्म कुर्व्वन्नाप्नोति किल्बिषम्। यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः। समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते। गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः। यज्ञायाचरतः कर्म समग्रं प्रविलीयते। ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम्। ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना"।

कर्म्मणां त्याज्यकर्त्तव्यतायां विशेषोऽन्यत्राध्याये तत्रोक्तः।

"सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ। तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते। ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति। निर्द्वन्द्वो हि महाबाहो! सुखं बन्धात् प्रमुच्यते। सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्। यत् सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते। एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति। संन्यासस्तु महाबाहो! दुःखमाप्तुमयोगतः। योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति। योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः। सर्व्वभूतात्मभूतात्मा कुर्व्वन्नपि न लिप्यते। नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्। पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन्। प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि। इन्द्रियाणीन्द्रियार्थेषु वर्त्तन्त इति धारयन्। ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा। कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म कुर्व्वन्ति सङ्गं त्यक्त्वात्मशुद्धये।

युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते । सर्व्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी । नवद्वारे पुरे देही नैव कुर्व्वन्न कारयन् । न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते” । एवं गीतायां नानास्थानेषु फलाभिसन्धित्यागेनैव कर्मणां परम्परया मोक्षसाधनत्वमुक्तमनुपदं वक्ष्यमाण पात० भाष्ये चेश्वरार्पणबुद्ध्यानुष्ठीयमानानां योगसाधनत्वोक्तेश्च मुमुक्षुणा उक्तशास्त्ररीत्यैव कर्म करणीयमिति स्थितम् । कर्म्म क्रियैव योगो योगसाधनम् । तपःस्वाध्यायेश्वरप्रणिधानादिरूपे क्रियात्मके २योगसाधने । यथा च तप आदीनां योगसाधनत्वं तथा साधनपादे पातञ्जलसूत्रभाष्यविवरणेषूक्तं यथा—

“तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः” सू० । “उद्दिष्टः समाहितचित्तस्य योगः, कथं व्युत्थितचित्तोऽपि योगयुक्तः स्यादित्येतदारभ्यते । नातपस्विनो योगः सिध्यति अनादिकर्मक्लेशवासनाचित्रा प्रत्युपस्थितविषयजाला चाशुद्धिर्नान्तरेण तपःसम्भेदमापद्यते इति तपस उपादानं तच्च चित्तप्रसादनमबाधमानमनेनासेव्यमिति मन्यते, स्वाध्यायः प्रणवादिपवित्राणां जपो मोक्षशास्त्राध्ययनं वा । ईश्वरप्रणिधानं सर्व्वक्रियाणां परमगुरावर्पणं तत्फलसन्न्यासो वा” भा० । “उद्दिष्ट इति । अभ्यासवैराग्ये हि योगोपायौ प्रथमे पादे उक्तौ, न च तौ व्युत्थितचित्तस्य द्रागित्येव सम्भवत इति द्वितीयपादोपदेश्यानुपायानपेक्षते सत्त्वशुद्ध्यर्थं, ततो हि विशुद्धसत्त्वः कृतरक्षाविधानोऽभ्यासवैराग्ये प्रत्यहं भावयति । समाहितत्वमविक्षिप्तत्वं, कथं व्युत्थानचित्तोऽप्युपदेक्ष्यमाणैरुपायैर्युक्तः सन् योगी स्यादित्यर्थः । तत्र वक्ष्यमाणेषु नियमेषु आकाङ्क्ष प्राथमिकं प्रत्युपयुक्ततरतया प्रथमतः क्रियायोगमुपदिशति सूत्रकारः । तपःस्वाध्यायेत्यादि, क्रियैव योगः क्रियायोगो योगसाधनत्वात् । अतएव विष्णुपुराणे खाण्डिक्यकेशिध्वजसंवादे । ‘योगयुक् प्रथमं योगी युञ्जानोऽभिधीयत” इत्युपक्रम्य तपः “स्वाध्यायादयो” दर्शिताः । व्यतिरेकमुखेन तपस उपायत्वमाह । नातपस्विन इति तपसोऽवान्तरव्यापारमुपायतोपयोगिनं दर्शयति अनादीति । अनादिभ्यां कर्मक्लेशवासनाभ्यां चित्रा अतएव प्रत्युपस्थितमुपनतं विषयजालं यस्यां सा तथोक्ता । अशुद्धीरजस्तमःसमुद्रेको नान्तरेण तपःसम्भेदमापद्यते सान्द्रस्य नितान्तविरलता सम्भेदः, ननूपादीयमानमपि तपो धातुवैषम्यहेतुतया योगप्रतिपक्ष इति कथं तदुपाय इति अत आह—तच्चेति, तावन्मात्रमेव तपश्चरणीयं न यावता धातुवैषम्यमापद्यत इत्यर्थः । प्रणवादयः पुरुषसूक्तरुद्रमण्डलब्राह्मणादयो वैदिकाः, पौराणिकाश्च ब्रह्मपारादयः, परमगुरुर्भगवानीश्वरस्तस्मिन्, यत्रेदमुक्तम्—“कामतोऽकामतो वापि यत् करोमि शुभाशुभम् । तत्सर्वं त्वयि सन्न्यस्तं त्वत्प्रयुक्तः करोम्यहम्” इति “तत्फलसन्न्यासो वा” फलानभिसन्धानेन कार्य्यकरणम् । यत्रेदमुक्तम् “कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि”(गीता) विव० ।

“स हि क्रियायोगः” भा० “समाधिभावनार्थः क्लेशतनूकरणार्थश्च” सू० “स ह्यासेव्यमानः समाधिं भावयति, क्लेशांश्च प्रतनूकरोति, प्रतनूकृतान् क्लेशान् प्रसंख्यानाग्निना दग्धबीजकल्पानप्रसवधर्मिणः करिष्यतीति तेषां तनूकरणात् पुनः क्लेशैरपरामृष्टा सत्त्वपुरुषान्यतामात्रख्यातिः सूक्ष्मा प्रज्ञा समाप्ताधिकारा प्रतिप्रसवाय कल्पिष्यते इति” भा० । “तस्य प्रयोजनाभिधानाय सूत्रमवतारयति स हीति” ननु क्रियायोग एव चेत् क्लेशान् प्रतनूकरोति कृतं तर्हि प्रसंख्यानेनेत्यत आह प्रतनूकृतानिति क्रियायोगस्य प्रतनूकरणमात्रे व्यापारो न तु वन्ध्यत्वे क्लेशानां, प्रसंख्यानस्य तु तद्वन्ध्यत्वे, दग्धबीजकल्पानिति वन्ध्यत्वेन दग्धकलमबीजसादृश्यमुक्तम् स्यादेतत्प्रसंख्यानमेव चेत् क्लेशान् अप्रसवधर्मिणः करिष्यति कृतमेषां प्रतनूकरणेनेत्यत आह तेषामिति । क्लेशानामतनवे हि बलवद्विरोधिप्रसक्ता सत्त्वपुरुषान्यताख्यातिरुदेतुमेव नोत्सहते किमुत प्रागेव तद्वन्ध्यभावं कर्त्तुम्, प्रतनूकृतेषु तु दुर्बलेषु तद्विरोधिन्यपि वैराग्याभ्यासाभ्यामुपजायते उपजाता च तैरपरामृष्टा अनभिभूता नैव यावत् परामृश्यते सत्त्वपुरुषान्यतामात्रख्यातिसूक्ष्मप्रज्ञायन्त्रिततया सूक्ष्मोऽस्याविषय इति सूक्ष्मा प्रज्ञा प्रतिप्रसवाय प्रविलयाय कल्पिष्यते, कुतः ? समाप्तोऽधिकारः कार्य्यारम्भणं गुणानां यया हेतुभूतया सा तथोक्तेति” विव० । क्रियायोगोऽप्यत्र ।

कर्म्मरङ्ग पुंन० कर्मणे हिंसायै रज्यते रन्ज—घञ् न्यङ्क्वादिवत् निमित्तार्थे कुत्व० । (कामराङ्गा) १शिरालफलके वृक्षे शब्दच० २तत्फले न० तद्गुणा भाव० उक्ताः “कर्मरङ्गं हिमं ग्राहि स्वाद्वम्लं कफवातकृत्” कफवात-

हिंसकत्वाच्च तस्य कर्म्मरङ्गनामतेति बोध्यम् ।

कर्म्मरी स्त्री कर्म भैषज्योपयोगक्रियां राति—रा गौरा० ङीष् । वंशरोचनायाम् राजनि० ।

कर्म्मवज्र पु० कर्म श्रौतकर्म वज्रमिव यस्य । शूद्रे तस्य श्रौतकर्मानधिकारेण तदाचरणस्य तं प्रति वज्रतुल्यहिंसाहेतुत्वात्तथात्वम् ।

कर्म्मवाटी स्त्री कर्मणां विहितकर्मणां चन्द्रकलाक्रियाणां वा वाटीव । तिथौ हेमच० । तिथीनां सर्वकर्मनिमित्तत्वाच्चन्द्रकलाक्रियाक्रियारूपत्वाच्च तथात्वम् ।

कर्म्मविपाक पु० कर्मणोः पुण्यापुण्यकारणयोर्विपाकः विशेषेण पच्यमानः फलविशेषः । पात० सू० भाष्याद्युक्ते जात्यायुर्भोगरूपे १ कर्मफले यथा च कर्मणां जात्यायुर्भोगात्मको विपाकः तथा पात० सू० भा० विवरणेषु प्रपञ्चितं यथा । "क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः" सू० । "तत्र पुण्यापुण्यकर्माशयः कामलोभमोहक्रोधप्रभवः स दृष्टजन्मवेदनीयश्चादृष्टजन्मवेदनीयश्च तत्र तीव्रसंवेगेन मन्त्रतपःसमाधिभिर्निर्वर्त्तित ईश्वरदेवतामहर्षिमहानुभावानामाराधनाद्वा यः परिनिष्पन्नः स सद्यः परिपच्यते पुण्यकर्माशय इति । तथा तीव्रक्लेशेन भीतव्याधितकृपणेषु विश्वासोपगतेषु वा महानुभावेषु कृतः पुनः पुनरपकारः, सचापि पापकर्माशयः सद्यएव परिपच्यते । यथा नन्दीश्वरः कुमारो मनुष्यपरिणामं हित्वा देवत्वेन परिणतः तथा नाहुषोऽपि देवानामिन्द्रः सन् स्वकं परिणामं हित्वा तिर्य्यक्त्वेन परिणत इति । तत्र नारकाणां नास्ति दृष्टजन्मवेदनीयः कर्माशयः क्षीणक्लेशानामपि नास्त्यदृष्टजन्मवेदनीयः कर्माशयः इति" भा० ।

"स्यादेतज्जात्यायुर्भोगहेतवं पुरुषं क्लिश्नन्तः क्लेशाः कर्माशयश्च तथा, न त्वविद्यादयस्तत्कथमविद्यादयः क्लेशाः ? इत्यत आह । क्लेशमूलः कर्माशय इत्यादि । क्लेशमूलं यस्योत्पादे च कार्य्यकरणे च स तथोक्तः । एतदुक्तं भवति—अविद्यादिमूलः, कर्माशयो जात्यायुर्भोगहेतुरिति अविद्यादयोऽपि तद्धेतवोऽतः क्लेशा इति । व्याचष्टे तत्रेति । आशेरते सांसारिकाः पुरुषा अस्मिन्नित्याशयः कर्मणामाशयः धर्माधर्मौ, कामात्काम्यकर्मप्रवृत्तौ स्वर्गादिहेतुर्धर्मो भवति एवं लोभात् परद्रव्यापहारप्रवृत्तौ नरकहेतुरधर्मः मोहादधर्मे हिंसादौ धर्मबुद्धेः प्रवर्त्तमानस्याधर्म एव नत्वस्ति मोहजो धर्मो, ऽस्ति तु क्रोधजोधर्मः तद्यथा ध्रुवस्य जनकापमानजन्मनः क्रोधात्तज्जिगीषयाहितेन कर्माशयेन पुण्येनान्तरीक्षलोकवासिनामुपरिस्थानम्, अधर्मस्तु क्रोधजो ब्रह्मवधादिजन्मा प्रसिद्धएव भूतानाम् । तस्य द्वैविध्यमाह । स दृष्टजन्मेति तत्र दृष्टजन्मवेदनीयमाह । तीव्रसंवेगेनेति । यथासङ्ख्येन दृष्टान्तावाह । यथा नन्दीश्वर इति । तत्र नारकाणामिति । येन कर्माशयेन कुम्भीपाकादयो नरकभेदाः प्राप्यन्ते तत्कारिणो नारकास्तेषां नास्ति दृष्टजन्मवेदनीयः कर्माशयो नहि मनुष्यशरीरेण तत्परिणामभेदेन वा सा तादृशी वत्सरसहस्रादिभिरुपभोग्या वेदना सम्भवतीति शेषं सुगमम्" वि० ।

"सति मूले तद्विपाकोजात्यायुर्भोगाः" सू० ।

"सत्सु क्लेशेषु कर्माशयो विपाकारम्भी भवति नोच्छिन्नक्लेशमूलः । यथा तुषावनद्धाः शालितण्डुलाः अदग्धबीजभावाः प्ररोहणसमर्था भवन्ति नापनीततुषा दग्धबीजभावा वा तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न प्रसंख्यानदग्धक्लेशबीजभावोवेति । स च विपाकस्त्रिविधो जातिरायुर्भोग इति तत्रेदं विचार्य्यते किमेकं कर्म एकस्य जन्मनः कारणम् १ । अथैकं कर्मानेकं जन्माक्षिपतीति २ । द्वितीया विचारणा—किमनेकं कर्मानेकं जन्म निर्वर्त्तयति ३ । अथानेकं कर्मैकं जन्म निर्वर्त्तयतीति ४ । न तावदेकं कर्मैकस्य जन्मनः कारणम् १ कस्मात् ? अनादिकालप्रचितस्यासङ्ख्येयस्यावशिष्टकर्मणः सांप्रतिकस्य च फलक्रमानियमात् अनाश्वासो लोकस्य प्रसक्तः सचानिष्ट इति । नचैकं कर्मानेकस्य जन्मनः कारणम् २ । कस्मात् ? अनेकेषु जन्मसु एकैकमेव कर्मानेकस्य जन्मनः कारणमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः सचाप्यनिष्ट इति । नचानेकं कर्मानेकस्य जन्मनः कारणम् ३ । कस्मात् ? अनेकं जन्म युगपन्न सम्भवतीति क्रमेण वाच्यं तथाच पूर्वदोषानुषङ्गः । तस्माज्जन्मप्रायणान्तरे कृतः पुण्यापुण्यकर्माशयप्रचयो विचित्रःप्रधानोपसर्ज्जनभावेनावस्थितः प्रायणाभिव्यक्तः एकप्रघट्टके मिलित्वा मरणं प्रसाध्य संमूर्च्छित एकमेव जन्म करोति ४ । तच्च जन्म तेनैव कर्मणा लब्धायुष्कं भवति तस्मिन्नायुषि तेनैव कर्मणा भोगः संपद्यते इति असौ कर्माशयो जन्मायुर्भोगहेतुत्वात् त्रिविपाकोऽभिधीयत इति । अतएकभविकः कर्माशयउक्तइति । दृष्टजन्मवेदनीयस्त्वेकविपाकारम्भी भोगहेतुत्वात्, द्विविपाकारम्भी वायुर्भोगहेतुत्वात्—नन्दीश्वरवत् नहुषवद्वेति, क्लेशकर्मविपाकानुभवनिर्मिताभिस्तु वासनाभिरनादिकालसंमूर्च्छितमिदं चित्तं

चित्रीकृतमिव सर्वतोमत्स्यजालग्रन्थिभिरिवाततम् इत्येता अनेकभवपूर्व्विका वासनाः। यस्त्वयं कर्माशय एष एकैकभविक उक्त इति। ये संस्काराः स्मृतिहेतवस्ता वासनाः ताश्चानादिकालीना इति यस्त्वसावेकभविकः कर्म्माशयः स नियतविपाकश्चानियतविपाकश्च तत्र दृष्टजन्मवेदनीयस्य नियतविपाकस्यैवायं नियमो नत्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य, कस्मात्? योह्यदृष्टजन्मवेदनीयोऽनियतविपाकस्तस्य त्रयी गतिः—कृतस्याविपक्कस्य नाशः१ प्रधानकर्म्मण्यावापगमनं २वा नियतविपाकप्रधानकर्म्मणाभिभूतस्य वा चिरमवस्थानमिति३। तत्र कृतस्याविपक्कस्य नाशो १यथा शुक्लकर्म्मोदयादिहैव नाशः कृष्णस्य, यत्रेदमुक्तम् "द्वे द्वे ह वै कर्म्मणी वेदितव्ये पापकस्यैकोराशिः पुण्यकृतोऽपहन्ति तदिच्छस्व कर्म्माणि सुकृतानि कर्त्तुमिहैव कर्म्म कवयो वेदयन्ते" प्रधानकर्म्मण्यावापगमनं २यत्रेदमुक्तम् "स्यात् स्वल्पः सङ्करः सपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षायालम्" कस्मात्? कुशलं हि मे बह्वन्यदस्ति यत्रायमावापङ्गतः स्वर्गेऽप्यपकर्षमल्पं करिष्यतीति। नियतविपाकप्रधानकर्म्मणाभिभूतस्य वा चिरमवस्थानम् ३कथमिति? दृष्टजन्मवेदनीयस्यैव नियतविपाकस्य कर्म्मणः समानं मरणमभिव्यक्तिकारणमुक्तं न त्वदृष्टजन्मवेदनीयस्यानियतविपाकस्य, यत्त्वदृष्टजन्मवेदनीयं कर्म्मानियतविपाकं तन्नश्येत् आवापं वा गच्छेत् अभिभूतं वा चिरमप्युपासीत यावत् समानं कर्म्माभिव्यञ्जकं निमित्तमस्य विपाकाभिमुखं करोतीति तद्विपाकस्यैव देशकालनिमित्तानवधारणादियं कर्म्मगतिश्चित्रा दुर्विज्ञाना चेति, नचोत्सर्गस्यापवादात् निवृत्तिरित्येकभविकः कर्म्माशयोऽनुज्ञायत इति" भा०।

"स्यादेतदविद्यामूलत्वे कर्म्माशयो विद्योत्पादे सत्यविद्याविनाशात् मा नाम तस्य कर्म्माशयान्तरं चैषीत्, प्राक्तन कर्म्माशयानामनादिभवपरम्परासञ्चितानामसंख्यातानामनियतविपाककालानां भोगेन क्षपयितुमशक्यत्वादशक्योच्छेदः संसारः स्यादित्यत आह सतीति। एतदुक्तं भवति सुखदुःखफलो हि कर्म्माशयस्तादर्थ्येन तन्नान्तरीयकतया जन्मायुषी अपि प्रसूते सुखदुःखे च रागद्वेषानुषक्ते तदविनिर्भागवर्त्तिनी तदभावे न भवतः, न चास्ति सम्भवो, न च तत्र यस्तुष्यति वोद्विजते वा, न च तस्य सुखं दुःखं वेति। तदियमात्मभूमिः क्लेशसलिलावसिक्ता कर्म्मफलप्रसवक्षेत्रमित्यस्ति क्लेशानां फलोपजननेऽपि कर्म्माशयसहकारितेति क्लेशसमुच्छेदे सहकारिवैकल्यात् सन्नप्यनन्तोऽप्यनियतविपाककालोऽपि प्रसङ्ख्यानदग्धबीजभावो न फलाय कल्पत इति। उक्तमर्थं भाष्यमेव द्योतयति सन्तुस्त्विति। अत्रैव दृष्टान्तमाह—यथा तुषेति। सतुषा अपि दग्धबीजभावाः स्वेदादिभिः। दार्ष्टान्तिके योजयति तद्वेति। ननु न क्लेशाः शक्या अपनेतुं, न हि सतामपनय इत्यत आह न प्रसङ्ख्यानदग्धक्लेशबीजभाव इति। विपाकस्य त्रैविध्यमाह स चेति। विपच्यते साध्यते कर्म्मभिरिति विपाकः। कर्म्मैकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा प्रथमा विचारणा, द्वितीया तु कर्मानेकत्वं ध्रुवं कृत्वा जन्मैकत्वानेकत्वगोचरा। तदेवं चत्वारो विकल्पाः—तत्र प्रथमं विकल्पमपाकरोति—न तावदेकं कर्म्मैकस्य जन्मनः कारणम्१। पृच्छति कस्मादिति। उत्तरम् अनादिकाले ऐकैकजन्मप्रचितस्य अत एव असङ्ख्येयस्य एकैकजन्मक्षयितादेकैकस्मात् कर्म्मणोऽवशिष्टस्य कर्म्मणः सांप्रतिकस्य च फलक्रमानियमादनाश्वासो लोकस्य प्रसक्तः स चानिष्ट इति। एतदुक्तं भवति कर्म्मचयस्य विरलत्वात् तदुत्पत्तिबाहुल्याच्चान्योन्यसंपीडिताश्च कर्म्माशया निरन्तरोत्पत्तयो निरुच्छ्वासाः स्वविपाकं प्रतीति न फलक्रमः शक्योऽवधारयितुं प्रेक्षावतेत्यनाश्वासो पुण्यानुष्ठानं प्रति प्रसक्त इति। द्वितीयं विकल्पं निराकरोति न च एकं कर्मानेकस्य जन्मनः कारणम्२। पृच्छति कस्मादिति। उत्तरम् अनेकस्मिन् जन्मन्याहितमेकमेव कर्मानेकस्य जन्मलक्षणस्य विपाकस्य निमित्तमित्यवशिष्टस्य विपाककालाभावः प्रसक्तः स चाप्यनिष्ट इति कर्म्मवैफल्येन तदनुष्ठानाप्रसङ्गात्। यदैकजन्मसमुच्छेद्ये कर्म्मण्येकस्मिन् फलक्रमानियमादनाश्वासस्तदा कैव कथा बहुजन्मसमुच्छेद्ये कर्म्मण्येकस्मिन्? तत्र ह्यवसराभावात् विपाककालाभाव एव साम्प्रतिकस्येति भावः। तृतीयं विकल्पं निराकरोति—नचानेकं कर्मानेकस्य जन्मनः कारणम्३। अत्र हेतुमाह तदनेकं जन्म युगपच्च सम्भवतीत्ययोगिन इति क्रमेण वाच्यं यदि हि कर्म्मसहस्रं युगपज्जन्मसहस्रं प्रसुवीत तत एव कर्म्मसहस्रप्रक्षयादवशिष्टस्य विपाककालः फलक्रमे नियमश्च न स्यातां नत्वस्ति जन्मनां यौगपद्यम्, एवमेव प्रथमपक्ष एवोक्तं दूषणमित्यर्थः। तदेवं पक्षत्रये निराकृते पारिशेष्यादनेकं कर्म्मैकस्य जन्मनः कारणमिति४ पक्षोऽवशिष्यते तस्माज्ज-

न्नेति जन्म च प्रायणञ्च जन्मप्रायणे तयोरन्तरं मध्यं तस्मिन् सञ्चितः सुखदुःखफलोपहारेण विचित्रः यदत्रान्तरमुद्भूतमनन्तरमेव फलं दास्यति तत् प्रधानं यत्तु किञ्चिद्विलम्बेन, तदुपसर्ज्जनं, प्रायणं मरणं, तेनाभिव्यक्तः स्वकार्य्यारम्भणाभिमुख्यमुपनीतः एकप्रघट्टके युगपत्, संमूर्च्छितः जन्मादिलक्षणे कार्य्ये कर्त्तव्ये एकलोलीभावमापन्नः एकमेव जन्म करोति नानेकं तच्च जन्म मनुष्यादिभावः। तेनैव कर्मणा लब्धायुष्कं कालभेदं नियतजीवनञ्च भवति तस्मिन्नायुषि तेनैव कर्मणा भोगः सुखदुःखसाक्षात्कारः स्वसम्बन्धितया सम्पाद्यत इति। तस्मादसौ कर्माशयो जात्यायुर्भोगहेतुत्वात् त्रिविपाकोऽभिधीयते। औत्सर्गिकमुपसंहरति—अत एकभविकः कर्माशय उक्त इति। एकोभवः एकभवः पूर्व्वकालेत्यादिना समासः, एकभवोऽस्यास्तीति मत्वर्थीय ठन्। क्वचित्पाठः ऐकभविक इति तत्रैकभवशब्दात् भवार्थे ठक्प्रत्ययः एकजन्मावच्छिन्नमस्य भवनमित्यर्थः, तदेवमौत्सर्गिकैकभविकस्य त्रिविपाकत्वमुक्त्वा दृष्टजन्मवेदनीयवैहिकस्य कर्म्मणस्त्रिविपाकत्वं व्यवच्छिनत्ति—दृष्टेति। नन्दीश्वरस्य ह्यल्पतरावच्छिन्नायुषो मनुष्यजन्मनस्तीव्रसंवेगेनाभिमतोपायजन्मा पुण्यभेद आयुर्भोगहेतुत्वात् द्विविपाकः, नहुषस्य तु पार्ष्णिप्रहार विरोधिनाम्ना स्वेन्द्रपदप्राप्तिहेतुनैव कर्मणा आयुषो विहितत्वादपुण्यभेदो भोगमात्रहेतुः। ननु यद्यैकभविकः कर्माशयस्तदा किं क्लेशवासना भोगानुकूलाय कर्मविपाकानुभववासनाः? तथा च मनुष्यस्तिर्य्यग्योनिमापन्नो न तत्तज्जातीयोचितं भुञ्जीतेत्यत आह—क्लेशेति। संमूर्च्छितमेकलोलीभावमापन्नम्। धर्माधर्माभ्यां व्यवच्छेत्तुं वासनायाः स्वरूपमाह ये संस्कारा इति। औत्सर्गिकमेकभविकत्वम्, क्वचिदपवदितुं भूमिकामारचयति—यस्त्वसाविति। तुशब्देन वासनातो व्यवच्छिनत्ति। दृष्टजन्मवेदनीयस्य, नियतविपाकस्यैवायमेकभविकत्वनियमः न त्वदृष्टजन्मवेदनीयस्य, किंभूतस्यानियतविपाकस्येति। हेतुं पृच्छति कस्मादिति। हेतुमाह योहीति। एकान्तावस्थितिमाह कृतस्येति। द्वितीयामाह प्रधानेति। तृतीयामाह नियतेति। तत्र प्रथमां विभजते तत्र कृतस्येति। संन्यासिकर्मभ्योऽशुक्लाकृष्णेभ्योऽन्यानि त्रीण्येव कर्माणि कृष्णा१। शुक्ल२। कृष्णशुक्लानि३। तदिह तपःस्वाध्यायादिसाध्यः शुक्लकर्माशय उदित

एवादत्तफलस्य कृष्णस्य नाशकः, अविनाशस्य यस्य स्यापि कृष्णभागयोगादिति मन्तव्यं, तत्रैव भगवान् स्वाम्नायमुदाहरति यत्रेदमिति—द्वे द्वे ह वै कर्मणी कृष्णकृष्णशुक्ले अपहन्तीति सम्बन्धः वीप्सया भूयिष्ठता सूचिता। कस्येत्यत आह पापकस्य पुंसः कोऽसावपहन्तीत्यत आह एकोराशिः पुण्यकृतः समूहस्य समूहसाध्यत्वात्, तदनेन शुक्लकर्माशयस्तृतीय उक्तः। एतदुक्तं भवति ईहशो नामायं परपीड़ादिरहितसाधनसाध्यः शुक्लकर्माशयः यद्येकोऽपि सन् कृष्णान् कृष्णशुक्लांश्चात्यन्तविरोधिनः कर्म्माशयान् भूयसोऽप्यपहन्ति। तत् तस्मादिच्छस्वेति छान्दसत्वादात्मनेपदम्। शेषं सुगमम्। अत्र च शुक्लकर्म्मोदयस्यैव स कोऽपि महिमा यत इतरेषामभावः, न तु स्वाध्यायादिजन्मनो दुःखात्मनो विरोध्यधर्म्मः अपि तु स्वकार्यदुःखविरोधी, न च स्वाध्यायादिजन्म दुःखं तस्य कार्य्यं, तत्कार्य्यत्वे स्वाध्यायादिविधानानर्थक्यात्तद्वशादेव तदुत्पत्तेः अनुत्पत्तौ वा कुम्भीपाकाद्यपि विधीयेत अविधाने तदनुत्पत्तेरिति सर्व्वं चतुरस्रम्। द्वितीयां गतिं विभजते प्रधाने कर्मणि ज्योतिष्टोमादिके तदङ्गस्य पशुहिंसादेरावापगमनं द्वे खलु हिंसादेः कार्य्ये प्रधानाङ्गत्वेन विधानात्तदुपकारः, "मा हिंस्यात् सर्व्वाभूतानीति" हिंसाया निषिद्धत्वादनर्थश्च, तत्र प्रधानाङ्गत्वेनानुष्ठानात्प्रधानतन्त्र्यतो न द्रागित्येव प्रधाननिरपेक्षा सती स्वफलमनर्थं प्रसोतुमर्हति किन्त्वारब्धविपाके प्रधाने साहायकमाचरन्ती अवतिष्ठते प्रधानसाहायकमाचरन्त्याश्च स्वकार्य्ये बीजमात्रतयावस्थानं प्रधाने कर्म्मण्यावापगमनं, यत्रेदमुक्तम् पञ्चशिखेन स्वल्पः सङ्करो ज्योतिष्टोमादिजन्मनः प्रधानापूर्व्वस्य पशुहिंसादिजन्मनानर्थहेतुनाऽपूर्व्वेण, सपरिहारः शक्योहि प्रायश्चित्तेन परिहर्त्तुम्, अथ प्रमादतः प्रायश्चित्तमपि नाचरितं प्रधानकर्मविपाकसमये च विपच्येत तथापि यावदनर्थसाधनं प्रसूते तावत् सप्रत्यवमर्षः—मृष्यन्ते हि पुण्यसम्भारोपनीतसुखसुधामहाह्रदावगाहिनः कुशलाः पापमात्रोपपादितां दुःखवह्निकणिकाम्, अतः कुशलस्य महतः पुण्यस्य नापकर्षाय प्रक्षयाय पर्य्याप्तः। पृच्छति कस्मात्? उत्तरं कुशलं हि मे बह्वन्यदस्ति प्रधानकर्मतया व्यवस्थितं दीक्षणीयादिदक्षिणान्तं यत्राव सङ्करः स्वल्पः स्वर्गेऽप्यस्य फले सङ्कीर्णपुण्यलब्धजन्मनः स्वर्गात् सर्व्वथा दुःखेनापराकृष्टादपकर्षमल्पमल्पदुःखसम्भेदं करिष्यतीति। तृतीयां गतिं विभजते नियतेति। कथी-

यस्य नेह प्राधान्यमभिमतं तत्वङ्गतया वलीयस्त्वञ्च नियतविपाकत्वेनान्यदानवकाशत्वात्, अनियतविपाकस्य तु दुर्बलत्वमन्यदा सावकाशत्वात्, चिरमवस्थानं बीजभावमात्रेण, न पुनः प्रधानोपकारितया, तस्य स्वतन्त्रत्वात्। ननु प्रायणेनैकदैव कर्माशयोऽभिव्यज्यत इत्युक्तमिदानीञ्च चिरावस्थानमुच्यते, तत् कथं? वरं पूर्वेण न विरुध्यत इत्याशयवशात् पृच्छति कथमिति। उत्तरम् अदृष्टेति। जात्यभिप्रायमेकवचनम्। तदितरस्य गतमुक्तामवधारयति यत्त्वदृष्टेति। शेषं सुगमम्" विव०।

"ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात्" सू०।

"ते जन्मायुर्भोगाः पुण्यहेतुकाः सुखफलाः, अपुण्यहेतुकाः दुःखफला इति यथा चेदं दुःखं प्रतिकूलात्मकम् एवं विषयसुखकालेऽपि दुःखमस्त्येव प्रतिकूलात्मकं योगिनः" भा०।

"उक्तम् क्लेशमूलत्वं कर्मणः, कर्ममूलत्वञ्च विपाकानाम्। अथ विपाकाः कस्य मूलम्? येनामी त्यक्तव्या इत्याह ते इत्यादि। व्याचष्टे—ते जन्मायुर्भोगा इति। यद्यपि जन्मायुषोरेव ह्लादपरितापपूर्वभावितया तत्फलत्वं न तु भोगस्य ह्लादपरितापोदयानन्तरभाविनस्तदनुभवात्मनः, तथाप्यनुभाव्यतया भोग्यतया भोगफलत्वमिति मन्तव्यम्। नन्वपुण्यहेतवो जात्यायुर्भोगाः परितापफला भवन्तु द्वेष्याः प्रतिकूलवेदनीयत्वात्, कस्मात् पुनः पुण्यहेतुकास्त्वन्ते सुखफला? अनुकूलवेदनीयत्वात्। नचैषां प्रत्यात्मवेदनीयानुकूलता शक्या सहस्रेणाप्यनुमानागमैरपाकर्तुम्, न च ह्लादपरितापौ परस्पराविनाभूतौ यतो ह्लादे उपादीयमाने परितापोऽप्यवर्जनीयतयाऽऽपतेत् तयोर्भिन्नहेतुत्वात् रूपत्वात् इत्यत आह—यथा चेदमिति" विवरणम्

मरणस्य यथा सर्व्वकर्माभिव्यञ्जकत्व तथा शा०भा०

"अपि च प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्राक् प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्य अभिव्यक्त्यनुपपत्तेः। तच्चाविशेषाद्यावत् किञ्चिदनारब्धफलं तस्य सर्व्वस्याभिव्यञ्जकम्, न हि साधारणे निमित्ते नैमित्तिकमसाधारणं भवितुमर्हति, नह्यविशिष्टे प्रदीपसन्निधौ घटोऽभिव्यज्यते न पट इत्युपपद्यते इत्याशङ्क्य निराकृतं यथा—

"अपि च केन हेतुना प्रायणमनारब्धफलस्य कर्मणोऽभिव्यञ्जकं प्रतिज्ञायत इति वक्तव्यम्। आरब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्ते तदुपशमात् प्रायणकाले वृत्त्युद्भवो भवतीति यदुच्येत ततो वक्तव्यं यथैव हि प्राक्प्रायणादारब्धफलेन कर्मणा प्रतिबद्धस्येतरस्य वृत्त्युद्भवानुपपत्तिरेवं प्रायणकालेऽपि विरुद्धफलस्यानेकस्य कर्मणो युगपत्फलारम्भासम्भवाद्बलवता प्रतिबद्धस्य दुर्बलस्य वृत्त्युद्भवानुपपत्तिरिति। नह्यनारब्धफलत्वसामान्येन जात्यन्तरोपभोग्यफलमप्यनेकं कर्मैकस्मिन् प्रायणे युगपदभिव्यक्तं सदेकां जातिमारभत इति शक्यं वक्तुम्, प्रतिनियतफलत्वविरोधात्। नापि कस्यचित् कर्मणः प्रायणे अभिव्यक्तिः कस्यचिदुच्छेद इति शक्यं वक्तुम्, ऐकान्तिकफलत्वविरोधात्। न हि प्रायश्चित्तादिभिर्हेतुभिर्विना कर्मणामुच्छेदः सम्भाव्यते। स्मृतिरपि विरुद्धफलेन कर्मणा प्रतिबद्धस्य कर्मान्तरस्य चिरमप्यवस्थानं दर्शयति। "कदाचित् सुकृतं कर्म कूटस्थमिह तिष्ठति। पच्यमानस्य संसारे यावद्दुःखाद्विमुच्यते" इत्येवंजातीयका। यदि च कृत्स्नमनारब्धफलं कर्मैकस्मिन् प्रायणेऽभिव्यक्तं सदेकां जातिमारभेत, ततः स्वर्गनरकतिर्य्यग्योनिष्वधिकारानवगमात् धर्माधर्मानुत्पत्तौ निमित्ताभावान्नोत्तरा जातिरुपपद्येत, ब्रह्महत्यादीनां चैकैकस्य कर्मणोऽनेकजन्मनिमित्तत्वं स्मर्य्यमाणमुपरुध्येत। न च धर्माधर्मयोः स्वरूपफलसाधनादिसमधिगमे शास्त्रादतिरिक्तं कारणं शक्यं सम्भावयितुम्। न च दृष्टफलस्य कर्मणः कारीर्य्यादेः प्रायणमभिव्यञ्जकं सम्भवतीत्यव्यापिकापीयं प्रायणस्याभिव्यञ्जकत्वकल्पना। प्रदीपोपन्यासोऽपि कर्मबलाबलप्रदर्शनेनैव प्रतिनीतः। स्थूलसूक्ष्मरूपाभिव्यक्तिवच्चेदं द्रष्टव्यम्। यथा हि—प्रदीपसमानेऽपि सन्निधाने स्थूलरूपमभिव्यनक्ति न सूक्ष्मम् एवं प्रायणं समानेऽप्यनारब्धफलस्य कर्मजातस्य प्राप्तावसरत्वे बलवतः कर्मणो वृत्तिमुद्भावयति न दुर्बलस्येति। तस्मात् श्रुतिस्मृतिन्यायविरोधादश्लिष्टोऽयमशेषकर्माभिव्यक्त्यभ्युपगमः। शेषकर्मसद्भावेऽनिर्मोक्षप्रसङ्ग इत्ययमप्यस्थाने सम्भ्रमः "सम्यग्दर्शनादशेषकर्मक्षयश्रुतेः"।

एवं शुभाशुभकर्मविपाकः सामान्यतो निरूपितः। इदानीमशुभकर्मविपाको विशेषतो निरूप्यते स चाधर्मशब्दे १२२० पृ० उक्तोऽपि प्रपञ्चार्थमिहोच्यते—

पुराणसर्वस्वे विष्णु पु० २अ० ६अ० पराशरमैत्रेयसंवादे। "पराशर उवाच। ततश्च नरकान् विप्र! भुवोऽधः सलिलस्य च। पापिनो येषु पात्यन्ते तान् शृणुष्व समाहितः। रौरवश्चैव वेधश्च शूकरोविशसस्तथा। महाज्वालस्तप्तकुम्भः शवलोऽथ विमोहनः। रुधिरान्धो वैतरणी

कृमिशः कृमिभोजनः । असिपत्रवनं कृष्णोलाला-भक्षश्च दारुणः । तथा पूयवहः पापो वह्निज्वालो ह्यधः-शिराः । सन्दंशः कालसूत्रश्च तमश्चावीचिरेव च । श्वभोजनोऽथाप्रतिष्ठो ह्यवीचिश्च तथापरः । इत्याद्या यातना विप्र ! घातका भयदारुणाः । यमस्य विषये घोराः शस्त्राग्निभयदायिनः । पतन्ति येषु पुरुषाः पापकर्म-रताश्च ये । कूटसाक्ष्यं तथा सम्यक्पक्षपातेन यो वदेत् । यश्चान्यदनृतं वक्ति स नरो याति रौरवम् । भ्रूणहा गुरु-हन्ता च मित्रहा मुनिसत्तम ! । यान्ति ते रौरवं वेधं यश्चोच्छ्वासनिरोधकः । सुरापो भ्रूणहा हर्त्ता सुवर्णानाञ्च शूकरे । प्रयान्ति नरके यश्च तैः संसर्गमुपैति वै । राजन्य वैश्यहा त्वत्वे तथैव गुरुतल्पगः । तप्तकुम्भे स्वसृगामी हन्ति राजभटांश्च यः । साध्वीविक्रयकृद्बध्य (हत्वा) प्राणिनं केशविक्रयी । तप्तलोहे पतन्त्येते यश्च भक्तं परित्यजेत् । स्नुषां सुताञ्चाभिगामी महाज्वाले निपात्यते । अवमन्ता गुरूणां योयश्चाक्रोष्टा नराधमः । वेददूषयिता यश्च वेद विक्रयिकश्च यः । अगम्यागामी यश्च स्यात्ते यान्ति शवल द्विज । चौरो विमोहे पतति मर्य्यादादूषकस्तथा । देवद्विजपितृ-द्वेष्टा रत्नदूषयिता च यः । स याति कृमिभक्ष्ये वै कृमिशे च त्वरिष्टकृत् । पितृदेवान् सुरान् यस्तु पर्य्यश्नाति नरा-धमः । लालाभक्ष्ये पतत्युग्रे शरकर्त्ता च वेधके । करोति कर्णिनो यश्च यश्च खड्गादिकृन्नरः । प्रयान्त्येते विशसने नरके भयदारुणे । असत्प्रतिग्रहीता तु नरकं यात्यधोमुखम् । अयाज्ययाजकस्तद्वत्तथा नक्षत्र सूचकः । क्रूरः पूयवहस्त्वेको याति मिष्टान्नभुङ्नरः । लाक्षामांसरसानाञ्च तिलानां लवणस्य च । विक्रेता ब्राह्मणो याति तमेव नरकं द्विज ! । मार्जारकुक्कुटच्छाग-श्ववराहविहङ्गमान् । पोषयन्नरकं याति तमेव द्विज-सत्तम ! । रङ्गोपजीवी कैवर्त्तकुण्डाशी गरदस्तथा । सूचीमाहिषकश्चैव पर्व्वगामी च यो द्विज ! । अगारदाही मित्रघ्नः शाकुनिर्ग्रामयाजकः । रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये । मधुहारी ग्रामहन्ता याति वैतरणीं नरः । रेतःपानादिकर्त्तारो मर्य्यादाभेदिनो हि ये । ते कृष्णे यान्त्यशौचाश्च कुहकाजीविनश्च ये । असिपत्रवनं याति वनच्छेदी वृथैव यः । औरभ्रिको मृगव्याधो वह्निज्वाले पतन्ति वै । पात्यते द्विज ! तत्रैव यश्चागारेषु वह्निदः । व्रतेषु लोपको यश्च स्वाश्रमाद्विच्युतश्च यः । सन्दंशयातनामध्ये पततस्तावुभावपि । दिवास्वप्ने रेतः स्कन्दा ये नरा ब्रह्मवादिनः । पुत्रैरध्यापिता ये च ते पतन्ति श्वभोजने । एते चान्ये च नरकाः शतशोऽथ सहस्रशः । ये च दुष्कृतकर्म्माणः पच्यन्ते यातनागताः । यथैव पापा-न्येतानि तथान्यानि सहस्रशः । भुज्यन्ते यानि पुरुषै-र्नरकान्तरगोचरैः । वर्णाश्रमविरुद्धञ्च कर्म्म कुर्व्वन्ति ये नराः । कर्म्मणा मनसा वाचा निरयेषु पतन्ति ते । अधः-शिरोभिर्दृश्यन्ते नारकैर्दिवि देवताः । देवाश्चाधोमुखान् सर्व्वानधः पश्यन्ति नारकान् । स्थावराः कृमयोऽब्जाश्च पक्षिणः पशवो नराः । धार्म्मिकास्त्रिदशास्तद्वन्मोक्षिणश्च यथाक्रमम् । सहस्रभागः प्रथमो द्वितीयोऽनुक्रमात्ततः । सर्व्वेष्वेते महाभागा यावन्मुक्तिसमाश्रयाः । यावन्तो जन्तवः स्वर्गे तावन्तो नरकौकसः । पापकृद्याति नरकं प्रायश्चित्तपराङ्मुखः” । विशेषशुभाशुभकर्म्मविपाकाः तत्रैव शिवधर्म्मोत्तरे स्कान्दोक्ताः “अथ पापैरिमे यान्ति यमलोकं चतुर्व्विधैः । सन्त्रासजननं घोरं विविधाः सर्व्व देहिनः । गर्भस्थैर्जायमानैश्च बालैस्तरुणमध्यमैः । पुंस्त्रीनपुंसकैर्वृद्धैर्यातव्यं सर्व्वदेहिभिः । शुभाशुभ-फलं तत्र देहिनां प्रविचार्य्यते । चित्रगुप्तादिभिः स-भ्यैर्मध्यस्थैः समदर्शिभिः । न तेऽत्र प्राणिनः सन्ति ये न यान्ति यमक्षयम् । अवश्यं हि कृतं कर्म्म भोक्तव्य यद्विचारितम् । तत्र ये शुभकर्म्माणः सौम्यचित्ता दया-न्विताः । ते नरा यान्ति सौम्येन पथा यान्ति यमाल-यम् । यः प्रदद्याद्द्विजेन्द्राणामुपानत्काष्ठपादुके । स धराश्वेन महता सुखं याति यमालयम् । छत्रदानेन गच्छन्ति पथा शुभ्रेण देहिनः । दिव्यवस्त्रपरीधाना यान्ति वस्त्रप्रदायिनः । शिविकायाः प्रदानेन सद्रथेन सुखं व्रजेत् । शय्यासनप्रदानेन स्वपन् याति यमाश्रयम् । आरामकर्त्ता छायासु शीतलासु सुखं व्रजेत् । यान्ति पुष्पक-यानेन पुष्करारामदायिनः । देवायतनकर्त्ता च यतो-नामाश्रमस्य च । अनाथपान्थकानाञ्च क्रीड़न् याति रथोत्तमैः । देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकाः । पूज्यमाना नरा यान्ति कामिकेन यथासुखम् । द्योत-यन्तो दिशः सर्व्वा यान्ति दीपप्रदायकाः । प्रतिश्रयप्रदा-नेन सुखं याति गृहे स्वपन् । सर्व्वकामसमृद्धेन पथा-गच्छन्ति गोप्रदाः । येऽन्नदानानि कुर्व्वन्ति ते तृप्ता यान्ति सत्पथा । आर्त्तौषधप्रदातारः सुखं यान्ति निरामयाः । विश्राम्यन्तो गच्छन्ति गुरुशुश्रू-षणे रताः । पादशौचप्रदानेन शीतलेन पथा व्रजेत् ।

पादाभ्यङ्गञ्च यः कुर्य्यादश्वपृष्ठेन स व्रजेत् । हेमरत्नप्रदानेन याति दुर्गाणि निस्तरन् । वरानडुत्प्रदानेन वरयानेन गच्छति । अन्नपानप्रदानेन पिबन् खादंश्च गच्छति । इत्येवमादिभिर्दानैः सुखं यान्ति यमालयम् । स्वर्गेऽपि विपुलान् भोगान् प्राप्नोति विविधान्नरः । सर्व्वेषामेव दानानामन्नदानं परं स्मृतम् । सद्यः प्रीतिकरं दिव्यं बलबुद्धिविवर्द्धनम् । नान्नदानसमं दानं त्रिषु लोकेषु विद्यते । अन्नाद्भवन्ति भूतानि तदभावे म्रियन्ति च । रक्तं मांसं वसा शुक्रं क्रमादन्नात् प्रवर्त्तते । शुक्राद्भवन्ति भूतानि तस्मादन्नमयं जगत् । हेमरत्नाश्वनागेन्द्रनारीस्रक्चन्दनादिभिः । समस्तैरपि संप्राप्तैर्न रमन्ते बुभुक्षिताः । गर्भस्था जायमानाश्च बालावृद्धाश्च मध्यमाः । आहारमभिकाङ्क्षन्ति देवदानवतापसाः । क्षुधा हि सर्व्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः । तस्मादौषधिलेपेन (आहारेण) प्रतीकारः प्रकीर्त्तितः । नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधासमः । नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः । अतएव महापुण्यमन्नदानं प्रधानतः । यतः क्षुधाग्निसन्तप्ता म्रियन्ते सर्व्वदेहिनः । अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्व्वदः । तस्मादन्नप्रदानेन सर्व्वदानफलं लभेत् । त्रैलोक्ये यानि रत्नानि भोगस्त्रीवाहनानि च । अन्नप्रदः सर्व्वमिहामुत्र च तल्लभेत् । यस्मादन्नपानपुष्टाङ्गः कुरुते पुण्यसञ्चयम् । अन्नप्रदातुस्तस्यार्द्धं कर्त्तुश्चार्द्धं न संशयः । धर्म्मार्थकाममोक्षाणां देहः परमसाधनम् । स्थितिस्तस्यान्नपानाभ्यामतस्तत् सर्व्वसाधनम् । अन्नं प्रजापतिः साक्षादन्नं विष्णुः शिवः स्वयम् । तस्मादन्नसमं दानं न भूतं न भविष्यति । त्रयाणामपि लोकानामुदकं जीवनं स्मृतम् । पवित्रममृतं दिव्यं शुद्धं सर्व्वरसाश्रयम् । अन्नपानाश्वगोवस्त्रशय्याच्छत्रमासनम् । प्रेतलोके प्रशस्तानि दानान्यष्टौ विशेषतः । एवं दानविशेषेण धर्म्मराजपुरं नराः । यस्माद्यान्ति सुखेनैव तस्माद्दानं समाचरेत् । ये पुनः क्रूरकर्म्माणः पापा दानविवर्ज्जिताः । ते घोरेण पथा यान्ति दक्षिणेन यमालयम् । षडशीतिसहस्राणि योजनानामतीत्य वै । वैवस्वतपुरं ज्ञेयं नानारूपव्यवस्थितम् । समीपस्थमिवाभाति नराणां शुभकर्म्मणाम् । पापानामतिदूरस्थं पथा रौद्रेण गच्छताम् । तीव्रकण्टकयुक्तेन शर्करानिचितेन च । क्षुरधारानिभैस्तीव्रैः पाषाणैर्निचितैस्तथा । क्वचित् पङ्केन महता सदुत्तारैश्च खातकैः । क्वचित् सूचीनिभैर्दन्तैः संकुलेन पथा क्वचित् । तटप्रपातविषमैः पर्व्वतैर्वृक्षसङ्कुलैः । प्रतप्ताङ्गारयुक्तेन यान्ति मार्गेण दुःखिताः । क्वचिद्विषमगर्त्तैश्च क्वचिल्लोष्ट्रैः सुपिच्छलैः । प्रतप्तबालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः । अनेकशाखाविततैर्व्याप्तं वंशवनैः क्वचित् । कष्टेन तमसा मार्गमनालम्बन कुत्रचित् । अयःशृङ्गाटकैस्तप्तैः क्वचिद्दावाग्निना पुनः । क्वचित्तप्तशिलाभिश्च क्वचिद्व्याप्तं हिमेन च । क्वचिद्बालुकया व्याप्तमाकण्ठान्तप्रवेशया । क्वचिदुष्णाम्बुना व्याप्तं क्वचिच्च करीषाग्निना । क्वचित् सिंहैर्वृकैर्व्याप्तं दंशैः कीटैश्च दारुणैः । क्वचिन्महाजलौकाभिः क्वचिच्चाजगरैः पुनः । मक्षिकाभिश्च रौद्राभिः क्वचित् सर्पविषोल्बणैः । मत्तमातङ्गयूथैश्च बलोन्मत्तैः प्रमाथिभिः । पन्थानमुल्लिखद्भिश्च तीक्ष्णशृङ्गैर्महावृषैः । महाविषाणैर्महिषैरुद्रैर्मत्तैश्च रोहकैः । डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः । व्याधिभिश्च महाघोरैः पीड्यमाना व्रजन्ति ते । महाधूलिविमिश्रेण महाचण्डेन वायुना । महापाषाणवर्षेण हन्यमाना निराश्रयाः । क्वचिद्विद्युत्प्रपातेन दार्य्यमाणा व्रजन्ति च । महाटङ्कौघवर्षेण भिद्यमानाश्च सर्व्वतः । पतद्भिर्वज्रसंघातैरुल्कापातैश्च दारुणैः । प्रतप्ताङ्गारवर्षेण दह्यमाना रुदन्ति च । महता पांशुवर्षेण पूर्य्यमाणा रुदन्ति हि । बहुमेघरवैर्घोरैर्वित्रास्यन्ते मुहुर्मुहुः । निशितायुधवर्षेण चूर्ण्यमानाश्च सर्व्वतः । महाक्षाराम्बुधाराभिः सिच्यमाना द्रवन्ति च । महाशीतेन मरुता रूक्षेण परुषेण च । समन्ताद्धूयमानाश्च शुष्यन्ते सङ्कुचन्ति च । इत्थं रौद्रेण मार्गेण पाथेयरहितेन च । निरालम्बेन दुर्गेण निर्जनेन समन्ततः । अविश्रामेण महता निर्गतापाश्रयेण च । तमोरूपेण कष्टेन सर्व्वदुःखाश्रयेण च । नीयन्ते देहिनः सर्व्वे ये मूढाः पापकारिणः । यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् । एकाकिनः पराधीना मित्रबन्धुविवर्ज्जिताः । शोचन्तः स्वानि कर्म्माणि रुदन्तस्ते मुहुर्मुहुः । प्रेतीभूता विवस्त्राश्च शुष्ककण्ठौष्ठतालुकाः । भयार्त्ताभीतभीताश्च दह्यमानाः क्षुधाग्निना । बद्धाः शृङ्खलया केचिदुत्तानाः पादयोर्नराः । आकृष्यन्ते हृष्यमाणा यमदूतैर्बलोत्कटैः । उरसाऽधोमुखाश्चान्ये कृष्यमाणाः सुदुःखिताः । केशपाशनिबद्धाश्च समाकृष्यन्ति रज्जुना । ललाटे चासिना चान्ये विद्धाः कृष्यन्ति देहिनः । उत्तानाः कण्टकपथा क्वचिद्-

क्षुरवर्त्मना । पश्चाद्गुधाहृदरद्वाश्च जठरे च प्रपीडिताः । पूरिताः शृङ्खलाभिश्च हस्तयोश्चापि कीलिताः । पाशपाशेन कृष्यन्तः प्रयान्त्यन्ये सुदुःखिताः । जिह्वाशङ्कुप्रबद्धेनाकृष्य नीयन्ति रज्जुना । कृकाट्यामर्द्धचन्द्रेण छिद्यमाना यतस्ततः । शिश्ने वृषणे बद्धा नीयन्तेऽन्ये च रज्जुना । नासाग्रवहरज्ज्वा च समाकृष्यन्ति चापरे । भिन्नाः कपोलयोरन्ये कृष्यन्ते ते तथौष्ठयोः । विभिन्नाश्चोदरे चान्ये तप्तशृङ्खलया नराः । कृष्यन्ते कर्णयोश्चान्ये भिन्नाश्च चिबुके परे । छिन्नापपादहस्ताश्च छिन्नकर्णौष्ठनासिकाः । संछिन्नशिश्नवृषणाश्छिन्नभिन्नाङ्गसन्धयः । प्रहन्यमानाः कुन्तैश्च भिद्यमानाश्च सायकैः । इतस्ततः प्रधावन्ति क्रन्दमाना निराश्रयाः । मुद्गरैर्लोहदण्डैश्च हन्यमाना मुहुर्मुहुः । कण्टकैश्च विविधैर्घोरैर्ज्वलिताग्निसमप्रभैः । भिन्दीपालैर्विभिद्यन्ते स्रवन्तः पूयशोणितम् । कृमिजग्धाश्च नीयन्ते सन्तता विवशा नराः । याचमानाश्च सलिलमन्नञ्चापि बुभुक्षिताः । छायां प्रार्थयमानाश्च शीतार्त्ता अनलं पुनः । दानहीना प्रयान्त्येवं याचन्तो विमुखा नराः । गृहीतदानपाथेयाः सुखं यान्ति यमालयम् । एवं प्रयान्ति कष्टेन प्राप्ताः प्रेतपुरं तदा । प्रज्ञापितास्तदा दूतैर्निवेश्यन्ते यमाग्रतः । तत्र ये शुभकर्माणस्तांस्तु सम्मानयेद्यमः । स्वागतासनदानेन पाद्यार्घ्येण प्रियेण च । धन्या यूयं महात्मानः स्वात्मनोहितकारिणः । येन दिव्यसुखार्थाय भवद्भिः सुकृतं कृतम् । इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितम् । स्वर्गं गच्छध्वमतुलं सर्वकामसमन्विताः । तत्र भुक्त्वा महाभोगांस्तदन्ते पुण्यसंक्षयात् । यत्किञ्चिदल्पमशुभं पुनस्तदिह भोक्ष्यथ । ते चापि धर्मराजानं नराः पुण्यानुभावतः । पश्यन्ति सौम्यवदनं पितृभूतमिवात्मनः । ये पुनः क्रूरकर्माणस्ते पश्यन्ति भयानकम् । मापाण्डवनयना विपरीतात्मवृत्तयः । दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् । ऊर्द्धकेशं महाश्मश्रुं प्रस्फुरदधरोत्तरम् । अष्टादशभुजं क्रुद्धं नीलाञ्जनचयप्रभम् । सर्वायुधोद्यतकरं यमदण्डेन तर्जिनम् । महामहिषमारूढं दीप्ताग्निसमलोचनम् । रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितम् । प्रलयाम्बुदनिर्घोषं पिबन्तमिव सागरम् । ग्रसन्तमिव त्रैलोक्यमुद्गिरन्तमिवानलम् । मृत्युश्च तत्समीपस्थः कालानलसमप्रभः । कालश्चाञ्जनसङ्काशः कृतान्तश्च भयानकः । मारी चोग्रा महामारी कालरात्री च दारुणा । विविधा व्याधयः कष्टा नानारूपा भयावहाः । शक्तिशूलाङ्कुशकराः पाशचक्रासिधारिणः । वज्रदण्डधरा रौद्राः क्षुरतूणधनुर्द्धराः । असंख्याता महावीर्य्याः क्रूराञ्जनसमप्रभाः । सर्वायुधोद्यतकरा यमदूता भयानकाः । अनेन परिवारेण महाघोरेण संवृतम् । यमं पश्यन्ति पापिष्ठाश्चित्रगुप्तञ्च भीषणम् । निर्भर्त्सयति चात्यर्थं यमस्तान् पापकर्मिणः । चित्रगुप्तश्च भगवान् धर्म्मवाक्यैः प्रबोधयेत् । भो भो दुष्कृतकर्माणः ! परद्रव्यापहारिणः ! । गर्विता रूपवीर्येण परदारविमर्द्दकाः ! । यत् स्वयं क्रियते कर्म तत् स्वयं भुज्यते जनाः । तत् किमात्मोपघातार्थं भवद्भिर्दुष्कृतं कृतम् ?। इदानीं किं प्रतप्यध्वं ? पीड्यमानाः स्वकर्मभिः । भुङ्क्ष्वं स्वानि कर्माणि नात्र दोषोऽस्ति कस्यचित् । एते ते पृथिवीपालाः संप्राप्ता मत्समीपतः । स्वकीयैः कर्मभिर्घोरैः दुष्प्रज्ञाबलदर्पिताः । भोभो नृपा ! दुराचाराः ! प्रजाविध्वंसकारिणः ! । अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम् ? । राज्यलोभेन मोहेन बलादन्यायतः प्रजाः । विध्वंसिताः फलं तस्य भुङ्क्ष्वमधुना नृपाः ! । क्व तद्राज्यं कलत्रञ्च यदर्थमशुभं कृतम् । तत् सर्वं संपरित्यज्य यूयमेकाकिनः स्थिताः । पश्यामस्तद्बलं वोनो येन तद्दण्डिताः प्रजाः । यमदूतैस्ताड्यमाना अधुना कीदृशं भवेत् । एवं बहुविधैर्वाक्यैरुपालभ्य यमेन ते । शोचन्तः स्वानि कर्माणि तूष्णीं तिष्ठन्ति पार्थिवाः । इति धर्मं समादिश्य नृपाणां धर्मराट् पुनः । तत्पापपङ्कशुद्ध्यर्थमिदं वचनमब्रवीत् । भोभोश्चण्ड महाचण्ड गृहीत्वा नृपतीनिमान् । विशोधयध्वं पापेभ्यः क्रमेण नरकाग्निना । ततः शीघ्रं समुत्थाय नृपान् संगृह्य पादयोः । भ्रामयित्वातिवेगेन निक्षिप्योर्द्धं प्रगृह्य च । सर्व्वप्राणेन महता प्रतप्तेऽथ शिलातले । आस्फालयन्ति तरसा वज्रेणेव महाद्रुमम् । ततः स राजदेहान्तःप्रविष्टो जर्ज्जरीकृतः । निःसंज्ञः स तदा देही निश्चेष्टश्च प्रजायते । ततः स वायुना स्पृष्टः शनैरुज्जीवते पुनः । ततः पापविशुद्ध्यर्थं क्षिप्यते नरकार्णवे । अष्टाविंशतिरेवाधः क्षितेर्नरककोटयः । सप्तमस्य तलस्यान्ते घोरे तमसि संस्थिताः । घोराऽख्या प्रथमा कोटिः सुघोरा तदधःस्थिता । अतिघोरा तृतीया च घोरघोरा चतुर्थिका । पञ्चमी घोररूपा च कोटिरेका प्रकीर्त्तिताः । षष्ठी तरलभाराख्या सप्तमी

च भयानका” इत्युपक्रम्य “कराला विकराला च वज्रविंशतिमा स्मृता। त्रिकोणा पञ्चकोणा च सुदीर्घा प्रतिवर्त्तुला। सप्तभौमाष्टभौमा च दीप्तमायेति चाष्टमी। एता नाम्ना समुद्दिष्टा घोरा नरककोटयः। अष्टाविंशतिरेवैताः पापानां यातनात्मकाः। आसां क्रमेण विज्ञेयाः पञ्चपञ्चैव नायकाः। प्रत्येकं सर्व्वकोटीनां नामतस्तन्निबोधत। रौरवः प्रथमस्तेषां रुदन्ति यत्र देहिनः। महारौरवपीडाभिर्महान्तोऽपि रुदन्ति हि। तमः शीतं तथाचोष्णं पञ्चाद्ये नायकाः स्मृताः। सुघोषः सुतलस्तीक्ष्णः पद्मः सञ्जीवनः शठः। महामायी विलोमश्च सुलोमश्च कटङ्कटः। तीव्रवेगः करालश्च विकरालः सुकम्पनः। महापद्मः सुवक्रश्च कालसूत्रः प्रगर्जनः। सूचीमुखः सुनेमिश्च खादकः सुप्रपीडितः। कुम्भीपाकः सुपाकश्च क्रकचश्चातिदारुणः। अङ्गारराशिभवनमसृक्पूयह्रदस्तथा। तीक्ष्णास्यस्तु शकुनिर्महासंवर्त्तकः क्रतुः। तप्तजन्तुः पङ्कलेपः पूतिमांसो द्रवद्वपुः। उच्छासश्च निरुच्छासः सुदीर्घः कूटशाल्मलिः। अरिष्टः सुमहानादः प्रवहोऽसृक्प्रवाहणः। श्वपमेषवृकशल्यसिंहव्याघ्रगजाननाः। श्वसूकराश्वमहिषवृषखड्गिखराननाः। ग्राहकुम्भीरनक्रास्याः सर्पकूर्माश्च वायसाः। गृध्रोलूकजलौकाश्च शार्दूलकपिकर्कटाः। गण्डकः पूतिवक्त्रश्च रक्ताक्षः पूतिमृत्तिकः। कणधूमस्तथाग्निश्च कृमीणां निचयस्तथा। अमेध्यशातितश्च रुधिराम्बुः श्वभोजनः। लालाभक्षश्चान्त्रभक्षः सर्व्वभक्षः सुदारुणः। सङ्कटः सुविलश्चैव विषमः कटपूतनः। अम्बरीषः कटाहश्च कष्टा वैतरणी नदी। सुतप्तलोहशयनमेकपादप्रपूरणः। असितालवनं घोरमस्थिभङ्गः प्रपीड़नः। तिलातसी मसुह्नौ च कूटपापः प्रमर्द्दनः। महाचूर्णं सुचूर्णश्च तप्तलोहमयी शिला। पर्व्वतः क्षुरधाराख्यस्तथा यमलपर्व्वतौ। मूत्रविष्ठान्धकूपश्च क्षारान्धश्च शोषणः। मुषलोदूखलं यन्त्रं शिलाशकटलाङ्गलम्। तालपत्रासिगहनं महामशकमण्डलम्। सम्मोहनोऽस्थिभङ्गश्च तप्तशूलमयोगुडः। बहुदुःखं महादुःखं कश्मलं समलं मलम्। हालाहलो विरूपश्च सुरूपश्च यमानुगः। एकपादो द्विपादश्च तीव्रश्चावीचिवर्त्तिनः। अष्टाविंशतिरित्येते क्रमशः परकार्त्तिताः। एषां नामानुपूर्व्येण पञ्चपञ्चैव नायकाः। रौरवादि अवीच्यन्तं नरकाणां शतं स्मृतम्। चत्वारिंशत्समधिकं महानरकमण्डलम्। एषु पापाः विपच्यन्ते नराः कर्म्मानुरूपतः। यातनाभिर्व्विचित्राभिरा कर्म्मप्रक्षयाद्भृशम्। आमलप्रक्षयात् यद्वदग्नौ ध्मायन्ति धातवः। तथाऽऽपापक्षयात् पापाः शोध्यन्ते नरकाग्निषु। हस्तयोः पादयोर्बद्धा तप्तशृङ्खलया नराः। महावृक्षाग्रमारोप्य लम्ब्यन्ते यमकिङ्करैः। ततस्ते सर्व्वयत्नेन क्षिप्ता दोल्यन्ति किङ्करैः। दोल्यमानाश्चातिवेगेन निःसंज्ञा यान्ति योजनम्। अन्तरीक्षस्थितानाञ्च लोहभारः समन्ततः। पादयोर्बध्यते तेषां यमदूतैर्महाबलैः। तेन भारेण महता भृशमात्रेण दुःखिताः। ध्यायन्तः स्वानि कर्म्माणि तूष्णीं तिष्ठन्ति निश्चलाः। कशाभिरग्निवर्णाभिर्लौहदण्डैः सकण्टकैः। हन्यन्ते किङ्करैर्घोरैः समन्तात्पापकारिणः। ततः क्षारेण दीप्तेन वह्निनापि विशेषतः। समन्ततः प्रलिप्यन्ते क्षताङ्गा जर्जरीकृताः। पुनर्विदार्य्य चाङ्गेषु शिरसः प्रभृति क्रमात्। वार्त्ताकुवत् प्रभज्यन्ते तप्ततैलकटाहके। विष्ठापूर्णे ततः कूपे कृमीणां निचये तथा। मेदोऽसृक्पूयपूर्णायां वाप्यां क्षिप्यन्ति ते पुनः। भक्ष्यन्ते कृमिभिस्तीक्ष्णैर्लौहतुण्डैश्च वायसैः। श्वभिर्दंशैर्वृकैर्व्याघ्रैश्च विकृताननैः। पच्यन्ते मांसवच्चापि प्रतप्ताङ्गारराशिषु। भिन्नाः शृङ्गेषु तीक्ष्णेषु नराः पापेन कर्म्मणा। तैलपीडैरिवाक्रम्य घोरकर्म्मभिरात्मजैः। तिलवत् संप्रपीड्यन्ते चक्राख्ये नरके नराः। क्वथ्यन्ते चातितप्तेषु लौहभाण्डेष्वनेकधा। तैलपूर्णकटाहेषु सुतप्तेषु तथा पुनः। बहुशः पात्यते जिह्वा येऽसत्याप्रियवादिनः। सन्दंशेन सुदीप्तेन प्रपीड्यास्य पादतः। मिथ्यागमप्रवक्तुश्च जिह्वाईमास्यनिर्गतात्। जिह्वार्द्धात् क्रोशविस्तीर्णाच्छूलैस्तीक्ष्णैश्च पात्यते। निर्भर्त्सयन्ति ये क्रूरा मातरं पितरं गुरुम्। तेषां वक्त्रं जलौकाभिः समापूर्य्य सीव्यते। ततः क्षारेण दीप्तेन ताम्रेण त्रपुणा पुनः। द्रुतेनापूर्य्य तेऽप्यथ तप्ततैलैश्च तन्मुखम्। इतस्ततः पुनर्वक्त्रं भृशमापूर्य्य हन्यते। विष्ठाभिः कृमिमिश्राभिः सोपानत्चरणैर्नरैः। परिष्वजन्ति चात्युग्रं प्रदीप्तं लौहशाल्मलिम्। हन्यन्ते पृष्ठदेशे च पुनर्भीमैर्महानखैः। दन्तुरेणाति कष्टेन क्रकचेन बलीयसा। शिरःप्रभृति पूर्य्यन्ते घोरैः कर्म्मभिरात्मजैः। खाद्यन्ते च स्वमांसानि पाय्यन्ते शोणितं स्वकम्। अन्नपानं न दत्तं यैर्मूढै-

नानुमोदितम् । इक्षुवत् संप्रपीड्यन्ते जर्जरीकृत्य मुद्गरैः । असितालवनैर्घोरैश्छिद्यन्ते खण्डखण्डशः । सूचीभिर्भिन्नसर्व्वाङ्गास्तप्तशूलापरोपिताः । संह्राद्यमानाविवशाः क्लिश्यन्ते न म्रियन्ति च । देहादुत्पाट्यते मांसं भिद्यन्तेऽस्थीनि मुद्गरैः । अतीवाकृष्यते तूर्णं यमदूतैर्बलोत्कटैः । निरुच्छ्वासे निरुच्छ्वासास्तिष्ठन्ति नरके चिरम् । उच्छ्वसन्तः सदोच्छ्वासे वालुकावदनावृताः । रौरवे रोदमानाश्च पीड्यन्ते विविधैर्वधैः । महारौरवपीडाभिर्महान्तोऽपि रुदन्ति हि । पञ्चरामासे गुदे चाक्ष्णोः पदे चोरसि मस्तके । निखन्यन्ते घनास्तीक्ष्णाः सुतप्ता लोहशङ्कवः । सुतप्तवालुकायाञ्च प्रपीड्यन्ते मुहुर्मुहुः । जातपङ्के भृशं तप्ते क्षिप्ताः क्रन्दन्ति विस्वरम् । तेन तेनैव रूपेण हसन्तीं परदारिकाम् । गाढमालिङ्गयते नारीं ज्वलन्तीं लोहनिर्मिताम् । पूर्व्वाकाराश्च पुरुषाः प्रज्वलन्तः समन्ततः । दुश्चारिणीं स्त्रियं गाढमालिङ्गन्तो वदन्ति च । किं प्रधावसि वेगेन न ते मोक्षोऽस्ति साम्प्रतम् । वञ्चितस्ते यथा भर्त्ता पापं भुङ्क्ष्व तथाऽधुना । लौहकुम्भे तथा क्षिप्ता सुपिधानैः शनैः शनैः । महदग्निना प्रपच्यन्ते श्वपाकैरिव मानवाः । घोरदन्त्यूदूखले सास्राः प्रकृष्यन्ते शिलासु च । क्षिप्यन्ते चान्धकूपेषु दश्यन्ते,क्रमिभिर्भृशम् । क्रमिभिर्भिन्नसर्व्वाङ्गाः शतशो जर्जरीकृताः । सुतीक्ष्णक्षारकूपेषु क्षिप्यन्ते तदनन्तरम् । महाज्वाले च नरके पापाः फूत्कारयन्ति च । इतस्ततश्च धावन्ति दह्यमानास्तदर्चिषा । पृष्ठे चानीय जङ्घे द्वे विन्यस्ते करयोः स्थिते । तयोर्मध्येन चाकृष्य बाहुपृष्ठेन गाढतः । बद्ध्वा परस्परं सर्व्वं सुदृढं गाढरज्जुभिः । पिण्डबन्धं दृशन्त्येवं भ्रमराक्षीणलोहजाः । मानिनां क्रोधिनाञ्चैव तस्कराणाञ्च दारुणा । पिण्डबन्धसमा याम्या महाज्वाले च यातना । रज्जुभिर्वेष्टिताङ्गाश्च प्रलिप्ताः कर्दमेन च । करीषतुषवह्नौ च पच्यन्ते च म्रियन्ति च । सुतीक्ष्णधारतोयेन कर्कशासु शिलासु च । क्षा पापसंक्षयात् पापा घृष्यन्ते चन्दनं यथा । शरीराभ्यन्तरगतैः प्रभूतैः कृमिभिर्नराः । भक्ष्यन्ते तीक्ष्णवदनैरा देहप्रक्षयाद्भृशम् । कृमीणां निचये क्षिप्ताः पूतिमांसस्य राशिषु । तिष्ठन्त्युद्विग्नहृदयाः पर्व्वताभ्याञ्च पीडिताः । सुतप्तवज्रलेपेन शरीरमनुलिप्यते । अधोमुखोर्द्ध्वपादश्च धृताः शुष्यन्ति वह्निना । वदनान्तःप्रविन्यस्तं सुमतप्तमयोगुडम् । ते खाद्यन्ते पराधीना हन्यमानास्तु मुद्गरैः । ये शिवायतनारामवापीकूपमठाङ्गणान् । विद्रावयन्ति पापिष्ठा स्तपास्तत्र वसन्ति च । व्यायामोद्वर्त्तनाभ्यङ्गस्नानमापानभोजनम् । क्रीडनं द्यूतमिथुनमाचरन्ति वसन्ति च । ते वधैर्विविधैर्घोरैरिक्षुयन्त्रादिपीडनैः । निरयाग्निषु पच्यन्ते यावदाचन्द्रतारकम् । ये शृण्वन्ति गुरोर्निन्दां तेषां कर्णौ प्रपूर्य्यतः । अग्निवर्णैरयःफालैस्तप्तताम्रादिभिः स्रुतैः । त्रपुसीसारकूटाद्यैः क्षारेण जतुना पुनः । सुतप्ततीक्ष्णतैलेन वज्रलेपेन चान्ततः । क्रमादापूर्य्यतः कर्णौ नरकेषु च यातनाः । अनुक्रमेण सर्व्वेषु भवन्त्येते समन्ततः । सर्व्वेन्द्रियाणामप्येवं क्रमात् पापेन यातनाः । भवन्ति घोराः प्रत्येकं शरीरेण कृतेन च । स्पर्शलोभेन ये मूढाः संस्पृशन्ति परस्त्रियम् । तेषां त्वगग्निवर्णाभिः सूचीभिः पूर्य्यते भृशम् । ततः क्षारादिभिः सर्व्वैः शरीरमनुलिप्यते । यातनाश्च महाकष्टाः सर्व्वेषु नरकेषु च । गुरौ कुर्व्वन्ति भ्रुकुटीं क्रूरनेत्राश्च ये नराः । परदारांश्च पश्यन्ति लुब्धाः स्निग्धेन चेतसा । सूचीभिरग्निवर्णाभिस्तेषां नेत्रे प्रपूर्य्यतः । क्षाराद्यैश्च क्रमात् सर्व्वैर्हि सर्व्वाश्च यातनाः । देवाग्निगुरुविप्राणामनिवेद्य च भुञ्जतः । लौहकीलशतैस्तप्तैस्तज्जिह्वास्य प्रपूर्य्यते । ततः क्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् । शरीरेषु महाघोराश्चिता नरकयातनाः । ये शिवारामपुष्पाणि लोभात् संगृह्य पाणिना । जिघ्रन्ति मूढमनसः शिरसा धारयन्ति वा । आपूर्य्य च शिरस्तेषां सुतप्तैर्लोहशङ्कुभिः । नासिका चातिवह्निशस्ततः क्षारादिभिः पुनः । ये निन्दन्ति महात्मानमाराध्यं धर्म्मदेशकम् । शिवभक्तांश्च ये मूढाः शिवधर्म्मञ्च शाश्वतम् । तेषामुरसि कण्ठे च जिह्वायां दन्तसन्धिषु । तालुन्योष्ठे च नासायां मूर्द्ध्नि सर्व्वाङ्गसन्धिषु । अग्निवर्णाः सुतप्ताश्च विशिखा लोहशङ्कवः । आपोथ्यन्ते सुबहुशः स्थानेष्वेतेषु मुद्गरैः । ततः क्षारेण तप्तेन ताम्रेण त्रपुणा पुनः । तप्ततैलादिभिः सर्व्वैरापूर्य्यन्ते समन्ततः । यातना च महाचित्रा शरीरस्यापि सर्व्वतः । निःशेषं नरकेष्वेवं भवन्ति क्रमशः पुनः । ये गृह्णन्ति परद्रव्यं पद्भ्यां विप्रं स्पृशन्ति च । शिवोपकरणं माञ्च ज्ञानञ्च लिखितं क्वचित् । हस्तपादौ घनौ तेषामाचूर्य्यन्ते समन्ततः । क्षारताम्रादिभिस्तप्तैः सदन्ते बहुशः पुनः ।

नरकेषु च सर्व्वेषु विचित्रा देहयातनाः। भवन्ति बहुशः कष्टाः पाणिपादसमुद्भवाः। शिवायतनपर्य्यन्ते शिवारामेषु कुत्रचित्। समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव वा। तेषां शिश्नं सवृषणं चूर्ण्यते लौहमुद्गरैः। सूचीभिरग्निवर्णाभिस्ततश्चापूर्य्यते पुनः। लोहदण्डश्च सुमहानग्निवर्णः सकण्टकः। आपीड्यते गुदे तेषां यावन्मूर्द्धि विनिर्गतः। ततः क्षारेण महता ताम्रेण त्रपुणा पुनः। इतेनापूर्य्यते गाढं गुदं शिश्नञ्च देहिनाम्। मनः सर्व्वेन्द्रियाणाञ्च यस्मादुक्तं प्रवर्त्तकम्। तस्मादिन्द्रियदुःखेन जायते तत् सुदुःखितम्। धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया। अतिथिञ्चावमन्यन्ते कालप्राप्तं गृहाश्रमे। तेनैते वीरणैरुच्चा हस्तयोश्चापि ताडिताः। प्रसारिताङ्गाः शुष्यन्तस्तिष्ठन्त्यवद्यन्त नराः। हस्तपादललाटेषु कीलिता लौहशङ्कुभिः। नित्यञ्च विवृतं वक्त्रं कीलकत्रयताडितम्। कृमिभिः प्राणिभिश्चोग्रैर्लौहदण्डैश्च वायसैः। उपद्रवैर्बहुविधैस्तु खमन्तः प्रपीड्यते। जिह्वावेधनिबद्धाश्च संपीड्यन्ते भृशं पुनः। तिष्ठन्ति लम्बमानाश्च लोहभाराः सुवर्त्तुलाः। शिश्ने सवृषणे तद्वत् लोहभारद्वयं पुनः। तिष्ठते लम्बमानञ्च बाहुभ्याञ्च चतुर्गुणम्। ततः स्वमांसमुत्कृत्य तिलमात्रप्रमाणतः। खादितुं दीयते तेषां स्वच्छपेण तु शोणितम्। यदा निर्मांसतां प्राप्ताः कालेन बहुना नराः। ततः क्षारेण दीप्तेन तच्छरीरं विलिप्यते। क्लिद्यन्ते वर्षधाराभिः क्लिश्यन्ते वै पुनः पुनः। शुष्काः सिच्यन्ति तैलेन सुतप्तेन समन्ततः। पच्यन्ति भूयो भूयोऽपि दूरस्थेन शनैः शनैः। निःशेषयातनाभिश्च पीड्यन्ते क्रमशः पुनः। स्थशं बुभुक्षया पीड्य कष्टा चातिपिपासया। अत्युष्णेनातिशीतेन पापानां स्मरणेन च। एवमाद्या महाघोरा यातनाः पापकर्म्मिणाम्। एकैकनरके ज्ञेयाः शतशोऽथ सहस्रशः। प्रत्येकं यातनाश्चित्राः सर्व्वेषु नरकेषु च। कष्टा वर्षशतेनापि सर्व्वा वक्तुं न शक्यते। इति तैर्विविधैर्घोरैः पाच्यमानाः स्वकर्म्मभिः। म्रियन्ते नैव पापिष्ठा यावत् पापस्य न क्षयः। तत्रान्या यातनाः कष्टा विविधाः पापकारिणाम्। महाघोरातिघोराश्च कल्पाग्निसदृशोपमाः। श्रुत्वैव यातनास्तूर्णं म्रियन्ते मृदुचेतसः। ततस्ते-मात्र कथिताः पापा व्रजन्ति याः स्वयम्। पुत्रमित्रकलत्रार्थं यदपुण्यं त्वया कृतम्। एकाकी दह्यसे तेन नात्र पश्यसि बान्धवान्। आत्मनैव कृतं पापं भोक्तव्यं भुवमात्मना। तत् किमात्मोपघातार्थं मूढ! पापं कृतं त्वया। एवं दूतैरुपालभ्यास्तान् पृच्छन्ति ततः पुनः। कियन्तं केन पापेन कालमत्रासते नराः। देवद्रव्यविनाशेन गुरुद्रोहादिकर्म्मभिः। क्रमात् सर्व्वेषु पच्यन्ते नरकेषु महीक्षयात्। महापातकिनश्चापि सर्व्वेषु नरकेष्विह। आचन्द्रतारकं यावत् पीड्यन्ते विविधैर्बधैः। महापातकिनः सर्व्वे निरयार्णवकोटिषु। चतुर्दशमन्वन्तरकल्पान्तं विविधैर्बधैः। उपपातकिनश्चापि तदर्द्धं यान्ति मानवाः। पापशेषैस्तदर्द्धञ्च कालञ्चापि तथाविधम्। तस्मात् पापं न कुर्व्वीत चञ्चले जीविते सति। पापेन हि ध्रुवं यान्ति नरकेषु नराः स्वयम्। यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः। पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना। कथं ते पापनिरता नरा रात्रिषु शेरते। मन्वन्तरान्तं तेषां च नरके तीव्रयातनाः। एवं क्लिष्टाः विशुद्धाश्च सावशेषेण कर्म्मणा। ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः। स्थावरा विविधाकारास्तृणगुल्मादिभेदतः। तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु। निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति पक्षिणः। संक्षिप्ताः पक्षिभावेन भवन्ति तृणजातिषु। मार्गदुःखमतिक्रम्य जायन्ते पशुयोनिषु। क्रमाद्गोयोनिमासाद्य पुनर्जायन्ति मानुषाः। एवं योनिषु सर्व्वासु परिभ्रम्य क्रमेण तु। कालान्तरवशाद् यान्ति मानुष्यमतिदुर्लभम्। व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात्। विचित्रा गतयः प्रोक्ताः कर्म्मणां गुरुलाघवात्। मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम्। द्वयोर्न साधयेदेकं स मृतस्तप्यते चिरम्। देवासुराणां सर्व्वेषां मानुष्यमतिदुर्लभम्। तत् संप्राप्य तथा कुर्य्यान्न गच्छेन्नरकं यथा। स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः। सर्व्वस्य मूलं मानुष्यं तद्यत्नादनुपालय। धर्म्ममूलेन मानुष्यं लब्ध्वा सर्व्वार्थसाधकम्। यदि लाभे न यत्नस्ते मूलं रक्षस्व यत्नतः। मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम्। न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः। सर्व्वेषामेव देशानामयं देशः परः स्मृतः। इतः स्वर्गश्च मोक्षश्च अतः संप्राप्यते नरैः। देशेऽस्मिन् भारते पुण्यं प्राप्य मानुष्यसम्भवम्। यः कुर्य्यान्नात्मनः श्रेयस्तेनात्मा वञ्चितश्चिरम्। भोगभूमिः स्मृतः स्वर्गः कर्म्मभूमिरयम् मता। इह यत् क्रियते कर्म्म स्वर्गे तदुपभुज्यते। यावत् सुस्थशरीरस्त्वं तावद्धर्म्मं समाचर। अहस्यौनोदितोऽ-

नानुमोदितम् । इक्षुवत् संप्रपीड्यन्ते जर्ज्जरीकृत्य मुद्गरैः । असितालवनैर्घोरैश्छिद्यन्ते खण्डखण्डशः । सूचीभिर्भिन्नसर्व्वाङ्गास्तप्तशूलाधिरोपिताः । सञ्चाल्यमाना विवशाः क्लिश्यन्ते न म्रियन्ति च । देहादुत्पाट्यते मांसं भिद्यन्तेऽस्थीनि मुद्गरैः । अतीवाकृष्यते तूर्णं यमदूतैर्व्वकोत्कटैः । निरुच्छ्वासे निरुच्छ्वासास्तिष्ठन्ति नरके चिरम् । उच्छ्वसन्तः सदोच्छ्वासे वालुकावदनाहताः । रौरवे रोदमानाश्च पीड्यन्ते विविधैर्व्वधैः । महारौरवपीड़ाभिर्महान्तोऽपि रुदन्ति हि । यन्त्रामासे गुदे चाक्ष्णोः पदे चोरसि मस्तके । निखन्यन्ते घनास्तीक्ष्णाः सुतप्ता लोहशङ्कवः । सुतप्तवालुकायाञ्च प्रपीड्यन्ते मुहुर्म्मुहुः । जानुपङ्के भृशं तप्ते क्षिप्ताः क्रन्दन्ति विस्वरम् । तेन तेनैव रूपेण हसन्तीं परदारिकाम् । गाढमालिङ्ग्यते नारीं ज्वलन्तीं लोहनिर्म्मिताम् । पूर्व्वाकाराश्च पुरुषाः प्रज्वलन्तः समन्ततः । दुश्चारिणीं स्त्रियं गाढमालिङ्गन्तो वदन्ति च । किं प्रधावसि वेगेन न ते मोक्षोऽस्ति साम्प्रतम् । वञ्चितस्ते यथा भर्त्ता पापं भुङ्क्ष्व तथाऽधुना । लौहकुम्भे तथा क्षिप्ता सुपिधानैः शनैः शनैः । महद्गिना प्रपच्यन्ते श्वपाकैरिव मानवाः । घोरदन्त्यूदूखले शास्त्राः प्रकृष्यन्ते शिलासु च । क्षिप्यन्ते चान्धकूपेषु दश्यन्ते,कृमिभिर्भृशम् । कृमिभिर्भिन्नसर्व्वाङ्गाः शतशो जर्ज्जरीकृताः । सुतीक्ष्णक्षारकूपेषु क्षिप्यन्ते तदनन्तरम् । महाज्वाले च नरके पापाः फुत्कारयन्ति च । इतस्ततश्च धावन्ति दह्यमानास्तदर्च्चिषा । पृष्ठे चानीय जङ्घे द्वे विन्यस्ते करयोः स्थिते । तयोर्म्मध्येन चाकृष्य बाहुपृष्ठेन गाढतः । बद्ध्वा परस्परं सर्व्वं सुदृढं गाढरज्जुभिः । पिण्डबन्धं दधन्त्येवं भ्रमरास्तीक्ष्णलोहजाः । मानिनां क्रोधिनाञ्चैव तस्कराणाञ्च दारुणा । पिण्डबन्धसमा याम्या महाज्वाले च यातना । रज्जुभिर्व्वेष्टिताङ्गाश्च प्रलिप्ताः कर्द्दमेन च । करीषतुषवह्नौ च पच्यन्ते च म्रियन्ति च । सुतीक्ष्णधारतोयेन कर्कशासु शिलासु च । क्षा पापसंचयात् पापा घृष्यन्ते चन्दनं यथा । शरीराभ्यन्तरगतैः प्रभूतैः कृमिभिर्नराः । भक्ष्यन्ते तीक्ष्णवदनैरा देहप्रलयाद्भृशम् । कृमीणां निचये क्षिप्ताः पूतिमांसस्य राशिषु । तिष्ठन्त्युद्विग्नहृदयाः पर्व्वताभ्याञ्च पीडिताः । सुतप्तवज्रलेपेन शरीरमनुलिप्यते । अधोमुखोर्द्धपादश्च धूताः क्षिप्यन्ति वह्निना । वदनान्तःप्रविन्यस्तं सुमतप्तमयोगुडम् । ते खाद्यन्ते पराधीना हन्यमानास्तु मुद्गरैः । ये शिवायतनारामवापीकूपमठाङ्गणान् । विद्रावयन्ति पापिष्ठा नृपास्तत्र वसन्ति च । व्यायामोद्वर्त्तनाभ्यङ्गस्नानमापानभोजनम् । क्रीडनं द्यूतमिथुनमाचरन्ति वसन्ति च । ते बधैर्व्विविधैर्घोरैरिक्षुयन्त्रादिपीडनैः । निरयाग्निषु पच्यन्ते यावदाचन्द्रतारकम् । ये शृण्वन्ति गुरोर्न्निन्दां तेषां कर्णौ प्रपूर्य्यतः । अग्निवर्णैरयःकीलैस्तप्तताम्रादिभिः स्रुतैः । त्रपुसीसारकूटाद्यैः क्षारेण ज्वलता पुनः । सुतप्ततीक्ष्णतैलेन वज्रलेपेन चान्ततः । क्रमादापूर्य्यतः कर्णौ नरकेषु च यातनाः । अनुक्रमेण सर्व्वेषु भवन्त्येते समन्ततः । सर्व्वेन्द्रियाणामप्येवं क्रमात् पापेन यातनाः । भवन्ति घोराः प्रत्येकं शरीरेण कृतेन च । स्पर्शलोभेन ये मूढाः संस्पृशन्ति परस्त्रियम् । तेषां त्वगग्निवर्णाभिः सूचीभिः पूर्य्यतेऽभृशम् । ततः क्षारादिभिः सर्व्वैः शरीरमनुलिप्यते । यातनाश्च महाकष्टाः सर्व्वेषु नरकेषु च । गुरौ कुर्व्वन्ति भ्रुकुटीं क्रूरनेत्राश्च ये नराः । परदारांश्च पश्यन्ति लुब्धाः स्निग्धेन चेतसा । सूचीभिरग्निवर्णाभिस्तेषां नेत्रे प्रपूर्य्यतः । क्षाराद्यैश्च क्रमात् सर्व्वैर्द्देहे सर्व्वाश्च यातनाः । देवाग्निगुरुविप्राणामनिवेद्य च भुञ्जतः । लौहकीलशतैस्तप्तैस्तज्जिह्वास्य प्रपूर्य्यते । ततः क्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् । शरीरेषु महाघोराश्चित्रा नरकयातनाः । ये शिवारामपुष्पाणि लोभात् संगृह्य पाणिना । जिघ्रन्ति मूढमनसः शिरसा धारयन्ति वा । आपूर्य्य च शिरस्तेषां सुतप्तैर्लोहशङ्कुभिः । नासिका चातिबहुशस्ततः क्षारादिभिः पुनः । ये निन्दन्ति महात्मानमाराध्यं धर्म्मदेशकम् । शिवभक्तांश्च ये मूढाः शिवधर्म्मञ्च शाश्वतम् । तेषामुरसि कण्ठे च जिह्वायां दन्तसन्धिषु । तालुन्योष्ठे च नासायां मूर्द्ध्नि सर्व्वाङ्गसन्धिषु । अग्निवर्णाः सुतप्ताश्च त्रिशिखा लोहशङ्कवः । आपोथ्यन्ते सुबहुशः स्थानेष्वेतेषु मुद्गरैः । ततः क्षारेण तप्तेन ताम्रेण त्रपुणा पुनः । तप्ततैलादिभिः सर्व्वैरापूर्य्यन्ते समन्ततः । यातना च महाचित्रा शरीरस्यापि सर्व्वतः । निःशेषं नरकेष्वेवं भवन्ति क्रमशः पुनः । ये स्पृहन्ति परद्रव्यं पङ्क्त्रां विप्रं स्पृशन्ति च । शिवोपकरणं माञ्च ज्ञानञ्च लिखितं क्वचित् । हस्तपादौ यतो तेषामाचूर्ण्यन्ते समन्ततः । क्षारताम्रादिभिस्तप्तैस्तदन्ते बहुशः पुनः ।

नरकेषु च सर्व्वेषु विचित्रा देहयातनाः । भवन्ति बहुशः कष्टाः पाणिपादशिरोद्भवाः । शिवायतनपर्य्यन्ते शिवारामेषु कुत्रचित् । समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव वा । तेषां शिश्नं सवृषणं चूर्ण्यते लौहमुद्गरैः । सूचीभिरग्निवर्णाभिस्ततश्चापूर्य्यते पुनः । लौहदण्डश्च सुमहानग्निवर्णः सकण्टकः । आपीड्यते गुदे तेषां यावन्मूर्द्ध्नि विनिर्गतः । ततः क्षारेण महता ताम्रेण त्रपुणा पुनः । द्रुतेनापूर्य्यते गाढं गुदं शिश्नश्च देहिनाम् । मनः सर्व्वेन्द्रियाणाञ्च यस्मादुक्तं प्रवर्त्तकम् । तस्मादिन्द्रियदुःखेन जायते तत् सुदुःखितम् । धने सत्यपि येऽदानं न प्रयच्छन्ति तृष्णया । अतिथिञ्चावमन्यन्ते कालप्राप्तं गृहाश्रमे । तेनैते घोरघोरञ्चा हस्तयोश्चापि ताडिताः । प्रसारिताङ्गाः शुष्यन्तस्तिष्ठन्त्यवद्यतं नराः । हस्तपादललाटेषु कीलिता लौहशङ्कुभिः । नित्यञ्च विवृतं वक्त्रं कीलकत्रयताडितम् । कृमिभिः प्राणिभिश्चोग्रैर्लौहदण्डैश्च वायसैः । उपद्रवैर्बहुविधैस्तु समन्ततः प्रपीड्यते । जिह्वावेधनिबद्धाश्च संपीड्यन्ते भृशं पुनः । तिष्ठन्ति लम्बमानाश्च लौहभाराः सुवर्त्तुलाः । शिश्ने सवृषणे तद्वत् लौहभारद्वयं पुनः । तिष्ठते लम्बमानञ्च बाहुभ्याञ्च चतुर्गुणम् । ततः स्वमांसमुत्कृत्य तिलमात्रप्रमाणतः । खादितुं दीयते तेषां सूच्यग्रेण तु शोणितम् । यदा निर्मांसतां प्राप्ताः कालेन बहुला नराः । ततः क्षारेण दीप्तेन तच्छरीरं विलिप्यते । क्लिद्यन्ते वर्षधाराभिः क्लिश्यन्ते वै पुनः पुनः । शुष्काः सिच्यन्ति तैलेन सुतप्तेन समन्ततः । पच्यन्ति भूयो भूयोऽपि दूरस्थेन शनैः शनैः । निःशेषयातनाभिश्च पीड्यन्ते क्रमशः पुनः । स्वयं बुभुक्षया पीड़ कष्टा चातिपिपासया । अत्युष्णेनातिशीतेन पापानां स्मरणेन च । एवमाद्या महाघोरा यातनाः पापकर्म्मिणाम् । एकैकनरके ज्ञेयाः शतशोऽथ सहस्रशः । प्रत्येकं यातनाश्चित्राः सर्वेषु नरकेषु च । कष्टा वर्षशतेनापि सर्वा वक्तुं न शक्यते । इति तैर्विविधैर्घोरैः पाच्यमानाः स्वकर्मभिः । म्रियन्ते नैव पापिष्ठा यावत् पापस्य न क्षयः । तत्रान्या यातनाः कष्टा त्रिविधाः पापकारिणाम् । महाघोरातिघोराश्च कल्पाग्निसदृशोपमाः । श्रुत्वैव यातनास्तासु म्रियन्ते मृदुचेतसः । ततस्तेनात्र कथिताः पापा द्रक्ष्यन्ति याः स्वयम् । पुत्रमित्रकलत्रार्थं यद्पुण्यं त्वया कृतम् । एकाकी दह्यसे तेन नात्र पश्यसि बान्धवान् । आत्मनैव कृतं पापं भोक्तव्यं ध्रुवमात्मना । तत् किमात्मोपघातार्थं मूढ ! पापं कृतं त्वया । एवं दूतैरुपालभ्यास्तान् पृच्छन्ति ततः पुनः । कियन्तं केन पापेन कालमत्रासते नराः । देवद्रव्यविनाशेन गुरुद्रोहादिकर्मभिः । क्रमात् सर्व्वेषु पच्यन्ते नरकेषु महीक्षयात् । महापातकिनश्चापि सर्वेषु नरकेष्विह । आचन्द्रतारकं यावत् पीड्यन्ते विविधैर्बधैः । महापातकिनः सर्वे निरयार्णवकोटिषु । चतुर्दशमन्वन्तरकल्पान्तं विविधैर्बधैः । उपपातकिनश्चापि तदर्द्धं यान्ति मानवाः । पापशेषैस्तदर्द्धञ्च कालञ्चापि तथाविधम् । तस्मात् पापं न कुर्व्वीत चञ्चले जीविते सति । पापेन हि ध्रुवं यान्ति नरकेषु नराः स्वयम् । यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः । पापस्य हि फलं दुःखं तद्भोक्तव्यमिहात्मना । कथं ते पापनिरता नरा रात्रिषु शेरते । मन्वन्तरान्तं तेषां च नरके तीव्रयातनाः । एवं क्लिष्टाः विशुद्धाश्च सावशेषेण कर्मणा । ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः । स्थावरा विविधाकारास्तृणगुल्मादिभेदतः । तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु । निष्क्रान्ताः कीटयोनिभ्यस्ततो जायन्ति पक्षिणः । संक्षिप्ताः पक्षिभावेन भवन्ति तृणजातिषु । मार्गदुःखमतिक्रम्य जायन्ते पशुयोनिषु । क्रमाद्गोयोनिमासाद्य पुनर्जायन्ति मानुषाः । एवं योनिषु सर्वासु परिभ्रम्य क्रमेण तु । कालान्तरवशाद् यान्ति मानुष्यमति दुर्लभम् । व्युत्क्रमेणापि मानुष्यं प्राप्यते पुण्यगौरवात् । विचित्रा गतयः प्रोक्ताः कर्मणां गुरुलाघवात् । मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम् । द्वयोर्न साधयेदेकं स मृतस्तप्यते चिरम् । देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम् । तत् संप्राप्य तथा कुर्य्यान्न गच्छेन्नरकं यथा । स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः । सर्वस्य मूलं मानुष्यं तद्यत्नादनुपालय । धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम् । यदि लाभे न यत्नस्ते मूलं रक्षस्व यत्नतः । मानुषत्वे च विप्रत्वं यदि प्राप्नोति दुर्लभम् । न करोत्यात्मनः श्रेयः कोऽन्योऽस्मादस्त्यचेतनः । सर्वेषामेव देशानामयं देशः परः स्मृतः । इतः स्वर्गश्च मोक्षश्च यतः संप्राप्यते नरैः । देशेऽस्मिन् भारते पुण्यं प्राप्य मानुष्यसम्भवम् । यः कुर्य्यान्नात्मनः श्रेयस्तेनात्मा वञ्चितश्चिरम् । भोगभूमिः स्मृतः स्वर्गः कर्मभूमिरयम् मता । इह यत् क्रियते कर्म स्वर्गे तदुपभुज्यते । यावत् सुस्थशरीरस्त्वं तावद्धर्मं समाचर । स्वहस्तेनोदितोऽ-

न्यैर्न किञ्चित् कर्त्तुमुत्सहः । अध्रुवेण शरीरेण ध्रुवं योन प्रसाधयेत् । ध्रुवं तस्य परिभ्रष्टमध्रुवं नष्टमेव हि । आयुषः खण्डखण्डानि निपतन्ति तवाग्रतः । अहोरात्रापदेशेन किमर्थं नावबुध्यसे । यदा न ज्ञायते मृत्युः कदा कस्य भविष्यति । आकस्मिके हि मरणे धृतिं विन्देत कस्तदा । परित्यज्य यदा सर्व्वमेकाकी यास्यसि ध्रुवम् । न ददासि तदा कस्मात् पाथेयार्थमिदं धनम् । गृहीतदानपाथेयाः सुखं यान्ति महाध्वनि । अन्यथा क्लिश्यते जन्तुः पाथेयरहितः पथि । येषां द्विजेन्द्र ! वाहित्वी पूर्णा भाण्डस्य गच्छति । स्वर्गदेशस्य पुरतस्तेषां लाभः पदेपदे । इति ज्ञात्वा नरः पुण्यं कुर्य्यात् पापञ्च वर्जयेत् । पुण्येन याति देवत्वमपुण्यान्नरकं व्रजेत् । ये मनागपि देवेशं प्रपन्नाः शरणं शिवम् । तेऽपि घोरं न पश्यन्ति यमस्य वदनं नराः । किन्तु पापैर्महाघोरैः किञ्चित्कालं शिवाज्ञया । भवन्ति प्रेतराजानस्ततोयान्ति शिवं परम् । ते न लिप्यन्ति पापेन पद्मपत्रमिवाम्भसा । तस्माद्विवर्द्धयेद्भक्तिमीश्वरे सततं बुधः । तन्माहात्म्यविचारेण भवदोषविचारतः” ।

भाग० ५,२६ अ० । नरकभेदतत्स्वरूपोन्यासप्रस्तावेन तेषां पापविशेषजन्यत्वमुक्तं तेन तत्तत्कर्म्मणां विपाकास्तामिस्रादयो नरका इति गम्यते । तत्र नरकविशेषस्वरूपनिदानमुक्तं यथा—

“अथ तांस्ते राजन्नामरूपलक्षणतोऽनुक्रमिष्यामः । तामिस्रो१ ऽन्धतामिस्रो२ रौरवो३ महारौरवः४ कुम्भीपाकः५ कालसूत्रम्६ असिपत्रवनं७ शूकरमुखम्८ अन्धकूपः९ क्रिमिभोजनः१० सन्दंशः११ तप्तसूर्म्मिः१२ वज्रकण्टकशाल्मली१३ वैतरणी१४ पूयोदः१५ प्राणरोधः१६ विशसनं१७ लालाभक्षः१८ सारमेयादनम्१९ अवीचिः२० अयःपानम्२१ इति । किञ्च क्षारकर्द्दमो२२ रक्षोगणभोजनं२३ शूलप्रोतो२४ दन्दशूकः२५ अवटनिरोधनो२६ ऽपर्य्यावर्त्तनं२७ सूचीमुखम्२८ इत्यष्टाविंशतिर्नरका विविधा यातनाभूमयः । यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे १ नरके बलान्निपात्यते । अनशनानिपानदण्डताडनसन्तर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादित एकदैव मूर्च्छामुपयाति तामिस्रप्राये । एवमेवान्धतामिस्रे यस्तु वञ्चयित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति । यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं २ तमुपदिशन्ति । यस्त्विह वा एतदहमिति ममेदमिति भूतद्रोहेण केवलं स्वकुटुम्बमेवानुदिनं पुष्णाति स तदिह विहाय स्वयमेव तदशुभेन रौरवे निपतति । ये त्विह यथैवामुना विहिंसिता जन्तवः परत्र यमयातनामुपगतं त एव रुरवो भूत्वा तथा तमेव हिंसन्ति तस्माद्रौरवम् ३ इत्याहुः । रुरुरिति सर्पादतिक्रूरसत्त्वापदेशः । एवमेव महारौरवो४ यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति यः केवलं देहम्भरः । यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति । तमपकरुणं पुरुषादैरपि गर्हितममुत्र यमानुचराः कुम्भीपाके५ तप्ततैले उपरन्धयन्ति । यस्त्विह ब्रह्मध्रुक् स कालसूत्रसंज्ञके६ नरके अयुतयोजनपरिमण्डले ताम्रमये तप्ते खले उपर्य्यधस्तादग्न्यर्काभ्यामभितप्यमानेऽभिनिवेशितः क्षुत्पिपासाभ्यां दह्यमानान्तर्बहिःशरीर आस्ते शेते चेष्टते अवतिष्ठति परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि । यस्त्विह वै निजवेदपथादनापद्यपगतः पाषण्डञ्चोपगतस्तमसिपत्रवनं ७ प्रवेश्य कशया प्रहरन्ति तत्र हासावितस्ततो धावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्व्वाङ्गो हा हतोऽस्मीति परमया वेदनया मूर्च्छितः पदेपदे निपतति स्वधर्म्महा पाषण्डानुगमनफलं भुङ्क्ते । यस्त्विह वै राजा राजपुरुषो वा अदण्ड्ये दण्डं प्रणयति ब्राह्मणे वा शरीरदण्डं स पापीयान्नरकेऽमुत्र शूकरमुखे ८ निपतति । तत्रातिबलैर्निष्पिष्यमाणावयवो यथैवेहेक्षुखण्ड आर्त्तस्वरेण स्वनयन् क्वचिन्मूर्च्छितः कश्मलमुपगतो यथैवेहादृष्टदोषा उपरुद्धाः । यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथो व्यथामाचरति स परत्रान्धकूपे९ तदभिद्रोहेण निपतति । तत्र हासौ तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकामत्कुणमक्षिकादिभिर्ये केचाभिद्रुग्धास्तैः सर्व्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः । यस्त्विह वा असंविभज्याश्नाति यत् किञ्चनोपनिर्मितपञ्चयज्ञो वायससंस्तुतः स परत्र क्रिमिभोजने१०नरकाधमे निपतति । तत्र शतसहस्रयोजने क्रिमिकुण्डे क्रिमिभूतः स्वयं क्रिमिभिरेव भक्ष्यमाणः क्रिमिभोजनो यावत्तदप्रत्तामहुतादोऽनिर्वेशमात्मानं यातयते । यस्त्विह वै स्तेयेन बलाद्वा हिरण्यरत्ना-

द्रविणानि ब्राह्मणस्य वाऽपहरति अन्यस्य वाऽनापदि पुरुषस्तममुत्र राजन् ! यमपुरुषा अयस्मयैरग्निपिण्डैः सन्दंशैः११ त्वचि निष्कुषन्ति । यस्त्विह वा अगम्यां स्त्रियं पुरुषोऽगम्यं वा पुरुषं योषिदभिगच्छति । तावमुत्र कशया ताडयन्तस्तिग्मया सूर्म्या१२लोहमय्या पुरुषमालिङ्गयन्ति । स्त्रियं च पुरुषरूपया सूर्म्या । यस्त्विह वै सर्वाभिगमस्तममुत्र निरये वर्त्तमानं वज्रकण्टकशाल्मली१३मारोप्य निष्कर्षन्ति । ये त्विह वै राजन्या राजपुरुषा वा पाषण्डा धर्म्मसेतून् भिन्दन्ति ते संपरेत्य वैतरण्यां १४निपतन्ति भिन्नमर्य्यादाः तस्यां निरयपरिखाभूतायां नद्यां यादोगणैरितस्ततो भक्ष्यमाणा आत्मना न वियुज्यमानाश्चासुभिरुह्यमानाः स्वाघेन, कर्मपाकमनुस्मरन्तो विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यामुपतप्यन्ते । ये त्विह वै वृषलीपतयो नष्टशौचाचारनियमास्त्यक्तलज्जाः पशुचर्य्यां चरन्ति । ते चापि प्रेत्य पूयविण्मूत्रश्लेष्मलालापूर्णे १५ निपतन्ति तदेवातिबीभत्सितमश्नन्ति । ये त्विह वै श्वगर्द्दभपतयो ब्राह्मणादयो मृगयाविहारा अतीर्थे च मृगान्निघ्नन्ति । तानपि संपरेताँल्लक्ष्यभूतान् यमपुरुषा इषुभिर्विध्यन्ति १६ । ये त्विह वै दाम्भिका दम्भयज्ञेषु पशून् विशसन्ति । तानमुष्मिँल्लोके वैशसे १७ नरके पतितान्निरयपतयो यातयित्वा विशसन्ति । यस्त्विह वै सवर्णां भार्य्यां द्विजोरेतः पाययति काममोहितः तं पापकृत्तममुत्र रेतःकुल्यायां पातयित्वा रेतः संपाययन्ति लालाभक्ष्ये १८। ये त्विह वै दस्यवोऽग्निदा गरदा ग्रामान् सार्थान् वा विलुम्पन्ति राजभटा वा तांश्चापि हि परेतान् यमदूतावज्रदंष्ट्राः श्वानः १९ सप्तशतानि विंशतिश्च सरभसं खादन्ति । यस्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित्, स वै प्रेत्य नरके अवीचिमति२० अधःशिरा निरवकाशे योजनशतोच्छ्रायाद् गिरिमूर्द्ध्नः संपात्यते । यत्र जलमिव स्थलमश्मपृष्ठमवभासते तदवीचिमत् तिलशो विशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति । यस्त्विह वै विप्रो राजन्यो वैश्यो वा सोमपीथस्तत्कलत्रं वा सुराः व्रतस्थोऽपि वा पिबति प्रमादतः तेषां निरयं नीतानामुरसि पदाऽऽक्रम्यास्ये वह्निना द्रवमाणं कार्ष्णायसं २१ निषिञ्चन्ति । अथ च यस्त्विह वा आत्मसंभावनेन स्वयमधमो जन्मतपोविद्याचारवर्णाश्रमवतो वरीयसो न बहु मन्येत स मृतक एव क्षारकर्द्दमे२२ निरयेऽवाक्शिरा निपतितो दुरन्तयातनाह्यश्नुते । ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशव इह निहता यमसदने यातयन्तो रक्षोगणाः सौनिका इव स्वधितिनाऽवदायाऽसृक्पिबन्ति नृत्यन्ति च हृष्यमाणा यथेह पुरुषादाः २३ । ये त्विह वा अनागसोऽरण्ये ग्रामे वाविश्रम्भकैरुपसृतानुपविश्रम्भय्य जिजीविषून् शूलादिषूपप्रोतान् क्रीड़नकतया यातयन्ति तेऽपि च प्रेत्य यमयातनासु शूलादिप्रोतात्मानः २४क्षुत्तृड्भ्यां चाभिहताः कङ्कवटादिभिश्चेतस्ततस्तिग्मतुण्डैराहन्यमाना आत्मशमलं स्मरन्ति । ये त्विह वै भूतान्युद्वेजयन्ति नरा उल्बणस्वभावा यथा दन्दशूकास्तेऽपि प्रेत्य नरके दन्दशूकाख्ये २५ निपतन्ति । यत्र नृप ! दन्दशूकाः पञ्चमुखाः सप्तमुखा उपसृत्य ग्रसन्ति यथा बिलेशयान् । ये त्विह वा अन्धावटकुसूलगुहादिषु भूतानि निरुन्धन्ति तथामुत्र तेष्वेवोपवेश्य सगरेण वह्निना धूमेन निरुन्धन्ति २६ । यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्रकङ्कवटादयः प्रसह्योरुबलादुत्पाटयन्ति २७ । यस्त्विह वा आढ्याभिमतिरहङ्कृतिस्तिर्य्यक्प्रेक्षणः सर्वतोऽभिविशङ्की व्ययविनाशचिन्तया परिशुष्यमाण हृदयवदनो निर्वृतिमनवगतो ग्रह इवार्थमभिरक्षति स चापि प्रेत्य तदुत्पादनोत्कर्षणसंरक्षणशमलग्रहः सूचीमुखे २८नरके निपतति । यत्र ह वित्तग्रहं पापपुरुषं धर्मराजपुरुषा वायका इव सर्वतोऽङ्गेषु सूत्रैः परिवयन्ति । एवंविधा नरका यमालये सन्ति शतशः तेषु च सर्व एवाधर्मवर्त्तिनो ये केचिदिहोदितास्त्ववनिपते ! पर्य्यायेण विविशन्ति"। तथैव धर्मानुवर्त्तिन इतरत्र । इह तु पुनर्भवे उभयशेषाभ्यां विशन्ति"

भा०आनु०७अ०शुभकर्म्मविशेषविपाक उक्तो यथ "युधिष्ठिरोक्तिः । "कर्म्मणाञ्च समस्तानां शुभानां भरतर्षभ ! । फलानि भरतश्रेष्ठ ! प्रब्रूहि परिपृच्छतः । भीष्म उवाच । हन्त ते कथयिष्यामि यन्मां पृच्छसि भारत ! । रहस्यं यदृषीणान्तु तच्छृणुष्व युधिष्ठिर ! । या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता । येन येन शरीरेण यद्यत्कर्म करोति यः । तेन तेन शरीरेण तत्तत्फलमुपाश्नुते । यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम् । तस्यां तस्यामवस्थायां भुङ्क्ते जन्मनिजन्मनि । न नश्यति

कृतं कर्म सदा पञ्चेन्द्रियैरिह । ते ह्यस्य साक्षिणो नित्यं षष्ठ आत्मा तथैव च । चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् । अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः । यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्त्तते । श्रान्तायादृष्टपूर्व्वाय तस्य पुण्यफलं महत् । स्थण्डिलेषु शयानानां गृहाणि शयनानि च । चीरवल्कलसंवीते वासांस्याभरणानि च । वाहनानि च यानानि योगात्मनि तपोधने । अग्नीनुपशयानस्य राज्ञः पौरुषमेव च । रसानां प्रतिसंहारे सौभाग्यमनुगच्छति । आमिषप्रतिसंहारे पशून् पुत्रांश्च विन्दति । अवाक्शिरास्तु यो लम्बेदुदवासञ्च यो वसेत् । सततञ्चैकशायी यः स लभेतेप्सितां गतिम् । पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् । दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः । वीरासनं वीरशय्यां वीरस्थानमुपागतः । अक्षयास्तस्य वै लोकाः सर्व्वकामगमास्तथा । धनं लभेत दानेन मौनेनाज्ञां विशाम्पते ! । उपभोगांश्च तपसा ब्रह्मचर्य्येण जीवितम् । रूपमैश्वर्य्यमारोग्यमहिंसाफलमश्नुते । फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत् । प्रायोपवेशिनो राजन् ! सर्व्वत्र सुखमश्नुते । गवाढ्यः शाकदीक्षायां स्वर्गगामी तृणाशनः । स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत् । स्वर्गं सत्येन लभते दीक्षया कुलमुत्तमम् । सलिलाशी भवेद्‌ यस्तु सदाग्निः संस्कृतो द्विजः । मनुःसाधयते राज्यं नाकपृष्ठमनाशके । उपवासञ्च दीक्षायां अभिषेकञ्च पार्थिव ! । कृत्वा द्वादश वर्षाणि वीरस्थानाद्विशिष्यते । अधीत्य सर्व्ववेदान् वै सद्यो दुःखाद्विमुच्यते । मानसं हि चरन् धर्म्मं स्वर्गलोकमुपाश्नुते । या दुस्त्यजा दुर्म्मतिभिर्य्या न जीर्य्यति जीर्य्यतः । योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् । यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् । एवं पूर्व्वकृतं कर्म कर्त्तारमनुगच्छति । अनोद्यमानानि यथा पुष्पाणि च फलानि च । स्वकालं नातिवर्त्तन्ते तथा कर्म पुराकृतम् । जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः । चक्षुःश्रोत्रे च जीर्य्येते तृष्णैका न तु जीर्य्यते । येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः । प्रीणाति मातरं येन पृथिवी तेन पूजिता । येन प्रीणात्युपाध्यायं तेन स्यात् ब्रह्म पूजितम् । सर्व्वे तस्यादृता धर्म्मा यस्यैते त्रय आदृताः । अनादृतास्तु यस्यैते सर्व्वास्तस्याफलाः क्रियाः” ।

तत्रैव दानविशेषे गतिभेदो निरूपितः प्रपञ्चभयात् तद्वाक्य नोद्धृतं भा०आनु० दानधर्म्मे द्रष्टव्यम् । भा० आनु०१११अ० संसारचक्रप्रवृत्तिरुक्ता यथा—

“एकः प्रसूयते राजन्नेक एव विनश्यति । एकस्तरति दुर्गाणि गच्छत्येकस्तु दुर्गतिम् । असहायः पिता माता तथा भ्राता सुतो गुरुः । ज्ञातिसम्बन्धिवर्गश्च मित्रवर्गस्तथैव च । मृतं शरीरमुत्सृज्य काष्ठलोष्ट्रसमं जनाः । मुहूर्त्तमिव रोदित्वा ततो यान्ति पराङ्मुखाः । तैस्तच्छरीरमुत्सृष्टं धर्म्म एकोऽनुगच्छति । तस्माद्धर्म्मः सहायश्च सेवितव्यः सदा नृभिः । प्राणी धर्म्मसमायुक्तो गच्छेत् स्वर्गगतिं पराम् । तथैवाधर्म्मसंयुक्तो नरकञ्चोपपद्यते । तस्मान्न्यायागतैरर्थैर्धर्म्मं सेवेत पण्डितः । धर्म्म एको मनुष्यस्य सहायः पारलौकिकः । लोभान्मोहादनुक्रोशाद्भयाद्वाप्यबहुश्रुतः । नरः करोत्यकार्य्याणि परार्थे लोभमोहितः । धर्म्मश्चार्थश्च कामश्च त्रितयं जीविते फलम् । एतत्त्रयमवाप्तव्यमधर्म्मपरिवर्जितम् । युधिष्ठिर उवाच । श्रुतं भगवतो वाक्यं धर्म्मयुक्तं परं हितम् । शरीरनिचयं ज्ञातुं बुद्धिस्तु मम जायते । मृतं शरीरं हि नृणां सूक्ष्ममव्यक्ततां गतम् । अचक्षुर्व्विषयं प्राप्तं कथं धर्म्मोऽनुगच्छति । बृहस्पतिरुवाच । पृथिवी वायुराकाशमापो ज्योतिर्मनोऽन्तगः । बुद्धिरात्मा च सहिता धर्म्मं पश्यन्ति नित्यदा । प्राणिनामिह सर्व्वेषां साक्षीभूता निशाऽनिशम् । एतैश्च सह धर्म्मोऽपि तं जीवमनुगच्छति । त्वगस्थिमांसं शुक्रञ्च शोणितञ्च महामते ! । शरीरं वर्ज्जयन्त्येते जीवितेन विवर्ज्जितम् । ततो धर्म्मसमायुक्तः प्राप्नुते जीव एव हि । ततोऽस्य कर्म्म पश्यन्ति शुभं वा यदि वाऽशुभम् । देवताः पञ्चभूतस्थाः किंभूयः श्रोतुमिच्छसि । ततो धर्म्मसमायुक्तः स जीवः सुखमेधते । इह लोके परे चैव किंभूयः कथयामि ते । युधिष्ठिर उवाच । तद्दर्शितं भगवता यथा धर्म्मोऽनुगच्छति । एतत्तु ज्ञातुमिच्छामि कथं रेतः प्रवर्त्तते ? । बृहस्पतिरुवाच । अन्नमश्नन्ति यद्देवाः शरीरस्था नरेश्वर ! । पृथिवी वायुराकाशमापो ज्योतिर्म्मनस्तथा । ततस्तृप्तेषु शुद्धात्मन् ! रेतः सम्पद्यते महत् । ततो गर्भः सम्भवति श्लेषात् स्त्रीपुंसयोर्नृप ! । एतत्ते सर्व्वमाख्यातं भूयः किं श्रोतुमिच्छसि ? । युधिष्ठिरउवाच । आख्यातं मे भगवता गर्भः संजायते यथा । यथा जातस्तु पुरुषः प्रपद्यति तदुच्यताम् । बृहस्पतिरुवाच । आसन्नमात्रः पुरुषस्तैर्भूतैरभिभूयते ।

विप्रयुक्तश्च तैर्भूतैः पुनर्यात्यपरां गतिम् । सर्व्वभूतसमायुक्तः प्राप्नुते जीव एव हि । ततोऽस्य कर्म पश्यन्ति शुभं वा यदि वाऽशुभम् । देवताः पञ्चभूतस्था किं भूयः श्रोतुमिच्छसि । युधिष्ठिर उवाच । त्वगस्थिमांसमुत्सृज्य तैश्च भूतैर्व्विवर्जितः । जीवः स भगवन् ! क्वस्थः सुखदुःखे समश्नुते । बृहस्पतिरुवाच । जीवः कर्म्मसमायुक्तः शीघ्रं रेतस्त्वमागतः । स्त्रीणां पुष्पं समासाद्य सूते कालेन भारत ! । यमस्य पुरुषैः क्लेशं यमस्य पुरुषैर्व्वधम् । दुःखं संसारचक्रञ्च नरः क्लेशञ्च विन्दति । इह लोके च स प्राणी जन्मप्रभृति पार्थिव ! । स्वकृतं कर्म्म वै भुङ्क्ते धर्मस्य फलमाश्रितः । यदि धर्म्मं यथाशक्ति जन्मप्रभृति सेवते । ततः स पुरुषो भूत्वा सेवते नित्यदा सुखम् । अथान्तरा तु धर्म्मस्याप्यधर्म्ममुपसेवते । सुखस्यानन्तरं दुःखं स जीवोऽप्यधिगच्छति । अधर्म्मेण समायुक्तो यमस्य विषयं गतः । महद्दुःखं समासाद्य तिर्य्यग्योनौ प्रजायते । कर्म्मणा येन येनेह यस्यां योनौ प्रजायते । जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु । यदेतदुच्यते शास्त्रे सेतिहासे च छन्दसि । इह स्थानानि पुण्यानि देवतुल्यानि भूपते ! । तिर्य्यग्योन्यतिरिक्तानि गतिमन्ति च सर्व्वशः । यमस्य सदने दिव्ये ब्रह्मलोकसमे गुणैः” ।

इतःपरं कर्मविपाकोऽभिहितः तत्र अधर्मशब्दे १२१,१२२ पृष्ठे “कर्मभिर्नियतैर्व्वेद” इत्यारभ्य “धर्मं कुरु मनःसदा” इत्यन्तं वाक्यं हरिवंशवाक्यत्वेन प्रमादात् लिखितम् । तच्च भा०अनु०१११अ०स्थं बोध्यम् । एवमधर्मशब्दे पृ०१२२ पृष्ठादौ मिता० दर्शितवाक्यादपि कर्मविपाकभेदोऽवधेयः ।

भुक्तावशिष्टकर्मणां विपाकस्तु शातातपेन दर्शितो यथा “प्रायश्चित्तविहीनानां महापातकिनां नृणाम् । नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् । प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचितम् । प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः । महापातकजं चिह्नं सप्तजन्मनि जायते । उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् । दुष्कर्म्मजा नृणां रोगा यान्ति चोपक्रमैः शमम् । जपैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत् । पूर्व्वजन्मकृतं पापं नरकस्य परिक्षये । बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः । कुष्ठञ्च राजयक्ष्मा च प्रमेहो ग्रहणी तथा । मूत्रकृच्छ्राश्मरीकासा अतीसारभगन्दरौ । दुष्टव्रणं गण्डमाला पक्षाघातोऽक्षिनाशनम् । इत्येवमादयो रोगा महापापोद्भवाः स्मृताः । जलोदरं यकृत्प्लीहाशूलरोगव्रणानि च । श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः । रक्तार्बुदविसर्प्याद्या उपपापोद्भवा गदाः । दण्डापतानकश्चित्रवपुःकम्पविचर्च्चिकाः । वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः । अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि । अन्ये च बहवो रोगा जायन्ते वर्णसङ्कराः । उच्यन्ते च निदानानि प्रायश्चित्तानि वै क्रमात् । महापापेषु सर्व्वं स्यात्तदर्द्धमुपपातके । दद्यात् पापेषु षष्ठांशं कल्प्यं व्याधिबलाबलम् । अथ साधारणं तेषु गोदानादि च कथ्यते । गोदाने वत्सयुक्ता गौः सुशीला च पयस्विनी । वृषदाने शुभोऽनड्वान् शुक्लाम्बरसकाञ्चनः । निवर्त्तनानि भूदाने दश दद्याद्द्विजातये । दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्त्तनम् । दश तान्येव गोचर्म्म दत्त्वा स्वर्गे महीयते । सुवर्णशतनिष्कन्तु तदर्द्धार्द्धप्रमाणतः । अश्वदाने मृदुलक्ष्णमश्वं सोपस्करं दिशेत् । महिषीं माहिषे दाने दद्यात् स्वर्णायुधान्विताम् । दद्याद्गजं महादाने सुवर्णफलसंयुतम् । कलसं स्वर्णजं पुण्यं प्रदद्याद्देवार्च्चने । दद्याद्द्विजसहस्राय मिष्टान्नं द्विजभोजने । रुद्रं जपेल्लक्षपुष्पैः पूजयित्वा च त्र्यम्बकम् । एकादश जपेद्रुद्रान् दशांशं गुग्गुलैर्घृतैः । हुत्वाभिषेचनं कुर्य्यान्मन्त्रैर्व्वरुणदैवतैः । शान्तिके गणशान्तिश्च ग्रहशान्तिकपूर्व्वकम् । धान्यदाने शुभं धान्यं खारीषष्टिमितं स्मृतम् । वस्त्रदाने पट्टवस्त्रद्वयं कर्पूरसंयुतम् । दशपञ्चाष्ट चतुर उपवेश्य द्विजान् शुभान् । विधाय वैष्णवीं पूजां सङ्कल्प्य निजकाम्यया । धेनुं दद्याद्द्विजातिभ्यो दक्षिणाञ्चापि शक्तितः । अलङ्कृत्य यथाशक्ति वस्त्रालङ्करणैर्द्विजान् । याचेद्दण्डप्रणामेन प्रायश्चित्तं यथोदितम् । तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि । पुनस्तान् परिपूर्णार्थानर्च्चयेद्विधिवद्द्विजान् । सन्तुष्टा ब्राह्मणा दद्युरनुज्ञां व्रतकारिणे । जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्म्मणि । सर्व्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः । ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः । सर्व्वदेवमया विप्रा न तद्वचनमन्यथा । उपवासो व्रतञ्चैव स्नानं तीर्थफलं तपः । विप्रैः सम्पादितं सर्व्वं सम्पन्नं तस्य तत्फलम् । सम्पन्नमिति यद्वाक्यं वदन्ति क्षितिदेवताः । प्रणम्य शिरसा धार्य्यमग्निष्टोमफलं लभेत् । ब्राह्मणाजङ्गमं तीर्थं निर्जलं सार्व्वकामिकम् । तेषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः । तेभ्योऽनुज्ञामभिप्राप्य प्रगृह्य च तथाशिषः । पूजयित्वा द्विजान् शक्त्या भुञ्जीत

सह बन्धुभिः” शातातपीये कर्म्मविपाके १ अध्याये । “ब्रह्महा नरकस्यान्ते पाण्डुकुष्ठी प्रजायते । प्रायश्चित्तं प्रकुर्व्वीत स तत्पातकशान्तये । चत्वारः कलशाः कार्य्याः पञ्चरत्नसमन्विताः । पञ्चपल्लवसंयुक्ताः सितवस्त्रेण संयुताः । अश्वस्थानादिमृद्युक्तास्तीर्थोदकसुपूरिताः । कषायपञ्चकोपेता नानाविधफलान्विताः । सर्व्वौषधिसमायुक्ताः स्थाप्याः प्रतिदिशं द्विजैः । रौप्यमष्टदलं पद्मं मध्यकुम्भोपरि न्यसेत् । तस्योपरि न्यसेद्देवं ब्रह्माणञ्च चतुर्मुखम् । पलार्द्धार्द्धप्रमाणेन सुवर्णेन विनिर्म्मितम् । अर्च्चयेत् पुरुषसूक्तेन त्रिकालं प्रतिवासरम् । यजमानः शुभैर्गन्धैः पुष्पैर्धूपैर्यथाविधि । पूर्व्वादिकुम्भेषु ततो ब्राह्मणा ब्रह्मचारिणः । पठेयुः स्वस्ववेदांस्ते ऋग्वेदप्रभृतीन् शनैः । दशांशेन ततो होमो ग्रहशान्तिपुरःसरम् । मध्यकुम्भे विधातव्यो घृताक्तैस्तिलहेमभिः । द्वादशाहमिदं कर्म समाप्य द्विजपुङ्गवः । तत्र पीठे यजमानमभिषिञ्चेद्यथाविधि । ततो दद्याद्यथाशक्ति गोभूहेमतिलादिकम् । ब्राह्मणेभ्यस्तथा देयमाचार्य्याय निवेदयेत् । आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः । प्रीताः सर्व्वे व्यपोहन्तु मम पापं सुदारुणम् । इत्युदीर्य्य मुहुर्भक्त्या तमाचार्य्यं क्षमापयेत् । एवं विधाने विहिते श्वेतकुष्ठी विशुध्यति । कुष्ठी गोवधकारी स्यान्नरकान्तेऽस्य निष्कृतिः । स्थापयेद्घटमेकन्तु पूर्व्वोक्तद्रव्यसंयुतम् । रक्तचन्दनलिप्ताङ्गं रक्तपुष्पाम्बरान्वितम् । रक्तकुम्भन्तु तं कृत्वा स्थापयेद्दक्षिणां दिशम् । ताम्रपात्रं न्यसेत्तत्र तिलचूर्णेन पूरितम् । तस्योपरि न्यसेद्देवं हेमनिष्कमयं यमम् । यजेत् पुरुषसूक्तेन पापं मे शाम्यतामिति । सामपारायणं (सामगानम्) कुर्य्यात् कलसे तत्र सामवित् । दशांशं सर्षपैर्हुत्वा पावमान्यभिषेचने । विहिते धर्म्मराजानमाचार्य्याय निवेदयेत् । यमोऽपि महिषारूढो दण्डपाणिर्भयावहः । दक्षिणाशापतिर्देवो मम पापं व्यपोहतु । इत्युच्चार्य्य विसृज्यैनं मासं तद्भक्तिमाचरेत् । ब्रह्मगोवधयोरेषा प्रायश्चित्तेन निष्कृतिः । पितृहा चेतनाहीनो मातृहान्धः प्रजायते । नरकान्ते प्रकुर्व्वीत प्रायश्चित्तं यथाविधि । प्राजापत्यानि कुर्व्वीत त्रिंशच्चैव विधानतः । व्रतान्ते कारयेन्नावं सौवर्णपलसम्मिताम् । कुम्भं रौप्यमयञ्चैव ताम्रपात्राणि पूर्व्ववत् । निष्कहेम्ना तु कर्त्तव्यो देवः श्रीवत्सलाञ्छनः । पट्टवस्त्रेण संवेष्ट्य पूजयेत्तं विधानतः । नावं द्विजाय तां दद्यात् सर्व्वोपस्करसंयुताम् । वासुदेव ! जगन्नाथ ! सर्व्वभूताशयस्थित ! । पातकार्णवमग्नं मां तारय प्रणतार्त्तिहृत् ! । इत्युदीर्य्य प्रणम्याथ ब्राह्मणाय विसर्जयेत् । अन्येभ्योऽपि यथाशक्ति विप्रेभ्यो दक्षिणां ददेत् । स्वसृघाती तु बधिरो नरकान्ते प्रजायते । मूको भ्रातृबधे चैव तस्येयं निष्कृतिः स्मृता । सोऽपि पापविशुद्ध्यर्थं चरेच्चान्द्रायणव्रतम् । व्रतान्ते पुस्तकं दद्यात् सुवर्णफलसंयुतम् । इमं मन्त्रं समुच्चार्य्य ब्राह्मणीं तां विसर्जयेत् । सरस्वति ! जगन्मातः ! शब्दब्रह्माधिदेवते ! । दुष्कर्म्मकरणात् पापात् पाहि मां परमेश्वरि ! । बालघाती च पुरुषो मृतवत्सः प्रजायते । ब्राह्मणोद्वाहनञ्चैव कर्त्तव्यं तेन शुद्धये । श्रवणं हरिवंशस्य कर्त्तव्यञ्च यथाविधि । महारुद्रजपञ्चैव कारयेच्च यथाविधि । षडङ्गैकादशैरुद्रै रुद्रः समभिधीयते । रुद्रैस्तथैकादशभिर्महारुद्रः प्रकीर्त्तितः । एकादशभिरेतैस्तु अतिरुद्रश्च कथ्यते । जुहुयाच्च दशांशेन दूर्व्वयायुतसंख्यया । एकादश स्वर्णनिष्काः प्रदातव्याः सदक्षिणाः । पलान्येकादश तथा दद्याद्वित्तानुसारतः । अन्येभ्योऽपि यथाशक्ति द्विजेभ्यो दक्षिणां दिशेत् । स्नापयेद्दम्पती पश्चान्मन्त्रैर्वरुणदैवतैः । आचार्य्याय प्रदेयानि वस्त्राभरणानि च । गोत्रहा पुरुषः कुष्ठी निर्व्वंशश्चोपजायते । स च पापविशुद्ध्यर्थं प्राजापत्यशतञ्चरेत् । व्रतान्ते मेदिनीं दत्त्वा शृणुयादथ भारतम् । स्त्रीहन्ता चातिसारी स्यादश्वत्थान् रोपयेद्दश । दद्याच्च शर्कराधेनुं भोजयेच्च शतं द्विजान् । राजहा क्षयरोगी स्यादेषा तस्य च निष्कृतिः । गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः । घृतधेनुप्रदानेन तिलधेनुप्रदानतः । इत्यादिना क्रमेणैव क्षयरोगः प्रशाम्यति । रक्तार्बुदी वैश्यहन्ता जायते स च मानवः । प्राजापत्यानि चत्वारि सप्त धान्यानि चोत्सृजेत् । दण्डापतानकयुतः शूद्रहन्ता भवेन्नरः । प्राजापत्यं सकृच्चैव दद्याद्धेनुं सदक्षिणाम् । कारूणाञ्च बधे चैव रूक्षभावः प्रजायते । तेन तत्पापशुद्ध्यर्थं दातव्यो वृषभः सितः । सर्व्वकार्य्येष्वसिद्धार्थो गजघाती भवेन्नरः । प्रासादं कारयित्वा तु गणेशप्रतिमां न्यसेत् । गणनाथस्य मन्त्रन्तु मन्त्री लक्षमितं जपेत् । कुलत्थशाकैः पूपैश्च गणशान्तिपुरःसरम् । उष्ट्रे विनिहते चैव जायते विकृतस्वरः । स तत्पापविशुद्ध्यर्थं दद्यात् कर्पूरकं फलम् । अश्वे विनिहते चैव वक्रतुण्डः प्रजायते । शतं पलानि

दद्याच्च चन्दनान्यघनुत्तये । महिषीघातने चैव कृष्णगुल्मः प्रजायते । खरे विनिहते चैव खररोमा प्रजायते । निष्कत्रयस्य प्रकृतिं स प्रदद्याद्धिरण्मयीम् । तरक्षौ निहते चैव जायते केकरेक्षणः । दद्याद्रत्नमयीं धेनुं स तत्पातकशान्तये । शूकरे निहते चैव दन्तरोगी जायते नरः । स दद्यात्तु विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् । हरिणे निहते खञ्जः शृगाले तु विपादकः । अश्वस्तेन प्रदातव्यः सौवर्णपलनिर्म्मितः । अजाभिघातने चैव अधिकाङ्गः प्रजायते । अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता । उरभ्रे निहते चैव पाण्डुरोगः प्रजायते । कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये । मार्जारे निहते चैव पीतपाणिः प्रजायते । पारावतं स सौवर्णं प्रदद्यान्निष्कमात्रकम् । शुकसारिकयोर्घाते नरः स्खलितवाग्भवेत् । सच्छास्त्रपुस्तकं दद्यात् स विप्राय सदक्षिणम् । वकघाते दीर्घनसो दद्याद्गां धवलप्रभाम् । काकघाती कर्णहीनो दद्याद्गामसितप्रभाम् । हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता । तदर्द्धप्रमाणेन क्षत्रियादिष्वनुक्रमात्” । २ अ० ।

“सुरापः श्यावदन्तः स्यात् प्राजापत्यन्तु तारकम् । शर्करायास्तुलाः सप्त दद्यात् पापविशुद्धये । जपित्वा तु महारुद्रं दशांशं जुहुयात्तिलैः । ततोऽभिषेकः कर्त्तव्यो मन्त्रैर्वरुणदैवतैः । मद्यपो रक्तपित्ती स्यात् स दद्यात् सर्पिषो घटम् । मधुनोऽर्द्धघटञ्चैव सहिरण्यं विशुद्धये । अभक्ष्यभक्षणे चैव जायते कृमिलोदरः । यथावत्तेन शुद्ध्यर्थमुपोष्यं भीष्मपञ्चकम् । उदक्यावीक्षितं भुक्त्वा जायते कृमिलोदरः । गोमूत्रयावकाहारस्त्रिरात्रेणैव शुद्ध्यति । भुक्त्वा चास्पृश्यसंस्पृष्टं जायते कृमिलोदरः । त्रिरात्रं समुपोष्याथ स तत्पापात् प्रमुच्यते । परान्नविघ्नकरणादजीर्णमभिजायते । लक्षहोमं स कुर्व्वीत प्रायश्चित्तं यथाविधि । मन्दोदराग्निर्भवति सति द्रव्ये कदन्नदः । प्राजापत्यत्रयं कुर्य्याद्भोजयेच्च शतं द्विजान् । विषदः स्याच्छर्द्दिरोगी दद्याद्दश पयस्विनीः । मार्गहा पादरोगी स्यात् सोऽश्वदानं समाचरेत् । पिशुनो नरकस्यान्ते जायते श्वासकासवान् । घृतं तेन प्रदातव्यं सहस्रपलसम्मितम् । धूर्त्तोऽपस्माररोगी स्यात् स तत्पापविशुद्धये । ब्रह्मकूर्चमयीं धेनुं दद्याद्राज्ञ सदक्षिणाम् । शूली परोपतापेन जायते तत्प्रमोचने । सोऽन्नदानं प्रकुर्व्वीत तथा रुद्रं जपेन्नरः । दावाग्निदायकश्चैव रक्तातिसारवान् भवेत् । तेनोदपानं कर्त्तव्यं रोपणीयस्तथा वटः । सुरालये जले वापि शकृन्मूत्रं करोति यः । गुदरोगो भवेत्तस्य पापरूपः सुदारुणः । मासं सुरार्च्चनेनैव गोदानद्वितयेन तु । प्राजापत्येन चैकेन शाम्यन्ति गुदजा रुजः । गर्भपातनजा रोगा यकृत्प्लीहजलोदराः । तेषां प्रशमनार्थाय प्रायश्चित्तमिदं स्मृतम् । एतेषु दद्याद्विप्राय जलधेनुं विधानतः । सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम् । प्रतिमाभङ्गकारी च अप्रतिष्ठः प्रजायते । संवत्सरत्रयं सिञ्चेदश्वत्थं प्रतिवासरम् । उद्वाहयेत्तमश्वत्थं स्वगृह्योक्तविधानतः । तत्र संस्थापयेद्देवं विघ्नराजं सुपूजितम् । दुष्टवादी खण्डितः स्यात् स वै दद्याद्द्विजातये । रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम् । खल्वाटः परनिन्दावान् धेनुं दद्यात् सकाञ्चनाम् । परोपहासकृत् काणः स गां दद्यात् समौक्तिकाम् । सभायां पक्षपाती च जायते पक्षघातवान् । निष्कत्रयमितं हेम स दद्यात् सत्यवर्त्तिनाम्” ३ अ० ।

“कुनखी नरकस्यान्ते जायते विप्रहेमहृत् । स तु स्वर्णशतं दद्यात् कृत्वा चान्द्रायणत्रयम् । औडुम्बरी ताम्रचौरो नरकान्ते प्रजायते । प्राजापत्यं स कृत्वाथ ताम्रं पलशतं दिशेत् । कांस्यहारी च भवति पुण्डरीकसमन्वितः । कांस्यं पलशतं दद्यादलङ्कृत्य द्विजातये । रीतिहृत् पिङ्गलाक्षः स्यादुपोष्य हरिवासरम् । रीतिपलशतं दद्यादलङ्कृत्य द्विजं शुभम् । मुक्ताहारी च पुरुषो जायते पिङ्गमूर्द्धजः । मुक्तापलशतं दद्यादुपोष्य स विधानतः । त्रपुहारी च पुरुषो जायते नेत्ररोगवान् । उपोष्य दिवसं सोऽपि दद्यात् पलशतं त्रपु । सीसहारी च पुरुषो जायते शीर्षरोगवान् । उपोष्य दिवसं दद्याद्घृतधेनुं विधानतः । दुग्धहारी च पुरुषो जायते बहुमूत्रकः । स दद्याद्दुग्धधेनुञ्च ब्राह्मणाय यथाविधि । दधिचौर्य्येण पुरुषो जायते मदवान् यतः । दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये । मधुचौरस्तु पुरुषो जायते नेत्ररोगवान् । स दद्यान्मधुधेनुञ्च समुपोष्य द्विजातये । इक्षोर्विकारहारी च भवेदुदरगुल्मवान् । गुडधेनुः प्रदातव्या तेन तद्दोषशान्तये । लोहहारी च पुरुषः कर्व्वुराङ्गः प्रजायते । लोहं पलशतं दद्यादुपोष्य स तु वासरम् । तैलचौरस्तु पुरुषो भवेत् कण्ड्वादिपीड़ितः । उपोष्य स तु विप्राय दद्यात्तैलघटद्वयम् । आमान्नहरणाच्चैव दन्त-

हीनः प्रजायते । स दद्यादश्विनौ हेमनिष्कद्वयविनिर्म्मितौ । पक्वान्नहरणाच्चैव जिह्वारोगः प्रजायते । गायत्र्याः स जपेल्लक्षं दशांशं जुहुयात्तिलैः। फलहारी च पुरुषोजायते व्रणिताङ्गुलिः । नानाफलानामयुतं स दद्याच्च द्विजन्मने । ताम्बूलहरणाच्चैव श्वेतौष्ठः संप्रजायते । सदक्षिणं प्रदद्याच्च विद्रुमस्य द्वयं वरम् । शाकहारी च पुरुषोजायते नीललोचनः । ब्राह्मणाय प्रदद्याद्वै महानीलमणिद्वयम् । कन्दमूलस्य हरणाद्ध्रस्वपाणिः प्रजायते । देवतायतनं कार्य्यमुद्यानं तेन शक्तितः । सौगन्धिकस्य हरणाद्दुर्गन्धाङ्गः प्रजायते । स लक्षमेकं पद्मानां जुहुयाज्जातवेदसि । दारुहारी च पुरुषः खिन्नपाणिः प्रजायते । स दद्याद्विदुषे शुभ्रं काश्मीरज-पलद्वयम् । विद्यापुस्तकहारी च किल मूकः प्रजायते । न्यायेतिहासं दद्यात् स ब्राह्मणाय सदक्षिणम् । वस्त्रहारी भवेत् कुष्ठी संप्रदद्यात् प्रजापतिम् । हेमनिष्कमितञ्चैव वस्त्रयुग्मं द्विजातये । ऊर्णाहारी लोमशः स्यात् स दद्यात् कम्बलान्वितम् । स्वर्णनिष्कमितं हेमवह्निं दद्याद्द्विजातये । पट्टसूत्रस्य हरणान्निर्लोमा जायते नरः । तेन धेनुः प्रदातव्या विशुद्ध्यर्थं द्विजन्मने । औषधस्यापहरणे सूर्य्यावर्त्तः प्रजायते । सूर्य्यायार्घः प्रदातव्योमासं देयञ्च काञ्चनम् । रक्तवस्त्रप्रवालादिहारी स्याद्रक्तवातवान् । सवत्सां महिषीं दद्यान्मणिरागसमन्विताम् । विप्ररत्नापहारी चाप्यनपत्यः प्रजायते । तेन कार्य्यं विशुद्ध्यर्थं महारुद्रजपादिकम् । मृतवत्सोदितः सर्व्वोविधिरत्र विधीयते । दशांशहोमः कर्त्तव्यः पायसेन यथाविधि । देवस्य हरणाच्चैव जायते विविधोज्वरः । ज्वरोमहाज्वरश्चैव रौद्रोवैष्णव एव च । ज्वरे रौद्रं जपेत् कर्णे महारुद्रं महाज्वरे । अतिरुद्रं जपेद्रौद्रे वैष्णवे तद्द्वयं जपेत् । नानाविधद्रव्यचौरोजायते ग्रहणीयुतः । तेनान्नोदकवस्त्राणि हेम देयञ्च शक्तितः”४अ०।“मातृगामी भवेद्यस्तु लिङ्गं तस्य विनश्यति । चाण्डालीगमने चैव हीनकोषः प्रजायते । तस्य प्रतिक्रियां कर्त्तुं कुम्भमुत्तरतोन्यसेत् कृष्णवस्त्रसमाच्छन्नं कृष्णमाल्यविभूषितम् । तस्योपरिन्यसेद्देवं कांस्यपात्रे धनेश्वरम् । सुवर्णनिष्कषट्केन निर्मितं नरवाहनम् । यजेत् पुरुषसूक्तेन धनदं विश्वरूपिणम् । अथर्ववेदविद्विप्रोह्याथर्व्वाणं समाचरेत् । सुवर्णपुत्तलिकां कृत्वा निष्कत्रिंशतिसङ्ख्यया । दद्याद्विप्राय संपूज्य निष्पापोऽहमिति ब्रुवन् । निधीनामधिपोदेवः शङ्करस्य प्रियः सखा । सौम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु । इमं मन्त्रं समुच्चार्य्य आचार्य्याय यथाविधि । दद्याद्देवं हीनकोषे लिङ्गनाशे विशुद्धये । गुरुजायाभिगमनान्मूत्रकृच्छ्रः प्रजायते । तेनापि निष्कृतिः कार्य्या शास्त्रदृष्टेन कर्म्मणा । स्थापयेत् कुम्भमेकन्तु पश्चिमायां शुभे दिने । नीलवस्त्रसमाच्छन्नं नीलमाल्यविभूषितम् । तस्योपरि न्यसेद्देवं ताम्रपात्रे प्रचेतसम् । सुवर्णनिष्कषट्केन निर्मितं यादसाम्पतिम् । यजेत् पुरुषसूक्तेन वरुणं विश्वरूपिणम् । सामविद्ब्राह्मणस्तत्र सामवेदं समामनेत् । सुवर्णपुत्तलिकां कृत्वा निष्कविंशतिसंख्यया । दद्याद्विप्राय संपूज्य निष्पापोऽहमिति ब्रुवन् । यादसामधिपोदेवोविश्वेषामपि पावनः । संसाराब्धौ कर्णधारो वरुणः पावनोऽस्तु मे । इमं मन्त्रं समुच्चार्य्य आचार्य्याय यथाविधि । दद्याद्देवमलङ्कृत्य मूत्रकृच्छ्रप्रशान्तये । स्वसृतागमने चैव रक्तकुष्ठं प्रजायते । भगिनीगमने चैव पीतकुष्ठं प्रजायते । तस्य प्रतिक्रियां कर्त्तुं पूर्व्वतः कलसं न्यसेत् । पीतवस्त्रसमाच्छन्नं पीतमाल्यविभूषितम् । तस्योपरि न्यसेत् स्वर्णपात्रे देवं सुरेश्वरम् । सुवर्णनिष्कषट्केन निर्मितं वज्रधारिणम् । यजेत् पुरुषसूक्तेन वासवं विश्वरूपिणम् । यजुर्वेदं तत्र साम ऋग्वेदञ्च समाचरेत् । सुवर्णपुत्तलिकां कृत्वा सुवर्णदशकेन तु । दद्याद्विप्राय संपूज्य निष्पापोऽहमिति ब्रुवन् । देवानामधिपोदेवो वज्री विष्णुनिकेतनः । शतयज्ञः सहस्राक्षः पापं मम निकृन्ततु । इमं मन्त्रं समुच्चार्य्य आचार्य्याय यथाविधि । दद्याद्देवं सहस्राक्षं स पापस्यापनुत्तये । भ्रातृभार्य्याभिगमनाद्गलत्कुष्ठं प्रजायते । स्वबधूगमने चैव कृष्णकुष्ठं प्रजायते । तेन कार्य्यं विशुद्ध्यर्थं प्रागुक्तस्यार्द्धमेव हि । दशांशहोमः सर्व्वत्र घृताक्तैः क्रियते तिलैः । यदगम्याभिगमनाज्जायते ध्रुवमण्डलम् । कृत्वा लौहमयीं धेनुं तिलषष्टिप्रमाणतः । कार्पासभारसंयुक्तां कांस्यदोहां सवत्सिकाम् । दद्याद्विप्राय विधिवदिमं मन्त्रमुदीरयेत् । सुरभो वैष्णवी माता मम पापं व्यपोहतु । तपस्विनीसङ्गमने जायते चाश्मरीगदी । स तु पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् । दद्याद्विप्राय विदुषे मधुधेनुं यथोदिताम् । तिलद्रोणशतञ्चैव हिरण्येन समन्वितम् । पितृष्वस्रभिगमनाद्दक्षिणांशव्रणी भवेत् । तेनापि निष्कृतिः कार्य्या अजादानेन शक्तितः । मातृ-

स्वान्यान्तु गमने पृष्ठकुब्जः प्रजायते । कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत् । मातृष्वस्रभिगमने वामाङ्गे व्रणवान् भवेत् । तेनापि निष्कृतिः कार्य्या सम्यग्दानप्रदानतः । मृतभार्य्याभिगमने मृतभार्य्यः प्रजायते । तत्पातकविशुद्ध्यर्थं द्विजमेकं विवाहयेत् । सगोत्रस्त्रीप्रसङ्गेन जायते च भगन्दरी । तेनापि निष्कृतिः कार्य्या महिषीदानयत्नतः । तपस्विनीप्रसङ्गेन प्रमेही जायते नरः । मासं रुद्रजपः कार्य्योदद्याच्छक्त्या च काञ्चनम् । दीक्षितस्त्रीप्रसङ्गेन जायते दुष्टरक्तरुक् । स पातकविशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् । सजातिजायागमने जायते हृदयव्रणी । तत्पापस्य विशुद्ध्यर्थं प्राजापत्यद्वयञ्चरेत् । पशुयोनौ च गमने मूत्राघातः प्रजायते । तिलपात्रद्वयञ्चैव दद्यादात्मविशुद्धये । अश्वयोनौ च गमनाद्गुदस्तम्भः प्रजायते । सहस्रकमलस्नानं मासं कुर्य्यात् शिवस्य च । एते दोषा नराणां स्युर्नरकान्ते न संशयः । स्त्रीणामपि भवन्त्येते तत्तत्पुरुषसङ्गमात् । अश्वशूकरखड्गादि कृमिश्वशकटेन च । भृग्वग्निवान्तशस्त्राम्बुविषोद्बन्धनजलैर्मृताः । व्याघ्राहिगजभूपालचौरवैरिवृकाहताः । हयतल्पमृता ये च शौचसंस्कारवर्जिताः । विसूचिकाक्षकवलद्वातीसारतोमृताः । शाकिन्यादिग्रहैर्ग्रस्ता विद्युत्पातहताश्च ये । अस्पृश्या अपवित्राश्च पतिताः पुत्रवर्जिताः । पञ्चत्रिंशत्प्रकारैश्च नाप्नुवन्ति गतिं मृताः । पित्राद्याः पिण्डभाजः स्युस्त्रयोलेपभुजस्तथा । ततोनान्दीमुखाः प्रोक्तास्त्रयोऽप्यश्रुमुखास्त्रयः । द्वादशैते पितृगणास्तर्पिताः सन्ततिप्रदाः । गतिहीनाः सुतादीनां सन्ततिं नाशयन्ति ते । दश व्याघ्रादिनिहता गर्भं निघ्नन्त्यथो क्रमात् । द्वादशास्त्रादिनिहता व्याकर्षन्ति च बालकम् । विषादिनिहताघ्नन्ति दशसु द्वादशस्वपि । वर्षैकबालकं कुर्य्यादनपत्योऽनपत्यताम् । व्याघ्रेण हन्यते जन्तुः कुमारीगमनेन च । विषदश्चैव सर्पेण गजेन नृपदुष्टकृत् । राज्ञा राजकुमारघ्नश्चौरेण पशुहिंसकः । वैरिणा मित्रभेदी च वकटत्तिर्वृकेण तु । गुरुघाती च शय्यायां मत्सरी शौचवर्जितः । द्रोही संस्काररहितः शुना निक्षेपहारकः । नरोविहन्यतेऽरण्ये शूकरेण च पापिकः । कृमिभिः कृत्तवासाश्च कृमिणा यो निकृन्तनः । शृङ्गिणा शङ्करद्रोही शकटेन च सूचकः । भृगुणा मेदिनीचौरोवह्निना यज्ञहानिकृत् । द्रवेन दक्षिणाचौरः शस्त्रेण श्रुतिनिन्दकः । अश्मना द्विजनिन्दाकृद्विषेण कुमतिप्रदः । उद्बन्धनेन हिंस्रः स्यात् सेतुभेदी जलेन तु । द्रुमेण राजदन्तिहृद्तीसारेण लौहहृत् । शाकिन्याद्यैश्च म्रियते सदर्पकार्य्यकारकः । अनध्यायेऽप्यधीयानो म्रियते विद्युता तथा । अस्पृश्यस्पर्शसङ्गी च वान्तमाश्रित्य शास्त्रहृत् । पतितोमद्यविक्रेतानपत्योद्विजवस्त्रहृत् । अथ तेषां क्रमेणैव प्रायश्चित्तं विधीयते । कारयेन्निष्कमात्रन्तु पुरुषं प्रेतरूपिणम् । चतुर्भुजं दण्डहस्तं महिषासनसंस्थितम् । पिष्टैः कृष्णतिलैः कुर्य्यात् पिण्डं प्रस्थप्रमाणतः । मध्वाज्यशर्करायुक्तं स्वर्णकुण्डलसंयुतम् । अकालमूलं कलसं पञ्चपल्लवसंयुतम् । कृष्णवस्त्रसमाच्छन्नं सर्व्वौषधिसमन्वितम् । तस्योपरि न्यसेद्देवं पात्रं धान्यफलैर्युतम् । सप्तधान्यन्तु सफलं तत्र तत् सकलं न्यसेत् । कुम्भोपरि च विन्यस्य पूजयेत् प्रेतरूपिणम् । कुर्य्यात् पुरुषसूक्तेन प्रत्यहं दुग्धतर्पणम् । षडङ्गञ्च जपेद्रुद्रं कलसे तत्र वेदवित् । यमसूक्तेन कुर्व्वीत यमपूजादिकं तथा । गायत्र्याश्चैव कर्त्तव्योजपः स्वात्मविशुद्धये । गृहशान्तिकपूर्व्वञ्च दशांशं जुहुयात्तिलैः । अज्ञातनामगोत्राय प्रेताय सतिलोदकम् प्रदद्यात् पितृतीर्थेन पिण्डं मन्त्रमुदीरयेत् । इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् । ददामि तस्मै प्रेताय यः पीड़ां कुरुते मम । सजलान् कृष्णकलसांस्तिलपात्रसमन्वितान् । द्वादश प्रेतमुद्दिश्य दद्यादेकञ्च विष्णवे । ततोऽभिषिञ्चेदाचार्य्योदम्पती कलसोदकैः । शुचिर्वैरायुधधरोमन्त्रैर्वरुणदैवतैः । यजमानस्ततोदद्यादाचार्य्याय स दक्षिणाम् । ततोनारायणबलिः कर्त्तव्यः शास्त्रनिश्चयात् । एष साधारणविधिरगतीनामुदाहृतः; विशेषस्तु प्रवक्ष्येयोव्याघ्रादिनिहतेष्वपि । व्याघ्रेण निहते प्रेते वरकन्यां विवाहयेत् । सर्पदंशे नागबलिर्देयः सर्पस्तु काञ्चनः । चतुर्निष्कमितं हेमगजं दद्याद्गजैर्हते । राज्ञा विनिहते दद्यात् पुरुषन्तु हिरण्मयम् । चौरेण निहते धेनुं वैरिणा निहते वृषम् । वृकेण निहते दद्याद् यथाशक्ति च काञ्चनम् । शय्यामृते प्रदातव्या शय्या तूलीसमन्विता । निष्कमात्रसुवर्णस्य विष्णुना समधिष्ठिता । शौचहीने मृते चैव द्विनिष्कस्वर्णजं हरिम् । संस्काररहीने च मृते कुमारञ्च विवाहयेत् । शुना हते च

निक्षेपं स्थापयेद्विजशक्तितः । शूकरेण हत दद्यान्म-हिषं दक्षिणान्वितम् । क्रमिभिश्च मृते दद्याद्गोधूमान् द्विजातये । शृङ्गिणा च हते दद्याद्वृषभं वस्त्रसंयुतम् । शकटेन मृते दद्यादश्वं सोपस्करान्वितम् । भृगुपाते मृते चैव प्रदद्याद्धान्यपर्व्वतम् । अग्निना निहते दद्यादुपानहं स्वशक्तितः । द्रवेन निहते चैव कर्त्तव्या सदने सभा ! शस्त्रेण निहते दद्यान्महिषीं दक्षिणा-न्विताम् । अश्मना निहते दद्यात् सवत्सां गां पय-स्विनीम् । विषेण च मृते दद्यान्मेदिनीं घेनु-संयुताम् । उद्बन्धनमृते चापि प्रदद्याद्गां पयस्विनीम् । मृते जलेन वरुणं हैमं दद्यात्त्रिनिष्ककम् । वृक्षं वृक्षहते दद्यात् सौवर्णं स्वर्णसंयुतम् । अतीसारमृते लक्षं गायत्र्याः संयतो जपेत् । शाकिन्यादिमृते चैवं जपेद्रुद्रं यथोचितम् । विद्युता निहते चैव विद्यादानं समाचरेत् । अस्पर्शे च मृते कार्य्यं वेदपारायणं तथा । सच्छास्त्रपुस्तकं दद्याद्दान्त-माश्रित्य संस्थिते । पातित्येन मृते कुर्य्यात् प्राजापत्यानि षोड़श । मृते चापत्यरहिते कृच्छ्राणां नवतिश्चरेत् । निष्कत्रयमितं स्वर्णं दद्यादश्वं हयाहते । कपिना निहते दद्यात् कपिं कनकनिर्म्मितम् । विसूचिकामृते स्वादु भोजयेच्च शतं द्विजान् । तिलधेनुः प्रदातव्या कण्ठेऽन्नकवले मृते । केशरोगमृते चापि अष्टौ कृच्छ्रान् समाचरेत् । एवं कृते विधाने तु विद्यात्तदौर्द्ध-देहिकम् । ततः प्रेतत्वनिर्म्मुक्ताः पितरस्तर्पितास्तथा । दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसम्पदः” इत्या० ।

भृगुभारतसंवादे रोगादिरूपकर्म्मविशेषविपाक उक्तो यथा-

३सर्व्वेण “वातपित्तादिभिर्दोषैर्यदुत्पन्नं प्रशाम्यति । अगदेन सुवैद्येन कर्म्मजं नोपशाम्यति । तस्मात् कर्म्म परि-ज्ञाय प्रायश्चित्तं करोति यः । स तु दोषैर्विनिर्म्मुक्तो भोगीव कञ्चुकोज्झितः । भवतोह पवित्रोऽपि मनुजो निरुपप्लवः । निशम्य तस्य तद्वाक्यं प्रणम्य स महा-मतिः ; कृतकर्म्मोपशमनं विस्तरेण महामते ! । वदस्व मुनिशार्द्दूल ! नान्यो वक्ता त्वया विना । मुनिरुवाच । धर्म्माधर्म्मसमायुक्ता लोभमोहसमावृताः । भवन्ति मानवाः सर्व्वे विष्णुमायावगुण्ठिताः । स्वकर्म्म-वशमासाद्य पतन्ति निरये नराः । ततो जन्म समा-साद्य व्याधिं कर्म्मानुरूपतः । अवाप्य परितप्यन्ति पीड्य-मानाः समन्ततः । देवद्रव्यविनाशेन गुरुद्रोहादि कर्म्मभिः । क्रमात् सर्व्वेषु पच्यन्ते नरकेष्वा महा-भयात् । महापातकिनश्चापि सर्व्वेषु नरकेष्विह आचन्द्रतारकं यावत् पीड्यन्ते विविधैर्गदैः । उप-पातकिनश्चापि तदर्द्धमिह मानवाः । शेषैः पापैस्तद-र्द्धञ्च कालं प्राप्य विशेषतः । अथाधःपततां पुंसा-मधर्म्मः परिकीर्त्तितः । नरकाब्धौ महाघोरे पतनात् पापमुच्यते । तस्मात् पापेषु दुःखानि तीव्राणि सुबहून्यपि । तस्मात् पापं न कर्त्तव्यमात्मपीडाकरं यतः । कर्म्मानुसारि नरकं भुक्त्वाशेषं व्रजन्ति वै । भूमौ वृक्षलतागुल्मपशुपक्षिमृगादिभिः । प्रत्यक्षं नरकं भुक्त्वा मानुषत्वं प्रपद्य च । तद्व्याधि-लक्षणं सर्व्वं संप्राप्य परितप्यते । पूर्व्वजन्मकृत पापं व्याधिरूपेण बाधते । तस्योपशमनं कार्य्यं मन्त्र-दानार्च्चनादिभिः । प्रायश्चित्तमकृत्वा तु न कुर्य्यात् कर्म्म किञ्चन । अनिस्तीर्णमघं नित्यं वर्द्धते द्विगुणं पुनः । देवद्रव्यं द्विजप्राप्तं ब्रह्मस्वं ब्राह्मणस्त्रियः । द्रोह एषां न कर्त्तव्यस्त्वधोगतिभयात् सदा । स्वर्ण-स्तेयी गुरोः शय्याशायी मद्यस्य भोजकः । ब्रह्महापि च तेषां वै संसर्गी चापि पञ्चमः । गर्भपातकरः षष्ठः कन्यादूषी च सप्तमः । स्त्रीबालघातकश्चापि नवमो न्यासहृत्तथा । विश्वासघातकश्चैव दशमः परिकीर्त्तितः । एते दशविधा घोरास्तदन्य उपपा-तकाः । यत् पापं ब्रह्महत्याया द्विगुणं गर्भपातने । प्रायश्चित्तं न तस्यास्ति देहत्यागो विधीयते । कृतदोष-सहस्राणां योषिद्‌द्विजतपस्विनाम् । न बधो नाङ्ग-विच्छेदो देशत्यागो विधीयते । नैते दण्ड्या महीभर्त्तुर्यमस्य विषयङ्गताः । दण्डयन् दोषमाप्नोति तस्माद्राजा परित्यजेत् । यथापराधतो राजा शास्ता भवति शास्त्रतः । न तस्य कुरुते शास्तिं यमो मर्त्येषु शासिता । अज्ञात्वा धर्म्मशास्त्राणि प्रायश्चित्तं वदन्ति ये । प्रायश्चित्तं भवेत्तेषां महापातकिनश्च ते । तस्माद्विमृश्य वक्तव्यं धर्म्मशास्त्रानुसारतः । ये विप्रान् नमन्ति नैव च गुरुं ये चाथ कर्म्मोज्झिता, ये शास्त्रोक्त विवर्जिता जनपदानां तापकाः पापिनः । ये वैद्यान् गणकान् ग्रहांश्च सुहृदः सन्मार्गगान् ये सदा, निन्दन्त्येव महापदं गदभयं विन्दन्ति ते दुःखिताः । ये नमन्ति-द्विजतीर्थमादरादौषधञ्च भिषजः प्रतिक्षणम् । इष्टमन्त्र-मखदानजं फलं ते भवन्ति निरुजो निरापदः । व्याधे-र्य्यदा गदविखण्डनभेषजाद्यैर्दोषो न याति शमनं

सुकृतप्रयोगैः । तं पूर्व्वजन्मजनितं तु विमृष्य सम्यक् कार्य्या सभा तदुपदिष्टयथोक्तशान्तिः” १ अ० ।

२ नपुंसकता “साध्वी यौवनसम्पन्ना त्यक्ता दोषैर्बहिष्कृता । तेन दोषेण राजेन्द्र ! नपुंस्त्वमनुगच्छति । मुष्कच्छेदनकृद्यस्तु सोऽपि षण्ढत्वमश्नुते । रजस्वलाम् स्थितां भार्य्यां सन्निधौ यो न गच्छति । षण्डत्वन्तु भवेत् तस्य जन्म चासाद्य भूपते !” ।

३ अल्पायुःप्रजता “शृणु विप्र ! पुरा स्नातुं गतस्त्वं सरितस्तटम् । गावः कतिपयास्तत्र तृषार्त्ता वारितास्त्वया । तस्य विघ्नस्य पाकोऽयं जायन्तेऽल्पायुषः प्रजाः” ।

४ अकिञ्चनता “अदाता निष्ठुरो जातः स च धर्म्मस्य निन्दकः । महाधनो न देवाग्निं ब्राह्मणं तोषयन् पुरा । आयुःक्षये मृतिं प्राप्य गृहीतो यमकिङ्करैः । बद्ध्वा पाशेन संनीतो यत्रास्ते धर्म्मराड्विभुः । चित्रगुप्तेन तत्पापं विख्यातञ्च यमाज्ञया । तेन मर्त्ये महाढ्येन कृतं दत्तं न किञ्चन । लोलाख्यस्य नरकस्य विषयेऽयं द्विजो भवेत् । आज्ञप्तः किङ्करैर्नीतो निःक्षिप्तो नरकार्णवे । लोलाख्यनरके घोरे सर्व्वप्राणिभयङ्करे । लोलाख्यनरकस्येह लक्षणं त्वमतः शृणु । सर्व्वत्र दर्शयेत् सर्व्वं भक्ष्यपानादि सर्व्वतः । मृगतृष्णाजलाकारं दृश्यते न तु लभ्यते । नैराश्यं प्राप्य विवशः क्षुत्पिपासासमाकुलः । बहुकालन्तु विविधं भुक्त्वा जन्म प्रपद्य च । अकिञ्चनत्वमासाद्य महाक्लेशञ्च विन्दति । अत्यर्थं कदन्नं भुङ्क्ते कदन्नमति दुर्लभम् । स तु भिक्षाटनेनापि जीर्णाम्बरधरः सदा”

५ वियोगः “अनं दुष्टो दुराचारं दुष्टबुद्ध्या चकार यत् । स्नेहभेदकरो यस्मात्तस्माद्दण्ड्यो यमस्य हि । इत्युक्त्वा शृङ्खलैर्बद्ध्वा ताडयित्वा भृशं बहु । नीत्वा नियोगिनस्तत्र यत्रास्ते दण्डनायकः । दृष्ट्वा तं चित्रगुप्तेन तत्पापं प्रकटीकृतम् । व्यामोहके तु नरके पातितो दुर्म्मतिर्नृप ! । व्यामोहकस्य यच्चिह्नं मानं वक्ष्याम्यशेषतः । व्यायामः सप्ततिस्तस्य योजनं दुर्व्वहं परम् । कुम्भाकारं निराकारं धूमोघव्याप्तमन्तरम् । वायोर्गतिर्न तत्रास्ति न च रश्मिर्विभावसोः । मूढस्य पतनं तत्र यश्च मैत्रीविभेदकः । ज्ञात्वा मन्त्रस्य निष्पाद्यं विमन्त्रं यो विधास्यति । सोऽपि मृत्युवशं प्राप्य मोहकाख्यञ्च गच्छति । मिथ्यापवादमन्येषां यः करोति वृथामतिः । तस्य मिथ्याभिशंसेन मोहकाख्ये गतिर्भवेत् । यानि मिथ्याभिशंसेन पतन्त्यश्रूणि रोदनात् । तानि पुत्रान् पशून् घ्नन्ति तेषां मिथ्याभिशंसिनाम् । मोहकाख्ये महाघोरे पतन्त्य ते दुराशयाः । पूर्व्वापरपरिज्ञानविहीनः परिशुद्ध च । एवमेतत् सहस्राणि वर्षाणि च चतुर्दश । भुक्त्वा मृगतनुं प्राप्य मृगीदेहसमाकुलः । व्यापादितोऽन्यशंसेन नवशोकसमाहतः । मृगयूथपरित्यक्तस्त्वेकाकी तिष्ठते पुनः । सोऽपि मृत्युवशं प्राप्य मनुष्ययोनौ प्रजायते । ततोमानुष्यमासाद्य वियोगे परितप्यते” ।

६ नेत्रामयः । “पुरा विप्र ! गृहस्थस्य दीपस्य हरणं कृतम् । तव पुत्रेण भो विप्र ! तेन काणत्वमस्य वै । कोटवीञ्च प्रपश्येद्यः सतीं वापि पराङ्गनाम् । स्कान्धः कामतो मोहाद्रतिमालक्ष्य पश्यति । सोऽपि नेत्रामयं प्राप्य सीदतीह स्वकर्म्मतः । सभयं निरयं घोरं संप्राप्य कदनं बहु । भुक्त्वा जन्म समासाद्य दुष्टकर्म्मसमुद्भवाम् । मानुषोन्तु तनुं प्राप्य निष्कृतिं न करोति यः । पुनर्जन्म समासाद्य प्राप्तं कर्म्म न मुञ्चति” ।

७ कुब्जत्वम् । “देवताप्रतिमां दृष्ट्वा यस्तां नैवाभिवादयेत् । ब्राह्मणञ्च गुरुं श्रेष्ठं ब्रह्मचारितपस्विनम् । श्मशाने जायते वृक्षः काकगृध्रोपसेवितः । भुक्त्वा कालमशेषञ्च मानुषत्वमवाप्य सः । कुब्जत्वमश्नुते तस्मात् कर्म्मणो मानुषो ध्रुवम्” ।

८ खञ्जत्वम् छिन्नपादत्वञ्च “उपानहं हरेद्यस्तु तथैव काष्ठपादुकाम् । तप्तवालुकदुर्भेद्यमङ्के प्राप्य च सीदति । स नीतो यमदूतैश्च ताड्यमानो भृशं मुहुः । प्रवेश्य दक्षिणं द्वारं बद्ध्वा पादद्वये दृढम् । हाहाकारस्तु सर्व्वत्र श्रूयते यत्र भीषणः । नीत्वा यमाज्ञया दूतैः रौरवे च निवेशितः । रौरवस्य च यन्मानं तन्मे निगदतः शृणु । शतयोजनविस्तीर्णं गभीरं स्यादुदिवाहृतम् । दह्यमानस्तु तत्रैव पतितः पुनरुत्थितः । पुनः पतति तत्रैव क्रन्दमानो मुहुर्मुहुः । अनेककालमासाद्य पारं प्राप्य सुदुःखितः । मानुषीं योनिमासाद्य खञ्जपादो भवेन्नरः । श्लीपदी(छिन्नपादता)व्याधिसंयुक्तो भवेज्जन्मनि-जन्मनि” ।

९ छिन्नघ्राणता “श्रुतिस्मृतिकथायान्तु यस्तत्र विघ्नमाचरेत् । देवद्विजातिधर्म्माणां सदा यो देवनिन्दकः । सोऽपि मृत्युवशं प्राप्य यत्र याति च तत् शृणु । नैरृते पश्चिमे भागे पिङ्गला नाम या पुरी । पिशाचा यत्र तिष्ठन्ति सोऽपि तत्र स्वकर्म्मतः । यमाज्ञया तत्र नीतो रक्षितस्तत्र दुर्म्मतिः । तत्र दुःखं महाघोरं भुक्त्वा कर्म्मा-

न्तरे पुनः । मानुषत्वमनुप्राप्य छिन्नप्राणोह्यशोभनः । स निन्द्यः सत्सभामध्ये न प्रवेश्योभवेद्धि सः" ।

१० छिन्नहस्तता छिन्नपादता च "अतः परं छिन्नहस्तोयतो भवति मानुषः। शृणुष्व तत् प्रवक्ष्येऽहं स्वकर्म्मवशतश्च सः। पिता माता गुरुर्वृद्धः क्रोधाविष्टेन ताडितः । विनाऽपराधतो जन्तुं योवा हन्याद्विमोहितः । यमलोके वसेत् सोऽपि छिन्नहस्तो भवेदिह । करेण ताडनाच्छिन्नपाणिर्भवति पामरः । पादेन छिन्नपादस्तु मर्त्त्योवै जायते ध्रुवम्" ।

११ छिन्नकर्णता । "मिथ्यापवाददुष्टत्वं येन तोषः परोभवेत् । मानुषस्य, ततोदुष्टाः श्रावयन्ति महीपतिम् । ते क्रूराश्छिन्नकर्णाश्च जायन्ते पृथिवीतले" ।

१२ कराङ्घ्रिहीनता । "सैन्ययोरुभयोर्यत्र संग्रामे चातिदारुणे । स्वामिनं सङ्कटे त्यक्त्वा ये भग्नाः पापबुद्धयः । स मृतो गृह्यते दूतैर्भीषणैर्विकटाननैः । पूतिगन्धवृतैः पाशैर्नीयते यमसादनम् । तर्ज्यमानः शरैः खड्गैः कूटमुद्गरपाणिभिः । यमाज्ञाकारिभिस्तैस्तु पात्यते नरकं शृणु । असिपत्रवनं घोरं नरकं शतयोजनम् । योजनायुतगम्भीरं ज्वलत्खड्गसमाकुलम् । पात्यन्ते तत्र तैः खड्गैः शितधारसमाहितैः । ये भग्नाः स्वामिनं त्यक्त्वा मित्रं प्राप्य च मानुषाः । क्रन्दमानाश्च तिष्ठन्ति यावदाभूतसंप्लवम् । कर्म्मावसाने जायन्ते मानुषत्वमतः परम् । कराङ्घ्रिभ्यां विहीनस्तु दुष्टजीवः प्रवर्त्तते । नास्त्यस्य कर्म्म संप्रोक्तं येन मुक्तो भवेन्नरः । जन्मजन्मनि जायन्ते छिन्नाङ्घ्रिकरवेदनाः ।

१२ प्रसङ्गात् युद्धकर्म्मविपाकः "अतःपरन्तु ये शूरास्तेषां माहात्म्यमुत्तमम् । शौकमातमतस्तात ! शृणुष्व गदतोमम । विद्रुतेषु च सैन्येषु सङ्कटेषु समन्ततः । नृपं प्रति यदा गच्छेत् सा यात्रा क्रतुभिः समा । ललाटदेशे रुधिरं स्रवच्च यस्यापि वक्त्रे पततीह किञ्चित् । तत् सोमपानेन हि तस्य तुल्यं संग्रामयज्ञे मघवाऽप्युवाच । शूरस्तेयस्य गात्राणि शरखड्गादितोमरैः । भिन्दन्ति न यमः शक्तोग्रहीतुं पुण्यभाजनम् । अश्वोपरि च यः शूरः प्राणांस्त्यजति घातितः । तिस्रः कोट्योऽर्द्धकोटी च द्विगुणं कालतस्तु सः । अप्सरोभिः सेव्यमानोदिव्यलोकमवस्थितः । तमेव पुरुषं प्राप्य दृष्ट्वा सर्व्वाः सुराङ्गनाः । विमानस्थाः समस्ताश्च गायमानाः परस्परम् । परित्यज्य सुरान् यान्ति स्वामिनं प्राप्य हर्षिताः" ।

१४ पत्नरोगः "अशस्त्रः पुरुषो येन सशस्त्रेण हतो रणे । तत्कर्म्मणः परिज्ञानं विस्तरेण शृणुष्व वै । त्यक्तास्त्रहत्यादोषेण यमस्य पुरुषैर्भृशम् । आयुःशेषेऽथ संगृह्य यमदूतैर्भयानकैः । तस्मिन् मार्गे दुराधर्षे नीत्वाऽऽज्ञाभिर्यमस्य च । तक्कशाख्ये महाघोरे निरये च वसेद्धि सः । प्रविप्तश्चिरकालन्तु महादुःखेन पच्यते । ततो रासभयोनौ स जायते वै स्वयं नरः । ततो मृगस्ततो व्याघ्रस्ततः शस्त्रेण हन्यते । सारमेयत्वमासाद्य मत्स्ययोनौ प्रजायते । तस्माद्वै मानुषीं प्राप्य पत्नरोगेण गृह्यते" ।

१५ वैधव्यम् "विरूपं स्वामिनं दृष्ट्वा यौवनेनातिगर्व्विता । दिवानिन्दति दुर्व्वाक्यैः शय्यां न भजते निशि । तेन दोषेण भो देवि ! वैधव्यं त्वमपाश्रिता । आज्ञप्ता रमणी या च स्वामिनं भजते न हि । सा वैधव्यमवाप्नोति दरिद्रं यावमन्यते । तस्य दोषस्य पाकोऽयं देवि ! वैधव्यमागता" ।

१६ वन्ध्यता "पयःपातुमना वत्सस्त्वया पूर्व्वं निवारितः । पुरुषो बन्ध्यतां याति वीर्य्यविक्रमदोषतः । अदत्त्विषं व्रतं कृत्वा बन्ध्यत्वमनयोर्भवेत् । अदैवतं मिष्टफलं यो भुङ्क्ते प्राप्यलोभतः । सोऽपि बन्ध्यत्वमाप्नोति कथयामि ततः शृणु । दृष्ट्वा तु मैथुनीभावं विघ्नं तु कुरुते च यः । सोऽपि बन्ध्यत्वमाप्नोति सर्व्वजन्मनिजन्मनि ।

१७ गर्भस्रावः "त्रेतायुगस्य मध्ये तु सञ्जयोनाम भूपतिः। तस्य भार्य्याद्वयं जातं सुमित्रा नन्दिनी तथा । नन्दिनी सुभगा तस्य सुमित्रा या यशस्विनी । प्रसूता सा स्वपुत्रेण तेन पत्या सुमानिता । सापत्न्यपरुषाविष्टा नन्दिनी नीतिवर्जिता। शून्यालये च सहसा छद्मनाऽऽनीय तं सुतम् । शतधा खण्डकं कृत्वा तैलपाके विचिक्षिपे । सानेन विधिना राजन् ! दुष्टमत्या निजेच्छया । चकार दारुणं कर्म्म तत्फलं शृणु भूपते ! । सा कालवशमासाद्य बालघाताभिदोषतः। गृहीत्वा निष्ठुरैर्बद्धा पाशेन यमकिङ्करैः । नीत्वा निरयमध्ये तु सा प्रक्षिप्ता दुराशया । कर्म्मान्ते कोकिला नाम वैश्यस्य च सुताऽभवत् । भूयोपि विश्वावसुना परिणीता गृहाश्रमे । सर्व्वद्रव्यसमायुक्ते दासदासीसमाकुले । सा पुनः पञ्चमे मासि तृतीये वा चतुर्थके गर्भस्रावोऽभवत् तस्यास्तेन दुःखेन दुःखिता" ।

१८ मृतभार्य्यता "अतिक्रम्य त्वया ज्येष्ठं भ्रातरं चात्मनः कृतः । पुरा परिणयस्तेन मृतभार्य्यत्वमागतः । शयनस्थां यः स्पृशेत्तैलं ज्येष्ठा भार्य्यास्य नश्यति" ।

१९ बहुपुत्रता अपुत्रता च } "गवोसुस्वाद्बहिष्कृत्वा यस्तु द्रव्यं हरेत् पुनः शृणु तस्य यथा पापं कथयामि तवाग्रतः ।

निर्जने दुर्व्वहे घोरे शिकताढ्ये मरुस्थले । क्रमिर्भूत्वा वसे-त्तत्र क्षुत्पिपासासमाकुलः । मन्वन्तरत्रयं तत्र ततोनीहा-रसंप्लवे । शीर्य्यमाणस्तु निश्चेष्टः शीतवातार्द्दितो भृशम् । कल्पमानन्तु दुःखेन मानुषोजायते स्मृतः । बहुपुत्रो-भवेत् सोऽपि पुत्रं न लभते हि वा ।

२०दौर्भाग्यम् “तृतीयासु च सर्व्वासु तैलस्पर्शस्त्वया कृतः । दुर्भगत्वञ्च ते जातं न तापं कुरु सुन्दरि !” ।

२१सापत्न्यम् । “शृणु देवि ! प्रवक्ष्यामि यत्तु सापत्न्यसम्भ-वम् । दुःखं सुपरमं स्त्रीणां स्वकर्म्मवशतः खलु । मिथ्यावाक्यप्रसादेन विवादं कुरुते तु या । अन्योन्य-स्नेहवैषम्यं कारयित्वा व्रजेदधः । कर्म्मानुयायिनी-भूत्वा जीवेद्वर्षचतुष्टयम् । ततः पुनरसौ दीना दैवाद्भवति मानुषी । सापत्न्यं प्राप्य सन्तप्ता चित्तपीड़ासमन्विता । भवतीति न सन्देहस्तस्य दानमतः शृणु” ।

२२जात्यन्तरम् “शृणु देव ! प्रवक्ष्यामि येन जात्यन्तरं गतः । मनुष्यो दुःखमाप्नोति भवेद्व गर्हितो जनः। पुरा राजकुले-जातो विश्वसेनेति नामतः । एकदा ब्राह्मणी रण्डा यौवनस्था तपस्विनी । पुष्पार्थिनी पुष्पवनं गता दृष्टाथ तेन सा । कामबाणार्द्दितेनाथ बलात्कारेण धर्षिता । हृद्रोगेणाभिसंतप्ता ततः स्वभवनं गता । अत्रान्तरे गृहं तस्या भिक्षुरेकः समागतः । धर्षिता सापि तन्वङ्गी भिक्षवेऽन्नं ददौ मुदा । इदं कृतं तया पापं शृणु तस्य फलं तथा । तत्कर्म्मवशमासाद्य यमस्य विषयङ्गता । पुनर्जन्म समासाद्याऽभवन्म्लेच्छकुलोद्भवा । म्लेच्छयोनिं परित्यज्य ततः कैवर्त्तयोनिजा । एवं बहुविधां योनिं समासाद्य द्विजाङ्गना । अमेध्यान्नञ्च यतये दत्त्वा प्राप गतिं नृप ! । मनुष्योदुःखमाप्नोति स भवेद्गर्हितोजनः”

२३मूकत्वम् “पुरा देवाग्रतो राजन् ! गायमानो द्विजः कश्चित् । नृत्यंश्च प्रणुवन् वाक्यैर्हास्ययुक्तैश्च निन्दितः। तस्य विघ्नस्य पाकोऽयं न वाक् प्रसरते मुखात् । नृत्यमानन्तु देवाग्रे गायमानं प्रहस्य च । नोपहासं प्रकुर्वीत महादोषो-भवेद्ध्रुवतः” ।

२४गद्गदवचनता “अतःपरं महाभाग ! गद्गदत्वेन दूषिताः । भवन्ति मानवा मर्त्ये तच्छृणुष्व वदामि ते । जिगीषाकृष्ट-हृदयोविवादं प्रकरोति यः । गुरोर्निन्दाञ्च मूर्खत्वादस्य पापमतः शृणु । यमलोके तु तस्यैव कुट्यते निशितैः जिह्वापि किङ्करैः कुठारजसं तस्य दोषतः । अयोमकाशपर्य्यन्तं दुःखं प्राप्य महत्तरम् । मानुषत्व-मनुप्राप्य गद्गदो जायते नरः। ततो गद्गदया वाण्या मर्त्यः सीदति सर्व्वदा” ।

२५मुखरोगः । “पितृदेवगुरोर्निन्दां ये वै मिथ्या वदन्ति च । अभक्ष्यभक्षका ये च ते वै मुखगदार्द्दिताः । भवन्ति नरकस्यान्ते मानुषास्तस्य निष्कृतिम् शृणु वक्ष्यामि भूपाल !” ।

२६कर्णरोगः । “अश्रव्यन्तु यच्छृणोति पापमन्तर्गतन्तु यत् । समाकर्ण्यापि मनुजः कर्णरोगी भवेत् सदा । कर्णमूलं भवेदेवं पूयशोणितसम्भवम् । कर्णरोगमिति ख्यात-मवाप्य परितप्यते” ।

२७दुर्गन्धगात्रता । “चोरयित्वा तु गन्धाढ्यं द्रव्यं लोभपरा-यणः । पच्यते नरके घोरे मूत्रविष्ठासमाकुले । अप्र-तिष्ठेऽतिदुर्गन्धे दिव्यवर्षायुतत्रयम् । मर्त्ये तु शशको भूत्वा जीवेद्वर्षचतुष्टयम् । ततोमृगस्तु सौगन्धो भूत्वा शस्त्रेण हन्यते । दुर्गन्धेन समायुक्तो मानुषत्वमवाप्य सः । स्वकर्म्मवशतो राजन् ! दुर्गन्धं गात्रमश्नुते” ।

२८दारिद्र्यं विरूपता च । “पुरा सङ्कल्पनृपतेरमात्येना-सता शृणु । दानविघ्नः कृतस्तेन पाकोऽयं नान्यथाऽभवत् । मा ददस्वेति यो ब्रूयाद्देवाग्निब्राह्मणेषु च । स नरस्तस्य पाकेन दरिद्रत्वेन गृह्यते । दरिद्रः कुरुते पापं पापाद्-याति यमालयम् । पुनरावृत्य पापेन दारिद्र्येणाभिगृह्यते । न क्षयोऽस्ति च पापस्य तस्मात् पापं त्यजेत् सुधीः । अदाता च भवेत् सोऽपि विरूपश्चापि दुर्व्विधः । तस्मात् कर्म परिज्ञाय दानं दद्यात् स्वशक्तितः” ।

२९सस्वेदपाणिपादता “चोरयित्वा तु लवणं मृतः क्षाराब्धि-संज्ञके । नरके पच्यते पश्चान्मानुषत्वमवाप्य सः । तस्य कर्म्मभवं चिह्नं जायते हस्तपादयोः । सस्वेदं सर्व्वदा तस्य निष्कृतिं त्वमतः शृणु ।

३०दाहज्वरः “पुरा येन गृहं पापः चौरं दग्धन्तु वह्निना । स मृतो रौरवं प्राप्य पीड्यमानः स्वकर्म्मणा । खदिरा-ङ्गारवद्दीप्तज्वालामालावगुण्ठिते । पतितस्तिष्ठते तत्र वर्षायुतशतत्रयम् । कर्म्मान्ते मानुषीं योनिमवाप्य परि-दह्यते । ज्वरदाहेन घोरेण येन शाम्यति तच्छृणु” ।

३१अग्निमान्द्यम् “कश्मषं नाम नरकं पूयशोणितसंश्रुतम् । विस्तारंलक्षदशकं महामोहसमाकुलम् । तिष्ठन्ति पापिन-स्तत्र द्विजपाकस्य विप्लवात् । ततो मानुषतां प्राप्य भुक्त्वा पापं सुदुष्करम् । अग्निमान्द्यं भवेत्तस्य निष्कृतिं कथयामि ते ।

२२अजीर्णरोगः“त्वया कृतं पुरा कर्म यद्युक्तञ्च तच्छृणु। कृत्वा पाकञ्च पाकाग्निं शमयित्वा जलेन च। भोजनञ्च कृतं तस्मादजीर्णत्वमुपागतः”।

२३अतीसार“अथातीसारो राजेन्द्र! जायते येन कर्म्मणा। देहिनां दोषदुर्वृत्तः प्रशाम्यति यतः शृणु। अत्यन्तगुप्तं पापिष्ठं निरुच्छ्वासकनामकम्। सोपद्रवञ्च नरकं विषमोपद्रवाकुलम्। निर्वातमूष्मणा युक्तं दंशकादिपरिप्लुतम्। पच्यन्ते पापिनस्तत्र वर्षलक्षायुतत्रयम्। यज्ञाग्निदूषका ये च ये च दानविलोपकाः। परस्वत्यागं चौर्य्येण शातयन्तीह तेऽधमाः। नरकान्ते मनुष्ययोनौ भूत्वा वर्षत्रयं पुनः। मानुषत्वमनुप्राप्य अतीसारेण दह्यते”।

२४ ग्रहिणी “अत्यर्थं संग्रहं ये च कुर्वन्ति धनलुब्धकाः। न ददन्ति न चाश्नन्ति हव्यं कव्यञ्च किञ्चन। तथा गोभूमिहर्त्तारो निष्ठुरा ये च दम्भकाः। अदुष्टामपतितां भार्य्यां यौवने यः परित्यजेत्। स मृतः पच्यते राजन्! स्वकर्म्मवशतः शृणु। नरकञ्च पूरीषाख्यं प्रलयानलपीडितम्। कल्पकोटिशतं तत्र दह्यन्ते पापदेहिनः। नरकान्ते गजयोनिं म्रियते प्राप्य बन्धनात्। तस्मात्तु मानुषीं योनिं ततः प्राप्यावसीदति। ग्रहणीरोगवान् भूत्वा पशुद्रव्यधनादिकम्। प्राप्यते विविधैर्दुःखैस्तस्य वक्ष्यामि निष्कृतिम्”।

२५पाण्डुरोगः“शृणु राजन्! प्रवक्ष्यामि पाण्डुरोगोद्भवो यतः। परभार्य्यारतोयश्च नरश्चैवान्यजारतः। स मृतः किङ्करैर्याम्यैर्बद्धः शृङ्खलया दृढम्। निष्ठुरैस्ताड्यमानस्तु क्रन्दमानो मुहुर्मुहुः। शोचमानः स्वकं कर्म्म प्रपञ्चश्च पदेपदे। संयमन्यां प्रवेश्यैनं दक्षिणद्वारिभीषणे। यमनाथं समानीय परभार्य्याभिमर्दकम्। ततोऽसं यमदूतोऽपि दृढं बद्धा निरन्तरम्। तं दृष्ट्वा चित्रगुप्तेन पापकर्मानुसारतः। प्रत्यक्षञ्चावदत् सर्व्वं दुश्चेष्टादिकमस्य वै। कथितोऽयं दुराचारः परस्त्रीरमणप्रियः। नयस्व नरकं भीमं ज्वलन्तीमायसीं स्त्रियाम्। भृशमालिङ्गनञ्चास्य कारयन्ति यमाज्ञया। वर्षायुतसहस्रे द्वे परं तापञ्च विन्दति। पुनः स्वकर्म्मपाकेन ज्वलदग्निमये ह्रदे। विक्षिप्तो दह्यते तत्र वेष्ट्यमानः स्वकर्म्मणा। वर्षलक्षसहस्राणि नव सप्तायुतानि च। तस्माद्भूमिपथं गत्वा मानुषत्वमवाप्य च। पाण्डुरोगमनुप्राप्य क्षीणचेताः प्रपद्यते”।

२६कामला “भक्तादीनान्तु चौरा ये गतिं तेषां ततः शृणु। आयुःशेषे तु ते याम्यैर्गणैर्नीता यमाज्ञया। घोरा पुरीति विख्याता पिङ्गला नाम दुस्तरा। पिशाचास्तत्र तिष्ठन्ति स्वकर्म्मवशपीड़िताः। यत्र संवर्द्धते नित्यं क्षुत्पिपासामहोद्धता। भक्तचौरान् जनांस्तत्र प्रवेश्य यमकिङ्करैः। प्रयान्ति सदनं याम्यं चित्रगुप्तोऽस्ति यत्र वै। स तत्र भक्तचौरश्च पिशाचकुलवेष्टितः। भक्तसंख्याप्रमाणेन वसति तत्र कर्म्मतः। कर्म्मान्ते वायसीं योनिं प्राप्य दुःखञ्च विन्दति। काकोऽष्टादश वर्षाणि तस्मात् कङ्कः प्रजायते। सोऽपि द्वादशकं जीवेत्ततोभवति मानुषः। कामलारोगवान् भूत्वा तद्दोषजनितेन च”।

२७कासः“कासः पञ्चविधोराजन्! जायते येन कर्म्मणा। तदहं विस्तराद्वक्ष्ये भूप! कर्मवशाद्यतः। येन दग्धोजनो नित्यं मिथ्यावाक्यैः सुदारुणैः। पित्तप्रबलकं कासं प्राप्य कासेन सीदति। ब्राह्मणस्थानविध्वंसी वातकासार्द्दितोभवेत्। गृह्यते श्लेष्मकासेन जलाशयस्य विघ्नतः। ब्रह्मविष्णुशिवं यस्तु भिन्नभावं प्रपश्यति। सन्निपातोत्थकासेन गृह्यते त्वमतः शृणु। अयज्ञेन पशुं हत्वा भुङ्क्ते मांसन्तु योनरः। सर्वदोषोत्थकासेन गृह्यते शृणु भूपते!। इति कासपरिज्ञानं कथितञ्च मया शृणु। पुनस्ते कथयिष्यामि यत्ते मनसि वर्त्तते। राजोवाच। श्रुतं कासपरिज्ञानं कर्मणा येन जायते। नरकं श्रोतुमिच्छामि त्वत्तोब्रह्मविदां वर!। भृगुरुवाच। स तु कर्म समासाद्य पच्यते यत्र तच्छृणु। चिन्तयन् स्वानि कर्माणि रोदमानोनिरन्तरम्। करम्भवालुकानामनरकं योजनायुतम्। कूपाकारं भयं दीप्तं वालुकाङ्गारकण्टकैः। दह्यते भिद्यते तत्र वर्षलक्षत्रयावधि। नरकाज्जायते दुर्गे जले कुम्भीरसंज्ञकः। कुम्भीराच्छूकरोभूत्वा जीवेद्वर्षचतुष्टयम्। तस्माद्दुष्टत्वमासाद्य महाभाग्योभवेत्। तदन्ते मानुषीं योनिं संप्राप्य परिदह्यते। असाध्यकासरोगेण तप्यमानोऽवसीदति”।

२८श्वासकासः। “श्वासकासो महारूपो भवेद्देहाभिघातकः। उद्भवेत् कर्मणा येन तन्मे निगदतः शृणु। महोर्द्ध्वच्छिन्नतमकक्षुद्रभेदाश्च पञ्चधा। श्वासः संजायते नृणां पृथक्कर्मवशानुगः। यस्तु यज्ञमनासाद्य पशुश्वासं निरुध्य च। हन्ति, खादति वा मोहात् महाश्वासेन१ गृह्यते। पौराणिककथामध्ये यस्तु वाचाऽन्यथा वदेत्। ऊर्द्ध्वश्वासं२समासाद्य दुनोत्यहरहर्भृशम्। निषिद्धदान-

पह्याच्छिन्नश्वासेन गृह्यते । मर्त्यः शास्त्रार्थनिर्णिक्तं वाक्यं यो दूषयत्यपि । पीड्यते तमकश्वासैः ४ क्षुद्रैः ५ पाकस्य विघ्नतः । परत्र कर्म्मणा देही नरकेषु विपच्यते । नरकान्ते व्यालयोनिं व्याघ्रीं शौकरवायसीम् । पृथक्कर्मवशाद्योनिं गत्वा स परितप्यते । मानुषत्वमनुप्राप्य पूर्व्वोक्तेनोपगृह्यते" ।

३९ यक्ष्मरोगः । "यक्ष्मरोगस्य विज्ञानं दुर्वृत्तं सर्वरोगतः । सहार्यास्तस्य वै राजन् ! कथयामि तवाग्रतः । सेनापतिः क्षयगदस्य च पाण्डुरोगोदाहज्वरोऽग्रसरएव बलासमास्यम् । हृल्लासकः कामलकः सहायो यौ श्वासकासावपि मन्त्रिणौ च । स त्वेवंविधं घोरं यक्ष्मरोगं सुदारुणम् । प्रणम्याह मुनिश्रेष्ठं त्रिकालसर्व्वदर्शिनम् । राजोवाच । यस्य रोगस्य चोत्पत्तिर्जायते केन कर्म्मणा । केन दानेन विप्रेन्द्र ! परत्रापि न वर्द्धते । तत्सर्व्वं विस्तराद्ब्रूहि श्रोतुमिच्छामि यत्नतः । भृगुरुवाच । पुरा येन हतो विप्रोन्यासापहरणं कृतम् । वृत्तिच्छेदः कृतो येन मधुविघ्नकरश्च यः । सर्व्वस्वेन प्रजापीडा कृता येन स्वकर्म्मणा । स मृतो दह्यते याम्यैर्दूतैरेव भयङ्करैः । निवेश्यान्धतमे मार्गे दक्षिणद्वारिभीषणे । ततो नीत्वा यमस्याग्रे कम्पमानञ्च पापिनम् । संयमन्यां यमस्याग्रे नीत्वा तं पापकारिणम् । हृष्टपुष्टाश्च ते दूताश्चित्रगुप्तान्तिकं ययुः । चित्रगुप्तश्च तं दृष्ट्वा क्रोधारुणितलोचनः । चित्रगुप्त उवाच । इमं पापं दुराचारं नरकं नय दुर्व्वहम् । योजनानां शतं लक्षं कुम्भीपाकं सुदारुणम् । ताम्रकुम्भमये दीप्ते वालुकाङ्गारसंवृते । एवंविधे तु दुर्वृत्तः क्षिप्तस्तत्र स्वकर्मतः । दह्यमानोऽतिदुःखेन यावदाभूतसंप्लवम् । कालान्ते स पुनः पापी कृमियोनौ च जायताम् । तत्र जीवति वर्षाणि दशपञ्च च भूपते ! दुष्कृतस्य क्षयं कृत्वा ततो भवति मानुषः । अत्युपक्षयरोगेण पीड्यमानस्तु दह्यते" ।

४० रक्तपित्तम् । "शृणु राजन् ! पुरा वृत्तं दसेदं कदनं महत् । कर्णाटकारण्यसंस्थाने सुव्रतो नाम वै द्विजः । तस्य पुत्रो दुराचारः सर्व्वधर्म्मबहिष्कृतः । परद्रव्याभिलाषी च परभार्य्यारतिप्रियः । एकदा कामतस्तेन पितृव्यस्य वधूर्बलात् । धर्षिता तेन दोषेण यमस्य विषयङ्गतः । नरकान्ते कुले जातस्तस्य कर्मसमुद्भवम् । रक्तपित्तगदं भुङ्क्ते स्वकर्मार्जितदोषतः" ।

४१ गुल्मरोगः "अतःपरं प्रवक्ष्येऽहं गुल्मरोगं सुदारुणम् । यस्मादुत्पद्यते पुंसो मृतो वा याति यत्र वै । कर्म्मतो याति तां योनिं येनोपगमनं भवेत् । काकोलनाम नरकं कृमिपूयपरिप्लुतम् । क्षिप्यते तत्र दुष्टात्मा एकाकी मिष्टभोजनः । अन्त्यजागमनेनापि नरकं नाम दुर्गमम् । तस्मात् पिपीलिका भूत्वा जीवेद्वर्षचतुष्टयम् । दुष्कृतस्य क्षयं कृत्वा जायते तत्र मानवः । गुल्मरोगं समासाद्य वेदनैः परितप्यते । अगदैर्न शमं याति तदा ज्ञेयं तु कर्मजम्" ।

४२ शूलरोगः "शृणुष्व कथयिष्येऽहं तव स्नेहान्महीपते ! । मूढा निरपराधेन ये लोककदनप्रदाः । घ्नन्ति शूलेन चास्त्रेण वाक्यदोषोद्गमेन च । तानेव निष्ठुरा दूता यमस्याज्ञाकराश्च ये । महाप्रेताख्यनिरये दीप्तशूलसमाहते । भेदयन्तीव तत्रैव दम्पत्योर्भेदकानपि । भुक्त्वा तु कदनं घोरं मन्वन्तरचतुष्टयम् । नरकान्ते ततो मर्त्यो जायते पक्षियोनिषु । पक्षी भूत्वा वियोगी स्यात् जीवेद्वर्षचतुष्टयम् । मानुषत्वमवाप्यैव शूलरोगातुरो भवेत्" ।

४३ अर्शोरोगः । "शृणुष्व तव पुत्रेण पुरा जन्मान्तरे कृतम् । साध्वीमृतुमतीं स्नातां सन्निधिं नागतश्च सः । एतत्कर्म कृतं तेन गृहीतश्चाशिषा च सः । आत्महा भ्रूणहा यस्तु कृतो येन च गोवधः । ते चार्शसा च गृह्यन्ते भुक्त्वा कष्टं सुदुःसहम् । पञ्चत्रिंशत् समाः कोट्यो लक्षाण्यामूनविंशतिः । तामिस्राख्यं महाघोरं गाढान्धतमसावृतम् । सर्पादा समाकीर्णं दुष्प्रेक्ष्यं जीववर्जितम् । स तिष्ठेद्विवशो दीनो येनेदं दुष्कृतं कृतम् । कर्म्मक्षयमनुप्राप्य पश्चाद्भवति मानुषः । शेषेऽर्शोगदवान् भूत्वा दुःखेन पीडितो भवेत्" ।

४४ भगन्दररोगः । "गुदस्य द्व्यङ्गुले पार्श्वे पित्तरक्तोदकाकृतिः । प्रभवेद्विकटाकारो दुर्वहो मर्म्मभेदकः । स वै भगन्दरो ज्ञेयः कर्मजो नोपशाम्यति । आचार्य्यभार्य्यागमनं ये कुर्व्वन्ति नराधमाः । पक्षपातमधर्म्मेण बालवृद्धधनापहाः । ते पतन्ति महाघोरे नरके च सुदारुणे । यः केशमूलहृन्मर्त्त्योऽसाहनं भद्रपीठकम् । चोरयेद्यस्तु दुर्बुद्धिर्गृह्णीयात् स्त्रीधनं च यः । स मृतस्तु विण्मलाख्यं नरकं प्राप्य सीदति । गृध्रश्वव्याघ्रगोमायुभक्ष्यमाणोऽतिदुःखितः । भुक्त्वादुतसहस्रञ्च नवसंख्यं क्षपेत् पुनः । सोऽप्यनेनैव रोगेण जन्मादावपि गृह्यते" ।

४५ छर्द्दिः "शृणुष्व नृपशार्दूल ! कथयामि तवाग्रतः । गत्वा

गृहीतं यत्किञ्चित् सुखादाकृष्य योऽहरेत् । सोऽन्यजन्म समासाद्य वातांशच्छर्दिमान् भवेत् । अतर्पयित्वा पितरं जलपानं करोति यः । मृतः पैशाचकीं योनिं संप्राप्य क्षुत्पिपासया । पीड्यते तप्यते तावद् यावद्व्योमगतो रविः । मानुषत्वमनुप्राप्य पित्तांशच्छर्दिपीड़ितः । वातपित्तपरिज्ञानं सद्वैद्यस्योपदेशतः । ज्ञात्वा कर्म्मोद्भवं दानं देयं मुक्तिमभीप्सता” ।

४६हिक्का “हिक्का न शाम्यते यस्य सद्वैद्यस्योपदेशतः । तां विद्यात् कर्म्मजां हिक्कां शृणु भूप ! वदामि ते । उत्सादितं येन तपः प्रवृत्तं यतेश्च गोविप्रकुलासनस्थम् । स याति घोरं नरकं मनुष्यो हिक्काविपन्नः पुनरेति दत्नम्” ।

४७अरोचकम् “पित्रे मात्रे चातिथये नादौ यस्तु च भोजनम् । दत्त्वाश्नाति स पापिष्ठो यां गतिं याति तां शृणु । तस्यान्नं कोष्ठदेशे तु क्रिमिर्भूत्वा विपच्यते । मृते विष्ठाक्रिमिर्भूत्वा पच्यते बहुवासरान् । ततो वायसयोनित्वं प्राप्य जीवेच्चिरं दिनम् । तत्र वायसयोनौ तु सर्वदुःखमवाप्य वै । मनुष्यत्वमवाप्नोति हीनयोनौ प्रजायते । आरोचकगदेनापि पीड़ितस्तत्र केवलम्” ।

४८स्वरभङ्गः “त्वया कृतं पुरा यच्च तन्मे निगदतः शृणु । सुस्वरं गायमानन्तु स्तुतिमन्तं द्विजोत्तमम् । त्वं निषेधितवान् पूर्व्वं तस्मात्ते गतिरीदृशी । असमाप्तपदं यस्तु गायमानन्तु सुस्वरम् । निवारयति सोऽप्येवं स्वरभङ्गेण गृह्यते” ।

४९अतितृष्णा । “तृषितं गोकुलं प्राप्तं जलपानावलम्बनम् । विघ्नमाचरितं तेन प्रपाध्वंसकृते न च । जलपात्रं तथा हृत्वा मृतो याति यमाज्ञया । अपरे निर्ज्जले देशे दुर्व्वहे सिकतामये । कीटयोनिं समासाद्य तत्र तिष्ठति पापधीः । गोलोमसम्मितं कालं दुःखमाप्नोति निर्भरम् । मानुषत्वमनुप्राप्य तृष्णाव्याधियुतो भवेत्” ।

५०विस्फोटकम् । “सुधन्वा नामतस्तेन चण्डालस्य जलाशये । कृतं स्नानं जलं पीतं तत्कर्म्मवशतः शृणु । आयुःशेषे मृतो दूतैर्गृहीतश्च यमाज्ञया । वह्निधूमसंयुक्ते क्षिप्तः कूपे निराश्रये । भुक्त्वा तत्र महद्दुःखं तस्यान्ते त्वत्कुले नृप ! । जातो दाहयुतो भूत्वा विस्फोटकगदार्द्दितः । स्वकर्म्मार्जितदोषं यो भुङ्क्ते का तस्य वेदना” ।

५१भ्रममूर्च्छा “भ्रममूर्च्छारुजाविष्टो येन संजायते नरः । तच्छृणुष्व मयाख्यातं कथयामि समासतः । भ्रमस्तु जायते तस्य तत्र दुःखकरः परः । भार्य्यां कुटिलालोकं भ्रामयित्वाऽन्यथा वदेत् । मूर्च्छान्वितो भवेत् सोऽपि यत्र याति शृणुष्व तत् । तमायुषोऽन्ते दुर्द्धर्षाः किङ्करा यमदेशिताः । नीत्वा प्रयान्ति तत्रैव तामेव पिङ्गलां पुरीम् । स्वकर्म्मवशतस्तत्र पिशाचाः सन्ति दुःखिताः । संक्षिप्तस्तत्र दुष्टात्मा पिशाचा यत्र मूर्च्छिताः । भ्रमयुक्तो भवेत्तत्र पूर्णमन्वन्तरं नृप ! । उलूको जायते तस्माद्दिवा वसति कोटरे । उलूकत्वत्रयं प्राप्य बकयोनौ प्रजायते । बको जीवति वर्षैकं ततो भवति मानुषः । पूर्व्वकर्म्मप्रभावेन भ्रममूर्च्छान्वितो भवेत्” ;

५२हृद्रोगः । “हृद्रोगो जायते येन कर्म्मणा त्वमतः शृणु । सावधानो महीपाल ! कथयामि तवाग्रतः । लोभात् द्वेषाद्भवेद्यस्तु परपीडाप्रदायकः । मर्म्मोद्घाटनकृद्योऽपि कदनं तेन विन्दति । मनुष्यस्तेन दोषेण दुर्व्वहम् नरकं व्रजेत् । नरकान्ते पुनर्मर्त्त्यो हृद्रोगैरतिदारुणैः । पीड्यमानो दुनोत्याशु कर्म्मदोषविशेषतः” ।

५३आमवातः । “पुरा येन महीपाल ! कृतो यज्ञस्त्वदक्षिणः । उत्सृज्य ब्राह्मणायैव न दत्तं येन वा पुनः । अधर्म्मार्जितवित्तानां संग्रहो येन वा कृतः । ग्रन्थिग्रन्थिषु तस्यैव भवेदामस्य संग्रहः । तस्मात् प्रवर्त्तते घोरा वेदना चातिदारुणा । आमवातस्तु स ज्ञेयः कर्म्मजस्तस्य निष्कृतिम्” ।

५४सर्व्वाङ्गवातव्याधिः “वातव्याध्युद्गमो येन कर्म्मणा देहिनां नृप ! । उत्पन्नो बहुधाभावैः सम्यग् वक्ष्ये ततः शृणु । सुरापयोषिद्रमणं येन वै वाञ्छता हठात् । कृतं स नरकस्यान्ते शुनीयोनौ प्रविश्य च । जङ्घास्थूलकटीस्थूलयुक्तः केवलखञ्जकः । परस्त्रीवसनं येन हृतं तस्य ततः शृणु । मृतः स पुरुषैर्याम्यैर्नीतश्चेतोयमाज्ञया । आयसीञ्च शिलां तप्तां बन्धद्वारपरिप्लुताम् । तद्गले बन्धयेद् यत्नाद्यावदिन्द्राश्चतुर्द्दश । तस्यान्ते शाकुनीं योनिं प्रयात्यब्दचतुष्टयम् । मानुषत्वमनुप्राप्य गृह्यते तेन संशृणु । सव्यथा-प्रत्ययस्तस्य सर्व्वाङ्गं वातपीडितम् । सोष्णगात्रं सदा तस्य भवतीह स्वकर्म्मतः” ।

५५तुन्दरोगः “घटो हृतः पुरा येन ब्राह्मणस्य महीपते ! । दम्यते स च दुर्वृत्तः संयमन्यां यमाज्ञया । कुम्भीरो जायते तस्माच्चिरकालं जले वसेत् । तस्यान्ते मानुषीं योनिं संप्राप्य तुन्दवान् भवेत् । अशक्तः सर्व्वकार्य्येषु गदोपचयदोषतः । सकलत्र विप्र क्रतुदक्षिणादिकं यदा न दद्यात् तदुपाहितं फलम् । समप्रमेदोप-

चवस्य संग्रहं भवत्यतीवोग्रतरेण तौन्दिकः”।

५६अम्लपित्तम् “अथाम्लपित्तोपचयो भवेद्येन वदामि तत्। जिह्वास्वादसमाविष्टो मानवोयो निर्म्मवति। निषिद्धमविकल्पेन स मृतः प्राप्य वायसीम्। गृध्रस्य सारमेयीञ्च योनिमासाद्य कर्मतः। पश्चात् संजायते देही विदग्धान्नं प्रकुप्य च। हृत्कण्ठस्थाम्लपित्तेन दह्यमानोऽतिदूषितः”।

५७शोथोदरम् “लोभान्मोहाद्भयाद्द्वेषात् कृत्वाऽधर्मं वदेत्तु यः। स भुङ्क्ते नरकं घोरं पश्चाच्छोथोदरी भवेत्”।

५८जलोदरम् “ब्रह्मविष्णुमहेशेषु भिन्नभावं करोति यः। गृह्यते स तु दुष्टात्मा जलोदररुजा ततः”।

५९शोथः “पुत्रस्ते शोथवान् जातः स्वकर्मार्जितदोषतः। कर्त्ता भुङ्क्तेऽन्यथा कात कर्त्तव्या परिदेवना। विनापराधेन यतोबहवस्ताडिताः पुरा। कषायवेत्रवंशैश्च तेन शोथार्द्दितश्च सः। उपपातकसमाविष्टो जातस्तव गृहे शृणु। तेन शोथार्द्दितः पुत्रो वृथा चिन्तापरः प्रभो!”

६०मूत्रकृच्छ्रम् “मूत्रकृच्छ्रं भवेत् भूप! कर्मणा येन दारुणम्। देहिनो देहमाश्रित्य तन्मे निगदतः शृणु। विधवागमनं येन कृतं वा मद्यभोजनम्। मूत्रकृच्छ्री भवेत् सोऽपि भुङ्क्ते च नरकं शृणु। अकृत्वा विगुणं कर्म जन्मकर्म च वर्द्धते”।

६१मूत्राघातः “मूत्राघातो भवेद्येन तन्मे निगदतः शृणु। दम्पत्योर्मैथुने यस्तु महाविघ्नं समाचरेत्। मूत्राघातो भवेत्तस्य दुर्व्वहं कदनप्रदम्”।

६२अश्मरी “अथाश्मरी भवेद्येन तन्मे निगदतः शृणु। ऋतुस्नातां स्त्रियं यस्तु सन्निधौ नोपगच्छति। अप्रीत्या क्रोधभावाद्वा स याति नरकं नरः। पूयशोणितसंमिश्रे नरके पच्यते भृशम्। मानुषत्वमनुप्राप्य शार्कराश्मरिरोगवान्। भूप! विन्दत्यनुदिनं कदन मूत्ररोधतः। आर्त्तवस्य विपर्य्यासं यः करोति नराधमः। तस्मात् सर्वप्रयत्नेन नरोनार्य्यामृतावियात्”।

६३मेहः। “मेहाश्च विंशतिः ख्याताः पृथक्कर्मप्रभावजाः। तेषां सामान्यहं वक्ष्ये क्रमादुत्पद्यते यतः। मधुमेहः सान्द्रमेहः सुराशुक्रोदकस्तथा। इक्षुः सिकतशीधुश्च सितमेहस्तथव च। फेनःक्षीरश्च नीलश्च हारिद्रः कालसंज्ञकः। तथा रक्तश्च माञ्जिष्ठोमज्जा क्षारस्तथा गजः। सद्वैद्यस्योपदेशेन ज्ञात्वा मेहान् पृथक् पृथक्। नामानुसारतः पूर्वं कर्म ज्ञात्वा विधिश्चरेत्। पूर्वं मैथुनकृद्यस्तु शौकरीं योनिमाव्रजेत्। तस्मान्ते मानुषीं प्राप्य जलमेहार्द्दितो भवेत्। मातृगामी बलान्मोहान्मधुमेही भवेन्नरः। रजकीगमनाच्चैव क्षारमेही प्रजायते। सतीविपर्य्ययं कृत्वा सान्द्रमेहान्वितो भवेत्। रोगिणीगमनान्मर्त्यो भवेन्माञ्जिष्ठमेहवान्। मित्रस्त्री धर्षिता येन स भवेच्छुक्रमेहवान्। चतुष्पदाभिगमने भवेत्सिकतमेहवान्। स्वर्णहर्त्ता क्षीरमेही सितमेही सुरारतः। कालमेही भवेत् सोऽपि पुष्पवत्याश्च धर्षणात्। रजस्वलायां रतिकृद्रक्तमेहार्द्दितो भवेत्। मज्जमेहयुतः सोऽपि योऽन्त्यजागमनञ्चरेत्। इक्षुमेह्यतिदुर्वृत्तोविधवागतिदोषतः। ब्राह्मणीगमनाद्देही हस्तिमेहेन मेहति। व्रतागमनासक्तो हरिद्राभञ्च मेहति। मातरं येऽभिगच्छन्ति भगिनीश्चात्मनः सुताम्। श्वश्रूञ्चैवाद्यताऽरक्तां भ्रातृभार्य्याञ्च मातुलीम्। गुरुस्त्रीं राजपत्नीञ्च मित्रस्त्रीं वा कुटुम्बिनीम्। मृता वैवस्वतपुरीं यान्ति भूतैः प्रपीडिताः। तास्तान्ते तत्र दुर्वृत्ता मत्तः शृणु वदामि ते। अङ्गारराशौ प्रक्षिप्य तान् दहन्ति यमाज्ञया। दूतास्तु महतीं घोरां ज्वलन्तीमायसीं शिलाम्। खादयन्ति च तान् पश्चात् नरके च क्षिपन्ति वै। नरकान्ते पुनस्तेऽपि मृताः स्युः शूकरा भृशम्। शूकराः पञ्चवर्षाणि दश वर्षाणि कुक्कुराः। पिपीलिकास्त्रयोमासा वृश्चिकाश्चाब्दमात्रकम्। भूत्वा प्रयान्ति गोयोनौ सरुजा विकलेन्द्रियाः। तत्राधर्मक्षयं कृत्वा ततो मानुषयोनिषु। प्रमेहगदवन्तः स्युः प्राप्नुवन्ति मनोव्यथाम्”।

६४पुंस्त्वनाशः “धर्मपत्नीं परित्यज्य योऽन्यस्त्रीमैथुने रतः। स स्त्रीविरक्तो भवति पुंस्त्वं तस्य विनश्यति”।

६५शुष्कवृद्धिः “सख्यं कृत्वा लुब्धकेन विप्रोवेदबहिष्कृत। सदैव गहनं याति मृगं हन्ति निषादवत्। क्षिपोतान् बहून् सोऽपि नित्यं खादितवांस्तदा। आयुःशेषे स वै दूतैर्यास्यैर्नीतोयमाज्ञया। निःक्षिप्तो नरके घोरे तस्मान्ते त्वत्कुले द्विज!। जातः सर्वगुणोत्पन्नः स्वकर्म्मवशतः शृणु। शुष्करोगेण सन्तप्तः क्षीणरेताः सुदुःखितः”

६६उन्मादः “ब्राह्मणं वैष्णवं तीर्थं पितरं मातरं द्विजम्। नार्च्चयेन्निन्दयेद्वापि पुरा स नरक व्रजेत्। पुरीषाख्ये महाघोरे निरये श्लेष्मभोजने। अधःशिरा भवेत् पापी नानादुःखप्रपीड़ितः। कर्मान्ते स पुनर्योनिं मानुषीं प्राप्य कर्मभिः। उन्मादरोगवान् मर्त्यो जायते नृपनन्दन! स्मृतिभ्रमकरं द्रव्यं यैर्दत्तं ब्राह्मणे गुरौ। दत्ताश्चारं

—चरेद्वयस्तु भवेदुन्मादरोगवान्”उन्मादभेदाः सुश्रुतोक्ता ज्ञेयाः

६७अपस्मारः “ये कोपवुद्धयः पूर्वं न जानन्त्युपकारिणम्। ब्राह्मणघातरोधश्च यैः कृतोमानवाधमैः। गोसुखं रश्मिभिर्बद्धं ते सुनिरयगामिनः। नरकान्ते व्याघ्रयोनिं वैयाघ्रीमपि शौकरीम्। ततो मानुषयोनौ च ह्यपस्मार युतो भवेत्”।

६८अस्थिस्रूत्रादिः “अजाश्च तिलधेनुश्च लौहचर्म्मतिला-जिनम्। गजोभयमुखीधेनुशालूकस्यापि संग्रहम्। चौद्रं तैलञ्च लवणं महादानस्य वा ग्रहम्। यः करोत्यन्यथा योनौ मैथुनं कामसोहितः। नरेषु गवि यो रेतःसेकं वा कुरुते क्वचित्। ब्रह्मस्वं नृपतिद्रव्यं योहरेद्दुष्टभावतः। अन्त्यजेच्छरणं प्राप्तं तथा भार्य्यां विवाहिताम्। दन्ति-दस्युनखिव्याघ्रसिंहगवादिभिर्हतः। स मृतः स्वास्थ्यरहिते स्थाने च स विषीदति। अशेषकालं तस्यान्ते मानुषत्व-मवाप्य सः। अस्थिमज्जादिभी रोगैर्गृहीतस्तप्यते सदा”।

६९मूत्रकृमिः “अग्नये प्रक्षिपेदाज्यं मन्त्रहीनं विमोहितः। स मृतः पर्वताङ्गूलैः पात्यतेऽधः पुनः पुनः। सर्वाङ्गव्याधि-दिग्धः स क्रन्दमानो यमाज्ञया। भुक्त्वा कष्टं चिराद्दुःखं मानुषत्वमवाप्य सः। मूत्रकृम्यर्द्दितं गात्रं प्राप्य मुह्यति निर्भरम्”।

७०विद्रधिः “फलापहरणं येन कृतं चौर्य्येण वै पुरा। स मृतो यमदूतैश्च शास्यमानो यमाज्ञया। संयमन्यां पीड़ितोऽपि दक्षिणद्वारि केवलम्। शोचयित्वा स्वयं कर्म्म क्रन्दमानः पदेपदे। प्रक्षिप्तो नरके घोरे स वै सीदति पापकृत्। ततोवानरयोनौ च जन्मासाद्य स दुष्टधीः। तच्छेषे मानुषत्वेऽपि स वै विद्रधिमान् भवेत्”।

७१अपची वातग्रन्थिश्च “त्वङ्मध्ये बहवो यस्य पर्कटीफल-सन्निभाः। भवन्ति ग्रन्थयस्तस्य नाम स्यादपचीगदम्। बहिर्ब्बहत्फलाकारं वर्द्धते च दिनं प्रति। वातग्रन्थीति सा ज्ञेया जायते देहिदेहतः। इदं गदद्वयं भूप! जायते येन तच्छृणु। कथयामि तव स्नेहाद्धर्मज्ञोऽसि महीपते! द्रुमञ्च-बहुलच्छायं पर्व्वतञ्च नदीतटम्। वल्मीकाग्रं गवां गोष्ठ गोशालां देवतालयम्। समासाद्य चरेन् मूत्रं तथा निष्ठी-वनादिकम्। सकामं कुरुते यस्तु स प्राप्नोति ततः शृणु। याम्यपाशञ्च दुर्भेद्यं पापिष्ठानां भयप्रदम्। कृमिपूय-वसाविष्ठाशोणितेनापि पिच्छिलम्। पापिनस्तत्र गच्छन्ति दूर्त्तैर्बद्धाः सुनिष्ठुरैः। शोचन्तः स्वानि कर्माणि क्रन्दमानाः पदेपदे। यमाज्ञया च निरये घोरे पूयपरिप्लुते। क्षिप्ता-स्तिष्ठन्ति तत्रैव यैरेवं दुष्कृतं कृतम्। तस्यान्ते मानुषीं योनिं प्राप्य तद्व्याधिमान् भवेत्”।

७२शिरोरोगः “संप्राप्य तीर्थं ये मर्त्त्या नाचरन्तीह चोत्तमम्। ब्राह्मणञ्च गुरुं दृष्ट्वा न नमन्ति कुबुद्धयः। तत्कर्मपाश-बद्धास्ते गृहीत्वा यमकिङ्करैः। पुरीं कृष्णवतीं नीत्वा पिशाचकुलसेविताम्। ताड्यन्ते विविधैर्यन्त्रैर्घोरैः पापि-भयावहैः। अनेककालं तत्रापि स्थित्वा भल्लूकयोनिषु। जायन्ते तत्र तिष्ठन्ति वर्षाणि दशसंख्यया। मेषयोनिं ततोयान्ति निरब्दं तत्र संस्थिताः। भुक्त्वा कर्मवशात् कष्टं मानुष्यं यान्ति ते पुनः। मानुषीं योनिमासाद्य-शिरोरोगयुतास्तु ते।

७३नेत्रहीनता “पुरा सकामतो येन कौटवी च पराङ्गना। दृष्टा नेत्राभिघातो वा गोः कृतो ब्राह्मणस्य वा। स एव कर्मवशगः कुपितैर्यमकिङ्करैः। काकोले नरके क्षिप्तो बद्धस्तिष्ठति शृङ्खलैः। वज्रतुल्यनखैः काकैस्तस्य नेत्रस्य कृन्त-नम्। क्रियतेऽब्दशतं यावत् उत्पन्योत्पन्न नित्यशः। शोचते स्वानि कर्माणि क्रन्दमानोऽतिदुःखितः। उत्पन्न-नरकात् पश्चात् उलूकोजायते हि सः। सदा कोटरशायी च दिवान्धः काकशङ्कितः। तिष्ठत्यब्दाष्टकं यावन्मा-नुषत्वमवाप्य सः। नेत्रहीनोभवेद्दुःखी भवेत् कर्मवशी-कृतः। यस्मिन् वयसि यत् कर्म सुकृतं वापि दुष्कृतम्। तस्मिन् सहायोभवति तद्वयस्येव जन्मतः। जीवनं तद्वृथा मर्त्त्ये नेत्रहीनस्य देहिनः। विद्यमाने शरीरेऽपि नेत्रहीनो निरर्थकः। प्राणागारमिदं देहं लोष्ट्रवत् प्राण-वर्जितम्। तद्वन्नेत्रबहिर्देहो वृथा स्यान्मरणं वरम्”।

७४रात्र्यन्धता “पुरा परस्त्री खलु कामबुद्ध्या विलोकिता वस्त्र-विवर्जितापि। गोविप्रहिंसासु नितान्तदृष्टिर्व्यक्रीकृता नेत्र-विहीनतायै। नक्तान्ध्यमन्दत्वमथान्यरोगः दिवान्धता चार्बुदद्दग्रजा मे। देवादुपेता कुरु दूरमाशु तां मेऽद्य-देवेश! हरे! प्रसीद”।

७५नेत्ररोगः “मन्ददृष्टिर्भवेद् येन मनुष्यस्तमतः शृणु। उद-यास्तमवेलायां भानुं मध्यन्दिने नरः। ईक्षते कामतो योऽपि मन्ददृष्टिः स वै भवेत्। यश्चाशुचिशरीरः सन् वीक्षते दिग्धीश्वरम्। नक्षत्रं ग्रहतारञ्च द्विजं वह्निञ्च गां दिशम्। सोऽन्यजन्म समासाद्य नेत्रव्याधियुतो भवेत्। अनेन पटलच्छन्नतिमिरार्त्तियुतोभवेत्। दम्पतिभ्यां प्रवृत्तं यो नरः पश्यति मैथुनम्। सोऽन्यजन्म समासाद्य नेत्रपूयगदार्त्तिमान्। दम्पत्योः सुरतासक्तचित्तयोः सुर-

तेजणम् । यः करोति स वै नेत्रपूयरोगयुतो भवेत् । मृत्वा कष्टमवाप्नोति पिचटादिक्षतोद्भवैः । विहायात्मपतिं या स्त्री पुत्रमाप्नोति जारतः । साऽन्यजन्मनि भूपाल ! विरूपाक्षी भवेद्ध्रुवम् । वस्तुदृष्ट्या प्रपश्येद्यः पुरुषो वाथ योषितम् । क्रोधाविष्टेन मनसा या वा श्रेष्ठं पतिं द्विजम् । सान्यजन्म समासाद्य विषमाक्षीभवेद्ध्रुवम्” ।

७६ गलगण्डः गण्डमाला च “पुरा येन कृतं मोहाद्गुरुस्त्रीकण्ठदर्शनम् । स मृतः प्रान्तरे देशे निर्जले च यमाज्ञया । पात्यते किङ्करैर्घोरैर्दिव्यवर्षायुतत्रयम् । पुनर्जन्म समासाद्य स्वकर्म वशतस्ततः । गलगण्डयुतो नित्यं गण्डमालाकुलोऽपि सन् । पापी सीदति दुश्चेष्टः चिरं कर्मक्षयावधि” ।

७७ नासारोगः “ब्राह्मणकर्म्मपरिभ्रष्टो मन्मथाविष्टचेतनः । सुगन्धिकुसुमादीनि यानि द्रव्याणि तानि च । त्वया सततमाघ्रातं प्राप्तं दत्तं न कस्यचित् । ब्राह्मणेभ्यो न देवेभ्यो दत्तं तेनेदमीदृशम् । नासिकादेशमासाद्य कर्म्म चाश्रित्य तिष्ठति । किञ्च वेश्याङ्गनासङ्गे यौवनं विफलीकृतम् । वेश्याश्च रमिता यैश्च तेनास्पृश्या द्विजातयः” ।

७८ क्षीरहीनस्तनता “याचमानं पयो या स्त्री न ददाति परार्भके । सा मृता सर्पिणी भूत्वा जीवेद्वर्षचतुष्टयम् । तस्मात् कच्छपिकायोनौ प्रविश्याब्दचतुष्टयम् । प्रत्यक्षं नरकं भुक्त्वा मानुषी तु भवेच्च सा । शृणु भूप ! प्रसूता स्त्री क्षीणक्षीरस्तनी भवेत् । क्षीरं न क्षरते यस्याः स्तनात् सन्तप्यते हि सा । आत्मजपालनेऽशक्ता भूत्वा कष्टञ्च विन्दति” ।

७९ स्तनविस्फोटरोगः “स्तनपाकोभवेद्येन कर्म्मणा त्वमतः शृणु । दृष्ट्वाऽन्यपुरुषं या स्त्री स्तनं दर्शयते स्वकम् । सकामाकामवशगा वा दुष्टयौवनगर्विता । दूतैर्यमाज्ञया सापि शास्यते च निरन्तरम् । भुक्त्वा स्वकर्म्मजं दुःखं पुनर्भूत्वा च मानुषी । स्तनविस्फोटरोगाढ्या विक्षिता सुखवर्जिता”

८० वेश्यात्वम् “मृते भर्त्तरि या नारी परस्याम्यभिलाषिणी । सा मृता किङ्करैर्याम्यैर्दण्डपाशासिताड़िता । नीत्वा यमाज्ञया सा च विशुद्ध्यर्थं ततः शृणु । आयसं पुरुषं तप्तं स्फुरद्वह्निकरोज्ज्वलम् । आलिङ्गनमतिक्रूराः कारयन्ति नरं भृशम् । वर्षायुतसहस्रान्ते ततो मर्त्त्ये च शौकरीम् । सारमेयीञ्च मार्जारीं योनिमाविश्य कर्म्मतः । मृत्वा च मानुषी पश्चाद्वारस्त्रीत्वमवाप्य सा । अशेषपुरुषैः सा च रम्यमाणा यथेच्छया । मर्त्त्ये मोहवशात् सा च सुखं प्राप्य सुहर्षिता । न भवेद्या चान्यनारीयन्त्रप्रहणजीविका । यस्याः सा च भवेद्वेश्या जन्मजन्मन्यन्यथा न हि” ।

८१ बाधिर्य्यम् “पुरा यस्तु महीपाल ! धर्म्मचिन्तापराङ्मुखः । निन्दकः पितृमातॄणां द्विजतीर्थसुखस्य च । स्मृतेर्बाधिर्य्यरोगेण स एव परिगृह्यते” ।

८२ श्लेष्मरोगः “नित्यक्रियाबहिर्यस्तु भूत्वा भुङ्क्ते स दुर्म्मतिः । मृतः भूमिपथं प्राप्य शुष्ककाष्ठोपजीवकः । वायसत्वमनुप्राप्य गृध्रकुक्कुटसूकरः । भूत्वा च मानुषत्वे स श्लेष्मरोगी सदा भवेत्” ।

८३ हस्तस्फूलम् “द्विजः सन्ध्याविहीनो यः स शूद्रादधमः स्मृतः । स मृतः शास्यते याम्यैर्वैवस्वतपुरोगमैः । काकीं पारावतीं योनिं गत्वा तिष्ठति वत्सरम् । ततो मानुषतां प्राप्य हस्तस्फूलार्दितो भवेत्” ।

८४ योनिरोगः “रममाणं पतिं या स्त्री तोषयेन्न यथेच्छया । उष्ट्रा सा च मृता वै स्यात् जीवेद्वर्षचतुर्दश । तस्माद्वै मानुषीं प्राप्य योनिं व्याध्यादियोगिनीम् गत्वा सन्तप्यमाना सा योनिरोगेण निर्भरम् । किञ्च चौर्य्यप्रकारेण या हरत्यन्यभोजनम् । सा तद्रोगेण सततं गृह्यते नात्र संशयः” ।

८५ असृग्दरम् प्रदरम् “अथासृग्दरमत्युग्रं प्रदरं योनिदोषजम् । कर्म्मणा येन राजेन्द्र ! तन्मे निगदतः शृणु । कृत्वा रन्धनमादौ या योषिद्भुङ्क्ते बुभुक्षया । बुभुक्षितं पतिं त्यक्त्वा वृथा पशुवधेन च । प्रयाति नरकं घोरं यत् प्रोक्तं मद्यभक्षणे । प्रत्यक्षं नरकं भुक्त्वा ततो भवति वायसी । वायसी दश वर्षाणि शुकी भवति सा पुनः । मानुषी तु भवेत् पश्चादसृग्दरगदार्दिता । श्वेतप्रदरयुक्ता सा भवेद्या भक्तचोरिणी” ।

८६ दुष्कीसुतोत्पादनम् परकान्तासुतोत्पादनञ्च । “महामना महादाता तीर्थकृत् पुण्यकृच्छुचिः । नगरीं भ्रमता तेन काचिदेका मनोहरा । रण्डा व्यलोकि सौन्दर्य्यशीलारसविलासभूः । तां दृष्ट्वा मोहितो राजा सम्यक्संजातकौतुकः । तामादाय बलाच्छीघ्रं ययौ निजगृहं प्रति । विहाय महिषीरन्या नारीः प्रियवशंवदाः । अत्यानुरागवान् राजा क्षणं ताञ्च न मुञ्चति । तस्या गर्भे सुतं राजा जनयामास सुन्दरम् । दैवादपि महीपाल आयुःशेषे यमाज्ञया । नीतो यमान्तिकं दूतैर्घोरैश्च भयदारुणैः । धर्म्मराजपुरे तस्य चित्रगुप्तेन धीमता । एतत् स्मृत्वा यमः क्रुद्धोऽब्रवीद्दूतान् सुनिष्ठुरान् । एवं क्रूरं दुराचारं परयोषित्प्रियं सदा । रौरवं नरकं नीत्वा ताडयध्वं निरन्तरम् । तस्याः पूरीषमूत्राभ्यामुत्पन्नस्य सुतस्य

स्व। एतस्य पितृलोकानामाहारार्थं प्रदास्यथ। रौरवेऽवद्यतं दुष्टं स्थापयित्वा च योनिगम्। ततः शूकरयोनौ च पातोऽस्य भविता पुनः। यावत्तिष्ठति भूलोके वृषलीगर्भजः सुतः। तावत्कालं पितॄणाञ्च नरकेऽस्य स्थितिर्भवेत्”।

आदर्शग्रन्थे यथा पाठोऽधिगतस्तथैव लिखितः। पुस्तकान्तरसंवादेन न्यूनताऽत्र याऽस्ति सा परिहरणीया

अत्रोक्तरोगादीनामकाराद्यक्षरविन्यासातिक्रमेणोपन्यासस्तु तत्रत्यक्रमानुरोधेन। तेन तत्रत्यक्रमानुसारेण निदर्शितरोगादीनामनुरयमार्थदानादिकपरिमाणं सुकरं भवति। तत्तद्दानादिकं विस्तरभयान्नोक्तम् तत एवावगम्यम्।

शातातपभृगुभारतसंवादयोरेकत्र विषये विरोधप्रसङ्गे रोगाल्पत्वमहत्त्वाभ्यां व्यवस्थोन्नेया। एवं दानादिभेदोऽपि। मार्कण्डेयपुराणाद्युक्तकर्मविपाकभेदो विस्तरभयान्नोट्टङ्कितः, तत्तद्ग्रन्थेभ्योऽवधेयः।

कर्म्मव्यतिहार पु० वि—अति हृ—घञ् कर्मणा व्यतिहारः ३त०। परस्परैकजातीयक्रियाकरणे, क्रियाविनिमये। यथा यः कश्चित् येन कर्मणा इतरं कर्मत्वादिना संबध्नाति, इतरोऽपि तज्जातीयेनैव कर्मणा तं कर्मत्वादिना संबध्नाति, तयोः कर्मविनिमयो भवति। यथा अन्योन्यं ताडयत इत्यादौ। अत्र अन्योन्ययोरेकजातीयताडनक्रियायां कर्मत्वेन सम्बन्धात्तथात्वम्। ‘कर्त्तरि कर्मव्यतिहारे’ ‘कर्मव्यतिहारे णच् स्त्रियाम्’ “न कर्मव्यतिहारे” पा०। क्रियाव्यतिहारोऽप्यत्र

कर्म्मशाला स्त्री कर्मणः शिल्पादेः शाला। शिल्पादेः शालायाम्। “गत्वा तु तां भार्गवकर्मशालाम्”। “जगाम भार्गवकर्मशालाम्” भा० आ० १९,१०

कर्म्मशील त्रि० कर्म शीलयति शील—अण्। कर्मकरणार्थशीलयुक्ते अमरः। [आफलोदयं २कर्म्मकारिणि च।

कर्म्मशूर पु० कर्म्मणि शूरः। प्रयत्नेन १प्रारब्धकर्म्मसमापके,

कर्म्मश्रेष्ठ पु०। १पुलहपुत्रभेदे “पुलहस्य गतिर्भार्य्या त्रीनसूत सती सुतान्। कर्म्मश्रेष्ठं वरीयांसं सहिष्णुञ्च महामते!” भाग० ४,१,२१। कर्म्मणा श्रेष्ठः। २कर्मकार्य्यकरणेन वरिष्ठे त्रि०।

कर्म्मसंन्यास पु० कर्मणः स्वरूपतः फलतो वा संन्यासस्त्यागः। फलाभिसन्धिराहित्येन १तत्फलत्यागे २स्वरूपतः कर्मत्यागे च। वा परसवर्णे कर्म्मसंन्न्यासोऽप्यत्र। आश्रमशब्दे ४८० पृ० संन्यासविवरणम्।

कर्म्मसंन्यासिक पु० कर्मणां संन्यासोऽस्त्यस्य ठन्। प्रव्रज्यान्विते भिक्षुके हलायुधः। वा परसवर्णे कर्मसन्न्यासिकोऽप्यत्र

कर्म्मसंन्यासिन् पु० कर्मसंन्यासोऽस्त्यस्य इनि। विधानेन १कर्म्मत्यागिनि भिक्षुके २कर्मफलत्यागिनि च। “द्विविधः कर्मणस्त्यागः फलसाधनभेदतः। फलाय चानिनस्त्यागो जिज्ञासोर्ज्ञानसिद्धये” इत्युक्तदिशा ज्ञानार्थं कर्मफलत्यागः, मोक्षार्थं स्वरूपतः कर्मत्यागः संन्यासः। “आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते” इति गीतोक्तेः “अविशुद्धधियः कर्मण्यधिकारो विशुद्धधीः। सत्यां विविदिषोत्पत्तौ तदर्थं कर्म संत्यजेत्” इत्युक्तेश्च विविदिषायामेव कर्मणो हेतुत्वावगमात् तदुत्पत्तौ तत्त्याज्यत्वावगमाच्च तथात्वम्। वा परसवर्णे कर्मसंन्न्यासीत्यप्यत्र।

कर्म्मसङ्ग पु० कर्मणि सङ्ग आसक्तिः सन्ज—घञ् ७त०। इदमहं करोमि अनेनैतत्फलं भोक्ष्ये इत्याकारकेऽभिनिवेशे।

कर्म्मसचिव पु० कर्मसु सचिवः ७त०। राज्ञां मन्त्रव्यतिरिक्तकर्मसु सहाये अमरः।

कर्म्मसाक्षिन् पु० साक्षात् पश्यति नि० साक्षी ६त०। “सूर्य्यः सोमो यमः कालो महाभूतानि पञ्च च। एते शुभाशुभस्येह कर्मणो नव साक्षिणः” इत्युक्तेषु सूर्य्यादिषु नवसु। ६त०। क्रियासाक्षात्कर्त्तृमात्रे त्रि०। “योऽयस्तत्कर्मसाक्षी स्वभुजबलयुतोयस्य यश्च प्रतीपः” वेणी०

कर्म्मसिद्धि स्त्री ६त०। इष्टानिष्टफलप्राप्तौ “स्वकर्मसिद्धिं पुनराशंससे” इति कुमा०।

कर्म्मस्थान न० कर्मणः व्यापारचिन्तनस्य स्थानम्। ज्योतिषोक्ते लग्नावधिदशमस्थाने। आजीवशब्दे विवृतिः। “लग्नेन्दुभ्यां वीर्य्यभाजः स्वभं स्यात् कर्मस्थानं खेचरेष्टं युतं सत्। सत्खेटैर्वा युक्तदृष्टं सुदृष्ट्यै पापैर्दृष्टं वा युतं दुष्टदृष्ट्यै। कर्मस्थोऽगुः स्वगृहे चेत् कुजशुक्रविभिर्युतः। दृष्टो वा वृद्धिहानिभ्यां युतोवित्तकरोमतः। कर्मभे शुभखगाभिवीक्षिताः सूराज्यदा न रिपुनीचगृहे चेत्। धर्मधान्यसुखवृद्धिकराश्च स्वायुषः स्थिरधनस्य च हर्त्रै। नीचारिसंस्था अपि पापदृष्टाः पापाश्च कर्मण्यशुभप्रदाःस्युः। क्रूरा अपि स्वभवने शुभाः स्युर्विशेषतः सद्ग्रहवीक्षिताश्चेत्। शुभदृष्टाः शुभायोगाः कर्मभे सद्ग्रहोद्भवाः। अशुभाः प्रायशः प्रोक्ताः खलखेटनिरीक्षणात्। चिकित्सकाः शास्त्रविवादकाश्च पुरोहिता यज्ञनतत्परा वा। नरा अथो स्वर्णकाः खलैस्तु

कर्मस्थितैः सद्ग्रहवीक्षितैश्च। तृतीयषष्ठगाः पापा लग्नेन्दुभ्यां शुभा मताः। निधनान्त्यगता नेष्टा विशेषाल्लग्नसंस्थिताः। एकोनविंशे वियति रविः खे, चन्द्रोऽधन २, चन्द्रसुतः ४, क्रमेण। त्रिवेदनन्दैकमिते१९ऽर्के ईज्योऽष्ट भृगुः१ सुखं खे कुसुतो१२ऽस्त्रमीतिम्" जातके तच्चिन्ताप्रकारः।

कर्म्माङ्ग न०६त०। विहितस्य यागादिकर्मणोऽङ्गे यथा दर्शादेः प्रयाजादि। देशकालादयोऽपि कर्माङ्गानि। यथाह गर्गः—"तिथिनक्षत्रवारादि साधनं पुण्यपापयोः। प्रधान गुणभावेन स्वातन्त्र्येण न ते क्षमाः"। "प्रधानस्य विधेयस्य कर्मणो गुणभावेनाङ्गत्वेन, तदुक्तं "कर्मासन्निहितं नैव बुद्धौ विपरिवर्त्तते। यस्त्वात्तु तदुपस्थानमुपादेये गुणो भवेत्" भट्टका० "प्रमाणान्तरासन्निहितं कर्म्म बुद्धौ प्रथमं न विषयीभवति प्राथमिकशब्दादेव तस्य कर्मण उपस्थितिरिति उपादेये स्वविधेये कर्म्मणि पूजादौ चन्द्रादिक्रियात्वेन तदवच्छिन्नकालत्वेन वा शुचितत्कालजीविनः कर्माधिकारात् प्रमाणान्तरलभ्यत्वेनाविधेयत्वात्तिथ्यादिर्गुणः" ति० त० रघु०। "फलवत्सन्निधावफलं तदङ्गमिति" न्यायेन फलवत्प्रकरणे पठितानामफलानां सर्वेषां तदङ्गत्वमवधेयम्।

कर्म्माजीव पु० कर्मणा आजीवः जीवनम्। १शिल्पादिकर्म्मद्वारा जीवनसाधने। स च नृणां जन्मलग्नावधिदशमभावे मेषादीनां द्रेक्काणनवांशद्वादशत्रिंशांशैः शिल्पादिकर्मविशेष आजीवे जातके उक्तः, तच्च आजीवशब्दे ६४१,४२पृ० दर्शितम्। कर्म जीवति अण्। २शिल्पादिकर्मजीविकावति त्रि०।

कर्मात्मन् पु० कर्मणा आत्मा आत्मभावो यस्य। संसारिणि स्वादृष्टोपनिबद्धशरीरयुक्ते १जीवे। "तस्मिन् स्वपिति तु स्वस्थे कर्मात्मानः शरीरिणः" मनुः। कर्मणि आत्मा मनो यस्य। २क्रियासक्तचित्ते च।

कर्माध्यक्ष पु० ७त०। क्रियासाक्षिणि कृताकृतावेक्षके।

कर्मान्त पु० कर्मणः कृषिकर्मणोऽन्तो यत्र। सम्पन्नकृषिकर्मणि १कृष्टभूमौ हेमच०। "अहन्यहन्यवेक्षेत कर्मान्तान् वाहनानि च" मनुः। कर्मणः तत्फलस्यान्तो यत्र। २इक्षुधान्यादिसंग्रहस्थाने च। "शुचीनाकरकर्मान्ते भीरूनन्तर्निवेशने" मनुः। "कच्चिच्च सर्वे कर्मान्ताः परोक्षास्ते विशङ्किताः" भा०सभा० १९५ श्लो०। ६त०। ३कर्मसमाप्तौ च। "कर्मान्ते दक्षिणां दद्यात्" स्मृतिः"।

कर्मार पु० कर्म ऋच्छति ऋ-अण्। १कर्मकारके (कामार) जातिभेदे, "नमस्तक्षभ्यो रथकारेभ्यश्च वो नमोनमः, नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमोनमः" यजु०१६,२७। "तपसे कौलालं मायायै कर्मारम्" यजु०३०,७, पुरुषमेधे "मायायै कर्मारं लौहकारम्" वेददी०। "कर्मारस्य निषादस्य रङ्गावतारकस्य च" मनुः। "ये धीवानो रथकाराः कर्मारा ये मनीषिणः" अथ०६,५, २वंशभेदे (वेड़वाँश), ३कर्मरङ्गवृक्षे च राजनि०। ४कर्म्मप्राप्तरि त्रि०स्वार्थे कन्। कर्मारक कर्मरङ्गे वृक्षे (कामराङ्गा) पु०राजनि०।

कर्मार्ह पु० कर्मार्हति अर्ह-अण्। १पुरुषे राजनि०। तस्य कर्मकरणसमर्थत्वात्तथात्वम्। २कर्मकरणसमर्थे त्रि०।

कर्माशय पु० आशेरते पुरुषा अस्मिन् आ+शी—आधारे अच् कर्मणामाशयः। कर्मजन्ये धर्माधर्मरूपे गुणभेदे "क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः" पात०सू०। कर्मविपाकशब्दे च अस्य भाष्यविवरणे दर्शिते।

कर्मिन् त्रि० कर्मास्त्यस्य ब्रीह्या०इनि। व्यापारयुक्ते स्त्रियां ङीप्। "कर्म्मिभ्यश्चाधिको योगी—तस्माद्योगी भवार्जुन!" गीता। २फलाभिसन्धानेन कर्मकर्त्तरि च। "यत्कर्मिणो न प्रवेदयन्ति रागात्तेनातुराः क्षीणलोकाश्च्यवन्ते" मुण्ड० उ०। "इष्टापूर्त्तादिकर्मिणां धूमादिमार्गेण चन्द्रमण्डलादिप्राप्तिः" शा० भा० "ऋत्विक्कर्षककर्मिणाम्" याज्ञ०।

कर्म्मिष्ठ त्रि० अतिशयेन कर्मी इष्ठन् इनेर्लुक्। क्रियादक्षे जने

कर्म्मेन्द्रिय न० कर्मणां वचनादीनां निमित्तमिन्द्रियम् अश्वघासादिवत् निमित्तार्थे ६त०। वचनादिकर्मकरेषु वागादिषु इन्द्रियेषु "पञ्चोत्यादानगमनविसर्गानन्दकाः क्रियाः। कृषिवाणिज्यसेवाद्यास्तेष्वेवान्तर्भवन्ति हि"। "वाक्पाणिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः। मुखादि गोलकेष्वास्ते तत्कर्म्मेन्द्रियपञ्चकम्" पञ्चदश्यां तेषां नाम कार्य्याण्युक्तानि। "वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चनाम्" सां०का०। "इन्द्रस्यात्मनश्चिह्नत्वादिन्द्रियमुच्यते" सां०कौ० व्याकृतञ्चैतदस्माभिः तद्विवृतौ।

"तेषामिन्द्रियशब्दार्थत्वे कारणमाह इन्द्रस्यात्मन इति। "इन्द्रोमायाभिः पुरुरूपईयते इत्यादि" श्रुतौ इन्द्रशब्दस्यात्मार्थकत्वदर्शनात्, पाणिनिना "इन्द्रियमिन्द्रलिङ्गम्" इत्यादिना इन्द्रशब्दात् तल्लिङ्गाद्यर्थे घप्रत्ययेन निपा-

मितत्वात्तस्य तथात्वम । करणव्यापारः कर्त्तृव्यापाराधीनः करणव्यापारत्वात् कुठारादिव्यापारवदिति करणव्यापारेण कर्त्तुरनुमानात् इन्द्रियादीनां पुरुषलिङ्गत्वम्” ।
अत्र विहरणशब्दस्य गतिपरत्वम् । स्पष्टमुक्तं शा०ति० । “ज्ञानेन्द्रियार्थाः शब्दाद्याः स्मृताः कर्मेन्द्रियाण्यपि । वाक्पाणिपादपायूपस्थसंज्ञान्याहुर्मनीषिणः । वचनादानगतयोविसर्गानन्दसंयुताः । कर्मेन्द्रियार्थाःसंप्रोक्ताः” “वश्युलिङ्गम्” राघवभट्टः ।

तेषां लक्षणनिर्णयार्थं द्वितीया कारिका या दर्शिता सा च कौ०व्याख्याता ।“पञ्चानां कर्मेन्द्रियाणाम्,कण्ठताल्वादिस्थानमिन्द्रियं वाक्,तस्या वृत्तिर्वचनम्”व्याकृतञ्चैतदस्माभिः “एवं वागिन्द्रियस्य स्थानमुक्त्वा लक्षणकथनाय तद्वृत्तिमाह तस्यावृत्तिर्वचनमिति । तथा च वचनसाधनमिन्द्रियं वाक् । एवम् आदानसाधनमिन्द्रियं पाणिरित्यादि लक्षणम् । कारिकायां विहरणपदं चलनपरं तच्च गतिभेदः । उत्सर्गः उदराद् मलस्यापसारणेन त्यागः। आनन्दः आनन्दविशेषजनको रमणीसंभोगात्मको व्यापारभेदः” । अत्र ताल्वादिस्थानमित्युक्त्वा आदिपदात् ‘अष्टौ स्थानानि वर्णानामुरःकण्ठः शिरस्तथा । जिह्वामूलञ्च दन्तौष्ठं नासिका चैव तालु च” इत्युक्तानामुर आदीनां ग्रहणम् । अतएव यज्ञेन “हस्तौ पादावुपस्थश्च जिह्वा पायुस्तथैव च । कर्मेन्द्रियाणि पञ्चैव” इति जिह्वायाः कर्मेन्द्रियत्वस्योक्तिः सङ्गच्छते । इन्द्रियाणि च आहङ्कारिकाणीति सांख्या मन्यन्ते “प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणश्च षोड़शकः । सात्त्विक एकादशकः प्रवर्त्तते वैकृतादहङ्कारात्” इति सां०का० । “प्रकाशलाघवाभ्यामेकादशक इन्द्रियगणः सात्त्विकः वैकृतादहङ्कारात् प्रवर्त्तते” इति कौ० व्याख्यातञ्चैतदस्माभिः ।
एकादशकगणस्य सात्त्विकत्वमुपपादयितुमाह प्रकाशलाघवाभ्यामिति“सत्त्वं लघु प्रकाशकम्”इति कारिकया लाघवस्य प्रकाशस्य च सत्त्वधर्म्मत्वस्योक्तेः इन्द्रियाणाञ्च प्रकाशकत्वात् लाघवाच्च सत्त्वकार्य्यत्वं निश्चितं, तथा च सात्त्विकादेवाहङ्कारात् तस्योत्पत्तिर्युक्ता । वैकृतात् विकृतमेव वैकृतन्तस्मादित्यर्थः” । इन्द्रियाणाञ्च यथा आहङ्कारिकत्वं तथा सां०सू०भाष्ययोः समर्थितम् ।

“अभिमानोऽहङ्कारः” “एकादश पञ्चतन्मात्रं तत्कार्य्यम्” सू० ।

“अहङ्करोतीत्यहङ्कारः कुम्भकारवत् अन्तःकरणद्रव्यं, स च धर्मधर्म्यभेदादभिमान इत्युक्तोऽसाधारणवृत्तितासूचनाय, बुद्ध्या निश्चित एवार्थेऽहङ्कारममकारौ जायेते । अतो वृत्त्योः कार्यकारणभावानुसारेण वृत्तिमतोरपि कार्यकारणभाव उन्नीयत इति । एकादशेन्द्रियाणि शब्दादिपञ्चतन्मात्रं चाहङ्कारस्य कार्यमित्यर्थः। मयानेनेन्द्रियेणेदं रूपादिकं भोक्तव्यमिदं मे सुखसाधनमित्याद्यभिमानादेवादिसर्गेष्विन्द्रियतद्विषयोत्पत्त्याहङ्कार इन्द्रियादिहेतुः लोके भोगाभिकामिनैव रागद्वारा भोगोपकरणसर्जनदर्शनात् “रूपरागादभूच्चक्षुरित्यादिना मोक्षधर्मे हिरण्यगर्भस्य रागादेव समष्टिचक्षुरादेरुत्पत्तिस्मरणाच्चेति भावः । अतश्च भूतेन्द्रिययोर्मध्ये रागधर्मकं मन एवादावहङ्कारादुत्पद्यत इति विशेष,स्तन्मात्रादीनां रागकार्य्यत्वादिति तत्रापि विशेषमाह सा०का०।“सात्त्विकमेकादशकं प्रवर्तते वैकृतादहङ्कारात्” । “एकादशानां पूरणमेकादशकं मनः षोड़शात्मगणमध्ये सात्त्विकम् । अतस्तद्वैकृतात् सात्त्विकाहङ्काराज्जायत इत्यर्थः । अतश्च राजसाहङ्काराद्दशेन्द्रियाणि तामसाहङ्काराच्च तन्मात्राणीत्यपि मन्तव्यम् । “वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा । अहन्तत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् । वैकारिकाश्च ये देवा अर्थाभिव्यञ्जनं यतः । तैजसादिन्द्रियाण्येव ज्ञानकर्ममयानि च । तामसो भूतसूक्ष्मादिर्यतः खं लिङ्गमात्मनः” इत्यादिस्मृतिभ्य एव निर्णयात् । अतएव पुराणाद्यनुसारेण कारिकायामप्येतदुक्तम् । ‘सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् । भूतादेस्तन्मात्रं स तामसस्तैजसादुभयम्” इति । तैजसो राजसः । उभयं ज्ञानकर्मेन्द्रिये । ननु देवतालयश्रुतिरित्यागामिसूत्रे करणानां देवतालयं वक्ष्यति तत्कथं कारिकयापि देवानां सात्त्विकाहङ्कारकार्यत्वं नोक्तमिति उच्यते समष्टिचक्षुरादिशरीरिणः सूर्यादिदेवता एव चक्षुरादिदेवताः श्रूयन्ते । अतश्च व्यष्टिकरणानां समष्टिकरणानि देवतेत्येव पर्यवस्यति । तथा च व्यष्टिसमष्ट्योरेकताशयेनात्र शास्त्रे देवाः करणेभ्यो न पृथङ्निर्दिश्यन्ते । अतः समष्टीन्द्रियाणि मनोऽपेक्षयाल्पसत्त्वत्वेन राजसाहङ्कारकार्यत्वेनैव निर्दिष्टानि । स्मृतिषु च व्यष्टीन्द्रियापेक्षयाऽधिकसत्त्वत्वेन सात्त्विकाहङ्कारकार्यतयोक्तानीत्यविरोध इति मन्तव्यम् । तदेवमहङ्कारस्य त्रैविध्यान्महतोऽपि तत्कारणस्य त्रैविध्यं मन्तव्यम् । ‘‘सात्त्विको राजसश्चैव

तामसश्च त्रिधा महान्” इति स्मरणात् त्रैविध्यं चानयोर्व्यक्तिभेदादंशभेदाद्वेत्यन्यदेतत् । एकादशेन्द्रियाणि दर्शयति” भा०।“कर्मेन्द्रियबुद्धीन्द्रियैरान्तरमेकादशकम्” सू० “कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि पञ्च,ज्ञानेन्द्रियाणि च चक्षुःश्रोत्रत्वग्रसनघ्राणाख्यानि पञ्च । एतैर्दशभिः सहान्तरं मन एकादशकमेकादशेन्द्रियमित्यर्थः । इन्द्रस्य सङ्कातेश्वरस्य करणमिन्द्रियम् । तथा चाहङ्कारकार्यत्वे सति करणत्वमिन्द्रियत्वमिति”। “इन्द्रियाणां भौतिकत्वमतं निराकरोति”भा० । “आहङ्कारिकत्वश्रुतेर्न भौतिकानि” सू० । इन्द्रियाणीति शेषः । आहङ्कारिकत्वे च प्रमाणभूता श्रुतिः काललुप्ताप्याचार्यवाक्यान्मन्वाद्यखिलस्मृतिभ्यश्चानुमीयते । प्रत्यक्षा श्रुतिस्तु “अहं बहु स्याम्”इत्यादि । ननु—“अन्नमयं हि सौम्य मनः” इत्यादिर्भौतिकत्वेऽपि श्रुतिरस्तीति चेन्न प्रकाशकत्वसाम्येनान्तःकरणोपादानत्वस्यैवोचिततयाहङ्कारिकत्वश्रुतेरेव मुख्यत्वात् । भूतानामपि हिरण्यगर्भसङ्कल्पजन्यतयाचस्य मनोजन्यत्वाच्च । व्यष्टिमनआदीनां भूतसंसृष्टतयैव तिष्ठतां भूतेभ्योऽभिव्यक्तिमात्रेण तु भौतिकत्वश्रुतिर्गौणीति । ननु तथाप्याहङ्कारिकत्वनिर्णयो न घटते ? “अस्य पुरुषस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यम्”इत्यादिश्रुतौ देवतास्विन्द्रियाणां लयकथनेन देवतोपादानकत्वस्याप्यवगमात् कारण एव हि कार्यस्य लय इत्याशङ्क्याह भा०।“देवतालयश्रुतिर्नारम्भकस्य”सू० “देवतासु या लयश्रुतिः सा नारम्भकविषयिणीत्यर्थः, अनारम्भकेऽपि भूतले जलबिन्दोर्लयदर्शनात् । अनारम्भकेष्वपि भूतेष्वात्मनो लयश्रवणाच्च । “स एष विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यति” इत्यादिश्रुताविति भावः” भा० ।

एतन्मूलतयैव शां०ति० ‘वैकारिकादहङ्काराद्वै वा वैकारिका दश । दिग्वातार्कप्रचेतोऽश्वि+वह्नीन्द्रोपेन्द्रमित्रकाः। तैजसादिन्द्रियाण्यासंस्तन्मात्रक्रमयोगतः”। इन्द्रियाणामधिष्ठातृदेवानाञ्च आहङ्कारिकत्वमुक्तम् ।

कर्मेन्द्रियाणामधिष्ठातृदेवाश्च वाचः वह्निः,पाणेरिन्द्रः, पादस्य उपेन्द्रः, पायोः मित्रः,उपस्थस्य कः ब्रह्मा ।

वेदान्तिमते च आकाशादीनां रजोंशैः वागादीनां क्रमेणोत्पत्तिः“रजोऽंशैः पञ्चभिस्तेषां क्रमात् कर्मेन्द्रियाणि तु । वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे” पञ्चदशयुक्तेः तेषाञ्चाहङ्कारित्वं प्रमेयविवरणोपन्यासे निराकृतं, तच्च आत्मशब्दे ६६६ पृ०दर्शितम्, तेषामनुमानेन भौतिकत्वसिद्धिरिति शुष्कतार्किकमतमपि तत्र निरासितं तत्रैव पृ०दृश्यम् । “तेषां रजोऽंशैर्जातानि क्रमात् कर्मेन्द्रियाणि च”शब्दचि०भागवतवाक्यम् ।

कर्व दर्पे भ्वा०प०अक० सेट् । कर्व्वति अकर्व्वीत् चकर्व प्रनिकर्वति । कर्वटः कर्वुरः कर्वूरः ।

कर्व पु० किरति विषयेषु चित्तम् कॄ—व । कामे उज्ज्व० । कामस्य चित्तविक्षेपकत्वात् तथात्वम् ।

कर्वट पु० कर्व-अट । द्विशतग्राममध्ये सुन्दरस्थाने, यत्र गत्वा क्रयविक्रयादिना सन्निहितजनपदवासिनो जना जीवन्ति १तादृशे ग्रामे पुरे वा,२नगरमात्रे च भरतटीका “कर्वटं द्विशतग्राममध्ये ग्रामोमनोहरः” हारा० उक्तेः न०च ।३प्रचुरकण्टकसन्ताने ग्रामे च । “धनुःशतं परीणाहो ग्रामात् क्षेत्रान्तरं भवेत् । द्वे शते कर्वटस्य स्यात् नगरस्य चतुःशतम्” याज्ञ० “कर्वटस्य प्रचुरकण्टकसन्तानस्य ग्रामस्य” मिता० कूर्मविभागे प्राच्यां दिशि दृष्टस्य० उक्ते ४देशभेदे “अथ पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यवद्गिरयः । व्याघ्रमुखसुह्मकर्वटचन्द्रपुराः शूर्पकर्णाश्च” । “ताम्रलिप्तं च राजानं कर्वटाधिपतिं तथा । सुह्मानामधिपं चैव ये च सागरवासिनः” भा० स० २९ भीमप्राचीविजये । त्रिकाण्डशेषे तु “चतुरष्टशतग्रामान्तर्द्रोणमुखकर्कटौ” इत्युक्तेः ५ अष्टशतग्राममध्यस्थग्रामे च पु०।

कर्वर न० कृ-वरच् । १कर्मणि निरु०।“अन्यदद्य कर्वरमन्यदु” ऋ० ६,२४,५ । “कर्वरं कर्मनामैतत्”भा०। कॄ-विक्षेपे ष्वरच् । २व्याघ्रे ३राक्षसे च पुंस्त्री उज्ज्व० जातित्वात् स्त्रियां ङीष्४निशायां स्त्री विश्वः षित्त्वात् ङीष् । कर्वरीत्येव । सा च ५हिङ्गुपत्र्याम् जटाध० ६शिवायां मेदि०।

कर्वुदार पु०कर्व दर्पे उण् तं दारयति दृ-अण् । कोविदारवृक्षे

कर्वु(वू)र पु० कर्बु (बू)रशब्दार्थे ।

कर्श्य पु० कृश-यत् । कर्चूरे, (कचूर) राजनि० ।

कर्ष पुंन० कृष—अच् कर्मणि घञ् वा ।“दशार्धगुञ्जं प्रवदन्ति माषं माषाह्वयैः षोड़शभिश्च कर्षम्” लीला० उक्ते अशीतिरक्तिकापरिमाणे षोड़शमाषके मानभेदे २ तन्मिते सुवर्णे च ।३विभीतकवृक्षे पु०शब्दरत्ना०। भ्वा०कृष—भावे घञ् ।४आकर्षणे । तुदा०कृष—भावे घञ् ।५विलेखने च । अत्र प्रसङ्गात् पौराणिकस्मार्त्तकर्मोचित स्मृत्यादिपरिभाषितवैद्यक परिभाषितमानभेदउच्यते। तत्र पौराणिकादिमा

नमाह हेमा०दा०ख०मनुः“लोकसंव्यवहारार्थं याः संज्ञाः प्रथिता भुवि । ताम्ररूप्यसुवर्णानां ताः प्रवक्ष्याम्यशेषतः । जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः । प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते । त्रसरेण्वष्टकं ज्ञेया लिक्षैका परमा यतः । ता राजसर्षपास्तिस्रस्ते त्रयो- गौरसर्षपः । सर्षपाः षट् यवोमध्यस्त्रियवश्चैव कृष्णलः । पञ्च कृष्णलको माषस्ते सुवर्णस्तु षोडश । पलं सुवर्णाश्चत्वारः पलानि धरणं दश । द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः । ते षोड़श स्याद्धरणं पुराणश्चैव राजतः । कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः । धरणानि दश ज्ञेयं शतमानस्तु राजतः । चतुःसौवर्णिको निष्कोविज्ञं तु तत्प्रमाणकम्”याज्ञवल्क्यः“जालसूर्य्यमरीचिस्थं त्रसरेणू रजः स्मृतम् । तेऽष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते । गौरस्तु ते त्रयः षट् ते यवोमध्यस्तु ते त्रयः । कृष्णलः, पञ्च ते माषस्ते सुवर्णस्तु षोडश । पलं सुवर्णाश्चत्वारः पञ्च वापि प्रकीर्त्तितम् । द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते । शाणमानन्तु दशभिर्द्धरणैः पलमेव च । निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः”आह विष्णुः“ “जालस्यार्कमरीचिगतं रजस्त्रसरेणुसंज्ञं, तदष्टकं लिक्षा, तत्त्रयं राजसर्षपः, तत्त्रयं गौरसर्षपः,ते षट् यवः, तत्त्रयं कृष्णलः, तत्पञ्चकं माषः, तद्द्वादशकमक्षार्द्धं स चतुर्माषकं सुवर्णः, तच्चतुःसौवर्णिकोनिष्कः । द्वे कृष्णले रूप्यमाषकः ते षोडश धरणम्” “ताम्रिकः कार्षापणः पणः” कात्यायनः“माषो विंशतिभागस्तु ज्ञेयः कार्षापणस्य तु । काकिणी तु चतुर्भागो माषस्य परिकीर्त्तिता । पञ्चनद्याः प्रदेशे तु संज्ञेयं व्यावहारिकी । कार्षापणप्रमाणं तु तत् निबद्धमिहैव यत् । ते द्वादश सुवर्णस्तु दीनारस्तु त्रिकः स्मृतः”नारदः“कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्त्तते । पणो निबद्धः पूर्व्वस्यां षोडशैव पणाः पलम् । अगस्तिरपि “यवः स्यात् सर्षपैः षड्भिर्गुञ्जा चैका त्रिभिर्यवैः । गुञ्जाभिः पञ्चभिश्चैको माषकः परिकीर्त्तितः । भवेत् षोडशभिर्माषैः सुवर्णस्तैः पुनः स्मृतः । चतुर्भिः पलमेकन्तु दश ते धरणं विदुः” ।“अष्टभिर्भवति व्यक्तैस्तण्डुलः गौरसर्षपैः । स वैणवयवः प्रोक्तो गोधूमं चापरे जगुः” । विष्णुगुप्तः “पञ्चगुञ्जोभवेन्माषः शाणस्ते च चतुर्गुणैः । कलञ्जं धरणं प्राहुर्मणिमानविशारदाः । मञ्जाटिकाकलञ्जस्तु तौल्ये गुञ्जाद्वयं विदुः । मञ्जाटिका विंशतिस्तु धरणं तद्विदां मतम् । स्थूलमध्यातिसूक्ष्माणां सुसूक्ष्माणामपि स्मृतम्”।“दीनारोरोपकैरष्टाविंशत्या परिकीर्त्तितः । सुवर्णसप्ततितमोभागोरोपक इष्यते” प्रकारान्तरेणाप्याह स्मृतौ यथाऽन्नमध्यपाककाले निष्पन्नधान्ययवादश सुवर्णमाषः पञ्च वा गुञ्जाः सुवर्णमापकः ते षोडश सुवर्णः एवं प्रमाणसिद्धस्य द्वितीया संज्ञा कर्ष इति चतुष्कर्षं पलं पलानां शतेन तुला द्विंशतितौलिको भारः अस्यैव भारस्य उदतौलिक इति द्वितीया संज्ञा” दानखण्डे हेमाद्रिः । एतेषा मानभेदः शक्तितारतम्यापेक्षया ग्राह्यतावेदनार्थः ।

वैद्यकपरिभाषितमानं भावप्र० ।

“न मानेन विना युक्तिर्द्रव्याणां जायते क्वचित् । अतः प्रयोगकार्य्यार्थं मानमत्रोच्यते मया । चरकस्य मतं वैद्यैराद्यैर्यस्मान्मतं ततः । विहाय सर्व्वमानानि मागधं मानमुच्यते । त्रसरेणुर्बुधैः प्रोक्तस्त्रिंशता परमाणुभिः । त्रसरेणुस्तु पर्य्यायनाम्ना वंशी निगद्यते । जालान्तरगतैः सूर्य्यकरैर्वंशी विलोक्यते । षड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका । तिसृभीराजिकाभिश्च सर्षपः प्रोच्यते बुधैः । यवोऽष्टसर्षपैः प्रोक्तो गुञ्जा स्यात्तच्चतुष्टयम् । षड्भिस्तु रत्तिकाभिः स्यान्माषको हेममानके । माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते । टङ्कः स एव कथितस्तद्द्वयं कोल उच्यते । क्षुद्रको वटकश्चैव द्रङ्क्षणः स निगद्यते । कोलद्वयन्तु कर्षः स्यात् स प्रोक्तः पाणिमानिका । अक्षः पिचुः पाणितलं किञ्चित्पाणिश्च तिन्दुकम् । विडालपदकं चैव तथा षोडशिका मता । करमध्यो हंसपदं सुवर्णं कवलग्रहः । उदुम्बरञ्च पर्य्यायैः कर्षमेव निगद्यते । स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्टमिका तथा । शुक्तिभ्याञ्च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका । प्रकुञ्चः षोडशी विल्वं पलमेवात्र कीर्त्त्यते । पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतञ्च निगद्यते । प्रसृतिभ्यामञ्जलिः स्यात्कुडवोऽर्द्धशरावकः । अष्टमानञ्च स ज्ञेयः कुडवाभ्याञ्च मानिका । शरावोऽष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः । शरावाभ्यां भवेत् प्रस्थः चतुःप्रस्थैस्तथाढकः । भाजनं कांस्यपात्रं च चतुःषष्टिपलश्च सः । चतुर्भिराढकैर्द्रोणः कलशोनल्वणोऽर्म्मणः । उन्मानश्च घटोराशिर्द्रोणपर्य्यायसंज्ञितः । द्रोणाभ्यां सूर्य्यकुम्भौ च चतुःषष्टिशरावकः

शूर्पाभ्याञ्च भवेद्द्रोणी वाही गोणी च सा स्मृता। द्रोणीचतुष्टयं खारी कथिता सूक्ष्मबुद्धिभिः। चतुःसहस्रपलिका षण्णवत्यधिका च सा। पलानां द्विसहस्रञ्च भार एकः प्रकीर्त्तितः। तुला पलशतं ज्ञेयं सर्वत्रैवैष निश्चयः। माषटङ्काक्षबिल्वानि कुडवप्रस्थमाढकम्। राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणम्। मागधपरिभाषायां षड्रत्तिको माषश्चतुर्विंशतिरत्तिकष्टङ्कः षण्णवतिरत्तिकः कर्षः। अयञ्चरकसम्मतः। सुश्रुतमते पञ्चरत्तिकोमाषो विंशतिरत्तिकष्टङ्कोऽशीतिरत्तिकः कर्षः। अयमेव कालिङ्गपरिभाषायामपि यतस्तत्राष्टरत्तिकोमाषो द्वात्रिंशद्रत्तिकष्टङ्कः सार्द्धटङ्कद्वयमितः कर्षः। गुञ्जादिमानमारभ्य यावत् स्यात्कुडवस्थितिः। द्रवार्द्रशुष्कद्रव्याणां तावन्मानं समं मतम्। प्रस्थादिमानमारभ्य द्विगुणं तद्द्रवार्द्रयोः। मानन्तथा तुलायास्तु द्विगुणं न क्वचित् स्मृतम्। मृद्वृक्षवेणुलोहादेर्भाण्डं यच्चतुरङ्गुलम्। विस्तीर्णञ्च तथोच्चञ्च तन्मानं कुडवं वदेत्। इति मागधमानम्। कालिङ्गमानम् “यतो मन्दाग्नयो ह्रस्वा हीनसत्वा नराः कलौ। अतस्तु मात्रा तद्योग्या प्रोच्यते सुश्रुसम्मता। यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः। यवद्वयेन गुञ्जा स्यात् त्रिगुञ्जो वल्ल उच्यते। माषो गुञ्जाभिरष्टाभिः सप्तभिर्वा भवेत् क्वचित्। चतुर्भिर्माषकैः शाणः स निष्कष्टङ्क एव च। गद्याणो माषकैः षड्भिःकर्षः स्याद्दशमाषिकः। चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः। चतुःपलैश्च कुडवप्रस्थाद्याः पूर्ववन्मताः। स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयोबलम्। प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत्। नाल्पं हन्त्यौषधं व्याधिं यथाम्भोऽल्पं महानलम्। अतिमात्रं च दोषाय शस्यो यस्ये बहूदकम्”।

कर्षं नित्यमर्हति ठञ्। कार्षिक कर्षपरिमाणार्हे “कार्षिकस्ताम्रिकः पणः इत्यमरः”। नित्यकर्षणार्हे क्षेत्रभेदे च षञन्तकर्षस्य “कर्षात्वतो घञोऽन्त उदात्तः” पा० अन्तोदात्तता अत्र कर्षेतिशपा निर्द्देशात्तुदादेराद्युदात्ततेति सि०कौ०।

कर्षक त्रि० कृष–विलेखने। १ क्षेत्रकर्षणकारके (कृषाण) “कच्चिच्च बीजं भक्तञ्च कर्षकस्यावसीदति” भा०स० ५अ० “पश्यैनं कर्षकं क्षुद्रं दुर्बलं मम पुत्रकम्। प्रतोदेनाभिनिघ्नन्तं लाङ्गलेन च पीड़ितम्” भा० ९ अ० सुरभेर्वाक्यम् “कालप्राप्तमुपासीत शस्यानामिव कर्षकम्” भा०व० २५८ अ०। “त्वं समीरण इव प्रतीच्छितः कर्षकेण वलजां पुपूषता” माघः २लेखके ३आकर्षके च।

कर्षण न० तुदा०कृष–भावे ल्युट्। लाङ्गलादिना भूमेर्विलेखने (चाष देओया) हेम०। “मृतं तु याचितं भैक्ष्यं प्रमितं कर्षणं स्मृतम्” मनुः। कृषिशब्दे विवृतिः। भ्वा० कृष–ल्युट्। २आकर्षणे च (टाना) “भज्यमानमतिमात्रकर्षणात्” रघुः “शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा” मनुः। ३चोरिणीवृक्षे स्त्री राजनि०गौरा०ङीष्।

कर्षणि स्त्री कृष–अनि। असत्यां स्त्रियाम् उणादिकोषः शब्दकल्पद्रुमे उक्तम्। तच्चिन्त्यम् “कृषेरादेश्च धः” उणा० २,१०५सू० धर्षणिरित्यस्यैव सिद्धेः कर्षणिरिति पाठो लिपिकरप्रमादकृतः। अतएव उज्ज्वलदत्तेन “धर्षणिर्बन्धकीत्युक्त्वा” “धृषेरनिप्रत्ययेन सिद्धे वैचित्र्यार्थम्” इत्युक्तम्

कर्षफल पु० कर्षः तन्मात्रं फलमस्य। १विभीतकवृक्षे, अमरः २आमलक्याम् स्त्री रत्नमाला टाप्।

कर्षापण पु० कर्षेणापण्यते क्रीयते। षोड़शपणपरिमाण (काहन) कर्षस्य षोडशमाषकमितत्वेन षोडशभिः पणैस्तस्य क्रयणात् तत्संख्यासाम्यात् तथात्वम्। “अशीतिभिर्वराटकैः पण इत्यभिधीयते। ते षोडश पुराणं स्यात् रजतं सप्तभिस्तु तैः” गौतमेन षोडशपणेषु पुराणशब्दस्य परिभाषितत्वात् “द्वात्रिंशत्पणिका गावो वत्सः पौराणिकोमतः” कात्यायनेन द्वात्रिंशत्पणानां गोमूल्यतयाभिधानेन “धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिका। कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता” षट्त्रिंशन्मते पुराणकार्षापणयोः पर्य्यायतादर्शनाच्च तथार्थता। ततः प्रज्ञा०स्वार्थे अण्। कार्षापणोऽप्यत्र अर्द्धर्चादि०तेन पुंन०।

कर्षिन् त्रि० कृष–आकर्षे णिनि। आकर्षके। “स्तम्बेरमामुखरशृङ्खलकर्षिणस्ते” रघुः। स्त्रियां ङीप्। “घ्राणकान्तमधुगन्धकर्षिणीः” रघुः। ङीबन्तः २चीरिणीवृक्षे ३अश्वमुखबन्धनरज्जुस्थितलौहभेदे कविकायां च स्त्री जटा०

कर्षू पु० कृष–ऊ। १करीषानले (घुटेर आगुन)। २कुल्यायां स्त्री अमरः। ३दृष्टखाते मेदि०। दृष्टखातस्तु “चतुरङ्गुलदृष्टीस्तावदन्तरास्तथाधःखाता वितस्त्यायतास्तिस्रः कर्षूः कुर्य्यात्” प्रा० वि० विष्णूक्तप्रमाणकगर्त्तभेदः। “ततः कर्षूःकुर्य्यात् तन्मूले प्रागुदगग्न्युप समाधानं कृत्वा पिण्डनिर्वपणम्” “कर्षूत्रयमूले पुरुषाणां, कर्षूत्रय-

मूले स्त्रीणाम्। पुरुषकर्षूत्रयं साज्येनोदकेन पूरयेत् स्त्रीकर्षूत्रयं साज्येन पयसा दध्ना मांसेन, पयसा च प्रत्येकं कर्षूत्रयं पूरयित्वा जपेत्" विष्णु०। ४गर्त्त-मात्रे च। "कर्षूषीरवति" कात्या० २१,३ २६। "कर्षूः कुहर उच्यते" कर्कः अस्य ह्रस्वान्तमपि। "दक्षिणतः कुटिले कर्षू खात्वा क्षीरोदकाभ्यां पूरयन्ति सप्तोत्तरतः प्राचीरुदक्स्थाः" कात्या०२१,३,२६। "श्मशानत उत्तरतः कुटिले कर्षू गर्त्तौ खात्वा" कर्कः।

कर्हि अव्य० कस्मिन् काले किम्+र्हिल् कादेशः। अनद्यतने कस्मिन् काले इत्यर्थे। कर्हि स्वित्तदिन्द्र यन्नृभिः" ऋ० ६,३५,२।

कर्हिचित् अव्य० कर्हि+चित् मुग्ध० पा० मते भिन्नं पदद्वयम्। कस्मिंश्चित्काले इत्यर्थे। "अश्विना यद्ध कर्हि चित्"ऋ०५,७४,१०। अतएव पदकाराः कर्हि,चित्। इति भिन्नपदतया पेठुः"यद्य कर्हि कर्हिचित्"ऋ०८,७२,५।

कल संख्यायां सक० शब्दे अक०भ्वा०आत्म०सेट्। कलते अकलिष्ट चकले प्रनिकलते।

कल गतौ संख्यायाञ्च अद० चुरा० उभय० सक० सेट्। कलयति ते अचकलत् त। कलयाम्–बभूव आस–चकार चक्रे। गत्यर्थत्वात् ज्ञानार्थत्वमपि। "कल-यन्त्यनुक्षणमनेकलसम्" माघः "व्यालनिलयमिलनेन गरलमिव कलयति मलयजसारम्"जयदे० षट्ठे "कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरौ"जयदे०। संख्यानञ्चात्र गणनं ज्ञानभेदश्च।"स पश्चात् संपूर्णः कलयति धरित्रीं तृणसमाम्" नीतिः "कलयेदमानमनसं सखि! माम्" माघः।"वाचामाचकलत् रहस्यमखिलं यथाद्यपादस्फुटाम्" भट्टि०।उच्चारणे च "माद्यन्तः कलयन्तु चूतशिखरे,केलि-पिकाः पञ्चमम्"। ग्रासे"कालः कलयतामहम्"गीता। "कलनात्सर्वभूतानां स कालः परिकीर्त्तितः"ति०त० विष्णुध०। कलनीयम् कलयितव्यम् कलयिता कलितः। कलयन् कलयमानः कलयितुम् कलयित्वा आक-लय्य। "कलितललितवनमालम्" जयदे० "करक-लितकपालः कुण्डली दण्डपाणिः" वटुकस्तवः।

अव–अवगमे अवकलयति वि+अव वियोजने "यदि व्यक्ते युक्तिव्यवकलनमार्गेऽसि कुशला"लीला०।

आ+बन्धने"सुवर्णसूत्राकलितधराम्बराम्, माघः ज्ञाने च" "वाचामाचकलत्" भट्टि०। "मकरध्वजद्विरदमाकलयत्" "दन्तावलीराकलयाञ्चकार"इति च माघः।

प्रति आ+प्रतिबोधे प्रत्याकलितस्वदुर्नयः" दशकु०।

उद्+उत्क्षेप्य षष्ठे"स तस्य हस्तोत्कलितस्तदासुरो विक्री-ड़तो यद्वदहिर्गरुत्मतः" भाग०७,८,१६।

सम्+एकसंख्यापादनरूपे योगे।"अथ संकलनव्यवकलनयोः करणसूत्रम्" "सैकपदघ्नपदार्धमथैकाद्यङ्कयुतिः किल सङ्कलिताख्या" लीला०।

काल नोदने प्रेरणे-चुरा०उभय०सक०सेट्। कालयति ते अचीकलत् त। कालयां बभूव आस चकार चक्रे। काल-यितव्यः कालनीयः। कालयिता कालितः कालयन् कालय-मानः। कालयित्वा आकाल्य। कर्म्मणि काल्यते अकालि अकालयिषाताम् अकालिषाताम्। "गवां शतसहस्राणि त्रिगर्त्ताः कालयन्ति ते" भा०वि० १०,७। "गावो न काल्यन्त इदं कुतो रजः"भाग०४,५,८। सा गौस्तत् सकलं सैन्यं कालयामास दूरतः"भा०आ० ६६८०।

कल पु० कल–शब्दे घञ् नि० अवृद्धिः। मधुराव्यक्ते ध्वनौ अमरः। "सारसैः कलनिर्ह्रादैः" "कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम्" "निशासु भास्वत् कलनूपुराणाम्" रघुः। "कलपक्षिणीरवमुदास वधुः"। "कलकाञ्चि काञ्चिदरुणत्तरुणः"माघः।कलप्रधाना काञ्चि-र्यत्र एवं कलहंस इत्यादौ शा०त० समासत्वेन तस्य न तद्युक्तार्थता। अतएवामरेण"कलो मन्द्रस्तु गम्भीरस्तारो-ऽत्युच्चैस्त्रयस्त्रिषु" मन्द्रादीनां त्रयाणामेव त्रिलिङ्गत्व-मुक्तम्।"उदकण्ठि कण्ठपरिवर्त्तिकलस्वरश्रुत्यगानपरया परया" माघः। कड़–मदे अच् डस्य लः। २शुक्रे चरम-धातौ न० मेदि०। ३कोलिवृक्षे पु०शब्दच०।४शालवृक्षे पु० राजनि०। ५अजीर्णे त्रि० मेदि०। कलाऽस्यस्य अच्। कुलान्वितेऽवयवे च। [स्त्रियां जातित्वात् ङीष्।

कलक पुंस्त्री कल–वु० ष्वुल्। शकुलमत्स्ये हेमच०।

कलकण्ठ पुंस्त्री कलः कलप्रधानः कण्ठोऽस्य। १कोकिले २हंसे, ३पारावते च। जातित्वेऽपि संयोगोपधत्वात् स्त्रियां न ङीष् किन्तु स्वाङ्गत्वात् ङीष्। कलध्वनियुक्त-कण्ठके त्रि०स्त्रियां ङीप्।

कलकल पु० कलप्रकारः गुणवचनत्वात् प्रकारे द्वित्वम्। कोलाहले। "चलितया विदधे कलमेखला-कलकलोऽलकलोलदृशाऽन्यया" माघः। कलस्य शालवृक्षस्य कला यत्र। २शालनिर्यासे मेदि०।

कलकीट पु०कलप्रधानः कीटः शा०त०। कीटभेदे। तत्र भवः मलद्या० अण्। कालकीट तद्भवे त्रि०।

कलकूट पु० नगरभेदे राजनि० । ततः भवार्थे तद्राजार्थे च "शाल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्" पा० इञ् । कालकूटि तद्भवे त्रि० तन्नृपे च । इञश्चास्त्रियां बहुषु लुक् । कलकूटास्तद्देशवासिषु तन्नृपेषु च स्त्रियां तु न लुक् । कालकूटय इत्येव । [जातित्वात् ङीष्

कलघोष पुंस्त्री कलो घोषोऽस्य । कोकिले शब्दर० स्त्रियां

कलङ्क पु० कलयति क्विप् कल् चासौ अङ्कश्चेति, कं ब्रह्माणमपि लङ्कयति गच्छति लकि–गतौ अण् वा । १चिह्ने २अपवादे, ताम्रादिधातूनां ३मलभेदे (कलङ्कान), ताम्रादियोगात् ४अस्त्रादेर्विकारे च मेदि० । "शशकपाणकलचेषु कलङ्काः" काद० । "धारानिबद्धेव कलङ्करेखा" "मत्तः सदाचारशुचेः कलङ्कः" रघुः । "ताम्रवर्णश्च परुषो मन्दरश्मिर्दिवाकरः । अदृश्यत कलङ्काङ्कः संसक्तो धूमकेतुना" रामा० । ततः अस्त्यर्थे इनि । कलङ्किन् तद्युक्ते त्रि० स्त्रियां ङीप् । "कलङ्की जायते विल्वे" ति० त० स्मृतिः । ततः तारका० जातार्थे इतच् । कलङ्कित जातकलङ्के त्रि० ।

कलङ्कष पुंस्त्री करेण कषति वा० खच् मुम् च रस्य लः । १सिंहे शब्दमा० । जातित्वात् स्त्रियां ङीष् । २करतालखां स्त्री शब्दरत्ना० टाप् ।

कलङ्कुर पु० कं जलं लङ्कयति लकि–गतौ णिच–उरच् । जलानामावर्त्ते स्रोतोजलभ्रमे त्रिका० ।

कलञ्ज पु० केतिशब्दं लञ्जति भाषते क इत्यव्यक्तानुकरणम् लजि-अण् । विषाक्तास्त्रेण हते १मृगे, २पक्षिणि च । ३तन्मांसे न० "न कलञ्जं भक्षयेदिति" श्रुतिः । ४ताम्रकूटे च (तामाक) "कलञ्जसंवेष्टनधूमपानात् स्याद्दन्तशुद्धिर्मुखरोगहानिरिति" वैद्यके तत्सेवनात् मुखरोगहान्यादि उक्तम् । ५परिमाणभेदे च । कर्षशब्दे भावप्र० तन्मानभेदोदृश्यः ।

कलञ्जाधिकरण न० "न कलञ्जं भक्षयेदित्यादिवाक्यमधिकृत्य पञ्चावयवन्यायभेदे स च न्यायः यथा किं यदा कदापि तद्भक्षणनिषेधः । उत सर्वदेति संशयः । यदा कदाचिन्निषेध इति पूर्वपक्षः सर्वदा तन्निषेध इति सिद्धान्तः । तदेतद्भङ्ग्या एका० त० दर्शितं यथा "न कलञ्जं भक्षयेत्" इति श्रुतिः कलञ्जभक्षणाभावविषयकं कार्य्यमित्यर्थः । तत्र कालविशेषानुपादानान्निषिध्यमानक्रियायां प्रवृत्तिमतोनिषेधविधावधिकाराद्यावत्कालमेव तस्यां तस्य निवृत्तिः । न हि कलञ्जभक्षणाद्यतः कुतश्चित् कारणान्निवृत्तस्य निषेधानुपालनमवृत्तमिति कलञ्जभक्षणनिषेधो न पुनस्तं निवर्त्तयति किन्तु भक्षणप्रवृत्तिमत्तामात्रमधिकारिविशेषणं यदा यदा भवति तदा तदैव निषेधविधिरपि तं निवर्त्तयति । न हि कलञ्जस्य भक्षणमुपक्रम्य यावत् कालं तद्भक्षयति । अतस्तदितरकाले निवृत्तिः सिद्धैवेति भवति विफलोविधिः । ननु नासौ निवृत्तिरप्रवृत्तस्य निवृत्त्यनुपपत्तेः । सत्यं, प्रवृत्त्युपाधिना विनाशं प्राप्स्यन् प्रागभाव एव प्रवृत्तिनिराकरणात् साध्यमानोनिवृत्तिरुच्यते न तु प्रवृत्तिरपि साध्यतयोपदिश्यते किन्तु रागप्राप्तप्रवृत्तिमतएव निषेधविधावधिकारः । यत्तु "मनसा तु प्रवृत्तस्य भूतचेष्टावतोऽपि वा । यदनागतभावस्य वर्ज्जनं तन्निवर्त्तनम्" इति । अत्रापिशब्देनाप्रवृत्तमात्रसमुच्चयान्न विरोधः । भूतचेष्टावत इति । "भूतं क्ष्मादौ पिशाचादौ जन्तौ क्लीवं त्रिषूचिते । प्राप्ते वृत्ते समे सत्ये देवयोन्यन्तरे तु ना" इति मेदिन्युक्तेः भूते प्राप्ते निषेध्ये चेष्टावत इत्यर्थः । ततश्च प्रागभाव एव कालान्तरसम्बन्धितया साध्यत्वेनोपदिश्यते । प्रागभावश्चानादिसंसर्गाभावमात्रपरः स चाप्रवृत्तस्य भक्षणकारणमननुतिष्ठतः सिध्यत्येव । तस्मात् सकृत्क्रियापर्य्यवसायित्वे विफलोविधिः । कादाचित्काकरणस्य निषेधमन्तरेणापि प्राप्तेः । न च स्वर्गकामादिवत् साध्यतया प्रवृत्तिमत्कर्त्तृकत्वमप्यङ्गं विषयमात्रानुष्ठानाधीनसिद्धत्वान्निषेधनियोगानामितिकर्त्तव्यताकाङ्क्षाविरहात् अत एव शुचित्वमपि तत्र नाङ्गम् । तस्मान्निषेधविधिषु काकवन्तो देवदत्तस्य गृहा इत्यादिवत्तटस्थत्वेनाधिकारिविशेषणीभूतायाः प्रवृत्तेर्यावत्कालमनुवृत्तिस्तावत्कालमेव निवृत्तौ साफल्यं पुनर्निमित्तान्तरवन्न सकृदनुष्ठानेनैव शास्त्रार्थसिद्धिः"।

यथा चात्र निवृत्तेरेव बोध्यता न प्रवृत्त्यभावस्य तथा समर्थितं वृहदारण्यकब्राह्मणभाष्ययोः यथा—

"प्रतिषिद्धानिष्टफलसम्बन्धश्च वेदादेव विज्ञायते न चानुष्ठेयः सः । न च प्रतिषिद्धविषये प्रवृत्तक्रियस्याकरणादन्यदनुष्ठेयमस्ति । अकर्त्तव्यताज्ञाननिष्ठतैव हि परमार्थतः प्रतिषेधविधीनां स्यात् । क्षुधार्त्तस्य प्रतिषेधज्ञानसंस्कृतस्याभक्ष्येऽभोज्ये वा प्रत्युपस्थिते कलञ्जाभिशस्तान्नादाविदं भक्ष्यमदो भोज्यमिति वा ज्ञानमुत्पन्नं तद्विषयया प्रतिषेधज्ञानस्मृत्या बाध्यते मृगतृष्णिकायामिव

मेयज्ञान तद्विषययाथार्थ्यविज्ञानेन तस्मिन् बाधिते स्वाभाविकविपरीतज्ञानेऽनर्थकरी तद्भक्षणभोजनप्रवृत्तिर्न भवति। विपरीतज्ञाननिमित्तायाः प्रवृत्तेर्निवृत्तिरेव न पुनर्यत्नः कार्य्यस्तदभावे” शङ्कराचार्य्यकृतभाष्यम्। “यद्यपि कलञ्जभक्षणादेरधःपातस्य च सम्बन्धो ‘न कलञ्जम्भक्षयेत्’इत्यादिवाक्यात्प्रतीयते, तथापि तस्यानुष्ठेयत्वाद्वाक्यस्यानुष्ठेयनिष्ठत्वसिद्धिरित्याशङ्क्याह न चेति। सम्बन्धस्याभावार्थत्वान्नानुष्ठेयतेत्यर्थः। अभक्षणादि कार्य्यमिति विधिपरत्वमेव निषेधवाक्यस्य किन्न स्यादित्याशङ्क्याह न चेति। तस्यापि कार्य्यार्थत्वे विधिनिषेधभेदभङ्गात् नञश्च स्वसम्बन्ध्यभावबोधने मुख्यस्यार्थान्तरे वृत्तौ लक्षणापातान्निषिद्धविषये रागादिना प्रवृत्तक्रियावतो निषेधशास्त्रार्थधीसंस्कृतस्य निषेधश्रुतेरकरणात् प्रसक्तक्रियानिवृत्त्युपलक्षितादौदासीन्य दन्यदनुष्ठेयं न प्रतिभातीत्यर्थः। भावविषयं कर्त्तव्यत्वं विधीनामर्थोऽभावविषयन्तु निषेधानामिति विशेषमाशङ्क्याह। अकर्त्तव्यतेति। अभावस्य भावत्वाभावात् कर्त्तव्यताविषयत्वासिद्धिरिति हि शब्दार्थः। प्रतिषेधज्ञानवतोऽपि कलञ्जभक्षणादिप्रागदर्शनात् तन्निवृत्तेर्नियोगाधीनत्वात् तन्निष्ठमेव वाक्यमेष्टव्यमिति चेन्नेत्याह। क्षुधार्त्तस्येति। विषलिप्तशरहतस्य पशोर्मांसं कलञ्जम्। ब्रह्मवधाद्यभिशापयुक्तस्यान्नपानादि। तस्मिन्नभक्ष्येऽभोज्ये च प्राप्ते यदुभयज्ञानं तत्राभासोत्पन्नं तन्निषेधधीसंस्कृतस्य तज्ज्ञोस्तत्या बाध्यमित्यत्र लौकिकदृष्टान्तमाह। मृगतृष्णिकायामिति। तथापि प्रवृत्त्यभावसिद्धये विधिरर्थ्यतामिति चेन्नेत्याह। तस्मिन्निति। तदभावः प्रवृत्त्यभावो न विधिजन्यप्रयत्नसाध्यो निमित्ताभावेनैव सिद्धेरित्यर्थः” आनन्दगिरिः।

नैयायिकमते तत्र बोधप्रकारःशब्दचि॰दर्शितो यथा—“ननु ‘न कलञ्जं भक्षयेत्’इत्यत्र विध्यर्थनिषेधानुपपत्तिः तद्भक्षणस्य श्येयोरूपेष्टसाधनत्वात्, न चासुराऽविद्यावत् पर्य्युदासलक्षणया विरोध्यनिष्टसाधनबोधनं, नञोऽसमस्तत्वात् क्रियासङ्गतत्वेन प्रतिषेधवाचकत्वव्युत्पत्तेश्चेति चेत् न विशेष्यवति विशिष्टनिषेधस्य “सविशेषणे हीति”न्यायेन विशेषणनिषेधपर्य्यवसायितया कलञ्जभक्षणमिष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखसाधनमिति”न कलञ्जं भक्षयेत्”इत्यनेन बोधनात्, इष्टसाधनतावाचकस्य विधेः सामान्ये निषेधानुपपत्तेर्बलवदनिष्टाननुबन्धीष्टसाधनविशेषे तात्पर्य्यं तथा चाशक्यविशेषणनिषेधपरत्वं नञ इति कश्चित् तन्न यथाश्रयोग्यतया छिद्रं विहाय घटत्वेन तदितरान्वयो न तच्छिद्रेतरत्वेन, युगपद्वृत्तिद्वयविरोधात् तथेहापि बलवदनिष्टाननुबन्धित्वेन नोपस्थितिरिति”

विशेषबोधप्रकारस्तु आख्यातवादे गदाधरेण दर्शितो यथा “न कलञ्जं भक्षयेत्” इत्यादिनिषेधविधेः प्रामाण्यानुरोधेन बलवदनिष्टाननुबन्धित्वस्य विध्यर्थे प्रवेशः निषेधोऽपि, कलञ्जभक्षणादौ तृप्त्यादिरूपेष्टसाधनतासत्त्वेन तदभावस्य नञा बोधने तत्प्रामाण्यानुपपत्तेः बलवदनिष्टाननुबन्धित्वस्य विधिप्रत्ययवाच्यत्वे तस्यैवाभावो बलवदनिष्टनरकानुबन्धिनि तत्कर्म्मण्यबाधितो बोध्यत इति तत्प्रामाण्योपपत्तिः। बलवदनिष्टाननुबन्धित्वस्येष्टसाधनताविशेषणतया वाच्यत्वे विशिष्टाभावस्यैव शाब्दबोधे भानं सोऽपि विशेषणाभावायत्तोऽबाधितः। कलञ्जभक्षणादौ विशिष्टाभावबोधानन्तरं तल्लिङ्गकानुमानगम्यो बलवदनिष्टाननुबन्धित्वरूपतदननुबन्धित्वाभावः। प्रवर्त्तकमिव निवर्त्तकमपि ज्ञानं श्रुतिवाक्यात् परम्परयैव, न तु साक्षात्। भवन्मते च तादृशाभावस्य शाब्दबोधे न भानं पदार्थैकदेश इतरविशेषणत्वेनोपस्थितत्वेन नञर्थविशेषणतया अनिष्टाननुबन्धित्वान्वयासम्भवात्। वस्तुतो विशिष्टशक्तौ विशेष्यविशेषणभावे विनिगमनाविरहात् पृथगेव बलवदनिष्टाननुबन्धिताया वाच्यत्वम्। न च बलवदनिष्टाननुबन्धित्वस्येष्टसाधनताविशेष्यत्वे विधिवाक्यतः क्रियाविशेष्यकेष्टसाधनताज्ञानसम्भवात् क्रियागोचरचिकीर्षाद्यर्थं विधिवाक्यजन्यशाब्दबोधोत्तरमिष्टसाधनत्वप्रकारकक्रियाविशेष्यकज्ञानान्तरं कल्पनीयमिति तदकल्पनप्रयुक्तलाघवमेव बलवदनिष्टाननुबन्धित्वविशेषणत्वे विनिगमकमिति वाच्यं क्रियायां बलवदनिष्टासाधनत्वज्ञानतद्गोचरेच्छयोर्हेतुतया बलवदनिष्टासाधनत्वस्येष्टसाधनताविशेषणत्वमते क्रियाविशेष्यकतत्प्रकारकज्ञानान्तरस्य कल्पनीयतया तन्नये कल्पनासाम्यात्। यदि च बलवदनिष्टाननुबन्धित्वज्ञानमेव तद्द्वेषसामग्रीत्वेन इच्छाप्रतिबन्धकं न तु तदसाधनत्वज्ञानमिच्छाहेतुस्तदोक्तविशेष्यविशेषणभावे विनिगमकस्य सम्भवेऽपि विशिष्टस्य वाच्यत्वोपगमे तत्र बाधेन तद्विधायकश्रुतेरप्रामाण्यप्रसङ्ग इति शक्तिभेदस्य श्येनस्थले इष्टसाधनताबोधस्य चोपगम आव-

शयकः । शक्यतापि तत्र बलवदनिष्टसाधनत्वविनिर्मोकेणेष्टसाधनत्वस्य भानं लिखितं तदभानञ्च विशिष्टशक्तिपक्षे न सम्भवति विशिष्टशक्तेर्विशेषणविनिर्मोकेण विशेष्याभासकत्वात् । तद्धर्मप्रकारेण पदार्थविषयकशाब्दबोधे तत्तद्धर्मांशे शक्यतावच्छेदकतापर्य्याप्त्यवगाहिज्ञानस्य हेतुत्वात् अन्यथा विशिष्टसुखादिवाचकस्वर्गादिपदाद्विना लक्षणां केवलसुखत्वादिशाब्दबोधापत्तेः" । "इदन्तु बोध्यं बलवदनिष्टाजनकत्वमत्र न तीव्रदुःखाजनकत्वं बह्वायाससाध्ययागादौ तस्य बाधात् नापि बलवद्द्वेषविषयदुःखाजनकत्वं दुःखमात्रस्य विरक्तानां बलवद्द्वेषविषयत्वेनाऽव्यावर्त्तकतापत्तेः तज्ज्ञानस्याप्रवर्त्तकतया तस्य विधित्वायोगाच्च यत्र बलवान् द्वेषस्तज्जनकताज्ञानत्वेन बलवद्द्वेषविषयत्वेन वा प्रवृत्तिसामान्यं प्रति प्रतिबन्धकत्वात्, परन्तु नरकाजनकत्वं पापाजनकत्वं वा, तद्विरहस्यैव कलञ्जभक्षणादौ नञा बोधनात्" शब्द०प्र०

कलट न० कं जलं लटति आप्नोति लट–अच्–६त०। गृहाच्छादने (चाल) तृणादिमये पदार्थे शब्दर०।

कलतूलिका स्त्री कं सुखं लाति विषयत्वेन ला–क कलं सुखविषयं कामं तूलयति निष्कर्षति पूरयति वा तूल पूरणे–निष्कर्षे वा ण्वुल् । इच्छावत्याम् स्त्रियां त्रिका०। इच्छायाः सुखविषयत्वेन सुखाधायकत्वात् तत्पूरकत्वात् तन्निष्कर्षकत्वाद्वा तस्यास्तथात्वम् । कलकूजिका कलकूणिका वा अत्र पाठान्तरमस्ति उभयत्र पृषो०साधु ।

कलत्र न० गड–सेचने अत्रन् आदेश कः डस्य लः, कलं त्रायते त्रै–क–कड–मदने वा० अत्रन् डस्य लो वा । १भार्य्यायाम् "कलत्रवानहं बाले" । "कलत्रवन्तमात्मानमवरोधे महत्यपि" "वसुमत्या हि नृपाः कलत्रिणः" रघुः । "पत्युस्त्विषामिह महौषधयः कलत्र-स्थानं परैरनभिभूतममूर्वहन्ति" माघः "नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः" मेघ० । २नितम्बे अमरः "कलत्रभारेण विलोलनीविना" किरा० । [रूपे राजनि० । नृपाणां ३दुर्गस्थाने हेमच०।

कलधूत न० कलेनावयवेन धौतः शुद्धत्वात् पृषो० ।

कलधौत न० कलेनावयवेन धौतं शुद्धम् । १स्वर्णे । "यस्यां कपोलैः कलधौतधामस्तम्भेषु भेजे मणिदर्पणश्रीः" माघः "व्योमस्पृशः प्रथयता कलधौतभित्तीः" माघः । २रूप्ये च मेदि० "अनतिचिरोज्झितस्य जलदेन चिरस्थितबहुबुद्बुदस्य पयसोऽनुकृतिम् । विरलविकीर्णवज्रशकलान् सकलामिह विदधाति धौतकलधौतमहीम्" "अधिरात्रि यत्र निपतन्नभोलिहां कलधौतधौतशिलवेश्मनां रुचौ" माघः "अमलकलधौतपट्टायितमष्टमीचन्द्रशकलाकारम्" काद०। कलो ध्वनिभेदो धौतः शुद्धोऽत्र । ३कलध्वनौ विश्वः ।

कलध्वनि पु० कलोध्वनिरस्य । १पारावते २कोकिले ३मयूरे जातित्वात् स्त्रीत्वमपि । ४मधुराव्यक्तध्वनियुक्ते त्रि० । कर्म०। ५मधुराव्यक्तध्वनौ पु०।

कलन न० कलयत्यनेन कल–गतौ गत्यर्थस्य ज्ञानार्थत्वात् ज्ञाने करणे ल्युट् । १चिह्ने २वातपित्तादिदोषे च तैः स्वरूपानुमानात् तथात्वम् । ३ग्रहणे ४ग्रासे । "कलनात् सर्वभूतानां स कालः परिकीर्त्तितः" ति०त०विष्णुध०पु० । ५ज्ञाने च "लोकानामन्तकृत् कालः कालोऽन्यः कलनात्मकः" सू०सि०। "कलनात्मकः ज्ञानविषयस्वरूपः ज्ञातुम् शक्य इत्यर्थः" रङ्ग०। "न सोऽस्ति प्रत्ययो लोके यः कालानुगमादृते" इत्युक्तेः ज्ञानमात्रस्य कालविषयकत्वात् तथात्वम् । कं जलं लाति उत्पत्तिसाधनत्वेन तथा सन् नमति नम–बा०ड।६वेतसवृक्षे पु० राजनि०। तस्य जलसमीपजातत्वात् तत्स्रोतसा नमनाच्च तथात्वम् । "स्त्रियाः प्रविष्ट उदरं पुंसो रेतः कलाश्रयः । कलनं(लं)त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम्" भाग० ३,३०,२७उक्ते ७एकरात्रेण पच्यमाने गर्भकारणे रेतोविकारभेदे इति शब्दकल्पद्रुमादयः । तच्चिन्त्यम् "आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि । मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम् । कललं जायते तस्याः इति" सुश्रुते "दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः" सा०कारिकायाम् "कार्य्यं शरीरं तस्यावस्थाः कललबुद्बुदमांसपेशीकरण्डाङ्गप्रत्यङ्गव्यूहाः" कौ० उक्तेश्च तदेकवाक्यतया लकारद्वययुक्तपाठस्यैव भागवतेऽवधृतत्वेन नकारयुक्तपाठोलिपिकरप्रमादकृतः इति विवेच्यम्

कलना स्त्री चु०कल–भावे युच् । १ज्ञाने २ग्रहणे ३आदाने ४आमोचने ५कवमोचने च "पिच्छावचूडाकलनामिवोरः" माघः "कलनामामोचनमवमोचनं वा" मल्लि० ।

कलनाद पुंस्त्री कलोनादोऽस्य । १राजहंसे राजनि० स्त्रियां जातित्वात् ङीष् । २कलध्वनियुक्ते त्रि० । कर्मधा० । ३ कलध्वनौ पु० । [जातिशब्दे विवृतिः ।

कलन्दर पुंस्त्री वर्णसङ्करजातिभेदे स्त्रियां जातित्वात् ङीष् ।

कलन्दिका स्त्री कं सुखं लाति विषयतया ला–क कलं कामं ददाति दा–क पृषो० मुम् च टाप् अत इत्वम् ।

सर्वविद्यायाम् हेमच० । तस्याः सर्वसंशयनिराकरणेन बालदात्रत्वात्तथात्वम् । [शाके राजनि० ।

कलन्धु पु० कलाया मात्राया अन्धुरिव शक० । पोली-

कलभ पु० करेण शुण्डेन भाति भा–क रस्य लः । "त्रिंश-द्वर्षस्तु कलभ" इति वैजयन्त्युक्ते १गजभेदे । "मुदा रमन्ते कलभा विकस्वरैः" । "इह मुहुर्मुदितैः कलभै रवः" "सकलकलभकुम्भविभ्रमाभ्याम्" माघः । २पञ्चवर्षे करिपोते सुभूतिः "हिमेन्द्रभावं कलभः श्रयन्निव" मोघहस्तिकलभस्य चेष्टितम्" । "दृष्टो हि वृण्वन् कलभप्रमाणम्" रघुः । "ननु कलभेन यूथपतेरनुकृतम्" मालवि० । "गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः" मेघ० । "शावकमात्रपरत्वे नकरिकलभकरन्ध्रदिवतमालकिसलया मेदिनी" काद० । वयोवाचित्वात् जातित्वात् स्त्रियां ङीप् । कं वातं लभते साधनत्वेन लभ–अच् । धुस्तूरे मेदि० तस्य मादकद्रव्यत्वेन वाताधायकत्वात्तथात्वम्

कलभवल्लभ पु० ६त० । पीलुवृक्षे राजनि० । कलभप्रियादयोऽप्यत्र । [ङीप् । वज्रवृक्षे राजनि० ।

कलभी स्त्री कं जलं लभते आश्रयत्वेन लभ–अच् गौरा०

कलम पु० कलते अक्षराणि कल–कमच् । १लेखन्याम् जटाधरः २धान्यभेदे च राजव० । स च "कलमः कलिविख्यातो जायते स हि हैमने । कह्लीरदेश एवोक्तो महातण्डुलगर्भकः" इति भावप्र० उक्तदेशजः । ३उत्खातप्रतिरोपितधान्यभेदे च । "आपादपद्मप्रणताः कलमा इव ते रघुम् । फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः" रघुः "कलमगोपवधूर्न मृगव्रजम्" माघः "तत्र लोहितकशालिकलमकर्दमकपाण्डुकसुगन्धकशकुनाहृतपुष्पाण्डकपुण्डरीकमहाशालिशीतभीरुकलोध्रपुष्पकदीर्घशूककाञ्चनकमहिषमस्तकहायनकदूषकमहादूषकप्रभृतयः शालयः । मधुरा वीर्यतः शीता लघुपाका बलावहाः । पित्तघ्नाल्पानिलकफाः स्निग्धा बद्धाल्पवर्चसः । तेषां लोहितकः श्रेष्ठो दोषघ्नः शुक्रमूत्रलः । चक्षुष्यो वर्ण्यबलकृत् स्वर्यो हृद्यः श्रमापहः । व्रण्यो ज्वरहरश्चैव सर्वदोषविषापहः । तस्मादल्पान्तरगुणाः क्रमशः शालयोऽवराः" सुश्रुते तस्य गुणा उक्ताः । अस्य च रोपितधान्यत्वेन गुणविशेषः भावप्र० उक्तो यथा "रोपितास्तु नवा वृष्याः पुराणा लघवः स्थिराः । तेभ्यस्तु रोपिता भूयः शीघ्रपाकाः गुणाधिकाः" । अस्य शिखा पिङ्गलवर्णा "कपोलदेशे कलमाग्रपिङ्गलाः" इति कुमारे पिङ्गलोपमानत्वेन वर्णनात् । कलयति परस्वं कल–अमच् । ४चौरे पु० मेदि० ।

कलमोत्तम पु० ७त० । गन्धशालौ राजनि० ।

कलम्ब पु० कल–क्षेपे अम्बच् कड–मदे अम्बच् डस्य लो वा । शाकनाडिकायां तस्या आहारकाले क्षिप्यमाणत्वात् तथात्वम् । २शरे अमरः तस्य अरिं प्रति क्षिप्यमाणत्वात् तथात्वम् ३कदम्बवृक्षे विश्वः कामिनां मादहेतुत्वात्तथात्वम् । संज्ञायां कन् । कलम्बक–धाराकदम्बे राजनि० ।

कलम्बिका स्त्री कलम्बीव कायति कै–क संज्ञायां ह्रस्वः । १ग्रीवापश्चाद्भागस्थनाड्यां तस्याः कलम्बीतुल्यसुषिरमध्यत्वात् तथात्वम् । स्वार्थे कन् ह्रस्वः । (कलमी) २शाकभेदे च ।

कलम्बी स्त्री के जले लम्बते लबि–अवस्रंसने अच् गौरा० ङीष् । (कलमी) शाकभेदे तस्या जले लम्बमानत्वात्तथात्वम् । भावप्र० तद्गुणाद्युक्तं यथा । "कलम्बी शतपर्वी च कथ्यन्ते तद्गुणा अथ । कलमी स्तन्यदा प्रोक्ता मधुरा शुक्रकारिणी" । ति०त० स्मृतौ अस्यादग्ध्याभक्ष्यत्वमुक्तम् "तुम्बी गोमांसतुल्या स्यात् कलम्बी गोवधात्मिका" हरिशयने चास्या अभक्ष्यत्वमभक्ष्यशब्दे उक्तम् । उभयोरैक्यात् कलम्ब्यादयोऽप्यत्र शब्दरत्ना० ।

कलम्बु(म्बू) स्त्री के जले लम्बते लबि–उण् ७त० । (कलमी) शाकभेदे शब्दर० । अप्राणिजातिवाचकत्वात् वा ऊङ् ।

कलम्बुट न० के जले लम्बते लबि–बा० उट ३त० । १हैयङ्गवीने राजनि० । २नवनीते हारा० । तयोर्जलोपरि प्लवमानत्वात्तथात्वम् ।

कलरव पुंस्त्री कलो रवोऽस्य । १पारावते (पायरा) अमरः २कोकिले राजनि० । स्त्रियां जातित्वादुभयतो ङीष् । ३कलध्वनियुक्ते त्रि० मेदि० कर्म० । ४मधुराव्यक्ते रवे पु०

कलल पुंन० कल–वृषा० कलच् । १गर्भवेष्टचर्मणि अमरः कललशब्ददर्शितभागवतोक्ते एकरात्रेण पच्यमानगर्भाद्यवयवभूते २रेतोविकारभेदे । उदा० तत्रैव शब्दे दृश्यम् ।

कललज पु० कललमिव जायते जन–ड कर्म० । १राले राजनि० । २गर्भे च ।

कललजोद्भव पु० उद्भवत्यस्मात् उद्–भू–अपादाने अप् ६त० । १शालवृक्षे राजनि० । ततो रालरूपकललजस्योत्पत्तेः तस्य तथात्वम् ।

कलविङ्क(ङ्ग) पुंस्त्री कलं वङ्क(ङ्ग)ते वगि(वकि)–गतौ अच् पृषो० अत इत्त्वम् । १चटके खगे, अमरः जातित्वेऽपि संयोगोपधत्वात् स्त्रियां टाप् । "पोष्णाय कलविङ्कान् वर्णाभ्यस्तित्तिरान्" यजु० २४,२० । "कल-

विङ्कोलोहितादिः पुष्करसादश्च त्वाष्ट्राः” २४,२०। अश्वमेधपशुदेशकथने। अभक्ष्यप्रकरणे चक्षाभक्ष्यतोक्ता मनुना “कलविङ्कं प्लवं हंसं चक्राह्वं ग्रामकुक्कुटम्” तन्मांसगुणाः तस्य संज्ञाभेदश्च सुश्रुते उक्तो यथा—

“चकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रकतित्तिरकुररयाष्टीकवर्त्तकप्रभृतयस्त्वाह्वना विष्किराख्यवः शीतमधुराः कषाया दोषशमनाश्च”। सुश्रुपादैर्हननात्त्राह्वनाः। भावप्र० विशेषतस्तन्मांसगुणा उक्ता यथा—

“चटकः कलविङ्कः स्यात् कुलिङ्गः कालकण्ठकः। कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः सन्निपातहरो वेश्मचटकस्यातिशुक्रलः” २कलिङ्गृद्धे मेदि०।

कलश पु० कलं मधुराव्यक्तं ध्वनिं शंसति शु–गतौ बा० ड। १घटे। कर्षशब्दे दर्शितभावप्रकाशोक्ते २मानभेदे च।

कलशदिर् स्त्री कलशस्य दीर्दरणम् दॄ–भावे क्विप्। यज्ञियकलशविदारणे “अथ कलशदिराम् यदि कलशो दीर्य्येतानुविपश्ध्वमिति ब्रूयात्” “यद्यनीतास्तु दक्षिणासु कलशो दीर्य्येत तत्राप्येकामेव गां दद्यादथावभृथादेवो देत्य पुनर्दीर्य्येत पुनर्यज्ञोह्येव तत्र प्रायश्चित्तिरिति कलशदिराम्” शत० ब्रा० ४,५,१०,७।

कलशपोतक पु० नागभेदे “आर्य्यकश्चोपकश्चैव नागः कलशपोतकः” भा० आ० २५ अ०।

कलशि स्त्री कं जलं लाति ला–क तथा सती शीर्य्यति शॄ–डि। (चाकुलिया) १पृश्निपर्ण्याम् अमरः २घटे हेमच० “कलशिमुदधिगुर्वीं बल्लवा लोडयन्ति” माघः। अस्य इदिकारान्तत्वात् वा ङीप् कलशीत्यप्युभयत्र।

कलशीकण्ठ त्रि० कलश्याः कण्ठ इव कण्ठोऽस्य। १कलशीकण्ठतुल्यकण्ठान्विते २ऋषिभेदे पु० ततः गोत्रप्रत्ययस्य बहुषु उपका० वा लुक्। कालशीकण्ठयः कलशीकण्ठाः।

कलशीपदी स्त्री कलशीव पादावस्याः अन्त्यलोपः समा० कुम्भपद्या० ङीप् पद्भावश्च। कुम्भाकारपादयुतायां स्त्रियाम्।

[अगस्त्ये मुनौ कुम्भसम्भवशब्दे तत्कथा।

कलशी(सी)सुत पु० कलश्याः(स्याः) सुत इव तत्रोत्पन्नत्वात्।

कलशोदर पु० कलश इव उदरमस्य। दानवभेदे “सुबाहुः सत्यबाहुश्च वरुणः कलशोदरः” हरिवं० २४०। २कुम्भाकारोदरयुक्ते त्रि० स्त्रियां वा ङीप्।

कलस पु० केन जलेन लसति लस–अच् ३त०। १घटे हेमच०। तन्नामनिरुक्तिः “कलां कलां गृहीत्वा तु देवानां विश्वकर्म्मणा। निर्म्मितोऽयं स वै यस्मात् कलसस्तेन कथ्यते” निरुक्त० उक्ता। “सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः। पीयूषधारणार्थाय निर्म्मितो विश्वकर्म्मणा। कलाः कलास्तु देवानामपि तास्ताः पृथक् पृथक्। यतः कृतास्तु कलसास्ततस्ते परिकीर्त्तिताः” कालि० पु० ८७ अ० पृषो० साधनम्। कर्मादौ स्थाप्यकलसमानमुक्तं शा० ति० यथा—“पञ्चाशदङ्गुलो व्यासं उत्सेधः षोडशाङ्गुलः। कलसानां प्रमाणन्तु मुखमष्टाङ्गुलं मतम्। षट्‌त्रिंशदङ्गुलं कुम्भं विस्तारोन्नतिशालिनम्। षोडशं द्वादशं वापि ततो न्यूनं न कारयेत्”। पुष्याभिषेके कालिकापु० ८७। पुष्याभिषेके स्थाप्यघटनामभेदस्तत्स्थापनप्रकारश्च तत्रैवाध्याये यथा “नवैव कलसाः प्रोक्ता नामतस्तान्निबोधत। गोह्योपगोह्यौ मरुतो मयूखश्च तथाऽपरः। मनोहा ऋषिभद्रश्च विजयस्तनुशोषकः। इन्द्रियघ्नोऽथ विजयो नवमः परिकीर्त्तितः। तेषामेव क्रमान्नृप! नव नामानि यानि तु। शृणु तान्यपराण्येव शान्तिदानि सदैव हि। क्षितीन्द्रः प्रथमः प्रोक्तो द्वितीयो जलसम्भवः। पवनाग्नी ततो द्वौ तु यजमानस्ततः परः। कोषसम्भवनामा तु षष्ठः स परिकीर्त्तितः। सोमस्तु सप्तमः प्रोक्तश्चादित्यस्तु तथाष्टमः। विजयो नाम कलसो योऽसौ नवम उच्यते। स तु पञ्चमुखः प्रोक्तो महादेवस्वरूपधृक्। घटस्य पञ्चवक्त्रेषु पञ्चवक्त्रः स्वयं तथा। यथाकाष्ठं स्थितः सम्यक् वामदेवादिनामतः। मण्डलस्य च मध्यान्तः पञ्चवक्त्रघटं न्यसेत्। क्षितीन्द्रं पूर्वतो न्यस्य पश्चिमे जलसम्भवम्। वायव्ये वायवं न्यस्य आग्नेये ह्यग्निसम्भवम्। नैरृते यजमानन्तु ऐशान्यां कोषसम्भवम्। सोममुत्तरतो न्यस्य सौरं दक्षिणतो न्यसेत्। न्यस्यैवं कलसांश्चैव तेषु चैतान् विचिन्तयेत्। कलसानां मुखे ब्रह्मा ग्रीवायां शङ्करः स्थितः। मूले तु संस्थितो विष्णुर्मध्ये मातृगणाः स्थिताः। दिक्पाला देवताः सर्व्वे वेष्टयन्ति दिशो दश। कुक्षौ तु सागराः सप्त सप्त द्वीपाश्च संस्थिताः। नक्षत्राणि ग्रहाः सर्व्वे तथैव कुलपर्व्वताः। गङ्गाद्याः सरितः सर्व्वा वेदाश्चत्वार एव च। कलसे संस्थिताः सर्व्वे तेषु तानि विचिन्तयेत्। रत्नानि सर्व्वबीजानि पुष्पाणि च फलानि च। वज्रमौक्तिकवैदूर्य्यमहापद्मेन्द्रस्फाटिकैः। सर्व्वधान्यमयं बिल्वं नागरोडुम्बरं तथा। बीजपूरकजम्बीरकाम्रातकदाडिमान्। यवं शालिञ्च नीवारं गोधूमं

सितसर्षपम् । कुङ्कुमागुरुकर्पूरमदनं रोचनं तथा । चन्दनञ्च तथा मांसीमेलां कुष्ठं तथैव च । कर्पूरपत्र चण्डञ्च जलं निर्यासकाम्बुदम् । शैलेयं बदरं जाती पत्रपुष्पे तथैव च । काकशाकं तथा पृक्कां देवीं पर्णकमेव च । वचां धात्रीं समङ्गिणां तुरुष्कं मङ्गलाष्टकम् । दूर्वां मोहनिकां भद्रां शतमूलीं शतावरीम् । पर्णालीं सरलां क्षुद्रां सहदेवीं गजाङ्कुशाम् । पूर्णकोषां सितां पाठां गुञ्जां सुरसिकालसौ । व्यामकं गजदन्तञ्च शतपुष्पां पुनर्नवाम् । ब्राह्मीं देवीं शिवां रुद्रां सर्व्वसम्बानिकां तथा । समाहृत्य शुभानेतान् कलसेषु निधापयेत् । कलसस्य यथा देवान् विधिं शम्भुं गदाधरम् । यथाक्रमं पूजयित्वा शम्भुं मुख्यतया यजेत् । प्रासादेन तु मन्त्रेण शम्भुतन्त्रेण शङ्करम् । प्रथमं पूजयेन्मध्ये नानानैवेद्यवेदनैः” ।

सर्व्वकर्म्मोपयोगिकलसस्थापनविधिः रुद्रकल्पे दर्शितो यथा ओँ भूरसीतिमन्त्रेण मण्डलात्पूर्वस्यां दिशि भूमिस्पर्शः । ओँ ओषधयः समवन्तेति तत्र धान्यपुञ्जीकरणम् । ओँ पवित्रेस्थो पुनात्विति सप्तभिर्द्दर्भपवित्रैः कलसपवित्रीकरणम् । ओँ आजिघ्रेति धान्यपुञ्जोपरि कलसस्थापनम् । ओँ स्थिरोभवेति स्थिरीकरणम् । ओँ मही द्यौरिति जलेन कलसपूरणम् । ओँ या ओषधीरिति तत्र सर्वौषधिप्रक्षेपः । ओँ व्रीहयश्च म इति धान्यम् । ओँ हिरण्यगर्भ इति हिरण्यम् । ओँ अश्वत्थे व इति पञ्च पल्लवान् । ओँ काण्डात्काण्डादिति दूर्वाः । ओँ स्योना पृथिवीति पञ्च सप्त वा मृदश्च दापयेत् । ओँ धान्यमसीति पूर्णपात्रे धान्यनिधानम् । ओँ पूर्णादर्वीति तस्यैव पूर्णपात्रस्य कलसोपरिनिधानम् । ओँ याः फलिनीरिति पूर्णपात्रे नारिकेलादिफलस्थापनम् । ओँ सुजात इति वासोयुग्मेन वाससा वा पवित्रेण वा कलससंवेष्टनम् । ततः कलसे गङ्गाद्यावाहनम् “इमं मे गङ्गे ! यमुने ! सरस्वति ! सितासिते सरितौ ! पावका नः सरस्वती । ओँ अम्बावतीर्गोमतीः । ओँ पञ्चनद्यः । ओँ “प्रपद्ये वरुणं देवं यादसांपतिमीश्वरम् । याचितं देहि मे तीर्थं सर्वपापापनुत्तये” । ओँ “गङ्गे ! त्वं सर्वतीर्थानामाश्रयोऽसि यतस्ततः । यजमानाभिषेकार्थमेहि पापं विनाशय” । “तापनि ! यमुने ! देवि ! त्रिषु लोकेषु विश्रुते ! यजमानाभिषेकार्थमेहि पापं विनाशय । सरस्वति ! नमस्तुभ्यं सरेश्वरि ! हरिप्रिये ! । यजमानाभिषेकार्थमेहि पापं व्यपोह वै” इति मन्त्रैः ओँ कलसस्य मुखे विष्णुरित्यादिकैः प्रसन्नोभव सर्वदेत्यन्तैर्मन्त्रैश्चावाहनम् । ओँ मनोजूतिरितिमन्त्रान्ते “कलस ! सुप्रतिष्ठितोभवेति प्रतिष्ठा । ततोगन्धादिभिः कलसपूजनम्” ।

अत्र प्रतीकमात्रं प्रदर्शितम् समग्रमन्त्राश्च मत्कृततुलादानादिपद्धतौ २२ पृष्ठादौ ज्ञेयाः । अत्र शाखिभेदात् मन्त्रभेदास्तु तत्तद्ग्रन्थेऽन्वेष्याः नवरात्रे कलसस्थापने विशेषः नि० सि० उक्तो यथा । भार्गवार्चनदीपिकायां देवीपुराणे “त्वाष्ट्रवैधृतियुक्ता चेत् प्रतिपच्चाम्बिकार्चने । तयोरन्ते विधातव्यं कलशारोपणं गृहेति” । चित्रावैधृतियुतापि द्वितीयायुता चेत् सैव ग्राह्येत्युक्तं दुर्गोत्सवे । “भद्रान्विता चेत् प्रतिपत्तु लभ्यते विरुद्धयोगैरपि सङ्गता सती । सैवापराह्णे विबुधैर्विधेया स्त्रीपुत्रराज्यादिविवृद्धिहेतुरिति” । यदा तु वैधृत्यादिपरिहारेण प्रतिपन्न लभ्यते । तदोक्तं तत्रैव कात्यायनेन । “प्रतिपद्याश्विने मासि भवेत् वैधृतिचित्रयोः । आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकमिति” । भविष्येऽपि चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप ! । त्याज्या अंशास्त्रयस्त्वाद्यास्तुरीयेऽंशे तु पूजनमिति” । रुद्रयामलेऽपि “वैधृतौ पुत्रनाशः स्याच्चित्रायां धननाशनम् । तस्मान्न स्थापयेत्कुम्भं चित्रायां वैधृतौ तथा । संपूर्णा प्रतिपद्देव ! चित्रायुक्ता यदा भवेत् । वैधृत्या वापि युक्ता स्यात्तदा मध्यन्दिने रवौ । अभिजित्तु मुहूर्त्तं यत्तत्र स्थापनमिष्यते” । “इदं कलसस्थापनं रात्रौ न कार्य्यम् । “न रात्रौ स्थापनं कार्य्यं न च कुम्भाभिषेचनमिति” मात्स्योक्तेः “भास्करोदयमारभ्य यावत्तु दश नाडिकाः । प्रातः काल इति प्रोक्तः स्थापनारोपणादिषु” इति विष्णुधर्मोक्तेश्च । रुद्रयामले “स्नानं माङ्गलिकं कृत्वा ततो देवीं प्रपूजयेत् । शुभाभिर्मृत्तिकाभिश्च पूर्वं कृत्वा तु वेदिकाम् । यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान् । तत्र संस्थापयेत्कुम्भं विधिना मन्त्रपूर्वकम् । सौवर्णं राजतं वापि ताम्रं मृण्मयमेव वेति” । “कलसं जलसंभृतं पुरः” नैष० ।

कलसि स्त्री केन लसति लस–इन् । १ घटे २पृश्निपर्ण्याञ्च (चाकुलिया) हेम० । कृदिकारान्तत्वात् वा ङीप् कलसीत्युभयत्र “अलम्बितकर्णशष्कुलीकलसीकं रचयन्नवोचत” नैष० ।

कलह पुं० कलं कामं हन्त्यत्र हन–बा० आधारे ड । अङ्क-

श्वादि । विवादे वाग्विवादे (झकड़ा) "वत्स ! पुत्रेषु पुत्रैर्मे कलहोऽन भविष्यति" भा० आ० ४८ । "न विवादे न कलहे न सेनायां न सङ्करे" मनुः । २युद्धे अमरः । "विधिवृधतः कलहमवेक्ष्य विद्विषः" "भाविकलह-फलयोगमसौ" माघः ।

कलहंस पुंस्त्री कलप्रधानो हंसः । १(कालहाँस) हंसभेदे २राजहंसे ३न्दपश्रेष्ठे च मेदि० । "कुन्दावदाताः कल-हंसमालाः प्रतीयिरे श्रोत्रसुखैर्निनादैः" भट्टिः । "कलसं जलसंभृतं पुरः कलहंसः कलयाम्बभूव सः" नैष० "वधूदुकूलं कलहंसलक्षणम्" कुमा० । स्त्रियां जाति-त्वात् ङीष् । "कलहंसीषु मदालसं गतम्" रघुः । ४पर-मात्मनि ब्रह्मणि च शब्दर० ।

कलहकार त्रि० कलहं करोति कृ-हेत्वादावपि न ट किन्तु अण् उप० स० । कलहकारके । "हन्तुं कलहकारो-ऽसौ शब्दकारः पपात खम्" भट्टिः ।

कलहनाशन च० कलहं नाशयति नश-णिच्-ल्यु । पूतिकरञ्जे शब्दरत्न० कलहनाशकता चास्य कार्मण विद्यायां विख्याता ।

कलहप्रिय पु० कलहः प्रियोऽस्य । १नारदे ऋषौ, तस्य कलह-प्रियत्वं पुराणादौ प्रसिद्धम् । २शारिकापक्षिण्याम् स्त्री राजनि० ।

कलहान्तरिता स्त्री अवस्थान्तरप्राप्ते नायिकाभेदे । सा च "चाटुकारमपि प्राणनाथं दोषादपास्य या । पश्चात्ताप-माप्नोति कलहान्तरिता तु सा" सा० द० उक्तलक्षणा । यथा "नो चाटुश्रवणं कृतं न च दृशा हारोऽन्तिके वीक्षितः कान्तस्य प्रियहेतवे निजसखीवाचोऽपि दूरी-कृताः । पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया पाणिभ्यामवरुध्य हन्त सहसा कण्ठे कथं नार्पितः ?" ।

कलहाय कलहं करोति कलह+क्यङ् नामधातुः आत्म० अक० सेट् । कलहायते अकलहायिष्ट । कलहायाम् बभूव आस चक्रे । कलहायमानः कलहायितः ।

कला स्त्री कलयति कलते वा कर्त्तरि अच् कल्यते ज्ञायते कर्मणि अच् वा । चन्द्रमण्डलस्य षोडशे भागे यथा च चन्द्रस्य षोड़शभागस्य कलाशब्दवाच्यत्वम् । तथा कालमा० उक्तं यथा स्कान्दे——

"अमा षोडशभागेन देवि ! प्रोक्ता महाकला । संस्थिता परमा माया देहिनां देहधारिणी । अमादिपौर्णमास्यन्ता या एव शशिनः कलाः । तिथयस्ताः समाख्याताः षोड़शैव वरानने !" इति "अयमर्थः या महामाया आधारशक्ति-रूपा देहिनां देहधारिणी संस्थिता सा चन्द्रमण्डलस्य षोड़शभागेन परिमिता चन्द्रदेहधारिण्यमानाम्नी महा-कलेति प्रोक्ता क्षयोदयरहिता नित्या तिथिसंज्ञिकैव इतरा अपि पञ्चदश कला दिवसव्यवहारोपयोगिन्यः क्षयोदयवत्यः, पञ्चदश तिथयो भवन्तीति तिथयः षोडशैवेत्यविरुद्धं वचनमिति । श्रुतिस्त्वस्मिन्नर्थे पक्षनिर्णय एवोदाहृता । "तस्य रात्रय एव पञ्चदश कला ध्रुवै-वास्य षोड़शी कलेति" । एवञ्च सत्यत्र सामान्यविशेषरूपेण तिथिद्वैविध्यमुक्तं भवति तत्र येयममेत्युक्ता क्षयोदय-विवर्जिता ध्रुवा षोडशी कला तद्युक्तः कालस्तिथि-सामान्यं यास्त्ववशिष्टाः वृद्धिक्षयोपेताः पञ्चदश कला-स्ताभिर्विशिष्टाः कालविभागास्तिथिविशेषाः । तासां पञ्च-दशानामेकैकां कलां वह्न्यादयः प्रजापत्यन्ताः पञ्च-दश देवताः क्रमेण पिबन्ति । तत्र वह्निना या कला प्रथमं पीयते सा प्रथमेत्युच्यते, तया युक्तः कालविशेषः प्राय व्यवाचिना प्रतिपच्छब्देनाभिधीयते । एवं द्वितीयादीनां पञ्चदश्यन्तानां तिथीनां नामान्यवगन्तव्यानि, ता एताः कृष्णपक्षे तिथयो भवन्ति । पुनश्च ताः पीताः कलास्तेनैव क्रमेण तत्र तथा वह्न्यादिदेवताभ्यो निर्गत्य चन्द्रमण्डलं पूरयन्ति ताभिर्युक्ताः कालविशेषाः शुक्लपक्षगताः प्रति-पदाद्यास्तिथयो भवन्ति । वह्न्यादिदेवतानां कलापानं सोमोत्पत्तौ पठितम्, तथा हि "प्रथमां पिबते वह्निर्द्वि-तीयां पिबते रविः । विश्वेदेवास्तृतीयान्तु चतुर्थीं सलि-लाधिपः । पञ्चमीं तु वषट्कारः षष्ठीं पिबति वासवः । सप्तमीमृषयो दिव्या अष्टमीमज एकपात् । नवमीं कृष्णपक्षे-ऽस्य यमः प्राश्नाति वै कलाम् । दशमीं पिबते वायुः पिब-त्येकादशीमुमा । द्वादशीं पितरः सर्वे समं प्राश्नन्ति भागशः । त्रयोदशीं धनाध्यक्षः कुवेरः पिबते कलाम् । चतुर्दशीं पशुपतिः पञ्चदशीं प्रजापतिः । निष्पीतः कल-या शेषश्चन्द्रमा न प्रकाशते । कला षोड़शिका या सा त्वपः प्रविशते सदा । अमायां तु सदा सोम ओषधीः प्रति-पद्यते । तमोषधिगतं गावः पिबन्त्यम्बुगतञ्च यत् । तत्-क्षीरममृतं भूत्वा मन्त्रपूतं द्विजातिभिः । हुतमग्निषु यज्ञेषु पुनराप्यायते शशी । दिने दिने कलावृद्धिः पौर्णमास्यां तु पूर्णतेति" ।

एवं षोडशानां कलानामेका नित्या अन्या क्षयोदय-शालिनी, तदेतद् स्पष्टमुक्तम् शत० ब्रा० १४,४,३,२२ ।

यथा "प्रजापतिः षोड़शकलस्तस्य रात्रय एव पञ्चदश-कला ध्रुवैवास्य षोड़शी कला स रात्रिभिरेवा च पूर्य्यते ऽप च चीयते सोऽमावास्यां रात्रिमेतया षोड़श्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेतां रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्य" "योऽयमन्नात्मा प्रजापतिः प्रकृतः स एष संवत्सरात्मना विशेषतो निर्दिश्यते रात्रयः अहोरात्राणि तिथय एव प्रतिपदाद्याः ध्रुवैव नित्यैव व्यवस्थिता। एतासां वित्तत्वं वक्तुं तत्साधर्म्यमाह स चन्द्रात्मा प्रजापतीरात्रिभिरेव प्रतिपदाद्याभिरुपचीयमानाभिः शुक्लपक्षे वर्धते कृष्णपक्षे ताभिरेवापचीयमानाभिः कलाभिरपक्षीयते अमावास्यायां ध्रुवैका कला व्यवस्थिता। एवं कलानां वित्तत्वे सिद्धे तदुपचयापचयौ कर्मेत्यभिप्रेत्याह स कलात्मा प्रजापतिरमावास्यां रात्रिं रात्रौ या ध्रुवा कलात्मावस्थितोक्ता एतया षोड़श्या कलया सर्वमिदं प्राणिजातं स्थावरजङ्गमात्मकमनुप्रविश्य यदपः पिबति यच्चौषधीरश्नाति तत् सर्वमेवौषध्यात्मना व्याप्यामावास्यां रात्रिमवस्थाय ततोऽपरेद्युः प्रातर्जायते द्वितीयया संयुक्तो भवति एवमसौ प्रजापतिः पाङ्क्तात्मकः संवृत्तः एवं प्रजापतेः पाङ्क्तकर्मफलत्वमुक्त्वा प्रासङ्गिकमर्थमाह तस्मादिति प्राणिनं न प्रमापयेत् कृकलासस्यापि सरटस्यापि प्राणं न विच्छिन्द्यात्"भा०। चन्द्रकलानां नामभेदादिकमनुपदं वक्ष्यते। "सर्वाभिः सर्वदा चन्द्रस्तं कलाभिर्निषेवते" "ज्योत्स्नान्तराणीव कलान्तराणि"। "कला च सा कान्तिमती कला(व)भृतः" कुमा०। "कलासमग्रेण गृहानमुञ्चता" "कलादधानः सकलाः स्वाभिरुद्भासयन् सौधसिताभिराशाः" "निधिरम्भसामुपचयाय कलाः" इति च माघः कलाधरः कलाभृत् कलानिधिः कलावान्। २अवयवमात्रे च। "सोमसूर्य्याग्निभेदेन मातृकावर्णसम्भवाः। धत्तेति यत्कलास्तत्तन्मण्डलेषु व्यवस्थिताः"शा०ति०।"सोममण्डलस्य षोड़शकलता सूर्य्यमण्डलस्य द्वादशकलता वह्निमण्डलस्य दशकलतोक्ता" तासां नामानि ध्येयरूपाणि च तत्र दर्शितानि यथा—

"अमृता मानदा पूषा तुष्टिःपुष्टीरतिर्धृतिः। शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा। पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः १६। तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः। सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा। कभाद्या वसुदाः सौराः टठान्ता द्वादशेरिताः १२। "धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी। सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि। डादीनां दशवर्णानां कला धर्मप्रदा इमाः"१०। अभयेष्टकराध्येया श्वेतपीतारुणाः क्रमात्"।

तथा अकारोकारमकारनादबिन्द्वात्मकप्रणवस्य पञ्चाशत्कलात्मकतामुक्त्वा तन्नामधेयरूपाण्यपि तत्रोक्तानि यथा— "तारस्य पञ्चभेदस्य पञ्चाशद्वर्णभाः कलाः। सृष्टिर्ऋद्धिःस्मृतिर्मेधा कान्तिर्लक्ष्मीर्धृतिः स्थिरा। स्थितिः सिद्धिरिति प्रोक्ता कचवर्गकलाः १० क्रमात्। अकाराद्ब्रह्मणोत्पन्नास्तप्तचामीकरप्रभाः। एताः करधृताक्षस्रक्पङ्कजद्वयकुण्डिकाः। जरा च पालिनी शान्तिरैश्वरी रतिकामिके। वरदा ह्लादिनी प्रीतिर्दीर्घा सृष्टतवर्गजाः१०। उकाराद्विष्णुनोत्पन्नास्तमालदलसन्निभाः। अभीतिमञ्चक्रेष्टबाहवः परिकीर्त्तिताः। तीक्ष्णा रौद्री भया निद्रा तन्द्रा क्षुत् क्रोधिनी क्रिया। उत्कारी मृत्युरेताः स्युः कथिताः पवर्गजाः १०। रुद्रेण मार्णादुत्पन्नाः शरच्चन्द्रसमप्रभाः। उद्वहन्त्योऽभयं शूलं कपालं बाहुभिर्वरम्। ईश्वरेणोदिता विन्दोःपीताश्वेताऽरुणाऽसिताः४। अनन्तास्ताःषवर्गस्था जवाकुसुमसन्निभाः। अभयं हरिणं वह्निं दधाना बाहुभिर्वरम्। निवृत्तिः सुप्रतिष्ठा स्याद्विद्या शान्तिरनन्तरम्। इन्धिका दीपिका चैव रेचिका मोचिकापरा। सूक्ष्मा सूक्ष्मामृता ज्ञानामृता चाप्यायिनी तथा। व्यापिनी व्योमरूपा स्युरनन्ताः स्वरसंगताः१६। सदाशिवेन संजातानादादेताः सितत्विषः। अक्षस्रक्पुस्तकगुणकपालाख्यकराम्बुजाः। न्यासे तु योजयेदादौ षोड़श स्वरजाः कलाः। इति पञ्चाशदाख्याताः कलाः सर्वसमृद्धिदाः" कल्यते ज्ञायतेऽनेन। अंशरूपे ३उपाधिभेदे च। "तस्मै सहोवाच इहैवान्तःशरीरे, सौम्य! स पुरुषो यस्मिन्नेताः षोड़श कलाः प्रभवन्तीति" प्रश्नोपनिषत्। "तस्मै स होवाच। इहैवान्तः शरीरे हृदयपुण्डरीकाकाशमध्ये हे सौम्य! स पुरुषो न देशान्तरे विज्ञेयो यस्मिन् एता उच्यमानाः षोड़श कलाः प्राणाद्याः प्रभवन्त्युत्पद्यन्त इति षोड़शकलाभिरुपाधिरूपाभिः सकल इव निष्कलः पुरुषो लक्ष्यतेऽविद्ययेति"भाष्यम्। "पुरुषस्य षोड़शकलत्वं न साक्षात्सावयवत्वेन, किन्तु कलाजनकत्वेन तदुपाधिमत्त्वादिति वक्तुं यस्मिन्नेता इति वाक्यतात्पर्यमाह षोडशकलाभिरिति" आनन्द०

यथा च पुरुषस्य षोडशकलत्वं तथोक्तं तत्रैव

प्रश्नोपनिषदि शङ्कराचार्य्यकृततद्भाष्ये च यथा—
"स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति" उप०। "तदुपाधिकलाध्यारोपापनयनेन विद्यया स पुरुषः केवलो दर्शयितव्य इति कलानां तत्प्रभवत्वमुच्यते। प्राणादीनामत्यन्तनिर्विशेषे ह्यद्वये शुद्धे तत्त्वे शक्यतेऽध्यारोपमन्तरेण प्रतिपाद्यप्रतिपादनादिव्यवहारः कर्त्तुमिति कलानां प्रभवस्थित्यप्यया आरोप्यन्ते अविद्याविषयाश्चैतन्याव्यतिरेकेणैव हि कला जायमानास्तिष्ठन्त्यः प्रलीयमानाश्च सर्व्वदा लक्ष्यन्ते। अत एव भ्रान्ताः केचिदग्निसंयोगाद् घृतमिव घटाद्याकारेण चैतन्यमेव प्रतिक्षणं जायते नश्यतीति तन्निरोधे शून्यमिव सर्व्वमिति। अपरे घटादिविषयं चैतन्यं चेतयितुर्नित्यस्यात्मनोऽनित्यं जायते विनश्यतीति। अपरे चैतन्यं भूतधर्म्म इति लौकायतिकाः। अनपायोपजननधर्म्मकचैतन्यमात्मैव नामरूपाद्युपाधिधर्म्मैः प्रत्यवभासते। "सत्यं ज्ञानमानन्दं ब्रह्म" "विज्ञानघन एवेत्यादि"श्रुतिभ्यः। स्वरूपाव्यभिचारात् यथा यथा यो यः पदार्थो विज्ञायते तथा तथा ज्ञायमानत्वादेव तस्य तस्य चैतन्यस्याव्यभिचारित्वं वस्तु च भवति किञ्चिन्न ज्ञायत इति चानुपपन्नम्। रूपञ्च दृश्यते न चास्ति चक्षुरिति वत्। व्यभिचरति तु ज्ञानं, ज्ञेयं न व्यभिचरति कदाचिदपि। ज्ञेयाभावेऽपि ज्ञेयान्तरेभावाज्ज्ञानस्य। न हि ज्ञानेऽसति ज्ञेयं नाम भवति कस्यचित् सुषुप्तेऽदर्शनात् ज्ञानस्यापि सुषुप्तेऽभावाज्ज्ञेयाज्ज्ञानस्वरूपस्य व्यभिचार इति चेन्न। ज्ञेयावभासकस्य ज्ञानस्यालोकवज्ज्ञेयाभिव्यञ्जकत्वात् स्वव्यङ्ग्याभावे आलोकाभावानुपपत्तिवत् सुषुप्ते विज्ञानाभावानुपपत्तेः। न ह्यन्धकारे चक्षुषो रूपानुपलब्धौ चक्षुषोऽभावः शक्यः कल्पयितुमवैनाशिकेन। वैनाशिको ज्ञेयाभावे ज्ञानाभावं कल्पयत्येवेति चेत्? येन तदभावं कल्पयेत्तस्याभावः केन कल्प्यत इति वक्तव्यम् वैनाशिकेन। तदभावस्यापि ज्ञेयत्वाज्ज्ञानाभावे ज्ञानाभाव इति चेत्? न, अभावस्यापि ज्ञेयत्वाभ्युपगमादभावोऽपि ज्ञेयोऽभ्युपगम्यते वैनाशिकैः, नित्यञ्च तदव्यतिरिक्तञ्चेज्ज्ञानं नित्यं कल्पितं स्यात्तदभावस्य च ज्ञानात्मकत्वादभावत्वं वाङ्मात्रमेव न परमार्थतोऽभावत्वमनित्यत्वं च ज्ञानस्य। न च नित्यस्य ज्ञानस्याभावो-नाममात्राध्यारोपे किमच्छिन्नम्। अथाभावो ज्ञेयोऽपि सन् ज्ञानव्यतिरिक्त इति चेन्न तर्हि ज्ञेयाभावे ज्ञानाभावः ज्ञेयं ज्ञानव्यतिरिक्तं न तु ज्ञानं ज्ञेयव्यतिरिक्तमिति चेन्न। शब्दमात्रत्वाद्विशेषानुपपत्तेः। ज्ञेयज्ञानयोरेकत्वञ्चेदभ्युपगम्यते—ज्ञेयं ज्ञानव्यतिरिक्तं न ज्ञेयव्यतिरिक्तं ज्ञानम् ज्ञेयव्यतिरिक्तं नेति तु शब्दमात्रमेव तद्वह्निरग्निव्यतिरिक्तोऽग्निर्न वह्निव्यतिरिक्त इति यद्वदभ्युपगम्य ज्ञेयव्यतिरेके तु ज्ञानस्य ज्ञेयाभावे ज्ञानाभावानुपपत्तिः सिद्धा। ज्ञेयाभावेऽदर्शनादभावो ज्ञानस्येति चेन्न सुषुप्तेरित्यभ्युपगमात्। वैनाशिकैरभ्युपगम्यते हि सुषुप्तेऽपि विज्ञानास्तित्वं, तत्रापि ज्ञेयसत्त्वमभ्युपगम्यते ज्ञानस्य स्वेनैवेति चेन्न भेदस्य सिद्धत्वात्। सिद्धं ह्यभावज्ञेयविषयस्य ज्ञानस्याभावज्ञेयव्यतिरेकाज्ज्ञेयज्ञानयोरन्यत्वम्। न हि तत्सिद्धं मृतमिवोज्जीवयितुं पुनरन्यथा कर्त्तुं शक्यते वैनाशिकशतैरपि ज्ञानस्य ज्ञेयत्वमेवेति। तदप्यन्येन तदप्यन्येनेति त्वत्पक्षेऽतिप्रसङ्ग इति चेन्न तद्विभागोपपत्तेः। सर्व्वस्य यदा हि सर्व्वं ज्ञेयं कस्यचित्तदा तद्व्यतिरिक्तं ज्ञानं ज्ञानमेवेति द्वितीयो विभाग एवाभ्युपगम्यतेऽवैनाशिकैः। न तृतीयस्तद्विषय इत्यनवस्थानुपपत्तिः ज्ञानस्य स्वेनाविज्ञेयत्वे सर्व्वज्ञत्वहानिरिति चेत्? सोऽपि दोषस्तस्यैवास्तु किन्तन्निवर्हणेनास्माकमनवस्थादोषश्च ज्ञानस्य ज्ञेयत्वाभ्युपगमादवश्यञ्चैव वैनाशिकानां ज्ञानं ज्ञेयम् स्वात्मना चाविज्ञेयत्वेनानवस्थाऽनिवार्य्या। समान एवायं दोष इति चेन्न ज्ञानस्यैकत्वोपपत्तेः। सर्व्वदेशकालपुरुषाद्यवस्थमेकमेव ज्ञानं नामरूपाद्यनेकोपाधिभेदात् सवित्रादिजलादिप्रतिबिम्बवदनेकतयावभासत इति। नाऽसौ दोषः। तथा चेदिहेदमुच्यते। ननु श्रुतेरिहैवान्तःशरीरे परिच्छिन्नः कुण्डबदरवत्पुरुष इति, न प्राणादिकलाकारणत्वात्। न हि शरीरमात्रपरिच्छिन्नस्य प्राणस्य श्रद्धादीनां कलानां कारणत्वं प्रतिपत्तुं शक्नुयात्। कलाकार्य्यत्वाच्च शरीरस्य। न हि पुरुषकार्य्याणां कलानां कार्य्यं सच्छरीरं कारणकारणं स्वस्य पुरुषं कुण्डबदरमिवाभ्यन्तरं कुर्य्यात्, बीजवत्स्यादिति चेत्? यथा बीजकार्य्यो वृक्षस्तत्कार्य्यञ्च फलं स्वकारणकारणं बीजमभ्यन्तरीकरोत्याम्रादि तद्वत्पुरुषमभ्यन्तरीकुर्य्यात् शरीरं स्वकारणकारणमपीति चेन्न अन्यत्वात् सावयवत्वाच्च। दृष्टान्ते कारणबीजाद्वृक्षफलसंवृतान्यन्यान्येव

बीजानि दार्ष्टान्तिके तु स्वकारणकारणभूतः स एव पुरुषः शरीरेऽभ्यन्तरीकृतः श्रूयते । बीजवृक्षादीनां सावयवत्वाच्च स्यादाधाराधेयत्वं निरवयवश्च पुरुषः सावयवाश्च कलाः शरीरञ्च एतेनाकाशस्यापि शरीराधारत्वमनुपपन्नं किमुताकाशकारणस्य पुरुषस्य तस्मादसमानो दृष्टान्तः ! किन्दृष्टान्तेन वचनात् स्यादिति चेन्न वचनस्याकारकत्वात् ; न हि वचनं वस्तुनोऽन्यथाकरणे व्याप्रियते किन्तर्हि यथाभूतार्थद्योतने । तस्मादन्तः शरीर इत्येतद्वचनं अण्डस्यान्तर्व्योमेतिवच्च द्रष्टव्यम् । उपलब्धिनिमित्तत्वाच्च । दर्शनश्रवणमननविज्ञानादिलिङ्गैरन्तःशरीरे परिच्छिन्न इव ह्युपलभ्यते अत उच्यते—अन्तःशरीरे सोम्य ! स पुरुष इति । न पुनराकाशकारणं सन् कुण्डवदरवच्छरीरपरिच्छिन्न इति मनसापीच्छति वक्तुं मूढोऽपि ! किमुत प्रमाणभूता श्रुतिः । यस्मिन्नेताः षोडश कलाः प्रभवन्तीत्युक्तं पुरुषविशेषणार्थं कलानां प्रभवः, स चान्योऽर्थोऽपि श्रुतः केन क्रमेण स्यादित्यत इदमुच्यते । चेतनपूर्विका च सृष्टिरित्येवमर्थं च पुरुषः षोडशकलः पृष्टो यो भारद्वाजेन, स ईक्षाञ्चक्रे ईक्षणं दर्शनं चक्रे कृतवानित्यर्थः । सृष्टिफलक्रमादिविषयं कथमित्युच्यते कस्मिन् कर्तृविशेषे देहादुत्क्रान्तो भविष्याम्यहमेव वा कस्मिन्वा शरीरे प्रतिष्ठितेऽहं प्रतिष्ठास्यामि प्रतिष्ठितः स्यामित्यर्थः”।

“स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियम् । मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोका लोकेषु च नाम च” उपनि०।

“नन्वात्माऽकर्त्ता, प्रधानं कर्तृ, अतः पुरुषार्थं प्रयोजनमुररीकृत्य प्रधानं प्रवर्त्तते महदाद्याकारेण, तत्रेदमनुपपन्नं पुरुषस्य स्वातन्त्र्येणेक्षापूर्व्वकं कर्तृत्ववचनं सत्वादिगुणसाम्ये प्रधाने प्रमाणोपपन्ने सृष्टिकर्त्तरि सति ईश्वरेच्छानुवर्त्तिषु परमाणुषु सत्स्वात्मनोऽप्येकत्वेन कर्त्तृत्वे साधनाभावादात्मन आत्मन्यनर्थकर्तृत्वानुपपत्तेश्च । न हि चेतनावान् बुद्धिपूर्व्वकार्य्यात्मनोऽनर्थं कुर्य्यात्, तस्मात् पुरुषार्थेन प्रयोजनेनेक्षापूर्व्वकमिव नियतक्रमेण प्रवर्त्तमानेऽचेतने प्रधाने चेतनवदुपचारोऽयं—स ईक्षाञ्चक्रे इत्यादिः । यथा राज्ञः सर्व्वार्थकारिणि भृत्ये राजेति इति चेत् ? नात्मनो भोक्तृत्ववत्कर्तृत्वोपपत्तेः। यथा साङ्ख्यस्य चिन्मात्रस्यापरिणामिनोऽप्यात्मनो भोक्तृत्वं तद्वद्वेदवादिनामीक्षादिपूर्वकं जगत्कर्तृत्वमुपपन्नं श्रुतिप्रामाण्यात् ।

तत्त्वान्तरपरिणामादात्मनोऽनित्यत्वाशुद्धत्वानेकत्वनिमित्तचिन्मात्रस्वरूपविक्रियातः पुरुषस्यात्मन्येव भोक्तृत्वे चिन्मात्रस्वरूपविक्रिया न दोषाय । भवतां पुनर्वेदवादिनां सृष्टिकर्तृत्वे तत्त्वान्तरपरिणाम एवेत्यात्मनोऽनित्यत्वादिसर्व्वदोषप्रसङ्ग इति चेन्न, एकस्याप्यात्मनोऽविद्याविषयनामरूपोपाध्यनुपाधिकृतविशेषाभ्युपगमादविद्याकृतनामरूपोपाधिकृतो हि विशेषोऽभ्युपगम्यते आत्मनोबन्धमोक्षादिशास्त्रकृतसंव्यवहारायपरमार्थं” परमार्थतोऽनुपाधिकृतञ्च तत्त्वमेकमेवाद्वितीयमुपादेयं सर्व्वतार्किकबुद्ध्यनवगाह्यमभयं शिवमिष्यते न तत्र कर्तृत्वं भोक्तृत्वं वा क्रियाकारकफलञ्च स्यादद्वैतत्वात्सर्व्वभावानाम् । साङ्ख्यास्त्वविद्याध्यारोपितमेव पुरुषे कर्तृत्वं क्रियाकारकं फलञ्चेति कल्पयित्वाऽऽगमबाह्यत्वात् सन्त्रस्तास्ततः परमार्थत एव भोक्तृत्वं पुरुषस्येच्छन्ति तत्त्वान्तरञ्च प्रधानं पुरुषात् परमार्थवस्तुभूतमेव कल्पयन्तोऽन्यतार्किकनिराकृतबुद्धिविषयाः सन्तो विहन्यन्ते । तथेतरे तार्किकाः साङ्ख्यैरित्येवं परस्परविरुद्धार्थकल्पनात् आमिषार्थिन इव प्राणिनोऽन्योन्यं विरुध्यमाना अर्थदर्शित्वात् परमार्थतत्त्वाद् दूरमेवापकृष्यन्तेऽतस्तन्मतमनादृत्य वेदान्तार्थतत्त्वमेकत्वदर्शनं प्रत्यादरवन्तो मुमुक्षवः स्युरिति तार्किकमते दोषदर्शनं किञ्चिदुच्यतेऽस्माभिः न तु तार्किकतात्पर्य्येण तथैतत् अत्रोक्तम् ।“विवदत्सु तेऽवनिश्चित्य विरोधोद्भवकारणम् । तैः संरक्षितसद्बुद्धिः सुखं निर्व्वाति वेदवित्”। किञ्च—भोक्तृत्वकर्तृत्वयोर्विक्रिययोर्विशेषानुपपत्तेः । का नामासौ कर्तृत्वाज्जात्यन्तरभूता भोक्तृत्वविशिष्टा विक्रिया यतो भोक्तैव पुरुषः कल्प्यते न कर्त्ता । प्रधानन्तु कर्त्त्रैव न भोक्त्रीति नभूक्तं पुरुषश्चिन्मात्र एव स्वात्मस्थो विक्रियते भुञ्जानोऽनन्यान्तरपरिणामेन । प्रधानन्तु तत्त्वान्तरपरिणामेन विक्रियतेऽतोऽनेकमशुद्धमचेतनञ्चेत्यादिधर्म्मवत्तद्विपरीतः पुरुषः । नाऽसौ विशेषो वाङ्मात्रत्वात्प्राग्भोगोत्पत्तेः । केवलचिन्मात्रस्य पुरुषस्य भोक्तृत्वं नाम विशेषो भोगोत्पत्तिकाले चेज्जायते निवृत्ते च भोगे पुनिस्तद्विशेषापेतश्चिन्मात्र एव भवतीति चेन्महदाद्याकारेण च परिणम्य प्रधानं ततोऽपेत्य पुनः प्रधानं स्वरूपेणावतिष्ठत इति अस्यां कल्पनायां न कश्चिद्विशेष इति वाङ्मात्रेण प्रधानपुरुषयोर्विशिष्टविक्रिया कल्प्यते । अथ भोगकालेऽपि चिन्मात्र एव प्राग्वत्पुरुष इति चेत् ? न तर्हि परमार्थतो भोगः पुरुषस्य । भोगकाले चिन्मात्रस्य विक्रिया परमार्थैव, तेन भोगः पुरुषस्येति चेन्न प्रधान-

स्यापि भोगकालेऽविक्रियत्वाद्भोक्तृत्वप्रसङ्गः। चिन्मात्रस्यैव विक्रिया भोक्तृत्वमिति चेदौष्ण्यादसाधारणधर्म्मवतामग्न्यादीनामभोक्तृत्वे हेत्वनुपपत्तिः। प्रधानपुरुषयोर्युगपद्भोक्तृत्वमिति चेन्न प्रधानस्य पारार्थ्यानुपपत्तेः। न हि भोक्त्रोर्द्वयोरितरेतरगुणप्रधानभाव उपपद्यते प्रकाशयोरिवेतरेतरप्रकाशने। भोगधर्म्मवति सत्वाङ्गिनि चेतसि पुरुषस्य चैतन्यप्रतिबिम्बादयोऽविक्रियस्य पुरुषस्य भोक्तृत्वमिति चेन्न पुरुषस्य कलापनयनार्थं मोक्षसाधनं शास्त्रं प्रणीयतेऽविद्याध्यारोपितानर्थापनयनाय शास्त्रप्रणयनमिति चेत्? परमार्थतः पुरुषो भोक्तैव न कर्त्ता प्रधानं कर्त्रेव न भोक्तृ परमार्थसद्वस्त्वन्तरं पुरुषाच्चेतीयं कल्पना ऽऽगमबाह्या व्यर्था निर्हेतुका च इति नादर्त्तव्या मुमुक्षुभिः। एकत्वेऽपि शास्त्रप्रणयनाद्यानर्थक्यमिति चेन्न अभावात्। न हि शास्त्रप्रणेत्रादिषु तत्फलार्थिषु च शास्त्रस्य प्रणयनमनर्थकं सार्थकञ्चेति कल्पना स्यात्। न ह्यात्मैकत्वे शास्त्रप्रणेत्रादयस्ततोऽभिन्नाः सन्ति तदभावे एवं विकल्पनैवानुपपन्नाः। अभ्युपगते ह्यात्मैकत्वे प्रमाणार्थश्चाभ्युपगतो भवता यदात्मैकत्वमभ्युपगच्छता। तदभ्युपगमे च कल्पनानुपपत्तिमाह शास्त्रम्। "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्?" इत्यादिशास्त्रप्रणयनाद्युपपत्तिञ्चाह। अन्यत्र परमार्थवस्तुस्वरूपादविद्याविषये "यत्र हि द्वैतमिव भवतीत्यादि"। विस्तरतो वाजसनेयके। विभक्ते विद्याऽविद्ये परापरे इत्यादावेव शास्त्रस्यातो न तार्किकवादभटप्रवेशः वेदान्तराजप्रमाणबाहुगुप्ते इहात्मैकत्वविषय इति। एतेनाविद्याकृतनामरूपाद्युपाधिकृतानेकशक्तिसाधनकृतभेदवत्त्वाद्ब्रह्मणः सृष्ट्यादिकर्तृत्वे साधनाद्यभावो दोषः प्रत्युक्तो वेदितव्यः परैरुक्त आत्मानर्थकर्तृत्वादिदोषश्च। यस्तु दृष्टान्तो राज्ञः सर्वार्थकारिणि कर्त्तृत्वाद्युपचाराद्राजा कर्त्तेति सोऽत्रानुपपन्नः। "स ईक्षाञ्चक्रे" इति श्रुतेर्मुख्यार्थबाधनात्प्रमाणभूतायाः तत्र हि गौणी कल्पना। शब्दस्य, यत्र मुख्यार्थो न सम्भवति। इह त्वचेतनस्य मुक्तबद्धपुरुषविशेषापेक्षया कर्तृकर्म्मदेशकालनिमित्तापेक्षया च बन्धमोक्षादिफलार्था नियता पुरुषं प्रति प्रवृत्तिर्नोपपद्यते। यथोक्तसर्वज्ञेश्वरकर्तृत्वपक्षे तूपपन्ना, ईश्वरेणैव सर्वाधिकारी प्राणः पुरुषेण सृज्यते। कथं? स पुरुष उक्तप्रकारेणेक्षित्वा प्राणं १हिरण्यगर्भाख्यं सर्वप्राणिकरणाधारमन्तरात्मानमसृजत सृष्टवान्, अतः प्राणात् श्रद्धां २सर्वप्राणिनां शुभकर्म्मप्रवृत्तिहेतुभूताम्। ततः कर्म्मफलोपभोगसाधनाधिष्ठानानि कारणभूतानि महाभूतान्यसृजत। खं ३शब्दगुणं, वायुं ४स्वेन स्पर्शेन कारणगुणेन च विशिष्टं द्विगुणम्। तथा ज्योतिः५ स्वेन रूपेण पूर्वाभ्याञ्च शब्दस्पर्शाभ्याम् विशिष्टं त्रिगुणं तथाऽऽपो६रसेन गुणेनासाधारणेन पूर्व्वगुणानुप्रवेशेन चतुर्गुणाः। तथा गन्धेन पूर्वगुणानुप्रवेशेन पञ्चगुणा पृथिवी७। तथा तैरेव भूतैरारब्धमिन्द्रियं ८ द्विप्रकारं बुद्ध्यर्थं कर्म्मार्थञ्च दशसङ्ख्यम्। तस्य चेश्वरमन्तःस्थं संशयसङ्कल्पादिलक्षणं मनः९। एवं प्राणिनां कार्य्यं करणञ्च सृष्ट्वा तत्स्थित्यर्थं व्रीहियवादिलक्षणमन्नम् १०। ततश्चान्नादद्यमानाद्वीर्य्यं ११ सामर्थ्यं बलं सर्वकर्म्मप्रवृत्तिसाधनम्। तद्वीर्य्यवताञ्च प्राणिनां तपः १२विशुद्धिसाधनं सङ्कीर्य्यमाणानां, मन्त्राः१३ तपोविशुद्धान्तर्बहिःकरणेभ्यः कर्मसाधनभूता ऋग्यजुःसामाथर्वाङ्गिरसः। ततः कर्म्म१४ अग्निहोत्रादिलक्षणम्। ततो लोकाः१५ कर्म्मणां फलम्। तेषु च सृष्टानां प्राणिनां नाम१६ च देवदत्तो यज्ञदत्त इत्यादि। एवमेताः कलाः प्राणिनामविद्यादिदोषबीजापेक्षया सृष्टास्तैमिरिकदृष्टिसृष्टा इव द्विचन्द्रमशकमक्षिकाद्याः स्वप्नदृक्सृष्टा इव च सर्वे पदार्थाः पुनस्तस्मिन्नेव पुरुषे प्रलीयन्ते हित्वा नामरूपादिविभागम्" भा०। "स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति, भिद्येते तासां नामरूपे समुद्र इत्येवं प्रोच्यते। एवमेवास्य परिद्रष्टुरिमाः षोड़श कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति, भिद्येते तासां नामरूपे पुरुष इत्येवं प्रोच्यते, स एषोऽकलोऽमृतो भवति, तदेष श्लोकः"

"कथं स दृष्टान्तः? यथा लोके इमा नद्यः स्यन्दमानाः स्रवन्त्यः समुद्रायणाः समुद्रोऽयनं गतिरात्मभावो यासां ताः समुद्रायणाः समुद्रं प्राप्योपगम्यास्तं नामरूपतिरस्कारं गच्छन्ति। तासाञ्चास्तं गतानां भिद्येते विनश्येते नामरूपे गङ्गायमुनेत्यादिलक्षणे। तद्भेदे समुद्र इत्येवं प्रोच्यते तद्वस्तूदकलक्षणमेव, यथाऽयं दृष्टान्तः। उक्तलक्षणस्य प्रकृतस्य पुरुषस्य परिद्रष्टुः परि समन्ताद्द्रष्टुर्दर्शनस्य कर्त्तुः स्वरूपभूतस्य। यथार्कः स्वात्मप्रकाशस्य कर्त्ता तद्वद्, इमाः षोड़श कलाः प्राणाद्याः उक्ताः कलाः पुरुषायणा नदीनामिव समुद्रः पुरुषोऽयनमात्मभावगमनं यासां कलानां ताः पुरुषायणाः पुरुषं प्राप्य पुरुषात्मभावमुपगम्य तथैवास्तं गच्छन्ति। भिद्येते तासां नामरूपे कलानां प्राणाद्याख्या रूपञ्च। यथास्मभेदे च

नामरूपयोर्यदनष्टं तत्त्वं पुरुष इत्येव प्रोच्यते ब्रह्मविद्भिः। य एवं विद्वान् गुरुणा प्रदर्शितकलाप्रलयमार्गः स एष विद्यया प्रविलापिताविद्याकामकर्म्मजनितासु प्राणादिकलास्वकलोऽविद्याकृतकलानिमित्तो हि मृत्युस्तदपगमेऽकलत्वादेवामृतो भवति। तदेतस्मिन्नर्थे एष श्लोकः" भा०।

"अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः। तं वेद्यं पुरुषं वेद यथा मा वो मृत्युः परिव्यथ" उप०।

"अरा रथचक्रपरिकरा इव रथनाभौ रथचक्रस्य नाभौ यथा प्रवेशितास्तदाश्रया भवन्ति यथा तथेत्यर्थः। कलाः प्राणाद्या यस्मिन् पुरुषे प्रतिष्ठिता उत्पत्तिस्थितिलयकालेषु तं पुरुषं कलानामात्मभूतं वेद्यं वेदनीयं पूर्णत्वात् पुरुषं पुरि शयनाद्वा वेद जानीयात्। यथा हे शिष्या वो युष्मान्मृत्युर्मा परिव्यथा मा परिव्यथयतु। अथाप्राप्ता दुःखिन एव यूयं स्थ अतस्तन्मा भूद् युष्माकमित्यभिप्रायः" भा०।

तथा च प्राणः१ श्रद्धा२ व्योम३ वायुः४ तेजः५ जलं६ पृथिवी७ इन्द्रियं८ मनः९ अन्नम्१० वीर्य्यम्११ तपः१२ मन्त्राः१३ कर्म१४ लोकाः१५ नाम१६ इत्येता प्राणादिनामान्ताः षोड़श कलाः पुरुषस्य उपाधय इति स्थितम्। "गताः कलाः पञ्चदश प्रतिष्ठाम्" श्रुतिः

२ अंशमात्रे च "प्राची दिक् कला दक्षिणा दिक् कलोदीची दिक् कलैष सौम्य! चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते" "पृथिवी कलाऽन्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सौम्य! चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम। स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्तेऽनन्तवानस्मिँल्लोके भवत्यनन्तवतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते"। "अग्निः कला सूर्यः कला चन्द्रः कला विद्युत्कलैष वै सौम्य! चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते"। "प्राणः कला चक्षुः कला श्रोत्रं कला मनः कलैष वै सौम्य! चतुष्कलः पादो ब्रह्मण आयतनवान्नाम स य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते आयतनवानस्मिँल्लोके भवत्यायतनवतो लोकाञ्जयति य एतमेवं विद्वांश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते"। अवतारशब्दे भूरि उदाहरणम् दृश्यम्।

पलद्वयात्मके ४ कालांशभेदे स च सि०शि० दर्शितो यथा——

"योऽक्ष्णोर्निमेषस्य खरामः३०भागः स तत्परस्तच्छतभाग उक्ता। त्रुटिर्निमेषैर्धृतिभिः१८स्यु काष्ठा तत्त्रिंशता सद्गणकैः कलोक्ता। त्रिंशत्कलाऽऽश्चौं घटिका क्षणः स्यान्नाडीद्वयं तैः खगुणैः३०दिनं च। गुर्वक्षरैः खेन्दुमितैः१०रसुस्तैः षड्भिः पलं तैर्घटिका खषड्भिः६०। स्याद्वा घटीषष्टिरहः खरामै३०र्मासो दिनैस्तैर्द्विकुभिः१२च वर्षम्। क्षेत्रे समाद्येन समा विभागाः स्युश्चक्रराश्यंशकलाविलिप्ताः" शि०।

"योऽक्ष्णोर्लोचनयोः पक्ष्मपातः स निमेषः। स यावता कालेन निष्पद्यते तावान् कालोऽपि निमेषशब्देनोच्यते उपचारात्। तस्य त्रिंशद्विभागस्तत्परसंज्ञः तत्परस्य शतांशस्त्रुटिरिति। अथ च निमेषैरष्टादशभिः काष्ठा। क्वचिच्छास्त्रान्तरे तिथिभिरिति पाठः। काष्ठात्रिंशता कलोक्ता। कलानां त्रिंशता घटिका। सार्द्धौ भभ्रमस्य षष्टिभाग इत्यर्थः। घटिकाद्वयेन क्षणो मुहूर्त्तः। क्षणानां त्रिंशता दिनम्। अथ प्रकारान्तरेण दिनमुच्यते। गुर्वक्षरैः खेन्दुमितैः१० असुरिति। एकमात्रो लघुः द्विमात्रो गुरुः। तथा "सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः" इति छन्दोलक्षणे प्रतिपादितम् यदक्षरं सानुस्वारं विसर्गान्तं दीर्घं यस्याक्षरस्य परतः संयोगस्तत्सर्वमपि गुरुसंज्ञं ज्ञेयम्। गुर्वक्षरस्योच्चार्य्यमाणस्य यावान् कालस्तद्दशकेनैकोऽसुः प्राणः। प्रशस्तेन्द्रियपुरुषस्य श्वासोच्छ्वासान्तर्वर्त्ती काल इत्यर्थः। षड्भिः प्राणैरेकं पानीयपलम्। पलानां षष्ट्या घटी। घटीनां षष्ट्या दिनम्। त्रिंशद्दिनैरेको मासः। मासैर्द्वादशभिर्वर्षमिति कालस्य विभागो दर्शितः" प्रमि०। "अक्ष्णोऽस्तमयवेलायां कलामात्राऽपि या तिथिः" कालमा० व्यासः। "प्रतिपद्यमावास्ये च कलामात्रेण चाष्टमी" पठन्ति। "स च त्रीणि त्रीणि कलासहस्राणि पञ्चदश च कला एकैकस्मिन् धातावतिष्ठते" इति सुश्रु०। "अष्टादश सहस्राणि संख्या यास्मिन् सप्तच्छये। कलानां नवतिः प्रोक्ता" सुश्रु०।

"विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते।

तच्छिन्नियता भवेद्राशिर्भनखोद्वादशैव ते” सू० सि०। उक्ते राशिचक्रस्य २१६००० मिते भागे च “क्षेत्रे समादेशन समा विभागा इत्यादि” शि० क्षेत्रे कलायां समाद्येन वर्षाद्येन समास्तुल्याः क्षेत्रविभागा ज्ञेयाः। ते के। चक्रराश्यंशकलाविलिप्ताः। यथैकस्य वर्षस्य मासदिनादयो विभागा एवं भगणस्य राश्यंशादयः” प्रमि०। सि० शि० उक्ते दिनमानज्ञानोपयोगिनि दिनज्यागुणिते व्यासार्द्धभक्ते सूत्रात्मके ६ पदार्थे च यथा—

“उक्ता प्रभाभिमतदिङ्नियमेन तावत् तामेव कालनियमेन च वच्मि भूयः। स्यादुन्नतं द्युगतशेषकयोर्यदल्पं तेनोनितं दिनदलं नतसंज्ञकं च। अथोन्नताद्धूनयुताच्चरेण क्रमादुदग्दक्षिणगोलयोर्ज्या। स्यात् सूत्रमेतद्गुणितं द्युमौर्व्या व्यासार्धभक्तं च कलाभिधानम्”शि० “दिवसस्य यद्गतं यच्च शेषं तयोर्यदल्पं तदुन्नतसंज्ञं ज्ञेयं तेनोन्नतेनोनीकृतं दिनदलमनायं तन्नतसंज्ञं भवति। अथोन्नतादुन्नतकालादुत्तरगोले चरेणोनितात् दक्षिणे युताद्वा ज्या तत् सूत्रम् सा सूत्रसंज्ञेत्यर्थः। तत् सूत्रं द्युज्यया गुणितं त्रिज्यया भक्तं कलासंज्ञं भवति। अत्रोपपत्तिः। यस्मिन् काले छाया साध्या तस्मिन् काले स्वाहोरात्रवृत्ते यावतीभिर्घटिकाभिः क्षितिजादुन्नतो रविस्तावत्युन्नतसंज्ञा। येन कालेन मध्याह्नान्नतस्तस्य नतसंज्ञा। अथ चरेण मध्याह्नान्नतयुतस्योन्नतकालस्य किल ज्या साध्या सा च ज्यामध्यादवधिर्भवति। स च मध्यप्रदेशोऽहोरात्रवृत्तस्योन्मण्डलसंपाते भवति। यत उन्मण्डलसंपाताभ्यामूर्ध्वमहोरात्रवृत्तस्यार्धमधोऽर्धम्। अत उन्मण्डलावधिर्जीवा साध्या। क्षितिजोन्मण्डलयोरन्तरं चरार्धम्। अतश्चरार्धेन वर्जितादुन्नतादुत्तरगोले, दक्षिणे तु युतात्। यत उत्तरगोले क्षितिजादुपर्युन्मण्डलम्”दक्षिणेऽधः। तस्मात् कालाद् या ज्या साधिता सा त्रिज्यावृत्तपरिणता। सा च सूत्रसंज्ञा। अथ यदि त्रिज्यावृत्ते एतावती, तदा द्युज्यावृत्ते कियतीत्यनुपातेन द्युज्यावृत्तपरिणता। सा च कलासंज्ञा। इदानीं प्रकारान्तरेण कला तस्याश्चेष्टयष्टिमाह” प्रमि०। “सूत्रं कुजीवागुणितं विभक्तं चरज्यया स्यादथवा कला सा। कला पलक्षेत्रजकोटिनिघ्नी तत्कर्णभक्ता भवतीष्टयष्टिः” शि०। “अथवा तत् सूत्रं कुज्यया गुणितं चरज्यया भक्तं सत् कला भवति। सा कलाख्या पलक्षेत्रकोटिभिर्गुण्या स्वस्वकर्णेन भाज्या फलमष्टधेष्टयष्टिर्भवति। अत्रोपपत्तिः। अत्र चरज्याकुज्ये त्रिज्याद्युज्यापरिणते। अतस्ताभ्यां चानुपातः। यदि चरज्यया कुज्या लभ्यते तदा सूत्रेण किमिति। फलं कला। सा कलाऽहोरात्रवृत्ते ज्या। सा पलवशादक्षकर्णवत् तिरश्चीना जाता। अथ तस्याः कोटिसूत्रमात्रमानेयम्। तत्रानुपातः। यदि पलक्षेत्रकर्णेन तत्कोटिर्लभ्यते तदा कलाकर्णेन किमिति। फलमुन्मण्डलमङ्क्षपसमसूत्रादुपर्यर्कबिम्बादध ऊर्ध्वं कोटिरूपं भवति। तस्येष्टयष्टिसंज्ञा” प्रमि०।

“स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा। श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान् विदुः। धात्वाशयान्तरे धातोर्यःक्लेदस्त्वधितिष्ठति। देहोष्मणाभिपक्वश्च स कलेत्यभिधीयते” भावप्र० उक्ते देहस्थे धात्वाशयान्तरस्थे ७धातुक्लेदभेदे तद्भेदाश्च तत्रैवोक्ताः। “आद्या मांसधरा प्रोक्ता द्वितीया रक्तधारिणी। मेदोधरा तृतीया तु चतुर्थी श्लेष्मधारिणी। पञ्चमी च मलं धत्ते षष्ठी पित्तधरा मता। रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः” ८एकमात्रात्मकलघुवर्णे “षड्विषमेऽष्टौ समे कलास्ताश्च समेऽस्युर्नो निरन्तराः। न समात्र पराश्रिता कला” “सर्वगुर्वन्तमध्यादिगुरवोऽत्र चतुष्कलाः। गणाश्चतुर्लघूपेता पञ्चार्यादिषु संस्थिताः” इति च वृत्तर० “ऋणप्रयोगे मूलधनादधिके आयत्वेनाधमर्णैन उत्तमर्णाय दीयमाने ९वृद्धिरूपे (सुद) पदार्थे मेदि०। “मासे शतस्य यदि पञ्च कलान्तरं स्यात्”लीला०१०स्त्रीरजसि ११नौकायां १२कपटे च विश्वः। १३गीतादिविद्याभेदे, सा च चतुःषष्टि६४विधा शैवतन्त्रोक्ता यथा—१गीतम् २वाद्यम् ३नृत्यम् ४नाट्यम्। ५आलेख्यम् ६विशेषकच्छेद्यम् ७तण्डुलकुसुमबलिविकाराः ८पुष्पास्तरणम् ९ दशनवसनाङ्गरागाः १०मणिभूमिकाकर्म ११ शयनरचनम् १२ उदकवाद्यम् १३ उदकघातः १४ चित्रायोगाः १५ माल्यग्रथनविकल्पाः १६ केशशेखरापीडयोजनम् १७ नेपथ्ययोगाः १८ कर्णपत्रभङ्गाः १९ गन्धयुक्तिः २० भूषणयोजनम् २१ इन्द्रजालम् २२ कौचुमारयोगाः २३ हस्तलाघवम् २४ चित्रशाकापूपभक्ष्यविकारक्रिया २५ पानकरसरागासवयोजनम् २६ सूचीवापकर्म २७ वीणाडमरुकसूत्रक्रीडा २८ प्रहेलिका २९ प्रतिमा ३० दुर्वचकयोगाः ३१ पुस्तकवाचनम् ३२ नाटिकाख्यायिकादर्शनम् ३३ काव्यसमस्यापूरणम्

२४ पट्टिकावेत्रवाणविकल्पाः २५ तर्कूकर्माणि २६ तक्षणम् २७वास्तुविद्या २८ रूप्यरत्नपरीक्षा २९ धातुवादः ४० मणिरागज्ञानम् ४१ आकरज्ञानम् ४२ वृक्षायुर्वेदयोगाः ४३ मेषकुक्कुटलावकयुद्धविधि· ४४ शुकसारिकाप्रलापनम् ४५ उत्सादनम् ४६ केशमार्जनकौशलम् ४७ अक्षरमुष्टिकाकथनम् ४८ म्लेच्छितकविकल्पाः ४९ देशभाषाज्ञानम् ५० पुष्पशकटिकानिमित्तज्ञानम् ५१ (अत्र निमित्तज्ञानमिति पृथक् केचित् पठन्ति)। यन्त्रमातृका ५२ धारणमातृका ५३ सम्पाठ्यम् ५४ मानसी काव्यक्रिया ५५ क्रियाविकल्पाः ५६ छलितकयोगाः ५७ अभिधानकोषच्छन्दोज्ञानम्। ५८ वस्त्रगोपनानि ५९ द्यूतविशेषः ६०आकर्षणक्रीडा ६१बालकक्रीडनकानि ६२ वैनायिकीनां विद्यानां ज्ञानम् ६३ वैजयिकीनां विद्यानां ज्ञानम् ६४ वैतालिकीनां विद्यानां ज्ञानम् इति भाग०९४५अ०२८श्लो०टीकायां श्रीधरलिखिताः। क्वचित् पुस्तके सूचीवापकर्मसूत्रक्रीडेत्येकं पदम् तदुत्तरं वीणाडमरुकवाद्यानीति। वैतालिकीनामित्यत्र वैयासिकीनामिति च पाठो दृश्यते। "अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः" भाग०१०,४५,२८। "चतुःषष्ट्यङ्गमद्दत् कलाज्ञानं समाद्भुतम्" भा० अनु० १८ अ०। "अधिगत कलाकलापकम्" कादं०। "चतुःषष्टिकलाविद्या ईश्वरीप्रीतिवर्द्धनम्" गायत्रीकवचम्।

कलाकुल न० कलया मात्रयापि आकुलयति आकुलि—णिच्–अच्। हलाहलविषे राजनि०।

कलाकेलि पु० कलेव केलिरस्य। कामदेवे त्रिका०।

कलाङ्कुर पुंस्त्री कलस्याङ्कुरो यत्र। १सारसपक्षिणि त्रिका० जातित्वात् स्त्रियां ङीष्। कलानामङ्कुरो यत्र। २स्तेयशास्त्रप्रवर्त्तके मूलदेवे कर्णीसुते त्रिका०। मूलदेवस्य स्तेयरूपशिल्पप्रवर्त्तकत्वात् कलाङ्कुरत्वम्। कंसासुरे इति शब्दकल्पद्रुमोक्तिश्चिन्त्या कर्णीसुतशब्दे विवृतिः।

कलाङ्गला स्त्री "सुतोमराङ्कुशा राजन्! सशतघ्नीकलाङ्गलेति" भा०व०१५अ० १६ श्लोके तादृशशब्दं कल्पयन् शोधलिङ् बुधो भ्रान्तः। तत्र शतघ्न्या सहितं सशतघ्नीकं "नद्यृतः कप्" पा० कप्। तादृशं लाङ्गलं यत्र सशतघ्नीकलाङ्गला इत्यर्थकतया न तस्य कलाङ्गलशब्दघटितत्वमिति बोध्यम्।

कलाची स्त्री कलामञ्चति गच्छति अञ्च–गतौ अण् उप० समा० गौरा०ङीष् पा० मुग्धबो० षण् षित्त्वात् ईप्। इतिभेदः। प्रकोष्ठे कफोणेरधःस्थे मणिबन्धपर्य्यन्तहस्तावयवे। स्वार्थे कन्। कलाचिकाप्यत्र हेमच०।

कलाटीन पुंस्त्री कलेनाटनम् आटः कलाटस्तत्र साधुः ख। कर्कोङ्गे पक्षिभेदे हारा० जातित्वात् स्त्रियां ङीष्।

कलाजाजी स्त्री कलायै जायते जन–ड तथा सती आजायते जन–ड गौरा० ङीष्। (कलौञ्जा) (मङ्गरैला) पाश्चात्त्यभाषाप्रसिद्धे वृक्षभेदे शब्दचि०।

कलाद पु०कलामंशमादत्ते आ–दा–क। स्वर्णकारे अमरः अलङ्कारगठनार्थं गृहीतधनस्यांशहरणात्तस्य तथात्वम्

कलादक पु० कलामत्ति अद–ण्वुल् इत०। स्वर्णकारे शब्दच०गठनार्थं दत्तद्रव्यांशस्य भोजित्वात्तस्य तथात्वम्।

कलाधर पु० कलाः धरति धृ–अच् ईत०। १चन्द्रे। २चतुःषष्टिकलाधारकमात्रे त्रि०।

कलानिधि क० कलानिधीयतेऽस्मिन् नि+धा–आधारे कि उपप० स०। चन्द्रे अमरः। "अहो महत्त्वं महतामपूर्वं विपत्तिकालेऽपि परोपकारः। यथाऽऽस्यमध्ये पतितोऽपि राहोः" "कलानिधिः पुण्यचयं ददाति" उद्भटः।

कलानुनादिन् पु० कलमनुनदति अनु+नद–णिनि ईत०। १भ्रमरे २चटके ३कपिञ्जले ४चातके च जातित्वात् स्त्रीत्वमपि तत्र नान्तत्वात् ङीप्।

कलान्तर पु० अन्या कला अंशः मयू०स०। वृद्धिभेदे "मासे शतस्य यदि पञ्च कलान्तरं स्यादिति" लीलावती, २अन्यस्यां चन्द्रकलायाञ्च, "ज्योत्स्नान्तराणीव कलान्तराणि" कुमा०।

कलान्यास पु० कलानां न्यासः। तन्त्रोक्ते न्यासभेदे कलाश्च कलाशब्दे दर्शिताः शारदातिलकोक्तरीत्या तासां पूजाङ्गतया न्यासः। देहे कलाविशेषस्य न्यासश्च यथा—

तन्त्रसारे "शिष्यशरीरे कलान्यासं कुर्यात्। तद्यथा ईशत्रयेण पादतलाज्जानुपर्य्यन्तम् ओं निवृत्त्यै नमः। जानुयनोर्नाभिपर्य्यन्तम् ओं प्रतिष्ठायै नमः। नाभेराकण्ठम् ओं विद्यायै नमः कण्ठादाललाटम् ओं शान्त्यै नमः ललाटाद्ब्रह्मरन्ध्रपर्य्यन्तम् ओं शान्त्यतीतायै नमः। पुनर्ब्रह्मरन्ध्रादाललाटम् ओं शान्त्यतीतायै नमः ललाटादाकण्ठम् ओं शान्त्यै नमः। कण्ठान्नाभिपर्य्यन्तम् ओं विद्यायै नमः नाभेर्जानुपर्य्यन्तम् ओं प्रतिष्ठायै नमः जानुनः पादपर्य्यन्तम् ओं निवृत्त्यै नमः।

कलाप पु०कलां मात्रामाप्नोति आप्–अण्। १समूहे, २मयूरपिच्छे, ३भूषणे, ४काञ्च्याम्, ५चन्द्रे, मेदिनि० तत्र समूहे "मुक्ताकलापीकृतसिन्धुवारम्" कुमा०। "अधिगतकला-

कलापकम्” बर्हे च “आलम्बिभिश्चन्द्रकिणः कलापैः”। “इहेव निर्जितकलापभरामधस्तात् व्याकीर्णमाल्यकबरां कबरीं तरुण्याः” माघः। भूषणे “मुक्ताकलापस्य च निस्तलस्य” कुमा० “मुक्ताकलापस्य मुक्ताभूषणस्य” मल्लि०। काञ्च्याम् “रशनाकलापगुणेन बधूः” माघः। ६तूणे तूणश्च शरपूर्णः चर्म्ममयः भस्त्राकृपः यथाह “कलापिनः” कात्या० २२,३,१८, व्या० “कलापशब्देन शरपूर्णा चर्म्ममयी भस्त्रोच्यते” कर्कः। “कलापी चषालः” आश्व० श्रौ०६,७,१८, “सा मेधी खलप्रदेशे धान्यपूलैर्बद्धा तिष्ठति स एव चषालो भवति” नारा० वृत्त्युक्तेः धान्यपूलानां शरतुल्यत्वारोपेण बद्धशरवत्त्वगुणयोगात्तूणवत्त्वम् इति तथा च गौण्या चषालस्य कलापित्वम्। ७शरे “कलापिनौ धनुष्पाणी शोभमानौ दिशोदश” रामा०१,२२,७, अतार्थे क्लीवत्वमपि “परीप्समानः पार्थानां कलापानि धनूंषि च” भा०व०१५७अ०। ८धनुषि। “हारिद्रवर्णा ये त्वेते हेमपुङ्खाः शिलाशिताः (शराः)। नकुलस्य कलापोऽयं पञ्चशार्दूललक्षणः। “येनासौ व्यजयत् कृत्स्नां प्रतीचीं दिशमाहवे” भा० वि०६५अ० नकुलास्त्रकथने। ९अर्द्धचन्द्राकारास्त्रभेदे च “खड्गांश्च दीप्तान् दीर्घांश्च कलापांश्च महाधनान्। विपाठान् क्षुरधारांश्च धनुर्भिर्निदधुः सह” भा०वि०५अ०। कलापः कार्त्तिकेयमयूरपिच्छः उत्पत्तिस्थानत्वेनास्त्यस्य अच्। १०व्याकरणभेदे कार्त्तिकेयमयूरपिच्छयोनित्वात्तस्य तथात्वम्। “अधुना स्वल्पतन्त्रत्वात् कातन्त्राख्यं भविष्यति। तद्वाहनकलापस्य नाम्ना कालापकं तथा” इहत्कथासारः। ११ग्रामभेदे। “देवापिर्योगमास्थाय कलापग्राममास्थितः। सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति” भाग०९,१२,१२, “सुदर्शनोऽथाग्निवर्णः शीघ्रस्तस्य मरुः सुतः। योऽसावास्ते योगसिद्धः कलापग्राममास्थितः। कलेरन्ते सूर्य्यवंशं नष्टं भावयिता पुनः” भाग०९,१२,५, “सत्यभामा तथैवान्या देव्यः कृष्णस्य सम्मताः। वनं प्रविविशू राजंस्तपसे कृतनिश्चयाः। फलमूलादिभोजिन्यो हरिध्यानैकतत्पराः। हिमवन्तमतिक्रम्य कलापग्राममाविशन्” भा० मौ०७अ०। तेनास्य हिमवदुत्तरपार्श्वे सन्निवेश इति गम्यते।

चन्द्रे तु कलामाप्नोति आप–अण् कलां पाति पा–क वा व्युत्पत्तिः। तस्य कलापतित्वात् कलाधारत्वाच्च तथात्वम् १४विदग्धे त्रि० मेदि० विविधकलाधरत्वात्तस्य तथात्वम्।

कलापक पु० कलाप+स्वार्थे कन्। १कलापार्थे, २हस्तिस्कन्धबन्धे, हेमच० एकवाक्यतापन्ने ३श्लोकचतुष्के न०। “छन्दोबद्धपदं पद्यं तेनैकेन च मुक्तकम्। द्वाभ्यां युग्मकं सन्दानितकं त्रिभिरिष्यते। कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्” सा०द०उक्तेः किराते उदा०। “लोकं विधात्रा विहितस्य गोप्तुं क्षत्रस्य मुष्णन् वसु जैत्रमोजः। तेजस्वितायां विजयैकवृत्तेर्निघ्नन् प्रियं प्राणमिवाभिमानम् १। व्रीडानतैराप्तजनोपनीतः संशय्य कृच्छ्रेण नृपैः प्रपन्नः। वितानभूतं विततं पृथिव्यां यशः समूहन्निव दिग्विकीर्णम् २। वीर्य्यावदानेषु कृतावमर्षस्तन्वन्नभूतामिव सम्प्रतीतिम्। कुर्वन् प्रयामक्षयमायतीनामर्कत्विषामह्न इवावशेषः ३। प्रसह्य योऽस्मासु परैः प्रयुक्तः स्मर्त्तुं न शक्यः किमुताधिकर्त्तुम्। नवीकरिष्यत्युपशुष्यदार्द्रः स त्वद्विना मे हृदयं निकारः ४”। कलापिनो मयूरा यस्मिन् काले सोऽपि कालः कलापी उपचारात् तस्मिन् काले देयमृणम् “कलाप्यश्वत्थयवबुसाद्वुन्” पा० वुन्। कालापक २तत्काले देये ऋणे न० सि०कौ०।

कलापद्वीप पु० कलापो ग्रामो द्वीप इव दृश्यत्वात्। कलापग्रामे स च ग्रामः हिमवन्तमतिक्रम्य उत्तरत्र वर्त्तमानः कलापशब्दे दर्शितः। “अग्निवर्णसुतः शीघ्रः शीघ्रस्य तु मरुः सुतः। मरुस्तु योगमास्थाय कलापद्वीपमास्थितः” हरिवं० १५ अ०। अस्यैव कलापग्रामत्वेन भाग० ९, १२, उक्तिः तच्च वाक्यं कलापशब्दे दर्शितम्।

कलापिन् पु० कलापो बर्होऽस्यास्ति इनि। १मयूरे तद्बर्हतुल्यशाखावति २वटवृक्षे मेदि०। आप–णिनि कलस्यापी ईत०। ३कोकिले। “ध्वनिहृष्टकूजितकलाः कलापिनः” माघः। “कलापिनामुद्धतनृत्यहेतौ” रघुः। ४कलापशब्दार्थवति त्रि० कलापशब्दे रामायणादिवाक्यमुदाहृतम्। स्त्रियां ङीप्। ५वैशम्पायनान्तेवासिभेदे पु० तदन्तेवासिनश्च “आलम्बः कङ्कः कमलः ऋचाभरुणि ताण्ड्यः श्यामायनः कठः कलापीति कलापिनोऽन्तेवासिनश्च हरिद्रुस्कगली तुम्बुरुरुलपश्चेति चत्वारः” मनो०। “कलापिवैशम्पायनान्तेवासिभ्यः” पा० तेन प्रोक्तमधीयते णिनि। कलापिनस्तत्प्रोक्ताध्येतृषु ब०व०।

कलापिनी स्त्री कलापश्चन्द्रोऽस्त्यस्याम् इनि। १रात्रौ राजनि० कलापतुल्याकारपत्रे: २नागरमुस्तायां राजनि०।

कलापूर्ण पु० कलाभिः पूर्णः। १चन्द्रे शब्दचन्द्रिका। २कलाभिः पूर्णे त्रि०। “सदा भवान् फाल्गुनस्य गुणैरस्मान्

विकल्पते। न चार्ज्जुनः कलापूर्णः मम दुर्योधनस्य च" भा० वि० ३९अ०।

कलाभृत् कलां बिभर्त्ति भृ-क्विप् ईत०। कलाधारके चन्द्रे हेम० "कला च सा कान्तिमती कलाभृ(व)तः" कुमा०। २शिल्पादिधारके त्रि०। "दशावदाद्यं पौरसख्यं पञ्चावदाद्यं कलाभृताम्" मनुः।

कलाय पु० कलामयते अय-अण्। (मटर) १शमीधान्यभेदे। "कलायोमधुरः स्वादुः पाके रूक्षश्च शीतलः। कषायो वातकोपाही कफपित्तहरो लघुः" भावप्र० तद्गुणाः। "कलायपरिमण्डलमुभयतोमुकुलायम्" सुश्रु०। 'विकसत्कलायकुसुमासितद्युतेः" माघः २गण्डदूर्वायां स्त्री।

कलायन कलानामयनं यत्र। नर्त्तकमात्रे शब्दच०

कलालाप पुंस्त्री कलमालपति आ+लप-अण् उप०स०। १भ्रमरे। राजनि०। स्त्रियां जातित्वात् ङीष्। ईत०

२कलालापे पु०

कलावत् पु० कला अमृतादिकाः सन्त्यस्य मतुप् मस्य वः। १चन्द्रे "कला च कान्तिमती कलाव(भृ)तः" कुमा० २गीतादिकलायुक्तमात्रे २अंशवति च त्रि० स्त्रियां ङीप्

कलावती स्त्री शा०ति० ४पटलोक्ते दीक्षाभेदे। स च "अथ दीक्षां प्रवक्ष्यामि मन्त्रिणां हितकाम्यया। विनाऽनया न लभ्येत सर्वमन्त्रफलं ततः। ज्ञानं दिव्यं यतोदद्यात् कुर्य्यात् पापक्षयं यतः। तस्माद्दीक्षेति सा प्रोक्ता देशिकैस्तत्त्ववेदिभिः। चतुर्विधा सा सन्दिष्टा क्रियावत्यादिभेदतः। क्रियावती वर्णमयी कलात्मा वेधवत्यपि। ताः क्रमेणैव कथ्यन्ते तन्त्रेऽस्मिन् सम्पदावहाः" इत्युपक्रम्य दर्शिता। तत्र कलात्मा कलायन्त्रदर्शितयारदातिलकोक्तपञ्चायतकलावतीत्यर्थः। कलात्माख्यत्व।

कलाविक पुंस्त्री कलेन सम्यक् विकायति विशेषेण शब्दायते आ+वि+कै-क ३त०। कुक्कुटे त्रिका० तस्य रात्रिशेषे विशेषेण शब्दायमानत्वात् तथात्वम्। स्त्रियां जातित्वात् ङीष्।

कलाविकल पुंस्त्री कलेनाविकलः। चटके शब्दर०। स्त्रियां जातित्वात् ङीष्। [काहलवाद्ये शब्दरत्ना०।

कलाहक पु० कलमाहन्ति आ+हन् क्विप् संज्ञायां कन्।

कलि पु० कल-शब्दादौ इन्। चतुर्थे युगे तन्मानमाह पुराणसर्व्वस्वे ब्रह्मपु०। "दिव्यवर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम्। चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे। चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्। दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः। तत्प्रमाणैः शतैः सन्ध्या पूर्व्वा तत्राभिधीयते। सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरोहि सः। सन्ध्यासन्ध्यांशयोरन्तः कालोयः मुनिसत्तम!। युगाख्यं तत्तु विज्ञेयं कृतत्रेतादिसंज्ञितम्"। सूर्य्यसिद्धान्तेऽप्युक्तं यथा- "सूर्य्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः। सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्। कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया" सू०सि०।

"तेषां दिव्यवर्षाणां द्वादश सहस्राणि चतुर्युगम्। चतुर्णां युगानां कृतत्रेताद्वापरकल्याख्यानां समाहारो योगस्तदात्मकं महायुगमित्यर्थः। एतद्द्योतनार्थं चतुरित्युक्तिरन्यथा युगमित्युक्तौ तद्वैयर्थ्यापत्तेः। मानाभिन्नैरुक्तम्। अथ सौरमानेन तत्संख्यां विशेषं चाह। सूर्य्याब्दसङ्ख्ययेति तद्दैवासुरमानेनोक्तं चतुर्युगं द्वादशसहस्रवर्षात्मकं महायुगं सन्ध्यासन्ध्यांशसहितम्। युगचरणस्याद्यन्तयोः क्रमेण प्रत्येकं सन्ध्यासन्ध्यांशाभ्यां युक्तं इदं सन्ध्यासन्ध्यांशावन्तर्गतौ न पृथक् यत्नोऽत्रादृशस्। सौरवर्षप्रमाणेन द्वित्रिसागरैः। "अङ्कानां वामतो गतिः" इत्यनेन द्वात्रिंशदधिकैकचतुःशतमितैः। अयुतेन दशसहस्रेण गुणितैः। खचतुष्कद्वात्रिंशच्चतुर्भिः ४३२००००परिमितं ज्ञेयमित्यर्थः। अथ चतुर्युगान्तर्गतयुगाङ्घ्रीणां विशेषतो मानाश्रवणात् "सर्वं स्यादश्रुतत्वादिति" न्यायेन प्रत्येकं महायुगचतुर्थांशो मानमिति चतुर्युगमित्यनेन फलितं निषेधति। कृतादीनामिति। कृतत्रेताद्वापरकलियुगानाम् धर्मपादव्यवस्थया धर्मचरणानां स्थित्या। इयं वक्ष्यमाणा व्यवस्था स्थितिर्ज्ञेया न तु समकालप्रमाणं स्थितिः। अयमर्थः—कृतयुगे चतुश्चरणो धर्म इति तस्य मानमधिकम्। ततस्त्रेतायां धर्मस्य त्रिपादवत्त्वात् तदनुरोधेन त्रेतामानं न्यूनम्। एवं द्वापरकल्योर्धर्मस्य क्रमेण द्व्येकचरणवत्त्वात् कृतत्रेतामानाभ्यां क्रमेणोक्तानुरोधान्न्यूनमानम्। न तु समं मानमिति। अथ सर्वधर्मचरणयोगेन दशमितेन यदि महायुगं भवति तर्हि स्वस्वधर्मचरणैः किमित्यनुपातेन पूर्वोक्तफलितेन कृतादियुगानां मानज्ञानं सविशेषमाह"। रङ्ग०। तेन ४३२००० वर्षास्तन्मानम्। "युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः। क्रमात् कृतयुगादीनां षष्ठांशः सन्ध्ययोःस्वकः" सू०सि०।

"प्रागुक्तदिव्यवर्षद्वादशसहस्रमितस्य युगस्य दशमो भागो दशांश इत्यर्थः । चतुर्द्धा क्रमेण चतुस्त्रिद्व्येकैर्गुणितः । गुणक्रमात् कृतयुगादीनां कृतत्रेताद्वापरकलियुगानां मानं स्यादिति शेषः । ननु मनुग्रन्थे कृतादिमानं दिव्यवर्षप्रमाणेन ४०००।३०००।२०००।१००० उक्तम् । अत्र तु तन्मानं तद्वर्षप्रमाणेन ४८००। ३६००। २४००। १२००। इति विरोध इत्यत आह । षष्ठ इति । स्वकः स्वसम्बन्धी षष्ठो विभागः सन्ध्ययोराद्यन्तसन्ध्ययोरैक्यकाल इति शेषः । तथा च मदुक्तमानानि ४८००। ३६००। २४००। १२००। एषां षडंशाः ८००।६००।४००।२००। एते स्वस्वयुगानामाद्यन्तयोः सन्ध्ययोर्योग इत्येषामर्धं सन्धिकालः । प्रत्येकमाद्यन्तयोः सन्धिकालः ४००।२००।२००।१००। अनेन प्रत्येकं मदुक्तमानं न्यूनीकृतं ग्रन्थान्तरोक्तं केवलं मानं भवति न स्वसन्धिभ्यां सहितम् । यथा कृतादिसन्धिः ४००। कृतमानम् ४००० कृतान्तसन्धिः ४०० । योगे ४८०० त्रेतादिसन्धिः ३०० त्रेतामानं ३००० त्रेतान्तसन्धिः ३००। ३६००द्वापरादिसन्धिः २००द्वापरमानं २००० द्वापरान्तसन्धिः २००२४००। कल्यादिसन्धिः१००कलिमानम् १००० कल्यन्तसन्धिः १०० । १२०० एवं च स्वसन्धिभ्यां सहितं मयोक्तं स्वसम्बन्धात् सन्ध्ययोस्तदन्तर्गतत्वाच्चेति न विरोध इति भावः" रङ्ग० ।

कलौ यथा प्राणिनां दुःशीलत्वम् धर्म्मादिहानिश्च तथा वर्णितम् भा०व०१९०अ० "कृते चतुष्पात् सकलो निर्व्याजोपाधिवर्जितः । वृषः प्रतिष्ठितो धर्म्मो मनुष्ये भरतर्षभ ! । अधर्म्मपादविद्धस्तु त्रिभिरंशैः प्रतिष्ठितः । त्रेतायां द्वापरेऽर्द्धेन व्यामिश्रो धर्म उच्यते । त्रिभिरंशैरधर्मस्तु लोकानाक्रम्य तिष्ठति । तामसं युगमासाद्य तदा भरतसत्तम ! । चतुर्थांशेन धर्मस्तु मनुष्यानुपतिष्ठति । आयुर्व्वीर्य्यमथो बुद्धिर्बलन्तेजश्च पाण्डव ! । मनुष्याणामनुयुगं ह्रसतीति निबोध मे । राजानो ब्राह्मणा वैश्या शूद्राश्चैव युधिष्ठिर ! । व्याजैर्धर्मञ्चरिष्यन्ति धर्मवैतंसिका नराः । सत्यं संक्षेप्स्यते लोके नरैः पण्डितमानिभिः । सत्यहान्या ततस्तेषामायुरल्पं भविष्यति । आयुषः प्रक्षयाद्विद्यां न शक्ष्यन्त्युपजीवितुम् । विद्याहीनानविज्ञानाल्लोभोऽप्यभिभविष्यति । लोभक्रोधपरा मूढाः कामासक्ताश्च मानवाः । वैरबद्धा भविष्यन्ति परस्परबधेप्सवः । ब्राह्मणाः क्षत्रिया वैश्याः संकीर्य्यन्ते परस्परम् । शूद्रतुल्या भविष्यन्ति तपःसत्यविवर्जिताः । अन्त्या मध्या भविष्यन्ति, मध्याश्चान्त्या न संशयः । ईदृशो भविता लोको युगान्ते पर्य्युपस्थिते । वस्त्राणां प्रवरा शाणी, धान्यानां कोरदूषकाः । भार्य्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये । मत्स्यामिषेण जीवन्तो दुहन्तश्चाप्यजैडकम् । गोषु नष्टासु पुरुषा येऽपि नित्यं धृतव्रताः । तेऽपि लोभसमायुक्ता भविष्यन्ति युगक्षये । अन्योऽन्यं परिमुष्णन्तो हिंसयन्तश्च मानवाः । अजपा नास्तिकाः स्तेना भविष्यन्ति युगक्षये । सरित्तीरेषु कुद्दालैर्वापयिष्यन्ति चौषधीः । ताश्चाप्यल्पफलास्तेषां भविष्यन्ति युगक्षये । श्राद्धे दैवेऽपि पुरुषा येऽपि नित्यं धृतव्रताः । तेऽपि लोभसमायुक्ता भोक्ष्यन्तीह परस्परम् । पिता पुत्त्रस्य भोक्ता च, पितुः पुत्त्रस्तथैव च । अतिक्रान्तानि भोज्यानि भविष्यन्ति युगक्षये । न व्रतानि चरिष्यन्ति ब्राह्मणा वेदनिन्दकाः । न यक्ष्यन्ति न होष्यन्ति हेतुवादविमोहिताः । निम्ने क्षेत्रं करिष्यन्ति हेतुवादविमोहिताः । निम्ने कृषिं करिष्यन्ति योक्ष्यन्ति धुरि धेनुकाः । एकहायनवत्सांश्च योजयिष्यन्ति मानवाः । पुत्त्रः पितृबधं कृत्वा पिता पुत्त्रबधं तथा । निरुद्वेगो वृहद्वादी न निन्दामुपलप्स्यते । म्लेच्छभूतं जगत्सर्वं निष्क्रियं यज्ञवर्ज्जितम् । भविष्यति निरानन्दमनुत्सवमथो तथा । प्रायशः कृपणानां हि तथा बन्धुमतामपि । विधवानाञ्च वित्तानि हरिष्यन्तीह मानवाः । स्वल्पवीर्य्यबलाः स्तब्धा लोभमोहपरायणाः । तत्कथादानसन्तुष्टा दुष्टानामपि मानवाः । प्रतिग्रहं करिष्यन्ति मायाचारपरिग्रहाः । समाह्वयन्तः कौन्तेय ! राजानः पापबुद्धयः । परस्परबधोद्युक्ता, मूर्खाः पण्डितमानिनः । भविष्यन्ति युगस्यान्ते क्षत्त्रिया लोककण्टकाः । अरक्षितारो लुब्धाश्च मानाहङ्कारदर्पिताः ; केवलं दण्डरुचयो भविष्यन्ति युगक्षये । आक्रम्याक्रम्य साधूनां दारांश्चापि धनानि च । भोक्ष्यन्ते निरनुक्रोशा रुदतामपि भारत ! । न कन्यां याचते कश्चिन्नापि कन्या प्रदीयते । स्वयंग्राहा भविष्यन्ति युगान्ते समुपस्थिते । राजानश्चाप्यसन्तुष्टाः परार्थान् मूढचेतसः । सर्व्वोपायैर्हरिष्यन्ति युगान्ते पर्य्युपस्थिते । म्लेच्छीभूतं जगत्सर्व्वं भविष्यति न संशयः । हस्तो हस्तं परिमुषेद्युगान्ते समुपस्थिते । सत्यं संक्षिप्यते लोके नरैः पण्डितमानिभिः । स्थविरा बालमतयो बालाः स्थविरबुद्धयः । भीरुस्तथा शूरमानी शूरा

भीरुविवादिनः । न विश्वसन्ति चान्योऽन्यं युगान्ते पर्य्युपस्थिते । एकहार्य्यं युगं सर्व्वं लोभमोहव्यवस्थितम् । अधर्म्मो वर्द्धते तत्र न तु धर्मः प्रवर्त्तते । ब्राह्मणाः क्षत्त्रिया वैश्या न शिष्यन्ते जनाधिप ! । एकवर्णस्तदा लोको भविष्यति युगक्षये । न क्षंस्यति पिता पुत्त्रं, पुत्त्रश्च पितरं तथा । भार्य्याश्च पतिशुश्रूषां न करिष्यन्ति संक्षये । ये यवान्ना जनपदा गोधूमान्नास्तथैव च । तान् देशान् संश्रयिष्यन्ति युगान्ते पर्य्युपस्थिते । स्वैराचाराश्च पुरुषा योषितश्च विशाम्पते ! । अन्योऽन्यं न सहिष्यन्ति युगान्ते पर्य्युपस्थिते । म्लेच्छीभूतं जगत्सर्व्वं भविष्यति युधिष्ठिर ! । न श्राद्धैस्तर्पयिष्यन्ति दैवतानीह मानवाः । न कश्चित् कस्य चिच्छ्रोता न कश्चित् कस्यचिद्गुरुः । तमोग्रस्तस्तदा लोको भविष्यति जनाधिप ! । परमायुश्च भविता तदा वर्षाणि षोड़श । ततः प्राणान् विमोक्ष्यन्ति युगान्ते समुपस्थिते । पञ्चमे वाऽथ षष्ठे वा वर्षे कन्या प्रसूयते । सप्तवर्षाऽष्टवर्षाश्च प्रजास्यन्ति नरास्तदा । पत्यौ स्त्री तु तदा राजन् ! पुरुषो वा स्त्रियं प्रति । युगान्ते राजशार्द्दूल ! न तोषमुपयास्यति । अल्पद्रव्या वृथालिङ्गा हिंसा च प्रभविष्यति । न कश्चित् कस्यचिद्दाता भविष्यति युगक्षये । अट्टशूला जनपदाः शिवशूलाश्चतुष्पथाः । केशशूलाः स्त्रियश्चापि भविष्यन्ति युगक्षये । म्लेच्छाचाराः सर्व्वभक्षा दारुणाः सर्वकर्म्मसु । भाविनः पश्चिमे काले मनुष्या नात्र संशयः । क्रयविक्रयकाले च सर्व्वः सर्वस्य वञ्चनम् । युगान्ते भरतश्रेष्ठ ! वित्तलोभात् करिष्यति । ज्ञानानि चाप्यविज्ञाय करिष्यन्ति क्रियास्तथा । आत्मच्छन्देन वर्त्तन्ते युगान्ते समुपस्थिते । स्वभावात् क्रूरकर्म्माणश्चान्योऽन्यमभिशंसिनः । भवितारो जनाः सर्व्वे संप्राप्ते तु युगक्षये । आरामांश्चैव वृक्षांश्च नाशयिष्यन्ति निर्व्यथाः । भविता संशयो लोके जीवितस्य हि देहिनाम् । तथा लोभाभिभूताश्च भविष्यन्ति नरा नृप ! । ब्राह्मणांश्च हनिष्यन्ति ब्राह्मणस्वोपभोगिनः । हाहाकृता द्विजाश्चैव भयार्त्ता वृषलार्द्दिताः । त्रातारमलभन्तो वै भ्रमिष्यन्ति महीमिमाम् । जीवितान्तकराः क्रूरा रौद्राः प्राणिविहिंसकाः । यदा भविष्यन्ति नरास्तदा सङ्क्षेप्स्यते युगम् । आश्रयिष्यन्ति च नदीः पर्व्वतान् विषमाणि च । प्रधावमाना वित्रस्ता द्विजाः कुरुकुलोद्वह ! । दस्युभिः पीड़िता राजन् ! काका इव द्विजोत्तमाः । कुराजभिश्च सततं करभारप्रपीड़िताः । धैर्य्यं त्यक्त्वा महीपाल ! दारुणे युगसंक्षये । विकर्म्माणि करिष्यन्ति शूद्राणां परिचारकाः । शूद्रा धर्मं प्रवक्ष्यन्ति ब्राह्मणाः पर्य्युपासकाः । श्रोतारश्च भविष्यन्ति प्रामाण्येन व्यवस्थिताः । विपरीतश्च लोकोऽयं भविष्यत्यधरोत्तरः । एड़ूकान् पूजयिष्यन्ति वर्ज्जयिष्यन्ति देवताः । शूद्राः परिचरिष्यन्ति न द्विजान् युगसंक्षये । आश्रमेषु महर्षीणां ब्राह्मणावसथेषु च । देवस्थानेषु चैत्येषु नागानामालयेषु च । एड़ूकचिह्ना पृथिवी न देवगृहभूषिता । भविष्यति युगे क्षीणे तद्युगान्तस्य लक्षणम् । यदा रौद्रा धर्म्महीना मांसादाः पानपास्तथा । भविष्यन्ति नरा नित्यं तदा संक्षेप्स्यते युगम् । पुष्पं पुष्पे यदा राजन् ! फले वा फलमाश्रितम् । प्रजास्यति महाराज ! तदा सङ्क्षेप्स्यते युगम् । अकालवर्षी पर्ज्जन्यो भविष्यति गते युगे । अक्रमेण मनुष्याणां भविष्यन्ति तदा क्रियाः । विरोधमथ यास्यन्ति वृषला ब्राह्मणैः सह । मही म्लेच्छजनाकीर्णा भविष्यति ततोऽचिरात् । करभारभयाद्विप्रा भजिष्यन्ति दिशो दश । निर्व्विशेषा जनपदास्तदा विष्टिकरार्द्दिताः । आश्रमानुपलप्स्यन्ति फलमूलोपजीविनः । एवं पर्य्याकुले लोके मर्य्यादा न भविष्यति । न स्थास्यन्त्युपदेशे च शिष्या विप्रियकारिणः । आचार्य्योऽपनिधिश्चैव भर्त्स्यते तदनन्तरम् । अर्थयुक्त्या प्रवत्स्यन्ति मित्रसम्बन्धिबान्धवाः । अभावः सर्व्वभूतानां युगान्ते सम्भविष्यति । दिशः प्रज्वलिताः सर्व्वा नक्षत्राण्यप्रभाणि च । ज्योतींषि प्रतिकूलानि वाताः पर्य्याकुलास्तथा । उल्कापाताश्च बहवो महाभयनिदर्शकाः । षड्भिरन्यैश्च सहितो भास्करः प्रतपिष्यति । तुमुलाश्चापि निर्ह्रादा दिग्दाहाश्चापि सर्वशः । कबन्धान्तर्हितो भानुरुदयास्तमने तदा । अकालवर्षी भगवान् भविष्यति सहस्रदृक् । सस्यानि च न रोक्ष्यन्ति युगान्ते पर्य्युपस्थिते । अभीक्ष्णं क्रूरवादिन्यः परुषा रुदितप्रियाः । भर्त्तॄणां वचने चैव न स्थास्यन्ति तदा स्त्रियः । पुत्त्राश्च मातापितरौ हनिष्यन्ति युगक्षये । सूदयिष्यन्ति च पतीन् स्त्रियः पुत्त्रानपाश्रिताः । अपर्व्वणि महाराज ! सूर्य्यं राहुरु-

पैष्यति । युगान्ते हुतभुक् चापि सर्व्वतः प्रज्वलिष्यति । पानीयं भोजनञ्चापि याचमानास्तदाऽध्वगाः । न लप्स्यन्ते निवासञ्च निरस्ताः पथि शेरते । निर्घातवायसा नागाः शकुनाः समृगद्विजाः । रूक्षा वाचो विमोक्ष्यन्ति युगान्ते पर्य्युपस्थिते । मित्रं सम्बन्धिनश्चापि सन्त्यक्ष्यन्ति नरास्तदा । जनं परिजनञ्चापि युगान्ते पर्य्युपस्थिते । अथ देशान् दिशश्चापि पत्तनानि पुराणि च । क्रमशः संश्रयिष्यन्ति युगान्ते पर्य्युपस्थिते । हा तात ! हा सुतेत्येवं तदा वाचः सुदारुणाः । विक्रोशमानश्चान्योऽन्यं जनो गां (पृथ्वीं) पर्य्यटिष्यति । ततस्तुमुलसंघाते वर्त्तमाने युगक्षये । द्विजातिपूर्व्वको लोकः क्रमेण प्रभविष्यति । ततः कालान्तरेऽन्यस्मिन् पुनर्लोकविवृद्धये । भविष्यन्ति पुनर्दैवमनुकूलं यदृच्छया । यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यबृहस्पती । एकराशौ समेष्यन्ति प्रवत्स्यति तदा कृतम् । कालवर्षी च पर्ज्जन्यो नक्षत्राणि शुभानि च । प्रदक्षिणा ग्रहाश्चापि भविष्यन्त्यनुलोमगाः । क्षेमं सुभिक्षमारोग्यं भविष्यति निरामयम् । कल्की विष्णुयशा नाम द्विजःकालप्रणोदितः । उत्पत्स्यते महावीर्य्यो महाबुद्धिपराक्रमः । सम्भूतः शम्भलग्रामे ब्राह्मणावसथे शुभे । मनसा तस्य सर्व्वाणि वाहनान्यायुधानि च । उपस्थास्यन्ति योधाश्च शस्त्राणि कवचानि च । स धर्म्मविजयी राजा चक्रवर्त्ती भविष्यति । स चेमं सङ्कुलं लोकं प्रसादमुपनेष्यति । उत्थितो ब्राह्मणो दीप्तः क्षयान्तकृदुदारधीः । संक्षेपको हि सर्व्वस्य युगस्य परिवर्त्तकः । स सर्व्वत्र गतान् क्षुद्रान् ब्राह्मणैः परिवारितः । उत्सादयिष्यति तदा सर्व्वम्लेच्छगणान् द्विजः" ।

कलियुगस्य विशेषप्रवृत्तिरुक्ता भाग० १२,२अ० ।

"सप्तर्षीणान्तु पूर्व्वौ यौ दृश्येते उदितौ दिवि । तयोस्तु मध्ये नक्षत्रं दृश्यते यत् समं निशि । तेनैव ऋषयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम् । ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः । विष्णोर्भगवतो भानुः कृष्णाख्योऽसौ दिवं गतः । तदाविशत् कलिर्लोकं पापे यद्रमते जनः । यावत् स पादपद्माभ्यां स्पृशन्नास्ते रमापतिः । तावत् कलिर्वै पृथिवीं पराक्रान्तुं न चाशकत् । यदा देवर्षयः सप्त मघासु विचरन्ति हि । तदा प्रवृत्तस्तु कलिर्द्वादशाब्दशतात्मकः । यदा मघाभ्यो यास्यन्ति पूर्व्वाषाढां महर्षयः । तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति । यस्मिन् दिने दिवं यातस्तस्मिन्नेव तदाऽहनि । प्रतिपन्नं कलियुगमिति प्राहुः पुराविदः" ।

कलिदोषमुक्त्वा तच्छमनोपायः भाग० १२,३अ० उक्तो यथा "केनोपायेन भगवन् ! कलेर्दोषान् कलौ जनाः । विधमिष्यन्त्युपचितांस्तन्मे ब्रूहि यथा मुने ! । युगानि युगधर्म्मांश्च मानं प्रलयकल्पयोः । कालस्येश्वररूपस्य गतिं विष्णोर्महात्मनः । श्रीशुक उवाच । कृते प्रवर्त्तते धर्म्मश्चतुष्पात्तु जनैर्धृतः । सत्यं दया तपो दानमिति पादा विभो ! नृप ! । सन्तुष्टाः करुणा मैत्राः शान्ता दान्तास्तितिक्षवः । आत्मारामाः समदृशः प्रायशः श्रमणा जनाः । त्रेतायां धर्म्मपादानां तुर्य्यांशो हीयते शनैः । अधर्म्मपादैरनृतहिंसाऽसन्तोषविग्रहैः । तदा क्रियातपोनिष्ठा नातिहिंस्रा न लम्पटाः । त्रैवर्गिकास्त्रयीवृद्धा वर्णा ब्रह्मोत्तरा नृप ! । तपःसत्यदयादानेष्वर्द्धं ह्रसति द्वापरे । हिंसाऽतुष्ट्यनृतद्वेषैर्धर्म्मस्याधर्म्मलक्षणैः । यशस्विनो महाशीलाः स्वाध्यायाध्ययने रताः । आढ्याः कुटुम्बिनो हृष्टाः वर्णाः क्षत्रद्विजोत्तराः । कलौ तु धर्म्महेतूनां तुर्य्यांशोऽधर्म्महेतुभिः । एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति । तस्मिँल्लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः । दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः । सत्त्वं रजस्तम इति दृश्यन्ते पुरुषे गुणाः । कालसंनोदितास्ते वै परिवर्त्तन्त आत्मनि । प्रभवन्ति यदा सत्त्वे मनोबुद्धीन्द्रियाणि च । तदा कृतयुगं विद्याज्ज्ञाने तपसि यद्रुचिः । यदा कर्म्मसु काम्येषु भक्तिर्यशसि देहिनाम् । तदा त्रेता रजोवृत्तिरिति जानीहि बुद्धिमन् ! । यदा लोभस्त्वसन्तोषो मानो दम्भोऽथ मत्सरः । कर्म्मणाञ्चापि काम्यानां द्वापरं तद्रजस्तमः । यदा मायाऽनृतं तन्द्रा निद्रा हिंसा विषादनम् । शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः । यस्मात् क्षुद्रदृशो मर्त्याः क्षुद्रभाग्या महाशनाः । कामिनो वित्तहीनाश्च स्वैरिण्योहि स्त्रियोऽसतीः । दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः । राजानश्च प्रजाभक्ष्याः शिश्नोदरपरा द्विजाः । अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः । तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः । ह्रस्वकाया महाहारा भूर्य्यपत्या गतह्रियः । शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः । पणयिष्यन्ति वै क्षुद्राः किराटाः (वणिजः) कूटकारिणः । अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम् । पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् । भृत्यं विपन्नं पतयः, कौलं गाश्चापयस्विनीः । पितॄन्

भ्रातॄन् सुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः। ननान्दृश्यालसंवादा दीनास्त्रैणाः कलौ नराः। शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः। धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा अधिरुह्योत्तमासनम्। नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्षिताः। निरन्ने भूतले राजन्ननावृष्टिभयातुराः। वासोऽन्नपानशयनव्यवायस्नानभूषणैः। हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः। कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः। त्यक्ष्यन्तीह प्रियान् प्राणान् हनिष्यन्ति स्वकानपि। न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि। पुत्रान् भार्य्याञ्च कुलजां क्षुद्राः शिश्नोदरम्भराः। कलौ न राजन्! जगतां परं गुरुं त्रिलोकनाथानतपादपङ्कजम्। प्रायेण मर्त्या भगवन्तमच्युतं यक्ष्यन्ति पाषण्डविभिन्नचेतसः। यन्नामधेयं म्रियमाण आतुरः पतन् स्खलन् वा विवशो गृणन् पुमान्। विमुक्तकर्म्मार्गल उत्तमां गतिं प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः। पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान्। सर्व्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः। श्रुतः संकीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा। नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम्। यथा हेम्नि स्थितो वह्निर्दुर्व्वर्णं हन्ति धातुजम्। एवमात्मगतो विष्णुर्योगिनामशुभाशयम्। विद्यातपःप्राणनिरोधमैत्रीतीर्थाभिषेकव्रतदानजप्यैः। नात्यन्तशुद्धिं लभतेऽन्तरात्मा यथा हृदिस्थे भगवत्यनन्ते। तस्मात् सर्व्वात्मना राजन्! हृदिस्थं कुरु केशवम्। म्रियमाणो ह्यवहितस्ततो याति परां गतिम्। म्रियमाणैरभिध्येयो भगवान् परमेश्वरः। आत्मभावं नयत्यङ्ग सर्व्वात्मा सर्व्वसम्भवः। कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः। कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परिव्रजेत्। कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्"।

विश्वेश्वरसरस्वतीकृते कलिधर्मे नानाप्रमाणात्तद्दोषोपशमनमुक्तं यथा—विष्णुपुराणाग्निपुराणयोः। "धर्म्मोत्कर्षमतीवात्र प्राप्नोति पुरुषः कलौ। स्वल्पायासेन धर्म्मज्ञास्तेन तुष्टोऽस्म्यहं कलेः। धन्ये कलौ भजेद्विप्रोह्यल्पक्लेशैर्महाफलम्। अत्यन्तदुष्टस्य कलेरयमेको महान् गुणः" ब्रह्माण्डपुराणे। "त्रेतायामाब्दिको धर्म्मो द्वापरे मासिकः स्मृतः। यथाशक्ति परं प्राज्ञस्तदह्ना प्राप्नुयात् कलौ"। विष्णुपुराणब्रह्मपुराणयोः "यत् कृते दशभिर्व्वर्षैस्त्रेतायां हायनेन तत्। द्वापरे तत्तु मासेन अहोरात्रेण तत् कलौ। तपसो ब्रह्मचर्य्यस्य जपादेश्च फलं द्विजाः!। प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम्। तथाल्पेनैव यत्नेन पुण्यस्कन्धमनुत्तमम्। करोति यः कृतयुगे क्रियते तपसा हि सः। स्कान्दे काशीखण्डे। "कलौ विश्वेश्वरो देवः कलौ वाराणसी पुरी। कलौ भागीरथी गङ्गा कलौ दानं विशिष्यते"। अग्निपुराणे "नास्ति श्रेयस्करं नृणां विष्णोराराधनान्मुने!। युगेऽस्मिंस्तामसे घोरे यज्ञवेदविवर्जिते। कुर्व्वीताराधनं राजन्! वासुदेवे कलौ युगे। यदभ्यर्च्य हरिं भक्त्या कृते वर्षशतं नृप!। विधानेन कलौ लेभे अहोरात्रात् कलौ हि तत्" नारदीये। "अहोऽतीव सभाग्यास्ते सकृद्ये केशवार्च्चकाः। घोरे कलियुगे प्राप्ते सर्व्वधर्म्मबहिष्कृते। शिवपूजापरा ये तु शिवनामपरायणाः। त एव शिवतुल्याश्च घोरे कलियुगे द्विजाः"। स्कन्दपुराणे "ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः। द्वापरे भगवान् विष्णुः कलौ देवो महेश्वरः"। मत्स्यपुराणस्कन्दपुराणयोः "ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनम्। अविमुक्तं न मुञ्चन्ति कृतार्थास्ते नरा भुवि। नान्यं पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम्। सर्व्वपापोपशमनं प्रायश्चित्तं कलौ युगे"। भविष्यपुराणे "कृते सर्व्वाणि तीर्थानि त्रेतायां पुष्करं परम्। द्वापरे तु कुरुक्षेत्रं कलौ गङ्गैव केवलम्। ध्यानं कृते मोक्षहेतुस्त्रेतायां तच्च वै तपः। द्वापरे तद्द्वयं यज्ञाः कलौ गङ्गैव केवलम्"। स्कन्दपुराणनारदीयपुराणयोः "भुक्तिमुक्तिफलप्रेप्सुरल्पोपायेन चेन्नरः। तीर्थान्येवाश्रयेद्विद्वान् कलौ गङ्गां विशेषतः"। मनुपाराशरौ "तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते। द्वापरे यज्ञमित्याहुः दानमेकं कलौ युगे"। महाभारते "तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते। द्वापरे यज्ञमेवाहुः कलौ दानं दया दमः। गीता गङ्गा तथा भिक्षुः कपिलाश्वत्थसेवनम्। वासरं पद्मनाभस्य सप्तमं न कलौ युगे"।

एवमुक्तानां विष्णुमहादेववाराणसीगङ्गादानानां कलौ विशेषतः सेवायां यानि फलानि तान्युत्तरत्र क्रमेण प्रदर्श्यन्ते। तत्रादौ विष्णोराराधनफलं कथ्यते। "कलौ कलिमलध्वंसं सर्व्वपापहरं परम्। येऽर्चयन्ति हरिं नित्यन्तेऽपि वन्द्या यथा हरिः" नारदीये "तीर्थान्यश्वत्थतरवो गावो विप्रास्तथा भुवि। मद्भक्ताश्चेति विज्ञेयास्तनवो मम पञ्चधा। तेषां प्रपन्नात्मनां भीतोऽभ्यर्णं कलिरघात्मकः। मन्दीभवत्पृथुविभवो निःषङ्ग

न प्रवर्द्धते । पूजिताः प्रणताः स्पृष्टाः स्तुता दृष्टाः स्मृता अपि । नृणां सर्व्वाघहन्तारः सततं ते हि मन्मयाः” ।

कलौ विष्णोर्नामसंकीर्त्तनेन आराधनं कर्त्तव्यम् उक्तञ्च भागवते । “कलिं सभाजयन्त्यार्य्या गुणज्ञाः सत्र(यत्र)भागिनः । यत्र संकीर्त्तनेनैव सर्व्वः स्वार्थोऽपि लभ्यते । नास्यतः परमो लाभो देहिनां भ्राम्यतामिह, । यतो विन्देत परमां शान्तिं, नश्यति संसृतिः” । कलेर्दोषोपशमनोपाये भागवतवाक्यमनुपदं दर्शितम् ।

स्कान्दपुराणे “गोविन्दनाम्ना यः कश्चिन्नरो भवति भूतले । कीर्त्तनादेव तस्यापि पापं याति सहस्रधा” विष्णुधर्म्मोत्तरे “येऽहर्निशं जगद्धातुर्व्वासुदेवस्य कीर्त्तनम् । कुर्व्वन्ति तान्नरव्याघ्र ! न कलिर्बाधते नरान् । चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत् । नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः । अज्ञानादथ वा ज्ञानादुत्तमश्लोकनाम यत् । संकीर्त्तितमघं पुंसो दहेदेधो यथाऽनलः” । विष्णुरहस्ये “सा हानिस्तन्महच्छिद्रं स मोहः स च विभ्रमः । यन्मुहूर्त्तं क्षणं वापि वासुदेवं न चिन्तयेत्” । मोहोऽविवेकः विभ्रमो विपरीतज्ञानम् । स्कान्दे “अभक्ष्यभक्षणात् पापमगम्यागमनादिजम् । नश्यते नात्र संदेहो गोविन्दस्य च कीर्त्तनात् । स्वर्णस्तेयं सुरापानं गुरुदाराभिमर्षनम् । गोविन्दकीर्त्तनात् सद्यः पापं याति महामुने ! । तावत्तिष्ठति देहेऽस्मिन् कलिकल्मषसंभवम् । गोविन्दकीर्त्तनं यावत् कुरुते मानवो न हि” “गोविन्देत्युक्तिमात्रेण हेलया कलिवर्द्धितम् पापौघो विलयं याति दानमम्भोनिधिर्यथा । गोविन्देति तथा प्रातर्म्मध्याह्ने वा निशागमे । कीर्त्तनात् पुण्यमाप्नोति जन्मकोटिशतोद्भवम् । गवामयुतकोटीनां कन्यानाम युतायुतैः । तीर्थकोटिसहस्राणां तुल्यं गोविन्दकीर्त्तनम् । तन्नास्ति कर्म्मजं लोके वाग्जं मानसमेव वा । यत्तु न क्षीयते पापं कलौ गोविन्दकीर्त्तनात् । प्रमादादपि संस्पृष्टो यथाऽनलकणो दहेत् । तथौष्ठपुटसंस्पृष्टं हरिनाम हरेदघम्” । वामनपुराणे । “अश्वमेधादिभिर्यज्ञैः नरमेधैस्तथैव च । याजितं तेन, येनोक्तं हरिरित्यक्षरद्वयम् । महाभारते “प्राणप्रयाणपाथेयं संसारव्याधिभेषजम् । दुःखशोकपरित्राणं हरिरित्यक्षरद्वयम्” । विष्णुपुराणे “ध्यायन् कृते यजन् यज्ञैः त्रेतायां, द्वापरेऽर्च्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् । अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः । पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव” ।

अथ कलिदोषोपशमनाय शिवपूजनादि विहितं यथा— लिङ्गपुराणे “कलौ रुद्रो महादेवः शङ्करो नीललोहितः । प्रकाशते प्रतिष्ठार्थं धर्म्मस्य विकटाकृतिः । ये तं विप्राश्च सेवन्ते येन केनापि शङ्करम् । कलिदोषं विनिर्जित्य प्रयान्ति परमां गतिम्” बृहन्नारदीये “शिव ! शङ्कर ! रुद्रेश ! नीलकण्ठ ! त्रिलोचन ! । इतीरयन्ति ये नित्यं न हि तान् बाधते कलिः । महादेव ! विरूपाक्ष ! गङ्गाधर ! मृडाव्यय ! । इतीरयन्ति ये नित्यं ते कृतार्था न संशयः । हरिस्मरणनिष्ठानां शिवनामरतात्मनाम् । सत्यं समस्तकर्म्माणि यान्ति संपूर्णतां द्विजाः ! । शिवपूजापरा ये तु शिवनामपरायणाः । तएव शिवतुल्याश्च घोरे कलियुगे द्विजाः” महाभारते “यस्तौ नमः शिवायेति मुच्यते स कलौ नरः । शाठ्येनापि नमस्कारः प्रयुक्तः शूलपाणये । संसाररोगसंघानामुन्मूलनकरः कलौ । यदा कदा तं यजते श्रद्धया मुनिपुङ्गव ! । लिङ्गेऽथ स्थण्डिले वापि कौतुके विधिपूर्व्वकम् । पुरा दोषं विनिर्जित्य रुद्रलोके महीयते !” । शिवपुराणे “ध्यानं परं कृतयुगे त्रेतायां यजनं परम् । द्वापरे लिङ्गपूजा च कलौ शङ्करकीर्त्तनम्” स्कान्दपुराणे “ब्रह्मा कृतयुगे देवः त्रेतायां भगवान् रविः । द्वापरे भगवान् विष्णुः कलौ देवो महेश्वरः” ।

अथ कलौ काशीवासस्य तथात्वमाह च स्कान्दपुराणे व्यासः । “इदं कलियुगं घोरं संप्राप्तं पाण्डुनन्दन ! । ततो गच्छामि देवस्य पुरीं वाराणसीं शुभाम् । अस्मिन् कलियुगे घोरे नराः पापानुवर्त्तिनः । भविष्यन्ति महाबाहो ! वर्णाश्रमविवर्ज्जिताः । नान्यत् पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् । सर्व्वपापप्रशमनम् प्रायश्चित्तं कलौ युगे । ये विप्रास्तां पुरीं प्राप्य न मुञ्चन्ति कदाचन । विजित्य कलिजान् दोषान् यान्ति तत् परमं पदम्” लिङ्गपुराणे “कलौ युगे तु मर्त्त्यानां स्थानं मोक्षप्रदायकम् । भक्त्या चाराधनेनैव स्नानतर्पणपूजनैः । ज्ञात्वा कलियुगं घोरं अल्पायुषमधार्म्मिकम् । सिद्धक्षेत्रं न सेवन्ते जायन्ते च म्रियन्ति च” मत्स्यपुराणे “ज्ञात्वा कलियुगं घोरं हाहाभूतमचेतनम् । अविमुक्तं न मुञ्चन्ति कृतार्थास्ते नरा भुवि । जपध्यानविहीनानां ज्ञानविज्ञानवर्ज्जिनाम् । तपस्युत्साहहीनानां गतिर्व्वाराणसी नृणाम्” स्कान्दे काशीखण्डे “न सिध्यति कलौ योगो न सिध्यति कलौ तपः । न्यायार्ज्जितधनोत्सर्गैः सद्यः सिध्येत् कलौ परः । न व्रतं न तपो ध्यानं न

जपेन सुरार्च्चनम् । दानमेव कलौ मुक्त्यै, काशी दानेन चाप्यते । कलिस्तानेव बाधेत कालस्तांश्च जिघांसति । एनांसि तांश्च बाधन्ते ये न काशीं समाश्रिताः । कलि-कालकृतं कर्म त्रिकण्टकमितीरितम् । एतत्त्रयं न प्रभवेदानन्दवनवासिनाम्”

अथ गङ्गायास्तथात्वमाह तुः काशीखण्डभविष्य-पुराणे “कृते सर्व्वत्र तीर्थानि त्रेतायां पुष्करं परम् । द्वापरे तु कुरुक्षेत्रं कलौ गङ्गैव केवलम् । ध्यानं कृते मोक्षहेतुस्त्रेतायां तच्च वै तपः । द्वापरे तद्द्वयं यज्ञाः कलौ गङ्गैव केवलम्” । विष्णुधर्म्मोत्तरे “पुष्करं तु कृते सेव्यं त्रेतायां नैमिषं तथा । द्वापरे तु कुरुक्षेत्रं, कलौ गङ्गां समाश्रयेत्” । स्कन्दपुराणे “भुक्ति-मुक्तिफलप्रेप्सुरल्पोपायेन चेन्नरः । तीर्थान्येवाश्रयेद्विद्वान् कलौ गङ्गां विशेषतः” । नारदीये कलौ तत्परमब्रह्मप्राप्तये सत्वरं नृणाम् । गङ्गाभजनमेवाहुर्म्महोपायं महर्षयः । लैङ्गे “कृते युगे पुष्कराणि त्रेतायां नैमिषं तथा । द्वापरे तु कुरुक्षेत्रं कलौ गङ्गां समाश्रयेत्” कामिकसंहितायाम् “न भवेद्वेदमन्त्राणां संशुद्धिः, शुद्धिवर्जितैः । मन्त्रैर्विना न सिध्यन्ति यज्ञाः, शुद्धिः सुदुर्लभा । काले कलौ विशेषेण शुद्धं वस्तु न दृश्यते । कलौ युगे हि तमसा नष्टधर्म्मे भयङ्करे । अनेकच्छिन्नसन्तानो धर्म्मतन्तुर्हि जाह्नवी । विना गङ्गां धर्म्ममयीं कथं स्याच्च गतिः कलौ । शिरसः कर्त्तनं तस्य प्राणत्यागोऽपि वा वरः । समर्थस्तु कलौ काले गङ्गां यो ऽभिगच्छति” भविष्यपुराणे “कलौ कलुषचित्तानां पापद्रव्यरतात्मनाम् । विधिहीनक्रियाणाञ्च गतिर्गङ्गां विना नहि । अनाश्रित्य तु गङ्गां हि मुक्तिमिच्छति यः कलौ । सूर्य्यं द्रष्टुमिहोद्युक्तो जात्यन्धसदृशस्तु सः । वृथा कुलं, वृथा विद्या, वृथा यज्ञा, वृथा तपः । वृथा दानानि तस्येह कलौ गङ्गां न याति यः” कूर्म्मपु० “गङ्गामेव निषेवेत प्रयागे तु विशेषतः । नान्यत् कलियुगोद्भूतं मलं हन्ति सुदुस्तरम्” ।

अथ कलियुगे दानस्य श्रेष्ठत्वम् अतएव मनुः “अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे । अन्ये कलियुगे नृणां युगह्रासानुरूपतः” इति युगभेदेन धर्म्मभेदमाह स्म । मनुपराशरौ “तपः परं कृतयुगे त्रेतायां ज्ञान-मुच्यते । द्वापरे यज्ञमित्याहुर्दानमेकं कलौ युगे” । महाभारते “तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमेवाहुः कलौ दानं दया दमः” बृहस्पतिः “त्रयीधर्म्मः कृतयुगे, ज्ञानं त्रेतायुगे स्मृतम् । द्वापरे चाध्वरः प्रोक्तः, कलौ दानं दया दमः” । लिङ्गपुराणे “ध्यानं परं कृतयुगे त्रेतायां ज्ञानमुच्यते । प्रवृत्तं द्वापरे युद्धं, दानमेकं कलौ युगे” । अग्निपुराणे “देवतावेश्म-मूर्त्त्यादिनगराणि कलौ युगे । कर्त्तव्यानि महीपालैः स्वर्गलोकमभीप्सुभिः”

इत्येवं कलौ विशेषधर्म्माः सेव्या इति दर्शितम् ।

सामान्यतः कलौ सेव्यधर्म्मानाह स्म पराशरः । “अस्मिन्मन्वन्तरे धर्म्माः कृतत्रेतादिके युगे । सर्व्वे धर्म्माः कृते जाताः सर्व्वे नष्टाः कलौ युगे । चातु-र्व्वर्ण्यसमाचारं किञ्चित् साधारणं वद । व्यासवा-क्यावसाने तु मुनिमुख्यः पराशरः । धर्म्मस्य निर्णयं प्राह सूक्ष्मं स्थूलञ्च विस्तरात् । शृणु पुत्र ! प्रवक्ष्ये-ऽहं शृण्वन्तु ऋषयस्तथा । कल्पे कल्पे क्षयोत्पत्तौ ब्रह्मविष्णुमहेश्वराः । श्रुतिः स्मृतिः सदाचारा निर्णेत-व्याश्च सर्व्वदा । न कश्चिद्वेदकर्त्ता च वेदस्मर्त्ता चतु-र्मुखः । तथैव धर्म्मं स्मरति मनुः कल्पान्तरान्तरे । अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे । अन्ये कलि-युगे नृणां युगरूपानुसारतः । तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमित्यूचुर्दानमेकं कलौ युगे । कृते तु मानवो धर्म्मस्त्रेतायां गौतमः स्मृतः । द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः । त्यजेद्देशं कृतयुगे, त्रेतायां ग्राममुत्सृजेत् । द्वापरे कुलमेकन्तु कर्त्तारञ्च कलौ युगे । कृते सम्भाषणात् पापं, त्रेतायाञ्चैव दर्शनात् । द्वापरे चान्नमादाय, कलौ पतति कर्म्मणा । कृते तु तत्क्षणाच्छापस्त्रेतायां दश-भिर्द्दिनैः । द्वापरे मासमात्रेण, कलौ संवत्सरेण तु । अभि-गम्य कृते दानं, त्रेतास्वाहूय दीयते । द्वापरे याचमानाय, सेवया दीयते कलौ । अभिगम्योत्तमं दानमाहूतञ्चैव मध्य-मम् । अधमं याच्यमानं स्यात्, सेवादानञ्च निष्फलम् । कृते चास्थिगताः प्राणास्त्रेतायां मांससंस्थिताः । द्वापरे रुधिरं यावत्, कलावन्नादिषु स्थिताः । धर्म्मो जितो ह्यधर्म्मेण, जितः सत्योऽनृतेन च । जिताश्चौरैस्तु राजानः, स्त्रीभिश्च पुरुषा जिताः । सीदन्ति चाग्निहोत्राणि, गुरुपूजा प्रण-श्यति । कुमार्य्यश्च प्रसूयन्ते तस्मिन् कलियुगे सदा । युगे युगे च ये धर्म्मास्तत्र तत्र च ये द्विजाः । तेषां निन्दा न कर्त्तव्या युगरूपा हि ते द्विजाः । युगे युगे च सामर्थ्यं शेषं मुनिभिर्भाषितम् । पराशरेण

साध्यकं प्रायश्चित्तं प्रदीयते । अहमद्यैव तद्धर्म्ममनुसृत्य ब्रवीमि वः । चातुर्व्वर्ण्यसमाचारं शृणुध्वं मुनिपुङ्गवाः ॥ पराशरमतं पुण्यं पवित्रं पापनाशनम्” इत्यारभ्य कलियुगे कर्त्तव्यास्तद्धर्म्मास्तत्रोक्तास्ते च तत एवावसेयाः । कलिस्वभाववर्णनेनागमोक्तैवोपासना कलौ कार्य्येति महानिर्व्वाणतन्त्रे निरूपितं यथा

“आयाते पापिनि कलौ सर्व्वधर्म्मविलोपिनि । दुराचारे दुष्प्रपञ्चे दुष्टकर्म्मप्रवर्त्तके ॥ न वेदाः प्रभवस्तत्र स्मृतीनां स्मरणं कुतः । नानेतिहासयुक्तानां नानामार्गप्रदर्शिनाम् ; बहुलानाम्पुराणानां विनाशो भविता विभो !॥ तदा लोका भविष्यन्ति धर्म्मकर्म्मबहिर्मुखाः । उच्छृङ्खला मदोन्मत्ताः पापकर्म्मरताः सदा ॥ कामुका लोलुपाः क्रूरा निष्ठुरा दुर्मुखाः शठाः । स्वल्पायुर्मन्दमतयो रोगशोकसमाकुलाः ॥ निःश्रीका निर्ब्बला नीचा नीचाचारपरायणाः । नीचसंसर्गनिरताः परवित्तापहारकाः ॥ परनिन्दापरद्रोहपरीवादपराः खलाः । परस्त्रीहरणे पापशङ्काभयविवर्जिताः ॥ निर्धना मलिना दीना दरिद्राश्चिररोगिणः । विप्राः शूद्रसमाचाराः सन्ध्यावन्दनवर्जिताः ॥ अयाज्ययाजका लुब्धा दुर्वृत्ताः पापकारिणः । असत्यभाषिणो मूर्खा दाम्भिका दुष्प्रवञ्चकाः ॥ कन्याविक्रयिणो व्रात्यास्तपोव्रतपराङ्मुखाः । लोकप्रतारणार्थाय जपपूजापरायणाः ॥ पाषण्डाः पण्डितम्मन्याः श्रद्धाभक्तिविवर्जिताः । कदाहाराः कदाचारा भृतकाः शूद्रसेवकाः ॥ शूद्रान्नभोजिनः क्रूरा वृषलीरतिकामुकाः । दास्यन्ति धनलोभेन स्वदारान्नीचजातिषु ॥ ब्राह्मण्यचिह्नमेतावत् केवलं सूत्रधारणम् । नैव पानादिनियमो भक्ष्याभक्ष्यविवेचनम् ॥ धर्म्मशास्त्रे सदा निन्दा साधुद्रोहो निरन्तरम् । सत्कथालापमात्रञ्च न तेषां मनसि क्वचित् ॥ त्वया कृतानि तन्त्राणि जीवोद्धारणहेतवे । निगमागमजातानि भुक्तिमुक्तिकराणि च ॥ देवीनां यत्र देवानां मन्त्रयन्त्रादिसाधनम् । कथिता बहवो न्यासाः सृष्टिस्थित्यादिलक्षणाः ॥ बद्धपद्मासनादीनि गदितान्यपि भूरिशः । पशुवीरदिव्यभावा देवतामन्त्रसिद्धिदाः ॥ शवासनं चितारोहो मुण्डसाधनमेव च । लतासाधनकर्म्माणि त्वयोक्तानि सहस्रशः ॥ पशुभावदिव्यभावौ स्वयमेव निवारितौ । कलौ न पशुभावोऽस्ति दिव्यभावः कुतो भवेत् ॥ पत्रं पुष्पं फलं तोयं स्वयमेवाहरेत् पशुः । न शूद्रदर्शनं कुर्य्यान्मनसा न स्त्रियं स्मरेत् ॥ दिव्यश्च देवताप्रायः शुद्धान्तःकरणः सदा । द्वन्द्वातीतो वीतरागः सर्व्वभूतसमः क्षमी ॥ कलिकल्मषयुक्तानां सर्व्वदाऽस्थिरचेतसाम् । निद्रालस्यप्रसक्तानां भावशुद्धिः कथम्भवेत् ? ॥ वीरसाधनकर्म्माणि पञ्चतत्त्वानि यानि तु । मद्यं मांसं तथा मत्स्यो मुद्रा मैथुनमेव च ॥ एतानि पञ्च तत्त्वानि त्वया प्रोक्तानि शङ्कर ! ॥ कलिजा मानवा लुब्धाः शिश्नोदरपरायणाः । लोभात् तत्र पतिष्यन्ति न करिष्यन्ति साधनम् ॥ इन्द्रियाणां सुखार्थाय पीत्वा च बहुलं मधु । भविष्यन्ति मदोन्मत्ता हिताहितविवर्जिताः ॥ परस्त्रीधर्षकाः केचिद् दस्यवो बहवो भुवि । न करिष्यन्ति ते मत्ताः पापयोनिविचारणम् ॥ अतिपानादिदोषेण रोगिणो बहवः क्षितौ । शक्तिहीना बुद्धिहीना भूत्वा च विकलेन्द्रियाः ॥ ह्रदे गर्त्ते प्रान्तरे च प्रासादात् पर्व्वतादपि । पतिष्यन्ति मरिष्यन्ति मनुजा मदविह्वलाः ॥ केचिद्विवादयिष्यन्ति गुरुभिः स्वजनैरपि । केचिन्मौना मृतप्राया अपरे बहुजल्पकाः ॥ अकार्य्यकारिणः क्रूरा धर्म्ममार्गविलोपकाः । हिताय यानि कर्म्माणि कथितानि त्वया प्रभो ! ॥ मन्ये तानि महादेव ! विपरीतानि मानवे । के वा योगं करिष्यन्ति न्यासजातानि केऽपि वा ॥ स्तोत्रपाठं यन्त्रलिपिं पुरश्चर्य्यां जगत्पते ! ॥ युगधर्म्मप्रभावेन स्वभावेन कलौ नराः । भविष्यन्त्यतिदुर्वृत्ताः सर्व्वथा पापकारिणः ॥ तेषामपायं दीनेश ! कृपया कथय प्रभो ! ॥ आयुरारोग्यवर्च्चस्यं बलवीर्य्यविवर्द्धनम् । विद्याबुद्धिप्रदं नृणामप्रयत्नशुभङ्करम् ॥ येन लोका भविष्यन्ति महाबलपराक्रमाः । शुद्धचित्ताः परहिता मातापित्रोः प्रियङ्कराः ॥ स्वदारनिरताः पुरुषाः परस्त्रीषु पराङ्मुखाः । देवतागुरुभक्ताश्च पुत्रस्वजनपोषकाः ॥ ब्रह्मज्ञा ब्रह्मविद्याश्च ब्रह्मचिन्तनमानसाः । सिद्ध्यर्थं लोकयात्रायाः कथयस्व हिताय यत् ॥ कर्त्तव्यं यदकर्त्तव्यं वर्णाश्रमविभेदतः । विना त्वां सर्व्वलोकानां कस्त्राता भुवनत्रये” ॥ १उल्ला० देवीप्रश्नः

“इति देव्या वचः श्रुत्वा शङ्करो लोकशङ्करः । कथयामास तत्त्वेन महाकारुण्यवारिधिः ॥ सदाशिव उवाच । साधु पृष्टं महाभागे ! जगतां हितकारिणि ! ॥ एतादृशः शुभः प्रश्नो न केनापि कृतः पुरा । धन्याऽसि सुकृतज्ञासि हितासि कलिजन्मनाम् ॥ यद् यदुक्तं त्वया भद्रे ! सत्यं सत्यं यथार्थतः । सर्व्वज्ञा त्वं त्रिकालज्ञा धर्म्मज्ञा परमेश्वरि ! ॥ भूतम्भवद्भविष्यच्च धर्म्मयुक्तं त्वया प्रिये ! ॥ यथातथ्यं

यथान्यायं यथायोग्यं न संशयः । कलिकल्मषदीनानां द्विजादीनां सुरेश्वरि ! । मेध्यामेध्याविचाराणां न शुद्धिः श्रौतकर्मणाम् । न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत् । सत्यं सत्यं पुनः सत्यं सत्यं सत्यं मयोच्यते । विनाह्यागममार्गेण कलौ नास्ति गतिः प्रिये ! । श्रुतिस्मृतिपुराणादौ मयैवोक्तं पुरा शिवे ! । आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः । कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्त्तते । न तस्य गतिरस्तीति सत्यं सत्यं न संशयः । सर्व्वैर्वेदैः पुराणैश्च स्मृतिभिः संहितादिभिः । प्रतिपाद्योऽस्मि नान्योऽस्ति प्रभुर्जगति मां विना । आमनन्ति च ते सर्व्वे मत्पदं लोकपावनम् । मन्मार्गविमुखा लोकाः पाषण्डा ब्रह्मघातिनः । अतो मन्मतमुत्सृज्य यो यत् कर्म समाचरेत् । निष्फलं तद्भवेद्देवि ! कर्त्तापि नारकी भवेत् । मूढो मन्मतमुत्सृज्य योऽन्यमतमुपाश्रयेत् । ब्रह्महा पितृहा स्त्रीघ्नः स भवेन्नात्र संशयः । कलौ तन्त्रोदिता मन्त्राः सिद्धास्तूर्णफलप्रदाः । शस्ताः कर्मसु सर्व्वेषु जपयज्ञक्रियादिषु । निर्वीर्य्याः श्रौतजातीया विषहीनोरगा इव । सत्यादौ सफला आसन् कलौ ते मृतका इव । पाञ्चालिका यथा भित्तौ सर्व्वेन्द्रियसमन्विताः । अमूरशक्ताः कार्य्येषु तथान्ये मन्त्रराशयः । अन्यमन्त्रैः कृतं कर्म वन्ध्यास्त्रीसङ्गमो यथा । न तत्र फलसिद्धिः स्याच्छ्रम एव हि केवलम् । कलावन्योदितैर्मार्गैः सिद्धिमिच्छति यो नरः । तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिः । मदुक्तादुदितं धर्मं हित्वान्यधर्ममीहते । अमृतं स्वगृहे त्यक्त्वा क्षीरमार्कं स वाञ्छति । नान्यः पन्था मुक्तिहेतुरिहामुत्र सुखाप्तये । यथा तन्त्रोदितो मार्गो मोक्षाय च सुखाय च । तन्त्राणि बहुधोक्तानि नानाख्यानान्वितानि च । सिद्धानां साधकानाञ्च विधानानि च भूरिशः । अधिकारिविभेदेन पशुबाहुल्यतः प्रिये ! कुलाचारोदितं धर्मं गुप्तरूपं कथितं क्वचित् । जीवप्रवृत्तिकारीणि कानिचित् कथितान्यपि । देवा नानाविधाः प्रोक्ता देव्योऽपि बहुधा प्रिये ! । भैरवाश्चैव वेतालावटुका नायिका गणाः । शाक्ताः शैवा वैष्णवाश्च सौरा गाणपतादयः । नानामन्त्राश्च यन्त्राणि सिद्ध्युपायाह्यनेकशः । भूरिप्रयाससाध्यानि यथोक्तफलदानि च । यथा यथा कृताः प्रश्ना येन येन यदा यदा । तदा तस्योपकाराय तथैवोक्तं मया प्रिये ! । सर्व्वलोकोपकाराय सर्व्वप्राणिहिताय च । युगधर्मानुसारेण याथातथ्येन पार्व्वति ! । त्वया यादृक्कृतः प्रश्नो न केनापि पुरा कृतः । तव स्नेहेन वक्ष्यामि सारात् सारं परात् परम् । वेदानामागमानाञ्च तन्त्राणाञ्च विशेषतः । सारमुद्धृत्य देवेशि ! तवाग्रे कथ्यते मया । यथा नरेषु तन्त्रज्ञाः सरितां जाह्नवी यथा । यथाहं त्रिदिवेशानामागमानामिदं तथा । किं वेदैः किं पुराणैश्च किं शास्त्रैर्बहुभिः शिवे ! । विज्ञातेऽस्मिन्महातन्त्रे सर्व्वसिद्धीश्वरो भवेत् । यतो जगन्मङ्गलाय त्वयाहं विनियोजितः । अतस्ते कथयिष्यामि यद्विश्वहितकृत् भवेत्" २ उल्ला० ।

"कलौ पापयुगे घोरे तपोहीनेऽतिदुस्तरे । निस्तारबीजमेतावद्ब्रह्ममन्त्रस्य साधनम् । साधनानि बहूक्तानि नानातन्त्रागमादिषु । कलौ दुर्व्वलजीवानामसाध्यानि महेश्वरि ! । अल्पायुषः स्वल्पवृत्ता अन्नाधीनासवः प्रिये ! लुब्धा धनार्जने व्यग्राः सदा चञ्चलमानसाः । समाधावस्थिरधियो यज्ञायासासहिष्णवः । तेषां हिताय मोक्षाय ब्रह्ममार्गोऽयमीरितः । कलौ नास्त्येव नास्त्येव सत्यं सत्यं मयोच्यते । ब्रह्मदीक्षां विना देवि ! कैवल्याय सुखाय च । यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी तथा । न स्थास्यति वरारोहे ! तदैव प्रबलः कलिः । यदा तु पुण्यपापानां परीक्षा वेदसम्भवा । न स्थास्यति शिवे ! शान्ते ! तदैव प्रबलः कलिः । क्वचिच्छिन्ना क्वचिद्भिन्ना यदा सुरतरङ्गिणी । भविष्यति कुलेशानि ! तदैव प्रबलः कलिः । यदा तु म्लेच्छजातीया राजानो धनलोलुपाः । भविष्यन्ति महामाये ! तदैव प्रबलः कलिः । यदा स्त्रियोऽतिदुर्दान्ताः कर्कशाः कलहे रताः । गर्हिष्यन्ति स्वभर्त्तारं तदैव प्रबलः कलिः । यदा तु मानवा भूमौ स्त्रीजिताः कामकिङ्कराः । द्रुह्यन्ति गुरुमित्रादीन् तदैव प्रबलः कलिः । यदा क्षौणी स्वल्पफला तोयदाः क्वचिद्वर्षिणः । असम्यक्फलिनो वृक्षास्तदैव प्रबलः कलिः । भ्रातरः स्वजनामात्या यदा धनकणेहया । मिथः सम्प्रहरिष्यन्ति तदैव प्रबलः कलिः । प्रकटे मद्यमांसादौ निन्दादण्डविवर्जिते । गूढपानं चरिष्यन्ति तदैव प्रबलः कलिः" ३ उल्ला० । इत्युपक्रम्य ब्रह्मसाधनप्रकारस्तत्र दर्शितः । स च तत एवावसेयः । उपासनायां विशेषः । कुब्जिकातन्त्रे १ पटले । "श्रुतिस्मृतिविधानेन पूजा कार्य्या युगत्रये । आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः । न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः" । पुरश्चरणरसोल्लासतन्त्रे ३ पटलेऽपि । "तन्त्रोक्तं ध्यानमन्त्रञ्च प्रशस्तं भारते कलौ । वेदोक्तञ्चैव स्मृत्युक्तं पुराणोक्तं वरानने ! ।

न यस्तं चञ्चलापाङ्गि ! कदाचिद्भारते कलाविति"। "श्रौतो धर्म्मः कृतयुगे त्रेतायां स्मार्त्त एव तु । द्वापरे च पुराणोक्तः कलावागमसम्मतः" पठन्ति । अत्रेदमभिदध्महे । वेदेषु काण्डत्रयमस्ति कर्म्मोपासनाब्रह्मरूपप्रतिपाद्यभेदात् । तत्र कर्म्मकाण्डमधिकृत्य जैमिनिप्रभृतिभिः सम्यक्तया कर्त्तव्यतादि विवेचितम् । उपासनाकाण्डमधिकृत्य शाण्डिल्यनारदादिभिः, ब्रह्मकाण्डमधिकृत्य च व्यासादिभिः प्रपञ्चो दर्शितः । तत्र उपासनाकाण्डमधिकृत्यैवागमशास्त्रप्रवृत्तिः तन्मूलञ्च रामतापनीयनृसिंहतापनीयप्रभृति । इत्यागमशास्त्रस्य प्रामाण्यम् । अनुपलभ्यमानमूलकागमस्यापि स्मृतिवत् श्रुतिकल्पकत्वेन प्रामाण्यम् । तत्र कर्म्मकाण्डे सर्व्वेऽप्यधिकारिणः मुमुक्षोरपि तत्त्वज्ञानपर्य्यन्तं चित्तशुद्ध्यर्थं प्रत्यवायपरिहारार्थं च कर्म्मकरणविधानात् "तमेतमात्मानं विविदिषन्ति वेदानुवचनेन यज्ञेन तपसा नाशकेनेति" श्रुत्या तथोक्तेः । उपासनाकाण्डेऽपि तथैव सर्व्वेषामधिकारः "तपसा किल्बिषं हन्ति विद्ययाऽमृतमश्नुते" इति स्मृतेः । तत्र सति कामे कर्म्मकाण्डविहितकर्म्माचरणे स्वर्गः फलम् । कामनाऽभावे मोक्ष एव फलम् । एवमुपासनायामपि । तत्रापि सत्यां कामनायां स्वर्गादि नानाफलम् असत्याञ्च तस्यां क्रममुक्तिः फलम् । ब्रह्मकाण्डे तु मुमुक्षोरेवाधिकारः । इत्येवं विषयविभागे स्थिते श्रौतीपौराणिकीस्मार्त्तीतान्त्रिकीषूपासनासु मध्ये कलौ आगमोक्तैवोपासनादर्त्तव्येति प्रदर्शितागमवाक्येभ्यो निश्चीयते । अन्यत्र च "हरेर्नाम हरेर्नाम हरेर्नामैव केवलम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा" "कलौ जागर्त्ति गोपालः कलौ जागर्त्ति कालिका" पठन्ति ।

अथ कलियुगे राजविशेषोत्पत्तिः कलेर्द्दिरन्ते कल्किरूपभगवदवतारप्रादुर्भावश्च भाग० १२।१,२ अ० उक्तौ यथा-
"योऽन्त्यः पुरञ्जयो नाम भविष्यो वारहद्रथः । तस्यामात्यस्तु शुनको हत्वा स्वामिनमात्मजम् । प्रद्योतसंज्ञं राजानं कर्त्ता यत् पालकः सुतः । विशाखयूपस्तत्पुत्रो भविता राजकस्ततः । नन्दिवर्द्धनस्तत्पुत्रः पञ्च प्रद्योतनाइमे । अष्टत्रिंशोत्तरशतं १३८ भोक्ष्यन्ति पृथिवीं नृपाः ! शिशुनागस्ततो भव्यः काकवर्णस्तु तत्सुतः । क्षेमधर्म्मा तस्य पुत्रः क्षेत्रज्ञः क्षेत्रधर्म्मजः । विधिसारः सुतस्तस्या जातशत्रुर्भविष्यति । दर्भकस्तत्सुतो भव्यो दर्भकस्याजयः स्मृतः । नन्दिवर्द्धन आजेयो महानन्दिस्तु तत्सुतः ! शैशुनागा दशैवैते षष्ट्युत्तरशतत्रयम् ३६०। समा भोक्ष्यन्ति पृथिवीं कुरुश्रेष्ठ ! कलौ नृपाः । महानन्दिसुतो राजन् ! शूद्रागर्भोद्भवो बली । महापद्मपतिः कश्चित् नन्दः क्षत्रविनाशकृत् । ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्म्मिकाः । स एकच्छत्रां पृथिवीमनुल्लङ्घितशासनः । शासिष्यति महापद्मो द्वितीय इव भार्गवः । तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः । य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः १००। नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति । तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ । स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति । तत्सुतो वारिसारस्तु ततश्चाशोकवर्द्धनः । सुयशा भविता तस्य सङ्गतः सुयशः सुतः । शालिशूकस्ततस्तस्य सोमशर्मा भविष्यति । शतधन्वा सुतस्तस्य भविता तद्बृहद्रथः । मौर्य्यास्त्वेते दश नृपाः सप्तत्रिंशच्छतोत्तरम् १३७। समा भोक्ष्यन्ति पृथिवीं कलौ कुरुकुलोद्वह ! । अग्निमित्रस्ततस्तस्मात् सुज्येष्ठो भविता ततः । वसुमित्रो भद्रकश्च पुलिन्दो भविता सुतः । ततो घोषस्ततस्तस्माद्वज्रमित्रो भविष्यति । ततो भागवतस्तस्माद्देवभूतिः कुरूद्वह ! । शुङ्गा दशैते भोक्ष्यन्ति भूमिं वर्षशताधिकम् ११२ । ततः काण्वानियं भूमिर्यास्यत्यल्पगुणान्नृप ! । शुङ्गं हत्वा देवभूतिं काण्वोऽमात्यस्तु कामिनम् । स्वयं करिष्यते राज्यं वासुदेवो महामतिः । तस्य पुत्रस्तु भूमित्रस्ततो नारायणः सुतः । काण्वायना इमे भूमिं चत्वारिंशच्च पञ्च च । शतानि त्रीणि ३४५ भोक्ष्यन्ति वर्षाणाञ्च कलौ युगे । हत्वा काण्वं सुशर्म्माणं तद्भृत्यो वृषलो बली । गां भोक्ष्यत्यन्ध्रजातीयः कञ्चित् कालमसत्तमः । कृष्णनामाथ तद्भ्राता भविता पृथिवीपतिः । श्रीशान्तकर्णस्तत्पुत्रः पौर्णमासस्तु तत्सुतः । लम्बोदरस्तु तत्पुत्रस्तस्माच्चिविलकोन्नृपः । मेघस्वातिः चिविलकात् अटमानस्तु तत्सुतः । अनिष्टकर्म्मा हालेयस्तलकस्तस्य चात्मजः । पुरीषभीरुस्तत्पुत्रस्ततो राजा सुनन्दनः । चकोरो वटको यत्र शिवस्वातिररिन्दमः । तस्यापि गोमतीपुत्रः पुरीमान् भविता ततः । मेदशिराः शिवस्कन्दो यज्ञश्रीस्तत्सुतस्ततः । विजयस्तत्सुतो भव्यश्चन्द्रवीर्य्यश्च सोमधिः । एते त्रिंशन्नृपतयश्चत्वार्य्यब्दशतानि च । षट् पञ्चाशच्च ४५६ पृथिवीं भोक्ष्यन्ति कुरुनन्दन ! । सप्ताभीरा आवभृत्या दश गर्द्दभिनो नृपाः । कङ्का षोड़श भूपाला भविष्यन्त्य-

तिलोनृपाः। ततोऽष्टौ यवना भाव्याश्चतुर्द्दश तुरुष्ककाः । भूयो दश गुरुण्डाश्च मौला एकादशैव तु । एते भोक्ष्यन्ति पृथिवीं दश वर्षशतानि च । नवाधिकाञ्च नवतिं १०९९ मौला एकादश क्षितिम् । भोक्ष्यन्त्यब्दशतान्यङ्ग ! त्रीणि ३००तैः संस्थिते ततः। किलकिलायां नृपतयो भूतनन्दोऽथ वङ्गिरः । शिशुनन्दिस्तु तद्भ्राता यशोनन्दिः प्रवीरकः । भोक्ष्यन्त्येते वर्षशतं भविष्यन्त्यधिकानि षट् १०६। तेषां त्रयोदश सुता भवितारश्च वाह्लिकाः । पुष्पमित्रोऽथ राजन्यो दुर्मित्रोऽस्य तथैव च । एककाला इमे भूपाः सप्तान्ध्राः सप्त कोशलाः । वैदूरपतयो भाव्या नैषधास्तत एव हि । मागधानाञ्च भविता विश्वस्फूर्जिः पुरञ्जयात् । करिष्यत्यपरान् वर्णान् पुलिन्दयदुमद्रकान् । प्रजाश्चाब्रह्मभूयिष्ठाः स्थापयिष्यति दुर्मतिः । वीर्य्यवान् क्षत्रमुत्साद्य पद्मवत्यां स वै पुरि । अनुगङ्गमाप्रयागं गुप्तां भोक्ष्यति मेदिनीम् । सौराष्ट्रावन्त्याभीराश्च शूरा अर्बुदमालवाः । व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः । सिन्धोस्तटं चन्द्रभागां कान्तीं काश्मीरमण्डलम् । भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छा अब्रह्मवर्चसः । तुल्यकाला इमे राजन् ! म्लेच्छप्रायाश्च भूभृतः । एतेऽधर्मानृतपराः फल्गुदास्तीव्रमन्यवः । स्त्रीबालगोद्विजघ्नाश्च परदारधनाहृताः । उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः । असंस्कृताः क्रियाहीना रजसा तमसाऽऽवृताः । प्रजास्ते भक्षयिष्यन्ति म्लेच्छराजन्यरूपिणः । तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः । अन्योऽन्यतो राजभिश्च क्षयं यास्यन्ति पीड़िताः” १अ० ।

“ततश्चानुदिनं धर्मः सत्यं शौचं क्षमा दया । कालेन बलिना राजन् ! नङ्क्ष्यन्त्यायुर्ब्बलं स्मृतिः । वित्तमेव कलौ नृणां जन्माचारगुणोदयः । धर्मन्यायव्यवस्थायां कारणं बलमेव हि । दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके । स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि । लिङ्गमेवाश्रमख्यातावन्योन्यापत्तिकारणम् । अवृत्त्या न्यायदौर्ब्बल्यं, पाण्डित्ये चापलं वचः । अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव च । स्वीकार एव चोद्वाहे, स्नानमेव प्रसाधनम् । दूरे वार्य्ययनं तीर्थं लावण्यं केशधारणम् । उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि । दाक्ष्ये कुटुम्बभरणं, यशोऽर्थे धर्मसेवनम् । एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले । ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः । प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्मिभिः । आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम् । शाकमूलामिषक्षौद्रफलपुष्पाष्टि (आँटि) भोजनाः । अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीड़िताः । शीतवातातपप्रावृड्हिमैरन्योन्यतः प्रजाः । क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया । त्रिंशद्विंशति वर्षाणि परमायुः कलौ नृणाम् । क्षीयमाणेषु देहेषु देहिनां कलिदोषतः । वर्णाश्रमवतां धर्मे नष्टे वेदपथे नृणाम् । पाषण्डप्रचुरेऽधर्मे दस्युप्रायेषु राजसु । चौर्य्यानृतवृथाहिंसा नानावृत्तिषु वै नृषु । शूद्रप्रायेषु वर्णेषु छागप्रायासु धेनुषु । गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु । अणुप्रायेष्वोषधीषु शमीप्रायेषु स्थाणुषु । विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु । इत्थं कलौ गते प्राये जनेषु खरधर्मिषु । धर्मत्राणाय सत्त्वेन भगवानवतरिष्यति । चराचरगुरोर्विष्णोरीश्वरस्याखिलात्मनः । धर्मत्राणाय साधूनां जन्म कर्मापनुत्तये । शम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः । भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति । अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः । असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः । विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः । नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति । अथ तेषां भविष्यन्ति मनांसि विशदानि वै । वासुदेवाङ्गरागाभिपुण्यगन्धानिलस्पृशाम् । पौरजानपदानां वै हतेष्वखिलदस्युषु । तेषां प्रजा विसर्गश्च स्थविष्ठः सम्भविष्यति । वासुदेवे भगवति सत्त्वमूर्त्तौ हृदि स्थिते । यदाऽवतीर्णो भगवान् कल्किर्धर्मपतिर्हरिः । कृतं भविष्यति तदा प्रजासूतिश्च सात्त्विकी । यदा सूर्य्यश्च चन्द्रश्च तथा तिष्यबृहस्पती । एकराशौ समेष्यन्ति भविष्यति तदा कृतम् । येऽतीता वर्त्तमाना ये भविष्यन्ति च पार्थिवाः । ते ते उद्देशतः प्रोक्ता वंशजाः सोमसूर्य्ययोः । आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम् । एतद्वर्षसहस्रन्तु शतं पञ्चदशोत्तरम्” “यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् । तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः”। अनुपदमधिकमुक्तम् । अधिकं कलिस्वभावादिकं कल्किशब्दे वक्ष्यते ।

कलियुगे च शककर्त्तारः षट् यथोक्तं ज्योतिर्विदाभरणे “युधिष्ठिरो विक्रमशालिवाहनौ धराधिनाथौ, विजयाभिनन्दनः । इमेऽनु नागार्ज्जुनमेदिनीपतिर्बलिः क्रमात् षट् शककारकाः कलौ”। तेषां शककालश्च शकशब्दे वक्ष्यते ।

कलौ वर्ज्यधर्म्माः निर्णयसिन्धावुक्ता यथा—

"वृहन्नारदीये । "समुद्रयातुः स्वीकारः कमण्डलुविधारणम् । द्विजानामसवर्णासु कन्यासूपयमस्तथा । देवराच्च सुतोत्पत्तिर्मधुपर्के पशोर्वधः । मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा । दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च । दीर्घकालं ब्रह्मचर्य्यं नरमेधाश्वमेधकौ । महाप्रस्थानगमनं गोमेधश्च तथा मखः । इमान् धर्म्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः" । कमण्डलुः "सोदकञ्च कमण्डलुम्" इत्युक्तः करकयो वा । दत्ता ऊढा । "ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा । कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुमिति" हेमाद्रौ वचनात् । "ऊढा पुरुषसंयोगात् क्षते देयेति केचन" इत्यादिभिर्विवाह्यतोक्ता । हेमाद्रौ ब्राह्मे "गोत्रान्मातुः सपिण्डाच्च विवाहो गोवधस्तथा । नराश्वमेधौ मद्यञ्च कलौ वर्ज्यं द्विजातिभिः" । गोत्रात् गोत्रजायाः पितृष्वसुः, मातुः सपिण्डात् मातुलात्, तत्कन्याया विवाहः कलौ न कार्य्यः । तेन यानि तद्विधायकानि, तानि युगान्तरविषयाणि । तथा च व्यासः । "तृतीयां मातृतः कन्यां, तृतीयां पितृतस्तथा । शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः" इति कलौ निन्दामाह । मातृतस्तृतीयां मातुलकन्यामित्यर्थः । उक्तञ्चैतत् प्राक् । मद्यं "स्त्रोभ्यः सुरामाचामम्" इत्यादिना विहितमपि वर्ज्यम्' हेमाद्रौ आदित्यपुराणे "विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् । बालायाः क्षतयोन्याश्च वरेणान्येन संस्कृतिः । कन्यानामसवर्णानां विवाहश्च द्विजातिभिः । आततायिद्विजाग्र्याणां धर्म्मयुद्धेन हिंसनम् । द्विजस्याब्धौ तु नौयातुः शोधितस्यापि संग्रहः । महाप्रस्थानगमनम्, गोसंज्ञप्तिश्च गोसवे । सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः । अग्निहोत्रहवन्याश्च लेहो लीढापरिग्रहः । वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा । प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम् । संसर्गदोषस्तेयान्यमहापातकिनिष्कृतिः । वरातिथिपितृभ्यश्च पशूपाकरणक्रिया । दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः । सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपि । अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः । परोद्देशात्मसंत्याग उच्छिष्टस्यापि वर्ज्जनम् । प्रतिमाभ्यर्चनार्थाय, संकल्पश्च सधर्म्मकः । अस्थिसञ्चयनादूर्द्ध्वमङ्गस्पर्शनमेव च । शामित्रं चैव विप्राणां सोमविक्रयणं तथा । षड्भक्तानशने चाथ हरणं हीनकर्म्मणः । पृथ्वीचन्द्रोदये "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् । भोज्यान्नता गृहस्थस्य तीर्थसेवातिदूरतः । शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशीलता । आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा । प्रजार्थं तु द्विजाग्र्याणां परजायापरिग्रहः । ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया । बलात्कारादिदुष्टस्त्रीसंग्रहो विधिनोदितः । यतेश्च सर्व्ववर्णेषु भिक्षाचर्य्या विधानतः । नवोदके दशाहञ्च दक्षिणा गुरुणोदिता । ब्राह्मणादिषु शूद्रस्य पचनादिक्रियापि च । भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा । गोतृप्तिशिष्टपयसि शिष्टैराचमनक्रिया । पितापुत्रविरोधेषु साक्षिणां दण्डकल्पनम् । यतेः सायंगृहत्वं च सूरिभिस्तत्त्वदर्शिभिः । एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्त्तितानि विद्वद्भिर्व्यवस्थापूर्व्वकं बुधैः" । सुराग्रहणस्य तत्कर्त्तुः संग्रहो व्यवहारः । न च मद्यं चेति सामान्येन निषिषेधेनास्योपसंहार इति शङ्क्यम् । निषेधस्य निवृत्तिफलत्वेन विशेषानपेक्षत्वात्, मा हिंस्यादित्यस्य न ब्राह्मणं हन्यादित्यनेनोपसंहारे हिंसान्तरस्यादोषापत्तेश्च । निरूपितं चैतद्धेमाद्रिणान्यत्रानुपरस्यते । "एकाहाद्ब्राह्मणः शुध्येद्योऽग्निवेदसमन्वितः" इत्युक्तेः अघस्य अशौचस्य सङ्कोचः "न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते" इत्युक्तस्य प्रायश्चित्तस्य विधानम् उपदेशः । "कलौ कर्त्तैव लिप्यत" इति व्यासोक्तेः पतितसंसर्गदोषे सत्यपि पातित्यं नेत्यर्थः-इति केचिदाहुः । ते मूर्खाः मानाभावात् । तेनायमर्थः । तत्संसर्गी तु पञ्चमः स्तेयञ्च इति तदन्यानि महापातकानि ब्रह्मवधसुरापानगुरुतल्पाभिगमनानि त्रीणि, तेषां कामकृतानां प्रायश्चित्तं कलौ न, तेषु कामतोमरणान्तस्यैवोक्तेः । तत्स्थाने द्वादशाब्दं, द्वैगुण्ये त्वात्मनो ब्रह्मवधनिमित्ते च चतुर्विंशत्यब्दमिति चातुर्गुण्याद्द्वादशाब्दापत्तेस्तस्य च "चतुर्थे नास्ति निष्कृतिरिति" निषेधात्संसर्गिणो व्रतस्यैवोक्तेः । "स्तेये च राज्ञो बधकर्त्तृत्वादात्मब्रह्मवधापत्तिः । अतो द्वैगुण्ये युक्तोऽधिकारः । न च विधित्वं, निषेधबाधात् । आत्मबधदोषापवादेऽपि ब्रह्मवधाभावात युगान्तरदोषसाम्येऽपि कलौ दोषाधिक्यात् । एतद्विप्रपञ्चम् । असवर्णान्या सवर्णा क्षत्रियादिस्तया दुष्टैः । अयोनौ शिष्यादौ । "स्त्रियस्तया परित्याज्याः शिष्यगा गुरुगाश्च याः" इत्युक्तेस्त्यागः । परोद्देशेन ब्राह्मणाद्यर्थं आत्मत्यागः । यद्वा परो-

हेयात्मा त्यागोद्यानं मनसा पातकहिंसयेत्युक्तम्। ऊर्द्ध्वदस्य त्यक्तस्य वर्ज्जनम् प्रतिपाद्यसमर्थोऽपीत्युक्तम्। वेतनग्रहणेन प्रतिमापूजा। "स्वाशौचकालाद्विज्ञेयं स्पर्शनन्तु त्रिभागतः" इत्युक्तः स्पर्शः। षड्भिरिति "उपोषितस्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेत्" इत्युक्तमन्नचौर्य्यम्। आपदि वृत्त्यादिवृत्तिः, सुखेनैव धमेदग्निमित्युक्तं धमनम्। "दशाहेनैव शुध्येत भूमिष्ठं च नवोदकम्" इत्युक्तो दशाहः। "गुरवे तु वरं दत्त्वा" इत्युक्ता दक्षिणा। शूद्रेषु दासगोपालेति। "कन्दुपक्वं स्नेहपक्वं यच्च दुग्धेन पाचितम्। एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत्" इत्यपरार्के सुमन्तूक्ता शूद्रस्य पाकक्रिया। "पितापुत्रविवादे तु साक्षिणां त्रिपणो दमः" इत्युक्तः। सायंगृहत्वम् "विधूमे सन्नमुषले" इत्युक्तम्। पृथ्वी चान्द्रेण तु। "अटन्ति वसुधां विप्राः पृथिवीदर्शनाय च। अनिकेता निराहारा ये तु सायंगृहास्तु ते" इति पुराणोक्तो निषिद्धः, तेनाज्ञातशीलपान्थादेः श्राद्धादौ विनियोगो न कार्य्यः। कलौ एतानि वर्ज्ज्यानीत्यर्थः। निगमः। "अग्निहोत्रं गवालम्भं संन्यासं पलपैतृकम्। देवराच्च सुतोत्पत्तिं कलौ पञ्च विवर्जयेत्"। अग्निहोत्रं तदर्थमाधानम्। एतच्च सर्वाधानपरम्। "अर्द्धाधानं स्मृतं श्रौतं स्मार्त्ताग्न्योस्तु पृथक्कृतिः। सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रितेति" लौगाक्षिवचनादिति स्मृतिचन्द्रिकायाम्। एतेन "चत्वार्य्यब्दसहस्राणि चत्वार्य्यब्दशतानि च। कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः। संन्यासश्च न कर्त्तव्यो ब्राह्मणेन विजानतेति" व्यासवचनं व्याख्यातम्। सर्वाधानेऽपि विशेषमाह देवलः "यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्त्तते। संन्यासञ्चाग्निहोत्रञ्च तावत्कुर्य्यात् कलौ युगे" इति। संन्यासस्त्रिदण्डः केचित्"।

दत्तौरसेतरेषान्त्वित्यत्र दत्तपदं कृत्रिमस्याप्युपलक्षणम् "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च" कलिधर्म्मे पराशरवचनात् इति दत्तकमीमांसादिमतम्। दत्तकशब्दे चन्द्रिकामतं वक्ष्यते। समुद्रयात्रास्वीकारोऽप्यत्र तीर्थयात्रारूपधर्मपरः तथा हि,

"शोधितस्यापीत्यनेन कृतप्रायश्चित्तस्यैव संव्यवहार्य्यतानिषेधेन यत्र विषये समुद्रनौयानं निषिद्धं तत्रैव विषये कृतप्रायश्चित्तस्याप्यसंव्यवहार्य इति प्रतिपादितम्। अत्र शोधितस्योक्त्यैव प्रायश्चित्तानिवर्त्तनीभूतपापनिषय आक्षिप्यते तद्विषयश्च पापावेदकशास्त्रादेव, समुद्रगमनमात्रे च कुत्रापि शास्त्रे प्रायश्चित्ताद्यदर्शनात् न तस्य निषिद्धता, किन्तु तद्गमनकाले म्लेच्छादिस्पृष्टजलाद्यसेवन एव, तत्पापापनोदनाय तु कृतेऽपि प्रायश्चित्ते न तद्यातुः संव्यवहार्य इत्येव कल्पयितुमुचितम् शोधितस्यापीति पदस्वारस्यात्। अन्यथा समुद्रनौगमनमात्रे संव्यवहार्य इत्येवाभिदध्यात्। न च तथाभिहितम्। न च "समुद्रयात्रास्वीकारः कमण्डलुविधारणम्। इत्युपक्रम्य "इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः" इति बृहन्नारदीयवचने समुद्रयात्रास्वीकारस्य कलौ निषिद्धत्वोक्तेः निषिद्धातिक्रमे च "विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्। अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति" इति याज्ञ०स्मृतौ क्रमशस्तथाचरणे पातित्यप्रतिपादनात् तद्विषय एव प्रायश्चित्ताचरणसम्भवेन तत्रैव शोधितस्यापीत्यस्यावकाश इति वाच्यम् बृहन्नारदीयवचने उपसंहारे "इमान् धर्मान्" इत्युक्तेः धर्म्मरूपसमुद्रयात्रास्वीकारस्यैव कलौ निषेधात् वाणिज्यराजाज्ञादिनिमित्तकस्य तस्य निषेधाभावेन तद्विषयकत्वासम्भवात्। स्मर्य्यते च ब्रह्महत्यादिपापापनोदनार्थं समुद्रगमनं पराशरेण,— प्रायश्चित्तप्रकरणे "शतयोजनविस्तीर्णं शतयोजनमायतम्। रामचन्द्र-समादिष्ट-नल-सञ्चय-सञ्चितम्। सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति" इत्यन्तेन। न चात्र समुद्रसेतुदर्शनस्यैव ब्रह्महत्यानाशकत्वं श्रुतं, समुद्रयात्रास्वीकारं विना शतयोजनायतस्य सेतोर्दर्शनासम्भवेन आक्षेपेणैव तद्गमनलाभात्। अन्यथा सेतोर्यत्किञ्चिदंशमात्रस्य तथात्वे "शतयोजनमायतम्" इति विशेषणमनर्थकं स्यात्, तथा च शतयोजनविस्तारायतसेतुबन्धदर्शनस्यैव प्रकृतब्रह्महत्यापनाशकत्वं न तु यत्किञ्चिन्मात्रदर्शनस्य, पापप्राबल्येन परिश्रमप्राबल्यस्यापेक्षितत्वात् किन्तु एकादश्यादिव्रतस्येव यत्किञ्चिन्मात्रदर्शनस्यातिदिष्टब्रह्महत्यानाशकत्वम् युक्तम्। अतएव "यो भूय आरभते तस्य फले विशेषः" इति जैमिनिना सम्यगाचारस्य फलबाहुल्यं निर्णीतम्, निर्णीतञ्च ऋग्वेदभाष्ये माधवाचार्य्येण सम्यगार्य्यासादिना अनुष्ठिताश्वमेधाद्यपेक्षया तत्तद्यज्ञविद्याबोधकवेदाध्यायिनोऽतिदिष्टब्रह्मवधादिनाशकत्वम्। एवञ्च प्रकृतब्रह्महत्यायाः अपनोदनार्थं शतयोजनदीर्घविस्तारसेतुदर्शनं स्मृतौ विहितम्। तेनैव च समुद्रनौगमनमर्थापत्तिलभ्यम् एवं द्वारवत्यादितीर्थयात्राङ्गमपि समुद्रयान-

गमनमर्थापत्तिप्रमाणलभ्यम् । एवञ्च ईदृशसमुद्रयानस्यैव धर्म्मरूपतया विहितस्य कलौ निषेधः बृहन्नारदीयवचने कमण्डलुविधारणादिभिः पुण्यापरपर्य्यायधर्म्मसाधनत्वेन धर्म्मरूपैः समभिव्याहारेण पठितत्वात् धर्म्मरूपस्यैव समुद्रयानस्य निषिद्धत्वौचित्यात् "प्रायेण समानरूपाः सहचरा भवन्ति" इति न्यायात् । एतेन बृहन्नारदीये "समुद्रयात्रास्वीकार" इति पाठे रघुनन्दनमाधवाचार्य्यादिबहुनिबन्धकारसम्मते स्थिते निर्णयसिन्धौ समुद्रयातुः स्वीकार इति क्वाचित्कपाठस्तु अनाकरोऽनुचितश्च, तथा सति समुद्रयातुर्जनस्य स्वीकाररूपव्यवहारस्य धर्म्मरूपत्वाभावेन "इमान् धर्म्मान्" इत्यभिधानस्यायुक्तत्वापत्तेः । ततश्च धर्म्मार्थसमुद्रयात्रा-स्वीकारस्यैव निषिद्धतया वाणिज्यराजाज्ञादिनिमित्तकस्य तस्य कुत्राप्यनिषेधात् तत्समये म्लेच्छादिगुरुतरसंसर्गे सन्ध्यावन्दनादित्यागे च तत्पापापनोदनार्थं शोधितस्यापि (कृतप्रायश्चित्तस्य) न संपर्क इत्यत्रैव आदित्यपुराणवचनतात्पर्य्यम् । यथा च "कामतोऽव्यवहार्य्यस्तु वचनादिह जायते, इति याज्ञवल्क्येन पातकविशेषे प्रायश्चित्ताचरणेऽपि अव्यवहार्य्यताऽभिहिता, तत्समानन्यायादत्रापि प्रायश्चित्ताचरणेऽपि न व्यवहार्य्यतेति युक्तमुत्पश्यामः । एवञ्च समुद्रनौगमनकाले सन्ध्यादिकर्त्तुः । म्लेच्छादिभिर्गुरुतरं संसर्गमकुर्वतश्च प्रायश्चित्तज्ञापकशास्त्राभावात् न अव्यवहार्य्यता, नापि प्रायश्चित्ताचरणम् । ततश्च "उषित्वा यत्र कुत्रापि स्वधर्म्मं प्रतिपालयन् । षट्कर्म्माणि प्रकुर्व्वीरन्निति धर्म्मस्य निश्चयः" इति स्मृतौ यत्र कुत्रापि वासेऽपि स्वधर्म्मानुष्ठाने पापशून्यत्वमुक्तं सूपपन्नम् । अतएव कलौ वाणिज्याद्यर्थसमुद्रयाने शिष्टाचारोऽपि दृश्यते । तथा हि कलियुग नृपवत्सराजामात्ययोर्यौगन्धरायणबाभ्रव्ययोर्युद्धार्थं वत्सराजाज्ञया समुद्रयानं रत्नावलीनाटके वर्णितम्, वर्णितञ्च भाषाचण्डीपुस्तके श्रीमन्ताभिधवणिजस्तत्पितुश्च इतो वङ्गदेशात् सिंहलगमनम् । न च तद्गमनं तदा केनापि विगीतम् । यदि तद्विगीतं स्यात् तदा ते हि शिष्टाः कथं तत् कुर्युः । इदानीन्तनानां विगानन्तु म्लेच्छभूरिसंसर्गाशङ्कयैवेति एतन्मूलकमेव इदानीमपि अन्यैर्दाक्षिणात्य शिष्टैर्वाणिज्याद्यर्थं सिंहलादिगमनमनुष्ठीयते । अतः समुद्रयानगमनमात्रं निषिद्धमिति तु रिक्तं वचः! ततश्च धर्म्मार्थसमुद्रयानगमनमेव कलौ निषिद्धमित्यायातम् । तद्गमनकाले च यदा म्लेच्छादिभिर्गुरुतरसंसर्गः सन्ध्यादित्यागश्च तदैव प्रायश्चित्ताचरणेऽपि द्विजानामव्यवहार्य्यता शूद्राणान्तु प्रायश्चित्ताचरणे व्यवहार्य्यतैव द्विजपदस्वारस्यात् अन्यथा लोकस्याश्यौ त्विच्चभिद्ध्यात् । इत्येव द्विजेभ्यः शूद्राणां विशेष इति दिङ्मात्रमुपदर्शितम्" २ कलिकालाधिष्ठातृदेवभेदे ५ । तस्योत्पत्तिर्यथा "प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः ससर्ज्ज घोरं मलिनं पृष्ठदेशात् स पातकम् । स चाधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात् । श्रवणात् स्मरणाल्लोकः सर्व्वपापैः प्रमुच्यते । अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना । तस्याः पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः । स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम् । निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् । स हिंसायां भगिन्यान्तु जनयामास तं कलिम् । वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम् । काकोदरं करालास्यं लोलजिह्वं भयानकम् । पूतिगन्धिं द्यूतमद्यस्त्रीसुवर्णकृताश्रयम् । भगिन्यान्तु दुरुक्त्यां स भयं पुत्त्रञ्च कन्यकाम् । मृत्युं संजनयामास तयोस्तु निरयोऽभवत् । यातनायां भगिन्यान्तु लोभपुत्त्रः सुतायुतम् । इत्थं कलिकुले जाता बहवो धर्म्मनिन्दकाः" इति कल्किपुराणे १ अ० ।

तस्य नलं प्रति द्वेषभावस्तच्छरीरे प्रवेशश्च भा० व० ५८,५९ अ० वर्णितः । यथा

"ततोऽब्रवीत् कलिः शक्रं दमयन्त्याः स्वयंवरम् । गत्वा हि वरयिष्ये तां मनो हि मम तद्गतम् । तमब्रवीत् प्रहस्येन्द्रो निर्व्वृत्तः स स्वयंवरः । वृतस्तया नलो राजा पतिरस्मत्समीपतः । एवमुक्तस्तु शक्रेण कलिः कोपसमन्वितः । देवानामन्त्र्य तान् सर्व्वानुवाचेदं वचस्तदा । देवानां मानुषं मध्ये यत् सा पतिमविन्दत । तत्र तस्या भवेन्न्याय्यं विपुलं दण्डधारणम् । एवमुक्ते तु कलिना प्रत्यूचुस्ते दिवौकसः । अस्माभिः समनुज्ञाते दमयन्त्या नलो वृतः । का च सर्व्वगुणोपेतं नाश्रयेत नलं नृपम् । यो वेद धर्म्मानखिलान् यथावच्चरितव्रतः । योऽधीते चतुरो वेदान् सर्व्वानाख्यानपञ्चमान् । नित्यं तृप्ता गृहे यस्य देवा यज्ञेषु धर्म्मतः । अहिंसानिरतो यश्च सत्यवादी दृढव्रतः । यस्मिन् दाक्ष्यं धृतिर्ज्ञानं तपः शौचं दमः शमः । ध्रुवाणि पुरुषव्याघ्रे लोकपालसमे नृपे । एवं रूपं नलं यो वै कामयेच्छपितुं कले ! । आत्मानं स शपेन्मूढो हन्यादात्मानमात्मना । एवंगुणं नलं यो वै कामयेच्छपितुं कले ! । कृच्छ्रे स नरके मज्जेदगाधे विपुले ह्रदे । एवमुक्त्वा कलिं देवा

द्वापरश्च दिवं ययुः। ततो गतेषु देवेषु कलिर्द्वापरमब्रवीत्। संहर्त्तुं नोत्सहे कोपं नले वत्स्यामि द्वापर!। भ्रंशयिष्यामि तं राज्यान्न भैम्या सह रंस्यते। त्वमप्यक्षान् समाविश्य साहाय्यं कर्त्तुमर्हसि” ५८।

“एवं स समयं कृत्वा द्वापरेण कलिः सह। आजगाम ततस्तत्र यत्र राजा स नैषधः। स नित्यमन्तरं प्रेप्सुर्निषधेष्ववसच्चिरम्। अथास्य द्वादशे वर्षे ददर्श कलिरन्तरम्। कृत्वा मूत्रमुपस्पृश्य सन्ध्यामन्वास्त नैषधः। अकृत्वा पादयोः शौचं, तत्रैनं कलिराविशत्। स समाविश्य च नलं समीपं पुष्करस्य च। गत्वा पुष्करमाहेदमेहि दीव्य नलेन वै। अक्षद्यूते नलं जेता भवान् हि सहितो मया। निषधान् प्रतिपद्यस्व जित्वा राज्यं नलं नृपम्। एवमुक्तस्तु कलिना पुष्करो नलमभ्यगात्। कलिश्चैव वृषो भूत्वा गवां पुष्करमभ्यगात्। आसाद्य तु नलं वीरं पुष्करः परवीरहा। दीव्यावेत्यब्रवीद्भ्राता वृषेणेति मुहुर्मुहुः। न चक्षमे ततो राजा समाह्वानं महामनाः। वैदर्भ्याः प्रेक्षमाणायाः पणकालममन्यत। हिरण्यस्य सुवर्णस्य यानयुग्यस्य वाससाम्। आविष्टः कलिना द्यूते जीयते स्म नलस्तदा” ५९। अधिकं कर्कोटकशब्दे उक्तम् “कर्कोटकस्य नागस्य दमयन्त्या नलस्य च। ऋतपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनम्”। भा०व०। २विभीतकवृक्षे (वयडा) तस्य नलप्रधर्षणार्थं कलिनाश्रितत्वात्तथात्वम्। “विभीतकमधिष्ठाय यथा भूतेन तिष्ठता। तेन भीमभुवो भीरुः स राजर्षिरधर्षि न। तमालम्बनमासाद्य वैदर्भीनिषधेशयोः। कलुषं कलिरन्विष्यन्नवाप्तमोहसरान् बहून्” नैष०। ३कलहे। “मुहुरुपहसितामिवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम्। वसतिमुपगतेन धाम्नि तस्याः शठ! कलिरेष महांस्त्वयाऽद्य दत्तः” माघः। ५शूरे ६युद्धे च हेमच०। द्यूतविषये ७एकाङ्कयुक्तपार्श्वकपाशके। यस्मिन् अक्षपार्श्वे एकाङ्कचिह्नमस्ति तस्मिन् अक्षभागे। कलिना दृष्टं साम कलेरपत्यादि वा ढक्। कालेय तद्दृष्टे सामनि तदपत्यादौ। ७कोरके स्त्री अमरटीका वा ङीप्।

कलिक पुंस्त्री कल+मत्वर्थे ठन्। वकभेदे (कोँचवक्) शब्दर०। स्त्रियां जातित्वात् ङीष्।

कलिका स्त्री कलिरेव स्वार्थे कन्। १कोरके (कडि) अस्फुटितपुष्पे अमरः। “वितरसि नः कलिकां किमर्थमेनाम्” “मधुकरकलिकाकुलीकृतानि स्खलनविकीर्णविकासि-केशराणाम्” माघः। “तुम्बावनान्तरगतं कलिकावकाशे” सा० द०। “चूतानां चिरनिर्गतापि कलिका बध्नाति न स्वं रजः” शकु०। “सकलिका कलिकामजितामपि” रघुः। कलोध्वनिभेदः साध्यतयाऽस्त्यस्य ठन्। वीणामूले हेमच० तस्य कलसाधनत्वात् तथात्वम्। कलैव स्वार्थे कन्। २कलाशब्दार्थे। “तन्यन्ते कलिका यस्मात्तस्मात्ताश्चित्रयः स्मृताः” सि०शि०। कलिकापूर्व्वम्। “प्रथममपरचरणसमुत्थं श्रयति स यदि लघुमे। इतरदितरगदितमपि यदि च तुर्यम्। चरणयुगलकमविहतमपरमिति कलिका सा” वृत्तर०उक्ते ४छन्दोभेदे च। ५पदसन्ततियुक्तरचनाभेदे सा च गोविन्दवीरुदावलीतट्टीकयोर्दर्शिता यथा “सुर्म्महाकलिकाऽन्त्ये श्लोकस्तु युगशः स्मृता। अन्यासां कलिकानान्तु भवन्त्येकशो हि ते। पूर्त्तौ द्वौ कलिकाभिस्तु वीरुदस्तुल्यसंख्यकाः। कला नाम भवेत्तालनियता पदसन्ततिः। कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः। कलिका चण्डवृत्ताख्या द्विगादिगणवृत्तका। तथा त्रिभङ्गी वृत्ताख्या मध्या मिश्रा च केवलेति”। चण्डवृत्ते दशधा संयुक्तवर्णाः। अत्र संयुक्तवर्णानां नियमो दशधा च ते। मधुश्लिष्टविश्लिष्टशिथिलह्वादिनस्तमी। भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दर्श्यन्ते स्फुटं यथा। ह्रस्वानुमधुरसंयोगाः शङ्कराङ्कुशकिङ्कराः। तस्मात्तु श्लिष्टसंयुक्तादर्पकर्परसर्पवत्। ततोविश्लिष्टसंयुक्ता भक्तकल्याणवल्गयः। तथा शिथिलसंयुक्ताः पश्यकश्यपवश्यवत्। प्रोक्ता ह्वादियुता मह्यंसह्यंगुह्यं प्रसह्यवत्। गर्हादीन् ह्वादिसंयुक्तभेदान् केचित् समूचिरे। दीर्घात्तुङ्गाङ्ककार्पासं वाल्यं वैश्यस्य बाह्यकमिति”। कलापरिमाणमुक्तम्। “अधिकाश्चतुःषष्टेर्न्यूना द्वादशतः कलाः। एताभ्यो नाधिकाः कार्य्या न्यूनाश्चापि न पण्डितैरिति”। तत्र तावच्चण्डवृत्तकलिका द्विविधा नखोविशिखश्चेति भेदात् तत्र रणादिविंशतिभेदस्य नखस्येह वर्द्धितादयोनव भेदा न्टह्योताः “वृद्धितं वीरभद्रस्य समपोऽच्युतवत्पलम्। तुरङ्गः श्रीगुणरतिस्तथा मातङ्गखेलितम्। तिलकश्चेति कलिकानखस्येहोदिता नव इत्युक्तेः अथ विशिखः पद्मकुन्दचम्पकवञ्जुलबकुलभेदात् पञ्चविधः तेष्वादिमं पद्मं पङ्केरुहसितकञ्जपाण्डूत्पलेन्दीवरारुणाम्भोरुहकह्लारभेदात् षड्विधम् अन्तिमं बकुलन्तु भासुरमङ्गलभेदात् द्विविधमित्येकादशभेदो विशिखः पङ्केरुहं सितकञ्जं तथा पाण्डूत्पलं परम्” इन्दी-

वराहश्चाम्भोजे कह्लारञ्चेति षड्विधम्। ईदृङ्केन कथित पद्ममेव मनीषिभिः। चम्पकं वञ्जुलं कुन्दं बकुलं द्विविधं तथा। इति पञ्चविधस्यापि विशिखस्येषसंख्यकाः” इत्युक्तेः एवं चण्डवृत्तकलिकाविंशतिधा गृहीताः अथ पञ्चधा द्विगादिगणवृत्तका कलिका मञ्जरीत्यभिहिता क्रमात् कोरकगुच्छकसंफुल्लकुसुमगन्धाख्या तस्याश्च कोरकगुच्छकुसुमानि गृहीतानि” कोरकोगुच्छकुसुमं मञ्जरी त्रिविधा तु” इत्युक्तेः। त्रिभङ्गो कलिका तु शिखरिण्यादिपूर्व्वा षोढा तस्याश्च दण्डकपूर्व्वा विदग्धपूर्वा च गृहीता “दण्डकाख्या विदग्धाख्या त्रिभङ्गीह द्विधा मता” इत्युक्तेः अथ मिश्रकलिका “कलिका गद्यसंपृक्ता सप्तविभक्तिका वा चन्दरमयी सर्व्वलघ्वी चेति द्विभेदा कोरका चेत्यष्टौ तदेवं षड्भ्योमहाकलिकाभ्यः अष्टाविंशतिरिह कलिका गृहीताः। एषादय एकादश जखभेदाः संफुल्लगन्धौ मञ्जरीभेदौ शिखरिण्यादयः त्रिभङ्गीभेदा मध्यकलिका च त्यक्तासारताधिक्यविरहात्” ।

कलिकापूर्व्व, क्ली॰ कलिकया अंशेन जन्यमपूर्वम्। परमापूर्वजनके अङ्गजन्यापूर्व्वभेदे। तत्साधने युक्तिः शब्दचिन्तामणिमाथुर्य्यां दर्शिता यथा—

“नन्वेवमाग्नेयादीनां चरमां क्षणिकत्वात् योग्यताज्ञानगतौ परमापूर्वकारणत्वानवगमे कथमपूर्वकल्पनम्? इति चेत् कार्य्योऽपूर्ववाच्यत्वस्थितावाग्नेयादौ तद्द्वारासाधनत्वस्य योग्यत्वसम्भवात् न तु प्रथमम्” शब्दचि॰। व्याकृतं चैतत् मथुरानाथेन यथा—

“ननु फलसाधनतान्वये फलसमयस्थायित्वतादृशव्यापारोपधायकत्वान्यतरत्वस्य योग्यतात्वे आग्नेयाष्टाकपालयागैन्द्रदधियागैन्द्रपयोयागात्मकयागत्रयरूपस्य दर्शस्य, आग्नेयाष्टाकपालोपांशुयागाग्नीषोमीयैकादशकपालयागात्मकयागत्रयरूपस्य पौर्णमासस्य चावान्तरकलिकापूर्व्वत्रय विना षड्जन्यैकपरमापूर्व्वजनकत्वमनुपपन्नं युगपदाग्नेयादीनां सहानवस्थानादतः “दर्शपौर्णमासाभ्यां यजेत स्वर्गकामः” इत्यादि प्रधानविधिबोधितपरमापूर्व्वसाधनत्वान्यथानुपपत्त्या तत्र परमापूर्व्वनाश्यं कलिकापूर्व्वषट्कं कल्प्यते इति तत्र सिद्धान्तो व्याहतः योग्यताज्ञानाभावेन प्रधानविधिवाक्यात् प्रथमं परमापूर्व्वसाधनत्वान्वयस्यैवासम्भवादित्याशङ्कते नन्वेवमिति। एवंसाधनत्वान्वये निरुक्तान्यतरत्वस्य योग्यतात्वे। क्षणिकत्वादिति आशुविनाशित्वादित्यर्थः। परम्पराघटकानुपस्थितेश्चेति शेषः। कथमिति। कथं प्रधानविधिबोधितपरमापूर्व्वसाधनतान्यथानुपपत्तेः कलिकापूर्व्वकल्पनम्? इत्यर्थः। यदि च निरुक्तयोग्यताज्ञानं विनापि परमापूर्व्वसाधनत्वावगमस्तदा परमापूर्व्वज्ञानं विना स्वर्गसाधनत्वस्यापि ज्ञानसम्भवात् किं परमापूर्व्वस्यापि वाच्यतया? इति भावः। न च तत्रापि प्रधानविधिबोधितपरमापूर्व्वसाधनत्वान्यथानुपपत्त्या कलिकापूर्व्वाणि न कल्प्यन्ते अपि तु आग्नेयादिबोधकप्रत्येकवाक्यात् कलिकापूर्व्वोपस्थितौ प्रधानविधिवाक्यात् परमापूर्व्वसाधनत्वावगमः प्रथमन्तु प्रधानविधिवाक्यं मूकमेवेति वाच्यम् अपसिद्धान्तात् “आग्नेयाष्टाकपालोभवत्यमावस्यायाम्” इत्यादिप्रत्येकबोधकवाक्यानां दर्शपौर्णमासाबोधकतया कलिकापूर्व्वाबोधकत्वाच्चेति निगर्वः। आशुविनाशित्वेन प्रतिसंहितकर्म्मणि यद्रूपेण फलस्य कालान्तरभावित्वप्रतिसन्धानं तद्रूपावच्छिन्नफलसाधनत्वान्वये तत्पर्य्यन्तस्थायिव्यापारोपधायकत्वं योग्यता प्रकृते च प्रधानविधिना कार्य्यत्वरूपेण परमापूर्व्वं बोध्यते, तथाच कार्य्यत्वरूपेण तज्जनकता दर्शादीनां बाधा, तथा च परमापूर्वत्वरूपेण कालान्तरभावित्वप्रतिसन्धानेऽपि न कार्य्यत्वरूपेण कालान्तरभावित्वप्रतिसन्धानं, कार्य्यत्वावच्छिन्नस्य दर्शाद्यव्यवहितक्षणेऽपि सम्भवादतःपरमापूर्वसमयस्थायिव्यापारोपधायकत्वज्ञानं विनापि प्रथमं कार्य्यत्वरूपेण सामान्यतस्तत्साधनत्वग्रहः, उत्तरकालन्तु स्वर्गसमयस्थायिकार्य्यान्तराजनकस्य तादृशकार्य्यजनकत्वं परमापूर्वजनकतयैव पर्य्यवस्यति, तच्च साक्षान्न सम्भवति आग्नेयादेराशुविनाशित्वादतः परम्परया जनकत्वं,तच्चावान्तरव्यापारं विनाऽनुपपन्नमित्यनुपपत्तिज्ञानात् कलिकापूर्वाणि कल्प्यन्ते, स्वर्गस्य च देहान्तरभोग्यत्वेन कालान्तरभावित्वप्रतिसन्धानात्तत्पर्य्यन्तस्थायिव्यापारोपधायकत्वज्ञानं विना सामान्यतोऽपि न तत्साधनत्वग्रहसम्भव इति गूढाभिसन्धिना समाधत्ते कार्य्य इति “दर्शपौर्णमासाभ्यां यजेत स्वर्गकामः” इति काम्यविधावित्यर्थः। अपूर्ववाच्यत्वस्थिताविति कार्य्यत्वरूपेण परमापूर्ववाच्यत्वस्थितावित्यर्थः, तद्द्वारा साधनत्वस्येति परमापूर्वद्वारा साधनत्वस्येत्यर्थः, सामान्यतः स्वर्गसाधनत्वरूपेणान्वये इति शेषः। योग्यतासम्भवात् योग्यताज्ञानसम्भवात्, न तु प्रथममिति। न तु परमापूर्ववाच्यत्वं विनेत्यर्थः। स्वर्गस्य देहान्तरभोग्यत्वेन काला-

न्तरभावित्वप्रतिसन्धानात् तत्साधनत्वान्वये तत्पर्य्यन्तस्थायिव्यापारोपधायकत्वस्य योग्यतात्वात् कार्य्यत्वरूपेण परमापूर्व्वसाधनत्वान्वये च न तत्पर्य्यन्तस्थायिव्यापारोपधायकत्वज्ञानमपेक्षितं कार्य्यत्वावच्छिन्नस्य देशान्तरभावित्वप्रतिसन्धानादित्यभिसन्धिः। एतच्चापाततः स्वर्गस्य कालान्तरभावित्वाप्रतिसन्धाने क्रियायाः क्षणिकत्वाप्रतिसन्धाने वा स्वर्गसाधनत्वान्वयेऽप्यपूर्व्वोपस्थितिं विना योग्यताज्ञानसम्भवात्। केचित्तु “दर्शपौर्णमासाभ्यां यजेत स्वर्गकामः” इत्यत्र विधिप्रत्ययस्य कार्य्यत्वरूपेणापूर्व्वसामान्य एव शक्तत्वात् प्रथमं कार्य्यत्वरूपेण कलिकापूर्व्वसाधनत्वावगमस्ततः कार्य्यत्वरूपेण परमापूर्व्वसाधनत्वावगमः, न तु प्रथममेव परमापूर्व्वसाधनत्वावगमः। न च प्रथमं कार्य्यत्वरूपेण कलिकापूर्व्वसाधनत्वावगमेऽपि तत्र परमापूर्व्वपर्य्यन्तस्थायित्वं न गृहीतमिति वाच्यं द्वितीयबोधे परमापूर्व्वस्वर्गपर्य्यन्तस्थायित्ववत् प्रथमबोधे कलिकापूर्व्वस्य स्वर्गपर्य्यन्तस्थायिव्यापारसमयस्थायित्वभाने बाधकाभावादिति समाधत्ते कास्य इति। “दर्शपौर्णमासाभ्यां यजेत स्वर्गकाम” इति काम्यविधावित्यर्थः, अपूर्व्ववाच्यत्वास्थितावित्ति कार्य्यत्वरूपेण कलिकापूर्व्वस्यापि वाच्यत्वस्थितावित्यर्थः, तद्द्वारा साधनत्वस्येति कलिकापूर्व्वद्वारा परमापूर्व्वसाधनत्वस्येत्यर्थः, अन्वय इति शेषः। योग्यतासम्भवात् प्रथमं योग्यताज्ञानसम्भवात्, न तु प्रथममिति परमापूर्व्वसाधनत्वावगम इति शेषः। न चैवं प्रतीतपरमापूर्व्वसाधनत्वानुपपत्त्या कलिकापूर्व्वाणां कल्प्यत्वमिति सिद्धान्तव्याघात इति वाच्यं प्रधानविधिवाक्यात् परमापूर्व्वसाधनत्वान्वयानुपपत्त्या कलिकापूर्व्वाणामेव प्रथमान्वयबोधविषयत्वम् इत्येव तदर्थात् इति भावः” इत्याहुः। ननु एकस्मिन्नेव परमापूर्व्वे स्वर्गे च दर्शपौर्णमासयोः केन रूपेण जनकत्वमिति चेदुच्यते दर्शपौर्णमासोभयसाधारणेन दर्शपौर्णमासत्वव्यापकीभूतेन वैजात्यविशेषेण विजातीयापूर्व्वं विजातीयस्वर्गञ्च प्रति जनकत्वं, विजातीयापूर्व्वजनकतावच्छेदकतयैव तद्वैजात्यसिद्धिः, न च दण्डचक्रन्यायेन दर्शपौर्णमासत्वाभ्यामेव जनकत्वमस्तु केवलदर्शात् केवलपौर्णमासाद्वा फलानुत्पादस्य परस्परव्यतिरेकादेवोपपत्तेरिति वाच्यं कार्य्यकारणभावद्वयकल्पने गौरवात् दर्शत्वादेर्जनकतावच्छेदकतापर्य्यन्तस्य विध्यर्थत्वाभावात्। न च तथापि दर्शत्वादि प्रत्येकधर्ममादाय विनिगमनाविरहात् कार्य्यकारणभावद्वयमावश्यकमिति वाच्यम्, केवलदर्शात् केवलपौर्णमासाच्च फलानुत्पादस्य वारणाय कार्य्यकारणभावद्वयस्यावश्यकत्वेन गौरवस्यैव विनिगमकत्वात्, यदि च पौर्णमासं विना कृते दर्शे दर्शत्वस्य, दर्शं विना कृते च पौर्णमासे पौर्णमासत्वस्य प्रत्यक्षसिद्धत्वं नाभ्युपेयते किन्तु दर्शपूर्व्वकृते पौर्णमास एव पौर्णमासत्वं, पौर्णमासोत्तरकृत एव दर्शे दर्शत्वमुपेयते, तदा तु प्रत्येकं दर्शत्वपौर्णमासत्वाभ्यामेव जनकत्वं, न व्यापकजात्या, अतिरिक्तकल्पने गौरवात् अतिरिक्तजातिकल्पनेऽपि दर्शत्वादिकमादाय विनिगमनाविरहेण कार्य्यकारणभावद्वयस्यावश्यकत्वात्। अथ यदि पौर्णमासोत्तरकृते दर्श एव दर्शत्वं, तदा दर्शत्वेनैव हेतुतास्तु किं पौर्णमासत्वेन हेतुतया? न च विनिगमनाविरहात् पौर्णमासत्वेनापि हेतुत्वमिति वाच्यं केवलपौर्णमासत्वेन हेतुत्वे पौर्णमासानन्तरं दर्शोत्पादप्राक्काल एव परमापूर्व्वोत्पत्त्यापत्तेरेव विनिगमकत्वादिति चेन्न “दर्शपौर्णमासाभ्यां यजेत स्वर्गकाम” इति श्रुत्या पौर्णमासस्यापि हेतुत्वबोधनात् पौर्णमासत्वेनापि हेतुत्वस्यावश्यकत्वात् दर्शत्वस्य पौर्णमासावृत्तित्वात्। एतेन पयोयागात्मकदर्शचरमयागस्यैव पयोयागत्वेन हेतुत्वमस्त्वित्यपि निरस्तम्। दर्शपौर्णमासत्वाक्रान्तानामन्येषामपि हेतुत्वस्य वेदबोधितत्वात्। अथोभयसाधारणवैजात्येन हेतुतापक्षे जातेरव्याप्यवृत्तितया आग्नेयादियागषट्कस्थल एव आग्नेयादियत्किञ्चिद्यागानन्तरं परमापूर्व्वोत्पत्त्यापत्तिः कारणतावच्छेदकावच्छिन्नयत्किञ्चित्कारणसत्त्वात् एवं दर्शत्वपौर्णमासत्वादिना प्रत्येकहेतुत्वपक्षेऽपि पौर्णमासानन्तरं दर्शान्तर्गतयत्किञ्चिद्यागे कृत एव परमापूर्व्वोत्पत्त्यापत्तिरिति चेन्न परमापूर्व्वव्यापारीभूतानां कलिकापूर्व्वषट्कानामपि तत्तद्रूपेण दण्डचक्रवत् हेतुतया कलिकापूर्व्वषट्कानां समूहतया वा तदभावादेव तत्र परमापूर्व्वानुत्पादात्। ननु तथापि दर्शपौर्णमासस्थले कियन्त्यपूर्व्वाणीति चेदत्र प्राहुः—प्रथमतः पौर्णमासत्रयेण प्रत्येकं कलिकापूर्व्वत्रयं जनयित्वा मध्ये एकं परमापूर्व्वं जन्यते एवं दर्शत्रयेणापि प्रत्येकं कलिकापूर्व्वत्रयं जनयित्वा मध्ये एकं परमापूर्व्वं जन्यते, ततस्ताभ्यां परमापूर्व्वाभ्यां चरमं परमापूर्व्वान्तरं जन्यते इति नवापूर्व्वाणीत्याहुः। नव्यास्तु मध्यमपरमापूर्व्वद्वये मानाभावात्

षड्भिः कलिकापूर्व्वैरेव चरमं परमापूर्व्वं जन्यते इति सप्तापूर्व्वाणि। न च पूर्व्वपूर्व्वक्रियाभिर्जनितैः पञ्चभिः कलिकापूर्व्वैः सह चोत्तरक्रियैव चरमं परमापूर्व्वं जनयतु किं चरमक्रियाजन्यकलिकापूर्व्वेणेति वाच्यं तस्या अपि स्वोत्तराङ्गदक्षिणादानादिसाचिव्येनैव परमापूर्व्वजनकत्वोपगमेन तावत्कालानवस्थितया चरमकलिकापूर्व्वस्वीकारात्, दक्षिणादानाद्युत्तराङ्गञ्च साक्षादेव परमापूर्व्वहेतुर्नतु तत्र द्वारापेक्षेति प्राहुः। उच्छृङ्खलास्तु षड्भ्यः कलिकापूर्व्वेभ्य एव स्वर्गोपपत्तेः परमापूर्व्वे मानाभावः। न च स्वर्गं प्रति षण्णामपूर्व्वाणां षडपूर्व्वसम्बन्धेन दर्शपौर्णमासयोर्वा हेतुत्वे गौरवमिति वाच्यं, तथापि परमापूर्व्वं प्रति षडपूर्व्वाणां षडपूर्व्वसम्बन्धेन दर्शपौर्णमासयोर्वा हेतुत्वेन तुल्यत्वात् षडपूर्व्वाणां सम्बन्धत्वन्तु मतद्वय एव। यदि षडपूर्व्वाणामपि पृथक् हेतुत्वं तदाऽपूर्व्वत्वे नैव। इत्थं षट्कत्वे नेत्यन्यदेतदित्याहुः। (अपूर्व्वशब्दे परमापूर्व्वखण्डनमेतन्मतानुसारेणैवोक्तमिति मन्तव्यम्)तदसत्, परमापूर्व्वानभ्युपगमे दक्षिणादानादेश्चरमाङ्गस्य स्वर्गोपयोगित्वानुपपत्तेः न हि दक्षिणादानं साक्षात् स्वर्गहेतुः, अङ्गत्वात् आशुविनाशित्वाच्च तज्जन्यस्य पृथगपूर्व्वस्य स्वीकारे किमपराद्धं परमापूर्व्वेण?। परमापूर्व्वं प्रति च दक्षिणादानादेश्चरमाङ्गस्य साक्षादेव हेतुत्वम् इत्युक्तमेव। न च परमापूर्व्वाभ्युपगमे तत्र षडपूर्व्वाणां दक्षिणादानस्य च कारणत्वं कल्पनीयमतोगौरवमिति वाच्यं, तथापि षडपूर्व्वाणां दक्षिणादानादिजन्यादृष्टस्य च स्वर्गं प्रति हेतुत्वेन तुल्यत्वात् मम तु कलिकापूर्व्वषट्कं परमापूर्व्वजननद्वारं नतु स्वर्गहेतुः, मानाभावात् यागस्य हेतुत्वे च श्रुतिरेव मानमिति न किञ्चिदेतत्। ननु तथापि नवावृत्त्यादिस्थले दशपार्थिवशिवपूजादिस्थले च केन रूपेण परमापूर्व्वविशेषे स्वर्गविशेषे च हेतुत्वं, तत्र नवावृत्तित्वादेर्जातित्वाभावात् न च तत्रापि अपेक्षाबुद्धिविशेषविषयत्वरूपनवत्वादिविशिष्टावृत्तित्वादिनैव हेतुत्वम्। अपेक्षाबुद्धिश्च प्रत्येकसङ्कल्पपूर्व्वकनवावृत्त्यादिव्यावृत्ता ग्राह्या इति वाच्यं प्रत्येकनवावृत्त्यादिमात्रव्यपेक्षाबुद्धेः कारणतावच्छेदकत्वेऽननुगमात् सकलनवावृत्त्यादिवृत्त्यपेक्षाबुद्धेः कारणतावच्छेदकत्वेऽसम्भवात् अथ चण्डीपाठावृत्तितत्तन्नवत्वेतरनवत्वत्वादिना नवत्वादिकमनुगतीकृत्य तद्विशिष्टत्वेन हेतुत्वं वाच्यं "कारणतावच्छेदकसम्बन्धश्च स्वर्गं प्रति परमापूर्व्वत्वमेव परमापूर्व्वं प्रति तु परमापूर्व्वेतरापूर्व्वसामान्यमेव दर्शादिस्थानवदत्रापि प्रत्येकावृत्तिजन्यकलिकापूर्व्वनवकादिद्वारैव परमापूर्व्वजननात् प्रत्येकसङ्कल्पपूर्व्वकप्रत्येकावृत्तिजन्यापूर्व्वतो नवावृत्त्यादिस्थलीयप्रत्येकावृत्तिजन्यकलिकापूर्व्वस्य न वैलक्षण्यमतः कलिकापूर्व्वं प्रति चण्डीपाठत्वादिनैव हेतुत्वं कार्य्यतावच्छेदकञ्च चण्डीपाठसामान्यजन्यतावच्छेदकतया सिद्धो नवावृत्त्यादिजन्यतावच्छेदकजातिव्यापको जातिविशेष एव। धारावाहिकपरमापूर्व्वद्वयादिवारणाय परमापूर्व्वेतरेति। नवत्वादेः प्रत्येकापरिसमाप्तत्वादेकस्मात् परमापूर्व्वोत्पाद इति चेन्न, निखिलापेक्षाबुद्धिसाधारणस्य नवत्वस्य एकस्यानुगतस्याभावेन तेन रूपेणानुगमासम्भवात् इति, मैवं नवावृत्तित्वादेरपि नवपाठादिविषयकमानसज्ञानविशेषवृत्तिमानसत्वव्याप्यजातित्वात् "नवकृत्वः पठेत्" "दश पार्थिवशिवलिङ्गानि पूजयेत्" इत्यादावपि तादृशज्ञानविशेष एव धात्वर्थः तादृशज्ञानविशेषश्च परमापूर्व्वं प्रति साक्षादेव हेतुरिति संक्षेपः"।

कलिकार पुंस्त्री कलिं कलहं करोति कृ—अण् कलिमृच्छति ऋ—अण् वा उप० स०। पीतमस्तके १धूम्याटे पक्षिणि (फिङ्गे)। तस्यामस्तके कलिकाकारपीतचिह्नवत्त्वात् तथात्वम्। स्त्रियां जातित्वात् ङीष्। २पूतिकरञ्जे (काँटाकरञ्चा)पु० मेदि०। ३विषलाङ्गल्याम् राजनि० गौरा० ङीष्। ४कलहकारके ५कलिकाप्राप्तरि च त्रि०। ६नारदे पु०।

कलिकारक पु० कलिकामृच्छति ऋ—कलिं करोति कृ—वा ण्वुल्। १पूतिकरञ्जे (काँटाकरञ्चा)२कलहकारके त्रि०। ३नारदे पु० हेमच०।

कलिङ्ग पुंस्त्री के मूर्द्ध्नि लिङ्गमस्य। १धूम्याटे पक्षिणि (फिङ्गे) अमरः तस्य मस्तके पीतचिह्नवत्त्वात्तथात्वम्। स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। कलिं गच्छति वा० खच् डित् मुम् च। १पूतिकरञ्जे (काँटाकरञ्चा) हेमच० २कुटजे (कुड़ची) तस्य फलम् अण् तस्य लुप्। ३इन्द्रयवे न०। ४शिरीषवृक्षे ५प्लक्षवृक्षे च मेदि०। "जगन्नाथात् समारभ्य कृष्णातीरान्तगं प्रिये! कलिङ्गदेशः संप्रोक्तो वाममार्गपरायणः" इति तन्त्रोक्ते ६देशभेदे ब० व० मेदि० "उत्कलादर्शितपथः कलिङ्गाभिमुखं ययौ" रघुः। स च देशः बृहत्सं० कूर्म्मविभागे

आग्नेयाद्युक्तः यथा "आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः"। तेषां राजा, ते अभिजनोऽस्य वा अण्। कालिङ्ग तद्देशनृपे तद्देशवासिजने च "कालिङ्गः प्रतिजग्राह तमस्त्रगजसाधनः" रघुः बहुषु अणो लुक्। कलिङ्गाः। "स सागरं समासाद्य गङ्गायाः सङ्गमे नृपः। नदीशतानां पञ्चानां मध्ये चक्रे समाप्लवम्। ततः समुद्रतीरेण जगाम वसुधाधिपः। भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत!। लोमश उवाच। एते कलिङ्गाः कौन्तेय! यत्र वैतरणी नदी। यत्रायजत धर्मोऽपि देवाञ्छरणमेत्य वै। ऋषिभिः समुपायुक्तं यज्ञियं गिरिशोभितम्। उत्तरं तीरमेतद्धि सततं द्विजसेवितम्। समानं देवयानेन पथा स्वर्गमुपेयुषः"। "त्रिशतं वै सहस्राणां योजनानां युधिष्ठिर!। यत्र ध्वनिं शृणोष्येवं तूष्णीमास्स्व विशाम्पते!। एतत् स्वयम्भुवो राजन्! वनं दिव्यं प्रकाशते" "यत्र प्रकाशते राजन्! वेदी सस्थानलक्षणा। आरुह्यात्र महाराज! वीर्यवान् वै भविष्यसि। एषा सागरमासाद्य राजन्! वेदी समाश्रिता। एतामारुह्य भद्रं ते, त्वमेकस्तर सागरम्। अहं च ते स्वस्त्ययनं प्रयोक्ष्ये यथा त्वमेतामधिरोहसेऽद्य। स्पृष्टा हि मर्त्येन ततः समुद्रमेषा वेदी प्रविशत्याजमीढ! भा॰व॰११४अ॰। इति तद्देशस्थनद्यादिविवृतिरुक्ता। "स प्रतापं महेन्द्रस्य मूर्द्धि तीक्ष्णं न्यवेशयत्" रघौ कलिङ्गदेशस्थः पर्वतः महेन्द्र इति वर्णितम्। ७उशीनरभ्रातृतितिक्षुवंश्यबलिनृपपुत्रभेदे। "महामनास्तु द्वौ पुत्रौ जनयामास भारत!। उशीनरं च धर्मज्ञं तितिक्षुञ्च महाबलम्" इत्युपक्रम्य। "तितिक्षोस्तु प्रजाः शृणु" इति प्रतिज्ञाय। "तितिक्षुरभवद्राजा पूर्वस्यां दिशि भारत!। उषद्रथो महाराज! फेनस्तस्य सुतोऽभवत्। फेनात्तु सुतपा जज्ञे सुतः सुतपसो बलिः। जातो मनुष्ययोनौ तु स राजा काञ्चनेषुधिः। महायोगी स तु बलिर्बभूव नृपतिः पुरा। पुत्रानुत्पादयामास पञ्च वंशकरान् भुवि। अङ्गः प्रथमतो जज्ञे वङ्गः सुह्मस्तथैव च। पुण्ड्रः कलिङ्गश्च तथा वालेयं क्षत्रमुच्यते" इत्युक्त्वा "तेषां जनपदाः पञ्च अङ्गा वङ्गाः ससुह्मकाः कलिङ्गाः पुण्ड्रकाश्चैव प्रजास्त्वङ्गस्य वै शृणु" हरिवं॰ ३१ अ॰ उक्तम्। तेन कलिङ्गनृपाधिष्ठितत्वात् देशस्य तथात्वम्। काय सुखाय लिङ्गमस्याः। ८योषिति स्त्री हेम॰। त्रिवृति ९(तेओडि) स्त्री शब्दच॰।

कलिङ्गाद्यगुटिका स्त्री चक्रद॰उक्ते औषधभेदे यथा "कलिङ्गबिल्वजम्ब्वाम्रकपित्थं सरसाञ्जनम्। लाक्षाहरिद्रे ह्रीवेरं कट्फलं शुकनासिकाम्। लोध्रं मोचरसं शङ्खं धातकीवटशुङ्गकम्। पिष्ट्वा तण्डुलतोयेन वटकानक्षसम्मितान्। छायाशुष्कान् पिबेच्छीघ्रं ज्वरातीसारशान्तये। रक्तप्रसादनाश्चैते शूलातिसारनाशनाः"।

कलिञ्ज पु॰ कं वातं लञ्जति रोधनेन लजि—भर्त्सने अण् उप॰स॰। (दरमा) कटे हेमच॰। तस्य गृहाद्यावरणेन वातरोधनात्तथात्वम्।

कलित त्रि॰ कल—कर्मणि क्त। १विदिते २प्राप्ते, मेदि॰ ३भेदिते ४संख्याते, शब्दरत्ना॰। ५गृहीते, ६उक्ते ७विचारिते, ८बद्धे च। भावे क्त ९ज्ञानलाभादौ न॰।

कलिद्रुम पु॰ कलेराश्रयः द्रुमः। १विभीतकवृक्षे रत्नमाला। तत्र हि नलस्य राज्ञश्छिद्रान्वेषणाय कलिना सुचिरं स्थितमिति कलिशब्ददर्शितनैषधवाक्ये दृश्यम्। कलिवृक्षादयोऽप्यत्र

कलिन्द पु॰ कलिं ददाति द्यति वा खच् मुम् च। अद्रिविशेषे, यतो यमुना नदी निःसृता, "कलिन्दगिरिनन्दिनी तटसुरद्रुमालम्बिनी" रसगङ्गा॰। २विभीतकवृक्षे, राजनि॰। ३सूर्य्ये भरतः तन्मूलं मृग्यम्।

कलिन्दकन्या स्त्री कलिन्दस्य पर्व्वतस्य कन्येव तत्र प्रभवत्वात्। यमुनायाम्। "कलिन्दकन्या मथुरां गतापि गङ्गोर्मिसंसक्तजलेव भाति" रघुः। कलिन्दतनया-कलिन्दजाकालिन्दगिरिजादयोऽप्यत्र।

कलिप्रिय पु॰ कलिः प्रियोऽस्य। नारदे शब्दर॰।

कलिमारक पु॰ कलीनां कलिकानां माला अत्र लस्य रः वा कप् संज्ञायां कन्। १पूतिकरञ्जे स्वामी। वा न लस्य रः। कलिमालकोऽप्युक्तार्थे अमरटीकायां रमानाथः। [राजनि॰।

कलिमाल्य पु॰ कलीनां कलिकानां माल्यं यत्र। १पूतिकरञ्जे

कलियुग न॰ कर्म॰ राजशिरोवत् तत्पुरुषो वा। कलिरूपे युगे कालविशेषे तन्मानादिकं कलिशब्दे उक्तं तदारम्भतिथिर्युगाद्या सा च गौडीयमते माघपौर्णमासी यथाह ति॰त॰
"अथ युगाद्याः तासु च 'युगाद्या वर्षवृद्धिश्च सप्तमी पार्व्वती प्रिया। रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता"। इत्यनेन व्यवस्था। ब्रह्मपुराणे। "वैशाखे शुक्लपक्षे तु तृतीयायां कृतं युगम्। कार्त्तिके शुक्लपक्षे तु त्रेताऽथ नवमेऽहनि। अथ भाद्रपदे कृष्णत्रयोदश्यान्तु

द्वापरम्। माघे च पौर्णमास्यां वै घोरं कलियुगं स्मृतम्। युगारम्भास्तु तिथयो युगाद्यास्तेन विश्रुताः”। अत्र वैशाखादय: पौर्णमास्यन्ताएव ब्रह्मपुराणे तथैव तिथिकृत्याभिधानात्। मुख्यवाचित्वे कार्त्तिके नवमेऽहनीत्यनेनैव सिद्धौ शुक्लपक्ष इति व्यर्थं स्यात् तेन भाद्रकृष्णत्रयोदशी अश्वयुक्कृष्णपञ्चमीयेति मैथिलोक्तं निरस्तम्। आसां प्रशंसामाह विष्णुपुराणम् “वैशाखमासस्य तु या तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे। नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पञ्चदशी च माघे। एता युगाद्याः कथिताः पुराणैरनन्तपुण्यास्तिथयश्चतस्रः। उपप्लवे चन्द्रमसोरवेश्च त्र्यष्टकास्वप्ययनद्वये च”। उपप्लवे ग्रहणे “पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतोमनुष्यः। श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत् पितरोवदन्ति”। स्नानमधिकृत्य भविष्ये “संवत्सरफलं तत्र नवम्यां कार्त्तिके तथा। मन्वादौ च युगादौ च मासत्रयफलं लभेत्”।

तदेतत् कल्पभेदेन व्यवस्थाप्य माघामावस्यैव कलियुगाद्येति दाक्षिणात्याः प्रतिपेदिरे यथाह नि०सि०

“रत्नमालायाम् ‘माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी। तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः। यत्तु गौड़ाः “माघस्य पूर्णिमायां तु घोरं कलियुगं स्मृतमिति” ब्राह्मोक्तेः “वैशाखमासस्य सिता तृतीया नवम्यसौ कार्त्तिकशुक्लपक्षे। नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पञ्चदशी च माघे” इति विष्णुपुराणे चकारेण तमिस्रपक्षानुषङ्गेण पूर्वोक्तविरोधात् पूर्णिमास्यैव ज्ञेया। “द्वे शुक्ले” इत्यादिकन्तु निर्मूलमित्याहुः। तन्न “दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम्” इति भविष्यविरोधात् एतेन ब्राह्मानुसारात् पूर्णिमायामेव युगादिश्राद्धं वदन् शूलपाणिः परास्तः। तेन कल्पभेदात् व्यवस्थेति तत्त्वम्। एतेन “कार्त्तिके नवमी शुक्ला माघमासे च पूर्णिमा” इति नारदीयं व्याख्यातम्। निर्मूलत्वोक्तिर्नारदीयाज्ञानकृता”। तत्र श्राद्धादिकरणमुभयदिने तत्प्राप्तौ निर्णयश्च नि०सि०।

“अत्र श्राद्धमुक्तं मात्स्ये “कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु। हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति”। भारतेऽपि “या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवः। स्नात्वार्पयित्वा दत्त्वा च ह्यनन्तफलं लभेदिति”श्राद्धेऽपि पूर्वाह्णव्यापिनी ग्राह्या “पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः। दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिकी” इति पाद्मोक्तेः। “द्वे शुक्ले द्वे तथा कृष्णे युगादी कवयो विदुः। शुक्ले पूर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके” हेमाद्रौ नारदीयवचनाच्च। दीपिकापि “अथो युगादि, मन्वादिकर्मतिथयः पूर्वाह्णिकाः स्युः सिते। विज्ञेया अपराह्णिकाश्च बहुले” इति। कृत्यसारेऽपि “युगादिमन्वादिश्राद्धेषु शुक्लपक्षे उदयव्यापिनी तिथिर्ग्राह्या। कृष्णपक्षे पराह्णव्यापिनीति”। दिवोदासीये गोभिलः “वैशाखस्य तृतीयां तु पूर्वविद्धां करोति वै। हव्यं देवा न गृह्णन्ति कव्यञ्च पितरस्तथेति”। गोविन्दार्णवेऽप्येवम्। तेनेयं पूर्वाह्णव्यापिनी दिनद्वये सती परैवेति धर्मतत्त्वविद्धेमाद्र्यादयः। अनन्तभट्टस्तु “सवैधृतिर्व्यतीपातो युगमन्वादयस्तथा। सम्मुखा उपवासे स्युर्दानादावन्तिमाः स्मृताः” इत्याह। दानादाविति श्राद्धसंग्रहः। उपवासस्त्वग्रे वक्ष्यते। यत्तु मार्कण्डेयः “शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्य्याद्विचक्षणः। कृष्णपक्षापराह्णे तु रौहिणं तु न लङ्घयेत्”। रौहिणो नवमोमुहूर्त्तः। अत्र च शुक्लपक्षयुगादिश्राद्धं पूर्वाह्णे कार्यमिति शूलपाणिः। निर्णयामृतादयस्तु “कालादर्शे अमाश्राद्धमापराह्णिकमुक्त्वा एवं मन्वादीनां युगादीनां निर्णय इत्युक्त्वाद्द्वे शुक्ल इत्यादि वचनं विष्णुपूजाविषयम्। श्राद्धे त्वापराह्णिकैवेति व्यवस्थां जगदुः। सेयं पूर्वोक्तानेकवचोविरोधात् स्वाज्ञत्वविलसितमित्युपेक्षणीया। “पूर्वाह्णे दैविकं कुर्य्यात्” इत्यादिवचनादेव तत्सिद्धेर्वचनवैयर्थ्याच्च। किञ्च कालादर्शोक्तिर्न्यायमूला वचोमूला वा नाद्यः. युगादिश्राद्धस्यामाश्राद्धविकृतित्वेन न्यायतो पराह्णव्याप्तावपि वचनेन तस्य बाधात्। नान्त्यः अतिदेशादेवापराह्णव्याप्तिप्राप्तेर्वचनवैयर्थ्यात् “अप्राप्ते शास्त्रमर्थवदिति” न्यायात् तेन यदि कालादर्शोक्तिः कथञ्चिच्छ्रद्धाजाड्येन समाधित्सा तर्हि न्यायप्राप्तकृष्णपक्षयुगादिविषयत्वेन सा व्यवस्थापनीयेति दिक्”। युगादिकृत्यं मलमासेऽपि कार्य्यम् “दर्शश्राद्धं गोत्सर्गश्चतुर्ष्वपि युगादिषु। उपाकर्मणि चोत्सर्गे ह्येतदिष्टं मलादितः” हेमाद्रौ ऋष्यशृङ्गवचनात् एतत् दर्शश्राद्धादिकम्। “अब्दोदकुम्भमन्वादिमहालययुगादि च। मलमासे न कर्त्तव्यम्” कालादर्शवाक्यात्तु महालयोऽत्र मघात्रयोदशीति बोध्यम्

स्मृतिचन्द्रिकायां तु मासद्वयेऽपि कर्त्तव्यमित्युक्तम्

"यौगादिकं मासिकं च श्राद्धं चापरपक्षिकम्। मन्वादिकं तैर्थिकञ्च कुर्य्यान्मासद्वयेऽपि च" तद्वचनात् अपरपक्षोऽत्र कृष्णपक्षः न तु प्रेतपक्षः तस्य तत्र निषेधात् "प्रतिमासं मृताहे च श्राद्धं यत् प्रतिवत्सरम्। मन्वादौ च युगादौ च तन्मासोरुभयोरपीति" मदनरत्ने मरीच्युक्तेः। प्रतिवत्सरं क्रियमाणं कल्पादिश्राद्धमिति मदनरत्नम्" एतेन युगाद्यावर्षवृद्धिश्चेति वचनं श्राद्धातिरिक्तविष्णुपूजादिविषयम् न तत्र तिथियुग्मतेति अन्यचरणस्वरसात् तिथियुग्मादरस्य दैवविषयतया तद्विषयकत्वस्यैवोचितत्वात् एवं निर्णयः" "सर्वासु युगाद्यासु"।

अत्रोभयमासे कर्त्तव्यताविधानमपि संक्रान्तिनिमित्तपुण्यकालस्योभयत्र लाभे पूर्वदिनाकरणे परदिने कर्त्तव्यतावत् पूर्वमासे दैवादकरणे परमासेऽपि कर्त्तव्यताभ्यनुज्ञानार्थम् नतूभयमासयोः समुच्चयेन। एकेनैवानुष्ठानेन दुरदृष्टानुत्पत्तेः "श्वः कार्य्यमद्य कर्त्तव्यमित्युक्तेश्च प्रथममासएव मुख्यःकाल इति तत्त्वम्।

अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तमृग्विधाने। "न यस्य छायामन्त्रं च शतशारं तदा जपेत्। युगादयो यदा न्यूनाः कुरुते नैव चापि यः"यदा न्यूना इत्यनेन अन्यतमाकरणं नैव कुरुते इत्यनेन सर्वासामकरणमिति सूचितम्। "युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ। गोसहस्रप्रदानस्य कुरुक्षेत्रे फलं हि यत्। तत्फलं लभते मर्त्त्यो भूमिदानस्य च ध्रुवमिति" पृथ्वी च० चौ० समुद्रस्नानमुक्तम्।

युगादिवत् युगान्तकालोऽप्यक्षय पुण्यदः तन्निरूपणादिकं हेमा०दा० यथा–

"नवम्यां शुक्लपक्षस्य कार्त्तिके निरगात् कृतम्। त्रेता सिततृतीयायां वैशाखे समपद्यत। दर्शे तु माघमासस्य प्रवृत्तं द्वापरं युगम्। कलिः कृष्णत्रयोदश्यां नभस्ये मासि निर्गतः। युगादयः स्मृता ह्येते दत्तस्याक्षयकारकाः" ब्रह्मपुराणे "युगारम्भास्तु तिथयो युगाद्यास्तेन कीर्त्तिताः। फलं दत्तहुतानाञ्च तासामनन्तं प्रकीर्त्तितम्" तथा–"एतावतस्तिथयो युगाद्या दत्तं हुतञ्चाक्षयमासु विन्द्यात्। युगे युगे वर्षशतेन यत्तपो युगादिकाले दिवसेन तद्भवेत्"। तथा–"सूर्य्यस्य सिंहसंक्रान्त्यामन्तः कृतयुगस्य च। तथा वृश्चिकसंक्रान्त्यामन्तस्त्रेतायुगस्य च। ज्ञेयस्तु वृषसंक्रान्त्यां द्वापरान्तस्तु संख्यया। तथा च कुम्भसंक्रान्त्यामन्तः कलियुगस्य च"।

पद्मपुराणे "युगादिषु युगान्तेषु स्नाना-दान-जपादिषु। यत्किञ्चित् क्रियते तस्य युगान्ताः फलशालिनः" आदित्यपुराणे "दिनर्क्षं रेवती यत्र गमनञ्चैव राशिषु। युगान्तदिवसं विद्धि तत्र दानमनन्तकम्। चन्द्रोपरागे विषुवे सौम्ये वा मिहिरोपदिः। सप्तमी शुक्लाकृष्णा वा युगादिदिवसं विदुः"।

कलिल त्रि०कल-इलच्।१गहने, अमरः"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति" गीता।२मिश्रे च उज्ज्व०। "लोकालोकौ कलोऽकल्ककलिलोऽलिकुलालकः"माघः।

कलिहारी स्त्री कलिं हरति हृ-अण् गौरा० ङीष्। (विषलाङ्गलिया)लाङ्गल्याम् भावप्र० "कलिहारी सरा कुष्ठ शोफार्शोव्रणशूलजित्। सक्षारा श्लेष्मजित्तिक्ता कटुकातुवराऽपि च। तीक्ष्णोष्णा कृमिहृल्लघ्वी पित्तला गर्भपातिनी" भावप्रकाशे तद्गुणा उक्ताः।

कलुष पुंस्त्री कल-उषच्, लुष-हिंसायां क।कस्य जलस्य लुषो घातकः इति वा। १महिषे राजनि० स्त्रियां जातित्वात् ङीष्। २पापे न०।"त्वां प्रत्यकस्मात् कलुषप्रवृत्तौ"रघुः। ३तद्वति त्रि०। ४अनच्छे आविले त्रि० अमरः। "विभिन्नशङ्खः कलुषीभवन्मुहुर्मदेन दन्तीव मनुष्यधर्म्मणः" माघः। ५गर्हिते त्रि० शब्दचि०। अकलुषः कलुषो भवति कलुषायते। कलुषायितः। कलुषं करोति णिच् कलुषयति कलुषितः। ६असमर्थे। "भावावबोधकलुषा दयितेव रात्रौ" रघुः। [तर तद्देशभवादौ त्रि०।

कलूतर पु० देशभेदे। ततः कच्छादि० भवादौ अण्। कालू-

कलेवर न० कले शुक्रे वरं श्रेष्ठम् तदुत्पन्नत्वेऽपि शुचि सप्तम्या अलुक्। देहे। "यं यं चापि स्मरन् भावं त्यजत्यन्ते कलेवरम्"गीता। "शरीरे जर्ज्जरीभूते व्याधिग्रस्ते कलेवरे। औषधं जाह्नवीतोयं वैद्योनारायणः स्वयम्" पुरा० पठन्ति।

कल्क पुंन० कल-क तस्य नेत्त्वम्। १घृततैलादिपाकसंस्कारविशेषे, २दम्भे, ३विभीतकवृक्षे, ४विष्ठायाम् ५किट्टे ६पापे च मेदि०। ७तुरुष्कनामगन्धद्रव्ये राजनि० ८घृततैलादिपाके देये औषधिद्रव्यभेदे च। कल्कप्रकारः भावप्र० उक्तो यथा। "स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ। ज्ञेया कषायाः पञ्चैते लघवःस्युर्यथोत्तरम्" इति विभज्य "द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्। प्रक्षिप्य गालयेद्वस्त्रे तन्मानं कर्षसंमितम्। कल्के मधु घृतं तैलं देयं द्विगुणमात्रया। सितां गुडसमां

दद्यात् द्रवोदेयश्चतुर्गुणः”।“क्वाथ्याच्चतुर्गुणं वारि—पादस्थं स्याच्चतुर्गुणम्। स्नेहात् स्नेहसमं क्षीरं कल्कस्तु स्नेहपादिकः। चतुर्गुणन्त्वष्टगुणं द्रवद्वैगुण्यतो भवेत्। पञ्चप्रभृति यत्र स्युर्द्रव्याणि स्नेहसंविधौ। तत्र स्नेहसमान्याहुरर्वाक् च स्याच्चतुर्गुणम्” चक्रद० तत्र देयद्रव्यमानपरिभाषोक्ता। “अकल्कको निरारम्भः प्रा० त० तीर्थयात्राङ्गधर्म्मोक्तौ भाव०।८ रुक्षतासाधने चूर्णभेदे च। “तां लोध्रकल्केन हृताङ्गतैलाम्” कुमा०। “लोकालकोकलोऽकल्ककलिलोऽलिकुलालकः” माघः। पापाशये त्रि० मेदि०।

कल्कन न० कल्कं शाठ्यं करोति णिच्—भावे—ल्युट्। शाठ्याचरणे “दह कल्कने कल्कनं दम्भः शाठ्यं च” सि०कौ०।

कल्कफल पु० कल्कस्य विभीतकस्य फलमिव फलमस्याकारसाम्यात्। दाड़िमवृक्षे राजनि०।

कल्कि पु० कल्कोऽस्त्यस्य हार्य्यतया इन्। भगवतो दशमेऽवतारे तदाविर्भावप्रसङ्गादि कल्किपु० उक्तं यथा “व्याधिव्याधिजराग्लानिदुःखशोकभयाश्रयाः। कलिराजानुगाश्चेरुर्यूथशोलोलनाशकाः। बभूवुः कालविभ्रष्टाः क्षणिकाः कामुकानराः। दम्भाचारदुराचारास्तातमातृविहिंसकाः। वेदहीना द्विजा दीनाः शूद्रसेवापराः सदा। कुतर्कवादबहुला धर्मविक्रयिणोऽधमाः। वेदविक्रयिणो व्रात्या रसविक्रयिणस्तथा। मांसविक्रयिणः क्रूराः शिश्नोदरपरायणाः। परदाररता मत्ता वर्णसङ्करकारकाः। ह्रस्वाकाराः पापसाराः शठा मठनिवासिनः। षोडशाब्दायुषः श्यालबान्धवा नीचसङ्गमाः। विवादकलहक्षुब्धाः केशवेशविभूषणाः। कलौ कुलीना धनिनः, पूज्या वार्द्धुषिका द्विजाः। सन्न्यासिनो गृहासक्ता गृहस्थास्त्वविवेकिनः। गुरुनिन्दापरा धर्म्मध्वजिनः साधुवञ्चकाः। प्रतिग्रहरताः शूद्राः परस्वहरणादराः। द्वयोः स्वीकारउद्वाहः शठे मैत्री, वदान्यता। प्रतिदाने, क्षमाऽशक्तौ, विरक्तिःकरणाक्षमे। वाचालत्वञ्च पाण्डित्ये, यशोऽर्थे धर्म्मसेवनम्। धनाढ्यत्वञ्च साधुत्वे, दूरे नीरे च तीर्थता। सूत्रमात्रेण विप्रत्वं, दण्डमात्रेण मस्करी। अल्पशस्या वसुमती नदीतीरेऽवरोपिता। स्त्रियो वेश्यालापसुखाः स्वपुंसा त्यक्तमानसाः। परान्नलोलुपा विप्राश्चण्डालग्रामयाजकाः। स्त्रियो वैधव्यहीनाश्च स्वच्छन्दाचरणप्रियाः। चित्रवृष्टिकरा मेघा, मन्दशस्या च मेदिनी। प्रजाभक्षा नृपा, लोकाः करपीडाप्रपीडिताः। स्कन्धे भारं, करे पुत्रं, कृत्वा क्षुब्धाः प्रजाजनाः। गिरिदुर्गं वनं घोरमाश्रयिष्यन्ति दुर्भगाः। मधुमांसैर्मूलफलैराहारैः प्राणधारिणः। एवं तु प्रथमे पादे कलेः कृष्णविनिन्दकाः। द्वितीये तन्नामहीनास्तृतीये वर्णसङ्कराः। एकवर्णाश्चतुर्थे च विस्मृताच्युतसत्क्रियाः। निः—स्वाध्याय-स्वधा-स्वाहा—वौषड़ोंकार-वर्ज्जिताः। देवाः सर्वे निराहाराः ब्रह्माणं शरणं ययुः”। इत्यन्तेन १अ० कलिस्वभावमुपवर्ण्य भगवतः प्रादुर्भावप्रतिज्ञोक्ता “स्तुत्वा प्राह पुरोब्रह्मा देवानां हृदयेप्सितम्। तत्श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्। शम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम् सुमत्यां मातरि विभोः कन्यायां त्वन्निदेशतः। चतुर्भिर्भ्रातृभिर्देव! करिष्यामि कलिक्षयम्। भवन्तोबान्धवा देवाः स्वांशेनावतरिष्यथ। इयं मम प्रिया लक्ष्मीः सिंहले संभविष्यति। वृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा। भार्य्यायां, मम भार्य्यैषा पद्मानाम्ना जनिष्यते। यात यूयं भुवं देवाः स्वांशावतरणे रताः। राजानौ मरुदेवापी स्थापयिष्याम्यहं भुवि। पुनः कृतयुगं कृत्वा धर्मान् संस्थाप्य पूर्ववत्। कलिव्यालं संनिरस्य प्रयास्ये स्वालयं विभो!। इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः। जगाम ब्रह्मा सदनं देवाश्च त्रिदिवं ययुः। मंहीमाश्वास भगवान् निजजन्मकृतोद्यमः। विप्रर्षे! शम्भलग्राममाविवेश परात्मकः। सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्। ग्रहनक्षत्रराश्यादिसेवितश्रीपदाम्बुजम्।सरित्समुद्रागिरयोलोकाःस्थावरजङ्गमाः। सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ। बभूव सर्वसत्त्वानामानन्दोविविधाश्रयः। नृत्यन्ति पितरोहृष्टास्तुष्टा देवा जगुर्यशः। चक्रुर्वाद्यादि गन्धर्वा ननृतुश्चाप्सरोगणाः। द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः। जातं ददृशतुः पुत्रं पितरौ हृष्टमानसौ। धात्री माता महाषष्ठी नाड़ीच्छेत्री तदम्बिका। गङ्गोदकक्लेदमोक्षा सावित्री मार्जनोद्यता। तस्य विष्णोरनन्तस्य वसुधाऽदात् पयः सुधाम्। मातृकामङ्गलवचः कृष्णजन्मदिनेऽभवत्। ब्रह्मा तदुपधार्य्याशु स्वाशुगं प्राह सेवकम्। याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय। चतुर्भुजमिदंरूपं देवानामपि दुर्लभम्। त्यक्त्वा मानुषवद्रूपं कुरु नाथ! विचारितम्। इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्। सशीतः प्राह तरसा ब्रह्मणोवचनादृतः। तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्। तदा तत्पितरौ दृष्ट्वा विस्मयापन्न-

सामगो । भ्रमसंस्कारवत् तत्र मेनाते तस्य मायया । ततस्तु शम्भलग्रामे सोतृसवा जीवजातयः । मङ्गलाचारबहुलाः पापतापविवर्ज्जिताः । सुमतिस्तं सुतं लब्ध्वा विष्णुं जिष्णुं जगत्पतिम् । पूर्णकामा विप्रमुख्यानाहूयादाद्गवां शतम् । हरेः कल्याणकृद्विष्णुयशाः शुद्धेन चेतसा । सामर्ग्यजुर्विद्भिरग्र्यैस्तन्नामकरणे रतः । तदा रामः कृपो व्यासो द्रौणिर्भिक्षुशरीरिणः । समायाता हरिं द्रष्टुं बालकत्वमुपागतम् । तानागतान् समालोक्य चतुरः सूर्य्यसन्निभान् । हृष्टरोमा द्विजवरः पूजयाञ्चक्रे स ईश्वरान् । पूजितास्ते स्वासनेषु संविष्टाः स्वसुखाश्रयाः । हरिं क्रोडगतं तस्य ददृशुः सत्यमूर्त्तयः । तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः । कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्बुधाः । नामाकुर्वंस्ततस्तस्य कल्किरित्यभिविश्रुतम् । कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः । ततः स ववृधे तत्र सुमत्या परिपालितः । कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी । कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः । तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः । कल्केरंशाः पुरो जाताः साधवो धर्मतत्पराः । गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः । विशाखयूपभूपालपालितास्तापवर्जिताः । ब्राह्मणाः कल्किमालोक्य परां प्रीतिमुपागताः । ततो विष्णुयशाः पुत्रं धीरं सर्वगुणाकरम् । कल्किं कमलपत्राक्षं प्रोवाच पठनादृतम् । तात ! ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम् । सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि"२अ०। तस्य चरितादिकं कल्किपुराणशब्दे दृश्यम्

कल्किन् पु० कल्को नाश्यतयाऽस्त्यस्य इनि । भगवतो दशमेऽवतारे कल्किशब्दे विवरणम् । "मत्स्यः कूर्म्मो वराहश्च नरसिंहश्च वामनः । रामो रामश्च रामश्च बुद्धः कल्की च ते दश" पुरा० । "कल्की सतां च भविता प्रहरिष्यतेऽरीन्" मुग्ध० ।

कल्किपुराण न० । वेदव्यासप्रणीते ब्रह्मभागवते उपपुराणभेदे तत्र प्रतिपाद्यविषयाश्च यथा—

सूतसमीपे शौनकादीनां भविष्यप्रश्नः । शुकस्य कल्किपुराणप्राप्तिविवरणम् । कलेरुत्पत्तिः । कलिविवरणम् । कलौ आचारभ्रंशः । धरित्र्या सह देवानां ब्रह्मलोकगमनम् । ब्रह्मलोकवर्णनम् । ब्रह्मसमीपे कलेर्दोषकीर्त्तनम् । ब्रह्मणा सह देवानां गोलोके गमनम् । विष्णुसमीपे कलिवृत्तनिवेदनम् । विष्णोर्विष्णुयशसो गृहे अवतारतयाविर्भावाङ्गीकारः । विष्णुयशसः पत्न्याः सुमत्या गर्भः । विष्णौ जाते देवानां हर्षः । विष्णोश्चतुर्भुजमूर्त्तिपरिहारपूर्वकं मानुषरूपधारणम् । रामकृपव्यासद्रौणीनां कल्किदर्शनार्थमागमनम् । कल्केर्नामकरणम् । कल्केरुपनयनकाले पितुरुपदेशः । कल्केर्गुरुकुलवासार्थं यात्रा जामदग्न्यप्राप्तिश्च । कल्केर्वेदाध्ययनं धनुर्वेदशिक्षा च । गुरुदक्षिणादानाभिलाषः । कल्केर्विल्वोदकेश्वरशिवदर्शनं तत्स्तुतिश्च । शिवया शिवस्याविर्भावो वरदानञ्च । शङ्करात् कल्केः करवालशुकतुरङ्गप्राप्तिः । कल्केर्गृहप्रत्यागमनम् । कल्केराश्रमधर्म्मोपदेशः । कल्केर्धर्म्मकथनम् । ब्राह्मणलक्षणम् । सिंहलद्वीपवर्णनम् । पद्माया राजकन्याया विवरणम् । शिवात् पद्माया वरलाभः । पद्मायाः स्वयंवरोद्योगः । समागतभूपानां स्त्रीत्वप्राप्तिः । पद्मायाया विलापः । कल्केरादेशेन शुकस्य पद्मासमीपे गमनम् । पद्माशुकसंवादः । विष्णुपूजाप्रकरणम् । पद्मासमीपे अच्युतावतारकथनम् । शुकस्य शम्भले प्रतिगमनम् । कल्किशुकसंवादः । कल्केः सिंहलगमनम् । पद्मायाः कल्किसमीपे गमनम् । पद्मायाः कल्किदर्शनम् । कल्किदर्शनेन भूपानां पुरुषत्वप्राप्तिः । राजगणकृतकल्किस्तवः । अनन्तस्यागमनम् । अनन्तोपाख्यानम् । अनन्तेन हंसस्य साक्षात्कारः । कल्केराज्ञया विश्वकर्म्मणः शम्भले पुरीनिर्म्माणम् । कल्केः सस्त्रीकस्य शम्भले प्रत्यागमनम् । कल्केः सुतोत्पत्तिः । बौद्धयुद्धम् । जिनविनाशः । बौद्धजयः । म्लेच्छजयः । म्लेच्छकामिनीभिः कल्केर्युद्धम् । बालखिल्यानामागमनम् । निकुम्भदुहितुराख्यानम् । कुथोदर्य्याः संहारार्थं कल्केर्यात्रा । कुथोदर्य्या बधः । नारदादीनां महर्षीणामागमनम् । मरोरात्मपरिचयार्थं सूर्य्यवंशवर्णनम् । श्रीरामचरितम् । सीतापरित्यागः । सीताया भूतलप्रवेशः । रामस्य स्वर्गारोहणम् । रामस्य वंशावली । मरोरुत्पत्तिविवरणम् । चन्द्रवंशे देवापेरुत्पत्तिविवरणम् । देवापेर्मरोश्च दिव्यरथप्राप्तिः । कृतयुगस्यागमनम् । मन्वन्तरवर्णनम् । कलिना संग्रामोद्योगः । कल्केर्दिग्विजययात्रा । धर्म्मस्य कलिना समागमः । कल्किसमीपे धर्मस्यात्मनिवेदनम् । कलिना कल्केः संग्रामः । मरुदेवापिप्रभृतीनां शककाम्बोजबर्बरचौलादिभिः संग्रामः कलिसहचराणां पराभवः । कोकविकोकबधः । कल्केर्भल्लाटनगरगमनम् । शशिध्वजस्य समरोद्योगः । मूर्च्छितं कल्किमादाय शशिध्वजस्य गृहागमनम् ।

सुशान्ताया गीतम् । शशिध्वजकन्यया कल्केर्विवाहः । शशिध्वजस्य हरिभक्तिकारणम् । शशिध्वजस्य पूर्वजन्मवृत्तान्तकथनम् । भक्तिलक्षणम् । हरिभक्तस्य संग्रामप्रवृत्तिकारणम् । द्विविदोपाख्यानम् । कृष्णावतारवृत्तान्तः । कल्केः काञ्चनपुर्यां प्रवेशः । विषकन्यासंवादः । कल्केरनुचराणां पृथक् पृथक् राज्येऽभिषेकः । कल्केः शम्भले प्रतिगमनम् । सत्ययुगप्रवर्त्तनम् । मायास्तवः । विष्णुयशसो राजसूययज्ञारम्भः । नारदस्यागमनम् । मायाजीवयोः कथोपकथनम् । विष्णुयशसो वनगमनम् । परशुरामस्यागमनम् । रुक्मिणीव्रतकथनम् । कल्केः पत्नीभिर्विहारः । शम्भले देवानामागमनम् । कल्केः स्वर्गारोहणम् । गङ्गास्तोत्रम् । कल्किपुराणस्यानुक्रमणिका । कल्किपुराणश्रवणादिफलम्" ।

कल्प पुं॰ कल्पते समर्थो भवति स्वक्रियायै विरुद्धलक्षणया असमर्थो भवति वाऽत्र, कृप् सामर्थ्ये विरुद्धलक्षणया असामर्थ्ये वा आधारे घञ् कल्पयति सृष्टिं विनाशं वाऽत्र कृप- णिच्-- आधारे अच् । ब्रह्मणो रात्रिरूपे जगतां चेष्टाराहित्यसम्पादके १प्रलये २तस्य दिनरूपे जगतां चेष्टासम्पादके च कालभेदे । "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत् । यदा स्वपिति शान्तात्मा तदा सर्वं निमीलति" मनुना जगच्चेष्टातद्राहित्ययोर्ब्रह्माहोरात्रयोरुक्तेस्तथात्वम् ।

कल्पिशब्दे दर्शितवाक्येन युगमानसङ्ख्या कल्पमानं प्रदर्श्य ब्रह्मणः आयुःपरिमाणं तस्य गतायुःकालश्च सू॰सि॰ उक्तो यथा—

"युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते । कृताब्दसङ्ख्यास्तस्यान्ते सन्धिः प्रोक्तो जलप्लवः" सू॰। "युगानां सैका सप्ततिरेकसप्ततिर्महायुगमित्यर्थः । इह—मूर्त्तकाले । मन्वन्तरं मन्वारम्भतत्समाप्तिकालयोरन्तरकालमानमित्यर्थः । मूर्त्तकालमानभेदाभिज्ञैः कथ्यते । तस्य मनोरन्ते विरामे जाते सति कृताब्दसङ्ख्यः सदुक्तकृतयुगवर्षमितः सन्धिः कालविद्भिः प्रकर्षेण द्वितीयमन्वारम्भपर्यन्तं भूतभाविमन्वोरन्तिमादिसन्धिरूपैककालेन कथितः । तत्स्वरूपमाह "जलप्लव इति । जलपूर्णा सकला पृथ्वी तस्मिन् लोकसंहारकाले भवति । अथ कल्पप्रमाणं सविशेषमाह" रङ्ग॰ । "ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश । कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः" सू॰। "ते एकसप्ततियुगरूपा मनवः स्वायम्भुवाद्याः ससन्धयः स्वस्वसन्धिसहिताश्चतुर्दशसङ्ख्याकाः कल्पकाले ज्ञातव्याः । स्वसन्धियुक्तचतुर्दशमनुभिः कल्पः स्यादित्यर्थः । ननु मन्वन्तरे कल्पमानं युगसहस्रं त्वया तु युगमानमेकसप्ततिगुणं मनुमानं ३०६७२०००० कृताब्द १७२८००० युक्तं सन्धिमनुमानं ३०८४४८००० इदं चतुर्दशगुणं ४३१८७२०००० कल्पप्रमाणं तच्च कृतेन युगसहस्रमित्यत आह । कृतप्रमाण इति । कल्पादौ प्रथममन्वारम्भे कृतयुगवर्षमितो मनोश्चतुर्दशत्वेऽप्याद्यः पञ्चदशकः सन्धिः कालज्ञैरुक्तः । तथा च कृतवर्षानन्तरं प्रथममन्वारम्भ इति तद्वर्षयोजनेनाविरोध इति भावः। अथ ब्रह्मणो दिनरात्र्योः प्रमाणमाह" रङ्ग॰। "इत्थं युगसहस्रेण भूतसंहारकारकः । कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती" सू॰ "इत्थं पूर्वोक्तप्रकारसिद्धेन युगसहस्रेण भूतसंहारकारको लयात्मकः कल्पकालो ब्राह्मं ब्रह्मणः सम्बन्ध्यहः दिनं कालज्ञैरुक्तम् । तस्य ब्रह्मणस्तावती दिनपरिमिता शर्वरी रात्रिः । कल्पद्वयं तदहोरात्रमिति फलितार्थः। अथ ब्रह्मण आयुःप्रमाणमतीतवयःप्रमाणं चाह" रङ्ग॰ । "परमायुः शतं तस्य तयाहोरात्रसङ्ख्यया । आयुषोऽर्द्धमितं तस्य शेषकल्पोऽयमादिमः" सू॰। परमपरं शृणु पूर्वोक्तं त्वया श्रुतमपरं च वक्ष्यमाणं शृणु त्वम् । यद्वा परमेति दैत्यवरार्थकं सम्बोधनम् । त्वं तस्य ब्रह्मणस्तया पूर्वोक्तयाहोरात्रमित्या कल्पद्वयरूपया शतं शतवर्षपरिमितमायुः शरीरधारणकालं जानीहि । एतदुक्तं भवति । अहोरात्रमानात् पूर्वपरिभाषया (३०) मासमानं तस्मात् पूर्वोक्तपरिभाषया(१२)ब्रह्मणो वर्षमानमेतच्छतसङ्ख्यया ब्रह्मायुरिति । न तु यथाश्रुतार्थेन कल्पशतद्वयमायुः, कीटादीनामपि दिनसङ्ख्ययायुषोऽनुक्तेः सुतरां ब्रह्मणः शतदिनात्मकायुषोऽसम्भवात् "निजेनैव तु मानेन आयुर्वर्षशतं स्मृतम्" इति विष्णुपुराणोक्तेश्च । एतेन परमादैत्यैकं पदमिति निरस्तम् ब्रह्मणोऽनियतायुर्दायासम्भवात् । तस्य ब्रह्मण आयु शतवर्षरूपमस्यार्द्धं पञ्चाशद्वर्षपरिमितमितं गतम् । अयं वर्त्तमान आदिमः प्रथमः शेषकल्पः शेषायुर्दायस्य ब्रह्मदिवस उत्तरार्द्धस्य प्रथमदिवसो वर्त्तमान इति फलितार्थः । अथ वर्त्तमानेऽस्मिन् दिवसेऽप्येतद्गतमित्याह" रङ्ग॰ । "कल्पादस्माच्च मनवः षड् व्यतीताः ससन्धयः । वैवस्वतस्य च मनोर्युगानां त्रिघनो गतः" सू॰। "अस्माद्वर्त्तमानात् कल्पाद् ब्रह्मदिवसात् षट्सङ्ख्याका मनव एकसप्ततियुगरूपाः ससन्धयः सप्तभिः सन्धिभिः कृतयुगप्रमाणैः सहिता

व्यतीता गताः। चकारश्चायुषोऽर्द्धमितमिति प्रागुक्तेन समुच्चयार्थकः। वर्त्तमानस्य सप्तमस्य मनोर्वैवस्वताख्यस्य युगानां त्रिघनस्त्रयाणां घनः स्थानत्रयस्थितसप्ताङ्कानां घातः सप्तविंशतिसङ्ख्यात्मको गतः। सप्तविंशतियुगानि गतानीत्यर्थः। चः समुच्चये। अथ वर्त्तमानयुगस्यापि गतमेतदिति यदभिमतकालेऽपतो वर्षगणः कार्य्य इत्याह” रङ्ग०। “अष्टाविंशाद् युगादस्मादुयातमेतत् कृतं युगम्। अतः कालं प्रसङ्ख्याय सङ्ख्यामेकत्र पिण्डयेत्” सू०। “अष्टाविंशतितमाद्वर्तमानादस्माद्युगादेतदल्पकालेन पूर्व्व-काले व्यापूर्तं स्थितं कृतं युगं गतम्। अतः कृतयुगान्ता-नन्तरमभिमतकाले कालं वर्षात्मकं प्रसङ्ख्याय गणयित्वा सङ्ख्यां पञ्चस्थानस्थितां भिन्नामेकत्रैकस्थाने पिण्डयेत् सङ्कलनविषयां कुर्य्यात्। सर्वेषां गतानां योगं कुर्य्या-दित्यर्थः” रङ्ग०।

मासस्य त्रिंशत्तिथ्यात्मकतया ब्रह्ममासस्य त्रिंश-त्कल्पघटितत्वात् तेषां कल्पानां नामानि हेमा० दा० मात्स्ये आह च

“कल्पानुकीर्त्तनं वक्ष्ये सर्व्वपापप्रणाशनम्। यस्यानु-कीर्त्तनादेव वेदपुण्येन युज्यते। प्रथमः श्वेतकल्पस्तु द्वितीयो नीललोहितः। वामदेवस्तृतीयस्तु ततो रथन्तरो-ऽपरः। रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः। सप्तमोऽथ बृहत्कल्पः कन्दर्पोऽष्टम उच्यते। सद्योऽथ नवमः प्रोक्त ईशानो दशमः स्मृतः। व्यान एकादशः प्रोक्तः तथा सारस्वतोऽपरः। त्रयोदश उदानस्तु गारुडोऽथ चतुर्दशः। कौर्म्मः पञ्चदशो ज्ञेयः पौर्णमासी प्रजापतेः। षोडशो नारसिंहस्तु समानस्तु ततः परः। आग्नेयोऽ-ष्टादशः प्रोक्तः सोमकल्पस्तथाऽपरः। मानवो विंशतिः प्रोक्तस्तत् पुमानिति चापरः। वैकुण्ठश्चापरस्तद्वल्लक्ष्मीकल्प-स्तथा परः। चतुर्विंशस्तथा प्रोक्तः सावित्रीकल्पसंज्ञकः। पञ्चविंशतिमो घोरो वाराहस्तु ततोऽपरः। सप्तविंशोऽथ वैराजो गौरीकल्पस्तथाऽपरः। माहेश्वरस्ततः प्रोक्तो त्रिपुरो यत्र घातितः। पितृकल्पस्तथान्ते तु या कुहू-र्ब्रह्मणः स्मृता। इत्ययं ब्रह्मणो मासः सर्वपापप्रणा-शनः। आदावेव हि माहात्म्यं यस्मिन् यस्य विधी-यते। तस्य कल्पस्य तन्नाम विहितं ब्रह्मणा पुरा”।

तदारम्भकालश्च ब्रह्मसिद्धान्ते उक्तः “चैत्रसितादेर्भानो-र्वर्षर्त्तुमासयुगकल्पाः। सृष्ट्यादौ लङ्कायामिह प्रवृत्ताः दिनैर्वृत्तम्।” चैत्रसितादेः चैत्रशुक्लप्रतिपदारभ्येत्यर्थः। ब्रह्मपु० “चैत्रे मासि जगत् ब्रह्मा ससर्ज प्रथमे-ऽहनि। शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति। प्रव-र्त्तयामास तदा कालस्य गणनामपि” इति कालसामान्य-गणनस्य तत आरभ्योक्तेः” एवं चैत्रशुक्लप्रतिपदि कल्पप्रार-म्भेऽपि “माघशुक्लतृतीयायां कृष्णायां फाल्गुनस्य च। पञ्चमी चैत्रमासस्य यथैवाद्या तथा परा। शुक्ला त्रयो-दशी माघे कार्त्तिकस्य तु सप्तमी। नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम्। कल्पानामादयो ह्येता दत्त-स्याक्षयकारकाः” वाराहवाक्यानि यदि समूलानि तदा कल्पभेदादविरुद्धानि कल्पादित्वेन तत्तत्तिथिषु श्राद्ध कर्त्तव्यतोपयोगिपारिभाषिकत्वपरतया वा समर्थनीयानि। अतएव सू० सि० सुरासुराणामन्योन्यमहोरात्रविप-र्य्ययात्। यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात्। मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् न तत्र। द्युनिशो भेदो ब्राह्मं कल्पः प्रकीर्त्तितः, इत्यादिना युगमन्वन्तर-कल्पानां सौरत्वेनोक्तिः। सौरमाने च नियतयुगादि-कालेषु अनियततिथिसम्भवेऽपि सर्वेषां कल्पानामादौ चैत्रसितादितिथिरेव नियता प्रागुक्तवचनप्रामाण्यात्। किन्तु प्रागुक्तमात्स्ये ब्राह्मकल्पानां चान्द्रत्वोक्तेः चान्द्र-त्वमपि तेन तिथिभेदसम्भवः सू०सि० वाक्यं तु पक्ष-स्पष्टीकरणोपयोगीत्यविरोधः।

अत्र तिथिद्वैधे युगादिवत् व्यवस्था। कृप-णिच्-भावे अच्। २रचने ३विकल्पे च इतिकर्त्तव्यतायुक्ते ४विधाने च। “प्रभुः प्रथमकल्पस्य योऽनुकल्पे प्रवर्त्तते” मनुः। कल्पो-विधानमन्यस्य औचित्येन। ५उचिते त्रि० शाश्वतः। कल्प्यतेऽनुष्ठीयतेऽनेन करणे अच्। ६वैदिकविधानज्ञापके शास्त्रभेदे च आश्वलायनापस्तम्बबौधायनकात्यायनादि-सूत्रात्मकः। तस्य यथोपयोगिता तथोक्तं सायणा-चार्य्येण ऋग्वेदभाष्योपोद्घाते यथा—

“कल्पस्त्वाश्वलायनापस्तम्बबौधायनादिसूत्रं, कल्प्यते समर्थ्यते यागप्रयोगोऽनेनेति व्युत्पत्तेः। नन्वाश्वलायनः किं मन्त्रकाण्डमनुसृत्य प्रवृत्तः? किं वा ब्राह्मणमनुसृत्य? नाद्यः “दर्शपूर्णमासौ तु पूर्वं व्याख्यास्याम” इत्येवं तेनोप-क्रान्तत्वात् न ह्यग्निमीळे इत्यादयो मन्त्रा दर्शपूर्णमासयोः कश्चिद्विनियुक्ताः। न द्वितीयः “आग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपन्ति दीक्षणीयायाम्” इत्येवं दीक्षणीयेष्टे-र्ब्राह्मणे प्रक्रान्तत्वात्। अत्रोच्यते—मन्त्रकाण्डोब्राह्म-णग्रन्थादिक्रमेण प्रवृत्तो न तु यागानुष्ठानक्रमेण

ब्रह्मयज्ञश्चैवं विहितः "यत् स्वाध्यायमधीयीतैकामप्यृचं
यजुः साम वा तद्‌ब्रह्मयज्ञम्" इति सोऽयं ब्रह्मयज्ञ
जपोऽग्निमीळे इत्याम्नायक्रमेणैवानुष्ठेयः तथा "सर्वा ऋचः
सर्वाणि यजूंषि सर्वाणि सामानि वाचः स्तोमे पारि-
प्लवं शंसतीति" विधीयते तथा "आश्विने शस्यमाने सूर्यो
नोदियादपि सर्वा दाशतयीरनुब्रूयादिति" विधीयते तथा
"रिच्यत इव वा एष प्रेव रिच्यते यो याजयति यो वा
प्रतिगृह्णाति याजयित्वा प्रतिगृह्य वाऽनश्नन् त्रिःस्वाध्यायं
वेदमधीयीतेति" प्रायश्चित्तरूपं वेदपारायणं विहितम्
इत्यादिषु तत्तन्मन्त्राणां विनियोगेषु संप्रदायपारम्-
पर्यागत एव क्रम आदरणीयः। विशेषविनियोगस्तु
मन्त्रविशेषाणां श्रुतिलिङ्गवाक्यादिप्रमाणान्युपजीव्या-
श्वलायनोदर्शयति अतोमन्त्रकाण्डक्रमाभावेऽपि न कश्चि-
द्विरोधः। इषे त्वेत्यादिमन्त्रास्तु क्रत्वनुष्ठानक्रमेणैवाम्नाता
इत्यापस्तम्बादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः।
आम्नातत्वादेव जपादिष्वपि स एव क्रमः। यद्यपि ब्राह्मणे
दीक्षणीयेष्टिरुपक्रान्ता तथापि तस्या इष्टेर्दर्शपूर्णमास-
विकृतित्वेन तदपेक्षत्वादाश्वलायनस्यादौ तद्व्याख्यानं युक्तम्
अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठानमुपदिश्यो-
पकरोति तर्हि "प्र वो वाजा" इत्यादीनां सामिधेनीनाम-
स्मामेव विनियोगमाश्वलायनोऽब्रवीत् "नमः प्रवक्त्रे" इत्यादय
स्त्वनाम्नाताः कुतो विनियुज्यन्ते? इति चेत् नायं दोषः
शाखान्तरसमाम्नातानां ब्राह्मणान्तरविहितस्य विनियोगस्य
गुणोपसंहारन्यायेनात्र वक्तव्यत्वात् सर्व्वशाखां प्रत्ययमेकं
कर्मेति न्यायविदः, तस्मादस्त्येव कल्पोऽप्यपेक्षितः"।
कात्या०व्या०कर्केण कल्पशास्त्रप्रयोजनमित्थं दर्शितं यथा—
"इह पुण्यो वै पुण्येन कर्म्मणा भवति" "तमेतं
वेदानुवचनेन विविदिषन्ति ब्रह्मचर्य्येण तपसा श्रद्धया
यज्ञेनेति" "अग्निहोत्रं जुहुयात् स्वर्गकाम" इत्यादिभि-
र्वाक्यैः कर्म्मणां स्वर्गापवर्गादिश्रेयःसाधनत्वं प्रतीयते।
तानि चाग्निहोत्रादिकर्म्माणि वेदवाक्यैकवेद्यानि। वेद-
वाक्यानि चानेकशाखाव्यवस्थिततया स्वतश्च प्रतिवाक्यं
नानाविधपरस्परविरुद्धार्थस्फुरणेन दुर्बोधार्थानि बहु-
भिरर्थवादवाक्यैर्मिश्रितानि च तथाहि "अग्निहोत्रं
जुहुयात् स्वर्गकामः" इत्यत्र किं स्वर्गो होमाय, उत होमः
स्वर्गाय, तथा अग्निहोत्रशब्दो गुणविधानार्थो नामधेयं
वेति तथा "स वै संवत्सरं दीक्षाभिरेति" इत्यादौ कश्चित्
संवत्सरशब्दस्य उत्थार्थत्वम् अहस्संवत्सरादौ तस्यैव

गौणत्वम्। अर्थवादादिभिश्च पाठात् विध्यर्थवादसंदेहोऽपि
भवति किमयं विधिः? उतार्थवादः? इति यद्यपि जैमिनि
शबरस्वामिकुमारिलभट्टप्रभृतिभिर्मीमांसायां तानि वाक्यानि
संदेहनिरासपूर्व्वकं यथार्थं व्याख्यातानि सन्ति। अधीत
शास्त्राणां च तदर्थावगमोऽपि सुकर एव, तथापि तेषां
नानाशाखाव्यवस्थितत्वेनेदानीन्तनैः सर्वैः पुरुषैरध्येतु-
मातुं वाऽशक्यत्वात्तदधीनं कर्म्मणां ज्ञानं दुःशकमि-
दानीन्तनानामिति मत्वा परमकारुणिको भगवान् कात्या-
यनाचार्य्यो नानाशाखागतविधिवाक्यसंग्रहरूपं कल्पसूत्रं
प्रणीतवान्"। तत्र प्रतिपाद्यविषयाः कात्यायनशब्दे वक्ष्यन्ते
आर्षेयकल्पसूत्रविषयाश्च "अथार्षेयकल्पो व्याख्या-
तव्यः" इत्युपक्रम्य सर्वक्रतुप्रकृतिभूतस्य त्रिपर्वणोज्योति-
ष्टोमस्य सर्वाहर्गणप्रकृतिभूतस्य व्यूढस्य द्वादशाहस्य
च ब्राह्मणवाक्यैरेव प्रयोगो दर्शितस्तदुपजीवनेन
क्रत्वन्तराणि प्रयोक्तव्यानीति दर्शयितुमादौ ऋत्वि-
ग्वरणादिकमभिधाय १प्र० "कॢप्तो ज्योतिष्टोमोऽति-
रात्रः षोडशिकः" इत्यादिना सौभरस्यर्द्धं शीयमित्यन्तेन
सामविशेषयुक्तस्य प्रावणीयस्य प्रयोगो दर्शितः। ततः "उपा-
स्मै गायता नरः" इत्यादिना अभिप्लवस्य प्रथमाहस्य।
"पवस्व वाचः" इत्यादिना द्वितीयाहस्य। "दविद्युतत्याऽऽरु-
चा" इत्यादिना तृतीयाहस्य। "पवमानोऽअजीजनत्"
इत्यादिना चतुर्थाहस्य। "पवमानस्य विश्ववित्" इत्यादिना
पञ्चमाहस्य। "असृत प्रवाजिनः" इत्यादिना षष्ठाहस्य।
"पृष्ठ्यः षडहः समूढो वा व्यूढो वा" इत्यादिना पृष्ठ्य-
षडहस्य त्र्यहाणां प्रयोगः। एवम् चतुर्थस्याह्न इत्या-
दिना उत्तरत्र्यहकल्पः। २प्र० "पवस्व वाचो अग्रियः"
इत्यादिना अभिजितोऽह्नः कल्पः। "उपास्मै गायता
नरः" इत्यादिना स्वरसाम्नां प्रथमस्य। "पवस्व वाचोऽग्रि-
यः" इत्यादिना तेषां द्वितीयस्य "दविद्युतत्याऽरुचा"
इत्यादिना तृतीयस्य। "उपास्मै गायता नरः" इत्यादिना
विषुवायनानामाहस्तानां स्वरसाम्नाम् कल्पः। "उप त्वा
जामयः" इत्यादिना विश्वजितः। "पौरमीढं मानवं
जनित्रम्" इत्यादिना आद्यन्तयोः पृष्ठ्याभिप्लवयोः।
ज्योतिष्टोमसाम्नेत्यादिना आयुष्टोमस्य। "पवस्व वाचोऽ-
ग्रियः" इत्यादिना गोष्टोमस्य। "उपास्मै गायता नरः"
इत्यादिना महाव्रतस्य। ३प्र० "कॢप्तो ज्योतिष्टोमः"
इत्यादिना गोः, आयुषः, अभिजितः विश्वजितश्च
महाव्रतस्य। "पवस्व वाचोऽग्रियः" इत्यादिना प्रथम

साहस्रस्य । "एवैवोत्तरस्य क्लृप्तिः" इत्यादिना द्वितीयतृतीययोः । "उपास्मै गायता नरः" इति चतुर्थस्य । "उपास्मै गायता नरः" इत्यादिना प्रथमसाद्यस्क्रस्य । "एवैवोत्तरस्य क्लृप्तिः" इत्यादिना साद्यस्क्रात्रिकस्य । "पवमानस्य जिन्वते" इत्यादिना श्येनरूपसाद्यस्क्रस्य । "उपास्मै गायता नरः" इत्यादिना एकत्रिकसाद्यस्क्रस्य । ज्योतिष्टोमं बहिष्पवमानमित्यादिना प्रथमव्रात्यस्तोमस्य । "एते असृग्रमिन्दव" इत्यादिना द्वितीयतृतीयव्रात्यस्तोमयोः । "अप्रियवती प्रतिपत्" इदित्यादिना चतुर्थव्रात्यस्तोमस्य । "अग्न ! आयूंषि पवस" इत्यादिना प्रथमस्याग्निष्टुतः । "एवैवोत्तरस्य क्लृप्तिः" इत्यादिना द्वितीयतृतीयचतुर्थानामग्निष्टुताम् प्रजापतेरपूर्व्वस्य बृहस्पतिसवस्य, इषुनामकयज्ञस्य च । "प्र सोमासो अधन्विषुः" इत्यादिना सर्व्वस्वारस्य ।

४प्र० । "अग्न ! आयूंषि पवसे" इत्यादिना वैश्वदेववारुणप्रघासिकैकाहस्य । "कया त्वं न ऊत्या पवस्व" इत्यादिना वारुणप्रघासिकद्वितीयाहस्य । "उप त्वा जामयोगिरः" इत्यादिना शाकमेधप्रथमाहस्य । "इन्द्रायेन्दो ! मरुत्वते" इत्यादिना तदीयद्वितीयाहस्य । "विश्वकर्मन् हविषा" इत्यादिना तदीयतृतीयाहस्य शुनासीर्य्यस्य च । "पवस्वेन्दो ! वृषासुतः" इत्यादिना उपहव्यस्य । "द्वितीयस्य स्वरसाम" इत्यादिना ऋतपेयदूणाशवैश्यस्तोमतीव्रसुद्राजपेयेषु प्रत्यवरोहणीयाभ्यारोहणीययोः कल्पः । "वायोः शुक्रो अयामि त" इत्यादिना अभिषेचनीयस्य । "राजा मेधाभिरीयते" इत्यादिना दशपेयस्य । "केशवपनाय व्युष्टिद्विरात्र" इत्यादिना तदीयद्वितीयाहस्य । इत्थं चत्रस्य धृतेश्च । एवमुक्तरूपेण सप्तसुत्यस्य वाजपेयस्य च ।

५प्र० "राजा मेधाभिरीयते" इत्यादिना राड्विराड़ोपसदाम् । "रौरवयौधाजये" इत्यादिना शुनस्तोमस्य चतुष्टोमस्य च । "उपोषु जात" इत्यादिना उद्भिद्बलभिदोरपचितेश्च । "साहस्रं बहिष्पवमानम्" इत्यादिना सर्व्वस्तोमोपचितेरग्नेः स्तोमयोश्च । "पुनानः सोमधारया" इत्यादिना ऋषभगोसवमरुत्स्तोमानामिन्द्राग्न्योः कुलायाश्च । "इन्द्रायेन्दो ! मरुत्वत" इत्यादिना इन्द्रस्तोमस्य । "पवस्व वाचो अग्रिय" इत्यादिना इन्द्राग्न्योःस्तोमस्य आद्यविघनस्य च । "पवस्व वाचो अग्रियः" इत्यादिना द्वितीयविघनस्य । "श्येनमाज्यबहिष्पवमानम् इत्यादिना एकाहसाध्यानां कल्पः । एते एकाहसाध्या इत्युक्तिश्च ।

६प्र० । "क्लृप्तो ज्योतिष्टोमोऽतिरात्रोऽथोषोड़शिक" इत्यादिना ज्योतिष्टोमातिरात्रस्य, आङ्गीनिकारात्रे सर्व्वस्तोमाप्तोर्यामस्य, नवसप्तदशस्य, विषुवतः गोःआयुषः विश्वजिदभिजितोः एकस्तोमानाञ्च प्रथमाहस्य कल्पः । "गोरायुर्बहिष्पवमानम्" इत्यादिना, उक्तानां ज्योतिष्टोमातिरात्रादीनां द्वितीयतृतीयचतुर्थाहानाम् एकस्तोमानामाङ्गिरसचैत्ररथकापिवनरूपाणां द्विरात्राणां च कल्पः । "अभिप्लवस्य प्रथमस्याह्नः" इत्यादिना गर्गत्रिरात्रे प्रथमाहस्य । "उपोषु जातम्" इत्यादिना तत्र द्वितीयाहस्य । "पवस्व वाचः" इत्यादिना तत्र तृतीयाहस्य कल्पः । "पवस्व वाज सातये" इत्यादिना अश्वमेधत्रिरात्रस्य । "प्रसोमासो विपश्चित" इत्यादिना वैदत्रिरात्रस्य । "सांवत्सरिकस्य विषुवतः" इत्यादिना, छन्दोमपवमानत्रिरात्रस्य । ये गर्गत्रिरात्रस्येत्यादिना अन्तर्वसुपराकत्रिरात्रयोः कल्पः ।

७प्र० । "उपास्मै गायता नर." इत्यादिना चतुरहप्रथमाहस्य । "पवस्व वाचो अग्रियः" इत्यादिना तदीयद्वितीयाहस्य । "दविद्युतत्या रुचा" इत्यादिना तृतीयाहस्य । "पवमानो अजीजनत्" इत्यादिना चतुर्थाहस्य । "उपोषु जातम्" इत्यादिना जामदग्न्यचतुरहस्य । "या जामदग्न्यस्य" इत्यादिना वाशिष्ठचतुरहस्य । प्रसोमासोविपश्चितः" इत्यादिना जाङ्कवचतुरहस्य । "वैश्वामित्रोद्यहः" इत्यादिना देवपञ्चरात्रस्य त्रयाणामह्नाम् । "पवमानो अजीजनत्" इत्यादिना तदीयचतुर्थाहस्य । "पवमानस्य विश्ववित्" इत्यादिना पञ्चमाहस्य कल्पः । "एष चतुरहोयोदेवानाम्" इत्यादिना पञ्चशारदीयव्रतमध्वोः । "पृष्ठ्यः षड़हः समूढो व्यूढो वा" इत्यादिना ऋतुषड़हायुष्कामपृष्ठ्यावलम्बनानां षड़हानाम् । "एष एव षड़हो य. क्रतूनाम्" इत्यादिना सप्तर्षीणां प्रजापतेः छन्दोमानां जमदग्नेरिन्द्रस्य च पञ्चसप्तरात्राणाम् । "या देवानां पञ्चरात्रस्य" इत्यादिना जनकसप्तरात्रस्य । "एष एव षड़होयः क्रतूनाम्" इत्यादिना पृष्ठ्यस्तोमस्य सप्तरात्रस्य अष्टरात्रनवरात्रयोश्च कल्पः ।

८प्र० । "अग्न आयूंषि पवस" इत्यादिना त्रिककुद्दशरात्रस्य द्वयोरह्नोः । "दविद्युतत्या रुचा" इत्यादिना तदीयतृतीयाहस्य । "पवमानो अजीजनत्" इत्या-

दिना चतुर्थाहस्य ।“पवमानस्य विश्ववित्” इत्यादिना पञ्चमाहस्य ।“अस्तृग्रत प्रवाजिनम्” इत्यादिना षष्ठाहस्य । “ये सोमासः परावति” इत्यादिना सप्तमाहस्य ।“पवमाना असृक्षत” इत्यादिना अष्टमाहस्य ।“उपोषु जातम्” इत्यादिना नवमाहस्य विश्वजिदतिरात्रस्य च कल्पः ।“या इन्द्र-स्वतिवरस्य सा कुसुरुविन्दस्य” इत्यादिना कुसुरुविन्दुदशरात्रस्य ।“पृष्ठ्यालम्बस्य पञ्चाहः” इत्यादिना छन्दोमदशरात्रस्य । “त्रिष्टोमोऽग्निष्टोमोयत्” इत्यादिना देवपूर्दशरात्रस्य पुण्डरीकैकादशरात्रस्य च कल्पः । इत्येते अहर्गणसाध्यत्वात् अहीना इत्युच्यन्त इत्युक्तिश्च ।

९प्र०।“द्वादशरात्रस्य षोड़शिमन्तावतिरात्रौ” इत्यादिना त्रयोदशरात्रयोर्द्वयोः, तृतीयषड्‌विंशतिरात्रस्य, चतुर्दशरात्राणां त्रयाणां, पञ्चदशरात्राणां चतुर्णाम्, षोड़शरात्रस्यैकस्य च कल्पः । एते सत्रसंज्ञा इत्युक्तिश्च ।“सप्तदशरात्रे चत्वार्य्यभिप्लवकान्यहानि” इत्यादिना सप्तदशरात्रस्य, अष्टादशरात्रस्य,एकोनविंशरात्रस्य च ।“विंशतिरात्रे सांवत्सरिकौ विश्वजिदभिजितौ” इत्यादिना विंशतिरात्रस्य । एकविंशतिरात्रयोर्द्वयोः, त्रयोविंशतिरात्रस्य, चतुर्विंशतिरात्रसम्बन्धिपृष्ठ्यातिरात्रयोश्च कल्पः । “पवस्वेन्दो ! वृषा सुतः” इत्यादिना त्रयोविंशतिरात्रस्य । “उपास्मै गायता नरः” इत्यादिना तदीयप्रथमत्रिरात्रस्य । “एष उस्य वृषा रथम्” इत्यादिना तदीयद्वितीयप्रभृतित्रिरात्रस्य, चतुर्विंशतिरात्रस्य च कल्पः। तत्रैकैकोत्तरवृद्ध्याष्टौ इत्युक्तिश्च ।“नानाब्रह्मसाम्नामतिरात्रः” इत्यादिना नानाब्रह्मसामादीनां त्रयाणां त्रयस्त्रिंशद्रात्राणाञ्च तत्र च एकोत्तरवृद्धानि सप्तेत्युक्तिश्च । “विघृतीनां ज्योतिष्टोमोऽतिरात्रोऽषोडशिकः” इत्यादिना विघृतीनाम् ।“पृष्ठ्यः षडहः समूढोत्र” इत्यादिना, च विघृतीनाम् ।“शतातिरात्राश्च गोष्टोमस्य” इत्यादिना शतातिरात्रप्रभृतीनां षस्साम्, एकपञ्चाशद्रात्रस्य, एकषष्टिरात्रस्य, शतरात्रस्य सांवत्सरिकस्य गवामयनस्य च कल्पः ।

१०प्र० “मध्ये पृष्ठ्यस्य क्लृप्तोऽतिरात्रः” इत्यादिना मध्ये पृष्ठ्यस्य, क्लृप्तानां व्यूढाग्निष्टोमेभ्य आद्वितीयादङ्गः कल्पः। “द्वितीयस्याङ्ग” इत्यादिना तत्रैव द्वितीयाहादि पञ्चानामङ्गम्। “सप्तमस्याङ्गः” इत्यादिना सप्तमप्रभृतीनां त्रयाणामङ्गम् ।“दशमस्याङ्गः पञ्चानाम्” इत्यादिना दशमाहप्रभृतिक्लृप्तस्य छन्दोमदशाहस्य अहर्गणस्य । “अस्य प्रत्ना मनुद्युतम्” इत्यादिना छन्दोमदशाहप्रथमाहस्य। “पवस्व वाचो अग्रियः” इत्यादिना छन्दोमद्वितीयाहस्य । “दविद्युतत्या रुचा” इत्यादिना छन्दोमतृतीयाहस्य । “पवमानो अजीजनत्” इत्यादिना छन्दोमचतुर्थाहस्य । उत शुष्मासः” इत्यादिना तदीयपञ्चमषष्ठयोरङ्गोः । “ये सोमासः परावति” इत्यादिना तत्र सप्तमाहस्य । “हिन्वन्ति सूरमुस्रयः” इत्यादिना तत्र अष्टमाहस्य । “उपोषु जातम्” इत्यादिना नवमदशमयोरङ्गोः कल्पः।

११प्र०“पुरस्तात् पृष्ठ्यस्य क्लृप्तोऽतिरात्रः” इत्यादिना पुरस्तात् पृष्ठ्यस्य, त्रिरात्राभिप्लवस्य, गोः, आयुषश्च कल्पः।“अस्य प्रत्नामनुद्युतम्” इत्यादिना द्वितीये छन्दोमे प्रथमाहस्य । “पवस्व वाचो अग्रियः” इत्यादिना तत्र द्वितीयाहस्य । “दविद्युतत्या रुचा” इत्यादिना तत्र तृतीयाहस्य। “अध्वने नु स्वतवसे” इत्यादिना तत्र चतुर्थपञ्चमयोः षष्ठस्य च । “ये सोमासः परावति” इत्यादिना सप्तमादिदशमान्तानां, महाव्रतस्यातिरात्रस्य च कल्पः । “विघृतिभिः क्लृप्तम्” इत्यादिना दृतिकुण्डपायिनामयनानां, द्वादशसंवत्सरस्य, षड्‌विंशतिसंवत्सरस्य, शतसंवत्सरस्य, अग्नेः सहस्राध्ययनस्य च । “प्रथमस्य सारस्वतस्य षोड़शिमन्तावतिरात्रौ” इत्यादिना त्रयाणां सारस्वतीनां, दार्षद्वतयोः, सर्पसत्रातिरात्रयोः दशि प्रथमस्य च कल्पः । “पवस्व वाचो अग्रियः” इत्यादिना दशि द्वितीयस्य,तत्र उत्तरपक्षासे विपर्य्यासस्य च कल्पः। इत्येवं यागविशेषे दिनभेदे सूक्तपाठादिप्रयोगो दर्शितः। अन्येषु आश्वलायनसूत्रादिरूपेषु तेषु प्रतिपाद्यविषयाश्च तत्तच्छब्दे द्रष्टव्याः । कल्पग्रन्थश्च वेदाङ्गभेदः तन्मूलमङ्गशब्दे ७२ पृ० शिक्षादिवाक्यमुक्तम् तत्र “हस्तौ कल्पोऽथ पठ्यते” इत्यत्र वैदिककर्म्मणां विधानज्ञानस्य कल्पग्रन्थाधीनत्वात् कर्म्मसाधनत्वेन हस्तसादृश्यादुक्तता । पितृकल्पः श्राद्धकल्पः पशुकल्पइत्यादि “कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्” रघुः । अनुष्ठाने । “वैश्यश्चौषकल्पश्च” मनुः । सपूर्वपदः कल्पप्रत्ययनिष्पन्नस्तु ईषदसमाप्तप्रकृत्यर्थे । “एते प्रदीपकल्पाः परस्परविलक्षणगुणविशेषाः” सां० का० । “कार्य्यं त्वया नः प्रतिपन्नकल्पम्” कुमा० ।

“श्राद्धकल्पात्मकश्च यजुर्वेदपरिशिष्टभागः यजुर्वेदशब्दे विवृतिः । अथर्ववेदस्यांशभेदरूपकल्पस्तु पञ्चविधः । “नक्षत्रकल्पोवेदानां संहितानां तथैव च । चतुर्थः स्यादाङ्गिरसः शान्तिकल्पश्च पञ्चमः” विष्णुपु० । हेमा० दा० देवीपुराणे च “पञ्च कल्पा भवन्ति नक्षत्रकल्पो

वैतानः संहिताविधिराङ्गिरसः शान्तिकल्पश्च आथर्वणः'' इति।

कल्पक त्रि० कल्पयति रचयति आरोपयति वा क्लृप–णिच्–ण्वुल्। १रचके २आरोपके च। ३कर्चूरे(कचूर) भावप्र० ४नापिते पु० यस्मात्तस्य केशवेशरचकत्वात् तच्छेदकत्वात् वा तथात्वम्। कल्प+स्वार्थे कन्। ५कल्पशब्दार्थे च

कल्पकार पु० कल्पं कल्पसूत्रं करोति कृ–अण्। १कल्पसूत्रकारकेषु आश्वलायनादिषु कल्पं वेशं करोति अण्। २वेशादिकारके त्रि० ३नापिते पु० ण्वुल्। कल्पकारकोऽप्यत्र

कल्पक्षय पु० कल्पस्य सृष्टेः रचनाविशेषस्य क्षयोऽत्र। प्रलये। "पुरा कल्पक्षये वृत्ते जातं जलमयं जगत्" इत्युक्तथा। "कल्पक्षये पुनस्ते तु प्रविशन्ति परं पदम्" विष्णुपुरा०।

कल्पतरु पु० कर्म० राजशिरोवत् त० वा। १देवतरुभेदे कल्पपादपशब्दे विवृतिः। "आसीत् कल्पतरुच्छायाश्रिता सुरभिः पथि" "मेरौ कल्पतरोरिव" रघुः। "निगमकल्पतरोर्गलितं फलम्" भाग० १, १, २। २स्मृतिनिबन्धनभेदे शारीरकसूत्रभाष्यटीकाभामतीव्याख्यानरूपे ३पन्थे च

कल्पद्रुम पु० कर्म० राजशिरोवत् त० वा। देवतरुभेदे। सं कल्पविषयफलदायकत्वाच्च तस्य कल्पद्रुमत्वम् "अनुकूलयतोन्द्रोऽपि कल्पद्रुमविभूषणैः" कुमा०। "नावुध कल्पद्रुमतां विहाय जातं तमात्मन्यसिपत्रवृक्षम्" रघुः। "कल्पद्रुमैरिह विचित्रफलैर्विरेजुः" माघः। कल्पद्रुकल्पवृक्षादयोऽप्यत्र।

कल्पन न० कृप–छेदने भावे ल्युट्। १छेदने त्रिका०। क्लृप्–सामर्थ्ये णिच्–भावे ल्युट्। २रचनायाम् ३विधाने ४आरोपे च।

कल्पना स्त्री क्लृप–णिच्–भावे युच्। १रचनायाम् "उद्धारेऽनुद्धृते त्वेषामियं स्याद्ंशकल्पना" मनुः "प्रबन्धकल्पना कथा" अम० २विधाने ३आरोहणाय गजसज्जीकरणे हेम० "सकल्पनं द्विरदगणं वरूथिनः" माघः। ४व्यतिरेकव्याप्तिज्ञानाधीने अनुमानभेदे नैया० ५अर्थापत्तिरूपे प्रमाणान्तरे मीमांसकावेदान्तिनश्चाहुः। आरोपणाविद्यमानपदार्थस्य अन्यत्र स्थितस्य अन्यत्र प्रतिभासरूपः मानसव्यापारः। "कल्पनापोढमभ्रान्तं प्रत्यक्षं निर्विकल्पकम्" सर्वद०स०। यथा रज्जौ सर्पकल्पना। वेदान्तिमते एवं प्रपञ्चस्य ब्रह्मण्यपि कल्पनारूप आरोपः। "चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः। उपासकानां सिद्ध्यर्थं ब्रह्मणो रूपकल्पना"। निराकारस्य साकारतया जगदाकारेणारोपोऽपि कल्पनैव स चाध्यासशब्दे उक्तः। तदेतत् मुक्ताफले तट्टीकायां च निर्णीतं यथा—

"अहमेवासमेवाग्रे नान्यद्यत् सदसत् परम्। पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम्" मुक्ताफ०। "अहमेवेति कर्त्रन्तरस्य व्यावृत्तिः आसमेवेति क्रियान्तरस्य। अग्रे मायासम्बन्धादहमेव त्रिधा विभक्त इत्यर्थः, पश्चात् मायावियोगादनन्तरमप्यहमेव प्रपञ्चस्यादिमध्यावसानेष्वहमित्यर्थः। यच्चैतत् प्रपञ्चरूपं तदप्यहं नान्यत् सिद्धं मय्यारोपितं यथाऽन्यत्र सिद्धः सर्पो रज्जौ एवं विवेचनात् भ्रमे निवृत्ते योऽवशिष्येत सोऽहमस्मि इदन्तया स्वरूपस्य निर्देष्टुमशक्यत्वादेवमुच्यते। एतेन यथा कटकादिष्ववस्थात्रयेऽपि सुवर्णत्वमेव सत्यम्। तथा जगदादिमध्यान्तेष्वनुस्यूतं सत्तामात्रं भगवत्स्वरूपमिति लक्षणार्थ इत्युक्तं, न तावदस्यासम्भवः "सदेव सोम्येदम्" इत्यादिश्रुतिसिद्धत्वात्। न च काशाकाशादिष्वतिव्याप्तिः तदुत्पत्तेः श्रुतत्वात् विमतमनित्यं बाध्यत्वात् शुक्तिरूप्यवदित्यनुमानाच्च। नापि साकारेषु चतुर्ष्वव्याप्तिः तेषामाकारतिरोहितत्वात् तस्मान्निर्दोषं लक्षणम्। एवं सामान्यलक्षणमुक्त्वा विशेषाल्लक्षयितुमाह" टी० "स द्वेधा निराकारः साकारश्च अनवच्छिन्नं चैतन्यं निराकारः, सत्त्वावच्छिन्नं चैतन्यं साकारः। स चतुर्धा रजस्तमोभ्यां युक्ते सत्त्वे पुरुषः१ रजसा ब्रह्मा२ तमसा रुद्रः३ शुद्धे विष्णुरेव४" मुक्ता०। "स द्वेधेति द्वेधात्वमेवाह निरेति अनवच्छिन्ने वस्तुन्यवच्छेदक उपाधिराकारः तेन रहितो निराकारः तत्सहितोऽन्यः। तत्राद्यं लक्षयति 'अनवच्छिन्नमिति। द्वितीयं लक्षयति सत्त्वेति। अस्यैव भेदानाह स चेति सः साकारः। तत्राद्यं भेदमाह रजस्तमोभ्यामिति। तुल्याभ्यां रजस्तमोभ्यां युक्ते सत्त्वे प्रतिफलितं चैतन्यं पुरुषशब्दार्थ इति पूर्वबोधम्। एवमुत्तरत्र रजस्तमोभ्यामिति तृतीयया तयोरप्राधान्य "सहयुक्ते चाप्रधाने" (पा०) इति स्मरणात् तेन पुरुषे सत्त्वं बहुलं, रजस्तमश्च तदपेक्षया न्यूनमित्यर्थः। न तु लोके समान्येव त्रिधात्मकस्य प्रकृतिलक्षणत्वात्, लोकाधिकभावश्चैषां कार्य्यगम्यो न तु माषादिमूर्त्तद्रव्यवत् प्रत्यक्षः। युक्तपदग्रहणं द्वयोर्वर्त्तते, सत्त्वग्रहणं लिङ्। द्वितीयं भेदमाह रजसेति। रजसा युक्ते सत्त्वे

ब्रह्मा। अत्र च मात्रया विद्यमानमपि तमो रजसः प्राधान्य वक्तुं नोक्तम् ननु तथाप्येव तत्कार्य्यस्योपलम्भात् तृतीया तु प्राग्वत् तेन ब्रह्मापि तमस्योक्तं तदपेक्षया रजः प्रभूतमित्यर्थः। रजसः प्रागुक्तिः सत्त्वापेक्षया हेयत्वात् तुर्यप्रकरणानुरोधाच्च तृतीयं भेदमाह तमसेति। अत्र रजोमात्रानुरोधादिकं प्राग्वत्। चतुर्थमाह शुद्धे विष्णुरेवेति शुद्धे रजस्तमोभ्यामस्पृष्टे सत्त्वे विष्णुरेव विष्णुसंज्ञैव क्रियते न तु तत्रावान्तरवस्तुसंज्ञान्तरमित्येवशब्दार्थः। तथाहि "तमेनं विशुद्धोर्जितसत्त्वाकारं सदाशिव" इत्याचक्षते शैवाः। पशुपतिरिति पाशुपताः। पुरुषोत्तम इति पाञ्चरात्राः। आदिविद्वान् सिद्ध इति कापिलाः। ईश्वर इति पातञ्जलाः। इह तु तस्य विष्णुसंज्ञैव। यद्वा विष्णुं पञ्चात्मकमित्यत्र पञ्चानामपि विष्णुसंज्ञामुक्त्वा चतुर्थ्यां संज्ञान्तरमप्युक्तम्। शुद्धसत्त्वोपाधिस्तु विष्णुसंज्ञ एवेत्येवशब्दार्थः। ते च ब्रह्मविष्णुरुद्राः प्रत्येकम् आधिदैविकादिभेदात् त्रेधा विष्णुरेव" टी० "अगोचरस्य गोचरत्वे हेतुः प्रकृतिगुणः सत्त्वम्, गोचरस्य बहुरूपत्वे रजः, बहुरूपस्य तिरोहितत्वे तमः। तथा परस्परमुदासीनत्वे सत्त्वम्" सुक्ता०। "एवमुपाधिसंभेदात् पञ्चरूपतामुक्त्वा इदानीमननुसंहितोपाधेरुपहितप्रत्ययायोगादुपाधीन् लक्षयति अगोचरस्येति। अगोचरस्य अविषयभूतस्य वस्तुनो गोचरत्वे विषयीभावे हेतुर्यः प्रकृतिगुणः तत् सत्त्वमित्यर्थः। हेतुः प्रकृतिगुण इत्युत्तरत्र पञ्चस्वनुवर्त्तते। गोचरस्य सतो यत्सम्बन्धान्नानात्वं तद्रजः। तस्यैव तिरोहितत्वे कारणात्मनावस्थाने हेतुस्तमः इत्यर्थः। विनाशे इत्यनुक्त्वा सत्कार्य्यपक्षाश्रयणात्तिरोहितत्वे इत्युक्तम्। एवमाधिदैविकोपाधिस्वरूपमुक्त्वा आध्यात्मिकोपाधिस्वरूपमाह तथेति। अयमर्थः-परस्परमुदासीनमित्रद्विषत्सु उदासीनत्वे हेतुः सत्त्वम् इति" टी० "गोचरत्वे सत्त्वम्, उपकारित्वे रजः, अपकारित्वे तमः। गोचरत्वादीनि, स्थितिसृष्टिसंहाराः" सुक्ता०। "आधिदैविकाध्यात्मिकोपाधिलक्षणादाधिभूतोपाधिस्वरूपमपि लक्षितं येन हि एकस्मिन् वस्तुनि द्विरूपो विच्छेदः असावाधिभौतिकः तदुक्तम् "योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदैविकः। यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः"। उक्तान् गोचरत्वादीन् उपाधीनुन्मीलयितुमाह गोचरत्वादीनीति। गोचरत्वबहुरूपत्वतिरोहितत्वानि क्रमात् स्थित्यादिशब्दै रुच्यन्त इत्यर्थः। न चैवं सृष्टेरनन्तरं स्थितिरिति विरुद्धं यद्वा स्थितिपूर्वकत्वात् सृष्टेः। स्थिता हि मृदादयो घटाद्यात्मना सृज्यन्ते नास्थिता इति अतएवोक्तं "सत्त्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः। सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तमसा जनात्यये" इति टी० "उदासीनत्वादीनि च" सुक्ता०। "एवमाध्यात्मिकेष्वपीत्याह उदासीनेति। अयमर्थः यदिदं चैत्रादेरुपकारापकारवैधुर्य्येणावस्थानं सा स्थितिः। उपकारकत्वेन सृष्टिः। अपकारकत्वेन तु संहारः। ततश्च जगत्स्थित्यादिहेतव आधिदैविकाः, अन्ये त्वाध्यात्मिकाः। सुरनराद्यः अवताराश्च सर्वे विना कृष्णम्, स तु पुरुषः त्रिविक्रमावतारत्वात् यथोक्तम् "तयोर्वां पुनरेवाहमदित्यामास कश्यपात्। उपेन्द्र इति विख्यातो वामनत्वाच्च वामनः" (भाग०) इति। अत एव तत्र तत्र विश्वरूपप्रकटनं पूर्वावतारदेयत्वात्सङ्गच्छ। दृश्यते चाद्यापि कुशस्थलीमूर्त्तौ त्रैविक्रमचिह्नं कृष्णव्यपदेशश्च। अतएव प्रह्लादसंहितायां द्वारकामाहात्म्ये तृतीये अध्याये वैकुण्ठमलङ्करिष्यता भगवता सकलं निजं तेजस्तस्यां मूर्त्तौ विन्यस्तमिति दर्शितम्। तथा हि "यत्र त्रैविक्रमी मूर्त्तिर्वहते यत्र गोमती। नरा मुक्तिं प्रयास्यन्ति चक्रतीर्थेन संगताः। कलेवरं परित्यक्तं प्रभासे हरिणा यदा। कलाभिः सहितं तेजस्तस्यां मूर्त्तौ निवेशितम्। तस्मात् कलियुगे विप्रा! नान्यत्र प्राप्यते हरिः। यदि कार्यं हि कृष्णेन तत्र गच्छत मा चिरम्" इति। तथा "आदौ त्रिविक्रम इति ख्यातिरासीन्महीतले। कृष्णस्य तु कलान्यासात् कृष्ण इत्यभिधीयते" इति। यत्तु सत्त्वं विशुद्धमित्यादिना शुद्धसत्त्वतासंकीर्त्तनं तत् सत्त्वस्य स्वविषयं, न तु यथाश्रुतमेव गुणान्तरकार्य्यस्याप्युपलम्भात् तत्र तदसत्यमन्यत्र तु वास्तवमिति तु भक्तिमात्रं तस्मात् पुरुष एवायमिति सन्तोष्टव्यं निष्कृष्टव्यं चेदमुपरिष्टात्। यथा चैता ब्रह्मादिमूर्त्तयो गुणमूलाः तथा हास्यादयोऽवताराश्च तन्मूला एवेत्युपरिष्टात् प्रवेदयिष्यामः। किं बहुना तच्चित्रयतारतम्यवैचित्र्याक्रान्तमिदं विश्वं तदुक्तं "न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः। सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैरिति" टी० "तेषु विष्णुब्रह्मरुद्रा निमित्तं पुरुष उपादानं गोचरत्वे तु चैतन्यम्, एवं पञ्च भेदाः तत्र निराकारः" सुक्ता०। एवमुपाधिस्वरूपं निर्धार्य्योपहितेषु संज्ञाविशेषस्योपयोगमाह तेष्विति" तेषु स्थितिसृष्टिसंहारेषु विष्णु-

दयः क्रमात् निमित्तम् कुलाल इव घटस्य, पुरुष उपादानं समवायिकारणं घटस्येव मृत्, दृष्टा च कारणद्वयपूर्विका कार्य्यप्रवृत्तिः असमवायिकारणं तु निमित्तान्तर्गतमेवेति पृथङ्नोक्तम्। अतएव "अन्वयादितरतश्चेति" भाग॰ प्रथमश्लोके द्वयमेवोपात्तम्। गोचरत्वे प्रतीतिविषयत्वे तु निर्विशेषचैतन्यं हेतुः "तस्य भासा सर्वमिदं विभातीति" श्रुतेः। तत्र स्थित्यादिनिमित्तार्थं त्रयः, उपादानार्थं चैकः गोचरत्वार्थमन्यश्चेति "विष्णुं पञ्चात्मकम्" इत्यत्र पञ्चैवोक्ता न न्यूनाधिका इत्यभिप्रेत्याह एवमिति। नचैवमेकः सामान्यात्मा विशेषरूपाश्च पञ्चेति षट्कमापद्येत विशेषपरिहारे सामान्यस्यानवस्थानात्। एवं तावत् पञ्च वस्तूनि स्वयं वर्णयित्वा तदेव ग्रन्थान्तरानुरूपेण लक्षणेन द्रढयितुमाह तत्रेति। निराकार इति निराकारस्य लक्षणं कथयत इत्यर्थः" टी॰। "न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे। न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम्। परं पदं वैष्णवमामनन्ति तत् यत्र नेतीत्यतदुत्सिसृक्षवः। विसृज्य दौरात्म्यमनन्यसौहृदा हृदोपगुह्यार्हपदं पदे पदे"(भाग॰)मुक्ता॰। "तत्रापि न यत्रेति तटस्थस्य,परं पदमिति स्वरूपस्य। तत् परं पदं वैष्णवम् आमनन्ति विष्णुनाधिष्ठितं अधिकृताधिष्ठितेन राज्ञाधिष्ठितवत् ब्रह्मादिपदानामपि विष्णुनाऽधिष्ठितत्वात् परमित्युक्तं विष्णुनैवाधिष्ठितमित्यर्थः। यत्र पदे कालोनास्ति यः अनिमिषां ब्रह्मादीनां परः प्रभुः संहर्त्ता महाप्रलयेऽपि नाशोनास्त्येवेत्यर्थः। अतएव कालाभावे किंपुनर्न्यायेन देवा अपि तत्र न सन्तीत्याह कुतोन्विति। तथा देवाभावे जीवा अपि न सन्तीत्याह जगतामिति। ये देवा जगताम् उच्चावचां गतिं गच्छतां जीवानामीशाः तेषां का वार्त्ता? तत्कृतविघ्नगन्धोऽपि नास्तीत्याह ईशिरे इत्यनित्यत्वद्योतनार्थं लिट्प्रयोगः। यत्र च पदे सत्वादिर्नास्ति सत्वमिन्द्रियदेवतारूपं, रज इन्द्रियम्,। तम इन्द्रियार्थरूपं, विकारोऽहङ्कारस्तेषां त्रयाणां कारणं महान् बुद्धितत्वं तदहङ्कारस्य प्रधानमव्यक्तं तन्महतः। सत्वाद्यभावादेतत् प्राप्नुवतां पुनर्जन्मादिग्रहावीजलेशोऽपि नास्तीत्यर्थः। एवं दुःखं नास्तीत्युक्त्वा सुखमस्तीत्याह यत्रेतीति। यत् विष्णुपदं हृदा मनसा उपगुह्याश्लिष्य अनन्यसौहृदाभवन्ति अन्यत्र विषये प्रीतिं परित्यजन्ति तादृक्सुखाभावात् तद्धि पदे पदे क्षणे क्षणे अर्हपदं अर्हणस्य आदरस्य स्थानम् उत्तरोत्तरचमत्करणीयत्वात् दौरात्म्यं विसृज्य अनादिदुर्वासनावासितत्वं त्यक्त्वा विषयान्तरस्फूर्तिरपि नास्तीत्यर्थः। नेति नेतीत्युपनिषदुपदेशविश्वासबलात् अतत् विष्णुपदादन्यत् उत्सिसृक्षवः स्वेच्छयैवोत्स्रष्टवन्तः। नित्यनिरतिशयसुखानुभवरूपे विष्णुपदे अनुभविता अनुभवनं अनुभवनीय इति कर्त्तृकरणकर्माणि अतच्छब्देनोच्यन्ते तानि ह्यनुभवार्थमुपादीयन्ते सत्यनुभवे तु त्यज्यन्ते असत्वात् अन्तरायत्वाच्च" टी॰ "इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्य्यसुरन्धिताशयः"। पुरुषः—"भूतैर्यदा पञ्चभिरात्मसृष्टैः पुरं विराजं विरचय्य तस्मिन्। स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः"(भाग॰)मुक्ता॰। "एवमस्य द्विविधलक्षणमुक्त्वा अत्राधिकारिणमाह इत्थमिति। इत्थं व्यवस्थितः अनेन प्रकारेण विशिष्टामवस्थामापन्नो मुनिरुपरमेत् न किञ्चित् कुर्य्यात् यतोविज्ञानस्य विशुद्धज्ञानरूपस्य विष्णोर्दृक् दर्शनं साक्षात्कारः तस्य वीर्य्यं बलं तेन सुरन्धितो यथा पुनर्नोदेति तथा हिंसितः आशयोजीवत्वोपाधिर्य्येन स तथा। अयमर्थः वक्ष्यमाणभूमिकोपासनाक्रमबलात् सत्वपुरुषान्यताख्यातिमापन्नस्तामपि सायुज्यार्थी निरोद्धुकाम इत्येतामवस्थामापन्नो मुनिरत्राधिक्रियते नान्यः। अवश्यञ्चाधिकारिनिर्धारार्थं इत्थमित्यादि ज्ञेयम् अन्यथास्योद्धरणं निःप्रयोजनं स्यात्। इति शुकः राजानं प्रति पुरुषलक्षणमाह। भूतैरित्यादि। आत्मसृष्टैः आत्मना प्रकृतिमधिष्ठाय सृष्टैः पुरं देहं विराजं ब्रह्माण्डं विरचय्य निष्पाद्य तस्मिन् स्वांशेन जीवकलया यदा प्रविष्टः तदा पुरुषसंज्ञामवाप पुरि शयनाद्वसनाद्वा पुरुषः अनंशोऽप्यंशोक्तिः कल्पनया। नारायणः जलशायी आदिदेवो निराकारः" टी॰। मुक्ताफलस्थाः श्लोकास्तु भागवतीयाः।

कल्पनाकाल त्रि॰ कल्पनायाः कालः कालो यस्य। संकल्पवदाशुविनाशिनि अस्थिरे पदार्थे त्रि॰।

कल्पनी स्त्री क्लप—छेदने करणे ल्युट् ङीप्। कर्त्तर्य्याम्। (काञ्चि) हेमच॰।

कल्पपादप पु॰ कर्म॰ राजशिरोवत् त॰स॰ वा। १सुरतरुभेदे "नृषा न चक्रेऽर्पितकल्पपादपः" नैष॰। महादानान्तर्गते स्वर्णनिर्म्मितपादपाकारे देये २द्रव्यभेदे तद्विधानं हेमा॰ दा॰ उक्तं यथा—

"मत्स्य उवाच। "कल्पपादपदानाख्यमतः परमनुत्तमम्। महादानं प्रवक्ष्यामि सर्व्वपातकनाशनम्। पुण्यं दिन-

मधासाद्य तुलापुरुषदानवत् । पुण्याहवाचनं कुर्य्या-
ल्लोकेशावाहनं तथा । ऋत्विग्मण्डपसम्भारभूषणाच्छा-
दनादिकम्" । आदिशब्देन कालदेशवृद्धिश्राद्धशिवादि-
पूजागुर्व्वृत्विक्चतुष्टयवरण–मधुपर्क–दान–होम–वेदिको-
परिचक्र–वेष्टनपञ्चवर्ण–वितानपताकातोरणादि, मत्स्य-
पुराणोक्ततुलापुरुषदानवद्बोद्धव्यम् । "काञ्चनान्
कारयेद्वृक्षान् नानाफलसमन्वितान् । नानाविहारवस्त्राणि
भूषणानि च कारयेत्" । नानाफलेति, पुंस्त्रीगो-
गज–वाजि–मणि–वज्र–कनक–रजत–मत्स्यफलादीनि ।
"शक्तितस्त्रिपलादूर्द्ध्वमासहस्रात् प्रकल्पयेत् । अर्द्धात् कॢप्त-
सुवर्णस्य कारयेत् कल्पपादपम् । गुडप्रस्थोपरिष्टाच्च
सितवस्त्रयुगावृतम् । कामदेवमधस्ताच्च सकलत्रं प्रक-
ल्पयेत्" । अर्द्धात् कॢप्तसुवर्णस्येति, यथाशक्ति दानार्थकॢप्त-
सुवर्णस्यार्द्धेन ब्रह्मादिप्रतिमासहितं कल्पपादपं कुर्य्यात्
द्वितीयमप्यर्द्धं चतुर्द्धा विभज्य एकैकांशेन दक्षिणस्थ-
देवतासहितान् सन्तानादीन् विदध्यात्, गुडप्रस्थोऽत्र
"द्वात्रिंशत्पलिकः प्रस्थः पुराणे परिकीर्त्तित"इति ।
ब्रह्मादिलक्षणमुक्तं ब्रह्माण्डदाने,कामदेवरूपन्तु विष्णुधर्म्मो-
त्तरात् "कामदेवस्तु कर्त्तव्यो रूपेणाप्रतिमो भुवि । अष्ट-
बाहुः प्रकर्त्तव्यः शङ्खपद्मविभूषणः । चापबाणकरश्चैव
समाकुञ्चितलोचनः । रतिः प्रीतिस्तथा शक्तिर्भार्य्याश्चैता-
स्तयोज्ज्वला । चतस्रस्तस्य कर्त्तव्याः पत्न्यो रूपमनोहराः ।
चत्वारश्च करास्तस्य कार्य्या भार्य्यास्तनोपगाः । केतुश्च
मकरः कार्य्यः पञ्चबाणमुखो महानिति" । अधस्तादिति
ब्रह्मादिभिरपि सम्बध्यते । अत्र प्रकृतौ परिमाणाभावात्
पुरुषेच्छया प्रतिमादिपरिमाणानियमः । "सन्तानं पूर्व्व-
वत्तद्वत्तुरीयांशेन कल्पयेत्" तुरीयांशेन, द्वितीयार्द्ध-
चतुर्थांशेनेत्यर्थः । तद्वत्कल्पवृक्षवत्, पञ्चशाखं गुडप्रस्थो-
परिगतं ब्रह्मादिप्रतिमान्वितं कुर्य्यादित्यर्थः । केचित्तु
कामदेवमधस्तात् प्रकल्पयेदितिसन्तानवृक्षे योजयन्ति,तन्मते
तत्प्रतिमैव कर्त्तव्या । "मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं
घृतोपरि । पश्चिमे पारिभद्रन्तु सावित्र्या सह जीरके ।
सुरभीसंयुतं तद्वन्निवेश्यं हरिचन्दनम् । तुरीयांशेन कुर्वीत
सौम्येन फलसंयुतम्"। श्रीलक्षणमुक्तं ब्रह्माण्डदाने,सावि-
त्रीलक्षणमाह नारदः "पद्मासना च सावित्री साक्षसूत्र-
कमण्डलुः"। सुरभीलक्षणं ब्रह्माण्डपुराणे "सवत्सा
सुरभी, धेनुरारक्ता प्रस्नुतस्तनीति, "सौम्येन, उत्तरेण ।
घृतादीनामपि परिमाणापेक्षायां तद्वदिति वचनात् मलि-
धानाच्च प्रस्थपरिमाणत्वमवधेयम् । "कौशेयवस्त्रसंयुक्तान्
स्रङ्माल्यफलान्वितान् । तथाष्टौ पूर्णकलशान् पादुकासन-
भाजनम् । दीपकोपानहच्छत्रचामरासनसंयुतम् । फल-
माल्ययुतं तद्वदुपरिष्टाद्वितानकम् । तथाष्टादश धान्यानि
समन्तात् परिकल्पयेत्" । आसनभाजनं, भोज्यान्वित-
भाजनं वितानं पञ्चवर्णम् । अथ पूर्व्ववत् पूर्व्वेद्युरधि-
वासनं विधाय श्वोभूते ब्राह्मणवाचनादिपूर्णाहुतिपर्य्यन्तं
कर्म्मशेषं समापयेत् । "होमाधिवासनान्ते च स्नापितो
वेदिपुङ्गवैः । त्रिःप्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ।
नमस्ते कल्पवृक्षाय चिन्तितार्थप्रदायिने । विश्वम्भराय
देवाय नमस्ते विश्वमूर्त्तये । यस्मात् त्वमेव विश्वात्मा
ब्रह्मा स्थाणुर्दिवाकरः । मूर्त्तामूर्त्तपरं बीजमतः पाहि
सनातनः । त्वमेवामृतसर्व्वस्वमनन्तः पुरुषोऽव्ययः । स-
न्तानाद्यैरुपेतः सन् पाहि संसारसागरात्" । अमृता,
देवाः तेषां सर्व्वस्वं, अमृतसर्व्वस्वम् । "एवमामन्त्र्य तं
दद्यात् गुरवे कल्पपादपम् । चतुर्भ्यश्चापि ऋत्विग्भ्यः
सन्तानादीन् प्रकल्पयेत्"। दानवाक्यमत्र तुलापुरुषोक्त-
मूहनीयं, चतुर्भ्यः प्रकल्पयेदित्येकैकशो दद्यादित्यर्थः।
चतुर्भ्य इतिवचनादत्र चतुर्णामेवर्त्विजां वरणमिति गम्यते
ऋत्विगष्टकपक्षे तु ऋत्विग्भ्य इति ऋत्विग्युग्मेभ्य इत्यर्थः।
एतस्मिंश्च पक्षे जापकादिभ्योऽन्यैव दक्षिणा दातव्या ।
वेदचतुष्टयापेक्षया चतुःसंख्यात्वमिदमृत्विजामिति केचित् ।
इहापि "प्राप्य तेषामनुज्ञाञ्च तथान्येभ्योऽपि दापये-
दिति" बोद्धव्यम । दक्षिणानिर्णयश्च पूर्व्ववत् । स्वल्पे-
ष्वेकाग्निवत् कुर्य्याद्गुरवे चाभिपूजनम् । न वित्तशाठ्यं
कुर्वीत न च विस्मयवान् भवेत्" । स्वल्पत्वविवरणमुक्तं
ब्रह्माण्डदाने । ततः पुण्याहवाचने कृते वेदिसमीपं गत्वा
कृतदेवपूजो यजमानो गुरुश्च पूर्ववदेव देवताविसर्जनं कुर्य्यात् ।
"अनेन विधिना यस्तु महादानं निवेदयेत् । सर्व्वपाप-
विनिर्मुक्तः सोऽश्वमेधफलं लभेत् । अप्सरोभिः परि-
वृतः सिद्धचारणपन्नगैः । भूतान् भव्यांश्च मनुजांस्ता-
रयेद्रोमसंमितान् । स्तूयमानो दिवःपृष्ठे पितृपुत्रप्रपौ-
त्रवान् । विमानेनार्कवर्णेन विष्णुलोकं स गच्छति
दिवि कल्पशतं तिष्ठेद्राजराजो भवेत् ततः । नारायण-
बलोपेतो नारायणपरायणः । नारायणकथासक्तो ना-
रायणपुरं व्रजेत् । यो वा पठेत् सकलकल्पतरुप्रदानं,
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा । सोऽपीन्द्रलोक-
मधिगम्य सहाप्सरोभिर्मन्वन्तरं वसति पापविमुक्तदेहः" ।

इति मत्स्यपुराणोक्तकल्पतरुदानविधिः। तत्रैव लिङ्गपुराणे, "सनत्कुमार उवाच। अथान्यत् संप्रवक्ष्यामि कल्पपादपमुत्तमम्। यतनिष्कोण कर्त्तव्यं सर्वशस्यसमन्वितम्"। सर्वशाखाः, सर्वदिगन्तशाखाः। "शाखायां विधिना कृत्वा मुक्तादाम प्रलम्बितम्। दिव्यैर्मरकतैश्चैव चाङ्कुराणि प्रविन्यसेत्"। दिव्यैः, उत्कृष्टैरित्यर्थः। "प्रवालङ्कारयेद्धीमान् प्रवालेन द्रुमस्य च"। प्रवालेन प्रवालङ्कारयेदिति, विद्रुमैर्नीलपल्लवान् कारयेदित्यर्थः। "फलानि पद्मरागैश्च पारिजातस्य शोभनम्। मूलदण्डञ्च नीलेन वज्रेण स्कन्धमुत्तमम्। वैदूर्य्येण द्रुमाग्रञ्च पुष्परागेण मस्तकम्"। स्कन्धादूर्द्ध्वभागो मस्तकं, तदूर्द्ध्वं, द्रुमाग्रम्। "गोमेदकेन वै स्कन्धं सूर्य्यकान्तेन सुव्रतः। चन्द्रकान्तेन वा वेदिं द्रुमस्य स्फटिकेन वा। वितस्तिमात्र आयामो वृक्षस्य परिकीर्त्तितः। शाखाष्टकसमानञ्च विस्तारश्चोर्द्ध्वतस्तथा"। शाखाव्यतिरिक्तस्य वृक्षस्य वितस्तिमात्र उच्छ्रायः कार्य्यः, ऊर्द्ध्वतस्तथेति, स्कन्धादूर्द्ध्वमुखी नवमी या मध्यमशाखा तस्या अपि वितस्तिमात्र उच्छ्रायः, शाखाष्टकसमानं विस्तारमिति, अष्टदिगमुखीनामष्टशाखानां विस्तारं तिर्य्यग्व्याप्तिं वितस्तिमात्रमेव कुर्य्यादित्यर्थः। "तन्मूले स्थापयेल्लिङ्गं लोकपालसमावृतम्। पूर्व्वोक्तवेदिमध्ये तु मण्डले स्थाप्य पादपम्। पूजयेद्देवमीशानं लोकपालांश्च यत्नतः। पूर्ववज्जपहोमाद्यन्तुलाभारवदाचरेत्। निवेदयेद्द्रुमं शम्भोर्ब्राह्मणायाथ वा नृप!। ब्राह्मणेभ्योऽथवा राजा सार्वभौमो भविष्यति"। तुलाभारवदाचरेदिति लिङ्गपुराणोक्ततुलापुरुषदानविहितविधिमाचरेदित्यर्थः। श्लोत्तरे। "फलानान्तु सहस्रेण कल्पयेत् कल्पपादपम्। समूलदण्डपत्रञ्च फलपुष्पसमन्वितम्। पञ्चस्कन्धन्तु संकल्प्य पञ्चानां स्थापयेत् सुधीः। सद्योजातेन मन्त्रेण देयं प्राह्यं शिवाग्रतः। दिव्यैर्विमानैर्देहान्ते शिवलोके महीयते। पितरस्तस्य मोदन्ते सत्यलोके महीपते!"। इति लिङ्गपुराणोक्तकल्पपादपदानविधिः।

कल्पपाल पुं० कल्पं सुराविधानकल्पं संकल्पं मद्याभिलाषं वा तत्पायिनां, पालयति पाल—अण्। शौण्डिके सुराजीवे हेमच०। कल्यपाल इत्येव पाठः साधुः।

कल्पलता स्त्री क्लृप—णिच्—कर्म्मणि अच् कर्म०। महादानान्तर्गते स्वर्णकल्पितलताकारे दानीयद्रव्यभेदे तद्विधिः हेमा० दा० मत्स्य पु० उक्तो यथा—

"अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम्। महाकल्पलता नाम महापातकनाशनम्। पुण्यां तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्। तुलापुरुषवत् कुर्य्यात् लोकेशावाहनादिकम्"। आदिशब्दव्याख्यानं पूर्व्ववत् (कल्पपादपोक्तवत्)। "चामीकरमयीः कुर्य्यात् दश कल्पलताः शुभाः। नानापुष्पफलोपेता नानांशुकविभूषिता। विद्याधरसुपर्णानां मिथुनैरुपशोभिताः। हरीनादित्यभिः सिद्धैः फलानि च विहङ्गमैः"। चामीकरं, सुवर्णं कल्पलतास्तुलाकारा विधेयाः,। नानाफलानि, पुंस्त्रीगोगजवाजिप्रभृतीनि, स्वरूपपुष्पफलानां तुलनार्थत्वेनैवोपपत्तेः। अंशुकानि, वस्त्राणि। सुपर्णाः पक्षिणः। एवं दश कल्पलता विधाय वेदिकायाम् लिखितचक्रस्योपरि मध्ये द्वयं, पूर्व्वादिदिक्षु चाष्टौ स्थापयेत्। "लोकपालानुसारिण्यः कर्त्तव्यास्तासु देवताः। ब्राह्मीमनन्तशक्तिञ्च लवणस्योपरि न्यसेत्। अधस्ताच्च तयोर्मध्ये पद्मशङ्खकरे शुभे"। लोकपालानुसारिण्यो देवता, लोकपालशक्तय इत्यर्थः। अधस्ताच्च तयोरिति, मध्यस्थापितयोः कल्पलतयोरधस्तात् पद्मकरां ब्राह्मीं, शङ्खधरामनन्तशक्तिञ्च स्थापयेत्। लवणादिपरिमाणञ्च, परिमाणविशेषानिर्देशात् पुरुषेच्छया नियम्यते। लवणस्तूपयोर्न्यसेदिति क्वचित् पाठः। तत्र स्तूपो राशिः द्विवचनं राशिद्वयाभिप्रायेणेति। "इभासनस्था तु गुडे पूर्वतः कुलिशायुधा। रजन्यजस्थिताऽऽग्नेयी स्रुवपाणिरथानले। याम्या महिषमारूढ़ा गदिनी तण्डुलोपरि। घृतेन नैर्ऋती स्थाप्या सखड्गा दक्षिणापरे। वारुणे वारुणी क्षीरे झषस्था नागपाशिनी। पताकिनी च वायव्ये मृगस्था शर्करोपरि। सौम्या तिलेषु संस्थाप्या शङ्खिनी निधिसंस्थिता। माहेश्वरी वृषगता त्वीमपाणिः त्रिशूलिनी"। इभो गजः स च चतुर्दन्तो विधेयः, कुलिशं, वज्रं, रजन्यजस्थितेति, रजनी, हरिद्रा, अजः, छागः, हरिद्रोपरिस्थापिता छागवाहनेत्यर्थः अनले, आग्नेयदिग्भागे, दक्षिणापरे नैर्ऋतदिग्भागे नैर्ऋती प्रेतवाहनेत्यवधेयं, झषस्था मकरवाहनेत्यर्थः। निधिसंस्थितेति निधिरूपं कलशानुकारि। "मौलिन्योवरदाश्चैव कर्त्तव्या बालिकान्विताः। तथा पञ्चपलादूर्द्ध्वमासहस्रात् प्रकल्पयेत्। सर्व्वासामुपरिष्टाच्च पञ्चवर्णं वितानकम्। धेनवो दश कुम्भाश्च वस्त्रयुग्मानि चैव हि"। मौलिन्यो

मुकुटधराः, वरदा इति, यथोक्तायुधधारिण्यः करादितरेण करेण वरदमुद्रान्विता इत्यर्थः। "बालिका, कर्णभूषणं (वालि) बालकान्विता इति क्वचित्पाठः तदा वामोत्सङ्गस्थितबालका इति व्याख्या। एतच्च पञ्चपलादिपरिमितकल्पलताकरणोपक्लृप्तसुवर्णेनैव विभज्य सर्वं कर्त्तव्यं, पृथग्द्रव्येण कर्त्तव्यानुपदेशात्। "मध्यमे द्वे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च। ततो मङ्गलशब्देन स्नातः शुक्लाम्बरो बुधः। त्रिः प्रदक्षिणमावृत्य मन्त्रानेतानुदीरयेत्"। तत इति होमाधिवासनपुण्याहवाचनादि पूर्वोक्तकर्मकलापानन्तर्यमुच्यते, स्नात इति कुण्डसमीपवर्त्तिकलशस्थितसर्वौषधिजलेन ऋत्विग्भिः स्नापितः, गृहीतकुसुमाञ्जलिरित्यपि ज्ञेयम्। अत्र मन्त्रः "नमो नमः पापविनाशिनीभ्यो ब्रह्माण्डलोकेश्वरपालिनीभ्यः। आशंसिताधिक्यफलप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः"। अथ पूर्ववत् प्रयोगमुच्चार्य्य मध्यमे द्वे देवतादिसहिते कल्पलते गुरवे प्रतिपाद्य शेषा ऋत्विग्भ्यः प्रतिपादयेत्। तदनुज्ञया अन्येभ्योऽपि दानं दीनानाथपूरणं, स्वल्पे त्वेकाग्निविधानं चेति पूर्वोक्तमनुसन्धेयम्। ततः पुण्याहवाचनदेवतापूजनविसर्जनानि कुर्य्यात्। "इति सकलदिगङ्गनाप्रदानं भवभयसूदनकारि यः करोति। अभिमतफलदे स नाकलोके वसति पितामहवत्सराणि त्रिंशत्"। अभिमतफलदे, इष्टफलदायिनि। "पितृशतमवतारयेद्भवाब्धेः स च दुरितौघविनाशशुद्धदेहः। सुरपतिवनितासहस्रसंख्यैः परिवृतमम्बुजसंसदाभिवन्द्यः। इति विधानमिदं सदिगङ्गनाकनककल्पलताविनिवेदने। पठति यः स्मरतीह तदीक्षते स पदमेति पुरन्दरसेवितम्"। कल्पस्य संकल्पविषयस्य साधनं लता। २सुरद्रुमशाखाकल्पलतायाञ्च।

कल्पवर्ष पु॰ उपसेनभ्रातृदेवकस्यात्मजोपदेवस्यात्मजभेदे "आहुकात्मजौ" देवकस्योपसेनस्य चत्वारो देवकात्मजाः। देववानुपदेवश्च सुदेवो देववर्द्धनः" इत्युक्त्वा राजन्यकल्पवर्षाद्या उपदेवसुता दश" भाग॰ ९,२४,२५ उक्तम्।

कल्पसूत्र न॰ कल्पस्य वैदिककर्म्मानुष्ठानस्य प्रतिपादकं सूत्रम्। आश्वलायनापस्तम्बप्रणीतेषु वैदिककर्मप्रयोगावेदकेषु सूत्रात्मकग्रन्थेषु "त्र्यहोऽश्वमेधः संख्यातः कल्पसूत्रेण ब्राह्मणैः। चतुष्टोममहस्तस्य प्रथमं परिकल्पितम्" रामा॰। [पान्तैधितसिन्धवः" भाग॰ २,११,२।

कल्पान्त पु॰। कल्पस्यान्तोयत्र। प्रलये अमरः। "कल-

कल्पित त्रि॰ कॢप-णिच्-क्त। रचिते "प्रजापतिः कल्पितयज्ञभागम्" कुमा॰। "मदीयसीमपि घनामनल्पगुणकल्पिताम्" २व्यञ्जिते। "सप्तभेदकरकल्पितस्वरम्" माघः। "करेण कल्पितोव्यञ्जितः स्वरोयत्र" मल्लि॰। ३आरोपिते च। "अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः" सूतसं॰। "किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्" वेदा॰प॰। ४आरोहणार्थं सज्जितगजे हेमच॰ ५कृत्रिमसंज्ञया परिभाषिते "तच्चेप्सिततमं कर्म चतुर्थ्यन्तु कल्पितम्" वाक्यप॰।

कल्पिन् त्रि॰ कल्पयति कॢप-णिच्-णिनि। १रचके २आरोपके ३वेशकारके च ४नापिते पु॰। "त्रेतायै कल्पिनं द्वापरायाधिकल्पिनम्" यजु॰ ३०,१८।

कल्प्य त्रि॰ कॢप-णिच्-यत्। १रचनीये २आरोप्ये ३अनुष्ठेये ४विधेये "कालोपपन्नातिथिकल्प्यभागम्" रघुः।

कल्मन् न॰ कर्मन् र-स्य लः। कर्मणि।

कल्मलि पु॰ कलयत्यपगमयति मलम् पृषो॰। १तेजसि। "तस्य प्राच्यां दिशि श्रद्धा पुंश्चली मन्त्रो मागधो विज्ञानं वासोऽहरुष्णीषं रात्री केशा हरितौ प्रवर्त्तौ कल्मलिर्मणिः" अथ॰ १५,२,१।

कल्मलीक न॰ कलयत्यपगमयति मलम् पृषो॰। ज्वलनयुक्ते तेजसि निरु॰। "नमस्या कल्मलीकिनम् नमोभिः" ऋ॰ २,३३,८। "कल्मलीकिनं ज्वलतोनामधेयमेतत्" निरु॰ ११,१७। "कलन्तं कलयत्यपगमयति मलमिति कल्मलीकं तेजः" तद्वन्तं रुद्रम्" भा॰ ततः अस्त्यर्थे इनि।

कल्मष न॰ कर्म शुभकर्म स्यति सो-क पृ॰ षत्वं रस्य लः। १पापे "व्यपेतकल्मषो नित्यं ब्रह्मलोके महीयते" "व्यपेतकल्मषोऽभ्येति" "यामीस्ता यातनाः प्राप्य स जीवो वीतकल्मषः" मनुः। २तद्वति त्रि॰ अमरः ३हस्तपुच्छे न॰ त्रिका॰ ४नरकभेदे पु॰ मेदि॰। ५मलिने त्रि॰ जटाधरः "जन्मन्यृक्षे यदि स्यातां वारौ भौमशनैश्चरौ। स मासः कल्मषो नाम मनोदुःखप्रदायकः" दीपिकोक्ते ६मासभेदे पु॰।

कल्माष पु॰ कलयति कल-क्विप् कल् माषयति हिनस्ति अन्यवर्णम् स्वमाषा पु॰ मष-हिंसायाम् अच् कर्म॰। १चित्रवर्णे २तद्वति त्रि॰ अमरः "अश्वांश्चित्तिरिकल्माषान्" भा॰ आ॰ ९ अ॰। तित्तिरिवच्चित्रवर्णान् इत्यर्थः। "कल्माषा आग्निमारुताः" यजु॰ २४,७। "कल्माषाः कर्बुरास्त्रयः पशवः आग्निमारुताः षष्ठे यूपे" वेददी॰ "कल्माष ऐन्द्राग्नाः" यजु॰ २९,५८।

"मारुतः कल्माष आग्नेयः कृष्णः" यजु०२९,५९। २कृष्णवर्णे ४कृष्णपाण्डुरवर्णे पु०५तद्वति त्रि०। ६राक्षसे च पुंस्त्री स्त्रियां जातित्वात् ङीष् मेदि०। वर्णवाचित्वे गौरा०पाठात् स्त्रियां ङीष्। ७गन्धशालौ पु०राजनि०। ८अग्निभेदे भारतम्। "अग्नीनां वासुदेवेन संसक्तानां महामृधे!। ते जातवेदसः सर्वे कल्माषः कुसुमस्तथा। दहनः शोषणश्चैव तपनश्च महाबलः" हरिवं० १८० अ०। ९नागभेदे "नीलानीलौ तथानागौ कल्माषशवलौ तथा" भा० आ० ३५ नागनामोक्तौ। १०कृष्णविन्दुचिते च। "कल्माषमिल्लेके" आश्व०गृ०४,९,५। "कल्माषो नाम कृष्णविन्दुचितः" नारा०।

कल्माषकण्ठ पु० कल्माषः कृष्णपाण्डुरः कृष्णो वा कण्ठोऽस्य। महादेवे हारा०। तस्य स्वतः श्वेतवर्णत्वेऽपि विषपानकाले नीलकण्ठत्वात् तथात्वं कल्माषग्रीवादयोऽप्यत्र। "ध्रुवा दिग्विष्णुरधिपतिः कल्माषग्रीवो रक्षिता" अथ०२,२७,५। "ध्रुवाय त्वा दिशे विष्णवेऽधिपतये कल्माषग्रीवाय रक्षित्रे" अथ०१२,२,५९।

कल्माषपाद पु०कल्माषौ पादौ यस्य। सूर्य्यवंश्ये सुदासपुत्रे नृपभेदे। "द्वे भार्य्ये सगरस्यास्ताम्" इत्युपक्रम्य "अयुताजित्सुतस्त्वासीदृतपर्णो महायशाः। दिव्याक्षहृदयज्ञोऽसौ राजा नलसखो बली। ऋतपर्णसुतस्त्वासीदार्त्तपर्णिर्महीपतिः। सुदासस्तनयस्तस्य राजा इन्द्रसखोऽभवत्। सुदासस्य सुतस्त्वासीत् सौदासो नाम पार्थिव!। ख्यातः कल्माषपादो वै नाम्ना मित्रसहोऽभवत्" हरिवं०१५अ०। तस्य ब्रह्मशापात् राक्षसत्वप्राप्ते र्वशिष्ठेन शापविमोचनस्य च कथा भा०आ०१७७,७८०अ०यथा—"कल्माषपाद इत्येवं लोके राजा बभूव ह। इक्ष्वाकुवंशजः पार्थ! तेजसाऽसदृशो भुवि। स कदाचिद्वनं राजा मृगयां निर्ययौ पुरात्। मृगान् विध्यन् वराहांश्च चचार रिपुमर्द्दनः। तस्मिन् वने महाघोरे खड्गांश्च बहुशोऽहनत्। हत्वा च सुचिरं श्रान्तो राजा निववृते ततः। अकामयत्तं याज्यार्थे विश्वामित्रः प्रतापवान्। स तु राजा महात्मानं वाशिष्ठमृषिसत्तमम्। तृष्णार्त्तश्च क्षुधार्त्तश्च एकायनगतः पथि। अपश्यदजितः सङ्ख्ये मुनिं प्रतिमुखागतम्। शक्तिं नाम महाभागं वशिष्ठकुलवर्द्धनम्। ज्येष्ठं पुत्रं पुत्रशताद्वशिष्ठस्य महात्मनः। अपगच्छ पथोऽस्माकमित्येवं पार्थिवोऽब्रवीत्। तथा ऋषिरुवाचैनं सान्त्वयन् श्लक्ष्णया गिरा। मम पन्था महाराज! धर्म्म एष सनातनः। राज्ञा सर्व्वेषु धर्म्मेषु देयः पन्था द्विजातये। एवं परस्परं तौ तु पथोऽर्थं वाक्यमूचतुः। अपसर्पापसर्पेति वागुत्तरमकुर्व्वताम्। ऋषिस्तु नापचक्राम तस्मिन् धर्म्मपथे स्थितः। नापि राजा मुनेर्मानात् क्रोधाच्चापजगाम ह। असुञ्चन्तं तु पन्थानं तमृषिं नृपसत्तमः। जघान कशया मोहात्तदा राक्षसवन्मुनिम्। कशाप्रहाराभिहतस्ततः स मुनिसत्तमः। तं शशाप नृपश्रेष्ठं वाशिष्ठः क्रोधमूर्च्छितः। हंसि राक्षसवद्यस्माद्राजापसद! तापसम्। तस्मात्त्वमद्यप्रभृति पुरुषादो भविष्यसि। मनुष्यपिशिते सक्तश्चरिष्यसि महीमिमाम्। गच्छ राजाधमेत्युक्तः शक्तिना वीर्य्यशक्तिना। ततो याज्यनिमित्तन्तु विश्वामित्रवशिष्ठयोः। वैरमासीत्तदा तन्तु विश्वामित्रोऽन्वपद्यत। तयोर्विवदतोरेवं समीपमुपचक्रमे। ऋषिरुग्रतपाः पार्थ! विश्वामित्रः प्रतापवान्। ततः स बुबुधे पश्चात्तमृषिं नृपसत्तमः। ऋषेः पुत्रं वशिष्ठस्य वशिष्ठमिव तेजसा। अन्तर्द्धाय तदात्मानं विश्वामित्रोऽपि भारत!। तावुभावतिचक्राम चिकीर्षन्नात्मनः प्रियम्। स तु शप्तस्तदा तेन शक्तिना वै नृपोत्तमः। जगाम शरणं शक्तिं प्रसादयितुमर्हयन्। तस्य भावं विदित्वा स नृपतेः कुरुसत्तम। विश्वामित्रस्ततो रक्ष आदिदेश नृपं प्रति। शापात्तस्य तु विप्रर्षेर्विश्वामित्रस्य चाज्ञया। राक्षसः किङ्करो नाम विवेश नृपतिं तदा। रक्षसा तं गृहीतन्तु विदित्वा मुनिसत्तमः। विश्वामित्रोऽप्यपाक्रामत्तस्माद्देशादरिन्दम!। ततः स नृपतिस्तेन रक्षसान्तर्गतेन च। बलवत्पीडितः पार्थ! नान्वबुध्यत किञ्चन। ददर्शाथ द्विजः कश्चिद्राजानं प्रस्थितं वनम्। अयाचत क्षुधापन्नः समांसम्भोजनन्तदा। तमुवाचाथ राजर्षिर्द्विजं मित्रसहस्तदा। आस्स्व ब्रह्मंस्त्वमत्रैव मुहूर्त्तं प्रतिपालयन्। निवृत्तः प्रतिदास्यामि भोजनं ते यथेप्सितम्। इत्युक्त्वा प्रययौ राजा तस्थौ स द्विजसत्तमः। ततो राजा परिक्रम्य यथाकामं यथासुखम्। निवृत्तोऽन्तःपुरं पार्थ! प्रविवेश महामनाः। ततोऽर्द्धरात्र उत्थाय सूदमानाय्य सत्वरम्। उवाच राजा संस्मृत्य ब्राह्मणस्य प्रतिश्रुतम्। गच्छामुष्मिन् वनोद्देशे ब्राह्मणो मां प्रतीक्षते। अन्नार्थी तं त्वमन्नेन समांसेनोपपादय। गन्धर्व्व उवाच। एवमुक्तस्ततः सूदः सोऽनासाद्यामिषं क्वचित्। निवेदयामास तदा तस्मै राज्ञे व्यथान्वितः। राजा तु रक्षसा-

त्रिष्टः सूदमाह गतव्यथः । अस्मै नरमांसेन भोजयेति पुनः पुनः । तथेत्युक्त्वा ततः सूदः स स्थानं वध्यघातिनाम् । गत्वाऽऽजहार त्वरितो नरमांसमपेतभीः । स तत् संस्कृत्य विधिवदन्नोपहितमाशु वै । तस्मै प्रादाद् ब्राह्मणाय क्षुधिताय तपस्विने । स सिद्धचक्षुषा दृष्ट्वा तदन्नं द्विजसत्तमः । अभोज्यमिदमित्याह क्रोधपर्य्याकुलेक्षणः । ब्राह्मण उवाच । यस्मादभोज्यमन्नं मे ददाति स नृपाधमः । तस्मात्तस्यैव मूढस्य भविष्यत्यत्र लोलुपा । सक्तो मानुषमांसेषु यथोक्तः शक्तिना पुरा । उद्वेजनीयो भूतानां चरिष्यति महीमिमाम् । द्विरनुव्याहृतो राज्ञः स शापो बलवानभूत् । रक्षोबलसमाविष्टो विसंज्ञश्चाभवन्नृपः । ततः स नृपतिश्रेष्ठो राक्षसोपहतेन्द्रियः । उवाच शक्तिं तं दृष्ट्वा न चिरादिव भारत ! । यस्मादसदृशः शापः प्रयुक्तोऽयं मयि त्वया । तस्मात्त्वत्तः प्रवर्त्तिष्ये खादितुं मानुषानहम् । एवमुक्त्वा ततः सद्यस्तं प्राणैर्व्विप्रयुज्य च । शक्तिं तं भक्षयामास व्याघ्रः पशुमिवेप्सितम् । शक्तिं तन्तु मृतं दृष्ट्वा विश्वामित्रः पुनः पुनः । वशिष्ठस्यैव पुत्त्रेषु तद्रक्षः सन्दिदेश ह । स तान् शक्त्यवरान् पुत्त्रान् वशिष्ठस्य महात्मनः । भक्षयामास संक्रुद्धः सिंहः क्षुद्रान् मृगानिव । वशिष्ठो घातितान् श्रुत्वा विश्वामित्रेण तान् सुतान् । धारयामास तं शोकं महाद्रिरिव मेदिनीम्"।"ततः प्रतिनिवृत्तः स तया वध्वा सहानघः । कल्माषपादमासीनं ददर्श विजने वने । स तु दृष्ट्वा तं राजा क्रुद्ध उत्थाय भारत ! । आविष्टो रक्षसोग्रेण इयेषात्तुं तदा मुनिम् । अदृश्यन्ती तु तं दृष्ट्वा क्रूरकर्म्माणमग्रतः । भयसंविग्नया वाचा वशिष्ठमिदमब्रवीत् । असौ मृत्युरिवोग्रेण दण्डेन भगवन्नितः । प्रगृहीतेन काष्ठेन राक्षसोऽभ्येति दारुणः । तं निवारयितुं शक्तो नान्योऽस्ति भुवि कश्चन । त्वदृतेऽद्य महाभाग ! सर्व्ववेदविदां वर ! । पाहि मां भगवन् ! पापादस्माद्दारुणदर्शनात् । रक्षोऽयमिह हात्तुं वै नूनमावां समीहते । वशिष्ठ उवाच । मा भैः पुत्त्रि ! न भेतव्यं राक्षसात्तु कथञ्चन । नैतद्रक्षो भयं यस्मात् पश्यसि त्वमुपस्थितम् । राजा कल्माषपादोऽयं वीर्य्यवान् प्रथितो भुवि । स एषोऽस्मिन् वनोद्देशे निवसत्यतिभीषणः । गन्धर्व्व उवाच । तमापतन्तं संप्रेक्ष्य वशिष्ठो भगवानृषिः । वारयामास तेजस्वी हुङ्कारेणैव भारत ! । मन्त्रपूतेन च पुनः स तमभ्युक्ष्य वारिणा । मोक्षयामास वै शापात् तस्माद्योगान्नराधिपम् । स हि द्वादश वर्षाणि वाशिष्ठस्यैव तेजसा । ग्रस्त आसीद्गृहेणेव पर्व्वकाले दिवाकरः । रक्षसा विप्रमुक्तोऽथ स नृपस्तद्वनं महत् । तेजसा रञ्जयामास सन्ध्याभ्रमिव भास्करः । प्रतिलभ्य ततः संज्ञामभिवाद्य कृताञ्जलिः । उवाच नृपतिः काले वशिष्ठमृषिसत्तमम् । सौदासोऽहं महाभाग ! याज्यस्ते मुनिसत्तम ! । अस्मिन् काले यदिष्टन्ते ब्रूहि किं करवाणि ते । वशिष्ठ उवाच । वृत्तमेतद्यथाकालं गच्छ राज्यं प्रशाधि वै । ब्राह्मणांस्तु मनुष्येन्द्र ! मावमंस्थाः कदाचन । राजोवाच । नावमंस्ये महाभाग ! कदाचिद्ब्राह्मणर्षभान् । त्वन्निदेशे स्थितः सम्यक् पूजयिष्याम्यहं द्विजान्" ।

कल्माषाङ्घ्रिरप्यत्र । तस्य कल्माषपादताकथा स्त्रीसंसर्गे मृत्युरूपशापादिकथा च भाग० ९ । ९ अ० यथा—

"ऋतुपर्णोऽनलसखो योऽश्वविद्यामयान्नलात् । दत्त्वाऽक्षहृदयञ्चास्मै, सर्व्वकामस्तु तत्सुतः । ततः सुदासस्तत्पुत्त्रो मदयन्तीपतिर्नृपः । आहुर्म्मित्रसहं यं वै कल्माषाङ्घ्रिमुत क्वचित् । वशिष्ठशापाद्रक्षोऽभूदनपत्यः स्वकर्म्मणा । श्रीराजोवाच । किंनिमित्तो गुरोः शापः सौदासस्य महात्मनः । एतद्वेदितुमिच्छामि कथ्यतां न रहो यदि । श्रीशुक उवाच । सौदासो मृगयां किञ्चिच्चरन् रक्षो जघान ह । मुमोच भ्रातरं, सोऽथ गतः प्रतिचिकीर्षया । संचिन्तयन्नघं राज्ञः सूदरूपधरो गृहे । गुरवे भोक्तुकामाय पक्त्वा निन्ये नरामिषम् । परिवेक्ष्यमाणं भगवान् विलोक्याभक्ष्यमञ्जसा । राजानमशपत् क्रुद्धो रक्षो ह्येवं भविष्यसि । रक्षःकृतं तद्विदित्वा चक्रे द्वादशवार्षिकम् । सोऽप्यपोऽञ्जलिमादाय गुरुं शप्तुं समुद्यतः । वारितो मदयन्त्याऽपो रुशतीः पादयोर्जहौ । दिशः खमवनीं सर्व्वं पश्यञ्जीवमयं नृपः । राक्षसं भावमापन्नः पादे कल्माषतां गतः । व्यवायकाले ददृशे वनौकोदम्पती द्विजौ । क्षुधार्त्तो जगृहे विप्रं तत्पत्न्याहाकृतार्थवत् । न भवान् राक्षसः साक्षादिक्ष्वाकूणां महारथः । मदयन्त्याः पतिर्व्वीर ! नाधर्म्मं कर्त्तुमर्हसि । देहि मेऽपत्यकामाया अकृतार्थं द्विजं पतिम् । देहोऽयं मानुषो राजन् ! पुरुषस्याखिलार्थदः । तस्मादस्य वधो वीर ! सर्व्वार्थवध उच्यते । एष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः । आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितम् । सर्व्वभूतात्मभावेन भूतेष्वन्तर्हितं गुणैः । सोऽयं ब्रह्मर्षिवर्य्यस्ते राजर्षिप्रवराद्विभो । कथमर्हति धर्म्मज्ञ ! वधं

पितुरिवात्मजः। कर्म्मणा मनसा वाचा सर्व्वभूतेषु सौहृदम्। विद्याविवेकसम्पन्नाः शीलमेतद्विदुर्बुधाः। तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः। कथं वधं यथा बभ्रोर्मन्यते सम्मतो भवान्। यद्ययं क्रियते भक्ष्यस्तर्हि मां खाद पूर्व्वतः। न जीविष्ये विना येन क्षणमप्यहं तथा। एवं करुणभाषिण्या विलपन्त्या अनाथवत्। व्याघ्रः पशुमिवाखादत् सौदासः शापमोहितः। ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम्। शोचन्त्यात्मानमुर्व्वीशमशपत् कुपिता सती। यस्मान्मे भक्षितः पाप! कामतः स्वपतिस्त्वया। तवापि मृत्युराधानादकृतप्रज्ञ! दर्शितः। एवं मित्रसहं शप्त्वा पतिलोकपरायणा। तदस्थीनि समिद्धेऽग्नौ प्रास्य भर्त्तुर्गतिङ्गता। विशापो द्वादशाब्दान्ते मैथुनाय समुद्यतः। विज्ञाप्य ब्राह्मणीशापं महिष्या स निवारितः। तत ऊर्द्धं स तत्याज स्त्रीसुखं कर्म्मणाऽप्रजः। वशिष्ठस्तदनुज्ञातो मदयन्त्यां प्रजामधात्”।

कल्माषी स्त्री कल्माष+“अन्यतो ङीष्” पा० ङीप्। १चित्रवर्णयुक्तायां स्त्रियां २कृष्णवर्णायां यमुनानद्याञ्च “प्रतिकंसं स्पन्द्रेऽतो यतमानोऽपि भारत!। अभितः सोऽथ कल्माषीं गङ्गाकूले परिभ्रमन्” भा० आ० १६७। “कल्माषीं कृष्णवर्णां यमुनामभितः” नीलक० “कल्माषीतीरसंस्थस्य गतस्त्वं शिष्यतां भृगोः” भा० स० ७६अ०। गङ्गायमुनासङ्गमसमीपे एव भृगोराश्रम इति भारतादौ लोके च प्रसिद्धेरतः कल्माषीशब्देन यमुनोच्यते सितासितयोर्नद्योः मिश्रितत्वेन कृष्णपाण्डुरवर्णत्वात् प्रयागस्थयमुनायस्तथात्वम्

कल्य न० कलयति चेष्टामत्र अमरा० यक्, कल्यते कल—गतौ कर्म्मणि यत्, कलासु साधु यत् वा। १प्रत्यूषे अमरः २मधुनि हेमच०। ३निरामये “यावदेव भवेत् कल्यस्तावत् श्रेयः समाचरेत्” भा० स० ५५अ०। ४सज्जे समर्थे उद्यते च त्रि० अमरः “कथयस्व कथामेतां कल्याः स्म श्रवणे तव” भा० आ० ५अ०। “कल्प्यारथं धनुश्चैव तथाऽक्षय्ये महेषुधीः। बभूव कल्यः कौन्तेयः प्रहृष्टः सत्यकर्म्मणि” भा० आ० २२५अ०। “कल्यौ स्वो भगवन् योद्धुमपि सर्व्वैः सुरासुरैः” भा० आ० २२५ अ०। ५वाक्श्रुतिवर्जिते (काला बोवा) ६उपायवचने कल्याणवचने च त्रि० मेदि०। ६सुरायां स्त्री मेदि० ७शुभात्मिकायां वाच्यां स्त्री अमरः ८हरीतक्यां स्त्री शब्दर०।

कल्यजग्धि स्त्री अद—क्तिन् कल्ये प्रातर्ज्जग्धिः। १प्रातर्भोजने उपचारात् २तत्कालभक्ष्ये जटाधरः कल्याशादयोऽप्यत्र [प्रातर्भोजने, त्रिका०

कल्यपाल पु० कल्यं मधु मद्यं पालयति पाल—अण् उप० स०। शौण्डिके हेमच०। ण्वुल् कल्यपालकोऽपि तत्रार्थे शब्दमा०।

कल्यवर्त्त पु० कल्ये प्रातर्वर्त्त्यते वृत—णिच् कर्म्मणि अच्।

कल्याण न० कल्ये प्रातः अण्यते शब्द्यते अण—घञ्। १हेम्नि, मेदि० २मङ्गले। अभिप्रेतार्थसिद्धिर्मङ्गलम् “यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्” “पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः” मनुः। “तद्भूय कल्याणपरम्पराणाम्” “अन्वमीयत कल्याणं तस्या विच्छिन्नसन्ततिः” रघुः तल्लेतरपि शङ्खादिकं मङ्गलम्। “कल्याणानां त्वमसि महसां भाजनं विश्वमूर्त्ते!” मालतीमा०। ३शुभयुक्ते त्रि० अमरः। “कल्याणपञ्चमा रात्रयः कल्याणपञ्चमीकः पक्षः” सि० कौ० “उदगयने आपूर्य्यमाणे पक्षे कल्याणे नक्षत्रे चौलोपनयनगोदानविवाहाः” आश्व० गृ० १,४,१, “प्रातिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजैः” मनुः। स्त्रियां बह्वा० वा ङीप्। “उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्” रघुः। “उपोपविष्टः कल्याणीः कथासक्ते मनोरमाः” भा० व० १२४ “उवाच चैनं कल्याण्या वाचा मधुरयोर्जितम्” भा० आ० १७३अ०। ङीबन्तः ३माषपर्ण्याम् ४गवि च राजनि०

कल्याणकगुड पु० सुश्रुतोक्ते द्रव्यविशेषसंयुक्ततया पक्वे गुडभेदे। यथा “प्रस्थत्रयेणामलकीरसस्य शुद्धस्य दत्त्वार्द्धतुलां गुडस्य। चूर्णीकृतैर्ग्रन्थिकचव्यजीरव्योषेभकृष्णाहपुषाऽजमोदैः। विडङ्गसिन्धुत्रिफलायमानीपाठाग्निधान्यैश्च पिचुप्रमाणैः। दत्त्वा त्रिवृच्चूर्णफलानि चाष्टावष्टौ च तैलस्य पचेत् यथावत्। तं भक्षयेदक्षफलप्रमाणं यथेष्टचेष्टं त्रिसुगन्धियुक्तम्। अनेन सर्व्वे ग्रहणीविकाराः। सश्वासकासस्वरभेदशोथाः। शाम्यन्ति, चायं चिरमन्तरग्नेर्हतस्य पुंस्त्वस्य च वृद्धिहेतुः। स्त्रीणां च वन्ध्यामयनाशनः स्यात् कल्याणको नाम गुडः प्रतीतः”।

कल्याणकघृत न० सुश्रुतोक्ते औषधिभेदयुक्तघृतभेदे यथा— “विडङ्गत्रिफलामुस्तामञ्जिष्ठादाडिमोत्पलैः। प्रियङ्गवैलवालुकचन्दनामरदारुभिः। बृहतीकुष्ठरजनीपर्णिनीशारिवाद्वयैः। हरेणुकात्रिवृद्दन्तीवचातालीशकेशरैः। द्विक्षीरं विपचेत्सर्पिर्मालतीकुसुमैः सह। विषमज्वरकासासगुल्मोन्मादगरापहम्। एतत्कल्याणकं नाम सर्पिर्माङ्गल्यमुत्तमम्। अलक्ष्मीग्रहरक्षोऽग्निमान्द्यापस्मारतापनुत्। शस्यते नष्टशुक्राणां वन्ध्यानां गर्भदं परम्। मेध्यञ्चक्षु-

प्रज्ञायुष्यं रेतोमार्गरुजापहम् । एतैरेव यथाद्रव्यैः सर्व्वगन्धैश्च साधितम् । कपिलाया घृतप्रस्थं सुवर्णमणिसंयुतम् । तत्क्षीरेण सहैकध्यं प्रसाध्य कुसुमैरिमैः । सुमनश्चम्पकाशोकशिरीषकुसुमैर्घृतम् । तथा नलदपद्मानां केशरैर्दाडिमस्य च । तिथौ प्रशस्ते नक्षत्रे साधकस्यातुरस्य च । कृतं मनुष्यदेवाय ब्राह्मणैरभिमन्त्रितम् । दत्तं सर्व्वज्वरान् हन्ति महाकल्याणकं घृतम् । दर्शनस्पर्शनाभ्यान्तु सर्व्वरोगहरं शिवम् । अधृष्यः सर्व्वभूतानां वलीपलितवर्ज्जितः । अस्याभ्यासादृष्टतस्येह जीवेद्वर्षशतत्रयम्" ।

कल्याणकलवण न० सुश्रुतोक्ते औषधभेदयुक्ते लवणभेदे यथा "गण्डीरपलाशकुटजबिल्वार्कस्नुह्यपामार्गपाटलापारिभद्रकनादेयीकृष्णगन्धानीपनिदिग्धानक्तमालकपूतिकाबृहतीकण्टकारिकाभल्लातकेङ्गुदीवैजयन्तीकदलीवर्षाभूह्वीबेरसुरेन्द्रवारुणीश्वेतमोक्षकाशोका इत्येवंवर्गं समूलफलशाखमार्द्रमाहृत्य लवणेन सह संसृष्टं पूर्ब्बवद्दग्ध्वा क्षारकल्पेन परिस्राव्य विपचेदेतत्प्रतिवापश्चात्र हिङ्ग्वादिभिः पिप्पल्यादिभिर्व्वा । इत्येतत्कल्याणकलवणं वातरोगेषु गुल्मप्लीहाभिपन्नाजीर्णार्शोऽरोचकार्त्तानां कासादिभिरुपद्रुतानां चोपदिशन्ति पानभोजनेष्विति । भवति चात्र । विष्यन्दनादुष्णभावाद्दीपनाच्च विपाचनात् । संस्कारपाचनाच्चेदं वातरोगेषु शस्यते" ।
"कल्याणकं वा लवणं पिबेत्तु" सुश्रुत: ।

कल्याणयोग पु० ज्योतिषोक्ते यात्राङ्गे लग्नावधिस्थानविशेषस्थितग्रहयोगभेदे यथा "गुरौ केन्द्रे १,४,७,१०, त्रिकोणे ५,९, वा रविर्लाभे ११ च कर्म्मणि १० । कल्याणयोगी भूपस्य यातुः कल्याणकृद्भवेत्" । "त्रिकोणगे ५,९, शुभे खेटे सबले वा द्वितीयगे । कल्याणसंज्ञो योगोऽयं यायिनां मङ्गलप्रदः" इति च

कल्याणकृत् त्रि० कल्याणं शुभं शास्त्रविहितं करोति कृ—क्विप् ६त० । १शास्त्रविहितकर्म्मकारके "नहि कल्याणकृत् कश्चिद्दुर्गतिं तात! गच्छति" गीता २कल्याणकरमात्रे च त्रि० ।

कल्याणवत् त्रि० कल्याण+अस्त्यर्थे मतुप् मस्य वः । मङ्गलयुक्ते त्रिका० स्त्रियां ङीप् ।

कल्याणवाचन न० ६त० । शास्त्रविहितकर्त्तव्यकर्म्मणः प्राक्कर्त्तव्ये ब्राह्मणादिद्वारा कल्याणयुक्तमन्त्रविशेषवाचने । तत्प्रकारो यथा "ओं स्वः कर्त्तव्येऽस्मिन् कर्म्मणि कल्याणं भवन्तोऽधिब्रुवन्तु" इति प्रार्थिते ब्राह्मणैः "ओं कल्याणम्" इति त्रिरुक्ते "ओं पृथिव्यामुद्धृतायान्तु यत् कल्याणं पुरा कृतम् । ऋषिभिः सिद्धगन्धर्व्वैस्तत् कल्याणं सदास्तु नः" इति यथेमामित्यस्य लौगाक्षिऋषिरनुष्टुप्छन्दो ब्रह्मा देवता कल्याणवाचने विनियोग इति स्मृत्वा "ओं यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां शूद्राय चार्य्याय च स्वाय चारणाय च प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृध्यतामुपमादो नमतु" यजु० २६,२, इति च पठेत् ।

कल्याणवीज पु० कल्याणं बीजं यस्य । मसूरे राजनि० ।

कल्याणिका स्त्री कल्याण+संज्ञायां कन् अत इत्त्वम् । मनःशिलायाम् राजनि० ।

कल्याणिन् त्रि० कल्याण+अस्त्यर्थे इनि । १कल्याणयुक्ते स्त्रियां ङीप् सा च २बलानामौषधौ राजनि० ।

कल्याण्यादि पु० पाणिन्युक्ते ढक्प्रत्ययेनङादेशनिमित्तभूते शब्दगणे स च गणः "कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृष्टि जरती बली बदी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री" काल्याणिनेय इत्यादिः ।

कल्यापाल पु० कल्यां सुरां पालयति पाल—अण् उप० स० । शौण्डिके त्रिका० । ण्वुल् । कल्यापालकोऽप्यत्र ।

कल्ल कूजने अशब्दे च भ्वा० आत्म० अक० सेट् । कल्लते अकल्लिष्ट चकल्ले प्रनिकल्लति कल्लः । [तथात्वम् ।

कल्ल त्रि० कल्ल-अच् । बधिरे त्रिका० । तस्य शब्दाश्रोतृत्वात्-

कल्लत्व न० कल्लस्य भावः त्व । १स्वरस्य भेदने । हेमच० २बाधिर्य्ये च ।

कल्लोल पु० कल्ल-बा० ओलच्, कम् जलं लोलं चपलं यस्माद्वा अत्र नित्यं अनुस्वारस्य लत्वम् नि० तस्यानुनासिकत्वं च । १महातरङ्गे, अमरः "कालिन्दीजलकल्लोलकोलाहलकुतूहली" उद्भटः । "कल्लोलाः सलिलनिधेरवाप्य पारम्" माघः २हर्षे च ३वैरिणि त्रि० मेदि० । कल्लोलोऽस्त्यत्र पुष्करा० इनि । कल्लोलिन् कल्लोलयुक्ते देशे नद्यां स्त्री । "कल्लोलिनीवल्लभमल्ललक्ष्मीः" महाना० स जातोऽस्य तार० इतच् । कल्लोलित जातमहातरङ्गे त्रि०

कव स्तुतौ वर्णने च भ्वा० आत्म० सक० सेट् । कवते अकविष्ट । चकवे णिच्–कावयति ते ऋदित् अचकावत् । प्रनिकवते

कवक पु० कु-अच् संज्ञायां कन् । १ग्रासे, २भूच्छत्राके, न० हेमच० । "लशुनं गृञ्जनञ्चैव पलाण्डुं कवकानि चेति" अभक्ष्ये मनुः । 'देवतार्थं हविः शिग्रुं लोहितान् व्रश्चनांस्तथा । अनुपाकृतमांसानि विड्जानि कवकानि

च"। अभक्ष्ये याज्ञ० "कवकानि कुलाकाराणि" मिता०।

कवच पु०कं वातं वञ्चति वञ्च-मूल० क कृतनीत्वा० उणा० अच वा ।१गर्द्दभाण्डे वृक्षे २पटहवाद्ये च मेदि०। ३सन्नाहे मात्रत्राणे योद्धृभिर्युद्धकाले शस्त्राघातरक्षणार्थमङ्गे धार्य्ये लौहादिनिर्म्मिते वर्म्मणि पु०न०अमरः। कवचलक्षणादिकं युक्तिकल्पतरावुक्तं यथा—

"खड्गादीनान्तु गणना पूर्व्वमेव निदर्शिता। अस्त्रात्मनैव निर्द्दिष्टः कवचादिरपीष्यते। तल्लक्षणं संक्षेपेण प्रवक्ष्यामि निबोधत। काष्ठं चर्म्म सवल्कं च लयमेतत्तु दुष्करम्। यथोत्तरं गुणयुतं यथापूर्व्वन्तु निन्दितम्। शरीरान्तरकत्वन्तु लघुत्वं दृढ़ता तथा। दुर्भेद्यतेति कथितः कवचे गुणसंग्रहः। सच्छिद्रतातिगुरुता तनुता सुखभेद्यता। कवचानां विनिर्दिष्टः समासाद्दोषसंग्रहः। अत्र वर्णो विनिर्दिष्टः क्रमादेवं चतुर्विधः। सितोरक्तस्तथा पीतः कृष्णो ब्रह्मादिषु क्रमात्। केचित् कुर्व्वन्ति कुशलाः कवचं धातुसम्भवम्। कनकं रजतं ताम्रं लौहं तेषु यथाक्रमम्"। अधिकं वर्म्मशब्दे वक्ष्यते। "यथा शस्त्रप्रहाराणां कवचं प्रतिवारणम्। तथा दैवोपघातानां शान्तिर्भवति वारणम्" मत्स्य० त० पु०। "वितत्य शार्ङ्गं कवचं पिनह्य" "सन्नद्धकवचं रथम्" भट्टिः। कवचोजातोऽस्य तार०इतच्। कवचितः तद्धारके त्रि०। व्रः अस्त्यस्य इनि। कवचिन् तद्धारके त्रि० "नमो विल्मिने च कवचिने च" यजु० १६,३५ "यश्च कवचो यश्चाऽकवचो ऽमित्रो यश्चाज्मनि ज्या पाशैः कवचपाशैरज्मनाभिहतः शयाम्" अथ०११,१०,२२ स्त्रियां ङीप्। तन्त्रोक्ते मन्त्रसाधनाङ्गे ४वाक्यसंघभेदे।"मन्त्रेण म्रियते योगी रक्ष्यते कवचैर्यतः" इति तन्त्रोक्तेस्तस्य रक्षासाधकत्वेन वर्म्मतुल्यत्वात्तथात्वम्। "श्रीजगन्मङ्गलस्यास्य कवचस्य ऋषिः शिवः" "इदं कवचमज्ञात्वा योभजेत् कालिदक्षिणाम्" इति च भै०त०। कवचानि च देवताभेदे भिन्नानि तन्त्रोक्तानि तानि च तन्त्रसारे स्तोत्रकवचप्रकरणे अन्यत्र च दृश्यानि। तानि च"भूर्ज्जे विलिखितं चैतत् स्वर्णस्थं धारयेद्यदि। कण्ठे वा दक्षिणे बाहौ"इत्यादिना तन्त्रे विलिख्य कण्ठादौ धार्य्यतया विहितानि।

कवचपत्र पु०कवचं तल्लेखनसाधनं पत्रमिव वल्कलं यस्य। भूर्जपत्रवृक्षे शब्दच०। "भूर्जे विलिखितं चैतत्"तन्त्रोक्तेस्तद्वल्कलस्य कवचलेखनाधारत्वात्तथात्वम्।

कवचहर पु० कवचं हरति येन वयसा हृ-उद्यमे अच् उप० स०। कवचहरणोद्यमयोग्यवयस्के कुमारे "कवचहरः कुमारः" सि० कौ०। वर्म्महरादयोऽप्यत्र "वर्म्महरः कुमारः"रघुः।

कवटी स्त्री कौति शब्दायते कु-अटन् गौरा० ङीष्। कपाटे द्विरूपकोषः। तस्याः रोधनकाले शब्दायमानत्वात्तथात्वम्

कवती स्त्री कशब्दः अस्त्यस्या मतुप् स्त्रियां ङीप्। "कया नश्चित्र" इत्यादिकासु ऋक्षु। "कवतीषु रथन्तरम् गायतीति"ताण्ड्य०श्रुतिः।"कया नश्चित्र"इत्याद्यास्तिस्र ऋचः कवत्यः"सा०भा०माधवः।"अतिदेश्यं विनिर्वेतुं कवतीषु रथन्तरम्"अधिकर० मा०। "तास ऋचः" ऋ० ४,३१ सूक्ते आद्यास्तिस्रः। तत्रान्त्यायाः कवत्त्वाभावेऽपि आद्ययोर्द्वयोः कवत्त्वेन बाहुल्यात्तथात्वम्।

कवयि(यी) स्त्री काञ्चनात् वयते गच्छति स्थानान्तरं वयगतौ इन् कृदिकारान्तत्वात् वा ङीप्।(कइ) मत्स्यभेदे। त्रिका०। तस्या बहातिक्रमेण गमनात्तथात्वम्। "कवयी मधुरा स्निग्धा कषाया रुचिकारिणी। किञ्चित् पित्तकरी वातशमनी बलवर्द्धिनी"भावप्र० उक्तगुणा।

कवर पु० कौति कु-शब्दे-अरन्। पाठके उज्ज्व०पाठकाले तस्य शब्दायमानत्वात् तथात्वम्। कं जलं वृणोति वृ-अच्। २लवणे३अम्ले च पुंन०मेदि०। लवणस्य जलसंपर्कमात्रेण द्रवीभावेन जलरूपेण परिणामात् अम्लस्य च दर्शनमात्रेण मुखात् जलस्रावणात् तथात्वम्। के मूर्द्धनि वरम् वरणीयम्। ४केशभूषायां त्रि०। केशविन्यास एव स्त्रियां ङीष्। अन्यत्र तु टाप्। सा च। ५वरपुष्पायां (बावुइ) शब्दच०। "कवरीभृतोमलयजार्द्रमिव व्याकीर्णमाल्यकवरां कवरीं तरुण्याः" माघः। "व्याकीर्णमाल्येन कर्बुरवर्णाम्"मल्लि० ६कर्बुरवर्णे पु० ७तद्वति त्रि० हेमा०। कव-स्तुतौ अरन्। ८खचिते ९संपृक्ते त्रि० हलायुधः। गौरा० ङीष्। १०बर्बरायाम्(बावुइ)मेदि०। तस्याः कवरीतुल्यत्वात्तत्त्वम्।

कवरकी स्त्री कवरं किरति क्षिपति कॄ-बा० ड गौरा० ङीष्। बन्द्याम् तस्याः बन्धनागारे कवरबन्धनाभावेन तथात्वम्।

कवर्ग पु० कघटितोवर्गः एकस्थानोत्पत्तिकसमूहः। कखगघङरूपेषु वर्णेषु तेषां कण्ठस्थानोत्पत्तिकत्वेन तथात्वम्। ततः वर्गान्तात् भवार्थे शब्दत्वात् छ। कवर्गीय तद्भवे त्रि०।

कवल पु०केन जलेन वलते वल-चलने अच्।१ग्रासे "मुस्ताप्ररोहकवलावयवानुकीर्णम्" "आस्वादवद्भिः कवलैस्तृणानाम्"रघु०रोगनाशार्थं भावप्र०उक्ते द्रव्यभेदस्य २क्रियाभेदे

च। तत्करणविधिगुणौ भावप्र०उक्तौ यथा। "वातपित्तकफघ्नस्य द्रव्यस्य कवलं सुखे। अर्द्धं निक्षिप्य संचर्व्य निष्ठीवेत् कवले विधिः। कवलः कुरुते काङ्क्षां भक्ष्येषु, हरते कफम्। तृष्णां शोषं च वैरस्यं दन्तचालञ्च नाशयेत्"। के जले वलते वच्। (केल्लामाछ) २मत्स्यभेदे शब्दच०। पुंस्त्वेऽपि स्त्रियां जातित्वात् ङीष्। तस्य ङीवा। कवड़ोऽप्यत्र।

कवलप्रस्थ पु० कवलस्य प्रस्थः। कवलयोग्यपरिमाणभेदे तस्य प्रस्थपरत्वेऽपि कर्क्यादि०न आद्युदात्तता।

कवलिका स्त्री कवल इव इवार्थे कन्। (पुलट्टिष) इति ख्याते व्रणचिकित्साङ्गे औषधभेदे "ततः कल्केनाच्छाद्य नातिस्निग्धां नातिरूक्षां कवलिकां दत्त्वा वस्त्रपट्टेन बध्नीयात्" "घनां कवलिकां दत्त्वा मृदु चैवापि पट्टकम्" "ततः कवलिकां दत्त्वा वेष्टयेत् सुसमाहितः" सुश्रु०

कवलित त्रि०कवलं करोति कवल+णिच्—कर्मणि—क्त। १ग्रस्ते २भुक्ते ३व्याप्ते च जटा०।

कवष त्रि० कौति कु—शब्दे बा०अषच्। १सच्छिद्रे कवाटादौ तस्य पिधानकाले शब्दायमानत्वात्तथात्वम्। स्त्रियां गौरा० ङीष्। "इन्द्र! दुरः कवष्योधावमानाः" यजु०२,४, "कवष्यः सशुषिरा, सच्छिद्र एव शब्दप्रसरात् कौतेरौणादिकोऽषच् प्रत्ययः" वेददी०। "कवष्योन व्यचस्वतीः" यजु०२०,६०, "होता यक्षद्दुरोदिशः कवष्यः" २१,२४,

कवष् त्रि०कु—शब्दे असुन् वेदे षत्वम्। सच्छिद्रे कवाटादौ सच्छिद्रस्य शब्दायमानात्तथात्वम्। "कष्व्याःसतीः कवषः इन्द्र! शुम्भमानाः" यजु० २९,५, "कवषः कु—शब्दे कुवन्ति शब्दं कुर्वन्ति कवषः कुवतेरसुन्प्रत्ययः षत्वमार्षम् कपाट्यः पिधानसमये शब्दं कुर्वाणाः सशुषिरा या" वेददी०

कवस पु० कु—अतसनीत्यादिना असच्। १कवचे सन्नाहे २कराटकजातिभेदे च उज्ज्व०।

कवाट न० कु—भावे अप् कवं शब्दमटति, कं वातं वटति वट वेष्टने वा अण् उप० स०। द्वाररोधके (कपाट) ख्याते काष्ठादिमये पदार्थे अमरः तस्य द्वारपिधानकाले शब्दायमानत्वात् वातरोधकत्वाच्च तथात्वम् "उरःश्रिया तत्र च गोपुरस्फुरत्कवाटदुर्द्धर्षतिरःप्रसारिता" नैष०। "मोक्षद्वारकवाटपाटनकरी काशीपुराधीश्वरी" अन्नदास्त०। कवाटपरिमाणादिकं वृ०स० उक्तं यथा। "विस्ताराधं भवेद्गर्भो भित्तयोऽन्याः समन्ततः। गर्भपादेन विस्तीर्णं द्वारं द्विगुणमुच्छ्रितम्। उच्छ्रायात् पादविस्तीर्णा शाखा तद्वदुदुम्बरः। विस्तारपादप्रतिमं बाहुल्यं शाखयोः स्मृतम्। त्रिपञ्चसप्तनवभिः शाखाभिस्तत् प्रशस्यते"। तत्काष्ठनियमश्च ज्यो०त० भारतोक्तः "चौरद्रुमोद्भवं दारु गृहेषु न निवेशयेत्। लताधिवासं विहगैर्निवासमपीडितम्। गजैर्विभग्नञ्च तथा विद्युन्निर्घातपीडितम्। चैत्यदेवालयोत्पन्नं वज्रभग्नं श्मशानजम्। देवाद्यधिष्ठितं दारु नीपनिम्बविभीतकान्। कण्टकिनोऽसारतरून् वर्जयेत् गृहकर्मणि। वटाश्वत्थौ च निर्गुण्डीं कोविदारविभीतकौ। पलाशं शाल्मलीञ्चैव पलाशञ्च विवर्जयेत्। विस्ताराद् द्विगुणोच्छ्रायं द्वारं कुर्यात्तथा गृहम्"। अधिकं गृहशब्दे वक्ष्यते। अल्पार्थे ङीप्। कवाटी स्वल्पकवाटे स्त्री।

कवाटघ्न त्रि० कवा(पा)टं हन्ति घ्नता "शक्तौ हस्तिकवा(पा)टयोः" पा० हन—टक्। कवाटहननशक्ते चौरभेदे।

कवाटवक्र न० कवाटं वक्रं यस्मात्। (कवाटबेटु) वृक्षभेदे।

कवार न० कं जलं वृणोति आश्रयत्वेन अण् उप०स०। पद्मे त्रिका०।

कवारि अ०कुत्सितोऽरिः कुगति०स० बा० कोः कवादेशः। कुत्सिते शत्रौ "दैवी पूतिर्दक्षिणादेवयाज्या न कवारिभ्यो न ते पृणन्ति" ऋ० १०,१०७,३।

कवासख त्रि०कुत्सितस्य सखा टच् पृषो०नि०। कुत्सितसहाये। "अपाप शक्रस्ततनुष्टिमूहति तनुशुभ्रं मघवा यः कवासखः" ऋ० ५,३४,३। "कुत्सितपुरुषसहायः" भा० निरुक्ते तु कवासखः यस्य कपूयाः सखायः इत्युक्तं तत्र बहुव्रीहौ टजपि निपात्यः इति भेदः।

कवि पु० कव—वर्णने गतौ कु—शब्दे वा इन्। क्रान्तदर्शिनि—सर्वज्ञे—१ब्रह्मणि हेमच०। तस्य सर्वगतत्वात् सर्वज्ञत्वात् क्रान्तदर्शित्वाच्च तथात्वम्। "कविर्मनीषी परिभूः स्वयम्भूः" १ श्रु०। "कविः क्रान्तदर्शी सर्वदृक् "नान्योऽतोऽस्ति द्रष्टा" इति श्रुतेः" शाङ्क०भा०। "कविं पुराणमनुशासितारम्" गीता। २स्तुत्ये "होता वा देव्या कवी" यजु०२८,१०। "दृषग्वरजं भेषजंकविम्" यजु०२८,२४। ३वाल्मिके मुनौ तस्य प्रथमं काव्यकर्त्तृत्वात् तथात्वम्। ४कविताकारके "मन्दः कवियशःप्रेप्सुः" रघुः "नैकमोजः प्रसादो वा रसभावविदः कवेः" माघः। "इदं कविभ्यः पूर्वेभ्यो नमोवाक प्रशास्महे" उत्तर०च० (काव्यम्) "कविः कुर्वन्तु कीर्त्तिं प्रीतिञ्च विन्दति" चन्द्रा०। "एकोऽभूत्नलिनात् परश्च पुलिनात् वल्मीकतश्चापरस्ते सर्वे कवयस्त्रिलोकगुरवस्तेभ्यो नमस्कुर्महे"

उद्भटः। "रवेः कवेः किं समरस्य सारम्" विदग्धमु०। ६भृगुसुते ऋषिभेदे ६तत्पुत्रे शुक्राचार्य्ये तस्य कविपुत्रत्वेऽपि जन्यजनकयोरभेदोपचारात्तत्त्वम् "भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः" भा०आ०६६अ०। ७सूर्य्ये मेदि०।८कल्किदेवस्य ज्यष्ठभ्रातरि "कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रका:" इति कल्किशब्दे उदाहृतम्। ६चौरयोधे "वेधस्थाने रणे भङ्गो दुर्गे खड्गिः प्रजायते। कविप्रवेशनं तत्र योधाघातस्य तत्र वै" ज्यो० त०। 'कवियौरयोद्घा" रघु०। १०खलीने स्त्री मेदि०। वा ङीप्। ११क्रान्तदर्शिनि त्रि०।"अक्षर्रा स्तवे-षु कवयो वयन्ति" यजु० १६,८। "कवयः क्रान्तदर्शिनः" वेददी० १२मेधाविनि त्रि० "अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः" मनुः। "क ज ते याचिता कविः" यजु० २३,२६। "कविर्मेधावी" वेददी०। १३चाक्षुषमनोः वैराजप्रजापतेः कन्याजातसुतभेदे पु०। "कन्यायां भरतश्रेष्ठ! वैराजस्य प्रजापतेः। जरुः पूरुः शतद्युम्नस्तपस्वी सत्यवाक् कविः" हरिवं०२अ०।१४स्तोतरि त्रि० "इन्द्रमग्निं कविच्छदा" ऋ०३,१२,३। "कविच्छदा कवीनां स्तोतॄणामुचितफलप्रदानेनोपच्छन्दकौ" भा०।

कविक पु०कवि+स्वार्थे कन् कचित् स्वार्थकप्रत्ययस्य प्रकृतिलिङ्गव्यतिक्रम इति। खलीने (लागाम) हलायुधः।

कविकल्पद्रुम पु० वोपदेवकृते धातुपाठग्रन्थभेदे "कविकल्पद्रुमो नाम मयैनिष्पाद्यतेऽत्र च" इति तदुपोद्घाते।

कविकल्पलता स्त्री काव्यरचनायामुपयोगिग्रन्थभेदे।

कविका स्त्री कवि+स्वार्थे कन्। (लागाम) खलीने अमरः २कविकापुष्पे राजनि०। ३कवयीमत्स्ये(कइ)भावप्र०। कवयीशब्दे तद्गुणाद्युक्तम् तत्र कवयोत्यत्र कविकेति पाठान्तरम्।

कविजेष्ठ पु० कविषु ज्येष्ठः। १वाल्मीकिमुनौ। त्रिका०।

कविता स्त्री कवेः वर्णयितुर्भावः तल्। कविकर्मणि काव्ये काव्यशब्दे विवृतिः। "केषां नैषा भवति कविताकामिनी कौतुकाय" प्रस० रा०। त्व।कवित्वमप्यत्र न०।"कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा" सा०द० अग्निपुरा०। "स ·र्वति कविताघृतनदीनदीनः पर्यन्ते परमपदलीनः प्रभवति" कर्पूरस्तवः। "ता ज कवित्वना कवी" ऋ०८,४३, "कवित्वना कवित्वेन" भा० प्रपो० साधु।

कविपुत्र पु० कवेः भृगुसुतस्य पुत्रः ६त०। १भार्गवे २शुक्राचार्य्ये "भृगोः पुत्रः कविर्विद्वान् शुक्रः कविसुतो ग्रहः" भारते आदिपर्व्वणि ६६अध्याये। कविसुतादयोऽप्यत्र।

कविय न० कं सुखमजति अज—क वीभावः।१खलीने त्रिका०। 'कवियं कविकोच्यते" त्रिकाण्डे क्लीवतया पाठात् शब्दकल्पद्रुमे पुक्लीवतोक्तिः चिन्त्यमूला।

कविरहस्य न० हलायुधकृते श्लोकात्मके अर्थभेदेन एकाकारधातुभेदप्रदर्शके ग्रन्थभेदे।

कविराज पु० कवीनां राजा कविः राजेव वा टच् समा०। कविश्रेष्ठे। "श्रीहर्षं कविराजराजमुकुटालङ्कार हीरः सुतम्" नैषधम्। "श्रीविश्वनाथकविराजकृतिप्रणीतं साहित्यदर्पणममुं स्थगितप्रमेयम्" सा०द०टी०रामचरणश्लोके कविराजशब्दस्य तदर्थतैव चिकित्सके प्रसिद्धेस्तु मूलं न दृश्यतेऽतो न तदर्थकता।

कविरामायण पु० कविना कवित्वेन रामः अदमं यस्य तत्त्वम्। वाल्मीकिमुनौ। शब्दरत्ना०।

कविल त्रि०कु–क्त वर्णने वा बा०इलच्।१स्तोतरि २शब्दकारके च। ततः प्रगद्या० चतुरर्थ्याम् ञ्य। काविल्य तत्सन्निकृष्टदेशादौ त्रि०।

कविविदिन् त्रि० कविं कवित्वं वेत्ति विद—णिनि। काव्यवेत्तरि कवौ जटा० स्त्रियां ङीप्।

कवीय न०कवि+स्वार्थे छ कचित् स्वार्थिकस्यापि प्रकृतिलिङ्गातिक्रमः। खलीने (लागाम) जटाधरः;

कवीयत् त्रि० कविरिवाचरति कविं स्तोतारम् इच्छति वा कवीय—नाम० शतृ। १कविसदृशे २आत्मनः स्तोतुरिच्छौ च। "अपो वसान पवते कवीयन् व्रजम्" ऋ० ६,५,१४,१। २कवीयन् कविरिवाचरन् कवयः स्तोतारः तानिच्छन् वा" भा०। एतेन अस्याः श्रुते: कवीयःशब्दोदाहरणतयोपन्यासः प्रामादिकः। स्त्रियां ङीप्।

कवीयस् त्रि० अतिशयेन कविः ईयसु। कवितरे स्त्रियां ङीप् कवीयसी। तरप्। कवितर तत्रार्थे। तमप्। कवितम बहूनां मध्ये अतिशयस्तोतरि काव्यकारकेन च त्रि०

कवूल न०नीलकण्ठताजकोक्ते कंबुलयोगे कंबुलशब्दे लक्षणादि। "इत्यशालि कवूलं तदुत्तरोत्तमसच्यते" नील०ता०

कवेल न० कं जलं विशति स्पृशाति विल—स्तृतौ अण् उप० स०। कुवलये शब्दच०।

कवोष्ण न० कुत्सितमुष्णं कुगतिसमासः कोः कवादेशः। १ईषदुष्णे स्पर्शे २तद्वति त्रि० अमरः। "पयः पूर्वैः सनिश्वासैः कवोष्णमुपभुज्यते" रघुः।

कव्य न०कवयः क्रान्तदर्शिनः पितरस्तेषिदं यत्,क्रूयते पितृभ्यः

कु शब्दे कर्म्मणि यत् वा । पित्रुद्देशेन दीयमानेऽन्नादौ अमरः । हव्यकव्यदानपात्रापात्रब्राह्मणानाह स मनुः “श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः । अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् । एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् । पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि । दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् । तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः । सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते । एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः । ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च । न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः । यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित् । तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुड़ान् । ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथाऽपरे । तपःस्वाध्यायनिष्ठाश्च कर्म्मनिष्ठास्तथाऽपरे । ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः । हव्यानि तु यथान्यायं सर्व्वेष्वेव चतुर्ष्वपि । अश्रोत्रियः पिता यस्य पुत्त्रः स्याद्वेदपारगः । अश्रोत्रियो वा पुत्रः स्यात् पिता स्याद्वेदपारगः । ज्यायांसमनयोर्विद्यात् यस्य स्याच्छ्रोत्रियः पिता । मन्त्रसम्पूजनार्थन्तु सत्कारमितरोऽर्हति । न श्राद्धे भोजयेन्मित्रं धनैः कार्य्योऽस्य संग्रहः । नारिं न मित्रं यं विद्यात् तं श्राद्धे भोजयेद्द्विजम् । यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च । तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हविःषु च । यः सङ्गतानि कुरुते मोहाच्छ्राद्धेन मानवः । स स्वर्गाच्च्यवते लोकाच्छ्राद्धमित्रो द्विजाधमः । सम्भोजनी साभिहिता पैशाची दक्षिणा द्विजैः । इहैवास्ते तु सा लोके गौरन्धेवैकवेश्मनि । यथेरिणे बीजमुप्त्वा न वप्ता लभते फलम् । तथाऽनृचे हविर्द्दत्त्वा न दाता लभते फलम् । दातॄन् प्रतिग्रहीतॄंश्च कुरुते फलभागिनः । विदुषे दक्षिणां दत्त्वा विधिवत् प्रेत्य चेह च । कामं श्राद्धेऽर्च्चयेन्मित्रं नाभिरूपमपि त्वरिम् । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् । यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्य्युं छन्दोगन्तु समाप्तिकम् । एषामन्यतमो यस्य भुञ्जीत श्राद्धमर्च्चितः । पितॄणां तस्य तृप्तिः स्याच्छाश्वती साप्तपौरुषी । एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः । मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम् । दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत् । न ब्राह्मणं परीक्षेत दैवे कर्म्मणि धर्म्मवित् । पित्र्ये कर्म्मणि तु प्राप्ते परीक्षेत प्रयत्नतः । ये स्तेनपतितक्लीवा ये च नास्तिकवृत्तयः । तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् । जटिलञ्चानधीयानं दुर्बलं कितवन्तथा । याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् । चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः । प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा । यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च । कुशीलवोऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे । भृतकाध्यापको यश्च भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ । अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा । ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः । अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः । पित्रा विवदमानश्च कितवो मद्यपस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी । धनुःशराणां कर्त्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुक् द्यूतवृत्तिश्च पुत्राचार्य्यस्तथैव च । भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च । हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्य्यस्तथैव च । स्रोतसां भेदको यश्च तेषाञ्चावरणे रतः । गृहसंवेशको दूतो वृक्षारोपक एव च । श्वक्रीड़ी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलवृत्तिश्च गणानाञ्चैव याजकः । आचारहीनः क्लीवश्च नित्यं याचनकस्तथा । कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च । औरभ्रिको माहिषिकः परपूर्व्वापतिस्तथा । प्रेतनिर्हारकश्चैव वर्जनीयाः प्रयत्नतः । एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् । द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् । ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते । अपाङ्क्तदाने यो दातुर्भवत्यूर्द्ध्वं फलोदयः । दैवे हविषि पित्र्ये वा तं प्रवक्ष्याम्यशेषतः । अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्त्रादिभिस्तथा । अपाङ्क्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते । दाराग्निहोत्रसंयोग कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवि-

त्तिस्तु पूर्व्वजः । परिवित्तिः परीवेत्ता यया च परिविद्यते । सर्व्वे ते नरकं यान्ति दातृयाजकपञ्चमाः । भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः । धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः । परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ । पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः । तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च । दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम् । अपाङ्क्त्यो यावतः पाङ्क्त्यान् भुञ्जानाननुपश्यति । तावतां न फलं तत्र दाता प्राप्नोति बालिशः । वीक्ष्यान्धो नवतेः, काणः षष्टेः, श्वित्री शतस्य तु । पापरोगी सहस्रस्य, दातुर्नाशयते फलम् । यावतः संस्पृशेदङ्गैर्ब्राह्मणान् शूद्रयाजकः । तावतां न भवेद्दातुः फलं दानस्य पौर्त्तिकम् । वेदविच्चापि विप्रोऽस्य लोभात् कृत्वा प्रतिग्रहम् । विनाशं व्रजति क्षिप्रमामपात्रमिवाम्भसि । सोमविक्रयिणे विष्ठा, भिषजे पूयशोणितम् । नष्टं देवलके दत्तम्, अप्रतिष्ठन्तु वार्द्धुषौ । यत्तु वाणिजके दत्तं, नेह नामुत्र तद्भवेत् । भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे । इतरेषु त्वपाङ्क्त्येषु यथोद्दिष्टेष्वसाधुषु । मेदोऽसृङ्मांसमज्जास्थि वदन्त्यन्नं मनीषिणः । अपाङ्क्त्योपहता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः । तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान् । अग्र्याः सर्वेषु वेदेषु सर्व्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेयाः पङ्क्तिपावनाः । त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् । ब्राह्मदेयात्मसन्तानो ज्येष्ठसामग एव च । वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः । शतायुश्चैव विज्ञेया ब्राह्मणाः पङ्क्तिपावनाः" भाग० ४,१८,१८ । "वत्सेन पितरोऽर्य्यम्णा कव्यं क्षीरमधुक्षतेति" पृथिव्याः पितृभिः कव्यरूपक्षीरदोहनात् तस्य तदन्नत्वम् । कु-शब्दे कर्मणि यत् । २स्तुत्ये "कव्योऽसि कव्यवाहनः" ताण्ड्य० ब्रा० । 'कव्यः स्तुत्यः" भा० । कवनं कवः कु-भावे अप् कवे साधु यत् । ३स्तवसाधकस्तोतरि । "वीतो जनस्य दिव्यस्य कव्यैरधि" ऋ० ९, ९१,२ । "कव्यैः कवनसाधुभिः स्तोतृभिः" भा० ।

कव्यबाल पु० कव्यं बलते ददाति अत्र बल-दाने आधारे घञ् । १वह्नौ तत्र दाने हि पितॄणां दाननिष्पत्तेस्तथात्वम् । कव्यं बल्यते दीयते बल-दाने सम्प्रदाने घञ् । २पितृदेवभेदे त्रिका० "कव्यबालोऽनलः सोमः यमश्चैवार्य्यमा तथा । अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः" वायु० पु० अस्य वा डः कव्यवाडोऽप्यत्र ।

कव्यवाह पु० कव्यं वहति प्रापयति पितॄन् वह-अण् उप० स० । अग्नौ । कव्यवाहनशब्दे विवृतिः ।

कव्यवाह् पु० कव्यं वहति वह-ण्वि । पितृभ्यः कव्यप्रापके वह्नौ ।

कव्यवाहन पु० कव्यं वह-वहति "कव्यपुरीषपुरीष्येषु ञ्युट्" पा० वह-ञ्युट् । पितृभ्यः कव्यप्रापके वह्नौ "त्रयो वा अग्नयो, हव्यवाहनो देवानां, कव्यवाहनः पितॄणां, सहरक्षा असुराणाम्" तैत्ति० २,५,८,६ । "अग्नये कव्यवाहनाय स्वाहा" यजु० २,२९ । "अग्नये कव्यवाहनायानुब्रूहीति तत्स्विष्टकृते हव्यवाहनो देवानां, कव्यवाहनः पितॄणामिति" शत० ब्रा० २,६,१,२० ।

कश शब्दे अक०वोप०गतौ शासने च सक० पा०भ्वा०पर० सेट् । कशति अकशीत्-अकाशीत् चकाश । प्रनिकशति । "अन्योऽनन्नमभिचाकशीति" श्रुतिः । यङ्लुकि लटो रूपम् । उभयपदीत्येके ।

कश पु० कशति शब्दायते शास्ति ताडयति वा करणस्य कर्त्तृविवक्षया कर्त्तरि कश-अच् । अश्वादेस्ताडनसाधने चर्म्मवस्त्रादिनिर्मिते पदार्थभेदे (चावुक्) "स राजा तं कशेनाताडयत्" भा०व०१९६ अ० । अमरे अस्य स्त्रीत्वमाह । "जघान कशया मोहात्तदा राक्षसवन्मुनिम्" भा० आ० १७७अ० । "सम्यक्कशात्रयविचारवता नियुक्तः" माघः ५,१०श्लो० व्या० मल्लि० ।

"अत्र कशाः कशाघातास्तासां त्रयमुत्तममध्यमाधमेषु यथासङ्ख्यं मृदुसमनिष्ठुरहितिरूपं त्रितयन्तस्य विचारः 'एतेषु निमित्तेषु अङ्गेष्वेवन्ताड्यः' इति विमर्षः तद्वता तज्ज्ञेन । यथाह भोजः "मृदुनैकेन घातेन दण्डकालेऽश्वं ताडयेत् । तीक्ष्णं मध्यं पुनर्द्वाभ्यामधमन्यत्रिष्ठुरैस्त्रिभिः । उपवेशेऽथ निद्रायां स्खलिते दुष्टचेष्टिते । वडवालोकनौत्सुक्ये बहुगर्व्वितहेषिते । सन्त्रासे च दुरुत्थाने विमार्गगमने भये । शिक्षात्यागस्य समये सञ्जाते चित्तविभ्रमे । दण्डः प्रयोज्यो वाहानां कालेषु द्वादशस्वपि । पौनःपुन्याभीतमाहन्यात् तस्कन्धे च वाजिनम् । विभ्रान्तचित्तमधरे त्यक्तशिक्षञ्च ताडयेत् । प्रहेषितं स्कन्धयोर्बाडवालोकिनं तथा । उपवेशे च निद्रायां कटिदेशे च ताडयेत् । दुश्चेष्टितं मुखे हन्यादुन्मार्गप्रस्थितं तथा । जघने स्खलितं हन्यात्सेतमार्गे

ईरुत्थितम् । यः कुराठप्रकृतिर्वाजी तं सर्वत्रैव ताड़येत्” इति । अधिकमश्वशब्दे उक्तम् । मांसरोहिण्यां स्त्री भावप्र०

कशकृत्स्न पु० ऋषिभेदे तस्यापत्यम् शिवा० अण् । काशकृत्स्न-व्याकरणशास्त्रकारके ऋषिभेदे “इन्द्रश्चन्द्रः काशकृत्स्ना-पिशली शाकटायनः । पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः” वोपदेवः । ततः उपका० गोत्रप्रत्ययस्य बहुषु लुक् । कशकृत्स्नेन निर्वृत्तम् चतुरर्थ्याम् अरीहणादि० वुञ् । काशकृत्स्नक तन्निर्वृत्तादौ त्रि० ।

कशस् न० कशति नीचं कश— गतौ असुन् । जले निघ० ।

कशार्ह त्रि० कशामर्हति अर्ह—अण् उप० स० । कशाताड़नयोग्ये दुष्टे अश्वादौ अमरः ।

कशिक पु० कशति हिनस्ति सर्पम् कश-शासने बा० इक । नकुले तस्य पादाविव पादावस्य उपमानपूर्वकत्वेऽपि हस्त्या० पाठात् नान्त्यलोपः । कशिकपादः ।

कशिपु पु० कशति दुःखम् कश्यते वा कश—गतिशासनयोः मृगय्वा० नि० । १अन्ने आच्छादने च २अमरः । एकपत्रभा ३भक्ताच्छादनयोश्च विश्वः । पुंस्यन्नान्नित्यत्वे च अयं द्विवचनान्तः इति मेदि० । ४शय्यायाम् । “क्लृप्तैः कशिपुभिः कान्तं पर्य्यङ्कव्यजनाशनैः” भाग० ३, २२,१६ । “चेदस्ति भूः किं कशिपोः प्रयासैः” भा०२,२, ५ । “कशिपोः शय्यायाः” श्रीधरः । ५आसनभेदे च “क्वचिच्छये धरोपस्थे तृणपर्णाश्मभस्मसु । क्वचित् प्रासादपर्य्यङ्के कशिपौ वा यथेच्छया” भाग० ७,१३,३७। वेदे अस्य क्लीवत्वमपि “प्रत्युच्याश्वं दक्षिणेन वेदिम् हिरण्मयं कशिपूपस्तृणाति तस्मिन् होतोपविशति” “हिरण्मययोः कशिपुनोः पुरस्तात् प्रत्यङ्ङध्वर्य्युः” शत० ब्रा० १३,४, ३,१ । “कशिपु आसनभेदः । “होत्रध्वर्य्यू हिरण्मययोः कशिपुनोरुपविष्टौ” कात्या० १५,६,१ । कशिपुशब्देन मसूरक उच्यते । “फलकमिति पितृभूतिः” सं०व्या०। “अध्वर्य्युयजमानौ कूर्चयोः” “फलकयोर्वा, होतृब्रह्मोद्गातारः कशिपुषु” कात्या० २०,२,२,१८,२०,२१ । “सपादमासनं कूर्चः (कुरसीचौकी) “पादरहितं फलकं कशिपुशब्देन स्वहासनं मसूरक उच्यते” संप० व्या० । तेन स्वहासनं पादरहितं फलकं च कशिपुशब्दार्थः ।

कशीका स्त्री कश+बा० ईकन् । सूतवत्सायां नकुल्याम् ।“आगधिता परिगधिता या कशीकेव जङ्गहे” ऋ० १,१२६,६ । “कशीका सूतवत्सा नकुली सा यथा पत्या सह चिरं क्रीड़ति न कदाचिदपि विसृजति” भा०

कशु पु० चेदिपुत्रे राजभेदे । “यथा चिच्चैद्यः कशुः शतमुष्ट्राणाम्” ऋ० ८,५,३७ ।

कशेरक पु० यक्षभेदे । “मणिभद्रोऽथ धनदः श्वेतभद्रश्च गुह्यकः । कशेरकोगण्डकण्डुः” इत्युपक्रम्य“एते चान्ये च बहवो यक्षाः शतसहस्रशः” इति भा०स०१०अ०कुबेरसभावर्णने उक्तम् ।

कशेरु(रू) स्त्री कं जलं वातं वा शृणाति शॄ—“के श्र एरक् चास्य”उणा०उ वा । तृणकन्दभेदे (केशुर) उज्ज्व० । दीर्घान्तःत्वष्टुश्चतुर्दश्यां२कन्यायां सा च नरकासुरेण गजरूपेण हृता तत्कथा हरिवं०१२१अ०यथा“त्वष्टुर्दुहितरं भौमः (नरकासुरः) कशेरुमगमत्तदा । गजरूपेण जग्राह रुचिराङ्गीं चतुर्दशीम्। प्रमथ्य तां वरारोहां नरकोवाक्यमब्रवीत्” उप्रत्ययान्तः पुंसि च। “किं कुर्व्वता वराहेण खाद्यन्ते हि कशेरवः” । उज्ज्व० चन्द्रः । ह्रस्वान्तं क्लीवमाह अमरः । “शृङ्गाटकं विसं द्राक्षा कशेरु मधुकं सिता” सुश्रु०। स्वार्थे कन् । तत्रार्थे न०। तद्भेदगुणा भावप्र०उक्ता यथा । “कशेरु द्विविधं तत्तु महद्राजकशेरुकम् । मुस्ताकृति लघु स्याद्यत्तच्चिचोटमिति स्मृतम् । कशेरुकद्वयम् शीतं मधुरं तुवरं गुरु । पित्तशोणितदाहघ्नं नयनामयनाशनम् । ग्राहि शुक्रानिलश्लेष्मरुचिस्तन्यकरम्परम् । भारतवर्षस्य नवखण्डान्तर्गते ३खण्डभेदे पु०“ऐन्द्रं कशेरुमत्कं किल ताम्रपर्णमन्यद्गभस्तिमदतश्च कुमारिकाख्यम् । नागं च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्वसंज्ञमिति भारतवर्षमध्ये”सि०शि०। पुराणसर्वस्वे विष्णुपुराणे च“भारतस्यास्य वर्षस्य नव भेदान्निशामय । इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान् । नागद्वीपस्तथा सौम्यो गान्धर्वस्त्वथ वारुणः। अयन्तु (कुमारिकाख्यः)नवमस्तेषां द्वीपः सागरसंवृतः । योजनानां सहस्रन्तु द्वीपोऽयं दक्षिणोत्तरात् । पूर्व्वे किराता यस्यान्ते पश्चिमे यवनाः स्थिताः । ब्राह्मणाः क्षत्रियावैश्या मध्ये शूद्राश्च भागशः । इज्यायुद्धवणिज्याद्यैर्वर्त्तयन्तोव्यवस्थिताः । वेदस्मृतिमुखाशाम्याः पारिपात्रोद्भवा मुने ! । नर्मदासुरसाद्याश्च नद्योविन्ध्यविनिर्गताः । तापीपयोष्णीनिर्व्विन्ध्याकावेरीप्रमुखा नदी । गोदावरीभीमरथीकृष्णवेन्यादिकास्तथा । सह्यपादोद्भवानद्यः स्मृताः पापभयापहाः । कृतमालाताम्रपर्णीप्रमुखामलयोद्भवाः । त्रिसामा ऋषिकुल्याद्या महेन्द्रप्रभवाः स्मृताः । ऋषिकुल्याकुमाराद्याः शुक्तिमत्पादसम्भवाः । शतद्रु-

चन्द्रभागाद्या हिमवत्पादनिःसृताः । आसां नद्युपनद्यश्च सन्त्यन्याश्च सहस्रशः । पश्चिमे कुरुपञ्चालमध्यदेशादयो जनाः । पूर्वदेशादिकाश्चैव कामरूपनिवासिनः । ओड्राः कलिङ्गमगधा दाक्षिणात्याश्च सर्वशः । तथाऽपरान्ताः सौराष्ट्राः शूद्राभीरास्तथार्बुदाः । मारुकामालवाश्चैव पारियात्रनिवासिनः । सौवीराः सैन्धवा हूणाः शाल्वाः शाकलवासिनः । मद्रारामास्तथाम्बष्ठाः पारसीकादयस्तथा । आसां पिबन्तः सलिलं वसन्ति सहिताः सदा । चत्वारि भारते वर्षे युगान्यत्र महामुने ! । कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित् । तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् । पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते । तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने ! । यतो हि कर्मभूरेषा ततोऽन्या भोगभूमयः । अत्र जन्मसहस्राणां सहस्रैरपि सत्तमः । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् । गायन्ति देवाः किल गीतकानि धन्यास्तु ये भारतभूमिभागे स्वर्गापवर्गास्पदहेतुभूते भवन्ति भूयः पुरुषाः सुरत्वात् । कर्माण्यसंकल्पिततत्फलानि संन्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिंल्लयं ये त्वमलाः प्रयान्ति । जानीम नैतत् क्व वयं विलीने स्वर्गप्रदे कर्मणि देहबन्धम् । प्राप्स्याम धन्याः खलु ते मनुष्या ये भारते चेन्द्रियविप्रहीनाः । नववर्षन्तु मैत्रेय ! जम्बुद्वीपमिदं मया । लक्षयोजनविस्तारं संक्षेपात् कथितं मया” ४एकदण्डस्त्रि पुंन० इवा० स्वार्थे कन् । एकास्थिभेदे स्त्री अमरः । तृणकन्देऽपि स्त्री रत्नमाला “कशेरुकस्त्वातिशुक्ला श्लेष्मकोपकं यथाह सुश्रुतः । दिवास्वप्नेत्याद्युपक्रमे“कशेरुकशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मा कोपमापद्यते” । एतद्रसस्य कूलचरमांसभोजनेऽनुपानम् यथाह अनुपानवर्गे सुश्रुतः “कूलचराणां शृङ्गाटककशेरुकासवः” । इदञ्च सुश्रुते मधुरवर्गे उक्तम् । तद्वाक्यं मधुरवर्गे दृश्यम् । एतस्य श्लेष्मपित्तप्रकोपकत्वेन क्रिमिकारित्वमुक्तम् सुश्रु० “माषपिष्टान्नविदलविसशालूककशेरुकैरित्युपक्रमे “श्लेष्मा पित्तं च कुप्यति । क्रिमीन् बहुविधाकारान् करोति विविधाश्रयान्” ।

कशेरुमत् पु० यवनराजभेदे । “इन्द्रद्युम्नोहतः कोपाद् यवनश्च कशेरुमान्” हरिवं० १६ अ० । भा० स० १२ अ० ।

कशोक त्रि० कश–ताडने बा० ओक । हिंसके राक्षसादौ “मा त्वा दभन् दुरेवासः कशोकाः” ऋच० ५,२,४ ।

कश्चन अव्य० कः+विभक्त्यन्तात् चन इति मुग्ध० पाणिन्यमरमते पृथक् पदमिति भेदः । (केचो) इत्यर्थे “दमघोषसुतेन कश्चन प्रतिशिष्टः प्रतिभानवानथ” माघः । चित् । कश्चिदप्यत्र अव्य० एकपदं द्विपदं वेति भेदः । “कश्चित् कान्ताविरहगुरुणा स्वाधिकारे प्रमत्तः” मेघ० ।

कश्मल न० कश–कल मुट् च । १मूर्च्छायां, २मोहे, “कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्” गीता । “मा राजन् ! कश्मलं घोरं प्राविशो बुद्धिनाशनम्”भा० व० ४४ अ० । वेदे पृषो० वस्य शः । कश्मश तत्रार्थे “विद्वेष कश्मशं भयमन्नित्रेषु निदध्मसि” अथ० ३पापे च शब्दमा० ४मलिने त्रि० हेम० ।

कश्मीर पु० कश–ईरन् मुट् च । स्वनामख्याते देशभेदे । ततो भवादौ कच्छा० अण् । काश्मीर तद्देशभवे त्रि० । कश्मीरोऽभिजनोऽस्य तक्षशिला० अञ् । काश्मीर पित्रादिक्रमेण तद्देशवासिनि त्रि० स्त्रियामुभयत्र ङीप् । तस्य राजन्यपि तथा । बहुषु तु तस्य लुक् । कश्मीराः । स्त्रियां भर्गादि० न लुक् । काश्मीरी । “अत ऊर्द्धं जनपदान् निबोध गदतो मम” इत्युपक्रमे “कश्मीराः सिन्धुसौवीराः गान्धारा दर्शकास्तथा” भा० भी० ६अ० जम्बुखण्डविभागे देशकीर्त्तने । तद्देशसीमादि शक्तिसङ्गमतन्त्रे ७पटले उक्तं यथा—“शारदामठमारभ्य कुङ्कुमाद्रितटान्तकः । तावत् कश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः” ।

कश्मीरजन्मन् न० कश्मीरदेशे जन्म यस्य । कुङ्कुमभेदे । कश्मीरजादयोऽप्यत्र । तद्भेदगुणादि भावप्र० उक्तं यथा—“कुङ्कुमं मसृणं रक्तं काश्मीरं पीतकं वरम् । सङ्कोचं पिशुनं धीरं वाह्लीकं शोणिताभिधम् । कश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत् । सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् । वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरं मतम् । केतकीगन्धयुक्तं स्यात् मध्यमं सूक्ष्मकेशरम् । कुङ्कुमं पारसीके यत् मधुगन्धि तदीरितम् । ईषत्पाण्डुरवर्णं तदधमं खलु केशरम् । कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् । तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम्”

कश्य न० कशात्वनेन कश–शब्दे बा० करणे यत् । १मद्ये वैज० । मद्यपानेन यथेष्टशब्दकरणात् तथात्वम् । कशामर्हति दण्डा० यत् । २कशाघातयोग्ये अश्वमध्यभागे त्रि० अमरः ।

कश्यप पु० कश्यं पिबति पा–क उप० स० । ब्रह्मणो मानसपुत्रस्य मरीचेः पुत्रे ऋषिभेदे तस्य तन्नामनिरुक्ति-

यथा—"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः। कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यपः" मार्कण्डे॰ पु॰। तस्य वंशादिकथा "ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश। अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा। क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः। कद्रूश्च मनुजव्याघ्र! दक्षकन्यैव भारत!। एतासां वीर्य्यसम्पन्नं पुत्रपौत्रप्रपौत्रकम्" भा॰ आ॰ ६५ अ॰ एतासामपत्यभेदास्तत्तच्छब्दे दृश्याः। "कश्यपाय त्रयोदश" मनुः।

तस्य च वंशादिकथा भाग॰ अन्यथैवोक्ता यथा—"पत्नी मरीचेस्तु कलासुषुवे कर्दमात्मजा। कश्यपं पौर्णमासं च ययोरापूरितं जगत्" भाग॰ ४,१,१२ श्लो॰ इत्युक्त्वा तत्पत्नीनां दक्षप्रजापतिकन्यानां नामभेदः नामान्तरेण तार्क्ष्यनामकस्य तस्य च अन्या अपि चतस्रः दक्षकन्याः पत्न्य आसन्" इतिदर्शनार्थं उक्तं यथा-"ततः प्राचेतसोऽसिक्न्यामनुनीतः स्वयम्भुवा। षष्टिं सञ्जनयामास दुहितॄः पितृवत्सलाः। दश धर्म्माय कायेन्दोर्द्विषट् त्रिनव दत्तवान्। भूताङ्गिरःकृशाश्वेभ्यो द्वे द्वे तार्क्ष्याय चापराः "नामधेयान्यमूषां त्वं सापत्यानाञ्च मे शृणु" इत्युपक्रमे (काय कश्यपाय द्विषट् षट्द्विगुणाः द्वादश त्रयोदशेत्यर्थः श्रीधरः) उत्तरश्लोकादित्यादीनां त्रयोदशानां वंशकीर्त्तनन्तथार्थः। "तार्क्ष्याय नामान्तरं प्राप्ताय कश्यपायैव अपरा अवशिष्टाश्चतस्रः इति" श्रीधरः) "तार्क्ष्यस्य विनता कद्रूः पतङ्गी यामिनीत्यपि। पतङ्ग्यसूत पतगान् यामिनी शलभानथ। सुपर्णाऽ(विनता) सूत गरुडं साक्षाद् यज्ञेशवाहनम्। सूर्य्यसूतमनूरुञ्च कद्रूर्नागाननेकशः" इति। तार्क्ष्यनामककश्यपस्य पत्नीपुत्राद्युक्त्वा प्रसिद्धनामककश्यपस्य पत्नीपुत्रनामादिकमुक्तं यथा तत्रैव

"अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्। अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इरा। मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः। तिमेर्यादोगणा आसन् श्वापदाः सरमासुताः। सुरभेर्महिषा गावो ये चान्ये द्विशफा नृप!। ताम्रायाः श्येनगृध्राद्या मुनेरप्सरसां गणाः। दन्दशूकादयः सर्पा राजन्!। क्रोधवशात्मजाः। इरायाभूरुहाः सर्वे यातुधानाश्च सौरसाः। अरिष्टायास्तु गन्धर्वाः काष्ठाया द्विशफेतराः। सुता दनोरेकषष्टिस्तेषां प्राधानिकान् शृणु। द्विमूर्द्धा शम्बरोऽरिष्टो हयग्रीवो विभावसुः। अयोमुखः शङ्कुशिराः स्वर्भानुः कपिलोऽरुणः। पुलोमा वृषपर्वा च एकचक्रोऽनुतापनः। धूम्रकेशो विरूपाक्षो विप्रचित्तिश्च दुर्जयः। स्वर्भानोः सुप्रभां कन्यामुवाह नमुचिः किल। वृषपर्वणस्तु शर्मिष्ठां ययातिर्नाहुषो बली। वैश्वानरसुतायाश्च चतस्रश्चारुदर्शनाः। उपदानवी हयशिरा पुलोमा कालका तथा। उपदानवीं हिरण्याक्षः क्रतुर्हयशिरां नृप। पुलोमा कालका च द्वे वैश्वानरसुते तु कः। उपयेमेऽथ भगवान् कश्यपो ब्रह्मनोदितः। पौलमाः कालकेयाश्च दानवा युद्धशालिनः। तयोः षष्टिसहस्राणि यज्ञघ्नांस्ते पितुः पिता (अर्जुनः)। जघान स्वर्गतो राजन्नेक इन्द्रप्रियङ्करः। विप्रचित्तिः सिंहिकायां शतञ्चैकमजीजनत्। राहुज्येष्ठं केतुशतं ग्रहत्वं य उपागताः। अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः। यत्र नारायणो देवः स्वांशेनावतरद्विभुः। विवस्वानर्य्यमा पूषा त्वष्टाऽथ सविता भगः। धाता विधाता वरुणो मित्रः शक्र उरुक्रमः। विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम्। मिथुनञ्च महाभागा यमं च यमुनां तथा। सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि। छाया शनैश्चरं लेभे सावर्णिञ्च मनुं ततः। कन्यां च तपतीं या वै वव्रे संवरणं पतिम्। अर्य्यम्णो मातृका पत्नी तयोश्चर्षणयः सुताः। यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता। पूषानपत्यः पिष्टादो भग्नदन्तोऽभवत् पुरा। योऽसौ दक्षाय कुपितं जहास विवृतद्विजः। त्वष्टुर्दैत्यात्मजा भार्य्या रचना नाम कन्यका। सन्निवेशस्तयोर्जज्ञे विश्वरूपश्च वीर्य्यवान्। तं वव्रिरे सुरगणाः स्वस्त्रीयं द्विषतामपि। विमतेन परित्यक्ता गुरुणाङ्गिरसेन यत्" भाग॰ ६,६ अ॰। कश्यपस्यैव तत्पत्नीनामपि नामान्तरकल्पनया विरोधः परिहरणीयः।

तस्य पृथिव्याः प्रतिग्रहरूपेण प्राप्तिकथादि भा॰ हरिवं॰ ५२। यथा "भार्गवेण पितुः श्राद्धे कश्यपाय निवेदिता। मांसमेदोऽस्थिदुर्गन्धा दिग्धा क्षत्रियशोणितैः। रजस्वलेव युवतिः कश्यपं समुपस्थिता। स मां ब्रह्मर्षिरप्याह किमुर्व्वि! त्वमवाङ्मुखी। वीरपत्नीव्रतमिदं धारयन्ती विषीदसि। साहं विज्ञापितवती कश्यपं लोकभावनम्। पतयो मे हता ब्रह्मन्! भार्गवेण महात्मना। साहं विहीना

विक्रान्तैः क्षत्रियैः परराष्ट्रजिद्भिः। विधवा शून्यनगरा न धारयितुमुत्सहे। तन्मह्यं दीयतां भर्त्ता भगवंस्तत्समो नृपः। रक्षेत् सग्रामनगरां यो मां सागरमालिनीम्। स श्रुत्वा भगवान् वाक्यं बाढमित्यब्रवीत् प्रभुः। ततो मां मानवेन्द्राय मनवे संप्रदत्तवान्। सा मनुप्रभवं पुण्यं प्राप्येक्ष्वाकुकुलं महत्। विपुले नास्मि कालेन पार्थिवात् पार्थिवं गता। एवं दत्तास्मि मनवे मानवेन्द्राय धीमते। भुक्ता राजसहस्रैस्तु महर्षिकुलसम्भवैः। बहवः क्षत्रियाः शूरा मां जित्वा दिवमाश्रिताः"। अयं च गोत्रप्रवर्त्तकः। आर्षयज्ञे गोत्रयज्ञे च विवृतिः। "त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्" यजु० ३,६२। "कश्यपस्यैतन्नामकस्य प्रजापतेः" वेददी०। तस्यापत्यानि विदा० अञ् बहुषु लुक्। कश्यपास्तद्गोत्रापत्येषु "कश्यपानां काश्यपवत्सारासितेति"। "कश्यपासितदेवलेति वा"८। "शाण्डिलानां कश्यपशाण्डिलयोः" आ० श्रौ० १२,१४,७। "एते कश्यपाः। एतेषां परस्परमविवाहः" नारा०।

काश्यपिर्गरुड़ाग्रजः इत्यत्र तु भवार्थे इञ्।

१मृगभेदे २मत्स्यभेदे च मेदि०। स्त्रियां जातित्वात् ङीष्। ४कच्छपे "अपामुद्ग्रो मासां कश्यपः" यजु० २४,२७। "कश्यपः कच्छपः" वेददी०। ४श्यावदन्ते त्रि०। "प्रमृग्भ्यश्चान्यत् कच्छकश्यपयाचमानवर्ज्जम्" कात्या० १०,२,२५। "कच्छघ्नं बधिरं मन्यन्ते कश्यपश्च श्यावदन्तमिति केचित्" कर्कः।

कश्यपनन्दन पु० ६त०। गरुडे हेमा०। कश्यपसुतादयोऽप्यत्र

कष बधे भ्वा० पर० सक० सेट्। बधोऽत्र निष्पीड़नं घर्षणञ्च। कषति अकषीत्-अकाषीत्। चकाष प्रनिकषति। "रुद्धेन कषन्निवालसत् कषपाषाणनिभे नभस्तले" नैष०। अस्य परस्मैपदिषु पा०ग०पाठात् शब्दकल्पद्रुमे च तथा पाठात् आ० उक्तिर्भ्रान्तिमूला। 'पामानं कषमाणम्' इत्यादिप्रयोगस्तु ताच्छीलिकचानशैवोपपत्तेः। "निमूलसमूलयोः कषः" "कषादिषु यथाविध्यनुप्रयोगः" पा० णमुल् अनुप्रयोगश्च। निमूलकाषं कषति समूलकाषं कषति समूलं निमूलं वा कषतीत्यर्थः सि० कौ०। "समूलकाषं चकषुरदन्तः" भट्टिः। "सर्वकूलाभ्रकरीषेषु कषः" पा० कर्मरूपेषु सूपपदेषु खच्। सर्वङ्कषः कूलङ्कषः अभ्रङ्कषः करीषङ्कषः"

कष पु० कष-अच्। स्वर्णघर्षरूपज्ञानार्थे (कषटी) पाषाणभेदे इतरप्रस्तरस्य स्वर्णेन घर्षणात्तस्येव तथात्वम्। अश्वादेस्ताड़नी करणसाधने शाणाख्ये पदार्थे अमरः। "कषपाषाणनिभे नभस्तले" नैष० "सुवर्णरेखेव कषे निवेशिता" मृच्छ०।

कषण त्रि० कष्यते कष-कर्मणि ल्युट्। १अपक्वे शलाटौ शब्दच०। भावे ल्युट्। २घर्षणे ३चालने न०। "कषणकम्पनिरस्तमहाहिभिः" माघः। "कषणेन कम्पनेन" मल्लि०

कषा स्त्री कष्यते ताड्यतेऽनया कष-बा० करणे-अच्। अश्वादेस्ताड़नसाधने चर्मादिनिर्मिते पदार्थे (चावुक) रमानाथः। "तस्क्रेण पृष्ठे कषया च ताडितः" भाग० ३,३०,२२।

कषाकु पु० कष-आकु। अग्नौ सूर्य्ये च उणादिको०।

कषाय पुंन० कषति कण्ठम्, कष-आय-अर्शआदि। (कषा) १रसभेदे २तद्वति त्रि०। तस्य कारणगुणादि सुश्रुते उक्तं यथा—"तत्र शैत्यरौक्ष्यलाघववैशद्यवैष्टम्भ्यगुणलक्षणो वायुस्तस्य समानयोनिः कषायो रसः सोऽस्य शैत्यात् शैत्यं वर्द्धयति, रौक्ष्यात् रौक्ष्यं, लाघवात् लाघवं, वैशद्यात् वैशद्यं, वैष्टम्भ्यात् वैष्टम्भ्यमिति" "योवक्त्रं परिशोषयति जिह्वां स्तम्भयति कण्ठं बध्नाति हृदयं कर्षति पीडयति च स कषायः"। "कषायः संग्राहकोरोपणः स्तम्भनः शोधनोलेखनः शोषणः पीडनः क्लेदोपशोषणश्चेति। स एवं गुणोऽप्येक एवात्यर्थमुपसेव्यमानः पीड़ास्यशोषोदराध्मानवाक्यग्रहमन्यास्तम्भगात्रस्फुरणचुमचुमायनाकुञ्चनाक्षेपणप्रभृतीन् जनयति" इति च। कषायवर्गश्च। "न्यग्रोधादिरम्बष्ठादिः प्रियङ्ग्वादीरोध्रादिस्त्रिफलाशल्लकीजम्ब्वाम्रबकुलतिन्दुकफलानि कतकशाकफलपाषाणभेदकवनस्पतिफलानि सालसारादिश्च प्रायशः कुरवककोविदारकजीवन्तीचिल्लीपालङ्क्यसुनिषण्णकप्रभृतीनि नीवारकादयो मुद्गादयश्च समासेन कषायोवर्गः" सुश्रु०। अस्योत्पत्तिकारणमपि तत्रोक्तं यथा—"तस्मादाप्योरसः परस्परसंसर्गात् परस्परानुग्रहात् परस्परानुप्रवेशाच्च सर्वेषु सर्वेषां सान्निध्यमस्त्युत्कर्षापकर्षात्तु ग्रहणम्। स खल्वाप्योरसः शेषभूतसंसर्गाद्विदग्धः षोढा विभज्यते" इत्युपक्रम्य। पृथिव्यनिलगुणबाहुल्यात् कषायः इति। तत्र तस्य च पित्तकफघ्नत्वमपि तत्रैवोक्तम् "मधुराम्लकषायाः पित्तघ्नाः कटुतिक्तकषायाः श्लेष्मघ्नाः" इति। "केचिदाहुरग्नीषोमीयत्वाज्जगतो रसाः द्विविधाः सौम्या आग्नेयाश्च, तत्र मधुरतिक्तकषायाः सौम्याः, कट्वम्ललवणा आग्नेयाः मधुराम्ललवणाः स्निग्धाः गुरु-

वश्च कटुतिक्तकषाया रूक्षा लघवश्च। सौम्याः शीता आग्नेयाश्चोष्णाः” इति सुश्रुते अन्यमतेनोक्ता तच्च दूषयित्वा पूर्वदर्शितमतमादृतम् भावप्र० तदेतद्विष्टतम् यथा—“कषायो रोपणो ग्राही स्तम्भनः शोधनस्तथा। लेखनः पीड़नः सौम्यः शोषणो वातकोपनः। कफशोणितपित्तघ्नो रूक्षः शीतो लघुर्मतः। त्वक्प्रसादनमालस्य स्तम्भनो विषदो मतः। जिह्वाया जाड्यकृत् कण्ठस्रोतसाञ्च विबन्धकृत्”। रोपणः व्रणस्य, स्तम्भनो गात्राणां, शोधनो व्रणस्य, लेखनो व्रणाद्युत्सन्नमांसस्य, शोषणोव्रणमज्जादीनाम्। पीड़नो हृदयस्य वातकारित्वात्, सौम्यः सोमादुत्पन्नः”। अथातियुक्तस्य कषायस्य गुणास्तत्रोक्ताः “सोऽतिचयुक्तो गुदाध्मानहृत्पीडाक्षेपणादिकृत्”। अभयायामत्र विशेषः। “प्रायशः स्तम्भनं प्रोक्तं कषायमभयां विना”। २रागद्वेषादिदोषे। “आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति” छा० उ०। “तस्मै मृदितकषायाय वार्क्षारादिरिव कषायो रागद्वेषादिदोषः, सत्वस्य रञ्जनरूपत्वात् ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितोमृदितो विनाशितो यस्य नारदस्य तस्मै” भा०। “कषाये कर्मभिः पक्वे ततो ज्ञानं प्रजायते” वेदा० प० कर्मणां रागद्वेषादिदोषरूपकषायनाशकत्वमुक्तम्। “लयविक्षेपाभावेऽपि चित्तवृत्तेः रागादिवासनया स्तब्धीभावात् अखण्डवस्त्वनवलम्बनं कषायः” इति वेदान्तसारोक्तलक्षणे ४निर्विकल्पकसमाधिविघ्नभेदे “सकषायं विजानीयात् शमप्राप्तं न चालयेत्”। “सकषायं कलुषितं मे चित्तमिति, विज्ञाय शमेऽद्वितीयात्मनि निवेशयेत्” विद्वन्म०। ५रक्ते अनुरागान्विते ६सुरभौ ७अपटौ च केशवः। “चूताङ्कुरास्वादकषायकण्ठः” कुमा०। “कषायः रक्तः” मल्लि०। “निद्राकषायितविपाटललोचनेषु” माघः “कषायितान्यपटूकृतानि” मल्लि०। ८रागे ९क्वाथभेदे १० निर्यासे च “रागे क्वाथे कषायोऽस्त्री निर्यासे सौरभे रसे” वैज०। कषायः जातोऽस्य तार० इतच्, तत्करोतीति णिच्—कर्मणि क्त वा। कषायित जातकषाये कषायीकृते च त्रि० “असुनैव कषायितस्तनी” कुमा० “कषायितः रञ्जितः” मल्लि०। ११विलेपने १२अङ्गरागे च विश्वः। “कर्णार्पितोलोध्रकषायरूक्षे” कुमा० “कषायेण विलेपनेन” मल्लि०।

कषायश्च स्वरसादिकः पञ्चविधः भावप्र०दर्शितो यथा। “स्वरसश्च तथा कल्कः क्वाथश्च हिमफाण्टकौ। ज्ञेयाः कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्”तेषां पञ्चानां लक्षणानि तु तत्तच्छब्दे दृश्यानि। १३श्योनाकवृक्षे पु० जटाधरः। १४कलियुगे अमरटीका रागदोषहेतुत्वात्तस्य तथात्वम् १५लोहितवर्णयुक्ते त्रि० मेदि० १६रक्तपीतमिश्रितवर्णे अमरटीका। १७धववृक्षे पु०राजनि० १८क्षुद्रदुरालभायां स्त्री राजनि०। देशे गम्ये अस्मात् पानशब्दस्य णत्वम्। कषायपाणोदेशभेदः।

कषायपाक पु० सुश्रुतोक्ते द्रव्यविशेषाणां क्वाथभेदे। तत्प्रकारो यथा “केचिदाहुस्त्वक्पत्रमूलादीनां भागन्तच्चतुर्गुणजलमावाप्य,चतुर्भागावशेषं निःक्वाथ्यापहरेदित्येषः कषायपाककल्पः”इति परमतमुक्ता“एतत्तु न सम्यक्”इति तन्मतं दूषयित्वा द्रव्यपरिमाणभेदं दर्शयित्वा च “तत्रान्यतमपरिमाणसम्मितानां यथायोगं त्वक्पत्रमूलादीनामातपपरिशोषितानां छेद्यानि खण्डशश्छेदयित्वा, भेद्यानि अणुशोभेदयित्वाऽष्टगुणेन षोडशगुणेन वा जलेनाभिषिच्य स्थाल्यां चतुर्भागावशिष्टं क्वाथयित्वाऽपहरेदित्येष कषायपाककल्पः” इति स्वमतेनोक्ता पक्षान्तरमप्युक्तम् “अथ वा तत्रोदकद्रोणे त्वक्पत्रमूलादीनां तुलामावाप्य-चतुर्भागावशिष्टं निःक्वाथ्यापहरेदित्येष कषायपाककल्पः” इति,। अयञ्च कल्पो विशेषानुक्तविषये विशेषनिर्देशे तु तथैव ग्राह्यः” यथाह तत्रैव “स्नेहभेषजतोयानां प्रमाणं यत्र नेरितम्। तत्रायं विधिराख्येयो निर्दिष्टं तत्तदेव तु। अनुक्तद्रव्यकार्ये तु सर्वत्र सलिलं मतम्। कल्ककाथावनिर्देशे गणात्तस्मात् विनिर्दिशेत्”। [भेदे राजनि०।

कषाययावनाल पु० नित्यकर्म०। तुवरयावनाले धान्य-

कषायवासिक पु० सुश्रुतोक्ते कीटभेदे। “हृषीमुखः कृष्णगोधा यश्च कषायवासिकः” इत्युपक्रमे “त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः इति विभज्य—तेषां सौम्यत्वं श्लेष्मप्रकोपकत्वञ्चोक्तम् “तस्य मन्दमूत्रविषत्वञ्च तत्रैवोक्तं यथा “चिपिटपिच्चटककषायवासिकसर्षपवासिकतोटकवर्च्चःकीटकौण्डिल्यकाः शकृन्मूत्रविषाः”।

कषायित त्रि०कषायो रक्तपीतवर्णादिर्जातोऽस्य तार०इतच्। जातकषाये तत्करोतीति णिच्—कर्मणि क्त। कषायीकृते च “असुनैव कषायितस्तनी”इति कुमा०।

कषायिन् पु०कषायोनिर्यासोऽस्त्यस्य इनि।१शालवृक्षे जटा० २खर्जूरवृक्षे ३लकुचवृक्षे च राजनि० ४कषाययुक्ते त्रि०

कषि त्रि० कष–हिंसायां इन्। हिंसाकारके उणादिकोषः।

कषीका स्त्री कष–हिंसने "कषिदूषिभ्यामीकन्" उणा० कर्मणि ईकन्। १पक्षिजातौ उज्ज्वल०। शब्दकल्पद्रुमे ह्रस्वमध्यपाठः प्रामादिकः उणादिसूत्रे ईकनो दीर्घतया निर्देशात्। इत उत्तरत्र फर्फरीकादयश्चेत्यादौ सर्वत्र दीर्घादेशानुवृत्तेः दीर्घादेरेवोचितत्वात्। कषत्यनया करणे ईकन्। २खनित्रे स्त्री शब्दचि०।

कषेरुका स्त्री कशेरुकावत्। (केशुर) तृणकन्दे रायमुकुटः।

कष्कष पु० कषित्यव्यक्तं शब्दमुच्चार्य्य कषति कष–हिंसने अच्। कृमिभेदे। "येवाषासः कष्कषास एजत्काः शिपवित्नुकाः। दृष्टश्च हन्यतां कृमिरुतादृष्टश्च हन्यताम्" अथ० ५,२३,७।

कष्ट न० कष–क्त "कृच्छ्रगहनयोः कषः" पा० नेट्। १पीड़ायाम् व्यथायाम्, "कष्टं युद्धे दश येषाः स्नुता मे" भा०आ० २अ०। "एकस्य कष्टस्य न यावदन्तम्" पञ्चत० २पीड़ायुक्ते ३गहने ४पीड़ाकारके च त्रि० "बन्धनानि च कष्टानि परप्रेष्यत्वमेव च" मनुः। "मोहादभूत् कष्टतमः प्रबोधः" रघु०। "शीतातपादिकष्टानि सहतेऽन्यानि सेवकः" पञ्चत० "ततः कष्टतरं नु किम्" गीता। "एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे"। "क्रोधजेऽपि गणे विद्यात् कष्टमेतत्त्रिकं बुधाः" मनुः। ५कष्टसाध्ये बहूपायेन साध्ये रिपुरोगादौ। "स हि कष्टतमो रिपुः" "कृतज्ञं धृतिमन्तं च कष्टमाहुररिं बुधाः" मनुः। रोगाणां कष्टता च बह्वायाससाध्यता यथोक्तं सुश्रुते "केवलः समदेहाग्नेः सुखसाध्यतमो गदः। अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रो व्याभिश्रलक्षणः। क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत्। पूर्वस्यां शान्तवेगायां न क्रियासङ्करो हितः। गुणालाभेऽपि सपदि यदि सैव क्रिया हिता। कर्त्तव्यैव तदा व्याधिः कृच्छ्रसाध्यतमो यदि"। तथा च रोगः त्रिविधः साध्यः असाध्यः याप्यश्च। तत्र साध्योऽपि द्विविधः अल्पायाससाध्यो बह्वायाससाध्यश्च बह्वायाससाध्यस्यैव कष्टता। कष्टसाध्याश्च रोगाः सुश्रुते तत्तत्स्थाने उक्तास्तत एवावसेयाः। कष्टसाधने ६पापे च। "कष्टाय क्रमणे" पा० क्यङ् "कष्टायते कष्टं पापं कर्त्तुमुत्सहते इत्यर्थः" सि० कौ०। अलङ्कारोक्ते ७दोषभेदे यत्र सन्ध्यादिना अर्थस्य दुर्बोधत्वं तत्र कष्टत्वम् "कष्टं तदर्थावगमो दूरायत्तो भवेद् यदि" इत्यक्तलक्षणात् तच्च सम्भितम् अतएव सा० दर्पणे "सद्यो विलसे षाल्मीलकष्टताः" इत्युक्तोदाहृतम् "उर्व्वसावत्र चार्वङ्गि! मर्वन्ते चार्वनस्थितिः" इदन्तु वाक्यगतम्। क्लिष्टत्वमप्यस्यैव नामान्तरं "अवाचकत्वं क्लिष्टत्वमिति" सा० द० पदगतदोषे उक्त्वा "क्षीरोदजावसति जन्मभुवः प्रसन्नाः" इति अत्र अर्थप्रतीतेर्व्यवहितत्वमिति तत् लक्षयित्वा क्षीरोदजालक्ष्मीस्तस्या वसतिः पद्मं तस्य जन्मभुवो जलानि" अर्थावबोधे व्यवधानं दर्शितम्। [त्रिका०। २पीडाकारके त्रि०।

कष्टकार पु० कष्टं करोति कृ–अण् उप०स०। १संसारे

कष्टरिपु पु० कर्म०। कष्टसाध्ये रिपौ स च मनुनोक्तलक्षणो यथा "प्राज्ञं कुलीनं शूरञ्च दक्षं दातारमेव च। कृतज्ञं धृतिमन्तञ्च कष्टमाहुररिं बुधाः" इति।

कष्टस्थान न० कष्टस्य स्थानम्। दुःखदस्थाने हारा०।

कस गतौ भ्वा० पर० सक० सेट्। कसति अकसीत्–अकासीत्। चकास–ज्वलादित्वात् कर्त्तरि वा ण। कासः। यङ् चनीकस्यते यङ्लुक् चनीकसीति–कस्ति। प्रनिकसति
उद्+ऊर्द्ध्वगतौ "उत्कसन्तु हृदयान्यूर्द्ध्वं प्राण उदीषतु" अथ० ११,९,२१"।
निस्+निर्+अपगतौ निष्कसति। णिचि निष्कासयति "निरकासयद्रविमपेतवसुम्" माघः।
वि+प्रकाशे। विकसति पङ्कजकलिका "फुल्लश्चैते विकासिते" अमरः "स प्रीतियोगात् विकसन्मुखश्रीः" कुमा०। "क्षणदृष्टिपातविकसद्वदनाम्" माघः। "विकसद्भिरास्यकमलैः कमलैः प्रमदाः" माघः "मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितम्" मालतीमा०। णिचि विकासयति व्यचीकसत्। "वचनेन चोपकुसुमं व्यचीकसत्" माघः। "वौ कषल सेत्था०" पा० इनि विकासी। वरच्। विकस्वरः "सदा रमन्ते कलभा विकस्वरैः" माघः।
अनु+वि+अनुरूपविकाशे "अन्तर्जलेऽनुविकसन्मधुमाधवीनाम्" भाग० ३,१५,१७।
प्रवि+प्रकर्षविकाशे प्रविकसति चिरायद्योतिताशेषलोके" माघः
सम्+सम्यग्गतौ सङ्कसुकः।

कस शातने गतौ च अदा० इदित् आत्म० सक० सेट् शातनमिह नाशनम्। कंस्ते अकंसिष्ट। चकंसे। प्रनिकंस्ते। कर्मणि कंस्यते। अकंसि।

कस शातने गतौ च सक० अदा० आत्म० सेट्। शातनमत्र नाशनम्। कस्ते अकसिष्ट। चकसे प्रनिकस्ते।

कस पु० कष–अच्। (कषटीपाथर) कषपाषाणे भरतः।

कसन पु० कसति हिनस्ति कस–ल्यु । १कासरोगे २लूताभेदे स्त्री ।"आखमूत्रविषा लृष्णा कसना चाष्टमी स्मृता" सुश्रु० लूताभेदकथने । "पिच्छिला कसनाद्यात् रुधिरं शीतलं स्रवेत्" सुश्रु० ।

कसनोत्पाटन पु० कसनं कासरोगम् उत्पाटयति उत्–पाटि–ल्यु । वासकवृक्षे, शब्दच० । "येन तेन प्रकारेण वासकः कासनाशकः" इति वैद्योक्तेस्तस्य तथात्वम् ।

कसर्णीर पु० सर्पभेदे । "एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्" तैत्ति० सं० १,५,४,१ । रस्य लत्वमपि "पैद्वो हन्ति कसर्णीलम् भेदः श्वित्रमुताशितम्" अथ० १०,४,५ । विषनाशकत्वे ।

कसाम्बु न० पितृभ्यः कव्यदानकाले देये जले । "उपासते पितरः स्वधाभिः" इत्युपक्रमे "इदं कसाम्बु चयनेन चितं तत्सजाता अवपश्यतेवत" अथ० १८,४,३७ ।

कसिपु पु० कशिपुवत् । अन्ने जटाधरः ।

कसेरु पु० कस–उ एरुगागमः । १कशेरौ, (केशुर) शूकरस्य प्रिये २जलकन्दभेदे च ।३कशेरुशब्दार्थे च राजनि०।

कसेरुका स्त्री कशेरुकावत् । १पृष्ठास्थ्नि राजनि० ।

कस्कादि पु०पाणिन्युक्ते विसर्जनीयस्य सत्वनिमित्ते शब्दगणे स च गणः "कस्कः कौतस्कुतः भ्रातुष्पुत्रः शुनस्कर्णः सद्यस्कालः सद्यस्क्रीः कांस्कान् सर्पिष्कुण्डिका धनुष्कपालं बर्हिष्पलं यजुष्पात्रं अयस्कान्तः तमस्काण्डः अयस्काण्डः मेदस्पिण्डः भास्कर अहस्करः आकृतिगणः"

कस्तम्भी स्त्री कं शिरोऽग्रभागं स्तभ्नाति स्तन्भ–अण् गौरा० ङीष् सुग्ध० मते ईप् । शकटस्याधःपतनवारणार्थं भीषादण्डाग्रोत्तम्भनार्थायां मेथौ "अथ यज्ञघने कस्तम्भीम्" शत० ब्रा० १,१, २,८ । "शकटस्याधःपतनं वारयितुमीषादण्डाग्रोत्तम्भनार्था मेधिः कस्तम्भी" भा० ।

क(का)स्तीर न० ईषत्तीरमत्र कुगति० समा० कोः कादेशः "कास्तीराजस्तुन्दे नगरे" पा० सूट् ।१नगरविशेषे२तज्जाते रङ्गे हेम० । हेमचन्द्रे कस्तीरमिति ह्रस्वपाठः प्रामादिकः पा० सूत्रे कास्तीरे दीर्घपाठदर्शनात् ।

कस्तूरी स्त्री कसति गन्धोऽस्याः दूरतः कस–ऊर–बा० तुट् च । मृगमदे मृगनाभिजाते गन्धद्रव्यभेदे स्वार्थे कन् । कस्तूरिका तत्रैव "तद्गुणपर्यायादि भावप्र०उक्तं यथा— "मृगनाभिर्मृगमदः कथितस्तु सहस्रभित् । कस्तूरिका च कस्तूरी वेधमुख्या तु सा स्मृता । कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत् । कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् । काश्मीरदेशसम्भूता कस्तूरी त्वधमा मता । कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः। कफवातविषच्छर्दिशीतदौर्गन्ध्यशोषहृत्" । "भस्य हिमाद्रेर्मृगनाभिगन्धि" कुमा० श्लोकव्या० मल्लिनाथेन "मृगनाभिःकस्तूरी तद्गन्धि कस्तूरीमृगाधिवासादित्युक्तं तेन हिमाद्रावपि तन्मृगस्य सञ्चारोऽस्तीति गम्यते । "कस्तूरीतिलकं ललाटपटले" विष्णुमूर्त्तिवर्णने ।"कस्तूरिकाजननशक्तिभृता मृगेण किं सेव्यते सुमनसां मनसापि गन्धः" रसग० । "कस्तूरिकामृगविमर्दसुगन्धिरेति" माघः । कस्तूरिकाहेतुर्मृगः कस्तूरिकामृगः ।

कस्तूरी(म)वल्लिका स्त्री कस्तूरीगन्धयुक्ता म(व)ल्लिका । (मुषकदाना) लताभेदे राजनि०वमध्यपाठःभावप्र०सम्मतः। तद्गुणा भावप्र०उक्ता यथा । "लता कस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा लघुः । चक्षुष्या भेदिनी श्लेष्मतृष्णा वस्त्यास्यरोगहृत्" अत्र लतेति विशेषपदोक्तेः कस्तूरिका वल्लिकेत्येवोचितम् ।

कस्मल न० कश्मलवत् । पापाद्यर्थे रायमुकुटः ।

कस्वर त्रि० कस–गतौ शातने च वरच् ।१गन्तरि २हिंसके च

काहय पु० कस्य सूर्यस्य हयः । सूर्याश्वे तस्यापत्यम् शिवा० अण् । काहय तदपत्ये पुंस्त्री । पाणिनिगणे कह्येति पाठः साधुः ।

कहूय पु०के–कप् हूयः कः सूर्यो हूयो यस्य । सूर्यह्वायके ऋषिभेदे । तस्यापत्यं शिवा०अण् । काहूय तदपत्ये पुंस्त्री ।

कहोड पु० ऋषिभेदे स च उद्दालकर्षिशिष्यः अष्टावक्रस्य पिता । "उद्दालकस्य नियतः शिष्य एको नाम्ना कहोड इति विश्रुतोऽभूत्" भा० व० १३२ अ० । अधिकमष्टावक्रशब्दे दृश्यम् । वा डस्य लः कहोलोऽप्यत्र । ततः अनुकम्पायां नीतौ च वा ठक् द्वितीयाजादेः सन्ध्यक्षरस्य च लुक् । कहिक अनुकम्पितकहोडे । वा इल । कहिल । च । कहिय इत्यादिरपि तत्रार्थे ।

कह्लार न० के जले ह्लादते ह्लाद–अच् पृषो० दस्य रः । श्वेतोत्पले । "आह्लादिकह्लारसमीरणाहिते" माघः । "मलयजलकह्लारचन्दनोत्पलपद्मकैः" सुश्रु० । तस्य गुणादि उत्पलशब्दे उक्तम् ।

कह्व पु०कं जलं ह्वयति स्पर्द्धते शुक्लरूपत्वात् ह्वे–क । बके धमरः। अस्यैव शिवादिगणे पाठमते अपत्ये अण् । काह्व तदपत्ये पुंस्त्री ।

कांशि पु० कंस भयार्थे बा० इञ् वेदे पृषो० सस्य शः। कंस-निर्मिते पात्रे "त्रींस्त्रीन् कंशोस्त्रिरात्रं, द्वौ द्वौ त्रिरात्रं चैकैकं षड्रात्रम्" कौषी०स्रु०।

कांस त्रि० कंसोदेशभेदोऽभिजनोऽस्य तक्षशिला० अञ्। कंसाधिष्ठितभोजदेशाभिजने नरादौ।

कांस्य न०कंसाय पानपात्राय हितं कंसीयं तस्य विकारः यञ् छलोपः। ताम्ररङ्गजधातुभेदे कंसशब्दे विवृतिः।"न पादौ धावयेत् कांस्ये कदाचिदपि भाजने" मनुः। अस्य शोधनविधिर्भावप्र० उक्तो यथा—"पत्त्रीकृत्य पत्त्राणि कांस्यस्याग्नौ प्रतापयेत्। निषिञ्चेत् तप्ततप्तानि तैले तक्रे च काञ्जिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा। एवं कांस्यस्य रीतेश्च विशुद्धिः सम्प्रजायते"। मारणविधिस्तत्रैव "अर्कक्षीरेण सम्पिष्टो गन्धकस्तेन लेपयेत्। समेन कांस्यपत्त्राणि शुद्धान्यम्लद्रवैर्मुहुः। ततो-मूषापुटे धृत्वा पचेद् गजपुटेन च। एवं पुटद्वयात् कांस्यं रीतिश्च म्रियते ध्रुवम्" तस्य गुणाः यथा—"कांस्यं कषायं तीक्ष्णोष्णं लेखनं विशदं सरम्। गुरु नेत्रहितं रूक्षं कफपित्तहरं परम्" भावप्र०। "कांस्यमुपहितसरोजसायतत्" माघः।

कांस्यकार पु०स्त्री कांस्यं तत्पात्रं करोति कृ-अण् उप०स०। (काँसारि)। जातिभेदे जातित्वात् स्त्रियां ङीष्। कंस-कारशब्दे विवृतिः। [भेदे हेमच०।

कांस्यनील पु०। कांस्येन कृतः नीलः। (कोमधाजल) अञ्जन-

काक पुंस्त्री कै-शब्दे कन्। स्वनामख्याते विहगभेदे स्त्रियां जातित्वात् ङीष् अण्डशावकयोः परतः ईत० पुंवत् काकाण्डः काकशावकः। "काकाश्नौलव्रं यमात् क्रौर्य्यम्" स्मृतिः "काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्लभम्" उद्भटः "काकः काकः पिकः पिकः" नीतिमा०। "काकाक्षो कामधरा काशोतलवाहिनी गङ्गा। कंसं जघान कृष्णः कम्बलवन्तं न बाधते शीतम्" विदग्धमु०। तन्मांसगुणा मदनपालेनोक्ता यथा—"काकमांसभवं मांसं चक्षुष्यं दीपनं लघु। आयुष्यं बृंहणं बल्यं क्षतदोषक्षयापहम्" काकजङ्घायां काकतिक्तत्वोक्तेः तन्मांसस्य तिक्तत्वमपि बोध्यम्। राजनि०काकाह्वेति काकजङ्घापर्य्यायोक्तेः २काकजङ्घायां पु० "काकजङ्घातुल्यग्राकारत्वात्तथात्वम्। कुत्सितमकति अक-अच् कोः कादेशः। ३पीठसर्पिणि(खोड़े)४काकप्रधाने द्वीपभेदे। कस्य शिरसः आक सेचनम् आक-घञ् ६त०। ५शिरोऽप्रक्षालने ६काकपदतुल्याकारे ७तिलकभेदे काकवच्चञ्चलत्वात् ८अतिधृष्टे च शब्दरत्ना०। काकानाम् संघः अण्। ९काकसमूहे काकपदरूपे १०सुरतबन्धभेदे च न० मेदि०। काकपदशब्दे तल्लक्षणं दृश्यम्। ईषत् कं कोः। कादेशः। ११ईषज्जले। बहु० १२ईषज्जलयुक्ते त्रि०। काकयुक्ता।

काककङ्गु पु० काकप्रियः कङ्गुः ईषज्जलयुक्तो वा कङ्गुः। (चीना) धान्यभेदे हेमच०। [काकजङ्घादृच्छे जटाध०।

काककला स्त्री काकस्य कला अवयवो जङ्घेवावयवो यस्याः।

काकघ्नी स्त्री काकं हन्ति ट टित्त्वात् ङीप्। १महाकरञ्जे राजनि०। तत्फलसेवने हि काकस्य नाशः।

काकचिञ्चा स्त्री काकवर्णा चञ्चा प्रान्तभागः फले यस्याः। पृषो०। गुञ्जायाम् अमरः। पृषो०काकचिञ्चिः, काकचिञ्ची, काकचञ्चाप्यत्र शब्दरत्ना०।

काकच्छद पुंस्त्री काकस्य च्छदः पक्ष इव छदः कृष्णत्वात् यस्य। खञ्जनविशेषे स्त्रियां जातित्वात् ङीष्। बा० इच् समा०। काकच्छदिरप्यत्र त्रिका०।

काकजङ्घा स्त्री काकस्य जङ्घेवावयवो यस्याः। (केओयाटेङ्गा) ख्याते वृक्षभेदे। "काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा। पारावतपदी दासी काकाङ्गापि प्रकीर्त्तिता। काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित्। निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रमीन्" भावप्र०तत्पर्यायगुणा-द्युक्तम्। [(बडजाम) स्वार्थे कन् तत्रार्थे।

काकजम्बु स्त्री काकवर्णा जम्बुः। भूमिजम्ब्वाम् शब्दमा०।

काकजम्बू स्त्री कं जलमकति उत्पत्तिस्थानत्वेन अक-अण् उप०स० काका काकवर्णा वा जम्बूः कर्म्म० ऊङ्। जलजातजम्बूभेदे राजनि०। तस्याः काकनीलेति जलजम्बुकेति पर्य्यायतोक्तेः तस्याः कृष्णवर्णफलकत्वाज्जलजातत्वाच्च तथात्वम् "क्षुद्रजम्बूः सूक्ष्मपत्त्रा नादेयी जलजम्बुका। जम्बूः संग्राहिणी रूक्षा कफपित्तास्रदाहजित्"। भावप्र०तत्पर्य्यायगुणाद्युक्तम्।

काकण न० सुश्रुतोक्ते महाकुष्ठभेदे। "महाकुष्ठान्यौदुम्बरर्ष्य-जिह्वकपालकाकणकपुण्डरीकदद्रुकुष्ठानीति" विभज्य। "काकणन्तिकाफलसदृशान्यतीव रक्तकृष्णानि काकणकम्" इति लक्षितम्। अत्र स्वार्थे कन्। "सर्वैरेतैलिङ्गैर्दोषैः प्राहुः काकणकं बुधाः" भावप्र० तन्निदानमुक्तं। "यत् काक-णन्तिकावर्णमपाकं तीव्रवेदनम्। त्रिदोषलिङ्गं तत् कुष्ठं काकणं नैव सिध्यति" काकणन्तिका गुञ्जा गुञ्जावर्णत्वेन मध्ये कृष्णम्, अन्ते रक्तम् अथवा मध्ये रक्तम् अन्ते

क्षणम् । अपाक स्वभावात्, त्रिदोषलिङ्गम् सर्वेषां कुडानां त्रिदोषजत्वेऽपि उल्बणदोषलयलिङ्गम्" भावप्र० लक्षितम् । अतएव पूर्ववाक्ये उल्बणैर्दोषैरित्युक्तम् ।

काकणन्ती स्त्री ईषत् कणन्ती निमीलन्ती कण-निमीलने शतृ ङीप कुगतिस० कोः कादेशः । गुञ्जायाम् सुश्रु० । तस्याः फलकोषस्येषन्निमीलनात्तथात्वम् । "कोष्ठं गत्वा क्षोभयन् यस्य रक्तं, तन्नाशकत्वात् काकणन्तीप्रकाशम्" सुश्रु० स्वार्थे कन् । काकणन्तिकाप्यत्र रत्नमा० । काकणशब्दे उदा० । "रक्तजानि न्यग्रोधप्ररोहविटूमकाकणन्तिकाफलसदृशानि" सुश्रु० ।

काकतालीय न० अवितर्कितसम्भवतुल्ये यादृच्छिकन्याये तद्गतप्रत्यादिर्यथा "समासाच्च तद्विषयादिति" पा० छ । अस्मादेव ज्ञापकादिवार्थे, सह सुपेति वा समासः, द्वाविवार्थौ काकागमनमिव तालपतनमिव काकतालम् काकतालमिव काकतालीयम् वृत्तिविषये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ तत्र काकागमनं देवदत्तागमनस्योपमानम् तालपतनं दस्युनिपातस्य, तालेन तु यः काकस्य बधः स देवदत्तस्य दस्युना बधस्योपमानम् इति बधादिः काकतालीयादिशब्दवाच्यः सम्पद्यते । काकतालसमागमसदृशयोरसमागम इति समासार्थः तत्प्रयुक्तकाकमरणसदृशस्तु देवदत्तबधादिः छप्रत्ययार्थः । "यत्तया मेलनं तत्र लाभो मे यश्च तद्रते । तदेतत् काकतालीयमवितर्कितसम्भवम्" चन्द्रालोकः । "फलन्ति काकतालीयं तेभ्यः प्राज्ञा न बिभ्यति" वेणी० ।

काकतिक्ता स्त्री काकमांसवत् तिक्ता । काकजङ्घायां भावप्र० काकजङ्घाशब्दे विवृतिः । (कुँच) २गुञ्जायां रत्नमा० । तयोः काकमांसतुल्यतिक्तत्वात्तथात्वम् ।

काकतिन्दुक पु० काकः ईषज्ज्वलकस्तिन्दुतिकेन्दुकः, काकवर्णो वा तिन्दुकः काकप्रियो वा तिन्दुकः । (कुँचिलिया) (माकड़ातेंडु) इति च प्रसिद्धे कुपीलौ भावप्र० । तत्पर्य्यायगुणादि तत्रोक्तं यथा "तिन्दुको यस्तु कथितो अजजो दीर्घपत्रकः । कुपीलुः कुलयः काकतिन्दुकः काकपीलुकः । कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु । पादव्यथाहरं ग्राहि कफपित्तास्रनाशनम्" अत्र फलपरत्वात् न० । [हेमच० ।

काकतुण्ड पु० काकतुण्डस्य वर्णोऽस्त्यस्य अच् । कालागुरुणि

काकतुण्डफला स्त्री काकतुण्डमिव फलमस्याः । काकनासायाम्" भावप्र० । काकनासाशब्दे विवृतिः ।

काकतुण्डिका स्त्री काकतुण्डस्य वर्णः अर्द्धफलेऽस्याः ठन् । गुञ्जायाम् रत्ना० ।

काकतुण्डी स्त्री काकम् ईषदर्थ ईषद्दुःखं तुण्डते तुडि ङ-बधे अण् उप०स०पा० गौरा०ङीप्, सुश्रु० षण् ईप् इति भेदः । १राजरीतौ न्द्रपयोग्ये पित्तले (गिलटीकरापितल) तस्य स्वर्णरूपतया दर्शनात् दुःखनाशकत्वात् तथात्वम् । काकतुण्ड इवाकारोऽस्याः अच् गौरा०ङीष । (केओयाठोटा) २काकनासाद्रक्ते च ।

काकदन्तगवेषण पु० काकस्य दन्ताः सन्ति न वेति संशये तत्र वर्णभेदस्य संख्याविशेषस्य च गवेषणमिव अनर्थकः प्रयत्नो यत्र । निष्प्रयोजनान्वेषणयुक्ते न्यायभेदे ।

काकध्वज पु० काकमोषज्ज्वलं बाष्पं ध्वज इवास्य । बाड़वाग्नौ त्रिका० । तस्य समुद्राद्रुद्गच्छन्त्या ज्वालया जातबाष्पस्य तत्केतनतुल्यत्वात् तस्य तथात्वम् ।

काकनामन् पु० काकेनापि नाम्यतेऽसौ नम-णिच्-कर्मणि ड्वनिप् । वकवृक्षे रत्नमाला तस्य मृदुशाखत्वेन काकारोहणेनापि नामितत्वात् तथात्वम् ।

काकनास पु० काकस्य नासा तदर्थः फलेऽस्य । विकङ्कतवृक्षे (बँइचि) राजनि० । तस्य फलस्य काकनासातुल्यलक्षणत्वात्तथात्वम् ।

काकनासा स्त्री काकस्य नासेव फलमस्याः । काकजङ्घायाम् (केओठेङ्गा) । भावप्र० तद्दपर्य्यायगुणाद्युक्तं यथा—"काकनासा कषायोष्णा कटुका रसपाकयोः । कफघ्नी वमनी तिक्ता शोथार्शःश्वित्रकण्डुनुत्" । स्वार्थे कन् । काकनासिका तत्रार्थे अमरः । सा च त्रिवृति राजनि० ।

काकनीला स्त्री काक इव नीला । जम्बुभेदे । राजनि० ।

काकन्दि(न्दी) स्त्री देशभेदे । वा ङीप् । तत्र भवादार्थे दीर्घान्तात् वुञ् । काकन्दक तत्र भवे त्रि० । २तद्देशवासिरूपचारात् तेषायुधजीविनः । संघपरत्वे ततः दामन्यादि० स्वार्थे छ । काकन्दीय तद्देशवासिनि आयुधजीविसंघे ।

काकपक्ष पु० काकस्य पक्षः तदाकारोऽस्त्यस्य अच् । (काणपाटा) काणजुलपी) प्रसिद्धे शिरोऽधःकर्णपार्श्वस्थे केशभेदे । "स दृत्तचूलश्चलकाकपक्षकैः" "काकपक्षधरस्येत्य याचितः" "नौ प्रणामचलकाकपक्षकौ" "काकपक्षधरेऽपि राघवे" इति च रघुः "काकपक्षधरो युवा" पद्मपु० रामकवचम् ।

काकपद पु० "पादौ द्वौ स्कन्धयुगमस्यौ चिप्रा लिङ्गं भगे लघु । कामयेत् कामुकां कामी नम्बः काकपदो मतः"

रतिमञ्जर्य्युक्ते रतिबन्धभेदे । काकस्य पदं पदमानम् । २काकपदतुल्यपरिमाणे न० । तत्परिमाणेन शिरसि शिखास्थापनं स्मृतौ विहितम् । काकस्य पदाकारोऽस्त्यस्य अच् । ३काकपदतुल्याकारे ग्रन्थलेखनकाले ऊर्द्ध्वमधोवाभिन्नपङ्क्तिलेखने प्रकृतग्रन्थत्रुटिसूचके२रेखाविशेषे । लेखकसंप्रदायप्रसिद्धिः ।

काकपर्णी स्त्री काक इव कृष्णं पर्णमस्याः काकमीषज्जलं पर्णेऽस्या वा गौरा० ङीष् । मुद्गपर्ण्यां भावप्र० तस्याः काककृष्णपर्णत्वात् ईषज्जलयुक्तपत्रत्वाच्च तथात्वम् ।

काकपीलु पु० काकप्रियः पीलुः । (कुचिला) कुपीलौ । राजनि०संज्ञायां कन् । तदर्थे भावप्रकाशोक्ततद्गुणादि काकतिन्दुकशब्दे उक्तम् ।

काकपुच्छ पुंस्त्री काकस्येव पुच्छो यस्य । कोकिले शब्दरत्ना० । स्त्रियां जातित्वेऽपि संयोगोपधत्वान्न ङीष् । किन्तु "पुच्छाच्चेति" वार्त्ति०वा ङीष् ।

काकपुष्ट पु० काकेन पुष्टः । कोकिले त्रिका० । कोकिला हि स्वाण्डस्फोटनाशक्ततया काकाण्डं तन्नीडात् निष्कास्य स्वाण्डं तत्र स्थापयित्वा काकद्वारा स्वाण्डजपोषणात् कोकिलस्य तथात्वम् ।

काकपुष्प न० काकवर्णं पुष्पमस्य । गन्धपर्णे राजनि० ।

काकपेय त्रि० काकैरनतकन्धरैः पीयते पा—यत् "कृत्यैरधिकार्थवचने" पा० ३त० । पूर्णोदकत्वेन प्रशस्ये काकैः पेये नद्यादौ । "काकपेया नदी" सि०कौ० ।

काकफल पु० काकप्रियं फलमस्य । निम्बवृक्षे राजनि० । तस्य तिक्तत्वेऽपि काकस्य तत्फलप्रियत्वात्तथात्वम् ।

काकबन्ध्या स्त्री काकीव बन्ध्या पुंवत् । काकीवत् एकमात्रसुतजननेन बन्ध्यात्वप्राप्तायां स्त्रियाम् काकस्य सकृत्प्रजत्वञ्च काकशब्दोक्तप्रमाणादवसेयम् । "काकबन्ध्या च या नारी मृतापत्या च या भवेत् । बह्वपत्या जीववत्सा सा भवेन्नात्र संशयः" पद्मपु० रामकवचम् ।

काकबलि पु० ६त० । काकोद्देश्यदेयबलौ काकशब्दे विवृतिः

काकभाण्डी स्त्री काकस्य ईषज्जलस्य सुखनिस्रावहेतुकस्य भाण्डी क्षुद्रभाण्डमिव । महाकरञ्जे राजनि० । तत्फलसेवनात् मुखात् ईषज्जलस्रावात्तस्यास्तथात्वम् ।

काकभीरु पु० ५त० । पेचके त्रिका० ।

काकमद्गु पु० काक इव कृष्णो मद्गुः दात्यूहे खगे त्रिका० "हतं हत्वा तु दुर्बुद्धिः काकमद्गुः प्रजायते" भा०अनु० ५५२० श्लो० ।

काकमर्द पु० काकं मृद्नाति मृद-अण् उप० स० । (माकाल-पाता) इति ख्याते महाकालवृक्षे राजनि० । ण्वुल् । काकमर्दकोऽप्यत्र रत्नमाला ।

काकमाची स्त्री काकान् मञ्चते मचि—अण् पृषो० नलोपः पा० गौरा०ङीष्, मुग्ध०अण् ङीप् । कटुफललतायाम् । (कठेया गुड्कामाइ) इति ख्याते वृक्षे भावप्र० । तत्पर्य्यायगुणाद्युक्तं तत्रैव यथा—"काकमाची ध्वाङ्क्षमाची काकाह्वा चैव वायसी । काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा । तिक्ता रसायनी शोथकुष्ठार्शोज्वररोगजित् । कटुर्नेत्रहिता हिक्काच्छर्दिहृद्रोगनाशिनी" "काकमाचिजनितं मृदुशाकं वेसवारमिलितं शुभवासम् । तप्ततैलतलनेन सुपाकं कैरवाप्य न कृतं सुखवासम्" इत्यत्र वैद्यके अस्य संज्ञायामपि "ङ्यापोरिति" पा०ह्रस्वः इति बोध्यम् । स्वार्थे कन् काकमाचिकाऽप्यत्र ।

काकमातृ स्त्री काकस्य मातेव पोषिका तस्य तत्फलप्रियत्वात् । काकमाच्याम् । राजनि० ।

काकमुद्गा स्त्री काकेन ईषज्जलेन मुदं गच्छति गम-ड । मुद्गपर्ण्याम् अमरः ।

काकयव पु० काकमीषज्जलमत्र तादृशो यव इव नीरसत्वात् । (आगडा) इति ख्याते पदार्थे "यथाऽफलाः षण्डतिलाः यथा चर्ममया मृगाः । तथैव पाण्डवाः सर्वे यथा काकयवा इव" भा० १७५ अ० । "काकयवा निष्फलधान्यानि" नीलकण्ठः ।

काकरुत न०काकस्य रुतम् । काकशब्दे । काकादिरवादेः भाविशुभाशुभसूचकतया शकुनत्वं यथाह वृ०सं० ९५अ० । "प्राच्यानां दक्षिणतः शुभदः काकः करालको वामे । विपरीतमन्यदेशेष्ववधिर्लोकप्रसिद्धैव । वैशाखे निरुपहते वृक्षे नीडः सुभिक्षशिवदाता । निन्दितकण्टकिशुष्केष्वसुभिक्षभयानि तद्देशे । नीडे प्राक्शाखायां शरदि भवेत्प्रथमवृष्टिरपरस्याम् । याम्योत्तरयोर्मध्या प्रधानवृष्टिस्तरोरुपरि । शिखिदिशि मण्डलवृष्टिर्नैरृत्यां शारदस्य निष्पत्तिः । परिशेषयोः सुभिक्षं मूषकसम्पत्तु वायव्ये । शरदर्भगुल्मवल्लीधान्यप्रासादगेहनिम्नेषु । शून्यो भवति स देशश्चौराऽनावृष्टिरोगार्त्तः । द्वित्रिचतुःशावत्वं सुभिक्षदं पञ्चभिर्नृपान्यत्वम् । अण्डावकिरणमेकाण्डताप्रसूतिश्च न शिवाय । चौरकवर्णैश्चौराश्चित्रैर्मृत्युः सितैश्च वह्निभयम् । विकलैर्दुर्भिक्षभयं काकानां निर्दिशेच्छिशुभिः । अनिमित्तसंहतैर्ग्रामभ्यगैः क्षु-

ध्रुवं प्रशाम्यद्भिः। रोधश्चक्राकारैरभिघातो वर्गवर्गस्थैः। अभयाश्च तुण्डपक्षैश्चरणविघातैर्जनानभिभवन्तः। कुर्वन्ति शत्रुवृद्धिं निशि विचरन्तो जनविनाशम्। सव्येन खे भ्रमद्भिः स्वभयं, विपरीतमण्डलैश्च परात्। अत्याकुलं भ्रमद्भिर्वातोद्भ्रमो भवति काकैः। ऊर्ध्वमुखाश्चलपक्षाः पथि भयदाः क्षुद्भयाय धान्यमुषः। सेनाङ्गस्था युद्धं परिमोषं चान्यभृतपक्षाः। भस्मास्थिकेशपत्राणि विन्यसन् पतिवधाय शय्यायाम्। मणिकुसुमाद्यवहनेन सुतस्य जन्माङ्गनायाश्च। पूर्णाननेऽर्थलाभः सिकताधान्यार्द्रमृत्कुसुमपूर्वैः। भयदो जनसंवासाद् यदि भाण्डान्यपनयेत्काकः। वाहनशस्त्रोपानच्छत्त्रच्छायाङ्गकुट्टने मरणम्। तत्पूजायां पूजा विष्ठाकरणेऽन्नसम्प्राप्तिः। यद्द्रव्यमुपनयेत्तस्य लब्धिरपहरति चेत् प्रणाशः स्यात्। पीतद्रव्ये कनकं, वस्त्रं कार्पासिके, सिते रूप्यम्। सक्षीरार्जुनवञ्जुलकूलद्वयपुलिनगा रुवन्तश्च। प्रावृषि वृष्टिं दुर्दिनमन्यर्तौ स्नाताश्च पांशुजालैः। दारुणनादस्तरुकोटरोपगो वायसो महाभयदः। सलिलमवलोक्य विरुवन् वृष्टिकरोऽब्दानुरावी वा। दीप्तोद्विग्नो विटपे विकुट्टयन् वह्निकृद्विधुतपक्षः। रक्तद्रव्यं दग्धं तृणकाष्ठं वा गृहे विदधत्। ऐन्द्रादिदिगवलोकी सूर्याभिमुखो रुवन् गृहे गृहिणः। राजभयचोरबन्धनकलहाः स्युः पशुभयं चेति। शान्तामैन्द्रीमवलोकयन् रुयाद्राजपुरुषमित्राप्तिः। भवति च सुवर्णलब्धिः शाल्यन्नगुडाशनाप्तिश्च। आग्नेय्यामनलाजीविकयुवतिप्रवरधातुलाभश्च। याम्ये माषकुलत्थाभोज्यं गान्धर्विकैर्योगः। नैर्ऋत्यां दूताश्वोपकरणदधितैलपललभोज्याप्तिः। वारुण्यां मांससुरासवधान्यसमुद्ररत्नाप्तिः। मारुत्यां शस्त्रायुधसरोजवल्लीफलाशनाप्तिश्च। सौम्यायां परमान्नाशनतुरङ्गाम्बरप्राप्तिः। ऐशान्यां सम्प्राप्तिर्घृतपूर्णानां भवेदनडुहश्च। एवं फलं गृहपतेर्गृहपृष्ठसमाश्रिते भवति। गमने कर्णसमश्चेत् क्षेमाय न कार्य्यसिद्धये भवति। अभिमुखमुपैति यातुर्विरुवन्विनिवर्त्तयेद्यात्राम्। वामे वाशित्वादौ दक्षिणपार्श्वेऽनुवाशते यातुः। अर्थापहारकारी तद्विपरीतोऽर्थसिद्धिकरः। यदि वाम एव विरुयात् मुहुर्मुहुर्यायिनोऽनुलोमगतिः। अर्थस्य भवति सिद्धिः प्राच्यानां दक्षिणस्यैवम्। वामः प्रतिलोमगतिर्वाशन् गमनस्य विघ्नकृद्भवति। तत्रस्थस्यैव फलं कथयति यद्वाञ्छितं गमने। दक्षिणविरुतं कृत्वा वामे विरुयाद्यथेप्सितावाप्तिः। प्रतिवाश्य पुरो यायाद् द्रुतमग्र्योऽर्थागमोऽतिमहान्। प्रतिवाश्य पृष्ठतो दक्षिणेन यायाद् द्रुतं क्षतजकर्त्ता। एकचरणोऽर्कमीक्षन् विरुवंश्च पुरो रुधिरहेतुः। दृष्ट्वार्कमेकपादस्तुण्डेन लिखेद्यदा स्वपिच्छानि। पुरतो जनस्य महतो वधमभिधत्ते तदा बलिभुक्। सस्योपेते क्षेत्रे विरुवति शान्ते ससस्यभूर्लब्धिः। आकुलचेष्टो विरुवन् सीमान्ते क्लेशकृद्यातुः। सुस्निग्धपत्रपल्लवकुसुमफलानम्रसुरभिमधुरेषु। सक्षीराव्रणसुस्थितमनोज्ञवृक्षेषु चार्थकरः। निष्पन्नसस्यशाद्वलभवनप्रासादहर्म्यहरितेषु। धान्योच्छ्रयमङ्गल्येषु चैव विरुवन् धनागमदः। गोपुच्छस्थे वल्मीकगेऽथवा दर्शनं भुजङ्गस्य। सद्यो ज्वरो महिषगे विरुवति गुल्मे फलं स्वल्पम्। कार्य्यस्य व्याघातस्तृणकूटे धामगेऽस्थिसंस्थे वा। ऊर्ध्वाग्निप्लुष्टेऽशनिहते च काके वधो भवति। कण्टकिमिश्रे सौम्ये सिद्धिः कार्यस्य भवति कलहश्च। कण्टकिनि भवति कलहो वल्लीपरिवेष्टिते बन्धः। छिन्नाग्रेऽङ्गच्छेदः कलहः शुष्कद्रुमस्थिते ध्वाङ्क्षे। पुरतश्च पृष्ठतो वा गोमयसंस्थे धनप्राप्तिः। मृतपुरुषाङ्गावस्थितोऽभिवाशन् करोति मृत्युभयम्। भञ्जन्नस्थि च चञ्च्वा यदि वाशत्यस्थिभङ्गाय। रज्ज्वस्थिकाष्ठकण्टकिनिःसारशिरोरुहानने रुवति। भुजगदष्टश्चितस्करशस्त्राग्निभयान्यनुक्रमशः।. सितकुसुमाशुचिमांसाननेऽर्थसिद्धिर्यथेप्सिता यातुः। धुन्वन् पक्षावूर्ध्वानने च विघ्नं मुहुः करोति। यदि मृदुलां वरत्रां वल्लीं वादाय वाशते बन्धः। पाषाणस्थे च भयं क्लिष्टापूर्वाधिकयुतिश्च। अन्योऽन्यभक्ष्यसङ्क्रामिताननेे तुष्टिरुत्तमा भवति। विज्ञेयः स्त्रीलाभो दम्पत्योर्वाशतोर्युगपत्। प्रमदाशिरउपगतपूर्णकुम्भसंस्थेऽङ्गनार्थसम्प्राप्तिः। घटकुट्टने सुतविपद् घटोपहनेऽन्नसम्प्राप्तिः। स्कन्धावारादीनां निवेशसमये रुवंश्चलत्पक्षः। सूचयतेऽन्यस्थानं निश्चलपक्षस्तु भयमात्रम्। प्रविशद्भिः सैन्यादीन् सगृध्रकङ्कैर्विनामिषं ध्वाङ्क्षैः। अविरुद्धैस्तैः प्रीतिर्द्विषतां युद्धं विरुद्धैश्च बन्धः। शूकरसंस्थे पङ्काक्ते शूकरे द्विकेऽर्थाप्तिः। क्षेमं खरोष्ट्रसंस्थे केचित् प्राहुर्वधं तु खरे। वाहनलाभोऽश्वगते, विरुवत्यनुयायिनि क्षतजपातः। अन्येऽप्यनुव्रजन्तो यातारं काकवद्विहगाः। द्वात्रिंशत्प्रविभक्ते दिक्चक्रे यद्यथा समुद्दिष्टम्। तत्तत्तथाऽभिधेयं गुणदोषफलं यियासूनाम्। का इति काकस्य रुतं स्वनिलयसंस्थस्य निष्फलं प्रोक्तम्। कव इति आत्मप्रीत्यै

क इति रुते स्निग्धमित्राप्तिः। कर इति कलहं कुरुकुरु, हर्षमथ कटकटेति दधिभक्तम्। केके विरुतं कुकु वा धनलाभं यायिनः प्राह। खरे खरे पथिकागममाह कखाखेति यायिनो मृत्युम्। गमनप्रतिषेधकमाखलखल सद्योऽभिवर्षाय। काकेति विघातं काकटीति चाहारदूषणं प्राह। प्रीत्यास्पदं कवकवेति बन्धमेवं कगाकुरिति। करकौ विरुते वर्षं गुड़यच्चाशाय, वडिति वस्त्राप्तिः। कलयेति च संयोगः शूद्रस्य ब्राह्मणैः साकम्। फडिति फलाप्तिः फलवाहिदर्शनं टडिति प्रहाराः स्युः। स्त्रीलाभः स्त्रीति रुते गडिति गवां, पुडिति पुष्पाणाम्। युद्धाय टाकुटाकिति गुडु वह्निभयं कटेकटे कलहः। टाकुलि चिखिटचि केकेकेति पुरस्त्वेति दोषाय। काकद्वयस्यापि समानमेतत् फलं यदुक्तं रुतचेष्टिताद्यम्। पतत्त्रिणोऽन्येऽपि यथैव काको वन्याः श्ववच्चोपरिदंष्ट्रिणो ये। स्थल सलिलचराणां व्यत्ययो मेघकाले प्रचुरसलिलवृष्ट्यै ग्रीष्मकाले भयाय। मधु भवननिलीनं तत्करोत्याशु शून्यं मरणमपि निलीनाम छिका मूर्ध्नि नीला। विनिक्षिपन्त्यः सलिले ऽण्डकानि पिपीलिका वृष्टिनिरोधभाजः। तरुस्थलं वापि नयन्ति निम्नाद् यदा तदा ताः कथयन्ति वृष्टिम्। कार्य्यं तु मूलशकुने ऽन्तरजे तदह्नि विन्द्यात् फलं नियतमेवमिमे विचिन्त्याः। प्रारम्भयानसमयेषु तथा प्रवेशे ग्राह्यं क्षुतं न शुभदं क्वचिदप्युशन्ति। शुभं दशापाकमविघ्नसिद्धिं मृताभिरक्षामथ वा सहायान्। इष्टस्य संसिद्धिमनामयत्वं वदन्ति ते मानयितुर्नृपस्य। क्रोशादूर्द्ध्वं शकुनिविरुतं निष्फलं प्राहुरेके तत्रानिष्टे प्रथमशकुने मानयेत्पञ्च षट् च। प्राणायामान्नृपतिरशुभे षोडशैव द्वितीये प्रत्यागच्छेत् स्वभवनमतो यद्यनिष्टस्तृतीयः"।

काकस्य वर्णादिभेदेन विप्रादिभेदकथनपूर्व्वकं कालभेदेन तद्रुतादिफलमुक्तं वसन्तराजशाकुने यथा

"अथोच्यते काकरुतं रुतानां मूर्द्ध्नि स्थितं शाकुनभाषितानाम्। अचिन्तितावेदितकार्य्यसिद्धिः पूर्वादिकाष्ठप्रहरक्रमेण। ये ब्राह्मणक्षत्रियवैश्यशूद्राः काका भवन्त्यन्त्यजपञ्चमास्ते। वर्णाकृतिभ्यां ऋषिभाषिताभ्यां सदाभियुक्तैरुपलक्षणीयाः। बृहत्प्रमाणो गुरुदीर्घतुण्डो दृढस्वरः कृष्णवपुः स विप्रः। पिङ्गाक्षनीलाक्षविमिश्रवर्णः स्यात् क्षत्रियस्तीक्ष्णरवोऽतिशूरः। यः पाण्डुनीलः सितनीलचञ्चुर्नात्यर्थरूक्षो रटितश्च वैश्यः। भस्मच्छविर्भूरिककारशब्दः शूद्रः कृशाङ्गश्चपलो निरुक्षः। विरूक्षरूक्षाश्मतनुर्विशङ्को यः कम्बुरादीप्तरवं बिभर्त्ति। स्थिरारवः स्थैर्य्यसमेतबुद्धिः काकोऽन्त्यजातिः खलु पञ्चमोऽसौ। द्रोणाभिधः कृष्णवपुर्द्विजो यो ग्राह्यः स काकः खलु मुख्यवृत्त्या। तस्माद्रुते श्यामगलो शिरोच्चः श्वेतश्च निन्द्योऽङ्ग तदर्शने ऽसौ। विप्रः स्फुटं जल्पति पृच्छ्यमानो न्यूनं ततः क्षत्रियजातिराह। आख्याति वैश्यस्त्वधिवासनेन ब्रवीति शूद्रो बलिदानलोभात्। प्रश्नं कृतं जल्पति कृष्णवर्णः सदा समस्तं विहगोऽन्त्यजातिः। सद्यस्त्रिसप्ताहदशाहपक्षैः पञ्चापि काकाः फलदाः क्रमेण। शान्ते प्रदीप्ते च रटन् विहङ्गः शुभप्रदो दीप्तपराङ्मुखः सन्। न क्वापि रौद्रो रटितः प्रशस्तः सर्व्वत्र शस्तो मधुरश्च रक्तः। दीप्तस्थितो यः परुषस्वरेण विरौति दीप्ताभिमुखः स कार्य्यम्। निष्पाद्य निर्नाशयते च सम्यग्दीप्तोन्मुखः शान्तरवो हि सिद्धैः। शान्तप्रदीप्ताभिमुखो विधाय शब्दं प्रविश्याथ पुनः प्रदीप्ताम्। यो रौति काको मधुरस्वरेण कृत्वा विरुद्धं स ददाति सिद्धिम्। विधाय दीप्ताभिमुखो विरावं ततः प्रशान्ताभिमुखो विरौति। यो वायसोऽसौ विनिहन्त्यसम्यक् कार्य्याणि सर्व्वाणि पुनः करोति"। विप्रादिश०

सूर्य्योदये पूर्व्वदिशि प्रशस्तस्थाने स्थितो यो ऽभिमुखं विरौति। नाशं रिपोश्चिन्तितकार्य्यसिद्धिं स्त्रीरत्नलाभं स करोति काकः। ध्वाङ्क्षः प्रभाते यदि वह्निभागे विरौति तिष्ठन् रमणीयदेशे। शत्रून् प्रणश्यत्यचिराद्विशङ्कः प्रयाति योषित् समवाप्यते तत्। रुवन् प्रभाते दिशि दक्षिणस्यां काकः समावेदयतेऽतिदुःखम्। रोगार्त्तिमृत्युं परुषस्वरेण रम्येण चेष्टागमयोषिदाप्तिम्। नैर्ऋत्यभागे यदि च प्रभाते करोति काकः सहसा विरावम्। क्रूरं ततः कर्म्म समभ्युपैति दूतागमो मध्यमिका च सिद्धिः। प्रातः प्रतीच्यां यदि रौति काको ध्रुवं तदा वर्षति वारिवाहः। स्त्रीवस्त्रभूभृत्पुरुषागमश्च कलिः कलत्रेण समं तदा स्यात्। ध्वाङ्क्षस्य शब्दे पवनालयस्थे वस्त्राशयानाभिमतागमाः स्युः। धान्यागमः प्राक्तनवृत्तिनाशः स्यादन्यदेशे गमनं स्वदेशात्। दिश्युत्तरस्यां सुरवः प्रभाते निरीक्षमाणो बलिभुग् नराणाम्। ददाति दुःखं भुजगाच्च भीतिं दरिद्रतां नष्टधनेष्टलाभम्। दिशीशवत्यां यदि रौति काक आगच्छतस्तद्दनितान्त्यजाती। व्याधेर्निमित्तं

प्रियवस्तुलाभो भवेत्तदा रोगबलेऽवसानम् । ब्रह्मप्रदेशे स्थितवायसस्य प्रभातकाले मधुरस्वरेण । अभीप्सितार्थागमनं ध्रुवं स्यात् स्वामिप्रसादो द्रविणस्य लाभः” । इति सूर्य्योदये काकशकुनम् । “पूर्व्वत्र यामे प्रथमे सुशब्दः काको भवेच्चिन्तितकार्य्यसिद्ध्यै । अभीष्टलोकागमनं तथा स्यान्नष्टार्थलाभो नियतं नराणाम् । आग्नेयभागे यदि चाद्ययामे स्त्रीलाभवित्ते भिषजौ भवेताम् । कृतान्तभागे बलिभुग्विरावः स्त्रीलाभसौख्यप्रियसङ्गकारी । नैर्ऋत्यकोणे प्रिययोषिदाप्तिर्म्मिष्टाशनं सिद्ध्यति चिन्तितोऽर्थः । दिशि प्रतीच्यां विरुते भवेतामभ्यर्थनीयागमनाम्बुवृष्टी । वायव्यकोणे करटः शुभः स्यात् नृपप्रसादोऽध्वगदर्शनं च । सौम्ये च भीतस्करशोकवार्त्ता सौम्या च वार्त्ता धनलाभवार्त्ता । ईशानदेशे ऽभिमतेन सङ्गस्त्रासो हुताशाद्बन्धुलोकसङ्गः । ब्रह्मप्रदेशे सुखकामभोगः सम्मानसम्पद्द्रविणेष्टसिद्धिः”। इति प्रथमप्रहरे शकु० । “प्राच्यां द्वितीये प्रहरे विरावैः काकस्य कश्चित् पथिकोऽभ्युपैति । चौराद्भयं व्याकुलता च बह्वी जायेत काचिन्महती च शङ्का । हुताशदेशे नियतं कलिः स्यात् प्रियागमाकर्णनयोषिदाप्तिः । याम्ये तु दृष्टिर्म्महती च भीतिः प्रियस्य चेष्टस्य समागमः स्यात् । रक्षोदिशि प्राणभयं तदा स्युः स्त्रीभोज्यलाभाखिलरुक्प्रणाशाः । भवेत् प्रतीच्यां प्रबला बलाप्तिर्योषागमो वृष्टिसुवर्णं च । समीरभागे ध्वजचौरसङ्गो दूतागमस्त्रीपिशितान्नलाभः । सौम्ये गणेष्टागमनं जयं च रम्ये रवे,चौरभयं त्वरण्ये । महेश्वराशाविरुतश्च काकश्चौराग्निसंत्रासविरुद्धवार्त्ताः । ब्रवीति रुच्चैरटनैरुच्चैः सदार्य्यगुर्व्वागमनं जयं च । ब्रह्मप्रदेशे प्रहरे द्वितीये काकः सुशब्दो नृपतिप्रसादम् । मिष्टान्नभोज्यं च ददाति पुंसां करोत्यसौ चौरभयं कुशब्दः”। इति द्वितीयप्रहरश०।“ऐन्द्र्यां विरुच्चः प्रहरे तृतीये वृद्धिं तथा चौरभयं ब्रवीति । कृष्णस्तु राजागमनं जयं च करोति यात्रां शुभकार्य्यसिद्धिम् । अग्नेर्विभागेऽग्निभयं कलिश्च विरुद्धवार्त्ता विफला च यात्रा । भवेद्विरुद्धैर्बलिभुग्विरावैर्जयादिवार्त्ता च भवेद्विशुद्धैः । ककुभ्यवाच्या कुरुतेऽतितूर्णं रोगं तथाप्तागमनं विहङ्गः । क्षुद्राणि कार्य्याणि च यान्ति सिद्धिं सर्व्वाणि तन्मुखतया नराणाम् । क्रव्याददेशे जलदागमः स्यान्मिष्टान्नलाभो रिपवो न सन्ति । स्मृद्रागमः स्वामिविरुद्धवार्त्ता भवन्ति यात्रासु च कार्य्यनाशः । स्यात् पश्चिमे नष्टधनस्य लाभो दूराध्वयानं सुहृदागमश्च । योषागमोऽभीष्टजयादिवार्त्ता यात्रासु रम्ये रटितेऽर्थसिद्धिः । वातालये दुर्द्दिनमेव वार्त्ता चौराभिनष्टार्थसमागमश्च । सन्तोषवार्त्ता वरयोषिदाप्तिर्यात्रा रवे स्यान्मधुरे प्रशस्ता । यामे तृतीये विरुवन्त्युदीच्यां कार्य्यार्थलाभो नृपसेवकानाम् । भोज्यप्रवृद्ध्यै शुभदा च वार्त्ता प्रयाणकं वैश्यसमागमश्च । दिश्यन्धकारेः कुरुते सुशब्दो भोज्यं जयं हानि कली कुशब्दः । ब्रह्मप्रदेशे तिलतण्डुलाभ्यां भोज्यं च ताम्बूलयुतं ददाति”। इति तृतीयप्रहरशकु०। “ऐन्द्र्यां तुरीयप्रहरेऽर्थलाभो भूमीशपूजा भयवृद्धिरोगाः । वह्नेर्विभागे भयरोगमृत्युः शिष्टागमो वायसवाशितेन । याम्ये रवे तस्करवैरिभीती स्यातां विशिष्टागमरोगमृत्युः । स्यात् यातुधान्यां महती प्रवृद्धिरभीष्टसिद्धिः पथि चौरयुद्धम् । दिशि प्रतीच्यां प्रहरे चतुर्थे द्विजातिरभ्येति ततोऽर्थलाभः । आयाति योषिद्विजयाम्बुवृष्टिः सिद्धिः प्रयाणे न्टपतेर्व्वैरश्च । वायव्यभागे करटस्य शब्दैरायाति योषित् प्रियमानिनी या । ध्रुवं प्रवासो दिनसप्तकेन शीघ्रागमः स्यात् गमने कृते च । कुवेरभागे पथिको ऽभ्युपैति ताम्बूललाभः कुशलस्य वार्त्ता । वैश्याङ्गनाप्तिस्तुरगादिरूढा यात्रा विरुद्धे म्रियते च रोगी । स्थाणौ स्थितः स्याद्बलिभुग्विरावैः सुवर्णवार्त्ता सरुजो विनाशः । ब्रह्मप्रदेशे प्रहरे चतुर्थे वार्त्ता भवेन्मध्यमिका च सिद्धिः” । इति चतुर्थप्रहरशकु० । “यद्भाषितं शाकुनिकैर्व्विमिश्रं शुभाशुभं दिक्प्रहरक्रमेण । तत्राशुभं यच्छति दीप्तशब्दः श्रेयष्करः शान्तरवश्च काकः । रम्यं रवं दीप्तदिशि प्रसर्पन् शान्तां दिशं भूरि फलं ददाति । तदेव तुच्छं वितरत्यसौ वै दीप्तास्थितः पश्यति दीप्तकाष्ठाम् । यथोपदिष्टं फलमत्र दुष्टं तथैव तद्दीप्तदिशि स्थितः सन् । ध्वाङ्क्षोऽधिरूढो विरुवन् करोति निरीक्षमाणः ककुभं प्रदीप्ताम् । काकः प्रशान्ताभिमुखोऽतितुच्छं दीप्ताश्रितो दुष्टफलं ददाति । श्यामाश्रितः शान्तदिगीक्षणेन रुक्षारवो ऽल्पं कथयत्यनिष्टम् । शान्तस्वरः शान्तककुप्प्रदेशे तिष्ठन् प्रदीप्तां ककुभञ्च पश्यन् । ददात्यभीष्टं फलमेवमल्पं दीप्तां स पश्यंस्तु तदेव तूर्णम् । आकारचेष्टारवभागविज्ञाश्चत्वारि काष्ठादिनयोः क्रमेण । सदाभियुक्ताश्च निरूपयन्ति यस्माच्च ते काकरुतं मनुष्याः”। इति काकरुते दिक्चक्रभेद शकु०। “वर्षकालमधिकृत्य किञ्चन प्रोच्यते बलिभजो

यथाक्रमम् । आलयाण्डकविचारसुन्दरं शाकुनं सकलशाकुनोत्तमम् । वैशाखमासे निरुपद्रवेषु द्रुमेषु काकस्य शुभाय नीड़म् । निन्द्येषु शुष्केषु सकण्टकेषु द्रुमेषु दुर्भिक्षमलाभहेतुः । प्रशस्तवृक्षे यदि पूर्वशाखामाश्रित्य काकेन कृतः कुलायः । तद्दृष्टिरिष्टा शकुनप्रमोदो नीरोगता स्याद्विजयश्च राज्ञः । आग्नेयशाखारचिते च नीडे स्याद्वृष्टिरीषार्त्तिभयं कलिश्च । दुर्भिक्षपतद्गुरुदेशभङ्गो भवन्ति रोगाश्च चतुष्पदानाम् । याम्यांस्तु शाखासु च वायसेन नीड़े कृतेऽल्पं जलपातमाहुः । व्याधिप्रकोपं मरणं समन्तादक्षयं शत्रुविरोधितां च । नैर्ऋत्यशाखारचिते च नीडे तस्याच्छनैर्वर्षति वर्षकाले । पीड़ा नृणां विप्लवचौरभीतिदुर्भिक्षयुक्तानि भवन्त्यवश्यम् । नीडे कृते पश्चिमवृक्षशाखामाश्रित्य काकैः कथिता च वृष्टिः । नीरोगता क्षेमसुभिक्षवृद्धिः सम्पत्प्रमोदाश्च भवन्ति लोके । वायव्यशाखासु कृते च नीड़े प्रभूतवाताल्पजलाश्च मेघाः । सुर्मूषिकोपद्रवशस्यनाशपक्षद्वयोद्वेगमहारिरोधाः । कौवेरशाखामधिकृत्य नीड़े कृते भवेत् प्रावृषि वृष्टिरिष्टा । भवन्ति च क्षेमसुभिक्षसौख्यनीरोगतावृद्धिसम्पद्वयोऽस्मिन् । ईशानशाखासु च वृष्टिरल्पा वैरं प्रजानामुपसर्गदोषः । स्याद्बान्धवानां कलहप्रवृत्तिर्म्म्यादया क्षीयत एष लोकः । इक्षाप्यनीड़े त्वतिवर्षकाले मध्ये पुनर्म्मध्यमतोयपातः । तृष्णापि वृष्टिर्न भवत्यधस्तात् स्फुटं दिशोक्तं न दिशः स्फुटत्वम् । अवृष्टिरोगादिभयादिवृद्धिं विद्याच्च भूमौ बलिभुक्कुलाये । शुष्के च वृक्षे डमरान्ननाशौ प्राकाररन्ध्रे च भयं प्रभूतम् । निम्नप्रदेशे तरुकोटरे वा वल्मीकरन्ध्रे व्रततिष्वपीह । काकस्य नीडे रुगवृष्टिदोषैर्भवन्ति शून्या नियमेन देशाः” । इति काकनीड़शकुनम् । अथ काकाण्डशकुनम् । “एकं भवेद्वारुणमाग्नेयं द्वितीयकं मारुतकं तृतीयम् । ऐन्द्रं तथा नाम चतुर्थमेव मण्डानि काक्याः परिकीर्त्तितानि । काक्या भवेद्वारुणमण्डकं चेत् पृथ्वी तदा नन्दति सर्वशस्यैः । मन्दप्रवर्षी ऽनलसंज्ञके ऽण्डे भोप्तस्य वीजस्य भवेत् प्ररोहः । जातानि शस्यानि समीरणेऽण्डे खादन्ति कीटाः शलभाः शुकाद्याः । क्षेमं सुभिक्षं सुखिता धरित्री स्यादैन्द्रको ऽण्डेऽभिमता च सिद्धिः” । इति काकाण्डश० । “यात्रानिमित्तानि च कीर्त्तयामः सकृत्प्रजानां शकुनानि यानि । विज्ञाय तानि प्रजहात्यनर्थानर्थांश्च सर्वान् कुरुतेऽध्वनीनः । भुङ्क्ते बलिं पवित्रमन्त्रपूतं त्वं प्राणिषु प्राणिषि वर्षलक्षम् । शुभेन च स्त्रीं भजसे नमोऽस्तु तुभ्यं खगेन्द्राय सकृत्प्रजाय । विलोक्य काकं विनिवेद्य तस्मै मन्त्रेण पूजां दधिभक्तयुक्ताम् । उदीर्य्य कार्य्यं निजमध्वगेन विलोकनीयं शकुनं तदर्थम् । वामेन शब्दं मधुरं विमुञ्चन् व्रजं स्ववामेन करोति काकः । सर्वार्थसिद्धिं पुनरागमञ्चाशुभप्रदेशे तु तदन्यरूपम् । प्रदक्षिणं संप्रविधाय मार्गे वामेन काको विनिवर्त्ततेऽसौ । याहुः करोतीप्सितकार्य्यसिद्धिं क्षेमञ्च शीघ्रं पुनरागमञ्च । वामे कलं रौत्यनुलोमयायी यो वायसो ऽसौ सकलार्थसिद्ध्यै । स्यातां क्रमाद्दक्षिणवामशब्दौ सिद्ध्यै, विरुद्धौ विपरीतभूतौ । पृष्ठे विरावं मधुरं विमुञ्चन्ननुव्रजंश्चापि मतो हिताय । प्रायेण यातारमनुव्रजन्तः सर्वेऽपि काकैः कथिता विहङ्गाः । कृत्वा रवं यः पुरतः प्रयाति उपस्थितो यो मुदमादधाति । कण्डूयते यः स्वशिरोऽङ्घ्रिणाऽसौ पुंसां तदाभीष्टफलं ददाति । स्तम्भे गजानां नियतं गजाप्तिं गजेऽधिरूढः पृथिवीपतित्वम् । तुरङ्गमे वाहनभूमिलाभं करोति काको विजयं ध्वजे च । प्रनष्टलाभं विजयं च कूपे, क्षिप्रं नदीरोधसि कार्य्यसिद्धिम् । पूर्णे घटेऽङ्गिश्च धनाप्तिवृद्धिं ध्वाङ्क्षोऽधिरूढः कुरुते सशब्दः । प्रासादधान्योच्चयहर्म्यपृष्ठनिष्पन्नशस्यावनिशाद्वलादौ । ध्वाङ्क्षो ऽधिरूढो धनसाधनाय रौति श्रियं यच्छति युग्मरावः । पृष्ठे पुरो वा यदि गोमयस्थो तथा वटाद्येषु तरुष्वपीह । स्थितो रुवन् भोजनपानमिष्टं विष्ठां च कुर्वन् वितरत्यवश्यम् । अन्नाद्यविष्ठाफलमूलपुष्पमत्स्यादिभिः पूर्णमुखः सदैव । संदृष्टमात्रो ऽभिमतार्थसिद्ध्यै मिष्टान्नभोज्याय सदैव काकः । नारीशिरः-पूर्णघटस्थितस्य काकस्य शब्दैर्वनिताधनाप्तिः । शय्याधिरूढस्य च तस्य शब्दैः समागमः स्यात् स्वजनेन सार्द्धम् । गोपृष्ठदूर्वातरुगोमयेषु तुण्डानि घर्षन्नवलोकिताध्वः । आहारमन्यस्य तथा ददानो ददाति भोज्यं बलिभुक्षिवित्तम् । धान्यं यवं वा दधि वापि चाज्यं विरौति पथ्यक्षिाधिलाभकारी । करोति लाभं पुरतः स दृष्टो यस्यास्ति वक्त्रे तृणमप्यशुष्कम् । वृक्षेषु रम्याङ्कुरपत्रपुष्पच्छायाफलाद्येषु सकृत्प्रजस्य । शब्देन सिध्यन्त्यसकृन्नराणां सदैव सर्वाणि समीहितानि । प्रशान्तनादः शिखरे तरूणां स्त्रीसङ्गसौख्यं करटोऽभिधत्ते । धान्यादिकूटेषु तथान्नलाभो गोपृष्ठगो गोवनिताधनाप्तिम् ।

क्षेमं विधत्ते करभस्य पृष्ठे खरस्य पृष्ठेऽरिभयं वधञ्च । क्रोड़स्य पृष्ठे वधमर्थलाभं तस्यैव पृष्ठे घनलग्नपङ्के । सद्योज्वरं सैरिभपृष्ठसंस्थो मृताङ्गसंस्थो मरणं करोति । कार्य्यक्षतिं रिक्तघटस्य संस्थः काकः कलिं काष्ठमधिष्ठितश्च । यो दक्षिणं कूजति दक्षिणेन प्रयाति यश्चाभिमुखोऽभ्युपैति । यो याति पृष्ठे प्रतिलोमगत्या क्षतारवः पातयते स रक्तम् । वामे रवो दक्षिणतस्ततो यः सोऽनर्थहेतुर्बलिभोजनस्य । वामप्रदेशे प्रतिलोमयानं विज्ञाय लाभो गृह एव तेन । प्रयाति पृष्ठे यदि दक्षिणेन क्षतारवस्तद्रुधिरं पुरः स्यात् । वल्लीवरत्रादि च यो गृहीत्वा प्रदक्षिणं याति स सर्पभीत्यै । गोपुच्छवल्मीकलतासदृश रुवन् भवेत् सर्पविलोकनाय । स्मशानवेऽङ्गारचितास्थिसंस्थः काकः प्रकुर्व्वन् करचर्व्वणं च । रुवन् पुरो हानिरुजौ करोति मृत्युं पुनर्निष्ठुरघृष्टशब्दः । प्रसार्य्य रिक्तं वदनं य आस्ते सर्व्वत्र निन्द्यो बलिभोजनोऽसौ । वामोऽप्यसृक्पातभयं मृतिं वा सन्ताड़यन् वा रथचर्म्मखण्डम् । चञ्च्वाऽस्थिभङ्गं प्रवसस्थिभङ्गबन्धौ वधं जल्पति युध्यमानः । वामोऽपि रोगं कुरुते विशुष्के तिक्तेऽपि वृक्षे कलिकार्य्यनाशौ । पक्षौ विधुन्वन् विरुवंश्च वृक्षं सकण्टके मृत्युमुपादधाति । बधो भवेद्रूढ़भग्नशाखे बन्धो लताभिः परिवेष्टिते स्यात् । रम्ये तरौ कण्टकयुक्तवृक्षे सदा भवेतां कलिकार्य्यसिद्धी । वृक्षाधिरूढो न रवेण यायात् प्रयाति चेत् स्यात् खलु रक्तपातः । अवस्कराम्भस्तृणकाष्ठकूपभस्मादिसंस्थो विनिहन्ति कार्य्यम् । वल्लीवरत्राकचशुष्ककाष्ठचर्म्मास्थिजीर्णाम्बरवल्कलानि । अङ्गाररक्तोत्पलकर्पराणि दृष्टानि चेत् काकमुखे तदानीम् । पुण्यक्षयः पापसमागमश्च महद्भयं रोगसमुद्भवश्च । बन्धो वधः सर्व्वधनापहार इत्यादिकं स्यात् पथि मन्दिरे च । ऊर्द्ध्वाननश्चञ्चलपक्षयुग्मः काकः कुनादी विदधाति मृत्युम् । छायायुधच्छत्रघटास्थियानवादित्रकाष्ठादिककुट्टनानि । सङ्कोचितैकाङ्घ्रिरुपेतचिन्तो दीप्तस्वरो भास्करमीक्षते च । काष्ठादिकं कुट्टयतेऽथ वा यो युद्धाधिकानर्थकरः खगोऽसौ । तुण्डेन पिच्छं विलिखन् रवेण यो रौति तूर्णञ्च निरीक्षते कम् । एकेन पादेन तथोपविष्टो ब्रूते स बन्धं पुरतो जनस्य । विड्गोमयौ न्यस्यति यस्य मूर्द्ध्नि तस्याऽनलत्रासरुजौ भवेताम् । यस्यास्थिखण्डं विसृजत्यसौ तु प्रयाति तूर्णं नगरीं यमस्य । शय्याप्रदेशे विरुवन् यियासोः कलत्रदोषं जनयत्यवश्यम् । मनुष्यमातङ्गतुरङ्गमाणां शिरोऽधिरूढो निधनाय तेषाम् । नदीतटे वाऽथ रटन्नटव्यां खरस्वरो व्याघ्रभयाय गन्तुः । नैशांतरः क्वापि मतो हिताय न दुष्टचेष्टो वितनोति शान्तिम् । यात्रोद्यमे सैन्यबधाय काको दृष्टो रथे शास्त्रनृमस्तकेषु । आयाति यस्याभिमुखो बलस्य युद्धोद्यमे तस्य पराजयः स्यात् । सगृध्रकङ्कैः कटके नृपस्य काकैः प्रविष्टैः पिशितं विनापि । संयुध्यमानैररिभिः समं स्यान्महाहवे सन्धिरयुध्यमानैः । चिह्नध्वजच्छत्रकृताधिरोहः समुद्यतं शत्रुबलं प्रपश्यन् । आजौ जयं जल्पति भूमिपानां कृतध्वनिः क्षीरतरौ च काकः । गतिस्वरौ वायसस्य प्रयुक्तौ प्राच्यां फलायोदितवैपरीत्यात् । एवं जनोऽप्याचरति प्रभूतो यथोदितं तत्र यथागमार्थम् । दिग्यामचक्रेऽपि शुभाशुभानि फलानि यानि प्रतिपादितानि । प्रतिष्ठमानस्य भवन्ति तानि तथाविधानीति वदन्ति तज्ज्ञाः” । इति यात्राङ्ककाकरु० ।

“स्थानस्थितिभ्यां कथयन्ति काकाश्चेष्टाविशेषेण शुभाशुभानि । प्रबोधिताः प्राक्तनकर्म्मभिर्यैस्तत्क्षपणाय क्रियते प्रयत्नः । निष्कारणं संवलिता रुवन्तो ग्रामेऽत्रनाशाय भवन्ति काकाः । रोधञ्च चक्राकृतयो वदन्ति सव्यापसव्यभ्रमणाद्भयञ्च । विघातमाकुञ्चवर्गसंस्था रात्रौ रुवन्तो जनताविनाशम् । लोकञ्च चञ्चूचरणप्रहारैरुद्वेजयन्तः परचक्रवृद्धिम् । यः स्नाति धूल्यान्तु विलोक्य रौति वृष्टिं समाशंसति वायसोऽसौ । जलस्थलप्राणिविपर्य्ययेण वर्षासु वृष्टिं भयमन्यदा तु । मध्यंदिने वेश्मनि यस्य काको विरौति रौद्रं विधुनोति वाङ्गम् । हरन्ति चौरा द्रविणानि तस्य ध्रुवं तथान्यो भवति प्रमादः । रुवन्नहृष्टस्तृणपूर्णवक्त्रो हुताशभीतिं करटः करोति । स्यात् प्रस्थितस्याप्यथ वा स्थितस्य दुःखं प्रभूतं दिवसत्रयेण । छायासु लाभं, भुवि भूमिलाभं, विघ्नं जले, ग्रावणि कार्य्यनाशम् । करोति काको विरुवन्नरस्य प्रस्थायिनः स्थानगतस्य वापि । द्वारप्रदेशे रुधिरानुलिप्तो विरौति काकः शिशुनाशनाय । पक्षौ विधुन्वन् विरुवंश्च वृक्षं शान्ते च दीप्ते भवने न शस्तः । भूयस्तथोर्द्ध्वं प्रविधाय पक्षौ काकः क्षुनादं प्रलयं करोति । क्रुद्धोऽधिरूढः करटान्तरञ्च रोगेण मृत्युं कुरुते नराणाम् । द्रव्ये हृते वाऽप्रहृते खगेन विनाशलाभावपि तादृशस्य ।

रुक्मस्य पीते, रजतस्य शुक्ले, चेलस्य कार्पासमये भवेताम्। प्रश्ने कृते रोगविनाशबुद्ध्या हन्त्याशु रोगं सुरवः प्रदीप्ते। शान्ते प्रदेशे करटश्चिरेण स्वल्परवो रोगमपाकरोति। प्रश्ने शुभे शान्तदिगाश्रयस्थः शान्तस्वरो यः शुभमादधाति। यो वायसस्तं शुभदं वदन्ति तद्वत्यये व्ययहेतुरुक्तः। विरौति कुम्भे मणिकेऽथ वा यः स गर्भवत्याः सुतजन्महेतुः। उड्डीयते कण्टकिनीश्च शाखामादाय राजागमनाय काकः। अन्नादिविष्ठापिशितादिभिर्यः पूर्णाननो ऽभीष्टफलप्रदोऽसौ। मन्त्रादिसिद्धौ वणिजादिलाभे शस्तो विवाहादिविधौ च काकः। दृष्टार्थदोऽश्वादिकवाहनस्थश्छत्त्रादिसंस्थस्तदवाप्तकारी। बध्वागमं जल्पति तोरणस्थो हृद्यार्थदो हृद्यतरुस्थितश्च। वायसः कुलकुलध्वनिं यदा व्याहरेद्भवनसंसुखं तदा। अभ्युपैति पथिकस्तदा ध्वनिं सर्व्वकार्य्यशुभदं वदत्यसौ। इदं त्विहोत्पातयुगं पृथिव्यां महाभयं शाकुनिका वदन्ति। यद्वायसो मैथुनसन्निविष्टो दृश्येत १यद्वा धवलः२ कदाचित्। उद्वेगविद्वेषभयप्रवासधनक्षयव्याधिभयप्रहाराः। बुद्धिप्रणाशाकुलताप्रवादा नृणां भवन्त्यत्र तु तद्दर्शनेन। शमाय तत् सूचितदुःखराशेः स्नानं बहिस्तत्क्षणमेव कुर्य्यात्। आत्मीयशक्त्या च सदक्षिणानि द्विजाय दद्यात् वसनानि तानि। नयेदहःशेषमपुण्यहान्या शयीत भूमावक्षताम्नभक्षः। हविष्यभोजी न भजेच्च नारीं दिनानि सप्त त्रिगुणानि यावत्। अकाकघातव्रतमादधीत बलिं च दद्याद्बलिभोजनेभ्यः। स्नात्वा प्रभाते विदधीत शान्तिं दद्यात् स्वशक्त्या द्रविणं गुणिभ्यः। देशे तु यत्राद्भुतमेतदुपमालोक्यते तत्र समापतन्ति। अवृष्टिदुर्भिक्षभयोपसर्गचौराग्निशत्रूद्भवधर्म्मनाशाः। कर्म्माणि तस्योपशमाय राजा प्रवर्त्तयेत् शान्तिकपौष्टिकानि। अन्नाद्यगोभूमिवसूनि दद्यात् शुद्धं विदध्याच्च च यावदब्दम्"। इति स्थानविशेषस्थितकाकचेष्टा शकु०। अथ काकध्वनिभेदश०। "ककामिति क्षेमविधौ विरावः केकामितीष्टाशनपानहेतुः। करोति कूंकूमिति चार्थलाभं, कं कं ध्वनिः काञ्चनलाभमाह। केंकेंमिति स्त्रीवरयोर्विदार्थं भोगाय कांकामिति शब्दतः स्यात्। अपत्यलाभः कुव इत्यनेन गन्तुः फलं केकव इत्यनेन। कौं कौमितीदं शुभलाभकारि कुंकुंनिनादः प्रियसङ्गमाय। क्रां क्रुमिति क्रामिति च त्वयोऽमी क्रां क्रामिति द्वौ च रवौ रणाय। क्रां क्रामिति क्रौमिति च द्विरुक्तं क्रूं क्रूमिति क्रौं कुकु कू इतीदम्। रुतं प्रदिष्टं मरणाय नृणां गन्तुः प्रणाशं कुरुते खगाख्यः। क्रौं क्रौमितीष्टार्थविनाशनाय ज्वलज्वलेत्यग्निभयाय शब्दः। कोकोति कोकाविति यः कथञ्चिन्मुहुर्मुहुः स्यात् स मतो बधाय स्यात् का इतीदं विफलं सदैव मित्राप्तये स्यात् क इतीरितश्च। काका इतीदं तु विघातकारि करोति काको वदति स्वतुष्ट्यै। आहारदोषाय च काकटीति स्यादाकुलं कुक्कुनिभं रणाय। केके ध्वनिः काकुटि किंटिकीति त्रयं त्विदं स्यात् पुरदूषणाय। यत् का इति त्रिस्तदनुस्वरेण शब्दद्वयं स्यान्महते रणाय। कामित्ययं वाहननाशनश्च ददाति हर्षं कुकुकुर्व्विंतीदम्। यत्का इतीदं विरुतं सुदीर्घकृतस्वरेणोच्चरितम् प्रमादात्। उत्साहहीनः श्रमदैन्ययुक्तः स वायसः कार्य्यविनाशनाय। सामिषं वकवकेति भोजयेद्वारयेत् कलिकलीति वाशनम्। अभ्युपैति स्वरक्षभाषिते प्रोषितः शवशवारवे शवः। स्यात् कलिः कवकवध्वनौ नृणां जायते कणकणाध्वनौ रणः। आव्रजेत् कुलुकुलुध्वनौ प्रियः सौदनं कटकटध्वनौ दधि। एवंप्रकारा बहवोऽपरेऽपि प्रशान्तदीप्ता बलिभोजनानाम्। भवन्ति शब्दाः खलु तेषु केचिदस्माभिरुक्ताः खलु लक्षणीयाः। इति काकध्वनिभेदशकुनम्। "हितं नरेभ्यो मुनिभिः पुराणैर्यदुक्तं बलिपिण्डयुक्त्या। तदुच्यते संप्रति येन काका वदन्ति नित्यं बलिलाभतुष्टाः। अदक्षिणस्यां दिशि यत्र काकैर्युतो भवेत् क्षीरतरुः प्रभूतः। गत्वा निवृत्ते ऽहनि तत्र काका निमन्त्रणीया बलिपिण्डभोज्ये। प्रातस्ततः क्षीरतरोरधस्ताद्विशोध्य लिम्पेत च गोमयेन। भूमिप्रदेशे चतुरस्रमस्य मध्ये ऽर्च्चयेत् ब्रह्ममुरारिभानून्। इन्द्राग्निवैवस्वतयातुधानजलेशवायुद्रविणेशशम्भून्। अभ्यर्च्चयेदष्टसु दिक्षु भक्त्या क्रमेण चाष्टावपि लोकपालान्। नमोयुतैः स्वप्रणवैश्च सर्व्वान् द्विजाभिधानैः प्रयतो मनुष्यः। अर्घासनालेपनपुष्पधूपनैवेद्यदीपाचनदक्षिणाभिः। आमन्त्र्य काकांस्तरुसन्निविष्टानाध्याय तत्प्राक्तनमन्त्रमुक्त्वा। ततस्तदर्थं बलिमाज्यसिक्तं मन्त्रेण दद्यात् दधिपिण्डयुक्तम्। "उदीर्य्य कार्य्यं स्वमथावहत्य ततः प्रदेशे करटस्य चेष्टाः।

मन्त्रोक्तताङ्ग शुभाशुभार्थं संलक्षयेच्चिह्नमपास्य पादः। पूर्वेण खादन् सुखवित्तवृद्धिं करोति वह्नौ दिशि वह्निभीतिम्: काकोऽथ नाशं दिशि दक्षिणस्यां नैर्ऋत्यदिग्गोचरहृत्यदिष्टः। जलेशदेशेऽभिमतार्थसिद्धिर्वायोर्दिशीतिप्रभवाल्पवृष्टिः। सौम्ये सुखारोग्यसमोहितार्थमीशानदेशे वितरत्यभीष्टम्। बलौ विलुप्ते करटैः समन्तात् कार्य्यं विमिश्रं परिभावनीयम्। बलिं विकीर्य्यापि न भक्षयन्ति काकास्तदानीं भयदा भवन्ति। क्षीरद्रुमारामचतुष्पथेषु, सरित्समीपे त्रिदशालयेषु। देयो बलिर्भूतदिनाष्टमीषु कुल्माषदध्योदनतण्डुलाद्यैः”। इति काकबलिदानशकु०। “पिण्डत्रयस्याथ विधानमेतदाख्यायते यत् किल नारदाद्यैः। दृष्टं मुनीन्द्रैरशुभं शुभञ्च यथावदस्मिन् कथयन्ति काकाः। गत्वा शुभेऽह्नि प्रहरे चतुर्थे देशेषु पूर्व्वं प्रतिपादितेषु। नरेण पिण्डत्रयभोजनार्थं काकाः प्रयत्नेन निमन्त्रणीयाः। ततः प्रभाते ह्युपलिप्य भूमिं तस्याञ्च पूर्व्वोदितमन्त्रयुक्त्या। ब्रह्माच्युतेशाप्पतिलोकपालाः काकाश्च पुंसां क्रमतोऽर्च्चनीयाः। दध्योदनाद्यैर्विहितं निवेश्य पिण्डत्रये मण्डलकस्य मध्ये। अभ्यर्च्चयेदक्षतपुष्पधूपैर्मनोहरैर्यत्नपरो मनुष्यः। तेषु क्षिपेत् प्राग्दिगनुक्रमेण पिण्डेषु हेम प्रथमे, द्वितीये। रूप्यं, तथा लौहलवं तृतीये, शेषं च कुर्य्याद्बलिपिण्डतुल्यम्। त्रिःसप्तकृत्वो विनिवेशपिण्डे पिण्डा निवेश्या बलिभोजनेभ्यः। मन्त्रोक्तमावाहनतोषितेभ्यः कार्य्यं विचार्य्याऽपसरेत्ततश्च। काकेन भुक्ते सुसुवर्णपिण्डे श्रेयं नरेणोत्तममात्मकार्य्यम्। भुक्ते तु रूप्ये खलु मध्यमं स्याद्भुक्ते च लौहे त्वधमं प्रदिष्टम्। विवादवाणिज्यविवाहदृष्टिक्षेमाश्वचिन्ताकृषिभोगरोगाः। संग्रामसेवान्यकार्य्यदेशाः इत्यादयोऽस्मिन् परिभावनीयाः। चेष्टाः सुरामा विदधाति याति प्रदक्षिणं दक्षिणपक्षपुच्छैः। ग्रीवां तथोच्चां कुरुते सशब्दः स्थानं मनोज्ञं श्रयति द्रुमञ्च। एवंविधां यो विदधाति चेष्टां पिण्डं समादाय शुभं खगोऽसौ। अभीष्टकार्य्यादधिकं करोति चेष्टाविपर्य्यासतयान्यथात्वम्। पिण्डं समादाय यदि प्रधानं शान्तां दिशं गच्छति काकपक्षी। पूर्णं फलं तत् कुरुते नराणां चिकीर्षिते वस्तुनि यत्र तत्र। काको गृहीत्वा यदि मुख्यपिण्डं प्रयाति दीप्तां ककुभं तदानीम्। अत्युत्तमं कार्य्यफलं प्रदर्श्य ततः समस्तं विनिहन्त्यवश्यम्। द्वितीयकं यद्यपहृत्य पिण्डम् प्रडीयते शान्तदिगाश्रयेण। फलं तदानीं शुभदं नराणां याम्यं खगो जल्पति कार्य्यजातम्। काके समादाय जघन्यपिण्डं याते प्रदीप्तां ककुभं वदन्ति। कार्य्यं जघन्यादधिकं जघन्यं स्यान्मध्यमं मध्यमपिण्डभागे”। इति बलिदाने पिण्डत्रयशकुनम्। “महर्षयो वायसशाकुनस्य वदन्ति सारादपि सारभूतम्। पिण्डाष्टकं यत्तदशेषमेतदाख्यायते कार्य्यविनिश्चयार्थम्। शुभेऽह्नि काकानधिवास्य सायं पिण्डाष्टकं भोक्तुमथ प्रभाते। यत्काकभोग्यानि समस्तवस्तून्यादाय यायाद्बहिरप्रमत्तः। एकान्तदेशे तरुपार्श्वभूमौ स्वह्नोमयाभ्यामुपलेपितायाम्। सत्पञ्चगव्येन समुक्षितायां सौम्योपहारैरुपशोभितायाम्। विधाय पूजां कुलदेवतानां मध्ये ततोऽष्टास्वपि दिक्षु देयम्। भक्तेन सर्पिर्दधिमिश्रितेन पिण्डाष्टकं प्राग्दिगनुक्रमेण। पक्षीन्द्रवज्र्यन्तकराक्षसेन्द्रान् विष्णुं विरिञ्चिं धनदं महेशम्। पूर्व्वादिकाष्ठाक्रमयोजितेषु न्यस्येत् क्रमादष्टसु पिण्डकेषु। नमोयुतैस्तान् प्रणवैश्च सर्व्वांस्ततोऽर्च्चयेत्तद्विजनाममन्त्रैः। कृर्पासनालेपनपुष्पधूपैर्नैवेद्यदीपाक्षतदक्षिणाभिः। अभ्यर्च्चितेभ्यो विधिनोदितेभ्य पिण्डाष्टकं तत् वितरेत् द्विजेभ्यः। मन्त्रेण संमन्त्र्य निवेदनार्थं कार्य्यं विचिन्त्यापसरेच्च किञ्चित्। काकेन पिण्डे प्रथमे गृहीते तिष्ठन् व्रजन् वापि भवेत् कृतार्थः। उद्वेगशोकौ विफलं प्रयाणे, हानिः कलिर्व्वा भवति द्वितीये। याम्ये रुगापद्भयमृत्यवः स्युः पिण्डे चतुर्थे विजयो रणेषु। स्याद्दैन्यतेऽभीष्टमकष्टसाध्यं भवेत् प्रवासो विफलश्च षष्ठे। नास्तीह तच्चिन्त्यमेव कार्य्यं भुक्ते न यत् सिध्यति सौम्यपिण्डे। सन्तापशोकौ विफला च यात्रा पिण्डेऽष्टमे वायसभक्षिते च। पिण्डं न गृह्णात्यथ वा न भुङ्क्ते चञ्चूनखैर्व्विक्षिपति द्विजो यः। कार्य्येषु सर्व्वेषु स न प्रशस्तो ब्रवीति घोरं समरं स पुंसाम्”

काकरुहा स्त्री काकरव रोहति अन्तरीक्षे मूलशून्यतया जायते। (परगाछा) वन्दाकवृक्षे त्रिका०।

काकरूक पु० कुत्सितं करोति कृ—ऊक कोः कादेशः। १स्त्रीजिते स्त्रीजितस्य स्त्रीमतानुसारेण कुत्सितकरणात्तथात्वम्। २निर्द्धने ३दिगम्बरे ४भीरौ च त्रि०। तेषां कुत्सिताचरणात् तथात्वम्। करणे ऊक। ५दम्भे पु०। दम्भेन धर्म्माचरणस्य कुत्सितत्वात् तस्य तथात्वम्।

काकेन लूयते लू-छिदि कर्मणि क्विप् तस्य रः संज्ञायां कन्। ६पेचके पुंस्त्री हेमच०। तस्य काकच्छेद्यत्वात्तथात्वम्। स्त्रियां जातित्वात् ङीष्।

काकल न०ईषत् कलो यस्मात् कोः कादेशः।१ग्रीवास्थे उन्नतप्रदेशे (टुँटि)त्रिका०। ततो वा कप्। तत्रार्थे पु०हेमच०। "एकः काकलके गासायाश्च" इति शरीरस्थसन्धिकथने "एकैका काकलकगलयोः" इति पेशीसंख्यानोक्तौ च सुश्रु०

कलेति कलो यस्य। २द्रोणकाके पुंस्त्री शब्दर०स्त्रियां ङीष्। ईषत् कं जलं लाति ला—क संज्ञायां कन्। षष्टिकधान्यभेदे तस्य षड्जलनिष्पन्नत्वात्तथात्वम्। "षष्टिककङ्गुकमुकुन्दकपीतकप्रमोदककाकलकासनपुष्पकमहाषष्टिकचूर्णककुरवककेदारकप्रभृतयः षष्टिकाः" सुश्रु०। "गर्भस्था एव ये पाकं यान्ति ते षष्टिका मताः"। भाव-प्रका० षष्टिकलक्षणमुक्त्वा तद्गुणा दर्शिता यथा— "षष्टिकाः मधुराः शीताः लघवो बद्धवर्चसः। वातपित्तप्रशमनाः शालिभिः सदृशा गुणैः" इति एवं सुश्रुतेऽपि।

काकलि(ली) स्त्री कल-इन् ईषत् कलिः कोः कादेशः। कृदिकारान्तत्वात् वा ङीप्। सूक्ष्ममधुरास्फुटध्वनौ अमरः "सहकारकिसलयमकरन्दास्वादनरक्तकण्ठानां मधुकरकलकण्ठानां काकलीकलकलेन" दशकु०। "उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः" सा० द०। काकलं गलस्योन्नतप्रदेशाकारः अस्त्यस्य अच् गौरा०ङीष्। काकलाकारे सन्धिसाधने पदार्थे "फणिमुखकाकलीसंदशकपुरुषशीर्षकयोगचूर्णयोगवर्त्तिकामानसूत्रकर्कटकरज्जुदीपभाजनभ्रमरकरण्डकप्रभृत्यनेकोपकरणयुक्तो गत्वा कस्यचिद्धीश्वरस्य गृहे सन्धिं छित्त्वा" दशकु०। काकं काकवर्णमर्धफले लाति ला—क गौरा० ङीष्। २गुञ्जायाम्। "काकलीमूलं गुञ्जामूलम्" ज्यो०त० रघु०।

काकलीद्राक्षा स्त्री काकलीव सूक्ष्मा द्राक्षा। अबीजायाम् क्षुद्रद्राक्षायाम्(किस्मिस्)राजनि०।"अबीजान्या स्वल्पतरा गोस्तनीसदृशी गुणैः" भावप्र०। गोस्तनीशब्दे तद्गुणा दृश्याः

काकलीरव पुंस्त्री काकली मधुराव्यक्तो रवो यस्य। १कोकिले राजनि० स्त्रियां जातित्वात् ङीष्। कर्म०। २काकलीरूपे रवे पु०। काकलीकलादयोऽप्यत्र।

काकवल्लभा स्त्री ६त०। काकजम्बुके राजनि०। [राजनि०

काकवल्लरी स्त्री काकप्रिया वल्लरी शाक०त०। स्वर्णवल्ल्याम्

काकशिम्बी स्त्री काकप्रिया शिम्बी। काकतुण्ड्याम् राजनि०

काकशीर्ष पु० काकः शीर्षेऽग्रेऽस्याः। वकवृक्षे जटाधरः। काकस्य तदग्रे वासयोग्यत्वात्तस्य तथात्वम्।

काकस्त्री च० काकस्य स्त्रीव नाम्यत्वात्। वकवृक्षे शब्दचि०।

काकस्फूर्ज पु० काकः स्फूर्जत्यत्र स्फूर्ज—आधारे घञ्। कार्कतिन्दुके राजनि०।

काका स्त्री ईषत् कं जलमत्र, काकः काकाकारोऽस्त्यस्य अच् वा। १काकनासावृक्षे २काकोल्यां ३काकजङ्घायाम् ४गुञ्जायां ५मलपूम् (काकोडुम्बरिकायाम्) ६काकमाच्याञ्च मेदि०।

काकाक्षिगोलकन्याय पु० काकस्याक्षिगोलकमिव न्यायः। काकस्य एकं चक्षुर्यथा उभयगोलके पर्य्यायेण चक्षुःकार्य्यकारकमेवमेकस्योभयसंबन्धज्ञापके न्याये।

काकाङ्गी स्त्री काकस्याङ्गं जङ्घेवाकारोऽस्याः वा ङीष्। काकजङ्घावृक्षे अमरः। पक्षे टाप् काकाङ्गा तत्रार्थे रमानाथः।

काकाञ्ची स्त्री काकं तज्जङ्घाकारमञ्चति गच्छति अन्चगतौ अण् गौरा०ङीष्, पा०, मुग्ध०मण् ईप्। काकजङ्घावृक्षे शब्दरत्ना०।

काकाण्ड पु० काकस्य अण्ड इव फलं यस्याः पुंवत्। १महानिम्बे तस्य गुणादि सुश्रुतेनोक्तं यथा "माषैः समानं फलमात्मगुप्तस्तु काकाण्डफलं तथैव"। २कोलशिम्ब्याम् स्त्री गौरा०ङीष् तदन्तः ३महाज्योतिष्मत्यां राजनि०। ६त०। ४काकस्याण्डे पुंन०।

काकाण्डोला स्त्री काकाण्डस्य तुला उपमा फले यत्र पृषो० तलोपः। कोलशिम्ब्याम् राजनि०।

काकादनी स्त्री काकैरद्यतेऽसौ अद—कर्म्मणि ल्युट् ६त० ङीप् १गुञ्जायाम् शब्दर०। २श्वेतगुञ्जायाम् राजनि० ३कुलिकवृक्षे (कुलियाखाड़ा) वृक्षे रत्नमा०। "मद्येनाश्वमारकगुञ्जाकाकादनीमूलकल्कनं पाययेत्" सुश्रु० इयञ्च सुश्रुते "कालेयकागुरुतिलपर्णीत्याद्युपक्रमे" "सुमनः काकादनीलाङ्गलोत्यादिना" "समासेन श्लेष्मसंशमनो वर्गः" इति श्लेष्मशमनतयोक्ता।

काकायु पु० काकस्यायुर्यस्मात्। स्वर्णवल्लीवृक्षे शब्दचि०।

काकार त्रि०कं जलमाकिरति आ+कॄ—अण्। जलसारिणि। स्त्रियां टाप् मुग्ध० षण् ईप् इति भेदः।

काकारि पु० काकोऽरिरस्य। पेचके। हेमच०।

काकाल पुंस्त्री केति शब्दं कलते रौति कल—अण्। द्रोणकाके शब्दरत्नमा० स्त्रियां जातित्वात् ङीष्।

काकि पुंस्त्री काकस्यापत्यम् वा इञ्। काकापत्ये स्त्रियां ङीप्। पक्षे वाकिना० फिञ् कुक् च। काककायनि तदर्थे पुंस्त्री। स्त्रियां ङीप्।

काकिणी स्त्री "काकिणी च चतुर्भागो माषकस्य पणस्य च" शु०त० नारदोक्ते १माषकचतुर्थभागे २पणचतुर्थभागे च। "वराटकानां दशकद्वयं यत् सा काकिनी(णी) ताश्च पणश्चतस्रः" इति लीला०। "तस्मात् पणं काकिणीं वा फलं पुष्पमथापि वा। प्रदद्यात् दक्षिणां यज्ञे यथा स सफलो भवेत्" शु०त० दक्ष०। स्वार्थे कन्। काकिणिका तत्रार्थे "क्वचिच्छिल्पिव्यवहारेण यत्किञ्चिद्धनमनेभ्यो वा काकिणिकामात्रम्" भाग०५,१४,२।

काकिनी स्त्री १पणपादे २मानपादे ३वराटके च मेदि०। मानपादः निवर्त्तनपाद इति केचित् (चारिकाठा) माषपाद इत्येवः पाठो न्याय्यः काकिणीशब्ददर्शितनारदवाक्यैकवाक्यत्वात्

काकिल पु० ईषत् किरति कॄ—क कोः कादेशः रस्य लः। गलस्योन्नतदेशे (टुंटि) शब्दमा०।

काकी स्त्री काक+जातित्वात् स्त्रियां ङीष्। १काकयोषिति काकवर्णत्वात् २वायसोलतायाम् ३काकोल्याञ्च शब्दचि०

काकु स्त्री कक—उण्। १शोकभीत्यादिभिर्ध्वनेर्विकारे, अलङ्कारप्रसिद्धे २विरुद्धार्थकल्पके नञादौ शब्दे च। "कामेकान्ते सा रसिका काकुरुतेन" सा०द०। "प्रणिजगदुरकाकुश्रावकाःस्निग्धकण्ठाः" माघः। सा० द० "वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः। प्रस्तावदेशकालानां काकोश्चेष्टादिकस्य च। वैशिष्ट्यादन्यमर्थं या बोधयेत् साऽर्थसम्भवा" इति व्यञ्जनाहेतून् निर्दिश्य "भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते" काकुं लक्षयित्वा उदा० "गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्। अलिकुलकोकिलललिते नैष्यति सखि! सुरभिसमयेऽसौ" नैष्यति अपि तर्हि ऐष्यत्येवेति काका व्यज्यते" इत्युक्तम्।

काकुत्स्थ पुंस्त्री ककुत्स्थस्य नृपस्यापत्यं शिवा० अण्। ककुत्स्थवंश्ये स्त्रियां ङीप्। ककुत्स्थशब्दे विवृतिः "काकुत्स्थमालोकयतां नृपाणाम्" "तं विनिष्पिष्य काकुत्स्थो पुरा दूषयति स्थलीम्" "असज्जनेन काकुत्स्थः प्रयुक्तमथ दूषणम्" रघुः। "काकुत्स्थ ईषत्करयमान आस्त" भट्टिः

काकुद न० काकुं ददाति दा—क उप०स०। तालुनि अमरः तालुना काकूच्चारणात् तस्य तथात्वम् "उद्विभ्यां काकुदस्य" पा० बहु० अस्यान्त्यलोपः "उत्काकुत्, विकाकुत्" वि० को० "पूर्णाद्विभाषा" पा० बहुव्रीहौ वाऽन्त्यलोपः। पूर्णकाकुत् पूर्णकाकुदः।

काकुभ त्रि० ककुभ इदं उत्सा० अञ्। १ककुप्छन्दस्के प्रगाथादौ। २दिक्सम्बन्धिनि च स्त्रियां ङीप्। ककुभोऽपत्यम् शिवा० अण्। तदपत्ये पुंस्त्री स्त्रियां ङीप्।

काकेक्षु पु० काक ईषदर्थे इक्षुः कोः कादेशः कर्म्मधा०। (नलखागड़ा) १तृणभेदे त्रिका० २कासभेदे राजनि०।

काकेन्दु पु० काकस्य इन्दुरिवाह्लादकत्वात् काकस्य प्रियः स्निग्धः इन्दुः पृषो०वा। (माकड़ाकेन्दु) कुलिकवृक्षे अमरः।

काकेष्ट पु० ६त०। निम्बवृक्षे राजनि०।

काकोचिक पु० ईषत् कोची सङ्कोची कुच—णिनि स्वार्थे कन् (कुँचे) मत्स्यभेदे कन्नभावे काकोचिन् इत्यपि तत्र हारा० पु०। हारावल्यां "काकोचिकस्तु काकोचीत्यत्र पुंसाहचर्यात् पुंस्त्वमेव न्याय्यम्। ईकारान्तत्वभ्रमेण शब्दकल्पद्रुमे स्त्रीत्वोक्तिः प्रामादिकी।

काकोडु(दु)म्बर पु० काक ईषदर्थे उडुम्बरः कर्म्म० काकस्य प्रियः उडु(दु)म्बरो वा। (कोटाडुमर) ६उ(दु)डुम्बरभेदे शब्दरत्ना०। स्वार्थे कन् अत इत्त्वम् स्वार्थिकप्रत्ययस्य प्रकृतिलिङ्गव्यतिक्रमः। काकोडु(दु)म्बरिकाप्यत्र स्त्री अमरः। "तत्र दद्यात् प्रतीवापं काकोडु(दु)म्बरिकारसम्" "काकोडु(दु)म्बरिकागोजीपत्रैर्विस्रावयेदसृक्" सुश्रु०। काकोडु(दु)म्बरिका फल्गुर्मलपूर्णश्चनेफला" मलपूरश्चमलत् तिक्ता शीतला तुवरा जयेत्। कफपित्तव्रणश्वित्रकुष्ठपाण्डुर्शःकामलाः" इति भावप्र० तत्पर्य्यायोक्तिः।

काकोदर पुंस्त्री कुत्सितं कुटिलमकति अक—वक्रगतौ अच् कोः कादेशः काकमुदरं यस्य। १सर्पे अमरः स्त्रियां जातित्वात् ङीष् तस्य उरसा कुटिलगामित्वात्तथात्वम् "काकोदरोयेन विनीतदर्पः" राघवपाण्डवीयम्।

काकोल पु० काकयति लोलयति कक—लौल्ये णिच् वा० ओल काकेन उल्लाय अद्यतेऽत्र उद्+ला—घञर्थे आधारे क पृषो०वा। १नरकभेदे "महानरककाकोलम् संजीवनमहापथम्" नरकभेदकीर्त्तने मनुः, काकोलं यत्र काकैर्भक्ष्यते" प्रा० वि०। कं जलमाकोलति आ+कुल—सं स्त्याने अण् उप० स०। २कुम्भकारे तस्य घटनिर्म्माणेन जलसंस्त्यानकरणात्तथात्वम्। कक—लौल्ये स्वार्थे णिच् वा० ओल। ३द्रोणकाके पुंस्त्री मेदि० स्त्रियां जातित्वात्

ङीष्। "बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम्" अभक्ष्यमांसोक्तौ मनुः। "कलविङ्कं बकाकोलं कुररं रज्जुदालकम्" अभक्ष्यमांसोक्तौ याज्ञ०। ईषत् कोलति कुल-सन्ताने करणे घञ् कोः कादेशः। "काकोलस्तु-च्यतेजः स्यात् कृष्णच्छवि महाविषम्" वैद्यकोक्तलक्षणे ४विष-भेदे अमरः ५सर्पे ६शूकरभेदे पुंस्त्री शब्दरत्ना० स्त्रियां जातित्वात् ङीष्। काकोलीनामौषधौ पु० धरणी।

काकोली स्त्री काकोल+गौरा० ङीष्। "जीवकर्षभकौ मेदे काकोल्यौ ऋद्धिवृद्धिके। अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः" इति भावप्रकाशोक्ताष्टवर्गान्तर्गते लताभेदे तद्भेदलक्षणगुणादिकं भावप्र० उक्तं यथा "जायते क्षीरकाकोली महामेदोद्भवस्थले। यत्र स्यात् क्षीरकाकोली काकोली तत्र जायते। पीवरीस-दृशः कन्दः क्षीरं स्रवति गन्धवान्। सा प्रोक्ता क्षीरकाकोली काकोल्यपि तथा भवेत्। एषा किञ्चिद्-भवेत् कृष्णा भेदोऽयमुभयोरपि। काकोली वायसोली च वीरा कायस्थिका तथा। सा शुक्ला क्षीरकाकोली वयस्था क्षीरवल्लिका। कथिता क्षीरिणी धीरा क्षीरशुक्ला पय-स्विनी। काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु बृंहणं वातदाहास्रपित्तशोषज्वरापहम्"। "सोमामृताश्वगन्धासु काकोल्यादौ गणे तथा। क्षीरिप्ररोहेष्वपि च वर्त्तयो-रोपणाः स्मृताः"। "समङ्गा सोमसरला सोमवल्का स-चन्दना। काकोल्यादिश्च कल्कः स्यात् प्रशस्तो व्रणरोपणे"। "पृश्निपर्ण्यात्मगुप्ता च हरिद्रे मालती सिता। काको-ल्यादिश्च योज्यः स्यात् प्रशस्तोरोपणे घृते" इति च सुश्रु०।

काकोलूक न० काकश्च उलूकश्च शाश्वतिकविरोधित्वात् समा-हारद्वन्द्वः। काकोलूकसमाहारे ततः वैरे वुञ्। काको-लूकिका तयोर्वैरे स्त्री। काकोलूकमधिकृत्य कृतोग्रन्थः "द्वन्द्वाच्छः" पा० काकोलूकीय तयोराख्याने तच्च भा० सौ० १अ० स्थितं यथा—

"सुप्तेषु तेषु काकेषु विस्रब्धेषु समन्ततः। सोऽपश्यत् सह-सायान्तमुलूकं घोरदर्शनम्। महास्वनं महाकायं हर्य्यक्षं बभ्रुपिङ्गलम्। सुदीर्घघोणानखरं सुपर्णमिव वेगितम्। सोऽथ शब्दं मृदुं कृत्वा लीयमान इवाण्डजः। न्यग्रो-धस्य ततः शाखां प्रार्थयामास भारत! संनिपत्य तु शाखायां न्यग्रोधस्य विहङ्गमः। सुप्तान् जघान सुब-हून् वायसान् वायसान्तकः। केषाञ्चिदच्छिनत् पक्षान् शिरांसि च चकर्त्त ह। चरणांश्चैव केषाञ्चिद्बभञ्ज चर-णायुधः। क्षणेनाहन्त्र बलवान् येऽस्य दृष्टिपथे स्थिताः। तेषां शरीरावयवैः शरीरैश्च विशाम्पते!। न्यग्रोधमण्डलं सर्वं सञ्छन्नं सर्वतोऽभवत्। तांस्तु हत्वा ततः काकान् कौशिको मुदितोऽभवत्। प्रतिकृत्य यथाकामं शत्रूणां शत्रुसूदन!"।

काकोल्यादि पु० सुश्रुतोक्ते काकोलीप्रभृतौ ओषधिगणे स च गणः "काकोलीक्षीरकाकोलीजीवकर्षभकमुद्गपर्णी-माषपर्णीमेदामहामेदाछिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्म-कप्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति" "काकोल्यादिरयं पित्तशोणितानिलनाशनः जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा"।

काकोष्ठक पु० काकस्योष्ठ इव कायति कै—क। सुश्रुतोक्ते कर्णबन्धाकृतिभेदे "तत्र समासेन पञ्चदश कर्णबन्धाकृतयः" इत्युपक्रमे। नेमिसन्धानक इत्यादिना "षट्टिकर्ण काकोष्ठक" इत्यन्तेन विभज्य "निर्मांसः संक्षिप्तात्पशोणितपालिः काकोष्ठकपालिरिति" सुश्रु० लक्षितम्।

काक्ष काङ्क्षणे इदित् भ्वा० सक० सेट्। काङ्क्षति अकाङ्क्षीत् चकाङ्क्ष काङ्क्षा प्रनिकाङ्क्षति। "न शोचति न काङ्क्षति" गीता "काङ्क्षन्तु गतिमुत्तमाम्" मनुः। अस्यात्मनेपदित्वमिच्छन्ति। "न काङ्क्षे विजयं कृष्ण!" गीता "काङ्क्षावहे द्वारपतेस्त्वत्राणाम्" भा०व०१०६२२। "नाहं भूयो वरं काङ्क्षे" भा०अनु०७६८ भा०स०२१२५।

अनु+आनुलोम्येन प्रार्थने। "अतः प्रियं चेदनुकाङ्क्षसे त्वम्"

अभि+आभिमुख्येन प्रार्थने "अत्यर्थमभिकाङ्क्षामि मृगयां सरयूवने" रामा०।

आ+सम्यक्प्रार्थने "रामाभिषेकमाकाङ्क्षन्नाकाङ्क्षदुदयं रवेः" रामा०। "धीरेव कन्या पितराचकाङ्क्ष" रघुः। "आका-ङ्क्षेयं तनुगुरुतया नैव गन्तुं समर्था" पदाङ्कदूतम्।

प्रति+आ प्रत्याशायाम। "इहैव कालमासीनः प्रत्याकाङ्क्षत सर्वगम्" भा० शा० ४८७।

प्रति+प्रतिरूपतयाभिलाषे। "त्वामेव प्रतिकाङ्क्षन्त पर्जन्यमिव कर्षकाः" रामा०।

काञ्च पु० कुत्सितमच्चमत्र का पथ्यकथा प्रा० कोः कादेशः। कटाक्षे त्रिका०। "आशालाभोन्न खीदूरात् काञ्चेणा-मारेचितः" भट्टिः।

का(ञ्ची)ची स्त्री कच्चे(ञ्चे) भवः अण् ङीप्। १तुवरिकायाम् (अरहर) २सौराष्ट्रमृत्तिकायाञ्च मेदि०। ३कच्च(ञ्च) भवमात्रे त्रि०।

काक्षीव पु॰ ईषत् क्षीवयति क्षीव–णिच्–अच् कोः कादेशः । १शोभाञ्जनवृक्षे अमरः २गौतमात् शूद्रायामौशीनर्यां जाते पुत्रभेदे । “शूद्रायां गौतमो यत्र महात्मा संशितव्रतः। औशीनर्यामजनयत् काक्षीवाद्यान् सुतान् मुनिः” भा॰स॰२०अ॰मगधदेशवर्णने। स्वार्थे कन् । काक्षीवकोऽपि शोभाञ्जनवृक्षे पु॰शब्दच॰।

काक्षीवत् पु॰दीर्घतमस ऋषेः शूद्रायामुत्पन्ने पुत्रभेदे तदुत्पत्तिकथा “गौतमादिभिः पुत्रैर्बद्ध्वा उडुपेन गङ्गाम्भसि निःक्षिप्तं दीर्घतमसमुपक्रम्य” भा॰ आ॰१०४ अ॰ उक्ता यथा “तन्तु राजा बलिर्नाम सर्वधर्मविशारदः। अपश्यन्मज्जनगतः स्रोतसाभ्याससागतम् । जग्राह चैनं धर्मात्मा बलिः सत्यपराक्रमः। ज्ञात्वा चैनं स वव्रेऽथ पुत्रार्थे भरतर्षभ ! । सन्तानार्थं महाभाग ! भार्य्यासु मम मानद !। पुत्त्रान् धर्मार्थकुशलानुत्पादयितुमर्हसि । एवमुक्तः स तेजस्वी तं तथेत्युक्तवानृषिः । तस्मै स राजा स्वां भार्य्यां सुदेष्णां प्राहिणोत्तदा। अन्धं वृद्धञ्च तं मत्वा न सा देवी जगाम ह। स्वान्तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा। तस्यां काक्षीवदादीन् स शूद्रयोनावृषिर्वशी । जनयामास धर्मात्मा पुत्त्रानेकादशैव तु । काक्षीवदादीन् पुत्रांस्तान् दृष्ट्वा सर्वानधीयतः। उवाच तमृषिं राजा ममेम इति भारत। नेत्युवाच महर्षिस्तं ममेम इति चाब्रवीत् । शूद्रयोनौ मया हीमे जाताः काक्षीवदादयः। अन्धं वृद्धञ्च मां दृष्ट्वा सुदेष्णा महिषी तव । अवमन्य ददौ मूढा शूद्रां धात्रेयिकां मम”। ३चण्डकौशिकपितरि गौतमे मुनिभेदे । “अथ काक्षीवतः पुत्रं गौतमस्य महात्मनः । शुश्राव तपसि श्रान्तमुदारं चण्डकौशिकम्”भा॰ स॰१६अ॰ ।“काक्षीवानौशिजश्चैव नाचिकेतोऽथ गौतमः”४अ॰। अत्र पृथगभिधानात् काक्षीवतोऽन्य एव गौतमः “ततो राजगृहं गच्छेत्तीर्थसेवी नराधिप । उपस्पृश्य ततस्तत्र काक्षीवानिव मोदते” भा॰ व॰८४अ॰ । “काक्षीवान गौतमोऽत्रिश्च” भाग॰ ३,९,५ । ४राजभेदे च । “सुहोत्रं रन्तिदेवञ्च काक्षीवन्तं महाद्युतिम्” भा॰ आ॰ १अ॰ अतिविश्वविख्यातनृपकथने ।

काक्षीवत पुंस्त्री कक्षीवतीमुनेरपत्यम् अण्, ऋष्यन्धकेति ण्य वा १कलीवदपत्ये २तद्वंश्यस्त्रीषु च स्त्रियां ङीप । सा च व्युषिताश्वस्य भद्राख्यायां भार्यायां वर्द्दितिदृष्टा भा॰ आ॰ १२१ अ॰यथा—

“आसीत् काक्षीवती चास्य भार्या परमसम्मता । भद्रा नाम मनुष्येन्द्र ! रूपेणासदृशी भुवि । कामयामासतुस्तौ च परस्परमिति श्रुतम् । स तस्यां कामसम्मत्तो यक्ष्मणा समपद्यत । तेनाचिरेण कालेन जगामास्तमिवांशुमान् । तस्मिन् प्रेते मनुष्येन्द्रे भार्य्यास्य भृशदुःखिता । अपुत्रा पुरुषव्याघ्र ! विललापेति नः श्रुतम् । भद्रा परमदुःखार्त्ता तन्निबोध जनाधिप! । भद्रोवाच । नारी परमधर्म्मज्ञ ! सर्वा भर्तृविनाकृता । पतिं विना जीवति या न सा जीवति दुःखिता । पतिं विना मृतं श्रेयो नार्य्याः क्षत्रियपुङ्गव ! । त्वद्गतिं गन्तुमिच्छामि प्रसीदस्व नयस्व माम् । त्वया हीना क्षणमपि नाहं जीवितुमुत्सहे । प्रसादं कुरु मे राजन्नितस्तूर्णं नयस्व माम् । पृष्ठतोऽनुगमिष्यामि समेषु विषमेषु च । त्वामहं नरशार्द्दूल ! गच्छन्तमनिवर्त्तिनम् । छायेवानुगता राजन् ! सततं वशवर्त्तिनी । भविष्यामि नरव्याघ्र ! नित्यं प्रियहिते रता । अद्यप्रभृति मां राजन्! कष्टा हृदयशोषणाः । आधयोऽभिभविष्यन्ति त्वामृते पुष्करेक्षण ! । अभाग्यया मया नूनं वियुक्ताः सहचारिणः । तेन मे विप्रयोगोऽयमुपपन्नस्त्वया सह । विप्रयुक्ता तु या पत्या मुहूर्त्तमपि जीवति । दुःखं जीवति सा पापा नरकस्थेव पार्थिव ! । संयुक्ता विप्रयुक्ताश्च पूर्वदेहे कृता मया । तदिदं कर्म्मभिः पापैः पूर्वदेहेषु सञ्चितम् । दुःखं मामनुसम्प्राप्तं राजंस्त्वद्विप्रयोगजम् । अद्यप्रभृत्यहं राजन् ! कुशसंस्तरशायिनी । भविष्याम्यसुखाविष्टा त्वद्दर्शनपरायणा । दर्शयस्व नरव्याघ्र ! शाधि मामसुखान्विताम् । कृपणां नाथ ! कृपणं विलपन्तीं नरेश्वर ! । कुन्त्युवाच । एवं बहुविधं तस्यां विलपन्त्यां पुनः पुनः । तं शवं संपरिष्वज्य वाक्किलान्तर्हिताऽब्रवीत् । उत्तिष्ठ भद्रे ! गच्छ त्वं ददानीह वरं तव । जनयिष्याम्यपत्यानि त्वय्यहं चारुहासिनि ! । आत्मकीये वरारोहे ! शयनीये चतुर्द्दशीम् । अष्टमीं वाप्यृतौ स्नाता संविशेथा मया सह । एवमुक्ता तु सा देवी तथा चक्रे पतिव्रता । यथोक्तमेव तद्वाक्यं भद्रा पुत्रार्थिनी तदा । सा तेन सुषुवे देवी शवेन भरतर्षभ । त्रीन् शाल्वांश्चतुरो मद्रान् सुतान् भरतसत्तम !” [स्त्रियां जातित्वात् ङीष् ।

काग पुंस्त्री केति शब्दं गायति गै–क । काके जटा॰ ।

कागद न॰ कागःकाकवर्णोमस्यादिर्दीयतेऽत्र दा–घञर्थे,क कागेन कागवर्णेन मस्यादिना दायति शुध्यति वा दै–शोधे

क वा । लेखनाधारे पत्रभेदे तच्च कृष्णवर्णमस्यादिदाना-धारत्वात् तेन शुक्लत्वाच्च तथात्वम् । "भूर्जे वा वसने रक्ते क्षौमे वा ताडपत्रके । कागदे वाऽष्टगन्धेन पञ्चगन्धेन वा पुनः । त्रिगन्धेनैकगन्धेन विलिख्य धारयेन्नरः" मन्त्रकल्पद्रुमे हनुमत्कवचम् ।

काग्नि पु० ईषदग्निः कोः कादेशः । ईषदग्नौ मुग्ध० ।

काङ्क्षा स्त्री काक्षि–भावे अ । अभिलाषे "उद्धारयुक्तावपि भक्तकाङ्क्षा" सुश्रु० ।

काङ्क्षिन् त्रि० काक्षि–णिनि । अभिलाषिणि "देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः" गीता स्त्रियां ङीप् । तदाश्रयिष्ये भद्रं ते भव त्वं कालकाङ्क्षिणी" रामा० ।

काङ्गा स्त्री कुत्सितकमङ्गमस्याः । वराटिकायाम् शब्दच० ।

काच दीप्तौ भ्वा० बन्धने सक० इदित् भ्वा० आत्म० सेट् । काञ्चते अकाञ्चिष्ट चकाञ्चे प्रनिकाञ्चते ।

काच न० कच्यतेऽनेन कच बन्धने करणे घञ् न कुत्वम् । (मोम) सिक्थे तस्य बन्धहेतुत्वात्तथात्वम् । काचः क्षारमृत्तिकाऽस्त्यस्याकारत्वेन अच् । क्षारमृत्तिकोद्भवे २लवणभेदे (काचलोन) । राजनि० । ३तत्साधने मृत्तिकाभेदे पु० । (क्षारीमाटी) अमरः । ४शिक्ये (शिका) ५मणिभेदे (काँच) मेदि० । "आकरे पद्मरागाणां जन्म काचमणेः कुतः" काचः काचः मणिर्मणिः" उद्भटः । काचश्च सुश्रुते अनुशस्त्रतयोक्तो यथा–

"अनुशस्त्राणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकाग्निक्षारनखगोजीशेफालिकाशाकपत्रकरीरबालाङ्गुलयः" इति । "शिशूनां शस्त्रभीरूणां शस्त्राभावे च योजयेत् । त्वक्सारादिचतुर्वर्गं छेद्ये भेद्ये च बुद्धिमान्" इति तदुपयोगविषयस्तत्रैवोक्तः । "पानीयं पानकं मद्यं मृण्मयेषु प्रदापयेत् । काचस्फटिकपात्रेषु शीतलेषु शुभेषु च" "काचाम्बुकोथान् पटलांश्च घोरान् पुष्पञ्च हन्त्यञ्जनमस्य योगैः" सुश्रु० । ६नेत्ररोगभेदे तल्लक्षणादि सुश्रुते उक्तं यथा–

"तिमिराख्यः स यो दोषश्चतुर्थं पटलं गतः । रुणद्धि सर्वतो दृष्टिं लिङ्गनाश इति क्वचित् । अस्मिन्नपि तमोभूते नातिरूढे महागदे । चन्द्रादित्यौ सनक्षत्रौ अन्तरिक्षे च विद्युतः । निर्मलानि च तेजांसि भ्राजिष्णूनीव पश्यति । स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः" व्याकृतमेतत् भावप्र० यथा "यो दोषो नेत्ररोगः चतुर्थं पटलं बाह्यं पटलं गतः स तिमिराख्यः तिमिरदर्शनेन तिमिरमस्यास्तीति तिमिरः अर्शआदित्वात् अच् । तस्य लक्षणमाह रुणद्धीत्यादि सर्वतः सर्वत्र । लिङ्गनाश इति क्वचित् तन्त्रान्तरे लिङ्गनाशसंज्ञः । तस्य निरुक्तिश्च । लिङ्ग्यते ज्ञायतेऽनेनेति लिङ्गं दृष्टितेजः तस्य नाशोऽस्मिन्निति लिङ्गनाशः । अस्मिन्नपि तिमिरेऽपि तमोभूते तमस्तुल्ये अत्र भूतशब्दस्तुल्यार्थः "भूतं प्राण्यतीते समे" इत्यमरात् नातिरूढे अप्रौढे नवे, चन्द्रादित्यौ नक्षत्राणि च पश्यति अन्तरिक्षे अन्तरिक्षस्य प्रकाशमयत्वेन तमोऽभिभवात् तेजांसि अग्न्यादेः भ्राजिष्णूनि रत्नसुवर्णादीनि । अस्मिन् प्रौढे चिरजे चन्द्रादीन्यपि न पश्यतीत्याशयः । नीलिकाकाचसंज्ञितः नीलिका काचेति नामान्तराभ्यां युक्तः" । तन्निदानादि दृष्टिरोगशब्दे वक्ष्यते । स्वार्थे कन् काचकोऽप्युक्तार्थे ।

काचन न० कच–बन्धने स्वार्थे णिच्–भावे ल्युट् । १पुस्तकादिबन्धने त्रिका० । स्वार्थे कन् । काचनक तत्रार्थे हारा० । का+चन मुग्ध० । २असाकल्यान्वितायां किंशब्दार्थस्त्रियाम् अव्य० । "व्यूढा काचन कन्यका खलु मया तेनास्मि ताताधिकः" प्रबोधच० ।

काचनकिन् पु० काचनकमस्त्यस्य इनि । लेखपत्रे जटा० तस्य काचनकरूपबन्धनवत्त्वात् तथात्वम् । [पात्रे त्रिका० ।

काचभाजन न० काचमयं भाजनम् । (काचेरवासन) काच-

काचमल न० काचस्य क्षारमृत्तिकायाः मल इव । काचभवे सौवर्चले लवणभेदे राजनि० ।

काचलवण न० काचः काचहेतुकं लवणम् । (काचलोन) सौवर्चले लवणभेदे राजनि० तस्य क्षारमृत्तिकोद्भवत्वात्तथात्वम् । तद्गुणाद्युक्तं सुश्रु० । "लघु सौवर्चलं पाके वीर्य्योष्णं विशदं कटु । गुल्मशूलविबन्धघ्नं हृद्यं सुरभि रोचनम्" ।

काचसम्भव न० सम्भवत्यस्मात् सम्+भू–अपादाने अप् काचः क्षारमृत्तिका सम्भवोऽस्य । काचलवणे सौवर्चले राजनि० । काचोद्भवमप्यत्र न० ।

काचसौवर्चल न० काचस्थानिकं सौवर्चलम् शा०त० । (काचलोन) लवणभेदे । राजनि० ।

काचस्थाली स्त्री काचस्य क्षारस्य स्थालीव । (पारुलगाछ) १फलेरुहावृक्षे अमरः । ६त० । २काचपात्रे च ।

काचाक्ष पुंस्त्री काच इवाक्षि अस्य षच् समा० । बकभेदे स्त्रियां जातित्वेऽपि संयोगोपधत्वात् न ङीष् किन्तु षित्वात् ङीष् इति भेदः । अयञ्च प्लवः संचारी च

सुश्रुतेनोक्तः यथा हंसवारसेत्याद्युपक्रमे काचाक्ष-मल्लिकाक्षेत्यादीनुक्त्वा "स्नवाः संवचारिणश्च" ।

काचिघ पु० कच-दीप्तौ वा० इण् काचिं कान्तिं हन्ति गच्छति हन-गतौ वा० ड पृषो० हस्य घः । १काञ्चने । २छेमण्डे (छेमडा) ३स्तूचके च मेदि० । [रोपिते अमरः ।

काचित त्रि० कच-बन्धने णिच् कर्मणि क्त । शिक्या-

काचित् अव्य० का+चित् सुप्सु० पार्थिव्यादिमते द्विपदम् । अवाकल्यान्विते कापीत्यर्थे । "गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी" पदाङ्कदूतम् । चयनं चित् चि-संप०क्विप्-ईषत् चित् कोः कादेशः । ईषच्चयने । "प्रियं काचित्करं हविः" ऋ० १०८६,१२ । "काचित्करम् ईषच्चयनकरम्" । [भञ्जकदृत्ते त्रिका० ।

काचिम पु० कच-बन्धे णिच्-इमनु । देवकुलोद्भवे

काचूक पुंस्त्री कच-दीप्तौ वा० ऊकञ् । १कृकवाकौ ताम्रचूडे पीतमस्तके खगे २कोके चक्रवाके च मेदि० स्त्रियां जातित्वात् ङीष् ।

काजल न० कुत्सितं जलम् कोः कादेशः । कुत्सितजले मुग्ध०

काञ्चन न० काचि-दीप्तौ भावे ल्युट् । १दीप्तौ । काचि-दीप्तौ ल्यु । २स्वर्णे अमरः । "अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम्" "धान्यान्नगोमहीवासस्तिलकाञ्चनसर्पिषाम्" "गोवीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः" मनुः । ३पद्म-केशरे मेदि० । ४नागकेशरपुष्पे ५धने राजनि० । ६चम्पके ७नागकेशरवृक्षे ८उडुम्बरे ९धुस्तूरे १०स्वनाम-ख्याते वृक्षे च पु० मेदि० । स्वार्थे कन् । काञ्चनवृक्षे । काञ्चनवृक्षश्च सुश्रुते वातशमनतयोक्तः । भद्रदारुकुष्ठेत्या-द्युपक्रमे 'काञ्चनकभार्गीत्यादिना "समासेन वातसंशमनो-वर्ग" इति । "काञ्चनारः काञ्चनको गण्डारिः शोण-पुष्पकः । कोविदारश्च मरिचः कुद्दालो युग्मपत्रकः । कुण्डली ताम्रपुष्पश्चाश्मन्तकः स्वल्पकोरकः । काञ्चनारो हिमग्राही तुवरः श्लेष्मपित्तनुत् । कृमिकुष्ठगुदभ्रंश गण्डमालाव्रणापहः । कोविदारोऽपि तद्वत् स्यात् तयोः पुष्पं लघु स्मृतम् । रूक्षं संग्राहि पित्तास्रप्रदर-क्षयकासनुत्" भावप्र० तत्पर्य्यायभेदगुणाद्युक्तम् । काञ्चनमिव कायति कै-क । हरिताले न० राजनि० शालिभेदे सुश्रु० "लोहितकशालिकलमेत्याद्युपक्रमे" दीर्घ-शूककाञ्चनकेत्यादि "महादूषकप्रभृतयः शालयः" इत्य-न्तम् । काञ्चनस्य विकारः अण् । ११काञ्चनविकारे त्रि० । "स काञ्चने यत्र मुनेरनुज्ञया" माघः । "निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" मनुः । स्त्रियां ङीप् । "तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टिः" मेघ० । किमः द्वितीयान्तात् स्त्रियां चन मुग्ध० । १२काञ्चिदि-त्यर्थे अव्य० । "न च काञ्चन काञ्चनसद्मचितिम्" भट्टिः । "न काञ्चन परिहरेत्" छा० उ० । द्विपदमिति बहवः । काचि बन्धने भावे ल्युट् । १२बन्धने न० ।

काञ्चनकदली स्त्री काञ्चनवर्णा कदली । स्वर्णकदल्याम् (चाँपाकला) राजनि० ।

काञ्चनकारिणी स्त्री काञ्चनं बन्धनं करोति कृ-णिनि ङीप० । शतमूल्यां शब्दच० । तस्या बहुमूलत्वेन बन्धन-कारित्वात् तथात्वम् । [चोरिणीलतायाम् राजनि० ।

काञ्चनक्षीरी स्त्री काञ्चनमिव क्षीरमस्याः गौरा० ङीष् ।

काञ्चनगिरि पु० काञ्चनमयस्तत्प्रधानो वा गिरिः शाक० त० । १सुमेरुपर्वते हेमच० । २दानार्थकल्पितस्वर्णाचले च । काञ्चनाचलस्वर्णाचलादयोऽप्यत्र ।

काञ्चनपुष्पक न० काञ्चनमिव पीतं पुष्पमस्य कप् । आढ्य-वृक्षे राजनि० आढ्यशब्दे ८०५पृ० दृश्यम् ।

काञ्चनपुष्पी स्त्री काञ्चनमिव पुष्पमस्य ङीप् । गणिकारी वृक्षे राजनि० ।

काञ्चनप्रभ पु० ऐलवंश्ये नृपभेदे । ऐलपुत्रवंशोपक्रमे "अमावसोस्तु दायादो भीमोराजाथ लग्नजित् । श्रीमान् भीमस्य दायादो राजासीत् काञ्चनप्रभः" हरिवं० २७अ० ।

काञ्चनाक्ष पु० दानवभेदे । "काञ्चनाक्षः कपिस्कन्धो व्याघ्राक्षः क्षितिकम्पनः" हरिवं० २४० अ० ।

काञ्चनार पु० काञ्चनं तद्वर्णमृच्छति पुष्पेण, ऋ-अण् उप० स० । पीतपुष्पे कोविदारे काञ्चनवृक्षभेदे भावप्र० ।

काञ्चनाल पु० काञ्चनं तद्वर्णमलति अल-अण् उप० स० । पीतपुष्पे कोविदारे काञ्चनवृक्षभेदे शब्दर० ।

काञ्चनी स्त्री काञ्चते दीप्यतेऽनया काचि-दीप्तौ करणे ल्युट् ङीप् । १हरिद्रायाम् मेदि० २गोरोचनायाम् । काञ्चनं तद्वर्णः क्षीरेऽस्याः ङीष् । ३स्वर्णक्षीरिणीवृक्षे च राजनि० ।

काञ्चनीया स्त्री काञ्चनाय दीप्तौ हिता छ । १गोरोचनायाम् राजनि० काञ्चनस्येदम् वृद्धत्वात् छ । २काञ्चनसम्बन्धिनि त्रि० । "काञ्चनीयाऽपि मात्रा या न सा दुष्यति कर्हि-चित्" भा० अनु० १०४ अ० ।

काञ्चि(ञ्ची) स्त्री काचि-बन्धने कर्मणि इन् । रशनायाम् (चन्द्रहार गोट) इत्यादौ कटिबन्धदामभेदे । "सकराव-बन्धनविलग्नगलन्नवकाञ्चि काञ्चिदृढबन्धनः" माघः ।

काचि—दीप्तौ कर्त्तरि इन् । २मोक्षदसप्तपुर्य्यन्तर्गतपुरीभेदे च "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका । पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" काञ्चिरभिजनोऽस्य अण् तस्य बहुषु लुक् । ३पित्रादिक्रमेण तत्र वासिषु जनेषु पु० ब० व० । "मूलतश्चाहरत् काञ्चीं क्षत्रभावं च पार्थिवः" भा०आ०१७५अ० । कृदिकारान्तत्वात् वा ङीप् उक्तार्थे । "वारिणीभात्तरितविहगश्रेणिकाञ्चीगुणायाः" मेघ० । "पुनः पुनः केसरदामकाञ्चीम्" "काञ्चीगुणस्थानमनिन्दितायाः" कुमा० । "काञ्चीमतीवमनितम्बकाञ्चीम्" रघुः । मुक्तिस्थानानान्यकेनोत्युपक्रमे "काञ्ची च त्र्यम्बकं चापि सप्तगोदावरीतटम्" काशी०६अ० "जगाम नगरीं काञ्चीं कान्तां त्रिभुवनादपि । लक्ष्मीकान्तः स्वयं साक्षाज्जन्तू यत्र निवासिनः । श्रीकान्तानेव कुरुते परत्रेह च निश्चितम् । दृष्ट्वा काञ्चीं कान्तिमतीं कान्तिमद्भिर्निषेविताम् । कान्तिमानभवत् सोऽपि नाकान्तिस्तत्र कस्यचित्" काशीख० । इयञ्च द्विविधा शिवकाञ्ची विष्णुकाञ्ची च प्र०प्रसिद्धा । काञ्चीपुरी च दक्षिणस्यां बृ०स०कूर्म्मविभागे उक्ता । अथ दक्षिणेन लङ्कत्युपक्रमे काञ्ची "मरुचीपट्टन चेर्य्यार्य्यकसिंहला ऋषभाः" इति । काञ्चीशब्दस्य प्रस्थशब्दे परे आद्युदात्तता । मेखलाभेदश्च "एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका । रशना षोडश ज्ञेया कलापः पञ्चविंशकः" इत्युक्तलक्षणः । अभेदोपचारादन्ययष्टिकायामपि वृत्तिरिति बोध्यम् । [हेमच० ।

काञ्चिक न० काचि—बन्धने इन् संज्ञायां कन् । काञ्जिके

काञ्चि(ञ्ची)पद न० ६त० । जघने । हेमच० ।

काञ्जिक न० अनुज—धात्वर्थनिर्देशे ण्वुल् कुत्सिता अञ्जिका व्यक्तिर्यस्य । आरनाले (काँजि) हेमच० ।

तस्य गुणादि भाव०प्र०उक्तं यथा "काञ्जिकं रोचनं रुच्यं पाचनं वह्निदीपनम् । शूलाजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम्" अन्यत्र वैद्यके च "संहितं धान्यमण्डादि काञ्जिकं कथ्यते जनैः । काञ्जिकम्भेदि तीक्ष्णोष्णं रोचनं पाचनं लघु, दाहज्वरहरं स्पर्शात् पानाद्वातकफापहम् । माषादिवटकैर्यत्तु क्रियते तद्गुणाधिकम् । लघु वातहरं तत्तु रोचनं पाचनम्परम् । शूलाजीर्णविबन्धानां नाशनं वस्तिशोधनम् । धान्याम्लमच्छतरमामनिवारि हारि शुण्ठीरजोलवणजीरकसंस्कृतं यत् । आवासितं सुरभि हिङ्गुकणेन यत्नात् तेनाशुशुष्यतिकणोऽधिकतां प्रयाति । एलामहौषधविभावितमाषिमन्थं संहितमामलकभेदककाञ्जिकं यत् । मन्दं विवर्द्धयति जाठरवीतिहोत्रं निर्वाणदीपमिव गन्धकचूर्णयोगः । काञ्जिकं वर्द्धितं हृद्यं सञ्चकमिकरं परम् । वातश्लेष्महरं श्रेष्ठं गुर्वाहारस्य पाचकम्" । अन्यत्र च "काञ्जिकं दधितैलञ्च वलीपलितनाशनम् । गात्रशैथिल्यदानाय महिमाश्च च भक्षणात्" । भावप्र० तद्भेदतद्विधानाद्युक्तं यथा—"कुल्माषधान्यमण्डेन संहितं काञ्जिकं भवेत् । यन्मस्त्वादि शुचौ भाण्डे सगुडं क्षौद्रकाञ्जिकम् । धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदुच्यते । तथाम्बु संहितम् ज्ञेयमामैर्विदलितैर्यवैः । यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत् । आरनालन्तु गोधूमैरामैः स्याद्विस्तुषीकृतैः । पक्वैर्वा संहितैस्तत्तु सौवीरसदृशं गुणैः । कल्माषधान्यमण्डादि संहितं काञ्जिकं विदुः । शिण्डाकी संहिता ज्ञेया मूलकैः सर्षपादिभिः" ।

काञ्जिकवटक पु०(काँजिवडा) प्रसिद्धे भावप्रकाशोक्ते वटकभेदे तद्विधानगुणादि तत्रोक्तं यथा "मन्थनी नूतना धार्य्या कटुतैलेन लेपिता । निर्म्मलेनाम्बुनापूर्य्य तस्यां चूर्णं विनिःक्षिपेत् । राजिकाजीरलवणहिङ्गुशुण्ठीनिशान्वितान् । निःक्षिपेद्वटकांस्तत्र भाण्डस्यास्य मुद्रयेत् । ततोदिनत्रयादूर्द्ध्वमम्लाः स्युर्वटका ध्रुवम् । काञ्जिको वटकोरुच्यो वातघ्नः श्लेष्मकारकः" । शीतोदाहं शूलमजीर्णं हरते दृगामयेष्वहितः" ।

काञ्जिका स्त्री ईषदञ्जिका अनुज—ण्वुल् अत इत्त्वम् कोः कादेशः । १जीवन्तीलतायां २पलाशीलतायां राजनि० । वैद्यकोक्ते सार्षपकन्देन कृते व्यञ्जनभेदे तल्लक्षणं यथा "सार्षपीकन्दली सूक्ष्मा खण्डिता स्निग्धभाजने । स्थापिता मण्डसहिता तत्र वा तण्डुलोदके । सप्तरात्रात् परं चुक्रं ततः सम्यक् प्रजायते । तस्मादेव समाहृत्य तत्रैवेद्धा-प्रलेहयेत् । काञ्जिकेति समाख्याता सूदधर्म्मोपजीवकैः । सार्षपस्य गुणा ये हि ते चास्या अपि कीर्त्तिताः" ।

काञ्जी स्त्री कं जलमनक्ति अनुज—अण् उप०स० गौरा० ङीष् पा०, मुग्ध० षण् ईप् । महाद्रोणीदले राजनि० ।

काट पु० कं जलमश्यते प्राप्यतेऽत्र अट—आधारे घञ् । १कूपे निरु० । "इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाह्ळः" ऋ०१,१०६,६, "कूटयास्य संशीर्य्यन्ते श्लोणया काटमर्द्दति" अथ०१२,४,३, २विषममार्गे वेददी०

काटुक न० कटुकस्य भावः युवा० अण् । कटुकरसे ।

काट्य त्रि० काटे विषममार्गे कूपे वा भवः यत् । १विषममार्गभवे २कूपभवे च ३रुद्रभेदे पु० । "नमः काट्याय च नीप्याय च" यजु० १६,३७, नमः काट्याय च गह्वरेष्ठाय च"। "काटे कूपे विषममार्गे वा भवः" वेददी० ।

काठ पु० कथ्यते तङ्क्यते कठ–तङ्कने कर्म्मणि घञ् । १पाषाणे त्रिका० । कठस्येदम् अण् । २कठसंबन्धिनि त्रि० स्त्रियां ङीप् ।

काठक न० कठानां धर्म्म आम्नायः समूहो वा वुञ् । १कठशाखाध्यायिधर्मे २तदाम्नाये ३तत्समूहे च "देवसुम्नयोर्यजुषि काठके" पा० कठशब्दे व्याहृतमेतत् । "यद्रोदीत्तद्रुद्रस्य रुद्रत्वमिति काठकम्" निरु० ।

काठिन्यफल पु० काठिन्यं फलेऽस्य । कपित्थे राजनि० ।

काठेरणि पु० ऋषिभेदे । तस्येदं तत्रभवो वा गहा० छ । काठेरणीय तत्सम्बन्धिनि तत्रभवे वा त्रि० ।

काण पुंस्त्री कण–निमीलने संज्ञायां कर्त्तरि घञ् । १काके मेदि० स्त्रियां जातित्वात् ङीष् । २एकचक्षुर्युक्ते त्रि० । काणत्वञ्च चक्षुरिन्द्रियशून्यं कगोलकवत्त्वम् । "पौनर्भवश्च काणश्च यस्योपपतिरेव सः" "वीक्षान्धो नवतेः काणः षष्टेः श्वित्री शतस्य तु" अपाङ्क्तेयकथने मनुः ।

"खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्" "काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणं वरम्" मनुः । अस्य निरुक्ते ६,अ० "अदायिकाणे विकटे" इत्यृचमधिकृत्य अन्याऽपि निरुक्तिर्दर्शिता यथा–"अदायिनि काणे विकटे विक्रान्तदर्शने इत्यौपमन्यवः । कणतेर्वा स्यादणूभावकर्मणः । कणतिः शब्दाणूभावे भाष्यतेऽनुकणतीति मात्राणूभावात् कणादर्शनाणूभावात् काणः" इति "परोपहासकृत् काणो गां दद्यात् स समौक्तिकाम्" शाता० परोपहासकर्मविपाकः काणत्वमुक्तम् । मनुना तु दीपनिर्वाणकर्मविपाकत्वमुक्तम् । "दीपहर्त्ता भवेदन्धः काणो निर्वापको भवेत्" ।

काणभूति पु० वररुचिनामकात्यायनेन बृहत्कथाश्रावणोद्देश्ये पिशाचत्वप्राप्ते यक्षभेदे । "विन्ध्याटव्यां कुबेरस्य शापात् प्राप्तः पिशाचताम् । सुप्रतीकाभिधोयक्षः काणभूत्याख्यया स्थितः" "इत्याख्याय कथामध्ये विन्ध्यान्तः काणभूतये । पुनर्वररुचिस्तस्मै प्रक्रतार्थमवर्णयत्" इति च बृहत्क० तदितिवृत्तं तत्रैव दृश्यम् ।

काणुक त्रि० कण–दीप्तौ बा० उकञ् । १कान्ते २क्रान्ते ३पूर्णीकृते च । "इन्द्रः सोमस्य काणुका" ऋ० ८,७७,४ । "काणुका कान्तानि क्रान्तानि सोमेन, कृतानि वा सोमपूर्णानि" भा० । निरुक्ते तु इमामृचमधिकृत्य ५,११, उक्तं यथा—"काणुका कान्तकानीति वा क्रान्तकानीति वा कृतकानीति वा इन्द्रः सोमस्य कान्त इति वा कणेघात इति वा कणेहतः कान्तिहत इति" । तत्र इषो० सर्व्वत्र साधु ।

काणूक पुंस्त्री कणति कण–ऊकण् । वायसे उज्ज्व० । स्त्रियां जातित्वात् ङीष् ।

काणेय पुंस्त्री काणायाः अपत्यम् "स्त्रीभ्यो ढक्" पा० ढक् । काणाया अपत्ये पक्षे "क्षुद्राभ्यो वा" पा० ढ्रक् । काणेरः तद्वार्थे पुंस्त्री "क्षुद्राश्च अङ्गहीनाः शीलहीनाश्च" सि० कौ० । काणेयानां विषयो देशः भैरिका० विधल् । काणेयविध तद्विषये देशे ।

काणेली स्त्री १अनूढायां कन्यायाम् २असत्यां स्त्रियाञ्च । "काणेलीमातः ! यामतस्त्वस्य सार्थवाहस्य गृहम्" मृच्छ०।

काण्टकमर्द्दनिक त्रि० कण्टकमर्दनेन निर्वृत्तम् अक्षद्यूता० ठक् । कण्टकमर्दनेन निर्वृत्ते स्वास्थ्यादौ ।

काण्ठेविद्धि पुंस्त्री कण्ठे विद्धः ७त० सप्तम्याः अलुक् कण्ठेविद्धऋषिभेदस्तस्यापत्यम् इञ् । कण्ठेविद्धस्यापत्ये स्त्रियां तु गोत्रप्रत्ययान्तत्वात् वा ष्यञ् पक्षे ङीप् । काण्ठेविद्ध्या काण्ठेविद्धी वा ।

काण्ड पुंन० कनी–दीप्तौ ड तस्य नेत्त्वं किच्च दीर्घः । १दण्डे २बाणे ३पर्वणि कुत्सिते ४वर्गे ५अवसरे ६जले च अम० । ७नाले (डाँटा) ८वृक्षस्कन्धे (गुँडि) ९स्तम्बे (गुल्मभेदे) १०निर्जने धरणिः ११नाडीवृन्दे १२वृक्षभेदे (शरवृक्षे) मेदि० । १३श्लाघायां हेमच० । दण्डश्चात्र षोडशहस्तमितः वंशः वंशादिदण्डश्च "काण्डान्तात् क्षेत्रे" पा० क्षेत्रे यः काण्डान्तो द्विगुस्ततो न ङीप् तद्धितलुकि सति द्वे काण्डे प्रमाणमस्याः सा द्विकाण्डा क्षेत्रभक्तिः । "प्रमाणे द्वयसजिति" पा० विहितस्य मात्रचः "प्रमाणे लोद्विगोर्नित्यमिति" वार्त्ति० लुक् । क्षेत्रे किं द्विकाण्डी रज्जुः" सि०कौ० । "पृषता वरत्राकाण्डेनाहन्ति" कात्या० ८,७,२७ । वरत्राकाण्डेन वंशदण्डेन"कर्कः । बाणे "सविष काण्डमादाय मृगयामास वै मृगम्"भा०अनु०२६५अ०। वर्गे "नपातनस्त्राकाण्डमलीमसं नभः" माघः । "इक्षुकाण्डमितो भाति" रामा० । "दूर्व्वाकाण्डमिव

ग्रामा" भट्टिः। वर्गश्च एकजातीयसमुदायः "क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह!" भाग०४,२४,६। "अग्निर्मुखं यस्य तु जातवेदा जातः क्रियाकाण्डनिमित्तजन्मा" भाग०८,४,२३। उपचारात् १४तत्प्रतिपादकग्रन्थे च ब्रह्मकाण्डं कर्मकाण्डम् अवसरश्चात्र योग्यकालः प्रस्तावश्च तत्र योग्यकाले अकाण्डशब्दे ५,२९उदा०। प्रस्तावे अयोध्याकाण्डं लङ्काकाण्डमित्यादि। नालमत्र लतादीनां पत्राधारदण्डः (डाँटा)नालारूपश्च। तत्र नाले "काण्डमूलपत्रपुष्पफलप्ररोहरसगन्धानां सादृश्येन प्रतिनिधिं कुर्य्यात् सर्वाभावे यत्र प्रतिनिधिः" श्रा०त०षष्ठी०। "काण्डं नालम्" रघु०। "पुच्छकाण्डाद्द्विशोऽस्यनि" कात्या० २५,६,५। पुच्छं काण्डमिव नालारूपत्वात्। स्तम्बे "काण्डात् काण्डात् प्ररोहन्तीः" यजु० १३,१४। "महतः पञ्चमूलस्य काण्डमष्टादशाङ्गुलम्" सुश्रु०। स्कन्धे "इक्षुकाण्डानि वा दशनसर्पैण दंशयित्वा भक्षयेत्" "दूर्वेन्दीवरनिस्त्रिंशार्द्रारिष्टशरकाण्डानामन्यतमवर्णः" सुश्रु० "उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः" "बीजकाण्डरुहाण्येव प्रतानावल्ल्य एव च" मनुः।१५ग्रन्थपरिच्छेदे। मधुकाण्डं श्राद्धकाण्डम् १६सन्धिविच्छिन्नैकखण्डास्थ्नि न०। "भग्नं समासात् द्विविधं हुताशकाण्डे च सन्धौ च हि तत्र सन्धौ। उत्पिष्टविश्लिष्टविवर्त्तितञ्च तिर्य्यग्गतं क्षिप्तमधश्च षट् च"। रोगनिश्चयः। "सन्धिविच्छिन्नमेकखण्डमस्थि काण्डम्" तट्टीका। काण्डस्यावयवो विकारो वा बिल्वा० अण्। १७काण्डावयवे १८तद्विकारे च त्रि० १९अङ्कोठवृक्षे पु० शब्दच०।

काण्डकटुक पु० काण्डे स्तम्बेऽपि कटुकस्तिक्तः। कारवेल्ले, (करेला)राजनि०। [मस्य कप्। काण्डतिक्ते राजनि०।

काण्डकाण्डक पु० काण्डस्य शरस्तम्बस्य काण्डमिव काण्ड-

काण्डकार पु० काण्डं किरति विस्तीर्णतया कृ—खल्। १गुवाकवृक्षे शब्दमा०। कृ—ण्वुल्। २शायकारके त्रि०।

काण्डकीलक पु० काण्डे कीलमिव यस्य कप् समा०। लोध्रवृक्षे राजनि०। तस्मिन् हि कीटसम्बन्धात् कीलमिव स्कन्धे जायते। [दीर्घकाण्डे गुण्डनामतृणे राजनि०।

काण्डगुण्ड पु० काण्डेन गुण्डयति गुडि—वेष्टने अण्।

काण्डगोचर पु० काण्डस्य बाणस्य गोचर इव गोचरोऽस्य। लौहमाले नाराचाख्ये अस्त्रभेदे त्रिका०।

काण्डतिक्त पु० काण्डे तिक्तः। भूनिम्बे (चिराता) राजनि०। स्वार्थे कन्। काण्डतिक्तक तत्रैव।

काण्डधार पु० काण्डं धारयत्यत्र धृ—णिच् आधारे अच्। १देशभेदे। स अभिजनोऽस्य तक्षशिला० अञ्। २काण्डधार पित्रादिक्रमेण तत्रवासिनि त्रि०। [राजनि०।

काण्डनील च० काण्डे नीलः कीटाकलितत्वात्। लोध्रवृक्षे

काण्डपट पु० काण्ड इव पटः। (कानात) पटभेदे, हेमच०। तस्य हि संकोचे काण्डरूपता भवति। "ततः स्वमेवागारमानीय काण्डपटपरिक्षिप्ते विविक्तोद्देशे" दशकु० स्वार्थे कन्। काण्डपटक तत्रैव। "उत्क्षिप्तकाण्डपटकान्तरलीयमानः" माघः। [शरपुङ्खावृक्षे राजनि०।

काण्डपुङ्खा स्त्री काण्डस्य शरस्य पुङ्खो यस्याः ५त०।

काण्डपुष्पा स्त्री काण्डात् पुष्पमस्याः "काण्डप्रान्तशतैकेभ्यः पुष्पात्" पा० टाप्। द्रोणवृक्षे शब्दच० पुष्पे न०।

काण्डपृष्ठ न० काण्डं वृक्षस्तम्भ इव स्थूलं पृष्ठमस्य। १स्थूलपृष्ठे धनुरादौ। काण्डः पृष्ठेऽस्य। २शस्त्राजीविनि पु०। "स्त्रीपूर्व्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ!। अजपा ब्राह्मणाश्चैव श्राद्धं नार्हन्ति केतनम्" भा० अनु० २३अ०। "अव्रतानामुपाध्यायः काण्डपृष्ठस्तथैव च" भा०अनु०१०अ० अपाङ्क्तेयकथने। "चिकित्सकः काण्डपृष्ठः पुराध्यक्षः पुरोहितः" भा०अनु०१२५अ० अभोज्यान्नकथने। पापिनां तिर्य्यग्योनितः काण्डपृष्ठताप्राप्तिश्च क्रमशो यथा भवति तथा भा० अनु० २८अ० निरूपितं यथा "तिर्य्यग्योनिगतः सर्व्वो मानुष्यं यदि गच्छति। स जायते पुक्कशो वा चण्डालो वाऽप्यसंशयः। पुक्कशः पापयोनिर्वा यः कश्चिदिह लक्ष्यते। स तस्यामेव सुचिरं मातङ्गः परिवर्त्तते। ततो दशशते काले लभते शूद्रयोनिताम्। शूद्रयोनावपि ततो बहुशः परिवर्त्तते। ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि। वैश्यतायां चिरं कालं तत्रैव परिवर्त्तते। ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम्। ब्रह्मबन्धुश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु द्विशते काले लभते काण्डपृष्ठताम्। काण्डपृष्ठश्चिरं कालं तत्रैव परिवर्त्तते। ततस्तु त्रिशते काले लभते जड़तामपि। ताञ्च प्राप्य चिरं कालं तत्रैव परिवर्त्तते। ततश्चतुःशत काले श्रोत्रियो नाम जायते"। "स्वकुलं पृष्ठतः कृत्वा योवै परकुलं व्रजेत्। तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृतः" स्मृत्यन्तरोक्तकर्म्मविपाकः काण्डपृष्ठता। २वेश्यापतौ शब्दकल्पद्रुमः तन्मूलं मृग्यम्।

काण्डरुहा स्त्री काण्डात् रोहति रुह—क। (कटकी)

१कटुक्याम् रत्नमाला । २स्तम्बरुहमात्रे त्रि० । "वीज-काण्डरुहाण्येव"मनुः ।

काण्डर्षि पु० काण्डस्य वेदभागभेदस्य ऋषिः तदधिकारेण विचारकः । वेदभागभेदमीमांसके जैमिन्यादौ त्रिका० । तत्र कर्म्मकाण्ड मीमांसको जैमिनिः तेन हि'अथातो धर्म्म-जिज्ञासा' इत्यादिसूत्रजातेन कर्म्मकाण्डस्य विचारः कृतः । ब्रह्मकाण्डस्य विचारको वेदव्यासः तेन हि "अथातो ब्रह्मजिज्ञासा" इत्यादिसूत्रजाते ब्रह्मकाण्डस्य विचारः कृतः । एवं भक्तिकाण्डस्य विचारकः शाण्डिल्य इति बोध्यम्

काण्डवत् पु० काण्डोऽस्त्यस्य प्रहरणत्वेन मतुप् मस्य वः । शरधारिणि (तीरन्दाज) अमरः ।

काण्डवारिणी स्त्री काण्डान् रिपुवाणान् वारयति स्मरणेन वृ-णिच्-णिनि । दुर्गायाम् "महागजघटाटोपसंयुगे नरवाजिनाम् । स्मरणात् वारयेत् वाणान् तेन सा काण्डवारिणी" देवीपु० ४५अ० देवीनामभेदनिरुक्तौ ।

काण्डलाव त्रि० काण्डं लुनाति लू-अण् उप० स० । १वृक्षस्कन्धच्छेदके काण्डं लवितुम् "अण् कर्मणि च" पा० । क्रियार्थायां क्रियायां कर्मण्युपपदेऽण् । २काण्डं छेत्तुमित्यर्थे । काण्डलावो व्रजति" सि०कौ० काण्डं छेत्तुं व्रजतीत्यर्थः ।

काण्डवीणा स्त्री काण्ड इव स्थूला वीणा । १स्थूलवीणायां चाण्डालवीणायाम् । काण्डस्य शरस्य विकारः बिल्वा० अण् काण्डी वीणा कर्म० । २शरमय्यां वीणायाम् २"गोधावो-णाः काण्डवीणाश्च पत्नीवादयन्त्युपगायन्ति"कात्या०१२, २,१७ । "शरकाण्डमय्योवीणाः काण्डवीणाः" कर्कः ।

काण्डसन्धि पु० ६त० । ग्रन्थौ पर्वणि (पाब्)(गाँट) राजनि०

काण्डस्पृष्ट पु० स्पृष्टं गृहीतं काण्डं येन निष्ठान्तत्वात् परनि० । शस्त्राजीवे अमरः ।

काण्डहीन न० काण्डेन हीनम् ३त० । भद्रमुस्तके शब्दच० ।

काण्डिका स्त्री काण्डोऽस्त्यस्याः प्राशस्त्येन ठन् । १लङ्कानामकधान्यभेदे २वालुकानामकर्कटीभेदे च राजनि० ।

काण्डिन् त्रि० काण्डः गुल्मोऽस्त्यस्य प्राशस्त्येन इनि । प्रशस्तगुल्मयुक्ते स्त्रियां ङीप् । "अंशुमतीः काण्डिनीर्या विशाखा ह्वयामि ते वीरुधः" अथ० ८,७.४ ।

काण्डीर पु० काण्डोवाणोऽस्त्यस्य इत्यर्थे "काण्डाण्डादीरन्नीरचौ पा०" इत्यत्रन ईरन् ईरच् वा । १वाणास्त्रधारिणि (तीरन्दाज) अमरः "काण्डीरः खाड्गिकः शार्ङ्गी" भट्टिः वाणाकारशिखावत्त्वात् २अपामार्गे काण्डवेल इति ख्याते ३लताभेदे च राजनि० ४मञ्जिष्ठायां स्त्री रत्नमाला अत्रार्थे गौरादित्वात् ङीष् । [तृणभेदे राजनि० ।

काण्डेक्षु पु० काण्डे इक्षुरिव (तालमाखना) इति ख्याते काश-

काण्डेरी स्त्री काण्डं बाणाकारं हस्तिदन्तमिव पुष्पम् ईर्त्ते ईरङ्-गतौ अण् गौरादेराकृतिगणत्वात् ङीष् पा०, मुग्ध० षण् ईप् । नागदन्तीवृक्षे रत्नमाला ।

काण्डेरुहा स्त्री काण्डे रोहति रुह-क ७त० अलुक्स० । (कट्की) कटुकीवृक्षे रत्नमा० । [अमरे पाठान्तरम् ।

काण्डोल पु० कण्डोल+प्रज्ञा० स्वार्थे अण् । कण्डोलशब्दार्थे

काण्व पु० काण्वास्य कण्वगोत्रापत्यस्य छात्रः कण्वादि० अण् यलोपः । १कण्वगोत्रापत्यस्य छात्रे 'यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः । जगृहुर्वाजसंन्यस्ताः काण्वमाध्यन्दिना-दयः' भाग०१२,६,७७ । २तदधीतशाखायां स्त्री ङीप् । कण्वस्यापत्यं शिवा० अण् । ३कण्वापत्ये पुंस्त्री "याभिः काण्वस्योप वर्हिः" ऋ०८,१,८ । "इत्था धीमन्तमद्रिवः काण्वं मेध्यातिथिम्" ८,२,४० । "काण्वं कण्वस्य पुत्रम्" भा० । गोत्रापत्ये तु गर्गा० यञ् । काण्व्य तद्गोत्रापत्ये बहुषु तस्य लुक् । स्त्रियां गोत्रान्तत्वात् ङीप् यलोपश्च । काण्वी तद्गोत्रापत्यस्त्रियाम् । "काण्वीपुत्रात् काण्वीपुत्र" बृ० उ० वेदवंशवर्णने । ततः स्त्रियां लोहिता० फक् । काण्वायनी । ततोयून्यपत्ये तु "यञिञोश्च ४।१।१०१" पा० फक् । काण्व्यायन तदीययुवापत्ये पुंस्त्री । कण्वेन दृष्टं साम अण् । ४कण्वदृष्टे सामभेदे । "कौत्सं भवति काण्वं भवति" श्रुतिः । तच्च साम गेय(वे)गाने १६प्रपाठके दृश्यम् ।

कात् अव्य० कुत्सितमतत्यनेन अत-आधारे क्विप् कोः कादेशः । तिरस्कारे तिरस्कारस्य कुत्सितप्राप्तिहेतुत्वा-त्तथात्वम् । "यन्मयैश्वर्य्यमत्तेन गुरुः सदसि कात्कृतः" भाग० ६,७,६ । "कात्कृतस्तिरस्कृतः" श्रीधरः ।

कातन्त्र न० ईषत्तन्त्रमस्य कोः कादेशः । कालापकव्याकरणे तच्च कार्त्तिकेयप्रसादेन शर्ववर्मणा कृतं यथोक्तं वृहत्-कथासारे सर्ववर्माश्वभापतेश्च पक्रमे "ततोऽन्तःपभणा तेन स्कन्देन मम दर्शनम् । दत्तं तत्र प्रविष्टा मे मुखे मूर्त्ता सरस्वती । अथासौ भगवान् साक्षात् षडभि-राननपङ्कजैः । "सिद्धोवर्णसमाम्नायः" इति सूत्रमु-दैरयत् । तच्छ्रुत्वैव मनुष्यत्वसुलभाच्चापलात् परम् । उत्तरं सूत्रमभ्यूह्य स्वयमेव मयोदितम् । अथा-ब्रवीत् स देवो मां नावदिष्यः स्वयं यदि । अनल्प्य-दिदं शास्त्रं पाणिनीयोपमर्दकम् । अधुना स्वल्पतन्त्रत्वात्

कातन्त्राख्यं भविष्यति । मद्वाहनकलापस्य नाम्ना कालापकं तथा । इत्युक्त्वा शब्दशास्त्रं तत्प्रकाश्याभिनवं लघु । साक्षादेव स मां देवः पुनरेवमभाषत”

कातर त्रि० ईषत्तरति स्वकार्य्यसमाप्तिं गच्छति तॄ–अच् कोः कादेशः । १अधीरे, व्यसनाकुले अमरः २भीते, ३विवशे, ४चञ्चले च । “चेन्या तदध्यासितकातराक्ष्या” रघुः । “तयोः समापत्तिषु कातराणि” कुमा० । “कातरोऽपि यदि चोद्गतार्चिषा” रघुः । “मद्गेहिन्याः प्रिय इति सखे ! चेतसा कातरेण” मेघ० । “विद्धा मृगी व्याधशिलीमुखेन मृगोऽपि तत्कातरवीक्षणेन” उद्भटः । के जले आतरति प्लवते न तु विशेषतो मज्जति । ५उडुपे । (कातला) ६मत्स्यभेदे पुंस्त्री स्त्रियां जातित्वात् ङीष् । ७ऋषिभेदे पु० ततः गोत्रे नडा० फक् । कातरायण तद्गोत्रापत्ये पुंस्त्री । भावे ष्यञ् । कातर्य्य व्याकुलतायां न० “कातर्य्यं केवला नीतिः शौर्य्यं श्वापदचेष्टितम्” रघु । तल् कातरता स्त्री, त्व कातरत्व न० तदर्थे ।

कातल पु० कस्य जलस्य न तलमस्ति स्पृश्यत्वेनास्य अच् । (कातला) १मत्स्यभेदे राजनि० । स्त्रियां जातित्वात् ङीष् । “कातलो मधुरश्चोष्णोगुरुपाकी त्रिदोषजित्” वैद्य० । २ऋषिभेदे च ततः गोत्रापत्ये नडा० फक् । कातलायन तदपत्ये पुंस्त्री स्त्रियां गोत्रत्वात् ङीष् ।

काति स्त्री कै–शब्दे क्तिन् । स्तवे अथकातिशब्दे उदा० ।

कातीय त्रि० कात्यायनस्य छात्रः तस्येदं वा “वृद्धाच्छः” पा० छ तत्र फको वा लुक् । १कात्यायनच्छात्रे २तत्सम्बन्धिनि च त्रि० । कातीयं श्रौतसूत्रं गृह्यसूत्रमित्यादि पक्षे न लुक् । कात्यायनीय तदर्थे त्रि० । कातीय श्रौतसूत्रप्रतिपाद्यविषयाश्च कात्यायनशब्दे दृश्याः ।

कातु पु० कं जलमतति सातत्येन गच्छति अत–उण् ६त० । कूपे निरु० तस्य पीप्ने निःशेषेण शोषणाभावात् तथात्वम्

कात्यक्य पु० कत्थ-श्लाघायाम् ण्वुल् कत्थकः स्वार्थे ष्यञ् अग्निभेदे निरु० । “यज्ञैध्म इति कात्थक्योऽग्निरिति” शाकपूणिः । “नाराशंसो यज्ञ इति कात्थक्यः नरा अस्मिन्नासीनाः शंसन्ति अग्निरिति शाकपूणिः । इति च निरु० ८,५,६, [पत्ते ।

कात्य पुंस्त्री कतस्यर्षेःगोत्रापत्यम् गर्गा० यञ् । कतर्षिगोत्रा-

कात्यायन पु० कतस्य गोत्रापत्यं युवा गर्गा० यञ् यञन्तत्वात् यनि फक् । कतस्य युवगोत्रापत्ये ऋषिभेदे । स च त्रिविधः विश्वामित्रवंश्यः, गोभिलपुत्रः, कतवंश्यसोमदत्त द्विजपुत्रः वसुदत्तागर्भजः वररुचिनाम्ना ख्यातश्च । तत्र विश्वामित्रगोत्रोत्पन्नः हरिवं २८३० उक्तो यथा । “विश्वामित्रस्य च सुता देवराताद्यः स्मृताः । विख्यातास्त्रिषु लोकेषु तेषां शीलानि मे शृणु । देवश्रवाः कतश्चैव यतः कात्यायनाः स्मृताः” इति ।

अयञ्च गोभिलपुत्रकात्यायनात् भिन्नः । गोभिलपुत्रकात्यायनेन च कर्मप्रदीपाख्यं छन्दोगपरिशिष्टरूपं शास्त्रं प्रणीतं तस्येदमादिमं वचनम् । “अथातो गोभिलोक्तानामन्येषाञ्चैव कर्म्मणाम् । असष्टानां तथा सम्यग्दर्शयिष्ये प्रदीपवत्” । तत्र १प्रपाठके १० खण्डाः तत्र १ख० यज्ञोपवीतादिपरिभाषा । २ख० आचमनादि परिभाषा । ३ख० अक्रियादित्रैविध्यादिकथनपूर्वकं श्राद्धविधिनिरूपणम् । ४ख० पिण्डदानविधानम् । ५ख० नान्दीमुखश्राद्धादिकर्त्तव्यताविधानानि । ६ख० अग्न्याधानादिकाधिकारिधर्मविधानम् । ७ख० अरणीनिर्माणप्रकारादि । ८ख० अग्न्युद्धारप्रकारादि । ९ख० अग्निहोत्रकालादितद्विधानादि । १०ख० दन्तधावनस्नानादिविधानम् उपाकर्म्मोत्सर्गादिस्नानादिविधानञ्च ।

२प्रपाठके नव खण्डाः । तत्र १ख० सन्ध्योपासनकालादितद्विधानानि । २ख० तर्पणप्रकारादि । ३ख० पञ्चयज्ञविधानप्रकारादि । ४ख० वैश्वदेवविधानप्रकारः । ५ख० दक्षिणादानादिप्रकारः । ६ख० अमावास्यादिश्राद्धकालव्यवस्था तद्विधानप्रकारश्च । ७ख० कर्षूनिर्माणप्रकारः श्राद्धविधानप्रकारश्च । ८ख० दर्शपौर्णमासविधानप्रकारः । ९ख० प्रवासगमनकाले साग्निकस्य कर्त्तव्यविशेषकथनम् ।

तृतीयप्रपाठके ।।१खण्डाः । तत्र १ख० साग्निकस्य पत्नीमरणे कर्त्तव्यविशेषविधानम् । २ख० साग्नेर्दाहप्रकारः । ३ख० शवस्पर्शिकर्त्तव्यभेदविधानम् साग्निकस्य विदेशमरणे दाहविधानञ्च । ४ख० सूतके सन्ध्यादित्यागेऽपि श्रौतकर्म्मणामनुष्ठानविधानम् । ५ख० पुंसवनादिक्रियाङ्गहोमाहुतिसंख्याविषयकथनं शुक्लापतिव्रताब्रह्मबन्धुशलाटुपन्यकपुष्पिकाकपुच्छबहुपरादिशब्दपरिभाषा ब्रह्मचारिकर्त्तव्यविधानञ्च । ६ख० समशनीयचरुकर्त्तव्यताविषयोपदर्शनम् नवयज्ञकालकथनञ्च । ७ख० विहितकर्मातिक्रमे प्रायश्चित्तविशेषविधानम्, अन्वष्टकर्युसंवरशब्दपरिभाषा ।८ख० वर्णभेदेन दण्डप्रमाणकथनम्, श्राद्धदर्भनिरूपणञ्च । दक्षिणायां गोः प्रवर-

तोक्तिः उपाकर्मप्रकारश्च। ९ख० यवधानादिशब्दानां पारिभाषिकार्थकथनम्। वेदोत्सर्गकथनं तत्र बलिप्रकारः स्तनकादिना तदकरणे आग्रहायणिककर्त्तव्यताविधानम् तत्र बलिदानवर्ज्जनञ्च। त्र्यम्बकमण्डकगोलकचीवरशब्द-परिभाषा। अनुमन्त्रणप्रकारः। १०ख०। पशुसंस्कारस्थानविशेषकथनम्। पशुदाने एकादशस्थानकथनम्। पश्वभावे पायसपिण्डैः होमविधानम् श्राद्धे पिण्डदानप्राधान्यं गयादौ पिण्डमात्रदानदर्शनादिति परमतमुक्त्वा अन्नदानस्य प्राधान्यमिति स्वमतकथनम्। आमश्राद्धविधाने पिण्डाभाव इत्युक्तिः। दीपार्घ्यमधुपर्कादिशब्दपरिभाषा"।

अनेनैव धर्म्मसंहिता कृता। "मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती" इत्युपक्रमे "धर्मशास्त्रप्रयोजकाः" याज्ञ०। तत्र च प्रायेणाष्टादशविवादनिर्णयः। कातीयश्रौतगृह्यसूत्रसर्वानुक्रमणिकादिकमनेनैव कृतम्। वररुचिनामकात्यायनस्य पुष्पदन्तावतारस्तत्कथा च बृहत्कथायाम्। सुप्रतीकयक्षावतारकाणभूतये स्वजन्मादिश्रावणरूपशापान्तमुपवर्ण्य स्वजन्मकथादि तत्रोक्तं यथा। "ततः स मर्त्त्यवपुषा पुष्पदन्तः परिभ्रमन्। नाम्ना वररुचिः किन्तु कात्यायन इति श्रुतः। पारं संप्राप्य विद्यानां कृत्वा नन्दस्य मन्त्रिताम्। खिन्नः समाययौ द्रष्टुं कदाचित् विन्ध्यवासिनीम्" इत्युपक्रम्य तस्य काणभूतिना सह मेलने जाते काणभूतिना निजशापादिवृत्तान्ते उक्ते। "इत्थं मे शापदोषोऽयं पुष्पदन्तागमावधिः। इत्युक्त्वा विरते तस्मिन् काणभूतौ च तत्क्षणम्। स्मृत्वा वररुचिर्जातिं सुप्तोत्थित इवावदत्। स एव पुष्पदन्तोऽहं मत्तस्तस्य कथां शृणु। इत्युक्त्वा पञ्चलक्षेण सप्त सप्त महाकथाः। कात्यायनेन कथिताः काणभूतिस्ततोऽब्रवीत्" इत्युपक्रम्य "तद्ब्रूहि निजवृत्तान्तं जन्मनः प्रभृति प्रभो!" इति काणभूतिप्रश्ने "ततो वररुचिस्तस्य प्रणतस्यानुरोधतः। सर्वमाजन्मवृत्तान्तं विस्तरादब्रवीदिदम्। कौशाम्ब्यां सोमदत्ताख्यो नाम्नाग्निशिख इत्यपि। द्विजोऽभूत् तस्य भार्या च वसुदत्ताभिधाऽभवत्। तस्यां तस्मात् द्विजवरात् एष जातोऽस्मि शापतः" इति स्वजन्मभूम्यादिकमुक्तम्। पश्चाच्च व्याडिसमीपे तन्मात्रा तस्य जन्मवृत्तान्तो यथा वर्णितस्तदप्युक्तं तत्रैव "तथा हि पूर्वं जातेऽस्मिन्नेकपुत्रे मम स्फुटा। गगनादेवमुदभूदशरीरा सरस्वती। एकश्रुतिधरो जातो विद्यां वर्षादवाप्स्यति। किञ्च व्याकरणं लोके प्रतिष्ठां प्रापयिष्यति। नाम्ना वररुचिश्चायं तत्तदस्मै हि रोचते। यद्यद्वरं भवेत् किञ्चिदित्युक्त्वा वागुपारमत्" इत्थं तज्जन्मकथान्ते व्याडीन्द्रदत्ताभ्यां तन्मातुः सकाशादभ्यर्थ्य तं गृहीत्वा तेन सह वर्षसमीपं गतमित्यप्युक्तं तत्रैव यथा "व्याडीन्द्रदत्तौ तरसा निर्गतौ नगरात्ततः। अथ क्रमेण वर्षस्य गृहं प्राप्ता वयं गुरोः" इत्युपक्रमे "अध्यापयितुमस्मांश्च प्रवृत्तोऽभूदसौ ततः। सकृच्छ्रुतं मया तत्र, द्विःश्रुतं व्याडिना तथा। त्रिःश्रुतञ्चेन्द्रदत्तेन गुरुणोक्तमगृह्यत" इति स्वस्य वर्षसमीपेऽध्ययनं वर्णितम्। "अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्। तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्। स शुश्रूषापरिक्लिष्टः प्रेषितो वर्षभार्य्यया। अगच्छत् तपसे खिन्नो विद्याकामो हिमालयम्। तत्र तीव्रेण तपसा तोषितादिन्दुशेखरात्। सर्वविद्यामुखं तेन प्राप्तं व्याकरणं नवम्। ततस्तत्रावयोर्वादे प्रयाताः सप्त वासराः। अष्टमेऽह्नि मया तस्मिन् जिते तत्समनन्तरम्। नभःस्थेन महाघोरो हुङ्कारः शम्भुना कृतः। तेन प्रनष्टमैन्द्रं तदस्मद्व्याकरणं भुवि। जिताः पाणिनिना सर्वे मूर्खीभूता वयं पुनः"। "अत्रान्तरे तुषाराद्रौ कृत्वा तीव्रतरं तपः। आराधितो मया देवो वरदः पार्वतीपतिः। तदेव तेन शास्त्रं मे पाणिनीयं प्रकाशितम्। तदिच्छानुग्रहादेव मया पूर्णीकृतं च तत्"।

अनेनैव पाणिनिव्याकरणतात्पर्य्यप्रकाशकः परिशिष्टरूपो वार्त्तिकपाठो निरमायि स च "सिद्धे शब्दार्थसम्बन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शब्देन धर्मनियमः" इत्यादिकः अष्टाध्याय्यात्मकः। बृहत्कथायाम् "तदैवानीय दत्ता मे योगनन्देन मन्त्रिता" इत्यनेन वररुचेस्तन्मन्त्रिताकरणं वर्णितम्। तेन पाणिनेर्वररुचिनामकात्यायनस्य च योगनन्दसमकालता प्रतीयते। बृहत्कथाया इदानीमप्राप्यत्वेऽपि तत्कथासारस्योपलम्भात् तत्र च यथावर्णितकालताऽवगम्यते बृहत्कथासारस्य चाप्रामाण्यं नाशङ्कनीयं तत्कथासारे "यथामूलं तथैवैतन्न मनागप्यतिक्रमः। ग्रन्थविस्तरसंक्षेपमात्रभाषा च भिद्यते" इत्युक्त्या बृहत्कथामूलकतायास्तत्कथासारस्योक्तेः। स च कतगोत्रापत्यत्वात् कात्यायनः। अतएव हरिवं० "ततः कात्यायनाः स्मृताः" इति बहुत्वनिर्देशात् अन्य-

स्यापि तद्गोत्रभवयुवापत्यस्य कात्यायनत्वमिति भूतस्य भविष्यतो वा स्यादिति सूचितम्” इति । ततः प्राचीनेन कात्यायनेन शुक्लयजुर्वेदविहितकर्म्मणामनुष्ठानज्ञापकं षड्‌विंशत्यध्यायात्मकं कातीयं श्रौतसूत्रं गृह्याख्यं सूत्रञ्च प्रणीतम् । तत्र श्रौतसूत्रे १अध्याये १कण्डिकायां २१सूत्राणि । तत्र अग्न्याध्यानादिषु अधीतसार्थवेदानां द्विजानां सपत्नीकानाम् रथकारस्य चाधिकारः । अङ्गहीनक्लीवपतितशूद्राणामनधिकारः । निषादस्थपतेर्गावेधुके चरावधिकारः । अवकीर्णिनश्च प्रायश्चित्तरूपगर्द्दभेज्यायाम् । तत्र गावेधुकचरुरवकोर्णिगर्द्दभेज्या च लौकिकेऽग्नौ कार्य्या । गर्द्दभेज्यायां पुरोडाशश्रपणं भूमावेव न कपाले कार्य्यम् । तत्र अवदानहोम उदके एव नाग्नौ, अन्यदाघारादि अग्नावेव । प्राशित्रं गर्द्दभस्य शिश्नादवदेयम् । श्रौतं कर्म्म वैतानिकेषु विहारार्थेषु गार्हपत्याहवनीयदक्षिणाग्निषु कर्त्तव्यम् । स्मार्त्तन्तु आवसथ्येऽग्नौ कर्त्तव्यम् । गृहारम्भे मांसपाकनिषेधः ।

२क० २२सू० । तत्र देवतोद्देशेन द्रव्यत्यागोयाग इति यागलक्षणम् दर्शपौर्णमासादिशब्दवाच्यार्थस्यागविशेषः । तस्य च प्राधान्यं, तत्प्रकरणपठितान्वाधानादिब्राह्मणदक्षिणान्तस्य कर्म्मजातस्याङ्गत्वम् । एवं प्रयाजादयः पूर्व्वाघारादिहोमाश्च तदङ्गानि । तिष्ठता होमः वषट्कारप्रदानः यजतिशब्दार्थः तत्र याज्यापुरोऽनुवाक्ये च । उपविष्टेन स्वाहाकारप्रदानो होमः जुहोतिशब्दार्थः । सर्व्वकर्म्मसु ब्राह्मणा एव ऋत्विजः, न क्षत्रियवैश्याः तेषां हविःशेषभक्षणनिषेधात् । फलेच्छासत्त्वे काम्यकर्म्माणि कर्त्तव्यानि नावश्यम् । नित्यानि तु अग्निहोत्रादान्यवश्यं कर्त्तव्यानि अकरणे दोषश्रवणात् । दीक्षितेन सत्यवचनाधःशयनब्रह्मचर्य्यादिनियमाः अवश्यं कार्य्याः । गृहदाहादिनिमित्त धनहानिनिमित्तं च प्रायश्चित्तमवश्यं कार्य्यं न तस्य इच्छयानुष्ठानम् । नित्यानि यथाशक्त्यङ्गयुक्तान्यपि कार्य्याणि । काम्यानि तु सर्व्वाङ्गोपेतान्येव । कामनासत्त्वेऽपि यदा यथाश्रुताङ्गानि कर्त्तुं शक्यन्ते तदैव काम्यं कार्य्यं नान्यदा ।

२क० ४२सू० । तत्र ऋग्यजुःसामप्रैषभेदेन मन्त्राश्चतुर्विधाः । ऋगादिलक्षणम् (ऋग्वेदशब्दे उक्तम्) । यजुषां यावति पदसमूहे उच्चरिते पदसमूहोनिराकाङ्क्षोभवति । तावत्परिमितमेकं वाक्यं कर्म्मकाले प्रयोक्तव्यम् । यत्र तु मध्ये पठितैः पदैर्यजुर्निराकाङ्क्षं न भवति तत्र पदान्तरं योग्यमध्याहृत्य पूर्व्वपठितं वानुषज्य निराकाङ्क्षीकृत्य प्रयोज्यम् । प्रयोगे मन्त्राः कर्म्मारम्भे प्रयोज्याः । यजुर्व्वेदमन्त्राश्च उपांशु प्रयोज्याः ऋग्वेदसामवेदयोस्तु मन्त्रा उच्चैःप्रयोज्याः । याजुषा अपि प्रैषा उच्चैःप्रयोज्याः । कुशजातिमात्रं बर्हिःशब्दार्थः । अग्न्यगारादौ वसोर्धाराहोमादौ च विशेषसंख्यानुक्तौ यावता कार्य्यसिद्धिस्तावत्संख्या ग्राह्या । इध्मबर्हिर्व्वन्धार्थानि संनहनानि विषमसंख्यत्वगुणविशिष्टान्यानीति । संनहने भेदस्तु प्रागग्रे संहनने उदग्रं बर्हिर्निधाय संनहनेन दृढं बद्ध्वा बर्हिर्मूलभागे ग्रन्थिमुपगूहेत्, उदगग्रे संनहने तु प्रागग्रमिध्मभागं निधायेध्ममूले ग्रन्थिमुपगूहेत् इति । अष्टादशसंख्यारत्निमात्रकाष्ठकः तथाभूतैकविंशतिकाष्ठको वा पालाशस्तदभावे वैकङ्कतः इध्मः कार्य्यः । तदभावे औपसर्गिकः वैल्वः औदुम्बरःखादिरो वा तत्तदभावे इध्मस्तथाभूतः कार्य्यः । इध्मादेव त्रीणि काष्ठान्यादाय परिधिपरिधानं कुर्य्यात् । सामिधेनीवृद्धौ चेध्मकाष्ठवृद्धिः पित्र्यादौ सामिधेनीह्रासेऽपि नेध्मसंख्याह्रासः । अग्निप्रणयनार्थं इध्म उक्तसंख्याधिककाष्ठकोऽपि भवति । इष्टकापशौ षड्विंशतिप्रभृतिभिस्तथाभूतकाष्ठैः इध्मः कार्य्यः । स च त्रिभिः संहननैर्मूलभागे बद्धः कल्प्यः । दर्शपौर्णमास एव वेदकरणम् । सूत्रे आङ्शब्दार्थोऽभिविधिरिति प्रतिज्ञा । सर्व्वकर्म्मस्वनुक्तमपि गार्हपत्यात् आहवनीयदक्षिणाग्न्योरुद्धरणं कार्य्यम् । अन्यकर्मार्थमुद्धृतयोस्तयोरागन्तुकान्यकार्य्यापाते तत्करणं नोद्धरणान्तरम् । यथा दर्शाद्यर्थमुद्धृतयोस्तयोः प्राप्तकालाग्निहोत्रहोमः । यत्कर्मार्थमुद्धृतौ तौ तत्समाप्तौ लौकिकावेव भवतः । तत ऊर्द्ध्वं तत्राहवनीयादिविहितं कर्म्म न कार्य्यं तयोः लौकिकत्वोपदेशात् । तेन यत्र पौर्णमासादौ पृथक्तन्त्रा बह्व्य इष्टयः सन्ति तत्र प्रतीष्टि पृथगग्न्युद्धरणेन ताः कार्य्याः । तथा च न सकृदुद्धृतयोः सर्व्वत्रोपयोगः । खादिरत्वादीनां क्वचिदनुक्तौ प्रकृतिवत् विकृतावपि कार्य्यता । स्रुवस्फ्यस्रुग्‌जुहूप्रभृतिहोमसाधनपदार्थानां लक्षणम् । तानि च तद्भाष्ये विवृतानि यथा (खादिरः स्रुवोऽङ्गुष्ठपर्व्ववृत्तपुष्करो नासिकावत्पर्व्वोत्खातो भवति । स्फ्यश्च खादिरः खड्गाकृतिररत्निमात्रः स्रुचो बाहुमात्र्यो मूलदण्डास्त्वग्बिला हंसमुखवदेकप्रणालिकायुक्ताः पा-

णिमात्रपुष्करास्तावत्खातयुक्ताश्च कार्य्याः । पालाशी जुहूः । उपभृदाश्वत्थी, वैकङ्कती ध्रुवा, एतेषां द्व्यणामेकस्य वा सर्व्वाः स्रुचः कारयेत् । अग्निहोत्रहवणी वैकङ्कती, अग्निहोत्रस्रुवो वैकङ्कतः । यैः पात्रैर्होमो न क्रियते तानि सर्व्वाणि वारणानि भवन्ति तानि चोलूखलमूसलकूर्चेडापात्रीपिष्टपात्रीपुरोडाशपात्रीशम्याष्टतावदानाभ्युपवेषान्तर्द्धानकटप्राशित्रहरणषड़वत्तब्रह्मासनादीनि । तत्रोलूखलमूसलौ लोकप्रसिद्धौ । कूर्च्चो बाहुमात्रः पीठाकारः । इडापात्री पिष्टपात्र्यौ अरत्निमात्र्यौ मध्यसंस्थहीते । पुरोडाशपात्री प्रादेशमात्री समचतुरस्रा षड़ङ्गुलहृत्तखातवती । शम्या प्रादेश द्वादशाङ्गुला । प्राशित्रहरणं हस्तमादर्शाकारं चतुरस्रं चमसाकारं वा तथैव द्वितीयमपिधानपात्रम् । षड़वत्तं चोभयत्र खातवत् । आसनानि चारत्निमात्रदीर्घाणि प्रादेशमात्रविपुलानि । सर्व्वेषु पात्रेषु मूलाभिज्ञानार्थं हस्तानि कार्य्याणि । अनादये सोमसाधनपात्राणि वैकङ्कतानि कार्य्याणि । षोड़शिनः पात्रं खादिरं चतुरस्रम् । अंशदाभ्यपात्रमौदुम्बरम् । वाजपेये सप्तदशपद्मपात्राणि वरणद्वसभवानि । सुरापद्मपात्राण्यपि । मृण्मयानि वा" । इष्टिषु प्रणीतोत्करावन्तरेण सर्व्वेषां गमनागमनार्थो मार्गः, सोत्तरवेदिकेषु कर्म्मसु चात्वालोत्करयोरन्तरालेन मार्गः ।

४क० १९सू० । तत्र विहितद्रव्याभावे काम्यं कर्म्म नारब्धव्यम् । नित्यन्तु मुख्यद्रव्याभावे प्रतिनिधिनाप्यारभ्यम् । काम्येऽङ्गसद्भावं ज्ञात्वाऽऽरम्भोत्तरम् मुख्यद्रव्यापचारे प्रतिनिधिद्रव्येण समापनम् । न तु असमाप्तस्य त्यागः । नित्ये तु आरब्धे ऽनारब्धे वा प्रतिनिध्युपादानमिति भेदः । काम्यस्यावश्यकार्य्यत्वाभावात् प्रतिनिधिना नारम्भः । आरब्धे आवश्यसमापनीयत्वात् समाप्त्यर्थं प्रतिनिधिर्भवति । दीक्षितस्य पयआदिके व्रतेऽपि प्रतिनिधिरस्ति । प्रतिनिधिना करणपक्षे मुख्यद्रव्यवाचकपदघटितमन्त्रे ऊहो न कार्य्यः । यत्र जात्यन्तरं विहितं तत्र ऊहः । विकल्पस्थले अन्यतरद्रव्यारब्धे कर्म्मणि देशात्तस्य दोषे विनाशे वा तत्प्रतिनिधिद्रव्यान्तरेणैव समाप्यं न तु वैकल्पिकद्रव्येण यथा व्रीह्यारब्धे कर्म्मणि व्रीहिनाशदोषयोः व्रीहिसदृशनीवारादिना समापनं न तु यवेन, एवमन्यत्र । व्रीह्यभावे नीवारैः प्रयोगे आरब्धे नीवारेषु विनष्टेषु कथञ्चिद्व्रीहिप्राप्तौ व्रीहिभिरेव अप्राप्तौ व्रीहिसदृशैरेव कर्म्म समापनम् न नीवारसदृशैः नापि वैकल्पिकैर्यवैः । मुख्यद्रव्येण सर्व्वप्रयोजनासिद्धौ तत्समर्थप्रतिनिधिनैव कर्म्म कार्य्यम् । यत्र कृष्णाः व्रीहयोविहितास्तत्र कृष्णव्रीह्यलाभे शुक्लव्रीहिभिः कर्म्म कार्य्यं न तु कृष्णनीवारैः गुणस्य द्रव्यापेक्षया दुर्ब्बलत्वात् । पुंवत्सत्वलक्षणं गुणं हित्वा स्त्रीवत्सायाअपि गोः पयसा होमो न तु पुंवत्सायाः मेष्याः पयसा । एवमार्द्रत्वगुणालाभे शुष्कपलाशैरपि कर्म्म कार्य्यं न तु आर्द्रसमिदन्तरेण एवं सर्व्वत्र । एवं प्राशित्रादिसर्व्वकर्म्मसु पर्य्याप्तव्रीह्यलाभेऽपि अवदानद्वयपर्य्याप्तपुरोडाशनिष्पत्तिसमर्था व्रीहय एव ग्राह्या न तु प्राशित्रादिसर्व्वकार्य्यपर्य्याप्ता नीवारा इति ५क० १७सू० । तत्र श्रुतिपाठमन्त्रपाठार्थसिद्धिक्रमेण पदार्थानुष्ठानम् । यत्र च पाठक्रमार्थसिद्धिक्रमयोर्विरोधः तत्र पाठक्रममनादृत्यार्थसिद्धिक्रमोग्राह्यः । यथा "स वै पर्णशाखया वत्सानपाकरोति तामाच्छिनत्ति" इत्यत्र पाठक्रममनादृत्य पूर्व्वं छेदनं ततोऽपाकरणम् । यत्र तु श्रुतिपाठक्रमयोर्विरोधः "संस्थिते यज्ञे ब्राह्मणं तर्पयितवै ब्रूयादिति" श्रुतिः संस्थिते यज्ञे ब्रह्मतर्पणं विदधाति पाठक्रमस्तु प्राशित्रावदानात् पूर्व्वम् । तत्र श्रुतिक्रमेण संस्थितएव कार्य्यम् न पाठक्रमेण । यत्र च श्रुतिपाठमन्त्रपाठयोर्विरोधः तत्र श्रुतिपाठक्रममनादृत्य मन्त्रपाठक्रमेण कार्य्यम् । यथा सोऽसावाज्यमधिश्रयतीत्यधिश्रयणं विधाय, तदनन्तरमेवोद्वासनं विहितम् मन्त्रक्रमस्तु पत्नीसंहननान्ते इति विरोधः तत्र मन्त्रपाठक्रमेणैवाज्योद्वासनम् । यत्र बहूनां प्रधानानां सह प्रयोगस्तदा सन्निपत्योपकारकाः पदार्थाः सर्व्वेषां प्रधानानां पृथक पृथक् सदृशपदार्थानुसमये कार्य्याः यथा सप्तदशसु प्राजापत्येषु पशुषु सर्व्वेषां प्रथम मुपाकरणं ततः सर्व्वेषां नियोजनम् ततः सर्व्वेषां प्रोक्षणमित्यादि । आरा कारकास्तु तन्त्रेण कार्य्या न तेषु क्रमचिन्ता । यथा दर्शादौ प्रयाजादय आरादुपकारकास्तन्त्रेण कार्य्याः । चतुर्द्दृष्टिकनिर्वापः एकादशादिकपालोपधानञ्च एकैकस्य कार्य्यम् । सोमे चैकैकस्य पद्मसादनान्तं ग्रहणं कार्य्यम् । सर्व्वत्र हविषोऽवदानं प्रदानान्तं कार्य्यम् । देवताऽभेदे हविर्मात्रभेदे देवतागुणे वा उपांश्वादिकेऽभिन्ने ऽदानान्तमवदानं न भवति किन्तु क्रमेण सर्व्वाणि हवींष्यवदाय पश्चा

त्तेभ्यः प्रदानं कार्य्यम्। सम्प्रदायस्तु प्राजापत्यपशुषु उपाकरणक्रमे प्रथमपदार्थे कृते द्वितीयपदार्थादौ उपाकरणक्रम आदर्त्तव्यः न क्रमान्तरम्। अयं प्रावृत्तिकः क्रमः। प्रधानानामाग्नेयादीनां पाठक्रमेण तदङ्गानां निर्वापादिक्रमः। यथा प्रथमपठितस्याग्नेयस्य प्रथमं निर्वापादि। पश्चात् पठितस्याग्नीषोमीयस्य पश्चात् इत्ययं क्रमो मुख्यः। अनेकाहसाध्यदर्शादौ क्रियमाणे मध्ये नित्यस्याग्निहोत्रादेः काले प्राप्ते काम्यमध्येऽपि तत् कार्य्यमेव न तु दर्शाद्यनुरोधेन नित्याग्निहोत्रादिकालातिक्रमः कार्य्यः। सौत्रामण्यादिविकृतिमध्यएवामावास्यायां दक्षिणाग्नौ पिण्डपितृयज्ञः कार्य्यः। षोड़शितिरात्रादौ च षोडशिनोनियतकालत्वेऽपि दैवादुक्थ्योत्कर्षे तदनन्तरमेव षोडशियागः कार्य्यः न तु कालानुरोधात् ततः पूर्व्वम्। अग्निष्टोमादिसत्रपर्य्यन्तानां प्रधानानामनुष्ठाने क्रमाभावः। यदा यत्र यस्येच्छा तदा तदनुष्ठेयम्। अध्ययनार्थ एवैषां पाठक्रमः नानुष्ठानार्थः।

६क० २६सूत्राणि। तत्र अवत्तहविर्नाशेऽन्यद्धविः कार्य्यं न स्विष्टकृदादिप्रतिपत्तिसहितः यागः कार्य्यः। यथा पुनः शेषादवदेयम्। अग्न्यादिदेवतानां, मन्त्राणां, प्रयाजानुयाजादिक्रियाणाञ्च न प्रतिनिधिरस्ति। दृष्टार्थानां तु क्रियाणामवघातादीनां प्रतिनिधिरस्ति। प्रतिषिद्धं वस्तु स्मृतद्रव्यसदृशमपि न प्रतिनिधेयम्। यथा मौद्गे चरौ माषादि। त्यागादौ वपनादौ संस्कारकर्म्मणि च यजमानस्य प्रतिनिधिर्नास्ति। गुणकर्म्मसु पात्रासादनाज्यावेक्षणाग्न्याधानव्यूहनवेदस्तरणादिषु यजमानस्यापि प्रतिनिधिरस्ति। पत्न्यभावेऽप्याज्यावेक्षणान्वारम्भोपाञ्जनादौ गुणकर्म्मणि प्रतिनिधिरस्ति। सत्रेषु यजमानस्य प्रतिनिधिरस्ति। यजमानकर्म्मणा सम्बन्धात् यजमानधर्म्मा अपि दीक्षणादयः प्रतिनिहितस्य भवन्ति सत्रेषु यजमानानामृत्विक्पदार्थकर्त्तृत्वविधानात्। ब्राह्मणस्यैव सत्रेषु अधिकारो न चात्रवैश्यानाम्। ब्राह्मणानामप्येककल्पानां न भिन्नकल्पानाम्। वैश्यक्षत्रिययोर्गृहपतित्वेऽपि सत्रेषु नाधिकारः। सहस्रसंवत्सरसत्रं मनुष्याणामपि भवति तत्र संवत्सरशब्दस्य अहःसु लक्षणा यतस्तत्र सहस्रसंवत्सरे सहस्रं सौत्यान्यहानि तानि च दिनसहस्रे सम्भवन्तीति।

७क०२८सूत्राणि। यत्र एकफलार्थं बहूनि प्रधानानि एकवाक्येन विधीयन्ते। तत्र तेषां सह प्रयोगः। देशकालफलकर्म्मादिसाम्ये सति प्रधानानामारादुपकारीणि आघारप्रयाजाज्यभागादीनि सकृदेव कार्य्याणि। न प्रतिप्रधानं पृथक् पृथक् कार्य्याणि। देशभेदे कालभेदे च तन्त्रभेदएव भवति न सकृत्क्रिया। यथा दर्शपौर्णमासयोः कालभेदे। वरुणप्रघासेषु च मारुत्या देशभेदे। अहर्गणे सुब्रह्मण्यानिगदे, द्वादशाहे सुत्यासुपगच्छेदित्यत्र कालसंयुक्तं कर्म्म तन्त्रेणैव सकृत् प्रयोज्यम्। एकद्रव्ये कर्म्मावृत्तौ सत्यां मन्त्रवचनं सकृदेव कार्य्यम् न प्रतिक्रियम्। यथा स्फ्येन पदं त्रिः परिलिखेदग्ने रक्षस्त्वेत्यत्र एकवारं मन्त्रेण, द्विस्तूष्णीमिति। हविर्ग्रहणे बर्हिर्ल्लवने तस्य स्तरणे आज्यग्रहणे च प्रतिक्रियं मन्त्रावृत्तिः न सकृत्। आज्यग्रहणे तु वचनात् त्रिधा मन्त्रेण ग्रहणम् शेषं तूष्णीं हविर्ग्रहणे चतुर्थं तूष्णीम्। वचनादुत्तमे सुप्तौ मन्त्रनिवृत्तिः। दीक्षितस्यानेकदुःस्वप्नदर्शने सकृदेव मन्त्रपाठः। एकनद्या अनेकप्रवाहतरणेऽनुमन्त्रणं सकृदेव। अवर्षणे अनेकवृष्टिधारासंयोगेऽपि अनुमन्त्रणं सकृदेव। युगपदनेकामेध्यदर्शने सूर्य्योपस्थापनं सकृदेव। वनीवाहने (विश्रम्य विश्रम्य पुनः पुनः प्रयाणे) अमेध्यदर्शने मन्त्रपाठः सकृदेव। एकरात्रिमध्ये पुनपुनःस्वापादौ अमेध्यदर्शनादिषु च कालभेदे भेदेनैवानुमन्त्रणं न सकृत्। अप्रधानकालीनमङ्गं सकृदेव, न प्रतिधानमावर्त्तते। यथाऽग्निषोमीयसवनीयानूबन्ध्यापशूनां साधारण एव स्वरुरपि यूपवत् सर्व्वपशुसाधारण एव। आधानादिकर्म्मसु पुरुषाएव कर्त्तारोन स्वयं केवलं यजमानः। तत्रायं भेदः देवतोद्देशेन द्रव्यत्यागात्मककर्म्माणि यजमानः स्वयं कुर्य्यात्। पुरुषयोगिमन्त्रान् यजमानः स्वयं जपेत् वपनाभ्यञ्जनादयो यजमानस्यैव संस्काराः। सति विशेषवचने ऋत्विजामपि ते संस्काराः यथा "हिरण्यमालिनोवाजपेयेन चरन्ति"। सति वचने उक्तादन्यदपि यजमानस्य भवति। यथा यजमानोवसोर्धारां जुहोति। यजमानः पात्राण्यासादयतीत्यादि। शेषं कर्म्म यथासमाख्यमृत्विगादयः कुर्युः। यथा अध्वर्युराध्वर्य्यवं, होता हौत्रम्, उद्गाता औद्गात्रमित्यादि। सर्व्वाणि कर्म्माणि यज्ञोपवीतिनः कुर्य्युः तानि च प्राक्संस्थानि उदक्संस्थानि वा कुर्युः। परिस्तरणपर्य्युक्षणादौ प्रदक्षिणं कार्य्यम्। पित्र्येऽपसव्यम्। दैवे यत्रावृत्तिः पैत्रे तत्र सकृत्। दक्षिणा च दिक् पित्र्ये। यद्दैवे प्राक्संस्थादि पैत्रे तत्दक्षिणसंस्थं कार्य्यम्। प्रधान-

द्रव्यविनाशे सन्निपत्योपकारकाङ्गसहितस्यैव तस्यावृत्तिः नारादुपकारकसहितस्य ।

८क० ४७सू० । विकल्पस्थले एकेनैव कार्य्यकरणम् । अदृष्टार्थेषु बहुषु विहितेषु समुच्चयः यथा होतृमन्त्राणामग्निमन्थनीयादीनाम् अग्निस्थापनमन्त्राणाञ्च । होतृमन्त्रत्वेऽपि याज्यानुवाक्ययोर्न समुच्चयः । तथा च याज्या पुरोनुवाक्या च एकैकस्मिन् यागे एकैकैव । एकनिमित्तकप्रायश्चित्तानां समुच्चयः । यज्ञकाले मन्त्राणामेकश्रुत्या प्रयोगः, न संहितास्वरेण, नापि ब्राह्मणस्वरेण । सुब्रह्मण्याशामजपन्यूङ्खयाजमानानां मन्त्राणां संहितावदेव स्वरेण प्रयोगोन त्वेकश्रुतिस्वरेण । आधाने विहितदक्षिणाभेदस्य विकल्पः, न समुच्चयः । अनेकसाधनके कर्म्मणि जवध्यादीनां समुच्चयः । सर्व्वपशूनां तानि कार्य्याणि । सोमक्रये विहितगवादिद्रव्यदशकस्य दृष्टार्थत्वात् न समुच्चयः । सर्व्वत्र गार्हपत्याहवनीययोः प्रदक्षिणीकृत्यापसव्यावृत्तिः अपसव्योकृत्य च प्रदक्षिणावृत्तिः कार्य्या । विहारोत्तरतः सर्व्वकर्म्म कार्य्यम् । विहारस्य दक्षिणतः ब्रह्मयजमानयोरासने कार्य्ये । तयोर्मध्ये यजमानस्य वेदिं स्पृष्ट्वा (वेदिमध्ये पादाय निधाय) उपवेशनम् । पश्चात् ब्रह्मोपवेशनम् । अनादेशेऽध्वर्युः यजुर्विहितं कर्म्म कुर्य्यात् आदेशे तु अन्योऽपि । विरोधे तु अन्योऽपि कर्त्ता यथा पेषणेऽध्वर्य्योर्व्यापृतत्वेन विरोधात् कपालोपधानमग्नीत् कुर्य्यात् । हविष्पात्रस्याप्यृत्विजामेकत्र समावेशे यद्यत् पूर्व्वं तत्तदन्तरं, यद्यदुत्तरं तद्बहिर्भवति । हविषामपि मध्ये पूर्व्वं पूर्व्वं हविरन्तरं कार्य्यं उत्तरमुत्तरं बहिः । प्रतापनाद्यग्निसाध्यसंस्कारा गार्हपत्याग्नौ कार्य्याः । सर्व्वकर्मसु हविःश्रपणं गार्हपत्ये आहवनीये वा कार्य्यम् । संस्काररहितं घृतमात्रमाज्यशब्दार्थोग्राह्यः । घृतं च गव्यमेव ग्राह्यम् । द्रव्यविशेषानुक्तौ सर्व्वत्र घृतेन होमः कार्य्यः विशेषवचने तेनैव । चात्वालात् बहिस्थं पुरीषं निवपेत् । आहवनीये यजतयः, आज्यभागोपांशुयाजादयः आज्यहविष्का ध्रुवातः आज्यं गृहीत्वा चतुरवदाय कार्य्याः । इडाप्राशित्राघारानप्येके ध्रुवातः कुर्व्वन्ति । आघारौ प्राञ्चौ विदिशौ वा होतव्यौ उभयपक्षेऽपि ऋजू दीर्घौ सन्ततौ च तौ कार्य्यौ । अनादेशेसर्व्वे होमा आहवनीये एव कार्य्याः । आदेशे तु यथादेश मन्यत्राग्नौ । आदेशाभावे सर्व्वत्र सकृद्गृहीतमेव होतव्यम् आदेशविशेषेऽन्यथा ।

८क० २१सू० । सर्व्वत्र व्रीहयोयवा वा हवींषि भवन्ति । व्रीह्याग्रयणानन्तरं यवाग्रयणादर्व्वाक् व्रीहिभिरेव दर्शपौर्णमासौ कार्य्यौ यवाग्रयणानन्तरं च प्राग्व्रीह्याग्रयणात् यवैरेव तौ कार्य्यौ । आरम्भमते सर्व्वदा व्रीहिभिरेवेति भेदः । दर्शपौर्णमासयोरेवायं द्रव्यनियमः न विकृतौ । द्विरवदानविधाने पुरोडाशचर्वादेर्मध्यदेशादेकमङ्गुष्ठपर्व्वमात्रं तिरश्चीनम् आद्यमवदानम् । द्वितीयं तु हविःपूर्व्वभागात् तथावदानम् । तच्चावदानयोर्मर्यादाभङ्गाभावेनैव कार्य्यम् । पञ्चार्षेयाणां जमदग्नीनां जमदग्निप्रवराणाञ्च हविषस्त्रिरवदानम् । तत्राद्यं मध्यात्, द्वितीयं पूर्व्वभागात्, तृतीयम् पश्चाद्भागात् । यत्र आज्यभागपत्नीसंयाजोपांशुयाजाग्निहोत्रहोमादौ चतुरवदानं विहितं तत्र जमदग्नीनां पञ्चधोऽवदानम् । दधिपयसोरपि स्रुवेणावदानग्रहणम् । तदप्यङ्गुष्ठपर्व्वमात्रमेव कार्य्यम् ।

पुरोडाशादिहविषोऽवदानात् प्रथममाज्यं सकृदवदाय ततोऽन्यद्धविरवदेयम् । पुनरप्यन्ते आज्यं सकृदवदेयम् । स्विष्टकृद्धोमे तु प्रधानावदानादेकोनं हविषोऽवदानम् । तथा च येषां प्रधानयागेऽवदानद्वयं विहितं तेषां स्विष्टकृद्धोमे सकृदवदानं, येषां प्रधानेऽवदानत्रयं तेषां हविष उत्तरार्द्धादेव स्विष्टकृति अवदानद्वयम् । एवं चतुःपञ्चधोऽवदाने त्रिः चतुर्व्वाऽवदानम् । उपस्तारः सकृत् । उपर्य्यभिघारणं तु द्विर्व्वारं भवति । हविषोऽवदेयावदानयोः प्रत्यभिघारणम् । स्विष्टकृदवदानानन्तरम् हविषो न प्रत्यभिधारणम् । एककपालः पुरोडाशः सर्व्वहुतः कार्य्यः । चतुर्थ्यन्तेन देवतापदेनानुवचनप्रैषा कार्य्या यथा अग्नयेऽनुब्रूहीत्येवंरूपा । आश्रावणानन्तरं यत्र मैत्रावरुणः प्रैष्यते तत्रापि चतुर्थ्यन्तं देवतापदं प्रयोज्यम् । अग्नये प्रेष्य, सोमाय प्रेष्येत्येवम् । आश्रावणानन्तरं यत्र मैत्रावरुणस्य प्रैषाभावस्तत्र द्वितीयान्तं देवतापदं प्रयोज्यम् । अग्निं यज सोमं यजेत्येवम् । प्रैषसम्बन्धिन्यनुवाचने द्रव्यात् षष्ठी भवति यथा इन्द्राग्निभ्यां छागस्य हविषोऽनुब्रूहीति । वपायै धाना सोमेभ्यः इति प्रैषद्वये तु न षष्ठी । यत्रापौ यजेति विहितं यथा नामग्राह्यं यजेति प्रशास्त्रादीन् प्रति । तत्र देवतापदं न प्रयोज्यम् । प्रशास्तर्यज पोतर्यजेत्येवं प्रयोज्यम् । यत्र यत्र मन्त्रे असाविति पदं श्रूयते तत्र तत्र असाविति पदमपनीय तस्य स्थाने तत्पदवाच्यस्य मैत्रादेर्नाम-

च्चार्य यथा इममनुष्य पुत्रमित्यादौ देवदत्तस्य पुत्रमित्यादि । सवषट्कारास्वाहुतिषु वेदेर्दक्षिणभागे उदक्प्राङ् इतीशानाभिमुखस्तिष्ठन् वषट्कारानन्तरं वषट्कारेण सह वा जुहुयात् । यत्राज्यमिश्रं हविर्विहितं, तत्र पूर्व्वमाज्यं हुत्वा ततो मध्ये हविर्हुत्वा पुनरुपर्य्याज्यं जुहुयात् । अथ वा सहैव सर्वमाज्यं हविश्च जुहुयादिति पक्षद्वयम् ।

१०क० १४सू० । तत्र आग्नेयोऽष्टाकपालो भवतीत्यादौ लटः लिङ्परत्वकल्पनया विधिपरत्वम् । कर्मसु कर्त्तव्येषु तदुपकरणद्रव्यसमुदायानामादौ उपकल्पनं तानि चानीय कर्मदेशस्थाने स्थापयेत् । चर्माण्युत्तरलोमानि प्राग्ग्रीवाणि सर्व्वत्रास्तरणीयानि । हविषां मध्ये यत् पश्चात् पठितं तद्देशतः कालतश्चोत्तरं कार्य्यम् । ग्रहणादिकं पूर्व्वपठितस्य पूर्व्वम् उत्तरपठितस्योत्तरम् कार्यम् । एवम् अधिश्रयणाद्यपि पूर्व्वपठितस्य दक्षिणतः पश्चात्पठितस्योत्तरत इति । एकद्रव्ये स्थालीसुवादौ साज्ये दक्षहस्तेन गृहीते सति वामेन वेदस्योपग्रहणं कार्य्यम् । एकद्रव्यहस्तयुक्तेः उपभृदादौ द्वितीयद्रव्ये सति वेदोपग्रहणाभावः । आज्यादन्यद्रव्येण द्रव्यवति यागे उपस्थानादौ च स्फ्येनोपग्रहणं कार्यम् । असत्सु वेदवर्ज्जद्वितीयद्रव्येषु कुर्य्यादुपग्रहणम् । यथा स्फ्ये अन्यकर्मव्यापृते सोमे ग्रहहोमादौ द्वितीयद्रव्याभावे च कुशोपग्रहणम् । स्रुचोरादानकाले आसादितां स्रुचं जुहूञ्च पाणिभ्यां परिगृह्य उपभृतउपरि निदध्यात् । तत्र च परस्परसंस्पर्शशब्दो न कार्य्यः । विश्वजिन्न्यायेन सर्व्वत्र स्वर्गः फलत्वेन कल्प्यते । एकस्मिन् कर्मणि वैकल्पिकानामङ्गानां यथाश्रुतस्य विहितानां मध्ये अधिकाङ्गानुष्ठानपक्षे सर्व्वत्र फलाधिक्यम् । यथा पौर्णमासादौ वैकल्पिकदृढधाद्यधिकाङ्गानुष्ठाने । एवमन्वाहार्य्यादिदक्षिणादाने षट्दक्षिणापक्षतोद्वादशचतुर्विंशतिदक्षिणापक्षयोः फलतारतम्यम् । दानान्वारम्भवरणव्रतप्रमाणानि यजमानसम्बन्धीनि ग्राह्याणि । तथाच यानि दानादीनि प्रमाणानि विहितानि च तानि याजमानान्येव व्रतञ्च सत्यवदनाधःशयनपयोव्रतादिकं यजमानस्यैव, प्रमाणं चाग्निस्वरवेदिशालासदोगृहादिमानं यजमान हस्तमानेनैव कार्य्यम् । यूपावटोपरवादौ खाते, लूने बर्हिषि, छिन्ने यूपे, अवहतेषु व्रीहिषु पिष्टेषु तण्डुलधानादिषु, दुग्धे पयसि, दग्धेषु महावीरेष्टकादिषु तदवयवलक्षणया क्रियादिसम्भवः । रौद्रमन्त्रं रक्षोदैवतम् असुरदैवतं पैत्र्यं मन्त्रमुच्चार्य तत्तद्देवताकं कर्म्म च कृत्वा आत्मानमुपस्पृश्यापां स्पर्शनं हस्तेन कुर्यात् । इति सर्व्वकार्य्योपयोगिविधानानि प्रथमाध्याये उक्तानि । एतेषां सर्व्वकर्म्मोपयोगित्वात् विस्तरेणोक्तिः । अन्यान्याध्यायार्थाः संक्षेपेणोच्यन्ते ।

२ अध्याये अष्टौ कण्डिकाः । तत्र १क० पौर्णमासेष्टिकालः तत्राग्न्यन्वाधानेऽध्वर्युयजमानयोरधिकारः । तद्विधानप्रकारः । दीक्षाग्रहणे दीक्षितधर्माः । दिवामैथुनमांसवर्जनम् अशिखकेशादिवापनम् । अपराह्णे पत्नीयजमानयोरष्टग्रासा हविषा सह व्रतकालयोग्यं माषमांसलवणवर्ज्जं हविष्यं भोज्यम् । तत्र व्रतयोग्यं भोज्यं भाष्ये दर्शितं यथा पुलस्त्यः "सकृत् पर्व्वणि सर्पिष्मत् हविष्यं लघु भोजनम् । न सायं नोपवासः स्यात् तैलामिषविवर्जितम्" बौधा० "सर्वमेवैतदहः क्षौमीधान्यं विवर्जयेदन्यत्र तिलेभ्यः" । परिशिष्टे च "शाकं मांसं मसूरं च चणकं कोरदूषकम् । माषान् मधु परान्नञ्च वर्जयेदौपवस्तके" । कर्म्मप्रदीपे "लवणं मधु मांसञ्च क्षारान्श्चोयेन हूयते । उपवासे न भुञ्जीत नोदरात्रौ न किञ्चन" । "तिलमुद्गादृते शैम्यं शस्यं गोधूमकोद्रवौ । चणकं देवधान्यञ्च सर्व्वशाकं तथैवयम् (गुडम्) । सर्व्वक्षारं यवक्षारं टङ्कणक्षारमेव च । व्रतस्थो वर्ज्जयेन्नित्यं सामुद्रं लवणं तथा" । सामुद्रविशेषणात् सैन्धवमानसयोर्न निषेधः । "सैन्धवं लवणं यच्च यच्च मानससम्भवम् । पवित्रे लवणे ह्येते प्रत्यक्षे अपि सर्व्वतः इति स्मृतेः" । सत्यवदनञ्चात्र कर्म्माङ्गम् उपनयनोत्तरविहितं तु पुरुषार्थः अतः प्रायश्चित्तभेदः । रात्रौ तस्मिन्नेव विहारेऽग्निहोत्रहोमः । सायमशनेच्छायां होमानन्तरमारण्यौषधीनां नीवारादीनामन्नम् आरग्वधप्लक्षादीनां च फलमनतिरात्रौ भुञ्जीत । आहवनीयगृहे गार्हपत्यगृहे वाऽधः शयनं तत्राप्यास्तरणनिषेधः, ब्रह्मचर्य्यञ्च । एष नियमः सपत्नीकयजमानस्यैव । पौर्णमासे अन्वाधानादिकर्मापवर्गान्ते द्व्यहे एकाहे वा कार्यभेदोक्तिः तच्च प्रातरेव कार्यम् । २क० । अग्निहोत्रानन्तरं ब्रह्मवरणं तत्प्रकारः । ३क० ८क०पर्य्यन्ते ब्रह्मसदनादेः आत्मस्पर्शपर्यन्तस्य कर्मकलापस्यानुष्ठानप्रकारमन्त्रादिकीर्त्तनम् ।

३ अध्याये अष्टौ कण्डिकाः । तत्र होतृवदनादिपौर्णमाससमाप्तिपर्यन्तकर्त्तव्यकार्यकलापस्यानुष्ठानप्रकारमन्त्रादि ।

४अ०।५क०। तत्र १।२।३क०दर्शयागात् प्राक्कर्त्तव्यं पिण्डपितृयज्ञानुष्ठानप्रकारमन्त्रादिकथनम्। तत्र द्रव्यदेवतायुक्तः आख्यातप्रत्ययान्तकर्म्मशब्दोवेदबोधितो यागशब्दार्थः इत्युक्तिः। सर्व्वासु इष्टिषु अग्नीषोमीये पशौ च दर्शपौर्णमास यागधर्म्मातिदेशः। वैश्वदेववरुणप्राघाससाकमेधशुनासीरीयरूपचतुःपर्व्वात्मकचातुर्मास्यस्याद्ये वैश्वदेवे पर्व्वणि दर्शपौर्णधर्म्माः। ततोऽतिरिक्तत्रयेषु चौपदेशिकाः प्राचीनप्रवणे त्रिधावर्हिःप्रस्तारादयोधर्म्मा भवन्ति। चातुर्मास्ये वरुणप्रघासादिषु त्रिषु तु वैश्वदेवपर्व्वधर्म्माः किन्तु मारुत्यादिषु न भवन्ति। सौमिकादवभृथात् वारुणप्राघासिकावभृथे धर्म्माभवन्ति। क ? कुर्यादिति सन्देहे लौकिकाग्निरेव ग्राह्यः। दर्शपौर्णमासयोराग्नेयादयः षट् प्रधानयागाः। वैकृते कर्मण्येकदैवत्ये सर्व्वत्राग्नेयधर्माः। अनेकदैवत्ये तु अग्नीषोमीयैन्द्राग्नादेः। तत्रापि आग्नावैष्णवादौ अग्नीषोमीयस्यैव धर्मा नैन्द्राग्नस्येति निर्द्धार्यम्। मारुतेषु ऐन्द्राग्नस्येति निर्द्धार्यम्। द्रव्यसामान्येनापि धर्मप्रवृत्तिर्भवति यथा पुरोडाशचरुधानासक्त्वादौ पुरोडाशस्य, साम्नाय्ये साम्नाय्यस्य, आज्ये आज्यस्येति। देवतागुणस्योपांशुत्वादेः साम्ये धर्म्मप्रवृत्तिर्भवति। यथोपांशुयाजे उपांशुयागः। द्रव्यदेवतासामान्यविरोधे द्रव्यसामान्यादेव धर्माभवन्ति न देवतासामान्यात् यथा ऐन्द्रपुरोडाशादौ देवता सामान्यात् पुरोडाशस्यैव। पयस्यायां पयस एव धर्माभवन्ति न दध्नः। अतश्चातुर्मास्यादौ परिदासितया शाखया पवित्रबन्धनानन्तरं वत्सापाकरणं दोहनचतुष्टयासादनञ्च भवति। पशावपि पयस एव धर्माभवन्ति न दध्नः। अतःसाम्नाय्योखास्थानापन्नानां वशाश्रपणीस्थूलोखाना मासादनप्रोक्षणे भवतः। द्रव्येषु स्थानापत्तेर्धर्माभवन्ति यथा श्यामाकानां व्रीहियवस्थानापत्तेस्तद्धर्म्मा ग्रहणासादनप्रोक्षणकण्डनादयो गृह्यन्ते। प्राकृतस्थानापन्नस्यापि द्रव्यस्य ये स्थानिनो धर्माविरुध्यन्ते स्थानापन्ने द्रव्ये न ते भवन्ति यथा परिधौ पशुनियोजने यूपस्थानापन्नस्यापि परिधेः तक्षणाष्टाश्रीकरणादयोधर्मा न भवन्ति विरुद्धत्वात्। विकृतौ यत्र प्राकृतद्रव्यदेवतास्थानेऽन्यद्रव्यदेवतादिर्विहितस्तत्र प्राकृतमन्त्रस्य यथार्थमूहोभवति। यथा अग्नये त्वा जुष्टमित्यस्य प्रकृतौ मन्त्रस्य इन्द्राग्निभ्यां वां जुष्टमित्यूहः। प्रकृतौ मन्त्राणामूहो न भवति प्रकृतेरपूर्व्वत्वात्। यथा पत्नीं संनह्येत्येकवचनान्तमन्त्रस्य बहुपत्नीकयागेऽपि नोहः। किन्तु एकवचनान्त एव प्रयोज्यः। तथा पवित्रे स्थ इति मन्त्रस्य पवित्रद्वयपक्षेऽपि नोहः। अत्रापवादः। विकृतौ वचनविशेषे प्राकृतधर्म्मा न भवन्ति। अर्थलोपात् (प्रयोजनलोपादपि) प्राकृतधर्म्मा न भवन्ति। यथा नीवारे चरौ कण्डनस्य प्रकृतितः प्राप्तस्यापि प्रयोजनाभावात् नानुष्ठानम्। तथा विरोधादपि प्राकृतधर्म्माणां विकृतावप्रवृत्तिः। यथा चरौ पेषणस्य दध्युपसर्जनोनामधिश्रयणस्य च। यच्च प्रकृतौ परार्थतया विहितं विकृतौ परार्थाभावेन तस्याप्रवृत्तिः यथा प्रकृतौ प्रतिपत्तिकर्म्मणां परार्था (प्रतिपाद्यद्रव्यार्था) उत्पत्तिरस्ति अतो विकृतौ प्रतिपाद्यद्रव्याभावे द्रव्यकरणमप्यभावो भवति। यत्र तु परार्थोत्पन्नं द्रव्यं क्वचित् कर्म्मान्तरसाधनत्वेन विहितं तत्र परस्याभावेऽपि परार्थोत्पन्नस्य भावो भवति (परार्थोत्पन्नेन द्रव्येण यत्कार्य्यं तदन्येनापि येन केनचित् कार्यम्) यथा यूपशकलेन शुक्रं समार्ष्टीत्यत्र यूपार्थं तक्ष्यमाणे यूपे यत् शकलमुत्पन्नं यूपाभावेन तत्सम्बन्धिशकलाभावेऽपि ग्रहसंमार्गसाधनत्वेन विहितत्वाद्येन केनचिच्छकलेन शुक्रसंमार्जनं कार्यम्। सर्व्वासामिष्टीनां सद्यस्कालत्वम्। [प्रकारादि।

४क०। प्रजापश्वन्नयशस्कामकार्य्य दाक्षायणयज्ञमन्त्रदर्शपौर्णमासयोर्दैवद्रव्यभेदकथनपूर्व्वकतद्विधानप्रकारः।

५क०। उपांशुशब्दार्थकथनम्। (व्यक्तत्वे चोदनैकत्वे तन्त्रैको यत्र कामना। तादर्थ्येनैव चोत्पत्तिस्तत्रैव स्यादुपांशुता” कर्कः। तत्रद्रव्यदेवतादिकथनम्।

६क० व्रीहीणां यवानां वा पाके आग्रयणसंज्ञं कर्म्म कार्य्यम् तत्र शरद्वसन्तादिकालद्रव्यदेवतादिमन्त्रविधानप्रकाराश्च। दर्शपौर्णमासेष्ट्यनन्तरमेवाग्रयणाद्या प्रकृतिवत् कार्य्याः न पूर्व्वम्। दर्शपौर्णमासोत्सर्गे कृते अग्निहोत्रमेव जुह्वत आग्रयणविधानप्रकारः। दीक्षिते विशेषः। संवत्सरोपसत्कादौ यज्ञे आग्रयणविशेषः। संवत्सरसुत्यादौ द्रव्यविशेषाः। श्यामाकाग्रयणविधान प्रकारः।

७क०। अग्न्याधेयकर्मकालदेवतामन्त्रविधानप्रकारादि अग्न्याधेयशब्दे वक्ष्यते द्विविधकर्को माध्यन्दिनानां विशेषस्तु विस्तरभयान्नोक्तः पद्धतौ दृश्यः। [दिकथनम्।

८।९।१०क०। आधानस्याङ्गकर्म्मणां विधानम्। [मन्त्रा-

११क०। पुनराधाने निमित्तं वित्तहान्यादि। तद्विधान-

१२क० । अग्निहोत्राङ्गस्य वात्समसोपस्थानप्रकारः ।
१३।१४।१५क०। अग्निहोत्रकालद्रव्यदेवताविधानमन्त्रादि।
तत्र कामनाभेदेनावस्थाभेदयुक्ते वह्नौ होमः कार्यः यथा प्रजाभ्योबलेनाङ्गारादिकं जिहीर्षुणा समिद्धे धूमसिद्धेऽग्नौ होमः कार्यः। प्रजाउपरुध्य ताभ्योऽन्नं जिहीर्षुणा अतिवज्ज्वलज्ज्वालायुक्ते, श्रीकामैः ययस्कामैर्वाऽऽज्यादिभिः प्रदीप्ते, मित्रभावेन प्रजाभ्योऽन्नं जिहत्सुणा रात्रा ज्वालापसरणे जाते, ब्रह्मवर्चसकामेन देदीप्यमानेष्वङ्गारेषु सत्सु वह्नौ होमः। कामनाभेदे होम्यद्रव्यभेदाः। यथा स्वर्गकामः पशुकामो वा पयसाऽग्निहोत्रं जुहुयात्। एवं ग्रामकामो यवाग्वा, बलकामः व्रीहिश्यामाकनीवारयवगोधूमयावोनां तण्डुलैः, यावनालैः प्रियङ्गुभिश्च। इन्द्रियकामोदध्ना, तेजस्कामो घृतेन। एतत्तुक्तद्रव्याणां प्रत्यहं संवत्सरहोमे तत्तत्फलसिद्धिः। अग्निहोत्रहोमे सर्वास्विष्टिषु च गार्हपत्यागारस्य दक्षिणद्वारेण प्रवेशनम्। सर्वदा यजमानः स्वयं होमः कार्यः, कार्यवशात् तन्नियुक्तेन अध्वर्युणा वा। किन्तु दर्शे पौर्णमास्याञ्च सदा स्वयं होमः कार्यः। प्रवासे सूतकादौ च विशेषः।
५अध्याये। १कण्डिकाः तत्र। १।२क०। चातुर्मास्ययज्ञ वैश्वदेवपर्वकालद्रव्यदेवताप्रयोगादि।
३, ४, ५, क० वरुणप्राघासरूपतदीयपर्वकालद्रव्यदेवतामन्त्रविधानादि। [मन्त्रादि।
६क०। साकमेधरूपतदीयपर्वकालविधानद्रव्यदेवता-
७क० तत्र हविर्विपक्वक्रौडिनीयेष्टिकालविधानद्रव्यदेवतामन्त्रादिकथनम्।
८,९,क० तत्र पित्रेष्टिकाकालद्रव्यदेवतामन्त्रादिकथनम्।
१०क० तत्र त्र्यम्बकहोमकालविधानद्रव्यदेवतामन्त्रादि
११ क० चातुर्मास्यपर्वभेदशुनासीरीयकालद्रव्यदेवतामन्त्रादिकथनम्। तत्रायं विशेषः। क्रतवैश्वदेवपर्वण एव वरुणप्राघाससाकमेधादिपर्वत्रयस्य नियतकालत्वात् वरुणप्राघासादि कर्त्तव्यमेव। क्रते पौर्णमासे दर्शेष्टिवत्। चातुर्मास्यानां पुनःप्रारम्भः सूतकादावपि कार्यएव। चातुर्मास्यानि त्रिविधानि ऐष्टिकानि, पाशुकानि सौमिकानि चेति तेषां द्रव्यदेवतामन्त्रविधानादि।
१२,१३,क० मित्रविन्देष्टिद्रव्यदेवता मन्त्रविधानकथनम्।
६अ० दशभिः कण्डिकाभिः निरूढपशुबन्धयागकालद्रव्यदेवतामन्त्रविधानादिकथनम्।
७अ० ९क०। तत्र ज्योतिष्टोमकालद्रव्यदेवतामन्त्रादि विधानादि। तत्र सोमयागरूपसाद्यस्यस्य द्रव्यदेवतादि विधानादि। [कथनम्।
८अ०९क०। तत्र १,२,क०आतिथ्यकर्मद्रव्यदेवतामन्त्रादि
३क० औपसथ्यकालद्रव्यदेवतामन्त्रादिकथनम्।
४,५,६,७,८,९,क०। आसु—
९अ०१४ कण्डिकात्मके १कण्डिकायाञ्च सौत्यकर्मकालद्रव्यदेवतामन्त्रविधानादिकथनम्। अध्यायशेषे समाप्तिपर्यन्ते प्रातःसवनद्रव्यदेवतामन्त्रविधानोक्तिः।
१०अ० ९क०। तत्र किञ्चिदूनाध्यायसमाप्तिपर्यन्ते मध्यन्दिनसवनतृतीयसवनयोर्द्रव्यदेवतामन्त्रविधानकथनम्। अन्ते ज्योतिष्टोमे सोमोत्तरकर्त्तव्यानाम् 'अत्यग्निष्टोमः उकथ्यः षोडशी वाजपेयोऽतिरात्रः आप्तोर्याम इत्येवं रूपाणां सप्तानां सोमसहितानां सप्तानां यागानां ज्योतिष्टोमत्वमुक्तं तत्र च ज्योतिष्टोमस्याध्वर्यवविधानप्रकारः।
११अ०१कण्डिका। तत्रज्योतिष्टोमाङ्गब्रह्मत्वविधानादि।
१२अ० ६क०। तत्र द्वादशाहयागविधानम्। तत्र एकादशाहादियागे च ज्योतिष्टोमधर्मातिदेशः। तत्राग्निष्टुतो धर्मातिदेशः इत्येकस्य मतम्। द्वादशाहो द्विविधः सत्ररूपः अहीनरूपश्च। तत्रोभयरूपयोर्लिङ्गप्रदर्शनम्। यथा यस्याद्यन्तयोः अतिरात्रयागस्तत्सत्रं, यत्र तु अन्तेएव अतिरात्रोयागः सः अहीन इति तयोर्लिङ्गतोक्तिः। सत्रेषु यजमानसहितानां षोडशर्त्विजां कर्त्तृत्वात् सर्व्वेषां यजमानत्वम् तेन तत्र दक्षिणाभावः सर्व्वेषां स्वामित्वयोगात् फलवत्त्वाच्च यजमानत्वातिदेशेन सप्तदशानामेव यजमानधर्म्मदीक्षणादि। अन्वारम्भस्तु गृहपतेरेव। क्रतुनिष्पत्त्यर्थं पात्रासादनादौ कर्म्मणि एकस्यैककर्तृत्वं तेनैव कृते सर्व्वं कृतत्वम्। गृहपत्याहवनीयेय एव अङ्गारप्राशनम्। अध्यायसमाप्तिपर्यन्ते तदीयद्रव्यदेवतामन्त्रदीक्षाकालविधानादि।
१३अ०४क०। तत्र १क०गवामयनसत्रप्रकारः तत्र द्वादशाहधर्मातिदेशः। २,३,४क०तत्रद्रव्यदेवतामन्त्रविधानादि
१४अ० ३क०। तासु ज्योतिष्टोमसंस्थाभेदवाजपेयकाल द्रव्यदेवतामन्त्रविधानादि।
१५अ० १०क०। तासु राजसूययाग उक्तः तत्र क्षत्रियजातेरेवाधिकारः वाजपेयेनेष्ट्वा न राजसूयः कार्यः। तत्र द्रव्यदेवतामन्त्रविधानादि
१६अ० ८क०। तत्र १क०पञ्चचितिकस्थलविशेषस्याग्निविधानप्रकारः चयनरूपाङ्गकाग्नेः सोमाङ्गत्वोक्तिः

तत्र च इच्छयाऽधिकारः तत्रायं भेदः महाव्रतसंज्ञक-स्तोत्रसाध्यसोमयागे एव पञ्चचितिकस्थलस्य नियमः अन्यत्र इच्छया विकल्पः । ४क० पर्य्यन्ते उखानिर्माण-प्रकारादि । उखायज्ञे तद्विधिरुक्तः [मन्त्रादिकथनम् । ४कण्डिकान्ते ५क० च अग्निचयनप्रकारस्तत्रत्यदेवता-६क० अग्निविशेषपञ्चकचयनप्रकारः ७क० तत्रत्यप्रायश्चित्तिहोमविधानम् [तान्मन्त्रादि । ८क० अग्निचयनस्य पूर्व्वोक्तस्य प्रकारभेदतत्कालद्रव्यदेव-

१७अ०१२क० । तत्र प्रायश्चित्तान्तकर्मोत्तरकर्त्तव्यविधान-भेदद्रव्यदेवतामन्त्रादिकथनम् ।

१८अ० ६क० तासु शतरुद्रियहोमः तदङ्गकर्मद्रव्य-देवतामन्त्रादिकथनम् । ६क० शेषे अग्निचितोनियमा उक्ता यथा अग्निचिद्वर्षति न पठेत् । पक्षिमांसा-भोजनम् । प्रथमचयने द्विजातिभार्य्यामेव गच्छेत् न शूद्राम् । द्वितीयचयने सवर्णामेवोपगच्छेत् नान्यवर्णां क्षत्रियां वैश्यां वा । तृतीये न काञ्चन स्त्रियं गच्छेत् । ब्रह्मचार्य्येव भूयात् । यावज्जीवमित्थं व्रतं कुर्य्यात् । संवत्सरं वेति पक्षान्तरम् । चित्याग्नौ सोमेज्यायां स्वय मातृणाविश्वज्योतिर्ऋतव्यानामन्यतमामामिष्टकानामुपधा-नम् । पुनश्चयनमचयनं वेति पक्षान्तरोक्तिः ।

१९अ० । ७क० । तत्र सौत्रामणीयागोविहितः । तत्र ऋद्धिकामस्य ब्राह्मणस्यैवाधिकारः । स च अग्निमता सोम-याजिना सोमयागान्ते कार्य्यः । सोमातिपूतस्य(यस्य मुखा-तिरिक्तनासाकर्णगुह्यादिच्छिद्रेभ्यः पीतः सोमः स्रवति स सोमातिपूतः) सोमवामिनश्च (मुखेन यः पीतसोमं वमति स सोमवामी) तस्याऽत्राधिकारः । स्वराज्यात् रिपुभिः प्रच्यावितस्य राज्ञोऽपि स्वराज्यप्राप्त्यर्थमधिकारः । पशु-प्राप्तियोग्यस्यापि अप्राप्तपशोः पशुकामनया वैश्यस्याऽ-प्यत्राधिकारः । अयं चतूरात्रसाध्यः । तदङ्गसुरासन्धान प्रकारादि । तत्र द्रव्यदेवतामन्त्रादि ।

२०अ० ८क० । तत्राश्वमेधयागोविहितः तत्र अभि-षिक्तस्य क्षत्रियजातेः राज्ञोऽधिकारः न विप्रवैश्ययोः । स च त्रिरात्रसाध्यः सर्व्वकामाप्तिफलकः । तत्र काल-द्रव्यदेवतामन्त्रादि । अश्वमेधशब्देऽस्य विवृतिः ।

२१अ० ४क० । तत्र १क० पुरुषमेधयज्ञोविहितः सर्व्व-भूतेभ्योऽतिशोत्कर्षकामस्यात्राधिकारः । स च पञ्चरात्र-साध्यः एकविंशतिदीक्षः ब्राह्मणक्षत्रिययोस्तत्राधिकारः न वैश्यस्य । तदीयद्रव्यदेवतामन्त्रादि । २क० सर्व्वकामस्य सर्व्वमेधयागोविहितः स च दशरात्रसाध्यः । ३ । ४क० । तत्र पुरुषः अश्वः गौः मेषः अजः इति पञ्चपश्वालम्भनं तद्विधानादि प्रोषितस्य मृतस्य वा संवत्सरात्मृतौ पितृ-मेधो यज्ञो विहितः तत्र नक्षत्रादिकालद्रव्यदेवतामन्त्र-विधानादिकथनम् ।

२२अ०११क० । तत्र १क० यजुर्वेदोक्ताधानादिपितृमेधान्त-कर्म्माण्युक्ता सामवेदविहिता एकाहसाध्य[illegible] विहिताः । तत्र परिभाषा । संस्थान्तरानुक्तौ अग्निष्टोमसंस्थः क्रतुर्भवति । भूर्नामैकाहः १ धनुमात्रदक्षिणः । ज्योति-र्नामैकाहः २ । तौ च विशेषानुक्तौ अग्निष्टोमसंस्थौ । गो-संज्ञकः ३ आयुःसंज्ञकश्च ४ एतावेकाहौ उक्थ्यसंस्थौ अभिजिद्विश्वजितौ५ ६ एतौ अग्निष्टोमकल्पौ । तत्राभि-जिति गोसहस्रं शताश्वं वा समुदितं वा दक्षिणा । विश्वजिति सहस्रं सर्व्वस्वं वा समुदितं वा दक्षिणा । तत्र ज्येष्ठपुत्रस्य विभागयोग्यद्रव्यभिन्नं भूमिदासवर्ज्जं सर्व्वस्वपदार्थः । यतो भूमेः धारणचङ्क्रमणद्वारेण उपयोगात् दासस्य शुश्रूषार्थमुपयोगात् तद्वर्ज्जं हिर-ण्यादिकं सर्व्वस्वपदार्थः इत्येकमतम् । स्वमते पुरुषमेधे गर्भदासदानदर्शनात् भूम्येकदेशपरित्यागे धारणसम्भ-वात् तद्व्यतिरिक्तं सर्व्वस्वं देयमिति । अवभृथस्नाने वत्सच्छविं परिदधातीतिश्रुतेः, तद्व्यतिरिक्तविषयं सर्व्व-स्वम् । एवं दीक्षोपयोगिद्रव्यव्यतिरिक्तविषयमपि । सह-स्रादधिकं सर्व्वस्वं दक्षिणा देयेति फलितम् । विश्वजिति द्वादशरात्रादिनियमभेदः । अभिजिति कृते विश्वजितोऽनुष्ठानम् अभिजिद्विश्वजितोर्युगपदनुष्ठानं वा । तयोर्युगपत्करणे देवयजनस्थानविशेषोक्तिः तत्र ऋतषोड-शर्त्विजां बाहुल्यात् अन्यतमेनान्यत्र कर्म सम्पाद्यम् । तत्र बहिर्वेदिकानि कर्म्माणि समानानि । अन्तर्वेदिकान्येव विशिष्टानि । युगपत्करणपक्षेऽपि अभिजित एव पूर्व्वं पूर्व्व मङ्गं कृत्वा विश्वजितः उत्तरमुत्तरं कार्यम् । सर्व्वजिन्नामा ७ एकाहः स च महाव्रतसंज्ञसामस्तवसाध्यः तद्विधा-नादि तत्र संवत्सरं दीक्षा सप्ताहाभिषवः । तत्र तिस्रः षट् वा उपसदः । तथा च संवत्सरं दीक्षां कृत्वा तदूर्द्ध्वं सप्तमाहे अभिषवं कृत्वा सप्ताहे अतीते सुत्या भवति तत्र च तिस्रः षड् वा उपसदः कार्य्याः । तत्र संवत्सरं दीक्षा-अग्निचयनवदुपा दीक्षा कार्य्या । स च अग्निष्टोमसंस्थ एव । २क० सर्व्वजिति दक्षिणाभेदतद्विधानादि । अयञ्च उक्थ्यकल्पः । उक्तानामभिजिदादीनां संज्ञान्तरम् ।

तत्र अभिजितो ज्योतिःसंज्ञा विश्वजितः विश्वज्योतिःसंज्ञा। सर्व्वजितः सर्व्वज्योतिःसंज्ञा। तद्दक्षिणाभेदविधानादि। उक्थ्यसंस्थश्चतुर्थस्त्रिरात्रसम्मितसंज्ञः। साद्यस्क्रसंज्ञाः ८,९,१०,११,१२,१३ षट् क्रतवो विहिताः। ते च क्रमेणोत्तरत्र दर्शिताः। तत्राद्ये ८ स्वर्गकामपशुकामभ्रातृव्यवतामेवाधिकारः। द्वितीये साद्यस्क्रे ९ दीर्घव्याधिशमप्रतिष्ठान्नाद्यकामानामधिकारः। अनुक्रीनाम साद्यस्क्रः तृतीयः १० तत्र कर्म्मादिना हीनस्य तन्निवृत्तिकामस्याधिकारः। विश्वजिच्छिल्पाख्यः ११ चतुर्थः। तस्मिन् दक्षिणाभेदः तत्र सर्व्वस्वप्रतिनिधिवेति दक्षिणोक्ता सर्व्वस्वप्रतिनिधिद्रव्याण्येवमुक्तानि यथा धेन्वनडुत्सीरधान्यपशवादिमानार्हस्वसंबन्ध्यादिदासदासीमिथुनसोपकरणमहानसहयाद्यारोहणगृहशय्या। तेन सर्व्वस्वपदेनैषामेव ग्रहणम्। वैरनिर्यातनकामस्य श्येनो नाम १२ पञ्चमः साद्यस्क्रः। तत्र दक्षिणाऽनुष्ठानमन्त्रदेवतादि। एकत्रिकनामा षष्ठः १३ साद्यस्क्रः। सर्व्वेषामेषां दीक्षायाः सद्यःक्रियमाणत्वात् साद्यस्क्रसंज्ञा। व्रात्यस्तोमाश्चत्वार एकाहाः १४।१५।१६।१७ विहिताः। इह त्रिपुरुषं पतितसावित्रीका व्रात्यास्तद्दोषशान्त्यै एते कार्य्यास्तत्र लौकिकेऽग्नौ होमः। तेषां प्रथमे १४ व्रात्यस्तोमे गाननर्त्तनकारिणां व्रात्यानामधिकारः। नृशंसत्वेन निन्दितस्य द्वितीये उक्थ्यसंस्थे १५ अधिकारः। कनिष्ठस्य तृतीये १६। तया च कनिष्ठं गृहपतिं कृत्वा स कार्य्यः। ज्येष्ठस्य अल्पप्रजनस्य स्थविरस्य चतुर्थे १७ अधिकारः तादृशं गृहपतिं कृत्वा गार्हपत्ये स कार्य्यः। तद्दीक्षाविधानादि। एतद्व्रात्यस्तोमस्य व्यवहार्य्यता भवति। अन्ते ब्रह्मवर्चसवीर्य्यान्नाद्यप्रतिष्ठाकामस्य आत्मनोऽपूतत्वनिवृत्तिकामस्य च कर्त्तव्यः अग्निष्टोमसंस्थः अग्निष्टुन्नामैकाहः १८।

५क०। तत्र द्रव्यदेवतामन्त्रविधानाद्युक्तम्। त्रिवृत्स्तोमका अग्निष्टोमसंस्थाः चत्वारः क्रतवो विहिताः। तत्र अनिरुक्तप्रातःसवनः प्रथमः १९। तस्य ईषुयज्ञ इति संज्ञा। हिरण्यादिकामस्य ग्रामकामस्य चात्राधिकारः। तत्र द्रव्यदेवतामन्त्रविधानादि। बृहस्पतिसवः द्वितीयः २०। राज्ञा सहिता ब्राह्मणाः यं ब्राह्मणं धर्म्मस्थापकत्वेनाङ्गीकुर्वीरन् तस्यात्राधिकारः। इषुसंज्ञ२१ स्तृतीयः। स च श्येनवत्कार्य्यः किन्तु न सद्य इति भेदः। स च मरणकामकर्त्तव्यः, ६क० सर्व्वस्वारश्चतुर्थः२२ एकाहः क्रतुः जीवितुकामस्य मर्त्तुकामस्य चात्राधिकारः। तत्र भिन्नान्नदक्षिणा। तस्य द्रव्यदेवताविधानादि। अत्रिगपोहनीयास्त्रयः २३,२४,२५ क्रतवो विहिताः। तेषु आद्यः सर्व्वस्तोमः २३। द्वादशाहिकच्छन्दोमत्रयमध्ये उक्थ्यसंस्थे उत्तमे अहनी पृथक् कृत्वा द्वितीयतृतीयौ २४,२५, अत्रिगपोहनीयौ कार्य्यौ। वाचस्तोमाश्चत्वारः २६,२७,२८,२९। छान्दोग्ये चैषां विशेषः। अन्ते त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिनवत्रयस्त्रिंशाख्याः षट् ३०,३१,३२,३३,३४,३५, पृष्ठ्यस्तोमाः एकाहविशेषा विहिताः।

७क०। तेषां विधानप्रकारमन्त्रदेवतादिकथनम्। अग्न्याधेयपुनराधेयाग्निहोत्रदर्शपौर्णमासदाक्षायणाग्रयणसंज्ञाः ३६,३७,३८,३९,४०,४१, षट् प्रतिकर्म्मसोमाः क्रतवो विहिताः। तद्विधानादि।

८क०। सप्तदशस्तोमकाः ४२,४३,४४,४५,४६, पञ्च क्रतवो विहिताः तत्र ग्रामकामस्य उपहव्यनामा ४२ अनिरुक्तः। मिथ्याभिशस्तस्यापि तत्राधिकारः। तद्दक्षिणाविधानादि। स्वर्गकामस्य ऋतपेयः ४३। तद्विधानप्रकारदेवतामन्त्रकथनम्।

९क० पशुवैश्यकामयोर्वैश्यस्तोमः ४४। तद्विधानादि। तीव्रसुन्नामकः ४५ उक्थ्यसंस्थः क्रतुः। तीव्रसुति सोमातिरेकेऽपि विशेषविधानम्। तत्र सोमातिपूतस्य स्वराज्यात् प्रच्यावितस्य राज्ञः, दीर्घव्याधिशान्तिग्रामप्रजापशुकामानाञ्चाधिकारः। तद्विधानादि।

१०क० राज्यकामस्य राजन्यस्य राट्संज्ञकः क्रतुः ४६ तद्विधानादि। सचाग्निष्टोमसंस्थः। सऐन्द्रपरियज्ञः ऋषभवत्कार्य्यः। विराडाख्यः ४७ क्रतुः अन्नाद्यकामस्य कर्त्तव्यः सऐन्द्रपरियज्ञवत् आद्यन्तयोः आग्नेयपशुकः कार्य्यः। औपशदनामा ४८ एकाहः प्रजातिकामस्य विहितः। तद्विधानादि। पुनस्तोमनामा ४९ एकाह उक्थ्यसंस्थः। तत्र प्रतिग्रहदोषशान्तिकामस्याधिकारः तद्दक्षिणादि। पशुकामस्य चतुष्टोमनामकौ ५०, ५१ उद्भिद्बलभिदौ च एकाहौ ५२,५३ दर्शपौर्णमासवत् संहतावेव तौ फलसाधकौ। इषुरिष्टिः ५४ तद्विधानादि। उद्भिदा इष्ट्वा तत एव दिनादारभ्यार्द्धमासं मासं संवत्सरं वा प्रत्यहं इषुरिष्टिर्विधेया। तद्विधानादि। पूजाकामस्य अपचितिनामकौ ५५,५६, द्वौ यज्ञौ विहितौ। तत्र राजन्यवैश्यकस्य वाधिकारः। तद्वि-

धानादि। तत्र पूर्व्वस्य पञ्चोतिसंज्ञा ५५ उत्तरस्य ज्योतिःसंज्ञा ५६ । तौ च साग्निचित्यौ सर्व्वजिद्वद्दीक्षायुक्तौ च ११क० तयोर्दक्षिणा । ऋषभगोषवौ ५७, ५८, द्वौ क्रतू विहितौ तत्र अग्निष्टोमसंस्थे ऋषभे राज्ञोऽधिकारः तद्दक्षिणाभेदश्च । गोषव उक्थ्यसंस्थः गवायुतदक्षिणः तत्र वैश्यस्यान्येषां वा अधिकार इति मतद्वयम् । तद्विधानादि । मरुत्स्तोमनामा ५६ यज्ञः तत्र भ्रातॄणां सखीनां वा गणभूतानामधिकारः । वैश्यस्तोमोक्तदक्षिणा । ऐन्द्राग्नकुलाययोनाम ६० क्रतुः प्रजाकामपशुकामयोस्तत्राधिकारः । गोकुलदक्षिणा । तत्र च द्वयोर्भ्रात्रोः सख्योर्वाऽधिकारः न गणानाम् । राजकर्त्तव्यः उक्थ्यसंस्थ इन्द्रस्तोमो ६१ विहितः । पुरोधाकामस्य इन्द्राग्नीस्तोमः ६२ क्रतुः विहितः । सायुज्यकामयोः राजपुरोहितयोरप्यत्राधिकारः । तयोः पृथक् वा सह वाधिकार इति विकल्पः । पशुकामस्य अग्निष्टोमसंस्थौ विघनौ ६३, ६४ नाम यज्ञौ विहितौ । अभिचारकामस्य पशुकामस्य वा तयोरधिकारः तत्र पशुकामस्य सम्पन्ना दक्षिणा, अभिचारकामस्य त्रिंशद्गावो दक्षिणेति भेदः । अभिचारकामस्य संदंशवज्रौ ६५, ६६ द्वौ यज्ञौ विहितौ, तौ च इन्द्रसोमौ कर्त्तव्यौ, तत्र वज्रः षोडशिसंस्थः कर्त्तव्यः तत्र विशेषोक्तिः । संदंशेन राजानमेवाभिचरेत् न जनपदम् । वज्रेण जनपदमेवाभिचरेत् न राजानम् । वैपरीत्येन वेति मतान्तरम् । अभिचारेण राजाद्युपघमं कृत्वा मारयित्वा वा आत्मशुद्ध्यर्थं ज्योतिष्टोमेन यजेतेति । इति सामवेदविहिता एकाहाः दर्शिताः ।

२३अ० ५क० । तत्र १क० । अहीनसंज्ञकयागानां द्वादश उपसदः, मासं समाप्यत्वञ्च । सुत्योपसद्विशेषोपदेशः दीक्षाभेदश्च च विहितः । तथा च सौत्यानि उपसदाञ्च दिनानि परिगणय्य दीक्षा । द्विरात्रावधिद्वादशाहपर्य्यन्तसाध्या यागाः अहीना इत्युच्यते । तत्र पाठात् अतिरात्रस्याप्यहीनसंज्ञत्वम् इत्येकीयमतम् । द्व्यहादिषु दशरात्रादिकादिप्रवृत्तिर्गौण्या इत्युक्तिः । द्वादशाहकर्त्तव्यदशरात्रस्य द्व्यहादिषु कर्त्तव्यतोक्तिः । द्विरात्रादिषु सहस्रदक्षिणा चतूरात्रादिष्वधिका दक्षिणा । तत्र दक्षिणादाने प्रत्यहं समभागेन देयतोक्तिः । अन्त्येऽवशिष्टदानम् । १३त्रयोदश अतिरात्राः विहिताः । यथा तत्र षोडशिचत्वारहिताश्चत्वारः प्रथमा अतिरात्राः । तत्र प्रजातिकामस्य नवसप्तदशसंज्ञः १ ज्येष्ठभ्रातृमत्याः स्त्रियाः ज्येष्ठपुत्रस्य कर्त्तव्यः विषुवन्नामातिरात्रः २ । भ्रातृव्यवतः गौर्नामातिरात्रः ३ । स्वर्गकामस्यारोग्यकामस्य वा आयुर्नामातिरात्रः ४ । इति प्रथमाः चत्वारः । ऋद्धिकामस्य ज्योतिष्टोमनामा ५ । पशुकामस्य विश्वजिन्नामा ६ । ब्रह्मवर्च्चसकामस्य त्रिवृन्नामा ७ । वीर्य्यकामस्य पञ्चदशनामा ८ । अन्नाद्यकामस्य सप्तदशनामा ९ । प्रतिष्ठाकामस्य एकविंशनामा १० इति षट् अतिरात्रा विहिताः । प्राप्तस्याप्राप्तस्यपद्योर्भ्रंशे तल्लाभकामस्य आप्तोर्यामोऽतिरात्रः ११ । भ्रातृव्यवतोऽभिजिन्नामातिरात्रः १२ । भूतिमिच्छोः सर्व्वस्तोमोऽतिरात्रः १३ । इति त्रयोदश अतिरात्राः ।

२क० । द्विसुत्यास्त्रयः अहीनाः । तत्र द्वितीयतृतीययोः षोडशिपद्वरहितौ द्वौ अतिरात्रौ । आङ्गिरसचैत्ररथकापिवना इति तेषां संज्ञाः । द्वितीयं द्विरात्रमुक्थ्यपूर्व्वकमेके इच्छन्ति । प्राकृतिकस्याग्निष्टोमस्य स्थाने उक्थ्यं कुर्व्वन्ति । संस्थान्यत्वमात्रं धर्म्मास्तु तदीया एव । पुण्यार्होऽपि यः पुण्यहीन इव स्यात् तस्य आङ्गिरसद्विरात्रेऽधिकारः । १ । प्रजाकामस्य चैत्ररथे २ । स्वर्गकामस्य पशुकामस्य वा कापिवनेऽधिकारः ३ । त्रिसुत्या अहीनाः गर्गवैदच्छन्दोमान्तर्व्वसुपराकाख्याः पञ्च क्रतवः । तत्र वैदे त्रिरात्रे १ त्रिवृत्स्तोमयुक्ताः सर्व्वे अतिरात्राः तत्संस्थान्यत्वमात्रम् । तत्र राज्यकामस्याधिकारः । पशुकामस्य अन्तर्व्वसौ २ । स्वर्गकामस्य पराके ३ इति भेदः । अत्रिचतुर्वीरजामदग्न्यवशिष्ठसंसर्पविश्वामित्राख्याश्चत्वारः चतुरहसाध्याःक्रतवो विहिताः । तत्र जामदग्न्ये, चतुरहे पुष्टिकामोऽधिकारी । तत्र विंशतिदीक्षाः । सर्व्वेषु उपसदः पुरोडाशवत्यः स्युः । ३क० तेषां विधानादि ।

४क० । पञ्चाहसाध्याः त्रयः अहीनाः । तत्र प्रथमः देवपञ्चाहसंज्ञकः पञ्चशारदीयः द्वितीयः तद्विधानादि व्रतवत्संज्ञकस्तृतीयः पञ्चाहः । तत्र ज्योतिर्गौर्महाव्रतं गौरायुः इत्येतन्नामका पञ्च एकाहाः । सर्व्वजिदिवात्र दीक्षा भवति । तद्विधानादि । ५क० । षडहा अहीनास्त्रयः । ऋतुषडहः १ पृष्ठ्यावलम्बाख्यः २ त्रिकद्रुकः ३ इति तेषां नाम । तेषु स्तोमविधानादि । सप्त सप्ताहा अहीना विहिताः । तत्र चतुर्णां महाव्रतमुत्तमं भवति । चतुर्णां मध्ये तृतीयः पशुकामस्य भवति । इन्द्रसप्ताहसंज्ञः पञ्चमः । तत्र पञ्चमे सप्ताहे द्वितीयादेकाहादारभ्य षडेकाहाः सुत्याहानि भवन्ति । तत्र ज्योतिर्गौः आयुः अभिजिद्विश्वजित् सर्व्वजित् इत्येते षट् प्रत्येकं दशमहाव्रताः

-कार्याः। एवञ्च महाह्नं सर्वांहेषु भवति। सर्वस्तोमउत्तमः षेषाहे ज्योतिर्गौरायुरभिजित् विश्वजित् सर्व्वजित् महाव्रतं सर्व्वस्तोमोऽतिरात्रः। जनकसप्तरात्रः षडः सप्ताहः। तद्विधानादि। उत्तमे सप्तमे सप्ताहे इहद्रथन्तरवामयुक्तात्पृष्ठ्यः ते च पृष्ठ्यस्तोमाख्याः इत्येवं सप्त सप्ताहा अहीना उक्ताः। तत्र विधानादि। अष्टमत्ये अहीने पार्ष्टिकात् षड़हादवसितात् महाव्रतम् भवति। नवरात्रे त्रिकद्रुका ज्योतिः गौः आयुः इत्येतदा नक्ताः। नवरात्रे षडहादूर्द्ध्वं ज्योतिः गौः आयुरित्येते एकाहा भवन्ति। तस्यैव प्रकारान्तरम्। तद्विधानादि। दशरात्राश्चत्वारः। त्रिककुप् प्रथमः प्रतिष्ठाकामस्य। तद्विधानादि। कोसुरविन्दो नाम द्वितीयः अभिचर्य्यमाणस्य। पूर्दशरात्रनामा तृतीयो दशरात्रः। तद्विधानादि। पशुकामस्य छन्दोमनामा चतुर्थो दशरात्रः। पौण्डरीकनामा एकादशरात्रः तद्विधानादि। २४अ० ७कण्डिकाः। तत्र १क०। द्वादशरात्रादीनि एकैकाहवृद्ध्या चत्वारिंशद्रात्रान्तानि सत्राणि उक्तानि। तत्र च येन क्रमेण यान्यहानि उपदिष्टानि तानि तथैवावगम्यानि। तत्र आवापिकानामन्यः क्रमः औपदेशिकानान्तु उपदेशक्रमएव याहरः। तत्रोपदिष्टाहव्यतिरिक्तानामह्ना मावापक्रमोक्तिः। यथा अपूर्व्वमाणे सत्रे दशरात्रावापो भवति स च भवन् पर एव भवति न पूर्व्वः। षट् पार्ष्टिकानि अहानि, चत्वारि छन्दोमानि अहानीति दशरात्रः। पृष्ठ्यः षडहः त्रयश्छन्दोमा अविवाक्योदशम इत्ययं वा दशरात्रो भवति। अयञ्च सर्व्वेषामह्नामन्ते परोभवति। प्रकृतिविहितेषु महाव्रतं दशरात्रादुत्तरमेकाहार्थे भवति। एकाहं विना सत्रसंख्यापूरणे दशरात्रात् परं महाव्रतं भवतीत्यर्थः। महाव्रतादन्यत् आवापानन्तरं दशरात्रात् पूर्व्वं भवति। यत्र षड्भिरहोभिर्विना न पूर्य्यते सत्रसंख्या तत्राभिप्लवः षडहार्थे पूरणोभवति। अभिप्लवस्यादितः पञ्चाहानि। पञ्चाहार्थे, (पञ्चाहेन विना संख्याऽपूरणे)। त्र्यहार्थे (त्र्यहेन विना सत्रसंख्याऽपूरणे) ज्योतिर्गौरायुः। ज्योतिरादीनां त्रिकद्रुका इति संज्ञा। चतुरहार्थे (चतुरहं विना सत्रसंख्याऽपूरणे)। ज्योतिरादित्रिकम् महाव्रतञ्च। एतच्चतुष्कं पूरणं भवति। द्व्यहार्थे (द्व्यहं विना सत्रसंख्याऽपूरणे) गौरायुश्च पूरणं भवति। सत्रस्याद्यन्तयोरतिरात्रः कार्य्यः प्रायणीयोदयनीययोरन्तराले आवापस्थानम्। यथा-

वापः क्रियते तस्य तयोरतिरात्रयोर्मध्ये करणं विहितम्। आवापानां समवायेन यत्र सत्रं पूर्य्यते तत्र यद्यदल्पं तत्तत्पूर्व्वं भवति। यथा एकोऽभिप्लवः षडहः अपरस्तस्यैव पञ्चाहः चतुरहस्त्र्यहोद्व्यहो वा तत्र पञ्चाहादेः पूर्व्वमावापः। इति सत्रावापोपयोगिनी परिभाषा। द्वे त्रयोदशरात्रसत्रे। तत्र पृष्ठ्यादवसितात् सर्व्वस्तोमसंज्ञोऽतिरात्रो भवति। अयं भावः-सर्व्वेषु सत्रेषु द्वादशाहधर्माविहिता अतस्त्रयोदशरात्रे सत्रे सकलोऽपि द्वादशाहो भवति, एकमहरवशिष्यते। तत्र पृष्ठ्यात् परः सर्व्वस्तोमोऽतिरात्रः कार्य्यः। तथाच १ प्रथमदिने प्रायणीयातिरात्रः, ततो द्वितीयादिषु षट्सु दिनेषु सप्तमाहान्तेषु पृष्ठ्यः षड़हः, अष्टमे सर्व्वस्तोमोऽतिरात्रः, नवमादिषु चतुर्षु छन्दोमाश्चत्वारः, त्रयोदशे उदयनीयातिरात्र इत्येवं क्रमः, एवमन्यत्रापि। द्वितीये त्रयोदशरात्रे तु दशरात्रादुत्तरं महाव्रतमिति भेदः। सम्भार्य्यतृतीयत्रयोदशरात्रस्य गवामयनवत् सम्भरणप्रकारः। चतुर्द्दशरात्राणि त्रीणि सत्राणि। तेषां विधानादि। तत्रान्तिमे विवाहोदकतल्पसंगयितानामधिकारः। पञ्चदशरात्राणि चत्वारि। तद्विधानादि सप्तदशरात्रे अष्टादशरात्रे एकोनविंशरात्रे विंशतिरात्रे च एवमेवावपनपूर्त्तिः। २क० षोड़शरात्रादिषु चतुर्षु आवापप्रकारः। तत्र षोड़शरात्रे प्रायणीयात् त्रिकद्रुकाः दशरात्रोत्तरं व्रतञ्च। सप्तदशरात्रे प्रायणीयात् पञ्चाहः। अष्टादशरात्रे प्रायणीयात् षडहः, एकोनविंशरात्रे प्रायणीयात् षडहोदशरात्रोत्तरं व्रतञ्च। इत्येवमावापोक्त्या विधानप्रकारः। एकविंशतिरात्रो अघोऽग्निको द्वौ अतिरात्रौ। तत्रावापप्रकारः। तद्विधानादि। अन्नाद्यकामस्य द्वाविंशतिरात्रो विहितः। तद्विधानादि। प्रतिष्ठाकामस्य त्रयोविंशतिरात्रोविहितः। प्रजाकामस्य पशुकामस्य च चतुर्विंशतिरात्रोविहितः। तच्च द्विविधं तत्र प्रथमस्य विधानादि। द्वितीयस्य संसदसंज्ञा। तत्र विधानादि। अन्नाद्यकामस्य पञ्चविंशतिरात्रं, प्रतिष्ठाकामस्य षड्विंशतिरात्रम्, ऋद्धिकामस्य सप्तविंशतिरात्रम्, प्रजाकामस्य पशुकामस्य वा अष्टाविंशतिरात्रम्, द्वात्रिंशद्रात्रञ्च विहितम्। तेषां क्रमशो विधानानि। एकोनत्रिंशद्रात्रस्य त्रिंशद्रात्रस्य एकत्रिंशद्रात्रस्य द्वात्रिंशद्रात्रस्य च विधानादि। त्रयस्त्रिंशद्रात्रस्य त्रयो भेदास्तेषां विधानादि। चतुस्त्रिंशद्रात्रमारभ्य आ चत्वारिंशद्रात्रात् सप्तानि सत्राणि आवापक्रमेण पूर्य्याणि। तत्र च विशेषः

अन्नाद्यकामस्य चतुस्त्रिंशद्रात्रम् प्रतिष्ठाकामस्य षट्त्रिंशद्रात्रम् समृद्धिकामस्य सप्तत्रिंशद्रात्रं प्रजाकामस्य पशुकामस्य वा अष्टात्रिंशद्रात्रं चत्वारिंशद्रात्रञ्च सत्रं विहितम्। एकाद्नपञ्चाशद्रात्राणि सप्त सत्राणि विहितानि। तत्र प्रथमस्य विधृतिसंज्ञा। तद्विधानादि। द्वितीयस्य यमातिरात्रसंज्ञा तद्विधानादि। अञ्जनाभ्यञ्जनीयम् तृतीयं, विद्वत्सु मध्ये आत्मानं विख्यापयितुकामस्यात्राधिकारः। तद्विधानादि। संवत्सरमितं नाम चतुर्थं तद्विधानादि।

३क०। प्रजातिकामस्य विहितस्य एकषष्टिरात्रस्य एतत् समानतया विधानादिप्रसङ्गादुक्तम्। सवितुः ककुभः पञ्चमः तद्विधानादि। तत्र प्रजातिकामस्याधिकारः। षष्ठसप्तमयोः सामान्यतोविधानादि। शतरात्रस्य विधानादि। तत्र विधाने विकल्पः।

४क०। तत्र सवनसन्तत्यादिहोमविधानादि। संवत्सरप्रभृतिसत्रे गवामयनधर्मातिदेशः। आदित्यानामयनसंज्ञकसत्रस्य विधानादि। आदित्यानामयनवत् अङ्गिरसामयनं कार्य्यं तत्र विशेषः। दृतिवातवतोरयनसंज्ञसत्रस्य विधानादि। कुण्डपायिनामयनसंज्ञसत्रस्य कालविधानादि। तत्र सुत्यास्थानेषु सोमोपनहनादिविशेषः। सर्पसत्रसंज्ञस्य सत्रस्य भेदविधानादि तत्र गवामयनधर्मातिदेशः।

५क०। तापश्चितनामसत्रस्य विधानादि। महतापश्चितनामसत्रस्य विधानादि। क्षुल्लकतापश्चितनामसत्रस्य, सहस्रसाव्याग्निसत्रस्य च विधानादि। त्रिसंवत्सरसत्रस्य विधानादि। महासत्रसंज्ञसत्रस्य विधानादि। प्रजापतिसत्रसंज्ञस्य द्वादशसंवत्सरसाध्यस्य विधानादि। षट्त्रिंशद्वत्सरसाध्यस्य शाक्त्यानामयनासंज्ञसत्रस्य विधानादि। शतसंवत्सरसाध्यस्य साध्यानामयनसंज्ञसत्रस्य विधानादि। सहस्रसंवत्सरसाध्यस्य विश्वसृजामयननामसत्रस्य विधानादि। तस्य च गौण्या वृत्त्या सहस्रदिनसाध्यता तेन सहस्रतुल्यमेतत् सत्रमित्युन्नेयम्। सारस्वतसत्राणां विधानादि। यात्सत्रनाम सत्रम्। ऋषभेनाधिकं गर्भिणीनां वत्सतरीणां प्रथमगर्भाणां शतं सहस्रपूरणायारण्ये उत्सृजेत् तासां सहस्रपूरणे इदं सत्रं समाप्यते क्षीवत्नामां दोहनाभावे क्षिप्रं वर्द्धमानानां तासां सहस्रपूरणं सम्पद्यते इत्युक्तिः। सारस्वतस्य दीक्षाकालदेशादि यथा चैत्रशुक्लसप्तम्याम् सरस्वतीविनशने स्थाने दीक्षा। सरस्वती नाम प्रत्यक्स्रोता नदी प्रवहति। तस्याः प्राक्पश्चाद्भागौ सर्वलोकप्रत्यक्षौ मध्यमस्तु भागः भूम्यन्तर्निमग्नः प्रवहति नासौ केनचिद्दृश्यते तत्स्थानं विनशनमुच्यते तच्च प्रभासस्थानमिति माधवाचार्य्यः। तत्र दीक्षाविधानादिप्रकारः।

६क०। तदीयाङ्गविधानादि। सरस्वतीदृषद्वत्योः सङ्गमे तद्विधानादि। प्लक्षप्रस्रवणे (सरस्वत्या उत्पत्तिस्थाने) अग्नये कामायेष्टिर्विहिता तत्र कारपचदेशभेदे यजमानावभृथस्नानम्। उदवसनीया इष्टिरन्ते कार्य्या। पृष्ठशमनीयरहितानि सारस्वतानि त्रीणि सत्राणीत्युक्तिः। पूर्व्वोक्तसहस्रापूरणे गृहपतिमरणे सर्व्वासां गवां हानौ वा एतत् सत्रं समाप्यते इत्युक्तिः। तत्र पश्चमार्गैरतिरात्रैरिष्ट्वा सत्रं समाप्यमित्युक्तिः। तत्र सहस्रपूरणे तदेव दत्त्वा सत्रसमाप्तिः। गृहपतिमरणे आयुःसंज्ञातिरात्रं कृत्वा, सर्व्वहानौ तु विश्वजित्संज्ञं कृत्वा समापयेत् इति भेदः। उभयथाऽपि ज्योतिष्टोमं कृत्वा वेति पक्षान्तरम्। इति प्रथमसारस्वतम्। द्वितीय दृतिवातवतोरयनवत् कार्य्यं तद्विधानादि। तत्र तिथिक्षयवृद्ध्योरप्यविशेष विधानम्। शुक्लकृष्णयोर्विशेषविधानादि। तृतीये सारस्वते विश्वजिदभिजितोर्विधानादि। ऋत्विजाऽऽचार्य्येण वा तत्र दार्षद्वतं नाम सत्रं कार्य्यम्। तत्र अरण्ये उत्सृष्टा गावः संवत्सरं, द्वितीयसंवत्सरं विगतोदके स्थाने रक्षणीयाः। सरस्वतीतीरे नैतण्डवानाम पुराणा ग्रामाः सन्ति, तत्राग्न्याधानमारम्भणीयं कुरुक्षेत्रे परीणत्स्थले अन्वारम्भणीयम्। ततस्तृतीयवत्सरे परीणन्नामस्थले दर्शपौर्णमासान्तं कुर्य्यात्। अवशिष्टविधानादि। दृषद्वतीतीरेणागत्य यमुनायामवभृथस्नानम् तत्र स्थाने मन्त्रपाठे विशेषः।

७क०। चैत्रस्य वैशाखस्य वा शुक्लपञ्चम्यां तुरायणनाम सारस्वतं सत्रं कार्य्यम्। तस्य दीक्षाविधानादि। तच्चैकवर्षसाध्यं तत्र वर्षपर्य्यन्तकर्त्तव्योपदेशः। दार्षद्वतवदनियतोऽवभृथस्नानम्। भरतद्वादशाहादिः द्वादशाहभेदः तद्विधानादि। उत्सर्गिषु गवामयनविकल्पाभिधानम्।

२५अ०१४क०। तत्र अङ्गवैगुण्यदोषोपशमार्थं प्रायश्चित्तविधानम्। तत्र प्रायश्चित्तशब्दार्थस्तु प्रपूर्व्वकायतेर्भावे घञ् प्रायो विनाशः स च विध्यतिक्रमदोषः तस्य चित्तं सन्धानं चितधातोर्भावे क्तः चित्तं धातूनामनेकार्थत्वात् सन्धानमित्युच्यते। प्रायस्य विध्यतिक्रमदोषस्य चित्तं सन्धानम् "प्रायस्य चित्तिचित्तयोः" इति "पारस्करप्रभृतीनीति" पा० वा० सुट्। तच्च विनाशकालएव कार्य्यमिति पूर्व्वपक्षे "आगन्तुकानामन्ते निवेशः" इति न्यायेन सर्व्वकार्य्यान्ते कार्य्यमिति सिद्धान्तो

गौणः। निमित्तकाले एव कर्त्तव्यतेतिमुख्यसिद्धान्तः तत्कालाकरणेऽन्ते करणमिति,तस्य गौणकालताव्यवस्थापनम्। अनादेशे सर्व्वत्र प्रायश्चित्तं महाव्याहृतिहोमः। आदेशविशेषे तु यथादिष्टं करणीयम्। यथा “प्रणीताः स्रवा अभिमृशेदिति” यजु०५,२८, प्रणीताभिमर्शनमेव प्रायश्चित्तम्। महाव्याहृतिहोमेऽयं विशेषः। हौत्रिके (ऋग्वेदोदिते) कर्म्मणि उपघाते गार्हपत्येऽग्नौ भूःस्वाहेति प्रा० होमः अयमग्निदैवतः। स च अनादिष्टकर्त्तृकत्वात् ब्रह्मणा कार्य्यः। ब्रह्मवरणात् प्राक् निमित्ते जाते ब्रह्मवरणात् प्राक् व्याहृतिहोमाय ब्रह्मान्तरं वृत्वा तेन कारयितव्यम्। अब्रह्मवरणकेऽग्निहोत्रादौ तु स्वयं कार्य्यः। सोमे तु कालाहुतिभिरस्य समुच्चयः। यजुर्व्वेदोक्तकर्म्मोपघाते दक्षिणाग्नौ भुवःस्वाहेति प्रा० होमः कार्य्यः स च पूर्व्ववत् ब्रह्मणैव कार्य्यः। सोमे तु तत्रापि आग्नीध्रीये भुवः स्वाहेति होम इति भेदः। तस्य वायुर्द्देवता। सामवेदविहितकर्मोपघाते आहवनीयेऽग्नौ स्वःस्वाहेति प्रा० होमः स च सूर्य्यदैवतः। चतुर्हौत्राणि सर्व्वत्र। सर्ववेदोक्तकर्म्मोपघाते व्यस्तैस्त्रिभिः समस्तेन भूर्भुवः स्वःस्वाहेत्येकेनेति चतुर्वारहोमः कार्य्यः। अयाश्चाग्ने इत्याद्याभिः पञ्चभिः प्रत्यृचमाहवनीये पञ्चाहुतिरूपः सर्व्वप्रायश्चित्तसंज्ञको होमः। अविज्ञाते आर्त्त्यादौ कर्म्मणि व्यस्तसमस्तमहाव्याहृतिहोमाश्चत्वारः कार्य्याः। तथा हि यत्र ऋग्वेदोक्तत्वादिना विशेषप्रहोणास्ति अथ च स्मृतिरुपलभ्यते। यथा यज्ञोपवीतिना बद्धशिखेन दक्षिणपाणिना पवित्रपाणिना कर्म कर्त्तव्यमित्यादि स्मृतिविहितं यज्ञोपवीतधारणादि। तस्य कथञ्चिदुपघाते व्यस्तसमस्तमहाव्याहृतिहोमचतुष्टयं प्रायश्चित्तं कार्य्यम्। तदन्ते च याजुषैः प्रागुक्तं सर्वप्रायश्चित्तसंज्ञकं पञ्चर्चाहुतिरूपं सर्व्वत्र ज्ञातेऽविज्ञाते निमित्ते वा करणीयम्। अत्रायं सम्प्रदायभेदः। भूरिति गार्हपत्ये, भुव इति दक्षिणाग्नौ, स्वरिति आहवनीये भूर्भुवः स्वरिति, सर्व्वप्रायश्चित्तसंज्ञकपञ्चाहुतिहोमश्च आहवनीये इति याज्ञिकवासुदेव भट्टाः। भूरित्याद्याहुतिनवकमाहवनीय एवेति सम्प्रदायकारिकाकारौ। महापितृयज्ञे, दक्षिणाग्नौ अवभृथेऽप्स्वेव, शतरुद्रिये परिश्रित्सु। त्र्यम्बकास्तु च पथे श्रयाग्नौ”इति कर्कः। अथ कर्मविशेषेषु प्रायश्चित्तभेदाः ७क० ८सू० पर्य्यन्तेषु उक्ताः। ७क० ६सूत्रादौ कर्मसमाप्तितः पूर्व्वं यजमाने मृते तदैव कर्मसमाप्तिर्भवत्येकः पक्षः ऋत्विगादिभिः शेषं समाप्यमित्यपरः पक्षः। तत्र कर्मसमाप्तावपि उत्तरक्रियाविशेषोविहितः।

८क० उपकृतपशुपलायनादौ प्रायश्चित्तभेदः। ततोऽन्त्येष्टिपद्धतिः। ९क०। अस्थिचयनप्रकारादि।

१०क०। सत्रविशेषकरणार्थं कृते उद्यमे दैवात्तदकरणे विश्वजिन्नामकेनातिरात्रेण यजेत्। सत्राद्यर्थं कृतदीक्षायां यदि दैवान्मानुषाद्वा निमित्तात् वाभिकृते दीक्षामात्रकृते वा सत्रे स्वामिनः सत्रं न समापयामीति बुद्धिर्जायते तदा सोमेनोपलक्षितं साधारणं धान्यघृतादिकं पुत्रादिभ्यः पृथगात्मीयं कृत्वा सर्व्वस्वदक्षिणेन विश्वजिताऽतिरात्रेण यजेत्। स च सोमे क्रीतएव भवति नाकृते इति ताण्ड्ये स्थितम्। क्रीतेऽक्रीते वा सोमे विश्वजिद्भवतीति स्वमतम्। अध्वर्य्युप्रभृतीनां दैवात् स्वस्वकार्य्याकरणे अदक्षिणं कर्म समाप्य पुनरन्यवरणपूर्व्वकं यागारम्भः। तत्र दिनभेदे विशेषः। दीक्षितस्य पत्नी चेत् रजस्वला तदा दीक्षारूपाणि मङ्कादीनि निधाय सिकतासु आ रक्तस्रवणात् आसीत। सुत्यासु वर्त्तमानासु सिकतासूपविशेत्। प्रातःसायञ्च वेदिसमीपे सिकतास्वेव तिष्ठेत्। चतुर्थेऽहनि गोमूत्रमिश्रोदकेन आर्त्तं स्नानं विधाय वासो धृत्वा सान्निपातिकं कुर्यात् नारादुपकारकम्। आरादुपकारकं च दीक्षणीयभूम्युल्लेखनादि। प्रसूतायास्तु दशरात्रादूर्द्ध्वं स्नानादि। गर्भिणीं न दीक्षयेदिति तद्दीक्षानिषेधः इति मतान्तरम्। “अयज्ञियाः गर्भा” इति श्रुतेः अनुबन्ध्याप्रकरणीयत्वात् निषेधस्य तद्विषयत्वेन गर्भवत्या अपि दीक्षाधिकारः इति स्वमतमुक्तम्। दीक्षितस्य दुःस्वप्नादिदर्शनादिप्रायश्चित्तविशेषः। चमसस्य पीतापीतत्वविषये प्रायश्चित्तम्। सोमस्योपरि मेघवर्षणे भक्षाभक्षनिर्णयपूर्व्वकं तत्र प्रायश्चित्तम्। चमसदोषे द्रोणकलसदोषे च प्रायश्चित्तम्। अग्निभेदने होमभेदः प्रायश्चित्तम्।

सोमापहरणे,अव्यक्तरागपुष्पाणि तृणानि सोमकार्यें निधाय अभिषवं कुर्य्यात्। बहुकालीनखादिरवृक्षस्य वल्लीरूपा अङ्कुरा जायमाना श्येनहृतमित्युच्यते तत्, श्यामकान्, सोमसदृशान् लताविशेषान् पूतीकान्,अरुणदूर्व्वा अव्यक्तरागा दूर्व्वा हरितकुशान् अशुष्कान् दर्भान् वा पूर्वपूर्व्वाभावे उत्तरोत्तरान् प्रतिनिधायाभिषुणुयात्। तत्र गोदानं प्रायश्चित्तं कृत्वा उक्तद्रव्येण यागसमापनम्। तत्र च अवभृथान्ते पुनः यज्ञः करणीयः, सोमकलसभेदे ब्रह्मसाम

पाठः प्रायश्चित्तम् इति विकल्पः । अभिषवणचर्मणि प्रस्र-स्यादिनाशसोमरसलाभे जलादिना तस्य वर्द्धनेन कलसमापूर्य्य द्रोणकलसपूरणं सम्पाद्यम् । सोमेऽनुलभ्यमाने यत्किञ्चिद्विगतमानीय पुनः यज्ञः । तत्र गोदानं प्रायश्चित्तम् ।
१२क०। सोमातिरेके आद्यादिसवनभेदे प्रायश्चित्तभेदः । दीक्षितस्य रोगे द्रोणकलसे उष्णानां शुण्ठीपिप्पल्यादीनां मध्ये येने च्छेत् तेन भिषक् विचिकित्सेत् नान्येन । तस्य विधानादि । ज्वरितस्यापि रोगशान्तिं यावत् प्राग्विहितदेश एव वासो नान्यत्र । प्रातःसवने च तस्य मन्त्रविशेषेणाभिषेकप्रकारः । एवं दीक्षितं सर्वे ऋत्विजः सवनान्तेषु स्पृशेयुः । तत्र यजमानस्य मन्त्रभेदेन स्पर्शः । तत्र मरणे तस्य दाहविशेषं कृत्वा दीक्षितस्यास्थीनि कृष्णाजिने बद्धा मृतस्यैव पत्न्यपि स्वकर्म पतिकर्म च कुर्य्यात् । पत्नीमरणेऽप्येवम् इति पक्षान्तरम् । तस्य भ्रात्रादिकं नेदिष्ठं दीक्षयित्वा सत्रस्य समापनम् इति मतान्तरम् । स्वमते मरणे एव कर्मसमाप्तिः । उभयपक्षेऽपि । तत्र प्रायश्चित्तविधानादि ।
१४क० । उखाभरणदिने यजमानमरणे विशेषविधानप्रायश्चित्तानि । सत्रदीक्षामध्ये मरणेऽपि उक्तसोमादिकर्मान्तकरणाय दीक्षितस्य तत्कर्मफलं भवति दीक्षितस्य भ्रात्रादेरेव प्रकृतक्रतुफलप्राप्तिरिति मतान्तरम् । साग्निना नेदिष्ठिना पुत्रादिना स्वकीयेष्वग्निषु स्वकीयेन द्रव्येणानुष्ठितस्य साग्निचित्यादिक्रतोः नेदिष्ठिनएव फलं प्रकृतक्रतुफलं तु मृतयजमानस्येति स्वमतम् । तत्र उपदीक्षी स्वेष्वग्निषु नक्षत्रनिकृन्तनावधि द्वादशान्तं सान्निपातिकं कुर्य्यात् । यद्यनाहिताग्निर्नेदिष्ठी तदा सवितृणामेवाग्निषु करणं तत्र च वैश्वानरनिर्वापः प्रायश्चित्तम् । एकराजकयोरपर्व्वतान्तरेऽनद्यन्तरे समानदेशे यजमानयोः यज्ञकरणे सोमसंसवो भवति । तथाच द्वौ यजमानौ चेत् मिथो वैरिणौ समकाले एकस्मिन् देशे, गिरिनद्यादिव्यवधानं विना यागार्थं सोममेककालं सुनुतः तदा समेत्य सवनात् संसव इत्युच्यते । तत्र सर्व्वं कर्म सत्वरं कार्य्यम् । परयज्ञापेक्षया स्वयज्ञे संस्थाधिक्यमिच्छन् सत्वरं सर्वं कार्य्यं कुर्य्यात् । तद्विधानादि । भिन्नदेशकालादौ पर्व्वताद्यन्तरे प्रीतौ च न संसव । इति भेदः । संसवविषयएव होत्रादिभिस्स्वस्वसममरणकामैः कर्त्तव्यकर्मविशेषविधानम् । यथा होत्रा होतुः अध्वर्युणाऽध्वर्य्योः यजमानेन यजमानस्येत्यादिरूपेण मरणमिच्छता तत्कर्म कार्य्यम् । अयञ्च यज्ञः एकदिनरथगम्यदेशे परस्परद्वेषे भवति अन्यतरस्य द्वेषाभावे उक्तदेशतो दूरत्वे च न सम्भवति । उक्तानामेकतरेण तथानुष्ठिते एकतरस्य मरणे । स्वस्वयज्ञान्तर्गता अध्वर्य्यादयः तदीयकर्मशेषं स्मरणपूर्व्वकं कुर्युः न वरणान्तरमपेक्ष्यते । सोमादिदाहे प्रतिनिधिना कर्म समापयेयुः । पञ्चगोदानं दत्त्वा यज्ञसमापनम् । द्वादश्या रात्रेः प्राक् तथाभूते दोषे पुनर्यज्ञारम्भः उत्तरन्तु पञ्चगोदानमात्रदक्षिणा प्रायश्चित्तमिति मतान्तरम् । ब्रह्मणएव विहितकर्माधिकारात् अनादेशे सर्व्वत्र प्रायश्चित्तहोमे तस्यैवाधिकारः । अब्रह्मके तु अग्निहोत्रादौ यजमानाधिकारः इत्युक्तं प्राक् ।
२६ अ० ६क० कण्डिकाः प्रवर्ग्योपयोगिमहावीरसम्भरणकर्मप्रतिपादिकाः । यथा मृत्पिण्डसञ्चयं वल्मीकलोष्टं स्सूकरोत्खातां मृत्तिकां पूतिकालताविशेषं गवेधुकाः (जलसन्निहितमहाटवजानि शुक्लानि फलानि) इत्येतान् सम्भारान् प्राक्संस्थान् उदक्संस्थान् वा कृत्वा कृष्णाजिनम् वक्ष्यमाणलक्षणम्, अभ्रिम् (कुद्दालम्) उत्तरतोनिदध्यात् । तेषामादाननिधानादिमन्त्राः । मृच्चात्र अतिचिक्कणा भाण्डादिनिर्माणयोग्या कुम्भकारस्य मृतैव गृह्यते । तथाभूतमृदः कृष्णाजिने उत्तरतोनिधानम् । दक्षिणतश्च कृष्णाजिने वल्मीकलोष्टस्य । कृष्णाजिनं परिगृह्य पञ्चारत्निप्रमाणं समचतुरस्रं भूभागं प्राग्द्वारं कृत्वा सप्त भूसंस्कारान् कृत्वा सिकतोपकिरणे परिश्रिते उक्तस्थाने कृष्णाजिनस्थान् सम्भारान् निदध्यात् । उक्तेषमे जलैरभ्युक्षणे सम्भारैः संसर्गे च मन्त्राः । ततोऽध्वर्युः गवेधुका अजापयश्च पृथक् निधाय वल्मीकलोष्टादिभिः सह मृत्पिण्डं मिश्रयेत् । ततो महावीरं कार्य्यम् । तत्स्वरूपं प्रादेशमात्रमूर्द्धमासेचनवन्तं (गर्त्तवन्तम्) मध्यदेशे सङ्कुचितमेखलम् (उलूखलवत् सुदिग्रहणयोग्यम्) । मेखलाया ऊर्द्ध्वं त्र्यङ्गुलम् (प्रादेशमात्रस्योपरिभागे त्र्यङ्गुलम्) परिशेष्य ततोऽधस्तात् मेखला कार्य्या । "मखस्य शिर" इति मन्त्रेण निष्पन्नमहावीरस्पर्शनम् । अनेनैव मन्त्रेण तदादानमपीत्येके । एवमितरौ महावीरौ कुर्य्यात् । अभिमर्शनानन्तर सर्वेषां भूमौ निधानम् । स्रुङ्मुखाकृती पिन्वने (दोहनपात्रे) रौहिणकपाले वक्ष्यमाणपुरोडाशकपाले वर्त्तुले सर्व्वसमीपे भूमौ निधाय । उपशायाम् (तदवशिष्टां मृदम्) प्रायश्चित्तार्थं निदध्यात् । "मखाय त्वेति मन्त्रेण"

गवेधुकाभिः श्लक्ष्णीकुर्य्यात् । दक्षिणाग्निनादीप्तेन अश्व पुरीषेण "अश्वस्य त्वेति" तस्याः मृदोधूपनम् । उखावत्-प्रदाहनादि । चतुरस्रमवटं खात्वा तत्र अपणम् (पाक-साधनमिन्धनादि) आस्तीर्य्य तत्र तीन् महा-वीरान् न्युब्जोकृतान् निधाय पिन्वने (दोहनपात्रे) रौहिणकपाले च न्युब्जे निधाय पुनः अपेणाबच्छाद्य दक्षिणाग्निना दीपयेत् । "ऋजवे त्वेति" मन्त्रेण पक्कां मृदमुद्धरेत् द्विवेव प्रदाहनोद्धारौ कार्य्यौ । ततस्तानि अजापयसावसिञ्चेत् । तूष्णीं पिन्वनादीनां करणाभि-मर्शनश्लक्ष्णधूपनप्रदहनोद्धरणावसेचनादि कुर्यात् ।

२क० महावीरमुक्ता प्रवर्ग्यचरणप्रकारः । यथा प्रत्यहं सायंप्रातः प्रागुपसदः प्रवर्ग्यचरणं कार्यम् । अपिहित-द्वारे प्रवर्ग्यचरणम् । पत्नीसन्निधावपि तया तस्य दर्शनं न कार्यम् । वैदिकशब्दानुक्तिस्तत्र कार्या । प्रकृत्यन्तरा-भावात् यावदुक्तं तावदेवात्र भवति नाधिकम् । अत्र सर्वमन्यद्विपात्रमौदुम्बरम् मासकृतं मौञ्जं शिक्यम् । तत्र विशेषः यजमानस्यान्यप्रमाणपादाया औदुम्बर्य्या आसन्द्या वाल्वजं वल्वजत्रयं बन्धनरज्जुर्भवति ।

गार्हपत्यं पूर्व्वेण प्रागग्रकुशानास्तीर्य तेषु पात्रासादनं द्वन्द्वशः कार्यम्] पात्राणि तु उपसंयमनी महावीरं, परीशासौ, पिन्वने, रौहिणकपाले, रौहिणहवन्यौ । अनुत्कीर्णे स्रुचौ, स्थूणामयूखम्, धृष्टी, शतमाने, विंशतिं मुञ्जप्रलवान्, प्रादेशमात्रान् विकङ्कतशकलान्, स्रुवं मुञ्जवेदम्, धवित्राणि, परिधीन्, रज्जुसन्दानमा-सन्दीम् कृष्णाजिनमभ्रिम्, खरार्थाः सिकता अर्थ-वच्च, पाठक्रमेणैवासादयेत् । तत्र बाहुप्रमाणा औदु-म्बरी उपसंयमनी । महाशस्त्रा प्रचरणीया स्रुक् । परीशासौ संदंशाकारौ, स्थूणा गोर्बन्धनार्थः स्तम्भभेदः । मयूखः अजाबन्धनार्थः शङ्कुरूपः कीलकः । धृष्टी उप-वेषौ औदुम्बरौ । एकं रजतरक्तिकाशतमानं, द्वितीयं स्वर्णरक्तिकाशतमानम् इति द्वे शतमाने । औदुम्बरएका-रत्निमात्रः स्रुवः । वेदोमुञ्जमयः । धुनोत्येभिरिति धवि-त्राणि कृष्णाजिनखण्डनिर्म्मितानि दण्डवन्ति त्रीणि व्यजनानि । सन्दानं दोहनकाले गोपादबन्धनार्था अज-बन्धनार्था च रज्जुः । अर्थवत् प्रयोजनोपयोगि अन्यदपि द्वन्द्वश आसादयेत् । प्रयोजनवद्द्रव्यञ्च स्फ्यः पवित्रे, अग्निहोत्रहवनी आज्यस्थाली प्रभूतमाज्यं, शूर्पं, पात्री-पिष्टम्, उपसर्ज्जनीपात्रम्, उपयवा, इतरौ महावीरौ, च । होतृषदनं मौञ्जं कार्य्यम् औदुम्बरी शमिदि-त्यादि द्वन्द्वश आसादयेत् । प्रोक्षणीः संस्कृत्य उत्थाय ब्रह्मणोऽनुज्ञाकरणम् । होत्रादिप्रेषणञ्च "यमाय त्वेति, मन्त्रेण प्रतिमन्त्रम् उक्तद्रव्याणां प्रत्येकं प्रोक्षणं दायीकृत्य च तूष्णीं प्रोक्षणञ्च कार्यम् । शालायाः पूर्व्वद्वारेण स्थूणां मयूखं च निष्कास्य, शालाया दक्षिणस्यां होतुः सन्दर्शने निखननम्, (गार्हपत्यसमीपे उपविष्टो होता यत्र निखातां स्थूणां मयूखं च पश्यति तादृशं स्थानं होतृसन्दर्शनम्) । गार्हपत्याहवनीययोरुत्तरतः खर-निवापः । दक्षिणतश्च भित्तिलग्नमुच्छिष्टखरनिवापः कार्य्यः । आहवनीयं पूर्व्वेण सम्राड़ासन्दीं पर्य्याहृत्य दक्षिणतः प्राचीमासादयेत् । राजासन्द्या उत्तरतः कृष्णा-जिनमथास्तृणाति तस्मिन्नभ्रुपशये निदध्यात् महा-वीरौ चाच्छादयेद्रुवेति । स्थूणादिनिर्हरणानि अध्वर्यु-रन्यो वा कुर्य्यात् । "देवस्य त्वे"ति मन्त्रेण एतेषामञ्जनं होता कुर्यात् । महावीरमाज्यं च संस्कृत्य "पृथिव्याः संस्पृश" इति मन्त्रेण रजतशतरक्तिकामानं सिकतामध्ये प्रवेशयेत् । ३क० शुक्रं गायेति प्रस्तोतुः प्रेषणम् । पत्नी-शिर आच्छादनम् । संसीदस्वेति यदाऽऽज्यं संस्कृत्य होता वक्ति तदा मुञ्जप्रलवान् शरेषीकापरितोभवानि शरष्ठ-णानि मध्यमोटनेन द्विगुणीकृतानादीप्य प्रतिदिशं सिक-तासु निदध्यात् । तेषु मुञ्जप्रलवेषु संस्कृतं प्रचरणीयं महावीरं घृतपूर्णम् "अर्चिरसीति" मन्त्रेण निदध्यात् । महावीरस्योपरि प्रादेशधारकं यजमानम् "अनाधृष्टेति" मन्त्रं वाचयेत् । प्रतिदिशं वा तथा वाचनमिति विकल्पः । दक्षिणत उत्तानं पाणिं यजमानो निदध्यात् । "मनोरश्वे"ति" मन्त्रेण महावीरस्योत्तरतः प्रादेशनिधानम् । महावीरं परितः भस्मक्षेपं कृत्वा गार्हपत्याङ्गारैः उपवेषाभ्यां महावीरं "मरुद्भिरिति" परिकीर्य (महावीरस्य सर्व्वतो निरन्तरानङ्गारान् निधाय) । अङ्गारैः विकङ्कतशकलैश्च प्रागुदगग्रैः त्रयोदशभिः "स्वाहामरुद्भिरिति" मन्त्रेण परिश्रयेत् । तेषां त्रयोदशानां मध्ये प्रतिदिशं त्रीन् त्रीन् स्थापयेत् तत्र द्वौ द्वौ समन्त्रकमेकं तूष्णीं तयोरुपरि इत्येवं प्रागादिषु चतसृषु दिक्षु स्थापितानां द्वादशानाम-धिकमेकं दक्षिणतः स्थापयेत् स्थापनक्रमेणैव श्रपणञ्च । सुवर्णशतरक्तिकामानेन "दिवः संस्पृश" इति मन्त्रेण महावीरं पिदध्यात् ।

४क० तत्रपिधानकाले "चन्द्रं गायेति " प्रस्तोतुः प्रेष-

णम् । कृष्णाजिनखण्डनिर्म्मितैर्व्यजनैर्दण्डवद्भिस्त्रिभिः महावीरं परितः प्रकीर्णानङ्गारान् दीपनाय उपवीजयेयुः । तेषु व्यजनेषु एकं प्रतिप्रस्थाता, अपरमग्नीधा, शिष्टमध्वर्युणा गृहीत्वा धूनयद्भिः सव्यापसव्यतिः प्रदक्षिणं कार्य्यम् । तत्र सव्यावृत्तौ व्यजनधूननम् दक्षिणावृत्तौ व्यजनाभ्यन्तः कृत्वेति भेदः । धूननेन प्रदीप्तत्वात् जाते अर्च्चिषि सुवर्णशतमानं निधायाज्येन स्रुवेण महावीरं सिञ्चेत् । एतच्च सुवर्णशतमानं महावीरादन्यत्र शुभ्रे देशे स्थापयित्वा कार्य्यम् । अध्वर्य्योर्महावीरसेके व्यापृततया प्रतिप्रस्थाता लौकिकपिष्टानां व्रीहीणां यथाम्ना रौहिणौ पुरोडाशौ पचेत् । रौहिणपुरोडाशयोरन्यपुरोडाशधर्म्मत्वं तेन कपालयोः संस्कारादि कार्य्यम् । "ईड़े द्यावापृथिवी" इति मन्त्रेण परिधीन् परिधाय रौहिणौ पुरोडाशौ पात्रीस्थानीययोरुपस्तीर्णयोः रौहिणहवन्योः स्रुचोरुद्धास्य तत्स्थाने आहवनीयदक्षिणोत्तरयोः एकं दक्षिणतोऽपरमुत्तरतश्च स्थापयेत् । 'घर्म्मस्य तन्वौ गायेति" प्रस्तोतृप्रेषणम् । यजमानसहितानामृत्विजां परिक्रमणम् । प्रस्तोतृव्यतिरिक्ताः पञ्चर्त्विजः उपतिष्ठेयुः । छन्दोगानां मते तत्सहिताः षट् परिक्रमेयुः । "गर्भो देवानामिति" सकृत्, द्विस्तूष्णीं परिक्रमेयुः । पत्नीशिरोऽपगताच्छादनं कृत्वा महावीरमीक्षमाणां पत्नीं "त्वष्टृमन्त" इत्येतं मन्त्रं वाचयेयुः । प्रातः "अहः केतुनेति" मन्त्रेण दक्षिणं रौहिणं, सायं"रात्रिरिति" मन्त्रेण उत्तरं रौहिणं जुहुयात् । ५क० । घर्म्मधुग्बन्धनार्था पाशवती रज्जुः तस्याएव पश्चात्पादबन्धनार्थं सन्दानं तदुभयमादाय "इडएहीति" मन्त्रेण उपांशु, नाम्ना च त्रिरुच्चैः गार्हपत्यं गच्छन् तामाह्वयेत् । 'धेनुं गायेति" प्रस्तोतृप्रेषणम् । "अदित्यै रास्नासीति" मन्त्रेणसमागतां गां पाशेन प्रतिमुच्य (तस्याः रज्जुपाशं शृङ्गयोः प्रोतं कृत्वा स्थूणायां बद्ध्वा) "पूषासीति" मन्त्रेण धेनुं पश्चात्पादयोः सन्दानेन (नियमनेन) बद्ध्वा 'घर्म्माय दीष्वेति" वत्सं ततोऽपाकुर्य्यात् । (स्तनपानात् निवर्त्तयेत्) "अश्विभ्यां पिन्वस्वेति"मन्त्रेण पिन्वने (पात्रभेदे) दुहेत् । "स्वाहेन्द्रवदिति" मन्त्रेण पिन्वने पतितान्विप्रुषोऽभिमन्त्रयेत् ।"यस्ते स्तन" इति स्तनालम्भनम् । प्रतिप्रस्थाता अजामेवं मयूखे तूष्णीं बद्ध्वा दुहेत् । "पयोगायेति प्रतिप्रस्थातृप्रेषणम् । "उत्तिष्ठ ब्रह्मणस्पते" इति मन्त्रे होत्रोच्यमाने अध्वर्युः गोः समीपादुत्तिष्ठेत् । "उपद्रव पयसेति" मन्त्रे होत्रोच्चार्य्यमाणे गार्हपत्यं प्रति अध्वर्य्युगतिः । "गायत्रं छन्दोऽसीति" प्रतिमन्त्रं परीशासावादद्यात् । "वसिष्ठशफौ गायेति" प्रस्तोतृप्रेषणम् । "द्यावापृथिवीभ्यां त्वा परिगृह्णामीति" मन्त्रेण परीशासाभ्यां महावीरग्रहणम् परीशासाभ्यां महावीरमुत्क्षिप्य मुञ्जवेदेनोपमृज्य उपयमन्या अन्तरिक्षेणोपयच्छामीति गृह्णीयात् । उपयमनीं च दुग्धरूपघर्म्मस्य अधस्तात् स्थापयेत् । उपयमन्या गृहीतं महावीरमजपयसासेकेन शान्ते महावीरे "प्रैतु ब्रह्मणस्पते इति" वाक्ये होत्रोच्यमाने "इन्द्राश्विनेति" गोः पयोऽपनयेत् ।

६क० आहवनीयं गच्छन् "समुद्राय त्वेति" मन्त्रेण वातनाम जपेत् । उपयमन्यां पतितं पयोघृतं वा घर्म्मे (दुग्धे) "स्वाहा घर्म्मायेति" आसिञ्चेत् । 'स्वाहा घर्म्मः पित्रे" इति जपित्वाऽतिक्रम्याश्राव्य प्रस्तोतारं घर्म्मस्य यजेतिप्रेषयेत् । वषट्कारेण "विश्वा आशा इति" मन्त्रेण होमः । "दिवि वा इति" मन्त्रेण महावीरं त्रिरुत्कम्पयेत् । "स्वाहाऽग्नये इति" मन्त्रेण वषट्कारयोजितेन होमः । हुतावशिष्टद्रव्यस्य"अश्विनौ घर्ममिति" ब्रह्मानुमन्त्रणम् ।"अपातामिति" मन्त्रेण घर्मस्य यजमानानुमन्त्रणम् । अतितप्तत्वात् पात्रमध्ये सर्वतः इतस्ततः उच्छलन्तो ये घर्मलेशास्तेषाम् "इषे पिन्वस्वेति" मन्त्रेणानुमन्त्रणम् । "वर्षादिति" मन्त्रेण ऐशान्यामध्वर्युरुद्गच्छन् "अमेन्यस्मे" इति मन्त्रेण महावीरं सिकतासु निदध्यात् । तच्च परीशासगृहीतमेव स्थापयेत् । नीचैर्घर्म्ममध्ये शकलं प्रवेश्य तत्स्थेनाज्येन विकङ्कतशकलम् अक्त्वा अक्त्वा "स्वाहा पूष्णे शरसे" इति मन्त्रेण तदेव जुहुयात् हुत्वा हुत्वा च प्रथमपरिधौ विकङ्कतशकलान् निदध्यात् । एवं त्रिधा हुत्वा चतुर्थमहुतं तच्छकलमीक्षमाणो दक्षिणतो बर्हिषि उपगूहेत् (प्रवेशयेत्) । अहुतं सप्तमं च विकङ्कतशकलम् दक्षिणेक्षमाणः सर्वलेपाक्तं (महावीरस्थघृतलेपेनाक्तम्) मूलाग्रपर्य्यन्तं प्रतिप्रस्थात्रे दद्यात् । प्रतिस्थाता तं शकलमुदञ्चं नियच्छेत् । घर्मसम्बन्धि नवनीतादि "स्वाहा सं ज्योतिषा" इति मन्त्रेण परीशासाभ्यामुत्पाद्य उपयमन्यां स्रुच्यासिञ्चति (स्रुम्मुखस्योपरि अधोमुखं करोतीत्यर्थः) ततोद्वितीयरौहिणहोमः । मध्यमपरिधौ निहितानि पञ्च वैकङ्कतशकलानि आहवनीये जुहुयात् । उपयमन्यां

स्थितं चमोजमग्निहोत्रविधानेन हुत्वा "मधु हुतमिति" मन्त्रेण सर्वे ऋत्विगादयो वाजिनवत् भक्षयेयुः । उच्छिष्टखरे प्रक्षाल्य उपयमनीं निदध्यात् । अत्र काले उपस्थितानां पशुशकलानामाहवनीये प्रहरणम् । अध्वर्युर्होत्रा संसाद्यमानाय महावीरायानुब्रूहीति अनुवाचयेत् । ततो धेनवे तृणोदके दद्यात् । सर्वं पात्रजातमनाशाय आसन्द्यां कुर्य्यात् । "अभीममिति" मन्त्रेण महावीरमासन्द्यां स्थापयेत् । इतराणि तु पात्राणि तूष्णीमिति भेदः । ततः शान्तिपाठः द्वारोद्घाटनञ्च । खरस्थूणामयूखकृष्णाजिनाभ्र्युपधयासन्दीनां सकृदासादनप्रोक्षणे । आरादुपकारकत्वात् प्रथमे प्रवर्ग्यचरणे एव आसादनप्रोक्षणे इत्येकपक्षः । असकृत्, "प्रतिप्रधानं गुणावृत्तिरिति" न्यायात् इति पक्षान्तरम् । ७क० । उपसदन्ते प्रवर्ग्योत्सादनप्रकारः । यथा शालामध्यात् दक्षिणेन द्वारेण घर्मसम्बन्धि द्रव्यं निष्क्रास्य अन्तःपात्यसमीपे सादितपात्रेभ्यो दक्षिणतएव निदध्यात् । आहवनीये त्रीन् शालाकान् प्रक्षिप्य प्रदीप्य अग्नीध्रो धारयेत् यजमानसक्थिषु मुखमात्रनाभिमात्रजानुमात्रप्रमाणेषु तान् प्रदीप्तान् शालाकान् निदध्यात् । अध्वर्युराज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वा तेषां प्रदीप्तानां शालाकानामुपरि "या ते घर्म ! दिव्या शुगिति" प्रतिमन्त्रं जुहुयात् । एकमेव चतुर्गृहीतं गृहीत्वा त्रिष्वपि शालाकेषु जुहुयात् । तथाच शलाकानां समूहः शालाकः तेन तिसृभिः शलाकाभिः एकः शालाकः । तादृशान् त्रीन् शालाकान् हस्ते गृहीत्वा तेषामेकं शालाकं शालाद्वार्य्ये प्रदीप्याग्नीध्रोयजमानमुखमात्रे आहवनीयस्योपरि धारयेत् । अध्वर्युश्चतुर्गृहीतं तृतीयांशं तस्मिञ्छालाके प्रदीप्ते जुहुयात् । ततस्तं शालाकमाहवनीयमध्यएव क्षिपेत् । ततोद्वितीयं शालाकं प्रदीप्याग्नीध्रो यजमानस्य नाभिदघ्ने आहवनीयस्योपरि धारयेत् अध्वर्युस्तथैव जुहुयात् । तृतीयन्तु अग्नीधा प्रदीप्य यजमानजानुमात्रे धृतमध्वर्युराहवनीये निक्षिप्य तत्र उपविश्य सर्वं चतुर्गृहीतं शेषं जुहुयात् । अत्र उपविश्येत्युक्तेः पूर्वयोः तिष्ठता होमौ कार्य्यौ । ततोऽध्वर्युः पुरस्तात् पत्नीमग्रे कृत्वा "चतस्र त्वेति" मन्त्रेण शालाया निष्क्रमेत् । अवभृथवत् अध्वर्युणा प्रस्तोतुः सामगानार्थं प्रेषणम् । अवभृथवत् देशगतिः निधनञ्च । सामगानात् परं सर्वे उत्सादनदेशं गच्छेयुः । (उत्सादनदेशश्च महावीरादिपात्रादीनां परित्यागदेशः "परिष्यन्दोवा अन्योवा देशः" इति शत०ब्रा० १४,२,१,१४, विहितदेशः) । तत्र अग्निचित्यारहिते यज्ञे उत्तरवेदिं प्रति सर्वे गच्छेयुः । अग्निचित्यायुक्ते यज्ञे तु परिष्यन्दं (जलपरिवृतं द्वीपम्) (निर्जनस्थलं वा) प्रत्येव गमनम् । तत्तत्सादनदेशम् उत्तरवेदिं वा "अचिक्रददिति" त्रिः परिषिच्य उत्तरकार्य्यं कार्य्यम् । अध्वर्युरुत्तरवेदौ उत्सादनपक्षे प्रथमं महावीरं नाभिस्पृष्टं "चतुःस्रक्तिरिति" निदध्यात् । इतरौ महावीरौ प्राक्संस्थौ प्राच्यां मन्त्रावृत्त्या निदध्यात् । उपशयाम् (महावीरघटनावसरे परिशेषितां मृदम्) तथैव तूष्णीं निदध्यात् । महावीरादिकमभितः परीशासौ निदध्यात् । अवकृष्टे (नीचे वाह्ये) रौहिणहवन्यौ स्रुचौ निदध्यात् । रौहिणहवन्योरुत्तरतः अभ्रिनिधानम् । तयोरेव दक्षिणतः आसन्दीम्, अभ्रेरुत्तरतः सर्व्वधवित्राणि च निदध्यात् । तथाच दक्षिणतः, पश्चात्, उत्तरतश्चैकैकं धवित्रं निदध्यात् । परिशिष्टानपि निहितद्रव्याण्यभितो निदध्यात् । निहितपात्रगणस्य पश्चात् उपयमनीं स्रुचं प्रागग्रां निधाय रज्जुसंदानं वेदञ्च तन्मध्ये निदध्यात् । पिन्वने (दोहनपात्रे) उपयमनीमुखस्य पश्चात् अभितोदण्डं निदध्यात् । पिन्वनयोः पश्चात् दक्षिणतः स्थूणाम्, उत्तरतो मयूखं, निदध्यात् स्थूणामयूखयोः पश्चात् रौहिणकपाले निदध्यात् । तयोरेव पश्चात् धृष्टी (उपवेषौ) निदध्यात् । घर्मोपयुक्तं स्रुवमौञ्जकूर्चादि आसादितपात्राणां मध्ये निदध्यात् । सर्वपात्राणामुत्तरतः प्रचरणीयौ खरौ निदध्यात् । मार्जालीयस्थानस्य दक्षिणतो वेदेर्बहिर्भागे उच्छिष्टखरं निदध्यात् । सगर्त्तानि सप्त पात्राणि (महावीरत्रयं द्वे पिन्वने उपयमनीं स्रुवञ्च) एतानि "घर्मैतत्ते"इति प्रतिमन्त्रं पयसा पूरयेत् । व्रतमिश्रं पयःशेषं पूर्व्वमदत्तं चेत् साग्निके सोमे प्रागेव सकलं देयमिति विधानात् । वर्षाहारेष्टाहोत्रीय सामगानार्थं प्रस्तोतुरध्वर्युणा प्रेषणम् । सपत्नीकाः सर्वे "सुमित्रिया न इति" मन्त्रेण चात्वालं मार्जयेयुः । ऐशानीं प्रति "उद्वयमिति" मन्त्रेण यजमान उद्गच्छेत् । प्रादेशमात्रामेकां समिधं हस्तेन "अनमेच्चमेत्येधोऽसीति" मन्त्रेणादाय "समिदसीति" मन्त्रेण आहवनीये दद्यात् । गार्हपत्ये तु तादृशीं समिधं तूष्णीं दद्यात् । यजमानः रजतसुवर्णशतमाने ब्रह्मणे दद्यात् । यजमानव्रतदुघां रूपां घर्मदुघां यजमानः अध्वर्य्यवे दद्यात् । पत्नीव्रतदुघां गामुद्गात्रे दद्यात् । अजामग्नीधे दद्यात् । घर्मस्य महा

वीरस्य भेदने यथाकालं प्रायश्चित्तं कुर्यात् । तत्प्रायश्चित्तप्रकारादि । अभग्नेन द्वितीयतृतीययोर्मध्ये द्वयेनान्यतरेण वा प्रवर्ग्यं चरेत् । तत्र पूर्णाहुतिहोमप्रकारः । संभ्रियमाणो महावीरो यदि भिद्यते तदा प्रायश्चित्तहोमे प्रजापतिर्देवता । निष्टिताभिमर्शनादारभ्य अजापयोऽवसेचनान्तकाले महावीरभेदने प्रायश्चित्तभेदः । तत्र प्रथमदिने भेदने प्रा० सविता देवता । द्वितीयेऽहनि भेदे अग्निर्देवता तृतीयदिने भेदने वायुर्देवता ।

अथ प्रवर्ग्याधिकारिणः । अग्निष्टोमस्याद्यसंस्थातिरात्रस्य प्रथमे प्रयोगे न प्रवर्ग्यचरणम् इत्येकः पक्षः । विकल्पेन तत्रापि प्रवर्ग्यचरणमिति शाखान्तरम् । सप्रवर्ग्ये यज्ञे दधिघर्मसम्बन्धिनीतिकर्त्तव्यता । सपवित्रायामग्निहोत्रहवन्यां दधिघर्मपहरणं कुर्यात् । तच्च यथाकथञ्चित् स्थालीमुखेनैव स्रुचि निनयेत् । प्रस्तरणाभिधारणे अप्यत्र न । हुतशेषस्य "मयि त्यदिति" मन्त्रेण भक्षणम् । तच्च महाव्रतीयेऽह्नि कर्त्तव्यम् । दधिभक्षानन्तरं चात्वाले मार्ज्जनम् । प्रवर्ग्यचरणस्यादौ अन्ते च शान्तिकाध्यायपाठः । (शान्तिकाध्यायश्च ऋचं वाचमित्याद्यध्यायः) । शान्तिकरणद्वयमध्ये द्वारपिधानोत्तरकाले आदिमम् । पात्राणामासन्द्यां निधानानन्तरमन्तिमम् इति भेदः ।

कातीयगृह्यसूत्रप्रतिपाद्यविषयाश्च विस्तरभयान्नात्रोक्तास्तत एवासेयाः । कात्यायनसर्व्वानुक्रमणिकाप्रतिपाद्यविषयाश्च सर्व्वानुक्रमणिकाशब्दे वक्ष्यन्ते ।

कात्यायनी स्त्री कतस्य गोत्रापत्यं स्त्री गर्गा० यञ् लोहितकतन्ता० ष्फः षित्त्वात् ङीष् । १ कतगोत्रापत्यस्त्रियाम् । पत्न्यां ङीष् । २ कात्यायनर्षेः पत्न्याम् ३ तत्तुल्य कषायादिवस्त्रधारिण्यामर्द्धवृद्धायां विधवायां स्त्रियां ४कल्पभेदे कतगोत्रोत्पन्नायां दुर्गायां ५ याज्ञवल्क्यर्षिपत्नीभेदे च । "याज्ञवल्क्यस्य द्वे भार्य्ये बभूवतुः मैत्रेयी कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी" छ० उ० । [यके शिवप्रणीते तन्त्रभेदे ।

कात्यायनीतन्त्र न० ६त० । कात्यायनीपूजामन्त्रादिविधा-

कात्यायनीपुत्र पु० ६त० । कार्त्तिकेये ।

काथक्य पु० स्त्री कथकस्य गोत्रापत्यं गर्गा० यञ् । कथकर्षेर्गोत्रापत्ये यूनि तु यञन्तत्वात् फक् । काथक्यायन तदीययुवगोत्रापत्ये । स्त्रियां लोहितकतान्तादि० ष्फः षित्त्वात् ङीष् । काथक्यायनी तद्गोत्रापत्यस्त्रियाम् ।

काथञ्चित्क न० कथञ्चित्+विनयादि० स्वार्थे ठक् तान्तत्वात् ठस्य कः । कथञ्चिदित्यर्थे ।

काथिक त्रि० कथायां साधु कथादि० ठक् । कथारचनासमर्थे

कादम्ब पुं०स्त्री सौ०कदि–णिच्–अम्बच् । (कालिहाँस) १हंसभेदे स्त्रियां जातित्वेऽपि संयोगोपधत्वान्न ङीष् किन्तु टाप् । तस्य च नीलवर्णत्वम् "क्वचित् खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः" सितासितगङ्गायमुनासंगमवर्णने रघुः । तद्व्या० "कादम्बसंसर्गवती नीलहंससंसृष्टा" मल्लि० । सुश्रुते हंससारसेत्युपक्रमे कादम्बस्य प्लवत्वं संघचारित्वञ्चोक्ता "रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः । सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः" इति तेषां मांसगुणा उक्ताः । २इक्षौ पु० विश्वः । ३वाणे मेदि० । "कादम्बानामेकपातैरसीव्यत्" माघः । कदम्बे समूहे भवः अण् । ५ समूहभवे त्रि० । कदम्बस्येदम् अण् । ६कदम्बसम्बन्धिनि त्रि० "कादम्बमर्द्धोद्गतकेशरञ्च" रघुः । "'कादम्बं' नीपकुसुम"मिति मल्लि० । वस्तुतः कदम्बशब्दस्य पुष्पपरत्वे कदम्बमित्येव ह्रस्वपाठः स्यात् दीर्घपाठे तु कदम्बानां कुसुमानां समूह इत्यर्थेऽण् । इति तस्य कदम्बसमूहपरतेति बोध्यम् । कदम्ब एव स्वार्थेऽण् । ७ कदम्बवृक्षे पु० "वेत्रकादम्बवल्वजकरम्भमहाकरम्भाः पञ्च पुष्पविषाणि" स्थावरविषकीर्त्तने सुश्रु० । स्वार्थे कन् वाणे हारा० ।

कादम्बर न०कादम्बं राति प्रकृतित्वेन रा-क तस्य रः । १ऐक्षवे गुडादौ, तस्य २विकारे मद्ये च । "निषेव्य मधु माधवाः सरसमत्र कादम्बरम्" माघः । तद्व्याख्यायां मल्लिनाथेनोक्ता व्युत्पत्तिरुक्ता । कादम्बं कदम्बोद्भवं रसं राति रा–क । तत्तुल्यरसयुक्ते ३दधिसरे पु० मेदि० ।

कादम्बरी स्त्री कुत्सितं मलिनमम्बरं यस्य कोः कदादेशः कदम्बरो नीलाम्बरो बलभद्रस्तस्य प्रिया अण् । हलिप्रियायाम्, मदिरायाम् । अस्यानिरुक्तिर्बलभद्रप्रियता च हरि० ९८ अ० दर्शिता यथा "अथ सङ्कर्षणः श्रीमान् विना कृष्णेन वीर्य्यवान् । चचार तस्य शिखरे नगस्य नगसन्निभः । प्रफुल्लस्य कदम्बस्य प्रच्छाये निषसाद ह । वायुना मदगन्धेन वीज्यमानः सुखेन वै । तस्य तेनानिलौघेन सेव्यमानस्य तत्र वै । मदसंस्पर्शजो गन्धः संस्पृशन् घ्राणमागतः । तृष्णा चैनं विवेशाशु वारुणीप्रभवा तदा । शुशोष च मुखं तस्य मत्तस्येवापरेऽहनि । स्मारितः स पुराष्टत्तमस्तप्राशनं

विभुः। तृषितोमदिरान्वेषी ततस्तं तरुमैक्षत। तस्य प्रावृषि फुल्लस्य यदम्भो जलदोज्झितम्। तत्कोटरस्थं मदिरा व्यजायत मनोहरा। तान्तु तृष्णाभिभूतात्मा पिबन्नार्त्तः श्वसन्नभूत्। मदाच्च चलिताकारः समजायत स प्रभुः। तस्य मत्तस्य वदनं किञ्चिच्चलितलोचनम्। घूर्णिताकारमभवच्छरत्कालेन्दुसप्रभम्। कदम्बकोटरे जाता नाम्ना कादम्बरीति सा। वारुणी रूपिणी तत् देवानाममृतारणी। कादम्बरीमदकलं विदित्वा लब्धपूर्व्वजम्। तिसृश्चिंदशनार्य्यस्ताः समुपतस्थुः प्रियंवदाः। मदिरा रूपिणी भूत्वा कान्तिश्च शशिनः प्रिया। श्रीश्च देवी वरिष्ठा स्त्री स्वयमेवाम्बुजध्वजा”। “कादम्बरीमदविघूर्णितलोचनस्य युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्” उद्भ०। तेन कादम्बं कदम्बकोटरसमुत्पत्तिस्थानत्वेन लाति ला—क लस्य रः मत्वर्थे र नेति बोध्यम्। कादम्बं रसं राति रा—क गौरा० ङीष्। २ कोकिलायाम्, ३ सरस्वत्याम्, ४ सारिकायाञ्च मेदि० बाणभट्टरचिते ५ कथाभेदे। सा च बाणभट्टेन सामिकृता तत्पुत्रेण च समाप्तिं नीता।

कादम्बरीवीज न० ६त०। मद्यसाधने किण्वादिद्रव्यभेदे रत्नमा०। [तस्य कादम्बरीमद्यहेतुत्वात् तथात्वम्।

कादम्बर्य्य पु० कादम्बर्य्यां हितं यत्। कदम्बवृक्षे जटाधरः

कादम्बा स्त्री कादम्बद्दशाचरति कदम्ब+आचारे क्विप् अच्। कदम्बपुष्प्यां (मुण्डरी) लतायां शब्दच०।

कादम्बिनी स्त्री कादम्बाः कलहंसा अनुभावकत्वेन सन्त्यस्याः इनि। मेघमालायाम् अमरः “मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी” रसग०। [ठञ्। कदलेन निर्वृत्तादौ।

कादलेय त्रि० कदलेन निर्वृत्तादि कदल+सख्या० चतुरर्थ्यां

कादाचित्क त्रि० कदाचिद्भवः कालवाचित्वात् ठञ्। कदाचित्कालभवे। “तथापि तस्य कदाचित्कतया उपचरितेन कार्य्यत्वेन कार्य्यत्वमुपचर्य्यते” सा० द०। “अनियतावधिकत्वे च कादाचित्कत्वव्याकोपः”। “अनादिरेव कार्यकारणप्रवाहः कादाचित्कत्वान्यथानुपपत्त्या कल्प्यः” इति च कुसु० हरिदासः। “अधिकरणस्य स्वाधिकरणसमयप्रागभावत्वव्यापकानुत्पत्तिकत्वे सति कादाचित्कत्वम्” दी० धि०। कादाचित्कत्वञ्च प्रागभावप्रतियोगित्वध्वंसप्रतियोगित्वान्यतरत्वम्। अन्यतरत्वनिवेशेन च ध्वंसे प्रागभावप्रतियोगित्वस्य, प्रागभावे च ध्वंसप्रतियोगित्वस्य सत्त्वान्नाव्याप्तिः नित्ये च तदुभयासत्त्वान्न प्रसङ्गः।

काद्रवेय पुंस्त्री कद्र्वाः अपत्यम् शुभ्रा० ढक्। कश्यपात् कद्र्वाः जाते सरीसृपभेदे नागे, सर्पे। स्त्रियां जातित्वात् ङीष्। “काद्रवेयाश्च बलिनः सहस्रममितौजसः। सुपर्णवशगाः नागा जज्ञिरेऽनेकमस्तकाः” हरिवं० ३अ० काश्यपपत्नीभेदकद्रूपुत्रवर्णने

कानक त्रि० कनकस्येदमण्। १कनकसम्बन्धिनि। कनकं फलमिव उग्रं फलम स्यस्य अण्। जयपालवीजे राजनि०।

कानन न० कन—दीप्तौ णिच् ल्युट् ल्यु वा। १वने, २गृहे, कस्य ब्रह्मण आननम्। ३ब्रह्मणो मुखे च मेदि०। “छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रैः” “शीतोवायुः परिणमयिता काननोदुम्बराणाम्” मेघ०। “सकानना निष्पततीव भूमिः” “पुष्पगन्धेन काननम्” रघुः।

काननाग्नि पु० ६त०। दावानले

काननारि पु० काननस्यारिरिव। शमीवृक्षे शब्दच०। शमीगर्भस्याग्निभा निखिलवनदाहात्तस्य तदरित्वम्

काननक त्रि० कनलेन निर्वृत्तादि० कनल+अरीहणा० चतुरर्थ्यां वुञ्। कनलनामजननिर्वृत्तादौ।

कानिष्ठिक न० कनिष्ठिकैव कनिष्ठिका+शर्करा० स्वार्थे अण् स्वार्थिकस्यापि प्रत्ययस्य कचित्प्रकृतिलिङ्गातिक्रमोक्तेः क्लीवता। कनिष्ठायाम्।

कानिष्ठिनेय पुंस्त्री कनिष्ठाया अपत्यं कल्याण्यादि० ढक् इनङ् च। कनिष्ठाया अपत्ये। “हते कानिष्ठिनेयस्य ज्यैष्ठिनेयोविवासितः” भट्टि० स्त्रियां ङीप्।

कानीत पु० कनीतस्यापत्यम् शिवा० अण्। कनीतनामकस्यापत्ये पृथुश्रवसि राज्ञि। “पृथुश्रवसि कानीते स्था व्युष्टादरे” ऋ० ८,४६,२१।

कानीन पु० कन्याया अनूढाया अपत्यम् अण् कनीनादेशश्च। “कानीनः कन्यकाजातो मातामहसुतो मतः” इति याज्ञ० उक्ते पुत्रभेदे। यथा व्यासः कर्णश्च। याज्ञ० मातामहसुतत्वमुक्तम्। मनुना तु “पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः। तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्” इत्यनेन वोढुः सुतत्वमुक्तम्। अनयोर्विरोधः अभ्युपगमानभ्युपगमाभ्यामन्यतरयोः सपुत्रापुत्रत्वाभ्यां वा समाधेयः। “कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च शौद्रश्च षड्दायादबान्धवाः” इति मनुना तस्यादायाद बन्धुत्वमुक्तम्।

कर्णस्य यथा कानीनत्वं तथा दृष्णातलजयशब्दे २५८६पृ० उक्तम्। “कानीनश्चापि जानामि सवितुः प्रथमं सुतम्। पितृम्बसुः

कथं वै प्रसूतं सुततां गतम्” हरि० ६०अ०। ‘भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुदवाहयत् यामाहु-र्गन्धकालीमिति। तस्यां पूर्व्वं कानीनो गर्भो पराशराद् द्वैपायनोऽभवदिति” भा० आ० ९५ अ०। व्यासस्य कानीनत्वमुक्तम्।

कान्त पु० कन-दीप्तौ कम–वा क्त। १, पत्यौ “कान्तवत्स-स्थलास्थिता” उद्भटः। “शिवरात्रौ ददाम्यर्घमुमाकान्त! गृहाण मे” शिवार्घदानमन्त्रः। सूर्य पूर्व्वकः सूर्यका-न्तशिलायाम्, चन्द्रपूर्व्वकः चन्द्रकान्तमणौ, अय·पूर्वः अयस्कान्तमणौ (चुम्बकपाथर) २चन्द्रे ३वसन्ते ४हिज्जल-वृक्षे च। ५कुङ्कुमे, न० ६शोभने, “कान्तालकान्ताललनाः सुराणाम्” माघः “नात्र कान्तमुपगीतया तया” माघः। ७अभीष्टे च त्रि०। “भीमकान्तैर्नृपगुणैः” रघुः। ८नार्य्यां, ९प्रियङ्गुवृक्षे च स्त्री। मेदि० १०बृहदे-लायां ११रेणुकौ षधौ १२ नागरमुस्तायां स्त्री राज-नि०। १३सुखसाने १४लोहभेदे न० भावप्र० तस्य लक्षणगुणादि तत्रोक्तं यथा

“यत्पात्रे न प्रसरति जले तैलविन्दुः प्रतप्ते, हिङ्गुर्गन्धं त्यजति च निजं तिक्ततां निम्बकल्कः। तप्तं दुग्धं भवति शिखराकारकं, नैति भूमिं, कृष्णं न·स्यात् सजलकणतः कान्तलोहं तदुक्तम्”। मारितस्य चूर्णीकृतस्य तस्य सेवने गुणा उक्तास्तत्रैव “गुल्मोदरार्शःशूलाममामवातं भगन्द-रम्। कामलाशोथकुष्ठानि क्षयं कान्तमयो हरेत्। प्लीहान-मम्लपित्तञ्च यकृच्चापि शिरोरुजम्। सर्व्वान्रोगान् विजयते कान्तलोहं न संशयः। बलं वीर्य्यं वपुः पुष्टिं कुरुतेऽग्निं विवर्धयेत्”। तत्रैव सामान्यलोहमारणविधिगुणादि।

“शुद्धं लोहभवं चूर्णं पातालगरुडीरसैः। मर्द्दयित्वा पुटेदग्नौ दद्यादेवं पुटत्रयम्। पुटत्रयं कुमार्य्याश्च कुठार-च्छिन्निकारसैः। पुटषट्कं ततोदद्यादेवं तीक्ष्णमृतिर्भवेत्”। अन्यच्च। “क्षिपेद्द्वादशमांशेन दरदं तीक्ष्णचूर्णतः। मर्द्दयेत्कन्यकाद्रावैर्यामद्वयं ततः पुटेत्। एवं सप्तपुटै-र्मृत्युं लोहचूर्णमवाप्नुयात्। सत्यानुभूतो योगीन्द्रैः क्रमोऽन्योलोहमारणे। कथ्यते रसराजेन कौतूहलधि-याऽधुना। सूतकात् द्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्। द्वयोः समं लोहचूर्णं मर्द्दयेत्कन्यकाद्रवैः। यामद्वयं ततः पिण्डं कृत्वा ताम्रस्य पात्रके। घर्म्मे धृत्वा रुचूकस्य पत्रैराच्छादयेद्बुधः। यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसे-त्ततः। दत्त्वोपरि शरावं तु त्रिदिनान्ते समुद्धरेत्। पिष्ट्वा च गालयेद्वस्त्रादेवं वारितरं भवेत्। दाड़िमस्य दलं पिष्ट्वा तच्चतुर्गुणवारिणा। तद्रसेनायसञ्चूर्णं सर्द्दीय प्लावयेदिति। आतपे शोषयेत्तच्च पुटेद्देवं पुनः पुनः। एकविंशतिवारै-स्तन्म्रियते नात्र संशयः। एवं सर्व्वाणि लोहानि स्वर्णा-दीन्यपि मारयेत्”। एवं मारितस्य लौहस्य गुणाः। “लोहं तिक्तं सरं शीतं कषायं मधुरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तज्वरं शूलं शोफार्शःप्ली-हपाण्डुताः। मेदोमेहक्रिमीन् कुष्ठं तत्किट्टं तद्वदेव हि। गुञ्जामेकां समारभ्य यावत् स्युर्नवरत्तिकाः। तावल्लोहं समश्नीयाद्यथादोषानलं नरः। कुष्माण्डं तिलतैलं च माषान्नं राजिकां तथा। मद्यमम्लरसञ्चैव वर्जयेल्लोह सेवकः। शिलागन्धार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः। म्रियन्ते द्वादशपुटैः सत्यं गुरुवचो यथा”।

“कामे कान्ते रसिका काकुरुतेन” माघः। “कान्ताजनेन रहसि गृहीता।” “वपुष्यशेषेऽखिललोककान्ता सानन्य-कान्ताह्युरसीतरा तु”। माघः कं ब्रह्माणमन्तयति द्विप-रार्द्धकाले। १५ वासुदेवे परमेश्वरे पु० “कामदेवः काम-पालः कामी कान्तः कृतागमः” विष्णुस०। १६ पत्यां स्त्री “सा कान्ते पर्वसान्ते पर्य्याकाशे देशे स्वास्थोः” ज्यो०त० “कान्तया कान्तसंयोगे किमकारि नवोढया” विदग्धमु०। १७ कार्त्तिकेये पु०। “आग्नेयश्चैव स्कन्दश्च” इत्युपक्रमे “कामजित् कामदः कान्तः” इत्युक्त्वा। “नामान्येतानि दिव्यानि कार्त्तिकेयस्य यः पठेत्” भा०वन० २३२अ०। “भवेत् कान्ता युगरसहयैर्यनौ नरसा लगौ” इत्युक्तलक्षणे १८छन्दोभेदे स्त्री। १९कामदेवभेदे पु० कामशब्दे विवृतिः।

कान्तपक्षिन् पु०स्त्री कान्तोमनोहरः पक्षोऽस्त्यस्य प्राशस्त्येन इनि। मयूरे शब्दच०स्त्रियां ङीप्।

कान्तपुष्प पु० कान्तं पुष्पमस्य। कोविदारवृक्षे। राजनि०।

कान्तलक पु० कान्तं लक्यते लक–आस्वादने कर्मणि घञर्थे क। (तुंद) तुन्नवृक्षे अमरः।

कान्तलोह पु० कान्तं प्रियं लोहं यस्य। अयस्कान्ते। कर्म्म०। (कान्तिलौह) लोहसारे। कान्तशब्दे तद्गुणाद्युक्तम्।

कान्ताङ्घ्रिदोहद पु० कान्ताङ्घ्रिस्तत्ताड़नं दोहदमस्य पुष्पो-द्गमे। अशोकवृक्षे त्रिका०। यथा च तस्य तथात्वं तथा-ऽशोकशब्दे ४८५पृ० उक्तम् कान्तापाददोहदादयोऽप्यत्र।

कान्तायस न० नित्यकर्म० जातित्वात् अच् समा०। कान्त-लोहे राजनि०।

कान्तार पु० कान्ता अभीष्टा अराइव यन्त्रयोऽस्य, कस्य जल-

स्यान्तं कान्तं मनोज्ञं वा रसम् ऋच्छति ऋ-अण् उप० स०। (काजलिया) १इक्षुभेदे भावप्र०। तत्र तद्गुणाद्युक्तम् "कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलोऽथ बृंहणःसरः। २कोविदारवृक्षे ३वंशे च राजनि०। कस्य सुखस्यान्तमृच्छत्यत्र ऋ—आधारे घञ्। ईत०। दुर्गमे पथि ४महारण्ये च पु० न० अमर० ६छिद्रे मेदि०। स्वार्थे कन् इक्षुभेदे अमरः।

कान्तारपथिक त्रि० कान्तारपथेनाहृतम् ठञ्। कान्तारपथेनाहृते।

कान्तारी स्त्री कान्तार+गौ० ङीष्। कान्तारेक्षौ राजव०।

कान्ति स्त्री कम—कामे कन—दीप्तौ वा भावे क्तिन्। १दीप्तौ २शोभायाम् ३इच्छायाम् ४स्त्रीणां शृङ्गारजे सौन्दर्यं गुणभेदे च। कान्तौ कारणं च सुश्रुते दर्शितं यथा "तेजोऽप्याग्नेयं क्रमशः पच्यमानानां धातूनामभिनिर्वृत्तमन्तरस्थं स्नेहजातं रसाख्यं स्त्रीणां विशेषतो भवति तेन मार्द्दवसौकुमार्य्यमृदल्परोमतातुष्टाहृष्टिस्थितिपङ्क्तिकान्तिदीप्तयो भवन्ति"। एतस्य तैजसत्वेन कान्तिदत्वम् यथोक्तं तत्रैव "एतन्तु" इत्युपक्रम्य "कृतिमतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोवलकरम्"। शोभाकान्तिदीप्तिद्युतीनां भेदस्तु सा०द० उक्तः "रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम्। शोभा प्रोक्ता, सैव कान्तिर्मन्मथाप्यायिता द्युतिः। कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते"। इति भेदेन लक्षयित्वा मन्मथोन्मेषेणातिविस्तीर्णा शोभैव कान्तिरुच्यते इति व्याख्यातम्। तेषां च नायिकागततेव नायकगततापि। चन्द्रादौ तु शोभादीप्तिकान्तिद्युतीनामभेद एव। "कला च सा कान्तिमती कलाभृतः" कुमा०। "बभ्रा इवाध्वंसितवर्णकान्तेः" माघः। चन्द्रकलासु मध्ये ७कलाभेदे। "शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना" शा०ति०। कलाशब्दे विवृतिः। ८लक्ष्म्या अनुचरदेवीभेदे "एवमुक्ता तु सा देवी लक्ष्मीर्दैत्यवृषं बलिम्। प्रविष्टा" इत्युपक्रमे "धिष्टाश्च देव्यः प्रवरा ह्रीः कीर्त्तिर्द्युतिरेव च" इत्याद्युक्त्वा "श्रुतिः प्रीतिरिडा कान्तिः" इत्यादिकमभिधाय "उपतस्थुर्महासत्वं वलभिन्द्रं महारथम्" इत्युक्तम् हरि०२५६अ०। ९ शशिनः प्रियाभेदे च "तिस्रस्त्रिदशनार्य्यस्तम्" इत्युपक्रमे "मदिरा रूपिणी भूत्वा कान्तिश्च शशिनः प्रिया" हरि० ६८ अ०। १०दुर्गायां "स्तुतिः सिद्धिरिति ख्याता श्रिया संश्रयणाच्च या। लक्ष्मीर्वा ललना वापि कामात् सा कान्तिरुच्यते" देवीपु० ४५अ०। ११कामशक्तिभेदे। "तथा कान्तिः कलकण्ठी इकोदरा" शा० ति० राघवभट्टः। कामशक्तिशब्दे विवृतिः।

कान्तिद न० कान्तिं ददाति दा—क। १पित्ते धातौ शब्द च० तस्य तैजसत्वात् तथात्वम्। तेजसश्च यथा कान्तिकरत्वं तथा कान्तिशब्दे उदाहृतसुश्रुतवाक्ये दर्शितम्। २घृते च। ३शोभादायकमात्रे त्रि० कान्तिकरादयोऽप्यत्र। ४सोमराज्यां स्त्री राजनि०।

कान्तिदायक न० कान्तिं ददाति दा-ण्वुल्। कालीयके गन्धद्रव्यभेदे जटाधरः। तस्य सेवनेन कान्तिपोषणात् तस्य तथात्वम्। २कान्तिदातरि त्रि०।

कान्तिनगरी स्त्री काञ्चिनगर्य्यां काशी० मोक्षपुरीभेदकाञ्ची नगरीवर्णने कान्तिपुरीति पाठान्तरम् काञ्चीशब्दे च तद्वाक्यमुक्तम्।

कान्तिभृत् त्रि० कान्तिं बिभर्त्ति भृ-क्विप्। १कान्तिधारके २चन्द्रे पु० तस्य कान्तिनामकलाधारित्वात् विशिष्टकान्तिधारित्वात् कान्तिनामदेवीभेदपतित्वाच्च तथात्वम्। कान्तिशब्दे च कान्तिशब्दस्य कलाचन्द्रपत्नीवाचकत्वं दर्शितम्।

कान्तिमत् कान्तिरस्त्यस्य मतुप्। १कान्तियुक्ते। "उपमानमभूत् विलासिनां करणं यत्तव कान्तिमत्तया" कुमा०। "शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत् खण्डमेकम्" मेघदू० स्त्रियां ङीप् "कला च सा कान्तिमती कलाभृतः" कुमा०। २ अप्सरोभेदे स्त्री "वपुष्मती कान्तिमती लीलावत्युत्पलावती" काशी० अप्सरोनामकथने। ३चन्द्रे पु० कान्तिनामकलावत्त्वात् तस्य तथात्वम्। ४कामदेवभेदे राघवभ०।

कान्यक त्रि० "वर्णुसमीपस्था कन्था ततो जातादौ वर्णौ वुक्" पा० वुक्। वर्णुनदसमीपस्थकन्थाजातादौ। "यथाहि जातं हिमवत्सु कान्यकम्" सि०कौ०

कान्यक्य पु० स्त्री कन्यकर्षिभेदस्य गोत्रापत्यं गर्गा० यञ्। कन्यकर्षिगोत्रापत्ये। यून्यपत्ये यञन्तत्वात् फक्। कान्यक्यायनः बहुषु तस्य लुक्। कन्यकाः। स्त्रियान्तु लोहिता० ष्फः षित्त्वात् ङीष्। कान्यक्यायनी।

कान्यिक त्रि० कन्यायां जातादि ठक्। कन्याभवे।

कान्द त्रि० कन्दस्येदं तत्र भवो वा अण्। १ तत्सम्बन्धिनि २कन्दभवे विषादौ च। ततः अश्मादि० चतुरर्थ्यां र। कान्दर तन्निर्वृत्तादौ त्रि०।

कान्दर्प पुंस्त्री कन्दर्पस्यापत्यं बिदादौ किन्दर्भेत्यत्र कन्दर्पेति पाठान्तरे अञ्। कन्दर्पापत्ये तस्येदमण्। २ कन्दर्पसम्बन्धिनि त्रि०।

कान्दर्पिक न० कन्दर्पस्तद्वृद्धिः प्रयोजनमस्य ठक् । कन्दर्पवृद्धिसाधने हे०स० उक्ते विधानभेदे । तद्विधानं च तत्र कान्दर्पिकनामकषट्सप्ततितमेऽध्याये उक्तं यथा । "रक्तेऽधिके स्त्री, पुरुषस्तु शुक्रे, नपुंसकं शोणितशुक्रसाम्ये । यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि । हर्म्यं पृष्ठमुडुनाथरश्मयः सोत्पलं मधु मदालसा प्रिया । वल्लकी स्मरकथा रहः स्रजो वर्ग एष मदनस्य वागुरा । माक्षीकधातुमधुपारदलोहचूर्णपथ्याशिलाजतुविडङ्गघृतानि योऽद्यात् । स एकविंशतिरहानि जरान्वितोऽपि सोऽशीतिकोऽपि रमयत्यबलां युवेव । क्षीरं घृतं यः कपिकच्छुमूलैः पिबेत् क्षयं स्त्रीषु न सोऽभ्युपैति । माषान् पयःसर्पिषि वा विपक्वान् षड्ग्रासमात्रांश्च पयोऽनुपानान् । विदारिकायाः स्वरसेन चूर्णं सुबहुशो भावितशोषितं च । घृतेन दुग्धेन सशर्करेण पिबेत्स यस्य प्रमदाः प्रभूताः । धात्रीफलानां स्वरसेन चूर्णं सुभावितं क्षौद्रसिताज्ययुक्तम् । लीढ्वानुपायाथ पयोऽग्निशक्त्या कामं निकामं पुरुषो निषेवेत् । क्षीरेण वस्ताण्डयुजा घृतेन समृद्धाव्य कामो बहुशस्तिलान् यः । सुशोषितानत्ति पिबेत्पयश्च तस्यायतः किं चटकः करोति । माषसूपसहितेन सर्पिषा षष्टिकौदनमदन्ति ये नराः । क्षीरमप्यनुपिबन्ति तास्तु ते शर्वरीषु मदनेन शेरते । तिलाश्वगन्धाकपिकच्छुमूलैर्विदारिकाषष्टिकपिष्टयोगः । आजेन पिष्टा पयसा घृतेन पक्वा भवेच्छष्कुलिकाऽतिवृष्या । क्षीरेण वा गोक्षुरकोपयोगं विदारिकाकन्दकभक्षणं वा । कुर्वन्न सीदेद्यदि जीर्यतेऽस्य मन्दाग्निता चेदिदमत्र चूर्णम् । साजमोदलवणा हरीतकी शृङ्गवेरसहिता च पिप्पली । मद्यतक्रतरलोष्णवारिभिश्चूर्णपानमुदराग्निदीपनम् । अत्यम्लतिक्तलवणानि कटूनि शक्तिसक्षारशाकबहुलानि च भोजनानि । हृक्छुक्रशौर्यरहितः स करोत्यनेकान् व्याजान् जरन्निव युवाप्यबलामवाप्य" । भावप्र० तदुपायविधानाद्युक्तं यथा । "अथ वाजीकरणाधिकारः । तत्र वाजीकरणस्य लक्षणमाह । यद्द्रव्यं पुरुषं कुर्याद्वाजीव सुरतक्षमम् । तद्वाजीकरमाख्यातं मुनिभिर्भिषजां वरैः । अत्र प्रसङ्गात् क्लैव्यस्य लक्षणं संख्यां निदानं चाह । क्लीवः स्यात् सुरताशक्तस्तद्भावः क्लैव्यमुच्यते । तच्च सप्तविधं प्रोक्तं निदानं तस्य कथ्यते । तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते । ध्वजः पतत्यतो नृणां क्लैव्यं समुपजायते । द्वेष्यस्त्रीसंप्रयोगाच्च क्लैव्यं तन्मानसं स्मृतम् । तैस्तैर्भावैः—भयशोकक्रोधादिभिः,—अहृद्यैः—हृदयाहितैः—दुःस्थत्वात् क्षते पीड़िते अस्वस्थीकृते इति यावत् । ध्वजः—शिश्नः । पतति नतत्वमेति संप्रयोगो मैथुनम् । "कटुकाम्लोष्णलवणैरतिमात्रोपसेवितैः । पित्ताच्छुक्रक्षयो दृष्टः क्लैव्यं तस्मात्प्रजायते । कटुकादिनातिमात्रेण प्रवृद्धेन पित्तेन शुक्रस्य दग्धत्वात् क्लैव्यं भवति पित्तजमिति द्वितीयम् । अतिव्यवायशीलो यो न च वाजीक्रियारतः । ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकः । शुक्रक्षयेण तृतीयम् । "महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत् । वीर्यवाहिशिराच्छेदान्मेहनादुन्नतिर्भवेत् । बलिनः क्षुब्धमनसो निरोधाद्ब्रह्मचर्यतः । षष्ठं क्लैव्यं स्मृतं तत्तु शुक्रस्तम्भनिमित्तकम् । बलिनः पुष्टस्य क्षुब्धमनसः कामात्तं चलतः मनसो, ब्रह्मचर्यम् अमैथुनं तस्मान्निरोधात् शुक्रस्य, क्लैव्यं भवति । जन्मप्रभृति यत्क्लैव्यं सहजं तद्धि सप्तमम् । असाध्यं क्लैव्यमाह । असाध्यं सहजं क्लैव्यं मर्मच्छेदाच्च यद्भवेत् । मन्मर्मच्छेदाद्वीर्यवाहिशिराच्छेदात् अथ क्लैव्यस्य चिकित्सा । क्लैव्यानामिह साध्यानां कार्यो हेतुविपर्ययः । मुख्यं चिकित्सितं यस्मान्निदानपरिवर्ज्जनम् । अथ क्लैव्यस्य चिकित्सायां वाजीकरणविधिमाह । नरो वाजीकरान् योगान् सम्यक् शुद्धो निरामयः । सप्तत्यन्तं प्रकुर्वीत वर्षादूर्ध्वन्तु षोड़शात् । नच वै षोडशादर्वाक् सप्तत्याः परतो न च । आयुष्कामो नरः स्त्रीभिः संयोगं कर्तुमर्हति । क्षयवृद्ध्युपदंशाद्या रोगाश्चातीव दुर्ज्जयाः । अकालमरणञ्च स्याद्भजते स्त्रियमन्यथा । विलासिनामर्थवतां रूपयौवनशालिनाम् । नराणां बहुभार्य्याणां विधिर्वाजीकरो हितः । स्थविराणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छताम् । योषित्प्रसङ्गात् क्षीणानां क्लीवानामल्परेतसाम् । हिता वाजीकरा योगाः प्रीणयन्त्यबलाः सदा । एतेऽपि पुष्टदेहानां सेव्याः कालाद्यपेक्षया । वाजीकरणान्याह । भोजनानि विचित्राणि पानानि विविधानि च । गीतं श्रोत्राभिरामाश्च वाचः स्पर्शसुखास्तथा । यामिनी चान्द्रतिलका कामिनी नवयौवना । गीतं श्रोत्रमनोज्ञञ्च ताम्बूलं मदिराः स्रजः । गन्धा मनोज्ञा रूपाणि चित्राण्युपवनानि च । मनसश्चाप्रतीघातं वाजी कुर्व्वन्ति मानवम् । माक्षीकधातुमधुपारदलोहचूर्णम् पथ्याशिलाजतुविडङ्गघृतानि लिह्यात् । एकाग्रविंश-

तिदिनानि गदार्दितोऽपि साशीतिकोऽपि रमयेत्प्रमदां युवेव"। तत्रौषधभेदास्तु तत एवावसेयाः।

कान्दव न० कन्दौ संस्कृतं भक्ष्यम् अण्। कन्दुसंस्कृते भक्ष्ये

कान्दविक त्रि० कान्दवं पण्यमस्य ठक्। कन्दुसंस्कृतभक्ष्यद्रव्यविक्रेतरि मिष्टान्नपण्यके।

कान्दिग्भूत त्रि० कां दिशं यामीत्याकुलतां भूतः प्राप्तः भू—प्राप्तौ कर्त्तरि क्त २त० पृषो०। कां दिशं यामीत्याकुलतं प्राप्ते। "स कथञ्चिद्भयात्तस्माद्दिक्तो ब्राह्मणस्तदा। कांदिग्भूतो जीवितार्थी प्रदुद्रावोत्तरां दिशम्" भा० शा० प० १६८अ०। "कां दिशं यामीत्याकुलः कान्दिग्भूतः" नीलक०। "कान्दिग्भूतं छिन्नगात्रं विसंज्ञं दुर्य्योधनो द्रक्ष्यति सर्व्वसैन्यम्" भा० उद्यो० ४७अ०।

कान्दिशीक त्रि० कां दिशं यामीत्याह "तदाहेति माशब्दादिभ्यः" उपसंख्यानात् ठक् पृषो० मयू० आकृतिगणत्वात् समासः। कदि-वैक्लव्ये भावे इन् कन्दिः वैक्लव्यम्। शीक सेचने क्षरणार्थत्वादश्रुपातार्थकता भावे घञ् कन्दिश्च शीकः अश्रुपातश्च विद्येते अस्य बा० अण् रायमुकुटः। भयद्रुते पलायिते अमरः। "बहूनां प्रलयोजातः कान्दिशीकमभूज्जगत्" काशी०।

कान्यकुब्ज पु० देशभेदे कन्यकुब्जशब्दे विवरणम्। "कान्यकुब्जे महानासीत् पार्थिवोभरतर्षभ!। गाधीति विश्रुतो लोके कुशिकस्यात्मसम्भवः" भा० व० १७४अ०।

कान्यजा स्त्री कात् जलादन्यस्मात् जायते जन—ड। नली नामगन्धद्रव्ये शब्दच०।

कापटव पुंस्त्री कापटोर्गोत्रापत्यम् अण्। १कापटुगोत्रापत्ये स्त्रियां तु गोत्रप्रत्ययान्तत्वेन जातित्वेऽपि न ङीष्। किन्तु शार्ङ्गरवादि० ङीन् स्वरे भेदः। कापटवी। गोत्रान्तत्वात् तत आगतेऽर्थे वुञ्। कापटवक ततआगते। कुत्सितः पटुः कापटुस्तस्य भावः कर्म्म वा अण्। कापटव २ निन्दितपटुतायां न०।

कापटिक त्रि० कपटेन चरति ठक्। १कपटव्यवहारिणि "कृत्स्नं चाष्टविधं कर्म पञ्चवर्गञ्च तत्त्वतः" इति ७।१५४ श्लोकव्या० कापटिकोदास्थितगृहपतिवैदेहिकतापसव्यञ्जनात्मकं पञ्चविधं चारवर्गं पञ्चवर्गशब्दवाच्यं तत्त्वतश्चिन्तयेत् तत्र परमर्म्मज्ञः प्रगल्भश्छात्रः कपटव्यवहारित्वात् कापटिकस्तं हृत्यर्थिनमर्थमानाभ्यामुपगृह्य राजा ब्रूयात् यस्य दुर्वृत्तं पश्यसि तत्तदानीमेव मयि वक्तव्यमिति" कुल्लू० उक्ते राज्ञः पञ्चवर्गान्तर्गते २छात्ररूपे चारभेदे पु०।

कापथ पु० कुत्सितः पन्थाः अच् समा० कादेशः। १ निन्द्यवर्त्मनि अमरः। "आस्थाव कापथं दुष्टं विषमं बहुकण्टकम्" रामा०। दुष्टपथवर्त्तिनि २ दानवभेदे च पु०। "शरभः शलभश्चैव कुपथः कापथः क्रथः" इति हरि० २६२अ० दानवनामकथने। ३ उशीरे न० मेदि०। कापथजातत्वात्तस्य तथात्वम्।

कापा स्त्री कम् सुखमाप्यतेऽनया आप—करणे घञ् ६त०। प्रातःप्रबोधकवन्दिवाण्याम्। "प्रातर्जरेथे जरणेव कापया" ऋ० १०।४०।३। प्रातःप्रबोधकस्य वन्दिनो वाणी कापा तया" भा०।

कापाटिक न० कपाटिकैव शर्करा० स्वार्थे अण् स्वार्थिकस्यापि क्वचिल्लिङ्गातिक्रमोक्तेः क्लीवता। क्षुद्रकपाटे।

कापाल न० कपालमेव तस्येदं वा अण्। १ कपालरूपाकारे कुष्ठभेदे कपालशब्दे उदा०। २ कपालसम्बन्धिनि तन्निर्मिते भूषणादौ च। "त्रिशूलमस्त्रं घोरञ्च कापालमथ कङ्कणम्" विक्रमो०। (कालियाखड़ा) ३ कर्कटाह्वे पु० रत्नमा०। गौरा० ङीष्। ४ विड़ङ्गायां स्त्री राजनि०।

कापालिक त्रि० कपालेन नृकपालेन चरति अभ्यवहारादिकं करोति ठक्। १ शैवाचारभेदयुक्ते सिद्धान्तिभेदे तेषामाचारश्च। "नरास्थिमालाकृतभूरिभूषणः श्मशानवासी नृकपालभोजनः"। "पश्यामि योगाञ्जनशुद्धदर्शनो जगन्मिथोभिन्नमभिन्नमीश्वरात्"। तस्य धर्मभेदः प्रबोधच० वर्णितो यथा। "मस्तिष्कान्त्रवसाभिघारितमहामांसाहुतीर्जुह्वतां वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा। सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैरर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः" इति। "अथ तीर्थकराग्रणीः प्रतस्थे बहुकापालिकजालकं विजेतुम्" शङ्करदिग्विजयः। २ अन्त्यजजातिभेदे (कपालि) पु० स्त्री०। स्त्रियां ङीष्। अन्त्यजशब्दे कपालिन्शब्दे च विवृतिः। कपालिकैव शर्करा० अण्। ३ क्षुद्रकपाले न०।

कापालिन् पु० कापालं कपालं ब्रह्मकपालं व्रते धार्य्यत्वेनास्त्यस्य इनि। ब्रह्मशिरोहरणजपापापनुत्तये व्रतार्थं ब्रह्मकपालधारिणि १शिवे। "अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः" भा० अनु० १७अ० शिवसहस्रनामकथने। वासुदेवस्य २ पुत्रभेदे। "कौशिक्यां सुतसोमायां यौधिष्ठिर्य्यां युधिष्ठिर!। कापाली गरुडश्चैव जज्ञाते चित्रयोधिनौ" हरि० १६२अ०। (कपालि) ३जातिसङ्करे अन्त्यजभेदे पुंस्त्री। स्त्रियां ङीप्। "नटी कापालिनी वेश्या कुलटा नाप-

ताङ्गना” तन्त्रसारे सप्तकुलनायिकाकीर्त्तने ।

कापिक पु० कपिरेव अङ्गुल्यादि० ठक् । कपिशब्दार्थे

कापिञ्जल पुंस्त्री कपिञ्जलस्यापत्यं शिवा० अण् । कपिञ्जलस्यापत्ये स्त्रियां ङीप् ।

कापिञ्जलादि पुंस्त्री कपिञ्जलान् तन्मांसान्यत्ति अद–अण् उप०स० कपिञ्जलादस्तस्यापत्यम् “अत इञ्”पा० इञ् । कपिञ्जलपक्षिमांसभक्षकस्यापत्ये स्त्रियां ङीप् । तस्यापत्यम् कुर्व्वादि० ण्य । कापिञ्जलाद्य तदपत्ये पुंस्त्री ।

कापित्थ न० कपित्थस्य विकारः अनुदात्तादित्वात् “अनुदात्तादेश्च” पा० अञ् । कपित्थविकारे

कापिल त्रि० कापिलं तदुक्तशास्त्रं वेत्त्यधीते वाऽण् । १कपिलशास्त्रज्ञे २ तदध्येतरि च हेम० । कपिलेन प्रोक्तम् अण् तस्येदं वा अण् । ३कपिलप्रोक्ते ४तत्सम्बन्धिनि शास्त्रे न० कपिलशब्दे तत्प्रोक्तविषया दर्शिताः । “मार्गज्ञाः कापिलाः सांख्याः” भा० शा० ३०२ । “बुद्धिश्च परमा यत्र कापिलानां महात्मनाम्” “पितुर्नियोगाज्जपाह शुको धर्म्मभृतां वरः । योगशास्त्रं च निखिलं कापिलञ्चैव भारत !” भा० शा० ३२७ अ० । स्वार्थेऽण् । ५पिङ्गलवर्णे पु० ६तद्वति त्रि० भरतः कपिलमधिकृत्य कृतोग्रन्थः अण् । ६कपिलाधिकारेण कृते उपपुराणभेदे “अन्यान्युपपुराणानि मुनिभिः कथितानि तु” इत्युपक्रम्य “कापिलं मानवञ्चैव तथैवोशनसेरितम्” । हेमा० दा० ख० कूर्म्मपु० उपपुराणगणने उक्तम्

कापिलिक पुंस्त्री कपिलिकायाः कपिलवर्णायाः अपत्यम् शिवा० अण् । कपिलिकाया अपत्ये स्त्रियां ङीप् ।

कापिलेय पु० कपिलायाः तन्नाम्न्या ब्राह्मण्या अपत्यम् ढक् । कपिलानाम्न्याः स्तनपायित्वेन तदपत्ये ब्राह्मणाः कपिलशिष्ये मुनिभेदे । तस्य वृत्तान्तादिकं भा० शा० २१८अ० वर्णितं यथा “तत्र पञ्चशिखो नाम कापिलेयो महामुनिः । परिधावन् महीं कृत्स्नां जगाम मिथिलामथ । सर्वसंन्यासधर्म्माणां तत्त्वज्ञानविनिश्चये । सुपर्यवसितार्थश्च निर्द्वन्द्वोनष्टसंशयः । ऋषीणामाहुरेकं तु यं कामानावृतं नृप । शाश्वतं सुखमत्यन्तमन्विच्छन्तं सुदुर्लभम् । यमाहुः कपिलं सांख्याः परमर्षिं प्रजापतिम् । समन्ये तेन रूपेण विस्मापयति हि स्वयम् । आसुरेः प्रथमं शिष्यं यमाहुश्चिरजीविनम् । पञ्चस्रोतसि यः सत्रमास्ते वर्षसहस्रिकम् । यत्र चासीनमागम्य कापिलं मण्डलं महत् । पञ्चस्रोतसि निष्णातः पञ्चरात्रविशारदः । पञ्चज्ञः पञ्चकृत् पञ्चगुणः पञ्चशिखः स्मृतः । पुरुषावस्थमव्यक्तं परमार्थं न्यवेदयत् । इष्टसत्रेण संसृष्टो भूयश्च तपसाऽऽसुरिः । क्षेत्रक्षेत्रज्ञयोर्व्यक्तिं बुबुधे देवदर्शनः । यत्तदेकाक्षरं ब्रह्म नानारूपं प्रदृश्यते । आसुरिर्मण्डले तस्मिन् प्रतिपेदे तदव्ययम् । तस्य पञ्चशिखः शिष्यो मानुष्या पयसा भृतः । ब्राह्मणी कपिला नाम काचिदासीत् कुटुम्बिनी । तस्याः पुत्रत्वमागम्य स्त्रियाः स पिबति स्तनौ । ततः स कापिलेयत्वं लेभे बुद्धिं च नैष्ठिकीम् । एतन्मे भगवानाह कापिलेयस्य संभवम् । तस्य तत् कापिलेयत्वं सर्ववित्त्वमनुत्तमम्” ।

व्याख्यातञ्चैतत् नीलकण्ठेन यथा “कापिलेयः कपिलायाः पुत्रः परिधावन् एकत्र वासमकुर्वन् । सुपर्यवसितार्थः सम्यग्निश्चितप्रयोजनः । कामैरनावृतं कामादवसितं निर्मितपाठे यदृच्छया स्थितं नृप सुखम् अन्विच्छन्तं स्थापयितुमिति शेषः । सः कपिलः, तेन पञ्चशिखसंज्ञेन तत्प्राशिष्यत्वात्तत्तुल्यत्वम् । पञ्च स्रोतांसि विषयकेदार प्रणाडिकाः यस्य तस्मिन् मनसि मानसं सत्रमित्यर्थः । यत्र यत्समीपे, कापिलं कपिलमतानुसारि मण्डलं मुनिसमूहं प्रति परमार्थं यो न्यवेदयदित्युत्तरेण सम्बन्धः । पञ्चस्रोतसि मनसि निष्णातः ऊहापोहकौशलवान् । पञ्चरात्रो नाम विष्णुत्वप्रापकः क्रतुः “पुरुषोह वै नारायणोऽकामयतात्यतिष्ठेयं सर्वाणि भूतान्यहमेवेदं सर्वं स्यामिति सएतं पञ्चरात्रं पुरुषमेधं यज्ञक्रतुमपश्यदिति” शतपथोक्तस्तत्र विशारदः अनुष्ठिताखिलकर्मेत्यर्थः । पञ्च अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयान् कोषान् मिथ आत्मनश्च विविक्तान् जानातीति पञ्चज्ञः अतएव पञ्चकृत् पञ्च तद्विषयान्युपासनानि “भृगुर्वै वारुणिरित्यस्यामुपनिषदि “सतपस्तप्त्वाऽन्नं ब्रह्मेति व्यजानदित्यादि” विहितानि करोति पञ्चकृत्, पञ्च “शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति स्मृताः शान्त्यादयो गुणाः यस्मिन् स पञ्चगुणः ततश्च “ब्रह्मविद्ब्रह्मैव भवतीति” श्रुतेः पञ्चभ्योऽतिरिच्यमानत्वात् शिखेवेति पञ्चशिखं पुच्छं ब्रह्म तज्ज्ञत्वात् मुनिरपि पञ्चशिखः । ननु पञ्चकृत् कथं षड्ज्ञः स्यादिति चेत् ? शृणु–यथान्नमयं विकारमुपासीनस्तत्प्रकृतिमन्नं विराडाख्यमेति एवं मायया विकृतमानन्दं तत्पतिमेतीति न षष्ठोपास्तिः पृथग्वक्तव्या । षड्ज्ञानाय तस्य पञ्चमोपास्तिफलत्वात् तदेतदाह पुरुषेति । पुरुषा अन्नमयादयः

पञ्च अवभत्तनतया बाधिततया तिष्ठन्तीत्यविभन्निति पुरुषावस्यम् अतएव शिरआद्यवयवरहितत्वादव्ययम् अबाध्यत्वाञ्च परमार्थम् अबोधयत्। तस्यापि गुरुमाह इत्येत्यादिना। इष्टसत्त्वेन आत्मयत्नेन हेतौ तृतीया, अध्ययनेन वसतीतिवत्, सम्यक् पृष्टं प्रश्नो यस्य स संपृष्टः, आत्मज्ञानार्थं कृतप्रश्न इत्यर्थः। व्यक्तिं बाध्यत्वाबाध्यत्वेन स्पष्टताम् देवदर्शनः दिव्यदृष्टिरित्यर्थः। सांख्यसम्मतं गुणपुरुषान्तरज्ञानात् कैवल्यं प्रधानं चोपादानमिति पक्षं निरस्यति यत्तदिति, अक्षरमेव जगदुपादानतया नानारूपं न तु क्षरं प्रधानम्, अव्ययं ब्रह्मैव प्रतिपेदे ज्ञातवान्, न तु गुणपुरुषान्तरम्। भगवान् मार्कण्डेयः सनत्कुमारो वा"।

कापिल्य त्रि० कपिलेन निर्वृत्तादि कपिल+चतुरर्थ्यां सङ्काशा० ण्यः। कपिलेन निर्वृत्तादौ।

कापिवन न० द्व्यहसाध्ये अहीने यागभेदे "द्व्यहानस्य"इत्युपक्रमे "आङ्गिरसचैत्ररथकापिवनाः"कात्या०२३।२।३। "चैत्ररथमन्नाद्यकामः कापिवनं स्वर्गकाम इति द्व्यहाः" आश्व०श्रौ० १०।२।३।

कापिश न० कपिशा माधवी तत्पुष्पम् साधनत्वेनास्त्यस्य अण्। माधवीलताकुसुमजाते मद्यभेदे हेमच०।

कापिशायन त्रि०कपिशैव स्वार्थेऽण् तत्र जातं "कापिश्याः ष्फक्" पा०ष्फक्। माधवीपुष्पलताजाते मद्ये जटा०। "कापिशायन सुगन्धि विघूर्णन्" माघः। देवतायां पु० धर०। द्राक्षायां स्त्री सि०कौ० षित्त्वात् ङीष्। [पिशाचे त्रिका०।

कापिशेय पु० स्त्री कपिशाया अपत्यम् ढक्। कपिशापत्ये

कापिष्ठल पु० कपिष्ठलस्येदम् अण्। मध्यदेशभेदे वृह० सं०। कूर्मविभागे "औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम्" इत्युक्तेस्तस्य मध्यदेशत्वम्।

कापिष्ठलि पु० स्त्री कपिष्ठलस्य गोत्रापत्यम् इञ्। कपिष्ठलगोत्रापत्ये स्त्रियान्तु क्रौड्या० ष्यञ्। कापिष्ठल्या इति भेदः। यून्यपत्ये तु "यञिञोश्च" पा० फक्। कापिष्ठलायन तद्गोत्रयुवापत्ये पु०।

कापुरुष पु० कुत्सितः पुरुषः कोः का। १कुत्सिते पुरुषे "यत्नोर्विख्यातवीर्य्यस्य व्यञ्जनीयस्य विक्रमैः। पश्यतोयुद्धलुब्धोऽहं कृतः कापुरुषस्त्वया" रामा० कापुरुषस्येदमण्। २कुत्सितपुरुषसम्बन्धिनि त्रि०। "स्त्रीषु शौर्य्यमनयासु परदारप्रधर्षक!। कृत्वा कापुरुषं कर्म्म शूरोऽहमिति मन्यसे" रामा०। स्त्रियां ङीप्। ब्राह्मणादि० भावे कर्म्मणि च ष्यञ्। कापुरुष्य तद्भावे तत्कर्म्मणि च न०।

कापेय न० कपेर्भावः कर्म्म वा "कपिज्ञात्योर्ढक्" पा० ढक्। १कपेर्भावे कर्म्मणि च। अपत्ये इदन्तत्वात् ढक्। २कपिगोत्रापत्ये अनाङ्गिरसे पुंस्त्री ३शौनकर्षौ पु०शब्दर्चि०। स्त्रियां गोत्रप्रत्ययान्तत्वात् ङीष्। तस्येदं ढक्। कपिसम्बन्धिनि त्रि० स्त्रियान्तु ङीप्। "कच्चिन्न खलु कापेयी सेव्र ते चलचित्तता" रामा०।

कापोत न० कपोतानां समूहः अण्। १कपोतसमूहे कपोतस्येदम्। "अनुदात्तादेः" पा०अञ्। २कपोतसम्बन्धिनि त्रि० स्त्रियां ङीप्। "अतिथिव्रती क्रियावांश्च कापोतीं वृत्तिमास्थितः" भा०व० २५९अ०। "कापोतीं वृत्तिं-स्वल्पसंग्रहरूपाम्" नीलकण्ठः" "स्रुवन् वृत्तिं स कापोतीं दुहिता स ययौ पुरात्" भाग० ८,१८,१५, "कापोतीं उञ्छवृत्तिम्" श्रीधरः। कपोतस्य यथा उञ्छवृत्तित्वमल्पसंग्रहत्वञ्च तथा कपोतलुब्धकीयशब्दे १९७०पृ०दर्शितम्। कापोतवर्णोऽस्त्यस्य अर्श० अच्। ३सौवीराञ्जने ४रुचके (सर्जिकाक्षारे) न० मेदि०। ५कपोताभवर्णे पु० ६तद्वति त्रि० हेम०। ७ओषधिभेदे स्त्री गौ०ङीष्। तल्लक्षणस्थानमुक्तं सुश्रुते "कौशिकीं सरितं तीर्त्त्वा सञ्जयन्त्यास्तु पूर्वतः। क्षितिप्रदेशोवल्मीकैराचितोयोजनत्रयम्। विज्ञेया तत्र कापोती श्वेता वल्मीकमूर्द्धसु" सुश्रु०। ओषधिलक्षणादिकथने।

कापोतक त्रि० कपोताः सन्त्यस्याम् नडा०छः कुक् च कपोतकीयः तत्रभवः अण् बिल्वका० छस्य लुक्। कपोतकीयभवे। [कपोतडिम्बसमुदाये।

कापोतपाक्य पु०कपोतानां पाकः डिम्बः तेषां पूगः ण्यः।

कापोताञ्जन न० कापोतं च तदञ्जनं चेति कर्म०। सौवीराञ्जने अमरः।

काप्य पुंस्त्री कपेर्गोत्रापत्यम् आङ्गिरसः "कपिबोधादाङ्गिरसे" पा० यञ्। १कपिगोत्रापत्ये आङ्गिरसे। स्त्रियान्तु शार्ङ्गरवादौ काप्येत्यत्र काप्य इति पाठान्तरे ङीन् यलोपः कापी। यञन्तत्वात् यून्यपत्ये फक्। काप्यायनः कपिगोत्रयुवापत्ये, स्त्रियान्तु लौहिता०ष्फः षित्त्वात् ङीष्। काप्यायनी। अनाङ्गिरसे तु "इतश्चानिञः" पा०ढक्। कापेय इति भेदः। कुत्सितमाप्यम् कोः का। २पापादौ त्रि०

काप्यकर त्रि० कुत्सितमाप्यं काप्यं पापं करोति धातूनामनेकार्थत्वात् कथयति कृ—ताच्छील्यादौ—ट। पापं कृत्वा परस्य कथके स्वपापप्रकाशके शब्दर०। कर्म्मणि अण्। काप्यकारोऽप्यत्र त्रि०त्रिका०।

काफल पु० कुत्सितं फलमस्य। (कट्फल) वृक्षभेदे। शब्दरत्ना०

काबर पु० कुत्सितो बन्धः कोः का वेदे पृषो०। कुत्सितबन्धे। "अवस्युं शुष्मं काबरं बध्रिं कृण्वन्तु बन्धुरः"। "शुनां कपिरिव दूषणो बन्धुरा काबरस्य च" इष्टौ छित्वा भर्त्स्यामि दूषयिष्यामि काबरम्" अथ० ३।९।३।४।५।

काम अव्य०कम-घञ्। १अनुज्ञायां विश्वः। २निकामे ३अत्यर्थे ४काम्ये न०मेदि०कामाय हितम् अण्। ५रेतसि न०मेदि० ६वाढमित्यर्थे, ७अनुमतौ "काममामरणात् तिष्ठेत् गृहे कन्यर्त्तुमत्यपि" शमनुः। "मनागनभ्यावृत्त्या वा कामं क्षम्यतु यः क्षमी"माघः। ८इच्छायाम् "कामः सङ्कल्पोविचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मनएव" श्रुतेः तस्य मनोधर्मत्वमिति वेदान्तिनः सांख्याश्च मन्यन्ते मनोहेतुकत्वोक्तावेव श्रुतेस्तात्पर्यं मन्यमाना आत्मधर्मत्वमिति नैयायिका आहुः। अभिलाषशब्दे इच्छाशब्दे चास्य विवृतिः। "सङ्कल्पमूलः कामो वै यज्ञाः सङ्कल्पसम्भवाः" इत्युपक्रम्य "अकामस्य क्रिया काचित् दृश्यते नेह कर्हिचित्। यद्यद्धि कुरुते किञ्चित् तत्तत् कामस्य चेष्टितम्" इति मनुना सर्व्वक्रियां प्रति कामस्य हेतुत्वमुक्तम्। "सङ्कल्पः अनेन कर्म्मणा इदमिष्टं फलं साध्यताम्" इति बुद्धिः। तथाच इष्टसाधनताज्ञानरूपात् सङ्कल्पात् काम इच्छा भवति, ततः क्रियानिष्पत्तिः। सचाप्राप्तविषयस्य प्राप्तिसाधने चित्तवृत्तिभेदः कामस्तु रजोगुणहेतुकः। यथोक्तं गीतायाम् "कामएष क्रोधएष रजोगुणसमुद्भवः" कामश्च इष्टविषयाभिलाषः। "पुंसो या विषयापेक्षा स काम इति भण्यते"। पुमानादौ कामभव एव भूत्वार्थकर्मकृत्। अतोऽयं कर्मणोहेतुः कामोऽतोऽस्य प्रधानता" "सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते" गीता। कर्मणि घञ्। ९कामनाविषये, कामनाविषयश्च त्रिविधः वाह्याभ्यन्तरवासनामयभेदात् तत्र गृहक्षेत्रादिकं शब्दादिविषयाश्च वाह्यविषयाः शारीरमानसिककर्म्मजातम् आभ्यन्तरः सर्वः स्वप्नहेतुकः वासनामयः "न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूयएवाभिवर्द्धते" मनुः। धर्मार्थकाममोक्षमध्ये कामशब्देन काम्यस्यैव ग्रहणं तस्यैव पुरुषार्थत्वात् पुरुषेण इष्यमाणत्वात् इच्छायास्तथात्वाभावात्। "अप्यर्थकामौ तस्यास्तां धर्मएव मनीषिणः" रघुः। "सन्तानकामस्य तथेति कामम्" रघुः। काम्यमानत्वात् कामं वरमित्यर्थः। "तथेति काम प्रतिशुश्रुवान् रघोः" रघुः। "इति स्वप्नोपमान् मत्वा कामान् मा गास्तदङ्गताम्" रघुः। कामनाविषयस्य सुखस्वरूपमात्मैवेति वेदान्तिनः, तदेव मुख्यं प्रयोजनम् "नवा अरे पत्युः कामाय पतिः प्रियोभवति आत्मनस्तु कामाय पतिः प्रियोभवति" वृ० उप० सुखस्वरूपात्मन एव परप्रेमास्पदत्वोक्तेः। तत्साधनानान्तु गौणप्रयोजनत्वम्। सुखमिव दुःखाभावोऽपि मुख्यं काम्यमिति नैयायिकादयः, "मोक्षकाङ्क्षिभिः काम्यमाने १०परमेश्वरे च। "कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" विष्णुस०। स्त्रीपुरुषयोः उपस्थसाध्यानन्दसाधने तयोः परस्पराभिङ्गनादिप्रवर्त्तके ११ अनुरागभेदे तत्रैव लोके कामशब्दस्य रूढिर्दृश्यते। स च तिथिविशेषे स्त्रीपुरुषयोः स्थानविशेषएव चुम्बनादिना व्यज्यते, यथोक्तं स्मरदीपिकायाम् "पादे गुल्फे तथोरौ च भगे नाभौ कुचे हृदि। कक्षे कण्ठे तथौष्ठे च गण्डे नेत्रे श्रुतावपि। ललाटे शीर्षकेशेषु कामस्थानं तिथिक्रमात्। दक्षे पुंसां स्त्रिया वामे शुक्ले कृष्णे विपर्य्ययः। पादाङ्गुष्ठे प्रतिपदि द्वितीयायाञ्च गुल्फके। ऊरुदेशे तृतीयायां चतुर्थ्यां भगदेशतः। नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले। सप्तम्यां हृदये चैव अष्टम्यां कक्षदेशतः। नवम्यां कण्ठदेशे च दशम्यां चोष्ठदेशतः। एकादश्यां गण्डदेशे द्वादश्यां नयने तथा। श्रवणे च त्रयोदश्यां चतुर्द्दश्यां ललाटके। पौर्णमास्यां शिखायाञ्च ज्ञातव्यञ्च इति क्रमात्। यत्र स्थाने वसेत् कामस्तत्रैव नखचुम्बनम्। "हृदि कामः भ्रुवोः क्रोधो लोभश्चाधोरदच्छदात्" भाग०। तस्य समष्टिरूपस्य विराजो ब्रह्मणः हृदयजातत्वेन व्यष्टीनामप्यस्मदादीनामपि मनसिजन्यत्वम्। प्राणिनां जन्मावधि सर्वकालेष्वस्य वर्त्तमानत्वेऽपि यौवने एवास्य यथा प्रादुर्भावस्तथा कालिका० पु० १९। २२ अ० वर्णितं यथा

"ब्रह्मापि तनयां सन्ध्यां दृष्ट्वा पूर्व्वमथात्मनः। कामाय्यु मनश्चक्रे त्यक्त्वा बुद्धिं सतेति वै। तस्याश्च चलितं चित्तं कामवाणविलोडितम्। ऋषीणां प्रेक्षतां तेषां मानसानां महात्मनाम्। भर्गस्य वचनं श्रुत्वा सोपहासं विधिं प्रति। आत्मनश्चलचित्तत्वममर्य्यादमृषीन् प्रति। कामस्य तादृशं भावं मुनिमोहकरं तदा। दृष्ट्वा सन्ध्या स्वयं तत्र त्रपाभारातिदुःखिता। ततस्तु ब्रह्मणा शप्ते मदने तदनन्तरम्। अन्तर्भूते विधौ शम्भौ गते चापि

निजास्पदे। अमर्षवशमापन्ना सन्ध्या ध्यानपराऽभवत्”। ततस्तस्यास्तपसा तोषितेन विष्णुना तत्प्रार्थनया कामप्रवृत्तिकालनियमनरूपोवरोदत्तो यथा “सन्ध्योवाच। यदि देव! प्रसन्नोऽसितपसा मम संप्रति। वृतस्तदायं प्रथमं वरो मम विधीयताम्। उत्पन्नमात्रा देवेश! प्राणिनोऽस्मिन् भुवस्तले। न भवन्तु क्रमेणैव सकामाः सम्भवन्तु वै। श्रीभगवानुवाच। प्रथमं शैशवो भावः कौमाराख्यो द्वितीयकः। तृतीयो यौवनो भावश्चतुर्थं वार्द्धकं तथा। तृतीये त्वथ संप्राप्ते वयोभागे शरीरिणः। सकामाः स्युर्द्वितीयान्ते भविष्यन्ति क्वचित् क्वचित्। तपसा तव मर्यादा जगति स्थापिता मया। उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः”। तथा च कामप्रवृत्तिहेतुर्हि शुक्रवृद्धिः बाल्ये च शुक्रवृद्धेरसम्भवात् न कामप्रवृत्तिः। बालानामपि अन्नरसपाकेन चरमधातोः शुक्रस्योद्भवसम्भवेऽपि तस्य सूक्ष्मत्वात् न प्रसरणम् यथाह भावप्र०। “बालानां शुक्रमस्त्येव किन्तु सौक्ष्म्यान्न दृश्यते। पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते। तेषां तदेव तारुण्ये पुष्टत्वाद्व्यक्तिमेति हि। कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा”। तत्र कारणस्य अनुपदोक्तविष्णुवर एव इति न बाल्ये तस्य प्रादुर्भावः। १२तादृशानुरागाधिष्ठातृदेवभेदे स च पञ्चाशद्विधः। यथोक्तं शा० ति० टी० राघवभट्टेन यथा “काम १ कामद २ कान्ता ३ च कान्तिमान् ४ कामग ५स्तथा। कामचारश्च ६ कामी ७ च कामुकः ८ कामवर्द्धनः ९। रामो १० रमश्च ११ रमणो १२ रतिनाथो १३ रतिप्रियः १४। रात्रिनाथो १५ रमाकान्तो १६ रममाणो १७ निशाचरः १८। नन्दको १९ नन्दन श्चैव २० नन्दी २१नन्दयिता २२ पुनः। पञ्चबाणो २३ रतिसखः २४ पुष्पधन्वा २५ महाधनुः २६। भ्रामणो २७ भ्रमण२८ श्चैव भ्रममाणो २९ भ्रमोत्तरः ३०। भ्रान्त श्च ३१ भ्रमको ३२ भृङ्गो ३३भ्रान्तचारो ३४ भ्रमावहः ३५। मोहनो ३६मोहको ३७ मोहो३८ मोहवर्द्धन३९ एव च। मदनो ४० मन्मथ ४१ श्चैव मातङ्गो ४२ भृङ्गनायकः ४३। गायनो ४४ गीतिज ४५ श्चैव नर्त्तनः ४६ खेलक ४७ स्तथा। उन्मत्तोन्मत्तक ४८ श्चैव विलासी ४९ लोभवर्द्धनः ५०”।

तेन च कार्त्तिकेयोत्पत्तये शिवध्यानभङ्गार्थमिन्द्रनियुक्तेन शिवध्यानभङ्गार्थमुद्युक्तेन ध्यानभङ्गजनितहरकोपात् भस्मीभावमापाद्यानङ्गत्वमाप्तं यथा ह शिवपु०१४अ०। “कामोधनुषि संयोज्य पुष्पबाणं तदा मुने!। पार्वतीसम्मुखे स्थाणौ मोक्तुकामो व्यवस्थितः। हरस्तु धैर्य्यमालम्ब्य किमेतदिति चिन्तयन्। ददर्श पृष्ठतः कामं पुष्पबाणधनुर्धरम्। विवृद्धमन्योस्तस्याथ तृतीयनयनान्मुने! स्फुरदुद्दीप्तवह्निस्तु पपात मदनोपरि। क्रोधं संहर हे देव! इति यावत् वदन्ति खे। इन्द्रादिसकलादेवास्तावद्भस्मीचकार तम्” स च पश्चात् वासुदेवात् रुक्मिण्यां प्रादुर्भूय मायावतीरूपां रतिं शम्बरभार्य्यात्वेन प्रथितामुपयेमे। तदेतत् हरि० वर्णितम्। “रुक्मिण्यां वासुदेवस्य लक्ष्म्यां कामोधृतव्रतः। शम्बरान्तकरोजज्ञे प्रद्युम्नः कामदर्शनः। त सप्तरात्रे सम्पूर्णे निशीथे सूतिकागृहात्। जहार कृष्णस्य सुतं शिशुं वै शम्बरो नृप!। स मृत्युना परीतायुर्मायया प्रजहार तम्। दोर्भ्यामुत्क्षिप्य नगरं स्वं निनाय महासुरः। अनपत्या तु तस्यासीद्भार्य्या रूपगुणान्विता। नाम्ना मायावती नाम मायेव शुभदर्शना। ददौ तं वासुदेवस्य पुत्रं पुत्रमिवात्मजम्। तस्या महिष्या नाथिन्या दानवः कालचोदितः। मायावती तु तं दृष्ट्वा सम्प्रहृष्टतनूरुहा। हर्षेण महता युक्ता पुनःपुनरुदैक्षत। अथ तस्या निरीक्षन्त्याः स्मृतिः प्रादुर्बभूव ह। अयं स मम कान्तोऽभूत् स्मृत्वैवं चान्वचिन्तयत्। अयं स नाथोभर्त्ता मे यस्यार्थे हि दिवानिशम्। चिन्ताशोकह्रदे मग्ना न विन्दामि रतिं क्वचित्। अयं भगवता पूर्व्वं देवदेवेन शूलिना। खेदितेन कृतोऽनङ्गो दृष्टोजात्वन्तरे मया। कथमस्य स्तनं दास्ये मातृभावेन जानती। भर्त्तुर्भार्य्या त्वहं भूत्वा वक्ष्ये वा पुत्र इत्युत। एवं सञ्चिन्त्य मनसा धात्र्यास्तं सा समर्पयत्। रसायनप्रयोगैश्च शीघ्रमेवान्ववर्द्धयत्। धात्र्याः सकाशात् स च तां पश्यन् रुक्मिणिनन्दनः। मायावतीमविज्ञानान्मेने स्वामेव मातरम्। सा च तं वर्द्धयामास कार्ष्णिं कमललोचनम्। माया श्चास्मै ददौ सर्व्वा दानवोः काममोहिता। स यदा यौवनस्थस्तु प्रद्युम्नः कामदर्शनः। चिकार्षितज्ञो नारीणां सर्व्वास्त्रविधिपारगः। तं सा मायावती कान्तं कामयामास कामिनी” हरि० १६३अ०। “कुमार! पश्य मां प्राप्तं देवगन्धर्वनारदम्। प्रेषितं देवराजेन तव सम्बोधनाय वै। स्मर त्वं पूर्व्वकं भावं कामदेवोऽसि मानद!। हरकोपानलाद्दग्धस्त्वेनानङ्गस्त्वमिहोच्यसे। त्वं वृष्णिवंशे जातोऽसि रुक्मिण्या गर्भसम्भवः। जातोऽसि केशवेन त्वं प्रद्युम्न इति

कीर्त्त्यसे। आहूय शम्बरेण त्वमिहानीतोऽसि मानद !। अप्राप्ते त्वसम्पूर्णे सूतिकागारमध्यतः। अधार्थे शम्बरस्य त्वं ह्रियमाणो ह्युपेक्षितः। केशवेन महाबाहो ! देवकार्यार्थसिद्धये। येषा मायावती नाम भार्या वै शम्बरस्य तु। रतिं तां विद्धि कल्याणीं तव भार्यां पुरातनीम्। तव सा रक्षणार्थाय शम्बरस्य गृहेऽवसत्। मायां शरीरजां न्यस्य मोहनार्थं दुरात्मनः। रतेरुत्पादनार्थाय मे प्रयत्न-निशं तदा। एवं प्रद्युम्न! बुद्ध्वा वै तव भार्यां प्रतिष्ठिताम्। हत्वा तं शम्बरं वीर! वैष्णवास्त्रेण संयुगे। गृह्य मायावती भार्यां द्वारकां गन्तुमर्हसि" हरि० १६५ अ० "कामं प्रति-नारदवाक्यम्। "सोऽब्रवीत् सहसा देवीं रुक्मिणीं देवतामिव। अयं स देवि! संप्राप्तः पुत्रस्तावधरस्तव। अनेन शम्बरं हत्वा मायायास्त्र विशारदम्। हृता मायाश्च ताः सर्वा याभिर्देवानबाधत। सती चेयं शुभा साध्वी भार्य्याऽपि तनयस्य ते। मायावतीति विख्याता शम्बरस्य गृहोषिता। सा च ते शम्बरस्येयं पत्नीति भवतु व्यथा। मन्मथेऽथ गते नाशं गते चानङ्गतां पुरा। कामपत्नी, न कान्तैषा शम्बरस्य रतिः प्रिया। मायारूपेण तं दैत्यं मोहयन्त्यसकृच्छुभा। न चैषा तस्य कौमारे वशे तिष्ठति शोभना। आत्ममायामयं कृत्वा रूपं शम्बरमाविशत्। पत्न्येषा मम पुत्रस्य स्नुषा तव वराङ्गना" हरि० १६७ अ०। रुक्मिणीं प्रति कृष्णवाक्यम्। तेन १२ रौक्मिणेये पु० १४ बलदेवे शब्दर०। तस्य कामपालत्वात्तथात्वम्। १५ महाराज चूते राजनि०। कर्मपूर्व्वकात् कामयतेः कर्त्तरि अण्। तत्तत्पदार्थकामनायुक्ते यथा स्वर्गकामोऽश्वमेधेन यजेत पशुकामः प्रजाकाम इत्यादि। अजन्तकामशब्दे परे तुमुन्नन्तस्यान्त्यलोपः। यथा गन्तुकामः रन्तुकामः इत्यादि हर्षादि०तस्याद्युदात्तता। कामनायुक्तवाचककामादिशब्द-समभिव्याहारे यागे तन्नियोज्यकर्तृ तत्कृतिसाध्यत्वञ्च मतभेदेन प्रतीयते यथा स्वर्गकामो यजेतेत्यत्र स्वर्गकाम नियोज्यकस्तत्कृतिसाध्यो वा याग इति बोधः। लिङादिना यागादेः कर्त्तव्यत्वबोधनात् यागादेस्तथात्वम्। यागजन्यफलं च कामनावतोऽत्र तत्तत्फलकामनोद्देश्येऽपि भवति अतः पितृस्वर्गकामनया कृतपूर्त्तादेः फलं पितरौति मयिकृत्। अर्थशब्देन द्वन्द्वेऽस्य वा पूर्व्वं निपातः। अर्थकामौ कामार्थौ। तन्त्रोक्ते १६बीजभेदे। तदुद्धारो यथा तन्त्रसा० कुलार्णवे "देवीं दक्षिणबाहुशक्रनयनं कामं कलाबाञ्छितम्" दक्षिणबाहुः ककारस्तस्य वर्णस्य मातृकान्यासे दक्षबाहुमूले न्यस्तत्वात् तथात्वम् शक्रोलकारः नयनं वामनेत्रं तेन ईकारः कलाबाञ्छितं विन्दुभूषितम् तेन क्लीम् इत्येवं रूपं कामम् इत्यर्थः। प्रकारान्तरेण तदुद्धारः तन्त्रसा०ध्योक्रमे। "तां विद्यां शृणु देवेशि! कामसिन्द्रसमन्वितम्। नादविन्दुकलाभेदात् तुरीयस्वरसंयुतम्। महात्रीसुन्दरी विद्या महात्रिपुरसुन्दरी। ककारे सर्व्वसुखपदं कामिकैवल्यदायकम्। लकारे सकलैश्वर्य्यमीकारे सर्व्वसौख्यदम्" कुब्जिकात०। "परा च कमला कामो वाग्भवं शक्तिरेव च"। १७ककाराक्षरे च। शिवबीजं (ह)। तथा कामं (क) इन्द्रम्(ल) देवीं(स) नियोजयेत्। षोडशीविद्यायां शक्तिकूटोद्धारे।

कामकला स्त्री० कामस्य कला प्रिया। तत्कलाहेतुत्वात् कामपत्न्याम् १रतौ शब्दरत्ना०। ६त० २कामहेतुकलायाञ्च।

कामकाति त्रि० कं-शब्दे क्तिन् कामपरा कातिर्यस्य। कामशब्दयुक्ते। "त्वे सुव्रत! मदसोऽस्तन् कामकातयः"। ऋ० ८।८१।१४।

कामकाम त्रि० कामं काम्यं कामयते कम-णिङ्-अण् उप०स०। अभीष्टकामे "एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते" गीता। णिनिः कामकामीत्यप्यत्र। "आपूर्य्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्। तद्वत् कामा यं प्रविशन्ति सर्व्वे, स शान्तिमाप्नोति न कामकामी" गीता। स्त्रियां ङीप्।

कामकार त्रि० कामं काम्यं करोति कृ-अण् उप० स०। १काम्यनिष्पादके। कारः करणं ६त०। २कामेन इच्छया फलाभिसन्धिना करणे पु०। "अयुक्तः कामकारेण फले सक्तो निबध्यते" गीता "अग्निहोत्रापविध्याग्नीन् ब्राह्मणः कामकारतः"। "कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्" मनुः। "यः शास्त्रविधिमुत्सृज्य वर्त्तते कामकारतः, गीता। कामचारत इति पाठान्तरम्।

कामकूट पु० कामएव कूटं शृङ्गं प्रधानमस्य। १वेश्याप्रिये (विड्गे) (नाङ)। ६त०। २वेश्यायाविभ्रमे च मेदि० तन्त्रोक्ते ३कामराजाख्ये श्रीविद्यायाः मन्त्रभेदे। "वियच्चन्द्रस्ततः पश्चात् कलौ नकुलिशक्ति च। मायास्वरेण संयुक्तं नादविन्दुकलान्वितम्। प्रथमं कामराजस्य कूटं परमदुर्लभम्" (हसकलह्रीम्) "वियद्विष्णुयुतं कामो हंसः शक्रस्ततःपरम्। महामाया ततः पश्चात् स्वरवतीति कथ्यते" हकसलह्रीं) द्वितीयम् कामकूटम्। "मदनं शिवबीजं च

वायुवीजं ततःपरम्। इन्द्रवीजं ततः पश्चात् महामायां समुद्धरेत्। (कइलहीं) तृतीयं कामकूटम् इयं मधुमती।

कामकृत् त्रि० कामेन करोति कृ–क्विप् ३त०। १यथेच्छं कारिणि। कामं काम्यं करोति। २अभीष्टदायके त्रि०। ३परमेश्वरे पु० “कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः” विष्णुसह०। [कर्म०। २सुरते हेमच०।

कामकेलि पु०कामे तद्धेतुकरणे केलिर्यस्य। १जारे त्रिका०।

कामक्रीड़ा स्त्री कामेन क्रीड़ा। १कामहेतुकक्रीड़ायाम्। “भाः पञ्च सुर्धस्यां सा कामक्रीडासंज्ञा ज्ञेया” इत्युक्तलक्षणे पञ्चदशाक्षरपादके २छन्दोभेदे च।

कामखड्गदला स्त्री कामोद्दीपकं खड्गद्य दलमस्याः। स्वर्णकेतक्याम् राजनि०।

कामग त्रि०कामेन वाह्यस्य इच्छया यथेष्टदेशं गच्छति गम-ड। वाह्यस्य इच्छया यथेष्टदेशगामिनि यानादौ। “एवमादि महाराज! विलप्य दिवसास्थितः। कामगेन स सौभेन” भा०व० १४अ०। कामगेन स सौभेन शाल्वः पुनरुपागमत्। व०१६अ०। कामगत्वादयोऽप्यत्र। कामेन अनुरागभेदेन गच्छति। यथेच्छं पुरुषगामिन्यां कुलटायाम् स्त्री “पाषण्डनाश्रितास्तेनाः भर्तृघ्न्यः कामगादिकाः। सुरापा आत्मत्यागिन्यो नाशौचोदकभाजनाः” याज्ञ०। “कामगा कुलटा” मिता०। २यथेष्टं स्त्रीगामिनि पुंसि पु०। ३कन्दर्पभेदे पु० कामशब्दे उदा०।

कामगामिन् त्रि० कामं यथेष्टं योनिविचारमकृत्वा गच्छति गम-णिनि। अनुकामीने यथेष्टस्त्रीगामिनि पुरुषे यथेष्ट पुरुषगामिन्यां स्त्रियां स्त्री ङीप्। काममित्यव्ययगभेकः कामङ्गामीत्यप्यत्र अमरः।

कामगिरि पु० कामप्रधानोगिरिः। भारतवर्षस्थे कामरूपस्थे पर्व्वतभेदे। “मलयो मङ्गलप्रस्थ इत्युपक्रमे” “इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलाः” इति भाग० ५,१९,१७। कामरूपशब्दे तत्स्थानं वक्ष्यते।

कामगुण: पु० ६त० कामकृतो वा गुणः। १अनुरागे २विषये ३आभोगे च मेदि०।

कामचर त्रि० कामेन चरति चर–ट ३त०। यथाकामं चारिणि “तां नारदः कामचरः कदाचित्” कुमा०। “द्रष्टुमिच्छामि तत्रानघान्तिके वस्तुं यथाकामचरस्तथा विभो!” भा०वि०२२श्लो०।

कामचार त्रि० पु० कामेन स्वेच्छया चारः चर+घञ्। यथेच्छाचरणे “न कामचारोमयि शङ्कनीयः” रघुः। “तस्मिंदभ्युदयात् सूर्य्यः शयानं कामचारतः” मनुः। चर णिच्–अच् ३त०। कामेन गवादेश्चारणे “पथि ग्रामविवीतान्ते क्षेत्रे दोषो न विद्यते। अकामतः, कामचारे चौरवद्दण्डमर्हति” याज्ञ०।

कामचारिन् त्रि०कामेन चरति चर–णिनि। १कामुके २यथेष्टाचारवति च “न त्वं दृष्ट्वा न पुनरलकां यास्यसे कामचारिन्!” मेघ०। स्त्रियां ङीप्। ३चटके मेदि०। तस्यातिकामित्वात् तथात्वम्। स्त्रियां ङीप् ४गरुडे पु०शब्दरत्ना०।

कामज त्रि० कामाज्जायते जन–ड ५त०। कामजाते १व्यसनादौ कामजव्यसनानि च दशविधानि मनुनोक्तानि यथा “मृगयाक्षोदिवास्वप्नः परीवादः स्त्रियोमदः। तौर्यत्रिकं वृथाट्या च कामजोदशकोगणः”। तन्मध्ये चतुर्णाम् अत्यन्तकष्टतोक्ता तेनैव यथा “पानमक्षास्त्रियश्चैव मृगया च यथाक्रमम्। एतत् कष्टतमं विद्यात् चतुष्कं कामजे गणे”। “कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः। वियुज्यतेऽर्थधर्म्माभ्यां ततोवर्ज्याः सदैव ते” इति तद्दोषस्तेनैवोक्तः। २कामजातमात्रे पुत्रादौ। ज्येष्ठपुत्रस्यैव पितृऋणापाकरणसाधनत्वोक्त्या इतरेषां कामजत्वमुक्तं मनुना यथा “ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः। पितृणामनृणश्चैव स तस्मात् सर्व्वमर्हति”। यस्मिन्नृणं सन्नयति येनानन्त्यं समश्नुते। स एव धर्म्मजः पुत्रः, कामजानितरान् विदुः”। “अपुत्रायान्यतश्चैव पुत्रिण्याप्तश्च देवरात्। उभौ तौ नार्हतो भागं जारजातककामजौ” मनुः “याऽनियुक्तान्यतः पुत्रं देवराद्वाप्यवाप्नुयात्। तं कामजमरिक्थीयं वृथोत्पन्नं प्रचक्षते” मनुः।

कामजान पुंस्त्री कामजमानयति प्रापयति उद्दीपयति ध्वनिना आ+नी–ड। कोकिले शब्दर०। “चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्” सा० द०। कोकिलशब्दादीनां कामोद्दीपकत्वोक्तेस्तस्य तथात्वं स्त्रियां जातित्वात् ङीप्। कामजनिरिति वा पाठः। तत्र कामस्य उद्दीपकध्वनिहेतुत्वात् उत्पत्तिरस्मात् इति वाक्यम्।

कामजित् पु० कामं जयति धर्षणेन जि–क्विप्। १महादेवे तस्य कामधर्षणात् तथात्वम्। कामं कामदेवं रूपेण जयति क्विप्। २कार्त्तिकेये। “कामजित् कामदः कान्तः” भा० व० २३१ अ० कार्त्तिकेयनामकथने। कामं कामव्यापारं जयति। ३जिनदेवे अर्हति तस्य स्त्रीसङ्गवर्ज्जनात् तथात्वम्।

कामठक पु० धृतराष्ट्रनागकुलजाते सर्पसत्रे नष्टे सर्पभेदे

"अमाठकः कामठकः सुषेणोमलयोऽव्ययः" इति सर्पसत्र-नष्टष्टतराष्ट्रकुलजनागनामकथने भा० आ०५० अ० ।

कामताल पुंस्त्री कामं तालयति प्रतिष्ठापयति तल+प्रतिष्ठायां णिच—अण् उप०स० । कोकिले त्रिका० । तस्य ध्वनिना कामोद्दीपकत्वात् तथात्वम् । स्त्रियां जातित्वात् ङीष्

कामतिथि पु० स्त्री कामपूजार्था तत्स्वामिका वा तिथिः त्रयोदश्यां तस्याः कामपूजाङ्गता काममहशब्दे दर्शयिष्यते।

कामद त्रि०कामान् ददाति दा—क । १अभीष्टदायके, २कामधेनौ स्त्री मेदि० भक्तानां कामपूरके ३ परमेश्वरे पु० । कामं कामरूपं सौन्दर्य्येण द्यति दो-अवखण्डने-क । ४ कार्त्तिकेये । "कामजित् कामदः कान्तः" भा० व० २३१अ० । कार्त्तिकेयनामकथने ।

कामदुघ त्रि०कामं दोग्धि दुह—क घादेशः । १अभीष्टसम्पादके "इन्द्रस्य कामदुघाःस्य कामान् धुग्ध्वम्" आश्व० श्रौ०६,१२,४ । "आराधय सपत्नीकः प्रीता कामदुघा हि सा" "अवेहि मां कामदुघां प्रसन्नाम्" रघुः । २सुरभौ गवि स्त्री ।

कामदुह् त्रि० कामं दोग्धि दुह—क्विप् ६त० । काम्यनिष्पादके । "एष (यज्ञः) वस्त्विष्टकामधुक्" गीता । "तस्याथ कामधुगधेनुर्नन्दिनी महात्मनः" भा० आ०१७५ । "श्रद्धयार्चितमत्पात्रे न्यस्तं (मुन्यन्नम्) कामधुगक्षयम्" । भाग० ७,१५,५ । "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके कामधुग्भवति" श्रुतिः । क (कामदुहोऽप्यत्रार्थे) त्रि० "तैस्तैर्गुणैः कामदुहाथ भूत्वा नरं प्रदातारमुपैति सा गौः" भा०व० १८६अ० ।

कामदूती स्त्री कामस्य दूतीव उद्दीपकत्वात् । १नागदन्तीवृक्षे रत्नमा० । २पाटलावृक्षे शब्दर० । स्वार्थे कन् । तत्रार्थे ।

कामदेव पु० कामएव देवः । कन्दर्पे तस्य ध्येयरूपम् हेमा० दा० विष्णुधर्मो०उक्तं यथा । "कामदेवस्तु कर्त्तव्यः षड्पद्मविभूषणः । चापबाणकरश्चैव मदाकुञ्चितलोचनः । रतिः प्रीतिस्तथा शक्तिर्भार्य्या चैतास्तथोज्ज्वला । चतस्रस्तस्य कर्त्तव्याः पत्न्योरूपमनोहराः । चत्वारश्च करास्तस्य कार्य्या भार्य्यास्तनोपगाः । केतुश्च मकरः कार्य्यः पञ्चबाणमुखो महानिति" । काम्यते मोक्षकाङ्क्षिभिः काम्यस्तथाभूतः सन् दीव्यति द्योतते । २ परमेश्वरे । "कामदेवः कामपालः कामी कान्तः कृतागमः" विष्णु स० । चक्रदत्तोक्ते ३ घृतभेदे तत्पाकादिप्रकारो यथा तत्रैव "अश्वत्थ कोविदारस्य वृषस्य ककुभस्य च । कल्काद्य्रात्वक्पुष्पफलप्रस्थे पलचतुष्टयम् । अश्वगन्धा पलमिता मदई गोक्षुरस्य च । शतावरी विदारी च शालपर्णी बला तथा । अश्वत्थस्य च शुङ्गानि पद्मवीजं पुनर्नवा । काश्मरीफलमेतत् तु माषवीजं तथैव च । पृथग्दशपलान् भागांश्चतुर्द्रोणेऽम्भसः पचेत् । चतुर्भागावशेषन्तु कषायमवतारयेत् । मृद्वीकां पद्मकं कुष्ठं पिप्पलीं रक्तचन्दनम् । बालकं नागपुष्पञ्च आत्मगुप्ताफलं तथा । नीलोत्पलं शारिवे द्वे जीवनीयं विशेषतः । पृथक्कर्षसमञ्चैव शर्करायाः पलद्वयम् । रसस्य पौण्ड्रकेक्षूणामाढ़कं तत्र दापयेत् । चतुर्गुणेन पयसा घृतप्रस्थं विपाचयेत् । रक्तपित्तं क्षतक्षीणं कामलां वातशोणितम् । हलीमकं तथा शोथं वर्णभेदं स्वरक्षयम् । अरोचकं मूत्रकृच्छ्रं पार्श्वशूलञ्च नाशयेत् । एतद्राज्ञां प्रयोक्तव्यं बह्वन्तःपुरचारिणाम् । स्त्रीणाञ्चैवानपत्यानां दुर्बलानाञ्च देहिनाम् । क्लीवानामल्पशुक्राणां जीर्णानामल्परेतसाम् । श्रेष्ठं बलकरं हृद्यं वृष्यं मेध्यं रसायनम् । ओजस्तेजस्करञ्चैव आयुःप्राणविवर्द्धनम् । संवर्द्धयति शुक्रञ्च पुरुषं दुर्बलेन्द्रियम् । सर्व्वरोगविनिर्मुक्तस्तोयसिक्तो यथा द्रुमः । कामदेव इति ख्यातः सर्व्वरोगेषु शस्यते" ।

कामधर पु० कामरूपस्थमत्स्यध्वजपर्व्वतस्थिते सरोवरभेदे कालि० ८१ अ० । तत्स्थानस्नानमाहात्म्याद्युक्तम् । "मणिकूटाचलात् पूर्व्वं मत्स्यध्वजकुलाचलः । निर्द्दग्धो यत्र मदनो हरनेत्राग्निना पुनः । शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् । तत्र प्राप्य स्वरूपन्तु कामदेवेन संस्थितम् । अधित्यकायां तस्यौ स नीलमाणः समन्ततः । तदा तु शाश्वतो नाम तत्रास्ते दक्षिणस्वरः । सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः । आश्विन्यां विधिवत् स्नात्वा पीत्वा कामधराम्भसि । विमुक्तपापः शुद्धात्मा शिवलोके महीयते" ।

कामधेनु स्त्री कामप्रतिपादिका धेनुः । १अभीष्टप्रतिपादिकायां स्वर्गधेन्वाम् सुरभिकन्यायाः रोहिण्याः २कन्यायां गवि च तस्या उत्पत्त्यादिकमुक्तं कालिकापु०९१अ० । "दक्षस्य तनया याऽभूत् सुरभिर्नाम नामतः । गवां माता महाभागा सर्व्वलोकोपकारिणी । तस्यान्तु तनया जज्ञे कश्यपात्तु प्रजापतेः । नाम्ना सा रोहिणी शुभ्रा सर्व्वकामदुघा नृणाम् । तस्या जज्ञे शूरसेनात्सुवीरतितमोज्ज्वलात् (तस्यां जज्ञे शुनःशेफात् मुनेरतितमोज्ज्वलात् वा पाठः कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता । सा सिताभ्र

प्रतीकाशा चतुर्व्वेदचतुष्पदा । स्तनैश्चतुर्भिर्धर्म्मार्थकामप्रसव-कारिणी" ।

कामधेनुकुलजातायां २ नन्दिन्याम् शबलानाम्न्यां वशिष्ठ-धेनौ च तस्याश्च काम्यपदार्थसम्पादकत्वात्तथात्वम् यथा च तस्याः कामनिष्पादकत्वं तथा रामा॰आदि॰५२स॰ वर्णितं यथा "एवमुक्ता वशिष्ठेन शबला शत्रुसूदन ! । विदधे कामधुक्कामान् यस्य यस्येप्सितं यथा । इक्षून्मधूंस्तथा लाजान् मैरेयांश्च सुरासवम् । पानानि च महार्हाणि भक्ष्यांश्चोच्चावचानपि । उष्णाढ्यस्यौदनस्यात्र राशयः पर्व्वतोपमाः । मृष्टान्यन्नानि सूपाश्च दधिकुल्यास्तथैव च । नानास्वादुरसानाञ्च खाड्वानां तथैव च । भोजनानि सुपूर्णानि गौड़ानि च सहस्रशः । सर्व्वमासीत् सुसन्तुष्टं हृष्टपुष्टजनायुतम् । विश्वामित्रबलं राम ! वशिष्ठेन सुतर्पितम् । विश्वामित्रो हि राजर्षिर्हृष्टपुष्टस्तदाभवत् । सान्तःपुरवरो राजा सब्राह्मणपुरोहितः । सामात्यो मन्त्रिसहितः सभृत्यः पूजितस्तदा । युक्तः परमहर्षेण वशिष्ठमिदमब्रवीत् । पूजितोऽहं त्वया ब्रह्मन् ! पूजार्हेण सुसत्कृतः । श्रूयतामभिधास्यामि वाक्यं वाक्यविशारद ! । गवां शतसहस्रेण दीयतां शबला मम । रत्नं हि भगवन्नेतद्रत्नहारी च पार्थिवः । तस्मान्मे शबलां देहि ममैषा धर्म्मतो द्विज ! । एवमुक्तस्तु भगवान्वशिष्ठो मुनिपुङ्गवः । विश्वामित्रेण धर्म्मात्मा प्रत्युवाच महीपतिम् । नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् । राजन् ! दास्यामि शबलां राशिभी रजतस्य वा । न परित्यागमर्हेयं मत्सकाशादरिन्दम ! । शाश्वती शबला मह्यं कीर्त्तिरात्मवतो यथा । अस्यां हव्यं च कव्यञ्च प्राणयात्रा तथैव च । आयत्तमग्निहोत्रञ्च बलिर्होमस्तथैव च । स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा । आयत्तमत्र राजर्षे ! सर्व्वमेतन्न संशयः । सर्व्वस्वमेतत् सत्येन मम तुष्टिकरी तथा । कारणैर्बहुभी राजन्न दास्ये शबलां तव"। तेनास्या अत्यागे च बलात् विश्वामित्रेण हरणोद्योगे कृते धेन्वा उत्पादितैर्नानाविधैः सैन्यैर्विश्वामित्रः पराजितः इत्यपि तत्रैव वर्णितं ५३स॰ यथा

'कामधेनुं वशिष्ठोऽपि यदा न त्यजते मुनिः । तदास्य शबलां राम ! विश्वामित्रोऽन्वकर्षत । नीयमाना तु शबला राम ! राज्ञा महात्मना । दुःखिता चिन्तयामास रुदन्ती शोककर्षिता । परित्यक्ता वशिष्ठेन किमहं सुमहात्मना । याहं राजभृतैर्दीना ह्रियेय भृशदुःखिता । किं मयापकृतं तस्य महर्षेर्भावितात्मनः । यन्मामनागसं दृष्ट्वा भक्तां त्यजति धार्म्मिकः । इति सञ्चिन्तयित्वा तु निश्वस्य च पुनः पुनः । जगाम वेगेन तदा वशिष्ठं परमौजसम् । निर्धूय तांस्तदा भृत्यान् शतशः शत्रुसूदन ! । जगामानिलवेगेन पादमूलं महात्मनः । शबला सा रुदन्ती च क्रोशन्ती चेदमब्रवीत् । वशिष्ठस्याग्रतः स्थित्वा रुदन्ती मेघनिःस्वना । भगवन् ! किं परित्यक्ता त्वयाहं ब्रह्मणःसुत ! । यस्माद्राजभटा मां हि नयन्ते त्वत्सकाशतः । एवमुक्तस्तु ब्रह्मर्षिरिदं वचनमब्रवीत् । शोकसन्तप्तहृदयां स्वसारमिव दुःखिताम् । न त्वां त्यजामि शबले ! नापि मेऽपकृतं त्वया । एष त्वां नयते राजा बलान्मत्तो महाबलः । न हि तुल्यं बलं मह्यं राजा त्वद्य विशेषतः । बली राजा क्षत्रियश्च पृथिव्याः पतिरेव च । इयमक्षौहिणी पूर्णा गजवाजिरथाकुला । हस्तिध्वजसमाकीर्णा तेनासौ बलवत्तमः । एवमुक्ता वशिष्ठेन प्रत्युवाच विनीतवत् । वचनं वचनज्ञा सा ब्रह्मर्षिमतुलप्रभम् । न बलं क्षत्रियस्याहुर्ब्राह्मणा बलवत्तराः । ब्रह्मन् ! ब्रह्मबलं दिव्यं क्षत्राच्च बलवत्तरम् । अप्रमेयबलं तुभ्यं न त्वया बलवत्तरः । विश्वामित्रो महावीर्य्यस्तेजस्तव दुरासदम् । नियुङ्क्ष्व मां महातेजस्त्वद्ब्रह्मबलसम्भृताम् । तस्य दर्पं बलं यत्तन्नाशयामि दुरात्मनः । इत्युक्तस्तु तया राम ! वशिष्ठस्तु महायशाः । सृजस्वेति तदोवाच बलं परबलार्द्दनम् । तस्य तद्वचनं श्रुत्वा सुरभिः साऽसृजत्तदा । तस्या हुम्भारवोत्सृष्टाः पह्लवाः शतशो नृप ! । नाशयन्ति बलं सर्व्वं विश्वामित्रस्य पश्यतः । स राजा परमक्रुद्धः क्रोधविस्फारितेक्षणः । पह्लवान्नाशयामास शस्त्रैरुच्चावचैरपि । विश्वामित्रार्द्दितान् दृष्ट्वा पह्लवान् शतशस्तदा । भूय एवासृजद्घोरांश्छकान् यवनमिश्रितान् । तैरासीत् संवृता भूमिः शकैर्यवनमिश्रितैः । प्रभावद्भिर्महावीर्य्यैर्हेमकिञ्जल्कसन्निभैः । तीक्ष्णासिपट्टिशधरैर्हेमवर्म्मभिरावृतैः । निर्दग्धं तद्बलं सर्व्वं प्रदीप्तैरिव पावकैः । ततोऽस्त्राणि महातेजा विश्वामित्रो मुमोच ह । तैस्ते यवनकाम्बोजा वर्व्वराश्चाकुलीकृताः ५४ स॰ ।

"ततस्तानाकुलान् दृष्ट्वा विश्वामित्रास्त्रमोहितान् । वशिष्ठोनोदयामास कामधुक् सृज योगतः । तस्या हुङ्कारतो जाताः काम्बोजा रविसन्निभाः । ऊधसश्चाथ सम्भूता

वर्व्वरा शस्त्रपाणयः। योनिदेशाच्च यवनाः शकृद्देशाच्छकाः स्मृताः। रोमकूपेषु म्लेच्छाश्च हारीताः सकिरातकाः। तैस्तन्निषूदितं सर्व्वं विश्वामित्रस्य तत्क्षणात्। सपदातिगजं साश्वं सरथं रघुनन्दन!। दृष्ट्वा निषूदितं सैन्य वशिष्ठेन महात्मना। विश्वामित्रसुतानान्तु शतं नानाविधायुधम्। अभ्यधावत् सुसंक्रुद्धं वशिष्ठं जपतां वरम्। हूङ्कारेणैव तान् सर्व्वान् निर्द्ददाह महानृषिः” ५५ स०।

दानार्थकल्पिते स्वर्णादिनिर्म्मिते षोडशमहादानान्तर्गते दानीये ४ धेनुभेदे तत्प्रकारो यथा हेमा०दा०मत्स्य०पु०। “अथातः सम्प्रवक्ष्यामि कामधेनुविधिं परम्। सर्व्वकामप्रदं नृणां महापातकनाशनम्। लोकेशावाहनं तद्वद्धोमः कार्य्योऽधिवासनम्। तुलापुरुषवत् कुर्य्यात् कुण्डमण्डपवेदिकाः। स्वल्पेऽप्येकाग्निमत् कुर्य्यात् गुरुरेव समाहितः”। कुण्डमण्डपवेदिका इत्युपलक्षणम्। इह हि देश-काल-शुद्धिश्राद्ध-शिवादिपूजा-ब्राह्मणवाचनाचार्य्यर्त्विग्वरण-मधुपर्कदान-वेदिकोपरिचक्रलेखन-पञ्चवर्णवितानतोरण-पताकादि सर्व्वं मत्स्यपुराणोक्त-तुलापुरुषदानविहितं वेदितव्यम्।

“काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्। उत्तमा पलसाहस्रैस्तदर्द्धेन तु मध्यमा। कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता। शक्तितस्त्रिपलादूर्द्ध्वमशक्तोऽपीह कारयेत्”। अत्र यद्यपि वत्सपरिमाणमनुक्तं तथापि कामधेनुविधानक्लृप्तकाञ्चनचतुर्थांशेन वत्सः कल्पनीयः, समस्तधेनुषु परिमितद्रव्यनिष्कृष्टवत्सनिर्माणक्लृप्तिदर्शनादिहापि धेनुदानत्वाविशेषात् तथैव निश्चीयते। तथा च गुड़धेन्वादिषु “चतुर्थांशेन वत्सः स्यादिति” तत्र तत्र वक्ष्यते।

“वेद्यां कृष्णाजिनं तस्य गुड़प्रस्थसमन्वितम्। न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम्। कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्”।

कल्पतरुदाने, प्रस्थो व्याख्यातः। ‘महारत्नानि, पद्मरागप्रभृतीनि, वत्सन्दक्षे तु विन्यसेदिति क्वचित्पाठः, ‘नानाफलानि, गोगजवाजिस्त्रीपुरुषप्रभृतीनि, सौवर्णानि, कल्पतरुदानोक्तानि।

“तथाष्टादशधान्यानि समन्तात् परिकल्पयेत्। इक्षुमण्डकं तद्वन्नानाफलसमन्वितम्। भाजनं चासनं तद्वत् ताम्रदोहनकं तथा”।

“कौशेयवस्त्रद्वयसम्प्रयुक्तां दीपातपत्राभरणाभिरामाम्। सचामरां कुण्डलिनीं सघण्टागणलिकापादुकरौप्यपादाम्। रसैश्च सर्व्वैः परितोऽभिजुष्टां हरिद्रया पुष्पफलैरनेकैः। अजाजिकुस्तुम्बुरुशर्कराभिः वितानकं चोपरि पञ्चवर्णम्। स्नातस्ततो मङ्गलवेदघोषैः प्रदक्षिणीकृत्य सपुष्पहस्तः। आवाहयेत्ताङ्गुड़धेनुमन्त्रैः द्विजाय दद्यादथ दर्भपाणिः”।

घण्टागणलिकापादुकाभिः सह वर्त्तत इति सघण्टागणलिकापादुका सा चासौ रौप्यपादा चेति विग्रहः। गणनासाधनत्वाद्गणलिका, अक्षमाला गलन्तिकेति क्वचित्पाठः। तत्र गलन्तिका कण्ठभूषणमिति केचित्, केचित्तु गलन्तिकेति पठित्वा जलपूर्णा कर्करीति व्याचक्षते। रसाः परिभाषायामुक्ताः। अजाजि जीरकं, कुस्तुम्बुरुः धान्यकम्। एवमुपकल्पितसम्भारः पूर्व्ववदधिवासनं विधाय तदन्यदिवसे प्रातः कृतपुण्याहवाचनोऽग्निकुण्डेषु ऋत्विगुपवेशनादिपूर्णाहुतिपर्य्यन्तकर्म्मशेषसमाप्तिं कृत्वा सर्व्वौषधिजलस्नातः शुक्लमाल्याम्बरो गृहीतकुसुमाञ्जलिर्यजमानस्त्रिःप्रदक्षिणमावृत्य गुड़धेनुमन्त्रैस्तामावाहयेत्। गुड़धेनुमन्त्राः। ‘या लक्ष्मीः सर्व्वभूतानाम्” इत्यादयः, तत्प्रकरणे द्रष्टव्याः। आवाहनानन्तरं वक्ष्यमाणमन्त्रेणामन्त्रयेत्। “त्वं सर्व्वदेवगणमन्दिरमङ्गभूता विश्वेश्वरत्रिपथगोदधिपर्व्वतानाम्। त्वद्दानशस्त्रशकलीकृतपातकौघः प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि। लोके यथेप्सितफलार्थविधायिनीं त्वामासाद्य कोहि भवदुःखमुपैति मर्त्त्यः। संसारदुःखशमनाय यतस्व कामं त्वां कामधेनुरिति विप्रगणा वदन्ति”। “आमन्त्र्य शीलकुलरूपगुणान्विताय विप्राय यः कनकधेनुमिमां प्रदद्यात्, प्राप्नोति धाम स पुरन्दरदेवजुष्टं, कन्यागणैः परिवृतं पदमिन्दुमौलेः।” दानवाक्यमत्र तुलापुरुषोक्तमूहनीयम्। विप्रायेत्येकवचनमेकाग्निविधानपक्षे, अनेकाग्निविधानपक्षे तु प्रकृतीभूततुलापुरुषदानवदाचार्य्यादीनां विभागव्यवस्था तदनन्तरं पुण्याहवाचनवेदिस्थितदेवतापूजनविसर्ज्जनानि कुर्य्यात्। दक्षिणाविचारश्च पूर्व्ववत्। मत्स्य पु०उक्तविधिः।

“व्यासउवाच। राजन्निहैकामपि कामधेनुं दद्यात् समुद्दिश्य तु केशवं वा। विप्राय वै सर्व्वगुणोपपन्नां कृत्वा व्रतं कृच्छ्रमनीयसैस्तु। सम्यक् प्रदत्तैस्तु गवां सहस्रैः सवत्सवस्त्रैः सहितैश्च हेम्ना। काले फलं यल्लभते मनुष्यो न कामधेनोश्च समं द्विजेभ्यः। शतैः सहस्रैश्च तथा हयानां सम्यक्प्रदत्तैश्च महाद्विपानाम्। कन्यारथैर्वा करिवाजियुक्तैः शतैः सहस्रैः सततं द्विजेभ्यः। दत्तैः फलैर्यल्लभते मनुष्यः, समं तथा स्यान्नतु कामधेनोः।

यो जाह्नवीतीरगतो हिमाद्रौ सन्त्यज्य तेऽतीव तपः सदा वै । ब्राह्मं पदं गन्तुमना द्विजेन्द्रो नैतत् फलं तस्य हि कामधेनोः । चान्द्रायणैः कृच्छ्रमहापराकैः संशुद्ध्यते पापयुतो मनुष्यः । कार्त्तिके कृष्णपक्षे तु नरः प्रयतमानसः । एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् । घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा । नक्ताशी गोरसैर्द्रव्यैः पूजयेन्मधुसूदनम् । गन्धपुष्पैः सुनैवेद्यै-र्वस्त्राभरणकुण्डलैः । शङ्खासिचक्रोद्यतबाहुर्विष्णोर्गदा जङ्घस्य तु शार्ङ्गपाणेः । अर्घं प्रयच्छामि जनार्द्दनस्य श्रिया युतस्यापि धराधरस्य । श्रियः पतिं श्रीधरमेककान्तं श्रियः सहायं हि श्रियोऽनुकूलम् । नमाम्यहं श्रीधरमब्धिवासं समर्च्चितो मे प्रददातु कामान् । एवं पूज्य विधानेन श्रिया युक्तं तु नामभिः । पृथग्जागरणं कुर्य्यात्, श्रिया सार्द्धं जगत्पतेः । या देवी भार्गवं भेजे कुलं सर्व्वत्र पूजिता । आयातु सा गृहे नन्दा, सुप्रीता वरदा मम । याऽङ्गिरसं सदा देवी सुनन्दा प्रत्युपस्थिता । आयातु मे गृहे सा तु सुप्रीता वरदा सती । सुरभी या भरद्वाजं कामधेनुः सुकामदा । सदा भेजे गृहं सात्र समायातु सुरार्च्चिता । सुशीला कश्यपं या तु भेजे सर्व्वत्र कामदा । सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा । यत्रच्छाया वशिष्ठन्तु सम्प्राप्य सुखदे शुभा । सा मे गृहं सदायातु कामदा वरपूजिता । एवं पूज्य विधानेन प्रभाते विमले शुभे । शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः । कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः । अनुलिप्ते महीपृष्ठे कृष्णाजिनसुसंस्तृते । तिलप्रस्थेन वाकीर्णे चतुर्व्वर्णविभूषिते । क्षौमवस्त्रान्विते शुभ्रे मध्वाज्यपात्रसंयुते । शुभवस्त्रैः समावृत्य सर्व्वरत्नैरलङ्कृताम् सुवर्णशृङ्गनखुराञ्चतुष्कर्णां मनोरमाम् । क्षीराब्धिपयसोपेतां धेनुमन्त्रैस्तु पूजयेत् । या धेनुः सर्व्वदेवानामृषीणां भावितात्मनाम् । क्षीराब्धिनिर्गता या च सा मे भवतु सुस्थिरा । घृतक्षीराभिषेकं च कृत्वा विष्णोः प्रयत्नतः । समभ्यर्च्च्य यथायोगं गन्धपुष्पादिभिः क्रमात् । गावो ममाग्रतः सन्तु गावः पार्श्वे तु पृष्ठतः । गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम् । प्राङ्मुखोदङ्मुखो वापि सितयज्ञोपवीतिनीम् । इमां त्वं प्रतिगृह्णीष्व देवदेव ! जगत्पते ! । सवत्सालङ्कृतां धेनुं गोविन्द ! भजतामिति । एवं विप्राय तान्दद्यात्, कृत्वा चैव प्रदक्षिणम् । अनुव्रजेच्च गच्छन्तं पदान्यष्टौ नराधिप ! । अनेन विधिना यस्तु कामधेनुं प्रयच्छति । सर्व्वकामसमृद्ध्यर्थं स्वर्गलोके स गच्छति । यद्दत्त्वा सकलां पृथ्वीं राहुग्रस्ते दिवाकरे । तत् फलं प्राप्यते राजन् ! कामधेन्वा न संशयः । चिन्तामणिः कामधेनुस्तथा भद्रघटो नृप ! । त्रीणि समफलान्याहुर्दानानि मुनिसत्तमाः । सप्तावरान् सप्त परान् आत्मानं चैव मानवः । शतजन्मकृतात्पापान्मोचयत्यवनीपते ! । पदेपदेऽश्वमेधस्य फलं प्राप्नोति मानवः दानानामेव सर्व्वेषामुत्तमं परिकीर्त्तितम् । सर्व्वकामप्रदं धन्यं, पापघ्नं सर्व्वदं शुभम् । सर्व्वेषामेव पापानां जातानां महतामपि । प्रायश्चित्तमिदं शस्तं कथितं ब्रह्मणा नृप ! । ब्रह्मविट्-क्षत्र-शूद्राणां कर्त्तव्या यत्नतो नृप ! । सर्व्वकामफलार्थाय कामधेनुरियं सताम् । मध्वाज्यतिल-होमेन कामधेनु-प्रयत्नतः । सकल्पं प्रतिपाद्येह सर्व्वपृथ्वीप्रदो भवेत्" । वह्निपुराणोक्तकामधेनुदानविधिः । अवशिष्टेतिकर्त्तव्यता च मत्स्यतुलादानादिपद्धत्युक्तदिशा ज्ञेया । अथ लिङ्गपुराणोक्तस्तद्विधिः । "सनत्कुमार उवाच । अथातः संप्रवक्ष्यामि हेमधेनुविधिं क्रमात् । सर्व्वपापप्रशमनं देशदुर्भिक्षनाशनम् । उपसर्गविनाशञ्च सर्व्वव्याधिनिवारणम् । निष्काणान्तु सहस्रेण सुवर्णेन तु कारयेत् । तदर्द्धेनापि वा सम्यक् तदर्द्धार्द्धेन वा पुनः । शतेन वा प्रकर्त्तव्यं सर्व्वकार्य्येषु सुव्रत !" । सर्व्वकार्य्येष्विति अव्यक्तेषु अनुक्तमानेषु सौवर्णेषु देयेषु सहस्रादिशतावरमानत्वमवधेयमिति इयं चोक्तिः प्रासङ्गिकी वातुले मानान्तरमुक्तम् । "त्रिपलादिसहस्रान्तं हेम्ना धेनुं प्रकल्पयेदिति"। "शिवाग्रे कामधेनुन्तु पलानां पञ्चभिः शतैः । यो ददाति महासेन ! राहुग्रस्ते दिवाकरे । तेन दत्तं भवेत्सर्व्वमाब्रह्मभुवनान्तिकम्" इति कालोत्तरमतम् । "गोरूपं सखुरन्दिव्यं सर्व्वलक्षणसंयुतम् । खुराग्रे विन्यसेद्वज्रं शृङ्गे वै पद्मरागकम् । भ्रुवोर्मध्ये न्यसेद्दिव्यं मौक्तिकं मुनिसत्तम !। वैदूर्य्येण स्तनान् कुर्य्याल्लाङ्गूलं नीलनिर्म्मितम् । दन्तस्थाने प्रकर्त्तव्यं सर्व्वरत्नविभूषितम् । पशुवत् कारयित्वा तु वत्सं कुर्य्यात् सुशोभनम् । दशांशकेन कर्त्तव्यं सर्व्वरत्नविभूषितम्" । कामिके तु, "तुरीयांशेन वत्सकः" इत्युक्तम् ।

"पूर्व्वोक्तवेदिकामध्ये मण्डलञ्च प्रकल्पयेत् । तन्मध्ये सुरभिं स्थाप्य सर्व्वतः सर्व्वरत्नकाम् । सवत्सां सुरभिं तत्र वस्त्रयुग्मेन वेष्टयेत् । संपूजयेत्तु गायत्र्या सवत्सां सुरभिं पुनः । कथैकाग्निविधानेन होमं

कुर्य्यात् यथाविधि। समिधन्त्वाज्यभागेन पूर्व्ववच्छेषमाचरेत्। शिवपूजा प्रकर्त्तव्या लिङ्गं स्नाप्य घृतादिभिः। गामालभ्य च गायत्र्या विप्रेभ्यो दापयेच्च ताम्। दक्षिणा च प्रदातव्या त्रिंशन्निष्कं महामते!"। गायत्र्या गोसावित्र्याख्यस्तोत्रमन्त्रेणेत्यर्थः, "गोसावित्रीतिमन्त्रेण मन्त्रयीत विचक्षणः" इति वातुलोक्तेः, कामिके तु "घृताद्यैः पूजयद्देवं सहस्रकलशादिभिः। गामाराध्य तु गायत्र्या विप्रेभ्यो दापयेच्च ताम्। आचार्य्यं पूजयेत् पूर्व्वं केयूरकटकादिभिः। वस्त्रयुग्मञ्च दत्त्वा तु विज्ञाप्य विधिपूर्व्वकम्। दक्षिणा तु प्रदातव्या त्रिंशन्निष्का महातपः!। त्रिंशन्निष्कदक्षिणादानन्तु एकाग्निपक्षविषयम्, अनेकाग्निपक्षे तुलापुरुषवद्दक्षिणा। तदुक्तं शैवे। "अथैकाग्निविधानं वा समिदाज्यं हविष्ययुक्। त्रिंशन्निष्कावरा देया गुरोरेकाग्निकल्पतः" इति। एकाग्निपक्षश्च स्वल्पवित्तविषयः। पूर्व्ववच्छेषमिति, शेषमनुक्तं किञ्चित् तदखिलं लिङ्गपुराणोक्ततुलापुरुषविहितमाचरेदित्यर्थः। कालोत्तरे "एतस्यास्तु प्रदाता यस्तेन दत्तं चराचरम्। त्रिःसप्तकुलसंयुक्तो विमानैर्दिव्यवर्च्चसैः। शिवलोकमवाप्नोति यावदिन्द्राश्चतुर्द्दश। तदन्ते चक्रवर्त्ती स्यात्, ज्ञानवांस्तु शिवं व्रजेत्"। इति नानाशास्त्रीयकामधेनुदानम्। वोपदेवधातुपाठव्याख्याने ५ग्रन्थभेदे।

कामधेनुतन्त्र न० शिवनिर्मिते तन्त्रभेदे। [महादेवे हला०।

कामध्वंसिन् पु० कामं ध्वंसयति ध्वन्स–णिच्–णिनि।

कामन त्रि० कम–णिङ्–ल्यु। १कामुके अम०। भावे ल्युट्। २अभिलाषे न०। युच् अभिलाषे स्त्री हला०। "समुच्चितफलकस्यापि तत्तत्कामनासहकारेण प्रत्येकफलदातृत्वम्" इति विधिस्वरूपे गदाधरेणोक्तम्।

कामन्दकि न० कमन्दकस्यापत्यम्। विद्वद्भेदे तेनेव नीतिशास्त्रं प्रणीतम्। तस्येदम् "वृद्धाच्छः" पा० छ०। कामन्दकीय तत्प्रणीतनीतिशास्त्रे न०।

कामन्धमिन् पु०स्त्री कामं यथेष्टं धमति ध्मा–णिनि बा० धमादेशः। कांस्यकारे (कांसारि) सङ्कीर्णजातिभेदे जटा०। स्त्रियां ङीप्।

कामनीयक न० कमनीयस्य भावः "योपधाद्गुरूपोत्तमाद्वुञ्" पा० वुञ्। रमणीयतायाम् "व्यलोकयत् काननकामनीयकम्" नैष० पाठान्तरम्।

कामप(त्नी)ति स्त्री कामः पतिर्यस्याः सपूर्व्वकत्वात् नान्तादेशः ङीप् च वा। कामदेवभार्य्यायां रत्यां शब्दरत्ना०।

कामपाल पु० कामान् पालयति पाल–अण् उप० स० १बलदेवे अमरः। भक्तानां कामस्याभीष्टस्य पालके स्वपुत्रस्य कामस्य वा पालके च २वासुदेवे। "कामहा कामपालश्च कामी कान्तः कृतागमः" विष्णु स०।

कामपूर त्रि० कामं पूरयति पूर–णिच्–अण् उप० स०। १अभीष्टपूरके २परमेश्वरे पु०। "कामपूरोऽस्म्यहं नृणाम्" भाग० ७।२।२५।

कामप्र त्रि० कामं पिपर्त्ति पृ–मूलविभुजा० क उप०स०। १अभीष्टपूरके। "कामप्रेण मनसा चरन्ता" ऋ० १।१०८।२। वि० कि। कामप्रि तत्रार्थे "मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे। आविक्षितस्य कामप्रेर्विश्वे देवाः सभासदः" ऐतरेयब्राह्मणम्।

कामप्रद त्रि० कामं प्रददाति प्र+दा+क उप०स० १अभीष्टस्य प्रकर्षेण दातरि। २परमेश्वरे पु०। "कान्तः कामप्रदः प्रभुः" विष्णु स०। कामं कामजरतिभेदं प्रददाति। "द्वौ पादौ स्कन्धसंलग्नौ क्षिप्त्वा लिङ्गं भगे तथा। कामयेत् कामुकः प्रीत्या बन्धः कामप्रदो हि सः" स्मरदीपिकोक्ते ३रतिबन्धभेदे पु०।

कामप्रवेदन न० कामस्याभिलाषस्य प्रवेदनम् आविष्करणम्। स्वाभिप्रायप्रकाशने "कच्चित् कामप्रवेदने" अमरः। "कामप्रवेदनेऽकच्चिति" पा०

कामप्रश्न पु० कामं यथेष्टम् प्रश्नः। यथेष्टप्रश्ने "तस्मै ह याज्ञवल्क्यो वरं ददौ सहोवाच कामप्रश्नएव"। शत० ब्रा० ११।६।२।१०। "कामप्रश्नः यथाकामं प्रश्नः" भा० "याज्ञवल्क्यो वरं ददौ सह कामप्रश्नमेव" शत० ब्रा० १४,७,१,१,

कामप्रस्थ पु०न० कामस्य कामगिरेः प्रस्थः। कामगिरिसानौ तत्र "मालादीनाञ्च" पा० छद्मपूर्व्वस्यापि प्रस्थशब्दे परे आद्युदात्तता। गहा० भवाद्यर्थे छ। कामप्रस्थीय तद्भवे त्रि०

कामफल पु० कामं यथेष्टं फलमस्य। महाराजाम्रवृक्षे। राजनि०।

कामम् अव्य० कम–णिङ्–बा० अमु। १अनुमतौ, २प्रकामे, ३पर्य्याप्ते, ४असूयायाम्, ५अकामानुमतौ, ६स्वच्छन्दार्थे, ७अनिष्टस्यागत्या स्वीकारे च। अमरमेदिन्यादयः।

काममह पु० ६त०। चैत्रमासे कर्त्तव्ये कामस्य १महोत्सवे तदाधारत्वात् २चैत्रपौर्णमास्यां त्रिका०। काममहस्य चैत्रपौर्णमास्यांकर्त्तव्यतोक्तिः प्रायिकी शक्रोदेवताभिप्राया वा, तिथितत्त्वे भविपु० "चैत्रशुक्लत्रयोदश्यां दमनं मदनात्मकम्। कृत्वा संपूजयेत् कामं वीजयेद्व्यजनेन

तु । तत्र समभ्यर्चितः कामः पुत्रपौत्रप्रवर्द्धनः । कामदेव-स्त्रयोदश्यां पूजनीयो यथाविधि" । इति चैत्रत्रयोदश्यां तत्पूजनविधानात्" नि० सि०रामार्चनच० "द्वादश्यां चैत्रमासस्य शुक्लायां मदनोत्सवः । बौधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरम्" तदीयद्वादश्यां विधानात् । "तत्र स्यात् स्वीयतिथिषु वह्न्यादेर्दमनार्पणमिति" पाद्मोक्तेः वह्न्यादिभक्तानां स्वस्वतिथिष्वपि विधानात् । तत्र तिथि-देवताश्च "वह्नि १विरिञ्चि २गिरिजा ३गणेशः ४फणी ५विशाखो ६दिनकृत् ७महेशः । ८दुर्गा ९ऽन्तको १०विश्व ११हरी १२स्मरश्च १३शर्वः १४शशी १५चेति तिथीषु पूज्याः" इत्युक्ता बेद्याः । एतदनुसारेण "शिवभक्तादिभिस्तु चतुर्दश्यां कार्य्यमिति नि० सि० व्यवस्थापितम् । रघु-नन्दनेन त्रयोदश्यां कार्य्यतोक्तिः त्रयोदश्याः स्मरतिथि-त्वादन्यदेवतानुपासकाभिप्रायेणेति न विरोधः । तस्य नित्यतोक्ता नि०सि०पाद्मे "ऊर्जे व्रतं मधौ दोलाम् श्रावणे तन्तुपूजनम् । चैत्रे च दमनारोपमकुर्व्वाणो व्रजत्यधः" प्रागुक्तरामार्चनच० वाक्ये च प्रतिसंवत्सर-मित्युक्तेरपि नित्यता । सा च त्रयोदशीकरणपक्षे द्वादशीयुक्ता ग्राह्या 'त्रयोदशी प्रकर्त्तव्या द्वादशी संयुता विभो ! । ति० त० ब्रह्मवैवर्त्तात् । द्वादशीकरण-पक्षे विशेषः" नि० सि० रामार्चनच० उक्तो यथा । "पारणाहे न लभ्येत द्वादशी घटिकाऽपि चेत् । तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे" । चतुर्द्दशीकरणपक्षे पूर्व्वविद्धैव ग्राह्या । "मधोः श्रावणमासस्य या च शुक्ला चतुर्द्दशी । सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कदाचनेति" हेमाद्रौ बौधायनोक्तेः । अन्यदिवसकरणे तु तन्तुदामनपर्व्वणोरुक्तवाक्योत पूर्व्वविद्धैव तिथिर्ग्राह्या । दैवात् चैत्रे तदकरणे गौणः काल उक्तः" नि० सि० रामार्चनच०। "हरौ (द्वादश्यां) न दमनारोपः स्यान्मधौ विघ्नतोयदि । वैशाखे श्रावणे वापि तत्तिथौ स्यात्तदर्प-णम्" श्रावणे वापि शुक्लास्ते कर्त्तव्यमिति इति वा तत्र-पाठः । इदञ्च मलमासे न कार्य्यम्" "उपाकर्म्मोत्-सर्जनञ्च पवित्रदमनार्पणमिति" कालादर्शे मलमासवर्ज्येषु परिगणनात् । उपाकर्म्म च हव्यञ्च कार्य्यं पर्व्वोत्-सवं तथा । उत्तरे नियतं कुर्य्यात् पूर्व्वे तद्विफलं भवेत्" कालमा० प्रजापतिवचनाच्च । शुक्लास्तादौ तु कार्य्यएव । रामार्चनच० पूर्व्वोक्तवचनात्" "उपाकर्म्मोत्सर्जनञ्च पवित्रदमनार्पणम् । देयानस्य बलिं विष्णोः शयनं परि-वर्त्तनम् । कुर्य्याच्छुक्रस्य च गुरोर्मौढ्येऽपीति विनिश्चयः" बृहद्गर्गवचनाच्च । इति दमनारोपरूपकाममहोत्सव-स्तिथिभेदेन दर्शितः । अनङ्गव्रतरूपस्तन्महोत्सवस्तु चैत्र शुक्लत्रयोदश्यामेव । हेमाद्रौ कालखण्डे भविष्ये "चैत्रो-त्सवे सकललोकमनोविलासे कामं त्रयोदशतिथौ च वसन्तयुक्तम् । पत्न्या सहार्च्य पुरुषप्रवरोऽथ योषित् सौभाग्यरूपसुतसौख्ययुतः सदा स्यात्" सा च पूर्व्वयुता ग्राह्या "त्रयोदशतिथिः सिते" इति पूर्व्वविद्धा ग्रहणे दीपिकोक्तेः । एवं च काममहशब्देन लक्षणया तदाधारपरत्वे चैत्रशुक्लत्रयोदश्येव ग्राह्येति तु न्याय्यम् ।

काममुद्रा स्त्री तन्त्रसा० "हस्तौ तु संपुटौ कृत्वा प्रसृता-ङ्गुलिकौ तथा । तर्ज्जन्यौ मध्यमापृष्ठे अङ्गुष्ठौ मध्यमा-श्रितौ । काममुद्रेयमुदिता सर्व्वदेवप्रियङ्करी" ज्ञाना-र्णवोक्ते मुद्राभेदे ।

काममूत त्रि०कामेन मूतः मूर्च्छितः मव-क्त बेदे नि० इड-भावः ऊठ् काममूर्च्छिते । "काममूता बह्वे तद्रपामि" ऋ०१०,१०,११, "काममूता काममूर्च्छिता" भा० ।

कामयमान त्रि० काम-णिङ् शानच् । कामुके ।

कामयान त्रि० कम-णिङ् शानच् आगमशास्त्रमनित्य-मिति मुगभावः । कामुके । "कामयानसमवस्थया तुलाम्" रघुः । "कामयानशब्दः सिद्धोऽनादिश्च" वामनः । "आने मुक्"पा० । आदौ मुकन्न्यतयाऽनादित्वेन सिद्धः ।

कामयितृ त्रि० कम-णिङ् तृच् । कामुके अमरः । स्त्रियां ङीप् ।

कामरूप पु० "कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम् । (यावद्विशेषः) कामरूपाभिधोदेशो गणेशगिरिमूर्द्धनि" इत्युक्तकालेश्वरादिगिरिचतुष्टयमध्यवर्त्तिनि गणेशगिरिमूर्द्धस्थे प्राग्ज्योतिषाख्ये देशभेदे । "योनिपीठे कामगिरौ कामाख्या तत्र देवता" इत्युपक्रमे "सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे" तन्त्रचूड़ा० । कामेन रूपमस्य । २यथेष्टरूपधारिणि त्रि० "जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः" मेघ० । "स्वेच्छाधीनविग्रहं दुर्ग-सञ्चारक्षमम्" मल्लि० । कामं काम्यं सुन्दरं रूपमस्य ३अतिशोभने त्रि० ।

कामरूपिन् त्रि० कामं काम्यरूपमस्त्यस्य प्राशस्त्येन इनि । १प्रशस्तरूपवति । कामेन स्वेच्छया रूपं धार्य्यत्वेनास्त्यस्य इनि । स्वेच्छया २यथेष्टरूपधारिणि त्रि० । "सर्व्वमासु निचेतव्यं हरिभिः कामरूपिभिः" रामा० । २ विद्याधरे

कामरेखा स्त्री कामानां कामव्यापाराणां लेखा पङ्क्तिर्यत्र तस्य रः। कामव्यापारराणियुक्तायां वेश्यायाम् शब्दमा०

कामल त्रि० कम-कलच्। १ कामुके। आधारे कलच्। २ वसन्तकाले पु० कस्य जलस्यामलोऽसम्बन्धो यत्र। ३ मरुदेशे च मेदिनी। ४रोगभेदे पुंस्त्री मेदि०। तन्निदानादि। "पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते। तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते" निदानम्। "हरिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः। रक्तपित्तशकृन्मूत्रो भेदकर्णो हतेन्द्रियः। दाहाविपाकदौर्बल्यसदनारुचिकर्षितः। कामला बहुपित्तैषा कोष्ठशाखाश्रया मता। कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला। तस्य सम्प्रा प्तिः। तस्यारिष्टलक्षणं यथा। कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः। स रक्ताक्षिमुखच्छर्दिविण्मूत्रो यस्य ताम्यति। दाहारुचितृषानाहतन्द्रामोहसमन्वितः। नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामलो। छर्द्यरोचकहृल्लासज्वरक्लोमनिपीडितः। नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान् विपद्यते" माधवनिदानम्। [लिङ्गे हेम०।

कामलता स्त्री कामस्य लतेव तद्गुणभूयिष्ठत्वात्। पुंचिह्ने

कामलायन पु० कमलस्यापत्यं नडादि०फक्। कमलापत्ये उपकोसलाख्ये मुनौ। "उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास" छा०उ०।

कामलाली स्त्री कामं यथेष्टं लाति आकर्षति ला—क ताडृश मस्ति यस्याः अच् समा०त्वित्वात् ङीप्। आकर्षणकारके देवीमूर्त्तिभेदे" तन्त्रसा० आकर्षणप्रकरणे। "अनामारक्तमिश्रेण कामलालीमनुं जपेत्" तन्मन्त्रस्तु तत्रैव दृश्यः।

कामलिका स्त्री कस्य जलस्यामलोऽसम्बन्धोऽस्यस्य ठन्। कङ्गुधान्ये शब्दचि०।

कामलिन् पु० ब०व०। कमलेन वैशम्पायनान्तेवासिभेदेन प्रोक्तमधीयते णिनि। वैशम्पायनान्तेवासिभेदकमलर्षिप्रोक्ताध्यायिषु।

कामवत् त्रि० कामोऽस्त्यस्य मतुप् मस्य वः। १अभिलाषयुक्ते २मैथुनानुरागयुक्ते च स्त्रियां ङीप् "त्यागः कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितः" भा० आ० ३८६श्लो०। ङीबन्तः ३दारुहरिद्रायां राजनि०।

कामवल्लभ पु०६त०। १आम्रवृक्षे तन्मुकुलं हि कन्दर्पप्रियम्। २ज्योत्स्नायां स्त्री राजनि०।

कामवृन्त पु० कामं बीजाङ्कुरनिरपेक्षतया यथेच्छं वृन्तः। धन्दाके (परगाछा)। राजनिघण्टुः।

कामवृत्त त्रि० कामं यथेष्टं निरङ्कुशं वृत्तमस्य। यथेष्टाचारिणि। "यस्तु स्यात् क्षत्रियः कश्चित् कामवृत्तः परन्तप!" "यस्तु स्यात् कामवृत्तोऽपि पार्थ ब्रह्मपुरस्कृतः।" भा०आ०१७०अ०।

कामवृत्ति स्त्री ६त०। १कामस्य चेष्टिते। कामेन स्वेच्छया वृत्तिः। २स्वेच्छाचारे। "न कामवृत्तिर्वचनीयमीक्षते" कुमा० कामतोवृत्तिरस्य। ३ यथेष्टाचारयुक्ते त्रि०।

कामवृद्धि पु०कामस्य वृद्धिर्यस्मात्। कर्णाटदेशप्रसिद्धे (कामज) इतिख्याते क्षुपभेदे राजनि०।६त०। २कामस्य वृद्धौ स्त्री

कामवृन्ता स्त्री कामतो वृन्तं यस्याः। पाटलायाम् शब्दमा०।

कामशक्ति स्त्री। कामस्य शक्तिर्गोयिकाभेदः। पदार्थादर्शे राघवभट्टोक्ते १कामदेवपत्नीभेदे। सा च पञ्चाशद्विधा यथा "रतिः १ प्रीतिः २ कामिनी च ३, मोहिनी ४ कमलप्रिया ५। विलासिनी ६ कल्पलता ७, श्यामला च ८ शुचिस्मिता ९। विस्मिताक्षी१० विशालाक्षी ११, लेलिहाना १२ दिगम्बरा १३। वामा १४ कुब्जा १५ धरा १६ नित्या १७, कल्याणी १८ मोहिनी१९ तथा। सुलोचना २० सुलावण्या २१, तथैव च विमर्द्दिनी २२। कलहप्रिया २३ चेकाक्षी २४, सुमुखी२५ नलिनी २६ तथा। जटिला२७ पालिनी २८ चैव, शिवा२९ सुधा३० रसा ३१ भ्रमा ३२। चारुलोला ३३ चञ्चला ३४ च, दीर्घजिह्वा ३५ रतिप्रिया ३६। लोलाक्षी ३७ भृङ्गिणी ३८ चैव, पाटला ३९ मार्दिनी ४० तथा। माला४१ च हंसिनी ४२ विश्वतोमुखी ४३ नन्दिनी४४ तथा। राङ्गिणी च तथा कान्तिः ४६। कलकण्ठी४७ वृकोदरा ४८। मेघश्यामा ४९ रघोन्मत्ता ५०, एवं पञ्चाशदीरिताः। शक्तयः कुङ्कुमनिभाः सर्वाभरणभूषिताः। नीलोत्पलकरा ध्येयास्त्रैलोक्याकर्षणक्षमाः" इति। तन्त्रसारे कामरतिन्यासे पञ्चाशद्वर्णात्मकमातृकाया एकैकवर्णसंयोगेन कामशब्ददर्शितानां पञ्चाशतः कामानां योगेन च एतासां न्यासोऽभिहितः। तत्र नाममाला कश्चिद्भेदोऽस्ति। "पञ्चाशद्वर्णगुणिता पञ्चाशद्वर्णमातृकाम्। कृते तद्वर्णतोभिन्नां तथा रुद्रादिकान् क्रमादिति" शा० ति० पद्व्या० राघवभट्टेन आदिपदेन पञ्चाशत्कामास्तच्छक्तयश्च ग्राह्या इति कीर्त्तनात् पञ्चाशदेव कामशक्तयः। अतः शब्दकल्पद्रुमे कामशब्दे रतिभेदस्यैकपञ्चाशत्त्वं यत् प्रतिज्ञातं तत्-

प्रामादिकमेव । किन्तु एकपञ्चाशत्कामशक्तयो रतिशब्दे द्रष्टव्या इत्युक्तिरपि प्रतिज्ञामात्रं रतिशब्दे तत्र तन्नामानुल्लेखनात् पञ्चाशत्कामानामेकपञ्चाशत् शक्तयोऽनुपपन्ना एवेति बोध्यम् ।

कामशर पु० कामस्य शर इव । १आम्रवृक्षे राजनि० । तन्मुकुलस्य कामशराकारत्वात्तस्य तथात्वम् ।

कामशास्त्र न० कामस्य काम्यस्य स्वर्गादेः प्रतिपादकं शास्त्रम् । १काम्यप्रतिपादकशास्त्रे । "अर्थशास्त्रमिदम् प्रोक्तं धर्म्मशास्त्रमिदं महत । कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना" भा० आ० १अ० भारतप्रशंसायाम् । कामस्य तच्चेष्टितस्य प्रतिपादकं शास्त्रम् । २रतिशास्त्रे च ।

कामसख पु० ६त० टच् समा० । वसन्तकाले राजनि० । अतएव कुमारे "सहचरमधुहस्तन्यस्तचूताङ्कुरास्त्रः" इति "स माधवेनाभिमतेन सख्या" इति "सहायमेकं मधुमेव लब्ध्वा" इति च वसन्तस्य तत्सहायत्वं दर्शितम् ।

कामसुत पु० ६त० । अनिरुद्धे हेम० ।

कामसू त्रि० काममभीष्टं सूते सू–क्विप् ६त० । अभीष्टसम्पादके । "किमत्र चित्रं यदि कामसूर्भूः" रघुः । कामं कामावतारं कन्दर्पं सूते । २रुक्मिण्यां स्त्री । गर्भाधानस्य सूतेरर्थत्वे । ३वासुदेवे पु० ।

कामसूत्र न० कामस्य तद्व्यापारस्य प्रतिपादकं सूत्रम् । वात्स्यायनादिप्रणीते कामव्यापारबोधके शास्त्रभेदे ।

कामस्तुति स्त्री ६त० । प्रतिग्रहदोषापनुत्तये प्रतिग्रहीतृपाठ्ये कामस्य स्तुतिरूपे मन्त्रभेदे स च मन्त्रः "कोऽदात् ? कस्मा अदात् ? कामोऽदात् कामायादात् कामोदाता कामः प्रतिग्रहीता कामैतत्ते" यजु० ७ । ४८ । यथाचास्य प्रतिग्रहदोषाभावज्ञापकत्वम् तथाऽस्य मन्त्रस्य व्याख्याने न वेददीपे दर्शितम् । यथा "दातुर्दानाभिमानाभावाय स्वस्य प्रतिग्रहदोषाभावाय च देहेन्द्रियवशात् कामं विविनक्ति कोऽदादिति । कोनरोऽदात् ? दत्तवान् कस्मै नरायादात् ? । प्रश्नद्वयस्योत्तरमाह । कामोऽदात् कामायैवादात् न त्वं दाता नाहं प्रतिग्रहीता । त्वत्कामाभिमानी देवो मत्कामाभिमानिनेऽदात् । एवञ्च काम एव दाता काम एव प्रतिग्रहीता नान्यः । हे काम ! एतद् द्रव्यं ते तव दातृप्रतिग्रहीतृत्वात्" । अय भावः तत्तत्फलकामनया दाता तत्तद्द्रव्याणां दानात् स्वाभीष्टसिद्धये च प्रतिग्रहीता तेषां ग्रहणात कामाभिमानिनो देवस्यैव दानप्रतिग्रहयोः प्रयोजकत्वात् द्रव्यस्वामित्वं कामदेवस्यैवेति न प्रतिग्रहीतुरिति उक्तमन्त्रपाठे न प्रतिग्रहदोषः इति । अतएव "प्रतिग्रहजदोषस्य शान्त्यै कामस्तुतिं पठेत्" स्मृतौ तत्पाठोविहितः ।

कामहन् त्रि० कामं हतवान् हन् क्विप्–६त० । परमेश्वरे । "कामहा कामकृत् कान्तो" विष्णुस० । तस्य च स्वात्मज्ञानेन सर्व्वकामहन्तृत्वात् तथात्वम् "छिद्यते हृदयग्रन्थिर्भिद्यन्ते सर्व्वसंशयाः । क्षीयन्ते चास्य कर्म्माणि दृष्टे तस्मिन् परावरे" इति श्रुत्या तस्य दर्शनेनाविद्याग्रन्थिरूपकामादिविभेदकत्वमुक्तम् । तथाच तत्त्वज्ञानेन मिथ्याज्ञानस्य नाशे तत्कार्य्याणां रागद्वेषादिदोषाणां नाशात् तस्य तथात्वम् तदेतदुक्तम् गौ० सू० तत्त्वज्ञानादित्यनुवृत्तौ "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायादनन्तरापायादपवर्गः" इति, २महादेवे च ।

कामाक्षी स्त्री कामं शोभनमक्षि यस्याः षच् समा० षित्वात् ङीष् । १देवीमूर्त्तिभेदे तन्त्रोक्ते २वीजभेदे च ।

कामाख्या स्त्री सतीदेव्या १योनिपीठरूपे स्थाने २तदधिष्ठात्र्यां देव्याञ्च । तन्नामनिरुक्तिश्चाद्भुर्भावादि कालि०पु०६१अ० दर्शितं यथा

"श्रीभगवानुवाच । कामार्थमागता यस्मान्मया सार्द्धं महागिरौ । कामाख्या प्रोच्यते देवी नीलकूटे रहोगता । कामदा कमिनी कामा कान्ता कामाङ्गदायिनी । कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते । तत्पीठकारणमुक्तं तत्रैव । "अथ काले बहुतिथे व्यतीते प्राक्सर्ज्जने । अष्टाहां दक्षतनयां, भार्य्यार्थेऽहं वधूवराम् । सा मेऽभूत् प्रेयसी भार्य्या, प्रदाय स्वतयं पितुः । अनिष्टकारी त्वन्वेत् स्याः, प्राणांस्त्यक्ष्ये तदा त्वहं । ततो यत्ते समस्तन्तु स च वश्ये चराचरम् । न मां नापि सतीं वश्ये तदनिष्टात्मृता तु सा । ततो मोहसमापन्नस्तामादाय मृतानहम् । प्राभ्रपीठवरं तन्तु भ्रममाण इतस्ततः । तस्यास्त्वङ्गानि पर्य्यायात् पतितानि यतो यतः । तत्तत् पुण्यतमं जातं योगनिन्द्राप्रभावतः । तस्मिंस्तु कुब्जिकापीठे सत्यास्तद्योनिमण्डलम् । पतितं, तत्र सा देवी महामाया व्यलीयत । लीनायां योगनिद्रायां मयि पर्व्वतरूपिणि । स नीलवर्णः शैलोऽभूत् पतिते योनिमण्डले । स तु शैलो महातुङ्गः पातालतलमाविशत् । तस्या आक्रमणाद्गाढं ततस्तं द्रुहिणोऽभ्ययात् । स तु पूर्व्वं ब्रह्मशक्तिशिलां धर्त्तुं चतुर्म्मुखः । शैलरूपोऽभवत्तेन शैलरूपेण मामधात् ब्रह्मा पर्व्वतरूपेण मयि पर्व्वतरूपिणि । हंसक्तोऽधो·

ऽगमच्छादमाक्रान्तो मायया। विधिः। ततो वराहः सम्भक्तो मयि मां स तु माधवः। शैलरूपः शैलरूपं धर्त्तुं समुपचक्रमे। सोऽप्यधोऽगान्मया सार्द्धं तदा पर्व्वतरूपिणा। आक्रम्य देवीं पृथिवीं स्थितो भुवि निखातकः। शतं शतं योजनानां तुङ्गमासीद्गिरित्रयम्। तदाक्रान्तं महादेव्या सर्व्वमेव ह्यधोगतम्। क्रोशमात्रं स्थितं तुङ्गं शेषं तस्त्रियस्य तु। एका समस्तजगतां प्रकृतिः सा यतस्ततः। ब्रह्मविष्णुशिवैर्देवैर्धृता सा जगतां प्रसूः। तत्र पूर्व्वो ब्रह्मशैलः श्वेत इत्युच्यते बुधैः। मद्रूपधारी शैलस्तु नील इत्युच्यते तथा। स तु मध्यगतः शैलस्त्रिकोणोदूखलाकृतिः। विभ्राजमानः सततं मध्ये ब्रह्मवराहयोः। वराहः शैलरूपो यः स चित्र इति कथ्यते। स सर्व्वेषां स्थितः पश्चात् दीर्घः सर्व्वेभ्य एव तु। ऐशान्यां योऽभवत् कूर्म्मः शैलरूपो महाद्युतिः। मणिकर्णः स नाम्ना तु ख्यातो देवोपसेवितः। योऽनन्तरूपः शैलस्तु वायव्यां समवस्थितः। मणिपर्व्वतसंज्ञोऽसौ पर्व्वतो माधवप्रियः। महामायागिरिर्यस्तु नैर्ऋत्यां समवस्थितः। स गन्धमादनो नाम्ना सर्व्वदा शङ्करप्रियः। वराहपृष्ठभवने यत्र छिन्नौ महासुरौ (मधुकैटभौ)। हरिणा तत्र संजातः पाण्डुनाथ इति स्मृतः। ब्रह्मशक्तिशिलायास्तु पूर्व्वभागे तु मध्यतः। यस्तु पर्व्वतरूपोऽहं स तु भस्माचलाह्वयः। पुण्यकूटे मया सार्द्धं देवी रहसि संस्थिता। सत्यास्तु पतितं तत्र विशीर्णं योनिमण्डलम्। शिलात्वमगमत् शैले कामाख्या तत्र संस्थिता। संस्पृश्य तां शिलां मर्त्त्यो ह्यमर्त्त्यत्वमवाप्नुयात्। तस्याः शिलाया माहात्म्यात् यत्र कामेश्वरी स्थिता। अद्भुतं यस्य गुह्ये तु सोऽहं भस्म भवेद्गतम्। सा चापि प्रत्यहं पुत्र ! पञ्चमूर्त्तिधरा भवेत्। मोहार्थं सर्व्वलोकानां ममापि प्रीतये शिवा। अहं पञ्चमुखेनाशु पञ्चभागे व्यवस्थितः। ईशानः पूर्व्वभागस्थः कामेश्वर्य्याः प्रधानतः। ऐशान्यां वै तत्पुरुषो ह्यघोरस्तस्य सन्निधौ। सद्योजातोऽथ वायव्यां वामदेवस्तु सङ्गतः। देव्याश्चापि सुरश्रेष्ठ! पञ्चरूपाणि भैरव !। शृणु वेताल ! गुह्यानि देवैरपि सदैव हि। कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा। शारदाऽथ महोत्साहा कामरूपगुणैर्युता। मयि लिङ्गत्वमापन्ने शिलायां योनिमण्डले। सर्व्वे शिलात्वमगमन् शैलरूपाश्च निर्ज्जराः। यथाहं निजरूपेण रेमे वै सह मायया। शिलारूपप्रतिच्छन्नास्तदा सर्व्वास्तु देवताः।

शिलारूपप्रतिच्छन्नाः शैले शैले व्यवस्थिताः। रमन्ते च स्वरूपेण नित्यं रहसि सङ्गताः। ब्रह्मा विष्णुरहञ्चात्र दिक्पालाः सर्व्व एव ते। अन्येऽप्यत्र स्थिता देवाः सानुकूलाः सदा मयि। उपासितुं तदा देवीं कामाख्यां कामरूपिणीम्। नीलशैलस्त्रिकोणस्तु मध्ये निम्नः सदाशिवः। तन्मध्ये मण्डलं चारु षट्शक्तिसमन्वितम्। गुहा मनोभवा तत्र मनोभवविनिर्म्मिता। योनिस्तस्यां शिलायान्तु शिलारूपा मनोहरा। वितस्तिमात्रविस्तीर्णा एकविंशाङ्गुलायता। क्रमसूक्ष्मविनिर्म्माणभस्मशैलान्तगामिनी। सिन्दूरकुङ्कुमारक्ता सर्व्वकामप्रदायिनी। तस्यां योनौ पञ्चरूपा नित्यं तिष्ठति कामिनी। महामाया जगद्धात्री मूलभूता सनातनी। तत्राष्टौ योगिनीर्नित्यं मूलभूताः सनातनीः। पूर्व्वोक्ताः शैलपुत्राद्याः स्थिता देव्याः समन्ततः। तासान्तु पीठनामानि शृणु चैकत्र भैरव !। गुप्तकामा १ च श्रीकामा २ तथा च विन्ध्यवासिनी ३। कोटीश्वरी ४ धनस्था ५ तु पाददुर्गा ६ तथापरा। दीर्घेश्वरी ७ क्रमादेव प्रकटा भुवनेश्वरी ८। स्वयोगिन्यः पीठनाम्ना ख्याता अष्टौ च देवताः। सर्व्वतीर्थानि चैकत्र जलरूपाणि भैरव !। स्थितानि नाम्ना सौभाग्या दरेखया प्राणिपुण्यदा। विष्णुस्तु तीरे तस्याः स नाम्ना कमल इत्युत। कामुकाख्यस्तु वटुकः कामाख्याभ्यर्णसंस्थितः। लक्ष्मीः सरस्वती देव्यौ देव्या अङ्गे व्यवस्थिते। ललिताख्याऽभवल्लक्ष्मीर्म्मातङ्गी तु सरस्वती। गणाध्यक्षः पूर्व्वभागे तस्य शैलस्य संस्थितः। सिद्धः स नाम्ना विख्यातो हारि देव्याः प्रियः सुतः। कल्पवृक्षः कल्पवल्ली तिन्तिड़ी चापराजिता। भूतास्तस्मिन्महाशैले स्थिते देव्या धृतप्रिये। वराहः पाण्डुनाथाख्यः स्थितस्तत्र हरिर्यतः। जघने शिरसी कृत्वा जघान मधुकैटभौ। तस्यासन्ने ब्रह्मकुण्डं ब्रह्मणा निर्म्मितं पुरा। ईशानाख्यं शिरोरत्नं तत् सिद्धेश्वरसंज्ञकम्। शिलारूपं सिद्धकुण्डं मध्यस्थं विद्धि भैरव !। तस्यासन्ने गयाक्षेत्रं क्षेत्रं वाराणसी तथा"। "योनिमण्डलसङ्काशं कुण्डं भूत्वा व्यवस्थितम्। तत्रैवामृतकुण्डन्तु सुधासंघप्रपूरितम्। मम प्रियार्थमिन्द्रेण स्थापितं सह निर्ज्जरैः। वामदेवाह्वयं शीर्षं श्रीकामेश्वरसंज्ञकम्। कामकुण्डं महापुण्यं तस्यासन्ने व्यवस्थितम्। केदारसंज्ञकं क्षेत्रं मध्यस्थं सिद्धकामयोः। दीर्घं चतुर्द्दशव्यामं छायाच्छत्राह्वयं तु तत्। तस्यासन्ने शैलपुत्री गुप्तकामाह्वया तु सा। गुप्तकुण्डस्य मध्यस्था

कामेशपार्श्वगा सङ्गता। कामेश्वरशिलासक्ता कामाख्यासंस्थिता सदा। पूर्व्वभागेन संसक्ता योनेस्तु परभागतः। कामकामाख्ययोर्म्मध्ये कालरात्रिर्व्यवस्थिता। पीठे दीर्घेश्वरी नाम्ना सीमाभागे प्रचण्डिका। कामाख्याप्रस्तरप्रान्ते कुष्माण्डी नाम योगिनी। पीठे कोटीश्वरी नाम्ना योनिरूपेण संस्थिता। यच्चाघोराह्वयं शीर्षं तत् कामायास्तु दक्षिणे। पीठे भैरवनामा तु गीयते परमर्षिभिः। चामुण्डाभैरवी नाम्ना भैरवासन्नसंस्थिता। नायिका कामदा भक्ते, चण्डमुण्डविनाशिनी। कामाभैरवयोर्म्मध्ये स्वयं देवी हरापगा। हिताय सर्व्वजगतां देव्यास्तु प्रीतये स्थिता। सद्योजाताह्वयं शीर्षं पीठे त्वाम्रातकेश्वरम्। भैरवाख्ये गह्वरे तु स्थितं देवर्षिसेवितम्। विद्धि तत्रैव दुर्गाख्यां नायिकां योगरूपिणीम्। सिद्धकामेश्वरीं नाम्ना ख्यातां देवेषु नित्यशः। अजीर्णपत्रः सुच्छायो वृक्षस्तत्र तु संस्थितः। आम्रातकः कल्पवृक्षः कल्पवल्लीसमन्वितः। पीठे तु सिद्धगङ्गाख्या स्वयं गङ्गा समुत्थिता। आम्रातकस्य निकटे मम प्रीतिविवृद्धये। पुष्कराख्यन्तु तत् क्षेत्रं पीठे त्वाम्रातकाह्वयम्। ऐशान्यां तत्पुरुषाख्यं मम शीर्षं व्यवस्थितम्। भुवनेश्वरनाम्ना तु पीठे ख्यातश्च भैरव!। गह्वरं भुवनेशस्य भवनानन्दसंज्ञकम्। तस्याग्रे तु सुरभिः शिलारूपेण संस्थिता। कामधेनुरिति ख्याता पीठे कामप्रदायिनी। योऽसौ शरभमूर्त्तिस्तु मध्यखण्डप्रचण्डकः। चण्डभैरवनामाऽभूत् कोटिलिङ्गाह्वयस्तु सः। मूर्त्तिभिः पञ्चभिः पञ्चभागेन समास्थितः। अहं पश्चादतिप्रीत्या भैरवाख्यः स्थितोऽधरे। महागौरी तु या देवी योगिनी सिद्धरूपिणी। सा ब्रह्मपर्वते चास्ते शिलारूपेण चोद्धृतः। अतीवरूपसम्पन्ना नाम्ना सा त्वपराजिता। कामधेनोरदूरस्था पूर्व्वभागे महेश्वरी। श्रीकामाख्या योनिरूपा चण्डिका सा तु योगिनी। आग्नेय्यां विद्धि तां संस्थां सर्व्वकामप्रदां शुभाम्। योगिनी चण्डघण्टाख्या पीठेऽभूत् विन्ध्यवासिनी। योगिनी स्कन्दमाता तत्पीठेऽभूद्वनवासिनी। कात्यायनीपीठनाम्ना पाददुर्गेति गद्यते। नैर्ऋत्यां नीलशैलस्य प्रान्ते सा संस्थिता शिवा। योऽसौ नन्दी मम तनुः स तु पाषाणरूपधृक्। संस्थितः पश्चिमद्वारि हनूमान् पाठनामतः"।

क्षेत्रपरत्वमप्युक्तं देवीगीतायाम् यथा "श्रीमत् त्रिपुरभैरव्याः कामाख्या योनिमण्डलम्। भूमण्डले क्षेत्ररत्नं महामायाधिवासितम्। नातःपरतरं स्थानं क्वचिदस्ति धरातले। प्रतिमासं भवेद्देवी यत्र साक्षाद्रजस्वला। तत्रत्याः देवताः सर्व्वाः पर्व्वतात्मकतां गताः। पर्व्वतेषु वसन्त्येव महत्यो देवता अपि। तत्रत्या पृथिवी सर्व्वा देवीरूपा स्मृता बुधैः। नातःपरतरं स्थानं कामाख्यायोनिमण्डलात्"।

कामाग्निसन्दीपन न० भैषज्यरत्नावलीदर्शिते मोदकभेदे "कर्पूररसं गन्धकमभ्रकञ्च द्विचारचितं लवणानि पञ्च। शठीयमानीद्वयकीटहारितालीशपत्राख्यपरं द्विकर्षम्। जीरं चतुर्जातलवङ्गजातिफलञ्च कर्षत्रयमेवमन्यत्। सहृद्दारं कटुकत्रयञ्च तथा चतुष्कर्षमितं निबोध। धन्याकयष्टीमधुकं कशेरु, कर्षाः पृथक् पञ्च वरी विदारी। वीरेभकाणेभबलात्मगुप्तावीजं तथा गोक्षुरवीजयुक्तम्। सवीजपत्रेन्द्ररजःसमानं समा सिता क्षौद्रघृतञ्च तुल्यम्। कर्षैकमिन्दोरथ मोदकं तत् कामाग्निसन्दीपनमेतदुक्तम्"। तद्गुणाश्च कामस्याग्नेश्च दीपकतादयस्तत्रोक्ता द्रष्टव्याः।

कामाङ्कुश पु० कामे कामोद्दीपने अङ्कुश इव। १ नखे त्रिका०। तस्याघातेन कामोद्दीपनात् तस्य तथात्वम्। कामस्य च तिथिभेदे स्थानविशेषे नखाघातेन यथोद्दीपनं भवति तथा शारदीपिकायामुक्तं तच्च वाक्यं कामशब्दे दर्शितम्। २ पुंसोलिङ्गे जटाधरः। कामस्याङ्कुश इव। ३ कामप्रतिरोधके च। [इत्ले जटाधरः।

कामाङ्ग पु० कामं कामोद्दीपनम् अङ्गं मुकुलमस्य। आम्र-

कामात्मज पु० ६त०। अनिरुद्धे।

कामात्मन् पु० कामप्रधानः रागप्रधान आत्मा मनो यस्य। रागप्रधानचित्ते। "कामात्मता न प्रशस्ता न चैवेहास्त्यकामता" मनुः। कामः तदायत्तः आत्मा स्वरूपं यस्य। २ कामायत्तस्वरूपे कामप्रसक्ते ३काममये च। "कामात्मानं तदात्मानं न शशाक नियच्छितुम्" भा० आ० १८४ श्लो०। कामात्मानं काममयमात्मानमन्तःकरणम् नियच्छितुमित्यार्षः नियन्तुमित्यर्थे।

कामाधिष्ठान न० ६त०। इन्द्रियमनोबुद्धिषु "इन्द्रियाणि मनोबुद्धिरस्याधिष्ठानमुच्यते" गीतायामिन्द्रियादीनां अस्य—कामस्याधिष्ठानत्वोक्तेस्तेषां तथात्वम्।

कामानशन न० काममनशनम्। यथेष्टभोजनरहिते तपोभेदे। रागद्वेषादिरहितैरिन्द्रियैः विषयसेवनेऽपि यथेष्टानशनं भवत्येवेति बोध्यम्।

कामान्ध पुंस्त्री कामेन कामोद्दीपनेन अन्धयति अन्ध णिच्-अच्। १कोकिले राजनि०। तद्ध्वनिना हि कामस्योद्दीपनात्तस्य तथात्वम्। स्त्रियां जातित्वात् ङीष्। कामेनान्धः ६त०। २स्मरान्धे स्मरवेगेन कर्त्तव्यताज्ञानशून्ये त्रि०।

कामान्धा स्त्री कामं यथेष्टमन्धयति अन्ध–अच्। कस्तूर्यां राजनि०। तस्याः कृष्णरूपत्वेन यथेष्टान्धकारतुल्यत्वात् तथात्वम्।

कामायुध पु० कामस्यायुधमिव मुकुले आकारोऽस्त्यस्य अच्। आम्रवृक्षे राजनि०। ६त०। कामस्यास्त्रे न०।

कामायुस् पु० कामं यथेष्टमायुर्यस्य। गरुड़े त्रिका०।

कामारण्य न० कामं शोभनमरण्यम्। मनोहरवने शब्दर०

कामारि पु०६त०। १महादेवे। २माक्षिकोपधातुभेदे च हेमच०

कामार्त्त त्रि० कामेन ऋतः ३त० वृद्धिः। कामेन पीडिते "कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" मेघ०

कामालिका स्त्री काममलति भूषयति अल–भूषणे ण्वुल् टापि अत इत्त्वम्। सुरायां हारा०।

कामालु पु० कामं यथेष्टमलति पुष्पविकाशेन अल–पर्याप्तौ उण्। रक्तकाञ्चने शब्दच०। तस्य पुष्पेण सर्व्वावयवव्यापनात् तथात्वम्।

कामावतार पु० ६त०। रौक्मिणेये वासुदेवात्मजे।

कामवशायिता स्त्री कामेन इच्छया व्यवशाययति पदार्थान् स्वचित्ते व्यव+शो-णिच्-णिनि तस्य भावः तल्। सत्यसङ्कल्पत्वे योगिनामैश्वर्यभेदे शब्दचि०यथेच्छं पदार्थानां स्वचित्ते समावेशनात् योगिनस्तथात्वम्। अन्येषां निश्चेतव्यानुसारेण पदार्थनिश्चयान्न तथात्वम्।

कामावसायिता स्त्री कामेन स्वेच्छयाऽवस्यति पदार्थान् अव+सो–णिनि तस्य भावः तल्। सत्यसङ्कल्पत्वरूपे योगिनामैश्वर्यभेदे। "अणिमा लघिमा प्राप्तिः प्राकाम्यञ्च तथेशिता। व्यापित्वञ्च वशित्वञ्च तथा कामावसायिता"। "यथास्य सङ्कल्पो भवति भूतेषु तथैव भूतानि भवन्ति अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते" इति सां०कौ०।

कामासन न० कामस्येति निपात्यनेन अस–करणे ल्युट् ६त०। रुद्रयामलोक्ते आसनभेदे। तल्लक्षणं यथा "अथ कामासनं वक्ष्ये काममर्द्दनहेतुना। गरुडासननाकृत्य कनिष्ठाग्रं स्पृशेद्भुवि"। गरुडासनञ्च गरुडासनशब्दे वक्ष्यते

कामि त्रि० कम–णिङ्–इण्। कमुके। कामपत्न्यां रत्यां स्त्री मेदि०।

कामिक पुंस्त्री कामोऽस्त्यस्य ठन्। १कारण्डवपक्षिणि शब्दर० स्त्रियां जातित्वात् ङीष्। कामेन निर्वृत्तम् ठञ्। २कामेन निर्वृत्ते काम्ये। "देवतास्तस्य तुष्यन्ति कामिकं तस्य सिध्यति" भा०अनु०६०२५श्लो०। स्त्रियां ङीप्। "ततद्दृष्टं भृकारर्षिस्तस्य वै पुत्रकामिकीम्" भा० अनु० १६६८श्लो०। कामिकं काम्यमधिकृत्य कृतो ग्रन्थः अण्। ३काम्याधिकारेण कृते ग्रन्थे हेमाद्रौ तत्प्रमाणानि भूरीणि सन्ति कामधेनुशब्दे दिङ्मात्रं दृश्यम्।

कामिन् त्रि० कम–णिङ्–णिनि। १कामनायुक्ते २ अतिशयस्मरवेगयुक्ते च। "स बभूव ततः कामी तया सार्द्धमकामया" भा०आ०४१८४श्लो०। स्त्रियां ङीप् ङीबन्तः ३स्त्रीसामान्ये। काम+भूम्नि प्राशस्त्ये वा इनि ङीप्। ४अतिस्मरवेगयुक्तायां स्त्रियां ५सुन्दर्यां च स्त्री अमरः। "केषां नैषा भवति कविता कामिनी कौतुकाय" प्रसन्नरा०। "मधूनि वक्त्राणि च कामिनीनामामोदकर्म्म व्यतिहारमीयुः" माघः। ६भीरुस्त्रियां ७वन्दायां (परगाछा) मेदि०। ८दारुहरिद्रायां सुन्दरवर्णवत्त्वात् तस्या तथात्वम् ९सुरायाञ्च स्त्री राजनि०। तस्याः कामाधिक्यसम्पादकत्वात् तथात्वम्। प्रशस्तः कामोऽस्त्यस्य इनि। १०सत्यसङ्कल्पे परमेश्वरे पु०। "कामी कान्तः कृतागमः" विष्णुस०। ११चक्रवाके १२पारावते च पुंस्त्री मेदि० १३चटके पुंस्त्री शब्दर०एतेषां कामातिशयवत्त्वात्तथात्वम्। १४चन्द्रे पु०त्रिका०कामोद्दीपकत्वात्तस्य तथात्वम्। १५ऋषभौषधौ पु० सेवनेन कामपोषणात्तस्य तथात्वम्। १६सारसपक्षिणि च पुंस्त्री राजनि० कामुकत्वात्तस्य तथात्त्वम्। सर्वत्र स्त्रियां ङीप १७कामशक्तिभेदे स्त्री। कामिनीविरागानुरागचिह्नतत्सेवनप्रकारादिः ह०स०दर्शितो यथा "शस्त्रेण वेणीविनिगूहितेन विदूरथं (राजभेदम्) स्वा महिषी जघान। विषप्रदिग्धेन च नूपुरेण देवी विरक्ता किल काशिराजम्। एवं विरक्ता जनयन्ति दोषान् प्राणच्छिदोऽन्यैरनुकीर्त्तितैः किम्?। रक्ता विरक्ताः पुरुषैरतोऽर्थात् परीक्षितव्याः प्रमदाः प्रयत्नात्। स्नेहं मनोभवकृतं कथयन्ति भावान्नाभीभुजस्तनविभूषणदर्शनानि। वस्त्राभिसंयमनकेशविमोक्षणानि भ्रूक्षेपकम्पितकटाक्षनिरीक्षणानि। उच्चैःष्ठीवनमुत्कटप्रहसितं शय्यामनोत्सर्पणं गात्रास्फोटनजृम्भणानि सुलभद्रव्याल्पसम्प्रार्थना। बालालिङ्गनचुम्बनान्यभिमुखे सख्याः समालोकनं दृक्पातश्च पराङ्मुखे गुणकथा कर्णस्य कण्डूयनम्। इमां च विन्द्यादनुरक्तचेष्टां प्रियाणि वक्ति

स्वधनं ददाति । विलोक्य संहृष्यति वीतरोषा प्रमार्ष्टि दोषान् गुणकीर्त्तनेन । तन्मित्रपूजा तदरिद्विषत्वं कृतस्मृतिः प्रोषितदौर्म्मनस्यम् । स्तनौष्ठदानान्युपगूहनं च स्वेदोऽथ चुम्बाप्रथमाभियोगः । विरक्तचेष्टा भ्रुकुटीमुखत्वं पराङ्मुखत्वं कृतविस्मृतिश्च । असंभ्रमोदुष्परितोषता च तद्विष्टमैत्री परुषं च वाक्यम् । स्पृष्ट्वाथ वालोक्य धुनोति गात्रं करोति गर्वं न रुणद्धि यान्तम् । चुम्बाविरामे वदनं प्रमार्ष्टि पश्चात्समुत्तिष्ठति पूर्व्वसुप्ता । भिक्षाणिका प्रव्रजिता दासी धात्री कुमारिका रजिका । मालाकारी दुष्टाङ्गना सखी नापिती दूत्यः । कुलजनविनाशहेतुर्दूत्यो यस्मादतः प्रयत्नेन । ताभ्यः स्त्रियोऽभिरक्ष्या वंशयशोमानवृद्धयम् । रात्रीविहारजागररोगव्यपदेशपरगृहेक्षणिकाः । व्यसनोत्सवाश्च संकेतहेतवस्तेषु रक्ष्याश्च । आदौ नेच्छति नोज्झति स्मरकथां व्रीडाविमिश्रालसा मध्ये ह्रीपरिवर्ज्जिताभ्युपरमे लज्जाविनम्रानना । भावैर्नैकविधैः करोत्यभिनयं भूयश्च या सादरा बुद्धा पुम्प्रकृतिं च यानुचरति ग्लानेतरैश्चेष्टितैः । स्त्रीणां गुणा यौवनरूपवेषदाक्षिण्यविज्ञानविलासपूर्व्वाः । स्त्रीरत्नसञ्ज्ञा च गुणान्वितासु स्त्रीव्याधयोऽन्याश्चतुरस्य पुंसः । न पाम्यवर्णैर्मलदिग्धकाया निन्द्याङ्गसम्बन्धिकथां च कुर्य्यात् । न चान्यकार्य्यस्मरणं रहःस्था मनो हि मूलं हरदग्धमूर्त्तेः । श्वासं प्रकम्पेण समं त्यजन्ती बाहूपधानस्तनदानदक्षा । सुगन्धकेशा प्रसभोपरागा सुप्तेऽनुसुप्ता प्रथमं विबुद्धा । दुष्टस्वभावाः परिवर्ज्जनीया विमर्दकालेषु च न क्षमा याः । यासामसृग्वा सितनीलपीतमाताम्रवर्णं च न ताः प्रशस्ताः । या स्वप्नशीला बहुरक्तपित्ता प्रवाहिणी वातकफातिरिक्ता । महाशना स्वेदयुताङ्गदुष्टा या ह्रस्वकेशी पलितान्विता च । मांसानि यस्याश्च चलन्ति नार्य्या महोदरा खिङ्खिणिनी च या स्यात् । स्त्रीलक्षणे याः कथिताश्च पापास्ताभिर्न कुर्य्यात्सह कामधर्म्मम् । शशशोणितसन्निभं लाक्षारससन्निकाशमथवा यत् । प्रक्षालितं विरज्यति यच्चासृक् तद्भवेच्छुद्धम् । यच्चाद्धवेदनावर्जितं त्र्यहात्सन्निवर्त्तते रक्तम् । तत् पुरुषसम्प्रयोगादविचारं गर्भतां याति । न दिनत्रयं निषेवेत् स्नानं माल्यानुलेपनं च स्त्री । स्नायाच्चतुर्थदिवसे शास्त्रोक्तेनोपदेशेन । पुष्पस्नानौषधयो याः कथितास्ताभिरत्र मिश्राभिः । स्नायात्तथात्र मन्त्रः स एव यस्तत्र निर्द्दिष्टः । युग्मासु किल मनुष्या निशासु नार्य्यो

भवन्ति विषमासु । दीर्घायुषः सुरूपाः सुखिनश्च विकृष्ट (प्रशस्त) युग्मासु । दक्षिणपार्श्वे पुरुषो, वामे नारी, यमावुभयसंस्थौ । यदुदरमध्योपगतं नपुंसकं तन्निबोद्धव्यम् । केन्द्रत्रिकोणेषु शुभस्थितेषु लग्ने शशाङ्के च शुभैः समेते । पापैस्त्रिलाभारिगतैश्च यायात् पुञ्जन्मयोगेषु च सम्प्रयोगम् । न नखदशनविक्षतानि कुर्य्याद् ऋतुसमये पुरुषः स्त्रियाः कथञ्चित् । ऋतुरपि दश षट् च वासराणि प्रथमनिशात्रितयं न तत्र गम्यम्" ।

"आयुःक्षयभयाद्विद्वाञ्चाह्नि सेवेत कामिनीम् । अथवो यदि सेवेत तदा ग्रीष्मवसन्तयोः" इति सामान्यत उक्त्वा बालाद्यवस्थापन्नकामिनीनां सेवने फलम्, कामिनीसेवनप्रकारश्च भावप्र० दर्शितो यथा

"बालेति गीयते नारी यावद्वर्षाणि षोडश । ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरावधि । तदूर्द्ध्वमधिरूढा स्यात् पञ्चाशद्वत्सरावधि । वृद्धा तत्परतो ज्ञेया सुरतोत्सववर्जिता । अधिरूढा प्रौढ़ा । निदाघशरदोर्बाला हिता विषयिणी (भोगार्हा) मता । तरुणी शीतसमये प्रौढ़ा वर्षावसन्तयोः । नित्यम्बाला सेव्यमाना नित्यं वर्द्धयते बलम् । तरुणी ह्रासयेच्छक्तिं प्रौढोद्भावयते जराम् । सद्यो मांसन्नवञ्चान्नं बाला स्त्री क्षीरभोजनम् । घृतमुष्णोदकं स्नानं सद्यः प्राणकराणि षट् । पूति मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि । प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट् । प्राणशब्दोऽत्र बलवाचकः । बालार्कः कन्यार्कः । वृद्धोऽपि तरुणीं गत्वा तरुणत्वमवाप्नुयात् । वयोऽधिकां स्त्रियङ्गत्वा तरुणः स्थविरायते । आयुष्मन्तो मन्दजरा वपुर्वर्णबलान्विताः । स्थिरोपचितमांसाश्च भवन्ति स्त्रीषु संयताः । सेवेत कामतः कामं बलाद्वाजीकृतो हिमे । प्रकामन्तु निषेवेत मैथुनं शिशिरागमे । त्र्यहाद्वसन्तशरदोः पक्षात् वृष्टिनिदाघयोः । सुश्रुतस्तु "त्रिभिस्त्रिभिरहोभिर्हि समेयात्प्रमदां नरः । सर्व्वेष्वृतुषु घर्म्मेषु पक्षात्पक्षाद्व्रजेद्बुधः" । समेयात् सङ्गच्छेत घर्म्मेषु ग्रीष्मेषु । "शीते रात्रौ दिवा ग्रीष्मे वसन्ते तु दिवानिशि । वर्षासु वारिदध्वाने शरत्सु सरसः स्मरः । उपेयात् पुरुषो नारीं सन्ध्ययोर्नैव पर्व्वसु । गोसर्गे चार्द्धरात्रे च तथा मध्यदिनेऽपि च । विहारम्भार्य्यया कुर्य्याद्देशेऽतिशयसंवृते । रम्ये अव्याकुलागारे सुगन्ते सुखमारुते । देशे गुरुजनासन्ने विवृतेऽतित्रपाकरे । श्रूयमाणे व्यथाहेतुवचने न रमेत ना । स्नातश्चन्दनलि-

स्नातः सुगन्धः सुमनोऽन्वितः। भुक्तहृष्यः सुवसनः सुवेशः समलङ्कृतः। ताम्बूलवदनः पत्न्यामनुरक्तोऽधिकस्मरः। पुत्रार्थी पुरुषो नारीमुपेयाच्छयने शुभे। अत्याशितोऽधृतिः क्षुद्वान् सव्यथाङ्गः पिपासितः। बालो वृद्धोऽन्यवेगार्त्तस्त्यजेद्रोगी च मैथुनम्। रोगी मैथुनसंवर्द्धनीयरोगयुक्तः। भार्य्यां रूपगुणोपेतां तुल्यशीलां कुलोद्भवाम्। अभिकामोऽभिकामान्तु हृष्टो हृष्टामलङ्कृताम्। सेवेत प्रमदां युक्त्या वाजीकरणबृंहितः। रजस्वलामकामाञ्च मलिनामप्रियान्तथा। वर्णवृद्धां वयोवृद्धां तथा व्याधिप्रपीडिताम्। हीनाङ्गीं गर्भिणीं द्वेष्यां योनिरोगसमन्विताम्। सगोत्रां गुरुपत्नीञ्च तथा प्रव्रजितामपि। नाभिगच्छेत् कुमाचारां भूरिवैगुण्यशङ्कया। रजस्वलां गतवतो नरस्यासंयतात्मनः। दृष्ट्यायुस्तेजसां हानिरधर्मश्च ततो भवेत्। लिङ्गिनीं गुरुपत्नीञ्च सगोत्रामथ पर्वसु। वृद्धाञ्च सन्ध्ययोश्चापि गच्छतो जीवनक्षयः। लिङ्गिनीं प्रव्रजिताम्। गर्भिण्यां गर्भपीड़ा स्याद्व्याधितायां बलक्षयः। हीनाङ्गीं मलिनां द्वेष्यां क्षामामन्यामसंहते। देशेऽभिगच्छतो रेतः क्षीणं म्लानं मनो भवेत्। गर्भिणीं गर्भवासदिवसात् द्वितीये मासि, गर्भस्थितेरनिश्चये यथोक्तमलवत्वादिव्रताभावे वा तृतीये मासि पुंसवने कृते नाभिगच्छेत्। यतः पुंसवनानन्तरमाह व्यासः "ततस्त्यजेन्नदीतीरं देवखातोदकं तथा। भर्त्तुः शय्यां मृतापत्यां तथैवामिषभोजनम्"। अन्यच्च "आमिषस्याशनं यत्नात्प्रमदा परिवर्ज्जयेत्। देवारामनदीयानं प्रयोगं पुरुषस्य चेति"। क्षुधितः क्षुब्धचित्तश्च मध्याह्ने तृषितोऽबलः। स्थितस्य हानिं शुक्रस्य वायोः कोपञ्च विन्दति। व्याधितस्य रुजा क्लीबा मूर्च्छा मृत्युश्च जायते। प्रत्यूषे चार्द्धरात्रे च वातपित्ते प्रकुप्यतः। तिर्य्यग्योनावयोनौ वा दुष्टयोनौ तथैव च। उपदंशस्तथा वायोः कोपः शुक्रसुखक्षयः। उच्चारिते मूत्रिते च रेतसश्च विधारणे। उत्ताने च भवेत् शीघ्रं शुक्राश्मर्य्यास्तु सम्भवः। सर्व्वमेतत्त्यजेत्तस्माद्‌दृयतो लोकद्वयाऽहितम्। शुक्रन्तूपस्थितम्मोहान्न सन्धार्य्यं कदाचन। स्नानं सशर्करं क्षीरं भक्ष्यमैक्षवसंयुतम्। वातोमांसरसः स्वप्नो सुरतान्ते हिता श्रमी। सूलकासज्वरश्वासकार्श्यपाण्ड्वामयक्षयाः। अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः"।

कामिनीश पु० कामिन्याः कामिनीप्रियाञ्जनस्य ईशस्तत्साधनत्वात्। शोभाञ्जनवृक्षे शब्दच०। तस्य कामिनीप्रियाञ्जनहेतुत्वात् तथात्वम्।

कामीन पु० काममनुगच्छति ख। १रामपूगे त्रिका०। कामानुगते त्रि०। कामील इति त्रिका०पाठान्तरं शब्दो०। रामपूगे।

कामुक त्रि० कम: उकञ्। १अशोकवृक्षे २माधवीलतायाम् मेदि०। ३चटके पुंस्त्री राजनि०। मैथुनेच्छावति त्रि० अम०। स्त्रियां ङीप्। इच्छामात्रयुक्ते त्रि० अम० तत्र स्त्रियां न ङीप् किन्तु टाप् इति भेदः "बोधयित्वा शुभैर्वाक्यैः कामिनीमिव कामुकः" रामा०।

कामुककान्ता स्त्री ६त०। माधवीलतायाम् राजनि०।

कामुकायन पु०स्त्री कामुकस्यापत्यं नड़ादि० फक्। कामुकापत्ये स्त्रियां ङीप्।

कामेश्वर पु० कामानामीश्वरः। १परमेश्वरे २भैरवीभेदे स्त्री "कामेश्वरी च रुद्राणी पूर्व्वसिंहासने स्थिता" तन्त्रसा० कामाख्यापञ्चमूर्त्त्यन्तर्गते ३ मूर्त्तिभेदे च स्त्री "देव्याश्चापि नरश्रेष्ठ! पञ्च रूपाणि भैरव!। शृणु वेताल! गुह्यानि देवैरपि सदैव हि। कामाख्या १त्रिपुरा २चैव तथा कामेश्वरी ३ शिवा ४। शारदा ५ ऽथ महोत्साहा कामरूपगुणैर्युता" कालिका पु०६१अ०।

कामोदक न० कामेन स्वेच्छया प्रेतोद्देशेन दीयमानम् उदकम्। मृतोद्देशेन स्वेच्छया दीयमाने उदके। स्वेच्छया तद्दानञ्च प्रेतविशेषायैव यथाह मनुः "नाद्विवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया। जातदन्तस्य वा कुर्य्युर्नाम्नि वाऽपि कृते सति" अत्र वाशब्देन इच्छया तद्दानम्। व्यक्तमाह लौगाक्षिः "रण्णीमेवोदकं कार्य्यं तूष्णीं संस्कारमेव च। सर्व्वेषां कृतचूड़ानामन्यत्रापीच्छया द्वयम्" चौलकर्मानन्तरकाले नियमेनाग्न्युदकं कार्य्यम् अन्यत्रापि नामकरणादूर्द्ध्वमकृतचूडेऽपि इच्छया प्रेताभ्युदयकामनया द्वयमग्न्युदकदानाख्यं तूष्णीं कार्य्यं न नियमेनेति विकल्पः" मिता०

कामोदा स्त्री कुत्सितो मोदो यस्याः। रागिणीभेदे हला०।

काम्पिल्य पु० १देशभेदे शब्दरत्ना० २पुरभेदे च। "माकन्दीमथ गङ्गायास्तीरे जनपदायुताम्। सोऽध्यवात्सीत् दीनमनाः काम्पिल्यञ्च पुरोत्तमम्"। दक्षिणांश्चापि पाञ्चालान् यावत् चर्म्मण्वतीं नदीम्। द्रोणेन चैवं द्रुपदः परिभूयाऽथ पालितः" भा०आ० १८०। "काम्पिल्ये ब्रह्मदत्तस्य त्वन्तःपुरनिवासिनी" भा० शा० १३९ अ०। तत्र जातादि "धन्वयोपधाद्वुञ्" पा० वुञ्। काम्पिल्यक

तद्भवादौ। काम्पिल्यदेशः उत्पत्तिस्थानत्वेनास्त्यस्य अच्। (गुड़ारोचना) २नामगन्धद्रव्ये अस्यैव चूर्णम् (कमला गुडि) कापिल्ल काम्पिल्यक एतावप्यत्र पृषो०साधु।

कापिल्लका स्त्री देशभेदे हारावली।

काम्पील पु० पृषो० काम्पिल्यशब्दार्थे "देवी काम्पील वासिनीम्" यजु० २३।१८। स्वार्थे कन् तथार्थे।

काम्बल पु० कम्बलेन परिवृतो रथः अण्। कम्बलपरिवृते रथे अमरः।

काम्बविक पु० स्त्री कम्बुः शङ्खभूषणं शिल्पमस्य ठक्। "येषाञ्च विरोधः शाश्वतिकः" पा० निर्देशात् "इसुसुक्तान्तात् कः" पा० इत्यस्यानित्यत्वेन न कादेशः किन्तु ठस्येकः। शङ्खकारे (शाँखारी) अमरः स्त्रियां जातित्वात् ङीप्। [गन्धायाम् रत्नमाला।

काम्बुका स्त्री० कुत्सितमम्बु यस्य कोः कादेशः कप्। अश्व-

काम्बोज त्रि०कम्बोजोऽभिजनो यस्य सिन्ध्वा०अण्। पित्रादिक्रमेण कम्बोजदेशवासिनि स्त्रियां ङीप्। कम्बोजदेशे भवः कच्छा०अण्। कम्बोजभवेऽमनुष्ये त्रि० "शतं यस्तु काम्बोजान् ब्राह्मणेभ्यः प्रयच्छति" भा०शा०२५अ०। २सोमवल्के ३पुन्नागवृक्षे च पु० मेदि०। कम्बोजानां जनपदानां राजा अण्। ४कम्बोजदेशनृपे "शकायवनकाम्बोजास्तास्ताः क्षत्त्रियजातयः। वृषलत्वं परिगता ब्राह्मणानामदर्शनात्" भा०अनु०३३अ०। न केवलं तेषां शूद्रत्वं किन्तु सगरेण वेशान्यत्वं धर्म्महीनत्वं च कृतं तच्च हरिवं १४अ०वर्णितं यथा। "ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा। पह्लवांश्चैव निःशेषान् कर्त्तुं व्यवसितः किल। ते वध्यमाना वीरेण सगरेण महात्मना। वशिष्ठं शरणं गत्वा प्रणिपेतुर्मनीषिणम्। वशिष्ठस्त्वथ तान् दृष्ट्वा समयेन महाद्युतिः। सगरं वारयामास तेषां दत्त्वाऽभयं तदा। सगरस्तु प्रतिज्ञाय गुरोर्वाक्यं निशम्य च। धर्मं जघान तेषां वै वेशान्यत्वं चकार ह। अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत्। यवनानां शिरः सर्व्वं काम्बोजानां तथैव च। पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः। निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना। शका यवनकाम्बोजाः पारदाः पह्लवास्तथा। कोलिसर्पाः समहिषाः दार्व्वाश्चोलाः सकेरलाः। सर्वे ते क्षत्त्रिया तात! धर्मस्तेषां निराकृतः। वशिष्ठवचनाद्राजन्! सगरेण महात्मना"। तेन तेषां प्राक् क्षत्त्रियत्वेऽपि पश्चात् सगरेण स्वधर्मनिराकरणेन निःस्वाध्यायतादिकरणेन च म्लेच्छत्वं कृतम्। कम्बोजेषु भवा अमनुष्यतत्स्थत्वात् कच्छा० अण् ङीप्। ५माषपर्ण्याम् (माषाणी) अम०। ६श्वेतखदिरे (पापड़ीखएर) मेदि०। ७गुञ्जायां (कुँच) ८वाकुच्याम् (हाकुच) च स्त्री राजनि०।

काम्बोजक न० काम्बोजे भवो मनुष्यस्तत्स्थो वा "मनुष्यतत्स्थयोर्वुञ्" पा०वुञ्। कम्बोजदेशभवे १मनुष्ये २तत्स्थे हास्यादौ च।

काम्य त्रि० कम–णिङ् कर्म्मणि यत्। १कामनाविषये "काम्यो हि वेदाधिगमः कर्मयोगश्च वैदिकः" मनुः। "काम्यानां स्वफलार्थञ्च दोषघातार्थमेव च। अतः काम्यं नैमित्तिकं प्रायश्चित्तमिति स्थितिः" प्रा० त० जाबालः। काम्यत्वञ्च तत्तत्फलकामनावदधिकारिकर्त्तव्यत्वम्। काम्यकर्म्मणामपि फलाभिसन्धानाभावेनानुष्ठाने मोक्षदत्वम् तदेतत् मल० त० निर्णीतम्। मनुः "इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्त्यते। निष्कामं ज्ञानपूर्व्वन्तु निवृत्तमुपदिश्यते। प्रवृत्तं कर्म संसेव्य देवानामेति सार्ष्टिताम्। निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै"। "कामनापूर्व्वकं कर्म्म शरीरप्रवृत्तिहेतुत्वात् प्रवृत्तं तदेव कर्म्म कामनारहितम् पुनर्ब्रह्मज्ञानाभ्यासपूर्व्वकं संसारनिवृत्तिहेतुत्वात् निवृत्तमुच्यते। सार्ष्टितां समानगतिताम् रूपेणैत्यर्थत्वात्। पञ्च भूतान्यत्येति अतिक्रामति मोक्षं प्राप्नोतीत्यर्थः" विष्णुपुराणम्। "विशिष्टफलदाः काम्या निष्कामाणां विमुक्तिदाः"। भगवद्गीतापि "युक्तः कर्म्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्। अयुक्तः कामकारेण फले सक्तो निबध्यते"। युक्तईश्वराय कर्म्माणि, न फलाय इत्येवं समाहितः फलं त्यक्त्वा कर्म्माणि कुर्व्वन्निति शेषः शान्तिं मोक्षाख्यां नैष्ठिकीं निष्ठायां भवाम्। सत्त्वशुद्धिज्ञानप्राप्तिसर्व्वकर्म्मसन्न्यासज्ञाननिष्ठाक्रमेणेति वाक्यशेषः। अयुक्तस्तद्वहिर्मुखः कामकारेण कामप्रेरिततया कामतः प्रवृत्तेरिति यावत्। फले सक्तः मम फलाय इदं, कर्म करोमीत्येवं फले सक्तो नियतं बन्धं प्राप्नोति तथाचार्ज्जुनं प्रति भगवद्वाक्यम्। "मयि सर्व्वाणि कर्म्माणि सन्न्यस्याध्यात्मचेतसा। निराशीर्निर्म्ममो भूत्वा युध्यस्व विगतज्वरः"। सन्न्यस्य निःक्षिप्य समर्प्य इति यावत्। अध्यात्मचेतसा विवेकबुद्ध्या अहं कर्त्ता ईश्वराय भृत्यवत् करोमीत्यनया बुद्ध्या। निराशीस्त्यक्तकामसङ्कल्पः। अतएव निर्म्ममो ममतारहितः विगत-

ज्वरः विगतसन्तापः । व्यक्तमाह सएव "यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् । यत् तपस्यसि कौन्तेय ! तत् कुरुष्व मदर्पणम्" । विष्णुपुराणे । 'कर्म्माण्यसङ्कल्पिततत्फलानि सन्न्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिँल्लयं ते त्वमलाः प्रयान्ति"। तां कर्ममहीं भारतवर्षरूपाम् । भाग०एकादशस्कन्धे "वेदोक्तमेव कुर्व्वाणोनिःसङ्गोऽर्पितमीश्वरे । नैष्कर्म्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः" । वेदोक्तमेव कुर्वाणो न तु निषिद्धम् । ननु कर्मणि क्रियमाणे तस्मिन्नासक्तिस्तत्फलञ्च स्यात् नतु नैष्कर्म्म्यरूपा फलसिद्धिः ? अतआह निःसङ्ग इति अनभिनिवेशितवान्, ईश्वरेऽर्पितं न फलोद्देशेन । अथ फलस्य श्रुतत्वात् कर्मणि कृते फलं भवत्येव इत्यत आह रोचनार्था इति। कर्मणि रुच्युत्पादनार्था। अतएव तत्रैव "फलश्रुतिरियं नृणां न श्रेयो रोचनं परम् । श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनम् । उत्पत्त्यैव हि कामेषु प्राणेषु स्वजनेषु च । आसक्तमनसोमर्त्या आत्मनोऽनर्थहेतुषु । न तानविदुषः स्वार्थं भ्राम्यतो वृजिनाध्वनि । कथं युञ्ज्यात् पुनस्तेषु तांस्तमोविशतोबुधः । एवं व्यवसितं केचिदविज्ञाय कुबुद्धयः । फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि" । इयं फलश्रुतिर्न श्रेयःपरमपुरुषार्थपरा न भवति किन्तु बहिर्मुखानां मोक्षविवक्षया अवान्तरकर्मफलैः कर्मसु रुच्युत्पादनमात्रम् । यथा भैषज्ये औषधे रुच्युत्पादनम् । यथा 'पिब निम्बं प्रदास्यामि खलु ते खण्डलड्डुकान् । पित्रैवमुक्तः पिबति तिक्तमप्यतिबालकः' । अत्र यथा तिक्तनिम्बादिपानस्य न खलु खण्डलड्डुकादिलाभ एव प्रयोजनम् किन्त्वारोग्यम्। तथा वेदोऽप्यवान्तरफलैः प्रलोभयन् मोक्षायैव कर्म्माणि विधत्ते । ननु कर्मकाण्डे मोक्षस्य नामापि न श्रूयते कुत एवं व्याख्यायते यथाश्रुतस्यैवाघटनादित्यतआह उत्पत्त्येति द्वाभ्याम् । उत्पत्त्या स्वभावतएव कामेषु पश्वादिषु प्राणेषु आयुरिन्द्रियबलवीर्य्यादिषु पुत्रदारादिषु परिपाकतोदुःखहेतुषु अतस्तान् स्वार्थं परमसुखमविदुषः अजानतो अतो नतान् मूढीभूतान् बुधोवेदोयद्बोधयति तदेव श्रेय इति विश्वसितानित्यर्थः तानेवम्भूतान् वृजिनाध्वनि पापे वर्त्मनि देवादियोनौ भ्राम्यतः । पुनस्तमोभूतवृक्षादियोनौ विशतः पशुकाम इति चायुरिन्द्रियादिकाम इति च पुत्रादिकाम इति च कथं पुनस्तेषु स्वयं बुधोवेदोयुञ्ज्यात् । तथासत्यनाप्तः स्यादिति भावः ।

कथं तर्हि कर्ममीमांसकाः कर्मफलपरतां वदन्ति तत्राह एवमिति व्यवस्थितम् । वेदस्याभिप्रायमविज्ञाय कुसुमिताम् अवान्तरफलरोचनतया रमणीयां परमफलश्रुतिं वदन्ति यतस्ते कुबुद्धयः । नदाह हि यस्मात् वेदज्ञा व्यासादयः तथा न वदन्तीति । अतएव निष्कामकर्मणात्मज्ञानमित्युक्तम् । यथा "अयमेव क्रियायोगोज्ञानयोगस्य साधकः । कर्मयोगं विना ज्ञानं कस्यचिन्नैव दृश्यते"। सोऽपि दुरितक्षयद्वारा न साक्षात् । तथाच 'ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः । श्रुतिः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति ब्रह्मचर्य्येण तपसा दानेन श्रद्धया यज्ञेनानशनेन चेति" तमात्मानम् । अतएव यज्ञादीनां ज्ञानशेषताञ्चावधार्य्य निष्कामेण कर्मसु प्रवर्त्तते । पण्डितेनापि मूर्खः काम्ये कर्मणि न प्रवर्त्तयितव्यः इत्याह भाग०षष्ठस्कन्धे "स्वयं निःश्रेयसं विद्वान् न वक्त्यज्ञाय कर्म हि । न राति रोगिणेऽपथ्यं वाञ्छतेऽपि भिषक्तमः' । राति ददाति । फलकामनानिन्दात्वमुक्तं तत्रैव "अकामः सात्त्विकोलोको यत्किञ्चिद्धि निवेदयेत् । तेनैव स्थानमाप्नोति यत्र गत्वा न शोचते । धर्मवाणिजिकामूढाः फलकामा नराधमाः । अर्च्चयन्ति जगन्नाथं ते कामानाप्नुवन्त्यथ। अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्। पत्रं प्रतीच्छते देवः सकामेन निवेदितम् । मूर्द्ध्नी प्रतीच्छते दत्तमकामेन द्विजोत्तमाः" ! इति वामनपुरा० काम्यमपि दानं विष्णुप्रीतये सार्व्वकालिकम् यथा म०त० "पुरुषोत्तमस्य तुष्ट्यर्थं प्रदेयं सार्व्वकालिकम् श्रीदत्तः "सार्व्वकालिकं मलमासादावपि विष्णुप्रीत्यर्थं देयत्"मल०त०रघु० । "सम्यक् संसाधनं कर्म कर्त्तव्यमधिकारिणा । निष्कामेण सदा पार्थ ! काम्यं कामान्वितेन च" प्रा०त०भविष्यपु० । काम्यञ्च "यत्किञ्चित् कुरुते कर्म यज्ञदानजपादिकम् । क्रियते कायिकं यच्च तत्काम्यमिति कीर्त्तितम्" इत्युक्तलक्षणम् । काम्याच्च सर्वाङ्गोपेतात् फलनिष्पत्तिः इति कात्या० श्रौ० प्रतिपादितम् तच्च कात्यायनशब्दे १८६५ पृ० प्रदर्शितम् । २अभिरूपे सुन्दरे च "नासौ न काम्यो नच वेद सम्यक्" रघुः । कामाय हितं यत् । ३कामोद्दीपके त्रि० ।

काम्यक न० १वनभेदे । तस्य स्थानादि भा०व०५अ० दर्शितं यथा "सरस्वतीदृषद्वत्यौ यमुनां च निषेव्य ते । ययुर्वनेनैव वनं सततं पश्चिमां दिशम्" इत्युपक्रमे "ततः सरस्वतीकूले समेषु मरुधन्वसु । काम्यकं नाम ददृशुर्वनं मुनिजन-

प्रियम्”। २सरोवरभेदे च। “शैलाभान्नित्यमत्तांश्चाप्यभितः काम्यकं सरः” भा०व० ५१अ०।

काम्यकर्म्मन् न० कर्मधा०। स्वर्गादीष्टकामनावदधिकारिकर्त्तव्ये ज्योतिष्टोमादौ “तदेव काम्यं यत्कर्म वत्सरात् प्रथमादृते” लघुबोधा०।

काम्यदान न० कर्मधा०। स्वर्गादिफलकामनया कर्त्तव्ये दाने “अपत्यविजयैश्वर्य्यस्वर्गार्थं यत्प्रदीयते। दानं तत्काम्यमाख्यातमृषिभिर्धर्मचिन्तकैः” गरुड़पु०। तस्य बन्धहेतुत्वे नामरे प्रावरणसंज्ञा कृता।

काम्यफल न० काम्यस्य फलम्। काम्यकर्म्मणः अभिसन्धीयमाने फले। “पितृगणस्थे दिवि ये च मूर्त्ताः स्वधाभुजः काम्यफलाभिसन्धौ। प्रदानशक्ताः सकलेप्सितानां विमुक्तिदा येऽनभिसंहितेषु” प्रा०त० रुचिस्तवः। काम्यानामपि फलाभिसन्धानाभावे मुक्तिफलकत्वमुक्तं काम्यशब्दे। कृत्रिमदेवानां पितॄणां तथात्वोक्त्या स्वतःसिद्धानामाजानदेवानामिन्द्रादीनां तथात्वस्यौचित्यमेव।

काम्या स्त्री कम–णिङ् भावे बा० क्यप् स्त्रीत्वम्। कामनायाम् “अष्टैतान्यव्रतघ्नानि आपोमूलं फलं पयः। हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम्”प्रा०त०बौधा०। “प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानाञ्च काम्यया” मनुः। “पुंसः कथं स्यादिह पुत्रकाम्या” इत्यादौ तु “काम्यच्च” पा० सुबन्तात् कर्म्मण इच्छायां काम्यच् ततोभावे अ। स्वपुत्रेच्छा इत्यर्थः। [लि०।

काम्ल न० कुगतिस० कोः कादेशः। ईषदम्ले १रसे २तद्वति

काय त्रि० कः प्रजापतिः, कं सुखं वा ततः देवताद्यर्थे तस्येदं वा अण् “कस्येत्” पा० इदन्तादेशे वृद्धिः। प्रजापतिदेवताके हविरादौ “अथ काय एककपालः पुरोडाशोभवति कं वै प्रजापतिः प्रजाभ्यः कायेनैकादशकपालेन पुरोडाशेन कुरुते तस्मात्काय एककपालः पुरोडाशोभवति”शत०ब्रा०२,५,२,१२। स्त्रियां ङीप् कायी यथा। “कायं कनिष्ठिकामूले तीर्थमुक्तं करस्य तु” शङ्खोक्ते २कनिष्ठाङ्गुलिमूलस्थानरूपे प्रजापतितीर्थे न०। “ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत्। कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन। अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते। कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः” मनुना पवित्रतासाधनतया तत्तत्स्थानस्य तीर्थत्वमुक्तम्। याज्ञ० कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्”। तेन कनिष्ठाङ्गुलिमूलस्य प्रजापतितीर्थत्वात् कायत्वं सुव्यक्तमुक्तम्. एतेन शब्दकल्पद्रुमे मेदिनिस्थकदैवतशब्दस्य ब्राह्मतीर्थपरताव्याख्यानं निर्मूलं ब्राह्मप्राजापत्यतीर्थयो. उक्तस्मृतिषु भेदेन निर्देशात्। कायसम्बन्धिकार्य्योपयोगित्वात् ३मनुष्यतीर्थे न०मेदि०। ४प्रजापतिदेवताके विवाहभेदे पु०। “इत्युक्त्वाऽऽचरतां धर्म्ममिति वाचानुभाष्य च। कन्याप्रदानमभ्यर्च्य प्राजापत्योविधिः स्मृतः” इति प्राजापत्यं परिभाष्य प्राजापत्यकाययोः पर्य्यायत्वाशयेन मनुना तारयन्तीत्यनुवृत्तौ “आर्षोढाजः सुतस्त्रीं स्त्रीन् षट् षट् कायोढजः सुतः”इत्युक्तम्।“कायोढज इत्यत्र वह भावे क्त ऊढं विवाहः कायादूढात् विवाहाज्जायते इत्यर्थः। चीयतेऽदः चि–कर्म्मणि घञ् चेः कत्वम्। ५मूलधने पु०। मूलधनस्य वृद्ध्या उपचीयमानत्वात् तथात्वम् “कायाविरोधिनी शश्वत् पणवृद्ध्या तु कायिका”नारदस्मृतिः। करणे घञ्। स्वभावे ६वस्तुस्वभावेन पदार्थानां चीयमानत्वात तथात्वम्। चिधातोर्निश्चयपरत्वे कर्म्मणि घञ्। ७लक्ष्ये मेदि० लक्षणेन लक्ष्यस्य निश्चीयमानत्वात्तथात्वम्। भावे घञ्। ८संघे पु० मेदि० चीयते भक्षितान्नादिरसैः कर्म्मणि, चीयतेऽस्थ्यादिकमत्र आधारे वा घञ्। ९देहे तस्य विशेषस्वरूपं याज्ञ० मिताक्षरयोर्दर्शितं यथा “कायस्वरूपं विवृण्वन्नाह “तस्य षोढा शरीराणि षट् त्वचो धारयन्ति च। षडङ्गानि तथास्थ्नाञ्च सह षष्ट्या शतत्रयम्” याज्ञ०। तस्यात्मनोयानि जरायुजाण्डजशरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन। तथाह्यन्नरसो जाठराग्निना पच्यमानो रक्ततांप्रतिपद्यते रक्तञ्च स्वकोशस्थाग्निना पच्यमानं मांसत्वम्, मांसञ्च स्वकोशानलपरिपक्वं मेदस्त्वम्, मेदोऽपि स्वकोशवह्निना पक्वमस्थिताम्, अस्थ्यपि स्वकोशाग्निपरिपक्वं मज्जात्वम्, मज्जापि स्वकोशपावकपरिपच्यमानचरमधातुतया परिणमते। चरमधातोस्तु परिणतिर्नास्तीति स एवात्मनः प्रथमः कोश इत्येवं षट्कोशाग्नियोगित्वात् षट्प्रकारत्वं शरीराणाम्। अन्नरसरूपस्य तु प्रथमधातोरनियतत्वान्न तेन प्रकारान्तरत्वम्। तानि च शरीराणि षट् त्वचोधारयन्ति रक्तमांसमेदोस्थिमज्जाशुक्राख्याः षट् धातव एव आत्मनस्त्वगिव बाह्याभ्यन्तररूपेण स्थिताः। त्वगिवाच्छादकत्वाच्च षट् त्वचोधारयन्ति। तदिदमायुर्वेदे प्रसिद्धम्। तथाङ्गानि च षडेव। करयुग्मं चरण-

युगलमुत्तमाङ्गकपालमिति । अस्थ्नान्तु षष्टिसहितं शतत्रयमुपरितनषट्श्लोक्या वक्ष्यमाणमवगन्तव्यम् । किञ्च "स्थालैः सह चतुःषष्टिर्दन्ता वै विंशतिर्नखाः । पाणिपादशलाकाश्च तासां स्थानचतुष्टयम्" या० । स्थालानि दन्तमूलप्रदेशस्थान्यस्थीनि द्वात्रिंशत् तैः सह द्वात्रिंशद्दन्ताश्चतुःषष्टिर्भवन्ति । नखाः कररुहा विंशतिर्हस्तपादस्थानि शलाकाकाराण्यस्थीनि मणिबन्धस्योपरिवर्त्तीन्यङ्गुलिमूलस्थानि विंशतिरेव । तेषां नखानां शलाकास्थ्नाञ्च स्थानचतुष्टयं, द्वौ चरणौ द्वौ करौ चेत्येवमस्थ्नाञ्चतुरुत्तरं शतम् । किञ्च । "षष्ठ्यङ्गुलीनां द्वे पार्ष्ण्योर्गुल्फेषु च चतुष्टयम् । चत्वार्य्यरत्निकास्थीनि जङ्घयोस्तावदेव तु" या० । विंशतिरङ्गुलयस्तासामेकैकस्य त्रीणि त्रीणीत्येवमङ्गुलिसम्बद्धान्यस्थीनि षष्टिर्भवन्ति । पादयोः पश्चिमौ भागौ पार्ष्णी तयोरस्थिनी द्वे एकैकस्मिन् पादे गुल्फौ द्वावित्येवञ्चतुर्षु गुल्फेषु चत्वार्य्यस्थीनि । बाह्वोररत्निप्रमाणानि चत्वार्य्यस्थीनि । जङ्घयोश्च तावदेव चत्वार्य्येवेत्येवञ्चतुः सप्ततिः । किञ्च "द्वे द्वे जानुकपोलोरुफलकांससमुद्भवे । अक्षतालूषके श्रोणिफलके च विनिर्द्दिशेत्" या० । जङ्घोरुसन्धिर्जानुः । कपोलो गल्लः । ऊरुः सक्थि तत्फलकम् । अंसो भुजशिरः । अक्षः कर्णनेत्रयोर्मध्ये शङ्खादधोभागः । तालूषकं काकुदम् । श्रोणी ककुद्मती तत्फलकम् । तेषामेकैकत्रास्थिनी द्वे द्वे विनिर्द्दिशेदित्येवं चतुर्द्दशास्थीनि भवन्ति । किञ्च "भगास्थ्येकन्तथा पृष्ठे चत्वारिंशच्च पञ्च च । ग्रीवा पञ्चदशास्थिः स्याज्जत्र्वेकैकन्तथा हनुः" या० । गुह्यास्थ्येकं, पृष्ठे पश्चिमभागे पञ्चचत्वारिंशदस्थीनि भवन्ति । ग्रीवा कन्धरा सा पञ्चदशास्थिः स्यात् भवेत् । वक्षोंऽसयोः सन्धिर्जत्रु प्रतिजत्र्वेकैकम् । हनुश्चिवुकम् । तत्राप्येकमस्थि इत्येवञ्चतुःषष्टिः । किञ्च "तन्मूले द्वे ललाटाक्षिगण्डे नासाघनास्थिका । पार्श्वकाः स्थालकैः सार्द्धमर्बुदैश्च द्विसप्ततिः" या० । तस्य हनोर्मूलेऽस्थिनी द्वे । ललाटम्भालम् । अक्षि चक्षुः । गण्डः कपोलाक्षयोर्म्मध्यप्रदेशः तेषां समाहारो ललाटाक्षिगण्डम् । तत्र प्रत्येकमस्थियुगलम् । नासाघनसंज्ञकाऽस्थिमती । पार्श्वकाः कक्षाधःप्रदेशसंबद्धान्यस्थीनि । तदाधारभूतानि स्थालकानि तैः स्थालकैः अर्बुदैश्चास्थिविशेषैः सह पार्श्वका द्विसप्ततिः । पूर्व्वोक्तैश्च नवभिः सार्द्धमेकाशीतिर्भवन्ति । किञ्च 'द्वौ" शङ्खौ कपालानि चत्वारि शिरसस्तथा । उरःसप्तदशास्थि स्यात् पुरुषस्यास्थिसंग्रहः" या० । भ्रूकर्णयोर्मध्यप्रदेशावस्थिविशेषौ शङ्खौ । शिरसः सम्बन्धीनि चत्वारि कपालानि । उरो वक्षः तत्सप्तदशास्थिकं इत्येवं त्रयोविंशतिः । पूर्व्वोक्तैश्च सह षष्ट्यधिकं शतत्रयमित्येवं पुरुषस्यास्थिसंग्रहः कथितः । सविषयाणि ज्ञानेन्द्रियाण्याह । "गन्धरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः । नासिकालोचने जिह्वात्वक्श्रोत्रञ्चेन्द्रियाणि च" या० । एते गन्धादयो विषयाः पुरुषस्य बन्धनहेतवः विषयशब्दस्य षिञ् बन्धन इत्यस्य धातोर्व्युत्पन्नत्वात् । एतैश्च गन्धादिभिर्बोध्यत्वेन व्यवस्थितैः । स्वस्वगोचरसंवित्साधनतयाऽनुमेयानि घ्राणादीनि पञ्चेन्द्रियाणि भवन्ति । कर्म्मेन्द्रियाणि दर्शयितुमाह । "हस्तौ पायुरुपस्थञ्च जिह्वा पादौ च पञ्च वै । कर्म्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम्" या० । हस्तौ प्रसिद्धौ । पायुर्गुदम् । उपस्थं रतिसम्पाद्यसुखसाधनम् । जिह्वा प्रसिद्धा, पादौ च एतानि हस्तादीनि पञ्चकर्म्मेन्द्रियाणि । आदाननिर्हारानन्दाहारविहारादिकर्म्मसाधनानि जानीयात् । मनोऽन्तःकरणं युगपज्ज्ञानानुत्पत्तिगम्यं तच्च बुद्धिकर्म्मेन्द्रियसहकारितयोभयात्मकम् । प्राणायतनानि दर्शयितुमाह "नाभिरोजो गुदं शुक्रं शोणितं शङ्खौ तथा । मूर्द्धांसकण्ठहृदयं प्राणस्यायतनानि तु" या० । नाभिप्रभृतीनि दश प्राणस्य स्थानानि । समाननाम्नः पवनस्य सकलाङ्गचारित्वेऽपि नाभ्यादिस्थानविशेषवाचोयुक्तिप्राचुर्य्याभिप्रायेण । प्राणायतनानि प्रपञ्चयितुमाह । "वपावसावहननं नाभिः क्लोम यकृत् प्लिहा । क्षुद्रान्त्रं वृक्कौ वस्तिः पुरीषाधानमेव च । आमाशयोऽथ हृदयं स्थूलान्त्रं गुदएव च । उदरञ्च गुदौ कोष्ठ्यौ विस्तारोऽयमुदाहृतः" या० । वपा प्रसिद्धा । वसा मांसस्नेहः । नाभिः प्रसिद्धा । अवहननं पुप्फुसः । प्लीहा आयुर्वेदप्रसिद्धः । तौ च मांसपिण्डाकारौ सव्यकुक्षिगतौ । यकृत्कालिका । क्लोम मांसपिण्डस्तौ च दक्षिणकुक्षिगतौ । क्षुद्रान्त्रं हृत्स्थान्त्रम् । वृक्कौ हृदयसमीपस्थौ मांसपिण्डौ । वस्तिर्मूत्राशयः । पुरीषाधानं पुरीषाशयः । आमाशयोऽपक्वान्नस्थानम् । हृदयं हृत्पुण्डरीकम् । स्थूलान्त्रगुदोदराणि प्रसिद्धानि । बाह्यात् गुदवलयादन्तर्गुदवलये द्वे । तौ च गुदौ कोष्ठ्यौ कोष्ठे नाभेरधःप्रदेशे भवौ । अयञ्च प्राणायतनस्य विस्तार उक्तः पूर्व्वश्लोके तु संक्षेपः । अतएव पूर्व्वश्लोकोक्तानां केषाञ्चिदिह पाठः । पुनः प्राणायतनप्रपञ्चार्थमाह । कनीनिके

चाक्षिकूटे शष्कुलो कर्णपत्रकौ। कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे। वङ्क्षणौ वृषणौ वृक्कौ श्लेष्मसङ्घातजौ स्तनौ। उपजिह्वास्फिजौ बाहू जङ्घोरुषु च पिण्डिका। तालूदरवस्तिशीर्षं चिबुके गलशुण्डिके। अवटश्चैवमेतानि स्थानान्यत्र शरीरके। अक्षिकर्णचतुष्कञ्च यद्भस्तहृदयानि च। नवच्छिद्राणि तान्येव प्राणस्यायतनानि तु” या०। कनीनिके अक्षितारके। अक्षिकूटे अक्षिनासयोःसन्धी, शष्कुली कर्णशष्कुली। कर्णपत्रकौ कर्णपाल्यौ। कर्णौ प्रसिद्धौ। दन्तवेष्टौ दन्तपाल्यौ। ओष्ठौ प्रसिद्धौ। ककुन्दरे जघनकूपकौ। वङ्क्षणौ जघनोरुसन्धी। वृक्कौ पूर्वोक्तौ। स्तनौ — श्लेष्मसंघातजौ। उपजिह्वा घण्टिका। स्फिचौ कटिप्रोथौ। बाहू प्रसिद्धौ। जङ्घोरुषु च तथा पिण्डिका। जङ्घयोरूर्वोश्च पिण्डिका मांसलप्रदेशः। गलशुण्डिके हनुमूलगलयोः सन्धी। शीर्षं शिरः। अवटः शरीरे यः कश्चिन्निम्नोदेशः कण्ठमूलकवाटिः। अवटुरिति पाठे कृकाटिका। तथाक्ष्णोः कनीनिकयोः प्रत्येकं श्वेतपार्श्वद्वयमिति वर्णचतुष्टयम्। यद्वाक्षिपुटचतुष्टयम्। शेषं प्रसिद्धम्। एवमेतानि कुत्सिते शरीरे स्थानानि। तथाक्षियुगलं कर्णयुग्मं नासाविवरद्वयमास्यं पायुरुपस्थमित्येतानि पूर्वोक्तानि नव छिद्राणि च प्राणस्यायतनान्येव। किञ्च “सिराशतानि सप्तैव नव स्नायुशतानि च” या०। सिरा नाभिसम्बद्धाः चत्वारिंशत्संख्याः वातपित्तश्लेष्मवाहिन्यः सकलकलेवरव्यापिन्यो नानाशाखाः सत्यः सप्तशतसंख्या भवन्ति। तथाङ्गप्रत्यङ्गसन्धिबन्धनाःस्नायवो नव शतानि। धमन्यो नाम नाभेरुद्भूताश्चतुर्विंशतिसंख्याः प्राणादिवायुवाहिन्यः शाखाभेदेन द्विशतं भवन्ति। पेश्यः पुनर्मांसखण्डाकारा ऊरुपिण्डकाद्यङ्गप्रत्यङ्गसम्बन्धिन्यः पञ्च शतानि भवन्ति। पुनश्चासामेव शिरादीनां शाखाप्राचुर्येण संख्यान्तरमाह। “एकोनत्रिंशल्लक्षाणि तथा नव शतानि च। षट्पञ्चाशच्च जानीत शिराधमनिसंज्ञिताः” या०। शिराधमन्यो मिलिताः शाखोपशाखाभेदेन एकोनत्रिंशल्लक्षाणि नव शतानि षट्पञ्चाशच्च भवन्तीत्येवं हे सोमश्रवःप्रभृतयो मुनयः! जानीत। किञ्च “त्रयोलक्षास्तु विज्ञेयाः श्मश्रुकेशाः शरीरिणाम्। सप्तोत्तरं मर्मशतं द्वे च सन्धिशते तथा” या०। शरीरिणां श्मश्रूणि केशाश्च मिलिताः सन्तस्त्रयो लक्षाविज्ञेयाः। मर्माणि मरणकराणि क्लेशकराणि च स्थानानि तेषां सप्तोत्तरं शतं विज्ञेयम्। अस्थ्नान्तु द्वे सन्धिशते स्नायुशिरादिसन्धयः पुनरनन्ताः। सकलशरीरसुषिरादिसंख्यामाह। “रोम्णां कोट्यस्तु पञ्चाशच्चतस्रः कोट्य एव च। सप्तषष्टिस्तथा लक्षाः सार्द्धाः स्वेदायनैः सह। वायवीयैर्विगण्यन्ते विभक्ताः परमाणवः। यद्यप्येकोऽनुवेदैषां भावानाञ्चैव संस्थितिम्” या०। पूर्वोदितशिराकेशादिसहितानां रोम्णां परमाणवः सूक्ष्मसूक्ष्मतररूपाभागाः स्वेदस्रवणसुषिरैः सह चतुःपञ्चाशत्कोट्यः तथा सप्तोत्तरषष्टिलक्षाः सार्द्धाः पञ्चाशत्सहस्रसहिताः वायवीयैर्विभक्ताः पवनपरमाणुभिः पृथक् कृताविगण्यन्ते। एतच्च शास्त्रदृष्ट्या अभिहितम् चक्षुरादिकरणपथगोचरत्वाभावादस्यार्थस्य। इममतिगहनमर्थं शिरादिभावसंस्थानरूपं हे मुनयः! भवतां मध्ये यदि कश्चिदनुवेद वेत्ति सोऽपि एकोमहान् अग्र्यो बुद्धिमताम्। अतो यत्नतो बुद्धिमता बोद्धव्या भावसंस्थितिः। शारीररसादिपरिमाणमाह “रसस्य नव विज्ञेया जलस्याञ्जलयो दश। सप्तैव तु पुरीषस्य रक्तस्याष्टौ प्रकीर्त्तिताः। षट्श्लेष्मा पञ्च पित्तन्तु चत्वारो मूत्रमेव च। वसात्रयो द्वौ तु मेदो मज्जैकोऽर्द्धन्तु मस्तके। श्लेष्मौजसस्तावदेव रेतसस्तावदेव तु। इत्येतदस्थिरं वर्ष्म यस्य मोक्षाय कृत्यसौ” या०। सम्यक्परिणताहारस्य सारोरसस्तस्य परिमाणं नवाञ्जलयः। पार्थिवपरमाणुसंश्लेषनिमित्तस्य जलस्याञ्जलयो दश विज्ञेयाः। पुरीषस्य वर्चस्कस्य सप्तैव। रक्तस्य जाठरानलपरिपाकापादितलौहित्यस्याहाररसस्याष्टावञ्जलयः प्रकीर्त्तिताः। श्लेष्मणः कफस्य षडञ्जलयः। पित्तस्य तेजसः पञ्च। मूत्रस्योच्चारस्य चत्वारः। वसायामांसस्नेहस्य त्रयः। मेदसो मांसरसस्य द्वावञ्जली। मज्जा त्वस्थिगतसुषिरगतस्तस्यैकोऽञ्जलिः। मस्तके पुनरर्द्धाञ्जलिः। श्लेष्मौजसः श्लेष्मसारस्य। तथा रेतसश्चरमधातोस्तावदेवार्द्धाञ्जलिरेव। एतच्च समधातुपुरुषाभिप्रायेणोक्तम्। विषमधातोस्तु न नियमः। “वैलक्षण्याच्छरीराणामस्थायित्वात् तथैव च। दोषधातुमलानां च परिमाणं न विद्यते” इत्यायुर्वेदस्मरणात्। इतीदृशमस्थिस्नाय्वाद्यारब्धमेतदशुचिनिधानं वर्ष्मास्थिरमिति यस्य बुद्धिरसौ कृती पण्डितो मोक्षाय समर्थो भवति वैराग्यनित्यानित्यविवेकयोर्मोक्षोपायत्वात्” मिता०।

सुश्रुते कायोत्पत्तिकारणोक्तिपूर्ब्बकं तत्स्वरूपविभागादिकं दर्शितं यथा।

“अग्निः सोमो वायुः सत्त्वं रजस्तमः पञ्चेन्द्रियाणि भूतात्मेति प्राणाः तस्य खल्वेवम्भूतस्य शुक्रशोणितस्याभिपद्यमानस्य

क्षीरस्येव सान्तानिकाः सप्त त्वचो भवन्ति। तासां प्रथमाऽवभासिनी नाम, या सर्व्ववर्णानवभासयति पञ्चविधाञ्च छायां प्रकाशयति सा ब्रीहेरष्टादशभागप्रमाणा सिध्मपद्मकण्टकाधिष्ठाना, द्वितीया लोहिता नाम षोडशभागप्रमाणा तिलकालकन्यच्छव्यङ्गाधिष्ठाना, तृतीया श्वेता नाम द्वादशभागप्रमाणा चर्म्मदलाजगल्लीमशकाधिष्ठाना, चतुर्थी ताम्रा नामाऽष्टभागप्रमाणा विविधकिलासकुष्ठाधिष्ठाना, पञ्चमी वेदिनी नाम ब्रीहिपञ्चभागप्रमाणा, कुष्ठविसर्पाधिष्ठाना, षष्ठी रोहिणी नाम ब्रीहिप्रमाणा ग्रन्थ्यपच्यर्व्वुदश्लीपदगलगण्डाधिष्ठाना, सप्तमी मांसधरा नाम ब्रीहिद्वयप्रमाणा भगन्दरविद्रध्यर्शोऽधिष्ठाना, यदेतत्प्रमाणम् निर्द्दिष्टं तन्मांसलेष्ववकाशेषु न ललाटे सूक्ष्माङ्गुल्यादिषु। अतो वक्ष्यत्युदरेषु ब्रीहिमुखेनाङ्गुष्ठोदरप्रमाणमवगाढम् विध्येदिति।

कलाः खल्वपि सप्त सम्भवन्ति धात्वाशयान्तरमर्य्यादाः। भवन्ति चात्र। यथाहि सारः काष्ठेषु छिद्यमानेषु दृश्यते। तथा धातुर्हि मांसेषु छिद्यमानेषु दृश्यते। स्नायुभिश्च प्रतिच्छन्नान् सन्ततांश्च जरायुणा। श्लेष्मणा वेष्टितांश्चापि कलाभागांस्तु तान् विदुः। तासां प्रथमा मांसधरा नाम यस्यां मांसे शिरास्नायुधमनीस्रोतसां प्रताना भवन्ति भवति चात्र। यथा विसमृणालानि विवर्द्धन्ते समन्ततः। भूमौ पङ्कोदकस्थानि तथा मांसे शिरादयः। द्वितीया रक्तधरा नाम मांसस्याभ्यन्तरतस्तस्यां शोणितं विशेषतश्च शिरासु यकृत्प्लीह्नोश्च भवति। भवति चात्र वृक्षाद्यथाभिप्रहतात् क्षीरिणः क्षीरमावहेत्। मांसादेवं क्षतात् क्षिप्रं शोणितं सम्प्रसिच्यते। तृतीया मेदोधरा नाम, मेदो हि सर्व्वभूतानामुदरस्थमण्वस्थिषु च महत्सु च मज्जा भवति। भवति चात्र। स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रितः। अथेतरेषु सर्व्वेषु सरक्तं मेद उच्यते। शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता। चतुर्थी श्लेष्मधरा नाम सर्व्वसन्धिषु प्राणभृतां भवति। भवति चात्र। स्नेहाभ्यक्ते यथा त्वक्षे चक्रं साधु प्रवर्त्तते। सन्धयः साधु वर्त्तन्ते संश्लिष्टाः श्लेष्मणा तथा। पञ्चमी पुरीषधरा नाम, याऽन्तःकोष्ठे मलमभिविभजते पक्वाशयस्था। भवति चात्र। यकृत्समन्तात् कोष्ठञ्च तथान्त्राणि समाश्रिता। उण्डुकस्थं विभजते मलं मलधरा कला। षष्ठी पित्तधरा नाम या चतुर्व्विधमन्नपानमुपयुक्तमामाशयात् प्रच्युतं पक्वाशयोपरिस्थितं धारयति। भवति चात्र। अशितं खादितं पीतं लीढं कोष्ठगतं नृणाम्। तज्जीर्य्यति यथाकालं शोषितं पित्ततेजसा। सप्तमी शुक्रधरा नाम, या सर्व्वप्राणिनां सर्व्वशरीरव्यापिनी। भवन्ति चात्र यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा। शरीरेषु तथा शुक्रं नृणां विद्याद्भिषग्वरः। द्व्यङ्गुले दक्षिणे पार्श्वे वस्तिद्वारस्य चाप्यधः। मूत्रस्रोतःपथाच्छुक्रं पुरुषस्य प्रवर्त्तते। कृत्स्नदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा। स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् सम्प्रवर्त्तते।

गृहीतगर्भाणामार्त्तववहानां स्रोतसां वर्त्मान्यवरुध्यन्ते गर्भेण, तस्माद्गृहीतगर्भाणामार्त्तवं न दृश्यते। ततस्तदधः प्रतिहतः मूर्द्धमागतमपरञ्चोपचीयमानमपरेत्यभिधीयते। शेषञ्चोर्द्धतरमागतं पयोधरावभिप्रतिपद्यते तस्माद्गर्भिण्यः पीनोन्नतपयोधरा भवन्ति।

गर्भस्य यकृत्प्लीहानौ शोणितजौ, शोणितफेनप्रभवः फुप्फुसः शोणितकिट्टप्रभव उण्डुकः।

असृजः श्लेष्मणश्चापि यः प्रसादः परो मतः। तं पच्यमानं पित्तेन वायुश्चाप्यनुधावति। ततोऽस्यान्त्राणि जायन्ते गुदं वस्तिश्च देहिनः। उदरे पच्यमानानामाध्मानाद्रुक्मसारवत्। कफशोणितमांसानां सारो जिह्वा प्रजायते। यथार्थमूष्मणा युक्तो वायुः स्रोतांसि दारयेत्। अनुप्रविश्य पिशितं पेशीर्विभजते तथा।

मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयात्। शिराणां च मृदुः पाकः स्नायूनाञ्च ततः खरः। आशय्याऽभ्यासयोगेन करोत्याशयसम्भवम्। रक्तमेदःप्रसादाद्वृक्कौ मांसासृक्कफमेदःप्रसादाद्वृषणौ, शोणितकफप्रसादजं हृदयं यदाश्रया हि धमन्यः प्राणवहाः। तस्याधोवामतः प्लीहा फुप्फुसश्च दक्षिणतो यकृत् क्लोम च। तद्धृदयं विशेषेण चेतनास्थानमतस्तस्मिंस्तमसाऽऽवृते सर्व्वप्राणिनः स्वपन्ति। भवति चात्र। पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम्। जाग्रतस्तद्विकसति स्वपतश्च निमीलति। निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति"। इतः परं निद्राविशेषकारणादिकमुक्तं तच्च निद्राशब्दे वक्ष्यते।

"शुक्रशोणितं गर्भाशयस्थमात्मप्रकृतिविकारसंमूर्च्छितं गर्भ इत्युच्यते। तञ्च चेतनावस्थितं वायुर्व्विभजते तेज एनं पचति, आपः क्लेदयन्ति, पृथिवी संहन्ति, आकाशं विवर्द्धयति। एवंविवर्द्धितः स यदा हस्तपादजिह्वाघ्राणकर्णनितम्बादिभिरङ्गैरुपेतस्तदा शरीरमिति संज्ञां लभते तच्च षडङ्गं शाखाश्चतस्रो मध्यं पञ्चमं षष्ठं शिर इति।"

ततः प्रत्यङ्गविभाग उक्तः तच्च अङ्गशब्दे ७२पृ० दर्शितम्। एवं समासत उक्त्वा विस्तारत उक्तं यथा

"विस्तारोऽत ऊर्द्ध्वम्। त्वचोऽभिहिताः कला धातवो मला दोषा यकृत्प्लीहानौ पुप्फुस उण्डुको हृदयं वृक्कौ च। आशयास्तु वाताशयः पित्ताशयः श्लेष्माशयो रक्ताशय आमाशयः पक्वाशयो मूत्राशयः स्त्रीणां गर्भाशयोऽष्टम इति। सार्द्धत्रिव्यामान्यन्त्राणि पुंसां, स्त्रीणामर्द्धव्यामहीनानि। श्रवणनयनवदनघ्राणगुदमेढ्राणि नव स्रोतांसि नराणां बहिर्मुखान्येतान्येव, स्त्रीणामपराणि च त्रीणि द्वे स्तनयोरधस्ताद्रक्तवहञ्च।

षोडश कण्डराः। तासाञ्चतस्रः पादयोस्तावत्यो हस्तग्रीवापृष्ठेषु। तत्र हस्तपादगतानां कण्डराणां नखाः प्ररोहाः। ग्रीवाहृदयनिबन्धिनीनामधोभागगतानां मेढ्रश्रोणिपृष्ठनिबन्धिनीनामधोभागगतानां बिम्बः मूर्द्धोरुवक्षोऽक्षपिण्डादीनाञ्च।

मांसशिरास्नाय्वस्थिजालानि प्रत्येकं चत्वारि चत्वारि। तानि मणिबन्धगुल्फसंश्रितानि परस्परनिबद्धानि परस्परसंश्लिष्टानि परस्परगवाक्षितानि चेति यैर्गवाक्षितमिदं शरीरम्।

षट् कूर्च्चास्ते हस्तपादग्रीवामेढ्रेषु, हस्तयोर्द्वौ पादयोर्द्वौ ग्रीवामेढ्रयोरेकैकः।

महत्यो मांसरज्जवश्चतस्रः पृष्ठवंशमुभयतः पेशीनिबन्धनार्थं द्वे बाह्ये आभ्यन्तरे च द्वे।

सप्त सेवन्यः। शिरसि विभक्ताः पञ्च, जिह्वाशेफसोरेकैका। ताः परिहर्त्तव्याः शस्त्रेण

चतुर्दशास्थ्नां संघाताः। तेषां त्रयो गुल्फजानुवङ्क्षणेषु एतेनेतरसक्थि ३बाहू च ६व्याख्यातौ त्रिकशिरसोरेकैकः२।

चतुर्द्दशैव सीमन्ताः। तेऽस्थिसंघातवद्गणनीया यतस्तैर्युक्ता अस्थिसङ्घाताः। ये प्रोक्ताः। सङ्घातास्तु खल्वष्टादशैकेषाम्। त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते। शल्यतन्त्रे तु त्रीण्येव शतानि। तेषां सविंशमस्थिशतं शाखासु। सप्तदशोत्तरं शतं श्रोणिपार्श्वपृष्ठोदरोरःसु। ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिः। एवमस्थ्नां त्रीणि शतानि पूर्य्यन्ते" अस्थिशब्दे ५६८पृ० विवृतिः।

'एकैकस्यान्तु पादाङ्गुल्यां त्रीणि त्रीणि तानि पञ्चदश। तलकूर्च्चगुल्फसंश्रितानि दश। पार्ष्ण्यामेकम्। जङ्घायां द्वे। जानुन्येकम्। एकमूराविति। त्रिंशदेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि३० बाहू ६०च व्याख्यातौ। श्रोण्यां पञ्च तेषां गुदभगनितम्बेषु चत्वारि। त्रिकसंश्रितमेकम्। पार्श्वे षट्त्रिंशदेवमेकस्मिन्, द्वितीयेऽप्येवम् ३६। पृष्ठे त्रिंशत्। अष्टावुरसि। द्वे अक्षकसंज्ञे। ग्रीवायां नवकम्। कण्ठनाड्यां चत्वारि। द्वे हन्वोः। दन्ता द्वात्रिंशत्। नासायां त्रीणि। एकं तालुनि। गण्डकर्णशङ्खेष्वेकैकम्। षट् शिरसि।

एतानि पञ्चविधानि भवन्ति। तद्यथा कपालरुचकतरुणवलयनलकसंज्ञानि। तेषां जानुनितम्बांसगण्डतालुशङ्खशिरस्सु कपालानि। दशनास्तु रुचकानि। घ्राणकर्णग्रीवाक्षिकोशेषु तरुणानि। पाणिपादपार्श्वपृष्ठोदरोरस्सु वलयानि, शेषाणि नलकसंज्ञानि। भवन्ति चात्र।

अभ्यन्तरगतैः सारैर्यथा तिष्ठन्ति भूरुहाः। अस्थिसारैस्तथा देहा ध्रियन्ते देहिनां ध्रुवम्। तस्माच्चिरविनष्टेषु त्वङ्मांसेषु शरीरिणाम्। अस्थीनि न विनश्यन्ति साराण्येतानि देहिनाम्। मांसान्यत्र निबद्धानि शिराभिः स्नायुभिस्तथा। अस्थीन्यालम्बनं कृत्वा न शीर्य्यन्ते पतन्ति वा।

सन्धयस्तु द्विविधाश्चेष्टावन्तः स्थिराश्च। शाखासु हन्वोः कट्याञ्च चेष्टावन्तस्तु सन्धयः। शेषास्तु सन्धयः सर्वे विज्ञेया हि स्थिरा बुधैः। सङ्ख्यातस्तु दशोत्तरे द्वे शते तेषां शाखास्वष्टषष्टिरेकोनषष्टिः कोष्ठे ग्रीवां प्रत्यूर्द्ध्वं त्र्यशीतिः। एकैकस्यां पादाङ्गुल्यां त्रयस्त्रयो द्वावङ्गुष्ठे ते चतुर्दश। जानुगुल्फवङ्क्षणेष्वेकैकः ३। एवं सप्तदशैकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि १७ बाहू ३४ च व्याख्यातौ। त्रयः कटीकपालेषु। चतुर्विंशतिः पृष्ठवंशे तावन्त एव पार्श्वयोः। उरस्यष्टौ तावन्त एव ग्रीवायाम्। त्रयः कण्ठे। नाड़ीषु हृदयक्लोमनिबद्धास्वष्टादश। दन्तपरिमाणा ३२ दन्तमूलेषु। एकः काकलके नासायाञ्च। द्वौ वर्त्ममण्डलजौ नेत्राश्रयौ। गण्डकर्णशङ्खेष्वेकैकः। द्वौ हनुसन्धी। द्वावुपरिष्टाद्भ्रुवोः शङ्खयोश्च। पञ्च शिरःकपालेषु। एको मूर्द्ध्नि। त एते सन्धयोऽष्टविधाः। कोरोदूखलसामुद्गप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः। तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः। कक्षावङ्क्षणदशनेषूदूखलाः। अंसपीठगुदभगनितम्बेषु सामुद्गाः। ग्रीवापृष्ठवंशयोः प्रतराः। शिरःकटीकपालेषु तुन्नसेवनी। हन्वोरुभयतस्तु वायसतुण्डाः। कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः। श्रोत्रशृङ्गाटकेषु शङ्खावर्त्ताः। तेषां नाम-

भिरेवाकृतयः प्रायेण व्याख्याताः। अस्थ्नान्तु सन्धयो ह्येते केवलाः परिकीर्त्तिताः। पेशीस्नायुशिराणान्तु सन्धिसङ्ख्या न विद्यते।

नव स्नायुशतानि तासां शाखासु षट् शतानि। द्वे शते त्रिंशच्च कोष्ठे। ग्रीवां प्रत्यूर्द्ध्वं सप्ततिः। एकैकस्यान्तु पादाङ्गुल्यां षट् निचितास्तास्त्रिंशत्। तावत्य ३० एव तलकूर्च्चगुल्फेषु। तावत्य ३० एव जङ्घायाम्। दश जानुनि। चत्वारिंशदूरौ। दश वङ्क्षणे। शतमध्यर्द्धमेवमेकस्मिन् १५० सक्थ्नि भवन्ति। एतेनेतरसक्थि १५० बाहू च ३०० व्याख्यातौ। षष्टिः कट्याम्। अशीतिः पृष्ठे। पार्श्वयोः षष्टिः। उरसि त्रिंशत्। षट्त्रिंशद्ग्रीवायाम्। मूर्द्ध्नि चतुस्त्रिंशत्। एवं नव स्नायुशतानि व्याख्यातानि।

भवन्ति चात्र। स्नायुश्चतुर्व्विधा विद्यात्तास्तु सर्व्वा निबोध मे। प्रतानवत्यो वृत्ताश्च पृथ्व्यश्च शुषिरास्तथा। प्रतानवत्यः शाखासु सर्व्वसन्धिषु चाप्यथ। वृत्तास्तु कण्डराः सर्व्वा विज्ञेयाः कुशलैरिह। आमपक्वाशयान्तेषु वस्तौ च शुषिराः खलु। पार्श्वोरसि तथा पृष्ठे पृथुलाश्च शिरस्यथ। नौर्यथा फलकास्तीर्णा बन्धनैर्ब्बहुभिर्युता। भारक्षमा भवेदप्सु न्युक्ता सुसमाहिता। एवमेव शरीरेऽस्मिन् यावन्तः सन्धयः स्मृताः। स्नायुभिर्ब्बहुभिर्बद्धास्तेन भारसहा नराः। नह्यस्थीनि न वा पेश्यो न शिरा न च सन्धयः। व्यापादितास्तथा हन्युर्यथा स्नायुः शरीरिणम्। यः स्नायुः प्रविजानाति बाह्याश्चाभ्यन्तरास्तथा। स गूढं शल्यमाहर्त्तुं देहाच्छक्नोति देहिनाम्।

पञ्च पेशीशतानि भवन्ति। तासां चत्वारि शतानि शाखासु। कोष्ठे षट्षष्टिः। ग्रीवां प्रत्यूर्द्ध्वं चतुस्त्रिंशत्। एकैकस्यान्तु पादाङ्गुल्यां तिस्रस्तिस्रस्ताः पञ्चदश। दश प्रपदे। पादोपरि कूर्च्चसन्निविष्टास्तावत्य एव। दश गुल्फतलयोः। गुल्फजान्वन्तरे विंशतिः। पञ्च जानुनि। विंशतिरूरौ। दश वङ्क्षणे। शतमेवमेकस्मिन् सक्थ्नि भवन्ति। एतेनेरसक्थि १०० बाहू च २०० व्याख्यातौ। तिस्रः पायौ। एका मेढ्रे। सेवन्यां चापरा। द्वे वृषणयोः। स्फिचोः पञ्च पञ्च। द्वे वस्तिशिरसि। पञ्चोदरे। नाभ्यामेका। पृष्ठोर्द्ध्वसंनिविष्टाः पञ्च पञ्च दीर्घाः। षट् पार्श्वयोः। दश वक्षसि। अक्षकांसौ प्रति समन्तात् सप्त। द्वे हृदयामाशययोः। षट् यकृत्प्लीहोण्डुकेषु। ग्रीवायाञ्चतस्रः। अष्टौ हन्वोः। एकैका काकलकगलयोः। द्वे तालुनि। एका जिह्वायाम्। ओष्ठयोर्द्वे। घोणायां द्वे। द्वे नेत्रयोः। गण्डयोश्चतस्रः कर्णयोर्द्वे। चतस्रो ललाटे। एका शिरसीत्येवमेतानि पञ्च पेशीशतानि।

शिरास्नायुस्थिपर्व्वाणि सन्धयश्च शरीरिणाम्। पेशीभिः संवृतान्यत्र बलवन्ति भवन्त्यतः। स्त्रीणान्तु विंशतिरधिका। दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च यौवने तासां परिवृद्धिः। अपत्यपथे चतस्रस्तासां प्रसृते अभ्यन्तरतो द्वे मुखाश्रिते बाह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसंश्रितास्तिस्रः। शुक्रार्त्तवप्रवेशिन्यस्तिस्र एव। पित्तपक्वाशयमध्ये गर्भाशयो यत्र गर्भस्तिष्ठति। तासां बहलपेलवस्थूलाणुपृथुवृत्तह्रस्वदीर्घस्थिरमृदुश्लक्ष्णकर्कशभावाः सन्ध्यस्थिशिरास्नायुप्रच्छादका यथादेशं स्वभावत एव भवन्ति। भवन्ति चात्र। पुंसां पेश्यः पुरस्ताद्याः प्रोक्ता लक्षणमुष्कजाः। स्त्रीणामावृत्य तिष्ठन्ति फलमन्तर्गतं हि ताः। मर्म्मशिराधमनीस्रोतसामन्यत्र प्रविभागः।

शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा प्रकीर्त्तिता। तस्यास्तृतीये त्वावर्त्ते गर्भशय्या प्रतिष्ठिता। यथा रोहितमत्स्यस्य मुखं भवति रूपतः। तत्संस्थानां तथारूपां गर्भशय्यां विदुर्बुधाः। आभुग्नोऽभिमुखः शेते गर्भो गर्भाशये स्त्रियाः। स योनिं शिरसा याति स्वभावात् प्रसवं प्रति। त्वक्पर्य्यन्तस्य देहस्य योऽयमङ्गविनिश्चयः। शल्यज्ञानादृते नैष वर्ण्यतेऽङ्गेषु केषुचित्। तस्मान्निःसंशयं ज्ञानं हर्त्रा शल्यस्य वाञ्छता। शोधयित्वा मृतं सम्यग्द्रष्टव्योऽङ्गविनिश्चयः। प्रत्यक्षतो हि यद्दृष्टं शास्त्रदृष्टञ्च यद्भवेत्। समासतस्तदुभयं भूयो ज्ञानविवर्द्धनम्।

तस्मात् समस्तगात्रमविषोपहतमदीर्घव्याधिपीडितमवर्षशतिकं निःसृष्टान्त्रपुरीषं पुरुषमवहन्त्यामापगायां निबद्धं पञ्जरस्थं मुञ्जवल्कलकुशशणादीनामन्यतमेनावेष्टिताङ्गमप्रकाशे देशे कोथयेत् सम्यक्प्रकुथितञ्चोद्धृत्य ततो देहं सप्तरात्रादुशीरबालवेणुवल्कलकूर्च्चानामन्यतमेन शनैः शनैरवघर्षयंस्त्वगादीन् सर्व्वानेव बाह्याभ्यन्तराङ्गप्रत्यङ्गविशेषान् यथोक्तान् लक्षयेच्चक्षुषा। श्लोकौ चात्र भवतः। न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मतमो विभुः। दृश्यते ज्ञानचक्षुर्भिस्तपश्चक्षुर्भिरेव च। शरीरे चैव शास्त्रे च दृष्टार्थः स्याद्विशारदः। दृष्टश्रुताभ्यां सन्देहमपोह्याचरेत् क्रियाः"।

"अथातः प्रत्येकमर्म्मनिर्द्देशं शारीरं व्याख्यास्यामः। सप्तोत्तरं मर्म्मशतम्। तानि मर्म्माणि पञ्चात्मकानि। तद्यथा मांसमर्म्माणि, शिरामर्म्माणि, स्नायुमर्म्माणि, अस्थिमर्म्माणि सन्धिमर्म्माणि चेति। न खलु मांसशिरा-

स्नाय्वस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते। तत्रैकादश मांसमर्म्माणि। एकचत्वारिंशत् शिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सप्तोत्तरं मर्म्मशतम्।

तेषामेकादशैकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि ११ बाहू २२ च व्याख्यातौ। उदरोरसोर्द्वादश चतुर्द्दश वा पृष्ठे। ग्रीवां प्रत्यूर्द्ध्वं सप्तत्रिंशत्। तत्र सक्थिमर्म्माणि क्षिप्रतलहृदयकूर्च्चकूर्च्चशिरोगुल्फेन्द्रवस्तिजान्वाण्युर्व्वीलोहिताक्षाणि विटपञ्चेति। एतेनेतरं सक्थि व्याख्यातम्। उदरोरसोस्तु गुदवस्तिनाभिहृदयस्तनमूलस्तनरोहितापलापान्यपस्तम्भौ चेति। पृष्ठमर्म्माणि तु कटीकतरुणकुकुन्दरनितम्बपार्श्वसन्धिबृहत्यंसफलकान्यंसौ चेति। बाहुमर्म्माणि तु क्षिप्रतलहृदयकूर्च्चकूर्च्चशिरोमणिबन्धेन्द्रवस्तिकूर्परांण्यूर्व्वीलोहिताक्षाणि कक्षधरञ्चेति। एतेनेतरो बाहुर्व्याख्यातः।

जत्रूर्द्ध्वं मर्म्माणि, चतस्रो धमन्यो,ऽष्टौ मातृका, द्वे कृकाटिके, द्वे विधुरे, द्वौ फणौ, द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि शृङ्गाटकान्येकोऽधिपतिरिति।

तत्र तलहृदयेन्द्रवस्तिगुदस्तनरोहितानि मांसमर्म्माणि। नीलधमनीमातृकाशृङ्गाटकापाङ्गस्थपनीफणस्तनमूलापलापापस्तम्भहृदयनाभिपार्श्वसन्धिबृहतीलोहिताक्ष्योर्व्व्यः शिरामर्म्माणि। आणिविटपकक्षधरकूर्च्चकूर्च्चशिरोवस्तिक्षिप्रांसविधुरोत्क्षेपाः स्नायुमर्म्माणि। कटीकतरुणनितम्बांसफलकशङ्खास्त्वस्थिमर्म्माणि। जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तकृकाटिकाश्चेति सन्धिमर्म्माणि।

तान्येतानि पञ्चविकल्पानि मर्म्माणि भवन्ति तद्यथा, सद्यःप्राणहराणि, कालान्तरप्राणहराणि, विशल्यघ्नानि, वैकल्यकराणि, रुजाकराणीति। तत्र सद्यः प्राणहराण्येकोनविंशतिः। कालान्तरप्राणहराणि त्रयस्त्रिंशत्। त्रीणि विशल्यघ्नानि। चतुश्चत्वारिंशद्वैकल्यकराणि। अष्टौ रुजाकराणीति।

भवन्ति चात्र। शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरा गुदम्। हृदयं वस्तिनाभी च घ्नन्ति सद्यो हतानि तु। वक्षोमर्म्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः। कटीकतरुणे सन्धी पार्श्वजौ बृहती च या। नितम्बाविति चैतानि कालान्तरहराणि तु। उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्दिशेत्। लोहिताक्षाणि जान्वूर्व्वीकूर्च्चविटपकूर्पराः। कुकुन्दरे कक्षधरे विधुरे सकृकाटिके। अंसांसफलकापाङ्गा नीले मन्ये फणौ तथा। वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च। गुल्फौ द्वौ मणिबन्धौ द्वौ द्वे द्वे कूर्च्चशिरांसि च। रुजाकराणि जानीयादष्टावेतानि बुद्धिमान्। क्षिप्राणि विद्धमात्राणि घ्नन्ति कालान्तरेण च।

मर्म्माणि नाम मांसशिरास्नाय्वस्थिसन्धिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति तस्मान्मर्म्मस्वभिहतास्तांस्तान् भावानापद्यन्ते।

तत्र सद्यःप्राणहराण्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्षपयन्ति। कालान्तरप्राणहराणि सौम्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्रमेण च सोमगुणेषु कालान्तरेण क्षपयन्ति। विशल्यप्राणहराणि वायव्यानि शल्यमुखनिरुद्धो यावदन्तर्वायुस्तिष्ठति तावज्जीवत्युद्धृतमात्रे तु शल्ये मर्म्मस्थानाश्रितो वायुर्निष्क्रामति तस्मात् सशल्यो जीवत्युद्धृतशल्यो म्रियते। वैकल्यकराणि सौम्यानि सोमो हि स्थिरत्वाच्छैत्याच्च प्राणावलम्बनं करोति। रुजाकराण्यग्निवायुगुणभूयिष्ठानि विशेषतश्च तौ रुजाकरौ। पाञ्चभौतिकीञ्च रुजामाहुरेके।

केचिदाहुर्म्मांसादीनां पञ्चानामपि समस्तानां वृद्धानाञ्च समवायात् सद्यःप्राणहराणि। एकहीनानामल्पानां वा कालान्तरप्राणहराणि। द्विहीनानां विशल्यप्राणहराणि। त्रिहीनानां वैकल्यकराणि। एकस्मिन्नेव रुजाकराणीति। यतश्चैवमतोऽस्थिमर्म्मस्वप्यभिहतेषु शोणितागमनं भवति।

चतुर्व्विधा यास्तु शिराः शरीरे प्रायेण ता मर्म्मसु सन्निविष्टाः। स्नाय्वस्थिमांसानि तथैव सन्धीन् सन्तर्प्य देहं प्रतिपालयन्ति। ततः क्षते मर्म्मणि ताः प्रवृद्धः समन्ततो वायुरभिवृणोति। विवर्द्धमानस्तु स मातरिश्वा रुजः सुतीव्राः प्रतनोति काये। रुजाभिभूतन्तु पुनः शरीरं प्रलीयते नश्यति चास्य संज्ञा। अतो हि शल्यं विनिहर्त्तुमिच्छन्मर्म्माणि यत्नेन परीक्ष्य कर्षेत्। एतेन शेषं व्याख्यातम्।

तत्र सद्यः प्राणहरमन्तेविद्धं कालान्तरेण मारयति। कालान्तरप्राणहरमन्तेविद्धं वैकल्यमापादयति। विशल्यप्राणहरमन्तेविद्धं कालान्तरेण क्लेशयति रुजाञ्च करोति। रुजाकरमतीव्रवेदनं भवति।

कालान्तरप्राणहराणि पक्षान्मासाद्वा। तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति। विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति। अतऊर्द्ध्वं प्रत्येकशो

मर्म्मस्थानान्यनुव्याख्यास्यामः। तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म, तत्र विद्धस्याक्षेपकेण मरणम्। मध्यमामाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम, तत्रापि रुजाभिर्मरणं। क्षिप्रस्योपरिष्टादुभयतः कूर्च्चो नाम, तत्र पादस्य भ्रमणवेपने भवतः। गुल्फसन्धेरधउभयतः कूर्च्चशिरो नाम, तत्र रुजाशोफौ। पदजङ्घयोः सन्धाने गुल्फो नाम, तत्र रुजः स्तब्धपादता खञ्जता वा। पार्ष्णिं प्रति जङ्घामध्ये इन्द्रवस्तिर्नाम, तत्र शोणितक्षये मरणम्। जङ्घोर्व्वोः सन्धाने जानु नाम, तत्र खञ्जता। जानुन ऊर्द्ध्वमुभयतस्त्र्यङ्गुलमाणिर्नाम, तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च। ऊरुमध्ये ऊर्व्वी नाम, तत्र शोणितक्षयात् सक्थिशोषः। ऊर्व्वा ऊर्द्ध्वमधोवङ्क्षणसन्धेरूरुमूले लोहिताक्षं नाम, तत्र लोहितक्षयेण पक्षाघातः। वङ्क्षणवृषणयोरन्तरे विटपं नाम, तत्र षाण्ड्यमल्पशुक्रता वा भवति। एवमेतान्येकादश सक्थिमर्म्माणि व्याख्यातानि। एतेनेतरसक्थिबाहू च व्याख्यातौ। विशेषतस्तु यानि सक्थि गुल्फजानुविटपानि तानि बाहौ मणिबन्धकूर्परकक्षधराणि यथा वङ्क्षणवृषणयोरन्तरे विटपमेव, वक्षःकक्षयोर्मध्ये कक्षधरं, तस्मिन्विद्धे तएवोपद्रवाः। विशेषतस्तु मणिबन्धे कुण्ठता। कूर्पराख्ये कुणिः। कक्षाधरे पक्षाघातः। एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि।

अत ऊर्द्ध्वमुदरोरसोर्मर्म्मस्थानान्यनुव्याख्यास्यामः। तत्र वातवर्च्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म्म, तत्र सद्योमरणम्। अल्पमांसशोणितोऽभ्यन्तरतः कट्यां मूत्राशयो वस्तिर्नाम, तत्रापि सद्योमरणमश्मरीव्रणादृते तत्राप्युभयतो भिन्ने न जीवत्येकतोभिन्ने मूत्रस्रावी व्रणो भवति स तु यत्नेनोपक्रान्तो रोहति। पक्वामाशययोर्मध्ये शिराप्रभवा नाभिर्नाम, तत्रापि सद्य एव मरणम्। स्तनयोर्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नाम, तत्र सद्यएव मरणम् स्तनयोरधस्तात् द्व्यङ्गुलमुभयतः स्तनमूले नाम मर्म्मणी, तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते। स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम, तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्यां च म्रियते। अंसकूटयोरधस्तात् पार्श्वोपरिभागयोरपलापौ नाम, तत्र रक्तेन पूयभावं गतेन मरणम्। उभयत्रोरसो नाड्यौ वातवहे अपस्तम्भौ नाम, तत्र वातपूर्णकोष्ठतया कासश्वासाभ्यां च मरणम्। एवमेतान्युदरोरसोर्द्वादश मर्म्माणि व्याख्यातानि।

अत ऊर्द्ध्वं पृष्ठमर्म्माण्यनुव्याख्यास्यामः। तत्र पृष्ठवंशमुभयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी, तत्र शोणितक्षयात् पाण्डुर्विवर्णो हीनरूपश्च म्रियते। पार्श्वजघनबहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी, तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च। श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम, तत्राधःकायशोषो दौर्ब्बल्याच्च मरणम्। अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वं च जघनात् पार्श्वसन्धी नाम, तत्र लोहितपूर्णकोष्ठतया म्रियते। स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम, तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते। पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम, तत्र बाह्वोः स्वापः शोषो वा। बाहुमूर्द्धग्रीवामध्येंऽसपीठस्कन्धनिबन्धनावंसौ नाम, तत्र स्तब्धबाहुता। एवमेतानि चतुर्द्दश पृष्ठमर्म्माणि व्याख्यातानि।

अत ऊर्द्ध्वं जत्रुगतानि व्याख्यास्यामः। तत्र कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले, द्वे च मन्ये, व्यत्यासेन तत्र मूकता स्वरवैकृतमरसग्राहिता च। ग्रीवायामुभयतश्चतस्रः शिरामातृकाः, तत्र सद्योमरणम्। शिरोग्रीवयोः सन्धाने कृकाटिके नाम, तत्र चलमूर्द्धता। कर्णपृष्ठतोऽधः संश्रिते विधुरे नाम, तत्र बाधिर्य्यम्। घ्राणमार्गमुभयतः स्रोतोमार्गं प्रतिबद्धे अभ्यन्तरतः फणे नाम, तत्र गन्धाज्ञानम्। भ्रूपुच्छान्तयोरधोऽक्ष्णोर्बाह्यतो ऽपाङ्गौ नाम, तत्रान्ध्यं दृष्ट्युपघातो वा। भ्रुवोरुपरि निम्नयोरावर्त्तौ नाम, तत्राप्यान्ध्यं दृष्ट्युपघातश्च। भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये शङ्खौ नाम, तत्र सद्यो मरणम्। शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम, तत्र सशल्यो जीवति पाकात् पतितशल्यो वा नोद्धृतशल्यः। भ्रुवोर्मध्ये स्थपनी नाम, तत्रोत्क्षेपवत्। पञ्च सन्धयः शिरसि विभक्ताः सीमन्ता नाम, तत्रोन्मादभयचित्तनाशैर्मरणम्। घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां शिराणां मध्ये शिरासन्निपातः शृङ्गाटकानि, तानि चत्वारि मर्म्माणि तत्रापि सद्योमरणम्। मस्तकाभ्यन्तरोपरिष्टात् शिरासन्धिसन्निपातो रोमावर्त्तोऽधिपतिः, तत्रापि सद्योमरणम्। एवमेतानि सप्तत्रिंशदूर्द्ध्वजत्रुगतानि मर्म्माणि व्याख्यातानि।

भवन्ति चात्र। ऊर्व्व्यः शिरांसि विटपे च सकक्षपार्श्वे

स्नाय्वस्थिसन्धिव्यतिरेकेणान्यानि मर्म्माणि भवन्ति यस्मान्नोपलभ्यन्ते। तत्रैकादश मांसमर्म्माणि। एकचत्वारिंशत् शिरामर्म्माणि। सप्तविंशतिः स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि। विंशतिः सन्धिमर्म्माणि। तदेतत् सप्तोत्तरं मर्म्मशतम्।

तेषामेकादशैकस्मिन् सक्थ्नि भवन्ति। एतेनेतरसक्थि ११ बाहू २२ च व्याख्यातौ। उदरोरसोर्द्वादश चतुर्द्दश वा पृष्ठे। ग्रीवां प्रत्यूर्द्ध्वं सप्तत्रिंशत्। तत्र सक्थिमर्म्माणि क्षिप्रतलहृदयकूर्च्चकूर्च्चशिरोगुल्फेन्द्रवस्तिजान्वाण्यूर्व्वीलोहिताक्षाणि विटपञ्चेति। एतेनेतरं सक्थि व्याख्यातम्।

उदरोरसोस्तु गुदवस्तिनाभिहृदयस्तनमूलस्तनरोहितापलापान्यपस्तम्भौ चेति। पृष्ठमर्म्माणि तु कटीकतरुणकुकुन्दरनितम्बपार्श्वसन्धिबृहत्यंसफलकान्यंसौ चेति। बाहुमर्म्माणि तु क्षिप्रतलहृदयकूर्च्चकूर्च्चशिरोमणिबन्धेन्द्रवस्तिकूर्परान्यूर्व्वीलोहिताक्षाणि कक्षधरश्चेति। एतेनेतरो बाहुर्व्याख्यातः।

जत्रूर्द्ध्वं मर्म्माणि, चतस्रो धमन्यो,ऽष्टौ मातृका, द्वे कृकाटिके, द्वे विधुरे, द्वौ फणौ, द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि शृङ्गाटकान्येकोऽधिपतिरिति।

तत्र तलहृदयेन्द्रवस्तिगुदस्तनरोहितानि मांसमर्म्माणि। नीलधमनीमातृकाशृङ्गाटकापाङ्गस्थपनीफणस्तनमूलापलापापस्तम्भहृदयनाभिपार्श्वसन्धिबृहतीलोहिताक्षोर्व्व्यः शिरामर्म्माणि। आणिविटपकक्षधरकूर्च्चकूर्च्चशिरोवस्तिक्षिप्रांसविधुरोत्क्षेपाः स्नायुमर्म्माणि। कटीकतरुणनितम्बांसफलकशङ्खास्त्वस्थिमर्म्माणि। जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तकृकाटिकाश्चेति सन्धिमर्म्माणि।

तान्येतानि पञ्चविकल्पानि मर्म्माणि भवन्ति तद्यथा, सद्यःप्राणहराणि, कालान्तरप्राणहराणि, विशल्यघ्नानि, वैकल्यकराणि, रुजाकराणीति। तत्र सद्यःप्राणहराण्येकोनविंशतिः। कालान्तरप्राणहराणि त्रयस्त्रिंशत्। त्रीणि विशल्यघ्नानि। चतुश्चत्वारिंशद्वैकल्यकराणि। अष्टौ रुजाकराणीति।

भवन्ति चात्र। शृङ्गाटकान्यधिपतिः शङ्खौ कण्ठशिरा गुदम्। हृदयं वस्तिनाभी च घ्नन्ति सद्यो हतानि तु। वक्षोमर्म्माणि सीमन्ततलक्षिप्रेन्द्रवस्तयः। कटीकतरुणे सन्धी पार्श्वजौ बृहती च या। नितम्बाविति चैतानि कालान्तरहराणि तु। उत्क्षेपौ स्थपनी चैव विशल्यघ्नानि निर्द्दिशेत्। लोहिताक्षाणि जान्वूर्व्वीकूर्च्चविटपकूर्पराः। कुकुन्दरे कक्षधरे विधुरे सकृकाटिके। अंसांसफलकापाङ्गा नीले मन्ये फणौ तथा। वैकल्यकरणान्याहुरावर्त्तौ द्वौ तथैव च। गुल्फौ द्वौ मणिबन्धौ द्वौ द्वे द्वे कूर्च्चशिरांसि च। रुजाकराणि जानीयादष्टावेतानि बुद्धिमान्। क्षिप्राणि विद्धमात्राणि घ्नन्ति कालान्तरेण च।

मर्म्माणि नाम मांसशिरास्नाय्वस्थिसन्धिसन्निपातास्तेषु स्वभावत एव विशेषेण प्राणास्तिष्ठन्ति तस्मान्मर्म्मस्वभिहतास्तांस्तान् भावानापद्यन्ते।

तत्र सद्यःप्राणहराण्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्षपयन्ति। कालान्तरप्राणहराणि सौम्याग्नेयान्यग्निगुणेष्वाशु क्षीणेषु क्रमेण च सोमगुणेषु कालान्तरेण क्षपयन्ति। विशल्यप्राणहराणि वायव्यानि शल्यमुखनिरुद्धो यावदन्तर्वायुस्तिष्ठति तावज्जीवत्युद्धृतमात्रे तु शल्ये मर्म्मस्थानाश्रितो वायुर्निष्क्रामति तस्मात् सशल्यो जीवत्युद्धृतशल्यो म्रियते। वैकल्यकराणि सौम्यानि सोमो हि स्थिरत्वाच्छैत्याच्च प्राणावलम्बनं करोति। रुजाकराण्यग्निवायुगुणभूयिष्ठानि विशेषतश्च तौ रुजाकरौ। पाञ्चभौतिकीञ्च रुजामाहुरेके।

केचिदाहुर्मांसादीनां पञ्चानामपि समस्तानां वृद्धानाञ्च समवायात् सद्यःप्राणहराणि। एकहीनानामल्पानां वा कालान्तरप्राणहराणि। द्विहीनानां विशल्यप्राणहराणि। त्रिहीनानां वैकल्यकराणि। एकस्मिन्नेव रुजाकराणीति। यतश्चैवमतोऽस्थिमर्म्मस्वप्यभिहतेषु शोणितागमनं भवति।

चतुर्व्विधा यास्तु शिराः शरीरे प्रायेण ता मर्म्मसु सन्निविष्टाः। स्नाय्वस्थिमांसानि तथैव सन्धीन् सन्तर्प्य देहं प्रतिपालयन्ति। ततः क्षते मर्म्मणि ताः प्रवृद्धः समन्ततो वायुरभिवृणोति। विवर्द्धमानस्तु स मातरिश्वा रुजः सुतीव्राः प्रतनोति काये। रुजाभिभूतन्तु पुनः शरीरं प्रलीयते नश्यति चास्य संज्ञा। अतो हि शल्यं विनिहर्त्तुमिच्छन्मर्म्माणि यत्नेन परीक्ष्य कर्षेत्। एतेन शेषं व्याख्यातम्।

तत्र सद्यःप्राणहरमन्तेविद्धं कालान्तरेण मारयति। कालान्तरप्राणहरमन्तेविद्धं वैकल्यमापादयति। विशल्यप्राणहरमन्तेविद्धं कालान्तरेण क्लेशयति रुजाञ्च करोति। रुजाकरमतीव्रवेदनं भवति।

कालान्तरप्राणहराणि पक्षान्मासाद्वा। तेष्वपि तु क्षिप्राणि कदाचिदाशु मारयन्ति। विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति। अतऊर्द्ध्वं प्रत्येकशो

मर्म्मस्थानान्यनुव्याख्यास्यामः । तत्र पादाङ्गुष्ठाङ्गुल्योर्मध्ये क्षिप्रं नाम मर्म्म, तत्र विद्धस्याक्षेपकेण मरणम् । मध्यमाङ्गुलीमनुपूर्व्वेण मध्ये पादतलस्य तलहृदयं नाम, तत्रापि रुजाभिर्मरणं । क्षिप्रस्योपरिष्टादुभयतः कूर्च्चो नाम, तत्र पादस्य भ्रमणवेपने भवतः । गुल्फसन्धेरध उभयतः कूर्च्चशिरो नाम, तत्र रुजाशोफौ । पादजङ्घयोः सन्धाने गुल्फो नाम, तत्र रुजः स्तब्धपादता खञ्जता वा । पार्ष्णिं प्रति जङ्घामध्ये इन्द्रवस्तिर्नाम, तत्र शोणितक्षये मरणम् । जङ्घोर्व्वोः सन्धाने जानु नाम, तत्र खञ्जता । जानुन ऊर्द्ध्वमुभयतस्त्र्यङ्गुलमाणिर्नाम, तत्र शोफाभिवृद्धिः स्तब्धसक्थिता च । ऊरुमध्ये उर्व्वी नाम, तत्र शोणितक्षयात् सक्थिशोषः । उर्व्व्या ऊर्द्ध्वमधोवङ्क्षणसन्धेरूरुमूले लोहिताक्षं नाम, तत्र लोहितक्षयेण पक्षाघातः । वङ्क्षणवृषणयोरन्तरे विटपं नाम, तत्र षाण्ड्यमल्पशुक्रता वा भवति । एवमेतान्येकादश सक्थिमर्म्माणि व्याख्यातानि । एतेनेतरसक्थि बाहू च व्याख्यातौ । विशेषतस्तु यानि सक्थि गुल्फजानुविटपानि तानि बाहौ मणिबन्धकूर्परकक्षधराणि यथा वङ्क्षणवृषणयोरन्तरे विटपमेव, वक्षःकक्षयोर्मध्ये कक्षधरं, तस्मिन्विद्धे तएवोपद्रवाः । विशेषतस्तु मणिबन्धे कुण्ठता । कूर्पराख्ये कुणिः । कक्षाधरे पक्षाघातः । एवमेतानि चतुश्चत्वारिंशच्छाखासु मर्म्माणि व्याख्यातानि ।

अत ऊर्द्ध्वमुदरोरसोर्मर्म्मस्थानान्यनुव्याख्यास्यामः । तत्र वातवर्च्चोनिरसनं स्थूलान्त्रप्रतिबद्धं गुदं नाम मर्म्म, तत्र सद्योमरणम् । अल्पमांसशोणितोऽभ्यन्तरतः कट्यां मूत्राशयो वस्तिर्नाम, तत्रापि सद्योमरणमश्मरीव्रणादृते तत्राप्युभयतो भिन्ने न जीवत्येकतोभिन्ने मूत्रस्रावी व्रणो भवति स तु यत्नेनोपक्रान्तो रोहति । पक्वामाशययोर्मध्ये सिराप्रभवा नाभिर्नाम, तत्रापि सद्य एव मरणम् । स्तनयोर्मध्यमधिष्ठायोरस्यामाशयद्वारं सत्त्वरजस्तमसामधिष्ठानं हृदयं नाम, तत्र सद्यएव मरणम् स्तनयोरधस्तात् द्व्यङ्गुलमुभयतः स्तनमूले नाम मर्म्मणी, तत्र कफपूर्णकोष्ठतया कासश्वासाभ्यां म्रियते । स्तनचूचुकयोरूर्द्ध्वं द्व्यङ्गुलमुभयतः स्तनरोहितौ नाम, तत्र लोहितपूर्णकोष्ठतया कासश्वासाभ्यां च म्रियते । अंसकूटयोरधस्तात् पार्श्वोपरिभागयोरपलापौ नाम, तत्र रक्तेन पूयभावं गतेन मरणम् । उभयत्रोरसो नाड्यौ वातवहे अपस्तम्भौ नाम, तत्र वातपूर्णकोष्ठतया कासश्वासाभ्यां च मरणम् । एवमेतान्युदरोरसोर्द्वादश मर्म्माणि व्याख्यातानि ।

अत ऊर्द्ध्वं पृष्ठमर्म्माण्यनुव्याख्यास्यामः । तत्र पृष्ठवंशमुभयतः प्रतिश्रोणीकाण्डमस्थिनी कटीकतरुणे नाम मर्म्मणी, तत्र शोणितक्षयात् पाण्डुर्विवर्णो हीनरूपश्च म्रियते । पार्श्वजघनबहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी, तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च । श्रोणीकाण्डयोरुपर्य्याशयाच्छादनौ पार्श्वान्तरप्रतिबद्धौ नितम्बौ नाम, तत्राधःकायशोषो दौर्ब्बल्याच्च मरणम् । अधःपार्श्वान्तरप्रतिबद्धौ जघनपार्श्वमध्ययोस्तिर्य्यगूर्द्ध्वं च जघनात् पार्श्वसन्धी नाम, तत्र लोहितपूर्णकोष्ठतया म्रियते । स्तनमूलादुभयतः पृष्ठवंशस्य बृहती नाम, तत्र शोणितातिप्रवृत्तिनिमित्तैरुपद्रवैर्म्रियते । पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसम्बद्धे अंसफलके नाम, तत्र बाह्वोः स्वापः शोषो वा । बाहुमूर्द्धग्रीवामध्येऽंसपीठस्कन्धनिबन्धनावंसौ नाम, तत्र स्तब्धबाहुता । एवमेतानि चतुर्द्दश पृष्ठमर्म्माणि व्याख्यातानि ।

अत ऊर्द्ध्वं जत्रुगतानि व्याख्यास्यामः । तत्र कण्ठनाडीमुभयतश्चतस्रो धमन्यो द्वे नीले, द्वे च मन्ये, व्यत्यासेन तत्र मूकता स्वरवैकृतमरसग्राहिता च । ग्रीवायामुभयतश्चतस्रः सिरामातृकाः, तत्र सद्योमरणम् । शिरोग्रीवयोः सन्धाने कृकाटिके नाम, तत्र चलमूर्द्धता । कर्णपृष्ठतोऽधः संश्रिते विधुरे नाम, तत्र बाधिर्य्यम् । घ्राणमार्गमुभयतः स्रोतोमार्गं प्रतिबद्धे अभ्यन्तरतः फणे नाम, तत्र गन्धाज्ञानम् । भ्रूपुच्छान्तयोरधोऽक्ष्णोर्बाह्यतोऽपाङ्गौ नाम, तत्रान्ध्यं दृष्ट्युपघातो वा । भ्रुवोरुपरि निम्नयोरावर्त्तौ नाम, तत्रान्ध्यं दृष्ट्युपघातश्च । भ्रुवोः पुच्छान्तयोरुपरि कर्णललाटयोर्मध्ये शङ्खौ नाम, तत्र सद्योमरणम् । शङ्खयोरुपरि केशान्त उत्क्षेपौ नाम, तत्र सशल्यो जीवति पाकात् पतितशल्यो वा नोद्धृतशल्यः । भ्रुवोर्मध्ये स्थपनी नाम, तत्रोत्क्षेपवत् । पञ्च सन्धयः शिरसि विभक्ताः सीमन्ता नाम, तत्रोन्मादभयचित्तनाशैर्मरणम् । घ्राणश्रोत्राक्षिजिह्वासन्तर्पणीनां सिराणां मध्ये सिरासन्निपातः शृङ्गाटकानि, तानि चत्वारि मर्म्माणि तत्रापि सद्योमरणम् । मस्तकाभ्यन्तरोपरिष्टात् सिरासन्धिसन्निपातो रोमावर्त्तोऽधिपतिः, तत्रापि सद्योमरणम् । एवमेतानि सप्तत्रिंशदूर्द्ध्वजत्रुगतानि मर्म्माणि व्याख्यातानि ।

भवन्ति चात्र । ऊर्व्व्यः शिरांसि विटपे च सकक्षपार्श्वे

एकैकमङ्गुलमिताः स्तनपूर्व्वमूलम् । विद्याद्‌ङ्गुलद्वयमितं मणिबन्धगुल्फं त्रीण्येव जानु सपरं सह कूर्पराभ्याम् । हृद्वस्तिकूर्च्चगुदनाभि वदन्ति मूर्द्ध्नि चत्वारि पञ्च च गले दश यानि च द्वे । तानि स्वपाणितलकुञ्चितसंमितानि शेषाण्यवेहि परिविस्तरतोऽङ्गुलार्द्धम् । एतत्प्रमाणमभिवीक्ष्य वदन्ति तज्ज्ञाः शस्त्रेण कर्म करणं परिहृत्य मर्म । पार्श्वाभिघातितमपीह निहन्ति मर्म तस्माद्धि मर्मसदनं परिवर्जनीयम् । छिन्नेषु पाणिचरणेषु सिरा नराणां सङ्कोचमीयुरसृगल्पमतो निरेति । प्राप्यामितव्यसनमुग्रमतो मनुष्याः संछिन्नशाखतरुवन्निधनं न यान्ति । क्षिप्रेषु तत्र सतलेषु हतेषु रक्तं गच्छत्यतीव पवनश्च रुजं करोति । एवं विनाशमुपयान्ति हि तत्र विद्धा छिन्ना इवायुधविघातनिकृत्तमूलाः । तस्मात्तयोरभिहतस्य तु पाणिपादं छेत्तव्यमाशु मणिबन्धनगुल्फदेशे । मर्म्माणि शल्यविषयार्द्धमुदाहरन्ति यस्माच्च मर्मसु हता न भवन्ति सद्यः । जीवन्ति तत्र यदि वैद्यगुणेन केचित्ते प्राप्नुवन्ति विकलत्वमसंशयं हि । सम्भिन्नजर्ज्जरितकोष्ठशिरःकपाला जीवन्ति शस्त्रनिहतैश्च शरीरदेशैः । छिन्नैश्च सक्थिभुजपादकरैरशेषैर्येषां न मर्म्मपतिता विविधाः प्रहाराः । सोममारुततेजांसि रजःसत्त्वतमांसि च मर्मसु प्रायशः पुंसां भूतात्मा चावतिष्ठते । मर्मस्वभिहतास्तस्मान्न जीवन्ति शरीरिणः । इन्द्रियार्थेष्वसम्प्राप्तिर्मनोबुद्धिविपर्य्ययः । रुजश्च विविधास्तीव्रा भवन्त्याशुहरे हते । हते कालान्तरघ्ने तु ध्रुवो धातुक्षयो नृणाम् । ततो धातुक्षयाज्जन्तुर्वेदनाभिश्च नश्यति । हते वैकल्यजनने केवलं वैद्यनैपुणात् । शरीरं क्रियया युक्तं विकलत्वमवाप्नुयात् । विशल्यघ्नेषु विज्ञेयं पूर्व्वोक्तं यच्च कारणम् । रुजाकराणि मर्म्माणि क्षतानि विविधा रुजः । कुर्व्वन्त्यन्ते च वैकल्यं कुवैद्यवशगो यदि । छेदभेदाभिघातेभ्यो दहनाद्दारणादपि । उपघातं विजानीयान्मर्मणान्तुल्यलक्षणम् । मर्म्माभिघातस्तु न कश्चिदस्ति योऽल्पात्ययो वापि निरत्ययो वा । प्रायेण मर्मस्वभिताडितास्तु वैकल्यमृच्छन्त्यथ वा म्रियन्ते । मर्म्माण्यधिष्ठाय हि ये विकारा मूर्च्छन्ति काये विविधा नराणाम । प्रायेण ते कृच्छ्रतमा भवन्ति नरस्य यत्नैरपि साध्यमानाः" ।

अथातः सिरावर्णनविभक्तिं नाम शारीरं व्याख्यास्यामः । सप्त सिराशतानि भवन्ति । याभिरिदं शरीरमाराम इव जलहारिणीभिः केदार इव च कुल्याभिरुपस्निह्यतेऽनुगृह्यते चाकुञ्चनप्रसारणादिभिर्विशेषैः । द्रुमपत्रसेवनीनामिव च तासां प्रतानास्तासां नाभिमूलं ततश्च प्रसरन्त्यूर्द्ध्वमधस्तिर्य्यक् च । भवतश्चात्र यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम् । नाभ्यां सर्व्वा निबद्धास्ताः प्रतन्वन्ति समन्ततः । नाभिस्थाः प्राणिनां प्राणाः प्राणान्नाभिर्व्युपाश्रिता । सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः । तासां मूलसिराश्चत्वारिंशत्तासां वातवाहिन्यो दश, पित्तवाहिन्यो दश, कफवाहिन्यो दश, दश रक्तवाहिन्यः । तासान्तु वातवाहिनीनां वातस्थानगतानां पञ्चसप्ततिशतं भवति तावत्य १७५ एव पित्तवाहिन्यः पित्तस्थाने । कफवाहिन्यश्च १७५ कफस्थाने रक्तवाहिन्यश्च १७५ यकृत्प्लीह्नोः, एवमेतानि सप्त सिराशतानि । तत्र वातवाहिन्यः सिरा एकस्मिन् सक्थ्नि पञ्चविंशतिः । एतेनेतरसक्थि २५ बाहू ५० च व्याख्यातौ । विशेषतस्तु कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्राश्रिताः श्रोण्यामष्टौ द्वे द्वे पार्श्वयोः, षट् पृष्ठे, तावत्य ६ एव चोदरे, दशवक्षसि एकचत्वारिंशज्जत्रुण ऊर्द्ध्वं, तासां चतुर्दश ग्रीवायाम् । कर्णयोश्चतस्रः । नव जिह्वायाम् । षड् नासिकायाम् । अष्टौ नेत्रयोः । एवमेतत् पञ्चसप्तत्यधिकशतं वातवहानां सिराणां व्याख्यातम् ! एष एव विभागः शेषाणामपि । विशेषतस्तु पित्तवाहिन्यो नेत्रयोर्दश, कर्णयोर्द्वे, एवं रक्तवहाः कफवहाश्च । एवमेतानि सप्त शिराशतानि सविभागानि व्याख्यातानि" ।

"अथातो धमनीव्याकरणं शरीरं व्याख्यास्यामः । चतुर्व्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः । तत्र केचिदाहुः सिराधमनीस्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति । तत्तु न सम्यक् । अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः, कस्मात् ? व्यञ्जनान्यत्वान्मूलसन्नियमात् कर्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सदृशागमकर्मत्वात् सौक्ष्म्याच्च विभक्तकर्मणामप्यविभाग इव कर्मसु भवति ।

तासान्तु नाभिप्रभवाणां धमनीनामूर्द्ध्वगा दश, दश चाधोगामिन्यः, चतस्रस्तिर्य्यग्गाः । ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति । तास्तु हृदयमभिप्रपन्नास्त्रिधा जायन्ते तास्त्रिंशत् । तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश, शब्दरूपरसगन्धानष्टाभिर्गृह्णीते । द्वाभ्यां भाषते च, द्वाभ्यां घोषं करोति, द्वाभ्यां

स्वपिति, द्वाभ्यां प्रतिबुध्यते। द्वे चाश्रुवाहिन्यौ। द्वे स्तन्यं स्त्रिया वहतः स्तनसंश्रिते। ते एव शुक्रं नरस्य स्तनाभ्यामभिवहतः। तास्त्वेतास्त्रिंशत्सविभागा व्याख्याता एताभिरूर्द्ध्वं नाभेरुदरपार्श्वपृष्ठोरःस्कन्धग्रीवाबाहवो धार्य्यन्ते याप्यन्ते च।

भवति चात्र। ऊर्द्ध्वं गतास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः। अधोगमास्तु वक्ष्यामि कर्म्म तासां यथायथम्।

अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्यधो वहन्ति। तास्तु पित्ताशयमभिप्रपन्नास्तत्रस्थमेवान्नपानरसं विपक्वमौष्ण्याद्विवेचयन्त्योऽभिवहन्त्यः शरीरं तर्पयन्त्यर्पयन्ति चोर्द्ध्वगतानां तिर्य्यग्गतानां रसस्थानञ्चाभिपूरयन्ति मूत्रपुरीषस्वेदांश्च विवेचयन्त्यामपक्वाशयान्तरे च त्रिधा जायन्ते तास्त्रिंशत्। तासान्तु वातपित्तकफशोणितरसान् द्वे द्वे वहतस्ता दश, द्वे अन्नवाहिन्यावन्त्राश्रिते, तोयवहे द्वे, द्वे मूत्रवस्तिमभिप्रपन्ने मूत्रवहे, द्वे शुक्रवहे, द्वे शुक्रप्रादुर्भावाय, द्वे विसर्गाय, ते एव रक्तमभिवहतो नारीणामार्त्तवसंज्ञम्। द्वे वर्च्चोनिरसन्यौ स्थूलान्त्रप्रतिबद्धे। अष्टावन्यास्तिर्य्यग्गानां धमनीनां स्वेदमर्पयन्ति। तास्त्वेतास्त्रिंशत् सविभागा व्याख्याताः एताभिरधोनाभेः पक्वाशयकटीमूत्रपुरीषगुदवस्तिमेढ्रसक्थीनि धार्य्यन्ते याप्यन्ते च।

भवति चात्र। अधोगमास्तु कुर्व्वन्ति कर्म्माण्येतानि सर्व्वशः। तिर्य्यग्गाः संप्रवक्ष्यामि कर्म्म तासां यथायथम्।

तिर्य्यग्गानान्तु चतसृणां धमनीनामेकैका शतधा सहस्रधा चोत्तरोत्तरं विभज्यन्ते तास्त्वसंख्येयास्ताभिरिदं शरीरं गवाक्षितं विबद्धमाततञ्च। तासां मुखानि रोमकूपप्रतिबद्धानि यैः स्वेदमभिवहन्ति रसञ्चापि सन्तर्पयन्त्यन्तर्बहिश्च, तैरेव चाभ्यङ्गपरिषेकावगाहालेपनवीर्य्याण्यन्तःशरीरमभिप्रतिपद्यन्ते त्वचि विपक्वानि, तैरेव स्पर्शं सुखमसुखं वा गृह्णाति। तास्त्वेताश्चतस्रो धमन्यः सर्वाङ्गगताः सविभागा व्याख्याताः।

भवतश्चात्र। यथा स्वभावतः खानि मृणालेषु बिसेषु च। धमनीनां तथा खानि रसो यैरुपचीयते। पञ्चाभिभूतास्त्वथ पञ्चकृत्वः पञ्चेन्द्रियं पञ्चसु भावयन्ति। पञ्चेन्द्रियं पञ्चसु भावयित्वा पञ्चत्वमायान्ति विनाशकाले।

अत ऊर्द्ध्वं स्रोतसां मूलविद्धलक्षणमुपदेक्ष्यामः। तानि तु प्राणान्नोदकरसरक्तमांसमेदोमूत्रपुरीषशुक्रार्त्तववहानि, येष्वधिकार एकेषां बहूनि। एतेषां विशेषा बहवः। तत्र प्राणवहे द्वे, तयोर्मूलं हृदयं रसवाहिन्यश्च धमन्यः। तत्र विद्धस्य क्रोशनविनमनमोहनभ्रमणवेपनानि मरणं वा भवति। अन्नवहे द्वे, तयोर्मूलमामाशयः अन्नवाहिन्यश्च धमन्यस्तत्र विद्धस्याध्मानं शूलान्नद्वेषौ छर्द्दिः पिपासान्ध्यं मरणं वा। उदकवहे द्वे, तयोर्मूलं तालु क्लोम च। तत्र विद्धस्य पिपासा सद्योमरणं च। रसवहे द्वे, तयोर्मूलं हृदयं, रसवाहिन्यश्च धमन्यस्तत्र विद्धस्य शोषः प्राणवहविद्धवच्च मरणं तल्लिङ्गानि च। रक्तवहे द्वे, तयोर्मूलं यकृत्प्लीहानौ रक्तवाहिन्यश्च धमन्यस्तत्र विद्धस्य श्यावाङ्गता ज्वरो दाहः पाण्डुता शोणितातिगमनं रक्तनेत्रता चेति। मांसवहे द्वे, तयोर्मूलं स्नायुत्वचं, रक्तवहाश्च धमन्यस्तत्र विद्धस्य श्वयथुर्मांसशोषः शिराग्रन्थयो मरणम्। मेदोवहे द्वे तयोर्मूलं कटीवृक्कौ च तत्र विद्धस्य स्वेदागमनं स्निग्धाङ्गता तालुशोषः स्थूलशोफता पिपासा च। मूत्रवहे द्वे, तयोर्मूलं वस्तिर्मेढ्रञ्च तत्र विद्धस्याऽऽनद्धवस्तिता मूत्रनिरोधः स्तब्धमेढ्रता च। पुरीषवहे द्वे, तयोर्मूलं पक्वाशयो गुदश्च तत्र विद्धस्याऽऽनाहो दुर्गन्धता ग्रथितान्त्रता च। शुक्रवहे द्वे, तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च। आर्त्तववहे द्वे, तयोर्मूलं गर्भाशयः आर्त्तववाहिन्यश्च धमन्यस्तत्र विद्धायां वन्ध्यात्वं मैथुनासहिष्णुत्वमार्त्तवनाशश्च। सेवनीच्छेदाद्रुजाप्रादुर्भावः। वस्तिगुदविद्धलक्षणं प्रागुक्तमिति। स्रोतोविद्धन्तु प्रत्याख्यायोपचरेदुद्धृतशल्यन्तु क्षतविधानेनोपचरेत्। मूलात् खादन्तरं देहे प्रसृतन्त्वभिवाहि यत्। स्रोतस्तदिति विज्ञेयं शिराधमनिवर्ज्जितम्।" शारीरस्थाने

एतच्च मनुष्यकायविषयं तुल्यप्रकरणे शा॰ ति॰ "पञ्चभूतात्मकं सर्व्वं चराचरमिदं जगत्। अचरा बहुधा भिन्ना गिरिवृक्षादिभेदतः। चरास्तु त्रिविधाः प्रोक्ताः स्वेदाण्डजजरायुजाः। स्वेदजाः कृमिकीटाद्याः अण्डजाः पन्नगादयः। जरायुजा मनुष्याद्यास्तेषु नॄणां निगद्यते। उद्भवः पुंस्त्रियोर्योगे शुक्राच्छोणितसंयुतात्। विन्दुरेको विशेद्गर्भमुभयात्मा क्रमादसौ। रजोऽधिको भवेन्नारी भवेद्रेतोऽधिकः पुमान्। पूर्व्वकर्म्मानुरूपेण मोहपाशेन यन्त्रितः। कश्चिदात्मा तदा तस्मिन् जीवभावं प्रपद्यते। अथ मात्राहृतैरन्नपानाद्यैः पोषितः क्रमात्। दिनात् पश्चात् ततो मासाद्वर्द्धते तत्त्वदेहवान्। दोषदूष्यैः सुखं प्राप्नोव्यक्तिं याति निजेन्द्रियैः। वातपित्तकफाः दोषाः दूष्याः स्युः सप्त धातवः। त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्राणि तान् विदुः"

इत्यन्तेन मनुष्याणामेव विशेष्योक्तेः। एतद्या॰ पद्मा॰ "द्वाविंशती रजोभागाः शुक्रमात्राश्चतुर्दश। गर्भसंजनने काले पुंस्त्रियोः सम्भवन्ति हि। नारी रजोऽधिकांशे स्यान्नरः शुक्राधिकेऽंशके। उभयोस्तुल्यसंख्यायां स्यान्नपुंसकसम्भवः" इति। किन्तु पशुपक्ष्यादीनामपि यथा सम्भवमस्थ्यादिसत्त्वयोग्येयः। षट्त्वग्धारित्वन्तु अण्डजादीनामप्यस्ति "तस्य षोढा शरीराणि षट् त्वचो धारयन्ति च" या॰ व्या॰ "तस्यात्मनो यानि जरायुजाण्डजशरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेनेति" मिता॰ उक्तेः। चीयते कर्मभिः कर्मणि घञ्। १०स्वस्वादृष्टसञ्चितभोगायतनमात्रे च। वक्ष्यमाणचतुर्विधकायानां कर्मजत्वेन तथात्वम्।

ततश्च कायो द्विविधः चरोऽचरश्च। तत्र चरास्त्रिविधाः स्वेदजाण्डजजरायुजभेदात् अचरा गिरिवृक्षभेदात् नानाविधाः प्रायुक्त या॰ मि॰ वाक्यात्। एषाञ्चोत्पत्तिभेदात् चतुर्विधत्वम् यथोक्तं पदार्थादर्शे "देहश्चतुर्विधो ज्ञेयो जन्तोरुत्पत्तिभेदतः। उद्भिज्जः स्वेदजोऽण्डोत्थश्चतुर्थस्तु जरायुजः" इति। उद्भिज्जशब्दे ११८०पृ॰ उद्भिज्जोत्पत्तिप्रकारो दर्शितः। चरेषु स्वेदजाः "कृमिकीटपतङ्गाद्याः स्वेदजा नाम देहिनः" पदा॰ दर्शोक्ता बोध्याः। तदुत्पत्तिप्रकारस्तत्रैवोक्तो यथा "स्वेदजं स्विद्यमानेभ्यो भूभागेभ्यः प्रजायते" इति। एषां स्थिराणां चायोनित्वं प्रयोगसारे उक्तं यथा "किन्त्वत्र स्वेदजा ये तु ज्ञेयास्ते चाप्ययोनिजाः। स्थिरा इव वायुभिन्नाश्चत्वारिंशत्सहस्रधा"। अण्डजास्तु "अण्डजाः पक्षिणः सर्पा नक्रमत्स्याश्च कच्छपा, इति तत्रोक्ताः बोध्याः। तेषामुत्पत्तिप्रकारो यथा। "अण्डजो वर्त्तुलीभूतात् शुक्रशोणितसंयुतात्। कालेन भिन्नात् पूर्णात्मा निगच्छन् प्रक्रमिष्यति"। जरायुजास्तु मनुष्याद्याः गर्भाशयरूपचर्म्मवेष्टनजातत्वात् तेषां तथात्वम्। ते च योनिजाः "योनिजाः प्राणिनो भिन्नाश्चतुःषष्टिसहस्रधा" इति तत्रोक्तेः। तथाऽन्येऽपि अयोनिजाः देहाः सन्ति ते च अयोनिजशब्दे ३४७पृ॰ उक्ताः। तत्र मनुष्याणां कायस्य पाञ्चभौतिकत्वं तदुत्पत्तिप्रकारश्च याज्ञ॰ मिता॰ दर्शितो यथा "सर्गादौ स यथाऽऽकाशं वायुं ज्योतिर्जलं महीम्। सृजत्येकोत्तरगुणांस्तथाऽऽदत्ते भवन्नपि" या॰। सृष्टिसमये स परमात्मा यथाऽऽकाशादीन्, शब्दैकगुणं गगनम्, शब्दस्पर्शगुणं पवनम्, शब्दस्पर्शरूपगुणन्तेजः शब्दस्पर्शरूपरसगुणमुदकम्, शब्दस्पर्शरूपरसगन्धगुणां जगतीमित्येवमेकोत्तरगुणान् सृजति। तथात्मा जीवभावमापन्नो भवन्नुत्पद्यमानोऽपि स्वशरीरस्यारम्भकत्वेनापि तानुपादत्ते स्वीकरोति। कथं शरीरारम्भकत्वं पृथिव्यादीनाम्? इत्यत आह। "आहुत्याऽऽप्यायते सूर्य्यः सूर्य्याद्वृष्टिरथौषधिः। तदन्नं रसरूपेण शुक्रत्वमधिगच्छति" या॰। यजमानैः प्रक्षिप्याऽऽहुत्या पुरोडाशादिरसेनाप्ययते सूर्य्यः सूर्य्याच्च कालवशेन परिपक्वाब्धादिहवीरसाद्वृष्टिर्भवति। ततो व्रीह्याद्योषधिरूपमन्नम्। तच्चान्नं सेवितं सत् रसरुधिरादिक्रमेण शुक्रशोणितभावमापद्यते। ततः किम्? इत्याह "स्त्रीपुंसयोश्च संयोगे विशुद्धे शुक्रशोणिते। पञ्च धातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुः" या॰। ऋतुवेलायां स्त्रीपुंसयोः संयोगे शुक्रस्य शोणितस्य शुक्रशोणितम् तस्मिन् परस्परसंयुक्ते विशुद्धे "वातपित्तश्लेष्मदुष्टग्रन्थिपूयक्षीणमूत्रपुरीषगन्धिरेतांसि बीजानीति" स्मृत्यन्तरोक्तदोषरहिते स्थित्वा पञ्च धातून् पृथिव्यादिपञ्चभूतानि शरीरारम्भकतया स्वयं षष्ठोऽन्तरात्मा प्रभुः शरीरारम्भकारणादृष्टकर्म्मयोगितया समर्थो युगपदादत्ते भोगायतनत्वेन स्वीकरोति। तथा च शारीरके "स्त्रीपुंसयोः संयोगे योनौ रजसाभिसंसृष्टं शुक्रन्तत्क्षणमेव सह भूतात्मना गुणैश्च सत्त्वरजस्तमोभिः सह वायुना प्रेर्य्यमाणं गर्भाशये तिष्ठतीति"। किञ्च "इन्द्रियाणि मनः प्राणो ज्ञानमायुः सुखं धृतिः। धारणा प्रेरणं दुःखमिच्छाऽहङ्कार एव च। प्रयत्न आकृतिर्वर्णः स्वरद्वेषौ भवाभवौ। तस्यैतदात्मजं सर्वमनादेरादिमिच्छतः" या॰। इन्द्रियाणि ज्ञानकर्म्मेन्द्रियाणि वक्ष्यमाणानि। मनश्चोभयसाधारणम्। प्राणोऽपानो व्यान उदानः समान इत्येवं स्ववृत्तिभेदभिन्नः शारीरो वायुः प्राणः, ज्ञानमवगमः, आयुः कालविशेषावच्छिन्नञ्जीवनम्, सुखं निर्वृतिः, धृतिश्चित्तस्य स्थैर्य्यम्, धारणा प्रज्ञा मेधा च, प्रेरणं ज्ञानकर्म्मेन्द्रियाणामधिष्ठातृत्वम्, दुःखमुद्वेगः, इच्छा स्पृहा, अहङ्कारोऽहङ्कृतिः प्रयत्नः कृतिः आकृतिराकारः, वर्णो गौरिमादिः, स्वरः षड्जगान्धारादिः, द्वेषो वैरम्, भवः पुत्रपश्वादिविभवः, अभवस्तद्विपर्ययः, तस्यानादेरात्मनो नित्यस्यादिमिच्छतः शरीरञ्जिघृक्षमाणस्य सर्वमेतदिन्द्रियादिकमात्मजमितं प्राग्भवीयकर्मबीजजन्यमित्यर्थः। संयुक्तशुक्रशोणितस्य कायरूपपरिणतौ क्रम-

माह “प्रथमे मासि सङ्क्लेदभूतो धातुविमूर्च्छितः। मास्यर्बुदं द्वितीये च तृतीयेऽङ्गेन्द्रियैर्युतः। असौ च चेतनः षष्ठो धातुर्धातुविमूर्च्छितः” या०। धातुषु पृथिव्यादिषु मूर्च्छितो लोलीभूतः क्षीरनीरवदेकीभूत इति यावत्। प्रथमे गर्भमासे संक्लेदभूतो द्रवरूपतां प्राप्त एवावतिष्ठते न कठिनतया परिणमते। द्वितीये तु मास्यर्बुदमीषत्कठिनं मांसपिण्डरूपमश्नुते। अयमभिप्रायः—कोष्ठगतजठरदहनाभ्यां प्रतिदिनमीषदीषच्छोष्यमाणं शुक्रसम्पर्कसम्पादितद्रवीभावं भूतजातं त्रिंशद्भिर्दिनैः काठिन्यमापद्यत इति। तथाच सुश्रुते—“द्वितीये मासि शीतोष्णानिलैरभिपच्यमानो भूतसंघातो घनोजायत” इति। तृतीये तु मास्यङ्गैरिन्द्रियैश्च संयुक्तो भवति। किञ्च “आकाशाल्लाघवं सौक्ष्म्यं शब्दं श्रोत्रं बलादिकम्। वायोश्च स्पर्शनं चेष्टां व्यूहनं रौक्ष्यमेव च। पित्तात्तु दर्शनम्पक्तिमौष्ण्यं रूपं प्रकाशिताम्। रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्दवम्। भूमेर्गन्धं तथा घ्राणं गौरवं मूर्त्तिमेव च। आत्मा गृह्णात्यजः सर्वं तृतीये स्पन्दते ततः” या०। आत्मा गृह्णातीति सर्वत्र सम्बध्यते। गगनाल्लाघवं लङ्घनक्रियोपयोगिताम्, सौक्ष्म्यं सूक्ष्मोचितत्वम्, शब्दं विषयम्, श्रोत्रं श्रवणेन्द्रियम्, बलं दार्ढ्यम्, आदिग्रहणात् शुषिरत्वं विविक्ततां च। “आकाशाच्छब्दं श्रोत्रं विविक्ततां सर्वच्छिद्रसमूहांश्चेति” गर्भोपनिषद्दर्शनात्। पवनात् स्पर्शनेन्द्रियम्, चेष्टाङ्गनागमनादिकाम्, व्यूहनम् अङ्गानां विविधं प्रसारणम्, रौक्ष्यं कर्कशत्वम्, चशब्दात् स्पर्शं च। पित्तात्तेजसो दर्शनं चक्षुरिन्द्रियम्, पक्तिं भुक्तस्यान्नस्य पचनम्, औष्ण्यम् उष्णस्पर्शत्वम्, अङ्गानां रूपं श्यामिकादि प्रकाशितां भ्राजिष्णुताम्। तथा सन्तापमर्षादि च, “शौर्यमर्षतैक्ष्ण्यं पक्त्यौष्ण्यं भ्राजिष्णुतां सन्तापवर्णमैकर्षरूपेन्द्रियाणि तैजसानीति” गर्भोपनिषद्दर्शनात्। एवं रसादुदकाद्रसनेन्द्रियम् शैत्यमङ्गानां, स्नेहं स्निग्धताम्, मृदुत्वसहितं क्लेदमार्द्रताम्, तथा भूमेर्गन्धं घ्राणेन्द्रियं गरिमाणं मूर्त्तिं च। सर्वमेतत् परमार्थतो जन्ममरणरहितोऽप्यात्मा तृतीये मासि गृह्णाति ततश्चतुर्थे मासि स्पन्दते चलति। तथाच शारीरके “तस्माच्चतुर्थे मासि चलनादावभिप्रायङ्करोतीति”। किंच ‘दोहदस्याप्रदानेन गर्भोदोषमवाप्नुयात्। वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः”। गर्भस्यैकं हृदयं गर्भिण्याश्चापरमित्येवं द्विहृदयायाः स्त्रिया यदभिलषितन्तद्दोहदम्। तस्याप्रदानेन गर्भोविरूपतां मरणरूपं वा दोषं प्राप्नोति तस्मात् तद्दोषपरिहारार्थं गर्भपुष्ट्यर्थं च गर्भिण्याः स्त्रिया यत्प्रियमभिलषितं तत्सम्पादनीयम्”।

किंच “स्थैर्यं चतुर्थे त्वङ्गानाम्पञ्चमे शोणितोद्भवः। षष्ठे बलस्य वर्णस्य नखरोम्णां च सम्भवः” या०। तृतीये मासि प्रादुर्भूतस्याङ्गसंघस्य चतुर्थे मासि स्थैर्यं स्थेमा भवति। पञ्चमे लोहितस्योद्भव उत्पत्तिः। तथा षष्ठे बलवर्णकररुहरोम्णां सम्भवः। किं च “मनश्चैतन्ययुक्तोऽसौ नाडीस्नायुशिरायुतः। सप्तमे चाष्टमे चैव त्वग्मांसस्मृतिमानपि” या०। असौ पूर्वोक्तो गर्भः सप्तमे मासि मनसा चेतनया च युक्तो नाडीभिर्वायुवाहिनीभिः, स्नायुभिरस्थिबन्धनैः शिराभिर्वातपित्तश्लेष्मवाहिनीभिश्च संयुतः। तथाऽष्टमे मासि त्वचा मांसेन स्मृत्या च युक्तो भवति। किंच ‘पुनर्द्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति। अष्टमे मास्यतोगर्भोजातः प्राणैर्वियुज्यते” या०। तथा ष्टममासिकस्य गर्भस्यौजः कश्चन गुणविशेषोधात्रीं गर्भं चप्राप्ति पुनः पुनरतितरां चञ्चलतया शीघ्रं गच्छति। अतोऽष्टमे मासि जातो गर्भः प्राणैर्विमुच्यते। अनेनौजःस्थितिरेव जीवनहेतुरिति दर्शयति। ओजःस्वरूपं च स्मृत्यन्तरे दर्शितम् “हृदि तिष्ठति यत् शुद्धमीषदुष्णं सपीतकम्। ओजः शरीरे संख्यातन्नाशान्नाशमृच्छतीति”। किं च “नवमे दशमे वापि प्रबलैः सूतिमारुतैः। निःसार्यते बाण इव यन्त्रच्छिद्रेण सज्वरः” या० एवं प्रकारेण चक्षुरादिपरिपूर्णाङ्गेन्द्रियो नवमे दशमे वापि मासेऽपिशब्दात् प्रागपि सप्तमे वाष्टमे वा अभ्यासादिदोषवशात्, प्रबलसूतिहेतुप्रभञ्जनप्रेरितः स्नायुस्थिचर्मादिनिर्मितवपुर्यन्त्रस्य छिद्रेण सूक्ष्मशुषिरेण सज्वरो दुःसहदुःखैरभिभूयमानोनिःसार्यते धनुर्यन्त्रेण सुधन्वप्रेरितवाण इवातिवेगेन। निर्गमनानन्तरञ्च बाह्यपवनस्पृष्टो नष्टप्राचीनस्मृतिर्भवति “जातःस वायुना स्पृष्टो न स्मरति पूर्वं जन्ममरणं कर्म च शुभाशुभमिति” निरुक्तस्याष्टादशेऽभिधानात्”।

पदार्थादर्शे योगार्णवे त्वन्य विशेष उक्तो यथा “कललं चैकरात्रेण पञ्चरात्रेण बुद्बुदम्। शोणितं दशरात्रेण मांसपेशी चतुर्दशे। घनमांसं च विंशाहे पिण्डीभावोपलक्षितम्। पञ्चविंशतिपूर्णाहे कललमङ्कुरायते। एकमासे तु सम्पूर्णे पञ्च भूतानि धारयेत्। मासद्वये तु संप्राप्ते शिरा मेदश्च जायते। मज्जास्थि च त्रिभिर्मासैः केशाङ्गुल्यश्चतुर्थके। कर्णाक्षिनासिकानां च रन्ध्रं मासे तु पञ्चमे। आस्य-

रन्ध्रोदरं षष्ठे वायुरन्ध्रं तु सप्तमे सर्व्वाङ्गं सन्धिसम्पूर्णं मासैरष्टभिरिष्यते"।

तत्रैव अध्यात्मविवेके विशेषः। "द्रवत्वात् प्रथमे मासे कललाख्यं प्रजायते। द्वितीये तु घनः पिण्डः पेश्या त्वा घनमर्व्वुदम्। पुंस्त्रीनपुंसकानान्तु प्रागवस्थाः क्रमादिमाः। तृतीये त्वङ्कुराः पञ्च कराङ्घ्रिशिरसां मताः। अङ्गप्रत्यङ्गभागाश्च सूक्ष्माः स्युर्युगपत्तदा। विहाय श्मश्रुदन्तादीन् जन्मानन्तरसम्भवात्। एषा प्रकृतिरन्या तु विकृतिः सम्मता सताम्। चतुर्थे व्यक्तता तेषां भावानामपि जायते"।

सुश्रुते तु कायोत्पत्तिप्रकारश्चेत्थमुक्तं यथा "वायुर्वेदशास्त्रेषूपसर्व्वगताः चत्वेत्ता नित्याश्च तिर्य्यग्योनिमानुषदेवेषु सञ्चरन्ति धर्म्माधर्म्मनिमित्तं, तएतेऽनुमानग्राह्याः परमसूक्ष्माश्चेतनावन्तः शाश्वता लोहितरेतसोः सन्निपातेष्वभिव्यज्यन्ते यतोऽभिहितं पञ्चमहाभूतशरीरसमवायः पुरुष इति। स एव कर्म्मपुरुषश्चिकित्साधिकृतः"। इत्युपक्रम्य सात्त्विकराजसतामसगुणान् कर्म्मपुरुषस्योक्त्वा पञ्चभूतकार्य्याणि शरीरे दर्शितानि यथा "आन्तरीक्षास्तु शब्दः शब्देन्द्रियं सर्व्वच्छिद्रसमूहो विविक्तता च। वायव्यास्तु स्पर्शः स्पर्शेन्द्रियं सर्व्वचेष्टासमूहः सर्व्वशरीरस्पन्दनं लघुता च। तैजसास्तु रूपं रूपेन्द्रियं वर्णः सन्तापो भ्राजिष्णुता पक्तिरमर्षस्तैक्ष्ण्यं शौर्य्यञ्च। आप्यास्तु रसो रसनेन्द्रियं सर्व्वद्रवसमूहो गुरुता शैत्यं स्नेहो रेतश्च। पार्थिवास्तु गन्धो गन्धेन्द्रियं सर्व्वमूर्त्तिसमूहो गुरुता चेति। तत्र सत्त्वतमोबहुला आपः। तमोबहुला पृथिवीति। श्लोकौ चात्र भवतः। अन्योन्यानुप्रविष्टानि सर्व्वाण्येतानि निर्दिशेत्। स्वे स्वे द्रव्ये तु सर्व्वेषां व्यक्तं लक्षणमिष्यते"

ततः शुक्रशोणितयोर्दोषगुणप्रदर्शनेन शुद्धयोस्तयोर्गर्भहेतुत्वमुक्तं यथा—

"अथातः शुक्रशोणितशुद्धिनाम शारीरं व्याख्यास्यामः। वातपित्तश्लेष्मकुणपगन्धिग्रन्थिभूतपूतिपूयक्षीणमूत्रपुरीषगन्धिरेतसः प्रजोत्पादने न समर्था भवन्ति। तेषु वातवर्णवेदनं वातेन। पित्तवर्णवेदनं पित्तेन। श्लेष्मवर्णवेदनं श्लेष्मणा। शोणितवर्णवेदनं कुणपगन्ध्यनल्पं रक्तेन। ग्रन्थिभूतं श्लेष्मवाताभ्याम्। पूतिपूयनिभं पित्तश्लेष्मभ्याम्। क्षीणं प्रागुक्तं पित्तमारुताभ्याम्। मूत्रपुरीषगन्धि सन्निपातेनेति। तेषु कुणपगन्धि-ग्रन्थिभूत-पूतिपूय-क्षीण रेतसः कृच्छ्रसाध्याः। मूत्रपुरीषगन्धिरेतसस्त्वसाध्याः साध्यमन्यच्चेति"

तत्र आर्त्तवदोषगुणादिकमुक्तं तच्च आर्त्तवशब्दे पृ०८०८ दर्शितम्। "लब्धगर्भायाश्चैतेष्वहःसु लक्षणावटशुङ्गासहदेवाविश्वानामन्यतमं क्षीरेणाभिषुत्य त्रींश्चतुरो वा बिन्दून् दद्याद्दक्षिणे नासापुटे पुत्रकामायै न च तान्निष्ठीवेत्"।

"ध्रुवञ्चतुर्णां सान्निध्याद्गर्भः स्याद्विधिपूर्व्वकः। ऋतुक्षेत्राम्बुबीजानां सामग्र्यादङ्कुरो यथा। एवं जातरूपवन्तो महासत्त्वाश्चिरायुषः। भवन्त्यृणस्य मोक्तारः सुपुत्राः पुत्रिणो हिताः। तत्र तेजोधातुः सर्व्ववर्णानां प्रभवः स यदा गर्भोत्पत्तावब्धातुप्रायो भवति तदा गर्भं गौरं करोति, पृथिवीधातुप्रायः कृष्णं, पृथिव्याकाशधातुप्रायः कृष्णश्यामं, तोयाकाशधातुप्रायो गौरश्यामम्। यादृग्वर्णमाहारमुपसेवते गर्भिणी, तादृग्वर्णप्रसवा भवतीत्येके भाषन्ते। तत्र दृष्टिभागमप्रतिपन्नं तेजो जात्यन्धं करोति। तदेव रक्तानुगतं रक्ताक्षं, पित्तानुगतं शुक्लाक्षं, वातानुगतं विकृताक्षमिति। भवन्ति चात्र। घृतपिण्डो यथैवाग्निमाश्रितः प्रविलीयते। विसर्पत्यार्त्तवं नार्य्यास्तथा पुंसां समागमे। बीजेऽन्तर्व्वायुना भिन्ने द्वौ जीवौ कुक्षिमागतौ। यमावित्यभिधीयेते धर्म्मेतरपुरःसरौ। पित्रोरत्यल्पबीजत्वादासेक्यः पुरुषो भवेत्। सशुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयम्। यः पूतियोनौ जायेत स सौगन्धिकसंज्ञितः। स योनिशेफसोर्गन्धमाघ्राय लभते बलम्। स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते। कुम्भीकः स च विज्ञेय ईर्ष्यकं शृणु चापरम्। दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते। ईर्ष्यकः स च विज्ञेयः षण्डकं शृणु पञ्चमम्। यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते। ततः स्त्रीचेष्टिताकारो जायते षण्डसंज्ञितः। ऋतौ पुरुषवद्वापि प्रवर्त्तेताङ्गना यदि। तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता। आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा। सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः।

अनया विप्रकृत्या तु तेषां शुक्रवहाः सिराः। हर्षात् स्फुटत्वमायान्ति ध्वजोच्छ्रायस्ततो भवेत्। आहाराचारचेष्टाभिर्य्यादृशीभिः समन्वितौ। स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः। यदा नार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन। मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते। ऋतुस्नाता तु या नारी स्वप्ने मैथुनमावहेत्। आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि। मासि मासि विवर्द्धेत गर्भिण्या गर्भलक्षणम्। कललं जायते तस्या वर्ज्जितं

पैत्तकैर्गुणैः । सर्पवृश्चिककुष्माण्डविकृताकृतयश्च ये । गर्भास्त्वेते स्त्रियाश्चैव ज्ञेयाः पापकृता भृशम् । गर्भो वातप्रकोपेण दौहृदे वाऽवमानिते । भवेत् कुब्जः कुणिःपङ्गुर्मूको मिन्मिण एव च । मातापित्रोस्तु नास्तिक्यादशुभैश्च पुराकृतैः । वातादीनाञ्च कोपेन गर्भो विकृतिमाप्नुयात् । मलाल्पत्वादयोगाच्च वायोः पक्वाशयस्य च । वातमूत्रपुरीषाणि न गर्भस्थः करोति हि । जरायुणा मुखे छन्ने कण्ठे च कफवेष्टिते । वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति । निश्वासोच्छ्वाससङ्क्षोभस्वप्नान् गर्भोऽधिगच्छति । मातुर्निश्वसितोच्छ्वाससङ्क्षोभस्वप्नसम्भवान् । सन्निवेशः शरीराणां दन्तानां पतनोद्भवौ । तलेष्वसम्भवो यश्च रोम्णामेतत् स्वभावतः । भाविताः पूर्व्वदेहेषु सततं शास्त्रबुद्धयः । भवन्ति सत्वभूयिष्ठाः पूर्व्वजातिस्मरा नराः । कर्म्मणा चोदितो येन तदाप्नोति पुनर्भवे । अभ्यस्ताः पूर्व्वदेहे ये तानेव भजते गुणान्" ।

अथातो गर्भावक्रान्तिशारीरं व्याख्यास्यामः । सौम्यं शुक्रमार्त्तवमाग्नेयमितरेषामप्यत्र भूतानां सान्निध्यमस्त्यणुना विशेषेण परस्परोपकारात्परस्परानुग्रहात्परस्परानुप्रवेशाच्च ।

तत्र स्त्रीपुंसयोः संयोगे तेजः शरीराद्वायुरुदीरयति । ततस्तेजोऽनिलसन्निपाताच्छुक्रं च्युतं योनिमभिप्रतिपद्यते संसृज्यते चार्त्तवेन । ततोऽग्निसोमसंयोगात् संसृज्यमानो गर्भो गर्भाशयमनुप्रतिपद्यते । क्षेत्रज्ञो वेदयिता स्प्रष्टा घ्राता द्रष्टा श्रोता रसयिता पुरुषः स्रष्टा गन्ता साक्षी धाता वक्ता योऽसावित्येवमादिभिः पर्य्यायवाचकैर्नामभिरभिधीयते दैवसंयोगादक्षयोऽव्ययोऽचिन्त्यो भूतात्मना सहान्वक्षं सत्वरजस्तमोभिर्दैवासुरैरपरैश्च भावैर्वायुनाभिप्रेर्य्यमाणो गर्भाशयमनुप्रविश्यावतिष्ठते तत्र शुक्रबाहुल्यात् पुमान्, आर्त्तवबाहुल्यात् स्त्री, साम्यादुभयोर्नपुंसकमिति । ऋतुस्तु द्वादशरात्रं भवति दृष्टार्त्तवः । अदृष्टार्त्तवाप्यस्तीत्येके भाषन्ते ।

भवन्ति चात्र । पीनप्रसन्नवदनां प्रक्लिन्नात्ममुखद्विजाम् । नरकामां प्रियकथां स्रस्तकुक्ष्यक्षिमूर्द्धजाम् । स्फुरद्भुजकुचश्रोणिनाभ्यूरुजघनस्फिचम् । हर्षौत्सुक्यपराञ्चापि विद्यादृतुमतीमिति । नियतं दिवसेऽतीते सङ्कुचत्यम्बुजं यथा । ऋतौ व्यतीते नार्य्यास्तु योनिः संव्रियते तथा । मासेनोपचितं काले धमनीभ्यान्तदार्त्तवम् । ईषत् कृष्णं विगन्धञ्च वायुर्योनिमुखं नयेत् । तद्वर्षाद्द्वादशात्काले वर्त्तमानमसृक् पुनः । जरापक्वशरीराणां याति पञ्चाशतः क्षयम् । युग्मेषु तु पुमान् प्रोक्तो दिवसेष्वन्यथाऽबला । पुष्पकाले शुचिस्तस्मादपत्यार्थी स्त्रियं व्रजेत् । तत्र सद्योगृहीतगर्भाया लिङ्गानि श्रमो ग्लानिः पिपासा सक्थिसदनं शुक्रशोणितयोरवबन्धः स्फुरणञ्च योनेः । स्तनयोः कृष्णमुखता रोमराज्युद्गमस्तथा । अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः । अकामतश्छर्दयति गन्धादुद्विजते शुभात् । प्रसेकः सदनञ्चापि गर्भिण्या लिङ्गमुच्यते । तदा प्रभृत्येव व्यायामं व्यवायमपतर्पणमतिकर्षणम् दिवास्वप्नं रात्रिजागरणम् शोकं यानारोहणं भयमुत्कुटासनं चैकान्ततः स्नेहादिक्रियां शोणितमोक्षणं चाकाले वेगविधारणं च न सेवेत । दोषाभिघातैर्गर्भिण्या यो यो भागः प्रपीड्यते । स स भागः शिशोस्तस्य गर्भस्थस्य प्रपीड्यते । तत्र प्रथमे मासि कललं जायते । द्वितीये शीतोष्मानिलैरभिप्रपच्यमानानां महाभूतानां सङ्घातो घनः सञ्जायते यदि पिण्डः पुमान्,स्त्री चेत्पेशी,नपुंसकं चेदर्बुदमिति । तृतीये हस्तपादशिरसां पञ्च पिण्डका निर्वर्त्तन्तेऽङ्गप्रत्यङ्गविभागाश्च सूक्ष्मा भवन्ति । चतुर्थे सर्व्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरो भवति गर्भहृदयप्रव्यक्तभावाच्चेतनाधातुरभिव्यक्तो भवति, कस्मात् ? तत्स्थानत्वात्तस्माद्गर्भश्चतुर्थे मास्यभिप्रायमिन्द्रियार्थेषु करोति द्विहृदयां च नारीं दौहृदिनीमाचक्षते । दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति । तस्मात् सा यद्यदिच्छेत्तत्तस्यै दापयेत् । लब्धदौहृदा हि वीर्य्यवन्तम् चिरायुषं च पुत्रं जनयति । भवन्ति चात्र । इन्द्रियार्थांस्तु यान् यान् सा भोक्तुमिच्छति गर्भिणी । गर्भाबाधभयात्तांस्तान् भिषगाहृत्य दापयेत् । सा प्राप्तदौहृदा पुत्रं जनयेच्च गुणान्वितम् । अलब्धदौहृदा गर्भे लभेतात्मनि वा भयम् । येषु येष्विन्द्रियार्थेषु दौहृदे वै विमानना । प्रजायेत सुतस्यार्त्तिस्तस्मिंस्तस्मिंस्तथेन्द्रिये । राजसन्दर्शने यस्या दौहृदं जायते स्त्रियाः । अर्थवन्तं महाभागं कुमारं सा प्रसूयते । दुकूलपट्टकौशेयभूषणादिषु दौहृदात् । अलङ्कारैषिणं पुत्रं ललितं सा प्रसूयते । आश्रमे, संयतात्मानं धर्म्मशीलं प्रसूयते । देवताप्रतिमायान्तु, प्रसूते पार्षदोपमम् । दर्शने व्यालजातीनां हिंसाशीलं प्रसूयते । गोधामांसाशने पुत्रं सुषुप्सुं धारणात्मकम् । गवां मांसे च बलिनं सर्व्वक्लेशसहन्तथा । माहिषे दौहृदाच्छूरं रक्ताक्षं लोम-

संयुतम्। वराहमांसात् स्वप्नालुं शूरं सञ्जनयेत् सुतम्। मार्गाद्विक्रान्तजङ्घालं सदा वनचरं सुतम्। सृमराद्विग्नमनसं नित्यभीतं च तैत्तिरात्। अतोऽनुक्तेषु या नारी समाध्यायति दौहृदम्। शरीराचारशीलैः सा समानं जनयिष्यति। कर्म्मणा चोदितं जन्तोर्भवितव्यं पुनर्भवेत्। यथा तथा दैवयोगाद्दौहृदं जनयेद्धृदि।

पञ्चमे मनः प्रतिबुद्धतरं भवति। षष्ठे बुद्धिः। सप्तमे सर्वाङ्गप्रत्यङ्गविभागः प्रव्यक्ततरः। अष्टमेऽस्थिरीभवत्योजस्तत्र जातश्चेन्न जीवेन्निरोजस्त्वान्नैर्ऋतभागत्वाच्च ततो बलिं मांसौदनमस्मै दापयेत्। नवमदशमैकादशद्वादशानामन्यतमे जायते अतो,ऽन्यथा विकारी भवति।

मातुस्तु खलु रसवहायां नाड्यां गर्भनाभिनाडी प्रतिबद्धा साऽस्य मातुराहाररसवीर्य्यमभिवहति। तेनोपस्नेहेनास्याभिवृद्धिर्भवति। असञ्जाताङ्गप्रत्यङ्गप्रविभागमानिषेकात् प्रभृति सर्व्वशरीरावयवानुसारिणीनां रसवहानां तिर्य्यग्गतानां धमनीनामुपस्नेहो जीवयति।

गर्भस्य हि सम्भवतः पूर्व्वं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वाद्देहेन्द्रियाणाम्। हृदयमिति, कृतवीर्य्यो बुद्धेर्मनसश्च स्थानत्वात्। नाभिरिति पाराशर्य्यस्ततो हि वर्द्धते देहो देहिनः। पाणिपादमिति मार्कण्डेयस्तन्मूलत्वाच्चेष्टाया गर्भस्य। मध्यशरीरमिति सुभूतिर्गौतमस्तन्निबद्धत्वात् सर्व्वगात्रसम्भवस्य। तत्तु न सम्यक् सर्व्वाङ्गप्रत्यङ्गानि युगपत् सम्भवन्तीत्याह धन्वन्तरिर्गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्चूतफलवच्च। तद्यथा चूतफले परिपक्वे केशरमांसास्थिमज्जानः पृथग्दृश्यन्ते कालप्रकर्षात्, तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात्तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति। एतेनैव वंशाङ्कुरोऽपि व्याख्यातः। एवं गर्भस्य तारुण्ये सर्व्वेष्वङ्गप्रत्यङ्गेषु सत्स्वपि सौक्ष्म्यादनुपलब्धिः। तान्येव कालप्रकर्षात् प्रव्यक्तानि भवन्ति।

तत्र गर्भस्य पितृजमातृजरसजात्मजसत्त्वजसात्म्यजानि शरीरलक्षणानि व्याख्यास्यामः। गर्भस्य केशश्मश्रुलोमास्थिनखदन्तशिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि। मांसशोणितमेदोमज्जहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृजानि। शरीरोपचयो बलं वर्णः स्थितिर्हानिश्च रसजानि। इन्द्रियाणि ज्ञानं विज्ञानमायुः सुखदुःखादिकञ्चात्मजानि। सत्त्वजान्युत्तरं वक्ष्यामः। वीर्य्यमारोग्यं बलवर्णौ मेधा च सात्म्यजानि।

तत्र यस्या दक्षिणे स्तने प्राक् पयोदर्शनं भवति दक्षिणाक्षिमहत्त्वं च पूर्वं च दक्षिणं सक्थ्युत्कर्षति बाहुल्याच्च पुन्नामधेयेषु द्रव्येषु दौहृदमभिध्यायति स्वप्नेषु चोपलभते पद्मोत्पलकुमुदाम्रातकादीनि पुन्नामान्येव, प्रसन्नमुखवर्णा च भवति तां ब्रूयात् पुत्रमियं जनयिष्यतीति। तद्विपर्य्यये कन्याम्। यस्याः पार्श्वद्वयमुन्नतमुरस्तान्निर्गतमुदरं प्रागभिहितलक्षणं च तस्या नपुंसकमिति विद्यात्। यस्य मध्ये निम्नं द्रोणीभूतमुदरं सा युग्मं प्रसूते इति। भवन्ति चात्र- देवताब्राह्मणपराः शौचाचारहिते रताः। महागुणान् प्रसूयन्ते विपरीतास्तु निर्गुणान्। अङ्गप्रत्यङ्गनिर्वृत्तिः स्वभावादेव जायते। अङ्गप्रत्यङ्गनिर्वृत्तौ ये भवन्ति गुणागुणाः। ते ते गर्भस्य विज्ञेया धर्माधर्मनिमित्तजाः”।

एवं याज्ञवल्क्यसुश्रुतादिवाक्यैः कायस्य पाञ्चभौतिकत्वे स्थितेऽप्येऽपि भूतविशेषगुणादिभेदाः पदार्थादर्शे उक्ता यथा। ‘अस्थि मांसं त्वचा स्नायू रोम चैव तु पञ्चमम्। एते पञ्चविधा प्रोक्ता पृथिवी कठिनात्मिका। लाला मूत्रं तथा शुक्रं शोणितं मज्जपञ्चमम्। अपां पञ्च गुणा एते द्रवरूपाः प्रकीर्त्तिताः। क्षुधातृष्णाऽऽलस्यं निद्रा आलस्यं कान्तिरेव च। उष्णात्मका गुणा एते तेजसः परिकीर्त्तिताः। धावनं गमनं भुक्तिराकुञ्चनप्रसारणे। एते पञ्च गुणा वायोः क्रियारूपा व्यवस्थिताः। रागद्वेषौ तथा लज्जा भयं मोहस्तथैव च। व्योम्नः पञ्च गुणा एते शून्याख्ये शुषिरात्मनि”। तत्रायं विशेषः मनुष्यकायस्य पार्थिवत्वं, चन्द्रालोकस्थकायस्याप्यत्वं, सूर्य्यादिलोकस्थकायस्य तैजसत्वं वायुलोककायस्य वायव्यत्वम्, बाहुल्येन तत्तत्कायेषु पृथिव्यादिगुणाधिक्योपलब्धेः। इतरभूतानान्तु उपष्टम्भकतामात्रं तदेतत् गौत० सू० भाष्ययोर्निर्णीतं यथा।

“पार्थिवं गुणान्तरोपलब्धेः” ३अ० २८सू०

तत्र मानुषं शरीरं पार्थिवम्। कस्मात्? गुणान्तरोपलब्धेः। गन्धवती पृथिवी, गन्धवच्छरीरम्, अबादीनामगन्धत्वात् तत्प्रकृत्यगन्धं स्यात् न त्विदमबादिभिरसंपृक्तया पृथिव्यारब्धं चेष्टेन्द्रियार्थाश्रयभावेन कल्पत इत्यतः पञ्चानां संयोगे सति शरीरं भवति भूतसंयोगोहि मिथः पञ्चानां न निषिद्ध इति, आप्यतैजसवायव्यानि लोकान्तरे शरीराणि, तेष्वपि भूतसंयोगः पुरुषार्थतन्त्र इति स्थाल्यादिद्रव्यनिष्पत्तावपि निःसंशयं, नाबादिसंयोगमन्तरेण निष्पत्तिरिति। पार्थिवाप्यतैजसं तद्गुणोपलब्धेः, निश्वासो-

स्पर्शोपलब्धेश्चातुर्भौतिकम्, गन्धक्लेदनव्यूहावकाशदानेभ्यः पाञ्चभौतिकम्, त इमे सन्दिग्धा हेतव इत्युपेक्षितवान् सूत्रकारः। कथं सन्दिग्धाः? सति च प्रकृतिभावे भूतानां धर्मोपलब्धिः, असति च संयोगाप्रतिषेधात् सन्निहितानामिति यथा स्थाल्यामुदकतेजोवाय्वाकाशानामिति, तदिदमेकभूतप्रकृति शरीरमगन्धमरसमरूपमस्पर्शं च प्रकृत्यनुविधानात् स्यात् नत्विदमित्थंभूतम् तस्मात् पार्थिवं गुणान्तरोपलब्धेः भा०।

"श्रुतिप्रामाण्याच्च" ३अ०२९सू०

"सूर्यं ते चक्षुर्गच्छतात्" इत्यत्र मन्त्रे "पृथिवीं ते शरीरमिति" श्रूयते तदिदं प्रकृतौ विकारस्य प्रलयाभिधानमिति "सूर्यं ते चक्षुः स्पृणोमि" इत्यत्र मन्त्रान्तरे "पृथिवीं ते शरीरमिति" श्रूयते, सेयं कारणाद्विकारस्य सृष्टिरभिधीयत इति, स्थाल्यादिषु च तुल्यजातीयानामेककार्य्यारम्भदर्शनाद्भिन्नजातीयानामेककार्य्यारम्भानुपपत्तिः" वात्स्या०भा०

सां०सूत्रेषु च "पाञ्चभौतिकोदेहः" सू० पञ्चानां भूतानां मिलितानां परिणामोदेह इत्येकीयमतम्। "चातुर्भौतिकमित्येके" सू०। आकाशस्यानारम्भकत्वमभिप्रेत्येदम्। एतच्च चार्वाकादिमते तन्मते भूतचतुष्टयस्यैव स्वीकारात् चार्वाकशब्दे विवृतिः। "ऐकभौतिकमित्यपरे" सू०। "पार्थिवमेव शरीरमन्यानि भूतान्युपष्टम्भकमात्राणि। अथवा ऐकभौतिकमेकैकभौतिकमित्यर्थः ततश्च मनुष्यदेहे पार्थिवांशाधिक्येन पार्थिवता। चन्द्रादिलोकेषु अवाद्यंशाधिक्येन आप्यत्वादि। हिमकरकसुवर्णादीनामिव भूतान्तरसंसर्गमात्रम्" भा०। ऊष्मजादिदेहानुक्त्वा "सर्व्वेषु पृथिव्येवोपादानम् असाधारण्यात् तद्व्यपदेशः पूर्व्ववत्" सू०। सर्व्वेषु स्थावरास्थावरदेहेषु पृथिव्येवोपादानम् असाधारण्यात् आधिक्यादिनिरुत्कर्षात् अत्रापि काये पञ्चभूतादिभूतजत्वव्यपदेशः पूर्व्ववत् इन्द्रियाणां भौतिकत्ववदुपष्टम्भमात्रेणेत्यर्थः" भा०।

शा०सू०भाष्ययोश्च छा०उ०मांसादीनां पृथिव्यादिकार्य्यत्वबोधकतया तस्य त्रैभौतिकत्वं व्यवस्थापितं यथा

"मांसादि भौमं यथाशब्दमितरयोश्च" सू०। "भूमेस्त्रिवृत्कृतायाः पुरुषेणोपयुज्यमानायाः मांसादि कार्य्यं यथाशब्दं निष्पद्यते। तथाहि (छा०)श्रुतिः "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठोधातुस्तत्पुरीषं भवति, योमध्यमस्तन्मांसं, योऽणिष्ठस्तन्मनः" इति। त्रिवृत्कृता भूमिरेवैषा व्रीहियवाद्यन्नरूपेणाद्यते इत्यभिप्रायः। तस्याश्च स्थविष्ठं रूपं पुरीषभावेन बहिर्निर्गच्छति मध्यममध्यात्मं मांसं वर्द्धयति अणिष्ठन्तु मनः। एवमितरयोरप्तेजसोर्यथाशब्दं कार्य्यमवगन्तव्यम्। मूत्रं लोहितं प्राणश्चापां कार्य्यम्। अस्थि मज्जा वाक् च तेजस इति। अत्राह यदि सर्व्वमेव त्रिवृत्कृतं भूतभौतिकम् अविशेषश्रुतेः "तासां त्रिवृतं त्रिवृतमेकैकामकरोदिति" किंकृतस्तर्ह्ययं विशेषव्यपदेशः इदं तेजः इमा आप इदमन्नमिति तथाध्यात्ममिदमन्नस्याशितस्य कार्य्यं मांसादि, इदमपां पीतानां कार्य्यं लोहितादि, इदं तेजसोऽशितस्य कार्य्यं मज्जादि। अत्रोच्यते—

"वैशेष्यात्तु तद्वादस्तद्वादः" सू०। तुशब्देन नोदितं दोषमपनुदति। विशेषस्य भावो वैशेष्यं भूयस्त्वमित्येतत्। सत्यपि त्रिवृत्करणे क्वचित् कस्यचिद्भूतधातोर्भूयस्त्वमुपलभ्यते। अग्नेस्तेजोभूयस्त्वम्, उदकस्याब्भूयस्त्वं, पृथिव्या अन्नभूयस्त्वमिति व्यवहारप्रसिद्ध्यर्थं चेदं त्रिवृत्करणम्। व्यवहारश्च त्रिवृत्कृतरज्जुवदेकत्वापत्तौ सत्यां न भेदेन भूतत्रयगोचरो लोकस्य प्रसिध्येत्। तस्मात् सत्यपि त्रिवृत्करणे वैशेष्यादेव तेजोबन्नविशेषवादो भूतभौतिकविषय उपपद्यते" भा०।

उत्तरपादे च बाहुल्यात् देहस्य त्रैभौतिकत्वमुक्तं यथा।

"तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" सू०। तदन्तर प्रतिपत्तौ देहाद्देहान्तरप्रतिपत्तौ देहबीजैर्भूतसूक्ष्मैः संपरिष्वक्तो गच्छतीत्यवगन्तव्यं कुतः? प्रश्ननिरूपणाभ्याम्। तथाहि प्रश्नः "वेत्थ यथा सौम्य! पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति"। निरूपणं च प्रतिवचनं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति" तस्मादद्भिः परिवेष्टितो जीवो रंहतीति गम्यते। नन्वन्या श्रुतिर्जलूकावत् पूर्व्वं देहं न मुञ्चति यावद्देहान्तरं न क्रामतीति दर्शयति "तद्यथा तृणजलायुकेति"। तत्राप्यप्परिवेष्टितस्यैव जीवस्य कर्म्मोपस्थापितप्रतिपत्तव्यदेहविषयभावनया दीर्घीभावमात्रं जलूकयोपमीयते इत्यविरोधः एवं श्रुत्युक्ते देहान्तरप्रतिपत्तिप्रकारे सति याः पुरुषमतिप्रभवाः कल्पनाः व्यापिनां करणानामात्मनश्च देहान्तरप्रतिपत्तौ कर्म्मवशाद्वृत्तिलाभस्तत्र भवति, केवलस्यैव चात्मनो वृत्तिलाभस्तत्र भवति, इन्द्रियाणि तु देहवदभिनवान्येव तत्र तत्र भोगस्थान उत्पद्यन्ते, मनएव वा केवलं भोगस्थानमभिप्रतिष्ठते, जीवएव वा उत्प्लुत्य देहाद्देहान्तरं

प्रतिपद्यते शुक्रद्रव इत्यादुपस्थान्तरमित्येवमाद्याः ताः सर्वा एवानादर्त्तव्याः श्रुतिविरोधात्। ननूदाहृताभ्यां प्रश्नप्रतिवचनाभ्यां केवलाभिरद्भिः संपरिष्वक्तो रंहति इति प्राप्नोति अप्शब्दश्रवणसामर्थ्यात् तत्र कथं सामान्येन प्रतिज्ञायते ? सर्वैरेव भूतसूक्ष्मैः संपरिष्वक्तो रंहतीत्यत उत्तरं पठति।

"त्र्यात्मकत्वात्तु भूयस्त्वात् तद्व्यपदेशः" सू०। तुशब्देन चोदितामाशङ्कामुच्छिनत्ति त्र्यात्मिका ह्यापः त्रिवृत्करणश्रुतेः तास्वारम्भिकास्वभ्युपगतास्वितरदपि भूतद्वयमवश्यमभ्युपगन्तव्यं भवति त्र्यात्मकश्च देहः त्रयाणामपि तेजोबन्नानां तस्मिन् कार्य्योपलब्धेः पुनश्च त्र्यात्मकः त्रिधातुकत्वात् त्रिभिर्वातपित्तश्लेष्मभिः। न स भूतान्तराणि प्रत्याख्याय केवलाभिरद्भिरारब्धुं शक्यते। तस्माद्भूयस्त्वापेक्षोऽयमापः पुरुषवचस इति प्रश्नप्रतिवचनयोरप्शब्दो न कैवल्यापेक्षः। सर्वदेहेषु हि रसलोहितादिद्रवभूयस्त्वं दृश्यते। ननु पार्थिवो धातुर्भूयिष्ठो देहेषूपलभ्यते! नैष दोषः, इतरापेक्षया अपां बाहुल्यं भविष्यति, दृश्यते च शुक्रशोणितलक्षणेऽपि देहबीजे द्रवद्रव्यबाहुल्यम्। कर्म च निमित्तं कारणं देहान्तरारम्भे, कर्माणि चाग्निहोत्रादीनि सोमाज्यपयःप्रभृति द्रवद्रव्यव्यपाश्रयाणि, कर्मसमवायिन्यश्चापः श्रद्धाशब्दोदिताः सह कर्मभिर्द्युलोकाख्येऽग्नौ हूयन्त इति वक्ष्यति तस्मादप्यपां बाहुल्यप्रसिद्धिः। बाहुल्याच्चाप्शब्देन सर्वेषामेव देहबीजानां भूतसूक्ष्माणामुपादानमिति निरवद्यम्"। तथा च त्रैभौतिकत्वं बाहुल्याभिप्रायेण ऐतरेयोपनिषदि पाञ्चभौतिकत्वोक्तेः। यथा

"एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि—पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो—यत् किञ्चेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरम्, सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म" उप० श्रु०।

"स एष प्रज्ञानरूप आत्मा ब्रह्म। अपरं सर्वशरीरस्थप्राणप्रज्ञात्मान्तःकरणोपाधिष्वनुप्रविष्टो जलभेदगतसूर्यप्रतिबिम्बवद्धिरण्यगर्भः प्राणः प्रज्ञात्मा। एष एवेन्द्र इन्द्रगुणवान् देवराजो वा। एषः प्रजापतिर्यः प्रथमजः शरीरी, यतो मुखादिनिर्भेदद्वारेणाग्न्यादयो लोकपाला जाताः। स प्रजापतिरेष एष येऽप्येते अग्न्यादयः सर्वे देवा एष एव। इमानि च सर्वशरीरोपादानभूतानि—पञ्च पृथिव्यादीनि महाभूतान्यन्नान्नादत्वादि लक्षणान्येतानि। किञ्चेमानि च क्षुद्रैरल्पकैर्मिश्राणि सर्पादीनि। इवशब्दोऽनर्थकः। बीजानि कारणानि चेतराणि चेतराणि च द्वैराश्येन चराचरतया निर्दिश्यमानानि। कानि तानि? इत्युच्यन्ते—अण्डजानि पक्ष्यादीनि। जारुजानि जरायुजानि मनुष्यादीनि। स्वेदजानि यूकादीनि उद्भिज्जानि च वृक्षादीनि। अश्वाः, गावः, मनुष्याः, हस्तिनः। अन्यच्च यत्किञ्चिदिदं प्राणिजातम्। किं तत्? जङ्गमं यच्चलति पद्भ्यां गच्छति। यच्च पतत्रि आकाशेन पतनशीलम्। यच्च स्थावरमचलं सर्व्वं, तदशेषतः प्रज्ञानेत्रम्—प्रज्ञप्तिः प्रज्ञा, तच्च ब्रह्मैव, नीयते अनया प्राप्यते अनेनेति नेत्रं, प्रज्ञा नेत्रं यस्य तदिदं प्रज्ञानेत्रम्। प्रज्ञाने ब्रह्मण्युत्पत्तिस्थितिलयकालेषु प्रतिष्ठितं प्रज्ञाश्रयमित्यर्थः। प्रज्ञानेत्रो लोकः पूर्ववत्। प्रज्ञाचक्षुर्वा सर्व एव लोकः। प्रज्ञा प्रतिष्ठा सर्व्वस्य जगतः। तस्मात् प्रज्ञानं ब्रह्म। तदेतत् प्रत्यस्तमितसर्व्वोपाधिविशेषं सन्निरञ्जनं निर्मलं निष्क्रियं शान्तमेकमद्वयं, नेति सर्व्वविशेषापोहसंवेद्यं सर्व्वशब्दप्रत्ययागोचरं तदत्यन्तविशुद्धप्रज्ञोपाधिसम्बन्धेन सर्व्वज्ञमीश्वरसंज्ञं भवति। सर्व्वसाधारणाव्याकृतजगद्बीजप्रवर्त्तकं नियन्तृत्वादन्तर्यामिसंज्ञं भवति। तदेव जगद्बीजभूतबुद्ध्यात्माभिमानलक्षणहिरण्यगर्भसंज्ञं भवति। तदेवान्तरण्डोद्भूतप्रथमशरीरोपाधिमद्विराट्प्रजापतिसंज्ञं भवति। तदुद्भूताग्न्याद्युपाधिमद्देवतादिसंज्ञं भवति। तथा विशेषशरीरोपाधिष्वपि ब्रह्मादिस्तम्बपर्य्यन्तेषु तत्तन्नामरूपलाभो ब्रह्मणस्तदेवैकं सर्व्वोपाधिभेदभिन्नं सर्वैः प्राणिभिस्तार्किकैश्च सर्व्वप्रकारेण ज्ञायते विकल्प्यते चानेकधा। एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम्। इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतमित्याद्या स्मृतिः" शाङ्करभाष्यम्।

कणादसूत्रवृत्त्योस्तु कायस्य पञ्चादिभौतिकत्वनिराकरणेन एकैकभूतारब्धत्वं व्यवस्थापितं यथा "पृथिव्यादि कार्य्यद्रव्यं त्रिविधं—शरीरेन्द्रियविषयसंज्ञकम्" क०सू०। तत्र शरीरत्वं प्रयत्नवदात्मसंयोगासमवायिकारणवत्क्रियावदन्त्यावयवित्वम् उपाधिभेदः न तु शरीरत्वं जातिः पृथिव्यादिना परापरभावानुपपत्तेः" उपस्कारवृत्तिः। तथा च शरीरत्वम् अन्त्यावय-

विभागाहत्तित्वे सति चेष्टावद्वृत्तिजातिमत्त्वं । हस्तत्व-पृथिवीत्वद्रव्यत्वसत्तादिवारणाय अन्यन्तम् । घटत्वादिवारणाय चेष्टावद्वृत्तीति । घटशरीरसंयोगादिवारणाय जातीति । मनुष्यत्वचैत्रत्वादिजातिमादाय मानुषादिशरीरे लक्षणसमन्वयः । वृक्षादावपि चेष्टा अस्त्येव आध्यात्मिकवायुसम्बन्धात् अन्यथा भग्नक्षतसंरोहणादिकं न स्यात् । कल्पभेदेन नृसिंहशरीरस्य नानात्वात् नृसिंहत्वजातिमादाय तत्र लक्षणसमन्वयः न तु शरीरत्वं जातिः पृथिवीत्वादिना सङ्करात् नापि चेष्टाश्रयत्वम् निश्चेष्टशरीरेऽव्याप्तेः ।

"इदानीं शरीरस्य त्रैभौतिकत्वचातुर्भौतिकत्वप्रवादं निराकर्त्तुमाह" उपस्कारवृत्तिः ।

"प्रत्यक्षाप्रत्यक्षाणां संयोगस्याप्रत्यक्षत्वात् पञ्चात्मकं न विद्यते,, सू०

"यदि गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकं शरीरं भवेत् तदाऽप्रत्यक्षं भवेत् यथा प्रत्यक्षाप्रत्यक्षाणां वायुवनस्पतीनां संयोगोऽप्रत्यक्षस्तथा शरीरमप्यप्रत्यक्षं स्यादिति दृष्टान्तद्वारकं सूत्रं, पञ्चात्मकं न विद्यत इति शरीरमिति शेषः । क्लेदपाकादयस्तु उपष्टम्भकजलानलगता एव, चातुर्भौतिकमप्येवम् । नन्वस्तु त्रैभौतिकम्, त्रयाणां भूतानां प्रत्यक्षत्वादिति चेन्न विजातीयारम्भस्य प्रतिषेधात् । एकस्य गुणस्यावयविनि गुणानारम्भकत्वात् । तथा च यदि पृथिवीजलाभ्यामारब्धः स्यात् तदा तदारब्धमगन्धमरसञ्च स्यात् ! एवं पृथिव्यनलाभ्यामगन्धमरूपमरसञ्च स्यात् ! पृथिव्यनिलाभ्यामगन्धमरसमरूपमस्पर्शञ्च स्यादित्याद्यूह्यम्" उ०वृत्तिः

"गुणान्तराप्रादुर्भावाच्च न त्र्यात्मकम्" सू० ।

"पृथिव्यप्तेजसां प्रत्यक्षाणामेवारब्धं शरीरं प्रत्यक्षं स्यादपि यदि तत्र गुणान्तरं कारणगुणपूर्व्वकं प्रादुर्भवेत्, न त्वेतदस्ति एकस्य गन्धादेरनारम्भकत्वस्योक्तत्वात् तथाच न त्र्यात्मकमपि शरीरं न रूपवद्भूतत्रयारब्धमपीत्यर्थः ।

कथं तर्ह्येकस्मिन्नेव शरीरे पाकादीनामुपलम्भः ? इत्यत आह" वृत्तिः । "अणुसंयोगस्त्वप्रतिषिद्धः" सू० "मिथः पञ्चानां भूतानां परस्परमुपष्टम्भकतया संयोगो न निषिध्यते, किन्तु विजातीययोरणोर्द्रव्यं प्रत्यसमवायिकारणं संयोगो नेष्यते । तथाच तदुपष्टम्भात् पाकादीनां शरीरे भवत्युपलम्भ इति तर्हि किंप्रकृतिकमिदं मानुषशरीरम्? इत्यत गौतमीयं सूत्रमुपतिष्ठते "पार्थिवं तद्विशेषगुणोपलब्धेः" (पाठान्तरम्) पृथिवीविशेषगुणो गन्धो मानुषशरीरे आनाशमनपायी दृश्यते, पाकादयस्तु शुष्कशरीरे नोपलभ्यन्ते इति तेषामौपाधिकत्वं गन्धस्य स्वाभाविकत्वमिति पार्थिवत्वव्यवस्थितेः" उपस्कारवृत्तिः ।

वेदान्तिनस्तु मनुष्यादिकायस्य पाञ्चभौतिकत्वमेव प्रतिपेदिरे । तच्च प्रमेयविवरणोपन्यासे उक्तं तच्च ६६४पृ० दर्शितम् । चार्वाकास्तु कायस्यैव भोक्तृत्वं मन्यन्ते तन्मतं तत्रैव निराकृतं तच्च ६६४पृ० दर्शितम् ।

अत्रेदमभिधीयते । प्राधान्येन यद्येकैकभूतारब्धत्वं तथापि कस्य मानवदेहारम्भकत्वम् तद्विवेचनीयम् । प्रागुक्तश्रुतवाक्येन या० वाक्येन प्रत्यक्षेण अशरीरशब्दे ४४०पृ० दर्शितशा०सूत्रभाष्येण वक्ष्यमाणैतरेयश्रुत्या च शुक्रशोणितयोरेव योनिनिषेकेण चेतनाधिष्ठाने देहारम्भस्योक्तत्वात् शुक्रशोणितयोरुपादानत्वं युक्तं ताभ्यामेव देहारम्भणात् शुक्रशोणितोपादानत्वात् देहस्याप्यत्वं शुक्रस्य तैजसत्वात् तैजसत्वञ्च युक्तं, श्रुतौ "वेत्थ यथा सौम्य ! पञ्चम्यामाहुतावापः पुरुषवचसोभवन्तीति" प्रश्ने "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति" प्रतिवचने च छा० उ० पुरुषशब्दवाच्यदेहेन्द्रियसंघातस्य अम्मयत्वमुक्तम् शुक्रस्य च व्रीह्याद्युपादानकत्वेन पार्थिवत्वमपि "आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः" इति मनुना प्राग्दर्शितेन या०वचनेन च अन्नोपादानकत्वस्योक्त्या च पार्थिवत्वसिद्धेः । तथा च भूयस्त्वेन त्र्यात्मकत्वमेव मानवदेहानां युक्तम् अतएव "त्र्यात्मकत्वात्तु भूयस्त्वात्तद्व्यपदेशः" शा० सू० त्र्यात्मकत्वमेवोक्तं तेन पाञ्चभौतिकत्वोक्तिरितरभूतोपष्टम्भकतामात्राभिप्राया। श्रुत्या बलवदागमेन विरोधात् कायस्य एकभूतारब्धत्वानुमानं नरशिरःकपालशुचित्वानुमानवत् न प्रसरति । ६६४पृ० दर्शितविवरणोपन्यासोक्तदिशा पाञ्चभौतिकत्ववत् त्रैभौतिकत्वस्याप्युपपत्तेरिति ।

गर्भस्य उत्पत्तिप्रकारः ऐतरेयोपनिषदि तद्भाष्ये च दर्शितो यथा-

"पुरुषे ह वा अयमादितो गर्भो भवति । यदेतद्रेतस्तदेतत् सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूतमात्मन्येवात्मानं बिभर्त्ति । तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति तदस्य प्रथमं जन्म ।

तत् स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा । तस्मादेनां न हिनस्ति साऽस्यैतमात्मानमत्र गतं भावयति ।

सा भावयित्री भावयितव्या भवति तं स्त्री गर्भं बिभर्त्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति । स यत् कुमार

जन्मनोऽग्रेऽधिभावयति आत्मानमेव तद्भावयत्येषां लोकानां सन्तत्या एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म।”उप०

“वैराग्यहेतोरयमेवाविद्याकामकर्म्मवान् यज्ञादिकर्म कृत्वा अस्माल्लोकाद्धूमादिक्रमेण चन्द्रमसम्प्राप्य क्षीणकर्मा वृष्ट्यादिक्रमेणेमं लोकं प्राप्यान्नभूतः पुरुषेऽग्नौ हुतः। तस्मिन् पुरुषे ह वै अयं संसारी रसादिक्रमेणादितः प्रथमं रेतोरूपेण गर्भो भवतीति तदाह तदेतत् पुरुषे रेतस्तेन रूपेणेति। तच्चैतद्रेतोऽन्नमयस्य पिण्डस्य सर्वेभ्यः अङ्गेभ्यो रसादिलक्षणेभ्यस्तेजः साररूपं शरीरस्य, सम्भूतं परिनिष्पन्नं तत् पुरुषस्याऽऽत्मभूतत्वादात्मा। तमात्मानं रेतोरूपेण गर्भीभूतमात्मानमात्मन्येव स्वशरीरे एव बिभर्त्ति धारयति। तद्रेतो यदा यस्मिन् काले भार्य्या ऋतुमती तस्यां योषाऽग्नौ स्त्रियां सिञ्चति। उपगच्छन्नथ तदेतद्रेत आत्मनो गर्भभूतं जनयति पिता। तस्य पुरुषस्य स्थानान्निर्गमनं रेतःसेककाले रेतोरूपेणास्य संसारिणः प्रथमं जन्म प्रथमावस्थाभिव्यक्तिः।

तदेतदुक्तं पुरस्तादसावात्माऽमुमात्मानमित्यादिना। तद्रेतो यस्यां स्त्रियां सिक्तं सत् तस्या आत्मभूयमात्माव्यतिरेकतां यथा पितुरेवं गच्छति प्राप्नोति यथा स्वमङ्गं स्तनादि तथा तद्वदेव। तस्माद्धेतोरेनां मातरं स गर्भो न हिनस्ति पिटकादिवत्। यस्मात् स्तनादि स्वाङ्गवदात्मभूयं गतं तस्माच्च हिनस्ति न बाधते इत्यर्थः। साऽन्तर्वत्नी एवम्भस्य भर्त्तुरात्मानमत्रात्मन उदरे प्रविष्टं गतं बुध्वा भावयति वर्द्धयति परिपालयति गर्भविरुद्धाशनादिपरिहारमनुकूलाशनाद्युपयोगञ्च कुर्वती। सा भावयित्री वर्द्धयित्री भर्त्तुरात्मनो गर्भभूतस्य भावयितव्या रक्षयितव्या च भर्त्ता भवति। न ह्युपकारप्रत्युपकारमन्तरेण लोके कस्यचित् केनचित् सम्बन्ध उपपद्यते; तं गर्भं स्त्री यथोक्तेन गर्भधारणविधानेन बिभर्त्ति धारयति प्राग्जन्मनः। स पिता अग्र एव पूर्वमेव कुमारं जातमात्रं जन्मनोऽध्यूर्द्ध्वञ्जन्मनो जातं कुमारं जातकर्म्मादिना यद्भावयति तदात्मानमेव भावयति पितुरात्मैव पुत्ररूपेण जायत। तथा ह्युक्तं “पतिर्जायां प्रविशतीत्यादि” तत् किमर्थमात्मानं पुत्ररूपेण जनयित्वा भावयति? उच्यते—एषां लोकानां सन्तत्यै अविच्छेदायेत्यर्थः। विच्छिद्येरन् हीमे लोकाः पुत्रोत्पादनादि यदि न कुर्युः ते च पुत्रोत्पादनादिकर्म्माऽविच्छेदेनैव सन्तता हि प्रबन्धरूपेण वर्त्तन्ते यस्मादिमे लोकास्तस्मात्तदविच्छेदाय तत्कर्त्तव्यं न मोक्षायेत्यर्थः। तदस्य संसारिणः पुंसः कुमाररूपेण मातुरुदराद्यन्निर्गमनं तद्रेतोरूपापेक्षया द्वितीयं जन्म द्वितीयावस्थाभिव्यक्तिः अस्य पितुः” शाङ्करभाष्यम्।

स्थावराणामपि भोगायतनदेहवत्त्वमस्ति। तदेतदुद्भिज्जशब्दे ८०८पृ० उक्तप्रायमपि सां० सू०प्र०भाष्ययोर्व्यक्तं दर्शितं यथा। “न बाह्यबुद्धिनियमो वृक्षगुल्मलतौषधिवनस्पतितृणवीरुदादीनामपि भोक्तृभोगायतनत्वं पूर्ववत्” सू०। “न बाह्यज्ञानं यत्रास्ति तदेव शरीरमिति नियमः किन्तु वृक्षादीनामन्तःसंज्ञानामपि भोक्तृभोगायतनं शरीरं मन्तव्यम्। यतः पूर्ववत् पूर्वोक्तो यो भोक्त्रधिष्ठानं विना मनुष्यादिशरीरस्य पूतिभावस्तद्वदेव वृक्षादिशरीरेष्वपि शुष्कतादिकमित्यर्थः। तथा च श्रुतिः “अथ यदेकां शाखां जीवो जहात्यथ सा शुष्यतीत्यादिरिति”। न बाह्यबुद्धिनियम इत्यस्य पृथक्सूत्रत्वेऽपि सूत्रद्वयमेकीकृत्यैव व्याख्येयम्। सूत्रभेदस्तु दैर्घ्यभयादिति बोध्यम्”भा०। “स्मृतेश्च”सू०। “शरीरजैः कर्मदोषैर्याति स्थावरतां नरः। वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्” इत्यादिस्मृतेरपि वृक्षादिषु भोक्तृभोगायतनत्वमित्यर्थः। ननु वृक्षादिष्वेवं चेतनत्वे न धर्माधर्मोत्पत्तिप्रसङ्गस्तत्राह।

“न देहमात्रतः कर्माधिकारित्वं वैशिष्ट्यश्रुतेः” सू० “न देहमात्रेण धर्माधर्मोत्पत्तियोग्यत्वं जीवस्य, कुतः? वैशिष्ट्यश्रुतेः, ब्राह्मणादिदेहविशिष्टत्वेनैवाधिकारश्रवणादित्यर्थः” भा०।

तस्य कायस्य षाड्विध्यं सां०सू० भा० उक्तं यथा। “स्थूलशरीरगतं विशेषं प्रसङ्गादवधारयति”भा०। “ऊष्मजाण्डजजरायुजोद्भिज्जसाङ्कल्पिकसांसिद्धिकं चेति न नियमः”सू०। “तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति अण्डजं जीवजमुद्भिज्जमिति” श्रुतावण्डजादिरूपं शरीरत्रैविध्यं प्रायिकाभिप्रायेणोक्तं न तु नियमः। यत ऊष्मजादिषड्विधमेव शरीरं भवतीत्यर्थः। तत्रोष्मजा दन्दश्रूकादयः। अण्डजाः पक्षिसर्पादयः। जरायुजा मनुष्यादयः। उद्भिज्जा वृक्षादयः। सङ्कल्पजाः सनकादयः। सांसिद्धिका मन्त्रतपआदिसिद्धिजाः। यथा रक्तबीजशरीरोत्पन्नशरीरादयः इति” भा०।

कणादेन संक्षेपेण कायस्य योनिजायोनिजत्वभेदेन द्वैविध्यमुक्तम् तच्च अयोनिजशब्दे ३४७पृ० दर्शितम्। प्रकारान्तरेण कायस्य चातुर्विध्यमुक्तं सां०सू०भा० यथा। “त्रिधा त्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः”

सू० त्रयाणामुत्तमाधममध्यमानां सर्वप्राणिनां त्रिप्रकारो देहविभागः, कर्मदेहभोगदेहोभयदेहा इत्यर्थः । तत्र कर्मदेहः परमर्षीणाम्, भोगदेह इन्द्रादीनाम्, उभयदेहश्च राजर्षीणामिति । अत्र प्राधान्येन त्रिधा विभागः । अन्यथा सर्वस्यैव भोगदेहत्वापत्तेः । चतुर्थमपि शरीरमाह” भा० ।

“न किञ्चिदप्यनुशयिनः” सू० । “विद्यादनुशयं द्वेष्यं पश्चात्तापानुतापयोः” इतिवाक्यादनुशयो वैराग्यम् विरक्तानां शरीरमेतत्त्रयविलक्षणमित्यर्थः । यथा दत्तात्रेयजडभरतादीनामिति” भा० ।

सर्व्वेषु च कायेषु भोक्तुरधिष्ठानमेव तदारम्भे प्रयोजकं तदेतत् सां०सू०भाष्ययोर्दर्शितं यथा

“भोक्तुरधिष्ठानाद्भोगायतननिर्माणमन्यथा पूतिभावप्रसङ्गात्” सू० ।

“भोक्तुः प्राणिनोऽधिष्ठानाद्व्यापारादेव भोगायतनस्य शरीरस्य निर्माणं भवति । अन्यथा प्राणव्यापाराभावे शुक्रशोणितयोः पूतिभावप्रसङ्गात् मृतदेहवदित्यर्थः । तथा च रससञ्चारादिव्यापारविशेषैः प्राणो देहस्य निमित्तकारणं धारकत्वादिति भावः । ननु प्राणस्यैवाधिष्ठानत्वं सम्भवति व्यापारवत्त्वात्, न प्राणिनः, कूटस्थत्वात् निर्व्यापारस्याधिष्ठाने प्रयोजनाभावाच्चेति तत्राह” भा० ।

“भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्तात्” सू० । “देहनिर्माणे व्यापाररूपमधिष्ठानं स्वामिनश्चेतनस्यैकान्तात् साक्षान्नास्ति, किन्तु प्राणरूपभृत्यद्वारा, यथा राज्ञः पुरनिर्माण इत्यर्थः । तथा च प्राणस्याधिष्ठातृत्वं साक्षात्, पुरुषस्याधिष्ठातृत्वं प्राणसंयोगमात्रेणेति सिद्धम् । कुलालादीनां घटादिनिर्माणेष्वप्येवम् । विशेषस्त्वयं तत्र चेतनस्य बुद्ध्यादेरप्युपयोगोऽस्ति बुद्धिपूर्व्वकसृष्टित्वादिति । यद्यपि प्राणाधिष्ठानादेव देहनिर्माणं तथापि प्राणद्वारा प्राणिसंयोगोऽप्यपेक्ष्यते पुरुषार्थमेव प्राणेन देहनिर्माणादित्याशयेन भोक्तुरधिष्ठानादित्युक्तम्” भा० ।

स च प्रकारान्तरेण द्विविधः स्थूलसूक्ष्मभेदात् तत्र स्थूलकायोऽपि व्यष्टिसमष्टिभेदात् द्विविधः । तत्र व्यष्टिकायोऽस्मदादीनां, तदुत्पत्तिप्रकारो विस्तरेण दर्शितः । समष्टिकायस्तु विराट्शब्दवाच्यः । तस्योत्पत्तिप्रकारः संक्षेपेण ऐतरेयोपनिषदि तद्भाष्ये च दर्शितो यथा ।

“स ऐक्षतेमे नु लोका लोकपालान्नु सृजा इति । सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्च्छयत्” उपनि० ।

“सर्व्वप्राणिकर्मफलोपादानाधिष्ठानभूतान् चतुरो लोकान् सृष्ट्वा स ईश्वरः पुनरेवैक्षत—इमे त्वम्भःप्रभृतयो मया सृष्टा लोकाः परिपालयितृवर्जिता विनश्येयुः, तस्मादेषां रक्षणार्थं लोकपालान् लोकानां पालयितॄन् सृजेऽहमिति । एवमीक्षित्वा सोऽद्भ्य एवाप्प्रधानेभ्यः पञ्चभूतेभ्यो येभ्योऽम्भःप्रभृतीन् सृष्टवान् तेभ्य एवेत्यर्थः । पुरुषं पुरुषप्रकारं शिरःपाण्यादिमन्तं समुद्धृत्याद्भ्यः समुपादाय मृत्पिण्डमिव कुलालः पृथिव्या अमूर्च्छयत् संमूर्च्छितवान् सम्पिण्डितवान् स्वावयवसंयोजनेनेत्यर्थः” शाङ्क०भा०

“तमभ्यतपत्तस्याऽभितप्तस्य मुखं निरभिद्यत यथाण्डम्, मुखाद्वाग्वाचोऽग्निः, नासिके निरभिद्येतां, नासिकाभ्यां प्राणः, प्राणाद्वायुः, अक्षिणी निरभिद्येताम्, अक्षिभ्याञ्चक्षुश्चक्षुष आदित्यः, कर्णौ निरभिद्येतां, कर्णाभ्यां श्रोत्रं, श्रोत्राद्दिशः, त्वङ्निरभिद्यत, त्वचो लोमानि, लोमभ्य ओषधिवनस्पतयो, हृदयं निरभिद्यत, नाभ्या अपानः, अपानान्मृत्युः, शिश्नं निरभिद्यत, शिश्नाद्रेतो, रेतस आपः” उप० ।

“तं पिण्डं पुरुषविधमुद्दिश्याभ्यतपत् तदभिध्यानं सङ्कल्पं कृतवानित्यर्थः । “यस्य ज्ञानमयं तपः” इति श्रुतेः तस्याभितप्तस्येश्वरसङ्कल्पेन तपसाभितप्तस्य पिण्डस्य मुखं निरभिद्यत मुखाकारं सुषिरमजायत । यथा पक्षिणोऽण्डं निर्भिद्यते एवम् । तस्माद्विभिन्नान्मुखाद्वाक्करणमिन्द्रियं निरवर्त्तत । ततो वाचस्तदधिष्ठाताग्निर्लोकपालः । तथा नासिके निरभिद्येताम्, नासिकाभ्यां प्राणः, प्राणाद्वायुरिति सर्व्वत्राधिष्ठानं करणं देवता च त्रयं क्रमेण निर्भिन्नमिति । अक्षिणी कर्णौ त्वक् । हृदयमन्तःकरणाधिष्ठानम् । मनोऽन्तःकरणम् । नाभिः सर्व्वप्राणनिबन्धनस्थानम् । तस्मादपानसंयुक्तत्वादपान इति पाय्विन्द्रियमुच्यते । तस्याधिष्ठात्री देवता मृत्युर्यथान्यत्र तथा, शिश्नं निरभिद्यत प्रजनेन्द्रियस्थानमिन्द्रियं, रेतोविसर्गार्थत्वात्सह रेतसा उच्यते रेतस आपः इति” भा० ।

एवं साधिदैवतेन्द्रियादिसृष्टिमुक्त्वा सृष्टदेवतानां यथायतनं प्रवेशोऽपि तत्रोक्तो यथा

“ता अब्रवीदायायतनं प्रविशतेति” उप० ।

“ता देवता ईश्वरोऽब्रवीत्-इष्टमासामिदमधिष्ठानमिति मत्वा, सर्व्वे हि स्वयोनिषु रमन्ते, अतो यथाऽऽयतनं यस्य यद्वदनादिक्रियायोग्यमायतनं तत्प्रविशतेति” भा० ।

“अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं

भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन् चन्द्रमा मनो भूत्वा हृदयं प्राविशत् मृत्युरपानो भूत्वा नाभिं प्राविशत् आपो रेतो भूत्वा शिश्नं प्राविशत्" उपनि० ।

"तथाखिलत्पत्तुचां प्रतिलभ्य ईश्वरस्य नगर्यामिव बलाधिकृताः । अग्निर्वागभिमानी वागेव भूत्वा स्वां योनिं मुखं प्राविशत्तयोक्तार्थमन्यत् । वायुर्नासिके । आदित्योऽक्षिणी । दिशः कर्णौ । ओषधिवनस्पतयस्त्वचम् । चन्द्रमा हृदयम् । मृत्युर्नाभिम् । आपः शिश्नं प्राविशन्" भा० ।

विस्तरस्तु भाग० २स्क० १०अ० उक्तोयथा

"पुरुषोऽण्डं विनिर्भिद्य यदासौ स विनिर्गतः । आत्मनोऽयनमन्विच्छन्नपोऽस्राक्षीच्छुचिः शुचीः" ११ ।

"उक्तमेवाध्यात्मादिविभागं प्रपञ्चयन् "यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम् । यथासीत्तदुपाख्यास्ये" इति प्रतिज्ञातं तदुत्पत्तिप्रकारमाह पुरुष इत्यादिना पुरुषो वैराजः अण्डं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक् स्थित इत्यर्थः अयनं स्थानमन्विच्छन् यतः शुचिः स्वयं अतः शुचीः शुद्धाः अपः गर्भोदकसंज्ञाः असाक्षीत् ससर्ज" ११ श्रीधरः ।

"तास्ववात्सीत् स्वसृष्टासु सहस्रं परिवत्सरान् । तेन नारायणो नाम यदापः पुरुषोद्भवाः" १२ ।

"अपु निवासं नारायणनामनिरुक्त्या स्पष्टयति तेन अप्सुवासेन, यत् यस्मात् पुरुषो नरः तस्मादुद्भवो यासां तानारा आपोऽयनमस्य इति नारायण इत्यर्थः । तदुक्तं "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः"इति" १२ श्रीधरः

"द्रव्यं कर्म च कालश्च स्वभावो जीवएव च । यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया"१२ ।

"तस्य प्रभावमाह द्रव्यमुपादानं, कर्मादीनि निमित्तानि, जीवो भोक्ता यस्याऽनुग्रहात् सन्ति कार्य्यक्षमा भवन्तीत्यर्थः" १२ श्रीधरः ।

"एको नानात्वमन्विच्छन् योगतल्पात् समुत्थितः । वीर्य्यं हिरण्मयं रेतो मायया व्यसृजत् त्रिधा" १४ ।

"योगएव तल्पं शय्या तस्मात् । वीर्य्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलम्" १४ श्रीधरः ।

"अधिदैवमथाध्यात्ममधिभूतमिति प्रभुः । अथैकं पौरुषं वीर्यं त्रिधाऽभिद्यत तच्छृणु" १५ ।

"तस्यैव प्रपञ्चः अथैत्यादिना" १५ श्रीधरः ।

"अन्तःशरीर आकाशात् पुरुषस्य विचेष्टतः । ओजः सहोबलं जज्ञे ततः प्राणो महानसुः" १६ ।

"अन्तःशरीर यआकाशः तस्मात्, क्रियाशक्त्या तत्र विविधं चेष्टमानस्य सतः, ओजः-इन्द्रियशक्तिः, सहो-मनःशक्तिः, बलं-देहशक्तिः, ततः शक्त्यात्मकात् सूक्ष्माद्रूपात् प्राणः सूत्रात्म्यः महान् मुख्यः असुः प्राणः सर्वेषाम्" १६ श्रीधरः ।

"अनुप्राणन्ति यं प्राणाः प्राणन्तं सर्व्वजन्तुषु । अपानन्तमपानन्ति नरदेवमिवाऽनुगाः" १७ ।

"महत्त्वं दर्शयति अन्विति यं प्राणन्तं चेष्टां कुर्व्वन्तं प्राणा इन्द्रियाणि अनु पश्चात् प्राणन्ति चेष्टां कुर्व्वन्ति अपानन्तं चेष्टां त्यजन्तं अनु अपानन्ति चेष्टां त्यजन्ति, राजानमनु भृत्या इव" १७ श्रीधरः ।

"प्राणेन क्षिपता क्षुत्तृडन्तराजायते विभोः । पिपासतोजक्षतश्च प्राङ्मुखं निरभिद्यत" १८ ।

"क्षिपता चालयता निमित्तेन क्षुत्तृडादिकन्तु विराड्जीवाभेदेनोपासनार्थमुक्तम् आजायते स ततः जक्षतो भक्षयितुमिच्छत इत्यर्थः प्राक् प्रथमं निरभिद्यत विभक्तमभूत्" १८ श्रीधरः ।

"मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते । ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते" १९ ।

"तालु अधिष्ठानं, जिह्वा इन्द्रियं नानारसो विषयः वरुणश्च देवता ज्ञातव्या एवं सर्व्वत्र अधिष्ठानमिन्द्रियं देवता विषय इत्येतच्चतुष्टयमनुक्तमप्यूह्यम्" १९ श्रीधरः ।

"विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः । जले वै तस्य सुचिरनिरोधः समजायत" २० ।

"विवक्षोर्वक्तुमिच्छोर्मुखतएव वह्निर्देवता वाक् इन्द्रियं व्याहृतं भाषणं तयोरिति इन्द्रियदेवताधीनत्वं कर्मणो दर्शयति" २० श्री० ।

"नासिके निरभिद्येतां दोधूयति नभस्वति । तत्र वायुर्गन्धवहो घ्राणोनसि जिघृक्षतः" २१ ।

"नभस्वति प्राणवायौ दोधूयति दोधूयमाने अत्यन्तं प्रचलति सति । तत्र नसि नासिकायां वायुर्देवता गन्धं वहतीति तथा, अनेन गन्धो विषयो दर्शितः घ्राण इन्द्रियं जिघृक्षतः गन्धं ग्रहीतुमिच्छतः" २१ श्रीधरः ।

"यदात्मनि निरालोकमात्मानञ्च दिदृक्षतः । निर्भिन्ने अक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः" २२ ।

"निरालोकं प्रकाशशून्यम् आसीदिति शेषः निर्भिन्नाक्षिमितिवदव्ययीभावः। तदा आत्मानं देहं चकारादन्यच्च वस्तु दिदृक्षतः अक्षिणी स्थानं ज्योतिरादित्यो देवता, चक्षुरिन्द्रियं, ततो गुणस्य रूपस्य ग्रहोग्रहणम् अनेन रूपं विषयो दर्शितः" २२ श्रीधरः।

"बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः। कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः" २३।

"ऋषिभिर्वेदैर्बोध्यमानस्य तदात्मनः प्रबोधनं ग्रहीतुमिच्छतः ततो गुणग्रहः शब्दग्रहणम्" २३। श्रीधरः

"वस्तुनो मृदुकाठिन्यलघुगुर्वौष्ण्यशीतताम्। जिघृक्षतस्त्वङ् निर्भिन्ना तस्यां रोम महीरुहाः" २४।

"मृदुत्वञ्च काठिन्यञ्च लघुत्वञ्च गुरुत्वञ्च आउष्णत्वञ्च ईषदुष्णत्वं शीतताञ्चेत्यर्थः। यद्यप्युष्णत्वमपत्वगीन्द्रियविषयमेव तथापि तस्य जिघृक्षाभावात् औष्ण्यत्वमित्युक्तं गुर्व्वौष्ण्येति पाठे वङ्गादेशम्छान्दसः। वस्तुन एतान् धर्मान् जिघृक्षतस्त्वङ्निर्भिन्ना त्वगिन्द्रियाधिष्ठानं चर्म जातमित्यर्थः। तस्यां रोमाणि, इन्द्रियं, महीरुहाश्च देवता जाता वस्तुनि हस्तेनोत्तोलिते लघुत्वगुरुत्वयोर्ज्ञानात्तयोरपि त्वगिन्द्रियविषयत्वमिति पौराणिकाः २४। श्रीधरः

"तत्र चान्तर्बहिर्वातस्त्वचा लब्धगुणोवृतः" २५। तत्र त्वचि अन्तर्बहिश्च वातो वायुर्वृतः आवृत्यस्थितः कर्त्तरि निष्ठा। कथम्भूतः? त्वचा लब्धो गुणस्पर्शो येन। अयमर्थः त्वगिन्द्रियमेव बहिः कण्डूतिषहितं स्पर्शं गृह्णत् रोमशब्देनोच्यते। तत्र महीरुहाणां देवतात्वम्। अन्तर्बहिश्च स्पर्शं गृह्णत् तदेव त्वक्शब्देनोच्यते तत्र वातो देवता। तथाच तृतीये वक्ष्यति "त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः। अंशेन रोमभिः कण्डूं यैरसौ प्रतिपद्यते। निर्भिन्नान्यस्य मर्माणि लोकपालोऽनिलोऽविशत्। प्राणिनांशेन संस्पर्शं येनासौ प्रतिपद्यते" इति। तत्र मर्माणीति मर्मोपलक्षिता त्वगित्यर्थः प्राणेनांशेनेति प्राणवायुना व्याप्तेन त्वगिन्द्रियेणेत्यर्थः। बह्वृचश्रुतौ त्वेक एवांशोनिर्दिष्टः "त्वङ्निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतय इति" २५। श्रीधरः

"हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया। तयोस्तु बलवानिन्द्र आदानमुभयाश्रयम्" २६।

"रुरुहतुः निर्भिन्नौ बलमिन्द्रियम् इन्द्रो देवता तदुभयाश्रयम् आदानं कर्म" २६। श्रीधरः

"गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम्। यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः"। २७

"अभिकामिकाम् अभीष्टां विहितामित्यर्थः। पद्भ्यां सह यज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपेण स्थितः। कर्मभिरिति गत्याख्यकर्मशक्तिरिन्द्रियमुक्तं हव्यं क्रियते इति गतिप्राप्यं यज्ञार्थं द्रव्यं विषय इत्युक्तं नृभिरिति व्यष्टिजीवेष्वपीयमेव रीतिरिति दर्शयन्नराधिकारित्वं यज्ञादीनां दर्शयति" २७ श्रीधरः।

"निरभिद्यत शिश्नोवै प्रजानन्दामृतार्थिनः। उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम्" २८।

"प्रजा अपत्यम् आनन्दोरतिः अमृतं स्वर्गादि तदर्थिनः शिश्नोऽधिष्ठानम् उपस्थ इन्द्रियं प्रजापतिश्चासीदिति शेषः। तदुभयाश्रयम् इन्द्रियदेवताश्रयम्। कामानां स्त्रीसम्भोगानां सम्बन्धि प्रियं सुखम्" २८ श्रीधरः

"उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्। ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः" २९।

"धातुमलं भुक्तान्नादीनाम् असारांशं त्यक्तुमिच्छोः गुदपायुमित्रोत्सर्गा अधिष्ठानेन्द्रियदेवताविषयाः" २९श्री०

"आसिसृप्सोः पुरःपुर्या नाभिद्वारमपानतः। तत्रापानस्ततो मृत्युः, पृथक्त्वमुभयाश्रयम्" ३०।

"पुर्या देहात् पुरा देहान्तराणि आसिसृप्सोः सर्वतो गन्तुमिच्छोः, निरभिद्यत इत्यनुषङ्गः। अपानतः अपगच्छतः पृथक्त्वं मरणं। नाभ्यादीन्यधिष्ठानादीनि नाभ्यां हि प्राणापानयोर्बन्धविश्लेषे मृत्युरिति प्रसिद्धम्" ३०। श्री०

"आदित्सोरन्नपानानामासन् कुक्ष्यन्त्रनाडयः। नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये" ३१।

"अन्नपानमादित्सोः संग्रहेच्छोः कुक्षिश्च अन्त्राणि च नाड्यश्चासन्। तत्र कुक्षिरधिष्ठानम्। अन्त्राणि अन्नसंग्रहेकरणम् इन्द्रियस्थानीयं, नाड्यस्तु पानसंग्रहे तयोर्नाड्यन्त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते तुष्टिरुदरभरणं पुष्टिस्तु रसपरिणामतः स्थौल्यं, तदाश्रये तदुभयनिमित्ते तत्रान्नसंग्रहेच्छोः कुक्ष्यन्त्रसमुद्रतुष्टय इति चतुष्टयं, पेयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्टय इति विवेकः" ३१ श्री०

"निदिध्यासोरात्ममायां हृदयं निरभिद्यत। ततो मनश्चन्द्र इति सङ्कल्पः काम एव च" ३२।

"निदिध्यासोर्नितरां चिन्तयितुमिच्छोः कामोऽभिलाषः हृदयमनश्चन्द्रसङ्कल्पा अधिष्ठानादयः" ३२ श्रीधरः।

"त्वक्चर्ममांसरुधिरमेदोमज्जास्थिधातवः। भूम्यप्तेजोमयाः सप्त, प्राणोव्योमाम्बुवायुभिः" ३३।

"तदेवम् अधिदैवादिभेदं विभज्य उक्त्वा तदंशभूतानां धात्वादीनां स्वरूपमाह त्वगिति द्वाभ्यां, त्वक् स्थूलं चर्म्म, तदुपरिस्थितं सूक्ष्मं, त्वगादयोऽस्थ्यन्तास्तन्त्वैकवद्भावेन निर्दिष्टाः सप्त ये धातवस्ते भूम्यप्तेजोमयाः तेषां पाञ्चभौतिकत्वेऽपि वाय्वाकाशयोराहारकरूपत्वेन संवर्द्धकत्वाभावादेवमुक्तम्" २२ श्रीधरः।

"गुणात्मकानीन्द्रियाणि भूतादिप्रभवा गुणाः। मनः सर्व्वविकारात्मा बुद्धिर्विज्ञानरूपिणी" २४।

"गुणात्मकानि गुणेषु शब्दादिषु आत्मा येषां विषयाभिमुखस्वभावानीत्यर्थः। गुणाः शब्दादयः भूतादिरहङ्कारः ततः प्रकर्षेण भवतीति तथा, अहङ्कारकल्पितशोभनस्वभावा न वस्तुतस्तथेत्यर्थः। अत्र हेतुः यतो मनएव सर्व्वविकाराणाम् आत्मा स्वरूपं, बुद्धिस्तु तथा भूतार्थविज्ञानरूपिणी। न तु परमार्थग्राहिणीति वैराग्यार्थमुक्तम् अनेनैव बुद्धिमनसोः स्वरूपञ्चोक्तम्"।

"एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया। मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम्" २५।

"उपसंहरति एतदिति प्रकृत्या सह अष्टभिः" २५ श्री०। विस्तरस्तु विराट्शब्दे दृश्यः।

सूक्ष्मोऽपि द्विविधः आधाराधेयभेदात्। तत्राधारभूतस्य आतिवाहिकत्वं तत्स्वरूपादिकं च ६६२ पृ० दर्शितम्। "तत्क्षणादेव गृह्णाति शरीरमातिवाहिकमिति" विष्णुध०। "आतिवाहिकसञ्ज्ञोऽसौ देहो भवति भार्गव!। केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित्" विष्णुध०। "आतिवाहिक एकोऽस्ति देहोऽन्यस्त्वाधिभौतिकः। सर्व्वासां भूतजातीनां ब्रह्मणस्त्वेक एव हि" सां०प्र०भा० धृतवाक्यम्। आधेयकायस्तु तदाश्रितं सप्तदशावयवं सूक्ष्मशरीरम् तच्च आतिवाहिकशब्दे ६६२पृ० दर्शितम्। तत्र वेदान्तिमते "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इत्युक्तलक्षणम्। साङ्ख्यमते पञ्चप्राणस्थले पञ्चभूतानीति भेदः आतिवाहिकशब्दे ६६२पृ०विवृतिः। स च प्रथमतः हिरण्यगर्भस्यैवोत्पेदे तत एव कर्म्मविशेषात् उच्चावचकायोत्पत्तिर्यथोक्तं सां०सू०भा० "ननु लिङ्गं चेदेकं तर्हि कथं पुरुषभेदेन विलक्षणा भोगाः स्युः? तत्राह। "व्यक्तिभेदः कर्मविशेषात्" सू०। "यद्यपि सर्गादौ हिरण्यगर्भोपाधिरूपमेकमेव लिङ्गं तथापि तस्य पश्चाद्व्यक्तिभेदो व्यक्तिरूपेणांशतो नानात्वमपि भवति यथेदानीमेकस्य पितृलिङ्गदेहस्य नानात्वमंशतो भवति पुत्रकन्यादिलिङ्गदेहरूपेण। तत्र कारणमाह कर्मविशेषादिति। जीवान्तराणां भोगहेतुकर्मादेरित्यर्थः। अत्र विशेषवचनं हि समष्टिसृष्टिर्जीवानां साधारणैः कर्मभिर्भवतीत्यायातम्। अयं च व्यक्तिभेदो मन्वादिभिरप्युक्तः। यथा मनौ पुरुषस्य षडिन्द्रियोत्पत्त्यनन्तरम्

"तेषां त्ववयवान् सूक्ष्मान् षण्णामप्यमितौजसाम्। सन्निवेश्यात्ममात्रासु सर्वभूतानि निर्ममे" इति षण्णामिति समस्तलिङ्गशरीरोपलक्षणम्। आत्ममात्रासु चिदंशेषु संयोज्येत्यर्थः। तथा च तत्रैव वाक्यान्तरम्

"तच्छरीरसमुत्पन्नैः कार्यैस्तैः करणैः सह। क्षेत्रज्ञाः समजायन्त गात्रेभ्यस्तस्य धीमतः"।

तस्य च सर्व्वकायव्यापित्वेऽपि शास्त्रेऽङ्गुष्ठमात्रतया कल्पनं यथा साङ्ख्यप्रवचनभाष्ये,—

"अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः"। "अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यमः" इति श्रुतिस्मृती न हि लिङ्गशरीरस्य सकलशरीरव्यापिनः स्वतोऽङ्गुष्ठमात्रत्वं सम्भवति। अत आधारस्याङ्गुष्ठमात्रत्वमर्थात् सिद्ध्यति। यथा दीपस्य सर्वगृहव्यापित्वेऽपि कलिकाकारत्वं तैलवर्त्त्यादिसूक्ष्मांशस्य दशोपरि सम्पिण्डितस्य पार्थिवभागस्य कलिकाकारता तथैव लिङ्गदेहस्य देहव्यापित्वेऽप्यङ्गुष्ठपरिमाणत्वं तदाश्रयभूतस्याङ्गुष्ठपरिमाणत्वेनानुमेयमिति"।

तथा च भोगसाधनत्वेन भोगायतनत्वं लिङ्गशरीरस्यैव तदाश्रयत्वात् स्थूलशरीरस्य तथा व्यवहार उपचारात्, तदेतत् सां०प्र०भाष्ययोर्दर्शितं यथा

"तदधिष्ठानाश्रये देहे तद्वादात् तद्वादः" सू०। "तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तदाश्रये षाट्कौशिकदेहे तद्वादो देहवादस्तद्वादात् तस्याधिष्ठानशब्दोक्तस्य देहवादादित्यर्थः लिङ्गसम्बन्धादधिष्ठानस्य देहत्वम्, अधिष्ठानाश्रयत्वाच्च स्थूलस्य देहत्वमिति पर्य्यवसितोऽर्थः। अधिष्ठानशरीरं च सूक्ष्मं पञ्चभूतात्मकं वक्ष्यते तथा च शरीरत्रयं सिद्धम्" भा०।

वेदान्तिमते कारणशरीरमप्येकमस्ति तच्चाविद्यारूपं वेदान्तसारे तच्चोक्तम्। चीयते सञ्चीयते संघातरूपेण चि—कर्म्मणि घञ्। आर्हतमतसिद्धे जीवधर्म्माधर्म्माकाशपुद्गलोपाधिके विद्यमाने १२ संघातभेदे जीवास्तिकायः धर्मास्तिकायः अधर्म्मास्तिकायः आकाशास्तिकायः

पुद्गलास्तिकायः इति हि तेषां मते पञ्च पदार्थाः। अर्हच्छब्दे ३८१पृ० विवृतिः।

"कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म्म कुर्व्वन्ति" गीता। "पश्चार्द्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्व्वकायम्" शकु०। "पर्य्यङ्कबन्धस्थिरपूर्व्वकायम्" कुमा०।

कायचिकित्सा स्त्री ६त०। अष्टविधेषु आयुर्वेदाङ्गेषु मध्ये सुश्रुतोक्ते चिकित्साङ्गभेदे। "ततोऽल्पायुष्ट्वमल्पमेधस्त्वञ्चावलोक्य नराणां भूयोऽष्टधा प्रणीतवान्—तद्यथा शल्यं शालक्यं कायचिकित्सा भूतविद्या कौमारभृत्यमगदतन्त्रं रसायनतन्त्रं वाजीकरणतन्त्रमिति" विभज्य सुश्रुते लक्षितं यथा "कायचिकित्सा नाम सर्व्वाङ्गसंसृतानां व्याधीनां ज्वरातिसाररक्तपित्तशोषोन्मादापस्मारकुष्ठादीनामुपशमनार्थम्"।

कायबन्धन न० कायं बध्नाति बन्ध–ल्यु। चेतनाधिष्ठिते शुक्रशोणितयोः संयोगभेदे। "भोक्तृरधिष्ठानात् भोगायतननिर्म्माणमन्यथा पूतिभावप्रसङ्गात्" सा०सू०। चेतनाधिष्ठानेनैव शुक्रशोणितसंयोगस्य देहारम्भहेतुत्वोक्तेस्तस्य तथात्वम्।

कायमान न० कायस्य मानमिव मानमस्य। २पर्णकुटीरे त्रिका०। तस्य विशालत्वाभावेन कायमात्रपरिच्छेदकत्वात्तन्मानत्वम्। ६त०। २देहपरिमाणे न०।

कायरूपसंयम पु० पात०सूत्रोक्ते ध्यानविशेषरूपे संयमभेदे स च तत्र सविस्तरं फलसहितो दर्शितो यथा।

"कायरूपसंयमात्तद्ग्राह्यशक्तिस्तम्भे चक्षुःप्रकाशासंयोगेऽन्तर्द्धानम्" सू०।

"कायरूपे संयमाद्रूपस्य या ग्राह्या शक्तिस्तां प्रतिबध्नाति ग्राह्यशक्तिस्तम्भे सति चक्षुःप्रकाशासंयोगेऽन्तर्धानमुत्पद्यते योगिनः। एतेन शब्दाद्यन्तर्द्धानमुक्तं वेदितव्यम्" व्यासभाष्य०।

"पञ्चात्मकः कायः स च रूपवत्तया चाक्षुषो भवति रूपेण हि कायस्य तद्रूपञ्च चक्षुर्ग्रहणकर्मशक्तिमनुभवति तत्र यदा रूपे संयमविशेषो योगिना क्रियते तदा रूपस्य ग्राह्यशक्तौ रूपवत्कायप्रत्यक्षताहेतुः स्तभ्यते तस्मात् ग्राह्यशक्तिस्तम्भे सत्यन्तर्द्धानयोगिनस्ततः परकीयचक्षुर्जनितेन प्रकाशेन ज्ञानेनासम्प्रयोगः चक्षुर्ज्ञानाविषयत्वं योगिनः कायस्यैवेति यावत् तस्मिन् कर्त्तव्येऽन्तर्द्धानं कारणमित्यर्थः। एतेनेति कायशब्दस्पर्शरसगन्धसंयमात्तद्ग्राह्यशक्तिस्तम्भे श्रोत्रत्वक्रसनघ्राणप्रकाशासम्प्रयोगे ऽन्तर्द्धानमिति" विव०।

कायवलन न० कायोवल्यते आच्छाद्यतेऽनेन वल–वृतौ करणे ल्युट्। कवचे वर्म्मणि हारा०।

कायव्य पु० भारतोक्ते दस्युप्रभुभेदे तदुत्पत्तिकथादि भा० शा० १३५अ० यथा।

"निषाद्यां क्षत्रियाज्जातः क्षत्रधर्मानुपालकः। कायव्यो नाम नैषादिर्दस्युत्वात् सिद्धिमाप्तवान्। अरण्ये सायं पूर्व्वाह्णे मृगयूथप्रकोपिता। विधिज्ञो मृगजातीनां नैषादानाञ्च कोविदः। सर्व्वकालप्रदेशज्ञः पारियात्रचरः सदा। धर्मज्ञः सर्व्वभूतानाममोघेषुर्दृढायुधः। अप्यनेकशता सेना एक एव जिगाय सः। स वृद्धावन्धबधिरौ महारण्येऽभ्यपूजयत्। मधुमांसैर्मूलफलैरन्नैरुच्चावचैरपि। सत्कृत्य भोजयामास मान्यान् परिचचार च। आरण्यकान् प्रव्रजितान् ब्राह्मणान् परिपूजयन्। अपि तेभ्यो मृगान् हत्वा निनाय सततं वने। येऽस्मान्न प्रतिगृह्णन्ति दस्युतो जनशङ्कया। तेषामासज्य गेहेषु कल्य एव स गच्छति। बहूनि च सहस्राणि ग्रामणीत्वेऽभिवव्रिरे। निर्मर्य्यादानि दस्यूनां निरनुक्रोशवर्त्तिनाम्। दस्यवः ऊचुः। मुहूर्त्तदेशकालज्ञः प्राज्ञः शूरो दृढव्रतः। ग्रामणीर्भव नो मुख्यः सर्वेषामेव सम्मतः। यथा यथा वक्ष्यसि नः करिष्यामस्तथा तथा। पालयास्मान् यथान्यायं यथा माता यथा पिता। कायव्य उवाच। मा बधीस्त्वं स्त्रियं भीरुं मा शिशुं मा तपस्विनम्। नायुध्यमानो हन्तव्यो न च ग्राह्या बलात् स्त्रियः। सर्व्वथा स्त्री न हन्तव्या सर्व्वसत्त्वेषु केनचित्। नित्यन्तु ब्राह्मणे स्वस्ति योद्धव्यञ्च तदर्थतः। सत्यञ्च नाभिहन्तव्यं शारविघ्नञ्च मा कृथाः। पूज्यते यत्र देवाश्च पितरोऽतिथयस्तथा। सर्व्वभूतेष्वपि च वै ब्राह्मणो मोक्षमर्हति। कार्य्या चोपचितिस्तेषां सर्व्वस्वेनापि या भवेत्। यस्य ह्येते सम्प्ररुष्टा मन्त्रयन्ति पराभवम्। न तस्य त्रिषु लोकेषु त्राता भवति कश्चन। यो ब्राह्मणान् परिवदेद्विनाशञ्चापि रोचयेत्। सूर्य्योदय इव ध्वान्ते ध्रुवं तस्य पराभवः। इहैव फलमासीनः प्रत्याकाङ्क्षेत सर्वशः। ये ये नो न प्रदास्यन्ति तांस्तांस्तेनाभियास्यति। शिष्ट्यर्थं विहितो दण्डो न वृद्ध्यर्थं विनिश्चयः। ये च शिष्टान् प्रबाधन्ते दण्डस्तेषां बधः स्मृतः। ये च राष्ट्रोपरोधेन वृद्धिं कुर्वन्ति केचन। तदैव तेऽनुमीयन्ते कुणपे कृमयो यथा। ये पुनर्द्धर्म्मशास्त्रेण वर्त्तेरन्निह दस्यवः। अपि ते दस्यवो भूत्वा क्षिप्रं सिद्धिमवाप्नुयुः"।

कायव्यूह काये वातादीनां धातूनां सप्तानां त्वगादीनाञ्च व्यूहो व्यूहनम्। कायस्थवातादीनां विन्यासे "नाभिचक्रे कायव्यूहज्ञानम्"पात०सू०"नाभिचक्रे संयमं कृत्वा कायव्यूहं विजानीयात्। वातपित्तश्लेष्माणस्त्रयो दोषाः सप्त सन्ति धातवः-त्वग्लोहितमांसस्नाय्वस्थिमज्जाशुक्राणि पूर्व्वं पूर्व्वमेषां बाह्यमित्येवंविन्यासज्ञानम्" भा०।इति०। योगिभिः कर्म्मभोगार्थं कल्पिते २कायसमुदाये च यथा च भोगार्थं कायव्यूहरचना तथा चिन्तामणौ मुक्तिवादे उक्तं यथा"यत्तु नाऽभुक्तमिति स्मृतिविरोधेन क्षीयन्तइत्यादिश्रुतेरन्यथार्थवर्णनं, तन्न स्मृतेः प्रत्यक्षवेदबाधितत्वेन तद्विरुद्धार्थकवेदाननुमापकत्वात्। वामदेवसौभरिप्रभृतीनां कायव्यूहश्रवणात्तत्त्वज्ञानेन कायव्यूहमुत्पाद्य भोगद्वारा कर्मक्षय इति चेन्न तपःप्रभावादेव तत्त्वज्ञानानुत्पादे वा कायव्यूहसम्भवात्। भोगजननार्थञ्च कर्मभिरवश्यं तत्तत्कायनिष्पादनमिति न तत्र तत्त्वज्ञानोपयोगः। यौगपद्यञ्च कायानां तज्जनकधर्म्मस्वभावात् तपःप्रभावाद्वा"।

एकस्यैव जीवस्य चित्तान्तराणि कायेन्द्रियाणि च निर्म्माय तत्तत्कर्म्मभोगार्थरचितकायव्यूहेन योग इत्येतत् शा० भा० समर्थितं यथा। "सङ्कल्पादेव तु तच्छ्रुतेः" शा० सू०। "हार्दविद्यायां श्रूयते-"स यदि पितृलोककामोभवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादि"। तत्र संशयः—किं सङ्कल्प एव केवलः पित्रादिसमुत्थानहेतुः उत निमित्तान्तरसहितः? इति। तत्र सत्यपि सङ्कल्पादेवेति श्रवणे लोकवन्निमित्तान्तरापेक्षा युक्ता यथा लोकेऽस्मदादीनां सङ्कल्पाद् गत्यादिभ्यश्च हेतुभ्यः पित्रादिसम्पत्तिर्भवत्येवं मुक्तस्यापि स्यात् एवं दृष्टविपरीतं न कल्पितं भविष्यति। सङ्कल्पादेवेति तु राज्ञइव सङ्कल्पितार्थसिद्धिकरीं साधनान्तरसामग्रीं सुलभामपेक्ष्योच्यते। न च सङ्कल्पमात्रसमुत्थानाः पित्रादयोमनोरथविजृम्भितवच्चञ्चलत्वात् पुष्कलं भोगं समर्पयितुं पर्य्याप्नुयुरित्येवं प्राप्ते ब्रूमः—सङ्कल्पादेव तु केवलात् पित्रादिसमुत्थानमिति। कुतः? तच्छ्रुतेः "सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिका" हि श्रुतिर्निमित्तान्तरापेक्षायां पीड्येत। निमित्तान्तरमपि यदि सङ्कल्पानुविधाय्येव स्याद्भवतु न तु प्रयत्नान्तरसम्पाद्यं निमित्तान्तरमिष्यते प्राक् तत्सम्पत्तेर्बन्ध्यसङ्कल्पत्वप्रसङ्गात्। न च श्रुतिगम्येऽर्थे लोकवदिति सामान्यतो दृष्टं क्रमते। सङ्कल्पबलादेव चैषां यावत्प्रयोजनं स्थैर्योपपत्तिः, प्राकृतसङ्कल्पविलक्षणत्वान्मुक्तसङ्कल्पस्य" भा०। "अतएव चानन्याधिपतिः" सू०"अतएव चावन्ध्यसङ्कल्पत्वादनन्याधिपतिर्विद्वान् भवति नास्यान्योऽधिपतिर्भवतीत्यर्थः। न हि प्राकृतोऽपि सङ्कल्पयन्नन्यस्वामिकस्त्वमात्मनः सत्यां गतौ सङ्कल्पयति। श्रुतिश्चैतद्दर्शयति "अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारोभवतीति"भा०। "अभावं वादरिराह ह्येवम्" सू०"सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति" इत्यतः श्रुतेर्मनस्तावत्सङ्कल्पसाधनं सिद्धं शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्य्यस्य विदुषः सन्ति न सन्तीति समीक्ष्यते तत्र वादरिस्तावदाचार्य्यः शरीरस्येन्द्रियाणाञ्चाभावं महीयमानस्य विदुषो मन्यते। कस्मात्? एवं ह्याहाम्नायः"मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके" इति। यदि मनसा शरीरेन्द्रियैश्च विहरेत् मनसेति विशेषणं न स्यात्। तस्मादभावः शरीरेन्द्रियाणां मोक्षे" भा० "भावं जैमिनिर्विकल्पामननात्" सू० "जैमिनिराचार्य्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं मुक्तं प्रति मन्यते, यतः "स एकधा भवति त्रिधा भवति" इत्यादिनाऽनेकधाभावविकल्पमामनन्ति नह्यनेकविधता विना शरीरभेदेनाञ्जसी स्यात्। यद्यपि निर्गुणायां भूमविद्यायामयमनेकधाभावे विकल्पः पठ्यते, तथापि विद्यमानमेवेदं सगुणावस्थायामैश्वर्य्यं भूमविद्यास्तुतये सङ्कीर्त्यत इत्यतः सगुणविद्याफलभावेनोपतिष्ठत इत्युच्यते" भा० "द्वादशाहवदुभयविधं वादरायणोऽतः" सू० "वादरायणः पुनराचार्य्योऽतएवोभयलिङ्गश्रुतिदर्शनादुभयविधत्वं साधु मन्यते, यदा सशरीरतां सङ्कल्पयति तदा सशरीरो भवति, यदा त्वशरीरतां तदा अशरीर इति सत्यसङ्कल्पत्वात् सङ्कल्पवैचित्र्याच्च, द्वादशाहवत्-यथा द्वादशाहः सत्रमहीनश्च भवति उभयलिङ्गश्रुतिदर्शनात् एवमिदमपीति" भा० "तदभावे सन्ध्यवदुपपद्यते" सू०"यदा तु सेन्द्रियस्य शरीरस्याभावस्तदा यथा सन्ध्ये स्थाने शरीरेन्द्रियविषयेष्वविद्यमानेष्वप्युपलब्धिमात्रा एव पित्रादिकामा भवन्त्येवं मोक्षेऽपि स्युः एवं तदुपपद्यते" भा० "भावे जाग्रद्वत्" सू० "भावे पुनस्तनोर्यथा जागरिते विद्यमाना एव पित्रादिकामा भवन्त्येवं मुक्तस्याप्युपपद्यन्ते" भा० "प्रदीपवदावेशस्तथाहि दर्शयति" सू० "भावं जैमिनिर्विकल्पामननादित्यत्र सशरीरत्वं मुक्तस्योक्तं तत्र त्रिधाभावादिष्वनेकशरीरसर्गे किं निरात्मकानि शरीराणि दारुयन्त्रवत् सृज्यन्ते? किं वा सात्मकानि? अस्मदादिशरीरवदिति भवति वीक्षा। तत्रात्ममनसोर्भेदानुपपत्तेरेकेन

शरीरेण योगादितराणि निरात्मकानीत्येवं प्राप्ते प्रतिपद्यते प्रदीपवदावेश इति। यथा प्रदीप एकोऽनेकप्रदीपभावमापद्यते विकारशक्तियोगात्, एवमेकोऽपि सन् विद्वानैश्वर्य्य-योगादनेकभावमापद्य सर्व्वाणि शरीराण्याविशति। कुतः! तथाहि दर्शयति शास्त्रमेकस्यानेकभावम् "स एकधा भवति त्रिधा भवति पञ्चधा सप्तधेत्यादि"। नैतद्दारुयन्त्रोपमाभ्युपगमेऽवकल्पते नापि जीवान्तरावेशे। न च निरात्मकानां शरीराणां प्रवृत्तिः सम्भवति। यत्त्वात्ममनसोर्भेदानुपपत्तेरनेकशरीरयोगासम्भव इति नैष दोषः एकमनोऽनुवर्त्तीनि समनस्कान्येवापराणि शरीराणि सत्यसङ्कल्पत्वात् स्रक्ष्यति। सृष्टेषु च तेषूपाधिभेदादात्मनोऽपि भेदेनाधिष्ठातृत्वं योक्ष्यते। एषैव च योगशास्त्रेषु योगिनामनेकशरीरयोगप्रक्रिया" भा०।

यथा च परशरीरे चित्तस्यावेशस्तथा पात० सू० भाष्ययोः दर्शितं यथा

"बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य परशरीरावेशः" पात० सू०

"लोलीभूतस्य मनसोऽप्रतिष्ठस्य शरीरे कर्माशयवशाद्बन्धः प्रतिष्ठेत्यर्थः तस्य कर्मणोबन्धकारणस्य शैथिल्यं समाधिबलाद्भवति प्रचारसंवेदनञ्च चित्तस्य समाधिजमेव, कर्मबन्धक्षयात् स्वचित्तस्य प्रचारसंवेदनाच्च योगी चित्तं स्वशरीरान्निष्कृष्य शरीरान्तरेषु निःक्षिपति निःक्षिप्तं चित्तञ्चेन्द्रियाण्यनुपतन्ति यथा मधुकरराजानं मक्षिका उत्पतन्तमनूत्पतन्ति, निविशमानमनुनिविशन्ते तथेन्द्रियाणि परशरीरावेशे चित्तमनुविधीयन्त" इति व्यासभा०।

कायसम्पद् स्त्री ६त०। "रूपलावण्यबलवज्र संहननत्वानि कायसम्पदः" पात० सूत्रोक्ते रूपलावण्यादौ। "ततोऽणिमादिप्रादुर्भावः कायसम्पद्धर्मानभिघातश्च" पात० सू०। व्याख्यातमिदमैश्वर्य्यशब्दे तच्च १५५१ पृ० दृश्यम्।

कायस्थ पु० कायेषु सर्वभूतरूपदेहेषु तिष्ठति अन्तर्यामितया स्था—क ७त०। १परमात्मनि मेदि०। यथा च सर्व्वशरीरेषु अधिष्ठातृतयास्य स्थितिस्तथा अन्तर्यामिब्राह्मणे दर्शितं तच्च वाक्यं १२०पृ० दर्शितम्। २जातिभेदे करणरूपे व्रात्यक्षत्रिये करणशब्दे तस्य विवृतिः।

अथ कायस्थानां शूद्रत्वाशूद्रत्वविषये बहुधा विप्रतिपत्तिरस्ति अतस्तन्निरूपणाय प्रमाणान्युद्धृत्य मीमांस्यते। "एवं हत्वाऽर्ज्जुनं रामः सन्धाय निशितान् शरान्। एक एव वधी हन्तुं सर्व्वानेवातुरान् नृपान्। केचित् गहनमाश्रित्य केचित् पातालमाविशन्। सगर्भा चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ। ततो रामः समायातो दाल्भ्याश्रममनुत्तमम्। पूजितो मुनिना सद्यः पाद्यार्घ्याचमनादिभिः। ददौ मध्याह्नसमये तस्मै भोजनमादरात्। रामस्तु याचयामास हृदिस्थं स्वं मनोरथम्। याचयामास रामाच्च कामं दाल्भ्यो महामुनिः। ततस्तौ परमप्रीतौ भोजनं चक्रतुर्मुदा। भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति। यत्त्वया प्रार्थितं देव! तत् त्वं शंसितुमर्हसि। राम उवाच तवाश्रमे महाभाग! सगर्भा स्त्री समागता। चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः। तन्मे त्वं प्रार्थितं देहि हिंसेयं तां महामुने!। ततो दाल्भ्यः प्रत्युवाच, ददामि तव वाञ्छितम्। दाल्भ्य उवाच। स्त्रियं गर्भमस्तु बालं तन्मे त्वं दातुमर्हसि। ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः। क्षत्रियान्तकरश्चाहं तत् त्वं याचितवानसि। प्रार्थितश्च त्वया विप्र! कायस्थो गर्भ उत्तमः। तस्मात् कायस्थ इत्याख्या भविष्यति शिशोः शुभा। एवं रामो महाबाहुर्हित्वा तं गर्भमुत्तमम्। निर्जगामाश्रमात् तस्मात् क्षत्रियान्तकरः प्रभुः। कायस्थ एष उत्पन्नः क्षत्रियायां ततः। रामाज्ञया स दाल्भ्येन क्षत्रधर्म्मात् बहिष्कृतः। कायस्थधर्म्मोदत्तोऽस्मै चित्रगुप्तस्य यः स्मृतः। तद्गोत्रजाश्च कायस्था दाल्भ्यगोत्रास्ततोऽभवन्। दाल्भ्योपदेशतस्ते वै धर्म्मिष्ठाः सत्यवादिनः। सदाचारपरा नित्यं रता हरिहरार्च्चने। देवर्षिविप्रपितृणाञ्च अतिथीनाञ्च पूजकाः" इति स्कान्दे रेणुकामाहात्म्यम्। अत्र क्षात्रधर्म्माद्बहिष्कृतः इत्यनेन सगरेण काम्बोजादीनामिव तस्य तद्वंशस्य च क्षत्रियधर्म्मद्वोपनयनादेराहित्यप्रतीतावपि चित्रगुप्तधर्म्मत्वदानकथनेनोपनयनादिमत्त्वं वेदाधिकारित्वं च सूचितं तेन केवलशूद्रादेराहित्यमात्रं चित्रगुप्तधर्म्मत्वदानेन लेखनाधिकारः सूचित। चित्रगुप्तधर्म्मश्च तदुत्पत्तिसहितः पद्मपुराणे सृष्टिखण्डे उक्तोयथा—

"क्षणं ध्यानस्थितस्यास्य सर्व्वकायाद्विनिर्गतः। दिव्यरूपः पुमान् बिभ्रत् मसीपात्रञ्च लेखनीम्। चित्रगुप्त इति ख्यातो धर्म्मराजसमीपतः। प्राणिनां सदसत्कर्म्मलेखाय स निरूपितः ब्रह्मणाऽतीन्द्रियज्ञानी देवाग्न्योर्यज्ञभुक् स वै। भोजनाच्च सदा तस्मात् आहुतिर्दीयते द्विजः। ब्रह्मकायोद्भवो यस्मात् कायस्थो वर्ण उच्यते। नाना-

गोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै”। भविष्यपुराणे च। दत्तात्रेय उवाच। त्रिकालज्ञं महाप्राज्ञं पुलस्त्यमुनिपुङ्गवम्। उपसंगम्य पप्रच्छ भीष्मः शास्त्रभृतां वरः। चतुर्णामपि वर्णानामाश्रमाणां तथैव च। सम्भवः सङ्करादीनां श्रुतो विस्तरतो मया। कायस्थोत्पत्तयो लोके ख्यातायैव महामुने!। भूय एव महाप्राज्ञ! श्रोतुमिच्छामि तत्त्वतः। वैष्णवा दानशीलाश्च पितृयज्ञपरायणाः। सुधियः सर्वशास्त्रेषु काव्यालङ्कारबोधकाः। पोष्टारो निजवर्णानां ब्राह्मणानां विशेषतः। तानहं श्रोतुमिच्छामि कथयस्व महामुने एतन्मे संशयं विप्र! वक्तुमर्हस्यशेषतः। इति दृष्टो मुनिप्राज्ञः गाङ्गेयं! प्राह तत्त्वतः। पुलस्त्य उवाच। शृणु गाङ्गेय! वक्ष्यामि कायस्थोत्पत्तिकारणम्। न श्रुतं यत् त्वया पूर्व्वं तन्मे कथयतः शृणु। येनेदं सकलं विश्वं स्थावरं जङ्गमं तथा। उत्पाद्य पाल्यते भूयो निधनाय प्रकल्प्यते। अव्यक्तः पुरुषः शान्तो ब्रह्मा लोकपितामहः। यथाऽसृजत् पुरा विश्वं कथयामि तव प्रभो!। मुखतोऽस्य द्विजा जाता बाहुभ्यां क्षत्रियास्तथा। ऊरुभ्याञ्च तथा वैश्याः पद्भ्यां शूद्राः समुद्भवाः। द्विपदःषट्पदादींश्च प्लवङ्गमसरीसृपान्। एककालेऽसृजत् सर्व्वं चन्द्रसूर्य्यग्रहांस्तथा। एवं बहुविधानेन विश्वमुत्पाद्य भारत!। उवाच तं सुतं ज्येष्ठं काश्यपं चातितेजसम्। प्रतियत्नेन भोः पुत्र! जगत्पालय सुव्रत!। इत्याज्ञाप्य सुतं ज्येष्ठं ऋषिसम्भवहेतुकम्। ततस्तु ब्रह्मणा तेन यत् कृतं तन्निबोध मे” ‘दश वर्षसहस्राणि दश वर्षशतानि च। समाधिस्थोऽभवत् प्राणान् संयम्य शान्तमानसः। ततः समाहितमतेर्यद्भूतं तद्वदामि ते। तच्छरीरान्महाबाहुः श्यामः कमललोचनः। कम्बुग्रीवो गूढ़शिराः पूर्णचन्द्रनिभाननः। लेखनीच्छेदनीहस्तो मसीभाजनसंयुतः। निःसृत्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः। उत्तमः सुविचित्राङ्गः ध्यानस्तिमितलोचनः। त्यक्त्वा समाधिं गाङ्गेय! तं दृष्ट्वा पितामहः। अधऊर्द्ध्वं निरीक्ष्याथ पुरुषश्चाग्रतः स्थितः। नामधेयं हि मे तात! वक्तुमर्हस्यतःपरम्। यथोचितञ्च यत् कार्य्यं तत् त्वं मामनुशासय। पुलस्त्य उवाच। इत्याकर्ण्य ततो ब्रह्मा पुरुषं स्वशरीरजम्। प्रहृष्य प्रत्युवाचेदमानन्दितमतिः पुनः। स्थिरचित्तं समाधाय ध्यानस्थमतिसुन्दरः। मच्छरीरात् समुद्भूतस्तस्मात् कायस्थसंज्ञकः। चित्रगुप्तेति नाम्ना वै ख्यातो भुवि भविष्यसि। धर्म्माधर्म्मविवेकार्थं धर्म्मराजपुरे सदा। स्थितिर्भवतु ते वत्स! ममाज्ञां प्राप्य निश्चलाम्। क्षत्रवर्णोचितो धर्म्मः पालनीयो यथाविधि। प्रजाः सृजस्व भो पुत्र! भुवि भावसमन्विताः। तस्मै दत्त्वा वरं ब्रह्मा तत्रैवान्तरधीयत”। “पुलस्त्य उवाच। चित्रगुप्तान्वये जाताः शृणु तान् कथयामि ते। श्रीभद्रा नागरा गौराः श्रीवत्साश्चैव माथुराः। अहिफणाः सौरसेनाः शैवसेनास्तथैव च। वर्णा वर्णद्वयञ्चैव अम्बष्ठाद्याश्च सत्तम!। शृणु तेषाञ्च कर्म्माणि कुरुवंशविवर्द्धन!। पुत्रान् वै स्थापयामास चित्रगुप्तो महीतले। धर्म्माधर्म्मविवेकज्ञश्चित्रगुप्तो महामतिः। भूस्थानं बोधयामास सर्व्वसाधनमुत्तमम्। पूजनं देवतानाञ्च पितॄणां यज्ञसाधनम्। वर्णानां ब्राह्मणानाञ्च सर्व्वदातिथिसेवनम्। प्रजाभ्यः करमादाय धर्म्माधर्म्मविलोकनम्। कर्त्तव्यं हि प्रयत्नेन पुत्राः स्वर्गस्य काम्यया। या माया प्रकृतिः शक्तिश्चण्डी चण्डप्रमर्द्दिनी। तस्यास्तु पूजनं कार्य्यं सिद्धिं प्राप्य दिवं गताः। स्वर्गाधिकारमासाद्य यतो यज्ञभुजः सदा। भवद्भिः सा सदा पूज्या ध्यातव्या मफलादिभिः। भवन्तं सिद्धिदा नित्यं पुत्रदा सा तु चण्डिका। तन्त्रोक्ता न सुरा पेया या न पेया द्विजातिभिः। वैष्णवं धर्म्ममाश्रित्य महाक्यं प्रतिपालय। कर्त्तव्यं हि प्रयत्नेन लोकद्वयहिताय वै। अनुशास्य सुतानेवं चित्रगुप्तो दिवं ययौ। धर्म्मराजस्याधिकारी चित्रगुप्तो बभूव ह। स्वयं भीष्म! समुत्पन्नाः कायस्था ये प्रकीर्त्तिताः। ये पृष्टास्ते मयाख्याताः संवादं शृणु चापरम्”।

पद्मपु॰ पातालखण्डे सूतं प्रति शौनकाद्युक्तिः। “श्रोतुमिच्छामहे त्वत्तः श्रेयसि प्रेमसङ्गिनः। पुराणसंहितामेतां कायस्थस्थितिलक्षणाम्। को हेतुस्तस्य चोत्पत्तौ, किंविधः, कर्म्म कीदृशम्। कि वर्णः कास्ति कस्मैचित् कार्य्यं शादाय को हि सः। किंकुलीनः किमाचारः किंगोत्रः कस्य चान्वयः। एतद्विस्तरतो ब्रूहि कायस्थकृतशासनम्। सूत उवाच। इदमद्भुतमाख्यानं कायस्थस्थितिलक्षणम्। कथयामि महाभागा भगवद्गुणकीर्त्तये। विचित्रो जगतां हेतुर्भगवच्छश्वदाश्रयः। तस्योद्भवोऽपि वैचित्रो जगतः कृतवान् विधिः। चित्रोविचित्र इति तत् विख्यातौ तावुभावपि। धर्म्मराजस्य सचिवौ दत्तावस्य तु वेधसा। असतां दण्डनेतारौ न्यपनीतिविचक्षणौ। यथार्थवादिनौ स्यातां शान्तिकर्म्माणि तावुभौ। कायस्थसंज्ञया ख्यातौ सर्व-

कायस्थपूर्वजौ । लेखनज्ञानविधिना मुख्यकार्य्यपरायणौ । अस्मिन् संसारपाथोधौ षड्विधाः कायवर्त्तिनः । तत्रस्य कायविज्ञानात् कायस्थत्वमिहैतयोः । धर्म्मराजस्य साचिव्यं कुर्व्वतोः शान्तिकर्म्मणि । हरेरनुग्रहोऽप्यास्ते तयोश्चित्र विचित्रयोः । एकविंशतिभेदेन याभ्यां कायस्थजातयः । इत्युदीर्य्य विधिस्तत्र वचश्चित्रविचित्रयोः । तूष्णीमास ततस्ताभ्यां पृष्टं स्वात्मविचेष्टितम् । अस्माकं के च संस्कारा किंवर्णजा ? वयं विभो ! । तत्सर्व्वं कथयस्वावां भवत्सेवा-परायणौ । सूत उवाच । इति श्रुत्वा तयोर्वाक्यमनुमोद्य पितामहः । भक्तयोत्तरमुत्कृष्टमुवाच प्रहसन्निव । ब्रह्मोवाच । भवन्तावादिकल्पस्य प्रथमे युगनायके । परमायाश्च शुद्रायामभूतां द्विजवेश्मनि । दासतां दिष्टतः प्राप्तौ परिदासित्वयवर्त्तिनौ । स्वामिसेवापरायत्तौ मिथः स्नेहानुवर्त्तिनौ । द्विजन्मकिङ्करौ तेषां गृहकर्म्मणि सन्ततम् । चक्रतुः प्रभुभावेन तदुच्छिष्टभुजौ युवाम् । त्वं दिवं सुखमासाद्य यावद्युगचतुष्टयम् । मर्त्यतामाप्य देवत्वं ततएवं क्रमेण तु । तन्महाप्रलये जाते सर्व्वप्राणिहितेरतौ । दासीसुतौ भवन्तौ, वां भगवद्वपुषि स्थितिः । अधुना सृष्टिसमये मत्तोजन्मापि वामिदम् । धर्म्माधिकार वपुषौ स्वामिवाक्यवजीवनात् । यत्र वर्णेष्व उत्कृष्टो ब्राह्मणः सर्व्वसम्मतः । तस्यानन्तरजो यस्मात् क्षत्रियः परिरक्षकः । विज्ञानजीवनोपायी व्यवहारनयान्वितः । वैश्यो वर्णस्तृतीयः स्याद् वर्णद्वितयसेवकः । मन्त्रवर्ज्जितसंस्कारो नमस्कारक्रियापरः । चतुर्थः शूद्रवर्णः स्याद् वर्णत्रितयसेवकः । अनेकव्यवहारज्ञः क्षत्रियश्च यजश्च सः । तेषामुत्तमतां याय।त् कायस्थोऽक्षरजीवकः । भवन्तौ क्षत्रवर्णस्थौ द्विजन्मानौ महाशयौ । कृतोपवीतिनौ स्यातां वेदशास्त्राधिकारिणौ । पूर्व्वपुण्यबलोत्कर्षसाध्यसाधनभाविनौ । सर्व्वज्ञकल्पौ भूयातां भगवद्गतमानसौ । एवमाख्याय भगवान् सर्व्वामरगणान्वितः । अन्तर्दधे तयोरन्तः स्थितः प्रत्यक्षचित्तितः” ।

‘‘सूत उवाच । अस्मिन् जगति दुःखानि दुर्दान्ताएव भुञ्जते । तस्माद्दुर्नयकर्त्तारो निरयेष्वधिवासिनः । दुर्नयं सुनयं वापि सर्व्वेषां नयवर्त्तिनाम् । अन्यायिनामपि तथा लिखतः कर्म्मसूत्रिणाम् । एतल्लिखनमध्यस्थं कर्म्मसूत्रं यथातथम् । न न्यूनमधिकं वापि देहारब्धस्य कर्म्म यत् । जन्मानन्त्यभवं कर्म्म जीवानां भाविताशुभौ । उपयोगं विना येनौ लेखयामासतुः स्वतः । विलोक्य प्राणिनामायुः संपूर्णं कर्म्म वा यथा । समानपतितानेव नापराविति निर्णयः । धर्म्मराजानुवचनमेकवाक्यमिव प्रियम् । सम्मानयित्वा सुतरां नेत्रभूताविव स्थितौ । षट्कायमतविज्ञानं जानीतः कर्म्मयोगि यत् । कायस्य संज्ञया चित्रविचित्रौ विष्णुवल्लभौ” । “सूत उवाच । एवमाभाष्य मनसा प्रमाणपदसिद्धये । वचसा छन्दयामास मैत्रस्तौ प्रीतिहेतवे । अनेके भुवि सत्कीर्त्तिसम्भवाय स्थितिं स्वकाम् । निरूपयन्ति नितरां मुनयो देवमानवाः । परिवारविभूत्यैव स्वसन्तानप्रसिद्धये । भवन्तावपि तस्मात्तु कुरुतां सुतसंस्थितिम् । इत्युक्त्वा कल्पयामास कन्ये द्वे परमोत्तमे । मरुत्प्रभोः समाधेश्च तनये क्षत्रजन्मनः । सम्पन्नकुलशीले ते कर्त्तव्ये गृहमेधसे । कलत्रे वंशविस्तारहेतवे तु पृथक् पृथक् । एवमादिष्टधर्म्माणौ प्रणम्य स्वामिनं प्रति । देशादेशप्रमाणं स्यात् इत्युक्त्वास्थिति चक्रतुः । विधिना परिनेतारौ समये भवमोचिते । ततएव समाम्नायहेतवे कृतनिश्चयौ । समाधिमानसौ धर्म्मराजस्य वचनेरितौ । कालिकामादिजननीं प्रार्थयामासतुस्तत: । चित्रोऽप्यथ विचित्रोपि मिथो निश्चित्य साम्प्रतम् । विचित्र ! जगतः कार्य्यं त्वया तत्तद्विधीयताम् । कायद्वयन्तु कर्त्तव्यमस्माभिः स्वामिवाक्यजम् । व्यापारोऽपि प्रकर्त्तव्यः कालिकापि हि सेव्यते” इत्युपक्रमे पद्मपु० पातालखण्डे “सुभामा चित्रगुप्तस्य गृहस्वामित्वयोगिनी । भामिनी तु विचित्रस्य सुन्दरी सुन्दरस्थितिः । उभे अपि समाम्नाते पातिव्रत्यशिरोमणी । देवदत्तां पुरं प्राप्य सुखेनैवानुतिष्ठताम् । परेरिता प्रवृत्तैषा पुरी साऽऽयतनी कृता । चित्रगुप्तेन भामायां त्रयउत्पादिताः सुताः । उदारशीलाचरिता धर्म्मराजस्य वल्लभाः । शरीरवेगाः सुदृढाः पितृयत्कार्य्यहेतवः । विचित्रस्य सुताः पञ्च सम्भूवन् महाशयाः । कलीरः सुषमः सूक्ष्मः सङ्गवान् कर्म्मकस्तमी । भामिनी कुक्षिजास्तावत्साद्गुणगुणशालिनः । तेषान्तु कल्पयामास कश्यपो जातकर्म्म वै । तदाचरति तत्पूर्व्वं नाम गर्भादि वैदिकम् । तयोः कुलपतिस्तस्मात् तावत् कश्यपसम्मतः । व्यातेने सकलाभीष्टमाशीःशतमुद्धृयैः । एतावेते च सर्व्वे सुगोत्रिणः कश्यपाभिधाः” ।

एवं चित्रगुप्तवंश्यानां चन्द्रसेनवंश्यानाञ्च क्षत्रियवदुपनयनवेदाधिकारे स्थिते कालवशात् तदन्वयजातानामुपनयनादिलोपात् व्रात्यक्षत्रियत्वम् । व्रात्यानाञ्चाकृतप्रायश्चित्तानाम् उपनयनादिराहित्यात् शूद्रधर्म्मत्वम्

इदानीन्तनानाम् यद्यपि व्रात्यक्षत्रियाणां क्षत्रियतुल्याशौचभागित्वमुचितं तथापि मनुना "शनकैस्तु क्रियालोपादिमाः स्युः क्षत्रियजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च" इति शूद्रत्वप्राप्तिं प्रति क्रियालोपस्य वेदानध्ययनस्य च हेतुतया उक्तेः इदानीन्तनानामुभयासद्भावेन वृषलधर्मत्वप्राप्त्या अकृतप्रायश्चित्तक्षत्रियाणामुपनयनादिराहित्येन शूद्रधर्मप्राप्त्या मासाशौचव्यवहारो नानुपपन्नः। रघुनन्दनेन महानन्दिप्रभृतिक्षत्रियाणामपि कलौ शूद्रत्वस्योक्तेः शूद्रतुल्यतया मासाशौचव्यवहारस्य युक्तत्वात् गतानुगतिकन्यायादेव तथा चार इत्यनुमीयते। व्रात्यप्रायश्चित्तञ्च मिता॰ आपस्तम्बेनोक्तं यथा "यस्य प्रपितामहादेर्नानुस्मर्य्यते उपयनं तस्य द्वादश वर्षाणि त्रैविद्यकं ब्रह्मचर्य्यम्"। एतेषाञ्च बहुकालावधिव्रात्यत्वं, यतो मनुना "झल्लोमल्लश्च राजन्यात् व्रात्यात् निच्छिविरेव च। नटश्च करणश्चैव खसो द्रविड़ एव च" इति व्रात्यत्वादेव तेषामुत्पत्तेरुक्तेः बहुकालपतितसावित्रीकस्यापि प्रागुक्तापस्तम्बवचनेन प्रायश्चित्तस्य विधानात् तथा प्रायश्चित्ताचरणे च उपनयनाद्यधिकारिता भवितुमर्हत्येव किन्तु वर्णसङ्करजातिभेदरूपकरणस्य न तथात्वं तन्निर्णयश्च वंशपरम्पराज्ञात्यभावे दुर्घटएव "शूद्रवद्वर्णसङ्कराः" इति स्मृतेः तेषां शूद्रधर्मातिदेशात्, तेषां मासाशौचाद्याचारदर्शनात् तदन्येषामपि व्रात्यक्षत्रियरूपकरणानां तथैवाचार इति गम्यते।

करणशब्दे उदा॰। तज्जातिस्त्रियां संयोगोपधत्वात् टाप् पुंयोगे तु ङीष्। कायस्थिष्ठत्यनया स्था—करणे घञर्थे क ६त॰ टाप्। २हरीतक्यां मेदि॰ ४धात्रीवृक्षे जटा॰ ५काकोल्यां भरत; ६एलाद्वये ७तुलस्याञ्च राजनि॰।

कायस्थैर्य्य न॰ ६त॰। रसायनादिना देहपिण्डस्य स्थिरतायाम् कायस्य बहुकालस्थायितायाम् साधनञ्च सर्व्व॰ सं॰। "अपरे माहेश्वराः परमेश्वरतादात्म्यवादिनोऽपि पिण्डस्थैर्य्ये सर्व्वाभिमता जीवन्मुक्तिः सेत्स्यतीत्यास्थाय पिण्डस्थैर्य्योपायं पारदादिपदवेदनीयं रसमेव सङ्गिरन्ते" इत्युपक्रम्य दर्शितं रसेश्वरशब्दे विस्तरेण वक्ष्यते।

कायाकाशसम्बन्धसंयम पु॰ पात॰ सूत्राद्युक्ते संयमभेदे। स च पात॰ सूत्रादौ फलसहितोदर्शितो यथा "कायाकाशयोः सम्बन्धसंयमात् लघुतूलसमापत्तेराकाशगमनम्" पात॰सू॰ऐश्वर्य्यशब्दे १५४९पृ॰ विवृतमिदम्।

कायिक त्रि॰ कायेन निर्वृत्तं ठक्। देहनिर्वृत्ते प्राण्यपायादौ कर्म्मणि। "अदत्तानामुपादानं हिंसा चैवाऽविधानतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतम्" ति॰त॰दशविधपापकीर्त्तने वाचस्पति॰। "मनसा तु कृतं कर्म मनसैवोपभुञ्जते। वाचा वाचा कृतं कर्म कायेनैव तु कायिकम्" मा॰भा॰धृता स्मृतिः।

कायिका स्त्री कायेन तद्व्यापारेण निर्वृत्ता ठक्। १बलीवर्द्दादिकायपरिश्रमसाध्ये वृद्धिभेदे। "दोहवाह्यकर्मयुता कायिका समुदा हृता" व्यासः। मूलधनाविरोधेन प्रत्यहमधमर्णदेयपणपादादिरूपायां २वृद्धौ च। "कायाविरोधिनी शश्वत् पणपादाद्या तु कायिका" नारदः। ऋणादानशब्दे विवृतिः।

कार पु॰ कृ—कृतौ घञ्। १क्रियायाम् २यत्ने "सकारनानारकासा"इत्यादि माघः।"सकाराः उद्यताः सोत्साहाः"मल्लि॰ करणे घञ्। ३बले। कस्य सुखस्यारः प्राप्तिर्यत्र। ४रतौ विश्वः कृ—हिंसायां भावे घञ्। ५बधे धातूनामनेकार्थत्वात् ६निश्चये। कर्मणि घञ्। ७पूजोपहारे बलौ। कं सुखमृच्छत्यनेन ऋ—करणे ^ ६त॰। ८ पत्यौ कं सुखं निर्वृतिमृच्छति कर्त्तरि अण्। १०यतिरूपे प्रव्रज्यान्विते चतुर्थाश्रमे च शब्दरत्ना॰ कं जलं नियम्येन ऋच्छति अण्। ११हिमाचले मेदि॰। करकायां भवम् अण् पृषो॰ कलोपः। १२करकाजले न॰ सुश्रुतः। "तत्र त्वन्तरीक्षं चतुर्विधं तद्यथा धारं कारं तौषारं हैमञ्चेति" सुश्रुते कारमित्यत्र कारकमित्येव पाठः समुचितः ककारलोपः लिपिकरप्रमादात् इति बोध्यम्। कर्मण्युपपदे कृ—अण्। स्वर्णकार कुम्भकार इत्यादौ तत्तत्कर्मकारके त्रि॰। स्त्रियां टाप्, बोपदेवमते कर्मणि अण् टित्त्वात् ईप् इति भेदः।

कारक न॰ करोति कर्त्तृत्वादिव्यपदेशान् कृ—ण्वुल्। १कर्त्तृत्वादिसंज्ञाप्रयोजके कर्म्मणि—क्रियायाम्। "कारके" पा॰। कर्त्तृत्वादिव्यपदेशकारिण्यां क्रियायामित्यर्थः। करोति क्रियां निष्पादयति कृ—ण्वुल्। २क्रियानिष्पादकेषु कर्त्तृकर्मादिषु कारकसंज्ञान्वितेषु न॰ तेषाञ्च क्रियायामेवान्वयः"सम्बोधनान्तं कृत्वोर्थाः कारकं प्रथमोक्तिः। धातुसम्बन्धाधिकारविहितमसमस्तनञ्। तथा यस्य च भावेन, षष्ठी चेत्युदितं द्वयम्। सम्बन्धषाष्टकस्यास्य क्रिययैवावधार्य्यताम्" इति हयुक्तेः। वैयाकरणभूषणकारमते कारकलक्षणादिकं शब्दार्थरत्नेऽस्माभिर्दर्शितं यथा "तत्र कारकत्वं नाम क्रियाजनकशक्तिमत्त्वं करोति क्रियां

निर्व्वर्त्तयतीति महाभाष्ये व्युत्पादनात् साधकं क्रियानिष्पादकं कारकसंज्ञं भवतीति वार्त्तिकोक्तेश्च। द्रव्यस्य स्वतस्तथात्वाभावेऽपि शक्त्याऽऽविष्टस्यैव तस्य तथात्वम्। ततश्चान्वयव्यतिरेकाभ्यात् शक्तिरेव कारकमिति मतान्तरं तदुक्तं हरिणा“स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे। क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुरिति”। शक्तिशक्तिमतोरभेदाच्च द्रव्यं कारकमिति व्यवहारइत्यवधेयम्, एवञ्च क्रियाजनकत्वेन सर्व्वेषां कर्त्तृत्वेऽपि स्वस्वावान्तरव्यापारविवक्षयैव करणत्वादिकं यथोक्तं हरिणा” “निष्पत्तिमात्रे कर्त्तृत्वं सर्वत्रैवास्ति कारके। व्यापारभेदापेक्षायां करणत्वादिसम्भवः”इति। तद्भेदश्च मञ्जूषायां दर्शितोयथा—“कर्त्तुः कारकान्तरप्रवर्त्तनव्यापारः, करणस्य क्रियाजनकाव्यवहितव्यापारः, क्रियाफलेनोद्देश्यत्वरूपव्यापारस्य कर्म्मणः, कर्त्तृकर्म्मव्यवहितक्रियाधारणव्यापारोऽधिकरणस्य, प्रेरणानुमत्यादिव्यापारः सम्प्रदानस्य, अवधिभावोपगमव्यापारोऽपादानस्येति” तत्र करणाधारकर्म्मकर्त्तृणां क्रियाजनकत्वं सुव्यक्तं तैर्व्विना क्रियानुत्पत्तेः फलरूपक्रियाजनकत्वेन विशिष्टक्रियाजनकत्वाच्च कर्म्मणस्तथात्वं घटं करोति कटं करोतीत्यादौ च बुद्धिस्थघटादेरपि पूर्व्वकालत्वेन करणादिहेतुत्वात्तथात्वम् अतएव तेषु कर्त्तृत्वविवक्षया काष्ठं पचति, स्थाली पचति, ओदनः पच्यते इत्यादि प्रयोगः। अपादानस्य अवधिभावोपगमेन हेतुत्वात् सम्प्रदानस्य च दातृबुद्धिस्थतया पूर्व्वकालत्वेन हेतुत्वाच्च क्रियानिर्व्वाहकत्वेऽपि न कर्त्तृत्वविवक्षा अनभिधानात् तदुक्तं महाभाष्ये “पर्य्याप्तं करणाधिकरणकर्म्मणामेव कर्त्तृत्वं निदर्शितमपादानादीनां कर्त्तृत्वानिदर्शनायेति”।

तच्च कारकं षड्विधम् अपादानसम्प्रदानकरणाधिकरणकर्म्मकर्त्तृभेदात्। एतेषाञ्च एकस्या क्रियायामुभयप्राप्तौ “विप्रतिषेधे परं कार्य्यम्” इत्युक्तेरुत्तरोत्तरप्राबल्यं तदुक्तं हरिणा—“अपानानसम्प्रदानकरणाधारकर्म्मणाम्। कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते” इति। गुणप्रधानक्रिययोरेकस्मिन् द्रव्ये उभयशक्तिप्रसङ्गे तु “प्रधानेन व्यपदेशा भवन्तीति” न्यायात् कार्य्यस्य प्रधानानुरोधित्वात् प्रधानशक्तिबोधिकैव विभक्तिर्ज्जायते गुणक्रियाशक्तिस्तु तात्पर्य्यवशादेव तत्र प्रतीयते तदुक्तं हरिणा “प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते। प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते। यथा गुणे तथा तद्वदनुक्तापि प्रतीयते” इति अतः स्थित्वाश्वेन गच्छतीत्येव प्रयोगः।

न्यायमते धात्वर्थे प्रकारतया भासमाने २सुबर्थे तन्मते हि सुबर्थस्यैव कारकत्वं मुख्यम्। तदर्थान्वयित्वाच्च पदार्थस्य तत्त्वंगौणम्। तथाच विभक्त्यर्थद्वारा क्रियान्वयित्वं कारकत्वम् इति तेनापादानादेः क्रियानिष्पादकत्वाऽभावेऽपि न क्षतिः स्वान्वयिविभक्त्यर्थद्वारा क्रियान्वयित्वात्। यथा च तस्यान्वयः तथा शब्द॰प्रका॰ तथा दर्शितं यथा “कारकार्थेतरार्थे च सुप् द्विधा च विभज्यते। धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्। इत्त्या कारकस्य बोधिका तदन्यस्य चेत्येवं द्विविधोऽपि सुपो विभागस्तत्र यद्धातूपस्थाप्ययादृशार्थेऽन्वये प्रकारीभूय भासते यः सुबर्थः स तद्धातूपस्थाप्यतादृशक्रियायां कारकम्। वृक्षात् पतति, व्याघ्राद्बिभेति इत्यादौ, ब्राह्मणाय ददाति, पुत्राय क्रुध्यतीत्यादौ, दात्रेण छिनत्ति घटत्वेन जानातीत्यादौ स्थाल्यां पचति, गुरौ भासत इत्यादौ, ग्रामं गच्छति घटं पश्यतीत्यादौ, चैत्रेण पच्यते घटेन भूयत इत्यादौ च पतप्रभृतिधात्वर्थे पतनादौ पञ्चम्याद्युपस्थितो विभागादिः प्रकारीभूय भासते इति तत्तद्धातूपस्थापिततत्तत्क्रियायां विभागादिकं प्रकृते कारकमतो धात्वर्थे स्वार्थबोधकतया तत्रत्यपञ्चम्यादिः कारकविभक्तिरुच्यते। यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स एव तादृशधात्वर्थे कारकतया व्यपदिश्यते, तेन वृक्षात् पततीत्यादौ वृक्षादेरपि पतनादिक्रियायामपादानादिकारकत्वव्यवहारः। स्तोकं पचतीत्यादौ क्रियाया प्रकारीभूतोऽपि स्तोकादिर्न कारकं सुपानुपस्थापनात्, द्वितीया तु तत्र क्लीवलिङ्गत्ववदानुशासनिक्येव स्तोकपाचकइत्यादिकस्तु तत्पुरुषो गिरिकाण इत्यादिवद्विशेषविधेरेव। षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते, तण्डुलस्य पचतीत्यप्रयोगात् इत्यतः सम्बन्धो न कारकं, न वा तद्दर्शिकापि षष्ठ्यादिः कारकविभक्तिः। अतएव “क्रियाप्रकारीभूतोऽर्थः कारकं तच्च षड्विधम्। कर्त्तृकर्मादिभेदेन, शेषः सम्बन्ध इष्यत” इति शाब्दिकाः स्मरन्ति”। “कारकव्यपदिष्टे च श्रूयमाणक्रिये पुनः”“कारकं प्रथमोवतिः” इति च भर्त्तृहरिः। ४कर्त्तृमात्रे त्रि॰ मेदि॰। “दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः” गीता। जगतां कारकः कृष्णः” वोपदेवः तुमर्थे ण्वुल्। ५कर्त्तुमित्यर्थे। तद्योगे कर्म्मणि न षष्ठी अतोघटं कारको व्रजत्येव प्रयोगः। “धातुसम्बन्धे प्रत्ययाः” पा॰ इत्यधिकारे तस्य विधानेनतदर्थस्य क्रियायामेवान्वयः प्रागुक्तहरिवाक्यात्।

करकायाइदं तत्र भवं वा अण्। ६करकासम्बन्धिनि त्रि०। ७तन्निष्यन्दिजले न० राजनि० ८अपत्तु स्त्री ङीप्। तल्लक्षणगुणादि भावप्र० उक्तं यथा "दिव्यवाय्वग्नि-संयोगात् संहताः खात् पतन्ति याः। पाषाणखण्ड-वच्चापस्ताः कारक्योऽमृतोपमाः। करकाजं जलं रूक्षं विशदं गुरु च स्थिरम्। दारुणं शीतलम् सान्द्रं पित्तहृत् कफवातकृत्"। [२९९पृ०विवृतिः

कारकदीपक न० दीपकभेदरूपार्थालङ्कारभेदे अलङ्कारशब्दे

कारकविभक्ति: स्त्री कारकशक्तिबोधिका विभक्तिः। व्याकरणोक्ते कर्म्मादिबोधके विभक्तिभेदे कारकशब्दे विवृतिः। "उपपदविभक्तेः कारकविभक्तिर्गरीयसीति" व्या०प०।

कारकर त्रि० कारं करोति कृ—ट। क्रियाकारके दासादौ।

कारकुक्षीय पु० शाल्वदेशे हेम० तत्र भवः अण् बहुषु तस्य लुक्। तद्देशवासिजनेषु बहुव०।

कारज त्रि०। कारात् क्रियातो जायते जन-ड। १क्रियाजन्ये करजे नखे भवं तस्येदं वा अण्। २नखभवे ३नखसम्बन्धिनि च त्रि०।

कारञ्ज त्रि०करञ्जस्य तत्फलस्येदम् अण्। करञ्जवृक्षफलतैलादौ तत्तैलगुणादि सुश्रुते उक्तं यथा। निम्बातसीत्युपक्रमे " करञ्जेङ्गुदीशिग्रुसर्षपसुवर्च्चलाविडङ्गज्योतिष्मतीफलतैलानि तीक्ष्णानि लघून्युष्णवीर्य्याणि कटूनि कटुविपाकानि सराण्यनिलकफकृमिकुष्ठप्रमेहशिरोरोगहराणि चेति"।

कारण न० कारयति क्रियानिवर्त्तनाय प्रवर्त्तयति कृ—णिच्—ल्यु। १क्रियानिष्पादके हेतौ २उद्देश्ये ३देहे ४इन्द्रिये। कृ-वधे स्वार्थे णिच्—भावे ल्युट्। ५वधे मेदि०। ६कर वाद्यभेदे। करणएव कारणः। ७कायस्थे पु०। करणमेव स्वार्थे अण्। ८साधने ९कर्म्मणि। १०गीतभेदे रत्नकोषः। न्यायमते कारणत्वलक्षणभेदादिकं भाषा० सुक्तावल्योर्दर्शितं यथा।

"पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम्" भाषा०।

पारिमाण्डल्येति पारिमाण्डल्यम् अणुपरिमाणं, कारणत्वं तद्भिन्नानामित्यर्थः। अणुपरिमाणं तु न कस्यापि कारणं तद्धि स्वाश्रयारब्धद्रव्यपरिमाणारम्भकं भवेत् तच्च न सम्भवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् महदारब्धस्य महत्तरत्ववत् अणुजन्यस्याणुतरत्वप्रसङ्गात् एवं परममहत्परिमाणम् अतीन्द्रियसामान्यं विशेषश्चेति बोध्यम्। इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं, ज्ञायमानसामान्यं न प्रत्यासत्तिः, ज्ञायमानं लिङ्गं नानुमितिकारणम् इत्यभिप्रायेण। मानसप्रत्यक्षे आत्मसहत्त्वस्य कारणत्वात् महत्परिमाणं कालादेर्बोध्यं तस्यापि न कारणत्वमित्याचार्य्याणामाशय इत्यन्ये तन्न ज्ञानातिरिक्तं प्रति कारणताया एव आचार्य्यैरुक्तत्वात्" मुक्ता०।

"अन्यथासिद्धिशून्यस्य नियता पूर्ब्ववर्त्तिता। कारणत्वं भवेत् तस्य त्रैविध्यं परिकीर्त्तितम्। समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम्। एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम्"। यत्समवेतं कार्य्यं भवति ज्ञेयन्तु समवायिजनकं तत्। तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात्" भाषा०।

नतु कारणत्वं किम्? अत आह अन्यथेति। तस्य-कारणत्वस्य। तत्र-समवायिकारणे, आसन्नं कारणं द्वितीयमसमवायिकारणमित्यर्थः। अत्र यद्यपि तुरीतन्तुसंयोगानां पटासमवायिकारणत्वं स्यात्, एवं वेगादीनामपि अभिघाताद्यसमवायिकारणत्वं स्यात् एवं ज्ञानादिकमिच्छाद्यसमवायिकारणं स्यात्, तथापि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयं, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव, एवं वेगादिकं वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्य्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं न देयम् आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वं नास्ति तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। तत्र समवायिकारणे प्रत्यासन्नं द्विविधं कार्य्यैकार्थप्रत्यासत्त्या,कारणैकार्थप्रत्यासत्त्या च। आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं, तत्र कार्य्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं तत्र घटरूपं प्रति कारणं घटः तेन सह कपालरूपस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति, तथाच क्वचित् समवायसम्बन्धेन, क्वचित् स्वसमवायिसमवायसम्बन्धेनेति फलितार्थः। इत्थञ्च कार्य्यकारणैकार्थान्यतरप्रत्यासत्त्या कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्य्यवसन्नम् आभ्यां समवायिकारणासमवायिकारणाभ्यां भिन्नं कारणं तृतीयं निमित्तकारणमित्यर्थः" मुक्ता०।

कारणताग्राहकं प्रमाणं च सर्व्वदर्शनसंग्रहे दर्शितं यथा "अन्वयव्यतिरेकाविनाभावनिश्चायकाविति ननु पक्षे साध्यसाधनयोरव्यभिचारो दुरवधारणो भवेत् भूते, भविष्यति, वर्त्तमाने—अनुपलभ्यमाने च व्यभिचारशङ्काया अनिवारणात्। ननु तथाविधस्थले तावकेऽपि मते

व्यभिचारशङ्का दुष्परिहरेति चेत् मैवं वोचः, विनापि कारणं कार्य्यमुत्पद्यतामित्येवं विधायाः शङ्काया व्याघातावधिकतया निवृत्तत्वात्। तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने व्याघातादयो नावतरेयुः तदुक्तम् “व्याघातावधिराशङ्केति” तस्मात्तदुत्पत्तिनिश्चयेन अविनाभावो निश्चीयते तदुत्पत्तिनिश्चयश्च कार्य्यहेत्वोः प्रत्यक्षोपलम्भानुपलम्भपञ्चकनिबन्धनः। कार्य्यस्योत्पत्तेः प्रागनुपलम्भः१ कारणोपलम्भे२ सति उपलम्भः ३उपलब्धस्य पश्चात् कारणानुपलम्भात्४ अनुपलम्भः५ इति पञ्चकारण्या धूमधूमध्वजयोः कार्य्यकारणभावो निश्चीयते”।

कारणत्वञ्च नियतपूर्व्वसत्त्वं तच्च कार्य्याव्यवहितप्राक्क्षणावच्छेदेन कार्य्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमिति नैयायिका मन्यन्ते। तच्च सत्त्वगर्भं न वेति सन्देहे सत्त्वगर्भं श्रीहर्षखण्डने निराकृतं यथा

“ननु तदसत्ताविशेषात्तत्कार्य्यस्यान्यदापि प्रसङ्गः, नकार्य्यस्याद्यसत्तावदन्यदापि सामग्रीसत्ताऽविशेषात्तवापि किं नान्यदा कार्य्यजन्म?। अथ न मम तदानीन्तनं सामग्रीसत्त्वं तदातनस्य कार्य्यजन्मनो नियामकं किन्तु ततः प्राक् सामग्रीसत्त्वं तथादर्शनात्। तर्हि ममापि कालान्तरस्यमपि तदसत्त्वं तदातनकार्य्यजन्मनोनियामकं, तथादर्शनादेव। मम तदव्यवहितोत्तरत्वं तदा कार्य्यजन्मनियामकमिति चेत् न असमसमयत्वादागन्तुकत्वाद्यविशेषेण नियम्यनियामकव्यवस्थानुपपत्तेः तस्मादन्यदास्थाया एव सामग्र्यास्तदा कार्य्यनियमोऽभ्युपेयः तथादर्शनादित्येव मन्तव्यम्। तथा च समः समाधिः। तथापि कार्य्यजनककालस्य कोविशेषः। अन्यथा यद्विशेषान्तरं तदपि विशेषान्तरवतः कालस्य स्यादिति अपर्य्यवसानमेव पर्य्यवस्येत्, तत्काल इत्याकलय। तथापि तत्कालस्यानुगतं किं रूपम्? इति चेत्न रूपान्तरवतोऽपि किं रूपम्?- इत्यपि पर्य्यनुयोगस्यानुवृत्तेः। किञ्च “अन्तर्भावितसत्त्वञ्चेत्कारणं तदसत्ततः। नान्तर्भावितसत्त्वं चेत् कारणं तदसत्ततः”। तथाह्यन्तर्भूतसत्त्वं यदि कारणत्वं तदा स्वविशिष्टे स्ववृत्तिरसतः स्वाश्रयत्वमापादयति। विशिष्टस्यार्थान्तरत्वेऽपि च स्वस्मिन् स्ववृत्तिव्यतिरेकवत् स्वविशिष्टे स्ववृत्तिव्यतिरेकनियमदर्शनात् न सैव सत्ता तस्मिन्निति अन्यस्यास्तस्याविशिष्टवृत्त्यभ्युपगमे तामसन्निवेश्य कारणत्वमभ्युपगन्तुः सर्व्वथैव कारणमसत्पर्य्यवस्यति। अपरापरसत्तानिवेशने चापर्य्यवसानमेव। न च सत्ताभेदानन्त्यमस्त्येवेत्यपि पादप्रसारिका निस्ताराय, सत्ताभेदे हि सद्बुद्धिव्यवहारानुगमननिबन्धनलक्षणः प्रथमापि सत्ता न स्यादिति सत्त्ववृद्धिमिच्छतो मूलमपि ते नष्टमिति कष्टतरम्। न च स्वरूपसत्तोपगमाय स्वस्ति, भिन्नामप्यनुगतबुद्ध्याद्याधानपदेऽभिषिञ्चता त्वया जातिमात्राय जलाञ्जलिर्वितीर्य्येत। मा भूदनुगतिः स्वरूपसत्त्वस्येति च वदन् तद्धर्मिणो कारणतां कथमनुगमयितासि?। किञ्च स्वरूपसत्त्वं स्वरूपात् घटाद्यात्मनो नाधिकमसतोऽपि स्वरूपं स्वरूपमेव न ह्यसन् घटादिर्न घटादिः तथा सति घटादिर्नित्योऽपि न स्यात् असतोऽघटादित्वात्। अथ सदपि सत्तामनन्तर्भाव्य कारणं, तदानीमसदपि तत्तथास्तु सत्तासत्तयोः कारणकोट्यप्रवेशाविशेषात्। अथ न सत्ताकारणकोटिनिविष्टा किन्तु कारणत्वं सत्त्वं नियतपूर्व्वसत्तां हि कारणतामन्ये इति मन्यसे तर्हि मत्पक्षे सैव कारणताऽस्तु तर्हि कारणसत्तामभ्युपगतवानसीति घट्टकुट्यां प्रभातमिति चेन्न भावानवबोधात् सत्तामसतोऽभ्युपगच्छताऽपि सत्ता किं मयाभ्युपगतैव? अन्यथा काचावसतीति त्वमपि किं सत्तान्तरसत्तामन्तर्भाव्य कारणत्वमिच्छसि? नत्वेवं, पूर्ववत् क्वापि सत्तात्यागो वा अनवस्थायां पर्य्यवसानं स्यात् असत्ताऽविशेषात्। असत्त्वाविशेषे कार्य्यनियमः कथं स्यात् इति चेन्न सत्ताविशेषेऽपि तुल्यत्वात्। सत्त्वेऽप्यन्वयाद्यनुविधानं तस्य तज्जातीयस्य वा त्वत्पक्षे त्वसत्त्वाविशेषात् व्यतिरेकः परं, सोऽप्यनियतो यदा कारणाभावस्तदा कार्य्याभावावश्यम्भावाभ्युपगमात् नित्यासतः कारणस्यासत्त्व एव कदाचित्कार्य्योत्पादात् अन्वयस्तु न कदाचिदपीति चेन्न तुल्यत्वात्। अन्वयोनास्तीत्यभ्युपगच्छतापि अन्वयोपगमात्। अन्वयस्यापि सत्तान्तर्भावे कथितदोषापत्तेः, एतेन “आशामोदकतृप्ता ये ये चोपार्ज्जितमोदकाः। रसवीर्य्यविपाकादि तेषां तुल्यं प्रसज्यते” इत्यस्यापि बाधकत्वमाशामोदकायते। सत्तान्तर्भावानन्तर्भावाभ्यां प्रत्यादेशात् आशामोदकादिनापि च रसवीर्य्यविपाकादिजननात् तदसत्कथं कार्य्यं स्यात्? इति चेन्न सत्तामन्तर्भाव्यकार्य्यत्वोपगमे कारणवत्कार्य्येऽपि उक्तदोषस्यानन्तर्भावे वाऽविशेषस्य पूर्व्ववदावृत्तेः तस्मात् “पूर्व्वसम्बन्धनियमे हेतुत्वे तुल्य एव नौ। हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा”। आस्तां प्रतिबन्दिप्रपञ्चः कथं पुनरसतः कारणत्वमवसेयम्? प्राक्सत्त्वनियमस्य विशेषस्यानभ्युपगमादिति चेन्न इदमनुगतनियतं प्राक् सदिति बुद्ध्या विशेषात्। भ्रान्त्यैवं-

बुद्धिगोचरेऽतिप्रसङ्ग इति चेन्न याडृश्या हि धिया लिचतुरादिकत्वानुधावनविश्रान्तया वस्तुसत्त्वनिश्चयस्ते, ताडृश्यैव विषयीकृतस्य ममापि कारणतानिश्चयः, केवलं ततः परास्वपि कक्षासु बाधात् पूर्व्वपूर्व्वभ्रान्तिसम्भवेन न तत एव सत्त्वावधारणं वयं मन्यामहे इति विशेषः”।

तत्र हेतौ “पञ्चेमानि महाबाहो ! कारणानि निबोध मे” गीता। “न लिङ्गं धर्म्मकारणम्” मनुः। उद्देश्ये “तस्यागमनकारणम्” रघुः। फलस्य कारणत्वञ्च इच्छाद्वारा, उपायेच्छां प्रति फलेच्छायाः कारणत्वात् सर्वोहि लोकः फलमिच्छन्नेव तदुपाये प्रवर्त्तमानो दृश्यते इति तस्य तथात्वम्। कारणमस्त्यस्य अर्श० अच्। १०उत्तरभेदे उत्तरशब्दे विवृतिः। “मिथ्योत्तरे पूर्व्ववादे कारणे प्रतिवादिनि” मिता० स्मृतिः। भावे तल् कारणता स्त्री। त्व कारणत्व न०कारणभावे “एकः कारणतां गतः” कुमा०। “कारणत्वं भवेत्तस्य” भाषा०।

कारणकारण न० ६त०। अन्यथासिद्धपदार्थभेदे यथा कुलालः घटादीनां कारणं, तत्कारणं तज्जनकः घटं प्रत्यन्यथासिद्धः। व्यापारद्वारा तु न कारणकारणस्यान्यथासिद्धिः। यथा कुठारादीनां, ते हि छेदनक्रियाकारणच्छेद्यसंयोगजनका अपि नान्यथासिद्धाः एवं व्याप्तिज्ञानस्य अनुमितिजनकपरामर्शरूपस्य, चक्षुरादीनां प्रत्यक्षजनकविषयसंयोगरूपस्य च कारणस्य कारणत्वेऽपि नान्यथासिद्धिः। “नहि व्यापारेण व्यापारिणोऽन्यथासिद्धिः” इत्युक्तेः २परमेश्वरे च सहि सर्वेषां निमित्तोपादानकारणानामधिष्ठातृत्वेन प्रयोजकत्वात् तथा, ३प्रयोजके कारणकारणस्याकारणत्वेऽपि प्रयोजकत्वमस्त्येवेति नैयायिकादयः।

कारणगुण पु० ६त०। उपादानकारणस्य गुणे “कारणगुणाः कार्य्यगुणानारभन्ते” इति न्यायम०। यथा तन्त्वादिरूपोपादानगुणाः शुक्लादयः, कार्यस्य पटस्य शुक्लगुणारम्भका भवन्ति न वैपरीत्येनेति आकरे स्थितम्।

कारणगुणोद्भव पु०कारणगुणा उद्भवोऽस्य। उपादान कारणगुणेनोपपन्ने गुणभेदे। ते च गुणा भाषायां दर्शिता यथा। “अपाकजास्तु स्पर्शान्ता द्रवत्वञ्च तथाविधम्। स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम्। स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः”। स्पर्शान्ताः। रूपरसगन्धस्पर्शाः घटादौ पाकजरूपादीनां कारणगुणपूर्व्वकत्वाभावात् अपाकजा इत्युक्तम्। तथाविधं अपाकजमिति। “स्पर्शान्तानुष्णाशीतो याह्यः। एकपृथक्त्वेत्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयात् एकत्वं पृथक्त्वञ्च ग्राह्यम् पृथक्त्वपदेन चैकपृथक्त्वं ग्राह्यम्” मुक्ता०। [विवृतिः।

कारणमाला स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ३९८पृ० [विवृतिः।

कारणशरीर न० कारणरूपं शरीरम्। वेदान्तिमते अज्ञानरूपे शरीरे। वेदान्तसारे तद्विवृतिः दृश्या।

कारणा स्त्री कृ–हिंसायां स्वार्थे णिच्–भावे युच्। १तीव्रवेदनायाम् अमरः। कृ–णिच्-युच्। २प्रेरणायाम्

कारणिक त्रि०कारणैश्चरति ठक्। कारणेन विचारके १परीक्षके अमरः। करणस्येदम् काश्या० ठञ् ञिठ् वा। २करणसम्बन्धिनि त्रि० स्त्रियां ठञि षित्त्वात् ङीष् ञिठ इदुच्चारणार्थः स्त्रियां टाप् इति भेदः।

कारणोत्तर न० कारणेन उत्तरम्। व्यवहारेषु वाद्युपन्यस्तं वस्तु सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलतासाधनकारणकथनरूपे उत्तरभेदे, यथा अयं शतं मे धारयतीत्यभियोगे सत्यं गृहीतं किन्तु शोधितम्, इयं भूमिर्मदीयानेन भुज्यते इत्यभियोगे सत्यमेतस्य भूमिः किन्तु दानेन क्रयादिना वा इदानीं ममेत्युत्तरम्। उत्तरशब्दे १०९०पृ० विवृतिः।

कारण्डव पुंस्त्री रम-ड तस्य नेत्त्वम् रण्डः ईषत् रण्डः कारण्डः तं वाति वा–क करण्डस्येदं कारण्डं तदाकारं वाति वा–क वा। हंसभेदे “हंसकारण्डवोद्गीताः सारसाभिरुताश्च या” भा० व०२८अ०। स्त्रियां जातित्वात् ङीष्। अस्य अजिरादि० पाठात् मतौ संज्ञायामपि न दीर्घः कारण्डववती नदीविशेषः। “हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवेत्युपक्रमे “प्लवाः समवारिणश्च” इति सुश्रुते तस्य प्लवत्वं समवारित्वञ्चोक्तम्।

कारण्डव्यूह पु० बौद्धभेदे त्रिका० २बौद्धशास्त्रविशेषे च।

कारन्धम पु० करन्धमस्यापत्यं शिवा० अण्। १करन्धमनृपस्यापत्ये अविक्षिन्नाम्नि नृपे तदुत्पत्त्यादि “एतस्मात् कारणाद्राजन् ! विश्रुतः स करन्धमः। तस्य कारन्धमः पुत्रस्त्रेतायुगमुखेऽभवत्। इन्द्रादनवरः श्रीमान् देवैरपि सुदुर्जयः। तस्य सर्व्वे महीपालाः वर्त्तन्ते स्म वशे तदा। स हि सम्राडभूत्तेषां वृत्तेन च बलेन च। अविक्षिन्नाम धर्म्मात्मा वीर्य्येणेन्द्रसमोऽभवत्” इत्युपक्रमे “तस्य पुत्रोऽतिचक्राम पितरं गुणवत्तया। मरुत्तोनाम धर्म्मज्ञश्चक्रवर्त्ती महायशाः” भा० आश्व० ४अ० उक्तम्। २गोत्रापत्ये अण्। करन्धमपौत्रे अविक्षिन्नृपपुत्रे २मरुत्ते नृपे च। “कथं वशे मरुत्तस्य” इत्युपक्रमे “यदि शुश्रूषसे पार्थ। शृणु

कारन्धमं नृपम्” तत्रैव २अ॰ मरुत्तस्य कारन्धममिति विशेषणात्। तस्येदमण्। २नारीतीर्थभेदे न॰ तत्तीर्थप्रादुर्भावादि भा॰ आ॰ २१७,१८अ॰। यथा

“ततः समुद्रे तीर्थानि दक्षिणे भरतर्षभः। अभ्यगच्छत् सुपुण्यानि शोभनानि तपस्विभिः। वर्ज्जयन्ति स्म तीर्थानि पञ्च तत्र तु तापसाः। आकीर्णानि यान्यासन् पुरस्तात्तु तपस्विभिः। अगस्त्यतीर्थं सौभद्रं पौलोमञ्च सुपावनम्। कारन्धमं प्रसन्नञ्च हयमेधफलञ्च तत्। भारद्वाजस्य तीर्थन्तु पापप्रशमनं महत्। एतानि पञ्च तीर्थानि ददर्श कुरुसत्तमः। विविक्तान्युपलक्ष्याथ तानि तीर्थानि पाण्डवः। दृष्ट्वा च वर्ज्ज्यमानानि मुनिभिर्धर्म्मबुद्धिभिः। तपस्विनस्ततोऽपृच्छत् प्राञ्जलिः कुरुनन्दनः। तीर्थानीमानि वर्ज्यन्ते किमर्थं ब्रह्मवादिभिः। तापसा ऊचुः। ग्राहाः पञ्च वसन्त्येषु हरन्ति च तपोधनान्। तत एतानि वर्ज्यन्ते तीर्थानि कुरुनन्दन!। वैशम्पायन उवाच। तेषां श्रुत्वा महाबाहुर्व्वार्य्यमाणस्तपोधनैः। जगाम तानि तीर्थानि द्रष्टुं पुरुषसत्तमः। ततः सौभद्रमासाद्य महर्षेस्तीर्थमुत्तमम्। विगाह्य सहसा शूरः स्नानं चक्रे परन्तपः। अथ तं पुरुषव्याघ्रमन्तर्जलचरो महान्। जग्राह चरणे ग्राहः कुन्तीपुत्रं धनञ्जयम्। स तमादाय कौन्तेयो विस्फुरन्तं जलेचरम्। उदतिष्ठन्महाबाहुर्ब्बलेन बलिनां वरः। उत्कृष्ट एव ग्राहस्तु सोऽर्ज्जुनेन यशस्विना। बभूव नारी कल्याणी सर्व्वाभरणभूषिता। दीप्यमाना श्रिया राजन्! दिव्यरूपा मनोरमा। तदद्भुतं महद्दृष्ट्वा कुन्तीपुत्रो धनञ्जयः। तां स्त्रियं परमप्रीत इदं वचनमब्रवीत्। का वै त्वमसि कल्याणि! कुतो वासि जलेचरी। किमर्थञ्च महत् पापमिदं कृतवती पुरा?। वर्गोवाच। अप्सरास्मि महाबाहो! देवारण्यविहारिणी। इष्टा धनपतेर्नित्यं वर्गा नाम महाबल!। मम सख्यश्चतस्रोऽन्याः सर्व्वाः कामगमाः शुभाः। ताभिः सार्द्धं प्रयातास्मि लोकपालनिवेशनम्। ततः पश्यामहे सर्व्वा ब्राह्मणं संशितव्रतम्। रूपवन्तमधीयानमेकमेकान्तचारिणम्। तस्य वै तपसा राजंस्तद्वनं तेजसा वृतम्। आदित्य इव तं देशं कृत्स्नं सर्व्वं व्यकाशयत्। तस्य दृष्ट्वा तपस्तादृग्रूपञ्चाद्भुतमुत्तमम्। अवतीर्णाः स्म तं देशं तपोविघ्नचिकीर्षया। अहञ्च सौरभेयी च समीची बुद्बुदा लता। यौगपद्येन तं विप्रमभ्यगच्छाम भारत!। गायन्त्योऽथ हसन्त्यश्च लोभयन्त्यश्च तं द्विजम्। स च नास्मासु कृतवान् मनो वीर! कथञ्चन। नाकम्पत महातेजाः स्थितस्तपसि निर्म्मले। सोऽशपत् कुपितोऽस्मांस्तु ब्राह्मणः क्षत्रियर्षभ!। ग्राहभूता जले यूयं चरिष्यथ शतं समाः!। वर्गोवाच। ततो वयं प्रव्यथिताः सर्व्वा भारतसत्तम!। अयाम शरणं विप्रं तं तपोधनमच्युतम्। रूपेण वयसा चैव कन्दर्पेण च दर्पिताः। अयुक्तं कृतवत्यः स्म क्षन्तुमर्हसि नो द्विज!। एष एव वधोऽस्माकं सुपर्य्याप्तस्तपोधन!। यद्वयं संशितात्मानं प्रलोब्धुं त्वामिहागताः। अवध्यास्तु स्त्रियः सृष्टा मन्यन्ते धर्म्मचारिणः। तस्माद्धर्म्मेण वर्द्धस्व नास्मान् हिंसितुमर्हसि। सर्व्वभूतेषु धर्मज्ञ! मैत्रो ब्राह्मण उच्यते। सत्यो भवतु कल्याण एवं वादो मनीषिणाम्। शरणञ्च प्रपन्नानां शिष्टाः कुर्व्वन्ति पालनम्। शरणं त्वां प्रपन्नाः स्मस्तस्मात्त्वं क्षन्तुमर्हसि। वैशम्पायन उवाच। एवमुक्तः स धर्म्मात्मा ब्राह्मणः शुभकर्म्मकृत्। प्रसादं कृतवान् वीर! रविसोमसमप्रभः। ब्राह्मण उवाच। शतं शतसहस्रन्तु सर्व्वमक्षय्यवाचकम्। परिमाणं शतं त्वेतन्नेदमक्षय्यवाचकम्। यदा च वो ग्राहभूता गृह्णतीः पुरुषान् जले। उत्कर्षति जलात्तस्मात् स्थलं पुरुषसत्तमः। तदा यूयं पुनः सर्व्वाः स्वं रूपं प्रतिपत्स्यथ। अनृतं नोक्तपूर्व्वं मे हसतापि कदाचन। तानि सर्व्वाणि तीर्थानि ततः प्रभृति चैव ह। नारीतीर्थानि नाम्नेह ख्यातिं यास्यन्ति सर्व्वशः। पुण्यानि च भविष्यन्ति पावनानि मनीषिणाम्। वर्गोवाच। ततोऽभिवाद्य तं विप्रं कृत्वा चापि प्रदक्षिणम्। अचिन्तयामापसृत्य तस्माद्देशात् सुदुःखिताः। क्व नु नाम? वयं सर्व्वाः कालेनाल्पेन तं नरम्। समागच्छेम यो नस्तद्रूपमापादयेत् पुनः। ता वयं चिन्तयित्वैव मुहूर्त्तादिव भारत!। दृष्टवत्यो महाभागं देवर्षिमुत नारदम्। संप्रहृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्युतिम्। अभिवाद्य च तं पार्थ! स्थिताः स्मो व्रीडिताननाः। स नोऽपृच्छद्दुःखमूलमुक्तवत्यो वयञ्च तत्। श्रुत्वा तत्र यथावृत्तमिदं वचनमब्रवीत्। दक्षिणे सागरानूपे पञ्च तीर्थानि सन्ति वै। पुण्यानि रमणीयानि तानि गच्छत मा चिरम्। तत्राशु पुरुषव्याघ्रः पाण्डवेयो धनञ्जयः। मोचयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः। तस्य सर्व्वा वयं वीर! श्रुत्वा वाक्यमिहागताः। तदिदं सत्यमेवाद्य मोचित्वा मां त्वयाकृतम्। एतास्तु मम ताः सख्यश्चतस्रोऽन्या जले स्थिताः। कुरु कर्म्म शुभं वीर! एताः शापाद्विमोक्षय!। वैशम्पायन उवाच। ततस्ताः पाण्डवश्रेष्ठः सर्व्वा एव विशाम्पते!। तस्माच्छापाददीनात्मा मोक्षयामास वीर्य्यवान्।

उत्थाय च जलात्तस्मात् प्रतिलभ्य वपुः स्वकम्। तास्तदाप्सरसो राजन्नदृश्यन्त यथा पुरा। तीर्थानि शोधयित्वा तु तथानुज्ञाय ताः प्रभुम्। चित्राङ्गदां पुनर्द्रष्टुं तदा मणिपुरं ययौ"।

कारन्धमिन् पु॰ स्त्री करएव कारस्तं धमति ध्मा-इनि पृषो॰। १कांस्यकारे स्त्रियां ङीप्। २धातुवादरते च मेदि॰

कारपचव पु॰देशभेदे। "अवभृथमभ्यवयन्ति यमुनां कारपचवं प्रति" कात्या॰श्रौ॰२४।६।१०"कारपचवो देशभेदस्तन्मध्ये यमुना वर्त्तते तां कारपचवदेशस्थां यमुनां प्राप्य तत्रावभृथमभ्यवयन्ति" संघ॰ व्या॰।

कारभ त्रि॰ करभस्येदम् अण्। करभसम्बन्धिनि मूलादौ "अर्योम्नं कारभं मूलं मातुषन्तु विषापहम्" सुश्रुतः।

कारभू स्त्री करएवकारः तस्य भूः। राजग्राह्यकरग्रहणभूमौ।

कारमिहिका स्त्री कारं जलसम्बन्धं मेहति मिह-सेके क ततः स्वार्थे क अत इत्त्वम्। कर्पूरे राजनि॰।

कारम्भा स्त्री॰ ईषत् रम्भा कोः कादेशः। प्रियङ्गुवृक्षे अम॰

कारयिष्णु त्रि॰ कृ–णिच्-इष्णुच्। कारयितरि।

कारव पु॰स्त्री कैति रवोऽस्य। काके त्रिका॰स्त्रियां ङीष्।

कारवल्ली स्त्री कुत्सितआरो गतिर्वल्ल्याः कर्म॰। कारवेल्ले (करेला)। कारवान् कर्म्मयुक्तः सन् लीयते ली–क्विप्। २काण्डीरे काण्डधरे राजनि॰।

कारवी स्त्री कारं वाति वा कके जलोपलक्षितवर्षाकाले रवोऽस्य कारवोमयूरस्तस्य पुच्छमिवाकारोऽस्त्यस्य अच्, कृ हिंसायां स्वार्थे णिच्–क्विप् काः तमवति अण् वा गौरा॰ ङीष्। १शतपुष्पायाम्, (मौर) २रुद्रजटायाम्, ३मयूरशिखालतायाम्। ४कारवेल्ले, (करेला) ५त्वक्पत्राम् (तेजपात) ६कृष्णजीरके च। ७क्षुद्रकारवेल्ले अमरः राजनि॰ ८काकयोषिति च।

कारवीरेय त्रि॰ करवीरेण निर्वृत्तादि करवीर+चतुरर्थ्यां सख्या॰ ढञ्। करवीरनिर्वृत्तादौ।

कारवेल्ल पु॰ कारेण वातगत्या वेल्लति वेल्ल-चालने अच्। १लताभेदे (करेला) २तत्फले न॰। "कारवेल्लं हिमं भेदि लघु तिक्तमशीतलम्। ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत्" भावप्र॰। स्वार्थे क कारवेल्लकोऽपि तत्रैव अल्पार्थे ङीष्। २क्षुद्रकारवेल्ले (उच्छा)। अमरः। कारवेल्लगुणा "तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः। कारवेल्लीफलं तक्रे स्वेदितं हिङ्गुमर्द्दितम्। भर्ज्जितं नवनीतेन सैन्धवेन समन्वितम्" भावप्र॰। "विदलितसुखमीषत् कारवेल्लीकठोरं पुलकितमिव तैलैः साधितं रामठेन। रचितमरिचचूर्णं सैन्धवेनातिपूर्णं सुललिततरसनायं लोलतामातनोति" पाकशा॰। कारवेल्लीफलं भेदि लघु तिक्तं सुशीतलम्। पित्तास्रकामलापाण्डुकफमेहकृमीन् हरेत्" वैद्यकम्। स्वार्थे क कारवेल्लिकाप्यत्र स्त्री।

कारस्कर कारं वधं करोति कृ–हेत्वादौ ट वृक्षे नि॰ सुट्। विषतिन्दौ किम्पाके वृक्षे राजनि॰ दासादौ न सुट्।

कारस्कराटिका स्त्री कारस्कर इवाटति अट–ण्वुल्। कर्णजलौकायाम्। त्रिका॰।

कारा स्त्री कृ–हिंसायां भिदा॰भावे अङ् "ऋदृशोऽङि" पा॰ गुणः "कारावन्धने" पा॰ग॰ दीर्घनिर्द्देशात् दीर्घः। १बन्धने मेदि॰ २पीडायां त्रिका॰ पा॰ग॰ बन्धनशब्दस्य बन्धनाधारपरत्वे ३बन्धनागारे अमरः। कुत्सितमृच्छति ऋ–अच् कोः का। ४दूत्याम् ५प्रसेवके। ६स्वर्णकारिकायाञ्च मेदि॰। ७शब्दे च। काराधुनी।

कारागार न॰ कारायाबन्धनस्यागारं गृहम् बन्धनागारे (जेलखाना) "रिपुः कारागारं कलयति च तं केलिकलया" कर्पूरस्तवः। कारागृहादयोऽप्यत्र।

कारागुप्त त्रि॰ कारायां बन्धनागारे गुप्तः। (कएदी) बन्धनाकारबद्धे हेमच॰।

कारापथ पु॰ देशभेदे। तत्र च लक्ष्मणात्मजाङ्गदचन्द्रकेतु राज्यमासीत् "अङ्गदं चन्द्रकेतुञ्च लक्ष्मणोऽप्यात्मसम्भवम्। शासनात् रघुनाथस्य चक्रे कारापथेश्वरौ" रघुः।

कारायिका स्त्री कं जलमाराति प्रचरणस्थानत्वेन आ+रा-ण्वुल्। बलाकायां जटाधरः।

काराधुनी स्त्री कारा शब्दः तस्याधुनी उत्पादयित्री। शब्दनिष्पादके शङ्खादौ। "अमत्योनरां नृषु प्रशस्तः काराधुनीव" ऋ॰ १,१८०,४। "कारा शब्दः" भा॰

कारि स्त्री कृ- भावे प्रश्नाख्यानविषये इञ्। प्रश्नाख्यानविषये १क्रियायाम्। "कां कारिमकार्षीः? सर्वां कारिमकार्षम्" इत्यादि। कृ–कर्त्तरि शिल्पिनि इञ्। २शिल्पिनि त्रि॰।

कारिका स्त्री कृ-भावे ण्वुल्। १क्रियायाम्। "कारिकाशब्दस्योपसंख्यानम्" वार्त्ति॰ क्रियायोगेऽस्य गतित्वम् तत्र कारिका क्रिया, कारिकाकृत्य" सि॰कौ॰। तत्र टासीस्तोकत्रा चकस्य क्रियाशब्दस्य न ग्रहणं तथाव्याख्यानात्। कारः रोगवधः साध्यतयाऽस्त्यस्य ठन्, कृ-हिंसायां ण्वुल् वा। रोगनाशिकायां २कण्टकार्य्यां राजनि॰। ३नटयोषि

४ विवरणश्लोके अल्पाक्षरेण बह्वर्थज्ञापकश्लोकभेदे। ५शिल्पिरचनायाम् मेदि०। ६वृद्धिभेदे (सुद) रमानाथः।

कारित त्रि० कृ–णिच–कर्म्मणि क्तः। १करणाय प्रेरिते। "विष्णुः शरीरग्रहणमहमीशान एव च। कारितास्ते यतोऽतस्त्वाम्" देवीमा०। २अधमर्णेन स्वकार्य्यसिद्धये नियतवृद्धेरुत्कोलताधिकवृद्धौ स्त्री "वृद्धिः सा कारिता नाम यर्णिकेन स्वयं कृता" मिता० ना० स्मृतिः। "ऋणिकेन तु या वृद्धिरधिका संप्रकीर्त्तिता। आपत्काले कृता नित्यं सा तु स्यात् कारिता मता" कात्या०।

कारी स्त्री कृ–हिंसायाम् इञ् स्त्रियां ङीप्। कराटकारिवृक्षे राजनि०। तस्याः कण्टकाचितत्वेन हिंसासाधनत्वात् रोगहिंसाकारकत्वाद्वा तथात्वम्।

कारीर न० करीरस्यावयवः काण्डं भस्म वा पलाशा० अञ्। १वंशस्य काण्डे २वंशभस्मनि च।

कारीरी स्त्री कं जलमृच्छति ऋ–विच् कारं सजलमेघमीरयति ईर–अण् उप० स० गौ० ङीप्। वर्षहेतौ इष्टिभेदे। "वर्षकामेष्टिः कारीरी" "तस्यां प्रति त्यं चारुमध्वरमीडे अग्निं स्वरसं नमोभिरिति धाय्ये" आश्व० श्रौ० २।१३।१।२। "वर्षकामस्य कारीरी नाम इष्टिः कार्य्या। तस्यां–कारीर्य्याम्। अत्र बहुदैवत्याया आम्नानात् अन्यदा इयमेव कारीरी एकदैवत्या भवति तस्यामपि प्रापणार्थं तस्यां ग्रहणमिति" नारा०। आरब्धायां कारीर्य्यां कृतार्द्धायां वर्षणे सति सा समापनीया न वेति सन्देहे कात्या० श्रौ० १।२।२२ सू० निर्णीतं यथा 'दृष्टे तत्परिमाणम्" कृतार्द्धायामिष्टौ वर्षणे दृष्टे सति तत्परिमाणमेव कर्म्म कर्त्तव्यं यत्परिमाणमदृष्टे वर्षणे क्रियते। न तु दृष्टौ दृष्टायां किमप्यन्यूनं कृतार्द्धं परित्याज्यमिति। न च वर्षणं तत्र तस्या इष्टेः फलं, किन्तु कालस्वभावात् प्रतिबन्धकापगमाच्च स्वयं प्रवृत्तम् इत्याशयः" सं०व्या०। अतएव जैमिनिना ६,२,१२,कर्म्मणि आरब्धे फलेच्छाराहित्ये, कथञ्चित् फलप्राप्तौ च आरब्धस्य काम्यकर्म्मणः समाप्यत्वमुक्तं यथा "प्रक्रमात्तु नियुज्येतारम्भस्य निमित्तत्वादिति" व्याख्यातं चेदं शबरस्वामिना यथा "प्रजाकामो यजेत, ग्रामकामो यजेत"–इत्येवमादि कर्म समाम्नायते। तत्र सन्देहः–किं प्रक्रान्तं नियोगतः समापनीयम्, उतेच्छया कार्य्यं हेयं वा?–इति कुतः? एवं प्राप्तं?–नियोगतः परिसमापयितव्यम्–इति। कुतः? एवं हि श्रूयते,–इदंकामो यजेत–इति, एवं तस्य आख्यातस्य अर्थम् उपदिशन्ति, 'उपक्रमप्रभृति अपवर्गपर्य्यन्तम् आह–इति, उपक्रमादारभ्य यावत् परिसमाप्तिः–इत्येतावान् व्यापारविशेषः तस्य अर्थः, न यथा पाकः त्यागः–इति। तत्र हि पाकसत्तामात्रं निर्द्दिश्यते न आरभ्य परिसमापयितव्यम्। एवं च आख्यातार्थं लौकिका अपि प्रतिपद्यन्ते, तत्र न आरम्भे पुरुषप्रयत्नः चोद्यते–इति गम्यते। यतो चोदितं न नियोगत आरभन्ते, नियोगतः पुनः परिसमापयन्ति, तेन नोभे आरम्भपरिसमाप्ती शब्दार्थः किन्तर्हि?–परिसमाप्तिः शब्दार्थः परिसमाप्त्याऽर्थप्राप्तत्वात् आरम्भस्य। तस्मात् परिसमाप्तिः शब्दार्थः–इति गम्यते। सा चेत् शब्दार्थः, सा कर्त्तव्यतया चोद्यते, आरम्भे नास्ति कर्त्तव्यतावचनं' तेन न नियोगत आरम्भः, नियोगतस्तु परिसमाप्तिः। तेन उपक्रान्ते कर्म्मणि यदि हीयात् फलेच्छा, अवाप्नोति वा फलं, तस्यामप्यवस्थायां, कर्त्तव्यमेव उपक्रान्तस्य परिसमापनम्। ननु अर्थिनो योऽर्थः सोऽत्र कर्त्तव्यतयोच्यते'। नैतदेवं, वाक्यार्थो हि स भवति, यागस्य तु कर्त्तव्यता श्रुत्या गम्यते। तस्मात् ग्रामकामेन याग आरब्धः परिसमापनीयः ग्रामादिकामनावचनं निमित्तत्वेन तदा भवति निमित्ते, च उत्पन्ने यत् कर्त्तव्यम्–इत्युच्यते, तद्विनष्टेऽपि निमित्ते कर्त्तव्यम्, न हि तद्विनष्टम् अनुत्पन्नं भवति, उत्पत्तिरेव निमित्तं न भावः तस्मात् हीनायामपि फलेच्छायाम् उपक्रान्तं परिसमापयितव्यम। क्रियाया हि निमित्तम् आरम्भः सोऽपि परिसमाप्तेः" इति।

कारीरीष्टिं प्रकृत्य श्रूयते च। "यदि वर्षेत्तावत्येव जुहुयात्" "कारीरीमनुइष्टिः" सि०कौ०।

कारीष न० करीषाणां समूहः अण्। शुष्कगोमयसमूहे।

कारीषगन्धि त्रि० कारीषस्येव गन्धोऽस्य इत्समा०। शुष्कगोमयसंघगन्धयुक्ते स्त्रियां ष्यङ् चाप्। कारीषगन्ध्या तस्याः तत्पुरुषे पुत्रपत्योः परयोः संप्रसा० दीर्घश्च। कारीषगन्धीपुत्रः कारीषगन्धीपतिः। एवं परमकारीषगन्धीपुत्रः। उपसर्ज्जने तु न, अतिकारीषगन्ध्यापतिः। बन्धुशब्दे परे तु बहुव्रीहौ तथा वा, कारीषगन्ध्याबन्धुः कारीषगन्धीबन्धुः। एवं कौमुदगन्ध्याशब्दस्यापि संप्रसारणदीर्घौ।

कारु त्रि० कृ–उण्। १शिल्पिनि। "इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते" नैष०। "कारयित्वा तु कर्म्माणि कारुं पश्चान्न वञ्चयेत्" कूर्म्मपु०

"उपस्तुतिं भरमाणस्य कारोः" ऋ० १, १४८, २, । "नित्यं शुद्धः कारुहस्तः पण्ये यच्च प्रसारितम्" मनुः । "कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा" याज्ञ० "गोरक्षकान् वाणिजकान् तथा कारुकुशीलवान् । प्रेष्यान् वार्द्धुषिकांश्चैव, विप्रान् शूद्रवदाचरेत्" मनुः । २सूपकारादौ "धान्येऽष्टमं विशां शुल्कं विंशं कार्षापणावरम् । कर्म्मोपकरणाः शूद्राः कारवः शिल्पिनस्तथा" मनुना कारुशिल्पिनोर्भेदेन निर्द्देशात् "कारवः सूपकारादयः" कुल्लू० । एतेषां च कर्म्मकरणरूप एव करो न धनरूपादिर्मनुना कर्म्मोपकरणत्वेन तेषां निर्द्देशात् । तत्र करप्रतिरूपकर्म्मकरणप्रकारो मनुना दर्शितो यथा "कारुकान् शिल्पिनश्चैव शूद्रांश्चात्मोपजीविनः । एकैकं कारयेत् कर्म्म मासिमासि महीपतिः" मासि मासि कर्म्म एकैकं दिनं कारयेदित्यर्थः । "सम्भूय कुर्व्वतामर्थं सबाधं कारुशिल्पिनाम् । अर्घस्य ह्रासं वृद्धिं वा जानतां दम उत्तमः" याज्ञ० । ३कारके तत्तत्क्रियानिष्पादके त्रि० मेदि० । "राघवस्य ततः कार्य्यं कारुर्वानरपुङ्गवः" भट्टिः । भावे उण् । ४कर्म्मणि मेदि० ५शिल्पे हेमच० ६स्तोतरि निरु० । अत्रेदं बोध्यम् उणादीनां व्युत्पत्तिपक्षे समुदायशक्त्या शिल्पिप्रभृतितत्तदर्थवाचकता, व्युत्पत्तिपक्षे अवयवशक्त्या अवयवार्थस्याप्युपस्थापनेन योगेन विशिष्टार्थपरतया यौगिकत्वं तेन कार्य्यं कारुरित्यादौ कर्म्मादेरन्वयः उदन्तकृद्योगाच्च तत्र कर्म्मणि न षष्ठी असत्यर्थयोगार्थे कर्म्मणोऽन्वयासम्भवात् न द्वितीयादिप्रसक्तिः । स्वार्थे क । कारुकोऽपि सूपकारादौ । "न साक्षी नृपतिः कार्य्यो न कारुककुशीलवौ" मनुः । "अशक्नुवंस्तु शुश्रूषां शूद्रः कर्त्तुं द्विजन्मनाम् । पुत्रदारात्ययं प्राप्तो जीवेत् कारुककर्म्मभिः । यैः कर्म्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः । तानि कारुककर्म्माणि शिल्पानि विविधानि च" मनुः । स्त्रियामूङ् । कारूः शिल्पिन्यां रजकादिस्त्रियाम् । [चौरे शब्दचि०]

कारुचौर पु० कारुणा शिल्पेन चोरयति चुर–अच् । सन्धि-

कारुज पु०क्लं जलमारुजति, ईषत् रुजति वा आ+रुज–क । १करभे, २वल्मीके, ३नागकेशरे, ४गैरिके, ५स्वयंजाते देहस्थे तिलादिचिह्ने च हेमच० । कारुतोजायते जन–ड ५त० । तक्षचित्रलेखनादौ न० ।

कारुणिक त्रि० करुणा शीलमस्य ठक् । दयालौ दयाशीले अमरः । "सम्यक् कारुणिकस्येदं वत्स ! ते विचिकित्सितम्" भाग०२,५,१० । "आचार्य्या वै कारुणिकाश्च" भा० वि०४७अ० । [स्वार्थे क । कारुणिका तत्रार्थे ।

कारुण्डी स्त्री ईषत् रुण्डो मूर्द्धहीना । जलौकायां शब्दच० ।

कारुण्य न० करुणः करुणायुक्तः करुणाविषयो वा तस्य भावः, करुणैव वा ष्यञ् । करुणायां परदुःखप्रहरणेच्छायाम् अमरः । २करुणाविषयत्वे च "दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः" नैष० "कारुण्य-वारांनिधे !" नीलतन्त्रम् ।

कारु(रू)ष पु० करु(रू)षस्य राजा अण् । करु(रू)षदेशाधिपे दन्तवक्रे "कारु(रू)षान्मात्मनवादासन् कारु(रू)षाः क्षत्रजातयः भाग० ९,२१" करु(रू)षोऽभिजन एषाम् अण् भर्गा० बहुषु न तस्य लुक् । पित्रादिक्रमेण तद्देशवासिषु ब०व० ।

कारेणव त्रि० करेणोरिदमण् । करेणुसम्बन्धिदुग्धादौ । "कषायं बहुविण्मूत्रं तिक्तमग्निकरं परम् । सर्पिः कारेणवं हन्ति कफकुष्ठविषक्रिमीन्" सुश्रु० ।

कारेणुपालि पुंस्त्री करेणुपालस्यापत्यम् इञ् । करेणुपालस्यापत्ये । युवापत्ये तु इञन्तत्वात् फक् तस्य तौल्वल्या० न लुक् कारेणुपालायन तदीययुवापत्ये पुंस्त्री ।

कारोत्तर पु० कारेण सुरागालनक्रियया उत्तरति उद्+तॄ-अच् । १सुरामण्डे अमरः स्वामी तु कारोत्तम इति पठित्वा तत्रार्थे इत्याह सुरागालनक्रियायां मण्डस्योत्तमत्वात्तथात्वम् । कारेण ईषद्गत्या उत्तीर्य्यतेऽसौ उद्+तॄ–कर्म्मणि अप् । २कूपे हेमा० तद्वेतुत्वात् चालनीरूपे वंशादिजे ३पात्रभेदे । "अन्तर उत्तरवेद्या रूपं कारोत्तरोभिषक्" यजु० १९, १६ । कारोत्तरः सुरापावनचालनी" वेददी० "अस्थि मज्जानं मासरैः कारोत्तरेण" यजु० १९,८२ । सुरामाक्षणी चालनी च वंशमयी तया मण्डियसुरागालनप्रकारः कात्या० श्रौ० १९,२,७, सू० दर्शितोयथा । "श्वभ्रं खात्वा खरमपरेण चर्मावधाय परिस्रुतमासिच्य कारोत्तरमवदधाति, कारोत्तरात् चर्म्मणि मन्त्रविकारात् पूतामादत्ते सिञ्चन्ति परिषिञ्चन्तीति" । "ततो दक्षिणवेदिखरमपरेण बहिर्वेदि श्वभ्रं गर्त्तं खात्वा तत्र गर्त्ते गोचर्मावधाय परिस्रुत सुरां चर्म्मणि आसिच्य सुराया उपरि कारोत्तरं वंशमयं पात्रं (करोत्तरचालनिका) सुरागालनसमर्थं निदधाति एवं कृते मण्डस्तत्र तिष्ठति गलिता सुरा कारोत्तरस्योपर्य्यायाति एषोऽयं गालनोपायः । अथवा पूर्व्वं चर्म्मणि कारोत्तरमवधाय तत्र

सुरामासिञ्चति तथा च सति कारोत्तरात् चर्म्मणि सुरा पतति” सं॰व्या॰। “तस्य लोमान्येव पुष्पाणि, त्वक् तोक्मानि, मांसं लाजा अस्थि कारोतरो मज्जा मासरं रसः परिस्रुन्नग्नहुर्लोहितं, रेतः पयः, मूत्रं सुरोवध्यम् वल्कसम्” शत॰ ब्रा॰ १२,९,१,२। एवं कारोत्तरशब्दस्य चालनीपरत्वे स्थिते सुरामण्डस्य तत्साध्यत्वात् तथात्वं बोध्यम्।

कार्कश्य न॰ कर्कशस्य भावः ष्यञ्। कठोरत्वे “आश्लेष लोलुपवधूस्तनकार्कश्यसाक्षिणी” माघः।

कार्कषि पुंस्त्री कर्कं स्यति सो क—पृषो॰ सत्वम् कर्कषः काठिन्यनायकः तस्यापत्यम् पक्षे इञ् तदपत्ये पक्षे वाकिन्या। वा फिञ् कुक् च। कार्कषकायनि तत्रार्थे पुंस्त्री।

कार्कीक त्रि॰ कर्कः शुक्लोऽश्वः स इव ईकक्। श्वेताश्वतुल्ये।

कार्स पुंस्त्री कर्सस्यापत्यं शिवा॰ अण्। १कर्सापत्ये इषकेतौ कर्सस्येदम् अण्। २अश्वसम्बन्धिमदादौ त्रि॰।

कार्सायनि त्रि॰ कर्षेण निर्वृत्तादि कर्स+कर्षा॰ चतुरर्थ्यां फिञ्। कर्षेण निर्वृत्तादौ। सुतङ्गमादिपाठात् पक्षे इञ्। कार्सिरथ्यत त्रि॰।

कार्त्त त्रि॰ कृतः कृत्प्रत्ययस्य व्याख्यानोग्रन्थः अण्। १ कृत्प्रत्ययव्याख्याने ग्रन्थे। कृतस्येदम् अण्। २कृतसम्बन्धिनि अस्य कौजपेन सहद्वन्द्वे कार्त्तकौजपा॰ पूर्वपदे प्रकृतिस्वरः। कृतमेव स्वार्थे अण्। ३कृतयुगे “किङ्कारवं कार्त्तयुगप्रधानः” भा॰आ॰९॰अ॰।

कार्त्तकौजपादि पु॰ पाणिन्युक्ते द्वन्द्वे पूर्वपदे प्रकृतिस्वरनिमित्ते शब्दगणभेदे स च गणः “कार्त्तकौजपौ सावर्णिमाण्डूकेयौ अवन्त्यश्मकाः पैलश्यापर्णेयाः कपिश्यापर्णेयाः शैतिकाक्षपाञ्चालेयाः कटुकवार्चलेयाः शाकलशुनकाः शाकलसणकाः सणकबाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमत्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदानच्युताः कठकालापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यू याज्यानुवाक्ये”।

कार्त्तवीर्य्य पु॰ कृतवीर्य्यस्यापत्यम् अण्। कृतवीर्य्यनृपापत्ये सहस्रबाहौ अर्जुने। “अर्जुनः कृतवीर्य्यस्य सप्तद्वीपेश्वरोऽभवत्। दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः। न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः। यज्ञदान तपोयोगैः श्रुतवीर्य्यजयादिभिः” भाग॰९,२३,२७। तत्कथादि अर्जुनशब्दे ३६६पृ॰ उक्तमायदधिकं भा॰आनु॰१५२अ॰उक्तं यथा।

“सहस्रभुजभृत् श्रीमान् कार्त्तवीर्य्योऽभवत् प्रभुः। अस्य लोकस्य सर्व्वस्य माहिष्मत्यां महाबलः। स तु रत्नाकरवतीं सद्वीपां सागराम्बराम्। शशास पृथिवीं सर्व्वां हैहयः सत्यविक्रमः। स्ववित्तं येन दत्तन्तु दत्तात्रेयाय कारणे। क्षत्रधर्म्मं पुरस्कृत्य विनयं श्रुतमेव च। आराधयामास च तं कृतवीर्य्यात्मजो मुनिम्। न्यमन्त्रयत सन्तुष्टो द्विजश्चैनं वरैस्त्रिभिः। स वरैश्छन्दितस्तेन नृपो वचनमब्रवीत्। सहस्रबाहुर्भूयासं चमूमध्ये गृहेऽन्यथा। मम बाहुसहस्रन्तु पश्यन्तां सैनिका रणे। विक्रमेण महीं कृत्स्नां जयेयं संशितव्रत!। तां च धर्म्मेण सम्प्राप्य पालयेयमतन्द्रितः। चतुर्थं तु वरं याचे त्वामहं द्विजसत्तम!। तं ममानुग्रहकृते दातुमर्हस्यनिन्दित!। अनुशासन्तु मां सन्तो मिथ्योद्वृत्तं त्वदाश्रयम्। इत्युक्तः स द्विजः प्राह तथास्त्विति नराधिपम्। एवं समभवंस्तस्य वरास्ते दीप्ततेजसः। ततः स रथमास्थाय ज्वलनार्कसमद्युतिम्। अब्रवीद्वीर्य्यसम्मोहात् कोऽन्वस्ति सदृशो मम। धैर्य्ये वीर्य्ये यशःशौर्य्ये विक्रमेणौजसाऽपि वा। तद्वाक्यान्तेऽन्तरीक्षे वै वागुवाचाशरीरिणी। न त्वं मूढ! विजानीषे ब्राह्मणं क्षत्रियाद्वरम्। सहितो ब्राह्मणेनेह क्षत्रियः शास्ति वै प्रजाः। अर्ज्जुन उवाच। कुर्य्यां भूतानि तुष्टोऽहं क्रुद्धो नाशं तथा नये। कर्म्मणा मनसा वाचा न मत्तोऽस्ति वरो द्विजः। पूर्व्वो ब्रह्मोत्तरो वादो द्वितीयः क्षत्रियोत्तरः। त्वयोक्तौ हेतुयुक्तौ तौ कथं तु ब्राह्मणो वरः। सर्व्वभूतप्रधानांस्तान् भैक्ष्यवृत्तीनहं सदा। आत्मसम्भावितान् विप्रान् स्थापयाम्यात्मनो वशे। कथितं ह्यनया सत्यं गायत्र्या कन्यया दिवि। विजेष्याम्यवशान् सर्व्वान् ब्राह्मणांश्चर्म्मवाससः। न च मां च्यावयेद्राष्ट्रात्त्रिषु लोकेषु कश्चन। देवो वा मानुषो वापि तस्माज्ज्येष्ठो द्विजादहम्। अद्य ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम्। न हि मे संयुगे कश्चित्सोढुमुत्सहते बलम्। अर्जुनस्य वचः श्रुत्वा वित्रस्ताऽभून्निशाचरी। अथैनमन्तरिक्षस्थस्ततो वायुरभाषत। त्यजैनं कलुषं भावं ब्राह्मणेभ्यो नमस्कुरु। एतेषां कुर्व्वतः पापं राष्ट्रक्षोभो भविष्यति। अथ वा त्वां महीपाल! शमयिष्यन्ति वै द्विजाः। निरसिष्यन्ति ते राष्ट्राद्धतोत्साहं महाबलाः। तं राजा कस्त्वमित्याह ततस्तं प्राह मारुतः। वायुर्वै देवदूतोऽस्मि हितं त्वां प्रब्रवीम्यहम्। अर्ज्जुन उवाच। अहो त्वयाऽद्य विप्रेषु भक्तिरागः प्रदर्शितः। यादृशं पृथिवीभूतं तादृशं ब्रूहि वै द्विजम्। वायोर्वा सदृशं किञ्चिद् ब्रूहि त्वं ब्राह्मणोत्त-

मम् । अपां वै सदृशो वह्निः सूर्य्यस्य नभसोऽपि वा” । ततः पवनार्ज्जुनयोः संवादे बहुकथा तत्र द्रष्टव्या । “भवन्तं कार्त्तवीर्य्योयोहोनसन्निभमचीकरत्” भट्टिः । “अनन्यसाधारणराजशब्दोबभूव योगी किल कार्त्तवीर्य्यः” रघुः ।

कार्त्तवीर्य्यदीप पु॰ ६तत्॰ । कार्त्तवीर्य्यार्ज्जुनोद्देशेन दीयमाने दीपे । तद्दानविधानादि विधानपारिजाते उड्डामेश्वरतन्त्रे उक्तं यथा

“गोमयेनोपलिप्तायां शुद्धभूमौ समाहितः । तन्मध्ये मण्डलं कार्य्यं त्रिकोणं विन्दुसंयुतम् । षट्कोणं तद्बहिः कार्यं मध्ये मूलं समालिखेत् । तण्डुलैः कुङ्कुमाक्तैर्वा रक्तचन्दनमिश्रितैः । तस्योपरि न्यसेद्दीपं घृतपूरितवर्त्तिकम् । तं दीपं विधिनायुज्य पश्चात्सङ्कल्पयेत्ततः । कार्त्तवीर्य ! महाबाहो ! भक्तानामभयप्रद ! । गृहाण दीपं मद्दत्तं कल्याणं कुरु सर्वदा । अनेन दीपदानेन कार्तवीर्यस्तु प्रीयताम् । पश्चिमाभिमुखं दीपं कारयेत् शुभकर्म्मणि । अभिचारे तु त्रितयं दक्षिणोत्तरपश्चिमे । नष्टप्राप्तौ च कुर्वीत पश्चादिविषमान् पुनः । वश्याभिकामी कुर्वीत गुर्वाज्ञां प्राप्य साधकः । चतुर्वर्गफलायैव शतदीपावलिं ततः । मारणे तु सहस्रं स्यादष्टाशाहस्रमेव च । दीपावलिं प्रकुर्वीत गुर्वाज्ञां प्राप्य साधकः । चतुर्वर्गफलावाप्तौ कुर्वीत प्रतिवासरम् । अनेन दीपदानेन कार्त्तवीर्यः प्रसीदति । एवं दीपं सुरेशानि ! कुर्वीत गुरुशासनात् ! । महाभये समुत्पन्ने चिन्ताव्याकुलितेक्षणे । लवणं स्वर्णसंयुक्तं देयं रात्रौ विचक्षणैः । पूर्णमासीदिने कुर्याद्गणरेका प्रदक्षिणा । ग्रामे पुरे गोव्रजे वा साधकः सर्वकालतः । एतत् सारतरं देवि ! न देयं यस्य कस्यचित् । गुरुभक्ताय शान्ताय साधकाय प्रकाशयेत् । नास्तिकाय न दातव्यं परशिष्याय नो वदेदिति” । तद्दीपपात्रादिविवृतिः तत्रैव

“राजचोरादिपीड़ासु ग्रहरोगभयेषु च । नानादुःखेषु देवेशि ! दुःखप्राप्तौ तथैव च । दीपं कुर्वीत विधिवद्गुरुदर्शितमार्गतः । दीपपात्रं नवं कार्यं महाकार्ये विशेषतः । सौवर्णं राजतं ताम्रं कांस्यं लौहं च मृण्मयम् । गोधूममाषमुद्गानां चूर्णेन घटितेऽथवा । सौवर्णे कार्यसिद्धिः स्यात् रौप्ये वश्यं जगत् भवेत् । ताम्रे रिपोभयाभावः कांस्ये विद्वेषणं भवेत् । मारणे लोहपात्रं च उच्चाटे मृण्मयं तथा । गोधूमचूर्णघटिते विवादे विजयो ध्रुवम् । माषे शत्रुमुखस्तम्भो मुद्गे स्याच्छान्तिरुत्तमा । सन्धिकार्यें नदीकूलद्वयोर्मृत्स्नां तु कारयेत् । अलाभे सर्वपात्राणां ताम्रे कुर्याद्विचक्षणः । सप्त पञ्च तथा तिस्र एका वा वर्तिका भवेत् । अयुग्मा वर्त्तिका ग्राह्या एकोत्तरशतावधिः । गुरुकार्येऽधिका कार्या स्वल्पे स्वल्पतमा प्रिये ! । सूत्रं श्वेतं तथा पीतं माञ्जिष्ठञ्च कुसुम्भजम् । कृष्णञ्च कर्बुरञ्चैव क्रमतो विनियोजयेत् । सर्वाभावे सितेनैव कुर्याद्वर्त्तीः पृथक् भवेत् । दशपञ्चाधिकाश्चैव विंशत्त्रिंशत्तथैव च । चत्वारिंशत्तथा कार्याः पञ्चाशदपि वा भवेत् । अष्टोत्तरसहस्रं वा शतं पञ्चाशदेव च । तत्तत्कार्यवशाद्देवि ! कुर्यात्तन्तून् समाहितः । षट्कर्म्माणि तथा कुर्यात् साधकश्च सुबुद्धिमान् । चत्वारिंशदधिकांश नित्यदीपे तु कारयेत् । तदर्द्धमपि च प्रोक्तं देवि ! विश्वार्तिहारिणि ! । गोघृतेन प्रकर्त्तव्यो दीपः सर्वार्थसिद्धये । गोमयेनोपलिप्तायां भूमौ यन्त्रं समालिखेत् । कपिलागोमयेनैव षट्कोणञ्च लिखेत्ततः । मारबीजं (क्लीं) कर्णिकायां षट्पात्रे बीजषट्ककम् । दिक्षु बीजचतुष्कञ्च शेषैः संवेष्टयेद्धि तत् । तत्र प्रत्यङ्मुखो दीपः स्थाप्यः सर्वाङ्गसुन्दरि ! । प्राणानायम्य विधिवन्मूलेनाङ्गं समाचरेत् । मन्त्रराजं लिखित्वा तु ताम्रपात्रेऽष्टगन्धकैः । स्थापयेत्पूर्वतस्तस्य कुर्यात्सङ्कल्पमादरात्” । “अनेन विधिना देवि ! कार्त्तवीर्यस्य गोपतेः । दीपो देयः प्रयत्नेन सर्वकार्यमभीप्सुना । गुरोराज्ञां पुरस्कृत्य कुर्याद्देवि ! प्रयत्नतः । अन्यथा तु कृतं लोके विपरीतफलं भवेत् । विधानं दीपदानस्य कृतघ्नपिशुनाय च । ब्रह्मकर्मविहीनाय न वक्तव्यं कदाचन । सुभक्ताय सुशिष्याय साधकाय विशेषतः । वक्तव्यं देवि ! विधिना मम प्रीतिकरं शिवम् । किं बहूक्तेन भो देवि ! कल्पोऽयमखिलार्थदः । अथाभिधीयते मानमाज्यस्य वरवर्णिनि ! । साधकानां हितार्थाय सर्वार्थस्य च सिद्धये । पलानां पञ्चविंशत्तु दीपो देयोऽर्थसिद्धये । पञ्चाशता चोरशान्त्यै शत्रुवश्याय चेष्यते । पञ्चसप्ततिर्देवेशि ! शत्रूणां स्यात् पराजये । एतेन रोगनाशः स्यात् सहस्रेणाखिलाः क्रियाः । सिध्यन्ति साधकानां हि प्रयोगा येऽतिदुष्कराः । नित्यदीपे न मानं हि कार्यः सोऽत्र स्वशक्तितः । यथाकथञ्चिद्देवेशि ! नित्यं दीपं प्रकल्पयेत् । कार्त्तवीर्याय देवेशि ! सर्वकल्याणसिद्धये । गुरुकार्य्येऽधिकं मानं कर्त्तव्यं देवि ! सर्वदा । लघुद्रव्यैः प्रकर्तव्यः लघुकार्ये वरानने ! । विना मानं न कुर्वीत कार्तवीर्यस्य गोपतेः” ।

अधिकं तत्र दृश्यम्। मन्त्रमहोदधौ १७तरङ्गे। कार्त्तवीर्य्यमन्त्रादिकमुक्त्वा विशेषो दर्शितो यथा “अथ दीपविधिं वक्ष्ये कार्त्तवीर्य्यप्रियङ्करम्। वैशाखे श्रावणे मार्गे कार्त्तिकाश्विनपौषतः। माघफाल्गुनयोर्मासोर्दीपारम्भं समाचरेत्। तिथौ रिक्ताविहीनायां वारे शनिकुजौ विना। हस्तोत्तराश्विरौद्रेषु६ पुष्यवैष्णव२२ वायुभे१५। द्विदैवते १६च रोहिण्यां दीपारम्भो हितार्थिनाम्। चरमे २७च, व्यतीपाते धृतौ वृद्धौ सुकर्म्मणि। प्रीतौ हर्षे च सौभाग्ये शोभनायुष्मतोरपि। करणे विष्टिरहिते ग्रहणेऽर्द्धोदयादिषु। योगेषु रात्रौ पूर्व्वाह्णे दीपारम्भः कृतः शुभः। कार्त्तिके शुक्लसप्तम्यां निशीथेऽतीव शोभनः। यदि तत्र रवेर्व्वारः श्रवणं तत्र दुर्लभम्। अत्यावश्यककार्य्येषु मासादीनां न शोधनम्। आद्येऽह्न्युपोष्य नियतो ब्रह्मचारी शयीत कौ। प्रातः स्नात्वा शुद्धभूमौ लिप्तायां गोमयोदकैः। प्राणानायम्य सङ्कल्प्य न्यासान् पूर्व्वोदितांश्चरेत्। षट्कोणं रचयेद्भूमौ रक्तचन्दनतण्डुलैः। अन्तःस्मरं (क्लीँ) समालिख्य षट्कोणेषु समालिखेत्। मन्त्रराजस्य षड्वर्णान् कामवीजविवर्ज्जितान्। त्रिपि पद्मं वर्म्म चास्त्रं पूर्व्वाद्याशासु संलिखेत्। नवार्णैर्वेष्टयेत्तच्च त्रिकोणं तद्बहिः पुनः। एवं विलिखिते यन्त्रे निदध्याद्दीपभाजनम्। स्वर्णजं रजतोत्थं वा ताम्रजं तदभावतः। कांस्यपात्रं मृण्मयञ्च कनिष्ठं लौहजं मतौ। शान्तये मुद्गचूर्णोत्थं सन्धौ गोधूमचूर्णजम्। बुभुक्षुं समानं तु पात्रं कुर्य्यात् प्रयत्नतः। अर्कदिग्वसुषट्पञ्चचतूरामाङ्गुलैर्मितम्। आज्ये पलसहस्रे तु पात्रं शतपलैः कृतम्। आज्येऽयुतपले पात्रं पलपञ्चशतीकृतम्। पञ्चसहस्रसंख्ये तु पात्रं षष्टिपलं मतम्। त्रिसहस्रीकृतपले शरार्क १२५ पलभाजनम्। द्विसहस्र्यां शरशिवं ११५ शतार्द्धे त्रिंशता मितम्। शतेऽष्टिशर ५५ संख्यातमेवमन्यत्र कल्पयेत्। नित्यदीपे वह्निपलं पात्रमाज्ये स्मृतं पलम्। एवं पात्रं प्रतिष्ठाप्य वर्त्तीः सूत्रोत्थिताः क्षिपेत्। एका तिस्रोऽथ वा पञ्च सप्ताद्या विषमा अपि। तिथि१५मानाऽऽसहस्रन्तु तन्तुसंख्या विनिर्म्मिता। गोघृतं प्रक्षिपेत्तत्र शुद्धवस्त्रविशोधितम्। सहस्रपलसंख्यादि दद्यान्तं कार्य्यगौरवात्। सुवर्णादिकृतां रम्यां शलाकां षोडशाङ्गुलाम्। तदर्द्धां वा तदर्द्धां वा सूक्ष्माग्रां स्थूलमूलिकाम्। विदध्याद्दक्षिणे भागे पात्रमध्ये कृताग्रकाम्। पात्राद्दक्षिणदिग्भागे मुक्ताऽङ्गुलचतुष्टयम्। अधोऽग्रां दक्षिणाधारां निखनेच्च क्षुरिकां शुभाम्। दीपं प्रज्वालयेत्तत्र गणेशस्मृतिपूर्व्वकम्। दीपात् पूर्व्वत्र दिग्भागे सर्व्वतो भद्रमण्डले। तण्डुलाष्टदले वापि विधिवत् स्थापयेद्घटम्। तत्रावाह्य नृपाधीशं पूर्व्ववत् पूजयेत् सुधीः। लाजाक्षतान् समादाय दीपं सङ्कल्पयेत्ततः। दीपसङ्कल्पमन्त्रोऽथ कथ्यते द्वीषु ५२ भूमितः”। ततस्तन्मन्त्रादिकमुक्त्वा शेषविधिर्दर्शितो यथा “एवं दीपप्रदानस्य कर्त्ता प्रोत्यखिलेप्सितम्। दीपप्रबोधकाले तु वर्ज्जयेदशुभाङ्गिरम्। विप्रस्य दर्शनं तत्र शुभदं परिकीर्त्तितम्। शूद्राणां मध्यमं प्रोक्तं म्लेच्छस्य बधबन्धनम्। आखोत्वोर्दर्शनं दुष्टं गवाश्वस्य सुखावहम्। दीपज्वाला समा सिद्ध्यै, वक्रा नाशविधायिनी। कृते दीपे यदा पात्रं भग्नं दृश्येत दैवतः। पक्षाद्र्व्वाक् तदा गच्छेद्दूयजमानोयमालयम्। वर्त्त्यन्तरं यदा कुर्य्यात् कार्य्यं सिध्येद्विलम्बतः। नेत्रहीनो भवेत् कर्त्ता तस्मिन् दीपान्तरे कृते। अशुचिस्पर्शने व्याधिर्दीपनाशे तु चौरभीः। श्वमार्जाराखुसंस्पर्शे भवेद्भूपतितोभयम्। व्रतारम्भे वसुपलैः कृतोदीपोऽखिलेष्टदः। तस्माद्दीपः प्रयत्नेन रक्षणीयोऽन्तरायतः। आ समाप्तेः प्रकुर्व्वीत ब्रह्मचर्य्यञ्च भूशयः। स्त्रीशूद्रपतितादीनां सम्भाषामपि वर्जयेत्। जपेत् सहस्रं प्रत्यह्नि मन्त्रराजं नवाक्षरम्। स्तोत्रपाठं प्रतिदिनं निशीथिन्यां विशेषतः। एकपादेन दीपाग्रे स्थित्वा यो मन्त्रनायकम्। सहस्रं प्रजपेद्रात्रौ सोऽभीष्टं क्षिप्रमाप्नुयात्। समाप्य शोभने घस्रे संभोज्य द्विजनायकान्। कुम्भोदकेन कर्त्तारमभिषिञ्चेन्मनुं स्मरन्। कर्त्ता तु दक्षिणां दद्यात् पुष्कलां तोषहेतवे। गुरौ तुष्टे ददातीष्टं कृतवीर्य्यसुतोन्नृपः। गुर्व्वाज्ञया स्वयं कुर्य्याद्यदि वा कारयेद्द्विजम्। कृत्वा रत्नादिदानेन दीपदानं धरापतेः। गुर्व्वाज्ञामन्तरा कुर्य्याद्यो दीपं स्वेष्टसिद्धये। प्रत्युतानुभवत्येष हानिमेव पदे पदे। दीपदानविधिं ब्रूयात् कृतघ्नादिषु नो गुरुः। दुष्टेभ्यः कथितोमन्त्रो वक्तुर्दुःखावहो भवेत्। उत्तमं गोघृतं प्रोक्तं मध्यमं महिषीभवम्। तिलतैलन्तु तादृक् स्यात् कनीयोऽजादिजं घृतम्। आस्यरोगे सुगन्धेन दद्यात्तैलेन दीपकम्। सिद्धार्थसम्भवेनाथ द्विषतां नाशसिद्धये। सहस्रेण पलदीपे विहिते चेन्न दृश्यते। कार्य्यसिद्धिस्तदा कुर्य्याद्द्विवारं दीपजं विधिम्। तदा सुदुर्लभं कार्य्यं सिध्यत्येव न

संशयः। यथा कश्चिद्यः कुर्य्याद्दीपदानं स्ववेश्मनि। विघ्नाः सर्व्वेऽरिभिः सार्कं तस्य नश्यन्ति दूरतः। सर्व्वदा जयमाप्नोति पुत्रान् पौत्रान् धनं यशः। यथा कश्चिद्यो गेहे नित्यं दीपं समाचरेत्। कार्त्तवीर्य्यार्जुनप्रीत्यै सोऽभीष्टं लभते नरः। दीपप्रियः कार्त्तवीर्य्यो मार्त्तण्डो नतिवल्लभः। स्तुतिप्रियो महाविष्णुर्गणेशस्तर्पणप्रियः। दुर्गाऽर्च्चनप्रिया नूनमभिषेकप्रियः शिवः"।

कार्त्तवीर्य्यस्य च दत्तात्रेयलब्धयोगप्रभावात् हरेश्चक्रावतारात्र उपास्यत्वम्। यथा चास्य हरेश्चक्रावतारत्वं तथा तस्य ध्याने वर्णितं यथा "उद्यत्सूर्य्यसहस्रकान्तिरखिलक्षौणीधवैर्वन्दितो हस्तानां शतपञ्चकेन च दधच्चापानिषूंस्तावता। कण्ठे हाटकमालया परिवृतश्चक्रावतारो हरेः पायात् स्यन्दनगोऽरुणाभवसनः श्रीकार्त्तवीर्य्यो नृपः"। २प्रभुमात्रे जैनराजचक्रवर्त्तिभेदे हेमच०।

कार्त्तवीर्य्यारि पु० ६त०। परशुरामे यथा च तस्य तदरित्वं तथा वर्णितम् भा०व० ११६अ० यथा

"अथानूपपतिर्वीरः कार्त्तवीर्य्योऽभ्यवर्त्तत। तमाश्रमपदं प्राप्तमृषेर्भार्य्या समार्च्चयत्। स युद्धमदसमत्तो नाभ्यनन्दत्तथार्च्चनम्। प्रमथ्य चाश्रमात्तस्माद्धोमधेनोस्ततो बलात्। जहार वत्सं क्रोशन्त्या बभञ्ज च महाद्रुमान्। आगताय च रामाय तदाचष्ट पिता स्वयम्। गाञ्च रोरुदतीं दृष्ट्वा कोपो रामं समाविशत्। स मृत्युवशमापन्नं कार्त्तवीर्य्यमुपाद्रवत्। तस्याथ युधि विक्रम्य भार्गवः परवीरहा। चिच्छेद निशितैर्भल्लैर्बाहून् परिघसन्निभान्। सहस्रसम्मितान् राजन्! प्रगृह्य रुचिरं धनुः। अभिभूतः स रामेण संयुक्तः कालधर्म्मणा"। कार्त्तवीर्य्यविजेत्रादयोऽप्यत्र।

कार्त्तस्वर न० कृतस्वरे आकरभेदे भवम् अण् कृताः पठिताः स्वरा येन कृतस्वरः सामगानकर्त्तृभेदस्तस्येदं दक्षिणात्वेन देयम् शैषिकोऽण् वा। १स्वर्णे तन्नामनामके २धूस्तुरे च अमरः "स तप्तकार्त्तस्वरभास्वराम्बरः" माघः। "पृथुकार्त्तस्वरपात्रम्" सा०द०। [ज्योतिर्विद्यावेत्तरि अमरः।

कार्त्तान्तिक त्रि० कृतान्तं वेत्ति उक्थादेराकृतिगणत्वात् ठक्।

कार्त्तिक पु० कृत्तिकानक्षत्रेण युक्ता पौर्णमासी कृत्तिका+अण् ङीप् कार्त्तिकी साऽस्मिन् मासे अण् पक्षे ठक्। वैशाखावधिके सप्तमे १चान्द्रेमासे यन्मासीयपौर्णमास्यां कृत्तिकानक्षत्रसम्बन्धः सम्भवति तादृशे मासे तस्य च यथा तथात्वं तथा सू०सि०रङ्गनाथाभ्यां दर्शितं यथा

"नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः" सू०सि०। "माससञ्ज्ञा महानक्षत्रनाम्नेति। पर्वान्तयोगतः पर्वान्तः पूर्णिमान्तः तस्य योगात्तत्सम्बन्धात्। नक्षत्रसंज्ञया मासाः शुक्लाराद्याश्चान्द्रमासा ज्ञेया इति तात्पर्यार्थः। तथा हि यद्दर्शान्तावधिकश्चान्द्रो मासस्तदभ्यन्तरस्थितपूर्णिमान्तस्थितचन्द्रनक्षत्रसञ्ज्ञः। यथा चित्रासम्बन्धाच्चैत्रः। विशाखासम्बन्धाद्वैशाखः। ज्येष्ठासम्बन्धाज्ज्यैष्ठः। आषाढासम्बन्धादाषाढः। श्रवणसम्बन्धाच्छ्रावणः। भाद्रपदासम्बन्धाद्भाद्रपदः। अश्विनीसम्बन्धादाश्विनः। कृत्तिकासम्बन्धात् कार्त्तिकः। मृगशीर्षसम्बन्धान्मार्गशीर्षः। पुष्यसम्बन्धात् पौषः मघासम्बन्धान्माघः। फाल्गुनीसम्बन्धात् फाल्गुन इति। ननु पूर्णिमान्ते तत्तन्नक्षत्राभावे कथं तत्सञ्ज्ञा मासानामुचितेत्यत आह" रङ्ग०।

"कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम्। अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्" सू०सि०।

"नक्षत्रसंयोगार्थमिति निमित्तसप्तमी। कार्त्तिक्यादिषु कार्त्तिकमासादीनां पौर्णमासीष्वित्यर्थः। कृत्तिकादि द्वयं द्वयं नक्षत्रं कथितं कृत्तिकारोहिणीभ्यां कार्त्तिकः। मृगार्द्राभ्यां मार्गशीर्षः। पुनर्वसुपुष्याभ्यां पौषः। अश्लेषामघाभ्यां माघः। चित्रास्वातीभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्यैष्ठः। पूर्वोत्तराषाढाभ्यामाषाढः। श्रवणधनिष्ठाभ्यां श्रावण इति फलितम्। अवशिष्टमासानामाह। अन्त्योपान्त्याविति। अत्र कार्त्तिकस्यादित्वेन पश्चादन्त्य आश्विनः। उपान्त्यो भाद्रपदः। एतौ मासौ पञ्चमः फाल्गुनः। चकारः समुच्चयः इति मासत्रयं त्रिधा स्यान्नत्रय उक्तम्। रेवत्यश्विनीभरणीति नक्षत्रत्रयसम्बन्धादाश्विनः। शततारापूर्वोत्तराभाद्रपदेति नक्षत्रत्रयसम्बन्धाद्भाद्रपदः। पूर्वोत्तराफाल्गुनीहस्तेति नक्षत्रत्रयसम्बन्धात् फाल्गुन इति सिद्धम्" रङ्गनाथः।

चान्द्रकार्त्तिकस्य तुलाराशिस्थरव्यारब्धशुक्लप्रतिपदादिदर्शान्तत्वम् "मीनादिस्थो रविर्येषामारम्भप्रथमक्षणे। भवेत्तेऽब्दे चान्द्रमासाश्चैत्राद्या द्वादश स्मृताः" व्यासवचनात्। २तुलास्थरविके तादृशे सौरमासे। तत्र तत्रन्तु तुलास्थरविकत्वविशिष्टदिनत्वं सौरकार्त्तिकत्वम्। "चन्द्रमाः कृष्णपक्षान्ते सूर्य्येण सह युज्यते। षष्टिकर्षादथारभ्य सन्निकर्षमथापरम्। चन्द्रार्कयोर्बुधैर्मासश्चान्द्र इत्यभिधीयते। आदित्यराशिभोगेन सौरोमासः प्रकीर्त्तितः" इति विष्णुध० वचनात्। "षण्डाख्यो जायते राजन्!

कार्त्तिके मांसभक्षणात्” पद्मपु० “शेते विष्णुः सदाषाढे भाद्रे च परिवर्त्तते। कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने” मत्स्यपु०। तत्र नानार्थशब्दानामेकत्र शक्तिरन्यत्र लक्षणेति सिद्धान्तात् चान्द्रे मुख्यत्वम्, सौरे गौणत्वमिति रघु०। उभयत्र शक्तिरिति कालमाधवीये स्थितम्। मासशब्दे विवृतिः। एवं मार्गादीनां चान्द्रसौरलक्षणमूह्यम्। २कृत्तिकानक्षत्रयुक्तपौर्णमासीघटिते अर्द्धमासात्मके तत्पक्षे च। “नक्षत्रेण युक्तः कालः” “साऽस्मिन् पौर्णमासीति संज्ञायाम्” पा० व्या० जयादित्येन अस्मिन्निति दशरात्रादिव्यावृत्त्यर्थं मासार्द्धमाससंवत्सराणामिव संज्ञेति व्याख्याय उदाहृतं पौषो मासः पौषोऽर्द्धमासः पौषः संवत्सर इति”। गुरोः कृत्तिकारोहिण्योरन्यतरनक्षत्रेण पर्वान्तियोगे गुरोरस्तोदयोपलक्षिते ४वर्षे च यथोक्तं सू०सि०रङ्गनाथाभ्याम् “अथ प्रसङ्गात् कार्तिकादिवृहस्पतिवर्षाण्याह” रङ्ग०। “वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ। कार्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा” सू०सि०।

“यथा पौर्णमास्यां नक्षत्रसम्बन्धेन तत्तन्नामो मासो भवति। तथेति समुच्चयार्थकम्। वृहस्पतेः सूर्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे पञ्चदशे तिथौ अमावास्यामित्यर्थः। चकारः पौर्णमासीसम्बन्धसमुच्चयार्थकः। योगे उक्तनक्षत्रसम्बन्धे कार्तिकादीनि द्वादश वर्षाणि भवन्ति। वैशाखकृष्णपक्षीयामायां वृहस्पतेरस्त उदये वा जाते सति तदादि वृहस्पतिवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्तिकसंज्ञम्। एवं ज्यैष्ठाषाढश्रावणभाद्रपदाश्विनमार्गशीर्षपौषमाघफाल्गुनचैत्रामादिषु मृगपुष्यमघापूफाचित्राविशाखाज्येष्ठापूर्वाषाश्रवणपूभाश्विनीदिन नक्षत्रसम्बन्धान्मार्गशीर्षादीनि भवन्ति। अत्रापि प्रोक्तनक्षत्रद्वयत्रयसम्बन्धः प्रागुक्तो बोध्यः। अमेत्याद्युपलक्षणम्। तेन यद्दिने वृहस्पतेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्संज्ञं बार्हस्पत्यं वर्षं भवतीति तात्पर्यम्। संहितापन्थेऽस्तोदयवशाद्वर्षोक्तिः परमिदानीमुदयवर्षव्यवहारो गणकैर्गण्यते “येनोदितेज्य” इत्युक्तेरिति” रङ्ग०।

तस्य च विवृतिः मलमासतत्त्वे यथा

“यथा मासानां पौर्णमास्यां कृत्तिकादिसम्बन्धात् कार्त्तिकादित्वं तथा वर्षाणां वृहस्पतेरस्तोदयसम्बन्धात् कार्त्तिकादित्वम् तेन कृत्तिकारोहिण्योरेकतरस्मिन् वृहस्पतेरस्तोदयैकतरलाभे कार्त्तिकवर्षम् एवं मार्गशीर्षादि। यत्र वर्षद्वयघटकयोर्नक्षत्रयोरेकतरस्मिन्नस्तं गतो गुरुरन्यस्मिन्नुदेति तत्र का गतिरिति चेत् कार्त्तिकोत्तरं मार्गशीर्षं मार्गशीर्षोत्तरं पौषमित्यादिक्रमाद्गतिः”

बार्हस्पत्यवर्षप्रयोजनमुक्तं सू०सि० “बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः”। षष्ट्यब्दं प्रभवादिवर्षाणि।

यथा च कार्त्तिकशब्दस्य कार्त्तिकीयुक्तार्द्धमासपरत्वं वर्षभेदपरत्वं च जयादित्येन दर्शितं तथा आग्रहायणाश्विनाषाढशब्दानामपि तादृशपौर्णमासीघटितपक्षवत्सरपरत्वं पूर्व्वमनुक्तमपि ज्ञेयम्।

कृत्तिकाणामयं पोष्यत्वेन अण्। अग्नौ निषिक्तरुद्रतेजोजाते ५स्कन्दे देवे। तस्य कृत्तिकापोष्यत्वकथा च भा०आनु० ८४अ० यथा।

“शूलपाणेर्भगवतो रुद्रस्य च महात्मनः। गिरौ हिमवति श्रेष्ठे तदा भृगुकुलोद्वह!। देव्या विवाहे निर्वृत्ते रुद्राण्या भृगुनन्दन!। समागमे भगवतो देव्या सह महात्मनः। ततः सर्व्वे समुद्विग्ना देवं रुद्रमुपागमन्। ते महादेवमासीनं देवीञ्च वरदामुमाम्। प्रसाद्य शिरसा सर्व्वे रुद्रमूचुर्भृगूद्वह!। अयं समागमो देव! देव्या सह तवानघ!। तपस्विनस्तपस्विन्या तेजस्विन्याऽतितेजसः। अमोघतेजास्त्वं देव! देवी चेयमुमा तथा। अपत्यं युवयोर्देव! बलवद्भविता विभो!। तन्नूनं त्रिषु लोकेषु न किञ्चिच्छेषयिष्यति। तदेभ्यः प्रणतेभ्यस्त्वं देवेभ्यः पृथुलोचन!। वरं प्रयच्छ लोकेश! त्रैलोक्यहितकाम्यया। अपत्यार्थं निगृह्णीष्व तेजः परमकं विभो!। त्रैलोक्यसारौ हि युवां, लोकं सन्तापयिष्यथः। तदपत्यं हि युवयोर्देवानभिभवेद्ध्रुवम्। न हि ते पृथिवी देवी न च द्यौस्त्रिदिवं विभो!। नेदं धारयितुं शक्ताः समस्ता इति नो मतिः। तेजःप्रभावनिर्द्दग्धं तस्मात् सर्व्वमिदं जगत्। तस्मात् प्रसादं भगवन्! कर्त्तुमर्हसि नः प्रभो!। न देव्यां सम्भवेत् पुत्रो भवतः सुरसत्तम!। धैर्य्यादेव निगृह्णीष्व तेजो ज्वलितमुत्तमम्। इति तेषां कथयतां भगवान् गोवृषध्वजः। एवमस्त्विति देवांस्तान् विप्रर्षे! प्रत्यभाषत। इत्युक्त्वा चोर्द्ध्वमनयद्रेतो वृषभवाहनः। ऊर्द्धरेताः समभवत्ततः प्रभृति चापि सः। रुद्राणी तु ततः क्रुद्धा प्रजोच्छेदे तथा कृते। देवानथाब्रवीत्तत्र स्त्रीभावात् परुषं वचः। यस्मादपत्यकामो वै भर्त्ता मे विनिवर्त्तितः। तस्मात् सर्व्वे सुरा यूयमनपत्या भविष्यथ। प्रजोच्छेदो मम कृतो यस्माद्

शापभिरद्य वै । तस्मात् प्रजा वः खगमाः सर्व्वेषां न भविष्यति । पावकस्तु न तत्रासीच्छापकाले भृगूद्वह ! । दे देवाव्यास्तथा शापादनपत्यास्तथाऽभवन् । रुद्रस्तु तेजोऽप्रतिमं धारयामास वै तदा । प्रस्कन्नन्तु ततस्तस्मात् किञ्चित्तत्रापतद्भुवि । उत्पपात तदा वह्नौ ववृधे चाद्भुतोपमम् । तेजस्तेजसि संपृक्तमात्मयोनित्वमागतम्" । इत्युपक्रम्य तारकासुरेण बाधितानां देवानां ब्रह्मसमीपे वरप्रार्थनादिकमुक्तं यथा

"देवा ऊचुः । असुरस्तारको नाम त्वया दत्तवरः प्रभो ! । सुरान्बलींश्च क्लिश्नाति बधस्तस्य विधीयताम् । तस्माद्भयं समुत्पन्नमस्माकं वै पितामह ! । परित्रायस्व नो देव ! न ह्यन्या गतिरस्ति नः । ब्रह्मोवाच । समोऽहं सर्व्वभूतानामधर्म्मं नेह रोचये । हन्यतां तारकः क्षिप्रं सुरर्षिगणबाधिता । वेदा धर्म्माश्च नोच्छेदं गच्छेयुः सुरसत्तमाः ! । विहितं पूर्व्वमेवात्र मया वै व्येतु वो ज्वरः । देवा ऊचुः । वरदानाद्भगवतो दैतेयो बलगर्व्वितः । देवैर्न शक्यते हन्तुं स कथं प्रशमं व्रजेत् । स हि नैव स्म देवानां न सुराणां न रक्षसाम् । बध्यः स्यामिति जग्राह वरं त्वत्तः पितामह ! । देवाश्च शप्ता रुद्राण्या प्रजोच्छेदे पुरा कृते । न भविष्यति वोऽपत्यमिति सर्व्वजगत्पते ! । ब्रह्मोवाच । हुताशनो न तत्रासीच्छापकाले सुरोत्तमाः ! । स उत्पादयिताऽपत्यं बधाय त्रिदशद्विषाम् । तद्वै सर्व्वानतिक्रम्य देवदानवराक्षसान् । मनुष्यानथ गन्धर्व्वान्नागानथ च पक्षिणः । अस्त्रेणामोघपातेन शक्त्या तं घातयिष्यति । यतो वो भयमुत्पन्नं ये चान्ये सुरशत्रवः । सनातनो हि संकल्पः काम इत्यभिधीयते । रुद्रस्य रेतः प्रस्कन्नमग्नौ निपतितञ्च यत् । तत्तेजोऽग्निर्म्महद्भूतं द्वितीयमिव पावकम् । बधार्थं देवशत्रूणां गङ्गायां जनयिष्यति । स तु नावाप तं शापं नष्टः स हुतभुक् तदा । तस्माद्वो भयहृद्देवाः ! समुत्पत्स्यति पावकिः । अन्विष्यतां वै ज्वलनस्तथा चाद्य नियुज्यताम् । तारकस्य बधोपायः कथितो वै मयाऽनघाः ! । न हि तेजस्विनां शापास्तेजःसु प्रभवन्ति वै । बलान्यतिबलं प्राप्य दुर्ब्बलानि भवन्ति वै । हन्यादबध्यान् वरदानपि चैव तपस्विनः । सङ्कल्पाभिरुचिः कामः सनातनतमोऽभवत् । जगत्पतिरनिर्द्देश्यः सर्व्वगः सर्व्वभावनः । हृच्छयः सर्व्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः । अन्विष्यतां स तु क्षिप्रं तेजोराशिर्हुताशनः ।

स वो मनोगतं कामं देवः सम्पादयिष्यति । एतद्वाक्यमुपश्रुत्य ततो देवा महात्मनः । जग्मुः संसिद्धसङ्कल्पाः पर्य्येषन्तो विभावसुम् । ततस्त्रैलोक्यमृषयो विचिन्वन्तः सुरैः सह । काङ्क्षन्तो दर्शनं वह्नेः सर्व्वे तद्गतमानसाः । परेण तपसा युक्ताः श्रीमन्तो लोकविश्रुताः । लोकानन्वचरन् सिद्धाः सर्व्व एव भृगूत्तम ! । नष्टमात्मनि संलीनं नाधिजग्मुर्हुताशनम् । ततः सञ्जातसन्त्रासानग्नेर्द्दर्शनलालसान् । जलेचरः क्लान्तमनास्तेजसाऽग्नेः प्रदीपितः । उवाच देवान्मण्डूको रसातलतलोत्थितः" इत्युपक्रम्य ८५ अ० देवैरग्निसमागमे ततो देवैः प्रार्थितवरादिमुक्तं यथा ।

"अग्निरुवाच । ब्रूत यद्भवतां कार्य्यं कर्त्ताऽस्मि तदहं सुराः ! । भवतान्तु नियोज्योऽस्मि मा वोऽत्रास्तु विचारणा । देवा ऊचुः । असुरस्तारको नाम ब्रह्मणो वरदर्पितः । अस्मान् प्रबाधते वीर्य्याद्बधस्तस्य विधीयताम् । इमान् देवगणांस्तात ! प्रजापतिगणांस्तथा । ऋषींश्चापि महाभाग ! परित्रायस्व पावक ! । अपत्यं तेजसा युक्तं प्रवीरं जनय प्रभो ! । यद्भयं नोऽसुरात्तस्मान्नाशयेद्धव्यवाहन ! । शप्तानां नो महादेव्या नान्यदस्ति परायणम् । अन्यत्र भवतो वीर्य्यात्तस्मात्त्रायस्व नः प्रभो ! । इत्युक्तः स तथेत्युक्त्वा भगवान् हव्यवाहनः । जगामाथ दुराधर्षो गङ्गां भागीरथीं प्रति । तया चाप्यभवन्मिश्रो गर्भश्चास्या दधे तदा । ववृधे स तदा गर्भः कक्षे कृष्णगतिर्यथा । तेजसा तस्य देवस्य गङ्गा विह्वलचेतना । सन्तापमगमत्तीव्रं सा सोढुं न शशाक ह । आहिते ज्वलनेनाथ गर्भे तेजःसमन्विते । गङ्गायामसुरः कश्चिद्भैरवं नादमानदत् । अबुद्धिपतितेनाथ नादेन विपुलेन सा । वित्रस्तोद्भ्रान्तनयना गङ्गा विह्वललोचना । विसञ्ज्ञा नाशकद्गर्भं वोढुमात्मानमेव च । सा तु तेजःपरीताङ्गी कम्पयन्तीव जाह्नवी । उवाच ज्वलनं विप्र! तदा गर्भबलोद्धृता । न ते शक्ताऽस्मि भगवंस्तेजसोऽस्य विधारणे । विमूढाऽस्मि कृताऽनेन न मे स्वास्थ्यं यथा पुरा । विह्वला चास्मि भगवंश्चेतो नष्टञ्च मेऽनघ ! । धारणे नास्य शक्ताऽहं गर्भस्य तपतां वर ! । उत्स्रक्ष्येऽहमिमं दुःखान्न तु कामात् कथञ्चन । न तेजसोऽस्ति संस्पर्शो मम देव ! विभावसो ! । आपदर्थे हि सम्बन्धः सुसूक्ष्मोऽपि महाद्युते ! । तदत्र गुणसम्पन्नमितरद्वा हुताशन ! । त्वय्येव तदहं मन्ये धर्म्माधर्म्मौ च केवलौ । तामुवाच ततो वह्निर्धार्य्यतां धार्य्यतामिति । गर्भो मत्तेजसा युक्तो महागुणफलोदयः ।

शक्ता शसि गर्भं कृत्स्नं वोढुं धारयितुं तथा । न हि ते किञ्चिदप्राप्यमन्यतो धारणं वते । सा वह्निना वार्य्यमाणा देवैरपि सरिद्वरा । समुत्ससर्ज्ज तं गर्भं मेरौ गिरिवरे तदा । समर्था धारणे चापि रुद्रतेजःप्रधर्षिता । नाशकत्तं तदा गर्भं संधारयितुमोजसा । सा समुत्सृज्य तं दुःखाद्दीप्तवैश्वानरप्रभम् । दर्शयामास चाग्निस्तां तदा गङ्गां भृगूद्वह ! । पप्रच्छ सरितां श्रेष्ठां कच्चिद्गर्भः सुखोदयः । कीदृग्वर्णोऽपि वा देवि कीदृग्रूपश्च दृश्यते । तेजसा केन वा युक्तः सर्व्वमेतद्ब्रवीतु मे" ।

"गङ्गोवाच । जातरूपः स गर्भो वै तेजसा त्वमिवानघ ! । सुवर्णो विमलो दीप्तः पर्व्वतञ्चावभासयत् । पद्मोत्पलविमिश्राणां ह्रदानामिव शीतलः । गन्धोऽस्य सकदम्बानां तुल्यो वै तपतांवर ! । तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः । यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्व्वतेषु च । तत् सर्व्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत । पर्य्यधावत शैलांश्च नदीः प्रस्रवणानि च । व्यादीपयंस्तेजसा च त्रैलोक्यं सचराचरम् । एवंरूपः स भगवन् ! पुत्रस्ते हव्यवाहन ! । सूर्य्यवैश्वानरसमः कान्त्या सोम इवापरः । एवमुक्त्वा तु सा देवी तत्रैवान्तरधीयत । पावकश्चापि तेजस्वी कृत्वा कार्य्यं दिवौकसाम् । जगामेष्टं ततो देशं तदा भार्गवनन्दन ! । एतैः कर्म्मगुणैर्लोके नामाग्नेः परिगीयते । हिरण्यरेता इति वै ऋषिभिर्विबुधैस्तथा । पृथिवी च तदा देवी ख्याता वसुमतीति वै । स तु गर्भो महातेजा गाङ्गेयः पावकोद्भवः । दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शनः । ददृशुः कृत्तिकास्तन्तु बालार्कसदृशद्युतिम् । पुत्रस्नेहाच्च तं बालं पुपुषुस्तन्यविस्रवैः । ततः स कार्त्तिकेयत्वमवाप परमद्युतिः । स्कन्नत्वात् स्कन्दताञ्चापि गुहावासाद्गुहोऽभवत्" । अधिकं कार्त्तिकेयशब्दे वक्ष्यते ।
कार्त्तिकस्येदम् अण् ङीप् । कार्त्तिकी ई देवीशक्तिभेदे कौमार्य्याम् नवपत्रिकान्तर्गते जयन्तीरूपे देवीभेदे च कृत्तिकानक्षत्रेण युक्ता पौर्णमासी अण् ङीप् । चान्द्रकार्त्तिकमासस्य ८ पौर्णमास्याम् स्त्री । "कार्त्तिक्याः आग्रहायणे मासे" महाभा० ।

कार्त्तिकव्रत न० कार्त्तिके कर्त्तव्यं व्रतम् । कार्त्तिकमासे कर्त्तव्ये नियमभेदे । तन्माहात्म्यव्रतादि पाद्मस्कान्दयोर्दर्शितं तत्रादौ तस्य नित्यत्वमुक्तम् स्कान्दे

"दुष्प्रापं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेत्तु हि । धर्मं धर्मभृतां श्रेष्ठ ! स मातापितृघातकः । अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् । तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः । स ब्रह्महा स गोघ्नश्च स्वर्णस्तेयी सदाऽनृती । न करोति मुनिश्रेष्ठ ! यो नरः कार्त्तिकव्रतम् । विधवा च विशेषेण व्रतं यदि न कार्त्तिके । करोति मुनिशार्दूल । नरकं याति सा ध्रुवम् । व्रतन्तु कार्त्तिके मासि यदा न कुरुते गृही । इष्टापूर्त्तं वृथा तस्य यावदाहूतनारकी । संप्राप्ते कार्त्तिके मासे द्विजो व्रतपराङ्मुखः । भवन्ति विमुखाः सर्व्वे तस्य देवाः सवासवाः । इष्ट्वा च बहुभिर्यज्ञैः कृत्वा श्राद्धशतानि च । स्वर्गं नाप्नोति विप्रेन्द्र ! अकृत्वा कार्त्तिके व्रतम् । यतिश्च विधवा चैव विशेषेण वनाश्रमी । कार्त्तिके नरकं याति अकृत्वा वैष्णवं व्रतम् । वेदैरधीतैः किं तस्य ? पुराणपठनैश्च किम् ? । कृतं यदि न विप्रेन्द्र ! कार्त्तिके वैष्णवं व्रतम् । जन्मप्रभृति यत् पुण्यं विधिवत् समुपार्ज्जितम् । भस्मीभवति तत् सर्व्वमकृत्वा कार्त्तिके व्रतम् । यद्दत्तञ्च परं जप्तं कृतञ्च सुमहत्तपः । सर्व्वं विफलतामेति अकृत्वा कार्त्तिके व्रतम् । सप्तजन्मार्ज्जितं पुण्यं वृथा भवति नारद ! । अकृत्वा कार्त्तिके मासि वैष्णवं व्रतमुत्तमम् । पापभूतास्तु ते ज्ञेया लोके मर्त्ते महामुने ! । वैष्णवाख्यं व्रतं यैस्तु न कृतं कार्त्तिके शुभम्" । किञ्च "अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः । जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद !" । किञ्च "नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ! । चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः" । किञ्च "पिण्डदानं पितॄणाञ्च पितृपक्षे न वै कृतम् । व्रतं ना कार्त्तिके मासि श्रावण्यामपितर्पणम् । चैत्रे नान्दोलितो विष्णुर्माघस्नानं न सज्जले । न कृतं मज्जनं पुष्ये, श्रावणे रोहिणाष्टमी । सङ्गमे न कृता येन द्वादशी श्रवणान्विता । कुत्र यास्यन्ति ते मूढा नाहं वेद्मि कलिप्रिय !" । पाद्मे च "शौनकादिमुनिगणसंवादे 'मानुषः कर्म्मभूमौ यः कार्त्तिकं नयते वृथा । चिन्तामणिं करे प्राप्य क्षिपते कर्द्दमाम्बुनि । नियमेन विना विप्राः ! कार्त्तिकं यः क्षिपेन्नरः । कृष्णः पराङ्मुखस्तस्य यस्मादूर्ज्जोऽस्य वल्लभः । यैर्न दत्तं हुतं जप्तं न स्नानं न हरेर्व्रतम् । न कृतं कार्त्तिके पुत्र ! द्विजास्ते वै नराधमाः" । किञ्च "यैर्न दत्तं हुतं जप्तं कार्त्तिके न व्रतं कृतम् । तेनात्मा हारितो नूनं न प्राप्तं प्रार्थितं फलम्" । अन्यत्र च "संप्राप्ते कार्त्तिके मासि ये रता न

जनार्द्दने । तेषां सौरिपुरे वासः पितृभिः सह नारद !”। किञ्च “कार्त्तिके नार्च्चितो यैस्तु भक्तिभावेन केशवः । नरकं ते गमिष्यन्ति यमदूतैस्तु यन्त्रिताः । जन्मकोटिसहस्रैस्तु मानुष्यं प्राप्य दुर्लभम् । कार्त्तिके नार्च्चितो विष्णुर्हारितं स्वं जन्म वै । विष्णोः पूजा कथा विष्णो वैष्णवानाञ्च दर्शनम् । न भवेत् कार्त्तिके यस्य हन्ति पुण्यं दशाब्दिकम्”। कार्त्तिकमाहात्म्यं स्कान्दे “कार्त्तिकस्य तु माहात्म्यं प्राक् सामान्येन लिख्यते । ततो विशेषतस्तत्र कर्म्म देशादिभेदतः” इत्युपक्रम्य “कार्त्तिकस्य तु मासस्य कोट्यंशेनापि नार्हति। सर्व्वतीर्थेषु यत् स्नानं सर्व्वदानेषु यत् फलम्। एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः। एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले । मेरुतुल्यसुवर्णानि सर्व्वदानानि चैकतः । एकतः कार्त्तिको वत्स ! सर्व्वदः केशवप्रियः । यत् किञ्चित् क्रियते पुण्यं विष्णुमुद्दिश्य कार्त्तिके। तदक्षयं भवेत् सर्व्वं सत्योक्तं तव नारद !। कार्त्तिकः खलु वै मासः सर्व्वमासेषु चोत्तमः। पुण्यानां परमं पुण्यं पावनानाञ्च पावनः । यथा नदीनां विप्रेन्द्र ! शैलानाञ्चैव नारद ! । उदधीनाञ्च विप्रर्षे ! क्षयो नैवोपपद्यते । पुण्यं कार्त्तिकमासे तु यत्किञ्चित् क्रियते मुने ! । न तस्यास्ति क्षयो ब्रह्मन् ! पापस्याप्येवमेव च । न कार्त्तिकसमो मासो न कृतेन समं युगम् । न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् । कार्त्तिकः प्रवरो मासो वैष्णवानां प्रियः सदा । कार्त्तिकं सकलं यस्तु भक्त्या सेवेत वैष्णवः । पितॄनुद्धरते सर्व्वान् नरकस्थान् महामुने !”। पाद्मे “द्वादशस्वपि मासेषु कार्त्तिकः कृष्णवल्लभः ।। तस्मिन् संपूजितो विष्णुरल्पकैरप्युपायनैः । ददाति वैष्णवं लोकमित्येवं निश्चितं मया। यथा दामोदरो भक्तवत्सलो विदितो जनैः । तस्यायन्तादृशो मासः स्वल्पमप्युरुकारकः । दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः । तत्रापि दुर्लभः कालः कार्त्तिको हरिवल्लभः। दीपेनापि हि तत्रासौ प्रीयते हरिरीश्वरः । सुगतिञ्च ददात्येव परदीपप्रबोधनात् ।”

“अथ तद्व्रतमाहात्म्यं स्कान्दे” “व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम् । कार्त्तिके तु व्रतस्योक्तं फलं जन्मशतानुगम् । अक्रूरतीर्थे विप्रेन्द्र ! कार्त्तिक्यां समुपोष्य च। स्नात्वा यत् फलमाप्नोति तत् श्रुत्वा वैष्णवं व्रतम्। वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करेऽर्व्वुदे । गत्वा यत् फलमाप्नोति व्रतं कृत्वा तु कार्त्तिके । अनिद्रा च सदा यत्नैर्न कृत्वा पितॄन् स्वधाम् । व्रतेन कार्त्तिके मासि वैष्णवन्तु पदं व्रजेत् । प्रवृत्तानाञ्च भक्ष्याणां कार्त्तिके नियमे कृते । अवश्यं कृष्णरूपत्वं प्राप्यते मुक्तिदं शुभम्”। किञ्च “ब्राह्मणः क्षत्त्रियो वैश्यः शूद्रो वा मुनिसत्तम ! तिर्य्योनिं न व्रजत्येव व्रतं कृत्वा तु कार्त्तिके”। किञ्च “कार्त्तिके मुनिशार्दूल ! स्वशक्त्या वैष्णवं व्रतम् । यः करोति यथोक्तन्तु मुक्तिस्तस्य करे स्थिता । सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते । क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम्”। तत्र कर्म्मविशेषमाहात्म्यं स्कान्दे “दानं दत्तं हुतं जप्तं तपश्चैव तथा कृतम् । तदक्षयफलं प्रोक्तं कार्त्तिके च द्विजसत्तम !”। किञ्च “यत्किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः । तदक्षयं लभ्यते वै अन्नदानं विशेषतः”। किञ्च “ये तु संवत्सरं पूर्णमग्निहोत्रमुपासते । कार्त्तिके स्वस्तिकं कृत्वा सममेतन्न संशयः । कार्त्तिके या करोत्येवं केशवालयमण्डनम् । स्वर्गस्था शोभते सा तु कपोती पक्षिणी यथा । यः करोति नरो नित्यं कार्त्तिके पत्रभोजनम् । न स दुर्गतिमाप्नोति यावदिन्द्राश्चतुर्दश । जन्मप्रभृति यत् पापं मानवेन कृतं भवेत् । तत् सर्व्वं नाशमाप्नोति ब्रह्म(पलाश)पत्रेषु भोजनात् । सर्व्वकामफलं तस्य सर्व्वतीर्थफलं भवेत् । न चापि नरकं पश्येद्ब्रह्मपत्रेषु भोजनात्। ब्रह्मा चैव स्मृतः साक्षात् पलाशः सर्व्वकामदः । मध्यमं वर्ज्जितं पत्रं शूद्रस्य मुनिसत्तम !। भुङ्क्ते नरकमाप्नोति यावदिन्द्राश्चतुर्दश । तिलदानं नदीस्नानं सत्कथा साधुसेवनम् । भोजनं ब्रह्मपत्रेषु कार्त्तिके मुक्तिदायकम् । जागरं कार्त्तिके मासि यः करोत्यरुणोदये। दामोदराग्रे विप्रेन्द्र! गोसहस्रफलं लभेत्। जागरं पश्चिमे यामे यः करोति महामुने ! । कार्त्तिके सन्निधौ विष्णोस्तत्पदं करसंस्थितम् । साधुसेवा गवां ग्रासः कथा विष्णोरथार्च्चनम् । जागरः पश्चिमे यामे दुर्लभः कार्त्तिके कलौ”। किञ्च “जलधेनुसहस्रस्य वृषसंस्थे दिवाकरे । तोयं दत्त्वा यदाप्नोति स्नानं कृत्वा तु कार्त्तिके । सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे । सूर्य्यवारेण यत् स्नानं तदेकाहेन कार्त्तिके। पितॄनुद्दिश्य यद्दत्तं कार्त्तिके कृष्णवल्लभे ! अन्नोदकं मुनिश्रेष्ठ । अक्षयं जायते नृणाम्” किञ्च “गीतशास्त्रविनोदेन कार्त्तिकं यो नयेन्नरः । न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय !”। किञ्च “प्रदक्षिणञ्च यः कुर्य्यात् कार्त्तिके विष्णुसद्मनि । पदे पदेऽश्वमेधस्य फलभागी भवेन्नरः । गीतं वाद्यञ्च

स्तवञ्च कार्त्तिके पुरतो हरेः । यः करोति नरो भक्त्या लभते चाक्षयं फलम् । हरेर्नाम सहस्राख्यं गजेन्द्रस्य च मोक्षणम् । कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते । कार्त्तिके पश्चिमे यामे स्तवगानं करोति यः । वसते श्वेतद्वीपे तु पितृभिः सह नारद ! । नैवेद्यदानेन हरेः कार्त्तिके यत्संख्यया । युगानि वसते स्वर्गे तावन्ति मुनिसत्तम ! अगुरुन्तु सकर्पूरं यो दहेत् केशवाग्रतः । कार्त्तिके तु मुनिश्रेष्ठ ! युगान्ते न पुनर्भवः” किञ्च “नियमेन कथां विष्णोर्ये शृण्वन्ति च भाविताः । श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम् । सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रतः । शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने ! । श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम् । कार्त्तिके मुनिशार्दूल ! कुलानां तारयेच्छतम् । नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः । निर्द्दहेत् सर्वपापानि यज्ञायुतफलं लभेत् । न तथा तुष्यते दानैर्न यज्ञैर्गोगजादिकैः । यथा शास्त्रकथालापैः कार्त्तिके मधुसूदनः । कार्त्तिके मुनिशार्दूल ! यः शृणोति हरेः कथाम् । स निस्तरति दुर्गाणि जन्मकोटिशतानि च । यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने ! । अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्” किञ्च “सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नरः । कार्त्तिके परया भक्त्या वैष्णवैः सह संवसेत्” । पाद्मे “कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक् । पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत् । स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ । मोदते विष्णुसदृशो भजनानन्दनिर्वृतः” किञ्च “कार्त्तिकं सकलं मास प्रातःस्नायी जितेन्द्रियः । जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते । कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम् । शूरश्च बहुवीर्य्यश्च कीर्त्तिमांश्च स जायते” । किञ्च “पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः । निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते । मध्यस्थमैश्वरं पत्रं वर्जयेद्ब्राह्मणेतरः” । किञ्च “अपराधसहस्राणि पातकानि महान्त्यपि । क्षमतेऽस्य हरिर्द्देवः पूजितः कार्त्तिके प्रभुः । नैवेद्यं पायसो विष्णोः प्रियं खण्डं घृतान्वितम् । विभज्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने” । तत्रैव श्रीकृष्णसत्यासंवादे “स्नानं जागरणं दीपं तुलसीवनपालनम् । कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः । इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते । देवानामपि ते वन्द्याः किं यैराजन्म तत् कृतम्” । स्कान्दे कार्त्तिकव्रताङ्गानि “हरिजागरणं प्रातःस्नानं तुलसिसेवनम् । उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके” । किञ्च “पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती । फलमाप्नोति तत्प्रोक्तं भुक्तिमुक्तिफलप्रदम् । विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम् । कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च । आपद्गतो यदा स्नानं न लभेत् सवनाय सः । व्याधितो वा पुनः कुर्य्याद्विष्णोर्नाम्नाऽघमार्ज्जनम् । उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः । ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे । अशक्तो दीपदानस्य परदीपान् प्रबोधयेत् । तेषां वा रक्षणं कुर्य्याद्वातादिभ्यः प्रयत्नतः । अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम् । सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि । सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे” । तत्र दीपदानमाहात्म्यम्” स्कान्दे

“कृत्वा कोटिसहस्राणि पातकानि बहून्यपि । निमेषार्द्धेन दीपस्य विलयं यान्ति कार्त्तिके” किञ्च “शृणु दीपस्य माहात्म्यं कार्त्तिके केशवप्रियम् । दीपदानेन विप्रेन्द्र ! न पुनर्जायते भुवि । रविग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे । तत् फलं कोटिगुणितं दीपदानेन कार्त्तिके । घृतेन दीपको यस्य तिलतैलेन वा पुनः । ज्वाल्यते मुनिशार्दूल ! अश्वमेधेन तस्य किम् ?। मन्त्रहीनं क्रियाहीनं शौचहीनं जनार्द्दने । सर्व्वं संपूर्णतां याति कार्त्तिके दीपदानतः । तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम् । दीपदानं कृतं येन कार्त्तिके केशवाग्रतः । तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्त्ये रसातले । यावन्न ज्वलते ज्योतिः कार्त्तिके केशवाग्रतः । श्रूयते चापि पितृभिर्गाथा गीता पुरा द्विज ! । भविष्यति कुलेऽस्माकं पितृभक्तः सुतो भुवि । कार्त्तिके दीपदानेन यस्तोषयति केशवम् । मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः” किञ्च “मेरुमन्दरमात्राणि कृत्वा पापान्यशेषतः । दहते नात्र सन्देहो दीपदानात्तु कार्त्तिके । गृहे वाऽऽयतने वापि दीपं दद्याच्च कार्त्तिके । पुरतो वासुदेवस्य महाफलविधायिनः । स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् । प्रदत्तः कार्त्तिके मासि दीपो वै मधुहाग्रतः । निमेषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके । न तत् क्रतुशतैः प्राप्यं फलं तीर्थशतैरपि । सर्वानुष्ठानहीनोऽपि सर्वपापरतोऽपि सन् । पूयते नात्र सन्देहो दीपं

दत्त्वा तु कार्त्तिके। तस्यास्ति पातकं किञ्चित् त्रिषु लोकेषु नारद ! यत्र शोभयते दीपः कार्त्तिके केशवाग्रतः। पुरतो वासुदेवस्य दीपं दत्त्वा तु कार्त्तिके। प्राप्नोति शाश्वतं स्थानं सर्व्वबाधाविवर्ज्जितम्। यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण तु दीपकम्। द्वादश्याञ्च विशेषेण तस्य पुण्यं वदामि ते। कुले तस्य प्रसूता ये ये भविष्यन्ति नारद !। समतीताश्च ये केचिद्येषां सङ्ख्या न विद्यते। क्रीडित्वा सुचिरं कालं देवलोके यदृच्छया। ते सर्व्वे मुक्ति मायान्ति प्रसादाच्चक्रपाणिनः" किञ्च "द्यूतव्याजेन विप्रेन्द्र! कार्त्तिके केशवालयम्। द्योतयेद्वा महाभागाः! पुनात्यासप्तमं कुलम्। कार्त्तिके दीपदानन्तु कुर्य्याद्यो वैष्णवालये। धन पुत्रो यशः कीर्त्तिर्भवेत्तस्य च सर्व्वदा। यथा च मथनाद्वह्निः सर्व्वकाष्ठेषु दृश्यते। तथा च दृश्यते धर्म्मो दीपदाने न संशयः" किञ्च "निर्द्धनेनापि विप्रेन्द्र! कृत्वा चैवात्मविक्रयम्। कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा। वैष्णवो न स मन्तव्यः संप्राप्ते कार्त्तिके मुने !। यो न यच्छति मूढात्मा दीपं केशवसद्मनि"। नारदीये श्रीरुक्माङ्गदमोहिनीसंवादे "एकतः सर्व्वदानानि दीपदानानि चैकतः। कार्त्तिके न समं प्रोक्तं दीपदो ह्यधिकः स्मृतः"। कार्त्तिके "कार्त्तिके खण्डदीपं यो ददाति हरिसन्निधौ। दिव्यकान्तिविमानाग्र्ये रमते स हरेः पुरे"। तत्र परदीपप्रबोधनमाहात्म्यं स्कान्दे "पितृपक्षेऽन्नदानेन ज्यैष्ठाषाढे च वारिणा। कार्त्तिके तत्फलं पुंसां परदीपप्रबोधनात्। बोधनात् परदीपस्य वैष्णवानाञ्च सेवनात्। कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः। दीयमानन्तु ये दीपं बोधयन्ति हरेर्गृहे। परेण नृपशार्द्दूल ! निस्तीर्णा यमयातनां। न तद्भवति विप्रेन्द्र! इष्टैरपि महामखैः। कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात्। एकादश्यां परैर्द्दत्तं दीपं प्रज्वाल्य मूषिका। मानुष्यं दुर्लभं प्राप्य परां गतिमवाप सा"। तत्र शिखरदीपमाहात्म्यं स्कान्दे। "यदा यदा भासयते दीपकः कलसोपरि। तदा तदा मुनिश्रेष्ठ! द्रवते पापसञ्चयः। यो ददाति द्विजातिभ्यो महीमुदधिमेखलाम्। हरेः शिखरदीपस्य कलां नार्हति षोडशीम्। यो ददाति गवां कोटिं सवत्सां क्षीरसंयुताम्। हरेः शिखरदीपस्य कलां नार्हति षोडशीम्। सर्व्वस्वदानं कुरुते वैष्णवानां महामुने ! शिखरोपरि दीपस्य कलां नार्हति षोडशीम्" किञ्च "यः करोति परं दीपं मूल्येनापि महामुने !। शिखरोपरि मध्ये च कुलानां तारयेच्छतम्। विमानं ज्योतिषा दीप्तं ये निरीक्षन्ति कार्त्तिके। केशवस्य महात्मानो कुले तेषां न नारकी। दिवि देवा निरीक्षन्ते विष्णुदीपप्रदं नरम्। कदा भविष्यत्यस्माकं सङ्गमः पुण्यकर्म्मणा। कार्त्तिके कार्त्तिकीं यावत् प्रासादोपरि दीपकम्। यो ददाति मुनिश्रेष्ठ ! तस्येन्द्रत्वं न दुर्लभम्"। तत्र दीपमालामाहात्म्यं स्कान्दे "दीपपङ्क्तेश्च रचना सबाह्याभ्यन्तरे हरेः। विष्णोर्विमाने कुरुते स नरः शङ्खचक्रधृक्। दीपपङ्क्तेश्च रचनां कुरुते केशवालये। तस्यान्वये प्रसूतानां लक्षाणां नरकं न हि। विष्णोर्विमानं दीपाढ्यं सबाह्याभ्यन्तरे मुने !। दीपोद्द्योतकरे मार्गे तेन प्राप्तं परं पदम्"। भविष्ये च "यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम्। प्रबोधे चैव द्वादश्यामेकादश्यां विशेषतः। सूर्य्यायतप्रकाशस्तु तेजसा भासयन् दिशः। तेजोराशिविमानस्थो जगदुद्द्योतयंस्त्विषा। यावत् प्रदीपसंख्या तु घृतेनापूर्य्य बोधिता। तावद्वर्षसहस्राणि विष्णुलोके महीयते"।

तत्र आकाशादिदीपमाहात्म्यं पाद्मे "उच्चैः प्रदीपमाकाशे यो दद्यात् कार्त्तिके नरः। सर्व्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात्। विष्णुकेशवमुद्दिश्य दीपं दद्यात्तु कार्त्तिके। आकाशस्य जलस्यञ्च शृणु तस्यापि यत् फलम्। धनं धान्यं समृद्धिश्च पुत्रवानीश्वरो गृहे! लोचने च शुभे तस्य विद्वानपि च जायते" किंच "विप्रवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम्। अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः। चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च। वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च। दीपदानाद्धि सर्व्वत्र महाफलमवाप्नुयात्"।

देशविशेषे कार्त्तिकमाहात्म्यविशेषः पाद्मे। "यत्र कुत्रापि देशेऽयं कार्त्तिकः स्नानदानतः। अग्निहोत्रसमफलः पूजायाञ्च विशेषतः। कुरुक्षेत्रे कोटिगुणो गङ्गायां चापि तत्समः। ततोऽधिकः पुष्करे स्याद् द्वारकायाञ्च भार्गव !। कृष्णसालोक्यदो मासः पूजास्नानैश्च कार्त्तिकः। अन्याः पुर्य्यस्तत्समाना मुनयो मथुरां विना। दामोदरत्वं हि हरेस्तत्रैवासीद्यतः किल। मथुरायां ततश्चोर्ज्जो वैकुण्ठप्रीतिवर्द्धनः। कार्त्तिको मथुरायां वै परमावधिरिष्यते। यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा। कार्त्तिके मथुरा सेव्या तथोत्कर्षः परो नहि। मथु-

रायां नरैरूर्जे स्नात्वा दामोदरोऽर्चितः। कृष्णरूपा हि ते ज्ञेया नात्र कार्य्या विचारणा। दुर्लभः कार्तिको विप्र! मथुरायां नृणामिह। यत्रार्चितः स्वकं रूपं भक्तेभ्यः संप्रयच्छति। भुक्तिं मुक्तिं हरिर्दद्यादर्चितोऽन्यत्र सेविनाम्। भक्तिञ्च न ददात्येष यतो वश्यकरी हरेः। सा त्वञ्जसा हरे भक्तिर्लभ्यते कार्त्तिके नरैः। मथुरायां सकृदपि श्रीदामोदरपूजनात्। मन्त्रद्रव्यविहीनञ्च विधिहीनञ्च पूजनम्। मन्यते कार्तिके देवो मथुरायां मदर्च्चनम्। यस्य पापस्य युज्येत मरणान्ता हि निष्कृतिः। तच्छुद्ध्यर्थमिदं प्रोक्तं प्रायश्चित्तं सुनिश्चितम्। कार्तिके मथुरायां वै श्रीदामोदरपूजनम्। कार्तिके मथुरायां वै पूजनाद्दर्शनं ध्रुवः। शीघ्रं संप्राप्तवान् बालो दुर्लभं योगवत्परैः। सुलभा मथुरा भूमौ प्रत्यब्दं कार्तिकस्तथा। तथापि संसरन्तीह नरा मूढा भवाम्बुधौ। किं यज्ञैः किं तपोभिश्च तीर्थैरन्यैश्च सेवितैः। कार्तिके मथुरायाञ्चेदर्च्च्यते राधिकाप्रियः। यानि सर्व्वाणि तीर्थानि नदा नद्यः सरांसि च। कार्तिके निवसन्त्यत्र माथुरे सर्व्वमण्डले। कार्तिके जन्मसदने केशवस्य च ये नराः। सकृत्प्रविष्टाः श्रीकृष्णं ते यान्ति परमव्ययम्। परोपहासमुद्दिश्य कार्तिके हरिपूजया। मथुरायां लभेद्भक्तिं किं पुनः श्रद्धया नरः" इति।

अथ कार्त्तिकव्रतारम्भकालक्रमौ। पाद्मे "आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत्। कार्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः। नित्यं जागरणायान्त्ये यामे रात्रेः समुत्थितः। शुचिर्भूत्वा प्रबोध्याथ स्तोत्रैर्नीराजयेत् प्रभुम्। निशम्य वैष्णवान् धर्मान् वैष्णवैः सह हर्षितः। कृत्वा गीतादिकं प्रातर्देवं नीराजयेत् पुनः। नद्यादौ च ततो गत्वाचम्य सङ्कल्पमाचरेत्" "प्रभुं प्रार्थ्याथ तस्मै च दद्यादर्घ्यं यथाविधि। तत्र सङ्कल्पमन्त्रः। कार्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन!। प्रीत्यर्थं तव देवेश! दामोदर! मया (त्वम्मया) सह" इति। "प्रार्थनामन्त्रस्तु—तव ध्यानेन देवेश! जलेऽस्मिन् स्नातुमुद्यतः। त्वत्प्रसादाच्च मे पापं दामोदर! विनश्यतु"। अर्घ्यमन्त्रः—"व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम। अर्घ्यं गृहाण देवेश! त्वां नमामि सुरेश्वर!"। काशीखण्डे "व्रतिनः कार्तिके मासि स्नातस्य विधिवन्मम। दामोदर! गृहाणार्घ्यं दनुजेन्द्रनिसूदन!। नित्ये नैमित्तिके कृत्स्ने कार्तिके पापशोषणे। गृहाणार्घ्यं मया दत्तं राधया सहितो हरे!"।

इति। पाद्मे तिलैरालिप्य देहं स्वं नामोच्चारणपूर्वकम्। स्नात्वा तु विधिना सन्ध्यामुपास्य गृहमाव्रजेत्। उपलिप्याथ देवाग्रे निर्माय स्वस्तिकं प्रभुम्। तुलसीमालतीपद्मागस्त्यपुष्पादिनार्चयेत्। नित्यं वैष्णवसङ्गत्या सेवेत भगवत्कथाम्। सर्पिषाहर्निशं दीपं तिलतैलेन चार्च्चयेत्। विशेषतश्च नैवेद्यान्यर्पयेदाचरेत्तथा। प्रणामांश्च यथाशक्ति एकभक्तादिकं व्रतम्"। पाद्मेऽन्यत्र "प्रातरुत्थाय शौचादि कृत्वा गत्वा जलाशयम्। कृत्वा च विधिवत् स्नानं ततो दामोदरार्च्चनम्"। किञ्च "मौनेन भोजनं कार्य्यं कार्त्तिके व्रतधारिणा। घृतेन दीपदानं स्यात् तिलतैलेन वा पुनः। दिनञ्च कृष्णकथया वैष्णवानां च सङ्गमैः। नीयतां कार्तिके मासि सङ्कल्पव्रतपालनम्। आश्विने शुक्लपक्षस्य प्रारम्भो हरिवासरे। अथ वा पौर्णमासीतः संक्रान्तौ वा तुलागते। दीपदानमखण्डञ्च दद्याद्वै विष्णुसन्निधौ। देवालये तुलस्यां वा आकाशे वा तदुत्तमम्"। किञ्च "रजतं कनकं दीपान् मणिमुक्ताफलादिकम्। दामोदरस्य प्रीत्यर्थं प्रदद्यात् कार्तिके नरः"। स्कान्दे च "न गृहे कार्तिके कुर्य्याद्विशेषेण तु कार्तिकीम्। तीर्थे तु कार्तिकीं कुर्य्यात् सर्वयत्नेन भाविनि!"। कार्तिके वर्ज्यानि स्कान्दे ब्रह्मनारदसंवादे "कार्तिके तु विशेषेण राजमाषांश्च भक्षयन्। निष्पावान् मुनिशार्दूल! यावदाहूतनारकी। कलिङ्गानि पटोलानि वृन्ताकं सन्धितानि च। न त्यजेत् कार्तिके मासि यावदाहूतनारकी। कार्तिके मासि धर्मात्मा मत्स्यमांसं न भक्षयेत्। तत्रैव यत्नतस्त्याज्यं शशकं शौकरं तथा"। किञ्च—"परान्नं परशय्याञ्च परीवादं पराङ्गनाम्। सर्वदा वर्ज्जयेत् प्राज्ञो विशेषेण तु कार्तिके। तैलाभ्यङ्गं तथा शय्यां परान्नं कांस्यभोजनम्। कार्त्तिके वर्ज्जयेद्यस्तु परिपूर्णव्रती भवेत्। संप्राप्तं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत्। दिने दिने तु कृच्छ्रस्य फलं प्राप्नोति मानवः"। तत्रैव श्रीरुक्माङ्गदमोहिनीसंवादे "कार्त्तिके वर्ज्जयेन्मधु। कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके शुक्तसन्धितम्। न मत्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि। चाण्डालः स भवेत् सुभ्रु! कार्तिके मांसभक्षणात्।"

कार्त्तिकिक पु० कार्त्तिकी पौर्णमासी अस्मिन् मासे ठञ्। १चान्द्रकार्त्तिकमासे एवं २कार्त्तिकीयुक्ते वर्षे ३कार्त्तिकाख्ये जीववर्षे च।

कार्त्तिकेय पु० कृत्तिकानामपत्यं पालकत्वेन ढक्। अग्निनिषिक्तरुद्रतेजस उत्पन्ने कृत्तिकाभिः पालिते स्कन्दे देवे कार्त्तिकशब्दे तत्कथादि उक्तम्। रामायणे तु संक्षेपेणोक्तं यथा "कुमारश्चाभवत् तत्र तरुणार्कसमद्युतिः। वह्नितेजोभवः श्रीमान् गङ्गाकुक्षिपरिच्युतः। तं कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः। तदा क्षीरप्रदानार्थं कृत्तिकाः संन्ययोजयन्। ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा। स्यादस्माकमयं पुत्रः ख्यातो नाम्नेति राघव!॥ अन्योन्यं पिबतस्तासां तनयस्य मुखानि षट्। समभूवन् महाबाहो! षण्मुखस्तेन विश्रुतः। ततस्तादेवता ऊचुः कार्त्तिकेय इति प्रभुः। पुत्रोऽयं जगति ख्यातो भविष्यति न संशयः"।

कार्त्तिकेयप्रसू स्त्री कार्त्तिकेयं प्रसूते प्र+सू–क्विप्। पार्वत्यां शब्दरत्ना०। पार्व्वत्यां शिववीर्यनिषेककाले देवैर्विघ्ने कृते तद्रेतसो भूमिवह्न्यादिनिषेकेण तस्योत्पत्तेस्तस्यास्तदीयमूलकारणत्वात् तत्प्रसूत्वं यथा ब्रह्मवै०पु०गणेशख०"सम्बभूव रहः क्रीड़ा पार्वतीशिवयोः पुरा। दृष्टस्य च सुरैः शम्भो वीर्य्यं भूमौ पपात ह। भूमिस्तदक्षिपत् वह्नौ वह्निश्च शरकानने। तत्त्वं पुष्टः कृत्तिकाभिः"। षट्सु ऋषिपत्नीषु वह्ने रेतसो निषेके ताभिश्च शरवणे क्षेपात्तज्जन्मे तस्यमूलमग्निकुमारशब्दे ५४९० भारतवाक्यं दर्शितम् तेन गङ्गायां निषेकाज्जन्मकथनन्तु कल्पभेदादित्यविरोधः।

कार्त्तायणि पुं०स्त्री कर्त्तुरपत्यम् कुर्वा०ण्यः कार्त्त्यः तस्यापत्यम् "अणोद्व्यचः" पा० फिञ् यलोपः। कर्त्तुरपत्यस्यापत्ये।

कार्त्तिकोत्सव पु० ७त०। १कार्त्तिककर्त्तव्ये उत्सवे उपचारात् तदाधारे कार्त्तिकपौर्णमासीरूपे २काले त्रिका०।

कार्त्स्न्य न० कृत्स्नस्य भावः ६त० ष्यञ्। साकल्ये "विभाषा साति कार्त्स्न्ये" पा० "तन्निबोधत कार्त्स्न्येन द्विजापरान् पङ्क्तिपावनान्" मनुः। [बा। कर्दमेन रक्ते वस्त्रादौ।

कार्दम(मिक) त्रि० कर्दमेन रक्तं अण् कृत्तिकारगते ठक्

कार्पट पु० कर्पटएव स्वार्थेऽण्, कार्पटः, स इवाकारोऽस्त्यस्य, अच् वा। १जीर्णवस्त्रखण्डे (लाता कानि)। तादृशं वस्त्रयुक्ते २कार्य्यार्थिनि (उमेदार) त्रि० हेमच०। तदाकारयुक्ते जतुनि (जौ) हेमच०।

कार्पटगुप्तिका स्त्री कार्पटेन खण्डवस्त्रेण गुप्तेव स्वार्थे क। (झुली) (बटुया) इति ख्याते पदार्थे शब्दचि०।

कार्पटिक त्रि० कर्पटेन चरति ठक् कार्पटोऽस्त्यस्य वा ठन् कषायखण्डवस्त्रेण चारिणि १तीर्थयात्राप्रसक्ते। "विश्रान्तकार्पटिकप्रस्फुटितचरणधूलिधूसरकिसलयलाञ्छितोदकघटैः" काद०। "नित्यं कार्पटिकान् सर्व्वान् समं पुत्रेण पश्यति" काशी०ख०१२अ०। २कर्मठे त्रिका०।

कार्पण्य न० कृपणस्य भावः ष्यञ्। १कृपणत्वे २दीनत्वे च "कार्पण्यदोषोपहतस्वभावः" गीता। "कार्पण्यं केवला नीतिः क्रौर्य्यं श्वापदचेष्टितम्" हितो०।

कार्पास त्रि० कर्पास्या अवयवः बिल्वा० अण्। कर्पासीविकारे सूत्रादौ। तस्य फले लुक्। कर्पासो स्वार्थेऽण् ङीप् कर्पासी (कापास) २ वृक्षे स्त्री। स्वार्थे क। कार्पासिकाऽप्यत्र। स्वार्थिकस्यापि प्रकृतिलिङ्गातिक्रमस्य काचित्कत्वात् कार्पासकोऽप्यत्र पु०। "कार्पासको लघुः कोष्णो मधुरो वातनाशकः। तत्पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम्। तत्फलं पिण्डिकानाड़ीपूयस्रावविनाशकृत्। तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु" भावप्र०। अधिकं कर्पासशब्दे १७२२पृ० दृश्यम्।

कार्पासधेनु स्त्री स्त्री कार्पासरचिता धेनुः। दानार्थं कल्पितायां कार्पासवस्त्रादिनिर्म्मितायां धेनौ। तद्विधानं हेमा० दा०ख० वराहपुराणे यथा

"अतःपरं प्रवक्ष्यामि धेनुं कार्पासिकीं शुभाम्। विश्वस्य गुह्यगुह्यार्थं ब्रह्मणा चांशुकङ्कृतम्। कार्पासमूलन्त्वापि तेनाशावृत्तमा स्मृता। सा च कार्पासभारेण धेनुः श्रेष्ठा प्रकीर्त्तिता। मध्यमा च तदर्द्धेन कन्यसी (कनिष्ठा) च तदर्द्धतः। पूर्ववद्वस्त्रधान्यञ्च हिरण्यञ्च तथैव च। वत्सकन्तु चतुर्थांशैर्दानमन्त्रोऽभिधीयते"। पूर्व्ववदिति वराहपुराणोक्ततिलधेनुवदित्यर्थः। "हेमकुन्देन्दुदेवेशि! क्षीरार्णवसमुद्भवे!। सोमप्रिये! सुधेन्वाख्ये! सौरभेयि! नमोऽस्तु ते। दत्तेयमिन्दुनाथाय शशाङ्कायामृताय च। अत्रिनेत्रप्रजाताय सोमराजाय वै नमः"। "यस्त्वेवं परया भक्त्या ब्राह्मणाय प्रयच्छति। स याति सोमलोकन्तु सोमेन सह मोदते। न रोगी न ज्वरी कुष्ठी कुले तस्य प्रजायते। पुत्रदारसमोपेतो जीवेच्च शरदां शतम्"। वस्त्र धेन्वादयोप्यत्र

कार्पासनासिका स्त्री कार्पासस्य तत्पूरणार्था नासिकेव। (टेको) तर्कौ शब्दरत्ना०। कर्पासनासिकाप्यत्र।

कार्पासपर्व्वत पु० दानार्थं कल्पिते धान्यशैलादिषु दशसु अचलेषु कर्पासवस्त्रनिर्म्मिते पर्व्वतभेदे तद्विधानादि हेमा० दानख० ब्रह्माण्डपुराणे यथा

"भगवानुवाच। अतःपरं प्रवक्ष्यामि कार्पासाचलमुत्तमम्।

परमं सर्व्वदानानां प्रियं सर्व्वदिवौकसाम्। देशकालौ समासाद्य धनं श्रद्धाञ्च यत्नतः। देयमेतन्महादानं तारणार्थं कुलस्य च। पर्व्वतं कल्पयेत्तत्र कार्पासेन विधानतः। पूर्व्वोक्तेन विधानेन कृत्वा सर्व्वं विधानतः। विंशद्भारस्तु कर्त्तव्य उत्तमः पर्व्वतो बुधैः। मध्यमो दशभिः कुर्य्याज्जघन्यः पञ्चभिस्तथा। सर्व्वधान्यसमूहस्य मध्ये ह्योषधिभिर्वृतः। रत्नैश्च संयुक्तो लोकपालावृतस्तथा। ब्रह्मादयस्तथा शृङ्गे काञ्चनेन विनिर्मिताः। कुलाचलांश्च चतुरश्चतुर्भागेन कल्पयेत्। सौवर्णशिखरान् सर्व्वान् सर्व्वरत्नोपशोभितान्। नानाधातुविचित्राङ्गान् भक्ष्यभोज्यसमावृतान्। कुण्डे वा स्थण्डिले वापि तत्र होमो विधीयते। ऋत्विजश्च तथा चाष्टौ कारयेद्वेदवित्तमान्। होमोव्याहृतिभिश्चैव अग्नौ तद्दैवतैरपि। गव्येन सर्पिषा तत्र तथा कृष्णतिलैरपि। अयुतं होमसंख्या च पालाशसमिधस्तथा। शङ्खतूर्य्यनिनादैश्च तथा मङ्गलपाठकैः। उत्सवं कारयेत्तत्र दिनमेकमतन्द्रितः। पर्व्वकाले ततो दद्यात् पूजयित्वा विधानतः। “नमः सर्व्वामरावास भूतसङ्घैरभिष्टुताः। ब्रह्मादयो मे वरदा भवन्तु विबुधाः सदा”। इत्युच्चार्य्य नरो दद्यान्नारी वा विधिपूर्व्वकम्। पूजयित्वा द्विजान् सम्यक् वासोभिर्भूषणैस्तथा। अनेन विधिना यस्तु दानमेतत् प्रयच्छति। स गच्छेत्त्रिदशावासं विमानोपरि संस्थितः। अप्सरोगणसंवीतो गन्धर्व्वैरभिसंस्तुतः। तत्र मन्वन्तरं यावदुषित्वा विबुधालये। पुण्यक्षयादिहाभ्येत्य महीम्भुङ्क्ते ससागराम्। रूपवान् सुभगोवाग्मी श्रीमानतुलविक्रमः। पञ्च जन्मानि नारी वा जायते नात्र संशयः। भूयश्च शृणु राजेन्द्र! दिव्यं कार्पासपर्व्वतम्। तस्य भारशतेनैव कुर्य्यादर्द्धेन वा पुनः। शेषं पूर्व्वविधानेन सर्व्वं कुर्य्याद्यथाक्रमम्। फलं पूर्व्वोदितञ्चैव जायते नृपसत्तम!”। कार्पासाचलकार्पासशैलादयोऽप्यत्र।

कार्पाससौत्रिक त्रि० कर्पाससूत्रेण निर्वृत्तः ठक् अनुशतिकादेराकृतिगणत्वेन द्विपदवृद्धिः। कर्पाससूत्रनिर्म्मिते वस्त्रादौ। “शते दशपला वृद्धिरौर्णे कार्पाससौत्रिके” याज्ञ०।

कार्पासिक त्रि कर्पासेन निर्वृत्तः ठक्। कर्पाससूत्रनिष्पन्ने पटादौ “शतं दासीसहस्राणां कार्पासिकनिवासिनाम्” भा०स०५०अ०। कार्पासवस्त्राच्छादिनाम्।

कार्म्म त्रि० कर्म्म शीलमस्य छत्रा० णः। “कार्म्मस्ताच्छील्ये” पा०नि० टिलोपः। फलमनपेक्ष्य कर्म्मसु प्रवृत्ते कर्म्मशीले स्त्रियां टाप्।

कार्म्मण न० कर्म्मैव कर्म्मन्+“तद्युक्तात् कर्म्मणोऽण्” पा०अण्। १वाचिकं श्रुत्वा क्रियमाणे कर्म्मणि सि०कौ०। कर्म्मणे हितम् अण्। २मूलकर्म्मणि मन्त्रौषध्यादिभि र्वश्यादिकरणे अमरः (यादुकरा)। “कार्म्मणत्वमगमन् रमणेषु” माघः। ततः स्वार्थेऽण् स्वार्थिकप्रत्ययस्य क्वचित् प्रकृतिलिङ्गाति क्रम विधानात् कार्म्मणी वृत्यर्थे स्त्री०। “धौतं नद्या किमिदमथवा कार्म्मणी माथुरीणाम्” उद्भवदू०। कार्म्मणमिति तु ज्यायः। ३मन्त्रादियोगविद्यायाम् न० कर्म्म साध्यत्वेन अस्त्यस्य अण्। ४कर्म्मदक्षे त्रि मेदि०। प्रपञ्चसारोक्तमलत्रयान्तर्गते ५मलभेदे च। “मायिकं नाम योषोत्थं पौरुषं कार्म्मणं मलम्। आणव्यं तदृहयं प्रोक्तं निषिद्धं तन्मलत्रयम्” “ज्योतिर्मन्त्रेण विधिवद्दहेन्मलत्रयं यती” तन्त्रसा०।

कार्म्मार पु० कार्म्मारएव स्वार्थेऽण्। १कर्म्मकारे (कामार) “कार्म्मारो अश्मभिर्द्युतिभिः” ऋ०९,११२,२। “कार्म्मारः अयस्कारः” भा०। कर्म्मारस्यापत्यम् शिवा० अण्। २कर्म्मकारापत्ये पुंस्त्री स्त्रियां ङीप्।

कार्म्मारक त्रि०कर्म्मारेण कृतं कुलाला०वुञ्। कर्म्मकारकृते।

कार्म्मार्य्यायणि पुंस्त्री कर्म्मारस्यापत्यं फिञ् नि०। कर्म्मकारापत्ये स्त्रियां वा ङीप्।

कार्म्मिक त्रि० कर्म्मणा चित्रकर्म्मणा निर्वृत्तः ठक्। निष्पत्त्युत्तरं चित्रसूत्रैः चक्रस्वस्तिकादिचिह्नयुक्ततया क्रियमाणे पटादौ। “कार्म्मिके रोमबद्धे च त्रिंशद्भागःक्षयोमतः” याज्ञ०। “कार्म्मिकं कर्म्मणा चित्रेण निर्म्मितम्। यत्र निष्पन्ने पटे चक्रस्वस्तिकादिकं चित्रसूत्रैः क्रियते तत्कार्म्मिक मित्युच्यते” मिता०। तस्य भावः पुरोहि० यक्। कार्म्मिक्य तद्भावे न०।

कार्म्मुक न० कर्म्मणे प्रभवति उकञ्। १धनुषि अमरः। “कार्म्मुकेणेव गुणिना बाणः सन्धानमेष्यति” माघः। “विहाय लक्ष्मीपतिलक्ष्म कार्म्मुकम्” किरा०। २कर्म्मक्षमे त्रि० मेदि०। कार्म्मुकं साध्यत्वेनास्त्यस्य अच्।। ३वंशे मेदि०। ४श्वेतखदिरे ५हिज्जलवृक्षे ६महानिम्बे च पु० राजनि०। मेषादिषु नवमे ७राशौ “कार्म्मुकं तु परित्यज्य झषं (मकरम्”) संक्रमते रविः। प्रभाते शार्वराक्षे च स्नानं कुर्य्यात् परेऽहनि” कालमा० भविष्यपु०। कृमुकस्येदम् अण्। ८क्रमुकसंबन्धिनि

त्रि० स्त्रियां ङीप्। "अग्नावारूढे त्रयोदशाश्वां प्रादेशमात्राः समिध आदधाति" "इतोद्नां कार्मुकीं द्रुवः" इति कात्या० श्रौ०१६,४,२२,२५,। "अत्र ऋतुकः धमनइक्ष" कर्कः। स च श्वेतखदिरः। अतएव स्वार्थे अणन्ततया श्वेतखदिरार्थतेत्युक्तं राजनि०। तूलस्फोटने तदाकारे (आचड़ा) (धुनारा) इतिख्याते ६यन्त्रभेदे। अग्निपुराणे धनुर्वेदप्रकरणे धन्विनां वैशाखादिस्थानपञ्चकमुक्त्वा धनुः शिक्षाप्रकारलक्षणादिकमुक्तं यथा

'कार्मुकं गृह्य वामेन बाणं दक्षिणकेन तु। वैशाखे यदि वा स्थाने संस्थितोऽप्यथ वाऽऽयते। गुणाढ्यं तु ततः कृत्वा कार्मुकं प्रियकार्मुकः। अधः कोटिन्तु धनुषः फलदेशन्तु पत्रिणः। धरण्यां स्थापयित्वा तु तोलयित्वा तथैव च। भुजाभ्यां मन्दकुञ्जाभ्यां प्रकोष्ठाभ्यां दृढव्रतः। न्यसेत्शाणं धनुःदेहे पुङ्खदेशश्च पत्रिणः। विन्यासो धनुषश्चैव द्वादशाङ्गुलमन्तरम्। ज्यया विशिष्टः कर्त्तव्यो नातिहीनो नचाधिकः। निवेश्य कार्मुकं नाभ्यां (धनुर्मध्ये) नितान्तं शरं करम्। उत्क्षिपेदुन्नतं हस्तमन्तरेणाक्षिकर्णयोः। पूर्व्वेण मुष्टिना ग्राह्यं तलाग्रे दक्षिणे शरम्। हरणन्तु ततः कृत्वा शीघ्रं पूर्व्वं प्रसारयेत्। नाभ्यन्तरा नैव बाह्या नोर्द्ध्वका नाधरा तथा। न च कुब्जा न चोत्ताना न चला नातिवेष्टिता। समास्थैर्य्यं गुणोपेता मौर्वी दण्डइव स्थिता। छादयित्वा ततो लक्ष्यं पूर्व्वेणानेन मुष्टिना (वाममुष्टिना)। उरसा तूत्थितो यन्ता त्रिकोणावनतस्थितः। स्तब्धाङ्गो निश्चलग्रीवो मयूराञ्चितमस्तकः। ललाटनासावक्त्रांसाः कुर्परोऽस्य समोभवेत्। अन्तरे त्र्यङ्गुलं ज्ञेयं चिबुकस्यांसकस्य च। प्रथमं त्र्यङ्गुलं प्रोक्तं द्वितीये द्व्यङ्गुलं तथा। तृतीयेऽङ्गुलमुद्दिष्टमायतं चिबुकांसयोः। गृहीत्वा सायकं तूण्या मयूराञ्चितमस्तकः। तर्ज्जन्याङ्गुष्ठकेनाथ पूरयेत् सायकं पुनः। अनामया पुनर्गृह्य तथा मध्यमयाऽपि च। तावदाकर्षयेद्वेगात् यावद्बाणः प्रपूरितः। एवंविधमुपक्रम्य मोक्तव्योऽविधिवत् खगः। दृष्टिमुष्टिगतं लक्ष्यं भिन्द्याद्बाणेन सुव्रतः, त्यक्त्वा तु पश्चिमं हस्तं क्षिपेद्वेगेन पृष्ठतः। एतदुच्छेदमिच्छन्ति ज्ञातव्यं हि त्वया द्विज!। कुर्परं तदधः कुर्य्यादाकृष्य तु धनुष्मता। ऊर्द्ध्वं वै लस्तके (धनुर्मध्ये) कुर्य्यादङ्गुलिष्टन्तु मध्यमम्। ज्येष्ठं प्रकृष्टं विज्ञेयं धनुःशास्त्रविशारदैः। ज्येष्ठस्तु सायको ज्ञेयोभवेद्द्वादशमुष्टिकः। एकादशस्तथा मध्यः कनीयान् दशमुष्टिकः। चतुर्हस्तं धनुः श्रेष्ठं त्रयं शार्ङ्गन्तु मध्यमम्। कनीयस्तु त्रयं प्रोक्तं नित्यमेव पदातिनः। अश्वे रथे गजे ज्येष्ठः सदैव परिकीर्त्तितः"

"पर्य्यायतं द्विजः कृत्वा ततो मारैर्गतायुषाम्। सुनिर्धौतं ततः कृत्वा यज्ञभूमौ विधानवत्। ततो बाणं समागृह्य दंशितः सुसमाहितः। तूणमासाद्य बध्नीयात् दृढां कक्ष्यां दक्षिणाम्। विलक्ष्यमपि लक्ष्या यस्तत्र चैव सुसंस्थितः। ततः समुद्धरेद्बाणं तूणाद्दक्षिणपाणिना। तेनैव सहितं मध्ये शरं संगृह्य धारयेत्। आकृष्य ताड़येत्तत्र चन्द्रकं (चन्द्राकारलक्ष्यम्) षोड़शाङ्गुलम्। मुक्त्वा बाणं ततः पश्चाद्धनुः शिक्षा ततः स्मृता। निगृह्णीयान्मध्यमया ततोऽङ्गुल्या पुनः पुनः। अक्षिलक्ष्यात् क्षिपेत्तूणाच्चतुरस्रं तु दक्षिणम्। चतुरस्रगतं वेध्यमभ्यसेच्चादितः स्थितम्। तस्मादनन्तरं तीक्ष्णं पराहत्तगतं च यत्। निम्नमुन्नतवेध्यञ्च अभ्यसेत् क्षिप्रकं ततः। वेध्यस्थानेष्वथैतेषु सत्त्वस्य पुटकं धनुः। हस्तावापशतैश्चित्रैस्तर्जयेद्दुर्जरैरपि। तस्मिन् मध्यगते विप्र! द्वे वेध्ये दृढसङ्करे। द्वे वेध्ये द्वे तथा चित्रदुष्करे दृढदुष्करे। न तु निम्नञ्च तीक्ष्णञ्च दृढवेध्ये प्रकीर्त्तिते। निम्नं दुष्करमुद्दिष्टं वेध्यं मूर्द्धि यतश्चरेत्। लक्ष्यकायममध्ये तु चित्रदुष्करसंज्ञके। एवं वेध्यगणं कृत्वा दक्षिणेनेतरेण च। आरोहेत् प्रथमं वीरोजितलक्ष्यस्ततो नरः। एष एव विधिः प्रोक्तस्तत्र दृष्टः प्रयोक्तृभिः। अधिकं भ्रमणं तस्य तस्माद्विष्वक् प्रकीर्त्तितम्। लक्ष्यं संयोजयेत्तत्र पत्रिपत्रगतं दृढम्। भ्रान्तं प्रचलितं चैव स्थिरं यच्च भवेदिति। समन्तात्ताड़येद्भिन्द्याच्छेदयेद्व्यथयेदपि। कर्म्मणां संविधानज्ञो ज्ञात्वैव विधिमाचरेत्। मनसा चक्षुषा दृष्ट्या योगसिद्धिं भुवं व्रजेत्"।

१० वृत्तक्षेत्रस्य परिध्यर्द्धात्मके रेखाभेदे ११तदीयांशभेदे च तयोर्धनुराकारत्वात्तथात्वम्। तदानयनप्रकारः जीवानयनप्रकारश्चोक्ता लीला० दर्शितोयथा।

"अथ चापानयनाय करणसूत्रं वृत्तम्। व्यासाब्धिघातयुतमौर्व्विकया विभक्तो जीवाब्धिपञ्चगुणितः परिधेस्तु वर्गः। लब्धोनितात्परिधिवर्ग चतुर्थभागादाप्ते पदे वृतिदलात्पतिते धनुः स्यात्"।

"उदाहरणम्। विदिताद्दह ये गुणास्ततोऽष्ट तेषामधुना धनुर्मितिम्। यदि तेऽस्ति धनुर्गुणक्रियागणिते गाणितिकातिनैपुणम्"

न्यासः । ४२ । ८२ । १२० । १५४ । २०८ । २२६ । २३६ । २४० । [एता जीवासंख्या यथा भवन्ति तथा जीवाशब्दे वक्ष्यते] अएवापवर्त्तितः परिधिः १८ । ४२ जीवार्द्धज्या २१/२ पञ्चभि ५ स परिधेः १८ वर्गो ३२४ गुणितः । १७०१० । व्यासार्द्ध २४० । ४ घात ९६० युत ४२ मौर्विकयानया १००२ विभक्तोलब्धो १७ ऽत्राङ्कलाघवाय चतुर्विंशतेरर्द्धाधिकसहस्रांशयुतोऽङ्कोतो-ऽनेनोनितात्परिधि १८ । ३२४ वर्गा चतुर्थभागात् ८१ (१७ ऊनितात्) ६४पदे प्राप्ते, ८ इति १८ दलात् ९ । पतिते १ जातं धनुः एवं जातानि धनूंषि । १ । २ । ३ । ४ । ५ । ६ । । ७ । ८ । ९ । एतानि परिधिस्वष्टा-दशांशेन गुणितानि स्युः"। एवं ८२ संख्यादौ कल्प्यम् ।

"द्वलीकृतं चक्रमुशन्ति चापम्" इति सि० शि० उक्ते १२ राशिचक्रस्यार्द्धरूपे खण्डे च तस्य च जीवाभेदेनान्यविधा मितिः यथोक्त तत्रैव "ज्यां प्रोज्झ्य तत्त्वाश्वि२२५हृता-वशेषं यातैश्चजीवाविवरेण भक्तम् । जीवा विशुद्धा यतमा च तज्ज्ञैस्तत्त्वाश्विभिस्तत् सहितं धनुःस्यात्" "यस्य धनुः साध्यं तस्याद्या जीवा विशुध्यति वा शोध्या शेषात्तत्त्वा-श्वि २२५ गुणाद्गतागामिज्यान्तरहृताद्यल्लभ्यते तत्स्याप्य ततोयतमा जीवा विशुद्धा तद्गुणितैस्तत्त्वाश्विभिः २२५ सहितं धनुःस्यात्" प्रमि०

सू० सि० रङ्गनाथाभ्याञ्च तथैवोक्तं यथा ।

"ज्यां प्रोज्झ्य शेषं तत्त्वाश्विहतं तद्विवरोद्धृतम् । सङ्ख्या-तत्त्वाश्विसंवर्गे संयोज्य धनुरुच्यते" सू० सि० ।

"यस्य धनुः कर्त्तुमिष्टं तस्मिन्नयुक्तपूर्वं ज्यापिण्डं न्यूनी-कृत्य शेषं पञ्चाकृति २२५ गुणं तद्विवरोद्धृतं तयोः शुद्धाऽ-शुद्धपिण्डयोरन्तरेण भक्तं फलं शुद्धा ज्या यतमा यतमसङ्ख्या तत्त्वाश्विनोः संवर्गे घाते संयोज्य सिद्धं धनुः कथ्यते । अत्रोपपत्तिः । ज्या यतमा शुद्ध्यति ततमा याश्चाप-कलास्ततमसङ्ख्यागुणिततत्त्वाश्विनः । यदि ज्यान्तरेण तत्त्वाश्विकलास्तदा शेषज्यया का ? इत्यनुपातागतफलयुता इति वैपरीत्येन सुगमतरा"। अधिकं जीवाशब्दे वक्ष्यते ।

कार्म्मुकासन न० । रुद्रयामलोक्ते आसनभेदे तल्लक्षणं यथा "कार्मुकासनमाकुर्य्यादुदरे पूरयेन्मुखम् । तदा वायुरधोयाति कालेन सूक्ष्मवायुना कृत्वा पद्मासनं मन्त्री वेष्टयित्वा च धारयेत् । करेण दक्षिणेनैव वाम-पादाङ्गुली तथा । सव्यापसव्यद्विगुणं कार्मुकासनमेव च । कार्मुकद्वययोगेन शववद्वायुमानयेत्" रुद्रयामले ।

कार्य्य त्रि० कृ—कर्म्मणि ण्यत् । १कृतिसाध्ये २कर्त्तव्ये । "तस्मात् शास्त्रं प्रमाणन्ते कार्य्याकार्य्यव्यवस्थितौ" गीता । "नास्य कार्य्योऽग्निसंस्कारो न च कार्य्योदक-क्रिया" मनुः । "शब्दानां कार्य्ये कार्य्यान्विते वा शक्तिरिति" मीमांसकाः । ३उत्पाद्ये जन्ये "व्यापारो-भावना सैवोत्पादना सैव च क्रिया । कर्त्तोऽकर्म्मतापत्तेर्न हि यत्नोऽर्थ इष्यते" इत्युक्तेः कृञोभावनारूपव्यापारा-र्थकत्वात् तत्साध्ये "यदि रस कार्य्यः स्यात् विभावादि-कारणकः स्यात्" सा० द० । गुरुमते यागादिकृति-साध्ये ४अपूर्व्वे । यथा चापूर्व्वस्यैव कार्य्यत्वं तथाऽपूर्व्व-शब्दे २४८पृ० दर्शितम् । ५प्रयोजने ६उद्देश्ये तदि-च्छयैव कर्म्मसु प्रवृत्तेस्तस्य तथात्वम् "उपसर्पति कार्य्यार्थी कृतार्थी नोपसर्पति" हितो० । अष्टादशानां विवाद-पदानाञ्च उद्देश्यत्वादेव तथात्वम् । "यस्मात्कार्य्य-समारम्भश्चिरासेन विनिश्चितः" व्य० त० कात्या० स्मृतिः । उपचारात् ७हेतौ च मेदि० । व्याकरणमते ८आदिश्यमाने वर्णादौ । "कार्य्यमनुभवन् हि कार्य्यी नि-मित्ततया नाश्रीयते" महाभा० "भिषक् कर्त्ताथ करणं रसा, दोषास्तु कारणम् । कार्य्यमारोग्यमेवैकम्" सुश्रुतोक्ते ९आरोग्ये च तत्र कर्त्तृत्वकरणत्वकारणत्व-कार्य्यत्वार्थेषु भिषगादिशब्दानां परिभाषितत्वात् । भावे ण्यत् । १० कर्म्मणि व्यापारे । ज्योतिषोक्ते ११ जन्मल-ग्नावधि दशमस्थाने । "कार्य्याधीशः स्वगेहे बुधगुरुक-विभिः संयुतो वीक्षितो वा" जातकम् कार्य्यस्य व्यापार-रूपत्वात्तथात्वम् ।

कार्य्योत्पत्तिप्रकारोमतभेदेन चतुर्द्धा "तत्र असतः सज्जा-यते इति सौगताः तदभावादेव कार्य्याणामुत्पत्तेः स्वी-कारात् । सतोऽसज्जायते इति नैयायिकाः तैः प्रागुत्-पत्तेः घटादीनामसत्त्वस्य, मृदादिकारणस्य च तदा-सत्त्वस्य च स्वीकारेण असत उत्पत्तेः स्वीकारात् । सतो-विवर्त्तः कार्य्यं जगत् न वस्तु सदिति अद्वैतवादिनः । सतः सज्जायते इति साङ्ख्याः । विस्तृतञ्चैतदुत्पत्तिशब्दे ११०८पृ० ।

यथा च लङादेः कार्य्यत्वेनापूर्व्ववाचकता तथा गुरुमत प्रदर्शने शब्दचि० उक्तं यथा

"अथ स्वर्गकामोयजेतेत्यादौ इष्टसाधनत्वं कार्य्यत्वं वा यद्विधिः समभिव्याहृतक्रियान्वयी तदन्यान्वयी वा । तत्र गुरवः नाहत्य क्रिया कार्य्यतया लिङा बोधयितुं

शक्यते स्वर्गकामनियोज्यान्वययोग्यताज्ञानविरहात् कामनाविशिष्टस्य हि ममेदं कार्य्यमितिबोद्धृत्वं नियोज्यत्वं तत्कामनायास्तद्बोधोपयोगे सति भवति। स च कामनानन्तरं काम्यसाधनताबोधात् कार्य्यताबोधे सति स्यात् एवञ्च स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वययोग्यता। न च कालान्तरभाविस्वर्गे क्रिया साक्षात् परम्परया वा साधनमिति शब्दोबोधयितुमर्हति आशुविनाशित्वात् परम्पराघटकानुपस्थितेस्तृतीयप्रकाराभावात् अन्यथा तमादाय साधनत्वसम्भवात् कल्प्यमप्यपूर्व्वं न स्यात् इष्टसाधनताविधिपक्षे स्फुटैवानुपपत्तिः कार्य्यताविधिपक्षेऽपि अन्वयप्रकारतया साधनत्वं शाब्दमिति फलतो न विशेषः। अतः क्रियातोऽन्यत् स्वर्गसाधनतार्हं क्रियाकार्य्यतानिर्वाहकं लिङाद्यर्थः"।

व्याकृतञ्चैतत् मथुरानाथेन—

"प्रसङ्गादपूर्वस्य विधिप्रत्ययवाच्यतां प्रभाकराभिमतां निराकर्त्तुं विचाराङ्गसंशयप्रयोजिका विप्रतिपत्तिमादर्शयति अथेत्यादिना यद्विधिः यद्विधिपदोपस्थापितार्थः। समभिव्याहृतक्रियान्वयीति एतद्विधिसमभिव्याहृतधातूपस्थापितार्थान्वयी तदन्यान्वयी वेत्यर्थः तदन्वयित्वञ्च तद्विशेष्यकत्वावच्छिन्नशाब्दबोधप्रकारताश्रयत्वम्। अत्र विधिकोटिः, विधेः कार्य्यत्वे शक्तिवादिनां नैयायिकानां, तन्मये स्वर्गकामकृतिसाध्यो याग इत्यन्वयात्, निषेधकोटिस्तु कार्यत्वरूपेणापूर्व्वे शक्तिवादिनां प्राभाकराणां, तन्मये स्वर्गकामस्य यागविषयकं कार्य्यमिति यागविषयककार्यवान् स्वर्गकाम इत्येव सान्वयबोधात् अत्र विषयकत्व जन्यत्वं तच्च यागकार्ययोः संसर्गः। कार्यत्वं कृतिसाध्यत्वम् अपूर्व्वस्यापि कश्चिल्लक्षणादिना धातूपस्थापितत्वाच्च विधिकोटौ सिद्धसाधनं निषेधकोटौ बाध इति तद्वारणाय एतद्विधिसमभिव्याहृतेति धातुविशेषणम्। तदन्यान्वयित्वञ्च तदन्वयिभिन्नत्वं यथाश्रुतस्य विरोधिकोटित्वाभावात्। इष्टसाधनत्वादिना प्रत्येकरूपेण पक्षत्वे द्वयोरसंग्रहः। इष्टसाधनताविधिपक्षे इष्टसाधनत्वस्यापि विध्यर्थकार्येऽन्वयादतः पक्षे यद्विधिरिति। इत्थञ्च यद्विध्यर्थत्वेन द्वयोरनुगमान्नोक्तदोषः इष्टसाधनत्वं कार्यत्वं वेति तु स्वरूपकथनं न तु तद्रूपेण पक्षे प्रवेशः इष्टसाधनत्वमिति प्राभाकरैकदेशिमते। कार्यत्वं कृतिसाध्यत्वम्। न च गुरुनये कार्यस्य धर्मिणो विध्यर्थतया कृतिसाध्यत्वरूपस्य कार्यत्वस्य विधिप्रत्ययप्रवृत्तिनिमित्तत्वमेव कुतो विध्यर्थत्वमिति वाच्यं कार्यस्य विध्यर्थत्वेऽपि अवच्छेदकविधया कार्यत्वस्यापि विध्यर्थत्वात्। वस्तुतस्तु तन्मते कृतिसाध्यत्वरूपं कार्यत्वं न शक्यतावच्छेदकम् अपि तु प्रागभावप्रतियोगित्वरूपं ध्वंसप्रतियोगित्वरूपं धर्मत्वरूपं वा लाघवात्। कृतिसाध्यत्वन्तु पृथगेव शक्यं लिङ्सामान्यशक्यं वा पचेतेत्यादिलौकिकस्थलानुरोधात्। अन्वयबोधोऽपि यागविषयकं कार्यं स्वर्गकामकृतिसाध्यमित्याकारकः, कृतिसाध्ययागविषयककार्यवान् स्वर्गकाम इत्याकारकोवेति यथाश्रुतएव साधुः। पक्षतावच्छेदकावच्छेदेन विधिकोटिसिद्धेरुद्देश्यतया बलवदनिष्टाननुबन्धित्वस्य प्रकृत्यर्थेऽन्वयमादाय नांशतः सिद्धसाधनं न वा कृतिसाध्यत्वेष्टसाधनत्वयोरन्यतरवांशतः साध्यसिद्धिमादायार्थान्तरत्वम्। प्रवर्त्तकज्ञानप्रकारीभूतत्वेन विध्यर्थो विशेषणीयः, तेन वर्त्तमानत्वादेः कालस्य संख्यायाश्च तादृशविधिप्रतिपाद्यत्वेऽपि न तत्र विधिकोटावंशतो बाधः। न चेष्टसाधनत्वत्वादौ विध्यर्थतावच्छेदकेंऽशतो बाधः, प्रवर्त्तकज्ञानप्रकारीभूतत्वस्य प्रवृत्तिविशेष्यांशे प्रवर्त्तकज्ञानप्रकारत्वरूपत्वात्। यद्वा संख्याकालातिरिक्तत्वेन विध्यर्थोऽपि विशेषणीयः। विधिशक्यत्वरूपस्य विध्यर्थत्वस्य पक्षतावच्छेदकत्वादिष्टसाधनत्वत्वादौ नांशतोबाधः। कृतिसाध्यत्वस्य पृथक् शक्यतया नैतदसंग्रहः निषेधसिद्धिस्तु पक्षतावच्छेदकसामानाधिकरण्येन उद्देश्या नातोबलवदनिष्टाननुबन्धित्वेऽंशतो बाधः। प्रवर्त्तकज्ञानप्रकारीभूतत्वमात्रेण पक्षतायाम् ओदनकामः पचेदित्यादिविध्यर्थे ओदनसाधनत्वपाकमात्रविषयककृतिसाध्यत्वादौ विधिकोटावंशतो बाध इति। स्वर्गकामो यजेतेत्यादिस्थलीय तत्तद्विध्यर्थत्वेन पक्षतालाभाय स्वर्गकामो यजेतेत्यादाविति विधिविशेषणमिति भावः। नव्यास्तु विज्ञातविधितत्त्वार्थस्तु तदन्वयिनं पृच्छति अथेति न तु विप्रतिपत्तिपरोऽयं ग्रन्थः गुरुणा समं विवादे तु कार्य्यत्वं विधिप्रत्ययशक्यतावच्छेदकं नवेति विप्रतिपत्तिरूहनीया विधिकोटिः परेषाम्। न च कार्यस्य विधिप्रत्ययशक्यत्वेऽपि तस्य प्रकृत्यर्थयागादावभेदान्वयेऽपि नैयायिकानां विवक्षितार्थसिद्ध्याऽर्थान्तरप्रसङ्ग इति वाच्यं धात्वर्थप्रत्ययार्थयोरभेदान्वयबोधस्याव्युत्पन्नतया तादृशबोधासम्भवात्। अन्यथा विप्रतिपत्तावपि यागनिष्ठकृतिसाध्यत्वस्य निरूपकतासम्बन्धेन विध्यर्थे कृतावन्वयादपि नैयायिकानां विवक्षितार्थसिद्ध्याऽर्थान्तरप्रसङ्गस्य दुर्वारत्वादिति प्राहुरिति दिक्। अत्र गुरव इति अत्र विप्रतिपत्तौ प्रश्ने वा। नाहत्येति आहत्य—साक्षात् अपूर्वकार्य्यत्वानुपपत्तिज्ञानद्वारा पश्चात्त

बोध्यतएवेति भावः। क्रिया—यागादिः, कार्य्यतया स्वर्गकामकृतिसाध्यतया। नचैवम् अनुपपत्तिज्ञानोत्तरकालिकबोधमादाय विधौ सिद्धसाधनं निषेधे च बाध इति वाच्यं तदन्वयित्वस्य शाब्दत्वघटितत्वादेव सिद्धसाधनादिनिरासात् अनुपपत्तिज्ञानोत्तरकालिकबोधस्यैव औपादानिकबोधत्वेन शाब्दत्वविरहात्। औपादानिकत्वञ्च प्रत्यक्षत्वादिवदनुभवत्वव्याप्योधर्मविशेषः तदवच्छिन्नं प्रति च श्रौतानुपपत्तिज्ञानसचिवः शब्दएव पुनरनुसन्धीयमानो हेतुः। अतएवानुपपत्तिज्ञानसचिवः शब्दएव पञ्चमं प्रमाणमिति परसिद्धान्त इति भावः। स्वर्गकामनियोज्येति स्वर्गकामोयोविधिवाक्यनियोज्यस्तदीयकृतिसाध्यत्वान्वयबोधप्रयोजकीभूतस्य ज्ञानस्य विरहादित्यर्थः। वक्ष्यमाणयुक्त्या यागे स्वर्गकामकृतिसाध्यत्वान्वयबोधे यागनिष्ठेष्टसाधनताज्ञानस्य हेतुत्वेन प्रथमं तद्विरहादिति भावः। प्रयोजकज्ञानविरहमेवोपपादयति कामनाविशिष्टस्य हीति ममेदं कार्य्यमिति यागविशेष्यकस्वर्गकामकृतिसाध्यत्वप्रकारकमित्यर्थः बोद्धृत्वं शाब्दबोधोपयोगित्वं तच्च कारणतावच्छेदकसाधारणं तेन वक्ष्यमाणक्रमेण कामनाया अपि तादृशशाब्दबोधोपयोगित्वं सङ्गच्छते कामनाविशिष्टस्य तादृशबोधोपयोगित्वं समवायिकारणतया नियोज्यत्वं सकलप्रामाणिकसिद्धनियोज्यव्यवहारविषयतावच्छेदकं तदिति स्वर्गकामनाविशिष्टस्य तादृशबोधोपयोगित्वमित्यर्थः।—तद्बोधोपयोगे तद्बोधोपयोगित्वे सतीत्यर्थः। विशेष्यान्वयिनाऽन्वयिन एव विशेषणतया विशेषणस्य तदुपयोगित्वं विना विशिष्टस्य तदुपयोगित्वासम्भवात्। न च रूपवति रस इत्यादिवत् कामना चोपलक्षणमिति वाच्यं विशेषणत्वसम्भवे उपलक्षणत्वस्यान्याय्यत्वादिति भावः। स चेति कामनायास्तादृशबोधोपयोगश्चेत्यर्थः। कामनानन्तर कामनाप्रकारकज्ञानानन्तरं यः काम्यसाधनताबोधः। कामनाघटितकाम्यसाधनताबोध इति यावत् तस्मात् कार्य्यताबोधे सति तज्जन्यो यदि कार्य्यताबोधस्तदैव स्यात् कामनायाः कारणतावच्छेदकत्वात् न हि कामनैव साक्षात् कार्य्यताबोधजनिकाऽसम्भवात् इत्यर्थः। अतः काम्यसाधनताज्ञानं स्वर्गकामकृतिसाध्यत्वान्वयप्रयोजकम् इति बोधः। स्वर्गकामेति स्वर्गकामोयो नियोज्यस्तदीयकृतिसाध्यत्वान्वयबोधप्रयोजकं ज्ञानमित्यर्थः। नन्वेवं प्रथमं वेदाद्यागे स्वर्गसाधनताज्ञाने सति तदनन्तरं तत्र स्वर्गकामकृतिसाध्यताबोधो भविष्यति किं कार्य्यत्वरूपेण विधेर कार्थ्येत्यत आह नचेति क्रिया—यागादिः। साक्षादिति

अव्यवहितपूर्व्वत्वसम्बन्धेन कार्य्याधिकरणीभूतक्षणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकान्यथासिद्ध्यनिरूपकधर्म्मवत्त्वं साक्षात् साधनत्वं, तादृशधर्म्मावच्छिन्नजनकत्वे सति कार्य्यनियतपूर्व्ववर्त्तितावच्छेदकान्यथासिद्ध्यनिरूपकधर्म्मवत्त्वञ्च परम्परासाधनत्वमिति भावः। साक्षात्साधनत्वस्याबोधने हेतुमाहाश्विति यागादेरिच्छाविशेषरूपतया, तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वात् इत्यर्थः। परम्परासाधनत्वस्याबोधने हेतुमाह परम्परेति अव्यवहितपूर्व्वत्वसम्बन्धेन स्वर्गविशेषाधिकरणीभूतक्षणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकान्यथासिद्ध्यनिरूपकधर्म्मावच्छिन्नजनकत्वे सति स्वर्गविशेषनियतपूर्ववर्त्तितावच्छेदकान्यथासिद्ध्यनिरूपकधर्म्मवत्त्वरूपपरम्परासाधनत्वघटकस्यानुपस्थितेरित्यर्थः। नचापूर्वघटितविशिष्टपरम्परासाधनत्वस्यैव विध्यर्थतया तत एव विशिष्टोपस्थितिसम्भवात् किमपूर्वस्य पृथगुपस्थित्या इति वाच्यं परम्परासाधनत्वान्वयबोधे परम्पराघटकफलपर्य्यन्तस्थायिव्यापारोपधायकत्वस्यान्वयप्रयोजकरूपत्वेन योग्यतात्वात् प्रथमन्तज्ज्ञानं विना तदन्वयबोधासम्भवादिति भावः। नन्वेतदुभयविलक्षणमेव साधनत्वं बोधयिष्यतीत्यत आह तृतीयेति अन्यथा—तृतीयप्रकारसत्त्वे। साधनत्वसम्भवादिति अपूर्व्वं विनापि यागस्य स्वर्गसाधनत्वसम्भवादिति भावः। कल्प्यमिति तव नयेऽप्यपूर्व्वकल्पना न स्यादित्यर्थः आशुविनाशिनो यागस्य कालान्तरभाविस्वर्गसाधनत्वान्यथानुपपत्त्यैव त्वयाप्यपूर्वकल्पनादिति भावः। नन्वेवं प्रथमं परम्परासाधनत्वरूपेण परम्परासाधनत्वान्वयासम्भवेऽपि सामान्यतः स्वर्गसाधनत्वरूपेणान्वयः स्यादित्यत आह इष्टसाधनताविधिपक्ष इति। सामान्यत इष्टसाधनत्वस्य विध्यर्थत्वपक्षे इत्यर्थः। अनुपपत्तेः साक्षात्परम्परौदासीन्येन फलसाधनत्वान्वयेऽपि फलपर्य्यन्तस्थायित्वतादृशव्यापारोपधायकत्वान्यतरत्वस्य योग्यतात्वेन तज्ज्ञानं विना सामान्यतोऽपि साधनत्वान्वयासम्भवात् इति भावः। अत्रैवानुपदं नतु सजातीय इति न च साक्षात् परम्परासाधनत्वोभयसाधारणं स्वर्गसाधनत्वमनुगतमेव दुर्वचमिति वाच्यं स्वर्गत्वावच्छिन्नविजातीयस्वर्गनियतपूर्ववर्त्तितावच्छेदकान्यथासिद्ध्यनिरूपकधर्म्मवत्त्वस्यैव तत्त्वात्। नचैवमव्यवधानस्याप्रवेशात् स्वतो-व्यापारतो वा स्वर्गाव्यवहितपूर्व्वक्षणमसतोऽपि नियतपूर्व्वकारणत्वापत्तिरिति वाच्यं अन्यथासिद्ध्यनिरूपकत्वविशेषणेनैव तद्वारणात् विजातीयस्वर्गनियतपूर्व्ववर्त्तिता

वच्छेदकत्वन्तु यावत्योविजातीयस्वर्गव्यक्तयः प्रत्येकं तत्पूर्व्वक्षणवृत्तिनियतत्वं विजातीयस्वर्गोत्पत्त्यधिकरणक्षणावच्छिन्नोत्तरत्वसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकान्यत्वमिति यावत् एवमग्रेऽपि सर्व्वत्र बोध्यम्। कार्य्यत्वं कारणत्वञ्चातिरिक्तपदार्थ इत्यभिप्रायेणेदमित्यपि कश्चित्। नन्तु भवन्मतेऽपि विधिप्रत्ययात् कार्य्यत्वरूपेणापूर्व्वावगमेऽपि तस्य स्वर्गसाधनत्वं नावगतं तथा च तावन्मात्रज्ञानात् कथं प्रवृत्त्यर्थमुत्तरकालं परम्परया स्वर्गसाधनत्वावगमः परम्परासाधनत्वस्यापूर्व्वनिष्ठसाधनताघटितत्वात्। न च कार्य्यवत् साक्षात् साधनत्वस्यापि विध्यर्थतया तस्य च समानपदोपात्ततया कार्य्ये एवान्वयादपूर्व्वस्य स्वर्गसाधनत्वावगम इति वाच्यं तथापि कार्य्यमात्रस्य विध्यर्थत्वपक्षेऽप्रतीकारादित्यत आह कार्य्यताविधिपक्ष इति। कार्य्यत्वमात्रस्य विधिप्रवृत्तिनिमित्तत्वपक्ष इत्यर्थः मात्रपदादिष्टसाधनत्वमात्रस्य व्यवच्छेदः तेन संख्यादेर्विध्यर्थत्वेऽपि न क्षतिः। कृतिसाध्यत्वस्य पृथक्शक्यत्वपक्षे कार्य्यमात्रस्य विधिशक्यत्वपक्षेऽपीत्यर्थः। मात्रपदादिष्टसाधनत्वव्यवच्छेदः। अन्वयप्रकारतयेति कृतिसाध्यत्वान्वयप्रयोजकरूपतयेत्यर्थः। साधनत्वं पदानुपस्थितमपि स्वर्गसाधनत्वं घटेन जलमाहरेत्यादौ अपदार्थस्यापि च्छिद्रेतरत्वस्य भानवदिति भावः। यद्यपि अपूर्व्वे कृतिसाध्यत्वान्वयबोधे स्वर्गसाधनत्वस्यान्वयप्रयोजकरूपतया योग्यतात्वे शाब्दबोधात् पूर्व्वमपूर्व्वे तज्ज्ञानमसम्भवि अपूर्व्वस्य शाब्दबोधात् पूर्व्वमज्ञानात्, तथापि परमते बोधनीयपदार्थे बोध्यताज्ञानं न कारणं बोधनीयपदार्थस्यापूर्व्वत्वात् किन्तु पदार्थतावच्छेदकावच्छिन्ने कश्चित्तस्य ज्ञानं तच्च प्रकृतेऽपि सम्भवति कार्य्यत्वरूपेण घटादावेव जलाहरणरूपकार्य्यसाधनताज्ञानसत्त्वादिति निगर्वः। स्वयमुपसंहरति अत इति स्वर्गसाधनतार्हमिति साक्षात्स्वर्गसाधनत्वस्यान्वययोग्यमित्यर्थः। क्रियाकार्य्यतानिर्व्वाहकमिति कार्य्योपस्थितिरिष्टसाधनताज्ञानं ततः कृतिरिति प्रणाल्या क्रियायाः कृतिसाध्यतानिर्वाहकत्वमित्यर्थः; लिङाद्यर्थ इति आदिपदात्तव्यादिपरिग्रहः”।

शब्दचिन्तामणौ स्थानान्तरे गुरुमते वैदिकलिङादेः कार्य्यत्वेनापूर्व्ववाचकता शङ्कापूर्व्वकं दर्शिता यथा।

“नन्वपूर्व्वे व्युत्पत्तिविरहः तथा हि प्रसिद्धार्थे स्वर्गपदसमभिव्याहारान्यथानुपपत्त्योपस्थिते शक्तिर्ग्रहीतव्या न च शाब्दानुभवात् पूर्व्वमपूर्व्वमुपस्थितं मानाभावात् अपूर्व्वत्वव्याघातादवाच्यत्वापाताच्च। न च लिङादिना तदुपस्थितिः व्युत्पत्त्यनन्तरं तत्प्रवृत्तावन्योन्याश्रयात्। न च कार्य्यत्वेनोपलक्षिते तत्र शक्तिग्रहः उपलक्षणं हि ज्ञापनमनुमापनं वा अगृहीते सम्बन्धग्रहात् अशक्यमिति? नैवम् कार्य्ये धर्म्मिणि कार्य्यत्वेन शक्तिग्रहात् कार्य्यत्वविशिष्टस्योपस्थितमेव ततोऽन्विताभिधानदशायां यागविषयकं कार्य्यमित्यनुभवः स्वर्गकामायोग्यतया घटादिकं तिरस्कृत्य क्रियाभिन्ने योग्यतावशाद्यागविषयकापूर्व्वे पर्य्यवस्यति, नत्वपूर्व्वत्वेन शक्तिग्रहो न वाऽपूर्व्वं कार्य्यमित्यनुभवः भवति च सामान्यतः सम्बन्धबुद्धिः सहकारिवशाद्विशेषबुद्ध्युपायः यथातथैव कर्त्तृमात्रसम्बन्धग्रहात् कर्त्तृविशेषसिद्धिः। ननु कार्य्यत्वेनापि किं घटादौ शक्तिग्रहः उतापूर्व्वे उभयत्र वा? नाद्यः, अन्यप्रतिपत्तावन्यशक्तिग्रहानुपयोगात्। नान्त्यौ, प्रागनुपस्थितेरिति चेत्? न येन हि रूपेण शब्देनानुभवो जन्यते तेन रूपेण शक्तिग्रहः पदार्थस्मरणञ्च शब्दानुभवहेतुः। नहि प्रमेयत्वेन शक्तिग्रहः पदार्थस्मरणञ्च घटत्वेन शाब्दानुभवहेतुः। एवञ्च घटादावेव कार्य्ये शक्तो लिङिति शक्तिग्रहः ततः कार्य्यमिति स्मरणं ततो योग्यतादिवशात् प्रचरद्द्रव्यगुणकर्म्माणि कार्य्याणि विहाय यागविषयकं कार्य्यमित्यनुभवो भवन्नपूर्व्वमालम्बते योग्यत्वाच्च तस्य स्थायित्वलाभः। अतएव वाक्यार्थानुभवमात्रविषयत्वादपूर्व्वम्। न च स्मृतानामाकाङ्क्षादिवशादन्वयबोधः पदेन क्रियते, न चापूर्व्वं स्मृतिगोचर इति वाच्यं? शक्तिग्रहपदार्थस्मरणशाब्दानुभवानां समानप्रकारकतामात्रेण हेतुहेतुमद्भावावधारणात् लाघवादावश्यकत्वाच्च। न च क्वचित् सहचारमात्रेणान्वयप्रतियोगिन एवोपस्थितिस्तथा, गौरवात् गोपदादपूर्व्वगवानुभवप्रसङ्गाच्च, विशिष्टवैशिष्ट्यबोधे सर्व्वत्र तथैव, अन्यथा पर्व्वतीयवह्निव्यापकतया नावगत इति कथं तदन्वयोऽनुमितौ। ननु सामान्यलक्षणया प्रत्यासत्त्या सर्व्वाएव व्यक्तयो व्याप्तिग्रहे शक्तिग्रहे च विषयी भवन्ति कथमन्यथा पर्व्वतीयधूमव्याप्तिग्रहे तस्य दत्तुमितः? इति चेत् न, येन रूपेण व्याप्तिग्रहस्तेन रूपेण व्याप्यत्वेन वा पक्षधर्म्मताग्रहोऽनुमितौ कारणमस्तु किन्तया। अपि च सा यद्यस्ति ममापि, नास्ति चेत्तवापि। किञ्च तव दर्शने नास्तीति सुतरामपूर्व्ववाच्यता कार्य्यत्वेन हि रूपेणापूर्व्वस्यापि शक्तिग्रहविषयत्वं पदार्थस्मृतिविषयत्वञ्च। नचैवमपूर्व्वत्वक्षतिः यागविषयकत्वादेर्विशेषस्य कार्य्ये लिङं विनानु-

पस्थितेः यथा पर्व्वतोयत्वभानं वह्नौ, नानुमितिं विना। ननु यदि कार्ये क्रियासाधारणे लिङः शक्तिः क्रिया चायोग्येति योग्यापूर्व्वलाभः तदा नित्यनिषेधापूर्व्वयोरलाभः न हि तत्रायोग्यतया क्रिया त्यक्तुं शक्यते फलाश्रवणात् कल्पनायाञ्च बीजाभावात् नचैवमत्र निर्णीतः शास्त्रार्थः परत्रापि तथैवेति न्यायात्तत्राप्यपूर्व्वमेव लिङाद्यर्थ इति युक्तं नत्वपूर्व्वत्वेन शक्तिग्रहः किन्तु कार्यत्वविशिष्टे धर्मिणि, क्रिया च तथा भवत्येव, न च कार्येण समं क्रियान्वयानुपपत्त्याऽपूर्व्वे पर्यवसानमभेदस्याप्यन्वयत्वादिति नैवम् न हि लोके पचेतेत्यादौ कार्ये धर्मिणि शक्तिः कल्पिता किन्त्वनन्यलभ्यतयातिरूपे कार्यत्वमात्रे, धर्मिणः पाकादेर्धातोरेवोपस्थितिसम्भवात् क्रियाकार्यतान्वयस्यान्विताभिधानलभ्यत्वात् तथाच धर्मिणि शक्तिर्वेदे कल्पनीया सा च क्रियानिरासेनैव, न हि क्रियायाः कार्यत्वान्वययोग्यत्वेन धर्मिणि शक्तिः कल्पयितुं शक्यते तस्मादयोग्यतया क्रियानिरासानन्तरं तदतिरिक्त एव शक्तिकल्पनं न हि क्रियातिरिक्तकार्यात् कार्यमात्रं लघु ततः क्रियापि शक्यैवेति वाच्यं यतो न ब्रूमः क्रियातिरिक्तकार्यत्वेन शक्तिः किन्त्वयोग्यतया निरस्तायां क्रियायां धर्मिणि शक्तिकल्पनसमये यत्क्रियातिरिक्तं तत्र शक्तिः न तु शक्तिग्रहे क्रियातिरिक्तत्वप्रवेशः न हि यत्प्रयुक्तानुपपत्त्या यत् कल्पनं तदेव तस्य विषयः एवञ्च कार्यत्वेनापि तदतिरिक्त एव शक्तिकल्पना। नित्यनिषेधयोरपि तदेवोपासनाद्यन्वययोग्यं लिङाऽभिधीयते न तु कार्यत्वमात्रे धर्मिणि बाधकाभावात् लक्षणाप्रसङ्गाच्च। घटादिस्तु लिङ्शक्तिग्रहेण तिरस्क्रियते न वा पुरस्क्रियते उभयथापि गौरवात् अन्विताभिधानदशायां त्वयोग्यतया तस्याप्रवेशः। विधिप्रत्ययस्य च तत्राप्रयोगः केवलस्य तस्यासाधुत्वात् धातुसमभिव्याहारे च तदर्थेनान्वयबोधजनननियमेन घटाद्यप्रतिपादकत्वात् अतएवाप्रयोगादेवाप्रयोगोऽपूर्व्वत्वं वा प्रयोगोपाधिरिति वदन्ति। अथाप्रतिपाद्यमेव घटादिवृत्तितया न कार्यत्वं प्रवृत्तिनिमित्तं प्रतिपाद्यमात्रवृत्तेरेव तथात्वात् अन्यथा प्रमेयत्वमेव तथास्त्विति चेत् न, यत्प्रकारिका हि प्रतिपत्तिः पदजन्या तदेव तत्र प्रवृत्तिनिमित्तं फलबलकल्प्यत्वाच्छक्तेः नतु प्रतिपाद्यमात्रवृत्तिः सास्नात्वादौ व्यभिचारात् न च प्रमेयत्वं तथा, तद्बोधस्याप्रवर्त्तकत्वात् अतएव लोके लिङ् लाक्षणिकी, क्रियाभिन्ने धर्मिणि वेदे, शक्तिकल्पनात्। न च लौकिकानामपूर्व्वे तात्पर्य्यं सम्भवति पूर्व्वं प्रमाणान्तरेणा-

प्रतीतेः। क्रियासाधारणशक्तावपि लोके लक्षणैव पचेतेत्यत्र हि पाककार्यतावगम्यते तत्र कार्यत्वे लिङस्तात्पर्यं लाघवात् न धर्मिणि, क्रियाया धातुलभ्यत्वात् तदाहुः "तात्पर्याद्धि वृत्तेर्न वृत्तेस्तात्पर्यमिति"। तृतीयायाः करणत्वैकत्ववत् कार्यं कार्यत्वञ्च न स्वतन्त्रं शक्यं किन्तु विशिष्टं विशेष्याच्च विशेषणमन्यदेवेति कार्यत्वे लक्षणा न च कार्यत्वविशिष्टधर्म्युपस्थितावपि धर्म्यंशमपहाय क्रियया कार्य्यतान्वयोऽस्तु किं लक्षणयेति वाच्यं नहीतरधर्मिगतत्वेनोपस्थितस्य धर्म्यन्तराकाङ्क्षास्ति अतः स्वतन्त्रकार्योपस्थितये लक्षणा यथा "पुरोडाशकपालेन तुषानुपवपति" इत्यत्र पुरोडाशार्थतया तदङ्गत्वेनोपस्थितस्य कपालस्य नोपवापाकाङ्क्षेति स्वतन्त्रकपालोपस्थितयेऽधिष्ठाने लक्षणा। न च व्युत्पत्तिविरोधः न हि लोके क्रियाकार्यत्वेन शक्तिरवधारिता येन विरोधो भवेत् किन्तु कार्यत्वमात्रे, क्रियाया धातुलभ्यत्वात्, न च धर्म्यन्तरे शक्तावपि तद्भङ्गः। तस्मात् प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानां गृहीतप्रत्ययार्थं वाऽपूर्व्वमपीति न विरोधः। अस्तु वा लोके लिङः क्रियाकार्यत्वे शक्तिः तथापि तद्भङ्गं विनैव नानार्थन्यायेन वेदे धर्म्यन्तरे शक्तिः तां विना स्वर्गकामान्वयासम्भवात्।"

व्याकृतञ्चेदं मथुरानाथेन यथा—

"व्युत्पत्तिविरह इति विधेः शक्तिग्रहासम्भव इत्यर्थः समभिव्याहारानुपपत्त्येति तदुपस्थापितस्य स्वर्गकामनावतो यागे कृतिसाध्यत्वान्वयानुपपत्त्येत्यर्थः। ग्रहीतव्येत्यपेक्षणाश्रयः। नन्वन्यथानुपपत्त्या जन्मान्तरीयसंस्कारादेव तदुपस्थितिः कल्पनीयेत्यत आह अपूर्व्वत्वव्याघातादिति शाब्दबोधात् पूर्व्वं प्रमाणान्तराविषयत्वस्यैवापूर्व्वरूपत्वादिति भावः। ननु तत्रापि योगार्थोऽत्र त्यज्यते मण्डपपदवदित्यस्वरसादाह अवाच्यत्वेति। प्रकारान्तरेणापूर्व्वस्योपस्थितौ वाच्यत्वं विनापि तद्द्वारा जनकत्वनिश्चयसम्भवादिति भावः। तत्प्रवृत्तौ—लिङादिनाऽपूर्व्वोपस्थितौ। अपूर्व्वत्वेनोपस्थितिः प्राक् नास्तीत्याशयेनाशङ्कते न चेति।—उपलक्षिते उपस्थिते। स्मारणं लिङपदेना स्मारणम्। गूढाभिसन्धिः समाधत्ते नैवमिति। कार्य्ये धर्म्मिणीति कार्यताश्रये धर्म्मिणीत्यर्थः। कार्य्यत्वविशिष्टेति घटादौ विशेषः यागविषयकं कार्य्यमिति स्वर्गसाधनमिति शेषः। स्वर्गकामेति स्वर्गसाधनत्वान्वयायोग्यतयेत्यर्थः। विशेषणमुपादाय इति सामान्यरूपेण विशेषणमुपादाय इत्यर्थः। सम्बन्धग्रहात् तत्सम्बन्धग्रहात् कर्त्तृविशेषेति पचेत्यादौ पाककर्त्त्रादिना

विशेषविद्भिरित्यर्थः। अभिसन्धिमुद्भाटयितुं शङ्कते नन्विति। अनुपस्थितेरिति अपूर्वस्य प्रागनुपस्थितेरित्यर्थः। येन हीति शक्तिग्रहपदार्थस्मरणशाब्दानुभवानां समानप्रकारत्वेनैव कार्य्यकारणभावः न तु समानविषयकत्वेनापि गौरवादित्यर्थः। ननु समानविषयकत्वेनैव कार्य्यकारणभावो न तु समानप्रकारकत्वेनेत्यतआह नहीति। पदार्थस्मरणस्य-प्रमेयत्वेन पदार्थस्मरणस्य तथाच समान प्रकारकत्वस्यावश्यकत्वात्तेनैव रूपेण हेतुत्वमिति भावः। स्मरणं-घटादेः स्मरणम्। ननु कार्य्यमात्रशक्त्या कथं स्वर्गपर्य्यन्तस्थायिकार्य्यलाभः? इत्यत आह योग्यत्वाच्चेति यागविषयककार्य्ये स्वर्गसाधनत्वान्वये स्वर्गपर्य्यन्तस्थायित्वस्य योग्यतारूपत्वाच्चेत्यर्थः। अतएवेति यतएव प्रथमं न तज्ज्ञानमित्यर्थः अपूर्वम् अपूर्वत्वव्यवहारः। पदेन क्रियत इति नियम इति शेषः। शक्तिग्रहेति तथा च शाब्दनियमोऽसिद्ध इति भावः। नन्वाकाशादिपदस्थले पाद्यपदार्थोपस्थितेर्हेतुत्वस्य दृष्टत्वादत्रापि तथेत्यतआह नचेति। क्वचित्-आकाशादिपदे। तथा-शाब्दधीहेतुः। अपूर्वेति शक्तिग्रहाविषयीभूतेत्यर्थः। ननु विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य हेतुतया यागविषयककार्य्यवान् स्वर्गकाम इति विशिष्टवैशिष्ट्यबोधानुरोधादपूर्व्वज्ञानमावश्यकमित्यतआह विशिष्टेति विशिष्टवैशिष्ट्यबोधेऽपि विशेषणतावच्छेदकप्रकारकज्ञानमेव हेतुर्न्नतु विशेषणविषयत्वस्यापि तत्र प्रवेश इत्यर्थः। अन्यथा-विशेषणविषयत्वस्यापि तत्र प्रवेशे। व्यापकतयेति। ज्ञानेन न भात इत्यर्थः। तदन्वयः तद्विषयत्वम्। तस्मात्-तदीयपक्षधर्म्मताज्ञानात्। तेन रूपेणेति स्वमते, तन्मते व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्यैवानुमिति हेतुत्वात्। व्याप्यत्वेन वेति महानसीयधूमे गृहीतेन धूमव्यापकवह्निसमानाधिकरणधूमत्वरूपेण वह्निमदन्यावृत्तित्वरूपेण वा व्याप्यत्वेनेत्यर्थः। एतच्च न्यायनये परनये वह्निव्याप्योधूमः धूमवान् पर्व्वत इति ज्ञानादप्यनुमित्युत्पत्तेः वह्निव्याप्यवान् पर्वत इति ज्ञानादप्यनुमित्युत्पत्तेश्चेति ध्येयम्। सा-सामान्यप्रत्यासत्तिः। सुतरामिति विद्यणोति कार्य्यत्वेन हीति। क्रियासाधारणेन-क्रियासाधारणधर्मप्रकारेण। अयोग्या-साक्षात्फलजननायोग्या। योग्येति साक्षात्फलजननयोग्येत्यर्थः। नित्यनिषेधेति सन्ध्यामुपासीतेत्यत्र सन्ध्यावन्दनापूर्व्वस्य, न कलञ्जं भक्षयेदित्यत्र कलञ्जभक्षणाभावजन्यापूर्व्वस्य चेत्यर्थः। तथा च तत्रापसिद्धान्त इति भावः। अयोग्यतया-साक्षात्फलजननायोग्यतया। फलाश्रवणात् इति नित्ये निषेधस्थले च फलाश्रवणादित्यर्थः। कल्पनायाश्चेति फलकल्पनायाश्चेत्यर्थः। बीजाभावात् प्रमाणाभावात्। कार्य्येण समं-क्रियारूपकार्य्येण समम्। अभेदस्यापीति यद्यपि निषेधस्थले कलञ्जभक्षणाभावस्य कार्य्यत्वाभावेन कार्य्यत्वरूपेण लिङा न तद्बोधसम्भवस्तथापि अभावस्योत्पादविनाशशालित्वनये ऽभावस्यापि कार्य्यत्व सम्भव इत्यभिप्रायेणेदं धर्म्मत्वरूपकार्य्यत्वाभिप्रायेण वा। केचित्तु कार्य्यत्वं कृतिसाध्यत्वं तच्च योगक्षेमसाधारणमित्यभावस्यापि कार्य्यत्वसम्भव इत्याहुः। कृतिरूप इति साध्यत्वसंसर्ग इति भावः। अन्विताभिधानेतिशाब्दबोधेत्यर्थः। धर्म्मिणि-कार्य्ये। कार्य्यत्वान्वयेति स्वर्गकामकृतिसाध्यत्वान्वयेत्यर्थः अयोग्यतया स्वर्गकामकृति साध्यत्वान्वयायोग्यतया। एवमग्रेऽपि। तत्र शक्तिरिति तत्र शक्तिग्रह इत्यर्थः। यत्प्रयुक्तेति यन्निष्ठस्वर्गकामकृतिसाध्यत्वान्वयानुपपत्त्येत्यर्थः। शक्तिकल्पनादिति वैदिकलिङ्मात्रशक्तिकल्पनादित्यर्थः। उपासनादीति सन्ध्योपासनादीत्यर्थः आदिपदान्निषेधविधिस्थले कलञ्जभक्षणाद्यभावपरिग्रहः। लक्षणेति वैदिकलिङः कार्य्ये धर्म्मिण्येव शक्तिकल्पनादिति भावः। एतच्च लोकस्थले लौकिकलिङ्त्वं कार्य्यत्वशक्ततावच्छेदकमित्यभिप्रायेणान्यथा तत्र लिङ्त्वस्य शक्ततावच्छेदकत्वे लक्षणाया असङ्गतेरिति ध्येयम्। एतच्चापाततः तन्मयेऽपूर्व्वस्य शक्तिग्रहाविषयत्वेऽपि शाब्दबोधविषयत्ववत् क्रियाया अपि कार्य्यत्वरूपेण वैदिकलिङः शक्तिग्रहाविषयत्वेऽपि शाब्दबोधविषयत्वसम्भवात् न हि न्यायनयइव तन्मते पाद्यपदार्थशक्तिधीरपेक्षिता किन्तु पदार्थतावच्छेदकरूपेण यत्र कुत्रचिद्धर्म्मिणि शक्तिग्रहादेव शाब्दबोधे योग्यव्यक्तेर्भानम्। किञ्चैवमपि निषेधस्थलेऽपूर्व्वालाभः तत्र कलञ्जभक्षणाभावस्यापि क्रियातिरिक्ततया कार्य्यत्वरूपेण लिङा तस्यैव बोधसम्भवात्। वस्तुतस्तु प्रकृतिप्रत्ययार्थयोरभेदान्वयस्याव्युत्पन्नतया लिङा क्रियादेर्न बोधसम्भवइत्येव तत्त्वम्। ननु घटादिलक्षणकार्य्यत्वस्य शक्यतावच्छेदकत्वे यजेतेत्यादौ कथमपूर्व्वलाभः घटादिभिन्नकार्य्यत्वस्य शक्यतावच्छेदकत्वेऽपूर्व्वस्यानुपस्थितत्वात् कुत्र कार्य्ये शक्तिग्रह इत्यतआह घटादिस्त्विति। उभयथापीति घटादिभिन्नकार्य्यत्वस्य घटादिकार्य्यत्वस्य च शक्यतावच्छेदकत्वे इत्यर्थः। किन्तु कार्य्यत्वमेव शक्यतावच्छेदकमिति भावः। ननु

सामान्यतः कार्यत्वस्य शक्यतावच्छेदकत्वे यजेतेत्यादौ घटा-
देरपि शाब्दबोधे भानापत्तिरित्यत आह्वान्वितेति अयोग्य-
तया—धात्वर्थान्वयायोग्यतया। नन्वेवं कार्यत्वेन घटादेरपि
शक्यत्वात्तत्रापि लिङः कदाचित् प्रयोगः स्यादित्यत आह
विधोति केवलस्य—धात्वसमभिव्याहृतस्य, तस्य—विधिप्रत्य-
यस्य, अप्रयोगादेवेति असाधुत्वादेवेत्यर्थः। अप्रयोगः विधि
प्रत्ययाद्घटादेरप्रयोगः। प्रयोगोपाधीति शक्तिप्रमाजन्य
शाब्दबोधेऽभावसम्बन्धेन प्रतिबन्धकमित्यर्थः। तादृशबोधेऽ-
पूर्व्वत्वं कारणमिति पर्य्यवसितोऽर्थः। प्रतिपत्तिः शक्य-
प्रतिपत्तिः। तदेव तत्रेति तद्वृत्ति तदेवेति योजना शक्य-
वृत्ति तदेवेत्यर्थः तथा च तत्पदशक्यवृत्तित्वे सति तत्-
पदजन्योपस्थितिप्रकारत्वं तत्पदप्रवृत्तिनिमित्तत्वमिति
लक्षणं फलितम्। आकृतेरपि गोपदादिजन्यप्रतीतौ
गवाद्यंशे स्वसमवायिसमवेतत्वसम्बन्धेन प्रकारत्वात्तत्राति-
व्याप्तिवारणाय सत्यन्तम्। आकृतिस्तु अवयवसंयोगविशे-
षरूपा न गोपदशक्यवृत्तिः स्वसमवायिसमवेतत्वलक्षण-
परम्परासम्बन्धस्य वृत्त्यनियामकत्वात्। वृत्त्यनियामक
सम्बन्धेन तु न कोपि धर्म्मः कुत्रापि शक्यतावच्छेदकः
पशुपदादेरपि लोमवल्लाङ्गूलादिसमवेतत्वादिकमेव शक्य-
तावच्छेदकं न तु समवेतत्वसम्बन्धेन लोमवल्लाङ्गूलादिकम्।
तदादिपदात् कदाचित् परम्परासम्बन्धेन कपाल-
त्वादिप्रकारेण घटादिबोधस्तु लक्षणयैव, आकृतेरपि
द्रव्यादिपदशक्यवृत्तित्वात्। तत्पदेति न चाकृतेरपि
कालिकादिसम्बन्धेन शाक्यगवादिवृत्तित्वादतिव्याप्तिस्तद-
वस्थेति वाच्यं तत्पदशक्तिविशेष्यतावच्छेदकतानियामक
सम्बन्धेन तत्पदशक्तिमुख्यविशेष्यवृत्तित्वस्य विवक्षित-
त्वात् मुख्येत्युपादानात् मूर्त्तादिपदे परिमाणत्वादेः,
घटादिपदे आकृतिवच्छन्नान्तरजातेः शक्यतावच्छेदकत्वव्यु-
दासः। ज्ञानविषयशक्तवत्त्वादिपदे ज्ञानस्यापि शक्तिमुख्य
विशेष्यतया ज्ञानत्वस्य शक्यमुख्यवृत्तित्वेऽपि न यथोक्त
सम्बन्धेन तद्वृत्तित्वम्। नचाकाशादेरपि आकाशादिपद
शक्यतावच्छेदकत्वापत्तिरिति वाच्यं नव्यमते घटत्वादे-
र्घटादिपदशक्यतावच्छेदकत्ववदाकाशादेराकाशादिपद-
शक्यतावच्छेदकत्वे इष्टापत्तेः। सम्प्रदायमते चा-
काशादिपदशक्तेर्विशेष्यांशे निर्विकल्पकरूपतया विशेष्य-
तावच्छेदकतानियामकसम्बन्धाप्रसिद्धेर्वातिव्याप्तिविरहात्,
अवयवावयविवाचिदध्यादिपदे दध्यादेः शक्यतावच्छेद-
कत्ववारणाय विशेष्यदलम्। उपस्थितिर्हि लक्षणाशक्ति-
भ्रमाजन्यत्वेन विशेषणीया तेन लक्ष्यतावच्छेदके नाति
प्रसङ्गः। न च समूहालम्बनमादायातिप्रसङ्ग इति वाच्यं
यत्प्रकारताघटितधर्म्मावच्छेदेन तत्पदजन्यत्वं तत्त्वस्य
विवक्षितत्वादिति निगर्वः। तत्पदशक्तिविशेष्यतावच्छे-
दकत्वं तत्पदप्रवृ[illegible]मित्तत्वं संस्थानञ्च गुरुनये, नव्य
नैयायिकनये च समभिति न तत्रातिव्याप्तिरिति
तु न्याय:। सास्नादौ सास्नासमवेतत्वादौ तथा—यथोक्त
लक्षणाश्रयः। तद्बोधस्य तत्प्रकारकज्ञानस्य अप्रवर्त्तक-
त्वात् शक्त्याऽजनकत्वात् घटादिपदस्येति शेषः। ननु लौकि-
कलिङः कार्यत्वे शक्तिः वैदिकलिङः कार्ये धर्मिणि शक्ति-
रित्यभ्युपगमे लौकिकलिङ्त्ववैदिकलिङ्त्वयोः शक्तताव-
च्छेदकत्वे शक्ततावच्छेदकगौरवमित्यत आह अतएवेति शक्तता-
वच्छेदकगौरवादेवेत्यर्थः। लाक्षणिकी-कार्यत्वे लाक्षणिकी
वेदे—वेदस्थले। शक्तिकल्पनादिति लिङ्सामान्यस्यैव शक्ति-
कल्पनादित्यर्थः। न च लिङ्मात्रस्य कार्यत्वे शक्तिः वेदे च
कार्ये धर्मिणि लक्षणा इत्येव किं न स्यात् कार्यत्वत्वा-
पेक्षया कार्यत्वत्वविशिष्टस्य कार्यत्वस्य गुरुत्वात् विनिगम-
काभावाच्चेति वाच्यं कृतिसाध्यत्वत्वरूपकार्यत्वत्वापेक्षया
प्रागभावप्रतियोगित्वादिरूपस्य धर्मत्वरूपस्य वा कार्य-
त्वस्य लघुत्वादित्यभिप्रायः। वस्तुतस्तु लाघवाल्लिङ्मात्रस्य
कृतावेव शक्तिः साध्यत्वं संसर्गः। वेदे च प्रागभाववत्त्वादि-
रूपकार्य्यत्वाश्रये धर्मिणि लक्षणाऽस्त्वेवेत्याशयः। ननु
लोकस्थले कार्य्यत्वरूपेणापूर्व्वमेवाऽर्थोऽस्तु किं लक्षणयेत्यत
आह नचेति पूर्व्वमिति वेदे तु अनादिलिङ्प्रवादादेवा
ध्यापकानामपूर्व्वावगमात्तत्र तात्पर्य्यसम्भव इति भावः।
वस्तुतोऽपूर्व्वं लोके बाधितं मानाभावादित्येव द्रष्टव्यम्।
ननु लिङः शक्तिपक्षे क्रियाभिन्नधर्मिणोविषयत्वेऽपि
कार्य्यत्वस्य शक्यतावच्छेदकतया क्रियायां शक्तिरस्त्येव
तथा च लोकेऽपि पाकः कार्य्याभिन्न इत्यभेदान्वयबोधस्य
शक्त्यैवोपपत्तौ किं लक्षणया इत्यतमाह क्रियासाधार-
णेति। लक्षणैव कार्यत्वे लक्षणैव। पाककार्यतावगम्यते इत्या-
धाराधेयभावसम्बन्धेन प कविशेष्यकृतिसाध्यत्वप्रकार-
कान्वयबोधोजायते इत्यर्थः। अन्यथा प्रवृत्त्यनुपपत्तेस्तथा
च प्रवर्त्तकज्ञानानुरोधाल्लक्षणेति भावः। इदञ्चाभ्युपगमवादे-
नोक्तं वस्तुतोधात्वर्थप्रत्ययार्थयोरभेदान्वयबोधस्याव्युत्पन्न
तया क्रियासाधारणशक्तावपि शक्यानोपपत्तिरन्यथा नि-
त्यनिषेधस्थलेऽपि तथान्वयबोधसम्भवादपूर्वलोपापत्तेरिति
ध्येयम्। ननु लोके पचेतेत्यादौ लिङोलक्षणायां लिङः

पदात् कार्य्यत्वरूपेण शक्योपस्थितिद्वारा शाकविशेष्यककार्य्यत्वप्रकारकान्वयबोधो जायतामिति वक्तुस्तात्पर्य्यमनुपपन्नं लिङो लक्षणया कार्य्यत्वमात्रोपस्थापकत्वादित्यत आह तत्रेति कार्य्यत्वे कार्य्यत्वोपस्थितौ। तात्पर्य्याद्वेति लोके लाघवात् केवलकार्य्यत्वोपस्थितौ लिङस्तात्पर्य्यात् केवलकार्य्यत्व एव वृत्तिरित्यर्थः नतु वृत्तिरिति अन्यत्रेति शेषः इदमापाततः लौकिकतात्पर्य्यस्य पुरुषेच्छानियन्त्रितत्वात्तत्र लाघवस्याकिञ्चित्करत्वात्। वस्तुतस्तु तात्पर्य्यस्याप्याकाङ्क्षानुरोधेन लक्षणाया अभ्युपगम इत्येव तत्त्वम्। ननु तथापि यन्मते वेदस्थले कृतिसाध्यत्वरूपकार्य्यत्वाश्रये लिङः शक्तिस्तन्मते कृतिसाध्यत्वरूपकार्य्यत्वस्यापि विशेषणविधया शक्यतया लोके शक्त्यैव कार्य्यत्वोपस्थितिसम्भवात् किं लक्षणया इत्यत आह तृतीयाया इति। न स्वतन्त्रं शक्यमिति धर्म्यंशे निर्विकल्पकशक्यतापत्तेरिति भावः। कार्य्यत्वे लक्षणेति कृतिसाध्यत्वरूपकार्य्यत्वविशिष्टशक्तादीनामपि तादृशकार्य्यत्वे लक्षणैव इत्यर्थः। गतत्वेन—विशेषणत्वेन। स्वतन्त्रेति इतराविशेषणतयेत्यर्थः। तुषानुपवपतीति पुरोडाशाय कपालं पुरोडाशकपालमिति चतुर्थीसमासे सतीति शेषः पुरोडाशार्थतयेति पुरोडाशप्रयोजनकत्वरूपेणेत्यर्थः तदन्वितत्वेनेति पुरोडाशप्रयोजनकरूपपुरोडाशपदार्थान्वितत्वेन, शाब्दानुभवविषयस्य कपालस्येत्यर्थः। नोपवापाकाङ्क्षा इति एतच्च जिज्ञासायोग्यताकाङ्क्षेति मते एकप्रयोजनकत्वेनावगतस्य प्रयोजनान्तरे जिज्ञासाया असम्भवात् कपालस्य किं प्रयोजनमिति जिज्ञासा सम्भवतीति भावः। स्वतन्त्रकपालोपस्थितये इति पुरोडाशप्रयोजनकानन्वितत्वेन कपालस्य बुद्धये इत्यर्थः अधिष्ठानलक्षणेति पुरोडाशपदस्य पुरोडाशाधिष्ठाने स्वाश्रयपात्रे लक्षणेत्यर्थः। एवञ्च पुरोडाशाधिष्ठानाभिन्नकपालेन तुषानुपवपतीत्यन्वयबोधः पुरोडाशस्य कपालमिति षष्ठीतत्पुरुषः, पुरोडाशश्च तत्कपालञ्चेति कर्म्मधारयो वेति भावः। उपवापः स्फोटनं यद्यप्यत्र इतरविशेषणतया उपस्थितिनिबन्धनं न निराकाङ्क्षत्वमपि तु प्रयोजनान्तरवत्त्वोपस्थितिनिबन्धनमेवेति दृष्टान्तदार्ष्टान्तिकयोर्महद्वैषम्यमेव तथापि निराकाङ्क्षत्वनिबन्धनलक्षणामात्रे दृष्टान्तः। एतच्चापाततः जिज्ञासायोग्यताया आकाङ्क्षात्वाभावात् घटजनकेन दण्डेन गामभ्याजेत्यत्राप्येवंरूपेण निराकाङ्क्षतयाऽन्वयबोधानुपपत्तेः किञ्च वाक्यान्तरवाक्यार्थबोधपूर्व्वकमहावाक्यार्थबोधेऽप्येवंरूपेण निराकाङ्क्षत्वं तथापि खलेकपोतन्यायेन युगपत्तत्रान्वयबोधे न काप्यनुपपत्तिः। वस्तुतस्तु वेदस्थले एकप्रयोजनकत्वविशिष्टस्य प्रयोजनान्तरे नान्वयः आनुपूर्व्वीभेदेन व्युत्पत्तिभेदात् वेदानुपूर्व्वीस्थले तथैव व्युत्पत्तेः सकलवैदिकवाक्यतया तथा निर्णीतत्वादित्यधिष्ठानलक्षणेत्येव तत्त्वम्। व्युत्पत्तिविरोध इति लोके लिङ्त्वावच्छेदेन क्रियानिष्ठकार्य्यताबोधकत्वमवधारितं वेदे च कार्य्ये धर्म्मिणि लिङः शक्तौ तद्भङ्ग इत्यर्थः। लोके इति लिङ्त्वावच्छेदेनेति शेषः। क्रियाकार्य्यत्वे शक्तिः क्रियाविशेष्यककार्य्यत्वानुभवजनकता। कार्य्यत्वमात्रे इति शक्तिरवधारितेत्यनुषज्यते शक्तिरनुभवजनकता। न चेति वेदस्थले इति शेषः। धर्म्यन्तरे कार्य्ये धर्म्मिणि तद्भङ्ग इति क्रियानिष्ठकार्य्यत्वस्यैव लिङः बोधनादिति भावः। ननु तथापि लोकस्थले लिङः क्रियानिष्ठकार्य्यताबोधकतया प्रकृत्यर्थान्वितस्वार्थबोधकत्वं लिङ्त्वावच्छेदेन सिद्धं कार्य्ये धर्म्मिणि शक्तौ च तद्भङ्गः कार्य्ये धर्म्मिण्येव लिङर्थकार्य्यत्वान्वयादित्यत आह तत्कारादिति लोकस्थले लिङः क्रियान्वितकार्य्यताबोधकत्वात् इत्यर्थः। प्रत्ययानां गृहीतमिति लिङ्प्रत्ययत्वावच्छेदेन गृहीतमित्यर्थः। न तु प्रकृत्यर्थान्विततया यावत्स्वार्थबोधकत्वमिति भावः। प्रत्ययार्थस्य—लिङ्प्रत्ययार्थस्य। न विरोध इति अपूर्व्वरूपस्वार्थस्यैव प्रकृत्यर्थान्वितत्वादिति भावः। तुष्यतु दुर्ज्जन इति न्यायेनाह अस्तु वेति। क्रियाकार्य्यत्व इति क्रियाकृतिस्तस्याः कार्य्यत्वे तत्साध्यत्वे इत्यर्थः शक्यतावच्छेदकञ्च लिङ्त्वमेव वेदेऽपि अपूर्व्वनिष्ठकृतिसाध्यत्वावगमादिति भावः। नानार्थन्यायेनेति हर्य्यादिपदन्यायेनेत्यर्थः। यथाश्रुतेऽस्यापि नानार्थतया नानार्थतुल्यत्वाभिधानस्यासङ्गतत्वापत्तेः। वेदे—वेदस्थले धर्म्यन्तरे कार्य्ये धर्म्मिणि शक्यतावच्छेदकन्तु अत्रापि लिङ्त्वमेवेति भावः। तथाच यथा हर्य्यादिपदस्थले एकमेव हरिपदत्वादिकं शक्यतावच्छेदकं विष्णुत्वचन्द्रत्वादिभेदेन शक्यतावच्छेदकञ्च नाना तथैवैकमेव लिङ्त्वं शक्यतावच्छेदकं शक्यतावच्छेदकञ्च कार्य्यत्वत्वं कार्य्यत्वञ्च द्वयमिति फलितोऽर्थः। न च लिङ्त्वावच्छेदेन कार्य्ये शक्तौ, लोकेऽप्यपूर्व्वलाभापत्तिरिति वाच्यं प्रागेव समाहितत्वात् तत्रापूर्व्वस्य बाधितत्वाच्चेति भावः।"

मणिकृता तु एतन्मतं पूर्व्वपक्षीकृत्य दूषितम्। तच्च तत एवावसेयम्। विस्तरभयान्नोक्तम्।

कार्य्यकारणभाव पु॰ कार्य्यञ्च कारणञ्च तयोर्भावः। एकस्य स्वकारणापेक्षया कार्य्यत्वे तदपेक्षया चान्यस्य कारणत्वे

हेतुहेतुमद्भावे यथा घटदण्डयोः कार्य्यकारणभावः। "कार्य्यकारणभावाद्वा स्वभावाद्वा नियामकात्। अविनाभावनियमो दर्शनान्तरदर्शनात्" सर्व्वद० बौद्धदर्शने। तत्र कार्य्यभेदेन कारणभेदे कारणशब्दे १९२८पृ०उक्तप्रायेऽपि किञ्चिदाधिक्यमुच्यते। कारणं तावत् द्विविधं मुख्यममुख्यञ्च तत्र घटादिकं प्रति मृदादिकं मुख्यं, तथा प्रत्यक्षे इन्द्रियमित्यादि। तद्भिन्नममुख्यं तच्च सहकारि कारणम्। मुख्यमपि त्रिविधं न्यायमते समवायि असमवायि निमित्तमिति भेदात् तत्र घटादिकं प्रति मृदादिकं समवायिकारणं, कपालसंयोगादि असमवायिकारणं, दण्डादयो निमित्तकारणानि। तत्राद्ये असाधारणे एव कारणे। असाधारणकारणमपि कार्य्यभेदान्नानाविधम्। निमित्तकारणमपि द्विविधं साधारणासाधारणभेदात् तत्र साधारणनिमित्तकारणानि चाष्टविधानि ईश्वरस्तज्ज्ञानेच्छाकृतयः दिक्कालौ अदृष्टं प्रागभावश्चेति भेदात्। असाधारणनिमित्तकारणानि चानेकविधानि। प्रतिबन्धकाभावस्य कारणत्वं नैयायिका मन्यन्ते। स च निमित्तकारणमेव। वेदान्तिनस्तु अभावस्य न कारणत्वम् इच्छन्ति "कथमसतः सज्जायेतेति" श्रुतेः नासतोविद्यते भावः" इति गीतोक्तेश्च। तदेतच्चिन्तितं तैत्तिरीयोपनिषद्भाष्ये यथा

"नित्यानाञ्चाकरणमभावस्ततः प्रत्यवायानुपपत्तिरिति। अतः पूर्व्वोपचितदुरितेभ्यः प्राप्यमाणायाः प्रत्यवायक्रियाया नित्याकरणं लक्षणमिति "अकुर्व्वन् विहितं कर्मेति" हि शतुर्नानुपपत्तिः। अन्यथा अभावाद्भावोत्पत्तिरिति सर्व्वप्रमाणव्याकोपः" भा०।

व्याकृतञ्चैतत् आनन्दगिरिणा यथा

"यच्चोक्तमकरणनिमित्तप्रत्यवायपरिहारार्थानि नित्यानीति तत्राह नित्यानाञ्चेति। आगामि दुःखं प्रत्यवाय उच्यते तस्य भावरूपस्य नाभावो निमित्तम् "पापः पापेनेति" श्रुतेः। निषिद्धाचरणनिमित्तत्वाद्दुःखस्येत्यर्थः। "अकुर्व्वन् विहितं कर्म निन्दितञ्च समाचरन्। प्रसजंश्चेन्द्रियार्थेषु नरः पतनमृच्छतीति" शतृप्रत्ययादकरणस्यापि प्रत्यवायनिमित्तत्वमवगतमित्याशङ्क्याह अतः पूर्व्वेति। यदि यथावन्नित्यनैमित्तिकानुष्ठानमभविष्यत्तदा सञ्चितदुरितक्षयोऽभविष्यत्। न चायं विहितमकार्षीदित्यतः प्रत्यवायो भविष्यतीति शिष्टैर्लक्ष्यते। यथा "विचिन्वन्नु श्रोत्रिय" इति। ततः शतृप्रत्ययस्यान्यथाव्युत्पन्नत्वान्न तद्बलादकरणस्य हेतुत्वमवगन्तुं शक्यत इत्यर्थः।

"लक्षणहेत्वोः क्रियायाः" इति (पा०) शतृप्रत्ययस्योभयत्र विधाने सति किमिति हेतुत्वमेव न गृह्यते? तत्राह अन्यथेति। अभावरूपस्य कार्य्यस्य भावरूपमेव कारणमिति प्रत्यक्षादिभिरवगतं शतृप्रत्ययादभावस्य हेतुत्वाभिधाने सर्व्वप्रमाणविरोधः स्यादित्यर्थः।

ननु त्वयाप्यकरणस्य प्रत्यवायलक्षणत्वमिष्टम्। भाट्टैश्चानुपलम्भस्याभावप्रमितिहेतुत्वमिष्यते। तार्किकैश्च प्रतिबन्धकाभावस्य तत्तत्प्रागभावस्य च तत्तत्कार्य्यव्यवस्थापकत्वमिष्यते तत्कथं भावस्यैव कारणत्वम् तदुक्तम्। "भावो यथा तथाऽभावः कारणं कार्य्यवन्मतम्" इति उच्यते। "अस्माभिस्तावदभावस्य स्वरूपेण कारणत्वं नेष्टं किन्तु तज्ज्ञानस्य प्रत्यवायगमकत्वमिष्टम्। तेन च रूपेण न प्रत्यवायजनकत्वमिष्यते। नित्याकरणाज्ञाने प्रत्यवायाभावप्रसङ्गात्। भाट्टानामपि च केषाञ्चिज्ज्ञानस्य योग्यानुपलम्भस्याभावप्रमितिहेतुत्वमिष्टं ज्ञानध्वंसतया तु प्रमितिहेतुत्वेऽभावप्रमायाः प्रत्यक्षत्वापातः। तार्किकाणामपि प्रतिबन्धकाभावस्य कारणत्वेऽन्योन्याश्रयत्वप्रसङ्गाच्च प्रामाणिकत्वम्। प्रागभावस्यापि ज्ञातरूपेण जन्यज्ञापकत्वमेव। यस्मादिदं प्राङ्नासीत्तस्मादिदानीं जातमिति। न तु जनकत्वं प्रागभावस्य, नियतप्रागभावित्वेन कारणत्वे प्राक्कालस्य स्वहेतुतापातः। प्रागभावित्वमपि चान्यथासिद्धमित्युक्तं तत्त्वालोके"।

कार्य्यविवृतिश्च कार्य्यशब्दे उक्ता। तत्र समवायिकारणोत्पाद्यं समवेतास्थ्युपादेयमित्युच्यते तद्भिन्नं कार्य्यं कार्य्योत्पाद्यादिशब्देन व्यवह्रियते इति भेदः।

कार्य्यकुशल त्रि० ७त०। कार्य्ये क्रियादक्षे।

कार्य्यचिन्तक त्रि० कार्य्यं चिन्तयति चिन्ति—ण्वुल् उप० स०। कर्त्तव्यविषये कृताकृतचिन्तके। "धर्म्मज्ञाः शुचयो ऽलुब्धा भवेयुः कार्य्यचिन्तकाः" याज्ञ०।

कार्य्यता स्त्री कार्य्यस्य भावः तल्। १कर्त्तव्यतायां २कृतिसाध्यतायाम्। त्व कार्य्यत्व तत्रार्थे न०। गुरुमते यथा च तज्ज्ञानस्यैव प्रवर्त्तकत्वं तथा शब्दचि० गुरुमतप्रदर्शने दर्शितं यथा। "कार्य्यत्वज्ञानं प्रवर्त्तकमिति गुरवः तथाहि ज्ञानस्य कृतौ जनयितव्यायां चिकीर्षातिरिक्तं न कर्त्तव्यमस्ति तत्सत्त्वे कृतिविलम्बहेत्वन्तराभावात्। चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्यक्रियाविषयेच्छा पाकं कृत्या साधयामीति तदनुभवात्। सा च स्वकृतिसाध्यताज्ञानसाध्या इच्छायाः स्वप्रकारकधीसाध्यत्वनियमात् अतएव स्वकृति-

साध्ये पाके प्रवर्त्तते न त्विष्टसाधनताज्ञानसाध्या, स्वकृत्यसाध्ये चिकीर्षापत्तेः। स्वकृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेत् न तदभावस्य कारणत्वे गौरवात् अथाभाव उभयसिद्धः कृतिसाध्यताधीरसिद्धेत्यतो न लाघवावसर इति चेत् न यत्र शब्दादनुमानाद्वा देशात् वा, तत्र लाघवावतारात् इच्छायाः स्वप्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्यकत्वात् जनकज्ञानं विघटयतएव ज्ञानस्य प्रतिबन्धकत्वाच्च व्याप्तिधीविघटनद्वारानुमितिप्रतिबन्धकानैकान्तज्ञानवत् अन्यथा स्वकृत्यसाध्यत्वानिष्टसाधनत्वोभेत्व श्रोयत्वनिष्फलत्वज्ञानं प्रतिबन्धकं क्रियाज्ञानमेव प्रवर्त्तकं कल्प्येत। ननु सन्धात्वर्थगोचरेच्छात्वावच्छिन्नत्वाल्लाघवाच्च कृताविच्छा चिकीर्षा सा च इष्टाविवेष्टसाधनताज्ञानादिति चेत् न वह्निना साधयामीतिवत् कृत्या साधयामीतीच्छायाः कृतिपूर्व्वमनुभूयमानायाः सनन्तवाच्यत्वेन गौरवेण च प्रत्याख्यातुमशक्यत्वात्। किञ्च पाकं चिकीर्षतोऽत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु कृतेः, धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारत्वाच्चित्वम् ओदनं बुभुक्षत इत्यत्र भोजनविषयत्वयोदनस्येच्छाविषयत्वानुभवात् इष्टसाधनत्वेन इष्टाविव कृताविच्छासम्भवेऽपि कृतीच्छा न प्रवर्त्तिका किन्तु कृतिसाध्येच्छैव। घटं जनाति चिकीर्षति करोतीति ज्ञानचिकीर्षाप्रवृत्तीनामेकविषयत्वानुभवात्। अथ यदि कृत्या साधयितुमिच्छा सा तदा चिकीर्षितस्य पाकस्यान्यतः सिद्धौ सा नापगच्छेत् नह्युपायविशेषसाध्यत्वेनेच्छोपायान्तराधीनफललाभेन निवार्य्यते प्रीत्या धनलाभेऽपि प्रतिग्रहेण तल्लिप्साया अनिवृत्तेरिति चेत् न स्वविपर्य्यासिद्धत्वस्य फलेच्छाविच्छेदस्य चोपायेच्छाविरोधित्वात् अस्ति च तत्र पाकौदनयोः सिद्धता। अन्यौदनेच्छायां पाकचिकीर्षा भवत्येव प्रत्युत अप्रसिद्धत्वात् कृतावेवेच्छा न विच्छिद्येत यदि कृतिविपर्य्यसिद्धत्वफलेच्छाविच्छेदौ न विरोधिनौ प्रीत्या धनलाभेऽपि तदधिकधनेच्छा न विच्छिद्यते तस्य असिद्धत्वात् तत्फलेच्छायाश्च सत्त्वात् धनमात्रार्थिनश्च प्रीत्या तल्लाभे प्रतिग्रहेण तल्लिप्सा नास्त्येव धनमात्रस्य सिद्धत्वात् किञ्चिद्विशेषस्य सिद्धौ हि सामान्येच्छाविच्छेदः। अन्यथा सकलस्वविषयसिद्धेरसम्भवेन तद्विच्छेदो न स्यादेव। वस्तुतस्तु क्रियानुकूला कृतिरिष्टोपाय इति ज्ञाने क्रियायाः कृतिसाध्यत्वम् इष्टोपायत्वञ्च भातं क्रियाद्वारैव कृतेरिष्टसाधनत्वादिति तद्बोधात् कृताविव कृतिसाध्यत्वेन क्रियायामपि सैवेच्छेति चिकीर्षायां कृतिसाध्यताप्रकारनैयत्यम्। अतः कृतिसमानविषयचिकीर्षात्वेन चिकीर्षायाः कृतिकारणत्वं न तु कृतीच्छात्वेन भिन्नविषयतया गौरवात् तथापि येन रूपेण यस्येष्टसाधनत्वं तेन प्रकारेण तत्रेच्छा यथा स्वर्गोदारवृत्तित्वेनेष्टसाधनत्वात्तथैवेच्छा तथा कृतिसाध्यत्वेन पाकस्येष्टसाधनत्वम् अतः कृतिसाध्यत्वेन तत्रेच्छा भवतीति कृतौ कृतिविषये वा चिकीर्षायां न इष्टेच्छाविलक्षणसामग्र्यन्तरकल्पनमिति चेत् भवेदेवं यदि कृतिसाध्यत्वेन पाकस्यौदनसाधनता स्यात् न चैवं, गौरवात् किन्तु पाकत्वेन, सा तु कृतिं विना नेयन्यदेतत्। वह्निना साधयामीतिवत् कृत्या साधयामीतीच्छा इष्टसाधनताज्ञानादेवेति चेत् तर्हि तत्र वह्निसाध्यताज्ञानवदत्रापि कृतिसाध्यताज्ञानं कारणमावश्यकं कृतौ चानुभवसिद्धं चिकीर्षाधीनत्वं विशेषः, तेन प्राणपञ्चकसञ्चारे जीवनयोनिकृतिसाध्ये न प्रवृत्तिः। अन्यथा कृतिसाध्येष्टसाधनतापत्तेऽपि तत्र प्रवर्त्तेत ननु चिकीर्षाधीनत्वस्य उपलक्षणत्वे उपलक्ष्यमात्रगताननुगतधर्माभावात् कृतिमात्रस्य चातिप्रसङ्गात् तत्तत्कृतिविशेषा उपलक्ष्याः तथा च तदननुगमात् प्रवृत्तेरननुगमः विशेषणत्वे चिकीर्षायां प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे गौरवं प्रमाणाभावश्च। किञ्च चिकीर्षासाध्यावस्थायाः कृतेः सिद्धावस्थासाधनस्य विरोधेन कृतिसाध्यता पाकादौ न ज्ञायेतेति चेत् न, अस्ति हि कृतिविशेषो मानसप्रत्यक्षसिद्धो जीवनयोनियत्नव्यावृत्तः स्वचिकीर्षोपलक्षणः यत्र चिकीर्षाकारणत्वपक्षः स च तव जातिरूपो मम त्वनुगतकारणोपाधिरूपः। एवञ्च चिकीर्षाधीनत्वेनानुगतेन कृतिविशेषाणामुपलक्ष्यमाणानामनुगतत्वमपि यथा गोत्वेन तटस्थेनोपलक्षिता महिष्यादिव्यावृत्ता धानकर्मव्यक्तिविशेषा धेनुपदेनोच्यन्ते न तु गोत्वमपि, तथा चिकीर्षापि एवं जीवनयोनिव्यावृत्तकृतिविशेषाणां कृतित्वेन ज्ञानं कारणमिति नाननुगमः। ननु कृतिसाध्ये न कृतिर्विशेषणम् असत्त्वात् सत्त्वे वा कृतौ सत्यां ज्ञानं ज्ञाने च कृतिरित्यन्योन्याश्रयः नोपलक्षणम् अतिप्रसङ्गादिति चेत् न कृतिर्हि ज्ञाने विषयतया विशेषणमेव साध्ये च परिचायकतयोपलक्षणम् अन्यथेष्टसाधनेऽपीष्टं न विशेषणम् असत्त्वान्नोपलक्षणम् अतिप्रसङ्गात् लिङ्गज्ञानादौ वा का गतिः। नन्वेवं भ्रमेऽपि चिकीर्षा स्यात् तस्यापि चिकीर्षाधीनकृतिसाध्यत्वात्। भ्रमस्तु भोजनादिक्रियासाध्यो न

तत्कृतिसाध्योऽचिकीर्षितत्वात् कृतेः स्वध्वंसप्रागात्कारातिरिक्ते चिकीर्षाविषयमात्रे जनकत्वात् नहि भोजनादिचिकीर्षाधीनकृत्या गमनं साध्यत इति केचित् तन्न गुरुतरभारोत्तोलने कृत्यसाध्ये श्रमात् प्रवृत्तस्य निगडनिबद्धदेहस्य वा कृतौ सत्यामुद्देशनचलनक्रियानुत्पादेऽपि श्रमानुभवात् कृतेरेव कारणत्वात्। न तु तज्जन्यक्रियायाः, सुखे व्यभिचाराच्च न हि सुखं कृतिसाधनचिकीर्षाविषयः उपायचिकीर्षाजन्या हि कृतिः न तु सुखचिकीर्षाजन्या। चिकीर्षाजन्यकृतिसाध्यत्वं न श्रमे, द्वेषयोनियत्नादपि तदुत्पत्तेरित्यपरे तन्न यत्नु(?)बलेष्टसाधनत्वेन चिकीर्षाजन्यकृतिसाध्यत्वात् द्वेषस्य यत्नाजनकत्वात् द्वेषसिद्धिस्तु यत्नं द्वेष्योत्वबाधितानुभववलात्। यत्तु श्रमः कृतित्वेन कृतिसाध्यो न चिकीर्षाधीनकृतित्वेन, यद्यचिकीर्षितेऽपि श्रमे चिकीर्षाधीनकृतित्वेन कारणता स्यात्तदा चिकीर्षितमेव भोजनं कृत्या साध्यते नाचिकीर्षितं गमनादीति न स्यात् श्रमवद्गमनेऽपि तज्जन्यत्वप्रसङ्गात् भोजनादिव चिकीर्षाधीनकृतिविशेषात् सहि कृतिमात्रं व्यभिचरति जीवयोनिकृतेस्तदनुत्पादात्। यद्वा श्रमो न भोजनकृतिसाध्यः किन्तु तद्विरन्तरोत्पन्नाज्जीवनयोनियत्नादेवेति तन्न नहि कृतित्वेन श्रमजनकत्वं नापि कृत्यन्तरादेव श्रमोत्पत्तिः जीवनयोनियत्नेन चापि भारोद्वहनादि कर्म कुर्व्वतस्ताद्दृश्यश्रमानुभवेन तस्य श्रमाजनकत्वात्। तथा भोजनादिवत् श्रमविशेषाणामपि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात्। सुप्तस्य स्वेदाद्यनुमितः श्रमस्तज्जन्य इति चेत् न स्वेदादेः श्रमान्यहेतुकत्वात् अन्यथा जागरेऽपि तदनुवृत्तौ श्रमानुवृत्तिप्रसङ्गादिति नैवं स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात्। श्रमश्च नियमतोऽन्येच्छाधीनकृतिसाध्यः श्रमे दुःखत्वेन इच्छाविरहात्। अतएवान्येच्छाजन्यकृतिसाध्यत्वेन तमोनान्तरीयक इत्युच्यते। स्वचिकीर्षाधीनत्वन्तु न कृतौ विशेषणं, गौरवात्। अन्ये तु कृतिगतधर्मान्तरमेवोद्देश्यत्वं तद्विशिष्टकृतिसाध्यश्च न श्रमः अचिकीर्षितत्वात् किन्तु कृतिमात्रसाध्यः अतएव कष्टं कर्मेत्यनुभवो लोकानाम्। एवं चिकीर्षायां सर्व्वत्र 'कृतिसाध्यत्वं' प्रयोजकं तत्र तु कृतिसाध्यत्वे सतीष्टसाधनत्वं सुखत्वं दुःखाभावत्वञ्चेति चतुष्टयम् इच्छाप्रयोजकन्तु मम सुखत्वं दुःखाभावत्वञ्चेति द्वयं कृतिसाध्ये सुखे हीच्छा वृत्तिमपि विषयीकरोति। नत्विष्टसाधनत्वेन तत्रेच्छासाधनत्वस्य इच्छाविरोधित्वात्

तत्र तु त्वयम् विषभक्षणे कृतिसाध्यत्वेऽपि बलवदनिष्टसाधनत्वेन चिकीर्षा नास्तीति कृतौ चिकीर्षाजन्यत्वं विशेषणमिति कश्चित् तत्तुच्छं विषभक्षणे कृतिसाध्यत्वमेव न स्यात् जीवनयोनिकृतेस्तस्यानुत्पत्तेरिति व्यर्थविशेषणम्। स्यादेतत् इष्टसाधनताभ्रमाद्विषभक्षणे चैत्यवन्दने च चिकीर्षाजन्यकृतिसाध्यत्वमस्ति ज्ञानप्रयुक्तत्वात् कार्यत्वस्य, तथाच वस्तुतबाधोऽपि तत्र कार्यज्ञानात् प्रवर्त्तेत तथा तृप्तोऽपि भोजने न तु कृतिसाध्यतानुभवस्तथा, अन्यथेष्टसाधनताभ्रमे विषभक्षणेऽपि प्रवर्त्तेत। नचेष्टसाधनताज्ञानं वेदोक्तानुभावकोऽस्तीति चेत् न वस्तुतस्तत्र कृतिसाध्यत्वे विकृतान्तरेणाप्रवाधन वा तदनुभवासम्भवात् विकृताभावाभावाद्वा प्रवृत्तिप्रसङ्गाच्च भेदाग्रहवादिनस्तत्र तदनुभवाभावात् नैवं स्वविशेषणवत्ताप्रतिसन्धानजन्यं हि कार्यताज्ञानं प्रवर्त्तकं तथाहि काम्ये पुरुषविशेषणं कामना ततः काम्यसाधनाज्ञानेन यागपाकादौ कार्यताज्ञानं नित्ये च कालशौचादि स्वविशेषणं तथाचैतत्सन्ध्यायामहं कृतिसाध्यसन्ध्यावन्दनः सन्ध्यासमये शौचादिमत्त्वात् पूर्व्वसन्ध्यायामहमिवेति, कार्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यम्। तदुक्तं "स कार्यविशेषः पुरुषविशेषभावगतः प्रवृत्तिहेतुरिति"। संजातबाधस्य च विषभक्षणे चैत्यवन्दने च भ्रमदशायामिव नेष्टसाधनताज्ञानमस्ति येन तज्जन्यकार्यताज्ञानात् प्रवर्त्तेत। तृप्तस्य च तृप्तौ कामनाविरहेणेष्टसाधनताज्ञानाभावान्न तथा बोधः। अन्ये त्वात्मनो जीवत्वप्रतिसन्धानजन्यं श्रमे कृतिसाध्यताज्ञानं न सम्भवतीति जीवनव्यतिरिक्तत्वं स्वविशेषणे विशेषणमिति, तन्न श्रमे स्वेच्छाधीनकृतिसाध्यत्वज्ञानाभावेन साध्यत्वाभावात्। इष्टसाधनतालिङ्गं कार्य्यताज्ञानं प्रवर्त्तकमित्यपरे तन्न नित्ये तदभावात्। ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशेषणमस्तु स्वविशेषणवत्ताज्ञानजन्यत्वापेक्षया लघुत्वात्। किन्तूपायविषया चिकीर्षा इष्टसाधनताज्ञानसाध्या उपायेच्छावत् इष्टेच्छावत्। भोगचिकीर्षायां तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत् न तत्रापि स्वविशेषणधीजन्यत्वाभावेन तस्य तत्राप्रयोजकत्वात् कृतिहेतुचिकीर्षायां तत्प्रयोजकं न भोगचिकीर्षायां तथा, उपायचिकीर्षातएव कृतिसम्भवादिति चेन्न तुल्यमिति नैवं साध्यत्वसाधनत्वयोर्विरोधेनैकत्र ज्ञातुमशक्यत्वात् असिद्धावस्थस्य हि साध्यत्वं, सिद्धतादशायां तदभावात् सिद्धतादशायाञ्च साधनत्वम्

असिद्धावस्थायाः कार्य्यानुत्पत्तेः । तथा च पाकादेर्सिद्धत्वासिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रहः नचैकमेकेनैकदा सिद्धमसिद्धञ्चेति ज्ञायते । न च स्वरूपगतता साध्यत्वसाधनत्वयोस्ततो न विरोध इति वाच्यं यदि हि स्वरूपनिबन्धनं तदुभयं तत्स्वरूपं सदैव सिद्धमसिद्धञ्च स्यात् । भिन्ननिरूपितत्वेऽपि तयो सिद्धत्वासिद्धत्वेऽनवगम्या ज्ञानात् । तस्मात् समयभेदोपाधिकएव तदुभयसम्बन्धः । पाके इदानीं साध्यत्वम् अग्रे च साधनत्वं ज्ञायत इति चेत् ? न, इदानीमग्रिमपदार्थयोर्नानात्वादननुगमेन व्याप्त्यग्रहात्, शब्देन तथा प्रतिपादयितुमशक्यत्वात् गौरवाच्च । स्वकृतितः सिद्धमिष्टसाधनमिति ज्ञानाच्चिकीर्षा, न हि सिद्धं कश्चिच्चिकीर्षति, कृतेः पूर्व्वं कृतितः सिद्धमिति ज्ञानाभावाच्च । न च कृतिसाध्यत्वेन पाकादेरिष्टसाधनत्वात् साधनत्वमपि साध्यं न हि कृतिसाध्यत्वेन पाकस्यौदनसाधनतेत्युक्तम् । तस्मात् कृतिक्रियमाणविलक्षणं कृत्यनन्तरभविष्यत्तारूपं कृतिसाध्यत्वं चिकीर्षाप्रयोजकं तादृशञ्च साधनत्वविरोध्येव किञ्च साधनत्वस्य सिद्धमात्रधर्म्मत्वात् साधनत्वज्ञानमिच्छाविरोधि । न हि कश्चित् सिद्धमिच्छतीत्युक्तम् । एतेन इष्टादाविष्टसाधनताज्ञानमुपायेच्छाकारणत्वेन क्लृप्तमिति निरस्तम् कथं तर्हि स्वतोऽसुन्दरे इष्टादाविच्छा ? तत्साध्येष्टज्ञानादिति गृहाण । अन्ये तु सुखदुःखाभावतत्साधनेष्विच्छाप्रयोजकमनुगतमुद्देश्यत्वं पुरुषार्थपदवेद्यं धर्म्मान्तरमस्ति अनुगतकार्य्यस्यानुगतकारणनियम्यत्वात् तदेव दुःखसाधनव्यावृत्तसुखतत्साधनादौ चिकीर्षाप्रयोजकमिति । न च दुःखविरोधित्वस्यैव तथाऽस्त्विति वाच्यं सहानवस्थाननियमविरोधस्यासम्भवात् । वध्यघातकभावस्यैकसमये सामानाधिकरण्याभावस्य च यत्नादिसाधारणत्वादिति तन्न तद्ज्ञानेऽपि सुखत्वज्ञानादिच्छोत्पत्तेः न हि सुखे ज्ञाते धर्म्मान्तरज्ञानं विना नेच्छा । तथात्वे स्वतः प्रयोजनत्वहान्यापत्तेः तदेव हि स्वतः प्रयोजनं यदन्यगतं सत् स्वइष्टतयेष्यते । किञ्चानुगतधर्म्मकल्पनापि कारणैः, न च सुखादाविच्छाकारणत्वं अमागतत्वात् किन्तु तदवगमः । तर्हि सुखादिज्ञाने तत्स्वरूपसदेवेच्छाप्रयोजकमस्त्विति चेत् ? न, यथाह्युद्देश्यत्वं सुखज्ञानादिष्वुत्पद्यते अन्यतरत्वात् तृणारणिमणिन्यायाद्वा तथेच्छैव जायताम् । कृतिसाध्यत्वञ्च कृतौ सत्यामपि समवाये स्वरूपं न कृतिं विना । क्षेमसाधारणञ्चैतत् कृतिसाध्यत्वं न तु कृतेः पूर्व्वम् । ननु कृतौ नष्टायां सत्यपि धर्म्मो न कार्य्यः, तथा च कथं कार्य्येऽपूर्व्वे कामिनोऽन्वयः क्षणिकत्वेन क्रियातुल्यत्वादितिचेत् ? न, यद्वृत्ति काम्यसाधनत्वं तत्र कार्य्यताबुद्धेः प्रयोजकत्वात् न तु कार्य्यताविशिष्टस्य काम्यसाधनतेति व्याप्तिः । ननु पाकादौ कृतिसाध्यताज्ञानं न प्रत्यक्षेण, कृत्यनन्तरं पाके सति कृतिसाध्यताज्ञानं तस्मिन् सति कृतिरित्यन्योन्याश्रयात् । कृतिसाध्यतोत्तीर्णे चिकीर्षाकृत्योरसम्भवाच्चेति चेत् न पाकोमत्कृतिसाध्यो मत्कृतिं विनाऽसत्त्वे सति मदिष्टसाधनत्वात् दैवाद्यनधीनत्वे सति मदिष्टसाधनत्वाद्वा मद्भोजनवत् इत्यनुमानात् स्वकृतिसाध्यत्वज्ञानं यस्य यदिष्टसाधनं यत्कृतिं विना यदा न सम्भवति तत्तदा तत्कृतिसाध्यमिति व्याप्तेः असिद्धस्येष्टसाधनत्वाभावात् । बलवदनिष्टाजनकत्वञ्च लिङ्गविशेषणं तेन मधुविषसम्पृक्तान्न भोजने न व्यभिचारः अतीतपाके कृतिसाध्यतोत्तीर्णे च न व्यभिचारः सामान्यतस्तस्याऽपि कृतिसाध्यत्वात् । अतीततादृशायाश्चातीतोदने इच्छाविरहे स्वेष्टसाधनत्वाभावात् अतएव निदाघदूनदेहो वर्षति वारिदे तोयदास्तोयलाभसम्भावनायां वा सरोवगाहने न प्रवर्त्तते इष्टसन्तापशान्तिसाधनस्य तोयसम्बन्धस्य स्वकृतिं विनाऽपि सिद्धिप्रतिसन्धाने लिङ्गाभावेन स्वकृतिसाध्यत्वज्ञानाभावात् । यदा च मत्कृतिं विना स न सम्भवतीति प्रतिसन्धत्ते, तदा प्रवर्त्तते । यस्य सन्तापशान्तिमात्रमिष्टं स सरोवगाहनस्येष्टसाधनत्वमेव न प्रतिसन्धत्ते । उपस्थितवृष्टितोऽपि तत्सम्भवादिति कश्चित् । तन्न तोयसम्बन्धत्वेन न सन्तापशान्तिसाधनत्वं तस्य सरोऽवगाहनेऽपि सत्त्वात् अन्यथा वृष्टिरपि तत्साधनं न स्यात् सरोऽवगाहनादपि तत्सिद्धेः किन्तु कार्य्यभेदसाधनत्वं कृतिसाध्यत्वेन लिङ्गं पाकादिवदोदनादेरपि प्रवृत्तेः पूर्व्वं कृतिसाध्यत्वज्ञाने हेत्वभावात् । नन्वेवं लिङ्गज्ञानमेव प्रवर्त्तकमस्तु प्राथमिकत्वादावश्यकत्वाच्च । न च लाघवात् कृतिसाध्यताज्ञानं तथा, कृतिसाध्यतानुमितौ तदा मानाभावेन युगपदुपस्थित्यभावात् प्रवृत्तिसामग्र्या अनुमितिप्रतिबन्धाच्चेति चेत् न लिङ्गज्ञाने कृतिसाध्यताप्रकारे तत्प्रकारकचिकीर्षायां तस्याहेतुत्वात् । अतएव लिङ्गान्तरज्ञानमपि न प्रवर्त्तकम् । ननु पाकादिः कृतः क्रियमाणो वा न पक्षः तस्य कृतिसाध्यत्वे बाधात् नाप्यनागतः भाविपाके मानाभावेनाश्रयासिद्धेः । पाकत्वं भविष्यद्वृत्ति सामान्यत्वात् गोत्ववदिति मानमिति चेत ?

न मानाभावेन गोत्वेऽपि तस्याप्रसिद्धेः । पाकमात्रं पक्षः इति चेत् न मात्रार्थो यदि पाकत्वं तदा बाधो लिङ्गासिद्धिश्च । सर्व्वपाकपरत्वे च तस्य सिद्धपाकभागे बाधः, अनागतभागे चान्वयासिद्धिः । वर्त्तमानाद्युदासीनः पाकः पक्षः प्रकृतसाध्ये च कृतिसाध्यत्वं बाधितमित्यनेन सिद्धस्य पक्षत्वं नासिद्धस्येत्यनुमितेश्च सिद्धविषयत्वे बाधात् भिन्नविषयत्वे चासिद्धविषयेच्छाप्रवृत्त्यनुत्पादकत्वात् ।

कृतक्रियमाणसाधारणकृतिसाध्यताज्ञानादेवासिद्धविषया चिकीर्षा कृतिश्चोत्पद्यते अनन्यगतिकत्वेन तथा कारणत्वकल्पनादिति चेत् तर्हि यादृशं कृतिसाध्यत्वं चिकीर्षायां प्रकारः तादृशं ज्ञाने भासतोऽन्यप्रकारकज्ञानादेव चिकीर्षा स्यात् । तथा च लिङ्गज्ञानमेव प्रवृत्तिहेतुरस्तु प्राथमिकत्वात् । यत्तु कृतपाके कृतिसाध्यत्वासंसर्गाग्रहात् प्रवृत्तिः, यथासंसर्गाग्रह इष्टसाधनताज्ञानादिति, तन्न कृतपाकस्य सिद्धत्वेन तत्र कार्यत्वासंसर्गाग्रहानुमानबाधात् । कृतपाकस्य सिद्धत्वं तदा न गृह्यते इति चेत् तर्हि कृतपाकस्य सिद्धत्वग्रहे ओदनार्थी पाके न प्रवर्त्तेत सिद्धौदनोऽपि पाके, तृप्तोऽपि भोजने प्रवर्त्तेत । ननु तत्र पाकादौ सिद्धत्वग्रहात् तदसंसर्गाग्रह इति चेत् तुल्यम् । अपि च कृतपाके कार्यत्वासंसर्गाग्रहाद्विद्यमानासंसर्गाग्रहाद्विसंवादिनी प्रवृत्तिः स्यात् । किञ्चैवं सिद्धपाकज्ञानादज्ञानेऽसिद्धे पाक इच्छाप्रवृत्तौ स्यातामिति । अत्र ब्रूमः । पाके कृतिसाध्यत्वं सिद्ध्यत् सिद्धे बाधादनागतं पाकमादाय सिद्ध्यति । पक्षतावच्छेदकधर्म्मसामानाधिकरण्यं साध्यमानस्य सिद्धे न सिद्ध्यतीत्यनुमाने क्लृप्तत्वात् यथा प्रसिद्धवह्निबाधेऽपि वह्निमात्रं न बाधितमित्यप्रसिद्धोऽपि वह्निः सिध्यति । अप्रसिद्धयोः पक्षसाध्ययोः सिद्धावविशेषात् तस्मात् "असिद्धस्य क्वचित् सिद्धेः सिद्धे सिद्धस्य च क्वचित् । अप्रसिद्धस्य चासिद्धे सिद्धिस्तेनानुमा त्रिधा" । अन्यथा कृतिसाध्येष्टसाधनतापक्षेऽपि पाकादौ कृतिसाध्यत्वं कथमवगम्यते ?। किञ्च तवापीष्टसाधनताज्ञानात् कथं दृष्टादाविच्छा ? सिद्धत्वस्येच्छाविरोधित्वादनागतस्य ज्ञातुमशक्यत्वात् । अतएव सिद्धासिद्धविषयनिरासेन सुखादिज्ञानात् फलेऽपि नेच्छेति न दृष्टादावपीष्टसाधनतापि । न च वृष्ट्यादिसाध्येष्टज्ञानाद्वृष्ट्यादाविच्छा इच्छायाः सिद्धासिद्धवृष्ट्यादितत्फलविषयकत्वविकल्पग्रासात् । अथ सामान्यलक्षणाप्रत्यासत्त्या वृष्ट्यादित्वेन सुखादित्वेन च सिद्धासिद्धवृष्ट्यादितत्फलविषयकज्ञान-सुखत्वं नेन सिद्धं विरोधिनं त्यक्त्वाऽसिद्धविषयेच्छोत्पद्यते । यदि च सामान्यलक्षणा नास्ति तदा येन रूपेण इष्टसाधनताग्रहस्तेन रूपेण ज्ञातेऽसिद्धे चेच्छोत्पद्यते अन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात् । सुखेच्छायामप्येवमिति चेत् तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादनागते चिकीर्षा । तच्च ज्ञानं सकलपाकविषयं यत्किञ्चित्पाकविषयं वेत्यन्यदेतत् । बालस्य व्याप्त्यग्रहेऽप्याद्या प्रवृत्तिर्जीवनादृष्टोद्बोधितजन्मान्तरीयसंस्कारजन्यात् स्तनपानं कार्यमिति स्मरणात् तत्रापीष्टसाधनतास्मरणात्तत्र प्रवृत्तेरनन्यगतिकत्वात् । न च जन्मान्तरेऽपि पर्यनुयोगः, जन्मधाराया अनादित्वात् । प्रत्यक्षानुमानमूलत्वाच्च नान्धपरम्परा । वस्तुतस्तु क्षुत्कण्ठतया बालो दुःखमनुभवन् विरोधितया सुखं स्मरति ततः सुखवृत्ति कार्यत्वं सुखवृत्तितया अन्तरङ्गत्वात् मातुःस्तनपानमिष्टसाधनमिति स्मरणं सुखावृत्तित्वेन बहिरङ्गत्वात् । सुखकार्यत्वञ्च स्तनपानद्वारा जन्मान्तरानुभूतमिति कार्यत्वस्मरणे स्तनपानमपि विषयः तेन स्तनपाने कार्यत्वज्ञानादेव प्रवृत्तिः इष्टसाधनताज्ञानस्य तदानीं सामग्र्यभावात् । एवञ्चाद्यप्रवृत्तौ कार्यताज्ञानं प्रयोजकं क्लृप्तमित्यन्येऽपि तदेव प्रवर्त्तकं क्लृप्तत्वात्" ।

अत्र दिङ्मात्रं मथुरानाथव्याख्या प्रदर्श्यते ।

"कार्य्यताज्ञानमिति कृतिसाध्यताज्ञानमित्यर्थः, न च कृतिसाध्यताज्ञानं विनापि घटयागपाकादिकर्त्तुरुपायकपालहविस्तण्डुलादिसिद्धविशेष्यकप्रवृत्तिदर्शनाद्व्यभिचार इति वाच्यं प्रवृत्तेर्हि विषयता त्रयी एका साध्यत्वाख्यविषयता सा च यद्विषयककृतिसाध्यताज्ञानचिकीर्षादिना प्रवृत्तिस्तन्निष्ठा, तच्च घटयागपाकाद्येव न तु तज्जनकीभूतकपालहविस्तण्डुलादिसिद्धनिष्ठा अतएव घटं करोमि यागं करोमीत्याद्येवानुव्यवसायो । न तु कपालहविरादेः सिद्धतादशायां कपालं करोमि हविः करोमीत्याद्यनुव्यवसायः व्यवहारो वा कृतिवाचिधातुयोगिद्वितीयायाः साध्यताख्यविषयतार्थकत्वनियमात् । न च साध्यताख्याया एव विषयतायाः कृतिवाचिधातुयोगिद्वितीयार्थत्वनियमे कपालतन्त्वादेः सिद्धतादशायां कपालं करोति तन्तुं करोतीत्यादिव्यवहाराभाववत् कपालं घटवत् करोति, तन्तुं पटवन्तं करोतीत्यादिव्यवहारोऽपि न स्यादिति वाच्यं साध्यत्वैशिष्ट्यबोधकपदासमभिव्याहृतकृतिवाचिधातुयोगिद्वितीयाया एव तथानियमात् तत्र कपालादि-

पटोत्तरद्वितीयाया आधेयत्वमर्थः घटादिपदस्य घटत्वादिपरं धात्वाख्यातयोर्व्यापारप्रयत्नौ यथायोग्यमर्थः तथा च कपालवृत्तिघटाश्रयानुकूलव्यापारजनकयत्नवानित्याद्यन्वयधीः। कपाल घटवत् करोमीत्यादिवत् कपाले घटं करोमीत्यादिप्रयोगोऽप्यत एवेत्यपि वदन्ति।

अपरा च उपादानतापरनाम्नी सिद्धत्वाख्यविषयता सा च सिद्धकपालादिविलक्षणाद्युपाय एव। कपालेन घटं करोमि हविषा यागं करोमीत्याद्यनुव्यवसायात् तत्र उपादानत्वाख्यविषयताया एव तृतीयार्थत्वात् तस्य च धात्वर्थकृतावन्वयात्। न च तत्र जन्यत्वं विषयत्वं वा तृतीयार्थस्तस्य च घटयागादावेवान्वय इति वाच्यम् सर्वत्र तृतीयार्थस्य धात्वर्थ एवान्वयस्य व्युत्पन्नत्वात् अन्यथा तण्डुलाभावेन तण्डुलं पचतीत्यपि व्यवहारापत्तेः।

अन्या च उद्देश्यताख्यविषयता सा च यत्नसाधनताज्ञानाधीना चिकीर्षा तद्विषया तच्च जलाहरणस्वर्गादिरूपं जलाहरणार्थितया घटं करोमि स्वर्गार्थितया यागं करोमीत्यनुव्यवसायात्। जलाहरणमुद्दिश्य घटं करोमि स्वर्गमुद्दिश्य यागं करोमीत्यनुव्यवसायाच्च एवञ्च तत्तत्साध्यतावच्छेदकतत्तत्साधारणप्रवृत्तित्वावच्छिन्नं प्रति तत्तत्साध्यतावच्छेदकविशिष्टावच्छेदकतत्तत्साध्यविशेष्यकृतिसाध्यताज्ञानं हेतुरिति न व्यभिचारः एवं चिकीर्षाया अपि हेतुत्वमवसेयं तेन तस्या अपि कपालादिविलक्षणादौ न व्यभिचारः। अन्यथा नैयायिकमतेऽपि व्यभिचारस्य दुर्वारत्वात् तैरपि कृतिसाध्यताज्ञानचिकीर्षयोर्हेतुत्वोपगमादिति भावः। यत्तु प्रवृत्तेर्विषयतात्रैविध्ये मानाभावः किन्तु कपालादिविलक्षणाद्युपाय एव प्रवृत्तिविषयः प्रवृत्तिविशेष्यत्वमेव चोपादानत्वम्। नचैवं घटं करोति यागं करोमीत्यादिव्यवहारानुपपत्तिः कृतिवाचिधात्वोर्गद्वितीयाया विशेष्यत्वार्थकत्वादन्यथा कपालं करोतीत्यादिव्यवहारापत्तिरिति वाच्यम् तत्र घटयागपाकादिपदस्य कपालादिविलक्षणादौ लाक्षणिकत्वात् कृतिवाचिधात्वोर्गद्वितीयाया विशेष्यतानुकूलत्वान्यतरार्थकत्वनियमेनानुकूलत्वं विशेष्यता वा तत्र द्वितीयार्थः इति प्राञ्चो नैयायिका वदन्ति। तदसत् लक्षणया शब्दप्रयोगरूपव्यवहारसम्भवेऽपि घटादिविशेष्यकत्वावगाहित्वेनानुभूयमानाया घटं करोमीत्यादिप्रात्यक्षिकप्रतीतेरनुपपादनात् लक्षणायां मानाभावाच्च। किञ्च जलाहरणस्वर्गादिरूपफलस्य उद्देश्यताख्यविषयताया घटयागपाकादेश्च साधनताख्यविषयताया अनभ्युपगमे इष्टसाधनताज्ञान कृतिसाध्यताचिकीर्षयोः कार्यकारणभावोऽपि दुर्वच इत्युक्तप्रायएव वक्ष्यमाणञ्चोपरिष्टात् इति दिक्। अत्र च तत्प्रकारकतद्विशेष्यकतत्साधनताज्ञानत्वं तत्साध्यतावच्छेदकतत्साध्यकतदर्थिप्रवृत्तिकारणतावच्छेदकं न वा, ज्ञानतदर्थिप्रवृत्तित्वं तत्साधनताज्ञानजन्यवृत्ति नवेत्यादिविप्रतिपत्तयः तेन नैयायिकैरपि कृतिसाध्यताज्ञानस्य प्रवर्त्तकत्वाभ्युपगमेऽपि न क्षतिः। तदर्थित्वञ्च तदुद्देश्यकत्वं न तु इष्टसाधनताज्ञानं प्रवर्त्तकं न वा तत्साधनताज्ञानं तदर्थिप्रवृत्तिकारणं नवेत्यादिविप्रतिपत्तिः परैरपि हविराद्युपादाननिष्ठयागादिरूपचिकीर्षाविषयसाधनताज्ञानस्य यागादिगोचरप्रवृत्तौ हेतुत्वस्याभ्युपगमात् इष्टसाधनत्वकृतिसाध्यत्वोभयविषयकसमूहालम्बनस्य प्रवृत्तिहेतुत्वाभ्युपगमाच्चेति ध्येयम्। चिकीर्षातिरिक्तं न कर्त्तव्यमस्तीति कर्त्तव्यं द्वारं चिकीर्षा अवश्यं द्वारमिति समुदितार्थः तस्यैव प्रकृतोपयोगात्। नचैवं प्रवर्त्तकज्ञानत्वव्यापकं चिकीर्षाव्यापारकत्वमिति फलितार्थः तच्चायुक्तं उपादानप्रत्यक्षे व्यभिचारात् तस्य साक्षादेव प्रवृत्तिहेतुत्वात् उपादानेच्छयोस्तस्य द्वारत्वमतेऽपि चिकीर्षाया अद्वारत्वाच्च इति वाच्यं ज्ञानत्वेनास्य प्रवृत्तिं प्रति साक्षादसाधनीभूतस्य ज्ञानस्येत्यर्थात् उपादानप्रत्यक्षस्य न साक्षात् साधनं उपादानप्रत्यक्षविरहे प्रवृत्त्यनुदयात् उपादानेच्छाया अद्वारत्वमतेऽपि तस्य साक्षात्साधनत्वावश्यकत्वात्। न च तथापि फलज्ञाने व्यभिचारः फलचिकीर्षायाः प्रवृत्त्यहेतुत्वात् इति वाच्यं फलज्ञानस्य फलेच्छाद्वारा उपायेच्छामात्रसम्पादकत्वनान्यथासिद्धतया प्रवृत्तिजनकत्वस्यैव तत्रासिद्धेः। यदि च फलज्ञानमपि प्रवृत्तिजनकं तदा उपायचिकीर्षाया एव तद्व्यापारत्वेन चिकीर्षाव्यापारकत्वरूपसाध्यस्यापि तत्र सुतरां सत्त्वाच्च न हि स्वसमानविशेष्यकचिकीर्षाव्यापारकत्वपर्यन्तं साध्यमनुपयोगादिति ध्येयम्। ननु चिकीर्षारूपव्यापारसत्त्वेऽपि कुतो न कश्चित् तदुत्पादक इत्यत आह तत्सत्त्वे इति। हेत्वन्तरेति हेत्वन्तरं दण्डकपालाद्युपादानलौकिकप्रत्यक्षं, प्रतिबन्धकाभावश्चेति भावः। ननु तत्तदुपादानतावच्छेदकतत्तदुपादानकप्रवृत्तित्वेन तत्तदुपादानतावच्छेदकप्रकारकतत्तदुपादानविशेष्यकलौकिकसाक्षात्कारत्वेनोपादानप्रत्यक्षस्य हेतुहेतुमद्भावात् दण्डकपालाद्युपादानप्रत्यक्षाभावे तदुपादानकप्रवृत्तिर्मास्तु घटादिसाध्यकप्रवृत्तिं विनापि.

संयोगादिसाध्यकप्रवृत्तौ दण्डाद्युपादानकप्रवृत्तित्वेन तदुपादानकप्रवृत्तिसामग्र्याः घटादिसाध्यकप्रवृत्तिसामग्र्यपेक्षया विशेषसामग्रीत्वविरहात् दण्डोपादानकप्रवृत्तिं विनापि कपालोपादानकघटसाध्यकप्रवृत्तौ घटसाध्यकप्रवृत्तित्वेन तदुपादानकप्रवृत्तिसामग्र्या घटादिसाध्यकप्रवृत्तिसामग्र्यपेक्षया सामान्यसामग्रीत्वविरहाच्चेति चेन्न सामग्र्याः सामान्यविशेषभावानापन्नत्वेऽपि दण्डचक्रकपालाद्यन्यतमोपादानकप्रवृत्त्यतिरिक्ताया घटादिसाध्यकप्रवृत्तेरलीकतया तादृशान्यतमोपादानकप्रवृत्तिसामग्रीविरहादेव तादृशान्यतमोपादानप्रत्यक्षाभावदशायां तदनुत्पत्तेस्तद्धर्मावच्छिन्नयत्किञ्चिद्व्यक्तिसामग्रीसहिताया एव तद्धर्मावच्छिन्नसामग्र्यास्तद्धर्मावच्छिन्नकार्योपधायकत्वात् दृष्टमेव च कारणसमाजाधीना कार्योत्पत्तिरिति गीयते। एतेन घटादिचिकीर्षाविरहेऽपि दण्डगोचरप्रत्यक्षात् दण्डोपादानकप्रवृत्त्यापत्तिस्तदवच्छिन्नसामग्रीसत्त्वादित्यपि निरस्तं संयोगभ्रम्याद्यन्यतमसाध्यकप्रवृत्त्यतिरिक्ताया दण्डोपादानकप्रवृत्तेरलीकतया तादृशान्यतमसाध्यकप्रवृत्तिसामग्रीविरहादेव तदनुत्पादात् कार्योत्पत्तेः कारणसमाजाधीनत्वात्। नव्यास्तु उपादानप्रत्यक्षस्य हि स्वातन्त्र्येण न हेतुता, किन्तु घटादिनिर्वचिकीर्षया दण्डाद्युपादानकलौकिकसाक्षात्कारस्य च सत्त्वेऽपि दण्डादौ घटसाधनत्वज्ञानाभावदशायां घटसाध्यकदण्डोपादानकप्रवृत्तिवारणाय दण्डोपादाननिर्वचिकीर्षाविषयघटादिसाधनताज्ञानस्यापि घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तित्वावच्छिन्नं प्रति न्यायनये परनये च विशेषकारणत्वावश्यकत्वात्तदेव चिकीर्षाविषयसाधनताज्ञानमुपादानांशे लौकिकप्रत्यक्षात्मकं हेतुरूप्यते कार्यकारणभावद्वयकल्पनामपेक्ष्य लाघवात्। न च घटसाध्यककपालोपादानकघटध्वंससाध्यकदण्डोपादानकसमूहालम्बनप्रवृत्तौ दण्डनिष्ठघटसाधनताज्ञानस्य हेतुत्वात् तत्र व्यभिचारवारणाय घटत्वावच्छिन्नसाध्यतानिरूपितदण्डत्वावच्छिन्नोपादानताशालिप्रवृत्तित्वमेव कार्यतावच्छेदकमुपेयं तथा च दण्डत्वावच्छिन्नोपादानतानिरूपितघटत्वावच्छिन्नसाध्यताशालिप्रवृत्तित्वमादाय विनिगमनाविरहात्तत्रापि गुरुतरकार्यकारणभावद्वयमावश्यकमिति वाच्यं दण्डाद्युपादाननिर्वचिकीर्षाविषयघटसाधनताज्ञानस्य घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तिं प्रति विशेषकारणत्वावश्यकतया विनिगमनाविरहात् तादृशकार्यकारणभावद्वयस्य सर्वसम्मतत्वात्। इत्थञ्च विशेषसामग्रीविरहादेव उपादानप्रत्यक्षाभावदशायां न घटादिसाध्यकप्रवृत्त्युत्पत्तिप्रसङ्गः। एतेन घटादिनिर्वचिकीर्षाविरहेऽपि दण्डगोचरप्रत्यक्षात् दण्डनिष्ठघटसाधनताज्ञानात् विशेषसामग्रीसहकृतात् दण्डोपादानकप्रवृत्त्यापत्तिस्तदवच्छिन्नसामग्रीसत्त्वादिति द्वितीयातिप्रसङ्गोऽपि निरस्तः, केवलदण्डोपादानकप्रवृत्तित्वस्य कार्यतानवच्छेदकत्वात् घटादिसाध्यकदण्डाद्युपादानकप्रवृत्तेश्च घटादिनिर्वचिकीर्षाजन्यघटादिसाध्यकप्रवृत्तिसामान्यसामग्रीविरहादेवासम्भव इति प्राहुः। अथ प्रत्यक्षविषयकपालव्यक्तौ इदं न कपालमित्यसंसर्गाग्रहसत्त्वेऽपि कपालत्वप्रकारेण कपालं घटसाधनमिति कपालत्वांशे निर्द्धर्मितावच्छेदककतत्कपालविषयकलौकिकप्रत्यक्षात् कपालत्वप्रकारेण तत्कपालोपादानकप्रवृत्त्यापत्तिः। न च कपालत्वप्रकारेण तद्व्यक्तौ वृत्ताविशिष्टप्रवृत्तिरिति वाच्यम् अनुभवविरोधादिति चेन्न तदुपादानतावच्छेदकांशे इदन्त्वधर्मितावच्छेदककतदुपादानविशेष्यकप्रत्यक्षस्येदं घटसाधनमित्याकारस्य वा तत्तदुपादानतावच्छेदककतदुपादानकप्रवृत्तिं प्रति हेतुत्वेन निर्द्धर्मितावच्छेदककज्ञानस्याहेतुत्वात्। नचैवमिदं घटसाधनमिति लौकिकप्रत्यक्षादिदन्त्वप्रकारेण तद्व्यक्त्युपादानकप्रवृत्तिर्न स्यात् तस्य इदन्त्वांशे निर्द्धर्मितावच्छेदककत्वादिति वाच्यम् उपादानतावच्छेदकभेदेन कार्य्यकारणभावभेदादिदन्त्वस्थले निर्द्धर्मितावच्छेदककज्ञानस्यापि प्रवर्त्तकत्वात् इदमिदं नेत्यसंसर्गाग्रहासम्भवेन तत्रापि प्रसङ्गविरहादित्यास्तां विस्तरः। चिकीर्षा चेति व्यापारीभूतचिकीर्षा चेत्यर्थः। अन्यथा चिकीर्षासामान्यस्य लक्ष्यत्वे। लक्षणे फलचिकीर्षायामतिव्याप्तिवारकं कृतिसाध्याक्रियाविषयत्वं विशेषणं व्यर्थं स्यादित्यनुपदमेव स्फुटीभविष्यति। कृतिसाध्यत्वप्रकारिकेति। अत्र फलचिकीर्षाया व्यापारत्वाभावेन लक्ष्यत्वाभावात्तत्रातिव्याप्तिवारणाय कृतिसाध्यक्रियेति क्रियापदं धर्म्मिमात्रपरम् कृतिसाध्यत्वञ्च साध्यत्वाख्यफलीभूतविषयताशालिनिष्ठत्वं तथा च साध्यत्वाख्यफलीभूतकृतिविषयताशालिधर्म्मिविषयिकेत्यर्थः फलन्तु न तादृशविषयताशालीति भावः। केचित्तु क्रियापदमेव साध्यत्वाख्यफलीभूतकृतिविषयताशालिपरम् न चैवं पृथक् कृतिसाध्यत्वं क्रियाविशेषणं व्यर्थमिति वाच्यं कृतिसाध्यत्वप्रकारकज्ञानस्य व्यापारीभूता या चिकीर्षा सैव प्रकृते लक्ष्या सा च संशयादिनी चिकीर्षेव, विशं-

वादिचिकीर्षायां तत्प्रकारकज्ञानस्य हेतुत्वेऽन्यथाख्यात्यापत्तेः। तथा च इच्छादिविसंवादिचिकीर्षायामतिव्याप्तिवारणाय तद्विशेषणस्यावश्यकत्वात् इत्याहुः। पाकमिति पाकं कृत्या साधयामीत्याकारिकायां तस्यां तदुद्भवात् कृतिसाध्यत्वप्रकारकत्वस्यानुभवसिद्धत्वादित्यर्थः कृतिसाध्यत्वेन पाकमिच्छामीति तदनुव्यवसायसत्त्वादिति भावः। इच्छाया इत्यादि। इच्छायाः स्वप्रकारकसंवादीच्छायाः तत्प्रकारकधीसाध्यत्वनियमादिति फलितार्थः। गुरुनये रजतादिप्रकारकविसंवादीच्छायां रजतादिप्रकारकज्ञानाजन्यायां व्यभिचारवारणाय संवादित्वोपादानं कूटलिङ्गस्थलेऽप्यनायत्त्या तदिच्छाया विषयान्तरविषयकत्वकल्पनेन विसंवादः कल्प्यते। न चैवं संवादिचिकीर्षायां तज्जन्यप्रवृत्तौ च कृतिसाध्यत्वप्रकारकज्ञानस्य हेतुत्वेऽपि चिकीर्षासामान्ये च कृतिसाध्यत्वज्ञानस्य न हेतुत्वसिद्धिरिति वाच्यं संवादिचिकीर्षादौ कृतिसाध्यताप्रकारकज्ञानस्य हेतुत्वे सिद्धे यद्विशेषयोरिति (यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपीति) न्यायात् चिकीर्षादिमात्रं प्रत्येव कृतिसाध्यताविषयकज्ञानस्य हेतुत्वसिद्धेरिति भावः एवमग्रेऽपि। केचित्तु या यत्प्रकारिकेच्छा सा तद्विषयकज्ञानसाध्येति नियमः न तु प्रकारतापर्य्यन्तप्रवेशः सूत्रेऽपि स्वप्रकारकेच्छायाः स्वविषयकेत्यर्थः एवञ्च रजतादिविसंवादीच्छायां न व्यभिचारः तत्र तन्नये इच्छाविशेष्यविशेष्यकरजतप्रकारकज्ञानस्याहेतुत्वेऽपि स्वातन्त्र्येण रजतोपस्थितेरवश्यं हेतुत्वात्। न च तन्नये विसंवादीच्छायामुपस्थितेष्टतावच्छेदकासंसर्गाग्रहस्यैव हेतुतया रजतज्ञानं तत्र कारणतावच्छेदकमेव न तु कारणमिति व्यभिचारो दुर्वार एवेति वाच्यं कारणकारणतावच्छेदकसाधारणप्रयोज्यत्वरूपस्य साध्यत्वस्य नियमघटकत्वात्। नन्वेवं प्रकृतेऽपि कृतिसाध्यताज्ञानस्यैककालावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन इष्टसाधनताज्ञाननिष्ठकारणतावच्छेदकत्वमेवायातु कुतः कारणत्वम्? इति वाच्यं वक्ष्यमाणक्रमेण तन्नये इष्टसाधनत्वज्ञानस्येच्छाविरोधितया इष्टसाधनताज्ञानस्य चिकीर्षाहेतुत्वासम्भवात् परिशेषेण जन्यतारूपस्यैव कृतिसाध्यताज्ञानप्रयोज्यत्वस्य चिकीर्षायां सिद्धेः। नचेष्टसाधनताज्ञानस्याजनकत्वेऽपि बलवदनिष्टाननुबन्धित्वज्ञाननिष्ठजनकतावच्छेदकत्वमेवायात्विति वाच्यं बलवद्द्वेषस्यैवेच्छाविरोधितया तज्ज्ञानस्यापि चिकीर्षाहेतुत्वासिद्धेः।

वस्तुतस्तु विशेष्यविशेषणभावे विनिगमकाभावादुपस्थितेष्टतावच्छेदकासंसर्गाग्रहवदुपस्थितासंसर्गकेष्टतावच्छेदकोपस्थितेरपि विसंवादीच्छाजनकतया जन्यत्वरूपसाध्यत्वमेव नियमघटकमिति न कोऽपि दोष इति प्राहुः। अत एवेति चिकीर्षायाः स्वकृतिसाध्यताज्ञानसाध्यत्वादेवेत्यर्थः। स्वकृतिसाध्य–स्वकृतिसाध्यत्वेन ज्ञाते। इदञ्चापाततः वस्तुतो लाघवात्पाको मत्कृतिमान् भवत्वित्याकारिका साध्यतासंसर्गेण कृतिप्रकारिका इच्छैव व्यापारो न तु कृतिसाध्यत्वप्रकारिका गौरवादत एव ज्ञानमपि साध्यतासंसर्गेण कृतिप्रकारकमेव हेतुरिति तत्त्वम्। यद्यप्युक्तनियमबलेन कृतिसाध्यताज्ञानस्य हेतुत्वं साधितमेव तथापि दृष्टान्तरदानाय पुनरनुवदति न हीति इष्टसाधनताज्ञानसाध्या कृतिसाध्यताज्ञानं विनापि इष्टसाधनताज्ञानसाध्या यथाश्रुतेऽपि महेत्वसङ्गतेः। स्वकृत्यसाध्ये–स्वकृत्यसाध्यत्वेन निश्चिते स्वकृत्यसाध्यताज्ञानमिति स्वकृत्यसाध्यतानिश्चय इत्यर्थः कृतिसाध्यतासंशयेऽपि प्रवृत्तेरनुभवाद्यथाश्रुतासङ्गतेः। न च कृतिसाध्यतासंशये प्रवृत्तिस्वीकारे बहुवित्तव्ययायाससाध्येऽपि प्रवृत्त्यापत्तिरिति वाच्यं बलवदनिष्टानुबन्धित्वज्ञानस्य विरोधित्वादेव तत्रेच्छाप्रवृत्त्योरभावादिति ध्येयम्। तदभावकारणत्व इति कृतिसाध्यताज्ञानत्वेन कारणत्वमपेक्ष्य कृत्यसाध्यतानिश्चयाभावत्वेन कारणत्वे गौरवात् इत्यर्थः। नचाप्रामाण्यनिश्चयानास्कन्दितकृतिसाध्यताज्ञानत्वापेक्षयाऽप्रामाण्यज्ञानानास्कन्दितकृत्यसाध्यतानिश्चयाभावत्वमेव लघ्विति वाच्यं कृतिसाध्यताज्ञानस्याप्रामाण्यनिश्चये बलवदनिष्टानुबन्धिताज्ञानोदयादेव प्रवृत्त्यभावसम्भवात्तत्र तदनास्कन्दितत्वस्याप्रवेशात् स्वकृत्यसाध्यतानिश्चयवत्तदभावव्याप्यादिनिश्चयस्यापि प्रतिबन्धकत्वावश्यकतया बहुतरकार्य्यकारणभावकल्पनागौरवाच्चेति भावः। केचित्तु ननूक्तनियमबलादस्तु कृतिसाध्यताज्ञानं हेतुस्तथापि कृतिसाध्यताज्ञानत्वेन तस्य न हेतुता अपि तु इष्टसाधनताज्ञानत्वेन सर्वत्रेष्टसाधनताकृतिसाध्यतोभयविषयकसमूहालम्बनादेव चिकीर्षेत्यत आह न हीष्टसाधनताज्ञानसाध्येति न हीष्टसाधनताज्ञानत्वावच्छिन्नकृतिसाध्यताज्ञानकारणताकेत्यर्थः। स्वकृत्यसाध्ये स्वकृत्यसाध्यत्वेन निश्चिते। चिकीर्षापत्तेः—केवलेष्टसाधनताज्ञानाच्चिकीर्षापत्तेः कारणतावच्छिन्नस्यादिष्टापत्तौ चोक्तनियमभङ्गादिति भावः। तदभावकारणत्वे गौरवादिति। इदमुपलक्षणं तत्त्व-

साध्यतानिश्चयस्य प्रतिबन्धकत्वेऽपि यत्र कारणान्तराभावादिष्टसाधनताज्ञाने कृतिसाध्यत्वस्य न भानं तत्र कथमिष्टसाधनताज्ञानाच्चिकीर्षापत्तेर्दुर्वारत्वाच्च इत्यपि बोध्यम्। उक्तनियमसमस्तत्वेव तटस्थः शङ्कते अथेतीति। अभावः-कृत्यसाध्यतानिश्चयाभावः। उभयसिद्धः-चिकीर्षापूर्व्वमुभयसिद्धः, असिद्धा-चिकीर्षापूर्व्वमुभयासिद्धा। न लाघवावसरः इति कृतिसाध्यताज्ञानत्वस्य सदपि लाघवं न कारणतावच्छेदकतायां विनिगमकम् इत्यर्थः लघु गुरुधर्म्मद्वयावच्छिन्नं यदि फलपूर्व्वमुभयवादिसिद्धं तदेव लाघवस्य कारणतावच्छेदकतायां विनिगमकत्वादिति भावः। द्वैवात् प्रतिबन्धकविरहात्। सा—चिकीर्षापूर्व्वं कृतिसाध्यताधीः। लाघवावतारादिति कृतिसाध्यताज्ञानत्वरूपलघुधर्म्मावच्छिन्नस्य चिकीर्षापूर्व्वमुभयमते सत्त्वादित्यर्थः। इच्छाया इति तत्प्रकारकसंवादीच्छायास्तत्प्रकारकज्ञानजन्यतानियमेनेत्यर्थः। आवश्यकत्वात्-चिकीर्षाहेतुतावश्यकत्वात् अपि च कृत्यसाध्यताज्ञानप्रतिबन्धकतान्यथानुपपत्त्या कृतिसाध्यताज्ञानस्य चिकीर्षाहेतुतासिद्धिरित्याह जनकज्ञानमिति। तज्जनकीभूतज्ञानविघटकस्यैव ज्ञानस्य विधिप्रतिबन्धकत्वाच्चेत्यर्थः। अत्र व्याप्तौ दृष्टान्तमाह व्याप्तिज्ञानविघटनद्वारेति अनुमितिजनकव्याप्तिज्ञानविघटनेनेत्यर्थः। तथा च यत् यत्प्रतिबन्धकं ज्ञानं भवति तत्तज्जनकज्ञानविघटकं यथा व्यभिचारज्ञानमनुमितिप्रतिबन्धकं ज्ञानं भवत् अनुमितिजनकव्याप्तिज्ञानविघटकमपि भवति इति सामान्यतोव्याप्त्या कृत्यसाध्यतानिश्चयस्य चिकीर्षाप्रतिबन्धकज्ञानत्वेन हेतुना चिकीर्षाजनकज्ञानविघटकत्वसाधने पक्षधर्म्मताबलात्कृतिसाध्यताज्ञानस्यैव चिकीर्षाजनकत्वसिद्धिरिति भावः। न च जनकज्ञानविघटकत्वे नाऽन्यथासिद्धतया तदभावस्याहेतुत्वात् स्वरूपासिद्धिर्दृष्टान्तासिद्धिश्च इति वाच्यं प्रतिबन्धकत्वं हि न कारणीभूताभावप्रतियोगित्वम् किन्तु प्रयोजकीभूताभावप्रतियोगित्वम्। प्रयोजकत्वं च कारणकारणव्यावृत्तान्यथासिद्धिचतुष्टयराहित्ये सति नियतपूर्ववर्त्तित्वम्—कारणतत्कारणसाधारणम्। हेतौ ज्ञानपदोपादानादेव च विषयान्तरसञ्चारादौ न व्यभिचारः। साध्ये च ज्ञानपदं स्वरूपकथनम्। विघटकत्वञ्च प्रतिबन्धकत्वमेव नत्वेककालावच्छेदेन तदधिकरणावृत्तित्वरूपविरोधित्वं गुरुनयेऽधिकरणज्ञानरूपतया कृतिसाध्यताज्ञानस्यापि कृत्यसाध्यताज्ञानाभावस्य ज्ञानात्मकस्य विरोधितया सिद्धसाधनापत्तेः। नचासाधुत्वज्ञाने साधुत्वज्ञानाजन्यशाब्दधीप्रतिबन्धके व्यभिचार इति वाच्यम् निराकाङ्क्षत्वरूपासाधुत्वज्ञाने आकाङ्क्षाज्ञानमादाय साध्यस्यापि सत्त्वात् असाधुत्वज्ञानस्य च प्रतिबन्धकत्वे मानाभावात्। न च तथापि सिद्धौ व्यभिचार इति वाच्यम् गुरुनये सिद्धेरप्रतिबन्धकत्वात् तद्व्यावृत्तप्रतिबन्धकताया वा हेतौ निवेशात्। अतएवासिद्धत्वज्ञानाजन्येच्छाप्रतिबन्धकसिद्धत्वज्ञानेऽपि न व्यभिचारः तद्व्यावृत्तप्रतिबन्धकताया एव हेतौ निवेशात् अनिष्टत्वनिश्चयस्यापि इच्छाहेतुत्वाद्वा। अथ तथापि बाधसत्प्रतिपक्षादौ व्यभिचारः। न च तद्व्यावृत्ताऽपि प्रतिबन्धकता हेतौ निवेशनीयेति वाच्यम् कृत्यसाध्यताज्ञानाभावव्यभिचारज्ञानाभावयोरपि बाधाभाववत्त्वेन चिकीर्षानुमित्योः प्रयोजकतया स्वरूपासिद्धिदृष्टान्तासिद्ध्योरापत्तेः। न च साक्षाद्विरोधित्वे सतीत्यनेन हेतुर्विशेषणीय इति वाच्यम् साक्षाद्विरोधित्वं हि न ग्राह्याभावतद्व्याप्याद्यनवगाहित्वं, प्रकृतेऽपि तदसिद्धेः कृत्यसाध्यताज्ञानस्य चिकीर्षाप्रकारीभूतकृतिसाध्यत्वाभावावगाहित्वात् अतएव न कारणीभूताभावप्रतियोगित्वमपि, प्रकृतेऽपि तदसिद्धेः पूर्वपक्षिणा कृत्यसाध्यताधियः साक्षादेव प्रतिबन्धकत्वाभ्युपगमात् न च हेतौ प्रतिबन्धकज्ञानत्वपदेन ज्ञानत्वावच्छिन्नप्रतिबन्धकताशालित्वं विवक्षितं बाधसत्प्रतिपक्षादेश्च निश्चयत्वेन प्रतिबन्धकत्वमिति वाच्यम् प्रकृते तदसिद्धेः उक्तयुक्त्या कृत्यसाध्यतानिश्चयस्यैव पूर्वपक्षिमते प्रतिबन्धकत्वादिति चेन्न हेतौ स्वपाद्यविरोधावगाहिज्ञानभिन्नत्वेन यत्पदार्थविशेषणात्। स्वपदं प्रतिबन्धकज्ञानपरं चिकीर्षायाश्च ज्ञानभिन्नत्वादेव संग्रहः स्वपाद्यविरोधावगाहित्वन्तु स्वं यत्र यदभाववद्व्याप्य तदवच्छेदकाद्यन्यतमावगाहिते तत्र तदवगाहित्वं संवादित्वेनापि हेतौ यत्पदार्थो विशेषणीयः तेन इष्टभेदपक्षे प्रवृत्त्यादिप्रतिबन्धके तन्नये न व्यभिचारः। संवादिप्रवृत्तौ विशिष्टज्ञानमेव हेतुरिति साध्यसत्त्वादेव न तमादाय व्यभिचारः। न च तथापि कूटभ्रमपरामर्शलिङ्गस्थले लिङ्गासंसर्गाग्रहेण लैङ्गिकासंसर्गाग्रहाधीनसंवादीच्छाप्रवृत्तिप्रतिबन्धकेष्टभेदपक्षे जनकीभूतविशिष्टज्ञानविघटकत्वाभावाद्व्यभिचार इति वाच्यम् विशिष्टज्ञानस्य संवादीच्छाप्रवृत्तिहेतुत्वे मानाभावात् तत्रापीच्छाप्रवृत्त्योर्विषयान्तरविषयकत्वकल्पनेन विसंवादित्वस्य तैः स्वीकारादिति दिक्। अन्यथा—एतादृशव्याप्त्यनङ्गीकारे। उपेक्षणीयत्वम्-

इष्टसाधनतावच्छेदकरूपशून्यत्वम्। निष्फलत्वम् इष्टफलोपधानशून्यत्वम्, प्रतिबन्धकं—चिकीर्षाप्रतिबन्धकम्। क्रियाज्ञानमेवेत्येवकारेण इष्टसाधनत्वादिज्ञानव्यवच्छेदः। सोऽन्द्रुः शङ्कते नन्विति। सन इति। शक्तिवशात् बोधकत्वात् एतच्च चिकीर्षापदस्य यौगिकत्वपक्षे चिकीर्षापदस्याखण्डरूढत्वपक्षे त्वाह लाघवादिति, कृतिसाध्यत्वप्रकारकेच्छात्वापेक्षया कृतीच्छात्वस्य प्रवृत्तिनिमित्तस्य लघुत्वादित्यर्थः। चिकीर्षा-चिकीर्षापदप्रतिपाद्या। वृष्टाविवेति वृष्टिर्भवत्वितीच्छेवेत्यर्थः। इष्टसाधनताज्ञानात्—इष्टसाधनताज्ञानमात्रात् कृतिसाध्यताज्ञानं विनापीष्टसाधनताज्ञानादिति यावत्। तत्र कृतिसाध्यत्वस्याप्रकारतया कृतिसाध्यत्वनिश्चयस्याप्रतिबन्धकतया च कृतिसाध्यताज्ञानस्य हेतुत्वे मानाभावादिति भावः। अत्र वृष्टिर्भवत्वितीच्छेवेति प्रकृतसाधारणो दृष्टान्तः गुरुनये इष्टसाध्यं सुखं भवत्वितीच्छेव विशेषणतया सुखत्वमिव इष्टमपि विषयं करोति न तु इष्टं भवत्विति स्वातन्त्र्येणेच्छा कृतिसाध्यत्वप्रकारकेच्छां प्रति सुखत्वदुःखाभावत्वप्रकारकज्ञानयोर्हेतुत्वेन कृतिसाध्यत्वाप्रकारकोपायेच्छाया अलीकत्वात् इष्टसाध्यं सुखं भवत्वितीच्छायान्तु सुखे इष्टसाध्यत्वज्ञानमेव हेतुरिति मन्तव्यम्। वह्निना साधयामीतिवदिति साध्यत्वप्रकारिकाया इति शेषः। अनुभूयमानायाः—नियमतोऽनुभूयमानायाः। सनन्तावाच्यत्वेन—सनन्ताप्रतिपाद्यत्वेन। गौरवेण—प्रवृत्तिनिमित्तगौरवेण। प्रत्याख्यातुमशक्यत्वात् इति कारणतायाः प्रत्याख्यातुमशक्यत्वादित्यर्थः तथाच चिकीर्षापदाप्रतिपाद्यापि सा प्रवृत्तिहेतुरिति भावः। प्राधान्येनेति विशेष्यतयेत्यर्थः। अप्राधान्येन विषयत्वस्य तत्र द्वितीयार्थत्वे पाकत्वं चिकीर्षतीत्यपि प्रयोगापत्तेरिति भावः। न तु कृतेरिति अतो न कृतीच्छा चिकीर्षाप्रतिपाद्येति भावः। ननु चिकीर्षतीत्यत्र पाकस्य विशेष्यतया इच्छाविषयत्वमनुभूयते इत्युक्तं सन्प्रत्ययसमभिव्याहृतधातोरिच्छाविशेषवाचितया धात्वर्थस्यैव विशेष्यत्वात् इत्यत आह धातोरेवेति। इच्छाप्रकारवाचित्वमिति न तु विशेष्यवाचित्वमिति शेषः। प्रकारश्च कृतिसाध्यत्वं साध्यतासंसर्गेण कृतिर्वा। आद्ये तु लक्षणादिकं शरणमित्यन्यदेतत्। भोजनविशेष्यतयेति भोजनप्रकारकेच्छाविशेष्यतयेत्यर्थः। ओदनविशेष्यकभोजनप्रकारकेच्छाश्रय इत्यन्वयबोधादिति भावः। ननु कृतिसाध्यत्वप्रकारकेच्छाया नियमतः कृतिपूर्वमनुभवसिद्धत्वेऽपि न सा प्रवृत्तेर्हेतुरवच्छेदकगौरवात्, किन्तु कृतीच्छैव इष्टसाधनताज्ञानेन, तस्या अपि पूर्वं सम्भवात्। न चैवं क्रियाया इष्टसाधनतादिज्ञानेऽपि कृतेरिष्टोपायत्वादिज्ञानात् प्रवृत्त्यापत्तिरिति वाच्यम् इष्टत्वात्। अन्यथा तथापि कृतेरिष्टाजनकत्वादिज्ञानदशायामपि क्रियाया इष्टजनकत्वादिज्ञानमात्रस्य प्रवृत्तेस्तुल्यत्वादत आह इष्टसाधनत्वेनेति इष्टसाधनत्वज्ञानेनेत्यर्थः। वृष्टाविवेति प्रवृत्तिपूर्वमिति शेषः। करोतीति तादृशानुव्यवसायेनेत्यर्थः। ज्ञानचिकीर्षाप्रवृत्तीनामिति प्रवृत्त्या सह प्रवृत्तिकारणज्ञानचिकीर्षायाः समानविशेष्यकत्वस्य विषयीकरणात् इत्यर्थः। इष्टमुपलक्षणम् अतिप्रसङ्गभङ्गाय तद्विशेष्यककृतौ तदनुकूलकृतीच्छाया एव हेतुतायाः वक्तव्यत्वात् पाकानुकूलकृतीच्छात्वकृतिसाध्यत्वप्रकारकेच्छात्वयोः समनियतत्वेन लाघवगौरवमपि नास्तीत्यवधेयम्। कृत्या साधयितुमिति कृतिसाध्यत्वप्रकारिकेत्यर्थः। सा—चिकीर्षा। चिकीर्षतीत्यस्य पाकस्येति चिकीर्षाविषयतावच्छेदकपाकत्वावच्छिन्नस्येत्यर्थः। अन्यतः सिद्धे अन्यतः सिद्धत्वपक्षे, सा-पाकत्वप्रकारिका नापगच्छेत् न न जायेत जायेतेति यावत्। उपायविशेषसाध्यत्वेनेति एकोपायसाध्यत्वप्रकारिकेत्यर्थः। उपायान्तराधीनेति उपायान्तराधीनसिद्धत्वज्ञानेनेत्यर्थः। प्रीत्येति प्रीत्या धनलाभस्य प्रीत्या सिद्धत्वज्ञानेऽपीत्यर्थः। प्रतिपक्षेणेति प्रतिपक्षसाध्यत्वप्रकारकधनलाभेच्छाया इत्यर्थः। अनिष्टसंतत्यनिवृत्तेरुत्पत्तेरिति यावत्। तथा च तदुपायसाध्यत्वप्रकारकेच्छां प्रति तदुपायतः सिद्धत्वज्ञानस्यैव प्रतिबन्धकतया उपायान्तराधीनसिद्धत्वज्ञानेऽपि कृतसाध्यत्वप्रकारकेच्छोत्पत्तौ न बाधकमिति भावः। स्वविषयसिद्धत्वस्येति स्वविषयतावच्छेदकावच्छिन्नविशेष्यताकसिद्धत्वज्ञानस्येत्यर्थः यथा श्रुते पाकं कृत्या साधयामीतीच्छाया अन्यतः सिद्धपाकाविषयतया तत्सिद्धौ तन्निवृत्तेरनुपपादनात्। न च तस्या अन्यतः सिद्धपाकोऽपि विषयः व्यधिकरणप्रकारकेच्छाया अभ्युपगमात्, इति वाच्यं तथापि पाकत्वरूपेणान्यतः सिद्धपाके सिद्धत्वज्ञाने तेन रूपेण सिद्धपाकमात्रे तदापत्तेस्तादवस्थ्यात् भिन्नप्रकारकस्यापि सिद्धत्वज्ञानस्य प्रतिबन्धकत्वापाताच्च। सिद्धत्वञ्च क्वचिदुत्पन्नत्वं, क्वचिद्विद्यमानत्वं, क्वचिच्च इष्टसाध्यताविरोधित्वरूपं, यथा दुःखप्रागभावादौ प्रतिबन्धकाभावकूटस्य हेतुत्वाच्च नाननुगमो दोषाय। न चैवं सिद्धे ग्रामादौ कथमिच्छेति वाच्यं तत्र ग्रामादिलाभस्यासिद्धस्यैव इच्छाविषयत्वात् न तु ग्रामादेरिति भावः। उपायेच्छाविरोधित्वात् उपायेच्छाग्रहणपा

प्रयोजकत्वात्, फलेच्छाविच्छेदस्य प्रतिबन्धकत्वाभावेन यथा श्रुतासङ्गतेः। तत्र-चिकीर्षितस्य पाकस्यान्यतः सिद्धत्वज्ञानस्थले। सिद्धत्वम्-सिद्धत्वग्रहः पाकस्य सिद्धत्वज्ञानात् स्वविषयसिद्धत्वज्ञानम् ओदनस्य सिद्धत्वज्ञानात् फलेच्छाविच्छेद इति भावः। ननु स्वविषयतावच्छेदकावच्छिन्नविशेष्यताकसिद्धत्वज्ञानत्वेन प्रतिबन्धकत्वे स्वत्वान्तर्भावात् अननुगमः न च तद्धर्म्माश्रयविशेष्यकेच्छां प्रति तादृशसिद्धत्वज्ञानं विरोधीति वाच्यं विसंवादीच्छाया असंग्रहात्। अथ तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि नचैवं शूद्रादिपाके सिद्धत्वज्ञानेऽपि ब्राह्मणस्य पाके चिकीर्षा न स्यादिति वाच्यं तदानीं स्वीयपाकत्वादिरूपेणैव” ब्राह्मणस्य चिकीर्षोत्पादात् पाकत्वरूपेण तदनुत्पादात् इति चेन्न ग्रामे स्वत्वं मे भवत्विति सिद्धग्रामादिगोचरेच्छायां ग्रामत्वादिरूपेण सिद्धत्वज्ञानेऽपि जायमानायां व्यभिचारात् कपालद्वयसंयोगादिरूपेण सिद्धत्वज्ञानेऽपि कपालद्वयसंयोगाद्युपादानेच्छायां व्यभिचारात् सिद्धत्वज्ञानदशायां तदनभ्युपगमे तदानीं प्रवृत्तेरप्यपलापप्रसङ्गात् उपादानेच्छायाः प्रवृत्तौ हेतुत्वादतएव तद्धर्म्मप्रकारकत्वावच्छिन्नतद्धर्म्मविशेष्यताकेच्छां प्रति तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि नातो ग्रामे स्वत्वं मे भवत्विति सिद्धग्रामादिगोचरेच्छायां व्यभिचार इति कस्यचित् प्रलपितमपास्तं, कपालद्वयसंयोगाद्युपादानेच्छायां व्यभिचारात् पाकत्वादिरूपेण सिद्धत्वज्ञानदशायां मम कृतिसाध्यपाको भवत्विति चिकीर्षाया अनुत्पादवत् घटत्वादिरूपेण सिद्धत्वज्ञानदशायामपि नीलोघटोभवत्वितीच्छाया अनुत्पत्तिप्रसङ्गाच्च इति चेत् ? नैवं तद्धर्म्मोद्देश्यतावच्छेदकेच्छां प्रति तद्धर्म्मप्रकारकसिद्धत्वज्ञानस्य प्रतिबन्धकत्वात्। उद्देश्यत्वञ्च भवत्वित्यादिपदाभिलप्यमानो विषयताविशेषः ग्रामे स्वत्वं मे भवत्वित्यादौ ग्रामादिर्नोद्देश्यः किन्तु स्वत्वमेव एवं कपालाद्युपादानगोचरेच्छायामपि कपालादिर्नोद्देश्यः। उद्देश्यतावच्छेदकत्वञ्च तत्पर्य्याप्त्यधिकरणत्वं तेन घटत्वादिरूपेण सिद्धत्वज्ञानदशायां नीलोघटोभवत्वितीच्छोत्पत्तिः। अतएव यत्र पाकादिविशेष्यकचिकीर्षायां, पाकत्वादिमात्रेणोद्देश्यता पाकत्वादिरूपेण सिद्धत्वज्ञानादेव सा प्रतिबध्यते यत्र तु स्वकृतिसाध्यपाकत्वादिरूपेण, सा तु स्वकृतिसाध्यपाकत्वादिरूपेण सिद्धत्वज्ञानादेवापैति इति विभागः। तादृशविलक्षणविषयतानङ्गीकारे तु तत्तद्व्यक्तित्वेनैव प्रतिबध्यता, प्रतिबन्धकता तु सामान्यतस्तद्धर्म्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानत्वेन तत्तद्व्यक्तित्वेन वेत्यन्यदेतत्। केचित्तु यद्धर्म्मावच्छेदेनेष्टसाधनताज्ञानाधीना इच्छा तद्धर्म्मप्रकारकसिद्धत्वज्ञानस्यैव विरोधि। इष्टसाधनविषयत्वञ्च यत्र पाकत्वरूपेण गृहीतं, तत्र पाकत्वप्रकारकसिद्धत्वधियैव सापगच्छति यत्र मत्कृतिसाध्यपाकत्वादिना तदवगतं, तत्र तदवच्छिन्नसिद्धत्वधियैवेति विभागः। तेन प्रतिग्रहसाध्यधनलाभत्वस्येष्टसाधनतावच्छेदकत्वात् प्रकारान्तरेण लाभेऽपि न तदपगमः। न च सिद्धत्वज्ञानदशायां घटयागादिसाध्यकप्रवृत्तिजनककपालद्वयसंयोगाद्युपादानेच्छायां व्यभिचार इति वाच्यम् गुरुनये उपादानविषयचिकीर्षाविषयसाधनताज्ञानस्य साक्षात् प्रवृत्तिहेतुत्वेन तादृशेच्छायां मानाभावात्। तच्चाग्रे स्फुटं भविष्यति एवं न्यायनयेऽपि। न च तथापि यथा पाकत्वरूपेण इष्टसाधनताज्ञानात् कृतिसाध्यत्वप्रकारकज्ञानसहकृतात् पाकः कृतिसाध्यो भवतु इतीच्छाया ग्रामत्वादिरूपेण सिद्धग्रामादाविष्टसाधनताज्ञानात् स्वीयत्वप्रकारकज्ञानसहकृतात् ग्रामो मे स्वकीयो भवतु इति सिद्धग्रामविशेष्यकेच्छाया उत्पत्तौ बाधकाभावात् तत्र व्यभिचारः ग्रामत्वादिरूपेण सिद्धत्वज्ञानेऽपि तदुत्पत्तेरिति वाच्यम् स्वकृतिसाध्यतातिरिक्तस्थले तत्प्रकारकफलार्थीच्छायां तत्प्रकारकफलसाधनताज्ञानस्य फलबलेन हेतुतया ग्रामत्वरूपेणेष्टसाधनताज्ञाने तादृशेच्छाया एवासिद्धेरित्याहुः, तदसत् गुरुनये नियतविषयकेच्छाया असंग्रहात्। घटादिसाध्यकप्रवृत्तौ घटादिचिकीर्षावत् कपालाद्युपादानकप्रवृत्तौ घटादिचिकीर्षावत्कपालाद्युपादानकप्रवृत्तौ कपालादीच्छाया अपि हेतुत्वेन कपालाद्युपादानकेच्छाया व्यभिचारस्य दुर्वारत्वाच्च, अन्यथा चिकीर्षाविषयसाधनताज्ञानस्य लौकिकप्रत्यक्षस्य चाविशिष्टत्वेऽपि यत्रेच्छा तत्रैवोपादानतया प्रवृत्तिर्यत्र नेच्छा तत्र नेति नियमानुपपत्तेः। न्यायमीमांसासिद्धान्तस्य च युक्तिविरुद्धत्वेनानुपादेयत्वादिति संक्षेपः”। अधिकं तद्ग्रन्थे दृश्यम्।

न्यायमते तु कार्य्यत्वज्ञानमिष्टसाधनत्वज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानं चेति यथायथम् प्रवर्त्तकमिति भेदः विस्तरस्तु आकरे दृश्यः।

कार्य्यपुट पु॰ कार्य्यां कर्त्तव्ये कर्म्मणि न पुटति पुट-क्षेपे क ७त॰। १क्षपणके २उन्मत्ते ३अनर्थकरे त्रि॰मेदि॰।

कार्य्यप्रद्वेष पु॰ कार्य्यं प्रद्विषत्यनेन प्र+द्विष-करणे घञ् ६त॰। आलस्ये राजनि॰ आलस्येन हि कार्य्यद्वेषात्तस्य तथात्वम्।

कार्य्यशब्दिक त्रि॰ कार्य्यः शब्द इत्याह ठक्। कार्य्यः शब्द इति कथके नैयायिके तेन शब्दस्यानित्यत्वस्य स्वीकारात्तस्य तथात्वम्।

कार्य्यसिद्धि स्त्री कार्य्यस्याभीष्टस्य सिद्धिः। १अभीष्टसिद्धौ "वित्तं व्रजस्थि कार्य्यसिद्धिरतुला शक्रे स्तुताये भयम्" ति॰ त॰ खञ्जनशकुने। २कर्त्तव्यकर्म्मनिष्पत्तौ नील॰ ताजकोक्ते ३सहमभेदे च तत्र हि "पुण्यं गुरुर्ज्ञानयशोऽथ मित्रम्" इत्युपक्रमे "स्यादन्यकर्मसवणिक् त्वथ कार्यसिद्धिः" इत्यादिना पञ्चाशत् सहमानि विभज्य "स्यात् कर्म्मसिद्धिः सततं (दिवानिशोः) विशोध्य मन्दं सितात् स्यात्तु निशाहरङ्गम्" इत्यनेन तदानयनप्रकारो दर्शितः तथा च वर्षलग्नकालिकस्फुटशनिं शुक्रस्फुटात् त्यक्त्वा लग्नयोगे तत्सहमस्फुटं भवति इयांस्तु भेदः शोध्यमन्दशुद्धाऽस्य शुक्रयोर्मध्ये यदि लग्नस्फुटं न भवेत्तदा राशौ एकाङ्कयोगः कार्य्य इति। तत्फलं च तत्रैवोक्तं यथा "कार्य्यसिद्धिसहमं युतं शुभैर्दृष्टमुथशिलगम् जयप्रदम्। सङ्करेऽथ शुभपापदृष्टियुक् क्लेशतोजय उदीरितो बुधैः"

कार्य्या स्त्री कृ-ण्यत्। कारोष्ट्रे राजनि॰।

कार्य्याधिप पु॰ ६त॰। ज्योतिषोक्ते १व्यापाररूपकार्य्यस्थानाधिपे लग्नावधिकदशमस्थानाधीश्वरे। २कार्य्याध्यक्षे च। कार्य्याधीशादयोऽप्यत्र।

कार्य्यान्वित त्रि॰ कार्य्येण कर्त्तव्येनान्वितः। १कार्य्ययुक्ते २कार्य्यताबोधकपदप्रतिपाद्यार्थान्विते च। मीमांसकनये कार्य्यान्विते एव शब्दस्य यथा शक्तिस्तथा पूर्व्वपक्षविधया शब्दचि॰ निर्णीतं यथा

"नन्वर्थवादानां सिद्धार्थतया न प्रामाण्यं कार्य्यान्वित एव पदानां शक्त्यवधारणात् वृद्धव्यवहारादेव हि सर्वेषामाद्या व्युत्पत्तिः उपायान्तरस्य शब्दव्युत्पत्त्यधीनत्वात्। तथाहि प्रयोजकवाक्योच्चारणानन्तरं प्रयोज्यस्य वृद्धस्य प्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुपस्थितत्वाच्च प्रयोज्यवृद्धप्रवृत्तिमेव प्रयोजनमवधारयति नचाकिञ्चित्कुर्वतस्तादर्थ्यं सम्भवतीति च तज्जन्यं प्रवृत्त्यनुकूलं कार्य्यताज्ञानमेव कल्पयति स्वप्रवृत्तौ तेन कार्य्यताज्ञानस्य हेतुत्वावधारणात् नान्यतः प्रवृत्तेः कार्य्यताज्ञानावरुद्धत्वात्, नचैवं शब्दस्य स्वार्थज्ञानद्वारा प्रवृत्तिहेतुत्वम्। स्वप्रवृत्तौ बालेन शब्दाहितविशेषस्य कार्य्यताज्ञानस्य हेतुत्वेनावधारणात्। ज्ञाने च प्रत्यक्षादिनानोपायकत्वदर्शनात् शब्दोऽपि कार्य्यताज्ञानहेतुरित्यवधार्य तत्रैव शक्तिं कल्पयति उपस्थितत्वात्। पश्चादावापोद्वारेण क्रियाकारकपदानां कार्य्यान्विततत्तदर्थेषु शक्तिं गृह्णाति प्रथमगृहीतसामान्यशक्त्यनुरोधात्। अथ यद्यपि वृद्धव्यवहारादौ कार्य्यान्वितधीरनुमिता तथाप्यन्वितमात्रशक्त्यैव कार्य्यवाचकपदसमभिव्याहारादाकाङ्क्षादिमहिम्ना कार्य्यत्वधीसम्भवान्न कार्य्यांशेऽपि शक्तिः परम्परयापि शब्दस्य कार्य्यान्वितज्ञानानुकूलत्वादर्थापत्तावन्यथोपपत्तिरपि। अवश्यक्लृप्ताकाङ्क्षादेः कारणत्वं कार्य्यांशशक्तावपि। तद्व्यतिरेकादन्विताभिधानव्यतिरेकनियमात् सति चाकाङ्क्षादौ कार्य्यत्वव्यतिरेकदर्शनादन्विताभिधानव्यतिरेको न काप्यस्ति। अन्यथा गवादिपदानां व्यक्तावपि शक्तिः स्यात्। संस्कारादेव व्यक्तिलाभदर्शनान्न तथेति यदि, तदा कार्य्यवाचकपदादेव कार्य्यान्वितलाभ इति किं शक्त्या वृद्धव्यवहारे नियमतः कार्य्यान्वितज्ञानं दृष्टमिति तत्र शक्तिकल्पने वृद्धव्यवहारे शब्दोपस्थापितेनैवान्वयबोधदर्शनाच्छाब्दसन्निधेरप्यन्वयहेतुत्वकल्पने द्वारमित्यादौ शब्द एवाध्याह्रियेत। क्वचिदसंपूर्णवाक्ये वृद्धव्यवहाराद्व्युत्पत्तेः शब्दसन्निधिं व्यभिचरतीति चेत् तर्हि सिद्धार्थेऽप्यन्वयप्रतीतिदर्शनात् कार्य्यत्वमपि व्यभिचारि। न च तत्र लक्षणा, बाधकाभावात्। शक्तिकल्पनभियाह्यन्यत्र लक्षणा मता। इह तु लघीयसा उभयसाधारणपदार्थमात्रशक्त्या सर्व्वत्रैवोचितत्वात्। किञ्च कार्य्यवाचिलिङादीनामाकाङ्क्षाद्युपेतपदार्थान्वितस्वार्थबोधकत्वमवश्यं वाच्यम् अतोऽविशेषात् पदान्तराणामपि तथात्वमस्तु लाघवादिति? मैवं, व्यवहारहेतुतयानुमिते हि कार्य्येऽन्वितज्ञानेऽन्वयव्यतिरेकाभ्यां शब्दस्य साक्षात्कारणत्वमवधारयति न परम्परया, साक्षात्त्वस्यौत्सर्गिकत्वेन तत्सम्भवे परम्पराया अन्याय्यत्वादिति तत्रैव शक्तिं कल्पयति नान्वितज्ञाने, पदार्थज्ञाने वाऽप्रवर्त्तकतया प्रवृत्त्या स्वकारणत्वेन तयोरनुपस्थापनात्। न चान्वितज्ञानशक्तावपि परम्परया कार्य्यत्वधीः सम्भवतीत्यर्थापत्त्या सैव कल्प्यतां, लाघवात्, न तु विशिष्टज्ञाने शक्तिरन्यलभ्यत्वादिति वाच्यम् अर्थापत्तेः साक्षादुपपादकमात्रविषयकत्वेन न्यूनाधिकाग्राहकत्वात्। साक्षादुपपादककार्य्यान्वितज्ञाने शक्तिः कल्प्यते लिङादीनां शक्तेरकल्पनादन्यलभ्यत्वस्याप्यभावात्। आद्यव्युत्पत्तेर्विचार्य्यत्वात्। किञ्च प्रवृत्तिकारणतयोपस्थितं कार्य्यान्वितज्ञानमपहायानुपस्थितान्वितज्ञानमात्रे

शक्तिकल्पनमयुक्तं हेत्वभावात् उपस्थित्यन्तरे गौरवात्। अथ कार्य्यान्वितज्ञानोपस्थितावप्यन्वितज्ञानमप्युपस्थितमिति लाघवात् कार्य्यांशमपहायान्विते शक्तिर्गृह्यतामिति चेत् न ज्ञाने हि पदानां शक्तिः शक्यत्वात्, नार्थे। अन्यच्च कार्य्यान्विते ज्ञानमन्यदन्वितज्ञानं विषयभेदेन ज्ञानभेदात्। तदुक्तमभाववादे, "अन्यद्भूतलज्ञानं अन्यच्च घटवद्भूतलज्ञानमिति" अन्वितज्ञानमुपस्थाप्य तत्र शक्तिग्रह इति गौरवमेव लघुनि शक्ये सम्भवत्यन्यलभ्यं गुरु न, युगपदुपस्थितौ तथात्वात्। न च तस्याप्यनुपस्थितिः पुरुषविशेषदोषात् सर्व्वैरेवाद्यप्रवृत्तौ तथानवगमात्। तथापि न कार्य्यान्विते शक्तिः कार्य्यवाचिलिङादीनां व्यभिचारादिति चेत् न सर्व्वपदानां कार्य्यत्वविशिष्टधीजनकत्वात् तच्च कार्य्यान्वितस्वार्थप्रतिपादकतयेतरान्वितस्वार्थकार्य्यप्रतिपादकतया वेति। एवं कार्य्यान्वितव्युत्पत्तौ सत्यामनाकाङ्क्षादौ व्यभिचारादाकाङ्क्षादेरुपाधित्वम्। तयोश्चोपजीव्यप्रथमभाविकार्य्यान्वितव्युत्पत्त्यनुरोधेन सिद्धश्रुतावपि कार्य्याध्याहारः। क्वचिल्लक्षणा क्वचित्संसर्गग्रह इति सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वितमात्रे शक्तिरेव कल्प्यतां प्राचीनकार्य्यान्वितज्ञानं बाध्यतामित्यप्यतएव निरस्तं पूर्व्वकल्पनातः कल्पनान्तरप्रसङ्गाच्च। उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरप्युपपत्तेरनन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् उपजीव्यव्याघाताच्च। अथ सिद्धार्थेऽपि व्युत्पत्तिः सम्भवति तथाहि उपलब्धचैत्रपुत्रजन्मा बालस्तादृशेनैव वार्त्ताहारेण चैत्रसमीपं गतः-चैत्र! पुत्रस्ते जात, इति वार्त्ताहारवाक्यं शृण्वन् चैत्रस्य मुखप्रसादं पश्यन् श्रोतृहर्षमनुमिनोति। हर्षाच्च तत्कारणं पुत्रजन्मज्ञानं कल्पयति उपस्थितत्वात् उपपादकत्वात् अन्योपस्थितौ गौरवाच्च तत्र वाक्यस्य कारणतां कल्पयति लाघवादिति चेत् न हर्षहेतूनां बहूनां सम्भवात् हर्षेण लिङ्गेन पुत्रजन्मज्ञानस्य बालेनानुमातुमशक्यत्वात् प्रियान्तरज्ञानस्य परिशेषयितुमशक्यत्वात्। अथ पुत्रजन्मज्ञानाव्यभिचारि वृद्धिश्राद्धादिक्रियाविशेषदर्शनात् पुत्रजन्मज्ञानानुमानमिति चेत् तर्हि पुत्रस्ते जात इति वाक्यं तत्तत्क्रियाकर्त्तव्यतापरमेवेति कार्य्यान्वितज्ञानजनकत्वमेव तस्य प्रथमतो गृह्यते तदुत्तरकालं पुत्रजन्मज्ञानानुमानमिति न व्युत्पत्तिः कार्य्यं जहाति। यत्रापीह सहकारतरौ पिकोरौतीति प्रसिद्धार्थकपदसामानाधिकरण्यादिभिर्व्युत्पत्तिस्तत्रापि व्यवहाराधीनव्युत्पत्तिपूर्व्विका कार्य्यान्वित एव युक्ता पिकपदशक्तिः। पूर्व्वं नावधृतेति चेत् तत्रापि पिकमानयेत्यादौ कस्यचित् कार्य्यान्वित एव व्युत्पत्तेः उपजीव्यजातीयतया च तस्यावलम्बनम्। किञ्चेदमपि पदं कार्य्यान्वितज्ञानशक्तम् पदत्वादिति सामान्यतोऽवगतः विशेषः स्वार्थः परं नाधिगतः स इदानीं सुहृदुपदेशादिभिरवगम्यते। अतः सिद्धप्रवृत्तिपराणां शब्दानां प्रवर्त्तकज्ञानजनकता तच्च क्वचित् साक्षात् क्वचित् परम्परया, कार्य्यान्वयात् कार्य्यान्वितस्वार्थबोधकमिति। यत्र पुराणभारतादिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वेन तेषामिति परम्परया कार्य्यान्वयात् कार्य्यान्वितस्वार्थबोधकत्वं स्वरूपाख्यानपराणान्तु काव्यनाटकादीनां पदार्थसंसर्गग्रहेण संसर्गव्यवहारो न संसर्गग्रह इति"।

तदेतन्मतं पूर्व्वपक्षत्वेनोक्त्वा मणिकृता निराकृतं यथा— "अत्रोच्यते घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयनकार्य्यताज्ञानमनुमितं बालेन, नतु कार्य्यान्वितज्ञानं प्रवृत्तिविशेषे तस्याहेतुत्वात् विषयादिपदशक्तिग्रहे तस्यानुपयोगाच्च तत्र च ज्ञानविशेषे घटमानयेति वाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमवधार्य्य घटपदद्वितीयाधातुविधिप्रत्ययानां प्रत्येकावापोद्वापेण घटकर्म्मत्वानयनकार्य्यत्वज्ञानेषु प्रत्येकं कारणत्वमवगम्य शक्तिं कल्पयति। पश्चात्प्रवृत्तिसामान्येनानुमितकार्य्यतान्वितज्ञाने वाक्यमात्रस्यानन्यलभ्यत्वेन कार्य्यांशमपहायान्वितज्ञानमात्रे शक्तिं कल्पयति नतु प्रथमं वाक्यमात्रस्य कार्य्यान्वितज्ञानमात्रहेतुत्वकल्पनम्।

अथ घटानयनक्रियायाः प्रथमं क्रियात्वज्ञानात्प्रवृत्तिमात्रानुमानं न तु कार्य्यान्वितज्ञानमनुमाय तत्र वाक्यमात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति तदुत्तरं विशेषयोः कार्य्यकारणभाव इति चेत् न प्रथमं प्रवृत्तिमात्रकार्य्यान्वितज्ञानमात्रयोरनुमानं बालस्य क्रमशो भवतीत्यत्र मानाभावात् घटादिपदशक्तिग्रहस्य तेन विनापि सम्भवात्, न च तदनुमानसामग्री तदा वृत्तेति वाच्यम् तदा व्याप्त्यादिस्फूर्तौ मानाभावात् सामान्ययोः कार्य्यकारणभावग्रहो विशेषयोस्तथात्वग्रहे हेतुरिति चेत् न विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् यथा धूमवह्निविशेषयोः कार्य्यकारणभावग्रहे तत्सामान्ययोरपि हेतुहेतुमद्भावो गृह्यते अन्यथा न सकृद्दर्शनगम्या व्याप्तिः

स्यात् तथात्वापि । विशेषयोः कार्यकारणभावग्रहस्य विशेष्यवेद्य एव सामान्ययोस्तथाभाव इति चेत् न प्रत्यक्षेण विशेषग्रहे योग्यत्वात् सामान्यमपि भासते । प्रकृते च कार्यविशेषेण कारणविशेषोऽनुमितो न सामान्यमिति न युगपदुपस्थितिः । अथ विशेषयोः कार्यकारणभावात् सामान्ययोरपि तथात्वमवधारयतीति चेत् तर्हि विशेषयोः कार्यकारणभावावगमः प्राथमिक इति तन्मूलकः प्रथमं कार्यान्वितपदविशेषशक्तिग्रह एव स्यात् निष्प्रयोजनकत्वेनानन्तरानुमितौ मानाभावात् । यच्चोक्तं प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहायान्वितज्ञानं कल्पयित्वा तत्र शक्तिकल्पनमयुक्तम् उभयथा गौरवादिति तन्न कार्यान्वितज्ञानेऽन्वितज्ञानत्वस्य सत्त्वात् तद्बाधकत्वाच्च तस्य । अतस्तत्रैव शक्तिग्रहो न कार्यत्वांशेऽपि । अतएव घटवद्भूतलज्ञाने भूतलज्ञानत्वमपीति तद्भिन्नं तज्ज्ञानमभावव्यवहारकारणं त्वया स्वीकृतम् । अस्त्वेवं किन्तु तदुपस्थितावप्यन्वितज्ञानत्वं न विषय इति तस्योपस्थित्यन्तरं कल्प्यमिति चेत् न कार्यान्वितज्ञानेऽन्वितज्ञानत्वं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात् विशिष्टज्ञानसामग्रीतो विशेष्यभानावश्यम्भावात् । अन्यथान्यज्जातिज्ञानमन्यच्च जातिविशिष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं क्वापि नोपस्थितमिति न तत्र जातिरेव पदार्थः स्यात् । जातेः केवलोपस्थितौ च न व्यक्तिसमानसंवित्वेद्यत्वम् । अथ जातिविशिष्टज्ञानोपस्थितेर्व्यक्तिज्ञानविषयत्वेऽपि गौरवात्, व्यक्तेरनन्यलभ्यत्वाच्च जातिविशिष्टज्ञानत्वं न शक्यतावच्छेदकं किन्तु जातिज्ञानत्वं लाघवादिति, चेत् तर्हि तुल्यम् । न च युगपदुपस्थितौ लाघवावतारः । नचात्र युगपदुपस्थितिरिति वाच्यम् विशिष्टज्ञानस्य विशेष्यविषयकत्वनियमात् । किञ्च ममेदं कार्यमिति ज्ञानं साक्षादुपपादकं प्रवृत्त्या स्वकारणत्वं नानुमितमतस्तत्र शक्तिं गृह्णीयात् । साक्षादुपपादकविषयत्वात् कल्पनायाः, ममेदं कार्यमिति ज्ञाने तस्य साक्षादुपपादकत्वात् । अथेदं कार्यमिति ज्ञानशक्त्यैव परम्परयानुमानद्वारा ममेदं कार्यमिति ज्ञानसम्भवादन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति तर्हीतरान्वितज्ञानशक्त्यैव कार्यवाचकपदसमभिव्याहारेण कार्यान्वितज्ञानसम्भवादन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति तुल्यम् । नन्विदं कार्यमिति ज्ञानं साक्षादेव प्रवर्त्तकं कर्त्तव्यताप्रयोजकतावदशेषविशेषणस्य स्वगतत्वप्रतिसन्धानं सहकारि तेन नातिप्रसङ्गः न च सहकारिविलम्बेन कार्यानुत्पादे साक्षात्साधनत्वं निवर्त्तत इति चेत् न लाघवेन ममेदं कार्यमिति ज्ञानादेव प्रवृत्तेः । यथा च भविष्यद्विषयया कर्त्तव्यतानुमितिस्तथोक्तमधस्तात् । अपि च यादृशस्य पुरुषस्याभिगीतकृतिसाध्यमिदं तादृशोऽहमिति धीर्न प्रवृत्तिहेतुः कृतक्रियमाणविषयकृतिसाध्यताज्ञानस्य सिद्धविषयस्यासिद्धविषयेच्छानुत्पादकत्वात् इच्छायाः स्वप्रकारकधीसाध्यत्वेन कृत्या साधयामीतीच्छायाः स्वकृत्यनन्तरभविष्यत्तारूपकृतिसाध्यताधीजन्यत्वाच्च । अपि चास्तु प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्कारणताबोधात् तत्र शक्तिग्रहः तथापि पश्चादावापोद्वारेण पदविशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति लाघवात् न तु कार्यत्वांशेऽपि गौरवात् अन्यलभ्यत्वाच्च । नचैवं प्रथमं प्रवृत्तस्य साक्षात्कारणताबोधकस्य तन्मूलककार्यान्वितशक्तिग्रहस्य च बाधः स्यादिति वाच्यम् इष्टत्वात् अन्यथासिद्धिमपहरतो हि बालस्य स (बाधः) भूत इति तस्याबलवत्त्वात् गौरवान्यलभ्यत्वतर्कसहकृतप्रमाणजन्यत्वेनोत्तरस्य बलवत्त्वात् नचोपजीव्यबाधान्न तथा प्रत्येतीति वाच्यम् उपजीव्यत्वे मानाभावात् दैवाद्धि प्रथमं तद्वृत्तं न तु पदविशेषशक्तिग्रहे तस्य हेतुत्वम् तेन विनापि तत्सम्भवात् । न च प्राथमिकत्वेन बलवत्त्वं, व्यभिचारात् । नापि सर्व्वैः प्रथमं प्रतीयमानत्वेन बलवत्त्वम् । सर्व्वेषां शरीराहंप्रत्यये, चन्द्रतारकादिपरिमाणस्य सर्वैरल्पत्वग्रहे च व्यभिचारात् । अतएव पूर्वकल्पनातः कल्पनान्तरप्रसङ्गः स्यादिति निरस्तम् । यत्रानन्यथासिद्धतयोपजीव्यतया वा बलवत्त्वं पूर्व्वकल्पनायास्तत्र तथात्वात् । किन्तु प्रथमं कार्यान्वितज्ञाने वाक्यस्य साक्षात्परम्परोदासीनं कारणत्वमात्रं गृह्यते न तु विशेषोऽपि उपायस्यान्वयव्यतिरेकादेरुभयविशेषसाधारणत्वेन तत्संशयिकत्वात् । उत्सर्गोऽपि बाधकाभावनिश्चयसहकृतो निश्चायकः । नचानन्यलभ्यत्वस्य बाधकस्याभावमापाततः स्वतो दर्शनमात्रेण बालो निश्चेतुमर्हति अतएव प्रामाण्यस्यौत्सर्गिकत्वेऽपि बाधकाभावनिश्चयादेव निश्चयः । अन्यथा प्रमाऽप्रमा वा साक्षात्परम्परासाधनं वेति संशयः क्वापि न स्यात् । यत्तु हर्षहेतूनां बहूनां सम्भवादित्यादि तन्न स्वतो गृहीतहर्षहेतुस्तनपानादेर्बाधावतारादन्यस्य हर्षहेतोरग्रहात् । उपस्थितत्वादुपपादकत्वाच्च पुत्रजन्मज्ञानस्यैव हर्षहेतुत्वेन कल्पनात् । अन्यप्रियज्ञानं हर्षकारणं भविष्यतीति शङ्कायां कथमेवमिति चेत् एवन्तर्हि कार्यान्वितज्ञानेऽपि

शक्तिर्न गृह्येत प्रयोज्यज्ञानहेतूनां बहुत्वात्। अनन्यथासिद्धशब्दानुविधानस्य च तुल्यत्वात् अन्यपियज्ञानस्याज्ञानस्य ज्ञानेऽपि वा तदुपस्थितिनियमे मानाभावात् सन्देहाभावोपपत्तेः लिङ्गाभासजन्यकाकतालीयसम्पन्नसंवादानुमितिवद्धर्षेण लिङ्गेन पुत्रजन्मज्ञानानुमानसम्भवाच्च। नचाभासत्वेनानुमितेर्भ्रमत्वे तद्धेतुशक्तिग्रहो भ्रमः, विषयस्य तथाभावेन तयोर्यथार्थत्वात्। यथा कश्चित् सूत्रसञ्चाराधिष्ठितं दारुपुत्रकं घटमानयेति नियुङ्क्ते स च तमानयति तदा चेतनव्यवहारादिवत् तद्दर्शीबालो व्युत्पद्यते—इयं क्रिया, कृतिजन्या, सा ज्ञानजन्या, ज्ञानं तद्वाक्यजन्यमित्यनुमितिपरम्परायाः भ्रमत्वेऽपि तद्धेतु शक्तिग्रहः तज्जन्यशाब्दबोधश्च यथार्थ एव विषयस्य तथाभावादिति सिद्धः सिद्धार्थे शक्तिग्रह इति। अतएव "यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत् सुखं स्वःपदास्पदम्" इत्यर्थवादोपस्थिते सुखे वेदादेव स्वर्गपदस्य शक्तिग्रहः"।

कार्य्यिन् त्रि॰ कार्य्यमस्त्यस्य इनि १कार्य्ययुक्ते २कार्य्यार्थिनि (उमेदार) व्याकरणोक्ते ३आदेशस्थानिनि च "कार्य्यमनुभवन् हि कार्य्यी निमित्ततया नाश्रीयते" परिभा॰। अत्र कार्य्यीति निर्द्देशात् "एकाक्षरात् कृतोजातेः सप्तम्याश्च न तौ (इनिठनौ) स्मृतौ" इत्युक्तिरप्यनित्या। ततः मतुप् मस्य वः। कार्य्यवत्। ठन् कार्य्यिक-तत्रार्थे त्रि॰। तत्र इनौ मतुपि च स्त्रियां ङीप्।

कार्शकेय पुंस्त्री कृशकस्यर्षेरपत्यं वा॰ ढञ्। कृशकर्षेरपत्ये ऋषिभेदे स्त्रियां ङीप् "कार्शकेयीपुत्रात् कार्शकेयीपुत्रः" शत॰ ब्रा॰ १४,९,४,२२, वेद वंशवर्णने।

कार्शाश्वीय त्रि॰ कृशाश्वेन निर्वृत्तादि कृशाश्वा॰ चतुरर्थ्यां छण्। कृशाश्वनिर्वृत्तादौ।

कार्श्मरी स्त्री कृश–स्वार्थे णिच्-भावे मनिन् कार्श्म तत् राति रा–क गौरा॰ ङीष्। १श्रीपर्णीवृक्षे ककः २गाम्भारीवृक्षे भरतः।

कार्श्य न॰ कृशस्य भावः ष्यञ्। १कृशत्वे "निर्बन्धसञ्जातरुषार्थकार्श्यम्" रघुः। स्वार्थे ष्यञ्। २कृशे ३शालवृक्षे, ४लकुचे (डेंयो) वृक्षे ५कर्चूरे च पु॰ राजनि॰।

कार्ष त्रि॰ कृषिः शीलमस्य छत्रा॰ णः। कृषिशीले कृषीवले भरतः।

कार्षापण पुंन॰ कर्षस्येदम् स्वार्थे वा अण्। तेन आपण्यते आ+पण–कर्म्मणि घ। १अशीतिरत्तिके ताम्रिके कर्षे "कार्षापणस्तु विज्ञेयः कार्षिकस्ताम्रिकः पणः" मनुः। २षोडशपणात्मके पुराणे (काहन) इति ख्याते मानभेदे। "माषः षोडशभागस्तु ज्ञेयः कार्षापणस्य तु। काकिनी (कुड़ि) तु चतुर्भागो माषस्य परिकीर्त्तिता। पञ्चनद्याः प्रदेशे तु संज्ञेयं व्यावहारिकी। कार्षापणप्रमाणन्तु तन्निबद्धम् (परिभाषितम्) इहैव तत्" कात्या॰ स्मृ॰ षोडशेत्यत्र हेमाद्रौ विंशतीति पाठः। अतएव "द्वात्रिंशत्पणिका गावो वत्सः पौराणिको भवेत्" कात्या॰ स्मृतौ पुराणद्वयस्याच्छ्वात्रिंशत्पणानां गोमूल्यत्वेनाभिधानम्। "अशीतिभिर्वराटकैः पण इत्यभिधीयते। ते षोडश पुराणं स्यात् रजतं सप्तभिस्तु तैः" भविष्यपु॰। "कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्त्तिता" प्रा॰त॰। "कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतोजनः। तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा।" "समुत्सृजेद्राजमार्गे यस्त्वमेध्यमनापदि। स द्वौ कार्षापणौ दद्यात्" मनुः। "कार्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्त्तते। पणोनिबद्धः पूर्व्वस्यां षोडशैव पणाः पलम्। इति नारदोक्ते ३दक्षिणदेशप्रसिद्धे पूर्व्वदेशप्रसिद्धपण परिमाणे च। कार्षापणेन क्रीतः टिठन् वा प्रतिरादेशश्च इदुच्चारणार्थः कार्षापणिक पक्षे प्रतिक तत्क्रीते त्रि॰ स्त्रियां ङीप्। कार्षापणिकी प्रतिकी अध्यर्द्धपूर्वात् द्विगोश्च तस्य वा लुक्। अध्यर्द्धकार्षापण अध्यर्द्धकार्षापणिकं सार्द्धकार्षापणक्रीते एवं द्विकार्षापण द्विकार्षापणिकं कार्षापणद्वयक्रीते त्रि॰। पर्श्वादिपाठात् स्वार्थेऽण्। कार्षापण कार्षापणसंघजीविषु त्रि॰ ब॰व॰।

कार्षि त्रि॰ कर्षतीति कर्षिः ततः स्वार्थे वा॰ इञ्। १कर्षणशीले २अन्तर्गतमलापनेतरि। "कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि" यजु॰६,२८। कर्षतीत्येवंशीलः कार्षिः अन्तर्गतमलापनेतासि" वेददी॰ "कार्षिरसीत्याह शमलमेवासायपप्लावयति" तैत्ति॰।

कार्षिक त्रि॰ कर्षं नित्यमर्हति छेदा॰ ठञ्। १नित्यकर्षणार्हे कर्षेण क्रीतः ठञ्। २कर्षेण क्रीते। तत्परिमाणमस्य ठञ्। ३कर्षपरिमाणयुक्ते। कर्षः कर्षणं शीलमस्य ठक्। ४कर्षके हेमच॰। स्वार्थे ठक्। ५कर्षपरिमाणे। "ताम्रिकः कार्षिकः पणः" मनुः।

कार्ष्ण्य न॰ कृष्णस्य भावः दृढा॰ ष्यञ्। कृष्णत्वे पक्षे इमनिच् कृष्णिमन् तत्रार्थे पु॰। षित्त्वात् स्त्रियां ङीष्यलोपौ।

कार्ष्ण त्रि॰ कृष्णस्येदम् अण्। १कृष्णमृगसम्बन्धिनि। "कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः" मनुः। २कृष्णद्वैपायनसम्बन्धिनि च "कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते" भा॰आ॰प॰१अ॰। कृष्णोदेवतास्य अण्। ३कृष्णाख्य-

विष्णुदेवताके हविरादौ त्रि०। "कार्ष्णेन पत्रिणा शत्रुः स भिन्नहृदयः पतन्" रघुः। ४शतावर्य्यां स्त्री राजनि०

कार्ष्णाजिनि पु० कृष्णाजिनस्यर्षेरपत्यम् इञ्। कृष्णाजिनर्षेरपत्ये "कुलकृत्विमिति कार्ष्णाजिनिः" कात्या०श्रौ०१,६,२२

कार्ष्णायन पु० कृष्णस्य व्यासस्य गोत्रापत्यम् नड़ा० ब्राह्मणे वाशिष्ठे च विशेष्ये फक्। कृष्णस्य व्यासस्य गोत्रापत्ये १ब्राह्मणे २वाशिष्ठे च।

कार्ष्णायस न० कृष्णस्यायसोविकारः अण्। कृष्णायसस्य विकारे "कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः" मनुः। स्त्रियां ङीप्। "व्याघ्रे कार्ष्णायसीं दद्यात्" मनुः।

कार्ष्णि पुंस्त्री कृष्णस्यापत्यं बाह्वा० इञ्। कृष्णस्य व्यासस्यापत्ये शुकदेवे। "युगपत्तपसः कार्ष्णिर्नन्दयिव्रतयस्तथा" भा० आ० १२२अ० ऋषिकीर्त्तने। २रौक्मिणेये कामदेवे च। "सा च तं वर्द्धयामास कार्ष्णिं कमललोचनम्" हरि० १६२ अ०। अस्योत्पत्तिकथा कामशब्दे उक्ता।

कार्ष्ण्य न० कृष्णस्य भावः दृढादि० ष्यञ् वा। १कृष्णत्वे कृष्णस्य गोत्रापत्यम् गर्गा० यञ्। ब्राह्मणवाशिष्ठे कृष्णस्य व्यासस्य गोत्रापत्ये पुंस्त्री स्त्रियां ङीप् तस्य छात्राः कण्वा० अण्। कार्ष्ण कृष्णगोत्रापत्यछात्रे स्त्रियां ङीप्।

कार्ष्मन् न० कर्षत्यत्र कृष-स्वार्थे णिच्-आधारे मनिन्। १युद्धे तत्र हीतरेतरं योधाः कर्षन्तीति तस्य तथात्वम्। "कार्ष्मन् वाजी न्यक्रमीत्" ऋ०९।३६।१ "कार्ष्मन् कार्ष्मे युद्धम्" भा०। ततः भावे मनिन्। २कर्षणे च।

कार्ष्मरी स्त्री कृष-णिच्-मनिन् कार्ष्म कर्षणं राति ददाति रा-क गौरा० ङीष्। श्रीपर्णीवृक्षे तस्याः विकारः यत्। कार्ष्मर्य्य श्रीपर्णीवृक्षावयवे। "पालाशवैकङ्कतकार्ष्मर्य्यबैल्वान्" कात्या० श्रौ० २,८,१। कर्कभाष्ये कार्ष्मर्य्येति पाठस्यापि दृष्टत्वात् तालव्यमध्योऽपि तत्रार्थे।

कार्ष्य पु० कृष्यतेऽसौ कृष-घञ् स्वार्थे ष्यञ्। शालवृक्षे अमरः।

काल कालोपदेशे (इयत्तया कालनिश्चयार्थोपदेशे) अद० चु० उभ० सक० सेट्। कालयति ते अचकालत्-त, कालयाम्-बभूव-आस-चकार-चक्रे। कालयिष्यति-ते

काल पु० ईषदलति अल-अच् कोः का। १कृष्णवर्णे तस्य वर्णेषु ईषद्भूषकत्वात् तथात्वम्। अस्त्यर्थे अर्श आद्यच्। २तद्वर्णयुक्ते त्रि०। ३लौहे न० वाचस्पतिः। धातुषु तस्य कृष्णत्वात् तथात्वम्। ४कक्कोले न० राजनि०। ५कालीयके गन्धद्रव्यभेदे भ०शब्दच०। तयोः पर्ण्यद्रव्येषु कृष्णत्वात्तथात्वम्। ६कोकिले पुंस्त्री० राजनि०। तस्य पक्षिषु कृष्णत्वात्तथात्वम् स्त्रियां ङीष्। ७राले ८रक्तचित्रके ९कसमर्द्दे (कालक सेन्दा) वृक्षे च पु० राजनि०। १०शनिग्रहे मेदि० कृष्णत्वात्तस्य तथात्वम्। कलयति सर्व्वं चु० कल-अच् "कालसमयवेलास्विति" पा० निर्द्देशात् नि० उपधादीर्घः। ११यमराजे १२महाकाले शिवे मेदि०। १३परमेश्वरे "कालोऽस्मि लोकक्षयकृत् प्रवृद्धः" "कालः कलयतामहम्" इति च गीता "कृतः सुदर्शनः कालः परमेष्ठी परिग्रहः" विष्णुस०। "लयोमयोऽयं भगवान् कालात्मा कालकृद्विभुः" सू०सि०। स्वनामख्याते परत्वापरत्वधीहेतौ न्यायादिमतसिद्धे १४द्रव्यभेदे। तन्निरूपणं कणादसूत्रे उपस्कारवृत्तौ च यथा

"अपरस्मिन्नपरं युगपत् चिरं क्षिप्रमिति काललिङ्गानि" क०सू०।

"इतिशब्दो ज्ञानप्रकारपरः प्रत्येकमभिसम्बध्यते तथाचापरमिति प्रत्ययो युगपदितिप्रत्ययः चिरमितिप्रत्ययः क्षिप्रमितिप्रत्ययः काललिङ्गानीत्यर्थः। अपरस्मिन्नपरमित्यनेन परस्मिन् परमित्यपि द्रष्टव्यं, तेनायमर्थः-बहुतरतपनपरिस्पन्दान्तरितजन्मनि स्थविरे युवानमवधिं कृत्वाऽपरत्वमुत्पद्यते तच्चापरत्वमसमवायिकारणसापेक्षम्, न च रूपाद्यसमवायिकारणं व्यभिचारात् त्रयाणां गन्धादीनां वायौ परत्वाद्यनुत्पादकत्वात् स्पर्शस्याप्युष्णादिभेदेन भिन्नस्य प्रत्येकं व्यभिचारात् न चावच्छिन्नपरिमाणं तथा तस्य विजातीयानारम्भकत्वात् तपनपरिस्पन्दानाञ्च व्यधिकरणत्वात् तदवच्छिन्नद्रव्यसंयोग एवासमवायिकारणं परिशिष्यते तच्च द्रव्यं पिण्डमार्त्तण्डोभयसंयुक्तं विभु स्यात् आकाशस्य तत्स्वाभाव्यकल्पने क्वचिदपि भेर्य्यभिघातात् सर्व्वभेरीषु शब्दोत्पत्तिप्रसङ्गः। तथाच कालस्यैव मार्त्तण्डसंयुक्तस्य पिण्डेन संयोगोऽपरत्वासमवायिकारणं काल एव मार्त्तण्डक्रियोपनायकः आत्मनश्च द्रव्यान्तरधर्म्मेषु द्रव्यान्तरावच्छेदेन स्वप्रत्यासत्त्यतिरिक्तसन्निकर्षापेक्षत्वात् अन्यथा वाराणसीस्थेन महारजनारुणिम्ना पाटलिपुत्रेऽपि स्फटिकमणेरारुण्यप्रसङ्गात्। कालस्य तु तत्स्वभावतयैव कल्पनादयमदोषः। कालेनापि रागसंक्रमः कथं न इति चेत् नियतक्रियोपनायकत्वेनैव तत्सिद्धेः एवं स्थविरमवधिं कृत्वा यूनि परत्वोत्पत्तिर्निरूपणीया। युगपदिति युगपज्जायन्ते युगपत्तिष्ठन्ति युगपत् कुर्व्वन्ति इत्यादि-प्रत्ययानाञ्च एकस्मिन् काले एकस्यां सूर्य्यगतौ एकस्मिन् सूर्य्यगत्यवच्छिन्नकाले इत्यर्थः, न चाप्राप्ता ए

सूर्य्यगतयो विशेषणतामनुभवन्ति। न च स्वरूपप्रत्ययासम्भा एव ताः, तस्मादेतादृशविशिष्टप्रत्ययान्यथानुपपत्त्या विशेषणप्रापकं यद्द्रव्यं स कालः” उपस्कारवृत्तिः।

“ननु सिध्यतु कालः, स तु नित्यो द्रव्यं वेति न प्रमाणमत आह” ।

“द्रव्यत्वनित्यत्वे वायुना व्याख्याते” क॰ सू॰ ।

“यथा वायुपरमाणोर्गुणवत्त्वाद्द्रव्यत्वम् अद्रव्यद्रव्यत्वाच्च नित्यत्वं तथा कालस्यापीत्यर्थः” उप॰ ।

“तथापि सन्तु बहवः काला इत्यत आह” ।

“तत्त्वम्भावेन” क॰ सू॰ ।

व्याख्यातमिति विपरिणतेनान्वयः। परादिप्रत्ययानां काललिङ्गानां सर्व्वत्राविशेषादनेकत्वेऽप्यात्मनामिव विशेषलिङ्गाभावात् सत्तावदेकत्वं कालस्येत्यर्थः। नन्वेवं क्षणलवमुहूर्त्तयामदिवसाहोरात्रपक्षमासर्त्त्वयनसंवत्सरादिभेदेन भूयांसः कालास्तत् कथमेकः इति चेन्न भेदभानस्य उपाधिनिबन्धनत्वात् यथा एक एव स्फटिकमणिर्जवातापिञ्छाद्युपाध्युपरागेण भिन्न इव भासते तथैक एव कालः सूर्य्यस्पन्दाद्यवच्छेदभेदेन तत्तत्कार्य्यावच्छेदकभेदेन च भिन्न इव भासत इत्यभ्युपगमात् तथाच कालोपाध्यव्यापकः कालोपाधिः, स्वाधेयकादाचित्काभावप्रतियोग्यनाधारः कालो वा क्षणः प्रतिक्षणं कस्यचिदुत्पत्तेः कस्यचिद्विनाशादेतदध्यवसेयम्। क्षणद्वयस्तु लव इत्याद्यागमप्रसिद्धम्। ननु तथाप्यतीतानागतवर्त्तमानभेदेन कालत्रयस्तु, श्रूयते हि “त्रैकाल्यमुपावर्त्तते” “त्रैकाल्यासिद्धेः” इत्यादीति चेन्न त्रैकाल्यव्यवहारात् येन हि वस्तुना यः कालोऽवच्छिद्यते स तस्य वर्त्तमानः यत्प्रागभावेन यः कालोऽवच्छिद्यते स तस्य भविष्यत्कालः यत्प्रध्वंसेन यः कालोऽवच्छिद्यते स तस्यातीतकालः तथाचावच्छेदकत्रित्वाधीनः कालत्रित्वव्यवहारः” उपस्कारवृत्तिः।

“इदानीं सर्व्वोत्पत्तिमतां कालः कारणमित्याह” ।

“नित्येष्वभावादनित्येषु भावात् कारणे कालाख्येति” क॰ सू॰।

इतिशब्दो हेतौ इतिहेतोः कारणे–सर्व्वोत्पत्तिमत्कारणे कालः इत्याख्या। हेतुमाह नित्येष्वभावात् अनित्येषु भावादिति नित्येषु आकाशादिषु युगपज्जातः चिरंजातः क्षिप्रं जातः इदानीं जातः दिवा जातः रात्रौ जात इत्यादिप्रत्ययस्याभावात् अनित्येषु घटपटादिषु यौगपद्यादिप्रत्ययानां भावात् अन्वयव्यतिरेकाभ्यां कारणं काल इत्यर्थः। न केवलं यौगपद्यादिप्रत्ययबलात् कालस्य सर्व्वोत्पत्तिमन्निमित्तकारणत्वम् अपि तु पुष्पफलादीनां हैमन्तिकवासन्तिकप्रावृषेण्यादिसुबलादेव तदध्यवसेयम्” उप॰।

भाषामुक्तावल्योश्च सङ्क्षेपेण तन्निर्णयो यथा

“जन्यानां जनकः कालो जगतामाश्रयो मतः ।”

“परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः” भाषा।

“कालं निरूपयति जन्यानामिति तत्र प्रमाणं दर्शयितुमाह जगतामिति तथाहि इदानीं घट इत्यादिप्रतीतिः सूर्य्यपरिस्पन्दादिकं यदि विषयीकरोति तदा सूर्य्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः स च संयोगादिर्न सम्भवतीति काल एव तत्सम्बन्धघटकः कल्प्यते इत्थञ्च तस्याश्रयत्वमपि सम्यक्। प्रमाणान्तरं दर्शयति परापरत्वेति परत्वापरत्वबुद्धेरसाधारणं निमित्तं काल एव परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कल्प्यत इति भावः। नन्वेकस्य कालस्य सिद्धौ क्षणदिनमासवर्षादिसमयभेदो न स्यादत आह क्षणादिरिति कालस्त्वेकोऽपि उपाधिभेदात् क्षणादिव्यवहारविषयः। उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म्म, पूर्व्वसंयोगावच्छिन्नविभागो वा पूर्व्वसंयोगावच्छिन्नउत्तरसंयोगप्रागभावो वा उत्तरसंयोगावच्छिन्नं कर्म्म वा। न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति वाच्यं कर्म्मान्तरसत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यपि, तदाऽनायत्त्या ध्वंसेनोपपादनीयः। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरेवेति” मुक्तावली।

तार्किकशिरोमणिना रघुनाथशिरोमणिना च पदार्थनिरूपणप्रकरणे “तत्र दिक्कालौ नेश्वरादतिरिच्येते” इति वदता विभुरूपस्यैकस्य कालस्य खण्डनं कृतम्। रघुदेवरामभद्राभ्यां तद्विवृतं ततः संक्षिप्य पदार्थतत्त्वसारे च जयनारायणतर्कपञ्चाननेन दर्शितं यथा

“दिक्कालौ नेश्वरादतिरिक्तौ. प्राच्यां घट इदानीं घटः इत्यादिव्यवहारस्य ईश्वरात्मकविभुविषयकत्वेनैवोपपत्तेः, न च तयोर्भिन्नविषयकत्वमनुभवसिद्धमिति वाच्यं तथा सति प्राच्यां घटः प्रतीच्यां घटः इदानीं घटः तदानीं घट इत्यादेरपि भिन्नभिन्नविषयकत्वानुभवात् कालदिशोरपि बहुत्वाङ्गीकारप्रसङ्गात्, तथा च उपाधिभेदादेकया दिशा एकेन कालेन च यथा भवतां बहूनां व्यवहाराणामुपपत्तिस्तथाऽस्माकमपि एकेनेश्वरेणागमानुमानाभ्यां सिद्धेन सर्व्वेषामेव तादृशव्यवहाराणामुपाधिभेदादुपपत्तिः सम्भवति,

द्रव्यं क्रियादौ स्वसंयुक्तेश्वरसंयोगापन्नत्वादिसम्बन्धेन घटादेः सत्त्वसम्भवेन तत्सम्बन्धघटकतयाऽप्यतिरिक्तकालाद्यसिद्धेः । अथवा क्षणा एवातिरिक्ताः इदानीमित्यादिव्यवहारविषयाः, विभागप्रागभावावच्छिन्नकर्मणः क्षणत्वासम्भवात् भाविकर्मान्तरजन्यविभागान्तरप्रागभावावच्छिन्नस्य कर्मणः क्षणचतुष्टयादिस्थायित्वेन तादृशस्योपाधित्वासम्भवात् नच विभागे स्वजन्यत्वं विशेषणीयम्, स्वत्वाननुगमादननुगमापत्तेः, विभागजननादिदशायामुपाध्यन्तरस्य वाच्यतया तावताप्यननुगमाच्च, एवञ्चोपाधीनामतिरिक्तानां क्षणिकपदार्थस्वरूपाणां क्षणानामवश्याभ्युपेयतया तैरेव तादृशाः सर्वे व्यवहारा उपपादनीयाः किमतिरिक्तेन कालेनेति" ।

सांख्यमते तस्य आकाशान्तर्भावः न पृथक्तत्त्वान्तरत्वं तदेतत् सांख्यसूत्रभाष्ययोर्दर्शितम्

"खण्डदिक्कालयोः सृष्टिमाह" भा० ।

"दिक्कालावाकाशादिभ्यः" सां० सू० ।

"नित्यौ यौ दिक्कालौ तावाकाशप्रकृतिभूतौ प्रकृतेर्गुणविशेषावेव । अतो दिक्कालयोर्विभुत्वोपपत्तिः । "आकाशवत् सर्वगतश्च नित्य" इत्यादिश्रुत्युक्तं विभुत्वं चाकाशस्योपपन्नम् । यौ तु खण्डदिक्कालौ तौ तु तत्तदुपाधिसंयोगादाकाशादुत्पद्येते इत्यर्थः आदिशब्देनोपाधिग्रहणादिति । यद्यपि तत्तदुपाधिविशिष्टाकाशमेव खण्डदिक्कालौ तथापि विशिष्टस्यातिरिक्ताभ्युपगमवादेन वैशेषिकनये प्रोक्तस्य कार्यं तावत् तत्कार्यापत्त्योक्तम्" प्र० भा० ।

"अत्रपदं दर्शयिष्यमाणमाधवग्रन्थे च वाचस्पतिमतेन कालखण्डनं तु नित्यविभुकालखण्डनपरं तथाहि "उपाधिर्भिद्यते न तु तद्वानिति" सां० सू० उपाधिभेदेन धर्म्मिभेदासम्भवस्य व्याख्यापनात् धर्म्मिणः कालस्य एकत्वेन उपाधिना भेदासम्भवात् उपाधिना नाऽनागतादिभेदव्यवहारसम्भवः तथा च क्रियादेरेव उपाधिभूतस्यानागतादिव्यवहारोपपादकतया तस्यैव कालत्वम् । अत एव क्रिया काल इत्यभियुक्तोक्तिः ।

कालमाधवीये च माधवेन शङ्कापूर्वकं कालसत्त्वं न्यरूपि

"ननु नायं श्रमः सफलः कालस्य गगनकुसुमायमानत्वात तदेतत्परमरहस्यमभिजानानः कपिलमहामुनिस्तत्त्वानि निर्विवेक्तुकामः कालमुपेक्ष्यान्यान्येव पञ्चविंशतितत्त्वानि विवेच "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति । न चैतेष्वेव तत्त्वेषु कालस्यान्तर्भावो मुनिना विवक्षित इति शङ्कनीयम् त्वदभिमतस्य कालस्य पञ्चविंशतितत्त्वानां चान्यादृशानि लक्षणानि । सत्त्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिर्महदहङ्कारपञ्चतन्मात्राख्यानां सप्तानां प्रकृतिविकृतीनां मध्येऽध्यवसायहेतुर्महत्तत्त्वम् अभिमानहेतुरहङ्कारः । शब्दस्पर्शरूपरसगन्धात्मकानि पञ्चतन्मात्राणि पृथिव्यादिपञ्चमहाभूतानामेकादशेन्द्रियाणाञ्च षोडशविकाराणां लक्षणानि प्रसिद्धानि । अप्रकृतिरविकृतिः पुरुषश्चिदात्मकः । न चोक्तलक्षणकेषु तत्त्वेषु कालस्यान्तर्भावः सम्भवति नापि षड्विंशं तत्त्वान्तरं मुनिरनुमन्यते । कथं तर्हि मुनिप्रणीतानि तत्त्वान्यार्याभिः संगृह्णन् ईश्वरकृष्णो बहिःकरणान्तःकरणे विविञ्चन् कालं व्याजहार ? "सांप्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणमिति" । परप्रसिद्ध्या परो बोधनीय इति न्यायेनायं व्यवहारो न तु स्वसिद्धान्ताभिप्रायेणेति वदामः । अत एवैतद्वचो व्याचक्षाणा वाचस्पतिमिश्रास्तत्त्वकौमुद्यामेवमाहुः "कालस्तु वैशेषिकाभिमत एको नानागतातीतादिभेदं प्रवर्त्तयितुमर्हति । तस्मादयं यैरुपाधिभेदैरतीतानागतादिभेदभावं प्रतिपद्यते सन्तु त एवोपाधयो व्यवहारहेतवः कृतमन्तर्गडुना कालेनेति सांख्याचार्याः" । तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति । अथोच्येत-भूतकालो वर्त्तमानकालो भविष्यत्काल इति एवं त्रिष्वपि भूतादिष्वनुगतः कालप्रत्यय एकमनुगतं कालत्वमन्तरेणानुपपन्न इति तन्न पदार्थप्रत्ययवदुपपत्तेः यथा भवन्मते द्रव्यपदार्थो गुणपदार्थ इति षट्सु भावेषु चतुर्षु भावेष्वनुगतः पदार्थप्रत्यय एकमनुगतं पदार्थशब्दवाच्यं तत्त्वान्तरमन्तरेणाप्युपपन्नः । तथा कालप्रयोगोऽपि कुतो नोपपद्येत ।। तस्माद्विस्तत्त्वं कालं निषेद्धुं महानयमुद्यमः प्रेक्षावच्छिरोमणेर्भवतश्चार्यस्य न कथञ्चिदप्युपपन्न इत्येवं प्राप्ते ब्रूमः आयुष्मतस्तस्यैवं निरूढकालतत्त्वे यः प्रद्वेषः स कस्य हेतोः ? इति वक्तव्यम् । किं कपिलमहामुनिना निराकृतत्वात् ?१ किंवा सांख्यशास्त्रप्रणीतेषु तत्त्वेषु असंगृहीतत्वात् ?२ उत लक्षणाभावात् ?३ आहोस्वित्प्रमाणाभावात् ?४ अथवा प्रयोजनाभावात् ?५, अथवा तत्त्वगतपञ्चविंशतिसंख्याभ्यासपाटवेनाभ्यसितात् व्यामोहात् ?६, न प्रथमः कालनिराकरणसूत्रस्य मुनिना प्रणीतस्यानुपलम्भात् । न द्वितीयः अतिप्रसङ्गात् ऋग्वेदप्रोक्तानां ज्योतिष्टोमादीनामायुर्वेदधनुर्वेदगान्धर्ववेदप्रोक्तानां [illegible]

पञ्चरात्रादीनां चासंदृष्टोतत्वेन तेष्वपि भवतः प्रद्वेषः केन वार्य्येत ? । अथ तेषां विशेषाध्यासंप्रदायेऽपि सुखदुःख-मोहात्मकत्वेन गुणत्रयान्तर्गतत्वं दृश्येतार्थात् संपद्दत्र-श्यते तर्हि कालस्याप्यसौ न दण्डवारित इति बुद्धिं समाधत्स्व । कालस्य गुणत्रयपरिणामत्वे सावयवत्वम-नित्यता च घटादेरिव प्रसज्येतेति चेत् ? निरवयव कालतत्त्वाभिनिवेशवतो वैशेषिकादेः पतत्वयं वज्रप्रहारः शिरसि । वेदवादिनां तु न कापि क्षतिः । कालस्योत-पत्तिसावयवत्वयोः प्रत्यक्षश्रुतावुपलभ्यमानत्वात । तैत्ति-रीयशाखायां नारायणीये कालोत्पत्तिराम्नायते “सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्त्ताः काष्ठा-श्चाहोरात्राश्च सर्वशः । अर्द्धमासा मासा ऋतवः संव-त्सरश्च कल्पन्तामिति” तस्यामेव शाखायामारुणकेतुकचयन ब्राह्मणे सावयवत्वं श्रूयते “उक्तो वेषो वासांसि च काला-वयवानामितः प्रतीच्येषिति” । इतोऽस्मादनुवाकात्मनो-ऽप्येष अधस्तनेऽनुवाके कालावयवानामृतूनां ध्यातव्यो वेष उक्तः वस्त्राणि चोक्तानीत्यर्थः । नित्यत्वनिरवयव-त्वाभिधायिनो वैशेषिकादिशास्त्रस्य “अमृता देवता” इति वदापेक्षिकनित्यतायामन्तर्द्धानगत्युपेतयत्रारात्सर्गादिवत् सं-सर्गयोग्यावयवसूक्ष्मतया च तात्पर्यं वर्णनीयम् ।

“अथ मन्यसे महता तपसा शिवमाराध्य तत्प्रसाद समासादितपदः कणादमुनिर्वेदतात्पर्यं सम्यगवैत्तीति वेद स्यैव मन्दमतिप्रतीतादर्थादर्थान्तरं नेतव्यमिति । एवमपि यस्य प्रसादादयं सर्वज्ञतामलभत स एव शिवो मुख्यः सर्वज्ञ इति तन्मतानुसारेण कणादमतस्यैवान्यथानयनम-त्यन्तमुचितम् । शिवो हि शैवेषु आगमेषु षट्त्रिंशत्-तत्त्वानि निरूपयन् कालतत्त्वस्योत्पत्तिमङ्गीचकार । निखिलशैवागमसारसार्थाभिः संगृह्णानो भोजराजः शुद्धानि पञ्च तत्त्वानि शिवशक्तिसदाशिवेश्वरविद्याख्यानि निर्दिश्येतराणि निर्दिशन्मायाकार्यत्वोक्तिपूर्वकमेव कालं निरदिक्षत् “पुंसो जगतः कृतये मायातस्तत्संयुक्तं भवति । कालो नियतिश्च तथा कला च विद्या च रागश्च” इति तानि मायासहितान्येकादश तत्त्वानि सांख्यप्रसिद्धपञ्च-विंशतितत्त्वानि चोद्दिश्य विश्वविदमाह “नाना-विधशक्तिमयी सा जनयति कालतत्त्वमेवादौ । भावि भवद्-भूतमयं कलयति जगदेष कालोऽतः” इति । तट्टीकाकार इत्थं व्याचख्यौ । “ननु एष कालो नैयायिकादिभिर्नित्यो-ऽभ्युपगतः अत आह भाविभवद्भूतमयमिति । भूतादि

रूपेण त्रिविधत्वात् अनेकत्वेनास्यानित्यत्वं सिद्धमिति भावः । केन कार्य्येणास्य सिद्धिरित्याह “कलयति जगदेष कालोऽतः” इति । चिरक्षिप्रादिप्रत्ययोपाधिद्वारेण कल-यत्याक्षिपतीत्यर्थः” इति । इत्थं प्रत्यक्षश्रुतिसहकृतशैवागमैः कणादशास्त्रस्य बाधे सति उत्तरमीमांसागतद्वितीया-ध्यायप्रथमाधिकरणन्यायोऽनुसृज्यते तस्य च न्यायस्य संग्राहकौ श्लोकौ “सांख्यस्मृत्यास्ति सङ्कोचो न वा वेदस-मन्वये । धर्मे वेदः सावकाशः सङ्कोच्योऽनवकाशया । प्रत्य-क्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिः स्मृतिः अमूला कापिली बाध्या न सङ्कोचोऽनया ततः” इति । अयमर्थः । ऋग्वे-दादिभिरग्निहोत्रादिधर्मो ब्रह्मणो जगत्कर्तृत्वं च प्रति-पाद्यते । सांख्यस्मृत्यादिस्तु प्रधानस्य जगत्कारणत्वं प्रतिपादयति तत्र तया स्मृत्या वेदस्य सङ्कोचोऽस्ति न वेति संशये स्मृतेर्जगत्कारणत्वमन्तरेणानवकाशत्वात् प्राबल्यं वेदस्य तु धर्मेऽपि चरितार्थत्वाद्दौर्बल्यम् । ततः स्मृत्य-नुसारेण वेदः संकुचित इति पूर्वः पक्षः । प्रत्यक्षश्रुतिभि-र्बहुभिरनुगृहीता बह्व्यो मन्वादिस्मृतयो ब्रह्मकारणता-माचक्षते सांख्यस्मृतिस्त्वेका मूलहीना चेति दुर्बलत्वात् सैव बाध्या अतो नास्ति वेदस्य सङ्कोच इति सिद्धान्त इति । अथ तार्किकत्वाभिमानपरिगृहीतः सन् परवश एवं ब्रूषे भूतादीनामौपाधिकानां कालविशेषाणामेवो-त्पत्तिर्न तु निरुपाधिकस्य मुख्यस्य कालस्येति तर्हि अपदिक्षान्वेषणाय प्रवृत्तश्चिन्तामणिमलभतेत्येवंवासिष्ठ-रामायणप्रोक्तस्याभाणकस्य त्वमेव विषयोऽभूः । अतः साध-र्म्यवैधर्म्यज्ञानाय द्रव्यादीन्यन्विष्यन् परब्रह्मतत्त्वमवागमः । व्यवहारहेतूनां भूतादिकालविशेषाणामाधारः स्वयं व्यव-हारातीतो नित्यो निरवयवो मुख्योयः कालः स परमा-त्मैव । तथाच श्वेताश्वतरा आमनन्ति । “यः कालकालो गुणी सर्वविद्य” इति । आस्तां नित्यत्वानित्यत्वसावयवत्व-चिन्ता । सर्वथाप्यस्ति सांख्यतत्त्वेषु आर्थिकः कालसंग्रहः साक्षात्संग्रहाभावस्तु ज्योतिष्टोमादिवत् प्रकृतिपुरुष-विवेकानुपयोगादित्यवगन्तव्यम् । तृतीयचतुर्थपक्षौ तु भवतो वैशेषिकपरिचयगन्धोऽपि नास्तीति प्रकटयतः । वैशेषिक-ग्रन्थेषु सर्वेष्वपि कालप्रकरणेषु तल्लक्षणस्य तत्साधकानुमा-नस्य च पर्याप्तत्वात् प्रमाणान्तराणि तु कालसाधकानि इत्येवोपन्यस्तानि तथा च तैत्तिरीया आरुणकेतुके मन्त्रमामनन्ति “स्मृतिः प्रत्यक्षमैतिह्यम् अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलं सर्व्वैरेव विधास्यते” इति । तत्र स्मृति

अनुमेयश्रुतिमूलं मन्वादिशास्त्रं, प्रत्यक्षं श्रोत्रग्राह्योऽकृत्रिमो वेदाख्योऽक्षरराशिः, योगिप्रत्यक्षमौपनिषदाभिमतं साक्षिप्रत्यक्षं वा। ऐतिह्यमितिहासपुराणादिकं ज्योतिःशास्त्रस्याप्यत्रान्तर्भावो द्रष्टव्यः। अनुमीयते स्वमूलभूतं स्मृतिवाक्यमनेनेत्यनुमानः शिष्टाचारस्तस्य च स्मृत्यनुमापकत्वं भट्टाचार्य्यैः स्पष्टमभिहितम्। "आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनमिति, तदेवं स्मृत्यादीनां चतुष्टयं सफलम्, एतैश्चतुर्भिः सर्वैरप्यादित्यमण्डलं प्रमीयत इति मन्त्रस्यार्थः। ननु स्मृत्यादीनि मण्डलसाधकत्वेनात्रोपन्यस्तानि न तु कालसाधकत्वेनेति चेत् मैवं मण्डलस्य सार्वजनीनप्रत्यक्षसिद्धत्वेन तत्र स्मृत्याद्यनुपयोगात्, कालविवक्षयैवात्र कालनिर्वाहकमण्डले तान्युपन्यस्तानि, तथा च मण्डलद्वारा कालः प्रमीयते। कालविवक्षा चोत्तरमन्त्रे स्फुटा तत्रानन्तरो मन्त्र एवमाम्नायते, "सूर्य्यो मरीचिमादत्ते सर्वस्माद्भुवनादधि, तस्याः पाकविशेषेण स्मृतं कालविशेषणमिति" तस्यायमर्थः। भुवनगतं सर्व्वभूतजातमधिकृत्य रसवीर्यपाकादिभिस्तत्तदनुग्रहसमर्थं मरीचिं सूर्य्यः स्वीकरोति तत्कृतेन भूतपाकभेदेन निमेषादिः परार्द्धपर्य्यन्तः कालविभेदोऽस्माभिरवगतो भवतीति। कालप्रतिपादकानि च स्मृत्यादीन्युदाहरामः। तत्र मनुः "कालं कालविभक्तिश्चेति" सृष्टिप्रकरणे कालं व्यवजहार। याज्ञवल्क्योऽपि, "श्राद्धकालः प्रकीर्त्तितः" इति। एवमन्यास्वपि स्मृतिषूदाहार्य्यम्। श्रुतिष्वपि "कृतं स्वप्ने विचिनोति कालः" इति बह्वृचाः। "अहमेव कालो नाहं कालस्येति" तैत्तिरीयाः। "का च सन्ध्या कश्च सन्ध्यायाः काल" इति सामगाः। योगशास्त्रेऽपि संयमविशेषाद्धारणाध्यानसमाधित्रयरूपाद्योगिनोऽतीतादिकालं प्रत्यक्षतः पश्यन्तीति अभिहितम् तथा च पातञ्जलसूत्रम्, "परिणामत्रयसंयमादतीतानागतादिज्ञानमिति"। साक्षिप्रत्यक्षमपि, अहमस्मिन्काले निवसामि, इत्यनुभवस्तावत्सार्वजनीनः। न चासौ बाह्येन्द्रियकृतः कालस्य रूपादिहीनत्वात्। नापि मानसस्तार्किकैस्तदनङ्गीकारात्। नाप्यनुमानादिजन्यः अपरोक्षप्रत्ययत्वात्। अतः सामग्र्यभावेऽप्यपरोक्षदर्शनात्साक्षिप्रत्यक्षमेतदित्यौपनिषदा मन्यन्ते। इतिहासेऽपि महाभारते "प्रहरौ घटिकान्यूनौ प्रहरौ घटिकाधिकौ। स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयमिति"। पुराणेऽपि "अनादिरेष भगवान्कालोऽनन्तोऽजरः परः" इति शिष्टाश्च पौर्णमास्याख्यकाले स्वस्वकुलोचितान् देवविशेषेभ्यः क्षीरदध्यादिसमर्पणादिकान् धर्म्मविशेषान् भानुवारादिकालविशेषे च समाचरन्ति। तदेवमनेकप्रमाणप्रमिते काले प्रमाणाभावरूपश्चतुर्थः पक्षः कथमाशङ्क्येत?। नापि प्रयोजनाभावादिति पञ्चमः पक्षो युज्यते। तार्किकैस्तावत् सर्वोत्पत्तिनिमित्तकारणत्वमुद्घोषितम्। लोके कृष्याद्युपयोगः कालविशेषस्य कर्षीवलादिभिर्व्यवह्रियते। गृहप्रवेशप्रयाणाद्युपयोगो ज्योतिःशास्त्रप्रसिद्धः। श्रौतस्मार्त्तकर्मोपयोगस्तु प्रदर्शयिष्यते। तत्र तु सांख्यमहाजनाद्यनुमतस्तत्प्रद्वेष इत्ययं षष्ठः पक्षः परिशिष्यते। तथाच पापात्मनः स्वस्य बुद्ध्यपराधं पुण्यात्मनि माधवाचार्य्ये समारोपयन् कया वा शिक्षया न दण्ड्योऽसि। तदेवं कालस्य प्रत्याख्यातुमशक्यत्वान्निर्णयोद्यमः सफल इति स्थितम्। ननु कतरकालोऽत्र निर्णीयते। किं केवलः कालः किं वा कालकालः। मनु किमित्यप्रसिद्धभाषया भीषयसि, न भीषयाम्यहं किन्त्वाख्येयकलयितव्यभेदात्कालद्वैविध्यम्। येन प्राणिदेहादयोऽतीतवर्त्तमानादिरूपेण कलयितव्याः स केवलः कालः। स च तत्त्वप्रकाशवचनेन पूर्व्वम् उदाहृतः "कलयति जगदेष कालोऽतः" इति। तादृशोऽपि कार्य्योत्पत्तिस्थितिविनाशकारिणा येन कलयितव्यः स कालकाल इति। स च वासिष्ठरामायणे दर्शितः "कालोऽपि कल्यते येनेति, श्रुतिश्च भवति "स विश्वकृद्विश्वविदात्मयोनिर्ज्ञः कालकालो गुणी सर्वविद्यः प्रधानक्षेत्रज्ञः इति 'गुणो संसारमोक्षस्थितिबन्धहेतुरिति" च कूर्मपुराणेऽपि "अनादिरेष भगवान् कालोऽनन्तोऽजरः परः। सर्वगत्वात् स्वतन्त्रत्वात् सर्वात्मत्वान्महेश्वरः। ब्रह्माणो बहवो रुद्रा अन्ये नारायणादयः। एको हि भगवानीशः कालः कविरिति स्मृतः। ब्रह्मनारायणेशानां त्रयाणां प्राकृतो लयः। प्रोच्यते कालयोगेन पुनरेव च सम्भवः। परं ब्रह्म च भूतानि वासुदेवोऽपि शङ्करः। कालेनैव च सृज्यन्ते स एव ग्रसते पुनः। तस्मात् कालात्मकं विश्वं स एव परमेश्वरः" इति। विष्णुधर्मोत्तरेऽपि। "अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः। कलनात्सर्वभूतानां स कालः परिकीर्त्तितः। कर्षणात् सर्व्वभूतानां स तु सङ्कर्षणः स्मृतः। सर्वभूतशमित्वाच्च स रुद्रः परिकीर्त्तितः। अनादिनिधनत्वेन स महान् परमेश्वर" इति ज्योतिःशास्त्रेऽपि "भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः" इति। तत्रैवं सति द्वयोर्मध्ये कालकालोऽत्र न निर्णेतव

तस्य धर्म्मानुष्ठानेष्वहेतुत्वेन हेयत्वादनुपादेयत्वाच्च। यस्त्वितरो मासपक्षतिथ्यादिरूपः सोऽपि ज्योतिःशास्त्रे सम्यङ्निर्णीत इति कृतमनया कालनिर्णयप्रवृत्त्येति माभै ब्रूमः उभयमप्यत्र निर्णेतव्यं कालकालस्य जगदीश्वरस्य सर्व्वेषु कर्म्मारम्भेषु अनुस्मर्त्तव्यत्वात् अतएव शिष्टाः पुण्याहवाचनादावीश्वरमनुस्मरन्ति। "सर्व्वेषु कालेषु समस्तदेशेष्वशेषकार्य्येषु तथेश्वरेश्वरः। सर्व्वैः स्वरूपैर्भगवाननादिमान्ममास्तु माङ्गल्यविवृद्धये हरिः। यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतमिति"। मासादिरूपभेदस्य तु स्वरूपेण ज्योतिषे निर्णीतत्वेऽपि श्रौतस्मार्त्तकर्म्मविशेषेण सह कालस्याङ्गाङ्गिभावो निर्णेतव्यः। यद्यप्यसौ हेमाद्रिप्रभृतिषु ग्रन्थेषु निर्णीतस्तथाप्यनेकत्र विप्रकीर्णस्यैकत्र संग्रहार्थमत्र यत्नः क्रियते। तदेवं चिकीर्षितस्य ग्रन्थस्य कालरूपो विषयः संग्रहरूपं प्रयोजनं चास्तीति अयं ग्रन्थ आरभ्यते"। "नित्यो जन्यश्च कालौ द्वौ तयोराद्यः परेश्वरः। सोऽवाङ्मनसगम्योऽपि देही भक्तानुकम्पया" नित्यकालस्य परमेश्वरत्वे प्रमाणं पूर्व्वमेवोपन्यस्तम्। परमेश्वरस्य चावाङ्मनसगोचरत्वे सर्व्वे वेदान्तास्तदनुसारिस्मृतिपुराणानि तत्त्वविदनुभवश्च प्रमाणम्। भक्तानुग्राहिमूर्त्तिस्वीकारश्च तलवकाराख्ये सामवेदशाखाविशेषे कस्याञ्चिदाख्यायिकायामाम्नायते तस्यां ह्याख्यायिकायामेवमुक्तम्—अग्निवाय्विन्द्रादयो देवा ईश्वरानुगृहीताः सर्व्वत्र विजयमानाः स्वकीयमेव तत्सामर्थ्यमित्यभिमन्यन्ते स्म। तान् बोधयितुमवाङ्मनसगम्यं परमेव ब्रह्म पूज्यां चक्षुर्ग्राह्यां काञ्चिन्मूर्त्तिं दर्शयित्वा प्रादुर्बभूव। तया सह वादं कृत्वापि राजसचित्तावग्निवायू तद्ब्रह्मतत्त्वं नैव बुबुधाते इन्द्रस्तु सात्त्विकचित्तो बुबुधे इति। वाशिष्ठरामायणेऽपि शुक्रोपाख्याने शुक्रं मृतमवलोक्य तत्पिता भृगुः क्रुद्धो मारयितारं कालं शप्तुमुद्यत तदानीं कालोऽनुग्रहीतुमीदृशेन रूपेणाविर्बभूवेति पठ्यते "अथाकलितरूपोऽसौ कालः कवलितप्रजः। आधिभौतिकमास्थाय वपुस्तं मुनिमाययौ। खड्गपाशधरः श्रीमान् कुण्डली कवचान्वितः। ऋतुषट्कमयोदारवक्त्रषट्कसमन्वितः। मासद्वादशकोद्दामभुजद्वादशकोत्कटः। स्वाकारसमया बह्व्या वृतः किङ्करसेनया। स उपेत्य प्रशान्तात्मा कुपितं तं महामुनिम्। कल्पक्षुब्धाब्धिगम्भीरं सान्त्वपूर्व्वमुवाच ह। त्वमत्यन्ततपा विप्र! वयं नियतिपालकाः तेन संपूज्यसे पूज्य! साधो! नेतरवाञ्छया। मा तपः क्षपयाऽबुद्ध! कल्पकालमहानलैः। यो न दग्धोऽस्मि मे तस्य किं त्वं शापेन धक्ष्यसि?। संसारावलयो यस्ता निगीर्णा रुद्रकोटयः। भुक्तानि विष्णुवृन्दानि केन शक्ता वयं मुने!। भोक्तारो हि वयं ब्रह्मन् भोजनं युष्मदादयः। स्वयं नियतिरेषा हि नावयोरेतदौचितमिति"। न च भक्तानुजिघृक्षया स्वीकृता मूर्त्तिरीश्वरस्यैवेति कश्चिन्नियमोऽस्ति सर्व्वात्मकस्य परमेश्वरस्य भक्तचित्तप्रियायाः सर्व्वस्या अपि मूर्त्तेः स्वकीयत्वात् अतएव भगवद्गीतायाम् "यो यो यां यां तनुं भक्तः श्रद्धयार्च्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्याराधनमीहते। लभते च ततः कामान् मयैव विहितान् हितानिति"। विष्णुरुद्रादिवत् अचेतनमूर्त्तयोऽपि तत्तत्फलविशेषार्थिभिरीश्वरत्वेनोपास्याः। तदेतदृग्वेदे समाम्नायते। "एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्त एतमग्नावध्वर्य्यव, एतं महाव्रते छन्दोगा, एतमस्याम् (पृथिव्याम्) एतं दिव्येतं वायावेतमाकाश एतमोषधीष्वेतं वनस्पतिष्वेतं चन्द्रस्येतं नक्षत्रेष्वेतं सर्व्वेषु भूतेष्विति" वाजसनेयिनोऽपि मण्डलब्राह्मणे "तमेतमग्निमध्वर्य्यव उपासत इत्यारभ्य पठन्ति "विषमिति सर्पाः, सर्प इति सर्पविदः, ऊर्गिति देवाः, रयिरिति मनुष्याः, मायेत्यसुराः, स्वधेति पितरो, देवजन इति देवजनविदो रूपमिति गन्धर्व्वा, गन्ध इत्यप्सरसस्तं यथायथोपासते तदेव भवतीति"। तैत्तिरीयाश्च पठन्ति "क्षेम इति वाचि, योगक्षेमम् इति प्राणापानयोरित्यादि"। परब्रह्मण्यारोपितं यद्यावज्जगद्रूपम् अस्ति तेन सर्व्वेणाप्युपासनया परमेश्वरो रूपवान् भवतीति हिरण्मयाधिकरणतेजोमयाधिकरणयोः प्रपञ्चितम्। एवं च सति यो यदा यत्कर्म्मारभते स तदा तत्कर्म्मोपयुक्तां कालात्मकस्येश्वरस्य मूर्त्तिमिष्टदेवतारूपेणानुस्मरेत्। अत एव मन्त्रशास्त्रेषु नानाविधानि ध्यानान्युपदिष्टानि। लोकेऽप्याविद्वद्गोपालाङ्गनं सर्व्वोऽपि जन एकैकां देवतां स्वेच्छया पूजयति तदेतद्भगवानाह "यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः। प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः" इति तस्मादारभ्यमाणकर्म्मफलप्रदो निजेष्टदेवतारूपो नित्यः कालः कर्म्मारम्भेषु अनुस्मर्त्तव्य इति सिद्धम्।

अथ जन्यं कालं निरूपयामः। ननु कालस्य जन्यत्वे सति कथं प्रलये कालव्यवहारः। प्रलयत्वस्य जन्यानधिकरणत्वरूपत्वात्। प्रलयोऽतीतः प्रलयो भावीति कालनित्यत्ववादिनस्तवापि समो दोषः। नित्यस्य कालस्य

तपनपरिस्पन्दाद्युपाधिभिः परिच्छेदे सत्येतावान् काल इति कालेयत्ता वर्णयितव्या। न च प्रलये तदुपाधयः सन्ति। अतस्तत्र कथं प्रलयकाले इयत्तानिर्णयः। अथ सत्कार्य्यवादाभ्युपगमेनोपाधयोऽपि वासनारूपेण सन्ति तर्हि कालेऽपि तत्समानं, न चैतावता नित्यताप्राप्तिः उपाधिषु तदनङ्गीकरात्। अथ मन्यसे इयत्तारहितेऽपि प्रलयकाले सृष्टिकालेयत्तावासनावशादियत्ता व्यवह्रियते। तत्रोपाध्यायत्वादिर्दृष्टान्तः। यथा कश्चिन्माणवकः त्रिंशद्वर्षवयस्कादध्येतुमुपक्रम्य संवत्सरमधीत्यास्तदुपाध्याय एकत्रिंशद्वर्षवयस्क इत्यध्ययनरहितेऽप्यतीते वयस्युपाध्यायत्वं व्यवहरति। तद्वदियत्ताव्यवहारः। एवं तर्ह्यनेन न्यायेन कालरहितप्रलये कालव्यवहारः किं न स्यात्?। कालरहितं च प्रलयादिकं वस्त्वस्तीति मार्कण्डेयादिस्मृतयोऽभ्युपगच्छन्ति। तथा च श्रूयते, "यस्मान्यच्चिकालातीतं तदप्योङ्कार एवेति"। प्राभाकरास्त्वपूर्व्वस्य कालत्रयासंस्पृष्टाश्विदवस्थामाहुः। तस्मात्कालः सुखेन जन्यतां स च सामान्यविशेषाभ्यां द्विविधः। तस्य चोभयविधस्येश्वराख्यान्नित्यात्कालादुत्पत्तिं मनुराह "कालं कालविभक्तीश्च नक्षत्राणि ग्रहांस्तथा। सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन्निमाः प्रजाः" इति। तत्र यः सामान्यकालः स विशेषानुगतत्वात्तदपेक्षया नित्यो ग्रहगत्यादिभिरनुमेयो भूतोत्पत्तिनिमित्तकारणमिति तार्किकज्यौतिषिकादयः प्रतिपेदिरे। तत्र ज्यौतिषिका एवमाहुः "प्रभवविरतिमध्यस्थानवन्ध्यानितान्तं विदितपरमतत्त्वा यत्र ते योगिनोऽपि। तमहमिह निमित्तं विश्वजन्मात्ययानामनुमितमभिवन्दे भग्रहैः कालमीशम्। युगवर्षमासदिवसाः समं प्रवृत्तास्तु चैत्रशुक्लादेः। कालोऽयमनाद्यन्तो ग्रहैरनुमीयते चैत्र" इति कालविशेषेषु च संवत्सरः प्राधानभूतः। अन्ये सर्व्वे गुणभूताः। तथाचारुणकेतुके समाम्नायते "नद इव प्रभवा काचिदक्षय्या स्यन्दते यथा। तां नद्योऽभिसमायन्ति सह, सा न निवर्त्तते। एवं नानासमुत्थानाः कालाः संवत्सरं श्रिताः। अणुशश्च महान्तश्च सर्व्वे समवयन्ति तम्। स तैः सर्व्वैः समाविष्ट ऊहः सन्न निवर्त्तते' इति। अयमर्थः। भागीरथीगोदावर्य्यादिका नदीव कालः कुतश्चिदुत्पत्तिस्थानादुत्पद्यते। तस्योत्पत्तिस्थानं सांख्योक्तं प्रकृतिः शिवागमोक्तमाया वा श्रुतिस्मृत्युदिता नित्यकालात्मक ईश्वरो वा भविष्यति। यथा तां गङ्गादिकां महानदीमन्यां स्वल्पनद्योऽभितः प्रविशन्ति सा च प्रविष्टैर्नद्यन्तरैः सह विस्तीर्णा प्रवहत्प्रवाहा सती न कदाचित् शुष्यति एवं नानाविधरूपैः समुत्पन्नाः कालभेदाः संवत्सराख्यं प्रधानं कालमाश्रिताः। तत्र निमेषाद्या अयनपर्यन्ताः कालभेदाः संवत्सरादर्व्वाचो, युगाद्याः परार्द्धपर्य्यन्ताः संवत्सरान्महान्तस्ते सर्व्वे तं संवत्सरं सम्यक् प्रविशन्ति। अणूनामवयवत्वेन प्रवेशः। महतान्तु संवत्सरावृत्तिनिष्पाद्यानामध्यक्षः संवत्सरइति तत्र प्रवेशोऽभिधीयते। तथाच वेदाङ्गज्योतिषग्रन्थे पठ्यते "पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम्। दिनर्त्त्वयनमासाङ्गं प्रणम्य शिरसा स्थित इति। स च संवत्सरस्तैरणुभिर्महद्भिश्च सर्व्वैः समाविष्टोऽतिदीर्घः सन्नस्मिन् जगति न च्छिद्यत इति। मन्वणुत्वं निमेषे पर्यवसितं महत्त्वन्तु परार्द्धे तथा च तयोरन्यतरस्य प्राधान्यमुचितम्। तत्र कथं संवत्सरस्य प्राधान्यम्? इति चेत् ईश्वरेण प्रथमं सृष्टत्वादिति ब्रूमः। तथा च वाजसनेयिनः समामनन्ति "सोऽकामयत द्वितीयोम आत्माजायेतेति स मनसा वाचा मिथुनं समभवद्यत्तद्रेत आसीत् स संवत्सरोऽभवदिति"। तस्मात् संवत्सरः प्रधानम्, अतएव वयं संवत्सरमारभ्य कालविशेषं निर्णयामः। तत्र संवत्सरोऽयनमृतुर्मासः पक्षः तिथिर्नक्षत्रं योग इत्येवं विधाः कर्म्मकालाः। यद्यपि पुराणेषु मत्स्यमार्कण्डेयादीनां युगादिकल्पादिपरिमितं तपः श्रूयते तथापि शतसंवत्सरायुषो मनुष्यानधिकृत्य धर्म्मशास्त्रप्रवृत्तेः युगादिनिर्णयो नोपयुक्तः। शास्त्राणां मनुष्याधिकारत्वं चास्माभिः पाराशरस्मृतिव्याख्याने "मनुष्याणां हितं धर्म्मम्" इत्यस्मिन्वचने प्रपञ्चितम्। ये तु "कलौ पञ्च विवर्जयेत्" इत्यादयो मनुष्यधर्म्मास्तेष्वपि न युगादिकं निर्णेतव्य सन्देहाभावात्। न च शतायुषामधिकारे कथं सहस्रसंवत्सरसत्रश्रुतिरिति शङ्कनीयम् तत्र संवत्सरशब्दो दिवसपर इति षष्ठाध्याये सप्तमपादे निर्णीतत्वात्। येऽपि चतुर्दशसंवत्सरावृत्तिसाध्या अनन्तव्रतादयस्तेष्वपि न संवत्सराधिकः कश्चित्कालो निर्णेतव्योऽस्ति। अतः संवत्सरमारभ्याल्पा एव निर्णेतव्याः कर्म्माङ्गकालाः। न च कालस्य कर्म्माङ्गत्वे विवदितव्यम् "सायं जुहोति प्रातर्जुहोतीति" श्रुतेः तत्तत्कर्म्मणस्तावदपूर्व्वविषयत्वात् (अपूर्व्वजनकत्वात्, प्राधान्यमभ्युगम्य तथा च कालस्य गुणत्वेनान्वयः परिशिष्यते अतएव गर्गः "तिथिनक्षत्रवारादि साधनं पुण्यपापयोः। प्रधानगुणभावेन स्वातन्त्र्येण न ते क्षमाः" इति। तस्मादङ्गभूतेषु निर्णयेष

कालेऽपृश्यवित्वेन संवत्सरस्याभ्यर्हितत्वादल्पवक्तव्यतया सूचीकटाहन्यायानुसारेण च सएव आदौ निर्णीयत-इतिस्थितम्”।

सू० सि० रङ्ग० कालविभागश्चेत्थं प्रदर्शितः

“लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः। स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते” सू० सि०। ‘कालो द्विधा तत्रैकः कालोऽखण्डदण्डायमानः शास्त्रान्तरप्रमाणसिद्धः। लोकानां जीवानां सुपलक्षणाद्चेतनानामपि। अन्तकृद्विनाशकः। यद्यपि कालस्तेषामुत्पत्तिस्थितिकारकस्तथापि विनाशस्यानन्तत्वात् कालत्वप्रतिपादनाय चान्तकृदित्युक्तम्। अन्तकृदित्यनेनैवोत्पत्तिस्थितिकृदित्युक्तमन्यथा नाशकत्वासम्भवात्। अतएव “कालः सृजति भूतानि कालः संहरति प्रजाः इत्याद्युक्तं ग्रन्थान्तरे। अन्यो द्वितीयः कालः खण्डकालः। कलनात्मको ज्ञानविषयस्वरूपः। ज्ञातुं शक्यइत्यर्थः। स द्वितीयः कलनात्मकः कालोऽपि द्विधा भेदद्वयात्मकः। तदाह स्थूलसूक्ष्मत्वादिति महत्त्वाणुत्वाभ्याम्। मूर्त्तः—इयत्तावच्छिन्नपरिमाणः। अमूर्त्तस्तद्भिन्नः कालतत्त्वविद्भिः कथ्यते। चकारो हेतुक्रमेण मूर्त्तामूर्त्तक्रमार्थकः। तेन महान् मूर्त्तकालोऽणुरमूर्त्तः काल इत्यर्थः। अथोक्तं भेदद्वयं स्वरूपेण प्रदर्शयन् प्रथमभेदं प्रतिपिपादयिषुस्तदवान्तरभेदेषु भेदद्वयमाह” रङ्गनाथः।

“प्राणादिः कथितो मूर्त्तस्त्रुट्याद्योऽमूर्त्तसञ्ज्ञकः। षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता” सू० सि०।

“प्राणः स्वस्थसुखासीनस्य श्वासोच्छ्वासान्तर्वर्ती कालो दशगुर्वक्षरोच्चार्यमाण आदिर्यस्यैतादृशः प्राणनान्तर्गतो मूर्त्तः काल उक्तः। त्रुटिराद्या यस्यैतादृशः काल एव प्राणान्तर्गतस्त्रुटितत्परादिकोऽमूर्त्तसञ्ज्ञः। अथामूर्त्तस्य मूर्त्तादिभूतस्य व्यवहारायोग्यत्वेनाप्रधानतयानन्तरोद्दिष्टस्य भेदप्रतिपादनस्तुरेण्य मूर्त्तकालस्य व्यवहारयोग्यत्वेन प्रधानतया प्रथमोद्दिष्टभेदान् विवक्षुः प्रथमं पलषष्ट्याद्याह। षड्भिरिति। षड्भिःप्राणैरसुभिः पानीयपलं भवति पलानां षष्ट्या घटिकोक्ता कालतत्त्वज्ञैः। अथ दिनमासादिकमाह” रङ्ग०।

‘नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्। तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा”।

“ऐन्दवस्तिथिभिस्तद्वत् सङ्क्रान्त्या सौर उच्यते। मासैर्द्वादशभिर्वर्षं दिव्यं तदहरुच्यते”।

“सुरासुराणामन्योऽन्यमहोरात्रं विपर्ययात्। तत्षष्टिः षड्गुणा ३६० दिव्यं वर्षमासुरमेव च”।

“तद्द्वादश सहस्राणि चतुर्युगमुदाहृतम्। सूर्य्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः ४३२०००० ”।

“सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्। कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया”।

“युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः। क्रमात् कृतयुगादीनां, षष्ठांशः सन्धयः स्वकाः”।

“युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते। कृताब्दसङ्ख्या १७२८००० स्तस्यान्ते सन्धिः प्रोक्तोजलप्लवः”।

“ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्दश। कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशः स्मृतः”।

“इत्थं युगसहस्रेण भूतसंहारकारकः। कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती”।

“परमायुः शतं तस्य तयाऽहोरात्रसङ्ख्यया। आयुषोऽर्द्धमितं तस्य शेषे कल्पोयमादिमः” सू० सि०। अहरादिकालभेदाः (अहन्) शब्दे उक्ताः।

सि० शि० तु निमेषतत्परत्रुटिरूपाः सूक्ष्माः कालावयवाः दर्शिताः तस्य वाक्यं १७८८पृ० दर्शितम्। स च कालस्त्रिविधः वर्त्तमानभूतभविष्यद्भेदात् तत्र भूतभविष्यत् कालावपि प्रत्येकं द्विधा अद्यतनानद्यतनभेदात् तद्भेदेनैव लकारविशेषं पाणिनिरनुशशास।

सोऽयं कालः षडिन्द्रियवेद्यः इति मीमांसका मन्यन्ते “न सोऽस्ति प्रत्ययोलोके यत्र कालो न भासते” इति तेषामुक्तेः। वेदान्तिनस्तु तस्य साक्षिप्रत्ययभास्यत्वमङ्गीचक्रुः तत्र प्रमाणं कालमा० अनुपदमेव दर्शितम्। सोऽयं कालः देशवृत्तरव्याप्यवृत्तितानियामकः। तथाहि यः पदार्थः स्वाधिकरणवृत्त्यभावप्रतियोगी सोऽव्याप्यवृत्तिरिति भण्यते तत्तानिर्वाहकश्च कालोदेशश्च। कचिद्देशे स्थितस्य तादृशपदार्थस्य कालभेदेन तत्रैवाधिकरणेऽभावस्तिष्ठति यथा ज्ञानाश्रये आत्मनि सुषुप्तिकाले इच्छादिविशेषगुणान्तरकाले च ज्ञानाभावः। यथा वा गुणवति जन्यद्रव्ये उत्पत्तिकाले गुणाभावः श्यामले अपक्वे घटे रक्तत्वाभावः रक्तत्वस्य पाकोत्तरं जायमानत्वात्। कालस्येव च देशोऽपि तथा। यथा आत्मनि ज्ञानकाले शरीरावच्छेदेन ज्ञानं, घटाद्यवच्छेदेन तदभावः। तथा वृक्षे कपिसंयोगकालेऽपि मूले तदभावः। कालेन कृतसम्बन्धश्च कालिकसम्बन्धः तेन सम्बन्धेन सर्व्वेषु जन्यभावेषु जन्यभावानां वृत्तिमत्ता

नित्येषु कालिकसम्बन्धेन न कस्यापि सत्त्वमित्यानुयोगिककालिकतत्त्वन्यानुपगमात् इति नैयायिकाः। तस्य च "पौरुषं दैवसम्पत्त्या काले फलति पार्थिव!। त्रयमेतन्मनुष्यस्य पिण्डितं स्यात् फलावहम्" इत्युक्तेः कार्य्यमात्रे निमित्तकारणता। यद्यपि "कृषेर्वृष्टिसमायोगे दृश्यन्ते फलसिद्धयः। तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चनेति" शास्त्रान्तरेण तत्तत्कालानामेव यत्तत्कार्य्योत्पत्तौ हेतुताऽधिगता तथापि "यद्विशेषयोः कार्य्यकारणभावस्तत्सामान्ययोरपीति" न्यायात् सामान्यतः कार्य्यमात्रं प्रति कालसामान्यस्य हेतुत्वम्। "कालः क्रीडति गच्छत्यायुस्तदपि न मुञ्चत्याशावायुः" मोहमु०। काले भवः ठञ्। कालिक कालभवे त्रि० "समासप्रत्ययविधौ प्रतिषेधो वक्तव्यः" वा० उक्तेः तदन्तविधिपरिभाषायाः अप्रवृत्तेः कालान्तशब्दान्नास्य प्रवृत्तिः तेन तदन्तशब्दात् खएव साधुः समानकालीनः प्राक्कालीन इत्यादि भूरिप्रयोगात्। सि० कौ० समानकालीनप्राक्कालीनशब्दयोरप्रामाणिकतोक्तिः प्रौढोक्तिरेव उदाहृतवार्त्तिकस्य जागरूकत्वात् इति गौडाचार्य्याः। प्रतीच्यास्तु कौमुदीकारश्रद्धावशात् ठञ्विधायकसूत्रे कालसामान्यतद्विशेषपर्य्यायाणां ग्रहणात् समानकालप्राक्कालयोरपि कालविशेषत्वेन ततः ठञेव प्रवृत्तिर्न खस्येति भाष्यादिप्रयोगस्तु आर्षत्वात् समाधेयः इति मन्यन्ते। कालेन निर्वृत्तः ठञ्। कालिक कालसाध्ये त्रि० स्त्रियां ङीप्। "कर्त्तुस्तात्कालिकी शुद्धिरिति" स्मृतिः तत्र तत्कालशब्दस्यैव ठञः प्रकृतित्वात् तेन न पूर्व्वोक्तवार्त्तिकसङ्कोचः अतएव तत्र तच्छब्दस्यैवाद्यचोवृद्धिः तेन निर्वृत्तमित्यधिकारात् प्रकृतिमात्रस्यैव ग्रहणात् न कालत्वेन तत्र प्रकृतिता। काले साधुः पुष्यत् पच्यमानो वा अण्। काल—काले साधौ काले विकशमाने काले पच्यमाने च त्रि०। अत्र सूत्रे कालविशेषस्यैव ग्रहणं न स्वरूपस्य तेन न ततोऽण् इत्यन्ये। कालः प्राप्तोऽस्य यत्। काल्य प्राप्तकाले शीतादौ त्रि० कालोदेवताऽस्य "कालेभ्योभववत्" पा० ठञ्। कालिक कालदेवताके हविरादौ स्त्रियां ङीप्। १५ तत्तत्कर्म्मोचितकाले "वरमेकाहुतिः काले नाकाले लक्षकोटयः" ति० त०। "अकालेऽप्यथ वा काले गङ्गां प्राप्य सरिद्वराम्" प्रा० त०। "काले कालकृतो नश्येत् फलभोग्यो न नश्यति" या० स्मृ०। अर्द्धयामशब्दे २७६ पृ० दर्शिते रव्यादिवारेषु कालवेलाख्ये १६ दिवानिशोरर्द्धयामभेदे "यात्रायां मरणं काले वैधव्यं पाणिपीडने। व्रते ब्रह्मवधः प्रोक्तः सर्व्वं कर्म्म ततस्त्यजेत्" ज्यो० त०। तस्य सर्व्वकर्म्मसु वर्ज्यतामाह १७ सांख्योक्ते मेघाख्ये विवेकसाक्षात्कारान्तरावे तुष्टिभेदे "यथा आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः। बाह्या विषयोपरमात् पञ्च, नव तुष्टयोभवन्ति" सा० का०

"या तु प्रव्रज्यापि न सद्योनिर्व्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिस्ते विधास्यति अलमुत्तप्ततया तवेत्युपदेशे या तुष्टिः सा कालाख्या मेघ (१) उच्यते" कौ०। विवृतञ्चैतदस्माभिः। "प्रव्रज्यामात्रस्य विवेकख्यातिहेतुत्वे प्रव्रज्याग्रहणमात्रेण विवेकख्यात्यापत्तिरूपम् उपदेशे असत्त्वप्रयोजकं दूषणम् सहकार्य्यन्तरापेक्षाकल्पनात् परिहरन्नुपदेशान्तरं दर्शयति न सद्यो निर्वाणदेति। सद्यः, ग्रहणमात्रात् न तु कालरूपसहकार्य्यन्तरापेक्षणात न निर्व्वाणदा विवेकख्यातिजननद्वारा न मुक्तिदेत्यर्थः। तथा च "कृषेर्वृष्टिसमायोगे दृश्यन्ते फलसिद्धयः; तास्तु काले प्रदृश्यन्ते नैवाकाले कथञ्चन" इति शास्त्रेण कार्य्यमात्रं प्रति कालस्य सहकारितया अन्वयव्यतिरेकाभ्यां च प्रसिद्धत्वात् कालस्यैव तद्धेतुत्वमस्तु कृतं ध्यानाभ्यसादिनेति समुदितार्थः। कालस्य साधनतासाधकशास्त्रेण कृष्यादेः प्रधानफलहेतुत्वं तत्र कालस्य सहकारितामात्रं प्रतिपादितं न तु तन्मात्रस्य हेतुत्वमेवञ्च कालस्य साधारणकारणत्वम् असाधारणकारणत्वन्तु कृष्यादेरेव एवञ्च प्रकृतेऽपि विवेकख्यातिं प्रति ध्यानाभ्यासादेरेवारादुपकारकत्वात् असाधारणहेतुत्वं, कालस्य साधारणहेतुत्वमित्यस्यासदुपदेशत्वमिति बोध्यम् इति।

वर्णवाचिकालशब्दस्य स्त्रियां जनपदा० नि० ङीष्। काली "काकाली कामधुरा काशीतलवाहिनी गङ्गा।" विदग्धमु० समानप्रश्नोत्तरम्।

१८ हिंसके त्रि० ततः स्त्रियां न ङीष्। कालात् वक्ष्येत्" वार्त्तिकोक्तेः। "कालान्या" सि० कौ०। कालस्येयम् अण् ङीप् कालस्य पत्नी ङीष् वा। काली कालशक्तौ शिवकान्तायाञ्च स्त्री। अधिकं कालीशब्दे वक्ष्यते। १९ मृत्यौ मेदि० सर्व्वस्यापहरणात्तस्य तथात्वम्। "अंशुमांश्च तपस्तेपे गङ्गानयनकाम्यया। कालं महान्तं नाशक्नोत् ततः कालेन संस्थितः। दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान्" भाग० ९ ९ २ २ १ "कालं मृत्युम्" श्रीधरः।

वर्णवाचकात् तस्य भाव इत्यर्थे इमनिच् कालिमन् पु० तल् कालता स्त्री, त्व कालत्व न० । कृष्णवर्णे । तत्र "यमे उपेत्य मुनिवेशोऽथ कालः प्रोवाच राघवम्" रघुः । यमपरत्वे २०द्वित्वसंख्यायां २१तत्संख्यान्विते च भरण्यायमदैवतत्वात् तस्याश्च अश्विन्यादिनक्षत्रचक्रे द्वितीयत्वात् लक्षितलक्षणया तत्परत्वम् । शिवपरत्वे २२षट्-संख्यायां २३तदन्विते च शिवदैवतार्द्रायाः अश्विन्यादिषु षष्ठत्वादुक्तरीत्या तथात्वम् । कर्णवेधनक्षत्रशब्दे १४२८पृ० दर्शितं षट्कालकालेत्यादि वाक्यम् उदा० "कालस्य वेला रवितः शराब्धिकालानलागाम्बुधयो गजेन्द्रः" ज्यो०त० ।

चन्द्रादिग्रहाणां दृष्टियोग्यताप्रापककालात्मके २४ अंशभेदे च । स च सि० शि० दर्शितो यथा

"दस्रेन्दवः १२ शैलभुवश्च १७ शक्रा १४ रुद्राः ११ खचन्द्रा १० स्तिथयः १५ क्रमेण । चन्द्रादितः काललवा निरुक्ताः ज्ञशुक्रयोर्वक्रगयोर्द्विहीनाः" सि०शि० ।

चन्द्रादीनामेते १२ । १७ । १४ । ११ १० । १५ । कालांशा ज्ञेयाः । बुधशुक्रयोस्तु वक्रगतयोर्द्विहीना १२।८ द्विवर्जिता ज्ञेयाः ।

अत्रोपपत्तिः । कालांशा इति कालात्मका अंशाः षड्भिरंशैरेका घटिका । एकस्यांशस्य दश पानीयपलानि । अत्रैतदुक्तं भवति । चन्द्रस्य किल द्वादश १२ कालांशाः । अर्कस्यास्तमयादुदयाद्वा घटिकाद्वयाधिकेऽन्तरे चन्द्रो दृष्टियोग्यो भवति । तदूने तत्प्रभाच्छादितत्वाददृश्यः । अतस्तस्य द्वादश कालांशाः । एवं भौमस्य सप्तदश १७ यदंशोनास्तिस्रो घटिकाः २ । ५० इत्यर्थः । एवमन्येषां यथापठितास्तेषां बिम्बस्य स्थूलसूक्ष्मतावशात् न्यूनाधिकता । अत एव बुधशुक्रयोर्वक्रगतयोर्बिम्बस्य स्थूलत्वाद्द्विहीनाः । अत्रोपलब्धिरेव वासना" प्रमि०

"यत्रोदयो वास्तमयोऽवगम्यस्तद्दिग्भवो दृक्खचरो रविश्च । अस्तोदयासन्नदिने कदाचित् साध्यस्तु पश्चात् तरणिः सषड्भः" सि०शि० ।

"इह केन्द्रभागैर्ग्रहस्योदयोऽस्तमयो वा यस्मिन् दिन आयातस्तस्यासन्ने कस्मिंश्चिद्दिने तं ग्रहं रविं च स्फुटं कृत्वा यस्यां दिशि ग्रहोदयोऽस्तमयो वा तद्दिग्भवो दृग्ग्रहः कार्यः । यदि प्राच्यां तदौदयिकं ग्रहं कृत्वोदयलग्नं साध्यम् । यदि च प्रतीच्यां तदास्तमयिकं ग्रहं कृत्वास्तलग्नं साध्यमित्यर्थः । यदा प्रतीच्यां, तदा रविः सषड्भश्च कार्यः । इदानीमिष्टकालांशानयनमाह" प्रमि० ।

"दृक्खेचरार्कान्तरजातनाड्यो रसाहताः काललवाः स्फुरिष्टाः" सि०शि० ।

"दृग्ग्रहार्कयोरन्तरघटिकाः साध्यास्ता रसैः ६ हता इष्टाः कालांशा भवन्ति । अथ तैरुदयास्तयोर्गतैष्याः नाड्यः" प्रमि० ।

"उक्तेभ्य ऊनाभ्यधिका यदीष्टाः खेटोदयो गम्यगतस्तदा स्यात् । अतोऽन्यथा चाऽस्तमयोऽवगम्यः प्रोक्तेष्टकालांशवियोगलिप्ताः । खाभ्राष्टभू १८०० घ्नाद्युचरोदयाप्ताः खेटार्कभुक्त्यन्तरभाजितास्च । वक्रे तु भुक्त्यैक्यहृता अवाप्तास्तदन्तराख्ये दिवसा गतैष्याः । तात्कालिकाभ्यां रविदृग्ग्रहाभ्यां मुहुः कृतास्ते स्फुटतां प्रयान्ति" सि०शि० ।

"एवं य इष्टकालांशा आनीतास्ते प्रोक्तेभ्यो यदि स्वल्पा भवन्ति तदा ग्रहस्योदयो गम्यः । यद्यधिकास्तदा गत इति वेदितव्यम् । अतोऽन्यथास्तमय इति । अथ प्रोक्ताउक्तेभ्यो यदीष्टाः स्वल्पास्तदा ग्रहस्यास्तमयो गतो यद्यधिकस्तदा गम्य इति । अथ प्रोक्तानामिष्टकालांशानां च या अन्तरे कलास्ता अष्टादशशतैः १८००र्गुण्या दृग्ग्रहाक्रान्तस्य राशेः स्वदेशोदयासुभिर्भाज्याः । फलकलानां ग्रहार्कभुक्त्यन्तरेण वक्रगे ग्रहे भुक्तियोगेन भागे गृहीते यल्लब्धं ते गता एष्या वा दिवसा भवन्त्युदये वास्तमये वा । तैर्दिवसैस्तात्कालिकौ दृग्ग्रहार्कौ कृत्वैवमसकृत्कर्मणा सम्यक् तत्कालज्ञानं भवति ।

अत्रोपपत्तिः । इष्टकालांशसाधने लग्नवासनैव । प्रोक्तानां कालांशानामनन्तर्वर्ती ग्रहो दृश्यो भवति । अतो यावदिष्टा न्यूनास्तावददृश्यः । उदये विलोक्यमाने उदेष्यति । अस्ते विलोक्यमानेऽस्तं गत इत्यर्थाज्ज्ञायते । इष्टा यद्यधिकास्तदा प्रोक्तेभ्यो विलोक्यमानेऽस्तंगते बहिर्भूताद्ग्रहोऽदृश्य उदये विलोक्यमान उदितः अस्तं यास्यतीत्यर्थाज्ज्ञायते । अथ तेषां प्रोक्तेष्टानां कालांशानां च या अन्तरे कलास्तासां क्षेत्रलिप्तीनां करणायानुपातः । यावत्यः कालकलास्तावन्त एवासवो भवन्ति । अथ यदि दृग्ग्रहोदयासुभिरष्टादशशतानि १८०० क्षेत्रलिप्ता लभ्यन्ते तदा तदन्तरकलासुभिः किमिति । फलं क्षेत्रलिप्ताः । ता ग्रहार्कभुक्त्यन्तरेण भाज्याः । भुक्त्यन्तरं हि क्षेत्रलिप्तात्मकमतः सजातीयकरणाय क्षेत्रलिप्तीकरणम् । भुक्त्यन्तरेणैको दिवसो लभ्यत इति युक्तमुक्तम् । वक्रे तु भुक्तियोग एव भुक्त्यन्तरम् । दूरान्तरे स्थूलकालो भवतीत्यसकृत्कर्म सूक्ष्मार्थम् । अत्र विशेषमाह" । प्रमि०

"प्राग्दृग्पक्षश्चेदधिको रवेः स्यादूनोऽथ वा पश्चिमदृग्पक्षश्च। प्रोक्तेष्टकालांशयुतैः कलाभिः साध्यस्तदानीं दिवसागतैष्याः। तथा यदीष्टकालांशाः प्रोक्तेभ्योऽभ्यधिकास्तदा। व्यत्ययश्च गतैष्यत्वे ज्ञेयोऽङ्कां सुधिया खलु" सि॰शि॰ "यदि प्राग्दृग्पक्षो रवेरधिको भवति। अथ वा पश्चिमदृग्पक्षो न्यूनो भवति तदा ये इष्टकालांशा आनीतास्तेषां प्रोक्तानां च योगकलाभिर्दिवसाः साध्याः। मान्तरकलाभिः तथा प्राग्दृग्पक्षेऽर्कादधिके सति पश्चाद्दृग्पक्षे वा न्यूने च इष्टकालांशा आगतास्ते च यदि प्रोक्तेभ्योऽधिकान्तराः तदा प्रोक्तेष्टकालांशयुतैः कलाभिर्ये दिवसाः साधितास्तेषां दिवसानां गतैष्यत्वे विपर्ययो ज्ञेयः।

अत्रोपपत्तिः। यो ग्रहः प्राच्यामुदेति प्रतितिष्ठति वा असौ रवेरूनः सन् पश्चिमायाम् अधिकः सन् प्राच्यां दिशि प्रोक्तकालांशैरूनः सन् दृश्यतामेति। तावद्भिरेव पश्चिमायामधिकः सन्। अतो रवेः पृष्ठतः प्राच्यां प्रोक्तकालांशाः प्रतीच्यामग्रतः। प्राच्यामूने ग्रहे ये इष्टकालांशाः साध्यन्ते ते रवेः पृष्ठतः। अतः पृष्ठगतैरेव प्रोक्तकालांशैस्तेषामन्तरं कर्तुं युज्यते। अथ प्राच्यां रवेरधिके दृग्ग्रहे ये इष्टकालांशाः साध्यन्ते ते रवेरग्रतो भवन्ति। अतोऽग्रगतानां पृष्ठगतानाञ्च कालांशानां योगे कृतेऽप्यन्तरं कृतं भवति तथा उक्तेभ्य ऊनाभ्यधिका यदोष्टा इति यद्गतगम्यलक्षणमुक्तं तत् सजातीयानामेव। यदा पुनरेके पृष्ठगता एकेऽग्रगतास्तदा तद्गतगम्यलक्षणं व्यत्ययेन भवति। अत उक्तं व्यत्ययश्च गतैष्यत्व इत्यादि। अत्र सुधियेति विशेषणाद्बुद्धिमतैतदनुक्तमपि ज्ञायते" प्रमि॰। व्यवहारे वादिप्रतिवादिनोः प्रतिज्ञातार्थसाधनाय राज्ञादेये २५अवसररूपे समयभेदे च तत्कालविशेषः स्मृतौ दर्शितो यथा "प्रत्यर्थी लभते कालं त्र्यहं सप्ताहमेव च। अर्थी तु प्रार्थयन् कालं तत्क्षणादेव हीयते"। प्रत्यर्थिनोऽपि क्वचिद्विषये न कालो देयः क्वचिच्चार्थिप्रत्यर्थिनोरिच्छया कालो देयः यथाह याज्ञ॰ "साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम्। विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृतः"।

समयरूपकालस्य वैशेषिकमते संयोगविभागपृथक्त्वसंख्यापरिमाणरूपा पञ्च गुणाः। भीमो भीमसेनवत् उत्तरपदलोपः। कालदण्डरूपे २६ योगे कालदण्डशब्दे उदा॰। वारविशेषे दिग्भेदेन ज्योतिषोक्ते यात्रादौ निषिद्धे २७ योगभेदे। स च योगः मु॰ चि॰ उक्तः। "कौबेरीतो वैपरीत्येन कालोऽर्काद्ये वारे सम्मुखे तस्य पाशः। रात्रावेतौ वैपरीत्येन गण्यौ यात्रा युद्धे संमुखौ वर्जनीयौ"। अयमर्थः। रवावुत्तरस्यां कालः, सोमे वायव्यां, भौमे पश्चिमायाम्, बुधे नैर्ऋत्याम्, गुरौ दक्षिणस्याम्, शुक्रे आग्नेय्यां, शनौ पूर्वस्याम्। "रवावुत्तरतः कालः सोमे वायव्यभागके। भौमे तु पश्चिमे भागे बुधे नैर्ऋतभागके। जीवे च याम्यदिग्भागे शुक्रे चाग्नेयकोणके। शनौ तु पूर्वदिग्भागे कालचक्रं प्रकीर्त्तितम्। स्वरोदये "यत्रस्थस्तत्र कालः स्यात् पाशस्तस्य तु सम्मुखः। दक्षिणस्थः शुभः कालः पाशो वामदिगाश्रयः। यात्रायां समरे श्रेष्ठस्ततोऽन्यत्र न शोभनः। रात्रौ च वैपरीत्येन यथा रवौ रात्रौ दक्षिणस्यां कालः उत्तरस्यां पाश इत्यादिक्रमेणेत्यूह्यम्। २८कलाये (मटर) शिम्बीभेदे, वैज॰। "विकसत्कलायकुसुमम्" माघव्या॰ कालकुसुममिति मल्लि॰ ध्रुवनामकवसोः २९ पुत्रभेदे पु॰। "ध्रुवस्य पुत्रो भगवान् कालो लोकप्रकालनः" हरिवं॰ ३अ॰।

कालक न॰ काल-स्वार्थे क कलयति रक्ततां कल-णोदने ण्वुल् वा। १कालखण्डे भावप्र॰ तस्य कृष्णवर्णत्वात् तथात्वम्। २यकृति हेमच॰। निखिलदेहरक्तप्रेरकत्वात् तस्य तथात्वम्। यथोक्तं भावप्र॰। "यदा रसो यकृत् याति तत्र रञ्जकपित्ततः। रागं पाकं च संप्राप्य स भवेद्रक्तसंज्ञकः"। "यकृत् प्लीहा च रक्तस्य मुख्यस्थानं तयोः स्थितम्। अन्यत्र संस्थितवतां रक्तानां पोषकं भवेत्" इति च। देहस्थे कृष्णवर्णे (जडुल) ३चित्रभेदे जतुके पु॰ अमरः ४अलगर्दे जलव्याले (कालडोड़ा) सर्पे पु॰ स्त्री शब्दर॰। अनित्ये वर्णे तेन रक्ते चार्थे "कालाच्च" प॰ कन्। कालक कालवर्णेन रक्ते ५पटादौ त्रि॰ तस्य वर्णस्यानित्यत्वात् रागेण रक्ततयाऽनित्यत्वाच्च तथात्वम्। स्त्रियां टाप्। "कालिका शाटी" सि॰ कौ॰। बीजगणितोक्ते ६ अव्यक्तराशिसंज्ञाभेदे पु॰ अव्यक्तशब्दे ४६७पृ॰ विवृतिः।

कालकचु स्त्री नि॰ कर्म॰। कृष्णवर्णे कचुभेदे शब्दचि॰।

कालकञ्ज न॰ नि॰ कर्म॰। १नीलपद्मे। २दानवभेदे पु॰। "पौलोमैः कालकञ्जैश्च हृष्टपुष्टैरधिष्ठितम्" भा॰ व॰ १७२ अ॰

कालकटङ्कट पु॰ कालरूपः कटङ्कटः। शिवे। "वैष्णवी पटवी तालो खली कालकटङ्कटः" भा॰ आनु॰ १७अ॰ शिवस्तवे।

कालकण्टक पु॰ स्त्री कालः कृष्णः कण्टकोऽस्य। २कृष्णकण्टकयुक्ते त्रि॰ दात्यूहे (डाक) पक्षिभेदे अमरः. स्त्रियां जातित्वात् ङीष्। ३पीतसारे वृक्षे मेदि॰।

कालकण्ठ पु॰ कालः कण्ठोऽस्य विषपानात्। १शिवे स हि

अमृतमन्थनकाले उत्थितविषपानात् कालकण्ठो जातः तत्कथा भाग० ८।७अ० यथा। "ततः स करतलीकृत्य व्यापि हालाहलं विषम्। अभक्षयन्महादेवः कृपया भूतभावनः। तस्यापि दर्शयामास स्वाभाव्यं जलकल्मषः। यच्चकार गले नीलं तच्च साधोर्विभूषणम्।" २मयूरे ३दात्यूहे ४खञ्जने च पक्षिभेदे त्रिका० स्त्रियां जातित्वात् ङीष्। तेषां कृष्णवर्णत्वात् तथात्वम्। वा कप्। दात्यूहे पुंस्त्री

कालकन्दक पुंस्त्री कालः कन्द इव कायति कै—क। (काल-ढोड़ा) जलसर्पे। स्त्रियां जातित्वात् ङीष्।

कालकर्णी स्त्री कालः कर्णोऽस्याः ङीप्। अलक्ष्मीभेदे "अलक्ष्मीः कालकर्णी च" पुरा०। स्वार्थे क ह्रस्वः। कालकर्णिका तत्रार्थे हेम०। अलक्ष्मीशब्देऽनुक्तस्तदुत्पत्त्यादिरत्राभिधीयते पाद्मे उत्तरखण्डे देवीं प्रति शिववाक्यम्।

"मां प्रणम्य पुनर्देवा ममन्थुः क्षीरसागरम्। तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि!। ज्येष्ठा देवी समुत्पन्ना रक्तस्रग्वाससावृता। उत्पन्ना साऽब्रवीद्देवान् किं कर्त्तव्यं? मयेति वै। तामब्रुवंस्तदा देवीं सर्व्वे देवगणास्तदा। येषां गृहान्तरे नित्यं कलहं संप्रवर्त्तते। तत्र स्थानं प्रयच्छामो वासस्तत्र शुभानने!। यस्य गेहं कपालास्थिभस्मकेशादिचिह्नितम्। परुषं भाषते नित्यं वसन्त्यनृतवादिनः। सन्ध्याकाले च ये पापाः स्वपन्ति मलचेतसः। तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी। कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु। तत्र ते सततं स्थानं भविष्यति न संशयः। अकृत्वा पादयोः शौचं यस्त्वाचामति दुर्म्मतिः। तं भजस्व सदा देवि! कलुषेणावृता भृशम्। तुषाङ्गारकपालास्थिवालुकायसचर्म्मभिः। दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः। रमस्व कलिना देवि! तेषां वेश्मसु नित्यशः। तिलपिष्टञ्च नक्तञ्च कालिङ्गशिग्रुगृञ्जनम्। छत्राकं त्रिवृताहञ्च विल्वकोषातकीफलम्। अलाबूं (वर्त्तुलाख्य) श्रीफलं ये वै खादयन्ति नराधमाः। तेषां गृहे तव स्थानं देवि! दारिद्र्यदे! सदा। इत्यादिश्य सुराः सर्वे ते ज्येष्ठां कलिवल्लभाम्"। तस्या उद्दालकमुनिना सह विवाहादिकथा च पाद्मे १६१अ०।

"समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः। श्रेष्ठञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः। यावदङ्गीचकाराशौ लक्ष्मीं भार्य्यार्थमात्मनः। तावद्विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम्। लक्ष्मीरुवाच। असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते। तस्मान्ममाग्रजामेतामलक्ष्मीं मधुसूदन!। विवाह्योद्वह मां पश्चादेष धर्म्मः सनातनः तस्मात् धर्म्मव्यतिक्रामं न कुर्य्या मधुसूदन!। इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः। उद्दालकाय मुनये सुदीर्घतपसे तदा। आप्तवाक्यानुरोधेन तामलक्ष्मीं ददौ किल। स्थूलोष्ठीं शुष्कवदनां विरूपां बिभ्रतीं तनुम्। रवदारक्तनयनां रूक्षपरुषशिरोरुहाम्। स मुनिर्विष्णुवाक्यात्तामङ्गीकृत्य स्वमाश्रमम्। वेदध्वनिसमायुक्तमानयामास धर्म्मवित्। होमधूपसुगन्धाढ्यं वेदघोषेण नादितम्। आश्रमं तं विलोक्याथ व्यथिता साऽब्रवीदिदम्। ज्येष्ठोवाच। न हि वासोऽनुरूपोऽयं वेदध्वनियुतो मम। नात्रागमिष्ये भो ब्रह्मन्! नयस्वान्यत्र मां ध्रुवम्। उद्दालक उवाच। कथं नायासि किन्त्वत्र? वर्त्तते स्वमतं तव। तव योग्या च वसतिः का भवेत्तद्वदस्व माम्। ज्येष्ठोवाच। वेदध्वनिर्भवेद्यस्मिन्नतिथीनाञ्च पूजनम्। यज्ञदानादिकं यत्र नैव, तत्र वसाम्यहम्। परस्परानुरागेण दाम्पत्यं यत्र विद्यते। पितृदेवार्च्चनं यत्र तत्र नैव वसाम्यहम्। दानशौचे न विद्येते परद्रव्यापहारिणः। परदाररता यत्र तत्र स्थाने रतिर्मम। वृद्धसज्जनविप्राणां यत्र स्यादवमाननम्। निष्ठुरं भाषणं यत्र तत्र सम्यग्वसाम्यहम्। सूत उवाच। इति तद्वचनं श्रुत्वा विषण्णवदनोऽभवत्। उद्दालकस्ततोऽवाक्यं तामलक्ष्मीमुवाच ह। उद्दालक उवाच। अश्वत्थवृक्षमूलेऽस्मिन् अलक्ष्मि! क्षणं तिष्ठ। आश्रमस्थानमालोक्य यावदायाम्यहं पुनः। सूत उवाच। इति तां तत्र संस्थाप्य जगामोद्दालको मुनिः। प्रतीक्षन्ती चिरं तत्र यदा न तं ददर्श सा। तदा रुरोद करुणं भर्त्तृत्यागेन दुःखिता। तत्तस्याः क्रन्दितं लक्ष्मीर्वैकुण्ठभवनेऽशृणोत्। तदा विज्ञापयामास विष्णुमुद्विग्नमानसा। लक्ष्मीरुवाच। स्वामिन्! मद्भगिनी ज्येष्ठा स्वामित्यागेन दुःखिता। तामाश्वासयितुं याहि कृपालो! यद्यहं प्रिया। सूत उवाच। लक्ष्म्या सह ततो विष्णुस्तत्रागात् कृपयान्वितः। आश्वासयंश्च लक्ष्मीं तामिदं वाक्यमथाब्रवीत्। विष्णुरुवाच। अश्वत्थवृक्षमाश्रित्य सदाऽलक्ष्मि! स्थिरा भव। ममांशसम्भवो ह्येष आवासस्ते मया कृतः। मन्दवारे सदा नूनं लक्ष्मीरत्रागमिष्यति। अस्पृश्योऽसौ भवेत्तस्मात् मन्दवारं विना किल"।

दीपान्विताभावस्थायां तत्पूजाविधानं मन्त्रलिङ्गात् यथा "अलक्ष्मीस्त्वं कुरूपासि कुत्सितस्थानवासिनि!।

सुखरात्रौ मया दत्तां गच्छ पूजाञ्च शाश्वतीम्। दारिद्र्य कलहप्रिये देवि! त्वं धननाशिनी। याहि यत्रोग्रमहं नित्यं स्थिरा तत्र भविष्यसि। यदि त्वं मे महाभागे! प्रीता भवसि सर्व्वदा। पुत्रबन्धुकलत्रेषु कदाचिन्ना गमिष्यसि। गच्छ त्वं मन्दिरं शत्रोर्गृहीत्वा चाशुभं मम। मदाश्रयं परित्यज्य स्थिता तत्र भविष्यसि"। किञ्च। "एवं गते निशीथे तु नारीभिः स्वगृहाङ्गनात्। अलक्ष्मीश्च वहिष्कार्य्या अमन्त्रञ्च यथाविधि" इति कृत्यतत्त्वार्णवधृत ब्रह्मपुराणम्। "एवंगते निशीथे तु जने निद्रार्द्धलोचने। तावन्नगरनारीभिः शूर्पडिण्डिमवादनैः। निष्कास्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहाङ्गनात्" इति मदनरत्नधृतञ्च। "षट्कुष्माण्डखेटाद्याः कालकर्णीशिशुग्रहाः" काशी०

कालकवृक्षीय पु० कालकोवृक्षो यत्र देशे तत्र भवः "वृद्धाच्छ" पा० छ। वायसविद्याभिज्ञे ऋषिभेदे। तत्कथा च भा० शा० ८२अ० "कोशलानामाधिपत्यं सम्प्राप्तं क्षेमदर्शिनम्। मुनिः कालकवृक्षीय आजगामेति नः श्रुतम्। स काकं पञ्जरे बद्ध्वा विषयं क्षेमदर्शिनः। सर्व्वं पर्य्यचरद्युक्तः प्रवृत्त्यर्थी पुनपुनः। अधीध्वं वायसीं विद्यां शंसन्ति मम वायसाः। अनागतमतीतञ्च यच्च सम्प्रति वर्त्तते" इत्युपक्रम्य दर्शिता। "क्षेमदर्शी नृपसुतो यत्र क्षीणबलः पुरा। मुनिं कालकवृक्षीयमाजगामेति नः श्रुतम्" तत्रैव १०४अ०। "मुनिः कालकवृक्षीय आम्नाय्योऽथ हिरण्मय" भा० स० ७अ०

कालकस्तूरी स्त्री नि०स०। कस्तूरीभेदे शब्दचि०।

कालका स्त्री कालेव कन् वा० नेत्त्वम्। दक्षकन्याभेदे लन्दा०। तस्या अपत्यं ढक्। कालकेय असुरभेदे कालकेयशब्दे उदा०।

कालकाल पु० कालमपि कालयति प्रेरयति स्वकर्म्मणि कल—नोदने अण्। परमेश्वरे कालशब्दे दर्शितकालमाधवीयपद्ये उदा०।

कालकीट पु० कालः कीटोऽत्र। १देशभेदे तत्र भवः पत्राद्या० अण्। कालकीट २तद्देशभवे त्रि०।

कालकीर्त्ति पु० चन्द्रहन्त्रसुरांशसम्भूते भारतप्रसिद्धे नृपभेदे। "कालकीर्त्तिरिति ख्यातः पृथिव्यां सोऽभवन्नृपः। चन्द्रहन्तेति यस्त्वेष कीर्त्तितः प्रवरोऽसुरः" भा० आ० ६७अ०

कालकील पु० कालं तज्ज्ञानं कीलयति कील—अण् उप० स०। कोलाहले शब्दरत्ना० कोलाहलस्य कालरूपपरमेश्वरज्ञानविरोधित्वात्तथात्वम्।

कालकुण्ठ पु० कालेन कुण्ठ्यते कुण्ठ—कर्म्मणि घञ्। यमराजे शब्दमा०। "भीषास्माद्वातः पवते—मृत्युर्धावति पञ्चमः" इति श्रुत्युक्तेः ईश्वरभियैव यमादिभिः स्वस्वकार्य्याणां करणात्तस्य तत्कुण्ठितत्वात् तस्य तथात्वम्।

कालकुष्ठ न० मि० कर्म०। कङ्कुष्ठे पर्व्वतीयमृत्तिकाभेदे राजनि०

कालकूट न०। कालं शिवमपि कूटयति कूट—उपतापे अण् उप० स०, कालस्य मृत्योः कूट इव वा कालवर्णस्य कूट इव वा। १विषभेदे पु० न०। विषभेदकालकूटलक्षणगुणाद्युक्तं भावप्रकाशे यथा "विषं तु गरलः क्ष्वेडस्तस्य भेदाननुदाहरे। वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः। सौराष्ट्रिकः शृङ्गिकश्च कालकूटस्तथैव च। हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव" इति विभज्य "देवासुररणे देवैर्हतस्य पृथुमालिनः। दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः। निर्य्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः। सहि क्षेत्रे शृङ्गवेरे कोङ्कणे मलये भवेत्" इति लक्षितम्।

विषशोधनस्य विधानादिकं तत्रैवोक्तं यथा— "गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुध्यति। रक्तसर्षपतैलाक्ते तथा धार्य्यञ्च वाससि। ये गुणा गरले प्रोक्तास्ते स्युर्हीनविशोधनात्। तस्माद्विषं प्रयोगे तु शोधयित्वा प्रयोजयेत्"। शोधितविषगुणाः तत्रैव।

"विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च। आग्नेयं वातकफहृत् योगवाहि तमोवहम्। व्यवायि सकलकायगुणव्यापनपूर्व्वकपाकस्थानगमनशीलम्। विकाशि ओजःशोषणपूर्व्वकसन्धिबन्धशिथिलीकरणशीलम्। आग्नेयम् अधिकाग्नेयम्। योगवाहि सङ्गिगुणग्राहकम्। तमोवहं तमोगुणप्राधान्येन बुद्धिविध्वंसकम्। "तदेव युक्तियुक्तन्तु प्राणदायि रसायनम्। योगवाहि परं वातश्लेष्मजित्सन्निपातहृत्"। २काके पु० स्त्री राज०। अतिकृष्णत्वात् मृत्योर्दूतरूपत्वाद्वा तस्य तथात्वम् स्त्रियां जातित्वात् ङीष्।

३विषमात्रे च। "कालिमा कालकूटस्य नापैति हरसङ्गमात्"। "ततोदुर्य्योधनः पापः तद्भक्ष्ये कालकूटकम्। क्षिप्रं प्रक्षेपयामास भीमसेनजिघांसया" भा० आ० ५००८ श्लोकः।

कालकूटि त्रि० कालकूटे भवः इञ्। कालकूटभवे।

कालकृत् पु० कालं कालमानं करोति स्वगत्या कृ—क्विप् ६त०। सूर्य्ये तद्गत्या हि क्षणदण्डादिव्यवहारस्य कृतत्वात्तस्य तथात्वम् २परमेश्वरे च "कालात्मा कालकृद्विभुः" ह० वि०

कालकृत पु० कालः कृतोयेन । १ सूर्य्ये शब्दरत्ना० कालो-ऽवधिरूपः कृतो यस्य । कृतावधिके २आधिभेदे । "काले कालकृतोनश्येत् फलभोग्योन नश्यति" याज्ञ०। ३त०। ३कालेन कृते 'सर्व्वं कालकृतं मन्ये कालो हि बलवत्तरः" पुरा० ।

कालकेय पु० कालकायाः अपत्यम् ढक् । दानवभेदे तत्कथा यथा "पुरा कृतयुगे घोरा दानवा युद्धदुर्मदाः । कालकेया इति ख्याता गणाः परमदारुणाः" इति भा०व०१०१अ० इत्युपक्रम्य प्रधानभूतस्य वृत्तस्य बधे तेषां समुद्रदुर्गाश्रयणं रात्रौ च नानामुन्याश्रमहिंसा दिवा पुनः समुद्रप्रवेशो वर्णितः पश्चात् विष्णोरादेशेनागस्त्यमुनिना तेषां समुद्ररूपस्य दुर्गस्य शोषणे कृते देवैस्ते नाशितास्तदवशिष्टाश्च "कालेकेयाये केचित् हिरण्यपुरवासिनस्ते अर्ज्जुनेन निहताः इत्युक्तम् हरिवं०१०२अ० यथा "चतुर्द्दश शतान्यन्यान् हिरण्यपुर-वासिनः" इत्युपक्रम्य १०५अ० तत्रैव "मरीचिर्जनयामास महता तपसान्वितः । पौलोमान् कालकेयांश्च दानवास्ते महाबलाः । अवध्यादेवतानाञ्च हिरण्यपुरवासिनः । कृताः पितामहेनाजौ निहताः सव्यसाचिना" । कालाया अपत्यम् ढक् । कालेयोऽप्यत्र उदा० तत्रैव ।

कालकेशी स्त्री कालः केश इव पत्रादिर्यस्याः गौरा० ङीष् । नील्यामोषधौ शब्दचि० २कृष्णकेशयुक्तस्त्रियाञ्च ।

कालक्षेप पु० कालस्य क्षेपः क्षेपणम् । १कर्त्तव्यकर्म्मकाललङ्घने २कालयापने च ।

कालखञ्ज पु० दानवभेदे "संह्लादो विप्रचित्तिश्च कालखञ्जाश्च दानवाः" भा०स०९अ०वरुणसभ्यकीर्त्तने ।

कालखञ्जन न०कालेन खञ्जति खजि-ल्यु । यकृति हृदयस्थे रक्ताधारस्थाने हेमच० ।

कालखण्ड न०कालं कृष्णं खण्डम् । दक्षिणकुक्षिस्थे मांस-खण्डे अमरः। हेमाद्रिकृते कालप्रतिपादके ग्रन्थभेदे च।

कालगङ्गा स्त्री कालो गङ्गा नदी । यमुनायां शब्दचि० तस्या नदीषु कृष्णत्वात्तथात्वम् ।

कालगन्ध पु० कालः कृष्णोगन्धो ऽस्य दुष्टद्रव्यम् । १काला-गुरुणि शब्दचि० । कालस्य गन्धोलेशः । २काललेशे कालकलायां च । ३कालचन्दने शब्दचि० ।

कालग्रन्थि पु० कालस्य ग्रन्थिरिव । संवत्सरे हारा० ।

कालघट पु० जनमेजयसर्पसत्रे आर्त्त्विज्यकारके ब्राह्मण-विशेषे "आत्रेयः कुण्डजठरोद्विजः कालघटस्तथा" भा० आ० ५२अ० । [भेदे रत्नमा० ।

कालङ्कृत पु० ईषदलङ्कृतः कोः का । (कालकासेँदा) वृक्ष-

कालचक्र न०कालस्य कालगतेश्चक्रमिव । हेमच०उक्ते द्वादशारे १कालचक्रभेदे । (उत्सर्पिन्) शब्दे ११२१पृ० विवृतिः । कालश्चक्रमिवानिशं परिवर्त्तमानत्वात् । विष्णुपुराणाद्युक्ते ज्योतिश्चक्राधिष्ठिते चक्रवत्परिवर्त्तमाने २ काले । "यथा कुलालचक्रेण भ्रमता सह भ्रमतां तदाश्रयाणां पिपीलिकादीनां गतिरन्यैव प्रदेशान्तरेषूपलभ्यमानत्वात् एवं नक्षत्रराशिभिरुपलक्षितेन कालचक्रेण ध्रुवं मेरुञ्च दक्षिणतः परिधावता सह परिधावमानानां तदाश्रयाणां सूर्य्यादीनां ग्रहाणां गतिरन्यैव नक्षत्रान्तरे राश्यन्तरे चोपलभ्यमानत्वात्' । भाग० ५ २२ ८श्लो० । भा०व० १६३अ०कलाकाष्ठादिविभागयुक्ता "एवमेष चरन् पार्थ! कालचक्रमतन्द्रितः । पर्य्येयन् सुमहातेजाः सविता परि-वर्त्तते" प्रपञ्चस्तु विष्णुपुराणे यथा

"पराशर उवाच । व्याख्यातमेतद्ब्रह्माण्डसंस्थानं तव सुव्रत! । ततः प्रमाणसंस्थाने सूर्य्यादीनां शृणुष्व मे । योजनानां सहस्राणि द्वितीयोऽस्यो विवस्वतः । ईशादण्डस्तथैवास्य द्विगुणो मुनिसत्तम! । सार्द्धकोटि-स्तथा सप्तनियुतान्यधिकानि वै । योजनानान्तु तस्याक्ष-स्तत्र चक्रं प्रतिष्ठितम् । त्रिनाभिमति पञ्चारे षण्णेमि-न्यक्षयात्मके । संवत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम् । चत्वारिंशत् सहस्राणि द्वितीयोऽक्षो विवस्वतः । पञ्चा-न्यानि सार्द्धानि स्यन्दनस्य महामते! । अक्षप्रमाण-मुभयोः प्रमाणं तद्युगार्द्धयोः । ह्रस्वोऽक्षस्तद्युगार्द्धञ्च ध्रुवाधाररथस्य वै । द्वितीयेऽक्षे तु तच्चक्रं स्थितं वै मान-साचले । हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु । गायत्री च बृहत्युष्णिग्जगती त्रिष्टुबेव च । अनुष्टुप् पङ्क्तिरित्येताश्छन्दांसि हरयो रवेः । मानसोत्तरशैले तु पूर्व्वतो वासवी पुरी । दक्षिणेन यमस्यान्या प्रतीच्यां वरुणस्य वै । उत्तरेण तु सोमस्य तासां नामानि मे शृणु । वस्वौकसारा शक्रस्य, याम्या संयमनी स्मृता । पुरी सुखा जलेशस्य, सोमस्य तु विभावरी । काष्ठाङ्गतो दक्षिणतः क्षिप्तेषुरिव गच्छति । मैत्रेय! भगवान् भानुर्ज्योतिषां चक्रसंयुतः । अहोरात्रव्यवस्थानकारणं भगवान् रविः । देवयानपरः पन्थायोगिनां क्लेशसंक्षये । दिवसस्य रविर्मध्ये सर्व्वकालं व्यवस्थितः । सर्व्वद्वीपेषु मैत्रेय! निशार्द्धस्य च सम्मुखः । उदयास्तमनञ्चैव सर्व्व-कालञ्च सम्मुखे । दिशास्वशेषासु तथा मैत्रेय! विदि-शासु च । यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः ।

तिरोभावश्च यत्रैति यत्र चास्तमनं रवेः । नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः । उदयास्तमनाख्यं हि दर्शनादर्शनं रवेः । शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् । विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा । उदितो वर्द्धमानाभिरामध्याह्नात्तपन् रविः । ततः परं ह्रसन्तीभिर्गोभिरस्तं नियच्छति । उदयास्तमनाभ्याञ्च स्मृते पूर्व्वापरे दिशौ । यावत् पुरस्तात्तपति तावत् पृष्ठे च पार्श्वतः । ऋतेऽमरागिरेर्मेरोरुपरि ब्रह्मणः सभा । ये ये मरीचयोऽर्कस्य प्रयान्ति ब्रह्मणः सभाम् । ते ते निरस्तास्तद्भासा प्रतीपमुपयान्ति वै । तस्यां दिश्युत्तरस्यां वै दिवारात्रिः सदैव हि । सर्व्वेषां द्वीपवर्षाणां मेरुरुत्तरतो यतः । प्रभा विवस्वतो रात्रावस्तङ्गच्छति भास्करे । विशत्यग्निमतो रात्रौ वह्निरेकः प्रकाशते । वह्निपादस्तथा भानुं दिनेष्वाविशति द्विज ! । अतीव वह्निसंयोगादतः सूर्य्यः प्रकाशते । तेजसी भास्कराग्नेये प्रकाशोष्णस्वरूपिणी । परस्परानुप्रवेशादाप्याय्येते दिवानिशम् । दक्षिणोत्तरभूम्यर्द्धे समुत्तिष्ठति भास्करे । आताम्रा हि भवन्त्यापो नक्तमह्नः प्रवेशनात् । दिनं विशति चैवाम्भो भास्करेऽस्तमुपागते । तस्माच्छुक्लीभवन्त्यापो नक्तमह्नः प्रवेशनात् । एवं पुष्करमध्येन यदा याति दिवाकरः । त्रिंशद्भागन्तु मेदिन्यास्तदा मौहूर्त्तिकी गतिः । कुलालचक्रपर्य्यन्तो भ्रमन्नेष दिवाकरः । करोत्यहस्तदा रात्रिं विमुञ्चन्मेदिनीं द्विज ! । अयनस्योत्तरस्यादौ मकरं याति भास्करः । ततः कुम्भञ्च मीनञ्च राशे राश्यन्तरं द्विज ! । त्रिष्वेतेष्वथ भुक्तेषु ततो वैषुवतीं गतिम् । प्रयाति सविता कुर्व्वन्नहोरात्रं ततः समम् । ततो रात्रिः क्षयं याति वर्द्धते च दिनं दिनम् । ततश्च मिथुनस्यान्ते परां काष्ठामुपागतः । राशिं कर्कटकं प्राप्य कुरुते दक्षिणायनम् । कुलालचक्रपर्य्यन्तो यथा शीघ्रं प्रवर्त्तते । दक्षिणे प्रक्रमे सूर्य्यस्तथा शीघ्रं प्रवर्त्तते । अतिवेगितया कालं वायुवेगबलाच्चरन् । तस्मात् प्रकृष्टां भूमिञ्च कालेनाल्पेन गच्छति । सूर्य्यो द्वादशभिः शैघ्र्यान्मुहूर्त्तैर्दक्षिणायने । त्रयोदशार्द्धमृक्षाणामह्ना चरति वै द्विज ! । मुहूर्त्तैस्तावदृक्षाणि नक्तमष्टादशैश्चरन् । कुलालचक्रमध्यस्थो यथा मन्दं प्रसर्पति । तथोदगयने सूर्य्यः सर्पते मन्दविक्रमः । तस्माद्दीर्घेण कालेन भूमिमल्पान्तु गच्छति । अष्टादशमुहूर्त्तं यदुत्तरायणपश्चिमम् । अहर्भवति तच्चापि चरते मन्दविक्रमः । त्रयोदशार्द्धमह्ना तु ऋक्षाणां चरते रविः । मुहूर्त्तैस्तावदृक्षाणि रात्रौ द्वादशभिश्चरन् । अधोमन्दतरं नाभ्यां चक्रं भ्रमति वै यथा, मृत्पिण्ड इव चक्रमध्ये ध्रुवो भवति वै तथा । कुलालचक्रनाभिस्तु यथा तत्रैव वर्त्तते । ध्रुवस्तथा हि मैत्रेय ! तथैव परिवर्त्तते । उभयोः काष्ठयोर्मध्ये भ्रमतो मण्डलानि तु । दिवा नक्तञ्च सूर्य्यस्य मन्दा शीघ्रा च वै गतिः । मन्दाह्नि यस्मिन्नयने शीघ्रा नक्तं तदा गतिः । शीघ्रा निशि यदा सा च तदा मन्दा दिवा गतिः । एवं प्रमाणेनैवैष मार्गं याति दिवाकरः । अहोरात्रेण यो भुङ्क्ते समस्ता राशयो द्विज । षडेव राशीन् यो भुङ्क्ते रात्रावन्यांश्च षड्दिवा । राशिप्रमाणजनिता ह्रस्वदीर्घात्मता द्विज ! । तथा निशायां राशीनां प्रमाणैर्लघुदीर्घता । दिनादेर्दीर्घह्रस्वत्वं तद्भोगेनैव जायते । उत्तरे प्रक्रमे शीघ्रा निशि मन्दा गतिर्दिवा । दक्षिणे त्वयने चैव विपरीता विवस्वतः ।” नरपतिजयचर्य्योक्ते चतुरशीतिचक्रमध्ये २चक्रभेदे तत्स्वरूपं चक्रशब्दे वक्ष्यते । दानार्थकल्पिते हेमा० दा० उक्ते रजतमये ४चक्रभेदे यथ,

“चक्रं रौप्यमयं कृत्वा सुझारश्मिमयात्मकम् । कृत्वा मूर्त्तिं परश्चन्द्ररश्मिमध्यान्तरस्थितम् । त्वङ्मांसानि च रौप्याणि गात्रेषु च समन्ततः । एवं ध्यानव्रतस्तस्य चन्द्रः कृष्णतां व्रजेत् । ततोऽप्यनन्तरं पश्चात् स्थित्वा विप्रप्रदक्षिणम् । तं गृहीत्वा व्रजेद्दूरमदृष्टत्वमपि व्रजेत् । स्वयञ्चाकृतसंघातपूर्णकायस्थितिस्थितः । कालचक्रमिदं नाम्ना दानं मृत्युविनाशनम् । ददन्ते राजतं चक्रं रश्मिजालसमाकुलम् । अपमृत्युविनाशाय ददामीति समुच्चरन् । सुवर्णं दक्षिणायुक्तं ब्राह्मणाय निवेदयेत् । एवं कृते विनश्येत अपमृत्युर्न संशयः । ततस्तस्मात्तदा देयमपमृत्युभयान्वितैः । ज्वरादिरोगग्रस्तैर्वा महापत्पतितैरपि । ततो गृह्योक्तविधिना स्थापयेज्जातवेदसम् । जुहुयात् कालनाम्ना तु शतमष्टोत्तरन्तिलैः । ततस्तु भोजयेद्भक्त्या विप्रान् द्वादशसंख्यया । स्वयमक्षारलवणं भुञ्जीत सकृदेव हि । एवं कृते नरो नूनं चिरंजीवेन्न संशयः ।” रव्यादिवारे नक्षत्रयोगभेदात् ५दण्डभेदे कालदण्डशब्दे विवृतिः । [ज्योतिर्व्विदि दैवज्ञे ।

कालचिन्तक पुं० कालं चिन्तयति विचारयति चिन्ति–ण्वुल् ।

कालचिह्न न० कालस्य मृत्योर्ज्ञापकं चिह्नम् । मृत्युज्ञापके लक्षणभेदे । तल्लक्षणमुक्तं काशीख० ४१अ० यथा

“वदामि कालचिह्नानि जायन्ते यानि देहिनाम् । मृत्यौ निकटमापन्ने मुने ! तानि निशामय । दक्षनासा

ष्टे यस्य वायुर्वाति दिवानिशम्। अखण्डमेकं तस्यायुः क्षयत्यब्दत्रयेण हि। द्व्यहोरात्रं त्र्यहोरात्रं रविर्वहति सन्ततम्। सार्द्धैकवर्षान्तस्येह जीवितावधिरुच्यते। षडेवनासापुटयुगे दशाहानि निरन्तरम्। वातश्चेत् सहसंक्रान्तिस्तथा जीवेद्दिनत्रयम्। नासारन्ध्रद्वयं हित्वा मातरिश्वा मुखाद्वहेत्। संगेद्दिनत्रयादर्व्वाक् प्रयाणं तस्य चाध्व न। सूर्ये सप्तमराशिस्थे जन्मर्क्षस्थे निशाकरे। पौष्णः स कालो द्रष्टव्यो यदा याम्ये रविर्वहेत्। अकस्मादेव तत्काले मृत्युः सन्निहितो भवेत्। वक्ष्यमाणः प्रयत्नेन स कालो मृत्युभीरुणा। अकस्माद्दीक्षते यस्तु पुरुषं कृष्णपिङ्गलम्। तस्मिन्नेव क्षणे गुप्तं स जीवेद्वत्सरद्वयम्। यस्य वीजं मलं मूत्रं, क्षुतं मूत्रं मलन्तथा। द्वैकदा पतेद्यस्य वत्सरन्तस्यायुरिष्यते। इन्द्रनीलनिभं व्योम्नि नागवृन्दं यदीक्षते। इतस्ततः प्रसृमरं षण्मासं न स जीवति। व्यभ्रेऽह्नि वारिपूर्णास्यः प्रतीक्ष्य दिवाकरम्। फूत्कृत्याप्स्विन्द्रचापञ्च पश्येत् षण्मासजीवनः। अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च। आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम्। अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते। विष्णोः पदानि भ्रूमध्ये नेत्राग्नौ मातृमण्डलम्। वेत्ति नीलादिवर्णस्य कट्वम्लादिरसस्य हि। अकस्मादन्यथाभावं षण्मासेन स मृत्युभाक्। षण्मासमृत्योर्मर्त्यस्य कण्ठोष्ठरसनारदाः। शुष्यन्ति सततं तद्वच्छायास्तालुप्रसूभाः। दन्तःकरजनेत्रान्ता नीलिमानं भजन्ति चेत्। स हि कीनाशनगरीं षष्ठे मासि व्रजेन्नरः। संप्रवृत्ते निधुवने मध्यान्ते क्षौति चेन्नरः। निश्चितं पञ्चमे मासि धर्मराजातिथिर्भवेत्। द्रुतमारुह्य सरटस्त्रिवर्णो यस्य मस्तकम्। प्रयाति, याति तस्यायुः षण्मासे सम्परिक्षयम्। स्नातस्यापि यस्याशु हृदयं परिशुष्यति। चरणौ च करौ वापि त्रिमासन्तस्य जीवितम्। प्रतिविम्बे भवेद्यस्य पदञ्चखण्डपदाकृति। पांशौ वा कर्दमे वापि पञ्चमासान् स जीवति। छाया प्रकम्पते यस्य देहमन्येऽपि निश्चले। कृतान्तदूता बध्नन्ति चतुर्थे मासि तन्नरम्। निजस्य प्रतिविम्बस्य नीराजसमुकुटादिषु। उत्तमाङ्गं न यः पश्येत् स मासेन विनश्यति। मतिर्भ्राम्येत् स्खलेद्वाणी धनुरैन्द्रं निशीक्षते। रात्रौ, चन्द्रद्वयं वापि दिवा द्वौ वा दिवाकरौ। दिवा च तारकाचक्रं रात्रौ व्योम वितारकम्। युगपच्च चतुर्दिक्षु शाक्रं कोदण्डमण्डलम्। भूरुहे भूधराग्रे वा गन्धर्व्वनगरोदयम्। दिवा पिशाचनृत्यञ्च एते पञ्चत्वहेतवः। सर्व्वेष्वेतेषु चिह्नेषु यद्येकमपि वीक्षते। तदा मासावधिर्मृत्युः प्रतीक्षेत नचाधिकम्। करावरुद्धश्रवणः शृणोति न यदा ध्वनिम्। स्थूलः कृशः कृशः स्थूलस्तदा मासान्निवर्त्तते। यः पश्येदात्मनश्छायां दक्षिणाशासमाश्रिताम्। दिनानि पञ्च जीवित्वा पञ्चत्वमुपयाति सः। प्रोह्यते भक्ष्यते वापि पिशाचासुरवायसैः। भूतैः प्रेतैः श्वभिर्गृध्रैर्गोमायुखरशूकरैः। सरभैः करभैः कीशैः श्येनैरश्वतरैष्टकैः। स्वप्ने स जीवितं त्यक्त्वा वर्षान्ते यममीक्षते। गन्धपुष्पांशुकैः शोणैः स्वाङ्गन्तु भूषिताम्बरः। यः पश्येत् स्वप्नसमये सोऽष्टौ मासाननित्यहो। पांशुराशिञ्च वल्मीकं यूपं दण्डमथापि वा। योऽधिरोहति वै स्वप्ने षष्ठे मासि स नश्यति। रासभारूढमात्मानं तैलाभ्यक्तञ्च मुण्डितम्। नीयमानं यमाशायां यः स्वप्ने पश्येत् स्वपूर्व्वजान्। स्वमौलौ स्वतनौ वापि यः पश्येत् स्वप्नतो नरः। तृणानि शुष्ककाष्ठानि षष्ठे मासि न तिष्ठति। लोहदण्डधरं कृष्णं पुरुषं कृष्णवाससम्। स्वयं योऽग्रे स्थितं पश्येत् स त्रीन्मासान्न लङ्घयेत्। काली कुमारी यं स्वप्ने बध्नीयाद्बाहुपाशकैः। स मासेन समीक्षेत नगरीं यमनोषिताम्। नरो यो वानरारूढः प्रयान् प्राचीं दिशं स्वपन्। दिनैः स पञ्चभिरेव पश्येत् संयमनीं पुरीम्। कृपणोऽपि वदान्यः स्यात् वदान्यः कृपणोऽर्द। प्रकृतिर्विकृतिश्चेत्स्यात्तदा पञ्चत्वमृच्छति। एतानि कालचिह्नानि सन्त्यन्यानि बहून्यपि। ज्ञात्वाभ्यसेद्वरोयोगमथवा काशिकां श्रयेत्। न कालवञ्चनोपायं मुनेऽन्यमवयाम्यहम्"।

कालजोषक त्रि० काले यथायोग्यकाले जुषते भोजनादि जुष–ण्वुल्। यथायोग्यकालेऽल्पाहारादिना तुष्टे गोपभेदे "बाह्लीका वाटधानाश्च आभीराः कालजोषकाः" भा०भी०९अ०।

कालज्ञ त्रि० कालं योग्यकालं ज्योतिषोक्तकालायनं वा "जानाति–ज्ञा–क। उचितसमयाभिज्ञे 'अत्यारूढो हि नारीणामकालज्ञो मनोभवः"रघुः। "तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः" माघः। [illegible]युक्ते ज्योतिषिके च।

कालज्ञान न०। कालो ज्ञायतेऽनेन ज्ञा–करणे ल्युट् ६त०। १सौरागमादि ज्योतिःशास्त्रे "विदितस्ते मया भावस्तोषितस्तपसा ह्यहम्। दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं तथा" इत्युपक्रम्य सू०सि०मयनामासुराय सूर्यपुरुषद्वारा कालज्ञानमुक्तम्। भावे ल्युट्। २योग्यसमयज्ञाने च।

कालो मृत्युर्ज्ञायतेऽनेन करणे ल्युट् । २मृत्युज्ञापके चिह्न-भेदे कालचक्रशब्दे तच्चोक्तम् । "कालज्ञानं ततः प्रोक्तं दिवोदासस्य वर्णनम्" काशीख० अनुक्रमणिकाध्याये ।

कालञ्जर पु० कालं जरयति जृ-णिच्-अच् बा० मुम् । पर्वत-भेदे "सप्त व्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ" भार० पितृकल्पगाथा । तन्माहात्म्यं भा० व० ८५ अ० "तत्र कालञ्जरो नाम पर्वतो लोकविश्रुतः । तत्र देवहृदे स्नात्वा गोसहस्रफलं लभेत् । यः स्नातस्तर्पयेत्तत्र गिरौ कालञ्जरे नृप । स्वर्गलोके महीयेत नरो नास्त्यत्र संशयः । ततो गिरिवरश्रेष्ठे चित्रकूटे विशाम्पते !" । तेनास्य चित्रकूटपर्वतसान्निध्यं गम्यते । तत्र मासं कृतस्नाने दशाश्वमेधफलं यथोक्तम् भा० अनु० २५ अ० "गङ्गा-यमुनयोस्तीर्थे तथा कालञ्जरे गिरौ । दशाश्वमेधानाप्नोति तत्र मासं कृतोदकः" ।

अयञ्च भूमिमध्यस्थरेखातः प्राच्यां दिशि वर्त्तते यथा भा० व० ८७ अ० । "पूर्वं प्राचीं दिशं राजन्! राजर्षिगण-सेविताम्" इत्युपक्रम्य पूर्वदिक्स्थतीर्थकथने "प्रयागमिति विख्यातं तस्मात् भरतसत्तम ! । अगस्त्यस्य तु राजेन्द्र ! तत्राश्रमवरो नृप । तत्तथा तापसारण्यं तापसैरुपशोभि-तम् । हिरण्यविन्दुः कथितो गिरौ कालञ्जरे महान्" । इत्युक्तेः । तीर्थपरत्वे अस्य क्लीवत्वमपि । "कालञ्जरं प्रभासञ्च तथा वदरिकाश्रमः" इति काशी० भौमतीर्थकथने ईश्व० तथाप्रयोगात् । २योगिचक्रमेलके । ३भैरवभेदे मेदि० । ४ देशभेदे धर० । स च कालञ्जरगिरिरूपजनपदा-धिभूतः । ततो भवादौ रोपधत्वात् प्राग्वर्त्तित्वाच्च वुञ् । कालरञ्जक तद्भवे त्रि० । कालं मृत्युं जरयति जृ—बा० खच् । ५कालस्य मृत्योर्जारके त्रि० । "इन्द्रि-याणां हि सर्व्वेषां वश्यात्मा चलितस्मृतिः । आत्मनः सम्प्रदानेन मर्त्त्यो मृत्युमुपाश्नुते । आहृत्य सर्वसङ्कल्पान् सत्त्वे चित्तं निवेशयेत् । सत्त्वे चित्तं समावेश्य ततः कालञ्जरो भवेत्" भा० शा० २४ अ० । कालं मृत्युं जरयति । मृत्युञ्जये ६शिवे तस्य पत्नी ङीप् कालञ्जरी ७चण्डिकायां स्त्री धर० । स्वयं तज्जारकत्वे तु टाबेवेति भेदः ।

कालतम(र) त्रि० अतिशयेन कालः कृष्णः तमप् (तरप्) वा । अतिशयकृष्णे । स्त्रीत्वे तु अतिशयेन काली इतिविग्रहे पुंवत् कालतमा(रा) इति भेदः । [तमालवृक्षे राजनि० ।

कालताल पु० कालतां श्वेतं अलति पर्याप्नोति अल—अच् ४त० ।

कालतिन्दुक पु० नि० कर्म्म० । कुपीलौ राजनि० ।

कालतीर्थ न० कोशलाख्ये तीर्थभेदे । "कोशलान्तु समासाद्य कालतीर्थमुपस्पृशेत् । वृषभैकादशफलं लभते नात्र संशयः" भा० व० ८५ अ० ।

कालदण्ड पु० कालप्रापको दण्डः । ज्योतिषोक्ते वारादियोगभेदे स च वारविशेषनक्षत्रभेदयोगरूपः यथोक्तं नारदेन "आनन्दः कालदण्डोऽथ धूम्रो धाता शुभावहः । ध्वाङ्क्षो ध्वजाख्यं श्रीवत्सवज्रमुद्गरछत्रकाः । मित्र-मानसपद्माख्यलुम्बकोत्पातमृत्यवः । कालः सिद्धिः शुभा-मृतमुसलातङ्ककुञ्जराः राक्षसाख्यचरस्थैर्यवर्द्धमानाः क्रमादमी । योगाः स्वसंज्ञाफलदास्त्वष्टाविंशतिसंख्य-काः । रविवारे क्रमादेते दास्रभादिन्दुभाद्विधौ । सार्पा-द्भौमे, बुधे हस्तान्मैत्रभाद्देवमन्त्रिणि । वैश्वदेवाद्भृगु-सुते वारुणाद्भास्करात्मजे" । अयमर्थः आनन्दादयः अष्टाविंशतिर्योगा अतः साभिजितानामश्विन्यादीनाम-ष्टाविंशतेरिह ग्रहणम् । तथा च रविवारे अश्विनी-नक्षत्रात् यावत्संख्यकं नक्षत्रमिष्टदिने भवति आनन्दा-दिषु मध्ये तावत्संख्यको योगो भवति एवं सोमवारे मृगात्५यावत्संख्यकं नक्षत्रमिष्टदिने तावत्संख्यको योगः । तथा भौमे अश्लेषातः९ इत्यादि । बुधे हस्तात्१३,गुरौ अनु-राधातः१७,शुक्रे उत्तराषाढ़ातः२१,शनौ शतभिषातः२४ । एषु वर्ज्यदण्डादिकमुक्तं मुहू० चि० "ध्वाङ्क्षे वज्रे मुद्गरे चेषु५ नाड्यो वर्ज्या वेदाः ४पद्मलुम्बे गदेऽश्वाः७ । १धूम्रे २काणे मौसले ३भूद्वयं२ द्वे रक्षोमृत्यूत्पातकालाश्च सर्वे" । तस्या-पवादो वसिष्ठेनोक्तः "सूर्य्याच्चतुर्थे दशमे च षष्ठे त्रिस्थर्क्षगे विंशतिगे च चन्द्रे । भवन्ति षड्भानुगतर्क्षयोगाः कुयोग-विध्वंसकराः शुभेषु" ।

कालदन्तक पु० कालो दन्तोऽस्य कप् । वासुकिकुलजे सर्प-सत्रनष्टे १नागभेदे । "हिरण्यबाहुः शरणः तक्षकः कालदन्तकः । एते वासुकिजा नागाः प्रविष्टा हव्यवाह-नम्" भा० आ० ५७ अ० । २कृष्णदन्तयुक्ते त्रि० ।

कालधर्म्म पु० ६ त० । १मृत्यौ अमरः "अप्राप्तवति तस्मिंस्तु यौवनं पुरुषर्षभे । स राजा शान्तनुर्धीमान् कालधर्ममुपेयि-वान्" भा० आ० १०२ अ० । कालस्य ऋतुविशेषस्य धर्म्मः ६त० । २समयस्य स्वभावे ऋत्वादिकालस्य२ धर्मे च ।

कालधर्म्मन् पु० कालस्येव हिंसाशालितया धर्म्मोऽस्य अनिच् समा० । मृत्यौ । "स पाण्डुः कालधर्म्मणा" भा० आ० १२४ अ० । एतास्ताः प्रजाः सर्व्वाः दक्षकन्यासु जज्ञिरे । कश्यपेनाव्ययेनेह, संयुक्ताः कालधर्म्मणा" हरि० २१२ अ० ।

कालनर पु० अनुवंश्ये नृपभेदे । १ "अनोः सभानरश्चक्षुः परेष्णुश्च त्रयः सुताः" सभानरात् कालनरः सृञ्जयस्तत्सुतः स्मृतः" भाग० ९,२३,२श्लो० । कालः कालचक्रं राशिचक्रं नर इव । मेषादिद्वादशराशिरूपमस्तकाद्यङ्गयुक्ते २ कालपुरुषे तच्छब्दे विवृतिः । "इति कालनरस्याङ्गे सदसद्ग्रहयोगतः" वृहज्जातकम् ।

कालनाथ पु० कालस्य कालभैरवस्य नाथः । महादेवे "कालनाथाय कल्पाय क्षयायोपचयाय च" भा०शा० २८६अ० दक्षप्रोक्तशिवसहस्रनामकीर्त्तने ।

कालनाभ पु० कालःकृष्णः नाभिरस्य संज्ञायाम् अच्समा० । हिरण्याक्षासुरपुत्रभेदे "हिरण्याक्षसुताःपञ्च विद्वांसः सुमहाबलाः । भर्भरः शकुनिश्चैव भूतसन्तापनस्तथा । महानाभश्च विक्रान्तः कालनाभस्तथैव च" हरि०३अ० । १ दानवभेदे "महानाभश्च विक्रान्तः कालनाभस्तथैव च" हरि० ३अ० । अयञ्च सैंहिकेयः यथोक्तं तत्रैव "सैंहिकेया इति ख्यातास्त्रयोदश महाबलाः । व्यंशः शल्यश्च बलिनौ नभश्चैव महाबलः । वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा । आञ्जिको नरकश्चैव कालनाभस्तथैव च । राहुर्ज्येष्ठस्तु तेषां वै सूर्य्यचन्द्रप्रमर्द्दनः ।

कालनियोग पु० कालेन कृतो नियोगः कालस्य वा नियोगः आज्ञा नि+युज–घञ् । १ दैवाज्ञायां २ कालकृतनियमे च

कालनिर्यास पु० नि०क० । गुग्गुलौ रत्नमा० तस्य निर्यासेषु कृष्णत्वात्तथात्वम् ।

कालनेमि पु० कालस्य मृत्योर्नेमिः स्तम्भ इव । दानवभेदे तदुत्पत्त्यादिकथा हरि० ४७अ० यथा—

"पूर्व्वं देवभयं श्रुत्वा मारुताऽग्निकृतं महत् । कालनेमिरिति ख्यातो दानवः प्रत्यदृश्यत । भास्कराकारमुकुटः शिञ्जिताङ्गदभूषणः । मन्दराचलसङ्काशो महाराजतसंवृतः । शतप्रहरणोदग्रः शतबाहुः शताननः । शतशीर्षः स्थितः श्रीमान् शतशृङ्ग इवाचलः । कक्षे महति संवृद्धो निदाघ इव पावकः । धूम्रकेशो हरिच्छ्मश्रुर्दंष्ट्रालौष्ठपुटाननः । त्रैलोक्यान्तरविस्तारी नामयन् वपुषा क्षितिम् । बाहुभिस्तुलयन् व्योम क्षिपन् पद्भ्यां महीधरान् । ईरयन् मुखनिःश्वासैर्वृष्टिमाज्जोबलाहकान् । तिर्य्यगायतरक्ताक्षं मन्दरोदग्रवर्चसम् । दिधक्षन्तमिवायान्तं सर्व्वान् देवगणान्मृधे । तर्जयन्तं सुरगणान् छादयन्तं दिशोदश । संवर्त्तकाले तृषितं दृप्तं मृत्युमिवोत्थितम् । सुतलेनोच्छ्रायवता विपुलाङ्गुलिपर्व्वणा । माल्याभरणपूर्णेन किञ्चिच्चलितवर्म्मणा । उच्छ्रितेनाग्रहस्तेन दक्षिणेन शराभृता । दानवान् देवनिहतानुत्तिष्ठध्वमिति ब्रुवन् । समरे कालनेमिं तं द्विषतां कालनेमिनम् । वीक्षन्ते स्म सुराः सर्व्वे भयवित्रस्तलोचनाः । तं वीक्षन्ति स्म भूतानि क्रमन्तं कालनेमिनम् त्रिविक्रमं विक्रमन्तं नारायणमिवापरम् । सोच्छ्रयन् प्रथमं पादं मारुताघूर्णिताम्बरः । प्राक्रामदसुरो युद्धे त्रासयन् सर्व्वदेवताः । स मयेनासुरेन्द्रेण परिष्वक्तः क्रमन् रणे कालनेमिर्बभौ दैत्यः सविष्णुरिव मन्दरः । अथ विव्यथिरे देवाः सर्व्वे सेन्द्रपुरोगमाः । दृष्ट्वा कालमिवायान्तं कालनेमिं भयावहम् ।"

ततस्तत्पराक्रमसुक्त्वा ४९ अ० "तमप्रतिमकर्म्माणं समानं सूर्य्यवर्चसा । चक्रमुद्यम्य समरे क्रोधदीप्तो गदाधरः । स मुष्णन् दानवं तेजः समरे स्वेन तेजसा । चिच्छेद बाहुं चक्रेण श्रीधरः कालनेमिनः । तच्च तस्य शतं घोरं साग्निचूर्णाट्टहासि वै । तस्य दैत्यस्य चक्रेण प्रममाथ बलाद्धरिः" इत्यनेन हरिणा तस्य बधकथोक्ता । "कालनेमिबधात्प्रीतस्तुराषाडिव शार्ङ्गिणम्" रघुः कालनेमिबधे युद्धे युद्धे त्रिपुरघातने" दुर्गाचार्यधृतः ।

कालनेमिन् पु० कालस्येव नेमिरस्त्यस्य व्रीह्यादेराकृतिगणत्वात् इनि । कालनेमिदानवे तच्छब्दे उदा० ।

कालनेमिहन् पु० कालनेमिं हतवान् हन–भूते क्विप् ६त० । विष्णौ त्रिका० तेन तस्य बधकथा कालनेमिशब्दे उक्ता कालनेमिरिपुतच्छत्रुप्रभृतयोऽप्यत्र ।

कालपथ पु० विश्वामित्रपुत्रभेदे । "मधुच्छन्दश्च भगवान् देवरातश्च वीर्य्यवान् । अक्षीणश्च शकुन्तश्च बभ्रुः कालपथस्तथा" भा० आनु० ४अ० विश्वामित्रपुत्रकीर्त्तने ।

कालपर्ण पु० कालं कृष्णं पर्णमस्य । तगरवृक्षे शब्दरत्ना० ।

कालपर्य्यय पु० कालस्य पर्य्ययः वैपरीत्येन गमनम् ६त० । १ शुभदायककालस्य अशुभदायकत्वे अशुभदायकस्य २शुभदायकत्वे च । "स(कर्णः) हि तेषां महावीर्यो द्वीपोऽभूत् सुमहाबलः । भिन्ननौका यथा राजन्! द्वीपमासाद्य निर्वृताः । भवन्ति पुरुषव्याघ्र! नाविकाः कालपर्य्यये । तथा कर्णं समासाद्य तारकं पुरुषर्षभम्" भा० वि० ७७अ० । २कालक्रमे च ।

कालपर्व्वत पु० नि० क० । त्रिकूटपर्वतनिकटस्थपर्व्वतभेदे "स(रावणः) निक्षिप्य ततः शल्यं खसारम् (शूर्पनखाम्) उपसान्त्व्य च । जह्माचक्रमे राजन्! विधाय नगरे

(लङ्कायाम्) विविशुः। त्रिकूटं समतिक्रम्य कालपर्वतमेव च। ददर्श मकरावासं गम्भीरोदं महोदधिम्” भा० व० २७६ अ०।

कालपालक न० कालं कृष्णवर्णं समयं वा पालयति पाल-ण्वुल्। १कङ्कुष्ठमृत्तिकायाम् राजनि०तस्याः कृष्णवर्णत्वात् तथात्वम्। २समयप्रतीक्षके त्रि० स्त्रियां टाप् अतइत्त्वम्।

कालपीलु पु० नि० कर्म्म०। पीलुभेदे कुपीलौ भावप्र०।

कालपुच्छ पुंस्त्री० कालः पुच्छोऽस्य। “गुणैरेषसमयः कालपुच्छोमुनिभिरीरितः” कात्या० स्मृत्युक्ते मृगभेदे स्त्रियां जातित्वात् ङीष्। स च कूलचरत्वेन सुश्रुते उक्तः कूलचरशब्दे विवृतिः।

कालपुरुष पु० कालः कालचक्रं पुरुष इव। मेषादिद्वादशराशिस्वरूपे कालव्यवहारकारके पुरुषाकारे गगनस्थे १वायुचक्रभेदे। तस्य च जन्मादौ शुभाशुभज्ञानाय यथाङ्गादिविभागः, तथा वृहज्जातके उक्तं यथा “शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि। जानुजङ्घे च ऊरू चरणाविति राशयोऽजाद्याः” तस्यार्थः। “मेषः शिरोवृषोवक्त्रं मिथुनं बाहुयुग्मकम्। कर्कटोहृदयञ्चैव सिंहस्तूदरमेव च। कन्या कटिस्तुला वस्तिर्वृश्चिको गुह्यमेव च। धनुरूरू मृगो जानु कुम्भोजङ्घे प्रकीर्त्तिते। मीनः पादद्वयञ्चैवाङ्गानि कालनरस्य तु”। ततश्च यदङ्गराशिराशीशौ दीर्घौ तदङ्गं दीर्घं, तयोर्लघुत्वे लघु, राशिराशीशयोर्भिन्नरूपत्वे मध्यमम् इति कल्प्यम्। लग्नद्रेक्काणभेदेनाङ्गविशेषः तत्तद्द्रेक्काणे सदसद्ग्रहयोगेन फलविशेषश्च वृहज्जा० उक्तः यथा। “कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रञ्च होरादयस्ते कण्ठांसकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः। वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी—जङ्घाङ्घ्री इत्युभयत्र वाममुदितैर्द्रेक्काणभागैस्त्रिधा” वचनस्यायमर्थः त्रिभिर्द्रेक्काणभागैस्त्रिधा देहविभाग इति शेषः। तत्र प्रथमेन द्रेक्काणेन मूर्द्धाद्यङ्गं, द्वितीयेन कण्ठादि, तृतीयेन वस्त्यादि। तत्राप्युदितैर्दृश्यभागस्थैर्वाममङ्गमनुदितैरदृश्यभागस्थैर्दक्षिणाङ्गमित्यर्थः। तथाच लग्नात् द्वादशैकादशदशमनवमाष्टमसप्तमाः उदितभागस्था दृश्याः। अनुदितभागस्थोऽदृश्यः स च लग्नात् द्वितीयतृतीयचतुर्थपञ्चमषष्ठसप्तमांशभेदभागस्थः। तथाचायमर्थः प्रथमे द्रेक्काणे लग्नं शिरः, द्वितीये द्वादशे च क्रमेण दक्षवामे दृशौ, तृतीयैकादशयोः दक्षवामश्रोत्रे, चतुर्थपञ्चमयोः, दक्षवामे नासे, पञ्चमनवमयो, दक्षवामकपोलौ, षष्ठाष्टमयोः दक्षवामे हनू, सप्तमं मुखम्। लग्नगे द्वितीये द्रेक्काणे लग्नं कण्ठः, द्वितीयद्वादशयोः दक्षवामस्कन्धौ, तृतीयैकादशयोः दक्षवामौ बाहू, चतुर्थदशमयोः दक्षवामे पार्श्वे पञ्चमनवमयोः दक्षवामौ हृद्भागौ, षष्ठाष्टमयोः दक्षवामौ उदरभागौ, सप्तमं नाभिः। लग्नस्य तृतीये द्रेक्काणे लग्नं वस्तिः (नाभिलिङ्गमध्यभागः) द्वितीयद्वादशयोः दक्षवामौ शिश्नगुह्यभागौ, तृतीयैकादशयोः दक्षवामौ ऊरू। पञ्चमनवमयोः दक्षवामे जानुनी। षष्ठाष्टमयोः दक्षवामे जङ्घे, सप्तमं पादाविति। इति महीधरकृतव्याख्यानुसारि। तत्फलमाह तत्रैव “तस्मिन् पापयुते व्रणं, शुभयुते सौम्यं, दृष्ट्वा लक्ष्मादिशेत्। स्वर्क्षांशे स्थिर २,५,८,११, संयुते च सहजः, स्यादन्यथाऽऽगन्तुकः। मन्दे खानिलजोऽग्निशस्त्रविषजो भौमे, बुधे (पापयुते) भूभवः, सूर्य्ये काष्ठचतुष्पदाश्च, हिमगौ (क्षीणचन्द्रे) शृङ्ग्यब्जजोऽन्ये शुभाः”। कालपुरुषः प्रतिपाद्यतयास्त्यस्य अच्। २ज्योतिःशास्त्रे “किन्त्वस्य कालपुरुषस्य महार्णवस्य गच्छेत् कदाचिदनृषिर्मनसाऽपि पारम्” भट्टोत्पलः। कर्म्म०। ३कृष्णवर्णपुरुषे। कालः पुरुष इव। दानार्थं कल्पिते पुरुषाकारे ४कालरूपेश्वरमूर्त्तिभेदे पु० तत्प्रकारो हेमा० दा० ख० उक्तो भविष्यो० पु० यथा

“काम्योदानविधिः पार्थ! क्रियमाणो यथातथम्। फलाय मुनिभिः प्रोक्तो विपरीतो भयाय च। ज्ञेयं निष्कशतं पार्थ! दानेषु विधिरुत्तमः। मध्यमस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः। मेष्वाश्च कालपुरुषे तथान्येषु महत्सु च। एवं वृषे रथेऽश्वे च धेनोः कृष्णाजिनस्य च। अशक्तस्यापि निर्दिष्टोऽयं पञ्चसौवर्णिकोविधिः। अतोऽप्यल्पेन योदद्यात् महादानं नराधिप!। प्रतिगृह्णाति वा तस्य दुःखशोकावहं भवेत्। पुण्यमन्दिरमथासाद्य भूमिभागे समे शुभे। चतुर्द्दश्यां चतुर्थ्यां वा विष्ट्यां वा पाण्डुनन्दन!। पुमान् कृष्णतिलैः कार्य्योरौप्यदन्तः सुवर्णदृक्”। सुवर्णादिपरीमाणमत्र यथाशक्ति सम्पादनीयम्। खड्गोद्यतकरोदीर्घोजपाकुसुमकुण्डलः। रक्ताम्बरधरः स्रग्वी शङ्खमालाविभूषितः। तीक्ष्णासिपुत्रीबन्धेन विस्फुरद्दारिकटीतटः। उपानद्युगयुक्ताङ्घ्रिः कृष्णकम्बलपार्श्वगः। गृहीतमांसपिण्डश्च वामे करतले तथा। एवंविधं नरं कृत्वा गृहीतकुसुमाञ्जलिः। यजमानः

प्रसन्नात्मा इमं मन्त्रमुदीरयेत । सम्पूज्य गन्धकुसुमैर्नैवेद्यं विनिवेद्य च । सर्व्वं कलयसे यस्मात् कालस्त्वं तेन चोच्यसे । ब्रह्मविष्णुशिवादीनां त्वमाराध्योऽसि सुव्रत ! । पूजितस्त्वं मया भक्त्या प्रार्थयस्व तथासुखम् । यदुच्यते तव विभो! तत्कुरुष्व नमोनमः । एवं संपूजयित्वा तं ब्राह्मणाय निवेदयेत् । ब्राह्मणं प्रथमं पूज्य वासोभिर्भूषणैस्तथा । दक्षिणां शक्तितो दद्यात् प्रणिपत्य विसर्ज्जयेत्" । दक्षिणां पूर्व्वोक्तां निष्कादिकाम् "अनेन विधिना यस्तु दानमेतत् प्रयच्छति । न च मृत्युभयं तस्य न च व्याधिकृतं भवेत् । भयत्यव्याहतैश्वर्य्यः सर्व्वबाधाविवर्ज्जितः । देहान्ते सूर्य्यभवनं भित्त्वा याति परं पदम् । पुण्यक्षयादिहागत्य राजा भवति धार्म्मिकः । सत्रयाजी श्रिया युक्तः पुत्रपौत्रसमन्वितः । संपूज्य कालपुरुषं विधिवद्द्विजाय दत्त्वा शुभाशुभफलोदयहेतुभूतम् । रोगातुरे सकलदोषमयेऽत्र देहे देही न मोहमुपगच्छति तत्प्रभावात्" ।

कालपृष्ठ पु० कालं पृष्ठं यस्य । १कर्णधनुषि २ धनुर्मात्रे हेमच० । [गौरा० ङीष् । श्यामालतायां रत्नमा० ।

कालपेषी स्त्री पिष्यतेऽसौ पिष–कर्म्मणि वञ् कर्म्म०

कालप्रभात न०कालं कृष्णं प्रभातं यत्र । शरदृतौ त्रिका० ।

कालप्रवृत्ति स्त्री ६त० । खण्डकालस्य व्यवहारारम्भे । तत्प्रवृत्तिकालश्च सि०शि० उक्तोयथा "लङ्कानगर्य्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव । मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत् प्रवृत्तिः" "कालस्य व्यक्तीनामपि दिनमासवर्षयुगादीनां युगपदेकहेलया प्रवृत्तिर्बभूव । एतदुक्तं भवति । चन्द्रार्कयोर्मेषादिस्थयोर्यत्तस्य शुक्लपक्षादिः प्रतिपत् । अतो मधोः सितादेर्दिनानां सौरादिमासानां वर्षाणां युगानां मन्वन्तराणां कल्पस्य च तदैव प्रवृत्तिः । अथोदयाच्च भानोः । स चोदयः कस्मिन् देशे । लङ्कानगर्य्याम् । तथा तस्यैव वारे चादित्यवार इत्यर्थः ।

कालभाण्डिका स्त्री कालभायै कृष्णप्रभायै भाण्डति भडि-वद्भमे ण्वुल् । मञ्जिष्ठायां राजनि० तस्या रक्तनिर्यासवत्त्वेऽपि क्वाथनात् पूर्व्वं कृष्णकाण्डत्वात्तथात्वम् ।

कालभैरव पु० भीरोर्भावः अण् भैरवं भीरुत्वं कालस्य भैरवं भयं यस्मात् । काशीस्थे शिवांशजे भैरवभेदे स च शिवतत्त्वज्ञानविधुरब्रह्मणःपञ्चमशिरश्छेदनाय शिवेन प्रादुर्भावितः । तत्कथादि काशीख० ३१अ० । तद्वाक्यञ्च कपालमोचनशब्दे १६५५पृ०दर्शितम् । तन्नामनिरुक्तिस्तत्रैव दर्शिता यथा "त्वत्तो भेष्यति कालोऽपि ततस्तु कालभैरवः" । कालराजोऽप्यत्र तत्रैव तन्नामनिरुक्तिर्दर्शिता यथा "कालवद्राजसे यस्मात् कालराजस्ततो भवान् । तस्य च काश्यामाधिपत्यं तत्रैवोक्तं यथा "आधिपत्यञ्च तस्यां ते कालराज ! सदैव हि । तत्र ये पापकर्त्तारस्तेषां शास्ता त्वमेव हि । शुभाशुभं न तत्कर्म्म चित्रगुप्तो लिखिष्यति ॥ एतान् वरान् प्रगृह्याथ तत्क्षणात् कालभैरवः । वामाङ्गुलिनखाग्रेण चकर्त्त च शिरोविधेः"

कालमयूख पु०कालस्य प्रकाशकत्वेन मयूख इव । कालस्वरूप कर्म्माङ्गभावादिज्ञापके स्मृतिनिबन्धभेदे ।

कालमसी स्त्री काली मसीव पुंवत् । नदीभेदे । "मही कालमसी चैव तमसा पुष्पवाहिनी" हरि० २२६अ० ।

कालमाधवीय पु० माधवस्य माधवाचार्य्यस्यायं छ कालप्रतिपादकोमाधवीयः माधवकृतः ग्रन्थः । माधवाचार्य्यप्रणीते कालभेदकर्म्माङ्गभावनिरूपके स्मृतिनिबन्धभेदे ।

कालमान पु० कालोमन्यतेऽसौ मन–कर्म्मणि घञ् सुप्०स० । कृष्णार्ज्जके (कालतुलसी) रत्नमाला । ६त० । २कालपरिमाणे न० । मल–मावे घञ् कालेन कृष्णवर्णेन मालः सम्बन्धोऽस्य । कालमालोऽपि कृष्णार्जके पु० राजनि० ।

कालमुख पुंस्त्री० कालं मुखं यस्य । १ कृष्णमुखे वानरभेदे स्त्रियां ङीष् । "यस्य शाखामृगा मित्राण्यृक्षाः कालमुखास्तथा" भा०व०२८१अ० । "ये च कालमुखानाम नरराक्षसयोनयः" भा०स०३०अ० ।

कालमुष्कक पु० कालोमुष्क इव कायति कै–क । घण्टापारुलिवृक्षे रत्नमा० ।

कालमूल पु० कालं मूलमस्य । रक्तचित्रकवृक्षे राजनि० ।

कालमेषी स्त्री कालं वर्णं मिषति स्पर्द्धते काण्डेन मिष–अण् उ०स० । १मञ्जिष्ठायाम्, २सोमराजग्राम्, त्रिवृति (तेओड़ि) च अमरः । स्वार्थे क । कालमेषिका तत्रार्थे भरतस्तु तालव्यमध्यं पठित्वा तदर्थतामाह ।

कालयवन पु० कर्म्म० । यवनाधिपे नृपभेदे ।

"मिथ्याभिशस्तो गार्ग्यस्तु मन्युनाभिसमीरितः । गोपकन्यामुपादाय मैथुनायोपचक्रमे । गोपाली त्वप्सरास्तस्य गोपस्त्रीवेशधारिणी । धारयामास गार्ग्यस्य गर्भं दुर्द्धरमच्युत! । मानुष्यां गार्ग्यभार्य्यायां नियोगाच्छूलपाणिनः । स कालयवनोनाम जज्ञे राजा-

महाबलः। वृषपूर्व्वार्द्धकायास्तमवहन् वाजिनो रणे। अपुत्रस्य स राज्ञस्तु ववृधेऽन्तःपुरे शिशुः। यवनस्य महाराज! स कालयवनोऽभवत्। स योद्धुकामो नृपतिः पर्य्यपृच्छद्द्विजोत्तमम्। वृष्ण्यन्धककुलं तस्य नारदोऽकथयद्विभुः। अक्षौहिण्या तु सैन्यस्य मथुरामभ्ययात्तदा। दूतं सम्प्रेषयामास वृष्ण्यन्धकनिवेशनम्। ततो वृष्ण्यन्धकाः कृष्णं पुरस्कृत्य महामतिम्। समेता मन्त्रयामासुर्यवनस्य भयात्तदा। कृत्वा च निश्चयं सर्व्वे पलायनमरोचयन्। विहाय मथुरां रम्यां मानयन्तः पिनाकिनम्। कुशस्थलीं द्वारवतीं निवेशयितुमीप्सवः" हरि० ३६अ०। "अस्ति तस्य रणे जेता यवनाधिपतिर्नृपः। स कालयवनो नाम अवध्यः केशवस्य ह। तथा सुदारुणं घोरं तपः परमदुश्चरम्। रुद्रमाराधयामास द्वादशाब्दान् यशोधनः। पुत्रकामेण मुनिना तोष्य रुद्रं सुतो वृतः। माथुराणामवध्योऽसौ भवेदिति च शङ्करात्। एवमस्त्विति रुद्रोऽपि प्रददौ मुनये सुतम्। एवं गार्ग्यस्य तनयः श्रीमान् रुद्रवरोद्भवः। माथुराणामवध्योऽसौ मथुरायां विशेषतः। कृष्णोऽपि बलवानेष माथुरो जातवानयम्" हरिवं १११अ०। "वासुदेवस्तु तं दृष्ट्वा निहतं योगमात्मनः। उत्सृज्य मथुरामाशु द्वारकामभिजग्मिवान्! वैरस्यान्तं विधित्संस्तु वासुदेवो महायशाः। निवेश्य द्वारकां राजन्! वृष्णीनाश्वास्य चैव ह। पदातिः पुरुषव्याघ्रो बाहुप्रहरणस्तदा। आजगाम महायोगी मथुरां मधुसूदनः। तं दृष्ट्वा निर्ययौ हृष्टः स कालयवनो रुषा। प्रेक्षापूर्व्वञ्च कृष्णोऽपि निश्चक्राम महाबलः। अथान्वगच्छद्गोविन्दं जिघृक्षुर्यवनेश्वरः। न चैनमशकद्राजा ग्रहीतुं योगधर्मिणम्। मान्धातुस्तु सुतो राजा मुचुकुन्दो महायशाः। पुरा देवासुरे युद्धे कृतकर्मा महाबलः। वरेण छन्दितो देवैर्निद्रामेव गृहीतवान्। श्रान्तस्य तस्य वागेवं तदा प्रादुरभूत् किल। प्रसुप्तं बोधयेद्यो मां तं दहेयमहं सुराः!। चक्षुषा क्रोधदीप्तेनेत्येवमाह पुनः पुनः। एवमस्त्विति तं शक्र उवाच त्रिदशैः सह। स सुरैरभ्यनुज्ञातस्त्वद्रिराजमुपागमत्। स पर्व्वतगुहां काञ्चित् प्रविश्य श्रमकर्षितः। सुष्वाप कालमेतं वै यावत् कृष्णस्य दर्शनम्। तत् सर्व्वं वासुदेवस्य नारदेन निवेदितम्। वरदानञ्च देवेभ्यस्तेजस्तस्य च भूपतेः। कृष्णोऽनुगम्यमानश्च तेन म्लेच्छेन शत्रुणा। तां गुहां मुचुकुन्दस्य प्रविवेश विनीतवत्। शिरःस्थाने तु राजर्षेर्मुचुकुन्दस्य केशवः। सन्दर्शनपथं त्यक्त्वा तस्थौ बुद्धिमतां वरः। अनुप्रविश्य यवनो ददर्श पृथिवीपतिम्। स तं सुप्तं कृतान्ताभमाससाद सुदुर्म्मतिः। वासुदेवन्तु तं मत्वा घट्टयामास पार्थिवम्। पादेन पादमाक्रम्य पादस्पर्शप्रबोधितः। चुकोप निद्राच्छेदेन पादस्पर्शेन तेन च। स संस्मृत्य वरं शक्रादवैक्षत तमग्रतः। स दृष्टमात्रः क्रुद्धेन स प्रजज्वाल सर्व्वतः। ददाह पावकस्तन्तु शुष्कं वृक्षमिवाशनिः। क्षणेन कालयवनं नेत्रतेजोविनिर्गतः" हरि० ११५ अ०। तद्वधकथा

कालयापन न० कालस्य यापनमतिवाहनम्। कालक्षेपणे

कालयुक्त पु० प्रभवादिषष्टिसंवत्सरान्तर्गते १द्वापञ्चाशत्तमे वत्सरभेदे प्रभवादिवर्षानयनं ज्यो० त० उक्तं यथा "शकेन्द्रकालः पृथगाकृति २२ घ्नः शशाङ्कनन्दाश्वियुगैः ४२९१ समेतः। शराद्रिवस्विन्दु १८७५ हृतः स लब्धः षष्ट्यावशिष्टाः प्रभवादयोऽब्दाः। वर्षवर्ज्जन्तु यच्छेषं सूर्य्यैः १२ संपूर्य्य खोर्मिभिः ६०। हृतो व्युत्क्रमतः खाग्नि३० हृतेऽंशे मासकादयः" अस्यार्थः। शाकेन्द्रकालः शकराजाब्दकालः पृथक् आकृतिघ्नः द्वाविंशत्या पूरितः शशाङ्कनन्दाश्वियुगैरेकनवत्यधिकशतद्वयाधिकचतुःसहस्रैः समेतोऽङ्कः शराद्रिवस्विन्दुहृतः पञ्चसप्तत्यधिकाष्टादशशतैर्यावत्संख्यं हर्त्तुं शक्यते तावता हृतः कर्त्तव्यः स लब्धः पूर्व्वशकाब्दः शरेत्यादिना लब्धसंख्यया युतः कार्य्यः षष्ट्याप्तावशेषे पूर्व्ववत् षष्ट्याहृतलब्धस्यावशिष्टे प्रभवादयः एकावशेषे प्रभवः द्व्याद्यवशिष्टे विभवादिः। वर्षवर्ज्जन्तु यच्छेषं वर्षातिरिक्तं शराद्रिवस्विन्दुहृतावशिष्टं तत् सूर्य्यैः द्वादशभिः संपूर्य्य खोर्म्मिभिः षष्ट्या हृते व्युत्क्रमत इत्यनेन षष्टिहृतावशिष्टः अङ्कादङ्काः षष्टिहृतलब्धांशके खाग्निहृते त्रिंशता हृतावशिष्टा अंशकालब्धा मासाः स्युरिति। प्रभवादिवर्षोत्पत्त्युपक्रम्य "आद्या तु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता। तृतीया रुद्रदैवत्या दृष्टा मध्याधमा भवेत्' इत्युक्त्वा तत्फलमुक्तं भविष्य पु० यथा "गोमहिष्यो विनश्यन्ति ये चान्ये नटनर्त्तकाः। वासवो वर्षते देवि! शस्यञ्च नु हि कायते। तिलसर्षपमाषादिकार्पासानां महार्घता। गोमहिष्यः सुवर्णानि कस्तूराण्यशेषतः। तत् सर्व्वं देवि! विक्रीय कर्त्तव्यो धान्यसञ्चयः। तेन धान्येन लोकोऽयं निस्तरिष्यति दुर्विनम्। पार्थिवा मेघ-

का दीनाः कालयुके प्रपीड़िताः ५२ वर्षफलकथने। २ त०। २कालेन कालधर्म्मेण मृत्युना युक्ते च त्रि०

कालयोग पु० ६प०। कालसम्बन्धे। "महता कालयोगेन प्रकृतिं यास्यतेऽसुवः" भा० व० १०अ०। कर्म्म० जप्रो०उक्ते कालरूपे योगभेदे च कालशब्दे विवृतिः।

कालयोगिन् पु० त्रि० कालएव योगोऽस्त्यस्य इनि ११ शिवे। "कालयोगी महानादः सर्व्वकामश्चतुष्पथः" भा०आनु० १७अ०। शिवसहस्रनामोक्तौ। २ कालसम्बद्धे त्रि०।

कालरात्रि स्त्री काली रात्रिरिव कालस्य खण्डकालस्य रात्रिरिव अप्रकाशकत्वात्। १ प्रलयरात्रौ २प्रलयकाले तत्र सर्व्वचेष्टाराहित्यात् तथात्वम्। "यदा स देवो जागर्त्ति तदेदं चेष्टते जगत्। यदा स्वपिति शान्तात्मा तदा सर्वं प्रलीयते" इति मनुना प्रलयकाले सर्व्वचेष्टाराहित्योक्तेस्तत्कालस्य रात्रिरूपत्वम्। ३दुर्गामूर्त्तिभेदे सा च "कालरात्रिमथोवक्ष्ये सपत्नगणसूदनीम्" इत्युपक्रम्य मन्त्रमहोदधौ१८तरङ्गे उक्ता, तत्रैव तस्या मन्त्रपूजादिकं दृश्यम्। "शक्तिभिःसहिता दुर्गा काशीं रक्षति सर्व्वतः। ताः प्रयत्नेन संपूज्याः कालरात्रिमुखा नरैः" काशीख० "कालरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा" देवीमा० व्याख्यातश्चैतद् गुप्तवत्या यथा "कालरात्रिः सर्व्वजन्तुमरणोपलक्षिता कल्परात्रिः। महारात्रिः ब्रह्मलयोपलक्षिता महाप्रलयरात्रिः, मोहरात्रिः मोहावर्त्तगर्त्तपातिनी महामायाख्या संहृतिकर्त्री, यद्वा दैनन्दिनप्रलयब्रह्मप्रलयमोक्षरूपमहाप्रलयरूपरात्रय इति पदत्रयस्यार्थः। ४तत्प्रतिपादकमन्त्रभेदे च अभेदोपचारात् स च मन्त्रः बह्वृचपन्थे रात्रिसूक्तत्वेन प्रसिद्धः। सामभेदे च "रात्रिं प्रपद्ये" इत्यादिः।

५ भीमरथ्याम् (अतिवृद्धवयस्के) हारा०। सर्वप्राणिनाशिकायां ६ यमभगिन्यां भावप्र०। ७ दीपान्विताभावस्यायाम् "दीपावली तु या प्रोक्ता कालरात्रिश्च सा मता" इत्यागमोक्तेः।

कालरुद्र पु० कालरूपो रुद्रः। कालरूपप्रलयाग्निरूपे रुद्रभेदे "याः पुरः कालरुद्रस्य नानास्त्रीशतसङ्कुलाः। विचित्रहर्म्यविन्यासाः कृतस्ता मेरुपृष्ठतः। ताएव कालरुद्रस्य तनुरूपेण संस्थिताः। या परा शिवरूपेण परमा पददायिका। तस्या यद्दुःसहं तेजो ब्रह्मादीनां भयङ्करम्। तं विद्धि कालरुद्रेति सौम्यरूपं सदाशिवम्। कालाग्निव्यसनं (व्यासः) लक्षं योजनानां प्रमाणतः। अर्द्धेनोच्छ्रयतस्तस्य पादः पादेन भासते। सिंहरूपा महाघोरा महानक्रमहाबलाः। कालाग्निरुद्ररूपो योगरूढरूपसमावृतः। अनन्तपद्मरूपश्च धातुश्च कारणेश्वरः। दारुणाग्निश्च रुद्रश्च यमहन्ता भयान्तकः" देवीपु०। कालाग्निरुद्रोऽप्यत्र

कालल त्रि० कालः कालकं चिह्नभेदः अस्त्यस्य सिध्मा० लच्। कालकचिह्नयुक्ते त्रिका०।

काललवण न० नि० कर्म्म०। विड्लवणे रत्नमा०। "रोचनं तीक्ष्णमुष्णञ्च विडं वातानुलोमनम्" सुश्रुते तद्गुणा उक्ताः। "विड़ं पाकञ्च कृतकं तथा द्राविड़माक्षरम्। विड़ं सक्षारमुष्णञ्च कफवातानुलोमनम्"। ऊर्द्ध्वं कफमधो वातं सञ्चारयतीत्यर्थः। "दीपनं लघु तीक्ष्णोष्णं रूक्षं रुच्यं व्यवायि च। विबन्धानाहविष्टम्भहृद्रुग्गौरवशूलनुत्" भावप्र० तत्पर्य्यायगुणाः

काललोचन पु० १ दानवभेदे। "प्रलम्बो नरको बाली खरूपः काललोचनः" हरिवं० २४०अ० दानवोक्तौ। कर्म्म०। २ कृष्णे लोचने न० ब० व०। ३ तद्युक्ते त्रि०

काललोह न० नि० कर्म्म०। कृष्णायसे रत्नमा० लोहस्योत्पत्तिलक्षणगुणा भावप्र० उक्ता यथा "पुरा लोमिनदैत्यानां निहतानां सुरैर्युधि। उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च। लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी। गुरुता दृढ़तोत्क्लेदः कश्मलं दाहकारिता। अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्तु ये। लोहं तिक्तं सरं शीतं मधुरं तुवरं गुरु। रूक्षं वयस्यं चक्षुष्यं लेखनं वातलं जयेत्। कफं पित्तं गरं शूलं शोथार्शःप्लीहपाण्डुताः। मेदोमेहौ क्रमीन् कुष्ठं, तत्किट्टं तद्वदेव हि। पाण्डुत्वकुष्ठामयमृत्युदं भवेत् हृद्रोगशूलौ कुरुतेऽश्मरीञ्च। नानारुजानाञ्च तथा प्रकोपं करोति हृल्लासमशुद्धलोहम्। जीवहारि मदकारि चायसं देहशुद्धिमदसंस्कृतं ध्रुवम्। पाटवं न तनुते शरीरके दारुणां हृदि रुजाञ्च यच्छति। कुष्माण्डं तिलतैलञ्च माषान्नं राजिकां तथा। मद्यमम्लरसञ्चापि त्यजेल्लोहस्य सेवकः"।

कालवृन्त पु० कालं कृष्णं वृन्तमस्य। कुलत्थवृक्षे रत्नमा०गौरा० ङीष्। कालवृन्ती पाटलावृक्षे स्त्री राजनि०।

कालवेला स्त्री कालस्य शनेः वेला कालभेदः। रव्यादिवारेषु दिवानिशोरर्द्धयामभेदे सच अर्द्धयामाशब्दे३७६पृ० उक्तः तत्फलमाह वसिष्ठः "निधनं प्रहरार्द्धे तु

निःस्वत्वं यमघण्टके । कुलिके सर्व्वनाशः स्यात् रात्रावेते न दोषदाः” । ततश्चार्द्धयामकुपकालवेलायाः रात्रावपि सम्भवेन तस्य रात्रौ दोषाभावोक्तिः वारविशेषविषया तदुक्तं ज्योतिर्निबन्धे “न वारदोषाः प्रभवन्ति रात्रौ देवेज्यदैत्येन्द्रदिवाकराणाम्। दिवा शशाङ्कार्कजभूसुतानां सर्वत्र निन्द्यो बुधवारदोषः” । तस्याः सर्वदेशे वर्जनीयतामाह गर्गः “विन्ध्यस्योत्तरकूले तु यावदाहिमाचलम् । यमघण्टकदोषोऽस्ति नान्यदेशे तु विद्यते । मत्स्याङ्गमागधान्ध्रेषु यमघण्टस्तु दोषकृत् । काश्मीरे कुलिकं दुष्टमर्द्धयामस्तु सर्व्वतः” । विन्ध्योत्तरकूलाद्यन्तर्गतत्वात् मत्स्यादीनां पृथगुक्तिः ।

कालशाक न० नि० कर्म० । स्वनामख्याते(नरिचा)हिन्दी भाषाप्रसिद्धे श्राद्धशाके भावप्र० । “नाडिकं कालशाकञ्च श्राद्धशाकञ्च कालकमिति” तत्पर्य्यायमुक्त्वा “कालशाकं सरं रुच्यं वातकृत् कफशोथहृत् । बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमम्” तद्गुणाद्युक्तम् । रुच्यं रुचये दीप्तये हितमित्यर्थः । मेध्यं श्राद्धदेयत्वेन पवित्रम् यथाह हारीतः “कालशाकञ्च शाकूकं मूलकं कृष्णनालिकाम् । वेत्राङ्कुरं कलायञ्च (मटर) पटोलं सर्षपं तथा । सूर्य्यावर्त्तं सुनिषण्णं शाकान्याहुर्मनीषिणः” ।

कालशालि पु० नि० कर्म० । कृष्णव्रीहौ धान्यभेदे राजनि० कृष्णव्रीहि-शालामुख-जतुमुख-नन्दीमुख-लावाक्षक-त्वरितक-कुक्कुटाण्डक-पारावतकपाटप्रभृतयो व्रीहयः। कषायमधुराः पाके मधुरा वीर्य्यतो हिमाः । अल्पाभिष्यन्दिनस्तुल्याः षष्टिकैर्बद्धवर्चसः । कृष्णव्रीहिर्वरस्तेषां कषायानुरसो लघुः । तस्मादल्पान्तरगुणाः क्रमशो व्रीहयोऽपरे । दग्धायामवनौ जाताः शालयो लघुपाकिनः । कषाया बद्धविण्मूत्रा रूक्षाः श्लेष्मापकर्षणाः”सुश्रुतः। तल्लक्षणमुक्तं भावप्र० कृष्णव्रीहिः स विज्ञेयो यः कृष्णतुषतण्डुलः” ।

कालशे(से)य न० कलश्याम्(स्याम्) भवः ढक् । तक्रे अम०

कालशैल पु० नि० कर्म० । पर्वतभेदे तत्स्थानादि भा० व०१२८अ०“उक्तं यथा “उशीरवीजं मैनाकं गिरिं श्वेतञ्च भारत! । समतीतोऽसि कौन्तेय। कालशैलञ्च पार्थिव!। एषा गङ्गा सप्तविधा राजते भरतर्षभ ! । स्थानं विरजसं पुण्यं यत्राग्निर्नित्यमिध्यते । एतद्वै मानुषेणाद्य न शक्यं द्रष्टुमद्भुतम् । समाधिं कुरुताव्यग्रास्तीर्थान्येतानि द्रक्ष्यथ । एतद्द्रक्ष्यति देवानामाक्रीडं चरणाङ्कितम् । अतिक्रान्तोऽसि कौन्तेय ! कालशैलञ्च पर्वतम्” ।

कालसंरोध पु० ६ त० । १चिरकालावस्थाने । “नष्टाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः” मनुः ।“कालसंरोधः चिरावस्थानम्” कुल्लू० । २त० । २ कालेन रोधे च

कालसङ्कर्षा न० कालेन सङ्कृष्यतेऽसौ सम्–कृष–कर्मणि-घञ् । नववर्षीयां कुमार्य्याम् । “एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती । त्रिवर्षा तु त्रिमूर्त्तिश्च चतुर्वर्षा तु कालिका । सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत् । सप्तभिर्मालिनी साक्षादष्टवर्षा च कुब्जिका । नवभिः कालसङ्कर्षा दशभिश्चापराजिता । एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी । त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका । क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका मता । एवं क्रमेण संपुज्या यावत् पुष्पं न जायते । पुष्पितापि च सम्पूज्या तत्पुष्पादानकर्म्मणि” अन्नदाकल्पः ।

कालसर्प पुंस्त्री नि० क० । कृष्णसर्पे त्रिका० स्त्रियां संयोगोपधत्वात् टाप् । पुंयोगे तु ङीष् ।

कालसार पुंस्त्री० कालः कृष्णवर्णः सारः प्रधानमस्य । कृष्णसारे मृगे शब्दर० स्त्रियां जातित्वात् ङीष् । तल्लक्षणं कृष्णसारशब्दे दृश्यम् २पीतचन्दने कालानुसार्य्ये न० भावप्र० । तस्य गुणादि कालानुसार्य्यशब्दे दृश्यम् । “कालसाराजकर्णखदिरकदरकालस्कन्धेत्यादि”सुश्रु०।

कालसाह्वय न० कालेन समानः आह्वयोऽस्य । कालसूत्राख्ये नरकभेदे “यो मनुष्यः स्वकं पुत्रं विक्रीय धनमिच्छति । कन्यां वा जीवितार्थाय यः शुल्केन प्रयच्छति । सप्तावरे महाघोरे निरये कालसाह्वये । स्वेदं मूत्रं पुरीषञ्च तस्मिन् मूढः समश्नुते” भा० आनु० ४५अ० ।

कालसूत्र न० कालस्य यमस्य सूत्रमिव बन्धनहेतुत्वात् । १ नरकभेदे भाग० ५, २६अ० “तामिस्रोऽन्धतामिस्रः” इत्यादिनरकभेदोक्तौ “रौरवः कुम्भीपाकः कालसूत्रम्” इत्यादिना तद्भेदानुक्त्वा “यस्त्विह ब्रह्मध्रुक् स कालसूत्रसंज्ञके नरके अयुतयोजनपरिमण्डले ताम्रमये तप्तखले उपर्य्यधस्तादग्न्यर्काभ्यामभितप्यमानोऽभिनिवेशितः क्षुत्पिपासाभ्यां दह्यमानान्तर्बहिःशरीर आस्ते चेष्टते अवतिष्ठते परिधावति च यावन्ति पशुरोमाणि तावद्वर्षसहस्राणि” इति लक्षितम् । “कालसाह्वयशब्ददर्शितभारतवाक्ये ऽन्योऽपि तद्धेतुरुक्तो मनुना तु “श्राद्धं भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति । स मूढो नरकं याति कालसूत्रमवाक्शिराः” इत्यन्योऽपि तद्धेतुर्विशिष्योक्तः सामान्यतस्तु एकविंशतिनरकहेतु-

रन्यायवर्त्तिराजप्रतिग्रह एव मनुना “यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्त्तिनः। स पर्य्यायेण यातीमान्नरकानेकविंशतिम्। तामिस्रमन्धतामिस्रम्” इत्युपक्रम्य “नरकं कालसूत्रञ्च महानरकमेव च” इत्यादिना एकविंशतिनरकहेतुत्वोक्तेः। कालस्य मृत्योः सूत्रमिव। २मृत्युहेतुसूत्रे “यद्विशोऽयं त्वया पाशः कालसूत्रेण लाम्बितः” भा० व०११४९०श्लो०।

कालस्कन्ध पु० कालः कृष्णः स्कन्धोऽस्य। १तमालवृक्षे २तिन्दुकवृक्षे (तेँद) ३जीवकवृक्षे (जिब्रोल) मेदि०। ४दुग्धखदिरे ५ उदुम्बरे च राजनि०। ६त०। ६कालावयवभेदे

कालहर पु० कालं मृत्युं हरति हृ—टच्। १शिवे २कामरूपान्तर्गते तल्लिङ्गभेदे च। “तस्मात् पूर्व्वं भद्रकामः पर्व्वतस्तु त्रिकोणकः। यत्र कालहरोनाम शिवलिङ्गं व्यवस्थितम्” कालि०पु०७८अ०।३समयहरे त्रि०स्त्रियांङीप्

कालहानि स्त्री ६ त०। विलम्बे शब्दचि०

कालहीन पु०कालेन कृष्णवर्णेन हीनः। लोध्रे शब्दचि०।

कालहोरा स्त्री कर्म० कालभेदे होरा। १षड्होरात्नोदितद्वादशलग्नार्द्धरूपहोरायां २समयभेदे च तत्तदीशितुराश्रयनम् मुहूर्त्तचि० यथा

“वारादेर्घटिका द्विघ्नाः स्वाक्षघ्न्यो शरवर्जिताः। शेषाः सप्त नगैः कालहोरेशा दिनपात्क्रमात्” मु० चि०।

“वारादेरिति वारप्रवृत्तिप्रकारेण यस्मिन् क्षणे वारप्रवृत्तिर्जाता तत इष्टघटिकाद्विगुणाः कार्य्यास्ता द्विस्थाने स्थाप्याः तत्र पञ्चभिर्भक्ते यल्लब्धं तत्त्याज्यं यच्छेषं तत् द्विगुणघटीमध्ये वर्जितं कार्य्यम्। एवं विधःवध्यःशेषा एकयुक्ताः कार्य्यास्ततोनगैः सप्तभिस्तष्टाभक्ता अवशिष्टाः कालहोराः स्युस्तादिनपाद्वारात् क्रमाद्गणनीयाः। यथा रविवारे इष्टघटिकाः षट् ६ द्विगुणाः १२ पृथगपञ्चमांशेन २ वर्जिताः १० नगैस्तष्टाः शेषं ३ सैकं ४ रविवार क्रमगणनया चतुर्थो बुधस्तस्य होरा यथाह वसिष्ठः “वारप्रवृत्तेर्गदितादिनेशात्कालाख्यहोरापतयः क्रमेण। सार्द्धेन नाडीद्वितयेन षष्ठः षष्ठस्य षष्ठश्च पुनःपुनः स्यात्” तथा हतेऽहोरात्रे चतुर्विंशतिः कालहोरा भवन्ति मत्रानुपातः यदि घटिकानां षष्ट्या ६० चतुर्विंशतिर्होरा २४ लभ्यन्ते तदा एकया किमिति फलैकेन गुणे विशेषाभावाच्चतुर्विंशतिः छेदः षष्टिर्जातः उभयोर्द्वादशापवर्त्ते इष्टघटिकाद्विगुणाः पञ्चभक्ताः कालहोराः स्युरिति। तथाचोक्तं रत्नमालायाम् “वारप्रवृत्तेर्घटिकाद्विनिघ्नाः कालाख्यहोरापतयः शराप्ताः। दिनाधिपाद्यारविशुक्रसौम्यशशाङ्कसौरेज्यकुजाः क्रमेण” अथ पञ्च हतोऽह्नौ वासना सार्द्धघटीद्वयेनैका होरा द्विगुणिताः सार्द्धद्विघट्यः पञ्च भवन्ति। अतएवोक्तं “वारादेर्घटिका द्विघ्ना” इति एकयोगे षट् जाता एवं रविवारक्रमेण गणनया द्वितीया शुक्रस्य कालहोरा प्रवृत्ता अतउक्तं सैका इति। भवन्मतेऽपि सूर्य्यात् षष्ठः शुक्रस्तस्यैव होरा इयञ्च शुक्रहोरा पञ्चघटीपर्य्यन्तं स्वमते इष्टघटिकाः ४द्विगुणाः ८ अत्र पञ्चभ्य आधिक्यमनुचितमिति द्वितीयस्थाने स्थापयित्वा पञ्चभक्तावशिष्टत्रयेणोनाः पञ्च जाताः अत उक्तं स्वाक्षघ्न्यो शरवर्ज्जिता इति। एकयोगे षट् एवं सति पुनः सैव होरा एवमिष्टघटीभिः कालहोराऽऽनयनं सुगमम्। वाराणां सप्तसंख्यात्वात्तदाधिक्यमनुचितमिति नगैस्तष्टा इत्युक्तम्। क्रमगणनायान्त्वियं युक्तिः द्वयोर्होरास्वामिनोरन्तरं पञ्च सम्भवति। एकयोगस्तु वर्त्तमानकालहोराज्ञानार्थमतो रविक्रमगणनया भवद्विवक्षिता सैव होरा भवति। विवाहवृन्दावने तु कालहोरा उदयमारभ्योक्ताः यथा “तत्कालार्कन्यूनलग्नांशपिण्डोभक्ताः पञ्चघ्नैर्भिर्भुक्तहोराः। भास्वच्छुक्रज्ञेन्दुसौरेज्यभौमा संख्यायैरन्वारतास्ते तदीशाः” अनयोर्विषयविभागो वसिष्ठसंहितायाम् “वारप्रवृत्तेर्विधानं क्षणवारार्थमेव हि। अखिलेष्वन्यकार्येषु दिनादिरुदयाद्भवेत्”। क्षणवारः कालहोरारूपः तदर्थं वारप्रवृत्तिः, अन्यकार्येषु दिक्शूलादिषु तिथिवारप्रयुक्तेषु नक्षत्रवारप्रयुक्तेषु चायोगेषु सुयोगेषु च सूर्योदयादेव वारा ग्राह्याः” पी०धा०। “वारे प्रोक्तं कालहोरासु तस्य धिष्ण्ये प्रोक्तं स्वामितिथ्यंशकेऽस्य” मु०।

“अथ कालहोराप्रयोजनमन्यच्च शालिन्याह। वारे प्रोक्तमिति। यत्कर्म यस्मिन् वारे प्रोक्तं तद्दिनस्य सदोषत्वेऽत्यावश्यकत्वे तस्य कालहोरायां कर्त्तव्यं यदाह नारदः “यस्य खेटस्य यत्कर्म वारे प्रोक्तं विधीयते। तद्ग्रहस्य क्षणवारेऽपि तस्य तत्कर्म सर्वदा”। अत्र केचित् यस्य वारे यत्कर्म प्रोक्तं तस्य बलिनो नवांशे सूर्यश्चन्द्रोवा चेत्तिष्ठेत् तदा तत्कर्म कार्यमित्याहुः उक्तञ्च “यस्य ग्रहदिने कर्म यत्किञ्चिदभिधीयते। तदंशसंस्थिते सूर्ये चन्द्रे वा तद्विधीयते” इति। केचित् प्रत्येकं होराफलान्युक्तानि “भानुहोरा मृतिं कुर्याच्चन्द्रहोरा स्थिरासनम्। काराबन्धं भौमहोरा बुधहोरा च पुत्रदा। वस्त्रालङ्कारदा जीवहोरा

शोक्ती शिवाह्वदा। जकत्वं शनिहोरायां सप्तहोराफलं स्मृतम्" उदयकाले यदा होरा तदा उदयादारभ्य होरानयनप्रयोजनन्तु "पादः स्ववर्षे चदलं स्वमासे दिने स्वकीये चरणोनरूपम्। रूपं स्वहोरास्विति कालवीर्यमुक्तं हि होरानिपुणैः पुराणैरिति"। युक्तं चैतत् वर्षेशादीनां उदयादितः प्रवृत्तानां साहचर्याद्वारेण अभ्युदयादेव गणनीयाः" पी०धा०।

काला स्त्री कालोवर्णोऽस्त्यस्य-अर्श०अच्। "कालात् वर्णेषु" वार्त्ति० कालशब्दस्यैव वर्णवाचित्वे ङीष् इह तु अर्श आद्यजन्तत्वात् न ङीष्। १नीलिन्याम् २कृष्णत्रिवृतायां (कालतेओड़ी) ३कृष्णजीरके च अमरः फर परत्वेऽपि हरी० स्त्री। कल-विक्षेपे णिच्-पचाद्यच्। ४मञ्जिष्ठायां मेदि० ५कुलिकवृक्षे (कुलियाखाड़ा) रत्नमा०। ६अश्वगन्धावृक्षे राजनि० ७पाटलावृक्षे भावप्र०। ८दक्षप्रजापतिकन्यारूपे कश्यपपत्नीभेदे। "प्रजापतेर्महाभाग! दक्षकन्यास्त्रयोदश॥ अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा" इत्यादिना भा० आ० ६५अ० ताः उक्ताः "कालायाः प्रथिताः पुत्राः कालकल्पाः प्रहारिणः। प्रथितप्राता महावीर्या दानवेषु परन्तपाः। विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च। क्रोधशत्रुस्तथैवान्ये कालकेया इति श्रुताः" कालाया अपत्यम् ढक्। कालेय तदपत्ये [लवभेदे कालशब्दे विवृतिः

कालांश पु० कालरूपोऽंशः। पक्षाणां दृश्यतायस्तैग्ये काल-

कालाक्षरिक स्त्री काले यथायोग्यकाले अक्षरं वेत्ति ठक्। शिक्षिताक्षरे त्रिका०।

कालागुरु न० कर्म०। कृष्णागुरुणि अमरः तद्गुणादि भावप्र० उक्तं यथा "अगुरु प्रवरं लौहं राजार्हं योगजं तथा। वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम्। अगुरूष्णं कटु त्वच्यं तिक्तं तीक्ष्णञ्च पित्तलम्। लघु कर्णशिरोरोगघ्नं शीतवातकफप्रणुत्। कृष्णं गुणाधिकं तत्तु लौहवद्वारि मज्जति। अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः"। तदुत्पत्तिदेशश्च प्राग्ज्योतिषदेशः यथाह रघौ "चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः। तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः"।

कालाग्नि पु० कालः सर्वहिंसकोऽग्निः। १प्रलयाग्नौ। कालानलप्रभृतयोऽप्यत्र २तदधिष्ठातरि रुद्रे ३तत्प्रिये पञ्चमुखे रुद्राक्षे। "पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः। अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्। मुच्यते सर्वपापेभ्यः पञ्चवक्त्रस्य धारणात्" ति०त० स्कन्दपु० रुद्रपरत्वे कालरुद्रशब्दे उदा० दृश्यम्।

कालाग्निरुद्र पु० कालाग्निरिव रुद्रः। सर्वहारके प्रलयाग्नितुल्ये रुद्रे तमधिकृत्यैव कालाग्निरुद्रोपनिषत् प्रवृत्ता। अभेदोपचारात् तदुपासके २ऋषिभेदे वैदिकमन्त्राणां बहूनां तद्दृष्टत्वात् तदार्षत्वम् कात्या० सर्वानुक्रमिकायामुक्तम्।

कालाङ्ग न० ६त०। १कालपुरुषस्याङ्गे। कालपुरुषशब्दे प्रमाणादि। कर्म०। २कृष्णवर्णदेहे न० कालमङ्गं यस्य। ३कृष्णवर्णाङ्गयुक्ते त्रि० "असिञ्च कालाङ्गमकोशमव्रणम्" भा० वि०७अ०।

कालाजिन न० कालस्य कृष्णमृगस्याजिनम्। १कृष्णसारमृगचर्मणि "कालमजिनं यत्र। २कालाजिनप्रधाने देशभेदे स च देशो वृह०सं०कूर्म्मविभागे दक्षिणस्यामुक्तः यथा "अथ दक्षिणेन लङ्काकालाजिनसौरिकीर्णतालिकटाः"।

कालाञ्जन न० कालमञ्जनम्। कृष्णवर्णाधिक्ययुक्ते अञ्जनभेदे (काजल) "न चक्षुषोः कान्तिविशेषबुद्ध्या कालाञ्जनं मङ्गलमित्युपात्तम्" कुमा०।

कालाञ्जनी स्त्री अज्यते अनया अन्ज-करणे-ल्युट् ङीप् काली अञ्जनी पुंवद्भावः। रेचन्यां क्षुपभेदे राजनि०

कालाण्डज पुं स्त्री० नि० कर्म०। कोकिले तस्याण्डजेषु (पक्षिषु) अतिकृष्णत्वात् तथात्वम्। "कालाण्डजकण्ठरागरक्तरक्ताधरारतिरणाप्रमत्ताहशालिनि" दशक० स्त्रियां जातित्वात् ङीष्।

कालातिरेक पु० ६त०। उचितसमयातिक्रमे संवत्सरातिरेके च। "कालातिरेके द्विगुणम् प्रायश्चित्तं समाचरेत्" प्रा०त० देवलः। कालातिरेके संवत्सरातिक्रमे- "संवत्सराभिशस्तस्य दुष्टस्य द्विगुणोदमः" इति मनुवचनैकवाक्यत्वात् दण्डवत्प्रायश्चित्तानि भवन्तीति न्यायात् कालातिक्रमकालात्ययादिकमप्यत्र "कालात्यये च कन्यायाः कालदोषो न विद्यते" उद्वा० त० भुजबलः।

कालातीत न० कालस्यातीतमत्ययः अति+इण-भावे क्त ६त०। १कालातिक्रमे। "कालातीते वृथा सन्ध्या वन्ध्यस्त्रीमैथुनं यथा" म०त० काशी०। अतीतः कालोऽस्य निष्ठान्तत्वात् परनिपातः २अतिक्रान्तकाले त्रि०। गौतमोक्ते कालात्ययापदिष्टाख्ये बाधरूपे ३हेत्वाभासभेदे कालात्ययापदिष्टशब्दे विवृतिः।

कालात्मन् पु० कालश्चात्मास्य। कालस्वरूपे परमेश्वरे। "कालात्मा कालकृद्विभुः"॥ह० शि०॥ वा कप्। कालात्मकोऽप्यत्र। कालेन तन्मृत आत्मा स्वरूपं यस्य वा कप्। २ कालकृतस्वभावके स्थावरजङ्गमादौ त्रि० "सात्त्विका राजसाश्चैव तामसा ये च केचन। भावा कालात्मकाः सर्वे प्रवर्त्तन्ते हि जन्तुषु। जङ्गमाः स्थावराश्चैव दिवि वा यदि वा भुवि। सर्वे कालात्मकाः सर्प! कालात्मकमिदं जगत्। प्रवृत्तयश्च लोकेऽस्मिंस्तथैव च निवृत्तयः। तासां विकृततायाश्च सर्व्वं कालात्मकं स्मृतम्। भा०आनु० १अ०

कालात्ययापदिष्ट पु० कालात्ययेनापदिष्टः ३ त० गौतमोक्ते हेत्वाभासभेदरूपे हेतुदोषे तल्लक्षणादिकं गौ० सू० भाष्यादौ दर्शितम् यथा

"कालात्ययापदिष्टः कालातीतः" सू०

"कालात्ययेन युक्तो यस्यार्थस्यैकदेशोऽपदिश्यमानः स कालात्ययापदिष्टः कालातीत इत्युच्यते। निदर्शनम्। नित्यःशब्दः संयोगव्यङ्ग्यत्वात् रूपवत्, प्रागूर्द्ध्वञ्च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन व्यज्यते तथा च शब्दोऽप्यवस्थितो भेरीदण्डसंयोगेन व्यज्यते दारुपरशुसंयोगेन वा। तस्मात् संयोगव्यङ्ग्यत्वात् नित्यःशब्द इत्ययमहेतुः कालात्ययापदेशात् व्यञ्जकस्य संयोगस्य कालं न व्यङ्ग्यस्य रूपस्य व्यक्तिरत्येति सति प्रदीपघटसंयोगे रूपस्य ग्रहणं भवति न निवृत्ते संयोगे रूपं गृह्यते, निवृत्ते दारुपरशुसंयोगे दूरस्थेन शब्दःश्रूयते। विभागकाले सेयं शब्दव्यक्तिः संयोगकालमत्येतीति न संयोगनिर्मिता भवति। कस्मात्? कारणाभावाद्धि कार्य्याभाव इति। एवमुदाहरणसाधर्म्यस्याभावादसाधनमयं हेतुर्हेत्वाभास इति"। भा०। उक्तसूत्रं वृत्तौ त्वेवं व्याख्यातं यथा।

"क्रमप्राप्तमतीतकालं लक्षयति। अतीतकालस्य समानार्थकत्वात् कालातीतशब्देनोक्तकालस्य साधनकालस्यात्ययेऽभावेऽपदिष्टः प्रयुक्तो हेतुः एतेन साध्याभावप्रमालक्षणार्थ इति सूचितं साध्याभावनिर्णये साधनासम्भवादयमेव बाधितसाध्यक इति गीयते। तथा वह्निरनुष्णः कृतकत्वादित्यादौ। न च बाधे आवश्यकस्य व्यभिचारस्वरूपासिद्ध्यन्यतरस्यैव दोषत्वमुचितमिति वाच्यं तत्प्रतिसन्धानेन बाधस्य दोषत्वावश्यकत्वात् उपाधेयसङ्करेऽप्युपाधेरसङ्करात्। उत्पत्तिकालावच्छिन्नो घटो गन्धवान्, शिखरावच्छिन्नः पर्वतोवह्निमानित्यादावसङ्कराच्च साध्याभाववत्प्रत्यक्षतावच्छेदकावच्छिन्नकत्वस्य तत्र सत्त्वात्। परे तु घटः सकर्तृकः कार्य्यत्वादित्यादौ यत्र लाघवोपनीतमेकमात्रकर्तृकत्वं भासते तत्र तदभावोऽसङ्कीर्णोदाहरणमिति वदन्ति"।

मणिकृता तु बाधत्वेनायं व्यवहृतः तल्लक्षणादिकं तत्रोक्तं यथा

"बाधो न साध्याभाववत्पक्षकत्वं पक्षवृत्त्यभावप्रतियोगिसाध्यकत्वं वा पक्षे साध्याभावज्ञानमात्रस्य प्रमात्वज्ञानं विना अधिकबलत्वाज्ञानेन बाधाभावादिति वक्ष्यते अतएव साध्याभाववत्पक्षवृत्तित्वमपि न, असिद्धिसङ्कीर्णबाधाव्याप्तेश्च। किन्तु साध्याभाववत्त्वप्रमाविषयपक्षकत्वं, प्रमितसाध्याभाववत्पक्षकत्वं, पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वं वेति विवक्षितविवेकेन साध्याभावप्रमैव दोषः सा च प्रमात्वेन ज्ञाता न स्वरूपसती हेत्वाभासत्वात् प्रमात्वज्ञानं विना अधिकबलत्वाभावेनादोषत्वात् अप्रमायामपि प्रमात्वज्ञानेऽनुमितिप्रतिबन्धाच्च"।

"कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा" भाषा०।

कालादर्श पु० कालः कालस्वरूपकर्म्माङ्गत्वादि आदर्श्यतेऽत्र आ+दृश–णिच्–आधारे घञ्। स्मृतिनिबन्धभेदे

कालाध्यक्ष पु० कालानां खण्डकालानामध्यक्षः स्वगत्या प्रवर्त्तनात्। १ सूर्य्ये "कालाध्यक्षः प्रजाध्यक्षो विश्वकर्म्मा तमोनुदः" भा०व० ३०। सूर्य्याष्टोत्तरशतनामकथने। सर्व्वकालप्रवर्त्तके २ परमेश्वरे च।

कालानल पु० कालःसर्व्वसंहारकः अनलः। १ प्रलयाग्नौ "दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसन्निभानि" गीता। २ नृपभेदे "सभानरस्यानुपश्च परमेषुस्तथैव च। सभानरस्य पुत्रस्तु विद्वान् कालानलो नृपः। कालानलस्य धर्म्मज्ञः सृञ्जयोनाम विश्रुतः। सृञ्जयस्याभवत् पुत्रो वीरोराजा पुरञ्जयः"। हरिवं० ३१ अ०

कालानलचक्र न० कालानल इव हिंसकं चक्रम्। नरपतिजयचर्य्योक्ते ऽनिष्टादिज्ञापके चक्रभेदे तद्भेदादिकञ्च चक्रशब्दे वक्ष्यते।

कालानुनादिन् न० कलएव कालः तं, काले वर्षाकाले वा अनुनदति अनु+नद–णिनि। १ भ्रमरे २ चटके ३ कपिञ्जले ४चातके पक्षिणि च मेदि०। स्त्रियां जातित्वात् ङीष्

कालानुसारिवा स्त्री कालेन वर्णेन अनुसृता सारिवा अनुसारिवा। १तगरमूले २शीतलीजटायाञ्च (शिउलीझोप) रत्नमा० तयोः कालवर्णतया सारिवातुल्यत्वात्तथात्वम्।

कालानुसारक न॰ कालं कृष्णवर्णं मृगमदमनुसरति गन्धेन अनु+सृ–ण्वुल्। २ पीतचन्दने कालानुसार्य्यके कालीयके(कलम्बक) भावप्र॰ २ समयानुसारिणि त्रि॰

कालानुसारिन् न॰ कालः मृगमद इवानुसरति गन्धेन दूरतो गच्छति अनु+सृ–णिनि। १ शैलजे गन्धद्रव्यभेदे शब्दरत्ना॰ २ समयानुसारके त्रि॰ स्त्रियां ङीप्।

कालानुसार्य्य न॰ कालो मृगमदो गन्धेनानुसार्य्यो यस्य। तगरभेदे भावप्र॰ (कलम्बक) "कालानुसार्य्यं तगरं कुटिलं नहुषं तथा। अपरं पिण्डतगरं दण्डहस्ती च बार्हिणम्। तगरद्वयमुष्णं स्यात् स्वादु स्निग्धं लघु स्मृतम्। विषाप-स्मारशूलाक्षिरोगदोषत्रयापहम्" तत्रैव तद्गुणादिकमु-क्तम्। बहु॰ वा कप्। कालानुसार्य्यक २ कालीयके शैलजे राजनि॰ ३ शिंशपावृक्षे (शिशु) मेदि॰।

कालान्तर न॰ अन्यः कालः मयू॰ नि॰स॰। १अन्यस्मिन् काले २उत्पत्त्युत्तरकाले "कालान्तरक्षमा" शकु॰। ३सम-यान्तरस्थायिनि च।

कालान्तरविष पुंस्त्री॰ कालान्तरे दंशनकालात् दीर्घकाले विषं विकारकारि यस्य। मूषिके हेम॰ तस्य दंशनाद्दीर्घ-काले विषस्य विकारकारित्वात्तथात्वम् स्त्रियां ङीष्।

कालाप पु॰कालो मृत्युराप्यते यस्मात् आप–अपादाने घञ् ६त॰। १ सर्पभोगे २ राक्षसे पुंस्त्री॰ भरणिः स्त्रियां ङीष्। कलापं व्याकरणभेदं वेत्त्यधीते वा अण्। ३ कलापव्याकरणाभिज्ञे ४तदध्येतरि च त्रि॰। कलापिना वैशम्पायनान्तेवासिभेदेन प्रोक्तमधीयते "कलापिनोऽण्" पा॰ अण् इनोलोपः। ५ कलापिना प्रोक्ताध्येतृषु भूम्नि "उदगुः कठकालापा" सि॰कौ॰। ६ तत्प्रोक्तवेदशाखाभेदे च

कालापक न॰ कालापस्य कलापिना प्रोक्तस्य शाखाभेदस्य धर्म्म आम्नायो वा "चरणाद्धर्म्माम्नाययोः" पा॰ वुञ्। १कलापिप्रोक्तशाखाभेदस्य २ धर्म्मे आम्नाये च

कालाभ्र पु॰ कर्म्म॰। सजले कृष्णवर्णे मेघे सजलस्यैव मेघस्य कालत्वात् तथात्वम् "कालाभ्राभैः कटाक्षैररिकुलभय-दाम्" तन्त्रसा॰। कालमेघादयोऽप्यत्र। ते नर्दमाना इवकालमेघाः" भा॰ आ॰१६३अ॰।

कालाम्र पु॰काल आम्रोयत्र। द्वीपभेदे "कुरून् यात्युत्तरान् वीर! कालाम्रद्वीपमेव च" हरि॰ १५१अ॰।

कालायन त्रि॰ कालेन निर्वृत्तादि पक्षा॰चतुरर्थ्यां फक्। कालनिर्वृत्तादौ।

कालायस न॰ कर्म्म॰ अच् समा॰। कृष्णवर्णे लोहभेदे। काललोहशब्दे दृश्यम्। २लौहमात्रे हेम॰। "वह्निना द्राव्यमाणं कालायसं निषिञ्चन्ति" भाग॰ ५,२६,२७,

कालाशुद्धि स्त्री कालस्य कर्म्मयोग्यसमयस्याशुद्धिः। समयाशुद्धौ कालस्य कर्म्मविशेषानर्हत्वप्रयोजके धर्म्म-भेदे सा च गुरुशुक्रास्तत्वादिकृता भवति। "वक्रातिचार वृद्धास्तबालत्वे गुरुशुक्रयोः। गुरौ मकरसिंहस्थे क्षय मासद्विमासयोः। त्रयोदशदिने पक्षे गुर्व्वादित्ये तथैव च। शुभाब्दे त्रिविधोत्पाते कालाशुद्धिरुदाहृता"। ज्यो॰प्र॰। एतदुपलक्षणम् अन्यान्यपि तन्निमित्तानि तत्तद्ग्रन्थे उक्तानि तत्र कालस्य शास्त्रादेव तत्तत्कर्म्म-साधनत्वेऽवगते शास्त्रेण च कालविशेषस्य पर्य्युदस्तत्वाद-शुद्धत्वम्। "द्रव्यक्रियागुणादीनां धर्म्मत्वं स्थापयि-ष्यते। तेषामैन्द्रियकत्वेऽपि न ताद्रूप्येण धर्म्मता। श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रमीयते" भट्टवार्त्ति-कोक्तेः तस्य पुण्यत्वं तच्च रिक्तादिदोषराहित्ये अष्टमचन्द्रा-दिदोषराहित्ये मलमासादिराहित्ये च भवति अतस्तेषां पर्य्युदासात् कर्म्मविशेषे कालाशुद्धिः। तन्निमित्तज्ञापकश्च रत्नाकरादिधृतं न्यायरत्नवाक्यम् म॰तत्त्वे यथा "तत्र मलिम्लुच–गुरुशुक्रबाल्यवृद्धास्तमय–सिंहमकरान्य-तरगुरुस्थिति–पूर्वराश्यनागतातिचारिगुरुकवत्सर–पूर्व-राशिगमिष्यमाणातिचारिगुरुकपक्षत्रय–वक्रिगुरुकाष्टाविं-शतिवासर–कम्पाद्यद्भुतोत्तरसप्ताह–सिंहादित्य–गुर्वा-दित्य–पौषादिमासचतुष्टयान्यतमैकद्वित्रितदधिकान्यतम-दिनवृत्त्प्राकालिकवृष्ट्युत्तरैकत्रिसप्ताहान्यतमदिन–नि-षिद्धरूपसमयान्यत्वमिति"। म॰त॰"एषु प्रमाणं वक्ष्यामः। अत्र नव्यवर्द्धमानः "एकद्वित्रितदधिकान्यतमदिनवृत्तप्रा-कालिकवृष्ट्युत्तरैकत्रिसप्ताहेत्यत्र उत्तरदिनत्वस्य पूर्व-दिननिरूप्यत्वात् उत्तरत्वपूर्वत्वयोर्विरुद्धतया नानात्वात्। अतोऽप्यिमदिनादित्वप्राप्तिरिति" जीवमिश्रेणाभिहि-तम्। नचैकमेकदिनं वृष्ट्यवच्छेदानवच्छेदाभ्यां भिन्नमिति वाच्यं विशेष्यीभूतदिनस्यैकत्वेन प्रत्यभिज्ञानविरोधेन उपाधिमात्रभेदात् अन्यथा अग्रावच्छिन्नवृक्षाग्मूलाव-च्छिन्नवृक्षस्याभेदेनान्योन्याभावस्याव्याप्यवृत्तित्वप्रसङ्गादि-त्याह" तच्च वृष्टिदिनोत्तरदिनस्य निषेधविषयत्वे वृष्टि-दिनस्य कर्म्मार्हता स्यात्। तस्मात् विशेष्याया वृष्टेरेवो-त्तरत्वम्, न तु तदवच्छेदकदिनस्यापीति। तेनैकस्मिन् दिने वृष्ट्या तद्दिनमात्रत्यागः द्वितीयदिनादौ तु अन्तिम दिनमारभ्य त्र्यहसप्ताहयोस्त्यागः। तथा च व्यासः

'नो सन्ध्यागर्जिते प्राज्ञैर्व्रतोपनयनं बुधाः। न च वृष्टावथाकाले वृष्टावाऽऽसप्तवासरान्''। आसप्तवासरानित्यत्र उपस्थितत्वाद्वृष्टिकालमादाय सप्ताहगणना आसप्तवासरानिति अधिकसंख्याव्यवच्छेदार्थम्। एतेन विध्यनुवादभिया अधिकसंख्या निरस्ता। अत्र वृष्ट्युत्तरमेव सप्ताहत्यागः एतद्वचनन्तु तृतीयादिदिवसीयाकालवृष्ट्यभिप्रायेण। ''अतोदिनेनैकदिनं त्याज्यं द्वितीयेन दिनत्रयम्। तृतीयेन च सप्ताहं त्यजेदकालवर्षणे' न्यायरत्नपरिगृहीतवाक्येऽपि दिनेन दिनवृत्तिवर्षणेन एवं द्वितीयेनेत्यादौ ज्ञेयम्। अतएव न्यायरत्नेऽपि वृष्ट्युत्तरत्वमुक्तं नतु वृष्टियुक्तदिनोत्तरत्वमिति। एकादिदिनवृत्तित्वविशेषणं दिनाल्पत्वबहुत्वज्ञापनार्थमिति। श्रीपतिव्यवहारनिर्णये 'आकालिकीं वृष्टिमवेक्ष्य गन्ता पदं न गच्छेच्छुभमात्मनीच्छन्। चौरं व्रतञ्चापि शुभाभिलाषी कदापि नैव मनसापि कुर्य्यात्''। अत्र नोसन्ध्या गर्जित इति आकालिकीवृष्टिमवेक्ष्य इत्यादि श्रवणात्। ''व्रतेऽह्नि पूर्वसन्ध्यायां वारिदोयदि गर्जति। प्रसन्नत्र तु नैव स्यादिति धर्म्मो व्यवस्थितः'' इति वचने पूर्वपदमपि कारणताग्राहकत्वेन परसन्ध्याव्यावर्त्तकम्। अन्यथा संक्रान्तिग्रहणादिनिमित्तत्वेन परसन्ध्यायां गर्जितेऽपि व्रतवैगुण्यं स्यात्। एतेन पूर्वदिने सायं सन्ध्यागर्जनेऽपि परदिने व्रतनिषेध इति मैथिलमतं चिन्त्यमिति। स्वप्रत्यर्थानुपपत्तेः गीतायां ''मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्!'' इतिवत् स्वरूपाख्यानपरं वा पूर्वपदम्। कामरूपीयनिबन्धेऽप्येवम्। योगीश्वरः ''चतुर्मासे निवृत्ते तु चक्रपाणौ समुत्थिते। अकालवृष्टिं जानीयात् यावन्न सुप्यते हरिः''। अत्र यावद्विष्णुमहोत्सव इति जीमूतवाहनः पठति महोत्सवः फाल्गुनी पूर्णिमा इति व्याख्याति च। कृत्यचिन्तामणिभोजराजव्यवहारसमुच्चयश्रीधरसमुच्चयेषु ''पौषादि चतुरो मासान् ज्ञेया वृष्टिरकालजा। व्रतयज्ञादिकं तत्र वर्जयेत् सप्त वासरान्; मार्गान्मासात् प्रभृति मुनयोव्यासवाल्मीकिगर्गाश्चैत्रं यावत् प्रवर्षणविधौ नेति कालं वदन्ति। नाड़ीजङ्घः सुरगुरुसुनिर्वक्ति वृष्टेरकालौ माघावेतौ न शुभफलदौ पौषमाघौ न शेषाः। मार्गादित्ववधौ पञ्चमी नाभिविधौ। व्यासवाल्मीकिगर्गा इत्यत्र व्यासवाल्मीकिशिष्या इति जीमूतवाहनः पठति। प्रवर्षणेत्यत्र छन्दोभङ्ग आर्षत्वात् सोढव्यः। एवं पक्षत्रये व्यवस्थिते येन सर्वपरिग्रहः स्यात् तस्यैव ग्रहणमिति न्यायेनाद्यः पक्षः श्रेयान्, तदुत्तरन्तु पक्षद्वयमापदत्यन्तापद्विषयमेवमन्यत्रापि। अतएव राजमार्त्तण्डे ''उक्तानि प्रतिषिद्धानि पुनः सम्भावितानि च। सापेक्षनिरपेक्षाणि श्रुतिवाक्यानि कोविदैः''। इति शेषचरणे मीमांसानीह कोविदैरिति कृत्यचिन्तामणौ पाठः। यद्वा ''सृष्टस्य तु विधेर्नान्यैरुपसंहार इष्यते'' इति न्यायेन दोषातिशयार्थ एव सामान्यनिषेधे विशेषनिषेधः। तत्रापि विशेषउक्तो बृहस्पतिना ''वृष्टिः करोति दोषं तावन्नाकालसम्भवा राज्ञः। यावन्न भवति याने नरपशुचरणाङ्किता वसुधा''। काश्यपः ''कच्चैकमन्दिरगतौ यदि जीवभानू शुक्रोऽस्तगः सुरवरैकगुरुश्च सिंहे। नारभ्यते व्रतविवाहगृहप्रतिष्ठा चौरादिकर्म्म गमनागमनञ्च धीरैः''। कच्चैकमन्दिरगताविति विशिष्टं न पृथक् तथा च ''एकराशिगतौ स्यातामेकर्क्षविषये यदि। गुर्वादित्यौ तदा त्याज्या यज्ञोद्वाहादिकाः क्रियाः'। चातुर्मास्यव्रते तु प्रतिप्रसवमाह महाभारते 'चातुर्मास्यव्रतारम्भमस्तगेऽपि गुरौ भृगौ। खण्डेऽयापि तिथौ कुर्य्यात् एवमेव समापनम्''।

गार्ग्यः ''जीवादित्ये बाले शुक्रे ऊर्द्धं दशाहान्माङ्गल्यं प्रतिष्ठां स्नातञ्च कुर्य्यात्'। माङ्गल्यं विवाहादि। स्नातं पुष्करिण्यादि। राजमार्त्तण्डे हारीतः 'यात्रां चूड़ां विवाहं श्रुतिविवरविधिं ग्रामसद्मप्रवेशं प्रासादोद्यानहर्म्यान् सुरनरभवनारम्भविद्याप्रदानम्। मौञ्जीबन्धं प्रतिष्ठां मणिवरकनकाधारणं कुर्वते ये मृत्युस्तेषाञ्च सिंहे गुरुदिनकरयोरेकराशिस्थयोश्च''। सिंहे गुरुदिनकरयोः—सिंहस्थे गुरौ रवौ च एकराशिस्थयोर्युगपत्तयोरेव ''तेषाञ्च सिंह'' इत्यत्र ''तेषां हरीज्य'' इति पाठान्तरम्। हरीज्ये—सिंहे बृहस्पतौ। सोमशेखराख्यनिबन्धे ''वापीकूपतड़ागयागगमनक्षौरप्रतिष्ठाव्रतं विद्यामन्दिरकर्णवेधनमहादानं वनं सेवनम्। तीर्थस्नानविवाहदेवभवनस्नानादिदेवेक्षणं दूरेणैव जिजीविषुः परिहरेदस्तं गते भार्गवे''। दीपिकायाम् 'गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे। याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेत्'। सर्वकर्म्माणीति वचनान्तरोक्तप्रातिस्विकनिषिद्धकर्मपरं लाघवात् अन्यथा अतिप्रसङ्गापत्तेः। बृहद्राजमार्त्तण्डः 'यात्राविवाहव्रतबन्धवेश्मप्रासादचूड़ाकरणं हितैषी। नष्टे भृगौ

णोपदिष्टेश्वराणां देवप्रतिष्ठामपि कर्णवेधम्। इत्याद्यं
शुभकर्माणि कुर्य्यादुत्तमे स्थिते। विवाहं मेखलाबन्धं
यात्राञ्च परिवर्जयेत्”। अत्र यात्राञ्चेति चकारः
पूर्ववचनोपात्तमुन्यन्तरोक्तप्रातिस्विकनिषिद्धकर्म्मणां स
मुच्चिनोति। “बाले शुक्रे, वृद्धे शुक्रे, नष्टे शुक्रे, जीवे
नष्टे। बाले जीवे, जीवे सिंहे, सिंहादित्ये जीवादित्ये।
तथा मलिम्लुचे मासि सुराचार्य्येऽतिचारगे। वापी-
कूपतड़ागादिक्रियाः प्रागुदितास्त्यजेत्’। एवञ्च काला-
शुद्धौ विद्यारम्भं न कुर्य्यात् तद्विधानञ्च विष्णुधर्म्मो-
त्तरे। ‘संप्राप्ते पञ्चमे वर्षे अप्रसुप्ते जनार्द्दने। षष्ठीं
प्रतिपदञ्चैव वर्जयित्वा तथाष्टमीम्। रिक्तां पञ्चदशीञ्चैव
सौरिभौमदिनन्तथा। एवं सुनिश्चिते काले विद्यारम्भः
प्रशस्यते” देवलः “बाले वृद्धे तथैवास्ते कुरुते दैत्यम-
न्त्रिणि। उद्वाहिताया कन्यायां दम्पत्योरेकनाशनम्”।
अन्तक इति शेषः। राजमार्त्तण्डे “सिंहे गुरौ परिणीता
पतिमात्मानमात्मजान् हन्ति। क्रमशस्त्रिषु पित्रादिषु
वशिष्ठगर्गादयः प्राहुः”। पित्रादिषु—सिंहघटकमघा
पूर्वफाल्गुन्युत्तरफाल्गुनीप्रथमपादेषु। प्रतिप्रसवमाह
शातातपः “माघ्यां यदि मघा नास्ति सिंहे गुरुरका-
रणम्”। तत्रैव हेमाद्रिधृतमाण्डव्यवचनम् “स्मृति-
वेधजातकाम्नप्राशनचूड़ादिकः सर्वः। रविभवनस्थे
जीवे कार्य्योऽत्र्यो विवाहस्तु’। माघ्यां मघायोगे तु पञ्च-
वेक्रमन्दिरगतावित्यादिना सर्वकर्मनिषेधात्। अथैवं
विवाहोऽपि श्रूयते तथाच राजमार्त्तण्डे दक्षः
“गुरौ हरिस्थे न विवाहमाहुर्हारीतगर्गप्रमुखामु-
नीन्द्राः। यदा न माघी मघसंयुता स्यात् तदा च
कन्योद्वहनं वदन्ति”। इत्यञ्च माघ्यां मघायोगाभावेऽपि
श्रुतिवेधादि, मघास्थेऽपि गुरौ भवति विवाहस्तु गुरोर्म-
घापरित्यागादेव तथाच माण्डव्यः “मघाऋक्षं परि-
त्यज्य यदा सिंहे गुरुर्भवेत्। तत्राब्दे कन्यका चोढ़ा
सुभगा सुप्रिया भवेत्”। वात्स्यायनः “यात्रोद्वाहप्रति-
ष्ठादिगृहचूड़ाव्रतादिकम्। यत्नतो वर्जयेच्चैव जीवे व-
क्रातिचारगे। कीर्त्तिभङ्गः प्रतिष्ठायां, भयं चौरात्तथाऽ-
ध्वनि। चूड़ोद्वाहे भवेन्मृत्युर्व्रते हानि, र्भयं गृहे।
अतिचारे त्रिपक्षः स्यात् वक्रे पक्षचतुष्टयम्। न
कुर्य्यात्तत्र यात्रादि गुरोर्वक्रातिचारयोः” गर्गः
“गुरोर्वक्रातिचारे च वर्जयेत्तदनन्तरम्। यज्ञव्रतविवा-
हादावष्टाविंशतिवासरान्”। माण्डव्यः “यदा वक्रा-

तिचाराभ्यां राशिं गच्छति वाक्पतिः। दिनानि सप्त-
विंशानि त्यक्त्वा कर्म्म समाचरेत्”। अत्रापि पूर्वः पूर्वः
पक्षः श्रेयान्। राशिं—राश्यन्तरम् अन्यथा व्यर्थं स्यात्।
अतएव न्यायरत्नेनापि पूर्वराशिगमिष्यमाणातिचारि-
गुरुकेत्युक्तम्। बृहद्राजमार्त्तण्डे “वक्रातिचारो-
पगताः कुजाद्या यद्यन्यराशौ, परिवर्जनीयाः। यथाक्र-
मस्थाः स्वगृहस्थिता वा न वर्जनीया यवना वदन्ति”।
व्यवहारसमुच्चये कृत्यचिन्तामणौ च हारीतः “कृत्वाऽ-
तिचारं यदि पूर्वराशिं नायाति मन्त्री विबुधाधिपा-
नाम्। यानं विवाहं व्रतबन्धगेहं सर्वं तदा हन्ति मतं
मुनीनाम्। अतिचारं गते जीवे वृषे वृश्चिककुम्भयोः।
यज्ञोद्वाहादिकं कुर्य्यात्तत्र कालो न लुप्यते”। कृत्यकल्प-
लतायां वाचस्पतिमिश्रैः ‘पूर्वराशिं यदा त्यक्त्वा अपूर्वे
वत्सरे गुरुः। लुप्तःकालः स विज्ञेयः परगेहं गतो यदा।
मीने मेषे वृषे चैव तथा मिथुनकन्ययोः। अतिचाराच्च
दोषः स्यान्नियतं काललोपजः”। द्वैतनिर्णये ‘कन्यावृश्चि-
कमेषेषु मन्यथे च झषे वृषे। अतिचारेषु कर्त्तव्यं विवाहादि
बुधैः सदा”इति अमूलकमित्युक्तम्। वराहसंहितायाम्
“अतिचारं गतोजीवस्तत्रैव कुरुते स्थितिम्। तदा महा-
तिचारः स्यात् लुप्तसंवत्सरक्रियः। अतिचारेण योराशिं
र्वक्रितोदेवमन्त्रिणा। तदाद्यो वत्सरोलुप्तोयोऽनर्हः
सर्वकर्मसु”। तत्र वर्षे कर्म्मणोलुप्तत्वात् वत्सरोलुप्त इति
तदाह योऽनर्ह इति। भुजबलभीमादिनिबन्धेषु
‘शुभं भवनमासाद्य यदातिक्रमते गुरुः। अत्र संव-
र्द्धिता कन्या सुखं भर्त्तुः प्रमोदते” दीपिकायाम्
‘त्रिकोणजायाधनलाभराशौ वक्रातिचारेण गुरुः
प्रयाति। यदा,तदा प्राह शुभे विलग्ने हिताय पाणि-
ग्रहणं वशिष्ठः”। त्रिकोणं नवपञ्चमम्। जाया-सप्तमं,
धनं-द्वितीयं, लाभ-एकादशगृहम्। रत्नकोषे “पञ्चो-
दशाहानि तथा त्रिपक्षी मासत्रिभागः खलु षट् च
मासाः। एषोऽतिचारः कथितोग्रहाणां भौमादिकानां
परतस्तु चारः”। प्रतिष्ठाकाण्डे कल्पतरौ देवीपुराणम्
“यथा जीवे स्थिते सिंहे तथैव मकरस्थिते। देवाराम-
तड़ागादिपुरोद्यानगृहाणि च। विवाहादि महाभाग्य
भयदानि विनिर्द्दिशेत्। यदा द्वादशगे जीवे अष्टमे वाथ
भास्करे। प्रतिष्ठा कारिता विष्णोर्महाभयकरी मता”।
कृत्यचिन्तामणौ देवीपुराणम् “सिंहसंस्थं गुरुं शुक्रं
सर्वारम्भेषु वर्ज्जयेत्। आरब्धञ्च न सिद्ध्येत महा-

भयङ्करं भवेत्। कूपारामतड़ागेषु पुरोद्यानगृहेषु च। सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत्। कारकोव्रजते नाशं सन्तानः क्षीयतेऽचिरात्"। शुचिसर्वस्वे मकरस्थगुरौ प्रवर्त्तकं नरसिंहपुराणम् "विवाहोनैव कर्त्तव्यः सिंहसंस्थे गुरौ सदा। मकरस्थे च तत्कार्य्यं कल्याणं सर्व्वतोबुधैः। तथा देवीपुराणम् "मकरस्थो यदा जीवो वर्जयेत् पञ्चमांशकम्। शेषेष्वपि च भागेषु विवाहः शोभनो मतः"। एतद्वाक्यं व्यवहारापरिगृहीतमिति कृत्यचिन्तामणिः। एतेनैतदनाकरं न भवति किन्तु मैथिलानामनाचारः इति स्वरसोऽवगम्यते। अतएव रत्नावल्यादिषु नीचस्थगुरावेव दोष उक्तः। गुरोर्नीचस्थत्वमपि त्रिंशांशमकरराशेः पञ्चमांशं यावदिति ज्योतिस्तत्त्वे ज्ञेयम्। रत्नावल्याम् 'नीचस्थः सिंहगो वा यदि भवति गुरुः सूर्य्यरश्मौ च लीनः संयुक्तो वा यदि स्यात् दशमतश्शिना क्षीणरूपोऽथ बालः। यात्रागेहं विवाहोव्रतममरगृहं यज्ञचूड़ादि सर्व्वं वापी चोद्यानकूपम् न भवति शुभदं यद्यदिष्टञ्च लोके"। श्रीपतिरत्नमालायां कृत्यचिन्तामणौ च वाक्यं "शाखाधिपे बलिनि केन्द्रगतेऽथ वास्मिन् वारेऽस्य चोपनयनं कथितं द्विजानाम्। नीचस्थितेऽरिगृहगेऽथ पराजिते वा जीवे भृगौ व्रतविधौ स्मृतिकर्म्महीनः"। अस्य शाखाधिपस्य। तेन सामगानां कुजवारेऽप्युपनयनम् "सामवेदाधिपो भौमः" इत्युक्तत्वात्। कामरूपीयनिबन्धे स्मृतिसागरे देवीपुराणम् 'मकरस्थो यदा जीवस्तदा त्रिंशद्दिनं त्यजेत्। त्यक्त्वा तु षष्टिदिवसं कुर्य्यात् कर्म्माणि मानवः"। रायमुकुटज्योतिःकालकौमुद्याम् यत्तु 'मकरस्थं गुरुं यत्नात् सिंहवत् परिवर्जयेत्। देवारामतड़ागेषु पुरोद्यानगृहेषु च" इत्यादि देवलवचनं तदपि सिंहवत् परिवर्जयेदित्यनेन यथा सिंहस्थस्य गुरोस्त्याज्यता तथा मकरस्थस्यापीति गम्यते। सिंहस्थगुरोर्मघायुक्तमाघ्यां सत्यामेव त्याज्यता अतो मकरस्थस्यापि गुरोस्तस्यामेव त्याज्यता इत्यवगम्यते। अतएव देवीपुराणम् 'यथा जीवस्थिते सिंहे तथैव मकरस्थिते" इत्यत्र यथातथोपादानम्। तदपि देशविशेष एव दूषणम् तथाहि "गण्डक्या उत्तरे तीरे गिरिराजस्य दक्षिणे। सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत्"। अतएवान्यदेशाभिप्रायेण भीमपराक्रमे 'वापीकूपतड़ागादि निषिद्धं सिंहगे गुरौ। मकरस्थे तु तत्कार्य्ये न दोषः काललोपजः। कार्य्यं मकरगे जीवे विवाहाद्यखिलं बुधैः। न तु सिंहगते जीवे कुर्य्याद्विप्रः कथञ्चन"। अत्र पूर्वोक्तनरसिंहपुराणवचने मकरस्थमात्रे विवाह उक्तः। अतएव तत्सारभूतं व्यवहारमात्रं विवक्षितं श्रीपतिनात्मबुद्धेरिति प्रतिज्ञाय समयाशुद्धौ मकरस्थबृहस्पतिदोषमनभिधाय केवलमुपनयने नीचस्थबृहस्पतिर्निषिद्धः। एतेन द्वैतनिर्णये श्रीपतिसंहितायां व्यवहारोपबृंहितमेव वचनं नच व्यवहारविरुद्धमिति। एतेन यत् मकरस्थगुर्वादौ विवाहादिविधायकं वचनं तदाचारविरहादनादरणीयम् इति वाचस्पतिमिश्रोक्तं हेयम् मकरस्थगुरौ प्रतिष्ठाव्यतिरिक्तकर्म्मनिषेधकश्रीपतिग्रन्थविरहात्। अथ तन्निषेधकस्मृतिवचनानि प्रामाणिकान्तरधृतत्वादुपादेयानीति चेत् तर्हि प्रतिप्रसववचनान्यपि तथा। एवञ्चातिचारे विवाहादिनिषेधकवचनानि श्रीपतिना लिखितानि नतु तदपवादकानीति तेन तान्यप्रामाणिकानीति यदुक्तं तदपि हेयम् प्रकृते पूर्वोक्तयुक्तेस्तौल्यात्। भुजबलभीमे 'जीवोऽर्केण युतः करोति मरणं बालांशुकोभागुरिः नक्षत्रैकगतो वदन्ति यवनाः पादस्थितो देवलः। प्रायोगर्गपराशरादिमुनयो नेच्छन्ति चास्तं गते तस्मादस्तमिते सुरेन्द्रसचिवे नेष्टं विवाहादिकम्' श्रीपतिरत्नमालायाम् 'प्रागुद्गतः शिशुरहस्त्रितयम् सितः स्यात् पश्चाद्दशाहमितपञ्चदिनानि वृद्धः। प्राक् पक्षमेव कथितोऽस्तवशिष्टगर्गैर्जीवस्तु पक्षमपि वृद्धशिशुर्विवर्ज्यः"। वृद्धशिशुत्वगन्तेति क्वचित्पाठः। सितः शुक्रः। इह—पश्चाह्नि। राजमार्त्तण्डे 'भवेत् सन्ध्यागतः पश्चात् अस्तमेष्यन् दिनत्रयम्। दिनानि पञ्च पूर्वेण, तत्कृते कर्म वर्ज्जयेत्। बाले वृद्धे च सन्ध्यांशे चतुःपञ्चत्रिवासरान्। जीवे च भार्गवे चैव विवाहादिषु वर्ज्जयेत्। बाले वृद्धे च सन्ध्यायां नष्टे च भृगुनन्दने। दुर्भगा चासती वन्ध्या मृत्युयुक्ता फलं क्रमात्। बाले च दुर्भगा नारी वृद्धे नष्टप्रजा भवेत्। नष्टे च मृत्युमाप्नोति सर्वमेवं गुरावपि"। वृद्धे पञ्चदिनत्वकीर्त्तनमप्यापद्विषयं ज्योतिःपराशरेण भृगोः पादास्तेऽपि दशाहविधानात्। एवं गुरावपि। रत्नमालादौ पक्षविधानात् तयोर्मते न सन्ध्यायाः पृथङ्निर्देशोऽपि वृद्धत्वेनैव तद्ग्रहणात्। दीपिकायाम् "गुर्व्वादित्ये, गुरौ सिंहे, नष्टे शुक्रे मलिम्लुचे। याम्यायने हरौ सुप्ते सर्वकर्म्माणि वर्जयेत्।

तत्रैव "नो शुक्रास्तेऽष्टमेऽर्के गुरुसहितरवौ जन्ममासेऽष्टमेन्दौ, विष्टौ, मासे मलाख्ये, कुजशनिदिवसे, जन्मताराश्च चाथ । नाडीनक्षत्रहीने, गुरुरविरजनीनाथताराद्यशुद्धौ, प्रातः कार्य्या परीक्षा क्षितसुचरगृहांशोदये सत्सलग्ने' । ज्योतिषे 'सिंहस्थे मकरस्थे च जीवे चास्तमिते तथा । सिंहस्थे तु रवौ नैव परीक्षा शस्यते बुधैः' । गर्गः 'दाहे दिशाञ्चैव धराप्रकम्पे, वज्रप्रपातेऽथ विदारणे वा । धूमे, तथा पांशुकरप्रपाते न कारयेन्माङ्गलिकादि कार्य्यम् । उल्कापाते च निर्घाते तथैवाकालवर्षणे । छिद्रे सूर्य्ये विनिर्द्दिष्टे न कुर्य्यान्मङ्गलक्रियाम् । धूमकेतौ समुत्पन्ने, ग्रहणे चन्द्रसूर्य्ययोः । ग्रहाणां सङ्गरे चैव न कुर्य्यान्मङ्गलक्रियाम् । द्विसूर्य्यं वा त्रिसूर्य्यं वा दृष्ट्वा गगनमण्डलम् । रात्रौ शक्रधनुश्चैव मङ्गलानि विवर्जयेत् । दिग्दाहे दिनमेकन्तु ग्रहे सप्त दिनानि च । भूमिकम्पे च सम्भूते त्र्यहाणि परिवर्जयेत् । उल्कापाते च त्रितयं, धूमे पञ्च दिनानि च । वज्रपाते दिनमेकं वर्जयेत् सर्वकर्म्मसु" । भोजराजः "ग्रहे रवीन्द्वोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे । व्रते दशाहानि वदन्ति तज्ज्ञास्त्रयोदशाहानि वदन्ति केचित्" । ग्रहणादौ भूकम्पोल्कापातवज्रपातादिदोषसमाहारे त्रयोदशाहमशुभम् किञ्चिदूनतत्समाहारे दशाहम् । ग्रहणाद्यैकैकदोषे त्र्यहमिति वाचस्पतिमिश्राः । अत्र स्मृतिसागरधृतसारसंग्रहे "राज्यादिकमहासिद्धौ यज्ञदानतपःसु च । होमस्वाध्याययोश्चैव वर्जयेत् सप्तरात्रकम् । लक्षहोमे महादाने वर्जयेत् सोरुके मखे । तपःस्वाध्याययोश्चैव चिरारम्भे त्रयोदय" इति व्यवस्था अन्यत्र "उल्कापाते भुवः कम्पे अकालवर्षगर्जिते । वज्रकेतूद्गमोत्पाते ग्रहणे चन्द्रसूर्य्ययोः । प्रयाणन्तु त्यजेत् क्षत्रः सप्तरात्रमतः परम् । ब्राह्मणः क्षत्रियो वैश्यस्त्यजेत् कर्म्म त्रिरात्रकम् । शूद्रस्त्यक्त्वा चैकरात्रं सर्वकर्म समाचरेत्' । पराशरः 'प्रयाणे सप्तरात्रं स्यात् त्रिरात्रं व्रतबन्धने । एकरात्रं परित्यज्य कुर्य्यात् पाणिग्रहं ग्रहे" । भृगुः 'कम्पे राजनि सप्ताहं ब्राह्मणानां त्र्यहन्तथा । शूद्रस्यार्द्धदिनं प्रोक्तं सर्वकार्येषु वै भृगुः' । शूद्रस्यापह्निमयम् । कम्पइत्युपलक्षणम् । ग्रहणादावप्येवमेवान्यत्रैकत्र पठितत्वात् । भोजदेवव्यवहारसमुच्चये "सर्वं कार्य्यं न कुर्वीत गुरौ सिंहेऽस्तगेऽपि च । मतदोषे न कुर्वीत तमोयुक्ते बृहस्पतौ" । तमोयुक्ते राहुयुक्ते । मतदोषे इति नित्येतरकर्म्मोपलक्षणम् । तथाच स्मृतिसागरसारे ज्योतिषम् 'एकराशौ स्थितौ स्यातां यदि राहुबृहस्पती । विवाहव्रतयज्ञादि सर्वन्तत्र विवर्जयेत्' । मलमासाद्युपक्रम्य भविष्ये 'अक्षभेदेऽप्येकराशौ सम्पर्कौ यदि वाऽनयोः । गुरोराहोरपि तथा त्यजेद्विद्वान् संशयः' । अत्र गुरोर्वाच्यत्वं हेतुः । तद्यथा "यत्र तत्र स्थितो जीवस्तमोयोगेन वाच्यते । उपहासाय किं न स्यादसत्सङ्गो मनीषिणाम्" इति । "अनिष्टे त्रिविधोत्पाते सिंहिकासूनुदर्शने । सप्तरात्रं न कुर्वीत यात्रोद्वाहादिमङ्गलम्" । इति दीपिकायामनिष्टइत्यभिधानात् अनिष्टजनकोत्पात एव सर्वकर्म्मानधिकारः । पूर्वलिखितभोजराजवचनेऽपि "केतूल्कापतनादिदोषे, इति दोषजनक एव तथोपरागे मण्डलतः शुभेऽपि यात्रानिषेधाय सिंहिकासुत इति पृथगुपादानम् । अत्र विवाहादावपि सप्तरात्रनिषेधस्तु पराशरोक्तस्वल्पकालनिषेध आपद्विषयः । तेनानिष्टाजनके भूमिकम्पादौ न दोषः । अतएव बृहत्संहितायां वराहेण उत्पातप्रकरणे प्रायःपदमभिहितम् तथा च" यः प्रकृतिविपर्य्यासः प्रायः संक्षेपतः स उत्पातः । क्षितिव्योमदिव्यजातोयथोत्तरं गुरुतरो भवति" प्रायइति ऋत्वादिप्रयुक्तविपर्य्यासव्यावृत्त्यर्थं यदाह तत्रैव "ये च न दोषं जनयन्त्युत्पातास्तान् ऋतुस्वभावकृतान् । ऋषिपुत्त्रैः कृतैः श्लोकैर्विद्यादेतैः समासोक्तैः" मनुनापि "निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्जने । एतानाकालिकान् विद्यादनध्यायानृतावपि" । अत्रानध्ययनार्थमृतावपीत्युक्तम् । उत्पाते दोषभङ्गमाह श्रीपतिव्यवहारनिबन्धे "अथ दिवसत्रयमध्ये मृदुजलपतनं यदा स्यात् । तदोत्पातदोषं शमयेदित्याहुराचार्य्याः" वार्हस्पत्ये "शमयन्त्याश्माहात् कम्पादिकृतं निमित्तमाश्वेव । अतिवर्षणोपवासव्रतदोषाजप्यहवनानि" । विष्णुधर्म्मोत्तरे 'शेतेऽत्र चतुरो मासान् यावद्भवति कार्त्तिकः । विनिवृत्ता न प्रवर्त्तन्ते तदा यज्ञादिकाः क्रियाः । नाभिषेच्यो नृपस्तेन नाधिमासे कदाचन । न शुभे च तथा हर्म्ये विवेशात् प्रवृषि द्विज !" । भविष्योत्तरे "शुभे मयि जगन्नाथे केशवे गरुडध्वजे । निवर्त्तन्ते क्रियाः सर्वा यावद्वर्षं सर्वस भारत ! । विवाहव्रतबन्धादिचूडासंस्कारदीक्षणम् । यज्ञगृहप्रवेशादिदानार्त्तमप्रतिष्ठनम् । पुण्यानि यानि कर्म्माणि वर्जयेद्धरिशायने" । सर्वास्तत्तद्वाक्यगर्भिताः

पूर्वप्रातिस्विकोक्ताः एवं पुण्यानीति अन्यथा विशेषवचनवैयर्थ्यं इति वदन्ति। भोजराजः ‘वापी तडागमठ इगापुरदेशसद्मप्रासादवारिमठकूपविवाहचैत्यात्। कर्त्तुं यथागमविज्ञानविधिं विधात्रा प्रोक्तक्रमेण कथयामि समासतोऽहम्। उभे हरी प्रकटशेषफणोपधाने लक्ष्मीकराब्जपरिमार्जितपादपद्मे। मीने रवौ धनुषि चास्तमिते तथेज्ये वास्तुक्रियाविधिरसौ मुनिभिर्निषिद्धः”। इज्योगुरुः। नारदः ‘वापीकूपतडागादिप्रतिष्ठायज्ञकर्म च। न कुर्य्यान्मलमासे च महादानव्रतानि च”। दानपदं सामान्यदानपरमिति वदन्ति। तथाच स्मृतिः ‘अस्ते सन्ध्यागते बाले भृगौ मासि मलिम्लुचे। देवतादर्शनं दानं महादानं विवर्जयेत्’। वृद्धहारीतः “भगावस्ते गुरौ सिंहे गुर्व्वादित्ये मलिम्लुचे। त्यजेत् दानं महादानं व्रतं देवविलोकनम्”। एतद्वचनद्वयं कालविवेकेऽपि। अत्र दानमहादानयोरुपादानात्” रा॰ त॰। मुहूर्त्तचिन्तामणिपीयूषधारादौ विशेष उक्तो विस्तरभयान्नोक्त स्ततएवावसेयः।

कालिक पुंस्त्री काले वर्णकाले चरति ठञ्, के जले अलति अल—वा॰ इकन् ७त॰ वा। १ क्रौञ्चे वके शब्दरत्ना॰ स्त्रियां ङीष्। कालोवर्णोऽस्त्यस्य ठन् कालात् वर्ण वाचित्वे जानपदा॰ नि॰ ङीष् ततः स्वार्थे क ह्रस्वः इति वा। कालिका २ देवीमूर्त्तिभेदे “तस्यां विनिर्गतायां तु कृष्णाऽभूत् साऽपि पार्व्वती” देवीमा॰ तस्याः कृष्णवर्णतयाविर्भावात्तथात्वम् विवृतिः कालिकापुराणे ६०अ॰यथा “सर्व्वे सुरगणाः सेन्द्रास्ततो गत्वा हिमाचलम्। गङ्गावतारनिकटे महामायां प्रतुष्टुवुः। अनेकसंस्तुता देवी तदा सर्व्वामरोत्करैः। मातङ्गवनितामूर्त्तिर्भूत्वा देवानपृच्छत। युष्माभिरमरैरत्र स्तूयते का च भाविनी। किमर्थमागता यूयं मातङ्गस्याश्रमं प्रति। एवं ब्रुवत्या मातङ्ग्यास्तस्यास्तु कायकोषतः। समुद्भूताऽब्रवीद्देवी मां स्तुवन्ति सुरा इति। शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान्। तस्मात्तयोर्वधाथाहं स्तूयेऽद्य सकलैः सुरैः। विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा। भिन्नाञ्जननिभा कृष्णा साऽभूत् गौरी क्षणादपि। कालिकाख्याऽभवत् सापि हिमाचलकृताश्रया”। ३ वृश्चिकपत्रवृक्षे ४ क्रमदेयवस्तुमूल्ये ५ चूर्ण्याम् ६ जटामांस्यां ७ काक्यां ८ पटोलशाखायां ९ रोमावल्यां १० शिवायाम् ११ मेघावल्यां स्त्री मेदि॰। १२क्षीरकीटे हारा॰ १३ मस्यां शब्दरत्ना॰ १४ काकोल्यां १५श्यामापक्षिणि स्त्री राजनि॰। १६ हिमाचलभवायां त्रिशिरायां हरीतक्याम् स्त्री मेदि॰। १७चतुर्वर्षकुमारीभेदे अन्नदाकल्पः कालसङ्कर्षाशब्दे विवृतिः। कालस्य भावः वा॰ वा वुञ्। १८ कृष्णवर्णे स्त्री। १९ स्वर्णदोषे जटाधरः वह्निना दाहे यद्दोषात् स्वर्णस्य कृष्णता भवति सा च ताम्रादिधातुयोगैः। “हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा” रघौ अग्नावेव कालिकाज्ञानस्योक्तेस्तस्यैव तथात्वम्। काय जलाय अलति पर्य्याप्नोति अल—पर्य्याप्तौ ण्वुल् टाप् अतइत्वम्। २०कुज्झटिकायां भरतः २१ नवमेघे स्त्री मेदि॰। काले दीयते ठक्। २२ प्रतिमासदेयवृद्धौ (सुद)“प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता” नारदः। कं जलमलति भूषयति अल—भूषणे ण्वुल् टाप् अतइत्वम्। २३ सुरायां स्त्री हेमच॰। कालोवर्णोऽस्त्यस्य ठन्। २४कालीयके कृष्णचन्दने न॰शब्दच॰। प्रकृष्टः दीर्घःकालोऽस्य प्रकृष्टे ठञ्। २५ वैरे न॰ तस्य दीर्घकालस्थायित्वात्तथात्वम्। “वर्णे चानित्ये” इत्यधिकारे “कालाच्च” पा॰ कन्। कालक स्त्रियां टाप् अत इत्वम्। २६ कालिका अनित्यकृष्णवर्णयुक्ते शाट्यादौ स्त्री “कालिका शाटी” सि॰ कौ॰। कालेन निर्वृत्तः ठञ्। कालिक २७ कालनिर्वृत्ते कालकृते त्रि॰। “विशेषः कालिकोऽवस्था” अमरः। काले भवः ठञ्। २८ कालभवे त्रि॰। उभयत्र स्त्रियां ङीप् इति भेदः।

कालिकापुराण न॰ कालिकाया माहात्म्यादिप्रतिपादकं पुराणम्। उपपुराणभेदे उपपुराणशब्दे दृ॰ तस्य तथात्वमुक्तं तत्प्रतिपाद्यविषयाश्च

१अ॰ ब्रह्मणोनारदादिक्रमेण तत्पुराणप्रवर्त्तनम्। ऋषिप्रश्ने मार्कण्डेयोक्तिः। प्रजासृष्टिः—ब्रह्ममनसः सन्ध्यासृष्टिः कन्दर्पसृष्टिः। तस्य ब्रह्मणा स्त्रीपुरुषयोर्मोहनाय निदेशः। २अ॰तस्य मन्मथनामादिनिरुक्तिः। तस्य हर्षणरोचनद्रावणशोषणमारणाख्यपञ्चवाणोक्तिः। सन्ध्यां दृष्ट्वा ब्रह्मणो मनोविकारः सन्ध्यादर्शनेन जातसात्त्विकधर्मात् अग्निष्वात्तादीनामुत्पत्तिः। तां दृष्ट्वा विकाराश्वितदक्षधर्म्मतः रतिनामककन्योत्पत्तिः।

३अ॰ ब्रह्मणः कामदेवशापः। रत्याः कामेन विवाहः। ४अ॰ शिवमोहनाय ब्रह्मणा कामस्य नियोगः। शिवमोहनाय ब्रह्मणा विष्णुमायायाः स्तुतिः। दक्षकन्यासतीत्वेन तस्याः प्रादुर्भावप्रार्थनः दक्षेण महामायायाः स्तुतिः।५अ॰

विष्णुमायाया दक्षाय वरदानम्। ६त० शम्भोर्दारग्रहणाय ब्रह्मणा कामस्य नियोजनम्। तेन सह मारादिगणस्य प्रेरणम्। ७अ० कामेन हरमोहनप्रकारोक्तिः। ८अ० दक्षकृतमहामायास्तवः। सतीजन्मतत्पालनप्रकारः तन्नामनिरुक्तिः। नारदेन सत्या हररूपवरप्राप्त्युक्तिः। ९अ०सतीकृतशिवव्रतम्। ब्रह्मणः शिवसमीपे दारग्रहणप्रार्थनम्। तदङ्गीकारे तत्परिणययोग्यतया दक्षकन्यायाः कथनम्। १०अ० सत्या नन्दाव्रतसमाप्तौ शिवेन तस्यै स्वस्य भार्य्याभवनरूपवरदानम्। दक्षसमीपे स्वेन सतीविवाहार्थं शिवेन ब्रह्मणः प्रेरणम्। ब्रह्मणो दक्षं प्रति तत्प्रार्थने तेन तदङ्गीकारः। सतीविवाहार्थं ब्रह्मादिभिः सह शिवस्य दक्षपुरगतिः। ११अ० विवाहकाले सतीरूपं दृष्ट्वा ब्रह्मणोमनोविकारः। ततः संवर्त्तादिमेघादीनामुत्पत्तिः। ततोदक्षवाक्येन ब्रह्माणं प्रति शिवस्य कोपः। विष्णुना सान्त्वनम्। १२अ० ऋषिप्रश्ने ब्रह्मविष्णुशिवानामभेदोक्तिः। १३अ० शिवाय विष्णुना ब्रह्माण्डसंस्थानस्य दर्शनम्। तथा रूपदर्शनेन तेषामेकत्वोक्त्या ब्रह्माणं प्रति तस्य कोपनिवृत्तिः। १४अ०शिवसतीविहारवर्णनम्। १६अ०दक्षयज्ञप्रारम्भः। तत्र शिवसतीनिमन्त्रणाभावे सत्याः पितरं प्रति कोपः। तत्र दक्षकोपेन सत्या देहत्यागः। १७तेन क्रुद्धशिवेन वीरभद्रं सृष्ट्वा तं प्रति दक्षयज्ञनाशनायादेशः। तेन तद्यज्ञस्य नाशनम्। सतीविरहे शिवविलापः। १८अ०शिवस्य सतीविरहवर्णनम्। शिवरोदनाम्बुनो भूमौ पतने तन्नाशाशङ्कया देवानां शनिं प्रति तच्छोषणप्रार्थने तेन तस्याङ्गीकारः। तद्वाष्पेण वैतरणीनदीप्रादुर्भावः। सतीमृतदेहग्रहणपूर्व्वकं शिवस्य भ्रमणम्। शनिना सतीशवदेहावयवानां क्रमशःखण्डने अङ्गभेदेन ततत्स्थानानां पीठत्वप्राप्तिः। क्रमशः सर्व्वसतीदेहपतने शिवस्य लिङ्गत्वप्राप्तिः। ब्रह्मणा तस्य सान्त्वनम्। १९ चन्द्रभागान्तिके शिप्रसरः शिप्रानदीसमुत्पत्तिः। चन्द्रभागानद्युत्पत्तिः। चन्द्रभागा नामनिरुक्तिः। सप्तविंशतौ अश्विन्यादिषु स्त्रीषु रोहिण्यामिन्दोरत्यनुरागे अश्विन्यादीनां चन्द्रेण विवादः। तत्र २ ३ ९ १० १२ १६ २१ २६ भरण्यादिभिर्नवभिश्चन्द्रस्य भर्त्सने कृते चन्द्रस्य ताः प्रति यात्रायां वर्ज्जनीयतारूपशापदानम्। सर्व्वासां दक्षसमीपे गतिः ताभिः चन्द्रदौरात्म्यस्य कथने दक्षेण चन्द्रं प्रति सर्व्वासु तुल्यवर्त्तनोपदेशेऽपि चन्द्रेण तथानाचरणे दक्षेण राजयक्ष्माणं गदत्वपादय चन्द्राभिभवाय तस्य नियोगः। तस्य प्रवेशेन चन्द्रस्य क्षयः। चन्द्रक्षये ओषधीनामपुष्टौ यज्ञाभावात् वृष्ट्यभावेन प्रजाक्षयोक्तिः। २१ तदालोक्य दक्षसमीपे देवानां गमने तदुपदेशेन राजयक्ष्मणा शीर्णकलानां ज्योत्स्नादीनाञ्च निष्कासनम्। बृहल्लोहितानदीस्नानात् चन्द्रयक्ष्ममोक्षः। राजयक्ष्मस्थितिस्थानकथनम्। तत्पत्नीकथनम्। दक्षवाक्यानुसारेण चन्द्रमसो मासार्द्धं ह्रासवृद्धिप्रकारकथनम्। सूर्य्यबिम्बेन चन्द्रवृद्धिकथनम्। शिवेन चन्द्रस्यैककलाधारणं ततएव ज्योत्स्नायाः क्षीणचन्द्रे प्रवेशेन चन्द्रवृद्धिकथनम्। सीतानदीप्रादुर्भावः। चन्द्रभागानामप्राप्तिसमर्थनम् निर्विण्णां सन्ध्यां प्रति विष्णूपासनार्थं वशिष्ठोपदेशः। सन्ध्यां प्रति विष्णोः प्रसादे तया तस्य स्तुतिः। तस्यै तेन वरस्य दानम्। विष्णोरुपदेशान्मेधातिथियज्ञाग्नौ तस्या देहत्यागः तच्छरीरस्य विष्णोराज्ञया सूर्य्यमण्डले नयनम्। सूर्य्येण तस्य त्रिधाकरणेन सन्ध्यात्रयकल्पनम्। मेधातिथियज्ञाग्नेः अरुन्धतीसमुत्थानं तन्नामनिरुक्तिः। २३अ०चन्द्रभागानदीमाहात्म्यम् अरुन्धत्या वशिष्ठेन सह विवाहः। २४अ०ब्रह्मादिभिः शिववैकल्यवारणार्थं योगनिद्रायाः स्तुतिः। विष्णुना शिवस्य सान्त्वनम्। निमेषादिपरार्द्धपर्य्यन्तकालमानोक्तिः। मन्वन्तरोक्तिः। प्रलयप्रकारः। सृष्टिप्रकारः। २५अ०सृष्टेर्विवृतिः। ब्रह्माण्डादिसंस्थानम्। २६अ०वराहकल्पे प्रतिसर्गः। २७अ० यज्ञवराहेण पृथ्वीधारणप्रकारः। २८अ० जगतोनिःसारत्वोक्त्या तत्त्वज्ञानेन मोक्षोपदेशः। २९ शिवगणानामुत्पत्त्यादि। ३० यज्ञवराहस्य धरारूपया वाराह्या सह क्रीड़नेन तदनुरागात् तद्देहत्यागेऽनिच्छा। तद्देहत्यागार्थं देवैर्विष्णोः स्तवः। वराहदेहनाशार्थं शिवस्य शरभमूर्त्तिधारणम् तेन तस्य युद्धे पृथिव्या नष्टप्रायताशङ्कया रोहितमत्स्यरूपेण विष्णोराविर्भावः। तेन पृथिवीवेदमुन्यादीनां धारणम्। शिवेन नानाविधगणानां सृष्टिः। वराहमूर्त्तेः शरभेण सह युद्धे तस्यांशतोनरनारायणयोरुत्पत्तिः। शिवेन वराहस्य वधः। शिवगणानां स्वरूपगुणादि। ३१अ० मृतवराहदेहावयवेभ्यो ज्योतिष्टोमादियज्ञकल्पनम्। वराहपुत्रत्रयस्य त्रेताग्निरूपेणोत्पत्तिः। ३२अ० स्वायम्भुवमनुं प्रति कपिलशापः। मनोर्विष्णूपासनम्। तत्समीपे विष्णोर्मत्स्यरूपेणागत्य वासस्थानप्रार्थनं, क्षुद्रपात्रादिवृहत्सरोवरपर्य्यन्ते क्रमशो वर्द्धमानस्य मत्स्यदेहस्याधारस्याभावोक्तिः। ३३अ०मनुनाऽद्भुतदर्शनेन

तं प्रति तस्य स्वरूपज्ञानाय प्रश्ने तस्मै तेन आत्मस्वरूपस्य कथनम् । कपिलवाक्यानुसारेणाचिरेण भाविखण्डप्रलया पद्धारणार्थं मत्स्येन दृढनौकानिर्म्माणस्य तत्रबीजसञ्चयस्थापनस्योपदेशः। स्वशृङ्गेण च तन्नौकायाः समाकर्षणं कर्त्तव्यमित्युक्तिः। प्रलयान्ते जगतां शेषरूपेण धार्य्यतोक्तिः। ३४अ० कूर्म्मरूपेण वराहशरभयुद्धेन नष्टप्रायायाभूमेः समीकरणम् । नरनारायणाभ्यां तपसा सूर्य्यादिस्थिति-करणम् । पूर्व्वसञ्चितबीजैः मनुना पुनः शस्यप्रवर्द्धनम् । ३५अ० शिवस्य पूर्व्वगृहीतशरभमूर्त्तित्यागकाले अष्टाभिः पादैः सूर्य्याद्यष्टमूर्त्तिग्रहणम् तेन तस्याष्टमूर्त्तिनामता । शारभकायात् कपालिभैरवप्रादुर्भावः । तद्यजनप्रकारः । ३६अ० रजस्वलायाः पृथिवीरूपवराहपत्न्याः वराहेण सङ्गमात् नरकासुरोत्पत्तिः। ३७अ० जनकन्यपात् सीताद्युत्पत्तिः । धरोपदेशेन जनकेन नरकस्य प्रतिपालनादि। ३८अ० तस्य प्राग्ज्योतिषदेशे राजत्वकरणम् तद्देशसीमादि । ३९ अ० द्वापरयुगे उत्पन्नवाणासुरसंसर्गात् नरकस्यात्याचारः । नीलकूटे स्थितदेवीदर्शनार्थमागतवसिष्ठदर्शननिवृत्तये नरकेण महद्वीद्वाराच्छादाने कृते तं प्रति“येन जनितस्त्वं मानुषरूपेण तेनैव तव वधो भविष्यतीति, वसिष्ठस्य शापदानम् । ४०अ० तस्य भगदत्तादिपुत्रोत्पत्तिः । वसिष्ठशापानुसारेण कृष्णेन द्वापरयुगे नरकस्य वधः। ४१अ० मेनकायाः मैनकादिपुत्रशतस्य कालीनामककन्यायाश्चोत्पत्तिः। नारदेन तस्याः शिवविवाहयोग्यत्वस्य तद्देहार्द्धहरत्वस्य च हिमाचलसमीपे कथनम् । ४२अ० शिप्रसरस्त्यागेन हिमवत्प्रस्थे शिवगतिः । शिवशुश्रूषार्थं हिमाद्रिणा स्वसुताकालीनियोजनम्। देवानां तारकासुरपीडनकथा । तद्वधाय देवप्रार्थितब्रह्मणा शिवस्य पार्वतीसङ्गमाज्जात तेजोजात् कुमारात् तस्य वधो भविष्यतीत्युक्तौ तया सह शिवस्य मेलनार्थं शक्रेण कामस्य प्रेषणे कृते तेन कालीसन्निधाने हरस्य मनसोविकारे जनिते शिवेन ललाटनेत्रोत्थापितेन वह्निना तस्य दाहः तद्भस्मधारणञ्च। हरनेत्रोत्थिताग्नेः वाड़वाग्निरूपेण सिन्धुप्रवेशः।४३अ० नारदोपदेशेन काल्याः शिवाराधनार्थं पित्रोः समीपे वनगमनप्रार्थना। तस्याउमानामप्राप्तिकारणोक्तिः। तदाराधनेन तुष्टस्य हरस्य ब्रह्मचारिवेशेन तदन्तिके आगतस्य तत्सखीं प्रति कालीतपस्याप्रयोजनप्रश्नः । तच्छ्रुत्वा ब्रह्मचारिणा हरस्य निन्दनेन अन्यपतिवरणीयतोपदेशः। तच्छ्रवणे तं प्रति क्रोधात् काल्या शिवस्वरूपादेः कथनम् । शिवस्य निन्दाश्रवणापराधमार्ज्जनाय काल्या तस्य स्तुतिः,अन्यत्र गमनोद्युयोगश्च स्वरूपग्रहणेन शिवेन तस्याः निवारणम् वरदानञ्च।४४अ० काल्या शिवं प्रति कन्यायाः पितृदेयत्वोक्त्या पितृसमीपे प्रार्थनकर्त्तव्यतोक्तिः। काल्यास्तपःफललाभे स्वगृहगतिः । शिवेन सारुन्धतीकसप्तर्षीणां तत्कृत्ये नियोजनम् तैर्हिमाचलं प्रति काल्याः शिवेन विवाहदानार्थ-प्रार्थना तेन तथाङ्गीकारे शिवेन कालीविवाहः । भिन्नाञ्जननिभायाः काल्याः गौराङ्गत्वप्राप्तिकथा ।४५अ०अर्द्धनारीश्वरमूर्त्तिप्रादुर्भावः तन्मूर्त्तिवर्णनम् । अ०४६कालीशिवयोर्महामैथुनानिवृत्तौ देवप्रार्थितेन हरेण अनले तेजसउत्सर्गः । तदुत्सर्गकालेऽण्डद्वयस्य हिमप्रस्थे पतनात् ततोभृङ्गिमहाकालभैरवयोरुत्पत्तिः । देवैर्महामैथुनविघ्ने कृते कुपितया काल्या देवानां स्वस्वभार्य्यासु अपत्याभावरूपशापदानम् । हरोपदेशेन कालीज्येष्ठाभगिन्यां गङ्गायां वह्निना हरोत्सृष्टतेजोनिषेकः । गङ्गया स्कन्दविशाखयोर्द्वयोः पुत्रयोःप्रसवः ततस्तयोरेकत्वोक्तिः । जातमात्रस्य तस्य शरवणे तया त्यागः। कृत्तिकाभिः स्तनदानेन तस्य पोषणम्। ततः काल्यै तत्पुत्रदानम् । मैथुनात् निवृत्तया गलितवस्त्रया पूर्वं द्वारनियुक्तयोर्भृङ्गिमहाकालयोः स्वपुत्रयोर्दर्शनेन लज्जितया काल्या तयोर्मर्त्यजन्मप्राप्तिरूपे शापे दत्ते निरागोभ्यां ताभ्यामपि शिवाशिवयोर्मानुष्यप्राप्तिशापस्य दानम्। पौष्यपुत्रत्वेन चन्द्रशेखरनाम्ना शिवजन्म। ४८अ० काल्याः ककुत्स्थभार्य्यायां जन्म तस्यास्तारावतीति नाम । पौष्यतारावत्योर्विवाहः । ४९अ०, तारावत्यां कामुकस्य कापोतमुनेर्वञ्चनार्थं चित्राङ्गदानाम स्वभगिन्याः स्ववेशेन प्रेरणे तेन तस्यां सुतद्वयस्योत्पादनम् चित्राङ्गदोत्पत्तिकथा ।

५०अ० पश्चात् तस्याः स्ववञ्चनं ज्ञात्वा क्रुद्धकापोतमुनिना कपालिना ते पुत्रौ जनयिष्येते इति तारावतीं प्रति शापे दत्ते तदनुसारेण कपालिवेशधारिणा शिवेन तारावतीदेहे कालीं प्रवेश्य तया सह सङ्गम्य वेतालभैरवयोरुत्पादनकथा । नारदात् श्रुतवृत्तान्तेन चन्द्रशेखरन्नृपेण तयोः ज्येष्ठस्य भैरवेति कनिष्ठस्य वेतालेति नामकरणम् । तयोःपूर्व्वतः उपरिचरः दमनः अलर्क इति त्रयः पुत्रास्तारावत्यां चन्द्रशेखरस्य बभूवुः । ५१अ० चन्द्रशेखरस्य औरसपुत्रेष्विव शिवपुत्रयोर्वेतालभैरवयोः स्नेहाभावेन तयोर्निर्वेदः । कापोतमुनेरुपदेशात् तयोः शिवाराधनाय महत्तशैलदाराधनस्थानप्रश्ने कापोतेन

तदुपासनास्थानकथनम्। तत्रादौ वाराणस्याः मुख्यत्वमुक्त्वा अन्यानि कामरूपादीनि तीर्थानि तत्स्थानत्वेन कथितानि शिवोपासनाप्रकारः तदुपदेशानुसारेण ताभ्यां स्वजनकस्य शिवस्याराधनम्। ताभ्यां तथाचरणे शिवेन तद्देहेन गाणपत्यपदलाभवरदानम्। ५२अ० कालीपूजनार्थे शिवेन तयोर्नियोगः। ५३, ५४, ५५, ५६, ५७,अ० कालीपूजा तत्पूजास्थानविशेषोक्तिः।५८अ०कामाख्यादेः विशेषफलोक्तिः। ५९अ०तस्याश्चाङ्गमन्त्रादि। महिषमर्द्दिनीध्यानपूजादि। तस्याः पूजाविधिः। महिषासुरवृत्तान्तकथनम्।६०अ०देव्याः समीपे हननकाले महिषासुरवरप्रार्थना। महिषस्य पूर्व्व-सृष्टौ उग्रचण्डामूर्त्त्या, पश्चात् भद्रकालीमूर्त्त्या, एतत्कल्पे दुर्गामूर्त्त्या च विनाशनोक्तिः। शिववरात् रम्भासुरात् महिष्यां महिषासुरोत्पत्तिः। पित्राराधितशिववरेण तस्यै-श्वर्य्यप्राप्तिः। ६१अ० अष्टादशभुजोग्रचण्डायाः प्रादुर्भावः। तस्या एव उग्रतारारूपत्वम्। तस्याध्यानपूजापीठयन्त्रादि। कौशिकीप्रादुर्भावः तद्रूपमन्त्रादि। शिवदूतीप्रादुर्भावः तद्रूपमन्त्रपूजादि। ६२अ०कामाख्यानामनिरुक्तिः। मधु-कैटभोत्पत्तितन्नामनिरुक्ती। विष्णुना तयोर्वधप्रकारः। तन्मेदसोल्लेपनेन पृथिव्याः दृढताकरणात् मेदिनीति नाम प्राप्तिः। कामाख्यातीर्थोत्पत्तिः। नीलादिपर्व्वतोत्पत्तिः शिलारूपेण ब्रह्मादीनां तत्र स्थितिः। तत्रत्यकालकुण्डा-दिनानातीर्थकथनम्। ६३अ० कामाख्यामन्त्रपूजाविधिः। तत्र जयन्त्याद्येकादशमूर्त्तिपूजा-उग्रचण्डादिनवशक्तिपूजा-विधा। त्रिपुराध्यानपूजाप्रकारः। ६४अ० कामेश्वरीमू-र्त्तिध्यानपूजाविधा। ६५अ०शारदीयापूजाविशेषविधिः।६६ अ०कामाख्याङ्गन्यासादिविधा।६७अ०बलिच्छेदनप्रकारनि-रूपणम्। देव्यै दत्तबलेस्तद्गणत्वप्राप्तिः। कारण्डवादीनां बलिदाने निषेधः। ६८अ० षोडशोपचाराः। तत्रासनादिषु वस्त्राभरणेषु गन्धपुष्पादौ विशेषः। ७०अ०नैवेद्यद्रव्याद्रि। ७१अ०प्रदक्षिणप्रणामप्रकारः। ७२अ०कामाख्याकवचम्। ७३अ०मातृकान्यासविधा।७४अ०अष्टधा योनिमुद्रास्वरूपा-णि तद्दर्शनफलञ्च। मन्त्ररहस्यम्। तन्मन्त्रधारणविधा। बालात्रिपुरामन्त्ररूपपूजाविधा। त्रिपुरभैरव्याः पूजादि। ७५अ० त्रिपुरभैरव्याः पुरश्चरणहोमादिविधा। ७६अ० मन्त्रशोधनप्रकारः। तत्र सिद्धसाध्यादिचक्रयस्य चक्रादि-कथनम्। एवं शिवोपदेशं प्राप्य वेतालभैरवयोर्वशिष्ठोप-देशेन कामाख्यातीर्थगमनं तत्र पुरश्चरणादिसमाप्तौ देव्याः प्रसादे तयोर्मानुषत्वत्यागेन देवत्वप्राप्तिः। शिवा

शिवयोः सेवकत्वप्राप्तिश्च।७७अ०कामरूपस्थनन्दिकुण्डाद्-नानातीर्थमाहात्म्यम्। तत्रत्यजटोदकानदीनामनिरुक्तिः। नवतोयानदीनामनिरुक्तिः”अगदनदमाहात्म्यादि। जली-शनामनिरुक्तिमाहात्म्यादि। ७८अ० तत्रत्यशङ्करीकानदी माहात्म्यादि। क्षान्तिवासगिरिचन्द्रिकानदीफेनिला-स्वपदनानदीमाहात्म्यादि। भद्रानदीसुभद्रानदीमानस भैरटगिरिभैरवीनदी वर्ष्मलानदीमाहात्म्यादि। त्रिस्रोतः कपोतकुण्डवारुणकुण्डतत्त्वाचलमाहात्म्यादि। सुरनदी-क्षीरोदानीलानदीचण्डिकाचन्द्रिकानदीमाहात्म्यादि। अनरालककुण्डशृङ्गेशकुब्जपीठमणिकूटगिरिलौहित्यब्र-ह्मपुत्रादिमाहात्म्यादि। भद्रकामाचलकालहर-लिङ्गपुनर्भवकुण्डहयग्रीवशिलागोकर्णशिवलिङ्गकेदारलि-ङ्गकमललिङ्गमाहात्म्यादि। हयग्रीवमन्त्रादि। ७९अ० तत्र यदर्पणरोहणदर्पटनदाग्निमानगिरिवरुणकुण्डकंसक-रवायुकूटाचलचन्द्रकूटाचलसोमकुण्डनन्दनाचलभस्मकूटा-चलोर्वशीकुण्डसदामृतकुण्डमणिकूटमणिकर्णलिङ्गसुभङ्ग-लानदीमत्स्यध्वजकुलाचलस्वश्वेतानदीकामवरसरःसुका-न्ताचलरत्नःकूटाचलपाण्डुनाथभैरवपाण्डुनाथाचलब्रह्म-कुण्डनीलकूटाचलोग्रतारास्थानमाहात्म्यपूजादि। कर्प-टाचलचित्राचलकज्जलाचलयज्ञाचलकपिलभङ्गिकानदी-दमनानदीदृष्टाचलाकाशगङ्गास्थावरसरोदुर्जयाचलक्षोभ-काचलकान्तानदीदिव्यकुण्डपुष्करिणीहेरुकलिङ्गसन्ध्याच-लललितानदीमाहात्म्यादि ८० अ० दीपवतीनदी-शृङ्गाटगिरिसिद्धत्रिस्रोतोनदीगृहवेदिकाभट्टारिकानदी-नाटकाचलस्वसरःसरित्त्रयदिक्करिकानदीवृद्धगङ्गास्वर्ण-नदीश्रीनदीविश्वनाथलिङ्गविश्वदेवीमूर्त्तिमाहात्म्यादि। सोमाश्रमनानदी सितगङ्गाललितकान्तलिङ्गतीक्ष्णका-ख्योग्रतारामूर्त्तिपूजामाहात्म्यादि। ललितकान्तामङ्ग-मङ्गलचण्डिकापूजाविधा तत्र स्वविष्णुमूर्त्तिभेद-तत्पूजाप्रकारादि। ८१अ० कामरूपस्थतत्तीर्थसे-वनेन सर्व्वेषां निर्व्वाणादिप्राप्तौ यमेन स्वकार्य्याभावाकलने ब्रह्मादिसमीपगमनेन तन्निवारणोपायचिन्तनम्। ब्रह्मप्रा-र्थितेन शिवेन कामरूपस्थतीर्थेभ्यः सर्व्वलोकोत्सारणार्थं गणैः सह उग्रताराया नियोजनम्। उग्रतारया च तत्र-स्थवसिष्ठस्योत्सारणे कृते वशिष्ठेन तां प्रति म्लेच्छाद्युपास्य-ताशाममार्गोपास्यतादिरूपशापदानम्। कामरूपस्य म्लेच्छा-क्रान्तत्वशापदानम् कामाख्यातारागमयोश्च विरलत्वादि-शापदानम्। तेन शापेन उग्रतारा सहितागतागणाश्च

म्लेच्छतां प्राप्ता उग्रताराऽपि तदवधि वाममार्गरता शिवस्य म्लेच्छरतिस्तदवधि जाता वशिष्ठशापाच्च तत्रत्यसर्व्वतीर्थगुप्तिः लौहित्यमात्रस्य तन्माहात्म्यस्थितिः। ८२अ० लौहित्योत्पत्तितन्माहात्म्यादि। जामदग्न्योपाख्यानम्। ८३अ० तत्कृतमातृवधपापनिर्मोचनेन लौहित्यप्रशंसा। पूर्व्वकल्पेऽनुजकयाणासुरयोर्भृङ्गिमहाकालरूपगणत्वप्राप्तिकथा। ८४अ० राजनीतिकथनम् दुर्गादिकरणप्रकारः८५अ०। प्रजासु राजवृत्तिप्रकारः। नृपकर्त्तव्यदुर्गापूजाविशेषकालाः। तत्पूजाप्रकारः नीराजनप्रकारः।८६ अ०पुष्याभिषेकप्रकारः ८७अ०शक्रध्वजोत्थानविधिः। ८८ दशहरायां विष्णोरिष्टिप्रकारः। श्रीपञ्चम्यां लक्ष्मीपूजाविधिः बृद्ध्यर्थकाचारविशेषाः। द्वादशविधपुत्रविधिः। दत्तकादीनां परिग्रहीत्रा संस्कारकरणे पुत्रत्वप्राप्तिः। पितृगोत्रेण संस्कारे गृहीतुः पुत्रत्वाभावः। गृहीतृगोत्रेण चूड़ादिसंस्काराभावे दासत्वम्, पञ्चमवर्षादूर्द्ध्वग्रहणे न पुत्रत्वसिद्धिः। पञ्चमवर्षीयग्रहणे तत्र पुत्रेष्टिविधानम्। दासीपुत्रे विशेषः। शूद्राणां पुराणादिश्रवणेऽनधिकारः। राज्ञः पुरोहितलक्षणम्। विशिष्य नृपकर्त्तव्याचारभेदः। आयुष्कामस्य कर्त्तव्याचारः ८९अ०। अपुत्रस्य गतिर्नास्तीति नन्दिन उपदेशात् वेतालभैरवयोः पुत्रोत्पादनाभिलाषे जाते भैरवस्य उर्व्वश्याः सङ्गमे सुरेशनामपुत्रोत्पत्तिः। तपसा तस्य विद्याधराध्यक्षताप्राप्तिः। तस्य हृतराष्ट्रकन्यायां देवसेननामपुत्रोत्पत्तिः। ततः देवसेनादिवंशवर्णनम्। तद्वंश्यविजयेन खाण्डवनस्य निर्म्माणम्। अर्ज्जुनेन वह्निप्रीत्यर्थं तस्य दाहनम्। ९०अ० वेतालस्य कामधेनौ वृषभरूपपुत्रोत्पादनम्। तस्य भृङ्गनाम्ना भृङ्गित्वेन शिववाहनताप्राप्तिः। तस्य वंशवर्णनम्। वेतालवंशोद्भवा एव सर्व्वे गावइत्युक्तिः ततउपसंहारः"। इत्येते प्रधानभूताः पदार्थास्तत्रत्याः प्रसङ्गागतास्त्वन्येऽपि पदार्था अभिधेयाः सन्ति विस्तरभयान्नोक्ताः

अत्रेदंचिन्त्यते ८९,९०अ०वेतालभैरवयोर्विभिन्नवंशकथने स्थिते दत्तकचन्द्रिकादौ भैरवपुत्रस्यैव वेतालेन ग्रहणस्यायथपुत्रकरणप्रतिपादकवाक्यानि यान्युद्धृतानि तानि निर्म्मूलानीत्यवगम्यते। पितृगोत्रेणेत्यादिवचनानां तत्र या निर्म्मूलत्वाशङ्का कृता सापि कालिकापुराणादर्शनमूलिकैव ८९अ० तद्वचनानां प्रत्यक्षत उपलभ्यमानत्वात् इति। कालीपुराणमप्यत्र न०।

कालिकाव्रत न० कालिकायाः प्रीत्यर्थं व्रतम्। पुराणोक्ते व्रतभेदे
"शच्युवाच। "विधानं चास्य मे ब्रूहि कालिकाया व्रतस्य च। ममोपदिश्यतामेव तद्व्रतञ्च करोम्यहम्। तस्यास्तद्वचनं श्रुत्वा प्रत्युवाचाय सा तदा। शुक्लकाले समारभ्य कृष्णपक्षे चतुर्द्दशीम्। संकल्प्य विधिना पूर्व्वममावास्यां व्रतं चरेत्। समारभ्य गुणैकेन द्विगुणं परिशोधयेत्। न रात्रौ भोजनं कार्य्यं वामहस्ते भुजिक्रिया। सिद्धमन्नं रात्रिकाले दग्धमीनञ्च सर्व्वदा। वर्ज्जयेत् पिष्टकं किञ्चित् रक्तशाकञ्च चाम्लकम्। द्विषट्कां विप्रजायाञ्च सधवां भोजयेत्ततः। एवं क्रमेण कृत्वा तु कतिकालं नयेद्व्रतम्। ततः शुद्धदिने प्राप्ते भौमाह्णे मन्दवासरे। यथाशक्त्युपचारैश्च पूजां कुर्य्याद्विधानतः। तथापराह्णकाले तु सन्ध्योपसमये तथा। रात्रौ तु कदलीकाण्डे गृहं निर्म्माय प्राङ्गणे। तस्य मध्ये समारोप्य कालिकां पूजयेत् सदा। पाद्यार्घ्याचमनीयैश्च गन्धपुष्पादिभिस्तथा। धूपैर्दिव्यप्रदीपैश्च नैवेद्यैर्विविधैस्तथा। पिष्टकं चैव सिद्धान्नं व्यञ्जनं दग्धमीनकम्। निवेद्य सकलं देव्यै बलिं दत्त्वा प्रणम्य च। तदन्नं व्यञ्जनं सर्व्वं नैवेद्यादि बलिं तथा। महारण्ये प्रदातव्यं कृत्वैतत् व्रतमुत्तमम्। वैणवे कदलीमूले या कुर्य्यात् कालिकाव्रतम्। कार्य्यसिद्धिर्भवेत् तस्या भविता गतिरुत्तमा"!

कालिकाश्रम न० ६तत्०। भारतवर्षस्थे विपाशानदीतीरस्थे तीर्थभेदे "कालिकाश्रममासाद्य विपाशायां कृतोदकः। ब्रह्मचारी जितक्रोधस्त्रिरात्रं मुच्यते भवात्" भा०आनु० २५अ०।

कालिङ्ग न० केन जलेनालिङ्ग्यते आ+लिगि—कर्म्मणि घञ् ३तत्०। (तरमुज) मध्यस्थजलके फलभेदे। "कालिन्दं कृष्णबीजं स्यात् कालिङ्गं च सुवर्त्तुलम्। कालिङ्गं ग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु। पक्वं तु सोष्णं सक्षारं पित्तलं कफवातजित्" भावप्र० तत्पर्य्यायस्वरूपगुणादिकमुक्तम्। "कलिङ्गे भवः अण्।२कलिङ्गदेशोद्भवे त्रि० स्त्रियां ङीप्। तद्देशानां राजा अण्। ३कलिङ्गदेशनृपे।"प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः" रघुः "वङ्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः। पाञ्चालमागधिकः कालिङ्गाश्च क्षयं यान्ति" वृहत्सं०। "निर्ज्जयत् कालिङ्गं गान्धाराधिपतिं तथा" हरि०

१११७अ०। बहुषु तु अणोलुक्। कलिङ्गा इत्येव तद्राजेषु तद्वासिषु च भूम्नि। क्वचिन्न लुक्। "कारस्करान् माहिषकान् कालिङ्गान् केरलांस्तथा" भा० क० ४४अ०। "कोशलाः काशपौण्ड्राश्च कालिङ्गा मगधास्तथा" ४५अ०। "कलिङ्गदेशमारभ्य पञ्चाशद्योजनं शिवे!। दक्षिणस्यां महेशानि!। कालिङ्गः परिकीर्त्तितः" इति३उक्तदेशभेदे एतत्परतयैव प्रागुक्तभारतवाक्ये लुगभावो न कल्पनीयः। कं जलमालिङ्गति० आ+लिगि—अण् उप०स०। ४हस्तिनि ५सर्पे च पुंस्त्री स्त्रियां जातित्वात् ङीष्। ६भूमिकर्कारौ पु०मेदि०। "कालिङ्गो लिङ्गवान् यः स्याद्-घनः सूक्ष्माङ्गकोमतः" इति सुखबोधोक्ते ७लौहभेदे पु०। ८ राजकर्कट्यां स्त्री गौरा०ङीष् मेदि०। स्वार्थे क अत इत्वम्। कालिङ्गिका त्रिवृति(तेओडी) राजनि०।

कालिदास पु० ६त०। संज्ञायां ह्रस्वः। रघुवंशादिकाव्यकारके महाकविभेदे तद्वृत्तान्तकालादिकमुच्यते "इतः पूर्वं संवत्सरनामकशाकाब्दप्रवर्त्तको भारतवर्षे मालवदेशे उज्जयिनीनामराजधान्यामसीमगुणधाम विक्रमादित्यनामा नृपतिरासीत्। तस्य धन्वन्तरिप्रभृतयो नव कविवराः सभासदो बभूवुः। तेषु कालिदास एव प्रथितयशा महाकविरासीत्। तेन च रघुवंश-कुमारसम्भव-मेघदूताभिधं काव्यत्रयं, स्मृतिचन्द्रिकाभिध उत्कलदेशप्रचलितो वेदोक्तकर्म्मप्रतिपादकप्रबन्धो ज्योतिर्विदाभरणनामकं कालज्ञानशास्त्रं च क्रमेण निरमायि। अनन्तरञ्च मालविकाग्निमित्र-विक्रमोर्वशी-शाकुन्तलाभिधानि दृश्यकाव्यानि प्रणीतानि। एतच्च तत्कृतज्योतिर्विदाभरणग्रन्थे शेषाध्याये स्पष्टमुपलभ्यते यथा—

"सत्तोऽधुना कृतिरियं सति मालवेन्द्रे श्रीविक्रमार्कनृपराजवरे समासीत्" इति। "धन्वन्तरिः क्षपणकोऽमरसिंहशङ्कुर्वेतालभट्टघटखर्[क]र्परकालिदासाः। ख्यातो वराहमिहिरो नृपतेः सभायां रत्नानि वै वररुचिर्नव विक्रमस्य"। "यद्राजधान्युज्जयिनी महापुरी सदा महाकालमहेशयोगिनी"।

"शङ्क्वादिपण्डितवराः कवयस्त्वनेके ज्योतिर्विदः समभवंश्च वराहपूर्वाः। श्रीविक्रमस्य बुधसंसदि मान्यबुद्धेस्तैरप्यहं नयसखः किल कालिदासः"। "काव्यत्रयं सुमतिकृद्रघुवंशपूर्वं जातं यतो ननु कियच्छ्रुतिकर्म्मवादः। ज्योतिर्विदाभरणकालविधानशास्त्रं श्रीकालिदासकवितो हि ततो बभूव" इति "वर्षैः सिन्धुरदर्शनाम्बरगुणैर्याते कलौ संमिते मासे माधवसंज्ञिते ऽत्र विहितो ग्रन्थक्रियोपक्रमः।" इति च अनेन ३०६८ अष्टषष्ट्युत्तरत्रिसहस्रसंख्यके कलेरब्दे याते तद्ग्रन्थकरणं प्रत्युक्तम्। इदानीञ्च कलेर्गताब्दाः ४९७५ तेषु निर्दिष्ट ३०६८ संख्ययोनितेषु१९०७ वर्षाः समायान्ति। तेन इतः १९०७ वर्षगणात् पूर्वं कालिदासकवितो ज्योतिर्विदाभरणं जातं ततः पूर्वं रघुवंशादिकमभूदिति प्रतिभाति। एतत् सन्दर्भैर्यद्यपि दृश्यकाव्यत्रयकरणं न प्रतीयते तथापि दृश्यकाव्यानां प्रागुक्तानां ज्योतिर्विदाभरणग्रन्थात् पश्चात् काले कालिदासकृतत्वेन न तेषां तत्र समुल्लेखः किन्तु तत्तद्ग्रन्थेष्वेव तत्कृतत्वं प्रत्युक्तमेव। ऋतुसंहारनलोदययोर्यदि तत्कालिदासकृतत्वं तदा ततः पराचीनतया न तत्रोल्लेखः। कालिदासस्य कतममन्वयं कतमञ्च जनपदमलञ्चकार तन्नाकलयामः। किन्तु तस्य चरितविषये ऽस्मद्देशे भूयिष्ठप्रचारमेवमैतिह्यमस्ति। तदत्र सर्वत्र विज्ञापनाय प्रदर्श्यते। काचित् विदुषीतमा कन्या विवाहार्थं पित्रानीतान् बहून् पात्रभूतान् द्विजान् वादविचारेण पराजिग्ये। एवम् आगत्यागत्य तस्याः सकाशात् विचारे पराजयमाप्य प्रतिनिवृत्तेषु वरेषु तदुत्तरं पराजयभयेनेतरे वरा यदा नैवागन्तुमैच्छन् तदा तत्पित्रा विचाराभावेनैव आगतमात्राय पात्राय कन्या देयेति प्रतिज्ञाते पूर्वपूर्ववरानयने निष्फलप्रयत्नतया बहुधा खिन्ना जातेर्ष्या दूताः पुनर्वरानयनार्थं तत्पित्रा नोदिताः स्वावलम्बितशाखाच्छेदितया कालिदासमल्पबुद्धिमवेत्य तत्कन्याया वरत्वेनावधार्य्यानिन्युः। आनीताय च तस्मै अविचार्य्य गुणदोषगुणौ तत्पिता तां कन्यां प्रायच्छत्। एवं तस्य विवाहे संवृत्ते दम्पत्योः परस्परालापकाले कालिदासेनापभ्रंशशब्दमात्राभिज्ञेनापभ्रंशशब्दः प्रायोजि। तत् श्रुत्वा च तद्भार्य्या तमत्यन्तं तिरस्कृत्य गृहात् निष्कासयामास। एवं पत्न्या निष्कासितः कालिदासोऽतीव निर्वेदमापद्यारण्यं गत्वा सरस्वतीमाराध्य तत्प्रसादात् लब्धविद्यः गृहं प्रति निववृते। आगत्य च रात्रौ गृहद्वारं रुद्धं विलोक्य तेन स्वपत्नीं प्रति (अनावृतकपाटं द्वारं देहि) इत्यभिहितम् तत् श्रुत्वा च स्वरविशेषेण तं स्वपतिमवगत्य कालिदासपत्न्याऽनुयुक्तम् (अस्ति कश्चित् वाग्विशेषः)इति इत्येवं पत्न्या कृते वाग्विशेषाख्यातस्वप्रश्ने तद्वाक्यं पदत्रयघटितमिति कृत्वा तत्रस्थमेकैकं पदमधिकृत्य तेन एकैकं काव्यं विरचितम्। तत्र तद्वाक्यस्थम् अस्तीति प्रथमं

पदमधिकृत्य "अस्त्युत्तरस्याम्" इत्यादि सप्तदशसर्गात्मकं कुमारसम्भवाख्यं महाकाव्यम्, कश्चिदिति द्वितीयं पदमधिकृत्य "कश्चित् कान्ताविरहगुरुणा" इत्यादिकं मेघदूताख्यं खण्डकाव्यम्, "वाग्विशेषः" इति तृतीये पदे तदेकदेशं वागिति पदमधिकृत्य "वागर्थाविव संपृक्तौ" इत्यादिकमूनविंशतिसर्गात्मकं रघुवंशाख्यं महाकाव्यञ्च तेन क्रमशो रचितम्। तद्रचनया च कालिदासः सर्वत्र प्रथितसुकवितया प्रख्यातिमुपलभ्य क्रमेण विक्रमादित्यस्य सभासदताम् आससादेति।

मालविकाग्निमित्रस्य तत्कृतत्वविषये केचित् सन्दिहाना एवमाहुः; कालिदासाह्वयास्त्रयः कवय आसन् तत्र एको विक्रमादित्यसभ्यः, अपरो भोजदेवसभ्यः अपरो भामिनीविलासकर्त्ता जगन्नाथमिश्रः अभिनवकालिदासाख्यः। तेषां मध्ये प्राचीनकालिदासस्य नैषा कृतिः शाकुन्तलस्येव तत्र वाग्वैदर्भीविरहादिरन्यस्यैवैषा कृतिरिति। तत्र मालविकाग्निमित्रस्य प्राचीनकालिदासकृतित्वाभावे तदीयसन्दर्भस्य भोजदेवसभासदुक्तिकेन दशरूपके कथन्तरां मालविकाग्निमित्रनामत्वेन समुद्धारः सङ्गच्छते। भोजदेवात्तस्य प्राचीनत्वे एव तदुद्धारः सङ्गच्छते नान्यथा भोजदेवेन च सरस्वतीकण्ठाभरणे ग्रन्थनामादत्त्वैव मालविकाग्निमित्रनाटकपद्यस्य समुद्धाराच्च तद्ग्रन्थस्य ततः प्राचीनकालिदासकृतित्वम् नान्यकृततेति निश्चेतव्यम्। किञ्च श्रीहर्षदेवनृपतेः सभ्यस्य रत्नावल्यादिकारकस्य धावकस्यैव ततः प्राचीननाटककर्त्तृत्वेन तद्ग्रन्थोपोद्घाते तस्य नामोल्लेखात् प्राचीनस्यैव कालिदासस्य तत्कर्त्तृत्वं युक्तम्; भोजदेवसभ्यकालिदासस्य तत्कर्त्तृत्वे ततः प्राचीनाभिज्ञानशकुन्तलादिकर्त्तृनामकीर्त्तनस्यैवोचितत्वेन किमिति तदपेक्षातिविप्रकृष्टधावकादिनामोत्कीर्त्तनम्? सन्निकृष्टं परित्यज्य विप्रकृष्टग्रहणस्यान्याय्यत्वात्। प्राचीनकालिदासस्य मालविकाग्निग्रन्थकर्तृत्वापेक्षया प्राचीनत्वेन प्रथितयशस्कत्वेन च तन्नामोल्लेखस्यैवोचितत्वात्। भोजदेवसभ्यकालिदासश्च भोजदेवकालिकः तदेतत् भोजप्रबन्धे वर्णितं यथा "भयन्नाम्ना कान्त्राराणि सौभाग्यावलम्बितानि कस्य वा देशस्य भवद्विरहः सुजनान् बाधत इति। ततः कविर्लिखति राज्ञो हस्ते कालिदास इति राजा वाचयित्वा पादयोः पतति ततस्तयोरासीनयोः कालिदासभोजराजयोरासीत् सख्या"। "यस्याश्चोरश्चिकुरनिकरः कालिदासोविलासः" प्रसन्नरा०। "उपमा कालिदासस्य भारवेरर्थगौरवम्। नैषधे पद-लालित्यं माघे सन्ति त्रयोगुणाः"। "कालिदासकविता नवं वयः" इति च उद्भटः। स्वार्थे क तत्रैव।

कालिन् पु० कालः कालरूपः खड्गोऽस्त्यस्य इनि। १परानन्दमतसिद्धे परमेश्वरे "कालिन्! कलिमलध्वंसिन्! ध्वंसयाशु मदापदः" इति तन्मते ईश्वरप्रार्थनम्। कालयति कल–नोदने णिनि। २ प्रेरके त्रि० स्त्रियां ङीप्।

कालिनी स्त्री कालः शिवः अधिष्ठातृत्वेनास्त्यस्याः कालः पुरुषाकारः गगनस्थः लुब्धकः अस्त्यस्याः सन्निकृष्टत्वेन वा, इनि ङीप्। आर्द्रानक्षत्रे हेमच० तस्याः तद्दैवतत्वं च अश्लेषाशब्दे ४६८पृ० दर्शितम् इल्वलरूपस्य मृगशिरो मूर्द्धदेशस्थितनक्षत्रस्यासन्नत्वात्तस्यास्तथात्वम्

कालिन्द न० कालिं जलराशिं ददाति दा–क पृषो० मुम् (तरमुज) ख्याते जलप्रधानफलके वृक्षे भावप्र० कालिङ्गशब्दे विवृतिः। स्वार्थे क। कालिन्दक तत्रार्थे न० राजनि०। कलिन्दे भवः अण्। कलिन्दपर्व्वतभवे त्रि० स्त्रियां ङीप्

कालिन्दी स्त्री कलिन्दे पर्व्वते तत्सन्निकृष्टदेशे वा भवः अण् ङीप्। यमुनानद्याम् अमरः। "कलिन्दगिरिनन्दिनी तटसुरद्रुमालम्बिनी" रसगङ्गाधरे तस्याः कलिन्दपर्व्वतसुतत्वोक्तेस्तथात्वम्। "कालिन्दीजलजनितश्रियं श्रयन्ते" माघः। २रक्तत्रिवृति (लालतेओडी) वृक्षे राजनि०।

कालिन्दीकर्षण न० कालिन्दीं यमुनां कर्षति कृष–ल्यु ६त०। बलदेवे तत्कर्षणकथा च हरि०११२अ० यथा "स मत्तो बलिनां श्रेष्ठो रराजाघूर्णिताननः। शैशिरीषु त्रियामासु यथा खेदालयः शशी। रामस्तु यमुनामाह स्नातुमिच्छे महानदि!। एहि मामभिगच्छ त्वं रूपिणी सागराङ्गने। सङ्कर्षणस्य मत्तोक्तां भारतीं परिभूय सा। नाभ्यवर्त्तत तं देशं स्त्रीस्वभावेन मोहिता। ततस्तु क्रोधहलभृद्रामो मदसमीरितः। चकार स हलं हस्ते कर्षणाधोमुखं बली। तस्मादुपरि मेदिन्यां पेतुस्तामरसस्रजः। मुमुचुः पुष्पकोषैश्च पुष्परेणुवरुणं जलम्। स हलेनानताग्रेण कूले गृह्य महानदीम्। चकर्ष यमुनां रामो व्युत्थितां वनितामिव। सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया। व्यावर्त्तत नदी भीता हलमार्गानुसारिणी। लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी। सङ्कर्षणभयत्रस्ता योषेवाकुलताङ्गता। पुलिनश्रोणिबिम्बोष्ठी मृदितैस्तोयताडितैः। फेनमेखलसूत्रैश्च छिन्नैस्तीरान्तगामिनी। तरङ्गविषमापीडा चक्रवाकोन्नतस्तनी।

वेगगम्भीरवक्राङ्गी तरलमीनविभूषणा। सितफेनक्षणापाङ्गी कायश्रोभोज्झिताम्बरा। तीरजोद्धृतकेशान्ता लालस्खलितगामिनी। लाङ्गलोल्लिखितापाङ्गी क्षुभिता सागराङ्गना। मत्तेव कुटिलापाङ्गी राजमार्गेण गच्छति। कृष्यते सा च वेगेन स्रोतःस्खलितगामिनी। उन्मार्गानीतमार्गा सा येन वृन्दावनं वनम्। वृन्दावनस्य मध्येन सा नीता यमुना नदी। रोदयमानेव स्वरैरन्विता तोयवासिभिः। सा यदा समनुक्रान्ता नदी वृन्दावनं वनम्। तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत्। प्रसीद नाथ! भीताऽस्मि प्रतिलोमेन कर्म्मणा। विपरीतमिदं रूपं तोयञ्च मम जायते। असत्यहं नदीमध्ये रौहिणेय! त्वया कृता। कर्षणेन महाबाहो! स्वमार्गव्यभिचारिणी। प्राप्तां मां सागरे नूनं सपत्न्यो वेगगर्व्विताः। फेनहासैर्हसिष्यन्ति तोयव्याहृतगामिनीम्। प्रसादं कुरु मे वीर! याचे त्वां कृष्णपूर्वज!। सुप्रसन्नमना नित्यं भवस्व त्वं सुरोत्तम!। कर्षणायुधकृष्टाऽस्मि रोषोऽयं विनिवर्त्त्यताम्। गच्छामि चरणौ मूर्ध्ना तथाहं लाङ्गलायुध!। मार्गमादिष्टमिच्छामि क्व गच्छामि महाभुज!"। "प्रणामावनतां दृष्ट्वा यमुनां लाङ्गलायुधः। प्रत्युवाचार्णववधूं मदक्लान्तमिदं वचः। लाङ्गलादिष्टमार्गा त्वमिमं मे प्रियदर्शने!। देशमम्बुप्रदानेन प्लावयस्वाखिलं शुभे!। एष ते सुभ्रु! सन्देशः कथितः सागराङ्गने!। शान्तिं व्रज महाभागे! गम्यताञ्च यथासुखम्। लोका हि यावत् स्थास्यन्ति तावत् तिष्ठतु मे यशः। यमुनाकर्षणं दृष्ट्वा सर्व्वे ते व्रजवासिनः"। कालिन्दीं भिनत्ति भिद—ण्वुल् ६त०। कालिन्दीभेदनोऽप्यत्र अमरः। [सूर्य्यपत्न्यां संज्ञायाम्।

कालिन्दीसू स्त्री कालिन्दीं यमुनां सूते सू—क्विप् ६त०।

कालिन्दीसोदर ६त०। यमे हेमच०। तत्कथा अर-कात्मजशब्दे ३५८पृ० दृश्या

कालिमन् पु० कालस्य भावः इमनिच्। कृष्णवर्णे "स्नानमानमतिकालिमालया" माघः।

कालिम्मन्या स्त्री आत्मानं कालीं मन्यते मन्—खश्—मुम् ह्रस्वः। आत्मानं कृष्णतया मन्यमानायाम् स्त्रियाम्।

कालिय पु० के जले आलीयते आ+ली—मूलविभुजा० क। नागभेदे कालियदमनशब्दे विवृतिः। "त्रस्तेन तार्क्ष्यात् किल कालियेन मणिं विसृष्टं यमुनौकसा यः" रघुः। "तोऽपि कालियकुला यमस्येव स्वसा स्वयम्" माघः "कालियं तक्षकञ्चैव पिङ्गलं मणिभद्रकम्" ति० त०गरु० पु०। गरुडभिया यमुनाह्रदजले निलीनत्वात्तस्य तथात्वम्।

कालियदमन पु० कालियं दमयति दम—णिच्—ल्यु। वासुदेवे कृष्णे तत्कथा भाग० १०,१६अ० यथा "कालिन्द्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना। श्रप्यमाणपया, यस्मिन् पतन्त्युपरिगाः खगाः। विप्रुष्मता विषोदोर्म्मिमारुतेनाभिमर्षिताः। म्रियन्ते तीरगा यस्य प्राणिनः स्थिरजङ्गमाः। तं चण्डवेगविषवीर्य्यमवेक्ष्य तेन कृष्णां नदीञ्च खलसंयमनावतारः। कृष्णः कदम्बमधिरुह्य ततोऽतितुङ्गादास्फोट्य गाढरसनोऽभ्यपतद्विषोदे। सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसिताम्बुराशिः। पर्य्यक् प्लुतोविषकषायितभीषणोर्म्मिर्धावन्! धनुःशतमनन्तबलस्य किन्तत्। तस्मिन् ह्रदे विहरतो भुजदण्डघूर्णवार्घोषमङ्ग! वरवारणविक्रमस्य। आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः। तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुन्दरास्यम्। क्रीडन्तमप्रतिभयं कमलोदराङ्घ्रिं संदश्य मर्म्मसु रुषा भुजगश्चछाद। तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्त्ताः। कृष्णेऽर्पितात्मसुहृदर्थकलत्रकामा दुःखानुशोकभयमूढधियो निपेतुः। गावो वृषा वत्सतर्य्यः क्रन्दमानाः सुदुःखिताः। कृष्णे न्यस्तेक्षणा भीता रुदन्त्य इव तस्थिरे" इत्थं गोपादीनामाकुलतामुपवर्ण्य "इत्थं स्वगोकुलमनन्यगतिं निरीक्ष्य सस्त्रीकुमारमतिदुःखितमात्महेतोः। आज्ञाय मर्त्यपदवीमनुवर्त्तमानः स्थित्वा मुहूर्त्तमुदतिष्ठदुरङ्गबन्धात्। तं प्रथ्यमानवपुषा व्यथितात्मभोगस्त्यक्त्वोन्नमय्य कुपितः स्वफणान् भुजङ्गः। तस्थौ श्वसन् श्वसनरन्ध्रविषाम्बरीषस्तब्धेक्षणोल्मुकमुखो हरिमीक्षमाणः। तं जिह्वया द्विशिखया परिलेलिहानं द्वे सृक्किणी ह्यतिविषाक्तकरालदृष्टिम्। क्रीडन्नमुं परिससार. यथा खगेन्द्रो बभ्राम सोऽप्यवसरं प्रसमीक्षमाणः। एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरःस्वधिरूढ आद्यः। तन्मूर्द्धरत्ननिकरस्पर्शातिताम्रपादाम्बुजोऽखिलकलादिगुरुर्ननर्त्त। तन्नर्त्तुमुद्यतमवेक्ष्य तदा तदीयगन्धर्वसिद्धमुनिचारणदेववध्वः। प्रीत्या मृदङ्गपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः। यद्यच्छिरो न नमतेऽङ्ग शतैकशीर्ष्णस्तत्तन्ममर्द खरदण्डधरोऽङ्घ्रिपातैः।

श्चोणायुषोऽभ्रमत उल्बणमास्यतोऽसृङ्नस्तोयमन् परमकश्मलमाप नागः। तस्याक्षिभिर्गरलमुद्वमतः शिरःसु यद्यत् समुन्नमति निःश्वसतो रुषोच्चैः। नृत्यन् पदा नु नमयन् दमयाम्बभूव पुष्पैः प्रपूजित इवेह पुमान् पुराणः” कालिमथनादयोऽप्यत्र भावे ल्युट् ६त०। कालियस्य २मर्द्दने न०

कालियह्रद पु० ६त०। कालियनागाधिष्ठिते वृन्दावनस्य यमुनान्तर्गते ह्रदभेदे कालियदमनशब्दे विवृतिः। तस्य कालियस्य तत्प्रदाश्रयणकथाभाग० १०, १७ अ० यथा “नागालयं रमणकं कथं तत्याज कालियः। कृतं वा किं सुपर्णस्य तेनैकेनासमञ्जसम्। बादरायणिरुवाच। उपहार्य्यैः सर्पजनैर्मासि मासीह यो बलिः। वानस्पत्यो महाबाहो। नागानां प्राङ्निरूपितः। स्वं स्वं भागं प्रयच्छन्ति नागाः पर्वणि पर्वणि। गोपीथायात्मनः सर्वे सुपर्णाय महात्मने। विषवीर्य्यमदाविष्टः काद्रवेयस्तु कालियः। कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिम्। तत् श्रुत्वा कुपितो राजन्! भगवान् भगवत्प्रियः। विजिघांसुर्महावेगः कालियं समुपाद्रवत्। तमापतन्तं तरसा विषायुधः प्रत्यभ्ययादुत्थितनैकमस्तकः। दद्भिः सुपर्णं व्यदशद्दयायुधः करालजिह्वोच्छ्वसितोग्रलोचनः। तं तार्क्ष्यपुत्रः स निरस्य मन्युमान् प्रचण्डवेगो मधुसूदनासनम्। पक्षेण सव्येन हिरण्यरोचिषा जघान कद्रुसुतमुग्रविक्रमः। सुपर्णपक्षाभिहतः कालियोऽतीवविह्वलः। ह्रदं विवेश कालिन्द्यास्तदगम्यं दुरासदम्। तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितम्। निवारितः सौभरिणा प्रसह्य क्षुधितोऽहरत्। मीनान् सुदुःखितान् दृष्ट्वा दीनान् मीनपतौ हते। कृपया सौभरिः प्राह तत्रत्यक्षेममाचरन्। अत्र प्रविश्य गरुडो यदि मत्स्यान् स खादति। सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहम्। तत् कालियः परं वेद नान्यः कश्चन लेलिहः। अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः”।

काली स्त्री कालस्य शिवस्य पत्नी ङीष्। १ शिवपत्न्याम्। “ऊर्द्ध्वरेता भवः कालः इति” भाग० २,८,२ शिवस्य कालनामतोक्तेस्तस्यास्तथात्वम्। कालवर्णा स्त्री “कालात्वर्णश्चेत्” वार्त्ति० ङीष्। २कृष्णवर्णायां स्त्रियाम् “का काली का मधुरा” “विदग्धमु०३हिमाचलदुहितरि उमायां तस्याश्च जन्मतः नीलाञ्जननिभवर्णतया तथात्वम्। “सुतामनुजगामाशु गतां कालीं हराश्रमम्”। “तां तत्र कालीं तनयाम् भयशोकाकुलाशुभाम्” कालि० पु० ४० अ०। “कालि! भिन्नाञ्जनश्यामे! ऊर्व्वश्यादयप्सरोगणैः”। “गौरत्वासादनञ्चैव कालिकायास्तथा श्रुतम्” इति च तत्र तस्या गौरत्वप्राप्तिकथनम्। ४दुर्गामूर्त्तिभेदे “काली करालवदना विनिष्क्रान्तासिपाशिनी। विचित्रखट्वाङ्गधरा नरमालाविभूषणा। द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा” इत्यादि देवीमा०तदाविर्भावउक्तः। सा च बहुविधा सिद्धकाली महाकाली गुह्यकाली दक्षिणाकाली भद्रकाली श्मशानकाली रक्षाकालीतिभेदात् तथा अन्येऽपि तद्भेदा भैरवत० दर्शिता यथा “काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी। विप्रचित्ता तथोग्रोग्रप्रभा नीलघनत्विषः। नीला घना बलाका च मात्रा मुद्रा मिता तथा। एताः सर्व्वा असिधरा मुण्डमालाविभूषिताः”। “कालि! कालि महाकालि! शीधुमांसपशुप्रिये” भा० वि० ४,अ०। ५मातृभेदे “काली कपालाभरणा चकाशे” कुमा० ६ भीमसेनस्य पत्नीभेदे। “युधिष्ठिरात्तु पौरव्यां देवकोऽथ घटोत्कचः। भीमसेनाद्धिडिम्बायां काल्यां सर्व्वगतस्ततः भाग० ९,२२,२४। भा०आ०९५अ० तु “भीमसेनोऽपि काश्यां बलन्धरां नामोपयेमे वीर्य्यशुल्कां, तस्यां पुत्रं सर्व्वगमुत्पादयामास” इत्युक्तं तदैकवाक्यात् काश्यामित्येव पाठः समुचितः गन्धकालीत्यस्य पूर्व्वपदलोपः। काली७ दासकन्यायां गन्धकाल्यां सत्यवत्याम् शान्तनुपत्न्याम्। “भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीं मातरमुदवाहयत् गन्धकालीमिति यामाहुः” भा०आ० ९५अ०। ८कृष्णत्रिवृति ९क्षीरकीटे पि० १०रात्रौ ११कालाञ्जन्याम् राजनि०१२तयोः कृष्णत्वात्तथात्वम् अग्निशिखाभेदे जटाधरः। अग्निजिह्वाशब्दे दर्शितशारदातिलकवाक्ये एतस्याः तज्जिह्वासु नान्तर्भाव इति चिन्त्यम्। १३हसिकाली (विचाति) रत्नमाला। १४कालरात्रौ यमभगिन्याम् तन्त्रोक्तासु दशमहाविद्यासु आद्यायां १५ महाविद्यायाम् ताश्च “काली तारा महाविद्या षोडशी भुवनेश्वरी, भैरवी छिन्नमस्ता च विद्या धूमावती तथा। बगला सिद्धविद्या च मातङ्गी कमलात्मिका। एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः” तन्त्रसा० “कालीपूजा श्रुता नाथ! भावाश्च विविधाः प्रभो!” भैरवत० “तारायाश्चैव काल्याश्च त्रिपुराया विशेषतः। जनने मरणे चैव न त्यजेयुर्जपार्चने” तन्त्र०

कालीक पुंस्त्री० के जलेऽलीकइव मत्स्यघाताय निश्चेष्ट-

त्वात्। क्रौञ्चे वके शब्दरत्ना॰ स्त्रियां ङीप्।

कालीची स्त्री काल्या यमभगिन्या चीयते ऽत्र—ची—बा॰ आधारे ड गौरा॰ ङीप्। यमविचारभूमौ त्रिका॰।

कालीतनय पुंस्त्री॰ कालीमितः प्राप्तोनयः प्रापणं यस्य। महिषे हेमच॰ स्त्रियां ङीप्। महिषस्य काल्यै बलिदानार्थं नीयमानत्वात्तथात्वम्। [चन्दने शब्दच॰।

कालीय न॰ कालस्थाने भवम् "वृद्धाच्छः" पा॰ छ। कृष्ण-

कालीयक न॰ कालीयमिव कायति—कै—क। कालानुसार्य्ये सुगन्धिकाष्ठे (कलम्बक) अमरः।

कालेय पु॰कालयाश्चपत्यम् ढक्। १दैत्यभेदे, कालकेये, कलायै १७८९पृ॰दर्शितरक्तधारिण्यै हितं ढक्। २यकृति कं सुखमालेयमादेयं यस्मात्। ३कालचन्दने न॰"आश्यानकालेयकृताङ्गरागाम्" कुमा॰। कलिना दृष्टं साम ढक्। ४कलिदृष्टे सामभेदे तच्च माध्यन्दिनसवने सप्तमं सूक्तमधिकृत्य गेयम्। तत्प्रकार अङ्गगाने दृश्यः

कालेयक पुंस्त्री॰ कलये विरोधाय साधु कलि+ढक् संज्ञायां क। १कुक्कुरे तस्यान्योन्यविरोधित्वात् तथात्वम् स्त्रियां ङीप्। कालेय+स्वार्थे संज्ञायां वा क। २कालीयचन्दने "मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु"काद॰। ३हरिद्रायां पु॰ ४दारुहरिद्रायां न॰राजनि॰। तत्रार्थे पु॰ शब्दर॰।

कालेश पु॰ ६त॰। १सूर्ये तस्य स्वगत्या कालप्रवर्त्तकत्वात् तथात्वम्। २शिवे च। ३मकारवर्णे। "विष्णुरीशस्ततो ह्यान्तः कालेशः पृथिवी ततः" श्रीविद्यामन्त्रोद्धारे "कालेशोमकारः" तन्त्रसा॰। कालेश्वरादयोऽप्यत्र।

कालोदक न॰ भारतप्रसिद्धे तीर्थभेदे। "कालोदकं नन्दिकुण्डं तथा चोत्तरमानसम्" भा॰ आनु॰२८अ॰।

काल्प पु॰ कल्पे विधौ भवः अण्। (काँचाहलुद्) कर्च्चूरे शब्दर॰। स्वार्थे क। तत्रार्थे अमरः।

काल्पनिक त्रि॰कल्पनायाः आगतः ठञ्। कल्पनाभवे १कल्पिते, २ आरोपिते, च। स्त्रियां ङीप्। "इति व्युत्पत्तिस्तु काल्पनिकी" नि॰त॰।

काल्पसूत्र त्रि॰ कल्पसूत्रं वेत्त्यधीते वा सूत्रान्तत्वात् ठकि प्राप्ते "अकल्पादेः" इत्युक्तेः अण्। १कल्पसूत्राभिज्ञे २तदध्येतरि च स्त्रियां ङीप्। [विधानादौ।

काल्पिक त्रि॰ कल्पग्रन्थे उक्तः ठञ्। वेदाङ्गकल्पग्रन्थोक्ते

काल्य न॰ कल्यमेव स्वार्थे अण्। १प्रत्यूषे हेमच॰। कालः-प्राप्तोऽस्य यत्। २प्राप्तकाले शीतादौ त्रि॰। काले भवः दिगा॰ यत्। ३कालभवे त्रि॰ तदन्तसमासे अकर्म्मधारये उत्तरपदस्य आद्युदात्तता। ततोनडा॰ पाठान्तरे गोत्रे फक्। काल्यायन काल्यगोत्रापत्ये पु॰ स्त्री। [शब्दर॰।

काल्यक न॰ काले साधु यत् स्वार्थे क। कर्च्चूरे(काँचाहलुद्)

काल्या स्त्री कालः गर्भग्रहणकालः प्राप्तोऽस्याः यत्। प्राप्तगर्भग्रहणयोग्यकालायाम् ऋतुमत्याम् अमरः "उपसर्य्या काल्याप्रजने" पा॰ [भावे।

काल्याणक न॰ कल्याणस्य भावः मनोज्ञा॰ वुञ्। कल्याण-

काव न॰ कविर्देवताऽस्य अण्। कविदेवताके सामभेदे। तच्च तृतीयसवने गेयार्भवपवमानान्तर्गतम्। "आभीप्रियाणीति" सूक्ते गेयम्। तत्प्रकारश्च अङ्गगाने दर्शितः।

कावचिक न॰ कवचिनां समूहः "ठञ् कवचिनश्च" पा॰ ठञ् 'इनोलोपः। वर्म्मधारिणां समूहे।

कावट पु॰ कर्वट+पृषो॰। कर्वटे हला॰।

कावषेय पु॰ यजुर्वेदं शान्तर्गते तुराख्ये ऋषिभेदे। "कावषेयास्तु कावषेयः" शत॰ १०,६,५,६, तुरोह कावषेयः कारोत्यां देवेभ्योऽग्निं चिकीर्षे" तत्रैव ९,५,२,१५,

कावाद पु॰ कुत्सितईषद्वा वादः कोः का। वाक्कलहे शब्दचि॰। [शैवाले टक्यादिष्कृते त्रिका॰।

कावार न॰ कं जलमावृणोति आ+वृ—अण् उप॰स॰।

कावी स्त्री कवेरियं प्रञ् ततः शार्ङ्ग॰र॰ स्त्रियां ङीन् यलोपः। कविसम्बन्धिन्याम् स्त्रियाम्।

कावृक पुंस्त्री कुत्सितः ईषद्वा वृक इव। १ कुक्कुटे २चक्रवाके ३पीतवर्णमस्तकपक्षिभेदे च मेदि॰तेषां वृकतुल्येर्ष्यिक्रियुक्तत्वात् तथात्वम्। स्त्रियां जातित्वात् ङीप्।

कावेर न॰ कस्य सूर्यस्येव ईषत्वेरमङ्गमस्य। १ कुङ्कुमे जटा॰। तस्य शिखाभिः सूर्यतुल्यरक्तत्वात् तथात्वम्।

कावेरी स्त्री कस्य जलस्य वेरं शरीरं तस्येदमित्यण् ङीप्। १सरिद्भेदे। कुत्सितमपवित्रं वेरं यस्याः स्वाङ्गत्वात् ङीप्। २वेश्यायाम् ५व॰। ३ हरिद्रायाम्। "इक्षुमती च कावेरी वङ्कुर्मन्दाकिनी तथा" भा॰आनु॰१६५अ॰। "भारतीपुत्रतोया च कावेरी मुर्म्मुरा तथा" भा॰व॰२२१। "चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला-वेहा मसी कावेरी वेणीत्यादि भाग॰ ५,१९,१८. भारतवर्षनदीकथने। सा च सह्याद्रेः मलयाद्रेश्च सानुसन्निकृष्टस्था तदेतत् रघौ वर्णितम् यथा "गृहीतप्रतिमुक्तस्य स धर्म्मविजयी नृपः। श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्। ततो वेलातटेनैव फल-

वत्पूगमालिना। अगस्त्याचरितामाशाम् अनाशास्य-जयो ययौ। स सैन्यपरिभोगेण गजदानसुगन्धिना। कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत्। बलै-रध्युषितास्तस्य विजिगीषोर्गताध्वनः। मारीचोद्भ्रा-न्तहारीताः मलयाद्रेरुपत्यकाः"। "कावेरीतीर-भूमीरुहभुजगवधूभुक्तमुक्तावशिष्टः" मलयजवातवर्णने "ततो गच्छेत कावेरीं वृतामप्सरसां गणैः। तत्र स्नात्वा नरो राजन्! गोसहस्रफलं लभेत्' भा० व० ८५। गङ्गे! च यमुने! चैव गोदावरि! सरस्वति! नर्म्मदे! सिन्धु! कावेरि! जलेऽस्मिन् सन्निधिं कुरु, तीर्थवाहन मन्त्र

काव्य पु० कवेः भृगुपुत्रस्यापत्यम् यञ्। शुक्रे अमरः "भृगोः पुत्रः कविर्विद्वान् शुक्रः कवितुतप्रहः" भा०आ०६०। "जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम्। पौरोहित्येन याज्यार्थे काव्यं तूशनसं परे" भा०आ०७५ अ०। कवे-रिदम् यञ्। २कविसम्बन्धिनि। कव—वर्णने स्तुतौ च कर्म्मणि ण्यत्। ३वर्णनीये ४स्तुत्ये च त्रि० स्त्रियां टाप् "दुर्य्योधनस्य रूपेण शृणु काव्यां गिरं मम" भा०स० ६०अ०। "भाष्याणि तर्कयुक्तानि देहवन्ति विशांपते!। नाटका विविधाः काव्याः कथाख्यायिककारिकाः" भा०स०११अ०। शार्ङ्गरवादौ तु काव्यशब्दस्य यञ-न्तस्यैव ग्रहणात् ततः स्त्रियां ङीन्। कवेः कर्म्म ष्यञ्। कविकृतगद्यपद्यात्मके ५ वाक्यविशेषे न०। काव्यप्र०तत् करणप्रयोजनमुक्तं यथा—

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये। सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे" मू०

"कालिदासादीनामिव यशः, श्रीहर्षादेर्धावकादीनामिव धनं, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्म्मयू-रादीनामिवानर्थनिवारणं, सकलप्रयोजनमौलिभूतं सम-नन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमा-नन्दं, प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः सुहृत्सम्मि-तार्थतात्पर्य्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुण-भावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णनानिपुणकविकर्म्म, तत् कान्तेव सरसतापा-दनेनाभिमुखीकृत्य रामादिवत् वर्त्तितव्यं न रावणादिव-दित्युपदेशञ्च, यथायोगं कवेः सहृदयस्य च करोतीति सर्व्वथा तत्र यतनीयम्। अस्य कारणमाह" वृत्तिः

शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्। काव्य-ज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे" मू०

"शक्तिः कवित्वबीजरूपः संस्कारविशेषः, यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्, लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य, शास्त्राणां छन्दोव्याकर-णाभिधानकोषकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्र-न्थानां, काव्यानाञ्च महाकविसम्बन्धिनाम्, आदिग्रह-णादितिहासादीनाञ्च विमर्शनाद्व्युत्पत्तिः, काव्यं कर्त्तुं विचारयितुञ्च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरिति त्रयः समुदिताः न तु व्यस्ता-स्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्नतु हेतवः" वृत्तिः

सा०द० अन्यप्रकारं काव्यस्य प्रयोजनं मुक्तं यथा "चतुर्व्वर्गफलप्राप्तिः सुखादल्पधियामपि। काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते" सू०।

"चतुर्व्वर्गफलप्राप्तिर्हि काव्यतो रामादिवत् प्रवर्त्तितव्यं न रावणादिवदित्यादिकृत्याकृत्यप्रवृत्तिनिवृत्त्युपदेशद्वारेण सुप्रतीतैव। उक्तञ्च "धर्म्मार्थकाममोक्षेषु वैचक्षण्यं क-लासु च। करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवण-मिति"। किञ्च काव्याद्धर्म्मप्राप्तिर्भगवन्नारायणचरणा-रविन्दस्तवादिना "एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुग् भवति" इत्यादिवेदवाक्येभ्यश्च सुप्रसिद्धैव। अर्थप्राप्तिश्च प्रत्यक्षसिद्धा। कामप्राप्तिश्चार्थद्वारैव। मोक्ष-प्राप्तिश्चैतज्जन्यधर्म्मफलाननुसन्धानात् मोक्षोपयोगि-वाक्ये व्युत्पत्त्याधायकत्वाच्च। चतुर्वर्गप्राप्तिर्हि वेदशा-स्त्रेभ्यो नीरसतया दुःखादेव परिणतबुद्धीनामेव जायते। परमानन्दसन्दोहजनकतया सुखादेव सुकुमारबुद्धीनामपि पुनः काव्यादेव। ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु काव्येषु किमिति यत्नः करणीय इत्यपि न वक्तव्यम् कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोप-शमनीयत्वे कस्य वा रोगिणः सितशर्कराप्रवृत्तिः साधी-यसी न स्यात्। किञ्च। काव्यस्योपादेयत्वमाग्नेयपुराणे-ऽप्युक्तम्। "नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा। कवित्वं दुर्लभं तत्र शक्तिस्तत्र सुदुर्लभेति" "त्रिवर्गसाधनं नाट्यमिति" च। विष्णुपुराणे "काव्यालापाश्च ये केचिद्गीतकान्यखिलानि च। शब्दमूर्त्तिधरस्यैते विष्णोरंशा महात्मनः" इति वृत्तिः। तस्य लक्षणं तत्रैव "वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः। उत्कर्ष-हेतवः प्रोक्ता गुणालङ्काररीतयः" सू०।

अन्ये तु गुणालङ्काररीतियुक्तं दोषरहितं वाक्यं का-

व्यमिति वदन्ति । आनन्दविशेषजनकवाक्यं काव्यमिति रसगङ्गाधरः ।

तद्भेदाः प्रथमं त्रिविधाः उत्तममध्यमाधमभेदात् । यथाह काव्यप्र॰

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः ।
अतादृशि गुणीभूतव्यङ्ग्यं काव्यं तु मध्यमम् ।
शब्दचित्रं वाच्यचित्रमव्यङ्ग्यन्त्ववरं स्मृतम्" ।

रसगङ्गाधरे तु अर्थचित्रापेक्षया शब्दचित्रस्याल्पचमत्कारकारित्वात्तस्याधमाधमत्वोक्त्या काव्यभेदचातुर्विध्यमुक्तम् । सा॰ द॰ मते अव्यङ्ग्यस्य काव्यत्वाभावात् ध्वनिगुणीभूतव्यङ्ग्यभेदेन द्वैविध्यमिति भेदः । तद्भेदाः सोदाहरणं दर्शिता तत्र यथा ।

"काव्यं ध्वनिर्गुणीभूतव्यङ्ग्यञ्चेति द्विधा मतम्" । सू॰

तत्र।"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्"सू॰

"वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मिन्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम्" वृत्तिः

"भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।

"अविवक्षितवाच्योऽन्योविवक्षितान्यपरवाच्यश्च"। सू॰

"तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः। लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधितस्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः । अत एवात्र वाच्यं विवक्षितम् अन्यपरं व्यङ्ग्यनिष्ठम् अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव व्यङ्ग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य । अभिधामूलस्य बहुविषयतया पश्चान्निर्द्देशः । अविवक्षितवाच्यस्य भेदावाह" वृत्तिः

"अर्थान्तरं सङ्क्रमिते वाच्येऽत्यन्तं तिरस्कृते ।
अविवक्षितवाच्योऽपि ध्वनिर्द्वैविध्यमृच्छति" सू॰ ।

"अविवक्षितवाच्यो नाम ध्वनिरर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः । यत्र स्वयमनुपयुज्यमानो मुख्योऽर्थः स्वविशेषरूपेऽर्थान्तरे परिणमति तत्र मुख्यार्थस्य स्वविशेषरूपार्थान्तरसङ्क्रमितत्वादर्थान्तरसङ्क्रमितवाच्यत्वम् यथा । "कदली कदली करभः करभः करिराजकरः करिराजकरः । भुवनत्रितयेऽपि बिभर्त्ति तुलामिदमूरुयुगं न चमूरुदृशः"। अत्र द्वितीयकदल्यादिशब्दाः पौनरुक्त्यभिया सामान्यकदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादि गुणविशिष्टस्वार्थपरा" जाड्याद्यतिशयश्च व्यङ्ग्यः । यत्र पुनः स्वार्थं सर्व्वथा परित्यजन्नर्थान्तरे परिणमति तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम् । यथा "निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते" । अत्रान्धशब्दो मुख्यार्थे बाधितोऽप्रकाशरूपमर्थं बोधयति अप्रकाशातिशयश्च व्यङ्ग्यः । अन्धत्वाप्रकाशत्वयोः सामान्यविशेषभावाभावान्नार्थान्तरसङ्क्रमितवाच्यत्वम् । यथा "भम धम्मिअ ! वीसत्थो सो सुणओ अज्ज मारिओ देन । गोलाणईकच्छकुडङ्गवासिणा दरिअसीहेन" । अत्र भ्रम धार्म्मिकेत्यतो भ्रमणस्य विधिः प्रकृतेऽनुपयुज्यमानतया भ्रमणनिषेधे पर्य्यवस्यतीति विपरीतलक्षणाशङ्का न कार्य्या । यत्र खलु विधिनिषेधावुत्पद्यमानावेव निषेधविध्योः पर्य्यवस्यतस्तत्रैव तदवसरः । यत्र पुनः प्रकरणादिपर्य्यालोचनेन विधिनिषेधयोर्निषेधविधी अवगम्येते तत्र ध्वनित्वमेव । तदुक्तम्

"क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् ।
पूर्व्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु" । अत्राद्ये मुख्यार्थस्यार्थान्तरे सङ्क्रमणं (प्रवेशः) न तु तिरोभावः अत एवात्राजहत्स्वार्थलक्षणा । द्वितीये तु स्वार्थस्यात्यन्तं तिरस्कृतत्वाज्जहत्स्वार्था" वृत्तिः ॥

"विवक्षिताभिधेयोऽपि द्विभेदः प्रथमं ततः। असंलक्ष्यक्रमो यत्र व्यङ्ग्यो लक्ष्यक्रमस्तथा"सू॰

"विवक्षितान्यपरवाच्योऽपि ध्वनिरसंलक्ष्यक्रमव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्यश्चेति द्विविधः" वृत्तिः !

"तत्राद्यो रसभावादिरेक एवात्र गण्यते । एकोऽपि भेदोऽनन्तत्वात् सङ्ख्येयस्तस्य नैव यत्"सू॰

"उक्तस्वरूपो रसभावादिरसंलक्ष्यक्रमव्यङ्ग्यः । अत्र व्यङ्ग्यप्रतीतेर्व्विभावादिप्रतीतिकारणकत्वात् क्रमोऽवश्यमस्ति किन्तु उत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते । एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात् सङ्ख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यङ्ग्यध्वनिर्नाम काव्यमेकभेदमेवोक्तम् । तथाहि एकस्यैव शृङ्गारस्य एकोऽपि सम्भोगरूपो भेदः परस्परालिङ्गनाधरपानचुम्बनादिभेदात् प्रत्येकञ्च विभावादिवैचित्र्यात् सङ्ख्यातुमशक्यः का गणनात् सर्व्वेषाम्" वृत्तिः ॥

"शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे । ध्वनिर्लक्ष्यक्रमव्यङ्ग्यस्त्रिविधः कथितो बुधैः" सू॰

"क्रमलक्ष्यत्वादेवानुरणनरूपो यो व्यङ्ग्यस्तस्य शब्दशक्त्युद्भवत्वेन अर्थशक्त्युद्भवत्वेन शब्दार्थशक्त्युद्भवत्वेन च त्रैविध्यात् संलक्ष्यक्रमव्यङ्ग्यनाम्नो ध्वनेः काव्यस्यापि त्रैविध्यम्" वृत्तिः । तत्र

"वस्त्वलङ्काररूपत्वाच्छब्दशक्त्युद्भवो द्विधा" मू०। "अलङ्कारशब्दस्य पृथगुपादानादनलङ्कारो" वस्तुमात्रं गृह्यते। तत्र वस्तुरूपशब्दशक्त्युद्भवो व्यङ्ग्यो यथा। "पन्थिअ! ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे। उण्णअपओहरं पेक्खिअ उण जइ वससि ता वससु"। अत्र सत्थरादिशब्दशक्त्या यद्युपभोगक्षमोऽसि तदास्स्वेति वस्तु व्यज्यते। अलङ्काररूपो यथा "दुर्गालङ्घितविग्रहो मनसिजं संमीलयंस्तेजसा प्रोद्यद्राजकलो गृहीतगरिमा विष्वग्वृतो भोगिभिः। नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिं धारयन् गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः"अत्र प्राकरणिकस्य उमानाममहादेवीवल्लभभानुदेवनृपतेर्वर्णने द्वितीयार्थसूचितमप्राकरणिकस्य पार्वतीवल्लभस्य वर्णनमसम्बद्धं मा प्रसाङ्क्षीदितीश्वरभानुदेवयोरुपमानोपमेयभावः कल्प्यते। तदत्र उमावल्लभ उमावल्लभ इवेत्युपमालङ्कारो व्यङ्ग्यः। यथा वा "अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदः प्रभो!। अहितः सहितः साधुयशोभिरसतामसि"। अत्रामित इत्यादावपिशब्दाभावाद्विरोधाभासो व्यङ्ग्यः व्यङ्ग्यस्यालङ्कार्यत्वेऽपि ब्राह्मणश्रमणन्यायादलङ्कारत्वमुपचर्यते" वृत्तिः।

"वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः। कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट्॥ षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः। अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम्''मू०॥

"स्वतः सम्भवी औचित्याद्बहिरपि सम्भाव्यमानः। प्रौढोक्त्या सिद्धो न त्वौचित्येन। तत्र क्रमेण यथा। "दृष्टिं हे प्रतिवेशिनि! क्षणमिहाप्यस्मद्गृहे दास्यसि प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति। एकाकिन्यपि यामि सत्वरमितः स्रोतस्तमालाकुलं नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः"। अनेन स्वतःसम्भविना वस्तुमात्रेण एतत्प्रतिपादिकाया भाविपरपुरुषोपभोगजनखक्षतादिगोपनरूपं वस्तुमात्रं व्यज्यते। "दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि। तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे"। अनेन स्वतः सम्भविना वस्तुना रवितेजसो रघुप्रतापोऽधिक इति व्यतिरेकालङ्कारो व्यज्यते। "आपतन्तममुं दूरादूरीकृतपराक्रमः। बलोऽवलोकयामास मातङ्गमिव केसरी"। अत्रोपमालङ्काररूपेण स्वतःसम्भविना व्यञ्जकार्थेन बलदेवः क्षणेनैव वेणुदारिणः क्षयं करिष्यतीति वस्तु व्यज्यते। "गाढकान्तदशनक्षतव्यथासङ्कटादरिवधूजनस्य यः। ओष्ठविद्रुमदलान्यमोचयन्निर्दशन् युधि रुषा निजाधरम्"। अत्र स्वतः सम्भविना विरोधालङ्कारेणाधरो निर्दष्टः शत्रवो व्यापादिताश्चेति समुच्चयालङ्कारो व्यङ्ग्यः। "सज्जेइ सुरहिमासो ण आपणेइ जुअइजणलक्खसहे। अहिणवसहआरमुहे णअपल्लवपत्तले अणङ्गस्स सरे"। अत्र वसन्तः शरकारः कामो धन्वी युवतयो लक्ष्यं पुष्पाणि शरा इति कविप्रौढोक्तिसिद्धं वस्तु प्रकाशीभवन्मदनविजृम्भणरूपं वस्तु व्यनक्ति।

"रजनीषु विमलभानोः करजालेन प्रकाशितं वीर!। धवलयति भुवनमण्डलमखिलं तव कीर्त्तिसन्ततिः सततम्"। अत्र कविप्रौढोक्तिसिद्धेन वस्तुना कीर्त्तिसन्ततेश्चन्द्रकरजालादधिककालप्रकाशकत्वेन व्यतिरेकालङ्कारो व्यङ्ग्यः "दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः। मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः"। अत्र कविप्रौढोक्तिसिद्धेनापह्नुत्यलङ्कारेण भविष्यद्राक्षसश्रीविनाशरूपं वस्तु व्यज्यते। ',धम्मिल्ले नवमल्लिकासमुदयो, हस्ते सिताम्भोरुहं,हारः कण्ठतटे, पयोधरयुगे श्रीखण्डलेपो घनः। एकोऽपि त्रिकलिङ्गभूमितिलक! त्वत्कीर्त्तिराशिर्ययौ नानामण्डनतां पुरन्दरपुरीवामभ्रुवां विग्रहे"। अत्र कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण भूमिष्ठोऽपि स्वर्गस्थानामुपकारं करोषीति विभावनालङ्कारो व्यज्यते "शिखरिणि क नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः। सुमुखि! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः"। अत्रानेन कविनिबद्धस्य कस्यचित् कामिनः प्रौढोक्तिसिद्धेन वस्तुना तवाधरः पुण्यातिशयलभ्य इति वस्तु प्रतीयते। "सुभगे कोटिसङ्ख्यत्वमुपेत्य मदनाशुगैः। वसन्ते पञ्चता त्यक्ता पञ्चतासीद्वियोगिनाम्"। अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन कामशराणां कोटिसङ्ख्यत्वप्राप्त्या निखिलवियोगिमरणेन वस्तुना शराणां पञ्चता शरान् विमुच्य वियोगिनः श्रितेत्युत्प्रेक्षालङ्कारो व्यज्यते "मल्लिकामुकुले चण्डि! भाति गुञ्जन्मधुव्रतः। प्रयाणे पञ्चबाणस्य शङ्खमापूरयन्निव"। अत्र कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन उत्प्रेक्षालङ्कारेण कामस्यायमुन्मादकः कालः प्राप्तस्तत्कथं 'मानिनि! मानं न मुञ्चसीति वस्तु व्यज्यते। "महिलासहस्सभरिए तुह हिअए.

सुन्दर! सा अमाअन्ती । अणुदिअमरणसम्भा अङ्गं तणुव्वं पि तणु एइ" । (अमाभायन्तीति) कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण तनोस्तनूकरणेऽपि तव हृदये न वर्त्तत इति विशेषोक्त्यलङ्कारो व्यज्यते। न खलु कवेः कविनिबद्धस्येव रागाद्याविष्टता। अतः कविनिबद्धवक्तृप्रौढोक्तिः कविप्रौढोक्तेरधिकं सहृदयचमत्कारिणीति पृथक्प्रतिपादिता। एषु च अलङ्कृतिव्यञ्जनस्थलेषु रूपकोत्प्रेक्षाव्यतिरेचनादिमात्रस्य प्राधान्यं सहृदयसंवेद्यं न तु रूप्यादीनामित्यलङ्कृतेरेव मुख्यत्वम्"। वृत्तिः "एकः शब्दार्थशक्त्युत्थे" मू॰ उभयशक्त्युद्भवे व्यङ्ग्ये एकोध्वनेर्भेदः। यथा "हिमसुक्तचन्द्ररुचिरः सपद्मको मदयन् द्विजान् जनितमीनकेतनः'। अभवत् प्रसादितसुरो महोत्सवः प्रमदाजनस्य स चिराय माधवः"॥ अत्र माधवः कृष्णो माधवो वसन्त इवेत्युपमालङ्कारो व्यङ्ग्यः। एवञ्च व्यङ्ग्यभेदादेव व्यञ्जकानां काव्यानां भेदः"। वृत्तिः "तदष्टादशधा ध्वनिः" मू॰। अविवक्षितवाच्योऽर्थान्तरसङ्क्रमितवाच्योऽत्यन्ततिरस्कृतवाच्येति द्विविधः। विवक्षितान्यपरवाच्यस्तु असंलक्ष्यक्रमव्यङ्ग्यत्वेनैकः। संलक्ष्यक्रमव्यङ्ग्यवाच्यत्वेन च शब्दार्थोभयशक्तिमूलतया पञ्चदशेति अष्टादशभेदो ध्वनिः" वृत्तिः एषु च।

"वाक्ये शब्दार्थशक्त्युत्थस्तदन्ये पदवाक्ययोः" मू॰।

"तत्र अर्थान्तरसङ्क्रमितवाच्यो ध्वनिः पदगतो यथा। धन्यः स एव तरुणो नयने तस्यैव नयने च। युवजनमोहनविद्या भवितेयं यस्य सम्मुखे सुमुखी"। अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टनयनपरः। वाक्यगतो यथा। "त्वामस्मि वच्मि विदुषां समुदायोऽत्र तिष्ठति। आत्मीयां मतिमादाय स्थितिमत्र विधेहि तत्" अत्र प्रतिपाद्यस्य सम्मुखीनत्वादेव लब्धे प्रतिपाद्यत्वे 'त्वामिति' पुनर्वचनमन्यव्यावृत्तिविशिष्टं त्वदर्थं लक्षयति। एवं अस्मीत्यनेनैव कर्त्तरि लब्धे 'अस्मीति' पुनर्व्वचनमन्यव्यावृत्तिविशिष्टं मदर्थं लक्षयति। तथा 'विदुषां समुदाय' इत्यादिवचनेनैव वक्तुः प्रतिपादने सिद्धे पुनः 'वच्मीति' वचनं 'उपदिशामि' इति वचनविशेषरूपमर्थं लक्षयति। एतानि च लक्षितानि स्वातिशयं व्यञ्जयन्ति। एतेन मम वचनं तवात्यन्तं हितं तदवश्यमेतत् कर्त्तव्यमित्यभिप्रायः। तदेवमयं वाक्यगतोऽर्थान्तरसङ्क्रमितवाच्यो ध्वनिः। अत्यन्ततिरस्कृतवाच्यः पदगतो यथा 'निश्वासान्ध इवेत्यादि'। वाक्यगतो यथा। "उपकृतं बहु तत्र' किमुच्यते सुजनता प्रथिता भवता परम्। विदधदीदृशमेव सदा सखे! सुखितमास्स्व ततः शरदां शतम्" अन्येषां वाक्यगतत्वे उदाहृतम्। पदगतत्वे यथा। "लावण्यं तदसौ कान्तिस्तद्रूपं स वचःक्रमः। तदा सुधास्पदमभूदधुना तु ज्वरो महान्" अत्र लावण्यादीनां तादृगनुभवैकगोचरताव्यञ्जकानां तदादिशब्दानामेव प्राधान्यम्। अन्येषान्तु तदुपकारित्वमेवेति तन्मूल एव ध्वनिव्यपदेशः। तदुक्तं ध्वनिकृता "एकावयवसंस्थेन भूषणेनेव कामिनी। पदद्योत्येन सुकवेर्ध्वनिना भाति भारती"। एवं भावादिष्वप्यूह्यम्। "भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः। कस्य नानन्दनिष्यन्दं विदधाति सदागमः"। अत्र सदागमशब्दः सन्निहितमुपनायकं प्रति सच्छास्त्रार्थमभिधाय 'सतः पुरुषस्यागमः' इति वस्तु व्यनक्ति। ननु 'सदागमः सदागम इवेति' न कथमुपमाध्वनिः, सदागमशब्दार्थयोरुपमानोपमेयभावाविवक्षणादुरहस्यसंगोपनार्थमेव हि द्व्यर्थपदप्रतिपादनं प्रकरणादिपर्य्यालोचनेन च सच्छास्त्राभिधानस्यासम्बन्धत्वात्। "अनन्यसाधारणधीर्धृताखिलवसुन्धरः। राजते कोऽपि जगति स राजा पुरुषोत्तमः"। अत्र पुरुषश्रेष्ठः पुरुषोत्तम इवेत्युपमाध्वनिः। अनयोः शब्दशक्तिमूलौ संलक्ष्यक्रमभेदौ। "सायं स्नानमुपासितं मलयजेनाङ्गं समालेपितं यातोऽस्ताचलमौलिमम्बरमणिर्विस्रब्धमत्रागतिः। आश्चर्य्यं तव सौकुमार्य्यमभितः क्लान्ताऽसि येनाधुना नेत्रद्वन्द्वममीलनव्यतिकरं शक्नोति तेनासितुम्"। अत्र स्वतःसम्भविना वस्तुना कृतपरपुरुषपरिचया क्लान्ताऽसीति वस्तु व्यज्यते। तस्याधुना क्लान्ताऽसि न तु पूर्वं कदाचिदपि तवैवंविधः क्लमो दृष्ट इति बोधयतोऽधुनापदस्यैवेतरपदार्थोत्कर्षादधुनापदस्यैव पदान्तरापेक्षया वैशिष्ट्यम्। "तदप्राप्तिमहादुःखविलीनाशेषपातका। तच्चिन्ताविपुलाह्लादक्षीणपुण्यचया तथा। चिन्तयन्ती जगत्सूतिं परं ब्रह्मस्वरूपिणम्। निरुच्छ्वासतया मुक्तिं गताऽन्या गोपकन्यका"। अत्राशेषचयपदप्रभावादनेकजन्मसहस्रभोग्यदुष्कृतसुकृतफलराशितादात्म्याध्यवसिततया भगवद्विरहदुःखचिन्ताह्लादयोः प्रत्यायनमित्यतिशयोक्तिद्वयप्रतीतिरशेषचयपदद्वयद्योत्या। अत्र च व्यञ्जकस्य प्रौढोक्तिमन्तरेणापि सम्भवात स्वतःसम्भविता। "पश्चान्त्यसंख्यपथगां त्वद्दानजलवाहिनीम्। देव! त्रि-

पथगात्मानं गोपयत्युपमूर्द्धनि"। अत्र 'पश्यन्तीति' कविप्रौढ़ोक्तिसिद्धेन काव्यलिङ्गालङ्कारेण न केऽप्यन्ये दातारस्तव सदृशा इति व्यतिरेकालङ्कारोऽसंलक्ष्यपदद्योत्यः। एवमन्येष्वर्थशक्तिमूलसंलक्ष्यक्रमभेदेषूदाहार्य्यम्। तदेवं ध्वनेः पूर्व्वोक्तेष्वष्टादशसु भेदेषु मध्ये शब्दार्थशक्त्युत्थो व्यङ्ग्यो वाक्यमात्रे भवत्येकः। अन्ये पुनः सप्तदश वाक्ये पदे चेति चतुस्त्रिंशदिति पञ्चत्रिंशद्भेदाः" वृत्तिः।

"प्रबन्धेऽपि मतो धीरैरर्थशक्त्युद्भवो ध्वनिः" सू०।

"प्रबन्धो महावाक्यम्। अनन्तरोक्तद्वादशभेदोऽर्थशक्त्युत्थः। यथा महाभारते गृध्रगोमायुसंवादे "अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसङ्कुले। कङ्कालबहुले घोरे सर्व्वप्राणिभयङ्करे। न चेह जीवितः कश्चित् कालधर्म्ममुपागतः। प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी"। इति दिवसे शक्तस्य गृध्रस्य श्मशाने मृतं बालमुपादाय तिष्ठतां दिवसे तं परित्यज्य गमनमिष्टम्। "आदित्योऽयं स्थितो मूढाः! स्नेहं कुरुत साम्प्रतम्। बहुविघ्नो मुहूर्त्तोऽयं जीवेदपि कदाचन। अमुं कनकवर्णाभं बालमप्राप्तयौवनम्। गृध्रवाक्यात् कथं बालास्त्यजध्वमविशङ्किताः"। इति निशि समर्थस्य गोमायोर्दिवसे परित्यागोऽनभिलषित इति वाक्यसमूहेन द्योत्यते। अत्र स्वतःसम्भवी व्यञ्जकः। एवमन्येष्वेकादशभेदेषूदाहार्य्यम्। एवं वाच्यार्थस्य व्यञ्जकत्वे उदाहृतम्। लक्ष्यार्थस्य यथा "निःशेषच्युतचन्दनं स्तनतटं निर्म्मृष्टरागोऽधरो नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः। मिथ्यावादिनि! दूति! बान्धवजनस्याज्ञातपीडागमे! वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्"। व्यङ्ग्यार्थस्य यथा "उअ णिच्चल णिप्पन्दा भिसिणीपत्तम्मि रेहइ बलाआ। णिम्मलमरगअभाअणपरिट्ठिआ संखसुत्तिव्व"। अनयोः स्वतःसम्भविनौ लक्ष्यव्यङ्ग्यार्थौ व्यञ्जकौ। एवमन्येष्वेकादशभेदेषूदाहार्य्यम्" वृत्तिः।

"पदांशवर्ण्णरचनाप्रबन्धेष्वस्फुटक्रमः। असंलक्ष्यक्रमव्यङ्ग्यो ध्वनिस्तत्र पदांशगः" सू०।

"प्रकृतिप्रत्ययोपसर्गनिपातादिभेदादनेकविधः। यथा "चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः। करं व्याधुन्वत्याः पिबसि रतिसर्व्वस्वमधरं वयं तत्त्वान्वेषान्मधुकर! हतास्त्वं खलु कृती"। अत्र 'हताः' इति न पुनर्दुःखं प्राप्तवन्त इति हन्प्रकृतेः। "शशिरुचिसंहताधरौष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्। मुखमंसविवर्त्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितन्तु"। अत्र 'तु' इति निपातस्यानुतापव्यञ्जकत्वम्। "न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः, सोऽप्यत्रैव निहन्ति राक्षसकुलं, जीवत्यहो रावणः। धिग्धिक् शक्रजितं, प्रबोधितवता किं कुम्भकर्णेन वा? स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः" 'अरयः' इति बहुवचनस्य, 'तापसः' इत्येकवचनस्य, 'अत्रैवेति' सर्व्वनाम्नः, 'निहन्तीति' 'जीवतीति' च तिङः 'अहो' इत्यव्ययस्य, 'ग्रामटिकेति कप्रत्ययतद्धितस्य, 'विलुण्ठनेति' व्युपसर्गस्य, 'भुजैरिति' बहुवचनस्य व्यञ्जकत्वम्। "आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा, नासाग्रे नयनं, तदेतदपरं यच्चैकतानं मनः। मौनञ्चेदमिदञ्च शून्यमधुना यद्विश्वमाभाति ते तद्ब्रूयाः सखि! योगिनी किमसि भोः! किं वा वियोगिन्यसि"। अत्र तु 'आहार इति' विषयसप्तम्याः, 'समस्तेति' 'परेति' च विशेषणद्वयस्य, 'मौनं चेदमिति' प्रत्यक्षपरामर्शिनः सर्व्वनाम्नः, 'आभातीति' उपसर्गस्य, 'सखीति' प्रणयस्मारणस्य, 'असि भोः' इति सोपहासोत्प्रासस्य, 'किं वा' इत्युत्तरपक्षदार्ढ्यसूचकस्य वाशब्दस्य, 'असीति' वर्त्तमानोपदेशस्य, तत्तद्विशेषव्यञ्जकत्वं सहृदयसंवेद्यम्। वर्णरचनयोरुदाहरिष्यते। प्रबन्धे महाभारते शान्तः। रामायणे करुणः मालतीमाधवरत्नावल्यादौ शृङ्गारः। एवमन्यत्र"। वृत्तिः।

"तदेवमेकपञ्चाशद्भेदास्तस्य ध्वनेर्म्मताः। सङ्करेण त्रिरूपेण संसृष्ट्या चैकरूपया। वेदखाग्निशराः ५३०४ शुद्धैरिषुवाणाग्निसायकाः" ५३५५ सू०

"शुद्धैः शुद्धभेदैरेकपञ्चाशता योजने इत्यर्थः। दिङ्मात्रन्तूदाह्रियते। "अत्युन्नतस्तनयुगा तरलायताक्षी द्वारि स्थिता तदुपयानमहोत्सवाय। सा पूर्णकुम्भनवनीरजतोरणस्रक्सम्भारमङ्गलमयत्नकृतं विधत्ते"। अत्र 'स्तनावेव पूर्णकुम्भौ, दृष्टय एव नवनीरजस्रज इति' रूपकध्वनिरसध्वन्योरेकाश्रयानुप्रवेशः सङ्करः। "भिन्नन्यमूनि मदमूर्च्छदलिध्वनीनि धूताध्वनीनहृदयानि मधोर्दिनानि। निस्तन्द्रचन्द्रवदनावदनारविन्दसौरभ्यसौहृदसगर्व्वसमीरणानि"। अत्र निस्तन्द्रेत्यादिलक्षणामूलध्वनीनां संसृष्टिः। अथ गुणीभूतव्यङ्ग्यम्"। वृत्तिः

"अपरन्तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये" सू०।

"अपरं काव्यम्। अनुत्तमत्वं न्यूनतया साम्येन च सम्भवति" वृत्तिः।

"तत्र स्यादितराङ्गं काक्वाक्षिप्तञ्च वाच्यसिद्ध्यङ्गम्। सन्दिग्धप्राधान्यं तुल्यप्राधान्यमस्फुटमगूढम्। व्यङ्ग्यमसुन्दरमेवं भेदास्तस्योदिता अष्टौ" मू०।

"इतरस्य रसादेरङ्गं रसादि व्यङ्ग्यं यथा "अयं स रसनोत्कर्षी पीनस्तनविमर्द्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः"। अत्र शृङ्गारः करुणस्याङ्गम्। "मानोन्नतां प्रणयिनीमनुनेतुकामस्त्वत्सैन्यसागररवोद्गतकर्णतापः। हा! हा! कथं नु भवतो रिपुराजधानी–प्रासादसन्ततिषु तिष्ठति कामिलोकः"। अत्रौत्सुक्यत्राससन्धिसंसृष्टस्य करुणस्य राजविषयरतावङ्गभावः। "जनस्थाने भ्रान्तं कनकमृगतृष्णान्वितधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम्। कृता लङ्काभर्त्तुर्व्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलवसुता न त्वधिगता"। अत्र रामत्वं प्राप्तमित्यवचनेऽपि शब्दशक्त्यैव रामत्वमवगम्यते। वचनेन तु सादृश्यहेतुकतादात्म्यारोपणमाविष्कुर्व्वता तद्गोपनमपाकृतम् तेन वाच्यं सादृश्यं वाक्यार्थान्वयोपपादकतयाऽङ्गतां नीतम्। काक्वाक्षिप्तं यथा "मथ्नामि कौरवशतं समरे न कोपाद् दुःशासनस्य रुधिरं न पिबाम्युरस्तः। संचूर्णयामि गदया न सुयोधनोरू सन्धिं करोतु भवतां नृपतिः पणेन"। अत्र 'मथ्नाम्येवेत्यादि' व्यङ्ग्यं वाच्यस्य निषेधस्य सहभावेनैव स्थितम्। "दीपयन् रोदसीरन्ध्रमेष ज्वलति सर्व्वतः। प्रतापस्तव राजेन्द्र! वैरिवंशदवानलः"। अत्रान्वयस्य वेणुत्वारोपणरूपो व्यङ्ग्यः प्रतापस्य दवानलत्वारोपसिद्ध्यङ्गम्। "हरस्तु किञ्चित् परिवृत्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः। उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि"।

अत्र विलोचनव्यापारचुम्बनाभिलाषयोः प्राधान्ये सन्देहः। "ब्राह्मणातिक्रमत्यागो भवतामेव भूतये। जामदग्न्यश्च वो मित्रमन्यथा दुर्म्मनायते"। अत्र परशुरामो रक्षःकुलक्षयं करिष्यतीति व्यङ्ग्यस्य वाच्यस्य च समं प्राधान्यम्। "सन्धौ सर्व्वस्वहरणं विग्रहे प्राणनिग्रहः। अल्लावदीननृपतौ न सन्धिर्न च विग्रहः"। अत्र अल्लावदीनाख्ये नृपतौ दानसामादिमन्तरेण नान्यः प्रशमोपायः व्यङ्ग्यं युत्पन्नानामपि झटित्यस्फुटम्। "अनेन लोकगुरुणा सतां धर्म्मोपदेशिना। अहं व्रतवती स्वैरमुक्तेन किमतः परम्"

अत्र प्रतीयमानोऽपि शाक्यमुनेस्तिर्य्यक्योषिति बलात्कारोपभोगः स्फुटतया वाच्यायमान इत्यगूढम्। "वाणीरकुडुङ्गुड्डीणसउणिकोलाहलं सुणन्तीए। घरकम्मवावडाए बहूए सीअन्ति अङ्गाइम्"। अत्र दत्तसङ्केतः कश्चिल्लतागृहं प्रविष्ट इति व्यङ्ग्यात् "सीदन्त्यङ्गानि" इति वाच्यस्य चमत्कारः सहृदयसंवेद्य इत्यसुन्दरम्। किञ्च यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः स गुणीभूतव्यङ्ग्य एव काव्यस्य दीपकादिमुखेनैव चमत्कारविधायित्वात् तदुक्तं ध्वनिकृता "अलङ्कारान्तरस्यापि प्रतीतौ यत्र भासते। तत्परत्वं न काव्यस्य नासौ मार्गो ध्वनेर्मतः"। यत्र च शब्दान्तरादिना गोपनकृतचारुत्वस्य विपर्य्यासः यथा "दृष्ट्या केशव! गोपरागहृतया किञ्चिन्न दृष्टं मया तेनात्र स्खलिताखि नाथ! पतितां किं नाम नालम्बसे। एकस्त्वं विषमेषु खिन्नमनसां सर्व्वाबलानां गतिर्गोप्यैवं गदितः सलेशमवताद्गोष्ठे हरिर्वश्चिरम्"। अत्र गोपरागादिशब्दानां गोपे राग इत्यादिव्यङ्ग्यार्थानां 'सलेशमिति' पदेन स्फुटतयावभासः। सलेशमितिपदस्य परित्यागे ध्वनिरेव। किञ्च यत्र वस्त्वलङ्काररसादिरूपव्यङ्ग्यानां रसाभ्यन्तरे गुणीभावः तत्र प्रधानकृत एव काव्यव्यवहारः तदुक्तं तेनैव "प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्। धत्ते रसादितात्पर्य्यपर्य्यालोचनया पुनरिति"। यत्र च "यत्रोन्मदानां प्रमदाजनानामभ्रंलिहः शोणमणीमयूखः। सन्ध्याभ्रमं प्राप्नुवतामकाण्डेऽप्यनङ्गनेपथ्यविधिं व्यधत्त" इत्यादौ रसादीनां नगरीवृत्तादिवस्तुमात्रेऽङ्गत्वं तत्र तेषामतात्पर्य्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः। तदुक्तमस्मत्सगोत्रकविपण्डितमुख्यश्रीचण्डिदासपादैः "काव्यार्थस्याखण्डबुद्धिवेद्यस्य तन्मयीभावेनास्वाददशायां गुणप्रधानभावावभासस्तावन्नानुभूयते कालान्तरे तु प्रकरणादिपर्य्यालोचनया भवन्नप्यसौ न काव्यव्यपदेशं व्याहन्तुमीशस्तस्यास्वादमात्रायत्तत्वादिति"। केचित् चित्राख्यं तृतीयं काव्यभेदमिच्छन्ति तदाहुः "शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्" इति तन्न यदि हि अव्यङ्ग्यत्वेन व्यङ्ग्याभावस्तदा तस्य काव्यत्वमपि नास्तीति प्रागेवोक्तम्। ईषद्व्यङ्ग्यत्वमिति चेत् किं नाम ईषद्व्यङ्ग्यत्वम् आस्वाद्यव्यङ्ग्यत्वम् अना-

स्वादग्रयङ्ग्रत्वं वा। आद्ये प्राचीनभेदयोरन्तःपातः। द्वितीये त्वकाव्यत्वम्। यदि चानास्वाद्यत्वं तदा क्षुद्रत्वमेव। क्षुद्रतायामनास्वाद्यत्वात्। तदुक्तं ध्वनिकृता "प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते:। उभे काव्ये ततोऽन्यद्यत्तच्चित्रमभिधीयते इति" इत्तिः।

तच्च काव्यं प्रकारान्तरेण द्विविधं महाकाव्यखण्डकाव्य भेदात्। तल्लक्षणादिकं सा० द० ६परि० उक्तं यथा "सर्गबन्धो महाकाव्यं तत्रैको नायकः सुरः। सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः। एकवंशभवा भूपाः कुलजा बहवोऽपि वा। शृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते। अङ्गानि सर्वेऽपि रसाः सर्वे नाटकसन्धयः। इतिहासोद्भवं वृत्तमन्यद्वा सज्जनाश्रयम्। चत्वारस्तस्य वर्गाः स्युस्तेष्वेकञ्च फलं भवेत्। आदौ नमस्क्रियाशीर्वा वस्तुनिर्देश एव वा। क्वचिन्निन्दा खलादीनां सताञ्च गुणकीर्त्तनम्। एकवृत्तमयैः पद्यैरवसानेऽन्यवृत्तकैः। नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह। नानावृत्तमयः क्वापि सर्गः कश्चन दृश्यते। सर्गान्ते भाविसर्गस्य कथायाः सूचनं भवेत्। सन्ध्यासूर्य्येन्दुरजनीप्रदोषध्वान्तवासराः। प्रातर्मध्याह्नमृगयाशैलर्त्तुवनसागराः। सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः। रणप्रयाणोपयममन्त्रपुत्रोदयादयः। वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह। कवेर्वृत्तस्य वा नाम्ना नायकस्येतरस्य वा। नामास्य सर्गोपादेयकथया सर्गनाम तु। अस्मिन्नार्षे पुनः सर्गा भवन्त्याख्यानसञ्ज्ञकाः। प्राकृतैर्निर्म्मिते तस्मिन् सर्गा आश्वाससञ्ज्ञकाः। छन्दसा स्कान्दकेनैतत् क्वचिद्गलितकैरपि। अपभ्रंशनिबद्धेऽस्मिन् सर्गाः कुडवकाभिधाः। तथापभ्रंशयोग्यानि छन्दांसि विविधान्यपि।

भाषाविभाषानियमात् काव्यं सर्गसमुज्झितम्। एकार्थप्रवणैः पद्यैः सन्धिसामग्र्यवर्ज्जितम्। खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च"।

तच्च काव्यं प्रकारान्तरेण द्विविधं "दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्। दृश्यं तत्राभिनेयं तत् रूपारोपात्तु रूपकम्" इति सा०द० उक्तेः

काव्यचन्द्रिका स्त्री काव्ये काव्यलक्षणादिप्रकाशने चन्द्रिकेव। अलङ्कारग्रन्थभेदे

काव्यप्रकाश पु० काव्यस्य स्वरूपादिप्रकाशो यत्र। काव्यस्वरूपादिज्ञापके मम्मटभट्टप्रणीते अलङ्कारग्रन्थभेदे।

काव्यप्रदीप पु० काव्यस्वरूपादिप्रकाशने प्रदीप इव। गोविन्दठक्कुरनिर्म्मिते भङ्ग्या काव्यप्रकाशार्थप्रकाशके अलङ्कारग्रन्थभेदे [प्रस्तरापके चन्द्रेशौ चौरभेदे त्रिका०

काव्यचौर पु० काव्यस्य चौर इव। परकीयकाव्यस्य स्वकीयत्वेन

काव्यरसिक त्रि० काव्यस्य रसं वेत्ति ठक्। काव्यप्रतिपाद्यरसाभिज्ञे

काव्यलिङ्ग न० अर्थालङ्कारभेदे अलङ्कारशब्दे ३९८पृ०विवृतिः

काव्यशास्त्र न० काव्यं शास्त्रमिव उपदेशकत्वात्। काव्यरूपे शास्त्रे "कान्तासम्मिततयोपदेशयुजे" इति काव्यप्रकाशे तस्य उपदेशयोगित्वोक्तेः हितशासकशास्त्रतुल्यत्वम्। "काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्"

काव्या स्त्री कव—वर्णने करणे बा० ण्यत्। बुद्धौ तया हि नानाविधवर्णनात् तथात्वम्। २पूतनायां च मेदि०।

काव्यार्थापत्ति स्त्री अर्थालङ्कारभेदे अलङ्कारशब्दे ३९८पृ० विवृतिः।

काश दीप्तौ भ्वा०आत्म०अक०सेट्। काशते अकाशिष्ट,काशाम्बभूव काशामास काशाञ्चक्रे चकाशे। णिच् अचकाशत्—त। ऋदित्वात् चङि नोपधाह्रस्वः। "काली कपालाभरणा चकाशे" "तया दुहित्रा सुतरां सवित्री स्फुरत्प्रभामण्डलया चकाशे" कुमा० "नंनम्यमानाः फलदित्सयेव चकाशिरे तत्र लता विलोलाः" भट्टिः। काशी काशकः काशितः काशमानः काशः काशनं काशितम् काशित्वा प्रकाश्य। यङ् लुक् चाकाशीति। वेदे ह्रस्वः चाकशीति

अनु+अनुरूपदीप्तौ अनुकाशते

अभि+ सर्व्वतः प्रकाशे अभिकाशते "अन्योअन्यमभिचाकशीति" शत०ब्रा० १४,७,१,१२, आभिमुख्येन दर्शने सक०। "घृतस्य धारा अभिचाकशीमि" ऋ०४,५८,५,९, "व्यज्यमानाभिचाकशीमि"९,"अभिचाकशीमि अभिपश्यामि" भा०

अव+अवकाशे स्ववासयोग्यताप्राप्तौ "उभयतो मांसैः संछन्नं नावकाशते" शत०८.७,४,२०, यदस्तुत्ये ऽधिश्रयति पत्नीं ह्यवकाशयिष्यन् भवति" "अथ यत्पुत्नीं नावकाशयेत्" शत०१,२,१,२०, अवकाशः "कृत्वावकाशे रचितसंप्रक्रमम्" भट्टिः अवेक्षणे सक०। "स्नातप्रियानूचानानवकाशयेत्" का० श्रौ० ९,७,१६, "अवकाशयेत् अवेक्षयेत्" वार्कः।

आ+समन्तात्स्थितौ आकाशः। अभिज्ञापने सक०। "संप्रत्युरः पुरुषमाकाश्य" शत०ब्रा० ७,४,१,४२, "आकाश्य अभिज्ञाप्य" भा०।

उद्+ऊर्द्ध्वगतौ ऊर्द्ध्वप्रकाशे च। उत्काशते उत्काशः।
नि+तुल्यत्वे नीकाशः घञि पूर्वस्वरदीर्घः। [४६अ०।
सम्+नि+निष्काशने। "न सन्निकाशयेद्धर्म्मम्" भा०आश्व०
निर्+निःसारणे। "माता निष्काशयेद्देषा पुनः सन्धान-
काङ्क्षया" सा०द०। अत्र निःकसोरूपत्वेन निष्कासयेदि-
त्येव पाठोयुक्तः
प्र०+ प्रकृष्टदीप्तौ "एषु सर्व्वेषु भूतेषु गूढोत्मा न प्रका-
शते" कठो०। "उभावपि प्रकाशेते प्रदृप्तौ वृषभाविव"
भा०वि० ७५५श्लो०।
प्रति+प्रतिरूपप्रकाशे सादृश्ये च प्रतीकाशः। "यमस्य त्वा
गृहेऽरसं प्रतिचाकशाम" अथ० ६,२८,२,
वि+ मुकुलीभावापनोदनेन प्रकाशे। पुष्पं विकाशते। प्रकाशे
च। "आदित्य इव तं देशं कृत्स्नं सर्व्वं व्यप्रकाशयत्"
भा० आ० ७४५६श्लो० वीकाशः।
सम्+ सम्यक्प्रकाशे सादृश्येन प्रकाशे च सङ्काशः "प्रतिस्रोत-
स्तृणाभाशां सहस्रं सङ्काशिरे" रामा०
काश-दीप्तौ दिवा०आ०अक०सेट्। काश्यते अकाशिष्ट काशाम्-
बभूव आस चक्रे चकाशे ऋदित् णिच् अचकाशत् त
काश पु०कैन जलेन कफात्मकेन अश्यते व्याप्यतेऽत्र अश-व्याप्तौ
आधारे घञ्। १कासरोगे, भरतः। कासशब्दे विवृतिः
"काशास्तुलाकाशिनः" शान्तिश०२स्तुते (काँशि) शब्दर०।
तयोः जलेनाकीर्णत्वात्तथात्वम्। काश दीप्तौ अच्।
(केशिया) ३तृणभेदे "केशः काशस्तवकविकाशः" सा०द०
"आकर्ण्णमुत्सुकितमन्नु यिकाशिकाशनीकाशभाप समतां
शितचामरस्य" माघः "कैलासकाशनीकाशमूर्त्त्या"
दशकु० "काशः स्यान्मधुरस्तिक्तः स्वादुपाकोहिमः सरः।
मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजरोगहृत्" भावप्र० तद्-
पुष्पाद्युक्तम् तत्पुष्पे न०। ईषदश्नाति अश-अच् कोः
का। ४मूषिकभेदे पुंस्त्री स्त्रियां ङीष्। "भूम्या आखू-
नालभेत" इत्युपक्रमे "काशान् दिग्भ्रः" यजु०२४,२५,
"काशान् मूषिकभेदान्" वेददी०। ५ऋषिभेदे पु० काशस्य
गोत्रापत्यम् अश्वा० फञ्। काशायन तद्गोत्रापत्ये पुंस्त्री
काशक पु० काश-ण्वुल्। १काशतृणे शब्दरत्ना०२सुहोत्रस्य
पुत्रभेदे "सुहोत्रस्य सुतत्रयम्। काशकश्च महासत्वस्तथा-
गृत्समतिर्नृपः" हरिवं०३२अ०। अस्यैव काशिरित्यपि नाम
तत्रैव "काशेस्तु काशयोराजन्!" इति तदनन्तरोक्तेः
काशेन निर्वृत्तादि काशा० चतुरर्थ्याम् इल। काशिल
काशनिर्वृत्तादौ त्रि० काशे भवः उत्करा० छ।
काशीय काशभवादौ त्रि०। ३प्रकाशान्विते त्रि०
काशकृत्स्न पु० आदिशाब्दिके ऋषिभेदे "इन्द्रश्चन्द्रः काश
कृत्स्नापिशलिशाकटायनाः पाणिन्यमरजैनेन्द्रा जय-
न्त्यष्टादिशाब्दिकाः" वोपदेवः। "अवस्थितेरिति काश-
कृत्स्नः" शा०सू०। काशकृत्स्नेन निर्वृत्तादि अरीहणा०
चतुरर्थ्यां वुञ्। काशकृत्स्नक तन्निर्वृत्तादौ त्रि०
काशज त्रि० काशे जायते जन०ड ७त०। काशजाते "दीर्घ
काशतुषभ्भादश्टं जे" पा०तस्य आद्युदात्तता
काशपरी स्त्री काशः परोयस्याः गौरा०ङीष्। काशाष्टतम-
द्याम् तत्र भवः नद्या० ढक्। काशपरेय तन्नदीभवे
त्रि० पृषो० पस्य फः। काशफरीत्यपि तत्रैव नद्यादि
गणे तस्य पाठात् भवार्थे ढक्। काशफरेय तद्भवे त्रि०
काशपौण्ड्र पु० काशप्रधानः पौण्ड्रः। देशभेदे "कोशलाः
काशपौण्ड्राश्च कालिङ्गा मागधास्तथा" भा० क० ४५अ०
काशमय त्रि० काशेन प्रचुरः तद्विकारोवा प्राचुर्य्ये तद्विकारे
वा मयट्। १काशप्रचुरे २तन्निर्मिते च "कुशकाशमयं बर्हि
रास्तीर्य्य भगवान्मनुः" भाग०३,२,२, श्लो०। स्त्रियां ङीप्।
काशमर्द्द पु० काशं मृद्नाति मृद-अण् उप०स०। (काल-
कासेन्दा) वृक्षे रायमुकुटः [२२अ०।
काशय पु० काशिनृपपुत्रे "काशेस्तु काशयोराजन्" हरिवं०
काशादि पु० पाणिन्युक्ते चतुरर्थ्यामिलप्रत्ययनिमित्ते
शब्दगणे स च गणः "काश पाश, अश्वत्थ पलाश, पीयू-
क्षा चरण वास नड़, वन, कर्द्दम, कच्छूल, कङ्कट-
गुहा, विस, तृण, कर्पूर, वर्व्वर, मधुर, ग्रह, कपित्थ,
जतु, सीपाल" [म्मलिवृक्षे जटाधरः
काशाम्मलि स्त्री कुत्सिता शाल्मलिः कोः का। कूटशा-
काशि स्त्री काश-इन्। १काशराम् या ङीप् काशीत्यपि
तत्र काशीशब्दे विवृतिः "आःकाशिवासिजनता
ननु वञ्चिताऽभूत्" काशीख०। २काशीनगरोपलक्षिते
देशभेदे पु० भूम्नि। "अतः काशयोऽग्नीनादत्त" "यत्त्वं
काशीनां भरतः सात्वतामिव" शत०ब्रा० ३,५,४,१८,
२१। "काशिष्वपि नृपो राजन् दिवोदासपितामहः"
हर्य्यश्व इति विख्यातः" भा० आनु० ३०अ० "सौधा
मद्रभुजिङ्गाश्च काशयोऽपरकाशयः" भा०स० ९अ०। ३सूर्य्ये
पु० उज्ज्वल०। ४मुष्टौ निरु०६। "१आपइव काशिना संग्र-
भीताः" ऋ० ७,१०४,८, "काशिना मुष्टिना" भा०। भावे इन्
५प्रकाशे च "अपारे यत् संगृभ्णा मघवन्! काशिरित्ते" ऋ०
३,३०,५ "काशिरित् लोके प्रसिद्ध एव यद्वा काशिर्मुष्टिः" भा०

६प्रकाशान्विते त्रि०” काशेरिदम् तस्यां भवं वा काश्या० ठञ् ञिठ् वा। काशिक काशिसम्बन्धिनि तत्रभवे च त्रि० ञितऽ इत् उच्चारणार्थः स्त्रियां ठञि ङीप् ञिठि टाप्। साच वा मनकृतायां पाणिनिवृत्तौ स्वार्थे क। काशिका काशीपुर्य्यां स्त्री।

काशिन् त्रि० काशते काश+णिनि। १प्रकाशशीले। जयकाशी स्त्रियां ङीप् मत्तकाशिनी काश+इनि।२काशरोगयुक्ते त्रि०

काशिप पु० काशीन् देशान् तत्स्थपुरीं वा पाति पा—क १ काशिदेशाधिपे दिवोदासादौ काशीनाथे २ महादेवे च काशिनाथादयोऽप्यत्र। “सुवर्णवर्म्माणमुपेत्य काशिपं वपुष्टमार्थं वरयांप्रचक्रिरे”

काशिपुरी स्त्री काशीदेशे पुरी कर्म्म० वा। काश्याम् स्वनामख्यातपुरीभेदे। “समेतं पार्थिवं क्षत्रं काशिपुर्य्यां स्वयंवरे”भा०आनु० १६८अ०। काशिनगर्य्यादयोऽप्यत्र स्त्री

काशिराज पु० काशीनां जनपदानां राजा टच्समा०। काशिदेशाधिपे। तद्देशाधिपास्तु कालभेदेन यद्यपि बहवस्तथापि काशिनामकन्नृपेण तदन्वयेन तत्र काशीपुरीकरणात् तदन्वयजस्यैव तदधिपत्यं प्रथितं तदेतत् हरिवं २९अ० वर्णितं यथा

“काशेस्तु काशयोराजन् पुत्रो दीर्घतपास्तथा। बभूव दीर्घतपसो विद्वान् धन्वन्तरिः सुतः। धन्वन्तरेस्तु तनयः केतुमानिति विश्रुतः। अथ केतुमतः पुत्रो विद्वान् भीमरथः स्मृतः। दिवोदास इति ख्यातः सर्वरक्षः प्रणाशनः। एतस्मिन्नेव काले तु पुरीं वाराणसीं नृपः। शून्यां निवेशयामास क्षेमको नाम राक्षसः। शप्ता हि सा मतिमता निकुम्भेन महात्मना। शून्या वर्षसहस्रं वै भवत्विति नराधिप!। तस्यान्तु शप्तमात्रायां दिवोदासः प्रजेश्वरः। विषयान्ते पुरीं रम्यां गोमत्यां संन्यवेशयत्। भद्रश्रेण्यस्य पुत्राणां शतमुत्तमधन्विनाम्। हत्वा निवेशयामास दिवोदासः प्रजेश्वरः। दिवोदासस्य पुत्रस्तु वीरो राजा प्रतर्द्दनः। प्रतर्द्दनस्य पुत्रौ द्वौ वत्सो भार्गव एव च। अलर्को राजपुत्रस्तु राजा सन्नतिमान् भुवि। हैहयस्य तु दायाद्यं हृतवान् वै महीपतिः। आजह्रे पितृदायाद्यं दिवोदासहृतं बलात्। भद्रश्रेण्यस्य पुत्रेण दुर्द्दमेन महात्मना। दिवोदासेन बालेति घृणया स विसर्ज्जितः। अष्टारथो नाम नृपः सुतो भीमरथस्य वै। तेन पुत्रेषु बालेषु प्रहृतं तस्य भारत। वैरस्यान्तं महाराज! क्षत्रियेण विधित्सता। अलर्कः काशिराजस्तु ब्रह्मण्यः सत्यसङ्गरः। षष्टिं वर्षसहस्राणि षष्टिं वर्षशतानि च। तस्यासीत् सुमहद्राज्यं रूपयौवनशालिनः। युवा रूपेण सम्पन्न आसीत् काशिकुलोद्वहः। लोपामुद्राप्रसादेन परमायुरवाप सः। वयसोऽन्ते महाबाहुर्हत्वा क्षेमकराक्षसम्। रम्यां निवेशयामास पुरीं वाराणसीं नृपः”।

तत्रापि दिवोदासस्यैव तथात्वम् सर्वत्र प्रथितं सहि देवान् पृथिव्या निष्कास्य वाराणस्यां राज्यं चकारेति काशीख०४२अ० वर्णितं यथा “गतेषु देवसंघेषु पृथिव्याः पृथिवीपतिः। चकार राज्यं निर्द्वन्द्वं दिवोदासः प्रतापवान्। विधाय राजधानीं स वाराणस्यां सुनिश्चलाम्”। इत्युपक्रम्य तद्राज्यं वर्णितम् “दिवोदासस्य तस्यैवं काश्यां राज्यं प्रशासतः। यातमेकदिनप्रायं शरदामयुताष्टकमिति” तत्र तस्य बहुकालराज्यकरणात् तथात्वम् “काशिराजं दिवोदासम्” रघु०। “द्वापरे तु दीर्घजिह्वासुरांश नृपभेद स्तन्नाम्ना प्रसिद्धः “दीर्घजिह्वस्तु कौरव्य! य उक्तो दानवर्षभः। काशिराजः स विख्यातः पृथिव्यां पृथिवीपतिः” भा०आ०६७अ०। तस्यासुरांशभवत्वात् विष्णुं प्रति द्वेषो यथा हरिवं०८१अ०। “कौशल्यः काशिराजश्च दशार्णाधिपतिस्तथा” इत्युपक्रम्य “तमन्वयुर्जरासन्धं विद्विषन्तो जनार्द्दनम्” इत्युक्तम्। स च अम्बिकादीनां पिता। “विचित्रवीर्य्योऽथोवाह काशिराजसुते क्रमात्। स्वयंवरादुपानीते ह्यम्बिकाम्बालिके उभे” भाग० ८,२२,१८। स च नाम्ना काशिराजत्वेऽपि काशिपतिरासीत्। “अथ काशिपतेर्भीष्मः कन्यास्तिस्रोऽप्सरोपमाः। शुश्राव सहिता राजन् वृण्वाना वै स्वयंवरम्” भा० आ० १०२अ०। “एवमुक्त्वा महीपालान् काशिराजश्च वीर्य्यवान्” तत्रैवोक्तेः “धृष्टकेतुश्चेकितानः काशिराजश्च वीर्य्यवान्” गीता। काशिपत्यादयोऽप्यत्र।

काशिष्णु त्रि० काश—वा० इष्णुच्। प्रकाशशीले। “काशिष्णुना कनकवर्णविभूषणेन” भाग० ४,२०,६,

काशी स्त्री काशते काश—इन् स्त्रियां ङीप्। काश—णिच्—अच् गौरा० ङीष्। असिवरणयोर्मध्यवर्त्तिन्यां स्वनामख्यातायां शिवपुर्य्याम्। तन्निरुक्त्यादि काशीख०। “निर्व्वाणकाशनादत्र काशीति प्रथिता पुरी। अविमुक्ते महाक्षेत्रे न मुक्तं शम्भुना क्वचित्। प्रागेव हि मुनेऽनर्घ्यं जातं जाम्बुनदं स्वयम्। पुनः स्वर्धुनितोयेन हीरेण यदि सङ्गतम्। चक्रपुष्करिणीतीर्थं प्रागेव श्रेयसांपदम्। ततः श्रेष्ठतरं शम्भोर्मणिश्रवणभूषणात्। आनन्दकानने तस्मिन्नविमुक्ते शिवा-

स्रवे । प्रागेव मुक्तिः संसिद्धा गङ्गा-सङ्गात्ततोऽधिका । यदाप्रभृति सा गङ्गा मणिकर्णीं समागता । तदा-प्रभृति तत् क्षेत्रं दुष्प्रापं त्रिदशैरपि । कृत्वा कर्माण्य-नेकानि कल्याणानीतराणि च । तानि क्षयात् समुत्-क्षिप्य काशीसंस्थोऽमृतो भवेत् । नस्य वेदान्तवेद्यस्य निदिध्यासनतो विना । विना साङ्ख्येन योगेन काश्यां संस्थोऽमृतो भवेत् । कर्म्मनिर्मूलनकृता विना ज्ञानेन कुम्भज ! । शशिमौलिप्रसादेन काश्यां संस्थोऽमृतोभवेत् । यत्नतोऽयत्नतो वापि कालात् त्यक्त्वा कलेवरम् । तारक-स्योपदेशेन काशीसंस्थोऽमृतो भवेत् । अनेकजन्मसं-सिद्धैर्बद्धोऽपि प्राकृतैर्गुणैः । असिसंभेदयोगेन काशी-संस्थोऽमृतो भवेत् । देहत्यागोऽत्र वै दानं देहत्यागोऽ-त्र वै तपः । देहत्यागोऽत्र वै योगः काश्यां निर्व्वाणसौ-ख्यकृत् । प्राप्योत्तरवहां काश्यामपि दुष्कृतवानपि । यायात् स्वं हेलया त्यक्त्वा तद्विष्णोः परमं पदम् । महेन्द्राग्निमुखा देवा दृष्ट्वा मुक्तिपथोन्मुखान् । सर्व्वान् सर्व्वशमालोक्य रक्षाङ्कुः पुरा पुरः । असिन्महासि-रूपाञ्च पापिसङ्कुलखण्डिनीम् । दुष्प्रवेशं धुन्वानां धुनीं देवा विनिर्म्ममुः । वरणाञ्च व्यधुस्तत्र क्षेत्रविघ्न निवारिणीम् । दुष्टं तस्य प्रवृत्तेश्च निवृत्तिकरणीं सुराः । दक्षिणोत्तरदिग्भागे कृत्वासिं वरणां सुराः । क्षेत्रस्य मोक्षनिःक्षेपरक्षां निर्वृतिमाययुः । क्षेत्रस्य पश्चाद्दिग्भा-गे तं देहलिविनायकम् । स्वयं व्यापारयामास रक्षार्थं शशिशेखरः । अनुज्ञातप्रवेशानां विश्वेशेन कृपाव-ताम् । ते प्रवेशं प्रयच्छन्ति नान्येषां हि कदाचन" । अत्रार्थे प्राचीनेतिहासमुक्त्वा माहात्म्यादिकमुक्तं यथा— "एवं काश्यां प्रविश्यापि पापी धर्म्मानुयन्त्रितः । न क्षेत्रफलमाप्नोति बहिर्भवति तत्क्षणात् । तस्माद्विश्वेश्व-रात्तैव काशीवासेऽत्र कारणम् । असिश्च वरणा यत्र क्षेत्ररक्षाकृतौ कृते । वाराणसीति विख्याता तदारभ्य महामुने ! । असेश्च वरणायाश्च सङ्गमं प्राप्य काशिका । वाराणसीह करुणामयदिव्यमूर्त्तिरुत्सृज्य यत्र तु तनुं तनुभृत् सुखेन । विश्वेशहृद्म्महसि यत् सहसा प्रवि-श्य रूपेण तां वितनुतापदशीन्द्रधाम्नि । जातो मृतो बहुषु तीर्थवरेषु रे त्वं जन्तो! न जातु तव शान्तिरभूदि-मज्ज्य । वाराणसीति गदतीह मृतोऽमृतत्वं प्राप्याधुना मम बलात् स्मरशासनः स्याः । अन्यत्र तीर्थसलिले पतितो द्विजन्मा देशादिभावमयते न तथा तु काश्याम् । क्षिप्तं यदत्र पतितःपुनरुत्थितं न प्राप्नोति पुल्कसजनोऽपि किमग्रजन्मा । सैषा पुरी संसृतिकूपपारावारस्य पारं पुरुषः पुरारिः । यस्यां परं पौरुषमर्थमिच्छन् सिद्धिं नयेत् पौरपरम्परासः । तीर्थान्तराणि मनुजः परि-तोऽपगाह्य हित्वा तनुं कलुषितां, दिवि दैवतं स्यात् । वाराणसीपरिसरे तु विसृज्य देहं सन्देहभाग्भवति देहल-वाप्तयेऽपि । वाराणसी शमवशीकरणादृतेऽपि योगादयो-गिजनताज्ञनतापहन्त्री । तत्तारकं श्रवणगोचरतां नयन्ती तद्ब्रह्म दर्शयति येन पुनर्भवो न । वाराणसी-परिसरे तनुमिष्टदात्रीं धर्म्मार्थसौख्यमिलयामह हा विसृजन् । दृष्टं पदं किमपि हृष्टतरोऽभिलाष्य-लाभोऽस्तु मूलमपि नो यदवाप मूल्यम् । अाः काशि-राशिजनता ननु वञ्चिताभूद्भालेविलोचनवता वनि-तार्द्धभाजा । आदाय यत् सुकृतभाजनमिष्टदेहं निर्वा-णमात्ममपवर्जयताऽपुनर्भु । वाराणसी स्फुरदसीमगु-णैकभूमिर्यत्र स्थितास्तनुभृतः शशिभृत्प्रभावात् । सर्वे गलेगरलिणोऽक्षियुजो ललाटे, वामार्द्ध,यामतन-वोऽतनवस्ततोऽन्ते । आनन्दकाननमिदं सुखदं पुरैव तत्रापि चक्रसरसी मणिकर्णिकाऽथ । स्वःसिन्धुसङ्ग-तिरथोपरमास्पदञ्च विश्वेशितुः किमिह तन्न विमुक्तये यत् । वाराणसीह वरणासिसरिद्वरिष्ठासंभेदखेददमनी द्यु नदीलसत्कोः । विश्रामभूमिरचलामलमोक्षलक्ष्म्या हैनां विहाय किमु सीदति मूढजन्तुः । किं विस्मृतं त्वहह गर्भजमामनस्यं कार्त्तान्तदूतकृतबन्धनताड़नं वा । शम्भोरनुग्रहपरिग्रहलभ्यकाशीं मूढो विहाय किमु याति करस्थमुक्तिम् । तीर्थान्तराणि कलुषाणि वहन्ति सद्यः श्रेयोऽप्रवन्त्यपि बहु त्रिदिवं नयन्ति । पानावगाहन-विधानतनुप्रहाणैर्वाराणसी तु कुरुते यत मूलनाशम् । काशीपुरीपरिसरे मणिकर्णिकायां त्यक्त्वा तनुं तनुभृत स्तनुभाग्नुवन्ति । भालेविलोचनवतीं गलनीललक्ष्मीं वामार्द्धबन्धुरवधूं विबुधैकराध्याम् । स्नात्वा प्रभावम-तुलं मणिकर्णिकाया यत् पुद्गलन्त्यजति चाशुचि पूय-गन्धि । स्वात्मावबोधमहसा सहसा मिलित्वा कल्पान्त-रेष्वपि स नैव पृथक्त्वमेति । रागादिदोषपरिभूतम-नोहृषीकाः काशीपुरीमतुलदिव्यमहाप्रभावाम् । ये कल्पयन्ति परतीर्थसमां समन्तात्ते पापिनो न सह तैः परिभाषणीयम् । वाराणसीं स्मरहरप्रियराजधानीं त्यक्त्वा कुतो व्रजसि मूढ ! दिगन्तरेषु । माघ्याम्यजाद्यस-

त्यभां स्थिरमोक्षलक्ष्मीं लक्ष्मीं स्वभावचपलां किमु कामयेथाः?। विद्राधनानि सदनानि गजाश्वभूत्या स्रक्चन्दनानि वनिताश्च नितान्तरम्याः। स्वर्गोऽप्यगम्यदिह नोद्यमभाजि पुंसि वाराणसी त्वसुलभाऽसुलभा विमुक्तिः। धात्रा धृतानि तुलया तुलनामवैतुं वैकुण्ठसुखप्रभुवनानि च काशिका च। तान्यूर्द्ध्वयुर्लघुतया न्यगियं गुरुत्वात् तस्थौ पुरीह पुरुषार्थचतुष्टयस्य। काशीपुरीमधिवसन् हि नरोऽनरोऽपि ह्यारोप्यमाण इह मानदहैककद्रः। नानोपसर्गजनिसर्गजदुःखभारे कर्म्मापनुत्य स विशेत् परमेशधाम्नि। स्थिरापायं कायं जननमरणक्लेशनिलयं विहायास्मां काश्यामिह परिग्टह्णीत न कुतः। वपुस्तेजोरूपं स्थिरतरपदानन्दसदनं विमूढोऽसौ जन्तुः स्फुटितमिव काश्यां विनिमयन्। अहो लोकः शोकं किमिह सहते हन्त हतधीर्विपद्भारैः सारैर्नियतनिधनैर्ध्वंसितधनैः। क्षितौ सत्यां काश्यां कथयति शिवो यत्र निधने श्रुतौ किञ्चिद्भूयः प्रविशति न येनोदरदरीम्। काशिवासिनि जने वनेचरे हितभुज्यपि समीरभोजने। स्वैरचारिणि जितेन्द्रियेऽप्यहो काशिवासिपुरुषे विशिष्टता नास्तीह दुष्कृतकृतां सुकृतात्मनां वा काचिद्विशेषगतिरन्तकृता। हि काश्याम्। वीजानि कर्म्मजनितानि यदूषराणां नाङ्कूरयन्ति हरदृग्ज्वलितानि तेषाम्। शशका मशका वकाः शुकाः कलविङ्काश्च वृकाः सजम्बुकाः। तुरगोरगवानरा नरा गिरिजे! काशिमृताः गतास्मृताः। अरुद्ररुद्राक्षफणीन्द्रभूषणा त्रिपुण्ड्रचन्द्रार्द्धधराधराङ्कृताः। निरन्तरं काशिनिवासिनो जना गिरीन्द्रजे! पारिषदा मता मम। यावन्त एव निवसन्ति च जन्तवोऽत्र काश्यां जलस्थलचराण्डजजम्बुकाद्याः। तावन्त एव मदनुग्रहरुद्रदेहादेहावसानमधिगम्य मयि प्रविष्टाः। ये तु वर्षेषवो रुद्रा दिवि! देवि! प्रकीर्त्तिताः। वातेषवोऽन्तरीक्षे ये ये भुव्यन्नेषवः प्रिये!। रुद्रा दश दश प्राच्यप्राचीप्रत्यगुदक्स्थिताः। ऊर्द्ध्वदिक्स्थाश्च ये रुद्राः पठ्यन्ते वेदवादिभिः। असंख्याताः सहस्राणि ये रुद्रा अधिभूतले। तत्सर्वेभ्योऽधिकाः काश्यां जन्तवो रुद्ररूपिणः। रुद्रावासस्ततः प्रोक्ताऽविमुक्तं घटोद्भव!। तस्मादभ्यर्च्य काशीस्थान् वर्णान् वर्णेतराश्रमान्। अद्वयेश्वरबुद्ध्या च रुद्रार्चाफलभाक् नरः। श्मशब्देन शवः प्रोक्तः शानं शयनमुच्यते। निर्वचन्ति श्मशानार्थं मुने! शब्दार्थकोविदाः। महान्त्यपि च भूतानि प्रलये समुपस्थिते। शेरतेऽत्र शवा भूत्वा श्मशानन्तु ततो महत्। अप्सु भूरिह लये लयं व्रजेदापश्चौर्वंवदनोपकन्दरे। मातरिश्वनि महातनूनपाद्व्योम्नि संचर्यति वै सदागतिः। व्योम चापि लयमेत्यहङ्कृतौ साऽपि षोडशविकारसंयुता। लीयते महति बुद्धिसंज्ञके ह्या महान् प्रकृतिमध्यगो भवेत्। सा गुणत्रयमयी च निर्गुणं तं पुमांसमवगुह्य तिष्ठति। पञ्चविंशतितमः परः पुमान् देहगेहपतिरेष जीवकः। प्राकृतः प्रलय एष उच्यते हंसयानहरिरुद्रवर्जितः। कालमूर्त्तिरथ तञ्च पुरुषं हेलया कलयतीश्वरः परः। स वै महाविष्णुरितीर्यते बुधैस्तं वै महादेवमुदाहरन्ति। सोऽन्तादिमध्यैः परिवर्जितः शिवः स श्रीपतिः सोऽपि हि पार्वतीपतिः। दैनन्दिनेऽथ प्रलये त्रिशूलकोटौ समुत्क्षिप्य पुरीं हरः स्वाम्। विभर्त्ति संवर्त्तमहास्थिभूषणस्ततो हि काशी कलिकालवर्जिता। स्कन्द उवाच। वाराणसीति काशीति रुद्रावास इति द्विज!। महाश्मशानमित्येवं प्रोक्तमानन्दकाननम्। इति देवीपुरः प्रोक्तं देवदेवेन शम्भुना। यथा विष्णौ पुराख्यातं तथैव च मया श्रुतम्"।

सा च सप्तमोक्षपुर्य्यन्तर्गता। "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका। पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः। काशी॰। "अन्यानि यानि तीर्थानि काशीप्राप्तिकराणि च। काशीं प्राप्यैव मोक्षन्ते नान्यथा कल्पकोटिभिः" भा॰टी॰नीलकण्ठधृतम् "तत्र हि जन्तोः प्राणेषूत्क्रमं माणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृतीभूय मोक्षीभवति" श्रुतिः। तेन काशीमृतानां जन्तूनां शिवस्तुकाशात्तत्त्वज्ञानलाभेन तत्क्षणात् मुक्तिः तत्त्वज्ञानस्य प्रारब्धेतरसर्व्वकर्म्मनाशकत्वात् तेनैव सर्वकर्म्मनाशः। सञ्चितकर्म्मणां कायव्यूहेन भोगात् परिक्षपणमित्यन्ये। इतरतीर्थमृतानां तु ब्रह्मादिलोकप्राप्तौ तत्र श्रवणमननाद्यपेक्षेति भेदः।

"सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत्"। काशी॰ "कदा काश्यां गमिष्यामि कदा द्रक्ष्यामि शङ्करम्। इति ब्रुवाणः सततं काशीवासफलं लभेत्। २ काशीस्थदेवीमूर्त्तिभेदे च "विश्वेशं माधवं दुण्ढिं दण्डपाणिञ्च भैरवम्। वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्। स्वल्पार्थे ङीप्। २ स्वल्पकाशतृणे भरतः

काशीखण्ड न॰ काशीमाहात्म्यप्रतिपादकं खण्डम्। स्कन्दपुराणान्तर्गते काशीमाहात्म्यादिप्रतिपादके व्यासप्रणीते खण्डभेदे तत्प्रतिपाद्यविषयाश्च तत्रानुक्रमणिकाध्याये दर्शिता यथा
"विन्ध्यनारदसंवादः प्रथमं परिकीर्त्तितः। सत्यलोकप्रभावश्च द्वितीयः समुदाहृतः। अगस्त्याश्रमपदे देवानामागमस्ततः। पतिव्रताचरितं च प्रस्थानं कुम्भसम्भुवः। तीर्थप्रशंसा च ततः सप्तपूर्य्यस्ततः स्तुताः। संयमिन्याः स्वरूपञ्च ब्रह्मलोकस्ततः परम्। इन्द्राग्न्योर्लोकसंप्राप्तिस्ततश्च शिवशर्म्मणः। अग्नेः समुद्भवस्तस्मात् क्रव्यादवरुणसम्भवः। गन्धवत्यलकापुर्य्यौरीशयोस्तु समुद्भवः। चन्द्रलोकपरिप्राप्तिः शिवशर्म्मद्विजन्मनः। उडुलोककथा तस्मात्ततः शुक्रसमुद्भवः। महेशगुरुशौरीणां लोकानां वर्णनं ततः। सप्तर्षीणां ततोलोका ध्रुवस्य च ततस्तपः। ततोध्रुवपदप्राप्ति र्ध्रुवलोकस्थितिस्ततः। दर्शनं सत्यलोकस्य तस्य वै शिवशर्म्मणः। चतुर्भुजाभिषेकश्च निर्व्वाणं शिवशर्म्मणः। स्कन्धागस्त्योश्च संवादो मणिकर्ण्याः समुद्भवः। ततस्तु गङ्गामाहात्म्यं ततोदशहरास्तवः। प्रभावश्चापि गङ्गाया गङ्गानामसहस्रकम्। वाराणस्याः प्रशंसा च भैरवाविर्भवस्ततः। दण्डपाणेः समुद्भूतिर्ज्ञानवाप्युद्भवस्ततः। आख्यानञ्च कलावत्याः सदाचारस्ततः परम्। ब्रह्मचारिप्रकरणं ततः स्त्रीलक्षणानि च। कृत्याकृत्यप्रकरणमविमुक्तेशवर्णनम्। ततोऽन्तर्गृहस्थधर्माश्च ततोयोगनिरूपणम्। कालज्ञानं ततः प्रोक्तं दिवोदासस्य वर्णनम्। काशप्राश्च वर्णनं तस्माद्योगिनीवर्णनं ततः। लोलार्कस्य समाख्यानमुत्तरार्ककथा ततः। शाम्बादित्यस्य महिमा द्रुपदादित्यशंसनम्। ततस्तु गरुडाख्यानमरुणार्कोदयःस्ततः। दशाश्वमेधिकं तीर्थं मन्दराच्च गणागमः। पिशाचमोचनाख्यानं गणेशप्रेषणं ततः। माया गणपतेश्चाथ दुण्टिप्रादुर्भवस्ततः। विष्णुमायाप्रपञ्चोऽथ दिवोदासविसर्ज्जनम्। ततः पञ्चनदोत्पत्तिर्विन्दुमाधवसम्भवः। ततोवैष्णवतीर्थानां माहात्म्यपरिवर्णनम्। प्रयाणं मन्दरात्काश्यां वृषभध्वजशूलिनः। जैगीषव्येण संवादो ज्येष्ठस्थाने महेशितुः। ततः क्षेत्ररहस्यस्य कथनं पापनाशनम्। अथातः कन्दुकेशस्य व्याघ्रेशस्य समुद्भवः। ततः शैलेश्वरकथा रत्नेशस्य च दर्शनम्। कृत्तिवासःसमुत्पत्तिस्ततश्चायतनागमः। देवतानामधिष्ठानं दुर्गासुरपराक्रमः। दुर्गाया विजयश्चाथ तत ओङ्कारवर्णनम्। पुनरोङ्कारमाहात्म्यं त्रिलोचनसमुद्भवः। त्रिलोचनप्रभावोऽथ केदाराख्यानमेव च। ततो धर्म्मेशमहिमा ततः पक्षिकथा शुभाः। ततो विश्वभुजाख्यानं दुर्द्दमस्य कथा ततः। ततोवीरेश्वराख्यानं वीरेशमहिमा पुनः। गङ्गा तीर्थैश्च संयुक्ता कामेशमहिमा ततः। विश्वकर्म्मेशमहिमा दक्षयज्ञसमुद्भवः। सत्या देहविसर्गश्च ततोदक्षेश्वरोद्भवः। ततो वै पार्व्वतीशस्य महिम्नः परिकीर्त्तनम्। गङ्गेशस्याथ महिमा नर्मदेशसमुद्भवः। सतीश्वरसमुत्पत्तिरमृतेशादिवर्णनम्। व्यासस्य हि भुजस्तम्भो व्यासशापविमोक्षणम्। क्षेत्रतीर्थकदम्बं च मुक्तिमण्डपसङ्कथा। विश्वेशाविर्भवश्चाथ ततोयात्रापरिक्रमः। एतदाख्यानशतकं क्रमेण परिकीर्त्तितम्"।

काशीनाथ पु॰ ६ त॰। महादेवे काशीपत्यादयोऽप्यत्र" कालं निकटतो ज्ञात्वा काशीनाथं समाश्रयेत्"। काशीनाथं समाश्रित्य कुतःकालभयं नृणाम्" काशीख॰।

काशीयात्रा स्त्री॰ ७त॰। काशीस्थतीर्थेषु यात्रायाम् तत्प्रकारः काशीख॰ दर्शितो यथा।
"श्रीवेदव्यास उवाच। निशामय महाप्राज्ञ! लोमहर्षण! वच्मि ते। यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदा। सचेलमादौ संस्नाय चक्रपुष्करिणीजले। संतर्प्य देवान् सपितॄन् ब्राह्मणांश्च तथार्थिनः। आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम्। नमस्कृत्य ततोगच्छेद् द्रष्टुं ढुण्ढिविनायकम्। ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत्। तारकेशं ततोऽभ्यर्च्च्य महाकालेश्वरं ततः। ततः पुनर्दण्डपाणिरित्येषा पञ्चतीर्थिका। दैनन्दिनी विधातव्या महाफलमभीप्सुभिः। ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धिदा। द्विसप्तायतनानाञ्च१४काश्यां यात्रा प्रयत्नतः। कृष्णां प्रतिपदं प्राप्य भूतावधि यथाविधि। अथ या प्रतिभूतञ्च क्षेत्रसिद्धिमभीप्सुभिः। तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः। मौनेन यात्रां कुर्वाणः फलं प्राप्नोति यात्रिकः। ओङ्कारं प्रथमं पश्येन्मत्स्योदर्य्यां कृतोदकः। त्रिविष्टपं महादेवं ततोवै कृत्तिवाससम्। रत्नेशं चाथ चन्द्रेशं केदारं च ततोव्रजेत्। धर्म्मेश्वरं च वीरेशं गच्छेत् कामेश्वरं ततः। विश्वकर्म्मेश्वरं चाथ मणिकर्णीश्वरं ततः। अविमुक्तेश्वरं दृष्ट्वा ततोविश्वेशमर्च्चयेत्। एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिना। यस्तु क्षेत्रमुषित्वा तु नैतां यात्रां समाचरेत्। विघ्नास्तस्योपतिष्ठन्ते क्षेत्रोच्चाटनसूचकाः। अष्टायतनया-

त्राऽन्या कर्त्तव्या विघ्नशान्तये । दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः । गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः । अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः । इत्यष्टान्येतानि लिङ्गानि महापापोपशान्तये । अपरापि शुभा यात्रा योगक्षेमकरी सदा । सर्व्वविघ्नोपहन्त्री च कर्त्तव्या क्षेत्रवासिभिः । शैलेशं प्रथमं वीक्ष्य वरणास्नानपूर्व्वकम् । स्नानं तु सङ्गमे कृत्वा द्रष्टव्यः सङ्गमेश्वरः । स्वर्लीन तीर्थे सुस्नातः पश्येत् स्वर्लीनमीश्वरम् । स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः । पश्येद्धिरण्यगर्भेशं तत्र तीर्थे कृतोदकः । मणिकर्ण्यां ततः स्नात्वा पश्येदीशानमीश्वरम् । उपशान्तशिवं पश्येत् तत्कूपविहितोदकः । पञ्चचूड़ाह्रदे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् । चतुःसमुद्रकूपे तु स्नात्वा देवं समर्च्चयेत् । देवस्याग्रे तु या वापी तत्रोपस्पर्शने कृते । शुक्रेश्वरं ततः पश्येत् तत्कूपविहितोदकः । दण्डखाते ततः स्नात्वा व्याघ्रेशम्पूजयेत्ततः । शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् । जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः । क्वचिन्न जायते भूयः संसारे दुःखसागरे । समारभ्य प्रतिपदं यावत् कृष्णचतुर्द्दशीम् । एतत् क्रमेण कर्त्तव्यान्येतदायतनानि वै । इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते । अन्या यात्रा प्रकर्त्तव्यैकादशायतनोद्भवा । अग्नीध्रकुण्डे सुस्नातः पश्येदग्नीध्रमीश्वरम् । उर्व्वशीशं ततो गच्छेत्ततस्तु नकुलीश्वरम् । आषाढीशं ततो दृष्ट्वा भारभूतेश्वरं ततः । लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् । ततो मनःप्रकाशेशं प्रीतिकेशमथो व्रजेत् । मदालसेश्वरं तस्मात्तिलपर्णेश्वरं ततः । तत्रैकादशलिङ्गानामेषा कार्य्या प्रयत्नतः । इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः । अतःपरं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् । शुक्लपक्षे तृतीयायां सा यात्रा विश्वर्द्धिदा । गोप्रेक्षतीर्थे सुस्नाय मुखनिर्म्मालिकां व्रजेत् । ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् । सौभाग्यगौरी संपूज्या ज्ञानवाप्यां कृतोदकैः । ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः । स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् । सुस्नातो ललितातीर्थे ललितामर्च्चयेत्ततः । स्नात्वा भवानीतीर्थेऽथ भवानीं परिपूजयेत् । मङ्गला च ततोऽभ्यर्च्या विन्दुतीर्थकृतोदकैः । ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये । इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन् मुक्तिजन्मनि । न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् । कुर्य्यात् प्रतिचतुर्थीह यात्रां विघ्नेशितुः सदा । ब्राह्मणेभ्यस्तदुद्देशाद्देया वै मोदका मुदे । भौमे भैरवयात्रा च कार्य्या पातकहारिणी । रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि । तत्रैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये । नवम्यामथ वाष्टम्यां चण्डीयात्रा शुभावहा । अन्तर्गृहस्य वै यात्रा कर्त्तव्या प्रतिवत्सरम् । प्रातः स्नानं विधायादौ नत्वा पञ्च विनायकान् । नमस्कृत्याथ विश्वेशं स्थित्वा निर्व्वाणमण्डपे । अन्तर्गृहस्य यात्रां वै करिष्येऽघौघशान्तये । गृहीत्वा नियमं चेति गत्वाथ मणिकर्णिकाम् । स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् । कम्बलाश्वतरौ नत्वा वासुकीशम्प्रणम्य च । पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ । ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः । ततो वै सोमनाथञ्च वाराहञ्च ततो व्रजेत् । ब्रह्मेश्वरं ततो नत्वा नत्वागस्तीश्वरं ततः । कश्यपेशं नमस्कृत्य हरिकेशवनं ततः । वैद्यनाथं ततो दृष्ट्वा ध्रुवेशमथ वीक्ष्य च । गोकर्णेश्वरमभ्यर्च्य हाटकेशमथो व्रजेत् । अस्थिक्षेपतड़ागेऽथ दृष्ट्वा वै कीकसेश्वरम् । भारभूतं ततो गत्वा चित्रगुप्तेश्वरं ततः । चित्रघण्टां प्रणम्याथ ततः पशुपतीश्वरम् । चन्द्रेशश्चाथ वीरेशो विद्येशोऽग्नीश एव च । दिवामहेश्वरं नत्वा ततस्तु कलसेश्वरम् । नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः । सेनाविनायकश्चाथ द्रष्टव्यः सर्व्वविघ्नहृत् । वशिष्ठवामदेवौ च मूर्त्तिरूपधरावुभौ । द्रष्टव्यौ यत्नतः काश्यां महाविघ्नविनाशकौ । सीमाविनायकं चाथ करुणेशं ततो व्रजेत् । त्रिसन्ध्येशो विशालाक्षी धर्म्मेशो विश्वबाहुका । आशाविनायकश्चाथ वृद्धादित्यस्ततः पुनः । चतुर्वक्त्रेश्वरं लिङ्गं ब्राह्मीशश्च ततः परम् । ततो मनःप्रकाशेशं ईशानेशस्ततः परम् । चण्डीचण्डीश्वरौ दृष्ट्वा भवानीशङ्करौ ततः । ढुण्ढिं प्रणम्य च ततो राजराजेशमर्च्चयेत् । लाङ्गलीशस्ततोऽभ्यर्च्यस्ततस्तु नकुलीश्वरः । परान्नेशमथो नत्वा परद्रव्येश्वरं ततः । प्रतिग्रहेश्वरं चापि निष्कलङ्केशमेव च । मार्कण्डेयेशमभ्यर्च्य तत आप्सरसेश्वरम् । गङ्गेशोऽर्च्यस्ततो ज्ञानवाप्यां स्नानं समाचरेत् । नन्दिकेशं तारकेशं महाकालेश्वरं ततः । दण्डपाणिं महेशञ्च मोक्षेशं प्रणमेत् ततः । वीरभद्रेश्वरं नत्वा अविमुक्तेश्वरं ततः । विना-

यकांस्ततः पञ्च विश्वनाथं ततोव्रजेत्। ततो मौनं विसृज्याथ मन्त्रमेतमुदीरयेत्। अन्तर्गृहस्य यात्रेयं यथावद्या कृता मया। न्यूनातिरिक्तया शम्भुः प्रीयतामनया विभुः। इमं मन्त्रं समुच्चार्य्य क्षणं वै मुक्तिमण्डपे। विश्रम्य यायाद्भवनं निष्पापः पुण्यवान्नरः। संप्राप्य वासरं विष्णोर्विष्णुतीर्थेषु सर्व्वतः। काश्यां यात्रा प्रयत्नेन महापुण्यसमृद्धये। नवम्यां पञ्चदश्यां च कुलस्तम्भं समर्चयेत्। दुःखरुद्रपिशाचत्वे न लभेद् यस्य पूजनात्। श्रद्धापूर्व्वमियं यात्रा कर्त्तव्या तीर्थवासिभिः। सर्व्वस्यापि विशेषेण काश्यां यात्रास्य सर्व्वतः। न वन्ध्यं दिवसं कुर्य्याद्विना यात्रां कचित् कृती। यात्राद्वयं प्रयत्नेन कर्त्तव्यं प्रतिवासरम्। आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुःस्तवम्। यस्य वन्ध्यं दिनं यातं काश्यां नियसतः सतः। निराशाः पितरस्तस्य तस्मिन्नेव दिनेऽभवन्। स दृष्टः कालसर्पेण स हतो मृत्युनास्फुटम्। स मुष्टस्तत्र दिवसे विश्वेशो यत्र नेक्षितः। सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रां व्यधात् स च। मणिकर्णीं तु यः स्नातो यो विश्वेशं निरैक्षत। सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः। द्रष्टव्योविश्वेश्वरो. नित्यं स्नातव्या मणिकर्णिका"।

काशीरहस्य न॰ काश्यारहस्यम्। १काशीस्थैः कर्त्तव्याचारभेदे २तन्माहात्म्यप्रकाशने तच्च काशीख॰दर्शितं यथा "येषां हृदि सदैवास्ते काशी त्वाशीविषाङ्कदः (प्रियः) संसाराशीविषविषं न तेषां प्रभवेत् कचित्। गर्भरक्षामणिर्मन्त्रः काशीवर्णद्वयात्मकः। यस्य कण्ठे सदा तिष्ठेत्तस्याकुशलभीः कुतः। सुधां पिबति योनित्यं काशीवर्णद्वयात्मिकाम्। स नैर्ज्जरीं दशां हित्वा सुधैव परिजायते। श्रुतं कर्णामृतं येन काशीत्यक्षरयुग्मकम्। न समाकर्णयत्येष स पुनर्गर्भजां कथाम्। काशीरजोऽपि यन्मूर्द्ध्नि पतेदप्यनिलाहृतम्। चन्द्रशेखरतन्मूर्द्धा भवेच्चन्द्रकलाङ्कितः। प्रसङ्गतोऽपि यच्चेत्रपथमानन्दकाननम्। यातं, तेऽत्र न जायन्ते नेक्षेरन् पितृकाननम्। गच्छता तिष्ठता वापि स्वपता जाग्रताथ वा। काशीत्येष महामन्त्रो येन जप्तः स निर्भयः। येन बीजाक्षरयुगं काशीति हृदि धारितम्। अबीजानि भवन्त्येव कर्म्मबीजानि तस्य वै। काशी काशीति काशीति जपतो यस्य संस्थितिः। अन्यत्रापि सतस्तस्य पुरो मुक्तिः प्रकाशते। क्षेममूर्त्तिरियं काशी क्षेममूर्त्तिमयो भवः। क्षेममूर्त्तिस्त्रिपथगा नान्यत् क्षेमत्रयं कचित्। ब्राह्मणानामिति वचः क्षेत्रभक्तिविवृंहितम्। निशम्य गिरिजाकान्तस्तुतोष नितरां हरः। प्रोवाच च प्रसन्नात्मा धन्या यूयं द्विजर्षभाः!। येषामित्थेदृशी भक्तिर्मम क्षेत्रेऽतिपावने। जाने सत्यमया जाताः क्षेत्रस्यास्य निषेवणात्। नीरजस्का वितमसः संसारार्णवपारगाः। वाराणस्यास्तु ये भक्तास्ते भक्ता मम निश्चितम्। जीवन्मुक्ता हि ते नूनं मोक्षलक्ष्म्या कटाक्षिताः। येन काशीस्थितो जन्तुरल्पकोऽपि विरोधितः। तेन विश्वम्भरा सर्वा मया सह विरोधिता। वाराणस्यास्तु नामापि यो निशम्यानुमोदते। अपि ब्रह्माण्डमखिलं भुवन्तेनानुमोदितम्। निवसन्ति हि ये मर्त्या अस्मिन्नानन्दकानने। ममान्तःकरणे ते वै निवसेयुरकल्मषाः। निवसन्ति मम क्षेत्रे मम भक्तिं न-कुर्वते। मम लिङ्गधरा ये नो,न तानुपदिशाम्यहम्। काशी निर्वाणनगरी येषां चित्ते प्रकाशते। ते मत्पुरः प्रकाशन्ते नैःश्रेयस्या श्रिया वृताः। मोक्षलक्ष्मीरियं काशी न येभ्यः परिरोचते। स्वर्लक्ष्मीं काङ्क्षमाणेभ्यः पतितास्ते न संशयः। काशीं संकाङ्क्षमाणानां पुरुषार्थचतुष्टयम्। पुरः किङ्करवत्तिष्ठेन्ममानुग्रहतो द्विजाः!। आनन्दकानने ह्यत्र ज्वलन्दावानलोऽस्म्यहम्। कर्म्मबीजानि जन्तूनां ज्वालये, न प्ररोहये। वस्तव्यं सततं काश्यां यष्टव्योऽहं प्रयत्नतः। जेतव्यौ कलिकालौ च लब्धव्या मुक्तिरञ्जसा। प्राप्यापि काशीं दुर्बुद्धिर्यो न मां परिषेवते। तस्य हस्तगताप्याशु कैवल्यश्रीः प्रणश्यति। धन्या मद्भक्तिलक्षाणो ब्राह्मणाः काशिवासिनः। यूयं,यत्नेतसौ वृत्तौ न दूरेऽहं न काशिका। दातव्यो वो वरः कोऽत्र व्रियतां स यथारुचि। प्रेयांसो मे यतो यूयं क्षेत्रसन्न्यासकारिणः। इति पीत्वा महेशाननचन्द्रक्षीराब्धिजां सुधाम्। परितृप्ता द्विजाः सर्व्वे वव्रुर्वरमनुत्तमम्। ब्राह्मणा ऊचुः। उमापते महेशान! सर्वज्ञ! वर एष नः। काशी कदापि न त्याज्या भवता भवतापहृत्!। वचनाद्ब्राह्मणानान्तु शापो मा प्रभवत्विह। कदाचिदपि केषांचित् काश्यां मोक्षेऽन्तरायकः। तव पादाम्बुजद्वन्द्वे निर्द्वन्द्वा भक्तिरस्तु नः। आकल्पेवरपातञ्च काशीवासोऽस्तु नोऽनिशम्। किमन्येन वरेणेश देय एष वरो हि नः। अवधेह्यन्धकध्वंसिन्! वरमन्यं वृणीमहे। तव प्रतिनिधीकृत्यास्माभिस्त्वद्भक्तिभावितैः। प्रतिष्ठितेषु लिङ्गेषु सान्निध्यं भवतोऽस्त्विह। श्रुत्वेति तेषां वाक्यानि तथास्त्विति पिनाकिना। प्रोचेऽन्योऽपि-

वरो दत्तो ज्ञानं यस्य भविष्यति । पुनः प्रोवाच देवेशो निशामयत भो द्विजाः ! । हितं वः कथयाम्यत्र तदनुष्ठीयतां ध्रुवम् । सेव्योत्तरवहा नित्यं लिङ्गमच्चर्यं प्रयत्नतः । दमो दानं दया नित्यं कर्त्तव्यं मुक्तिकाङ्क्षिभिः । इदमेव रहस्यञ्च कथितं, क्षेत्रवासिना । मतिः परहिते कार्य्या वाच्यं नोद्वेगकृद्वचः । मनसाऽपि न कर्त्तव्यमेनोऽत्र विजिगीषुणा । अत्यर्थमक्षयं यस्मात् सुकृतं सुकृतेमरत् । अन्यत्र यत् कृतं पापं तत् काश्यां परिनश्यति । वाराणस्यां कृतं पापमन्तर्गेहे विनश्यति । अन्तर्गेहे कृतं पापं पैशाच्यनरकावहम् । पिशाचनरकप्राप्तिर्गच्छत्येव बहिर्यदि । न कल्पकोटिभिः काश्यां कृतं कर्म्म प्रभुज्यते । किन्तु रुद्रपिशाचत्वं जायतेऽत्रायुतत्रयम् । वाराणस्यां स्थितो यो वै पातकेष्वारतः सदा । योनिं प्राप्यापि पैशाचीं वर्षाणामयुतत्रयम् । पुनरत्रैव निवसन् ज्ञानं प्राप्स्यत्यनुत्तमम् । तेन ज्ञानेन संप्राप्ते मोक्षमाप्स्यत्यनुत्तमम् । दुष्कृतानि विधायेह बहिः पञ्चत्वमागताः । तेषां गतिं प्रवक्ष्यामि शृणुत द्विजसत्तमाः ! । याम्याख्या मे गणाः सन्ति घोरा विकृतमूर्त्तयः । मूषायां ते धमन्त्यादौ क्षेत्रदुष्कृतकारिणः । नयन्त्यनूपप्रायाश्च ततः प्राचीं दुरासदाम् । वर्षाकाले दुराचारान् पातयन्ति महाजले । जलौकाभिः सपद्माभिर्दन्दशूकैर्जलोद्भवैः । दुर्निवारैश्च मशकैर्दंश्यन्ते ते दिवानिशम् । ततो याम्यैर्हिमर्त्तौ ते नीयन्तेऽद्रौ हिमालये । अशनावरणैर्हीनाः क्लेश्यन्ते ते दिवानिशम् । मरुस्थले ततो ग्रीष्मे वारिवृक्षविवर्जिते । दिवाकरकरैस्तीव्रैः स्थाप्यन्ते ते पिपासिताः । क्लेशितास्ते गणैरुग्रैर्यातनाभिः समन्ततः । इत्थं कालमसङ्ख्यातमानीयन्ते ततस्त्विह । निवेदयन्ति ते याम्याः कालराजान्तिकं ततः । कालराजोऽपि तान् दृष्ट्वा कर्म्मसंस्मार्य्य दुष्कृतम् । विवस्त्रान् क्षुत्तृषार्त्तांश्च लग्नपृष्ठोदरत्वचः । अन्यै रुद्रपिशाचैश्च सह संयोजयत्यपि । ततो रुद्रपिशाचास्ते भैरवानुचराः सदा । सहन्ते क्लममत्यर्थं क्षुत्तृड्लग्नत्वसम्भवम् । आहारं रुधिरोन्मिश्रं ते लभन्ते कदाचन । एवं त्र्ययुतसंख्यातं कालं तत्रापि दुःखिताः । श्मशानस्तम्भमभितो नीयन्ते कण्ठपाशिताः । पिपासिता अपि न तेऽम्बु स्पर्शमपि चाप्नुयुः । अथ संक्षीणपापास्ते कालभैरवदर्शनात् । इहैव देहिनो भूत्वा मुच्यन्ते ते ममाज्ञया । तस्माच्च कामयेदत्र वाङ्मनःकर्म्मणाव्ययम् । शुचौ पथि सदा स्थेयं महालाभमभीप्सुभिः । नाविमुक्ते मृतः कश्चिन्नरकं याति किल्विषी । ममानुग्रहमासाद्य गच्छत्येव परां गतिम् । अनशनं यः कुरुते मद्भक्त इह सुव्रतः । न तस्य पुनरावृत्तिः कल्पकोटिशतैरपि । अशाश्वतमिदं ज्ञात्वा मानुष्यं बहुकिल्विषम् । अविमुक्तं सदा सेव्यं संसारभयमोचकम् । नान्यत् पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् । सर्वपापप्रशमनीं प्रायश्चित्तं कलौ युगे । जन्मान्तरसहस्रेषु यत्पापं समुपार्जितम् । अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम् । जन्मान्तरसहस्रेषु युञ्जन् योगं यदाप्नुयात् । तदिहैव परो मोक्षो मरणादधिगम्यते । तिर्यग्योनिगताः सत्त्वा येऽविमुक्ते कृतालयाः । कालेन निधनं प्राप्तास्ते यान्ति परमां गतिम् । अविमुक्तं न सेवन्ते ये मूढास्तमसा वृताः । विण्मूत्ररेतसां मध्ये ते वसन्ति पुनः पुनः । अविमुक्तं समासाद्य यो लिङ्गं स्थापयेत् सुधीः । कल्पकोटिशतैर्वापि नास्ति तस्य पुनर्भवः । ग्रहनक्षत्रताराणां कालेन पतनं ध्रुवम् । अविमुक्तमृतानान्तु पतनं नैव विद्यते । ब्रह्महत्यां नरः कृत्वा पश्चात् संयतमानसः । प्राणांस्त्यजति यः काश्यां स मुक्तो नात्र संशयः । स्त्रियः पतिव्रता याश्च मम भक्तिसमाहिताः । अविमुक्ते मृता विप्रा ! यान्ति ताः परमां गतिम् । अत्रोत्क्रमणकालेऽहं स्वयमेव द्विजोत्तमाः ! । दिशामि तारकं ब्रह्म, देही स्यात्तेन तन्मयः । मन्मना मम भक्तश्च मयि सर्व्वार्पितक्रियः । यथा मोक्षमिहाप्नोति न तथाऽन्यत्र कुत्रचित् । मरणं निश्चितं ज्ञात्वा गतिञ्चासुखदायिनीम् । चलमागन्तुकं सर्वं, ततः काशीं समाश्रयेत् । काशी समाश्रिता यैस्तु मनोवाक्कायकर्म्मभिः । तानत्र निर्म्मलधियो निर्वाणश्रीः । समाश्रयेत् काशीस्थितैकमपि यः प्रीणयेन्न्यायजैर्धनैः । तेन त्रैलोक्यमखिलं प्रीणितं तु मया सह । यः प्रीणयति पुण्यात्मा निर्वाणनगरीश्वरम् । प्रणयेन स्थितो नित्यं ब्राह्मणाः ! प्रीणयामि तम् । दिवोदासोऽपि राजर्षिः काशीं धर्मेण पालयन् । सदेहो मत्पदं प्राप्तो यतो न पुनरागतिः । अत्र योगस्तथा ज्ञानं मुक्तिरेकेन जन्मना । अतो विमुक्तमासाद्य नान्यद्गच्छेत्तपोवनम् । मोक्षं सुदुर्लभं ज्ञात्वा संसारञ्चातिभीषणम् । अश्मना चरणौ हत्वा कालमत्र प्रतीक्षयेत् । अविमुक्तं परित्यज्य यदा यास्यन्ति दुर्धियः । हसिष्यन्ति तदा भूतान्यन्योन्यं करता-

ङ्गैः। प्राप्य वाराणसीं पुण्यां सिद्धिक्षेत्रमनुत्तमम्। परिनिष्क्रान्तुमन्यत्र कस्य जन्तोर्मतिर्भवेत्। महादानेन चान्यत्र यत् फलं लभ्यते नरैः। अविमुक्ते तु काकिन्यां दत्तायां तदवाप्यते। एकः समर्चयेल्लिङ्गं तपस्तप्येत चापरः। तयोर्मध्ये तु स श्रेष्ठो यो लिङ्गं पूजयेदिह। तीर्थान्तरे गवां कोटिं विधिवद्यः प्रयच्छति। एकाहं यो वसेत् काश्यां काशीवासी तयोर्वरः। अन्यत्र ब्राह्मणानां तु कोटिं संभोज्य यत् फलम्। वाराणस्यां तदेकेन भोजितेन तदाप्यते। सन्निहित्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे। तुलापुरुषदानेन काश्यां भिक्षा समा भवेत्। ममेह परमं ज्योतिरापातालाद्व्यवस्थितम्। अतीत्य सत्यलोकादीननन्तलिङ्गरूपधृक्। पृथिव्यन्तःस्थितं लिङ्गमविमुक्तं स्मरन्ति ये। कलुषैस्ते विमुच्यन्ते महद्भिरिति निश्चितम्। अस्मिन् क्षेत्रे तु येनाहं दृष्टः स्पृष्टः समर्चितः। समाप्य तारकं ज्ञानं न स भूयोऽभिजायते। यो मामिह समभ्यर्च्य म्रियतेऽन्यत्र कुत्रचित्। जन्मान्तरेऽपि मां प्राप्य स विमुक्तो भविष्यति। इत्युक्त्वा क्षेत्रमाहात्म्यं द्विजानामग्रतो हरः। पश्यतामेव तेषान्तु तत्रैवान्तर्हितोऽभवत्"।

काशीसेतु पु० त्रिस्थलीसेत्वन्तर्गते काशीमाहात्म्ययात्रादिविधायके ग्रन्थभेदे।

काशेय पु० काश्यां भवः ढक् काशेर्नृपस्यापत्यं वा ढक्। काश्यां भवे स्त्रियां ङीप्। "भरतः खलु काशेयीमुपयेमे सार्व्वसेनीं सुनन्दां नाम तस्यां जज्ञे भुमन्युर्नाम"। भा० आ० ९५।

काशीश(स) न० काशिं प्रकाशमीष्टे ईश–क। (हीराकस) ख्याते उपधातुभेदे "काशीशं(सं)धातुकाशीशं (सं)पांशुकाशीश(स)मित्यपि। तदेव किञ्चित्पीतं तु पुष्पकाशीश(स)मुच्यते। काशीश(स)मम्लमुष्णञ्च तिक्तञ्च तुवरं तथा। वातश्लेष्महरं केश्यं रेतःकण्डूविषप्रणुत्। मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्त्तितम्" भावप्र० काशीं दीप्तिं स्यति सो–क। दन्त्यान्तोऽप्यत्र भावप्र०।

काशू(सू) स्त्री कश(स) ऊ णिच्च उज्ज्वलदत्तीये तालव्यमध्यपाठः पा० सूत्रे दन्त्यमध्यपाठः १शक्तिरूपास्त्रे २विकलवाचि च मेदि०३बुद्धौ रोगे शब्दचि०।

काशू(सू)कार पु० काशूं(सूं)विकलवाचं करोति कृ–अण्उप–स०। गुवाकेश वृचि० तत्फलसेवने हि जिह्वाजाड्यात् वाचो वैकल्यं जायते इति तस्य तथात्वम्।

काशू(सू)तरी स्त्री० ह्रस्वा काशूः(सूः) ह्रस्वार्थे ष्टरच् ङीष्। ह्रस्वे काशूनामास्त्रभेदे।

काश्म(श्व)री स्त्री काश–वनिप् वनोरच नश्चान्तादेशः पृषो० वा वस्य मः। गाम्भार्य्याम् अमरः, फलेऽपि हरीत० अणोलुपि स्त्री।० "विल्वान् कपित्थान् जम्बूश्च काश्मरीर्बदरीस्तथा" भा०व० १५८अ०।

काश्मर्य्य पु० काश्मरी+स्वार्थे ष्यञ्। गाम्भार्य्याम् अमरः "बदरेङ्गुदकाश्मर्य्यभल्लातकफलानि च" भा०आनु० ५३०। अयञ्च मधुरवर्गे पियालबीजकाश्मर्य्येत्याद्युपक्रमे "समासेन मधुरोवर्गः" सुश्रुते उक्तः।

काश्मीर न० काश्मीरे भवः कच्छा० अण्। १पुष्करमूले अमर०। २टङ्के ३कुङ्कुमभेदे मेदि० "काश्मीरदेशजे क्षेत्रे कुङ्कुमं यत् भवेद्धि तत्। सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम्" भावप्र० तत्स्वरूपाद्युक्तम्। काश्मीरद्रवसान्द्रदिग्धवपुषः" भर्त्तृ०। "काश्मीरागुरुकस्तूरीतिलकरीकाशीपुराधीश्वरी" अन्नदास्त०। ४काश्मीरदेशभवे त्रि० स्त्रियां ङीप्। "तेन तेनैवमापन्ना काश्मीरीव तुरङ्गमी" भा०वि०९अ०। सा च ५गाम्भार्य्यां भावप्र०। काश्मीरदेशानां राजा अण्। ६तद्देशराजे। "काश्मीराश्च कुमाराश्च घोरका हंसकादनाः। शिविस्त्रिगर्त्तयौधेयाः राजन्या मद्रकैकयाः" भा० स० ५२। काश्मीरोऽभिजनोऽस्य सिन्ध्वा०अण्। पित्रादिक्रमेण ७तद्देशवासिनि त्रि० "काश्मीराः सिन्धुसौवीरा गान्धारादर्शकास्तथा" भा० भी०९अ०। "शूद्राभीराश्च दरदाः काश्मीराः पत्तिभिः सह" तत्रैव। "शारदामठमारभ्य कुङ्कुमाद्रितटान्तकः। तावत्काश्मीरदेशः स्यात् पञ्चाशद्योजनात्मकः" इत्युक्ते ८देशभेदे च। "काश्मीरेषु सरो दिव्यं नाम्ना क्षुद्रकमानसम्" सुश्रु०। काश्मीरमण्डलतीर्थादिकथा भा०व०१३०अ० यथा "एषा रम्या विपाशा च नदी परमपावनी। अत्र वै पुत्त्रशोकेन वशिष्ठो भगवानृषिः। बद्ध्वात्मानं निपतितो विपाशः पुनरुत्थितः। काश्मीरमण्डलञ्चैतत् सर्व्वपुण्यमरिन्दम!। महर्षिभिश्चाध्युषितं पश्येदं भ्रातृभिः सह। यत्रोत्तराणां सर्व्वेषामृषीणां नाहुषस्य च। अग्नेश्चैवात्र संवादः काश्यपस्य च भारत!। एतद्द्वारं महाराज। मानसस्य प्रकाशते। वर्षमस्य गिरेर्मध्ये रामेण श्रीमता कृतम्। एष वातिकखण्डो वै प्रख्यातः सत्यविक्रम!। नात्यवर्त्तत यद्द्वारं विदेहादुत्तरञ्च यः। इदमाश्चर्य्यमपरं देशेऽस्मिन् पुरुषर्षभ!। क्षीणे युगे तु कौन्तेय! शर्व्वस्य

सह पार्षदैः। सहोमया च भवति दर्शनं कामरूपिणः। अस्मिन् सरसि सन्नेव्वै चैत्रे मासि पिनाकिनम्। यजन्ते याजकाः सम्यक् परिवारशुभार्थिनः। अत्रोपस्पृश्य सरसि श्रद्दधानो जितेन्द्रियः। क्षीणपापः शुभान् लोकान् प्राप्नुते नात्र संशयः"।

"काश्मीरमण्डले नद्यो याः पतन्ति महानदम्। ताः नदीः सिन्धुमासाद्य शीलवान् स्वर्गमाप्नुयात्" भा० आनु०२५अ०। काश्मीरदेशउत्पत्तिस्थानत्वेनास्त्यस्याः अच् टाप्। १कपिलद्राक्षायां स्त्री राजनि०। ९ अतिविषायां स्त्री मेदि०।

काश्मीरक त्रि० काश्मीरे भवः मनुष्यस्तत्स्थोवा वुञ्। काश्मीरदेशोद्भवे १मनुष्ये २तत्स्थे च। "ततः काश्मीरकान् वीरान् क्षत्रियान् क्षत्रियर्षभः" भा०स० २६अ०।

काश्मीरज न० काश्मीरे जायते जन–ड ७त०। १कुष्ठे (कुड़)२कुङ्कुमभेदे च मेदि०। ३पुष्करमूले विश्वः।

काश्मीरजन्मन् न० काश्मीरे जन्म अस्य। कुङ्कुमभेदे अमरः।

काश्मीर्य्य त्रि० काश्मीरेण निर्वृत्तादि सङ्काशा०चतुरर्थ्यां ण्य। १काश्मीरनिर्वृत्तादौ २कुङ्कुमभेदे न०

काश्य न० कं जलमास्यं यत्र कुत्सितं वा आस्यं अच–ण्यत् कश्य+स्वार्थेऽण् वा। १मद्ये हेमच०। काश्यां भवःयत्। २काशिराजे पु०। स्वार्थेक। तत्रैव। "शलात्मजश्चार्ष्टिषेण स्तनयस्तस्य काश्यकः। काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा" हरिवं० २९अ०।

काश्यप न०काश्यं मद्यं पिबत्यत्र पा–घञर्थे क।१मांसे हेमच०। मांसस्य मद्यपानाव्यभिचारात्तथात्वम्। काश्यं राजभेदं पाति नरकात् पा–क। काश्यस्य नृपस्य २पुत्रभेदे काश्यपशब्दे उदा०। कश्यपस्य गोत्रापत्यम् विदा० अञ्। ३कश्यपगोत्रापत्ये पुंस्त्री। ४कणादे मुनौ पु० त्रिका०। ५मृगभेदे पुंस्त्री मेदि० स्त्रियां जातित्वात् ङीष्। कश्यपस्येदम् अण्। ६कश्यपसम्बन्धिनि त्रि० "एष एव दितेर्गर्भ ओजः काश्यपमर्पितम्"भाग०३,१५, ११श्लो०। स्त्रियां ङीप्। सा च ७पृथिव्याम् स्त्री तस्याः तत्सम्बन्धितया तत्सुतत्वकथा भा० आनु०१५४अ०उक्ता यथा "इमां भूमिं द्विजातिभ्यो दित्सुर्वै दक्षिणां पुरा। अङ्गो नाम नृपो राजंस्ततश्चिन्तां मही ययौ। धारिणीं सर्वभूतानामयं प्राप्य वरो नृपः। कथमिच्छति मां दातुं द्विजेभ्यो ब्रह्मणः सुताम्। साऽहं त्यक्त्वा गमिष्यामि भूमित्वं ब्रह्मणः पदम्। अयं सराष्ट्रो नृपतिर्मा भूदिति ततोऽगमत्। ततस्तां कश्यपो दृष्ट्वा व्रजन्तीं पृथिवीं तथा। प्रविवेश महीं सद्यो मुक्त्वात्मानं समाहितः। ऋद्धा सा सर्वतो जज्ञे तृणौषधिसमन्विता। धर्मोत्तरा नष्टभया भूमिरासीत्ततो नृप!। एवं वर्षसहस्राणि दिव्यानि सततं नृप!। शयितः कश्यपो राजन्! भूमिरासीदतन्द्रिता। अथागम्य महाराज! नमस्कृत्य च कश्यपम्। पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः"। ८तद्गोत्रापत्यस्त्रियां स्त्री ङीष् "काश्यपीबालाक्यमाठरी पुत्रात् काश्यपी बालाक्यमाठरीपुत्रः" शत०ब्रा०१४,९,४,३१० ९कश्यपपत्न्यां स्त्री काश्यपेयः। कश्यपगोत्रोत्पन्ने विषचिकित्साभिज्ञे १०ऋषिभेदे पु० तत्कथा भा०आ० ४२अ० यथा

"काश्यपोऽभ्यागमद्विद्वांस्तं राजानं चिकित्सितुम्। श्रुतं हि तेन तदभूद्यथा तं राजसत्तमम्। तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम्। तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम्। तत्र मेऽर्थश्च धर्मश्च भवितेति विचिन्तयन्। तं ददर्श च नागेन्द्रस्तक्षकः काश्यपं पथि। गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽतिगः। तमब्रवीत् पन्नगेन्द्रः काश्यपं मुनिपुङ्गवम्। क्व भवांस्त्वरितो याति किञ्च कार्यं चिकीर्षति। काश्यप उवाच। नृपं कुरुकुलोत्पन्नं परीक्षितमरिन्दमम्। तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति। तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसा। पाण्डवानां कुलकरं राजानममितौजसम्। गच्छामि त्वरितं सौम्य! सद्यः कर्तुमपज्वरम्। तक्षक उवाच। अहं स तक्षको ब्रह्मंस्तं धक्ष्यामि महीपतिम्। निवर्त्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुम्। काश्यप उवाच। अहं तं नृपतिं गत्वा त्वया दष्टमपज्वरम्। करिष्यामीति मे बुद्धिर्विद्याबलसमन्वितः। तक्षक उवाच। यदि दष्टं मयेह त्वं शक्तः किञ्चिच्चिकित्सितुम्। ततो वृक्षं मया दष्टमिमं जीवय काश्यप!। परं मन्त्रबलं यत्ते तद्दर्शय यतस्व च। न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम!। काश्यप उवाच। दश नागेन्द्र! वृक्षं त्वं यद्येतदभिमन्यसे। अहमेनं त्वया दष्टं जीवयिष्ये भुजङ्गम!। सौतिरुवाच। एवमुक्तः स नागेन्द्रः काश्यपेन महात्मना। अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः। स वृक्षस्तेन दष्टस्तु पन्नगेन महात्मना। आशीविषविषोपेतः प्रजज्वाल समन्ततः। तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत्। कुरु यत्नं द्विजश्रेष्ठ!

जीवयैनं वनस्पतिम्। सौतिरुवाच। भस्मीभूतं ततो वृक्षं पन्नगेन्द्रस्य तेजसा। सर्वं भस्म समाहृत्य काश्यपो वाक्यमब्रवीत्। विद्याबलं पन्नगेन्द्र! पश्य मेऽद्य वनस्पतौ। अहं सञ्जीवयाम्येनं पश्यतस्ते भुजङ्गम!। ततः स भगवान् विद्वान् काश्यपो द्विजसत्तमः। भस्मराशीकृतं वृक्षं विद्यया समजीवयत्। अङ्कुरं कृतवांस्तत्र ततः पर्णद्वयान्वितम्। पलाशिनं शाखिनञ्च तथा विटपिनं पुनः। तं दृष्ट्वा जीवितं वृक्षं काश्यपेन महात्मना। उवाच तक्षको ब्रह्मन्नैतदत्यद्भुतं त्वयि। द्विजेन्द्र! यद्विषं हन्या मम वा मद्विधस्य वा। कं त्वमर्थमभिप्रेप्सुर्यासि तत्र तपोधन!। यत्तेऽभिलषितं प्राप्तुं फलं तस्मान्नृपोत्तमात्। अहमेव प्रदास्यामि तत्ते यद्यपि दुर्लभम्। विप्रशापाभिभूते च क्षीणायुषि नराधिपे। घटमानस्य ते विप्र! सिद्धिः संशयिता भवेत्। ततो यशः प्रदीप्तन्ते त्रिषु लोकेषु विश्रुतम्। निरंशुरिव घर्म्मांशुरन्तर्द्धानमितो व्रजेत्। काश्यप उवाच। धनार्थी याम्यहं तत्र तन्मे देहि भुजङ्गम!। ततोऽहं विनिवर्त्तिष्ये स्वापतेयं प्रगृह्य वै। तक्षक उवाच। यावद्धनं प्रार्थयसे तस्माद्राज्ञस्ततोऽधिकम्। अहमेव प्रदास्यामि निवर्त्तस्व द्विजोत्तम!। सौतिरुवाच। तक्षकस्य वचः श्रुत्वा काश्यपो द्विजसत्तमः। प्रदध्यौ सुमहातेजा राजानं प्रति बुद्धिमान्। दिव्यज्ञानात् स तेजस्वी ज्ञात्वा तं नृपतिं तदा। क्षीणायुषं पाण्डवेयमपावर्त्तत काश्यपः”।

काश्यपनन्दन पु० कश्यपस्यायम् अण् कर्म्म०। १गरुडे २अरुणे ३देवमात्रे च। “ददानि मेदिनीभागं भवद्भ्योऽहं सुरर्षभाः!। यस्मिन् देशे करिष्यध्वं यज्ञान् काश्यपनन्दनाः” भा०आनु०६६अ०। “मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश” इत्युपक्रम्य “अदित्यां द्वादशादित्याः सम्भूता भुवनेश्वराः” इत्युक्त्वा सर्व्वेषां सुरासुरादीनां तततदुत्पत्त्युक्तेः ४असुरादिषु च। कश्यपशब्दे १८३९पृ० विवृतिः [कश्यपगोत्रापत्ये

काश्यपायन पुंस्त्री० कश्यपस्य गोत्रापत्यं नडा० फक्।

काश्यपि पु० कश्यपे भवः इञ्। १अरुणे २गरुडे च। तयोः कश्यपेन विनतायामुत्पत्तिकथा च भा० आ० ३१अ० यथा “एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा। विनता नाम कल्याणी पुत्रकामा यशस्विनी। तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः। उपचक्राम भर्त्तारं, तामुवाचाथ कश्यपः। आरम्भः सफलो देवि! भविता यस्त्वयेप्सितः। जनयिष्यसि पुत्त्रौ द्वौ वीरौ त्रिभुवनेश्वरौ। तपसा वालिखिल्यानां मम सङ्कल्पजौ तथा। भविष्यतो महाभागौ पुत्त्रौ त्रैलोक्यपूजितौ। उवाच चैनां भगवान् कश्यपः पुनरेव ह। धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः! एतौ सर्व्वपतत्त्रिणामिन्द्रत्वं कारयिष्यतः। लोकसम्भावितौ वीरौ कामरूपविहङ्गमौ। शतक्रतुमथोवाच प्रीयमाणः प्रजापतिः। त्वत्सहायौ महावीर्य्यौ भ्रातरौ ते भविष्यतः। नैताभ्यां भविता दोषः सकाशात्ते पुरन्दरः। व्येतु ते शक्र! सन्तापस्त्वमेवेन्द्रो भविष्यसि। न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः। न चावमान्या दर्पात्ते वाग्वज्रा भृशकोपनाः। एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिपिष्टपम्। विनता चापि सिद्धार्था बभूव मुदिता तथा। जनयामास पुत्त्रौ द्वावरुणं गरुडं तथा। विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः। पतत्त्रिणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत”।

काश्यपिन् पु० भूम्नि। काश्यपेन प्रोक्तमधीयते णिनि। काश्यपप्रोक्तशाखाध्येतृषु।

काश्यपेय पु० कश्यपस्येयम् अण् काश्यपी कश्यपभार्य्या तत्र भवः ढक्। १कश्यपपत्नीजाते सुरासुरादौ। “इत्येते द्वादशादित्याः काश्यपेयाः प्रकीर्त्तिताः” भा०आनु० १५०अ० गरुडे च “नागक्षयकरश्चैव काश्यपेयो महाबलः” भा०आ०२३अ०। “काश्यपेयोऽमृताहर्त्ता” ध्वजपूजामन्त्रः।

काश्यादि पु० ञ्ठञ्ञिठोः प्रत्यययोः प्रकृतिभूते पाणिन्युक्ते शब्दगणे स च गणः काशि वेदि (चेदि इति वा) सांयाति संवाह अच्युत मोदमान शकुलाद हस्तिकर्षू कुनामन् हिरण्य करण गोवासन भारङ्गी अरिन्दम अरित्र देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दासमित्र सुधामित्र सोममित्र छागमित्र सधमित्र (आपदादिपूर्वपदात्कालान्तात्) आपदूर्द्ध तत्”। तात्कालिकः।

काश्यायन पुंस्त्री काश्यस्य काशिराजस्य गोत्रापत्यम् नडा० फक्। काशिराजगोत्रापत्ये

काष पु० कष्यतेऽनेन कष–करणे घञ्। १कषपाषाणे (कष्टीपातर) ख्याते प्रस्तरभेदे शब्दार्थचि०। २ऋषिभेदे च

काषाय त्रि० कषायेण रक्तः अण्। कषायेण रक्ते १वस्त्रादौ “यदि वासांसि वसीरन् रक्तानि वसीरन् काषायं ब्राह्म-

णो, माञ्जिष्ठं क्षत्रियो, हारिद्रं वैश्यः” आश्व०श्रौ० १,१९,९। “कात्यायन्यर्द्धवृद्धा या काषायवसनाऽधवा” अमरः। स्त्रियां ङीप्। तदन्तस्य रक्तार्थाणन्तत्वात् एकार्थविशेष्यस्त्रीलिङ्गे शब्दे परे पुंवत्। काषा यी कन्या यस्य काषायकन्यः

काषायण पु० अश्वा० गणे काशेत्यत्र काषेति पाठे गोत्रापत्ये फञ्। १काषगोत्रापत्ये शुक्लयजुर्वेदवंशान्तर्गते ऋषिभेदे। “काषायणात् काषायणः” शत ब्रा०१२,७,२,२७।

काषायवासिक पुंस्त्री काषाये वस्त्रे वासोऽस्त्यस्य ठन्। कीटभेदे स्त्रियां ङीष्। “सूचीमुखः कृष्णगोधा यश्च काषायवासिकः” सुश्रु०। कीटशब्दे विवृतिः।

काषायिन् पु० भूम्नि। कषायेण प्रोक्तमधीयते णिनि। कषायर्षिप्रोक्तशाखाध्यायिषु।

काष्ठ न० काशत्यनेन काश–क्थन् नेट् शस्य ष १अनलादेरिन्धनार्थे दारुणि “ससारमतिशुष्कं यत् सुष्टिमध्ये समेष्यति। तत् काष्ठं काष्ठमित्याहुः खदिरादिसमुद्भवम्” इत्युक्तलक्षणयुक्ते २दारुभेदे च। “काष्ठेन वा नखेन वा कण्डुयेत” शत०,ब्रा०,२,२,१, “यथा काष्ठञ्च काष्ठञ्च समेयातां महोदधौ। समेत्य च व्यपेयातां तद्वद्भूतसमागमः” भा०,शा०,८६४ श्लो०“तथाश्मानस्तृणकाष्ठञ्च सर्व्वं दिष्टक्षये स्वां प्रकृतिं भजन्ति” भा०,आ०,८९अ०।

काष्ठक त्रि० काष्ठं विद्यतेऽस्य नड़ादि० छ कुक् च बिल्वादि० छमात्रस्य लुक्। काष्ठयुक्ते। २अगुरुचन्दने न शब्दमा० तस्य प्रशस्तकाष्ठवत्त्वात् तथात्वम्।

काष्ठकदली स्त्री काष्ठमिव कठिना कदली। (काठकला कदलीभेदे राजनि०। [ङीष्।

काष्ठकीट पुं स्त्री काष्ठे कीटः। घुणाख्ये कीटे हेम०स्त्रियां

काष्ठकुट्ट पुं स्त्री० काष्ठं कुट्टति कुट्ट–अण् उप० स०। (काठठोकरा)पक्षिभेदे त्रिका० स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। [काष्ठमये कुद्दाले अवभ्रौ अमरः।

काष्ठकुद्दाल पु० काष्ठमयः कुद्दालः। नौकास्थमलघर्षणार्थे

काष्ठजम्बू स्त्री काष्ठप्रधाना जम्बूः। भूमिजम्बूवृक्षे राजनि०

काष्ठतक्ष् पु० काष्ठं तक्षति तक्ष–क्विप्। (छुतार) इतिप्रसिद्धे जातिभेदे। ण्वुल्। काष्ठतक्षकोऽप्यत्र स्त्रियां जातित्वात् ङीष्। काष्ठतक्षणकर्त्तृमात्रे त्रि०। स्त्रियां टाप् इति भेदः। [कृमिभेदे हारा०।

काष्ठतन्तु पु० काष्ठे तन्तुरिव दीर्घत्वेनावस्थितत्वात्। काष्ठस्थ

काष्ठदारु पु० काष्ठप्रधानो दारुः। देवदारुवृक्षे राजनि०। तस्य शाखाबाहुल्ययोगेन काष्ठप्रधानत्वात् तथात्वम्।

काष्ठद्रु पु० काष्ठप्रधानो द्रुर्वृक्षः। पलाशवृक्षे राजनि० तस्य काष्ठतोऽपि पुष्पोद्गमात्तस्यप्राधान्यात्तथात्वम्।

काष्ठधात्रीफल न० काष्ठमिव शुष्कं धात्रीफलम्। आमलके राजनि०तत्फलाभ्यन्तरे अष्टेः काष्ठस्येव शुष्कत्वात्तस्य तथात्वम्। [लायाम् राजनि०

काष्ठपाटला स्त्री काष्ठमिव कठिना पाटला। सितपाट

काष्ठमठी स्त्री क्षुद्रोमठः मठी काष्ठेन निर्म्मिता मठीव चितायाम् त्रिका०। तस्याः काष्ठनिर्म्मितक्षुद्रमठाकारत्वात् तथात्वम्।

काष्ठमय त्रि०काष्ठात्मकं मयट्। १काष्ठात्मके २काष्ठतुल्यकठिन हृदये निर्दये च। “दुर्द्दशाः केचिदाभान्ति नराः काष्ठमया इव” । भा०,रा०,२४४,। [हारा

काष्ठमल्ल पुं काष्ठं मल्ल इव यत्र। शवनिर्हारणे यानभेदे

काष्ठमौन न० काष्ठमिव मौनम्। इङ्गितेनापि स्वाभिप्रायाप्रकाशनरूपे मौने शब्दचि०

काष्ठलेखक पु० काष्ठं लिखति ण्वुल्। घुणाख्ये कीटे।

काष्ठलौहिन् पु० काष्ठञ्च लौहञ्च स्तोऽस्य। लौहयुक्ते काष्ठमये मुद्गरे त्रिका०

काष्ठवल्लिका स्त्री काष्ठमिव शुष्का वल्लिका। कटुकायां (कट्की) ख्याते वल्लीभेदे वैद्यकम् [शरिवाभेदे राजनि०

काष्ठशारिवा स्त्री काष्ठमिव शुष्का शारिवा। (अनन्तमूल)

काष्ठा स्त्री काश–क्थन् नेट् शस्य षः। १दिशि। “स राजपत्नीवदध आशु शुक्ल इयोड्डुवः। आपूर्य्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहम्”। २अष्टादशनिमेषात्मके २काले “त्वं मुहूर्त्तस्थितिस्त्वं च लवस्त्वं पुनः क्षणः“शुक्लस्त्वं बहुलस्त्वं च कला काष्ठा त्रुटिस्तथा”भा० आ०२५अ०।“कलाकाष्ठादिरूपेण परिणाम प्रदायिनि!” देवीमा०। ३सीमायाम् “परा हि काष्ठा तपसस्तया पुनः” कुमा०। ४स्थितौ “काष्ठां भगवतोध्यायेत् स्वनासाग्रावलोकनः” भाग० १,१,२२, श्लो०। ५उत्कर्षे च अमरः “काष्ठागतस्नेहरसानुविद्धम्” कुमारः। काष्ठं प्राधान्येनास्त्यस्याम् अच्। ६दारुहरिद्रायां मेदि०। ७कश्यपपत्नीभेदे। “अथ कश्यपपत्नीनां यत्प्रसूतमिदं जगत्। अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला। मुनिः क्रोधवशा ताम्रा सुरभिः सरमा तिमिः” इत्युपक्रम्य “अरिष्टायास्तु गन्धर्व्वाः काष्ठाया द्विशफेतराः” भाग० ६,६,२७, उक्तेः

काष्ठागार न० काष्ठनिर्म्मितमागारम्। (काठेरघर) काष्ठनिर्म्मिते गृहे त्रिका०।

काष्ठाम्बुवाहिनी स्त्री काष्ठनिर्म्मिताऽम्बुवाहिनी। (सेञ्ओति) ख्याते द्रोणीरूपे नौकाजलसेचनपात्रभेदे अमरः

काष्ठालुक न० काष्ठमिव कठिनमालुकम्। कन्दभेदे। "कन्दानत ऊर्द्धं वक्ष्यामः विदारिकन्द-शता-वरी-विस-मृणाल-शृङ्गाटक-कशेरुक-पिण्डालुक-मध्वालुक-हस्त्यालुक काष्ठालुक-शङ्खालुक-रक्तालुकेन्दीवरोत्पल-कन्दप्रभृतीनि। रक्तपित्तहराण्याहुः शीतानि मधुराणि च। गुरूणि बहुशुक्राणि स्तन्यवृद्धिकराणि च" सुश्रुतः।

काष्ठिक त्रि० काष्ठमस्त्यस्य ठन्। बहुकाष्ठयुक्ते अमले देशादौ 'क्षुद्रं काष्ठं ङीप् काष्ठी स्वार्थे क ह्रस्वः टाप्। काष्ठिका क्षुद्रकाष्ठखण्डे स्त्री। "विंशति काष्ठिकाः" भवदेवः

काष्ठिन् त्रि० काष्ठमस्त्यस्य इनि। बहुकाष्ठयुक्ते स्त्रियां ङीप्

काष्ठील पु० काष्ठिना ईल्यते ईल-क्षेपणे कर्म्मणि घञ्। १राजार्के राजनि० ईषदष्ठीलेव। २कदलीभेदे (काठकला) शब्दचि०

काष्ठेक्षु पु० काष्ठमिव कठिनकाण्ड इक्षुः। इक्षुभेदे सुश्रु० इक्षुशब्दे ९०९पृ०विवृतिः। भावप्र० काण्डेक्षुरिति पाठः।

काष्ठोडुम्बरिका स्त्री काष्ठप्रधाना उदुम्बरिका। काकोडुम्बरिकायाम् शब्दचि०।

कास कुत्सित शब्दे (रोगहेतुकशब्दभेदे) भ्वा० आत्म० अक० सेट्। कासते अकासिष्ट कासाम्-बभूव-आस-चक्रे चकासे "असीतोरावणः कासाञ्चक्रे शस्त्रैर्निराकुलः" भट्टिः। "कासाञ्चक्रे कुत्सितशब्दमभिहितवान्" जयम०। "अतऊर्द्धं प्रवक्ष्यामि धूमोपहतलक्षणम्। भृशंति क्षौति चात्यर्थमत्याध्मति कासते" "स पूर्व्वं कासते शुष्कम्" सुश्रु०। "कासमानश्च तृष्णाभिभूतः" सुश्रु०। अस्य कश्चित् परस्मैपदित्वमिच्छन्ति। "प्रसक्तवेगस्य समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः" सुश्रु०कासशब्दे उदा०। क्विप् काः। "यस्त्वं शीतोऽथोरूरः सह कासा वेपयः" अथ० ५,२२,१०, भावे घञ्। कासः कुत्सितशब्दः "मुञ्च शीर्षक्त्या उत कास एनम्" अथ० १,१२,२।

कास त्रि० कस हिंसने कर्त्तरि ण। १हिंसके। कासतेऽनेन कास-करणे घञ्। २रोगभेदे पु० "कुरुथा वलासं कासमुद्युगम्" अथ० ५,२२,११। तल्लक्षणनिदानादि सुश्रुते उक्तं यथा

"अथातः कासप्रतिषेधमध्यायं व्याख्यास्यामः। उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः। कासस्यापि च ते ज्ञेयास्त एवोत्पत्तिहेतवः। धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च। विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव। प्राणोह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः। निरेति वक्त्रात् सहसा सदोषः कासः स विद्वद्भिरुदाहृतस्तु। स वातपित्तप्रभवः कफाच्च क्षतात्तथान्यः क्षयजोऽपरश्च। पञ्चप्रकारः कथितो भिषग्भिर्व्विवर्द्धितो यक्ष्मविकारकृत् स्यात्। भविष्यतस्तस्य तु कण्ठकण्डूर्भोज्योपरोधो गलतालुलेपः। स्वशब्दवैषम्यमरोचकोऽग्निसादश्च लिङ्गानि भवन्त्यमूनि। हृच्छङ्खमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः। प्रसक्तवेगस्य समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः। उरोविदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः। पित्तेन पीतानि वमेत्कटूनि कासेच्च पाण्डुः परिदह्यमानः। विलिप्यमानेन मुखेन सीदन् शिरोरुगार्त्तः कफपूर्णदेहः। अभक्तरुग् गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन। वक्षोऽतिमात्रं विहतञ्च यस्य व्यायामभाराध्ययनाभिघातैः। विश्लिष्टवक्षाः स नरः सरक्तं ष्ठीवत्यभीक्ष्णं क्षतजः स उक्तः। अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः। रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत्। स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्। कण्ठेन रुजताऽत्यर्थं विभिन्नेनैव चोरसा। सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना। दुःखस्पर्शेन शूलेन भेदपीडाभितापिना। पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः। पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्। विषमाऽसात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्। घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः। कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम्। स गात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चोपलभेत कासी। शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम्। तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति। इत्थं समासाद्य भवत्यथो वै याप्यन्तमाहुर्भिषजस्तु कासम्"।

भावप्र० एतद्विवृतं यथा

पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः। क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरम्। क्षयाय राजयक्ष्मणे। अथ पूर्व्वरूपमाह। पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता। कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते। भोज्यानामवरोधः कवलंगिलने कण्ठव्यथा। अथ

वातिकस्य रूपमाह हृच्छङ्खपार्श्वोदरमूर्द्धशूली क्षामाननः क्षीणबलस्वरौजाः। प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव। शङ्खो ललाटैकदेशः, शुष्कं श्लेष्मादिरहितम्। पैत्तिकस्य रूपमाह उरोऽग्निदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः। पित्तेन पीतानि वमेत्कटूनि कासेत् सपाण्डुः परिदह्यमानः। सपाण्डुः, पाण्डुरोगयुक्तः। श्लैष्मिकस्य रूपमाह प्रलिप्यमानेन मुखेन सीदेत् शिरोरुजार्त्तः कफपूर्णदेहः। अभक्तरुङ्गौरवकण्डुयुक्तः कासेद्भृशं सान्द्रकफः कफेन। प्रलिप्यमानेन मुखेन श्लेष्मलिप्तेन मुखेनोपलक्षितः। अभक्तरुक् न भक्ते रुक् रुचिर्यस्य सः कण्डूः कण्ठ एव। क्षतकासस्य निदानपूर्व्विकां सम्प्राप्तिमाह अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः। रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत्। अश्वगजयोर्निग्रहो दमनम्। लक्षणमाह स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्। कण्ठेन रुजतात्यर्थं विभग्नेनेव चोरसा। सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना। दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना। पर्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीड़ितः। पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्। कण्ठेनेत्युपलक्षणे तृतीया एवमुरसेति। क्षयकासस्य निदानपूर्व्विकां सम्प्राप्तिमाह विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्। घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः। कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम्। घृणिनां विचिकित्सायुक्तानाम्। लक्षणमाह सशूलज्वरमोहदाहप्राणक्षयश्चोपलभेत् स कासी। शुष्कं विनिष्ठीवति निर्व्वलस्तु प्रक्षीणमांसो रुधिरं सपूयम्। तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति। असाध्यसाध्यप्रत्याख्यानाह इत्येष क्षयजः कासः क्षीणानां देहनाशनः। साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः। एवं क्षतोत्थितः क्षीणानामसाध्यः। बलवतां साध्यो याप्यो वा स्यात्। न वा कदाचित् सिध्येतामपि पादगुणान्वितौ सिध्येतां क्षतजक्षयजौ वृद्धस्य वृद्धोपजः सतुपरिचारकयुक्तस्य सदातुरस्य जातौ। स्थविराणां जराकासः सर्वो याप्यः प्रकीर्त्तितः। स्थविराणां जराकासः वृद्धानां यः कासो भवति स जराकाससंज्ञः स सर्व एव वातजादिरपि याप्यः। त्रीन् पूर्वान् साधयेत् साध्यान् पथ्यैर्याप्यांश्च यापयेत्। स्वल्पोऽपि कास उपेक्षणीयो न भवति। किन्तु शीघ्रं प्रतिकरणीय इत्याह स्वरारोचकहृल्लासस्वरभेदक्षयादयः। भवन्त्युपेक्षया यस्मात्तस्मात् त्वरया जयेत्”।

कासरोगभेदस्य हेतुपापादि कर्म्मविपाकशब्दे १७६४, पृ॰ उक्तम्। कं जलमस्यतेऽनेन अस–क्षेपणे करणे घञ् ६त॰। २शोभाञ्जनवृक्षे पु॰ शब्दच॰। तदञ्जनसेवने नेत्राज्जलनिस्सारणात्तस्य तथात्वम्।

कासकन्द पु॰ कासहेतुः कन्दः। काशालौ राजनि॰

कासघ्न त्रि॰ कासं हन्ति हन–हेत्वादौ टक। कासहरे सुश्रुतोक्ते १विधानभेदे। “प्रायोगिकः स्नेहनीयैरेचनः कासघ्नः शमनीयश्च” इत्युपक्रमे “हरीतकीकण्टकारिकात्रिकटुककासमर्द्दनेङ्गुदीत्वङ्मनःशिलाच्छिन्नरुहाकर्कटशृङ्गीप्रभृतिभिः कासहरैश्च कासघ्नं” (धूमं)। स्त्रियां ङीप्। सा च २कण्टकार्य्यां स्त्री शब्दच॰। “हरीतकी कणा शुण्ठी मरिचं क्षौद्रसंयुतम्। कासघ्नोमोदकः प्रोक्तस्तृष्णारोचकनाशनः” भावप्र॰उक्ते ३मोदकभेदे पु॰। कासनाशककासहरादयोऽपि। कासरोगनिवारके त्रि॰ “येन तेन प्रकारेण यासकः कासनाशकः” वैद्यकम् कासहरैश्चेति सुश्रुतः

कासजित् स्त्री कासं जयति जि–क्विप्। १भार्ग्याम् (वामनहाटी) राजनि॰। २कासनाशके त्रि॰।

कासनाशिनी स्त्री कासं नाशयति नश–णिच्–णिनि ङीप्। कर्कटशृङ्ग्यां रत्नमा॰।

कासन्दीवटिका स्त्री वेशवारभेदे राजवल्लभः।

कासमर्द्द पु॰ कासं मृद्नाति मृद–अण् उप॰स॰। (कालकासिन्दा) इत्ये तद्गुणाद्युक्तं भावप्र॰ यथा “कासमर्द्दोऽरिमर्द्दश्च कासारिः कर्कशस्तथा। कासमर्द्ददलं रुच्यं वृष्यं कासविषास्रनुत्। मधुरं कफवातघ्नं पाचनं कण्ठशोधनम्। विशेषतः कासहरं पित्तघ्नं ग्राहकं लघु”। सुश्रुतेऽयं सुरसादिगणे पठितः सुरसादिशब्दे दृश्यम्। कस्य जलस्यासेन क्षेपेण मृद्यतेऽसौ मृद–कर्म्मणि घञ् वेशवारभेदे स च पिष्टजलमिश्रितवस्त्रगालितवेसवार इति पाकराजेश्वरः।

कासमर्द्दन पु॰ कासं मृद्नाति मृद–ल्यु ६त॰। पटोले हारा

कासर पुंस्त्री॰ के जले आसरति आ+सृ–अच् ७त॰। महिषे अमरः तस्य जले सर्वदासरणात्तथात्वं स्त्रियां ङीष्।

कासहन् पु॰ कासं हन्ति हन–क्विप्। “कण्टकारीकृतः क्वाथः सकृष्णः सर्वकासहा” इत्युक्ते कासनाशके १क्वाथभेदे

तस्य कासनाशकत्वात् तथात्वम् २कासनाशकमात्रे त्रि०

कासार पु०कस्य जलस्यासारोऽत्र। १सरोवरे विंशत्या रगणै-
रचिते २दण्डकच्छन्दोभेदे च वृत्त० टी०। ३पक्वान्नभेदे
न० भावप्र०

"घृते तप्ते विनिःक्षिप्य कटाहे पाचयेन्मनाक्।
ततस्तत्र विनिःक्षिप्य खण्डं भागसमं पचेत्। तत्पाकस्य
तत् पात्रे क्षिप्त्वा सम्यक् सुचिक्कणे। चतुरस्त्रीकृतं ह्येतत्
भवेत् कासारसंज्ञकम्। कासारं रुचिदं श्रेष्ठं मारुतघ्नं
नपिच्छिलम्। दुर्ज्जरासकफपित्तघ्नं यिद्धौ रुचिकारकम्।
प्रक्षिप्य माषशृङ्गाटकरेणूनां पृथक् पृथक्। शालूकस्य
च कर्त्तव्यं कासारं खण्डसर्पिषा"। [विवृतिः।

कासारि पु० ६त०। कासमर्द्दवृक्षे भावप्र० कासमर्द्द शब्दे

कासालु पु० कासकारी आलुः। कोङ्कणदेशप्रसिद्धे आलुक-
भेदे राजनि०

कासीस न० कासीं क्षुद्रकासं स्यति सो—क। (हिराकस्)
उपधातुभेदे दन्त्यद्वयवानयमित्येके काशीसशब्दे विवृतिः।
"कासीसं लिप्ता दन्ती हरितालं दुराङ्गजा" सुश्रु०।

कासृति स्त्री० कुत्सिता सृतिः सरणम्। कुत्सितगतौ
"न कासृत्या ग्रामं प्रविशेत्"गोभि०

कासीर न० ईषत्तीरमस्यास्ति कोःका नि० सुट्। ईषत्तीर-
युक्ते नगरभेदे सि०कौ०।

कास्मर्य्य पु० कात्मर्य्य+पृषो० शस्य सः। गाम्भार्य्याम्

काहका स्त्री काहला+पृषो० लस्य कः। काहलावाद्ये द्वि-
रूपकोषः।

काहल पुंस्त्री कुत्सितं हलति लिखति हल—अच्, कोः का।
१विड़ाले २कुकुटे, स्त्रियां ङीष् ३शब्दमात्रे पु०४महाढ-
कायाम्, स्त्री टाप्मेदि० ५धुस्तूराकारे वाद्यशब्दभेदे
६अप्सरोभेदे स्त्री शब्दच० ७अव्यक्तवाक्ये न० हेमच०।
८शुष्के ९भृशे, १०खले च त्रि० मेदि०।

काहलापुष्प प० काहलेव पुष्पमस्य। धुस्तूरे शब्दमा०

काहलि पु० कं सुखमाहलति ददाति आ+हल+इन् ६त०।
१शिवे "हस्तोऽहस्तश्च देहश्च काहलिः सर्वकामदः
भा० आनु०१७अ० २तरुण्यां युवत्यां स्त्री ङीप् मेदि०।

काही स्त्री ईषदाहन्ति आ+हन—ड गौरा० ङीष्। कुटज-
वृक्षे राजनि०

कि ज्ञाने जुहो० पर० सक० अनिट्। चिकेति अकैषीत्।
चिकाय। वैदिकोऽयं धातुः

किंयु त्रि० किमिच्छति मान्तत्वेन निषेधेऽपि वेदे क्यच् ततः
छन्दसि उ। किमिच्छौ "किंयुर्विप्रोनद्योजोऽहवीति"
ऋ० ३,३१,४, "किंयुः किमिच्छुः" भा०

किंराजन् पु० कःकुत्सितो राजा क्षेपार्थत्वात् न टच्समा०।
कुत्सिते राजनि। किमः प्रश्नार्थकत्वे तु टच्। किं राज-
इत्येव ब०व०। किंराजन् निन्दितस्वपयुक्ते देशादौ त्रि०

किंवत् त्रि० किं विद्यतेऽस्य मतुप् मान्तत्वात् मस्य वः। किं-
विशिष्टे स्त्रियां ङीप्। कस्येव कस्मिन्निव वा वति।
किंतुल्यार्थे षष्ठ्यन्तार्थे सप्तम्यन्तार्थे च अव्य०।

किंवदन्ति(न्ती) स्त्री किम्+वद—झिच् या ङीप्। जनश्रुतौ
सत्ये असत्ये वा लोकप्रवादे अमरः। "इति व्याधानां
मुखात् किंवदन्ती श्रूयते" हितो०। "अस्ति किलैषा
किंवदन्ती—अस्माकं कुले कालरात्रिकल्पा विद्या नाम
राक्षसी समुत्पत्स्यते" प्रबोधच०

किंवा अव्य० किञ्च वा च द्वन्द्वः। १वितर्के २सम्भावनायां
३पक्षान्तरद्योतने च मेदि० पदद्वयमित्यन्ये

किंशारु पु० कुत्सितं शृणाति किम्+शॄ—ञुण्। १धान्या-
द्यग्रभागे, अम० "शूर्पशोभितकणकिंशारुकांस्तण्डुलान-
सकृद्भिः प्रचाल्य" दशकु०२वाजे.३कङ्कपक्षिणि च मेदि०
"किञ्जरयोः श्रिणः" उणा० सू० "शॄहिंसायाम् इत्यु-
ज्ज्वलदत्तोक्तेः शान्तमध्योऽयं शब्दक० दन्त्यमध्यपाठः
प्रामादिकएव। गतिकारकोपदत्वेन तत्पु० प्रकृतिस्वरः।

किंशुक पु० किञ्चित् शुकइव शुकतुण्डाभपुष्पत्वात्।
१पलाशे अमरः "फलस्तनस्थानविदीर्णरागिहृद्विश-
च्छुकास्यस्मरकिंशुकाशुगाम्" नैष० "किंशुकाम्भोजबकु-
लचूताशोकादिपुष्पितैः" सुश्रुतः "ते (दैत्या) हेमनिष्का-
भरणाः कुण्डलाङ्गदधारिणः। निहता बह्वशोभन्त
पुष्पिता इव किंशुकाः"भा०व०१०५अ०"। अस्यच निर्ग-
न्धत्वम् "विद्याहीना न शोभन्ते निर्गन्धाइव किंशुकाः"
चाणक्यः। फलहीनत्वञ्च"अविज्ञाय फलं योहि कर्म्म-
त्वेवानुधावति। स शोचेत् फलवेलायां यथा किंशुकसे-
चकः" रामा० २नन्दिवृक्षे राजनि०

किंशुलक पु० किंशुक+किंशुलुकादीनाम्" पा०नि०लुमध्यता।
पलाशवृक्षे शब्दर०। अस्य गिरिशब्दे परे दीर्घः। किं-
शुलुकागिरिः (पलाशप्रधानपर्व्वतः)

किंशुलुकादि पु० गिरौ परे दीर्घनिमित्ते पा०उक्ते शब्दगणे
स च गणः किंशुलुक शाव नड़ अञ्जन भञ्जन लोहित
कुक्कुट।

किंस त्रि० किं स्यति सो—क वनादि० पूर्व्वपदस्यनिमित्तात्

न यत्वम् । कुत्सितच्छेदके तद्वचे किमेति पाठान्तरम् इत्यो॰ अनुस्वारलोपः । तदर्थे

किंसखि पु॰कः कुत्सितः सखा किमःक्षेपार्थत्वात् न टच्समा॰। कुत्सिते सख्यौ "स किंसखा साधु न शास्ति योऽधिपम्" किरा॰प्रश्नार्थे किमः टच्समा॰। किंसखइत्येव ।

किंस्वित् अव्य॰ द्वन्द्वः । वितर्के गणर॰ स्थाणुरयं किंस्वित् पुरुषः । स्थाणुत्वपुरुषत्वाभ्यां वितर्कोऽत्र गम्यते ।

किकि पु॰ कक इन् इषो॰ ह्रस्वम् । १नारिकेले राजनि॰ । किकीतिशब्दकारके २चाषपक्षिणि (स्वर्ण चातक) शब्दमा॰।

किकिदिव पु॰ किकीत्यव्यक्तशब्देन दीव्यति दिव—क । चाषपक्षिणि । इन् । किकिदिविरप्यत्र शब्दमा॰ ।

किकिन् पु॰किकी तिशब्दोऽस्त्यस्य वीह्या॰ इनि । चाषपक्षिणि किकीदिविरिति पदद्वयम् अमरव्याख्याने क्षीरस्वामी।

किकिर त्रि॰ कृ—घञर्थे कर्म णि क वेदे इषो॰ आदौ क्यागमः । कीर्णे "आविश्य किकिरा क्षणु पत्नीनाम्" ऋ॰६'५२'७' "किकिरा कीर्णानि"भा॰सुपां सुलु गित्यादि ना आच् । एतेन किकिराशब्दकल्पनं चिन्त्यम् ।

किकीदि(दी)वि पु॰ किकीतिशब्देन दीव्यति दिव—इन् उणा॰स्त्र॰किकीदिवीति निर्द्देशात् नि॰दीर्घः । चाषे सि॰ कौ॰ अत्र पूर्व्वोत्तरपदयोर्ह्रस्वदीर्घविनिमये किकिदीविरित्यपि तत्रैव सि॰ कौ॰। "साकं यक्ष्म प्रपत चाषेण किकिदीविना" ऋ॰१०,९७,१३ ।

किक्किट त्रि॰ कुत्सिते । "किक्किटाकारेण यास्याः पशवो- भवन्ति "तैत्ति॰ स॰

किक्किश पु॰सुश्रुतोक्ते दैहिके क्रमिभेदे ।"केशरोमनखादाश्च दन्तादाः किक्किशास्तथा" क्रमिशब्दे विवृतिः

किक्किसाद पु॰ "राजिमन्तस्तु" इत्युपक्रमे "गोधूमकः किक्किसाद इति सुश्रुतोक्ते सर्पभेदे । सर्पशब्दे विवृतिः

किखि पु॰स्त्री॰ (खेँक शेयालि) मृगालभेदे त्रिका॰

किङ्कणी स्त्री किञ्चित्कणति कण—शब्दे इन् ङीप् । क्षुद्रघण्टिकायां हेमच॰

किङ्कर त्रि॰ किञ्चित् करोति अच् । १दासे सेवके स्त्रियान्तु टाप् । किङ्करस्य पत्नी ङीष् । २किङ्करी दासपत्न्याम् स्त्री "अवेहि मां किङ्करमष्टमूर्त्तेः" रघुः। "विप्रस्य किङ्करो भूपो वैश्योभूपस्य भूमिप !। सर्वेषां किङ्करः शूद्रो ब्राह्मणस्य विशेषतः" पुरा॰। किङ्करस्य गोत्रापत्यं नडा॰ फक् । कैङ्करायण तद्गोत्रापत्ये पुंस्त्री ।

किङ्कल पु॰वायवतंश्ये नृपभेदे ।"भजमानस्य निम्लोचिः किङ्कलो- मुष्टिरेव च"भाग॰९,२४,५, नडादौ किङ्कलेति वा पाठः ततो गोत्रापत्ये फक् । कङ्किलायन तद्गोत्रापत्ये पुंस्त्री॰

किङ्किणी स्त्री किङ्किणी+इषो॰ह्रस्वम् । १क्षुद्रघण्टिकायाम् अम॰ । तदाकारफले २विकङ्कतवृक्षे राजनि॰"रथेन काञ्चनाङ्गेन कल्पितेन यथाविधि । वैव्याघ्रशैवयुक्तेन किङ्किणीजालमालिना:" भा॰आ॰२२०अ॰"सौभाग्यं मन्त्र- दाप्नोति किङ्किणीं प्रददद्धरेः" विष्णु ध॰पु॰"भग्नं भीमेन मरुता भवतोरथकेतनम् । पातितं किङ्किणीजालम्" वेणी॰ । ३अम्लरसायां द्राक्षायां "इद्रधरः जलजम्बू वृक्षे हलायुधः "कट्फलं किङ्किणी द्राक्षा लकुचं मोचमेव च" हारी॰। कंशब्दः किम इव यस्यां स्तुतौ गौरा॰ङीष् । तन्त्रसारोक्ते ५देवीस्तुतिभेदे सा च "किं किं दुःखं सकलजननि ! क्षीयते न स्तुतायाम्" इत्यादिस्तुतिः ।

किङ्किणीका स्त्री कण—शब्दे ईकन् प्रकृतेः किङ्किणादेशः । क्षुद्रघण्टिकायाम् । "तस्तवाहू वाहः सशब्दचामीर किङ्किणीकः" कुमा॰ । अभूमिपालान् भोजान् स्वाना- तिष्ठत् किङ्किणीकिनः हरिवं॰ ३८ । अस्य पुंस्त्वमपि "किङ्किणीकविभूषितान्"

किङ्किणीकाश्रम पुंन॰ भा॰ प्रसिद्धे तीर्थभेदे । "वैमानिक उस्तृ यत्र किङ्किणीकाश्रमे तथा नियासेऽप्सरसां दिव्ये कामचारी महीयते" भा॰अनु॰२५अ॰।

किङ्किर पुंस्त्री किञ्चित् किरति वियोगिनं रागाय वा कृ—क । १भ्रमरे २कोकिले ३अश्वे च सारस्वतः स्त्रियां जातित्वात् ङीष्। ४कामे पु॰४गजकुम्भे न॰५रक्तवर्णे पु॰६तद्वति त्रि॰

किङ्किरात पुं॰ किङ्किरं रक्तवर्णमतति अत—अण् । अशोक- वृक्षे जटा॰भरनमितशिरः"शेखरैः किङ्किरातैः" रत्ना॰ ।

किङ्किराल पु॰ किङ्किराय रक्ततायै अलति कार्य्यानोति अल—अच् २त॰ । वर्व्वूरे वैद्य॰ तस्य निर्यासयोगेन रक्तवर्णस्थिरत्वकरणात् तस्य तथात्वम् ।

किङ्किरिन् पु॰ किङ्कर+इनि । (वइचि)विकङ्कतवृक्षे जटा॰

किङ्किल अव्य॰ किम्+किल+द्वन्द्वः । "किङ्किलेति कोपा- श्रद्धयोः"गणरत्नोक्ते १कोपे २अश्रद्धायाञ्च। "न मर्षये न श्रद्दधे किङ्किल भवान् वृषलं याजयेत्" भवत्कर्त्तृकं शूद्रयाजनं कोपविषयः अश्रद्धाविषयश्च। तदर्थक किङ्किलशब्दयोगे लिङ् ।

किञ्च अव्य॰ किम च च द्व॰। १आरम्भे,२समुच्चये,३साकल्ये, ४सम्भावनायाञ्च मेदि॰ ५अवान्तरे जटा॰

किञ्चन अव्य॰ किम्+चन सुप्सु॰ पदद्वयमित्यन्ये। १अप्राकल्ये,

२अल्पे च किम्+चन–अच्। ३हस्तिकर्णपलाशे पु० शब्दरत्ना० "असाकल्ये तु चिच्चन" इत्यमरोक्तेः चनेति भिन्नं पदम् अतएव मयू० अकिञ्चनशब्दो निपातितः।

किञ्चित् अव्य०किम्+चित् किञ्च चिञ्च समा० वा।१असाकल्ये, २अल्पे च राजनि०। अस्य पदद्वयत्वमते १अकिञ्चित्कर इत्यादौ नञ् सुपेति समास इति बोध्यम्। इदन्तया निर्द्देष्टुमशक्यत्वमेव किञ्चित्त्वम्। "कम्पेन किञ्चित् प्रतिगृह्य मूर्द्ध्नः" रघुः "किञ्चित् प्रकाशस्तिमितोग्रतारैः"। "आवर्जिता किञ्चिदिव स्तनाभ्याम्" कुमा०।

किञ्चुलुक पु० किञ्चित् चुलुम्पति चौरः चुलुम्प-डु संज्ञायां कन्। (केंचो) महीलताख्ये कीटभेदे अम० पृषो० किञ्चिलिकोऽप्यत्र अमरटी०। [किन्दानशब्दे दृश्यम्।

किञ्जप्य न० किञ्चिज्जप्यं यत्र। भा० प्रसिद्धे तीर्थभेदे

किञ्जल न० किञ्चित् जलमत्र। पद्मादेः केशरे शब्दर० पृषो० ललोपे" किञ्जलमप्यत्र राजनि०।

किञ्जल्क पु०किञ्चित् जलति जल-अपवारणे क तस्य नेत्त्वम्। पुष्पादेः १केशरे,२पुष्परेणौ,३नागकेशरे च मेदि० पद्ममध्यस्थे केशाकारे पदार्थे।"केचित् किञ्जल्कसङ्काशाः केचित् पीताः पयोधराः"भा०व०१८८अ०। "पद्मोदरच्युतरजः किञ्जल्कारुणतां गतैः" भा०व०१५८अ० "किञ्जल्किनीं ददौ चाब्धिर्मालामम्लानपङ्कजाम्" देवीमा अमरे पुंस्त्व जटाधरे क्लीवतेत्युभयलिङ्गता तद्गुणादिकं भावप्र० उक्तं "किञ्जल्कः शीतलोरूक्षः कषायो ग्राहकोऽपि सः। कफपित्ततृषादाहरक्तार्शोविषशोथजित्" तत्र पुष्पकेशरे "हिरण्यस्रजोयाजयेयुः यज्ञ्किञ्जल्काः शतपुष्करा होतुः"आ०श्रौ० ६,४,५"यज्ञैः शतकिञ्जल्काः शतकेशरा" होतुः स्रजःकार्य्याः नारा०

किट गतौ सक० भये अक० भ्वा०पर० सेट्। केटति अकेटीत् किकेट प्रनिकटति।

किटकिटाय किटकिटेत्यव्यक्तशब्दकरणे डाच्-क्यच्-नामधातुः किटकिटायते अकिटकिटायीत् "दन्तान् किटकिटायते उद्धृताचोजिह्वां खादति" सुश्रुतः

किटि पु० किट–गतौ इन् किच्च। शूकरे अमरः स्त्रियां गिद्न्तत्वात् वा ङीप्

किटिभ पु० किटिरिव भाति कृष्णत्वात् भा–क। १केशकीटे (उकुण) हेम०। २सर्पदंशनोपद्रवभेदे न० सुश्रु०। "दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च। तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः"।"पिडकोपचयश्चोग्राः विसर्पाः किटिभानि च। पर्व्वभेदोरुजस्तीव्रोज्वरोमूर्च्छा च दारुणाः। दौर्बल्यमरुचिश्वासोवमथुर्लोमहर्षणम्। "दष्टरूपं समासोक्तमेतच्च व्यासतः शृणु" सुश्रु०। तल्लक्षणं तत्रोक्तं यथा। "यत् स्रावि वृत्तं घनमुग्रकण्डु तत् स्निग्धकृष्णं किटिभं वदन्ति"

किट्ट न० किट-क्त नि० इडभावः। १धातूनां मले, २तैलादाधोभागस्थे मले च"पृथक् किट्टं पृथङ्मलम्" योगार्णवः। "आहारस्य रसः सारः सारहीनो मलद्रवः। शिराभिस्तज्जलं नीतं वस्तिं मूत्रत्वमाप्नुयात्। शेषं किट्टञ्च यत्तस्य तत्पुरीषं निगद्यते" भावप्र०।

किट्टवर्ज्जित न० ३त०। शुक्रे चरमधातौ यथा च तस्य पाके किञ्चित् मलशून्यत्वं तथोक्तं भावप्र० तच्च अहस्करशब्दे ५६०पृ०उक्तम्।

किट्टाल पु० किट्टमालाति आ+ला–क। १ताम्रकलशे किट्टरूपेण अलति पर्य्याप्नोति अल–अच्। २लौहमले मेदि०

किण पु० कण गतौ अच् पृषो० अत इत्त्वम्। (घेंटा)। (कड़ा)१शुष्कव्रणे, २मांसग्रन्थौ, ३घर्षणजे चिह्ने च। "ज्याघातरेखाकिणलाञ्छनेन" रघुः "कराभ्यां किणजाताभ्यां शनकैः संवाहतुः" भा०व० १४४अ०। [शब्दर०

किणि स्त्री किणाय तन्निवृत्तये प्रभवति बा० इन्। अपामार्गे

किणिही स्त्री किण–अस्त्यर्थे इनि किणिनो व्रणान् हन्ति हन–ड गौ० ङीष्। अपामार्गे अमरः। "इङ्गुदी–किणिही–दन्ती–सरला–देवदारुभिः" सुश्रु०

किण्व न० उल्वादि० नि०। १सुराबीजे २ पापे च मेदि० सुराबीजद्रव्यभेदश्च नानाविधः सौत्रामणीशब्दे वक्ष्यते, भावप्र० "सुराबीजन्तु किण्वकम्"इति परिभाष्य"सुराबीजं यवगोधूमतण्डुलादि" इति व्याख्यातं सुश्रुते तु कल्कस्य तण्डुलादितो भिन्नत्वेन निर्द्देशः कृतः यथा "वैरेचनिकमूलानां क्वाथे माषान् सुभावितान्। सुधौतांस्तत्कषायेण शालीनाञ्चापि तण्डुलान्। अवच्छुद्यैकतः पिण्डान् कृत्वा शुष्कान् सुचूर्णितान्। शालितण्डुलचूर्णञ्च तत्कषायोपसाधितम्। तस्य पिष्टस्य भागांस्त्रीन् किण्वभागविमिश्रितान्। मण्डोदकार्थे क्वाथञ्च दद्यात्तत्सर्व्वमेकतः। निदध्यात्कलसे तान्तु सुरां जातरसां पिबेत्" "किण्वादिभ्योमदशक्तिवत्" सां०सू०। अयं शब्दः पु० न० इति भरतः। तस्मै हितम् अपूपा० यत् छ वा किण्व्य किण्वीय तत्साधने द्रव्ये त्रि०

कित संशये रोगापनयने च भ्वा०पर० सक० सेट् एतदर्थे स्वार्थे सन्। चिकित्सति अचिकित्सीत् चिकित्सा चिकित्सितुम् चिकित्सितः। वासे अक० न सन् इच्छायां सक० न सन्। केतति अकेतीत्। केतनं केतुः

कित ज्ञाने जुहो०पर०सक० सेट् वैदिकोऽयम्। चिकेत्ति अकेतीत्। "यं नोऽचिकेत् चित्रभानो" ऋ०१०,५१,२,

कित पु० कित—क। १ ऋषिभेदे तस्य गोत्रापत्यम् अश्वादि० फञ्। कैतायन तद्गोत्रापत्ये पुं स्त्री

कितव पु० कि—भावे—क्त कितेन वाति वा—क। १द्यूतकारके २धुस्तूरवृक्षे अमरः ३वञ्चके, ४खले, च त्रि० मेदि० ५चौरनामकगन्धद्रव्ये, पु० शब्दरत्ना०। "यन्मा पितेव कितवं शशास" ऋ० २,२९,५। द्यूतकारके "कितवानक्षैर्बध्यासमप्रति" अथ० ७,५,१, "स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये। असाक्षिणश्च ते दृष्टास्तेषु सत्यं न विद्यते" नारदः। "कितवान्द्यूतकराः" रघु०। द्यूते विशेषः या०मिता० दर्शितो यथा "द्रष्टारो व्यवहाराणां साक्षिणश्च त एव हि" या० "द्यूतव्यवहाराणां द्रष्टारस्त एव कितवा एव राज्ञा नियोक्तव्याः न पुनः श्रुताध्ययनसम्पन्ना इत्यादि नियमोऽस्ति। साक्षिणश्च द्यूते द्यूतकारा एव कार्य्याः न तत्र स्त्रीबालकितवेत्यादिनिषेधोऽस्ति। कचित् द्यूतनिषेधदण्डमाह" मि० "राज्ञा सचिह्नं निर्वास्याः कूटाक्षोपधिदेविनः" या० "कूटैरक्षादिभिरुपधिना च मतिवञ्चनहेतुना मणिमन्त्रौषधादिना ये दीव्यन्ति तान् श्वपदादिनाऽङ्कयित्वा राजा स्वराष्ट्रान्निर्वासयेत्। नारदेन निर्वासने विशेष उक्तः "कूटाक्षदेविनः पापान् राजा राष्ट्राद्विवासयेत्। कण्ठेऽक्षमालामासज्य स ह्येषां विनयः स्मृत" इति। यानि च मनुवचनानि द्यूतनिषेधपराणि "द्यूतं समाह्वयं चैव यः कुर्य्यात्कारयेत वा। तान् सर्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः" इत्यादीनि तान्यपि कूटाक्षदेवनविषयतया राजाध्यक्षसभिकरहितद्यूतविषयतया च योज्यानि" मि० किञ्च "द्यूतमेकमुखं कार्य्यं तस्करज्ञानकारणात्" या०। "यत्पूर्वोक्तं द्यूतन्तदेकं मुखं प्रधानं यस्य द्यूतस्य तत्तथोक्तं कार्य्यम्। राजाध्यक्षाधिष्ठितं राज्ञा कारयितव्यमित्यर्थः तस्करज्ञानकारणात् तस्करज्ञानरूपम्पर्य्यालोच्य प्रायशः चौर्य्यार्जितधना एव कितवा भवन्त्यतश्चौरविज्ञानार्थमेकमुखं कार्य्यम्" मिता०। "ग्लहे शतिकवृद्धेस्तु सभिकः पञ्चकं शतम्। गृह्णीयाद्धूर्त्तकितवात् इतराद्दशकं शतम्" या०। "यदाऽश्रौषं वाससां तत्र राशिं समाक्षिपत् कितवो मन्दबुद्धिः" भा० आ०१अ०। कितवस्य गोत्रापत्यम् अश्वा०फञ्। कैतवायन तद्गोत्रापत्ये पुंस्त्री। उत्करा० चतुरर्थ्यां छ। कितवीय तन्निर्वृत्तादौ अनन्तरापत्ये तिका० फिञ्। कैतवायनि तदपत्ये पुंस्त्री० तैकायनिशब्देन द्वन्द्वे फिञो लुक्, बहुत्वे। तैकायनयश्च कैतवायनयश्च तिककितवाः,। अस्य व्याघ्रादि० उपमितसमासः। कितवधूर्त्तः। शौण्डा०७त०। अक्षकितवः। वञ्चके "तव कितव! किमाहितैर्वृथा नः" माघः ६रोचनानामगन्धद्रव्ये राजनि०। [कीटभेदे त्रिका०

किन्तनु पु० का कुत्सिता तनुरस्य। (माकडसा) ख्याते

किन्तमाम् अव्य० कुत्सितार्थे किम्+बहूनां मध्ये एकस्यातिशये तमप् आमु। बहुषु मध्ये प्रकृष्टे कुत्सिते

किन्तराम् अव्य० कुत्सितार्थे किम्+द्वयोर्मध्ये एकस्यातिशये तरप् आमु। द्वयोर्मध्ये प्रकृष्टे कुत्सिते।

किन्तु अव्य० किञ्च तु च द्व०। १पूर्ववाक्यसङ्कोचज्ञापने, २प्रागुक्तविरुद्धार्थे, ३किंपुनरित्यर्थे च मेदि०।

किन्तुघ्न पु० तिथ्यर्द्धरूपकरणभेदे करणशब्दे विवृतिः

किन्दत पु० भारतप्रसिद्धे कूपभेदरूपे तीर्थे "किन्दतं कूपमासाद्य तिलप्रस्थं प्रदाय च। गच्छेत परमां सिद्धिमृणैर्मुक्तः कुरूद्वह!" भा०व०८३०अ०।

किन्दम पु० ऋषिभेदे सहि मृगरूपेण मृगीरूपधारिण्या स्त्रिया सह सङ्गमकाले पाण्डुना मृगबुद्ध्या हतः। तत्कथा भा० आ० ११८अ० यथा "राजा पाण्डुर्महारण्ये मृगव्यालनिषेविते। चरन् मैथुनधर्म्मस्थं ददर्श मृगयुग्मकम्। ततस्तांश्च मृगीं तञ्च रुक्मपुङ्खैः सपत्त्रिभिः। निर्बिभेद शरैस्तीक्ष्णैः पाण्डुः पञ्चभिराशुगैः। स च राजन्! महातेजा ऋषिपुत्रस्तपोधनः। भार्य्यया सह तेजस्वी मृगरूपेण सङ्गतः" इत्युपक्रम्य पाण्डुं प्रति तत्कृतविलापस्य तस्य शापदानमुक्तं तत्रैव यथा
"मृग उवाच। नाहं घ्नन्तं मृगान् राजन्! विगर्हे चात्मकारणात्। मैथुनन्तु प्रतीक्ष्यं मे त्वयेहाद्यानृशंसतः। सर्वभूतहिते काले सर्वभूतेप्सिते तथा। को हि विद्वान् मृगं हन्याच्चरन्तं मैथुनं वने। अस्यां मृग्यां च राजेन्द्र! हर्षान्मैथुनमाचरम्। पुरुषार्थफलं कर्त्तुं तत्त्वया विफलीकृतम्। पौरवाणां महाराज! तेषामक्लिष्टकर्म्मणाम्। वंशे जातस्य कौरव्य! नानुरूपमिदन्तव। नृशंसं कर्म्म सुमहत् सर्वलोकविगर्हितम। अस्वर्ग्यमयशस्यञ्चाप्यधर्म्मिष्ठञ्च

भारत! । स्त्रीभोगानां विशेषज्ञः शास्त्रधर्म्मार्थतत्त्ववित् । नार्हस्त्वं सुरसङ्काश! कर्त्तुमस्वर्ग्यमीदृशम् । त्वया नृशंसकर्त्तारः पापाचाराश्च मानवाः । निग्राह्याः पार्थिवश्रेष्ठ! त्रिवर्गपरिवर्ज्जिताः । किं कृतं ते नरश्रेष्ठ! मामिहानागसं घ्नता । मुनिं मूलफलाहारं मृगवेशधरं नृप! । वसमानमरण्येषु नित्यं शमपरायणम् । त्वयाहं हिंसितो यस्मात्तस्मात्त्वामप्यहं शपे । द्वयोर्नृशंसकर्त्तारमवशं काममोहितम् । जीवितान्तकरो भाव एवमेवागमिष्यति । अहं किमिन्दमो नाम तपसा भावितो मुनिः । व्यपत्रपन्मनुष्याणां मृग्यां मैथुनमाचरम् । मृगो भूत्वा मृगैः सार्द्धं चरामि गहने वने । न तु ते ब्रह्महत्येयं भविष्यत्यविजानतः । मृगरूपधरं हत्वा मामेवं काममोहितम् अस्य तु त्वं फलं मूढ! प्राप्स्यसीदृशमेव हि । प्रियया सह संवासं प्राप्य कामविमोहितः । त्वमप्यस्यामवस्थायां प्रेतलोकं गमिष्यसि । अन्तकाले हि संवासं यया गन्तासि कान्तया । प्रेतराजपुरं प्राप्तं सर्व्वभूतदुरत्ययम् । भक्त्या मतिमतां श्रेष्ठ! सैव त्वामनुगमिष्यति । वर्त्तमानः सुखे दुःखं यथाहं प्रापितस्त्वया । तथा त्वाञ्च सुखं प्राप्तं दुःखमभ्यागमिष्यति" । [तदपत्ये पुंस्त्री०

किन्दर्भ पु० ऋषिभेदे तस्यापत्यम् विदा० अञ् । कैन्दर्भ

किन्दान न० किञ्चिदपि दानमावश्यकं यत्र । भारतप्रसिद्धे सरकतीर्थस्थे तीर्थभेदे सरकमुपक्रम्य "किन्दाने च नरः स्नात्वा किञ्जप्ये च महीपते! । अप्रमेयमवाप्नोति दानं जप्यञ्च भारत!" भा०,व०,८३अ० ।

किन्दास पुं कः कुत्सितोदासः । निन्दिते दासे ततः अनार्षत्वात् अपत्ये विदा० अञ् । कैन्दास तदपत्ये पुंस्त्री० ।

किन्धिन् पुं कुत्सिता धीरस्त्यस्य व्रीह्या०इनि । अश्वे त्रिका० स्त्रियां ङीप् ।

किन्नर पुंस्त्री कः कुत्सितो नरः तुरङ्गवदनत्वात् । देवयोनिभेदे स च पुलस्त्यर्षि पुत्रभेदः । "राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा । यक्षाश्च मनुजव्याघ्र! पुलाजस्य च धीमतः" भा० आ० ६६अ० । "किन्नरान् वानरान् मत्स्यान् विविधांश्च विहङ्गमान्" मनुः स्त्रियां ङीप् । "अप्सरःसु च तथा जाता वानराः किन्नरीषु च" रामा० । किञ्चित्कणत्किन्नरमध्युवास" "उद्गास्यतामिच्छति किन्नराणाम्" कुमा० । "किमिदं किन्नरकण्ठि! सुप्यते" रघुः । २वर्षभेदे च किम्पुरुषशब्दे विवृतिः ३अर्हदुपासकभेदे हेम० ।

किन्नरेश पुं ६त० । कुबेरे तस्य तदधिपत्वकथा काशी० ख० १३अ०यथा "वरं ददामि ते वत्स! तपसाऽनेन तोषितः । निधीनामधिनाथस्त्वं गुह्यकानामपीश्वरः । यक्षाणां किन्नराणाञ्च राजा राज्ञाञ्च सुव्रत! । पतिः पुण्यजनानाञ्च सर्व्वेषां धनदोभव" किन्नरेश्वरादयोऽप्यत्र ।

किन्नु अव्य० किञ्च नु च द्व० । १प्रश्ने, २वितर्के ३सादृश्ये ४स्थाने च जटाधरः पदद्वयमित्येके ।

किप्य पु० सुश्रुतोक्ते पुरीषजे कृमिभेदे । "ककेरुका मकेरुकाः किप्याश्चिप्या गण्डूपदास्तथा । सुरवोद्विमुखाश्चैव सप्तैते पुरीषजाः" सुश्रु० ।

किम् त्रि०कु-शब्दे बा०डिमु । १कुत्सिते २जिज्ञासिते ३वितर्कविषये । ४कुत्सायां ५गर्हणे ६वितर्के ७प्रश्ने ८सादृश्ये, (प्रकारे) ९करणे च अव्य०जटा० १०ईषदर्थे ११अतिशये गणरत्नम् । तत्र त्रिलिङ्गस्य सर्व्वनामता के कस्मै इत्यादि "के यूयं स्थल एव संप्रति वयं प्रश्नोविशेषाश्रयः" सा०द० । "कस्मै नाथ! समर्थ कैरवकुलं व्योमान्तमालम्बसे" उद्भटः । "केषां नैषा भवति कविता कामिनी कौतुकाय" प्रसन्नरा० । "कस्मिंश्चिद्वनोद्देशे भासुरकोनाम सिंहः प्रतिवसति" पञ्चतन्त्रम् । "कस्मिन्नु खलु विज्ञाते सर्वं विज्ञातं भवति" मुण्डकश्रुतिः । निन्दितार्थे किंराजा किङ्गौः इत्यादि । "किंराजा यो न रक्षति" "स किंसखा साधु न शास्ति योऽधिपम्" किरा० इत्यादि तत्र ईषदर्थे न किमप्यस्यास्ति । किञ्चिदपि नास्तीत्यर्थः अतिशये किमप्येष प्रगल्भसे अतिशयितं प्रगल्भसे इत्यर्थः अव्ययस्य प्रश्ने "किमिदं किन्नरकण्ठि सुप्यते" रघुः तत्र किंशब्दशक्तिबोधादिप्रकारो गदाधरेण शक्तिवादे दर्शितो यथा ।

"किंपदस्य जिज्ञासिते शक्तिः एतदेव स्वीयजिज्ञासाज्ञापनाय किंपदघटितप्रश्नवाक्यं प्रयुज्यते । तत्रोद्देश्यवाचककिंपदस्य समभिव्याहृतपदोपस्थाप्यतावच्छेदकधर्मावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन वक्तृजिज्ञासितो धर्मः प्रवृत्तिनिमित्तं उपस्थाप्यतावच्छेदकत्वान्तरपर्यवसानतयानुगमकं शाब्दबोधे तदभानात् । एवञ्च कः पचतीत्यतः पाककृतित्वावच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकत्वेन जिज्ञासितो यो धर्म्मस्तद्वान् पचतीत्याकारोऽन्वयबोधः प्रतिपाद्यते किञ्चिद्धर्मावच्छिन्नोद्देश्यतानिरूपितपाककृतित्वावच्छिन्नविधेयताशालिज्ञानं भवत्वित्याकारिकाया जिज्ञासायास्ताट्टशबोधविषयकतया

तादृशेच्छाविषयीभूतज्ञानजनकादृब्राह्मणः पचतीत्युत्तरवाक्यात्तन्निवृत्तिरिति तादृशप्रश्नानन्तरं तथैवोत्तरं प्रयुज्यते । न चैवं प्रमेयः पचतीत्युत्तरवाक्यमेव कथं तादृशप्रश्नानन्तरं न प्रयुज्यते तज्जन्यज्ञानस्यापि तादृशेच्छाविषयत्वादिति वाच्यं जिज्ञासाविषयीभूतस्वसमभिव्याहृतपदोपस्थाप्यविधेयन्यूनवृत्तिधर्म्मावच्छिन्नएव तादृशकिंपदस्य शक्त्यभ्युपगमात् । अभेदेन स्वार्थान्वितोद्देश्यवाचकपदान्तरसमभिव्याहृतकिंपदस्य शक्यतावच्छेदकगर्भे च स्वार्थाभेदान्वयितावच्छेदकत्वोपलक्षितधर्मन्यूनवृत्तित्वमपि धर्म्मांशे विशेषणं देयमतः को ब्राह्मणः पचतीत्यादिप्रश्नानन्तरञ्चैत्रः पचतीत्यादिकमुत्तरवाक्यं प्रयुज्यते नतु मनुष्यः पचतीत्यादिकं मनुष्यत्वादेर्ब्राह्मणत्वाद्यन्यूनवृत्तित्वात्तदवच्छिन्नोद्देश्यकत्वेन ज्ञानविषयेच्छायास्तत्राप्रतीतेः एवं यत्रोद्देश्यतावच्छेदके किंपदार्थस्याभेदेनान्वयस्तत्र तदन्वयितावच्छेदकधर्म्मावच्छिन्नविशेषणतापन्नतदन्वयितावच्छेदकधर्मन्यूनवृत्तिधर्मावच्छिन्नोद्देश्यतावच्छेदकताकप्रकृतज्ञानगोचरेच्छा किंपदेन बोध्यतेऽतः कति घटाः सन्तीत्यादौ डतिप्रत्ययार्थे संख्यादौ किंपदार्थस्य जिज्ञासितधर्म्मावच्छिन्नस्याभेदेनान्वयात् संख्यात्वन्यूनवृत्तिदशत्वत्वाद्यवच्छिन्नोद्देश्यतावच्छेदकताकबोधजनकं दशसंख्यका घटाः सन्तीत्युत्तरं तत्र प्रयुज्यते । यत्रोद्देश्यतावच्छेदकीभूतविभक्त्यार्थे भेदेन किंपदार्थान्वयः कस्य पुत्रः सुन्दर इत्यादौ तत्र यादृशसम्बन्धेन यदवच्छिन्ने यदन्वयस्तत्र तादृशसम्बन्धेन विशेषधर्म्मावच्छिन्नविशेषिततदवच्छिन्ननिष्ठोद्देश्यतावच्छेदकतावच्छेदकताकप्रकृतविधेयज्ञानगोचरेच्छा प्रतीयते एवं विधेयवाचककिंपदस्य स्वसमभिव्याहृतपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्म्मावच्छिन्नोद्देश्यतानिरूपितविधेयतावच्छेदकतया जिज्ञासितो विशेषधर्म्मस्तदवच्छिन्ने शक्तिरित्ययं क इत्यादौ इदन्त्वावच्छिन्नांशे विधेयतावच्छेदकत्वेन जिज्ञासितधर्म्मवानित्याकारकोऽन्वयबोधः । तेन तद्विषयकजिज्ञासाजनकज्ञानजनकं चायं ब्राह्मण इत्याद्युत्तरवाक्यं तादृशप्रश्नानन्तरं प्रयुज्यते । एवं यत्र वेधेये विधेयतावच्छेदके वा किंपदार्थस्य तदवच्छेदकधर्मस्याभेदेन वान्वयः इदं किम् इदं किंधनं भवतः कति पुत्राः भवान् कस्य पुत्र इत्यादौ रीतिः पूर्ववदूहनीया "किमिन्दुः किं पद्मं किमु मुकुरबिम्बं किमु मुखं किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ । कटौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ तडिद्वा तारा वा कनकलतिका वा किमबला" इत्यादावव्ययकिमो वाशब्दस्येव वितर्कोऽर्थः । वितर्कश्च प्रयोक्तुः सम्भावनात्मकं ज्ञानं तदर्थस्य च विशेष्यतासम्बन्धेन प्रथमान्तपदोपस्थाप्यविशेष्ये प्रकारितासम्बन्धेन तत्र च विशेषणस्य चन्द्रादेरन्वयः नामार्थनाव्ययार्थस्य भेदान्वयेऽविरोधात् । यत्र विशेषणवाचकमपि प्रथमान्तं तत्राभेदसम्बन्धावच्छिन्नप्रकारितासंसर्गः यत्र तु प्रकृत्यर्थस्य विशेष्यतया स्वार्थबोधकं विभक्त्यन्तं, यत्र किंपदासत्त्वे तादृशविभक्त्यन्तसमुदायार्थस्य विशेष्ये यादृशसम्बन्धेनान्वयस्तादृशसम्बन्धावच्छिन्नप्रकारितैव तादृशार्थस्य किंपदार्थे संसर्गोऽतः किमिन्दुरित्यादावभेदेन चन्द्रादिप्रकारिका धनमिदं किं चैत्रस्येत्यादावाश्रयत्वादिसम्बन्धेन चैत्रस्वत्वादिप्रकारिका सम्भावना नियमतः प्रतीयते किमिन्दुरित्यादौ सम्भावनाबोधोत्तरं तत्प्रयोजकाह्लादकत्वादिप्रतीतिस्त्वार्थी । कुत्सार्थकमपि क्वचित्किंपदं यथा किन्नरैरित्यादौ ।"

किमिच्छक त्रि॰ किमिच्छसि किमिच्छसीति पृच्छति पृषो॰ । किमिच्छसि किमिच्छसीति प्रश्नकारके भोजनाद्यर्थमाह्वानाय नियुक्ते १इत्यादौ । "सुमनोजोदकै रत्नैर्हिरण्येन च भूरिणा । गोभिर्वस्त्रैश्च राजेन्द्र ! विविधैश्च किमिच्छकैः" भा॰ शा॰ २८ "किमिच्छसि किमिच्छसीतिप्रश्नकारकैर्भृत्यैः विविधैर्गोवस्त्रादिभिर्निमन्त्रयद्भिः" नीलक॰। किमिच्छसीति प्रश्नेन दानार्थं कार्यति शब्दायतेऽत्र पृषो॰। २मार्कण्डेयपुराणोक्ते व्रतभेदे पु॰ तदुक्ते हि "पुरोहितस्य वीराया-(तन्नामराजमहिष्याः) वदतोऽर्थिजनं प्रति । कः किमिच्छति दुःसाध्यम् कार्य्यं किंसाध्यतामिति । करन्धमस्य महिषी किमिच्छकमुपोषिता । राजपुत्रोऽप्यविक्षित्तु श्रुत्वा पौरोहितं वचः । प्रत्युवाचार्थिनः सर्व्वान् राजद्वारमुपागतान् । मया साध्यं शरीरेण कार्य्यं किञ्चित् ब्रवीत मे । मम माता महाभागा किमिच्छकमुपोषिता । शृण्वन्तु मेऽर्थिनः सर्व्वे प्रतिज्ञातं मयात्र वै । किमिच्छथ ददाम्येवं क्रियमाणे किमिच्छके" अर्थिनोऽभिलाषानुरूपदानार्थं केच्छाप्रश्नपूर्व्वकं तद्दानं विहितमिति तस्य तथात्वम् । ३इच्छाविषयप्रश्नपूर्व्वकेष्टेच्छानुरूपदेयमात्रेऽपि "प्रति श्रयान् सभाः कूपान् प्रपाः पुष्करिणीस्तथा । नैत्यकानि च सर्व्वाणि किमिच्छकमतीव च" भा॰शा॰६६८५श्लो॰

किमीदिन् त्रि॰ किमिदानीमिति चरति किम्+इदानी-

स्+इनि पृषो०। किमिदानीमित्येवं चरणशीले पिशुने-खले "द्वेषे धत्तमनवायं किमीदिने" ऋ०७,१०४,२, "किमीदिने किमिदानी मतिचरते पिशुनाय" भा० "वि-लुपन्तु यातुधाना अत्रिणो ये किमीदिनः" अथ०१,७,२,

किमु अव्य० कै–डिमु। १प्रश्ने, २निषेधे, ३वितर्के, ४निन्दा-याञ्च मेदि० "किमु भीरुररार्य्यसे" भट्टिः

किमुत अव्य० किञ्च उत च द्व०। १प्रश्ने, २वितर्के३विकल्पे, ४अतिशये च। कैमतिकन्यायः तस्य शब्दद्वयात्मकत्वे तत्र स्यादिति बोध्यम् "आहो उताहो किमुत वितर्के किं किमूत च" हेम० किमु–उत इति छेदः तेन किमू-तेत्येकशब्दकल्पनं चिन्त्यम्

किम्पच त्रि० किं पचति पच–अच्। कृपणे रायमु०। सहि आत्मोदरपूर्त्तिसमर्थमात्रं पचति नागन्तुकातिथिभ्योदा-नपर्य्याप्तम्। इति तस्य तथात्वम्।

किम्पचान त्रि० किम्+पच–आनच्। आत्मोदरपूर्त्तिमात्रप-र्य्याप्तपाककर्त्तरि कृपणे अमरः। [लतायां रत्नमा०

किम्पाक पु० कुत्सितः पाकोयस्य। (माकाल) महाकाल

किम्पुना स्त्री भा०प्रसिद्धे नदीभेदे "किम्पुना च विशल्या च तथा वैतरणी नदी" भा०स०९ वरुणसभावर्ण्णने। "वित-स्ताञ्च महाभाग! कावेरीञ्च महानदीम्। शोणञ्च पुरुष-व्याघ्र! विशल्यां किम्पुनामपि" भा०व०१८८अ०

किम्पु(म्पू)रुष पु० कुत्सितः पु(पू)रुषः। देवयोनिभेदे देवगायके अमरः। स च अश्वाकारजघनः नराकारमुखः। किन्नरस्तु अश्वाकारवदनः नराकारजघन इति तयोर्भेदः। अतएव "राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा" इति पुलस्त्यस्य वंशमुक्त्वा "पुलहस्य सुताः राजन्! शलभाश्च प्रकीर्त्तिताः। सिंहाः किम्पुरुषा व्याघ्रा यक्षा-ईहामृगास्तथा" भा० आ०६६अ० पुलहवंशे किम्पुरुषस्य कीर्त्तनम्। अतएव भाग० ८,२०,१२, "नेदुर्मुकुन्द-भयः सहस्रशोगन्धर्व्वकिम्पूरुषकिन्नराजगुः"। तयोर्भेदेन निर्द्देशः। "स यं पुरुषमालभत स किम्पुरुषोऽभवत्" शत०ब्रा० १,२,३,९, किंपुरुषावासे २वर्षभेदे। कुत्सितपुरुषत्वसाम्यात् परस्परमभेदाभिप्रायेण उभयोरप्युभयपरता तेन क्वचित् किन्नरवर्षमित्युच्यते क्वचिच्च किम्पुरुषवर्षम् इति। तदधिष्ठानदेशभेदश्च वर्षभेदः स च "किंन्नरवर्षमतो हरिवर्षमिति विभज्य" "मात्य-वज्जलधिमध्यवर्त्ति यत् तत्तु भद्रतुरगं (मुखेन तुरगतु-ल्यम्) जगुर्बुधाः" सि०शि०उक्तः भाग०५,१९, "किम्पुरुषे वर्षे इत्युक्तम्। "देशं किम्पुरुषावासं द्रुमपुत्रेण रक्षि-तम्" भा०स०२७अ०। "द्रुमः किंपुरुषेशश्च उपास्ते धनदेश्वरम्" भा० स०१०अ०। "काश्मीरराजो गोनर्द्दः करूषाधिपतिस्तथा। द्रुमः किम्पुरुषश्चैव पर्व्वतीयोह्य-नामयः" हरिवं०९२अ०।

"प्रियामुखं किम्पुरुषश्चुचुम्बे" "यदृच्छया" किम्पुरुषा-ङ्गनानाम्" कुमा०। [राजनि च।

किम्पुरुषेश्वर पुं ६त० १कुबेरे किम्पुरुषवर्षेश्वरे २द्रुमाभिधे-

किम्भरा स्त्री किञ्चित् बिभर्त्ति भृ–अच्। नलीनामगन्धद्रव्ये शब्दच०

कियत् त्रि० किम्+परिमाणे,वतुप् किमः क्यादेशः वस्य यः। किंपरिमाणे"गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा,, सा०, द०, "मदर्थसन्देशमृणालमन्थरः प्रियःकियद्दूरमिति त्वयोदिते" "भवेदमीभिः कमलोदयः कियान्" नैष०, स्त्रियां ङीप्"निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम्"नैष०।

कियदेतिका स्त्री कियत् एतत् आरभ्यमाणं करोति णिचि डिद्वत्त्वे टिलोपे ण्वुल्। उद्योगे उत्साहे हेम०। त्रिका० कियेतद्केति पाठः प्रामादिकः।

कियाम्बु त्रि० कियदम्बु यत्र वेदे पृषो०तोलोपः। किंप्रमाणा-म्बुयुक्ते "कियाम्ब्वत्र रोहतु पाकदूर्वा व्यल्कशा,, ऋ० १०,१६,१३,।

कियाह पुं रक्तवर्णे अश्वे हेमच०।

कियेधास् अव्य०कियत्प्रकारे इत्यर्थे निरु६ २०"हन्ताय व-ज्रमीशानः कियेधाः,,ऋ०,१,६१,१२,"कियेधाः कियद्धा-इति" भा०।

किर पुंस्त्री कॄ–क। १शूकरे अमरः स्त्रियां जातित्वात् ङीप् २विक्षेपकमात्रे त्रि०। कीर्य्यतेऽत्र आधारे कॄ–घञर्थे क। ३अवस्करविक्षेपदेशे पर्य्यन्तभूमौ। किरातः

किरक पुं स्वल्पः किरः अल्पे कन्।१बालशूकरे२लेखके च त्रिका०

किरण पुं कीर्य्यते परितः कॄ–कर्म्मणि क्यु। सूर्य्यादेः रश्मौ "स्वकिरणपरिवेषोन्मेषशून्यः प्रदीपः" रघुः "एकोहि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणे-ष्विवाङ्कः" कुमा०। ततः अरीहणा० चतुरर्थ्यां वुञ्। कैरणक तन्निर्वृत्तादौ त्रि० [हारा०।

किरणमालिन् पुं किरणानां मालाऽस्त्यस्य इनि। सूर्य्ये

किराटिका स्त्री० किरे पर्य्यन्त भूमौ अटति अट–ण्वुल्। पर्य्यन्त भूमिचारिण्यां शारिकायां पक्षिण्याम् शब्दचि०

किरात पुंस्त्री किरमवस्करादेर्निःक्षेपस्थानं पर्य्यन्तभूमिमतति अत+अण उप०स०। १नीचजातिभेदे स च अवस्करनिःक्षेपस्थानपर्य्यन्तदेशाश्रयः व्याधादिः। जातिशब्दे विवृतिः। "तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं शिवे!। किरातदेशो विज्ञेयो विन्ध्यशैलेऽवतिष्ठते" इति शक्तिसङ्गमोक्ते २देशभेदेषु० भूम्नि। वृहत् सं०कूर्म्मविभागे ऐशान्युक्ते ३देशभेदे च "ऐशान्यां मेरुकनष्टराज्येषूपक्रमे "वनराज्यकिरातचीनकौलिन्दाः" इत्युक्तम् तद्देशानां राजा अण्। कैरात तद्देशनृपे बहुषु अणो लुक्। किराताः। ते च क्रमशो वेदानध्ययनादिना वृषलत्वमाप्ता यथाह मनुः "शनकैस्तु क्रियालोपादिमाः स्युः क्षत्रजातयः। वृषलत्वं गता लोके ब्राह्मणादर्शनेन च"। पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा यवनाः शकाः। पारदापह्लवाश्चीना किराताःदरदाः खसाः" इति। जातौ स्त्रियां ङीष्। ४मत्स्यभेदे पुंस्त्री० "किरातस्तथा स्त्रियां चामरग्राहिन्यां मत्स्यजात्यन्तरे द्वयोः" केशवोक्तेः ५चामरग्राहिन्यां स्त्री। "नौसंश्रयां पार्श्वगतां किरातीम्" रघुः "किरातीं—चामरग्राहिणीं दासीम्" मल्लि०। तपस्यदर्ज्जुनप्रसादार्थं किरातरूपेण गतत्वात् ६शिवे तस्य पत्न्यां तथारूपायां ७दुर्गायां स्त्री ङीष् "किराती चीरवसना चौरसेनानमस्कृताम्। आज्यपां सोमपां सौम्यां सर्व्वपर्व्वतवासिनीम्" हरिवं०१७८अ०दुर्गास्तवे। तत्र व्याधे "मुक्ताफलैः केशरिणां किराताः" "वहायुरन्विष्टमृगैः किरातैः" कुमा०। ८भूमिनिम्बे पुं० राजनि० ९घोटकरक्षे सारस्वतः। १०अल्पतनौ त्रि० मेदि०। "पर्य्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतम्" रत्ना०। अत्र स्वनामसदृशत्वञ्च वानरभिया सङ्कोचितदेहत्वेनाल्पतनुत्वात् स्वनामसमानुपूर्व्वीकपदबोध्याल्पतनुत्वकरणात् पर्य्यन्ताश्रयित्वविशेषणाद्वा तथात्वम् तत्र भूनिम्बगुणाद्युक्तं भावप्र० यथा "किरातः सारको रूक्षः शीतलस्तिक्तको लघुः। सन्निपातज्वरश्वासकफपित्तास्रदाहनुत्। कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत्। स्वार्थे क। किरातक भूमिनिम्बे राजनि०। किरातं शिवमधिकृत्य कृतोग्रन्थः अण् कैरात भारतवनपर्व्वान्तर्गतेऽवान्तरपर्व्वभेदे तत्रत्यकथा भा०व०३९अ० यथा

"गतेषु तेषु सर्व्वेषु तपस्विषु महात्मसु। पिनाकपाणिर्भगवान् सर्व्वपापहरो हरः। कैरातं वेशमास्थाय काञ्चनद्रुमसन्निभम्। विभ्राजमानो विपुलो गिरिर्मेरुरिवापरः। श्रीमद्धनुरुपादाय शरांश्चाशीविषोपमान्। निष्पपात महावेगो दहनो देहवानिव। देव्या सहोमया श्रीमान् समानव्रतवेशया। नानावेशधरैर्हृष्टैर्भूतैरनुगतस्तदा। किरातवेशसंछन्नः स्त्रीभिश्चापि सहस्रशः। अशोभत तदा राजन्! स देशोऽतीव भारत!। क्षणेन तद्वनं सर्व्वं निःशब्दमभवत्तदा। नादः प्रस्रवणानाञ्च पक्षिणाञ्चाप्युपारमत्। स सन्निकर्षमागम्य पार्थस्याक्लिष्टकर्म्मणः। मूकं नाम दनोः पुत्रं ददर्शाद्भुतदर्शनम्। वाराहं रूपमास्थाय तर्जयन्तमिवार्ज्जुनम्। हन्तुं परमदुष्टात्मा तमुवाचाथ फाल्गुनः। गाण्डीवं धनुरादाय शरांश्चाशीविषोपमान्। सज्यं धनुर्वरं कृत्वा ज्याघोषेण निनादयन्। यन्मां प्रार्थयसे हन्तुमनागसमिहागतम्। तस्मात्त्वां पूर्व्वमेवाहं नेताऽद्य यमसादनम्। दृष्ट्वा तं प्रहरिष्यन्तं फाल्गुनं दृढधन्विनम्। किरातरूपी सहसा वारयामास शङ्करः। मयैष प्रार्थितः पूर्व्वमिन्द्रकीलसमप्रभः। अनादृत्य च तद्वाक्यं प्रजहाराथ फाल्गुनः। किरातश्च समं तस्मिन्नेकलक्ष्ये महाद्युतिः। प्रमुमोचाशनिप्रख्यं शरमग्निशिखोपमम्। तौ मुक्तौ सायकौ ताभ्यां समं तत्र निपेततुः। मूकस्य गात्रे विस्तीर्णे शैलसंहनने तदा। यथाऽशनेर्विनिर्घोषो वज्रस्येव च पर्व्वते। तथा तयोः सन्निपातः शरयोरभवत्तदा। स विद्धो बहुभिर्व्वाणैर्दीप्तास्यैः पन्नगैरिव। ममार राक्षसं रूपं भूयः कृत्वा विभीषणम्। स ददर्श ततो जिष्णुः पुरुषं काञ्चनप्रभम्। किरातवेशसंछन्नं स्त्रीसहायममित्रहा। तमब्रवीत् प्रीतमनाः कौन्तेयः प्रहसन्निव। को भवानटते शून्ये वने स्त्रीगणसंवृतः। न त्वमस्मिन् वने घोरे बिभेषि कनकप्रभ!। किमर्थञ्च त्वया विद्धो वराहो मत्परिग्रहः। मयाऽभिपन्नः पूर्व्वं हि राक्षसोऽयमिहागतः। कामात् परिभवाद्वाऽपि न मे जीवन् विमोक्ष्यसे। न ह्येष मृगयाधर्म्मो यस्त्वयाऽद्य कृतो मयि। तेन त्वां भ्रंशयिष्यामि जीविताद् पर्व्वताश्रयम्। इत्युक्तः पाण्डवेयेन किरातः प्रहसन्निव। उवाच श्लक्ष्णया वाचा पाण्डवं सव्यसाचिनम्। न मत्कृते त्वया वीर! भीः कार्य्या वनमन्तिकात्। इयं भूमिः सदाऽस्माकमुचिता वसतां वने। त्वया तु दुष्करः कस्मादिह वासः प्ररोचितः?। वयन्तु बहुसत्त्वेऽस्मिन्निवसामस्तपोधन!। भवांस्तु कृष्णवर्त्माभः सुकुमारः सुखोचितः। कथं शून्यमिमं देशमेकाकी

विचरिष्यति । अर्ज्जुन उवाच । गाण्डीवमाश्रयं ज्ञात्वा नाराचांश्चाग्निसन्निभान् । निवसामि महारण्ये द्वितीय इव पावकः । एष चापि महाजन्तुर्म्मृगरूपं समाश्रितः । राक्षसो निहतो घोरो हन्तुं मामिह चागतः । किरात उवाच । मयैष धनुर्निर्म्मुक्तैस्ताड़ितः पूर्व्वमेव हि । वाणैरभिहतः शेते नीतश्च यमसादनम् । ममैष लक्ष्यभूतो हि मम पूर्व्वपरिग्रहः । ममैव च प्रहारेण जीविताद्व्यपरोपितः । दोषान् स्वान्नार्हसेऽन्यस्मै वक्तुं स्वबलदर्पितः । अवलिप्तोऽसि मन्दात्मन् ! न मे जीवन् विमोक्ष्यसे । स्थिरो भवस्व मोक्ष्यामि सायकानशनीरिव । घटस्व परया शक्त्या मुञ्च त्वमपि सायकान् । तस्य तद्वचनं श्रुत्वा किरातस्यार्ज्जुनस्तदा । रोषमाहारयामास ताड़यामास चेषुभिः । ततो हृष्टेन मनसा प्रतिजग्राह सायकान् । भूयोभूय इति प्राह मन्दमन्देत्युवाच ह । प्रहरस्व शरानेतान्नाराचान्मर्म्मभेदिनः । इत्युक्तो वाणवर्षं स मुमोच सहसाऽर्ज्जुनः । ततस्तौ तत्र संरब्धौ राजमानौ मुहुर्म्मुहुः । शरैराशीविषाकारैस्ततक्षाते परस्परम् । ततोऽर्ज्जुनः शरवर्षं किराते समवासृजत् । तत्प्रसन्नेन मनसा प्रतिजग्राह शङ्करः । मुहूर्त्तं शरवर्षं तत् प्रतिगृह्य पिनाकधृक् । अक्षतेन शरीरेण तस्थौ गिरिरिवाचलः । स दृष्ट्वा वाणवर्षन्तु मोघीभूतं धनञ्जयः । परमं विस्मयञ्चक्रे साधु साध्विति चाब्रवीत् । अहोऽयं सुकुमाराङ्गो हिमवच्छिखराश्रयः । गाण्डीवमुक्तान्नाराचान् प्रतिगृह्णात्यविह्वलः । कोऽयं देवो भवेत् साक्षात् रुद्रो यक्षः सुरोऽसुरः । विद्यते हि गिरिश्रेष्ठे त्रिदशानां समागमः । नहि मद्बाणजालानामुत्सृष्टानां सहस्रशः । शक्तोऽन्यः सहितुं वेगमृते देवं पिनाकिनम् । देवो वा यदि वा यक्षो रुद्रादन्यो व्यवस्थितः । अहमेनं शरैस्तीक्ष्णैर्नयामि यमसादनम् । ततो हृष्टमना जिष्णुर्नाराचान्मर्म्मभेदिनः । व्यसृजच्छतधा राजन् ! मयूखानिव भास्करः । तान् प्रसन्नेन मनसा भगवान् लोकभावनः । शूलपाणिः प्रत्यगृह्णाच्छिलावर्षमिवाचलः । क्षणेन क्षीणवाणोऽथ संवृत्तः फाल्गुनस्तदा । भीश्चैनमाविशत्तीव्रा तं दृष्ट्वा शरसंक्षयम् । चिन्तयामास जिष्णुः स भगवन्तं हुताशनम् । पुरस्तादक्षयौ दत्तौ तूणौ येनास्य खाण्डवे । किं नु मोक्ष्यामि धनुषा यन्मे वाणाः क्षयं गताः । अयञ्च पुरुषः कोऽपि वाणान् ग्रसति सर्व्वशः । हत्वा चैनं धनुष्कोट्या शूलाग्रेणेव कुञ्जरम् । नयामि दण्डधारस्य यमस्य सदनं प्रति । प्रगृह्याथ धनुष्कोट्या ज्यापाशेनावकृष्य च । मुष्टिभिश्चापि हतवान् वज्रकल्पैर्म्महाद्युतिः । संप्रयुद्धो धनुष्कोट्या कौन्तेयः परवीरहा । तदप्यस्य धनुर्द्दिव्यं जग्राह गिरिगोचरः । ततोऽर्ज्जुनो ग्रस्तधनुः खड्गपाणिरतिष्ठत । युद्धस्यान्तमभीप्सन् वै वेगेनाभिजगाम तम् । तस्य मूर्द्ध्नि शितं खड्गमसक्तं पर्व्वतेष्वपि । मुमोच भुजवीर्य्येण विक्रम्य कुरुनन्दनः । तस्य मूर्द्धानमासाद्य शफालासिवरो हि सः । ततो वृक्षैः शिलाभिश्च योधयामास फाल्गुनः । तदा वृक्षान्महाकायः प्रत्यगृह्णादथो शिलाः । किरातरूपी भगवांस्ततः पार्थो महाबलः । मुष्टिभिर्व्वज्रसङ्काशैर्धूममुत्पादयन् मुखे । प्रजहार दुराधर्षे किरातसमरूपिणि । ततः शक्राशनिसमैर्म्मुष्टिभिर्भृशदारुणैः । किरातरूपी भगवानर्द्दयामास पाण्डवम् । ततश्चटचटाशब्दः सुघोरः समपद्यत । पाण्डवस्य च मुष्टीनां किरातस्य च युध्यतः । सुमुहूर्त्तन्तु तद्युद्धमभवल्लोमहर्षणम् । भुजप्रहारसंयुक्तं वृत्रवासवयोरिव । जघानाथ ततो जिष्णुः किरातमुरसा बली । पाण्डवञ्च विचेष्टन्तं किरातोऽप्यहनद्बली । तयोर्भुजविनिष्पेषात् संघर्षेणोरसोस्तथा । समजायत गात्रेषु पावकोऽङ्गारधूमवान् । तत एनं महादेवः पीड्य गात्रैः सुपीड़ितम् । तेजसा व्याक्रमद्रोषाच्चेतस्तस्य विमोहयन् । ततोऽभिपीड़ितैर्गात्रैः पिण्डीकृत इवाबभौ । फाल्गुनो गात्रसंरुद्धो देवदेवेन भारत ! । निरुच्छ्वासोऽभवच्चैव सन्निरुद्धो महात्मना । पपात भूम्यां निश्चेष्टो गतसत्त्व इवाभवत् । स मुहूर्त्तन्तथा भूत्वा सचेताः पुनरुत्थितः । रुधिरेणाप्लुताङ्गस्तु पाण्डवो भृशदुःखितः । शरण्यं शरणं गत्वा भगवन्तं पिनाकिनम् । मृण्मयं स्थण्डिलं कृत्वा माल्येनापूजयद्भवम् । तच्च माल्यं तदा पार्थः किरातशिरसि स्थितम् । अपश्यत् पाण्डवश्रेष्ठो हर्षेण प्रकृतिङ्गतः । पपात पादयोस्तस्य ततः प्रीतोऽभवद्भवः । उवाच चैनं वचसा मेघगम्भीरगीर्हरः । जातविस्मयमालोक्य तपःक्षीणाङ्गसंहतिम् । भव उवाच । भो भो फाल्गुन ! तुष्टोऽस्मि कर्म्मणाऽप्रतिमेन ते । शौर्य्येणानेन धृत्या च क्षत्त्रियो नास्ति ते समः । समं तेजश्च वीर्य्यञ्च ममाद्य तव चानघ । प्रीतस्तेऽहं महाबाहो ! पश्य मां भरतर्षभ ! । ददामि ते विशालाक्ष !

चक्षुः पर्व्वन्न प्रभवान्। विजेष्यसि रणे शत्रूनपि सर्वान् दिवौकसः। प्रोवाच च तेऽहं दास्यामि यदस्त्रमनिवारितम्। त्वं हि शक्तो मदीयं तदस्त्रं धारयितुं क्षणात्। वैशम्पायन उवाच। ततो देवं महादेवं गिरिशं शूलपाणिनम्। ददर्श फाल्गुनस्तत्र सह देव्या महाद्युतिम्। स जानुभ्यां महीं गत्वा शिरसा प्रणपत्य च। प्रसादयामास हरं पार्थः परपुरञ्जयः”।

किराततिक्त पु० किरातो भूनिम्ब इव तिक्तः (चराता) वृक्षे अमरः“किराततिक्तस्तु हिमस्तिक्तः पित्तकफापहः”भावप्र०

किरातार्ज्जुनीय न० किरातश्चार्ज्जुनश्चाधिकृत्य कृतोग्रन्थः “द्वन्द्वाच्छः” पा०छ। भारविकविप्रणीते अष्टादशसर्गात्मके महाकाव्यभेदे

किराताशिन् पु किरातानश्नाति अश–णिनि ६त०। गरुडे शब्दर० तस्य किराताशनकथा भा०आ०२८अ० यथा “इत्युक्तो गरुडः सर्पैस्ततो मातरमब्रवीत्। गच्छाम्यमृतमाहर्त्तुं भक्ष्यमिच्छामि वेदितुम्। विनतोवाच। समुद्रकुक्षावेकान्ते निषादालयमुत्तमम्। निषादानां सहस्राणि तान् भुक्त्वाऽमृतमानय। न च ते ब्राह्मणं हन्तुं कार्य्या बुद्धिः कथञ्चन। अवध्यः सर्व्वभूतानां ब्राह्मणो ह्यनलोपमः। अग्निरर्को विषं शस्त्रं विप्रो भवति कोपितः। गुरुर्हि सर्व्वभूतानां ब्राह्मणः परिकीर्त्तितः। एवमादिभीरूपैस्तु सतां वै ब्राह्मणो मतः। स ते तात! न हन्तव्यः संक्रुद्धेनापि सर्व्वथा। ब्राह्मणानामभिद्रोहो न कर्त्तव्यः कथञ्चन। न ह्येवमग्निर्नादित्यो भस्म कुर्य्यात्तथानघ!। यथा कुर्य्यादभिक्रुद्धो ब्राह्मणः संशितव्रतः। तदेतैर्विविधैर्लिङ्गैस्त्वं विद्यास्तं द्विजोत्तमम्। भूतानामग्रभूर्व्विप्रो वर्णश्रेष्ठः पिता गुरुः। गरुड़ उवाच। किंरूपो ब्राह्मणो मातः किंशीलः किंपराक्रमः। किंस्विदग्निनिभो भाति किंस्वित् सौम्यप्रदर्शनः। यथाहमभिजानीयां ब्राह्मणं लक्षणैः शुभैः। तन्मे कारणतो मातः! पृच्छतो वक्तुमर्हसि। विनतोवाच। यस्ते कण्ठमनुप्राप्तो निगीर्णं वडिशं यथा। दहेदङ्गारवत् पुत्र! तं विद्याद्ब्राह्मणर्षभम्। विप्रस्त्वया न हन्तव्यः संक्रुद्धेनापि सर्व्वदा। प्रोवाच चैनं विनता पुत्रहार्द्दादिदं वचः। जठरे न च जीर्य्येद्यस्तं जानीहि द्विजोत्तमम्। पुनः प्रोवाच विनता पुत्रहार्द्दादिदं वचः। जानन्त्यप्यतुलं वीर्य्यमाशीर्व्वादपरायणा। प्रीता परमदुःखार्त्ता नागैर्व्विप्रकृता सती”। “सौतिरुवाच। ततः स मातुर्व्वचनं निशम्य वितत्य पक्षौ नभ उत्पपात। ततो निषादान् बलवानुपागतो बुभुक्षितः काल इवान्तकोऽपरः। स तान्निषादानुपसंहरंस्तदा रजः समुद्धूय नभःस्पृशन्महत्। समुद्रकुक्षौ च विशोषयन् पयः समीपजान् भूधरजान् विचालयन्। ततः स चक्रे महदाननं तदा निषादमार्गं प्रतिरुध्य पक्षिराट्। ततो निषादास्त्वरिताः प्रवव्रजुर्यतो मुखं तस्य भुजङ्गभोजिनः। तदाननं विवृतमतिप्रमाणवत् समभ्ययुर्गगनमिवार्द्दिताः खगाः। सहस्रशः पवनरजोविमोहिता यथाऽनिलः प्रचलितपादपे वने। ततः खगो वदनममित्रतापनः समाहरत् परिचपलो महाबलः। निसूदयन् बहुविधमत्स्यजीविनो बुभुक्षितो गगनचरेश्वरस्तदा”।

किराति स्त्री किरेण समन्तात् जलक्षेपेण अतति गच्छति अत इन् ३त०। १गङ्गायां जटा० तस्या योजनपर्य्यन्तजलक्षेपेण हिमाचलात् समुद्रपर्य्यन्तगमनात्तथात्वम्। वा ङीप्। तत्रैव। २किरातवेशधारिण्यां दुर्गायाञ्च तस्याः किरातवेशधारणं यथा तथा, किरातशब्दे दर्शितम्।

किरातिनी स्त्री किरातदेश उत्पत्तिस्थानत्वेनास्त्यस्या इनि ङीप्। जटामांस्यां शब्दर०।

किरि पुंस्त्री किरति भूमिम् कृ–कृगॄशॄ इक्। भूविदारे १शूकरे अमरटी० भरतः स्त्रियां ङीप्। २मेघे च तस्य जलक्षेपकत्वात् तथात्वं किरिकः

किरिक पु० किरिर्मेघ इव कायति कै–क। सजलमेघतुल्ये रुद्रभेदे।“नमो वः किरिकेभ्यो देवानां हृदयेभ्यः” यजु०१६,४६। [ङि। हिन्ताले अमरः २फले त्रिका०।

किरिटि न० किरिणा शूकरेण टल्यते विक्लव्यते टल विक्लवे

किरीट पुंन०कॄ–कीटन् किच्च। १मुकुटे २शिरोवेष्टने (पागड़ि) च शब्दचि० दशाननकिरीटभ्यः मा०द०। किरीटबद्धाञ्जलयोनिपेतुः” रघुः [शब्दचि०।

किरीटमालिन् पु० मल–सम्बन्धे णिनि ६त०। अर्ज्जुने

किरीटिन् पु० किरीटोऽस्त्यस्य इनि। अर्ज्जुने भा०वि० ४४अ०। “पुरा शक्रेण मे बद्धं युध्यतो दानवर्षभैः। किरीटं मूर्द्धि सूर्य्याभं तेनाहुर्मां किरीटिनम्” उत्तरसमीपेऽर्ज्जुनेन स्वनामभेदनिरुक्तिकथनात्तस्य तथात्वम्। शक्रेण तस्य मूर्द्धनि किरीटयोजनकथा च “ततो-मातलिसंयुक्तं मयूरसमरोमभिः। हयैरुपेतं प्रादान्मे रथं दिव्यं महाप्रभम्। बबन्ध चैव मे मूर्द्धि किरीटमिदमुत्तमम्। स्वरूपसदृशं चैव प्रादादङ्गविभूषणम्।

अभेद्यं कवचं चेदं सर्पस्पर्शवदुत्तमम्। नागराजमिवासिं च गाण्डीवे समयोजयन्" इति भा० व० १६१ अ०। २किरीटयुक्तमात्रे त्रि०। "किरीटिनं गदिनं चक्रहस्तम्" गीता स्त्रियां ङीप्

किरोडाट धौर्त्ये आकृतिगणत्वात् कण्ड्वा० यक् प० सेट् अक०। किरोडाय्यति अकिरोडाटीत्।

किर्म्मि स्त्री कॄ—कि नि० मुट्। १पलाले (पोयाल) २गृहे ३स्वर्णपुत्तलिकायाञ्च मेदि०। वा ङीप् किर्म्मीत्यपि तत्रार्थे

किर्म्मिर त्रि० किर्म्मीर+पृषो० वेदे ह्रस्वः। चित्रवर्णयुक्ते। "नक्षत्रेभ्यः किर्म्मिरं चन्द्रमसे किलासम्" यजु० ३०, २१। पुरुषमेधे

किर्म्मीर पु० कॄ—गम्भीरा० ईरन् नि०। नागरङ्गे (नारेङ्गी) १जम्बीरभेदे। २राक्षसभेदे। ३चित्रवर्णे च मेदि० ४तद्वति त्रि०।

किर्म्मीरजित् पु० किर्म्मीरं राक्षसभेदं जितवान् जि—भूते क्विप्। भीमसेने तद्वधकथा भा० व० ११ अ० यथा "प्रत्युवाचाथ तद्रक्षो धर्म्मराजं युधिष्ठिरम्। अहं वकस्य भ्राता वै किर्म्मीर इति विश्रुतः" इत्युपक्रम्य "ततो भीमो महाबाहुरारुह्य तरसा द्रुमम्। दशव्याममथोद्विद्धं निष्पत्रमकरोत्तदा। चकार सज्यं गाण्डीवं वज्रनिष्पेषगौरवम्। निमेषान्तरमात्रेण तथैव विजयोऽर्ज्जुनः। निवार्य्य भीमो जिष्णुं तं तद्रक्षो मेघनिस्वनम्। अभिद्रुत्याब्रवीद्वाक्यं तिष्ठ तिष्ठेति भारत!। इत्युक्त्वैनमभिक्रुद्धः कक्षामुत्पीड्य पाण्डवः। निष्पिष्य पाणिना पाणिं संदष्टौष्ठपुटो बली। तमभ्यधावद्वेगेन भीमो वृक्षायुधस्तदा। यमदण्डप्रतीकाशं ततस्तं तस्य मूर्द्धनि। पातयामास वेगेन कुलिशं मघवानिव। असंभ्रान्तन्तु तद्रक्षः समरे प्रत्यदृश्यत। चिक्षेप चोल्मुकं दीप्तमशनिं ज्वलितामिव। तदुदस्तमलातन्तु भीमः प्रहरतां वरः। पदा सव्येन चिक्षेप तद्रक्षः पुनराव्रजत्। किर्म्मीरश्चापि सहसा वृक्षमुत्पाट्य पाण्डवम्। दण्डपाणिरिव क्रुद्धः समरे प्रत्यधावत"। इत्युपक्रम्य तयोर्युद्धमुपवर्ण्य "अथैनमाक्षिप्य बलाद्गृह्य मध्ये वृकोदरः। धूनयामास वेगेन वायुश्चण्ड इव द्रुमम्। स भीमेन परामृष्टो दुर्बलो बलिना रणे। व्यस्पन्दत यथाप्राणं विचकर्ष च पाण्डवम्। तत एनं परिश्रान्तमुपलभ्य वृकोदरः। योक्त्रयामास बाहुभ्यां पशुं रशनया यथा। विनदन्तं महानादं भिन्नभेरीस्वनं बली। भ्रामयामास सुचिरं विस्फुरन्तमचेतनम्। तं विषीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः। प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत्। आक्रम्य च कटीदेशे जानुना राक्षसाधमम्। पीडयामास पाणिभ्यां तस्य कण्ठं वृकोदरः। अथ जर्ज्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम्। भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह। हिडिम्बवकयोः पाप! न त्वमश्रुप्रमार्ज्जनम्। करिष्यसि गतश्चापि यमस्य सदनं प्रति। इत्येवमुक्त्वा पुरुषप्रवीरस्तं राक्षसं क्रोधपरीतचेताः। विस्रस्तवस्त्राभरणं स्फुरन्तमुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज्ज"। किर्म्मीरहादयोऽप्यत्र। [ङ्गे जम्बीरभेदे त्रिका०

किर्म्मीरत्वच् पु० किर्म्मीरा चित्रा त्वगस्य। नागर-

किल शौक्ल्ये क्रीडायाञ्च तुदा० पर० अक० सेट्। किलति अकेलीत् चिकेल प्रनिकिलति [याम् बभूव आस चकार चक्रे केलिः

किल प्रेरणे चुरा० सक० सेट्। केलयति ते अचीकिलत्" केल-

किल अव्य० किल—क। १वार्त्तायाम् २अनुशयार्थे, ३निश्चये, ४संभाव्ये ५प्रसिद्धार्थद्योतने ६हेतौ ७अरुचौ ८अलीके ९तिरस्कारे च। "दमयन्ती किलकिञ्चितं किल" नैष०। "अमूं किल त्वं त्रिदिवादवातरः" माघः। "तद्भग्नं तदवयती" किलात्मनोऽपि "तदपि न किल बाल पल्लवाग्रे इति" माघः, "ध्रुवं किलाव्याजमनोहरं वपुः" शकु०। १किलेत्यागमारुचिन्यक्कारणसंभाव्यहेत्वलीकेषु" गणरत्ने उक्त्वा तत्तद्विषये उदाहृतं यथा आगमे, "कंसं जघान किल वासुदेवः" कृष्णकर्त्तृकं कंसहननमागमसिद्धमित्यर्थः। अरुचौ "एवं किल केचिद्वदन्ति" केषाञ्चिदेवं कथनं वक्तुररुचिविषय इत्यर्थः न्यक्कारे "स किल योत्स्यते" तस्य यौवनशक्तिराहित्यद्योतनात् तिरस्कारो गम्यते सम्भावनायाम् "पार्थः किल विजेष्यते कुरून्" पार्थकर्त्तृककुरुविजयः सम्भवनाविषय इत्यर्थः। हेतौ "स किलैवमुक्तवान्" तत्कथनस्यान्यत्र हेतुता द्योत्यते। अलीके "प्रसह्य सिंहः किल तां चकर्ष" रघुः। सिंहकर्त्तृकं नन्दिनीकर्षणं वस्तुतोऽलीकं काल्पनिकत्वात्। अव्ययविशेषस्य अस्य शब्दान्तरसहकारेण प्रयोगविशेषो निरुक्तकारेण निरणायि यथा "किलेतिविद्याप्रकर्षे एवं किलेत्यथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे न किलैवम्। ननु किलैवम्"। इति प्रश्नानन्तरं तस्यानभ्युपगमे न किलैवमिति, अभ्युपगमे तु ननु किलैवमिति प्रयोज्यमित्यर्थः तथाच तस्य एवंशब्दोत्तरता न—ननु इत्येतच्छब्दपूर्व्वकता च।

किलकिञ्चित न० किल अलीकेन ईषत् चितं रचितम्। "स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम्। साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षात्" सा० दर्प०णोक्ते स्त्रीणां भावभेदे यथा "पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः। कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितञ्च सुखेऽपि" माघः "त्वयि वीर! विराजते परं दमयन्तीकिलकिञ्चितं किल" नैष०।

किलकिला स्त्री किल–क प्रकारे द्वित्वम् टाप्। १हर्षध्वनौ त्रिका०। "ततः किलकिलाशब्दस्तस्मिन् वदति पार्थिवे" भा०आ०६१अ। "जितशात्रवदर्पस्य प्रतिज्ञापूरणोत्कटः। वीरस्य गर्जितं सिंहनादः किलकिला तथा" इत्युक्ते वीरस्य २सिंहनादे च विश्वः

किलाट पु० "नष्टदुग्धस्य पक्वस्य पिण्डं प्रोक्तः किलाटकः" इति भावप्र० परिभाषिते विश्रयितदुग्धस्य पाकेन घनीभूते पिण्डाकारे पदार्थे। तद्गुणाद्युक्तं तत्रैव यथा "पेयूषञ्च किलाटश्च क्षीरशाकं तथैव च। तक्रपिण्ड इमे दृष्या दृंहणा बलवर्द्धनाः। गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः। दीप्ताग्नौ च विनिद्राणां विदग्धौ चातिपूजिताम्। गुरुः किलाटोऽनिलहा पुंस्त्वनिद्राप्रदः स्मृतः"। ततः स्वार्थे क। किलाटक तत्रार्थे। कूर्चिकायां क्षीरविकारभेदे स्त्री हेमच० गौरा० ङीष्। [इत्येके हारा०।

किलाटिन् पु० किलति किल–क, अट–णिनि कर्म्म०। वंश

किलात पु० किल–यौक्त्रे क किलमतति अत–अण्। ऋषिभेदे तस्य गोत्रापत्यम् विदा० अञ्। कैलात तद्गोत्रापत्ये पुंस्त्री० "किलाताकुली इति हासुरब्रह्मावासतुः"। शत० ब्रा० १,१,४,१४,

किलास न० किल वर्णे कंकिलमस्यति अस+अण्। १सिध्मरोगे (कुली) तदस्यास्ति अच्। २तद्विशिष्टे त्रि० "चन्द्रमसे किलासम्" यजु० ३०,२१, । "किलासं सिध्मरोगवन्तम्" वेददी०। सिध्म च क्षुद्रकुष्ठभेदः यथाह सुश्रुतः"क्षुद्रकुष्ठमत ऊर्द्धं वक्ष्याम इत्युपक्रमे "कण्डुन्वितं श्वेतमपाकि सिध्म विद्यात्तनु प्रायश ऊर्द्धकाये" इति तस्य लक्षणादिकमुक्त्वा "किलासमपि कुष्ठविकल्पएव। तत्त्रिविधं वातेन पित्तेन श्लेष्मणा चेति। कुष्ठकिलासयोरन्तरन्त्वग्गतमेव किलासमपरिस्राविः च। तद्वातेन मण्डलमरुणं परुषं परिध्वंसि च; पित्तेन पद्मपत्रप्रतीकाशं सपरिदाहञ्च। श्लेष्मणापि श्वेतं स्निग्धं बहुलं कण्डूमच्च। तेषु सम्बद्धमण्डलमन्तोजातं रक्तरोम चाऽसाध्यमग्निदग्धञ्च। कुष्ठेषु दूरत्वक्सङ्कोचस्वापस्वेदशोफभेदकौण्यस्वरोपघाता वातेन। पाकावदरणाङ्गुलिपतनकर्णनासाभङ्गाक्षिरोगसत्त्वोत्पत्तयः पित्तेन। कण्डूवर्णभेदशोफास्रावगौरवाणि श्लेष्मणा"।

किलासघ्न पु० किलासं हन्ति हन्–टक्। (काँकरोल) ख्याते वृक्षे हेमच०।

किलासनाशन त्रि० किलासं नाशयति नश–णिच्–ल्यु। सिध्मरोगनाशके औषधादौ "आसुरी चक्रे प्रथमेदं किलासभेषजमिदं किलासनाशनम्" अथ० १,२४,२।

किलासिन् त्रि० किलासमस्त्यर्थे इनि। (कुली) रोगयुक्ते स्त्रियां ङीप्।

किलिञ्ज न० किल्यते ऽनेन किलि–इन् ततोजायते जन–ड ष्टमो०मुम्। १वीरणादिजाते कटे२स्वल्पदारुणि च जटा०। त्रिका०पु०। तेन उभयलिङ्गता। स्वार्थे क। कटे काष्ठादिरज्जौ च अमरः। "क्षुमान् यवान् निष्पूतान् रात्रौ गोमूत्रपर्य्युषितान्""मङ्क्ति किलिञ्जे शोषयेत्। आस्तीर्य्य किलिञ्जेऽन्यस्मिन् वा तत्प्रतिच्छन्दके शयानं प्राहत्य स्वेदयेत्" सुश्रुतः

किलिम न० किल–इमन्। देवदारुवृक्षे राजनि०।

किल्विन् पु० स्त्री किल–शौक्ल्ये भावे क्विप् ततोऽस्त्यर्थे वा० विनि। घोटके त्रिका० स्त्रियां नान्तत्वात् ङीप्।

किल्विष न० किल–टिषच्–वुक् च। १पापे २अपराधे च अमरः ३रोगे मेदि० तस्य पापहेतुत्वात् तथात्वम्। "न किल्विषादीषते यस्य आकरः" ऋ०५,३५,४, "क्षीरं यदस्याः पीयते तद्वै पितृषु किल्विषम्, अथ०५,१९५। "अपराधे। "कोमे लुब्धक! दोषोऽत्र विद्यते यदि बालिश!। अस्वतन्त्रं च मां मृत्युर्विवशं यदचूचुदत्। तस्यैव वचनादृष्टो न कोपेन न काम्यया। तस्य तत् किल्विषं लुब्ध,! विद्यते यदि किल्विषम्" इति लुब्धकं प्रति सर्पोक्तिः। पापे "यद्यान्यवशगेनेदं कृतं ते पन्नगाशुभम्। कारणं वै त्वमप्यत्र तस्मात्त्वमपि किल्विषी" सर्पं प्रति लुब्धकोक्तिः भा० आनु०१अ०। तत्र पूर्व्ववाक्ये दोषत्वेन कीर्त्तनात् अपकारपरत्वम्। उत्तरत्र अशुभत्वेन कीर्त्तनात् पापपरत्वम्। "एवं सति न दोषो मे नास्ति वध्यो न किल्विषी। किल्विषं समवाये स्यात् मन्यसे यदि किल्विषम्" तत्रैव। कीर्त्तिभेदके कायिके ४पापे च। "अपाघमप किल्विषम्" यजु० ३५,११, "किल्विषं कीर्त्तिभेदकं कायिकं पापम्" वेददी०। ततः अस्त्यर्थे इनि। किल्विषिन्।तद्युक्ते त्रि०।

किश(स)र पुं न०किम्+सृ–(शॄ)-अच् पृषो०। सुगन्धद्रव्यभेदे।

तत् परत्मस्य किश(स)रा० छन् । किश(स)रिक किश-(स)रविक्रयकर्त्तरि स्त्रियां षित्त्वात् ङीप् । शब्देन्दुशेखरे तालव्यमध्यतया पठितः अन्यत्र दन्त्यमध्यतयेत्युभयरूपता

किशरा स्त्री० किञ्चित् शृणाति शॄ–अच् । शर्करायां । त तो-मध्वा० चतुरर्थ्यां मतुप् मस्य वः । किशरावत् तद्वति देशे

किश(स)रादि पु० पाणिन्युक्ते ष्ठन्प्रत्ययप्रकृतिभूते शब्द गणे सच गणः "किश(स)र नरद नलद स्थामक तगर गुग्गुलु उशीर हरिद्रा हरिद्रुपर्णी" ।

किशल पु० न० किञ्चित्शलति शल–गतौ अच् पृषो० मलोपः। नवपल्लवे शब्दरत्ना० ।

किशलय पु० न०किञ्चित्शलति शल–चलने वा कयन् पृषो०। नवपल्लवे शब्दरत्ना० ।

किशोर पु० कश–शब्दे किशोरा० निपा० । १अश्वशिशौ, २तैलपर्ण्यौषधौ ३सूर्य्ये च मेदि० "किञ्चिच्छूरः किशोरः स्यात् यतो हि दशमात् परम् । शूरत्वं दृश्यते किञ्चिदनुदद्य दिने दिने" ४तरुणावस्थापन्ने त्रि० । स्त्रियां वयो-वाचित्वात् ङीप् किशोरी । "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशात् यौवनञ्च ततः परम्" भाग०टीकाकृच्छ्रीधरधृतवचनात् दशवर्षोत्तरं पञ्चदशाब्दपर्य्यन्तवयस्कःकिशोर इति बोध्यम् ।

किष्क वधे चुरा० आत्म० सक० सेट् । किष्कयते अचिकिष्कत

किष्किन्ध पु० किं कि दधाति धा–क पारस्करा० सुट् षत्वं मलोपः । बृह०सं० कूर्मविभागे आग्नेय्यामुक्ते १देशभेदे "आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः" इत्युपक्रमे "किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिक-दाशार्णाः" इति । तत्रत्ये २पर्व्वतभेदे च । ३तत्रत्यवालि-राजधान्यां ४तत्रत्यगुहायाञ्च स्त्री शब्दर० । "त्वया सह महाबाहो ! किष्किन्धोपवने तदा" । "गच्छ लक्ष्मण ! जानीहि किष्किन्धायां कपीश्वरम्" । "किष्किन्धाद्वा-रमासाद्य प्रविवेशानिवारितः" भा०व०२८१अ० । "गुहामासादयामास किष्किन्धां लोकविश्रुताम् । तत्र वानरराजाभ्यामैन्देन द्विपदेन च । युयुधे दिवसान् सप्त" भा०स०३०अ० । दक्षिणदिग्विजये । किष्किन्धा अभिजनोऽस्य सिन्ध्वा० अण् । कैष्किन्ध पित्रादिक्रमेण किष्किन्धागु-हातत्पुरीवासिनि त्रि० स्त्रियां ङीप् ।

किष्किन्धा(न्ध्या)काण्ड न० वाल्मीकिरामायणान्तर्गते किष्किन्धाधिकारेण वालिसुग्रीवादीनामितिवृत्तप्रतिपादके काण्डभेदे ।

किष्किन्धी स्त्री किष्किन्ध+गौरा० ङीष् । किष्किन्धपर्व्वत-गुहायाम् "अभ्येत्य सर्व्वे किष्किन्ध्याम्" भा०व०२७६अ० ।

किष्किन्ध्य पु० किष्किन्ध+स्वार्थे यत् । १किष्किन्धशब्दार्थे २तत्रत्यपर्वतगुहायां ३वालिराजधान्यां च स्त्री ।

किष्किन्धया(न्ध्या)धिप पु० ६त० । वालिनामके वानरराजे जटा० शब्दर०

किष्कु पु०स्त्री० किष्क–उन्,किम्+कै–कु पृषो० मलोपः पार-स्करा० सुट् षत्वम् वा ।१वितस्तौ द्वादशाङ्गुलपरिमाणे चतुर्विंश-त्यङ्गुल परिमाणे२हस्तमाने मेदि०२प्रकोष्ठे ३कफोणेरधो-मणिबन्धपर्य्यन्ते च४कुत्सिते त्रि० विश्वः"दशकिष्कुसहस्रां तां मापयामास सर्व्वतः" भा०स०१०अ० "दशकिष्कुसह-स्राणि समन्तादायताऽभवत्" भा० स० ३अ० । "अवर्द्धत महातेजाः किष्कूनुराजं स्वयोदग्र" भा०व० १२६अ० ।

किष्कुपर्व्वन् न० किष्कुमितं वितस्तिमितं हस्तमितं वा पर्व्वास्य । १वंशे (वाँश) २इक्षौ ३पोटगले(नल)च मेदि०

किसल पुं न० किमीषत् सलति सल–गतौ अच् पृषो० मलोपः । नवपल्लवे त्रिक०।

किसलय पुं न० किम् ईषत् सलति–सल गतौ वा० कयन् पृषो० । नवपल्लवे अमरः।"किसलयैः सलयैरिव पाणिभिः" रघुः । तारका०जातार्थे इतच् । किसलयित नवपल्लविते । किसलयस्य नवपत्रादियुक्तशाखाग्रस्थितः पल्लवः ।

की अव्य० कुत्सायाम् ।

कीकट पु० की+कट–अच् । "चरणाद्रिं समारभ्य गृध्रकूटा-न्तकं शिवे ! । तावत् कीकटदेशःस्यात् तदन्तर्मगधोभवेत् शक्तिसङ्गमोक्ते १देशभेदे । तद्देशवासिजनवाचित्वे ऽस्य भूम्नि "साधवः समुदाचारास्ते पूयन्तेऽपि कीकटाः" भाग० ७,१०,२० । उपचारात् देशेऽपि भूम्नि "ततः कलौ संप्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धोनाम्ना जिनसुतः कीकटेषु भविष्यति" भाग० १,३,२५ । ४निर्द्धने ५कृपणे च त्रि० मेदि० । ६घोटके पुं स्त्री विश्वः स्त्रियां जातित्वात् ङीष् [शब्दचि० ।

कीकश पु० कीति कशति कश–शब्दे अच् । चण्डाले ।

कीकस पु० कीति कसति कस–गतौ अच् । १कृमिजन्तुभेदे २अस्थ्नि न० अमरः ३कठिने त्रि० मेदि० । "यदन्तर्य्य-स्तकीकसम्" अमरः । शब्दरत्ना०स्त्रीत्वमपि "तस्मादिमा उभयत्र पर्शवोबद्धाः कीकसासु च जत्रुषु च" शत०ब्रा० ८,६,२,१० । कीकसेश्वरः काशीखण्डशब्दे उदा०

कीकसास्य पुं स्त्री० कीकसमास्ये ऽस्य । पक्षिणि हारा०

स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। तस्य च सुप्तस्यास्नो दृष्टिगोचरत्वात् तथात्वम्। कीकस-मुखादयोऽप्यत्र [अमरटीका स्त्रियां ङीप्।

कीकि पुंस्त्री० कीतिशब्दं कायति कै वा०ङि। चाषपक्षिणि

कीचक पु० कीत्यव्यक्तं चकति चक–हृप्राप्तौ अच्। १दैत्यभेदे "कीचका नाम ते वंशा ये स्वनन्त्यनिलाहताः" इत्युक्ते २वेणुभेदे (नलतावांश)अमरः। "यः पूरयन् कीचक-रन्ध्रभागान् दरीमुखोत्थेन समीरणेन" कुमा० "सङ्कीर्ण-कीचकवनस्खलितैकबालेत्यादि" माघः विराटराजश्याले ३केकयात्मजे विराटसेनाधिपभेदे च कीचकस्य द्रौपद्या-मनुरागादिकथा भा०वि०अ० यथा—

"तस्मिन् वर्षे गतप्राये कीचकस्तु महाबलः। सेनापति-र्विराटस्य ददर्श द्रुपदात्मजाम्। तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव। कीचकः कामयामास कामबाणप्र-पीड़ितः"। इत्युपक्रम्य सैरिन्ध्रीरूपां द्रौपदीं प्रति तत्-प्रार्थने तया तस्य प्रत्याख्यानमुपवर्णितं यथा—

"सैरिन्ध्र्युवाच। मा सूतपुत्र! मुह्यस्व माऽद्यात्याक्षीः स्वजीवितम्। जानीहि पञ्चभिर्देवैर्नित्यं मामभिरक्षि-ताम्। न चाप्यहं त्वया लभ्या गन्धर्वाः पतयो मम। ते त्वां निहन्युः कुपिताः साध्वलं मा व्यनीनशः। अश-क्यरूपं पुरुषैरध्वानं गन्तुमिच्छसि। यथा निश्चेतनो बा-लः कूलस्थः कूलमुत्तरम्। तर्त्तुमिच्छति मन्दात्मा तथा त्वं तर्त्तुमिच्छसि। अन्तर्महीं वा यदि वोर्द्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि। तथाऽपि तेभ्यो न वि-मोक्षमर्हसि प्रमाथिनो देवसुता हि खेचराः। त्वं का-लरात्रीमिव कश्चिदातुरः किं मां दृढ़ं प्रार्थयसेऽद्य की-चक!। किं मातुरङ्के शयितो यथा शिशुश्चन्द्रं जिघृक्षु-रिव मन्यसे हि माम्" १३अ०। तथैवं निरस्तेन तेन स्वभगिनीं सुदेष्णां प्रति तस्यावश्यतासम्पादनप्रार्थने तया तत्रोपायविधानं वर्णितं यथा—

"प्रत्याख्यातो राजपुत्त्र्या सुदेष्णां कीचकोऽब्रवीत्। अ-मर्य्यादेन कामेन घोरेणाभिपरिप्लुतः। कीचक उवाच। यथा कैकेयि! सैरिन्ध्री समेयात्तद्विधीयताम्। येनोपायेन सैरिन्ध्री भजेन्मां गजगामिनी। तं सुदेष्णे! परीप्स-स्व नो चेत् प्राणान् प्रहासिषम्। वैशम्पायन उवाच। तस्य सा बहुशः श्रुत्वा वाचं विलपतस्तदा। विराटम-हिषी देवी कृपाञ्चक्रे मनस्विनी। स्वातन्त्र्यमभिसन्धाय तस्यार्थमनुचिन्त्य च। उद्योगञ्चैव कृष्णायाः सुदेष्णा सूतमब्रवीत्। सुदेष्णोवाच। पर्व्वणि त्वं समुद्दिश्य सुरामन्नञ्च कारय। तत्रैनां प्रेषयिष्यामि सुराहारीं तवान्तिकम्। तत्र सम्प्रेषितामेनां विजने निरवग्रहे। सान्त्वयेथा यथाकामं सान्त्व्यमाना रमेद्यदि। वैशम्पा-यन उवाच। इत्युक्तः स विनिष्क्रम्य भगिन्या वचनात्त-दा। सुरामाहारयामास राजार्हां सुपरिष्कृताम्। म-द्यांश्च विविधाकारान् बहूंश्चोच्चावचांस्तदा। कारया-मास कुशलैरन्नपानं सुशोभनम्। तस्मिन् कृते तदा देवी कीचकेनोपमन्त्रिता। सुदेष्णा प्रेषयामास सैरिन्ध्रीं की-चकालयम्"। तत्प्रेषिताया द्रौपद्याः कीचकेन कथादि "द्रौपद्युवाच। सम्प्रैषीद्राजपुत्त्री मां सुराहारीं तवान्ति-कम्। पानमाहर मे क्षिप्रं पिपासा मयि चाब्रवीत्। कीचक उवाच। अन्या भद्रे! नयिष्यन्ति राजपुत्त्र्याः प्र-तिश्रुतम्। इत्येनां दक्षिणे पाणौ सूतपुत्त्रः परामृशत्। द्रौपद्युवाच। यथैवाहं नाभिचरे कदाचित् पतीन्मदाद्वै-मनसाऽपि जातु। तेनैव सत्येन वशीकृतं त्वां द्रक्ष्यामि पापं परिकृष्यमाणम्। वैशम्पायन उवाच। स तामभि-प्रेक्ष्य विशालनेत्रां जिघृक्षमाणः परिभर्त्सयन्तीम्। जग्राह तामुत्तरवस्त्रदेशे स कीचकस्तां सहसाऽऽक्षिपन्ती-म्। प्रगृह्यमाणा तु महाजवेन मुहुर्विनिश्वस्य च रा-जपुत्त्री। चिक्षेप तं गाढ़मकृष्यमाणा प्रवेपमानाऽतिरु-षा शुभाङ्गी। तया समाक्षिप्ततनुः स पापः पपात शाखीव निकृत्तमूलः। सा गृहीता विधुन्वाना भूमावा-क्षिप्य कीचकम्। सभां शरणमागच्छद्यत्र राजा युधि-ष्ठिरः। तां कीचकः प्रधावन्तीं केशपाशे परामृशत्। अथैनां पश्यतो राज्ञः पातयित्वा पदाऽवधीत्। तस्या योऽसौ तदाऽर्केण राक्षसः सन्नियोजितः। स कीचक-मपोवाह वातवेगेन भारत!। स पपात तदा भूमौ र-क्षोबलसमाहतः। विघूर्णमानो निश्चेष्टश्छिन्नमूल इव द्रुमः"। भा० वि० १५अ०

कीचकजित् पु० कीचकं जितवान् जि–भूते क्विप्। भीमसेने कीचकभिदादयोऽप्यत्र भीमेन तस्य बधकथा च भा० वि०२२अ०। तत्रायं संक्षेपः कीचकधर्षितया द्रौपद्या तद्बधार्थं प्रार्थितेन भीमेन एकाकिना नाट्यशालायां त्वया रात्रौ आगतेन सह ममेलनं भविष्यतीति कीचकं प्रति सङ्केतदानाय भीमेन नोदितया द्रौपद्या तथाऽनुष्ठिते भीमस्य नाट्यशालायां रात्रौ द्रौपदीस्थानीयतयाप्रवेशे तत्र कीचकगतौ तयोर्युद्धादिकमुपवर्ण्य भीमेन कीच-

कस्य बध होद्देदि करपाद-प्रवेशनञ्चेति वर्णितं यथा "भीमोऽथ प्रथम गत्वा रात्रौ छन्न उपाविशत्। मृगं हरिरिवाहश्यः समाकाङ्क्षत कीचकम्। कीचकश्चाप्यलङ्कृत्य यथाकाममुपागमत्। तां वेलां नर्त्तनागारं पाञ्चालीसङ्गमाशया। मन्यमानः स सङ्केतमागारं प्राविशत्ततः। प्रविश्य च स तद्वेश्म तमसा संवृतं महत्। पूर्व्वागतं गतस्तत्र भीममप्रतिमौजसम्। एकान्तावस्थितं चैनमाससाद सुदुर्म्मतिः। शयानं शयने तत्र मृत्युं सूतः परामृशत्। पतङ्गः पावकं दीप्तं सिंहं क्षुद्रपशुर्यथा। जाज्वल्यमानं कोपेन कृष्णाधर्षणजेन ह। उपसंगम्य चैवेनं कीचकः काममोहितः। हर्षोन्मथितचित्तात्मा स्मयमानोऽभ्यभाषत। प्रापितं ते मया वित्तं बहुरूपमनन्तकम्। त्वत्कृते धनरत्नाढ्यं दासीशतपरिच्छदम्। रूपलावण्ययुक्ताभिर्युवतीभिरलङ्कृतम्। गृहं सान्तःपुरं सुभ्रु! क्रीडारतिविराजितम्। तत् सर्व्वं त्वां समुद्दिश्य सहसा समुप गतः। आकस्मात् प्रशंसन्ति सर्व्वा गृहगताः स्त्रियः। सुवासा दर्शनीयश्च नान्योऽस्ति त्वादृशः पुमान्। भीम उवाच। दिष्ट्या त्वं दर्शनीयोऽसि दिष्ट्यात्मानं प्रशंससि। ईदृशस्तु त्वया स्पर्शः स्पृष्टपूर्व्वो न कर्हिचित्। स्पर्शं वेत्सि विदग्धस्त्वं कामधर्म्मविचक्षणः। स्त्रीणां प्रीतिकरो नान्यस्त्वत्समः पुरुषस्त्विह। वैशम्पायन उवाच।

इत्युक्त्वा तं महाबाहुर्भीमो भीमपराक्रमः। सहसोत्पत्य कौन्तेयः प्रहस्येदमुवाच ह। अद्य त्वां भगिनी पाप! कृष्यमाणं मया भुवि। द्रक्ष्यत्यद्रिप्रतीकाशं सिंहेनेव महाद्विपम्। निराबाधा त्वयि हते सैरिन्ध्री विचरिष्यति। सुखमेवं चरिष्यन्ति सैरिन्ध्र्याः पतयस्तथा। ततो जग्राह केशेषु माल्यवत्सु महाबलः। स केशेषु परामृष्टो बलेन बलिनां वरः। आक्षिप्य केशान् वेगेन बाह्वोर्जग्राह पाण्डवम्। बाहुयुद्धं तयोरासीत् क्रुद्धयोर्नरसिंहयोः। वसन्ते वासिताहेतोर्ब्बलवद्गजयोरिव। कीचकानान्तु मुख्यस्य नराणामुत्तमस्य च। वालिसुग्रीवयोर्भ्रात्रोः पुरेव कपिसिंहयोः"।

ततस्तयोर्युद्धमुपवर्ण्यो क्तम् "मुहूर्त्तन्तु स तं वेगं सहित्वा भूरि दुःसहम्। बलादहीयत तदा सूतो भीमबलार्द्दितः। तं हीयमानं विज्ञाय भीमसेनो महाबलः। वक्षस्यानीय वेगेन ममर्द्दैनं विचेतसम्। क्रोधाविष्टो विनिश्वस्य पुनश्चैनं वृकोदरः। जग्राह जयतां श्रेष्ठः केशेष्वेव तदा भृशम्। गृहीत्वा कीचकं भीमो विरराज महाबलः। शार्द्दूलः पिशिताकाङ्क्षी गृहीत्वेव महामृगम्। तत एनं परिश्रान्तमुपलभ्य वृकोदरः। योक्त्रयामास बाहुभ्यां पशुं रशनया यथा। नदन्तञ्च महानादं भिन्नभेरीसमस्वनम्। भ्रामयामास सुचिरं विस्फुरन्तमचेतसम्। प्रगृह्य तरसा दोर्भ्यां कण्ठं तस्य वृकोदरः। अपीडयत कृष्णायास्तदा कोपोपशान्तये। अथ तं भग्नसर्व्वाङ्गं व्याविद्धनयनाम्बरम्। आक्रम्य च कटीदेशे जानुना कीचकाधमम्। अपीडयत बाहुभ्यां पशुमारममारयत्। तं विषीदन्तमाज्ञाय कीचकं पाण्डुनन्दनः। भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह। अद्याहमनृणो भूत्वा भ्रातृभार्य्यापहारिणम्। शान्तिं लब्धास्मि परमां हत्वा सैरिन्ध्रिकण्टकम्। इत्येवमुक्त्वा पुरुषप्रवीरस्तं कीचकं क्रोधसरागनेत्रः। आस्रस्तवस्त्राभरणं स्फुरन्तमुद्भ्रान्तनेत्रं व्यसुमुत्ससर्ज्ज। निष्पिष्य पाणिना पाणिं सन्दष्टौष्ठपुटो बली। समाक्रम्य च संक्रुद्धो बलेन बलिनां वरः। तस्य पाणी च पादौ च शिरो ग्रीवाञ्च सर्व्वशः। काये प्रवेशयामास पशोरिव पिनाकधृक्। तं सम्मथितसर्व्वाङ्गं मांसपिण्डोपमं कृतम्। कृष्णायै दर्शयामास भीमसेनो महाबलः"।

कीज त्रि॰किमस्य कथंजात इति वा पृषो॰। अद्भुते "यः शक्रो मृध्रो अश्व्रो यो वा कीजो हिरण्मयः" ऋ॰८।६६।१०। कीज इत्यद्भुतमाह" भा॰

कीट बन्धे वर्णे च चुरा॰ उभ॰ सक॰ सेट्। कीटयति ते अचीकिटत्—त। कीटयाम् बभूव आस चकार चक्रे कीटः।

कीट पु॰ कीट—अच्। कृमिभ्यः स्थूले क्षुद्रजन्तुभेदे। स्वार्थे क। तत्रार्थे २मागधजातौ च धरणिः। ३कठिने त्रि॰ मेदिनिः। कीटभेदलक्षणादिकं सुश्रुते दर्शितं यथा—"अथातः कीटकल्पं व्याख्यास्यामः। सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः। वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः। सर्वदोषप्रकृतिभिर्युक्तास्तपरिणामतः। कीटत्वेऽपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः। कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः। उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका। आवर्त्तकस्तथोरभ्रसारिकामुखवैदलौ। शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः। शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः। अष्टादशेति वायव्याः कीटाः पवनकोपनाः। तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः। कौण्डिन्यकः कणभको वरटी

पत्रवृश्चिकः। विनासिका ब्रह्मणिका विन्दुलो भ्रमरस्तथा। वाह्यकी पिच्चिटः कुम्भी वर्च्चःकीटोऽरिमेदकः। पद्मकीटो दुन्दुभिको मकरः शतपादकः। पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी। क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः। एते ह्यग्निप्रकृतयश्चतुर्विंशः प्रकीर्त्तिताः। तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः। विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः। सैरेयकः प्रचलको बलभः किटिभस्तथा। सूचीमुखः कृष्णगोधा यश्च काषायवासिकः। कीटगर्द्दभकश्चैव तथा त्रोटक एव च। त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः। तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः। तुङ्गीनासो विचिलकस्तालको वाहकस्तथा। कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः। तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा। अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः। तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्। तास्ताश्च वेदनास्तीव्रारोगा वै साद्रिपातिकाः। क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः। ज्वराङ्गमर्द्दरोमाञ्चवेदनाभिः समन्वितः। छर्द्यतीसारतृष्णा च दाहो मोहोविजृम्भिका। वेपथुश्वासहिक्काश्च दाहः शीतञ्च दारुणम्। पिडकोपचयः शोफो ग्रन्थयो मण्डलानि च। दद्रवः कर्णिकाश्चैव विसर्पाः किटिभानि च। तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः। येऽन्ये तेषां विशेषास्तु तत्वं तेषां समादिशेत्। दूषीविषप्रकोपाच्च तथैव विषलेपनात्। लिङ्गं तीक्ष्णविषेष्वेतच्छृणु मन्दविषेष्वतः। प्रसेकोऽरोचकश्छर्द्दिःशिरोगौरवशीतता। पिडकाकोठकण्डूनां जन्म दोषविभागतः। योगैर्नानाविधैरेषां चूर्णानि गरमादिशेत्। दूषीविषप्रकाराणां तथैवाप्यनुलेपनात्। एकजातीनतस्तूर्द्ध्वं कीटान् वक्ष्यामि भेदतः। सामान्यतो दष्टलिङ्गैः साध्यासाध्यक्रमेण च। त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः। चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः। तैर्दष्टस्य श्वयथुरङ्गमर्दो गुरुता गात्राणां दंशःकृष्णश्च भवति। प्रतिसूर्य्यं पिङ्गभासो बहुवर्णो महाशिराः। तथा निरुपमश्चापि पञ्च गौधेरकाः स्मृताः। तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत्। रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः। गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिका इत्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति। सर्षपिकया हृदयपीडातिसारश्च। शतपद्यस्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च। मण्डूकाः कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भ्रुकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशकण्डूर्भवति पीतफेनागमश्च वक्त्रात्। भ्रुकुटीकोटिकाभ्यामेतदेव दाहश्छर्दिर्मूर्च्छा चातितिमात्रम्। विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिडकाभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति। अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च। कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते। शूकवृन्तादिभिर्दष्टे कण्डूकोठाः प्रवर्द्धन्ते शूकञ्चात्र लक्ष्यते। पिपीलिकाः स्थूलशीर्षा संवाहिका ब्राह्मणिकाङ्गुलिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः। मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः। स्थालिका काषायीभ्यामेतदेव पिडकाश्च सोपद्रवा भवन्ति। मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च पार्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः। नखावकृष्टेऽत्यर्थं पिडकाः सदाहपाकाभवन्ति। जलौकसां दष्टलक्षणमुक्तं चिकित्सितञ्च। भवन्ति चात्र। गोधेरकःस्थालिका च ये च श्वेताग्निसंप्रभे। भ्रुकुटीकोटिकश्चैव न सिध्यन्त्येकजातिषु। शवमूत्रपुरीषैस्तु सविषैरवमर्षणात्। स्युः कण्टदाहकोठारुः पिडकातोदवेदनाः। प्रक्लेदश्चांस्तथास्रावो भृशं सम्माचयेत्त्वचम्। दिग्धविद्धक्रियास्तत्र यथावदवचारयेत्। नावसन्नं नचोत्सन्नमतिसंरम्भवेदनम्। दंशादौ विपरीतार्त्ति कीटदष्टं सुबाधकम्। कीटैर्दष्टानुग्रविषैः सर्पवत् समुपाचरेत्। त्रिविधानान्तु सर्पाणां त्रैविध्येन क्रिया हिता। स्वेदमालेपनं सेकं चोष्णमत्रावचारयेत्। अन्यत्र मूर्च्छिताद्दंशात् पाककोथप्रपीडितात्। विषघ्नञ्च विधिं सर्वं कुर्य्यात् संशोधनानि च”। २कीटाख्येषु राशिषु

कीटगर्द्दभक पु० कीटभेदे कीटशब्दे विवृतिः।

कीटघ्न पु० कीटं हन्ति हन—टक्। गन्धके राजनि०।

कीटजा स्त्री० कीटेभ्यो जायते जन—ड। १जतुनि लाक्षायाम् रत्नमाला०२कीटजातमात्रे त्रि०। [हंसपदीश्चे राजनि०।

कीटपादिका स्त्री कीटाःपादे मूलेऽस्याः कप् अतइत्वम्।

कीटमणि पु० कीटेषु मणिरिव । खद्योते शब्दचि० ।

कीटमातृ स्त्री कीटस्य मातेव मूले बहुलकीटप्रसवात् । हंसपदीवृक्षे भावप्र० ।

कीटमारी स्त्री कीटान् मारयति सेवनेन मृ—णिच्—अण् उप०स०गौरा०ङीष् मुग्ध०मते षण् ईप् । हंसपदीवृक्षे राजनि०। [(उच्चिङ्डिड़ा) इतिख्याते कीटभेदे शब्दचि०।

कीटमेष पु० कीटोमेष इव । नदीतीरे सिकतामध्ये स्थायिनि

कीटसंज्ञ पु० कीटः संज्ञा यस्य ! "कर्कटवृश्चिकमीना मकरान्त्यार्द्धञ्च कीटसंज्ञाः स्युः" ज्यो० उक्तेषु कर्कटादिषु राशिषु कीटाख्यादयोऽप्यत्र । यद्यप्येषां सर्वेषां कीटसंज्ञा तथापि क्वचित् कीटशब्दस्य वृश्चिकराशिमात्रपरता यथा "हरिः कीटघटेन च" पताकीवेधे वृश्चिकस्यैव सिंहकुम्भाभ्यां वेधात्तस्यैव ग्रहणम्।

कीडेर पु० कील—एरच् लस्य डः । तण्डुलीयशाके—भावप्र०।

कीदृक्ष त्रि०कस्येव दर्शनमस्य किम्+दृश—क्स क्यादेशे दीर्घः। किम्प्रकारे । क्विन् । कीदृश् । कञ् । कीदृश तत्रार्थे त्रि० तत्र कञि स्त्रियां ङीप्,क्से टाप् इति भेदः। "प्रिये ! स कीदृक् भविता तव क्षणः" नैष० । "यद्येतानि जयन्ति हन्त परितः शस्त्राण्यमोघानि मे तद्वोः कीदृगसौ विवेकविभवः कीदृक् प्रबोधोदयः" प्रबोधच० ।

कीनाश पु० क्लिष्टं नाशयति, कीचनाशि अच् क्लिश्नाति निं०वा । १यमे "विशेष्टि कीनाशनिकेतनातिथिम्" माघः।२वानरे पुंस्त्री अमरः स्त्रियां जातित्वात् ङीष् । ३पशुके:।४क्षुद्रे ५कर्षके च त्रि० मेदि०। "कीनाशो गोवृषो यानमलङ्कारश्च वेश्म च। विप्रस्यौद्धारिकं देयमेकांशश्च प्रधानतः"मनुः "कीनाशः कर्षकः"कुल्लू० । "शुनं न फाला वि कृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः"ऋ०४,५७,८, "कीनाशाः बलीवर्द्दरक्षकाः" भा०।"नाद्रियन्ते यथापूर्वं कीनाशाइव गोजरम्"भाग०३, ३०,११ । क्षुद्रे "य उद्धतमनादृत्य कीनाशमभियाचते । क्षीयते तद्यशः स्फीतं मानश्चावज्ञया हतः"भाग०१२२,१२

कीर पुंस्त्री कीति ईरयति ईर—णिच्—अच् । १शुके पक्षिभेदे अमरः । "खगवागियमित्यतोऽपि किं न मुदं धास्यति ? कीरगीरिव" नैष० जातित्वात् स्त्रियां ङीष् । २काश्मीरदेशे पु० भूम्नि मेदि० अल्पार्थे कन् । कीरक शुकशावे संज्ञायां कन् । वृक्षभेदे चमसके च धरणिः

कीरवर्णक न० कीरस्येव वर्णोऽस्य कप् । (स्थौणेयक) नाम सुगन्धिद्रव्ये राजनि० ।

कीरि पु० कीर्यते विक्षिप्यते कॄ—ना०ये १स्तोत्रे "कीरिणा देवान्नमसोपशिक्षन्" ऋ०५,४०,८, "कीरिणा स्तोत्रेण" भा० २स्तुत्यादिषु विक्षिप्ते त्रि० । "यस्या हृदा कीरिणा मन्यमानः" ऋ०५,४,१०,"कीरिणा स्तुत्यादिषु विक्षिप्तेन हृदा"भा० ३स्तोतरि त्रि० निरु० "वहु स्तुवते कीरये" ऋ० ६,२३,३. "कीरिरितिस्तो नाम" भा० "सखायं कीरिचोदनम्" ऋ० ६,४५,१९, "कीरीणां स्तोतॄणां चोदनं प्रेरयितारम्" भा० ।

कीरेष्ट पु० कीरस्य इष्टः । १आम्रवृक्षे २आक्षोटवृक्षे (आखरोट) ३जलमधूकवृक्षे च राजनि० ।

कीर्ण त्रि० कॄ—क्त । १आच्छन्ने २निक्षिप्ते ३विक्षिप्ते ४हिंसिते च मेदि० । "अमविरततरुस्रग्भिः शिभिः कीर्णवर्त्मा" शकु० । "कीर्णं शनैरनुकपोलमनेकपानाम्" माघः ।

कीर्णि स्त्री० कॄ—भावे क्तिन् नि० निभावः । १विक्षेपे २हिंसने ३आच्छादने च । [कथने ।

कीर्त्तन न० चु०कत—कीर्त्तादेशः सौत्र—कीर्त्त—वा भावे ल्युट् ।

कीर्त्तना स्त्री चु० कत कीर्त्तादेशे भावे युच् । १कथने । कर्म्मणि युच् । २यशसि शब्दरत्ना० ;

कीर्त्ति स्त्री सौ०कीर्त्त—क्तिन् । १प्रसादे मेदि०२शब्दे ३दीप्तौ ४मातृकाविशेषे च शब्दरत्ना०५विस्तरे६कर्द्दमे च विश्वः । ७ख्यातिभेदे अमरः । ख्यातिभेदश्च धार्म्मिकत्वादि प्रशस्तधर्म्मवत्त्वेन नानादेशीयकथनज्ञानविषयता । कीर्त्तिश्च जीवतोऽमृतस्य वेत्यत्र विशेषोनास्ति ।"यस्य कीर्त्तिः श्रुता लोके धन्यं तस्य सुजीवितम्" नीतिसारे "सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते"गीतायाञ्च जीवतोऽपि कीर्त्तिसम्बन्धस्योक्तेः। तत्र दानादिप्रभावा ख्यातिः कीर्त्तिः शौर्य्यादिप्रभवा ख्यातिर्यश इति केचिद्यशःकीर्त्त्योर्भेदमाहुः "कीर्त्तिं स्वर्गफलामाहुरासंसारं नृणां किल" इत्यनेन कीर्त्तेः स्वर्गफलतोक्तेः । जीवतःख्यातिर्यशः मृतस्य ख्यातिः कीर्त्तिरिति विभागस्तु न सम्यक् "इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्" इति मनुना इहलोकेऽपि कीर्त्तिप्राप्तेरुक्तेः । एतेन

"प्रज्ञां यशश्च कीर्त्तिञ्च ब्रह्मवर्चसमेव च" मनुवाक्यस्य "जीवन् यशः मृतस्य कीर्त्तिमिति" कुल्लू०व्याख्या चिन्त्या प्रागदर्शितमनुवाक्यान्तरविरोधात् किन्तु स्वर्गादिफलकदानादिधर्म्मस्यैव कीर्त्तिः, शौर्य्यादिना यश इत्युभयाभेदसम्भवेन मनुवाक्यस्य तदर्थपरत्वमेवोचितम् "स्वकान्तिकीर्त्तिव्रजमौक्तिकस्रजम्" नैष० ।

कीर्त्तित त्रि॰ चु॰ कृत–कीर्त्तादेशे क्त। १कथिते–२ख्याते च।

कीर्त्तिभाज् पु॰ कीर्त्तिं भजते भज–ण्वि १द्रोणाचार्य्ये शब्दरत्ना॰। २कीर्त्तियुक्ते त्रि॰

कीर्त्तिमत् त्रि॰ कीर्त्तिरस्त्यस्य मतुप्। १कीर्त्तियुक्ते स्त्रियां ङीप्। विश्वदेवान्तर्गते श्राद्धदेवभेदे पु॰ २विश्वेदेवाश्च भा॰ आनु॰ ९१ अ॰ दर्शिता यथा

"विश्वे चाग्निसखा देवाः सङ्ख्याताः पूर्व्वमेव ते। तेषां नामानि वक्ष्यामि भागार्हाणां महात्मनाम्। बलं धृतिर्विधाता च पुण्यकृत् पावनस्तथा। पार्ष्णिक्षेमी समूहश्च दिव्यसानुस्तथैव च। विवस्वान् वीर्य्यवान् ह्रीमान् कीर्त्तिमान् कृत एव च। जितात्मा मुनिवर्य्यश्च दीप्तरोमा भयङ्करः। अनुकर्म्मा प्रतीतश्च प्रदाताऽथांशुमांस्तथा। शैलाभः परमक्रोधी धीरोष्णी भूपतिस्तथा। स्रजो वज्री वरी चैव विश्वेदेवाः सनातनाः। विद्युद्वर्च्चाः सोमवर्च्चाः सूर्य्यश्रीश्चेति नामतः। सोमपः सूर्य्यसावित्रो दत्तात्मा पुण्डरीयकः। उष्णीनाभो नभोदश्च विश्वायुर्दीप्तिरेव च। चमूहरः सुरेशश्च व्योमारिः शङ्करो भवः। ईशः कर्त्ता कृतिर्द्दक्षो भुवनो दिव्यकर्म्मकृत्। गणितः पञ्चवीर्य्यश्च आदित्यो रश्मिमांस्तथा। सप्तकृत् सोमवर्च्चाश्च विश्वकृत् कविरेव च। अनुगोप्ता सुगोप्ता च नप्ता चेश्वर एव च। कीर्त्तितास्ते महाभागाः कालस्यागतिगोचराः"।

३वसुदेवज्येष्ठपुत्रे "वसुदेवस्तु देवक्यामष्टौ पुत्रानजीजनत्। कीर्त्तिमन्तमित्यादि" भाग॰ ९,२४,२५।

कीर्त्तिशेष त्रि॰ कीर्त्तिःशेषोऽस्य। नामशेषे मृते शब्दचि॰

कील बन्धे भ्वादि॰पर॰ सक॰ सेट्। कीलति अकीलीत्। चिकील कीलः। कीलितः कीलनम्। प्रनिकीलति

कील पु॰ कील–बन्धे यथायथं भावकरणादौ घञ्। १वह्निशिखायां २शङ्कौ (गोँज) अमरः। ३स्तम्भे (खोँटा) ४लेशे ४कफोणौ मेदि॰। ५कफोणिनिम्नदेशे विश्वः। "परिखाश्चापि कौरव्य! कीलैः सुनिचिताः कृताः" भा॰ ३, ६५०श्लो॰ ६रतिप्रहारभेदे स्त्री "कीला उरसि, कर्त्तरी शिरसि, विद्धा कपोलयोः" वात्स्या॰ भाव अ,७वन्धे स्त्री

कीलक पु॰ कीलति बध्नात्यनेन करणे घञ् स्वार्थे क। १स्तम्भभेदे (खोँटा) गवादेर्दोहनकाले रोधनार्थे २काष्ठमयस्तम्भे सुभूतिः। तन्त्रोक्ते देवताभेदेश्मन्त्रविशेषे न॰। प्रभवादिषष्टिवर्षमध्ये ४ वर्षभेदे तत्फलञ्च "जायन्ते सर्वशस्यानि सुभिक्षं निरुपद्रवम्। सौम्यदृष्टि र्भवेद्राजन्! कीचके च शुभं भवेत्" ज्यो॰ त॰ सप्तशतीजपाङ्गतया पाठ्ये ५स्तवभेदे न॰ स च "सर्वमेतद्विना यस्तु मन्त्राणामपि कीलकम्" इत्यादि। तस्य च कीलकत्वम् तज्ज्ञानं विना फलाजनकत्वात् तदुक्तं तत्रैव "कृष्णायां च चतुर्दश्यामष्टम्यां वा समाहितः ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति" इत्थं रूपेण कीलेन महादेवेन कीलितम्। यो निष्कीलां विधायैनां नित्यं जपति सम्पुटाम्"। तत्रैव तज्ज्ञानस्या भावे निष्फलत्वोक्तेश्च तच्च गुरुलघुभेदेन द्विविधं गुप्तवत्यां विवृतिः"। तेन कृष्णाष्टमीचतुर्दश्योः नूतनार्जितधनस्य देवातिथ्यादिभ्यो यथोचितांशदानं तदवशिष्टस्य स्वायत्तीकरणमावश्यकं तद्विना सप्तशतीजपस्य न फलजनकत्वमिति गम्यते "अर्गलं कीलकं चादौ पठित्वा कवचम् पठेत्" तत्रैव

कीलसम्पर्श पु॰ कीलं तदुपकारं संस्पृशति सम्+स्पृश–अण् उप॰स॰। (गाव)इत्यभेदे शब्दच॰

कीलाल पु॰ कीलाय बन्धाय अलति पर्य्याप्नोति अल–अच् ४त॰। १पशौ२बन्धनयोग्ये त्रि॰ मेदि॰। "कीलां दह्निशिखां कीलं स्तम्भबन्धं वाऽलति वारयति अल–अण् उप॰स॰। ३जले कीलां तद्वर्णमलति याति। ४रुधिरे न॰ अमरः ५अमृते ६मधुनि च शब्दर॰। मधुनः शीघ्रसंघाहकत्वेन बन्धहेतुत्वात् तथात्वम्। "ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम्" यजु॰ २,४,७। ७रसे पु॰। "अथोअन्नाय कीलालः उपकूतो मृह्णेषु" यजु॰ ३,१२, तत्र रुधिरे "सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैः"। जले"कीलालजं न खादेयं करिष्ये चासुरव्रतम्"। भा॰श॰अ॰"कीलालजं जलजम्"।

कीलालधि पु॰ कीलालं धीयतेऽस्मिन् धा–आधारे कि ६त॰। समुद्रे शब्दच॰

कीलालप पुंस्त्री कीलालं रुधिरं पिबति पा–क। रुधिरपे राक्षसे रत्नमा॰ स्त्रियां ङीष् "स च कीलालोपयस्तु पराक्षं भोक्तुमिच्छति" भा॰व॰१२२४१। [२बन्धे न॰।

कीलित त्रि॰ कील–क्त। १बद्धे २जातकीले च भावे–क्त।

कीयत् त्रि॰ कियत् +पृषो॰ वेदे नि॰ दीर्घः। कियदित्यर्थे "आः कीयतः ललूकं चकर्थ" ऋ॰ १,२०,१७,

कीश पुंस्त्री कस्य वायोरपत्यम् अत–इञ् किः हनुमान् ईशो यस्य कुत्सितं शेते शी–ड वा। वानरे अमरः स्त्रियां जातित्वात् ङीष्। २सूर्य्ये कपिकपोलतुल्यवर्णत्वात् तस्य ३पक्षिणि च शब्दर॰कुत्सितशयनात्तस्य तथात्वम्। ४नग्ने मेदि॰। कीशवद्वस्त्ररहितत्वात्तस्य तथात्वम्।

कोशपर्णी पु० कोशः तल्लोमेव पर्णमस्य । अपामार्गे शब्दर० । जातित्वेन ङीष् । कोशपर्णीत्यप्यत्र अमरः

कु शब्दे वर्णे च भ्वा० आत्म० अक० अनिट् कवते अकोष्ट चुकुवे प्रनिकवते [अकोष्ट चुकाव

कु आर्त्तस्वरे तुदा० आत्म० अ० क० अनिट् । कुटादि । कुवते

कु शब्दे अदा०पर०अक०अनिट् । कौति अकौषीत् चुकाव

कु अव्य० कु+डु । १पापे, २निन्दायाम्, ३ईषदर्थे, ४निवारणे च । ५भूमिभागे ६धरायाञ्च स्त्री । कुत्सितार्थत्वे ईषदर्थत्वे चास्य "कुगतिप्रादयः" "पा० समर्थेन नित्यसमासः कुरूपम् कुदेशः तत्रायं भेदः तत्पुरुषे अजादौ शब्दे परे कोः कत् । कुत्सितोऽश्वः कदश्वः कदन्नम्कदध्वः कदग्निः ।"रथवदयोश्च"पा०कद्रथः कद्वदः"तृणे च जातौ"पा० कत्तृणम् पथिशब्दे तत्समासान्ताक्षशब्दे परे च कादेशः कापथः काक्षः । ईषदर्थस्य कोः का, ईषज्जलं काजलम् पुरुषे परे का वा ईषत् पुरुषः कुपुरुष कापुरुषः । उष्णे उक्तत्वयादेशः कोष्णं कवोष्णं कदुष्णम्" गतिप्रादिसाहचर्य्यात् अव्ययस्यैवेह ग्रहणात् न भूमिवाचस्य नित्यसमासः नवा कदादेशः अव्ययपूर्व्वकत्वात् प्रकृतिस्वरः, "राहुः कुभामण्डलगः शशाङ्कं ग्रस्ते""ज्यो०ब्राह्मण इव कुशासनसहितः" काद० । कुदिनम् कुजः अव्ययस्य वेदे दीर्घः"कूष्ठोदेवावश्विनाद्याद्दिवोमनावसू" ऋ०५,७४,१ ।

कुंसा स्त्री कुसि—भावे अ । १भाषणे २ज्ञापने च

कुक आदाने भ्वा० आत्म०सक० सेट् । कोकते । अकोकिष्ट । चुकुके कोकः' प्रनिकोकते

कुक त्रि० कुक—क । १समर्थे २आदायिनि च ।

कुकभ न० कुकस्य भा यत्र । मद्ये शब्दच० । तत्पानस्य सामर्थ्याधायकत्वात् तथात्वम्

कुकर पु० कुत्सितःआदानादिमान्द्यमुक्तः करोयस्मात् । करस्य क्रियामान्द्यसम्पादके कुणिरोगे अमरः । ब०व० २तद्रोगयुक्ते त्रि० । कु+कृ—ट । ३कुकर्म्मकारके त्रि० ।

कुकर्म्मन् न० कुत्सितं कर्म्म नित्यस० । १शेकशास्त्रनिन्दिते कर्म्मणि ब०त० । २तद्युक्ते त्रि० स्त्रियां वा डाप्

कुकील पु० कोः पृथिव्या । कीलइव । पर्व्वते त्रिका० तस्य भूमौ कीलरूपेणावस्थानात् तथात्वम्

कुकुट पु०कौ कुटति कुट—क, कोः कुटइव वा । (सुषुणि) इतिख्याते शाकभेदे राजनि० तस्य पृथिव्याः कुटतुल्यत्वात् तथात्वम्

कुकु(कू)द पु० कोः पृथिव्याः कुद ईषद्दः । सत्कृतालङ्कृतायाः कन्याया दातरि पृषो० दीर्घपाठः इत्यन्ये । कन्यादस्य ईषद्भूमिदानसमत्वात्तस्य तथात्वम् । सत्कृतालङ्कृतां कन्यां ददानः ककुदः स्मृतः" अमरे पाठान्तरम्

अत्र प्रसिद्धपदसान्निध्यात् कुकुदपदस्य उक्तार्थे शक्तिग्रह इति शब्द० प्र० । प्रसिद्धपदसान्निध्यञ्च प्रसिद्धार्थपदसामानाधिकरण्यम् सामानाधिकरण्यञ्च अभेदेनान्वयबोधकत्वम् । न्यायमते तिङर्थस्याभेदेन प्रथमान्तार्थे अन्वयासम्भवेन "यो ददाति स कुकु(कू)दः इत्यमर पाठे स्थिते ददातीतिस्थाने ददान इति पाठः कल्पितः । व्याकरणमते तु तिङन्तार्थस्य प्रथमान्तार्थेऽभेदेनान्वयस्वीकारान्न यथाश्रुतपाठेऽपि क्षतिः । विवेचितं चैतदस्माभिः शब्दार्थरत्ने तत एव तदवसेयम् ।

कुकुन्दर पु० कुं भूमिं दारयति अन्तर्भूतण्यर्थे दृ—अच् नि० कुत्सितं कुन्दरमत्र, स्कुद्यते कामिनाऽत्र स्कुदु नि० वा । स्त्रीणां १नितम्बस्थे आवर्त्ताकारे पृष्ठवंशादधोवर्त्तिगर्त्तद्वये । अमरः । (कुकुरसोङ्गा) २वृक्षे भावप्र० ।

कुकुभा स्त्री रागिणीभेदे हलायुधः ।

कुकुर पु ०कुं पृथिवी० कुरति त्यजति स्वामित्वेन कुर—क । यदुवंशीयनृपभेदे तेषां ययातिशापात् राज्यं नास्तीति पुराणकथा यदुशब्दे दृश्या । "विधुरि ताः धुरिताः"कुकुरस्त्रिय"·माघः । २दशार्हे देशभेदे पु० ब०व० । कुक—उरच् किच्च । ३कुकुरे हड्डचन्द्रः । ४धन्यिपर्णीपर्य्यौ त्रिका० । कुकुरन्टपश्चान्त्रकण्ठभेदः । "कुकुरः भजमानशुचिकम्बलबर्हिषास्तथान्धकस्य पुत्राः" इति विष्णुपु० "कुकुरो भजमानश्च शुचिः कम्बलबर्हिषः । "अन्धकान् काश्यदुहिता चतुरोलभतात्मजान् कुकुरं भजमानं च शमं कम्बलबर्हिषम्" हरिवं० २८अ० तदधिष्ठानदेशभेदश्च दशार्हः ।

कुकूटी स्त्री कोः पृथिव्याः कूटोऽस्त्यस्याः अच् गौरा०ङीष् । शाल्मलीवृक्षे राजनि० तस्या दीर्घतया भूमिकूटतुल्यत्वात्तथात्वम् ।

कुकूल पु० कोः भूमेः कूलं, कुत्सितं वा कूलम् कु—ऊलच् धातोः कुगागमश्च वा । १तुषानले २शङ्कुभिः सङ्कीर्णे ३गर्त्ते ४वर्म्मणि च अमरः । "शिरीषादपि मृद्वङ्गी केयमायतलोचना । अयं क्व च कुकूलाग्निः कर्कशो मदनाऽनलः" ।

कुकोल न० कुत्सितं कोलति कुल—अच् । कोलिवृक्षे । शब्दच० ।

कुक्कुट पुंस्त्री०कुक—सम्प०क्विप् कुका आदानेन कुटति कुट—

क। पक्षिभेदे चरणायुधे १ताम्रचूडे स्त्रियां जातित्वात् ङीष्। तस्य शुभाशुभलक्षणमुक्तम् वृ०सं० यथा—
"कुक्कुटस्त्वृजुतनूरुहाङ्गुलिस्ताम्रवक्त्रनखचूलिकः सितः। रौति सुस्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम्। यवग्रीवो यो वा बदरसदृशो वापि विहगो बृहन्मूर्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः। स शस्तः सङ्ग्रामे मधुमधुपवर्णश्च जयकृन्न शस्तो योऽतोऽन्यः कृशतनुरवः खञ्जचरणः। कुक्कुटी च मृदुचारुभाषिणी स्निग्धमूर्त्तिरुचिराननेक्षणा। सा ददाति सुचिरं महीक्षितां श्रीयशोविजयवीर्यसम्पदः"।
तन्मांसगुणा भावप्र० उक्ता यथा "कुक्कुटो वृंहणः स्निग्धो वीर्य्योष्णोऽनिलहृद्गुरुः। चक्षुष्यः शुक्रकफकृत् बल्यो वृष्यः कषायकः। वातपित्तक्षयवमिविषमज्वरनाशनः"। अभक्ष्यप्रकरणे ग्राम्यकुक्कुटस्याभक्ष्यत्वमाह मनुः "छत्राकं विड्वराहं च लशुनं ग्राम्यकुक्कुटम्" २हस्तोल्कायां (उल्को) ३कुक्कुभखगे च ४वह्निकणे स्फुलिङ्गे हेम०। स्वार्थे क तत्रार्थेषु मेदि०। "शूद्राज्जातो निषादायां तु स वै कुक्कुटकः स्मृतः" मनूक्ते निषादीजाते शूद्रपुत्रे च

कुक्कुट(टी)व्रत न० भाद्रशुक्लसप्तम्यां कर्त्तव्यव्रतभेदे "भाद्रे मासि सिते पक्षे सप्तम्यां नियमेन या। स्नात्वा शिवं लेखयित्वा मण्डले च सहाम्बिकम्। पूजयेच्च तदा तस्या दुष्प्रापं नैव विद्यते" ति०त० भवि०पु०। इदं कुक्कुटीव्रतमिति ति० त० रघुनन्दनः

कुक्कुटमण्डप काशीस्थे मुक्तिमण्डपे स्थाने। तस्य तन्नामकारणकथा च काशी० ६८ अ० दर्शिता यथा—
"कैवल्यमण्डपस्यास्य भविष्यद्द्वापरे हरे!। लोके ख्यातिर्भवित्रीयमेष कुक्कुटमण्डपः" इति शिवेनोक्ते तद्विषये हरिप्रश्ने यथा तस्य कुक्कुटमण्डपनामप्राप्तिस्तथेतिहासो वर्णितः। तत्र चण्डालतः प्रतिग्राहकविप्रस्य सुतद्वयपत्नीभ्यां सहितस्य कीकटे कुक्कुटयोनित्वप्राप्तिमुपवर्ण्य तस्य मरणकाले काशीस्मरणजात् पुण्यात् कुक्कुटयोनिगतावपि काशीप्राप्त्या मुक्तिरित्युक्तम् यथा "न काश्यां मरणं प्राप्तं तस्माद् दुष्प्रतिग्रहात्। प्रान्ते कुटुम्बस्मरणात्तथा काशीस्मृतेरपि। चौरैर्हतोऽपि स तदा कीकटे कुक्कुटोऽभवत्। सा कुक्कुटी सुतौ तौ तु ताम्रचूडत्वमापतुः। प्रान्ते काशीस्मरणतोजाता जातिस्मृतिः पुरा। इत्थं बहुतिथे काले गते कार्पटिकोत्तमाः। तस्मिन्नेवाध्वनि ग्रामाश्चत्वारो यत्र कुक्कुटाः। वाराणस्याः कथां प्रोचुः कुर्वन्तोऽन्योन्यमेव हि। काशीकथां समाकर्ण्य तदा ते चरणायुधाः। जातिस्मृतिप्रभावेन तत्सङ्गेन तु निर्गताः। तैश्च कार्पटिकश्रेष्ठैः पथि दृष्टाः कृपालुभिः। तण्डुलादिप्रक्षेपैः प्रापिताः क्षेत्रमुत्तमम्। ते तु क्षेत्रं समासाद्य चत्वारश्चरणायुधाः। चरिष्यन्तोऽत्र परितो मुक्तिमण्डपमुत्तमम्। जिताहारान् सनियमान् कामक्रोधपराङ्मुखान्। शृण्वतः सत्कथालापान् लोभमोहविवर्ज्जितान्। स्वर्धुनीस्नानसंक्लिन्नसुनिर्मलशिरोरुहान्। महामोङ्कारजपपरान् मत्कथार्पितसुश्रुतीन्। मद्गतचित्तसद्वृत्तीन् दृष्ट्वा क्षेत्रनिवासिनः। मानयामासुरथ तान् कुक्कुटान् साधुवर्त्मनः। प्राक्तनाद्यासनायोगात् संप्रधार्य्य परस्परम्। क्रमेणाहारभाक्त्वञ्च प्राणांस्त्यक्ष्यन्ति चात्र ते। पश्यतां सर्वलोकानां विष्णो! ते मदनुग्रहात्। विमानमधिरुह्याशु कैलासं प्राप्य मत्पदम्! निर्विश्य सुचिरं कालं दिव्यान् भोगाननुत्तमान्। ततोऽत्र ज्ञानिनोभूत्वा मुक्तिं प्राप्स्यन्ति शाश्वतीम्। ततो लोकास्तदारभ्य कथयिष्यन्ति सर्वतः। मुक्तिमण्डपनामैतदेष कुक्कुटमण्डपः"। [(चन्द्र)। राजनि०

कुक्कुटमस्तक पु० कुक्कुटस्येव मस्तकं शिखा यस्य। चव्ये

कुक्कुटशिख पु० कुक्कुटस्य शिखेव शिखा यस्य। कुसुम्भवृक्षे शब्दच० तस्य हि पुष्पाणि कुक्कुटशिखातुल्यानीति तस्य कुक्कुटतुल्यरक्तशिखपुष्पत्वात्तथात्वम्

कुक्कुटागिरि पु० कुक्कुटप्रधानोगिरिः किंशुलुका० दीर्घः। कुक्कुटप्रधाने पर्वते

कुक्कुटाण्ड पु० कुक्कुट्या अण्डः पुंवद्भावः। कुक्कुट्याण्डे

कुक्कुटाभ पुंस्त्री कुक्कुट इवाभाति आ+भा—क। कक्कुटचरणतुल्ये सर्पभेदे हेमच० स्त्रियां जातित्वात् ङीष्।

कुक्कुटासन न० "कुक्कुटासनमावध्य नाड़ीनिर्म्मलहेतुना। सत्कुलागममार्गेण कुर्य्यात् वायुनिरोधनम्। निजहस्तद्वयं भूमौ पातयित्वा जितेन्द्रियः। पद्भ्यां बद्धं यत् करोति कर्परद्वयमध्यगम्। सव्यापसव्ययुगलं तत्कुक्कुटासनमुच्यते" इति रुद्रयामलोक्ते आसनभेदे [हेमच०।

कुक्कुटाहि पु० कुक्कुट इव तच्चरणइवाहिः। सर्पभेदे

कुक्कुटि स्त्री कुक्कुट इवाचरति कुक्कुट+आचारार्थे क्विप् ततः इन्। दम्भचर्य्यायाम् हेमच०। वा ङीप्। तत्रैव। सा च २कुक्कुटजातिस्त्रियाम् ३ज्योत्स्नाम् (टिक्टिकी) कीटभेदे शब्दरत्ना०। ४शाल्मलीवृक्षे जटा०

कुक्कुभ पु० कुक् इत्यव्यक्तं शब्दं कौति कु—भक्। वन

कुक्कुटे। कुक्कुशब्दं भाषते भाष–बा० ड। २कुक्कुटे पक्षिणि। (पातुकुका) इति ख्याते ३पक्षिभेदे अमरः।

कुक्कुर पुंस्त्री कोकते क्विप् कुरति शब्दायते कुर–शब्दे क कर्म्म०। १स्वनामख्याते पशौ। तच्छुभाशुभलक्षणमुक्तं वृ०स० यथा "पादाः पञ्चनखास्तथापरचरणः षड्भिर्नखैर्दक्षिण-स्ताम्रोष्ठाग्रनसो मृगेश्वरगतिर्जिघ्रन् भुवं याति च। लाङ्गूलं ससटं दृगृक्षसदृशी कर्णौ च लम्बौ मृदू यस्य स्यात् स करोति पोष्टुरचिरात् पुष्टां श्रियं श्वा गृहे। पादेपादे पञ्च पञ्चाग्रपादे वामे यस्याः षण्नखा मल्लिकाक्षाः। वक्रं पुच्छं पिङ्गलालम्बकर्णा या सा राष्ट्रं कुक्कुरी पाति पोष्टुः"। स्त्रियां जातित्वात् ङीष्।

कुकुरगुणाश्चाणक्येनोक्ताः यथा "बह्वाशी स्वल्पसन्तुष्टः सुनिद्रः शीघ्रचेतनः। प्रभुभक्तश्च शूरश्च षडेते च शुनो-गुणाः"। २ग्रन्थिपर्णीवृक्षे न० शब्दचि०।

कुक्कुरद्रु पु० कुक्कुरस्तद्गन्धयुक्तोद्रुर्वृक्षः। (कुकुरशोङ्गा) क्षुपभेदे "कुक्कुरद्रुः कटुस्तिक्तो ज्वररक्तकफापहः। तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत्" भावप्र०।

कुक्करवाच् पु० कुक्कुरस्येव वागस्य। सारङ्गमृगे राजनि०

कुक्ष पु० कुष– क्स। जठरे उज्ज्वलदत्तः।

कुक्षि पु० कुष–क्सि। १उदरे "विपुलेन सागरशयस्य कुक्षिणा" माघः "कुम्भीनस्याश्च कुक्षिजः" रघुः। "तव कुक्षौ महाभागे!! अचिरात् संजनिष्यते" रामा० २उदरस्य वामदक्षिणपार्श्वयोश्च(कोँक) अमरः। ३मध्यभागे "ततः सागरमासाद्य कुक्षौ तस्य महोर्म्मिणः" भा०व०७६अ०। कुक्षौ भवः अण्। कौक्ष उदरभवे मध्यभवे च त्रि०स्त्रियां ङीप्। कुक्षौ बद्धोऽसिः ढकञ्। कौक्षेयकोऽसिः। कुक्षिदेशे भवः धूमा० वुञ्। कौक्षक मध्यदेशभवे त्रि०।

कुक्षिम्भरि त्रि० कुक्षिं बिभर्त्ति भृ–खि–मुम् च। देवातिथि-वञ्चनेनात्मोदरमात्रपूरके कृपणे।

कुक्षिरन्ध्र पु० कुक्षौ मध्यभागे रन्ध्रं छिद्रं यस्य नल रायमु०।

कुक्षिशूल न० कुक्षौ शूलः। सुश्रुतोक्ते शूलरोगभेदे "प्रकुप्यति यदा कुक्षौ वह्निमाक्रम्य मारुतः। तदास्य भोजनं भुक्तं सोपष्टम्भं न पच्यते। उच्छ्वसित्यामशक्तता शूलेनाहन्यते मुहुः। नैवासने न शयने तिष्ठन् लभते सुखम्। कुक्षिशूल इति ख्यातो वातादाटोपसुद्भवः" सुश्रु०। तस्य क्लीवत्वमपि "हृत्कुक्षिशूलं मुखकण्ठशोषः" सुश्रुतः

कुङ्कुम न० कुक्यते आदीयते कुक–आदाने–उमक् नि० मुम्। काश्मीरादिदेशजे स्वनामख्याते १गन्धद्रव्यभेदे। देशभेद-विशेषजातस्य तस्य लक्षणादि भावप्रकाशे दर्शितं यथा– "काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत्। सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम्। बाह्लीकदेशसंजातं कुङ्कुमं पाण्डुरमतम्। केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम्। कुङ्कुमं पारसीके यन्मधुगन्धि तदीरितम्। ईषत्पाण्डुरवर्णं यदधमं स्थूलकेशरम्। कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित्। तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम्" [तद्भेदे

कुङ्कुमाद्रि पु० कुङ्कुमस्याकरोऽद्रिः। काश्मीरदेशस्थे पर्व्व-

कुङ्कुमी स्त्री कुङ्कुमवर्णोऽस्त्यस्याः अच् गौरा०ङीष्। महाज्योतिष्मतीलतायाम् राजनि०। पृषो० कुङ्कुनीति पाठान्तरम् तत्रैवार्थे

कुच रोधे, सम्पर्के लेखने च सक० कौटिल्ये अक० तु०पर०सेट् कुटादि। कुचति अकुचीत् चुकोच कुचः। प्रनिकुचति

कुच पु० कुच–कर्त्तरि क। स्तने। स्त्रीणां कुचवृद्धिर्यौवने यथाह सुश्रुतः "स्त्रीणां तु त्रिंशतिरधिका दश तासां स्तनयोरेकैकस्मिन् पञ्च पञ्च, यौवने तासां परिवृद्धिः" इति विवृतञ्चैतत् भावप्र० यथा– "पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते। तेषां तदेव तारुण्ये पुष्टत्वाद्व्यक्तिमेति हि। कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा। रोमराज्यादयः पुंसां नारीणामपि यौवने। जायतेऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च। व्याख्यानं यथा पुंसां रोमराजीश्मश्रुप्रभृतयः नारीणान्तु रोमराजीस्तनार्त्तवप्रभृतयः"। "यावन्नोतद्भिद्येते स्तनौ तावद्देया" इति स्मृतौ कुचोद्भेदकालात् पूर्व्वं दानं विहितम्। स च कालः द्वादशवर्षादिः, "स तदुच्चकुचौ भवन् प्रभाझरचक्रभ्रमिमातनोति यत्" नैष० "सकठिनकुचचूचुकप्रणोदम्" "नत्युन्नतत्वात् कुचमण्डलेन" "कौसुम्भं पृथुकुचकुम्भसङ्गिवासः" माघः "तन्वि! तव कुचावेतौ नियतं चक्रवर्त्तिनौ" उद्भटः "पितुर्गृहे चेत् कुचपुष्पसम्भवः" ज्यो० २सङ्कुचिते त्रि०

कुचण्डी स्त्री कुत्सिता चण्डी विकारकारित्वात् कोपनेव। मूर्वालतायाम् शब्दचि०। स्वार्थे क। कुचण्डिका तत्रैव।

कुचतट त्रि० कुचस्तटमिव विशालत्वात्। विशाले १कुचे ६त०। २कुचैकदेशे च।

कुचन्दन न० कुत्सितं गन्धहीनत्वात् चन्दनम्। (बकमकाठ) १काष्ठभेदे मेदि० २रक्तचन्दने अमरः। इदं सुश्रुते पटोलादिगणे शालसारादिगणे चोक्तम् तत्तच्छब्दे विवृतिः

३कुङ्कुमे शब्दचिन्ता० । रक्तचन्दनतुल्यत्वात्तस्य तथात्वम्

कुचफल पु० कुचइव फलमस्य । दाड़िम्बवृक्षे राजनि० ।

कुचर त्रि० कुत्सितं चरति चर—अच् । १परदोषकथनशीले । हेमच० कुत्सिते स्थाने चरति चर—अच् । २दुर्गमदेशगन्तरि "न भीमः कुचरोगरिष्ठाः" ऋ १, १५४,२, "कुचरः कुत्सितहिंसाकर्त्ता दुर्गमदेशगन्ता वा" भा० कौ चरति चर—ट । ३भूमिचरे त्रि० । स्त्रियां ङीप्

कुचाग्र पु० ६त० । चूचुके कुचयोरग्रभागे अमरः ।

कुचाङ्गेरी स्त्री—कुत्सिता चाङ्गेरी । (चुकपालङ्ग) चुक्रे शाकभेदे रत्नमा० चुक्रशब्दे गुणादि

कुचिक पुंस्त्री० कुच—वा० इकन् । (कुँचिया)मत्स्यभेदे स्त्रियां जातित्वात् ङीष् । वृह०सं०कूर्म्मविभावे ऐशान्यामुक्ते देशभेदे "भल्लापलोलजटासुरकुनठखसघोषकुचिकाख्याः" ।

कुचित त्रि० कुच—क्तिच् । परिमिते उज्ज्वलदत्तः ।

कुचेल त्रि० कुत्सितं चेलं वस्त्रमस्य । कुत्सितवस्त्रधरे । कुचा सङ्कुचा इला यस्याः५त०। २विद्धकर्ण्णाम् ३पाठायाम् स्त्री मेदि० गौरा० ङीष् । (आकनादी) ४वृक्षे स्त्री रत्नमा० ।

कुच्छ न कु+छो—क । कुमुदे शब्दच० ।

कुज स्तेये भ्वा० पर० सक० सेट् । कोजति अकोजीत् चुकोज उदित् कुजित्वा कुक्त्वा । प्रनिकुजति

कुज पु० कोः पृथिव्या जायते जन—ड । मङ्गलग्रहे यथा च तस्य तज्जातत्वं तथा आग्नेयशब्दे काशीखण्डवाक्येन दर्शितम् २नरकासुरे तस्य वाराहीरूपायाः पृथिव्याउत्पन्नत्वात् तथात्वम् तत्कथा कालिकापुराणे ३६अ० यथा "यथा स नरकोजातो धरागर्भे महासुरः । रजस्वलाया गोत्रायागर्भे वीर्य्येण पोत्रिणः (वराहस्य) । यतोजातस्ततोभूतो देवपुत्रोऽपि, सोऽसुरः" इत्युपक्रम्य "गर्भसंस्थं महावीर्य्यं ज्ञात्वा ब्रह्मादयः सुराः । गर्भ एव तदा देवशक्त्या दम्भुश्चिरं दृढ़म् । यथाकालेऽपि संप्राप्ते नो गर्भाज्जायते स च । ततस्त्यक्तशरीरस्तु वराहस्तनयैः सह । अतीव शोकसन्तप्ता जगद्धात्र्यभवत् क्षितिः । शोकाकुला सा व्यलपच्चिरकालं मुहुर्मुहुः । प्रकृतिस्था क्षितिर्भूता माधवेन प्रबोधिता । ततः कालेऽपि संप्राप्ते देवशक्त्या यदा धृतः। न गर्भः प्रसवं याति तदाऽभूत् पीड़िता मही । कठोरगर्भा सा देवी गर्भभारं न चाशकत् । यदा वोढुं, तदा देवं माधवं शरणं गता शरण्यं शरणं गत्वा माधवं जगतां पतिम् । प्रणम्य शिरसा देवी वाक्यमेतदुवाच ह" । स्तवप्रसन्नमाधवोक्तिधराप्रत्युक्तिभ्यां त्रेतायुगार्द्धे तदुत्पत्तिकथा— "इति स्तुतो हृषीकेशोजगद्धात्र्या तदा हरिः । प्रादुर्भूतस्तदा प्राह धरित्रीं दीनमानसाम् । श्रीभगवानुवाच । कथं दीनमना देवि ! धरित्रि ! परिदेवसे । तव वा किङ्कृता पीडा वेत्तुमिच्छामि तदहम् । मुखन्ते परिशुष्कन्तु शरीरं कान्तिवर्जितम् । आकुलं नयनद्वन्द्वं भ्रू विभ्रमविवर्जितम् । ईदृशन्तव रूपन्तु दृष्टपूर्व्वं कदा च न । रूपस्य तु विपर्य्यासे दुःखे बीजञ्च भाषय । एतच्छ्रुत्वा वचस्तस्य माधवस्य जगत्पतेः । विनयावनता देवी पृथ्वी प्राह सगद्गदम् । पृथिव्युवाच । गर्भभारं न संवोढुं माधवाहं क्षमाऽधुना । भृशं नित्यं विषीदामि तस्मात्त्वं त्रातुमर्हसि । त्वया वराहरूपेण मलिनी (ऋतुमती)कामिता पुरा । तेन कामेन कुक्षौ मे स्थयं गर्भोऽयमास्थितः । काले प्राप्ते स गर्भोऽयं न प्रच्यवति माधव ! । कठोरगर्भा तेनाहं पीडितास्मि दिनेदिने । यदि न त्रासि मां देव ! गर्भदुःखाज्जगतपते ! । न चिरादेव यास्यामि त्वत्तोर्वं शमसंशयम् । कदापि नेदृशोगर्भो धृतोमाधव ! वै पुरा । योऽचलां चालयति मां सरसीमिव कुञ्जरः । एतच्छ्रुत्वा वचस्तस्याः पृथिव्याः पृथिवीपतिः । आह्लादयन् प्रत्युवाच हरिस्तप्तां लतामिव । श्रीभगवानुवाच । न धरे ते महादुःखं चिरस्थायि भविष्यति । शृणु येन प्रकारेण चानुभूतमिदं त्वया । मलिन्या सह सङ्गेन यो गर्भः संधृतस्त्वया । सोऽभूदसुरसत्त्वस्तु दृष्टेः(वराहस्य) पुत्रस्तु दारुणः । ज्ञात्वा तस्य च वृत्तान्तं गर्भस्य द्रुहिणादयः । देवीभिः शक्तिभिः सुभ्रूस्तव कुक्षौ धृतं खरम् । सर्गादौ यदि जायेत भवत्यास्तादृशः सुतः । भ्रंशयेत् सकलाल्लोकान् क्षोणिमान् ससुरासुरान् । अतस्तस्य बलं वीर्य्यं ज्ञात्वा ब्रह्मादयः सुराः । प्राक्सृष्टिकाले ते गर्भं तदाऽधुर्जगतां कृते । अष्टाविंशतिमे प्राप्ते आदिसर्गाच्चतुर्युगे । त्रेतायुगस्य मध्ये तु सुतं त्वं जनयिष्यसि । यावत् सत्ययुगं याति त्रेतार्द्धञ्च वरानने ! । तावदिह महागर्भं दत्तः कालोमया तव । न यावज्जायते धात्रि ! गर्भस्ते ह्यतिदारुणः । तावद्गर्भवती दुःखं न त्वं प्राप्स्यसि भाविनि !" "ये च प्रलम्बखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाः कुजपौण्ड्रकाद्याः" भाग० २ ७,३६ । "तत्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्" भाग०३,३,८श्लो० । "कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम्" "ज्यो०" मङ्गलग्रहस्य चारादिकमङ्गारकशब्दे ७८४पृ० उक्तम् । कस्य

तदीयभगणादिकमुच्यते "युगमयुगमशरनागलोचनव्यालपक्षवयमाश्विनोऽङ्गजः" ६६८२८५२२ सि०शि०। कल्पे एतावन्तः कुजस्य भगणाः अस्योपपत्त्यादिकं ग्रहभगणमध्ये दर्शयिष्यते। तस्य चलोच्चभगणमानञ्च तत्रैवोक्तम् "अर्कशुक्रबुधपर्य्यया वियदक्षि कोटिगुणिता रदाब्धयः ४३२००००००० एतएव शनिजीवभूभुवां कीर्त्तिताश्च गणकैश्चलोच्चकाः" तत्पातस्य भगणास्तत्रैवोक्ताः "कुभद्रसाश्विनः" २६७, तस्य मन्दकेन्द्रभगणमानं निबन्धे "खरामाभ्रछिद्रषट्षड्गोद्विदस्राः" २२९६८२८२३०। "शीघ्रकेन्द्रभगणाः" गजाद्रिमनुसप्तेन्दुत्र्यश्विखाश्विमिताः" २०२३१७-१४७८, । तस्य कक्षामानम् श्रीपतिनोक्तं यथा "अब्ध्यब्धब्धमनुगजाः क्षितिनन्दनस्य" ८१४६६९१५ योजनानि-मध्यमकुजस्फुटीकरणम् सि०शि०प्रमि०दर्शितं यथा "दिनगणार्धमयो गुणसंगुणं द्युगणसप्तदशांशविवर्जितम्। लवकलादिफलद्वयसंयुतः क्षितिसुतध्रुवकः क्षितिजो भवेत्" सि०शि०। "अत्रोपपत्तिः। दिनगणार्द्धे भागा इति प्रत्यहं त्रिंशत् कला गृहीताः। तत् पृथक् त्रिगुणं जातम् एताः कलाः पूर्वकलाभिर्मीलिता जाताः। एतत् कुजगतेरधिकमतोऽतः कुजगतिं विशोध्य शेषम्। अनेन सप्तदशगुणेनैका कला भवति। अत उक्तं द्युगणसप्तदशांशविवर्जितमिति। पूर्वफलेन भागादिनाऽनेन च कलादिना भौमध्रुवक२२७०युक्तः कुजो भवति। यतोऽयमहर्गणोऽर्कोदयाल्लङ्काद्धूर्ध्वमतस्तदुत्थं फलं रविमण्डलान्तिके योज्यमित्युपपन्नम्" प्रमि०

कुजस्य ध्रुवकमानं "तत्रैवखाद्रिरामाम्नय":२२७०। तथाच कलेरारम्भे राशिचक्रस्यविकलाभ्यो ध्रुवकेण हीनशायां तत्काले ११।२९।२।५०। राश्यादि कुजध्रुवकः तस्य मन्दशीघ्रपरिधी तत्रैव उक्तौ यथा

"मन्दोच्चनीचपरिधिस्त्रिलवोनशक्र १४भागा रवेर्जिन २४कलोम२२रदा हिमांशोः। खाश्वा७० भुजङ्गदहना ३८अमरा३३भवाश्च११ पूर्वेषवो५० निगदिताः क्षितिजादिकानाम् सि०शि०" इह ग्रहफलोपपत्त्यर्थं मन्दोच्चनीचवृत्तानि पूर्वैः कल्पितानि तेषां प्रमाणान्येतावन्तो भागाः। अत्रोपपत्तिः ग्रहस्य यन्त्रवेधविधिना यत् परमं फलमुत्पद्यते तस्य ज्या परमा फलज्या परमफलज्याऽन्त्यफलज्या चोच्यते। अन्त्यफलज्यातुल्यव्यासार्द्धेन यद्वृत्तमुत्पद्यते तन्नीचोच्चवृत्तम्। तत्परिधिस्त्रैराशिकेन। यदि त्रिज्याव्यासार्द्धे भागाः परिधिस्तदान्त्यफलव्यासार्धे किमिति लब्धं परिधिभागाः। एवमर्कादीनां त्रिलवोनशक्रा इत्याद्य उत्पद्यन्ते। अथ भौमादीनां चलपरिधीनाह" प्रमि०। "एषां चलाः कृतजिना२४४स्त्रिलवेन हीना दन्तेषवो ५।३२वसुरसाङ्ग६८वसुबाणदस्राः २५८। पूर्णाश्रयो ४०ऽथ भृगुजस्य तु मन्दकेन्द्र--दोःशिञ्जिनी द्विगुणिता त्रिगुणेन भक्ता। लब्धेन मन्दपरिधीरहितः स्फुटः स्यात् तच्छीघ्रकेन्द्रभुजमौर्व्यथ बाणनिघ्नी। त्रिज्योद्धृतायुपरिधिः फलयुक् स्फुटः स्याद्भौमस्य केन्द्रपदगत्यगताल्पजीवा। त्र्यंशोनशैल७गुणितार्व ७युतस्य राशेर्मौर्व्योद्धृताप्तलवहीनयुतं स्वदूरम्। भौमस्य कर्किमकरादिगते स्वकेन्द्रे लब्धांशकैर्विरहितः परिधिस्तु शैघ्र्यः"।

भौमस्य भूमध्यादुच्छ्रितियोजनानि सि०शि० "गोकुरसस्व पक्षवसूर्य्यसंख्याः" १२८६६१९। तस्य कालांशाः शैलभुवः १७। अस्य क्षेत्रं मेषवृश्चिकौ, उच्चं मकरः परमोच्चं मकरस्याष्टाविंशोऽशः। नीचः कर्कटः तदीयाष्टाविंशोऽशः सुनीचः। मूलत्रिकोणं मेषस्य दशमोंऽशः। रविचन्द्र जीवामित्राणि बुधोरिपुः, शुक्रशनी समौ। चतुर्थे अष्टमे चास्य पूर्णदृष्टिः। विषमराशिषु मेषमिथुनादिषु प्रथमपञ्चांशा अस्य त्रिंशांशाः समराशिषु वृषकर्कटादिषु शेषपञ्चांशा अस्य त्रिंशांशाः। अष्टोत्तरीयनाक्षत्रिकदशायां तस्य अष्टौ वर्षा दशाभोग कालः। विंशोत्तरीयनाक्षत्रिकदशायां तु सप्त वर्षाः। नक्षत्रकक्षायाम् अयं शनेरधस्तृतीयकक्षायां वर्त्तते, अयं रवितस्तृतीयवारेशः। अयं दक्षिणाशाधिपतिः अतस्तद्वारे दक्षिणदिग्गतिः प्रशस्ता। अयं पापग्रहः क्षत्रियवर्णः भारद्वाजगोत्रः अवन्तिदेशभवः मेषवाहनः चतुर्भुजः रक्तवर्णः। तस्य स्कन्दोऽधिदेवता पृथिवी प्रत्यधिदेवता। पूजने रक्तचन्दनं रक्तवस्त्रम् जवादिरक्तपुष्पं सर्ज्जरसयुक्तसिह्लकं धूपः, यावकं नैवेद्यं पूगं फलम् प्रवालं रत्नं रक्तवृषभो दक्षिणा। तस्य दौस्थ्योपशमनाय विप्राय रक्तवृषभं रक्तवस्त्रं प्रवालं दद्यात् स्वयं वा प्रवालं धारयेत्। अनन्तमूलं वा धारयेत्। होमे धूमकेतुरग्निः खादिरी समित्। कुजवारे दिवा२यामार्द्धे वारवेला ६षष्ठे कालवेला रात्रौ २द्वितीये कालवेला। अयं पुंग्रहः दक्षिणदिग्बली। अयं रजोगुणप्रकृतिः, तिक्तरसप्रधानः सामवेदाधिपः तरुणमूर्त्तिः पैत्तिकः कृशमध्यः। अस्य राशिभोगकालः ४५दिनानि। जन्मराशितः षष्ठे तृतीये

एकादशे चायं शुभः। "विक्रमायरिपुगः कुजःशुभः स्यात्तदान्यसुतधर्म्मगैः खगैः। चेन्न विद्ध इनसूनुरप्यसौ" ज्यो॰त॰ उक्तस्थानेषु अन्यग्रहासत्त्वे शुभदः अन्त्यसुतधर्म्मस्थितोऽयं क्रमेण तृतीयैकादशषष्ठेषु अन्यग्रहैः स्थितैर्वामवेधेन शुद्धः "रक्तस्रावविषास्त्रकर्म्म कुतलुकुकार्य्यं विवादं रणं कुर्य्याद्द्वन्द्वविधिं सुदुष्टदमनम् सेतुप्रभेदं तथा। वृक्षच्छेदनभेदनानि मृगयां चौर्य्यं तथा साहसं सेनान्यं कृषिकर्म्म धातुकरणं भौमस्य लग्ने ऽह्नि वा" ज्यो॰त॰। उक्तकर्म्म तद्वारे तल्लग्ने च शुभदम्। कर्कटराशौ रात्रौ वर्षप्रवेशेऽयं त्रिराशिपतिः, वृश्चिकलग्ने दिने वर्षप्रवेशे अयं त्रिराशिपतिः, मकरराशौ वर्षप्रवेशे दिवानिशोरयं त्रिराशिपतिः वर्षलग्नात् षष्ठस्थानमस्य हर्षपदम् मूलं नी॰ता॰ दृश्यम्। अन्यद्ग्रहशब्दे वक्ष्यते

कुजप पुंस्त्रि॰ कुत्सितं जपति—जप—अच्! कुत्सितजपकारके तस्येदम् अण्। कौजप तत्सम्बन्धिनि त्रि॰ कार्त्तेन सह द्वन्द्वे तस्य प्रकृतिस्वरः पा॰

कुजम्भ त्रि॰ कुत्सितो जम्भोदन्तोऽस्य। १कुत्सितदन्तयुक्ते २असुरभेदे पु॰ "प्रह्लादस्य त्रयःपुत्रा विक्रान्ताश्च महाबलाः। विरोचनश्च जम्भश्च कुजम्भश्चेति विश्रुताः" हरिवं॰ २२६अ॰ "विरोचनानुजश्चैव कुजम्भोनाम वीर्य्यवान्" हरिवं॰ २४२अ॰।

कुजम्भन पु॰ कोः पृथिव्याः जम्भनमिवात्र। सन्धिचौरे हारा॰ तस्य पृथिव्यां सन्धिखननकाले मैथुनवदाचरणात् तथात्वम्। कुजम्भोऽप्यस्य इलच्। कुजम्भिलोऽप्यत्र शब्दरत्ना॰।

कुजा स्त्री कोः पृथिव्याः जायते जन—ड। सीतादेव्यां तस्याः पृथिवीतोजन्मकथा कालि॰ ३७अ॰

"तच्छ्रुत्वा जनको राजा प्रविश्यान्तःपुरं स्वकम्। भार्य्याभिर्मन्त्रयामास यज्ञार्थं पुत्रजन्मने। मन्त्रयित्वा तदा राजा महिषीप्रमुखैः स्वयम्। चतसृभिस्तु भार्य्याभिर्यज्ञार्थं दीक्षितोऽभवत्। ततः पुरोधसं राजा गौतमं मुनिसत्तमम्। तत्पुत्रञ्च शतानन्दं पुरोधायाकरोन्महम्। द्वौ पुत्रौ तस्य सञ्जातौ यज्ञभूमौ परौ स्मृतौ। एका च दुहिता साध्वी भूम्यन्तरगता शुभा। नारदस्योपदेशेन यज्ञभूमिं ततो नृपः। हलेन दारयामास यज्ञवाटावधि स्वयम्। तद्भूमौ जातसीतायां शुभां कन्यां समुत्थिताम्। लेभे राजा मुदा युक्तः सर्व्वलक्षणसंयुताम्। तस्यान्तु जातमात्रायां पृथिव्यन्तर्हिता स्वयम्। जगाद वचनञ्चेदं गौतमं जनकं नृपम्। पृथिव्युवाच। एषा सुता मया दत्ता तव राजन्मनोहरा। एनां गृहाण सुभगां लोकद्वयशुभावहाम्। अनया मे महाभार उद्धृतौ हेतुभूतया। क्षयं यास्यति भारार्त्तिं मोचयिष्यामि दारुणाम्। रावणाद्या महावीराः कुम्भकर्णादयोऽपरे। नाशं यास्यन्ति दुर्द्धर्षाः कृतेऽस्या राक्षसाः परे। त्वञ्च मोदं दुराधर्षं यद्द्दिष्ट कृतं नृप!। अवाप्स्यसि सुराणाञ्च पितॄणामृणशोधनम्"। कुजाः वृक्षा आश्रयत्वेन सन्त्यस्याः अच्। २कात्यायनीदेव्यां मेदि॰ "कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः। विल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिका" इत्युक्तनवपत्रिकाणाम् "तव स्थानमिदं मर्त्ये" इति मन्त्रलिङ्गेन आश्रयणीयत्वोक्तेस्तस्यास्तथात्वम्।

कुजाष्टम पु॰ कुजो मङ्गलग्रहोऽष्टमोयत्र। ज्यो॰ उक्ते जन्मलग्नादष्टमस्थानस्थितमङ्गलग्रहरूपयोगभेदे "सर्व्वगुणान्निहन्त्याशु विलग्नादष्टमः कुजः। अस्तगे नीचगे भौमे शत्रुक्षेत्रगते ऽपि वा। कुजाष्टमोद्भवो दोषो न किञ्चिदपि विद्यते,, ज्यो॰।

कुञ्जिश पुंस्त्री॰ मत्स्यभेदे "कुञ्जिशोमधुरोहृद्यः कषायोदीपनस्तथा। "बल्यः स्निग्धोगुरुर्ग्राही वातहृत् रोचनो मतः" राजनि॰। स्त्रियां जातित्वात् ङीष्।

कुज्या स्त्री सि॰शि॰उक्ते वृत्ताकाराच्चक्रेत्वार्द्धीत्रयवधनुः साधनाङ्गज्यापञ्चकान्तर्गते जीवाभेदे। ज्यापञ्चकं च तत्र दर्शितम् यथा इदानीं पञ्चज्यासाधनमाह। "युक्तायनांशादपमः प्रसाध्यः कालौ च खेटात् खलु भुक्तभोग्यौ। जिनांशमौर्व्या१३९७गुणितार्कदोर्ज्या त्रिज्यो३४३८द्धृता क्रान्तिगुणोऽस्य वर्गम्। त्रिज्याकृतेः ११८१९८४४ प्रोह्य पदं द्युजीवा क्रान्तिर्भवेत् क्रान्तिगुणस्य चापम्। अक्षप्रभासंगुणितापमज्या तद्द्वादशांशो भवति क्षितिज्या। सा त्रिज्यकाघ्नी विहृता द्युमौर्व्या चरज्यकास्याश्च धनुश्चरं स्यात्" सि॰शि॰। "अत्र खेटादित्युपलक्षणम् यस्मात् खेटाल्लग्नाद्वाऽपमः साध्यस्तस्मात् सायनांशादेव। तथा यस्मादुदयसम्बन्धिनौ भुक्तभोग्यकालौ साध्यौ तस्मादपि सायनांशादेव। सायनार्कस्य दोर्ज्या जिनभागज्यया गुणिता त्रिज्यया भक्ता क्रान्तिज्या स्यादित्यादि स्पष्टार्थम्। अस्योपपत्तिः। विषुवत्क्रान्तिवृत्तयोर्याम्योत्तरमन्तरं क्रान्तिः। तयोर्हि संपाते क्रान्त्यभावः। ततस्त्रिभेऽन्तरे परमा जिनतुल्यभागाः। अतस्तत्-

संपातादारभ्य क्रान्तिः साध्या। उदयाश्च तत एव। स तु संपातो मेषादेः प्रागयनांशतुल्येऽन्तरे। अतः साय-नांशात् खेटात् क्रान्तिर्भुक्तभोग्यकालौ चेत्युक्तम्। यदि त्रिज्यातुल्यया भुजज्यया जिनांशज्यातुल्या क्रान्तिज्या लभ्यते तदेष्टज्यया किमिति। फलं क्रान्तिज्या विषुवद्वृत्तात् तिर्य्यग्रूपा भवति। क्रान्तिज्या भुजस्त्रि-ज्या कर्णस्तद्वर्गान्तरपदमहोरात्रवृत्तव्यासार्द्धम्। सैव द्युज्या। अथ कुज्योच्यते। यदि द्वादशकोटेः पलभा भुजस्तदा क्रान्तिज्याकोटेः किमिति। फलं क्षितिजो-न्मण्डलयोर्मध्येऽहोरात्रवृत्ते ज्यारूपं स्यात्। सैव कुज्या। सा धनुःकरणार्थं त्रिज्यावृत्ते परिणाम्यते। यदि द्युज्याव्यासार्द्धे एतावती तदा त्रिज्याव्यासार्द्धे कि-मिति। फलं चरज्या। तद्धनुश्चरमित्युपपन्नम्।" प्रमि॰ अक्षक्षेत्र शब्दे ४२पृ॰ दर्शिते सि॰ शि॰ वाक्ये दृश्यम्

कुज्झटि स्त्री कु–क्विप् झट–इन् कर्म्म॰। नीहारे (कोयाशा) त्रिका॰ वा ङीप् कुज्झटीत्यप्यत्र। स्वार्थे क। कुज्-झटिकापि तत्रार्थे शब्दरत्ना॰। "ज्ञेया कुज्झटिका रूक्षा तमःप्राया च सा तथा। कफपित्तकरी लोके भिषग्भिः परिकीर्तिता" वैद्यके तद्गुणा उक्ताः।

कुञ्चन न॰ कुन्च–करणे ल्युट्। "वाताद्या वर्त्म सङ्कोच्य ज-नयन्ति यदा मलम्। तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" इति निदानोक्ते १नेत्ररोगभेदे। भावे ल्युट्। २सङ्कोचे। "कुर्य्यात् सिरागतं मूलसिराकुञ्चनपूरणम्" सुश्रुतः। [फलान्तत्वात् टाप्। कुष्माण्ड्याम् राजनि॰।

कुञ्चफला स्त्री कुञ्चं सङ्कुचितं फलमस्याः जातित्वेऽपि

कुञ्चि पु॰ कुन्च–इन्। "अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" इत्युक्ते अष्टमुष्टिमाने स्मृतिः

कुञ्चिका स्त्री॰ कुन्च ण्वुल्–टाप्। १गुञ्जायाम् (कुँच) शब्दर॰ (कन्चो) २वंशशाखायाम् जटा॰ ३कूर्चिकायां (चाविकाटि) हेमच॰। "उद्घाटिनी कुञ्चिका" प्रसन्नरा॰ ४मङ्गीलतायाम् (केँचो) "कुञ्चिकयैनं भाययति विस्माययति वा" सुग्ध॰

कञ्चित त्रि॰ कुन्च–क्त। १वक्रे २तगरपुष्पे न॰ राजनि॰

कुञ्ज पु॰ न॰ अर्द्धर्चा॰ द॰ कौ–जायते जन–ड ष्टपो॰ सुम्। पर्वतादौ लतादिभिराच्छादिते मध्यशून्ये १स्थाने निकुञ्जे अमरः। "लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्" सा॰द॰ "चल सखि! कुञ्जं सतिमिरपुञ्जम्" "कूजितकुञ्जकुटीरे" जयदे॰ "त्यक्ता गेहं झटिति यमुनामञ्जुकुञ्जं जगाम" पदा॰ २हस्तिदन्ते ३हस्तिहनौ ४मेदि॰ ऋषिभेदे ततः गोत्रा-पत्ये कुञ्जा॰ च्फञ्। कौञ्जायन तद्गोत्रापत्ये पुंस्त्री॰

कुञ्जर पुंस्त्री॰ कुञ्जः दन्तो हनुर्वा प्राशस्त्येनास्त्यस्य। १हस्तिनि स्त्रियां जातित्वात् ङीष् "कुञ्जरस्येव संग्रामे परि-वृत्यांकुशग्रहम्" भा॰व॰२६अ॰ "अद्रीन्द्रकुञ्जचर-कुञ्जरगण्डकाष–संक्रान्तदानपयसोवनपादपस्य" माघः। अस्य समर्थेन व्याघ्रा॰ उपमितसमासः राजा कुञ्जर इव राजकुञ्जरः। "एवमुक्त्वा परिष्वज्य देत्यास्तं राज कुञ्जरम्" भा॰ व॰ २५१अ॰। अत्र कुञ्जरसादृश्येन राज्ञः श्रेष्ठत्वम् गम्यते। तदभिप्रायेणैव "स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः" इत्यमरोक्तिः। ५देशभेदे च मेदि॰। मात्राप्रस्तारे पञ्चमात्रस्य प्रथमे ६प्रस्तारे ऽऽ। छन्दोग्रन्थः! "क्षितेर्दक्षिणदिगस्थिते गजाकृतौ ७पर्व्वतभेदे। "कृत्वा प्राचीविभागन्तु दक्षिणायामयोदिशि" इत्युपक्रमे "चकार कुञ्जरञ्चैव कुञ्जरप्रतिमाकृतिम्। पर्व्वतं काञ्चनगुहं वञ्चयो-जनविस्तृतम्" हरिवं॰ २२५अ॰। "ऋषभः पर्वतश्चैव श्रीमदृषभसंस्थितः। कुञ्जरः पर्वतश्चैव यत्रागस्त्यगृहं शुभम्" हरिवं॰ २३६ अ॰। ८हस्तनक्षत्रे च तस्य ह-स्तिकराकारत्वात्तथात्वम्। कुञ्जरपिप्पली शब्दस्यान्त्यलोपे ९पिप्पल्याञ्च शब्दचि॰। [मूलमस्य। मूलके राजनि॰।

कुञ्जरक्षारमूल पु॰ कुञ्जरस्य गजपिप्पल्या इव क्षारमुग्रं

कुञ्जरच्छाय न॰ कुञ्जरस्य छायायत्र। "योगोमघात्रयो-दश्यां कुञ्जरच्छायसंज्ञितः। भवेन्मघायां संस्थे च शशिन्यर्के करस्थिते" इत्युक्ते योगभेदे। विवृतमेतत् ति॰त॰ यथा "करे हस्तायां तत्स्थे सूर्य्ये। मघासंस्थे चन्द्रे चेति मघात्रयोदश्यां कुञ्जरच्छायसंज्ञितो योगो भवति। हस्ता-वस्थानञ्च सूर्य्यस्य कन्यादशमांशोत्तरकिञ्चिदधिकसपा-दत्रयोदशांशं १३,२० यावत्। नचानेन कुञ्जरच्छाययोगः सङ्केतितो नतु गजच्छायेति वाच्यं कुञ्जरच्छायस्य गज-च्छायादिका संज्ञा जाता अस्येतीतच्प्रत्ययेन गजच्छाया-याश्चपि सङ्केतितत्वात् (धुस्तूरः कनकाह्वयः) इतिवत्। व्यक्तं कृत्यचिन्तामणौ। "कृष्णपक्षे त्रयोदश्यां मघास्विन्दुः करे रविः। यदा तदा गजच्छाया श्राद्धे पुण्यैरवाप्यते।" "एवञ्च श्राद्धे निमित्तान्तरत्वेनानङ्गीकाराद्गौडीयमैथि-लाभ्यां कुञ्जरच्छाययोगः फलातिशयार्थं इत्युक्तम्। तात्र मघात्रयोदशीश्राद्धं कृत्वा परदिने कुञ्जरच्छाय-योगे श्राद्धं कर्त्तव्यमिति वाचस्पतिमिश्रोक्तं हेयम्।" मनुव्या॰ कुल्लूकभट्टेन एतस्य तिथ्यन्तरे ऽपि सम्भव उक्तः

यथा“अपि नः स कुले जायात् यो नो दद्यात् त्रयोदशीम्। पायसं मधुसर्पिभ्यां प्राक्छाये कुञ्जरस्य च” मनुव्याख्यायाम् “प्रकृतायां त्रयोदश्यां तथा तिथ्यन्तरेऽपि हस्तिनः पूर्वां दिशं गतायां छायायां मधुघृतसंयुक्तं पायसं दद्यात्। ननु त्रयोदशीहस्तिच्छाययोः समुच्चयः यथाह विष्णुः “अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः। प्रावृट्कालेऽसिते पक्षे त्रयोदश्यां समाहितः। मधूत्कटेन यः श्राद्धं पायसेन समाचरेत्। कार्त्तिकं सकलं वापि प्राक्छाये कुञ्जरस्य च”। इत्युक्तम् तेनास्य पृथङ्निमित्तता। अन्ये तु “राहुर्वै हस्ती भूत्वा चन्द्रमसं गृह्णातीति” श्रुतेः कुञ्जररूपस्य राहोश्छायायत्र इति व्युत्पत्त्याग्रहणपरतामाहुः। गजच्छायादयोऽप्यत्र

कुञ्जरदरी स्त्री० कूर्म्मविभागे बृहत्सं० दक्षिणस्यामुक्ते देशभेदे “अथ दक्षिणे लङ्केत्युपक्रमे “कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः”।

कुञ्जरपिप्ली स्त्री कुञ्जरोपपदा पिप्पली शा० त०। गजपिप्पल्याम् राजनि०। गजपिप्पल्यादयोऽप्यत्र स्त्री

कुञ्जरा स्त्री कुञ्जः हस्तिदन्त इव पुष्पमस्त्यस्याः अच्। १धातकीद्रुमे (धाइफुल) तस्याः हस्तिदन्तशुभ्रपुष्पत्वात्तथात्वम् २पाटलावृक्षे च मेदि०। अजादि० टाप्। ३हस्तिन्याम् शब्दचि०। जातित्वात् ङीष्। कुञ्जरीत्येव त्रिका०

कुञ्जरारातिः पु० ६त०। शरभे अष्टापदे पशुभेदे हेमच०। २सिंहे च

कुञ्जरालुक न० हस्त्यालुके आलुकभेदे शब्दच०। [अमरः

कुञ्जराशन पु० कुञ्जरैरश्यते अश–भक्षे कर्म्मणि ल्युट्। अश्वत्थवृक्षे

कुञ्जरासन न० कुञ्जरस्येवासनमत्र। “अथ वक्ष्ये महाकाल! कुञ्जरासनमुत्तमम्। करद्वयेन पादाभ्यां भूमौ तिष्ठेत् शिरःकरः” इति रुद्रयामलोक्ते आसनभेदे

कुञ्जल न० कुत्सितं जलं यत्र पृषो०। काञ्जिके। (आमानि) अमरः [राजनि०।

कुञ्जवल्लरी स्त्री कुञ्जाकारा वल्लरी। निकुञ्जिकाम्लावृक्षे

कुञ्जादि पु० गोत्रे चफञ्प्रत्ययप्रकृतिभूते शब्दगणे स च गणः कुञ्ज ब्रध्न शङ्ख भस्मन् गण लोमन् शठ शाक शुण्डा शुभविपाश स्कन्द स्कम्भ”।

कुट कौटिल्ये तुदा० पर० सक० सेट् कुटादि कुटति अकुटीत् चुकोट। कुटिता कुटितं कुटितव्यम्। कुटिलः प्रनिकुटति उद्+उत्क्षेपे अक० वि+कुत्सने सक०। विकुटितः कुत्सितः।

कुट प्रतापने चुरा० आत्म० सक० सेट्। कोटयते अचूकुटत।

कुट वैकल्ये भ्वा० इदित् प० अक० सेट। कुण्टति अकुण्टीत्।

कुट कुट्टने (कोटा) दिवा० अक० सेट्। कुट्यति अकोटीत् “जीवनं कुट्यतीव”। “भक्षयन्ति समांसानि प्रकुट्य विधिवत्तथा” भा० आ० २६४२ श्लो०

कुट पु० कुट–क। १कोटे (गड) मेदि० २शिलाकुट्टे (पाथर भाङ्गा हातुडी) ३वृक्षे च हेम० ४पर्व्वते हारा० ५कलशे पु० न० अम० ६ऋषिभेदे पु० ततः गोत्रापत्ये अश्वा० फञ्। कौटायन तद्गोत्रापत्ये पुंस्त्री अनन्तरापत्ये तु कुर्वा० ण्य। कौट्य तदपत्ये पुंस्त्री० “हविषा जारो अपां सिपर्त्ति पपुरिर्नरा पिता कुटस्य चर्षणिः” ऋ० १,४६,४

कुटक पु० दक्षिणस्थदेशभेदे, “चङ्क्रममाणः कोङ्कवेङ्कटकुटकान् दक्षिणकर्णाटान् यदृच्छयोपगतः कुटकाचलोपवने” भाग० ५,६,८, “यस्य (ऋषभदेवस्य) किलानुचरितमुपाकर्ण्य कोङ्कवेङ्ककुटकानां राजार्हन्नामोपशिक्ष्य कलावधर्म्म उत्कृष्यमाणे भवितव्येन विमोहितः स्वधर्म्मपथमकुतोभयमपहाय कुपथपाषण्डमसमञ्जसं निजमनीषया मन्दः संप्रवर्त्तयिष्यति” तत्रैव १० श्लो०,। तद्देशाधिपति र्जिनाचार्य्यः। कुटकदेशस्थोऽचलः कुटकाचलः तत्रत्यपर्व्वत भेदः। २फाले न० शब्दचि०

कुटङ्क पु० कुर्गृहभूमिः टङ्क्यतेऽऽच्छाद्यतेऽनेन टकि–आच्छादने करणे घञ् ६त०। गृहाच्छादने तृणादौ (चाल) शब्दमा०

कुटङ्गक पु० कुटस्याङ्गमिव शक० इवार्थे क। १छदिषि पटले (चाल) हेमच० पत्रादिच्छादिते २गृहभेदे (कुँडे) राय०

कुटच पु० कुट इव ठीयते चि–ड। कुटजवृक्षे (कुरची) शब्दचन्द्रि०

कुटज पु० कुटे पर्व्वते जायते जन–ड। (कुरची) १वृक्षभेदे अमरः। “कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः। अर्शोऽतीसारपित्तास्रकफातृष्णामकुष्ठनुत्” भावप्र० तत्गुणाद्युक्तम्। “कुटजः कूटजः कौटो वत्सको गिरिमल्लिका। कालिङ्गः शक्रशाखा च मल्लिकापुष्प इत्यपि। इन्द्रयवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः” इति भावप्र० तत्पर्य्याये इन्द्रयवफलत्वोक्तेः तत्फलस्य इन्द्रयवनामता “कुटजपुष्पपरागकणाः स्फुटम्” माघः “अलिरसौ नलिनीवनवल्लभः कुमुदिनीकुलकेलिकलालसः। विधिवशेन विदेशमुपागतः कुटजपुष्परसं बहु मन्यते” कुटे घटे जायते। २अगस्त्यमुनौ ३द्रोणाचार्य्ये च मेदि० तयोस्तदुत्पत्तिकथा कुम्भजशब्दे वक्ष्यते।

कुटजगति स्त्री "कुटजगतिर्नजौस्त्सततस्तौ गुरुः" वृ०र०टी० उक्ते छन्दोभेदे

कुटजपुटपाक पु० चक्रदत्तोक्ते अतिसाररोगनाशके औषधभेदे यथा "स्निग्धं घनं कुटजवल्कमजन्तुजग्धमादाय तत्क्षणमतीव च पोथयित्वा। जम्बूपलाशपुटतण्डुलतोयसिक्तं बद्धं कुशेन च बहिर्घनपङ्कलिप्तम्। सुस्विन्नमेतदवपीड्य रसं गृहीत्वा क्षौद्रेण युक्तमतिसारवते प्रदद्यात्। कृष्णात्रिपुत्रमतपूजित एष योगः सर्वातिसारहरणेष्वयमेव राजा"।

कुटजरस पु० चक्र० उक्ते अर्शोनाशके रसभेदे यथा— "कुटजत्वचो विपाच्य शतपलमार्द्रं महेन्द्रसलिलेन। यावत् स्यादरसं तद्द्रव्यं स्वरसस्ततो ग्राह्यः। मोचरसः समङ्गा फलिनी पलांशिभिस्त्रिभिस्तैश्च। वत्सकबीजं तुल्यं चूर्णीकृतमत्र दातव्यम्। पूतोत्क्वथितः सान्द्रः सरसो दर्वीप्रलेपनो ग्राह्यः। मात्राकालोपहिता रसक्रियैषा जयत्यसृक्स्रावम्। छागलीपयसा युक्ता पेया मण्डेनाथवा यथाग्निबलम्। जीर्णौषधश्च शालीन् पयसा छागेन भुञ्जीत। रक्तं गुदजातीसारं शूलं सासृग्रुजो निहन्त्याशु। बलवच्च रक्तपित्तं रसक्रियैषा ह्युभयभागम्"।

कुटजलेह पु० चक्रदत्तोक्ते अतिसारनाशके लेहभेदे यथा "शतं कुटजमूलस्य क्षुण्णं तोयार्मणैः पचेत्। क्वाथे पादावशेषेऽस्मिन् लेहं पूते पुनः पचेत्। सौवर्चलयवक्षारविडसैन्धवपिप्पलीम्। धातकीन्द्रयवाजाजीचूर्णं दत्त्वा पलद्वयम्। लिह्याद्बदरमात्रं तत् शीतं क्षौद्रेण संयुतम्। पक्वापक्वमतीसारं नानावर्णं सवेदनम्। दुर्वारं ग्रहणीरोगं जयेच्चैव प्रवाहिकाम्"।

अर्शोरोगनाशके तत्रोक्ते २लेहभेदे च यथा— "कुटजत्वक्पलशतं जलद्रोणे विपाचयेत्। अष्टभागावशिष्टन्तु कषायमवतारयेत्। वस्त्रपूतं पुनः क्वाथं पचेल्लेहत्वमागतम्। भल्लातकविडङ्गानि त्रिकटुत्रिफलान्तथा। रसाञ्जनं चित्रकञ्च कुटजस्य फलानि च। वचामतिविषां बिल्वं प्रत्येकञ्च पलं पलम्। त्रिंशत्पलानि गुडस्य चूर्णीकृत्य निधापयेत्। मधुनः कुडवं दद्यात् घृतस्य कुडवन्तथा। एष लेहः शमयति चार्शोरक्तसमुद्भवम्। वातिकं पैत्तिकञ्चैव श्लैष्मिकं सान्निपातिकम्। ये च दुर्नामजा रोगास्तान् सर्वान् नाशयत्यपि। अम्लपित्तमतीसारं पाण्डुरोगमरोचकम्। ग्रहणीमार्दवं कार्श्यं श्वयथुं कामलामपि। अनुपानं घृतं दद्यात् मधु तक्रं जलं पयः। रोगानीकविनाशाय कौटजो लेह उच्यते"।

कुटजबीज न० ६त०। इन्द्रयवे भावप्र०।

कुटजा स्त्री "सजसा भवेदिह सगौ कुटजाख्यम्" वृ०र०उक्तलक्षणे छन्दोभेदे

कुटजाद्यघृत न० चक्रोदत्तोक्ते शूलादिरोगनाशके घृतभेदे यथा "कुटजफलवल्कलकेशरनीलोत्पललोध्रधातकीकल्कैः। सिद्धं घृतं विधेयं शूलेऽस्रक्षार्शसां भिषजा"।

कुटजाष्टक पु० चक्रदत्तोक्ते अतिसारादिरोगनाशके औषधभेदे यथा "तुलामथार्द्रां गिरिमल्लिकायाः संक्षुद्य पक्वा रसमाददीत। तस्मिन् सुपूते पलसम्मितानि श्लक्ष्णानि पिष्ट्वा सह शाल्मलेन। पाठां समङ्गातिविषां समुस्तां बिल्वं च पुष्पाणि च धातकीनाम्। प्रक्षिप्य भूयो विपचेत् तु तावत् दर्वीप्रलेपः स्वरसस्तु यावत्। पीतस्त्वसौ कालविदा जलेन मण्डेन वा छागपयसाऽथवाऽपि। निहन्ति सर्वं त्वतिसारमुग्रम् कृष्णं सितं लोहितपीतकं वा। दोषं ग्रहण्या विविधं च रक्तं शूलं तथार्शांसि सशोणितानि। असृग्दरञ्चैवमसाध्यरूपं निहन्त्यवश्यं कुटजाष्टकोऽयम्।

कुटन्नट पु० कुटन् सन् नटति नट—अच्। १श्योनाकवृक्षे (शोना) अमरः २कैवर्त्तीमुस्तके (केउर) न०अमरः अत्र कुटन्नक इति पाठान्तरम्

कुटप पु० कुट—कपन्। १मुनौ २गृहसमीपस्थोपवने, ३कुडवरूपमानभेदे च। ४पद्मे न०हेम० [अमरटीका

कुटर पु० कुट—करन्। मन्थानदण्डस्यरज्जुबन्धनस्तम्भे

कुटरु पु० कुट—अरु। वस्त्रगृहे (कानात्) उज्ज्वल० तस्य कौटिल्यकरणयोगत्वात्तथात्वम्। [(तैयोडि) रत्नमा०

कुटरुणा स्त्री कुटे गृहे रुणा श्रदणा शब्द०। त्रिवितायाम्

कुटल न० कुट—कलच्। (चाल) छदिषि पटले हारा०।

कुटहारिका स्त्री कुटं घटं हरति हृ—ण्वुल् अत इत्वम्। दास्यां हेम०। १घटस्य हारकमात्रे त्रि०। कुटहारकः

कुटि स्त्री कुट—इन्। गृहे "ब्रह्महा द्वादश समाः कुटिं कृत्वा वने वसेत्" मनुः वा ङीप्। "बटुकुट्यां प्रभातवृत्तान्तमनुहरति" खण्ड० कुटीचकः कुटीचरः। भावे इन्। २कौटिल्ये स्त्री वा ङीप् "भ्रुकुटीकुटिलास्तस्याः" देवीमा०। ३वृक्षे पु०शब्दरत्ना०४देहे दुर्गसिं०कौ०। अल्पार्थे क कुटिका क्षुद्रगृहे(कुडे) स्त्री "शिरसोकुण्डनाद्वापि न स्यानकुटिकासनात्। भा०, व०,१२४५४, ५कर्त्तरि इन्। ५कौटिल्यान्विते त्रि०।

कुटिचर पुंस्त्री० कुटि कुटिलं जले चरति चर—अच्। जलशूकरे (शुशुक) शब्दरत्ना० स्त्रियां जातित्वात् ङीष्।

कुटित त्रि० कुट—इतच्। कुटिले उज्ज्वलदत्तः।

कुटिर न० कुट—इरन् किच्च। (कुँडे) स्वल्पगृहे भरतः

कुटिल त्रि० कुट—इलच्। १वक्रे अमरः “भ्रुकुटीकुटिलात्तस्याः” देवीमा०। २तगरपुष्पे न० राजनि० “युगदिग्भिः कुटिलमिति मतं स्नौ न्यौ गौ” वृ०र०टी०उक्ते ३छन्दोभेदे न० ४नदीभेदे (बाँका) ५सरस्वत्यां स्त्री मेदि० ६स्पृक्कानाम गन्धद्रव्ये स्त्री राजनि०।

कुटी स्त्री कुट—इन् ङीप्। १गृहे २कुटिन्यां ३सुरानामगन्धद्रव्ये च मेदि०।

कुटीकुट न० कुटी च कुटश्च गवा० नि० समा० द्व०। कुटीकुटयोः समाहारे।

कुटीकृत न० कुटि+च्वि—कृ—क्त। गृहीकृते वस्त्रे “और्णञ्च राङ्कवञ्चैव कीटजं पट्टजं तथा। कुटीकृतं तथैवात्र कमलाभं सहस्रशः” भा०स० १८४७श्लो०।

कुटीचक पु० कुट्यां चकते तृप्नोति चक—तृप्तौ अच्। संन्यासिभेदे “चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ। हंसः परमहंसश्च योऽत्र पश्चात् स उत्तमः” भा० आनु० १४अ०। कुटीचकलक्षणादिकम् आश्रमशब्दे ८४१पृ०दर्शितम् “न्यासे कुटीचकः पूर्व्वं बह्वोदो हंसनिष्क्रियौ” भाग०३,१२,२७

कुटीमय त्रि० कुट्या विकारो ऽवयवो वा शरा० मयट्। १कुट्यवयवे तद्विकारे च स्त्रियां ङीप्।

कुटीमुख पु० कुटीव मुखमस्य। शिवपारिषद्भेदे। “शङ्कुकर्णमुखाः सर्वे शैवाः पारिषदास्तथा। काष्ठः कुटीमुखो दन्ती विजया च तपोऽधिका” भा०स०१०अ०,।

कुटीय कुट्यामिवाचरति क्यच् नामधा० पर० अक० सेट् कुटीयति प्रासादे सि० कौ०।

कुटीर पु० ह्रस्वा कुटी ह्रस्वार्थे रः स्वार्थिकप्रत्ययस्य क्वचित् प्रकृतिलिङ्गातिक्रमस्योक्तेः पुंस्त्वम्। १ह्रस्वायां कुट्याम् “कूजितकुञ्जकुटीरे” जयदे० तस्यावयवः विल्वा० अण्। कौटीर कुटीरावयवे तद्विकारे वा त्रि०। स्त्रियां ङीप् २केवले ३रते च हेम०। [स्वार्थे क। तत्रैव।

कुटीचर पु० कुट्यां चरति चर—ट। कुटीचके भिक्षुभेदे

कुटुङ्गक पु० कुटङ्ग—पृषो०। १पटले छदिषि भरतः२गृहभेदे ३पिटे (डोल) वंशादिनिर्म्मिते धान्याद्याधारे पात्रे

कुटुनी स्त्री कुट—उन गौरा०ङीष्। कुट्टिन्याम् अमरटीका।

कुटुम्ब धृतौ चुरा० आत्म० अक० सेट्। कुटम्बयते अचुकुटुम्बत। कुटुम्बः प्रनिकुटुम्बयते।

कुटुम्ब पु० न० कुटुम्ब—अच्। १पोष्यवर्गे अमरः २बान्धवे ३सन्ततौ ४नामनि शब्दरत्ना०। “कुटुम्बं बिभृयात् भ्रातुर्य्योविद्यामधिगच्छतः। भागोयवीयस तत्र यदि विद्यानुपालिनः” दा० भा० स्मृतिः “तस्य भृत्यजनं ज्ञात्वा कुटुम्बांश्च महीपतिः। श्रुतशीले च विज्ञाय वृत्तिं धर्म्म्यां प्रकल्पयेत्” “न निर्हारं स्त्रियः कुर्य्युः कुटुम्बाद्बहुमध्यगात्” “वैश्यशूद्रावपि प्राप्तौ कुटुम्बे ऽतिथिधर्म्मिणौ” मनुः स्वार्थो क। तत्रैव पुंन० “अयं निजः परोवेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्” हितो०। [पासक्ते।

कुटुम्बव्यापृत त्रि० कुटुम्बे तद्भरणे व्यापृतः। कुटुम्बभर-

कुटुम्बिक त्रि०कुटुम्बोऽस्त्यस्य ठन्। कुटुम्बयुक्ते गृहस्थाश्रमे “मुनिश्च स्यात् सदा विप्रो वेदांश्चैव सदा जपेत्। कुटुम्बिकोधर्म्मकामः सदाऽस्वप्नश्च मानवः” भा० आनु० ९३अ० इनि। कुटुम्बिन् अपि तत्रार्थे। “आयासते कुटुम्बिभ्यस्तेभ्यः कार्य्यं विजनता” “प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः” कुमा०। २कर्षके त्रि० शब्दच०।

कुटुम्बिनी कुटुम्बोऽस्त्यास्या इनि ङीप्। १भार्य्यायां पा पुत्रवत्यां २स्त्रियां “शौचं तु च यावत् कुरुते भाजनं कुटम्बिनी” भा० व० २०५अ०। कुटुम्बानां सम् खला० इनि। ३कुटुम्बसमूहे स्त्री। ४क्षीरिण्यां क्षु राजनि०।

कुट्ट छेदने, निन्दने च अद० चुरा०उभ०सक०सेट्। कुट्टयति ते अचुकुट्टत् त। प्रनिकुट्टयति काष्ठकुट्टः शिलाकुट्टः

कुट्ट प्रतापने अद०चुरा०आत्म०सक०सेट्। कुट्टयते अचुकुट्टत।

कुट्टक त्रि० कुट्ट—ण्वुल्। छेदके “दन्तोलूखलिकः कालपकाशी वाश्मकुट्टकः। १लीलावत्यादौ प्रसिद्धे २गणितोपयोगिक्रियाभेदे कुट्टकविधिश्च लीलावत्यां संक्षेपेणोक्तः बीजगणिते कुट्टकाध्याये विशेषेणोक्तो यथा “भाज्योहारः क्षेपकश्चापवर्त्यः केनाप्यादौ सम्भवे कुट्टकार्थम्। येन छिन्नौ भाज्यहारौ न तेन क्षेपश्चैतद्दुष्टमुद्दिष्टमेव। परस्परं भाजितयोर्ययोर्यः शेषस्तयोः स्यादपवर्त्तनं सः। तेनापवर्त्तेन विभाजितौ यौ तौ भाज्यहारौ दृढसंज्ञितौ स्तः। मिथोभजेत्तौ दृढभाज्यहारौ यावद्विभाज्ये भवतीह रूपम्। फलान्यधोऽधस्तदधोनिवेश्यः क्षेपस्तथान्ते खमुपान्तिमेन। स्वो-

र्द्धे हृतेऽन्त्येन युते तदन्त्यं त्यजेन्मुहुः स्यादिति राशियुग्मम् । ऊर्द्ध्वो विभाज्येन दृढेन तष्टः फलं गुणः स्यादपरो हरेण । एवं तदैवात्र यदा समस्ताः स्युर्लब्धयश्चेद्विषमास्तदानीम् । यदागतौ लब्धिगुणौ विशोध्यौ स्वतक्षणाच्छेषमितौ तु तौ स्तः । भवति कुट्टविधेर्युतिभाज्ययोः समपवर्त्तितयोरथ वा गुणः । भवति यो युतिभाजकयोः पुनः स च भवेदपवर्त्तनसङ्गुणः । गुणलब्ध्योः समं ग्राह्यं धीमता तक्षणे फलम् । हरतष्टे धनक्षेपे गुणलब्धी तु पूर्ववत् । योगजे तक्षणाच्छुद्धे गुणाप्ती स्तो वियोगजे । धनभाज्योद्भवे तद्वद्भवेतामृणभाज्यजे । क्षेपतक्षणलाभाढ्या लब्धिः शुद्धौ तु वर्ज्जिता । अथ वा भागहारेण तष्टयोः क्षेपभाज्ययोः । गुणः प्राग्वत्ततो लब्धिर्भाज्याद्धतयुतोद्धृतात् । क्षेपाभावोऽथ वा यत्र क्षेपः शुध्येद्धरोद्धृतः । ज्ञेयः शून्यं गुणस्तत्र क्षेपो हारहृतः फलम् । इष्टाहतस्वस्वहरेण युक्ते ते वा भवेतां बहुधा गुणाप्ती । उदाहरणम् । एकविंशतियुतं शतद्वयं यद्गुणं गणक ! पञ्चषष्टियुक् । पञ्चवर्ज्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तम् । न्यासः भा२२१ हा १९५ क्षेपः ६५ अत्र परस्परं भाजितयोर्भाज्यभाजकयोःशेषम् १३ अनेन भाज्यहारक्षेपा अपवर्त्तिता जाता दृढाः भा१७हा१५ क्षेपः ५ अनयोर्दृढभाज्यहारयोः परस्परं भक्तयोर्लब्धमधोधस्तदधः क्षेपस्तदधः शून्यं निवेश्यमिति न्यस्ते जाता वल्ली १ । ७ । ५ । ० उपान्तिमेन स्वोर्द्ध्वे हतइत्यादिकरणेन जातं राशिद्वयम् । ४० । ३५ एतौ दृढभाज्यहाराभ्यामाभ्यां १७ । १५ तष्टौ शेषमितौ लब्धिगुणौ अनयोःस्वतक्षणमिष्टगुणं क्षेपइति । अथ वा लब्धिगुणौ २३ । २० वा४० । ३५ इत्यादीनि उदाहरणम् । शतं हृतं येन युतं नवत्या विवर्ज्जितं वा विहृतं त्रिषष्ट्या । निरग्रकं स्याद्वद मे गुणं तं स्पष्टं पटीयान्यदि कुट्टकेऽसि । न्यासः भा १००हा ६३क्षेपः ९० अत्र वल्ली १ । १ । १ । २ । २ । १ । ९ ।० उपान्तिमेनेत्यादिना जातं राशिद्वयं २४३० । १५३० पूर्ववल्लब्धिगुणौ ३० । १८ अथ वा भाज्यक्षेपौ दशभिरपवर्त्तितौ भा१० हा६३ क्षेपः ९ एभ्योऽपि पूर्ववद्वल्ली ० । ६ । ३ ९ । ० उपान्तिमेनेत्यादिना राशिद्वयम् २७ । १७१ पूर्ववज्जातौ लब्धिगुणौ ७ । ४५ । अत्र लब्ध्योर्विषमा इति स्वतक्षणाभ्यामाभ्यां १० । ६३ शोधितौ जातौ लब्धिगुणौ ३ । १८ अत्र लब्धिर्न ग्राह्या गुणघ्नभाज्ये क्षेपयुते हर

भक्ते लब्धिश्च ३० । अथ वा भाज्यक्षेपापवर्त्तनेन १० पूर्व्वानीता लब्धि ३र्गुणिता जाता सैव लब्धिः३० । अथ वा हारक्षेपौ नवभिरपवर्तितौ भा१०० हा७ क्षे१० पूर्व्ववद्वल्ली १४ । ३ । १० । ० जातं राशिद्वयम् ४३० । ३० तक्षणे जातं ३० । २ हारक्षेपापवर्त्तनेन ९ गुणं सङ्गुण्य जातौ लब्धि गुणौ तावेव ३० । १८ । अथ वा भाज्यक्षेपौ हारक्षेपौ चापवर्त्त्य न्यासः भा१० हा७ क्षे १ अत्र जाता वल्ली १ । २ । १ । ० पूर्व्ववज्जातं राशिद्वयम् ३, २ तक्षणाज्जातं तदेव ३ । २ भाज्यक्षेपहारक्षेपापवर्त्तनेन क्रमेण लब्धिगुणौ गुणितौ जातौ तावेव३० । १८ गुणलब्ध्योः स्वहारौ क्षेपाविति अथ वा लब्धिगुणौ १३० । १८ वा २३०।४४ इत्यादि । योगजे गुणाप्ती १८ । ३० स्वतक्षणाभ्यामाभ्यां ६३ । १०० शुद्धे जाते नवतिशुद्धौ गुणाप्ती ४५ । ७० वा १०८ । १७० वा । १७१ । २७० । इत्यादि । उदाहरणम् । यद्गुणा क्षयगषष्टिरन्विता वर्जिता च यदि वा त्रिभिस्ततः । स्यात्त्रयोदशहृता निरग्रका तं गुणं गणक ! मे पृथग्वद । न्यासः भा ६० हा१३ क्षे ३ । प्राग्वज्जाते धनभाज्ये धनक्षेपे गुणाप्ती११।५१ एते स्वस्वतक्षणाभ्यामाभ्यां १३ । ६० शुद्धे जाते ऋणभाज्ये धनक्षेपे २ । ९ । अत्र भाज्यभाजकयोर्विजातीययोर्भागहारेऽपि चैवं निरुक्तमित्युक्तत्वाल्लब्धेः ऋणत्वं ज्ञेयम् २ ९ पुनरेते स्वतक्षणाभ्यामाभ्यां १३ । ६० शुद्धे जाते ऋणभाज्ये ऋणक्षेपे गुणाप्ती ११ । ५१ । ऋणभाज्ये ऋणक्षेपे धनभाज्यविधिर्भवेत् । तद्वत्क्षेपे ऋणगते व्यस्तं स्यादृणभाज्यके । धनभाज्योद्भवे तद्वद्भवेतामृणभाज्यजे । मन्दावबोधार्थं मयोक्तम् । अन्यथा योगजे तक्षणाच्छुद्धे इत्यादिनैव सिद्धं यतः ऋणधनयोर्योगो वियोगएव । अतएव भाज्यभाजकक्षेपाणां धनत्वमेव प्रकल्प्य गुणाप्ती साध्ये । ये योगजे भवतः ते स्वतक्षणाभ्यां शुद्धे वियोगजे कार्य्ये । भाज्ये भाजके वा ऋणगते परस्परभजनाल्लब्धयः ऋणगताः स्युरित्यादि किं तेन प्रयासेन तथाकृते सति भाज्यभाजकयोरेकस्मिन् ऋणगते गुणाप्ती द्वौ राशी क्षिपेत्तत्रेत्यादिना परोक्तस्वल्ले लब्धौ व्यभिचारः स्यात् । उदाहरणम् । अष्टादश हताः केन दशाढ्या वा दशोनिताः । शुद्धं भागं प्रयच्छन्ति क्षयगैकादशोद्धृताः । न्यासः भा१८हा११क्षे १० अत्र भाजकस्य धनत्वं प्रकल्प्य साधितौ लब्धिगुणौ १४ । ८ एतावेव ऋणभाजके । किं तु लब्धेः पूर्व

धनर्णत्वं ज्ञेयं तथाकृते जातौ लब्धिगुणौ १४ । ८ ऋणक्षेपे तु योगजे तक्षणाच्छुद्धे इत्यादिना लब्धिगुणौ ४ । २ भाजकस्य धनत्वे ऋणत्वे वा लब्धिगुणावेतावेव । परन्तु भाजके भाज्ये वा ऋणगते, लब्धेः ऋणत्वं सर्वत्र ज्ञेयम् । उदाहरणम् । येन सङ्गुणिताः पञ्च त्रयोविंशतिसंयुताः । वर्जिता वा त्रिभिर्भक्तानिरग्राःस्युः स कोगुणः । न्यासः भा ५ हा ३ क्षे २३ अत्र वल्ली १ । १ । २३ । ० । पूर्ब्बवज्जातं राशिद्वयम् ४६ । २३ अत्र तक्षणेऽधोराशौ सप्त लभ्यन्ते, ऊर्द्ध्वराशौ तु नव लभ्यन्ते ते नव न ग्राह्याः 'गुणलब्ध्योः समं ग्राह्यं धीमता तक्षणे फलमित्यतःसप्तैव ग्राह्याइति जातौ लब्धिगुणौ ११ । २ वियोगजे एतौ स्वस्वतक्षणाभ्यां शोधितौ जातौ ऋणक्षेपे६ । १इष्टाहतस्वस्वहरेण युक्तावितिं द्विगुणितौ स्वस्वहारौ क्षेप्यौ यथा धनलब्धिः स्यादिति कृते जातौ लब्धिगुणौ ४ । ७ एवं सर्वत्र ज्ञेयम् । अथ वा हरतष्टे धनक्षेपइति न्यासः भा ५ हा ३ क्षे २ पूर्ब्बवज्जातौ लब्धिगुणौ योगजौ ४ । २ एतौ स्वतक्षणाभ्यां शुद्धौ १ । १ जातौ वियोगजौ । क्षेपतक्षणलाभाढ्या लब्धिरिति क्षेपतक्षणलाभेन ७ योगजलब्धिर्युता ११ जाता योगजा लब्धिः शुद्धौ तु वर्ज्जितेति तक्षणलाभेन ७ लब्धिरियं१ वर्ज्जिता६ धनलब्ध्यर्थं द्विगुणे हरे क्षिप्ते जातौ तावेव लब्धिगुणौ ४ । ७ । अथवा भागहारेण तष्टयोरिति न्यासः भा२ हा ३ क्षे २ अत्रापि जातं राशिद्वय २ । २ तक्षणाज्जातं २ । २ । अत्रापि जातः पूर्ब्ब एव गुणः २ लब्धिस्तु भाज्याद्धतयुतोद्धृतादिति गुण २ गुणितोभाज्यः १० क्षेप २३ युतो ३३ हरभक्तोलब्धिःसैव ११ । उदाहरणम् येन पञ्च गुणिताः खसंयुताः पञ्चषष्टिसहिता श्च तेऽथ वा । स्युस्त्रयोदशहृतानिरग्रकास्तं गुणं गणक ! कीर्त्तयाशु मे । न्यासः भा ५ हा १३ क्षे ० क्षेपाभावे गुणाप्ती ०।० एवं पञ्चषष्टिक्षेपे ० । ५ वा१३ । १०इत्यादि । अथ स्थिरकुट्टके सूत्रं वृत्तम् । क्षेपं विशुद्धिं परिकल्प्य रूपं पृथक् तयोर्यें गुणकारलब्धी । अभीप्सितक्षेपविशुद्धिनिघ्ने स्वहारतष्टे भवतस्तयोस्ते । प्रथमोदाहरणे दृढभाज्यहारयोः रूपक्षेपस्य च न्यासः भा १७ हा १५ क्षे-१ अत्रोक्तवद्गुणाप्ती ७ । ८ एते अभीष्टपञ्चगुणे स्वहारतष्टे जाते ५ । ६ ते एव । अथ रूपशुद्धौ गुणाप्ती ८ । ९ एते पञ्चकगुणे स्वहारतष्टे जाते १० । ११ ते यव एवं सर्वत्र । अस्य गणितस्य ग्रहगणिते महानुपयोगः । तदर्थं किञ्चिदुच्यते । कल्पग्रविशुद्धिर्विकलावशेषं षष्टिश्च भाज्यः कुदिनानि हारः । तज्जं फलं स्युर्विकला गुणस्तु लिप्ताग्रमस्माच्च कला लवाग्रम् । एवं तदूर्द्ध्वं च तथाऽधिमासावमाग्रकाभ्यां दिवसा रवीन्द्वोः । ग्रहस्य विकलावशेषाद्ग्रहाहर्गणयोरानयनम् । तद्यथा । षष्टिर्भाज्यः । कुदिनानि हारः । विकलावशेषं शुद्धिरिति प्रकल्प्य साध्ये गुणाप्ती । तत्र लब्धिर्विकलाः स्युर्गुणस्तु कलावशेषम् । एवं कलावशेषं शुद्धिः । षष्टिर्भाज्यः । कुदिनानि हारः फलं कलाः गुणोंऽशशेषम् । एवमंशशेषं शुद्धिस्त्रिंशद्भाज्यः । कुदिनानि हारः । फलं भागाः गुणोराशिशेषम् । एवं राशिशेषं शुद्धिर्द्वादश भाज्यः । कुदिनानि हारः । फलं गतराशयोगुणोभगणशेषम् । एवं कल्पभगणाभाज्यः । कुदिनानि हारः । भगणशेषं शुद्धिः फलं गतभगणाः गुणोऽहर्गणः स्यादिति । अस्योदाहरणानि त्रिप्रश्नाध्याये । एवं कल्पाधिमासाभाज्यो, रविदिनानि हारो, ऽधिमासशेषं शुद्धिः । फलं गताधिमासाः, गुणो गतरविदिवसाः । एवं युगावमानि भाज्यश्चन्द्रदिवसा॰ हारोऽवमशेषं शुद्धिः । फलं गतावमानि । गुणोगतचन्द्रदिवसाइति ।

अथ संश्लिष्टकुट्टके करणसूत्रं वृत्तम् । एकोहरश्चेद्गुणकौ विभिन्नौ तदा गुणैक्यं परिकल्प्य भाज्यम् । अग्रैक्यमग्रं कृतउक्तवद्यः संश्लिष्टसंज्ञः स्फुटकुट्टकोऽसौ । उदाहरणम् । कः पञ्चनिघ्नोविहृतस्त्रिषष्ट्या सप्तावशेषोऽथ सएव राशिः । दशाहतः स्याद्विहृतस्त्रिषष्ट्या चतुर्द्दशाग्रोवद राशिमेनम् । अत्र गुणैक्यं भाज्यः अयमेव राशिः अग्रैक्यं शुद्धिरिति न्यासः भा१५ हा६३ क्षेपः २१ पूर्ब्बवज्जातोगुणः १ लब्धिः२" ।

कुट्टनी स्त्री कुट्ट—ल्युट् ङीप् । (कुट्नी) परपुरुषेण सह परस्त्रियाः समागमकारयित्र्यां स्त्रियाम् । "तदालिङ्गनमवलोक्य समीपवर्त्तिनी कुट्टन्यचिन्तयत् अकस्मादियमेनमुपगूढवतीति ततस्तया कुट्टन्या तत्कारणं परिज्ञाय सा लीलावती गुप्तेन दण्डिता" हितो॰ । ङीनि कुट्टिन्यप्यत्र

कुट्टमित न॰ "केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् । प्राहुः कुट्टमितं नाम शिरःकरविधूननम्" इति सा॰द॰ उक्ते स्त्रीणां विलासभेदे । उदा॰ यथा "पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरविम्बमभीष्टे ।

पर्य्यकूजि रुजेव तरुण्यान्तारलोलवलयेन करेण" ।

कुट्टाक त्रि० कुट्ट—षाकन् । छेदके स्त्रियां ङीप् ।

कुट्टापरान्त पु० भूम्नि । जनपदभेदे "अत ऊर्द्ध्वं जनपदान्निबोध गदतोमम" इत्युपक्रमे "कुट्टापरान्ता माहेया कक्षाः सामुद्रनिष्कुटाः" भा०भी० ९अ० ।

कुट्टार पु० कुट्ट—कर्म्मभावादौ बा० आरन् । १पर्व्वते २केवले ३रमणे न० मेदि० ४कम्बले न० विश्वः ।

कुट्टित त्रि० कुट्ट—क्त । १छेदिते खण्डीकृते । तादृशे २पक्वमांसभेदे न० । "मांसमस्थ्यायु संत्यज्य सूक्ष्मं कृत्वा सुकुट्टितम् । वेशवारगुणाध्याद्यम् स्वेदितं पाचितं भवेत् । कुट्टितं पाचितं मांसं सुस्वादु लघु दीपनम् । तत्रापि जाङ्गलं श्रेष्ठं जाङ्गलेष्वपि पक्षिणाम्" भावप्र० ।

कुट्टिम पुंन० अर्द्धर्चादि कुट्ट—भावे घञ् तेन निर्वृत्तः इमप् । १रत्नमयभूमौ भरतः २सुधालिप्तभूतले सुभूतिः ३कुटीरे स्वल्पगृहे मथुरानाथः । ४दाडिम्बवृक्षे राजनि० (क्षात) इति ख्याते बद्धभूमिभागे ५सौधप्रदेशभेदे हला० । "कान्तेन्दुकान्तोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यत्र" माघः "शाद्वलोपचितां भूमिं यथाकाञ्चनकुट्टिमाम्" भा०आनु०५४अ० । "प्रासादजातसम्बाधं मणिप्रवरकुट्टिमम्" भा०आश्व० ८५अ० ।

कुट्टिमित न०कुट्ट—भावे घञ् तेन निर्वृत्तः इमप् ततः तार० इतच् । कुट्टमितशब्दार्थे शब्दचि० तन्मते सा०द० कुट्टिमितमिति पाठः "केशाधरादिग्रहणे मोदमानेऽपि मानसे । दुःखितेव बहिः कुर्य्याद्यत्र कुट्टिमितं मतम् । तत्र स्त्रीणामेव स्वभावः यदिष्टमप्यनिष्टतया निवारयन्त्य एव सुरतसुखमुपभुञ्जते इति तेन गाढपरिपीडने केशस्तनादिग्रहणे च हर्षात् सुखेऽपि दुःखाविष्करणं दुःखेऽपि सुखाविष्करणम्" इति

कुट्टिहारिका स्त्री० कुट्ट—इन् कुट्टिं कुट्टितद्रव्यं मांसादि हरति हृ—ण्वुल् टाप् अतइत्त्वम् । दास्यां हलायुधः ।

कुट्टीर पु० कुट्ट—ईरन् । १क्षुद्रपर्व्वते हारा० । २छेदके त्रि० ।

कुट्टीरक त्रि० कुट्टीरःक्षुद्रपर्व्वत इव कायति कै—क । क्षुद्रपर्व्वतवत्स्तूपीकृते "द्वितीयेन तस्यास्थीनि तद्भस्म च श्मशाने कुट्टीरकं कृत्वा रचितानि" वेतालः ।

कुट्मल पुंन० कुट—क्मलन् । १मुकुले विकाशोन्मुखपुष्पकलिकायाम् । "द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः" माघः । अग्रान्तत्वात् दन्तस्य वा टत्वादेशः । २नरकभेदे न० यत्र रज्जुभिर्यन्त्रणा नारकिभ्यो दीयते तत्र । "तामिस्रमन्धतामिस्रमित्येकविंशतिनरककथने "संघातं सकाकोलं कुड्मलं पूतिमृत्तिकम्" मनुः "कुट्मलं यत्र बहुभिः पीडनम्" प्रा०वि० । मुद्रितपु०कुड्मलमिति पाठः । कुड्मलमपि नरकभेदे । ३कुड्मलाकारे बाणाग्रभागे फलके च "विष्णुं सोमं हुताशं च तस्मिन्नेवं समकल्पयन् । शृङ्गनग्निर्बभूवास्य भल्लः सोमोविशाम्पते ! । कुड्मलश्चाभवद्विष्णुस्तस्मिन्निषुवरे तदा" भा० क० ३६अ०,

कुठ छेदने सौत्रः पर० सक० सेट् । कोठति अकोठीत् । प्रनिकोठति ।

कुठ वैकल्ये (गतिप्रतिघाते) आलस्ये अक० मोचने सक० इदित् भ्वा०प० सेट् । कुण्ठति अकुण्ठीत् । प्रनिकुण्ठति कुण्ठनम् कुण्ठा ।

कुठ पु० कुठ—छेदने वज्रर्थे कर्म्मणि क । वृक्षे अमरः ।

कुठर पु० कुठ—बा० करन् । मन्थानदण्डाकर्षणरज्जुयुक्तस्तम्भे अमरः । [उज्ज्वलदत्तः

कुठाक पु० कुठ—आकन् किच्च । (काठ ठोकरा) पक्षिभेदे

कुठाटङ्क पुंस्त्री कठारहूपःटङ्कः पृषो० । कुठारे अस्त्रे जटा०

कुठार पुंस्त्री०कुठ—करणे आरन् । स्वनामख्याते काष्ठच्छेदनसाधने अस्त्रभेदे स्त्रीत्वे गौरा० ङीष् । "राजन्योघांसकूटक्रथनपटुरटद्घोरधारः कुठारः" प्रबोध० । "मातुः केवलमेव यौवनवनच्छेदे कुठारावयम्" भर्त्तृ० । "तं त्वा गताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारम्" भाग० ३,२५,१२, तल्लक्षणं हेमा० परि० ख० लक्षणसमुच्चये यथा—

"जमदग्निं प्रति शुक्रः प्रोवाच यथोपदेशं शुश्रूषो ! निबोध परशोरुत्पत्तिं द्रव्यक्रमयोगं प्रमाणं चोत्तममध्यमाधमानां नराणां सम्प्राप्तिः पाणिसुकृदिति ह्निकर्म्मा परशुर्भवति । तत्र पञ्चाशत्पलिकः श्रेष्ठश्चत्वारिंशत्पलिकोमध्यमस्त्रिंशत्पलिकः कनिष्ठ इति । जातप्रमाणस्य पुरुषस्य सर्वायसमयस्त्रिविधः परशुर्भवति सार्द्धपञ्चाङ्गुलं श्रेष्ठस्य, सार्द्धचतुरङ्गुलं मध्यमस्य, सार्द्धत्र्यङ्गुलं निकृष्टस्य, मूलं विस्तृतम्भवति । तथा मध्ये सार्द्धपञ्चाङ्गुलं विस्तृतं चोत्तममध्यमकनिष्ठानां भवति । तथाङ्गमपि पञ्चदशाङ्गुलमुत्तमस्य, सार्द्धत्रयोदशाङ्गुलं मध्यमस्य, द्वादशाङ्गुलं निकृष्टस्येति परशोःफलम् । तथोत्तमं द्वादशाङ्गुलायामं, मध्यमं दशाङ्गुलायाममधमम ष्टाङ्गुलायामित्येवमपि त्रिविधं भवति । कुणपेष्विव दण्डप्रमाणमुत्तममध्यमकनिष्ठभेदात्त्रिविधं शालकधवधन्वनशाका-

गुणाग्रीवयिंशपासनराजदर्ढ्न्द्रहढतिन्दुकसोमवल्कस्व-
तकार्जुनप्रभृतीनां तुल्यप्रमाणो दण्डपन्थिर्भवेत्। यस्तु
सपाषिः परशुः स यथाकामं प्रयोज्यः।

कुणपलक्षणं तु कुणपशब्दे दृश्यं। २वृक्षे पु० शब्द-
रत्ना०। तस्येदम् शिवा० अण्। कौठार तत्सम्बन्धिनि
त्रि० स्त्रियां ङीप्। अल्पार्थे क। कुठारक क्षुद्रकुठारे
पुंस्त्री० स्त्रियां कुठारिका। [कारे पु० शब्दरत्ना०।

कुठारु पु० कुठ—आरु। १वृक्षे २वानरे पुंस्त्री० मेदि०। ३शस्त्र-

कुठि पु०कुठि—इन् किच्च। १पर्व्वते. २वृक्षे च उणा० कौ०।

कुठिक पु० कुठ—इकन् किच्च। (कुड़) कुष्ठे हारा०।

कुठेर पु०कुठि—एरन् बा०नुमभावः। १पर्णासे उज्ज्व०। २वह्नौ
शब्दमा०। ३श्वेततुलस्याम् (वावुइतुलसी) राजनि०।

कुठेरक पु०कुठेर इव कायति कै—क। नान्दीवृक्षे राजनि०।
स्वार्थे क। ४श्वेततुलस्यां (वावुइतुलसी) शब्दच०।

कुठेरज पु० कुठेरइव जायते जन—ड "सह सुपा" पा०स०।
श्वेततुलस्याम् शब्दरत्ना०।

कुठेरु पु० कुठ—एरुक्। चामरवाते त्रिका०।

कुड वैकल्ये भ्वा० इदित् पर० अक० सेट्। कुण्डति अकुण्डीत्
प्रनिकुण्डति कुण्डः। [प्रनिकुण्डते। कुण्डम्।

कुड दाहे भ्वा० इदित् आत्म० सक० सेट्। कुण्डते अकुण्डिष्ट

कुड रक्षणे चुरा० इदित् उभ० सक० सेट्। कुण्डयति ते
अचुकुण्डत् त। प्रनिकुण्डयति ते।

कुड अदने सक० बाल्ये अक० तुदा० पर० सेट् कुटादि।
कुडति अकुडीत् चुकोड़। प्रनिकुडति कुडपः कुडवः

कुडप (व) पु० कुड—कपन् (कवन्)वा। प्रस्थचतुर्थांशरूपे प-
रिमाणभेदे अमरः अर्द्धर्चादि। कर्षशब्दे विवृतिः क्षीर-
स्वामिमते पाल्लः। "द्रोणस्तु खार्य्याः खलु षोड़शोऽंशः
स्यादाढकोद्रोणचतुर्थभागः। प्रस्थश्चतुर्थांश इहाढकस्य
प्रस्थाङ्घ्रिराद्यैः कुडवः प्रदिष्टः" "लीला० तेन षोड़शक-
र्षमितः कुडवः आर्द्रद्रव्याणां तु द्वात्रिंशत्कर्षमित
इत्याह सुश्रुतः

"पलकुडवादीनामतो मानन्तु व्याख्यास्यामः। तत्र
द्वादशधान्यमाषा मध्यमाः सुवर्णमाषकः। ते षोडश
सुवर्णम्। अथ मध्यमनिष्पावा वा एकोनविंशतिर्द्ध-
रणम्। तान्यर्द्धतृतीयानि कर्षः। तत ऊर्द्धं चतु-
र्गुणमभिवर्द्धयन्तः पलकुडवप्रस्थाढकद्रोणा इत्यभिनि-
ष्पद्यन्ते तुला पलशतं तानि विंशतिर्भारः शुष्काणामिदं
मानमार्द्रद्रवाणाञ्च द्विगुणमिति"।

"अथ षष्ठे गते काले यवप्रस्थमुपार्ज्जयन्। यवप्रस्थं
तु तं सक्तूनकुर्व्वन्त तपस्विनः। कृतजप्याह्निकास्ते तु
हुत्वा वह्निं यथाविधि। कुडवं कुडवं सर्वे (चत्वारः)
व्यभजन्त तपस्विनः" "इत्युक्तः प्रतिगृह्याथ सक्तूनां
कुडवं द्विजः" भा० आश्व० ६०,।

कुडि पु० कुण्ड्यते दह्यते कुडि—दाहे इन् नलोपश्च। देहे
सि० कौ० "कुठिकम्प्योर्नलोपश्चेति" उणा० उज्ज्वलदत्तेन
कुठि गतिप्रतिघाते इति व्याख्यातम् कौमुदीकृता तु कुडि—
दाहे इति व्याख्यातम्। अतः मतभेदेन उणादिकृते
पाठद्वयम्।

कुडिश पुंस्त्री० कुड्यते कुड—अदने बा० श इट्। (कुड्ची)
ख्याते मत्स्यभेदे राजनि०। "कुडिशो मधुरोवल्यः कषायो
वह्निदीपनः। लघुः स्निग्धो वातरोगे पथ्यश्च रोचनस्तथा।
बलकारी कोष्ठबन्धकारी च भिषजां मतः" राजनि०।

कुडिहुञ्ची स्त्री० क्षुद्रकाण्डावेल्लवृक्षे (छोट उच्छिया) राजनि०।

कुड्मल कुड—शाल्ये बा० कलच्। १ईषत्कुले विकाशोन्मुखे कु-
सुमे सि०कौ०। २नरकभेदे न० कुट्मलशब्दे उदाहृत
मनुवचने कुड्मलमिति वा पाठः "दलितकोमलपाटल
कुड्मले" माघः तारका०इतच्। कुड्मलित जातमुकु-
कुले त्रि०।

कुड्य न० कुदुड कार्श्ये ण्यत् कौतेरम्न्रा० यक् डुगागमश्च
इत्युज्ज्वलदत्तः। १भित्तौ (भित) अमरः २विलेपने मेदि०
३कौतूहले शब्दरत्ना०। "वैद्यं सम्भाषमाणोऽङ्गं कुड्य-
मास्तरणानि वा। "चन्दनरसैरुपलिप्तकुड्ये" सुश्रु०।
"वैदूर्य्यकुड्येषु शशिद्युतिभ्यः" माघः। स्वार्थे क।
भित्तौ शब्दर०।

कुड्यच्छेदिन् पु० छिद—णिनि ६त०। चौरभेदे येन गृह-
भित्तिं विदार्य्य चौर्य्यं क्रियते तत्र शब्दरत्ना०।

कुड्यच्छेद्य पु० कुड्यं च्छेद्यं यस्य। १खनके। कुड्यस्य
तन्निर्म्माणाय तदर्थं च्छेद्यम् चतुर्थ्यर्थे ६त०। भित्ति-
निर्म्माणाय खाते २गर्त्ते त्रिका०।

कुड्यमत्स्य पुंस्त्री०कुड्ये मत्स्य इव। स्थूलगोधिकायां हेम०
जातित्वात् स्त्रियां ङीष् यलोपः। कुड्यमत्सी तत्रैव
शब्दर०। [कुणयति ते अचुकुणत् त। प्रनिकुणयति

कुण आमन्त्रणे, मन्त्रणे च अद० चु० उभ० सक० सेट्।

कुण उपकरणे शब्दे च तुदा०पर०सक० सेट्। कुणति अको-
णीत्। प्रनिकुणति उपकरणं दानादिना पोषणम्।

कुणक पु० कुण्यते उपक्रियते कुण—कर्म्मणि घञर्थे क तत

अनुकम्पायां कन्। बालके शिशौ। “तं त्वणकुणकं कृपणं स्रोतसानुवाह्यमानमभीक्ष्य” “तस्य ह वा एष कुणके उच्चैस्तरामेतस्मिन् कृतनिजाभिमानस्याहरह स्तत्पोषणपालनप्रीणनलालनानुध्यानेन” “अहो बतायं हरिणकुणकः कृपणः” इति च भाग० ५,८, ७,८,६, “एणकुणकं हरिणबालकम्” श्रीधरः।

कुणञ्ज पुंस्त्री० कुणं शब्दकारकं स्वरभेदं जरयति अन्तर्भूतण्यर्थे जृ बा० ड पृषो० मुम्। वनवास्तूके शाकभेदे (वनवेथुया) “कुणञ्जो मधुरो रुच्यो दीपनः पाचनो हितः। तच्छाकं तु त्रिदोषघ्नं मधुरं रुचिकारकम्। ईषत्कषायं संग्राहि पित्तश्लेष्महरं लघु” राजनि०। स्त्रीत्वमप्यत्र।

कुणञ्जर पु० कणं जरयति जृ—बा० खच्। वनवास्तूके राजनि०

कुणप पु० कण—कपन् सं प्र०। गतप्राणे मृतदेहे शवे अमरः “वाराणस्यां महाराज। दर्शनेप्सुर्महेश्वरम्। तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित्। तं दृष्ट्वा यो निवर्त्तेत स संवर्त्तो महीपते!”। नारदोक्तौ “कुणपं स्थापयामास नारदस्य वचः स्मरन्। यौगपद्येन विप्रस्य पुरीद्वारमथाविशत्” “ततः स कुणपं दृष्ट्वा सहसा संन्यवर्त्तत” भा० आश्व०६अ०। “शोणितवर्ण वेदनं कुणपगन्ध्यनल्पं रक्तेन” सुश्रु० अर्द्धश्वा०पा०। २पूतिगन्धे पु० ३तद्वति त्रि० मेदि०। “कुणपं मस्तुलुङ्गाभं सुगन्धं कथितं बहु” माधवनि० “तस्य देवा यावन्मात्रमिव गन्धस्यापजघ्नुस्तं पशुष्वदधुः स एव पशुषु कुणपगन्धस्तस्मात् कुणपगन्धान्नापिगृह्णीत” शत० ब्रा० ४, १, २, ८,। (बड़शा) ४अस्त्रभेदे। “शक्तिभिः कवचैश्चित्रैः कुणपै रङ्कुशैरपि” भा० भी० ५७अ०। कुणपलक्षणन्तु हेमा० प० ख० लक्षणसमुच्चये दर्शितं यथा

“जमदग्निं प्रति उशनाः प्रोवाच साधु दृष्टं कुणपानां विधानं यथादृष्टं कथयामि शृणु विंशत्यङ्गुलोऽष्टादशाङ्गुलः षोडशाङ्गुलश्चेति श्रेष्ठमध्याधमत्वेन कुणपोऽङ्गुलमाने त्रिविधो भवेदेवं पलप्रमाणे विंशतिपलः षोडशपलो द्वादशपलश्चेति। बालयोग्यानामेतत् प्रमाणमुक्तमबालानां तु कुणपस्त्रिंशत्पलः श्रेष्ठः पञ्चविंशतिपलो मध्यमः विंशतिपलस्तु निकृष्टः, श्रेष्ठस्तु विंशत्यङ्गुलो द्वाविंशत्यङ्गुलो मध्यमः कनिष्ठस्तु विंशत्यङ्गुलो भवेत्” कणपेति पाठान्तरम्। ५शवतुल्ये निश्चेतन्ये जड़े देहादौ “आश्चर्यमेतत् यदसत्सु सर्व्वदा महद्विनिन्दा कुणपात्मवादिषु” भाग० ४, ४, १३, “कुणपं जडं शरीरं तदेवात्मेति वदन्ति ये तेषु” श्रीधरः। गौरा० ङीष्। ६विट्शारिकायां (गुड़शालिक) स्त्री० मेदि०

कुणारु त्रि० कण—शब्दे बा० आरु सं प्र०। कणनशीले “सहदानुं पुरुहूत क्षियन्तमहस्तमिन्द्र! संपिनक् कुणारुम्” ऋ० २,३०, ८, “कुणारुं कणनशीलम्” भा०।

कुणाल पु० कण—कालन् सं प्र०। देशभेदे सि० कौ०।

कुणि पु० कुण—इन्। १तुन्दवृक्षे मेदि०। २आदानादिक्रियामन्दकरान्विते त्रि० अम०। “दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति, सुश्रु०”गर्भो वातप्रकोपेण दौहृदे चावमानिते। भवेत्कुब्जः कुणिः पङ्गुः मूको मिन्मिण एव च” सुश्रु० कुणेर्भावः ष्यञ्। कौण्य हस्तस्यादानादिविघातरूपे दोषे “एकादशेन्द्रियवधाः” सां०का० व्याख्यायां कौमुद्यां “बाधिर्य्यं कुष्ठितान्धत्वम् जडताऽजिघ्रता तथा। मूकता कौण्यपङ्गुत्वक्लैव्योदावर्त्तमन्दताः” इन्द्रियभेदेन क्रियाविघातभेदो दर्शितः।

कुणिन्द पु० कण—भावे किन्दच् सं प्र०। शब्दे उज्ज्वलद०

कुणिपदी स्त्री कुणिरिव कुण्ठितशक्तिः पादोऽस्याः कुम्भपद्या० ङीष् पद्भावश्च। क्रियामन्दपादयुक्तस्त्रियाम्।

कुण्टक त्रि० कुटि—ण्वुल्। स्थूले शब्दरत्ना०।

कुण्ठ त्रि० कुठि—वैकल्ये अच्। १क्रियासु मन्दे अकर्म्मण्ये अमरः “पूर्वं तपोवीर्य्यमहत्सु कुण्ठम्” कुमा० “विभावसोस्तुल्यमकुण्ठमण्डलम्” (सुदर्शनम्) भा०आ०१६अ०। २मूर्खे मेदि०। कर्त्तरि क्त कुण्ठित तत्रार्थे। “वृत्रस्य हन्तुः कुलिशं कुण्ठिताश्रीव लक्ष्यते” कुमा०।

कुण्ठक त्रि० कुठि—ण्वुल्। १सङ्कुचिते क्रियामन्दे। २मूर्खे पु० शब्दमा० ३तत्प्रधानदेशभेदे पु० भूम्नि। “मालवा वल्लवाश्चैव तथैवापरवल्लवाः। कुलिन्दाः कालकाश्चैव कुण्ठकाः करटास्तथा” भा०भी० ६ जनपदकथने।

कुण्ड न०कुण्ड्यते रक्ष्यते जलं वह्निर्वाऽत्र कुडि—रक्षणे आधारे—अच् णिलोपः। जलाधारे वृत्ताकारे १पात्रभेदे(कुण्डा) “भुवं कोष्णेन कुण्डोघ्नी” रघुः “अत्सरुका कुण्डप्रतिरूपाश्चमसाः” कात्या० श्रौ०२४,४.४, “अत्सरुकाः अच्छन्नकाः कुण्डप्रतिरूपा वृत्ताकाराः”कर्कः। २देवादिखातजलाशये अगस्त्यकुण्डं सप्तर्षिकुण्डं सोमकुण्डम् ३कमण्डलौ स्त्री गौरा० ङीष् मेदि०। होमार्थमग्न्याधारे ४स्थानभेदे। तल्लक्षणादकं हेमा० दा० ख० दर्शितं तथा।

“भविष्यत्पुराणे “वेदिपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च

शा। वेदास्राण्येव तानि स्युर्व्वर्त्तुलान्यथ वा क्वचित्। वेदास्राणि, चतुरस्राणि। आम्नायरहस्ये "कुण्डानि चतुरस्राणि वृत्तनालाकृतीनि वा। नव पञ्चाथ वा चैकं कर्त्तव्यं लक्षणान्वितम्। नवकुण्डविधाने तु दिक्षु कुण्डाष्टके स्थिते। नवमं कारयेत् कुण्डं पूर्व्वैशानदिगन्तरे। विधाने पञ्च कुण्डानामीशाने पञ्चमं भवेत्"। ज्ञानरत्नावल्याम् "दिक्षु वेदास्रवृत्तानि पञ्चमं त्वीशगोचरे"। नारदीयेऽपि "यत्रोपदिश्यते कुण्डचतुष्कं तत्र कर्म्मणि। वेदास्रमर्द्धचन्द्रञ्च वृत्तं पद्मनिभं तथा। कुर्यात् कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः। कुण्डयोर्द्यन्तरञ्चैव सपादकरसम्मितम्। पीठवद्वन्तु यत्कुण्डं सुप्रमाणं सुगर्त्तकम्"। बह्वृचपरिशिष्टे "भुक्तौ मुक्तौ तथा पुष्टौ जीर्णोद्धारे विशेषतः। सदा होमे तथा शान्तौ वृत्तं वरुणदिग्गतम्"। कामिके तु तत्तद्दिक्षु तत्तत्फलार्थं कुण्डोक्तिर्यथा "ऐन्द्र्यां स्तम्भे चतुष्कोणमग्नौ भागे भगाकृति। चन्द्रार्द्धं मारणे याम्ये, नैरृते हि त्रिकोणकम्। वारुण्यां शान्तिके वृत्तं, षडस्रमुच्चाटनेऽनिले। उदीच्यां पौष्टिके पद्मं रौद्र्यामष्टास्रमुक्तिदम्"। सर्व्वेषु चैतेषु होमानुसारेण हस्तादिमानं क्षेत्रफलमुपकल्पनीयम्। तदुक्तं भविष्यपुराणे "मुष्टिमानं शतार्द्धे तु शते चारत्निमात्रकम्। सहस्रे त्वथ होतव्ये कुर्यात्कुण्डं करात्मकम्। द्विहस्तमयुते तच्च लक्षहोमे चतुःकरम्। अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकम्"। मुष्टिमानमिति, बद्धमुष्टिहस्तमात्रमित्यर्थः। इदानीं चतुरस्रादिकुण्डानामुद्धारक्रमोऽभिधीयते। चतुरस्रं तावदाह विश्वकर्म्मा "कृत्वा प्राक् सूत्रमर्द्धाङ्कं दक्षिणोत्तरमत्स्ययोः। न्यस्य सूत्रं ततः कोणैरङ्कितैश्चतुरस्रकम्"। पूर्व्वाङ्केनाप्युपायेन प्राचीं निश्चित्य प्राक्पश्चिमायातां रेखामालिख्य तामर्द्धभागे लाञ्छयित्वा दक्षिणोत्तरदिशोर्मत्स्यद्वयं कुर्य्यात् सूत्रोपरि सूत्रान्तरनिपातनात् स्वस्तिकमध्याकृतिः शिल्पशास्त्रेषु मत्स्य इत्युच्यते। मत्स्यद्वयनिष्पत्तिश्चात्रैवं कार्य्या। पूर्व्वोक्तरेखापरिमितस्य सूत्रस्यादिं तस्या एव रेखाया मूले निधाय तत्सूत्रान्तरं परिभ्राम्य वृत्तं रचयेत् तस्या एव-रेखाया अपरप्रान्ते तस्यैव सूत्रस्यादिं निधाय तत्सूत्रान्तं परिभ्राम्य द्वितीयान्तं कुर्य्यात् एवं वृत्तद्वये कृते दक्षिणोत्तरदिशोर्मत्स्यद्वयं निष्पद्यते अथ मत्स्यद्वये पूर्व्वोक्तरेखालाञ्छने चैकं सूत्रं निपात्य दक्षिणोत्तरायतां रेखां लिखेत्। एवं दिक्षु साधितासु विदिक्साधनार्थं कोणान् लाञ्छयेत्। तत्रायं प्रकारः—पूर्व्वनिष्पन्नरेखाप्रान्तचतुष्टयस्य प्रत्येकं पार्श्वद्वये चिकीर्षितपरिमाणस्यार्द्धमर्द्धं निधाय तत्सन्धौ कोणलाञ्छनानि कुर्य्यात् ततः कोणलाञ्छनेषु सूत्रचतुष्टयनिपातनात् पूर्व्वदिश्युदङ्मुखयोनिकं चतुरस्रं कुण्डं कुर्य्यात्। योन्याकारादीनामुद्धारश्चतुरस्रप्रकृतिकस्तु कामिकशास्त्रात् "पञ्चमांशं पुरोन्यस्य मध्ये वेदांशमानतः। भ्रमादश्वत्थपत्राभं कुण्डमाग्नेयमुच्यते"। क्षेत्रस्य पञ्चमभागं पुरःप्राच्यां दिशि विन्यस्य मध्ये कोणसूत्रस्येति शेषः। वेदांशः, तुरीयांशः। भ्रमात्, सूत्रान्तपरिभ्रमणेन अश्वत्थपत्राकारं कुण्डमाग्नेयदिशि कुर्य्यादिति। तत्रायं निर्म्माणप्रकारः पूर्व्वोक्तन्यायेन समचतुरस्रीकृतस्य क्षेत्रस्य पश्चिमरेखामध्यात् पूर्व्वरेखामध्यभेदिनीं क्षेत्रसूत्रपञ्चमांशाधिकां गर्भरेखामालिख्य नैरृत्यदेशे कोणसूत्रन्तुरीयांशे लाञ्छयित्वा तल्लाञ्छनोपरि विन्यस्तादेः सूत्रस्य पूर्व्वोक्तगर्भरेखामूलविन्यस्तं प्रान्तं परिभ्राम्य बहिर्वृत्तार्द्धं निष्पाद्य वायव्यकोणेऽप्येवमेव वृत्तार्द्धं रचयेत्। ततो गर्भरेखाप्रान्तात् वृत्तद्वयप्रान्तस्पर्शि सूत्रद्वयं निपात्य पिप्पलपत्राकारमाग्नेयदिश्युदङ्मुखयोनिकं योनिकुण्डं विदध्यात्। "चतुरस्रे ग्रहैर्भक्ते त्यक्त्वाद्यन्तौ तदंशकौ। मध्यसप्तांशमाने तु कुण्डं खण्डेन्दुवत् क्रमात्"। चतुरस्रे क्षेत्रे ग्रहैर्नवभिर्विभक्ते आद्यान्तौ त्यक्त्वा अवशिष्टसप्तांशमानेन सूत्रभ्रमणात् खण्डेन्दुसदृशं कुण्डं कुर्य्यात्। अत्रैवं कृतिः—चतुरस्रं क्षेत्रं नवधा विभज्य तत्र प्रथमोऽन्तिमश्चेति भागद्वयं परित्यज्य अवशिष्टसप्तभागादिमरेखागर्भदेशे सूत्रादिं निधाय तत्रैव भागसप्तकस्यान्तिमरेखागर्भदेशे सूत्रान्तं निवेश्य तत्सूत्रपरिभ्रामणेन प्रथमरेखातुल्यं विश्रान्तप्रान्तवृत्तार्द्धं विरचयेत्। अथ प्रथमरेखाप्रान्तद्वयमपि वृत्तार्द्धे संयोज्य दक्षिणदिगवस्थितमुत्तराशाभिमुखयोनिकं कुण्डं चन्द्रखण्डं विदध्यात्। "त्रिभागवृद्धितो मत्स्यैस्त्रिभिर्नैशाचरं भवेत्"। स्थानत्रये तृतीयांशत्रयं वृद्ध्या मत्स्यत्रयेण नैशाचरं नैरृत्यदिक्सम्बन्धि कुण्डं कुर्य्यात्। इहायं सम्प्रदायः। पूर्व्ववत्समचतुरस्रं क्षेत्रं निर्म्माय तत्तिरश्चीनपश्चिमरेखामध्यात् तिर्य्यगवस्थितपूर्व्वरेखामध्यभेदिनीं क्षेत्रसूत्रतृतीयभागाधिकां गर्भरेखामालिख्य पूर्व्वोक्तपश्चिमरेखाप्रान्तद्वयमपि क्षेत्रसूत्रतृतीयभागाधिकं कुर्य्यात् ततो गर्भरेखाप्रान्तात् पूर्व्वोक्तपश्चिमरेखाप्रान्तद्वयमपि क्षेत्रसूत्रतृतीयभागाधिकं कुर्य्यात्।

ततो गर्भरेखाप्रान्तात् पूर्वोक्तपश्चिमरेखाप्रान्तद्वयस्पर्शिसूत्रद्वयं निपात्य नैर्ऋत्यदिशि पूर्वाभिमुखयोनिकं त्रिकोणं कुण्डमुत्पादयेत्। एवञ्च विधीयमाने स्थानत्रये तृतीयांशत्रयवृद्धिस्तत्रैव मत्स्यत्रयमपि निष्पद्यत इति। “कर्म्मार्द्धाष्टांशसंन्यासाद्वृत्तं कुण्डमिहोदितम्। कर्म्मसूत्रार्द्धस्य योऽष्टमांशस्तस्य संन्यासात् सम्यक् न्यासात् वृत्तं कुण्डं स्यादिति। अत्रैवं रचनाप्रकारः चतुरस्रे क्षेत्रे कोणात् कोणान्तरगामिनः सूत्रस्यार्द्धं कोणार्द्धशब्दवाच्यमष्टधा विभज्य यावानष्टमो भागस्तावन्तं भागं चतुर्द्दिक्षु बहिर्विन्यसेत्। ततः क्षेत्रगर्भदेशे सूत्रादिं निधाय बहिःस्थिताष्टमभागविन्यस्तं तस्यैव सूत्रस्य प्रान्तं सर्व्वतः परिभ्राम्य पश्चिमदिशि पूर्वाभिमुखयोनिकं वृत्तकुण्डं कुर्य्यात्।“षड्भागवृद्धितो मत्स्यैश्चतुर्भिः स्यात् षडस्रकम्” क्षेत्रपार्श्वयोः प्रत्येकं षष्ठभागवृद्धं कृत्वा अवशिष्टदिशोर्मत्स्यचतुष्टयमुत्पाद्य सूत्रषट्कपातात् षडस्रकुण्डनिष्पत्तिरिति। अत्रैवं सम्प्रदायः—समचतुरस्रं क्षेत्रं षोढ़ा विभज्य यावान् षष्ठो भागस्तावता मानेन क्षेत्रस्य दक्षिणोत्तरपार्श्वे समन्ताद्वर्द्धयित्वा तदेव क्षेत्रमायतचतुरस्रं सम्पादयेत्। अथानन्तरोक्तपार्श्वद्वयरेखास्पर्शिनीं दक्षिणोत्तरायतां गर्भरेखां रचयेत्। ततः क्षेत्रमध्यादुत्तरपार्श्वरेखामध्याच्च पूर्वोक्तगर्भरेखार्द्धपरिमितमेकैकं सूत्रं निपात्य पूर्व्वेशानदिशोरन्तराले मत्स्यमुत्पाद्य तेनैव प्रकारेण पश्चिमवायव्ययोरन्तराले मत्स्यं कुर्य्यात्। अथ भूयोऽपि क्षेत्रमध्याद्दक्षिणपार्श्वरेखामध्याच्च प्रागुक्तगर्भरेखाप्रान्तद्वयात् लाञ्छनचतुष्टयस्पर्शिसूत्रचतुष्टयं निपातयेत्। एवं लाञ्छनानन्तरालस्थितसूत्रद्वयेन सह सूत्रषट्कयोगाद्वायव्यदिशि प्राङ्मुखयोनिकं षट्कोणकुण्डं कुर्य्यात्।“चतुरस्राष्टभागेन कर्णिका स्याद्विभागशः। तद्वहिस्त्वेकभागेन केसराणि प्रकल्पयेत्। तृतीये दलमध्यानि तुरीये दलकोटयः। भ्रामणात् पद्मदलं स्याद्दलाग्रं दर्शयेद्बहिः”। चतुरस्रस्य अष्टधा विभक्तस्य मध्ये अष्टमभागेन कर्णिका स्यात् कर्णिकाया बहिः परिधिस्थे द्वितीये अष्टमभागे विन्यासे केसराणि स्युः। केसराद्बहिः परिधिस्थिते तृतीये अष्टमभागे विन्यासे दलमध्यानि कल्पयित्वा चतुर्थे दलकोटीं विधाय चतुरस्राद्बहिर्द्दलाग्राणि दर्शयेत्। अत्राप्यष्टमभागेनेति सम्बध्यते। विभागशः विभागे विभागे सर्व्वदिग्भागेष्वित्यर्थः। भ्रामणात्,- सूत्रस्येति शेषः एतच्च पद्मदलं यावत् योजनीयम्।

अयमर्थः—चतुरस्रं क्षेत्रं प्रागग्राभिरुदगग्राभिश्च रेखाभिरष्टधा विभज्य मध्यदेशे लाञ्छयित्वा क्षेत्राद्बहिश्चतुर्द्दिक्षु समन्तादपरमष्टभागं विन्यसेत् तत्येवं लाञ्छनात् परितः प्रतिदिशं पञ्चपञ्चाष्टमभागावधिरेखा भवन्ति। ततः पूर्वोक्तलाञ्छनोपरि विन्यस्तादेकत्तद्रेखाविन्यस्तप्रान्तस्य च सूत्रस्य परिभ्रामणात् पञ्च वृत्तानि सम्पाद्य वृत्तातिरिक्तरेखाः परिमार्ज्जयेत्। ततः प्रथमे वृत्ते कर्णिका द्वितीये केसराणि तृतीये दलमध्यानि चतुर्थे दलकोटयः पञ्चमे दलाग्राणीति कृत्वा अष्टदलं पूर्वाभिमुखयोनिकं पद्मकुण्डमुत्तरदिशि कुर्य्यात्। इदानीमेतदेव कुण्डं प्रकारान्तरेणोच्यते “वृत्तकुण्डं समं चान्यदथवान्यप्रकारतः। वृत्तकुण्डं पुरा कृत्वा चतुर्द्धाऽऽमेखलं भजेत्। उत्सेधञ्च तथा कृत्वा कर्णिका सार्द्धका भवेत्। अवशिष्टं दलं वेददलमष्टदलन्तु वा” यथा प्रतीच्यां दिशि वृत्तकुण्डमभिहितमिहापि तथैव कृत्वा तन्मध्ये यथाविभागं पद्मकुण्डं कुर्य्यादिति। अथवेत्यादिना तृतीयः प्रकार उच्यते पूर्ववृत्तकुण्डमेव आमेखलं मेखलमवधीकृत्य अन्तश्चतुर्द्धा भजेत्। वृत्तकुण्डमध्ये अन्यस्यापि समभागस्य वृत्तत्रयस्य करणाच्चतुर्थक्षेत्रविभागः कार्य्य इत्यर्थः। ततः क्षेत्रमध्ये सार्द्धभागेन विस्तृता कर्णिका विधेया। उत्सेधञ्च तथा कृत्वेति, कर्णिकाया उच्छ्रयमपि सार्द्धभागेन कृत्वेत्यर्थः। अवशिष्टेन सार्द्धभागद्वयेन केसरव्यतिरिक्तानि दलान्येव कुर्य्यात्। एवञ्चतुर्द्दलमष्टदलं वा पद्मकुण्डं कुर्य्यात्। “क्षेत्रात् द्वादशमं भागं चतुर्द्दिक्षु तदन्तरे। विन्यस्य तत्प्रमाणेन तुर्य्यांशमपरं नयेत्। तस्य कर्णप्रमाणेन तद्भुजास्वपि लाञ्छयेत्। तत्राष्टसूत्रसंयोगादष्टास्रं कुण्डमुच्यते”। द्वादशधा विभक्तस्य क्षेत्रस्य यावान् द्वादशो भागस्तावन्तं भागं चतुर्द्दिक्षु विन्यस्य, तदन्तरे, तस्य क्षेत्रस्य अन्तरे बहिःप्रदेशे “अन्तरं बहिर्योगोपसंव्यानयोरिति” ज्ञापकादन्तरशब्दोऽत्र बहिर्व्वचनः। तत्प्रमाणेनेति तस्य बहिर्विन्यस्तद्वादशभागस्य परिमाणेन अपरं द्वितीयं तुर्य्यांसं चतुरस्रं नयेत् प्रणयेत् कुर्य्यात इति यावत्। तुर्य्यांशमिति, स्वार्थिकोऽत्र पूरणप्रत्ययः। तस्य कर्णप्रमाणेनेति। कोणात् कोणान्तरस्पर्शिसूत्रं शिल्पशास्त्रेषु कर्ण इति प्रसिद्धम्। इह तु क्षेत्रगर्भादारभ्य चतुष्कोणगामिनः पृथगेव चत्वारः कर्णा इत्यभिप्रायेण कर्णार्द्धमपि कर्णशब्देनोक्तम् तेनायमर्थः। बाह्यस्थितचतुर-

स्य गर्भदेशावधियोगान् कर्णस्तावता मानेन तद्भुजाश्च तस्य कर्णस्य भुजाश्च लाञ्छयेत् । अत्र बाह्यचतुरस्रसूत्राण्येव कर्णोभयपार्श्ववर्त्तीनि निजभुजाकारतया भुजाशब्देनोच्यन्ते । अयमाशयः—बाह्यचतुरस्रसम्बन्धिन्येकस्मिन् कोणे कर्णार्द्धपरिमितस्य सूत्रस्यादिं विधाय तत्सूत्रं चतुरस्ररेखोपरि प्रसार्य्य सूत्रप्रान्ते लाञ्छयेत् । एवं प्रतिकोणं सूत्रादिं निधाय प्रातिलोम्यानुलोम्येन सूत्रप्रसारणात् तत्तत्प्रान्ते लाञ्छयन् प्रतिदिशं लाञ्छनद्वयकरणाद्दिक्चतुष्टयेन लाञ्छनेषु सूत्राष्टकनिपातनादष्टास्रकुण्डं कुर्य्यादिति । अयमिह निर्म्माणप्रकारः—पूर्व्ववच्चतुरस्रीकृतस्य क्षेत्रस्य बहिश्चतुर्द्दिक्षु द्वादशमं भागं विन्यस्य तत्परिमाणेन अपरं चतुरस्रं कुर्य्यात् । अथ तदीयकर्णार्द्धपरिमितस्य सूत्रस्य प्रतिकोणमादिं विधाय चतुरस्ररेखोपरि प्रसारणात् तत्तत्प्रान्तेषु लाञ्छयन् दिक्चतुष्टयेन लाञ्छनाष्टकं कृत्वा तल्लाञ्छनोपरि सूत्राष्टकनिपातनादैशानदिशि पूर्व्वाभिमुखयोनिकमष्टास्रकुण्डं कुर्य्यात् । इदानीं दिङ्नियममन्तरेणैव तत्तत्कर्म्मोपयोगितया विद्यानललितोपदिष्टं कुण्डमुच्यते । "सप्तमांशं बहिर्न्यस्य कृत्वा वृत्तमिह भ्रमात् । चतुर्थभागन्यूनेन पूर्व्वक्षेत्रेण साम्भतैः । धनुर्ज्याकृतिभिः पञ्चसूत्रैः पञ्चास्रकुण्डकम् । होमे प्रशस्यते भूतशाकिनीग्रहनिग्रहे" । चतुरस्रस्य क्षेत्रस्य बहिःप्रदेशे चतुर्द्दिक्षु क्षेत्रसप्तमांशं विन्यसेत् । ततः क्षेत्रगर्भविन्यस्तादेः बाह्यस्थितसप्तमांशोपरि विन्यस्तप्रान्तस्य सूत्रस्य सर्व्वतः परिभ्रामणात् वृत्तं निष्पादयेत् । पूर्व्वक्षेत्रेणेति, बहिःस्थितवृत्तापेक्षया, पूर्व्वक्षेत्रशब्देन आन्तरश्चतुरस्रक्षेत्रमेवोच्यते । ततश्चायमर्थः आन्तरचतुरस्रस्य यद्दैर्घ्यं ततः स्वकीयचतुर्थभागान्यूनं कृत्वा यन्मानं भवति तावता मानेन परिमितं सूत्रं निधाय तादृशानि पञ्च सूत्राणि बाह्यवृत्तस्यान्तर्विन्यस्य सूत्रसन्धौ कोणं कुर्य्यात् । तानि च पञ्च सूत्राणि प्रत्येकं प्रान्तद्वयसंस्पृष्टवृत्तत्वात् धनुर्ज्याकृतीनि धनुरारूढमौर्वीसदृशानि स्युः । ततः पञ्चसूत्रातिरिक्तं सर्व्वं परित्यज्य पञ्चास्रकुण्डं रचयेत् । तच्च ग्रहनिग्रहादिहोमे प्रयोज्यम् । "दशमांशं बहिर्न्यस्य कृत्वा वृत्तमिह भ्रमात् । भक्त्वा क्षेत्रं चतुःषष्ट्या तद्भागैः त्रिंशता त्रिभिः । समानसूत्रं तादृक्षान् सप्तास्रं सूत्रसप्तकात् । अभिचारोपशान्त्यर्थं होमकुण्डमिति स्मृतम्" । इहापि चतुरस्रस्य क्षेत्रस्य दशमभागं चतुर्द्दिक्षु बहिर्विन्यस्य पूर्व्ववत् वृत्तं कुर्य्यात् । अथ पूर्व्वक्षेत्रं चतुःषष्ट्या विभज्य तेषां चतुःषष्टिसंख्यानां भागानां मध्ये त्रयस्त्रिंशत्संख्यैर्भागैः परिमितं सूत्रं कृत्वा तादृशानि सप्त सूत्राणि वृत्तस्यान्ते दिन्यस्य सप्तास्रं कुण्डं कुर्य्यात् । अत्रापि सूत्राणां धनुर्ज्याकारत्वं सूत्रसन्धौ कोणनिर्म्माणं सप्तसूत्रातिरिक्तपरिमार्ज्जनं चेति पूर्व्ववदेव वेदितव्यम् । एतच्च कुण्डमभिचारदोषोपशमनहोमेषु प्रयोज्यम् । आह विश्वकर्म्मा "यावन्मात्रः कुण्डविस्तार उक्तस्तावत् खातस्यापि मानं प्रदिष्टम् । यादृक् कुण्डस्याकृतिः संप्रदिष्टा तादृग्रूपं मेखलाया विदध्यात् । स्थापने सर्व्वकुण्डानां ध्वजायः सर्व्वसिद्धिदः" । सर्व्वेषु चैतेषु प्रोक्तमानाद्द्व्यङ्गुलयवादि न्यूनमतिरिक्तं वा विधाय ध्वजायः साधनीयः । विस्तारे दैर्घ्यगुणिते अष्टभिर्विभक्ते यद्येकः परिशिष्यते तदा ध्वजाय इति । "खातेऽधिके भवेद्रोगो हीने धेनुधनक्षयः । वक्रकुण्डे तु सन्तापो मरणं भिन्नमेखले । मेखलारहिते शोकोऽभ्यधिके वित्तसंक्षयः । भार्य्याविनाशनं प्रोक्तं कुण्डे योन्या विना कृते । अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्ज्जितम्" । खातहीने भवेद्रोगः इत्यादिना खातादिलक्षणरहितस्य कुण्डस्यानिष्टफलत्वदर्शनादिदानीं खातादीनामेव लक्षणमभिधीयते । तद्यथा मोहचूडोत्तरशास्त्रे "चतुर्विंशतिमं भागमङ्गुलं परिकल्प्य तु । चतुर्विंशाङ्गुलं हस्तं कुण्डानां परिकल्पयेत् । हस्तमात्रं खनेत्तिर्य्यगूर्द्ध्वं मेखलया सह" । मुष्टिमानं शतार्द्धे स्यादित्यादिना प्रसिद्धेनैव हस्ताङ्गुलव्यवहारेण होमानुसारात् कुण्डमानमुक्तम् । इयन्तु खातादिमानकथनार्थं परिभाषा क्रियते । चिकीर्षितकुण्डक्षेत्रं चतुर्विंशतिधा विभज्य यावान् चतुर्विंशतिमो भागस्तावत्परिमाणमङ्गुलं परिकल्प्य चतुर्विंशत्या अङ्गुलैर्हस्तं परिकल्पयेत् । ततस्तेन हस्तेन परिमितं सर्व्वकुण्डानां तिर्य्यक्खातमानं विधाय मेखलासहितस्य खातस्य तेनैव हस्तेन परिमितमूर्द्ध्वमानं विदध्यात् । प्रथमे उक्तम् "कुण्डं जिनाङ्गुलम् । तिर्य्यगूर्द्ध्वं मेखलया सह" जिनाङ्गुलं चतुर्विंशत्यङ्गुलम् । प्रतिष्ठासारसंग्रहेऽपि "पञ्च—त्रिमेखलोच्छ्रायां ज्ञात्वा शेषमधः खनेत्" । विश्वकर्म्मणाप्युक्तम् "व्यासात् खातः करः प्रोक्तो निम्नस्तिर्य्यगङ्गुलेन तु" । तिर्य्यङ्गुलानि—पञ्चदशाङ्गुलानि खातस्य निम्नत्वम् । "उच्चता सा नवाङ्गुलैरिति, वक्ष्यमाणत्वान्मेखलात्रयपक्षे नवाङ्गुलं प्रथममेखलयोत्सेध इत्युभयोश्चतुर्विं-

षडङ्गुलत्वम्। कण्ठमानमुक्तं कालोत्तरे "खाताद्वाह्येऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः"। खातमेखलयोरन्तराले अङ्गुलमानेन कण्ठमोष्ठापरपर्य्यायं कुर्य्यात्। सारसमुच्चये "खाताद्वाह्याङ्गुलः कण्ठस्तद्वाह्ये मेखला क्रमात्। मेखलालक्षणमुक्तं कामिके" "क्षेत्रार्कांशेन तस्यौष्ठः स्यात्तद्वेदर्तुभागतः। मेखलाष्टयुतोच्छ्रायः कुण्डाकारा तु मेखला। सर्व्वेषान्तु प्रकर्त्तव्या मेखलैकात्र लाघवात्"। क्षेत्रस्य अर्कांशेन—द्वादशांशेन कुण्डस्यौष्ठः कण्ठशब्दवाच्यः स्यात् तद्वेदभागतः कुण्डचतुर्थांशतो मेखलायाः पृथुता विस्तारः। तथा ऋतुभागतः षड्भागेन मेखलोच्छ्रायः कार्य्यः। पिङ्गलामतेऽपि "खातादेकाङ्गुलं त्यक्त्वा मेखलानां स्थितिर्भवेत्। मेखलैकाथवा तिस्रो भूतसंख्याथवा प्रिये"। भूतसंख्याः—पञ्चसंख्याः। उक्तञ्च प्रथमे "कण्ठाङ्गुलाद्वहिः कार्य्या मेखलैका षडङ्गुला। चतुस्त्र्यङ्गुला यद्वा तिस्रः सर्व्वत्र शोभनाः"। यदा एका मेखला तदा सा विस्तारोत्सेधाभ्यां षडङ्गुला विधेया "एका षडङ्गुलोत्सेधविस्तारा मेखला मतेति "पिङ्गलोक्तेः। यदा तु मेखलात्रयपक्षस्तदा क्रमेण चतुस्त्रिद्व्यङ्गुलमानाः कर्त्तव्याः। मोहचूड़ोत्तरे "मेखलात्रितयं कार्य्यं कोषरामयमाङ्गुलैः। कोषाः—चत्वारः। रामाः—त्रयः। यमौ—द्वौ। तत्र सर्व्वान्तिमा, द्व्यङ्गुला। मध्यस्था त्र्यङ्गुलाः। कुण्डकण्ठसन्निहिता चतुरङ्गुला इति। सत्येवं प्रथममेखलायाः कुण्डकण्ठादारभ्य नवाङ्गुल उत्सेधःस्यात्। लक्षणसंग्रहेऽपि "प्रथमाष्टाङ्गुला व्यासादुन्नता सा नवाङ्गुलैः। मध्या तु त्र्यङ्गुला बाह्ये तृतीया तु यमाङ्गुला। मेखलाः पञ्च वा कार्य्याः षट्पञ्चाब्धित्रिपक्षकैः" प्रथमा कुण्डसन्निहिता आन्तरोत्सेधनवाङ्गुला बाह्ये तु चतुरङ्गुलैव। अब्ध्यङ्गुला—चतुरङ्गुला। अब्धयः—चत्वारः। पक्षौ—द्वौ। योनिलक्षणमुक्तं स्वायम्भुवे "मेखलामध्यतो योनिः कुण्डार्द्धात्र्यंशविस्तृता। अङ्गुष्ठमानोष्ठकण्ठा कार्य्याश्वत्थदलाकृतिः। प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखा। पूर्व्वमुखाः स्मृताः-शेषा यथाशोभं समन्विताः। मेखलाया गर्भदेशे कुण्डार्द्धदीर्घा कुण्डतृतीयांशविस्तृता योनिःकार्य्या। अत्रौष्ठशब्देन योन्यग्रमुच्यते। कण्ठशब्देन च योनिमेखला अङ्गुष्ठशब्दः, अङ्गुलपर्य्यायः। एकाङ्गुलपरिमाणेन योनेरग्रं मेखलाञ्च कुर्य्यादित्यर्थः "विस्तारोऽष्टाङ्गुलो योनेरप्यमङ्गुलसंमितमिति" पिङ्गलोक्तेः। नारदीये "कुण्डत्र्यंशप्रविस्तारा योनिरुच्छ्रयताङ्गुलम्। कुण्डार्द्धेन तु दीर्घा स्यात् कुण्डोष्ठी बोधिपत्रवत्"। कुण्डोष्ठीति यथा कुण्डे द्वादशांशेन ओष्ठो विहित एवं योनेरपि द्वादशभागेन ओष्ठः कार्य्य इत्यर्थः। तथा कुण्डे प्रविष्टओष्ठो यस्या इति। बोधिपत्रम्, अश्वत्थपत्रम्। त्रैलोक्यसारे "दीर्घात् सूर्य्याङ्गुला नाभिस्त्र्यंशोना विस्तरेण तु। एकाङ्गुलोच्छ्रिता सा तु प्रविष्टाभ्यन्तरे तथा। कुम्भद्वयसमायुक्ता चाश्वत्थदलसन्नता। अङ्गुष्ठमेखलायुक्ता मध्ये त्वाज्यस्थितिस्तथा। दक्षस्था पूर्व्वयाम्येषु वामस्था पश्चिमोत्तरे। नवमस्यापि कुण्डस्य योनिर्द्दक्षदलस्थिता"। सूर्य्याङ्गुला—द्वादशाङ्गुला। त्र्यंशोनेति—दैर्घ्यतृतीयांशन्यूनविस्तारा। एकेनाङ्गुलेनोच्छ्रिता तथा, एकेनाङ्गुलेन कुण्डमध्ये प्रविष्टा। कुम्भद्वयसमायुक्तेति—पूर्व्वोक्ताग्नेयकुण्डस्य तुल्याकृतेर्योनेर्नुभ्रदेशस्थितं वृत्तद्वयमेव गजकुम्भाकृतित्वात् कुम्भशब्देनोक्तम्। तेनात्र कुण्डस्यबाकृतिर्वटद्वयं मृत्पिण्डद्वयं वा स्थाप्यमिति तद्व्याहम्। अङ्गुष्ठमेखलेति, एकाङ्गुलमानया मेखलया परिवेष्टितेत्यर्थः। मध्ये त्विति, यथा स्रुचि घृतधारणाय बिलं क्रियते तथा योनिमध्येऽपि बिलं कर्त्तव्यमित्यभिप्रायः। दक्षस्थेति, पूर्व्वाग्नेययाम्यकुण्डेषु दक्षिणभागे उत्तराभिमुखा योनिः कार्य्या नैर्ऋत्यादिकुण्डेषु तु पश्चिमभागे प्राङ्मुखा विधेया। नवम इति, अष्टदिक्षु कुण्डाष्टकं विधाय पूर्व्वेशानदिशोरन्तराले यन्नवमं कुण्डं चतुर्द्दिक्षु वा कुण्डचतुष्टयं कृत्वा ऐशानदिशि यत् पञ्चमं कुण्डं तयोरपि दक्षिणभागेऽपि योनिः कार्य्येत्यर्थः"।

तत्र विशेषश्चेत्रफलादिकं कुण्डोद्द्योते उक्तं यथा "शारदातिलके "अष्टास्वाशासु रम्याणि कुण्डान्येतान्यनुक्रमात्। चतुरस्रं योनिरर्द्धचन्द्रं त्र्यस्रञ्च वर्त्तुलम्। षडस्रं पङ्कजाकारमष्टास्रन्तानि नामतः। आचार्य्यकुण्डं मध्ये स्याद्गौरीपतिमहेन्द्रयोरिति" सिद्धान्तशेखरे "पुरन्दरेशयोर्मध्ये वृत्तं वा चतुरस्रकम्। तदाचार्य्यं विनिर्द्दिष्टमिति" अयमुत्तमः पक्षः। अथ पञ्चकुण्डैककुण्डनिवेशनं यथा "आशेशकुण्डैरिह पञ्चकुण्डी चैकं यदा पश्चिमसोमशैवे। वेद्याः सपादेन करेण यद्वा पादान्तरेणाखिलकुण्डसंस्था" आशा—दिक्। तत्र कुण्डानि चतुरस्रवृत्तार्द्धवृत्तपद्मानि ऐशदिशि कुण्डं चतुरस्रं वृत्तं वा नैः पञ्चकुण्डीनिवेशनं स्यात् यदा चैकमेव कुण्डं

तदा पश्चिमे उत्तरे वा ऐशान्यां वा स्यात् परन्तु चतुरस्रं,
वेद्याः सकाशात्तानि सर्व्वाणि कुण्डानि सपादेन करेण
त्रिंशदङ्गुलान्तरेण वा पादान्तरेण द्वादशाङ्गुलान्तरेण
वा वेदीपादान्तरेण वेद्याश्चतुर्थांशेन वा मण्डपे नवकोष्ठे
कृतेऽष्टसु भागेषु मध्ये भवन्तीति व्याख्या" नारदीये "यत्नो-
पदिश्यते कुण्डचतुष्कं तत्र कर्म्मणि। वेदास्रमर्द्धचन्द्रं
च वृत्तं पद्मनिभं तथा"। चतुःकुण्डपक्षे खातोनास्ती-
त्युक्तं नारदीये "पीठवद्वर्त्तयेत् कुण्डं सुप्रमाणमगर्त्तकम्
कुर्य्यात् कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः। पञ्चमं
कारयेत् कुण्डमीशदिग्गोचरं द्विजेति" अयं मध्यमः पक्षः।
केचित्पूर्व्वेशयोरिति लिखितवन्तस्तदसत् सोमशम्भौ "एवं
वा विस्तरायां प्रतीच्याङ्कारयेद्ध्रुवः "आचार्य्या अपि
"अथवा दिशि कुण्डमुत्तरस्यां प्रविदध्याच्चतुरस्रमेकमेव" इत्ययं
कनिष्ठः पक्षः। नवग्रहाधिकारे वशिष्ठसंहितायाम् "कुण्ड-
न्तन्मध्यभागे तु कारयेच्चतुरस्रकम्। वितस्तिद्वयखातं तत् कु-
ण्डं तु चतुरङ्गुलमिति। वेदीपादान्तरन्त्यक्त्वा कुण्डानि नव-
पञ्च वेति"। नारदीये "कुण्डवेद्यन्तरञ्चैव सपादकरसंमित-
मिति" केचित्त्रयोदशाङ्गुलमप्यन्तरमुक्तं तत्र मण्डपानुसा-
रेण व्यवस्था। अथ वर्णविशेषस्य स्त्रीणाञ्च कुण्डविशेषमाह
"विप्राच्चतुरस्रं च वृत्तं च वृत्तार्द्धं त्र्यस्रं स्याद्वेदकोणानि
वापि। सर्व्वेषाङ्कुर्य्युस्तद्रूपाणि चान्ये योन्याकाराण्यङ्गना-
नां मतानि "विप्रादारभ्य विप्रक्षत्रियविट्शूद्राणां
चतुःकोणवृत्तवृत्तार्द्धत्रिकोणानि भवन्ति। अथवा विप्रादि
वर्णेषु चतुःकोणानि वर्त्तुलानि वा सर्व्वाणि कुण्डानि
भवन्ति यदा स्त्री यजमाना तदा योन्याकाराण्येव कुण्डानि
भवन्तीति व्याख्या। शारदायाम् "विप्राणां चतुरस्रं स्या-
द्राज्ञां वर्त्तुलमिष्यते। वैश्यानामर्द्धचन्द्राभं शूद्राणां त्र्यस्र-
मीरितम् चतुरस्रन्तु सर्व्वेषां केचिदिच्छन्ति तान्त्रिकाः"।
पञ्चरात्रे "सर्व्वाणि तानि वृत्तानि चतुरस्राणि
वा सदा" सनत्कुमारः "स्त्रीणां कुण्डानि विप्रेन्द्र!
योन्याकाराणि कारयेदिति"। अथ प्राच्यादिकुण्डेषु
फलविशेषमाह "सिद्धिः पुत्राः शुभं शत्रुनाशः
शान्तिर्म्मृतिच्छिदे दृष्टिमारोग्यमुक्तं हि फलं प्राच्या-
दिकुण्डके" प्राच्यादिकुण्डेष्वष्टस्वष्टौ फलानि स्युः।
शारदायाम् "सर्व्वसिद्धिकरं कुण्डं चतुरस्रमुदा-
हृतम्। पुत्रप्रदं योनिकुण्डमर्द्धेन्द्वाभं शुभप्रदम्। शत्रु-
क्षयकरन्त्र्यस्रं वर्त्तुलं शान्तिकर्म्मणि छेदमारणयोः षड-
स्रं पद्मसन्निभम्। दृष्टिदं रोगशमनं कुण्डमष्टास्रमी-

रितम्"। कामिके तु फलान्तरम् "ऐन्द्र्यां स्तम्भे चतुः-
कोणमग्नौ भोगे भगाकृति। चन्द्रार्द्धं मारणे याम्ये, द्वेषे
त्र्यस्रन्तु नैर्ऋते। वारुण्यां शान्तिके वृत्तं, षडस्रं त्वाट-
नेऽनिले। उदीच्यां पौष्टिके पद्मं रौद्र्यामष्टास्रि भुक्तिदमिति"
अथ होमसंख्यया कुण्डमानम्। "शतार्द्धे रत्निः स्याच्छत-
परिमितेऽरत्निविततः सहस्रे हस्तः स्यादयुतहवने हस्त-
युगलम्। चतुर्हस्तं लक्षे प्रयुतहवने षट्करमिभैः ८ ककुब्-
भिर्वा १० कोणैर्नृपकरमपि प्राहुरपरे" शतार्द्धमिते पञ्चाश-
न्मिते होमे रत्निमितं कुण्डं, शतमिते अरत्निमितं,
सहस्रमिते होमे हस्तमितं, दशसहस्रमिते द्विहस्तं, लक्ष-
होमे चतुर्हस्तमितं दशलक्षहोमे षड्ढस्तमितं, कोटि-
होमेऽष्टहस्तमितं दशहस्तमितं वा। केचित् षोडश-
करमपि प्राहुरिति व्याख्या भविष्यपुराणे "मुष्टिमानं
शतार्द्धे तु शते चारत्निमात्रकम्। सहस्रे त्वथ होतव्ये
कुण्डं ह्युर्व्यात्करात्मकम्। द्विहस्तमयुते तच्च लक्षमाने
चतुःकरम्। दशलक्षमिते होमे षट्करं सम्प्रचक्षते।
अष्टहस्तात्मकं कुण्डं कोटिहोमेषु नाधिकम्" शार-
दायाम् "दशहस्तमितं कुण्डं कोटिहोमेऽपि शस्यते"
स्कान्दे "कोटिहोमे चतुर्हस्तं चतुर्हस्तं समन्ततः
योनिवक्त्रद्वयोपेतन्तद्व्याङ्कितमेखलमिति" इदं प्राय
स्थूलद्रव्यविषयम् "अथ केषांचिन्मते कुण्डमानं
"लक्षैकवृद्ध्यादशलक्षकान्तं करैकवृद्ध्यादशहस्तकञ्च। कोट्य-
र्द्धदिग्विंशतिलक्षलक्षदले मुनीष्वर्त्तुशशाङ्कहस्तम्"
लक्षस्यैकवृद्ध्या दशलक्षकाणामन्तं समाप्तिर्यस्मात् दश
लक्षकान्तम् एकलक्षमारभ्य लक्षवृद्ध्या दशलक्षपर्यन्त-
मित्यर्थः करस्य एकवृद्ध्यादशहस्तकम्मर्यादीकृत्येत्यादश-
हस्तकम् एककरमारभ्य एककरवृद्ध्या दशहस्तं याव-
त्कुण्डं प्राहुरिति पूर्वेणान्वयः कोटेरर्द्धे पञ्चाशल्लक्षे
दशविंशतिलक्षे लक्षदले पञ्चाशत्सहस्रे क्रमात् सप्त-
पञ्चषट्त्रिकरं कुण्डमिति व्याख्याः शारदायाम् "एक-
हस्तमितं कुण्डं लक्षहोमे विधीयते। लक्षाणां दशकं
यावत्तावद्धस्तेन वर्द्धयेत्" सिद्धान्तशेखरे "लक्षार्द्धे त्रिकरं
कुण्डं लक्षहोमे चतुःकरम्। कुण्डं पञ्चकरम्प्रोक्तं दश-
लक्षाहुतौ क्रमात्। षड्ढस्तं लक्षविंशत्यां, कोट्यर्द्धे सप्त-
हस्तकमिति"। इदमेव कुण्डमानङ्कामिकादिमतं सिद्धान्त
शेखरशारदाहेमाद्रिप्रभृतिभिः प्राचीनैः राघवभट्टरामवाजपे
यिकुण्डरत्नाकरकुण्डकौमुदीकारादिभिर्नवीनैश्च लिखितं
कुत्रचिदन्यथापि कुण्डमानान्युक्तानि तानि तत्तत्प्रकरण-

यथास्तत्कर्मविशेषे द्रष्टव्यानि । अथैकहस्तादुदशहस्तान्तं यावत्कुण्डेषु भुजकोटिमानम् "वेदाक्षीणि युगाग्नयः शशियुगान्यष्टाश्वयस्त्रीषवोऽष्टाक्षाशक्षिरसारसाङ्कमिता नेत्रर्षयोऽब्धिस्वराः । अङ्गुल्यो,ऽथ यवाः खमभ्रमिषवः खं पञ्चषट्सागराः सप्ताभ्रं मुनयस्तमो निगदिता वेदास्तके बाहवः" । एकहस्ते कुण्डे चतुर्विंशत्यङ्गुलान्यायामविस्तारौ, द्विहस्ते चतुस्त्रिंशदङ्गुलानि । इमानि पादोन लिक्षाचतुष्टयन्यूनानि अल्पान्तरत्वात् पूर्णान्येव धृतानि । त्रिहस्ते एकचत्वारिंशदङ्गुलानि । चतुर्हस्ते अष्टचत्वारिंशदङ्गुलानि । पञ्चहस्ते पञ्चयवाधिकानि त्रिपञ्चाशदङ्गुलानि । षड्ढस्ते त्रिपदोनैकोनषष्टिः, सप्तहस्ते सार्द्धत्रिषष्टिः। अष्टहस्ते यवोना सप्तषष्टिः । नवहस्ते द्विसप्ततिः दशहस्ते यवोना १षट्सप्ततिरिति षोडशहस्ते षण्णवतिः चतुर्भुजे कुण्डे भुजाउक्ता इति व्याख्या । अत्रोपपत्तिः एकहस्तस्य चतुर्विंशत्यङ्गुलात्मकस्य भुजकोटिघातः क्षेत्रफलं तच्च षट्सप्तत्यधिकपञ्चशती५७६ । एतत्पदमेकहस्तक्षेत्राङ्गुलानि चतुर्विंशतिः। एवं क्षेत्रफलस्य द्व्यादिगुणस्य मूलं चतुस्त्रिंशदाद्यङ्गुलानि भवन्ति । अथयोनिनिवेशनम् "कुण्डत्रयी दक्षिणयोनिरैन्द्र्याः सौम्यापरा स्यादितराणि पञ्च । पश्चाद्गतानीन्द्रदिगप्यकाष्ठी योनिर्न कोणे न च योनिकुण्डे" ऐन्द्र्याः प्राच्या आरभ्य कुण्डत्रयी चतुरस्रयोनिवृत्तार्द्धरूपा दक्षिणयोनिः स्यात् उत्तराया ऊर्द्धहोता उदङ्मुखः। इतराणि पञ्च कुण्डानि त्र्यस्रवृत्तषडस्रपद्माष्टास्राणि प्रत्यग्योनीनि प्रागग्राणि अर्थाद्धोता प्राङ्मुखः । नवममपि कुण्डं दक्षिणयोन्युदगग्रम् । योनिः कोणे योनिकुण्डे च न कार्येति व्याख्या। स्वायम्भुवे "प्रागग्नियाम्यकुण्डानां प्रोक्ता योनिरुदङ्मुखी । पूर्व्वमुखाः स्थिताः शेषाः यथाशोभं व्यवस्थिताः" इति । त्रैलोक्यसागरे "नवमस्यापि कुण्डस्य योनिर्दक्षदले स्थितेति" अन्यत्र "नार्पयेत् कुण्डकोणेषु योनिं तान्त्रिकसत्तमः" इति "योनिकुण्डे तथा योनिं, पद्मे नाभिं विवर्जयेदिति"। अथ सर्व्वेषां कुण्डानां प्रकृतिभूतं चतुरस्रमाह "द्विघ्नव्याससूत्रं चिह्नं समाग्रं सूत्रं शङ्कौ पश्चिमे पूर्व्वगेऽपि। दत्त्वाकर्षेत् कोणयोः पाशतुर्य्यं स्यादेवं वा वेदकोणं समानम्" । इष्टव्यासात् द्विगुणितं व्यासं चतुर्थांशकृतचिह्नं सपाशं सूत्रं पूर्व्वपश्चिमस्थयोः शङ्क्वोर्दत्त्वा दक्षिणोत्तरसूत्रमध्ये यथामत्स्यचिह्नं भवति तथा कोणयोः पाशाच्चतुर्थांशे आकर्षेत् एवमन्यतोऽपि। एवं कृते समचतुरस्रं स्यात् इदमेव सर्व्वेषां कुण्डानां मूलमिति व्याख्या । उक्तं च "चतुरस्रमिदं प्रोक्तं सर्व्वकुण्डेषु कारणमिति" अत्र "समश्रुतौ तुल्यचतुर्भुजे च तथाऽऽयते तद्भुजकोटिघातः" क्षेत्रफलं षट्सप्तत्यधिकपञ्चशती ५७६ एतावदेव योन्यादिकुण्डेषु एकहस्तेषु यथा क्षेत्रफलं सम्पद्यते तथा यतितव्यमिति। अथ योनिकुण्डमाह "क्षेत्रे जिनांशे तु पुरःशरांशान् संवर्द्ध्य च स्वीयरदांश२२ युक्तान्। कर्णार्द्धमानेन लिखेन्दुखण्डे प्रत्यक्पुरोऽङ्काद् गुणतोभगाभम्" । चतुरस्रक्षेत्रे चतुर्विंशतिधा भक्ते सति पञ्चांशान् स्वीयद्वात्रिंशदंशयुक्तान् अग्रे संवर्द्ध्य ततश्चतुर्धा विभक्तस्य क्षेत्रस्य पश्चिमचतुरस्रद्वयमध्याङ्कात् कर्णसूत्रस्य चतुर्थांशेन प्रत्यक्पश्चिमभागे इन्दुखण्डे वृत्तार्द्धद्वयं विद्वन् । लिख । ततः पूर्वाङ्काद्दक्षिणोत्तरसंलग्नं वृत्तार्द्धं यावद्धीयमानगुणद्वयतो भगाकारं योनिकुण्डं स्यादिति व्याख्या । अथ क्षेत्रफलानयनम् अत्र क्षेत्रत्रयं पूर्व्वाङ्काद्दक्षिणोत्तरसूत्राग्रं यावद्धीयमानसूत्रद्वयं त्रिकोणमेकं, तथा दक्षिणोत्तरसूत्राग्रात्पूर्वापरसूत्रान्तं यावद्धीयमानसूत्रद्वयादपरं त्रिकोणम् उभयवृत्तार्द्धे मिलित्वा एकं वृत्तमिति तृतीयं, क्षेत्रत्रयफलयोगे पूर्णफलम् तत्र प्रथमस्य क्षेत्रफलं यथा अत्र लम्बः अङ्गुलानि १७ यवः१यूका२ । भूः२४ "लम्बेननिघ्नं कुमुखैक्यखण्डमिति" । अत्र कुमुखाभावाद्भूमध्यमेव लम्बेन गुणितं सञ्जातं प्रथमं क्षेत्रफलम् अङ्गुलानि२०५ यवाः ७ । अथापरस्य लम्बः १२ भूः सैव अत्रापि तथैव रीत्या क्षेत्रफलं १४४। अथ वृत्तार्द्धयोरेकं वृत्तं तत्फलं यथा तत्र वृत्तव्यासः१६,७,४,१ "व्यासस्य वर्गे भनवाग्निनिघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते" इति व्यासवर्गः २८८ ०।०।२ । अयम्भनवाग्नि ३९२७ निघ्नः पञ्चसहस्र५०००भक्तोजातं क्षेत्रफलं वृत्तस्य ११६।१ । ४ । ५। त्रयाणां योगे क्षेत्रफलं पूर्णं ५७६।० । ४ । ५ । अत्र लिक्षापञ्चकं यूकाचतुष्टयञ्चाधिकम् अल्पान्तरत्वाददोषः। ध्वजायसिद्धिश्चान्यत्रोक्ता। "स्थापने सर्व्वकुण्डानां ध्वजायः सर्व्वसिद्धिदः। शतांशेनाधिकं हीनं ह्रासवृद्धी न दूषयेत् । आयदोषविशुद्ध्यर्थं क्रियते शास्त्रकोविदैरिति" । एतत्क्षेत्रस्योत्तराग्रत्वात् उदीचीप्राचीवद्द्रष्टव्या एवमन्ययोरपि । पदार्थादर्शे "चतुर्विंशतिधा मध्यसूत्रं भक्त्वा पुरोन्यसेत्। पञ्चांशान् वैककस्य त्रीन्विंशत्यंशान् कोणपादतः। वृत्तार्द्धे स्तो मध्यतिर्य्यक्सूत्रान्तश्च ततोऽर्पयेत । पुरो वर्द्धितसूत्रान्तं, सूक्ष्मे द्वे स्याद्भगाकृतिरिति"

"इमानि कुण्डानि कादिपञ्चविंशानीयत्नादरणीयानि । तानि वचनानि तु तदाकारत्वमात्रसम्पादकानि न क्षेत्रफलपूर्त्तिकराणि तत्र शिष्यक्षोभाभूदिति स्थूलमार्गेण योन्याद्याकारमात्रं प्रतिपाद्यते । योगणितानभिज्ञस्तेन चतुरस्रकुण्डं तदङ्गुलादिना पूरयित्वा तानेव तदङ्गुलान् योन्यादिकुण्डे क्षत्वा तत्पूर्त्तौ तोष्टव्यमिति । अङ्गुलयवयूकालिक्षाः कृत्वा गोमूत्रिकारीत्या गणयित्वा अष्टभिर्भागे गृहीते फले उपर्य्युपरि च योज्यमाने कलायुतपद्यते वंशसवर्णनादि कुण्डमात्रेष्विति ध्येयम् । वृत्तार्द्धकुण्डमाह "स्वगतांशयुतेषुभागहीन स्ववरित्रीमितकर्कटेन मध्यात् । कृतवृत्तदलेऽग्रतश्च जीवां विदधातीन्दुदलस्य साधु सिद्ध्यै" । स्वीयगतांशेन युतोय इषुभागः पञ्चमांशः अर्थात् क्षेत्रस्यैव, तेन हीना यासौ स्वभूमिः क्षेत्रजन्मितेन कर्कटेन सूत्रेण वा मध्याङ्कात् कृतं यद्वृत्तार्द्धं तस्मिन् पूर्वापरां रेखाञ्जीवारूपां वृत्तार्द्धस्य सिद्ध्यै साधु स्याद्यथा, तथा करोतु विद्वानिति व्याख्या । अत्र क्षेत्रफलम् क्षेत्रस्य पञ्चांशोऽङ्गुलाद्यः ४ । ६ । २ । १ । ५ । तस्य शतांशोऽङ्गुलाद्यः ०।० । २ । ० । ४ । अनेनान्वितः पञ्चांशः ४ । ६ । ६ । २ । १ अनेनोना क्षेत्रभूमिः १९ । १ । १ । ५ । ७ एतद्व्यासार्द्धं द्विगुणं व्यासः ३८ । २।३।२।६। अत्रापि व्यासस्य वर्गः १४४४ । ५ । २ । ५ । ४ । भनयोग्निनिघ्ने २९२७ । पञ्चसहस्रभक्ते इत्यादि रीत्या क्षेत्रफलम् ११५२ । २ । २ । ६ । २ । एतद्वृत्तस्य फलम् अस्यार्द्धं वृत्तार्द्धक्षेत्रफलम् ५७६ । १।२ । १ अत्रापि ध्वजायविद्धिः । अथ त्र्यस्रवृत्तकुण्डमाह "षड्ग्रथं पुरतो निधाय च पुनः श्रोणद्वयेचतुर्थांशकचिह्नेषु त्रिषु सूत्रदानतइदं स्यात्त्र्यस्रि कष्टोज्झितम् । विश्वांशैः स्वजिनांशकेन सहितैः क्षेत्रे जिनांशे कृते व्यासार्द्धेन मितेन मण्डलमिदं स्याद्वृत्तसंज्ञं शुभम्" अत्र पूर्वोक्तं कुण्डं व्याख्यायते क्षेत्रस्य तृतीयांशम्पूर्वतोनिधाय तत उभयश्रोणद्वयेचतुर्थांशं निधाय दक्षिणत उत्तरतश्च दत्त्वा त्रिचिह्नेषु सूत्रदानात् कष्टरहितं त्र्यस्रि जायते इति तृतीयांशोऽष्टाङ्गुलानि मध्यसूत्रे योजितानि जातोलम्बः पश्चिमभुजे उभतश्चतुर्थांशः षडङ्गुलानि योजितानि जातानि भूः २६ अत्र सुखाभावात् भूमेरर्द्धं कृतम् १८ इदं लम्बेनानेन निघ्नञ्जातं अत्र क्षेत्रफलम् ५७६ समभुजे क्षेत्रफलञ्च सिद्ध्यतीति कष्टोज्झितमित्युक्तम्

किञ्चिद्भुजवैषम्यं न दोषाय कुत्रापि ध्वजाय एवेति । अथोत्तरार्द्धेन वृत्तमाह क्षेत्रे चतुर्विंशतिभक्ते सति त्रयोदशांशैः सह चतुर्विंशत्यंशयुतैः मितेन व्यासार्द्धेन मण्डलं यद्वृत्तं तत् वृत्तसंज्ञं कुण्डं सुन्दरं स्यात् । अथ क्षेत्रफलानयनम् अत्र त्रयोदशानाञ्चतुर्विंशांशोऽङ्गुलाद्यः०४ । २ । ५ । २ । अनेन युतास्त्रयोदश १२ । ४।२ । ५ । २ । इदं व्यासार्द्धमेतद्द्विगुणं व्यासः २७ । ० । ५ । २ । ४ अस्य व्यासस्य वर्गेऽस्मिन् ७२९ । ० ।२। १। २ भनवाग्निनिघ्ने० पञ्चसहस्रभक्ते इत्यादिना क्षेत्रफलम् ५७६ ।०।६।०। अत्रापि ध्वजाय एवेति । अथ षडस्रमाह "भक्ते क्षेत्रे जिनांशैर्धृतिमितलवकैः स्वाक्षिशैलांशयुक्तैर्व्यासार्द्धं मण्डले तन्मितधृतगुणके कर्कटे सेन्दुदिक्षु । षट्चिह्नेषु प्रदद्यात्स्वमितगुणकानेकमेकन्तु हित्वा नाशे सञ्ज्यंशदोषामपि च धृतिकृते नेत्ररम्यं षडस्रम्" । क्षेत्रे चतुर्विंशतिधा विभक्ते सति अष्टादशांशैः स्वद्वासप्ततितमांशयुक्तैस्तावता व्यासार्द्धेन वृत्ते कृते सति तेनैव व्यासार्द्धेन मिते गुणके सूत्रे सति कर्कटे वा उत्तरदिक्तो धृते सति परावर्त्तनेन षट्चिह्नानि भवन्ति तेषु षट्सु चिह्नेषु षट्सूत्राणि एकान्तरेण परस्परलग्नानि दद्यात् ततः सन्धौ ये अङ्कदोषाः षड्भुजास्तेषां नाशे धृतिकृते मण्डलस्य विनाशे षडस्रि रमणीयञ्जायत इति व्याख्या अस्मिन् षडस्रे व्यासः २६ । ४ । ० अत्रोत्तराग्रं त्रिकोणमेकं महत् तद्भुजमानं त्रिदशाङ्काग्निनभश्चन्द्रैर्हतव्यासे समाहृते । [illegible]भार्द्धे१२००००संभक्ते लभ्यन्ते क्रमशोभुजाः" इति त्रयाणां भुजानां मानं २१ । ४।२।० उत्तराग्रात् पूर्वापरभुजमध्यं यावन्नीयमानं सूत्रं लम्बश्चतुर्थांशोव्यासएव २७।६।० भुजाः, एवं भूः सुखाभावाद्भूम्यर्द्धं १५।६।२।४ लम्बेन निघ्नमित्यादिना जातं क्षेत्रफलं ४२२।५।२ अथास्य महतस्त्रिभुजस्य त्रिष्वपि भुजेषु त्रीणि त्र्यस्राणि समान्येव लघूनि भवन्ति तत्रैकस्य फलमानीय त्रिगुणं कृत्वा पूर्व्वफले योजितं सत् पूर्णं क्षेत्रफलं स्यात् । तत्र दक्षिणकोणाग्रात् पूर्वापरभुजमध्यं नीयमानं सूत्रं लम्बः ८।१।० अयं व्यासचतुर्थांशः भुजत्र्यंशोभूमिः १०।४।२।२ सर्वत्र त्र्यंश एव भुजस्मानात् अत्र सुखाभावाद्भूमेरर्द्धं ५।२।१।१। इदं लम्बेन गुणितं क्षेत्रफलं ४८।०।४।२।१ जातं इदं त्रिगुणं त्र्यस्राणामपि फलं १४४।१।४।६ ।२। इदं पूर्वक्षेत्रफलेऽस्मिन् ४२२।५।२ योजितं ५७६।७।१।४।६। इदपकिञ्चिदधिकैकयुकाधिकं

सप्तयवाधिकं अस्मान्तरत्वाददोषः। अथ वा व्यासोयूकया न्यूनः कार्य्यः। ध्वजायसिद्धिश्च। अथ वा किमितावता प्रयासेन लघुत्रिकोणं कुण्डं क्षेत्रं द्वादशांशः तत्क्षेत्रफलं स्यात् द्वादशगुणितं पूर्णं क्षेत्रफलम्। अथेदं कुण्डं स्वबुद्धिविलासमात्ररचितमिति नोपेक्षणीयं यतः षट्कोणता समभुजताफलं च सम्पद्यते एवं "मानाधिक्ये भवेद्रोगो मानहीने दरिद्रता" इत्यादिदोषापत्तिरपि नास्ति। अथ वक्तव्यं प्राचीनकृतकुण्डविरुद्धत्वर्हि दृश्यते च प्राचीनकृतकुण्डेषु परस्परविरुद्धता इदमेव कुण्डं रामवाजपेयिभिर्विषमभुजं मृदङ्गाकारं कृतं राघवभट्टादिभिः समभुजमेव कारितं लक्ष्मणाचार्य्यादयोऽप्यन्यथैवोचुः तस्मादस्मदुक्ते नेत्ररञ्जनीये समभुजे क्षेत्रफलसंवादिनि षट्-कोणे विद्वद्भिर्नानादरो भाव्यमिति। अथ ये प्राचीनकृतावेवाग्रहिणस्तेषान्तोषायापि समभुजमाह "अथ वा जिनभक्तकुण्डमानात्तिथिभागैः स्वस्वभूपभागहीनैः। मितकर्कटकोद्भवे तु वृत्ते विधुदिक्तः समषड्भुजैः षडस्रम्" अथ वा चतुर्विंशतिभक्ते कुण्डमाने सति स्वीयषष्ट्यधिकशतभागेन हीनैः पञ्चदशभागैर्मितोयः कर्कटस्तदुद्भवे वृत्ते उत्तरदिक्तः सकाशात् समैः षड्भिर्भुजैर्दत्तैः परस्परलग्नैः षडस्रं वृत्तमार्जनेन भवतीति व्याख्या। अथ क्षेत्रफलानयनं तत्र 'वृत्तव्यासे द्विसंभागे षडस्रे स्युर्भुजाः स्फुटा' इति भुजमानम् १४। ७। २। २ क्षेत्रमध्ये दक्षिणोत्तरां रेखान्दत्त्वा ऊर्ध्वे भुजसंपाततः पूर्व्वापरं रेखाद्वयम् अधोभुजसंपातावधि दद्यात् एवं कृते चतुरस्रद्वयं परस्परलग्नं भवति पूर्व्वापररेखयोर्दक्षिणोत्तररेखया सह सम्पातश्चतुर्थांशे एव भवति सैवाबाधा तन्मानं ७।२।५ भुजः १४।७।२ "स्वाबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः" इति साधितो लम्बः १२।७।१। अयमेव मध्यलम्बः "लम्बेन निघ्नं कु २८।६।४ मुखैः १४।७।५।२कय ४४।५।६ खण्डम्" २२।२।७। इति जातं क्षेत्रफलं २८८।१।१।६ एवमपरस्यापि खण्डस्य। उभययोगे ध्वजायसिद्धिश्चेति। अथ पद्मकुण्डमाह "अष्टांशाढ्य युतश्च वृत्तशरके तत्तादिभे कर्णिकायुग्मे षोडश केशराणि चरमे स्वाष्टतिभागोनिते। भक्ते षोडश केशराणि च धृते स्युः कर्कटेऽष्टौ छदाः सर्वांस्तान् खन कर्णिकां त्यज निजायामोच्छ्रकं स्यात् कजम्"। क्षेत्रस्याष्टमांशादष्टांशवृद्ध्या च वृत्तपञ्चके कृते सति तत्र पञ्चकमध्ये प्रथमं तत्कर्णिका, द्वितीये षोडश केशराणि, द्वितीयं केशरस्थानमित्यर्थः।

अन्तिमे पञ्चमे वृत्ते स्वस्य अङ्गुलत्रयात्मकस्याष्टमिं शदं शोणितस्य षोडशसु स्थानेषु दिक्षु विदिक्षु तदन्तराले च समतया भाजिते तस्मिन्वृत्ते पञ्चचिह्नान्तरे दिशि विदिशि च कर्कटके धृते सति परावर्त्तनेनाष्टौ पत्राणि जायन्ते सर्वांस्तान् केशरादीन् केशरवृत्ततृतीयचतुर्थवृत्तानि पत्राणि च हे विद्वन्! खन कर्णिकां त्यज मा खन। कीदृशीं निजः स्वकीयश्चायामो विस्तारस्तत्तुल्यमौच्च्यं यस्यास्तां, कजं पद्मकुण्डम् बहिर्वृत्तमार्जनेन स्यादिति व्याख्या। अथ क्षेत्रफलानयनम् अत्रोपान्तिमस्य चतुर्विंशत्यङ्गुलस्य पूर्व्ववत् क्षेत्रं ६५।२।२।१ अन्तिमवृत्तस्यास्य २८।३।४। क्षेत्रफलं ६९८।४।५।० अनयोरन्तरार्द्धम् १२३।४।६।० इदं पूर्व्वक्षेत्रफले योजितं वा अन्तिमवृत्तक्षेत्रफलम्। प्रवर्त्तितंमव्ज्ञातं पूर्णं फलं ५७६।०।१ यूकोनं फलमायात्यतोऽदोषः। अन्तिमवृत्ते शिखामात्रवर्द्धनेन ध्वजायसिद्धिश्चेति। अत्रान्तिमवृत्ते पत्रान्तरार्द्धभूसंपद्दोर्द्धमूल्यागश्च बुद्धिमता प्रत्यक्षत एवोपलब्धव्यः। अथाष्टास्रिकुण्डमाह "क्षेत्रे जिनांशे गजचन्द्रभागैः स्वाष्टाश्वि-२८ भागेन युतैस्तु वृत्ते। विदिग्दिशोरन्तरतोऽष्टसूत्रैस्तृतीयसूत्रैरिदमष्टकोणम्"। क्षेत्रचतुर्विंशतिभागे कृते सत्यष्टादशभागैः स्वीयाष्टाविंशेन युतैः कर्कटकेन वृत्ते कृते सति विदिग्दिशोर्मध्ये कृताष्टचिह्नेभ्यः अष्टभुजेभ्यस्तृतीयांशमिलितैः चिह्नद्वयं विधाय तृतीयचिह्नेन योजितैरष्टकोणं वृत्तमार्जनान्मध्यस्थाष्टदोःखण्डमार्जनाच्च भवतीति व्याख्या। अथ "क्षेत्रफलानयनं व्यासार्द्धं १८।५।१।०। व्यासः ३७।२।२। अथ "द्विदिनन्देषुसागरैर्वृत्तव्यासे समाहते। खखखाभ्रार्कसंभक्ते लभ्यन्ते क्रमशो भुजाः" इति १४।२ एतद्वृहद्भुजमानं दक्षिणोत्तररेखा कोटिः कल्प्यते क्षेत्रे भुजकोटिघातः क्षेत्रफलम्। भुजकोटिमानं तु वृहद्भुजतुल्यं मध्येऽन्तरम् १४।२।२ याम्योत्तररेखोभयप्रान्तवर्त्तिरेखा खण्डमाने योजितं सत्कोटिः स्यात् यथा दक्षिणोत्तरपूर्व्वापररेखा खण्डयोगादूर्ध्वरेखातिर्य्यग्रूपे च भुजकोटिरूपे तदग्राह्यीयमानो महाभुज एव कर्णः १४।२।२।५।० अस्य वर्गार्द्धमूलं तिर्य्यग्रूपभुजकोटिमानं लघुः १०।०।६।२। यतोऽत्र भुजकोटिवर्गयोगः कर्णवर्गो भवति इदं कोटिमानं द्विघ्नं सत् पूर्व्वभुजे योजितं जाता कोटिः दक्षिणोत्तररेखारूपा २४।२।५।४। एतद्वृहद्भुजघातफलं ४८२।१।१।२। अथ कोणक्षेत्रयोः फलं लघुभुज-वर्गेण तुल्यमेतत् १०१।७।६। पूर्व्वफलादस्मा ४८२।

१।१।२। च्छोधितं सजातं फलम् २९०।१।३।२। अस्मिन् पूर्व्वापरकोणानां चतुर्णां फलं योजितं सत्पूर्व्वं फलं स्यात्। तत्र पूर्व्वकोणयोः फलं यथा इहङ्गजोभुजः १४।२२। पूर्व्वापररेखाखण्डं कोटिः१०।०।६।२। अनयोर्घातः १४४।१।५।६२ अस्मात्कोणक्षेत्रफलमेतत्५०।७।७ शोधितं सञ्जातं पूर्व्वकोणयोः फलम्९३।१।६।एतदेवापरकोणयोः, अतोद्विघ्नमेतत् १८६।३।४। पूर्व्वक्षेत्रफलेऽस्मिन्२९०।१।३।२। योजितं सञ्जातं क्षेत्रफलं ५७६।५।०।०। अल्पान्तरत्वाद्दोषः ध्वजायसिद्धिश्च। इदं सर्व्वथा नेत्ररमणीयमित्यङ्गीकर्त्तव्यम्। अथ प्रकारान्तरेण समाष्टभुजाष्टास्र कुण्डमाह "माध्ये गुणे वेदयमैर्विभक्ते शक्रैर्निजाद्र्यब्धिलवेन युक्तैः। इत्थे कृते दिग्विदिशोऽन्तराले गजैर्भुजैः स्यादथवाष्टकोणम्"। माध्ये गुणे—सूत्रे चतुर्विंशतिभक्ते स्वसप्तचत्वारिंशदंशसहितैश्चतुर्दशभिर्व्यासार्द्धेन मण्डले कृते तत्र दिग्विदिशोर्मध्ये कृताष्टसूत्रैः परस्परसंलग्नैरष्टकोणम् प्रकारान्तरेण प्राचीनकृतिरशिक्षाभिमतं कुण्डं इतमार्जनाद्भवतीति व्याख्या। अथ क्षेत्रफलानयनम् "चन्द्रर्त्तुनन्दाक्षतिथि २२९६१ व्यासार्द्धे तु समाहते। खखखाभ्राग्निसंभक्ते ३०००० लभ्यन्ते कृतशोभुजाः" इति भुजमानं १०। ७।४।३।४। "ततःज्याव्यासयोगान्तरघातमूलं व्यासस्तदुतो दलितः शरः स्यादिति"। जातः शरः १।०।७।२।३। अथ याम्यभुजस्योभयान्तात् सम्मुखापर भुजप्रान्तद्वयं यावत् सूत्रद्वयं कुर्य्यात्। एवङ्कृते तिर्य्यग्दीर्घचतुरस्रं पार्श्वयो विषमभुजचतुरस्रद्वयञ्च स्यात् तत्र व्यासाद्यस्मात्२८।४।६। शक्रायाद्द्विगुणं शरं विहाय शेषोदीर्घचतुरस्रस्य भुजः। अथ वा ज्याव्यासवर्गान्तरमूलं भुजः किं शरकरणप्रयासेन२६।३।०। अष्टास्त्रिभुजएव कोटिः आयते भुजकोटिघातः क्षेत्रफलम् २८८।४।४। अथ विषमभुजचतुर्भुजक्षेत्रफलम् जीवार्द्धशरोनव्यासार्द्धं विषमचतुर्भुजे लम्बः ७।५।५।०। ज्यैव मुखं दीर्घचतुरस्रभुज एव भूः लम्बेन निघ्नं कु२६।३।०मुखे १०।७।४।३। क्य३७खण्डम् १८।५।२।१ क्षेत्रफलम् १४४।२।६।४ एवमपरस्यापि त्रयाणां योगः ५७६।१।४ ध्वजायसिद्धिश्च। अथवाष्टधनुषां फलमानीय वृत्तफलात् संशोध्यापि क्षेत्रफलं स्यादिति अस्मिन्समाष्टभुजे राघवभट्टादिभिरुक्ते शारदातिलकादिवाक्यैः सह महान्विरोधस्तस्मादस्मदुक्तमष्टास्रि नेत्ररम्यं क्षेत्रफलसंवादिसमभुजमेवादरणीयमिति"। अथ खातलक्षणं कण्ठलक्षणञ्चाह। "खातं क्षेत्रसमं प्राङ्गरन्ये तु मेखलां विना। कण्ठोजिनांशमानः स्यादङ्कोऽश इति चापरे"। कुण्डखननं क्षेत्रसम कुण्डस्य यावान्विस्तार आयामश्च तावत्खननमाद्यमेखलया सहितं कुण्डे कार्य्यम् योन्यादिकुण्डेषु विस्तारायामयोर्नानात्वाच्चतुरस्रस्यैवायामविस्तारौ ग्राह्यौ। अन्ये तु मेखलां वर्जयित्वा भूभावेव तावत् खननं कार्य्यमित्याहुः। कण्ठोऽपि क्षेत्रचतुर्विंशत्यंशमानः खाताद्बहिः कार्य्यः समन्तादेकाङ्गुलमितः। अन्ये क्षेत्रद्वादशांशपरिमित इति प्राहुरिति व्याख्या। सिद्धान्तशेखरे "खातं कुण्डप्रमाणं स्यादूर्द्ध मेखलया सह" प्रतिष्ठासारसंग्रहे "पञ्चत्रिमेखलोच्छ्रायं त्यक्त्वाऽशेषमधः खनेत्" मोहमूलोत्तरे "हस्तमात्रं खनेत्तिर्य्यगूर्द्ध मेखलया सहेति"। अथ पक्षान्तरे शारदातिलके "यावान् कुण्डस्य विस्तारः खननं तावदीरितमिति"। प्रयोगसारे "चतुरस्रस्थतःकोष्ठे सूत्रैः कृत्वा यथा पुरा। हस्तमात्रेण तन्मध्ये तावन्निम्नायतं खनेत्"। गणेशविमर्शिन्याम् "चतुर्विंशाङ्गुलायामं तावत्खातसमन्वितमिति" पक्षद्वैधे वयन्तु "स्यातद्वैधे तु विषयः कल्पनीयः पृथक् पृथगिति" वचनात् होमाल्पत्वबहुत्वयोरन्यतरपक्षावाश्रयणीयाविति युक्तमुत्पश्यामः। "औचित्यादर्थात् परिमाणमिति" कात्यायनोक्तिः; लोकान्तरे "खाताद्बाह्येऽङ्गुलः कण्ठः सर्व्वकुण्डेष्वयं विधिः। चतुर्विंशतमोभागः कुण्डानामङ्गुलं स्मृतमिति"। एतत्पारिभाषिकमङ्गुलं सर्व्वत्र बोद्धव्यम्। सोमशम्भौ "बहिरेकाङ्गुलः कण्ठोद्व्यङ्गुलः क्वचिदागमः" इति तेनाद्यः पक्षएव श्रेयान् बहुसंमतत्वात्। अथ मेखलानामधमतादिपक्षमाह "अधमा मेखलैका स्यान्मध्यमं मेखलाद्वयम्। श्रेष्ठा स्तम्भोऽथवा द्वित्रिपञ्चस्वधमतादिकम्"। एकमेखलापक्षोऽधमो द्विमेखलो मध्यः, त्रिमेखलः श्रेष्ठः। अथ पक्षान्तरे द्विमेखलोऽधमः त्रिमेखलोमध्यः पञ्चमेखलः श्रेयान् एकमेखलोऽधमाधम इति व्याख्या। क्रियासारे "नाभियोनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलम्। कुण्डं द्विमेखलं मध्यन्नीचं स्यादेकमेखलमिति" लक्षणसंग्रहे "मुख्या स्तु पञ्चताः प्रोक्तामध्यमास्तिस्र एव च। द्वे स्यातामवमे पक्षे एका सा त्वधमाधमेति" सोमशम्भुना तु विशेष उक्तः "त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम्। मेखलैका तु वैश्यस्येति" अथ खातं समेखलं क्षेत्रसममिति स्पष्टं वदन्मेखलालक्षणमाह "अष्टधा विहितकुण्डशरांशैःसङ्क्रमेद्भुवमुपर्य्यनलांशैः। मेखलाविरचयेदपि तिस्रःमह-

गजार्कलवविस्तृतिपिण्डाः "अष्टधा भक्तस्य क्षेत्रस्य यः स्वराङ्गुलात्मको भागस्तादृशैः पञ्चभिर्भागैर्भुवं खनेत् उपरित्रिमितादृशैर्भागैस्त्रिस्रो मेखला रचयेत् कीदृशीः षड्द्वादशांशाः चतुस्त्रिद्व्यङ्गुलमितास्तैस्तुल्यविस्तारौच्चत्वं यासां ता इति व्याख्या। विश्वकर्मा "व्यासात्खातः करः प्रोक्तो निम्नान्तिर्यङ्गुलेन तु। कण्ठात् परं मेखला तु उच्चता सा नवाङ्गुलैरिति"। क्रियासारे "प्रधानमेखलोत्सेधउक्तमत्र नवाङ्गुलम्। तद्वाह्यमेखलोत्सेधमङ्गुलद्वितयंक्रमात्। चतुस्त्रिद्व्यङ्गुलव्यासो मेखलात्रितयस्य तु" योगिनीहृदयेऽपि "मेखलाः शृणु मे देवि! हस्तादिषु विशेषतः। षड्भागार्कांशसम्भागैर्मिताः सुभीपिताः शुभाः" इति। अथ प्रकारान्तरेण मेखलालक्षणं नाभिलक्षणं चाह "रसांशकादुन्नतविस्तृताश्च तिस्रोऽथवैका युगभागतुल्या। पञ्चाथवा षट्शरवेदरामद्व्यंशैस्तताः स्युर्नवभागपिण्डाः। आद्यापरास्तच्छरभागहीना जिनांशकण्ठाद्बहिरेव सर्वाः। कुण्डानुसारा अपि मेखलाः स्युरर्काङ्गभागोच्चततिस्तु नाभिः। कुण्डाकारोनाभिरम्भोजसाम्योवाब्जेऽयं नेनांशहानिर्दलाग्रे। शेषक्षेत्रे वह्निवृत्तैः समे ते स्युर्वै कर्ण्यः केशराः पत्रकाणि" अथवा क्षेत्रषडंशादुन्नताः षडंशेनैव विस्तृतास्तिस्रो मेखला भवन्ति अथैकमेखलापक्षमाह एकैवमेखला क्षेत्रचतुर्थांशोच्चा तत्तृतीयांशविस्तृता च स्यात्। पञ्चमेखलापक्षमाह। अथ पञ्च मेखलाः कार्याः षट्पञ्चचतुस्त्रिद्व्यङ्गुलैः पारिभाषिकैर्विस्तृताः। अथपञ्चमेखलानामुच्चतामाह तत्रादिमा नवभागः पिण्डःऔच्चं यस्याः सा पारिभाषिकनवाङ्गुलोच्चा स्यात् अपरा मेखलास्तस्या आद्याया यः शरांशः पञ्चांशस्तेन हीना भवन्ति यथा एकहस्ते कुण्डे प्रथममेखला नवाङ्गुलोच्चा अस्याः पञ्चमांशः १।६।२।१।५ एष एकद्वित्रिचतुर्षु प्रथममेखलामाने न्यूनः कृतः सन् तदधःस्थानां मेखलानामौच्चं स्यात् यथेदं द्वितीयमेखलोच्चम् ७।१।४।६।२ एवमपरासामपि द्रष्टव्यम्। ताः मेखलाः सर्वाः क्षेत्रचतुर्विंशतिभागमितात् कण्ठाद्बहिरेव भवन्ति कीदृश्यः कुण्डानुकाराः योन्यादिकुण्डेषु योन्याद्याकारा एव स्युः अपिरेवार्थे। अथ नाभिलक्षणमाह नाभिर्द्वादशांशेनोच्चः षडंशेन विस्तृतः कुण्डानुकारः यादृशञ्चतुरस्राद्याकारं कुण्डं तादृशो नाभिः। अथवा नाभिरम्भोजसमः कमलाकारः कार्यः अयं नाभिरब्जे पद्मकुण्डे संभवति तत्र नाभिरूपायाः कर्णिकायाः समन्तात्। अथ पद्माकारकरणं नाभेरुच्यते दलाग्रे दलाग्रनिमित्तं द्व्यङ्गुलोच्चे चतुरङ्गुलविस्तारायामे नाभौ इनांशहानिर्द्वादशांशत्यागः कार्यः शेषमवशिष्टं क्षेत्रं तस्मिन् वृत्तत्रयं समभागेन कार्यम्। तत्र मध्यचिह्नात् प्रथमं वृत्तं कर्णिका द्वितीयं वृत्तं केशरस्थानं तृतीयं पत्राणि तद्बहिरवशिष्टद्वादशांशेन दलाग्राणि रचयेदिति व्याख्या। वाशिष्ठ्याम् "प्रथमं मेखला तत्र द्वादशाङ्गुलविस्तृतिः। चतुर्भिरङ्गुलैस्तस्याश्चोन्नतिश्च समन्ततः। ततश्चोपरिवप्रः स्याच्चतुरङ्गुलमुन्नतः। अष्टाभिरङ्गुलैः सम्यग्विस्तीर्णश्चोन्नतस्तथा"। पिङ्गलामते "एका षडङ्गुलोत्सेधविस्तारा मेखला मतेति" लक्षणसंग्रहे तु विशेष उक्तः। "चतुरङ्गुलविस्तारोत्सेधा चैकैव मेखलेति" तन्त्रान्तरे "षष्ठांशेनाष्टमांशेन मेखलाद्वितयं विदुरिति" अयं पक्षोऽबहुसंमतत्वादुपेक्षित एव। सिद्धान्तशेखरे "षड्बाणाब्धिवह्निनेत्रमिताः स्युः पञ्च मेखलाः" इति लक्षणसंग्रहे "पञ्च वा मेखलाः कार्याः षट्पञ्चाब्धित्रिपक्षकैः। प्रथमा कुण्डसहितोत्तरोत्सेधनवाङ्गुलेति" पिङ्गलामते "खातादेकाङ्गुलन्त्यक्त्वा मेखलानां स्थितिर्भवेदिति" शारदायाम् "कुण्डानां यादृशं रूपं मेखलानाञ्च तादृशम्" इति तत्रैव "कुण्डानां कल्पयेदन्तर्नाभिमम्बुजसन्निभम्। तत्तत्कुण्डानुरूपं वा मानमस्य निगद्यते" षष्ट्यरत्निरत्निहस्ता नाभेरुत्सेधता मता। नेत्रवेदाङ्गुलोपेतेति" पद्मे नाभिं विवर्जयेदिति प्रागेव लिखितम्। अम्बुजाकारकरणं तत्रैव "पद्मकुण्डे तु क्षेत्रस्य द्वादशांशं बहिः सुधीः। तन्मध्ये विभजेद्वृत्तैस्त्रिभिः समविभागतः। आद्यं स्यात् कर्णिकास्थानं केशराणां द्वितीयकम्। तृतीयन्तत्र पत्राणां सुक्ष्मांशेन दलाग्रकमिति" अथ योनिलक्षणमाह "योनिर्व्यासार्द्धदीर्घा विततगुणलवादायताब्धिद्विभागात्तुङ्गातापत् समन्तात् परिधिरुपरिगस्तावदग्रेण रम्यम्। निम्नं कुण्डं विशन्ती बलयदलयुगेनान्विताधो विशाला, मूलात् सच्छिद्रनालान्तरवटरुचिराश्वत्थपत्राकृतिः स्यात्" योनिर्व्यासार्द्धेन दीर्घा विस्तारतृतीयांशेन विस्तीर्णा चतुर्विंशांशेनोच्चा चतुर्विंशांशेन परिधिमेखला यस्याः सा तावतैवाग्रेण चतुर्विंशांशेन निम्नं यथा तथा कुण्डं प्रति विशन्ती बलयदलयुगेन वृत्तार्द्धद्वयेन युता अधो विशाला अर्थादुपरिखर्वसंकोचनवती मूलात्स्थलात् सकाशात् मध्ये सच्छिद्रं नालं

यस्याः सा पद्मनालाकारत्वान्नालोक्तिः। अन्तर्मध्ये अवटो गर्त्तः स्रुचि घृतधारणार्थं यद्वत्तेन रुचिरा सुन्दरा सा अश्वत्थपत्राकृतिः स्यादिति व्याख्या। वायवीये "मेखलां मध्यतः कुर्य्यात् पश्चिमे दक्षिणेऽपि वा। शोभनां मध्यतः किञ्चिच्छिन्नामुन्मीलितां शनैरिति" योनिमिति शेषः। त्रैलोक्यसारे "दीर्घा सूर्य्याङ्गुला योनिस्त्र्य' शोना विस्तरेण तु। एकाङ्गुलोच्छ्रिता सा तु प्रविष्टाऽभ्यन्तरे तथा। कुम्भद्वयार्द्धसंयुक्ता साश्वत्थदलवन्मता। अङ्गुष्ठमेखलायुक्ता मध्ये वाज्यधृतिस्तथेति" पञ्चरात्रे "अर्काङ्गुलोच्छ्रितां योनिं विदध्यात्तावदायताम्" तावद्दीर्घाम् एकाङ्गुलोच्छ्रिता इत्यस्य विवरणम् अङ्गुष्ठमेखलायुक्तेत्यत्र अङ्गुलद्वयमुच्छ्रायः कुत्रचिदुक्तः अङ्गुलं परिधिरिति द्वादशाङ्गुलोच्छ्रायः अयं न प्रायोबहुसंमतपक्षः अतोऽस्मदुक्त एकाङ्गुलोच्छ्रायपक्षो बहुसंमतः कार्य्यः। शारदायाम्" "मूलादारभ्य नालं स्याद्योन्या मध्ये सरन्ध्रक मिति' द्वादशाङ्गुलमेखलापक्षे योनिलक्षणमाह "अथार्काङ्गुलपक्षे तु मेखलानान्दशाङ्गुलैः। विस्तृता तिथिभिर्दीर्घाङ्गुलिभिर्योनिरिष्यते" मेखलानां दशाङ्गुलैर्विस्तृता तिथ्यङ्गुलैर्दीर्घा योनिः स्यादिति व्याख्या। प्रयोगसारे "स्थितां प्रतीच्यामायामे सम्यक् पञ्चदशाङ्गुलाम्। द्विपञ्चाङ्गुलविस्तारां षट्चतुर्द्व्यङ्गुलाः क्रमात्। त्रयोदशाङ्गुलोत्सेधां योनिं कुण्डस्य कारयेत्"। केचित् योनिक्षेत्रस्य दीर्घचतुरस्रस्य यत्फलं तस्य मूलमानीय तावत्समचतुरस्रं संशोध्य योनिकुण्डवद्योनिं साधयेदित्याहुः"। अधिकं कुण्डार्कादौ दृश्यम्।

"रसं पिबेत् कुमारोऽयं त्वत्प्रसादात् महाबलः। बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम्। यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्"। "एकोच्छ्वासात्तत कुण्डं पिबति स्म महाबलः। एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः" भा॰आ॰ १२८अ॰। "साधुभिर्गर्हितं कर्म्म चण्डालस्य विधीयते। तस्मात् गोरजसा ध्वस्तमपां कुण्डे निषिञ्चति" भा॰ आनु॰ १०१अ॰। कण्ड्यते कुलमनेन कुडि–दाहे करणे घञ्। अमृते भर्त्तरि ५जारजाते स्त्रियां टाप्। "परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ। पत्यौ जीवति कुण्डः स्यात् मृते भर्त्तरि गोलकः। तौ तु जातौ परक्षेत्रे प्राणिनौ प्रेत्य चेह च। दत्तानि हव्यकव्यानि नाशयेते प्रदायिनाम्" मनुः। "ब्राह्मणा एव संपूज्या पुण्यस्वर्गमभीप्सता। श्राद्धकाले तु यत्नेन भोक्तव्याह्यजुगुप्सता। दुर्वचाः कुनखी कुष्ठी मायावी कुण्डगोलकौ। वर्ज्जनीयाः प्रयत्नेन काण्डपृष्ठाश्च देहिनः" भा॰ स॰ १९९अ॰। "द्विजात् द्विजातिभार्य्यायां सवर्णायाम्तुत्पन्नकुण्डगोलकयोः संस्कारार्हता यथाह "प्रयोगपारिजाते ब्राह्मे "ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः। तस्माच्च षण्डबधिरकुब्जवामनपङ्गुषु। जडगद्गदरोगार्त्तशुष्काङ्गविकलाङ्गिषु। मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम्। मत्तोन्मत्तौ न संस्कार्य्याविति केचित् प्रचक्षते। कर्म्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः। तदपत्यञ्च संस्कार्य्यमपरे प्राहुरन्यथा। संस्कारमन्त्रहोमादीन् करोत्याचार्य्य एव तु। उपनेयांश्च विधिवदाचार्य्यस्य समीपतः। आनीयाग्निसमीपं वा सावित्रीं स्पृष्ट्वा वाचयेत्। कन्यास्वीकरणादन्यत् सर्वं विप्रेण कारयेत्। एवमेव द्विजैर्जातौ संस्कार्य्यौ कुण्डगोलकौ" अतस्तस्य ब्राह्मणत्वेऽपि श्राद्धेऽन्नदाननिषेध इति विशेषः। अत्रेदं बोध्यम्। "अशुल्कोपहृतायां तु पिण्डदा वोढुरेव ते" स्मृत्युक्तेः शुल्कदानं विना उपगतपरस्त्रियां जातस्य वोढुरेव पुत्रत्वं शुल्कदाने तु उत्पादयितुरेवेति। अतएव "यन्मे माता प्रलुलोभ रेतः" इत्यादि श्रुत्या क्षेत्रिण एव पिण्डदत्वं भङ्ग्योक्तम्। अस्य प्रस्थेन सह समासे आद्युदात्तता। तेन निर्वृत्ताद्यर्थे चतुरर्थ्यां अश्मा॰ र। कुण्डर तन्निर्वृत्तादौ त्रि॰ कुडि–दाहे भावे अ। ६दाहे स्त्री।

कुण्डक पु॰ धृतराष्ट्रपुत्रभेदे। "कुण्डकश्चित्रसेनश्च सुवर्च्चाः कनकध्वजः" भा॰आ॰१८६अ॰, कुण्ड+स्वार्थे क। २कुण्डार्थे,

कुण्डकीट पु॰ कुण्डे योनिकुण्डे कीट इव विचारशून्यत्वात्। १पतितब्राह्मणपुत्रे २जारजातब्राह्मणपुत्रे ३दासीकामुके ४चार्व्वाकवचनाभिज्ञे पुरुषे च मेदि॰।

कुण्डगोलक न॰ कुण्डे गोलं गोलाकारं कं जलमत्र। १काञ्जिके हेमच॰। स॰द्वन्द्वः। २कुण्डगोलकयोः समाहारे च।

कुण्डङ्ग पु॰ कुण्डं तदाकारं गच्छति गम–वा॰ख डिच्च। निकुञ्जिकादृक्षे हेम॰ तस्य लतादिनाऽपिधानेन कुण्डाकारत्वात्तथात्वम् [च शताधिका" भा॰ आ॰ ६७अ॰।

कुण्डज पु॰ धृतराष्ट्रपुत्रभेदे "कुण्डजश्चित्रकश्चैव दुःशला

कुण्डजठर पु॰ कुण्डइव जठरमस्य। १कुण्डाकारोदरे २का

षिभेदे पु० "आत्रेयः कुण्डजठरोद्विजः कालघटस्तथा" भा०आ० ५३अ०,

कुण्डधार त्रि० कुण्डं कुण्डाकारं धारयति धारि–अण् उप० स०। नागभेदे, "मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ" भा० स० ६अ०,

कुण्डपायिन् पु० भूम्नि कुण्डेन कुण्डाकारचमसेन पिबन्ति सोमम् पा–णिनि। कुण्डेन सोमपायिषु सयजमानषोडशर्त्विक्साध्यसत्रभेदकारिषु

कुण्डपायिनामयन न० ६त०अलुक् स०। सत्रभेदे तदितिकर्त्तव्यतादिकम् आश्व०श्रौ०१२।२।२–सूत्रादौ उक्तं यथा "कुण्डपायिनामयनम्"सू०। "एतन्नामकमिदं सत्रमभिक्रान्तं वेदितव्यम्"वृ०। "मासन्दीक्षिता भवन्ति" सू०। "अयं मासशब्द एकान्नविंशतिरात्रे उपचरितः, एकान्नविंशतिरात्रादिकं सावनवद्भवतीत्यर्थः" वृ०। "ते मासि सोमं क्रीणन्ति" सू०। "अयमप्युपचार एव दीक्षाकाले। मासेऽतीते दीक्षिताः सोमं क्रीणन्तीत्यर्थः" वृ०। "तेषां द्वादशोपसदो भवन्ति"सू०। "सात्रिकाणान्दीक्षाणामपवादो दीक्षाविधिः, तथा सात्रिकाणामुपसदामपवादोऽयमुपसद्विधिः"वृ०। "सोममुपनह्य प्रवर्ग्यपात्राण्युत्साद्योपनह्य वा मासमग्निहोत्रं जुह्वति"सू०। "उपसत्स्वतीतासु प्रवर्ग्यपात्राण्युत्साद्योपनह्य वा तानि तानि, ते एकं मासम् अग्निहोत्रं जुह्वति सायं प्रातः"वृ०। "प्रातरुपक्रमः सायमपवर्गः"सू० "प्रातःकालस्य प्रथमप्राप्तत्वात् उपसत्काले द्वादशाहेऽतीतेऽग्निहोत्रस्य प्रातरारम्भान्नैमित्तिकादग्निहोत्रात् कर्म्मान्तरमेतदिति न्यायविदां प्रसिद्धम्"वृ०। "मासं दर्शपूर्णमासाभ्यां यजन्ते" सू०। "अग्निहोत्रमासेऽतीते ततः अनन्तरमेकं मासं दर्शपूर्णमासाभ्यां यजन्ते"वृ०। "कृष्णपक्षेऽहरहः पौर्णमास्या, शुक्लपक्षेऽहरहरमावास्यया, मित्रावरुणयोरयने तथा दृष्टत्वात्" सू०। "एवमत्र सम्पादनीयम्—यथा कृष्णपक्षादौ पौर्णमास्याऽहः सम्भवति, तत्र दीक्षारम्भः कर्त्तव्य इति" वृ०। "मासं वैश्वदेवेन" सू०। "अहरहरनेन यष्टव्यम्। वैश्वानरपार्जन्या तु न भवति आरम्भार्थत्वात्तस्याः, स चारम्भः सत्रे न प्रसक्त इति"वृ०। "मासं वरुणप्रघासैः मासं शाकमेधैः एतैरहरहर्यजेरन्"सू० "एकाहेनापवृज्य प्रकृतेर्द्व्यहसमापनीयत्वाद्द्व्यहेन वा कुर्य्यात्। अध्वर्युप्रत्ययात्समापनमिति स्थितिः"वृ०। "मासं शुनासीरीयेण" सू०। "अनेनाप्यहरहरेव" वृ०। "यदहर्मासः पूर्यते तदहरिष्टिं समाप्याग्निप्रणयनादिधर्मोत्सादनादि चौपवसथिकं कर्म्म कृत्वा श्वोभूते प्रसुनुयुः"सू०। "यस्मिन्नहनि मासः पूर्यते तस्मिन्नहनि शुनासीरीयेष्टिं समाप्य तदनन्तरं यदि पूर्वमेव प्रवर्ग्यपात्राण्युत्सादितानि तदाग्निप्रणयनाद्यौपवसथिकं कर्म कृत्वा सुत्यारम्भः"वृ०। "तद्वैक उपसद्भ्य एवानन्तरं कुर्वन्ति तथादृष्टत्वात् सौत्यान्मासानग्निहोत्रादीन् वदन्तः"सू०। "तदिदमग्निप्रणयनाद्यौपवसथिकं कर्म कुण्डपायिनामयने अग्निहोत्रादिमासेभ्यः कर्त्तव्यमित्युक्तम् तत्रैक आहुः तत्कर्माग्निहोत्रादिमासेभ्यः प्रागुपसद्भ्योऽनन्तरं कर्त्तव्यमिति। तत्र हेतुमाहुः प्रकृतौ तथादृष्टत्वादिति। न त्वग्निहोत्रादिमासेभ्य उपरिष्टात्, क्रियमाणे वा औपवसथिके सुत्यानन्तरस्य विद्यमानत्वादिति। तथादृष्टत्वात्साधारणमिति, तत्परिहारार्थमग्निहोत्रादिमासान् सौत्यानिति। कथम्? अस्य सत्रस्य गवामयनप्रकृतिकत्वात्तस्य सांवत्सरिकत्वात् कुण्डपायिनामयने त्रिवृदादयः षण्मासा एकः पक्षः, अग्निहोत्रादयः षण्मासा अपरः पक्ष इति मन्यमानाः। एवं च उपसदाञ्च सुत्याञ्च मध्ये औपवसथिकस्य कृतत्वान्न कश्चिद्दोष इति वदन्तोऽग्निहोत्रादिमासेभ्यः प्रागुपसद्भ्यः ऊर्ध्वमौपवसथिकं कुर्वन्ति। एतदुक्तम् भवति। अग्निहोत्रादिमासान् सुत्यानिति मन्यमानाः तेभ्यः पुरस्तादुपसद्भ्य ऊर्ध्वं औपवसथिकं कर्म केचित् कुर्वन्ति प्रकृतौ तथादृष्टत्वादिति। यदेतदग्निहोत्रादिमासान् सौत्यानिति वदन्ति तदनुपपन्नम्। कुतः? सोमयागस्वरूपत्वात् सुत्यानाम् अग्निहोत्रादीनां तु हविर्यज्ञस्वरूपत्वादसुत्यत्वमिति। यत्पुनरिदमुक्तं गवामयनप्रकृतिकत्वादग्निहोत्रादिमासैः पूर्वपक्षसिद्धिरिति। तदयुक्तम् सोमयागानामेव गवामयनप्रकृतिकत्वं पूर्वपक्षस्योत्तरपक्षस्य चेति। अग्निहोत्रादयोऽस्मिन् सत्रे अप्राकृता आगन्तवः कर्मविशेषाः अतस्तेषान्तत्स्थानापन्नत्वमपि न सम्भवति। अतस्तेषां सुत्यत्वञ्च सम्भवति। सुत्यत्वासम्भवे तथादृष्टत्वादित्यस्य हेतोः साधारण्यादसाधकत्वादित्यनेनाभिप्रायेणोक्तं भगवताचार्येण 'तदनुपपन्नम् इति" वृ० "पश्वर्थं ह्यग्निप्रणयनन्तस्य च श्वःसुत्यानिमित्तम्"सू०। "परोक्तस्य हेतोरसाधकत्वमुक्त्वा स्वपक्षं समर्थयति। औपवसथेषु कर्मसु यः पशुभागः सः श्वःसुत्यानिमित्तमिति प्रत्यक्षं श्रूयते 'अग्नीषोमाभ्यामिन्द्रो वृत्रमहंस्तावेनमभ्रूताम्' इत्यादिना। अतो वचनात् पशोः सुत्यानन्तर्यमेव स-

स्यादनीयम्। तत्र यदग्निप्रणयनन्तत् सोमयागार्थमेव पशोरप्युपकरोति प्रसङ्गादिति पश्वर्थमित्युक्तम्। अतोऽग्निप्रणयनस्य पशोः श्वःसुत्यानन्तर्यमेव कर्त्तुं युक्तम्"द०। "अतिप्रणीतचर्यायां च वैगुण्यं दर्शपूर्णमासयोः तथाग्निहोत्रस्य"सू० "एवं तावदौपवसथिकस्य अग्निप्रणयनादेरग्निहोत्रादिमासेभ्य ऊर्द्ध्वमेव कर्त्तव्यतां प्रतिपाद्येदानीमग्निप्रणयनस्याग्निहोत्रादिमासेभ्यः पुरस्तात् क्रियायां दर्शपूर्णमासयोरग्निहोत्रस्य च वैगुण्यं भवतीति प्रतिपादयति। कुतः? इति चेत्, प्रकृतौ नैयमिकेऽतिप्रणीते उत्तरवेद्यान्तयोर्यागादिदर्शनात्। अतो वैगुण्यकरत्वादग्निप्रणयनन्तावत् पुरस्तान्न कर्त्तव्यमित्यस्य विशेषोऽन्येभ्य इत्युक्तम्"द०। "सदो हविर्धानान्याग्नीध्रीयाग्नीषोमप्रणयनवसतीवरीग्रहणानि पश्वर्थानि भवन्ति सुत्यार्थान्येके"सू०। "एवं तावदौपवसथिकेषु यः, सः श्वःसुत्यानिमित्तत्वादग्निहोत्रादिमासेभ्य ऊर्ध्वं कर्त्तव्य इत्युक्तम्। अग्निप्रणयनञ्च सुत्यार्थत्वात् पशोरप्युपकारकत्वाच्च पुरस्तात् क्रियायाञ्चाग्निहोत्रादीनां वैगुण्यकरत्वात्तद्वदित्युक्तम्। इदानीं येषां श्वःसुत्यावचनं नास्ति सुत्यादिभिस्तु सुत्याङ्गभावोऽस्त्येव अङ्गभावस्य सन्निपत्योपकारद्वारेण, तेषां सुत्याकर्मणोद्देशादिसाधन इत्यकल्परूपाणां सदआदीनामग्निहोत्रादिमासेभ्यः पुरस्तात् करणे किञ्चिददृष्टं दृष्टं वा प्रयोजनं नास्ति। तेषां पुरस्तात् करणे प्रमाणं च नास्ति, कुतः?"द०। "तत्कालास्त्वेव तद्गुणाः" सू०। "यस्य प्रधानस्य यः कालः स एव कालस्तद्गुणानां प्रधानकाल एव अङ्गानां मुख्यकाल इत्यर्थः। तदेतन्न्यायविदां प्रसिद्धम्। अत एव प्रसिद्धवदुपदिष्टवानाचार्यः 'तत्कालास्त्वेव तद्गुणाः, इति। एतदुक्तं भवति यस्मात् प्रधानकाला एव प्रधानगुणाः तस्मात् सदआदीनामग्निहोत्रादिमासेभ्यः पुरस्तादक्रियैव। तत्कालास्त्वेव तद्गुणा इति चशब्दोऽत्र पठितः प्रधानकाले च गुणाः कर्त्तव्या इत्यर्थः। सदआदीनाम्पश्वर्थतावचनम् अभ्युपगम्य सदआदीनि पश्वर्थानि वा भवन्तु, सुत्यार्थानि वा, सर्वथा तावदग्निहोत्रादिभ्यः पुरस्तात् क्रिया न स्यादित्ययमभिप्रायः। अङ्गानां प्रधानकालत्वमुक्तं "तत्कालास्त्वेव तद्गुणाः, इति। यानि पुनरङ्गानि प्रधानकालाद्विप्रकृष्टानि, यथा 'अग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति" इति तेषां पश्वर्थता नास्ति सौमिकैः पदार्थैर्व्यवधानादिति। अतोऽनुयाजसदृशानि कर्मान्तराणि सोमाङ्गत्वेनैव विधीयन्त इति प्राप्ते उच्यते" वृ०। "सिद्धस्वभावानां न व्यवधानादन्यत्वं यथा पृष्ठ्याभिप्लवयोः"सू०। "प्रकृतौ सिद्धस्वभावानां पदार्थानां विकृतौ पदार्थान्तरव्यवधानमात्रेण तेषामन्यत्वं न स्यात्। अनन्यत्वे च प्राकृतोपकारत्वे नाङ्गत्वमपि स्यात्। प्राकृतानां विकृतावुपकारद्वारेण हि पदार्थानां प्राधानानामनुपकारकत्वमित्ययुक्तं यदि परं व्यवधानादन्यत्वं भवति। अतो विप्रकृष्टकाला अपि पदार्थास्तद्गुणा एव भवन्ति, तद्धानपगमादिति कर्मान्तरत्वपक्षे वाक्यभेदादिति प्रसज्येत। यथा पृष्ठ्याभिप्लवयोरिति व्यवधानादन्यत्वाभावे दृष्टान्तः। यथा पृष्ठ्यस्य वाभिप्लवस्य वान्यस्य वा सङ्घाते रूपविशेषस्य मध्ये यजमानमरणस्य निमित्तेन नैमित्तिकमहरन्तरमुपजायते तत्र तेन व्यवधानमस्ति, तथा पृष्ठ्यादिसङ्घातविशेषबुद्धिर्नापैति तद्वदत्रापीति। यस्माद्व्यवधानात् पदार्थान्यत्वं नास्ति, अत एकौपवसथिकस्याग्निहोत्रादिमासेभ्यः पुरस्तात् क्रियाशङ्कानिराकरणार्थमिदं प्रकरणमारब्धम्। कानिचिदङ्गानि तत्कालानि कानिचिद्विप्रकृष्टकालानीत्येवमुभयथा व्यवहारोऽस्ति। सर्वथा तावदग्निहोत्रादिमासेभ्यः पुरस्तादौपवसथिकं न कर्त्तव्यमिति प्रकरणार्थः"वृ०।"सगुणानां ह्येव कर्मणामुद्धार उपजनो वा"सू० "अयमप्यग्निहोत्रादिमासेभ्यः उपरिष्टादौपवसथिकक्रियायां हेतुः। यस्मात् प्रधानकर्मणामुद्धारे उपजने-उत्कर्षे च सगुणानामेव सर्वत्रोद्धारादिर्दृष्टः यथा स्नानभोजनविहाराणामहरहः कार्याणाङ्कस्यचिदुद्धारे सगुणस्यैवोद्धारो दृष्टः, उत्कर्षे च सगुण एवोत्कृष्यते, एतेषां नित्यकार्याणामन्तराले अनन्यनैमित्तिकमुपजायमानं सगुणमेवोपजायते, एवमत्रापि वैशेषिकैरग्निहोत्रादिभिरुत्कृष्यमाणं सौत्यं कर्म आत्मनो गुणभूतेन औपवसथिकेन सहोत्कृष्यते। द्वयञ्च प्रसिद्धौ। यस्मात् सर्वत्र उद्धारोपजनोत्कर्षाः सगुणानामेव दृष्टाः तस्मादत्रापि सगुणस्य सौत्यस्य उत्कर्षो युक्त इति सूत्रार्थः" वृ०। "सुब्रह्मण्या त्वत्यन्तम्" सू०। "प्रासङ्गिकोऽयं सुब्रह्मण्याविचारः प्रकृतावुपसत्सुत्याकालत्वात्। सुब्रह्मण्यायाः अग्निहोत्रादिमासानाञ्च सुत्योपसदभावात् सुब्रह्मण्याया अभावशङ्का स्यात्, तत इदमुच्यते। सुब्रह्मण्याया अयं विशेषः। अत्यन्तं-नित्यं कर्त्तव्या, अग्निहोत्रादिमासेष्वपि अप्राकृतोऽयङ्काल इति नोत्स्रष्टव्या। अनवस्थिते हकालसंशयत्वात्। प्रकृतावुपसत्सुत्याकाला सती सुब्रह्मण्या

न कालविशेषविशिष्टाऽऽहूयते। इह पुनरप्राकृतत्वात्कालस्य तेनोपलक्षणं प्रकृत्या सुब्रह्मण्याया अयुक्तमिति मन्त्रमानेनानवधृता कालसङ्ख्याविशेषणाऽऽह्वातव्या। सुत्यामागच्छेति कालसंशयत्वादित्यस्यायमर्थः। प्रकृतौ द्वादशाहे सुत्यानीत्यादयःसङ्ख्याविशेषाः किमुपसदहःसङ्ख्याविशेषप्रयुक्ताः आहोस्वित्प्राक्सुत्यावन्त्यहानि। तत्र तदहःसङ्ख्याप्रयुक्ता इत्येवङ्कालसंशयत्वादित्यर्थः" वृ०। "उत्सर्गमेके सुत्योपसद्गुणत्वात्" सू०। "सुब्रह्मण्याया उत्सर्गमेके इच्छन्ति सुत्योपसद्गुणत्वात्। किमिदं सुत्योपसद्गुणत्वमिति? सुत्यानामेवायङ्गुणो नोपसदां क्रमाल्लिङ्गं बलीय इति। अतोऽयमुपसदाङ्गुण उपसत्कालवर्त्तित्वात् उपसद्गुणत्वोपचारः अग्निहोत्रादिमासानामसुत्यत्वात् उपसत्कालत्वात् सुब्रह्मण्योत्सर्गमेक आहुरित्यर्थः" वृ०। "क्रियात्वेव प्रवृत्ते ह्यन्तमगत्वाऽवस्थाने दोषः"सू०। "अस्याः क्रियैव निधीयते सोमयागसाधनसंस्कारत्वात् मन्त्रस्य, प्रकृतौ सोमयागादूर्ध्वं यावत्सुत्याकालस्तावदाहूयते। तद्वदत्राप्याह्वातव्या। तावतःकालस्योपसत्स्वेवैतत्सम्बन्धादस्या उपसत्सम्बन्धः तदभावान्नास्यास्त्यागो युक्तः। अत्रायमपि विशेषोऽस्ति। औचित्यादपि न त्याज्या। आदितआरभ्य सर्वेष्वेवाहःस्वाह्वयन्ति कथमिदानीं नाह्वयन्ति। नूनमयं सोमोऽस्मभ्यन्न दास्यत इति देवतायाः शङ्का स्यात् तन्निवृत्त्यर्थमाह्वातव्या। प्रारब्धस्य मध्ये त्यागस्य कारणाभावात् त्यागे दोष एव स्यादित्यभिप्रायः। परवदर्थविचारोऽत्र स्वपदार्थपरिज्ञानार्थ एव। अतिप्रैषः श्वःसुत्यहृपोह्यत इति" वृ०। "त्रिवृता मासं पञ्चदशेन मासम् सप्तदशेन मासम् एकविंशेन मासम् त्रिणवेन मासम् अष्टादशत्रयस्त्रिंशानि द्वादशाहस्य दशाहानि। महाव्रतञ्चातिरात्रश्च"सू०। "अत्र पृष्ठ्यस्य पञ्चभिरहोभिः पञ्च मासाः कर्त्तव्याः। षष्ठेनाष्टादशाहानि दशरात्रो महाव्रतमुदयनीयः।क्लृप्तोक्तत्वात्त्वत्र प्रायणीयः"वृ०। "सर्वेण यज्ञेन यजन्ते य एतदुपयन्ति"सू०। "स्तुतिवादोऽयं बहूनामत्र सम्भवाद्दृत्विक्समासोऽनेन सूत्रकारेण न सूत्रितः। स कर्त्तव्यश्चेत् परप्रत्ययादेव कर्त्तव्यः" नारायणवृत्तिः कात्या०श्रौ० २४,४,२, सूत्रादौ विशेष उक्तो यथा "कुण्डपायिनामयनं पौर्णमासीदीक्षम्" सू०। कुण्डपायिनामयनमिति सत्रस्य संज्ञा तस्य पौर्णमास्यां दीक्षा भवति" कर्कः। "चतुर्थ्यां वाऽपरपक्षस्य"सू०। इति विकल्पः फाल्गुनापरपक्षस्य वा चैत्र्यां पौर्णमास्यामिति" कर्कः "मासं दीक्षाः"सू०। "तस्य भवन्ति"कर्कः। "सोममुपनह्य सुत्यास्थानेषु मासमग्निहोत्रं जुह्वति" सू०। सोमोपनहनं कृत्वा यानि सुत्यास्थानानि तेष्वग्निहोत्रहोमः। अग्निहोत्रं च सायारम्भं प्रातरपवर्गम् तत्र द्वावपि होमौ कालैक्यात्तन्त्रेणोपक्रमितव्यौ। प्रधानस्य तु भेदः चतुर्गृहीतेनाग्नेयीं सायमाहुतिं हुत्वा पुनश्चतुर्गृहीतेन सौरीमाहुतिं जुहोति तन्त्रेणोत्तरां जुहोति। गार्हपत्यकार्य्यं तत्र प्रागभिहितएव न शालाद्वार्य्ये, ज्योतिष्टोमे हि तच्छ्रुतम् न चाग्निहोत्रं ज्योतिष्टोमः न च तदङ्गत्वमिति आहवनीयस्त्वतिप्रणीत एव" कर्कः "सोमबन्धनपूर्वकम् अत्राग्निहोत्रशब्दो नित्याग्निहोत्रधर्मातिदेशार्थः ततश्च तद्धर्मकं कर्मान्तरं मासपूर्तिपर्य्यन्तं प्रत्यहं भवति"सं०व्या०। "दर्शपूर्णमासाभ्यां मासम्" सू०। "नयेयुः"कर्कः। "पक्षादौ यद्यद्धविस्तत्सर्वस्मिन्" सू०। "पक्षस्यादौ प्रतिपदि यद्यद्धविस्तद्देयं सर्वस्मिन् पक्षे भवति सकले शुक्ले दर्शेष्टिः, सकले कृष्णे पौर्णमासेष्टिः"सं०व्या०। "सारस्वते च प्रथमे" सू०। "एवमेव"कर्कः "तन्त्रेण वा समस्तचोदितत्वात्" सू०। "शाखाद्यः पक्षव्यावृत्तौ तन्त्रेणैव दर्शपूर्णमासौ कर्त्तव्यौ समस्तयोर्हि चोदना"दर्शपौर्णमासाभ्यां मासमिति" नह्यत्र कालभेदकः तस्मादग्निहोत्रवदत्रापि तन्त्रमेव" कर्कः "न दर्शपौर्णमासस्य पक्षभेदेनानुष्ठानम् किं तर्हि तन्त्रेण कर्तव्यौ"कुतः? समस्तचोदितत्वात् समस्तयोरेव दर्शपौर्णमासयोः प्रत्यहं मासपर्यन्तं विहितत्वात् सारस्वते तु पक्षभेदेनैव, तत्र तथैव विधानात्"सं०व्या०।"अग्निहोत्रं च"सू०। "अस्य सूत्रस्य पूर्वमेवाभिहितो न्यायः" कर्कः तन्त्रेण न तु नित्याग्निहोत्रवत्सायम्प्रातः पृथक्पृथगिति अतो दिवस एव सायम्प्रातस्तनमग्निहोत्रं तन्त्रेणैव होतव्यम् एककालत्वादङ्गानि तन्त्रेण प्रधानाहुतयस्तु भिन्नाः" सं०व्या०। "पृथङ्मासाश्चातुर्मास्यपर्वभिः" सू० "नीयन्ते वैश्वदेवेन मासम्" "वरुणप्रघासैर्मासम् साकमेधैर्मासम् शुनासीरीयेण मासमिति ता०ब्रा० श्रुतेः" कर्कः। "पृथक् पृथक्-चत्वारो मासा नेयाः" सं०व्या०। "साकमेधा दर्शपूर्णमासवत्" सू०। "तन्त्रेणेत्युक्तो न्यायः" कर्कः। "सोमा या सामान्यात्"सू०। "एते अग्निहोत्रादयः सोमा वा भवन्ति कुतः सामान्यात् सत्रं हि सोमयागैः पूरणीयम्" सं०व्या०। "न जुहोतिशब्दात्"सू०। "नैतदेवम् सोमा इति कुतः?

एतत् ? जुहोतिशब्दात्“मासमग्निहोत्रं जुहोतीति” जुहोतिशब्दोऽत्र भवति न चासौ सोमयागेषु प्रसिद्धः तस्मान्न सोमा इति”संव्या०। “काममितरे” सू० । “इतरे तर्हि दर्शपूर्णमासादयो भवन्तु सोमाः न हि तत्र जुहोतिशब्द इति नेत्युच्यते दर्शपूर्णमासादयः शब्दा निरुपपदा एव दर्शपौर्णमासादीन् सोमान् प्रत्याययन्ति सोमोपपदाः निरुपपदाश्चैते मासं दर्शपौर्णमासाभ्यामिति तस्माद्दर्शपौर्णमासादयोऽपि न सोमा एते” संव्या० । दर्शपौर्णमासादयः कामं सोमा भवन्तु यतस्तत्र जुहोतिशब्दो नास्ति परमार्थतस्तु तेऽप्यत्र सोमा न भवन्ति यतो दर्शपूर्णमासादयः शब्दा निरुपपदा अत्र श्रूयन्ते न चातुर्मास्यसोमा दर्शपूर्णमाससोमा इत्येवं सोमोपपदाः अतस्तेऽपि न सोमा इति सिद्धान्तः । एवं षण्मासाः परिपूर्णाः मासश्चात्र सर्वत्र सावनस्त्रिंशदहात्मकः अथोत्तरेषु षट्सु मासेष्वहान्याह”कर्कः।“इतिशतवतोरयनपूर्वपक्षेण षण्मासान्”सू० । “इतिवातवतोरयनस्य पूर्व्वपूर्व्वपक्षेण षण्मासान् नयेयुः। तत्र विशेषमाह” कर्कः “उत्तमे त्रयोऽभिप्लया दशरात्रो महाव्रतम्”सू०।“उत्तमे द्वादशे मासे एतान्यहानि भवन्ति”संव्या०। “उपरिष्टादतिरात्रं भवति”सू०। “अनुपहस्तुतेः यदन्यतरतोऽतिरात्रस्तेनाहीन इति”देव०“अन्ते एक उदयनीयातिरात्र एव भवति न प्रायणीय इत्यर्थः”कर्कः।“उभयतो वा”सू० “अतिरात्रो भवति सत्रत्वात् अनुपहस्तुतिस्तु अहीनत्वेन संस्तौति तत्कथम् ? हविर्यज्ञैर्व्यवहितत्वात्”देव० “अथवोभयतोऽतिरात्रं भवति प्रायणीयश्चोदयनीयश्चात्र द्वावपि भवत इत्यर्थः”संव्या०। “हविर्यज्ञेभ्योऽतिरात्रमेके सोमानन्तर्यात्”सू०“हविर्यज्ञेभ्योऽवसितेभ्यः एके प्रायणीयमतिरात्रमिच्छन्ति एवं सोमानन्तर्यं भवति एके तन्नेच्छन्ति अग्नीषोमीयोत्तरकालता हि तस्य प्रकृतौ दृष्टा इहापि तद्वदेव तस्मात् प्रागेव हविर्यज्ञेभ्यः प्रायणीयः”कर्कः उभयतोऽतिरात्रपक्षे प्रायणीयमतिरात्रमेके आचार्याः”हविर्यज्ञेभ्योऽग्निहोत्रदर्शपूर्णमासचातुर्मास्यपर्वभ्यः परं कुर्वन्ति एवं हि सर्व्वेषां सोमयागानामानन्तर्यमव्यवधानं कृतं भवति इतरथा हविर्यज्ञैर्व्यवधानं स्यात् एके एतन्न वाञ्छन्ति यतः प्रकृतौ प्रायणीयस्याग्नीषोमीयोत्तरकालता दृष्टा इहापि च तद्वदेवानुष्ठानं युक्तम् तस्माद्धविर्यज्ञेभ्यः पूर्व एव प्रायणीयो भवति । अन्येभ्यः सत्रेभ्योऽत्र विशेषमाह”संव्या०।“अत्सरुकाः कुण्डपानिरूपाऽसमसाः”सू०। अत्सरुकाः अष्टन्तका कुण्डप्रतिरूपाः वृत्ताकाराः कर्कः । “अत्र अत्सरुका अष्टन्ता मूलज्ञापकचिह्नदण्डरहिताः कुण्डप्रतिरूपाः कुण्डाकारा वृत्ताश्च भवन्ति”संव्या०।“पञ्चर्त्विजस्त्रीणि त्रीणि कर्माणि कुर्युः”सू०। “अत्र कुण्डपायिनामयने वक्ष्यमाणाः पञ्चर्त्विजस्त्रीणित्रीणि कर्म्माणि कुर्वन्ति त्रयाणांत्रयाणामृत्विजां कर्माणि एकैकः करोति” संव्या०“होताध्वर्य्यवपोत्रीये च”सू०। “चशब्दाद्धौत्रं च” कर्कः। “उद्गाता नेष्ट्राच्छावाकीये”सू०।“मैत्रावरुणो ब्रह्मत्वप्रातिहर्त्रे”। “प्रस्तोता ब्राह्मणाच्छंसिग्रावस्तोत्रीये” सू० । “सर्वत्र प्रथमान्तः कर्ता”संव्या० “प्रतिप्रस्थाताग्नीध्रौन्नेत्रे”सू०। “चकारः स र्वत्रानुवर्त्तते” कर्कः। “मुख्यासनेभ्योऽनुसंसर्पमितराणि” सू०। “आसनशब्दः स्थानवाची मुख्यस्थानेभ्यः अनु सृप्त्वा-सृप्त्वा परकीयाणि कर्माणि कुर्युः स्वकर्मकर्त्तृकस्य चरितार्थत्वात्” कर्कः ।

कुण्डपायिनामयनन्याय पु० जैमिन्युक्ते कुण्डपायिनामयननामकसत्रे ऽग्निहोत्रपदस्य प्रकृताग्निहोत्रात् कर्म्मान्तरत्वप्रतिपादके न्यायभेदे स च न्यायो जै०सू० दर्शितोयथा “प्रकरणान्तरे प्रयोजनान्यत्वम्”जै०सू०।“कुण्डपायिनामयने श्रूयते—सायम् अग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजते”इत्येवमादि । तत्र सन्दिह्यते,—किं नियते अग्निहोत्रे नियतयोश्च दर्शपूर्णमासयोर्मासो विधीयते कालः? अथ किं नियताग्निहोत्रात् नियताभ्याञ्च दर्शपूर्णमासाभ्यां कर्मान्तरविधानम् ?—इति । किं तावत् प्राप्तं ?—नियतेषु कालविधिः इति कुतः ? कालविधिस्वरूप एष शब्दोमासमिति । कथं कालविधिस्वरूपता ? । यत् अग्निहोत्रं जुहोति—इति विदितं, मासमित्यविदितम् । एवं च अग्निहोत्रशब्दो दर्शपूर्णमासशब्दश्च न अर्थान्तरवृत्तीभविष्यतः तस्मात् कालविधिः। ननु कुण्डपायिनामयनप्रकरणं बाध्येतैवम्’ । कामं बाध्यतां, वाक्यं हि बलवत्तरम् । एवं प्राप्ते ब्रूमः,—प्रकरणान्तरे श्रूयमाणं वाक्यं यस्य प्रकरणे तस्य वाचकं भवितुमर्हति । ननु प्रत्यक्षोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च गुणविधिः । न,—इत्युच्यते । कथम् ? । उपसद्भिश्चरित्वेति हुत्वा इदमभिधीयते, न च, उपसदोऽग्निहोत्रस्य दर्शपूर्णमासयोश्च सन्ति । तस्मात् अशक्यः तत्र मासविधिः ‘अथ उच्येत,—उपसदोऽपि विधीयन्ते’—इति । तदा गुणविधानार्थेऽस्मिन् वाक्ये अनेकगुणविधानात् वाक्यम् भिद्येत! अस्मिन् पक्षे पुनरनन्तरम् अग्निहोत्रशब्दो न

कर्म विशेक्ष्यति तेन वाक्यभेदो न भविष्यति । तस्मात् कर्म्मान्तरम् इति सिद्धम्" भाष्यम् ।

तत्त्वबोधिन्यां विवृतमेतत् यथा

"उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति दर्शपौर्णमासाभ्यां मासं यजेतेति" श्रूयते । उपसदश्च ज्योतिष्टोमयागे दीक्षादिवसादूर्द्ध्वं सोमाभिषवदिवसात् पूर्ब्बं कर्त्तव्या होमविशेषा इति माधवाचार्य्यप्रभृतियाज्ञिकमीमांसकाः तत्परिपाटी च (डाबका) इत्यस्मद्देशप्रसिद्धजलपात्रसदृशाकारकम्बुग्रीवादिवदनेकरेखाविशिष्टाग्रभागमहावीराख्यपात्रविशेषः तत्संस्थानं यथा तस्मिन् पात्रे यवागूसहितं दधि कृत्वा संदंशाकारकाष्ठद्वयेन तस्य ग्रीवां धृत्वा दक्षिणावर्त्तेन परावृत्य एकवारं तत्र स्थितं प्रतप्तं यवागूदधि जुहोति वामावर्त्तेनापरवारमिति वारद्वयहोमेनैकोपसद्भवतीति याज्ञिकप्रसिद्धिः । उपसद्भिरित्यभेदे तृतीयाश्वमेधेनेत्यादिवत् तथाच उपसद्यागाचरणं कृत्वेत्यर्थः एतेन "उपसत्कथ्यते तत्र सतिलैर्व्रीहिभिश्चरुरिति मीमांसानभिज्ञस्य कल्पनं निरस्तं मीमांसाश्चिवन्धा केनापि तथानभिधानात् । अत्र "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुतिप्राप्ताग्निहोत्रमनूद्य उपसदानन्तर्य्यं माससाध्यत्वञ्चेति गुणद्वयं विधीयते किं वा विशिष्टकर्म्मान्तरमिति संशये नायं कर्म्मान्तरविधिर्गौरवात् किन्तु कृप्ताग्निहोत्रे गुणद्वयविधिर्लाघवात् नच प्रकरणान्तरपठितत्वेनाग्निहोत्रपदानुक्तप्रत्युपस्थितिरिति वाच्यम् अग्निहोत्रशब्दस्य तत्रैव शक्तेर्नानार्थत्वाभावाच्च प्रकरणान्तरेऽप्युपस्थितिसम्भवात् न च कथं तत्रैवाग्निहोत्रपदशक्तिः कौण्डपायिनामयनेऽपि तच्छक्तिसम्भवादिति वाच्यं "यावज्जीवमग्निहोत्रं जुहोतीति" श्रुत्युक्ताग्निहोत्रस्य "यदग्नये च प्रजापतये च सायं प्रातर्जुहोतीति" श्रुत्या देवताकाङ्क्षानिरासेनाग्निहोत्रपदस्य यागनामपरत्वेन तत्र रूढत्वात् इह तु देवताकाङ्क्षानिरासार्थम् अग्नये होत्रमिति व्युत्पत्तिकल्पनेनाग्निदेवताकत्वरूपोपाधिहोत्रगुणयोगाद्गौणत्वस्यापि स्थापितत्वात् नानार्थशक्तिकल्पने गौरवादिति प्राप्ते उच्यते प्राप्ते कर्म्मणि गुणद्वयविधाने वाक्यभेदापत्तेः तथाहि किं मास एव विधीयते उतोपसद्भिश्चरित्वेति उपसदपि, नाद्यः नित्याग्निहोत्रे उपसदोऽसत्त्वेन तस्यापि विधातव्यत्वादित्युभयगुणविधौ वाक्यभेदापत्तेः प्रधानानुवादेन गुणप्रकारकाङ्क्षतया एकगुणविधानेनाकाङ्क्षानिवृत्तौ विधेयान्तरं प्रति आकाङ्क्षामुत्थाप्य वाक्यान्तरकल्पनेनाग्निहोत्रं मासं कुर्य्यात् अग्निहोत्रमुपसदनन्तरं कुर्य्यादिति विधिद्वये पर्य्यवसानात् अपूर्व्वद्वयं विधेयं स्यात् तत्र प्रत्येकगुणानुष्ठाने प्रत्येकमपूर्व्वमित्यपूर्व्वद्वयं मिलितानुष्ठाने च प्रत्येकजन्यापूर्व्वद्वयम् उभाभ्यां विलक्षणमपूर्व्वं वा जन्यत इति गौरवं विशिष्टैककर्म्मविधाने गुणानां प्रधानस्वरूपनिर्व्वाहकाङ्क्षतया साङ्गप्रधानजन्यमेकमेवापूर्व्वं विधेयं स्यादित्यपूर्व्वैक्यादेकविधिः । अतएवोक्तं "प्राप्ते कर्म्मणि नानेको विधातुं शक्यते गुणः । अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः" । विध्यन्तरप्राप्ते प्रधाने अनेकगुणो विधातुं न शक्यते वाक्यभेदापत्तेरिति शेषः अप्राप्ते तु प्रधाने बहवोऽपि गुणा एकयत्नत एकवाक्यात् विधीयन्ते नानागुणविशिष्टैकप्रधानविधिसम्भवेनापूर्व्वैक्यादित्यर्थः । नचैकगुणविशिष्टापरगुणो विधेयः यथाग्निहोत्रमुपसदनन्तरं मासं कुर्य्यादिति न वाक्यभेद इति वाच्यम् गुणानां परस्परं विशेषणविशिष्यभावेनान्वयबोधे निराकाङ्क्षत्वात् तथाच जैमिनिसूत्रं "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्" । गुणानां विशेषणानां अङ्गानाञ्च परस्परमसम्बन्धः विशेष्यविशेषणभावेन नान्वयः परार्थत्वात् द्वयोरपि विशेष्यान्वयित्वात् तथा सत्येव कथं नान्वयस्तत्राह समत्वात् द्वयोरेव परसाकाङ्क्षतया तुल्यरूपत्वात् न परस्परं गुणप्रधानभावः । यत्तु परस्परवैशिष्ट्येन गुणद्वयैकविधित्वे विनिगमकाभावादुभयोरपि विशेष्यत्वेन विशेषणत्वेन च विधेयत्वेन वाक्यभेद इति, तन्न विनिगमकाभावेन वाक्यस्य द्वैविध्येऽपि नापूर्व्वभेदकल्पना किन्तु कारणतावच्छेदकभेदेन कारणभेदमात्रम् अन्यथा दृष्टवाक्यभेदस्य विशिष्टैकप्रधानविधिपक्षेऽपि सम्भवात् । किञ्चोपसदानन्तर्य्यविशिष्टे माससाध्यत्ववैशिष्ट्यं माससाध्यत्वविशिष्टे या उपसदानन्तर्य्यवैशिष्ट्यमिति विनिगमकाभावात् । नचैकत्र द्वयमिति न्यायेन विशेष्ये युगपद्विशेषणद्वयमिति वाच्यं वेदे विशिष्टवैशिष्ट्यबोधस्यौत्सर्गिकत्वात् । किञ्च विशेष्यविशेषणभावस्य द्वैविध्येऽपि विशिष्टस्यानतिरिक्ततया कारणैक्यात् कार्य्यैक्याच्च न कार्य्यकारणभावभेदोऽपि एकाङ्कापूर्व्वं प्रत्येव परस्परसापेक्षतया उभयोर्हेतुत्वादिति वाक्यार्थैक्याच्चोक्तिभेदरूपवाक्यभेदो दोषाय कारणतावच्छेदकगौर-

तथाचैतादृशलाघवदृष्टेहि कौण्डपायिनामयनप्रकरणपाठ एव कर्म्मान्तरत्वे प्रमाणं तथाच सिद्धान्तसूत्रम् "प्रकरणान्यत्वे प्रयोजनान्यत्वमिति" अतएव प्रकरणाद्वाक्यस्य बलीयस्त्वात् शक्त्या नित्याग्निहोत्रस्योपस्थित्या गुणविधिरित्यपि निरस्तं तस्योक्तगौरवपराहतत्वात्। एवञ्च गौण्याग्निहोत्रपदप्रयोगस्तद्धर्म्मातिदेशार्थः अतएव "दैवश्राद्धादौ श्राद्धशब्दो गौणस्तद्धर्म्मप्राप्त्यर्थः कौण्डपायिनामयन इवाग्निहोत्रशब्द इति" श्राद्धविवेकः।

कुण्डपाय्य पु० कुण्डेन कुण्डाकारेण चमसेन पीयते सोमोऽत्र आधारे यत्—पा० युगागमश्च। कुण्डपायिनामयमयननामके सत्रभेदे "यस्ते शृङ्गवृषो नपात् प्रणपात् कुण्डपाय्यः" ऋ० ८,१७,१२

कुण्डभेदिन् पु० धृतराष्ट्रपुत्रभेदे, "अनाधृष्यः कुण्डभेदी विरावी दीर्घलोचनः" भा०आ० ६७अ०

कुण्डल पुंन० अर्द्धर्चा०। कुण्डते कुण्डयते कुडि—दाहे कुडि-रक्षायां वा कर्त्तरि कर्म्मणि वा वृषा०कलच्, कुण्डं कुण्डाकारं लाति ला—क कुण्डस्तदाकारोऽस्त्यस्य सिध्मादित्वाल्लच् वा। १कर्णभूषणभेदे "कनककुण्डलवान् किरिटी" विष्णुध्या० २वलये ३वेष्टने मेदि० "मण्डलानि पताकाश्च मरीचीः कुण्डलानि च" सुश्रु० "अथैतान्युपकल्पयीत समावर्त्त्यमाने मणिकुण्डले वस्त्रयुगमित्यादि" आश्व० गृ० कुण्डले आबध्नीत" तत्रैव" ते च सौवर्णे एव यथाह मनुः "यज्ञोपवीतं वेदञ्च उभे रौक्मे च कुण्डले" "ताडकाचलकपालकुण्डला" रघुः

कुण्डलना स्त्री कुण्डलं वेष्टनं करोति कुण्डल+णिच्—भावे युच्। वेष्टनकरणे (वेडा देओया) "फणिभाषितभाष्यफक्किका विषमां कुण्डलनामवापिता" नैष०।

कुण्डलिका स्त्री मात्रावृत्तभेदे तल्लक्षणं यथा "कुण्डलिका सा कथ्यते प्रथमं दोहा यत्र। वोलाचरणचतुष्टयं प्रभवति विमलं तत्र। प्रभवति विमल तत्र पदमतिसुललितयमकम्। अष्टपदी सा भवति विमलकविकौशलगमकम्। अष्टपदी सा भवति सुखितपलितमण्डलिका कुण्डलिनायकभणिता विबुधकर्णे कुण्डलिकेति"

कुण्डलिन् पुंस्त्री कुण्डलं पाशाकारं वेष्टनं वा स्त्यस्य इनि। १सर्पे स्त्रियां ङीप् २वरुणे तस्य पाशास्त्रवत्त्वात् तथात्वम्। ३मयूरे पुंस्त्री मेदि० ४चित्रमृगे ५वेष्टनयुक्ते त्रि० स्त्रियां ङीप्। सा च (जिलेपी) इतिख्याते पक्वान्नभेदे भावप्र० तत्पाकप्रकारो दर्शितो यथा "नूतनं घटमानीय तस्यान्तः कुशलोजनः। प्रस्थार्द्धपरिमाणेन दध्नाऽम्लेन प्रलेपयेत्। द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्। घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्। आतपे स्थापयेत्तावद्यावद्याति तदम्लताम्। ततस्तत्क्षिपेत्पात्रे सच्छिद्रे भाजने तु तत्। परिभ्राम्य परिभ्राम्य तत् सन्तप्ते घृते क्षिपेत्। पुनः पुनस्तदावृत्त्या विदध्यान्मण्डलाकृतिम्। तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रये। कर्पूरादिसुगन्धेन स्नपयित्वोद्धरेत्ततः। एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा। धातुवृद्धिकरी वृष्या रुच्या च क्षिप्रतर्पणी"। तन्त्रसारप्रसिद्धे मूलाधारस्थिते षट्चक्रमध्यवर्त्तिस्ये देवीभेदे यथा "ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्। तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्। कोटिसौदामनीभासां स्वयम्भूलिङ्गवेष्टिनीम्। तामुत्थाप्य महादेवीं प्राणमन्त्रेण साधकः। उद्यद्दिनकरोद्द्योतां यावच्छ्वासं दृढ़ासनः। अशेषाशुभशान्त्यर्थं समाहितमनाश्चिरम्। तत्प्रभापटलव्याप्तं शरीरमपि चिन्तयेत्" इति

कुण्डशायिन् पु० धृतराष्ट्रस्यपुत्रभेदे "अपराजितः कुण्डशायी विशालाक्षो दुराधरः" भा० आ०१७अ०

कुण्डाशिन् पु० धृतराष्ट्रस्यपुत्रभेदे। "कुण्डाशी विरजाश्चैव दुःशला च शताधिका" भा० आ० ११७अ०। "अस्ते जारजः कुण्डोऽमृते भर्त्तरि गोलकः। यस्तयोरन्नमश्नाति स कुण्डाशीति कथ्यते" देवलोक्ते २कुण्डगोलकयोरन्नभक्षके त्रि० स्त्रियां ङीप् "अगारदाही गरदः कुण्डाशी सोमविक्रयी" मनुः "अव्रती वृषलीभर्त्ता कुण्डाशी सोमविक्रयी" भा० आनु०१४२अ०

कुण्डिक पु० कौरवे राजभेदे। "धृतराष्ट्रोऽथ राजासीत् तस्य पुत्रोऽथ कुण्डिकः। हस्ती वितर्कः क्राथश्च कुण्डिनश्चापि पञ्चमः" भा० आ० ९४" अयन्तु धृतराष्ट्रः दुर्य्योधनपितुर्भिन्नः कुरुवंश्यः तत्रैव विस्तरः।

कुण्डिका स्त्री कुडि—ण्वुल्। १ कमण्डलौ हेमच०। २ पिठरे (कुँडि) शब्दच०।

कुण्डिन् त्रि० कुडि—णिनि—कुण्ड+अस्त्यर्थे इनिर्वा। १कुण्डयुक्ते स्त्रियां ङीप् "रावणस्तु यतिर्भूत्वा मुण्डःकुण्डी त्रिदण्डधृक्" भा० व० २७७अ० "दण्डी छत्री च कुण्डी च द्विजानां धारणस्तथा" भा०व०१४अ० इत्युक्ते २शिवे पु० "रत्नभाण्डभेदे स्त्री "सन्ति निष्कसह-

स्थानि कुण्डिन्यो भरिताः शुभाः” भा०स०५९अ० ”कुण्डिन्यः पात्रभेदाः “भाण्डिन्य इति वा पाठः” नीलक० । कुण्डिन इति पाठस्तु प्रामादिकः

कुण्डिन पु० कुरुवंश्ये नृपभेदे । १कुण्डिकशब्दे उदा० २भोजदेशस्थे पुरभेदे न०“कुण्डिने पुण्डरीकाक्ष ! भोजपुत्रस्य शासनात्” हरिवं० १०४ अ० तच्च दक्षिणदेशस्थम् । “राजर्षेर्यादवस्यासीद्विदर्भो नाम वै सुतः । विन्ध्यस्य दक्षिणे पार्श्वे विदर्भां यो न्यवेशयत् । क्रथकौशिकमुख्याश्च पुत्रास्तस्य महात्मनः । बभूवुर्वीर्य्यसम्पन्नाः पृथग्वंशकरा नृपाः । तस्यान्ववाये भीमस्य जज्ञिरे वृष्णयो नृप ! । क्रथस्य त्वंशुमान् वंशे कैशिकस्य तु भीष्मकः । हिरण्यरोमेत्याहुर्यं दाक्षिणात्येश्वरं जनाः । अगस्त्यगुप्तामाशां यः कुण्डिनस्थोऽन्वशान्नृपः” । “विलासिनः कुण्डिनमण्डनायितम्” नैष० । “तस्मात् पावर्तत कुण्डिनेश्वरः” रघुः ३ऋषिभेदे पु०। तस्य गोत्रापत्यम् गर्गा० यञ् । कौण्डिन्य तद्गोत्रापत्ये पुंस्त्री “ब्राह्मणेभ्यो दधि दीयतां कौण्डिन्याय तक्रम् । बहुषु तस्य लुक् । कुण्डिनास्तद्गोत्रापत्येषु भूम्नि । “कुण्डिनानां वासिष्ठमैत्रावरुणकौण्डिन्येति” आश्व० श्रौ०१२, १५,२,

कुण्डीर पुं कुडि-ईरन् । १मनुष्ये २बलवति त्रि० धरणी ।

कुण्डृणाची स्त्री कुटिलगतौ । “पताति कुण्डृणाच्या” ऋ०१।२९।६० “कुण्डृणाच्या—वक्रया गत्या” भा०।

कुण्डोद् पु० भारतप्रसिद्धे पर्व्वतभेदे “कुण्डोदःपर्व्वतोरम्यो बहुमूलफलोदकः नैषधस्तृषितोयत्र जलं शर्म्म च लब्धवान्” भा०व० ८७अ० ।

कुण्डोदर पु० कुण्ड इव उदरमस्य । १नागभेदे । कर्कराकर्करौ, नागौ कुण्डोदरमहोदरौ” भा०आ० ३५अ० । २अप्रशस्तोदरयुक्ते त्रि० । ततःक्षेपे “उदराश्वेषु” पा० परेषु पूर्व्वमन्तोदात्तम् ।

कुत आस्तरणे सौ०प०सक०सेट् । कोतति अकोतीत् । चुकोत ।

कुतनु पुं कुत्सिता तनुरस्य । १कुवेरे त्रिका० कुवेरशब्दे विवृतिः २कुत्सितदेहान्विते त्रि० । कुगतिस० । ३कुत्सितदेहे स्त्री ।

कुतन्त्री स्त्री कुगतिस० । कुत्सितायां वीणायाम् । सैव । २क्षुद्रदण्डे स्त्री । “स ददर्श श्वमांसस्य कुतन्त्रीं विततां मुनिः” (विश्वामित्रः) भा०शा०१४अ०“कुतन्त्रीं दण्डिकाम्” नीलकण्ठः ।

कुतप पु०कुत्सितं पापं तपति कुं भूमिं तपति—तप—अच् कुतकपन् वा । १सूर्य्ये २वह्नौ ३अतिथौ ४गवि ५भागिनेये ६द्विजातौ च ७दौहित्रे ८वाद्यभेदे ९नेपालकम्बले १०कुशतृणे च न०मेदि० । पञ्चदशधा विभक्तदिनस्याष्टमे ११भागे अमरः अर्द्ध्वादि “मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलम् । रौप्यं दर्भास्तिलाः शाकं दौहित्रश्चाष्टमः स्मृतः” इति स्मृत्युक्तेषु अष्टसु पदार्थेषु । “कुत्सितं पापमित्याहुस्तस्य सन्तापकारिणः । अष्टावेतेयतस्तस्मात् कुतपा इति विश्रुताः” इति स्मृत्युक्तेस्तेषां तथात्वम् । अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा । तत्राष्टमो मुहूर्त्तो यः स कालः कुतपःस्मृतः” स्मृतिः । स च एकोद्दिष्टश्राद्धारम्भकालः “कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् । आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्” कालमा० व्यासोक्तेः । “आवर्त्तनं पश्चिमदिगवस्थितच्छायायाः पूर्व्वपदिग्गतिकालः कुतपशेषपदस्तु इत्यर्थः” रघु० । “आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः । विधिज्ञो विधिमास्थाय रौहिणं तु न लङ्घयेत्” गौतमः । “दिवसस्याष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपोज्ञेयः पितॄणां दत्तमक्षयम्” मत्०पु०“त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः” मनूक्तौ दौहित्रतिलानां पृथङ्निर्द्देशात्तदुक्तकालपरता । तथाच तत्रैव मुख्यत्वम् दौहित्रादौ परिभाषिकत्वमिति विवेकः । ज्योत्स्नादि० चतुरर्थ्याम् अण् । कौतप तन्निर्वृत्तादौ त्रि० ।

कुतस् अव्य० कस्मात् किम्+तसिल् किमः कुः । १कस्मादितिहेतुविषये १प्रश्ने २निह्नवे च विश्वः। ३आक्षेपविषये हेतौ “नदमूढ़बुद्धिषु विवेकिता कुतः ?” माघः “कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्” गीता । “कुतस्तु खलु सोम्यैवं स्यात् कथमसतः सज्जायेत” श्रुतिः । ततः आक्षेपातिशयार्थे तरप् तमप् वा आमु०च० कुतस्तराम् कुतस्तमाम् आक्षेपविषयहेत्वतिशये अव्य० ततोभवार्थे त्यप् । कुतस्त्य कुतोभवे त्रि०। “कुतस्त्यं भीरु ! यत्तेभ्यो द्रुह्यद्भ्योऽपि क्षमामहे” भट्टिः ।

कुतुक न० कुत बा० उकञ् । १कौतूहले फलनिरपेक्षतया कर्त्तुमौत्सुक्ये अमरः । “क्रमविगलितपुच्छैरभिमतमास्तां बलेन किं शिखिनः। कुतुकिनि ! पुनर्न लाभो विषधरविषमं वनं भविता” रुद्रटः । ततो युवा० स्वार्थे अण् । कौतुक कौतूहले न० ।

कुतुप पुं न० कुतप+पृषो०। १पञ्चदशधा विभक्तदिवसस्याष्टमांशे शब्दरत्ना०। ह्रस्वा कुतूः डुपच्। (छोटकुपा) चर्म्ममये ह्रस्वे २स्नेहपात्रे पु० अमरः।

कुतुम्बुरु न० कुगतिस०। कुत्सिततिन्दुकीफले शब्दचि०

कुतू स्त्री कुत—बा० कू। चर्म्ममये स्नेहपात्रे (कुपो) अमरः

कुतू(कू)णक पु० "कुठू(कू)णकः चीरदोषाच्छिन्नूनामेव वर्त्मनि। जायते तेन तन्नेत्रं कण्डूरं च स्रवेन्मलः। शिशुः कुर्य्याल्ललाटाक्षिकूटनासावघर्षणम्। सञ्चो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः" इति माधवनिदानोक्ते बालानां नेत्रवर्त्मरोगभेदे (कुठुया)

कुतूहल न०कुतं चर्म्ममयं स्नेहपात्रमिव हृदयं हलति हल—अच्। अपूर्व्ववस्तुदिदृक्षातिशयजन्ये चेष्टाभेदे फलनिरपेक्षतया चिकीर्षिते १कौतुके अमरः "प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत्" नैष०। "कुतूहलाघ्रातशिलोपवेशम्" भट्टिः। "अथास्ति मे शकुन्तलादर्शनं प्रति कुतूहलम्" शकु० २प्रशस्ते ३अद्भुते च त्रि०हेमच०। "रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्" सा० द० उक्ते ४नायकयोर्भावभेदे न०। तारका० इतच्। कुतूहलित जातकौतुके त्रि०। स्वार्थे युवा० अण्। कौतूहल कौतुके न० अमरः।

कुतृण न०। कुगतिस०। (पाना) कुम्भिकायाम् शब्दर०।

कुतोनिमित्त त्रि० कुतः किं निमित्तं यस्य किम्+प्रथमार्थे तसिल् ब०व०। किन्निमित्ते किंहेतुके। "कुतोनिमित्तः शोकस्ते" रामा०।

कुत्र अव्य०किम्+सप्तम्याः त्रल् किमः कुः। कस्मिन्नित्यर्थे प्रश्नविषये आक्षेपविषये च अधिकरणे "हा सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टो" महानाट०। "कुत्राशिषः श्रुतिसुखा मृगतृष्णिरूपाः" भाग०७।९।२५। ततो भवार्थे त्यप्। कुत्रत्य कस्मिन्नभवे त्रि०"कस्यापि कुत्रत्य इहापि कस्मात्" भाग० ५।१०।२०।

कुत्रचित् अव्य० कुत्र+चित् दुग्ध०। कचिदित्यर्थे असाकल्येन कस्मिंत् देशे काले वेत्यर्थे। "असुरेभ्योभयं नास्ति युष्माकं कुत्रचित् कचित्"भा० व०१४२अ०। कुत्रचित् देशे कचित् काले इत्यर्थः। पा० अमरमते पदद्वयमिति भेदः। "विशिष्टं कुत्रचिद्बीजं स्त्रीयोनिस्त्वेव तु कुत्रचित्" मनुः। चन। कुत्रचन तदर्थे अव्य०।

कुत्स निन्दने चुरा० आत्म० सक० सेट्। कुत्सयते अचुकुत्सत कुत्सयाम् बभूव आस चक्रे। कुत्सयमानः कुत्सयित्वा सं कुत्स्य। कुत्स्यः कुत्सितः कुत्सनं कुत्सा कुत्सः। कुत्सना। कर्म्मणि कुत्स्यते अकुत्सि अकुत्सिषाताम्-अकुत्सयिषाताम् "बहुतकुत्समार्ज्जनेन शतक्रतुः" ऋ० १।६३।२। कुत्सायशुष्णमशुषम्" ऋ० ४।१६।१२ "कुत्सितानि कुत्सनैः" पा०। कुत्सकः। "परिवित्तिः परीवेत्ता यज्ञाग्नोयश्च कुत्सकः" भा०शा०२४०श्लो०। "यदाऽश्रौषं कर्णमाशाद्य सुक्तं नावधीत्भीमं कुत्सयित्वा वचोभिः" भा० आ० अ० "नास्तिक्यम् वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्" मनुः। "नैतच्छ्रतच्छक्यं त्वया वेत्तुं बच्छ्रमिलोऽ कुत्सयन्" भा०आ० ५२८६श्लो०। अत परस्मैपदमार्षम्

कुत्स प० कुत्सयते संसारं कुत्स—अच्। १ऋषिभेदे तस्यापत्यम् ऋष्यण्। कौत्स तदपत्ये पुंस्त्री "कौत्सः प्रपेदे वरतन्तुशिष्यः" रघुः। बहुषु तस्य "अत्रिभृगु कुत्सेति" पा० लुक्। कुत्साः तदपत्येषु। क—बा० स पृषो०। २कुर्वति त्रि०। "कुत्स एते हर्य्यश्वाय" ऋ० ७।२५।५। "कुत्साः कुर्व्वाणाः। करोतेः कुत्सशब्दनिष्पत्तिः" भा०। ततः पचा० चतुरर्थ्यां फक्। कौत्सायन तन्निर्वृत्तादौ त्रि०।

कुत्सकुशिकिका स्त्री कुत्सानां कुशिकानां च मैथुनम् "द्वन्द्वाद्वुन्वैरमैथुनयोः" पा० मैथुने वुन्। कुत्सगोत्राणां कुशिकगोत्राणाञ्च स्त्रीपुंसां मैथुने।

कुत्सन न० कुत्स—भावे ल्युट्। १निन्दने "देवतानाञ्च कुत्सनम्"मनुः। कुत्स्यते ऽनेन करणे ल्युट्। २निन्दासाधनधर्म्मे उपचारात् ३तद्युक्ते त्रि०। "कुत्सितानि कुत्सनैः"पा०। वैयाकरणखसूचिः। प्रश्नाविष्करणार्थखसूचित्वेन धर्म्मेण वैयाकरणस्य निन्दनात् तादृशधर्म्मस्य कुत्सनत्वम् तद्वत्त्वाच्च खसूचकस्य तथात्वम्।

कुत्सला स्त्री कुत्स—कर्म्मणि बा० कलच् कुत्सं निन्दां लाति ला—क वा। नीलीदले शब्दच०। तस्य क्रयविक्रययोः निन्दितत्वात् तथात्वम् नीलीशब्दे विवृतिः।

कुत्सा स्त्री कुत्स—भावे अ। निन्दायाम् अमरः। "गुरुकुत्सामतिश्च या" भा०अनु०६५८९ श्लोकः।

कुत्सित न० कुत्स—कर्म्मणि क्त। १कुष्ठनामौषधौ (कुड़) राजनि० २निन्दिते त्रि०"कुत्सितानि कुत्सनैः" पा०। भावे क्त ३निन्दायाम् न०।

कुथ क्लेशे (कोँथपाड़ा) इदित् भ्वादि०अक०सेट्। कुन्थति [अकुन्थीत् चुकुन्थ कुन्थात्

कुथ पूतिगन्धे दिवा० पर० अक०प०सेट्। कुथ्यति अकोथीत्। प्रनिकुथ्यति णिचि कोथयति (पोँ या) मिखनने। तस्य

पूतिभावसाधनत्वात्तथात्वम्। "अप्रकाशे देशे कोथयेत्" सुश्रुतः।

कुथ पुंस्त्री० कुथ—पूतीभावे क कुन्थ—निष्कर्षे—क नलोपोवा। "कुथा १कन्था समाख्याता कुथः स्यात् २करिकम्बलम्। कुथः ३कुशः कुथः ४कीटः ५प्रातःस्नायी द्विजः कुथः, इत्युक्तेष्वर्थभेदेषु लिङ्गभेदस्तु रूपभेदादुन्नेयः। "कुथेन नागेन्द्रमिवेन्द्रवाहनम्"।"आक्षिप्तकेतुकुथसैन्यगजच्छलेन"माघः। "शतशश्च कुथांस्तत्र सिंहलाः समुपाहरन्" भा० स० ५१अ०। हस्तिकम्बले पुंस्त्री अमरः। "महत्या कुथयास्तीर्णां पृथिवीलक्षणाङ्कया" रामा०। "तत्र कुशे "शाद्वलेषु यदाशिश्ये वनान्ते वनगोचरा। कुथास्तरणतल्पेषु किं स्यात् सुखतरं ततः" रामा०।

कुथुम पु०सामवेदशाखाभेदे। तं वेत्ति इनि। कुथुमिन् अण् वा। कौथुम तच्छाखाध्यायिनि। सामवेदशब्दे विवृतिः। कुथुमिना प्रोक्तमधीयते अण् नान्तस्य टिलोपे सब्रह्मचारिपीठसर्पि समापिकुथुमीत्यादि" वा०टिलोपः। कौथुम तत्प्रोक्ताध्यायिषु भूम्नि त्रि०।

कुथोदरी स्त्री कुम्भकर्णपौत्र्यां निकुम्भदुहितरि। सा च कल्किना हता यथाह कल्किपु० १६अ०

"मुनय ऊचुः। शृणु विष्णुयशःपुत्र! कुम्भकर्णात्मजात्मजा। कुथोदरीति विख्याता गगनार्द्धसमुत्थिता॥ कोलकञ्जस्य महिषी निकञ्जजननी च सा। हिमालये शिरः कृत्वा पादौ च निषधाचले॥ शेते स्तनं पाययन्ती निकञ्जं प्रस्नुतस्तनी। तस्या निश्वासवातेन विवशा वयमागताः॥ दैवेनैव समानीताः प्राप्तास्तव पदाम्बुजम्। मुनयो रक्षणीयास्ते रक्षःसु च विपत्सु च॥ इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः। सेनागणैः परिवृतो जगाम हिमवद्गिरिम्"।

इत्युपक्रम्य तया सह युद्धे ससैन्यकल्केस्तदुदरवेशमुपवर्ण्य "कल्किः कमलपत्राक्षः सुरारातिनिसूदनः। वाजाग्निचेत्रचर्म्मभ्यां कम्बलैर्यामदारुभिः। प्रज्वाल्योदरमध्येन करवालं समाददे॥ तेन खड्गेन महता कुक्षिं निर्भिद्य बन्धुभिः। बलिभिर्भ्रातृभिर्व्वीरैर्वृतः शस्त्रास्त्रपाणिभिः। दक्षिणं भूत्वा सर्व्वशः कल्किः कल्कविनाशनः। सहस्राक्षो यथा वृत्रकुक्षिं दम्भोलिनेमिना॥ योनिरन्ध्राद्गजरथास्तुरगाश्चाभवन् बहिः। नासिकाकर्णविवरात् केऽपि तस्या विनिर्गताः। ते निर्गतास्तमस्याः सैनिका रुधिरोक्षिताः। तां विव्यधुर्निःक्षिपन्तीं तरसा चरणौ करौ॥ ममार सा भिन्नदेहा भिन्नकुक्षिशिरोधरा"।

कुद [कुदत्। धातुपाठः।

कुद्र मिथ्योक्तौ चु० सक० उभ० सेट्। कोद्रयति ते। अचू-

कुद्दाल पु० कुं भूमिं दलति दल—भेदने अण् उप०स०। कुद्दाले (कोदाल) रमानाथः।

कुदिन न० कोः पृथिव्याः भ्रमणेन दिनम्। १सावनदिने। तदुक्तं सू० सि०। "ओदयादोदयं भानोः सावनं तत् प्रकीर्त्तितम्। सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः" 'सूर्य्यस्योदयादुदयकालमारभ्याव्यवहितोदयकालपर्यन्तं यत् कालात्मकं तत् सावनं मानमुक्तम्। एतेनोदयद्वयान्तरात्मककालस्य गणनया सावनानि वसुद्व्यष्टाद्रीत्यादिना मध्यमाधिकारोक्तानि भवन्ति। तद्व्यवहारमाह। यज्ञकालविधिरिति यज्ञस्य यः कालस्तस्य गणना तैः सावनैः। तुकारोऽन्यमाननिरासार्थकैवकारपरः"रङ्गना०। निरुपपदसावनदिनस्य सूर्य्यसंबन्धिसावनदिनपरत्वं युगे तत्संख्या च तत्रैव दर्शिता यथा

"ओदयादोदयं भानोर्भूमिसावनवासराः"॥

"ननु भोदया भगणैरित्यादिना पूर्वं सर्वेषां सावनदिवसा उक्ता इत्यत्र कस्य ग्राह्या इत्यतः सूर्य्यसावनस्वरूपकथनच्छलेनोत्तरमाह। ओदयादिति। सूर्य्यस्योदय० कालमारभ्याव्यवहिततदुदयकालपर्यन्तं यः कालः स एको दिवसः। इति ये दिवसास्ते भूमिसावनवासराः। भूदिवसा उदयस्य भूसम्बन्धेनावगमात् सावनदिवसाश्चेत्यर्थः। तथा च निरुपपदसावनभूमिशब्दाभ्यां सूर्य्यस्य वासरा एव नान्येषां सोपपदत्वाभावादिति भावः" रङ्गना०। ते कियन्त इत्यतस्तत्प्रमाणमाह "वसुद्व्यष्टाद्रिरूपाङ्क सप्ताद्रितिथयोयुगे" सू०सि०। "अष्टाश्विगजसप्तभूगोनगसप्तपञ्चभूमिता १५७७९१७८२८ युगे सूर्य्यसावनदिवसाः"रङ्गना०। सि०शि०अन्यथोक्तं यथा "भूदिनानि शरवेदभूपगोसप्तसप्ततिथयोऽयुताहताः १५७७९१८४५०००० ‍। भभ्रमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा" सि०शि०।

"एषामुपपत्तिः प्रागेवोक्ता। एकस्मिन् रविवर्षे यावन्तो भभ्रमाः स्युस्तावन्त एवैकोना रविसावनदिवसा भवन्ति। यतो रविः प्राग्गत्या एकं पर्यायं गतः। अतो भगणसंख्ययोना भभ्रमाः कहा भवन्ति। एवमन्येषामपि ग्रहाणां कुदिनानि स्युरित्युपपन्नम्" प्रमि०।

"इनोदयद्वयान्तरं तदर्कसावनं दिनम्। तदेव मेदिनी-

दिनं भवासरस्तु भभ्रमः” इति सिद्धान्तशिरोमणिः। “इनोदयद्वयान्तरमिति। अर्कोदययोरन्तरं यत् तदर्कसावनं दिनम्। तदेव कुदिनसंज्ञं ज्ञेयम्। अतोऽपि पूर्ववन्मासवर्षादिकल्पना। अन्तार्कग्रहणमुपलक्षणं तेनान्येषामपि ग्रहाणां तदुदयद्वयान्तरं तत्सावनमिति” प्रमि०।

तद्दिवसस्य कार्य्यविशेषे आदर्त्तव्यतामाह सू०सि०— “सूतकादिपरिच्छेदो दिनमासाब्दपास्तथा। मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृह्यते”।

“सूतकं जन्ममरणसम्बन्धि। आदिपदग्राह्यं चिकित्सितचान्द्रायणादि तस्य परिच्छेदो निर्णयः। दिनाधिपमासेश्वरवर्षेश्वराः। तथा—समुच्चये। ग्रहाणां गतिर्मध्यमा। तुकारात् स्फुटगतेर्निरासः तस्याः प्रतिक्षणं वैलक्षण्याद्दिनसम्बन्धस्याभावात्। एतेन स्पष्टगत्या स्पष्टग्रहस्य चालनं निरस्तं स्थूलत्वादिति सूचितम्। सावनमानेन। एवकारादन्यमाननिरासः” प्रमि०।

“प्रायश्चित्तं सूतकाद्यं चिकित्सा यज्ञाद्येयं कर्म वारादिकं च। शास्त्रे तस्मिन् खेचराणां च चारा विज्ञातव्याः सावनात् भास्करीयात्” श्रीपतिः॥

कुत्सितभूमिदिनादयोऽप्यत्र। २ज्योतिषनिषिद्धे दिने च

कुदृष्टि स्त्री कुत्सिता दृष्टिः ज्ञानम्। वेदबाह्यतार्किक कल्पनायाम्।“या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः” मनुः।

कुदेह पु० कुत्सितोदेहोऽस्य। १कवेरे २कुत्सितदेहयुक्ते त्रि०। कुगतिस० २कुत्सिते देहे पु०। कुदेहमानाहिवि-दष्टदृष्टेः” भाग०५।१२।२।

कुद्दार पु० कुं पृथ्वीं दारयति दृ—विदारे अण् पृषो०। १कुद्दाले भूमिविदारणाज्जाते २कोविदारवृक्षे अमरटीका।

कुद्दाल पु० कुं भूमिं दलति दल—अण् उप०स०पृषो०। १कोविदारे वृक्षे अमरटी० २भूमिदारणास्त्रे (कोदाल) मेदि०। “समासाद्य बिलं तत्राप्यखनन् सागरात्मजाः। कुद्दालैर्हेषुकैश्चैव समुद्रं यत्नमास्थिताः” भा०व० १०७अ०। “कुद्दालं दात्रपिटकं प्रकोसं कांस्यभाजनम्” भा०शा० २२८अ०। हस्त्यादि० बहुव्रीहौ एतत्पूर्व्वस्य पादस्य नान्त्यलोपः कुद्दालपादः। स्वार्थे क। कुद्दालक तत्रार्थे।

कुद्मल न०कुड्मल+पृषो०। विकाशोन्मुखे पुष्पमुकुले अमरटी०

कुद्य न कुद—क्यप्। भित्तौ अमरटीका।

कुद्र मिथ्योक्तौ इदित् चु०उभ०सक०सेट्। कुन्द्रयति अचुकुन्द्रत्। प्रतिकुन्द्रयति नोपधकरणेनैव प्रसिद्धौ इदित्करणं स्वरार्थम्।

कुद्रङ्क पु०कुत्सितः रङ्कश्चिह्नमस्य पृषो०। मञ्चोपरिस्थे मण्डपे त्रिका०।

कुद्रङ्ग पु०कुत्सितोरङ्गोयत्र पृषो०। मञ्चकोपरिस्थे मण्डपे हारा०

कुद्रव पु०कुं भूमिं द्रवति द्रावयति द्रु—अन्तर्भूतण्यर्थे—अच्। कोद्रवे धान्यभेदे (कोदो) भरतः। [पुंस्त्री०।

कुद्रि पु० ऋषिभेदे तस्यापत्यं गृष्ट्या० ढञ्। कौद्रेय तदपत्ये

कुधान्य न० कुत्सितं धान्यं कुगतिस०। कुत्सिते धान्यभेदे स च सुश्रुते गुणसहितोदर्शितोयथा

“कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखकुरुविन्दगवेधुकावरुकतीनपर्णी मुकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः’॥ उष्णाः कषायमधुरा रूक्षाः कटुविपाकिनः। श्लेष्मघ्ना बद्धनिष्यन्दा वातपित्तप्रकोपणाः। कषायमधुरास्तेषां शीतपित्तापहाः स्मृताः। कोद्रवश्च सनीवारःश्यामाकश्च सशान्तनुः। कृष्णा रक्ताश्च पीताश्च श्वेताश्चैव प्रियङ्गवः। यथोत्तरं प्रधानाः स्युः रूक्षाः कफहराः स्मृताः। मधूली मधुरा शीता स्निग्धा नान्दीमुखी तथा। विशोषी तत्र भूयिष्ठं वरकः समुकुन्दकः। रूक्षा वेणुयवा ज्ञेया वीर्य्योष्णाः कटुपाकिनः। बद्धमूत्राः कफहराः कषाया वातकोपनाः”

कुध्र पु० कुं पृथिवीं धारयति धृ—मूलविभुजादि० क दृत०। महीध्रे पर्वते हला०।

कुनक पुंस्त्री करटे स्त्रियां जातित्वात् ङीष्।

कुनख पु० कुत्सितो नखोऽत्र। सुश्रुतोक्ते रोगभेदे (कुनि) तल्लक्षणं तत्रैवोक्तं यथा। “अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः। भवेत्तु कुनखं विद्यात् कुलीनमिति संज्ञितम्”। कुनखे विधिरप्येष” सुश्रु०। ६ब०। कुत्सितनखयुक्ते त्रि०स्त्रियां स्वाङ्गत्वात् वा ङीष्।

कुनखिन् त्रि० कुनखो रोगोऽस्त्यस्य इनि। कुनखरोगयुक्ते सच रोगो भुक्तावशिष्टसुवर्णस्तेयरूपजन्मान्तरीय महापातकचिह्नं यथाह विष्णुः

“अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्ये, लक्षणानि भवन्ति कुष्ठ्यतिपातकी, ब्रह्महा यक्ष्मी, सुरापः श्यावदन्तकः, सुवर्णहारी कुनखी गुरुतल्पगोदुश्चर्म्मा”। “कुनखी श्यावदन्तश्च द्वादशरात्रं चरित्वा तद्दन्तनखावुद्धरेयाताम्” विष्णुः। स्त्रियां ङीप्। सच रोगः गर्भावस्थायां मातुर्दोषभेदाज्जायते तदुक्तं सुश्रुते “दिवास्वपन्त्याः स्वापशीलोऽञ्जनादन्धो रोदनात् विकृतदृष्टिः स्नानानुलेपनात् दुःखशीलस्तैलाभ्यङ्गात् कुष्ठी नखा-

अकर्त्तनात् कुनखीत्यादि। कुनखी च श्राद्धकाले वर्ज्जनीयः यथाह मनुः "वर्ज्याः स्युर्हव्यकव्ययोः। प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः"। "दुर्वर्णः कुनखी कुष्ठी मायावी कुण्डगोलकौ, वर्ज्जनीयाः प्रयत्नेन" भा०व० १९६। श्राद्धे वर्जनीयोक्तौ।

कुनट पु० कुत्सितं नटति—नट—अच्। १श्योनाकभेदे राजनि० गौरा० ङीष्। कुनटी २मनःशिलायाम् अमरः ३धन्याके राजनि०। कुत्सितोनटः कुग०स०। ४कुत्सिते नटे पु०।

कुनलिन् पु० ईषत् नलोऽस्त्यस्य इनि। वकवृक्षे त्रिका०। तस्य फलेषु ईषन्नलाकारत्वात्तथात्वम्।

कुनह(ट) पु० कूर्म्मविभागे वृह०सं० ऐशान्यामुक्ते १देशभेदे "ऐशान्यां मेरुकनष्टराज्येत्युपक्रमे "भल्लोपनीलजटासुरकुनह(ट)खसकुचिकाख्याः" इति तत्रोक्तत्वात्। कु+नह—अच्। २कुत्सितबन्धके त्रि०।

कुनाथ पु० कुत्सितोनाथः। १कुत्सितपालके। "कुनाथस्याजितात्मनो यथा सार्थस्य" भाग०५।१४।४। "हतास्म्यहं कुनाथेन नपुंसा वीरमानिना" भाग० ९।१४।४। कुपालककुपत्यादयोऽप्यत्र। कोर्नाथः। २महीनाथे राजनि पु०।

कुनाभि पु० ईषत् नाभिरिव आवर्त्तयस्त्वात्। १वातमण्डल्याम् (घुर्णावाताम) त्रिका०। २निधिभेदे हेमच०।

कुनामन् त्रि० कुत्सितं प्रातरस्मरणीयं नामास्य। अतिक्रमणे स्त्रियां वा डाप् ङीप्। तस्यापत्यं बाह्वा० इञ्। कौनामि तदपत्ये पुंस्त्री०। तस्येदम् काश्या० ठञ्ञिठौ। कौनामिक तत्सम्बन्धिनि त्रि० ठञि स्त्रियां ङीप् ञिठि टाप् इदुच्चारणार्थः इति भेदः।

कुनाशक पु० ईषत् नाशयति स्पर्शनात् नश—णिच्—ण्वुल्। दुरालभायाम् यवासे (आलकुशी) अमरः।

कुनिषङ्ग पु० दशममनोः पुत्रभेदे। "दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः" इत्युपक्रमे "मनोः सुतोत्तमाजाश्च कुनिषङ्गश्च वीर्य्यवान्" हरिवं० ७अ०।

कुन्च वक्रणे अनादरे च भ्वा० पर० सक०सेट्। कुञ्चति अकुञ्चीत् चुकुञ्च चुकुच(ञ्च)तुः। कुञ्चनम् आ+सङ्कोचने आकुञ्चति संकोचयति। वि प्रसारणे। विकुञ्चति प्रसारयति सङ्कुचितः णिच् आकुञ्चितः "आकुञ्चितसव्यपादम्" भट्टिः।

कुन्त पु० कुं भूमिमित्युनत्ति उन्द—बा० न शकन्ध्वा०। गवेधुकायां (गड़गड़े) १धान्यभेदे। २प्रासास्त्रे च मेदि०। ३क्षुद्रकीटभेदे (उकुन्) कुन्तलः। ४चण्डभावे विश्वः। कुन्तास्त्रलक्षणं हेमा० परिख० लक्षणसमुच्चये उक्तं यथा "उक्ता कुन्तोत्पत्तिरनन्तरं कुन्तद्रव्यं वक्ष्यते वेणुर्वेत्रं बिल्वश्चन्दनो वर्द्धनं शिशंपा खदिरो देवदारुर्घण्टारोहश्चेति कुन्तस्य दण्डद्रव्याणि तत्र सप्तहस्तप्रमाणः श्रेष्ठः। षड्भिर्हस्तैर्मध्यमः। पञ्चहस्तश्च निकृष्टो भवति लोहस्याकारौ द्वौ भवतः एकं पुष्कलावर्त्तकं द्वितीयं चीनोत्थितं तत्तु तीक्ष्णं, यत्तु पुष्कलावर्त्तकं तल्लोहं मृदु। तयोस्त्वियं परीक्षा यत्ताडितं नदति तत्तीक्ष्णं यन्निःशब्दं तन्मृदु, निपाते यच्छिद्यते तत्तीक्ष्णं, यन्नमति तत्पुष्कलावर्त्तं मृदु। तत्र चीनोद्भवं भवत्यप्रशस्तं पुष्कलावर्त्तकमेव प्रशस्यते। कुन्तस्य फलं च मृदुना लोहेन कर्त्तव्यं तीक्ष्णेन लोहेन धारा कार्या तयोरलाभे शेषाणि लौहानि शोधयित्वा कुन्तफलं तैः कारयेत्। तत्र सप्तपर्णशाकखर्जूरीबिल्वकरवीरवेणूनां तालफलकयोः केतक्याः स्नुह्या वा पत्राकारः कुशाग्रस्य सन्निभश्च। तथा कर्णसंस्थानं वा कर्त्तव्यं तच्च निर्व्रणं मनोहारिहृष्टकरं लोहं शुभञ्च श्रेष्ठं षोड़शाङ्गुलायामं, मध्यं चतुर्द्दशाङ्गुलायाममधमं द्वादशाङ्गुलं भवति। अङ्गुलविस्तारं सार्द्धाङ्गुलविस्तारं द्व्यङ्गुलविस्तारञ्च क्रमाद्भवति। द्वियववैपुल्यं सार्द्धैकयववैपुल्यमेकयववैपुल्यञ्च। तत्र श्लोकाः। वेण्वादिद्रुमजातीनां कार्यो दण्डः स च त्रिधा। सप्तषट्पञ्चहस्तश्च उत्तमो मध्यमोऽधमः। तस्याकारौ च द्वौ स्यातां सचीनं पुष्कलं तथा। तत्रैकं तीक्ष्णं लोहस्य द्वितीयं मृदुलस्तथा। तत् फलं मृदुलोहेन धारा तीक्ष्णेन कारयेत्। सप्तपर्णादिपत्राणां समाकारं फलं भवेत्। षोड़शाङ्गुलमायामोद्व्यङ्गुलञ्चापि विस्तृतम्। यवद्वितयवैपुल्यं श्रेष्ठं कुन्तफलं भवेत्। मध्यमाधमयोर्हानिर्द्व्यङ्गुलार्द्धाङ्गुलं क्रमात्। आयामे विस्तृते दत्त। वैपुल्ये च यथाक्रमम्। सुशब्दत्वं मृदुगन्धत्वं सुपीनत्वं दर्शपूजितत्वञ्चेति फलगुणाः। चम्पकोत्पलचन्दनागुरुपद्मोशीरपत्ररसानां सुगन्धिदानाम् भवति फलस्य गन्धसंपत्; तया युक्तं फलमतिक्रम्यापि रूपं पूजितं भवति वसागन्धि मत्स्यगन्धि गोमूत्रगन्धि दुर्गन्धि च निन्दितं भवति। मधुरं यद्ययास्त्वं यत्कषायं भवति तल्लक्ष्मीप्रवर्द्धनं, यल्लवणं कटुकं तिक्तं वापि रूक्षं क्षयावहं तन्निर्द्दिशेत्। शब्दस्तु हिरण्यस्थालीशब्दवत् घण्टाशब्दवच्च प्रशस्तो, झर्झरीभिन्नपात्रशब्दश्चेरी

शब्दयश्च शब्दो निन्दितो भवति। वैदूर्यनिभं चन्द्रसमानवर्णं कुसुम्भितोत्फलसदृशवर्णं निर्मलाकाशसवर्णमतसीपुष्पनिभं वा कुन्तफलं श्रियं भर्त्तुर्ददाति, मधुकोशसमानवर्णं श्यामलोहवर्णं मक्षिकासवर्णं निन्दितं भवति। हंसशुकमयूरताम्रचूडघटनन्द्यावर्त्तकूर्ममत्स्यसरित्प्रभा अन्ये च मङ्गलशंसिनः पदार्थाः कुन्तव्रणेषु यदि दृश्यन्ते तदा ते धर्मकामार्थसाधकाविनिर्द्दिष्टाः। पादुकोलूकपादपवायसश्वगृध्रजम्बूकनिगलक्ककलासाश्चेत्येवं निन्दिताः पदार्था दृश्यन्ते व्रणेषु ते दृष्टाः श्रियमपहरन्ति वत्सेति व्रणलक्षणम्। छाया वक्ष्यते ध्वजपताकाचामरच्छत्रतोरणशिविकावेश्माङ्कुशवर्द्धमानभृङ्गारगजतुरङ्गायस्मिन् कुन्तफले दृश्यन्ते धौतच्छायान्तरगतास्तं कुन्तमपुण्यकृतोन लभन्ते नकुलच्छेदकसूकरमहिषवायसोलूकयल्मीकादयो ये निन्दितायदि कुन्ते स्युर्धौतश्यक्ते तदा स कुन्तः श्रियं भुज्यमानामपि विनाशयेद्यस्तादृशङ्कुन्तं बिभृयात्। स बधं बन्धं सद्योलभेत तस्य महिषी वा। चूलिकयोर्व्याधूनखस्य शुक्लानि चूर्णानि समभागानि कारयेत्। तत् चूर्णितं कृत्वा तेन चूर्णेन फले घर्षोपघर्षितं कुन्तफलं निर्मलं भवति दुर्गन्धं न भवेत्तथा मलेन न लिप्यते। तत्र वर्मकोषसमन्वितं समाहितं कारयेन्नालिकावच्छिद्रेण सुदृढा यामेन व्रतुबन्धेन सुश्लिष्टैश्चाद्वैर्वलयकैः सुवर्णमये रजतमये वा चर्मणि रत्नालङ्कृतैर्नलिका श्लिष्टा कर्त्तव्या। स्कन्धे दृढपरिग्रहश्च तथाचोक्तं कुन्तस्य कर्त्तव्यं नलिकासहजं वा। नलिका चात्र प्रमाणतः श्लिष्टा कार्या हरीतकीसदृशन्तालफलसमानं यिल्वफलाकारं ककुभकपित्थफलसदृशं वा हस्तमष्टाङ्गं वा कलशामलकाकारं वा भवति सर्वोपस्करान्वितं कुन्तायुधं षष्टिपलं श्रेष्ठं पञ्चाशत्पलं मध्यमं चत्वारिंशत्पलं निकृष्टमिति प्रबलरिपुविनाशकं क्रियान्वितञ्च कुन्तं कारयेन्नत्तु स्वप्रमाणादधिगौरवं, यो हि कायसारस्य बलमविदित्वा कुन्तमायुधमावहेत् सादिकस्तस्याजीर्णमजानतः पुरुषस्येवातिभुक्तमशनं कुन्तायुधं विषीभवति। इत्यौशनसे कुन्तलक्षणम्” कुन्ताः प्रविशन्तीत्यत्र कुन्तधारिषि लक्षणेत्यालङ्कारिकाः। “शक्तिकुन्तध्वजरथाश्वाजवारणगोदृशाः” सुश्रु०। “शक्तिकुन्ताद्यायुधानीति” सुश्रुतः।

कुन्तल पु० कुन्तं क्षुद्रकीटं (उकुण) लाति ला—क। १केशे “क्वापि कुन्तलसंव्यानसंयमव्यपदेशतः। बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्” सा० द०। शृङ्गारकारत्वात् २ह्रीबेरे च अमरः। कुन्तलाकारं केशाग्राकारं लाति ला—क। ३यवे ४चषके पानपात्रे ५लाङ्गले च विश्वः। ६ध्रुवकभेदे “वर्णैः षोड़शभिः कार्य्यः कुन्तलो लघुशेखरैः। शृङ्गारे च रसे प्रोक्त आनन्दफलदायकः” इति संगीतदामो०। “कामगिरिं समारभ्य द्वारकान्तं महेश्वरि!! श्रीकुन्तलाभिधो देशः कथितः पूर्व्वसूरिभिः” शक्तिसङ्गमतन्त्रोक्ते ७देशभेदे पु० भूम्नि “स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुः” सा०द०। “अथापरे जनपदा दक्षिणा भरतर्षभ” इत्युपक्रमे “द्रविड़ाः कुन्तलाश्चैव सौहृदा नलकाननाः” भा०भी०९अ० दाक्षिणात्यजनपदोक्तौ। तेषां राजा अण्। कौन्तल तद्देशनृपे। बहुषु तस्य लुक्। क्वचित् एकत्वेऽपि लुक्। “आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा। द्राविड़ाः सिंहलाश्चैव राजा काश्मीरकस्तथा” भा०स०१४अ०। ते अभिजनोऽस्य अण्। कौन्तल पित्रादिक्रमेण तद्देशवासिनि। बहुषु तस्य लुक्।

कुन्तलवर्द्धन पु० कुन्तलान् वर्द्धयति वृध—णिच्—ल्यु। भृङ्गराजे (भीमराज) राजनि०। तद्रससेवनेन हि केशवृद्धिरिति वैद्यकप्रसिद्धिः।

कुन्तलिका स्त्री कुन्तलाग्राकारो विद्यतेऽस्याः ठन् अत इत्त्वम्। दध्यादिच्छेदन्यां १छुरिकाभेदे पालिकायाम् हारा०। २बाला नामौषधौ (बाला) स्त्री सुश्रुतः। यथा “कुन्तलिकाकुरण्टकाप्रभृतानीत्युपक्रमे “स्वादुपाकरसाःशीताः कफघ्नाश्चातिपित्तलाः। लवणाद्रसाल्वाः सक्षाराः वातलाः सराः। स्वादुतिक्ता कुन्तलिका”। [राजनि०।

कुन्तलोशीर न० कुन्तल इवोशीरम्। (बाला) नामौषधौ।

कुन्ताप पु०। १वैदिके ऋचां पाठप्रकारभेदे तत्प्रकारः आश्व० श्रौ० ८।३।७।८।९। सू० दर्शितोयथा “तस्मादूर्ध्वं कुन्तापम्” सू० “तस्माद् पाकपेद्धर्ध्वं कुन्तापं शंसेत्। तस्मादूर्ध्वमिति वचनात् माध्यन्दिने वृषाकपौ प्रविष्टे तदनन्तरं कुन्तापः स्यादसति प्रवेशे तृतीयसवनेऽपि तस्य प्रवेशो नास्तीति गम्यते” नारा०वृ०। “तस्यादितश्चतुर्दशर्चविग्राहं निगद्यं शंसेत” सू०। “तस्य कुन्तापस्यादितश्चतुर्दश ऋचो विग्राह्य निगद्योऽयमपूर्व इति तस्याः स्वरूपनिदर्शनमाह” वृ०। “तृतीयेषु पादेषूदात्तमनुदात्तपरं यत् प्रणवं तन्निगदेत्” वृ०

वक्रर्त्तनात् कुनखीत्यादि। कुनखी च श्राद्धकाले वर्ज्जनीयः यथाह मनुः "वर्ज्याःस्युर्हव्यकव्ययोः। प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः"। "दुर्बालः कुनखी कुष्ठी मायावी कुण्डगोलकौ, वर्ज्जनीयाः प्रयत्नेन" भा०व० १९९। श्राद्धे वर्जनीयोक्तौ।

कुनट पु० कुत्सितं नटति—नट—अच्। १श्योनाकभेदे राजनि० गौरा०ङीष्। कुनटी २मनःशिलायाम् अमरः ३धन्याके राजनि०। कुत्सितोनटः कुग०स०। ४कुत्सिते नटे पु०।

कुनलिन् पु० ईषत् नलोऽस्त्यस्य इनि। वकवृक्षे त्रिका०। तस्य फलेषु ईषन्नलाकारत्वात्तथात्वम्।

कुनह(ट) पु० कूर्म्मविभागे वृह०सं० ऐशान्यामुक्ते १देशभेदे "ऐशान्यां मेरुकनष्टराज्यमित्युपक्रमे "भल्लोपनीलजटासुरकुनह(ट)खसकुचिकाख्याः" इति तत्रोक्तत्वात्। कु+नह—अच्। २कुत्सितबन्धके त्रि०।

कुनाथ पु० कुत्सितोनाथः। १कुत्सितपालके। "कुनाथस्याजितात्मनो यथा सार्थस्य" भाग०५।१४।४। "हतास्म्यहं कुनाथेन नपुंसा वीरमानिना" भाग० ९।१४।४। कुपालककुपत्यादयोऽप्यत्र। कौनाथः। २महीनाथे राजनि पु०।

कुनाभि पु० ईषत् नाभिरिव आवर्त्तवत्त्वात्। १वातमण्डल्याम् (घुर्णावात) त्रिका०। २निधिभेदे हेमच०।

कुनामन् त्रि० कुत्सितं प्रातरस्मरणीयं नामास्य। अतिशयणे स्त्रियां वा डाप् ङीप्। तस्यापत्यं बाह्वा० इञ्। कौनामि तदपत्ये पुंस्त्री०। तस्येदम् काश्या० ठञ्ञिठौ। कौनामिक तत्सम्बन्धिनि त्रि० ठञि स्त्रियां ङीप् ञिठि टाप् इदङ्गारवार्थः इति भेदः।

कुनाशक पु० ईषत् नाशयति स्पर्शनात् नश—णिच्—ण्वुल्। दुरालभायाम् यवासे (आलकुशी) अमरः।

कुनिषञ्ज पु० दशममनोः पुत्रभेदे। "दशमे त्वथ पर्य्याये द्वितीयस्यान्तरे मनोः" इत्युपक्रमे "मनोः सुतोत्तमाजाश्च कुनिषञ्जश्च वीर्य्यवान्" हरिवं० ७अ०।

कुन्च वक्रणे अनादरे च भ्वा० पर० सक०सेट्। कुञ्चति अकुञ्चीत् चुकुञ्च चुकुच(ञ्च)तः। कुञ्चनम् आ+सङ्कोचने आकुञ्चति संकोचयति। वि प्रसारणे। विकुञ्चति प्रसारयति सङ्कुचितः णिच् आकुञ्चितः "आकुञ्चितसव्यपादम्" भट्टिः।

कुन्त पु० कुं भूमिमुनत्ति उन्द—बा० न शकन्ध्वा०। गवेधुकायां (गड़गड़) १धान्यभेदे। २प्रासास्त्रे च मेदि० ३क्षुद्रकीटभेदे (उकुन्) कुन्तलः। ४चण्डभावे विश्वः। कुन्तास्त्रलक्षणं हेमा० परिख० लक्षणसमुच्चये उक्तं यथा "उक्ता कुन्तोत्पत्तिरनन्तरं कुन्तद्रव्यं वक्ष्यते वेणुर्वेत्रं बिल्वश्चन्दनो वर्द्धनं शिंशपा खदिरोदेवदारुर्धन्वटारोहश्चेति कुन्तस्य दण्डद्रव्याणि तत्र सप्तहस्तप्रमाणः श्रेष्ठः। षड्भिर्हस्तैर्मध्यमः। पञ्चहस्तस्य निकृष्टो भवति लोहस्याकारौ द्वौ भवतः एकं पुष्कलावर्त्तकं द्वितीयं चीनोद्भवं तत्तु तीक्ष्णं, यत्तु पुष्कलावर्त्तकं तल्लोहं मृदु। तयोस्त्वियं परीक्षा यत्ताडितं नदति तत्तीक्ष्णं यन्निःशब्दं तन्मृदु, निपाते यच्छिद्यते तत्तीक्ष्णं, यन्नमति तत्पुष्कलावर्त्तं मृदु। तत्र चीनोद्भवं भवत्यप्रशस्तं पुष्कलावर्त्तकमेव प्रशस्यते। कुन्तस्य फलं च मृदुना लोहेन कर्त्तव्यं तीक्ष्णेन लोहेन धारा कार्य्या तयोरलाभे शेषाणि लोहानि शोधयित्वा कुन्तफलं तैः कारयेत्। तत्र सप्तपर्णशाकखर्जूरीबिल्वकरवीरवेणूनां तालफलकयोः केतक्याः सूच्या वा पत्राकारः कुशाग्रस्य सन्निभश्च। तथा कर्णसंस्थानं वा कर्त्तव्यं तच्च निर्व्रणं मनोदृष्टिहरन्तीक्ष्णं शुभञ्च श्रेष्ठं षोडशाङ्गुलायामं, मध्यमं चतुर्द्दशाङ्गुलायाममधमं द्वादशाङ्गुलं भवति। अङ्गुलविस्तारं सार्द्धाङ्गुलविस्तारं द्व्यङ्गुलविस्तारञ्च क्रमाद्भवति। द्वियववैपुल्यं सार्द्धैकयववैपुल्यमेकयववैपुल्यञ्च। तत्र श्लोकाः। वेण्वादिद्रुमजातीनां कार्य्यो दण्डः स च त्रिधा। सप्तषट्पञ्चहस्तश्च उत्तमो मध्यमोऽधमः। तस्याकारौ च द्वौ स्यातां सचीनं पुष्कलं तथा। तत्रैकं तीक्ष्णं लोहस्य द्वितीयं मृदुनस्तथा। तत् फलं मृदुलोहेन धारा तीक्ष्णेन कारयेत्। सप्तपर्णादिपत्राणां समाकारं फलं भवेत्। षोडशाङ्गुलमायामोद्व्यङ्गुलश्चापि विस्तृतम्। यवद्वितयवैपुल्यं श्रेष्ठं कुन्तफलं भवेत्। मध्यमाधमयोर्हानिर्द्व्यङ्गुलार्द्धाङ्गुलं क्रमात्। आयामे विस्तृते दलस्य वैपुल्ये च यथाक्रमम्। कृशत्वं मृदुगन्धत्वं सुपीनत्वं दर्शपूजितत्वञ्चेति फलगुणाः। चम्पकोत्पलचन्दनागुरुपद्मोशीरपत्ररसानां सुगन्धिदानाम् भवति फलस्य गन्धसंपत्। तथा युक्तं फलमतिक्रम्यापि रूपं पूजितं भवति वसागन्धि मत्स्यगन्धि गोमूत्रगन्धि दुर्गन्धि च निन्दितं भवति। मधुरं यद्धयवास्त्रं यत्कणाय भवति तत्तन्त्रीतवर्द्धनं, यल्लवणं कटुकं तिक्तं वापि रूक्षं क्षयावहं तन्निर्द्दिशेत्। शब्दस्तु किङ्किणस्यालोशब्दवत् घण्टाशब्दवच्च प्रशस्तो, झर्झरीभिन्नपात्रशब्दश्चेरीः

शब्दश्च शब्दो निन्दितो भवति। वैदूर्य्यनिभं चन्द्रसमान वर्णं कुसुम्भितोत्पलसदृशवर्णं निर्म्मलाकाशसवर्णमतसी पुष्पनिभं वा कुन्तफलं श्रियं भर्त्तुर्ददाति, मधुकोशसमानवर्णं श्यामलोहवर्णं मक्षिकासवर्णं निन्दितं भवति। हंसशुकमयूरताम्रचूडघटनन्द्यावर्त्तकूर्म्ममत्स्य सरित्प्रभा अन्ये च मङ्गलशंसिनः पदार्थाः कुन्तव्रणेषु यदि दृश्यन्ते तदा ते धर्म्मकामार्थसाधकाविनिर्द्दिष्टाः। पादुकोलूकपादपवायसश्वगृध्रजम्बूकनिगलहृककलासास्वेत्येवं निन्दिताः पदार्था दृश्यन्ते व्रणेषु ते दृष्टाः श्रियमपहरन्ति भर्त्तुरिति व्रणलक्षणम्। छाया वक्ष्यते ध्वजपताकाचामरच्छत्रतोरणशिविकावेश्मसाङ्कुशवर्द्धमानभृङ्गारगजतुरङ्गायस्मिन् कुन्तफले दृश्यन्ते धौतच्छायान्तरगतास्तं कुन्तमपुण्यकृतोन लभन्ते नकुलच्छिद्रकसूकरमहिषवायसोलूकवल्मीकादयो ये निन्दितायदि कुन्ते स्युर्धौतश्चक्रे तदा स कुन्तः श्रियं भुज्यमानामपि विनाशयेद्यस्तादृशकुन्तं बिभृयात्। स बधं बन्धं सद्योलभेत तस्य महिषी वा। चूलिकयोर्व्याघ्रनखस्य शुक्लानि चूर्णानि समभागानि कारयेत्। तत् चूर्णितं कृत्वा तेन चूर्णेन फले घर्षोपघर्षितं कुन्तफलं निर्म्मलं भवति दुर्गन्धं न भवेत्तथा मलेन न लिप्यते। तत्र वर्म्मकोषसमन्वितं समाहितं कारयेन्नालिकावर्म्मनिर्म्माणं सुदृढा यामेन चतुवन्धेन सुश्लिष्टैश्चार्द्देर्वलयकैः सुवर्णमये रजतमये वा वर्म्मणि रत्नालङ्कृतैर्नलिका श्लिष्टा कर्त्तव्या। स्कन्धे दृढपरिग्रहश्च तथाचोक्तं कुन्तस्य कर्त्तव्यं नलिकासहजं वा। नलिका चात्र प्रमाणतः श्लिष्टा कार्या हरीतकीसदृशन्तालफलसमानं यिल्वफलाकारं ककुभकपित्थफलसदृशं वा वृत्तमष्टास्रं वा कलशामलकाकारं वा भवति सर्वोपस्करान्वितं कुन्तायुधं षष्टिपलं श्रेष्ठं पञ्चाशत्पलं मध्यमं चत्वारिंशत्पलं निकृष्टमिति प्रबलरिपुविनाशकं क्रियान्वितश्च कुन्तं कारयेन्नतु स्वप्रमाणादधिगौरवं, यो हि कायसारस्य बलमविदित्वा कुन्तमायुधमावहेत् सादिनस्तस्याजीर्णमजानतः पुरुषस्येवातिभुक्तमन्नं कुन्तायुधं विपीभवति। इत्यौशनसे कुन्तलक्षणम्” कुन्ताः प्रविशन्तीत्यत्र कुन्तधारिषि लक्षणेत्यालङ्कारिकाः। “शक्तिकुन्तध्वजरथाश्वाजवारणगोदृशाः” सुश्रु०। “शक्तिकुन्ताद्यायुधानीति” सुश्रुतः।

कुन्तल पु० कुन्तं क्षुद्रकीटं (उकुण) लाति ला—क। १केशे “क्वापि कुन्तलसंव्यानसंयमव्यपदेशतः। बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्” सा० द०। तद्वद् आकारत्वात् २ह्रीवेरे च अमरः। कुन्तलाकारं केशाग्राकारं लाति ला—क। ३यवे ४चषके पानपात्रे ५लाङ्गले च विश्वः। ६ध्रुवकभेदे “वर्णैः षोडशभिः कार्य्यः कुन्तलो लघुशेखरैः। शृङ्गारे च रसे प्रोक्त आनन्दफलदायकः” इति संगीतदामो०। “कामगिरिं समारभ्य द्वारकान्तं महेश्वरि!! श्रीकुन्तलाभिधो देशः कथितः पूर्व्वसूरिभिः” शक्तिसङ्गमतन्त्रोक्ते ७देशभेदे पु० भूम्नि “स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुः” सा०द०। “अथापरे जनपदा दक्षिणा भरतर्षभ” इत्युपक्रमे “छिन्निकाः कुन्तलाश्चैव सौहृदा नलकाननाः” भा०भी०९अ० दक्षिणात्यजनपदोक्तौ। तेषां राजा अण्। कौन्तल तद्देशनृपे। बहुषु तस्य लुक्। क्वचित् एकत्वेऽपि लुक्। “आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा। द्राविड़ाः सिंहलाश्चैव राजा काश्मीरकस्तथा” भा०स०१अ०। ते अभिजनोऽस्य अण्। कौन्तल पित्रादिक्रमेण तद्देशवासिनि। बहुषु तस्य लुक्।

कुन्तलवर्द्धन पु० कुन्तलान् वर्द्धयति वृध—णिच्—ल्यु। भृङ्गराजे (भीमराज) राजनि०। तद्रससेवनेन हि केशवृद्धिरिति वैद्यकप्रसिद्धिः।

कुन्तलिका स्त्री कुन्तलाग्राकारो विद्यतेऽस्याः ठन् अत इत्त्वम्। दध्यादिच्छेदन्यां १छुरिकाभेदे पालिकायाम् हारा०। २वाला नामौषधौ (बाला) स्त्री सुश्रुतः। यथा “कुन्तलिकाकुरण्टिकाप्रभृतानीत्युपक्रमे “स्वादुपाकरसाःशीताः कफघ्नाश्चातिपित्तलाः। लवणानुरसारूक्षाः सक्षाराः वातलाः सराः। स्वादुतिक्ता कुन्तलिका”] [राजनि०।

कुन्तलोशीर न० कुन्तल इवोशीरम्। (बाला) नामौषधौ।

कुन्ताप पु०। १वैदिके स्वराणां पाठप्रकारभेदे तत्प्रकारः आश्व० श्रौ० ८।३।७।८।९। सू० दर्शितोयथा “तस्मादूर्ध्वं कुन्तापम्” सू० “तस्माद् पाकपेरूर्ध्वं कुन्तापं शंसेत्। तस्मादूर्ध्वमिति वचनात् माध्यन्दिने वृषाकपौ प्रविष्टे तदनन्तरं कुन्तापः स्यादसति प्रवेशे तृतीयसवनेऽपि तस्य प्रवेशो नास्तीति गम्यते” नारा०वृ०। “तस्यादितश्चतुर्दशर्चपिप्याहं निगद्यं शंसेत” सू०। “तस्य कुन्तापस्यादितश्चतुर्दश ऋचो विभक्ता निगदोऽयमपूर्व इति तस्याः स्वरूपनिदर्शनमाह” वृ०। “तृतीयेषु पादेषूदात्तमनुदात्तपरं यत् प्रणवं तन्निगदेत्” सू०

"तृतीयेषु पादेष्वादितो यदक्षरं तदनुदात्तीकृत्य ब्रूयात्। एतदुक्तं भवति तृतीयेषु प्रथममादितः इत्यर्थः। आदितो ये द्वे अक्षरे तयोः पूर्व्वमनुदात्तं, तस्मात् परं द्वितीयम् उदात्तं यथा भवेत् तथा निनर्दैत्, नितरां ब्रूयादित्यर्थः। तदेवमुच्चारणं निनर्दशब्देनोच्यत इत्यर्थः" नारायणवृत्तिः।

उदराभ्यन्तरस्थिते २अन्त्रभेदे न०। "उदरमेकविंशं विंशतिर्वा अन्तरुदरे कुन्तापान्युदरमेकविंशं तस्मादुदरमेकविंशः" शत०ब्रा० १२।२।४।१२। "अथ यत्कुन्तापमासीत् यो रज्जा स साईं समभवत्" तत्रैव १२।४।४।८।

कुन्ति पु० भूम्नि कम—भिच् पृषो०। देशभेदे "कुन्तयोऽवन्तयश्चैव तथैवापरकुन्तयः" भा० भी० ६अ० जनपदोक्तौ तेषां राजा अण्। कौन्त तद्देशस्थे पु० बहुषु तस्य लुक्। कुन्तयः तन्नृपेषु भूम्नि। "सुस्थलाश्च सकुट्टाश्च कुलिन्दाः कुन्तिभिः सह। शाल्वायनाश्च राजानः" भा०स०१४अ०। विदर्भवंशजे क्रथस्य पुत्रे २नृपभेदे "तस्मात् विदर्भोऽजनयत् पुत्रौ नाम्ना कुशक्रथौ" इत्युपक्रमे "क्रथस्य कुन्तिः पुत्रोऽभूद् चिरस्तस्याथ निर्वृतिः" भाग०९।२४।२। "कुन्तेः सख्युः पिता शूरोह्यपुत्रस्य पृथामदात्" तत्रैव २४अ० ११श्लो०। कार्त्तवी० सुराष्ट्रेण सहृ० प्रजनिश्वरः

कुन्तिभोज पु० कुन्तिसंज्ञको भोजः भोजदेशाधिपः। पृथापितरि कुन्तिसंज्ञके भोजराजे नृपभेदे "पृथां दुहितरं चक्रे कुन्तिस्तां कुरुनन्दन!। शूरःपूज्याय वृद्धाय कुन्तिभोजाय तां ददौ" हरिवं०३५अ०।

कुन्तिसुता स्त्री ६त०। वसुदेवभगिन्यां कुन्तिभोजाय पित्रा शूरेण दत्तकत्वेन दत्तायां पृथायाम्। कुन्तीशब्दे विवृतिः कुन्तितनयादयोऽप्यत्र स्त्री।

कुन्ती स्त्री वसुदेवभगिन्यां कुन्तिभोजदत्तकसुतायां पृथायाम् युधिष्ठिरादिमातरि तत्कथा यथा "महिष्यां जज्ञिरे शूराद्भोज्यायां पुरुषा दश" इत्युपक्रमे वसुदेवाद्युत्पत्तिमुक्त्वा "पञ्च चास्य वराङ्गनाः। पृथुकीर्त्तिः पृथा चैव श्रुतदेवी श्रुतश्रवाः। राजाधिदेवी च तथा पञ्चैता वीरमातरः। पृथां दुहितरं चक्रे कुन्तिस्तां कुरुनन्दन!। शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ। तस्मात् कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा" हरिवं०३५। इत्युक्ता "पृथां दुहितरं चक्रे कुन्तिस्तां पाण्डुरावहत्" हरिवं० ३५अ० उक्तम्।

कुन्तीतनय पु० ६त०। कुन्त्यां धर्मादितो जातेषु १युधिष्ठिरादिषु त्रिषु सूर्य्यात् जाते ४कर्णे च। तत्कथा यथा "यस्यां (कुन्त्याम्) स धर्मविद्राजा धर्माज्जज्ञे युधिष्ठिरः। भीमसेनस्तथा वातादिन्द्राच्चापि धनञ्जयः" हरिवं० ३५अ०। कर्णोत्पत्तिकथा भा०आ० १११अ० यथा "शूरो नाम यदुश्रेष्ठो वसुदेवपिताऽभवत्। तस्य कन्या पृथा नाम रूपेणाप्रतिमा भुवि। पितृस्वस्रीयाय सुतामनपत्याय भारत!। अग्र्यमग्रे प्रतिज्ञाय स्वस्यापत्यं स सत्यवाक्। अग्रजामथ तां कन्यां शूरोऽनुग्रहकाङ्क्षिणे। प्रददौ कुन्तिभोजाय सखा सख्ये महात्मने। नियुक्ता सा पितुर्गेहे ब्राह्मणातिथिपूजने। उग्रं पर्य्यचरत्तत्र ब्राह्मणं संशितव्रतम्। निगूढनिश्चयं धर्मे यं तं दुर्व्वाससं विदुः। तमुग्रं संशितात्मानं सर्व्वयत्नैरतोषयत्। तस्मै स प्रददौ मन्त्रमापद्धर्म्मान्ववेक्षया। अभिचारादिभिर्युक्तमब्रवीच्चैव तां मुनिः। यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि। तस्य तस्य प्रसादेन तव पुत्रो भविष्यति। तथोक्ता सा तु विप्रेण कुन्ती कौतूहलान्विता। कन्या सती देवमर्कमाजुहाव यशस्विनी। सा ददर्श तमायान्तं भास्करं लोकभावनम्। विस्मिता चानवद्याङ्गी दृष्ट्वा तन्महदद्भुतम्। तां समासाद्य देवस्तु विवस्वानिदमब्रवीत्। अयमस्म्यसितापाङ्गि!। ब्रूहि किं करवाणि ते। कुन्त्युवाच। कश्चिन्मे ब्राह्मणः प्रादाद्वरं विद्याञ्च शत्रुहन्!। तद्विजिज्ञासयाह्वानं कृतवत्यस्मि ते विभो!। एतस्मिन्नपराधे त्वां शिरसाहं प्रसादये। योषितो हि सदा रक्ष्याः स्वपराधेऽपि नित्यशः। सूर्य्य उवाच। वेदाहं सर्वमेवैतत् यद्दुर्व्वासा वरं ददौ। संत्यज्य भयमेवेह क्रियतां सङ्गमो मम। अमोघं दर्शनं मह्यमाहूतश्चास्मि ते शुभे!। वृथाह्वानेऽपि ते भीरु! दोषः स्यान्न संशयः। वैशम्पायन उवाच। एवमुक्ता बहुविधं सान्त्वपूर्व्वं विवस्वता। सा तु नैच्छद्वरारोहा कन्याहमिति भारत!। बन्धुपक्षभयाद्भीता लज्जया च यशस्विनी। तामर्कः पुनरेवेदमब्रवीद्भरतर्षभ!। मत्प्रसादान्न ते राज्ञि! भविता दोष इत्युत। एवमुक्त्वा स भगवान् कुन्तिराजसुतां तदा। प्रकाशकर्त्ता तपनः सम्बभूव तया सह। तत्र वीरः समभवत् सर्वशस्त्रभृतांवरः। आमुक्तकवचः श्रीमान् देवगर्भः श्रियान्वितः। सहजं कवचं बिभ्रत् कुण्डलोद्योतिताननः। अजायत सुतः कर्णः सर्व्वलोकेषु विश्रुतः। प्रादाच्च तस्य कन्यात्व

पुनः स परमद्युतिः । दत्त्वा च तपतां श्रेष्ठो दिवमाचक्रमे ततः । दृष्ट्वा कुमारं जातं सा वार्ष्णेयी दीनमानसा । एकाग्रं चिन्तयामास किं कृत्वा सुकृतं भवेत् । गूहमानापचारं सा बन्धुपक्षभयात्तदा । उत्ससर्ज्ज कुमारं तं जले कुन्ती महाबलम्" ।

युधिष्ठिराद्युत्पत्तिस्तत्रैव १२२।१२३ अ॰ यथा "एवमुक्ता ततः कुन्ती पाण्डुं परपुरञ्जयम् । प्रत्युवाच वरारोहा भर्त्तुः प्रियहिते रता । पितृवेश्मन्यहं बाला नियुक्तातिथिपूजने । उग्रं पर्य्यचरन्तत्र ब्राह्मणं शंसितव्रतम् । निगूढनिश्चयं धर्म्मे यन्तं दुर्व्वाससं विदुः । तमहं शंसितात्मानं सर्व्वयत्नैरतोषयम् । स मेऽभिचारसंयुक्तमाचष्ट भगवान् वरम् । मन्त्रन्त्विमञ्च मे प्रादादब्रवीच्चैव मामिदम् । यं यं देवं त्वमेतेन मन्त्रेणावाहयिष्यसि । अकामो वा सकामो वा वशं ते समुपैष्यति । तस्य तस्य प्रसादात्ते राज्ञि ! पुत्त्रो भविष्यति । इत्युक्ताहं तदा तेन पितृवेश्मनि भारत ! । ब्राह्मणस्य वचस्तथ्यं तस्य कालोऽयमागतः । अनुज्ञाता त्वया देवमाह्वयेयमहं नृप ! । तेन मन्त्रेण राजर्षे ! यथा स्यान्नौ प्रजा हिता । आवाहयामि कं देवं ब्रूहि सत्यवतां वर ! । त्वत्तोऽनुज्ञाप्रतीक्षां मां विद्ध्यस्मिन् कर्म्मणि स्थिताम् । पाण्डुरुवाच । अद्यैव त्वं वरारोहे ! प्रयतस्व यथाविधि । धर्म्ममावाहय शुभे ! स हि देवेषु पुण्यभाक् । अधर्म्मेण न नो धर्म्मः संयुज्येत कथञ्चन । लोकश्चायं वरारोहे ! धर्म्मोऽयमिति मन्यते । धार्म्मिकश्च कुरूणां स भविष्यति न संशयः । धर्म्मेण चापि दत्तस्य नाधर्म्मे रंस्यते मनः । तस्माद्धर्म्मं पुरस्कृत्य नियता त्वं शुचिस्मिते ! । उपचाराभिचाराभ्यां धर्म्ममावाहयस्व वै । वैशम्पायन उवाच । सा तथोक्ता तथेत्युक्त्वा तेन भर्त्रा वराङ्गना । अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमवर्त्तत" । "संवत्सरधृते गर्भे गान्धार्य्या जनमेजय । आह्वयामास वै कुन्ती गर्भार्थं धर्म्ममच्युतम् । सा बलिं त्वरिता देवी धर्म्मायोपजहार ह । जजाप विधिवज्जप्यं दत्तं दुर्व्वाससा पुरा । आजगाम ततो देवो धर्म्मो मन्त्रबलात्ततः । विमाने सूर्य्यसङ्काशे कुन्ती यत्र जपस्थिता । विहस्य तां ततो ब्रूयाः कुन्ति ! किन्ते ददाम्यहम् । सा तं विहस्यमानापि पुत्त्रं देह्यब्रवीदिदम् । संयुक्ता सा हि धर्म्मेण योगमूर्त्तिधरेण ह । लेभे पुत्त्रं वरारोहा सर्व्वप्राणभृतां हितम् । ऐन्द्रे (ज्येष्ठाभे) चन्द्रसमायुक्ते मुहूर्त्तेऽभिजितेऽष्टमे । दिवामध्यगते सूर्य्ये तिथौ पूर्णेऽतिपूजिते । समृद्धयशसं कुन्ती सुषाव प्रवरं सुतम् । जातमात्रे सुते तस्मिन् वागुवाचाशरीरिणी । एष धर्म्मभृतां श्रेष्ठो भविष्यति नरोत्तमः । विक्रान्तः सत्यवाक् चैव राजा पृथ्व्यां भविष्यति । युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः । भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः । यशसा तेजसा चैव वृत्तेन च समन्वितः । धार्म्मिकं तं सुतं लब्ध्वा पाण्डुस्तां पुनरब्रवीत् । प्राहुः क्षत्रं बलज्येष्ठं बलश्रेष्ठं सुतं वृणु । ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा । ततस्तामागतो वायुर्मृगारूढो महाबलः । किन्ते कुन्ति ! ददाम्यद्य ब्रूहि यत्ते हृदि स्थितम् । सा सलज्जा विहस्याह पुत्त्रं देहि सुरोत्तम ! । बलवन्तं महाकायं सर्व्वदर्पप्रभञ्जनम् । तस्माज्जज्ञे महाबाहुर्भीमो भीमपराक्रमः । तमप्यतिबलं जातं वागुवाचाशरीरिणी । सर्व्वेषां बलिनां श्रेष्ठो जातोऽयमिति भारत । इदमत्यद्भुतं चासीज्जातमात्रे वृकोदरे । यदङ्कात् पतितो मातुः शिलां गात्रैरचूर्णयत् । कुन्ती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल । नान्वबुध्यत संसुप्तमुत्सङ्गे स्वे वृकोदरम् । ततः स वज्रसङ्घातः कुमारो न्यपतद्गिरौ । पतता तेन शतधा शिला गात्रैर्विचूर्णिता । तां शिलां चूर्णितां दृष्ट्वा पाण्डुर्व्विस्मयमागतः । यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम ! । दुर्य्योधनोऽपि तत्रैव प्रजज्ञे वसुधाधिप ! । जाते वृकोदरे पाण्डुरिदं भूयोऽन्वचिन्तयत् । कथं नु मे वरः पुत्त्रो लोकश्रेष्ठो भवेदिति । दैवे पुरुषकारे च लोकोऽयं सम्प्रतिष्ठितः । तत्र दैवन्तु विधिना कालयुक्तेन लभ्यते । इन्द्रो हि राजा देवानां प्रधान इति नः श्रुतम् । अप्रमेयबलोत्साहो वीर्य्यवानमितद्युतिः । सन्तोषयित्वा तपसा पुत्त्रं लप्स्ये महाबलम् । यं दास्यति स मे पुत्त्रं स वरीयान् भविष्यति । अमानुषान्मानुषांश्च संग्रामे स हनिष्यति । कर्म्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः । ततः पाण्डुर्म्महाराजो मन्त्रयित्वा महर्षिभिः । दिदेश कुन्त्याः कौरव्यो व्रतं संवत्सरं शुभम् । आत्मना च महाबाहुरेकपादस्थितोऽभवत् । उग्रं स तप आस्थाय परमेण समाधिना । आरिराधयिषुर्द्देवं त्रिदशानां तमीश्वरम् । भार्य्यया सह धर्म्मात्मा पर्य्यतप्यत भारत ! । तन्तु कालेन

महता वासवः प्रत्यपद्यत । शक्र उवाच । पुत्रं तव प्रदास्यामि त्रिषु लोकेषु विश्रुतम् । ब्राह्मणानां गवाञ्चैव सुहृदाञ्चार्थसाधकम् । दुर्हृदां शोकजननं सर्व्वबान्धवनन्दनम् । सुतं तेऽग्र्यं प्रदास्यामि सर्व्वामित्रविनाशनम् । इत्युक्तः कौरवो राजा वासवेन महात्मना । उवाच कुन्तीं धर्म्मात्मा देवराजवचः स्मरन् । उदर्कस्तव कल्याणि ! तुष्टो देवगणेश्वरः । दातुमिच्छति ते पुत्रं यथा सङ्कल्पितं त्वया । अतिमानुषकर्म्माणं यशस्विनमरिन्दमम् । नीतिमन्तं महात्मानमादित्यसमतेजसम् । दुराधर्षं क्रियावन्तमतीवाद्भुतदर्शनम् । पुत्रं जनय सुश्रोणि ! धाम क्षत्रियतेजसाम् । लब्धः प्रसादो देवेन्द्रात् तमाह्वय शुचिस्मिते ! । वैशम्पायन उवाच । एवमुक्ता ततः शक्रमाजुहाव यशस्विनी । अथाजगाम देवेन्द्रो जनयामास चार्ज्जुनम्" । कुन्त्या अपत्यं ढक् । कौन्तेय तदपत्ये "कौन्तेय प्रतिजानीहि" गीता ।

कुन्थ क्लेशे क्लेषे च क्र्यादि॰ प॰सक॰सेट् । कुथ्नाति अकुन्थीत् चुकुन्थ प्रनिकुथ्यात् । [न्तरम् ।

कुन्थु पु॰ कुन्थ—उन् । बौद्धभेदे हेमच॰ कुन्थुरवेति पाठा-

कुन्द पु॰ कुन्द इव श्वेतत्वात्, कूं पृथिवीं कश्यपाय ददाति दा—क वा । १विष्णौ तस्य कुन्दोपमाङ्गत्वात् स्वच्छतया स्फटिकवन्निर्मलत्वात् "श्वेतारक्तास्तथा पीत इदानीं कृष्णतां गतः" इत्युक्तेः युगावतारे सत्ययुगे श्वेतत्वाद्वा, परशुरामावतारे कश्यपाय भूमिदानाद्वा तथात्वम् । यथाह हरिवंशे "सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान् । तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः । मारीचाय ददौ प्रीतः कश्यपाय वसुन्धराम्" । कुं भूमिमुनत्ति उन्द-क्विप् शक॰, कौ तेः अवदा॰ दन् मुमच् वा । २कुन्दरुनामगन्धद्रव्ये ३भ्रमियन्त्रभेदे (कुँद) ४कुबेरस्य निधिभेदे च पु॰ मेदि॰ ५करवीरवृक्षे पु॰ राजनि॰ स्वनामख्याते ख्याते ६पुष्पप्रधानवृक्षे पुंन॰ पुष्पे न॰अमरः । "कुन्दं शीतं लघु श्लेष्मशिरोरुग्वातपित्तहृत्" भावप्र॰ । "कुन्दकुड्मलाग्रदतः स्मितैः" माघः । "कुन्देन्दुसुन्दररुचिः" सा॰ द॰ "शङ्कराय न दातव्याः कुन्दशेफालिकाजवाः" पुरा॰ ७पद्मे च कुन्दिनी त्रिका॰ । शाल्मलद्वीपस्थे ८वर्षपर्व्वतभेदे । शाल्मलद्वीपवर्णने भाग॰ ५,२०अ॰ । "तेषु वर्षेष्वद्रयो नद्यश्च सप्तैवाभिज्ञाताः सुरसः शतशृङ्गो वामदेवः कुन्दः कुमुदः पुष्पवर्षः सहस्रश्रुतिरिति" । विष्णुपु॰ तु एषां नामान्तराणि दृश्यन्ते "कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः । द्रोणोयत्र महौषध्यः स चतुर्थो महीधरः । कुन्दस्तु पञ्चमः षष्ठो महिषः सप्तमस्तथा । ककुद्मान् पर्व्वतवरः" अनयोः कल्पभेदादविरोधः ।

कुन्दक पु॰ कुन्द+संज्ञायां कन् । १कुन्दरुवृक्षे राजनि॰ स्वार्थे क । २कुन्दशब्दार्थे

कुन्दम पुंस्त्री॰ कुन्देन मीयते शुभ्रवर्णत्वात् मा—घञर्थे क । विडाले त्रिका॰ स्त्रियां जातित्वात् ङीष् । तस्य च पाणिभिन्नषष्ठ्यन्तात् परस्य पूर्णा॰तत्पुरुषे आद्युदात्तता- तत्र गणे सुकुन्द इति पाठान्तरम् । तेन सह श्वेण्यादित्वात् तत्पुरुषः ।

कुन्दमाला स्त्री ग्रन्थभेदे सा॰द॰ ।

कुन्दर पु॰ कुन्दवत् शुद्धानि धर्म्मानुबन्धीनि फलानि राति ददाति रा—क, कुं धरां दारयति हिरण्याक्षजिघांसया वराहरूपावतारे दृ—अच् पृषो॰ मुम् । १विष्णौ । "कुमुदः कुन्दरः कुन्दः" विष्णुस॰ । कुं भूमिं दारयति अन्तर्भूतण्यर्थे दृ—अच् पृषो॰ । कलिङ्गेषु (कुन्दरा) विख्याते २तृणभेदे पु॰राजनि॰ तस्य पर्य्यायोक्तिद्वारा लक्षणं राजनि॰ दर्शितम् । "कण्डुरो दीर्घपत्रः खरच्छदः रसालक्षेत्रसंभूतः मृगवल्लभः" । "ज्ञेयं कुन्दरमूलन्तु स्थौल्यशैत्योपकारकम् । पित्तातिसारनाशि स्यात् गोधनानां प्रशस्यते । बलपुष्टिकरञ्चैव" राजनि॰ तद्गुणा उक्ताः । [समूहे त्रिका॰ ।

कुन्दिनी स्त्री कुन्दानां पद्मानां समूहः खला॰ इनि । पद्म-

कुन्दु पु॰ कुं भूमिं दृणाति दृ बा॰डु । १मूषिके शब्दरत्ना॰ । २कुन्दुरुनाम गन्धद्रव्ये स्त्री ।

कुन्दुर पु॰ कुं भूमिं दारयति दृ—विदारे उरन् पृषो॰ । कुन्दुरुनामगन्धद्रव्ये भरतः ।

कुन्दुरु पुंस्त्री कुं भूमिमुनत्ति उन्द—उन् बा॰ नि॰ । स्वनामख्याते गन्धद्रव्यभेदे अमरः । "कुन्दुरुर्मधुरस्तीक्ष्णस्तिक्तस्त्वच्यः कटुर्हरेत् । ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान्" भावप्र॰ । स्वार्थे क । तत्रैव पुंस्त्री राजनि॰ । स च सुश्रुते एलादिगणे पठितः । स च गणो यथा "एलातगरकुष्ठमांसीध्यामकत्वक्पत्रनागपुष्पप्रियङ्गुहरेणुका व्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकबालकगुग्गुलुसर्जरसतुरुष्ककुन्दरुकाऽगुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति । एलादिको वातकफौ निहन्याद्विषमेव च । वर्णप्रसादनः कण्डूपिटकाकोठनाशनः" ।

कुप आच्छादने इदित् वा चुरा०उभ०पक्षे भ्वादि० पर० सक० सेट्। कुम्पयति ते कुम्पति अचुकुम्पत् त अकुम्पीत्। कुम्पयाम् बभूव आस चकार—चक्रे। चुकुम्प। प्रनि कुम्प्यात्

कुप द्युतौ चुरा०उभ०अक०सेट्। कोपयति ते अचूकुपत् त। कोपयाम् बभूव आस चकार चक्रे। कुपितः कोपः कोपनम् कुपित्वा प्रकुप्य। "प्रोचुः प्राञ्जलयो विप्राः प्रहृष्टाः कुपितत्वचः" भाग० ३,१६,

कुप रोषे दिवा० सक० प० सेट्। कुप्यति इरित् अकुपत् अकोपीत् चुकोप। "यस्मिन् यस्मिन् कृतौ ये ये दोषाः कुप्यन्ति देहिनाम्"सुश्रु०। "तस्य तद्वचनं श्रुत्वा हृष्टं हुचाक्षरं वङ्क। चुकोप बलिनां श्रेष्ठः" भा०स०४१अ०। "कुपितकपिकपोलक्रोड़ताम्रस्तमांसि। उद्भटः "द्रुह्य कुप्यसि याचके" भा०आ०७८अ०" अस्य आर्षे पदव्यत्ययोऽपि दृश्यते। "नन्दते कुप्यते चापि तथा हुङ्कारयत्यपि" भा० आनु०१४अ०। "न च कुप्ये महाशर्म! न चात्मानं विगर्हये" भा० व० १७६अ०। उपसर्गपूर्ब्बकस्य तत्तदुपसर्गद्योत्यार्थपरत्वम् यथा प्रकोपः संकोपः अतिकोपः इत्यादि। "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा०कर्म्मणः सम्प्रदानता।

कुपथ पु० कुत्सितः पन्थाः कुगतिस० अच् समा०। १कुत्सिते पथि शब्दरत्ना०। "स्वधर्म्म पथमकुतोभयम् विहाय कुपथपाषण्डमसमञ्जसं संप्रवर्त्तयिष्यति" भाग० ५,६, १०श्लो। स सेव्यत्वेनास्त्यस्य अर्श०अच्। २असुरभेदे "प्रमदो मयश्च कुपथोऽहयग्रीवश्च वीर्य्यवान्" हरि० ३अ० "तथा निकुम्भः कुपथश्च दानवः" हरि०२४१अ०। सएव सुपार्श्वनृपरूपेण द्वापरे आविर्भूतः "कुपथस्तु महावीर्य्यः श्रीमान् राजन्! महासुरः। सुपार्श्व इति विख्यातः क्षितौ जज्ञे महीपतिः" भा०आ० ६७अ०।

कुपन पु० कुप—क्यु। हिरण्याक्षसैन्यस्थे असुरभेदे "शरभः शलभश्चैव कुपनः कोपनः क्रथः" हरिवं०४२अ०।

कुपय त्रि० गुप—क्यप् पृषो०। गोपनीये। "आ राज्यं कुपयं वर्द्धनं पितुः" ऋ०१,१४०,२,"कुपयं गोपनीयम्"भा०

कुपाणि त्रि० कुत्सितः पाणिरस्य। वक्रहस्ते वाङ्कुण्ठे (कोपा)। जटा०

कुपिञ्जल पुंस्त्री कुत्सितः पिञ्जल इव पुच्छोऽस्य। पक्षिभेदे स्त्रियां ङीष् ततः शिवा०अण्। कौपिञ्जल तदपत्ये पुंस्त्री०।

कुपिनिन् पु० कुपिनी मत्स्यधानी अस्त्यस्य व्रीह्या० इनि। मत्स्यधारके कैवर्त्ते त्रिका०।

कुपिनी स्त्री गुप्यते मत्स्योऽत्र गुप—बा० इनि किञ्च ङीप् पृषो०। (माछेरखालुइ)मत्स्याधारे पात्रभेदे शब्दरत्ना०।

कुपिन्द पुंस्त्री कुप—किन्दच्। तन्तुवाये उणादिको०।

कुपीलु पु० कुत्सितः पीलुः कुगतिस०। (माकड़ातेन्दु) काकेन्दुवृक्षे भावप्र०। यस्य फलं (कुचिला) इतिख्यातम्। तत्पर्य्यायगुणादि भावप्र० उक्तं यथा "तिन्दुको यस्तु कथितो जलदो दीर्घपत्रकः। कुपीलुः कुलकः कालस्तिन्दुकः कालपीलुकः। काकेन्दुर्विषतिन्दुश्च तथा मर्कटतिन्दुकः। कुपीलु शीतलं तिक्तं वातलं मदकृल्लघु। पादव्यथाहरं ग्राहि कफपित्तास्रनाशनम्"।

कुपुत्र पु० कुत्सितः पुत्रः कुगतिस०। कुत्सिते पुत्रे १ "यादृशं फलमाप्नोति कुपुत्रैः सन्तरँस्तमः"मनुः। ब०व्री०। २कुत्सितपुत्रयुक्ते त्रि०। भावे कर्म्मणि च ततो मनोज्ञा० वुञ्। कौपुत्रिका तद्भावे स्त्री। कोः पृथिव्याः पुत्रः। ३मङ्गलग्रहे ४नरकासुरे च। [द्विनिन्दिते अमरः

कुपूय त्रि०कुत्सितं पूयते पूय—विशरणे अच्। जाल्माचारा-

कुप्य न० गुप—क्यप् नि०। स्वर्णरूप्याभ्यामन्यस्मिन् १तेजसादौ धातौ, अमरः (दस्ता) इति ख्याते २धातौ च

कुप्यशाला स्त्री कुप्यस्य तत्पात्रादिनिर्म्माणस्य शाला। (काँसारिर दोकान) कांस्यादिपात्रनिर्म्माणगृहे हेमच०।

कुप्रिय त्रि० कु+प्री—क। अवन्ये हला०।

कुप्लव पु० कुगतिस०। तृणादिनिर्म्मिते उडपे शब्दचि०। "यादृशं फलमाप्नोति कुप्लवैः सन्तरन् जलम्" मनुः

कुब स्तृतौ (आच्छादने) इदित् वा चुरा० उभ०पक्षे भ्वा० पर० सक०सेट्। कुम्बयति ते कुम्बति अचुकुम्बत् त अकुम्बीत्। कुम्बयाम्—बभूव आस चकार चक्रे चुकुम्ब। कुम्ब्या

कुबल त्रि० कुत्सितं बलमस्य। निन्दितबलयुक्ते।

कुबलाश्व त्रि० कुबलोऽश्वोऽस्य। १दुर्बलाश्वयुक्ते सूर्य्यवंश्ये २नृपभेदे तस्यधुन्धुमारसंज्ञाप्राप्तिः भा० व० २०३अ० उक्ता यथा "मार्कण्डेय उवाच। इक्ष्वाकौ संस्थिते राजन्! शशादः पृथिवीमिमाम्। प्राप्तः परमधर्म्मात्मा सोऽयोध्यायां नृपोऽभवत्। शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान्। अनेनाश्चापि काकुत्स्थः पृथुश्चानेनसः सुतः। विष्वगश्वः पृथोः पुत्रस्तस्मादद्रिश्च जज्ञिवान्। अद्रेश्च युवनाश्वस्तु श्रावस्तस्यात्मजोऽभवत्। तस्य श्रावस्तकोज्ञेयः श्रावस्ती येन निर्म्मिता। श्रावस्तस्य तु दायादो बृहदश्वो महाबलः। बृहदश्वस्य दायादः कुबलाश्व इति

श्रुतः । कुवलाश्वस्य पुत्राणां सहस्राण्येकविंशतिः । सर्वे विद्यासु निष्णाता बलवन्तः सुदारुणाः । कुवलाश्वश्च पितृतो गुणैरभ्यधिकोऽभवत् । समये तं पिता राज्ये वृहदश्वोऽभ्यषेचयत् । कुवलाश्वं महाराज । शूरमुत्तमधार्म्मिकम् । पुत्रसंक्रामितश्रीस्तु वृहदश्वो महीपतिः । जगाम तपसे धीमांस्तपोवनममित्रहा" । इत्युपक्रम्य मधुकैटभयोःसमुत्पत्तिबधकथान्ते २०३अ० "मार्कण्डेयउवाच । धुन्धुर्नाम महाराज ! तयोः पुत्रोःमहाद्युतिः । स तपोऽतप्यत महत् महावीर्य्यपराक्रमः । अतिष्ठदेकपादेन कृशो धमनिसन्ततः । तस्मै ब्रह्मा ददौ प्रीतो वरं वव्रे स च प्रभुम् । देवदानवयक्षाणां सर्पगन्धर्वरक्षसाम् । अवध्योऽहं भवेयं वै वर एष वृतो मया । एवं भवतु गच्छेति तमुवाच पितामहः । स एवमुक्तस्तत्पादौ मूर्द्ध्नाऽऽस्पृश्य जगाम ह । स तु धुन्धुर्वरं लब्ध्वा महावीर्य्यपराक्रमः । अनुस्मरन् पितृबधं द्रुतं विष्णुमुपागमत् । स तु देवान् सगन्धर्वान् जित्वा धुन्धुरमर्षणः । बबाधे सर्वानसकृद्विष्णुं देवांश्च वै भृशम् । समुद्रे बालुकापूर्णे उज्जालक इति स्मृते । आगम्य च स दुष्टात्मा तं देशं भरतर्षभ ! । बाधते स्म परं शक्त्या तमुतङ्काश्रमं विभो ! । अन्तर्भूमिगतस्तत्र बालुकान्तर्हितस्तथा । मधुकैटभयोः पुत्रो धुन्धुर्भीमपराक्रमः । शेते लोकविनाशाय तपोबलमुपाश्रितः । उतङ्कस्याश्रमाभ्याशे निःश्वसन् पावकार्च्चिषः । एतस्मिन्नेव काले तु राजा सबलवाहनः । उतङ्कविप्रसहितः कुवलाश्वो महीपतिः । पुत्रैः सह महीपालः । प्रययौ भरतर्षभ ! । सहस्रैरेकविंशत्या पुत्राणामरिमर्द्दनः । कुवलाश्वो नरपतिरन्वितो बलशालिनाम् । तमाविशत्ततो विष्णुर्भगवांस्तेजसा प्रभुः । उतङ्कस्य नियोगेन लोकानां हितकाम्यया । तस्मिन् प्रयाते दुर्द्धर्षे दिवि शब्दो महानभूत् । एष श्रीमानवध्योऽद्य धुन्धुमारो भविष्यति । दिव्यैश्च पुष्पैस्तं देवाः समन्तात् पर्य्यवाकिरन् । देवदुन्दुभयश्चापि नेदुः स्वयमनीरिताः । शीतश्च वायुः प्रववौ प्रयाणे तस्य धीमतः । विपांशुलां महीं कुर्वन् ववर्ष च सुरेश्वरः । अन्तरीक्षे विमानानि देवतानां युधिष्ठिर ! । तत्रैव समदृश्यन्त धुन्धुर्यत्र महासुरः । कुवलाश्वस्य धुन्धोश्च युद्धं कौतूहलान्विताः । देवगन्धर्वसहिताः समवैक्षन्महर्षयः । नारायणेन कौरव्य ! तेजसाप्यायितस्तदा । स गतो नृपतिः क्षिप्रं पुत्रैस्तैः सर्वतो दिशम् । अर्णवं खानयामास कुवलाश्वो महीपतिः । कुवलाश्वस्य पुत्रैश्च तस्मिन् वै बालुकार्णवे । सप्तभिर्दिवसैः खात्वा दृष्टो धुन्धुर्महाबलः । आसीद्घोरं वपुस्तस्य बालुकान्तर्हितं महत् । दीप्यमानो यथा सूर्य्यस्तेजसा भरतर्षभ ! । ततो धुन्धुर्महाराज ! दिशमावृत्य पश्चिमाम् । सुप्तोऽभूद्राजशार्दूल ! कालानलसमद्युतिः । कुवलाश्वस्य पुत्रैस्तु सर्वतः परिवारितः । अभिद्रुतः शरैस्तीक्ष्णैर्गदाभिर्मुषलैरपि । पट्टिशैः परिघैः प्रासैः खड्गैश्च विमलैः शितैः । स बध्यमानः संक्रुद्धः समुत्तस्थौ महाबलः । क्रुद्धश्चाभक्षयत्तेषां शस्त्राणि विविधानि च । आस्याद्वमन् पावकं स संवर्त्तकसमं तदा । तान् सर्वान् नृपतेः पुत्रानदहत् स्वेन तेजसा । मुखजेनाग्निना क्रुद्धो लोकानुद्वर्त्तयन्निव । क्षणेन राजशार्दूल ! पुरेव कपिलः प्रभुः । सगरस्यात्मजान् क्रुद्धस्तदद्भुतमिवाभवत् । तेषु क्रोधाग्निदग्धेषु तदा भरतसत्तम ! । तं प्रबुद्धं महात्मानं कुम्भकर्णमिवापरम् । आससाद महातेजाः कुवलाश्वो महीपतिः । तस्य वारि महाराज ! सुस्राव बहु देहतः । तदापीयत तत्तेजो राजा वारिमयं नृप ! । योगी योगेन वह्निञ्च शमयामास वारिणा । ब्रह्मास्त्रेण च राजेन्द्र ! दैत्यं क्रूरपराक्रमम् । ददाह भरतश्रेष्ठ ! सर्वलोकाभयाय वै । सोऽस्त्रेण दग्ध्वा राजर्षिः कुवलाश्वो महासुरम् । सुरशत्रुममित्रघ्नं त्रैलोक्येश इवापरः । धुन्धोर्बधात्तदा राजा कुवलाश्वो महामनाः । धुन्धुमार इति ख्यातो नाम्नाऽप्रतिरथोऽभवत्" ।

कुवे(बे)र पु० कुम्बति धनम् कुबि–एरक् नि० नलोपश्च कुत्सितं वेरमस्य इति वा । १धनदे यक्षराजे अमरः "कुत्सायां क्षितिशब्दोऽयं शरीरं वेरमुच्यते । कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः" वायुपु० । "कुवेरोभव नाम्ना त्वं मम रूपेर्ष्यया सुत !" काशीख० देवीशापोक्तेस्तस्य तथात्वम् । "कुवेरस्य मनःशल्यं शंसतीव पराभवम्" कुमा० । तस्येदमण् । तत्सम्बन्धिनि त्रि० स्त्रियां ङीप् "कौवेरदिग्भागमपास्य मार्गम्" माघः । क्षुभ्ना० पाठात् कुवेरवनमित्यादौ न णत्वम् वा कप् । कुवेरकोऽप्यत्रार्थे कुगतिस० । २निन्दितदेहे न० ।

कुवेराक्षी स्त्री कुवेरस्याक्षीव पिङ्गलं पुष्पमस्याः पृ० समा० ङीप् । १पाटलिवृक्षे २लताकरञ्जे च राजनि० ।

कुवे(बे)राचल पु० ६त० । कैलासपर्वते जटा० तस्य कुवे-

राशस्त्वात्तथात्वम्। कुवे(वे)रादिप्रभृतयोऽप्यत्र।

कुब्ज पु० ईषत् उब्जमार्ज्जवं यत्र शक०। १अपामार्गे राजनि० २खड्गे शब्दमा०। (कुज) ३हृदयपृष्ठरोगे पु० "हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्। क्रुद्धो वायुर्यदा कुर्य्यात् तदा तं कुब्जमादिशेत्" माधवोक्त तल्लक्षणम्। ४तद्युक्ते (कुब्जो) त्रि०। "कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः" रत्ना०। सच राज्ञामन्तःपुरसहायभेदो यथाह सा०द० तद्दवरोधे इत्युपक्रमे "वामनषण्डकिरातम्लेच्छाभीराः शकारकुब्जाद्याः" अवरोधाधिकारिकुब्जलक्षणमुक्तं वृह०सं० ६८ अ० "यश्चापरे वामनको जघन्यः कुब्जोऽपरो मण्डलकोऽथ सामी। पूर्वोक्तभूपानुचरा भवन्ति सङ्कीर्णसंज्ञाः शृणु लक्षणैस्तान्"। "कुब्जो नाम्ना यः स शुद्धो ऽधस्तात् क्षीणः किञ्चित् पूर्व्वकाये नतश्च। हंसासेवी नास्तिको ऽर्थैरुपेतो विद्वान् शूरः सूचकः स्यात् कृतज्ञः। कलास्वभिज्ञः कलहप्रियश्च प्रभूतभृत्यः प्रमदाजितश्च। सम्पूज्य लोकं प्रजहात्यकस्मात् कुब्जो ऽयमुक्तः सततोद्यतश्च"।

कुब्जक पु० कौ उब्जति उब्ज—ण्वुल् शक०। अतिसुरभिपुष्पे वृक्षभेदे 'चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम्। अशोकपुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्। सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पमुत्तमम्" शब्दचि०। नरसिं० पुरा० "कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः। त्रिदोषशमनो वृष्यः शीतहर्त्ता च स स्मृतः" इति भावप्र०।

कुब्जकण्टक पु० कुब्जः कण्टकोऽस्य। श्वेतखदिरे राजनि०

कुब्जा स्त्री कंसभवनस्थे सैरिन्ध्रीभेदे यां पद्मनाभाक्रम्य कृष्णः सुरूपां चकार तत्कथा भाग०१०स्क०४१अ० यथा "अथ व्रजन् राजपथेन माधवः स्त्रियं गृहीताङ्गविलेपभाजनाम्। विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यान्तीं प्रहसन्रसप्रदः। का त्वं वरोर्वे! तदुहानुलेपनं कस्याङ्गने! वा कथयस्व साधु नः। देह्यावयोरङ्गविलेपमुत्तमं श्रेयस्ततस्ते नचिराद्भविष्यति। सैरिन्ध्र्युवाच। दास्यस्म्यहं सुन्दर! कंससम्मता त्रिवक्रनामा ह्यनुलेपकर्म्मणि। मद्भावितं भोजपतेरतिप्रियं विना युवां कोऽन्यतमस्तदर्हति। रूपपेशलमाधुर्य्यहसितालापवीक्षिता। धर्षितात्मा ददौ सान्द्रमुभयोरनुलेपनम्। ततस्तावङ्गरागेण स्ववर्णेतरशोभिना। संप्राप्तपरभागेण शुशुभाते ऽनुरञ्जितैः। प्रसन्नोभगवान् कुब्जां त्रिवक्रां रुचिराननाम्। ऋज्वीं कर्त्तुं मनश्चक्रे दर्शयन् दर्शने फलम्। पद्भ्यामाक्रम्य प्रपदे द्व्यङ्गुल्युत्तानपाणिना। प्रगृह्य चिवुकेऽध्यात्ममुदनीनमदच्युतः। सा तदर्जुसमानाङ्गी वृहच्छ्रोणिपयोधरा। मुकुन्दस्पर्शनात् सद्योबभूव प्रमदोत्तमा"।

कुब्जाम्रक न० भारतप्रसिद्धे तीर्थभेदे "ततः कुब्जाम्रकं गच्छेत् तीर्थसेवी नराधिप!। गोसहस्रमवाप्नोति स्वर्गलोकं च गच्छति" भा० व० ८४ अ०। तच्च तीर्थं ब्रह्मावर्त्तसमीपस्थं तत्रैव विवृतिः।

कुब्जिका स्त्री १अष्टवर्षीयां कन्यायाम्। "अष्टवर्षा च कुब्जिका" अन्नदाकल्पः कालसङ्कर्षाशब्दे २००४पृ०विवृतिः। २देवीमूर्त्तिभेदे तस्याः पूजादिविधायकं तन्त्रं कुब्जिका तन्त्रत्वेन प्रसिद्धम् तन्त्रसारे तत्प्रमाणं दृश्यम्।

कुब्र न० कुबि—आच्छादने रन् ऋज्रेन्द्रेत्यादिना नि०। १अरण्ये उज्ज्वलदत्तः। २कुण्डे ३कुण्डले ४तन्तौ ५शरणे ६शकटे च संक्षिप्तसारवृत्तिः।

कुब्र(ब्र)ह्म पु० कुत्सितो ब्र(ब्र)ह्मा वा टच्। कुत्सिते ब्र(ब्र)ह्मणि टजभावपक्षे कुब्र(ब्र)ह्मन्शब्दोऽप्यत्र।

कुभ छन्दने भ्वा०पर०सक०सेट्। कोभति अकोभीत् चुकोभ। ऋ०भा०माधवसंमतोऽयम्। [विवृतिः।

कुभ न० कुभ—क। उदके ऋ०भा० माधवः। कुभन्युशब्दे

कुभन्यु त्रि०कुभ—कर्म्मणि घञर्थे क कुभमुदकमिच्छति क्यच् बा० अनङ् छन्दसि उ। आत्मनः सेकमिच्छति उदकस्य सेक्तरि "छन्दस्तुभः कुभन्यवः ऋ० ५, ५२,१२, कुभन्यवः कुभिरुन्दनकर्म्मा" भा०।

कुभा स्त्री कोः पृथिव्याः भा। पृथिवीच्छायायाम् "राहुः कुभामण्डलगः शशाङ्कम्" ज्योति०। उपरागशब्दे १२८५पृ० विवृतिः। कुगतिस०। २कुत्सितदीप्तौ। "मा वोरसानितभा कुभा" ऋ० ५,५३,९, "कुभा कुत्सित दीप्तिः" भा०। ३तद्युक्ते त्रि०।

कुभृत् पु० कुं पृथिवीं बिभर्त्ति भृ—क्विप्। १भूधरे शैले २सप्तसंख्यायाम्। एकादिशब्दे १५०८पृ० विवृतिः कुभृद्रेखिकं सप्तशलाकचक्रम् ज्योति०।

कुमार केलौ अद० चुरा० उभ० अक० सेट्। कुमारयति ते अचुकुमारत् त। कुमरयाम् बभूव आस चकार चक्रे।

कुमार पु०कुमारयति क्रीडति, कुत्सितो मारो यस्मात्, कौमारयति दुष्टान् मृ—णिच्—अच् वा। १कार्त्तिकेये, नार्थीन्त्रौ २युवराजे, अम० ३शुके पक्षिणि ४अश्वचारके, ५वरुणवृक्षे ६पञ्चवर्षीये, बालके च मेदि०। "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि" भाग० १०श्रीधर

हृतवचनम्। स्त्रियां वयोवाचित्वात् ङीप्। "त्रीणि वर्षाण्युदीक्षेत कुमार्य्यृतुमती सती" मनुः। ७सिन्धुनदे शब्दर०। ८अर्हदुपासकभेदे हेमच०। ९शाकद्वीपेश्वरपुत्रभेदे १०तदीयवर्षभेदे च विष्णुपु० "शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः। सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त च। जलदश्च कुमारश्च सुकुमारो मणीवकः। कुसुदोदः, समोदाकिः सप्तमश्च महाद्रुमः। तत्संज्ञान्यपि तान्येव सप्तवर्षाण्यनुक्रमात्"। ११शुक्तिमत्पर्व्वतोद्भवे ऋषिकुल्याभेदे "ऋषिकुल्याः कुमाराद्याः शुक्तिमत्पादसम्भवाः" विष्णुपु०। १२सुन्दरे त्रि०। १३अविवाहितावस्थायामुपचारात्। "कौमारापूर्व्ववचने,, पा०। "अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्। दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्" मनुः। अतएव अन्नदाकल्पे "एकवर्षा भवेत्सन्ध्या इत्यादिना षोड़शवर्षान्ताया अपि कुमारीत्वमुक्तम्। तत्र बालके "कुमारं माता बिभर्त्ति" ऋ० ५,२,१, कुमारस्य रेतः सिक्तं न सम्भवति" "शत०ब्रा० १,४,५,७, "कन्यानां संप्रदानञ्च कुमाराणाञ्च रक्षणम्" मनुः नाद्योक्तिं विनापि काव्ये राजदारके कुमारशब्दः प्रयुज्यते। "आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः"। "कुमारसैन्यं सपदि स्थितं च तत्"रघुः "तदानुजग्मतुः स्थाणुं कुमाराविव पावकी" रामा०। विश्वसारोक्ते १५मन्त्रभेदे पु० १६विद्यायां स्त्री ङीप्। मन्त्रविशेषाणां संज्ञाभेदाश्च तन्त्रसारे दर्शिता यथा

विश्वसारे निबन्धे च। "छिन्नोरुद्धः शक्तिहीनः पराङ्मुख उदीरितः। बधिरोनेत्रहीनश्च कीलितः स्तम्भितस्तथा। दग्धःस्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः। भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्च्छितः। हृतवीर्य्यश्च भीमश्च प्रध्वस्तोबालकः पुनः। कुमारश्च युवा प्रौढोवृद्धो निस्त्रिंशकस्तथा। निर्व्वीजः सिद्धिहीनश्च मन्दः कूटस्तथा पुनः। निरंशकः सत्वहीनः केकरोजीवहीनकः। धूमितालिङ्गितौ स्यातां मोहितश्च क्षुधार्त्तकः। अतिदीप्तोऽङ्गहीनः स्यादतिक्रुद्धः समीरितः। अतिक्रूरश्च सव्रीड: शान्तमानस एव च। स्थानभ्रष्टश्च विकलोनिःस्नेहः परिकीर्त्तितः। अतिवृद्धः पीडितश्च वक्ष्याम्येषान्तु लक्षणम्। मनोर्यस्यादिमध्यान्तेष्वानिलं वीजमुच्यते। संयुक्तं वा वियुक्तं वा पुराक्रान्तस्त्रिधा पुनः। चतुर्द्धा पञ्चधा वापि स मन्त्रश्छिन्नसंज्ञकः। आदिमध्यावसानेषु भूर्वीजद्वयलाञ्छितः। रुद्धमन्त्रः स विज्ञेयोभुक्तिमुक्तिविवर्जितः। मायात्रितयश्रीवीजराकाहीनस्तु योमनुः। शक्तिहीनः स कथितो यस्य मध्ये न विद्यते। कामवीजं मुखे माया शिरस्यङ्कुशमेव च। असौ पराङ्मुखः प्रोक्तोहकारो विन्दुलाञ्छितः। आद्यन्तमध्ये विन्दुर्व्वा न भवेद्बधिरः स्मृतः। पञ्चवर्णोमनुर्यःस्याद्रेफार्केन्दुविवर्ज्जितः। नेत्रहीनः स विज्ञेयो दुःखशोकामयप्रदः। आदिमध्यावसानेषु हंसप्रासादवाग्भवौ। हकारोविन्दुमान् जीवो वाचश्चापि चतुःकलः। माया नमामि च पदं नास्ति यस्मिन् स कीलितः। एकं मध्ये द्वयं मूर्द्ध्नि यस्मिन्नस्त्रपुरन्दरौ। न विद्येते स मन्त्रस्तु स्तम्भितः सिद्धिवर्ज्जितः। वह्निर्वायुसमायुक्तो यस्य मन्त्रस्य मूर्द्धनि। सप्तधा दृश्यते तन्तु दग्धमन्त्रं प्रचक्षते। अस्त्रं द्वाभ्यां त्रिभिः षड्भिरष्टभिर्दृश्यतेऽक्षरैः। स्रस्तः सोऽभिहितो यस्य मुखे न प्रणव स्मृतः। शिवो वा शक्तिरथ वा भीताख्यः स प्रकीर्त्तितः। आदौ मध्ये तथा चान्ते यस्य मार्णचतुष्टयम्। सएव मलिनो मन्त्रः सर्वविघ्नसमन्वितः। यस्य मध्ये दकारोऽस्ति कवचं मूर्द्धनि द्विधा। अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदाहृतः। द्योद्वयं हृदये शीर्षे वषट्वौषट् तु मध्यमे। सएव भेदितोमन्त्रः सर्वशास्त्रविवर्ज्जितः। त्रिवर्णो हंसहीनोयः स सुषुप्तउदाहृतः। मन्त्रोवाप्यथ वा विद्या सप्ताधिकदशाक्षरा। फट्कारपञ्चकादिर्योमदोन्मत्त उदाहृतः। तद्वदस्त्रं स्थितं मध्ये यस्य मन्त्रः स मूर्च्छितः। विरामेऽङ्गस्य यो मन्त्रो हृतवीर्य्यः स उच्यते। आदौ मध्ये तथा चान्ते चतुरस्त्रयुतोमनुः। ज्ञातव्योभीम इत्येष यःस्यादष्टादशाक्षरः। एकोनविंशत्वर्णो वा योमन्त्रस्तारसंयुतः। हृल्लेखाङ्कुशवीजाढ्यं प्रध्वस्तं तं प्रचक्षते। सप्तवर्णो भवेद्बालः कुमारोऽष्टाक्षरःस्मृतः। षोडशार्णो युवा प्रौढ़श्चत्वारिंसल्लिपिर्म्मनुः। त्रिंशद्वर्णश्चतुःषष्टिवर्णोमन्त्रः शताक्षरः। चतुःशताक्षरश्चापि वृद्धः स परिकीर्त्तितः। नवाक्षरो ध्रुवयुतो मनुर्निस्त्रिंश ईरितः। यस्यावसाने हृदयं शिरोमन्त्रौ च मध्यतः। शिखा वर्म्म च न स्यातां वौषट्फट्कार एव वा। शिवशक्त्यर्णहीनो वा स निर्वीजः उदाहृतः। एषु स्थानेषु फट्कारः षोढा यस्मिन् प्रदृश्यते। स मन्त्रः सिद्धिहीनःस्यान्मन्दःपङ्क्त्यक्षरोमनुः। कूट एकाक्षरो मन्त्रः स एवोक्तोनिरंशकः। द्विवर्णः सत्वहीनः स्याच्चतुर्व्वर्णस्तु केकरः। षड्क्षरोजीवहीनः सार्द्धसप्ता-

क्षरोमनुः। सार्द्धद्वादशवर्णो वा भूषितः स तु निन्दितः। सार्द्धबीजत्रयस्तद्वदेकविंशतिवर्णकः। विंशदर्णस्त्रिंशदर्णो शःसाद्यालिङ्गितः स्मृतः। द्वाविंशत्यक्षरो मन्त्रो मोहितः परिकीर्त्तितः। द्वात्रिंशदर्णो मन्त्रो यः स प्रविंशतिवर्णकः। क्षुधार्त्तः स तु विज्ञेयश्चतुर्विंशतिवर्णकः। एकादशाक्षरोयश्चाऽपि पञ्चविंशतिसंख्यकः। त्रयोविंशतिवर्णो वा मन्त्रोऽसितदीप्तईरितः। षड्विंशत्यक्षरोमन्त्रः षट्त्रिंशदर्णकस्तथा। त्रिंशदेकोनवर्णो वा स्वङ्गहीनः स एव हि। अष्टाविंशत्यक्षरोय एकत्रिंशदथापि वा। अतिक्रुद्धः स विज्ञेयो निन्दितः सर्वकर्मसु। त्रिंदशदक्षरकोमन्त्रस्त्रयस्त्रिंशदथापि वा। अतिक्रूरः स विज्ञेयो निन्दितः सर्वकर्मसु। चत्वारिंशत्तमा विद्या त्रिषष्टिर्यावता भवेत्। तावत्संख्या निगदिता मन्त्राः सव्रीडसंज्ञकाः। पञ्चषड्क्षरा ये सुमन्त्रास्ते शान्तमानसाः। एकोनशतपर्य्यन्तं पञ्चषष्ट्यक्षरादिति। ते सर्वे कथितामन्त्राः स्थानभ्रष्टा न शोभनाः। त्रयोदशाक्षरा ये सुमन्त्राः पञ्चदशाक्षराः। विकलास्तेऽभिधीयन्ते शतं सार्द्धशतं तथा। शतद्वयं द्विनयतिरेकहीना तथापि वा। यावच्छतत्रयं संख्या निःस्नेहास्ते प्रकीर्त्तिताः। चतुःशतमथारभ्य यावद्वर्णसहस्रकम्। अतिवृद्धः स मन्त्रस्तु सर्वशास्त्रविवर्ज्जितः। सहस्रार्णाधिका मन्त्रा दण्डकाः पीड़िताह्वयाः। द्विसहस्राक्षरामन्त्राः खण्डशः सप्तधा कृताः। ज्ञातव्यास्तोत्ररूपास्ते मन्त्राएते यथास्थिताः। तथा विद्याश्च बोद्धव्या मन्त्रिभिः सर्वकर्मसु। दोषानिमानविज्ञाय योमन्त्रं भजते बुधः। सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि" अथ मन्त्राणां दोषशान्तिः तदुक्तं तत्रैव "छिन्नादिदुष्टाश्च मन्त्रास्तन्त्रे-तन्त्रे निरूपिताः। ते सर्वे सिद्धिमायान्ति मातृकार्णप्रभावतः। मातृकार्णैः पुटीकृत्य मन्त्रं विद्यां विशेषतः। शतमष्टोत्तरं पूर्वं प्रजपेत् फलसिद्धये। तदा मन्त्रोमहाविद्या यथोक्तफलदा भवेत्। मातृकापुटितं कृत्वा मध्ये वर्णान्निदाय च। मन्त्रवर्णास्ततः कुर्य्याच्छोधनं तत्र सम्मतम्। बद्ध्वा तु योनिमुद्रां तां संक्षोचयाधारपङ्कजम्। तत्पश्चान् मन्त्रवर्णान् कुर्य्यात्तत्र गतागतान्। ब्रह्मरन्ध्रावधि ध्यात्वा वायुमापूर्य्य कुम्भयेत्। सहस्रं प्रजपेन्मन्त्रं मन्त्रदोषोपशान्तये"। तथा। "एषु दोषेषु प्राप्तेषु मायां काममथापि वा। श्रियं चादौ श्रियं चैव तद्दूषणविमुक्तये"। तथा। "तारसंपुटितोवापि दुष्टमन्त्रोऽपि सिध्यति। यस्य यत्र भवेद्भक्तिः सोऽपि मन्त्रोऽस्य सिध्यति" तथा। "प्रणवोमातृका देवी हृल्लेखेत्यमृतत्रयम्। अमृतत्रयसंयोगाद्दुष्टमन्त्रोऽपि सिध्यति" तत्र विद्यायां "कुमारी या च विद्येयं त्वया शम्भो पतिव्रते!। केवलं शिवरूपेण शक्तिरूपेण केवलम्" मुण्डमा०। १७स्वरोदयोक्ते बालादिचक्रस्थे स्वरभेदे पु० चक्रशब्दस्थबालादिचक्रे विवृतिः। तत्र स्कान्दे "अग्नेः पुत्रः कुमारस्तु श्रीमान् शरवणालयः" भा० आ० ६६अ०। "कुमारमभिगम्याथ वीराश्रमनिवासिनम्। अश्वमेधमवाप्नोति नरो नात्र न संशयः" भा० व० ८४अ०। तस्य कन्दर्पापेक्षयाधिकसौकुमार्य्यात्तथात्वम्। १८बालोपद्रावकग्रहभेदे "स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा। बिभर्त्ति चापरां संज्ञां कुमारः इति स ग्रहः" सुश्रुतः। १९शुद्धसुवर्णे न० मेदि०। संज्ञायां कन्। वरुणवृक्षे तिक्तशाके। स्वार्थे क। बालके हेमच०। तस्येदं तस्य भावो वा अण्। कौमार शिशुत्वे बाल्यावस्थायां "देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा" गीता।

कुमारकल्याण न०। चक्रदत्तोक्ते घृतभेदे तल्लक्षणं यथा "शङ्खपुष्पी वचा ब्राह्मी कुष्ठं त्रिफलया सह। द्राक्षा सशर्करा शुण्ठी जीवन्ती जीरकं बला। शठी दुरालभा विल्वं दाडिमं सुरसः स्थिरा। मुस्तं पुष्करमूलञ्च सूक्ष्मैला गजपिप्पली। एषां कर्षसमैर्भागैर्घृतप्रस्थं विपाचयेत्। कषाये कण्टकार्य्याश्च क्षीरे तस्मिंश्चतुर्गुणे। एतत् कुमारकल्याणं घृतरत्नं सुखप्रदम्। बलवर्णकरं धन्यं पुष्ट्यग्निबलवर्द्धनम्। छायासर्वग्रहालक्ष्मीकृमिदन्तगदापहम्। सर्वबालामयहरं दन्तोद्भेदं विशेषतः"।

कुमारघातिन् त्रि० कुमारं हन्ति हन--णिनि। शिशुमारके।

कुमारजीव पु० कुमारं जीवयति जीव--णिच् अण् उप० स०। (जियापोता) जीवपुत्रवृक्षे रत्नमा०।

कुमारदेष्ण पु० कुमाराणां दाता दा--बा० दृष्णच्। कुमारदातरि "कुमारदेष्णाः जयतः पुनर्हणः" ऋ० १०,३४,७, कुमारदेष्णाः कुमाराणां दातारः, भा०

कुमारधारा स्त्री भारतोक्ते तीर्थभेदे। "पितामहसरो गत्वा शैलराजसमीपतः। तत्राभिषेकं कुर्वाणो ह्यग्निष्टोममवाप्नुयात्। पितामहस्य सरसः प्रसुता लोकपावनी। कुमारधारा तत्रैव त्रिषु लोकेषु विश्रुता। यत्र स्नात्वा कृतार्थोऽस्मीत्यात्मानमवगच्छति। षष्ठकालो-

"मासेन मुच्यते भ्रूणहत्यया" भा०व०८१ अध्याये स्थितम्।

कुमारपालन पु० कुमारेण पाल्यते कर्म्मणि पालि–ल्युट्। शालिवाहने १नृपे हेमच०। कुमारं पालयति पालि+ल्यु उप०स०। २बालकपालके त्रि०।

कुमारभृत्या स्त्री भृ–क्यप् भृत्या भरणम् ६त०। कुमाररक्षणोपायभूते सुश्रुतोक्ते कौमारभृत्याख्ये कौमारतन्त्रे। कुमारभृत्या अधिकृत्य प्रवृत्तं तन्त्रम् अण्। कौमारभृत्य कुमाररक्षणोपायज्ञापके तच्छास्त्रांशे। "शल्यं शालाक्यं कायचिकित्सा भूतविद्या कौमारभृत्येत्यादिना अष्टधा शास्त्रं विभज्य तल्लक्षणमुक्तं तत्रैव यथा

"कौमारभृत्यं नाम कुमारभरणधात्रीक्षीरदोषसंशोधनार्थं दुष्टस्तन्यग्रहसमुत्थानाञ्च व्याधीनामुपशमनार्थम्।

विवृतमुत्तरत्र तत्रैव यथा

"नवग्रहाकृतिज्ञानं स्कन्दस्य च निषेधनम्। अपस्मारशकुन्योश्च रेवत्याश्च पुनःपृथक्। पूतनायास्तथान्धाया मण्डिका शीतपूतना। नैगमेयचिकित्सा च ग्रहोत्पत्तिः सयोनिजा। कौमारतन्त्रमित्येतच्छारीरेषु च कीर्त्तितम्"।

तत्प्रकारस्तत्रैव उत्तरतन्त्रे दर्शितो यथा

"अथातो नवग्रहाकृतिविज्ञानीयमध्यायं व्याख्यास्यामः। बालग्रहाणां विज्ञानं साधनञ्चाप्यनन्तरम्। उत्पत्तिं कारणञ्चैव सुश्रुतैकमनाः शृणु। १स्कन्दग्रहस्तु प्रथमः २स्कन्दापस्मार एव च। ३शकुनी ४रेवती चैव ५पूतना चान्धपूतना ६। पूतना ७शीतनामा च तथैव ८मुखमण्डिका। नवमो ९नैगमेयश्च यः पितृग्रहसंज्ञितः। धात्रीमात्रोःप्राक् प्रदिष्टापचाराच्छौचभ्रष्टान्मङ्गलाचारहीनान्। त्रस्तान् हृष्टांस्तर्ज्जितान् क्रन्दतान्वा पूजाहेतोर्हिंस्युरेते कुमारान्। ऐश्वर्य्यस्थास्ते न शक्या विशन्तो देहं द्रष्टुं मानुषैर्विश्वरूपाः। आप्तं वाक्यं तत्समीक्ष्याभिधास्ये लिङ्गान्येषां यानि देहे भवन्ति। शूनाक्षः क्षतजसगन्धिकः स्तनद्विड्वक्रग्रीवो हतचलितैकपक्ष्मनेत्रः। उद्विग्नः सुललितचक्षुरल्परोदी स्कन्दार्त्तो भवति च गाढमुष्टिवर्च्चाः १। निःसंज्ञो भवति पुनर्भवेद्विसंज्ञः संरब्धः करचरणैश्च नृत्यतीव। विण्मूत्रे सृजति विनद्य जृम्भमाणः फेनञ्च प्रसृजति तत्सखाभिपन्नः २। स्रस्ताङ्गो भयचकितो विहङ्गगन्धिः संस्राविव्रणपरिपीडितः समन्तात्। स्फोटैश्च प्रततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या ३। रक्तास्यो हरितमलोऽतिपाण्डुदेहः श्यावो वा ज्वरमुखपाकवेदनार्त्तः। रेवत्या ४ व्यथिततनुश्च कर्णनासं मृद्नाति ध्रुवमभिपीडितः कुमारः। स्रस्ताङ्गः स्वपिति सुखं दिवा न रात्रौ विड्भिन्नं सृजति च काकतुल्यगन्धिः। छर्द्यार्त्तो हृषिततनूरुहः कुमारस्तृष्णालुर्भवति च पूतनागृहीतः ५। यो द्वेष्टि स्तनमतिसारकासहिक्काच्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः। दुर्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रूयुर्भिषजोऽन्धपूतनार्त्तम् ६। उद्विग्नो भृशमतिवेपते प्ररुद्यात् संलीनः स्वपिति च यस्य चान्त्रकूजः। विस्राङ्गो भृशमतिसार्य्यते च यस्तं जानीयाद्भिषगिह शीतपूतनार्त्तम् ७। म्लानाङ्गः सुरुचिरपाणिपादवक्त्रो बह्वाशी कलुषसिरावृतोदरो यः। सोद्वेगो भवति च मूत्रतुल्यगन्धिः स ज्ञेयः शिशुरथ वक्त्रमण्डिकार्त्तः ८। यः फेनं वमति विनम्यते च मध्ये सोद्वेगं विलपति चोर्द्ध्वमीक्षमाणः। ज्वर्य्येत प्रततमथो वसासगन्धिर्निःसंज्ञो भवति हि नैगमेयजुष्टः ९। प्रस्तब्धो यः स्तनद्वेषी मुह्यते चाविशन्मुहुः। तं बालं न चिराद्धन्ति ग्रहः सम्पूर्णलक्षणः। विपरीतमतः साध्यं चिकित्सेदचिरार्दितम्। गृहे पुराणहविषाभ्यज्य बालं शुचौ शुचिः। सर्षपान् प्रकिरेत्तेषां तैलैर्दीपञ्च कारयेत्। सदा सन्निहितञ्चापि जुहुयाद्धव्यवाहनम्। सर्वगन्धौषधीबीजैर्गन्धमाल्यैरलङ्कृतम्। अग्नये कृत्तिकाभ्यश्च स्वाहा स्वाहेति संस्मरन्। नमः स्कन्दाय देवाय ग्रहाधिपतये नमः। शिरसा त्वाभिवन्देऽहं प्रतिगृह्णीष्व मे बलिम्। नीरुजो निर्विकारश्च शिशुर्मे जायतां ध्रुवम्।

अथातः स्कन्दग्रहप्रतिषेधं व्याख्यास्यामः। स्कन्दग्रहोपसृष्टानां कुमाराणाञ्च शस्यते। वातघ्नद्रुमपत्राणां निःक्वाथः परिषेचने। तेषां मूलेषु सिद्धञ्च तैलमभ्यञ्जने हितम्। सर्वगन्धसुरामण्डकैटर्य्यांश्चापमिष्यते। देवदारुणि रास्नायां मधुरेषु द्रुमेषु च। सिद्धं सर्पिश्च सक्षीरं पानमस्मै प्रयोजयेत्। सर्षपाः सर्पनिर्मोको वचा काकादनी घृतम्। उष्ट्राजाविगवाञ्चैव रोमाण्युद्धूपनं शिशोः। सोमवल्लीमिन्द्रवल्लीं शमीं विल्वस्य कण्टकान्। मृगादन्याश्च मूलानि ग्रथितान्येव धारयेत्। रक्तानि माल्यानि तथा पताका रक्ताश्च गन्धा विविधाश्च भक्ष्याः। घण्टा च देवाय बलिर्निवेद्यः सकुक्कुटः स्कन्दगृहे हिताय। स्नानं त्रिरात्रं निशि चत्वरेषु कुर्य्यात्पुनः शालियवैर्नवैस्तु। अद्भिश्च गायत्र्यभिमन्त्रिताभिः प्रज्वालनञ्चाहुतिभिश्च वह्नेः। रक्षामतः प्रवक्ष्यामि बालानां पाप-

शायिनीम्। अहन्यहनि कर्त्तव्या या भिषग्भिरतन्द्रितैः। तपसां तेजसां चैव यशसां वपुषां तथा। निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु। ग्रहसेनापतिर्देवो देवसेनापतिर्विभुः। देवसेनारिपुहरः पातु त्वां भगवान् गुहः। देवदेवस्य महतः पावकस्य च यः सुतः। गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु। रक्तमाल्याम्बरः श्रीमान् रक्तचन्दनभूषितः। रक्तदिव्यवपुर्देवः पातु त्वां क्रौञ्चसूदनः" १।

"अथातः स्कन्दापस्मारप्रतिषेधं व्याख्यास्यामः। विल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः। परिषेके प्रयोक्तव्यः स्कन्दापस्मारशान्तये। सर्वगन्धविपक्वन्तु तैलमभ्यञ्जने हितम्। क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा। विपक्तव्यं घृते वापि पानीयं पयसान्वितम्। उत्सादनं वचाहिङ्गुयुक्तं स्कन्दग्रहे हितम्। गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतम्। वृषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च। अनन्तां कुक्कुटीं विम्बीं मर्क्कटीञ्चापि धारयेत्। पक्वापक्वानि मांसानि प्रसन्नं रुधिरं पयः। घृतोदनो निवेद्यश्च स्कन्दापस्मारिणोऽवटे। चतुःपथे च कर्त्तव्यं स्नानमस्य यतात्मना। स्कन्दापस्मारसंज्ञोयः स्कन्दस्य दयितः सखा। विशाखसंज्ञश्च शिशोः शिवोऽस्तु विकृताननः" २।

"अथातः शकुनीप्रतिषेधं व्याख्यास्यामः। शकुन्यभिपरीतस्य कार्य्यो वैद्येन जानता। वेतसाम्रकपित्थानां निःक्वाथः परिषेचने। कषायमधुरैस्तैलं कार्य्यमभ्यञ्जने शिशोः। मधुकोशीरह्रीवेरशारिवोत्पलपद्मकैः। रोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम्। व्रणेषूक्तानि चूर्णानि पथ्यानि विविधानि च। स्कन्दग्रहे धूपनानि तानीहापि प्रयोजयेत्। शतावरीमृगैर्वारुनागदन्तीनिदिग्धिकाः। लक्ष्मणां सहदेवाञ्च वृहतीञ्चापि धारयेत्। तिलतण्डुलकं माल्यं हरितालं मनःशिला। बलिरेष करञ्जेषु निवेद्यो नियतात्मना। निकुञ्जे च प्रयोक्तव्यं स्नानमस्य यथाविधि। स्कन्दग्रहोपशमनं घृतं तच्चेह पूजितम्। कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः। अन्तरिक्षचरा देवी सर्व्वालङ्कारभूषिता। अयोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु। दुर्द्दर्शना महाकाया पिङ्गाक्षी भैरवस्वना। लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु" ३।

"अथातो रेवतीप्रतिषेधं व्याख्यास्यामः। अश्वगन्धाजशृङ्गी च शारिवा सपुनर्नवा। सहे विदारी च तथा कषायाः सेचने हिताः। तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसेऽपि वा। धवाश्वकर्णककुभधातकीतिन्दुकीषु च। काकोल्यादिगणे चैव पानीयं सर्पिरिष्यते। कुलत्थाः शङ्खचूर्णञ्च प्रदेहाः सर्वगन्धिकाः। गृध्रोलूकपुरीषाणि यवा यवफसी घृतम्। सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः। वरुणारिष्टकमयं रुचकं सैन्दुकं तथा। सततं धारयेच्चापि कृतं वा पौत्रजीविकम्। शुक्लाः सुमनसो लाजाः पयः शाल्योदनं तथा। बलिर्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना। सङ्गमे च भिषक् स्नानं कुर्य्याद्धात्रीकुमारयोः। नानावस्त्रधरा देवी चित्रमाल्यानुलेपना। चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु। लम्बा कराला विनता तथैव बहुपुत्रिका। रेवती सततं माता सा ते देवी प्रसीदतु" ४।

"अथातः पूतनाप्रतिषेधं व्याख्यास्यामः। कपोतवङ्काऽरलुको वरुणः पारिभद्रकः। आस्फोता चैव योज्याः स्युर्बालानां परिषेचने। वचा वयस्था गोलोमी हरितालं मनःशिला। कुष्ठं सर्ज्जरसश्चैव तैलार्थे वर्ग इष्यते। हितं घृतं तुगाक्षीर्य्यां सिद्धं मधुरकेषु च। कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा। देवदारुवचाहिङ्गुकुष्ठं गिरिकदम्बकः। एलाहरेणवश्चापि योज्या उद्धूपने सदा। गन्धनाकुलिकुम्भीकामज्जानो वदरस्य। कर्कटास्थि घृतञ्चैव धूपनं सर्षपैः सह। काकादनीं चित्रफलां विम्बीं गुञ्जाञ्च धारयेत्। मत्स्यौदनञ्च कुर्व्वीत कृशरं पललं तथा। शरावसम्पुटे कृत्वा बलिं शून्यगृहे हरेत्। उच्छिष्टेनाभिषेकेण शिरसि स्नानमिष्यते। पूज्या च पूतना देवी बलिभिः सोपहारकैः। मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा। शून्यागाराश्रिता देवी दारकं पातु पूतना। दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका। भिन्नागाराश्रया देवी दारकं पातु पूतना" ५।

"अथातोऽन्धपूतनाप्रतिषेधं व्याख्यास्यामः। तिक्तकद्रुमपत्राणां कार्य्यः क्वाथोऽवसेचने। सुरासौवीरकं कुष्ठं हरितालं मनःशिला। तथा सर्ज्जरसश्चैव तैलार्थमुपदिश्यते। पिप्पलः पिप्पलीमूलं वर्गो मधुरको मधु। शालपर्णी वृहत्यौ च घृतार्थमुपदिश्यते। सर्व्वगन्धैः प्रदेहश्च गात्रेष्वक्ष्णोश्च शीतलैः। पुरीषं कौक्कुटं केशांश्चर्म्म सर्पत्वचन्तथा। जीर्णाञ्च भिक्षुसङ्घाटीं धूपनायोपकल्पयेत्। कुक्कुटीं मर्कटीं शिम्बीमनन्ताञ्चापि धारयेत्। मांसमामं तथा पक्वं शोणितञ्च चतुःपथे। निवेद्यमन्तर्गृहे

शिशोरक्षानिमित्ततः। शिशोश्च स्नपनं कुर्य्यात् सर्व्वगन्धादिकैः शुभैः। कराला पिङ्गला मुण्डा कषायाम्बरवासिनी। देवी बालमिमं प्रीता संरक्षत्वन्धपूतना" ६।

"अथातः शीतपूतनाप्रतिषेधं व्याख्यास्यामः। कपित्थं सुवहां बिम्बीन्तथा बिल्वं प्रचीबलम्। नन्दीं भल्लातकीञ्चापि परिषेके प्रयोजयेत्। बस्तमूत्रं गवां मूत्रं मुस्तञ्च सुरदारु च। कुष्ठञ्च सर्व्वगन्धञ्च तैलार्थमवचारयेत्। रोहिणीसर्ज्जखदिरपलाशककुभत्वचः। निःक्वाथ्य तस्मिन्निःक्वाथे सक्षीरं विपचेत्ततः। गृध्रोलूकपुरीषाणि वस्तगन्धामहेस्त्वचः। निम्बपत्राणि मधुकं धूपनार्थे प्रयोजयेत्। धारयेदपि लम्बाञ्च गुञ्जां काकादनीं तथा। नद्यां मुद्गकृतैश्चान्नैस्तर्पयेच्छीतपूतनाम्। देव्यै देयश्चोपहारो वारुणीरुधिरं तथा। जलाशयान्ते बालस्य स्नपनं चोपदिश्यते। मुद्गौदनाशना देवी सुराशोणितपायिनी। जलाशयालया देवी पातु त्वां शीतपूतना" ७।

"अथातोमुखमण्डिकाप्रतिषेधं व्याख्यास्यामः। कपित्थबिल्वतर्क्कारीमांसीगन्धर्व्वहस्तकाः। कुवेराक्षी च योज्याः स्युर्बालानां परिषेचने। सरसैर्भृङ्गवृक्षाणां तथाजर्क्कारिगन्धयोः। तैलं वसाञ्च संयोज्य पचेदभ्यञ्जने शिशोः। मधूलिकायां पयसि तुगाक्षीर्य्याङ्गुषे तथा। मधुरे पञ्चमूले च कनीयसि घृतं पचेत्। वचासर्ज्जरसः कुष्ठं सर्पिश्चोद्धूपने हितम्। धारयेदपि जिह्वाश्च चाषचीरल्लिसर्प्पजाः। वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा। मनःशिलाञ्चोपहरेद्गोष्ठमध्ये बलिं तथा। पायसं सपुरोडाशं बल्यर्थमुपहारयेत्। मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितम्। अलङ्कृता रूपवती सुभगा कामरूपिणी। गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका" ८।

"अथातो नैगमेयप्रतिषेधं व्याख्यास्यामः। बिल्वाग्निमन्थपूतीकाः कार्य्याः स्युः परिषेचने। सुराशौवीरधान्याम्लैः परिषेकश्च शस्यते। प्रियङ्गुसरलानन्ताशतपुष्पाकुटन्नटैः। पचेत्तैलं सगोमूत्रैर्दधिमस्त्वम्लकाञ्जिकैः। पञ्चमूलद्वयक्वाथे क्षीरे मधुरकेषु च। पचेद्घृतञ्च मेधावी खर्ज्जूरीमस्तकेऽपि च। वचां वयस्थां गोलोमीं जटिलां चापि धारयेत्। उत्सादनं हितं चात्र स्कन्दापस्मारनाशनम्। सिद्धार्थकवचाहिङ्गुकुष्ठैर्यावतैः सह। भल्लातकाजमोदाश्च हितमुद्धूपनं शिशोः। मर्क्कटोलूकगृध्राणां पुरीषाणि नखग्रहे। धूपः सुप्ते जने कार्य्यो बालस्य हितमिच्छता। तिलतण्डुलकं माल्यं भक्ष्यांश्च विविधानपि। कुमारपितृमेषाय वृक्षमूले निवेदयेत्। अधस्ताद्वटवृक्षस्य स्नपनं चोपदिश्यते। बलिं न्यग्रोधवृक्षेषु तिथौ षष्ठ्यां निवेदयेत्। अजाननश्चलाक्षिभ्रूः कामरूपी महायशाः। बालं पालयिता देवो नैगमेयोऽभिरक्षतु" ९।

"अथातो ग्रहोत्पत्तिमध्यायं व्याख्यास्यामः। नव स्कन्दादयः प्रोक्ता बालानां य इमे ग्रहाः। श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः। एते गुहस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः। सृष्टाः शरवणस्थस्य रक्षितस्यात्मतेजसा। स्त्रीविग्रहा ग्रहा ये तु नानारूपा मयेरिताः। गङ्गोमाकृत्तिकानाञ्च ते भागा राजसा मताः। नैगमेयस्तु पार्व्वत्या सृष्टो मेषाननो ग्रहः। कुमारधारी देवस्य गुहस्यात्मसमः सखा। स्कन्दापस्मारसंज्ञो यः सोऽग्निनाग्निसमद्युतिः। स च स्कन्दसखो नाम विशाख इति चोच्यते। स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा। बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः। बाललीलाधरो योऽयं देवो रुद्राग्निसम्भवः। मिथ्याचारेषु भगवान् स्वयं नैष प्रवर्त्तते। कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः। ग्रहलीत्यल्पविज्ञाना ब्रुवते देहचिन्तकाः। ततो भगवति स्कन्दे सुरसेनापतौ कृते। उपतस्थुर्ग्रहाः सर्व्वे दीप्तशक्तिधरं गुहम्। ऊचुः प्राञ्जलयश्चैनं वृत्तिं नः संविधत्स्व वै। तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्। ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत्। तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत्। परस्परोपकारेण वर्त्तते धार्य्यतेऽपि च। देवा मनुष्यान् प्रीणन्ति तैर्य्यग्योनींस्तथैव च। वर्त्तमानैर्यथाकालं शीतवर्षोष्णमारुतैः। इज्याञ्जलिनमस्कारजपहोमव्रतादिभिः। नराः सम्यक् प्रयुक्तैश्च प्रीणन्ति त्रिदिवेश्वरान्। भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते। तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति। कुलेषु येषु नेज्यन्ते देवाः पितर एव च। ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा। निवृत्ताचारशौचेषु परपाकोपभोजिषु। उच्छिन्नबलिभिक्षेषु भिन्नकांस्योपभोजिषु। गृहेषु तेषु ये बालास्तान् गृह्णीध्वमशङ्किताः। तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति। एवं ग्रहाः समुत्पन्ना बालान् गृह्णन्ति चाप्यतः। ग्रहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः। वैकल्यं मरणं चाशु ध्रुवं स्कन्दग्रहे मतम्। स्कन्द-

पद्दोत्य्पतनः सर्वेष्वेव यतःस्मृतः। अन्योवा सर्वरूपस्तु न साध्यो यह उच्यते"। "कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ गर्भभर्मणि" रघुः।

कुमारयु पु० कुमारं कौमारं याति या–कु मितय्वादि० नि०। युवराजे उज्ज्वलदत्तः

कुमारललिता स्त्री "कुमारललिता ज्सगाः" वृत्त०र० उक्ते १सप्ताक्षरपादके छन्दोभेदे। कुमारं सुन्दरं ललितं चेष्टितं, तादृशं ललितं, वा यस्य। २सुकुमारचेष्टायां न०। ३तद्युक्ते त्रि०।

कुमारवाहिन् पु० कुमारं स्कन्दं वहति वह–णिनि। मयूरे शब्दरत्ना०। कुमारवाहनत्वात्तस्य तथात्वम्। वह–स्वार्थे णिच् ल्युट् ६त०। कुमारवाहनमप्यत्र न०।

कुमारसम्भव न० कुमारस्य कार्त्तिकेयस्य सम्भवमधिकृत्य कृतोग्रन्थः अण् आख्यायिकायां तस्य लुक्। कालिदास प्रणीते महाकाव्यभेदे।

कुमारसू स्त्री कुमारं स्कन्दं सूते सू–क्विप् ६त०। १गङ्गायाम् २हैमवत्याञ्च हेमच०। तयोस्तदुत्पत्तिस्थानत्वात् तथात्वम् कुमारजनन्यादयोऽप्यत्र

कुमारहारित पु० यजुर्वेदसम्प्रदायप्रवर्त्तके ऋषिभेदे "कुमारहारितात् कुमारहारितः" शत०ब्रा० १४,५,५,२२,

कुमारिका स्त्री कुमारी–स्वार्थे क संज्ञायां कन्, कुमार–ण्वुल् वा। १अनूढकन्यायाम् २नवमल्लिकायां ३स्थूलैलायां रत्नमा०। ४घृतकुमार्य्यां ५कुमारीशब्दार्थे। भारतवर्षस्य नवसु खण्डेषु ६खण्डभेदे यथाह सि०शि०। "ऐन्द्रं कशेरुशकलं किल ताम्रपर्णमन्यद्गभस्तिमदनश्च कुमारिकाख्यम्। नागञ्च सौम्यमिह वारुणमन्त्यखण्डं गान्धर्व्वसंज्ञमिति भारतवर्षमध्ये। वर्णव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्त्यजजनाः निवसन्ति सर्वे" कशेरुशब्दे १८३५पृ० विवृतिः

कुमारिन् त्रि० कुमारोविद्यतेऽस्य इनि। कुमारयुक्ते "पुलिणा ता कुमारिणाः ऋ०८,३१,८ कुमारिणौ दम्पती इत्यर्थः सुपां सुलुगित्यादिना पा० औस्थाने आच्।

कुमारिल पु० मीमांसकभेदे "साधु कुमारिल स्वामिन्! साधु" प्रबोधच०

कुमारी स्त्री कुमार+प्रथमवयोवचनत्वात् स्त्रियां ङीप्। १अनूढकन्यायां वर्षभेदेन तन्नामभेदाः कालसङ्कर्षाशब्दे उक्ताः तदनुसारे तत्पूजाफलसहितानामभेदा अन्यथा उक्ता यथा"होमादिकन्तु सकलं कुमारीपूजनं विना। परिपूर्णफलं न स्यात् पूजया तद्भवेद्ध्रुवम्। कुमारीपूजया देवि! फलं कोटिगुणं भवेत्। पुष्पं कुमार्य्यै यद्दत्तं तन्मेरुसदृशं भवेत्। कुमारी भोजिता येन त्रैलोक्यं तेन भोजितम्"। तत्र कुमारीनिर्णयः जामले "एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती। त्रिवर्षा त्रिविधा मूर्त्तिश्चतुर्वर्षा च कालिका। सुभगा पञ्चवर्षा तु। षड्वर्षा च उमा भवेत्। सप्तभिर्म्मालिनी साक्षादष्टवर्षा च कुब्जिका। नवभिः कालसङ्कर्षा दशभिश्चापराजिता। एकादशे च रुद्राणी द्वादशाब्दे तु भैरवी। त्रयोदशे महालक्ष्मी द्विसप्ता पीठनायिका। क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका स्मृता। एवं क्रमेण संपूज्या यावत्पुष्पं न दृश्यते। प्रतिपदादिपूर्णिमान्तं वृद्धिभेदेन पूजयेत्। महापर्व्वसु सर्वेषु विशेषाच्च पवित्रके। महानवम्यां देवेशि! कुमारीञ्च प्रपूजयेत्। "कुमारिका ह्यहं नाथ! सदा त्वं हि कुमारिका। अष्टोत्तरशतं वापि एकां वापि प्रपूजयेत्। पूजिताः प्रतिपूज्यन्ते निर्दहन्त्यवमानिताः। कुमारी योगिनी साक्षात् कुमारी परदेवता। असुरा दुष्टनागाश्च ये च दुष्टग्रहा अपि। भूतवेतालगन्धर्व डाकिनीयक्षराक्षसाः। याश्चान्याः देवताः सर्वा भूर्भुवःस्वःस्थभैरवाः। पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम्। ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः। ते तुष्टा सर्वदेवाश्च यस्तु कन्यां प्रपूजयेत्। विधियुक्तं कुमारीश्च भोजयेच्चैव भैरवीम्। पाद्यमर्घ्यन्तथा धूपं कुङ्कुमञ्चन्दनं शुभम्। भक्तिभावेन संपूज्य कुमारीभ्योनिवेदयेत्। प्रदक्षिणत्रयं कुर्य्यादादौ मध्ये तथान्ततः। पश्चाच्च दक्षिणा देया रजतं स्वर्णमौक्तिकैः। दक्षिणाञ्च कुमारीभ्योदद्यात् प्रकृतगतस्ततः। विवाहयेद्यस्तु कन्यां ब्रह्महत्यां विनश्यति। गोहत्या च स्त्रीहत्या च सर्वपापं प्रणश्यति। यो यज्ञ पुण्यकाले च कन्यादानं प्रकल्पयेत्। वालुकासागरं ज्ञेयं तावद्वर्ष सहस्रकम्। एकैकं कुलमुद्दिश्य रुद्रलोके महीयते" कन्यादानन्तु तत्तद्देवताप्रीतये इति सम्प्रदायः। वस्तुतस्तु तत्तद्वर्षायाः कन्यायास्तत्तद्देवताबुद्ध्या शिवरूपत्वं सम्प्रदानीत्वे विभाव्य दद्यादिति रहस्यार्थः" कृष्णानन्दः। "सं प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते इति स्मृत्युक्तायां २द्वादशवर्षीयकन्यायाम् ३पार्वत्याम् ४नवमल्लिकायां ५नदीभेदे ६घृतकुमार्य्याम् तत्पर्य्यायगुणादि भावप्रकाशे उक्तं यथा "कुमारी गृहकन्या च कन्या घृतकुमारिका

कुमारी भेदिनी शीता तिक्ता नेत्र्या रसायनी। मधुरा बृंहणी बल्या वृष्या वातविषप्रणुत्। गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत्। ग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वगामयान्”।
७अपराजितायां ८जम्बुद्वीपांशभेदे कुमारिकाखण्डे ९सहायां मेदि०। १०सीतायां हेमच०११बन्ध्याकर्कोट्याम् १२स्थूलैलायां १३मोदिनीपुष्पे। १४तरणीपुष्पे १५श्यामापक्षिणि राजनि०।

कुमारीक्रीडनक न० कुमारीभिः क्रीड्यतेऽनेन क्रीड–करणे ल्युट् ततः यावादि०स्वार्थे क। कुमारीक्रीडासाधने द्रव्ये

कुमारीपुत्र पु०। १कानीने कन्याकालोत्पन्ने पुत्रे स च मातामहपुत्रः कानीनशब्दे विवृतिः। ततः प्रकारवचने स्थूलादि० कन्। कुमारीपुत्रक तत्सदृशे त्रि०

कुमारीश्वशुर पु० ६त०। विवाहात् पूर्व्वं धर्षितकन्यायाः भर्त्तुः पितरि। ततः प्रकारे स्थूला० कन्। तत्सदृशे त्रि०

कुमाल केलौ अद० चुरा० उभ० अक० सेट्। कुमालयति ते अचुकुमालत् त। कुमालयां बभूव आस चकार चक्रे

कुमालक पु० कुमाल–ण्वुल्। सौवीरदेशे हेमच०।

कुमुद् न० कौ मोदते मुद–क्विप् ७त०। १कैरवे मेदि०२रक्तोत्पले त्रिका०। कुत्सिता मुदस्य। ३कृपणे त्रि० मेदि०। ४अप्रीते च त्रि०शब्दर०। कुगतिस०। ५कुत्सितमोदे स्त्री

कुमुद न०कौ मोदते मुद–क ७त०। (सुँदि) कैरवे अमरः। “कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव” पञ्चत०। “कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम्” भाव० प्र० तद्गुणा उक्ताः। २रक्तपद्मे मेदि० ३रूप्ये हेमच०। ४कर्पूरे पु० राजनि० अयमर्द्धर्चादि ५शाल्मलिद्वीपस्थे वर्षपर्वतभेदे। कुन्दशब्दे उदा०। ६दक्षिणदिग्गजे अमरः तस्य श्वेतोत्पलनिभत्वात्तथात्वम्। कुं भूमिं मोदयति मुद–अन्तर्भूतण्यर्थे–क। ७विष्णौ “कुमुदः कुन्दरः कुन्दः पर्जन्यः पावकोऽनिलः” विष्णुस०। ८पद्मे न० त्रिका०। “यस्य बाला बहुव्यामा दीर्घलाङ्गूलमाश्रिताः। ताम्राः पीताः शीताश्चैव प्रकीर्णा घोरकर्मणः” रामा० उक्तलक्षणे ९वानरभेदे। “सुषेणमैन्दद्विविदैः कुमुदेनाङ्गदेन च” भा०व०२८८अ०। १०विष्णुपारिषदभेदे। “प्रहस्तानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः”इत्युपक्रमे कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट्” भाग० ८,२१,१०। ११मेरोरुपष्टम्भगिरिभेदे पु०। “मन्दरोमेरुमन्दरः सुपार्श्वः कुमुद इत्ययुतयोजनविस्तारोन्नतामेरोश्चतुर्द्दिशमवष्टम्भगिरय उपक्लृप्ताः” भा० ५,१६,१ “एवं कुमुदनिरूढोयः शतवल्शोनाम वटस्तस्य स्कन्धेभ्योनीचीनाः पयोदधिमधुगुडान्नाद्यम्बरशय्यासनाभरणादयः सर्व्व एव कामदुघा नदाः कुमुदाग्रात् पतन्तस्तदुत्तरेणेलावृतमुपयोजयन्ति” तत्रैव १२सर्पभेदे कुमुद्वतीशब्दे रघुवाक्यम्। “कुमुदः कुमुदाक्षश्च तित्तिरः हलिकस्तथा”भा०आ०३५अ०१३दैत्यभेदे च। ततः कुमुदा० चतुरर्थ्यां ठक्। कौमुदिकं तत्सन्निकृष्टादौ त्रि०। तत्रार्थे ठच्। कुमुदिक तत्रार्थे त्रि०

कुमुदखण्ड न० कुमुदानां समूहः कमला० खण्डच्। १कैरवसमूहे। ६त०। २कुमुदस्य भागे

कुमुदगन्ध्या स्त्री कुमुदस्येव गन्धमर्हति ष्यङ्। कुमुदगन्धयुक्तायां स्त्रियां ततः करीषगन्ध्याशब्ददर्शितं कार्य्यम्।

कुमुद्घ्नी स्त्री सुश्रुतोक्ते क्षीरविषवृक्षभेदे। यथा “कुमुद्घ्नी स्नुही जालक्षीर्य्याणि त्रीणि क्षीरविषाणि”।

कुमुदनाथ पु० ६त०। चन्द्रे तस्य प्रकाशेन कुमुदस्य प्रकाशात्तस्य तथात्वम्। कुमुदपत्यादयोऽप्यत्र

कुमुदबन्धु पु० ६त०। चन्द्रे तत्प्रकाशकत्वात्तस्य तथात्वम् कुमुदसुहृत्कुमुदबान्धवादयोऽप्यत्र। [न्याम् भरतः।

कुमुद्वती स्त्री कुमुदानि सन्त्यस्यां मतुप् मस्य वः। कुमुदि-

कुमुदा स्त्री कुत्सितं मोदते मुद–क टाप्। १कुम्भिकायां (पाना) २गाम्भारीवृक्षे मेदि०। ३शालपर्णीवृक्षे ४कट्फले राजनि०। संज्ञायां कन्। कट्फले अमरः। गौरा० ङीष्। कुमुदी कट्फले स्त्री शब्दरत्ना०।

कुमुदाकर पु० ६त०। कुमुदस्थाने ह्रदादौ “कुमुद्वतीनां कुमुदाकरैरिव” माघः

कुमुदाक्ष पु १नागभेदे२विष्णुपारिषदभेदे च कुमुदशब्दे उदा०

कुमुदादि पु० पाणिन्युक्ते चतुरर्थ्यां ठच्प्रत्ययनिमित्ते शब्दगणभेदे स च गणः “कुमुद शर्करा न्यग्रोध इत्कट सङ्कट कङ्कट गर्त्त वीज परिवाप निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ वल्वज यवास कूप विकङ्कट दशग्राम”। कुमुदिक कुमुदसन्निकृष्टदेशादौ त्रि० स्त्रियां षित्त्वात् ङीष्। तत्रैवोक्ते तदर्थे ठक्प्रत्ययनिमित्ते २शब्दगणभेदे स च गणः। “कुमुद गोमय रथकार दशग्राम अश्वत्थ शाल्मलि शिरीष मुनिस्थल कुण्डल कूट मधुकर्ण घास कुन्द शुचिकर्ण”। कौमुदिक तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां षित्त्वात् ङीष्।

कुमुदाभिख्य न० कुमुदस्येवाभिख्या शोभा यस्य श्वेतत्वात्। रौप्ये रजते धातौ शब्दचि० [२कुमुदाधारस्थाने च

कुमुदावास पु० कुमुदानामावासः। १कुमुदप्राये देशे हेमच०

कुमुदिका स्त्री कौ मोदते मुद–हर्षे क ७त०। कट्फले अमरः

कुमुदिनी स्त्री कुमुदानि सन्त्यत्र देशे पुष्क० इनि। १कुमुदयुक्तदेशे पुष्करिण्यादौ २कुमुदलतायां भरतः। "कुमुदिनीकुलकेलिकलालसः" भ्रमराष्टकम्। "पद्मिन्यां ये गुणाः प्रोक्ताः कुमुदिन्याश्च ते स्मृताः। सा तु मूलादि सर्वाङ्गैः रक्ता समुदिता बुधैः" भावप्र०तद्गुणा उक्ताः कुमुदानां समूहः खलादेराकृतिगणत्वात् इनि। ३कुमुदसमूहे च। "वीक्षन्तेऽन्यमितः स्फुटत्कुमुदिनीफुल्लोल्लसल्लोचनाः" पञ्चत०

कुमुदिनीनायक पु० ६त०। चन्द्रे तदुदये कुमुदस्य प्रकाशात्तस्य तथात्वं कुमुदिनीपत्यादयोऽप्यत्र पु०

कुमुदेश पु० ६त०। चन्द्रे कुमुदेश्वरादयोऽप्यत्र पु०

कुमुद्वत् त्रि० कुमुद+चतुरर्थ्यां ड्मतुप् झय इति मस्य वः। १कुमुदयुक्तदेशादौ "हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु" रघुः स्त्रियां ङीप्। सा च २कुमुदलतायाम्। "ग्लपयति यथा शशाङ्कं कुमुद्वतीं न तथाहि दिवसः" शकु० "कुमुद्वती भानुमतीव भावम्" रघुः "वाप्ये वैदूर्य्यसोपानपद्मोत्पलकुमुद्वतीः" भा० ४।६।६४ कुमुदस्यास्ति मतुप्। २कुप्रीतियुक्ते त्रि० स्त्रियां ङीप् "प्रभातवाताहतिकम्पिताकृतिः कुमुद्वतीरेणुपिशङ्गविग्रहम्। निरास भृङ्गं कुपितेव पद्मिनी न मानिनीसंसहतेऽन्यसङ्गमम्" भट्टिः मानिनीपक्षे कुमुद्युक्तस्त्रोपरत्वम्। ३कुमुदनागस्य भगिन्यां "इमा स्वसारञ्च यवीयसीं मे कुमुद्वतीं नार्हसि नानुमन्तुम्। इत्युपक्रमे "संयोजयां विधिवदास समेतबन्धुःकन्यामयेन कुमुदः कुलभूषणेन"। "अतिथिं नाम काकुत्स्थात् पुत्रमाप कुमुद्वती" रघुः

कुमुद्वतीश पु०६त०। चन्द्रे कुमुद्वतीनाथतदीशादयोऽप्यत्र पु०

कुमुद्वतीवीज न० ६त०। (वेरा) इतिख्याते कुमुदिनीवीजे "भवेत् कुमुद्वतीवीजं स्वादु रूक्षहिमं गुरु"भावप्र०

कुमोदक पु० मोदयति मुद–णिच्–ण्वुल् ६त०। १विष्णौ हेमच० सहि त्राणेन भारावतारणेन च पृथिव्या मोदक इति तस्य तथात्वम्। तस्येदमण् ङीप्। कौमोदकी तद्गदायाम् स्त्री

कुम्ब त्रि० कुबि–अच्। बाहुकुण्ठे (कोपा) जटा० "कुरीरमस्य शीर्षणि कुम्बं चाभिनिदध्मसि" अथ० ६,१३८,३

कुम्बा स्त्री कुबि–भावे अङ्। १सुगहनायामावृतौ दृढ़वेष्टने अमेध्यादिदृष्टिवारणाय वैदिके २वेष्टनभेदे च "तस्मिन्नुदीचीनकुम्बां शम्यां निदधाति" तैत्ति०। कुम्बयति आच्छादयति अच्। ३स्थूलशाटके स्त्री त्रिका०

कुम्ब्या स्त्री कुबि–यत्। एकार्थप्रतिपादके विध्यर्थवादात्मके वेदैकदेशब्राह्मणवाक्य भेदे माधवः। "तस्मादृचं वा यजुर्वा साम वा गाथां वा कुम्ब्यां वाऽभिव्याहरेद्व्रतस्याध्यायाव्यवच्छेदाय" शत० ब्रा० ११।५।७।१०।

कुम्भ पु०कुं भूमिं कुत्सितं वा उम्भति उन्भ–पूरणे अच् शक०। १घटे, २हृद्रोगभेदे, ३हस्तिशिरःस्थमांसपिण्डद्वये, "तैः किं मत्तकरीन्द्रकुम्भकुहरे नारोपणीयाः कराः" प्रसन्नराघवम्। ४कुम्भकर्णस्य पुत्रे, ५वेश्यापतौ, मेदि० ६प्राणायामाङ्गे श्वासरोधके चेष्टाभेदे, "दशद्रोणा भवेत् खारी कुम्भस्तु द्रोणविंशतिरित्युक्ते ७परिमाणभेदे "धान्यं दशभ्यः कुम्भेभ्योहरतोऽभ्यधिकं बधः" मनुः। ज्योतिषप्रसिद्धे मेषावधिके ८एकादशराशौ च। ९गुग्गुलौ, १०त्रिवृति च न०।

तत्रघटार्थककुम्भलक्षणमुक्तं हेमा० दा० परिभाषाप्र०" "विष्णुधर्मोत्तरे "हैमराजतताम्रा वा मृण्मया लक्षणान्विताः। यात्रोद्वाहप्रतिष्ठादौ कुम्भाः सुरभिषेचने। पञ्चाशाङ्गुलवैपुल्या उत्सेधषोड़शाङ्गुलाः। द्वादशाङ्गुलकं मूलं मुखमष्टाङ्गुलं भवेत्"। "पञ्चाशाङ्गुलेति आशा दिशः, ताश्च, दशसंख्यावाचकत्वेन ज्योतिःशास्त्रादौ प्रसिद्धाः पञ्च च आशाश्च पञ्चाशाः तावन्ति अङ्गुलानि वैपुल्यं येषां ते तथाभूताः। मध्यप्रदेशे तिर्य्यग्मानेन पञ्चदशाङ्गुला इत्यर्थः। अथवा बाह्यप्रदेशे वलयाकृतिना सूत्रेण नीयमाना कुक्ष्यस्थाने पञ्चाशदङ्गुला इत्यर्थः। अस्मिन् पक्षे पञ्चाशाङ्गुलेति छान्दसः प्रयोगः" हेमा०।

तान्त्रिकमानन्तु तन्त्रसा० गौतमीये "हैमं रौप्यं तथा ताम्रं मार्त्तिक्यं वा स्वशक्तितः। वित्तशाठ्यं न कुर्वीत कृते निष्फलमाप्नुयात्। षट्त्रिंशदङ्गुलं कुम्भं विस्तारो न्नतिशालिनम्। षोड़शं द्वादशं वापि ततोन्यूनं न कारयेत्"।

प्राणायामाङ्गकुम्भकपरकुम्भप्रकारः विश्वा० पा० उक्तो यथा "कुम्भकः पूरकोरेचः प्राणायामस्त्रिलक्षणः।

पूरकं पूरणं वायोः, कुम्भकः स्थापनं क्वचित्। बहिर्निःसारणं तस्य रेचकः परिकीर्त्तितः। दक्षिणे रेचयेद्वायुं वामेन पूरितोदरः। कुम्भेन धारयेन्नित्यं प्राणायामं विदुर्बुधाः। अङ्गुष्ठेन पुटं ग्राह्यं नासाया दक्षिणं पुनः। कनिष्ठानामिकाभ्याञ्च वामं प्राणस्य संग्रहे। अङ्गुष्ठतर्ज्जनीभ्यान्तु ऋग्वेदी सामगायनः। अङ्गुष्ठानामिकाभ्यां तु याहत्रं सर्व्वैरथर्वभिः” याज्ञ० “दक्षिणे रेचकं कुर्य्यात् वामेनापूर्य्य चोदरम्। कुम्भकेन जपं कुर्य्यात् प्राणायामस्य लक्षणम्” शङ्खः। विवृतमेतत् पात० सू० भाष्यविवरणेषु यथा

“तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः” सू०

“सत्यासनजये बाह्यस्य वायोराचमनं श्वासः। कोष्ठस्य वायोर्निःसारणं प्रश्वासः तयोर्गतिविच्छेद उभयाभावः प्राणायामः” भाष्यम्

“आसनानन्तरं तत्पूर्व्वकतां प्राणायामस्य दर्शयन् तल्लक्षणमाह रेचकपूरककुम्भकेष्वस्ति श्वासप्रश्वासयोर्गतिविच्छेद इति प्राणायामसामान्यलक्षणमेतदिति तथाहि यत्र बाह्यवायुराचम्यान्तर्धार्य्यते पूरके। तत्रापि श्वासप्रश्वासयोर्गतिविच्छेदः यत्रापि कोष्ठोवायुर्विरेच्य बहिर्धार्य्यते रेचके तत्रास्ति श्वासप्रश्वासयोर्गतिविच्छेदः एवं कुम्भकेऽपि इति तदेतद्भाष्येणोच्यते। सत्यासनेति” वाचस्पतिविवरणम्।

“बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टोदीर्घसूक्ष्मः” सू०

“यत्र प्रश्वासपूर्व्वको गत्यभावः स बाह्यः। यत्र श्वासपूर्व्वको गत्यभावः स आभ्यन्तरः तृतीयस्तम्भवृत्तिर्यत्रोभयाभावः सकृत्प्रयत्नाद् भवति यथा तप्ते न्यस्तमुपले जलं सर्वतः सङ्कोचमापद्यते। तथा द्वयोर्युगपद्गत्यभावइति त्रयोऽप्येते देशेन परिदृष्टाः, इयानस्य विषयो देश इति कालेन परिदृष्टाः क्षणानामियत्तावधारणेनावच्छिन्ना इत्यर्थः। सङ्ख्याभिः परिदृष्टाः एतावद्भिः श्वासप्रश्वासैः प्रथम उद्घात स्तद्वन्निगृहीतस्यैतावद्भिः द्वितीय उद्घातः” एवं तृतीय एवं मृदुरेवं मध्य एवं तीव्र इति सङ्ख्यापरिदृष्टः स खल्वयमेवमभ्यस्तो दीर्घसूक्ष्मः” भाष्यम्

“प्राणायामविशेषत्रयलक्षणपरं सूत्रमवतारयति यत्रेति; वृत्तिशब्दः प्रत्येकं संबध्यते। रेचकमाह यत्र प्रश्वासेति। पूरकमाह यत्र श्वासेति। कुम्भकमाह तृतीय इति। तदेव स्फुटयति यत्रोभयोः श्वासप्रश्वासयोः सकृदेव विधारकात् प्रयत्नादभावो भवति न पुनः पूर्व्ववदापूरणप्रयत्नौघप्रविधारकप्रयत्नो नापि रेचकप्रयत्नौघविधारणप्रयत्नोऽपेक्ष्यते किन्तु यथा तप्ते उपले निहितं जलं परिशुष्यत् सर्वतः संकोचमापद्यते एवमयमपि मारुतो वहनशीलो बलवद्विधारकप्रयत्ननिरुद्धक्रियः शरीरएव सूक्ष्मीभूतोऽवतिष्ठते न तु पूरयति येन पूरकः, न तु रेचयति येन रेचक इति। इयानस्य देशो विषयः प्रदेशः। वितस्तिहस्तादिपरिमितो निवाते प्रदेशे ईषीकातूलादिक्रियानुमितो बाह्य एव नान्तरोऽप्यापादतलमामस्तकं पिपीलिकास्पर्शसदृशेनानुमितः स्पर्शननिमेषक्रियावच्छिन्नस्य कालस्य चतुर्थो भागः क्षणस्तेषामियत्तावधारणेनावच्छिन्ना स्वजानुमण्डलं पाणिना त्रिः परामृश्य छोटिकावच्छिन्नः कालोमात्रा। ताभिः षट्त्रिंशन्मात्राभिः परिमितः प्रथम उद्घातो मन्दः। स एव द्विगुणीकृतो द्वितीयोमध्यमः स एव त्रिगुणीकृतस्तृतीय स्तीव्रः तममिमं सङ्ख्यापरिदृष्टं प्राणायाममाह सङ्ख्याभिरिति। स्वस्थस्य हि पुंसः श्वासप्रश्वासक्रियावच्छिन्नेन कालेन यथोक्तं छोटिकाकालसमानः प्रथमोद्घातकर्म्मतां नीतः उद्घातो विजितो वशीकृतो निगृहीतः क्षणानामियत्ताकालो विवक्षितः श्वास प्रश्वासेयत्तासंख्येति कथञ्चिद्भेदः। स खल्वयं प्रत्यहमभ्यस्तो दिवसपक्षमासादिक्रमेण देशकालप्रचयव्यापितया दीर्घः परमनैपुण्यसमधिगमनीयः तया च सूक्ष्मो नतु मन्दतया” विव०

“बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः” सूत्रम्

“देशकालसङ्ख्याभिर्बाह्यविषयः परिदृष्ट आक्षिप्तः। तथाभ्यन्तरविषयः परिदृष्ट आक्षिप्तः। उभयथा दीर्घसूक्ष्म तत्पूर्व्वको भूमिजयात्। क्रमेणोभयोर्गत्यभावश्चतुर्थः प्राणायामः। तृतीयस्तु विषयानालोचितो गत्यभावः सकृदारब्धएव देशकालसङ्ख्याभिः परिदृष्टो दीर्घसूक्ष्मश्चतुर्थस्तु श्वासप्रश्वासयोर्विषयावधारणात् क्रमेण भूमिजयादुभयाक्षेपपूर्व्वको गत्यभावश्चतुर्थः प्राणायामः इत्ययं विशेषइति” भाष्यम्

“एवं त्रयोविशेषा लक्षिताः चतुर्थं लक्षयति बाह्येति व्याचष्टे देशकालसङ्ख्याभिरिति आक्षिप्तोऽभ्यासवशीकृतादूर्ध्वादवरोपितः सोऽपि दीर्घसूक्ष्म एवं तत्पूर्व्वको बाह्याभ्यन्तरविषयः प्राणायामो देशकालसंख्यादर्शनपूर्व्वकः, न चासौ चतुर्थः तृतीयइव सकृत्प्रयत्नादह्नाय जायते किन्त्वभ्यस्यमानस्तां तामवस्थामापन्न। तत्तदवस्था

विजयानुक्रमेण भवतीत्याह भूमिजयादिति"।
"ननूभयोर्गत्यभावस्तम्भवृत्तावप्यस्तीति कोऽस्मादस्य विशेष इत्यत आह। तृतीय इति अनालोचनपूर्व्वं सकृत्प्रयत्ननिर्वर्त्तितस्तृतीयश्चतुर्थस्त्वालोचनपूर्वो बहुप्रयत्ननिर्वर्त्तनीय इति विशेषः। तयोः पूरकरेचकयोर्विषयो नालोचितोऽयं तु देशकालसङ्ख्याभिरालोचित इत्यर्थः" विवरणम्
"ततः क्षीयते प्रकाशावरणम्" सू०
"प्राणायामनभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म्म यत्तदाचक्षते। महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्वमावृत्य तदेवाकार्य्ये नियुङ्क्ते इति तदस्य प्रकाशावरणं कर्म्म संसारनिबन्धनं प्राणायामाभ्यासात् दुर्बलं भवति प्रतिक्षणं च क्षीयते। तथाचोक्तम् "तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति" किञ्च धारणासु च योग्यता मनसः प्राणायामाभ्यासादेव। "प्रच्छर्द्दनविधारणाभ्यां वा प्राणस्येति" वचनात्"भाष्यम्
"प्राणायामस्यावान्तरप्रयोजनमाह ततइति। आव्रियतेऽनेन बुद्धिसत्वप्रकाशइत्यावरणं क्लेशः पाप्मा च। व्याचष्टे प्राणायाममिति। ज्ञायतेऽनेनेति ज्ञानं बुद्धिसत्वप्रकाशः विवेकस्य ज्ञानं विवेकज्ञानमावृणोतीति विवेकज्ञानावरणीयं भव्यगेयप्रवचनीयादीनां कर्त्तरि निपातनस्य प्रदर्शनार्थत्वात् कोपनीयरञ्जनीयवत् अत्रापि कर्त्तरि कृत्यप्रत्ययः। कर्मशब्देन तज्जन्यमपुण्यं तत्कारणं क्लेशं लक्षयति अत्रैवागमिनामनुमतिमाह यत्तदाचक्षत इति। महामोहोरागः तदविनिर्भागवर्त्तिन्यविद्याऽपि तद्ग्रहणेन गृह्यते। अकार्य्यमधर्म्मः। ननु प्राणायामश्चेत् पाप्मानं क्षिणोति कृतं तर्हि तपसेत्यतआह दुर्बलं भवतीति न तु सर्वथा क्षीयते अतस्तत्प्रक्षयाय तपोऽपेक्ष्यते इति अत्राप्यागमिनामनुमतिमाह तथा चोक्तमिति। मनुरप्याह "प्राणायामैर्द्दहेद्दोषानिति" प्राणायामस्य योगाङ्गता विष्णुपुराणोक्ता "प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यः। प्राणायामः स विज्ञेयः सबीजोऽबीजएव च। परस्परेणाभिभवं प्राणापानौ यदाऽनिलौ। कुरुतस्तद्विधानेन तृतीयं संयमात्तयोः" इति किञ्च व्यासः "प्राणायामोहि मनः स्थिरीकुर्वन् धारणासु योग्यं करोति" विवरणम्" प्राणायामशब्दे विवृतिः
कुम्भमानमुक्तं हेमा० दा० ख० परिभाषाप्रकरणे भविष्यपुराणे "पलद्वयं तु प्रसृतं द्विगुणं कुड़वो मतः। चतुर्भिःकुड़वैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढ़कैस्तैश्चतुर्भिश्च द्रोणस्तु कथितोबुधैः। कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोड़श"। विष्णुधर्म्मोत्तरे "पलञ्च कुड़वः प्रस्थ आढ़को द्रोण एव च। धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः। द्रोणैः षोड़शभिः खारी विंशत्या कुम्भउच्यते। कुम्भैस्तु दशभिर्वाहो धान्यसंख्याः प्रकीर्तिताः"।
वैद्यकपरिभाषायां कर्षशब्दे दर्शितं "चतुर्भिराढकैर्द्रोणः कलसोनुल्वणोऽर्म्मणः। उन्मानञ्च घटोराशिर्द्रोणपर्य्याय संज्ञितः। द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः"भाव० प्र० वाक्यम्। कुम्भराशिस्तु धनिष्ठाशेषार्द्ध शतभिषापूर्व्वभाद्रपदात्रिपादात्मकः स च३६० अंशैर्विभक्तस्य राशिचक्रस्य ३००त्रिशतोत्तरत्रिंशदंशात्मकः। तस्य स्वरूपादिकमुक्तं नील०ता० "कुम्भोऽपदो ना दिनमध्यसङ्गप्रसूः स्थिरः कर्बूरवर्णवायुः। स्निग्धोष्णखण्डस्वरतुल्यधातुः शूद्रः प्रतीची विषनोदयश्च"। तस्य स्वामी शनिः। स च स्थिरराशिः "चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टा"इत्युक्तेः। स च पुष्कराख्यः"पुण्यश्च पुष्करश्चैव आधानाख्यस्तथैव च। सुत्याढ्त्त्या भवन्त्येते नित्यं द्वादश राशयः"ज्यो०त०। स च द्विपदराशिः। "मिथुनतुलाघटकन्या द्विपदाख्याश्चापपूर्व्वभागश्च" तत्रोक्तेः "द्विपदवशगाः सर्वे, सिंहं विहाय चतुष्पदाः, सलिलनिलया वश्या भक्ष्याः सरीसृपजातयः" तत्रैवोक्तेः तद्राशेः सिंहं विना सर्वे राशयोवश्या जलजरा भक्ष्याः। स च राहोर्मूलत्रिकोणम्। "उक्षं न्द्युग्मं घटभं त्रिकोणस्" इत्युक्तेः। तत्र तुलादितो नवांशा ग्राह्याः "चराणां सत्रिकोणानां तच्चराद्या नवांशका" इत्युक्तेः कुम्भापेक्षया तुलाराशेर्नवमत्वात्तस्य चरत्वाच्च तथात्वम् तस्य लङ्कायामुदयमानं उदयशब्दे ११२०पृ० दर्शितम्। देशभेदे तु भिन्नकालेनेति लग्नकालशब्दे विवृतिः।
११प्रह्लादपुत्रभेदे "प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत!। विशेषतश्च कुम्भश्च निकुम्भइति नामतः" भा० आ० ६५अ० "प्रह्लादोऽश्वशिराः कुम्भः संह्रादोग गनप्रियः" हरिवं० ४२अ०

कुम्भक पु० कुम्भ+स्वार्थे क.कुम्भ इव कायति प्रकाशते निश्चलत्वात् कै–क वा। प्राणयामाङ्गे वायुरोधन व्यापारभेदे कुम्भशब्दे विवृतिः। "कुम्भकोनिश्चल श्वासः"या०स्मृ०।

कुम्भकर्ण पु० कुम्भ इव कर्णोऽस्य । रावणानुजे राक्षसभेदे स च विश्रवसः कैकस्यां जातः तदुत्पत्तिकथा रामा० उत्त०का० सुमालिकन्यया कैकस्या अग्निहोत्रकाले सन्ध्यासमये पुत्रमभिलषन्त्या प्रार्थितेन विश्रवसा राक्षसयोनिपुत्रप्राप्तिरूपो वरोदत्तः। यथा “दारुणायां तु वेलायां यस्मात्त्वं मामुपस्थिता । शृणु तस्मात् सुतान् भद्रे ! यादृशान् जनयिष्यसि । दारुणान् दारुणाकारान् दारुणाभिजनप्रियान् । प्रसविष्यसि सुश्रोणि ! राक्षसान् क्रूरकर्म्मण” इत्युपक्रमे “एवमुक्ता तु सा कन्या राम ! कालेन केनचित् । जनयामास बीभत्सं रक्षोरूपं सुदारुणम् । दशग्रीवं महादंष्ट्रम् नीलाञ्जनचयोपमम् । ताम्रोष्ठं विंशतिभुजं महास्यं दीप्तमूर्द्धजम्” इति रावणोत्पत्तिमुक्त्वा “तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः । प्रमाणात् यस्य विपुलं प्रमाणं नेह विद्यते । ततः शूर्पनखा नाम संजज्ञे विकृतानना, विभीषणस्तु धर्म्मात्मा कैकस्याः पश्चिमः सुतः” इति । भा०व०१७४ अ० तु पुष्पोत्कटातस्तस्योत्पत्तिरुक्ता” यथा

“पुलस्त्यस्य तु यः क्रोधादर्द्धदेहोऽभवन्मुनिः। विश्रवा नाम सक्रोधः स वैश्रवणमैक्षत । बुबुधे तन्तु सक्रोधं पितरं राक्षसेश्वरः । कुबेरस्तत्प्रसादार्थं यतते स्म सदा नृप !॥ स राजराजो लङ्कायां निवसन्नरवाहनः। राक्षसीः प्रददौ तिस्रः पितुर्वै परिचारिकाः। ताः सदा तं महात्मानं सन्तोषयितुमुद्यताः। ऋषिं भरतशार्दूल! नृत्यगीतविशारदाः। पुष्पोत्कटा च राका च मालिनी च विशाम्पते!। अन्योन्यस्पर्द्धया राजन् ! श्रेयस्कामाः सुमध्यमाः। तासां स भगवांस्तुष्टो महात्मा प्रददौ वरान् । लोकपालोपमान् पुत्रानेकैकस्या यथेप्सितान् । पुष्पोत्कटायां जज्ञाते द्वौ पुत्रौ राक्षसेश्वरौ । कुम्भकर्णदशग्रीवौ बलेनाप्रतिमौ भुवि । मालिनी जनयामास पुत्रमेकं विभीषणम्। राकायां मिथुनं जज्ञे खरः शूर्पणखा तथा। विभीषणस्तु रूपेण सर्वेभ्योऽभ्यधिकोऽभवत् । स बभूव महाभागो धर्म्मगोप्ता क्रियारतिः। दशग्रीवस्तु सर्वेषां श्रेष्ठो राक्षसपुङ्गवः । महोत्साहो महावीर्य्यो महासत्वपराक्रमः । कुम्भकर्णो बलेनासीत् सर्वेभ्योऽभ्यधिको युधि । मायावी रणशौण्डश्च रौद्रश्च रजनीचरः” ।

तस्य ब्रह्मतोवरप्राप्तिरुक्ता रामा०उ० का०१० सर्गे यथा “इत्युक्ता कुम्भकर्णाय वरं दातुमवस्थितम्। प्रजापतिं सुराःसर्वे वाक्यंप्राञ्जलयोऽब्रुवन् । न तावत् कुम्भकर्णाय प्रदातव्योवरस्त्वया । जानीषे हि यथा लोकांस्त्रासयत्येष दुर्मनाः । नन्दनेऽप्सरसः सप्त महेन्द्रानुचरा दश । अनेन भक्षिता ब्रह्मन् ऋषयो मानुषास्तथा । अलब्धवरपूर्वेण यत् कृतं राक्षसेन तु । यद्येष वरलब्धःस्याद्भक्षयेद्भुवनत्रयम् । वरव्याजेन मोहोऽस्मै दीयताममितप्रभ !। लोकानां स्वस्ति चैवं स्यादस्य चेदस्य च संमतिः। एवमुक्तः सुरैर्ब्रह्माऽचिन्तयत्पद्मसम्भवः। चिन्तिता चोपतस्थेऽस्य पार्श्वं देवी सरस्वती । प्राञ्जलिः सा तु पार्श्वस्था प्राह वाक्यं सरस्वती। इयमस्म्यागता देव ! किं कार्यं करवाण्यहम् । प्रजापतिस्तु तां प्राप्तां प्राह वाक्यं सरस्वतीम् । वाणि ! त्वं राक्षसेन्द्रस्य भव वाग् देवतेप्सिता । तथेत्युक्त्वा प्रविष्टा सा प्रजापतिरथाब्रवीत् । कुम्भकर्ण! महाबाहो! वरं वरय योमतः। कुम्भकर्णस्तु तद्वाक्यं श्रुत्वा वचनमब्रवीत् । स्वप्तुं वर्षाण्यनेकानि देवदेव ! ममेप्सितम् । एवमस्त्विति तच्चोक्त्वा प्रायात् ब्रह्मा सुरैः समम् । देवी सरस्वती चैव राक्षसं तं जहौ पुनः । ब्रह्मणा सह देवेषु गतेषु च नभस्तलम् । विमुक्तोऽसौ सरस्वत्या स्वां संज्ञां च ततोगतः । कुम्भकर्णस्तु दुष्टात्मा चिन्तयामास दुःखितः । ईदृशं किमिदं वाक्यं ममाद्य वदनाच्च्युतम् । अहं व्यामोहितो देवैरिति मन्ये तदागतैः”

स च रामेण हत इति रामा० स्थितम् भारते तु लक्ष्मणेन निहत इति स्थितम् यथा भा० वन० २८६अ० “कुम्भकर्णो महेष्वासः प्रगृहीतशिलायुधः । अभिदुद्राव सौमित्रिमुद्यम्य महतीं शिलाम् । तस्यापि पततस्तूर्णं क्षुराभ्यामुच्छ्रितौ करौ । चिच्छेद निशिताग्राभ्यां स बभूव चतुर्भुजः । तानप्यस्य भुजान् सर्वान् प्रगृहीतशिलायुधान्। क्षुरैश्चिच्छेद लघ्वस्त्रं सौमित्रिः प्रतिदर्शयन् । स बभूवातिकायश्च बहुपादशिरोभुजः । तं ब्रह्मास्त्रेण सौमित्रिर्ददाराद्रिचयोपमम् । स पपात महावीर्य्यो दिव्यास्त्राभिहतो रणे । महाशनिविनिर्दग्धः पादपोऽङ्कुरवानिव । तं दृष्ट्वा वृत्रसङ्काशं कुम्भकर्णं तरस्विनम् । गतासुं पतितं भूमौ राक्षसाः प्राद्रवन् भयात्” ।

उत्पत्तौ बधे च विरोधस्तु कल्पभेदात् समाधेयः । स च विष्णुपारिषदविजयावतारः सनत्कुमारादिमुनिशापात् आसुरभावमापेदे तत्कथा भाग० अनुसन्धेया ।

कुम्भकामला स्त्री कुम्भाख्या कामला । भावप्र० उक्ते कामलारोगभेदे । “कामला बहुपित्तैषा कोष्ठशाखा

-त्रया मता" तत्र कोष्ठाश्रयां कामलामाह "कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला" अधिकं कामलाशब्दे १८६९पृ० उक्तम्। सुश्रुते तु कुम्भाह्वयमित्युक्तं यथा "सकामलापालकिपाण्डुरोगकुम्भाह्वयो लाघरकोऽलसाख्यः" इत्युपक्रम्य "वक्ष्यामि लिङ्गान्यथ कामलायाः" इत्युक्त्वा कामलालक्षणादिकमुक्त्वा च "भेदांस्तु तस्याः शृणु कुम्भमाह्वं प्रोक्तो महांस्तत्र च पर्वभेदैः" तेन कुम्भ इत्येव तस्या नामान्तरम्।

कुम्भकार पुंस्त्री कुम्भं करोति कृ—अण् उप० स०। (कुमार) १जातिभेदे अमरः। सा च जातिः "वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते" उशनसोक्ता ब्रह्मवैवर्त्ते तु "मालाकारात् चर्म्मकार्य्यां कुम्भकारो व्यजायत" इति "पट्टिकाराच्च तैलिक्यां कुम्भकारो बभूव ह" इति पुराणान्तरं तेन उत्तमाधमवर्णसङ्करत्वात् जातिभेदस्तु देशभेदेन व्यवस्थाप्यः। जातित्वात् स्त्रियां ङीष्। २कुम्भकारके त्रि० स्त्रियां टाप् सि० कौ० मुग्धबोधमते ततोऽपि ईप् तन्मते अण्प्रत्ययविधानात्। "यत् कुम्भकारपयनोपरिपङ्कलेपस्तापाय केवलमसौ न च तापशान्त्यै" उद्भटः ३कुक्कुभविहगे पुंस्त्री० हेम० स्त्रियां ङीष्।

कुम्भकारिका स्त्री कुम्भस्येव कार आकारोयस्याः कप् अतइत्वम्। १कुलत्थायाम् (कुर्थि कलाइ) राजनि० तस्यास्तदाकारत्वात् तथात्वम्। कुम्भं करोति कृ—ण्वुल्। कुम्भकारक कुम्भकर्त्तरि त्रि० स्त्रियां टाप् अतइत्वम्।

कुम्भकारी स्त्री कुम्भस्येव कार आकारोऽस्याः गौरा० ङीष्। १कुलत्थायाम् राजनि० २मनःशिलायां जटाध० कुम्भकारस्य कुलालस्य पत्नी ङीष् ३कुलालभार्य्यायाञ्च।

कुम्भकेतु पु० कुम्भः केतौ ध्वजे यस्य। शम्बरासुरसेनापतिभेदे "कुम्भकेतुः सुदंष्ट्रश्च केशिरित्येवमादयः" हरि० १६२अ०

कुम्भचक्र न० नर० ज० उक्ते चक्रभेदे। चक्रशब्दे विवृतिः।

कुम्भज पु० कुम्भाज्जायते जन—ड ५त०। १अगस्त्ये मुनौ कुम्भयोनिशब्दे विवृतिः। २वशिष्ठे मुनौ ३द्रोणाचार्य्ये च ४घटजाते त्रि० कुम्भजन्मकुम्भजातादयोऽप्यत्र।

कुम्भतुम्बी स्त्री कुम्भ इव तुम्बी। अलाबूभेदे राजनि० तद्गुणास्तत्रैवोक्ता यथा "मधुरा कुम्भतुम्बी तु शीता पित्तहरा मता। रुच्या ज्वरापहा प्रोक्ता श्वासकासकफास्रनुत्"

कुम्भदासी स्त्री कुम्भिकायां (पाना) शब्दरत्ना०

कुम्भनाभ पु० कुम्भ इव नाभिरस्य अच्समा०। बलिदैत्यपुत्रभेदे "बलेः पुत्रशतं त्वासीत् बाणज्येष्ठं नराधिप!। धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः। कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः" हरिव० २अ०

कुम्भपद्यादि बहुव्रीहौ पादशब्दान्त्यलोपङीष्निपातननिमित्ते शब्दगणभेदे स च गणः "कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रुपदी सूकरपदी शकृत्पदी अष्टपदी स्थूणपदी अपदी सूचीपदी"।

कुम्भपाद त्रि० कुम्भ इव स्फीतः पादोऽस्य कुम्भपद्या० स्त्रीत्वेन विशेषोक्तेर्नान्त्यलोपः। घटतुल्यपादयुक्ते श्लीपदरोगयुते स्त्रियां कुम्भपद्या० अन्त्यलोपः ङीष् च। कुम्भपदी इतिभेदः।

कुम्भमण्डूक पु० कुम्भे मण्डूक इव। कुम्भान्तर्गतत्वेऽतिमततया निन्द्ये। पात्रेसमितादित्वात् क्षेपेऽस्य समासः तेन नास्य समासान्तरघटकता। युक्तारोह्यादित्वात् आद्युदात्तोऽयम्।

कुम्भमुद्रा स्त्री "दक्षाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु। सावकाशामेकमुष्टिं कुर्य्यात्" कुम्भमुद्रिका सा तन्त्रसारोक्ते मुद्राभेदे कलसमुद्रादयोऽप्यत्र स्त्री

कुम्भयोनि पु० कुम्भः योनिरुत्पत्तिस्थानमस्य। १अगस्त्ये मुनौ "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः" रघुः। २वशिष्ठे मुनौ। तयोः यथा च तत उत्पत्तिस्तथाह रामा०उ०का० ८२अ० "अशरीरः शरीरस्य कृते न्यस्य महामुनिः। वशिष्ठस्तु महातेजा जगाम पितुरन्तिकम्। सोऽभिवाद्य ततः पादौ देवदेवस्य धर्म्मवित्। पितामहमथोवाच वायुभूतमिदं वचः। भगवन्निमिशापेन विदेहत्वमुपागमम्। देवदेव! महादेव! वायुभूतोऽहमण्डज!। सर्वेषां देहहीनानां महद्दुःखं भविष्यति। लुप्यन्ते सर्वकार्य्याणि हीनदेहस्य वै प्रभो!। देहस्यान्यस्य सद्भावे प्रसादं कर्त्तुमर्हसि। तमुवाच ततो ब्रह्मा स्वयम्भूरमितप्रभः। मित्रावरुणजं तेज आविश त्वं महायशः!। अयोनिजस्त्वं भविता तत्रापि द्विजसत्तम!। धर्म्मेण महता युक्तः पुनरेष्यसि मे वशम्। एवमुक्तस्तु देवेन अभिवाद्य प्रदक्षिणम्। कृत्वा पितामहं तूर्णं प्रययौ वरुणालयम्। तमेव कालं मित्रोऽपि वरुणत्वमकारयत्। क्षीरोदेन सहोपेतः पूज्यमानः सुरेश्वरैः। एतस्मिन्नेव काले तु उर्वशी परमाप्सराः। यद-

च्छया तदुद्देशमागता सखीभिर्वृता । तां दृष्ट्वा त्वप्सरसं क्रीडन्तीं वरुणालये । तदाऽऽविशत्परो हर्षो वरुणं चोर्वशीकृते । स तां पद्मपलाशाक्षीं पूर्णचन्द्रनिभाननाम् । वरुणो वरयामास मैथुनायाप्सरोवराम् । प्रत्युवाच ततः सा तु वरुणं प्राञ्जलिः स्थिता । मित्रेणाहं वृता साक्षात्पूर्वमेव सुरेश्वर!। वरुणस्त्वब्रवीद्वाक्यं कन्दर्पशरपीडितः । इदं तेजः समुत्स्रक्ष्ये कुम्भेऽस्मिन्देवनिर्मिते । एवमुत्सृज्य सुश्रोणि! त्वय्यहं वरवर्णिनि!। कृतकामो भविष्यामि यदि नेच्छसि सङ्गमम् । तस्य तल्लोकनाथस्य वरुणस्य सुभाषितम् । उर्वशी परमप्रीता श्रुत्वा वाक्यमुवाच ह । काममेतद्भवत्वेवं हृदयं मे त्वयि स्थितम् । भावश्चाप्यधिकं तुभ्यं देहो मित्रस्य तु प्रभो!। उर्वश्या एवमुक्तस्तु रेतस्तन्महदद्भुतम् । ज्वलदग्निसमप्रख्यं तस्मिन् कुम्भे न्यवासृजत् । उर्वशी त्वगमत् तत्र मित्रो वै यत्र देवता । तान्तु मित्रः सुसंक्रुद्ध उर्वशीमिदमब्रवीत् । मयाऽभिमन्त्रिता पूर्वं कस्मात्त्वमवसर्जिता । पतिमन्यं वृतवती किमर्थं दुष्टचारिणि!। अनेन दुष्कृतेन त्वं मत्क्रोधकलुषीकृता । मनुष्यलोकमास्थाय कञ्चित्कालं निवत्स्यसि" इति तस्य तस्यां शापमुक्त्वा

"यः स कुम्भो रघुश्रेष्ठ! तेजःपूर्णौ महात्मनोः । तस्मिंस्तेजोमयौ विप्रौ सम्भूतावृषिसत्तमौ । पूर्वं समभवत्तत्र अगस्त्यो भगवानृषिः । नाहं सुतस्तवेत्युक्त्वा मित्रं तस्मादपाक्रमत् । तद्धि तेजस्तु मित्रस्य उर्वश्याः पूर्वमाहितम् । तस्मिन् समभवत्कुम्भे तत्तेजो यत्र वारुणम् । कस्यचित्त्वथ कालस्य मित्रावरुणसंभवः । वशिष्ठस्तेजसा युक्तो जज्ञे इक्ष्वाकुदैवतम्" ।

अत्रैवमाख्यायिका प्रथममुर्वशीं मित्रो दृष्ट्वा तामामन्त्रितवान् तया च त्वन्निवासमागमिष्यामीत्युक्तस्तदा वरुणलोकस्य एव मित्रस्तद्दर्शनाद्धटस्खलितं निजतेजः कुम्भे उत्सृज्य स्वनिवासं जगाम पश्चाद्वरुणोऽपि तां दृष्ट्वा स्खलितं तेजः कुम्भे व्यसृजत् ततो मित्रनिवासं गता मित्रेण शप्ता चेति। रामा० श्लोकस्यायमर्थः नाहं सुतस्तवेति यद्यपि मित्रेणापि कुम्भे रेत उत्सृष्टं तथापि तवैकस्य पुत्रो न भवामीत्युक्त्वाऽप्याक्रामत्। एवमुक्तौ बीजमाह तद्धि तेज इति अगस्त्योत्पत्तिहेतुभूतं मित्रस्य तेजः पूर्वमुर्वशीनिमित्तवरुणवीर्यविसर्गात्पूर्वं माहितं यस्मिन् कुम्भे तस्मिन्नेव कुम्भे वारुणं तेजः समभवत् संगतमभवत् यत्र कुम्भे मित्रस्य तेज आसीत् अतस्तेजोन्तरसंगमादुत्पत्तेर्नैकस्य तव सुत इत्युक्तमगस्त्येन मित्रं प्रति ।

"अगस्त्यश्च वशिष्ठश्च मित्रावरुणयोर्ऋषी । रेतः सिषिचतोः कुम्भे उर्वश्याः सन्निधौ द्रुधा" भाग० ६।१८।५। २अप्सरोभेदे स्त्री "गोपाली सहजन्या च कुम्भयोनिः प्रजागरा" भा०व०४३अ० । ४द्रोणाचार्ये पु० तदुत्पत्तिकथा द्रोणशब्दे वक्ष्यते ५द्रोणपुष्पीवृक्षे पु०राजनि०

कुम्भरेतस् पु० अग्निभेदे । "हविषा यो द्वितीयेन सोमेन सह युज्यते । रथप्रभूरथध्वा च कुम्भरेताः स उच्यते" भा० व० २१८अ० अग्निवंशवर्णने । कुम्भस्थितं रेतः कारणमस्य । २अगस्त्ये ३वसिष्ठे मुनौ तयोर्यथा तथात्वं तथा कुम्भयोनिशब्दे उक्तम्

कुम्भला स्त्री कुम्भं कुम्भाकारं लाति ला—क । (मुण्डिरी) कुण्डीरिकालतायाम् रत्नमा०

कुम्भबि(वि)ल न० ६त० । कुम्भस्ये गर्त्ते अन्तोदात्तोऽयम्

कुम्भबीज पु०कुम्भ इव बीजमस्य (रीठा) करञ्जभेदे राजनि०

कुम्भशाला स्त्री कुम्भपाकार्थं शाला । (पोयान)(कुमारशाला) कलसपाकार्थे गृहे हेमच०

कुम्भसन्धि पु० कुम्भयोर्हस्तिशीर्षस्थमांसपिण्डयोः सन्धिः । आरघाख्ये हस्तिकुम्भमध्यस्थाने त्रिका०

कुम्भसम्भव पु० संभवशब्दात् सम्+भू—अपादानेऽप् कुम्भः सम्भवोऽस्य । १अगस्त्ये २वसिष्ठे ३द्रोणाचार्य्ये च तत्रागस्त्यवशिष्ठयोस्तत्तदुत्पत्तिकथा कुम्भयोनिशब्दे उक्ता

कुम्भसर्पिस् न० सुश्रुतोक्ते कलसे एकादशशतवर्षस्थापिते घृतभेदे "पुराणं तिमिरश्वासपीनसज्वरकासनुत् । मूर्च्छाकुष्ठविषोन्मादग्रहापस्मारनाशनम् । एकादशशतञ्चैव वत्सरानुषितं घृतम् । रक्षोघ्नं कुम्भसर्पिः स्यात् परतस्तु महाघृतम्" । [शब्दभा०

कुम्भा स्त्री कुत्सित इच्छया उम्भा पूर्त्तिरस्याः शक० । वेश्यायां

कुम्भाण्ड पु० कुम्भइवाण्डोऽस्य । बाणासुरस्य मन्त्रिभेदे "इत्येवमुक्तः प्रहसन् कुम्भाण्डमिदमब्रवीत्" हरिव० १७५अ० "एतस्मिन्नन्तरे तत्र कुम्भाण्डाय महात्मने कुम्भाण्ड! मन्त्रिणां श्रेष्ठ । प्रीतोऽस्मि तव सुव्रत! । एतद्दत्वाऽभयं तस्मै कुम्भाण्डाय महात्मने । शिवाहमकरोत् तत्र सोऽनिरुद्धस्य वीर्यवान्" हरिव० १८८अ० । स्वार्थे क । तत्रैव । सच कुष्माण्डे न० गौरकुष्माण्ड्याम् स्त्री राजनि०

कुम्भाधिप पु० ६त० । शनिग्रहे तस्य तदधिपत्वात् कुम्भाशीशादयोऽप्यत्र पु०

कुम्भिका स्त्री कुम्भस्तदाकारोऽस्त्यस्याः ठन् । (पाना)जलो-

रेजाते तृणभेदे अमरः। तत्पर्य्यायादि भावप्र० उक्तं यथा "वारिपर्णी कुम्भिका स्याच्छैवालं शैवलञ्च तत्। वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा कटुः। दोषत्रयहरी रुक्षा शोणितं ज्वरशोषहृत्"। २पाटलावृक्षे ३द्रोणपुष्प्याञ्च राजनि०। "वर्त्मान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च। कुम्भिकाबीजसदृशा कुम्भिकाः सन्निपातजाः" माधवोक्ते ४नेत्रवर्त्मस्थरोगभेदे सुश्रुते दीर्घमध्यत्वेनायं पठितः यथा "पृथग्दोषाः समस्ताश्च यदा वर्त्मव्यपाश्रयाः। सिरा व्याप्यावतिष्ठन्ते वर्त्मस्वधिकमूर्च्छिताः। विवर्द्ध्य मांसं रक्तञ्च तदा वर्त्मव्यपाश्रयान्। विकारान् जयन्त्याशु नामतस्तान्निबोधत। उत्सङ्गिन्यथ कुम्भीका पोथक्यो वर्त्मशर्करा" इत्युपक्रम्य कुम्भीकबीजप्रतिमाः पिडकाः पक्ष्मवर्त्मनोः। आध्मायन्ते तु भिन्ना याः कुम्भीकपिडकास्तु ताः"। तेन माधवग्रन्थे दीर्घमध्यपाठः समुचितः। कुम्भीकपिडकेत्यत्र पुंवद्भावश्चार्षः। कुम्भा—स्वार्थे क। ५वेश्यायाम् शब्दमाला६कट्फले भावप्र० कट्फलशब्दे तद्वाक्यादि

कुम्भिन् पुंस्त्री० कुम्भोऽस्त्यस्य इनि। १हस्तिनि २कुम्भीरे हेमच० स्त्रियां ङीप्। ३गुग्गुलौ जटा०। ४कलसधारिणि त्रि० स्त्रियां ङीप् "उदकं कुम्भिनीरिव" ऋ० १। १९१। १४। ङीवन्तः। ५जयपालवृक्षे राजनि० कुम्भिबीजं जयपालबीजमित्युक्तेः ६पृथिव्यां "गौरिलाकुम्भिनी चमेति" मा० २०,५४ श्लो० व्या० मल्लिनाथधृतकोषात्।

कुम्भिपाकी स्त्री कुम्भिना पाकोयस्याः गौरा०ङीष्। कट्फले भावप्र० शब्दकल्पद्रुमः भावप्र० कट्फलपर्य्याये कट्फलशब्दे दर्शिते तद्वाक्ये कुम्भिकाऽपिचेत्येव पाठः क्वचित् कुम्भिपाक्यपीति पाठः तन्मूलं मृग्यम्। [राजनि०

कुम्भिमद कुम्भिनः गजस्य मदः। हस्तिमदे गन्धद्रव्यभेदे

कुम्भिल पु० कु—उम्भ—इलच् शक०। १चौरे २स्लोकार्थचौरे ३शालमत्स्ये ५श्याले च हेमच०

कुम्भी स्त्री कुम्भ+अल्पार्थे ङीप्। १क्षुद्रे कुम्भे तदाकृतित्वात् २उखायां ३पाटलावृक्षे ४कुम्भिकायां वरिपर्ण्याम् (पाना) ५कट्फले च हेमच० कोङ्कणे प्रसिद्धे कुम्भीपुष्पे ६पर्पटवृक्षे; अस्य गुणाः "कुम्भी वातकफहरी" राजनि० ७दन्तीवृक्षे राजनि०। तत्र जातादि कच्छ्वा०ढकञ्। कौम्भेयक तत्र जातादौ त्रि०। कर्णादि० चतुरर्थ्यां फिञ्। ५कौम्भायनि तत्सन्निकृष्टदेशादौ त्रि०।

कुम्भीक पु० कुम्भीव कायति कै—क। १पुन्नागवृक्षे। रत्नमा० २कुम्भिकायां (पाना) कुम्भीकबीजप्रतिमाः" सुश्रुतः सुश्रुते अयं प्रियङ्ग्वादिगणे उक्तः यथा "प्रियङ्गुसमङ्गाधातकीपुन्नागरक्तचन्दनचन्दनमोचरससरसाञ्जनकुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूला चेति"। तत्र पुन्नागस्य पृथक्कीर्त्तनात् कुम्भिकापरत्वम्। सुश्रुते नेत्रवर्त्मस्थे ३रोगभेदे कुम्भिकाशब्दे तद्वाक्यमुदाहृतम् तत्रोक्ते ४शूकरोगोपद्रवभेदे च यथा "अथातः शूकदोषनिदानं व्याख्यास्यामः। लिङ्गवृद्धिमिच्छतामक्रमप्रवृत्तानां शूकदोषनिमित्ता दश चाष्टौ च व्याधयो जायन्ते। तद्यथा सर्षपिका, अष्ठीलिका, ग्रथितम्, कुम्भीका, अलजी, मृदितम्, सम्मूढपिडका, अवमन्थः, पुष्करीका, स्पर्शहानिः, उत्तमा, शतपोनकः, त्वक्पाकः, शोणितार्वुदम्, मांसार्वुदम्, मांसपाकः, विद्रधिः, तिलकालकश्चेति,, इति विभज्य तल्लक्षणमुक्तं यथा "कुम्भीका रक्तपित्तोत्था जाम्बवास्थिनिभाऽशुभा" "कुम्भिका रक्तपित्ताभ्यामिति भावप्र० ह्रस्वमध्यपाठस्तु लिपिकरप्रमादात्। ततः समूहे खलादि० इनि। तद्रोगसमूहे स्त्री "कुम्भीकिनीं शर्कराश्च तथैवोत्सङ्गिनीमपि" "कुम्भीकिनी सह शर्करया लेख्या" सुश्रुतः सुश्रुतोक्ते क्लीवभेदे पु० "स्वे गुदे ब्रह्मचर्य्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते कुम्भीकः स च विज्ञेयः। इत्युक्त्वा" "आसेक्यश्च सुगन्धी च कुम्भीकः सेर्ष्यकस्तथा। अरेतसः स्मृता ह्येते ऋ-शुक्रः षण्डसंज्ञितः" तल्लक्षणं तत्रोक्तम्।

कुम्भीधान्य(क) कुम्भीमितं धान्यमस्य वा कप्। वर्षभोग्यसञ्चितधान्ये गृहस्थभेदे "कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा।" मनुः "वर्षनिर्वाहोचितधान्यादिधनः कुम्भीधान्यः" "प्राक् सौमिकीः क्रियाः कुर्य्यात् यस्यान्नं वार्षिकं भवेदिति" याज्ञवल्क्येन गृहस्थस्य वार्षिकसञ्चयाभ्यनुज्ञानात्। मनुरपि यदा वानप्रस्थस्यैव "समानिचयएव वा" इत्यनेन समासञ्चयं वक्ष्यति तदपेक्षया बहुपोष्यवर्गस्य गृहिणः समुचितः संवत्सरसञ्चयः" कुल्लू०। मेधातिथिस्तु यावता धान्यादिधनेन बहुभृत्यदारादिमतः त्रिसंवत्सरस्थितिर्भवति तावत् सुवर्णादिधनवानपि कुशूलधान्यक इत्यभिधाय कुम्भी उष्ट्रिका षाण्मासिकधान्यादिनिचय. कुम्भीधान्यक इति व्याख्यातवान्। गोविन्दराजस्तु कुशूलधान्यक

इत्येतद्व्याचक्षाणः धान्यकोष्ठसञ्चयो वा स्यात् द्वादशाहमात्रपर्य्याप्तधनः इति कुम्भीधान्यक इत्येतद्व्याचष्टे। उष्ट्रिकाप्रमाणधान्यराशिसञ्चयो वा षडहमात्रपर्य्याप्तधनः इति”। तेन २तदर्थयोरपि

कुम्भीनस पु॰ कुम्भीव नसा नासायस्य। १ क्रूरसर्पे मेदि॰ २रावणमातृष्वस्रेयां लवणासुरजनन्यां स्त्री ङीष्। तदुत्पत्तेः तस्या मधुदैत्येन हरणस्य च कथा रामा॰ उत्तर॰ का॰ २५ अ॰ “विभीषणस्तु संक्रुद्धो भ्रातरं वाक्यमब्रवीत्। श्रूयतामस्य पापस्य कर्म्मणः फलमागतम्। मातामहस्य योऽस्माकं ज्येष्ठो भ्राता सुमालिनः। माल्यवानिति विख्यातो वृद्धः प्राज्ञो निशाचरः। पितृज्येष्ठो जनन्या नोऽस्माकं चार्य्यकोऽभवत्। तस्य कुम्भीनसी नाम दुहितुर्दुहिताऽभवत्। मातृष्वसुरथास्माकं सा च कन्याऽनलोद्भवा। भवत्यस्माकमेवैषा भ्रातॄणां धर्म्मतः स्वसा। सा हृता मधुना राजन् राक्षसेन बलीयसा। यज्ञप्रवृत्ते पुत्रे तु मयि चान्तर्जलोषिते। कुम्भकर्णे महाराज! निद्रामनुभवत्यथ। निहत्य राक्षसश्रेष्ठानमात्यानिह संमतान्। धर्षयित्वा हृता राजन्! गुप्ता ह्यन्तःपुरे तव। श्रुत्वापि तन्महाराज! क्षान्तमेव हतो न सः। यस्मादवश्यं दातव्या कन्या भर्त्रे हि भ्रातृभिः। तदेतत्कर्म्मणो ह्यस्य फलं पापस्य दुर्मतेः। अस्मिन्नेवाभिसंप्राप्तं लोके विदितमस्तु ते। विभीषणवचः श्रुत्वा राक्षसेन्द्रः स रावणः। दौरात्म्येनात्मनोद्धूततप्ताम्भा इव सागरः। ततोऽब्रवीद्दशग्रीवः क्रुद्धः संरक्तलोचनः। कल्प्यतां मे रथः शीघ्रं शूराः सज्जीभवन्तु नः। भ्राता मे कुम्भकर्णश्च ये च मुख्या निशाचराः। वाहनान्यधिरोहन्तु नानाप्रहरणायुधाः। अद्य तं समरे हत्वा मधुं रावणनिर्भयम्। सुरलोकं गमिष्यामि युद्धाकाङ्क्षी सुहृद्वृतः। अक्षौहिणीसहस्राणि चत्वार्य्यग्र्याणि रक्षसाम्। नानाप्रहरणान्याशु निर्ययुर्युद्धकाङ्क्षिणाम्। इन्द्रजित्त्वग्रतः सैन्यात् सैनिकान् परिगृह्य च। जगाम रावणो मध्ये कुम्भकर्णश्च पृष्ठतः। विभीषणश्च धर्म्मात्मा लङ्कायां धर्म्ममाचरत्। शेषाः सर्वे महाभागा ययुर्मधुपुरं प्रति। खरैरुष्ट्रैर्हयैर्दीप्तैः शिशुमारैर्महोरगैः। राक्षसाः प्रययुः सर्वे कृत्वाऽऽकाशं निरन्तरम्। दैत्याश्च शतशस्तत्र कृतवैराश्च दैवतैः। रावणं प्रेक्ष्य गच्छन्तमन्वगच्छन् हि पृष्ठतः। स तु गत्वा मधुपुरं प्रविश्य च दशाननः। न ददर्श मधुं तत्र भगिनीं तत्र दृष्टवान्। सा च प्रह्वाञ्जलिर्भूत्वा शिरसा चरणौ गता। तस्य राक्षसराजस्य त्रस्ता कुम्भीनसी तदा। तां समुत्थापयामास न भेतव्यमिति ब्रुवन्। रावणो राक्षसश्रेष्ठः किं चापि करवाणि ते। साऽब्रवीद्यदि मे राजन्! प्रसन्नस्त्वं महाभुज!। भर्त्तारं न ममेहाद्य हन्तुमर्हसि मानद!। नहीदृशं भयं किञ्चित्कुलस्त्रीणामिहोच्यते। भयानामपि सर्वेषां वैधव्यं व्यसनं महत्। सत्यवाग्भव राजेन्द्र! मामवेक्षस्व याचतीम्। त्वयाप्युक्तं महाराज! न भेतव्यमिति स्वयम्। रावणस्त्वब्रवीद्धृष्टः स्वसारं तत्र संस्थिताम्। क चासौ तव भर्त्ता वै मम शीघ्रं निवेद्यताम्। सह तेन गमिष्यामि सुरलोकं जयाय हि। तव कारुण्यसौहार्दान्निवृत्तोऽस्मि मधोर्वधात्”

तस्याः पतिपुत्रयोश्चरितवर्णनं रामा॰ उत्त॰ ६१अ॰ यथा “पूर्वं कृतयुगे राजन्दैतेयः सुमहामतिः। लोलापुत्रोऽभवज्ज्येष्ठो मधुर्नाम महासुरः। ब्रह्मण्यश्च शरण्यश्च बुद्ध्या च परिनिष्ठितः। सुरैश्च परमोदारैः प्रीतिस्तस्याऽतुलाऽभवत्। स मधुर्वीर्य्यसंपन्नो धर्म्मे च सुसमाहितः। बहुमानाच्च रुद्रेण दत्तस्तस्याद्भुतो वरः। शूलं शूलाद्विनिष्कृष्य महावीर्य्यं महाप्रभम्। ददौ महात्मा सुप्रीतो वाक्यं चैतदुवाच ह। त्वयाऽयमतुलो धर्म्मो मत्प्रसादकरः शुभः। प्रीत्या परमया युक्तो ददाम्यायुधमुत्तमम्। यावत् सुरैश्च विप्रैश्च न विरुध्येर्महासुर!। तावच्छूलं तवेदं स्यादन्यथा नाशमेष्यति। यश्च त्वामभियुञ्जीत युद्धाय विगतज्वरः। तं शूलो भस्मसात्कृत्वा पुनरेष्यति ते करम्। एवं रुद्राद्वरं लब्ध्वा भूय एव महासुरः। प्रणिपत्य महादेवं वाक्यमेतदुवाच ह। भगवन्! मम वंशस्य शूलमेतदनुत्तमम्। भवेत्तु सततं देव। सुराणामीश्वरो ह्यसि। तं ब्रुवाणं मधुं देवः सर्वभूतपतिः शिवः। प्रत्युवाच महादेवो नैतदेवं भविष्यति। मा भूत्ते विफला वाणी मत्प्रसादकृता शुभा। भवतः पुत्रमेकं तु शूलमेतद् गमिष्यति। यावत् करस्थः शूलोऽयं भविष्यति सुतस्य ते। अवध्यः सर्वभूतानां शूलहस्तो भविष्यति। एवं मधुर्वरं लब्ध्वा देवात् सुमहदद्भुतम्। भवनं सोऽसुरश्रेष्ठः कारयामास सुप्रभम्। तस्य पत्नी महाभागा प्रिया कुम्भीनसीति या। विश्वावसोरपत्यं साऽथ नलायां महाप्रभा। तस्याः पुत्रो महावीर्य्यो लवणो नाम दारुणः। बाल्यात् प्रभृति दुष्टात्मा पापान्येव समाचरत्। तं पुत्रं दुर्विनीतं तु दृष्ट्वा क्रोधसमन्वितः। मधुः स शोकमापेदे न चैनं किञ्चिदब्रवीत्। स विहाय इमं लोकं प्रवि-

ष्टीवरणानयम्। मूलं निवेश्य लवणे वरं तस्मै न्यवेदयत्। स प्रभावेण मूलस्य दौरात्म्येनात्मनस्तथा। सन्तापयति लोकांस्त्रीन्विशेषेण च तापसान्”। यथाह्रुः शत्रुघ्नेन हतः तत्कथा रामा॰उत्त॰ ६३अ॰। स (शत्रुघ्नः) सुभो-च महाघाणं लवणस्य महोरसि। उरस्तस्य “निर्भिद्याशु प्रविवेश रसातलम्”।

कुम्भीनसि पु॰ बलिदानवे “शम्बरस्य च या माया या माया नमुचेरपि। बलेः कुम्भीनसेश्चैव सर्व्वास्ता-योषितोविदुः” भा॰ आ॰ २२३८अ

कुम्भीपाक पु॰ नरकभेदे कारणसहितं तत्स्वरूपमुक्तं भाग॰ ५ २६ १६ “महारौरवः कुम्भीपाकः कालसूत्र इत्यष्टाविंशति नरकान् विभज्य “यस्त्विह वा उग्रः पशून् पक्षिणो वा प्राणे उपरन्धयति तमपकरुणं पुरुषादैरपि गर्हितममुत्र यमानुचराः कुम्भीपाके तप्त-तैले उपरन्धयन्ति” “करम्भवालुकातापान् कुम्भी पाकांश्च दारुणान्” मनुः। “स्तुतिवादमिमं मत्वा कु-म्भीपाके महीयते” प्रा॰त॰।

कुम्भीर पुंस्त्री॰ कुम्भिनं हस्तिनमपीरयति ईर—अण्। ज-लजन्तुभेदे नक्रे अमरः स्त्रियां ङीष्। “संयत्स्वगन्तु कुम्भी रस्ततोजायेत मानवः” भा॰अनु॰ १११अ॰। कर्म्मविपाक-शब्दे विवृतिः। [(कुमीरे पोका) कीटभेदे हारा॰।

कुम्भीरमक्षिका स्त्री कुम्भीरोपपदा मक्षिका शाक॰ त॰।

कुम्भीरासन न॰ “अथ वक्ष्ये महादेव! कुम्भीरासनमुत्त-मम्। पादोपरि पदं दत्त्वा शीर्षोपरि करद्वयम्। तिष्ठे-द्दण्डाकृतिर्भूमौ कुम्भीरासनमुच्यते” रुद्रया॰ उक्ते आसनभेदे

कुम्भील पुंस्त्री कुम्भीर+रस्य लः। कुम्भीरे अमरम ला स्त्रियां ङीष्। संज्ञायां क। चौरभेदे कुम्भिलशब्दार्थे

कुम्भीवीज न॰ ६त॰। जयपालहक्षवीजे राजनि॰।

कुम्भोदर पु॰ शिवपारिषदभेदे। “कुम्भोदरं नाम निकुम्भमि-त्रम्” रघुः। कुम्भतुल्यमुदरमस्य। तथोदरे त्रि॰स्त्रियां ङीष्

कुयव पु॰ कुत्सितेन यौति यु—अच्।” असुरभेदे “कुत्साय शुष्णं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा” ऋ॰४।१६।१२। “कुयवं कुयवनामासुरम्” भा॰“शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र। यदावधीः” ऋ॰ १,१०३,८। कुगतिस॰। २ कुत्सिते धान्ये “क्षीरेण स्नातः कुयवस्य योषे” ऋ॰ १। १०४।३। “पूर्वतरस्य मे कुयवश्च मे” “यजु॰ १८। ११ “कुयवं कुधान्यम्” वेददी प॰

कुयवाच् पु॰ असुरभेदे “नि दुर्योणे कुयवाचम्मृधि श्रेत्” ऋ॰ १। १७४।७। “कुयवागित्येतन्नामानमसुरम्” भा॰

कुर शब्दे तुदा॰पर॰अक॰सेट्। कुरति अकोरीत्। चुकोर कुरटः। [राजनि॰।

कुरका स्त्री कुर—क सदृव कायति कै—क। सल्लकीवृक्षे

कुरङ्कर पुंस्त्री कुरं शब्दं करोति कृ—अच् मु॰मुम्। सारस-पक्षिणि हेमच॰ स्त्रियां ङीष्

कुरङ्कुर पुंस्त्री॰ कुरमित्यव्यक्तं शब्दं कुरति कुर—क। सारसखगे हारा॰ स्त्रियां ङीष्।

कुरङ्ग पुंस्त्री॰ कौ रङ्गति—अच्। “कुरङ्ग ईषत्ताम्रः स्याद्ध-रिणाकृतिको महान्” इत्युक्तचिह्ने १मृगभेदे २मृगमात्रे अमरः स्त्रियां ङीष्। “कुरङ्गमातङ्गपतङ्गभृङ्ग-मीना हताः पञ्चभिरेव पञ्च। एकः प्रमादी स कथं न हन्यते यः सेवते पञ्चभिरेव पञ्च” भाग॰ व्या॰ श्रीधरः तन्मांसगुणा भावप्र॰ यथा “कुरङ्गो बृंहणोबल्यः शीतलः पित्तहृद्गुरुः। मधुरोवातहृत् ग्राही किञ्चित् कफकरोमतः। हरिणस्य गुणैस्तुल्यः कुरङ्गः कथितोबुधैः” २तारलोहे ३तीर्थभेदे न॰ “करतोयां कुरङ्गे च त्रिरात्रे ण्णेषितोनरः। अश्वमेधमवाप्नोति विगाह्य प्रयतः शुचिः’ भा॰ आनु॰ २५अ॰। स्वार्थे क। कुरङ्गक तत्रार्थे

कुरङ्गनयना स्त्री कुरङ्गस्येव नयनमस्याः। सुन्दरनेत्रायां स्त्रियां “किन्त्वेका यमुना कुरङ्गनयनानेत्राम्बुभिर्वर्द्धते” उद्भटः। कुरङ्गाक्ष्यादयोऽप्यत्र “कुरङ्गाक्षीवृन्दं तमनु-सरति प्रेम तरलम्” कर्पूरस्तवः।

कुरङ्गनाभि पु॰६त॰। मृगमदे गन्धद्रव्ये राजनि॰तस्य तन्नाभे-र्जातत्वादभेदोपचारात्तथात्वम् कस्तूरीशब्दे गुणाद्युक्तम्।

कुरङ्गम पुंस्त्री॰ कौ रङ्गं मिमीते मा—ड। हरिणभेदे कुरङ्गे मृगे त्रिका॰ स्त्रियां ङीष्। [राजनि॰

कुरङ्गिका स्त्री कौ—रङ्गोऽस्त्यस्य ठन्। मुद्गपर्ण्याम्

कुरचिल्ल पुंस्त्री॰ कुरे शब्दे चिल्लति चिल्ल—शैथिल्ये अच्। कर्कटे हेमच॰ स्त्रियां टाप्। [जातित्वात् ङीष्

कुरट पुंस्त्री॰कुर—अटन् कित्। चर्म्मकारे त्रिका॰ स्त्रियां

कुरण्ट(क) पु॰ कुर्य्यते शब्द्यते कुर—कर्म्मणि अण्टक्। पीतझिण्टाम् स्वार्थे क। तत्रार्थे अमरः।

कुरण्ड पु॰ कुर—अण्डक्। १शाकरण्डवृक्षे राजनि॰। २अण्डवृद्धिरोगे हेमच॰ तन्निदानादि माधवनिदा-नोक्तं यथा—

“क्रुद्धोऽनूर्द्ध्वगतिर्वायुः शोथशूलकरश्चरन्। मुष्कौ

–वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः। प्रपीड्य धमनी वृद्धिं करोति फलकोषयोः। दोषास्रमेदोमूत्रान्त्रैर्वृद्धिः सप्तधा गदः। मूत्रान्त्रजातावनिलाद्धेतुभेदस्तु केवलम्। वातपूर्णाङ्गतस्पर्शं रूक्षोवातादहेतुरुक्। पक्कोडुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान्। कफाच्छीतो गुरुः स्निग्धः कण्डूमान् कठिनोऽल्परुक्। कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः। कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः। मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः। अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः। मूत्रकृच्छ्रमधः स्याच्च चालयन् फलकोषयोः। वातकोपिभिराहारैः शीततोयावगाहनैः। धारणेरण भाराध्वविषमाङ्गप्रवर्त्तनैः। क्षोभणैः क्षुभितश्चान्यैः क्षुद्रान्त्रावयवं यदा। पवनो विगुणीकृत्य स्वनिवेशादधो नयेत्। कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा। उपेक्षमाणस्य च मुष्कवृद्धिमाध्मानरुक् स्तम्भवतीं स वायुः। प्रपीडितोऽन्तःस्वनवान् प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः। अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः"

कुरण्डक पु॰ कुरण्टक+पृषो॰। कुरण्टकवृक्षे रायमुकुटः

कुरर पुंस्त्री॰ कुङ् शब्दे क्ररन्। (कुरल) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष्। "तत्र मामनयद्दुःखः क्रोशन्तीं कुररीमिव" भा॰व॰अ॰६१०८ "देवीं रोदयमानां कुररीमिवार्त्ताम्" भा॰ स॰२३५१ क्षौषनः २मेषे हेमच॰।

कुरराङ्घ्रि पु॰ कुररस्याङ्घ्रिरिव। देवसर्षपे राजनि॰

कुररीरुता स्त्री॰ "कुररीरुता नजभजैर्लगयुक्" इत्युक्तलक्षणे चतुर्दशाक्षरपादके वर्णवृत्तभेदे। "अनतिचिरोज्झितस्य जलदेन चिरं स्थितबहुबुद्बुदस्य पयसोऽनुकृतिम्" माघः।

कुरल पुंस्त्री॰ कुरर+रस्य लः। स्वनामख्याते पक्षिभेदे स्त्रियां जातित्वात् ङीष्। २चूर्णकुन्तले पु॰ धरणिः।

कुरव पु॰ अल्पमकरन्दत्वात् कुत्सितो रवो यत्र। १रक्ताभिझिण्ट्याम्, २ कुरवके, शब्दर॰ ३सितमन्दारे च। कुगतिस॰। ४कुत्सितशब्दे। बहु॰। ५तथाशब्दयुक्ते त्रि॰। ततः स्वार्थे क। तत्रैवार्थेषु(कुडचि) इति ख्याते ६पुष्पवृक्षे। "कुरवकस्तवकव्यतिषङ्गिणीति" माघः।

कुरस पु॰कुत्सितोरसोऽत्र। १मद्यभेदे बहु॰। २कुत्सितरसयुक्ते त्रि॰। ३गोजिह्वालतायां स्त्री टाप्। कुगतिस॰। ४कुत्सिते रसे पु॰।

कुराह्व पुंस्त्री॰ कुलाह+लस्य रः। ईषत्पाण्डुवर्णे अश्वजातिभेदे हेमच॰। [भेदे राजनि॰।

कुरी स्त्री कुं भूमिं राति रा–क गौरा॰ ङीष्। तृणधान्य-

कुरीर न॰ "कुञ उञ्च" उणा॰ कीरन् उच्च। १मैथुने उज्ज्वलदत्तः। २शीर्षावयवभेदे च। "कुरीरमस्य शीर्षणि" अथ॰ ६,१३८,२, "स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः" ऋ॰ १०,८५,८,

कुरु पु॰कृ–कु उच्च। १चन्द्रवंश्ये आजमीढस्यप्रपौत्रे १राजभेदे "योऽजमीढसुतस्त्वन्य ऋक्षः संवरणस्ततः। तपत्यां सूर्यकन्यायां कुरुक्षेत्रपतिः कुरुः। परीक्षित् सुधनुर्जह्नुर्निषधश्च कुरोः सुताः" भाग॰ ९,२२,२, यथा च अस्य तपत्यासुद्भवः तथोक्तं भा॰ आ॰ १७४अ॰ "एवमासीत् महाभागा तपती नाम पौर्व्विकी। तव वैवस्वती पार्थ! तापत्यस्त्वं यथा मतः। तस्यां सञ्जनयामास कुरुं संवरणो नृपः। तपत्यां तपतां श्रेष्ठ! तापत्यस्त्वं ततोऽर्ज्जुन!"। कुरोर्निवासः जनपदे अणोलुप् लुपि व्यक्तिवद्वचनता। २तदीयनिवासदेशभेदे पु॰ भूम्नि। "कुरून् स्वपिति" सि॰ कौ॰। स च देशः वृ॰सं॰ १४ अ॰ कूर्मविभागे "साकेतकुरुकालकोटिकुकुराश्च पारिपात्रनगाः। औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम्" मध्यस्थतयोक्तं तत्सीमादि च "हस्तिनापुरमारभ्य कुरुक्षेत्रात् दक्षिणे। पञ्चालपूर्वभागे तु कुरुदेशः प्रकीर्त्तितः, इति शक्तिसङ्गमतन्त्रे उक्तम्। 'आ मत्स्येभ्यः कुरुपाञ्चालदेशयाः'भा॰क॰२०८श्लोकः। तेषां राजनि अञ् बहुषु तस्य लुक्। ३तद्देशराजे पु॰ भूम्नि "कुरूणां स्वश्रयानाच्च पुरोहित आस" शत॰ब्रा॰ २,५,"उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति" गीता। "श्रियः कुरूणामधिपस्य पालनीम्"किरा॰ तस्येदम् अण्। कौरव तदपत्ये पुंस्त्री "श्रुतात् स यस्त्वो जज्ञे कुरुः संवरणात्तथा। यः प्रयागमतिक्रम्य कुरुक्षेत्रञ्चकार ह। पुण्यञ्च रमणीयञ्च पुण्यकृद्भिर्निषेवितम्। तस्यान्ववायः सुमहान् यस्य नाम्ना स्म कौरवाः"हरिवं॰३२अ॰कुर्वा॰अपत्ये ण्य। कौरव्य तदपत्ये पुंस्त्री बहुषु तस्य लुक्। कश्चित् "कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलम्" वेणीसं॰। कौरव्ये साधवः यत्। कौरव्या इति तु माधवः। "स्त्रियामवन्तिकुन्तिकुरुभ्यः" इति स्त्रियां लुकि ऊङ्जातित्वादूङ् कुरूः। ४ओदने मेदि॰। ५कण्टकारिकायां शब्दच॰ ६प्रियव्रतराजपौत्रे ६आग्नीध्रराजसुतभेदे "तस्मादह वा आत्म

नान् स राजवर आग्नीध्रोनाभिकिंपुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नव पुत्रानजनयत्” भाग० ५स्क० २८अ० १९ श्लो० तत्पुत्रकुरुराज्यत्वेन ७उत्तरकुरुनामके तद्वर्षे च। तत्प्रमाणञ्च उत्तरकुरुशब्दे १०९४पृ०दर्शितम्। पुराणसर्व्वस्वे विष्णुपु०“नाभिश्च प्रथमं वर्षं ततः किंपुरुषं स्थितम्। हरिवर्षं तथैवान्यत् मेरोर्दक्षिणतः स्थितम्। रम्यकश्चोत्तरं वर्षं तथैवानु हिरण्मयम्। उत्तराः कुरवश्चैव यथा वै भारतं तथा। इलावृतञ्च तन्मध्ये सौवर्णोमेरुत्तमः”इति। अतस्तत्पुत्रनवकनाम्ना नवानां वर्षाणां ख्यातिरिति। तत्सन्निवेशादिकं तत्रैवोक्तं यथा

“भद्रा तथोत्तरगिरीनुत्तरांश्च तथा कुरून्। अतीत्योत्तरमम्भोधिं समभ्येति महामुने!। वङ्क्षुश्च पश्चिमगिरीनतीत्य सकलांस्ततः। पश्चिमं केतुमालाख्यं वर्षमभ्येति सार्णवम्। तथा चालकनन्दापि दक्षिणेनेत्य भारतम्। प्रयाति सागरं भूत्वा सप्तभेदा महामुने। आनील निषधायामौ माल्यवद्गन्धमादनौ। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्राणि लोकपद्मस्य मर्य्यादाश्चैव बाह्यतः। जठरोदेवकूटश्च मर्य्यादापर्व्वतावुभौ। तौ दक्षिणोत्तरायामावानीलनिषधायतौ। मेरोः पश्चिमदिग्भागे यथापूर्व्वौ तथा स्थितौ। त्रिशृङ्गोजारुधिश्चैव उत्तरे वर्षपर्व्वतौ। पूर्व्वपश्चायतावेतावर्णवान्तव्यवस्थितौ। इत्येते मुनिवर्य्योक्ता मर्य्यादापर्व्वतास्तव। जठराद्याः स्थिता मेरोर्येषां द्वौ द्वौ चतुर्द्दिशम्। मेरोश्चतुर्द्दिशं ये तु प्रोक्ताः केशरपर्वताः। शीतान्ताद्या मुने! तेषामतीवेह मनोरमाः। शैलानामन्तरद्रोण्यः सिद्धचारणसेविताः। सुरम्याणि तथा तेषु काननानि पुराणि च। लक्ष्मीविष्ण्वग्निसूर्य्यादि देवानां मुनिसत्तम!। तान्यायतनरम्याणि जुष्टानि वरकिन्नरैः। गन्धर्व्वयक्षरक्षांसि तथा दैतेयदानवाः। क्रीडन्ति तासु रम्यासु शैलद्रोणीष्वहर्निशम्। भौमाह्येते स्मृताः स्वर्गा धर्मिणामालया मुने!। नैतेषु पापकर्म्माणो यान्ति जन्मशतैरपि। भद्राश्वे भगवान् विष्णुरास्ते हयशिरा द्विज!। वराहः केतुमाले तु भारते कूर्म्मरूपधृक्। मत्स्यरूपश्च गोविन्दः कुरुष्वास्ते सनातनः। विश्वरूपेण सर्व्वत्र सर्व्वः सर्व्वेश्वरोहरिः। सर्वस्याधारभूतोऽसौ मैत्रेयास्तेऽखिलात्मकः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ महामुने!। न तेषु शोकोनोनायासो नोद्वेगः क्षुद्भयादिकम्। सुस्थाःप्रजा निरातङ्काः सर्व्वदुःखविवर्जिताः। दशद्वादशवर्षाणां सहस्राणि स्थिरायुषः। न तेषु वर्षवर्य्येषु भौमान्यम्भांसि तेषु वै। कृतत्रेतादिका नैव तेषु स्थानेषु कल्पना। सर्वष्वेतेषु वर्षेषु सप्त सप्त कुलाचलाः। नद्यश्च शतशस्तेभ्यः प्रसूता या द्विजोत्तम!”। विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः” किरा० त्यशादिकर्त्तरि त्रि० कुरुश्रयणशब्दे उदा०। [मूलके (मूलो) शब्दमाला।

कुरुकन्दक पुंन० कुरव इव विस्तीर्णः कन्दोऽस्य कप्।

कुरुकुल्ला स्त्री श्यामाशक्तिभेदे “काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी” श्यामाकवचम्

कुरुक्षेत्र न० कुरुणा चन्द्रवंश्यनृपभेदेन कृष्टं क्षेत्रम्, कुरुदेशान्तरगतं वा क्षेत्रम् शाक० मध्यपदलोपः। तीर्थभेदे तद्वृत्तिः भा० शल्य० ५३अ०

“ऋषय ऊचुः। प्रजापतेरुत्तरवेदिरुच्यते सनातनी राम! समन्तपञ्चकम्। समीजिरे तत्र पुरा दिवौकसो वरेण सत्रेण महावरप्रदाः। पुरा च राजर्षिवरेण धीमता बहूनि वर्षाण्यमितेन तेजसा। प्रकृष्टमेतत् कुरुणा महात्मना ततः कुरुक्षेत्रमितीह पप्रथे। राम उवाच। किमर्थं कुरुणा कृष्टं क्षेत्रमेतन्महात्मना। एतदिच्छाम्यहं श्रोतुं कथ्यमानं तपोधनाः!। ऋषय ऊचुः। पुरा किल कुरुं नाम कर्षन्तं सततोत्थितम्। अभ्येत्य शक्रस्त्रिदिवात् पर्य्यपृच्छत कारणम्। इन्द्र उवाच। किमिदं वर्त्तसे राजन्! प्रयत्नेन परेण च। राजर्षे। किमभिप्रेतं येनेयं कृष्यते क्षितिः। कुरुरुवाच। इह ये पुरुषाः क्षेत्रे मरिष्यन्ति शतक्रतो!। ते गमिष्यन्ति सुकृतान् लोकान् पापविवर्ज्जितान्। अवहस्य ततः शक्रो जगाम त्रिदिवं पुनः। राजर्षिरप्यनिर्विण्णः कर्षत्येव वसुन्धराम्। आगम्यागम्य चैवैनं भूयो भूयोऽवहस्य च। शतक्रतुरनिर्विण्णः पृष्ट्वा पृष्ट्वा जगाम ह। यदा तु तपसोग्रेण चकर्ष वसुधां नृपः। ततः शक्रोऽब्रवीद्देवान्राजर्षेर्यच्चिकीर्षितम्। एतच्छ्रुत्वाऽब्रुवन्देवाः सहस्राक्षमिदं वचः। वरेण च्छन्द्यतां शक्र! राजर्षिर्यदि शक्यते। यदि ह्यत्र प्रमीता वै स्वर्गं गच्छन्ति मानवाः। अस्माननिष्ट्वा क्रतुभिर्भागो नो न भविष्यति। आगम्य च ततः शक्रस्तदा राजर्षिमब्रवीत्। अलं खेदेन भवतः क्रियतां वचनं मम। मानवा ये निराहारा देहं त्यक्ष्यन्त्यतन्द्रिताः। युधि वा निहताः सम्यगपि तिर्य्यग्गता नृप!। ते स्वर्गभाजो

राजेन्द्र ! भविष्यन्ति महामते ! । तथाऽस्त्विति ततो राजा कुरुः शक्रमुवाच ह । ततस्तमभ्यनुज्ञाप्य प्रहृष्टेनान्तरात्मना । जगाम त्रिदिवं भूयः क्षिप्रं बलनिसूदनः । एवमेतद्यदुश्रेष्ठ ! कृष्टं राजर्षिणा पुरा । शक्रेण चाभ्यनुज्ञातं ब्रह्माद्यैश्च सुरैस्तथा । नातः परतरं पुण्यं भूमेः स्थानं भविष्यति । इह तप्स्यन्ति ये केचित् तपः परमकं नराः । देहत्यागेन ते सर्वे यास्यन्ति ब्रह्मणः क्षयम् । ये पुनः पुण्यभाजो वै दानं दास्यन्ति मानवाः । तेषां सहस्रगुणितं भविष्यत्यचिरेण वै । ये चेह नित्यं मनुजा निवत्स्यन्ति शुभैषिणः । यमस्य विषयं ते तु न द्रक्ष्यन्ति कदाचन । यक्ष्यन्ति ये च क्रतुभिर्महद्भिर्मनुजेश्वराः । तेषां त्रिविष्टपे वासो यावद्भूमिर्धरिष्यति । अपि चात्र स्वयं शक्रो जगौ गाथां सुराधिपः । कुरुक्षेत्रनिबद्धां वै तां शृणुष्व हलायुध ! । पांशवोऽपि कुरुक्षेत्राद्वायुना समुदीरिताः । अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् । सुरर्षभा ब्राह्मणसत्तमाश्च तथा नृगाद्या नरदेवमुख्याः । इष्ट्वा महार्हैः क्रतुभिर्नृसिंह ! संत्यज्य देहान् सुगतिं प्रपन्नाः । तरन्तुकारन्तुकयोर्यदन्तरं रामहृदानाञ्च मचक्रुकस्य । एतत् कुरुक्षेत्रसमन्तपञ्चकं प्रजापतेरुत्तरवेदिरुच्यते । शिवं महापुण्यमिदं दिवौकसां सुसंमतं सर्वगुणैः समन्वितम् । अतश्च सर्वे निहता नृपा रणे यास्यन्ति पुण्यां गतिमक्षयां सदा । इत्युवाच स्वयं शक्रः सह ब्रह्मादिभिस्तथा । तच्चानुमोदितं सर्वं ब्रह्मविष्णुमहेश्वरैः ।

"कुरुक्षेत्रे परीषहि स्थलेऽप्यग्न्याधेयमन्वारम्भणीयान्तं भवति" कात्या० २४।६।२४।

कुरुक्षेत्रं च ब्रह्मर्षिदेशः।"कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः" मनूक्तेः । इदं संवरणसुतकुरुनृपराज्यान्तर्गतमत स्तन्नाम्ना प्रथितम् अतएव कुरुशब्ददर्शिते भाग०वाक्ये "कुरुक्षेत्रपतिं कुरुमित्युक्तम् । भा० आ०९४अ० । "ततः संवरणाद्देवी तपती सुषुवे कुरुम् । राजत्वे तं प्रजाः सर्वा धर्म्मज्ञ इति मेनिरे । तस्य नाम्नाऽभि विख्यातं पृथिव्यां कुरुजाङ्गलम् । कुरुक्षेत्रं स तपसा पुण्यं चक्रे महातपाः" इति ।

कुरुक्षेत्रस्थतीर्थमहात्म्यं भा०व०८३अ० उक्तं यथा "ततो गच्छेत राजेन्द्र ! कुरुक्षेत्रमभिष्टुतम् । पापेभ्यो यत्र मुच्यन्ते दर्शनात् सर्वजन्तवः । कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् । य एवं सततं ब्रूयात् सोऽपि पापैः प्रमुच्यते । पांशवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः । अपि दुष्कृतकर्म्माणं नयन्ति परमां गतिम् । दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च । ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिपिष्टपे । तत्र मासं वसेद्वीर ! सरस्वत्यां युधिष्ठिर ! । यत्र ब्रह्मादयो देवा ऋषयः सिद्धचारणाः । गन्धर्व्वाप्सरसो यक्षाः पन्नगाश्च महीपते ! । ब्रह्मक्षेत्रं महापुण्यमभिगच्छन्ति भारत ! । मनसाप्यभिकामस्य कुरुक्षेत्रं युधिष्ठिर ! । पापानि विप्रणश्यन्ति ब्रह्मलोकञ्च गच्छति । गत्वा हि श्रद्धया युक्तः कुरुक्षेत्रं कुरूद्वह ! । फलं प्राप्नोति च तदा राजसूयाश्वमेधयोः । ततो मचक्रुकं नाम द्वारपालं महाबलम् । यक्षं समभिवाद्यैव गोसहस्रफलं लभेत् । ततो गच्छेत धर्म्मज्ञ विष्णोः स्थानमनुत्तमम् । सततं नाम राजेन्द्र ! यत्र संनिहितो हरिः । तत्र स्नात्वा च नत्वा च त्रिलोकप्रभवं हरिम् । अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति । ततः पारिप्लवं गच्छेत्तीर्थं त्रैलोक्यविश्रुतम् । अग्निष्टोमातिरात्राभ्यां फलं प्राप्नोति भारत ! । पृथिवीतीर्थमासाद्य गोसहस्रफलं लभेत् । ततः शालूकिनीं गत्वा तीर्थसेवी नराधिप ! । दशाश्वमेधे स्नात्वा च तदेव फलमाप्नुयात् । सर्पदेवीं समासाद्य नागानां तीर्थमुत्तमम् । अग्निष्टोममवाप्नोति नागलोकञ्च विन्दति । ततो गच्छेत धर्म्मज्ञ द्वारपालं तरन्तुकम् । तत्रोष्य रजनीमेकां गोसहस्रफलं लभेत् । ततः पञ्चनदं गत्वा नियतो नियताशनः । कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत् । अश्विनोस्तीर्थमासाद्य रूपवानभिजायते । ततो गच्छेत धर्म्मज्ञ वाराहं तीर्थमुत्तमम् । विष्णुर्वराहरूपेण पूर्वं यत्र स्थितोऽभवत् । तत्र स्नात्वा नरश्रेष्ठ ! अग्निष्टोमफलं लभेत् । ततो जयन्त्यां राजेन्द्र सोमतीर्थं समाविशेत् । स्नात्वा फलमवाप्नोति राजसूयस्य मानवः । एकहंसे नरः स्नात्वा गोसहस्रफलं लभेत् । कृतशौचं समासाद्य तीर्थसेवी नराधिप । पुण्डरीकमवाप्नोति कृतशौचो भवेच्च सः । ततो मुञ्जवटं नाम स्थाणोः स्थानं महात्मनः । उपोष्य रजनीमेकां गाणपत्यमवाप्नुयात् । तत्रैव च महाराज ! यक्षिणीं लोकविश्रुताम् । स्नात्वाभिगम्य राजेन्द्र ! सर्व्वान् कामानवाप्नुयात् । कुरुक्षेत्रस्य तद्द्वारं विश्रुतं भरतर्षभ ! । प्रदक्षिणमुपावृत्य तीर्थसेवी समाहितः । सम्मितं पुष्कराणाञ्च स्नात्वार्च्य पितृदेवताः । जामदग्न्येन रा-

येण क्षतन्तत् सुमहात्मना । क्षतक्षयो भवेद्राजन्नश्वमेधञ्च विन्दति । ततो रामह्रदान् गच्छेत् तीर्थसेवी समाहितः । तत्र रामेण राजेन्द्र ! तरसा दीप्ततेजसा । क्षत्रमुत्साद्य वीरेण ह्रदाः पञ्च निवेशिताः । पूरयित्वा नरव्याघ्र ! रुधिरेणेति विश्रुतम् । पितरस्तर्पिताः सर्वे तथैव प्रपितामहाः । ततस्ते पितरः प्रीता राममूचुर्नराधिप ! । पितर ऊचुः । राम ! राम ! महाभाग ! प्रीताः स्म तव भार्गव ! । अनया पितृभक्त्या च विक्रमेण च ते प्रभो ! । वरं वृणीष्व भद्रं ते किमिच्छसि महाद्युते । एवमुक्तः स राजेन्द्र ! रामः प्रहरतां वरः । अब्रवीत् प्राञ्जलिर्वाक्यं पितॄन् स गगनेस्थितान् । भवन्तो यदि मे प्रीता यद्यनुग्राह्यता मयि । पितृप्रसादमिच्छेयं तप आप्यायनं पुनः । यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया । ततश्च पापान्मुच्येयं युष्माकं तेजसाप्यहम् । ह्रदाश्च तीर्थीभूता मे भवेयुर्भुवि विश्रुताः । एतच्छ्रुत्वा शुभं वाक्यं रामस्य पितरस्तदा । प्रत्यूचुः परमप्रीता रामं हर्षसमन्विताः । तपस्ते वर्द्धतां भूयः पितृभक्त्या विशेषतः । यच्च रोषाभिभूतेन क्षत्रमुत्सादितं त्वया । ततश्च पापान्मुक्तस्त्वं निहतास्ते स्वकर्मभिः । ह्रदाश्च तव तीर्थत्वं गमिष्यन्ति न संशयः । ह्रदेष्वेतेषु यः स्नात्वा पितॄन् सन्तर्पयिष्यति । पितरस्तस्य वै प्रीता दास्यन्ति भुवि दुर्लभम् । ईप्सितञ्च मनःकामं स्वर्गलोकञ्च शाश्वतम् । एवं दत्त्वा वरान् राजन् ! रामस्य पितरस्तदा । आमन्त्र्य भार्गवं प्रीत्या तत्रैवान्तर्हितास्ततः । एवं रामह्रदाः पुण्या भार्गवस्य महात्मनः । स्नात्वा ह्रदेषु रामस्य ब्रह्मचारी शुभव्रतः । राममभ्यर्च्य राजेन्द्र ! लभेद्बहु सुवर्णकम् । वंशमूलकमासाद्य तीर्थसेवी कुरूद्वह ! । स्ववंशमुद्धरेद्राजन् ! स्नात्वा वै वंशमूलके । कायशोधनमासाद्य तीर्थं भरतसत्तम ! । शरीरशुद्धिः स्नातस्य तस्मिंस्तीर्थे न संशयः । शुद्धदेहश्च संयाति शुभाल्लोकाननुत्तमान् । ततो गच्छेत धर्मज्ञ ! तीर्थं त्रैलोक्यविश्रुतम् । लोका यत्रोद्धृताः पूर्वं विष्णुना प्रभविष्णुना । लोकोद्धारं समासाद्य तीर्थं त्रैलोक्यपूजितम् । स्नात्वा तीर्थवरे राजन् ! लोकानुद्धरते स्वकान् । श्रीतीर्थञ्च समासाद्य स्नात्वा नियतमानसः । अर्च्चयित्वा पितॄन् देवान् विन्दते श्रियमुत्तमाम् । कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः । तत्र स्नात्वार्च्चयित्वा च पितॄन् स्वान् दैवतान्यपि । कपिलानां सहस्रस्य फलं विन्दति मानवः । सूर्यतीर्थं समासाद्य स्नात्वा नियतमानसः । अर्च्चयित्वा पितॄन् देवानुपवासपरायणः । अग्निष्टोममवाप्नोति सूर्यलोकञ्च गच्छति । गवां भवनमासाद्य तीर्थसेवी यथाक्रमम् । तत्राभिषेकं कुर्वाणो गोसहस्रफलं लभेत् । शङ्खिनीतीर्थमासाद्य तीर्थसेवी कुरूद्वह ! । देव्यास्तीर्थे नरः स्नात्वा लभते वीर्य्यमुत्तमम् । ततो गच्छेत राजेन्द्र ! द्वारपालं करन्तुकम् । तच्च तीर्थं सरस्वत्यां यक्षेन्द्रस्य महात्मनः । तत्र स्नात्वा नरो राजन्नग्निष्टोमफलं लभेत् ॥” “धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि” हारा० २देवयजनस्थाने “कुरुक्षेत्रेऽमी देवा यज्ञं तन्वते” शत०ब्रा० ४।१।५।१२ । “तेषां कुरुक्षेत्रं देवयजनं यस्मादाहुः कुरुक्षेत्रं देवानां देवयजनं तस्माद्यत्र क्व च कुरुक्षेत्रस्य निगच्छति तदेव मन्यते इदं देवयजनमिति तद्धि देवानां देवयजनम्” शत० ब्रा० १४।१।१।२ अस्मिन् पक्षे च कुरु देवयज्ञाधारभूतं क्षेत्रम् आधारे कर्त्तृत्वोपचारात् कर्त्तरि कुप्रत्यय इति मन्तव्यम् । ३अविमुक्ते क्षेत्रे च । देवयजनपरताऽविमुक्तपरता चास्य “धर्म्मक्षेत्रे कुरुक्षेत्रे” इति गीताव्या० नीलकण्ठेन समर्थिता यथा “तत्र वेदे तेषां कुरुक्षेत्रं देवयजनमासेति” कर्मकाण्डप्रसिद्धं कुरुक्षेत्रमन्यत् “अविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्म सदनम्” इत्यविमुक्ताख्यं ब्रह्मप्राप्तिस्थानभूतं कुरुक्षेत्रमन्यत् ब्रह्मसदनत्वं चास्य “अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति” वाक्यशेषेण व्युत्पादितम् एतद्व्यावृत्त्यर्थं धर्म्मक्षेत्रे इति विशेषणं कुरुदेशान्तरगतं हि कुरुक्षेत्रं धर्म्मक्षेत्रमेव न तु तत् ब्रह्मसदनं प्रथमकाण्डे तस्य धर्म्मक्षेत्रत्वमात्रश्रवणात्”

कुरुक्षेत्रीयोग पु० एकस्मिन् वासरे तिथिनक्षत्रयोगानां त्रयरूपे ज्यो० उक्ते १योगभेदे । २कुरुक्षेत्रे मृत्युसूचके ग्रहयोगभेदे च । “सद्ग्रहयुते मृत्यौ लग्नरंश्रे बृहस्पतौ । सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्” जातकाम्हते योगाध्यायः ।

कुरुजाङ्गल न० जङ्गलमेव जाङ्गलं कुरुषु जाङ्गलम् । १कुरुक्षेत्रे “तस्य नाम्नाऽभिविख्यातं पृथिव्यां कुरुजाङ्गलम् । कुरुक्षेत्रं स(कुरुः) तपसा पुण्यं चक्रे महातपाः” भा०आ०६४ अ० “यदा परीक्षित् कुरुजाङ्गले वसन्” भाग०१,१६,११, कुरवश्च जाङ्गलाश्च द्व० । “कुरुदेशे जाङ्गलदेशे च पुं भूम्नि “कथमाचक्षितः पौरैः

संप्राप्तः कुरुजाङ्गलान्'' भाग० १,४,७, कुरवो जाङ्गलाश्च देशभेदाः''श्रीधरः'' । कुरवश्च जाङ्गलश्च "विशिष्टलिङ्गो नदीदेशोऽग्रामतः'' पा०समा० एकवद्भावे कुरुजाङ्गलम् । २तत्समाहारे न०

[चरकभाके राजनि० ।

कुरुट पु० कुत्सितं रोटति रुट--दीप्तिप्रतिघाते क । सिता-

कुरुण्ट पु० कुत्सितं रुण्टति रुटि--स्तेये अच् । पीतभि-ण्ट्याम् पीताम्लाने मेदि० । स्वार्थे क । तत्रार्थे अमरः

कुरुण्टी स्त्री कु+रुटि--स्तेये अच् गौरा० ङीष् । १दारु पुत्तलिकायां मेदि० । २भाण्डय्यां जटा०

कुरुत पु० कुर--बा०उतक् । वंशनिर्म्मिते छत्त्राकारे पात्रभेदे यस्य पादोऽस्य हस्त्या० नान्त्यलोपः । कुरुतपादइत्येव ।

कुरुतीर्थ न० भारतप्रसिद्धे तीर्थभेदे तच्च तीर्थं "यत्र ब्र-ह्मादिभिर्देवैर्ऋषिभिश्च तपोधनैः । सैनापत्येन देवाना-मभिषिक्तो गुहस्तदा । तैजसस्य च पूर्व्वेण कुरुतीर्थं कुरूद्वह ! कुरुतीर्थे नरः स्नात्वा ब्रह्मचारी जितेन्द्रियः । सर्व्वपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते'' भा० व०८३अ० उक्तम् ।

[छायामल्लायां नद्याम् ।

कुरुनदिका स्त्री यथाल्पिका नदी कुरुनदिकेत्युच्यते इत्यु-

कुरुपिशङ्गिला स्त्री कुरु इत्यनुकरणशब्दकरणेन मूलाव-यवभक्षिकायां गोधायाम् "कईमरे पिशङ्गिला कईं कुरु-पिशङ्गिला'' इति प्रश्ने "अजारे पिशङ्गिला श्वावित् कुरुपिशङ्गिला'' यजु० २३।५५।५६। उत्तरम् "श्वावित् गोधा कुरुपिशङ्गिला । कुरुशब्दानुकरणे पिश--अवयवे इति धातोरिगुपधेति कप्रत्ययः कुरु इति शब्दानुकुर्व्वाणा पिशान् मूलाद्यवयवान् गिलति । पिशङ्गिला मूला-नि शतं कृत्वा स्थापयति शतश्च भक्षयतीति गोधायाः स्वभावः'' वेददीपः ।

कुरुम्ब न० कुर--बा० उम्बच् । (कमलालेबु) १कुलपालके जम्बीरभेदे शब्दच० । २द्रोणपुष्प्यां स्त्री० टाप् राजनि० गौरा० ङीप् । सैंहलीदृत्ते राजनि० । स्वार्थे क तत्रार्थे

कुरुराज् पु० कुरुषु राजते राज--क्विप् । दुर्योधने त्रिका० कुरूणां राजा टच्समा० । कुरुराजोऽप्यत्र

कुरुल पु०कुर+उलक् । ललाटस्थे चूर्णकुन्तले हेमच०

कुरुवक पु० कु+रु--क--कुत्सितं रवोभ्रमरो यत्र कप् । १रक्तझिण्ट्याम् अमरः २पीतझिण्ट्यां हेम०

कुरुवर्ष न० कुरुसंज्ञकं वर्षम् । जम्बुद्वीपस्थे उत्तरकुरु-संज्ञके वर्षभेदे उत्तरकुरुशब्दे १०९४पृ० विवृतिः

कुरुविन्द पु० कुरून् मूलकारणत्वेन विन्दति विद--श मुचा०

दिस्वात् नुम् । १मुस्तायाम् अमरः २माषे राजनि० ३ काचलवणे ४माणिक्यरत्ने न० राजनि० । ५कुरुविल्वरत्ने ६कुल्माषे व्रीहिभेदे मेदि० ७दर्पणे ८हिङ्गुले च न० शब्दार्थचि०

कुरुबिल्व पु०कुरुषु बिल्वइव । १पद्मरागमणौ त्रिका० संज्ञायां क । कुरुबिल्वक कुल्माषे (वनकुरथि) रत्नमा०

कुरुविस्त पु० कुरुषु विख्यातः विस्तः । स्वर्णपले अमरः

कुरुवृद्ध पु० कुरवो जनपदानां राजानः तद्राजस्य तद्धितस्य बहुषु लुक् तेषु कुरुषु वृद्धः । भीष्मे । "तस्य संजनयन् हर्षं कुरुवृद्धः पितामहः'' गीता ।

कुरुश्रवण त्रि० कुरवः यज्ञकर्त्तारः तेषां श्रवणः स्तोतृणां श्रोता श्रु--नन्द्या ल्यु । ऋत्विजां स्तुतिश्रोतरि "कुरुश्रवण मावृणि राजानं त्रासदस्यवम् ऋ०१०,३३अ० "कुरुश्रवण ! ददतो मघानि'' ऋ० १०।३३।९ । हे कुरुश्रवण ! कुरवः ऋत्विजः तेषां स्तुतीनां श्रोतः !'' भा०

कुरूटिनी स्त्री किरीटिनी+वेदे पृषो० । किरीटयुक्तायां से-नायाम् "वाहिनी विश्वरूपा कुरूटिनी अथ० १०,१,१५

कुरूप्य न० ईषत् रूप्यं शुभ्रत्वेन सादृश्यात् । १रङ्गनामके धातौ राजनि० कोः पृथिव्याः कुस्थानात् वा आगत रूप्यप् । पृथिव्याः कुस्थानाद्वा २आगते त्रि०

कुर्कुट पुंस्त्री०कुरित्यव्यक्तं शब्दं कुटति कुट--क । कुक्कुटे हारा० "श्वानः कुर्कुटचण्डालाः समस्पर्शाः प्रकीर्त्तिताः । रासभोष्ट्रौ विशेषेण तस्मात्तान्नैव संस्पृशेत्'' पञ्चत० स्त्रियां जातित्वात् ङीष्

[भे खगे स्त्रियां ङीष्

कुर्कुटाहि पु० कुर्कुटतुल्यमहन्ति अह--इन् । कुर्कुटा

कुर्कुर पुंस्त्री० कुरित्यव्यक्तं शब्दं कोरति कुर--क । कुक्-कुरे शब्दसुकुटः "कुर्कुराविव कूजन्तौ'' अथ०७,९५,२, "उपकर्त्तुमपि प्राप्तं निःस्वं मन्यन्ति कुर्कुरम्'' पञ्चत० ।

कुर्चिका स्त्री कूर्चिका पृषो० । कूर्चिकाशब्दार्थे अमरटीका

कुर्सञ्ज पु० कलञ्जनवृत्ते गन्धमूले राजनि० ।

कु(कू)र्द क्रीडायां भ्वा० आत्म० अक० सेट् । कु(कू)र्दते अकु(कू)र्दिष्ट चुकु(कू)र्दे । अर्थवत्परिभाषया न-कुरछुरामिति निषेधाप्रवृत्तावपि दीर्घमध्यान्तरपाठसाम-र्थ्यात् रेफे परे न दीर्घः इति सूचितम् । तेन कुर्द्द-नमित्यादौ न दीर्घः ।

[अमरः ।

कु(कू)र्दन न० कु(कू)र्द--भावे ल्युट् । क्रीडायां (कोंदा)

कु(कू)र्पर पु०कुर--क्विप् कुः पिपर्त्ति अच् परः कर्म्म० । १जा-नुनि, २कफोणौ च । मेदि० दीर्घमध्यपाठान्तरे नि०दीर्घः

कु(कू)र्पास पुंन० कुर्परे अस्यते आस्ते वा अस् घञ् । स्त्रीणां

कञ्चुलिकायां (कांचुली) स्वार्थे क । गतैवार्थे । "प्रस्वेदवारिसविशेषविषक्तमङ्गे कु(कू)र्पासकं क्षतनखक्षतकुत्क्षिपन्ती" माघः । "मनोज्ञकु(कू)र्पासकपीडितस्तना" रत्ना० [३कर्त्तरि त्रि० । स्त्रियां ङीप् ।

कुर्व्वत् पुंस्त्री कृ-शतृ । १चर्म्मकारे २भृत्ये त्रि० हेम० ।

कुर्व्वद्रूप पु० कुर्व्वत् फलोन्मुखं रूपं यस्य । बौद्धमतसिद्धे फलजननाय योग्ये धान्यादौ वीजे । स च बौद्धमते आतशयात्मा सहकारिभिराधीयते इति स्थितम् यथा "अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयते इत्यभ्युपगम्यते तर्हि प्राचीनभावोऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्व्वद्रूपादिपदवेदनीयो जायत इति" सर्व्वदर्शनसं० । क्षणिकशब्दे बौद्धशब्दे च विवृतिः ।

कुर्व्वाण त्रि० कृ-शानच् । १भृत्ये २कारके च शब्दचि० ।

कुर्व्वादि पु०अपत्ये ण्यप्रत्ययनिमित्ते पाणिन्युक्ते शब्दगणभेदे "स च गणः कुरु गर्गर मङ्गुष अजमार रथकार वावदूक (सम्राजः क्षत्रिये) कवि विमति कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रलाजी एजि वातकि दामोष्णीषि गणकारि कैशोरि कुट शलाका मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी (वेणा छन्दसि) शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यङ्कार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाकम् शाकिन् शालीन कर्त्तृ हर्त्तृ इन पिण्डी (वामरथस्य कण्वादिवत् स्वरवर्जम्) कौरव्य

कुल बन्धे संहतौ च भ्वा०पर०अक० सेट् । कोलति अकोलीत् चुकोल । कुलम् । वंशएवास्य प्रयोग इति वदन् दुर्गादासः आकुलः सङ्कुलइत्यादिप्रयोगमपश्यन् परास्तः । आ+व्यग्रतायाम् चञ्चलतायाम् । आकोलति "किमेतदित्याकुलमीक्षितं जनैः" माघः "उदपतद्दिवमाकुललोचनैः" भट्टिः ।

सम्+सङ्कीर्णतायाम् सङ्कुल युद्धम् भा०द्रो०प० । "अलिकुलसंकुलकुसुमनिराकुलेत्यादि" जयदेवः । "शङ्खकुलाकुलेन" माघः ।

कुल न० कुल-क, कुङ् शब्दे कर्म्मणि बा० लक्, कुं भूमिं लाति ला-क, कौ भूमौ लीयते "अन्येभ्योऽपि" पा०ड० यथायथम् व्युत्पत्तिः । १जनपदे देशे । मध्यमहलद्वयेन यावती भूमिः कृष्यते तावत्यां २भूमौ "दशी कुलन्तु भुञ्जीत" मनुः । "अष्टागवं धर्म्महलं षड्गवं जीवितार्थिनाम् । चतुर्गवं गृहस्थानां द्विगवं ब्रह्मघातिनाम्" हारीतस्मरणात् "षड्गवं मध्यमं हलमिति तथाविधहलद्वयेन यावती भूमिः कृष्यते तावद्भूमिः कुलमित्युच्यते कुल्लू० । ३गोत्रे ४वंशे । ५सजातिगणे विप्रकुलम् पक्षिकुलम् । खगकुलाय कुलायनिलायिताम् माघः तत्र सत्कुलधर्म्माश्च "आचारो विनयो विद्या प्रतिष्ठा-तीर्थदर्शनम् । निष्ठा वृत्तिस्तपोदानं नवधा कुललक्षणम्" । अभियुक्तोक्ताः तस्य नाशकधर्म्माश्च कूर्म्म पु०१५अ०उक्ता यथा "गोभिश्च घोटकैर्विप्र ! कृष्या राजोपसेवया । कुलान्यकुलतां यान्ति यानि हीनानि वृत्ततः । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण वै । अनृतात् पारदार्य्याच्च तथाऽभक्ष्यस्य भक्षणात् । अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम् । अश्रोत्रियेषु वेदानां वृषलेषु तथैव च । विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्" ।

मनुना तु कुलनाशवृद्ध्योः कारणमुक्तं यथा "शोचन्ति जामयो यत्र विनश्यत्याशु तत् कुलम् । न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा । जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः । तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च । सन्तुष्टो भार्य्यया भर्त्ता भर्त्रा भार्य्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् । यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्त्तते । स्त्रियान्तु रोचमानायां सर्वं तद्रोचते कुलम् । तस्यान्त्वरोचमानायां सर्व्वमेव न रोचते । कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च । शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । अयाज्ययाजनैश्चैव नास्तिक्येन च कर्म्मणाम् । कुलान्याशु विनश्यन्ति यानि हीनानि मन्त्रतः । मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसङ्ख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः" ।

कुलरक्षार्थंविवाह विषये त्याज्यकुलानि मनुनोक्तानि यथा "महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः । स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्ज्जयेत् । हीनक्रियं निष्पुरुषं निश्छन्दोरोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च" । ६गृहे ७देहे च दन्त्ये ४थे त्रि० मेदि० । "जीवप्रकृतितत्त्वञ्च दिक्कालाकाशमेव च । क्षित्यप्तेजोवायवश्च कुलमित्यभिधीयते" तन्त्रोक्तेषु ८जीवादिषु ९कु-

लिके शिल्पिकुलप्रधाने पु० भरतः। कुले भवः यत् कुल्य ख। कुलीन; ढकञ्। कौलेयक कुलोद्भवे त्रि० अश्वादि० चतुरर्थ्यां यः। कुल्य कुलसन्निकृष्टदेशादौ त्रि० बलादि० देशे मतुप् मस्य वः। कुलवत् कुलयुक्ते त्रि० स्त्रियां ङीप् कुलवती तत्र सजातीयसंघे "यस्याश्वलक्षारिधिवारिवीचिच्छटोच्छलच्छङ्खकुलाकुलेन" माघः अलिकुलसङ्कुलेत्यादि जयदेवः पृथिव्याधारे मूलाधारे लीयते—ली+ड। ११कुलकुण्डल्यां स्त्री उपचारात् तदुपासके तन्त्रोक्ते १२आचारविशेषयुक्ते कुलाचाराधिकारेणैव कुलचन्द्रिका कुलक्रमदीपिका कुलचूडामणिकुलार्णवादयस्तन्त्रग्रन्थाः १३भूमिलग्ने च त्रि०। १४तन्त्रोक्ते तिथिनक्षत्रवारभेदे त्रि० कुलतिथिकुलनक्षत्रकुलवारशब्दे कुलाचारशब्दे च विवृतिः।

कुलक न० कुल—क कौ लीयते ली—ड वा ततः संज्ञायां कन्। १पटोललतायां २परस्परसंबद्धश्लोकपञ्चके च मेदि० "कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम्" सा०द०। ३काकेन्दौ पु०अमरः ४वल्मीके पु०। ५कुलश्रेष्ठे त्रि०मेदि० ६मरुवकवृक्षे पु०रत्नमा०। ७हरितसर्पे पुंस्त्री० राजनि०। ८कुपीलौ पु० माधव०। ९शिल्पिकुलप्रधाने त्रि० भरतः।

कुलकर्कटी स्त्री नित्यकर्म०। चीनकर्कट्यां राजनि०।

कुलकुण्डलिनी स्त्री कौ पृथिवीतत्त्वाधारे मूलाधारे लीयते ली—ड कर्म०। तन्त्रोक्ते मूलाधारे सर्पीवदवस्थिते शिवशक्तिभेदे कुलकुण्डलीत्यप्यत्र स्त्री। तत्स्वरूपादिकं शारदायामुक्तम् यथा "तत्र चैतन्यरूपा सा सर्वगा विश्वरूपिणी। शिवसन्निधिमासाद्य नित्यानन्दगुणोदया। दिक्कालाद्यनवच्छिन्ना सर्ववेदार्थगा शुभा। परापरविभागेन परशक्तिरियं स्मृता। योगिनां हृदयाम्भोजे नृत्यन्ती नित्यमञ्जसा। आधारे सर्वभूतानां स्फुरन्ती विद्युदाकृतिः। शङ्खावर्त्तक्रमाद्देवी सर्वमावृत्य तिष्ठति। कुण्डलीभूतसर्पाणामङ्गश्रियमुपेयुषी। शुषिता सर्वगात्रेषु कुण्डली परदेवता। विश्वात्मना प्रबुद्धा सा सूते मन्त्रमयं जगत्। सर्वदेवमयी देवी सर्वमन्त्रमयी शिवा। सर्वतत्त्वमयी साक्षात् सूक्ष्मा सूक्ष्मतरा विभुः। त्रिधामजननी देवी सोमसूर्य्याग्निरूपिणी। त्रिभेदतेजसां कर्त्री शब्दब्रह्मस्वरूपिणी। द्विचत्वारिंशद्वर्णा सा पञ्चाशद्वर्णरूपिणी"। विवृतमेतत् पदार्थादर्शे राघवभट्टेन यथा "कुण्डलिनीत उत्पत्तिमाह तत्रेत्यादिनेति। तदुक्तं "मूलाधारात् प्रथममुदितोयस्तु भावः पराख्यः पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ् मध्यमाख्यः। वक्त्रे वैखर्य्यथ रुरुदिषोरस्य जन्तोः सुषुम्णाबद्धस्तस्माद्भवति पवनप्रेरितोवर्णसंघः"। ततः शरीरोत्पत्त्यनन्तरं चैतन्यरूपा अतएव शब्दब्रह्ममयी सा देवी कुण्डली परदेवता सर्वगात्रेषु शुषिता अतएव विश्वात्मना सर्वात्मना प्रबुद्धा जातप्रबोधा मन्त्रमयं जगत् सूत इति दूरेण सम्बन्धः। तत्र मूलाधारे कुण्डलीभूतसर्पवन्नाडी वर्त्तते तन्मध्ये वायुवशादस्याः सञ्चरणमेव शुषणम्। चैतन्यरूपेति स्वरूपाख्यानं सा प्रसिद्धा सर्वमावृत्य तिष्ठतीत्यनेन कर्त्तृव्याप्तिर्दर्शिता विश्वरूपिणीत्यनेन विषयव्याप्तिः। शिवसन्निधिमासाद्य स्थितेति शेषः अनेन शैवसिद्धान्ते शक्तिशब्दवाच्येयमित्युक्तं सन्निधिशब्दोऽप्यौपचारिक. उच्यते शिवशक्त्योरभेदात् तदुक्तमभिनवगुप्तपादाचार्य्यैः "शक्तेश्च शक्तिमद्रूपाद्व्यतिरेकं न वाञ्छति। तादात्म्यमनयोर्नित्यं वह्नि "दाहकयोरिव"। यद्वा सम्यक्सन्निधिस्वरूपं शिवस्वरूपं प्राप्येत्यर्थः वक्ष्यति च "पिण्डभावेत् कुण्डलिनी शिवात्मेति" गुणानां सत्वरजस्तमसामुदयोयस्याः सा नित्यानन्दा चासौ गुणोदया च सा नित्यानन्दगुणोदया तेन कुण्डलिनीस्वरूपमुक्त्वा गुणोदयेत्यनेन साङ्ख्यमते प्रकृतिवाच्येयमित्युक्तं यदाहुः "प्रधानमिति यामाहुर्या शक्तिरिति कथ्यते" इति इदानीमध्यात्माधिभूताधिदैवादि शिवयादिव्योतिषक्रमेण तस्या व्याप्तिमाह दिक्कालेति सर्वदेहानुगेति देहव्याप्तिः परापरविभागेन काचन परा शक्तिः काचनापरा तद्विभागेनापीयं परशक्तिरेव यदाहुः "भूमिरापोऽनलोवायुः खं मनोबुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् जीवभूतां महाबाहो। ययेदं धार्य्यते जगत्" (गीता)। यद्वा परः स्थूलः अपरः महास्थूलः महदादिः तद्विभागेन परशक्तिः स्थूला शक्तिः स्थूलात् स्थूलेत्युक्तेः। अनेन महदादिव्याप्तिः यद्वा सर्वदेहानुगेत्यनेन प्राकृतशब्दतोर्थतश्च पुंस्त्रीनपुंसकलिङ्गव्याप्तिर्दर्शित शब्दतो यथा शिव इत्युच्यते कुण्डलिनीत्युच्यते प्रधानमिति एवंभूतापि सा स्त्रीत्वेनैव निर्दिश्यत इत्याह परापरेति परा पुंप्रकृतिः अपरं नपुंसकप्रकृतिस्तद्विभागेन इयं परशक्तिःस्मृता अयमर्थः यद्यपि लिङ्गत्रयवाच्या तथापि तूर्णमेयःप्रबलभक्तिभारपरिश्रान्तभक्तजनसमस्ताकाङ्क्षाकल्पवल्ली परशक्तिशब्दवाच्येति। अत एव शुभा रमणीया यदाहुराचार्य्याः" पुंनपुंसकयोस्तुल्याभिव्यञ्जनायां वि-

शिष्यत” इति नित्यक्लिन्नाम्नायेऽपि “सर्व्वत्वावच्छिन्ना-प्येषा कामिनीषु विशेषतः। प्रकाशते ततस्तासामतिहर्त्तिं न कारयेदिति” अञ्जसा तत्त्वेन योगिनां हृदयाम्भोजे नृत्यन्तीत्यस्य तैरेव गुरूपदेशेन ज्ञायते इत्यर्थः। “इयत्रा तैरेव सा देवी सदा देशकदेशितैरित्युक्तेः सर्व्वभूतानाम् आधारे मूलाधारचक्रे स्फुरन्ती अनेन स्थाननिर्द्देशः विद्युदाकृतिरित्यनेन ध्यानमुक्तं यदाहुः“तड़ित्कोटिप्रख्यां स्वरुचिजितकालानलरुचिमिति” अथ वाऽनेन अनेकधर्म्मोत्पत्तिहेतुत्वेनानेकधा भवतीत्यु॰ ॰ङ्खमध्ये य आवर्त्तः स यथा शङ्खमध्यमाहृत्य तिष्ठति तद्वदियमपि देवीत्यर्थः। इदमवान्तरवाक्यं भिन्नमेव शङ्खेति कुण्डलीत्यनयोर्हि तद्धेतुमद्भावेन योजना। कुण्डलीभूता कुण्डलाकारतां प्राप्ता ये सर्पा तथाभूता। केचन कुण्डलीति भिन्नं पदं वर्णयन्ति भूतानि सर्पाश्च ते यथा कुटिलगतयस्तद्वदियमपीत्यर्थः इति तत्र कुण्डली परदेवतेत्यनेन पुनरुक्तिः। सर्व्वदेवमयीति देवव्याप्तिः दीव्यतीति देवी तेजोरूपेत्यर्थः अनेन तेजोव्याप्तिः। सर्व्वमन्त्रमयीति मन्त्रव्याप्तिः। शिवा शिवरूपेत्यर्थः यद्वा शिवा कल्याणरूपा। साक्षात् सर्व्वतत्त्वमयीति तत्त्वव्याप्तिः। सूक्ष्मा सूक्ष्मतरा विभुरिति विरोधः परिहारस्तु सूक्ष्मा स्वरूपतः सूक्ष्मतरा दुर्ज्ञाना यद्वा सूक्ष्मात् त्रसरेणोरपि सूक्ष्मतरा अणुतरा अनेना-ण्वादिव्याप्तिर्द्दर्शिता तदुक्तं “बालाग्रस्य सहस्रधा विदलितस्यैकेन भागेन या सूक्ष्मत्वात् सदृशी त्रिलो जननीति”विभुः इयत्तया प्रात्तमशक्या। त्रिधामेति सूर्य्यसोमाग्निरूपा। यद्वा त्रिधामेति स्थानत्रयं पातालभूस्वर्गरूपा अनेन स्थानव्याप्तिर्द्दर्शिता द्विचत्वारिंशद्वर्णात्मा मूर्त्तिभिमन्त्रमयी पञ्चाशद्वर्णरूपिणीति मातृकामयी”।

तस्या ध्यानादिकमुक्तं प्रयोगसारे यथा

“मूलाधारे कुण्डलिनीं ध्यात्वा संपूजयेन्नरः। ध्यानं तस्याः प्रवक्ष्यामि येन योगी प्रजायते। प्रसुप्तभुजगाकारां स्वयम्भूलिङ्गमाश्रिताम्। विद्युत्कोटिप्रभां देवीं विचित्रवसनान्विताम्। शृङ्गारादिरसोल्लासां सर्व्वदा कारणप्रियाम्। एवं ध्यात्वा कुण्डलिनीं ततोयजेत् समाहितः। मनसा गन्धपुष्पाद्यैः संपूज्य वाग्भवं जपेत्। ततोवै तोषयेत्ताञ्च स्तवेनानेन साधकः।“रुद्रजामले” अथ प्रातः समुत्थाय पशुरुत्तमपण्डितः। गुरूणां चरणाम्भोजं मङ्गलं शीर्षपङ्कजे। विभाव्य पुनरेवं हि श्रीपदं भावयेद्धृदि। पूजयित्वा च विविधैरुपचारैर्नमेत् स्तवैः। त्रैलोक्यं तेजसा व्याप्तां मण्डलस्थां महोत्सवाम्। तड़ित्कोटिप्रभादीप्तिं चन्द्रकोटिसुशीतलाम्। सार्द्धत्रिवलयाकारां स्वयम्भूलिङ्गवेष्टिताम्। उत्थापयेन्महादेवीं महावक्त्रां मनोन्मनीम्। श्वासोच्छ्वासादुद्गच्छन्तीं द्वादशाङ्गुलरूपिणीम्। योगिनीं खेचरीं वायुरूपां मूलाम्बुजस्थिताम्। चतुर्व्वर्णस्वरूपां तां वकारादिकसान्तकाम्। कोटिकोटिसहस्रार्ककिरणोज्ज्वलमोहिनीम्। महासूक्ष्मपथप्रान्तरन्तरान्तरगामिनीम्। त्रैलोक्यरचितां वाक्यदेवतां शब्दरूपिणीम्। महाबुद्धिप्रदां देवीं सहस्रदलगामिनीम्। महासूक्ष्मपथे तेजोमयीं मृत्युस्वरूपिणीम्। कालरूपां ब्रह्मरूपां सर्व्वत्र सर्व्वचिन्मयीम्। ध्यात्वा पुनःपुनः शीर्षे सुधाब्धौ विनिवेशिताम्। सुधापानं कारयित्वा पुनःस्थाने समानयेत्। समानयनकाले तु सुषुम्णामध्यमध्यके। अमृताभिप्लुतां कृत्वा पुनःस्थानेषु पूजयेत्। ऊर्द्ध्वोद्गमनकाले तु महातेजोमयीं स्मरेत्। प्रतिप्रयाणकाले तु सुधाधाराभिराप्लुताम्। कुलकुण्डलिनीं देवीं ममृतानन्दविग्रहाम्। ध्यात्वा ध्यात्वा पुनर्ध्यात्वा सर्व्वसिद्धीश्वरोभवेत्। तस्मिन् स्थाने महादेवीं त्रिमर्त्त्य किरणोज्ज्वलाम्। अमृतानन्दमूर्त्तिं तां पूजयित्वा शुभां सदा। मानसोच्चारबीजेन मायां वा कामबीजकम्। पञ्चाशद्वर्णमालाभिर्जप्त्वानुलोमतस्तथा। विलोमेन पुनर्जप्त्वेति”

कुलक्क पुं॰ कु+लक्क—आप्तौ भावे घञ्। करताल्याम् हारा॰।

कुलक्षया स्त्री कुलस्य क्षयोयस्याः। १स्तूकशिम्ब्याम् शब्द-चि॰ ६त॰। २कुलनाशे पुं॰। “कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम्”। “कुलक्षये प्रणश्यन्ति कुलधर्म्माः सनातनाः” गीता।

कुलघ्न त्रि॰ कुलं हन्ति हन—टक्। वंशघातके। “सङ्करो-नरकायैव कुलघ्नानां कुलस्य च। पतन्ति पितरोह्येषां लुप्तपिण्डोदकक्रियाः। दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः। उत्साद्यन्ते जातिधर्म्माः कुलधर्म्माश्च शाश्वताः। उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन!। नरके नियतं वासोभवतीत्यनुशुश्रुमः” गीता। तत्र यथोत्तरं कार्य्यमुक्तं तत्रैव “कुलक्षये प्रणश्यन्ति कुलधर्म्माः सनातनाः। धर्म्मे नष्टे कुलं कृत्स्नमधर्म्मोऽभिभवत्युत। अधर्म्माभिभवात् कृष्ण! प्रदुष्यन्ति कुलस्त्रियः। स्त्रीषु दुष्टासु वार्ष्णेय! जायते वर्णसङ्करः। सङ्करोनरकायैव कुलघ्नानां कुलस्य च” एतदुत्तरं कुलघ्नशब्दे दर्शितम्

कुलज त्रि॰ कुले सत्कुले जायते जन–ड । १सत्कुलोद्भवे । २कुलपालिकायां स्त्री टाप् शब्दरत्ना॰

कुलञ्ज पु॰ कुं पृथिवीं रञ्जयति रञ्ज–णिच् अण् रस्य लः । कुलञ्जनवृक्षे राजनि॰नन्द्या॰ल्यु । कुलञ्जनोऽप्यत्र “कुलञ्जनः कटुस्तिक्तः उष्णश्च दीपनस्तथा । मूत्रदोषविनाशी च” राजनि॰ तद्गुणा उक्ताः

कुलटा स्त्री॰ कुलात् कुलान्तरं व्यभिचारार्थमटति अट–अच् शक॰ । व्यभिचारिण्यां स्त्रियाम् । या तु भिक्षार्थं कुलमटति सा कुलाटा इति तत्र न शक॰ । इति भेदः

कुलटी स्त्री कुत्सितं रट्यते रट–भाषणे घञर्थे क गौरा॰ ङीष् रस्य लः । मनःशिलायां रत्नमा॰

कुलतन्तु पु॰ कुलस्य तन्तुरिव । कुलावलम्बने “मया च सत्यवत्या च कृष्णेन च महात्मना । समवस्थापितं भूयो युष्मासु कुलतन्तुषु” भा॰आ॰ ११०अ॰

कुलतिथि स्त्री द्वितीयाषष्ठीदशमीभिन्नासु समतिथिषु चतुर्थ्यष्टमीद्वादशीचतुर्द्दशीषु यथोक्तं तन्त्रसा॰ “द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् । विषमाश्चाकुलाः सर्व्वाः शेषाश्च तिथयः कलाः”

कुलत्थ पु॰कुलं भूलग्नं सत् तिष्ठति स्था–क पृषो॰। १कलायभेदे (कुलत्थकलाइ) २वनकुलत्थे स्त्री टाप् रत्नमा॰ । तत्पर्य्यायादि भावप्र॰ उक्तं

“कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ । कुलत्थः कटुकः पाके कषायः रक्तपित्तकृत् । लघुर्विदाही वीर्य्योष्णः श्वासकासकफानिलान् । हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् । स्वेदसंग्राहको मेदोज्वरकृमिहरः परः । ” भावप्र॰ कुलत्थिकेति निर्द्देशात् स्त्रीत्वमपि सा च उपचारात् ३तद्रुत्याञ्जने ४वनकुलत्थायां च स्त्री राजनि॰ “कुलाली लोचनहिता चक्षुष्या कुम्भकारिका लुलत्थिकेति” राजनि॰ वनकुलत्थापर्य्याये उक्तेः । स्वार्थे क । तत्रैवार्थे राजनि॰ कुलत्थे भावप्र॰ संज्ञायां कन् । कुलत्थाञ्जनाकारप्रस्तरभेदे अमरः ।

कुलत्थाञ्जन न॰ कुलत्थया कृतमञ्जनम् । अञ्जनभेदे “मलापहारि चक्षुष्यं कषायं कटुकं हिमम् । विषविस्फोटककण्डूनां नाशकं व्रणदोषहृत्” राजनि॰ तद्गुणा उक्ताः

कुलदीप पु॰ कुले कुलाचारे विहितोदीपः तन्त्रसारोक्ते कुलाचाराङ्गे १दीपभेदे “अर्केन्दुसितवाटग्रासतूल निर्म्मितवर्त्तिकम् । प्रदीपं तत्र संस्थाप्य अस्त्रैस्तत्र सपूजयेत् । इते तस्मिन् कुलदीपे विघ्नौघ परिभूयते । तदश्वास्त्रमन्त्रेण निखनेत् कुलदीपकम्” कुलं दीपयति अण् उप॰स॰ । २कुलप्रकाशके कुलश्रेष्ठे त्रि॰

कुलदेवता स्त्री॰ कुले पूज्या देवता । १कुलक्रमेणोपास्य देवतायाम् गौर्य्यादिषु षोडशसु मातृषु मध्ये २मातृभेदे च । ताश्च छन्दोगपरिशिष्टे उक्तायथा “गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातरो लोकमातरः । शान्तिः पुष्टिर्धृतिस्तुष्टिरात्मदेवतया सह । आदौ विनायकः पूज्यो अन्ते च कुलदेवता”

कुलदेवी स्त्री कुलैः कुलाचारैरुपास्या देवी । १तन्त्रोक्ते देवीभेदे कुलदेवताश्च तन्त्रराः॰ उक्तायथा

“त्रिपुरा त्रिपुरेशी च सुन्दरी पुरसुन्दरी । श्रीमालिनी च सिद्धाम्बा महात्रिपुरसुन्दरी । प्रकटाख्या तथा गुप्ता तथा गुप्ततरा परा । सम्प्रदायाकुला कौला रहस्यातिरहस्यगा । परस्पररहस्या च तथा कामेश्वरी शुभा । भगमाली नित्यक्लिन्ना भैरवी वह्निसुन्दरी । महाविद्येश्वरी दूती त्वरिता कुलसुन्दरी । नित्या नीलपताका च विजया सर्वमङ्गला । ज्वालांशुमालिनी चित्रा अशिनी शुभगाकुला । पूर्णाख्या च तथा वत्सा कामेशी मोहिनी तथा । विमला वरुणा देवी जयिनी कूलभैरवी । सर्वेश्वरी तथा कौली वागिशी सर्वकामिनी । सिद्धेश्वरी तथा चोग्रा दुर्गा महिषमर्द्दिनी । स्वप्नावती शूलिनी च मातङ्गी सुरसुन्दरी । महाकाली महोग्रा च चित्ररूपा महोदरी । प्राणविद्या तथैकाक्षी चैकपादा महाकृशा । वामा शिवा तथा ज्येष्ठा सुरूपा चारुहासिनी । त्रिखण्डा त्रिशिरा गौरी विन्ध्याचलनिवासिनी । क्षोभिणी मोदिनी भद्रा ललिता बहुरूपिका । सर्व्वसम्पत्करी तारा भवानी विश्वहारिणी । कुलेश्वरी महाविद्या कथिता तव भैरव !” । कुलैः कुलजैरुपास्या देवी २वंशपरम्परया उपास्ये देवीभेदे च

कुलद्रुम पु॰ “श्लेष्मान्तकः करञ्जश्च विल्वाश्वत्थकदम्बकाः । निम्बो वटोडुम्बरौ च धात्री चिञ्चा दश स्मृताः” इत्युक्तेषु श्लेष्मान्तकादिषु दशसु [वंशरक्षके पुत्रे त्रिका॰

कुलधारक पु॰ कुलं धारयति स्थिरीकरोति धृ–णिच्–ण्वुल्।

कुलधुर्य्य त्रि॰ कुलेषु धुर्य्यः अग्र्यः । कुलश्रेष्ठे

कुलनक्षत्र न॰ “वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् । कुलानि समधिष्ण्यानि शेषाणि चाकुलानि वै” तन्त्रसा॰ उक्तेषु साभिजित्काष्टाविंशतिनक्षत्रमध्ये आर्द्राभिन्नसमसंख्यकेषु नक्षत्रेषु तत्फलमुक्तं तत्रैव “तिथिवारे च

नक्षत्रे अकुले स्थायिनोभयम्। कुलाख्ये जयिनो नित्यम् साम्यञ्चैव कुलाकुले”

कुलनायिका स्त्री॰ तन्त्रोक्ते कुलैः सेव्ये नायिकाभेदे। शक्तिसाधनतन्त्रे १पटले तद्भेदादिकमुक्तं यथा “नटी कापालकी वेश्या रजकी नापिताङ्गना। ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका। मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः। विशेषवैदग्ध्ययुताः सर्वा एव कुलाङ्गनाः। रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी। पूजनीया प्रयत्नेन ततः सिद्धिर्भवेद्ध्रुवा”। अत्र विशेषयति निरुत्तरतन्त्रे १४पटले। “नटी कापालिकी वेश्या रजकी नापिताङ्गना। योगिनी श्वपची शुण्डी भूमीन्द्रतनया तथा। गोपिनी माल्यकारस्य कन्या कार्यविभेदतः। चतुर्वर्णोद्भवा रम्या कापाली सा प्रकीर्त्तिता। पूजाद्रव्यं समालोक्य वेशाचरणमिच्छति। चतुर्वर्णोद्भवा रम्या सा वेश्या परिकीर्त्तिता। पूजाद्रव्यं समालोक्य रजोऽवस्थां प्रकाशयेत्। सर्ववर्णोद्भवा रम्या रजकी सा प्रकीर्त्तिता। पूजाद्रव्यं समालोक्य कुलजा वीरमाश्रयेत्। संत्यज्य पशुभर्त्तारं कर्म्म चाण्डालिनी स्मृता। विपरीतरता पत्यौ पात्रं या परिपृच्छति। सर्ववर्णोद्भवा रम्या सा शौण्डी परिकीर्त्तिता। सर्वदा यन्त्रसंस्कारो यस्याश्च परिजायते। भूमीन्द्रजा तु रम्याऽसौ सर्ववर्णोद्भवा प्रिये!। आत्मानं गोपयेद्या च सर्वदा पशुसङ्कटे। सर्ववर्णोद्भवा रम्या गोपिनी सा प्रकीर्त्तिता। पूजाद्रव्यं समालोक्य या मालां परिकीर्त्तयेत्। सर्ववर्णोद्भवा रम्या मालिनी सा प्रकीर्त्तिता”। वेश्यायाविशेषस्तु तत्रैवोक्तः। “गुप्तवेश्या महावेश्या कुलवेश्या महोदया। राजवेश्या देववेश्या ब्रह्मवेश्या च सप्तधा। कुलजा गुप्तवेश्या स्यात् निर्लज्जा मदनातुरा। पशुभर्त्राश्रिता लोके गुप्तवेश्या प्रकीर्त्तिता। कुलजा कुलवेश्या स्यात् महावेश्या प्रकीर्त्तिता। भगलिङ्गकलाभिश्च चुम्बयेच्च पुनः पुनः। एवंविधा कुलीना चेत् ब्रह्मवेश्या प्रकीर्त्तिता। दिव्यशक्तिर्वीरशक्तिस्तासां सङ्गे प्रकीर्त्तिता। चतुर्वर्णोद्भवानाञ्च शङ्किताः परिभाषिताः। वेश्यावद्भ्रमते यस्मात् तस्माद्वेश्या प्रकीर्त्तिता। वर्णसङ्करतो जाता सर्ववेश्या प्रकीर्त्तिता”। कुलकामिन्यादयोऽप्यत्र

कुलनाश पु॰ ६त॰। १कुलध्वंसे तत्कारणं कुलशब्दे उक्तम् तदभावकारणञ्च “यावच्च वेदधर्म्माः स्युर्यावत् स्याच्छङ्करार्च्चनम्। यावत् स्याच्छुचि क्षत्रञ्च तावन्न कुलनाशनम्। कुलं भूलग्नं नाश्नाति न+अश+अच् सुप् सुपेति समासः। २उष्ट्रे पुंस्त्री॰ हेमच॰ तस्योन्नतकन्धरतया उन्नतप्रदेशस्य कण्टकादेर्भक्षणाद्भूलग्नादेरभक्षणेन तथात्वम् स्त्रियां जातित्वात् ङीप्।

कुलनाशन न॰ कुलं नाशयत्यनेन नश—णिच्—करणे ल्युट्। वंशध्वंससाधने। “मुसलं कुलनाशनम्। यथा च मुसलेन वृष्णिप्रभृतिकुलनाशनं तथा भा॰मौ॰१अ॰उक्तं यथा “विश्वामित्रञ्च कण्वञ्च नारदञ्च तपोधनम्। सारणप्रमुखा वीरा ददृशुर्द्वारकां गतान्। ते तान् शाम्बं पुरस्कृत्य भूषयित्वा स्त्रियं यथा। अब्रुवन्नुपसङ्गम्य दैवदण्डनिपीडिताः। इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः। ऋषयः साधु जानीत किमियं जनयिष्यति। इत्युक्तास्ते तदा राजन् विप्रलम्भप्रधर्षिताः। प्रत्यब्रुवंस्तान् मुनयो यत्तच्छृणु नराधिप!। वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम्। वासुदेवस्य दायादः शाम्बोऽयं जनयिष्यति। येन यूयं सुदुर्वृत्ता नृशंसा जातमन्यवः। उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्द्दनौ। समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः। जरा कृष्णं महात्मानं शयानं भुवि भेत्स्यति। इत्यब्रुवंस्ततो राजन्! प्रलब्धास्तैर्दुरात्मभिः। मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परम्। तथोक्त्वा मुनयस्ते तु ततः केशवमभ्ययुः। अथाब्रवीत्तदा वृष्णीन् श्रुत्वैवं मधुसूदनः। अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान्। एवमुक्त्वा हृषीकेशः प्रविवेश पुरन्तदा। कृतान्तमन्यथा नैच्छत् कर्त्तुं स जगतः प्रभुः। श्वोभूतेऽथ ततः शाम्बो मुसलं तदसूत वै। येन वृष्ण्यन्धककुले पुरुषा भस्मसात्कृताः। वृष्ण्यन्धकविनाशाय किङ्करप्रतिमं महत्। असूत शापजं घोरं तच्च राज्ञे न्यवेदयन्। विषण्णरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत्। तच्चूर्णं सागरे चापि प्राक्षिपन् पुरुषा नृप!”

चूर्णीकृतस्य तस्य समुद्रे एरकाभावमुक्त्वा एरकाभूतेन मुसलेन ३अ॰ परस्परनाशोवर्णितः यथा “ते तु पानमदाविष्टाश्चोदिताः कालधर्म्मणा। युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भोजनैस्तदा। हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनन्दनः। तदनन्तरमागच्छन्मोचयिष्यञ्छिनेः सुतम्। स भोजैः सह संयुक्तः सात्यकिश्चान्धकैः सह। व्यायच्छमानौ तौ वीरौ बाहुद्रविणशालिनौ। बहुत्वान्निहतौ तत्र उभौ कृष्णस्य पश्यतः। हतं दृष्ट्वा तु शैनेयं पुत्रञ्च यदुनन्दनः। एरकाणान्तदा मुष्टि

क्रोधाज्जग्राह केशवः। तदभून्मुसलं घोरं वज्रकल्पमयोमयम्। जघान कृष्णस्तांस्तेन ये ये प्रमुखतोऽभवन्। ततोऽन्धकाश्च भोजाश्च शैनेया वृष्णयस्तथा। जघ्नुरन्योन्यमाक्रन्दे मुसलैः कालचोदिताः। यस्तेषामेरकां कश्चिज्जग्राह कुपितो नृप!। वज्रभूतेव सा राजन्नदृश्यत तदा विभो। तृणञ्च मुसलीभूतमपि तत्र व्यदृश्यत। ब्रह्मदण्डकृतं सर्वमिति तद्विद्धि पार्थिव!। अविध्यन् विध्यते राजन्! प्रक्षिपन्ति स्म यत्तृणम्। तद्वज्रभूतं मुसलं व्यदृश्यत तदा दृढम्। अवधीत् पितरं पुत्रः पिता पुत्रञ्च भारत!। मत्ताः परिपतन्ति स्म योधयन्तः परस्परम्। पतङ्गा इव चाग्नौ ते निपेतुः कुकुरान्धकाः। नासीत् पलायने बुद्धिर्बध्यमानस्य कस्यचित्। तत्रापश्यन्महाबाहुर्जानन् कालस्य पर्य्ययम्। मुसलं समवष्टभ्य तस्थौ स मधुसूदनः। शाम्बञ्च निहतं दृष्ट्वा चारुदेष्णञ्च साव्ययम्। प्रद्युम्नञ्चानिरुद्धञ्च ततश्चुक्रोध माधवः। गदं वीक्ष्य शयानञ्च भृशं कोपसमन्वितः। स निःशेषं तदा चक्रे शार्ङ्गचक्रगदाधरः। तं निघ्नन्तं महातेजा बभ्रुः परपुरञ्जयः। दारुकश्चैव दाशार्हमूचतुर्यन्निबोध तत्। भगवन्निहताः सर्वे त्वया भूयिष्ठशो नराः। रामस्य पदमन्विच्छ तत्र गच्छाम यत्र सः।" भावे ल्युट्। २वंशनाशने च।

कुलन्धर पु० कुलं वंशं धारयति धृ—वा० खच् मुम् च। वंशधरे "युधिष्ठिरोलब्धराज्योदृष्ट्वा पौत्रं कुलन्धरम्" भा० १,१२,१४,

कुलपति पु० "मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः" पुराणोक्त लक्षणे १मुनिभेदे। "लोमहर्षणपुत्र उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये। शौनकस्य कुलपतेर्द्वादशवार्षिके सत्रे" भा०आ०१अ०१श्लो०। "ततोऽब्रवीत् कुलपतिं पादौ संगृह्य भारत!"भा०आनु०६अ०२२०। २वंशश्रेष्ठे च कुलनायकादयोऽप्यत्र। अश्वपत्या० अपत्यादिषु प्राग्दीव्यतीयेषु अर्थेषु अण्। कौलपत तदपत्याद्यर्थेषु।

कुलपत्र(क) पु० कुलं भूमिलग्नं पत्रमस्य। दमनकवृक्षे राजनि०। वा कप्। तत्रार्थे। भावप्र० कुलपुत्रक इति क्वचित्पाठे पृषो०।

कुलपर्व्वत "पु० माहेन्द्रोमलयः सह्यः शक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तात्र कुलपर्व्वताः" विष्णुपु० उक्तेषु जम्बुद्वीपस्थवर्षसीमाकारकेषु माहेन्द्रादिषु सप्तसु वर्षाचलेषु पर्वतेषु। एतेषां यथा वर्षमर्य्यादाकारित्वं तथा इलावृतशब्दे ९८४पृ० शि० सि० वाक्येनोक्तम्। प्लक्षादिद्वीपेषु कुलाचलाश्च विष्णुपु० दर्शिता यथा तत्र २प्लक्षद्वीपे "मर्य्यादाकारकास्तेषां तथान्ये वर्षपर्वताः। सप्तैव तेषां नामानि शृणुष्व मुनिसत्तम!। गोमेदश्चैव चन्द्रश्च नारदो दुन्दुभिस्तथा। सोमकः सुमनाः शैलो वैभ्राजश्चैव सप्तमः" शाल्मले। ३"वर्षाचलेषु रम्येषु सर्वेष्वेतेषु चानघ!। तत्रापि पर्वताःसप्त विज्ञेया रत्नयोनयः। रसाभिव्यञ्जकास्तेषु तथा सप्तैव निम्नगाः। कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः। द्रोणोयत्र महौषध्यः स चतुर्थो महीधरः। कङ्कश्च पञ्चमः षष्ठो महिषः सप्तमस्तथा। ककुद्मान् पर्वतवरः"। ४कुशद्वीपे"विद्रुमाह्वयशैलश्च द्युतिमान् पुष्पवांस्तथा। कुशेशयो हरिश्चैव सप्तमो मन्दराचलः। वर्षाचलास्तु सप्तैव तत्र द्वीपे महामुने"। ५क्रौञ्चद्वीपे "तत्रापि देवगन्धर्वसेविताः सुमनोहराः। वर्षाचला महाबुद्धे! तेषां नामानि मे शृणु। क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः। चतुर्थो हरशैलश्च स्वभाभिर्भासय प्रभः। देवावृत् पञ्चमश्चैव तथान्यः पुण्डरीकभाक्। ६शाकद्वीपे। "तत्रापि पर्वताः सप्त वर्षविच्छेदकारकाः। पूर्व्वस्तत्रोदयगिरिर्जलाधारस्तथाऽपरः। तथा रैवतकः श्यामस्तथैवास्तगिरिर्द्विज!। आम्बिकेयस्तथा रम्यः केशरी पर्वतोत्तमः"। तत्तद्द्वीपस्थेषु उक्तेष्वपि सप्तसु वर्षाचलेषु७पुष्करद्वीपे तु एकएव मानसोत्तरशैलस्ताद्दक् यथाह भा० ५०,२०,२१, तद्द्वीपमध्ये एक एवार्वाचीनवर्षयोर्मर्य्यादाकारकोऽयुतयोजनोच्छ्रायायामः"। विष्णुपु०। भागवतयोस्तेषां नामभेदः कल्पभेदादविरुद्धः। कुलगिरिकुलाचलवर्षाचलादयोऽप्यत्र। "माहेन्द्रशुक्तिमलयर्क्षकपारियात्राः। सह्यः सविन्ध्य इह सप्त कुलाचलाख्याः" शि०सि० इह जम्बुद्वीपे।

कुलपालक त्रि० कुलं पालयति पालि—ण्वुल् (कमलानेवु) १कुरुम्बे पु०शब्दच० २वंशपालके त्रि०स्त्रियां टाप् अतइत्त्वम्। सा च कुलस्त्रियाञ्च [स्त्रियां वा ङीप्।

कुलपालि स्त्री कुलं पालयति पालि—इन्। कुलवत्यां।

कुलपुत्र पु० कुलरक्षकः पुत्रः। वंशधरे पुत्रे ततः भावे कर्म्मणि च मनोज्ञा० वुञ्। कौलपुत्रक तद्भावे तत्कर्म्मणि च न०

कुलप्रसूत त्रि० कुले सत्कुले प्रसूतः। सत्कुलजाते

कुलवधू स्त्री कुले गेहे एव स्थिता वधूः। गृहमात्रस्थितायां योषिति। "मृते मृतां व्रजकुलवधूः कापि साध्वी

समाये" उद्भटः कुलयोषिदादयोऽप्यत्र" असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम्" मनुः

कुलभृत्या स्त्री कुलैः वंशभवैः भृत्या भरणम् भृ—भावे क्यप् ६त० । गर्भिण्या दोहदादिदानरूपायां परिचर्य्यायाम् जटा० । कुलस्य भृत्या । २वंशभरणे च ।

कुलम्पुन न०कुलं पुनाति पू—बा०खश् मुम् च । भारतोक्ते तीर्थभेदे "कुलम्पुने नरः स्नात्वा पुनाति स्वकुलानि च भा०व० ८३ अ०

कुलम्भर(ल) पु० कौ भूमौ रन्ध्रे सन्धिकरणादिव्यापारे लीयते व्यासक्तः ली—बा० ड लस्य रः अन्तस्थसं ह वा रः । चौरे हारा० । [देशादौ ।

कुलर त्रि० कुल+अश्मादि० चतुरर्थ्यां र । कुलसन्निकृष्ट

कुलवत् त्रि० कुलं प्रशस्तकुलमस्त्यस्य बला० वा मतुप् मस्य वः । प्रशस्तकुलजे स्त्रियां ङीप् । सा च कुलस्त्रियां गृहमात्रावस्थितायां स्त्रियाम् ।

कुलवर्णा स्त्री० कुलैः वैद्यकुलैः वर्णो गुणोत्कीर्त्तनं यस्याः वर्ण—भावे घञ् ३त०। रक्तत्रिवृति (लालतेओडि) राजनि०।

कुलवार पु० "रविचन्द्रो गुरुः सौरिश्चत्वारश्चाकुला इमे । "भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः" तन्त्रसा० उक्तयोः कुजशुक्रवारयोः ।

कुलविद्या स्त्री० कुलक्रमागता विद्या । १वंशक्रमागतविद्यायाम् । कुलैः स्वकुलैः शिक्षणीया विद्या । "२आन्वीक्षिकीत्रयीप्रभृतिविद्यायाम् "तमादौ कुलविद्यानामर्थमर्थविदां वरः" रघुः [क्षीरस्वामी कुलपुरोहितादयोऽप्यत्र

कुलविप्र पु० कुलक्रमागतः विप्रः । वंशक्रमागते पुरोहिते

कुलव्रत न० कुले चर्य्यं व्रतम् । कुलक्रमेण कर्त्तव्ये व्रते "गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम्" रघुः ।

कुलश्रेष्ठिन् त्रि० कुलेषु श्रेष्ठी । शिल्पकुलप्रधाने अमरः

कुलसंख्या स्त्री कुले संख्या कीर्त्तिः । वंशमध्ये गणनायाम् वंशश्रेष्ठतायाम् "मन्त्रतस्तु समृद्धानि कुलान्यल्पधनानि च । कुलसंख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः" मनुः

कुलसत्त्र न० कुलैः कुलजैरनुष्ठेयं सत्त्रम् । पित्रादिक्रमेणानुष्ठेये सहस्रवर्षसाध्ये कार्ष्णाजिनिमतसिद्धे सत्त्रभेदे तच्च कात्या०श्रौ० १,६,२२, दर्शितं यथा

"कुलसत्त्रमिति कार्ष्णाजिनिः"सू०। "कार्ष्णाजिनि र्मुनिरित्याह एवं कथयति यत् कुलसत्त्रमेतत् सहस्रसंवत्सरं भवति कुलस्य पितृपुत्रपौत्रप्रपौत्रतत्पुत्रादिरूपस्य वंशस्यैतत्भवति न त्वेकस्य कस्यचित् असम्भवात् । मनुष्याधिकारं चैतत् प्रारब्धं चावश्यं समापनीयं नचैकः शक्नोति समापयितुमिति यथा शक्यते तथा समापनीयमिति गम्यमाने ये बहवस्ते शक्नुयन्ति तेन तत्कुलीनाः सत्रेषु केचिदारब्धं केचिन्मध्येऽनुष्ठितं केचित् समापयिष्यन्तीत्येवं कुलसत्त्रं कार्ष्णाजिनिमन्यते" कर्कः वर्षशब्दस्य दिनपरत्व कल्पनेन कात्यायनेनेदं दूषितम् ।

कुलसम्भवः कुलं सम्भवोऽस्य । बीज्ये कुलजाते अमरः ।

कुलसाधक त्रि० कुलेन कुलाचारेण साधकः । तन्त्रोक्ते कुलाचारेण साधकभेदेषु तेच तन्त्रसारे दर्शिताः यथा "उपासकान्महादेव ! शृणु चैकमनाः स्वयम् । मनुश्चन्द्रः कुबेरश्च मन्मथस्तदनन्तरम् । लोपामुद्रामुनिर्नन्दी शक्रः स्कन्दः शिवस्तथा । क्रोधभट्टो रुरुश्चैव पञ्चमश्च प्रकीर्त्तितः । दुर्व्वासा व्याससूर्य्यौ च वशिष्ठश्च पराशरः । श्रौर्व्वोवह्निर्यमश्चैव निर्ऋतीवरुणस्तथा । वायुर्विष्णुः स्वयम्भूश्च भैरवो दानवस्तथा । अनिरुद्धो भरद्वाजो दक्षिणामूर्त्तिरेव च । गणपः कुलपाश्चैव लक्ष्मीर्गङ्गा सरस्वती । कालीदेवः प्रमत्तश्च उन्मत्तः कुलभैरवः । क्षेत्रपालो हनूमांश्च दत्तो गरुड़ एव च । काश्यपः कौशकुत्सौ च जमदग्निर्भृगुस्तथा । बृहस्पतिर्यदुश्रेष्ठो दत्तात्रेयो युधिष्ठिरः । अर्जुनो भीमसेनश्च द्रोणाचार्य्यो कृपाकपिः । दुर्योधनस्तथा कुन्ती सीता च रुक्मिणी तथा । सत्यभामा द्रौपदी च उर्वशी च तिलोत्तमा । पुष्पदन्तो महाबुद्धो बाणः कालश्च मन्दरः । कैलासः क्षीरसिन्धुश्च उदधिर्हिमवांस्तथा । नारदश्च महावीराः कामतो वीरसाधकाः । महाविद्याप्रसादेन स्वस्वकर्म्मसमन्विताः । एतेषां वत्स ! नामानि विद्याविद्योपसेविनाम् । प्रातःकाले शुचिर्भूत्वा यः पठेत् प्रयतात्मवान् । पूजायां वा शुचिर्भूत्वा प्रसीदामि कुलान्वये । अशुचिर्वानिरालम्बप्रमालम्ब्य च कुलान्तिके । नित्य पूजाफलं तस्य ददामि वरमीप्सितम् ।"

कुलवीरकुलोपासकादयोऽप्यत्र

कुलसौरभ न०कुलं श्रेष्ठं सौरभमस्य । मरुवकवृक्षे शब्दमा०

कुलस्त्री स्त्री कुले गृहे स्थिता स्त्री । कुलपालिकायाम् अमरः

कुलहुण्डक पु० कुलाय संघाय हुण्डते हुडि—संघे ण्वुल् । व्यावर्त्ते हारा० कुलहुण्डकोऽप्यत्र त्रि० पृषो० ।

कुलाकुल त्रि० तन्त्रोक्तेषु ततृचक्रतिथिवारनक्षत्रेषु । कुलाधारपद्मे विहृतिः

कुलाकुलचक्र न॰ कुलञ्च अकुलं कुलाकुलम् तयोर्विचारार्थं चक्रम्। तन्त्रोक्ते ग्राह्यमन्त्रस्य शुभाशुभताज्ञानार्थे चक्रभेदे तद्दर्शितः तन्त्रसारे

“कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह”। इत्युपक्रम्य निबन्धे “वाय्वग्निभूजलाकाशपञ्चाशल्लिपयः क्रमात्। पञ्च ह्रस्वाः पञ्च दीर्घा बिन्द्वन्ताः सन्धिसम्भवाः (यादयाः)। कादयः पञ्चशः प्रोक्ता लसहान्ताः समीरिताः”। अ आ एकचटतपयषा मारुताः। इ ई ऐ ख छ ठ थ फ रक्षा आग्नेयाः। उ ऊ ओ ग ज ड द बललाः पार्थिवाः। ऋ ॠ औ घ झ ढ ध भ वसा वारुणाः। ऌ ॡ अं ङ ञ ण नमशहा नाभसाः। “साधकस्याक्षरं पूर्व्वं मन्त्रस्यापि तदक्षरम्। यद्येकभूतदैवत्यं जानीयात् स्वकुलं हि तत्। भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतम्। मारुतं पार्थिवानाञ्च शत्रुराग्नेयमम्भसाम्”। चकाराडाग्नेयं पार्थिवानां शत्रुः। तथाच रुद्रयामले “पार्थिवे वारुणं मित्रं तैजसं शत्रुरीरितः। ऐन्द्रवारुणयोः शत्रुर्मारुतं स प्रकीर्त्तितः। नाभसं सर्वमित्रं स्यात् विरुद्धे नैव शीलयेत्। मित्रे सिद्धिः समाख्याता उदासीने न किञ्चन। मृत्युर्व्याधिरमित्रे च स्वकुले सिद्धिरुत्तमा”।

कुलाङ्गार न॰ कुलस्याङ्गारमिव उपमितस॰। कुलावमे वंशदूषके “धक्ष्यति स्म कुलाङ्गारं चोदितो मे ततद्रुहम्” भाग॰ १।१४।३७।

कुलाचार पु॰ ६त॰। कुलोचिते धर्म्मे ‘जीवः प्रकृतितत्त्वञ्च दिक्कालाकाशमेव च। क्षित्यप्तेजोवायवश्च कुलमित्यभिधीयते। ब्रह्मबुद्ध्या निर्विकल्पमेतेष्व चरणञ्च यत्। कुलाचारः स एवोक्तो धर्म्मकामार्थमोक्षद” इत्युक्तरूपे सर्व्वत्र ब्रह्मदृष्टिसाधके २ध्यानभेदे तन्त्रोक्ते ३आचारभेदे च तन्त्रसारे तदाचारप्रकारो दर्शितो यथा

“कालीतन्त्रे “अथाचारं प्रवक्ष्यामि यत्कृतेऽमृतमश्नुते। सर्व्वभूतहिते युक्तः समयाचारपालकः। अनित्यकर्म्मसंत्यागी नित्यानुष्ठानतत्परः। मन्त्राराधनमात्रेण शिवभावेन तत्परः। परस्यान्देयतायान्तु सर्व्वकर्म्मनिवेदकः। अन्यमन्त्रार्च्चनश्रद्धा अन्यमन्त्रप्रपूजनम्। कुलस्त्रीभीरनिन्दाञ्च तद्द्रव्यस्यापहारणम्। स्त्रीषु रोषं प्रहारञ्च वर्ज्जयेन्मतिमान् सदा। स्त्रीमयञ्च जगत् सर्वं स्वयंभूयत् तथा भवेत्। पेयञ्चर्व्यं तथा चोष्यं भक्ष्यं लेह्यं गृहं सुखम्। सर्व्वञ्च युवतीरूपं भावयेन्मतिमान् सदा। कुलजां युवतीं वीक्ष्य नमस्कुर्य्यात् समाहितः। यदि भाग्यवशाद्देवि! कुलदृष्टिः प्रजायते। तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत्”। तासां भगादिदेवीनाम्। तास्तु “भगिनीं भगचिन्ताञ्च भगास्यां भगमालिनीम्। भगदत्तां भगाङ्गाञ्च भगकर्षां भगत्वचाम्। भगनासां भगस्तनीं भगस्थां भगसर्पिणीम्। संपूज्य ताभ्योगन्धाद्यैर्मानसैर्गुरुमेव च। नमस्कृत्य पुमानेवं क्षमस्वेति ततः सुधीः। बालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा। कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत्। तासां प्रहारं निन्दाञ्च कौटिल्यमप्रियन्तथा! सर्वथा न च कुर्य्यात्तु चान्यथासिद्धिरोधकृत्। स्त्रियोदेवाः स्त्रियः प्राणास्त्रियश्चैव विभूषणम्। स्त्रीसङ्गिना सदा भाव्यमन्यथा स्वस्त्रिया अपि। विपरीतरता सा तु भविता हृदयोपरि। तद्व्यस्तारचितं पुष्पं तद्व्यस्तारचितं जलम्। तद्व्यस्तारचितं द्रव्यं देवताभ्यो निवेदयेत्। स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं महत्। जपस्थाने महाशङ्खं निवेश्योर्द्धं जपञ्चरेत्। स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात् कुलजां शुभाम्। भक्ष्यं ताम्बूलमन्यच्च भक्ष्यद्रव्यं यथारुचि। भक्त्वाप्यशेषभक्ष्याणि भुक्त्वा शेषं जपञ्चरेत्”। कालीतन्त्रे “दिक्कालनियमोनात्र स्थित्यादिनियमोन च। जपे न कालनियमोनार्च्चादिषु बलिष्वपि। स्वेच्छानियम उक्तश्च महामन्त्रस्य साधने। वस्त्रासनस्थानदेहागारपुष्पादिवारिणः। शुद्धिं नचाचरेत्तत्र निर्व्विकल्पं मनश्चरेत्”। कुलार्णवे “कुलाचारग्टहं कृत्वा भक्त्या पापविशुद्धये। याचयेदमृतं कौलं तदभावे जलं पिबेत्। कुलाचारेण यद्दत्तं कृत्वा पात्रेण भक्तितः। नमस्कृत्य च गृह्णीयादन्यथा नरकं व्रजेत्”। अन्यत्रापि “न वृथा गमयेत् कालं द्यूतक्रीड़ादिना सुधीः। गमयेद्देवतापूजाजपयामस्तवादिना। वीराणां जपयज्ञस्तु सर्वकाले प्रशस्यते। सर्वदेशे सर्वपीठे कर्त्तव्यो नात्र संशयः”। शिवागमे “शक्तिः शिवः शिवः शक्तिः शक्तिर्ब्रह्मा जनार्द्दनः। शक्तिरिन्द्रो रविः शक्तिः शक्तिश्चन्द्रो ग्रहा ध्रुवम्। शक्तिरूपं जगत् सर्वं योन जानाति नारकी”। वीरतन्त्रे “स्नानादि मानसं शौचं मानसं प्रवरोजपः। मानसं पूजनं दिव्यं मानसन्तर्पणादिकम्। सर्व्व एव शुभः कालो नाशुभोविद्यते क्वचित्। न विशेषोदिवा रात्रौ न सन्ध्यायान्तथा निशि। सर्वदा पूज-

येद्देशोमस्नातः कृतभोजनः । महानिश्यशुचौ देशे बलिं मन्त्रेण दापयेत्" । यत्तु "रात्रावेव महापूजा कर्त्तव्या वीरवन्दिश्यते ! । न दिने सर्व्वथा कार्य्या शासनान्मम सुव्रते" ! तत् पुनः कुलदेवताविषये । महानिशा तु तत्रैव "अर्द्धरात्रात् परं यच्च मुहूर्त्तद्वयमेव च । सा महारात्रिरुद्दिष्टा तद्दत्तमक्षयन्तु वै" गान्धर्व्वे, "पृथ्वीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः । तदा वादी स्वसिद्धान्तहतः क्षितितलं विशेत्" । "पर्व्वते हस्तमारोप्य निर्भयोयतमानसः । कवितां लभते सोऽपि अमृतत्वञ्च गच्छति" । अत्रापि सहस्रमिति सम्बन्धः । पृथ्वीं स्त्रियं, नित्यश इति षोड़शदिनं यावत् । पर्वतं स्तनम् । अन्यच्च नीलतन्त्रे "पद्मं दृष्ट्वा तथा विम्बं खञ्जनं शिखरन्तथा । चामरं रविविम्बञ्च तिलपुष्पं सरोरुहम् । त्रिस्थूलं वीक्ष्य जप्त्वा च मनशः शुद्धभावनः । सुमुखं प्रसादं सुखं सुलोचनं सुहास्यकम् । सुवेशं सुगतिं गन्धं सुगन्धं सुखमेव च । लभते च यथासंख्यं शृणु पार्वति ! सादरम्" । पद्मं मुखं, विम्बमधरं, खञ्जनञ्चक्षुः, शिखरं मस्तकं, चामरं केशं, रविविम्बं सिन्दूरं, तिलपुष्पं नासिकां, सरोरुहं नाभिं, त्रिशूलं त्रिवेणीम्, साहश्यत्वात् । भावचूड़ामणौ "एकाकी निर्जने देशे श्मशाने विजने वने । शून्यागारे नदीतीरे निःशङ्कोविहरेत् सदा । महाचीनद्रुमे देवीं ध्यात्वा तत्र प्रपूजयेत् । तद्द्रुमोद्भवपुष्पेण पूजयेद्भक्तिभावतः । स भवेत् कुलदेवस्य कुलद्रुमगतः शुचिः । अश्वत्थतरोर्म्महापीठे देवीं ध्यात्वा यथाविधि । तत्सुधारसधारेण तर्पयेन्मारकाननम् । महाचीनद्रुमलताबेष्टितः साधकोत्तमः । रात्रौ यदि जपेन्मन्त्रं स वै कल्पद्रुमोभवेत् । तिथिक्रमेण संख्याभिर्लताभिर्वेष्टितो यदि । सदा मासेन सिद्धिः स्यात् सहस्रजपमानतः । अष्टम्याञ्च चतुर्द्दश्यां द्विगुणं यदि दृश्यते । तत्रैव महती सिद्धिर्द्देवतानां सुदुर्लभा"। कुलचूडामणौ "शृणु पुत्र ! रहस्यं मे समयाचारसम्भवम् । येन हीना न सिध्यन्ति जन्मकोटिसहस्रतः । मानवः कुलशास्त्राणां कुलचर्य्यानुचारिणाम् । उदारचित्तः सर्वत्र शैष्णवाचारतत्परः । परनिन्दासहिष्णुः स्यादुपकाररतः सदा । पर्वते विपिने वापि निर्ज्जने शून्यमण्डपे । चतुष्पथे कला(स्त्री)मध्ये यदि दैवाद्गतिर्भवेत् । क्षणं स्थित्वा मन्त्रं जप्त्वा नत्वा गच्छेद्यथासुखम् । श्मशानं वीक्ष्य महाकालीं नमस्कुर्य्यादलक्षितम् । क्षेमङ्करीं तथा वीक्ष्य जम्बुकीं यमदूतिकाम् । कुररश्येनभूकाकौ कृष्णमार्ज्जारमेव च"। दृष्ट्वा नमस्कुर्य्यादिति शेषः । मन्त्रस्तु "कृशोदरि ! महाचण्डे ! मुक्तकेशि ! बलिप्रिये ! । कुलाचारप्रसन्नास्ये ! नमस्ते शङ्करप्रिये ! । श्मशानञ्च शवं दृष्ट्वा प्रदक्षिणमनुव्रजन् । प्रणम्यानेन मनुना मन्त्री सुखमवाप्नुयात् । घोरदंष्ट्रे ! करालास्ये ! किटिशब्दनिनादिनि ! । घोरघोररवास्फाले ! नमस्ते ! चितिवासिनि ! । रक्तवस्त्रं तथा पुष्पं विलोक्य त्रिपुरां तथा । प्रणमेद्दण्डवद्भूमौ इमं मन्त्रं पठेन्नरः । बन्धूकपुष्पसङ्काशे त्रिपुरे ! भयनाशिनि ! । भाग्योदयसमुत्पन्ने ! नमस्ते वरवर्ण्णिनि ! । कृष्णवस्त्रं तथा पुष्पं राजानं राजपूरुषम् । हस्त्यश्वरथशस्त्राणि फलकान् वीरपूरुषान् । महिषं कुलदेवञ्च दृष्ट्वा महिषमर्द्दिनीम् । प्रणम्य जयदुर्गां वा स च विघ्नैर्न लिप्यते । जय ! देवि ! जगद्धात्रि ! त्रिपुराद्ये ! त्रिदैवते ! भक्तेभ्योवरदे ! देवि ! महिषघ्नि ! नमोऽस्तु ते । मद्यभाण्डं समालोक्य मत्स्यं मांसं वरस्त्रियम् । दृष्ट्वा च भैरवीं देवीं प्रणम्य विलिखेन्मनुम् । घोरविघ्नविनाशाय कुलाचारसमृद्धये ! । नमामि ! वरदे ! देवि ! कुण्डलाभ्यां विभूषिते ! । रक्तधारासमाकीर्णवदने ! त्वां नमाम्यहम् । सर्वविघ्नहरे ! देवि ! नमस्ते हरवल्लभे ! । एतेषां दर्शने चैव यदि नैवं प्रकुर्वते । भक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धिर्न जायते" तथा कुलचूड़ामणौ "कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः । योगिनीपूजनन्तत्र प्रधानं कुलपूजनम् । यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः । तथा कुलतिथौ दुर्गा पूजिता वरदायिनी । कुलवारादिनियमो जामले "रविश्चन्द्रो गुरुः सौरिश्चत्वारश्चाकुलाइमे । भौमशुक्रौ कुलाख्यौ हि बुधवारः कुलाकुलः । द्वितीया द्वादशी षष्ठी कुलाकुलमुदाहृतम् । विषमा श्चाकुलाः सर्व्वाः शेषाश्च तिथयः कुलाः" विषमाः प्रतिपत् तृतीया पञ्चमी सप्तमी नवमी एकादशी त्रयोदशी पञ्चदशी चकुलाख्या तद्भिन्नाः सर्व्वाः शेषाश्च तिथयः कुलाः । "वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् । कुलानि समधिष्ण्यानि शेषाणि च कुलानि च । तत्फलमाह तत्रैव "तिथिवारे च नक्षत्रे चाकुले स्थायिनो भयम् । कुलाख्ये जयिनो नित्यं साम्यञ्चैव कुलाकुले"। एवं कुलवारादिकं ज्ञात्वा साधकः कर्म्मकुर्य्यात्" । विवृतिश्च आगमे दृश्या ।

कुलाचार्य्य पुं० कुलक्रमागतः आचार्य्यः । १कुलगुरौ कुलस्य

वंशस्य व्याख्यायामाचार्य्यः। आधुनिककुलख्यापके विप्रभेदे। (घटक) [भेदे शब्दमा० स्त्रियां जातित्वात् ङीष्

कुलाट पुंस्त्री कुलेन संघेनाटति अट—अच् ३त०। क्षुद्रमत्स्य

कुलाय पु० कुलं पक्षिसंघातोऽयतेऽत्र अय—घञ्। १पक्षिनिलये नीडे, अमरः "खगकुलाय कुलायनिलायिताम्" माघः वेदे त्वस्य क्लीवत्वमपि कुलायिनीशब्दे ता—ब्रा० वाक्ये उद्दा० दृश्यम्। २स्थानमात्रे मेदि० कौ लायोगतिरस्मात्। ३ देहे न०।

कुलायस्थ पुंस्त्री कुलाये नीड़े तिष्ठति स्था—क ७त०। नीडस्थे पक्षिमात्रे शब्दच०स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। कुलायवासीत्यादयोऽप्यत्र स्त्रियां ङीप्

कुलायिका स्त्री कुलायः पक्षिवासस्थानं विद्यतेऽस्याम् ठन्। पक्षिशालायां (चिड़ियाखाना)। त्रिका०।

कुलायिनी स्त्री व्युत्पत्तिः मा०भाष्योक्ता। त्रिवृत्स्तोमस्य विष्टुतिभेदे तत्प्रकारादिकं ताण्ड्य०ब्रा०२अ० दर्शितं यथा।

"अथ कुलायिनीं विष्टुतिन्दर्शयति" माधवभाष्यम्

"तिसृभ्यो हिङ्करोति स पराचीभिस्तिसृभ्यो हिङ्करोति या मध्यमा सा प्रथमा, योत्तमा सा मध्यमा, या प्रथमा सोत्तमा, तिसृभ्यो हिङ्करोति योत्तमा सा प्रथमा, या प्रथमा सा मध्यमा, या मध्यमा सोत्तमा, कुलायिनी त्रिवृतो विष्टुतिः" ब्रा०

"परिवर्त्तिन्यादव प्रथमः पर्य्यायः पराचीभिः। द्वितीये पर्य्याये तृचस्य या मध्यमा ऋक् सा प्रथमा कार्य्या। योत्तमा सा मध्यमा कार्य्या। या प्रथमा सोत्तमा कार्य्या। तृतीयः पर्य्यायः निगदसिद्धः। कुलायिनी कुलायो नीडं पक्षिणां निवासस्थानं तद्यथा व्यस्ततृणादिनिर्म्मितम् एवं व्यत्यासयुक्ता ऋचः कुलायास्तैस्तद्वती कुलायिनी एतत्संज्ञा त्रिवृत्स्तोमस्य विष्टुतिरियम्"

"अस्यां विष्टुतौ कोऽधिकारीत्यत आह" भा०

"प्रजाकामो वा पशुकामो वा स्तुवीत प्रजा वै कुलायम्पशवः कुलायङ्कुलायमेव भवति" ब्रा०

"प्रजानाम्पशूनाञ्च कुलायवदवस्थितिहेतुत्वात् कुलायत्वेन स्तुतिः। कुलायिन्या स्तुवानोऽपि प्रजानां पशूनाञ्च कुलायमेव आश्रयभूतो भवत्येव"।

"पुनरप्यधिकारिविशेषं दर्शयति" भा०

"एतामेवानुजावराय कुर्य्यादेव तासामेवाग्रं परियतीनां प्रजानामग्रम्पर्य्येति" ब्रा०

"अनु पश्चाज्जायत इत्यनुजः कनीयान् सहि निकृष्टः तस्मादप्यवरो निकृष्टः अनुजावरस्तादृशाय यजमानायेति। अग्रं परियतीनां लोके याः प्रजाः अग्रं वयोगुणादिभिः श्रेष्ठपदं परियन्ति परितो गच्छन्ति एतासामेव श्रैष्ठ्यं परिगच्छन्तीनां प्रजानाम्मध्ये स यजमानः अग्रं श्रेष्ठं पदं पर्य्येति परिगच्छति सर्व्वोत्कृष्टो भवतीत्यर्थः"

"सत्रेष्वहीनेषु च बहूनां यजमानानां फलसाम्याय कुलायिनीं विधत्ते" भा०

"एतामेव बहुभ्यो यजमानेभ्यः कुर्य्यात् यत्सर्वा अपिया भवन्ति सर्वा मध्या सर्वा उत्तमाः। सर्वानेवैनान् समावद्भाजः करोति नान्योन्यमपघ्नते सर्वे समावदिन्द्रिया भवन्ति" ब्रा०

"एतामेव कुलायिनीन्त्रिवृतो विष्टुतिं बहुभ्यो यजमानेभ्यः उद्गाता कुर्य्यात् यत् यस्माद्धेतोः तृचगताः सर्वा ऋचः अपिया मुख्याः प्रथमा भवन्ति सर्वास्तु मध्ये वर्त्तमाना भवन्ति सर्वाश्चोत्तमा भवन्ति तद्यथा प्रथमे पर्य्याये प्रथमैव प्रथमा भवति। मध्यमे तु मध्यमा प्रथमा भवति। उत्तरे उत्तमा प्रथमा भवति। एवं सर्वासां प्राथम्यं जातम्। तथा प्रथमपर्य्याये मध्यमैव मध्यमा द्वितीये पर्य्याये उत्तमैव मध्यमा तृतीये पर्य्याये प्रथमैव मध्यमा। एवं सति तिस्रोऽपि मध्यमाः सम्पन्नाः। तथा प्रथमे पर्य्याये उत्तमोत्तमा भवति। द्वितीये पर्य्याये प्रथमैवोत्तमा भवति। तृतीये पर्य्याये मध्यमैवोत्तमा भवति। एवं सर्वा अप्युत्तमाः सम्पन्नाः। यस्मादेताः सर्वा ऋचः समानरूपाः ततो हेतोरनया विष्टुत्या सर्वानेवैनान् यजमानानुद्गाता समावद्भाजः समावच्छन्दः समपर्य्यायः समं फलं भजन्त इति समावद्भाजः साम्येन फलभाजः करोति। अतएव नान्योन्यमपघ्नते परस्परञ्च हिंसन्ति। तथा सर्वे यजमानाः समावदिन्द्रियाः समाशङ्कीर्य्याः समानसामर्थ्या भवन्ति"।

"फलान्तरमाह" भा०

"वर्षुकः पर्ज्जन्यो भवतीमे हि लोकास्त्रयस्तान् हिङ्कारेण व्यतिषजति" ब्रा०

"लोकस्थानीयानां तिसृणामृचामादौ प्रयुक्तेनैकेनैव हिङ्कारेण व्यतिषङ्गमात् संयोजनात् त्रयाणां लोकानां परस्परमुपकार्य्योपकारकभावो न बाधित इति पर्ज्जन्यो वर्षणशीलो भवतीत्यर्थः"।

"अस्यामपि विष्टुतौ बहुदोषाः सम्भवन्तीत्याह" भा० "पापवसीयसन्तु भवति" ब्रा०

"तुशब्दः फलवैलक्षण्यद्योतनार्थः। पापं प्रसिद्धं वसीयः पुण्यं तदुभयमेकाश्रयं भवति। इतरत् उद्यतीवाक्यशेषवत् व्याख्येयम्। नञः भावोऽत्र विशेषः। इत्थं विष्टुतयस्तिस्रो विहिताः, तिसृष्वपि तासु फलविशेषश्रवणाच्छिन्द्रादर्शनाच्च समानफलत्वात्सर्वा नित्याः, यत्र विशेषादेशः क्रियते निमित्तं वा कामो वा श्रूयते ततोऽन्यः नित्यः। प्रयोगे आद्याभिरेताभिरेव स्तुतिभिः स्तोमसम्पादनं कार्य्यं, तदाह सूत्रकृत्। "प्रथमाभिर्विष्टुतिभिः स्तोमविधानमनादेशे ताः पञ्चाः सर्वाभिप्रायाश्चेति"। पुनरपि यथाशिषं वा विदध्यादित्यादिना खण्डशेषेण बहवः पञ्चाः सूत्रकृतोपन्यस्ताः ते तत्रैव बोद्धव्याः। नन्वेतास्वपि प्रत्येकं छिन्द्रादर्शनात् कथमासां नित्यत्वम्। नैष दोषः, उद्यत्यान्तावत् यो दोष उक्तः अवर्षुकः पर्ज्जन्यो भवतीति, स कुलायिनीपरिग्रहे परिह्रियते। यत्र हि वर्षुकः पर्ज्जन्यो भवतीत्याम्नातम्। यत्तु कुलायिन्यां दोषदर्शनं पापवसीयसन्तु भवत्यधरोत्तरमित्यादि तदुद्यतीप्रयोगेण विहृतं तत्र हि पापवसीयसो विष्टुतिरिति सा श्रूयते तत्रैव तु पापवसीयसन्तु भवति"।

"अधरोत्तरमप्रावगतो रुध्यतेवगच्छत्यपरुद्धः पापीयाञ्छ्रेयांसमभ्यारोहति जनता जनतामभ्येत्यन्योन्यस्य प्रजा आददते न यथा क्षेत्रं कल्पन्ते" ब्रा०

"प्रथमाया मध्यमायाश्चान्ते प्रयोग इति यदस्ति तदेतदधरोत्तरमनुष्ठानं यस्मिन् देशे क्रियते तत्र वा ईश्वरा पशूञ्छिन्नर्त्तज इति, परिवर्त्तिन्यां यदपशुलक्षणं दोषदर्शनं तदुद्यत्यां परिहृतं भवति। एषा वै प्रतिष्ठिता विष्टुतिर्स्ति, तत्र हि वाक्यशेषः प्रजापशुसम्पन्ना हि प्रतिष्ठितो भवतीति"।

एतत्सामयोनिः सूक्तविशेषः। तत्पाठप्रकारः साम संहिताभाष्ये उक्तो यथा "साम गानानुत्तरापन्ये तृचात्मकानि सूक्तान्याम्नातानि यथा "उपास्मै गायता नर" इत्याद्यं सूक्तं "दविद्युतत्या रुचा" इति द्वितीयं "पवमानस्य ते कव" इति तृतीयम्" तच्च उद्यतीशब्दे ११८४पृ० दर्शितम्। एवमुद्यती विष्टुतिमुक्त्वा "एवं परिवर्त्तिनी कुलायिनीति द्वे विष्टुती भवतः "इति इत्युक्त्वा परिवर्त्तिन्या विष्टुतेः प्रकारमुक्त्वा कुलायिन्याः प्रकारकथनाय प्रागुक्तं ता० ब्रा० वाक्यमुदाहृत्य व्याख्यातम्। अत्र प्रथमसूक्ते "पराचीभिः०अनुक्रमेणाम्नाताभिः। तेन पाठक्रमएव। द्वितीये पर्य्याये मध्यमोत्तमप्रथमाः। तृतीयेतूत्तमाप्रथमामध्यमा इत्येवं व्यत्यासेन" मन्त्राः (पूर्वोक्ताः) बोध्याः

२कुलाययुक्ते त्रि० "ऊर्ध्वस्त्वं प्रथमः सीद योनिम्। कुलायिनं घृतवन्तम् सवित्रे" ऋ० ६।१५।१६। "कुलायिनं गुग्गुल्वादिसंभरणोपेतम् तथा च श्रूयते "कुलायमिव ह्येतद्यज्ञे क्रियते यत् पैतदारवाः परिधयो गुग्गुलूर्णास्तुकासुगन्धितेजनानि" ऐत०ब्रा०" भा०।

कुलाल पुंस्त्री कुल—कालन, कुल्वमलति अल—अण्, कुलमालाति आ+ला—क—वा। १कुम्भकारे, (कुमार) अमरः "कुलालजनकोऽपरः भाषा० "नमः कुलालेभ्यः कर्म्मारेभ्यश्च" यजु० १६।२७। २कुक्कुभपक्षिणि मेदि० जातित्वात् स्त्रियां ङीष्। ततः तेन कृतमित्यर्थे संज्ञायां कुलाला० वुञ्। कौलालक तत्कृते शरावादौ त्रि०

कुलालादि पु० संज्ञायां तेन कृतमित्यर्थे वुञ्प्रत्ययनिमित्ते पाणिन्युक्ते शब्दगणभेदे स च गणः "कुलाल वरुड चण्डाल निषाद कर्म्मार सेना सिरिन्ध्र सैरिन्ध्र देवराज परिषत् बधू मधु रुरु रुद्र अनडुह् ब्रह्मन् कुम्भकार श्वपाक" कौलालकं वारुडकम् इत्यादि

कुलाली स्त्री कुलमलति अल—अण् ङीप्। १नीलोपलभेदे, कपित्थाञ्जनप्रस्तरभेदे, अमरः २आरण्यकुलत्थिकायाम्, राजनि० ३कुम्भकारभार्य्यायाञ्च। स्वार्थे क ह्रस्वः। कुलालिकाप्यत्र हेमच०

कुलाह पुंस्त्री० कुलमाहन्ति आ+हन—ड। ईषत्पीतवर्णे कृष्णजानौ अश्वे हेमच० ततः संज्ञायां कन्। २ककलासे, (राङ्गाकुलेखाड़ा) इति ख्याते ३शाकभेदे शब्दमाला। "आमवातरक्तवातरोगनाशी कुलालकः" राजवल्लभः [वृक्षभेदे रत्नमाला

कुलाहल पु० कुलमाहलति स्पर्द्धते अच्। (कुकुरशोङ्का)

कुलि पु० कुल—इन् किच्च। १हस्ते त्रिका०। २कण्टकारिकायां स्त्री शब्दरत्ना० कृदिकारान्तत्वात् वा ङीप्।

कुलिक त्रि०कुलमधीनत्वेन प्राधान्येन वास्त्यस्य ठन्। १कुलश्रेष्ठे मेदि०२शिल्पिकुल,प्रधाने अमरः। (कुलेखाड़ा)इति प्रसिद्धे ३शाकभेदे पु० मेदि० महानागान्तर्गते ४नागभेदे पु०"शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः। वासुकिस्तक्षकश्चैव नागयोमणिभद्रकः। ऐरावतो धृतराष्ट्रः

कर्कोटकधनञ्जयौ” तिथित० पु० “ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति” भाग० ५।२४।२।
“कुलिकोऽर्द्धचन्द्रमौलिज्वालाधूमसमप्रभः” हेमा० तद्रूपमुक्तम्। तन्त्रे तु तस्य पाटलतोक्ता। उग्रताराशब्दे १०५६ पृ० तद्वाक्यमुक्तम्ः
“भुजेषु नागः कुलिकोऽङ्गदोमतः”। तस्य उग्रताराङ्गदभूषणत्वमुक्तम्। रव्यादिवारेषु दिवारात्र्योः ५दुष्टमुहूर्त्तभेदे यथाह मुहू० चि०
“शक्रार्कदिग्वसुरसाब्धयश्विन्यः कुलिका रवेः। रात्रौ निरेकास्तिथ्यंशाः शनौ चान्त्योऽपि निन्दिताः”। रविमारभ्य सर्ववारेषु क्रमादुक्तसंख्यास्तिथ्यंशामुहूर्त्ताः कुलिकाः स्युः। यथा रवौ दिने १४,मुहूर्त्तः चन्द्रे १२, मङ्गले १०, बुधे ८, गुरौ ६, शुक्रे ४, शनौ २कुलिकः रात्रावेते निरेकाः कार्य्याः। यथा रवौ १३, चन्द्रे ११, भौमे ९,बुधे ७,गुरौ ५,शुक्रे ३,शनौ १,शनौ तु अन्त्यः पञ्चदशमुहूर्त्तोऽपि कुलिकः। एते निन्दिताः। अस्यापवादमाह गुरुः “शारेशे सबले चापि बलाढ्ये लग्नगे शुभे। कुलिकोद्भवदोषस्तु विनश्यति न संशयः। शुभे केन्द्रगते चन्द्रे शुभांशे वा शुभेक्षिते। लग्नगे सबले वापि कुलिकस्तु विलीयते” अन्यत्र दोषमाह वशिष्ठः “निधनं प्रहरार्द्धे तु निःस्वत्वं यमघण्टके। कुलिके सर्वनाशः स्यात् रात्रावेते न दोषदाः” रात्रावेते न दोषदा इत्यस्यापवादो रत्नकोषे “तमस्विनीगन्धमुपेत्य वारदोषास्तथा शक्तिमनाप्नुवन्तः। अल्पं समासाद्य विलासिनीनां कटाक्षवाणाइव निष्फलाः स्युः” “न वारदोषाः प्रभवन्ति रात्रौ देवेज्यदैत्येज्यदिवाकराणाम्। दिवा शशाङ्कार्कजभूसुतानां सर्वत्र निन्द्यो बुध० वारदोषः”। शुभकार्याणामावश्यकत्वे देशभेदेनापवादमाह गर्गः। “विन्ध्यस्योत्तरकूले तु यावदातुहिनाचलम्। यमघण्टकदोषोऽस्ति नान्यदेशेषु विद्यते। मत्स्याङ्गमगधाख्येषु यमघण्टस्तु दोषकृत्। काश्मीरे कुलिकं दुष्टमर्द्धयामस्तु सर्वतः”। कुलिकस्य विशेषप्रयोजनन्तु “अर्पयित्वा सितगुञ्जानां कुडकं कुलिकोदये” शारदायाम् नवदुर्गाभिचारकर्माङ्गतयोक्तम्। तट्टीकायां राघवभट्टेन च “मन्वर्कदिग्वसुतुवेदपक्षैरकोन्मुहूर्त्तैः कुलिका भवन्ति। दिवा निरेकैरथ यामिनीषु ते गर्हिताः कर्मसु शोभनेषु” इत्युक्तम् निरेकैः पूर्वोक्तमन्वादिभ्यः एकैकरे-

कोनैरित्यर्थः” “न्यूनाधिमासकुलिकप्रहरार्द्धपातविष्टिभ्रवजघटिकात्रयमेव वर्ज्यम्” मुहू० चि० तस्य सर्वकर्मणि वर्जनीयतामाह

कुलिङ्ग पु० कौ पृथिव्यां लिङ्गति चरणार्थं गच्छति अच्। १चटके, शब्दचि० २धूम्याटे, (फिङ्गा) अमरः भूमिप्रन्थासन्नतया धान्यादिस्थलचारिणि ३खगमात्रे च। ४कुत्सितलिङ्गे न०। ब०। ५तद्वति त्रि०। ६कर्कटशृङ्ग्याम् स्त्री गौरा० ङीष्। स्वार्थे क। कुलिङ्गक चटके हेमच०।

कुलिङ्गाक्षी स्त्री० कुलिङ्ग कुत्सितलिङ्गमक्षी वफलमस्याः षच् समा० ङीष्। (पेटारी) घटिकावृक्षे रत्नमाला

कुलिज त्रि० कुलौ हस्ते कण्टकारिकायां वा जायते जन–ड ७त०। १हस्तजाते नखादौ “कुलिजहृष्टे दक्षिणतोऽम्नेयमारस्याहरति” ग्टह्यम् २कण्टकारीजाते च ततः “कुलजात् लुक्खौ च” पा० तदन्तात् द्विगोः सम्भवति अवहरति पचति वेत्यर्थेषु ठञ् तस्य लुक् वा ष्ठञ ख वा। द्विकुलज द्वैकुलजिक द्विकुलजिक द्विकुलजीन। तत्र सम्भवति, (कुलिजं स्वस्मिन् समावेशयति) तदपहारके तत्पाचके च त्रि०। ठञि स्त्रियां ङीप् अन्यतः टाप्।

कुलिन् पु० कुल+अस्त्यर्थे बला० पक्षे इनि। १पर्वते शब्दचि०। २सत्कुलवति त्रि० स्त्रियां ङीप्।

कुलिन्द पु० भूम्नि १देशभेदे “कुलिन्दाः कालयाश्चैव कुण्ठकाः करटास्तथा” भा०भी० ९अ० जनपदकथने। २तद्राजेषु च “शूरसेनाः भद्रकारा बोधाः शाल्वाः पटच्चराः। सुस्थलाश्च सुकुट्टाश्च कुलिन्दाः कुन्तिभिः सह” भा०स० १३अ०। “पूर्वं कुलिन्दविषये वशेचक्रे महीपतीन्। धनञ्जयो महाबाहुर्नातितीव्रेण कर्मणा”। “आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः” भा०स० १३।२५अ० अयञ्च देशः वृहसं० कूर्मविभागे १४अ० ऐशान्यामुक्तः “वनराजकिरातचीनकौलिन्दाः” कुलिन्द+स्वार्थे अण् कौलिन्दाः। [मेषादिषु २चतुर्थे राशौ च

कुलिर पु० कुल–वा० इरन्+कित्। १कर्कटे शब्दरत्ना०।

कुलिश पुंन० कुलौ हस्ते शेते शी–ड, कुलिनः पर्वतान् श्यति शो–ड वा ईषत् लिशति कु+लिश–क–कौ लिशति लिश–क वा यथायथं व्युत्पत्तिः। १इन्द्रायुधे वज्रे अशनिशब्दे ५७४पृ० तदुत्पत्त्यादिकमुक्तं तत्स्वरूपादिकं हेमा० परि० ख० लक्षणसमुच्चये धौम्यन सश्रुवेदोक्ततक्तं तत्र तत्रैव दृश्यम् विस्तरभयान्नोक्तम् “अयः शक्तिकुलिशपाशर्ष्टिकणपाः शराः” भा०व०२०अ०।

"अदेदनात्र कुलिशक्षतानाम्" कुमा० २मत्स्यभेदे पु० त्रिका०। ३अस्थिसंहारवृक्षे रत्नमा०।

कुलिशद्रुम पु० कुलिश इव द्रुमः। स्नुहीवृक्षे शब्द चि०

कुलिशधर पु० कुलिशं धरति धृ—अच्। वज्रधरे इन्द्रे कुलिशभृदादयोऽप्यत्र पु०

कुलिशनायक पु० "स्त्रीपादद्वयमाक्रम्य विसृष्टचितलिङ्गकः। योनिञ्च पीड़येत् कामी बन्धः कुलिशनायकः" रतिमञ्जर्य्युक्ते शृङ्गारबन्धभेदे। कुलिशनामक इति पाठः साधुः

कुलिशपाणि पु० कुलिशः पाणावस्य। इन्द्रे देवराजे

कुलिशाङ्कुशा स्त्री बौद्धानां विद्यादेवीभेदे हेमच०

कुलिशासन पु०कुलिशमिव दृढ़मासनमस्य। शाक्यमुनौ त्रिका०

कुली स्त्री कुल—क गौरा० ङीष्। १कण्टकारिकायाम् अमरः २वृहत्यां राजनि०। ३पत्नीज्येष्ठभगिन्याम् (बड़शाली) हेमच०

कुलीक पुंस्त्री० कुल—बा०ईकन् किच्च। पक्षिमात्रे स्त्रियां जातित्वेऽपि टाप्। "सोमाय लवानालभते त्वष्ट्रे कौलीकान् गोषादीर्देवानां पत्नीभ्यः कुलीका देवजामिभ्यः" यजु०२४ २४ कुलीक+स्वार्थेऽण् कौलीकान् पक्षिणः" तिस्रः कुलीकाः पक्षिणोर्देवाजामिभ्य देवस्वसृभ्यः" वेद दी०।

कुलीन पुंस्त्री० कुले जातः ख। १सत्कुलजे हये स्त्रियां ङीष्। तन्त्रोक्ते २कुलाचारयुक्ते ३उत्तमकुलजाते त्रि०। कौ पृथिव्यां लीनः। ४भूमिलग्ने त्रि०। संज्ञायां कन्। कुलीनक यमद्रुक्षे पु० हेमच० [क। जले हेम०।

कुलीनस न० कुलिलीनं भूलग्नं सति सो—अन्तकर्म्मणि

कुलीपय त्रि० जलचरजन्तुभेदे "मित्राय कुलीपयान्, वरुणाय नक्रान्" यजु० २४,२१। "कुलीपयान् जलजान् मित्राय" वेददी०। नाक्रोमकरः: कुलीपयस्ते ऽकूपारस्य" यजु० २४।३५ "नाक्रः मकरः कुलीपयस्ते त्रयः जलचरविशेषाः" वेददी०

कुलीर पुंस्त्री० कुल—संस्त्याने ईरन् किच्च। १कर्कटे(केँकडा) जलचरजन्तुभेदे अमरः स्त्रियां ङीष्। २कर्कटराशौ च। कर्कटशब्दे विवृतिः।

कुलीरशृङ्गी स्त्री कुलीरः कुलीरावयव इव शृङ्गमस्याः गौरा० ङीष्। (काँकडा शिङ्गी) वृक्षे रत्नमा० कुलीरविषाणीत्यप्यत्र स्त्री

कुलीराद् पु० कुलीरमत्ति अद्—क्विप्। कर्कटशिशौ तस्योत्पत्त्यैव स्वप्रसूतिगर्भविनाशनेन तद्भक्षकत्वात्तथात्वम्

कुलीश पुंन० कुलिश+पृषो०। वज्रे—सारसुन्दरी

कुलुक न० कल—बा० उलच् किच्च। जिह्वामले हेमच०

कुलुकगुञ्जा स्त्री कौ भूमौ लुका गुप्ता गुञ्जेव। उल्काग्नौ हारा०।

कुलुङ्ग पुंस्त्री कुरङ्ग+पृषो०। हरिणभेदे स्त्रियां टाप्। "सोमाय कुलुङ्ग आरण्योऽजो नकुलः शकाः"यजु० २४ ३२। "कुलुङ्गः कुरङ्गः हरिणः" वेददी० "साध्येभ्यः कुलुङ्गान्" यजु० २४।२७

कुलुञ्च त्रि० कु भूमिं क्षेत्रगृहादिरूपां लुञ्चति हरति,कुत्सितं लुञ्चति वा लुन्च—अण्। चौरभेदे "उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमः"यजु० १६।२२।

कुलूत पु० भूम्नि देशभेदे स च देशः वृ०सं० कूर्म्मविभागे वायव्यामैशान्याञ्च उक्तः यथा "दिशि पश्चिमोत्तरस्याम्" इत्युपक्रमे "अश्मककुलूतलहड़स्त्रीराज्यनृसिंहवनस्थाश्च" "ऐशान्यां मेरुकनष्टराज्यमित्युपक्रमे "अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः"; तेन कुलूतदेशो द्विधा। तत्र भवः अण्। कौलूत तत्र भवे त्रि० बहुषु तस्य लुक् कुलूताः। तेषां राजा अण्। कौलूत तद्राजे बहुषु तस्य लुक्। कुलूता तद्राजाः।

कुलेचर पु० कुले जलसमीपे चरति चर—अट् अलुक्स०। उद्भिद्दे शाकभेदे "लवककुलेचरवंशकरीरप्रभृतीनि कफहराणि सृष्टमूत्रपुरीषाणि" सुश्रुतः।

कुलेश्वर पु० ६त०। १शिवे २वंशपतौ च शब्दमा०

कुलेय त्रि० कुले भवः वा० ढ। कुलजाते "बभूव तत् कुलेयानां द्रव्यकार्य्यमुपस्थितम्" भा० आ० १७८अ०

कुलोत्कट पुंस्त्री० कुलेन उत्कटः। १कुलीनाश्वे शब्दच० २उत्कृष्टकुलजाते त्रि०

कुलोद्वह त्रि० कुलं वंशभारं रक्षणादिकमुद्वहति उद्+वह—अच्। कुलपालके कुलश्रेष्ठे "पुत्रोममानुरूपश्च शूरश्चेति कुलोद्वहः"भा०वि०३५अ०

कुल्फ पुंन०। कल—संख्याने फक् अस्य उत्त्वं। १रोगभेदे २गुल्फे च उज्ज्वलद०। "अष्ठीवन्तौ परि कुल्फौ च देहत्" ऋ०७,५०,२, "अयमेव दक्षिण ऊरुर्वरुणप्राघास"इत्युपक्रमे "कुल्फावैन्द्राग्नं हविः" शत०ब्रा० ११।५।२।३। "अयमेवोत्तरऊरुरित्युपक्रमे "कुल्फावैन्द्राग्नं हविः तस्मादिमौ द्वौ कुल्फाविति च" ११।५।२।५। "जानुदघ्नोद्वितीयः कुल्फदघ्नस्तृतीयः" शत०ब्रा० १२।२।१।२०।

कुल्मल न० कुष—क्मलच् लत्वात्लादेशः। १पापे उज्ज्वलद०। "तत्र से गच्छताद्दूरं शल्य इव कुल्मलं यथा" अथ० २९

२०,२०।२तद्वति त्रि० "अपाष्टाच्छृङ्गात् कुल्मलाच्चिरवोचमहं विषम्" अ०४,६,५,जिह्वा ज्या भवति कुल्मलस्५,१८,८,

कुल्माष पु० कोलति कुल–क्विप् कुल् माषोऽस्मिन् ७ब०। "अर्द्धस्विन्नास्तु गोधूमा अन्ये च चणकादयः। कुल्माषा इति कथ्यन्ते" इत्युक्तेषु १अर्द्धस्विन्नगोधूमादिषु वैद्यकम्. "कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः" भावप्र० "सक्तून् प्रिलेपी कुल्माषं जलञ्चापि शुभं पिबेत्" सुश्रु०। "वज्राकां वारुणीकुल्माषाभ्याम्" (वाग्नीयात्)। सुश्रु०। "कणपिण्याकफलीकरणकुल्माषस्थालीपुरीषादीन्यमृतवदभ्यवहरति" भाग० ५,६,१०,। कुत्सिता माषाः पृषो०। २निन्दितमाषे च "स हेभ्यं कुल्माषान् खादन्तं बिभिक्षे" छान्दो०उ० "कुल्माषान् कुत्सितान् माषान्" भा० भाष्यम्। ३सूर्य्यस्य पारिपार्श्विकभेदे ४गूकधान्ये अवादौ च शब्दचि०। ५काञ्जिके ६मसीपरिणामे च न० शब्दचि०। "कुल्माषाः कुलेषु सीदन्तीति" निरुक्तोक्ते ७कुत्सितार्थे त्रि० "कुल्माषांश्चिदाहरेत्यत्र कुत्सिते" निरुक्तकारः। कुल्माषाः प्रायेणान्नमस्याः अच् स्त्रियां ङीप्। कौल्माषी पूर्णिमा। ८माषादिमिश्राद्र्भ्रष्टभक्ते (खेचडी) भरतः। ६रोगभेदे शब्दरत्ना० १०वनकुलत्थे रत्नमा०।

कुल्माषाभिषुत न० ३त०। काञ्जिके क्षीरस्वामी।

कुल्मास न० कुल्माष+पृषो०। कुल्माषशब्दार्थे भरतः।

कुल्य न० कुल–क्यप्। १अस्थि अमरः। २अष्टद्रोणपरिमाणे शूर्पे ३आमिषे च मेदि०। कुले भवः यत्। ४कुलजाते ५मान्ये च त्रि० मेदि०। कुल+चतुरर्थ्यां बला०य। ५कुलसन्निकृष्टदेशादौ त्रि०। कुलाय हितं यत्। ६कुलहिते त्रि० "हन्तीव कुल्याः पशुभूतवर्गान्" भाग० ७।६।१२। कुल्यायां भवः यत् यलोपः। ८कुल्याभवे त्रि० "नमः कुल्याय च सरस्याय च" यजु०१६,३७ ततिमेऽन्त्ये १०सरिद्भेदे स्त्री अमरः ११पयःप्रणाल्याम् १२जीवन्त्यौषधौ १२नदीमात्रे च स्त्री० मेदि० "सैन्धवारण्यमासाद्य कुल्यानां कुरु दर्शनम्" भा०व०१०४०८श्लो०। "घृतकुल्यास्त दश नद्यो बहुशतास्तथा" भा०व०८५,२०श्लो०। क्षीरकुल्या घृतकुल्या दधिकुल्या मधुकुल्या इत्यादि।

कुल्यासन न०कुलाय कुलाचारायहितं यत् कुल्यमासनम्। "अथकुल्यासनं वक्ष्ये यत् कृत्वा कुलिको भुवि। एकहस्तो मालतस्योऽधःशीर्षो नाभिं करे" इति रुद्रयामलोक्ते आसनभेदे

कुल्लूक पु० मनुधर्मशास्त्राबलीनामटीकाकारकविहद्भेदे "श्रीमद्भट्टदिवाकरस्य तनयः कुल्लूकभट्टोऽभयत्" तट्टीकोपक्रमः।

कुल्व कुल–उल्वा० नि० १लोमराहित्यरूपे। (टाक) रोगभेदे २तद्युक्ते त्रि० "अथैतानष्टौ विरूपानालभते अतिदीर्घं चातिह्रस्वं चातिस्थूलं चातिकृशं चातिशुक्लं चातिकृष्णं चातिकुल्वं चातिलोमशं च अशूद्रा अब्राह्मणास्ते प्राजापत्याः" यजु०३०।२२। "अतिकुल्वं रोमरहितम्." वेददी०

कुव न० कुं भूमिं वाति गच्छति वा–क, कुङ् शब्दे कूवन् वा। १जलजे, पुष्पभावे, २उत्पले च हेमच०।

कुवकालुका स्त्री कुवमिव कायति कै–क आलुका। घोलीशाके। राजनि०

कुवङ्ग न० ईषद् वङ्गं गुणेन। सीसके राजनि०।

कुवचस् त्रि० कुत्सितं वचोऽस्य। १कुत्सितवादकथके अमरः कुगतिस०। २परीवादकथने न०। कुवाक्यादयोऽप्यत्र न०।

कुवज् न० कुत्सितं वज्रं हीरकमिव कायति कै–क। वैक्रान्तमणौ राजनि०।

कुवम पु०कौ पृथिव्यां वमति वर्षति जलं वम–अच्। १सूर्य्ये "कुलं कुलञ्च कुवमः कुवमः कश्यपोद्विजः" भा०आनु० ६३अ० "कुः पृथिवी तस्यां वमति वर्षतीति कुवमश्चादित्यः "आदित्याद् जायते वृष्टिरिति" श्रुतेः सर्वोऽप्यादित्योऽग्निरेव अतएव सर्व्वं धर्मादित्वात्तासुत्पत्तेः" नीलकण्ठः। कुपपौः इति पाठान्तरे सूर्य्य एवार्थः। कुत्सितं वमति। २निन्दितवमनकारके त्रि० [रायमुकुटः

कुवर पु०कुत्सितं त्रियते वृ–अप्। १तुवरे २कषाये ३तद्वति त्रि०

कुवल न०कौ वलति वल–अच्। १उत्पले २मुक्ताफले च मेदि०३वदर्य्यां स्त्री० गौरा० ङीष्। तस्याः फलम् अण् लुक्।४वदरीफले न०। कौ वलनात्। ५जले। ६सर्पोदरे च न०कुवलेशयः। प्रस्थे परे समासे कर्क्यादि०अस्य नाद्युदात्तता। तस्य पाकः पील्वादि० कुणच्। कुवलकुण तत्पाके पु०।

कुवलय न० कोर्वलयमिव शोभाहेतुत्वात्। १उत्पले, अमरः २श्वेतोत्पलेनीलोत्पले राजनि० "कस्त्वं साधो! कुवलयदलश्यामविस्तीर्णदृष्टे! इत्युद्भवदूतम्। ततः तारका० इतच्। कुवलयित जातकुवलये त्रि०। "कुवलयित गवाक्षालोचनैरङ्गनानाम्" रघुः। कोर्वलयम् ६त०। ४भूमण्डले न० "यतो भूवलयं सर्व्वं आलोऽयं विचरिष्यति। अतः कुवलयो नाम्ना ख्यातिं लोके प्रयास्यति" इत्युक्त निरुक्तियुते ५असुरभेदे पु०।

कुवलयानन्द पु०कुवलयं भूमण्डलमानन्दयति आ+नन्द–अण्

उप॰स॰। चन्द्रालोकस्यालङ्कारमयूखव्याख्याने अप्पयदीक्षितकृते ग्रन्थभेदे ६त॰। २कुमुदस्यानन्दे च। "अमुं कुवलयानन्दमकरोदप्पदीक्षितः। नियोगाद्वेङ्कटपतेर्निरुपाधिकृपानिधेः। चन्द्रालोकोविजयतां शरदागमसम्भवः। हृद्यः कुवलयानन्दोयत्प्रसादादभूदयम्"। तद्ग्रन्थसमाप्तौ "तस्माच्च कुवलयानन्दः स्वग्रन्थोऽभूत् कुवलयस्य कुमुदस्यानन्द इति च श्लेषइति" चन्द्रिका

कुवलयापीड त्रि॰ कुवलयमापीडः भूषणं यस्य। नीलोत्पलभूषणवति १जने कंसासुरस्य हस्तिरूपधारिणि २दैत्यभेदे पु॰। "नागं कुवलयापीडं चाणूरं मुष्टिकं तथा। कंसञ्च बलिनां श्रेष्ठं सगणं देवकीसुतः। न्यहनत् गोपवेशेन क्रीडासक्तोऽपि केशवः" हरिवं॰ १०६अ॰ "राजा कुवलयापीडः समाजद्वारि कुञ्जरः। तिष्ठत्विति समाज्ञाप्य प्रेक्षागारमुपाययौ" हरि॰ ८६अ॰

कुवलयाश्व पु॰ कुव(ब)लाश्वनामके धुन्धुमारे नृपभेदे। स्वार्थे क तत्रार्थे "बृहदश्वस्तु श्रावन्तिस्ततः कुवलयाश्वकः। यः प्रियार्थमुतङ्कस्य धुन्धु नामासुरं बली। सुतानामेकविंशत्या सहस्रैरहनद्वृतः। धुन्धुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः। धुन्धोर्मुखाग्निना सर्व्वे त्रय एवावशेषिताः" भाग॰ ९।६।१८।१९। कुवलाश्वशब्दे तच्चरितादि। [पद्मिन्याम् राजनि॰।

कुवलयिनी स्त्री कुवलयानां संघः खलादि॰ इनि। उत्-

कुवलाश्व पु॰ कौ पृथिव्यां वलते वल अच् तादृशोऽश्वोऽस्य। कुवलयाश्वे धुन्धुमारे नृपभेदे।

कुवलेशय पु॰ कुवले जले शेते शी—अच् ७त॰ अलुक्स॰। विष्णौ "कुमुदः कुवलेशयः" विष्णुस॰। "क्षितौ वलनात् सञ्चलनात् कुवलं जलं तस्मिन् शेषोदरे शेते इति कुवलेशयः, कुबलं बदरीफलं तन्मध्ये शेते कुवलेशयः तक्षकः सोऽपि भगवतोविभूतिरिति वा हरिः कुवलेशयः। कौ भूमौ वलति संवीयते सर्पाणामुदरं कुवलं तस्मिन् शेषोदरे शेते इति कुवलेशय इति" भाष्यम्।

कुवाद त्रि॰ कुत्सितं वदति अण्। अपरदोषकथनशीले। अमरः। भावे घञ् कुगतिस॰। २कुत्सितवादे।

कुवाहुल पुंस्त्री वहति कु+वह—वा॰ उलच्। उष्ट्रे शब्दचन्द्र॰ स्त्रियां ङीष्।

कुवि(चि)क पु॰ भूम्नि देशभेदे स्वार्थे देशः बृह॰सं॰ कूर्म्मविभागे ऐशान्यामुक्तः। "ऐशान्यामित्युपक्रमे कुनटखशघोषकुचि(वि) काख्याः" इति

कुविद् अव्य॰ कुः भूमिरिव विद्यते ज्ञायते बाहुल्यात् विद—भावे क्विप् ६त॰। १बाहुल्ये २प्रशंसायाञ्च। चादिगण व्याख्याने मनोरमा। उच्चैर्वत् ३तद्वति च "कुवित्सस्य प्रहि व्रजम्" ऋ॰ ६।४५।२४। "कुविदङ्गयः स्यति हिनस्ति" भा॰ "कुविन्नो अस्य वचसः" ऋ॰२।१६।७ कुविदङ्ग" भा॰। 'स त्वष्टा चुक्रोध कुविन्मे पुत्रमवधीत्' शत॰ब्रा॰ १।६।३।६। "कुविदङ्ग नमसा ह्वधासः" ऋ॰ ७।९१।१। कुविदिति बहुनाम। अङ्गेति क्षिप्रनाम कुविद्बहुशोऽङ्ग क्षिप्रं कृतेन नमसा" भा॰। "कुविद् अङ्ग" इति पदग्रन्थे पदद्वयतया विभागः। एतेन कुविदङ्गेति एकशब्दकल्पनं चिन्त्यम्। कुत्सितं वेत्ति विद—ज्ञाने कर्त्तरि क्विप्। ४कुज्ञानवति त्रि॰।

कुविद्या स्त्री कुगतिस॰। १निन्द्यविद्यायाम्। ब॰। २तद्वति त्रि॰

कुविद्यास त्रि॰ कुविद्यां स्यति हिनस्ति सो—क। कुविद्यानिरासके। ततः कृशाश्वादिषु विकुद्यासेत्यत्र पाठान्तरेऽस्य पाठात् चतुरर्थ्यां छण्। कौविद्यासीय तत्सन्निकृष्टदेशादौ त्रि॰।

कुविन्द पुंस्त्री कुं भूं कुत्सितं वा विन्दति विद—श। तन्तुवाये शूद्रागर्भे विश्वकर्म्मणो जाते जातिसङ्करभेदे अमरः [२निन्दितमण्डले च त्रिका॰

कुविम्ब पु॰न॰। कोर्विम्बं कुत्सितं विम्बं वा। १भूमण्डले

कुविवाह पु॰। कुगतिस॰ वर्णभेदेन निन्दनीयविवाहे मनुना वर्णभेदेन ब्राह्माद्यष्टविवाहेषु निन्द्यानिन्द्यत्वमुक्तं यथा

"चतुर्णामपि वर्णानां प्रेत्य चेह हिताहितान्। अष्टाविमान् समासेन स्त्रीविवाहान्निबोधत" मनु॰

"चतुर्णामिति। चतुर्णामपि वर्णानां ब्राह्मणादीनां परलोके इह लोके च कांश्चित् हितान् कांश्चिदहितान् इमान् अभिधास्यमानान् अष्ट संक्षेपेण भार्य्याप्राप्तिहेतून् विवाहान् शृणुत" कुल्लूकभट्टीका

"ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः। गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः" मनु॰

"त एते नामतो निर्द्दिश्यन्ते ब्राह्म इति। ब्राह्मराक्षसादिसंज्ञा चेयं शास्त्रादौ संव्यवहारार्था स्तुतिनिन्दाप्रदर्शनार्था च। ब्रह्मण इवायं ब्राह्मः रक्षस इवायं राक्षसः नतु ब्रह्मादिदेवताकत्वं विवाहानां सम्भवति। पैशाचस्याधमत्वाभिधानं निन्दातिशयार्थम्" टी॰

"यो यस्य धर्म्मो वर्णस्य गुणदोषौ च यस्य यौ।

तद्धः सर्व्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्” मू०
“स इति। धर्म्मादनोपेतो धर्म्म्यः यो विवाहो यस्य वर्णस्य धर्म्म्योयस्य विवाहस्य यौ गुणदोषौ दृष्टानिष्ट-फले तत्तद्विवाहोत्पन्नापत्येषु ये गुणागुणास्तत् सर्व्वं युष्माकं प्रकर्षेणाभिधास्यामि। वक्ष्यमाणानुकीर्त्तनमिदं शिष्याणां सुखग्रहणार्थम्” टी०
“षडानुपूर्व्व्या विप्रस्य क्षत्त्रस्य चतुरोऽवरान्। विट्-शूद्रयोस्तु तानेव विद्याद्धर्म्म्यान राक्षसान्” मू०
“षडिति। ब्राह्मणस्य ब्राह्मादिक्रमेण षट्। क्षत्त्रियस्य; अवरानुपरितनानासुरादींश्चतुरः, विट्शूद्रयोस्तु तानेव राक्षसवर्जितानासुरगान्धर्व्वपैशाचान् धर्म्मादनपेतान् जानीयात्” टी०

“चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः। राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः” मू०
“चतुर इति। ब्राह्मणस्य प्रथमपठितान् ब्राह्मादींश्चतुरः, क्षत्त्रियस्य राक्षसमेकमेव, वैश्यशूद्रयोरासुरमेतान् श्रेष्ठान् ज्ञातारो जानन्ति। अतएव ब्राह्मणादिष्वासुरादीनां पूर्व्वविहितानामप्यत्रानुपादानं जघन्यत्वज्ञापनार्थं तेन प्रशस्तविवाहासम्भवे जघन्यस्यापि परिग्रह इति दर्शितम्। एवमुत्तरत्रापि विगर्हितपरित्यागो बोद्धव्यः” टी०

“पञ्चानान्तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह। पैशाचश्चासुरश्चैव न कर्त्तव्यौ कदाचन” मू०
“पञ्चानामिति। इह पैशाचप्रतिषेधादुपरितनानां प्राजापत्यादीनां ग्रहणम्। तेषु मध्ये प्राजापत्यगान्धर्व्वराक्षसास्त्रयो धर्म्मादनपेताः। तत्र प्राजापत्यः क्षत्त्रियादीनामप्राप्तो विधीयते ब्राह्मणस्य विहितत्वादनूद्यते। गान्धर्व्वस्य च चतुर्णामेव प्राप्तत्वादनुवादः। राक्षसोऽपि वैश्यशूद्रयोर्व्विधीयते ब्राह्मणस्य क्षत्त्रियस्याव्यवस्थितस्यापि, आसुरपैशाचौ न कर्त्तव्यौ। कदाचनेत्यविशेषाच्चतुर्णामेव निषिध्यते। अत्र यं वर्णं प्रति यस्य विवाहस्य विधिनिषेधौ तस्य तं प्रति विकल्पः स च विहितासम्भवे बोद्धव्यः” टी०

“पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्व्वचोदितौ। गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्त्रस्य तौ स्मृतौ” मू०
“पृथगिति। पृथक्पृथगिति प्राप्तत्वादनूद्यते। मिश्राविति विधीयते। पृथक्पृथक् मिश्रौ वा पूर्व्वविहितौ गान्धर्व्वराक्षसौ क्षत्त्रस्य धर्म्म्यौ मन्वादिभिः स्मृतौ। यदा स्त्रीपुंसयोरन्योन्यानुरागपूर्व्वकसंवादेन परिणेता युद्धादिना विजित्य तामुद्वहेत्तदा गान्धर्व्वराक्षसौ मिश्रौ भवतः” टी०
“कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च। कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च” मनुः दुर्विवाहादयोऽप्यत्र “जायन्ते दुर्विवाहेषु ब्रह्मधर्म्मद्विषः सुताः। अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा” मनुः।

कुवृत्ति स्त्री० कुगतिस०। १निन्दिताचरणे २ईषच्चरणे च ब०व्री०। ३तद्युक्ते त्रि०

कुवृत्तिकृत् पु० कुवृत्तिमीषदावरणरूपं चरणं करोति कृ–क्विप् (काँटाकरमचा) १ करञ्जभेदे शब्दचि०। २निन्दित-चेष्टाकारके त्रि० शब्दचि०

कुवेणि(णी) स्त्री ईषत् वेणन्ते मत्स्या अस्याम् वेण–इन्, वा ङीप्) मत्स्यधान्याम् (खालुइ) अमरः

कुवेर न० कुत्सितं वेरमस्य। धनदे उत्तरदिक्पाले देवभेदे कुबेरशब्दे विवृतिः कुवेरोत्पत्यादिकं रामा० उ० का० ३ स० वर्णितं यथा
“ज्ञात्वा तस्य तु तद्वृत्तं भरद्वाजो महामुनिः। ददौ विश्रवसे भार्य्यां स्वसुतां देववर्णिनीम्। प्रतिगृह्य तु धर्म्मेण भरद्वाजसुतान्तदा। प्रजान्वीक्षिकया बुद्ध्या श्रेयोह्यस्य विचिन्तयन्। मुदा परमया युक्तो विस्मया मुनिपुङ्गवः। स तस्यां वीर्य्यसम्पन्नमपत्यं परमाद्भुतम्। जनयामास धर्म्मज्ञः सर्व्वैर्ब्रह्मगुणैर्वृतम्। तस्मिन् जाते तु संहृष्टः स बभूव पितामहः। दृष्ट्वा श्रेयस्करीं बुद्धिं धनाध्यक्षो भविष्यति। नाम चास्याकरोत् प्रीतः सार्द्धं देवर्षिभिस्तदा। यस्माद्विश्रवसोऽपत्यं सादृश्याद्विश्रवा इव। तस्माद्वैश्रवणो नाम भविष्यत्येष विश्रुतः। स तु वैश्रवणस्तत्र तपोवनगतस्तदा। अवर्द्धताहुतिहुतो महातेजा यथाऽनलः। तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः। चरिष्ये परमं धर्मं धर्मो हि परमा गतिः। स तु वर्षसहस्राणि तपस्तप्त्वा महावने। यन्त्रितो नियमैरुग्रैश्चकार सुमहत्तपः। पूर्णे वर्षसहस्रान्ते तं तं विधिमकल्पयत्। जलाशी मारुताहारो निराहारस्तथैव च। एवं वर्षसहस्राणि जग्मुस्तान्येकवर्षवत्। अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह। गत्वा तस्याश्रमपदं ब्रह्मेदं वाक्यमब्रवीत्। परितुष्टोऽस्मि ते वत्स! कर्म्मणाऽनेन सुव्रत!। वरं वृणीष्व भद्रन्ते वरार्हस्त्वं महामते!। अथाब्रवीद्वैश्रवणः पि-

तामहमुपस्थितम्। भगवन्! लोकपालत्वमिच्छेयं लोकरक्षणम्। अथाब्रवीद्वैश्रवणं परितुष्टेन चेतसा। ब्रह्मा सुरगणैः सार्धं बाढमित्येव हृष्टवत्। अहं वै लोकपालानां चतुर्थं स्रष्टुमुद्यतः। यमेन्द्रवरुणानाञ्च पदं यत्तव चेप्सितम्। तद्गच्छ वत्स! धर्मज्ञ! निधीशत्वमवाप्नुहि। शक्राम्बुपयमानाञ्च चतुर्थस्त्वं भविष्यसि। एतच्च पुष्पकं नाम विमानं सूर्यसन्निभम्। प्रतिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज। स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम्। कृतकृत्या वयं तात! दत्त्वा तव वरद्वयम्। इत्युक्त्वा स गतो ब्रह्मा स्वस्थानं त्रिदशैः सह। गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्तलम्। धनेशः पितरं प्राह प्राञ्जलिः प्रयतात्मवान्। भगवन्! लब्धवानस्मि वरमिष्टं पितामहात्। निवासनं न मे देवो विदधे स प्रजापतिः। तं पश्य भगवन्! कञ्चिन्निवासं साधु मे प्रभो!। न च पीड़ा भवेद्यत्र प्राणिनो यस्य कस्य चित्। एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुङ्गवः। वचनं प्राह धर्मज्ञः श्रूयतामिति सत्तम!। दक्षिणस्योदधेस्तीरे त्रिकूटो नाम पर्वतः। तस्याग्रे तु विशाला सा महेन्द्रस्य पुरी यथा। लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा। राक्षसानां निवासार्थं यथेन्द्रस्यामरावती। तत्र त्वं वस भद्रन्ते लङ्कायां नात्र संशयः। हेमप्राकारपरिखायन्त्रशस्त्रसमावृता। रमणीया पुरी सा हि रुक्मवैदूर्यतोरणा। राक्षसैः सा परित्यक्ता पुरा विष्णुभयार्दितैः। शून्या रक्षोगणैः सर्वैः रसातलतलङ्गतैः। शून्या संप्रति लङ्का सा प्रभुस्तस्या न विद्यते। स त्वं तत्र निवासाय गच्छ पुत्र! यथासुखम्। निर्दोषस्तत्र ते वासो न बाधस्तत्र कस्य चित्। एतच्छ्रुत्वा स धर्मात्मा धर्मिष्ठं वचनं पितुः। निवासयामास तदा लङ्कां पर्वतमूर्धनि। नैरृतानां सहस्रैस्तु हृष्टैः प्रमुदितैः सदा। अचिरेणैव कालेन संपूर्णा तस्य शासनात्। स तु तत्रावसत् प्रीतो धर्मात्मा नैरृतर्षभः। समुद्रपरिखायां स लङ्कायां विश्रवात्मजः। काले काले तु धर्मात्मा पुष्पकेण धनेश्वरः। अभ्यागच्छद्विनीतात्मा पितरं मातरञ्च ह।”

कुवेरक पु० कुवेर इव कायति कै—क। १नन्दीवृक्षे अमरः स्वार्थे क। २वनदे ३नन्दीवृक्षे मेदि० ४अर्हदुपासकभेदे हेम०

कुवेराक्षी स्त्री० कुवेरस्याक्षीव पिङ्गपुष्पत्वात् षच् समा० ङीष्। १पाटलावृक्षे अमरः २लताकरञ्जे राजनि०

कुवेराचल पु० ६त०। कैलासपर्वते त्रिका० कुवेरपर्वतादयोऽप्यत्र पु०

कुवेल न० कुवेषु जलजपुष्पेषु मध्ये वें शोभां लाति—ला—क। उत्पले हेमच०

कुवैद्य पु० कुगतिस०। सुश्रुताद्युक्तक्रियोल्लङ्घनेन स्वेच्छया विपरीताचारिणि वैद्ये तल्लक्षणदोषादिकं सुश्रुते उक्तं यथा “यस्तु केवलशास्त्रज्ञः कर्म्मस्वपरिनिष्ठितः। स मुह्यत्यातुरं प्राप्य प्राप्य भीरुरिवाहवम्। यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः। स सत्सु पूजां नाप्नोति बधं चार्हति राजतः। उभावेतावनिपुणावसमर्थौ स्वकर्म्मणि। अर्द्धवेदधरावेतावेकपक्षाविव द्विजौ। ओषध्योऽमृतकल्पास्ते शस्त्राशनिविषोपमाः। भवन्त्यज्ञैरुपहृतास्तस्मादेतौ विवर्जयेत्। स्नेहादिष्वनभिज्ञो यः स्नेहादिषु च कर्म्मसु। स निहन्ति जनं लोभात् कुवैद्यो नृपदोषतः। यस्तूभयज्ञो मतिमान् स समर्थोऽर्थसाधने। आहवे कर्म्म निर्वोढुं द्विचक्रः स्यन्दनो यथा” “कुवैद्ये कितवे शठे। चाटचारणदासेषु दत्तं भवति निष्फलम्” स्मृतिः

कुश द्युतौ इदित् वा चुरा० पक्षे भ्वादि० पर० सक० सेट्। कुंशयति ते कुंशति अचुकुंशत्—त अकुंशीत्। कुंशयां बभूव आस चकार चक्रे चुकुंश। प्रनिकुंशति

कुश श्लेषे दि० पर० सक० सेट्। कुश्यति। अकुशत्—अकोशीत्। चुकोश। कुचिः कोशः

कुश पु०न० कौ शेते शी—क, कुं पापं श्यति शो—क वा। १स्वनामख्याते तृणे अमरः। “कुशोन्मृष्टगर्भक्लेदवति २रामसुते ‘रिपुनागाङ्कुशं कुशमिति” रघुः। ३योक्त्रे, च पु० मेदि० घृतसमुद्रेणावृते ४द्वीपभेदे पु०। ५जले न० मेदि०। कुशेशयः। ६सर्पोदरे शङ्कराचार्य्यः “कौशं बर्हिः” कात्या० १।२।१२ तस्यासंस्कृतकुशार्थतामाह “बर्हिःकौशं कुशा दर्भाः तस्येदं कौशं कुशमात्रमेव बर्हिःशब्देनोच्यते न संस्काराः, कुतः? अन्वयव्यतिरेकाभ्यां जातिवाचित्वाद्बर्हिःशब्दस्य, यत्र यत्र बर्हिःशब्दप्रयोगस्तत्र तत्र जातिरित्यस्या व्याप्तेर्लोके वेदे च नास्ति व्यभिचारः, संस्कारव्याप्तेस्तु लौकिकप्रयोगे व्यभिचारो दृश्यते क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विना संस्कारं बर्हिःशब्दः प्रयुज्यते बर्हिरादाय गावो गता इति तस्माज्जातिवाची बर्हिःशब्दः। असंस्कृतं कुशमात्रं बर्हिःशब्देनोच्यत इत्यर्थः। प्रयोजनं बर्हिषि प्राग्राग्रदृष्टि च प्रास्तरी

त्यादौ संस्कारा न कर्त्तव्याः। स्मृतौ कुशाभावे तु का-
शाः स्युः काशाः कुशसमाः स्मृताः। काशाभावे गृहीतव्या
अन्ये दर्भा यथोचिताः। दर्भाभावे स्वर्णरूप्यताम्रैः कर्म-
क्रियाः सदा। कुशकाशशरा दूर्वायवगोधूमवाल्वजाः।
सुवर्णं रजतं ताम्रं दश दर्भाः प्रकीर्त्तिताः। स्नाने होमे
तथा दाने स्वाध्याये पितृतर्पणे। सपवित्रौ सदर्भौ वा करौ
कुर्व्वीत नान्यथा। सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रथितं
न वा। सपवित्रः सदर्भो वा कर्म्माङ्गाचमनं चरेत्। नो-
च्छिष्टं तत् सदर्भं च दर्भोच्छिष्टं तु वर्जयेदिति” कर्क:
कर्म्माङ्गकुशलक्षणादिकं श्रा० त० आह यथा

“ब्रह्मपुराणे ‘सपिञ्जलाश्च हरिताः पुष्टाः स्निग्धाः
समाहिताः। गोकर्णमात्राश्च कुशाः सकृच्छिन्नाः समूल-
काः। पितृतीर्थेन देयाः स्युर्दूर्व्वाः श्यामाक एव च।
काशाः कुशा बल्वजाश्च तथान्ये तीक्ष्णरोमशाः। मौञ्जा-
श्च शाद्वलाश्चैव षड्दर्भाः परिकीर्त्तिताः”। तीक्ष्णरोमशा
इति वल्वजानां विशेषणं तेन तेषामलाभे ‘मूकतृणशर-
शीर्षयुतबल्वजोलपशुण्ठवर्जं सर्व्वतृणानीति” गोभिलेन
तद्व्यतिरिक्तवल्वजानां निषेधोबोद्धव्यः। सपिञ्जलाः सा-
ग्राः स्निग्धा अकर्कशाः पुष्टा न सूक्ष्माः समाहिता
निर्दोषाः शाद्वला इति मौञ्जस्य विशेषणम्। मूकानि फ-
लपुष्पमञ्जर्य्यस्तायेषां तृणानां सन्ति तानि मूकतृणानीति
भट्टनारायणचरणाः। गोकर्णमात्रा विस्तृताङ्गुष्ठानामि-
कापरिमिताः। विष्णुः ‘कुशस्थाने काशं दूर्व्वां वा
दद्यादिति” हतमुष्टिहस्तपरिमिताः कुशाः प्रस्तर-
णार्थाः तथाच वायुपुराणम् ‘रत्निप्रमाणाः शस्ता वै
पितृतीर्थेन संस्कृता। उपमूले तथा लूनाः प्रस्तरार्थे
कुशोत्तराः”। वर्ज्यकुशानाह हारीतः ‘चितौ दर्भाः
पथि दर्भाः ये दर्भा यज्ञभूमिषु। स्तरणासनपिण्डेषु षड्-
दर्भान् परिवर्जयेत्। पिण्डार्थं ये स्तृता दर्भा यैः कृतं
पितृतर्पणम्। मूत्रोच्छिष्टप्रलेपे तु त्यागस्तेषां विधीय-
ते”। छन्दोगपरिशिष्टम् ‘धृतैः कृते च विण्मूत्रे
त्यागस्तेषां विधीयते। नीवीमध्ये च ये दर्भा ब्रह्म-
सूत्रे च ये धृताः। पवित्रांस्तान् विजानीयाद्यथा काय
स्तथा कुशाः। आचम्य प्रयतो नित्यं पवित्रेण द्विजो-
त्तमः। नोच्छिष्टन्तु भवेत्तत्र भुक्तशेषं विवर्जयेत्’।
अत्र विशेषः निर्णयसिन्धौ
पृथ्वीचन्द्रोदये तद्ग्रहणकालमाह दक्षः “समित्पुष्प-
कुशादीनां द्वितीयः परिकीर्तितः। अष्टधा विभक्तदिनस्य
द्वितीयोभाग इत्यर्थः। तत्रैव यमः “समूलस्तु भवेद्दर्भः
पितॄणां श्राद्धकर्म्मणि। मूलेन लोकान् जयति
शक्रस्य सुमहात्मनः”। व्यासः “तर्पणादीनि कार्य्याणि
पितॄणां यानि कानि चित्। तानि स्युर्द्विगुणैर्दर्भैः
सपवित्रैर्विशेषतः” शाखङ्कायनः “सपिण्डीकरणं
यावदृजुदर्भैः पितृक्रिया। सपिण्डीकरणादूर्ध्वं
द्विगुणैर्विधिवद्भवेत्” शङ्खः “अनन्तर्गर्भिणं साग्रङ्कौशं द्वि-
दलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्”
हारीतः “पवित्रं ब्राह्मणस्यैव चतुर्भिर्दर्भपिञ्जलैः।
एकैकं न्यूनमुद्दिष्टं वर्णेवर्णे यथाक्रमम्”। कृत्यार्थसारे
“सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रथितं नवम्” रत्नावल्याम्
“द्वयोस्तु पर्व्वणोर्मध्ये पवित्रं धारयेद्बुधः” हेमाद्रौ स्कान्दे
“अनामिकाधृता दर्भा ह्येकानामिकयापि वा। द्वाभ्या-
मनामिकाभ्यां तु धार्ये दर्भपवित्रके” पवित्राभावे तु तत्रैव
सुमन्तुः “समूलाग्रौ विगर्भौ तु कुशौ द्वौ दक्षिणे करे। सव्ये
चैव तथा त्रीन्वै बिभृयात् सर्वकर्मसु”। बौधायनः “हस्त-
योरुभयोर्द्वौ द्वावासनेऽपि तथैव च” दर्भग्रहणे मन्त्रमाह
शङ्खः “विरिञ्चिना सहोत्पन्न! परमेष्ठिनिसर्गज!।
नुद सर्वाणि पापानि दर्भ! स्वस्तिकरोभव”। कृत्यार्थसारे
“हुम्फट्कारेण मन्त्रेण सकृच्छित्त्वा समुद्धरेत्” भरद्वाजः
“प्रेतक्रियार्थं पित्रर्थमभिचारार्थमेव च। दक्षिणाभि-
मुखश्छिन्द्यात् प्राचीनावीतिकोद्विजः”। कुशाभावे अप-
रार्के सुमन्तुः “कुशाः काशाःशरो गुन्द्रोयवा दूर्वाऽ-
श्च बल्वजाः। गोकेशमुञ्जकुन्दाश्च पूर्वाभावे परः परः”।
काशादौ विशेषमाह शङ्खः “काशहस्तस्तु नाचामेत्कदा-
चिद्विधिशङ्कया। प्रायश्चित्तेन युज्येत दूर्वाहस्तस्तथैव च”
पृथ्वीचन्द्रोदये यमः “मासि मास्युद्धृता दर्भा मासि मा-
स्येव चोदिताः”। षट्त्रिंशन्मते “मासेमासेत्वमावास्यां
दर्भो ग्राह्योनवः स्मृतः” गृह्यपरिशिष्टे “ये च पिण्डा
श्रिता दर्भा यैः कृतं पितृतर्पणम्। अनेध्याऽशुचिलिप्ता ये
तेषां त्यागो विधीयते” लघुहारीतः “पथि दर्भाश्चितौ
दर्भाये दर्भायज्ञभूमिषु। स्तरणासनपिण्डेषु षट् कुशान्
परिवर्जयेत्। ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे।
हतामूत्रपुरीषाभ्यान्तेषां त्यागो विधीयते” हेमाद्रौ
“अन्यानि च पवित्राणि कुशदूर्वात्मकानि च। हेमात्मक-
पवित्रस्य कलां नार्हन्ति वै कलाम्”
भाद्रामावास्यागृहीतदर्भस्यायातयामतामाह हेमा०
श्रा० ख० हारीतः “मासे नभस्यमावास्या तस्यां

दर्भोऽक्षयो मतः। अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः”

तस्योत्पत्तिरुक्ता भाग० ३,२०अ० “बर्हिष्मती नाम पुरी सर्वसम्पत्समन्विता। न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः। कुशकाशास्त एवासन् शश्वद्धरितवर्चसः। ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे”।

पूजादौ तस्य तत्प्रतिनिधेर्वा धारणमावश्यकम् यथाह वरदातन्त्रे १प० “पूजाकाले सर्वदैव कुशहस्तो भवेच्छुचिः। तर्ज्जन्या रजतं धार्य्यं स्वर्णं धार्य्यमनामया। कुशकार्य्यकरं यस्मात्तु वन्याः कुशाः कुशाः। कुशेन रहिता पूजा विफला कथिता मया” सधवायास्तद्धारणनिषेधमाह ब्राह्मणसर्वस्वे स्मृतिः। “न स्पृशेत् तिलदर्भांश्च सधवा तु कथञ्चन”।

तत्पर्य्यायभेदादिकं भावप्र० उक्तं यथा “कुशोदर्भस्तथा बर्हिः सूच्यग्रोयज्ञभूषणम्। ततोऽन्योदीर्घपत्रःस्यात् क्षुरपत्रस्तथैव च। दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम्। मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित्”। “एते लूनशिखास्तस्य दशनैरचिरोद्गतैः। कुशकाशा विराजन्ते वटवः सामगा इव”। रामपुत्रकुशस्य नामनिरुक्तिसहितोत्पत्तिकथा रामा०उत्त०का० ६६स० यथा

“यामेव रात्रिं शत्रुघ्नः पर्णशालां समाविशत्। तामेव रात्रिं सीतापि प्रसूता दारकद्वयम्। ततोऽर्द्धरात्रसमये बालका मुनिदारकाः। वाल्मीकेः प्रियमाचख्युः सीतायाः प्रसवं शुभम्। भगवन्! रामपत्नी सा प्रसूता दारकद्वयम्। ततो रक्षां महातेजः! कुरु भूतविनाशिनीम्। तेषां तद्वचनं श्रुत्वा महर्षिः समुपागमत्। बालचन्द्रप्रतीकाशौ देवपुत्रौ महौजसौ। जगाम तत्र हृष्टात्मा ददर्श च कुमारकौ। भूतघ्नीञ्चाकरोत्ताभ्यां रक्षां रक्षोविनाशिनीम्। कुशमुष्टिमुपादाय लवञ्चैव तु स द्विजः। वाल्मीकिः प्रददौ ताभ्यां रक्षां भूतविनाशिनीम्। यस्तयोः पूर्व्वजो जातः स कुशैर्मन्त्रसत्कृतैः। निर्मार्ज्जनीयस्तु तदा कुश इत्यस्य नाम तत्। यश्चावरो भवेत्ताभ्यां लवेन स समाहितः। निर्मार्जनीयो वृद्धाभिर्लवेति च स नामतः। एवं कुशलवौ नाम्ना तावुभौ यमजातकौ। मत्कृताभ्यां च नामभ्यां ख्यातियुक्तौ भविष्यतः। ता रक्षाञ्जगृहुस्तां च मुनिहस्तात् समाहिताः। अकुर्वंश्च ततो रक्षां तयोर्विगतकल्मषाः। तथा तां क्रियमाणां च वृद्धाभिर्गोत्रनाम च। सङ्कीर्त्तनञ्च रामस्य सीतायाः प्रसवौ शुभौ”। “अयाप्तं रामत्वं कुशलवसुता नत्वधिगता” सा०द०। कुशद्वीपमानस्थानाद्युक्तं विष्णु० पु० यथा

“सुरोदकः परिवृतः कुशद्वीपेन सर्व्वतः। शाल्मलस्य तु विस्ताराद्द्विगुणेन समन्ततः। ज्योतिष्मतः कुशद्वीपे सप्त पुत्राः शृणुष्व तान्। उद्भिदो वेणुमांश्चैव सुरथो लम्बनो धृतिः। प्रभाकरोऽथ कपिलस्तन्नाम्ना वर्षपद्धतिः। तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः। तथैव देवगन्धर्व्वयक्षकिम्पुरुषादिभिः। वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः। दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने!। ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्चानुक्रमोदिताः। यथोक्तकर्म्मकर्तृत्वात् स्वाधिकारक्षयाय ते। तत्र यत्तत् कुशद्वीपे ब्रह्मरूपं जनार्द्दनम्। यजन्तः क्षपयन्त्युग्रमधिकारफलप्रदम्। विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा। कुशेशयो हरिश्चैव सप्तमो मन्दराचलः। वर्षाचलास्तु सप्तैव तत्र द्वीपे महामुने!। नद्योऽपि सप्त तासाञ्च शृणु नामान्यनुक्रमात्। धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा। विद्युदम्भा मही चैव सर्वपापहरास्त्विमाः। अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः। कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतम्। तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः”।

भाग० ५,२०अ० अन्यथैवायं वर्णितः यथा

“एवं सुरोदाद्बहिस्तद्द्विगुणः समानेनावृतो घृतोदेन यथा पूर्व्वः कुशद्वीपो यस्मिन् कुशस्तम्बो देवकृतस्तद्द्वीपाख्यापनो ज्वलन इवापरः स्वशष्परोचिषा दिशो विराजयति। तद्द्वीपपतिः प्रियव्रतो राजन्! हिरण्यरेता नाम स्वं द्वीपं सप्तभ्यः स्वपुत्रेभ्यो यथाभागं विभज्य स्वयं तप आतिष्ठत्! वसुवसुदानदृढरुचिनाभिगुप्तसत्यव्रतविप्रनामदेवनामभ्रः तेषां वर्षेषु सीमागिरयो नद्यश्चाभिज्ञाताः सप्तैव। बभ्रुश्चतुःशृङ्गकपिलश्चित्रकूटोदेवानीक ऊर्द्ध्वरोमा द्रविण इति। रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति यासां पयोभिः कुशद्वीपौकसः कुशलकोविदाभियुक्तकुलकसंज्ञा भगवन्तं जातवेदसरूपिणं कर्म्मकौशलेन यजन्ते”। कल्पभेदान्नामभेदः समाधेयः। कुशद्वीपोऽप्यत्र पु० “कुशोऽभूत् काञ्चनः कोशे स्वयम्भूश्चितमर्हति”। कुत्सिते आचरणे शेते शी–ड। उपापिष्ठे मत्ते च त्रि० मेदि०।

नृपभेदे पु० "अजकस्य तु दायादो बलाकाश्वो महीपतिः। बभूव मृगयाशीलः कुशस्तस्यात्मजोऽभवत्" हरि० २७अ०

कुशकण्डिका स्त्री कुशैः कण्डिकेव। वैदिकाग्निसंस्कारभेदे स च वेदिभेदेन भिन्नः तत्प्रकारश्च ऋग्वेदिनाम् कालेशीकृते, यजुर्वेदिनाम् पशुपतिकृते, सामवेदिनां भवदेवभट्टकृते ग्रन्थे उक्तः संक्षेपेण तुलादानादिपद्धतौ तदनुसारिप्रकारोऽस्माभिर्दर्शितः। पृषो० कस्य लोपे कुशण्डिकाऽप्यत्र स्त्री "सर्व्वेषु माहुतियुक्तकर्म्मणाम् कुशण्डिकासंस्कृताग्निसाध्यत्वात् सैव प्रथममभिधीयते" भवदेवः

कुशकाश न० नित्यः समाहारद्व०। कुशकाशानां समाहारे क्वचित् इतरेतरसमासः आर्षप्रयोगे दृश्यते यथा "इमे लूनशिखास्तस्य दर्भैरचिरोद्गतैः। कुशकाशा विराजन्ते बटवः सामगा इव" विष्णु पु० इति केचित्। कुशसहिताः काशा इत्येव तत्र वाक्यमित्यन्ये

कुशधारा स्त्री० नदीभेदे

कुशध्वज पु० जनकस्य नृपस्यानुजे भ्रातरि। "तस्य पुत्रद्वयं जज्ञे धर्म्मज्ञस्य महात्मनः। ज्येष्ठोऽहमनुजो वीरो मम भ्राता कुशध्वजः" रामा० आ० का० ७१स० "जनकोक्तिः। तस्य राज्यञ्च साङ्काश्यनगरयासीत् यथोक्तं तत्रैव "साङ्काश्ये भ्रातरं शूरमभ्यषिञ्चं कुशध्वजम्"। "भ्राता यवीयान् धर्म्मज्ञ एष राजा कुशध्वजः" स च भरतशत्रुघ्नयोः श्वशुरः तत्कथा तत्रैव ७२ सर्गे दृश्या "निमिवंशज जनकस्यात्मजे नृपभेदे "स्वर्णरोमा सुतस्तस्य ह्रस्वरोमा व्यजायत। ततः सीरध्वजो जज्ञे यज्ञार्थं कर्षतो महीम्। सीता सीराग्रतो जाता यस्मात् सीरध्वजः स्मृतः। कुशध्वजस्तस्य पुत्रस्ततो धर्म्मध्वजो नृपः" इति भाग० ९।१३।१२। अनयोर्विरोधः कल्पभेदात् समाधेयः "पार्थिवीमुदवहद्रघूद्वहो लक्ष्मणस्तदनुजामथोर्म्मिलाम्। यौ तयोरवरजौ वरौजसौ तौ कुशध्वजसुते सुमध्यमे" रघुः

कुशनाभ पु० कुश इव नाभिरस्य अच् समा०। बलाकाश्व पौत्रे कुशपुत्रे नृपभेदे "अजकस्य तु दायादो बलाकाश्वो महीपतिः। बभूव मृगयाशीलः कुशस्तस्यात्मजोऽभवत्। कुशपुत्रा बभूवुर्हि चत्वारो देववर्चसः। कुशिकः कुशनाभश्च कुशाश्वो मूर्तिमांस्तथा" हरिवं २७अ०। कन्याकुब्जशब्दे तच्चरितानि दर्शितानि तस्य राजधानी महोदयनामपुरं यथा रामा० आदि०३२स० "कुशनाभस्तु धर्म्मात्मा पुरं चक्रे महोदयम्"।

कुशनेत्र पु० मारीचिपुत्रभेदे असुरे "शुम्भुः पुश्चण्डशक्तिश्च कुशनेत्रः शशिध्वजः। यथामति मया प्रोक्ताः मारीचेः कीर्तिवर्द्धनाः" हरिवं० २४०अ०

कुशप न० कुश—बा० कपन्। पानपात्रे उणादिकोषः

कुशपुष्प न० कुशाकारं पुष्पमस्य। १ग्रन्थिपर्णे वृक्षे रत्नमा०। कुशाश्च पुष्पाणि च समा० द्व०। २कुशपुष्पाणां समाहारे "कुशपुष्पं समिद्वारि ब्राह्मणः स्वयमाहरेत्" स्मृतिः

कुशप्लवन न० भारतप्रसिद्धे तीर्थभेदे "कुशप्लवनमासाद्य ब्रह्मचारी समाहितः। त्रिरात्रमुषितः स्नात्वा अश्वमेधफलं लभेत्" भा० व० ८५अ०

कुशर पु० कुत्सितः शरः। शरसदृशे अन्तश्छिद्रे तृणभेदे ऋ० भा० माधवः "शरासः कुशरास" ऋ० ६।१९१।१।

कुशल न० कुश—कलन्। १कल्याणे। २तद्वति त्रि०। कुशान् लाति ला—क। ३कुशग्राहके त्रि०। कौ पृथिव्यां शलति चलयति कर्य्याणि शल—अच्। ४कार्य्यचतुरे त्रि०। अस्य च कुशग्राहकत्वे यौगिकत्वम् चतुरे लाक्षणिकत्वमिति काव्यप्रकाशकारश्राह तदेतन्मतं सा० द० निराकृत्य दक्षतायां रूढत्वमस्य व्यवस्थापितं यथा

"केचित् तु "कर्म्मणि कुशलः" इति रूढावुदाहरन्ति। तेषामयमभिप्रायः। "कुशं लाति" इति व्युत्पत्तिलभ्यः कुशग्राहिरूपो मुख्योऽर्थः प्रकृतेऽसम्भवन् विवेचकत्वसाधर्म्म्यसम्बन्धसम्बन्धिनं दक्षरूपमर्थं बोधयति"। तदन्ये न मन्यन्ते। कुशग्राहिरूपार्थस्य व्युत्पत्तिलभ्यत्वेऽपि दक्षरूपस्यैव मुख्यार्थत्वात्। अन्यद्धि शब्दानां व्युत्पत्तिनिमित्तमन्यच्च प्रवृत्तिनिमित्तम्। व्युत्पत्तिलभ्यस्य मुख्यार्थत्वे "गौः शेते" इत्यत्रापि लक्षणा स्यात्। "गमेर्डोः" इति गमधातोर्डोप्रत्ययेन व्युत्पादितस्य गोशब्दस्य शयनकालेऽपि प्रयोगात्"।

अत्रेदमभिदध्महे। "गमेर्डोरिति औणादिकडोप्रत्ययान्तस्य गोशब्दस्य "उणादयोऽव्युत्पन्नाः प्रातिपदिकानि" पा० उक्तत्वात् न यौगिकतासम्भवः अवयवलभ्यार्थाभावात् अतस्तस्य गवादौ रूढतैव। "आतोऽनुपसर्गे कः" पा० उक्तकप्रत्ययस्य कृत्त्वेन व्युत्पन्नत्वात् अवयवार्थलभ्यार्थसत्त्वाच्च गोशब्दतुल्यता "किञ्च उणादीनां व्युत्पन्नत्वपक्षेऽपि गोशब्दस्यावयवार्थयोगात् पङ्कजादिपदवत् अर्थविशेषे योगरूढत्वं गोशब्दे वक्ष्यते। अतएव गोशब्दस्य रूढत्वकल्पनमव्युत्पन्नत्वपक्षमाश्रित्यैवेति विवेच्यमिति। मण्डपशब्दस्य मण्डपानकर्त्तृताव-

पार्य्यकत्वे यौगिकता जनाश्रयपरत्वे रूढत्वमिव कुशल शब्दस्य रूढ़यौगिकत्वमेव युक्तम् "पप्रच्छ कुशलं राज्ये" रघुः। "भयाप्तं रामत्वं कुशलवसुता न त्वधिगता" सा०द०। "प्रसारयन्ति कुशलाश्रितां वाचं पटीमिव" माघः। "तदनुप्रवेशमथ वा कुशलः" माघः। कुश+अस्त्यर्थे सिध्मा० लच्। ५कुशयुक्ते त्रि०। ततः अस्त्यर्थे इनि। कुशलिन् तद्युक्ते त्रि० स्त्रियां ङीप्। "कुशलिनी वत्सस्य वार्त्ताऽपि न" सा० द०। "मास्तु कुशलिनीं ब्रूयाः" भा० उ०१२६अ०। शौण्डा० एतस्य ७त०। कर्म्मकुशलः। श्रेण्यादि०अभूततद्भावार्थे समा०। कुशलकृतः कुशलभूतः। अनेन सह कुमारशब्दस्य समासे कुमारस्य विशेष्यत्वेऽपि श्रमणादि० परनिपातः। कुमार कुशलः। ततः ब्राह्मणादि० कर्म्मणि भावे च ष्यञ्। कौशल्य दक्षतायाम् न०। युवा० तदर्थे अण्। कौशल तदर्थे "योगः कर्म्मसु कौशलम्" गीता।

कुशलव पु०द्वि०। पुष्पवतोरिव एकशक्त्या रामसुतयोः हेमच०

कुशलिन् त्रि० कुशल+अस्त्यर्थे इनि। कल्याणवति। "कुशलिनी वत्सस्य वार्त्तापि न" सा०द०। [नकहत्वे वैद्य०।

कुशली स्त्री कुशइव लीयते ली—ड गौरा० ङीष्। अश्म-

कुशविन्दु पु० भूम्नि देशभेदे। "वातायना दशार्णाश्च रोमकाः कुशविन्दवः" भा० भी० ६अ० जनपदकथने।

कुशस्थल न० कुशप्रधानं स्थलम्। १कान्यकुब्जदेशे हेमच०। "कुशस्थलं वृकस्थलं माकन्दं वारणावतम्। देहिमे चतु र्थामान् कञ्चिदेकञ्च पञ्चमम्" वेणीसं० २पुरीभेदे स्त्री ङीष् जटाधरः सा च प्राक् रैवतन्टपेण निर्म्मिता पश्चात यदुभिः संस्कृता यथा हरिवं० १२२ अ०

"इति सञ्चिन्त्य सर्वे च प्रतीचीं दिशमाश्रिताः। कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम् "विहाय मथुरां रम्यां मानयन्तः पिनाकिनम्। कुशस्थलीं द्वारवतीं निवेशयितुमीप्सवः" हरिवं० ११६अ०।

"आनर्त्तविषयश्चासीत् पुरी तस्य कुशस्थली" हरिवं०१०अ०।

कुशा स्त्री कुश—क। १रज्ज्वां मेदि० २मधुकर्कटग्राम् शब्दच० ३वल्गायां हेमच०। कुशाशब्दे परे अयसः सत्वम् अयस्कहिता कुशा अयस्कुशा सि० कौ०। साममानां स्तोत्रीयगणनार्थे औदुम्बरे ४शङ्कौ च शब्दचि०।

कुशाकर पु० कुशैराकीर्य्यते समन्तादग्नेण मूलाच्छादनेन वेष्ट्यतेऽत्र आ+कृ—आधारे अप्। यज्ञाग्नौ। स हि कुशकण्डिकायां कुशैराक्रियते। [वानरे शब्दमाला

कुशाक्ष पुंस्त्री कुशइव सूक्ष्माण्यक्षीणि अस्य षच् समा०।

कुशाग्र न० ६त०। कुशस्याग्रे। "कुशाग्रेणापि कौन्तेय ! न स्प्रष्टव्यो महोदधिः" भा० व० ११०२३श्लो०। कुशस्याग्रमिव सूक्ष्मत्वात्। २कुशाग्रतुल्यसूक्ष्मे ३अतिदुर्बोधग्राहके "कुशाग्रबुद्धे। कुशली गुरुस्ते" रघु०। कुशाग्रमिव इवार्थे छ। कुशाग्रीय कुशाग्रतुल्ये त्रि० "कुरु बुद्धिं कुशाग्रीयामनुकामीनतां त्यज" भट्टिः।

कुशादिक भावप्रकाशोक्ते तैलभेदे यथा

कुशाग्निमन्थशैरीयनलदर्भेक्षुगोक्षुराः। कपोतवङ्कावसुकवशिरेन्द्रीवरीशराः। धातक्यरलुवन्दाकाः कर्णपूराश्मभेदकाः। एषां कल्ककषायाभ्यां सिद्धं तैलं प्रयोजयेत्। पानाभ्यञ्जनयोगेन वस्तिनोत्तरवस्तिना। शर्कराश्मरिरोगेषु मूत्रकृच्छ्रे च दारुणे। प्रदरे योनिशूले च शुक्रदोषे तथैव च। वन्ध्यागर्भकरं प्रोक्तं तैलमेतत् कुशादिकम्"।

कुशाम्ब पु० निमिवंश्ये न्टपभेदे कुशान्टपसुते। "कुशनाभशब्दे हरिवं० वाक्यम्" रामा० उ०२२अ० "ब्रह्मयोनिर्महानासीत् कुशोनाम महातपाः" इत्युपक्रमे "स महात्मा कुलीनायां युक्तायां सुमहारथान्। वैदर्भ्यां जनयामास चतुरः सदृशान् सुतान्। कुशाम्बं कुशनाभञ्च अस्तूर्त्तरजसं वसुम्" नामभेदः कल्पभेदात् अविरुद्धः। "प्रत्यग्रथः कुशाम्बश्च यमाहुर्म्मणिवाहनम्" भा०आ०६२अ० कुशाम्बेन निर्वृत्ता अण् ङीप्। तत्कृतपुरीभेदे "कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत् पुरीम्" रामा० उ०३२अ० निर्गतः कौशाम्ब्याः निष्कौशाम्बिः सि०कौ०। कुशाम्बस्यापत्यं शुभ्रा०ढक्। कौशाम्बेय तदपत्ये पुंस्त्री०।

कुशारणि पु० कुशं जलं शापार्थमुदकमरणिरिवास्य। दुर्वासमि मुनौ त्रिका० तस्य शापजलेनैव सर्वनाशकत्वात् तथात्वम्। [राजनि०

कुशाल्मलि पु० कुत्सितः शाल्मलिः। रोहितकवृक्षे।

कुशावती स्त्री कुश—अस्त्यर्थे मतुप् मस्य वः संज्ञायां दीर्घः। रामात्मजकुशस्य राजधान्याम् पुर्य्याम्। "स निवेश्य कुशावत्यां रिपुनागाङ्कुशं कुशम्"। "कुशावतीं श्रोत्रियसात् स कृत्वा" रघुः। रामा०उ०का० तु कोशलेषु वैतदभिषेकोवर्णितः। "कोशलेषु कुशं वीरमुत्तरेषु तथा लवम्। अभिषिच्य महात्मानावुभौ रामः कुशीलवौ"। अतोरघुवाक्यं पुराणान्तरानुसारीति विवेच्यम्।

कुशावर्त्त पु०कुशस्य जलस्यावर्त्तोयत्र। गङ्गावतारतीर्थे "गङ्गाद्वारे कुशावर्त्ते विल्वके नीलपर्वते। तथा कनखले स्नात्वा

धूतपाप्मा दिवं व्रजेत्" भा० आनु० १७००श्लो०। "उपगम्य कुशावर्त्तं आसीनं तत्त्ववित्तमम्" भाग० ३।२०।५। "कुशावर्त्ते गङ्गाद्वारे" श्रीधरः। २भरतनृपपुत्रभेदे। "तमनु कुशावर्त्त इलावर्त्तो ब्रह्मावर्त्तो मलयः केतुर्भद्रसेन इन्द्रस्पृग्विदर्भः कीकट इति नव नवतिप्रधानाः" भाग० ५।४।१०। तद्राज्यत्वात् कुशावर्त्तस्य तत्संज्ञत्वम्।

कुशाश्व पु० सूर्य्यवंश्ये नृपभेदे "सृञ्जयस्य सुतः श्रीमान् सहदेवः प्रतापवान्। कुशाश्वः सहदेवस्य पुत्रः परमधार्म्मिकः" रामा० आ०

कुशासन न० कुशैर्निर्म्मितमासनम्। कुशनिर्म्मिते आसने "कुशासनमनन्तरम्" श्राद्धक्रमः। तत्स्वरूपादि श्रा०त० "अथ कुशासनम् तत्र गोभिलः 'पित्र्ये द्विगुणांस्तु दर्भान् पवित्रपाणिर्दद्यादासीनः सर्वत्र मन्त्रेषु पङ्क्तिमूर्द्धन्यं पृच्छति सर्वान् वा सर्वत्रासनेषु दर्भानास्तीर्य्येति' पित्र्ये पित्रर्थदाने तत्रादौ जलगण्डूषप्रक्षेपः। ततोहि गुणभुग्नकुशपत्रत्रयं पितॄणामासनार्थं दद्यात् एतच्च आदौ विश्वदेवपक्षे कृत्वा पितृपक्षे कर्त्तव्यं तथा च याज्ञवल्क्यः 'पाणिप्रक्षालनं दत्त्वा उपस्तत्येत्यृचा पितॄन्"। प्रक्षाल्यतेऽनेनेति प्रक्षालनं जलं तेन तूष्णीं ब्राह्मणपाणौ जलं दत्त्वा विष्टरार्थमासनार्थमिति दीपकलिका। कुशान् ऋजून् दद्यात्। व्यक्तमाहाश्वलायनः "अपः प्रदाय दर्भान् द्विगुणभुग्नानासनं प्रदाय" इति आसनमित्यनेनोपवेशनीयत्वप्रतीते हेतुं तद्दानं प्रतीयते। तथाच कार्ष्णाजिनिः 'दर्भांश्चैवासने दद्यान्न तु पाणौ कदा चन। पितृदेवमनुष्याणामेवं तृप्तिर्हि शाश्वती"। अत्र पितृदेवमनुष्येभ्योऽपि कुशासनदानं प्रतीयते। अत्र दैविकत्वेन कुशानां ऋजुत्वमिति विशेषः। देवपितृविप्रयोर्दक्षिणवामयोः कुशासनस्थापनमाह श्राद्धसूत्रभाष्यधृतवचनम्। "पितॄणामासनं दद्याद्वामपार्श्वे कुशान् सुधीः। दक्षिणे चैव देवानां सर्वत्र श्राद्धकर्म्मसु"। कोः पृथिव्याः२शासने च। अब्राह्मणोऽपि कुशासनसहितः"

कुशिंशपा स्त्री कुत्सिता शिंशपा। कपिलशिंशपायां राजनि०

कुशिक पु० कुशः कुशनामा नृपः जनकत्वेनास्त्यस्य ठन्। गाधिनृपजनके विश्वामित्रपितामहे नृपभेदे तत् कथा यथा "कान्यकुब्जे महानासीत् पार्थिवो भरतर्षभ!। गाधीति विश्रुतो लोके कुशिकस्यात्मसम्भवः। तस्य धर्म्मात्मनः पुत्रः समृद्धबलवाहनः। विश्वामित्र इति ख्यातो बभूव रिपुमर्द्दनः। भा०आ०१७४अ०

"कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन!" रामा० आ० "कुशिकस्यात्मजः श्रीमान् गाधिर्नाम जनेश्वरः। भा०आ०४अ० "कुशपुत्रा बभूवुर्हि चत्वारोदेववर्च्चसः। कुशिकः कुशनाभश्च कुशाश्वो मूर्त्तिमांस्तथा" कुशिकस्तु तपस्तेपे" इत्युपक्रमे "स गाधिरभवद्राजा भगवान् कौशिकः स्वयम्" हरिवं० २७।अ० कुशिकचरितं च भा०आनु०५२अध्यायावधि ५६अ० पर्य्यन्ते

"अत्राप्युदाहरन्तीममितिहासं पुरातनम्। च्यवनस्य च संवादं कुशिकस्य च भारत!। एतं दोषं पुरा दृष्ट्वा भार्गवश्च्यवनस्तदा। आगामिनं महाबुद्धिः स्ववंशे मुनिसत्तमः। निश्चित्य मनसा सर्वं गुणदोषं बलाबलम्। दग्धुकामः कुलं सर्व्वं कुशिकानां तपोधनः। च्यवनः समनुप्राप्य कुशिकं वाक्यमब्रवीत्। वस्तुमिच्छा समुत्पन्ना त्वया सह समानघ!।

कुशिक उवाच। भगवन् सह धर्म्मोऽयं पण्डितैरिह धार्य्यते। प्रदानकाले कन्यानामुच्यते च सदा बुधैः। यत्तु तावदतिक्रान्तं धर्म्मद्वारं तपोधनम्। तत् कार्य्यं प्रकरिष्यामि तदनुज्ञातुमर्हसि। भीष्म उवाच। अथासनमुपादाय च्यवनस्य महामुने!। कुशिको भार्य्यया सार्द्धमाजगाम यतो मुनिः। प्रगृह्य राजा भृङ्गारं पाद्यमस्मै न्यवेदयत्। कारयामास सर्व्वाश्च क्रियास्तस्य महात्मनः। ततः स राजा च्यवनं मधुपर्कं यथाविधि। ग्राहयामास चाव्यग्रो महात्मा नियतव्रतः। सत्कृत्य तं तथा विप्रमिदं पुनरथाब्रवीत्। भगवन्! परवन्तौ स्वो ब्रूहि किं करवावहै। यदि राज्यं यदि धनं यदि गाः संशितव्रत!। यज्ञदानानि च तथा ब्रूहि सर्व्वं ददामि ते। इदं गृहमिदं राज्यमिदं धर्म्मासनञ्च ते। राजा त्वमसि शाध्युर्वीं योऽहं स परवांस्त्वयि। एवमुक्ते ततो वाक्ये च्यवनो भार्गवस्तदा। कुशिकं प्रत्युवाचेदं मुदा परमया युतः। न राज्यं कामये राजन्न धनं न च योषितः। न च गा न च वै देशान्न यज्ञं श्रूयतामिदम्। नियमं कञ्चिदारप्स्ये युवयोर्यदि रोचते। परिचर्य्योऽस्मि यत्ताभ्यां युवाभ्यामविशङ्कया। एवमुक्ते तदा तेन दम्पती तौ जहर्षतुः। प्रत्यब्रूताञ्च तमृषिमेवमस्त्विति भारत।। अथ तं कुशिको हृष्टः प्रावेशयदनुत्तमम्। गृहोद्देशं

ततस्तस्य दर्शनीयमदर्शयत्। इयं शय्या भगवतो यथाकाममिहोष्यताम्। प्रयतिष्यावहे प्रीतिमाहर्त्तुं ते तपोधन!। अथ सूर्य्योऽतिचक्राम तेषां संवदतां तथा। अथर्षिर्नोदयामास पानमन्नं तथैव च। तमपृच्छत्ततो राजा कुशिकः प्रणतस्तदा। किमन्नजातमिष्टन्ते किमुपस्थापयाम्यहम्। ततः स परया प्रीत्या प्रत्युवाच नराधिपम्। औपपत्तिकमाहारं प्रयच्छस्वेति भारत!। तद्वचः पूजयित्वा तु तथेत्याह स पार्थिवः। यथोपपन्नमाहारं तस्मै प्रादाज्जनाधिप!। ततः स भुक्त्वा भगवान् दम्पती प्राह धर्म्मवित्। स्वप्तुमिच्छाम्यहं निद्रा बाधते मामिति प्रभो!। ततः शय्यागृहं प्राप्य भगवानृषिसत्तमः। संविवेश नरेशस्तु सपत्नीकः स्थितोऽभवत्। न प्रबोध्योऽस्मि संसुप्त इत्युवाचाथ भार्गवः। संवाहितव्यौ मे पादौ जागर्त्तव्यञ्च तेऽनिशम्। अविशङ्कस्तु कुशिकस्तथेत्येवाह धर्म्मवित्। न प्रबोधयतान्तौ च तं तथा रजनीक्षये। यथा तथा महर्षेस्तु शुश्रूषापरमौ तदा। बभूवतुर्म्महाराज! प्रयतावथ दम्पती। ततः स भगवान् विप्रः समादिश्य नराधिपम्। सुष्वापैकेन पार्श्वेन दिवसानेकविंशतिम्। स तु राजा निराहारः सभार्य्यः कुरुनन्दन!। पर्य्युपासत तं हृष्टश्च्यवनाराधने रतः। भार्गवस्तु समुत्तस्थौ स्वयमेव तपोधनः। अकिञ्चिदुक्त्वा तु गृहान्निश्चक्राम महातपाः। तमन्वगच्छतां तौ तु क्षुधितौ श्रमकर्षितौ। भार्य्यापती मुनिश्रेष्ठस्तावेतौ नावलोकयत्। तयोस्तु प्रेक्षतोरेव भार्गवाणां कुलोद्वहः। अन्तर्हितोऽभूद्राजेन्द्र! ततो राजाऽपतत् क्षितौ। स मुहूर्त्तं समाश्वास्य सह देव्या महाद्युतिः। पुनरन्वेषणे यत्नमकरोत् परमं तदा” ५२ अ०

युधिष्ठिर उवाच। तस्मिन्नन्तर्हिते विप्रे राजा किमकरोत्तदा। भार्य्या चास्य महाभागा तन्मे ब्रूहि पितामह!। भीष्म उवाच। “अदृष्ट्वा स महीपालस्तमृषिं सह भार्य्यया। परिश्रान्तो निववृते व्रीडितो नष्टचेतनः। स प्रविश्य पुरीं दीनो नाभ्यभाषत किञ्चन। तदेव चिन्तयामास च्यवनस्य विचेष्टितम्। अथ शून्येन मनसा प्रविश्य स्वगृहं नृपः। ददर्श शयने तस्मिन् शयानं भृगुनन्दनम्। विस्मितौ तावृषिं दृष्ट्वा तदाश्चर्य्यं विचिन्त्य च। दर्शनात्तस्य तु तदा विश्रान्तौ सम्बभूवतुः। यथास्थानन्तु तौ स्थित्वा भूयस्तं संववाहतुः। अथापरेण पार्श्वेन सुष्वाप स महामुनिः। तेनैव च स कालेन प्रत्यबुध्यत स वीर्य्यवान्। न च तौ चक्रतुः किञ्चिद्विकारं भयशङ्किता। प्रतिबुद्धस्तु स मुनिस्तौ प्रोवाच विशाम्पते!। तैलाभ्यङ्गो दीयतां मे स्नास्येऽहमिति भारत!। तौ तथेति प्रतिश्रुत्य क्षुधितौ श्रमकर्षितौ। शतपाकेन तैलेन महार्हेणोपतस्थतुः। ततः सुखासीनमृषिं दम्पती संववाहतुः। न च पर्य्याप्तमित्याह भार्गवः सुमहातपाः। यदा तौ निर्व्विकारौ तु लक्षयामास भार्गवः। तत उत्थाय सहसा स्नानशालां विवेश ह। क्लृप्तमेव तु तत्रासीत् स्नानीयं पार्थिवोचितम्। असत्कृत्य च तत् सर्वं तत्रैवान्तरधीयत। स मुनिः पुनरेवाथ नृपतेः पश्यतस्तदा। नासूयाञ्चक्रतुस्तौ च दम्पती भरतर्षभ!। अथ स्नातः स भगवान् सिंहासनगतः प्रभुः। दर्शयामास कुशिकं सभार्य्यं कुरुनन्दन!। स हृष्टवदनो राजा सभार्य्यः कुशिको मुनिम्। सिद्धमन्नमिति प्रह्वो निर्व्विकारो न्यवेदयत्। आनीयतामिति मुनिस्तञ्चोवाच नराधिपम्। स राजा समुपाजह्रे तदन्नं सह भार्य्यया। मांसप्रकारान् विविधान् शाकानि विविधानि च। रसालापूपकांश्चित्रान्मोदकानथ खाण्डकान्। रसान् नानाप्रकारांश्च वन्यञ्च मुनिभोजनम्। फलानि च विचित्राणि राजभोज्यानि भूरिशः। बदरेङ्गुदकाश्मर्य्यभल्लातकफलानि च। गृहस्थानाञ्च यद्भोज्यं यच्चापि वनवासिनाम्। सर्व्वमाहारयामास राजा शापभयात्ततः। अथ सर्व्वमुपन्यस्तमग्रतश्च्यवनस्य तत्। ततः सर्व्वं समानीय तच्च शय्यासनं मुनिः। वस्त्रैः शुभैरवच्छाद्य भोजनोपस्करैः सह। सर्व्वमादीपयामास च्यवनो भृगुनन्दनः। न च तौ चक्रतुः क्रोधं दम्पती सुमहामती। तयोः सम्प्रेक्षतोरेव पुनरन्तर्हितोऽभवत्। तथैव च स राजर्षिस्तस्थौ तां रजनीं तदा। सभार्य्यो वाग्यतः श्रीमान्न कोपं स समाविशत्। नित्यं संस्कृतमन्नन्तु विविधं राजवेश्मनि। शयनानि च मुख्यानि परिषेकाश्च पुष्कलाः। वस्त्रञ्च विविधाकारमभवत् समुपार्ज्जितम्। न शशाक ततो द्रष्टुमन्तरं च्यवनस्तदा। पुनरेव च विप्रर्षिः प्रोवाच कुशिकं नृपम्। सभार्य्यो मां रथेनाशु वह यत्र ब्रवीम्यहम्। तथेति च प्राह नृपो निर्व्विशङ्कस्तपोधनम्। क्रीडारथोऽस्तु भगवन्नुत सांग्रामिको रथः। इत्युक्तः स मुनी राज्ञा तेन हृष्टेन तद्वचः। च्यवनः प्रत्युवाचेदं हृष्टः परपुरञ्जय!। सज्जीकुरु रथं क्षिप्रं यस्ते

सांग्रामिको रथः । सायुधः सपताकश्च शक्तीशानकयष्टिमान् । किङ्किणीस्वननिर्घोषो युक्तस्तोरणकल्पनैः । जाम्बूनदनिबद्धश्च परमेषुशतान्वितः । ततः स तथेत्युक्त्वा कल्पयित्वा महारथम् । भार्य्यां वामे धुरि तदा चात्मानं दक्षिणे तथा । त्रिदण्डं वज्रसूच्यग्रं प्रतोदं तत्र चादधत् । सर्वमेतत्ततो दत्त्वा नृपो वाक्यमथाब्रवीत् भगवन् ! क्व रथो यातु ब्रवीतु भृगुनन्दन ! । यत्र वक्ष्यसि विप्रर्षे ! तत्र यास्यति ते रथः । एवमुक्तस्तु भगवान् प्रत्युवाचाथ तं नृपम् । इतः प्रभृति यातव्यं पदकं पदकं शनैः । श्रमो मम यथा न स्यात्तथा मे छन्दचारिणौ । सुसुखञ्चैव वोढव्यो जनः सर्वश्च पश्यतु । नोत्सार्य्याः पथिकाः केचित्तेभ्यो दास्ये वसु ह्यहम् । ब्राह्मणेभ्यश्च ये कामानर्थयिष्यन्ति मां पथि । सर्वान् दास्याम्यशेषेण धनं रत्नानि चैव हि । क्रियतां निखिलेनैतन्मा विचारय पार्थिव ! । तस्य तद्वचनं श्रुत्वा राजा भृत्यानथाब्रवीत् । यद्यद्ब्रूयान्मुनिस्तत्तत् सर्वं देयमशङ्कितैः । ततो रत्नान्यनेकानि स्त्रियो युग्यमजाविकम् । कृताकृतञ्च कनकं गजेन्द्राश्चाचलोपमाः । अन्वगच्छन्त तमृषिं राजामात्याश्च सर्वशः । हाहाकृतञ्च तत् सर्वमासीन्नगरमार्त्तवत् । तौ तीक्ष्णाग्रेण सहसा प्रतोदेन प्रतोदितौ । पृष्ठे विद्धौ कटे चैव निर्विकारौ तमूहतुः । वेपमानौ निराहारौ पञ्चाशद्रात्रकर्षितौ । कथञ्चिद्वहतुर्वीरौ दम्पती तौ रथोत्तमम् । बहुशो भृशविद्धौ च वहन्तौ च क्षतोद्भवम् । ददृशाते महाराज ! पुष्पिताविव किंशुकौ । तौ दृष्ट्वा पौरवर्गस्तु भृशं शोकसमाकुलः । अभिशापभयत्रस्तो न च किञ्चिदुवाच ह । द्वन्द्वशश्चाब्रुवन् सर्वे पश्यध्वं तपसो बलम् । क्रुद्धा अपि मुनिश्रेष्ठं वीक्षितुं नेह शक्नुमः । अहो भगवतो वीर्य्यं महर्षेर्भावितात्मनः । राज्ञश्चापि सभार्य्यस्य धैर्य्यं पश्यत यादृशम् । श्रान्तावपि हि कृच्छ्रेण रथमेतं समूहतुः । न चैतयोर्विकारं वै ददर्श भृगुनन्दनः ।

"भीष्म उवाच । ततः स निर्विकारौ तु दृष्ट्वा भृगुकुलोद्वहः । वसु विश्राणयामास यथा वैश्रवणस्तथा । तत्रापि राजा प्रीतात्मा यथादिष्टमथाकरोत् । ततोऽस्य भगवान् प्रीतो बभूव मुनिसत्तमः । अवतीर्य्य रथश्रेष्ठात् दम्पती तौ मुमोच ह । विमोच्य चैतौ विधिवत्ततो वाक्यमुवाच ह । स्निग्धगम्भीरया वाचा भार्गवः सुप्रसन्नया । ददामि वां वरं श्रेष्ठं तं ब्रूतामिति भारत ! । सुकुमारौ च तौ विद्धौ कराभ्यां मुनिसत्तमः । पस्पर्शामृतकल्पाभ्यां स्नेहाद्भरतसत्तम ! । अथाब्रवीन्नृपो वाक्यं श्रमो नावयोरिह । विश्रान्तौ च प्रभावात्ते ऊचतुस्तौ च भार्गवम् । अथ तौ भगवान् प्राह प्रहृष्टश्च्यवनस्तदा । न वृथा व्याहृतं पूर्व्वं यन्मया तद्भविष्यति । रमणीयः समुद्देशो गङ्गातीरमिदं शुभम् । किञ्चित्कालं व्रतपरो निवत्स्यामीह पार्थिव ! । गम्यतां स्वपुरं पुत्त्र ! विश्रान्तः पुनरेष्यसि । इहस्थं मां सभार्य्यस्त्वं द्रष्टासि श्वो नराधिप ! । न च मन्युस्त्वया कार्य्यः श्रेयस्ते समुपस्थितम् । यत् काङ्क्षितं हृदिस्थं ते तत् सर्वं हि भविष्यति । इत्येवमुक्तः कुशिकः प्रहृष्टेनान्तरात्मना । प्रोवाच मुनिशार्दूलमिदं वचनमर्थवत् । न मे मन्युर्महाभाग ! पूतौ स्वो भगवंस्त्वया । संवृत्तौ यौवनस्थौ स्वो वपुष्मन्तौ बलान्वितौ । प्रतोदेन व्रणा ये मे सभार्य्यस्य त्वया कृताः । तान्न पश्यामि गात्रेषु स्वस्थोऽस्मि सह भार्य्यया । इमां च देवीं पश्यामि वपुषाऽप्सरसोपमाम् । श्रिया परमया युक्तां यथा दृष्टा पुरा मया । तव प्रसादात्संवृत्तमिदं सर्वं महामुने ! । नैतच्चित्रन्तु भगवंस्त्वयि सत्यपराक्रम ! । इत्युक्तः प्रत्युवाचैनं कुशिकं च्यवनस्तदा । आगच्छेथाः सभार्य्यश्च त्वमिहेति नराधिप । इत्युक्तः समनुज्ञातो राजर्षिरभिवाद्य तम् । प्रययौ वपुषा युक्तो नगरीं देवराजवत् । तत एनमुपाजग्मुरमात्याः सपुरोहिताः । बलस्था गणिकायुक्ताः सर्वाः प्रकृतयस्तथा । तैर्वृतः कुशिको राजा श्रिया परमया ज्वलन् । प्रविवेश पुरं हृष्टः पूज्यमानोऽथ बन्दिभिः । ततः प्रविश्य नगरं कृत्वा पूर्व्वाह्णिकीः क्रियाः । भुक्त्वा सभार्य्यो रजनीमुवास स महाद्युतिः । ततस्तु तौ नवमभिवीक्ष्य यौवनं परस्परं विगतजराविवामरौ । ननन्दतुः शयनगतौ वपुर्धरौ श्रिया युतौ द्विजवरदत्तया तदा । अथाप्यृषिर्भृगुकुलकीर्त्तिवर्द्धनस्तपोधनो वनमभिराममृद्धिमत् । मनीषया बहुविधरत्नभूषितं ससर्ज यन्न नगरे शतक्रतोः ।" इति ५३अ० ।

"भीष्म उवाच । ततः स राजा रात्र्यन्ते प्रतिबुद्धो महामनाः । कृतपूर्व्वाह्णिकः प्रायात् सभार्य्यस्तद्वनं प्रति । ततो ददर्श नृपतिः प्रासादं सर्वकाञ्चनम् । मणिस्तम्भसहस्राढ्यं गन्धर्वनगरोपमम् । तत्र दिव्यानभिप्रायान् ददर्श कुशिकस्तदा । पर्व्वतान् रूप्यसानूंश्च नलिनीश्च सपङ्कजाः । तत्र यानाश्च विविधास्तोरणानि च भार-

त !। शाद्वलोपचितां भूमिं यथाकाञ्चनकुट्टिमाम् ।
सहकारान् प्रफुल्लांश्च केतकोद्दालकान् धवान् । अशो-
कान् सहकुन्दांश्च फुल्लांश्चैवातिमुक्तकान् । चम्पकांस्ति-
लकान् भव्यान् पनसान् वञ्जुलानपि । पुष्पितान् कर्णि-
कारांश्च तत्र तत्र ददर्श ह । श्यामान् वारणपुष्पांश्च तथा-
ऽष्टपादिका लताः । तत्र तत्र परिक्लृप्ता ददर्श स मही-
पतिः । रम्यान् पद्मोत्पलधरान् सर्व्वर्त्तुकुसुमांस्तथा । वि-
मानप्रतिमांश्चापि प्रासादाञ्छैलसन्निभान् । शीतलानि
च तोयानि क्वचिदुष्णानि भारत ! । आसनानि विचि-
त्राणि शयनप्रवराणि च । पर्य्यङ्कान् रत्नसौवर्णान्
परार्द्ध्यास्तरणावृतान् । भक्ष्यभोज्यमनन्तञ्च तत्र
तत्रोपकल्पितम् । वीणानादाञ्छुकांश्चैव सारिकान्
भृङ्गराजकान् । कोकिलाञ्छतपत्रांश्च सकोयष्टिककु-
कुभान् । मयूरान् कुक्कुटांश्चापि दात्यूहान् जीव-
जीवकान् । चकोरान् वानरान् हंसान् सारसांश्चक्रसा-
ह्वयान् । समन्ततः प्रमुदितान् ददर्श सुमनोहरान् ।
क्वचिदप्सरसां संघान् गन्धर्व्वाणाञ्च पार्थिव !। कान्ताभिर-
परांस्तत्र परिष्वक्तान् ददर्श ह । न ददर्श च तान् भूयो दद-
र्श च पुनर्नृपः । गीतध्वनिं सुमधुरं तथैवाध्यापनध्वनिम् ।
हंसान् सुमधुरांश्चापि तत्र शुश्राव पार्थिवः । तं दृष्ट्वाऽ-
त्यद्भुतं राजा मनसाऽचिन्तयत्तदा । स्वप्नोऽयं चित्तविभ्रंश
उताहो सत्यमेव तु । अहो सह शरीरेण प्राप्तोऽस्मि
परमां गतिम् ! उत्तरान् वा कुरून् पुण्यानथ वाऽप्यमरा-
वतीम् । किन्त्विदं महदाश्चर्य्यं संपश्यामीत्यचिन्तयत् । एवं
सञ्चिन्तयन्नेव ददर्श मुनिपुङ्गवम् । तस्मिन् विमाने सौवर्णे
मणिस्तम्भसमाकुले । महार्हे शयने दिव्ये शयानं भृगु-
नन्दनम् । तमभ्ययात् प्रहर्षेण नरेन्द्रः सह भार्य्यया ।
अन्तर्हितस्ततो भूयश्च्यवनः शयनञ्च तत् । ततोऽन्यस्मिन्
वनोद्देशे पुनरेव ददर्श तम् । कौश्यां वृष्यां समासीनं
जपमानं महाव्रतम् । एवं योगबलाद्विप्रो मोहयामास
पार्थिवम् । क्षणेन तद्वनञ्चैव ते वै चाप्सरसां गणाः ।
गन्धर्व्वाः पादपाश्चैव सर्व्वमन्तरधीयत । निःशब्दमभवच्चापि
गङ्गाकूलं पुनर्नृप ! । कुशवल्मीकभूयिष्ठं बभूव च यथा
पुरा । ततः स राजा कुशिकः सभार्य्यस्तेन कर्म्मणा ।
विस्मयं परमं प्राप्य तद्दृष्ट्वा महदद्भुतम् । ततः प्रोवाच
कुशिको भार्य्यां हर्षसमन्वितः । पश्य भद्रे ! यथा भावा
स्त्रिया दृष्टाः सुदुर्लभाः । प्रसादाद्भृगुमुख्यस्य किमन्यत्र
तपोबलात् । तपसा तदवाप्यं हि यत्तु शक्यं मनोरथैः ।
त्रैलोक्यराज्यादपि हि तप एव विशिष्यते । तपसा हि
सुतप्तेन शक्यो मोक्षस्तपोबलात् । अहो प्रभावो ब्रह्मर्षे-
श्च्यवनस्य महात्मनः । इच्छयैव तपोवीर्य्यादन्यान् लो-
कान् सृजेदपि । ब्राह्मणा एव जायेरन् पुण्यवाग्बुद्धि-
कर्म्मणः । उत्सहेदिह कृत्वैव कोऽन्यो वै च्यवनादृते ।
ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः ।
ब्राह्मणस्य प्रभावाद्धि रथे युक्तौ स्व धुर्य्यवत् । इत्येवं
चिन्तयानः स विदितश्च्यवनस्य वै । संप्रेक्ष्योवाच नृप-
तिं क्षिप्रमागम्यतामिति । इत्युक्तः सहभार्य्यस्तु सोऽभ्य-
गच्छन्महामुनिम् । शिरसा वन्दनीयन्तमवन्दत च पा-
र्थिवः । तस्याशिषः प्रयुज्याथ स मुनिस्तं नराधिपम् ।
निषीदेत्यब्रवीद्धीमान् सान्त्वयन् पुरुषर्षभ !। ततः प्रकृति-
मापन्नो भार्गवो नृपतेर्नृप ! । उवाच श्लक्ष्णया वाचा
तर्पयन्निव भारत ! । राजन् ! सम्यग् जितानीह पञ्च पञ्च-
स्वयं त्वया । मनःषष्ठानीन्द्रियाणि कृच्छ्रान्मुक्तोऽसि तेन
वै । सम्यगाराधितः पुत्त्र ! त्वया प्रवदतां वर ! । न हि
ते वृजिनं किञ्चित्, सुसूक्ष्ममपि विद्यते । अनुजानीहि
मां राजन् ! गमिष्यामि यथागतम् । प्रीतोऽस्मि तव
राजेन्द्र ! वरश्च प्रतिगृह्यताम् ।
कुशिक उवाच । अग्निमध्यगतेनेव भगवन् सन्निधौ मया ।
वर्त्तितं भृगुशार्दूल ! यन्न दग्धोऽस्मि तद्बहु । एष एव
वरो मुख्यः प्राप्तो मे भृगुनन्दन ! । यत्प्रीतोऽसि मया
ब्रह्मन् ! कुलं त्रातञ्च मेऽनघ ! । एष मेऽनुग्रहो विप्र !
जीविते च प्रयोजनम् । एतद्राज्यफलञ्चैव तपसश्च फलं
मम । यदि त्वं प्रीतिमान् विप्र ! मयि वै भृगुनन्दन ! ।
अस्ति मे संशयः कश्चित्तन्मे व्याख्यातुमर्हसि । ५४ अ०
“च्यवन उवाच । वरश्च गृह्यतां मत्तो यश्च ते संशयो
हृदि । तं प्रब्रूहि नरश्रेष्ठ । सर्व्वं सम्पादयामि ते ।
कुशिक उवाच । यदि प्रीतोऽसि भगवंस्ततो मे वद भा-
र्गव ! । कारणं श्रोतुमिच्छामि मद्गृहे वासकारितम् ।
शयनञ्चैकपार्श्वेन दिवसानेकविंशतिम् । अकिञ्चिदुक्त्वा
गमनं बहिश्च मुनिपुङ्गव ! । अन्तर्द्धानमकस्माच्च पुनरेव च
दर्शनम् । पुनश्च शयनं विप्र ! दिवसानेकविंशतिम् ।
तैलाभ्यक्तस्य गमनं भोजनञ्च गृहे मम । समुपानीय
विविधं यद्दग्धं जातवेदसा । निर्य्याणञ्च रथेनाशु सह-
सा यत् कृतं त्वया । धनानाञ्च विसर्गश्च वनस्यापि च
दर्शनम् । प्रासादानां बहूनाञ्च काञ्चनानां महामुने ! । म-
णिविद्रुमपादानां पर्य्यङ्कानाञ्च दर्शनम् । पुनश्चादर्शनं तस्य

श्रोतुमिच्छामि कारणम्। अतीव ह्यत्र मुह्यामि चिन्तयानो भृगूद्वह!। नचैवान्ताधिगच्छामि सर्व्वस्यास्य विनिश्चयम्। एतदिच्छामि कात्स्न्र्येन सत्यं श्रोतुं तपोधन! च्यवन उवाच। शृणु सर्व्वमशेषेण यदिदं येन हेतुना। न हि शक्यमनाख्यातुमेवं पृष्टेन पार्थिव!। पितामहस्य वदतः पुरा देवसमागमे। श्रुतवानस्मि यद्राजंस्तन्मे निगदतः शृणु। ब्रह्मक्षत्रविरोधेन भविता कुलसङ्करः। पौत्रस्ते भविता राजंस्तेजोवीर्य्यसमन्वितः। ततस्ते कुलनाशार्थमहं त्वां समुपागतः। चिकीर्षन् कुशिकोच्छेदं सन्दिधक्षुः कुलन्तव। ततोऽहमागम्य पुरे त्वामवोचं महीपते!। नियमं कञ्चिदारप्स्ये शुश्रूषा क्रियतामिति। न च ते दुष्कृतं किञ्चिदहमासादयं गृहे। तेन जीवसि राजर्षे। न भवेयास्त्वमन्यथा। एवं बुद्धिं समास्थाय दिवसानेकविंशतिम्। सुप्तोऽस्मि यदि मां कश्चिद्बोधयेदिति पार्थिव!। यदा त्वया सभार्य्येण संसुप्तो न प्रबोधितः। अहन्तदैव ते प्रीतो मनसा राजसत्तम!। उत्थाय चास्मि निष्क्रान्तो यदि मां त्वं महीपते!। पृच्छेः क यास्यसीत्येवं शपेयं त्वामिति प्रभो!। अन्तर्हितः पुनश्चास्मि पुनरेव च ते गृहे। योगमास्थाय संसुप्तो दिवसानेकविंशतिम्। क्षुधितो मामसूयेथाः श्रमाद्वेति नराधिप!। एवं बुद्धिं समास्थाय कर्षितौ वां क्षुधा मया। न च तेऽभूत् सुसूक्ष्मोऽपि मन्युर्म्मनसि पार्थिव!। सभार्य्यस्य नरश्रेष्ठ! तेन ते प्रीतिमान् हृम्। भोजनञ्च समानाय्य यत्तदा दीपितं मया। क्रुध्येथा यदि मात्सर्य्यादिति तन्मर्षितञ्च मे। ततोऽहं रथमारुह्य त्वामवोचं नराधिप!। सभार्य्यो मां वहस्वेति तच्च त्वं कृतवांस्तथा। अविशङ्को नरपते! प्रीतोऽहञ्चापि तेन ह। धनोत्सर्गेऽपि च कृते न त्वां क्रोधः प्रधर्षयेत्। ततः प्रीतेन ते राजन्! पुनरेतत् कृतं तव। सभार्य्यस्य वनं भूयस्तद्विद्धि मनुजाधिप!। प्रीत्यर्थं तव चैतन्मे स्वर्गसन्दर्शनं कृतम्। यत्ते वनेऽस्मिन्नृपते! दृष्टं दिव्यं निदर्शनम्। स्वर्गोद्देशस्त्वया राजन्! सशरीरेण पार्थिव!। मुहूर्त्तमनुभूतोऽसौ सभार्य्येण नृपोत्तम!। निदर्शनार्थं तपसो धर्म्मस्य च नराधिप!। तत्रवासीत् स्पृहा राजंस्तच्चापि विदितं मया। ब्राह्मण्यं काङ्क्षसे हि त्वं तपश्च पृथिवीपते!। अवमन्य नरेन्द्रत्वं देवेन्द्रत्वं नराधिप!। एवमेतद्यथात्थ त्वं ब्राह्मण्यं तात! दुर्लभम्। ब्राह्मणे सति चर्षित्वं ऋषित्वे च तपस्विता। भविष्यत्येष ते कामः कौशिकात् कौशिको द्विजः। तृतीयं पुरुषं तुभ्यं ब्राह्मणत्वं गमिष्यति। वंशस्ते पार्थिवश्रेष्ठ! भृगूणामेव तेजसा। पौत्रस्ते भविता विप्रस्तपस्वी पावकद्युतिः। यः स देवमनुष्याणां भयमुत्पादयिष्यति। त्रयाणामेव लोकानां सत्यमेतद्ब्रवीमि ते। वरं गृहाण राजर्षे! यस्ते मनसि वर्त्तते। तीर्थयात्रां गमिष्यामि पुरा कालोऽभिवर्त्तते।

कुशिक उवाच। एष एव वरो मेऽद्य यस्त्वं प्रीतो महामुने!। भवत्वेतत् यथात्थ त्वं भवेत् पौत्रो ममानघ!। ब्राह्मण्यं मे कुलस्यास्तु भगवन्नेष मे वरः। पुनश्चाख्यातुमिच्छामि भगवन्! विस्तरेण वै। कथमेष्यति विप्रत्वं कुलं मे भृगुनन्दन। कश्चासौ भविता बन्धुर्मम कश्चापि सम्मतः। ५५ अ०

च्यवन उवाच। अवश्यं कथनीयं मे तवैतन्नरपुङ्गव!। यदर्थं त्वाहमुच्छेत्तुं संप्राप्तो मनुजाधिप!। भृगूणां क्षत्रिया याज्या नित्यमेतज्जनाधिप!। ते च भेदं गमिष्यन्ति दैवयुक्तेन हेतुना। क्षत्रियाश्च भृगून् सर्वान् वधिष्यन्ति नराधिप!। आ गर्भादनुकृन्तन्तो दैवदण्डनिपीडिताः। तत उत्पत्स्यतेऽस्माकं कुलगोत्रविवर्द्धनः। ऊर्वो नाम महातेजा ज्वलनार्कसमद्युतिः। स त्रैलोक्यविनाशाय कोपाग्निं जनयिष्यति। महीं सपर्वतवनां यः करिष्यति भस्मसात्। कञ्चित् कालन्तु वह्निञ्च स एव शमयिष्यति। समुद्रे वडवावक्त्रे प्रक्षिप्य मुनिसत्तमः। पुत्रं तस्य महाराज! ऋचीकं भृगुनन्दनम्। साक्षात् कृत्स्नो धनुर्वेदः समुपस्थास्यतेऽनघ!। क्षत्रियाणामभावाय दैवयुक्तेन हेतुना। स तु तं प्रतिगृह्यैव पुत्रे संक्रामयिष्यति। जमदग्नौ महाभागे तपसा भावितात्मनि। स चापि भृगुशार्दूलस्तं वेदं धारयिष्यति। कुलात्तु तव धर्म्मात्मन् कन्यां सोऽधिगमिष्यति। उद्भावनार्थं भवतो वंशस्य भरतर्षभ!। गाधेर्दुहितरं प्राप्य पौत्रीं तव महातपाः। ब्राह्मणं क्षत्रधर्म्माणं पुत्रमुत्पादयिष्यति। क्षत्रियं विप्रकर्म्माणं बृहस्पतिमिवौजसा। विश्वामित्रं तव कुले गाधेः पुत्रं सुधार्म्मिकम्। तपसा महता युक्तं प्रदास्यति महाद्युते!। स्त्रियौ तु कारणं तत्र परिवर्त्ते भविष्यतः। पितामहनियोगाद्वै नान्यथैतद्भविष्यति। तृतीये पुरुषे तुभ्यं ब्राह्मणत्वमुपैष्यति"।

"भीष्म उवाच॥ कुशिकस्तु मुनेर्वाक्यं च्यवनस्य महात्मनः। श्रुत्वा हृष्टोऽभवद्राजा वाक्यञ्चेदमुवाच ह

एवमस्त्विति धर्म्मात्मा तदा भरतसत्तम !। च्यवनस्तु महातेजाः पुनरेव नराधिपम्। वरार्थं नोदयामास तमुवाच स पार्थिवः। वाढमेवं करिष्यामि कामं त्वत्तो महामुने !। ब्रह्मभूतं कुलं मेऽस्तु धर्म्मे चास्य मनो भवेत्। एवमुक्तस्तथेत्येवं प्रत्युक्त्वा च्यवनो मुनिः। अभ्यनुज्ञाय नृपतिं तीर्थयात्रां ययौ तदा। एतत्ते कथितं सर्व्वमशेषेण मया नृप !। भृगूणां कुशिकानाञ्च अभिसम्बन्धकारणम्। यथोक्तमृषिणा चापि तदा तदभवन्नृप !" ५६अ०। कुशिकस्यापत्यम् अण्। कौशिक तदपत्ये पुंस्त्री० स्त्रियां ङीप् हेमच० मुनिभेदार्थकतामालोक्य जमदग्निपितर्य्युक्तोक्तिः कल्पद्रुमे तन्मूलान्वेषोक्तिश्च चिन्त्या। २सर्ज्जवृक्षे हेमच०। ३विभीतकवृक्षे पु० विश्वः ४कोकरे त्रि० ५अश्मकर्ण्णवृक्षे राजनि० ६तैलपर्णे पु० शब्दमा० कुशी+स्वार्थे क। कुशिका ७फाले स्त्री

कुशित त्रि० कुश–इतच्। जलमिश्रिते उज्ज्वल०

कुशिन् त्रि० कुशोऽस्त्यस्य इनि। कुशयुक्ते "दिनेऽष्टमे तु विप्रेन्द्र दीक्षितोऽहं यथाविधि। दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः" भा०आनु०१४अ० २वाल्मीकौ मुनौ हेमच०।

कुशिम्बि(म्बी) स्त्री कुत्सिता शिम्बी पृषो० वा ह्रस्वः। शिम्बीभेदे सुश्रु०। "सप्ताह्वयं मूलकजाश्च शिम्बा कुशिम्बिवल्लीप्रभवाश्च शिम्बाः। ज्ञेया विपाके मधुरा रसे च बलप्रदाः पित्तनिबर्हणाश्च सम्यक्"। [फाले मेदि०।

कुशी स्त्री कुश–अयोविकारेऽर्थे ङीप् नि०। लौहविकारे

कुशी(सी)द न० कु+सद–श पृषो० वा सस्य शः। वृद्ध्यर्थं धनप्रयोगे अमरः "कुशी(सी)दवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता" या० स्मृतिः। २रक्तचन्दने तन्त्रसा०। "लाक्षा कुशी(सी)दसिन्दूरं गोमयञ्च करीषकम्। विलोड्य गुटिकां कृत्वा जपसंख्यां च कारयेत्"

कुशी(सी)रक पु० कुत्सितः शी(सी)रोऽस्य कर्षणे वा कप्। कर्षणेन कुत्सितहलके क्षेत्रादौ। ततः चतुरर्थ्यां सख्या० ढञ्। कौशी(सी)रकीय तत्सन्निकृष्टदेशादौ त्रि०।

कुशीलव पु० कुत्सितं शीलं कुगति० अस्त्यर्थे व, कुशीलं वाति वा–क–वा। १कीर्त्तिसञ्चारके नटे, २चारणे, ३गायके च। कुशीलवत्त्वर्थं नाट्यप्रचारकत्वात् ४वाल्मीकौ मुनौ। शब्दचि० ५नटमात्रे अमरः। "यन्नाट्यवस्तुनः पूर्व्वं रङ्गविघ्नोपशान्तये" कुशीलवाः प्रकुर्व्वन्ति सा०द०। कुशश्च लवश्च पृषो०। ६कुशलवयोः द्वि० हेमच०। "अभिषिच्य महात्मानावुभौ रामः कुशीलवौ" रामा० उ० १०७स०। त्रिकाण्डशेषे कुशीलवः इति वाल्मीक्यर्थे पाठः लिपिकरप्रमादकृतः।

कुशुम्भ पु० कु+शुम्भ अच्। कुसुम्भशब्दार्थे हारा०

कुशूल पु० कुश–कूलच्। १तुषाग्नौ, जटाधरः २अन्नकोष्ठके, इष्टकादिनिर्म्मिते धान्यादिस्थापनार्हे ३स्थाने च। हेमच० "कुसूलपूरणाढकैः" स्मृतिः

कुशूलधान्यक पु० कुशूलपरिमितं धान्यं यस्य। यावता धान्येन वर्षत्रयं स्वस्य सकुटुम्बस्य सभृत्यस्य निर्वाहो भवति तावन्मात्रसञ्चितधान्ये १विप्रे। कुम्भीधान्यशब्दे विवृतिः।

कुशेशय न० कुशे जले शेते शी–अच् अलुक् स०। १पद्मे, "कुशेशयैरत्र जलाशयोषिताम्" माघः। २सारसपक्षिणि, अमरः। ३कर्णिकारवृक्षे शब्दचिन्ता०। कुशद्वीपस्थे ४पर्व्वतभेदे पु० कुशशब्दे विवृतिः [जले

कुशोदक न० कुशसंसृष्टमुदकम् शाक०। दानार्थं कुशसहिते

कुष निष्कर्षे क्र्यादि० पर० सक० सेट्। कुष्णाति अकोषीत्। निरस्तु वेट् निरकोषीत् निरकुक्षत्। चुकोष। निष्कर्षश्चेह इयत्तापरिच्छेदः, मध्यस्थितस्य, वस्तुनो बहिर्निःसारणञ्च। "शिवाः कुष्णन्ति मांसानि" "ततोऽकुष्णात् दशग्रीवः क्रुद्धः प्राणान् वनौकसाम्" भट्टिः। क्त्वा सेट् कित्। "कुषित्वा जगतां सारम्" भट्टिः कर्म्मकर्त्तरि सार्वधातुके श्यन् वा प०। कुष्यति ते वा पादः। आर्द्धधातुके तु न परस्मैपदम् श्यन्वचियोर्विधिष्टत्वात् कोषिषीष्ट पादः।

अनु+सादृश्येन बहिर्निःसारणे तुल्येनानुकुष्णाति

अभि+आभिमुख्येन निःसारणे "न बालकस्य नासास्रोतो दशनविवराण्यभिकुष्णीयात्" सुश्रुतः

अव+अधोनिःसारणे तुलैरवकुष्णाति सि०कौ०।

निर्+निष्कासने। निरकुक्षत् निरकोषीत् 'निष्कोष्टा निष्कोषिता। "निष्कोषितव्यान्निष्कोष्टु प्राणान् दशमुखात्मजात्। आदाय परिघं तस्थौ बलान्निष्कुषितद्रुमः" भट्टिः "कीटनिष्कुषितं धनुः" भट्टिः "उपान्तयोर्निष्कुषितं विहङ्गैः" रघुः। आर्षे तु गणव्यत्ययोऽपि क्वचित् दृश्यते "यमपुरुषा अयस्मयैरग्नितप्तैः संदंशैस्त्वचि निष्कुषन्ति" भाग० ५।२६।१६।

कुषल त्रि० कुष–बा० कलच्। दक्षे पटौ भरतः [कोष

कुषाकु पु० कुष–आकु। १कपौ २वह्नौ ३सूर्य्ये च उज्ज्व०

कुषित् अव्य० कुविद्+पृषो०। १बाहुल्ये २प्रशंसायाञ्च मनोरमा

कुषित त्रि० कुष–क्त। जलमिश्रिते उणादि०।

कुषीद न० कु+सद–अ पृषो० षत्वम्। वृद्ध्यर्थधनप्रयोगे भरतः

कुषीतक पु० ऋषिभेदे। तस्यापत्यम् काश्यपः ठञ्। कौषीतकेय तदपत्ये काश्यपे। अन्यत्वार्थे अत इञ्। कौषीतकि तदपत्येऽकाश्यपे। ततः उपकादि० द्वन्द्वेऽद्वन्द्वे च गोत्रप्रत्ययस्य लुक्।

कुषुभ क्षेपे कण्ड्वा०प०सक०सेट्। कुषुभ्यति अकुषु(भी)भ्यीत्। "भिनद्मि ते कुषुम्भं यस्ते विषधानः" अथ० २।२२।६।

कुषुम्भक पुं स्त्री कुषुम–ण्वुल् वेदे पृषो० हस् यलोपश्च। नकुले "कुकुम्भकस्तदब्रवीद्गिरेः प्रवर्त्तमानकः" ऋ० १६१।१६। "कुषुम्भकोनकुलः" भा०

कुष्ठ पुंन०कुष्णाति रोगम् कुष–क्थन्। (कुड) प्रसिद्धे द्रव्यभेदे "कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु। हन्ति वाता-स्रवीसर्पकासकुष्ठमरुत्कफान्" भावप्र०। तद्भेदास्तत्रैवोक्ता यथा "उक्तं पुष्करमूलं तु पौष्करं पुष्करं च तत्। पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिमं जगुः"। अयञ्च सुश्रुते एलादिकगणे एलातगरकुष्ठेत्यादिना, सालसारादिकगणे च मुस्ताहरिद्रेत्युपक्रमे विभीतककुष्ठेत्यादिना उक्तः। 'रोगभेदे तत्स्वरूपनिदानभेदादि भावप्र० दर्शितं यथा "विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च। भजतामागतान्छर्द्दिवेगांश्चान्यान् प्रतिघ्नताम्। व्यायाममग्निसन्तापमत्यतिभुक्त्वा निषेविणाम्। शीतोष्णलङ्घनाहारान् क्रमं मुक्त्वा निषेविणाम्। घर्म्मश्रमभयार्त्तानां द्रुतं शीताम्बुसेविनाम्। अजीर्णाध्याशिनां चापि पञ्च कर्म्मापचारिणाम्। नवान्नदधिमत्स्यादिलवणाम्लनिषेविणाम्। माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम्। व्यवायं चाप्यजीर्णेऽन्ने दिवा निद्रानिषेविणाम्। विप्रान् गुरून् धर्षयतां पापं कर्म्म च कुर्वताम्। वातादयस्त्रयो दोषास्त्वग्रक्तं मांसमम्बु च। दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः। अतः कुष्ठानि जायन्ते सप्तधैकादशैव च"। विरोधीन्यन्नपानानि क्षीरमत्स्यादीनि व्यायाममित्यादि। अतिभुक्त्वा व्यायामम्, अग्निसन्तापम् अग्निरुपलक्षणं सूर्य्यादिसन्तापञ्च निषेविणामिति। तद्योगे षष्ठी प्राप्ता द्वितीया तु सुनिषेवणात्। एवमग्रेऽपि "शीतोष्णं लङ्घनाहारानित्यादिष्वपि द्वितीया। क्रमं–विधिं, वर्मेत्यादि। घर्म्मार्त्ते सति द्रुतमविश्रम्य पाने स्नाने शीताम्बुसेविनाम्। अजीर्णाध्याशिनां भुक्तेऽजीर्णे भुञ्जताम्। पञ्चकर्म्मापचारिणां पञ्चकर्म्माणि वमनविरेकवस्त्यनिरूहानुवासनानि तेषु कृतेषु अपचारिणाम्। नवान्नदधिमत्स्यादि आहारादि सेविनाम्। व्यवायमित्यादि। अन्ने अजीर्णे विदग्धादिरूपे सति। व्यवायं मैथुनं निषेविणाम्। दिवानिद्रानिषेविणामिति भिन्नो हेतुः। धर्षयताम् अभिभवताम्। दोषदुष्यसंग्रहार्थमाह। वातादय इत्यादि-शब्देन त्रिष्वपि प्रतीतेषु त्रय इति पदं सर्वेषु कुष्ठेषु त्रयाणामपि वातादीनां दुष्टत्वबोधनार्थम्। त्वक्, रस, अम्बु, लसीका। अथ संख्यामाह। अतः कुष्ठानीत्यादि। अतः पूर्व्वोक्तदोषदूष्यसमुदायात्। सप्तधैकादशधेति संख्याविच्छेदपाठेन सप्तानां महाकुष्ठत्वमेकादशानां क्षुद्रकुष्ठत्वं बोधयति। तत्र महाकुष्ठान्याह "पूर्वं त्रिकं तथा सिध्मं ततः काकणकं तथा। पुण्डरीकर्क्षजिह्वाके महाकुष्ठानि सप्त च"। पूर्वत्रिकं कपालौदुम्बरमण्डलाख्यम्। सिध्मशब्दोऽकारान्तो नपुंसकः। ननु कथं सिध्मस्य महाकुष्ठेषु गुणना सुश्रुतेन क्षुद्रकुष्ठेषु उक्तत्वात् धातुप्रविष्टं सिध्मं तु स्यान्महाकुष्ठमेव च। एवंविधस्य सिध्मस्य चरकेण महाकुष्ठेषु दर्शितत्वात्। एषां महाकुष्ठत्वञ्च शीघ्रमुत्तरोत्तरधात्ववगाहनात् उल्बणदोषजन्यत्वात् चिकित्सावाहुल्याच्च। अथ क्षुद्रकुष्ठान्याह "एककुष्ठं स्मृतं पूर्वं गजचर्म ततः स्मृतम्। ततश्चर्मदलं प्रोक्तं ततश्चापि विचर्चिका। विपादिकाभिधा सैव पामाकच्छूस्ततः परम्। दद्रूविस्फोटकिटिभालसकानि च वेष्टितम्। क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैः"। ननु दद्रूः कथं क्षुद्रकुष्ठेषु गणिता? सुश्रुतेन महाकुष्ठेषूक्तत्वात्। उच्यते असितावगाढमूला दद्रूः सुश्रुतेन महाकुष्ठेषु उक्ता। असितेतराऽनवगाढमूला दद्रूः क्षुद्रकुष्ठमेव। एवंविधाया दद्र्वाश्चरकेण क्षुद्रकुष्ठेषु दर्शितत्वात्। कुष्ठानां त्रिदोषजत्वेनैकत्वेऽपि दोषस्योल्बणतया सप्तधात्वमाह। "कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः। सर्वेषु च त्रिदोषेषु व्यपदेशोऽधिकत्वतः"। सर्वेष्वपि त्रिदोषेषु व्यपदेशः कपालादिसंज्ञास्वेषामष्टादशरूपं यदधिकत्वं ततः कुष्ठानि सप्तधा, दोषैः कथंभूतैः पृथग्द्वन्द्वैः समागतैः सङ्गतैः संमिलितैरिति यावत्। अस्यायमर्थः। किमपि कुष्ठं वातोल्बणं, किमपि पित्तोल्बणं, किमपि कफोल्बणं, किमपि वातश्लेष्मोल्बणं, किमपि पित्तश्लेष्मोल्बणम्, किमपि वातपित्तोल्बणं, किमपि

त्रिदोषोल्वणमिति। पूर्वरूपमाह "अतिश्लक्ष्णः खरस्पर्शः स्वेदास्वेदविवर्णता। दाहः कण्डूस्त्वचिस्वापस्तोदः कोठोन्नतिः श्रमः। व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः। रूढ़ानामपि रूक्षत्वं निमित्तेऽल्पेऽपि कोपनम्। रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्"। अतिश्लक्ष्णः अतिमृदुः। अथवा घर्मादिप्रसङ्गेऽपि स्वेदाभावः। त्वचिस्वापः स्पर्शाज्ञता। शीघ्रोत्पत्तिः व्रणानाम्। "दूषयन्ति श्लथीकृत्य निश्चलत्वादितस्ततः। त्वचः कुर्वन्ति वैवर्ण्यं दोषाः कुष्ठमुशन्ति तम्"। येनोल्वणेन यत्कुष्ठमुत्पद्यते तदाह। "वातेन कुष्ठं कापालं पित्तेनौदुम्बरं कफात्। मण्डलाख्यं विचर्ची च ऋक्षाख्यं वातपित्ततः। चर्मैककुष्ठकिटिभं सिध्मालसविपादिकाः। वातश्लेष्मोद्भवाः पित्तकफाद्दद्रूशतारुषी। सपुण्डरीकविस्फोटपामाचर्मदलं तथा। सर्वैरेवोल्वणैर्दोषैराहुः काकणकं बुधाः"। विचर्ची च कफादित्यन्वयः। पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा पित्तकफादित्यन्वयः। अथ महाकुष्ठानां मध्ये कपालस्य लक्षणमाह। "कृष्णारुणं कपालाभं यद्रूक्षं परुषं तनु। कापालं तोदबहुलं तत् कुष्ठं विषमं स्मृतम्"। किञ्चित्कृष्णाः किञ्चिदरुणाः ये कपालाः स्फुटितमृत्पात्रखण्डाः 'खपरा' इति यावत् तद्वर्णं, परुषं खरस्पर्शम्। तनु तनुत्वक् कपालम् कपालसंज्ञं, विषमं दुश्चिकित्स्यम्। औदुम्बरमाह "उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेत्। रुग्दाहरागकण्डूभिः परीतं रोमपिञ्जरम्"। औदुम्बरफलाकारम्। मण्डलमाह "श्वेतरक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम्। कृच्छ्रमन्योन्यसंसक्तं कुष्ठं मण्डलमुच्यते। श्वेतरक्तं किञ्चिच्छ्वेतं किञ्चिद्रक्तम्। स्थिरं चिकित्सां विना अविनाशि, स्त्यानम् आर्द्रं, स्निग्धं सस्वेदम्। उत्सन्नमण्डलम् उद्गतमण्डलम्। कृच्छ्रं कष्टसाध्यम्। अन्योन्यसंसक्तं परस्परमिलितम्। अथ सिध्ममाह "श्वेतताम्रञ्च तनु यत् रजोघृष्टं विमुञ्चति। प्रायेणोरसि तत् सिध्ममलाबूकुसुमोपमम्"। श्वेतताम्रं श्वेतं ताम्रम्। तनु तनुत्वक्। प्रायेणोरसि प्रायशब्दादन्यत्रापि बोद्धव्यम्। काकणमाह "यत्काकणन्तिकावर्णमपाकं तीव्रवेदनम्। त्रिदोषलिङ्गं तत् कुष्ठं काकणं नैव सिध्यति। काकणन्तिका गुञ्जा। गुञ्जावर्णत्वेन मध्ये कृष्णमन्ते रक्तम्। अथवा मध्ये रक्तं मध्यान्ते कृष्णम्। अपाकं स्वभावात्। त्रिदोषलिङ्गम्—सर्वेषां कुष्ठानां त्रिदोषजत्वेऽपि उल्वणदोषत्रयलिङ्गम्। पुण्डरीकमाह "तत् श्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम्। सरागञ्चैव सोत्सेधं पुण्डरीकं कफोल्वणम्" पुण्डरीकदलोपमं पुण्डरीकं श्वेतकमलं तत्पत्रोपमम् सरागञ्चैव। अत एव श्वेतं, रक्तपर्य्यन्तं अन्ते रक्तम्। सरागमिति अन्ते लौहित्याधिक्यबोधनार्थम्। सोत्सेधम् उन्नतम्। ऋक्षजिह्वमाह "कर्कशं रक्तपर्य्यन्तमन्तःश्यावं सवेदनम्। यदृक्षजिह्वासंस्थानमृक्षजिह्वं तदुच्यते"। रक्तपर्य्यन्तं अन्ते रक्तम् अन्तःश्यावं मध्ये धूम्रवर्णम्। ऋक्षजिह्वासंस्थानम् ऋक्षो भल्लूकस्तस्य जिह्वाकृति। अथ क्षुद्रकुष्ठानां मध्ये एककुष्ठगजचर्मणोर्लक्षणमाह "अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम्। तदेककुष्ठं चर्माख्यं बहुलं हस्तिचर्मवत्"। महावास्तु महास्थानम्। मत्स्यशकलोपमम् अत्र शकलशब्देन लक्षणया त्वगुच्यते। तेन चक्राकारमभ्रकपत्रसदृशं भवति। एककुष्ठमिति क्षुद्रकुष्ठेषु मुख्यत्वात्। चर्माख्यं गजचर्माख्यम् बहुलं स्थूलम् गजचर्मवत् रूक्षं कृष्णं च। अथ चर्मदलमाह "रक्तं सशूलं कण्डूमत् सस्फोटं दलयत्यपि। तच्चर्मदलमाख्यातं स्पर्शासहनञ्च यत्"। दलयत्यपि विदारयत्यपि चर्मेति शेषः। विचर्चिकामाह "सकण्डूः पिडका श्यावा बहुस्रावा विचर्चिका"। पिडका क्षुद्रपिडका। ननु क्षुद्रकुष्ठानां कथमेकादशत्वं विपादिकाया हादशत्वसम्भवात् उच्यते। विचर्चिकैव पादयोर्भवन्ती विपादिका तेन संख्यानतिरेकः। अतएव भोजः "दाल्यते त्वक् वरा रूक्षपाण्योर्या विचर्चिका। पादे विपादिका ज्ञेया स्थानभेदादुविचर्चिका"। दाल्यते विदार्य्यते। केचिद्विचर्चिकातो विपादिकां भिन्नामाहुः। विपादिकामाह "वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम्"। पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत्। पामामाह "सूक्ष्मा बह्व्यः स्रावयन्त्यः प्रदाहाः पामेत्युक्ताः पिडकाः कण्डुमत्यः"। पिडकाः पीडयन्तीति पिडका इति क्षिपकादित्वात् निपात्यते। कच्छुमाह "सैव स्फोटैस्तीव्रदाहैरुपेता ज्ञेया पाण्योः कच्छुरुग्रा स्फिचोश्च"। सैव पामा स्फोटैः महद्भिः, स्फिचौ-प्रोथौ। दद्रूमाह "सकण्डु रागपिडकं दद्रूमण्डलमुद्गतम्"। दद्रूमण्डलरूपेणोत्पत्तिमत्, उद्गतम् उच्छूनम्। विस्फोटमाह "स्फोटाः श्यावारुणाभासा विस्फोटाः स्युस्तनुत्वचः"। किटिभमाह "श्यावं किणखरस्पर्शपरुषं किटिभं स्मृतम्।

किणखरस्पर्शम् किणः शुष्कव्रणस्थानं तद्वत् कर्कशस्पर्शम्। परुषं रूक्षम्। अलसकमाह "कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम्" गण्डैः महापिडकाभिः चितं वेष्टितम्। शतारुराह "रक्तश्यावं सदाहार्त्ति शतारुः स्यात् बहुव्रणम्"। अथ सप्तधातुगतानां कुष्ठानां लक्षणान्याह तत्र रसगतस्य लक्षणमाह "त्वक्स्थे वैवर्ण्यमङ्गेषु कुष्ठे रौक्ष्यञ्च जायते। त्वक्स्वापो रोमहर्षश्च स्वेदस्यातिप्रवर्त्तनम्"। त्वक्शब्देनात्र रस उच्यते धातुप्रस्तावात्। त्वक्स्थत्वाच्च त्वक्स्वापः स्पर्शाज्ञत्वम्। त्वक्स्वाप इत्यादिकं केचिद्रक्तगतस्य लिङ्गं मन्यन्ते। रुधिरगतमाह "कण्डूर्विपूयकश्चैव कुष्ठे शोणितसम्भवे"। विपूयकः विशेषेण पूयः। अथ मांसगतमाह "बाहुल्यं वक्त्रशोषश्च कार्कश्यं पिडकोद्गमः। तोदः स्फोटः स्थिरत्वञ्च कुष्ठे मांससमाश्रिते"। बाहुल्यं कुष्ठस्य पुष्टिः। पिडकोद्गमः क्षुद्रपिडकोद्गमः स्फोटः बृहत्पिडका। स्थिरत्वम् असञ्चारित्वम्। मेदोगतमाह "कौण्यङ्गतिक्षयोऽङ्गानां सम्भेदः क्षतसर्पणम्। क्षतप्रसारो लिङ्गानि पूर्वमुक्तानि यानि च। मेदःस्थानगते लिङ्गं प्रागुक्तानि तथैव च"। कौण्यं हस्तनाशः। अङ्गानां सम्भेदः अङ्गभङ्गः, क्षतसर्पणं क्षतप्रसरणं, पूर्वोक्तानि रक्तमांसगतलिङ्गानि। अस्थिमज्जागतमाह "नासाभङ्गोऽक्षिरागश्च क्षतेषु क्रिमिसम्भवः। स्वरोपघातः पीडा च भवेत् कुष्ठेऽस्थिमज्जगे"। शुक्रगतमाह "दम्पत्योः कुष्ठबाहुल्याद् दुष्टशोणितशुक्रयोः। यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितम्"। ननु शुद्धशोणितशुक्रयोरेव दम्पत्योर्गर्भसम्भवः दुष्टशोणितशुक्रयोः कथम् अपत्योत्पत्तिः? यत आह सुश्रुतः "कामान्मिथुनसंयोगे शुद्धशोणितशुक्रजः। गर्भः सञ्जायते नार्य्याः स जातो बाल उच्यते" अथान्यच्च "वातादिदुष्टरेतसोऽपत्योत्पादनेऽसमर्थाः" इति। उच्यते। गर्भोऽत्र शुद्धो बोद्धव्यः। अशुद्धगर्भोऽपि दुष्टशोणितशुक्रयोरपि भवति गतकर्णान्धबधिरादीनां सम्भवात्। शोणितमार्त्तवम्। कुष्ठितं कुष्ठं सञ्जातमस्येति तारकादित्वादितच्। शुक्रार्त्तवगतं कुष्ठमपत्येन व्यज्यते इति तात्पर्य्यम्। कुष्ठेषु उल्वणवातादिदोषलिङ्गमाह "खरं श्यावारुणं रूक्षं वातात् कुष्ठं सवेदनम्। पित्तात् प्रकुपितं दाहरागस्रावान्वितं मतम्। कफात् क्लेदं घनं स्निग्धं सकण्डूशैत्यगौरवम्। द्विलिङ्गं द्वन्द्वजं कुष्ठं त्रिलिङ्गं सान्निपातिकम्"। खरं कर्कशम्। श्यावारुणं श्यावं वा अरुणं वा। प्रकुपितं पूतिक्लेदबहुलम्। क्लेदम् आर्द्रतायुक्तम् घनं पुष्टम्। साध्यत्वादिकमाह "साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकञ्च यत्। मेदोगं द्वन्द्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितम्। क्रिमितृड्दाहमन्दाग्निसंयुक्तं यत् त्रिदोषजम्"। वातश्लेष्माधिकञ्च यत् एतेन सिध्मैककुष्ठगजचर्म्मविपादिकाकिटिभालसकानि साध्यानि। मज्जागतं शुक्रगतमप्यसाध्यम्। क्रिमिबाहुग्रोऽपि वर्ज्यं इत्यन्वयः। अथारिष्टमाह "प्रभिन्नं प्रस्रुताङ्गञ्च रक्तनेत्रं हतस्वरम्। पञ्चकर्म्मगुणातीतं कुष्ठं हन्तीह कुष्ठिनम्"। प्रभिन्नं विदीर्णम्। हतस्वरं घर्घरस्वरम्। पञ्चकर्म्मगुणातीतम् असञ्जातवमनादिपञ्चकर्म्मगुणम्। अथ त्वग्दुष्टिसाम्यात् कुष्ठभेदत्वाच्चात्रैव श्वित्रमाह "कुष्ठैकसम्भवं श्वित्रं किलासं चारुणं भवेत्। निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम्"। कुष्ठैकसम्भवं कुष्ठेन सहैकः समानः सम्भवो निदानं यस्य तत्। अथ श्वित्रस्य भेदमाह किलासञ्चारुणं भवेत्। श्वित्रमेव रक्तमांसाश्रयात् किलासमरुणञ्च भवेदित्यर्थः। ननु कुष्ठस्य श्वित्रस्य च को भेद इत्यत आह निर्द्दिष्टमपरिस्रावीति श्वित्रमपरिस्रावि भवति कुष्ठन्तु स्रावि अपि च त्रिधातूद्भवसंश्रयमिति। त्रयोधातवो वातपित्तकफास्तेभ्यः पृथगग्रतेभ्य उद्भवो यस्य तत् श्वित्रम्। अथ वा त्रयोधातवो रक्तमांसमेदांसि संश्रयोऽधिष्ठानं यस्य तत्। कुष्ठन्तु सान्निपातिकं सर्वधातुगतं भवतीति भेदः। दोषभेदेन लक्षणभेदानाह "वाताद्रूक्षारुणं, पित्तात् ताम्रं कमलपत्रवत्। सदाहं रोमविध्वंसि, कफात् श्वेतं घनं गुरु। सकण्डूकं क्रमाद्रक्तमांसमेदःसु चादिशेत्। वर्णेनैवेदृगुभयं कुष्ठं तच्चोत्तरोत्तरम्"। अरुणमीषल्लोहितम्। कमलपत्रवदित्यनेन मध्ये श्वेतमन्ते लोहितं बोधयति। घनं धुसम्। क्रमाद्रक्तमांसमेदःसु चादिशेत्। तथा च चरकः "अरुणं रक्तमेवान्ते ताम्रं पित्ते पलङ्कते। श्वेतं श्लेष्मणि मेदःस्थे श्वित्रं कुष्ठं परापरमिति" उभयं द्विविधमपि श्वित्रं वर्णेन ईदृगेव। अरुणं ताम्रं श्वेतञ्च दोषभेदात्। द्विविधं दोषजं व्रणजं च। तथा च भोजः "श्वित्रं तु द्विविधं विद्याद्दोषजं व्रणजं तथेति"। श्वित्रं साध्यमसाध्यञ्चाह "अशुक्लरोमबहुलमसंसृष्टमथो नवम्। अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा"। अबहुलं तनु। अन्यच्च "गुह्यपाणितलौष्ठेषु जातमप्यचिरन्तन-

नम्। वर्ज्जनीयं विशेषेण किलासं सिद्धिमिच्छता"। गुह्यं मेहनम् भगञ्च तलमतलपदतलं, तत्र जातं सुश्रुतेनान्ते जातमिति सामान्यतो निर्द्दिष्टत्वात्। अप्यचिरन्तनम् नवमपि। कुष्ठस्य संसर्गजत्वप्रसङ्गेनान्यानपि संसर्गजान् रोगानाह "प्रसङ्गाद्गात्रसंस्पर्शान्निःश्वासात् सहभोजनात्"। प्रसङ्गोमैथुनम्। "एकशय्यासनाच्चापि वस्त्रमाल्यानुलेपनात्। कण्डूकुष्ठोपदंशश्च भूतोन्मादव्रणज्वराः। औपसर्गिकरोगाश्च संक्रामन्ति नरान्नरम्। म्रियते यदि कुष्ठेन पुनर्जातस्य तद्भवेत्। अतो निन्दितरोगोऽयं कुष्ठं कष्टं प्रकीर्त्तितम्"। एतावता कुष्ठिनां कुष्ठं सर्वथा प्रतीकरणीयं न तु उपेक्षणीयम्"।

एतेषां मध्ये केषाञ्चित् महापातकचिह्नत्वं केषाञ्चिदतिपातकचिह्नत्वं केषांचिच्चोपपातकचिह्नत्वं स्मृत्यादौ प्रसिद्धम्। अष्टादशानां मध्ये अष्टानामेव पापरोगतया स्मृतौ तदुक्तशादाह्यत्वादिकमुक्तं तच्च शु०त०निर्णीतं यथा भविष्यपुराणीयमध्यतन्त्रस्य षष्ठाध्याये "शृणु कुष्ठगणं विप्र! उत्तरोत्तरतोगुरुम्। विचर्च्चिका तु दुश्चर्म्मा चर्म्मरीदल,तौयकः। विकर्चुर्व्रणताम्रौ च कृष्णश्वेते तथाष्टकम्। एषां मध्ये तु यः कुष्ठी गर्हितः सर्वकर्म्मसु। व्रणवत् सर्वगात्रेषु गण्डे भाले तथा नखि"। तथा 'मृते च प्रोत्सृजेत्तीर्थे अथवा तरुमूलके। न पिण्डं नोदकं कुर्य्यान्नच दाहक्रियाञ्चरेत्। षण्मासीयस्त्रिमासीयोऽमृतः कुष्ठी कदा चन। यदि स्नेहाच्चरेद्दाह यतिचान्द्रायणं चरेत्"। यतिचान्द्रायणाशक्तौ पादोनधेनुचतुष्टयं देयम्। अतिपातकाशेषफलत्वादप्येवं युक्तं यथाह विष्णुः "अथ नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुषेषु लक्षणानि भवन्ति कुष्ठ्यतिपातकी, ब्रह्महा यक्ष्मी, सुरापः श्यावदन्तकः, सुवर्णहारी कुनखी, गुरुतल्पगो दुश्चर्म्मा, इत्यादि। श्यावदन्तकः स्वभावकृष्णदन्तकः प्रधानदन्तद्वयमध्यवर्त्तिक्षुद्रदन्तः। प्रधानदन्तोपरि दन्तान्तरमिति केचित्। कुनखी सङ्कुचितनखः, दुश्चर्म्मा स्वभावतः घ्नाहतमेढ्रः। अत एव महारोगिणोयावज्जीवमशौचमाह कूर्म्मपुराणम् "क्रियाहीनस्य मूर्खस्य महारोगिण एव च। यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्"। क्रियाहीनस्य नित्यनैमित्तिकक्रियाननुष्ठायिनः। मूर्खस्य गायत्रीरहितस्य। सार्थगायत्रीरहितस्येति रुद्रधरः। महारोगिणः पापरोगाष्टकान्यतमरोगवतः ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासोमधुमेहोभगन्दरः उदरोऽश्मरी इत्यष्टौ पापरोगा नारदोक्ताः। यथेष्टाचारणस्य द्यूतवेश्याद्यासक्तस्य। एवञ्च भविष्यपुराणोक्तं यतिचान्द्रायणप्रायश्चित्तमकृतप्रायश्चित्तानां कुष्ठ्यादीनां दाहे बोद्धव्यम् अन्यथैषां प्रायश्चित्तोपदेशोविफलःस्यात्। यथाह विष्णुः 'कुनखी श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं चरित्वोद्धरेयातां तद्दन्तनखौ' इति अत्र द्वादशरात्रं पराकरूपं तत्र पञ्च धेनवः न तु प्राजापत्यं तद्दाहकर्त्तुर्यतिचान्द्रायणेन विषमशिष्टत्वात् अत्र बहूनामेकधर्म्मिणामिति वचनादाकाङ्क्षितत्वाच्च कुष्ठ्यादीनामपि प्रायश्चित्तम्। अतएव प्रायश्चित्तविवेकेऽप्युक्तमेतं दुश्चर्म्मादिष्वपूह्यमिति। महापातकादतिपातकस्य गुरुत्वात् तच्छेषेऽपि प्रायश्चित्तं द्विगुणम्। कर्म्मविपाके शातातपः "महापातकजं चिह्नं सप्तजन्मसु जायते। बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः शमः। कुष्ठञ्च राजयक्ष्मा च प्रमेहोग्रहणी तथा"। अत्र कुष्ठपदमल्पकुष्ठपरमिति पूर्वेणाविरोधः"।

कुष्ठकेतु पु० कुष्ठं तन्नाशनः केतुश्चिह्नं यस्य। मार्कण्डिकायां (भूँइखखसा) वृक्षे राजनि०

कुष्ठगण पु० ६त०। शु०त०उक्ते कुष्ठशब्दे दर्शिते अदाह्यत्वादिप्रयोजके कुष्ठभेदसमूहे स च कुष्ठशब्दे भावप्र० अष्टादशविधो वर्णितः स च कुष्ठशब्दे दर्शितः

कुष्ठगन्धि न० कुष्ठस्येव गन्धोऽस्य इच् समा०। एलवालुके [राजनि०

कुष्ठगन्धिनी स्त्री० कुष्ठस्येव गन्धोऽस्याः इनि ङीप्। अश्वगन्धायां शब्दचि०

कुष्ठघ्न त्रि० कुष्ठं हन्ति हन-टक्। कुष्ठनाशके औषधे "मसूरिकायां कुष्ठघ्नलेपनादिक्रिया हिता" सुश्रु०। २हितावल्यां पु० राजनि० ३काकोदुम्बरिकायां ४वाकुच्यां च स्त्री ङीप् राजनि०

कुष्ठनाशन पु० कुष्ठं नाशयति नश-णिच्-ल्यु। १वाराहीकन्दे २श्वेतसर्षपे च राजनि० ३क्षीरीशवृक्षे रत्नमा० ४कुष्ठनाशके औषधादौ त्रि०

कुष्ठनाशिन् त्रि० कुष्ठं नाशयति नश-णिच्-णिनि। कुष्ठनाशके स्त्रियां ङीप्। सा २सोमराज्यां रत्नमा०

कुष्ठल न० कुत्सितं स्थलम् अम्बष्ठादि० षत्वम्। कुत्सितस्थले

कुष्ठविद् स्त्री कुष्ठस्य तत्स्वरूपादेः विद् विद्या विद-सम्प० भावे क्विप्। कुष्ठस्वरूपादिविद्यायां तत्र साधुः कथादि० ठक्। कौष्ठविदिक तत्र साधौ त्रि० कुष्ठं वेत्ति कर्त्तरि क्विप्। २कुष्ठस्वरूपवेत्तरि त्रि०। [राजनि०। २कुष्ठनाशके त्रि०

कुष्ठसूदन पु० कुष्ठं सूदयति सूदि-ल्यु। १आरग्वधे(सोन्दाल'

कुष्ठहन्तृ पु० कुष्ठं हन्ति हन–तृच्। १हस्तिकन्दे (हातिकान्दा) राजनि० २कुष्ठनाशके त्रि० ३वाकुच्यां स्त्री०ङीप् राजनि० [त्रिका० २कुष्ठनाशके त्रि०

कुष्ठहृत् पु० कुष्ठं हरति हृ–क्विप् तुक् च। १विट्खदिरे

कुष्ठारि पु० ६त०। १विट्खदिरे शब्दच०। २पटोले ३आदित्यपत्रे ४खदिरसारे ५गन्धके च राजनि० ६कुष्ठनाशके

कुष्ठिका स्त्री कुष्ठीव कायति कै–क। पादावयवभेदे "यास्ते जङ्घाः याः कुष्ठिका ऋच्छरा ये च ते शफाः" अथ०१०९२२

कुष्ठिन् त्रि० कुष्ठ+अस्त्यर्थे इनि। कुष्ठरोगयुक्ते। कुष्ठशब्दे उदा० स्त्रियां ङीप्

कुष्ठित त्रि० कुष्ठं जातमस्य तार० इतच्। जातकुष्ठे "स्त्रीपुंसयोः कुष्ठदोषाद् दुष्टशोणितशुक्रयोः। यदपत्यं तयो र्जातं ज्ञेयं तदपि कुष्ठितम्" सुश्रुतः [ऊषा०

कुष्मल न० कुष–क्मलन्। १छेदने २छादने ३विकसिते च

कुष्माण्ड पु० ईषत् उष्मा पित्तहेतुत्वात् अण्डेषु बीजेषु यस्य कर्म०। (कुमड़ा) ख्याते १वृक्षे, २शिवस्य पारिषदभेदे च तस्य कुष्माण्डाकृतित्वात्तथात्वम् जातित्वात् स्त्रियां ङीप् कुष्माण्डीत्यप्यत्र ३लताभेदे स्त्री भावप्र० ऋग्वेदादिप्रसिद्धेषु ४ऋग्विशेषेषु स्त्री ५यद्देवा देवहेडनमित्याद्यन्तपञ्चकात्मकेऽनुवाके पु० "स्तेनस्य दुराचारस्य प्रायश्चित्तानि दापयेत्। साधितां रेवतीमिष्टिं कुष्माण्डमवमर्षणम्" भा० आनु० १२६अ० व्याख्याने नीलकण्ठः। यद्देवा इत्याद्यनुवाकश्च यजु० २०।१४।१७॥ यथा "यद्देवा देवहेडनं देवासश्चकृमा वयम्। अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः" यजु० २०।१४। यदि दिवा यदि नक्तमेनांसि चकृमा वयम्। वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः"१५। यदि जाग्रद्यदि स्वप्न एनांसि चकृमा वयम्। सूर्य्यो मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः" १६। यद्ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये। यच्छूद्रे यदर्य्ये यदेनश्चकृमा वयम्। यदेकस्याधिधर्म्मणि तस्यावयजनमसि" १७। यदापो अघ्न्या इति वरुणेति नो मुञ्चत्वंहसः" १७॥ "इति सार्द्धचतुष्टयमन्त्रात्मकोऽनुवाकः तत्राद्यास्तिस्रः कुष्माण्डीसंज्ञा यथाह वेददी० "इति उत्तरमयभृथः प्रागरकुम्भं प्रापयति यद्देवा इति" का० १५।१२। अवन्ययेष्टिं कृत्वा यद्देवा इत्यादिना ऋग्त्रयेण मौ कुम्भमिपन्नेन सार्द्धकण्डिकाचतुष्कात्मकेन मन्त्रेण मागरकुम्भं जले तारयति। अग्निर्वायुःसूर्य्यदेवत्यास्तिस्रोऽनुष्टुभः कुष्माण्डीसंज्ञाः" इति। तेनायमिष्टसार्द्धमन्त्रसहितोऽनुवाकः कुष्माण्डसंज्ञक इति विवेच्यम् प्रागुक्तभारतव्याख्याने नीलकण्ठेन मन्त्रपञ्चात्मकस्य तथात्वोक्तिः अर्द्धमन्त्रस्य मन्त्रत्वकल्पनयेति बोध्यम्। स्वार्थे क कुष्माण्डकोऽपि (कुमड़ा) वृक्षे ओषधिभेदे, उमायां, (मसिना) कर्क्कारौ च। कुष्माण्डस्य गुणपाकप्रकारादि भावप्र० उक्तं "कुष्माण्डं वृंहणं वृष्यं गुरु पित्तास्रवातनुत्। बालं पित्तापहं शीतं मध्यमं कफकारकम्। वृद्धं नातिहितं स्वादु सक्षारं दीपनं लघु। वस्तिशुद्धिकरं चेतोरोगहृत् सर्वदोषजित्। अस्य पाकप्रकाराः यथा "घृते तप्ते विनिःक्षिप्य खण्डान् कुष्माण्डसम्भवान्। वार्त्ताकुविधिना कुर्य्यात् प्रलेहतलनादिकम्। वेसवाराङ्गतक्रेण घृते तलनपूर्बकम्। कुष्माण्डकं फलं सिद्धं विदुः सुस्वादु सुन्दरम्"। "घृतेन गुडयुक्तेन गोलकुष्माण्डखण्डकान्। रञ्जितान् जीरमरिचैरिमान् सुगुलिकां विदुः" "चतुरस्रायतान् स्थूलान् स्विन्नान् क्षीरेण चोदितान्। सुपाच्यान् खण्डसर्पिर्भ्यां मरिचैलादिवासितान्"।"कुष्माण्डखण्डानि ससैन्धवानि तनूनि सम्मर्द्दितपिण्डितानि। जम्बीरनीराश्रितशृङ्गवेरैर्भवन्ति वक्त्रेरपि पोषणाय"। "कुष्माण्डसम्भवाः खण्डाः सुस्विन्नाश्च शकान्विताः। वेसवारयुते तैले तलयेद्वा प्रलेहयेत्। खण्डं कनिष्ठिकाकारं कौष्माण्डं खेद्यपिण्डितम्। राजिकादधिसिन्धूत्थैर्भिश्रितं कास्तूरीयकम्: एवं बहुविधाः कार्य्याः कौष्माण्डा हि विचक्षणैः। प्रलेहतलनस्वादुक्षारसन्धानराजिकाः"। "अमृतं पक्वकुष्माण्डं कुष्माण्डं तरुणम् विषम्" वैद्य० "कुष्माण्डे चार्थहानिः स्यात्" तिथित०। अलाबूं चैव कुष्माण्डं कार्त्तिके परिवर्ज्जयेत्, कार्त्तिकव्रते पुरा०।

६ यागक्रियाविशेषे शब्दरत्ना० तन्मूलं मृग्यम्

कुष्माण्डकरसायन न० चक्रदत्तोक्ते कुष्माण्डस्य द्रव्यान्तरमिश्रितस्य पाकविशेषेण जाते औषधभेदे यथा "कुष्माण्डकात् पलशतं सुस्विन्नं निष्कुलीकृतम्। पचेत् तप्ते घृतप्रस्थे शनैस्ताम्रमये दृढे। यदा मधुनिभः पाकस्तदा खण्डशतं न्यसेत्। पिप्पलीशृङ्गवेराभ्यां द्वे पले जीरकस्य च। त्वगेलापत्रमरिचधान्यकानां पलार्द्धकम्। न्यसेच्चूर्णीकृतं तत्र दर्व्या सङ्घट्टयेन्मुहुः। तत् पक्वं स्थापयेद्भाण्डे दत्त्वा क्षौद्रं घृतार्द्धकम्। तद्यथाग्निबलं खादेद्रक्तपित्ती क्षतक्षयी। कासश्वासतमश्छर्द्दितृष्णाज्वरनिपीड़ितः। वृष्यं पुनर्नवकरं बलवर्णप्रसादनम्।

उरःसन्धानकरणं द्रं हणं स्वरबोधनम्। श्रश्विभ्यां निर्म्मितं सिद्धं कुष्माण्डकर म्। खण्डामलकमानानुसारात् कुष्माण्डकद्रवात्। पात्रं पाकाय दातव्यं यावान् वात्र रसो भवेत्। अत्रापि मुद्रया पाको निस्त्वचं निष्कुलीकृतम्"।

कुष्माण्डखण्ड पुंन० चक्रदत्तोक्ते औषधभेदे

'पञ्चाशत्कं पलं स्विन्नं कुष्माण्डात् प्रस्थमाज्यतः। पाद्यं पलशतं खण्डवासाक्काथाढ़के पचेत्। मुस्ताधात्री शुभाभार्गीत्रिसुगन्धैश्च कार्षिकैः। ऐलेयविश्वधन्याकमरिचैश्च पलांशकैः। पिप्पलीकुड़वञ्चैव मधुमानीं प्रदापयेत्। कासं श्वासं क्षयं हिक्कां रक्तपित्तं हलीमकम्। हृद्रोगमम्लपित्तञ्च पीनसञ्च व्यपोहति"।

कुस श्लेषे दि० प० सक० सेट्। कुस्यति इरित् अकुसत्—अकोसीत् चुकोस। कुसलः

कुसल न कुस—कलच्। १मङ्गले २तद्वति त्रि० अमरटीका

कुसित पु० कुस—इत नि० गुणाभावः। १जनपदे उणादिकोषः। २वृद्धिजीविनि त्रि० तस्य पत्नी ङीप् ऐदादेशः। कुसितायी तत्पत्न्यां स्त्री सि०कौ०। कु+सि बन्धने क्त। २ ईषद्बद्धे त्रि०।

कुसिद त्रि० कुस—इद नि० न गुणः। १वृद्ध्यर्थः धनप्रयोगे २वृद्धिजीविनि त्रि०। तस्य पत्नी ङीप् ऐदन्तादेशः। कुसिदायी तत्पत्न्यां स्त्री सि० कौ०

कुसिन्ध न० कबन्धे। "या वैताः श्रियः एतानि तानि पशुशीर्षाण्यथ यानि तानि कुसिन्धान्येतास्ताः पञ्च चितयः" शत० ब्रा० ७,५,२,२, "कुसिन्धानि कबन्धानि" भा०। "याभ्यां कुसिन्धं सुदृढं बबन्ध"। "तद्देवः कुसिन्धे अध्यादधौ" अथ० १०,२,३५, [राजनि०।

कुसिम्बी स्त्री कुशिम्बी+पृषो०। शिम्बराम् (सिम)

कुसीद त्रि०कुस—ईद नि० न गुणः "कुसीदम्बोमेदेता"उणा० सूत्रे वतीयप्रत्ययः सुखादिदीर्घादिर्वेति वृत्तिकारहरदत्तादयः। १वृद्ध्यर्थे धनप्रयोगे (सुदखाओया) २पुनर्ग्राह्यत्वेन प्रयुक्ते धनविशेषे। तत्स्वरूपं नारदेनोक्तं यथा "स्थानलाभनिमित्तं यद्दानमुद्दृष्यमिष्यते। तत् कुसीदमिति प्रोक्तम् तेन वृद्धिः कुसीदिनाम्" अस्यार्थः स्थानं मूलधनाऽवस्थानम् लाभोवृद्धिः दानमुद्दृष्यपदे कर्मणि ल्युटा साध्ये तेन मूलधनाऽवस्थाने सत्यप योलाभस्तदर्थं यद्दानं धनिकेन दीयमानं मूलानम् अधमर्णेन च ग्रहणं तयाखोलत्य ग्रहमाणं यत् तदरमिति अवश्यापाकरणीयत्वरूपगुणयोगात् गौणप्रयोगः। अतएव वाणिज्यार्थमयुक्तस्य न कृष्यत्वम् इति मिश्राः। तस्यावयवार्थमाह वृहस्पतिः "कुत्सिताद् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते। चतुर्गुणं वाष्टगुणं कुसीदाख्यमतस्मृतः" इति अस्यार्थः कुत्सितात् सीदतश्चाधमर्णात् सकलधनं यत् गृह्यते निर्विशङ्कैरुत्तमर्णैः चतुर्गुणं वेति वाकारोऽनास्थायाम् तेन-द्विगुण्यादिलाभः इति। कुसीदे विशेषो गारुडे २१५ अध्याये उक्तः यथा "कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयंकृतम्। आपत्काले स्वयं कुर्वन् नैनसा युज्यते द्विजः। बहवोवर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः। सर्वेषामपि चैवैषां कुसीदमधिकं विदुः। अनावृष्ट्या-राजभयान्मूषिकाद्यैरुपद्रवैः। कृष्यादिके भवेद्वाधा सा कुसीदे न विद्यते। शुक्लपक्षे तथा कृष्णे रजन्यां दिवसेऽपि वा। उष्णे वर्षति शीते वा वर्द्धनं न निवर्त्तते। देशं गतानां या वृद्धिर्नानापण्योपजीविनाम्। कुसीदं सर्वतः सम्यक् संस्थितस्यैव जायते। लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत्। ते तृप्तास्तस्य तद्दोषं शमयन्ति न संशयः। वणिक् कुसीदी दद्यात्तु वस्त्रं गां काञ्चनादिकम्। कृषीवलोऽन्नपानानि यानशय्यासनानि च। पण्येभ्यो विंशतिं दत्त्वा पशुस्वर्णादिकं शतम्। पादेनायस्य पारक्यं कुर्यात् सञ्चयमात्मवान्। अर्द्धेन चात्मभरणं नित्यनैमित्तिकान्वितम्। पादञ्च प्रार्थमानस्य मूलभूतं विवर्द्धयेत्। विद्याशिल्पं भृतिः सेवा गोरक्षा विपणिः कृषिः। वृत्तिर्भैक्ष्यं कुसीदञ्च दश जीवनहेतवः"। तस्य विप्रादिभिः स्वयंकर्त्तव्यता निर्णीता आह्नि० त० तत्र गौतमः

"कृषिगोरक्षवाणिज्ये अस्वयंकृते कुसीदञ्चेति" कुसीदस्य पृथगुपादानं स्वयंकृतस्याभ्यनुज्ञानार्थं कुसीद वृद्धिकर्म प्रदेशान्तरेऽभिधानादिति कल्पतरुः। वृहस्पतिः "कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयंकृतम्। आपत्काले स्वयं कुर्वन् नैनसा युज्यते द्विजः लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव भोजयेत्। ते तृप्तास्तस्य तं दोषं शमयन्ति न संशयः। वणिक् कुसीदी दद्यात्तु वस्त्रगोकाञ्चनादिकम्। कृषीवलोऽन्नपानानि यानशय्यासनानि च। पण्येभ्यो विंशकं दत्त्वा पशुस्वर्णादिकं शतम्। वणिक् कुसीदादोषः स्यात् ब्राह्मणानाञ्च पूजनात्। राज्ञे दत्त्वा तु षड्भागं देवतानाञ्च विंश-

कम्। त्रिंशद्भागस्तु विप्राणां कृषिं कृत्वा न दोषभाक्"। वृद्धिभेदः ऋणादानशब्दे १४१८ पृ० उक्ताः। २तद्वति त्रि० तस्य पत्नी ङीप् ऐङ् च मुग्धबोधः। कुसीदायी वृद्ध्याजीविपत्न्याम्। पाणिन्यादिमते कुसितकुसिदशब्दाभ्यां हृस्वमध्याभ्यामेव ङीप् ऐङ्च इति भेदः। कुसीदं वृद्ध्यर्थद्रव्यं प्रयच्छति ठन् ठचौ। कुसीदिक वृद्ध्यर्थधनदायिनि त्रि० स्त्रियामुभयत्र षित्त्वात् ङीप्। स्वार्थे क। कुसीदक, मत्वर्थे अस्त्यर्थे इनि। कुसीदिन् वृद्ध्यर्थं धनप्रयोक्तरि उत्तमर्णे त्रि० स्त्रियां ङीप्

कुसीदवृद्धि स्त्री कुसीदरूपा वृद्धिः। कुसीदरूपायां वृद्धौ (सुद) "कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता" या० स्मृतिः। ब०व्री०। कुसीदरूपवृद्धियुक्ते त्रि०

कुसुम न० कुस–उम नि० गुणाभावः। १पुष्पे, "कुसुमसन्ततिसन्ततसङ्गिभिः" माघः। "कुसुमशरोजितकार्मुकोऽमधुः" कुमा०। "विपिनविहारे कुसुमविचित्रा" छन्दोम०। २फले, ३स्त्रीरजसि, "यदा नार्याः पितृर्गेहे कुसुमस्तनसम्भवः" ज्यो० ४नेत्ररोगभेदे च मेदिनिः। पञ्चमात्रप्रस्तावे। ऽ॥ षडे ५प्रभेदे। फलकुसुमविशेषाणां द्रव्यान्तरसुलभत्वादिसूचकत्वं वृ० सं० २९अ० दर्शितं यथा

"फलकुसुमसम्पदृद्धिं वनस्पतीनां विलोक्य विज्ञेयम्। सुलभत्वं द्रव्याणां निष्पत्तिश्चापि शस्यानाम्। शालेन कलमशाली रक्ताशोकेन रक्तशालिश्च। पाण्डूकः क्षीरिकया नीलाशोकेन मसूरकः। न्यग्रोधेन तु यवकस्तिन्दुकवृद्ध्या च षष्टिको भवति। अश्वत्थेन ज्ञेया निष्पत्तिः सर्वशस्यानाम्। जम्बूभिस्तिलमाषाः शिरीषवृद्ध्या च कङ्गुनिष्पत्तिः। गोधूमाश्च मधूकैर्यववृद्धिः सप्तपर्णेन। अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदशनैः। बदराभिश्च कुलत्थांश्चिरविल्वेनादिशेन्मुद्गान्। अतसी वेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः। तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेन शणः। करिणश्च हस्तिकर्णैरादेश्या वाजिनोऽश्वकर्णेन। गावश्च पाटलाभिः कदलीभिरजाविकं भवति। चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन। कुरुवकवृद्ध्या वज्रं वैदूर्यं नन्दिकावर्त्तैः। विद्याच्च सिन्धुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन। रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः। श्रेष्ठी सुवर्णपुष्पैः पद्मैर्विप्राः पुरोहिताः कुमुदैः। सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः। आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्त्वथारोग्यम्। खदिरशमीभ्यां दुर्भिक्षमर्जुनैः शोभना वृष्टिः। पिचुमर्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन। निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन। दूर्वाकुशकुसुमाभ्यां मिक्षुर्वह्निश्च कोविदारेण। श्यामालताभिवृद्ध्या बन्धक्यो वृद्धिमायान्ति"।

कुसुमविशेषप्रकाशने दोहदभेदः। "सनूपुररवेण स्त्रीचरणेनाभिताडनम्। दोहदं यदशोकस्य ततः पुष्पोद्गमो भवेत्। बकुलो मुखशीधुसिक्तः। आलोकितः कुरुवकः कुरुते विकाशमालोडितस्तिलक उत्कलिको विभाति" कुमा० टी० मल्लि०। तदस्य संजातं तार० इतच्। कुसुमित संजातकुसुमे त्रि०।

कुसुमकार्मुक पु० कुसुमं कार्मुकमस्य। कन्दर्पे "कुसुमकार्मुककार्मुकसंहितेत्यादि" माघः। कुसुमचापादयोऽप्यत्र पु०, "कुसुमचापमतेजयदंशुभिः" माघः।

कुसुमपञ्चक न० कुसुमानां पञ्चकम्। कामदेवबाणरूपे अरविन्दादिपञ्चके "ननसिशयमहास्त्र मन्ययाऽमी न कुसुमपञ्चकमप्यलं विसोढुम्" माघः। कुसुमबाणशब्दे विवृतिः।

कुसुमपुर न०(पाटना) इति ख्याते पाटलिपुत्रे नगरे "ततः पितृवधपरित्रासादपक्रान्ते कुसुमपुरात् कुमारे मलयकेतौ" "चाणक्यहतकेन आहूयाभिहिताः कुसुमपुरवासिनः" इति च मुद्राराक्ष०। कुसुमनगर पुष्पपुरादयोऽप्यत्र न०। अनुलोमे कुसुमनप्यत्र।

कुसुममध्य पु० कुसुमं मध्ये फलमध्ये यस्य। (चालता) वृक्षभेदे। शब्दच०

कुसुममय त्रि० कुसुमात्मकं कुसुमप्रचुरं वा कुसुम+मयट्। १पुष्पमये २पुष्पप्रचुरे च स्त्रियां ङीप्।

कुसुमबाण पु० कुसुमानि अरविन्दादीनि पञ्च पुष्पाणि बाणाः यस्य। कन्दर्पे। "अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः" माघव्या० मल्लि० धृतवाक्यम् कुसुमशरादयोऽप्यत्र पु०।

कुसुमविचित्रा स्त्री "नयसहितौ न्यौ कुसुमविचित्रा" वृ०र० उक्ते १द्वादशाक्षरपादके वर्णवृत्तभेदे। कुसुमैन विचित्रः। २पुष्पैर्विचित्रे त्रि०। "विपिनविहारे कुसुमविचित्रा" (मुररिपुमूर्त्तिः) छन्दोमञ्जरी।

कुसुमाकर पु० ६त०। वसन्ते ऋतौ। "मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः" गीता। पुष्पाकरादयोऽप्यत्र पु०।

कुसुमागम पु० कुसुमानामागमोऽयत्र। वसन्ते ऋतौ

कुसुमाञ्जन न० कुसुमाकारमञ्जनं शाक०। पैत्तलमलजाते पुष्पाकारे अञ्जनभेदे अमरः।

कुसुमाञ्जलि पु० कुसुमपूर्णोऽञ्जलिः। १पुष्पपूर्णेऽञ्जलौ कुसुमानामञ्जलिरिव। उदयनाचार्य्यप्रणीते पञ्चस्तवकात्मके परमात्मनिरूपके ग्रन्थभेदे "इत्येष नीतिकुसुमाञ्जलिरुज्ज्वलश्रीः" इति तद्ग्रन्थोपसंहारे न्यायप्रसूनाञ्जलिरित्युपक्रमे च कीर्त्तनात् तस्य न्यायकुसुमाञ्जलिनामत्वेऽपि देवदत्तस्य पूर्व्वपदलोपे दत्तपदवाच्यतावत् पूर्व्वपदलोपेन तन्नामता लोकप्रसिद्धेति। पुष्पाञ्जल्यादयोऽप्यत्र पु०

कुसुमात्मक न० कुसुममेवात्मा स्वरूपं यस्य कप्। १कुङ्कुमे हारा०। तस्य सर्व्वात्मनैव पुष्पाकारत्वात्तथात्वम्।

कुसुमाधिप पु० कुसुमेषु कुसुमप्रधानेषु वृक्षेषु अधिपः श्रेष्ठः सुगन्धित्वात्। चम्पकवृक्षे शब्दर०।

कुसुमाधिराज् पु० कुसुमेषु अधिराजते सुगन्धित्वात् राज–क्विप्। चम्पके त्रिका०।

कुसुमायुध पु० कुसुमानि आयुधान्यस्य। कामदेवे "कुसुमायुधपत्नि! दुर्लभः" "तव प्रसादात् कुसुमायुधोऽपि" कुमा० पुष्पास्त्रकुसुमास्त्रादयोऽप्यत्र पु०

कुसुमाल पु० कोः पृथिव्याः सुमालः कुत्सितखननभेदोऽस्य। चौरे हारा०। तस्य भूमिसन्धिकारित्वेन तत्सम्बन्धित्वात् तथात्वम्।

कुसुमासव न० कुसुमस्य तद्रसस्यासवम्। १ पौष्पमधुनि, तज्जाते, २ मद्ये च राजनि०। आसवशब्दे विवृतिः।

कुसुमेषु पु० कुसुमानि इषवोऽस्य। कामदेवे अमरः कुसुमवाणशब्दे विवृतिः। [६त०। २ पुष्पसमूहे।

कुसुमोच्चय पु० कुसुमानामुच्चयः समूहो यत्र। १ स्तवके।

कुसुम्भ पु० कुस–उम्भ नि० गुणाभावः। (कुसुम) पुष्पप्रधाने वृक्षे अमरः। पुष्पादिप्रसवपरत्वे न०। "कुसुम्भं नालिकाशाकं वृन्ताकं पूतिकां तथा। भक्षयन् पतितस्तुस्यादपि वेदान्तगो द्विजः" तिथित० उशनाः। "कुसुम्भं वातलं रूक्षं रक्तपित्तकफापहम्" भावप्र०। "कटुर्विपाके कटुकः कफघ्नो विदाहिभावादहितः कुसुम्भः" सुश्रु०। तस्य तैलगुणाः: "कुसुम्भतैलमत्युष्णं गुरु स्वादु विदाहि च। चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम्" भावप्र०। सुश्रुते तु तत्तैलगुणाः सामान्यत उक्ता यथा "निम्बातसीकुसुम्भमूलकजीमूतकवृक्षकफलतवेधनार्ककम्पिल्लकहस्तिकर्णपृथ्वीकापीलुकरञ्जेङ्गुदीशिग्रुसर्षपसुवर्चलाविडङ्गज्योतिष्मतीफलतैलानि तीक्ष्णानि लघून्युष्णवीर्य्याणि कटूनि कटुविपाकानि सराण्यनिलकफकृमिकुष्ठप्रमेहशिरोरोगहराणि चेति"। "कुसुम्भशाकस्य सएव" (त्रिफलासवः) सुश्रुते तस्यानुपानसूत्रम्। २कमण्डलौ अमरः। "ताम्रकेसरकस्तु पात्री दण्डी कुसुम्भवान्" मनुः। ३ स्वर्णे न० मेदि०।

कुसुम्भराग पु० ६त०। कुसुम्भस्य तत्पुष्पस्य रागः, कुसुम्भस्तद्रस इव रागः इति वा। कुसुम्भ पुष्पस्य १कायजरागे २दम्पत्योः रागभेदे च। स च सा० द ३प० दर्शितः यथा "नीलीकुसुम्भमञ्जिष्ठाः पूर्वरागोऽपि च त्रिधा। न चातिशोभते यन्नापैति प्रेम मनोगतम्। तन्नीलीरागमाख्यान्ति यथा श्रीरामसीतयोः। कुसुम्भरागं तं प्राहुर्यदपैति च शोभते। मञ्जिष्ठारागमाहुस्तं यन्नापैत्यतिशोभते"।

कुसुम्भवीज न० ६त०। (वरडा) पाश्चात्यभाषाप्रसिद्धे वरटाख्ये वीजे। यस्य तैलं कुसुम्भतैलम्।

कुसुरुविन्द पु० ऋषिभेदे तेन "आजिम्र कलशम्" इत्यादिमन्त्रो दृष्टः। यजु० ८।४२ वेददी० दृश्यः।

कुसू पु० कुस–क्रू। गण्डूपदे (केँचो) हेमच०।

कुसूल पु० कुस बा० कूलच्। कुशूलशब्दार्थे भरतः।

कुसृति स्त्री कुत्सिता सृतिः सृ–गतौ भावे क्तिन्। १शाठ्ये अमरः २ इन्द्रजाले हेमच०। कुत्सिता सृतिराचारोऽस्य। ३दुष्टचेते त्रि० "कामादमी कुसृमयः खलयोनयस्ते" भाग० ८।२३।६

कुस्तुभ पु० कुं पृथिवीं स्तुभ्नाति स्तुम्भ मूल० क। १विष्णौ भरतः। २समुद्रे च शब्दचि०। तस्येदम् अण्। कौस्तुभ मणिभेदे तस्य विष्णुसम्बन्धित्वात् समुद्रोत्पन्नत्वाच्चतथात्वम्। कौस्तुभशब्दे विवृतिः।

कुस्तुम्बरी स्त्री० कुत्सिता तुम्बरी प्रा०। धन्याके भरतः

कुस्तुम्बुरु न० कुत्सितं तुम्बरु तुवि–अर्द्दने बा० उरु। जातित्वे ङीष्। धन्याके दि० को०।

कुस्त्री स्त्री कुगतिस०। कुत्सितायां स्त्रियां। तस्या भावः–कर्म्म वा युवा० अण्। कौस्त्र तद्भावे तत्कर्म्मणि च न०।

कुस्म बुद्धिपूर्व्वकदर्शने चुरा० आत्म० सक० ईषद्धास्ये अक० सेट्। कुस्मयते अचुकुस्मतमूर्द्धन्यमध्य इत्येके।

कुह विस्मापने अद० आत्म० सक० सेट्। कुहयते अचुकुहत, कुहयां बभूव आस चक्रे कुहकम् कुहनम्।

कुह अव्य० किम्+छन्दसि ह किमः कुः। कास्मिन्नित्यर्थे "यद्मा पृच्छन्ति कुह सेति घोरम" ऋ० २।१२।५। "क्व वत्रि कुह धित्सथः" ऋ० १।५६।८।छन्दसो-

वास्य प्रयोगः न लोके । कुहयति विस्मापयति ऐश्वर्य्येण कुह- अच् । २कुवेरे पु० हेमच० । ३विस्मापके त्रि० ।

कुहक न० कुह—वा० कन् । १इन्द्रजाले असद्वस्तुनः सत्त्वेन बोधके व्यापारभेदे । "हैथ्यैरपत्रैरहितैश्च तस्य भिद्यस्व नित्यं कुहकोद्यतैश्च" भा० व० २३३अ० । "धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि" भाग० १,१,१, २वञ्चनायां स्त्री त्रिपका० नेत्त्वम् । इन्द्रजालं च माया च कुहका वापि भीषणा" भा०उ० ५४६१ श्लो० । ३नागभेदे पु० । "ततोऽधस्तान्महातले काद्रवेयाणां सर्पाणां नैकशिरसां क्रोधवशोनाम गणः कुहकतक्षककालियसुषेणादिप्रधाना महाभोगवन्तः" भाग० ५।२४। २६। "द्विजोपसृष्टः कुहकस्तक्षको वा (मां) दशत्वलं गमत विष्णुगायाः" भाग० १।१६।१४। परीक्षिदुक्तिः

कुहकस्वन पुंस्त्री० कुहकः विस्मापकः स्वनोऽस्य । कुक्कुटविहगे हेमच० स्त्रियां ङीष् । [ङीष् ।

कुहकस्वर पुंस्त्री कुहकस्वनवत् । कुक्कुटे हारा० स्त्रियां

कुहक्क पु०"द्रुतद्वन्द्वं लघुद्वन्द्वं ताले कुहक्कसंज्ञके" इति सङ्गीतदामोदरोक्ते तालभेदे ।

कुहन न० ईषत् प्रयत्नेन हन्यते हन—कर्म्मणि बा अप् । १मृद्भाण्डे २काचपात्रे च मेदि० तयोरीषत्प्रयत्नेन हन्यमानत्वात्तथात्वम् कुत्सिताचारेण हन्ति हन—अच् । ३ईर्षालौ त्रि० मेदि० । कुं पृथ्वीं हन्ति हन—अच् । ४मूषिके ५सर्पे च पुंस्त्री स्त्रियां ङीष् ।

कुहना स्त्री कुह—युच् । १दम्भचर्य्यायां मेदि० २लोभात् मिथ्येर्य्यापथकल्पनायाम् अमरः (दम्भेन कृतध्यान मौनादौ भानुदीक्षितः) भावे ल्युट् विस्मापने न० स्वार्थे क अत इत्वम् । कुहनिका तत्रार्थे शब्दरत्ना ।

कुहर पु० कुं हरति हृ—अच् कुह—विस्मापने क तं राति रा—क वा । १नागभेदे मेदि० । २गह्वरे ३छिद्रे न० मेदि० "तैः किं मत्तकरीन्द्रकुम्भकुहरे नारोपणीयाः कराः" प्रसन्नरा० । ४कर्णे ५कण्ठशब्दे ६गले ७समीपे च न० अजयपालः ।

कुहरित न० कुहरयति कण्ठशब्दं करोति कुहर+तत्करोति णिच्—भावे क्त । १पिकालापे मेदि०२रतध्वनौ च मेदि० ३गन्ध्याले त्रिकः

कुहलि पु० कु+हलि—इन् । १पूगपुष्पिकायां (पान) त्रिका०

कुहा स्त्री कुह—क । १कुजभ्भटिकायाम् २कटुक्यां च (कट्की) शब्दच० ।

कुहु स्त्री कुह—बा० कु । कुहूशब्दार्थे हेमच० । "कोकिलानां कुहुरवैः सुखैः श्रुतिमनोहरैः" भा० आश्व० ७२४ श्लो० । कुहुकुहायते कुहुशब्दे वक्ष्यमाणं भारतवाक्यम् कुहु+डाच् इव कुहुकुहायते ।

कुहू स्त्री कुह—कू । नष्टेन्दुकलायामावास्यायाम् । "द्वे ह वा अमावास्ये या पूर्वाऽमावास्या सा सिनीवाली योत्तरा सा कुहूरिति" श्रुतिः । व्यक्तमाह कालमा० व्यासः "दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्मता" स्मृत्यन्तरे "तिथिक्षये सिनीवाली नष्टचन्द्रा कुहूर्मता। बाह्वृच्येऽपि कुहूर्ज्ञेया वेदवेदाङ्गवेदिभिः" । तत्र श्राद्धाधिकारिभेदमाह तत्रैव जावालिः "अपराह्णद्वयाव्यापी यदि दर्शस्तिथिक्षये । आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता" । आदिशब्दात् स्त्रीशूद्रयोरपि ग्रहणम् यथाह तत्रैव लौगाक्षिः "सिनीवाली द्विजैः कार्य्या साग्निकैः पितृकर्मणि । स्त्रीभिः शूद्रैः कुहूः कार्य्या तथा चानग्निकैर्द्विजैः"। अत्र विशेषादिःकालमाधवीयादौ ज्ञेयः । २तदधिष्ठात्र्यां देवपत्न्याम् "सिनीवाली कुहूरिति देवपत्न्याविति" नैरुक्ताः; सा च अङ्गिरसः सुता यथाह भाग० ४,१,२६। "श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः। सिनीवाली कुहूराका चतुर्थ्यनुमतिस्तथा" भा०व०११७अ० तु अन्या अपि तत्कन्या आह यथा "देवी भानुमती नाम प्रथमाङ्गिरसः सुता । भूतानामेव सर्वेषां यस्यां रागस्तदाऽभवत् । रागाद्रागेति यामाहुर्द्वितीयाङ्गिरसः सुता। यां कपर्दिसुतामाहुर्दृश्यादृश्येति देहिनः । तनुत्वात् सा सिनीवाली तृतीयाङ्गिरसः सुता । पश्यत्यर्चिष्मती भाभिर्हविर्भिश्च हविष्मती । षष्ठीमङ्गिरसः कन्यां पुण्यामाहुर्महिष्मतीम् । महामखेष्वाङ्गिरसीदीप्तिमत्सु महामती । महामतीति विख्याता सप्तमी कथ्यते सुता । यां तु दृष्ट्वा भगवतीं जनः कुहुकुहायते । एकानंशेति तामाहुः कुहूमङ्गिरसः सुताम् ।" विवृतमेतत् नीलकण्ठेन "भानुमती सूर्य्ययुक्ता दिवसाभिमानिनीत्यर्थः । रात्रिमाह भूतानामिति सुषुप्तिकालत्वेन अमनायकत्वात्तस्यां रागोऽभवत् रागात् रागहेतुत्वात् सन्ध्याद्वये रागोपेतत्वाद्वा । कपर्दिनो रुद्रस्य सुतामिव सुतां चन्द्रकलां ललाटे धृतत्वात् दृश्यादृश्यरूपां तत्र हेतुः तनुत्वादिति तेन सूक्ष्मचन्द्रयुक्तत्वं लक्ष्यते चतुर्दशीयुक्तामावास्या सिनीवाली "या पूर्वामावास्या सा सिनीवाली योत्तरा

सा कुहूरिति” श्रुतेः। अर्चिष्मती पूर्णचन्द्रोपेता शुक्ल-पौर्णमासी यस्यां भाभिर्जनोरात्रावपि पश्यति रूपा-दिकमिति शेषः। सा चतुर्थी यस्यां हविर्भिर्देवता इज्यन्ते सा हविष्मती। प्रतिपद्युक्ता पौर्णमासी राका नाम पञ्चमी। पुण्यां व्रताहां सदिष्मतीं नाम चतु-र्दशीयुक्तां पौर्णमासीम् अनुमतीं नाम “या पूर्वा पौर्णमासी साऽनुमतिर्योत्तरा सा राकेति” श्रुतेः। शुद्धाममावास्यामाह महाव्रतेष्विति सोमयागादिषु दीप्तिमती अमावास्यायां हि दीक्षाकर्तुर्वर्धमानश्चन्द्रोऽप्य दृश्यते पौर्णमास्यान्तु क्षीयमाणः अतो दीप्तिमत्सु दिनेषु एषा महामतीत्युच्यते। यतोऽत्र महान् महस्वान् व. अन्तर्हितो विद्यतेऽस्यामिति योगात् पूर्वपदस्याकारोन्ता-देश आर्षः। कुहुकुहायते विस्मितो भवति एका कला अनंशा अल्पांशवती अलयथा यवागूरिति वदल्पार्थे नञ्। “योत्तरा सा कुहूरिति” श्रुतेः प्रतिपद्युक्ता अमावास्या कुहूरिति प्रसिद्धम्।”

“कुहूं देवीं सुकृतं विद्मना” अथ०७४७।१। “कुहूर्देवानाम-मृतस्य पत्नी” अथ०७४७।२। “तं सिनी च कुहूश्चैव द्युतिः पुष्टिः प्रतावसुः। कीर्त्तिर्धृतिश्च लक्ष्मीश्च नव देव्यः सिषेविरे” हरि०वं० २५ अ०। “असमये मतिरुन्मिषति ध्रुवं, करगतैव गता यदियं कुहूः” “कुहूः कृताऽऽह्वयत चन्द्रवैरिणी” नैषधम्

२कोकिलशब्दे तस्य शब्देन विस्मायकत्वात्तथात्वम्। “उहूरिति कुहूरवध्वनिभियाऽपतन्मूर्च्छिता” “त्वमपि चन्द्रविरोधिकुहूरवः” उद्भटः।

कुहूकण्ठ पुंस्त्री कुहूरिति शब्दः कण्ठे यस्य। कोकिले। शब्दरत्ना० स्त्रियां ङीप्।

कुहूमुख पुंस्त्री कुहूरिति शब्दो मुखे यस्य। कोकिले त्रिका० स्त्रियां ङीप्। ६त०। प्रतिपद्युक्तामावास्याया मुखे न०।

कुहूरव पुंस्त्री कुहूरिति रवो यस्य, १कोकिले। कुहूशब्दा-दयोऽप्यत्र राजनि०स्त्रियां ङीप्। कर्म्म०।२कुहूरूपे शब्दे पु०।

कुहूल न० कुह–ऊलक्। सशल्यभूमिच्छिद्रे जटाध०

कुहेडी(ली) स्त्री ईषत् हेडति वेष्टते नेत्रसञ्चारोऽत्र हेड-वेष्टे इन् ङीप्। कुज्झटिकायां शब्दमाला डस्य दा लः। कुहेलीत्यप्यत्र त्रिका० स्वार्थे क। कुहेडि(लि) काऽपि तत्रार्थे।

कुह्नान न० ह्नु–भावे ल्युट् कुगतिस०। कुत्सितशब्दे “प्र-त्यनूकाय कुह्नानैर्यैर्वै श्रूत्याभिव्यक्तः” भाग०१,११,१४,

कू आर्तस्वरे तुदा०अक०सेट् कुटादि। कुवते अकुविष्ट चुकुवे।

कू शब्दे क्र्यादि० उभ० अक० सेट् प्वादि०। कुनाति कुनीते अकवीत् अकविष्ट। कुकाव चुकुवे। प्रनिकुनाति

कू स्त्री कू–क्विप्। पिशाच्याम् शब्दमा०।

कूकुद पु० कू शब्दे भावे क्विप् तस्याः कीर्त्तेः कुं भूमिं ददाति दा–क। “सत्कृतालङ्कृतां कन्यां यो ददाति स कूकुदः” इत्युक्ते कन्यादातरि अमरः। कुकुदशब्दे विवृतिः

कूच पु० कु–चट् दीर्घश्च। १स्तने टित्त्वात् ङीप्। कूची २तूलिकायां चित्रलेखनसाधनद्रव्ये स्त्री उणादि०। स्वार्थे क। कूचिकाप्यत्र स्त्री।

कूचवार पु० कूचं स्तनोऽत्र देशे वृ–आधारे घञ्। १ग्राम-भेदे ततः सोऽभिजनोऽस्य ढक्। कौचवार्य्यं पित्रादि क्रमेण तत्र वासिनि। २ऋषिभेदे पु० तस्यापत्यं विदा० अञ्। कौचवार तदपत्ये पुंस्त्री स्त्रियां ङीप्।

कूज अव्यक्तशब्दे भ्वा० प० अक० सेट्। कूजति अकूजीत्। “कूजन्तं रामरामेति मधुरं मधुराक्षरम्” रामा० “पुं-स्कोकिलोयन्मधुरं चुकूज” कुमा० “चुकूज कूले कलहंस-मण्डली” नैष०। “कूजितं राजहंसेन नेदं नूपुरशि-ञ्जितम्” विक्र०। “समोऽकूजने” पा०।

कूजित न० कूज–क्त। १पक्षिशब्दे २अव्यक्तशब्दे च “मधु-करनिकरकरम्बितकूजितकुञ्जकुटीरे” इति जयदेवः।

कूट अपवादे दानाभावे च चुरा०आत्म०सक०सेट्। कूटयते अचुकूटत्–त। कूटयां–बभूव आस चकार चक्रे।

कूट दाहे मन्त्रणे प्रच्छादने च अद० चुरा० उभय० सक०सेट्। कूटयति ते अचुकूटत्–त। कूटयां बभूव आस चकार चक्रे

कूट पु० कूट–अच् यथायथं कर्म्मादौ घञ् वा। १अगस्त्यमुनौ शब्दरत्ना०। २गृहे पुंस्त्री शब्दरत्ना० ३निश्चले राशौ (ढेरी) “अन्नकूटाश्च दृश्यन्ते बहवः पर्वतोपमाः” रामा०। ४लौहमुद्गरे ५दम्भे ६मायायाम् “नैव धर्म्मेण तद्राज्यं नार्ज्जवेन न चौजसा। अक्षकूटमधिष्ठाय हृतं दुर्य्योधनेन वै” भा० व०१२६६३। ७पर्वतशृङ्गे चित्र-कूटः त्रिकूटः। “अट्टीलामिव कूटानि धातुरक्तानि शेरते” भा०व्या०१८अ०। प्रत्यक्षे ८हलाङ्गभेदे फाला-धारे १०यन्त्रभेदे (फाँद) “वागुराभिश्च पाशैश्च कूटैश्च वि-विधैस्तथा” रामा०। ११असत्ये छद्मनि च पुंन० मेदि०। “तुलाशासनमानानां कूटकृन्नाणकस्य च” मनुः। १२कैतवे “वाचः कूटन्तु देवर्षेः स्वयं विमम्रशुर्धिया” भाग०६,५,१०,। १३तद्वति त्रि० “मन्त्रोदयो धनस्य च कूटप्रधानैराष्ट्रे च प्रेषणं

पाण्डवान् प्रति" भा०आ०१अ०। "न कूटैरायुधैर्हन्यात् युध्य-मानो रणे रिपून्" मनुः। १४भग्नशृङ्गे पु० हेम०। यथार्थस्य वस्तुनः स्वरूपप्रच्छादनेन १५अयथार्थवस्तुप्रकाशने "ब्रह्मानुग्रहमवधीन्महदे कूटे युक्तं समलं लुब्धकस्य" भा० मौ० ११अ०। १६पुरद्वारि शब्दचि० "इयं कूटे मनुष्येन्द्र! गहना महती चमी" भा०वि०१५४श्लो०। १७अग्रमात्रे "किरीटकूटं ज्वलितम् यदङ्गारं दीप्तकुण्डलम्" रामा०। "वज्रकूटाङ्गनिपातनेन विशीर्णकुक्षिः" भाग० २,१२२६, १८मिथ्याभूते त्रि० द्विगुणा याऽन्यथा ब्रूयुः कूटाः स्युः पूर्वसाक्षिणः" या०स्मृ०। १६निश्चले त्रि० कूटस्थः।

कूटक पु० कूट–ण्वुल्। १सुरानामगन्धद्रव्ये शब्दमा० २कर्णिकायां त्रिका० ३फाले न० अमरः। कूट–संज्ञायां कन् ४पर्वतभेदे पु०। "हिकूटकप्रभः कूटकः कोल्लः मद्यः" इत्यादि भा०५,१६,१७,

कूटकृत् त्रि० कूटं करोति कृ–क्विप्। १छलिमयानादिकारके २कितवे च "तुलायःसमानानां कूटकृन्नाणकस्य च" मनुः ३कायस्थे पु० ४शिवे पु० त्रिका०। [राजनि०

कूटज पु० कूटाज्जायते जन–ड। कूटज इन्द्रे (कुडची)

कूटकार्षापण पु० कर्म०। मिथ्याभूतरौप्यादिमुद्रायाम्

कूटपूर्व्व पु० हस्तिनां त्रिदोषजे ज्वरे त्रिका०।

कूटपालक पु० कूटं कृत्स्नोमं पालयति पालि–ण्वुल्। १कुलाले अभेदोपचारात् तत्साधने २कलसादिपाकस्थाने (पोयान)

कूटयन्त्र न० कर्म०। (फान्द) आमिषादिद्रव्यम् दत्त्वा मृगादि ग्रहणार्थं यन्त्रभेदे अमरः।

कूटशाल्मलि स्त्री० कर्म०। १शाल्मलिभेदे अम०। २कृष्णशाल्मली। "कूटशाल्मलिकस्तिक्तः कफवातज्वरप्रणुत्। भेदीष्णः प्लीहजठरयकृद्गुल्मविषापहः। भूतानाहविबन्धास्रमेदःशूलकफापहः" भावप्र० तद्गुणा उक्ताः।

कूटसंक्रान्ति स्त्री कूटा मिथ्याभूता तद्दिवसस्नानाद्यनङ्गत्वात् संक्रान्तिः। "अर्द्धरात्रे व्यतीते तु यदा संक्रमते रविः। सा ज्ञेया कूटसंक्रान्तिर्मुनिभिः परिकीर्त्तिता" ज्यो० उक्ते रवेरर्द्धरात्रोपरिराश्यन्तरसञ्चारे तस्याः कूटत्वञ्च तद्दिने स्नानदानाद्यनङ्गत्वात्। यथा "अर्द्धरात्रे व्यतीते तु संक्रान्तिर्यदहर्भवेत्। पूर्व्वं व्रतादिकं कुर्य्यात् परेद्युः स्नानदानयोः" भुजबलभीमः। "परदिवसीयस्नानाद्यर्थं पूर्व्वदिने उपवासः कार्य्य इत्यर्थः एका०त०रघु०।

कूटसाक्षिन् त्रि० कर्म०। मिथ्याभिधायिनि साक्षिणि "न ददाति तु यः साक्ष्यं जानन्नपि नराधमः। स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि" या०स्मृ०। तस्य भावः ष्यञ्। कौटसाक्ष्य मिथ्यासाक्ष्यदाने। तच्चोपपातकं "कौटसाक्ष्यं सुहृद्वधः" इति मनुनोपपातकमध्ये तस्य गणितत्वात्

कूटस्थ त्रि० कूटोऽयोघनवत् निश्चलं यथा तथा वा तिष्ठति स्था–क। १एकरूपतया सर्व्वकालस्थायिनि परिणामादिशून्ये "अधिष्ठानतया देहद्वयावच्छिन्नचेतनः। कूटवन्निर्विकारत्वात् स्थितः कूटस्थ इष्यते" इत्युक्तलक्षणे २परमात्मनि पु०। ३व्याघ्रनखाख्ये गन्धद्रव्ये न० राजनि०।

कूटागार न० कर्म०। १द्यूतागारे, २चन्द्रशालिकायाम्, च(चिलघर) ३क्रीडागृहे च त्रिका०

कूटायुस् कूटमायुरस्य। गुग्गुलुवृक्षे त्रिका०।

कूटायुध न० कर्म०। अन्तर्गुप्तनिहितशस्त्रे वहिःकाष्ठादिमये अस्त्रभेदे शब्दचि०

कूटार्थभाषा स्त्री कूटार्थस्य कल्पितार्थस्य भाषा कथा। प्रबन्धकल्पनारूपायां कथायाम् शब्दरत्ना०। भाष–णिनि। कूटार्थभाषिन् कल्पितार्थकथके स्त्रियां ङीप्

कूड घनीभावे अक० भक्षणे सक० पर० तुदादि०सेट्। कूडति अकूडीत्। चुकूड। प्रनिकूडति

कूड्य न० कूड–ण्यत्। कुड्यशब्दार्थे शब्दरत्ना०।

कूण आभाषे मन्त्रणे च अद०चुरा०उभ० सक० सेट्। कूणयति–ते अचूकुणत् त। कूणयाम्–बभूव आस चकार चक्रे। [कूणितम् कूणिः प्रनिकूणयति

कूण सङ्कोचे चुरा० आत्म०अक० सेट्। कूणयते अचूकुणत।

कूणि त्रि० कूण–इन्। रोगादिना सङ्कुचितमस्करादौ जने

कूणिका स्त्री कूण–ण्वुल्। वीणामध्यस्थसंयमशलाकायां हेमच

कूदर पुंस्त्री "ब्राह्मण्यां क्षत्रियवीर्य्येण ऋतोः प्रथमवासरे। कुत्सिते चोदरे जातः कूदरस्तेन कीर्त्तितः" ब्रह्मवै० उक्ते १जातिभेदे स्त्रियां ङीष् "तदशौचं विप्रतुल्यं पतितोऽसौ तु दोषतः। सद्यःकोटकसंसर्गादधमो जगतीतले"

कूद्दाल पु० कुद्दाल+पृषो०। उद्दालवृक्षे रमानाथः।

कू(कु)प दौर्बल्ये अद० चुरा० उभ० अक० सेट्। कू(कु)पयति–ते अचुकू(कु)पत् त। कू(कु)पयां बभूव आस चकार चक्रे।

कूप पु० ईषत् आपो यत्र कच् समा०, कुवन्ति मण्डूकाः अस्मिन् कु–पक् दीर्घश्च वा। १स्वनामख्याते

जलाधारे, अमरः तल्लक्षणं भावप्र० उक्तं यथा। "भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः। बद्धोऽबद्धः स कूपः स्यात् तदम्भः कौपमुच्यते। कौपं पयोयदि स्वादु त्रिदोषघ्नं हितं लघु। तत् क्षारं कफवातघ्नं दीपनं पित्तकृत् परम्"। कूपस्येदम् अण्। कौप तत्सम्बन्धिनि त्रि० स्त्रियां ङीप्। "प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति" शा०द०। कूपादिकरणफलादिकम् जलाश०त० "सेतुबन्धरता ये च तीर्थशौचरताश्च ये। तडागकूपकर्त्तारो मुच्यन्ते ते तृष्णाभयात्" आदित्य पु०। "अथ कूपकर्त्तु स्तत्प्रवृत्ते पानीये दुष्कृतार्द्धं विनश्यति" विष्णुः। तत्प्रवृत्ते कृतकूपादुत्थिते। "तडागकूपकर्त्तारस्तथा कन्याप्रदायिनः। छत्रोपानहदातारस्ते नराः स्वर्गगामिनः" विष्णु ध०। "यो वापीमथ वा कूपं देशे तोयविवर्ज्जिते। खानयेत् स दिवं याति विन्दौ विन्दौ शतं समाः" नन्दि पु० "कूपारामतडागेषु देवतायतनेषु च। पुनः संस्कारकर्त्ता च लभते मौलिकं फलम्" विष्णुः "संस्कारविधौ "अजले जलमुत्पाद्य इति वचनात् जलशून्यदेशखनन एव प्रतिष्ठा न तु पङ्कोद्धारमात्रे। "प्रासादेऽप्येवमेव स्यात् कूपवापीषु गम्यते" जलाश० त० धृत वचनाच्च तत्र वास्तुयागः कार्य्यः। तज्जलञ्च "शीतकाले भवेदुष्णं ग्रीष्मकाले सु शीतलम्। वसन्ते तु प्रशस्तं स्यात् कालभेदात् गुणत्रयम्" राजवल्लभः "प्रेक्षादि० चतुरर्थ्याम् इनि। कूपिन् तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप्। २गर्त्ते उणादिके.षः।

कूपक पु० कूपे गर्त्ते कायति कै—क। १नौकायाम् गुणाकर्षणयन्त्ररूपे वृक्षे (मास्तुल) २नदीमध्यस्थवृक्षे ३तथाभूतपर्वते च उणा०। कूप+स्वार्थे क। ४स्नुहाराण्डे मेदि०। ५तैलादिस्नेहाधारपात्रभेदे (कूपा) ६कुकुन्दरे ७उदपाने दर्चितायाञ्च मेदि०। ततः प्रेक्षादि० चतुरर्थ्याम् इनि। कूपकिन् तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप्।

कूपकच्छप पु० कूपे एवान्यत्र सञ्चारशून्यः कच्छप इव पात्रेसमि० स०। अल्पविषयाभिज्ञतया निन्दनीये कूपमण्डूकवदर्द्दराचष्यत्वे। युक्तारोह्या० स्त्रियां जातित्वात् ङीप्। "यद्यसौ कूपमण्डूकि! तवैतावति कः क्षयः" भट्टिः।

कूपखा त्रि० कूपं खनति खन—वेदे विट् ङा च। कूपखनके।

कूपज पु० कूपइव जायते जन—ड। रोमकूपे शब्दचि०

कूपद अव्य० कूप—बा० अदि। प्रश्ने प्रशंसायाञ्च मनो०

कूपाङ्क(ङ्ग) पु० कूपाकारोऽङ्कश्चिह्नं कूपाकारमङ्गं वास्मिन्। रोमाञ्चे शब्दरत्ना०।

कूपार पु० कुं पृथिवीं पिपर्ति पूरयति अण् पूर्व्वदीर्घः। समुद्रे अमरटीका पृषो० कूवारोऽप्यत्र।

कूपी स्त्री कूप—इन् ङीप्। (कुपो) स्नेहपात्रभेदे शब्दचि०

कूप्य त्रि० कूपे भवादि यत्। कूपभवादौ। "शन्नः समुद्रिया आपः शमनः सन्तु कूप्याः" स्नानमन्त्रः। "कूप्याः" कात्या० १५,४,३०,

कूम न० कोः पृथ्व्या उमा कान्तिः यतः। सरोवरे जटाधरः।

कूमनस् त्रि० कुत्सितं मनोऽस्य "ऋचि तुनुघेत्यादिना" पा० ऋचि पूर्व्वदीर्घः। कुत्सितमनस्के। लोके तु ह्रस्वादिः कुमना इत्येव

कूर पुंन० वेज—भावे क्विप् ऊः कौ भूमौ उवं वयनं लाति ला—क लस्य रः। अन्ने हलायुधः

कूर्च पुंन० कूर्य्यते कुर—चट् नि० दीर्घः। १भ्रुवोर्मध्ये स्थिते लोमोच्चये, अमरः २प्रसमुत्रि, ३कैतवे, मेदि० ४दम्भे ५मयूरपुच्छे ६कुशमुष्टौ ७अङ्गुष्ठाङ्गुलिमध्यस्योपरिभागे ८शीर्षे, शब्दचि० ९आसनभेदे, तन्त्रोक्ते १०वीजभेदे (हूम्) च। कूर्चवीजन्तु हूमित्येव। "ईशानः सेन्दुवामश्रवणपरिगतो वीजमन्यन्महेशि! द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित्" इति कर्पूरस्तवे तदुद्धारः। "वर्गाद्यं वह्निसंस्थं विधुरतिवलितं तत्त्रयं कूर्चयुग्मम्" तत्रैव। भैरवतन्त्रे "कालीवीजद्वयं देवि! दीर्घं हूङ्कारमेव च। त्र्यक्षरी सा महाविद्या चामुण्डा कालिका स्मृता"। ११कठिने त्रि०। १२विकत्थने हेमच०। १३मलापकर्षणार्थे (कूँचि) ख्याते पदार्थे "ततः समर्पयेत् कूर्चं सुशीरादिविनिर्म्मितम्। मलापकर्षणाद्यर्थं श्रीमन्नृसिंह ऋर्य्यङ्गसञ्चितः" "उशीरकूर्चकं दत्त्वा सर्वपापैः प्रमुच्यते। दत्त्वा गोबालजं कूर्चं सर्व्वान् तापान् व्यपोहति। दत्त्वा चामरकं कूर्चं श्रियमाप्नोत्यनुत्तमाम्" नरसिं० पु०। तत्रासनभेदे "किं स्रुचं पारिमृज्य कूर्चं न्यमार्जीत्" शत०ब्रा० "मद्यात् स्रुचं परिमृज्य कूर्चे न्यमार्जिषम्" शत०ब्रा० ११,२,५,२, सुक्षाणाञ्च कूर्चमध्वर्य्यवे संस्कुर्वन्ति" सांख्या०श्रौ०सू० "स्फ्यस्य कूर्चस्य शौदर्य्यः" भा० आश्व० २०९२ श्लो० स्वार्थे क। तत्रार्थे "मृदुना वा दन्तधावन कूर्चकेनापमयेत्" सुश्रु० अस्त्यर्थे इनि। कूर्चकिन्

श्मश्रुगाकारयुक्ते त्रि० । "कूर्चकिनोऽभ्यन्तरस्तुपरिष्टाद्वा" सुश्रु०चूडा० लच् कूर्चलः । श्मश्रुयुक्ते त्रि० । १४पञ्चगव्ये ब्रह्मकूर्चशब्दे विवृतिः

कूर्चशिरस् न० ६त० । पादस्कन्धे (गुडमुडा) "बाहुमर्माणि तु चिप्रतलहृदयकूर्चकूर्चशिरोमणिबन्धेन्द्रवस्तिकूर्पराणि" सुश्रु० ।

कूर्चशीर्ष न० कूर्चं श्मश्रु तद्वच्छीर्षमस्य वा कप् । १नारिकेले शब्दचि० । २जीवके अष्टवर्गान्तर्गते ओषधिभेदे राजनि० ।

कूर्चशेखर पु०कूर्चं श्मश्रु इव शेखरमस्य । नारिकेले राजनि०

कूर्चामुख पु०विश्वामित्रवंशजे ऋषिभेदे । "लीलाढ्यो नारदश्चैव तथा कूर्चामुखः स्मृतः" भा०आनु०४अ० । तद्वंशोक्तौ

कूर्चिका स्त्री कूर्चस्तदाकारोऽस्त्यस्याः ठन् । क्षीरविकृतिभेदे सा च द्विविधा दधिकूर्चिका तक्रकूर्चिका च । "दध्ना सह च यत् पक्वं क्षीरं सा दधिकूर्चिका । तक्रेण पक्वं यत् क्षीरं सा भवेत् तक्रकूर्चिका" भरतः । "दधितक्रकूर्चिकामस्तु सौविरकेत्यादि" । "ग्राहिणी वातला रूक्षा दुर्जरा तक्रकूर्चिका । तक्राल्लघुतरो मण्डः कूर्चिका दधितक्रजः" सुश्रुते तद्गुणा उक्ताः । "कूर्चिका विकृता भव्या गुरवो नातिपित्तलाः । विदाहोत्क्लेशजनना रूक्षा दृष्टिप्रदूषणा" सुश्रु० ।

कूर्द क्रीडायां कुर्दवत् ।

कूर्दन न० कूर्द–भावे ल्युट् खेलायाम् (कौँदा) अमरः

कूर्दनी स्त्री कूर्द्यतेऽत्र आधारे ल्युट् ङीप् । चैत्रपूर्णिमायां त्रिका० । तत्र हि जनाः कूर्दनोत्सवं कुर्वन्ति

कूर्प पु० कुरं पाति पा–क दीर्घः । भ्रुवोर्मध्ये हेमा०

कूर्पर पु० कुर्परवत् । तदर्थे ।

कूर्पास पु० कुर्पासवत् । तदर्थे । स्वार्थे क । तत्रार्थे

कूर्म पुंस्त्री०कुत्सितः कौ वा ऊर्म्मिर्वेगो यस्य पृषो० । १कच्छपे, अमरः स्त्रियां टाप् । तल्लक्षणं वृह०सं०६४अ०यथा "स्फटिकरजतवर्णो नीलराजीविचित्रः कलशसदृशमूर्तिश्चारुवंशश्च कूर्मः । अरुणसमवपुर्वा सर्षपाकारचित्रः सकलनृपमहत्त्वं मन्दिरस्थः करोति । अञ्जनभृङ्गश्यामवपुर्वा बिन्दुविचित्रोऽव्यङ्गशरीरः । सर्पशिरा वा स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्ध्यै । वैदूर्यत्विट् स्थूलकण्ठस्त्रिकोणो गूढच्छिद्रश्चारुवंशश्च शस्तः । क्रीडावाप्यां तोयपूर्णे मणौ वा कार्यः कूर्मो मङ्गलार्थं नरेन्द्रैः" ।

"उन्मीलने स्थितः कूर्मो भिन्नाञ्जनसमप्रभः" या०ति०टी० उक्ते २देहस्थे वायुभेदे । ३भगवदवतारभेदे कमठशब्दे १६८०पृ० विवृतिः । ४मुद्राभेदे तत्स्वरूपं तन्त्रसारे यथा "वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठया । तथा दक्षिणतर्जन्यां वामाङ्गुष्ठेन योजयेत् । उन्नतः दक्षिणाङ्गुष्ठः वामस्य मध्यमादिगः । अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च । वामस्य पितृतीर्थेन मध्यमानामिके तथा । अधोमुखे च ते कुर्याद्दक्षिणस्य करस्य च । कूर्मपृष्ठसमं कुर्याद्दक्षपाणिञ्च सर्वतः । कूर्ममुद्रेयमाख्याता देवताध्यानकर्मणि" ।

कूर्मचक्र न० कूर्माकारं चक्रम् । १तन्त्रोक्ते ग्राह्यमन्त्रशुभादिसूचके कूर्माकारे चक्रभेदे । तत्स्वरूपादि रुद्रयामले उक्तं यथा

"कूर्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम् । यज्ज्ञात्वा सर्वशास्त्रार्थं जानाति पण्डितोत्तमः । अभेद्यं भेदकं चक्रं शृणुष्वादरपूर्वकम् । कूर्माकारं महाचक्रं चतुष्पादसमावृतम् । तुण्डे स्वरान्, दक्षपादे कवर्गं, वामपादके । चवर्गं, कीर्त्तितं पश्चात् अधःपादे टवर्गकम् । तदधस्तु तवर्गः स्यादुदरे च पवर्गकम् । यवान्तं हृदये प्रोक्तं शहान्तं पृष्ठमध्यके । लाङ्गूले शक्तबीजञ्च(क्षं) चकारं लिङ्गमध्यके । लिखित्वा गणयेन्मन्त्री चक्राकारं मलापहम् । स्वरे लाभः कवर्गे श्रीश्चवर्गश्च विवेकदः । टवर्गे राजपदवी तवर्गे धनवान् भवेत् । उदरे सर्वनाशः स्यात् हृदये बहुदुःखभाक् । पृष्ठे च सर्वसन्तापः लाङ्गूले मरणं ध्रुवम् । वैष्णवे पृष्ठदेशे तु दुःखञ्च वामपादके । विरुद्धद्वयलाभे तु न कुर्याच्चक्रचिन्तनम् । विरुद्धैके धर्मनाशो युग्मदोषे च मारणम् । यत्र देवाक्षरस्थास्तु तत्र चेन्निजवर्णकम् । विरुद्धञ्च त्यजेच्चक्रमन्यमन्त्रं विचारयेत् । पृथक् होमे यदि भवेत् वर्णमाला महेश्वर ! ! यदि तत् सौख्यभाग् स्यात् तत् सौख्यं नापि वर्जयेत् । विभिन्नगेहे दोषश्चेत् शुभमन्त्रञ्च संत्यजेत् । इति ते कथितं देव ! दृष्टादृष्टफलप्रदम् । ये शोधयन्ति चक्रेन्द्रं मन्त्रसिद्धिप्रदं शुभम्" ।

२जपाङ्गदेशभेदसूचके चक्रभेदे तत्स्वरूपं तन्त्रसारे उक्तं यथा "दीपस्थानं समाश्रित्य कृतं कर्म फलप्रदम् । दीप्यते पुरुषो यत्र दीपस्थानं तदुच्यते । चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत् । पूर्वकोष्ठादि विलिखेत् सप्तवर्गाननुक्रमात् । लक्ष्मीशे मध्यकोष्ठे स्वरान् युग्मक्रमाल्लिखेत् । दिक्षु पूर्वादितो यत्र चेला-

द्यवरसंस्थितिः। मुखं तत्तस्य जानीयात् हस्तावुभयतः स्थितौ। कोष्ठे कुक्षी उभे-पादौ द्वे शिष्टे पुच्छमीरितम्। क्रमेणानेन विभजेत् मध्यस्थमपि भागतः। मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः। उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात्। पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चाटनादिभिः। कूर्म्मचक्रमिदं प्रोक्तं मन्त्रिणां सिद्धिदायकम्" पिङ्गलायाम् "कूर्म्मचक्रमविज्ञाय यः कुर्य्याज्जपयज्ञकम्। तस्य यत्तफलं नश्यति सर्व्वानर्थाय कल्पते"।

२ज्योतिषोक्ते नक्षत्रभेदेन देशभेदानां शुभाशुभज्ञापके कूर्म्माकारे चक्रे च तन्निरूपम् ज्यो॰ त॰यथा "प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः। आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम्"। तत्र नक्षत्रन्यासक्रमः "मध्यप्रागग्नियाम्यादि कृत्तिकादित्रयत्रयैः। क्रूरवेधयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः"। तत्र वेधो यथा "पूर्व्वापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे। ईशानराक्षसे वेधो वेध आग्नेयमारुते। तारात्रयान्वितं तत्र सौरिं यत्नेन चिन्तयेत्"। तत्र वेधादिजन्यदोषाः "अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। स्वचक्रं परचक्रञ्च सप्तैते सम्भवन्ति च। एवं देशगृहग्रामक्षेत्रनामर्क्षतो वदेत्। तथाच यत्र नक्षत्रे दिग्वर्गोवनाभवाः। हश्यन्ते सुमहोत्पाताः स्वां दिशं तत्र पीडयेत्। सौरिर्व्वक्राधिको दुष्टः, स्वल्पवीर्य्यः शुभावहः। एकदा पीडयेद्यत्र भानुजः कूर्म्मचक्रके। तत्र स्थाने महाविघ्नो जायते नात्र संशयः। दुष्टस्थाने गते चन्द्रे कर्त्तव्यं शान्तिपौष्टिकम्। द्रव्यदेशभेदाश्च कूर्म्मविभागशब्दे दृश्याः

कूर्म्मपुराण न॰ कूर्म्मेण भाषितं पुराणम्। व्यासप्रणीतेषु अष्टादशसु महापुराणेषु पञ्चदशे पुराणे तत्प्रतिपाद्यविषयाश्च वृहन्ना॰ दर्शिता यथा "श्रीब्रह्मोवाच। शृणु वत्स! मरीचे! ऽद्य पुराणं कूर्म्मसंज्ञितम्। लक्ष्मीकल्पानुचरितं यत्र कूर्म्मवपुर्हरिः। धर्म्मार्थकाममोक्षाणां माहात्म्यञ्च पृथक् पृथक्। इन्द्रद्युम्नप्रसङ्गेन प्राहर्षिभ्यो दयाधिकम्। तत् सप्तदशसाहस्रं सचतुःसंहितं शुभम्। यत्र ब्राह्म्या (संहितया) पुरा प्रोक्ता धर्म्मा नानाविधा मुने!। नानाकथाप्रसङ्गेन नृणां सद्गतिदायकाः"। तत्पूर्व्वभागे "तत्र पूर्व्वविभागे तु पुराणोपक्रमः पुरा। लक्ष्मीप्रद्युम्नसंवादः कूर्म्मर्षिगणसङ्कथा। वर्णाश्रमाचारकथा जगदुत्पत्तिकीर्त्तनम्। कालसङ्ख्या समासेन लयान्ते स्तवनं विभोः। ततः सङ्क्षेपतः सर्गः शाङ्करं चरितं तथा। सहस्रनाम पार्व्वत्या योगस्य च निरूपणम्। भृगुवंशसमाख्यानं ततः स्वायम्भुवस्य च। देवादीनां समुत्पत्तिर्दक्षयज्ञाहतिस्ततः। दक्षसृष्टिकथा पश्चात् कश्यपान्वयकीर्त्तनम्। आत्रेयवंशकथनं कृष्णस्य चरितं शुभम्। मार्कण्डकृष्णसंवादो व्यासपाण्डवसंकथा। युगधर्म्मानुकथनं व्यासजैमिनिकी कथा। वाराणस्याश्च माहात्म्यं प्रयागस्य ततः परम्। त्रैलोक्यवर्णनञ्चैव वेदशाखानिरूपणम्" तदुत्तरभागे "उत्तरेऽस्य विभागे तु पुरा गीतेश्वरी ततः। व्यासगीता ततः प्रोक्ता नानाधर्म्मप्रबोधिनी। नानाविधानां तीर्थानां माहात्म्यञ्च पृथक् ततः। नानाधर्म्मप्रकथनं १ब्राह्मीयं संहिता स्मृता। अतः परं २भगवती संहितार्थनिरूपणे। कथिता यत्र वर्णानां पृथग्वृत्तिरुदाहृता"। तदुत्तरभागे भगवत्याख्यद्वितीयसंहितायाः पञ्चसु पादेषु "पादेऽस्याः प्रथमे प्रोक्ता ब्राह्मणानां व्यवस्थितिः। सदाचारात्मिका वत्स! भोगसौख्यविवर्द्धिनी। द्वितीये क्षत्रियाणान्तु वृत्तिः सम्यक् प्रकीर्त्तिता। यया त्वाश्रितया पापं विधूयेह व्रजेद्दिवम्। तृतीये वैश्यजातीनां वृत्तिरुक्ता चतुर्विधा। यया चरितया सम्यक् लभते गतिमुत्तमाम्। चतुर्थेऽस्यास्तथा पादे शूद्रवृत्तिरुदाहृता। यया सन्तुष्यति श्रीशो नृणां श्रेयोविवर्द्धनः। पञ्चमेऽस्यास्ततः पादे वृत्तिः सङ्करजन्मनाम्। यया चरितयाप्नोति भाविनीमुत्तमां जनिम्। इत्येषा पञ्चपादयुक्ता द्वितीया संहिता मुने!। तृतीयाप्योदिता३सौरी नृणां कामविधायिनी। षोढा षट्कर्म्मसिद्धिं सा बोधयन्ती च कामिनाम्। चतुर्थी ४वैष्णवी नाम मोक्षदा परिकीर्त्तिता। चतुष्पदी द्विजादीनां साक्षात् ब्रह्मस्वरूपिणी। ताः क्रमात् षट्चतुर्द्विसाहस्राः परिकीर्त्तिताः"। तत्फलश्रुतिः "एतत् कूर्म्मपुराणन्तु चतुर्वर्गफलप्रदम्। पठतां शृण्वतां नृणां सर्व्वोत्कृष्टगतिप्रदम्। लिखित्वैतत्तु यो भक्त्या हेमकूर्म्मसमन्वितम्। ब्राह्मणायायने दद्यात् स याति परमां गतिम्"। तच्च पुराणम् तामसं "मात्स्यं कौर्म्मं तथा लैङ्गं शैवं स्कान्दं तथैव च। आग्नेयञ्च षडेतानि तामसानि निबोधत" पाद्मोत्तरख॰ ४२अ॰।

कूर्म्मविभाग पु॰ कूर्म्मस्य तद्रूप भूखण्डस्य विभागोऽत्र।

वराह मिहिरोक्ते नक्षत्रभेदेन देशविशेषाणां शुभाशुभबोधके ग्रन्थभेदे स च बृ॰ सं॰ १४ अध्यायः। यथा

"नक्षत्रत्रयवर्गैराग्नेयाद्यैर्व्यवस्थितैर्नवधा। भारतवर्षे मध्यात् प्रागादि विभाजिता देशाः। १भद्रारिमेदमाण्डव्यसाल्वनीपोज्जिहानसङ्ख्याताः। मरुवत्सघोषयामुनसारस्वतमत्स्यमाध्यमिकाः। माथुरकोपज्योतिष धर्मारण्यानि शूरसेनाश्च। गौरग्रीवोद्देहिक पाण्डुगुडाश्वत्थपाञ्चालाः। साकेतकङ्ककुरुकालकोटिकुकुराश्च पारियात्रनगः। औदुम्बरकापिष्ठलगजाह्वयाश्चेति मध्यमिदम् ३।४।५। अथ २पूर्वस्यामञ्जनवृषभध्वजपद्ममाल्यवद्गिरयः। व्याघ्रमुखसुह्मकर्वटचान्द्रपुराः शूर्पकर्णाश्च। खसमगधशिबिरगिरिमिथिलसमतटोड्राश्ववदनदन्तुरकाः। प्राग्ज्योतिषलौहित्यक्षीरोदसमुद्रपुरुषादाः। उदयगिरिभद्रगौडकपौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः। एकपदताम्रलिप्तिककोशलका वर्धमानाश्च ६।७।८। आग्नेय्यां ३दिशि कोशलकलिङ्गवङ्गोपवङ्गजठराङ्गाः। शौलिकविदर्भवत्सान्ध्रचेदिकाश्चोर्ध्वकण्ठाश्च। वृषनालिकेरचर्मद्वीपा विन्ध्यान्तवासिनस्त्रिपुरा। श्मश्रुधरहेमकूटव्यालग्रीवा महाग्रीवाः। किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः। सह नग्नपर्णशवरैराश्लेषाद्ये ९।१०।११। त्रिके देशाः। अथ दक्षिणेन ४लङ्का कालाजिनसौरिकीर्ण तालिकटाः। गिरिनगरमलयदर्दुरमहेन्द्रमालिन्द्यभरुकच्छाः। कङ्कटटङ्कणवनवासिशिबिकफणिकारकोङ्कणाभीराः। आकरवेणावल्लकदशपुरगोनर्दकेरलकाः। कर्णाटमहाटविचित्रकूटनासिक्यकोल्लगिरिचोलाः। क्रौञ्चद्वीपजटाधरकावेर्यो रिष्यमूकश्च। वैदूर्यशङ्खमुक्तात्रिवारिचरधर्मपट्टनद्वीपाः। गणराज्यकृष्णवेल्लूरपिशिकशूर्पाद्रिकुसुमनगाः। तुम्बवरकार्मणेयकयाम्योदधितापसाश्रमा ऋषिकाः। काञ्चीमरुचीपट्टनचेर्यार्यकसिंहला ऋषभाः। बलदेवपट्टनं दण्डकावनतिमिङ्गिलाशना भद्राः। कच्छोऽथ कुञ्जरदरी सताम्रपर्णीति विज्ञेयाः १२।१३।१४। नैरृत्यां दिशि५ देशाः पह्लवकाम्बोजसिन्धुसौवीराः। बडवामुखारवाम्बष्ठकपिलनारीमुखानर्ताः। फेनगिरियवनमाकरकर्णप्रावेयपारशवशूद्राः। बर्बरकिरातखण्डक्रव्याशाभीरचञ्चूकाः। हेमगिरिसिन्धुकालकरैवतकसुराष्ट्रबादरद्रविडाः। स्वात्याद्ये भत्रितये १५।१६।१७। ज्ञेयश्च महार्णवोऽत्रैव। अपरस्यां ६मणिमान् मेघवान् वनौघः क्षुरार्पणोऽस्तगिरिः। अपरान्तकशान्तिकहैहयप्रशस्ताद्रिवोक्काणाः। पञ्चनदरमठपारततारक्षितिजृङ्गवैश्यकनकशकाः। निर्मर्यादा म्लेच्छा ये पश्चिमदिक्स्थितास्ते च १८।१९।२०। दिशि ७पश्चिमोत्तरस्यां माण्डव्यतुषारतालहलमद्राः। अश्मककुलूतलहडस्त्रीराज्यनृसिंहवनखस्थाः। वेणुमती फल्गुलुका गुरुहा मरुकुच्चचर्मरङ्गाख्याः। एकविलोचनशूलिकदीर्घग्रीवास्यकूशाश्च २१।२२।२३। उत्तरतः ८कैलासो हिमवान्वसुमान् गिरिर्धनुष्मांश्च। क्रौञ्चो मेरुः कुरवस्तथोत्तराः क्षुद्रमीनाश्च। कैकयवसातियामुनभोगप्रस्थार्जुनायनाग्नीध्राः। आदर्शान्तर्द्वीपित्रिगर्ततुरगाननाश्वमुखाः। केशधरचिपिटनासिकदासेरकवाटधानशरधानाः। तक्षशिलापुष्कलावतकैलावतकण्ठधानाश्च। अम्बरमद्रकमालवपौरवकच्छारदण्डपिङ्गलकाः। माणहलहूणकोहलशीतकमाण्डव्यभूतपुराः। गान्धारयशोवतिहेमतालराजन्यखचरगव्याश्च। यौधेयदासमेयाः श्यामाकाः क्षेमधूर्ताश्च २४,२५,२६,। ऐशान्यां ९ मेरुकनष्टराज्यपशुपालकीरकाश्मीराः। अभिसारदरदतङ्गणकुलूतसैरिन्ध्रवनराष्ट्राः। ब्रह्मपुरदार्वडामरवनराज्यकिरातचीनकौणिन्दाः। भल्लापलोलजटासुर कुनठखषघोषकुचि(वि)काख्याः। एकचरणानुविश्वाः सुवर्णभूर्वसुवनं दिविष्ठाश्च। पौरवचीरनिवसनत्रिनेत्रमुञ्जाद्रिगन्धर्वाः २७।१।२। वर्गैराग्नेयाद्यैः क्रूरग्रहपीडितैः क्रमेण नृपाः। पाञ्चालो मागधिकः कालिङ्गश्च क्षयं यान्ति। आवन्तोऽथानर्तो मृत्युं चायाति सिन्धुसौवीरः। राजा च हारहौरो मद्रेशोऽन्यश्च कौलिन्दः"।

कूर्मपृष्ठ न॰ कूर्मस्य पृष्ठमिव। १शरावे २अस्त्रानद्धे च पु॰ शब्दच॰। ६त॰। कूर्मस्य पृष्ठे न॰

कूर्मराज पु॰ कूर्माणां राजा श्रेष्ठत्वात् टच् समा॰, कूर्मरूपेण राजते राज—अच् वा। कूर्मरूपे भगवदवतारे जटा॰। "पृथ्वि! स्थिरा भव भुजङ्गम! धारयैनां त्वं कूर्मराज! तदिदं द्वितयं दधीथाः" महाना॰। २कूर्माणां श्रेष्ठे च

कूल आवृतौ भ्वा॰ पर॰ सक॰ सेट्। कूलति अकूलीत् चुकूल प्रनिकूलति कूलम्। "तासां प्राजमानो योनिमकूलयत्" शत॰ ब्रा॰ ४९।

कूल न॰ कूलति आवृणोति जलप्रवाहम् कूल—अच्। नद्यादेस्तीरे। "नदीकूलं यथा वृक्षः" मनुः "नदीवोभयकूलभाक्" रघुः। "मुकुज कूले कलहंसमण्डली" नैष॰। कर्मणि घञर्थे क। २स्तूपे ३तडागे ४सैन्यपृष्ठे च विश्वः

६अन्तिके "कुलायकूलेषु विलुठ्य ते सुताः"नैष०। "कूलाय कूलेषु नीडान्तिकेषु"मल्लि०। बलादि० अस्त्यर्थे वा मतुप् मस्य वः। कूलवत् पक्षे इनिः कूलिन् । तद्युक्ते त्रि०स्त्रियां ङीप्। ततः धूमा० सौवीरे सम्बन्धिन्यर्थे वुञ् । कौलक कूलसम्बन्धिनि सौवीरे त्रि०। [२स्तूपे मेदि० ।

कूलक न० कूल+ण्वुल् । १तीरे विश्वः । कूल+स्वार्थे क ।

कूलङ्कष त्रि० कूलं कषति व्याप्नोति कष—खश् मुम् च । कूल-व्यापके । "कूलङ्कषौघाः सरितस्तथाऽपराः" माघः । "कूलङ्कषेव सिन्धुः प्रसन्नमम्भस्तटतरुञ्च" शकुन्तला ।

कूलवती स्त्री कूल+अस्त्यर्थे बलादि० मतुप् मस्य वः । ङीप्। नद्यां राजनि० ।

कूलचर त्रि० कूले नदीकूले चरति चर—ट । गजादिजन्तुषु । कूलचराश्च जन्तवः समांसगुणाः सुश्रुते दर्शिता यथा "तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गि-गोकर्णकालपुच्छकोन्द्र्न्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः । वातपित्तहरा वृष्या मधुरा रसपाकयोः । शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः" ।

कूलन्धय त्रि० कूलं धयति धे—खस् मुम् च मुग्धबो० । कूल स्पर्शिनि वनादौ स्त्रियां ङीप् ।

कूलभु स्त्री ६त० । तीरभूमौ हेमच० । कूलभूमि-तीरभूम्यादयोऽप्य "कावेरीतीरभूमीरुहभुजगवधूभुक्त मुक्तावशिष्टः । (वायुः) उद्भटः ।

कूलमुद्रुज त्रि० कूलमुद्रुजति उद्+रुज खश् मुम् च । कूलभेदके । "आसादितौ कथं मूतं न गजैः कूलमुद्रुजैः" भट्टिः । "मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः"रघुः

कूलमुद्वह त्रि० कूलमापूर्य्य वहति उद्+वह—खश् मुम् च । कूलमापूर्य्य वाहिनद्यादौ "उत्तीर्णौ वा कथं भीमाः सरितः कूलमुद्वहाः" भट्टिः ।

कूलहु(ह)ण्डक पु० कूले हुण्डते संघीभवति हुडि—संघे ण्वुल् पृषो० वा उलोपः । जलावर्त्ते त्रिका०

कूलाल त्रि० कूलमस्यति क्षिपति अस—अण् । कूलक्षेपके ततः सङ्कला० चतुरर्थ्याम् अण् । कौलास तत्सन्निकृष्टदेशादौ त्रि० स्त्रियां ङीप् ।

कूलेचर त्रि० कूले चरति चर अलुक्स० । नद्यादेस्तीरचरेषु महिषादिपशुषु । ते च "चमरीवारणादयः । एते कूले-चराः प्रोक्ताः यतः कूले चरन्त्यपाम्" भावप्र० उक्ताः आदिपदात् कूलचरशब्दे सुश्रुतेनोक्ता ग्राह्याः । "कूले चरा मरुत्पित्तहरा वृष्या बलावहाः । मधुराः शीत-लाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः" तद्गुणा स्तत्रोक्ताः ।

कूल्य त्रि० कूले भवः यत् । १तीरभवे २रुद्रभेदे पु० "नमस्ती-र्थ्याय च कूल्याय च" यजु० १६,४२, रुद्राध्यायः ।

कूवर पु० कू—शब्दे कुटादि—वरच् । १कुब्जके वृक्षभेदे (कुंजा) २कुब्जे त्रि० ३मनोहरे त्रि० शब्दचि०४युगन्धरे यत्र युग-काष्ठमासज्यते तत्र रथावयवभेदे पुंन० अमरः "वै-दूर्य्यमणिकूवरम्" रामा० । "रथं चामितकूवरम्" भा० आनु० ४२६८श्लो० । "पादैः पुरः कूवरिणां विदा-रिताः" माघः । ५रथिकस्थाने गोयुक्तं रथमुपक्रम्य "पञ्चमी कूवरबाहू राश्मिकल्पयेत्" गोभि०सू० । कूवरं रथिकस्थानम्" सं० त० रघुनन्दनः ।

६कम्बलाच्छादितरथे स्त्री हला० गौरा० ङीष् ।

कूवार पु० कुं तीरभूमिं वृणोति वृ—अण् उप०स० पृषो० दीर्घः । कूपारशब्दार्थे अमरटीका

कूश्म पु० हवनीयदेवभेदे ।"प्रदरान् पायुना कूश्मांश्छकपिण्डैः" यजु० २५,७ "कूश्मान् देवान् प्रीणयामि"वेददी० ।

कूष्माण्ड पु० ईषदूष्माण्डेषु वीजेष्वस्य । १कुष्माण्डशब्दार्थे २शिवपारिषदभेदे हेमच० "अन्ये च ये प्रेतपिशाचभूत कूष्माण्डयादोमृगपक्ष्यधीशाः"भाग०२,६,४५।३ऋषिभेदे पु० "कूष्माण्डोराजपुत्रश्चेत्यन्ते स्वाहासमन्वितैः" या०स्मृ० तद्दृष्टत्वात् "यद्देवा देवहेडनमित्याद्यासु ४ऋक्षु स्त्री ङीप् "त्रिरात्रोपोषितोभूत्वा कूष्माण्डीभिर्घृतं शुचिः । सुरापः स्वर्णहारी च रुद्रजापी जलेस्थितः"यास्मृ०। "त्रिरात्रमुपोषितः कूष्माण्डीभिर्यद्देवादेवहेडनमित्या-द्याभिः कूष्माण्डदृष्टाभिरनुष्टुब्भिर्मन्त्रलिङ्गदेवताभिर्ऋ-ग्भिश्चत्वारिंशद्घृताहुतीर्हुत्वा शुचिर्भवेत् । तथा बौ-धायनेनाप्युक्तम् "अथ कूष्माण्डीभिर्जुहुयाद्योऽपूतमिवा-त्मानं मन्येत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यं-अयोनौ या रेतः सिक्त्वा अन्यत्र स्वप्नादिति" । मिता० "सर्व्ववेदपवित्राणि वक्ष्याम्यहमतः परम् । येषाञ्जपैश्च होमैश्च पूयन्ते नात्र संशयः । अघमर्षणन्देवकृतः शुद्ध-वत्यस्तरत्समाः । कूष्माण्ड्यः पावमान्यश्च दुर्गासावित्र्य-थैव च" मिताक्षरायां वशिष्ठस्मृः । स्वार्थे क । तत्रार्थे

कूष्माण्डवटिका स्त्री कुष्माण्डखण्डमिश्रिता माषादि वटि-का शा०त०। (कुम्डावडी)ख्याते पदार्थे "कूष्माण्डवटिका ज्ञेया पूर्व्वोक्तवटिकागुणा । विशेषात् रक्तपित्तघ्नी लघ्वी च कथिता बुधैः" भावप्र० । पूर्व्वोक्तवटिका माषवटिका

कूष्माण्डी स्त्री ईषदूष्माऽण्डेषु स्रुत्याः गौरा० ङीष् । १ओष-

भिभेदे २कर्कोटौ३दुर्गायाञ्च हेमच०। दुर्गायाश्च कूष्माण्ड बलिप्रियत्वात्तथात्वम्। "कुष्माण्डी तु भवेत् लक्ष्मी कर्कोटः परिकीर्त्तिता" भावप्र०। चक्रविशेषे च

कूहा स्त्री ईषत् जहातेऽत्र जह-वितर्के आधारे घञर्थे क। कुज्झटिकायाम् शब्दरत्ना०।

कृ कृतौ भ्वा० उभ० सक० अनिट् कविकल्प०। करति ते अकार्षीत् अकृत। चकार। भौवादिकस्यास्यापाणिनीयता

कृ कृतौ तना० उभ० सक० अनिट्। करोति कुरुते कुर्यात्। करोतु कुरु अकरोत् अकार्षीत् अकृत। चकार कर्त्ता करिष्यतिते क्रियात् कृषीष्ट। कर्म्मणि क्रियते अकारिअकारिषातामकारयिषाताम्। कारक. कर्त्ता कारी कुर्वन् कुर्व्वाणः चकृवान् चक्राणः। डु—कृत्रिमः कृतः कृतवान् करणं कृतिः क्रिया कृत्या कृत्वा प्रकृत्य। कृत्यं कार्य्यः कर्त्तव्यः करणीयः। णिचि कारयति ते अचीकरत्तत्सनि चिकीर्षति ते यङि चेक्रियते यङ् लुकि चरि(री)करीति चरि(री) कर्त्ति चर्करीति चर्कर्त्ति

"कृञो हेतुताच्छील्यानुलोम्येषु" पा०

"एषु द्योत्येषु करोतेष्टः स्यात्। अतः कृञमीति सः। यशस्करी विद्या। श्राद्धकरः वचनकरः" सि० कौ०

"दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिम्लिपिलिबिबलिभक्तिकर्त्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु" पा०।

"एषु कृञष्टः स्यात्। अहेत्वादावपि। दिवाकरः विभाकरः निशाकरः कस्कादित्वात्सः। भास्करः बहुकरः बहुशब्दस्य वैपुल्यार्थे संख्यापेक्षया पृथग्ग्रहणम् लिपिलिबिशब्दौ पर्य्यायौ। संख्या-एककरः। द्विकरः। कस्कादित्वात्सः। अहस्करः। नित्यम् समासेऽनुत्तरपदस्थस्येति षत्वम्। धनुष्करः। अरुष्करः। "किंयत्तद्बहुषु कृञोऽज्विधानमिति" वार्त्तिकम् किङ्करा। तत्करा। हेत्वादौ टस्बाधित्वा परत्वादच्। पुंयोगे ङीप्। किङ्करी। "कर्म्मणि भृतौ" पा०

"कर्म्मशब्दे उपपदे करोतेष्टः स्यात् भृतौ। कर्म्मकरो भृतकः। कर्म्मकारोऽन्यः" सि० कौ०

"न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु" पा०।

"एषु कृञष्टो न। हेत्वादिषु प्राप्तः प्रतिषिध्यते। शब्दकार इत्यादि"। "स्तम्बशकृतोरिन्" पा०

"व्रीहिवत्सयोरिति वक्तव्यम्" वार्त्ति०। स्तम्बकरिर्व्रीहिः। शकृत्करिर्वत्सः। व्रीहिवत्सयोः किम् स्तम्बकारः। शकृत्कारः"। सि० कौ०

"सुकर्म्मपापमन्त्रपुण्येषु कृञः" पा० "सौ कर्म्मादिषु च कृञः क्विप् स्यात्। त्रिविधोऽत्र नियम इति काशिका। सुकृत् कर्म्मकृत् पापकृत् मन्त्रकृत् पुण्यकृत्। क्विपेवेति नियमात्कर्म्मकृतवानिति निष्ठा न। कृञ एवेति नियमान्मन्त्रमधीतवान्मन्त्राध्यायः अत्र न क्विप्। भूत एवेति नियमात् मन्त्रङ्करोति करिष्यति वेति विवक्षायाम् क्विप्। स्वादिष्वेवेति नियमाभावादन्यस्मिन्नप्युपपदे क्विप्। शास्त्रकृत्। भाष्यकृत्"। सि० कौ०

अधि+अधिकारे आरम्भे सक० अधिकरोति अधिकृत्य

अनु+सदृशीकरणे अनुकरोति।"शैलाधिपस्यानुचकार लक्ष्मीम्"

अप+अपकारे अनिष्टाचरणे अपकरोति "रिपौ सान्त्वमपक्रिया" माघः [प्राधान्येनापाक्रियते" छ०उ० भा०

अप+आ निवारणे सक०। अपाकरोति। "अयं प्रश्नः

आ+आकारे अवयवसंस्थाने आकृतिः आकारः

उद्+आ+उत्कालने सक० "उदाकरोति उत्कालयति "याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाचैताः सौम्योदज सोमश्रवाः! इति ताहोदाचकार"छ०उ०। "ताश्च ह उदाचकार उत्कालितवानाचार्य्यगृहम्" भा०।

उप+उपकारे सक० उपकरोति"उपकृतं बहु तत्र किमुच्यते" सा० द०। संस्कारे सक० सुट् च। उपस्करोति

उप+आ+आरम्भे उपाकरोति उपाकृत्य "श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि" मनुः पश्वादिसंस्कारे च उपाकर्म्मशब्दे दृश्या०।

दुर्—दुष्टाचरणे दुष्कृतं दुष्कृतिः।

नि+पराभवे सक० निकरोति (पराभवति) नीकरः

निस्+निर+शुद्धौ अक० निष्करोति निष्कृतिः (शुद्धिः)

निर्+आ+निवारणे सक० निराकरोति"निराकरिष्णू वर्द्धिष्णू वर्त्तिष्णू परितोरणम्" भट्टिः! "निराकरिष्णोर्वृजिनादृतेऽपि" रघुः

परा+निराकरणे सक०। पराकरोति [परिष्करोति

परि+परिष्कारे सतोगुणान्तराधाने भूषणे च सक० सुट् च

प्र+प्रस्तावे सक० प्रकरोति प्रकृत्य। आरम्भे च "प्रकृतजपविधीनामाश्रयात्प्रसदन्तम्" माघः.

प्रति+प्रतिकारे अनिष्टनिवारणे प्रतिकूलाचरणे च सक० प्रतिकरोति प्रतीकारः प्रतिक्रिया।

वि+विभागे विकरोति "स त्रेधात्मानं व्यकुरुत" छा० उ०। "व्यकुरुत व्यभजत्"भा०। विकारे (अन्यथास्थितस्य वस्तुनोऽन्यथाभावे) अक०आ० वायुर्विकुरुते" सि० कौ०।

वि+आ+प्रकाशने व्याकरोति "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" श्रुतिः। व्याख्याने व्याकृतम् पाणिन्याद्युक्तशब्दसाधुत्वाधायकसंस्कारभेदे च "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चितिः" वेदाङ्गोक्तौ "व्याक्रियाव्यञ्जनीया वा जातिः कापीह साधुता" भर्त्तृहरिः।

वि+प्र+उपद्रवे सक० विप्रकरोति "तस्मिन् विप्रकृताः काले" कुमा०। "वामपरमयशं न विप्रकुर्य्युः" कुमा०।

सम्+संस्कारे सतोगुणान्तराधाने सक० सुट् च। संस्करोति पात्रम्।

सम्+परि उप+भूषणे अर्थे सुट्। संस्करोति परिष्करोति उपस्करोति अलङ्करोतीत्यर्थः। तत्पूर्व्वकाः समवायेऽर्थे च अक० सुट् संस्करोति उपस्करोति परिस्करोति संघीभवतीत्यर्थः उप+सतोगुणान्तराधाने विकारे आकाङ्क्षितवाक्यस्य पूरणे च सुट्। उपस्कृतं भुङ्क्ते विकृतं भुङ्क्ते। उपस्कृतं ब्रूते वाक्यमध्याहृत्य ब्रूते" सि०कौ०।

अथ मतभेदेन कृञोऽर्थो निरूप्यते तत्र वैयाकरणाः तस्य यत्नार्थकतानिराकरणेन व्यापारार्थकतामाहुः यथा वै० भू० सारे

"व्यापारो भावना सैवोत्पादना सैव च क्रिया। कृञोऽकर्म्मकतापत्तेर्न हि यत्नोऽर्थ इष्यते" भू०।

"पचति पाकमुत्पादयति पाकानुकूला भावना तादृश्युत्पादनेत्यादिविवरणाद्ध्रियमाणस्यापि तद्वाचकतेति भावः। व्यापारपदं फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम्। अतएव पचतीत्यत्राधःसन्तापनत्वफूत्कारत्वचुल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्व्वसिद्धः। नचैवमेषां शक्यतावच्छेदकत्वे गौरवापत्त्या कृतित्वमेव तदवच्छेदकं वाच्यम् रथो गच्छति जानातीत्यादौ च व्यापारत्वादिप्रकारकबोधो लक्षणयेति नैयायिकरीतिः साध्वी; शक्यतावच्छेदकत्वस्यापि लक्ष्यतावच्छेदकत्ववद्गुरुणि सम्भवात् तयोर्वैषम्ये बीजाभावात्। नच पचति पाकं करोतीति यत्नार्थकरोतिना विवरणाद्यत्न एवाख्यातार्थ इति वाच्यम्। रथो गमनं करोति बीजादिना अङ्कुरः कृत इति दर्शनात् कृञो यत्नार्थकताया असिद्धेः। किञ्च भावनाया अवाच्यत्वे घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि द्वितीया स्यात् नचात्र घटस्य कर्त्तृत्वेन तत्संज्ञया कर्म्मसंज्ञाया बाधान्न द्वितीयेति वाच्यम् अनुगतकर्त्तृत्वस्य त्वन्मते दुर्व्वचत्वेन घटस्याकर्त्तृत्वात्। कृत्याश्रयत्वस्य कारकचक्रप्रयोक्तृत्वस्य वा घटादावभावात्। धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्। अपि च भावनाया अवाच्यत्वे धातूनां सकर्म्मकत्वाकर्म्मकत्वविभाग उच्छिन्नः स्यात्। स्वार्थफलव्यधिकरणव्यापारवाचित्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनावाच्यत्वमन्तरेणासम्भवि। अन्यतमत्वं तत्त्वमिति चेन्न एकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वदर्शनात् तदेतदभिसन्धायाह कृञ इति। अयं भावः व्यापारावाच्यत्वपक्षे फलमात्रमर्थ इति फलितम्। तथा च करोतीत्यादौ यत्नप्रतीतेस्तन्मात्रं वाच्यमभ्युपेयम्। तथा च यती प्रयत्न इतिवत् फलस्थानीययत्नवाचकत्वाविशेषादकर्मकतापत्तिः उक्तरीत्या दुर्वारेति। तथा च नहि यत्नः इत्यत्र फलस्थानीयत्वेनेति शेषः कृञः इति धातुमात्रोपलक्षणं सर्वेषामप्यकर्म्मकता सकर्मकता वा न स्यादिति भावः। अथ वा व्यापारो भावना इत्यर्द्धेन व्यापारस्य वाच्यत्वं प्रसाध्य फलांशस्यापि तत्साधयन् नैयायिकाभ्युपगत जानातिकृञादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं दूषयति कृञः इति। अयं भावः फलांशस्यावाच्यत्वे व्यापार एव धात्वर्थः स्यात्। तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वादिरूपसकर्मकत्वोच्छेदापत्तिः। नच कृञादौ सकर्म्मकत्वव्यवहारो भाक्त इति नैयायिकोक्तं युक्तम् व्यवहारस्य भाक्तत्वेऽपि कर्मणि लकारासम्भवात्। न हि तीरे गङ्गापदस्य भाक्तत्वेऽपि तेन स्नानादिकार्यं कर्त्तुं शक्यम्। एवञ्च नहि यत्न इत्यत्र यत्नमात्रमित्यर्थः"। अतएवाह।

"किन्तूत्पादनमेवातः कर्म्मवत्स्यात् यगाद्यपि। कर्मकर्त्तर्य्यन्यथा तु न भवेत् तद्दृशेरिव" भू०

"उत्पादनम् उत्पत्तिरूपफलसहितं यत्नादि कृञर्थ इत्यर्थः। फलस्य वाच्यत्वे युक्त्यन्तरमाह अत इत्यादि। यतः कृञो यत्नमात्रार्थो नेष्यते अतः कर्मवत् स्यादिति पदेन 'कर्मवत्कर्मणा तुल्यक्रियः" इति (पा०) सूत्रं लक्ष्यते। अयमर्थः यत एवास्योत्पादनार्थकता अतः पच्यते ओदनः स्वयमेवेतिवत् क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्मनिष्ठत्वाभावात्तन्न स्यात् दृशिवत्। यथा दृश्यते घटः स्वयमेवेति न, दर्शनस्य घटावृत्तित्वात्तथा यत्नस्यापीति, तथा प्रयोगानुपपत्तेरिति"।

नैयायिकास्तु व्यापारार्थकतानिराकरणेन यत्नार्थकतामाहुः यथा शब्दचिन्तामणौ

"आख्यातस्य यत्नवाचकत्वादचेतने रथो गच्छतीत्यादौ चाख्याते व्यापारलक्षणा तथाह्याख्यातस्य पचतीत्यादौ यत्नो वाच्यः पचति पाकं करोतीत्यादियत्नार्थककरोतिना सर्वाख्यातविवरणाद्वृद्धव्यवहारादिव बाधकं विना विवरणादपि व्युत्पत्तेः। द्वन्द्वादिसमासस्य विग्रहेण विवरणादपि विग्रहार्थे न शक्तिग्रहः अन्यलभ्यत्वात् किंकरोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थत्वं विनानुपपत्तेरित्याचार्य्याः। अत्र वदन्ति—आख्यातस्य करोतेश्च न यत्नार्थकत्वं रथो गच्छति जानाति यतते निद्रातीत्यत्र धात्वर्थानुकूलयत्नाभावेऽप्याख्यातपदप्रयोगात् गमनं करोतीति करोतिना तत्राख्यातविवरणाच्च अत्र व्यापारस्य करोत्यर्थत्वे चेतनेऽपि तथा। न च तत्राख्यातकरोत्योर्गौणत्वं तुल्ये बाधकाभावात्। अतएव प्रश्नोत्तरयोर्न यत्नार्थत्वं किन्तु क्रियावाचकत्वमेव कृञः, तेन किं करोतीति क्रियामात्रप्रश्ने पचति गच्छतीति क्रियाविशेषेणोत्तरमपि सुसङ्गतम्भवति"। ततः परोऽन्यः कर्त्तृशब्दे १७१७ दर्शितोदृश्यः। तत्परस्तु- "ननु प्रकृतेस्तदर्थत्वेऽपि प्रत्ययस्य न तदर्थत्वं दोषः एकोद्वौबहवःएषिषतीत्यत्रेव तत्सम्भवात्।—यत्तु तत्र द्वितीयसंख्येच्छादिकल्पनावदिहापि द्वितीययत्नकल्पनमिति तन्न द्वितीययत्नेच्छाद्वा विच्छायत्नाऽभावात्। वस्तुतस्तु प्रत्येकसामर्थ्यावधृतौ सन्देहे उभयोपस्थितेरावश्यकत्वेन कस्याप्यनन्वयेऽप्यदोषात् पाकाय यतेत पाकं कुर्य्यादित्यत्र कृत्यर्थकाख्यातेऽपि तथैवान्वयादिति चेत् न एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसंख्यान्वयावगमायोग्यत्वात् लडादेर्यत्नसामर्थ्यानवधारणात् लिङः पचेतेत्यत्र कृतौ सामर्थ्यावधारणाच्च। अथायत्नार्थकधातुपराख्यातस्य यत्नार्थत्वं तेन यतत इति नानन्वयः अचेतने चाख्यातप्रयोगो गौणएव। न च वृत्त्यन्तरेणापि प्रयोगसम्भवे शक्तिकल्पना युक्ता। यद्वाऽनुकूलयत्ने प्रवृत्तं पदं तदेकदेशेऽनुकूलमात्रे प्रवर्त्तते विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणे श्रोत्रियपदवत्। अचेतने तु मध्यमोत्तमपुरुषौ न भवतएव उपपदयोर्युष्मदस्मदोस्तत्रानर्थत्वात्। भवतु वा गौण एव लोकस्यापर्य्यनुयोज्यत्वादिति चेत् न अचेतने आख्यातस्य मुख्यत्वे बाधकाभावेन गौणत्वाभावात् तस्मादाख्यातस्यानुकूलत्वेन व्यापारो वाच्यः" इति भाट्टाः। तेन चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारस्य सत्त्वादाख्यातप्रयोगो मुख्य एव। पथि श्रमशयानेऽपि पचतीति स्यात् श्रमशान्तिद्वारा शयनस्य पाकानुकूलव्यापारत्वात् तत्र यत्नविशेषस्यैवानुकूलव्यापारविशेषस्य वाच्यत्वात् अन्यथा यत्नवाच्यत्वेऽपि तण्डुलानुकूलयत्नवति पचतीति स्यात् एवमचेतनेऽपि करोतिनाख्यातविवरणात् करोत्यर्थोऽपि व्यापारविशेषः। कथन्तर्हि चैत्रःपचतीत्यत्र पाकानुकूलताप्रतीतिः आक्षेपादिति चेन्न आख्यातार्थेन व्यापारेण संख्यया वा यत्नानपेक्षणात् तयोः प्रयत्नं विनापि सत्त्वात् नापि कर्त्रा, द्रव्यमात्रस्य कर्त्तृत्वात् यत्नवतश्च कर्तृत्वे आख्यातेन तदभिधाने यत्नस्याप्यभिधानात्। नापि धात्वर्थमात्रेण, तस्य यत्नं विनापि सत्त्वात् नापि यत्नोधात्वर्थः क्रियायास्तत्फलस्य वा धातुवाच्यत्वात् अन्यथा पाक इत्यत्रापि यत्नानुभवप्रसङ्गादिति चेत् न धात्वर्थविशेषेण पाकादिना यत्नाक्षेपात् तस्य यत्नं विनानुपपत्तेः। अथ पचतीत्यत्र पाकयत्नवानिति विवरणात् यत्नार्थतेति चेत् तर्हि कर्त्रर्थतापि स्यात् न हि पाकयत्न इत्येव विवरणं पचतीत्यस्य, तत्पार्थ्य विवरणन्तत् तत्राक्षेपेणापि निर्व्वहतीति चेत् तुल्यं यत्नेऽपि कथन्तर्हि रथो गच्छति, विद्यते व्योमेति भावनानुभव इति चेत् न कथञ्चित्, भावनायाधात्वर्थान्वयायोग्यत्वेन त्वयापि तत्र गौणत्वाभ्युपगमादिति। उच्यते। चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवावाद्यत्र एवाख्यातार्थोलाभवात् नत्वनुकूलो व्यापारः यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात् नचाचेतन आख्यातार्थे मुख्यत्वार्थमनुगुणोव्यापार एवाख्यातवाच्यः मुख्यत्वसम्भवे त्यागायोगादिति वाच्यं शक्तिग्राहकेण लघुनि शक्तिपरिच्छेदात् अचेतने प्रयोगस्य वृत्त्यन्तरेणापि सम्भवात्। मुख्यत्वार्थं शक्तिकल्पने च वृत्त्यन्तरोच्छेदः। एतेन व्यापारवाचकस्याख्यातस्य यत्नसाध्यार्थरूपपचत्यादिधातूपसन्धानेन व्यापारविशेषयत्नोपस्थापनमिति निरस्तं लाघवेन यत्नस्यैव शक्यत्वात् ननु यत्नोनाख्यातार्थः पाकत्वेन पाकस्य यत्नसाध्यत्वानुमित्या यत्नलाभादित्युक्तमिति चेन्न चैत्रो यत्नं करोत्यतः पाकानुकूलवर्तमानयत्नवान् प्रतीयते। नच पाकस्य वर्त्तमानयत्नेन व्याप्तिरस्ति अतीतानागतयोर्व्यभिचारात्। न च धात्वर्थेनानुमिते यत्ने आख्यातेन वर्त्तमानतान्वयः सम्भवति यत्नस्यापदार्थत्वात् स्वार्थव्यापारस्य वर्त्तमानत्वबोधनेनाख्यातस्य पर्य्यवसि-

त्त्वाच्च। अथ चैत्रः पाकानुकूलवर्त्तमानव्यापारवानिति शाब्दबोधानन्तरं चैत्रः पाकानुकूलवर्त्तमानयत्नवान् चेतनत्वे सति पाकानुकूलवर्त्तमानव्यापारवत्त्वात् मैत्रवत्। अनुमानं विना च पाकयत्ने वर्त्तमानताभानमाख्यातस्य यत्ने शक्तिभ्रमादिति चेन्न यत्नाभावकालेऽपि तज्जन्यव्यापारस्य वर्त्तमानतया व्यभिचारात् किञ्च। व्यापारस्य वाच्यत्वं तल्लिङ्गकञ्च वर्त्तमानयत्नानुमानमिति कल्पनाद्वयमपेक्ष्य यत्न वाच्यत्वे लाघवात्। नचाचेतने आख्यातस्य व्यापारवाचकत्वावधारणादेव कल्पनेति युक्तं गौणतया शक्तिभ्रमेण वा तत्राख्याताद्व्यापारावगमोपपत्तेः। यत्नविगमदशायां तज्जन्यव्यापारकाले पचतीत्यत्र वर्त्तमानव्यापाराभिधानमाख्यातेन लक्षणया। यथा रथोगच्छतीत्यत्र, अतोऽन्यलभ्यत्वान्न तदनुरोधेन व्यापारे शक्तिः। अन्यथा तत्रापि यत्नकाले पचतीति न स्यात् तस्मान्न लडाख्यातं यत्नवाचकं आख्यातत्वात् लिङाख्यातवत् तर्कश्चोक्त एव। एतेन फलानुकूलोव्यापारो धात्वर्थः आख्यातवाच्या संख्यैव तेन चैत्रः पचति रथो गच्छतीत्यत्र चैत्ररथयोर्धात्वर्थानुकूलव्यापारवत्त्व प्रतीते मुख्य एव प्रयोगः। पचतीत्यत्र यत्नलाभोधात्वर्थेनाक्षेपात् विक्लित्त्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेरिति गुरुमतमपास्तं पचतीत्यत्र पाकानुकूलयत्नवर्त्तमानत्वस्याक्षेपादलाभेनाख्यातार्थत्वात्”। रत्नकोषकृतस्तु धात्वर्थो व्यापारः आख्यातार्थ उत्पादना सा चोत्पादकता सैव भावना पचतीत्यादावाख्यातस्य पाकमुत्पादयतीति विवरणात् धात्वर्थोत्पादकता च चेतनाचेतनयोरिति सर्व्वत्राख्यातप्रयोगो मुख्यएव। यतते जानातीत्यादावपि यत्नं ज्ञानमुत्पादयतीत्यर्थात् नतु व्यापारो यत्नोवाख्यातार्थः यतत इत्यादौ मुख्यत्वे सति गौणत्वस्यान्याय्यत्वात् आख्यातार्थविवरणकरोत्यर्थोऽप्युत्पादकतैव पाकं करोतीत्यादौ करोतीत्यस्योत्पादयतीति विवरणात् घटं करोतीत्यादौ कृञर्थ उत्पत्तिरेव गम्यते। अतएव किं करोतीति सामान्योत्पादनाप्रश्ने पचतीति पाकोत्पादनाविशेषेणोत्तरमात्रमपि समञ्जसम्। चैत्र उत्पादयतीत्यत्र धात्वर्थ एवोत्पादना चैत्रेणान्वेति आख्यातार्थोत्पादना त्वनन्वितैव उत्पत्तेरुत्पत्त्यभावात्। वस्तुतस्तूत्पादयतीत्यत्र धात्वर्थ एवोत्पादना अतोऽनुत्पादनार्थधातूत्तरवर्त्तिन आख्यातस्यानन्यलभ्यतयोत्पादना वाच्या” तन्मतञ्च शब्दचि० दूषितं विस्तरभयान्नोद्धृतम्।

एवं दर्शितेषु मतेषु युक्तायुक्तत्वं सुधीभिर्भाव्यम्। ततः स्वार्थे—णिच् कारयति करोतीत्यर्थः। “दश वर्षसहस्राणि रामो राज्यमकारयदित्यादि” रामा०

कृ वधे स्वादि उभ० सक० सेट्। कृणोति कृणुते अकार्षीत् अकृत। चकार। अस्य न इट् इड्विधौ तानादिकस्यैव ग्रहणात्।

कृक पु० कृ—कक्। गले कण्ठे हेमच०

कृकण पुं० कृ इति कणति कण—शब्दे अच्। (कयार) १क्रकरपक्षिणि, अमरः स्त्रियां ङीष्। मुतकारके २देहस्थे वायुभेदे पाठान्तरम् ३कृनौ हारा०।

कृकर पुं० कृ इति शब्दं करोति। क्षुतकारके देहस्थे १वायौ। “कृकर(ण)स्तु क्षुते चैव जवाकुसुमसन्निभः” पदार्थादर्शे योगार्णवः। २शिवे त्रिका० ३कृकणविहगे शब्दरत्ना० ४चव्ये (चइ) ५करवीरेवृक्षे च राजनि०। [राजनि०

कृकला स्त्री कृकं कृकाकारं लाति ला—क। पिप्पल्याम्

कृकलास पुंस्त्री कृकं कण्ठं लासयति लस—णिच् अच्। सरटे (काँकलास) पक्षिणि अमरः स्त्रियां जातित्वात् ङीष्। कृकलासस्यानिष्टसूचकत्वं तच्छान्तिश्च शान्तिशब्दे दृश्या त्रिका० तालव्यान्तः पाठः शृषो०। “ददृशुस्ते महाकायं कृकलासमवस्थितम्”। “श्वभ्रात्योदपानस्य कृकलासः स्थितोमहान्” भा०आनु० ७०अ०। स्वार्थे क तत्रार्थे। स्त्रियां ङीप्। शृभो० कृकुलासोऽप्यत्र अमरटीका।

कृकवाकु पुंस्त्री कृकेण वक्ति वच—परिभाषणे ञुण् कुश्च। १कुक्कुटे अमरः। २मयूरे, ३सरटे च मेदिनी। “कृकवाकोर्ध्वनिमाकर्ण्य कल्ये” माघः। [त्रिका०।

कृकवाकुध्वज पु० कृकवाकुर्मयूरः ध्वजोऽस्य। कार्त्तिकेये

कृकाट न० कृकं कण्ठमटति अण् उप० स०। घाटायाम् “इन्द्रः शिरो,ऽग्निर्ललाटं,यमः कृकाटम्”अथ० ६,७,१,

कृकाटिका स्त्री कृकं कण्ठमटति अट—ण्वुल् टाप् कापि अत इत्त्वम्। ग्रीवायामुन्नतदेशे अमरः “जत्रूर्द्ध्वं मर्म्माणि चतस्रोधमन्योऽष्टौ मातृका द्वे कृकाटिके”। “जानुकूर्परसीमन्ताधिपतिगुल्फमणिबन्धकुकुन्दरावर्त्तकृकाटिकाश्चेति सन्धिमर्म्माणि। “कुकुन्दरे कक्षधरे विधुरे सकृकाटिके” इति च सुश्रु०। “शिरोग्रीवयोः सन्धाने कृकाटिके नाम तत्र चलमूर्द्धता” सुश्रुते तत्स्थानमुक्तम्। “कृकाटिकान्ते छिन्ने तु गच्छत्यपि गभीरणे” सुश्रु०।

कृच्छ्र पुं०न०कृत—रक् छोऽन्तादेशः उणा०। १सान्तापनादिव्रतं कृच्छ्रञ्च नानाविधः मिता०दर्शितः यथा

"गोमूत्रं गोमयं क्षीरन्दधि सर्पिः कुशोदकम्। जग्ध्वापरेऽह्न्युपवसेत् कृच्छ्रं सान्तपनञ्चरन्" या०। "पूर्व्वेद्युराहारान्तरपरित्यागेन गोमूत्रादीनि गव्यानि पञ्च द्रव्याणि कुशोदकसहितानि संयुज्य पीत्वा अपरेद्युरुपवसेदिति द्वैरात्रिकः सान्तपनः कृच्छ्रः सान्तपनश्चोत्तरश्लोके पृथग्विधानादवगम्यते। कृच्छ्र इति चान्वर्थसंज्ञेयम् तपोरूपत्वेन क्लेशसाध्यत्वात्। गोमूत्रादीनाम्परिमाणं वक्ष्यते। यदा पुनः पूर्व्वेद्युरुपोष्यापरेद्युः समन्त्रकं संयुज्य समन्त्रकमेव पञ्चगव्यम्पीयते तदा ब्रह्मकूर्च्च इत्याख्यायते यथाह पराशरः "गोमूत्रङ्गोमयं क्षीरन्दधि सर्पिः कुशोदकम्। निर्द्दिष्टम्पञ्चगव्यन्तु पवित्रं कायशोधनम्। गोमूत्रन्ताम्रवर्णायाः, श्वेतायाश्चापि गोमयम्। पयः काञ्चनवर्णाया, नीलायाश्च तथा दधि। घृतञ्च कृष्णवर्णायाः सर्व्वं कापिलमेव वा। अलाभे सर्व्ववर्णानाम्पञ्चगव्येष्वयं विधिः। गोमूत्रमाषकास्त्वष्टौ गोमयस्य तु षोडश। क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्त्तिताः। गोमूत्रवद्घृतस्येष्टास्तदर्द्धन्तु कुशोदकम्। गायत्र्यादाय गोमूत्रं, गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरन्दधिक्राव्णेति वै दधि। तेजोऽसि शुक्रमित्याज्यन्देवस्य त्वा कुशोदकम्। पञ्चगव्यमृचा पूतं होमयेदग्निसन्निधौ। सप्तपत्रास्तु वै दर्भा अच्छिन्नाग्राः शुकत्विषः। एतैरुद्धृत्य होतव्यम्पञ्चगव्यं यथाविधि। इरावती इदं विष्णुर्मानस्तोके च शंवतीः। एताभिश्चैव होतव्यं हुत्वा शेषं पिबेद्द्विजः। प्रणवेन समालोड्य प्रणवेनाभिमन्त्र्य च। प्रणवेन समुद्धृत्य पिबेत्तत् प्रणवेन तु। मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत्। स्वर्णपात्रेण रौप्येण ब्रह्मतीर्थेन वा पुनः। यत्त्वगस्थिगतम्पापं देहे तिष्ठति मानवे। ब्रह्मकूर्च्चोपवासस्तु दहत्यग्निरिवेन्धनमिति"। यदा त्वेतदेव विमिश्रितम्पञ्चगव्यं त्रिरात्रमभ्यस्यते तदा यतिसान्तपनसंज्ञां लभते "एतदेव त्र्यहाभ्यस्तं यतिसान्तपनं स्मृतमिति" शङ्खस्मरणात्। जाबालेन तु सप्ताहसाध्यं सान्तपनमुक्तम् "गोमूत्रङ्गोमयं क्षीरन्दधि सर्पिः कुशोदकम्। एकैकं प्रत्यहम्पीत्वा त्वहोरात्रमभोजनम्। कृच्छ्रः सान्तपनो नाम सर्व्वपापप्रणाशनः" इति। एषाञ्च गुरुलघुकृच्छ्राणां शक्त्याद्यपेक्षया व्यवस्था विज्ञेया। एवमुत्तरत्रापि व्यवस्था बोद्धव्या। महासान्तपनाख्यं कृच्छ्रमाह "पृथक् सान्तपनद्रव्यैः षडहः सोपवासकः। सप्ताहेन तु कृच्छ्रोऽयं महासान्तपनः स्मृतः" या० सप्ताहेनापवर्त्तितो महासान्तपनाख्यः कृच्छ्रो विज्ञेयः कथमित्यपेक्षायामुक्तम् पृथग्भूतैः षड्भिर्गोमूत्रादिभिरेकैकेनैकैकमहरतिवाहयेत्सप्तमञ्चोपवासेनेति। यमेन तु पञ्चदशाहसम्पाद्यो महासान्तपनोऽभिहितः "त्र्यहम्पिबेत्तु गोमूत्रन्त्र्यहं वै गोमयम्पिबेत्। त्र्यहन्दधि त्र्यहं क्षीरन्त्र्यहं सर्पिस्ततः शुचिः। महासान्तपनं ह्येतत्सर्व्वपापप्रणाशनमिति"। जाबालेन त्वेकविंशतिरात्रनिर्वर्त्त्यो महासान्तपन उक्तः। "षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत्। त्र्यहञ्चोपवसेदन्त्यं महासान्तपनं विदुरिति"। यदा तु षण्णां सान्तपनद्रव्याणामेकैकस्य द्व्यहमुपयोगस्तदातिसान्तपनम् यथाह मनुः "एतान्येव तथा पेयान्येकैकन्तु द्व्यहं द्व्यहम्। अतिसान्तपनन्नाम श्वपाकमपि शोधयेदिति"। श्वपाकमपि शोधयेदित्यर्थवादः। इति महासान्तपनातिसान्तपने। पर्णकृच्छ्राख्यं व्रतमाह "पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः। प्रत्येकम्प्रत्यहम्पीतैः पर्णकृच्छ्र उदाहृतः" या०। "पलाशोदुम्बरारविन्दश्रीवृक्षपर्णानामेकैकेन क्वथितमुदकम्प्रत्यहम्पिबेत् कुशोदकञ्चैकस्मिन्नहनीति पञ्चाहसाध्यः पर्णकृच्छ्र। यदा तु पर्णादीनामेकीकृतानां क्वाथस्त्रिरात्रान्ते पीयते तदा पर्णकूर्च्चः यथाह यमः "एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः। क्वाथयित्वा पिबेदद्भिः पर्णकूर्च्चोऽभिधीयते" इति। यदा तु बिल्वादिफलानि प्रत्येकं क्वथितानि मासम्पीयन्ते तदा फलकृच्छ्रादिव्यपदेशं लभते यथाह मार्कण्डेयः "फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः। श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा। मासेनामलकैरेवं श्रीकृच्छ्रमपरं स्मृतम्। पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते। मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु" इति पर्णकृच्छ्रमेकादशविधम्। अथ तप्तकृच्छ्रं व्रतमाह "तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहम्पिबेत्। एकरात्रोपवासश्च तप्तकृच्छ्र उदाहृतः" या०। दुग्धसर्पिरुदकानान्तप्तानामेकैकम्प्रतिदिवसम्प्राश्यापरेद्युरुपवसेदेवं दिवसचतुष्टयसम्पाद्यो महातप्तकृच्छ्रः। एभिरेव समस्तैः सोपवासैर्द्विरात्रसम्पाद्यः सान्तपनवत्तप्तकृच्छ्रः। मनुना तु द्वादशरात्रनिवर्त्त्योऽभिहितः "तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहम्पिबेदुष्णान् सकृत् स्नायी समाहितः" इति। क्षीरादिपरिमाणन्तु पराशरेणोक्तन्द्रष्टव्यम् "अपाम्पिबेत्तु त्रि-

पलं द्विपलन्तु पयः पिबेत् । पलमेकम्पिबेत्सर्पिस्त्रिरात्रं चोष्णमारुतमिति" । त्रिरात्रं चोष्णमारुतमिति त्रिरात्रमात्मपूरणमुष्णोदकवाष्पं पिबेदित्यर्थः । यदा तु शीतं क्षीरादि पीयते तदा शीतकृच्छ्रः "त्र्यहं शीतं पिबेत्तोयन्त्र्यहं शीतं पयः पिबेत् । त्र्यहं शीतं घृतम्पीत्वा वायुभक्षः परन्त्र्यहमिति" यमस्मरणात् । इति तप्तकृच्छ्रश्चतुर्विधः । पादकृच्छ्रमाह "एकभक्तेन नक्तेन तथैवायाचितेन च । उपवासेन चैकेन पादकृच्छ्रः प्रकीर्त्तितः" या० । एकभक्तेन सकृद्भोजनेन दिवैव, नक्तेनेति पृथगुपादानात् । अतश्च दिवैव एकवारमेव भोजनेनैवैकमहोरात्रमतिवाहयेदिति । तत्र दिवेति रात्रिव्युदासः एकवारमिति द्विवारादिव्युदासः । भोजनेनेत्यभोजनव्युदासः । एतच्च कृच्छ्रादीनां व्रतरूपत्वात् पुरुषार्थभोजनपर्य्युदासेन कृच्छ्राङ्गभूतम्भोजनं विधीयते । तथा चापस्तम्बः "त्र्यहमनक्ताश्यदिवाशी च ततस्त्र्यहम् । त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किञ्चिदिति" । अत्र चानक्ताशीत्यनेन व्रते विहितणिनिप्रत्ययेन नक्तपर्युदासेन दिवाभोजननियमं दर्शयति । गौतमेनापीदमेव स्पष्टीकृतम् "हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादिति" । एवं नक्तभोजनविधावपि । न विद्यते याचितं यस्मिन् भोजने तदयाचितम् तेन कालविशेषानुपादानाद्दिवारात्रौ वा सकृदेव तपोरूपत्वात् कृच्छ्राणां, द्वितीयभोजने तदनुपपत्तेः । अयाचितमिति न केवलं परकीयान्नयाचनप्रतिषेधोऽपि तु स्वीयमपि परिचारकभार्य्यादिभ्यो न याचितव्यम् प्रेषणाध्येषणयोः साधारणत्वाद्याच्ञायाः । अतः स्वगृहेऽपि भृत्यभार्य्यादयोऽनाज्ञप्ता एव यदि भोजनमुपहरन्ति तर्हि भोक्तव्यं नान्यथा । अमुनैवाभिप्रायेणोक्तं गौतमेन "अथापरत्र्यहं न कञ्चन याचेतेति" । अत्र च ग्राससंख्यानियमः पराशरेण दर्शितः "सायन्तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः । चतुर्विंशतिरायाच्याः परन्निरशनं स्मृतमिति" । आपस्तम्बेन त्वन्यथोक्तम् "सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः । चतुर्विंशतिरायाच्याः परे निरशनाः स्मृताः । कुक्कुटाण्डप्रमाणास्तु यथा वा संविशेन्मुखमिति" । अनयोश्च कल्पयोः शक्त्यपेक्षो विकल्पः । आपस्तम्बेन तु प्राजापत्यं चतुर्द्धा विभज्य चतुरः पादकृच्छ्रान् उक्त्वा वर्णानुरूपेण व्यवस्था कृता "त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् । सायं त्र्यहन्तथा पादः प्रातः पादस्तथा त्र्यहम् । प्रातः पादं चरेच्छूद्रः सायं वैश्ये तु दापयेत् । अयाचितन्तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतमिति" । यदा तु याचितोपवासात्मकत्र्यहद्वयानुष्ठानं तदार्द्धकृच्छ्रः सायव्यतिरिक्तापरत्र्यहत्रयानुष्ठानन्तु पादोनमिति विज्ञेयम् "सायंप्रातर्विनार्द्धः स्यात्पादोनं नक्तवर्जितमिति" तेनैवोक्तत्वात् । अर्द्धकृच्छ्रस्य प्रकारान्तरमपि तेनैव दर्शितम् "सायंप्रातस्तथैकैकन्दिनद्वयमयाचितम् । दिनद्वयञ्च नाश्नीयात्कृच्छ्रार्द्धं तद्विधीयते" प्राजापत्यकृच्छ्रमाह "यथा कथञ्चित्त्रिगुणः प्राजापत्योऽयमुच्यते" या० । अयमेव पादकृच्छ्रः । यथाकथञ्चिद्दण्डकलितवदावृत्त्या स्वस्थानविवृद्ध्या वा । तत्राप्यानुलोम्येन प्रातिलोम्येन वा । तथा वक्ष्यमाणजपादियुक्तं तद्रहितं वा त्रिरभ्यस्तः प्राजापत्योऽभिधीयते । तत्र दण्डकलितवदावृत्तिपक्षो वशिष्ठेन दर्शितः "अहः प्रातरहर्नक्तमहरेकमयाचितम् । अहः पराकन्तत्रैकमेवञ्चतुरहोऽपरः । अनुग्रहार्थं विप्राणां मनुर्द्धर्म्मभृतां वरः । बालवृद्धातुरेष्वेव शिशुकृच्छ्रमुवाच हेति" । आनुलोम्येन स्वस्थानविवृद्धिपक्षस्तु मनुना दर्शितः "त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहम्परञ्च नाश्नीयात् प्राजापत्यं चरन् द्विजः" इति । प्रातिलोम्यावृत्तिस्तु वशिष्ठेन दर्शिता । "प्रतिलोमञ्चरेत्पुष्टः कृच्छ्रं चान्द्रायणोत्तरमिति" । जपादिरहितपक्षस्तु स्त्रीशूद्रादिविषयोऽङ्गिरसा दर्शितः "तस्माच्छूद्रं समासाद्य सदा धर्म्मपथे स्थितम् । प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति" । जपादियुक्तपक्षस्तु पारिशेष्याद्योग्यतया च त्रैवर्णिकविषयः स च गौतमेन दर्शितः । "अथातः कृच्छ्रान् व्याख्यास्यामो हविष्यान् प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयादथापरं त्र्यहं नक्तम्भुञ्जीताथापरं त्र्यहं न कञ्चन याचेताथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत क्षिप्रकामः सत्यं वदेदनार्य्यैर्न सम्भाषेत रौरवयौधाजपे नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिरथोदकतर्पणं नमोऽहनाय नमोमोहनाय नमोधन्वने तापसाय पुनर्वसवे नमः । मौञ्ज्यायौर्व्याय वसुविन्दाय सर्वविन्दाय नमः । पाराय सुपाराय महापाराय पारटाय पग्पाराय पारयिष्णवे नमः । रुद्राय पशुपतये म-

हते देशाय त्र्यम्बकायैकचरायाधिपतये हराय शर्व्वायावनाशायोग्राय वज्रिणे घृणिने कपर्दिने नमः। सूर्य्यायादित्याय नमः। नीलग्रीवाय शितिकण्ठाय नमः। कृष्णायापिङ्गलाय नमः। ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्द्ध्वरेतसे नमः। सत्याय पावकाय पावकवर्णाय कवर्णाय कामाय कामरूपिणे नमः। दीप्ताय दीप्तरूपिणे नमः। तीक्ष्णाय तीक्ष्णरूपिणे नमः। सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमः। चन्द्रललाटाय कृत्तिवाससे नमः इति एतदेवादित्योपस्थानमेता एवाज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा। सोमाय स्वाहा। अग्नीषोमाभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्नये स्विष्टकृत इति। अन्ते ब्राह्मणभोजनमिति”। तत्र “तिष्ठेदहनि रात्रावासीत क्षिप्रकामः” इत्यस्यायमर्थः यस्तु महतोऽप्येनसः क्षिप्रमेकेनैव कृच्छ्रेण शुच्येयमित्येवं कामयते असावहनि कर्म्माविरुद्धेषु कालेषु तिष्ठेद्रात्रावासीत। एवं रौरवयौधाजपसामजपौ नमो हनायेत्यादिभिस्तर्पणादित्योपस्थानादिकञ्चरुश्रपणादिकञ्च योगीश्वराद्यनुक्तं क्षिप्रकामः कुर्वीत। अतश्च योगीश्वराद्युक्तप्राजापत्यद्वयस्थाने गौतमीयमनेकेतिकर्त्तव्यतासहितन्द्रष्टव्यम्। एवमन्यत्रापि च स्मृत्यन्तरतो विशेषान्तराण्यन्वेषणीयानि। अतिकृच्छ्रमाह “अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः” या०। एतद्धर्मक एव एकभक्तादिप्राजापत्यधर्मयुक्तोऽतिकृच्छ्रः स्यात्। इयांस्तु विशेषः आद्ये त्र्यहत्रये पाणिपूरणमात्रमन्नं भुञ्जीत न पुनर्द्वाविंशतिग्रासान्। अत्र च ग्रासभोजनानुवादेन पाणिपूरान्नभोजनविधानादन्यत्र्यहेऽतिदेशप्राप्त उपवासोऽप्रतिपन्नएव। अत्रापि पादशो व्यवस्थापूर्ववदेव द्रष्टव्या। यत्तु मनुनोक्तम् “एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः” इति तत्पाणिपूरणपरिमितादल्पत्वाच्छक्तविषयम्। कृच्छ्रातिकृच्छ्रमाह “कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्” या० एकविंशतिरात्रं पयसा वर्त्तनं कृच्छ्रातिकृच्छ्राख्यं व्रतं विज्ञेयम्। गौतमेन तु द्वादशरात्रमुदकेन वर्त्तनं कृच्छ्रातिकृच्छ्र उक्तः “अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्र” इति। अतश्च शक्त्यपेक्षयाऽनयोर्व्यवस्था। पराकमाह “द्वादशाहोपवासेन पराकः परिकीर्त्तितः” या० स्पष्टार्थोऽयमर्द्धश्लोकः। सौम्यकृच्छ्रमाह “पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते”। पिण्याकोनिःसृततैलस्तिलस्तस्यौदननिस्रावोदश्वितुदकसक्तूनाञ्च पञ्चानामेकैकं प्रतिदिवसमुपभुज्य षष्ठेऽह्नि उपवसेदेवं सौम्याख्यः कृच्छ्रोऽभिधीयते। द्रव्यपरिमाणन्तु प्राणयात्रामात्रनिबन्धनमधिगन्तव्यम्। जाबालेन चतुरहव्यापी सौम्यकृच्छ्र उक्तः “पिण्याकं सक्तवस्तक्रश्चतुर्थेऽहन्यभोजनम्। वासो वै दक्षिणां दद्यात्सौम्योऽयं कृच्छ्र उच्यते” इति। तुलापुरुषाख्यं कृच्छ्रमाह “एषान्त्रिरात्रमभ्यासादेकैकस्य यथाविधि। तुलापुरुष इत्येष ज्ञेयः पाञ्चदशाहिकः” या० “एषां पिण्याकादीनाम्पञ्चानां क्रमेणैकैकस्य त्रिरात्राभ्यासेन पञ्चदशाहव्यापी तुलापुरुषाख्यः कृच्छ्रोवेदितव्यः। अत्र पाञ्चदशाहिकत्वविधानादुपवासस्य निवृत्तिः। यमेन त्वेकविंशतिरात्रिकस्तुलापुरुष उक्तः “आचाममथ पिण्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहन्त्र्यहम्प्रयुञ्जानो वायुभक्षस्त्र्यहद्वयम्। एकविंशतिरात्रस्तु तुलापुरुष उच्यते” इति। अत्र हारीताद्युक्तेतिकर्त्तव्यता ग्रन्थगौरवभयान्न लिख्यते” मिता०। चान्द्रायणकृच्छ्रस्तु चान्द्रायणशब्दे वक्ष्यते। २कष्टे दुःखे “अमन्त्रयत कृच्छ्रञ्च तस्याः सर्वः सभाजनः” रामा०। “महत् खलु कृच्छ्रमनुभूतं तत्रभवत्या” मालवा०। ३कष्टसाधने ४कष्टयुक्ते च त्रि० अमरः “इत्यश्च देशाननुसञ्चराम: वनानि कृच्छ्राणि च कृच्छ्ररूपाः” भा० व०३४ अ०। “कृच्छ्रां प्राप स आपदम्” रामा०। ५कष्टसाध्ये त्रि० “अमन्त्रयित्वा सचिवैः योऽर्थं कृच्छ्रं न्यपश्यरेत्” रामा०। “अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रोऽयं मिश्रलक्षणः” सुश्रु०। ६प्रजापत्यव्रते “विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने” मनुः। “तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्” मनुः। “एकवर्षे गवि हते कृच्छ्रपादोविधीयते। अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने। त्रिहायणे त्रिपादस्तु प्राजापत्यमतः परम्” प्रा०त० वृद्धप्रचेताः। “चतुर्हायणादौ प्राजापत्यविधानात् कृच्छ्रपदं प्राजापत्यपरम्” प्रा० त० रघु०। ७पापे न० मेदि० ८मूत्रकृच्छ्ररोगे पु० राजनि०। कृच्छ्रं वेदयते सुखा० क्यङ् पापचिकीर्षायाम्। कृच्छ्रायते पापं चिकीर्षति। सुखा० अस्त्यर्थे वा मतुप् मस्य वः। कृच्छ्रवत् पक्षे इनि। कृच्छ्रिन् तद्युक्ते त्रि० “स ह कृच्छ्री बभूव” छा० उ०। स्त्रियां ङीप्। अपत्यपरत्वे·

ततोहेतौ पञ्चमी कृच्छ्रान्मुक्तः सत्यपरत्वे तृतीया कृच्छ्रेण विशेषं सुक्तः। एतत्पञ्चम्या अलुक्स०।

कृच्छ्रसान्तपन पु॰न॰ सम्यक् तपनमत्र प्रज्ञाद्यण् कर्म्म॰। व्रतभेदे कृच्छ्रशब्दे विवृतिः।

कृच्छ्रातिकृच्छ्र पु॰ कृच्छ्रादपि अतिकृच्छ्रः अतिकष्टसाध्यत्वात्। व्रतभेदे कृच्छ्रशब्दे विवृतिः। [तथात्वम्।

कृच्छ्रारि पु॰६त॰। विल्वभेदे राजनि॰। कष्टनिवारकत्वात्तस्य

कृच्छ्रार्द्ध पु॰ व्रतभेदे कृच्छ्रशब्दे विवृतिः।

कृणाङ्ग पु॰ कृशाङ्ग+पृषो॰। कृशाङ्गशब्दार्थे राजनि॰।

कृणु पु॰ कृ-बा॰नु णत्वम्। चित्रकरजातौ त्रिका॰

कृत संशब्दे चुरा॰उभ॰सक॰ सेट्। कीर्त्तयति ते अचिकीर्त्तत् त कीर्त्तयां बभूव आस चकार चक्रे। कीर्त्तिः कीर्त्तनम् कीर्त्तितः कीर्त्तयन्। कीर्त्त्यते कीर्त्त्यमानः

कृत छेदे तुदा॰ पर॰ सक॰ सेट् मुचादि। कृन्तति अकर्त्तीत् कर्त्तिष्यति-कर्त्स्यति ईदित् कृत्तः कृत्तिः। "न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति" हितो॰। प्रनिकृन्तति णिचि कर्त्तयति ते अचीकृतत्-त अचकर्त्तत्-त सनि। चिकर्त्तिषति "शिरोऽतिरागाद्दशमं चिकीर्त्तिषुः" माघः। कर्त्तनं कर्त्तरी कृन्तनम्। [चकर्त

कृत वेष्टे रुधा॰ पर॰ सक॰ सेट्। कृणत्ति कृन्तः अकर्त्तीत्।

कृत् पु॰करोति प्रातिपदिकसंज्ञां कृ-क्विप्। १प्रत्ययभेदे कृत्त्वं च धातुप्रकृतिकत्वे सति प्रातिपदिक संज्ञानिमित्तप्रत्ययत्वम्। धातोरित्यधिकारेण तद्विधानात् धातुप्रकृतिकत्वम् "कृत्तद्धितसमासाश्चेति" पा॰ तस्य प्रातिपादकसंज्ञावत्त्वम्। अतएवोक्तमभियुक्तैः "उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्। नामसंज्ञा भवेत्तेषां स्याद्युत्पत्तिस्ततः परम्" तद्धितव्युदासाय धातुप्रकृतिकत्वविशेषणम् तिङ् व्युदासाय प्रातिपदिक संज्ञानिमित्तत्वमिति "कर्त्तरि कृत्" पा॰। "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः" वार्त्ति॰। "कृदभिहितोभावोद्रव्यवत् प्रकाशते" महाभाष्यम् "सप्तम्याः कृति बहुलम्" पा॰। २कर्त्तरि त्रि॰

कृत त्रि॰ कृ+कर्म्मणि क्त। १सम्पादिते २जनिते३अभ्यस्ते च। "कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम्। ब्रीह्यादि चाकृतं प्रोक्तमिति द्रव्यं त्रिधा बुधैः" कात्या॰ उक्ते ४ओदानादौ हविषि न॰। "कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकम्" वेणीसं॰ ५विहिते त्रि॰। ६फले न॰। ७सत्ययुगे न॰ तन्मानाद्युक्तं मनुना "चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः"। तेन ४८०० दिव्यवर्षास्तन्मानम् व्यक्तमुक्तं सू॰ सि॰ यथा "तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम्। सूर्य्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः। सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्। कृतादीनां व्यवस्थेयं धर्मपादव्यवस्थया युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः। क्रमात् कृतयुगादीनां षष्ठोंऽशः सन्ध्ययोः स्वकः"। ततश्च मानुषमानेन१७२८००० वर्षास्तन्मानं। तदेतदुक्तं सि॰शि॰"खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणैः। क्रमेण सूर्य्यवत्सरैः कृतादयो युगाङ्घ्रयः। स्वसन्ध्यकातदंशकैर्निजार्क १२भागसंमितैः। युताश्च तद्युतौ युगं रदाब्धयोऽयुताहताः" मू॰ 'खखाऽभ्रदन्तसागरैरिति। रविवर्षाणां लक्षचतुष्टयेन द्वात्रिंशत्सहस्राधिकेन चतुर्गुणेन कृतं नाम प्रथमो युगचरणः १७२८०००। त्रिगुणेन त्रेतासंज्ञो द्वितीयो युगचरणः १२९६०००। द्विगुणेन द्वापराख्यस्तृतीयः ८६४००। एकगुणेन कलिश्चतुर्थः ४३२०००। किंविशिष्टा एते युगचरणाः। स्वसन्ध्यकातदंशकैर्निजार्कभागसंमितैर्युताश्च। युगचरणप्रमाणस्य यो द्वादशांशस्तत्प्रमाणा तस्य चरणस्य सन्ध्या। सा चरणादौ भवति। तावांश्च सन्ध्यांशः। स चरणस्यान्ते। एवं स्वसन्ध्यासन्ध्यांशैः सह एते युगचरणाः कथिता इत्यर्थः। ततश्च कृतादौ सन्ध्यावर्षाणि१४४०००। कृतान्ते सन्ध्यांशः१४४०००। त्रेतादौ सन्ध्या १०८०००। त्रेतान्ते सन्ध्यांशः १०८०००। द्वापरादौ सन्ध्या७२०००। द्वापरान्ते सन्ध्यांशः ७२०००, कलेरादौ ३६००सन्ध्या तदन्ते ३६०० सन्ध्यांशः" प्रमि॰ "पदैश्चतुर्भिः सुकृतैःस्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे" नैष॰। २२४ पृ॰ अयशब्ददर्शिते ८चतुरङ्कयुक्ते पाशकभेदे १०स्तोमभेदे च तल्लैवोदा॰ ११पर्य्याप्ते त्रि॰ मेदि॰। भावे क्त। १२क्रियायां न॰ कृतपूर्व्वी कटम् कृतपूर्व्विशब्दे विवृतिः। १३दासभेदे पु॰ कृतदासशब्दे विवृतिः १४चतुःसंख्यायां "युग्माग्नी कृतभूतानि" ति॰त॰ निगमः। १५साधिते पक्वे त्रि॰ कृतान्नम्।

कृतक त्रि॰ कृतं करणं भावे क्त तत आगतः कन् कृतमेव स्वार्थे क कृन्तति स्वरूपं कृत-क्वुन् वा। १कृत्रिमे करणाज्जाते। कृत्रिमस्य स्वरूपाच्छादकत्वात् तथात्वम्। "यद्यत् कृतकं तदनित्यमिति न्यायः। "शब्दोऽनित्यः कृतकत्वात्" सुक्ता॰ "एतेन विधिना कृत्रः कृतकेन

यथाऽऽकृतः" भा॰ वि॰ २अ॰। "आर्य्यरूपसमाचारं चरन्तं कृतके पथि" भा॰आनु॰ २६०७ श्लो॰ "कच्चिन्न कृतकैर्दूतैरित्यादि' कच्चिदध्यायशब्दे दर्शितम्। "कृतकं कामिनि चुचुम्बे कृगाक्ष्या" माघः। २विड्लवणे न॰ अमरः।

कृतकर्म्मन् त्रि॰ कृतं कर्म्म येन। १दक्षे चतुरे कार्य्यक्षमे हेम॰। २कृतस्वकार्य्ये च "यावदस्तं न यात्येष कृतकर्म्मा दिवाकरः" रामा॰। कर्त्तव्यताशून्ये ३परमेश्वरे पु॰। "इन्द्रकर्म्मा महाकर्म्मा कृतकर्म्मा कृतागमः" विष्णु स॰ "कृतमेव न कर्त्तव्यं किञ्चित् कर्म्मास्य विद्यते धर्म्मात्मकं कर्म्म कृतं वा कृतकर्म्मा" भा॰। कृतकार्य्य कृतकृत्यादयोऽप्यत्र त्रि॰ "समूहकार्य्य आयतान् कृतकार्य्यान् विसर्ज्जयेत्"या॰स्मृ॰।"यथेष्टं गम्यतां तत्र कृतकार्य्योऽयं त्वया" भा॰आनु॰२८६२श्लो॰। "कृतकृत्योविधिर्मन्ये न वर्द्धयति तस्य ताम्" माघः। ५कृत्यतयादिमुक्ते संन्यासिनि। "ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। नैवास्ति किञ्चित् कर्त्तव्यमस्ति चेन्न स तत्त्ववित्"इत्युक्त्या तस्य समाप्तकृत्यत्वात्तथात्वम्"कृतकृत्यस्तु संन्यस्य स्यात्मात्मरतिर्भवेत्"। अकृतकृत्योहि मृत्योर्बिभेति यथाह "प्रायेणाकृतकृत्यत्वान्मृत्योरुद्विजते जनः" इति।

कृतकाल त्रि॰कृतः कालः समयोयेन। १कृतावधौ विवादौ। कर्म्म॰। २कृते समये पु॰ "कृतशिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे"या॰।कृतसमयादयोऽप्यत्र [च लिङ्का॰।

कृतकोटि पु॰ कृता कोटिर्येन। १काश्यपमुनौ २उपवर्षमुनौ

कृतक्रिय त्रि॰ कृता क्रिया येन। कृतनित्यादिकार्य्ये "विप्रः युध्यन्तपः स्पृशा क्षत्रियो वाहनायुधम्। वैश्यः प्रतोदं रश्मीन् वा यष्टिं शूद्रः कृतक्रियः" मनुः।

कृतक्षण त्रि॰ कृतः क्षणः समयो येन। लब्धावकाशे।"तमुतङ्कः प्रत्युवाच कृतक्षण एवास्मि शीघ्रमिच्छामि यथोपपन्नमन्नमुपकृतम्" भा॰ आ॰ ३अ॰। कृतसमयादयोऽप्यत्र

कृतघ्न त्रि॰ कृतं हन्ति हन-टक्। कृतोपकारस्यापकारके "शरणागतदीनस्त्रीहिंसकान् संवसेन्न तु। चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्" या॰ स्मृ॰ "बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्म्मतः। शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्" मनुः "कृतघ्नानाह स्कान्दपुराणम् "भर्त्तृपिण्डापहर्त्ता च पितृपिण्डापहारकः। तस्माद्दुष्टतरो ज्ञेयो विद्याश्च दायणां न प्रयच्छति। एतान् स्त्रियश्च योद्वेष्टि यश्चैतान् घातयेन्नरः। कृतघ्नं दोषं वदति यकामाच्च करोति यः। न मारयेत् कृतं यश्च आत्मवान् यस्तु दूषयेत्। सर्वैश्चान्यैर्विधिभिः सार्द्धं कृतघ्नानब्रवीन्मनुः" "ब्रह्मघ्ने च सुरापे च चौरे च गुरुतल्पगे। निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः"। "तस्मात् पित्रादिगुरोः कृतस्य सत् कर्म्म वदति शेषः। यकामाश्च करोति उपकर्त्तृ निति शेषः" प्रा॰ त॰ रघुनन्दनः।

कृतघ्नोपाख्यान न॰कृतघ्नविशेषस्योपाख्यानम्। भारतशान्तिपर्व्वान्तर्गते १६८ अध्यायमारभ्य १७२ अध्यायपर्य्यन्ते ग्रन्थे नाडीजङ्घशब्दे विवृतिः। "कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम्। अश्रद्धेयः कृतघ्नोहि कृतघ्ने नास्ति निष्कृतिः। मित्रद्रोहो न कर्त्तव्यः पुरुषेण विशेषतः। मित्रध्रुक् नरकं घोरमनन्तं प्रतिपद्यते। कृतज्ञेन सदा भाव्यं मित्रकार्य्येषु चैव ह। मित्राच्च लभते सर्व्वं मित्रात् पूजां लभेत च। मित्राद्भोगांश्च भुञ्जीत मित्रेणापत्सु मुच्यते। सत्कारैरुत्तमैर्मित्रं पूजयेत विचक्षणः। परित्याज्यो बुधैः पापः कृतघ्नो निरपत्रपः। मित्रद्रोही कुलाङ्गारः पापकर्म्मा नराधमः। एष धर्म्मभृतां श्रेष्ठ! प्रोक्तः पापो मया तव। मित्रद्रोही कृतघ्नो वै किंभूयः श्रोतुमिच्छसि"। भा॰शा॰१७२अ॰

कृतच्छिद्रा स्त्री कृतं छिद्रं यस्याम्। कोषातकीलतायाम्। राजनि॰।

कृतज्ञ त्रि॰ कृतं कृतोपकारं जानाति ज्ञा—क। १कृतोपकारज्ञातरि २तत्प्रत्युपकारके। "कृतज्ञेन सदा भाव्यम्" भा॰ शा॰ १७२ अ॰।३ कुक्कुरे पु॰ मेदि॰ स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। कृतं कार्य्यं जगत् जानाति ज्ञा—क, कृतं कार्य्यं ज्ञआत्मा यस्य वा।४ परमेश्वरे पु॰ "महर्षिः कपिलाचार्य्यः कृतज्ञोमेदिनीपतिः" विष्णु स॰ "कृतज्ञतामस्य वदन्ति सम्पदः" किरा॰।

कृतत्रा स्त्री कृतं त्रायते त्रै—क। त्रायमाणालतायां राजनि॰

कृतदास पु॰ कर्म्म॰। एतावत्कालं त्वद्दास इत्यभ्युपगमिते पञ्चदशदासान्तर्गते दासभेदे दासाश्च पञ्चदशविधाः मिता॰ दर्शिता यथा "गृहजातस्तथा क्रीतोलब्धोदायादुपागतः। अनाकालभृतस्तद्वदाहितः स्वामिना च यः। मोक्षितोमहतश्चर्णाद्युद्धप्राप्तः पणेजितः। तवाहमित्युपगतः प्रव्रज्यावसितः कृतः। भक्तदासश्च विज्ञेयस्तथैव वडवाहृतः। विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः" या॰।

'गृहे दास्यां जातो गृहजातः१ क्रीतो मूल्येन२। लब्धः३ प्रतिग्रहादिना। दायादुपागतः पित्रादिदासः४। अनाकालभृतो दुर्भिक्षे योदासत्वाय मरणाद्रक्षितः५। आहितः स्वामिना धनग्रहणेनाधितां नीतः६। ऋणमोचनेन दासत्वमभ्युपगतः ऋणदासः७। युद्धप्राप्तः समरे विजित्य गृहीतः८। पणेजितः यद्यस्मिन् विवादे पराजितोऽहन्तदा त्वद्दासो भवामीति परिभाष्य जितः९। तवाहमित्युपगतः तवाहन्दास इति स्वयम्प्रतिपन्नः१०। प्रव्रज्यावसितः प्रव्रज्यातश्च्युतः११। कृतः एतावत्कालं त्वद्दास इत्यभ्युपगमितः१२। भक्तदासः सर्वकालम्भक्तार्थमेव दासत्वमभ्युपगम्य यः प्रविष्टः१३। वडवाहृतः वडवा गृहदासी तया हृतस्तल्लोभेन तामुद्वाह्य दासत्वेन प्रविष्टः१४। य आत्मानं विक्रीणीते स आत्मविक्रेता''१५। इत्येवम्पञ्चदश प्रकारा'':।

कृतधी त्रि० कृता सम्पादिता धीर्येन। शास्त्राभ्याससंस्कृतान्तःकरणे, स्थिरचित्ते, ''कृतधीः किं प्रभाषेतेति'' ''कृतधीर्मुनिरुच्यते'' गीता।

कृतध्वज पु० नृपभेदे ''कुशध्वजस्तस्य पुत्रस्ततो धर्म्मध्वजो नृपः धर्म्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ'' भाग० ८,१०,१३, [अभ्यासनिपुणे अमरः।

कृतपुङ्ख पु० कृतः अभ्यस्तः पुङ्खः तद्युक्तोबाणो येन। शरा-

कृतपूर्व्वी त्रि० कृतं पूर्व्वमनेन ''सपूर्व्वाच्च'' पा० इनि। कृतपूर्व्वकर्म्मके तद्बोधप्रकारः सरलायामस्माभिर्निरूपितो यथा ''कृतपूर्व्वी कटं भुक्तपूर्व्वी ओदनमित्यादिमहाभाष्यकारप्रयोगा दृश्यन्ते तत्र च कृतं पूर्व्वमनेनेति विग्रहे ''सह सुपा'' इति पा०समासे पूर्व्वादिनिरितीनेरनुवृत्तिमता ''सपूर्व्वाच्चेति'' पा० सूत्रेण इनिर्विहितः तत्र यदि कृतमिति कर्म्मणि क्तः स्यात् तदा तस्य कटादिकर्म्मरूपविशेषणतया सापेक्षत्वेन पूर्व्वादिपदेन समासो न स्यात् एकत्र विशेषणतयोपस्थितस्यान्यत्र विशेषणतयान्वयायोगात् न वृत्तिसम्भवः। भाष्यप्रामाण्याच्च तत्र वृत्तौ सत्यामेवं रीतिराकलनीया तथाहि प्रथमं कर्म्माविवक्षयाऽकर्म्मकत्वेन भावे क्तप्रत्यये विहिते तदन्तेन पूर्व्वस्य ''सह सुपेति'' पा०समासे कृत तत्पूर्व्वकात् पूर्व्वशब्दादिनिप्रत्ययो भवति। पश्चाच्च कर्त्तृकृतक्रियायाः कर्म्माकाङ्क्षायां कटादिकर्म्मणोऽन्वयः एतदेव हरिणा दर्शित यथा ''अकर्म्मकत्वे सत्येव क्तान्ते भावाभिधायिनि। पश्चात् क्रियावता कर्त्रा योगो भवति कर्म्मणा। अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः। क्रिया सम्बध्यते तद्वत् कृतपूर्व्व्यादिषु स्थितेति''। गमनकर्तृवाचकगतादिमध्यपातिनी गमनक्रिया कर्त्तृविशेषणत्वेनोपस्थिता यथा अविग्रहा अनुबोधा तथा कृतपूर्व्वकर्त्तृबोधककृतपूर्व्विमध्यपातिन्यपीति तदर्थः''।

कृतप्रणाश पु० कृतयोः पुण्यापुण्ययोर्भोगमन्तरेण प्रणाशे नाशः। कृतहानौ दोषभेदे। स च दोषविशेषः कृतप्रणाशाकृताभ्यागमौ दोषौ जीवस्यानित्यत्वे प्रसक्तौ'' शा० सू० भा० दर्शितौ [स्त्री राजनि०

कृतफल न० कृतं फलमस्य। १कक्कोले २कोलशिम्ब्यां टाप्

कृतब्रह्मन् त्रि० कृतं ब्रह्म स्तोत्रं येन। कृतस्तोत्रे ''यन्वद्दनुष्मतः कृतब्रह्मा'' ऋ० २,२५,१,

कृतम् अव्य० कृत—बा० कमु। अलमर्थे, निषेधे च।

कृतमाल पु० कृता मालास्य। १आरग्वधे, (सोन्दाल) २कर्णिकारे च अमरः। ३कर्णिकारवृक्षे ४नदीभेदे स्त्री राजनि०। ५कृतमाल्ये मालाकारे त्रि०।

कृतमुख त्रि० कृतं संस्कृतं मुखं यस्य। पाण्डते अमरः

कृतरथ पु० १निमिवंश्ये नृपभेदे ''मेरोः प्रतीपस्तस्माच्च जातः कृतरथो यतः'' भाग० ९,१३,१, श्लो०। २सम्पादितरथे रथकारे त्रि०

कृतलक्षण त्रि० कृतानि लक्षणान्यस्य। १गुणैर्ख्याते अमरः। २कृतचिह्ने च ''ज्ञातिसम्बन्धिभिस्त्वेते त्यक्तव्याः कृतलक्षणाः'' मनुः।

कृतवर्म्मन् पु० कृतवीर्य्यभ्रातरि कनकनृपात्मजे। ''कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः। कृतवीर्य्यः कृतौजाश्च कृतवर्म्मा तथैव च। कृताग्निस्तु चतुर्थोऽभूत् कृतवीर्य्यादथार्ज्जुनः'' हरिवं ३१अ०। यदुवंश्ये २क्षत्रियभेदे ''समीपुत्रः प्रतिक्षत्रः प्रतिक्षत्रस्य चात्मजः। स्वयंभोजः, स्वयंभोजाद् हृदिकः सबभूव ह। तस्य पुत्रा बभूवुर्हि सर्व्वे भीमपराक्रमाः। कृतवर्म्माग्रजस्तेषां शतधन्वा तु मध्यमः'' हरि०वं०३९अ० ''रामे भारं समासज्य युयुधाने च वीर्य्यवान्। अक्रूरे विष्टथौ चापि गदे च कृतवर्म्मणि'' हरिवं०११३अ० [त्रिका०

कृतविद्य त्रि० कृता अभ्यस्ता विद्या येन। अभ्यस्तविद्ये

कृतवीर्य्य पु० कृतं वीर्य्यमनेन। १चन्द्रवंश्ये कार्त्तवीर्य्यार्ज्जुनजनके नृपभेदे। ''कनकस्य तु दायादाश्चत्वारो लोकविश्रुताः। कृतवीर्य्यः कृतौजाश्च कृतवर्म्मा तथैव च। कृताग्निस्तु चतुर्थोऽभूत् कृतवीर्य्यादथार्ज्जुनः'' हरिवं०

२१अ० तस्यापत्यम् अण्। कार्त्तवीर्य्य तदपत्ये कार्त्तवीर्य्यशब्दे विवृतिः "गर्भस्य सम्भवतः पूर्व्वं शिरः सम्भवतीत्याह शौनकः शिरोमूलत्वादिहेन्द्रियाणां, हृदयमिति कृतवीर्य्यः बुद्धेर्मनसश्च स्थानत्वात्" सुश्रुतः। २वीर्य्यान्विते त्रि० :

कृतवेतन त्रि० कृतं वेतनं यस्य। "योयावत् कुरुते कार्य्यं तावत्तस्येह वेतनम्" या० उक्तरीत्या कृतभृतिके दासे। "प्रमादद्दुष्टनष्टांश्च प्रदाप्यः कृतवेतनः" या०स्मृ०

कृतवेदिन् त्रि० कृतं वेत्ति विद–णिनि। कृतोपकारस्योपकारके स्त्रियां ङीप् [रत्नमा०

कृतवेध(क) पु० कृतो वेधोऽस्य वा कप्। श्वेतकोषातक्यां

कृतवेधना स्त्री कृतं वेधनं यस्याः। कोषातकीलतयाम् राजनि० [शिल्पोऽपि निवसेत् कृतकालं गुरोर्गृहे" या०

तशिल्प पु० कृतमभ्यस्तं शिल्पं येन। अभ्यस्तशिल्पे "कृत-

कृतश्रम त्रि० कृतः श्रमो येन। महोत्साहान्विते। "पौराणिकः पुराणे कृतश्रमः" भा० आ० ८५ श्लो०। २धर्म्मराजसभ्ये ऋषिभेदे 'वलीवाकः शिलीवाकः सत्यपालः कृतश्रमः', भा० स० ४अ० यमसभ्योक्तौ

कृतसंज्ञ त्रि० कृता संज्ञा संकेतो यस्मै। कृतसङ्केते दासादौ "गुल्मांश्च स्थापयेदाप्तान् कृतसंज्ञान् समन्ततः" मनुः २कृतचैतन्ये "नरेणाकृतसंज्ञेन विशुद्धेनान्तरात्मना" भा० आश्व०५अ०। कृतसंकेतादयोऽप्यत्र "नामसमेतं कृतसङ्केतम्" जयदेवः

कृतसापत्निका स्त्री कृतं सापत्न्यं यस्याः कप् टापि अत इत्त्वे यलोपः। अध्यूढायां स्त्रियां यस्या विवाहात् पश्चात् तत्पतिना विवाहान्तरं कृतं तस्याम् अमरः

कृतस्वर पु० कृतः स्वरः शब्द उपतापो वा येन यत्र वा। स्वर्णोत्पत्तिस्थाने स्वर्णाकरे कार्त्तस्वरः २कृतशब्दे त्रि०

कृतहस्त त्रि० कृतः अभ्यस्तः हस्तो वाणादित्यागमोक्षणलाघवरूपा हस्तशिक्षा येन। सुशिक्षितशरक्षेपे जने अमरः "अप्राप्तांश्चैव तान् (शरान्) पार्थश्चिच्छेद कृतहस्तवत्" भा०वि०१८७६ श्लो० "अप्राप्तांश्चैव तान् वाणान् चिच्छेद कृतहस्तवद्" हरिवं०१८१०५ श्लो०

कृताकृत न० कृतं कार्य्यञ्च अकृतं कारणं च समा० द्व०। १कार्य्यकारणयोः। "क्तेन नञ्विशिष्टेनानञ्" पा० कर्म्म०। कृते अकृते च २होमादौ। ऋत्विग्गणेषु ब्रह्मणः कृताकृतावेक्षणाय होमादौ वरणम् क्रियते इति याज्ञिकसम्प्रदायः। ३कृतशब्दोक्ते कात्यायनपरिभाषिते तण्डुलादौ कार्य्यकारणरूपे ४परमेश्वरे पु० "लोकाध्यक्षः सुराध्यक्षः गृहधर्म्मा कृताकृतः" विष्णुसं० "कृतश्च कार्य्यरूपेण, अकृतश्च कारणरूपेणेति कृताकृतः" भा०। भावे क्त कृतं करणम् अकृतमकरणं द्वन्द्व०। ५करणाकरणयोः न० द्वित्व०। "नैनं कृताकृते तपतः" शत० ब्रा०१४।७।२।२७। कृतञ्चाकृतञ्च। ६किञ्चित्कृते किञ्चिदकृते च "कृताकृतञ्च कनकं हस्तिनश्चाचलोपमाः" भा०आनु० ५३अ० "कृताकृतांस्तण्डुलांश्च पललौदनमेव च" या० स्मृ०

कृतागम पु० कृत आगमोवेन। १परमेश्वरे वेदशास्त्रकर्तृत्वात्तस्य तथात्वम्। "कृतकर्म्मा कृतागमः" विष्णुसं० कृतोवेदात्मकआगमोयेनेति कृतागमः "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेदश्च" इति श्रुतेः" भा० "कामः कान्तः कृतागमः" विष्णुसं०

कृताग्नि पु० कृतवीर्य्यानुजभ्रातरि। कृतवीर्य्यशब्दे विवृतिः

कृताङ्क पु० कृतसंख्यकचतुःसंख्यकोऽङ्कोयत्र। चतुःसंख्यान्विते पाशकभेदे [लुब्धे २संपुटीकृतहस्ते त्रि० भरणिः

कृताञ्जलि पु० कृतोऽञ्जलिरिव पत्रसङ्कोचो येन। १लज्जा-

कृतात्मन् पु० कृतः शिक्षितः संस्कृतो वा आत्माऽन्तःकरणं यस्य। १शिक्षितचित्ते, २शुद्धान्तःकरणे च। "गृहे गृहवतां नित्यमागच्छन्ति कृतात्मनाम्" "उच्चावचेषु भूतेषु दुर्ज्ञेयामकृतात्मभिः" मनुः "पर्य्याप्तकामस्य कृतात्मनस्तु इहैव सर्व्वे प्रविलीयन्ति कामाः"

कृतात्यय पु० कृतस्य कर्म्मजन्यभोगस्यात्ययोऽवसानम्। भोगं विना कृतकर्म्मनाशे 'कृतात्ययेऽनुशयवान्" या०स्मृ०

कृतानुकृत न० कृतस्यानुकृतमनुकरणम्। कृतप्रतिकृतौ कृतताडनादेस्ताडने "तौ जघ्नतुस्तदान्योन्यं कृतानुकृतकारिणौ" रामा० "कृतानुकारकृतप्रतिकृत्यादयोऽप्यत्र

कृतान्त पु० कृतः अन्तो विपर्य्ययनाशो–निश्चयो विषयपरिच्छेदो वा येन। १सिद्धान्ते। "कृतो नाशो येन। २दैवमात्रे ३पापे ४यमे च। ५पूर्व्वदेहजन्ये फलोन्मुखे ६दैवे अमरः ७शनौ ८तद्वारे च शब्दचि० "कृतान्तकुजयोर्वारे यस्य जन्मदिनं भवेत्" ति०त० ज्यो० ९यमदैवत्ये भरणीनक्षत्रे लक्षितलक्षणया १०द्वित्वसंख्ययाञ्च

कृतान्तजनक पु०६त०। सूर्य्ये हेमच० कृतान्तो जनकोयस्याः कालागुरुणि रेणुकागन्धद्रव्ये स्त्री शब्दच०

कृतान्न न० कृतं पक्वं तदन्नञ्च। लड्डुकादौ पक्वान्ने, "कृतान्नमुदकं स्त्रियः" इति ऋषिभाष्ये स्मृतिः। पाश्चात्य

भाषानामकाः कृतान्नभेदास्तत्साधनप्रकाराश्च भावप्र० दर्शिता यथा

अथ कृतान्नवर्गः तत्रान्नानां साधनप्रकारः सिद्धानां गुणाश्च तत्र परिभाषा। समवायिनि हेतौ ये मुनिभिर्भणिता गुणाः। कार्य्येऽपि तेऽखिला ज्ञेयाः परिभाषेति भाषिता। कचित्संस्कारभेदेन गुणभेदो भवेद्यतः। भक्तं लघु पुराणस्य शालेस्तच्चिपिटो गुरुः। कचिद्योगप्रभावेन गुणान्तरमपेक्षते। कदन्नं गुरु सर्पिश्च लघूक्तं सुहितं भवेत्।

अथ भक्तस्य नामानि साधनं गुणाश्च। भक्तमन्नं तथान्धश्च क्वचित्कूरञ्च कीर्त्तितम्। ओदनोऽस्त्री स्त्रियां भिस्सा-दीदिवः पुंसि भाषितः। सुधौतास्तण्डुलाः स्फीतास्तोये पञ्चगुणे पचेत्। तद्भक्तं प्रस्रुतं चोष्णं विशदं गुणवन्मतम्। भक्तं वह्निकरं पथ्यं तर्पणं रोचनं लघु। अधौतमस्रुतं शीतं गुर्व्वरुच्यं कफप्रदम्।

अथ (दालि)। दलितन्तु शमीधान्यं दालिर्दाली स्त्रियामुभे। दाली तु सलिले सिद्धा लवणार्द्रकहिङ्गुभिः। संयुक्ता सूपनाम्नी स्यात् कथ्यन्ते तद्गुणा अथ। सूपो विष्टम्भको रूक्षः शीतस्तु स विशेषतः। निस्तुषो भृष्टसंसिद्धः लाघवं सुतरां व्रजेत्।

अथ (खिचिड़ी)। तण्डुला दालिसंमिश्रा लवणार्द्रकहिङ्गुभिः। संयुक्ता सलिले सिद्धा कृशरा कथिता बुधैः। कृशरा शुक्रला बल्या गुरुः पित्तकफप्रदा। दुर्जरा बुद्धिविष्टम्भमलमूत्रकरी स्मृता।

अथ तापहरी (तातारीति) लोके। घृते हरिद्रासंयुक्ते माषजाम्भञ्जयेद्वटीम्। तण्डुलांश्चापि निर्धौतान् सहैव परिभर्जयेत्। सिद्धियोग्यं जलं तत्र प्रक्षिप्य कुशलः पचेत्। लवणार्द्रकहिङ्गूनि मात्रया तत्र निःक्षिपेत्। एषा सिद्धिः समानत्वा प्रोक्ता तापहरी बुधैः। एषा तापहरी बल्या वृष्या श्लेष्माणमाहरेत्। वृंहणी तर्पणी रुच्या गुर्व्वी पित्तहरी स्मृता।

अथ क्षीरिका। पायसः परमान्नं स्यात् क्षीरिकापि तदुच्यते। शुद्धेऽर्द्धपक्के दुग्धे तु घृताक्तांस्तण्डुलान् पचेत्। ते सिद्धा क्षीरिका ख्याता रुसिताज्ययुतोत्तमा। क्षीरिका दुर्जरा प्रोक्ता वृंहणी बलवर्द्धिनी। नालिकेरन्तु नूतन्य च्छिन्नं पयसि गोः क्षिपेत्। सिताशव्याज्यसंयुक्ते तत्पचेन्मृदुनाऽग्निना। नारीकेलोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा। गुर्व्वी सुमधुरा वृष्या रक्तपित्तानिलापहा।

अथ (सेवइ)। समितां वर्त्तिकां कृत्वा सूक्ष्मां तु यवसन्निभाम्। शुष्का क्षीरेण संसाध्या भोज्या घृतसितान्विता। सेविका तर्पणी बल्या गुर्व्वी पित्तानिलापहा। ग्राहिणी सन्धिकृद्रुच्या तां खादेन्नातिमात्रया।

अथ (मण्डा)। गोधूमा धवला धौताः कुट्टिताः शोधितास्ततः। प्रोक्षिता यन्त्रनिष्पिष्टाश्चालिताः समिताः (मयदा) स्मृताः। वारिणा कोमलां कृत्वा समितां साधु मर्द्दयेत्। हस्ततालनया तस्या लोप्त्रीं सम्यक् प्रसारयेत्। अधोमुखघटस्यैतत् विस्तृतं प्रक्षिपेद्वहिः। मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते। लोप्त्री (लाइ)। दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः। अथ वा सिद्धमांसेन सतक्रवटकेन वा। मण्डको वृंहणो वृष्यो बल्यो रुचिकरो भृशम्। पाकेऽपि मधुरो ग्राही लघुर्दोषत्रयापहः।

अथ (पोरी) कुत्रापि (दुनौरी) इति च। "कुर्य्यात्समितयाऽतीव तन्वी पर्प्पटिका ततः। स्वेदयेत्तप्तके (ताओया) तान्तु पोलिकां जगदुर्बुधाः। तां खादेल्लप्सिकायुक्तां तस्या मण्डकवद्गुणाः।

अथ प्रसङ्गाल्लप्सी। समितां सर्पिषा भृष्टां शर्करां पयसि क्षिपेत्। तस्मिन् घनीकृते न्यस्येल्लवङ्गं मरिचादिकम्। लप्सिका वृंहणी वृष्या बल्या पित्तानिलापहा। स्निग्धा श्लेष्मकरी गुर्व्वी रोचनी तर्पणी परम्।

(रोटि)। शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च पोलिकाम्। तप्तके (ताओया)। स्वेदयेत्कृत्वा भूर्य्यङ्गारेऽपि तां पचेत्। सिद्धैषा रोटिका प्रोक्ता गुणं तस्याः प्रचक्ष्महे। रोटिका बलकृद्रुच्या वृंहणी धातुवर्द्धनी। वातघ्नी कफकृद्गुर्व्वी दीप्ताग्नीनां प्रपूजिता।

अथ (लिट्टी) शुष्कगोधूमचूर्णन्तु साम्बु गाढं विमर्द्दयेत्। विधाय वटकाकारं निर्धूमेऽग्नौ शनैः पचेत्। अङ्गारकर्कटी ह्येषा वृंहणी शुक्रला लघुः। दीपनी कफकृद्बल्या पीनसश्वासकासजित्।

अथ (यवरोटी)। यवजा रोटिका रुच्या मधुरा विशदा लघुः। मलशुक्रानिलकरी बल्या हन्ति कफामयान्।

अथ माषरोटिका। माषाणां दालयस्तोये स्थापितास्त्यक्तकञ्चुकाः। आतपे शोषिता यन्त्रे पिष्टास्ता धूमसी स्मृता। धूमसी रचिता चैव प्रोक्ता भर्भरिका बुधैः। भर्भरी कफपित्तघ्नी किञ्चिद्वातकरी स्मृता।

अथ चणकरोटिका। चणक्यारोटिका रूक्षा श्लेष्मपित्तास्रनु-

कुरुः । विष्टम्भिनी न चक्षुष्या तद्गुणा चातिशष्कुली" ।
अथ पिष्टिका । दालिः संस्थापिता तोये ततोऽपहृतकञ्चुका । शिलायां साधु सम्पिष्टा पिष्टिका कथिता बुधैः ॥

अथ (बेठई) । माषपिष्टिकया पूर्णगर्भा गोधूमचूर्णतः । रचिता रोटिका सैव प्रोक्ता बेढमिका बुधैः । भवेद्वेढमिका बल्या वृष्या रुच्याऽनिलापहा । उष्णसन्तर्पणी गुर्वी वृंहणी शुक्रला परम् । भिन्नमूत्रमला स्तन्यमेदःपित्तकफप्रदा । गुदकीलार्द्दितश्वासपङ्क्तिशूलानि नाशयेत् ।

अथ (पापर) धूमसी रचिता हिङ्गुहरिद्रालवणैर्युता । जीरकस्वर्जिकाभ्याञ्च तनूकृत्य च वेल्लिता । पर्प्पटास्ते सदाङ्गारभ्रष्टाः परमरोचकाः । दीपनाः पाचना रूक्षा गुरवः किञ्चिदीरिताः । मौद्गाश्च तद्गुणाः प्रोक्ता विशेषाल्लघवो हिताः । चनकस्य गुणैर्युक्ताः पर्प्पटाश्चनकोद्भवाः । स्नेहभ्रष्टास्तु ते सर्वे भवेयुर्मध्यमा गुणैः ।

अथ (पूरी) । माषाणां पिष्टिका पूर्व्वा लवणार्द्रकहिङ्गुभिः । तया पिष्टिकया पूर्णा समिताकृतपोलिका । ततस्तैलेन पक्वा सा पूरीका कथिता बुधैः । रुच्या स्वाद्वी गुरुः स्निग्धा बल्या पित्तासृद्दूषिका । चक्षुस्तेजोहरी चोष्णा पाके वातविनाशिनी । तथैव घृतपक्वापि चक्षुष्या रक्तपित्तहृत् ।

अथ (वरा) । माषाणां पिष्टिका युक्ता लवणार्द्रकहिङ्गुभिः । कृत्वा विदध्याद्वटकांस्तांस्तैलेषु पचेच्छनैः । विशुष्का वटका बल्या वृंहणी वीर्य्यवर्द्धनी । वातामयहरा रुच्या विशेषादर्द्दितापहा । विबन्धभेदिनी श्लेष्मकारिणोऽत्यग्निपूजिता । संचूर्ण्य निक्षिपेत्तक्रे भृष्टं जीरकहिङ्गुभिः । लवणं तत्र वटकान् सकलानपि मज्जयेत् । शुक्रलस्तत्र वटको बलकृद्रोचनो गुरुः । विबन्धहृद्विदाही च श्लेष्मलः पवनापहः । राज्यक्तपातिनो वाम्यान् पाचनांस्तांस्तु भक्षयेत् राज्यका (राइता) इति लोके ।

अथ (काञ्जीवरा) । मन्थनी नूतना धार्य्या कटुतैलेन लेपिता । निर्म्मलेनाम्बुनापूर्य्य तस्यां चूर्णं विनिःक्षिपेत् । राजिकाजीरलवणहिङ्गुशुण्ठीनिशाकृतम् । निःक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् । ततो दिनत्रयादूर्द्ध्वमम्लाः स्युर्वटका ध्रुवम् । काञ्जिको वटको रुच्यो वातघ्नः श्लेष्मकारकः । शीतो दाहं शूलमजीर्णं हरते दृगामयेष्वहितः ।

(दहीवड़ा) । अम्लिकां स्वेदयित्वा तु जलेन सह मर्द्दयेत् । तक्रीरे कृतसंस्कारे वटकान्मज्जयेज्जनः । अम्लिका वटकास्ते तु रुच्या वह्निप्रदीपनाः । वटकस्तत्र गुणैः पूर्व्वैरेषोऽपि च समन्वितः ।

अथ (मुगवड़ा) मुद्गानां वटकास्तद्वत् (ताञ्ज्ञोया) भर्जिता लघवो हिमाः । संस्कारजप्रभावेन त्रिदोषशमना हिताः ।

अथ (माषवड़ा) माषाणां पिष्टिका हिङ्गुलवणार्द्रकसंस्कृता । तया विरचिता वस्त्रे वटिकाः साधुशोषिताः । भर्जितास्तप्ततैलैस्ता अथवाम्बुप्रयोगतः । वटकस्य गुणैर्युक्ता ज्ञातव्या रुचिदा भृशम् ।

अथ (कोँहड़ावड़ी) । कूष्माण्डकवटी ज्ञेया पूर्व्वोक्तवटिकागुणाः । विशेषात्पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ।

अथ (मुद्गवटी) मुद्गानां वटिका तद्वद्रचिता साधिता तथा । पथ्या रुच्या तथा लघ्वी मुद्गसूपगुणा स्मृता ।

(चरिकवच्छ) । माषपिष्टिकया लिप्तं नागवल्लीदलं महत् । तत्तु संस्वेदयेत् युक्त्या स्थाल्यामास्तारकोपरि । ततो निष्कास्य तं खण्डन्ततस्तैलेन भर्जयेत् । खण्डंत्र खण्डेन योग्यमिति यावत् । अलीकमत्स्यत्र उक्तोऽयं प्रकारः पाकपण्डितैः । तं हन्ताकभटित्रेण वास्तूकेन च भक्षयेत् ।

अथ (कड़ी) । स्थाल्यां घृते वा तैले वा हरिद्राहिङ्गु भर्जयेत् । अवलेहनसंयुक्तं तक्रन्तत्रैव निःक्षिपेत् । एषा सिद्धा समरीचा कथिता कथिता बुधैः । अवलेहनम् । (अरिहन) इति लोके । कथिता पाचनी रुच्या लघ्वी वह्निप्रदीपनी । कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिणी । अलीकमत्स्यत्राः शुष्का वा किं वा कथितया पुनः । वृंहणा रोचना वृष्या बल्या वातगदापहाः । कोष्ठशुद्धिकराः शुक्राः किञ्चित्पित्तप्रकोपनाः । अर्द्दिते हनुस्तम्भे विशेषेण हिताः स्मृताः ।

अथ (आदवरा) । मुद्गपिष्टाविरचितान् वटांस्तैलेन पाचितान् । हस्तेन चूर्णयेत्सम्यक् तस्मिंश्चूर्णे विनिःक्षिपेत् । भृष्टं हिङ्ग्वार्द्रकं सूक्ष्मं मरीचं जीरकं तथा । निम्बूरसं यवानीं च युक्त्या सर्वं विमिश्रयेत् । मुद्गपिष्टं पचेत्सम्यक् स्थाल्यामास्तारकोपरि । तस्यास्तु गोलकं कुर्य्यात् तन्मध्ये पूरणं क्षिपेत् । तैले तान् गोलकान् पक्त्वा कथितायां निमज्जयेत् । गोलकाः पाचकाः प्रोक्तास्ते त्वार्द्रकवटा अपि । मुद्गार्द्रकवटा रुच्याः लघवो बलकारकाः । दीपनास्तर्पणाः पथ्यास्त्रिषु दोषेषु पूजिताः ।

(पकौरी) दालयश्चनकानान्तु निस्तुषा यन्त्रपेषिताः । तच्चूर्णं वेशनं प्रोक्तं पाकशास्त्रविशारदैः । वटिका वेशनस्यापि कथितायां निमज्जिताः । रुच्या विष्टम्भजननी बल्या

पुष्टिकरी स्मृता। एवमन्येऽपि वेशनभवा: प्रकारा: खण्डनखण्डप्रभृतयो बोद्धव्या:।

अथ मांसस्य प्रकारा:। तत्र शुद्धमांसम्। (सुधमाँस) इति लोके। पाकपात्रे घृतं दद्यात् तैलञ्च तदभावत:। तत्र हिङ्गु हरिद्रां च भर्जयेत्तदनन्तरम्। छागादेरस्थिरहितं मांसं तत्खण्डितं भृशम्। धौतं निर्गालितं तस्मिन् घृते तद्भर्जयेच्छनै:। सिद्धियोग्यं जलं दत्त्वा लवणन्तु पचेत्तत:। सिद्धे जलेन सम्पिष्य वेशवारं परिक्षिपेत्। वेशवार: (वेशम) इति लोके। द्रव्याणि वेशवारस्य नागवल्ल्योदलानि च। तण्डुलाश्च लवङ्गानि मरीचानि समासत:। अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम्। शुद्धमांसं परं हृद्यं बल्यं रुच्यञ्च बृंहणम्। त्रिदोषशमनं श्रेष्ठं दीपनं धातुवर्द्धनात्।

अथ सहार्द्रकम् (सहरमांस) इति लोके। छागादेर्मांसमूर्वादे: कुट्टितं खण्डितं पुन:। शुद्धमांसविधानेन पचेदेतत्सहार्द्रकम्। सहार्द्रकं गुणाद्यन्थे शुद्धमांसगुणं स्मृतम्।

अथ तक्रमांसम् (अखनी) पाकपात्रे घृतं दत्त्वा हरिद्रा हिङ्गु भर्जयेत्। छागादे: सकलस्यापि खण्डान्यपि च भर्जयेत्। सिद्धियोग्यं जलं दत्त्वा पचेन्मृदुतरं यथा। जीरकादियुते तक्रे मांसखण्डानि तारयेत्। तक्रमांसन्तु वातघ्नं लघु रुच्यं बलप्रदम्। कफघ्नं पित्तलं किञ्चित् सर्वाहारस्य पाचनम्।

अथ हरीसा (आस)। पाकपात्रे तु हहति मांसखण्डानि नि:क्षिपेत्। पानीयं प्रचुरं सर्पि: प्रभूतं हिङ्गु जीरकम्। हरिद्रामार्द्रकं शुण्ठीं लवणं मरिचानि च। तण्डुलांश्चापि गोधूमान् जम्बीराणां रसान् बहून्। यथा सर्वाणि वस्तूनि सुपक्वानि भवन्ति हि। तथा पचेत् तु निपुणो बहुमांसस्थितिर्यथा। एषा हरीसा बलकृत् वातपित्तापहा गुरु:। शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी।

तलितमांसम्। शुद्धमांसविधानेन मांसं सम्यक्प्रसाधितम्। पुनस्तदाज्ये सम्भृष्टं तलितं प्रोच्यते बुधै:। तलितं बलमेधाग्निमांसौज:शुक्रवृद्धिकृत्। तर्पणं लघु सुस्निग्धं रोचनं दृढताकरम्।

अथ शूल्यम् (सीख) कालखण्डादिमांसानि ग्रथितानि शलाकया। तैलं सलवणं दत्त्वा निर्धूमे दहने पचेत्। तत्तु शूल्यमिदं प्रोक्तं पाककर्मविचक्षणै:। शूल्यं पलं सुधासमं रुच्यं वह्निकरं लघु। कफवातहरं बल्यं किञ्चि-

त्पित्तकरं हि तत्। (इदमेव शूलाकृतं भट्टित्रमित्युच्यते) मांसशृङ्गाटिकम्। सिद्धमांसं तनूकृत्य कर्त्तितं स्वेदितं जले। लवङ्गहिङ्गुलवणमरिचार्द्रकसंयुतम्। एलाजिरकधन्याकनिम्बूरससमन्वितम्। घृते सुगन्धे तद्भृष्टं मांसशृङ्गाटिकोच्यते। मांसशृङ्गाटकं रुच्यं बृंहणं बलकृद्गुरु। वातपित्तहरं हृद्यं कफघ्नं वीर्य्यवर्द्धनम्।

अथ मांसरसा। सिद्धमांसरसो रुच्य: श्रमश्वासक्षयापह:। प्रीणनो वातपित्तघ्न: क्षीणानामल्परेतसाम्। विश्लिष्टभग्नसन्धीनां कृशानां शुद्धिकाङ्क्षिणाम्। स्मृत्योजोबलहीनानां ज्वरक्षीणक्षतोरसाम्। शस्यते स्वरहीनानां दृष्ट्यायु:श्रवणार्थिनाम्। प्रकारा: कथिता: सन्ति बहवो मांससम्भवा:। ग्रन्थविस्तारभीतैस्ते मया नात्र प्रकीर्त्तिता:। (ते च सुश्रुतेऽन्नगुणकथानऽनुपदं वक्ष्यन्ते)

शाकपाकविधि:। हिङ्गु जीरयुते तैले क्षिपेच्छाकं सुखण्डितम्। लवणं चाम्लचूर्णादि सिद्धे हिङ्गूदकं क्षिपेत्। इत्येवं सर्वशाकानां साधनोऽभिहितो विधि:।

अथ मठक: (माठ) इति लोके। समितामर्द्दयेदन्यजलेनापि च सञ्चयेत्। तस्मात्तु वटिकां कृत्वा पचेत्सर्पिषि नीरसम्। एलालवङ्गकर्पूरमरीचाद्यैरलङ्कृते। मज्जयित्वा सितापाके ततस्तच्च समुद्धरेत्। अयं प्रकार: संसिद्धो मठ इत्यभिधीयते। सञ्चयेत् मर्द्दयेत्। मठस्तु बृंहणो वृष्यो बल्य: सुमधुरो गुरु:। पित्तानिलहरो रुच्यो दीप्ताग्नीनां सुपूजित:। समिता: शर्करासर्पिर्निर्मिता अपरेऽपि ये। प्रकारा अमुना तुल्यास्तेऽपि चैतद्गुणा: स्मृता:।

अथ सम्याव:(पेराकी)पर्य्याय: साज्यसमिता निर्मिता घृतमर्जिता:। कुट्टिताश्चालिता: शुद्धशर्कराभिर्विमर्द्दिता:। तत्र चूर्णं क्षिपेदेलालवङ्गमरिचानि च। नालिकेलं रुकर्पूरञ्चारवीजान्यनेकधा। घृताक्तसमिता पुष्टरोटिका रचिता तत:। तदन्त: पूरणं तस्या: कुर्य्यान्मुद्रां दृढां सुधी:। सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जन:। प्रकारत्तै: प्रकारोऽयं सम्याव इति कीर्त्तित:।

अथ कर्पूरनालिका। घृताढ्यया समितया लम्बं कृत्वा पुटं तत:। लवङ्गोल्लणकर्पूरयुतया सितयाऽन्वितम्। पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका। सम्यावसदृशी ज्ञेया गुणै: कर्पूरनालिका।

फेनिका (फेनी) समितायां घृताढ्याया वर्त्तिं दीर्घां समाचरेत्। तास्तु सन्निहिता दीर्घा: पीठस्योपरि धारयेत्

वेल्लयेद्वेल्लनेनैतां यथैका पर्पटी भवेत्। ततश्छुरिकया तान्तु सलग्नामेव कर्त्तयेत्। ततस्तु वेल्लयेद्भूयः शट्टकेन च लेपयेत्। शालिचूर्णं घृतं तोयं मिश्रितं शट्टकं वदेत्। ततः संहृत्य तल्लोप्त्रीं विदधीत पृथक् पृथक्। पुनस्तां वेल्लयेल्लोप्त्रीं यथा स्यान्मण्डलाकृतिः। ततस्तां सुपचेदाज्ये भवेयुश्च पुटाः स्फुटाः। सुगन्धया शर्करया तदुद्धूलनमाचरेत्। सिद्धैषा फेनिका नाम्ना मण्डकेन समा गुणैः। ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः। वेल्लयेत् प्रसारयेत् वेल्लनम् (वेलन) इति लोके। पर्प्पटी रोटी। लोप्त्री (लाइ) इति लोके।

अथ शष्कुली(सोहाली) इति लोके। समितायां घृताक्तायां लोप्त्रीं कृत्वा च वेल्लयेत्। आज्ये तां भर्जयेत्सिद्धां शष्कुली फेनिकागुणा।

अथ मोदकः (लाड्डू)। श्यामया समितया कृत्वा स्थूलाश्रितानि तु। निपुणो भर्जयेदाज्ये खण्डपाकेन योजयेत्। युक्तेन मोदकान् कुर्य्यात् ते गुणैर्मण्डका यथा।

अथ मुद्गमोदकः (मोतिचुरलाड्डू)। मुद्गानां धूमसीं सम्यक् घोलयेन्निर्मलाऽम्बुना। कटाहस्थघृतस्योर्द्ध्वं झर्झरं स्थापयेत्ततः। धूमसीन्तु द्रवीभूतां प्रक्षिपेत् झर्झरोपरि। पतन्ति विन्दवस्तस्मात् तान् सुपक्वान् समुद्धरेत्। सितापाकेन संयोज्य कुर्य्याद्धस्तेन मोदकान्। झर्झरं (झाझरा) इति लोके। लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः। चक्षुष्यो ज्वरहृद्बल्यस्तर्पणो मुद्गमोदकः।

अथ सेवनमोदकः(सेओकालड्डुआ)। एवमेव प्रकारेण कार्य्याः सेवनमोदकाः। ते बल्या लघवः शीता किञ्चिद्वातकरास्तथा। विष्टम्भिनो ज्वरघ्नाश्च पित्तरक्तकफापहाः

दुग्धकूपिका। तण्डुलचूर्णविमिश्रितनष्टक्षीरेण सान्द्रपिष्टेन। दृढकूपिकां विदध्यात्ताञ्च पचेत्सर्पिषा सम्यक्। अथ तां पूरितमध्यां घनपयसा पूर्णगर्भाञ्च। शट्टकछादितवदनां सर्पिषि सुपक्ववदनाञ्च। अथ पाण्डुखण्डपाके स्नापयेत् कर्पूरवासिते कुशलः। अथ दुग्धकूपिका सा बल्या पित्तानिलापहा कथिता। वृष्या शीता गुर्व्वी शुक्रकरी बृंहणी रुच्या। शिवयति कायपुष्टिं दृष्टिं दूरप्रसारिणीं सुचिरम्।

कुण्डलिनी (जिलेपी) नूतनं घटमानीय तस्यान्तः कुशलो जनः। प्रस्थार्द्धचूर्णदमानेन भाऽम्लेन प्रलेपयेत्। द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्। घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्। आतपे स्थापयेत्तावद्यावद्याति तदम्लताम्। ततस्तत्प्रक्षिपेत्पात्रे सच्छिद्रे भाजने तु तत्। परिभ्राम्य परिभ्राम्य तत्सन्तप्ते घृते क्षिपेत्। पुनः पुनस्तदावृत्त्या विदध्यान्मण्डलाकृतिम्। तां सुपक्वां घृतान्नीत्वा सितापाके तनुद्रवे। कर्पूरादि सुगन्धञ्च स्नापयित्वोद्धरेत्ततः। एषा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा। धातुवृद्धिकरी वृष्या रुच्या च क्षिप्रतर्पणी।

अथ पश्चात्परिवेश्या रसाला। (शिखरिणी) आदौ माहिषमम्लमम्बुरहितं दध्याढकं शर्करां शुभ्रां प्रस्थयुगोन्मितां शुचिपटे किञ्चिच्च किञ्चित् क्षिपेत्। दुग्धेनार्द्धघटेन मृण्मयनवस्थाल्यां दृढं स्रावयेत् एलाबीजलवङ्गचन्द्रमरिचैर्योग्यैश्च तद्योजयेत्। भीमेन प्रियभोजनेन रचिता नाम्ना रसाला स्वयम् श्रीकृष्णेन पुरा पुनः पुनरियं प्रीत्या समास्वादिता। एषा येन वसन्तवर्जितदिने संसेव्यते नित्यशः तस्य स्यादतिवीर्य्यवृद्धिरनिशं सर्व्वेन्द्रियाणां बलम्। ग्रीष्मे तथा शरदि ये रविशोषिताङ्गाः ये च प्रमत्तवनितासुरतातिखिन्नाः। ये चापि मार्गपरिसर्पणशीर्णगात्रास्तेषामियं वपुषि पोषणमाशु कुर्य्यात्। रसाला शुक्रला बल्या रोचनी वातपित्तजित्। दीपनी बृंहणी स्निग्धा मधुरा शिशिरा सरा। रक्तपित्तं तृषादाहं प्रतिश्यायं विनाशयेत्।

अथ शर्करोदकम् (सरवत्) जलेन शीतलेनैव घोलिता शुभ्रशर्करा। एला लवङ्गकर्पूरमरिचैश्च समन्विता। शर्करोदकनाम्ना तत् प्रसिद्धं विदुषां मुखे। शर्करोदकमाख्यातं शुक्रलं शिशिरं सरम्। बल्यं रुच्यं लघु स्वादु वातपित्तप्रशामनम्। मूर्च्छाच्छर्द्दितृषादाहज्वरशान्तिकरं परम्।

अथ प्रपानकम् (पना)। तत्र आम्रफलप्रपानकम्। आम्रमामं जले स्विन्नं मर्द्दितं दृढपाणिना। सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम्। प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्म्मितम्। सद्यो रुचिकरं बल्यं शीघ्रमिन्द्रियतर्पणम्।

अथाम्लिकाफलपानकम्। अम्लिकायाः फलं पक्वं मर्द्दयेत् वारिणा दृढम्। शर्करामरिचैर्मिश्रं लवङ्गेन्दुसुवासितम्। अम्लिकाफलसम्भूतं पानकं वातनाशनम्। पित्तश्लेष्मकरं किञ्चित् सुरुच्यं वह्निबोधनम्।

निम्बूकफलपानकम्। भागैकं निम्बुजं तोयं षड्भागं शर्करोदकम्। लवङ्गमरिचैर्मिश्रं पानं पानकमुत्तमम्। निम्बूफलभवं पानमत्यम्लं वातनाशनम्। वह्निदीप्तिकरं रुच्यं समस्ताहारपाचकम्।

धान्याकपानकम् । निशायां साधु संस्पृष्टं धान्यकं वस्त्रगालितम् । शर्करोदकसंयुक्तं कर्पूरादिसुसंस्कृतम् । नूतने मृण्मये पात्रे स्थितं पित्तहरं परम् ।

अथ काञ्जी । काञ्जीविविवेटकावसरे लिखितः । काञ्जीकं रोचनं रुच्यं पाचनं वह्निदीपनम् । शूलजीर्णविबन्धघ्नं कोष्ठशुद्धिकरं परम् । न भवेत् काञ्जिकं यत्र तत्र जालिः प्रदीयते ।

अथ जालिः । आममाम्रफलं पिष्टं राजीकालवणान्वितम् । भृष्टहिङ्गुयुतं पूतं घोलितं जालिरुच्यते । जालिर्हरति जिह्वायाः कुण्ठत्वं कण्ठशोधनी । मन्दमन्दन्तु पीता सा रोचनी वह्निवर्धिनी ।

अथ तक्रम् । तूर्य्यांशेन जलेन संयुतमतिस्थूलं सदम्लं दधि प्रायो माहिषमम्बुकेन विमले मृद्भाजने घोलयेत् । भृष्टं हिङ्गु च जीरकञ्च लवणं राजीञ्च किञ्चिन्मिताम् पिष्टान्नत्र विमिश्रयेद्भवति तत्तक्रं न कस्य प्रियम् । तक्रं रुचिकरं वह्निदीपनं पाचनं परम् । उदरे ये गदास्तेषां नाशनं तृप्तिकारकम् ।

अथ दुग्धम् । विदाहीन्यन्नपानानि यानि भुङ्क्ते हि मानवः । तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत् । दुग्धस्यापरे गुणा उक्ता एव दुग्धवर्गे ।

अथ सक्तवः । धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि सक्तवः ।

तत्र यवसक्तवः । यवजाः सक्तवः शीता दीपना लघवः सराः । कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः । ते पीता बलदा वृष्या वृंहणा भेदनास्तथा । तर्पणा मधुरा रुच्याः परिणामे बलावहाः । कफपित्तश्रमक्षुत्तृड्व्रणनेत्रामयापहाः । प्रशस्ता घर्मदाहाढ्यव्यायामार्त्तशरीरिणाम् ।

चणकयवसक्तवः । निस्तुषैश्चणकैर्भृष्टैस्तुर्य्यांशेन यवैः कृताः । सक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ।

शालिसक्तवः । सक्तवः शालिसम्भूता वह्निदा लघवो हिमाः । मधुरा ग्राहिणो रुच्याः पथ्याश्च बलशुक्रदाः । न भुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् ।

न जलान्तरितान् तद्वत् सक्तूनद्यान्न केवलान् । पृथक् पानं पुनर्दानं आमिषं पयसा निशि । दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु वर्जयेत् ।

अथ धाना(बहुरी) यवास्तु निस्तुषा भृष्टाः स्मृता धाना इति स्त्रियाम् । धानाः स्युर्दुर्जरा रूक्षास्तृट्प्रदा गुरवश्च ताः । तथा मेहकफच्छर्दिनाशिन्यः सम्प्रकीर्त्तिताः ।

अथ लाजाः । येषां स्युस्तण्डुलास्तानि धान्यानि सतुषाणि च । भृष्टानि स्फुटितान्याहुर्लाजा इति मनीषिणः । लाजाः स्युर्मधुराः शीता लघवो दीपनाश्च ते । स्वल्पमूत्रमला रूक्षा बल्याः पित्तकफच्छिदः । छर्द्यतीसारदाहास्रमेहमेदस्तृषापहाः ।

अथ पृथुकाः(चिड़ुआ) । शालयः सतुषा आर्द्रा भृष्टा अस्फुटिताश्च ते । कुट्टिताश्चिपिटाः प्रोक्तास्ते स्मृताः पृथुका अपि । पृथुका गुरवो वातनाशनाः श्लेष्मला अपि । सक्षीरा वृंहणा वृष्या बल्या भिन्नमलाश्च ते ।

अथ होलकः (होरहा) । अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः । होलकोऽल्पानिलोमेदःकफदोषत्रयापहः । भवेद्यो होलको यस्य स च तत्तद्गुणो भवेत् ।

अथ उम्बी । मञ्जरी त्वर्द्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेन संभृष्टा बुधैरुम्बीति सा स्मृता । (उमिया) इति लोके । उम्बी कफप्रदा बल्या लघ्वी पित्तानिलापहा ।

अथ कुल्माषाः(घुघुनी) अर्द्धस्विन्नास्तु गोधूमा अन्येऽपि चणकादयः । कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः । कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ।

अथ पललम् (तिलकुट) पललन्तु समाख्यातं सैव सतिलपिष्टकम् । पललं मलकृद्वृष्यं वातघ्नं कफपित्तकृत् । वृंहणञ्च गुरु स्निग्धं मूत्राधिक्यनिवर्त्तकम् ।

अथ पिण्याकः (पीना) । तिलकिट्टन्तु पिण्याकस्तथा तिलखलः स्मृतः । पिण्याको लेखनो रूक्षो विष्टम्भी दृष्टिदूषणः ।

अथ (चाउर) तण्डुलो मेहजन्तुघ्नः स नवस्त्वतिदुर्जरः" ।

अन्येऽपि कृतान्नप्रकाराः पाकशास्त्रे द्रष्टव्याः

कृतान्नविशेषगुणाश्च सुश्रुते दर्शिता यथा

"अतः परं प्रवक्ष्यामि कृतान्नगुणविस्तरम् । लाजमण्डो विशुद्धानां पथ्यः पाचनदीपनः । वातानुलोमनो हृद्यः पिप्पलीनागरायुतः । स्वेदाग्निजननी लघ्वी दीपनी वस्तिशोधनी । क्षुत्तृट्श्रमग्लानिहरी पेया वातानुलोमनी । विलेपी तर्पणी हृद्या ग्राहिणी बलवर्द्धनी । पथ्या स्वादुरसा लघ्वी दीपनी क्षुत्तृषापहा । हृद्या सन्तर्पणी वृष्या वृंहणी बलवर्द्धनी । शाकमांसफलैर्युक्ता यवाग्वस्त्वाश्च दुर्जराः । सिक्थैर्व्विरहितो मण्डः, पेया सिक्थसमन्विता । विलेपी बहुसिक्था स्याद्यवागूर्विरलद्रवा । विष्टम्भी पायसो बल्यो मेदःकफकरो गुरुः । कफपित्तकरी बल्या कृशराऽनिलनाशनी । धौतस्तु विमलः शुद्धो मनोज्ञः सुरभिः समः । स्विन्नः प्रस्रुत

स्तूष्णो विशदस्त्वोदनो लघुः । अधौतोऽप्रस्रुतोऽस्विन्नः शीतश्चाप्योदनो गुरुः । लघुः सुगन्धिः कफहा विज्ञेयो भृष्टतण्डुलः । स्नेहैर्मांसैः फलैः कन्दैर्वैदलाम्लैश्च संयुताः । गुरवो बृंहणा बल्या ये च क्षीरोपसाधिताः । सुस्विन्नो निस्तुषो भृष्ट ईषत्सूपो लघुर्हितः । स्विन्नं निःपीडितं शाकं हितं स्यात् स्नेहसंस्कृतम् । अस्विन्नं स्नेहरहितमपीडितमतोऽन्यथा । मांसं स्वभावतो वृष्यं स्नेहनं बलवर्द्धनम् । स्नेहगोरसधान्याम्लफलाम्लकटुकैः सह । सिद्धं मांसं हितं बल्यं रोचनं बृंहणं गुरु । तदेव गोरसादानं सुरभिद्रव्यसंस्कृतम् । विद्यात्पित्तकफोद्रेकि बलमांसाग्निवर्द्धनम् । परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु । रोचनं बलमेधाग्निमांसौजःशुक्रवर्द्धनम् । तदेवोल्लुप्तपिष्टत्वादुल्लुप्तमिति पाचकाः । परिशुष्कगुणैर्युक्तं वह्नेः पक्वमतो लघु । तदेव शूलिकाप्रोतमङ्गारे परिपाचितम् । ज्ञेयं गुरुतरं किञ्चित् प्रदिग्धं गुरुपाकतः । उल्लुप्तं भर्जितं पिष्टं प्रतप्तं कन्दुपाचितम् । परिशुष्कं प्रदग्धञ्च शूल्यं यच्चान्यदीदृशम् । मांसं यत्तैलसिद्धन्तु वीर्य्योष्णं पित्तकृद्गुरु । लघ्वग्निदीपनं हृद्यं रुच्यं दृष्टिप्रसादनम् । अनुष्णवीर्य्यं पित्तघ्नं मनोज्ञं घृतसाधितम् । प्रीणनः प्राणजननः श्वासकासक्षयापहः । वातपित्तश्रमहरो हृद्यो मांसरसः स्मृतः । स्मृत्योजःस्वरहीनानां ज्वरक्षीणक्षतोरसाम् । भग्नविश्लिष्टसन्धीनां कृशानामल्परेतसाम् । आप्यायनः संहननः शुक्रौजोबलवर्द्धनः । सदाडिमयुतो वृष्यः संस्कृतो दोषनाशनः । यन्मांसमुद्धृतरसं न तत्पुष्टिबलावहम् । विष्टम्भि दुर्जरं रूक्षं विरसं मारुतावहम् । दीप्ताग्नीनां सदा पथ्यः खानिकस्तु परं गुरुः । मांसं निरस्थि सुस्विन्नं पुनर्दृषदि चूर्णितम् । पिप्पलीशुण्ठिमरिचगुडसर्पिःसमन्वितम् । एकध्यं पाचयेत्सम्यक् वेशवार इति स्मृतः । वेशवारो गुरुः स्निग्धो बल्यो वातरुजापहः । प्रीणनः सर्वधातूनां विशेषान्मुखशोषिणाम् । क्षुत्तृट्तापहरः श्रेष्ठः सौरावः स्वादुशीतलः । कफघ्नो दीपनो हृद्यः शुद्धानां प्राणिनामपि । ज्ञेयः पथ्यतमश्चापि मुद्गयूषः कृताकृतः । स तु दाडिमम्द्वीकायुक्तः स्याद्रागषाडवः । रुचिष्यो लघुपाकश्च दोषाणामविरोधकृत् । मसूरमुद्गगोधूमकुलत्थलवणैः कृतः । कफपित्ताविरोधी स्याद्वातव्याधौ च शस्यते । मृद्वीकादाडिमैर्युक्तः स एवोक्तोऽनिलार्दिते । रोचनो दीपनो हृद्यो लघुपाक्युपदिश्यते । पटोलनिम्बयूषौ तु कफमेदोविशोषिणौ । पित्तघ्नौ दीपनौ हृद्यौ कृमिकुष्ठज्वरापहौ । श्वासकासप्रतिश्यायप्रसेकारोचकज्वरान् । हन्ति मूलकयूषस्तु कफमेदोगलामयान् । कुलत्थयूषोऽनिलहा श्वासपीनसनाशनः । तूणीप्रतूणीकासार्शोगुल्मोदावर्त्तनाशनः । दाडिमामलकैर्यूषो हृद्यः संशमनो लघुः । प्राणाग्निजननो मूर्च्छामेदोघ्नः पित्तवातजित् । मुद्गामलकयूषस्तु ग्राही पित्तकफे हितः । यवकोलकुलत्थानां यूषः कण्ठ्योऽनिलापहः । सर्व्वधान्यकृतस्तद्वद्बृंहणः प्राणवर्द्धनः । खलकाम्बलिकौ हृद्यौ तथा वातकफे हितौ । बल्यः कफानिलौ हन्ति दाडिमाम्लोऽग्निदीपनः । दध्यम्लः कफकृद्बल्यः स्निग्धो वातहरो गुरुः । तक्राम्लपित्तकृत् प्रोक्तो विषरक्तप्रदूषणः । खडाः खडयवागूश्च षाडवाः पानकानि च । एवमादीनि चान्यानि क्रियन्ते वैद्यवाक्यतः । अस्नेहलवणं सर्व्वमकृतं कटुकैर्विना । विज्ञेयं लवणस्नेहकटुकैर्हि युतं कृतम् । अथ गोरसधान्याम्लफलाम्लैरन्वितञ्च यत् । यथोत्तरं लघु हितं संस्कृतासंस्कृतं रसे । दधिमस्त्वम्लसिद्धस्तु यूषः काम्बलिकः स्मृतः । तिलपिण्याकविकृतिः शुष्कशाकं विरूढकम् । सिण्डाकी च गुरूणि स्युः कफपित्तकराणि च । तद्वच्च वटकान्याहुर्विदाहीनि गुरूणि च । लघवो बृंहणा वृष्या हृद्या रोचनदीपनाः । तृष्णामूर्च्छाभ्रमच्छर्दिश्रमघ्ना रागषाडवाः । रसाला बृंहणी बल्या स्निग्धा वृष्या च रोचनी । स्नेहनं गुडसंयुक्तं हृद्यं दध्यनिलापहम् । सक्तवः सर्पिषाभ्यक्ताः शीतवारिपरिप्लुताः । नातिद्रवा नातिसान्द्रा मन्थ इत्युपदिश्यते । मन्थः सद्योबलकरः पिपासाश्रमनाशनः । साम्लस्नेहगुडो मूत्रकृच्छ्रोदावर्त्तनाशनः । शर्करेक्षुरसद्राक्षायुक्तः पित्तविकारनुत् । द्राक्षामधूकसंयुक्तः कफरोगनिवर्हणः । वर्गत्रयेणोपहितो मलदोषानुलोमनः । गौडमम्लमनम्लं वा पानकं गुरु मूत्रलम् । तदेव खण्डमृद्वीकाशर्करासहितं पुनः । साम्लं सतीक्ष्णं सुहिमं पानकं स्यान्निरत्ययम् । मार्द्वीकं तु श्रमहरं मूर्च्छादाहतृषापहम् । परूषकाणां कोलानां हृद्यं विष्टम्भि पानकम् । द्रव्यसंयोगसंस्कारं ज्ञात्वा मात्राश्च सर्वतः । पानकानां यथायोगं गुरुलाघवमादिशेत्” ।

२ कृतं साधितमन्नं येन । साधितान्ने पाचके त्रि० ।

कृताय पु० कृतसंज्ञकोऽयः । द्यूतक्रीडाप्रसिद्धे चतुरङ्काङ्कित

पाशकभेदे "कृताये त्रेतादयस्तेऽन्तर्भवन्ति" अयशब्दे ३३५ पृ० दर्शिते आनन्दगिरिः

कृतार्थ त्रि० कृतः अर्थः प्रयोजनं येन । कृतकार्य्ये । "शरदः कृतार्थताम्" किरा० "कृतः कृतार्थोऽस्मि निवर्हितांहसा" माघः

कृतालय त्रि० कृत आलयो येन । १कृतवासे "यत्र ते दयिता भार्य्या तनयाश्च कृतालयाः" रामा० । २भेके पुंस्त्री० त्रिका० । स्त्रियां योपधत्वात् टाप् । [कर्म्मयुक्ते शब्दचि० ।

कृतावदान त्रि० कृतमवदानं ख्यानकर्म्म येन । विख्यात

कृतावसक्थिक त्रि० कृताऽवसक्थिका येन । वस्त्रादिना जानुजङ्घापृष्ठबन्धयुक्ते "प्रौढ़पादो न कुर्व्वीत स्वाध्यायपितृतर्पणम् । आसनारूढपादस्तु जानुनोर्जङ्घयोस्तथा । कृतावसक्थिको यस्तु प्रौढपादः स उच्यते" आ० त० कात्या० "कृतावसक्थिकः कृतपृष्ठजानुजङ्घाबन्धः" आ० त० रघु०

कृतास्त्र त्रि० कृतं शिक्षितमस्त्रं येन । शिक्षितास्त्रे । "येषां योद्धा सव्यसाची कृतास्त्रः" भा० व० ४ अ०

कृति स्त्री कृ—क्तिन् । १पुरुषप्रयत्ने, २कर्त्तृव्यापारे, "वृथा जातिस्तदायुष्मन् ! कृतिर्यत्र न विद्यते" भा० व० १२४८२ श्लो० ३विंशत्यक्षरपादके छन्दोभेदे "कृतिः प्रकृतिराकृतिः" वृ० र० । ३क्रियायाम् मेदि० "श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदियादियम्" नैष० ४नृपभेदे पु० "सप्ताश्वमेधानाहृत्य राजसूयं च पार्थिवः । कृतिर्नामाऽभ्यवत् स्वर्गादसत्यवचनात् सकृत्" मार्क० पु० । स च जनकवंश्यः "बहुलाश्वो धृतेस्तस्य कृतिरस्य महाबलः" भाग० ९।१३।१६ मैथिलवंश्यनृपोक्तौ । कृ बधे—क्तिन् । ५हिंसायां मेदि० ६विंशतिसंख्यायाम् कृतिकरः । कृत—बा० करणे इक् । ७कर्त्तन्यां स्त्री "हस्तेषु खादिश्च कृतिश्च संदधे" ऋ० १।१६४।२ "कृतिः कर्त्तनी" भा०

कृतिकर पु० कृतिसंख्यातुल्या विंशतिसंख्याः करा यस्य । रावणे शब्दमा० । तस्य विंशतिहस्तत्वात् तथात्वं कृतिहस्तादयोऽप्यत्र पु०

कृतिन् त्रि० कृतमनेन कृत—इष्टा० इनि १कृतक्रिये कर्त्तरि अमरः, २पुण्यवति शब्दमा० "कृती श्रुती वृद्धमतेषु धीमान्" भट्टिः "न खल्वनिर्जित्य रघुं कृती भवान्" रघुः । "तवैव नामास्त्रगतिः कृती त्वम्" "यस्य चेतसि वर्त्तेथाः स तावत् कृतिनां वरः" कुमा० "कान्तवक्त्रसदृशाकृतिं कृती" माघः "कृतिः कृतिमुदे" कृतिशब्दे नैष०

कृतिरात पु० नृपभेदे "बहुलाश्वो धृतेस्तस्य कृतिरातो महाबलः" भाग० ९।१३।१७ पाठान्तरम् [यार्चनकृते" या

कृते अव्य० कृ—क्विप् नि० एदन्तत्वम् । निमित्तार्थे "देयातिः

कृतेयुक पु० पौरवे नृपभेदे । "ऋतेयुस्तस्य कक्षेयुः स्थण्डिलेयुः कृतेयुकः" भाग० ९।२०।३ रौद्राश्वस्य घृताच्याम-प्सरस्युत्पन्नदशपुत्रोक्तौ

कृतोदक त्रि० कृतमुदकमुदककार्य्यं स्नानतर्पणादि येन । कृतस्नानादौ । "एवं कृतोदका भार्य्याः प्रवेक्ष्यन्ति गजाह्वयम्" भा० स० ७८ अ०

कृतौजस् पु० १कृतवीर्य्यभ्रातरि । कृतवीर्य्यशब्दे विवृतिः । कृतमोजो येन । २कृततेजस्के कृतपराक्रमे त्रि० ।

कृत्त त्रि० कृत+क्त । १छिन्ने, २वेष्टिते च हेम०

कृत्ति स्त्री कृत्यते कृत—कर्म्मणि—क्तिन् । १मृगादिचर्म्मणि कृत्तिवासाः । २त्वचि भूर्ज्जपत्रे ४कृत्तिकानक्षत्रे च मेदि० ५गृहे निरु०

कृत्तिका स्त्री कृन्तति उग्रत्वात् कृत—तिकन् किच्च । अश्विन्यादिषु तृतीये नक्षत्रे तस्याः क्षुरतुल्याकारत्वं षट्तारात्मकत्वञ्च अश्लेषाशब्दे ४९७ पृ० दर्शितम् अन्ये तु शकटाकारत्वमाहुः । सा च ३६० अंशात्मके राशिचक्रे २६।४० अंशकलोत्तरम् १३।२० अंशकलात्मिका मेषवृषोभयराशिघटिका । तत्र च तस्या आद्यचरणः मेषराशिघटकः अन्यचरणत्रयं वृषराशिघटकम् । अश्विन्यादयश्च सप्तविंशतिः दक्षसुता चन्द्रपत्न्यः । तत्र भरणी कृत्तिकाद्याः २।३।६।९।१०।१२।१६।२१।२६ संख्यकाः सपत्नीं रोहिणीं प्रति चन्द्रस्यातिशयानुरागदर्शनेन चन्द्रस्य भर्त्सनां कृतवत्यः । ततः चन्द्रेण ताः प्रति गमनाप्रशस्ततादिशापदानं कालिकापु० २० अध्याये उक्तं तच्च कालिकापुराणशब्दे २०१४ पृ० दृश्यम् । दक्षसुतानां च चेतनत्वात् कृत्तिकाभिः षड्भिः कार्त्तिकेयस्य पोषणं कृतं कार्त्तिकेयशब्दे विवृतिः । तस्या अग्निरधिष्ठातृदेवः सा च मिश्रगणान्तर्गता "मिश्रोऽग्निः सविशाखभः, शुभकराः सर्व्वे स्वकृत्ये गणाः" ज्यो० त० । कृत्तिकानक्षत्रयुक्ता पौर्णमासी अण् ङीप्, कार्त्तिकी साक्षिन् मासे पुनरण् । कार्त्तिक कार्तिक्या युक्ते चान्द्रे मासभेदे पु०

कृत्तिकाञ्जि पु० कृत्तिका शकटाकारा अञ्जिस्तिलकादिचिह्नमस्य । अश्वमेधीये शकटाकारतिलकचिह्नयुक्ते अश्वभेदे "त्रिरूप एषोऽश्वः' इत्युपक्रमे "कृत्तिकाञ्जिः पुरस्तात्" शत० ब्रा० ।१२।४ "२कृत्तिका शकटाकारा अञ्जिर्यस्य' भा०

कृत्तिकातनय पु० ६त० । कार्त्तिकेये तस्य यथा तथात्वं तथा कार्त्तिकेयशब्दे १९५६ पृ० उक्तम् । कृत्तिकापुत्रादयोऽप्यत्र पु०

कृत्तिकाभव पु० कृत्तिकायां नक्षत्रे भवः । चन्द्रे शब्दच०

कृत्तिवास पु० कृत्तिं गजासुरचर्म्म वस्ते वस–आच्छादने अण् उप०स० । महादेवे कृत्तिवासेश्वरः

कृत्तिवासस् पु० कृत्तिर्गजासुरचर्म्म वासोयस्य । महादेवे यथाच तस्य तद्वसनत्वं तथा काशी० ६८अ० वर्णितं यथा "कोलाहलो महानासीत् त्रात त्रातेति सर्व्वतः । महिषासुरपुत्रोऽसौ समायाति गजासुरः । प्रमथ्न् प्रमथान् सर्व्वान् निजवीर्य्यमदोद्धतः । यत्र यत्र धरायां स चरणं प्रमिणोति हि । अचलान् दोलयाञ्चक्रे तत्र तत्रास्य भारतः । ऊरुवेगेन तरवः पतन्ति शिखरैः सह । तस्य दोर्द्दण्डवातेन चूर्णाः स्युश्च शिलोच्चयाः । यस्य मौलिजटं वर्धन् घना व्योम त्यजन्त्यलम् । नीलिमानं न चाद्यापि जहुस्तत्केशसङ्गजम् । यस्य निःश्वाससम्भारैरुत्तरङ्गा महाब्धयः । नाद्याप्यमन्दकल्लोला भवन्ति तिमिभिः सह । योजनानां सहस्राणि नव यस्य समुच्छ्रयः । तावानेव हि विस्तारस्तनोर्मायाविनोऽस्य हि । यन्नेत्रयोः पिङ्गलिमा तथा तरलिमा पुनः । विद्युता नोह्यते ऽद्यापि सोऽयमायाति सत्वरः । यां यां दिशं समभ्येति सोऽयं दुःसह दानवः । नाद्य शमीभवेदस्य साध्वसादिव दिग्भयम् । ब्रह्मलब्धवरश्चायं तृणीकृतजगत्त्रयः । अवध्योऽहं भयामीति स्त्रीपुंभिः कामनिर्ज्जितैः । ततस्त्रिशूलहस्तेति समायान्तं दैत्यपुङ्गवम् । विज्ञायावध्यमन्येन शूलेनाभिजघान तम् । प्रोतस्तेन त्रिशूलेन स च दैत्यः गजासुरः । छत्रीकृतमिवात्मानं मन्यमानो जगौ हरम् । गजासुर उवाच । त्रिशूलपाणे ! देवेश ! जाने त्वां स्मरहारिणम् । तव हस्ते मम बधः श्रेयानेव पुरान्तक ! । किञ्चिद्विज्ञप्तुमिच्छामि अवधेहि ममेरितम् । सत्यं ब्रवीमि नासत्यं मृत्युञ्जय ! विचारय । त्वमेको जगतीवन्द्यो ! विश्वस्योपरि संस्थितः । अहं तदुपरिष्टाच्च स्थितोऽस्मीति जितं मया । धन्योऽस्म्यनुगृहीतोऽस्मि त्वत्त्रिशूलाग्रसंस्थितः । कालेन सर्व्वैर्मर्त्तव्यं श्रेयसे मृत्युरीदृशः । इति तस्य वचः श्रुत्वा देवदेवः कृपानिधिः । प्रोवाच प्रहसन् शम्भुर्घटोद्भव ! गजासुरम् । ईश्वर उवाच । गजासुर ! प्रसन्नोऽस्मि महापौरुषशेवधे ! । स्वानुकूलं वरं ब्रूहि ददामि सुमतेऽसुर !' इत्याकर्ण्य स दैत्येन्द्रः प्रत्युवाच महेश्वरम् । गजासुर उवाच । यदि प्रसन्नोदिग्वासस्तदा नित्यं वसान मे । इमां कृत्तिं विरूपाक्ष ! त्वत्त्रिशूलाग्निपाविताम् । स्वप्रमाणां सुखस्पर्शां रणाङ्गणपणीकृताम् । इष्टगन्धिः सदैवास्तु सदैवास्त्वतिकोमला । सदैव निर्म्मला चास्तु सदैवास्त्वतिमङ्गलम् । महातपानलज्वालां प्राप्यापि सुचिरं विभो ! । न दग्धा कृत्तिरेषा मे पुण्यगन्धनिधिस्ततः । यदि पुण्यवती नैषा मम कृत्तिर्दिगम्बर ! तदा त्वदङ्गसङ्गोऽस्याः कथं जातो रणाङ्गणे । अन्यञ्च मे वरं देहि यदि तुष्टोऽसि शङ्कर ! । नामास्तु कृत्तिवासास्ते प्रारभ्याद्यतनं दिनम्" इत्यग्रे कृत्तिवासेश्वरशब्दे दृश्यम् ।

कृत्तिवासेश्वर न० काशीस्थे शिवलिङ्गभेदे कृत्तिवासशब्दे दर्शितात् काशीख० वाक्यादुत्तरग्रन्थे तत्कथा यथा "इति तस्य वचः श्रुत्वा तथेत्युक्त्वा च शङ्करः । पुनः प्रोवाच तं दैत्यं भक्तिनिर्म्मलमानसम् । ईश्वर उवाच । शृणु पुण्यनिधे ! दैत्य ! वरमन्यं सुदुर्लभम् । अविमुक्ते महाक्षेत्रे रणत्यक्तकलेवर ! । इदं पुण्यशरीरं ते क्षेत्रेऽस्मिन् मुक्तिसाधने । मम लिङ्गं भवत्वत्र सर्व्वेषां मुक्तिदायकम् । कृत्तिवासेश्वरं नाम महापातकनाशनम् । सर्व्वेषामेव लिङ्गानां शिरोभूतमिदं परम् । यावन्ति सन्ति लिङ्गानि वाराणस्यां महान्त्यपि । उत्तमं तावतामेतद्ब्रह्ममाङ्गल्यमुत्तमम् । श्मशानानां हितायात्र स्थास्येऽहं सपरिग्रहः । दृष्टेनानेन लिङ्गेन पूजितेन स्तुतेन च । कृतकृत्योभवेन्मर्त्यः संसारं न विशेत् पुनः । रुद्राः पाशुपताः सिद्धा महाव्रतप्रचिन्तकाः । शान्ता दान्ता जितक्रोधा निर्द्वन्द्वा निष्परिग्रहाः । अविमुक्ते स्थिता ये तु मम भक्ता मुमुक्षवः । मानापमानयोस्तुल्याः समलोष्टाश्मकाञ्चनाः । कृत्तिवासेश्वरे लिङ्गे स्थास्येऽहं तदनुग्रहात् । दशकोटिसहस्राणि तीर्थानि प्रतिवासरम् । त्रिकालमागमिष्यन्ति कृत्तिवासे न संशयः । कलिद्वापरसम्भूता नराः कल्मषबुद्धयः । सदाचारविनिर्मुक्ताः सत्यशौचपराङ्मुखाः । मायया दम्भलोभाभ्यां मोहाहङ्कृतिसंयुताः । शूद्रान्नसेविनो विप्रा जिह्वालाः रतिलालसाः । सम्भ्रान्ताज्ञानजमेध्यास्तु दूरीकृतमनोधियः । कृत्तिवासेश्वरं प्राप्य सर्व्वपापविवर्ज्जिताः । सुखेन मोक्षमेष्यन्ति यथा सुकृतिनस्तथा । कृत्तिवासेश्वरं लिङ्गं सेव्यं काश्यां ततोनरैः । जन्मान्तरसहस्रेषु मोक्षोऽन्यत्र सुदुर्लभः । कृत्तिवासेश्वरे लिङ्गे

लभ्यस्त्वेकेन जन्मना। पूर्व्वजन्मकृतं पापं तपोदानादिभिः शतैः। नश्येत्, सद्यो विनश्येत्तु कृत्तिवासेश्वरेक्षणात्। कृत्तिवासेश्वरं लिङ्गं येऽर्च्चयिष्यन्ति मानवाः। प्रविष्टास्ते शरीरे मे तेषां नास्ति पुनर्भवः। अविमुक्ते निवस्तव्यं जप्तव्यं शतरुद्रियम्। कृत्तिवासेश्वरो देवो द्रष्टव्यश्च पुनः पुनः। सप्तकोटिमहारुद्रैः सुजप्तैर्यत् फलं लभेत्। तत् फलं लभ्यते काश्यां पूजनात् कृत्तिवाससः। माघकृष्णचतुर्द्दश्यामुपोष्य निशि जागरात्। कृत्तिवासेशमभ्यर्च्च्य यः स यायात् परां गतिम्। शुक्लायां पञ्चदश्यां यश्चैत्र्यां कर्त्ता महोत्सवम्। कृत्तिवासेश्वरे लिङ्गे न स गर्भं प्रवेक्ष्यति। कथयित्वा तु देवेशस्तत्कृत्तिं परिधाय च। गजासुरस्य महतीं प्राह्णोत्तां दिगम्बरः। यत्र शूलीकृतो दैत्यः शूलमारोप्य भूतले। तच्छूलपाटनाज्जातं तत्र कुण्डं महत्तरम्। तस्मिन् कुण्डे नरः स्नात्वा कृत्वा च पितृतर्पणम्। कृत्तिवासेश्वरं दृष्ट्वा कृतकृत्यतरो भवेत्"॥

कृत्नु त्रि० कृ—क्नु। कारौ शिल्पिनि उणा० "बहुकर्म्मकरे च। "कृपया कृत्नो! अकृतम्" ऋ० ६।१८।१५। "कृत्नो! बहुलकर्म्मणां कर्त्तः" भा०

कृत्य न० कृ—क्यप् तुक् च। १कार्य्ये, व्याकरणप्रसिद्धे पाणिन्यादिपरिभाषिते २तव्यादौ तव्यत्क्यप्तव्यानीयर्यत्केलिमाख्ये प्रत्यये। ३कर्त्तव्ये त्रि० हेमच० "कृतकृत्यो विधिर्मन्ये" माघः। ४विद्विष्टे त्रि०। मेदि० ५धनादिभेद्ये त्रि० जटा० "कृत्याः पा० "तयोरेव कृत्यक्तखलर्थाः" "कृत्यैरधिकार्थवचने" पा०। "कृत्याः षट् ते समाख्याताः क्यब्यत्तौ भावकर्म्मणोः। तव्यानीयावलन्तात् यत् केलिमः कर्म्मकर्त्तरि" सुपद्म०। कृत्याः इत्यधिकारे तेषां विहितत्वात् तेषां तत्संज्ञत्वम्। कृत्यप्रत्ययस्तु धातुविशेषात् कर्म्मभावादौ विहितः। कृत्यञ्च वेदादिविहितावश्यकर्त्तव्याचारविशेषः। तदधिकारेणैव कृत्यचिन्तामणिकृत्यतत्त्वकृत्यरत्नाकरादयोऽन्ये विशेषाः प्रवृत्ताः

कृत्यविद् त्रि० कृत्यं कर्त्तव्यं वेत्ति विद—क्विप्। कार्य्यज्ञे विविक्ते, "कृत्यविदित्युवाचेति" रघुः।

कृत्या स्त्री० कृ—क्यप् टाप्। १क्रियायां २अभिचारक्रियाजन्ये अभिचारोद्देश्यनाशके ३देवादिमूर्त्तिभेदे च सा च वैदिकाद्यभिचारक्रियाजन्या अदृष्टविशेषनिर्वर्त्त्या देवादिमूर्त्तिरूपतयोत्पद्य अभिचारोद्देश्यं पुरुषं निहत्य नश्यतीति अथर्ववेदे प्रासद्धम्। "पञ्चकल्पमथर्वाणं कृत्याभिः परिबृंहितम्" भा०शा०२४४अ०। कृत्याविशेषोत्पादनकथा भा० आनु० ९०अ० यथा

"इत्युक्तः स तु धृत्यैस्तैर्वृषादर्भिश्चुकोप ह। तेषां वै प्रतिकर्त्तुञ्च सर्व्वेषामगमद्गृहम्। स गत्वा हवनीयेऽग्नौ तीव्रं नियममास्थितः। जुहाव संस्कृतैर्मन्त्रैरेकैकामाहुतिं नृपः। तस्मादग्नेः समुत्तस्थौ कृत्या लोकभयङ्करी। तस्या नाम वृषादर्भिर्यातुधानीत्यथाकरोत्। सा कृत्या कालरात्रीव कृताञ्जलिरुपस्थिता। वृषादर्भिं नरपतिं किङ्करोमीति साऽब्रवीत्। वृषादर्भिरुवाच। ऋषीणां गच्छ सप्तानामरुन्धत्यास्तथैव च। दासीभर्त्तुश्च दास्याश्च मनसा नाम धारय। ज्ञात्वा नामानि चैवैषां सर्व्वानेतान् विनाशय। विनष्टेषु तथा स्वैरं गच्छ यत्रेप्सितं तव। सा तथेति प्रतिश्रुत्य यातुधानीस्वरूपिणी। जगाम तद्वनं यत्र विचेरुस्ते महर्षयः" "इन्द्रेण च सा नाशितेति तत्रैवान्ते उक्तम् यथा "रक्षणार्थञ्च सर्व्वेषां भवतामहमागतः। यातुधानी ह्यतिक्रूरा कृत्यैषा वो वधैषिणी। वृषादर्भिप्रयुक्तैषा निहता मे तपोधनाः!। दुष्टा हिंसादियं पापा युष्मान् प्रत्यग्निसम्भवा"।

कृत्यानिवारणोपायमन्त्राश्च अथ० ५,१२,१४, उक्ता यथा "सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा। दिप्सौषधे! त्वं दिप्सन्तमव कृत्याकृतं जहि। अव जहि यातुधानानव कृत्याकृतं जहि। अथो यो अस्मान्दिप्सति तमु त्वं जह्योषधे!। रिश्यस्येव परीशासं परिकृत्य परि त्वचः। कृत्यां कृत्याकृते देवा निष्कमिव प्रति मुञ्चत। पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय। समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत्। कृत्याः सन्तु कृत्याकृते शपथः शपथीयते। सुखो रथ इव वर्त्ततां कृत्या कृत्याकृतं पुनः। यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने। तामु तस्मै नयामस्यश्वमिवाश्वाभिधान्या। यदि वासि देवकृता यदि वा पुरुषैः कृता। तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम्। अग्ने पृतनाषाट् पृतनाः सहस्व। पुनः कृत्यां कृत्याकृते प्रतिहरणेन हरामसि। कृतव्यधनि! विध्य तं यश्चकार तमिज्जहि। न त्वामचक्रुषे वयं वधाय सं शिशीमहि। पुत्र इव पितरं गच्छ स्वज इवाभिष्ठितो दश। बन्धमिवावक्रामी गच्छ कृत्ये! कृत्याकृतं पुनः। उदेणीव वारण्यभिस्कन्दं मृगीव। कृत्या कर्त्तारमृच्छतु इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति। सा तं मृग

मिव गृह्णातु कृत्या कृत्याकृतं पुनः । अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम् । सुखो रथ इव वर्त्ततां कृत्या कृत्याकृतं पुनः" ।

सुश्रुते चान्यप्रकारोऽत्र सामान्यतो दर्शितः यथा "कृत्यानां प्रतिघातार्थं तथा रक्षोभयस्य च । रक्षाकर्म्म करिष्यामि ब्रह्मा तदनुमन्यताम् । नागाः पिशाचा गन्धर्व्वाः पितरो यक्षराक्षसाः । अभिद्रवन्ति ये ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा । पृथिव्यामन्तरीक्षे च ये चरन्ति निशाचराः । दिक्षु वास्तुनिवासाश्च पान्तु त्वां ते नमस्कृताः । पान्तु त्वां मुनयो ब्राह्म्या दिव्या राजर्षयस्तथा । पर्व्वताश्चैव नद्यश्च सर्व्वाः सर्वेऽपि सागराः । अग्नीरक्षतु ते जिह्वां प्राणान् वायुस्तथैव च । सोमो व्यान, मपानं ते पर्जन्यः परिरक्षतु । उदानं विद्युतः पान्तु, समानं स्तनयित्नवः । बलमिन्द्रो बलपति, र्मनुर्मन्ये मतिं तथा । कामांस्ते पान्तु गन्धर्व्वाः, सत्वमिन्द्रोऽभिरक्षतु । प्रज्ञां ते वरुणो राजा, समुद्रो नाभिमण्डलम् । चक्षुः सूर्य्यो, दिशः श्रोत्रे, चन्द्रमाः पातु ते मनः । नक्षत्राणि सदा रूपं, छायां पान्तु निशास्तव । रेतस्त्वाप्याययन्त्वापो, रोमाण्योषधयस्तथा । आकाशं खानि ते पातु, देहं तव वसुन्धरा । वैश्वानरः शिरः पातु, विष्णुस्तव पराक्रमम् । पौरुषं पुरुषश्रेष्ठो, ब्रह्मात्मानं, ध्रुवो भ्रुवौ । एता देहे विशेषेण तव नित्या हि देवताः । एतास्त्वां सततं पान्तु दीर्घमायुरवाप्नुहि । स्वस्ति ते भगवान् ब्रह्मा स्वस्ति देवाश्च कुर्वताम् । स्वस्ति ते चन्द्रसूर्य्यौ च स्वस्ति नारदपर्वतौ । स्वस्त्यग्निश्चैव वायुश्च स्वस्ति देवाः सहेन्द्रगाः । पितामहकृता रक्षा स्वस्त्यायुर्वर्द्धतां तव । ईतयस्ते प्रशाम्यन्तु सदा भव गतव्यथः । इति स्वाहा । एतै र्वेदात्मकैर्म्मन्त्रैः कृत्याव्याधिविनाशनैः । मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि" ।

"ततोऽसुरा एषु लोकेषु कृत्यां वलगान्निचख्नुरुतैवं चिद्देवानभिभवेमेति, "तद्वै देवा अस्पृण्वत । तएतैः कृत्यां वलगानुदखनन्, यदा वै कृत्यामुत्खनन्ति" "अत्र कश्चिद्द्विषन् भ्रातृव्यः कृत्यां वलगान्निखनति" इति च शत०ब्रा० ३.५,४,२,३, "यामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति न संशयः" मनुः

कृत्याकृत्य न० द्वि० । द्वन्द्व० १कर्त्तव्याकर्त्तव्ययोः । सुश्रुतोक्ते २व्रणचिकित्साङ्गे कर्त्तव्याकर्त्तव्यविशेषे च ते च कृत्याकृत्ये सुश्रुतेन दर्शिते यथा

"अथातः कृत्याकृत्यविधिमध्यायं व्याख्यास्यामः । तत्र वयस्थानां दृढानां प्राणवतां सत्ववताञ्च सुचिकित्स्या व्रणा एकस्मिन् वा पुरुषे यत्रैतद्गुणचतुष्टयं तस्य सुखसाधनीयतमाः । तत्र वयस्थानां प्रत्यग्रधातुत्वादाशु व्रणा रोहन्ति । दृढानां स्थिरबहुमांसत्वाच्छस्त्रमवचार्य्यमाणं शिरास्नाय्वादिविशेषान्न प्राप्नोति । प्राणवतां वेदनाभिघाताहारयन्त्रणादिभिर्न ग्लानिरुत्पद्यते । सत्ववतां दारुणैरपि क्रियाविशेषैर्न व्यथा भवति । तस्मादेतेषां सुखसाधनीयतमाः । तएव विपरीतगुणा दुःखशल्यप्राणभीरुषु द्रष्टव्याः । स्फिक्पायुप्रजननललाटगण्डौष्ठपृष्ठकर्णफलकोपोदरजत्रुमुखाभ्यन्तरसंस्थाः सुखरोपणीया व्रणाः । अक्षिदन्तनासापाङ्गश्रोत्रनाभिजठरसेवनीनितम्बपार्श्वकुक्षिवक्षःकक्षास्तनसन्धिभागगताः सफेनपूयरक्तानिलवाहिनोऽन्तःशल्याश्च दुश्चिकित्स्याः । अधोभागाश्चोर्द्ध्वभागनिर्वाहिनो रोमान्तोपनखमर्म्मजङ्घास्थिसंश्रिताश्च । भगन्दरमपि चान्तर्मुखं सेवनीकुटकास्थिसंश्रितम् ।

भवन्ति चात्र । कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् । व्रणाः कृच्छ्रेण सिध्यन्ति येषां चापि व्रणे व्रणाः । अवपाटिकानिरुद्धप्रकाशसन्निरुद्धगुदजठरग्रन्थिशतक्रिमयः प्रतिश्यायजाः कोष्ठजाश्च त्वग्दोषिणां प्रमेहिनां वा ये परिचतेषु दृश्यन्ते शर्करासिकतामेहवातकुण्डलिकाष्ठीलादन्तशर्करोपकुशकण्ठशालूकनिष्कोषणदूषिताश्च दन्तवेष्टाविसर्पास्थिक्षतोरःक्षतव्रणग्रन्थिप्रभृतयश्च याप्याः । साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा । घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् । यापनीयं विजानीयात् क्रिया धारयते तु यम् । क्रियायान्तु निवृत्तायां सद्य एव विनश्यति । प्राप्ता क्रिया धारयति याप्यव्याधितमातुरम् । प्रपतिष्यदिवागारं विष्कम्भः साधुयोजितः । अतऊर्द्ध्वमसाध्यान् वक्ष्यामः । मांसपिण्डवदुद्गताः प्रसेकिनोऽन्तःपूयवेदनावन्तोऽश्वापानवदुद्वृत्तौष्ठाः । केचित्कठिना गोशृङ्गवदुन्नतमृदुमांसप्ररोहाः । अपरे दुष्टरुधिरास्राविणस्तनुपिच्छिलास्राविणो वा मध्योन्नताः । केचिदवसन्नशुषिरपर्य्यन्ताः । शणतूलवत्स्नायुजालवन्तो दुर्दर्शा वसामेदोमज्जमस्तुलुङ्गस्राविणश्च दोषसमुत्थाः । पीताऽसितमूत्रपुरीषवातशाहिनश्च कोष्ठस्थाः क्षीणमांसानाञ्च सर्वतोगतयश्चाणुमुखा मांसबुद्बुदवन्तः सशब्दवातवाहिनश्च शिरःकण्ठस्थाः । क्षीणमांसानाञ्च पूयरक्तनिर्वाहिणोऽरोचकाविपाकका-

श्वासोपद्रवयुक्ताः। भिन्ने वा शिरःकपाले यत्र मस्तुलुङ्गदर्शनं त्रिदोषलिङ्गप्रादुर्भावः कासश्वासौ या यत्रेति।
भवन्ति चात्र। वसां मेदोऽथ मज्जानं मस्तुलुङ्गञ्च यः स्रवेत्। आगन्तुस्तु व्रणः सिध्येत् सिध्येद्दोषसम्भवः। स मर्म्मोपहिते देशे सिरास्नाय्वस्थिवर्जिते। विकारो योऽनुपर्येति तदसाध्यस्य लक्षणम्। क्रमेणोपचयं प्राप्य धातूननुगतः शनैः। न शक्यउन्मूलयितुं वृद्धो वृक्ष इवामयः। स स्थिरत्वान्महत्त्वाच्च धात्वनुक्रमणेन च। निहन्त्यौषधवीर्य्याणि मन्त्रान् दुष्टग्रहो यथा। अतो यो विपरीतः स्यात् सुखसाध्यः स उच्यते। अबद्धमूलः क्षुपको यद्वदुत्पाटने सुखः। त्रिभिर्दोषैरनाक्रान्तः श्यावौष्ठः पिडकीसमः। अवेदनो निरास्रावो व्रणः शुद्ध इहोच्यते। कपोतवर्णप्रतिमा यस्यान्ताः क्लेदवर्जिताः। स्थिराश्चिपिटिकावन्तो रोहन्तीति तमादिशेत्। रूढवर्त्मानमग्रन्थिमशूनमरुजं व्रणम्। त्वक्सवर्णं समतलं सम्यग्रूढं विनिर्द्दिशेत्। दोषप्रकोपाद्व्यायामादभिघातादजीर्णतः। हर्षात्क्रोधाद्भयाद्वापि व्रणो रूढोऽपि दीर्य्यति"।

कृत्यादूषणी स्त्री कृत्या दूष्यतेऽनया दूषि–ल्युट् ङीप्। १ओषधिभेदे। "अयो वलासनाशनाः कृत्यादूषणीश्च यास्ता इहायान्त्वोषधीः" अथ०८,७,१०, "अनयाऽहमोषध्या सर्वाः कृत्या अदूदुषम्" १०,१,४,। आङ्गिरसे २जङ्गिडे ऋषिभेदे पु०। "अङ्गिरा असि जङ्गिड! रक्षितासि जङ्गिड!" इत्युपक्रमे "अभिकृत्यास्त्रिपञ्चाशीः शतं कृत्याकृतश्च ये। सर्वान् विनष्टतेजसोऽरसां जङ्गिडस्करत्" इत्याद्युक्ता "कृत्यादूषण एवायमतो अरातिदूषणः" इत्युक्तम्। अथ० १९,३४,१,

कृत्यादूषि पु० कृत्यां परकृताभिचारजां दूषयति दूषि–इन्। कृत्यानाशके जङ्गिडे मणिभेदे। "अरण्यादन्य आभृतः कृत्या अन्योरसेभ्यः! कृत्यादूषिरयं मणिरथो अरातिदूषिः" अथ० २,४,५,६,

कृत्रिम न० कृ–क्त्रि मप् च। १विड्लवणे, मेदि० २काचलवणे, ३तुरुष्कनामगन्धद्रव्ये, ४रसाञ्जने च राजनि०। ५सिह्लके पु० मेदि० ७क्रियया निष्पन्नमात्रे त्रि०। "सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्य्यतः" "चित्रंसया कृत्रिमपत्त्रिपङ्क्तेः कपोतपालीषु निकेतानाम्। मार्ज्जारमप्यायतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने" माघ:। "कृत्रिमाकृत्रिमयोः कृत्रिमे कार्य्यसंप्रत्ययः" व्या०प०। द्वादशपुत्त्रमध्ये स्वयंकृते "सदृशं तु प्रकुर्य्याद्यं गुणदोषविचक्षणम्। पुत्रं पुत्रगुणोपेतं स विज्ञेयश्च कृत्रिमः" इति मनूक्ते पुत्रभेदे पु०। सदृशं स्वजातीयं "सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः" उपसंहारात्। "कृत्रिमः स्यात् स्वयं कृतः" या०"। "कृत्रिमस्तु पुत्रः स्वयं पुत्रार्थिना धनक्षेत्रप्रदर्शनादिलोभनेनैव पुत्रीकृतः मातापितृविहीनस्तत्सद्भावे तत्परतन्त्रत्वात्" मिता०। कलौ तु "दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः" इति आदित्यपु० दत्तौरसभिन्नानां पुत्रताकरणनिषेधात् न तस्य कर्त्तव्यता एवञ्च "औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च" कलिधर्म्मप्रतिपादकपराशरवचने क्षेत्रजपदस्य औरसविशेषणत्वं कृत्रिमपदपदस्य च दत्तकविशेषणत्वं कल्पनीयमिति दत्तचन्द्रिका गौडदेशीयानां तथाचारश्च। पराशरवचनस्थकृत्रिमपदं न यौगिकं किन्तु परिभाषिकस्वयंकृतविषयमेव अन्यथा दत्तकस्य कृत्रिमत्वविशेषणं व्यर्थं स्यात् अतः आदित्यपुराणवचनस्थदत्तपदस्य कृत्रिमोपलक्षणपरता युक्तेति कलौ कृत्रिमपुत्रस्यापि ग्राह्यतेति दत्तकमीमांसादयः। पाश्चात्यादिवङ्गदेशेषस्य प्रचारः। अनयोर्युक्तत्वायुक्तत्वरुद्भावेऽपि आचारस्य बलवत्त्वाद्व्यवस्था। अयञ्च "औरसः क्षेत्रजश्चैव दत्त: कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च दायादाबान्धवाश्च षट्" मनुना बन्धुदायहरत्वेनोक्तः। स्वार्थे क। तत्रार्थे। सिह्लके पु० जटाधरः,। तुरुष्कनामगन्धद्रव्ये राजनि०।

कृत्रिमधूप पु० कर्म्म०। नानासुगन्धिद्रव्यसंयोगजाते दशाङ्गषोडशाङ्गादौ धूपे अमरः।

कृत्रिमपुत्र पु० कर्म्म०। १कृत्रिमे पुत्रभेदे। कृत्रिमसुतादयोऽप्यत्र। स्वार्थे क। तत्रार्थे वस्त्रादिरचितपुत्तलिकायाञ्च। "सा कन्दुकैः कृत्रिमपुत्रकैश्च" कुमा०

कृत्वन् त्रि० कृ–क्वनिप् तुक् च। कर्त्तरि। "तदिन्द्राव आ भर येना दंशिष्ठ कृत्वने" ऋ०८,२५,२४, स्त्रियां ङीप् रश्चान्तादेशः। "महाषिवेन्द्रः स्वकृत्वरी बहुम्–यशःपटं नद्धटचाहरीतरी" नैष०।

कृत्वा अव्य०कृ–कृतौ हिंसायां वा क्त्वा। १विधायेत्यर्थे "कृत्वाप्रकाशे रुचिरसंप्रकृप्रम्" भट्टिः। २हिंसित्वेत्यर्थे च।

कृत्वी स्त्री व्यासपुत्रशुकदेवस्य १कन्यायाम्। "पराशरकुलोद्भूतः शुकोनाम महातपाः। भविष्यति युगे तस्मिन् (द्वापरे) महायोगी द्विजर्षभः। व्यासादरण्यां सम्भूतो

विद्मोऽग्निरिव ज्वलन्। स तस्यां पितृकन्यायां (पुलस्त्यकन्यायाम्) पीवर्य्यां जनयिष्यति। कन्यां पुत्रांश्च चतुरो योगधर्म्मान् महाबलान्। कृष्णं गौरं प्रभुं शम्भुं कृत्वीं कन्यां तथैव च। ब्रह्मदत्तस्य जननीं महिषीं त्वणुहस्य च" हरिवं० १८अ०। "अणुहोनाम तस्यासीत् पुत्रः परमधार्म्मिकः। प्रादात् कन्यां शुक स्तस्मै कृत्वीं पूजितलक्षणाम्। सत्वशीलगुणोपेतां योग-धर्म्मरतां सदा" हरिवं० २३अ०

वेदे स्नात्व्यादि० व्यातदन्त्वम्। २कृत्वेत्यर्थे च। "अपागू-हन्नमृतां मर्त्येभ्यः कृत्वी" ऋ० १०।१७।२। "कृत्वी कृत्वा" भा० "जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी" १०।१५।१२। ३कर्म्मणि स्त्री० "निरु० "भ्रातरस्तु वः कृ-त्व्येमसि" ऋ० १।१६१।३। "—— कर्म्मणा एमसि एम" भा०

कृत्व्य त्रि० कृत्वीं कर्म्म अर्हति यत्। कर्म्मार्हे कर्म्मकारके "अज्यसेऽग्ने रात्री न कृत्व्यः" ऋ० ६।२।८ "कृत्व्यः हविर्वहनादीनां कर्म्मणां कर्त्ता" भा०

कृत्म न० कृन्तति कृणत्ति वा कृत—छेदने वेष्टने वा मः किच्च। जले २समुदाये ३पापे पु० सि० कौ०

कृत्स्न न० कृत—क्स्न। १सकले २जले ३कुक्षौ पु०। ४समग्रे त्रि० मेदि० "तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचा-लयेत्" गीता। कृत्स्नस्य भाव ष्यञ्। कार्त्स्न्य-न० तल्। कृत्स्नता स्त्री त्व कृत्स्नत्व। न० साकल्ये। "का-र्त्स्न्यायन्त्योः सम्पद्यमाने साति:। जलसात् सम्पद्यते

कृदर पु० कृ—अरन् "कृदरादयश्च" उणा० नि०। कुशूले अन्नकोष्ठे उज्ज्वल०। २दिग्वस्त्रे च न० निरु०। ३गर्त्ते पु० निरु०।

कृधु त्रि० कृत—उन् बा० कित् पृषो०। ह्रस्वे निरु०। "यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत्" यजु०२३,२८, "प्रतीत्येन कृधुना तृपासः" ऋ०४,५,१४, कृधुना ह्रस्वेन" भा० "मम स्विनात् कृधुकर्णो भयाते" ऋ०१०,२७,१३ स्वार्थे क। तदर्थे। ततः अतिशायने इष्ठन् ऋतोरः। क्रधिष्ठ। ईयसुन्। कृधीयस् अतिशयेनह्रस्वे त्रि० ईयसुनि स्त्रियां ङीप्। भावे इमनिच् क्रधिमन पु० ष्यञ् कार्ध्व न० ह्रस्वत्वे

कृन्तत्र न० कृत—कत्रन् मुम् च। लाङ्गले सि०कौ०।

कृन्तन न० कृत—ल्युट् बा० मुम् च। १छेदने कर्त्तने "कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः। शावाशौचे न कर्त्तव्यं पठनं पाठनं तथा" नारदः। कर्त्तरि ल्यु मुम् च। २छेदके त्रि० करणे ल्युट्। बा० मुम् च। ३छेदनसाधने "नातः परं कर्म्मनिबन्धकृन्तनम्" भाग० ६,२,४, स्त्रियां ङीप। नखनिकृन्तनी

कृन्तविचक्षणा स्त्री कृन्त (छिन्धि) विचक्षण! इत्युच्यते यस्यां क्रियायां मयू० स०। विचक्षणसम्बोधनककर्त्तनार्थ-निर्देशक्रियायाम्।

कृप कल्पने (सम्पत्तौ) भ्वा० आत्म० लुङि लुटि लृटि लृङि च उभ० द्युतादि अक० वेट्। अस्य ऋतः रकारस्थाने लः। कल्प-ते। अकल्पत्—अकल्पिष्ट—अक्लृप्त। कल्प्तासि कल्पितासे कल्प्स्यति कल्प्स्यते-कल्पिष्यते। कल्पितव्यः-कल्प्तव्यः कल्पनम् कल्पः। क्लृप्तः क्लृप्तिः। णिचि। कल्पयति ते अचकल्पत् त-अचीक्लृपत् त। कल्पितः कल्पना कल्पयिता। "क्लृपि सम्पद्यमाने" वार्त्ति०। एतद्योगे सम्पद्यमाने कर्त्तरि चतुर्थी। भक्तिर्ज्ञानाय कल्पते। "कल्पवित् कल्प-यामास वन्यामेवास्य संविधाम्" "क्लृप्तेन सोपानपथेन" रघुः। "हविसंप्रक्लृप्तम्" भट्टिः "प्रजापतिकल्पितयज्ञ-भागम्" कुमा०। छेदने च सक० "क्लृप्तकेशनखश्मश्रुः" मनुः "कल्पनं छेदनम्" कुल्लू०।

अनु+प्रथमविधानप्रतिनिधीकरणे सक० "प्रभुः प्रथमकल्प-स्य योऽनुकल्पे प्रवर्त्तते" स्मृतिः।

अव+अवधारणे "अनवक्लृप्तावेवः" सि० कौ०।

आ+भूषणे सक० आकल्पः भूषा

वि+ कल्पि—संशये विकल्पयति संशेते इत्यर्थः।

सम्—कल्पि इदं करिष्यामीत्येवंरूपे मानसव्यापारभेदे। "कामः सङ्कल्पोविचिकित्सेत्यादि" श्रुतिः "मनसा संकल्प-यति वाचाऽभिलपति" स्मृतिः। मानसकर्म्माभिलापने "संकल्पेन विना राजन्! यत्किञ्चित् कुरुते नरः" ति०त०।

कृप दौर्ब्बल्ये अद० चुरा० उभ० अक० सेट। कृपयति ते अचि-कृपत् त [ल्पयति ते कल्पति अचकल्पअचीक्लृपत्—त अकल्पीत्।

कृप युतौ चित्रीकरणे वा चुरा० पक्षे भ्वा० पर० सेट्। क-

कृप पु० चु० कृप—अच्। राजर्षिभेदे "यथा रुशमं श्यावकं कृपमिन्द्र! प्रावः" ऋ० ८,३,१२, "रुशमं श्यावकं कृपं चैतन्नामकांस्त्रीन् राजर्षीन्" यथा प्रावः" भा०। कृपा अस्त्यस्य पालनसाधनत्वेन अर्श० अच्। शरद्वतो गौतमस्य २पुत्रे ३तत्सुतायां स्त्री ङीप्। यथा च त-योरुत्पत्तिस्तन्नामता च तथा भा०आ०१३०अ०उक्तं यथा "कृपस्यापि मम ब्रह्मन्! सम्भवं वक्तुमर्हसि। शरस्तम्बात् कथं जज्ञे कथं वाऽस्त्राण्यवाप्तवान्। वैशम्पायन

उवाच। महर्षेर्गौतमस्यासीच्छरद्वान्नाम गौतमः। पुत्रः किल महाराज! जातः सह शरैर्विभो!। न तस्य वेदाध्ययने तथा बुद्धिरजायत। यथाऽस्य बुद्धिरभवद्धनुर्वेदे परन्तप!। अधिजग्मुर्यथा वेदांस्तपसा ब्रह्मचारिणः। तथा स तपसोपेतः सर्व्वाण्यस्त्राण्यवाप ह। धनुर्वेदपरत्वाच्च तपसा विपुलेन च। भृशं सन्तापयामास देवराज स गौतमः। ततो जानपदीं नाम देवकन्यां सुरेश्वरः। प्राहिणोत्तपसो विघ्नं कुरु तस्येति कौरव!। सा हि गत्वाश्रमं तस्य रमणीयं शरद्वतः। धनुर्वाणधरं बाला लोभयामास गौतमम्। तामेकवसनां दृष्ट्वा गौतमोऽप्सरसं वने। लोकेऽप्रतिमसंस्थानां प्रोत्फुल्लनयनोऽभवत्। धनुश्च शरस्तस्य कराभ्यामपतद्भुवि। वेपथुश्चापि तां दृष्ट्वा शरीरे समजायत। स तु ज्ञानगरीयस्त्वात्तपसश्च समर्थनात्। अवतस्थे महाप्राज्ञो धैर्य्येण परमेण ह। यस्तस्य सहसा राजन्! विकारः समदृश्यत। तेन सुस्राव रेतोऽस्य स च तन्नावबुध्यत। धनुश्च सशरं त्यक्त्वा तथा कृष्णाजिनानि च। स विहायाश्रमन्तञ्च ताञ्चैवाप्सरसं मुनिः। जगाम रेतस्तत्तस्य शरस्तम्बे पपात च। शरस्तम्बे च पतितं द्विधा तदभवन्नृप!। तस्याथ मिथुनं जज्ञे गौतमस्य शरद्वतः। मृगयाञ्चरतो राज्ञः शान्तनोस्तु यदृच्छया। कश्चित् सेनाचरोऽरण्ये मिथुनं तदपश्यत। धनुश्च सशरं दृष्ट्वा तथा कृष्णाजिनानि च। ज्ञात्वा द्विजस्य चापत्ये धनुर्वेदान्तगस्य ह। स राज्ञे दर्शयामास मिथुनं सशरं धनुः। स तदादाय मिथुनं राजा च कृपयान्वितः। आजगाम गृहानेव मम पुत्त्राविति ब्रुवन्। ततः संवर्द्धयामास संस्कारैश्चाप्ययोजयत्। प्रातीपेयो नरश्रेष्ठो मिथुनं गौतमस्य तत्। गौतमोऽपि ततोऽभ्येत्य धनुर्वेदपरोऽभवत्। कृपया यन्मया बालाविमौ संवर्द्धिताविति। तस्मात्तयोर्नाम चक्रे तदेव स महीपतिः। गोपितौ गौतमस्तत्र तपसा समविन्दत। आगत्य तस्मै गोत्रादि सर्वमाख्यातवांस्तदा। चतुर्विधं धनुर्वेदं शास्त्राणि विविधानि च। निखिलेनास्य तत्सर्वं गुह्यमाख्यातवांस्तदा। सोऽचिरेणैव कालेन परमाचार्य्यतां गतः। ततोऽधिजग्मुः सर्वे ते धनुर्वेदं महारथाः। धृतराष्ट्रात्मजाश्चैव पाण्डवाः सह यादवैः। वृष्णयश्च नृपाश्चान्ये नानादेशसमागताः”।

“अहल्या कन्यका यस्यां शतानन्दस्तु गौतमात्। तस्य सत्यधृतिः पुत्रो धनुर्वेदविशारदः। शरद्वांस्तत्सुतो यस्य सर्वैश्यादर्शनात् किल। शरस्तम्बेऽपतद्रेतो मिथुनं तदभूत् सुतम्। तद्दृष्ट्वा कृपयाऽगृह्णाच्छान्तनुर्मृगयां चरन्। कृपः कुमारः कन्या च द्रोणपत्न्यभवत् कृपी” भाग० ९,२१।। स च रुद्रांशसम्भूतः यथाह “यस्तु राजन्। कृपोनाम ब्रह्मर्षिरभवत् क्षितौ। रुद्राणान्तु गणाद्विद्धि संभूतमतिपौरुषम्” भा० आ० ६७अ०। स च चिरजीवी। “अश्वत्थामा बलिर्व्यासो हनूमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः” पुरा०। “ततो दीर्घायुषं व्यासं रामं द्रौणिं कृपं बलिम्। प्रह्लादञ्च हनूमन्तं विभीषणमथार्चयेत्” ति० त० गर्गः। ४कर्म्मणि च “यमासा कृपनीडं भासा केतुम् वर्द्धयन्ति” ऋ० १०,२०,२, “कृपनीडं कर्म्मस्थानम्” भा०।

कृपण त्रि० कृप–क्युन् न लत्वम्। अदातरि कदर्ये अमरः “कृपणेन समोदाता न कश्चिद्भुवि विद्यते। अनश्नन्नेव वित्तानि यत् परेभ्यः प्रयच्छति” व्यासः। “दातारं कृपणं मन्ये मृतोऽप्यर्थं न मुञ्चति” व्यासः। २मन्दे त्रि०मेदि० “कृपणाः फलहेतवः” गीता। ३महाव्यसनप्राप्ते दीने। “महद्धा व्यसनं प्राप्तो दीनः कृपण उच्यते”। रामा०; श्रेण्या०अभूततद्भावेऽर्थेऽस्य कृतादिभिः स०। कृपणकृतः। कृपणस्य भावः ष्यञ्। कार्पण्य दीनतायां न० “कार्पण्यदोषोपहतस्वभावः” गीता। तल्। कृपणता स्त्री, त्व कृपणत्व न० तत्रार्थे। ४दैन्ये न०। “वक्तुं न त्वहमुत्सहे सकृपणं देहीति दीनं वचः” शान्तिश०। सुखा० वेदनायाम् क्यङ्। कृपणायते दैन्यमनुभवतीत्यर्थः। सुखा० अस्त्यर्थे इनि। कृपणिन् दैन्ययुक्ते त्रि० स्त्रियां ङीप्। ५क्रिमौ पु० मेदि०। कृतः पणोयस्य वेदे नि० तलोपः। ६कृतपणे पणक्रीते दासादौ “एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात् प्रैति स कृपणः” छ०उ०। “कृपणः पणक्रीत इव दासादिः” भा०

कृपा स्त्री कृप–भिदा० अङ् “कृपेः संप्रसारणञ्च” गणसू० संप्र०। अनुपहेच्छायां प्रत्युपकारानपेक्षया परदुःखप्रहरणेच्छायाम् अमरः “मिथुने कृपावती” कुमा०।

कृपाण पु० कृपां नुदति नुद–ड संज्ञायां णत्वम्। १खड्गे अमरः। गौरा० ङीष्। २कर्त्तर्य्याम् स्त्री अमरः। ३छुरिकायाम् स्त्री मेदि०। स्वार्थे क। कृपाणक। खड्गे पु० टाप् अत इत्वम्। कृपाणिका छुरिकायां स्त्री हेमच०

कृपाद्वैत पु० बौद्धभेदे हेम०। [कृपायुक्ते अमरः।

कृपालु त्रि० कृपां लाति ला–आदाने मित० डु। दयालौ

कूपीट न० कुप–कीटन्। १उदरे २जले च मेदि०। ३वने ४दम्भने च शब्दरत्ना०। कृपीटयोनिः।

कृपीटपाल पु० कृपीटं पालयति पालि–अण् उप०स०। १समुद्रे। २केनिपाते नौकाङ्गे काष्ठभेदे च मेदि० ३वायौ शब्दरत्ना० तस्य उदरवनयोःपालकत्वात् तथात्वम्।

कृपीटयोनि पु०कृपीटस्य जलस्य योनिः कृपीटं काष्ठं योनिरस्य वा। वह्नौ अमरः"अग्नेरापः इति श्रुतेस्तस्य जलहेतुत्वात् काष्ठोद्भूतत्वाच्च तथात्वम्। तत्पुरुषे स्त्री इति भेदः

कृपीपति पु० ६त०। द्रोणाचार्य्ये शब्दमाला। तस्यास्तत्पतित्वकथा कृपशब्दे दृश्या। [कृपीतनयादयोऽप्यत्र

कृपीसुत पु० ६त०। भारतप्रसिद्धे अश्वत्थाम्नि त्रिका०

कृ(क्रि)मि पु० क्रम–इन् अतइत्त्वम्"भ्रमेः सम्प्रसारणञ्च" उ० इत्यतः सम्प्रसारणानुवृत्तौ सम्प्रवा। १क्षुद्रजन्तुभेदे उज्ज्व-ल०। "लुम्पन्ति कीटकृमयः परितस्तथैते" नागार्ज्जनीये ऋकारयुक्तपाठः। २लाक्षायां ३कृमियुक्ते ४खरे गर्द्दभे च मेदि०। ५रोगभेदे पु०। तन्निदानादि सुश्रुते उक्तं यथा "अथातः कृमिरोगमध्यायं व्याख्यास्यामः। अजीर्णाध्यशनासात्म्यैर्विरुद्धमलिनाशनैः। अव्यायामदिवास्वप्नगुर्व्वतिस्निग्धशीतलैः। माषपिष्टान्नविदलविसशालूकसेरुकैः। पर्णशाकसुराशुक्तदधिक्षीरगुडेक्षुभिः। पललानूपपिशितपिन्याकपृथुकादिभिः। स्वाद्वम्लद्रवपानैश्च श्लेष्मा पित्तञ्च कुप्यति। कृमीन् बहुविधाकारान् करोति विविधाश्रयान्। आमपक्वाशयस्तेषां प्रसवः प्रायशः स्मृतः। विंशतेः कृमिजातीनां त्रिविधः सम्भवः स्मृतः। पुरीषकफरक्तानि तेषां वक्ष्यामि लक्षणम्। अव्यवा वेयवाः किप्या क्षिप्या गण्डूपदास्तथा। चूरवो द्विमुखाश्चैव सप्तैवैते पुरीषजाः। श्वेताः सूक्ष्मास्तुदन्त्येते गुदं प्रतिसरन्ति च। तेषामेवापरे पुच्छैः पृथवश्च भवन्ति हि। शूलाग्निमान्द्यपाण्डुत्वविष्टम्भवलसङ्क्षयाः। प्रसेकारुचिहृद्रोगविड्भेदास्तु पुरीषजैः। रक्ता गण्डूपदा दीर्घा गुदकण्डूनिपातिनः। शूलाटोपशकृद्भेदपक्तिनाशकराश्च ते। दर्भपुष्पा१ महापुष्पा२ प्रलूना३ चिपिटा४स्तथा। पिपीलिका५ दारुणाश्च६ कफकोपसमुद्भवाः। रोमशा रोममूर्द्धानः सपुच्छाः श्यावमण्डलाः। रूढधान्याङ्कुराकाराः शुक्लास्ते तनवस्तथा। मज्जादा१ नेत्रलेढार२स्तालुश्रोत्रभुज३स्तथा। शिरोहृद्रोगवमथुप्रतिश्यायकराश्च ते। केशरोमनखादाश्च४ दन्तादाः५ किक्किशा६स्तथा। कुष्ठजाः परीसर्पा७ ज्ञेयाः शोणितसम्भवाः। ते सरक्ताश्च कृष्णाश्च स्निग्धाश्च पृथवस्तथा। रक्ताधिष्ठानजान् प्रायोविकारान् जनयन्ति ते। माषपिष्टान्नलवणगुडशाकैः पुरीषजाः। मांसमाषगुडक्षीरदधिशुक्तैः कफोद्भवाः। विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवन्ति हि। ज्वरो विवर्णता शूलं हृद्रोगः सदसंभ्रमः। भक्तद्वेषोऽतिसारश्च सञ्जातकृमिलक्षणम्। दृश्यास्त्रयोदशाद्यास्तु कृमीणां परिकीर्त्तिताः। केशादाद्यास्त्वदृश्यास्ते द्वावाद्यौ परिवर्जयेत्। एषामन्यतमं ज्ञात्वा जिघांसुः सिग्ध्वमातुरम्"। "तुदन्त्यामत्वचं दंशा मशकामत्कुणादयः। रुदन्तं विगतज्ञानं क्रिमयः क्रिमिलं यथा" भाग०,३,३१.२८,

स्वार्थे क तत्रार्थे "ततो भक्षयतस्तस्य फलात् कृमिरभूदणुः। ह्रस्वकस्तु स मुनिः कृमिर्मां दशतामयम्"। "एवमुक्त्वा स राजेन्द्रो ग्रीवायां सन्निवेश्य तम्। कृमिकं प्राहसत्तूर्णं मुमूर्षुर्नष्टचेतनः" भा० आ० ४३अ०।

कृमिकण्टक न० कृमौ कृमिरोगे कण्टकमिव तन्नाशकत्वात्। १विडङ्गे २चित्राङ्गे (चिता) ३उदुम्बरे च मेदि० तेषां तन्नाशकत्वात् तथात्वम्।

कृमिकर पु० कृमिं करोति कृ–ताच्छील्यादौ ट च। कीटभेदे "कोठागारी कृ(क्रि)मिकरोयस्य मण्डलपुच्छकः" सुश्रु० प्राणनाशनकीटोक्तौ

कृमिकर्ण(क) पु० कृमियुक्तः कर्णोयत्र वा कप्। सुश्रुतोक्ते कर्णरोगभेदे। "यदा तु मूर्च्छन्त्यथवापि जन्तवः सृजन्त्यपत्यान्यथवापि मक्षिकाः। तदञ्जनत्वात् श्रवणो निरुच्यते भिषग्भिराद्यैः कृमिकर्णकस्तु सः"। "कृमिकर्णप्रतीनाहौ विद्रधिर्द्विविधस्तथा"। "कृमिकर्णकनाशार्थं कृमिघ्नं योजयेद्विधिम्" इति च सुश्रु०।

कृमिकोषोत्थ न० कृमेः कोषादुत्तिष्ठति उद्+स्था–क ५त०। कौषेये (रेशमी कापड) वस्त्रे अमरः।

कृमिग्रन्थि पु० सुश्रुतोक्ते सन्धिगतरोगभेदे। तद्विवृतिर्यथा "अथातः सन्धिगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः पूयालसः सोपनाहः स्रावः पर्वणिकालजी। क्रि(कृ)मिग्रन्थिश्च विज्ञेया रोगाः सन्धिगता नवेति" विभज्य क्रि(कृ)मिग्रन्थिर्वर्त्मनः पक्ष्मणश्च कण्डूं कुर्य्युः कृमयः सन्धिजाताः"। सुश्रु०

कृमिघ्न पु० कृमिं हन्ति हन–ताच्छील्यादौ टक् "हन्तेरत्पूर्वस्य" पा०नियमात् न णत्वम्। १विडङ्गे अमरः २पलाण्डौ (पेयाज) ३कोलकन्दे ५पारिभद्रे (पालिदामांदार) ६भल्लातके (भेला) च राजनि० तेषां कृमिघाति-

तथा तथात्वम् ७हरिद्रायां स्त्री० भावप्र० अजा० टाप्। दविडङ्गे स्त्री० ङीप् राजनि०

कृमिज न० कृमिभिर्जन्यते कृमेर्जायते वा जन–ड। १अगुरुणि अमरः। २कृमिजातमात्रे त्रि० ३लाक्षायां स्त्री० राजनि०

कृमिजग्ध न० कृमिभिर्जग्धम्। उपचारात् तज्जाते अगुरुचन्दने राजनि०

कृमिजलज पु० कृमिरिव जलजः। कृमिशङ्खे राजनि०

कृमिण त्रि०कृमिरस्त्यस्य पामा० न णत्वञ्च। कृमियुक्ते

कृमिदन्तक पु० कृमियुक्तोदन्तोऽत्र। दन्तरोगभेदे "कृष्णाच्छिद्रचलः स्रावी ससंरम्भो महारुजः। अनिमित्त रुजोवातात् स ज्ञेयः कृमिदन्तकः" तल्लक्षणम् "शौषिरो गलगालुकं कण्ठश्चा कृमिदन्तकः" क्षुद्ररोगगणनायाम् सुश्रु०

कृमिफल पु० कृमयः फलेऽस्य। उदुम्बरे शब्दचिन्ता०

कृमिभोजन पु० कृमिभिर्भुज्यतेऽत्र भुज–आधारे ल्युट् ६त०। नरकभेदे तामिस्राग्धतामिस्राद्युपक्रमे "अन्धकूपकृमिभोजन इत्यादिना विभज्य भाग०५।२६।२४ तत्स्वरूपमुक्तं यथा

"यस्त्विह वा असंविभज्याश्नाति यत् किञ्चनोपनमत निर्मितपञ्चयज्ञोवायसंस्तुतः स परत्र कृमिभोजने नरकाधमे निपतति। तत्र शतसहस्रयोजने कृमिकुण्डे कृमिभूतः स्वयं कृमिभिरेव भक्ष्यमाणः कृमिभोजनोयावत्तदप्रत्ताप्रहुतादोऽनिर्वेशमात्मानं यातयते"।

कृमिभक्षादयोऽप्यत्र विष्णु पु० तन्नामतयैव कीर्त्तनात्

कृमिमत् त्रि० कृमि+अस्त्यर्थे मतुप् मोपधत्वेऽपि यवादि० न मस्य वः। कृमियुक्ते स्त्रियां ङीप्।

कृमिरिपु ६त०। विडङ्गे शब्दरत्ना०। कृमिशत्रु प्रभृतयोऽप्यत्र

कृमिल त्रि० कृमिं लाति ला–क। कृमियुक्ते बहुप्रसवायां स्त्रियां स्त्री० हेमच०

कृमिलाश्व पु० आजमीढवंश्ये नृपभेदे "आजमीढात् सुनीलिन्यां सुशान्तिरुदपद्यत। पुरुजातिः सुशान्तेस्तु वाह्याश्वः पुरुजातितः। वाह्याश्वतनयाः पञ्च बभूवुरमरोपमाः। मुद्गलः सृञ्जयश्चैव राजा बृहदिषुस्तथा। यवीनरश्च विक्रान्तः कृमिलाश्वश्च पञ्चमः" हरिवं० ३२अ०

कृमिलोदर त्रि० कृमिं लाति ला–क तादृशमुदरमस्य। कृमियुक्तोदररोगभेदयुक्ते। "भुक्तास्मृसंसर्गसंसृष्टोजायते कृमिलोदरः" शाता०।

कृमिवारिरुह पु०कृमिरिव वारिरुहः। कृमिशङ्खे राजनि०

कृमिवृक्ष पु० कृमिप्रधानो वृक्षः। कोषाम्रे शब्दप्रकाशः।

कृमिशङ्ख पु० कृमिरिव शङ्खः। शङ्खभेदे राजनि०

कृमिशुक्ति स्त्री कृमिरिव शुक्तिः। जलशुक्तौ राजनि०

कृमिशैल पु० कृमीणां शैल इव। वल्मीके। कृमिपर्वतादयोऽप्यत्र पु० [वमशृङ्गे राजनि०।

कृमीलक पु० कृमीन् ईरयति जनयति ईर–ण्वुल् रस्य लः।

कृमुक पु० क्रमुक+पृषो०। गुवाकवृक्षे तस्योत्पत्तिकथा शत० ब्रा०६।६।२।११

"स कार्मुकी स्यात्। देवासुराउभये प्राजापत्या अस्पर्धन्त ते देवा अग्निमनीकं कृत्वा असुरानभ्यायं स्तस्याचिषः प्रस्कन्दीत्तस्माहरा अथ प्राच्यं स्तस्यां प्रत्यतिष्ठत्स कृमुकोऽभवत्तस्मात् स स्वादु रसोऽहि तस्मात् लोहितो चिर्हि स एषोऽग्निरेव यत् कृमुकोऽग्निमेवास्मिन्न तत्सम्भूतिं दधाति"। कृमुकस्येयम् अण् ङीप्। कार्मुकी कृमुकसम्बन्धिन्यां समिधि स्त्री

कृव कृतौ हिंसे च इदित् स्वा० प० सक० सेट् ओ कृ इत्यादेशः। कृणोति–अकृणोत् अकृवीत्। इदित्त्वात् कृण्वते इत्यत्र न नलोपः। [(तनि) सि०कौ०।

कृवि पु० करोत्यनेन कृ–वि किञ्च। तन्तुवयनसाधनद्रव्ये तन्त्रे

कृश तनूकरणे दिवा० पर०सक० सेट्। कृशति इरित् अकृशत् अकशीत्। णिचि कर्शयति ते अचीकृशत्–त अचकर्शत्–त। कर्शयाम् बभूव आस चकार चक्रे। कृशः।

कृश त्रि० कृश–क्त नि०। १अल्पे, २सूक्ष्मे च। "आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः" उपनासकर्म तन्तु" "क्षत्रियञ्चैव सर्पञ्च ब्राह्मणं वा बहुश्रुतम्। नावमन्येत वै भूयः कृशानपि कदाचन" मनुः "ब्राह्मणस्य हरन्येव! कृशवृत्तेः कदाचन" भा० आनु० ६२अ०। सुमध्ये कृशोदरी। कृशस्य भावः इमनिच् क्रशिमन् तद्भावे पु०। ष्यञ् कार्श्य न०। तल्। कृशता स्त्री, त्व 'कृशत्व न० तद्भावे "त्वयेयं कृशता कृता" सा० द०। अतिशयेन कृशः इष्ठन् क्रशिष्ठ ईयसुन् क्रशीयस्। अतिशयकर्मे त्रि० ईयसौ स्त्रियां ङीप्।

कृशर पु० कृशमल्पमायां राति रा क। "तिलतण्डुल संमिश्रः कृशरः परिकीर्त्तितः" स्मृत्युक्ते १पक्वान्नभेदे हेमच०। (खिचड़ी) त्वाति २पक्वान्नभेदे स्त्री टाप् भावप्र० कृतान्नशब्दे लक्षणादि दृश्यम्। कृशरस्य शनैश्चराय मृत्युयज्ञे बलित्वेन देयः यथाह मत्स्यपुरा० "गुडौदनं रवेर्दद्यात् सोमाय घृतपायसम्। अंगारकाय संयावं बुधे दद्यात्

क्षीरान्नं सोमसुनवे । दध्योदनञ्च जीवस्य शुक्राय तु घृतौदनम् । शनैश्चराय कृशरमाजमांसञ्च राहवे । चित्रौदनञ्च केतुभ्यः सर्व्वभक्ष्यैः समर्चयेत्” ।

कृशला स्त्री कृशं कार्श्यं लाति ला–क टाप् । केशे शब्दच० ।

कृशशाख पु० कृशा शाखा यस्य । १पर्पटे (पापडी) राजनि० २ह्रस्वशाखान्विते त्रि० ।

कृशाङ्गी स्त्री कृशमङ्गं यस्याः ङीष् । १प्रियङ्गुवृक्षे शब्दचन्द्रिका २सूक्ष्माङ्गयुक्ते त्रि० स्त्रियां ङीष् ।

कृशानु पु० कृश–आनुक् । १वह्नौ २चित्रकवृक्षे च अमरः । तस्य तन्नामकत्वात् “तस्मिन् कृशानुसाङ्गते” भट्टिः । ३सोमपालके । “इत्कृशानोरस्तुर्मनसाह बिभ्युषा” ऋ० ८,७७,२, “कृशानोः सोमपालस्य” “कृशानुः सोमपालः सप्तस्य पदः” ऐत०ब्रा०३,२६,भा० । “कृशानुरस्ता मनसा भुरण्यन्” ऋ०४,२७,३, “कृशानुरेतन्नामकः सोमपालः” भा० । ४सव्यपार्श्वस्थरश्मिधारके च । “कृशानो ! सव्यानायच्छ” ता०ब्रा० “कृशानुर्नाम सव्यपार्श्वस्थानां रश्मीनां धारयितेति” भा० । ततः मत्वर्थे गोषदा० टन् । कृशानुक यज्ञियुक्ते त्रि० तद्गणे कृशानुस्थाने कृशाश्व इति वा पाठः कृशाश्वोऽस्य यज्ञिरेशार्घः ।

कृशानुरेतस् पु० कृशानौ पतितं रेतोऽस्य । १महादेवे अमरः । तस्य यथा वह्नौ तेजोनिषेकः तथा कालिकापु० ४७अ० उक्तं कालिकापु० शब्दे २०५५पृ० तत्कथामात्रं दर्शितं विस्तरस्तु कालिकापुराणे दृश्यः । ६त० । २वह्नेस्तेजसि न० ।

कृशाश्व त्रि० कृशोऽश्वोऽस्य । १ह्रस्वाश्वस्वामिनि । तृणबिन्दुवंश्ये २राजर्षिभेदे पु० । “तत् पुत्रात् संयमादासीत् कृशाश्वः सहदेवजः । कृशाश्वात् सोमदत्तोऽभूत्” भाग०९,२,३२,श्लो० । ३दक्षजामातृभेदे पु० “कृशाश्वोऽर्चिषि भार्य्यायां धूमकेशमजीजनत् । धिषणायां वेदशिरं देवलं वयुनं मनुम्” भाग० ६ ६,१८,श्लो० । रामा० तु जयाप्रभयोर्दक्षकन्ययोः तद्भार्य्यात्वमुक्तं यथा “सर्वास्त्राणि कृशाश्वस्य पुत्राः परमधार्म्मिकाः । कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति । तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसुतासुताः । नैकरूपा महावीर्य्या दीप्तिमन्तो जयावहाः । जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे । असुवातां च शस्त्राणि शतं परमभास्वरम् । पञ्चाशतं सुतान् लेभे जया लब्धवरा वरान् । वधायासुरसैन्यानामप्रमेयानुरूपिणः । सुप्रभाऽजनयच्चापि पुत्रान् पञ्चाशतं पुनः । संहारान्नाम दुर्द्धर्षान्दुराक्रामान् बलीयसः । तानि चास्त्राणि वेत्त्येष यथावत् कुशिकात्मजः । अपूर्वाणां च जनने शक्तो भयश्च धर्म्मवित्” । “देवि एतानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात् कौशिकमृषिमुपसंक्रान्तानि तेन च ताडकावधे प्रसादीकृतान्यार्य्यस्य” उत्तररामच० । “व्यश्वः साश्वः कृशाश्वश्च शशबिन्दुश्च पार्थिवः” भा०स०८अ० यमसभ्योक्तौ “धौन्धुमारिर्दृढाश्वश्च” इत्युपक्रमे “संहताश्वो निकुम्भस्य पुत्रो रणविशारदः । अकृशाश्वकृशाश्वौ च संहताश्वस्य तौ नृप” हरिवं० १२अ० उक्ते धुन्धुमारवंश्ये ४नृपभेदे च । ततः तेन प्रोक्तमधीयते नटसूत्रम् इनि । कृशाश्विन् तत्प्रोक्तनटसूत्राध्यायिषु ब०व० । [रक्ताणी) राजनि० ।

कृशिका स्त्री कृशैव स्वार्थे क । आखुकर्णीलतायां (उन्दु-

कृष विलेखने आकर्षणे च तुदा० आ० सक० अनिट् । कृषते । अकृक्षत–अकृष्ट । चकृषे चकृषिषे । क्रष्टा कर्ष्टा क्रक्ष्यते । कर्षणम् । प्रतिकृषते ।

कृष विलेखने आकर्षणे च भ्वा० पर० सक० अनिट् । कर्षति अक्राक्षीत्–अकार्क्षीत्–अकृक्षत् । चकर्ष चकर्षिथ चकृषिव । क्रष्टा कृष्यात् क्रक्ष्यति । कर्म्मणि कृष्यते अकर्षि अकृक्षाताम् अकृषाताम् । कृष्यः कर्षणीयः क्रष्टव्यः । क्रष्टा कर्षकः कर्षी कर्षन् कृष्यमाणः । क्रक्ष्यन् क्रक्ष्यमाणः । कृष्टः कृष्टिः कृष्ट्वा अनुकृष्य । कर्षः कर्षणम् ।

अनु+पूर्वस्थितस्य पदादेः उत्तरवाक्ये योजनार्थे अनुसन्धाने अनुषङ्गे सक० अनुकर्षति । अनुकर्ष शब्दे विवृतिः

अप+हीनताकरणे स्वकालात् पूर्व्वत्र काले करणे च सक० अपकर्षति अपकर्षसमिखण्डनम् । अपकृष्टः । अपकर्ष शब्दे विवृतिः

अप+आ+निवर्त्तने सक० । “तमध्वरमपाकृष्टुं निदेशात् स्वर्गिणः पितुः” रघुः ।

अभि+आभिमुख्येन कर्षणे सक० अभिकर्षति ।

अव+अधःस्थतया कर्षणे सक० । अवकर्षति

आ+विषयान्तरतोनयने सक० ; आकर्षति

उद्+अतिशायने प्राधान्यप्रापणे स्वकालात् उत्तरकालकरणे आकर्षणे च सक० । उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणे” रामा०ल० ३८,१४ । उत्कर्षशब्दे विवृतिः

निस्+निर्+निस्सारणे निश्चये च सक० । निष्कर्षति “निष्क्रष्टुमर्थं चकमे कुबेरात्” रघुः । तदयं निष्कर्षः

प्र+अतिशयेन कर्षणे उत्तमताधाने सक० प्रकर्षति प्रकृष्टः

प्रकर्षः प्राधान्यभवने अक॰ "इदं तु मम दीनस्य मनो भूयः प्रकर्षति" रामा॰ सु॰ १,१,

सम् + सम्यक्कर्षणे सक॰ सङ्कर्षणम् । [समाकर्षी ।

सम् + आ + सम्यक्तया दूरपर्य्यन्तनयने सक॰ । समाकर्षति

कृषधातुर्न्यादिपाठात् द्विकर्म्मकः । कर्षणञ्च भूमिसंयोजनेन बलेन देशान्तरसंयोगानुकूलव्यापारानुकूलव्यापारः तेनास्य द्विव्यापारबोधकतया द्विकर्म्मकत्वम् । ग्राममजां कर्षति इत्यादौ अकथितञ्चेत्यादि पा॰ अजादेः कर्म्मत्वम् । अत्र प्रधाने कर्म्मण्येव वाच्ये लकारादयः । "प्रधाने नीकृष्वहाम्" भर्त्तृहर्य्युक्तेः । अजा ग्रामं कृष्यते । विलेखनञ्च विदारणं तदर्थे न द्विकर्म्मकतेति भेदः

कृषक त्रि॰ कृष–क्वुन् । १कर्षके कृषिशब्दे उदा॰ । २फाले न॰ मेदि॰ । ३वृषे पु॰ हेम॰ ।

कृषर न॰ कृष–करन् । कृशरशब्दार्थे पृषो॰ कृसरोऽप्यत्र केचित्

कृषाण त्रि॰ कृष–बा॰ आनक् । कर्षके कृषिशब्दे उदा॰

कृषि स्त्री कृष–इक् । शस्योत्पादनार्थं भूमिकर्षणरूपे वैश्यवृत्तिभेदे अमरः कर्षकस्य प्रकारादि कृषिपराशरे दर्शितं यथा तत्रादौ कृषिप्रशंसा "चतुर्व्वेदालयो ब्रह्मा ब्रवीति कृषणं वचः । अलक्ष्म्या युज्यते सोऽपि प्रार्थनालाघवान्वितः । एकयैव पुनः कृष्या प्रार्थको नैव जायते । कृष्यान्वितो हि लोकेऽस्मिन् भूयादेकश्च भूपतिः । सुवर्णरौप्यमाणिक्यवसनैरपि पूरिताः । तथापि प्रार्थयन्त्येव कृषकान् भक्ततृष्णया । कण्ठे हस्ते च कर्णे च सुवर्णं यदि विद्यते । उपवासस्तथापि स्यादन्नाभावेन देहिनाम् । अन्नं प्राणा बलञ्चान्नमन्नं सर्व्वार्थसाधकम् । देवासुरमनुष्याश्च सर्व्वे चान्नोपजीविनः । अन्नन्तु धान्यसम्भूतं धान्यं कृष्या विना न च । तस्मात् सर्वं परित्यज्य कृषिं यत्नेन कारयेत् । कृषिर्धन्या कृषिर्मेध्या जन्तूनां जीवनं कृषिः । हिंसादिदोषयुक्तोऽपि मुच्यतेऽतिथिपूजनात् । तेनार्च्चितं जगत् सर्व्वमतिथिर्येन पूजितः । अर्च्चितास्तेन देवाश्च स एव पुरुषोत्तमः" ।

अथ कृषेः स्वयमवेक्षणोक्तिः "फलत्यवेक्षिता स्वर्णं, दैन्यं सैवानवेक्षिता । कृषिः कृषिपुराणज्ञ इत्युवाच पराशरः" ।

अथ चान्ये मुनयश्चाहुः "पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् । गोषु चात्मसमं दद्यात् स्वयमेव कृषिं व्रजेत् । कृषिर्गावो वाणिज्याः स्त्रियो राजकुलानि च । क्षणेनैवावसीदन्ति मुहूर्त्तमनवेक्षणात् । मन्त्रीव कृषिः कार्य्या लोकानां हितकाम्यया असमर्थो हि कृषको भिक्षामटति नीचवत् । गोहितः क्षेत्रगामी च कालज्ञो बीजतत्परः । वितन्द्रः सर्व्वशस्याढ्यः कृषको नावसीदति" ।

अथ वाहपोषणादिप्रकारः । "कृषिञ्च तादृशीं कुर्य्यात् यथा वाहान्न पीड़येत् । वाहपीडार्जितं शस्यं गर्हितं सर्वकर्म्मसु । वाहपीडार्जितं शस्यं फलितञ्च चतुर्गुणम् । वाहनिश्वासविफलः कृषको निःस्वतां व्रजेत् । गुडकैर्यवसैर्भूसैः सुधान्यैरपि पोषणैः । वाहाः क्वचिन्न सीदन्ति सायं प्रातश्च चारणात्" ।

अथ गोशालाविधानम् । "गोशाला सुदृढ़ा यस्य शुचिर्गोमयवर्ज्जिता । तस्य वाहा विवर्द्धन्ते पोषणैरपि वर्जिताः । शकृन्मूत्रविलिप्ताङ्गा वाहा यत्र दिने दिने । निःसरन्ति गवां स्थानात् तत्र किं पोषणादिभिः । पञ्चपञ्चायता शाला, गवां वृद्धिकरी मता । सिंहस्थाने कृता सैव गोनाशं कुरुते ध्रुवम् । सिंहगेहेऽर्पितां चैव गोशालां कुरुते यदि । प्रमादान्मन्दबुद्धित्वात् गवां नाशो भवेत्तदा । तण्डुलानां जलञ्चैव तप्तमण्डं भृगोदकम् । कार्पासास्थितुषञ्चैव गोस्थाने गोविनाशकृत् । सम्मार्ज्जनीञ्च मुषलमुच्छिष्टं गोनिकेतने । कृत्वा गोनाशमाप्नोति तथा तत्राजबन्धने । गोमूत्रजालकेनैव तत्रावस्करमोचनम् । कुर्व्वन्ति स्वेच्छमेधिष्यस्तत्र का वाहवासना । विलम्बं गोमयस्यापि रविभौमशनेर्द्दिने । न कारयेत् प्रयत्नेनापि गोवृद्धिं यदि वाञ्छति । वारत्रयं परित्यज्य दद्यादन्येषु गोमयम् । विलम्ब्य शनिभौमेषु गवां हानिकरः स्मृतः । रोमपूत्रारीषाणि पङ्कानि च रजांसि च । न पतन्ति गवां यत्र तत्र लक्ष्मीः स्थिरा भवेत् । सन्ध्याकाले च गोस्थाने दीपो यत्र न दीयते । स्थानं तत् कमलाहीनं वीक्ष्य क्रन्दन्ति गोगणाः । हलमष्टगवं धर्म्म्यं षड्गवं व्यवसायिनाम् । चतुर्गवं नृशंसानां द्विगवञ्च गवाशिनाम् । नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम् । नित्यञ्च त्रिहले भक्तं नित्यमेकहले ऋणम् । आत्मपोषणमात्रन्तु द्विहलेन च सर्व्वदा । पितृदेवातिथीनाञ्च दुःख्यं सोऽक्षमो भवेत् ।

अथ गोपर्वकथनम् "गोपूजां कार्त्तिके कुर्य्यात् लगुड़पतिपत्तिथौ । बद्धा श्यामलतां स्कन्धे लिप्ता तैलहरिद्रया । कुङ्कुमैश्चन्दनैश्चापि कृत्वा चाङ्गे विलेपनम् । गृहीत्वा लगुडं हस्ते गोपालाः कृतभूषणाः ; ततो वाद्यैश्च

घण्टैश्च मण्डयित्वाऽम्बरादिभिः। भ्रामयेद्वृषभं मुख्यं ग्रामे गोविन्दशालये। गवामङ्गे तदा दद्यात् कार्त्तिकप्रथमे दिने। तैलं हरिद्रया युक्तं मिलित्वा कुङ्कुमैः सह। तप्तलोहादिकं तत्र गवामङ्गे प्रदापयेत्। छेदनञ्च प्रकुर्व्वीत लाङ्गूले कर्णकर्णयोः। सर्वा गोजातयः सुस्था भवन्त्येतेन तद्गृहे। नानाव्याधिविनिर्म्मुक्ता वर्षमेकं न संशयः"।

अथ गवां यात्राप्रवेशकालादि। पूर्व्वात्रयं धनिष्ठा च इन्द्राग्निसौम्यवारुणाः। एते शुभप्रदा नित्यं गवां यात्राप्रवेशयोः। उत्तरात्रयरोहिण्यां सिनीवाली चतुर्द्दशी। पुष्यश्रवणहस्तेषु चित्रायामष्टमीषु च। गवां यात्रां न कुर्व्वीत प्रस्थानं वा प्रवेशनम्। पशवस्तत्र नश्यन्ति ये चान्ये तृणचारिणः। अर्कार्किकुजवारेषु गवां यात्राप्रवेशयोः। गमने गोविनाशः स्यात् प्रवेशे स्वामिनो वधः"।

अथ गोमयकूटोद्धारः "माघे गोमयकूटन्तु संपूज्य श्रद्धयान्वितः। सारं शुभदिनं प्राप्य कुद्दालैस्तोलयेत्ततः। रौद्रे संशोष्य तत् सर्वं कृत्वा गुण्डकरूपिणम्। फाल्गुने प्रतिकेदारे गर्त्तं कृत्वा निधापयेत्। ततो वपनकाले तु कुर्य्यात् सारविमोचनम्। विना सारेण यद्धान्यं वर्द्धते न फलत्यपि"।

अथ हलसामग्रीकथनम् "ईषा युगो हलस्थाणुर्निर्य्योलस्तस्य पाशिका। अड्डचल्लश्च शौलश्च पच्चनी च हलाष्टकम्। पञ्चहस्ता भवेदीषा स्थाणुः पञ्चवितस्तिकः। सार्द्धहस्तस्तु निर्य्योलो युगः कर्णसमानकः। निर्य्योलपाशिका चैव अड्डचल्लस्तथैव च। द्वादशाङ्गुलमानो हि शौलोऽरत्निप्रमाणकः। सार्द्धद्वादशमुष्टिर्वा कार्य्या या नवमुष्टिका। दृढा पच्चनिका ज्ञेया लौहाग्रा वंशसम्भवा। आबन्धो मण्डलाकारः स्मृतः पञ्चदशाङ्गुलः। योक्त्रं हस्तचतुष्कञ्च रज्जुः पञ्चकरात्मिका। पञ्चाङ्गुलाधिको हस्तो हस्तो वा फालकः स्मृतः। अर्कस्य पत्रसदृशी पाशिका च नवाङ्गुला। एकविंशतिशल्यस्तु विद्धकः परिकीर्त्तितः। नवहस्ता तु मदिका(मइ)प्रशस्ता कृषिकर्म्मसु। इयं हि हलसामग्री पराशरमुनेर्म्मता। सुदृढा कर्षकैः कार्य्या शुभदा कृषिकर्म्मणि। अदृढा युज्यमाना सा सामग्री वाहनस्य च। विघ्नं पदे पदे कुर्य्यात् कर्षकाले न संशयः"।

अथ हलप्रसारणकालादि "अनिलोत्तररोहिण्यां मृगमूलपुनर्व्वसौ। पुष्याश्रवणहस्तेषु कुर्य्याद्धलिप्रसारणम्। हलप्रसारणं कार्य्यं कर्षकैः शस्यवृद्धये। शुक्रेन्दुजीववारेषु शशिजस्य विशेषतः। भौमार्कदिवसे चैव तथैव शनिवासरे। कृषिकर्म्मसमारम्भो राज्योपद्रवमादिशेत्। दशम्येकादशी चैव द्वितीया पञ्चमी तथा। त्रयोदशी तृतीया च सप्तमी च शुभावहा। शस्यच्छेदः प्रतिपदि द्वादश्यां वधबन्धनम्। बहुविघ्नकरी षष्ठी कुहूः कर्षकनाशिनी। हन्त्यष्टमी बलीवर्द्दान् नवमी शस्यघातिनी। चतुर्थी कीटजननी सर्वं हन्ति चतुर्द्दशी। वृषे मीने च कन्यायां युग्मे धनुषि वृश्चिके। एतेषु शुभलग्नेषु कुर्य्याद्धलप्रसारणम्। मेषलग्ने पशुं हन्यात् कर्कटे जलजात् भयम्। सिंहे चौरभयञ्चैव कुम्भे सर्पभयं तथा। मकरे शस्यनाशः स्यात् तुलायां प्राणसंशयः। तस्माल्लग्नं प्रयत्नेन कृष्यारम्भे विचारयेत्। शुभेऽर्क्के चन्द्रसंयुक्ते शुक्लयुग्मेन वाससा। शुक्लपुष्पैश्च गन्धैश्च पूजयित्वा यथाविधि। पृथिवीं हलसंयुक्तां पृथुञ्चैव प्रजापतिम्। अग्नेः प्रदक्षिणं कृत्वा भूरि दत्त्वा च दक्षिणाम्। फालाग्रं स्वर्णसंयुक्तं कृत्वा च मधुलेपनम्। अहेः क्रोड़े ग्रामपार्श्वे कुर्य्याद्धलप्रसारणम्। कर्त्तव्यो वासवो व्यासः पृथूरामः पराशरः। सम्पूज्याग्निं द्विजं देवं कुर्य्याद्धलिप्रसारणम्। कृष्णौ वृषौ हले श्लाघ्यौ रक्तौ वा कृष्णलोहितौ। शुक्लपार्ष्णी तयोः श्लाघ्यौ नवम्या च घृतेन च। उत्तराभिमुखो भूत्वा इन्द्रायार्घ्यं निवेदयेत्। शुक्लपुष्पसमायुक्तं दधिक्षीरसमन्वितम्। हर्षं कुरु देवेश! गृहाणार्घ्यं शचीपते!। निविष्टो विष्टरे भक्तः संस्थाप्य जानुनी क्षितौ। प्रणमेद्वासवं देवं मन्त्रेणानेन कर्षकः। वृषो महःकटिर्व्वर्ज्यश्चञ्चलाङ्गूलकर्णकः। सर्व्वशुक्लस्तथा वर्ज्यः कृषकैर्हलकर्म्मणि। हलप्रसारणं कार्य्यं नीरुगभिष्टकर्षकैः। क्षिप्ररेखा न कर्त्तव्या यथा प्राह पराशरः। एका तिस्रस्तथा पञ्च हलरेखाः प्रकीर्त्तिताः। एका जयकरी रेखा तृतीया चार्थसिद्धिदा। पञ्चमाख्या तु या रेखा बहुशस्यप्रदायिनी। हलप्रवाहकाले तु कूर्म्ममुत्पाटयेद्यदि। गृहिणी म्रियते तस्य तथा चाग्निभयं भवेत्। फालोत्पाटे च भङ्गे च देशत्यागो भवेद्ध्रुवम्। लाङ्गलो भिद्यते वापि प्रभुस्तस्य विनश्यति। ईषाभङ्गो भवेद्वापि कृषको जीवनाक्षमः। भ्रातृनाशो युगे भग्ने शौले च म्रियते वृषः। योक्त्रच्छेदे च रोगः स्यात् शस्यहानिश्च जायते। निपाते कर्षकस्यापि कष्टं स्याद्राजमन्दिरे। हलप्रवाहकाले तु गौरिकः प्रपतेद्यदि। ज्वरातिसाररोगेण मानुषो

म्रियते तदा । हले प्रवहमाने तु वृषो धावन् यदि व्रजेत् । कृषिभङ्गो भवेत्तस्य पीड़ा चापि शरीरजा । हलप्रवाहमानन्तु गौरेको नर्द्दते यदि । नाशालीढ़ं प्रकुर्वीत तदा शस्यं चतुर्गुणम् । प्रवाहान्मुक्तमात्रन्तु गौरेकः खनते यदि । अन्यस्य लेहनं कुर्य्यात् तदा शस्यं चतुर्गुणम् । हले प्रवहमाने तु शकन्मूत्रं यदा स्रवेत् । शस्यवृद्धिः शकृत्पाते मूत्रे वन्या प्रजायते । हलप्रसारणं येन न कृतं मृगकुम्भयोः । कुतस्तस्य कृषाणस्य फलाशा कृषिकर्म्मणि । हलप्रसारणं नैवं कृत्वा यः कर्षणं चरेत्, केवलं बलदर्पेण स करोति कृषिं वृथा । मृत् सुवर्णसमा माघे कुम्भे रजतसन्निभा । चैत्रे ताम्रसमा ख्याता धान्यतुल्या च माधवे । ज्यैष्ठे मृदेव विज्ञेया आषाढ़े कर्द्दमाह्वया । निष्फला कर्कटे चैव हलैरुत्पाटिता तु या"। तथाच पराशरः ।"हेमन्ते कृषग्रते हेम । वसन्ते ताम्ररौप्यकम् । धान्यं निदाघकाले तु दारिद्र्यन्तु घनागमे" ।

अथ बीजस्थापनविधिः "माघे वा फाल्गुने वापि सर्व्वबीजस्य सङ्ग्रहः । शोषयेदातपे सम्यक् नीहारे विनिधापयेत् । बीजस्य पुटिकां कृत्वा निधानं तत्र शोधयेत् । बीजं निधानसंमिश्रं फलहानिकरं परम् । एकरूपन्तु यद्बीजं फलं फलति निर्भरम् । एकरूप प्रयत्नेन तस्माद्बीजं समाहरेत् । सुदृढं पुटकं बद्ध्वा तृणं छिन्द्यात् विनिर्गतम् । अच्छिन्नतृणके ह्यस्मिन् कृषिः स्यात्तृणपूरिता । न वल्मीके न गोस्थाने न प्रसूतानिकेतने । न च वन्ध्यावति गेहे बीजस्थापनमाचरेत् । नोच्छिष्टः संस्पृशेद्बीजं न च नारी रजस्वला । न वन्ध्या गुर्व्विणी चैव न च सद्यःप्रसूतिका । घृतं तैलञ्च तक्रञ्च प्रदीपं लवणं तथा । बीजोपरि भ्रमेणापि कृषको नैव कारयेत्" । तथाच गार्ग्यः "दीपाग्निधूपसंस्पृष्टं दृष्ट्या चोपहतञ्च यत् । वर्ज्जनीयं सदा बीजं यद्गर्त्तेषु पिधापितम् । शोषितं बीजसंमिश्रं भ्रान्त्या न निर्वपेत् क्वचित् । निधानं गुल्मसंमिश्रं तद्बीजं वन्ध्यतां व्रजेत् । कृषाणसार केदारहलाङ्कलकादयः । सर्व्वे ते वन्ध्यतां यान्ति बीजे वन्ध्यत्वमागते । तिलधान्ययवादीनां विधिरेष प्रकीर्त्तितः । बीजे यत्नमतः कुर्य्यात् बीजमूलाः फलादयः"।

अथ बीजवपनविधिः "वैशाखे वपनं श्रेष्ठं ज्यैष्ठे तु मध्यमं स्मृतम् । आषाढे चाधमं प्राहुः श्रावणे चाधमाधमम् । रोपणार्थन्तु बीजानां शुचौ वपनमुत्तमम् । श्रावणे चाधमं प्रोक्तं भाद्रे चैवाधमाधमम् । उत्तरात्रयमूलेन्द्रमैत्रपैत्रेन्दुधातृषु । हस्तायामथ रेवत्यां बीजवापनमुत्तमम् । विष्णुपूर्वविशाखासु यमरौद्रानिलाहिषु । बीजानां वपनं कृत्वा बीजं प्राप्नोति मानवः । वपने रोपणे चैव वारयुग्मं विवर्ज्जयेत् । मूषिकाणां भयं भौमे मन्दे शलभकीटयोः । न वापयेत्तिथौ रिक्ते क्षीणे सोमे विशेषतः । एवं सम्यक् प्रयुञ्जानः शस्यवृद्धिमवाप्नुयात् । ज्यैष्ठान्ते त्रिदिनं सार्द्धमाषाढादौ तथैव च । वपनं सर्व्वशस्यानां फलार्थी कृषकस्त्यजेत्" । तथाच वराहः "वृषान्ते मिथुनादौ च त्रीण्यहानि रजस्वला । बीजं न वापयेत्तत्र जनः पापाद्विनश्यति । मृगशिरसि निवृत्ते रौद्रपादेऽम्बुवाची भवति ऋतुमती क्ष्मा भास्करे त्रीण्यहानि । यदि वपति कृषाणः क्षेत्रमासाद्य बीजं न भवति फललाभो दारुणस्तत्र कालः । हिमेन वारिणा सिक्तं बीजं शान्तमनाः शुचिः । इन्द्रं चित्ते समाधाय स्वयं मुष्टित्रयं वपेत् । कृत्वा धान्यस्य पुण्याह कृषका हृष्टमानसाः । प्राङ्मुखाः कलसं कृत्वा पठेयुर्मन्त्रमुत्तमम् । ओँ वसुधे ! हेमगर्भासि बहुशस्यफलप्रदे ! । वसुपूज्ये ! नमस्तुभ्यं वसुपूर्णास्तु मे कृषिः । रोपयिष्यामि धान्यानां वृषबीजानि प्राट्षि । सुस्था भवन्तु कृषका धनधान्यसमृद्धिभिः । वासवो नित्यवर्षी स्याच्चित्यवर्षास्तु तोयदाः । शस्यसम्पत्तयः सर्व्वाः सफलाः सन्तु नीरुजः । इति प्रणम्य वसुधां कृषकान् घृतपायसैः । भोजयित्वा कृषी भूरि निर्व्विघ्नां कुरुते कृषिम्" ।

अथ मदिकादानम् । "बीजस्य वपनं कृत्वा मदिकां तत्र दापयेत् । विना मदि(मइ)प्रदानेन सस्यवान्न न जायते"।

अथ धान्यरोपणविधिः "वपन रोपणञ्चैव बीजं स्यादुभयात्मकम् । वपनं गदनिर्म्मुक्तं रोपणं सगदं विदुः । न वृत्तरूपधान्यानां बीजाकर्षणमाचरेत् । न फलन्ति दृढ़बीजा वृक्षाः केदारसंस्थिताः । हस्तान्तरं कर्कटे च सिंहे हस्तार्द्धमेव च । रोपणं सर्व्वधान्यानां कन्यायां चतुरङ्गुलम्" ।

अथ धान्यकर्त्तनम् "आषाढे श्रावणे चैव धान्यमाकर्त्तयेद्बुधः । अनाकृष्टन्तु यद्धान्यं यथा बीजं तथैव हि । भाद्रे च कर्त्तयेद्धान्यमष्टष्टौ कृषितत्परः । भाद्रे चार्द्धफलप्राप्तिः फलाशा नैव चाश्विने । न बिलभूमौ धा-

न्यानां कुर्य्यात् कट्टनरोपणे । न च सारप्रदानन्तु तृण-मात्रन्तु शोधयेत्” ।

अथ धान्यनिस्तृणीकरणम् “निष्पन्नमपि यद्धान्यमकृता तृणवर्जितम् । न सम्यक् फलमाप्नोति तृणक्षीणा कृषिर्भवेत् । कुलीरभाद्रयोर्मध्ये यद्धान्यं निस्तृणं भवेत् । तृणैरपि तु सम्पूर्णं तद्धान्यं द्विगुणं भवेत् । द्विवारमाश्विने मासि कृत्वा धान्यन्तु निस्तृणम् । अथ पार्वतीयं हि धान्यं फलति माषवत् । तस्मात् सर्व्वप्रयत्नेन निस्तृणां कारयेत् कृषिम् । निस्तृणा हि कृषाणानां कृषिः कामदुघा भवेत्” ।

अथ भाद्रे जलमोचनम् “नैरुज्यार्थं हि धान्यानां जलं भाद्रे विमोचयेत् । मूलमात्रन्तु संस्थाप्य कारयेज्जलमोक्षणम् ; भाद्रे च जलसम्पूर्णं धान्यं विविधबाधकैः । प्रपीड़ितं कृषाणानां न धत्ते फलमुत्तमम्” ।

अथ धान्यव्याधिखण्डनमन्त्रः “ओं सिद्धिः, गुरुपादेभ्यो नमः । स्वस्ति, हिमगिरिशिखरात् शङ्खकुन्देन्दुधवल-शिखरतटात् नन्दनवनसङ्काशात् परमेश्वरपरमभट्टारक-महाराजाधिराजश्रीमद्रामभद्रपादा विजयिनं समुद्रत-टावस्थितनानादेशागतवानरकोटिलक्षाग्रगण्यं खरतर-नखरातितीक्ष्णहस्तमूर्द्धलाङ्गूलं लीलागमनसमुद्भूतवा-तवेगावधूतपर्व्वतशतं परचक्रप्रमथनं पवनसुतं श्रीहनूम-न्तमाज्ञापयन्ति अमुकग्रामे अमुकगोत्रस्य श्रीमतोऽमुकस्य अमुकखण्डक्षेत्रे राता भोम्रा उदा गान्धिया भोम्री गान्धी द्रोदी पाण्डरमुखी महिषासुण्डी धूलिशृङ्ग मण्डूका इत्यादयः तालजङ्घाः चटकशुकशूकरगवयहरिणमूषिकाव-राहपतङ्गादयः सर्व्वे शस्योपघातिनो यदि त्वदीयवचनेन न त्यजन्ति तदा तान् वज्रलाङ्गूलेन ताड़यिष्यतीति । ओं ह्रां ह्रीं ह्रीं नमः” ।

मतान्तरे धान्यव्याधिखण्डनमन्त्रः “ओं सिद्धिः, गुरुपादेभ्यो नमः । श्रीरामचन्द्रचरणेभ्यो नमः । स्वस्ति, हिम-गिरिशिखरात् शङ्खकुन्देन्दुधवलशिलातटात् नन्दनवन-सङ्काशात् परमेश्वरपरमभट्टारकमहाराजाधिराजश्री-मद्रामभद्रपादाः कुशलिनः समुद्रतटावस्थितनानादेशाग-तवानरकोटिलक्षाग्रगण्यं खरतरनखरातितीक्ष्णहस्तमू-र्द्धलाङ्गूलं लीलागमनसमुद्भूतवातवेगावधूतपर्वतशतं पर-चक्रप्रमथनं पवनसुतं श्रीमन्त' हनूमन्तमाज्ञापयन्त्वदः, अमुकग्रामे अमुकगोत्रस्य श्री अमुकस्य अमुकखण्डक्षेत्रे भोम्रा--भोम्री--पाण्डरमुखी-गान्धी-धूलिशृङ्गादिराग-च्छलेन त्रिपुटी नाम राक्षसी सप्त पुत्रानादाय विविधविघ्नं समाचरन्त्यवतिष्ठते, इदं मदीयशासनलिखनमवगम्य तां पापराक्षसीं सपुत्रबान्धवां वज्रदण्डाधिकलाङ्गूलदण्डैः खरतरनखरैश्च विदार्य्य दक्षिणसमुद्रे लवणाम्बुधौ खण्डशः प्रक्षिपेति, यद्यत्र त्वया क्षणमपि विलम्ब्यते तर्हि त्वं केशरिणा पित्रा पवनेन मात्रा चाञ्जनया शप्तोऽसीत्यन्यथा नाहं प्रसन्नं त्वं भज इति ओं ह्रां ह्रीं ह्रः” ।

इमं मन्त्रं विल्वकण्टकेन श्वेतकीदले लिखित्वा शुक्लवेष्टेना-दित्यवारे क्षेत्रस्यैशान्यां शस्यमध्ये मञ्जरीषु बन्धयेत् । पाटाल्परञ्च लिखित्वाऽलक्तकेनैतन्मन्त्रं शस्येषु बन्धयेत् । न व्याधिकीटहिंस्राणां भयं तत्र भवेत् क्वचित्” ।

अथ जलरक्षणम् । आश्विने कार्त्तिके चैव धान्यस्य जलर-क्षणम् । न कृतं येन मूर्खेण तस्य का शस्यवासना । यथा कुलार्थी कुरुते कुलस्त्रीपरिरक्षणम् । तथा संर-क्षयेत् वारि शरत्काले समागते ।

अथ कार्त्तिकसंक्रान्त्यां नलरोपणम् “घटप्रवेशसंक्रान्त्यां रोप-येत्तु नलं तथा । केदारैशानकोणे च स्वयं कृषकः शुचिः । गन्धैः पुष्पैश्च धूपैश्च शुक्लवस्त्रैर्विशेषतः । पूजयित्वा नलं तत्र पूजयेद्धान्यरक्षकान् । दधिभक्तञ्च नैवेद्यं पायसञ्च विशेषतः । ततो दद्यात् प्रयत्नेन ताला-ष्टिशस्यमेव च” । तत्र मन्त्रः । “बालकास्तरुणा वृद्धाः सन्ति ये धान्यरक्षकाः । ज्येष्ठाश्चापि कनिष्ठा वा सगदा निर्गदाश्च ये । आज्ञया भीमसेनस्य रामस्य च पृथोपरि । ताड़िता नलदण्डेन मर्त्ये स्युः सुपुष्पिताः । सुमण्डलमवाप्याद्य फलन्त्वाशु च निर्भरम् । सुस्था भवन्तु कृषका धनधान्यसमन्विताः । रोपयित्वा नलं क्षेत्रे म-न्त्रेणानेन च क्रमात् । धान्यवृद्धिं परां प्राप्य नन्दन्ति कृषका जनाः । नलन्तु घटसंक्रान्त्यां क्षेत्रे नारोपयन्ति ये । विषमा बन्ध्यपुष्पाश्च तेषां स्युर्धान्यजातयः” ।

अथ मार्गे मुष्टिग्रहणम् । “ततो मार्गे तु सम्प्राप्ते केदारे शुभवासरे । धान्यस्य लवनं कुर्य्यात् सार्द्धमुष्टिद्वयं शुचिः । गन्धैः पुष्पैश्च धूपैश्च नैवेद्यैर्धान्यरक्षकान् । पूजयित्वा यथा-न्यायमीशाने लवनं चरेत् । ततस्तन्मस्तके कृत्वा सम्मुखं शीर्षकान्वितम् । न स्पृष्टा कमपि क्वापि व्रजेन्मौनेन मन्दिरम् । सप्तपद्यां ततः पादं दत्त्वा स्वस्थनिकेतने । प्रविश्य स्थापयेत्तत्तु पुष्पगन्धादिपूजितम् । न कुट्टग्र-हणं कुर्य्यात् कदाचिद्वटपौषयोः । श्रेष्ठो मुष्टिग्रहो

मार्गे धनधान्यफलप्रदः । सार्द्धं मुष्टिद्वयं मार्गे योऽच्छित्त्वा लवनञ्चरेत् । पदे पदे विफलता तस्य धान्यं कुतो गृहे । रौद्रे मघे तथा सौम्ये पुष्ये हस्तानिलोत्तरे । धान्यच्छेदं प्रशंसन्ति मूलश्रवणयोरपि । व्यतीपाते च भद्रायां रिक्तायां वैधृतौ तथा । भौमार्किबुधवारेषु मुष्टिसंग्रहणं त्यजेत्” ।

अथ मार्गे मेधिरोपणम् “कृत्वा तु खलकं मार्गे समं गोमयलेपितम् । रोपणीया प्रयत्नेन तत्र मेधिः शुभेऽहनि । स्रोनाम्ना कृषकैः कार्य्या मेधिर्दक्षिणभास्करे । मेधेर्गुणेन कृषकः शस्यवृद्धिमवाप्नुयात् । न्यग्रोधः सप्तपर्णी वा गाम्भारी शाल्मलिस्तथा । औदुम्बरो विशेषेण अन्यो वा क्षीरवांस्तरुः । वटादीनामभावे तु कार्य्या स्त्रीनामधारिका । वैजयन्तीयुता मेधिर्निम्बसर्षपरक्षिता । धान्यकेशरसंयुक्ता तृणमर्कटकान्विता । अर्च्चिता गन्धपुष्पाभ्यां मेधिः शस्यसुखप्रदा । पौषे मेधिर्न चारोप्या क्रूराहे श्रवणे तथा । शस्यवृद्धिकरी मार्गे पौषे शस्यक्षयङ्करी । कपित्थविल्ववंशानां तृणराज्ञां तथैव च । मेधिः कार्य्या नरैर्नैव यदीच्छेदात्मनः शुभम्” ।

अथ पौषे पुष्ययात्राकथनम् “अखण्डिते ततो धान्ये पौषे मासि शुभे दिने । पुष्ययात्रां जनाः कुर्य्युरन्योन्यं क्षेत्रसन्निधौ । परमान्नञ्च तत्रैव व्यञ्जनैर्म्मत्स्यमांसजैः । निरामिषैस्तथा दिव्यैर्हिङ्गुमारीचसंयुतैः । दधिभिश्च तथा दुग्धैराज्यपायसमिश्रितैः । नानाफलैश्च मूलैश्च मिष्टपिष्टकविस्तरैः । एभिः सुढौकितं कृत्वा तदन्नं कदलीदले । भोजयेयुर्जनाः सर्व्वे यथावृद्धपुरःसराः । आचम्य च ततस्तत्र चन्दनैश्च चतुःसमैः । अन्योन्यं लेपनं कुर्य्युस्तैलैः पक्वैः सुगन्धिभिः । कर्पूरवासितं दिव्यं ताम्बूलं गन्धधूपितम् । भक्षयेयुः सपूर्ण्यास्यं परिधाय नवाम्बरम् । पुष्पैराभरणं कृत्वा नमस्कृत्य शचीपतिम् । गीतैर्वाद्यैश्च नृत्यैश्च कुर्य्युस्तत्र महोत्सवम् । ततस्तु हर्षिताः सर्व्वे मन्त्रं श्लोकचतुष्टयम् । हस्तसंपुटकं कृत्वा पठेयुर्वीक्ष्य भास्करम् । क्षेत्रे चाखण्डिते धान्ये तव देव ! प्रसादतः । पुष्यन्तु निर्म्मिताः सर्व्वे शस्यानि शुभकारकाः । मनसा कर्म्मणा वाचा ये चास्माकं विरोधिनः । ते सर्व्वे प्रशमं यान्तु पुष्ययात्राप्रभावतः । धान्यवृद्धिर्यशोवृद्धिः प्रवृद्धिः पुत्रदारयोः । राजसम्मानवृद्धिश्च गवां वृद्धिस्तथैव च । सन्तानवृद्धिश्च लक्ष्मीवृद्धिरहर्न्निशम् । अस्माकमस्तु सततं यावत् पूर्णो न वत्सरः ।

ततः प्रमुदिताः सर्व्वे व्रजेयुः स्वनिकेतनम् । न भोजनं पुनः कुर्य्युस्तस्मिन्नहनि मानवाः । हिताय सर्व्वलोकानां पुष्ययात्रा मनोहरा । पुरा पराशरेणेयं कृता सर्व्वार्थसाधिनी । तस्मादियं प्रयत्नेन पुष्ययात्रा विधानतः । सर्व्वविघ्नप्रशान्त्यर्थं कार्य्या शस्यस्य वृद्धये । पुष्ययात्रां न कुर्व्वन्ति ये जना धनगर्व्विताः । न विघ्नोपशमस्तेषां कुतस्तद्वत्सरे सुखम् । पौषे मासि ततः कुर्य्याद्धान्यच्छेदं विचक्षणः । मर्द्दयित्वा यथायोगमाढ़केन प्रमापयेत् । सुप्रमाप्य च तद्धान्यं यथालाभं प्रबन्धयेत् । प्रमादेनापि पौषे तु व्ययं तस्य न कारयेत् । मापनं सर्व्वशस्यानां वामावर्त्तेन कीर्त्तितम् । धान्यानां दक्षिणावर्त्तं मापनं क्षयकारकम् । वामावर्त्तेन सुखदं धान्यवृद्धिकरं परम्” ।

आढ़कलक्षणम् “द्वादशाङ्गुलकैर्म्मानैराढ़कः परिकीर्त्तितः । श्लेष्मातकाम्रपुन्नागकृतमाढ़कमुत्तमम् । कपित्थपर्क्कटीनिम्बजनितं दैन्यवर्द्धनम्” ।

अथ धान्यस्थापनम् । हस्ते स्वातौ च पुष्यायां रेवत्याञ्च प्रजापतौ । यममूलोत्तरे सौम्ये मघायाञ्च पुनर्व्वसौ । जीवे सोमे भृगोर्व्वारे निधने क्रूरवर्जिते । मीनलग्ने शुभे कृच्चे धान्यस्थापनमुत्तमम्” ।

कृषिकर्त्तव्यतायां विशेषो वृहत्पराशरसं० दर्शितोयथा “अतःपरं गृहस्थस्य कर्म्माचारं कलौ युगे । धर्म्मं साधारणं साक्षाच्चतुर्व्वर्णक्रमागतम् । सुधर्म्मं सम्प्रवक्ष्यामि पाराशरप्रचोदितम् । षट्कर्म्मसहितोविप्रः कृषिवृत्तिं समाश्रयेत् । हीनाङ्गं व्याधिसंयुक्तं प्राणहीनञ्च दुर्ब्बलम् । क्षुद्युक्तं तृषितं श्रान्तमनड्वाहं न वाहयेत् । स्थिराङ्गं नीरुजं दृप्तं शान्तं षण्डविवर्जितम् । अष्टं सवनभागश्चानडुवाहं तु वाहयेत् । वाहयेद्दिवसस्यार्धं पश्चात् स्नानं समाचरेत् । कुरुपैर्न्नर्पिं कुर्य्यात्सर्व्वथा धेनुसंग्रहम् । बन्धनं पालनं रक्षा द्विजः कुर्य्याद्गृही गवाम् । यस्माद्यत्नतो रक्ष्या वर्द्धन्ते ते यथाक्रमम् । न दूरे तास्तु मोक्तव्याश्चरणाय कदाचन । दूरे गावश्चरन्त्यो वै न भवन्ति शुभायमाः । प्रातरेव हि दोग्धव्या दुह्याः सायं तथा गृही । दोग्धुर्विपर्य्यये नैव वर्द्धन्ते ताः कदाचन । अनादेयतृणं भुक्त्वा स्रवन्त्यनुदिनं पयः । तुष्टिकृद्देवतादीनां पूज्या गावः कथन्न ताः । यस्याः शिरसि ब्रह्मास्ते स्कन्धदेशे शिवः स्मृतः । पृष्ठे विष्णुस्तथा तस्थौ श्रुतयश्चरणेषु तु । या अन्या देवताः काश्चित्तस्या लोमसु ताः स्थिताः । सर्व्वदेवमयी गौस्तु तुष्येत्तद्भक्तितो हरिः ।

हरन्ति स्पर्शनात्पापं पयसा पोषयन्ति याः । प्रापयन्ति दिवं दत्ताः पूज्या गावः कथन्न ताः । यच्छफाहतभूमेस्तु उद्यतः पांशुसंचयः । प्रोथयेत् पुरुषस्यैनो वन्द्या गावः कथन्न ताः । यत्तन्मूत्रं हि यस्यास्तु पितुः पुनाति पातकम् । किमपूज्यं हि तस्या गोरिति पाराशरोऽब्रवीत् । गौरवत्सा न दोग्धव्या नचैव गर्भसन्धिनी । प्रसूता च दशाहार्वाग्दोग्धा चेन्नरकं व्रजेत् । दुर्बला व्याधिसंयुक्ता पुष्पिता या द्विवत्सभूः । सा साधुभिर्न दोग्धव्या वर्णिभिः सुखमीप्सुभिः । कुलान्ते पुष्पिता गावः कुलान्ते बहुवत्सलाः । कुलान्ते चलचित्ता स्त्री कुलान्ते बन्धुविग्रहः । एकत्र पृथिवी सर्वा सशैलवनकानना । तथा गौर्ज्यायसी साक्षादेकत्रोभयतोमुखी । यथोक्तविधिना यस्ता वर्षैः पाल्यास्तु पूजिताः । पालयेत् पूतचेताः स प्रेत्येह च मोदते । दक्षिणाभिमुखा गाव उत्तराभिमुखा अपि । बन्धनीयास्तथैतास्तु न च प्राक्पश्चिमामुखाः । गोरूपवाजिशालायां सुतीक्ष्णं लोहदात्रकम् । स्थाप्यन्तु सर्वदा तस्यां गवि लुप्तविमोक्षणात् । गावो देयाः सदा रक्ष्याः पोष्याः पाल्याश्च सर्वदा । ताड़यन्ति च ये पापा ये चाकर्षन्ति ता नराः । नरके पच्यन्तेऽङ्गानि श्वासैश्च प्रपीड़िताः । विसर्पन्तीं न दण्डेन पालकस्तां निवर्त्तयेत् । गच्छ गच्छेति तां ब्रूयान्मा माभैरिति वारयेत् । संस्पृशन् गां नमस्कृत्य कुर्य्यात्तान्तु प्रदक्षिणम् । प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा । तृणोदकादिसंयुक्तं यः प्रदद्याद्गवाह्निकम् । सोऽश्वमेधसमं पुण्यं लभते नात्र संशयः । पृथिव्यां यानि तीर्थानि समुद्राश्च सरांसि च । गवां शृङ्गोदकस्नाने कलां नार्हन्ति षोड़शीम् । कृतन्तेषां हि पापानि येषां गृहमलङ्कृतम् । सततं बालवत्साभिर्गोभिः स्त्रीभिरिव स्वयम् । ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् । तिष्ठन्त्येकत्र मन्त्राणि हविरेकत्र तिष्ठति । गोभिर्यज्ञाः प्रवर्त्तन्ते गोभिर्देवाः प्रतिष्ठिताः । गोभिर्वेदाः समुद्गीर्णाः सषड़ङ्गपदक्रमाः । सौरभेयास्तु तस्याग्रे पृष्ठतोऽप्यस्य ताः स्थिताः । वसन्ति हृदये नित्यन्तासां मध्ये वसन्ति ये । ते पुण्यपुरुषाः जीवतां नाकेऽपि दुर्लभाश्च ते । शृङ्गमूले स्थितो ब्रह्मा शृङ्गमध्ये तु केशवः । शृङ्गाग्रे शङ्करं विद्यात्त्रयो देवाः प्रतिष्ठिताः । शृङ्गाग्रे सर्वतीर्थानि स्थावराणि चराणि च । सर्वे देवाः स्थिता देहे सर्वदेवमयी हि गौः । ललाटाग्रे स्थिता देवी नासामध्ये तु षण्मुखः । कम्बलाश्वतरौ नागौ तत्कर्णे तु व्यवस्थितौ । स्थितौ तस्याश्च सौरभ्याश्चक्षुषोः शशिभास्करौ । दन्तेषु वसवश्चाष्टौ जिह्वायां वरुणः स्थितः । सरस्वती च हुङ्कारे यमयक्षौ च गण्डयोः । ऋषयो रोमकूपेषु प्रस्रावे जाह्नवीजलम् । कालिन्दी गोमये तस्या अपरा देवतास्तथा । अष्टाविंशतिदेवानां कोट्यो लोमसु ताः स्थिताः । उदरे गार्हपत्योऽग्निर्हृदये दक्षिणस्तथा । मुखे चाहवनीयस्तु चावसथ्यस्तु च कुक्षिषु । एवं यो वर्त्तते गोषु ताड़ने क्रोधवर्जितः । महतीं श्रियमाप्नोति स्वर्गलोके महीयते । कुल्यं तस्या न लङ्घेत प्रतिगन्धं न वर्जयेत् । यावज्जिघ्रति तद्गन्धं तावत्पुण्यं प्रवर्द्धते । यो गां पयस्विनीं दद्यात्तरुणीं वत्ससंयुताम् । शिवस्यायतनं दत्तं दत्तन्तेन च विश्वकम् । उक्षा गौर्वेधसा सृष्टा तस्य ह्लादनाय च । तैरुत्पादितशस्येन सर्वमेतद्धि धार्य्यते । यश्चैतान् पालयेत् यत्नात् वर्धयेच्चैव यत्नतः । जगन्ति तेन सर्वाणि साक्षात् स्युः पालितानि च । यावद्गोपालने पुण्यमुक्तं पूर्वमनीषिभिः । उक्ष्णोऽपि पालने तेषां फलं दशगुणं भवेत् । जगदेतद्धृतं सर्वमनडुद्भिश्चराचरम् । वृष एष ह्यतो रक्ष्यः पालनीयस्तु सर्वदा । धर्म्मोऽयं भूतले साक्षाद्ब्रह्मणा हितकारिणा । त्रैलोक्यधारणायालमन्नानाञ्च प्रसूतये । अनादेयानि शस्यानि विध्वंसन्ति सकामतः । भ्रमिता भूतलं दूरमुक्षाणं को न पूजयेत् । उत्पादयन्ति शस्यानि मर्दयन्ति वहन्ति च । आनयन्ति दवीयःस्थमुक्षणो वा कोऽधिको भुवि । स्कन्धेन दूराच्च वहन्ति भारमन्नादिकानां न च भक्षयन्ति । स्वीयेन जीवेन परस्य जीवं रक्षन्ति पुष्णन्ति विवर्धयन्ति । पुण्यास्तु गावो वसुधातले मां बिभ्रत्यलं पृष्ठगर्भभारम् । भारः पृथिव्या दशताड़िताया एकस्य चाप्णो ह्यपि साधुवाचः । एकेन दत्तेन वृषेण येन दत्ता भवेयुर्दश सौरभेयाः । दाने कृपीयं धरणी समा नो तस्माद्वृषात् पूजितमस्ति नान्यत् । उत्पाद्य शस्यानि तृणञ्चरन्ति तदेव भूयः सकलं वहन्ति । स भारखिन्नाः प्रवदन्ति किञ्चिद्दुहोदपाद्धार्यति जीवलोकः । तृतीयेऽह्नि चतुर्थे वा यदैवोन्मा हठोभवेत् । तदा नस्या न भेत्तव्या नैव प्राग्दुर्बलस्य च । नासावेधनकीलन्तु खादिरं वाथ शैंशपम् । द्वादशाङ्गुलकञ्चार्य्यन्तज्ज्ञैस्त्रीणि समे च वा । शाला द्विपानां वृषगोहयानां तां वास्यदिग्द्वारवतीं विदध्यात् । सौम्यां ककुब्द्वारवतीं कृशोभान्ते-

षां शमिच्छन् हितमात्मनश्च । गावो वृषो वा हयहस्तिनो वा अन्येऽपि सर्व्वे पशवो द्विजेन्द्राः । याम्यामुखा नैव तु उत्तरादिङ्मुखांसकास्ते खलु बन्धनीयाः । शालाप्रवेशे वृषगोपशूनां राजापि यत्नाद्धयकुञ्जराणाम् । होमञ्च सप्ताचिषि शास्त्रयुक्तं कुर्य्याद्विधिज्ञो द्विजपूजनञ्च । लाङ्गलं तत् प्रवक्ष्यामि यत्काष्ठं रत्नप्रमाणतः । हलीशायास्तथा मानं प्रतोदस्य युगस्य च । चत्वारिंशत्तथा चाष्टावङ्गुलानि कुहः (हलः) स्मृतः । अथा शमोऽङ्गुलैर्भाज्यो हलीशावेधतश्च यः । षोड़शैव तु तस्याधः षड्विंशति रथोपरि । वेधस्तथा च कर्त्तव्यः प्रमाणेन षड़ङ्गुलः । अष्टाङ्गुलस्तुरस्तस्य वेधादूर्द्ध्वं प्रकल्पयेत् । ग्रीवा दशाङ्गुला चोर्द्ध्वं हस्तपाहो ततः स्मृतः । अङ्गुलैश्चाष्टभिस्तत् स्याद्वेधः स्यात् प्रतिहारकः । तस्यावस्ताद्यश्चत्वारि स वेधश्चतुरङ्गुलः । प्रतिहारी शुभा कार्य्या तद्वेधस्त्र्यङ्गुलो भवेत् । पञ्चाङ्गुलमुरस्तस्याः सीरस्येति विभाजनम् । पृथुत्वं शिरसोधार्य्यं हस्ततलप्रमाणकम् । अङ्गुलानि तथा चाष्टौ उरसः पृथुता स्मृता । बन्धाद्बहिः प्रतीहारी षड्विंशदङ्गुला भवेत् । सुतीक्ष्णा लोहपाल्यस्य उक्ता दामादिदारकृत् । न सीरं क्षीरवृक्षस्य न बिल्वपिचुमर्दयोः । इत्यादीनां हि कुर्वाणो न नन्दति चिरं गृही । प्राञ्जला सप्तहस्ता तु हलीशा विदुषां मता । तस्याः(ईशायाः)वेधः सवर्णायाः कार्य्यो नववितस्तिभिः । अचायुयोर्न तत्कुर्य्यात् कीर्त्तिघ्नौ तौ प्रकीर्त्तितौ । प्रमादतस्तु ताः कुर्व्वन् सवंशो नश्यते गृही । नीचोत्कृष्टप्रमानेन तज्ज्ञास्तां प्रवदन्ति हि । चतुर्हस्तं युगं कार्य्यं स्कन्धस्थानेऽर्द्धचन्द्रवत् । मेषशृङ्गाः कदम्बस्य सालधवद्रुमस्य च । सम्या (साँपि)वेधाद्बहिः कार्य्या दशाङ्गुलप्रमाणिका । तन्माने च प्रवाली च तदन्तरदशाङ्गुलम् । प्रतोदविषमग्रन्थि वैणवश्च चतुःकरः । तदग्रे तु प्रकर्त्तव्या यवाकारा तु लोहवत् । हीनातिरिक्तं कर्त्तव्यं नैव किञ्चित्प्रमाणतः । कुर्य्यादनड्हां दैन्याद्दैन्यान्नरकं व्रजेत् । यथाऽभीष्टं यथाशोभं वाहकस्य प्रमाणतः । भूमेश्च कर्षणायालं तज्ज्ञाः सर्व्वं वदन्ति हि । योजनं तु हलस्याथ प्रवक्ष्यामि यथा तथा । श्रेष्ठनक्षत्रसंयुक्ते पुण्येऽह्नि तद्विधीयते । यत्र दिने तु बुध्येत तत्र कार्य्यं विजानता । यत्र कृत्यं हितं चापि पुण्यं वा मनसि स्मरेत् । तत्र विद्वान् द्विजश्रेष्ठः पुण्येऽह्नि तद्विधीयते । माङ्गल्याद्यं द्विजः कृत्वा यथो-

कृविधिना गृही । द्रव्यकालानुसारेण कुर्व्वतो धर्म्मतः कृषिम् । प्रोल्लिखन् मण्डलं पुष्पधूपदीपैः समर्चयेत् । इन्द्राय च तथाश्विभ्यां मरुद्भ्यश्च तथा द्विजः । कुर्य्याद्बलिहृतिं विद्वान् उदकसञ्चयाय च । तथा कुमार्य्यै सीतायै अनुमत्यै तथा बलिम् । नमः स्वाहेति मन्त्रेण संवाञ्छन्नात्मनः शुभम् । दधिगन्धाक्षतैः पुष्पैः शमीपत्रैस्तिलैस्तथा । दद्याद्बलिं वृषाणाञ्च तथाज्यप्राशनं ततः । संघृष्य सीरफालाग्रे हेम्ना वा राजतेन वा । प्रलिप्य मधुसर्पिर्भ्यां कुर्य्याद्वैव प्रदक्षिणम् । अग्न्युक्षोर्मण्डलं कुर्य्यात् कृत्वा सीरप्रवाहणम् । पुष्पं लाङ्गलकल्याणं कल्याणाय नमोऽस्त्विति । सीतायाः स्थापनं कुर्य्यात् पाराशरमृषिं स्मरन् । सीतां युञ्जत इत्याद्यैर्मन्त्रैः सीरं प्रवाहयेत् । दधिदूर्व्वाक्षतैः पुष्पैः शमीपत्रैश्च पुण्यदैः । सीतां पूज्य वशी भक्तै रक्तवस्त्रैर्विषाणके । सप्त धान्यानि चादाय प्रोक्ष्य पूर्व्वमुखो हली । तानि दक्षोक्षणः क्षेत्रे किरन् भूमौ कृषेद्द्विजः । न यवैर्न तिलैर्हीनं द्विजः कुर्य्याच्च कर्षणम् । तद्विहीनन्तु कुर्वाणं न प्रशंसन्ति देवताः । तिलमात्रच्युतं तोयं दक्षिणस्याम्पतेद्दिशि । तेन तृप्यन्ति पितरो यावद्व तिलविक्रयः । विक्रीणीते तिलान् यस्तु तर्पयेत्सर्व्वदेवताः । विमुच्य पितरस्तन्तु प्रयान्तीव तिलैः सह । जपाजलं यवस्तम्बपत्रेभ्यो भूतले पतत् । पयोदधिघृताद्यैस्तु तर्पयेत् सर्व्वदेवताः । देवपर्जन्यभूसीरयोगात् कृषिः प्रजायते । व्यापारात् पुरुषस्यापि तस्मात्सर्व्वोद्यतो भवेत् । शालीन् सशणकार्पासं वार्त्ताकुप्रभृतीनि च । वापयेत्सर्व्वबीजानि सर्व्ववापी न सीदति । चन्द्रक्षये पतिर्विप्रो यो युनक्ति वृषान् क्वचित् । तत्पञ्चदशवर्षाणि त्यजन्ति पितरो हि तम् । चन्द्रक्षये द्विजो विद्वान् यो भुङ्क्ते तु पराशनम् । भोक्तुर्मासार्जितं पुण्यं भवेदशनदस्य तत् । चन्द्रार्कयोस्तु संयोगे कुर्य्याद्यः स्त्रीनिषेवणम् । सरेतोभोजिनस्तस्य षण्मासं पितरोऽहिताः । चन्द्रक्षये च यः कुर्य्यान्नरस्तरुनिकृन्तनम् । तत्पर्णसङ्ख्यया तस्य भवन्ति भ्रूणहत्यकाः । वनस्पतिगते सोमे योऽध्यध्वानं व्रजेन्नरः । प्रभ्रष्टद्विजकर्म्माणं तं त्यजन्त्यमरादयः । वासांसीन्दुप्रणाशे यो रजकस्यामतिः क्षिपेत् । पिबन्ति पितरस्तस्य मासं वस्त्रजलन्तु तत् । सोमक्षये द्विजो याति यत्कालस्तु हुताशनम् । तदेव पितृशापाग्निदग्धो नरकमाविशेत् ।

अष्टमी कामभोगेन, षष्ठी तैलोपभोगतः। कुहूस्तु दन्त-
काष्ठेन हिनस्त्यासप्तमं कुलम्। चन्द्राप्रतीतैः पुरुषस्तु
दैवाद्यद्यादगत्या यदि दन्तकाष्ठम्। नराधिराजैः संहि-
तस्तु तेन घातः क्षतः स्यादिष्टदेवतानाम्। तत्राभ्यज्य
विषाणानि गावश्चैव वृषास्तथा। चरणाय विसृज्यन्ते
आगतान्निशि भोजयेत्। य उत्पाद्येह शस्यानि सर्वा-
णि नृणचारिणः। जगत्सर्व्वं धृतं यैस्तु पूज्यन्ते किन्न
ते वृषाः। येनैकेन प्रदत्तेन दत्तं गोदशकम्भवेत्। य-
द्रूपेण स्थितो धर्म्मः पूज्यन्ते किन्न ते वृषाः। पाल्या-
हि यत्नतस्ते वै वाहनीया यथाविधि। स याति नरकं
घोरं यो वाहयत्यपालयन्। नाधिकाङ्गो न हीनाङ्गः
पुष्पिताङ्गो न दूषितः। वाहनीयो हि शूद्रेण वाह-
यन् क्षयमाप्नुयात्। वर्जयेद्दुष्टदोषांश्च गावो वै दोहने
नरः। पाल्या वै यत्नतः सर्व्वे पालयन् शुभमाप्नु-
यात्। अन्नार्थमेनानुक्षाणः ससर्ज परमेश्वरः। अन्ने-
नाप्यायते सर्व्वं त्रैलोक्यं सचराचरम्। अग्निर्ज्वलति
चान्नार्थं वाति चान्नाय मारुतः। गृह्णाति चाम्भसां
सूर्य्यो रसानन्नाय रश्मिभिः। अन्नं प्राणो बलं चान्न-
मन्नाज्जीवितमुच्यते। अन्नं सर्व्वस्य चाधारः सर्व्व-
मन्ने प्रतिष्ठितम्। सुरादीनां हि सर्व्वेषामन्नं बीजं
परं स्थितम्। तस्मादन्नात्परं तत्त्वं न भूतं न भविष्यति।
द्यौः पुमान्, धरणी नारी, अम्भोबीजन्दिवश्च्युतम्। द्यु-
धात्रीतोयसंयोगादन्नादीनां हि सम्भवः। आपोमूलं
हि सर्व्वस्य सर्व्वमप्सु प्रतिष्ठितम्। अतोऽमृतरसा ह्याप
आपः शुक्रं बलं महः। सर्व्वस्य बीजमापो वै सर्व-
मद्भिः समावृतम्। सद्य आप्यायना ह्यापः आपो
ज्येष्ठतरा ह्यतः। किञ्चित्कालं विनाऽन्नाद्यैर्जीवन्ति
मनुजादयः। न जीवन्ति विना तास्तु तस्मादापोऽमृतं
स्मृतम्। दत्तानि चाद्भिरेतस्यां किं न दत्तं क्षितौ भवेत्।
तथान्नेन प्रदत्तेन सर्व्वं दत्तं भवेदिह। अतोऽप्यन्नार्थ-
भावेन कर्त्तव्यं कर्षणं द्विजः। यथोक्तेन विधानेन ला-
ङ्गलादिप्रयोजनम्। सीते! सौम्ये! कुमारि! त्वं
देवि! देवार्च्चिते! श्रिये। सत्कृता हि यथा सिद्धा यथा
मे सिद्धिदा भव। मरुत्सूनोर्विना नाम्ना सीतायाः
स्थापनं विना। विनाभ्युक्षणरक्षार्थं सर्व्वं हरति रा-
क्षसः। वापने लवने क्षेत्रे खले गन्त्रीप्रवाहणे। एष
एव विधिर्ज्ञेयो धान्यानाञ्च प्रवेशने। देवतायतनो-
द्याननिपातस्थानगोव्रजान्। सीमाश्मशानभूमिञ्च वृक्ष-
च्छायाचितिं तथा। भूमिं निखातयूपाञ्च अयन-
स्थानमेव च। अन्यामपि हि चावाह्यां न कर्षेत्
कृषिकृत् धराम्। नोषरां वाहयेद्भूमिं वर्चोऽस्रक्क-
र्करीवृताम्। वाहयन्नप्रमत्तश्च न नदीपुलिनं तथा।
यद्यसौ वाहयेल्लोभात् द्वेषाद्वापि हि मानवः। क्षीयते सोऽ
चिरात्पापात् सपुत्रपशुबान्धवः। नरकं घोरतामिस्रं
पापीयान् याति चैनसा। परकीयां योऽपहृत्य कृषि-
कृद्वाहयेद्धराम्। स भूमिस्थेन पापेन ह्यनन्तनरकं
वसेत्। न दूरे वाहयेत् क्षेत्रं नचैवात्यन्तिके तथा।
वाहयेन्न पथि क्षेत्रं वाहयन्दुःखभाग् भवेत्। क्षेत्रेष्वेवं
वृतिं कुर्य्यात् यामुष्ट्रो नावलोकयेत्। न लङ्घयेत्पशु-
र्यां वा नाभीयाद्याञ्च शूकरः। बन्धश्च यत्नतः कार्य्यो
मृगयुत्रासनाय च। अत्राप्युपद्रवं राजतस्करादि-
समुद्भवम्। संरक्षेत्सर्व्वतो यत्नाद्यस्मात् गृह्णात्यसौ क-
रात्। कृषिकृन्मानवस्त्वेवं मत्वा धर्म्मं कृषेर्ध्रुवम्।
अनवद्यां शुभां स्निग्धां जलावगाहनक्षमाम्। निम्नां
हि वाहयेद्भूमिं यत्र विश्रमते जलम्। वाहयेत्तु
जलाभ्यर्णे पुष्टे ससेकसम्भवे। शारदस्तुच्चकैःस्थाने क-
लम्बं वापयेद्बली। अर्व्वाक्प्रकासु कार्पासं तदन्यत्र तु
हैमनम्। वसन्तग्रीष्मकालीयमप्सु स्निग्धेषु तद्विदः।
केदारेषु तथा शालीन् जलोपान्तेषु चेक्षवः। वृन्ताकशा-
कमूलानि कन्दानि च जलान्तिके। वृष्टिविश्रान्तपानीय-
क्षेत्रेषु च यवादिकान्। गोधूमांश्च मसूरांश्च खल्वान्
खलु कुलत्थकाः। समस्निग्धेषु वोप्यानि भूमीजीवान्
निजानता। तिला बहुविधा वोप्या अतसीशणमेव
च। मृदम्बुजं जगत्सर्व्वं वापयेत्कृषिकृन्नरः। संप-
श्येत्त्वरतः सर्व्वान् गोष्ठपादीन् स्वयङ्गृही। चिन्तयेत्स-
र्व्वमात्मानं स्वयमेव कृषिं व्रजेत्। प्रथमं कृषिवाणिज्यं
द्वितीयं योन्यिपोषणम्। तृतीयं विक्रयः प्रोक्तश्चतुर्थं
राजसेवनम्। नखैर्विलिखने यस्याः ब्रूयुर्दोषं म-
नीषिणः। तस्याः सीरविदारेण किन्न पापं क्षितेर्भवेत्।
तृणैकच्छेदमात्रेण प्रोच्यते क्षयमायुषः। असह्यक्र-
न्दनिर्घोषादसङ्ख्यानम्भवेदघम्। यत्सेचनात् कीटवध-
स्तथा सङ्घर्षणादपि। अंहः कुक्कुटिकानाञ्च तदंहः कृ-
षिजीविनाम्। वधकानाञ्च यत्पापं यत्पापं मृगयो-
रपि। कदर्य्याणाञ्च तत्पापं तत्पापं कृषिजीविनाम्।
पण्यानाञ्च गृहस्थानां कृषिवृत्त्युपजीविनाम्। तदेनसो
विशुद्ध्यर्थं प्राह सत्यवतीपतिः। द्वादशो नवमो वापि

सप्तमः पञ्चमोऽपि वा । धान्यभागः प्रदातव्यो देहिनः क्षेत्रिणा ध्रुवम् । असमर्थे द्यूतभूमौ च विट्पतिः क्षेत्रभुग्भवेत् । एकैकांशापकर्षः स्याद्यावद्दशमसप्तमौ । ग्रामेशस्य नृपस्यापि वर्णिभिः कृषिजीविभिः । स स भागः प्रदातव्यो यतस्तौ कृषिभागिनौ । व्यूढौ त्वश्वर्य्यमात्रया देयोंऽशः स्याच्चतुर्द्दशः । एकैकांशापकर्म्म स्यात् यावद्दशमसप्तमौ । ब्राह्मणस्तु कृषिं कुर्व्वन्नाहरेदिच्छया धराम् । न किञ्चित् कस्यचिद्दद्यात्स सर्व्वस्य प्रभुर्यतः । ब्रह्मा वै ब्राह्मणानां स्यात्प्रभुस्त्वसृजदादितः । तद्रक्षणाय बाहुभ्यामसृजत् क्षत्रियानपि । पशुपाल्याशनोत्पत्त्यै ऊरुभ्याञ्च तथा विशः । द्विजदास्याय पद्भ्यां शूद्रमकल्पयत् । यत्किञ्चिज्जगतोऽस्य भूगेहाश्वगजादिकम् । स्वभावेनेह विप्राणां ब्रह्मा स्वयमकल्पयत् । ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ । न तयोरन्तरं किञ्चित्प्रजा धर्म्मेण रक्षयेत् । तस्मान्न ब्राह्मणो दद्यात् कुर्व्वाणो धर्मतः कृषिम् । ग्रामेशस्य नृपस्यापि किञ्चिन्मात्रमणौ बलिम् । अथान्यत्सम्प्रवक्ष्यामि कृषिकृच्छुद्धिकारणम् । संशुद्धः कर्षकोयेन स्वर्गलोकमवाप्नुयात् । सर्व्वसत्त्वोपकाराय सर्व्वत्र कृषिकृन्नरः । कुर्य्यात् कृषिं प्रयत्नेन सर्व्वसत्त्वोपजीव्यकृत् । सर्व्वस्य स्थितिकारण्यात्स देवपितृभिः पुनः । मनुष्याणान्तु पोषाय कृषिं कुर्य्यात् कृषीवलः । वयांसि चान्यसत्त्वानि क्षुत्तृष्णातो विमोचयन् । विमुक्तः सर्व्वपापेभ्यः स्वर्लोकस्तमवाप्नुयात् । चतुर्दिक्षु खले कुर्य्यात्प्राच्यामतिघनावृतिम् । सैकद्वारपिधानञ्च पिदध्याच्चैव सर्व्वतः । खरोष्ट्राजोरणादींस्तु विशतस्तु निवारयेत् । शूकरान् श्वशृगालादिकाकोलूककपोतकान् । त्रिसन्ध्यं प्रोक्षणं कुर्य्यात् दानीयाभ्युक्षणाम्बुभिः । रक्षा च भस्मना कुर्य्याज्जलधाराभिरक्षणम् । त्रिसन्ध्यमर्च्चयेत्सीतां पराशरस्मृतिं स्मरन् । प्रेतभूतादिनामानि न वदेच्च तदग्रतः । सूतिकागृहवत्तत्र कर्त्तव्यं परिरक्षणम् । हरन्त्यरक्षितं यस्मात् रक्षांसि सर्व्वमेव हि । प्रशस्तोदिनपूर्व्वाह्णो नापराह्णे न सन्ध्ययोः । धान्योन्मानं सदा कुर्य्यात्सीतापूजनपूर्व्वकम् । यजेत खलभिक्षाभिः खलेरोहिण्यएव हि । भक्त्या सर्व्वं प्रदत्तं हि तत्समस्तमिहाक्षयम् । खलयज्ञाः पक्षिणां वै ब्रह्मणा निर्म्मिताः पुरा । भागधेयमथो कृत्वा तां गृह्णीह मात्रिकाम् । शतक्रत्वादयो देवाः पितरः सोमपादयः । सनकादिमनुष्याश्च येचान्ये दक्षिणाशनाः । तानुद्दिश्य च विप्रेभ्यो दद्याच्च प्रथमं हली । विवाहे खलयज्ञे च संक्रान्तौ ग्रहणेषु च । पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम् । अन्येषामर्थिनां पश्चात्कारुकाणां पुनः पुनः । दीनानामप्यनाथानां कुष्ठिनां कुशरीरिणाम् । क्लीवान्धवधिरादीनां सर्व्वेषामपि दीयते । वर्णानां पतितानाञ्च द्युडगभूतानि तर्पयेत् । चाण्डालानां श्वपाकानां प्रीत्यात्युच्चावचा ददत् । ये केचिदागतास्तत्र पूज्यास्ते विधिवद्द्विजाः । स्तोकशः सीरिभिः सर्व्वे वर्णिभिर्गृहमेधिभिः । दत्त्वा स्वच्छतया वाचा क्रमेणाथ विसर्जयेत् । तत्कृत्वा स्वगृहं गच्छेच्छ्राद्धमभ्युदयं चरेत् । शरद्धेमन्तवसन्तनवान्नैः श्राद्धमाचरेत् । नाकृत्वा तत्तदश्नीयादश्नंस्तदघमश्नुते । कृष्या तूत्पाद्य धान्यानि खलयज्ञं समाप्य च । सर्व्वसत्त्वहितोद्युक्त इहामुत्र सुखी भवेत् । कृषेरन्योत्त धर्मं न लभेत् कृषितोऽन्यतः । न सुखं कृषितोऽन्यत्र यदि धर्म्मेण कर्षति । अवस्त्रत्वं निरन्नत्वं कृषितो नैव जायते । अनातिथ्यञ्च दुःखित्वं दुर्म्मनो न कदाचन । निर्धनत्वमसभ्यत्वं विद्यायुक्तस्य कर्हिचित् । अस्थानित्वमभाग्यत्वं न सुशीलस्य कर्हिचित् । वदन्ति कवयः केचित् कृष्यादीनां विशुद्धये । लाभस्यांशप्रदानञ्च सर्व्वेषां शुद्धिकृद्भवेत् । प्रतिग्रहचतुर्थांशं वणिग्लाभं तृतीयकम् । कृषितो विंशतिश्चैव ददतो नास्ति पातकम् । राज्ञो दत्त्वा च षड्भागं देवतानां च विंशकम् । त्रयस्त्रिंशञ्च विप्राणां कृषिकर्मा न लिप्यते । कृष्या समुत्पाद्य यवादिकानि धान्यानि भूयांसि, मखं विधाय । मुक्तो गृहस्थोऽपि पराशरेण तस्यामयः कश्चिदथादि दोषः । देवा मनुष्याः पितरश्च सर्व्वे साध्याश्च यक्षाश्च सकिन्नराश्च । गावो द्विजेन्द्राः सह सर्व्वसत्त्वैः कृषौ नं तृप्तानि मनाग् दुरेति । यश्चैतदालोच्य कृषिं विदध्यात् लिप्येत पापैर्न स भूस्वैश्च । सीरेण तस्यापि विदारितापि स्याद्भूतवात्री वरदानदात्री । षट् कर्माणि कृषिं ये तु कुर्य्युर्ज्ञानविधिं द्विजाः । ते सुरादिवरप्राप्ताः स्वर्गलोकमवाप्नुयुः । षट्कर्म्मभिः कृषिः प्रोक्तो द्विजानां गृहमेधिनाम्" ।

कृषिकार्य्यारम्भमुहूर्त्तादि ज्यो॰ चि॰ पी॰धा॰ दर्शितं यथा "मूलद्वीशमघाचरध्रुवमृदुक्षिप्रैर्विनार्क्कं शनिं पापैर्हीनबलैर्विधौ जलगृहे शुक्रे विधौ मांसले । लग्ने देवगुरौ हलप्रवहणं शस्तं न सिंहे घटे कर्क्काजैणघटे तनौ क्षय-

करं रिक्तासु पञ्चान्त्यया । एतेषु श्रुतिवारुणादितिविशाखोडुनि भौमं विना बीजोप्तिर्गदिता शुभा त्वशुभतोऽष्टाग्नीन्दुरामेन्दवः । रामेन्द्वग्नियुग न्यसक्तुभकराग्युप्तौ हलेऽर्कोज्झिताङ्काद्रामाष्टनवाष्टभानि मुनिभिः प्रोक्तान्यसन्त्यन्ति च" मु०

"मूलविशाखामघाभिः चरध्रुवमृदुक्षिप्रैश्च एकोनविंशतिनक्षत्रैर्हलप्रवहणं हलप्रवृत्तिं कुर्यात् यदाह नारदः "मृदुध्रुवक्षिप्रचरविशाखापितृभेषु च । हलप्रवाहं प्रथमं विदध्यान्मूलभे वृषैः" । विशेषमाह श्रीपतिः "मृदुध्रुवक्षिप्रचरेषु मूले मघाविशाखासहितेषु भेषु । हलप्रवाहं प्रथमं विदध्यान्नीरोगमुष्कान्वितसौरभेयैः" । नीरोगाः पीडारहिता मुष्का वृषणास्तैरन्विता ये सौरभेया वृषास्तैर्विदध्यादित्यर्थः । उक्तञ्चैतत् वृषाणां वृषणास्तु फलरूपा यतस्तादृशैर्वृषैः कृतं कर्षणं सफलं स्यात् चूर्णितवृषणैर्वृषैः कृतं कर्षणं निष्फलमेव भवति । तथाऽर्कं सूर्यवारं शनिवारं विना त्वन्यवारेषु चन्द्रमङ्गलबुधबृहस्पतिशुक्रवारेषु हलप्रवहणं शुभम् । उक्तञ्च व्यवहारतत्त्वे "पूर्वार्द्धीशयमाग्निभेऽर्कयमयोरिक्तासु नेष्टा कृषिरिति" । अथ सामान्यतो लग्नशुद्धिः तत्र पापग्रहैर्हीनबलैर्निर्बलैरुपलक्षिते लग्ने विधौ चन्द्रे शुक्रे मांसले बलिनि पुष्टे उदित इत्यर्थः । तत्र विधौ चन्द्रे जलमृङ्गे जलराशिस्थे सति देवगुरौ लग्नस्थे च सति हलप्रवहणं शुभम् । उक्तञ्च रत्नमालायाम् "शक्तिशालिनि सितेऽथ शीतगौ दुर्बलैरसितभौमभास्करैः । आश्रिते शशिनि वारिभोदये लग्नवर्त्तिनि गुरौ कृषिक्रिया" । कश्यपोऽपि "गुरौ लग्नगते शुक्रे बलिन्यापोदये विधौ । शस्ता कृषिक्रिया तत्र दुर्बलैः क्रूरखेचरैः" । अथ विशेषतो लग्नशुद्धिः तत्र सिंहे घटे कुम्भे कर्कटे अजे मेषे एणे मकरे धटे तुलायाम् एषु लग्नेषु कृषिकर्म्म न शस्तं यतस्तत्क्षयकरं पीडाकरं तथा रिक्तासु चतुर्थीनवमीचतुर्दशीषु षष्ठ्याञ्च क्षयकरं तथाशब्दोऽनुक्तसमुच्चयार्थस्तेनाष्टम्यामपि न शस्तं कृषिकर्म्म । उक्तञ्च ज्योतिःसारसागरे "मेषलग्ने पशून् हन्ति कर्कटे जलजन्मभयम् । सिंहे सस्यभयं ज्ञेयं तुलायां हलसंक्षयः । मकरे सस्यनाशः स्यात्कुम्भे चौरभयन्तथा । हन्त्यष्टमी बलीवर्दान् नवमी सस्यघातिनी । षष्ठी च कीटजननी पशून् हन्ति चतुर्दशी" । चतुर्थ्याम-

पीदं फलं ध्येयम् । अथ बीजोप्तिमुहूर्त्तं फणिचक्रहलचक्राणि शार्दूलविक्रीडितेनाह एतेष्विति । श्रुतिः श्रवणः वारुणं शततारका अदितिः पुनर्वसुः विशाखा प्रसिद्धा एतैरुडुभिर्नक्षत्रैर्विना तेषु पूर्वोक्तनक्षत्रेषु मूलमघाध्रुवमृदुक्षिप्रधनिष्ठास्वातीषु पञ्चदशनक्षत्रेषु बीजोप्तिर्बीजवपनं शुभम् । उक्तं च रत्नमालायाम् "हस्ताश्विपुष्योत्तररोहिणीषु चित्रानुराधामृगरेवतीषु । स्वातीधनिष्ठासु मघासु मूले बीजोप्तिरुत्कृष्टफला प्रदिष्टा" । वसिष्ठेनाप्येतावन्त्येव नक्षत्राण्युक्तानि "धातृद्वये वैष्णवपैत्रपुष्ये हस्तत्रये त्र्युत्तरमैत्रभेषु । पौष्णे धनिष्ठास्वथ वाश्विनीषु बीजोप्तिरुत्कृष्टफलप्रदा स्यादिति" । कौणपो मूलम् नारदेनाप्युक्तानि "मृदुध्रुवक्षिप्रभेषु पितृवायुवसूडुषु । समूलभेषु बीजोप्तिरत्युत्कृष्टफलप्रदा" । कश्यपेनापि वसुवायुभनैर्ऋत्यक्षिप्रध्रुवमृदूडुषु । सीतां कृत्वाथ बीजोप्तिरत्युत्कृष्टफलप्रदा" । अत्र भवा नोक्ता अत्र भौमोऽङ्गलवारो निषिद्धः अर्थात् सूर्यचन्द्रबुधगुरुशुक्रशनीनां वारेषु बीजोप्तिः शुभा । नेष्टा कृषिरित्यतो नकारोऽत्रानुवर्त्तनेन तेन बीजोप्तिर्नेष्टेत्यर्थः । अत्र कालविशेषनिषेधो राजमार्त्तण्डे "रवौ रौद्राद्यपादस्थे भूमेः संजायते रजः । तस्माद्दिनत्रयं तत्र बीजवापं परित्यजेदिति । अथ बीजोप्तौ फणिचक्रमुच्यते । अशुभतो न विद्यन्ते गावः किरणा यस्य साऽगुः यस्य स्वरूपाभावः । तस्य कुतस्तरां किरणाः तादृशोऽगू राहुस्तस्य भं नक्षत्र तस्मादित्यर्थः राहुधिष्ठितनक्षत्रादष्टौ भानि अत्यन्तसमीचीनानि, ततस्त्रीणि शुभानि, तत एकमशुभं ततस्त्रीणि शुभानि ततोऽप्येकमशुभं ततस्त्रीणि शुभानि ततोऽप्येकमशुभं ततस्त्रीणि शुभानि ततश्चत्वार्यशुभानि । एवं बीजोप्तौ सप्तविंशतिनक्षत्राणां शुभाशुभत्वमुक्तं उक्तञ्च नारदेन "भवेद्भत्रितयं मूर्ध्नि धान्यनाशाय राहुभात् । गले त्रयं कज्जलाय वृद्धये द्वादशोदरे । निस्तण्डुलत्वं लाङ्गूले भचतुष्टयमीरितम् । नाभौ बहिः पञ्चके स्याद्बीजोप्तावपि चिन्तयेदिति" । राहुर्यस्मिन्नृक्षेऽस्ति तस्मान्नक्षत्रत्रयं मूर्ध्नि मस्तके स्थाप्यं धान्यनाशकरं भवति । ततस्त्रयं गले स्थाप्यं कज्जलाय श्यामिकासम्पादकं स्यात् । ततो द्वादश भानि बहिर्नक्षत्ररहितानि उदरे स्थाप्यानि तानि धान्यवृद्धये स्युः ततो नक्षत्रचतुष्टयं पुच्छे निस्तण्डुलत्वकरं स्यात् ततोऽवशिष्टं बहिर्नक्षत्रपञ्चकं धान्यनाशकरं स्यात् । रत्न-

मालायामपि "मूर्ध्नि त्रीणि गले त्रयञ्च जठरे विष्णाग्नि च द्वादश स्यात् पुच्छे च चतुष्टयं बहिरतोभानां स्थितं पञ्चकम् । फ्लेडं कज्जलमत्रहृद्धिरधिका निस्तण्डुलत्वं क्रमात् स्यादीतिप्रभवं भयञ्च फणिभाद्वीजोप्तिकाले स्फुटम्"। अत्र केचित् । फणिभात् सूर्यनक्षत्रादितिव्याचख्युस्तत्र युक्तिः "सूर्यभादुरगःस्याप्यः" इति स्वरोदयवाक्यैकवाक्यत्वात्, तन्न नारदवाक्ये साक्षाद्राहुभादित्युक्तत्वात् "राहोर्धिष्ण्यात्समारभ्य धिष्ण्यैर्यष्टसु निष्फलमिति" कश्यपोक्तेश्च । "सूर्यभादुरगः स्याप्यः" इति तु स्वरोदयवचनं वीजरोपणविषयम् । तत्र लग्नशुद्धिमाह वसिष्ठः "भवरिपुसहजे पञ्चत्रिकोणकेन्द्रस्थितैश्च शुभैः । कथितेषु च धिष्ण्येष्वपि शुभलग्ने वीजवापनं कार्यमिति" अथ हलप्रवहणे चक्रमुच्यते हलेऽति हले हलचक्रेऽर्कोज्झिताद्भुक्तान्नक्षत्रात् क्रमेण त्रीणि नक्षत्राणि अवन्ति अशुभफलानि । ततोऽष्ट भानि सन्ति शुभफलदानि ततो नव भान्यसन्ति ततोऽष्टौ भानि सन्ति यथा सूर्ये अश्विन्यां भुक्तभं मृगः तत आरभ्य त्रीणि मृगार्द्रापुनर्वसुभान्यशुभानि । ततः पुष्याश्लेषामघापूर्वफाल्गुनीहस्तचित्रास्वातीनक्षत्राणि शुभानि । ततो विशाखानुराधाज्येष्ठामूलपूर्वाषाढोत्तराषाढाभिजिच्छ्रवणधनिष्ठानक्षत्राणि अशुभानि । ततः शततारकापूर्वभाद्रपदोत्तरभाद्रपदारेवत्यश्विनीभरणीकृत्तिकारोहिणीनक्षत्राणि शुभानि । एवमष्टाविंशतिर्भानि भवन्ति यदाह वसिष्ठः "अर्कगतागतसंस्थभत्रितयं नेष्टमुभयतस्त्विष्टम् । षोडश धिष्ण्यं नवकं शिष्टमनिष्टं च लाङ्गले चक्रे" इति । अर्केण गतं भुक्तम् आगतं भोग्यं संस्थमाक्रान्तम् एतद्भत्रितयं नेष्टं तत उभयतःषोडशधिष्ण्यं इष्टं यथा सूर्यभुक्तभात् प्राक्तनान्यष्टौ शुभानि सूर्यभोग्यभादग्रेतनानि शुभानि स्युरित्यर्थः । शिष्टद्दुर्वरितं मध्यगतनक्षत्रनवकमनिष्टम् एवमत्राप्यष्टाविंशतिर्भानि । नारदोऽपि "हलादौ वृषनाशाय भत्रयं सूर्यभुक्तभात् । अग्रे क्षत्रयं लक्ष्म्यै सौख्यं पार्श्वस्थपञ्चकम् । शूलत्रयेऽपि नवकं मरणायान्यपञ्चकम् । श्रियै पुच्छे त्रयं श्रेष्ठं स्याङ्के लाङ्गले शुभम्" इति । अस्यार्थः हलप्रवहणसमये सूर्यभुक्तनक्षत्रान्नक्षत्रत्रयं वृषनाशाय स्यात् । तदग्रे नक्षत्रत्रयं लक्ष्म्यै स्यात् तदग्रे पार्श्वनक्षत्रपञ्चकं सौख्याय स्यात् तदग्रे शूलत्रयगतं नक्षत्रनवकं मरणाय स्यात् तदग्रेऽन्यत् पार्श्वस्थपञ्चकं श्रियै स्यात् तदग्रे पुच्छगतं नक्षत्रत्रयं श्रेष्ठं शुभफलमिति । अनेनापि प्रकारेण मृगादीनि तान्येवाशुभाशुभानि सम्भवन्ति । तत्र हलचक्राकृतिर्लिख्यते तत्र काश्यपः "त्रिषट्सु नवर्क्षेषु सप्तस्वर्कविमुक्तभात् । हानिर्वृद्धिः कर्तृमृत्युर्लक्ष्मीश्चैव यथाक्रममिति, हलनक्षत्रोक्त्यनन्तरमुक्तवान् अस्यायमर्थः अर्कविमुक्तभात्त्रिषु भेषु हानिः ततोऽष्टसु भेषु वृद्धिः ततोनवसु भेषु कर्तुर्नाशः, ततः सप्तसु भेषु लक्ष्मीप्राप्तिरिति यथाक्रमं फलं ज्ञेयम् । अत्र सप्तविंशतिनक्षत्रोक्तेरभिजिद्गणनानास्ति । नन्वत्र पञ्चनक्षत्रत्यागे कोहेतुरित्यत आह तदन्तरगत इति तच्छब्देन हलोर्ध्वदण्डशूलोर्द्ध्वदण्डावुच्येते तयोरन्तरगते मध्ये विद्यमाने पञ्चकपञ्चके श्रियै स्याप्ये नक्षत्रदशकमिति यावत् तद्वान्यद्भत्रितयं हलदण्डोर्ध्वभागे शुभफलदं ज्ञेयम्" पी०धा०

अत्र विशेषः ज्यो० त० तत्र

कूर्मचक्रशब्दे दर्शितात् ज्यो०त० वाक्यात् परद्रव्यो यथा "कूर्माङ्गस्थदेशानाह । "मध्ये सारस्वतामत्स्याः शूरसेनाः समाथुराः । पञ्चालसाल्वमाण्डव्यकुरुक्षेत्रगजाह्वयाः। मरुनैमिषविन्ध्याद्रिपाण्ड्यघोषाः सयामुनाः । काश्ययोध्या प्रयागश्च गयावैदेहकादयः । प्राच्यां मागधशोणौ च वारेन्द्रीगौड़राढ़काः । वर्द्धमानतमोलिप्तप्राग्ज्योतिषोदयाद्रयः । आग्नेय्यामङ्गवङ्गोपवङ्गत्रैपुरकोशलाः । कलिङ्गोड्रान्ध्रकिष्किन्धाविदर्भशवरादयः । दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूककाः । चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः । कावेरी ताम्रपर्णी च लङ्कात्रिकूटकादयः । नैर्ऋते द्रविडानर्त्तमहाराष्ट्राश्च रैवतः । जवनः पल्लवः सिन्धुः पारसिकादयो मताः । पश्चिमे हैहयास्याद्रिम्लेच्छवासशकादयः । वायव्ये गुर्जराटश्च नाटजालन्धरादयः । उत्तरे चीननेपालहूनकैकेदनन्दराः । गान्धारहिमवत्क्रौञ्चगन्धमादनमालवाः । कैलासमद्रकाश्मीरम्लेच्छदेशाः खसादयः । ऐशाने स्वर्णभौमश्च गङ्गाद्वारञ्च टङ्कनः । काश्मीरब्रह्मपुरककिरातादरदादयः" । देवलः । "सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवासिनः । अङ्गवङ्गकलिङ्गोड्रान् गत्वा संस्कारमर्हति" तीर्थयात्राव्यतिरेकेणेति द्रष्टव्यमिति मिताक्षरा । व्यासः "ऊपरा बहुला भूमिः पन्थानस्तस्करावृताः । सर्वे वाणिजिकाश्चैव भविष्यन्ति कलौ युगे । शस्यानिष्पत्तिरफला तरुणा वृद्धशालिनः । भविष्यन्त्यफलोद्यमः क्रोधश्च सफलोद्यमाम् । पुरुषाल्पं बहुस्त्रीकं

तद्युगान्तस्य लक्षणम्”। तत्र ग्रामादिषु स्वनामफलम्। ज्योतिषे “अवर्गेऽष्टाविषुः के च,षट् चे, वेदाः टवर्गके। एवं ते सप्त, दे वर्गे, ये द्वयं, शे च वह्नयः। इत्यमष्टसु वर्गेषु याः संख्याः कथिताः क्रमात्। नाम्नि वर्गात् स्वराञ्चैव प्रत्येकं तां प्रकल्पयेत्। एकीकृत्याष्टभिर्भक्ते शेषसंख्याध्वजादयः। ध्वजोधूमश्च सिंहः श्वा वृषभोरासभोगजः। ध्वाङ्क्षश्च क्रमतो ज्ञेयः फलं तत्र बलक्रमात्। ध्वाङ्क्षश्वधूम्रवृषभागजः सिंहोध्वजः खरः। यथोत्तरबला एते ज्ञातव्याः स्वरपारगैः। प्रभौ योधे पुरे देशे मित्रनारीगृहेषु च। बलात् प्रायोभवेल्लाभो न लाभोबलवर्ज्जितात्। अ गरुड़ः क मार्जारश्च सिंहः ट शुनीसुतः। त भुजङ्गः प आखुः स्यात् य वर्गे भः, श मेषकः। नामादिवर्णतोज्ञेया अष्टौ वर्गाः क्रमादमी। यद्वर्गभक्ष्यो यः प्रोक्तस्तस्मात्तस्य भवेत् क्षयः। ग्रामवर्गस्य ये भक्ष्यास्त्यज्यास्तद्ग्रामवासिनः। एवं दुर्गे रणे त्यक्त्वा न कर्त्तव्या गड़ाधिपाः। अवर्गाद्यष्टकं ज्ञेयं प्रागाद्यष्टदेशां क्रमात्। स्ववर्गात् पञ्चमे स्थाने खाण्डभङ्गश्च जायते”। व्यासः “धनिनः श्रोत्रियोराजा नदी वैद्यश्च पञ्चमः। पञ्च यत्र न विद्यन्ते तत्र न दिवसं वसेत्”। मत्स्यपुराणे “फालकृष्टे तथा देशे सर्वबीजानि रोपयेत्। त्रिपञ्चसप्तरात्रेण यत्र रोहन्ति तान्यपि। ज्येष्ठा मध्या कनिष्ठा भूर्वर्ज्जनीयेतरा मता”।

अथ लाङ्गलचक्रं स्वरोदये “लाङ्गलं दण्डिकायूपयोक्त्रद्वयसमन्वितम्। दण्डिकादि लिखेद्भानि दिनेशाक्रान्तभादितः। दण्डिकाहलयूपानां द्विद्विस्थाने त्रिकं त्रिकम्। योक्त्रयोश्च त्रिकञ्चैव मध्ये मञ्चाग्रके द्वयम्। दण्डस्थे च गवां हानिर्यूपस्थे स्वामिनोभयम्। लक्ष्मीर्लाङ्गलयोक्त्रादौ क्षेत्रारम्भं दनर्क्षके”।

अथ बीजोप्तिचक्रम्। “सूर्य्यभादुरगः स्थाप्यस्त्रिनाड्येकान्तरक्रमात्। मुखे त्रीणि गले त्रीणि भानि द्वादशतूदरे। पुच्छे चतुर्बहिः पञ्च दिनभाञ्च फलं वदेत्। वदने चोचकं विद्यात् गलकेऽङ्गारकस्तथा। उदरे धान्यवृद्धिः स्यात् पुच्छे धान्यक्षयो भवेत्। ईतिरोगभयं राज्ये चक्रे बीजोप्तिसम्भवे”। सूर्य्यभात् सूर्य्यभुज्यमाननक्षत्रात् त्रिनाड्येकान्तरक्रमादिति यद्याश्विन्यां रविस्तदा तामारभ्य गणयेत्। त्रिनाडीषु अश्विनीभरणीकृत्तिका दत्त्वा रोहिणी बहिः कार्य्या मृगार्द्रापुनर्व्वसूनि त्रिनाडीषु दत्त्वा पुष्योबहिः कार्य्यः एवं क्रमेणान्या लेख्याः। चोचकं शस्यशून्यताम्। ईतयः। “अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः। प्रत्यासन्नाश्च राजानः षडेते ईतयः स्मृताः”बीजोप्तिः सम्भवः कारणमस्येति व्युत्पत्तिमाश्रित्य बीजरोपविषयमिति पी०वा० स्थितम्।

“वृषचक्रं वृषाकारं सर्व्वावयवसंयुतम्। लिखित्वा विन्यसेद्भानि वृषनामर्क्षपूर्व्वकम्। मुखाक्षिकर्णशीर्षेषु शृङ्गे स्कन्धे द्विकं द्विकम्। त्रीणि पृष्ठे द्वयं पुच्छेऽष्टौ पादे तूदरे त्रिकम्। हलप्रवाहबीजोप्तिप्रारम्भादिदिनर्क्षकम्। यदङ्गेषु स्थितं तस्माद्वक्षे सर्व्वं शुभाशुभम्। आस्ये हानिः सुखं नेत्रे कर्णे भिक्षाटनं तथा। शीर्षे धृतिस्तथा शृङ्गे सौख्ये स्कन्धे च मङ्गलम्। पृष्ठे कष्टं शुभं पुच्छे भ्रमः पादे सुखं हृदि। चन्द्रयोगादिदं प्रोक्तं वृषचक्रफलं बुधैः”।

दीपिकायाम् “पूर्व्वाग्नियाम्यफणिपित्रशिवान्यभेषु विक्ताष्टमीविगतचन्द्रतिथिं विहाय। द्व्यङ्गालिगोसमुदये विकुजार्किवारे शस्तेन्दुयोगकरणेषु हलप्रवाहः। हलप्रवाहवद्बीजवपनस्य विधिः स्मृतः। चित्रायाञ्च शुभे केन्द्रे स्थिरस्वमनुजोदये’। भीमपराक्रमे ‘वामे कृष्णं बलीवर्द्दं दक्षिणे लोहितं न्यसेत्। उत्तराभिमुखोभूत्वा कर्षकः कृषिमारभेत्। हले तु योजिते यत्र चेत् मूत्रं करोति गौः। तत्र स्याद्द्विगुणं शस्यमवश्यं गर्गभाषितम्”। कृत्यचिन्तामणौ बलभद्रः“सुखदा प्रतिपच्चैव द्वितीया कार्य्यसाधिनी। आरोग्यदा तृतीया च चतुर्थी कीटकृत्तदा। पञ्चमी श्रीप्रदा नूनं षष्ठी च कलहप्रिया। सप्तमी स्यानदा भोग्या वृषं हन्ति तथाष्टमी। नवमी शस्यनाशाय दशमी भूनिदा सदा। एकादशी तथा कुर्य्याद्वनं धान्यं मनोरथम्। द्वादशी प्राणसन्देहा सर्वसिद्धा त्रयोदशी। चतुर्द्दशी पतिं हन्ति पञ्च दशग्रेव निष्फला। अमावास्याष्टमीं षष्ठीं रिक्तां च परिवर्जयेत्। सौरिभौमदिने चैव कृष्यारम्भे धनक्षयः। प्राजेशत्रिषु तथ्येषु पित्र्यकरोत्तरेषु च। अश्विनीवातपौष्णेषु मूलादितीन्दुभे तथा। वारे भानुजशुक्रे च जीवे शीतकरे तथा। लग्ने स्त्रीगोमीनयुग्मे च कृष्यारम्भं शुभं विदुः। ऐशान्य पुष्पनैवेद्यैः क्षेत्रपालञ्च पूजयेत्। सालङ्कारोहलधर स्रगभिश्च पूजितं हलम्। दध्याज्यमधुभिः श्रेष्ठं फालायञ्च प्रलेपितम्। कर्षं प्रावर्त्तयेत् प्राज्ञोनूतनेन —

लेन च। हस्ताश्विनितिष्यचन्द्रेषु ब्रह्मेन्द्रविष्णुवारुणे। वायव्येन्द्राग्निभे चैव रोहिण्यामुत्तरासु च। वारे जीवज्ञशुक्रे च सोमे दिनकरे तथा। युग्मे युवतिगोमीने शस्तं स्याद्बीजवापनम्। राजमार्त्तण्डे "प्राजेशश्रवणोत्तरादितिमघामार्त्तण्डतिष्याश्विनीपौष्णानुष्णमरीचयः शतभिषास्वातिर्विशाखा तथा। जीवार्केन्दुसितेन्दुनन्दनदिने वारे स्थिरस्योदये शस्यानां वपने भवन्ति लवने शस्ते तिथौ रोपणे'। देवलः 'गुरुसोमसूर्य्यशुक्राःश्रेय्याः सम्पत्कराः शुभाः। बुधार्किभूमिपुत्त्राश्च न भवन्ति फलप्रदाः। हन्ति मेषः पशून् सर्व्वान् स्वभावेनाथ वृश्चिकः। कर्कटे न भवेत् सौख्यं तुलायां न प्ररोहति। केशरी शस्यघाती स्यात् पार्थिवोपद्रवं धनुः। मकरे चैव कुम्भे च भयमेव विनिर्द्दिशेत्। गोस्त्रीमन्मथमीनेषु शस्यं सम्पद्यते महत्। प्रशस्ते चन्द्रतारे च शुचिः शुक्लेन वाससा। स्नात्वा गन्धैश्च पुष्पैश्च पूजयित्वा विधानतः। पृथ्वीञ्च ग्रहसंयुक्तां पूजयित्वा प्रजापतिम्। अग्निं प्रदक्षिणीकृत्य दीयते भूरिदक्षिणा। कृष्णौ वृषौ नियोक्तव्यौ नवनीतैर्घृतेन वा। सुखपार्श्वं तयोर्लिम्पात् फालाग्रं कनकैः स्पृशेत्। उत्तराभिमुखोभूत्वा क्षीरेणार्घ्यं प्रदापयेत्। ततः शुभकरः श्रीमान् कृषिकर्म्म समाचरेत्। वर्जयेद्भग्नशृङ्गञ्च क्षुरभग्नञ्च वर्जयेत्। विकलं छिन्नलाङ्गूलं कपिलं वृषभं तथा। हलप्रवाहणं कार्य्यं नीरुग्भिः कृषिकर्म्मकैः। हलाद्भिर्दृढैः क्षेमं कुद्दैर्न शुभं वदेत्। वृषभार्यदि सुह्यन्ति तस्य विघ्नप्रदा भवेत्'। कृषिरिति शेषः। "तस्मात् सर्व्वप्रयत्नेन निर्व्विघ्नं कारयेत् सदा। एका जयकरी रेखा तृतीया चार्थदायिका। पञ्चमी या भवेद्रेखा बहुशस्यफला हि सा। अतऊर्द्ध्वं न कर्त्तव्यं महादोषस्ततोभवेत्। संपूज्याग्निं द्विजं देवं कुर्य्याद्धलप्रवर्त्तनम्। हेमनिष्टं फालाग्रं छिद्ररेखां न कारयेत्। स्मर्त्तव्या वसवश्चेन्द्रः पृथुरामः सचन्द्रमाः। पराशरो बलभद्रः सर्वविघ्नप्रशान्तये। हले प्रवाह्यमाणे तु कूर्म्म उत्पद्यते यदि। गृहिणी म्रियते तस्य ततोऽग्नेश्च भयं भवेत्। लाङ्गलं भिद्यते चापि प्रभुस्तत्र विनश्यति। ईशाभङ्गोयदा कर्त्तुः संशयोजीवितस्य च। सुतनाशोयुगाभङ्गे समीने म्रियते सुतः"। समीने योक्त्रबन्धनकाष्ठद्वये। "योक्त्राच्छेदे तु व्यासङ्गः शस्यहानिश्च जायते। हले प्रवाह्यमाणे तु गौरेकः प्रपतेद्यदि। प्रपतेन्मुक्तमात्रस्तु बन्धनं स न मन्यते। ज्वरातिसाररोगेण कृषिभङ्गं विनिर्दिशेत्। प्रवाहमुक्तमात्रस्तु ततो गौः प्रपतेत् यदि। वत्सानीदृेन नर्द्देत्तु तदा शस्यं चतुर्गुणम्। हेमवारिविलिप्तस्य वीजस्योद्वयतः शुचिः। इन्द्रं चित्ते निधायाथ स्वयं मुष्टित्रयं वपेत्। कृत्वा चान्योन्यप्रोत्साहं कर्षकोहृष्टमानसः। प्राङ्मुखः कलसं गृहय इमं मन्त्रमुदीरयेत्। त्वं वै वसुन्धरे सीते! बहुपुष्पफलप्रदे!। नमस्ते मे शुभं नित्यं कृषिं मेधांशुभे! कुरु। रोहन्तु सर्वशस्यानि काले देवः प्रवर्षतु। कर्षकास्तु भवन्त्यग्र्या धान्येन च धनेन च स्वाहा"। कृत्यरत्नाकरे ब्रह्मपुराणम् "चैत्रे च कृष्णपञ्चम्यां काश्मीरा च रजस्वला। नित्यं भवति तस्मात्तां कृत्वा शैलमयीं स्त्रियम्। अभ्यङ्गवस्त्रनैवेद्यैः पूजयेच्च दिनत्रयम्। पुष्पाकङ्कारधूपैश्च गोरसं वर्जयन्ति च"। काश्मीरा पृथ्वी। "अष्टम्याञ्च ततः स्नाप्य ताभिरेव गृहे गृहे। सुस्नाताभिः प्रहृष्टाभिर्जीवपत्नीभिरेव च। अनन्तरं द्विजैः स्नाप्य सर्वौषधियुतैर्जलैः। गन्धैर्बीजैस्तथा रत्नैः फलैः सिद्धार्थकैस्तथा। स्नापयित्वा च तां देवीं गन्धैर्माल्यैश्च पूजयेत्। तन्निवेदितशिष्टन्तु प्राशितव्यं गृहे गृहे। अतःपरं स्नाता गर्भं गृह्णाति स्वतुमेदिनी"। तथा "ब्रह्मा विष्णुश्च रुद्रश्च काश्यपः सुरभी गृहे। इन्द्रः प्रचेताः पर्जन्यः शेषचन्द्रार्कवह्नयः। बलदेवो हलं भूमिर्वृषभो रामलक्ष्मणौ। रक्षोघ्नौ जानकी सीता युगं गगनमेव च" सीता लाङ्गलपद्धतिः। युगं युगकाष्ठम्। "एते द्वाविंशतिः प्रोक्ता प्रजानां पतयः शुभाः। गोमङ्गले तु संपूज्याः कृष्यारम्भे महोत्सवे। अर्घ्यैः पुष्पैश्च धूपैश्च माल्यै रत्नैः पृथक्पृथक्। हलेन वाहयेद्भूमिं स्वयं स्नातः स्वलङ्कृतः"। तथा। "उप्त्वा वीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह"। वीजवपनं प्राजापत्यतीर्थेन यथाह हारीतः "कनिष्ठायाः पश्चात् प्राजापत्यमावपनं होमतर्पणे प्राजापत्येन कुर्य्यात्" इति। होमतर्पणे लाजहोमसनकादितर्पणे। राजमार्त्तण्डे पराशरः "नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम्। नित्यञ्च त्रिहले भक्तं नित्यमेकहले ऋणम्"। "वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ। अतःपरश्चाधमं न जातु श्रावणे शुभम्"। ज्योतिषे "पूर्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी। विशाखा शतभिषा वा घा

न्यानां रोपणे वरा। सदोषा रजनीं नीलीं पुत्रवित्तैर्वियुज्यते। स्वयं जाते पुनस्ते हि पालयन्नैव दुष्यति। आरामे गृहमध्ये वा मोहात् संस्थापनावपन्। पराभवं रिपोर्याति ससाधनधनक्षयम्। निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता। कोविदारश्च सर्वत्र सर्वं निघ्नन्ति मङ्गलम्"। निशा हरिद्रा। कोविदारकोरक्तकाञ्चनः। "हेमाम्भसा हृत्वबीजं स्नातोमन्त्रेण रोपयेत्। वसुधेति सुशीतेति पुण्यदेति धरेति च। नमस्ते शुभगे! नित्यं द्रुमोऽयं वर्द्धतामिति। अरिष्टाशोकपुन्नागवकुलाम्रप्रियङ्गवः। माङ्गल्याः पूर्वमारामे रोपणीया गृहेषु च। अश्वत्थमेकं पिचुमर्दमेकं द्वौ चम्पकौ त्रीण्यथ केशराणि। तालाष्टकं श्रीफलसंप्रकञ्च पञ्चाम्रवापी नरकं न पश्येत्"। दानरत्नाकरे देवीपुराणम् "ये च पापा दुराचाराः श्रीतरुच्छेदकारिणः। तेऽप्यवीच्यादिनरके पच्यन्ते ब्रह्मणोदिनम्। मृतास्ते जीव्यमानास्तु ब्रह्मघ्नाः कीर्त्तिता भुवि। तस्मिन् देशे भयं नित्यं राजानोन चिरायुषः। नच नन्दन्त्ययं लोको यत्र श्रीफलभेदिनः। श्रीतरुर्विल्वः। "लिखित्वा लक्तकेनापि मन्त्रं शस्येषु बन्धयेत्। न व्याधिकीटहिंस्राणां भयं तत्र भवेत् क्वचित्। "सिद्धिः प्रचलतरङ्गतरलितमृदुतरसमीरणवनोद्देशे श्रीमद्रामभद्रपादाः कुशलिनः समुद्रतटे नानाशतसहस्रवानराणां मध्ये खरनखरपशाङ्गलाङ्गूलं पवनसुतं वायुवेगं परचक्रप्रमथनं श्रीमद्धनूमन्तमाज्ञापयन्ति अमुकसग्राखण्डक्षेत्रे वाताभोम्भोगाश्चीरुतीणाण्डरसुण्डीभूलीभ्रङ्गारतल्लाकृशराङ्कताफड़िङ्गैलावानरागम्भड़ामड़कमहिषादिरोगम् खण्डयत क्षणमपि विलम्बं मा चरत यदि विलम्बं कारयत तदा युष्मान्शतखण्डं कारयामीति। घां घीं घौं श्रीरामाय नमः"। इति मन्त्रेण बन्धयेत्" "कृषेर्वृष्टिसमायोगात् दृश्यन्ते फलसिद्धयः" शु०त०पु०। वा ङीप् कृषीत्यप्यत्र। स्वार्थे क कृषिकाप्यत्र स्त्री। आधारे कि। भुवि २। "कृषिर्भूवाचकः शब्द" भा०। कृष्णशब्दे दृश्यम्

कृषिक पु० कृष–किकन्। फाले अम० कर्षके त्रि०।

कृषिजीविन त्रि० कृषा जीवति जीव–णिनि। स्वयमस्वयं वा कृतया कृषिवृत्त्या जीविनि स्त्रियां ङीप।

कृषिपराशर पु० कृषिकर्त्तव्यताविधायकपराशरमतानुसारिनिबन्धभेदे।

कृषीवल त्रि० कृषिरस्त्यस्य इत्तित्वेन वलच् दीर्घः। कर्षके कृषिजीविनि। "कश्चित्तुष्टाः कृषीवलाः" भा० स०५अ०

कृष्कर पु० अव्युत्पन्नं प्रातिपदिकम्। शिवे त्रिकाण्डशेषः

कृष्ट त्रि० कृष–कर्म्मणि क्त। १कृतकर्षणे क्षेत्रादौ "कृष्टजानामोषधीनां जातानां च स्वयं वने" मनुः कृष्टपच्यः भावे क्त। २कर्षणे न० "न प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत्" या०। ततः दृढा० भावे इमनिच् ऋतोरः। क्रष्टिमन् कृष्टत्वे कर्षणे पु०

कृष्टपच्य त्रि० कृष्टे क्षेत्रे स्वयमेव पच्यते पच–कर्म्मकर्त्तरि क्यप्। कृष्टक्षेत्रे–स्वयमेव पच्यमाने धान्यादौ "न कृष्टपच्यमश्नीयादकृष्टञ्चाप्यकालतः" भाग० ७।१२।१७। वानप्रस्थधर्म्मोक्तौ। शुद्धकर्म्मणि तु एवदेव "कृष्टपाक्य इति" सि० कौ०

कृष्टि पु० कृष–कर्त्तरि क्तिच् भावे क्तिन् वा। १पण्डिते अमरः २जनमात्रे निरु० "मानुषीणामेकः कृष्टीनामभवत् सहावा" ऋ० ६।१८।२ "विश्वानम त कृष्टयः" ऋ० ८।६।४॥ "कृष्टयः प्रजाः" भा० "कृष्टीनां विचर्षणिः" ऋ० ६।४५।१६ ३कर्षणे स्त्री० त्रिका० ४आकर्षणे च

कृष्टोप्त त्रि० कृष्टे क्षेत्रे उप्तः। कृतकर्षणक्षेत्रे–कृतवपने ओषध्यादौ "वन्या ग्राम्याश्च ह तथा कृष्टोप्ताः पर्वताश्रयाः। अकण्टकाः कण्टकिनो गन्धरूपरसान्विताः" भा० आ० ६८अ०;

कृष्ण पु० कृष–नक्। भगवतोऽवतारभेदे वासुदेवे १देवकीनन्दने। "कृषिर्भूवाचकः शब्दः णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्णइत्यभिधीयते" इत्युक्ते २परब्रह्मणि, ३वेदव्यासे, ४अर्ज्जुने मध्यमपाण्डवे च। कृष्णवर्णत्वात् ५कोकिले, विश्वः ६काके, मेदि० करमर्द्दके (करमचा) ७वृक्षे, शब्दर० ८नीले, वर्णे ९तद्वति त्रि० अमरः १०कालागुरुणि राजनि०। ११अशुभकर्म्मणि च न०। कृष्णकर्म्म अमरः १२द्रौपद्यां, १३नीलीवृक्षे, १४पिप्पल्यां, १५द्राक्षायां, स्त्री मेदि० १६नीलपुनर्नवायाम्, १७कृष्णजीरके, १८गाम्भार्य्यां १९कटुकायाम्, २०शारिवाभेदे २१राजसर्षपे, राजनि० २२पर्पट्यां, भावप्र०। २३काकोल्यां, २४सोमराज्याञ्च स्त्री टाप् जटा०कृष्णवर्णत्वाच्च तासां तथात्वम् २५धनभेदे न०कृष्णधनशब्दे विवृतिः। २६नीलाञ्जने, २७लौहे, २८मरिचे च पु० जटाधरः। तत्र भगवदवतारविशेषः "अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे। अष्टाविंशतिमे जातः कृष्णोऽसौ देव-

कौस्तुभः" ब्रह्मपु० । वसुदेवदेवक्यौ च कश्यपादिती । तौ च वरुणस्य गोहरणात् ब्रह्मणः शापेन गोपालत्वमापतुः । यथाह हरिवं० ५६अ०

"इत्यम्बुपतिना प्रोक्तो वरुणेनाहमच्युत ! । गवां कारणतत्त्वज्ञः कश्यपे शापमुत्सृजम् । येनांशेन हृता गावः कश्यपेन महात्मना । स तेनांशेन जगतीं गत्वा गोपत्वमेष्यति । या च सा सुरभिर्नाम अदितिश्च सुरारणी । उभे ते तस्य वै भार्य्ये सह तेनैव यास्यतः । ताभ्यां सह स गोपत्वे कश्यपो भुवि रंस्यते । तदस्य कश्यपस्यांशस्तेजसा कश्यपोपमः । वसुदेव इति ख्यातो गोषु तिष्ठति भूतले । गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः । तत्रासौ गोष्वभिरतः कंसस्य करदायकः । तस्य भार्य्याद्वयञ्चैव अदितिः सुरभिस्तथा । देवकी रोहिणी चैव वसुदेवस्य धीमतः । तत्रावतर लोकानां भयाय मधुसूदन ! । जयाशीर्वचनैस्त्वेते वर्द्धयन्ति दिवौकसः । आत्मानमात्मना हि त्वमवतार्य्य महीतले । देवकीं रोहिणीञ्चैव गर्भाभ्यां परितोषय । तत्र त्वं शिशुरेवादौ गोपालकृतलक्षणः । वर्द्धयस्व महाबाहो ! पुरा त्रैविक्रमे यथा ॥ छादयित्वात्मनात्मानं मायया गोपरूपया । गोपकन्यासहस्राणि रमयंश्चर मेदिनीम् । गाश्च ते रक्षिता विष्णो ! वनानि परिधावतः । वनमालापरिक्षिप्तं धन्या द्रक्ष्यन्ति ते वपुः । विष्णो ! पद्मपलाशाक्ष ! गोपालवसतिङ्गते । बाले त्वयि महाबाहो ! लोको बालत्वमेष्यति । त्वद्भक्ताः पुण्डरीकाक्ष ! तव चित्तवशानुगाः । गोषु गोपा भविष्यन्ति सहायाः सततन्तव । वने चारयतो गास्तु गोष्ठेषु परिधावतः । मज्जतो यमुनायान्तु रतिमाप्स्यन्ति ते भृशम् । जीवितं वसुदेवस्य भविष्यति सुजीवितम् । यस्त्वया तात इत्युक्तः स पुत्र इति वक्ष्यति । अथ वा कस्य पुत्रत्वं गच्छेथाः कश्यपादृते । का वा धारयितुं शक्ता विष्णो ! त्वामदितिं विना । योगेनात्मसमुत्थेन गच्छ त्वं विजयाय वै" इति विष्णुं प्रति ब्रह्मोक्तिः । ताभ्यां तस्योत्पत्तिकथा च तत्र ६०अ० यथा

"यदर्थं सप्त ते गर्भाः कंसेन विनिपातिताः । तन्तु गर्भं प्रयत्नेन ररक्षुस्तस्य रक्षिणः । स तत्र गर्भवसतौ वसत्यात्मेच्छया हरिः । समधत्त यशोदाऽपि गर्भं तदहरेव तु । विष्णोः शरीरजां निद्रां विष्णोर्निर्द्देशकारिणीम् । गर्भकाले त्वसंपूर्णे अष्टमे मासि ते स्त्रियौ । देवकी च यशोदा च सुषुवाते समं तदा । यामेव रजनीं विष्णुर्जज्ञे वृष्णिकुलं प्रभुः । तामेव रजनीं कन्या यशोदातो व्यजायत । नन्दगोपस्य भार्य्यैका वसुदेवस्य चापरा । तुल्यकालं हि गर्भिण्यौ यशोदा देवकी तथा । देवक्यजनयद्विष्णुं यशोदा तान्तु कन्यकाम् । मुहूर्त्तेऽभिजिते प्राप्ते सार्द्धरात्रे विभूषिते । सागराः समकम्पन्त चेलुश्च धरणीधराः । जज्वलुश्चाग्नयः शान्ता जायमाने जनार्द्दने । शिवाः संप्रववुर्वाताः प्रशान्तमभवद्रजः । ज्योतींषि व्यत्यकाशन्त जायमाने जनार्द्दने । अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्व्वरी । मुहूर्त्तो विजयो नाम यत्र जातो जनार्द्दनः । अव्यक्तः शाश्वतः कृष्णो हरिर्नारायणः प्रभुः । जायते भगवांस्तत्र नयनैर्मोहयन् जगत्" । ततोऽनतिदूरे

"वसुदेवस्तु तं रात्रौ जातं पुत्त्रमधोक्षजम् । श्रीवत्सलक्षणं दृष्ट्वा युतं दिव्यैश्च लक्षणैः । उवाच वसुदेवस्तं रूपं संहर वै प्रभो ! । भीतोऽहं देव ! कंसस्य तस्मादेवं वदाम्यहम् । मम पुत्त्रा हतास्तेन तव ज्येष्ठाऽम्बुजेक्षण ! । वैशम्पायन उवाच । वसुदेववचः श्रुत्वा रूपं संहरदच्युतः । अनुज्ञाप्य पितृत्वेन नन्दगोपगृहं नय । वसुदेवस्तु संगृह्य दारकं क्षिप्रमेव च । यशोदाया गृहं रात्रौ विवेश सुतवत्सलः । यशोदायास्त्वविज्ञातस्तत्र निक्षिप्य दारकम् । गृहीत्वा दारिकां ताञ्च देवकीशयने न्यसत् । परिवर्त्ते कृते ताभ्यां गर्भाभ्यां भयविक्लवः । वसुदेवः कृतार्थो वै निर्जगाम निवेशनात्" ।

यथा रूपेण तस्याविर्भावस्तथा रूपं भाग०१०स्क०वर्णितम्

"देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः । आविरासीद्यथा प्राच्यां दिशीन्दुरिव पुष्कलः । तमद्भुतं बालकमम्बुजेक्षणं चतुर्भुजं शङ्खगदाद्युदायुधम् । श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं पीताम्बरं सान्द्रपयोदसौभगम् । महार्हवैदूर्य्यकिरीटकुण्डलत्विषा परिष्वक्तसहस्रकुन्तलम् । उद्दामकाञ्च्यङ्गदकङ्कणादिभिर्विरोचमानं वसुदेव ऐक्षत । स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुन्दुभिस्तदा । कृष्णावतारोत्सवसम्भ्रमोऽस्पृशन्मुदा द्विजेभ्योऽयुतमाप्लुतो गवाम्" । इत्याविर्भाव वर्णयित्वा

"जन्म ते मय्यसौ पापो मा विद्यान्मधुसूदन ! । समुद्विजे भवद्धेतोः कंसादहमधीरधीः । उपसंहर विश्वात्मन्नदो रूपमलौकिकम् । शङ्खचक्रगदापद्मश्रिया जुष्टं चतुर्भुजम् । विश्वं यदेतत् स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान् । बिभर्त्ति, सोऽयं मम गर्भगोऽभू

दृष्टो न्वलोकस्य विडम्बनं तत्"। इत्थं देवक्याः प्रार्थने तां सान्त्वयित्वा तस्य प्राकृतरूपधारणं तत्रैवोक्तं यथा "इत्युक्त्वा तां हरिस्तूष्णीं भगवानात्ममायया। पित्रोः संपश्यतोरेव बभूव प्राकृतः शिशुः।" "एवञ्च चतुर्भुजरूपेणोत्पत्तावपि प्राकृतरूपत्वोक्त्या तस्मादनन्तरं द्विभुजत्वमिति वैष्णवा मन्यन्ते। गीतायान्तु "तेनैव रूपेण चतुर्भुजेन सहस्रबाहो! भव विश्वमूर्त्ते!" इति भारतयुद्धकाले तस्य चतुर्भुजत्वकीर्त्तनात् चतुर्भुजत्वमेवासीत् शङ्खचक्राद्यायुधशून्यत्वेन प्राकृतत्वमिति तु युक्तमुत्पश्यामः। तस्येदानीं जन्मसमयो निरूप्यते प्रागुक्तब्रह्मपु० कलौ जातत्वाभिधानात् कलियुगएवास्य प्रादुर्भावः। यदि च एकैकमन्वन्तरे बहवः कलयः सम्भवन्ति तथापि वर्त्तमानवैवस्वतमन्वन्तरे अष्टाविंशतिमे महायुगे यः कलिस्तत्रैवाभिर्भूतः। तत्रापि ज्योतिर्निबन्धे "उच्चस्थाः शशिभौमचान्द्रिशनयो लग्नं वृषो लाभगो जीवः सिंहतुलालिषु क्रमवशात् पूषोशनोराहवः। नैशीथः समयोऽष्टमी बुधदिनं ब्राह्मर्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बुजेक्षणमभूदाविः परं ब्रह्म तत्" ग्रहाणां विशेषराश्यवस्थानकाले तस्याविर्भावोक्तेः तादृशसमयस्य च कलेः ६४७वर्षेषु गतेषु सम्भवः कलौ ततः पूर्व्वं तादृशसमयासम्भवात्। राजतरङ्गिण्यां च "शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले। कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः" इत्यनेन कलेः ६५३ वर्षेषु गतेषु तत्समकालीनयोः कुरुपाण्डवयोरुत्पत्तिरुक्ता अनन्तस्यापि तत्कालोत्पत्तिकत्वम्।

तदवतारचरितं च हरिवं० ४२अ० वर्णितं यथा

"अपरः केशवस्यायं प्रादुर्भावो महात्मनः। विख्यातो माथुरे कल्पे सर्व्वलोकहिताय वै। यत्र शाल्वञ्च मैन्दञ्च कंसं द्विविदमेव च। अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम्। नागं कुवलयापीडं चाणूरं मुष्टिकं तथा। दैत्यान्मानुषदेहस्थान् सूदयामास वीर्य्यवान्। छिन्नं बाहुसहस्रञ्च बाणस्याद्भुतकर्म्मणः। नरकश्च हतः सङ्ख्ये यवनश्च महाबलः। हृतानि च महीपानां सर्व्वरत्नानि तेजसा। दुराचाराश्च निहताः पार्थिवा ये महीतले"।

तस्य च कृष्णनामता गर्गेण तथा नामकरणात् यथाह भाग०१०।८।९ "आसन् वर्णास्त्रयोह्यस्य गृह्णतोऽनुयुगं तनूः। शुक्लोरक्तस्तथाऽपीत इदानीं कृष्णतां गतः" इति अपीतः श्याम इत्यर्थः भाग० ११अ० युगावतारे द्वापरे श्याममूर्त्तित्वोक्तेः यथा "कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः। कृष्णाजिनोपवीताक्षान् बिभ्रद्दण्डकमण्डलू। त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः। हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपलक्षणः। द्वापरे भगवान् श्यामः पीतवासा निजायुधः। श्रीवत्सादिभिरङ्कैश्च लक्षणैरुपलक्षितः। नानातन्त्रविधानेन कलावपि यथा शृणु। कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदः। यज्ञैः संकीर्त्तनप्रायैर्यजन्तीह सुमेधसः"।

अस्य तन्नामनिर्वचनं च भा० उ० ६९अ०

"कृषिर्भूवाचकः शब्दोणश्च निर्वृतिवाचकः। विष्णुस्तद्भावयोगाच्च कृष्णोभवति सात्वतः"

कल्पभेदेऽपि वैवस्वतमनोरष्टाविंशतिमे युगे युगे तस्याविर्भावः अतएव छा०उ०कल्पभेदादिप्रायेणैव "तद्धैतत् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाच" इत्युक्तम्। वस्तुतस्तस्य भगवदवतारात् भिन्नत्वमेव तस्य घोराङ्गिरसशिष्यत्वोक्तेः परमेश्वरस्य तथात्वासम्भवात्। अतस्तन्नाम्नि २९अपरस्मिन्नेव कृष्णशब्दस्य वृत्तिः। "कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते। भस्मीभवन्ति राजेन्द्र! महापातककोटयः" पुरा०। अर्ज्जुनस्य तन्नामनिर्वचनं भा० वि०४४अ०। "कृष्ण इत्येव दशमं नाम चक्रे पिता मम। कृष्णावदातस्य सतः प्रियत्वात् बालकस्य" च। व्यासस्य कार्ष्ण्यात्तथात्वम् "योव्यस्य वेदांश्चतुरस्तपसा भगवानृषिः। लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च" भा० आ०१०५अ०। कृष्णस्येदम् अण्। कार्ष्ण तत्सम्बन्धिनि त्रि० "कार्ष्णं वेदमिमं विद्वान् श्रावयित्वार्थमश्नुते" भा०आ०१अ०उक्ते। अपत्ये तु इञ्। कार्ष्णि तदपत्ये पुंस्त्री। चन्द्रह्रासकरप्रथमादिपञ्चदशकलाक्रियारूपे प्रतिपदादिदर्शान्तात्मकपञ्चदशतिथ्यात्मके ३०कालभेदे अर्द्धमासे "चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" ति०त०षट्त्रि०। इन्दुकलाक्षयप्रकारः इन्दुशब्दे ६११पृ० उक्तः। तदुपलक्षिते ३१पितृयाने "शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः" गीता। पितृयाने च यथा कृष्णपक्षसंबन्धस्तथा आतिवाहिकशब्दे ६५१पृ० दर्शितम्। "धूमोरात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्" गीता। कृष्णपक्षाभिमानिनि पितृयानस्थे कर्म्मिणामतिवाहके ईश्वरनियोजिते ३२देवभेदे आतिवाहिकशब्दे

विवृतिः। २३द्यूताद्युपार्जिते धने न० कृष्णधनशब्दे अर्थशब्दे च विवृतिः। कृष्णस्य भावः ष्यञ्। कार्ष्ण्य तद्भावे न० "कार्ष्ण्यात् कृष्णत्वमेव च" भा०आ० १०५अ०। इमनिच्। कृष्णिमन् तद्भावे पु० "कृष्णिमानं दधानेन"। तल्, कृष्णता स्त्री, त्व कृष्णत्व, न०, कृष्णवर्णे। "कृष्णाऽपि शुद्धेरधिकं विधात्रभिः" माघः। "अभिहत्य मरुत्त्वसान् कृष्णमेघस्तिरोदधे" रघुः। २४नेत्रगतेऽंशभेदे अक्षिशब्दे विवृतिः। २५कृष्णसारमृगे पुंस्त्री० "एणः कृष्णः स कीर्त्तितः" छन्दो०प०। कृष्णाजिनम्

कृष्णक पु० कृष्णप्रकारः स्थूला० कन्। १कृष्णसर्षपे अनुकम्पितं कृष्णाजिनम् कन् अजिनान्तत्वादुत्तरपदलोपः। अनुकम्पिते २कृष्णाजिने न०

कृष्णकन्द न० कृष्णः कन्दोऽस्य। रक्तोत्पले त्रिका०

कृष्णकर्कटक पुंस्त्री नित्यकर्म०। कर्कटभेदे सुश्रुतः। "कूर्म्मकुम्भीरकर्कटकृष्णकर्कटशिशुमारप्रभृतयः पादिनः" सुश्रुते पादिजलचरोक्तौ

कृष्णकर्म्मन् न० कर्म०। १हिंसादिनिषिद्धकर्म्मणि। ब०व०। २तद्युक्ते पापाचारिणि त्रि० अमरः ३व्रणस्य कृष्णतासम्पादके क्रियाभेदे स च सुश्रुतेन दर्शितो यथा "अथ व्रणस्योपक्रमाः भवन्तीत्युपक्रमे "दारुणकर्म्मक्षारकर्म्माग्निकर्म्मकृष्णकर्म्मपाण्डुकर्म्म" इत्याद्युक्त्वा। "दुरूढत्वात्तु शुक्लानां कृष्णकर्म्म हितं पुनः इति" तस्योपयोगो दर्शितः। कृष्णेऽर्पितं कृष्णार्पितं कर्म्म०। ४परमेश्वरार्पिते कर्म्मणि न०।ब०व०। ५तद्युक्ते त्रि० स्त्रियां वा ङाप्।

कृष्णकलि पु० कृष्णा इव चूडाला कलिः कलिकाऽस्य। स्वनामख्याते पुष्पप्रधाने वृक्षे। [स्त्रियां जातित्वात् ङीष्।

कृष्णकाक पुंस्त्री नित्यकर्म०। (दाडकाक) काकभेदे हारा०

कृष्णकापोती स्त्री ओषधिभेदे सुश्रु०। "अथौषधीर्व्याख्यास्यामः" इत्युपक्रमे "श्वेतकापोती कृष्णकापोती" इत्यादिना विभज्य तदुपयोगप्रकारो दर्शितो यथा। "गोनसाजगरीकृष्णकापोतीनां सुनखमुष्टिं खण्डयित्वा क्षीरेण विपाच्याभिषुत्य" इत्याद्युक्तं सुश्रु० तस्या लक्षणमोषधिशब्दे १५६२ पृ० उक्तम्।

कृष्णकाय पुंस्त्री कृष्णः कायोऽस्य महिषे शब्दचि०। जातित्वेऽपि योपधत्वात् स्त्रियां न ङीप् किन्तु टाप्।

कृष्णकाष्ठ न० कृष्णं काष्ठमस्य। कालागुरुणि राजनि०

कृष्णकौतूहल पु० कृष्णस्य कृष्णकर्म्मणः जन्म वितर्कं वाति वा—क। द्यूतकारिणि त्रिका०।

कृष्णगङ्गा स्त्री नित्य०। कृष्णवेणायां नदीभेदे राजनि०।

कृष्णगतरोग पु० नेत्रावयवभेदकृष्णगतरोगभेदे। तद्विज्ञानादि सुश्रुते उक्तं यथा।

"अथातः कृष्णगतरोगविज्ञानीयमध्यायं व्याख्यास्यामः। यत्सव्रणं शुक्रमथाव्रणं वा पाकात्ययश्चाप्यजका तथैव। चत्वार एतेऽभिहिताः विकाराः कृष्णाश्रयाः संग्रहतः पुरस्तात्। निमग्नरूपं हि भवेत्तु कृष्णे सूच्येव विद्धं प्रतिभाति यद्वै। स्रावं स्रवेदुष्णमतीव रुक् च तत्सव्रणं शुक्रमुदाहरन्ति। दृष्टेः समीपे न भवेत्तु यच्च न चावगाढं न च संस्रवेद्धि। अवेदनावन्न च युग्मशुक्रं तत्सिद्धिमाप्नोति कदाचिदेव। सितं यदा भात्यसितप्रदेशे स्यन्दात्मकं नातिरुगश्रुयुक्तम्। विहायसीवाभ्रदलानुकारि तदव्रणं साध्यतमं वदन्ति। गम्भीरजातं बहलञ्च शुक्लं चिरोत्थितञ्चापि वदन्ति कृच्छ्रम्। विच्छिन्नमध्यं पिशिताहृतं वा चलं सिरासक्तमदृष्टिकृच्च। द्वित्वग्गतं लोहितमन्ततश्च चिरोत्थितञ्चापि विवर्ज्जनीयम्। उष्णास्रपातः पिडका च कृष्णे यस्मिन् भवेन्मुद्गनिभञ्च शुक्लम्। तदप्यसाध्यं प्रवदन्ति केचिदन्यच्च यत्तित्तिरिपक्षतुल्यम्। संछाद्यते श्वेतनिभेन सर्वदोषेण यस्यासितमण्डलन्तु। अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छिलास्रः। विदार्य्य कृष्णं प्रचयोऽभ्युपैति तञ्चाजकाजातमिति व्यवस्येत्"।

कृष्णगति पु० कृष्णा गतिर्गतिस्थानमस्य। कृष्णवर्त्मनि वह्नौ तस्य गमनस्थानस्य तद्वर्त्मना कृष्णताप्राप्तेस्तस्य तथात्वम्। "ववृधे स तदा गर्भः कक्षे कृष्णगतिर्यथा" भा० आनु० ८५अ०।

कृष्णगन्ध पु० कृष्ण उग्रो गन्धोऽस्य। शोभाञ्जनवृक्षे राजनि०

कृष्णगर्भ पु० कृष्णवर्णो गर्भोऽस्य। कट्फले राजनि०।

कृष्णगिरि पु० नित्यकर्म०। नीलगिरौ

कृष्णगोधा कृष्णः गोधेव। कीटभेदे। "सूचीमुखः कृष्णगोधा यश्च काषायवासिकः" सुश्रु० कीटशब्दे विवृतिः।

कृष्णग्रीव त्रि० कृष्णा ग्रीवा यस्य। कृष्णवर्णगलेऽजादौ "कृष्णग्रीव आग्नेयः" यजु० २४,२, "कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्त ऐन्द्राग्नाः" इत्यादि अश्वमेधीयपशुविशेषोक्तौ। "श्वेतलोहितपर्य्यन्तः कृष्णग्रीवस्तडिद्द्युतः। तिर्य्यक्परिघोभानुः सन्ध्यारागमथावृणोत्" हरि० १७५अ०। २नीलकण्ठे महादेवे पु०।

कृष्णचञ्चुक पु० कृष्णा चञ्चूरस्य कप्। चणके राजनि०।

कृष्णचन्दन न० कृष्णप्रियं चन्दनम् शा० त०। हरिचन्दने श्वेतचन्दने शब्दचि० [माह्लादकत्वात्तथात्वम्।

कृष्णचन्द्र पु० कृष्णचन्द्र इव। वासुदेवे तस्य चन्द्रवत् भक्ताना

कृष्णचर पु० कृष्णस्य भूतपूर्व्वः चरट्। भूतपूर्व्वकृष्णसम्बन्धिनि गवादौ

कृष्णचूड़ा स्त्री कृष्णस्य चूड़ा इव चूड़ाऽस्य। स्वनामख्याते पुष्पवृक्षे। स्वार्थे क अत इत्त्वम् ।तत्रार्थे राजनि०।

कृष्णचूडिका स्त्री कृष्णा चूडाऽग्रं यस्याः कप् अत इत्त्वम्। गुञ्जायां राजनि०। [राजनि०।

कृष्णचूर्ण न०कृष्णं तद्वर्णं चूर्णम्। लौहमले (लोहार गु)

कृष्णजटा स्त्री कृष्णा जटा यस्याः। जटामांस्याम् रत्नमा०

कृष्णजीरक पु० नित्यकर्म्म०। कालवर्णे जीरके (कालजीरे) अमरः "कटूष्णः कफशोषघ्नो जीर्णज्वरविनाशनः। चक्षुष्यो रुचिकृद्ग्राही कृष्णजीरक ईरितः" राजनि०

कृष्णतण्डुला स्त्री कृष्णस्तण्डुलोयस्याः। चर्म्मस्फोटक-तायां राजनि०। [शब्दमा०।

कृष्णताम्र न० "वर्णोवर्णेन" पा० कर्म्म०। गोशीर्षचन्दने

कृष्णतार पुंस्त्री कृष्णतारास्त्यत्र अच्—अण् उप०स०। १कृष्णसारमृगे२हरिणमात्रे च राजनि०। स्त्रियां जातित्वात् ङीष्।

कृष्णत्रिवृता स्त्री नित्य कर्म्म०। (कालतेओडी) त्रिवृताभेदे जटा०। [कृष्णदेहा स्त्री राजनि० टाप्।

कृष्णदन्त त्रि० कृष्णा दन्ता यस्य। १कालवर्णदन्तयुक्ते २का-

कृष्णदेह पुंस्त्री कृष्णोदेहोऽस्य।१भ्रमरे शारस्वतः स्त्रियांङीष् २कालवर्णदेहान्विते त्रि०। कर्म्म०। कालवर्णे ३देहे पु०

कृष्णद्वैपायन पु० द्वीपे यमुनाद्वीपे भवः फक् द्वीपोऽयनं जन्मभूमिर्वास्य प्रज्ञाद्यण् कर्म्म०। वेदव्यासे तस्य यमुनाद्वीपोत्पत्तिकथा भा०आ० १०५अ०।

"धर्म्मयुक्तस्य धर्मार्थं पितुरासीत्तरी मम। सा कदाचिदहं तत्र गता प्रथमयौवना। अथ धर्मविदां श्रेष्ठः परमर्षिः पराशरः। आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम्। स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा। सान्त्वपूर्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः॥ तमहं शापभीता च पितुर्भीता च भारत!। वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे। अभिभूय स मां बालां तेजसा वशमानयत्। तमसा (कुज्झटिकया) लोकमावृत्य नौगतामेव भारत!। मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः। तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः। ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम्। द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि। पाराशर्य्यो महा योगी स बभूव महानृषिः। कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः। योव्यस्य वेदांश्चतुरस्तपसा भगवानृषिः। लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च। सत्यवादी शमपरस्तपस्वी दग्धकिल्विषः। सद्योत्पन्नः स तु महान् सह पित्रा ततो गतः"। "श्रुत्वा तु सर्पसत्राय दीक्षितं जनमेजयम्। अभ्यगच्छदृषिर्विद्वान् कृष्णद्वैपायनस्तदा। जनयामास यं काली शक्तेः पुत्रात्पराशरात्। कन्यैव यमुनाद्वीपे पाण्डवानां पितामहम्। जातमात्रश्च यः सद्य इष्टं देहमवीवृधत्। वेदांश्चाधिजगे साङ्गान् सेतिहासान्महायशाः। यन्नाति तपसा कश्चिन्न वेदाध्ययनेन च। न व्रतैर्नोपवासैश्च न प्रसूत्या न मन्युना। विव्यासैकं चतुर्धा यो वेदं वेदविदांवरः। परावरज्ञो ब्रह्मर्षिः कविः सत्यव्रतः शुचिः। यः पाण्डुं धृतराष्ट्रञ्च विदुरं चाप्यजीजनत्। शान्तनोः सन्ततिं तन्वन् पुण्यकीर्त्तिर्महायशाः"।

"मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः। क्षेत्रे विचित्रवीर्य्यस्य कृष्णद्वैपायनः पुरा। त्रीनग्नीनिव कौरव्यान् जनयामास वीर्य्यवान्। उत्पाद्य धृतराष्ट्रञ्च पाण्डुं विदुरमेव च। जगाम तपसे धीमान् पुनरेवाश्रमं प्रति"। "कृष्णद्वैपायनाज्जज्ञे धृतराष्ट्रो जनेश्वरः। विचित्रवीर्य्यक्षेत्रे च पाण्डुश्चैव महाबलः। धर्मार्थकुशलो धीमान्मेधावी धूतकल्मषः। विदुरः शूद्रयोनौ तु जज्ञे द्वैपायनादपि"। भारते नानास्थान

"कृष्णद्वैपायनं व्यासं विद्धि नारायणं विभुम्। कोह्यन्यः पुण्डरीकाक्षात् महाभारतकृत् भवेत्" विष्णुपु०। तस्य विष्णोरवतारत्वकथा भाग० "ततः सप्तदशे जातः सत्यवत्यां पराशरात्। चक्रे वेदतरोः शाखा द्वापरे सोऽल्पमेधसः"। अवतारशब्दे ४२२पृ० विवृतिः। कृष्णेति द्वैपायनेति च तस्य नामद्वयम् कर्म्म० क्वचिदेकनामताऽपि। "द्वैपायनेन कृष्णेन नगरे वारणावते" भा०स०७६अ०। "कार्ष्ण्यात् कृष्णत्वमेव च" "कार्ष्णं वेदमिमं शृणु" इति च व्यस्तप्रयोगः। "तमहमरागमतृष्णं कृष्णद्वैपायनं वन्दे" वेणीसं०। प्रागुक्तभारते च समस्तप्रयोगः

कृष्णधत्तू(धूस्तू)र पु० कर्म्म० (कनकधुतरा) वृक्षभेदे। "सितनीलकृष्णलोहितपीतधूसराश्च सन्ति धत्तूराः। सामान्यगुणोपेतास्तेषु गुणाढ्यस्तु कृष्णकुसुमः स्यात्" राजनि०। धत्तूरशब्दे तत्सामान्यगुणा भावप्र०उक्तायथा

"धत्तूरो मदवर्णाग्निवातकृज्ज्वरकुष्ठनुत्। कषायो मधुरस्तिक्तो यूकालिक्षाविनाशकः। उष्णो गुरुर्वमिगुल्म कण्डूकृमि विषापहः"।

कृष्णधन न० कर्म्म०। द्यूतादिभिरर्ज्जिते धने; अर्थशब्दे २६७पृ०विवृतिः। "पार्श्विकद्यूतचौर्य्याप्त प्रतिरूपकसाहसैः। छलेनोपार्ज्जितं यच्च तत्कृष्णं समुदाहृतम्" विष्णुसं०।"पार्श्विकः अपात्रस्य पात्रताख्यापनम्"प्रा० वि०

कृष्णपक्ष पु० कर्म्म०। चन्द्रस्य कलाह्रासकरे प्रतिपदादिदर्शान्ते पञ्चदशतिथ्यात्मके काले। तत्र (चान्द्रे) पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि। चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः। पक्षत्याद्यास्तु तिथयः क्रमात् पञ्चदश स्मृताः। दर्शान्ताः कृष्णपक्षे ताः पूर्णिमान्ताश्च शुक्लके" ति०त० षट्त्रिंशन्मतम्। "रावणेन हृता सीता कृष्णपक्षे सिताष्टमी" महाना०

कृष्णपदी स्त्री कृष्णौ पादौ यस्याः कुम्भप० ङीप् अन्त्यलोपः पद्भावश्च। कालपादयुक्तायां स्त्रियाम्। [रत्नमा०

कृष्णपर्णी स्त्री कृष्णं पर्णमस्याः। कालतुलस्याम्।

कृष्णपवि पु० पूयते पू–शोधे इन् पविः पन्थाः "पन्था वातेन शुध्यति" इत्युक्तेः पथोवातभिन्नशुद्धिहेत्वनपेक्षणात् तथात्वम् कृष्णः पन्था यस्य यज्ञौ "पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे" ऋ० ७,८,२। "कृष्णपविः कृष्णवर्त्माऽग्निः भा० [फलमस्य। करमर्द्दे रत्ना०

कृष्णपाक पु० पच्यते इति पाकः फलं कृष्णः कृष्णवर्णः पाकः

कृष्णपाकफल पु० कृष्णपाकरूपं फलमस्य। करमर्द्दे अमरः

कृष्णपिङ्गल त्रि०"वर्णोवर्णेन"पा० कर्म्म०। कालपिङ्गलवर्णयुक्ते "ऋतं सत्यं परं ब्रह्म पुरुषं कालपिङ्गलम्" रुद्रोपस्थानमन्त्रः। तस्यापत्यम् इञ्। कार्ष्णपिङ्गलि तदपत्ये बहुत्वे उपका०अन्यशब्देन द्वन्द्वे अद्वन्द्वे च वा तस्य लुक्। कृष्णपिङ्गलास्तदपत्येषु। २दुर्गायां स्त्री० त्रिका०

कृष्णपिण्डीतक पु० नित्यकर्म्म०। कृष्णपिण्डीरभेदे रत्नमाला कृष्णपिण्डीरोऽप्यत्र।

कृष्णपिप्पिली स्त्री नित्यकर्म्म०। पिपीलिकाभेदे वृक्षारोहिपिपीलिकायां (काठपिपिड़ा) राजनि०

कृष्णपुष्प पु० कृष्णं पुष्पमस्य। १कृष्णधत्तूरे राजनि० २प्रियङ्गुवृक्षे स्त्री ङीप् शब्दच०

कृष्णफल पु०कृष्णं फलमस्य।१करमर्द्दे(करमचा)वृक्षे २सोमराज्यां स्त्री टाप अमरटीकायांभरत [द्विरूपको०

कृष्णफलपाक पु० कृष्णः फलरूपः पाकोयस्य। करमर्द्दे

कृष्ण(व)बलक्ष पु० "वर्णोवर्णेन" पा०स०। १कालश्वेतवर्णे २तद्युक्ते त्रि० "अजिने पार्श्वसहिते कृष्णव(ब)लक्षे आविके" कात्या० २२,४,१७, कृष्णधवलादयोऽप्यत्र।

कृष्णभूम पु० कृष्णा भूमिर्यत्र अच् समा०। कालवर्णमृत्तिकायुक्ते देशे हेम०

कृष्णभूमिज त्रि० कृष्णाया भूमेर्जायते जन–ड १कालवर्णमृत्तिकात उत्पन्ने २गोमूत्रिकातृणे स्त्री राजनि०

कृष्ण भेदा(दी) स्त्री कृष्णोवर्णेन भेद। खण्डोऽस्याः ङीप् कटुकायां (कट्की) वृक्षे राजनि० वा गौरा० ङीष्। तत्रार्थे अमर:

कृष्णमण्डल न० कर्म्म०। "नेत्रावयवभेदे। नेत्रायामत्रिभागात्तु कृष्णमण्डलमुच्यते। कृष्णात् सप्तमभागं तु दृष्टिं दृष्टिविशारदाः" सुश्रु०। भीमसेनादिवत् उत्तरपदलोपे कृष्णमप्यत्र तदभिप्रायेणैव कृष्णादिति सुश्रुतोक्तिः

कृष्णमल्लिका स्त्री कृष्णा कृष्णप्रिया मल्लिकेव। कृष्णार्ज्जके (कालतुलसी) वृक्षे राजनि०।

कृष्णमत्स्य पुंस्त्री नित्यकर्म्म० (कालवस) इति ख्याते मत्स्यभेदे "पाठीनपाटलाराजीवबर्म्मिगोमत्स्यकृष्णमत्स्य वागुञ्जारमुरल सहस्र दंष्ट्र प्रभृतयो नादेयाः"सुश्रुतः स्त्रियां ङीप्

कृष्णमुख त्रि० कृष्णं मुखमास्यमग्रं वा यस्य स्त्रियां वा ङीप् १कृष्णवर्ण मुखयुक्ते २काश्यपे च"स्तनयोः कृष्णमुखता रोमराज्युद्गमस्तथा" गर्भलक्षणे सुश्रुतः ३वानरभेदे पुंस्त्री० स्त्रियां जातित्वात् ङीष्। ४दानवभेदे "सहस्रपात् कृष्णमुखः कृष्णस्यैव महोदरः" हरिवं० २४०अ० दानवोक्तौ। कृष्णवदनादयोऽपि पूर्व्वोक्तार्थे त्रि०

कृष्णमुद्ग पु० नित्यकर्म्म०। मुद्गभेदे तद्भेदगुणादि भावप्र० उक्तं यथा

"मुद्गमसूरयोराध्मानाकारित्वमन्यवैदलापेक्षया न तु सर्वथा एतयोरपि किञ्चिदाध्मानकारित्वात् तत्र मुद्गस्य गुणाः मुद्गोरूक्षो लघुर्ग्राही कफपित्तहरो हिमः। स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा। मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा। श्वेतो रक्तश्च तेषान्तु पूर्वः पूर्वो लघुः स्मृतः। सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः। चरकादिभिरप्युक्त एष एव गुणाधिकः"।

माधवयासन्तुराष्ट्रजेति राजनि०तस्य पर्य्यायदर्शनात् वसन्तकाले चैत्रमासे सुराष्ट्रदेशेऽस्योत्पत्तिरवसेया ततोदेशादानीयान्यत्र देशेऽपि तस्योत्पादना एवमन्यत्र कालेऽपि।

कृष्णमूली स्त्री०कृष्णं मूलमस्याः ङीप्। शारिवाभेदे। राजनि

कृष्णमृग पुंस्त्री नित्यकर्म० । (कालसार) कृष्णसारमृगे "रुरून् कृष्णमृगांश्चैव मेध्यादन्यान् वनेचरान्" भा० व० ५४अ० । स्त्रियां जातित्वात् ङीष् कृष्णहरिणादयोऽप्यत्र पुंस्त्री०

कृष्णमृद् स्त्री० कर्म० । १कृष्णवर्णे मृत्तिकाभेदे २कृष्णभूमौ हेमच० । "कृष्णमृत् घृतदाहास्रप्रदरश्लेष्मपित्तनुत्" राजनि० कृष्णमृत्तिकाऽप्यत्र । ब० व० । २तद्युक्ते त्रि० हेमच०

कृष्णयजुर्वेद पु० तैत्तोरीयरूपयजुर्वेदभेदे । तस्य कृष्णत्वञ्च तस्य पाठे प्रतिपदायुक्तपूर्णिमायाम्प्राह्मत्वात् । यजुर्वेदस्य द्वौ भेदौ शुक्लकृष्णभेदात् तदवान्तरभेदाश्च चरणव्यूहभाष्ययो दर्शिताः यथा "यजुर्वेदस्य षडशीतिर्भेदा भवन्ति । तत्र चरका नाम द्वादशभेदा भवन्ति "चरका आह्वरकाः कठाः प्राच्यकठाः कपिष्ठलकठाश्चारायणीया वार्त्तान्तरीयाः श्वेताश्वतरा वाराहा औपमन्यवम्छागलेया मैत्रायणीयाश्चेति । मैत्रायणीयानाम सप्तभेदा भवन्ति मानवामैत्रायणीया दुन्दुभाश्चैकेया हारिद्रवेयाः श्यामाःश्यामायनीयाश्चेति । तेषामध्ययनमष्टशतं यजुःसहस्राण्यधीत्य शाखापारो भवति तान्येव द्विगुणान्यधीत्य पदपारो भवति तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति षडङ्गान्यधीत्य षडङ्गविद्भवति शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमित्यङ्गानि भवन्ति तत्र प्राच्य उदीच्यां, नैरृत्यां निरृत्यस्तत्र वाजसनेयानां पञ्चदश भेदा भवन्ति काण्वा माध्यन्दिनाः शावीयाः श्यामायनीयाः कापोलाः पौण्ड्रवत्सा आवटिकाः परमावटिकाः पाराशर्याः वैधेया वैनेया औधेया गालवा वैजपाः कात्यायनीयाश्चेति प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानि उपज्योतिषं साङ्गलक्षणं प्रतिशानुवाक्यः परिसंख्या चरणव्यूहः श्राद्धकल्पः प्रवराध्यायश्च शास्त्रक्रतुसंख्यानुगमयज्ञपार्श्वानि हौत्रिकम्प्रायश्चित्तानि कूर्मलक्षणम् इत्यष्टादश परिशिष्टानि भवन्ति । द्वे सहस्रे शते न्यूने मन्त्रे वाजसनेयके । इत्युक्तमेतत्सकलं स शुक्रियञ्च कीर्त्तितम् । ग्रन्थाश्च परिसंख्याता ब्राह्मणञ्च चतुर्गुणम् । तत्र तैत्तिरीयकानाम द्विभेदा भवन्ति । औखेयाः काण्डिकेयाश्चेति । काण्डिकेयानाम पञ्चभेदा भवन्ति । आपस्तम्बी बौधायनी सत्याषाढी हिरण्यकेशी औधेयी चेति तत्र कठानां तु प्रशायचतःचत्वारिंशदुपग्रन्थाः मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते । यजुर्वेदः स विज्ञेयोऽन्ये शाखान्तराः स्मृताः । तेषामध्ययनं प्रवचनीयाश्चेति" मू० । विवृतमेतद्भाष्ये यथा "यजुर्वेदस्य षडशीतिर्भेदा भवन्ति" अत्र शाखाभेदो ग्राह्यः । षडुत्तराशीतिभेदा इत्यर्थः । "तत्रचरका नाम द्वादशभेदा भवन्ति"इतिस्पष्टार्थः । ते के भेदा इत्याह चरका इत्यादि मैत्रायणीयानाम सप्तभेदा भवन्ति । मैत्रायणीया मानवा इत्यादि । मैत्रायणीयशाखागण इत्यर्थः । मैत्रायणीयस्तु वाजसनीयवेदाध्यायी । मानवं कल्पसूत्रम् । तेषामध्ययनमष्टोत्तरशतं यजुःसहस्राण्यधीत्य शाखापारो भवति तेषामध्ययने द्विचत्वारिंशदध्यायाः अष्टशताधिकसहस्रमन्त्रा इत्यर्थः । तान्येव द्विगुणान्यधीत्य पदपारोभवति द्विवारपठनात्पदपारायणफलं भवति इत्यर्थः । तान्येव त्रिगुणान्यधीत्य क्रमपारो भवति त्रिवारपठनात् क्रमपारायणफलं भवतीत्यर्थः । पदक्रमाध्ययनफलं भवतीत्यर्थः । तत्र प्राच्य उदीच्यां, नैरृत्यां निरृत्यस्तत्र वाजसनेयानां पञ्चदश भेदा भवन्ति प्राच्य उदीच्यनैरृत्य इति तिसृषु दिशासु । वाजसनेयवेदोत्पत्तिमध्ये कृष्णामः इतरदेशेषु वेदशाखयोर्विभाग उच्यते तच्च महार्णवे उक्तम् "पृथिव्यामध्यरेखायां नर्मदा परिकीर्त्तिता । दक्षिणोत्तरयोर्भागे शाखावेदश्च उच्यते । नर्मदादक्षिणे भागे आपस्तम्बाश्वलायनी । राणायनी पिप्पला च यज्ञकन्याविभागिनः । माध्यन्दिनी शाङ्खायनी कौथुमी शौनकी तथा नर्मदोत्तरभागे च यज्ञकन्याविभागिनः । तुङ्गकृष्णा तथा गोदा सह्याद्रिशिखरावधि । आआन्ध्रदेशपर्यन्तम् बह्वृचश्चाश्वलायनी । उत्तरे गुर्जरे देशे वेदो बह्वृच ईरितः । कौषीतकिब्राह्मणं च शाखा शाङ्खायनी स्थिता । आन्ध्रादिदक्षिणाग्नेय्यां गोदासागरकावधि । यजुर्वेदस्य तैत्तिर्यी आपस्तम्बी प्रतिष्ठिता । सह्याद्रिपर्वतादाराद्दिशाम् नैरृत्यसागरात् । हिरण्यकेशी शाखा च परशुरामस्य सन्निधौ । मयूरपर्वताच्चैव यावद्गुर्जरदेशतः । व्याप्ता वायव्यदेशान्तु मैत्रायणी प्रतिष्ठिता । अङ्गवङ्गकलिङ्गाश्च कानीनो गुर्जरस्तथा । वाजसनेयी शाखा च माध्यन्दिनी प्रतिष्ठिता । आपणा याज्ञवल्क्येन सर्वदेशेषु विस्तृता । वाजसनेयवेदस्य प्रथमा काण्वसंज्ञकाः" इति व्यासशिष्योवैशम्पायनोनिगदाख्ययजुर्वेदम्पठित्वा शिष्यान् चकार । तथाह भागवते१२।६अ० "वैशम्पायनशिष्या वै चरकाध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्यांहःक्षपणं स्वगुरोर्व्रतम् । याज्ञवल्क्यश्च तच्छिष्य आहाहोभगवन् ! कियत् । चरितेनाल्पसाराणां च-

रिष्ये ऽहं सुदुश्चरम्। इत्युक्तो गुरुरप्याह कुपितोयाह्यलं त्वया। विप्रावमन्ता शिष्येण मदधीतं त्यजत्विति। देवरातः सुतः सोऽपि छर्द्दित्वा यजुषांगणम्। ततोऽगतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्। यजूंषि तित्तिरीभूत्वा तल्लोलुपतयाऽऽददुः। तैत्तिरीया इति यजुःशाखा आसन् सुपेशलाः”। याज्ञवल्क्यः “ओँ नमो भगवते” इत्यादिना सूर्य्यं तुष्टाव। “एवमुक्तः स भगवान् वाजिरूपधरो हरिः। यजूंष्ययातयामानि मुनयेऽदात् प्रसादितः” (अजीर्णभुक्ते उच्छिष्टवान्ते यातयामशब्द इति निघण्टुः तदन्यत् अयातयामम्)“यजुर्भिरकरोच्छाखा दश पञ्च शतैर्विभुः। जगृहुर्वाजसन्यस्ताः काण्वा माध्यन्दिनादयः” इत्यादि ग्रन्थपर्य्यालोचनया यजुर्वेदत्यागानन्तरं देवरातः सुतेनाब्राह्मणत्वभिया प्रसादितः सूर्य्यो वाजिरूपेण तस्मै दत्ता वाजेभ्यः केसरेभ्यः वाजेन वेगेन वा संन्यस्ताः शाखा वाजसनेय संज्ञा। तस्य शाखारण्डत्वपरिहारार्थं चातुर्वेद्यत्वसंरक्षणार्थं च वाजिरूपेण सूर्य्येणायातयामानि यानि यजूंषि मुनये दत्तानि तैर्यजुर्भिरर्पितैः स मुनिस्ताः वाजसन्यः पञ्चदश शाखा अकरोत्। तस्माच्च मुनेः काण्वमाध्यन्दिनादयः अध्ययनं चक्रुः। ते पञ्चदश भवन्ति तथा च विष्णुपुराणे यजुर्वेदस्य विस्तारविभागमाह “यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने!। वैशम्पायननामासौ व्यासशिष्यश्चकार वै। शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेऽप्यनुक्रमात्। याज्ञवल्क्यस्तु तस्याभूद्ब्रह्मरातः सुतोद्विजः। शिष्यः परमधर्म्मज्ञो गुरुवृत्तिरतः सदा। ऋषिर्यश्च महामेरोःसमाजेष्वागमिष्यति। तस्य वै सप्त रात्रन्तु ब्रह्महत्या भविष्यति। पूर्वमेवं मुनिगणैः समयोऽयं कृतोद्विज!। वैशम्पायन एकस्तु तं व्यतिक्रान्तवांस्तदा। स्वस्रियं तं च हंसोऽथ पदहष्टमवातयत्। शिष्यानाह च भो शिष्या ब्रह्महत्यापरं व्रतम्। चरध्वं मत्कृते सर्वे न विचार्यमिदन्तथा। अथाह याज्ञवल्क्यस्तांङ्कमेतैर्बहुभिर्द्विजैः। क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम्। ततः क्रुद्धो गुरुः प्राह याज्ञवल्क्यं महामुनिम्। मुच्यतां यत् त्वयाऽधीतं यतो विप्रावमानकः। निस्तेजसोवदस्येतान् यस्त्वं ब्राह्मणपुङ्गवान्। तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा। याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम्। ममाप्यलन्त्वया त्वत्तोयदधीतं द्विज! त्विदम्। श्रीपराशर उवाच इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंष्यथ। छर्दयित्वा ददौ तस्मै ययौ च स्वेच्छया मुनिः। यजूंष्यथ विसृष्टानि याज्ञवल्क्येन वै द्विज!। जगृहुस्तित्तिरीभूतास्तित्तिर्यास्तु च ते ततः। ब्रह्महत्याव्रतं चीर्णं गुरुणा नोदितैस्तु यैः। चरकाध्वर्यवस्ते तु चरणान्मुनिसत्तम!। याज्ञवल्क्योऽपि मैत्रेय! प्राणायामपरायणः। तुष्टाव प्रयतः सूर्यं यजूंष्यभिलषं स्ततः। याज्ञवल्क्य उवाच। नमः सवित्रे द्वाराय मुक्तेरमिततेजसे। ऋग्यजुःसामरूपाय त्रयीधामात्मने नमः” इत्यादि। पराशर उवाच। इत्येवमादिभिस्तेन स्तूयमानः सवै रविः। वाजिरूपधरः प्राह प्रीयमाणोऽभिवाञ्छितम्। याज्ञवल्क्यस्तथा प्राह प्रणिपत्य दिवाकरम्। यजूंषि तानि मे देहि यानि सन्ति न मे गुरौ। पराशरउवाच। एवमुक्तो ददौ तस्मै यजूंषि भगवान् रविः। अयातयामसंज्ञानि यानि नो वेत्ति तद्गुरुः। यजूंषि यैरधीतानि तानि विप्रैर्द्विजोत्तम!। वाजिनस्ते समाख्याता सूर्य्याश्वोद्भव योगतः। शाखाभेदास्तु तेषां वै दश पञ्च च वाजिनाम्। काण्वाद्यास्तु महाभाग! याज्ञवल्क्यप्रवर्त्तिताः”

काण्वा माध्यन्दिनाः शावीया स्थापायनीया कापोलाः पौण्ड्रवत्साःआवटिकाःपरमावटिकाः पाराशर्या वैधेया वैनेया औधेया गालवा वैजपाः कात्यायनीयाश्चेति पञ्चदश शाखा, इत्यर्थः। प्रतिपदमनुपदम् प्रतिपदे अनुपदम् अल्पपदं कर्त्तव्यमित्यर्थः। छन्दः छन्दोरत्नाकरादि। भाषा शब्दपरिभाषा, धर्म्मः धर्मशास्त्रं मन्वादि, मीमांसा प्रसिद्धा न्यायः तर्कः इति षड्दाङ्गानि। उपज्योतिषं ज्योतिःशास्त्रम् साङ्गलक्षणं सामुद्रिकादि प्रतिज्ञानुवाक्यः अनेन वाक्येन अयं सिद्धान्तः। परिसंख्या भूगोलादि। अयं रणव्यूहः। श्राद्धकल्पः प्रवराध्यायश्च शास्त्रं क्रतुसंस्थाकल्पादिषु ज्ञातव्यम्। अनुगमयज्ञा यज्ञक्रियापार्श्वानि हौत्रिकभेदाः; हौत्रं यज्ञक्रियाः। पाशयोक्त्यानि पशुयज्ञाः कूर्मलक्षणं यज्ञे प्रसिद्धम्। इति अष्टादश परिशिष्टानि भवन्ति। द्वे सहस्रे शतन्यूने मन्त्रे वाजसनेयके इत्युक्तेः सकलं सशुक्रियं ग्रन्थाश्च परिसंख्यात मित्यर्थः। वाजसनेयवेदे च नवशताधिकसहस्रमन्त्रा इत्यर्थः। एतत्सकलं सशुक्रियं मध्याह्ने शुक्लवर्णेन सूर्येण दत्तं सशुक्रिय संज्ञं परिसंख्यातमित्यर्थः। वेदोपक्रमणे चतुर्दशीयुक्तपूर्णिमाग्रहणात् शुक्लयजुः प्रथितमित्यर्थः। प्रतिपदायुक्तपूर्णिमाग्रहणात् कृष्णयजुरिति च। ब्राह्मणश्च चतु-

र्गुणं ब्राह्मणमित्यर्थः,यजुर्वेदतरोरासन् शाखा ह्येकोत्तरं शतम्। तत्रापि च शिवाकारा दश पञ्च च वाजिनाम्। ‘तत्रापि प्रथमा मुख्या शाखेयं काण्वसंज्ञिका” इति ग्रन्थान्तरे। तैत्तिरीयानाम द्विभेदा भवन्ति औख्याः काण्डिकेयाश्चेति। काण्डिकेयानां पञ्च भेदा भवन्ति आपस्तम्बी बौधायनी सत्याषाढी हिरण्यकेशी औधेयी चेति तेषामध्ययनं परिमाणम्। “काण्डास्तु सप्त विज्ञेया प्रश्नाश्च चतुरुत्तराः। चत्वारिंशत्तु विज्ञेया अनुवाकाः शतानि षट्। एकपञ्चाशदधिका संख्या पञ्चाशग्र्योच्यते। द्विसहस्रमेकशतमष्टानवतिकाधिकम्। लक्षैकन्तु द्विनवतिः सहस्राणि प्रकीर्त्तितम्। पदानि नवतिश्चैव तथाक्षरन्तदुच्यते। लक्षद्वयं त्रिपञ्चाशत् सहस्राणि शताष्टकम्। अष्टषष्ट्यधिकं चैव यजुर्वेदप्रमाणकम्”। काण्डाः ७। प्रश्नाः १४४। अनुवाकाः ६५१। पञ्चाशी २१९८। पदानि १९२०९०। अक्षरसंख्या २५३८६८। इति शाखावाक्यान्ययुतानि सहस्राणि नवानि च। चतुःशतान्यशीतिश्च अष्टौ वाक्यानि गण्यते तत्र इति ब्राह्मणे वाक्यसंख्या १९४८०तैत्तिरीयनिगदवेदाख्यसंख्या उक्ता इत्यर्थः। तत्र कठानां तु प्रगायचतुश्चत्वारिंशदुपग्रन्थाः। मन्त्रब्राह्मणयोर्वेदस्त्रिगुणं यत्र पठ्यते। यजुर्वेदः स विज्ञेयो अन्ये शाखान्तराः स्मृताः” चतुश्चत्वारिंशदुपग्रन्थाः मन्त्रब्राह्मणयोर्वेदस्य अध्याय समीपे उक्ताः चतुश्चत्वारिंशत्। मन्त्रश्च ब्राह्मणं च मन्त्रब्राह्मणे तयोः मन्त्रब्राह्मणयोः तयोश्च वेद इति संज्ञा तदुक्तं “मन्त्रब्राह्मणयोर्वेद” इति नामधेयमित्यृक्शाखीयप्रातिशाख्याभाष्यकारेण, आपस्तम्बवाजान्यस्तम्भाष्यकारकपर्दिना धूर्त्तस्वामिना च। तथाच सति मन्त्रोनाम संहितामन्त्रस्ताडङ्मन्त्ररूपसंहितायाः मध्ये एव तद्रूपे ब्राह्मणत्वेन पठनमित्युभयथापि संहितात्वेन पदत्वेन क्रमत्वेन च पठनं त्रिगुणपठनमिति समन्त्रब्राह्मणयो र्वेदस्त्रिगुणो यत्र पठ्यते इत्यर्थः एतादृशं पठनं शाखाया अध्ययनं स यजुर्वेदस्तत्र तैत्तिरीयशाखायामेवास्ति” भाष्यम्। अदमत्र शाखाभेदसंख्यानिर्णयः। चरकादिकानां द्वादशानां प्रत्येकं मानवादि सप्तभेदैर्गुणितानां ८४संख्या सम्पद्यते तैत्तिरीयस्य द्वौ भेदौ एवं षडशीतिसंख्या वाजसनेयसंख्या पञ्चदशेति एकोत्तरशतसंख्या। अतएवमुक्तिकोपनिषदि “एकोत्तरशतं चैव यजुःशाखाः प्रकीर्त्तिताः” इत्युक्तम् दर्शितविष्णुपु० सप्तविंशतिभेदोक्तिः चरकादिद्वादशभेदाः काण्वादि पञ्चदशभेदाश्चेति मुख्यभेदाभिप्रायेणेति न विरोधः। कृष्णयजुर्वेदगतोपनिषदश्च उपनिषच्छब्दे दर्शिताः

कृष्णयाम पु० कृष्णोयामोवर्त्म यस्य। वह्नौ। “इयद्दनं कृष्णयामम्” ऋ० ६,६,१, “कृष्णयामं कृष्णवर्त्मानम्” भा०

कृष्णरक्त पु० वर्णोवर्णेनेति” पा० स०। १काललोहितवर्णे (वेगुनीरङ्) २तद्वति त्रि०। [राजनि०

कृष्णरुहा स्त्री कृष्णा सती रोहति रुह—क। जतुकायां

कृष्णरूप्य त्रि०कृष्णस्य भूतपूर्वःरूप्य। तदीदभूतपूर्वसम्बन्धिनि। कृष्णाया इत्यर्थे न पुंवत्। कृष्णारूप्य इति भेदः

कृष्णल पु०कृष्णोवर्णोऽस्त्यस्याः फले सिध्मा० लच्। गुञ्जावृक्षे शब्दचि०तत्रार्थे स्त्री अमरः२तत्फले न०। “द्वे कृष्णले पञ्चष्टते विज्ञेयोमध्यमोयवः” मनुः। “त्रियवं त्वेककृष्णलम्”। “स दण्ड्यः कृष्णलान्यष्टौ” मनुः। “जालसूर्य्यमरीचिस्थं त्रसरेणु रजः स्मृतम्। तेऽष्टौ लिक्षा, तु तास्तिस्रोराजसर्षप उच्यते। गौरस्तु ते त्रयः, षट् ते यवोमध्यस्तु, ते त्रयः। कृष्णलः,पञ्च ते माषः” इति याज्ञ०परिभाषिते ३परिमाणभेदे पुंस्वार्थे क। तत्रार्थे “पञ्चकृष्णलकोमाषः” मनुः अत्र पञ्च कृष्णलाः परिमाणमस्येति कन्। इति तु न्याय्यम्

कृष्णलवण न० नित्यकर्म्म०। सौवर्चललवणे (कालालोन) राजनि० काचलवणशब्दे १८५६पृ० विवृतिः।

कृष्णलोह नित्यक०। अयस्कान्ते लौहभेदे राजनि०।

कृष्णलोहित पु०कृष्णः सन् लोहितः“वर्णोवर्णेनेति”पा०स०। १रक्तकालमिश्रितवर्णे धूमले (वेगुनीरङ)। २तद्वति त्रि० अमरः।

कृष्णवक्त्र पुंस्त्री०कृष्णं वक्त्रमस्य। वानरे हलायुधः संयोगोपधत्वात् जातित्वेऽपि स्त्रियां टाप्। कृष्णवदनादयोऽप्यत्र

कृष्णवर्ण पु० कृष्णो वर्णोऽस्य। १राहौ ग्रहे। राहोः छायारूपत्वेन तमोरूपत्वात् तथात्वारोपात् तथात्वम् कृष्णः अशुद्धो वर्णः। २शूद्रे पु०। कर्म्म०। काले वर्णे पु० कृष्णवर्णवति त्रि०। “कृष्णवर्णं त्विषाऽकृष्णम्” भागव० ११स्क०।

कृष्णवर्त्मन् पु० कृष्णं वर्त्म धूमप्रसाररूपगतिस्थानमस्य। १वह्नौ, “हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते” मनु पातयामास विहगान् प्रदीप्ते कृष्णवर्त्मनि” भा० आ० २२६अ०। २चित्रकवृक्षे अमरः ३राहौ ग्रहे, मेदि०। कृष्णमपवित्रं वर्त्माचरणं यस्य। ४दुष्टकर्म्मकारके त्रि० अमरः कृष्णएव वर्त्म। ५वासुदेवरूपगतौ। “कृष्णवर्त्मनि गुणान गणयन्ती जीवनेषु लषयन्त्यनुरागम्। कामता

बत जरेव हिमानी सेव्यतां सुरतरङ्गिणी” उद्भटः। कृष्णवर्त्मन्यादयोऽपि वह्नौ। “पावकं कृष्णवर्त्मनिम्”कु० ८,२३,१८, चित्रकवृक्षे च

कृष्णबर्बर पु० नि०कर्म०। बर्बरभेदे (कालतुलसी) राजनि०।

कृष्णवल्लिका स्त्री कर्म०। जतुकालतायाम् राजनि०

कृष्णवल्ली स्त्री कर्म०। १कृष्णतुलस्याम्, २कर्कव्याञ्च शब्दच० ३शारिवाभेदे राजनि०। [नि०स्त्रियां जातित्वात् ङीष्

कृष्णवानर पुंस्त्री नित्यकर्म०। वानरभेदे गोलाङ्गूले राज-

कृष्णविषाणा स्त्री कृष्णस्य मृगस्य विषाणा विषाणयुक्ता। यजमानकण्डूयनसाधनद्रव्यभेदे। तत्स्वरूपादि कात्या० ७,२,उक्तं यथा “कृष्णविषाणां त्रिवलिं पञ्चवलिं वो-त्तानां दशायां बध्नीत”२८सू० “कृष्णस्य मृगस्य विषाण-युक्तां बध्नीत आत्मनेपदाद्यजमानः, कीदृशीं त्रिवलिं प-न्थित्रययुक्तां पञ्चवलिं पञ्चपर्व्वयुक्तां वा। सा च प्रादे-शमात्री परिशिष्ट उक्ता तस्मादक्षिणावर्त्तेन बन्धनमा-म्नातव्यान्तरत्वेन “त्रिवलिः पञ्चवलिर्वा दक्षिणाद्दृश्यति सव्याद्दलित्येक इति”कर्कः। “तया कण्डूयनम्” सू०३० “दीक्षितेन कर्त्तव्यम्” कर्कः। कृष्णोमृगः विषाणं योनिर्यस्य। दीक्षितभार्य्यो मृगचर्म्मभेदे स्त्री। यज्ञो हि कृष्णः (कृष्णमृगः) स यज्ञस्तत्कृष्णाजिनं या सा योनिः सा कृष्णविषाणा” शत० ब्रा० ३,२,१,२८,

कृष्णवीज पु० कृष्णं वीजमस्य। १रक्तशिग्रौ, जटाधरः २कालिङ्गे वृक्षे न० राजनि०।

कृष्णवृन्ता स्त्री कृष्णं वृन्तमस्याः १पाटलावृक्षे मेदि० २माष-पर्ण्याम् अमरः। संज्ञायां कन् कापि अत इत्वम्। कृष्णवृन्तिका गाम्भार्य्याम्। रत्नमा०

कृष्णवेणा स्त्री भारतप्रसिद्धे नदीभेदरूपे तीर्थभेदे। “ततो-देवहृदेऽरण्ये कृष्णवेणाजलोद्भवे। जातिस्मरहृदे स्नात्वा भवेज्जातिस्मरोनरः” भा० व० ८५अ०। “मुनेर्गां कृष्ण-वेणाञ्च दैरामाञ्च महारवाम्” भा० व० १८८ अ०। कृष्णवेण्याप्यत्र “गोदावरी कृष्णवेण्या कावेरी च सरि-द्वरा” भा० स० ६अ०

कृष्णव्रीहि पु० नित्यकर्म०। (केलेधान) व्रीहिभेदे। कृष्णव्रीहिशालामुख्येत्यादिना व्रीहीन् विभज्य सुश्रुते तद्गुणा उक्ता यथा “कृष्णव्रीहिर्वरस्तेषां कषाया-नुरसो लघुः”। “नैर्ऋतः परिहृत्य कृष्णव्रीहीणां नखनिर्भिन्नानाम्” कात्या० १५,३,१४,

कृष्णश न० कृष्णदश+पृषो०। स्वयमकृष्णे कृष्णदशायुक्ते वा-ससि। “वासः कृष्णशं कद्रु” “अकृष्णं कृष्णदशं या तदाख्यम्” कात्या०२२, ४,१२,१३,। “स्वयमकृष्णं सत् कृष्णदशं वासः तदाख्यं कृष्णशमित्यर्थः” सं० व्या०

कृष्णशकुनि पुंस्त्री नित्यकर्म०। काके। “स्त्रीशूद्रशवकृ-ष्णशकुनिशुनकादर्शनम्” पार० सू०।

कृष्णशा(सा)र पुंस्त्री कृष्णश्चासौ शारः (सारः) शबलश्च “वर्णो वर्णेनेति पा०ध०। (कालसार)मृगभेदे रमानाथः “कृष्ण(शा)सारस्तु चरति मृगोयत्र स्वभावतः” मनुः। “कृष्ण(शा)सारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके” शकु०। स्त्रियां ङीष्

कृष्णशालि पु० कर्म०। (केलेधान) धान्यभेदे। राजनि०। “कृष्णशालिस्त्रिदोषघ्नोमधुरो दृष्टिकृद्वितः। पुष्टिवीर्य्य-वर्द्धनश्च वर्णकान्तिबलप्रदः” राजनि०

कृष्णशिग्रु पु०कर्म०। कृष्णशोभाञ्जने(कालसजना)। राजनि०

कृष्णशिम्बिका स्त्री० कर्म०। काकाण्ड्याम्। (कालशिम्) रत्नमा० [स्त्रियां स्वाङ्गत्वात् ङीष्।

कृष्णशृङ्ग पुंस्त्री० कृष्णं शृङ्गमस्य। १महिषे हेमच०।

कृष्णसख पु० कृष्णस्य सखा टच् समा०। १अर्ज्जुने तन्नामके २अर्ज्जुनवृक्षे च शब्दचि०। वासुदेवतुल्यवयस्त्वात् ३कालजीरके स्त्री शब्दच०

कृष्णसमुद्भवा स्त्री कृष्णा सती समुद्भवति सम्+भू—अच्। कृष्णगङ्गायाम्। कृष्णःसमुद्भवोयस्य कृष्णपुत्रे २कामदेवादौ

कृष्णसर्प पुंस्त्री० नित्यक०। सुश्रुतोक्ते कृष्णरूपे कालरूपे (केउटा) सर्पभेदे अहिशब्दे विवृतिः“आशीविषैः कृष्ण-सर्पैः सुप्तं चैनमदंशयत्” भा० आ० ६१अ० स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। २ओषधिभेदे स्त्री “वसन्ते कृष्णसर्पाख्या गोनसी प्राप्यते क्वचित्” सुश्रु०

कृष्णसर्षप पुंस्त्री० नित्यकर्म०। कालसर्षपे (राइसरिषा) राजनि०।

कृष्णसार पु०कृष्णशारवत् विग्रहादि। १मृगभेदे“एणः कृष्णः प्रकीर्त्तितः इति” भावप्र० मृगभेदानभिधाय “जाङ्गलाः प्रायशः सर्व्वे पित्तश्लेष्मकराः स्मृताः। किञ्चिद्वातकरा श्चापि लघवोवलवर्द्धनाः” इति तन्मांसगुणाद्युक्ता “एणः कृष्णमृगः स्मृतः” छन्दो०प०। स्त्रियां ङीष्। कृष्णःसा-रोऽस्य। २स्नुहीवृक्षे ३शिंशपावृक्षे च मेदि०। ४खदिरवृक्षे शब्दरत्ना०। शिंशपावृक्षे स्त्री शब्दचि०

कृष्णसारङ्ग पु० कर्म०। मृगभेदे “कृष्णसारङ्ग सैध्यमभावे लोहितसारङ्गम्” कात्या० श्रौ० ७।६।२१। “कृष्णःश्यामः

सारङ्गः सारङ्गवर्णानुविद्धः" कर्कः "कृष्णसारङ्गः स्यादितप्राङ्ग्यदि कृष्णसारङ्गं न विन्देत अथो अपि लोहितसारङ्गम्" शत० ब्रा० ३।३।४।१२ "कृष्णसारङ्गः ग्राम्यबलः" भा०

कृष्णसारथि पु० कृष्णः सारथिरस्य । १अर्जुने मध्यमपाण्डवे यथा च तस्य तत्सारथित्वं तथा भा०उ०६अ०वर्णितं यथा "अर्ज्जुन उवाच । भवान् समर्थस्तान् सर्व्वान्निहन्तुं नात्र संशयः । निहन्तुमहमप्येकः समर्थः पुरुषर्षभ ! । भवांस्तु कीर्त्तिमाँल्लोके तद्यशस्त्वां गमिष्यति । यशसा चाहमप्यर्थी तस्मादसि मया वृतः । सारथ्यन्तु त्वया कार्य्यमिति मे मानसं सदा । चिररात्रेप्सितं कामं तद्भवान् कर्त्तुमर्हति । वासुदेव उवाच । उपपन्नमिदं पार्थ ! यत् स्पर्द्धसि मया सह । सारथ्यं ते करिष्यामि कामः सम्पद्यतां तव"। तन्नामके२अर्ज्जुनवृक्षे च राजनि०

कृष्णसुन्दर त्रि०कृष्णवर्णोऽपि सुन्दरः। श्रीकृष्णे । तस्यापत्यम् इञ् । कार्ष्णसुन्दरि तदपत्ये पुंस्त्री० स्त्रियां ङीप् बहुत्वे तु तिककितवादित्वात् द्वन्द्वे अद्वन्द्वे च इञो लुक्।

कृष्णस्कन्ध पु० कृष्णः स्कन्धोऽस्य । तमालवृक्षे भरतः

कृष्णागुरु न० कर्म० । कालागुरुणि, "कृष्णं गुणाधिकं तत्तु लोहवत् वारि मज्जति" इत्युक्तलक्षणे गन्धद्रव्यभेदे राजनि० "विलिप्य कृष्णागुरुणा वाजपेयफलं लभेत्" आ०त० भवि० पु० "चन्दनाच्चागुरौ ज्ञेयं पुण्यमष्टगुणं नृप!। कृष्णागुरौ विशेषेण द्विगुणं फलमादिशेत्" तत्रैव शिवपूजाधिकारे भविष्यपुराणम्

कृष्णाचल पु० कृष्णप्रियः अचलः शा० त० । १रैवतकपर्व्वते जटाधरः। तस्य द्वारकासन्निकृष्टत्वेन तदीयाक्रीडपर्व्वतत्वात् तत्प्रियतरत्वं तच्च माघे४सर्गे वर्णितम् । कर्म० । २नीलपर्व्वते ।

कृष्णाजिन न० ६त० । कृष्णसारमृगस्य चर्म्मणि एणेये "कृष्णाजिनं चोलूखलमूषले" शत० ब्रा० १,१,१,२२, "कृष्णाजिनोत्तरीयाश्च" भा० आनु० १४अ०

कृष्णाञ्जनी स्त्री अज्यतेऽनया अन्ज–करणे ल्युट् ङीप् कर्म० । कालाञ्जनीवृक्षे राजनि० ।

कृष्णाद्यतैल न० चक्रदत्तोक्ते तैलभेदे "कृष्णाविडङ्गमधुयष्टिकसिन्धुजन्मविश्वौषधैः पयसि सिद्धमिदं द्रुगल्याः । तैलं नृणां तिमिरशुक्रशिरोऽक्षिशूलपाकातपश्चान् जयति नस्यविधौ प्रयुक्तम्" । [जनि०

कृष्णानदी स्त्री कर्म०बा० न०पुंवद्भावः । कृष्णगङ्गायां रा-

कृष्णाध्वन् पु० कृष्णः अध्वा यस्य । कृष्णवर्त्मनि वह्नौ । "कृष्णाध्वा तपूरप्स्वयश्चिकेत" ऋ० २.४.६, [विद्वङ्गदे ।

कृष्णानन्द पु० तन्त्रसारनामकतन्त्रनिबन्धकारके तान्त्रिके

कृष्णाभा स्त्री कृष्णा सती आभाति आ+भा–क। कालाञ्जनीवृक्षे राजनि०। [नञ्+मिष–क । कालायसे हेम०।

कृष्णामिष न० कृष्णं वासुदेवमामिषति स्पर्द्धते वर्णे-

कृष्णायस न० कर्म० जातौ अच् समा०। लौहभेदे रत्नमा०

कृष्णार्चिस् पु० कृष्णः कालवर्णोऽर्च्चिर्धूमो यस्य । कृष्णताकारकशिखे वह्नौ ।

कृष्णार्जक पु० कर्म० । विषघ्ने (कालतुलसी) वनवर्वरे । "कृष्णार्जकः कटूष्णश्च कफवातामयापहः । नेत्ररोगविनाशी च रुच्यः सुप्रसवे हितः" राजनि०

कृष्णालु पु० कर्म० । कालालौ आलुभेदे राजनि०

कृष्णावास पु० आवसत्यस्मिन् आ+वस–आधारे घञ् ६त० । अश्वत्थवृक्षे । तस्य तदावासत्वमश्वत्थशब्दे ५०६पृ० उक्तम्

कृष्णाष्टमी स्त्री कृष्णा अष्टमी । १कृष्णपक्षाष्टम्याम् कृष्णस्य वासुदेवस्य जन्मदिनमष्टमी । गौणभाद्रपदमासीयकृष्णपक्षस्याष्टम्यां जन्माष्टम्याम् तस्याश्च "अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे । अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः" ब्रह्मपु० तज्जन्मदिनत्वोक्तेस्तयात्वम् तत्र कर्त्तव्यव्रतकालनिर्णयः कालमा० दर्शितो यथा "अथ जन्माष्टमी विचार्य्यते । सा किं पक्षभेदेन निर्णेतव्या उत व्रतविशेषेणाहोस्विद्योगविशेषेणेति ; अत्रैवेदमपरं चिन्त्यते किं जन्माष्टमीव्रतमेव जयन्तीव्रतमुत तयोर्भेद इति । तथान्यदपि चिन्तनीयं किं तिथ्यन्तरवदत्राह्वेधः उत मध्यरात्रवेध इति । प्रथमं व्रतस्वरूपे निश्चिते पश्चादस्मिन् व्रते कीदृशी तिथिरित्याकाङ्क्षोदेति । तिथौ च पूर्वविद्धत्वेन परविद्धत्वेन वा निश्चितायां पश्चात्कीदृशो वेध इत्याकाङ्क्षा । तस्मादादौ व्रतं निर्णीयते । तत्र जन्माष्टमीजयन्तीशब्दाभ्यां व्यवह्रियमाणं व्रतमेकमेवेतितावत् प्राप्तम् । कुतः ? रूपभेदाभावात् । यथा यागस्य द्रव्यदेवते रूपं यथा चोपासनस्य गुणविशेषैर्युक्ता देवता यथा च तत्त्वविद्यायां वेद्यन्तत्त्वं रूपम् । तथा व्रते नियमविशेषोरूपम् नियमश्चात्रोपवासो जागरणं कृष्णपूजा चन्द्रार्घदानमित्यादिलक्षणः । स चोभयत्र न भिद्यते । अथोच्येत रूपाभेदेऽपि नित्यकाम्यत्वाभ्यां भेदो भविष्यति नित्या जन्माष्टमी अकरणे प्रत्यवायश्रवणात् । तथा च स्मर्यते "दृश्यमासं खगं काकं यत्नेन च मुनिसत्तम ! ।

मांसं वा द्विपदां भुङ्क्ते भुक्त्वा जन्माष्टमी दिने । जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम ! । त्रैलोक्यसम्भवं पापं तेन भुक्तं द्विजोत्तमेति”। भविष्यत्पुराणे “श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् । न करोति नरो यस्तु भवति ब्रह्मराक्षसः। कृष्णजन्माष्टमीं त्यक्त्वा योऽन्यद्व्रतमुपासते। नाप्नोति सुकृतं किञ्चिदिष्टापूर्त्तमथापि वा । वर्षे वर्षे तु या नारी कृष्णजन्माष्टमीव्रतम् । न करोति महाप्राज्ञ ! व्याली भवति कानने”इति । स्कन्दपुराणेऽपि “ये न कुर्वन्ति जानन्तः कृष्णजन्माष्टमीव्रतम् । ते भवन्ति नराः प्राज्ञ ! व्याला व्याघ्राश्च कानने ! रटन्तीह पुराणानि भूयोभूयो महामुने ! । अतीतानागतन्तेन कुलमेकोत्तरं शतम् । पातितं नरके घोरे भुञ्जता कृष्णवासरे” इति । जयन्ती च काम्या फलविशेषश्रवणात् विष्णुधर्मोत्तरे हि जयन्तीं प्रकृत्य पठ्यते“यद्बाल्ये यच्च कौमारे यौवने वार्धके तथा। बहुजन्मकृतं पापं हन्ति सोपोषिता तिथिरिति” । वह्निपुराणेऽपि“सप्तजन्मकृतं पापं राजन्! यत्त्रिविधं नृणाम् । तत् क्षपयति गोविन्दस्तिथौ तस्यां समर्चितः । उपवासश्च तत्रोक्तो महापापप्रणाशनः । जयन्त्यां जगतीपाल ! विधिना नात्र संशयः” इति । पद्मपुराणेऽपि “प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः । यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता । किं पुनर्बुधवारेण सोमेनापि विशेषतः”इति । स्कन्दपुराणेऽपि “महाजयार्थं कुरुतां जयन्ती मुक्तयेऽनघ! । धर्ममर्थं च कामञ्च मोक्षञ्च मुनिपुङ्गव ! । ददाति वाञ्छितानर्थानन्यर्थानतिदुर्लभानिति”। भविष्योत्तरे जयन्तीकल्पे “प्रतिवर्षं विधानेन मद्भक्तो धर्मनन्दन ! नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् : पुत्रं सौभाग्यमारोग्यं सन्तोषमतुलं लभेत् । इह धर्मरतिर्भूत्वा मृतो वैकुण्ठमाप्नुयादिति” । एवं जन्माष्टम्या अकरणे प्रत्यवायाज्जयन्त्याः फलविशेषाच्चो भयोःक्रमेण नित्यत्वं काम्यत्वञ्चाभ्युपगन्तव्यमिति नैवं गुण फलाधिकत्वाभ्युपमेऽपि जयन्त्याः फलविशेषोपपत्तेः गोदोहनंदध्यादि तत्र दृष्टान्तः यथा “चमसेनापः प्रणयेद्गोदोहनेन पशुकामस्येति” नित्ययोर्दर्शपौर्णमासयोरपां प्रणयनं विधाय तदेवाश्रित्य पशुफलाय गोदोहन मात्रं विहितम् । “दध्नेन्द्रियकामस्य” इत्यत्र च पूर्वप्रकृते नित्याग्निहोत्रे फलाय गुणो विधीयते । अत्रादिपदात् “खादिरं वीर्यकामस्य”इत्युदाहार्यम् । एवं नित्यां जन्माष्टमीमाश्रित्य फलविशेषाय जयन्तीनामकोरोहिणीयोगो विधीयताम् । न च रोहिणीलक्षणस्य कालविशेषस्यानुपादेयत्वादविधेयत्वं शङ्कनीयम् । कालविशेषस्य स्वरूपेण पुरुषैरनुपादेयत्वेऽपि अनुष्ठानाङ्गत्वं शास्त्रेणावगतस्यानुष्ठानाय तत्प्रतीक्षायाः कर्त्तुं शक्यत्वात् । अन्यथा “वसन्ते वसन्ते ज्योतिषा यजेत” इत्यादिः सर्वोऽपि कालविधिर्लुप्येत। रोहिणीयोगस्य च जयन्तीनामकत्वं जयन्तीलक्षणप्रदिपादकैः स्मृतिवाक्यैरध्यवसेयम्। तानि च वाक्यान्युदाहरामः“विष्णुधर्मे“रोहिणी च यदा कृष्णपक्षेऽष्टम्यां द्विजोत्तम! । जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति” सनत्कुमारसंहितायाम् “शृणुष्वावहितो राजन्! कथ्यमानं मयानघ ! । श्रावणस्य च मासस्य कृष्णाष्टम्यां नराधिप !। रोहिणी यदि लभ्येत जयन्ती नाम सा तिथिरिति” स्कान्दे “प्राजपत्येन संयुक्ता अष्टमी तु यदा भवेत्। श्रावणे बहुले सा तु सर्वपापप्रणाशिनी । जयं पुण्यं च कुरुते जयां पुण्यां च तां विदुरिति” । विष्णुरहस्ये “अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता। भवेत् प्रोष्ठपदे मासि जयन्ती नाम सा स्मृता” पौर्णमास्यन्तेषु मासेषु स्वीकृतेषु श्रावण्यां पूर्णिमायां श्रावणमासस्य समाप्तत्वात् उपरितनीं प्रतिपदमारभ्य भाद्रपदमास इत्यभिप्रेत्य प्रोष्ठपद इत्युक्तम् । विष्णुधर्मोत्तरे “प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी । सोपवासो हरेः कृत्वा तत्र पूजां न सीदतीति” । वशिष्ठसंहितायाम् “श्रावणे वा नभस्ये वा रोहिणीसहिताऽष्टमी। यदा कृष्णा नरैर्लब्धा सा जयन्तीति कीर्त्तिता । “श्रावणे न भवेद्योगो नभस्ये तु भवेद्ध्रुवम्। तयोरभावे योगस्य तस्मिन्वर्षे न सम्भवः”इति। अत्र श्रावण इति मुख्यः कल्पः। नभस्य इत्यनुकल्पः। यदि वा श्रावणे यदि वा नभस्ये, सर्वथाऽपि रोहिणीकृष्णाष्टमीयोगो जयन्तीत्येतदविवादम् । पुराणान्तरे “रोहिणी च यदा पक्षे कृष्णेऽष्टम्यां द्विजोत्तम ! । जयन्ती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति” । तदेवमेतैः स्मृतिवाक्यैर्जयन्त्याः कृष्णाष्टमीरोहिणीयोगस्वरूपे सति पूर्वोदाहृतफलकामिनस्तादृशो योगो गोदोहन दध्यादिवद्गुणत्वेन विधीयते । काम्ये तु ज्योतिष्टोमे गुणविशेषो न कोऽपि फलाय विहितः । अतः काम्य ज्योतिष्टोमवैषम्याद्गोदोहनदध्यादिसाम्याच्च पूर्वोदाहृत फलवाक्यानि प्रकृते नित्ये जन्माष्टमीव्रते गुणफलप्रतिपादकत्वेनोपपद्यन्ते । तथा सति यथा दर्शपौर्णमासाभ्या

न्यः कश्चित्पृथुफलको गोदोहनसंज्ञको यागोनास्ति किन्तु गुण एव केवलं गोदोहनम्। तथा न जन्माष्टमीव्रतादन्यज्जयन्तीव्रतं किन्तु प्रकृत एव व्रतेऽयं फलाय गुणविधिरित्येवं प्राप्ते ब्रूमः। अतद्द्वयमिदं भवितुमर्हति कुतः? नामभेदात्१ निमित्तभेदात्२ रूपभेदात्३ शुद्धमिश्रितत्वभेदात्४ निर्द्देशभेदाच्च५ तथाहि पूर्वोदाहृतेष्वकरणे प्रत्यवायप्रतिपादकस्मृतिवाक्येषु जन्माष्टमीव्रतमित्येव नाम व्यवहृतम्। तथा पूर्वोदाहृतेषु जयन्तीव्रतमिति नाम व्यवहारः। नामभेदाच्च कर्म्मभेदोज्योतिरधिकरणे व्यवस्थितः। तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः। "अथैष ज्योतिरित्यत्र गुणो वा कर्म्म वा पृथक्। गुणः सहस्र दानात्मा ज्योतिष्टोमे ह्यनूदिते। अथेति प्रकृते च्छिन्न एतच्छब्दोऽप्यगं वदेत्। संख्ययेवान्यकर्म्म त्वसदुत्पत्तिगतसंख्ययेति"। अयमर्थः "अथैष ज्योतिरथैष विश्वज्योति रथैष सर्वज्योति रेतेन सहस्रदक्षिणेन यजेतेति" श्रुतम्। तत्र संशयः। किं प्रकृत एव ज्योतिष्टोमे सहस्र दक्षिणागुणविधिः उत यागान्तरविधिरिति। एष ज्योतिरेतेनेत्येताभ्यां एतच्छब्दाभ्यां प्रकृतं ज्योतिष्टोममनूद्य तत्र गुणविधिरिति पूर्व्वः पक्षः। अर्थान्तरद्योतकेनाथशब्देन प्रकृतस्य ज्योतिष्टोमस्य विच्छेदः क्रियते। एतच्छब्दश्च प्रत्यासन्नं ब्रूते प्रत्यासत्तिश्च द्विविधा अतीता आगामिनी चेति। तत्रातीतायाः प्रत्यासत्तेर्विच्छेदे सति आगामिप्रत्यासत्तिपरत्वेनैतच्छब्दावुपपद्येते। तथाप्येककर्म्मत्वं मा भूत् कर्म्मभेदे तु किं प्रमाणमिति चेत्। अपूर्व्वसंज्ञेति वदामः। एष ज्योतिरित्यस्मिन्नुत्पत्तिवाक्ये पूर्व्वप्रकृतकर्म्मविषयाया ज्योतिष्टोमसंज्ञाया अन्या ज्योतिरित्येषा संज्ञा श्रूयते। तत्र यथा पूर्व्वाधिकरणे "सप्तदश प्राजापत्यान् पशूनालभेत" इत्यत्रोत्पत्तिवाक्यगतया संख्यया कर्म्मभेदो निरूपितः तथात्राप्युत्पत्तिगतया नूतनसंज्ञया कर्म्मभेदोऽभ्युपगन्तव्य इति एवं च सति प्रकृतेऽप्यनेन न्यायेनोत्पत्तिवाक्यगताभ्यां जन्माष्टमीव्रत जयन्तीव्रतसंज्ञाभ्यां व्रतभेदोऽभ्युपगन्तव्यः ॥१॥

तथा निमित्तभेदादपि व्रतभेदः। जन्माष्टमीव्रते तिथिरेव निमित्तं जयन्तीव्रते तु रोहिणीयोगः। ननु जन्माष्टमीत्यत्रापि व्यवहारे योग एव विवक्षितव्य नक्षत्र युक्तायामेव तिथौ देवकीनन्दनस्योत्पत्तेः, नैवम् तज्जन्मन्यष्टम्या एव प्रधानप्रयोजकत्वात् रोहिणी तद्योगयोर्विधीमानयोरपि बुधवारादिवदुपलक्षणत्वात्। अतएव शास्त्रेषु जन्माष्टमीत्येव समाख्यायते। अन्यथा जन्मरोहिणीति जन्मयोग इति वा समाख्यायेत कश्चित्सद्भावमात्रेण प्रयोजकत्वे बुधवारोऽपि प्रयोजकः स्यात्। अस्त्विति चेत् अतिप्रसङ्गात्। तज्जन्मकाले द्वापरावसानस्य संवत्सरविशेषस्य च सद्भावेन तयोरपि प्रयोजकत्वं केन वार्य्येत। तस्माज्जन्मन्यष्टम्या एव प्राधान्यम्। तत्प्राधान्ये च श्रुतिलिङ्गादिषु षट्सु समाख्यारूपं षष्ठं प्रमाणमुपन्यस्तं वेदितव्यम्। तथा प्रत्यक्षादिषु सम्भवैतिह्यान्तेष्वष्टसु प्रमाणेष्वैतिह्यरूपमागम रूपं वा प्रमाणमुक्तं भवति। ननु निरर्थकोऽयं पक्षवादलक्षणः कोलाहलः। यद्येकं व्रतं यदि नाम व्रतद्वयं तथाप्यनुष्ठाने कोविशेषः स्यात्। अस्त्येव महानतिशयः। यस्मिन् संवत्सरे श्रावणबहुलाष्टमीं परित्यज्यान्यस्मिन्नवस्यादौ रोहिणी भवति तस्मिन् संवत्सरे जयन्तीस्वरूपमेव नास्ति अतो जयन्तीव्रतस्य तत्र लुप्तत्वात्तस्यैव जन्माष्टमीव्रतत्वे तदपि न प्राप्नुयात्। भेदपक्षे त्वसत्यामपि जयन्त्यां जन्माष्टमीव्रतं तत्र प्रवर्त्तते इत्ययमनुष्ठानेऽतिशयः। भवत्वेवन्तथापि नोपन्यस्तो निमित्तभेदो व्रतभेदमावहति। कर्म्मभेदहेतुषु शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयेषु षट्सु प्रमाणेषु निमित्तस्यानन्तर्भावादिति चेत्, नैवम् तथाहि पूर्व्वोक्तसंज्ञा भेद सम्पादितं व्रतभेदं निमित्तभेद उपोद्वलयति। तस्मादत्र निमित्तभेदाद्व्रतभेदः२

"तथा रूपभेदादपि व्रतभेदोऽवगन्तव्यः। रूपभेदस्य कर्म्मभेदहेतुत्वमामिक्षाधिकरणे निरूपितम् तस्य चाधिकरणस्य संग्राहकावेतौ श्लोकौ भवतः"गुणः कर्म्मान्तरं वा स्याद्वाजिभ्यो वाजिनन्त्विति। गुणोदेयानन्द्योक्तः समुच्चयविकल्पने। आमिक्षोत्पत्तिशिष्टत्वात् प्रबला, तत्र वाजिनम्। गुणोऽप्रविश्य कर्म्मान्यत् कल्पयद्वाजिदेवकमिति"। "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति"श्रुतम्। अत्र दधिसम्बन्धात् क्षीरनीरयोर्विभेदे सति योघनीभूतः क्षीरभागः साऽऽमिक्षा तस्याश्च विश्वे देवा देवताः तत्र यत्पृथग्भूतं नीरं तद्वाजिनम् तस्य च वाजिनो देवताः। तत्रामिक्षाद्रव्यकं विश्वदेवदेवताकमेकं कर्म्म, तथा सति किमुपरितनेन वाजिभ्यो वाजिनमित्यनेन वाक्येन, पूर्व्वस्मिन्नेव कर्म्मणि वाजिनं गुणोविधीयते उत कर्म्मान्तरमिति संशयः। तत्र वाजो-

ऽयमामिक्षा सा येषां देवानामस्ति ते वाजिन इति व्युत्पत्त्या प्रकृतान् देवाननूद्य वाजिनङ्गुणो विधीयते स चामिक्षया सह विकल्प्यते समुच्चीयते वेति पूर्व्वःपक्षः । उत्पत्तिशिष्टामिक्षागुणावरुद्धस्य कर्म्मणो गुणान्तराकाङ्क्षाऽभावाद्वाजिनस्य तत्र प्रवेशासम्भवे सत्यन्यथानुपपन्नो वाजिनगुणो वाजिशब्दार्थस्य प्रकृतदेवताव्यतिरिक्त देवतात्वं कल्पयित्वा कर्म्मभेदे पर्य्यवस्यतीति सिद्धान्तः । अत्र यथा द्रव्यदेवतालक्षणस्य यागरूपस्य भिन्नत्वात् कर्म्मभेदस्तथा प्रकृतेऽपि रूपभेदोऽभ्युपगम्यताम् । उपवासमात्रं जन्माष्टमीव्रतस्वरूपं तदुत्पत्तिवाक्ये तन्मात्रस्य प्रतीयमानत्वात् । ननु जयन्तीव्रतएवोपवासं कुर्य्यादित्युत्पत्तिवाक्यं स्मर्य्यते न तु जन्माष्टमीव्रते, बाढम् । तथा अत्र विधिरुन्नेतव्यः अन्नभोजने प्रत्यवायस्मरणानुपपत्तेः । स चोन्नीयमानो विधिरुपवासमात्रं विधत्ते न तु मण्डपनिर्म्माणजागरणप्रतिमादानादिकं, विधेरुन्नयने हेतुप्रकरणे प्रत्यवायबोधकवाक्येषु भोजननिषेधमात्रस्मरणात् । न हि तत्र निद्रायां दानाभावे वा प्रत्यवायः स्मर्य्यते । अत उपवासमात्रं तस्य स्वरूपं न तु दानादिकम् । अतएवाकरणे प्रत्यवायवाक्यशेषे जयन्तीप्रयुक्तदानादिशङ्काव्यावृत्तये केवलशब्दउपवासविशेषणत्वेन पठ्यते "केवलेनोपवासेन तस्मिन्जन्मदिने मम । शतजन्मकृतात् पापान्मुच्यते नात्र संशयः" इति । तस्माज्जन्माष्टमीव्रतस्योपवासमात्रं स्वरूपं, यदि शिष्टास्तत्र जागरणदानादिकमनुतिष्ठन्त्यनुतिष्ठन्तु नामाविरुद्धैः पुराणविशेषैर्व्रतस्योपोद्वलनसम्भवात् । शास्त्रेण तु प्रापितमुपवासमात्रम् । जयन्तीव्रतस्य तु दानादिसहित उपवासः स्वरूपं तद्विधायकेषु शास्त्रेषु तथा विधानात् । तथा च वह्निपुराणे "तदर्थं देवकीसूनोर्ज्जयन्तीसम्भवं व्रतम् । कर्त्तव्यं विधिनानेन भक्त्या भक्तजनैरपीति" । भविष्योत्तरेऽपि "मासि भाद्रपदेऽष्टम्यां निशीथे कृष्णपक्षगे । शशाङ्के वृषराशिस्थे ऋक्षे रोहिणीसंज्ञके । योगेऽस्मिन् वसुदेवाद्धि देवकी मामजीजनत् । तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः । ब्राह्मणान् भोजयेद्भक्त्या ततोदद्याच्च दक्षिणाम् । हिरण्यं मेदिनीं गाश्च वासांसि कुसुमानि च । यद्यदिष्टतमन्तत्तत् कृष्णो मे प्रीयतामिति" । भविष्य द्विष्णुधर्म्मोत्तरयोः "जयन्त्यामुपवासश्च महापातकनाशनः । सर्व्वैः कार्य्यो महाभक्त्या पूजनीयश्च केशवः" इति । वह्निपुराणे "कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि । जयन्ती नाम सा प्रोक्ताउपोष्या सा प्रयत्नतः" इति । स्मृत्यन्तरेऽपि "प्राजापत्यर्क्षसंयुक्ता श्रावणस्यासिताष्टमी । वर्षे वर्षे तु कर्त्तव्या तुष्ट्यर्थं चक्रपाणिनः" इति । नारदीयसंहितायाम् जयन्तीं प्रकृत्य स्मर्य्यते "उपोष्य जन्मचिह्नानि कुर्य्याज्जागरणं पुनः । अर्द्धरात्रयुताष्टम्यां सोऽश्वमेधफलं लभेदिति" । एवमेतेषु विधिवाक्येषु दानादियुक्त उपवासोजयन्तीव्रतरूपत्वेन प्रतीयते । अतोरूपभेदाद्व्रतभेदः ३ ।

तथा शुद्धमिश्रत्वभेदादपि द्रष्टव्यः अकरणे प्रत्यवायमात्रश्रवणाच्छुद्धं नित्यं जन्माष्टमीव्रतम् । करणे फलविशेषश्रवणादकरणे प्रत्यवायश्रवणाच्च नित्यत्वेन काम्यत्वेन च मिश्ररूपं जयन्तीव्रतम् । तत्र फल वाक्यानि पूर्व्वपक्षएव प्रसङ्गादुदाहृतानि । अकरणे प्रत्यवायश्च जयन्तीं प्रकृत्य कस्मिंश्चित्पुराणे स्मर्य्यते "अकुर्व्वन् याति नरकं यावदिन्द्राश्चतुर्द्दशेति" । स्कन्दपुराणेऽपि "शूद्रान्नेन तु यत्पापं शवहस्तस्य भोजने । तत्पापं लभते कुन्ति! जयन्तीविमुखो नरः" । "ब्रह्मघ्नस्य सुरापस्य गोवधे स्त्रीवधेऽपि वा । न लोकोयदुशार्दूल ! जयन्तीविमुखस्य च । क्रियाहीनस्य मूर्खस्य परान्नं भुञ्जतोऽपि वा । न कृतघ्नस्य लोकोऽस्ति जयन्तीविमुखस्य च । न करोति यदा विष्णोर्ज्जयन्तीसम्भवं व्रतम् । यमस्य वशमापन्नः सहते नारकीं व्यथाम् । जयन्तीवासरे प्राप्ते करोत्युदरपूरणम् । संपीड्यतेऽतिमात्रं तु यमदूतैः सुदारुणैः । काकोला वायसैस्तुण्डैः कुन्तन्ति च कलेवरम् । योभुञ्जीत विमूढात्मा जयन्तीवासरे न्वमेति" । तैरेतैरकरणे प्रत्यवायवाक्यैर्न्नित्यत्वं जयन्त्याः । नन्वेवमुक्तैरकरणे प्रत्यवायवाक्यैः केवलेनोपवासेनेति पापक्षयवाक्यात् जन्माष्टमीव्रतमपि नित्यकाम्यं स्यात् नैवम् पापक्षयफलत्वमात्रेण काम्यत्वे सन्ध्यावन्दनादेरपि काम्यत्वप्रसङ्गात् । अतः सत्यपि पापक्षये फलान्तराश्रवणेन केवलनित्यत्वं जन्माष्टमीव्रतस्य युक्तम् । अतः शुद्धमिश्रभेदाद्व्रतयोर्भेदः ४ ।

तथा निर्द्देशभेदादपि व्रतभेदो द्रष्टव्यः निर्द्देशभेदश्च भृगुवाक्ये दृश्यते "जन्माष्टमी जयन्ती च शिवरात्रिस्तथैव च । पूर्व्वविद्धैव कर्त्तव्या तिथिभान्ते च पारणमिति" यत्र जन्माष्टमी रोहिणी चेति पाठः तत्रापि रोहिणीशब्देन तद्युक्ता तिथिर्व्विवक्षिता न तु केवलरोहिणी, तस्मिन्वाक्ये निर्द्दिष्टयोः पूर्व्वोत्तरयोर्ज्जन्माष्टमीशिवरात्र्योस्तिथित्वात् । यद्येकमेव व्रतं स्यात्तर्हि निर्द्देशभेदोनोपपद्यते । ननु व्रतभेदेऽप्यस्ति

दोषः यदा दिनद्वयेऽष्टमी वर्त्तते रोहिणी तूत्तरएव तदा पूर्व्वदिने जन्माष्टम्युपवासः परेद्युर्जयन्त्युपवास इति नैरन्तर्य्येणोपवासद्वयं प्रसज्यते प्रसज्यतां नाम प्रमाणवत्त्वादिति चेत् न परदिने भोजनोपवासलक्षणविरुद्धधर्म्मद्वयप्रसङ्गात् । उपवासस्याङ्गं पारणमिति हि वक्ष्यते । तथा च जन्माष्टम्युपवासाङ्गस्य पारणस्य जयन्त्युपवासस्य चैकत्र प्राप्तिः सोऽयमेकोदोषः । व्यतिरेकानुपलम्भश्चापरो दोषः । तथाहि यथा जयन्तीव्यतिरिक्ता जन्माष्टम्युपलभ्यते तथा जन्माष्टमीव्यतिरिक्तापि जयन्ती क्वापि वत्सरउपलभ्येत न त्वेवमुपलभ्यते अतोव्रतभेदोऽपि दुष्टएव । अत्रोच्यते न तावत्पारणोपवाससाङ्कर्य्यलक्षणोदोषोऽस्ति आघ्राणोदकपानादिना पारणे सम्पादितेऽप्युपवाससम्भवात् अन्यथा द्वादशीपारणत्रयोदशीव्रतयोः क्वचित्साङ्कर्य्यं केन वार्य्येत । नाप्युपवासद्वयनैरन्तर्य्यम् रोहिणीसंयोगसम्भवे जन्माष्टम्या अपि तत्रैव कर्त्तव्यत्वात् सर्व्वत्र तिथिनक्षत्रयोगस्य केवलतिथेरुत्कृष्टत्वेन केवलायास्तिथेस्तत्रोपेक्षणीयत्वात् । अतएव व्यतिरेकानुपलम्भोऽप्यलङ्काराय नतु दोषाय जन्माष्टम्या रोहिणीनिरपेक्षत्वेन व्यतिरेक उपलभ्यतां नाम । जयन्त्यास्तु योगरूपत्वेन रोहिण्यामिवाष्टम्यामपि सापेक्षत्वेन कथं व्यतिरेकाशङ्कावकाशः । तस्माद्व्रतद्वयपक्षे न कोऽप्यस्ति दोषः । किं च यदा रोहिणीयोगोऽस्ति तदा जन्माष्टमीजयन्त्योः सहयोगस्यावश्यम्भावित्वेन जयन्तीव्रतएव जन्माष्टमीव्रतमन्तर्भवति । तस्मादपि नोपवासद्वयप्रसङ्गः ५ .

तदेवं व्रतभेदे दोषाभावात्तत्साधकानाञ्च नामभेदादीनां पञ्चानां सद्भावाद्व्रतभेदएवावश्यमभ्युपेयः । व्रतैक्यभ्रमस्तु तयोरुक्तयुक्त्यनुसन्धानाभावादष्टम्युपवासमाहात्म्याच्च केषांचिदुदेति । सादृश्यं च गुणविकृतित्वादाश्रयाश्रयिभावाच्च सम्भाव्यते । यथा दर्शयागस्य गुणविकृतिः साकम्प्रस्थापीयोयागः । तत्र दर्शयागे यावन्तोऽङ्गाङ्गिविषयाः प्रयोगाः, ते सर्व्वेऽपि साकम्प्रस्थापीये विद्यन्ते भेदस्तु स्वल्पएव भवति । दर्शयागे सान्नाय्यहविषोर्द्दधिपयसोः पृथगवदानम् । साकम्प्रस्थापीये सहैव तु प्रस्थापनम् एतावता भेदेन गुणविकृतिरित्यभिधीयते । तथाग्निष्टोमस्य गुणविकृतिरुक्थ्यः । अग्निष्टोमे द्वादश स्तोत्राणि उक्थ्ये च द्वादशभ्योऽधिकानि त्रीणि,ततो गुणाधिक्यात् गुणविकृतित्वम् । एवमत्रापि जन्माष्टम्यामुपवासोऽनुष्ठेयः जयन्त्यां तु दानादिरधिकोगुणः । अतः सा गुणविकृतिः । आश्रयाश्रयिभावश्च ज्योतिष्टोमे तदङ्गावबद्धोपासने दृष्टः । तत्र ज्योतिष्टोम आश्रयः तस्याङ्गान्युक्थादीनि आश्रितानि । तत्रोक्थं नाम बह्वृचाध्यायिना होत्रा शस्यमानं मरुत्वतीयनिष्कैवल्यादिनामकं शस्त्रम् । तच्चोक्थमाश्रित्य बह्वृचब्राह्मणोपनिषत्सूपासनानि विहितानि । तथाच श्रुतिः "उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवीति अहमुक्थमस्मीति विद्यादिति च" उद्गीथो नाम सामवेदिनोद्गात्रा गीयमानः साम्नो भागविशेषः । तच्चोद्गीथमाश्रित्य छान्दोग्योपनिषत्सूपासनानि विहितानि "ओमित्येतदक्षरमुद्गीथमुपासीतेति" । एवं प्रकृतेऽपि जन्माष्टमीव्रते येयं श्रावणकृष्णाष्टमी तामाश्रित्य रोहिणीयोगनिमित्तं दानादिकं जयन्तीव्रते विधीयते । अतोगुणविकृतित्वेनाश्रयाश्रयिभावेन च सादृश्यसम्भवादनयोर्व्रतैक्यभ्रमो मन्दबुद्धीनां जायतां नाम प्रमाणन्यायदर्शिभिस्तु सर्व्वथैव व्रतभेदोऽङ्गीकार्य्य इति सिद्धम् ।

यदेतद्विचारत्रयं पूर्व्वमुपक्षिप्तं व्रतभेदे तिथिनिर्णये वेधे चेति तत्र व्रतभेदो निर्णीतः । अथ तिथिर्निर्णेतव्या । तन्निर्णयश्च वेधाधीनः अतोवेधः पूर्व्वमभिधीयते । तिथ्यन्तरेष्वह्न एव प्रायेण कर्म्मकालत्वादुदयास्तमयवेलायां त्रिमुहूर्त्तवेधः सामान्येन निरूपितः । पञ्चम्यां तु विशेषतः षण्मुहूर्त्तवेधोदर्शितः जन्माष्टम्या जयन्त्याश्च रात्रिप्रधानत्वाद्रात्रियोगोऽत्र प्रशस्तः । एतच्च जाबालिवृद्धगौतमाभ्यां दर्शितम् "अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतोदिवा । नक्तादिव्रतयोगेषु रात्रियोगो विशिष्यत" इति । यद्यप्युपवासस्य व्रतत्वादहनि रात्रौ च मुख्यत्वं युक्तितः सामर्थ्यसिद्धं तथाप्यर्द्धरात्रस्य मुख्यकालत्वमुक्तं वशिष्ठसंहितायाम् "अष्टमी रोहिणीयुक्ता निशार्द्धे दृश्यते यदि । मुख्यकाल इति ख्यातस्तत्र जातोहरिः स्वयमिति" । एवं सत्यर्द्धरात्रव्याप्तिरेवात्र कर्म्मकालव्याप्तिरित्यभिधीयते । एतदेवाभिप्रेत्य विष्णुरहस्ये पठ्यते "रोहिण्यामर्द्धरात्रे तु यदा कृष्णाष्टमी भवेत् । तस्यामभ्यर्च्चनं शौरेर्हन्ति पापं त्रिजन्मजमिति" । तस्मिन्नर्द्धरात्रे कियत्परिमाणमपेक्षितमित्यपेक्षायामादित्यपुराणे दर्शितम् "अर्द्धरात्रादधश्चोर्द्ध्वं कलयापि यदा भवेत् । जयन्ती नाम सा प्रोक्ता सर्व्वपापप्रणाशिनीति" । वराहसंहितायामपि "सिंहेऽर्के रोहिणीयुक्ता नभःकृष्णाष्टमी यदि । रात्र्यर्द्धपूर्व्वा-

परगा जयन्ती कलयापि चेति"। पूर्वं चाप-रञ्च पूर्वापरे रात्र्यर्द्धे च ते पूर्वापरे च रात्र्यर्द्धपूर्वापरे तयोर्गच्छति वर्त्तत इति रात्र्यर्द्धपूर्वापरगा। घटिका-या अशीत्यधिकशततमोभागः१८० कला तावता परिमाणेन पूर्वार्द्धावसाने उत्तरार्द्धादौ च वर्त्तमाना ग्रहीतव्या। खण्डतिथिरूपा कृष्णाष्टमी द्विविधा पूर्वेद्युः सप्तमीयुक्ता परेद्युर्नवमीयुक्ता चेति। तत्र सप्तमीयुक्तायां रात्रि-पूर्वार्धावसाने कलासद्भावोविधीयते। उत्तरार्द्धादौ स्वतः सिद्धत्वेनाविधेयत्वात्तद्विपर्ययेण नवमीयुक्तायामुत्तरा-र्द्धादौ कलासद्भावो विधीयते तदा पूर्वार्द्धावसाने स्वतः सिद्धत्वादनुवादः पूर्वार्द्धावसानकलायाः सप्तमीयुत त्वप्रयत्वं, विष्णुधर्मोत्तरे स्पष्टमभिहितम् "रोहिणी सहिता कृष्णा मासि भाद्रपदेऽष्टमी। सप्तम्यामर्धरा-त्राधः कलयापि यदा भवेत्। तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः। तमेवोपवसेत् कालं कुर्यात्तत्रैव जागरमिति"। इयमष्टमी कृष्णपक्षादिमासविवक्षया भाद्रपदे भवति सैवाष्टमी शुक्लपक्षादिमासविवक्षया श्रावणे भवति। अतएव योगीश्वरः "रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी। अर्द्धरात्रादधश्चोर्ध्वं क-लयापि यदा भवेत्। जयन्ती नाम सा प्रोक्ता सर्वपाप प्रणाशिनीति"। कलाया अतिसूक्ष्मत्वेन दुर्लक्ष्यत्वात् स एव पक्षान्तरमाह। "अर्द्धरात्रादधश्चोर्ध्वमेकार्धघ-टिकाचिता। रोहिणी चाष्टमी ग्राह्या उपवासव्रता-दिष्विति"। एका चार्द्धघटिका चैकार्धघटिके ताभ्यामा-चिता। कलामपेक्ष्यार्धघटिका स्थूला। तामपेक्ष्य घ-टिका स्थूला। तत्रायमर्थः संपद्यते पूर्वभागावसाने एका घटिका उत्तरभागादौ चैका मिलित्वा तन्निशीथश-ब्दवाच्यं मुहूर्त्तं तावत्परिमाणं सर्वैरपि सुलक्ष्यत्वा-न्मुख्यः कल्पः। तदसम्भवेऽर्धघटिकान्वेष्टव्या। तस्याप्य-सम्भवे कलेति तत्र मुख्यं पक्षमभिप्रेत्य भविष्योत्तरे "नि-शीथे कृष्णपक्षगे" इत्युक्तं तच्च वचनं साकल्येन पूर्वमुदा-हृतम्। अत्र जयन्त्यां चन्द्रार्घ्यदानस्यावश्यकर्त्तव्यत्वा-त्तस्य च चन्द्रोदयकालीनत्वान्निशीथे योगः प्रशस्तः। एतदेव विष्णुधर्मोत्तरेऽभिहितम् "अर्द्धरात्रे तु योगोऽय-न्तारापत्युदये तथा। नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेदिति"। सोऽयमर्धरात्रयोगो मुख्यः कल्पः। यस्तु कृत्स्नाहोरात्रयोगः सोऽयं मुख्यतरः। यश्च यदा कदाचिदीषद्युयोगः सोऽनुकल्पः। स च वशिष्ठसंहि-तायां दर्शितः "अहोरात्रं तयोर्योगोह्यसंपूर्णोभवेद्यदि मुहूर्त्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदिति"। सोऽय जयन्तीव्रते योगनिर्णयः। स एव जन्माष्टमीव्रते-ऽपि द्रष्टव्यः। यस्मिन्वर्षे योगोनास्ति तस्मि-न्वर्षे जन्माष्टमीव्रतमेकमेव प्रवर्त्तते तत्रापि नेतरा-ष्टमीवद्दिवसवेधः किं त्वर्द्धरात्रवेधः। तथा च पुराणान्तरे "दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला। रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसं-युताम्"। अन्यत्रापि "अष्टमी शिवरात्रिश्च ह्यर्द्धरात्राद-धोयदि। दृश्यते घटिका या सा पूर्वविद्धा प्रकीर्त्तितेति"। इति वेधोनिरूपितः। अथ ग्राह्यतिथिर्निरूप्यते सा च संवत्सरभेदेन द्विधा भवति रोहिणीरहिता रोहिणी-युक्ता चेति। तत्र या रोहिणीरहिताष्टमी सापि-द्विविधा शुद्धा सप्तमीविद्धा चेति। सूर्योदयमारभ्य प्रवर्त्तमानाष्टमी शुद्धा निशीथादर्वाक् सप्तम्या किंयत्यापि युक्ता विद्धा। शुद्धा पुनर्निशीथव्याप्त्यव्याप्तिभ्यां द्विवि-धा तत्र निशीथव्यापिनी जन्माष्टमीव्रते मुख्या। "विशेषेणेन्दुसंयुतामिति" वचनात्। निशीथव्याप्तिर-हितापि "रात्रियुक्तां प्रकुर्वीतेति" वचनेन ग्रहीतव्या भवति। ननु पूर्वेद्युर्निशीथादूर्ध्वमारभ्य परेद्युर्नि-शीथादर्वाक् समाप्यते तस्या उभयत्र रात्रिसंबन्ध-त्वात् कुत्रोपवास इति चेत् परेद्युरिति ब्रूमः उभयत्र निशीथव्याप्त्यभावस्य रात्रिसम्बन्धस्य च तुल्य-त्वेऽपि परेद्युः प्रातःसंकल्पकालमारभ्य वर्त्तमान-तया प्राशस्त्यं द्रष्टव्यम्। सप्तमीविद्धापि त्रिविधा। पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेव निशीथव्यापिनी उभयत्र निशीथव्यापिनी चेति। तत्र प्रथमद्वितीययोः पक्षयोः निशीथव्याप्तेः प्रयोजकत्वेन या निशीथव्या-पिनी सा "विशेषेणेन्दुसंयुतामिति" वचनेन ग्रही-तव्या भवति। या तु दिनद्वये निशीथव्यापिनी तस्याम् उभयत्र निशीथयोगस्य रात्रियोगस्य च तुल्यत्वान्नानेन वचनेन निर्णयः सम्भवति नापि "कृष्णपक्षेऽष्टमी" इत्या-दिभिरष्टमीमात्रमुपजीव्य प्रवृत्तैः निर्णेतुं शक्यते तेषाम-ह्वैर्धविषयत्वात्। अन्यथा व्रतान्तरेष्वपि निशीथवेधः प्रसज्येत तस्मान्न्यायः परिशिष्यते। न्यायश्च परेद्युरुप-वासं प्रापयति, संकल्पकालमारभ्य तिथिसद्भावात्। न च साकल्याभिधायिवचनेन पूर्वेद्युरपि संकल्पकाले तिथिरस्तीति शङ्कनीयम्। तस्यास्तुल्यतिथित्वाभावात्।

किञ्च "सा तिथिः सकला ज्ञेया यस्यामस्तमितो रवि रिति" वचनं निशीथव्यापिनीमष्टमीं न विषयी करोति तस्मात्परेद्युरेवोपवासः। तदेवं चतुर्विधा रोहिणीरहिताष्टमी निर्णीता। अथ रोहिणीसहिताष्टमी निर्णीयते सापि चतुर्विधा शुद्धा विद्धा शुद्धाधिका विद्धाधिका चेति। तत्र शुद्धायां संपूर्णयोगो निशीथयोगो यत् किञ्चिन्मुहूर्त्तयोगश्चेति त्रैविध्यं भवति। एवं विद्धायामपि द्रष्टव्यम्। एतेषु षट्सु भेदेषु दिनान्तरे योगाभावादुपवासे सन्देहो नास्ति किंतु केवलं योगगततारतम्यात् प्राशस्त्यतारतम्यं भवति। यत्किञ्चिन्मुहूर्त्ते योगः प्रशस्तः अर्धरात्रयोगः प्रशस्ततरः सम्पूर्णयोगः प्रशस्ततमः। सर्वेष्वपि योगेषु योगमुपजीव्य उपवासो विहितः विष्णुधर्म्मोत्तरे "प्राजपत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी। मुहूर्त्तमपि लभ्येत सोपोष्या सुमहाफला। मुहूर्त्तमप्यहोरात्रे यस्मिन् व्यक्तं हि लभ्यते। अष्टम्यां रोहिणीऋक्षं तां पुण्यां समुपावसेदिति"। शुद्धाधिका तु पूर्व्वेद्युः सूर्योदयमारभ्य प्रवृत्ता परेद्युः सूर्योदयमतिक्रम्य वर्त्तते सा च त्रिविधा पूर्व्वेद्युरेव रोहिणीयुक्ता परेद्युरेव रोहिणीयुक्ता दिनद्वयेऽपि रोहिणीयुक्ता चेति तत्राद्ययोर्द्वयोः पक्षयोर्नास्त्युपवाससन्देहः रोहिणीयुक्ताया द्वितीयायाः कोटेरभावात्। तृतीयपक्षे तु रोहिणीयोगस्योभयत्र समानत्वेऽपि गुणाधिक्यात् पूर्व्वैवोपास्या गुणाधिक्यं च दर्शयिष्यते। येयमत्रोपोष्यत्वेनोक्ता पूर्वा तिथिः सापि रोहिणीयोगभेदात्त्रिधा भिद्यते अष्टमीवत् सूर्य्योदयमारभ्य प्रवृत्ता रोहिणी कदाचित्परेद्युरपि कियती वर्त्तते, कदाचित्पूर्व्वेद्युर्निशीथमारभ्य रोहिणी प्रवर्त्तते। कदाचिन्निशीथादूर्द्ध्वमारभ्य प्रवर्त्तते। तत्र प्रथमपक्षे संपूर्णत्वमेको गुणः। संकल्पकालमारभ्य कृत्स्नकर्म्मकालव्याप्तिरपरो गुणः। निशीथव्याप्तिस्तृतीयो गुणः। न चैते त्रयो गुणाः परेद्युः सम्भवन्ति। द्वितीयपक्षे निशीथे जयन्तीसद्भावो गुणः। न च परेद्युः सोऽस्ति। तृतीयपक्षे दिनद्वयेऽपि निशीथयोगो नास्ति पूर्व्वेद्युः केवलाष्टमी परेद्युः केवला रोहिणी। तत्राष्टम्याः प्राधान्यात्प्राबल्यमास्थेयम्। सर्वत्र हि जयन्त्याश्रयेषु रोहिणीसहिताष्टमीति व्यवहारादष्टमीसहिता रोहिणीति व्यवहाराभावाच्च तिथिनक्षत्रयोः क्रमेण प्रधानोपसर्ज्जनभावोऽवगन्तव्यः। अतो गुणाधिक्याच्छुद्धाधिका पूर्व्वैवोपोष्या। निशीथादर्वाक् सप्तम्या युक्ता परेद्युरपि विद्यमाना विद्धाधिका। नन्वत्र निशीथवेधो ग्राह्य इत्युक्तम्। बाढं वेध्याया अष्टम्या निशीथसद्भावोऽत्र निशीथवेधः न तु वेधिकाया सप्तम्याः निशीथसमये सद्भावः। विद्धाधिकायामपि पक्षत्रयम्। द्वयोः पक्षयोश्च सन्देहाभावः पूर्व्ववद्योजनीयः। तत्र या पूर्व्वेद्युरेव रोहिणीयुक्ता विद्धाधिका तस्यामुपवास आदित्यपुराणे स्मर्य्यते "विनाऋक्षं न कर्त्तव्या नवमीसंयुताष्टमी। कार्य्या विद्धापि सप्तम्या रोहिणीसहिताष्टमीति"। विष्णुधर्म्मोत्तरेऽपि "जयन्ती शिवरात्रिश्च कार्य्ये भद्राजयान्विते। कृत्वोपवासं तिथ्यन्ते तथा कुर्य्यात्तु पारणमिति"। गारुड़पुराणेऽपि "जयन्त्यां पूर्व्वविद्धायामुपवासं समाचरेत्। तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणमिति"। या परेद्युरेव रोहिणीयुक्ता विद्धाधिका तत्रोपवासः पूर्वतिथौ न युक्तः, रोहिणीयोगाभावात् परेद्युः तत्सद्भावात्पूर्वोदाहृतेन प्राजापत्येत्यादिना विष्णुरहस्यवचनेनोपवासो विधीयते। या तूभयत्र रोहिणीयुक्ता विद्धाधिका सापि निशीथे जयन्तीयोगमपेक्ष्य चतुर्धा भिद्यते। पूर्व्वेद्युरेव निशीथयोगवती। परेद्युरेव तादृशी, उभयत्रापि निशीथयोगसहिता तद्रहिता चेति। तत्र या पूर्व्वेद्युरेव निशीथयोगवती सा पूर्व्वैवोपोष्या तदुक्तं पद्मपुराणे "कार्य्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी। तत्रोपवासं कुर्वीत तिथिभान्ते च पारणमिति" अत्रावशिष्टेषु त्रिषु पक्षेषु परदिन एवोपवासः। तत्र दिनद्वये निशीथयोगमुपलक्ष्य ब्रह्मवैवर्त्ते पठ्यते "वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी। सा सर्क्षापि न कर्त्तव्या सप्तमीसहिताष्टमी। "अविद्धायान्तु सर्क्षायां जातो देवकीनन्दनः" इति। यदा दिनद्वयेऽपि निशीथयोगे परत्रोपवासस्तदा किमु वक्तव्यं परेद्युरेव निशीथयोगे। दिनद्वयेऽपि निशीथयोगराहित्यं बहुधा जायते। तद्यथा पूर्वेद्युर्निशीथादूर्द्ध्वं तिथिनक्षत्रद्वयं प्रवृत्तं तच्च परेद्युर्निशीथादर्वागेव समाप्तमित्येकः प्रकारः। पूर्वेद्युर्निशीथादर्वागेव नक्षत्रं प्रवृत्तम् अष्टमी तु निशीथादूर्द्ध्वं प्रवृत्ता परेद्युर्निशीथादर्वाग् नक्षत्रं निवृत्तमित्यपरः। अष्टमी निशीथादर्वाक् प्रवृत्ता ऋक्षं च निशीथादूर्द्ध्वं प्रवृत्तम् अष्टम्याःपरेद्युर्निशीथादर्वागेव समाप्तिरिति तृतीयः। त्रिष्वप्येतेषु प्रकारेषु परैवोपोष्या। दिनद्वयेऽप्यर्धरात्रयोगविषये पूर्वोदाहृतस्य "वर्जनीया

प्रयत्नेन" इत्यादिवचनस्यात्राऽपि चारयितुं शक्यत्वात् । किञ्च प्रथमप्रकारे न्यायोऽप्युक्तो भवति । सङ्कल्पकालमारभ्य तिथिनक्षत्रयोगस्य बहुकालव्यापित्वात् प्रशस्तत्वं द्रष्टव्यम् । द्वितीयप्रकारे परेद्युरष्टमीबाहुल्येऽपि नक्षत्रयोगस्याल्पत्वादनुपादेयत्वमित्याशङ्का न कर्त्तव्या । अतएव स्कन्दपुराणे पठ्यते"सप्तमीसहिताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम ! । प्राजापत्यं द्वितीयेऽह्नि मुहूर्त्तार्धं भवेद्यदि । तदाष्टयामिकं ह्येयं प्रोक्तं व्यासादिभिः पुरेति"। तृतीयप्रकारे परेद्युर्नक्षत्रबाहुल्येऽपि अष्टमीयोगस्याल्पत्वादनुपादेयत्वमित्याशङ्का भवति सा च पद्मपुराणेन निवर्त्त्यते "पूर्वविद्धाष्टमी या तु उदये नवमीदिने । मुहूर्त्तमपि संयुक्ता संपूर्णा साष्टमी भवेत् । कला काष्ठा मुहूर्त्ताऽपि यदा कृष्णाष्टमी तिथिः । नवम्यां सैव ग्राह्या स्यात् सप्तमीसंयुता न हीति" । तदेवं जन्माष्टमीभेदा जयन्तीभेदाश्च निरूपिताः । तत्र जयन्तीभेदेषूपवासदिने यदि बुधवारः सोमवासरो वा भवति तदा फलाधिक्यं भवति तदुक्तं पद्मपुराणे "प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः । यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता । किं पुनर्बुधवारेण सोमेनापि विशेषतः । किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति"। स्कन्दपुराणेऽपि"उदये चाष्टमी किंचिन्नवमी सकला यदि । भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता । अपि वर्षशतेनापि लभ्यते यदि वा नवेति"। विष्णुधर्मोत्तरेऽपि "अष्टमी बुधवारेण रोहिणीसहिता यदा । भवेत्तु मुनिशार्दूल! किं कृतैर्व्रतकोटिभिरिति" ।

यथोक्तरीत्या विहिततिथावुपवासं कृत्वा परेद्युः पारणेनोपवासं समापयेत् पार तीर-कर्मसमाप्तावित्यस्माद्धातोः निष्पन्नः पारणशब्दः । यद्यप्यसौ समाप्तिमात्रमभिधत्ते तथाप्युपवाससमाप्तावेव लोकशास्त्रयोः प्रयोगात् पङ्कजादिशब्दवद्योगरूढो द्रष्टव्यः । तथा च योगरूढ्योपवासस्य चरमाङ्गं भोजनमभिधत्ते । अङ्गत्वञ्चोपवासविधिवाक्येषु "तिथिभान्ते च पारणमिति" विधानादवगन्तव्यम् । न च रागप्राप्तस्य भोजनस्यानेन वचनेनोपवासाङ्गतिथिनक्षत्रयोर्निषेधः क्रियते न तु पारणनामकं किञ्चिदङ्गं विधीयत इति शङ्कनीयम् तथा सति पारणशब्दप्रयोगानुपपत्तेः रागप्राप्ते ह्यभ्यवहरणे भोजनशब्दः । तत्र पारणशब्देन रागप्राप्तभोजनविवक्षायां मुख्यार्थो बाधितः स्यात् । किञ्च यदि पारणमङ्गं न स्यात्तदा प्रतिनिधिविधानं नोपपद्येत । तद्विधानञ्च द्वादशीप्रस्तावे देवलेन स्मर्यते"संकटे विषमे प्राप्ते द्वादश्यां पारयेत् कथम्?। अद्भिस्तु पारणां कुर्यात् पुनर्भुक्तं न दोषकृदिति"। अतः पारणशब्दबलात् प्रतिनिधिविधिबलाच्च पारणस्याङ्गत्वं द्रष्टव्यम्। अतएवादित्यपुराणे"पारणान्तं व्रतं ज्ञेयं व्रतान्ते न द्विभोजनम् । असमाप्ते व्रते पूर्वं नैव कुर्य्याद्व्रतान्तरमिति" तच्च पारणमुपवासदिनात् परदिनपूर्वाह्णे कर्त्तव्यम् "उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेदिति" देवलस्मरणात् । एवं सामान्यतः पूर्वाह्णे पारणप्राप्तौ क्वचिदपवादाय "तिथिभान्ते च पारणम्" इत्यभिधीयते । शुद्धाधिकायां पूर्व्वेद्युरेव जयन्तीयोगः उभयत्रापि वा जयन्तीयोग इत्यनयोः पक्षयोः पूर्व्वेद्युरेवोपवासविधानात् परेद्युः केवलतिथेस्तिथिनक्षत्रयोर्वा सद्भावात्तदन्ते पारणविधिः। तथा शुद्धाधिकयोर्विद्धाधिकयोरुभयोरपि यदा परेद्युरेव जयन्तीयोगस्तदा परतिथावुपवासविधानात्पारणदिने तिथ्यभावेऽपि कदाचिन्नक्षत्रावशेषसम्भवात्तदन्ते पारणं विधीयते तिथेर्वा नक्षत्रस्य वावशेषकाले पारणं ब्रह्मवैवर्त्ते प्रतिषिध्यते। "अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित् । हन्यात्पुरा कृतं कर्म उपवासार्जितं फलम् । तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् । तस्मात् प्रयत्नतः कुर्यात्तिथिभान्ते च पारणमिति"। स्कन्दपुराणेऽपि "तिथिनक्षत्रनियमे तिथिभान्ते च पारणम् । अतोऽन्यथा पारणे तु व्रतभङ्गमवाप्नुयादिति" ।

तिथिभान्तञ्च द्विविध उभयान्त एकतरान्तश्चेति । दिनद्वये जयन्तीयोगवत्यां शुद्धाधिकायां परदिने अष्टमी मुहूर्त्तत्रयं नातिक्रामति रोहिणी तु पूर्वेद्युर्निशीथादर्वाग् यदा कदाचित् प्रवृत्ता तदनुसारेण परेद्युः समाप्येत । तत्र यदि दिवैव समाप्येत तदा तामतिवाह्यैव पारणं कुर्यात् उभयान्तस्य मुख्यत्वात् । यदि रात्रौ समाप्तिस्तदा तत्समाप्तिर्न प्रतीक्षणीया रात्रिपारणस्य निषिद्धत्वात् । तथा च ब्रह्मवैवर्त्ते "सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते । अन्यथा पुण्यहानिः स्यादृते धारणपारणमिति । अन्यतिथ्यागमोरात्रौ तामसस्तैजसो दिवा । तामसे पारणं कुर्वंस्तामसीं गतिमश्नुते" इति । दिवापारणं कुर्वन्नपि नाष्टमीबेलायां कुर्यात् एकतरान्तस्याभावात् अष्टमीमतिवाह्य रोहिण्यां वर्त्तमानायामपि पारणं कार्यम्। अतएव नारदीये "तिथिनक्षत्रसंयोग उपवासोयदा भवेत् । पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः" । सांयोगिके व्रते प्राप्ते यत्रैकोऽपि वियुज्यते। तत्रैव पारणं कुर्यादेवं

वेदविदोविदुरिति"। पूर्व्वेद्युरेव निशीथे जयन्तीयोग यस्यां विद्धाधिकायां पारणदिने तिथिभान्तो बहुधा संभाव्यते। अह्न्युभयान्तएकतरान्तोवा, रात्रावेकतरान्त उभयान्तोवेति। तेषु चतुर्षु भेदेषु निर्णयः स्मर्य्यते "तिथिनक्षत्रयोर्यदा च्छेदोनक्षत्रान्तमथापि वा। अर्द्ध रात्रेऽपि वा कुर्य्यात् पारणन्तु परेऽहनीति"। दिवसे यद्युभयान्तस्तदा पारणमिति मुख्यः कल्पः। नक्षत्रान्तमित्यनेनैकतरान्तत्वं विवक्षितम्। सोऽयमनुकल्पः। यदि रात्रौ निशीथादर्वागुभयान्त एकतरान्तो वा भवति तदा दिवसे मुख्यानुकल्पयोरुभयोरप्यसंभावाद्रात्रौ पारणस्य निषिद्धत्वाच्चार्थात्तत्राप्युपवासप्राप्तौ पारणस्य प्रतिप्रसवः क्रियते "अर्द्धरात्रेऽपि वा कुर्य्यादिति"। ननु पारणेऽष्टम्यन्तस्य प्रतीक्षणीयत्वेऽपि रोहिण्यन्तो न प्रतीक्षणीयः "याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रसंयुताः। ऋक्षान्ते पारणं कुर्य्याद्विना श्रवणरोहिणीम्" इति स्मरणात्। नैवम्। "नक्षत्रञ्च चतुर्गुणमिति"प्रत्यया यशोदाहृतत्वात्। तस्मात् "विना श्रवणरोहिणीमिति वचनं केवलनक्षत्रोपवासविषयं पूर्वोक्तानुकल्पविषयं वेत्यवगन्तव्यम्। अशक्तस्य तु तिथिनक्षत्रयोरुभयोरनुवर्त्तमानयोरपि प्रातर्देवं संपूज्य क्रियमाणं पारणं न दुष्यति। "तिथ्यन्ते वोत्सवान्ते वा व्रती कुर्वीत पारणमिति" स्मरणात्।

तत्र निष्कृष्टार्थस्तु तेनैव कारिकाभिर्निबद्धोयथा "जयन्त्याख्यं व्रतं भिन्नं कृष्णजन्माष्टमीव्रतात्। शुद्धा च सप्तमीविद्धेत्येवं जन्माष्टमी द्विधा। सप्तमी चेन्निशीथात् प्राग्विद्धा शुद्धाऽन्यथा भवेत्। शुद्धायां नास्ति सन्देहो विद्धा च त्रिविधेष्यते। निशीथयोगः पूर्वेद्युरुत्तरेद्युर्द्वयोरुत। पूर्वैव प्रथमे पक्षे परैवोत्तरपक्षयोः। अष्टमी रोहिणीयुक्ता जयन्ती सा चतुर्विधा। शुद्धा शुद्धाधिकेत्येवं विद्धा विद्धाधिकेति च। शुद्धायामपि विद्धायां न संभाव्योत्तरा तिथिः। शुद्धाधिकायां योगः स्यादेकस्मिन्वा दिनद्वये। नैकयोगेऽस्ति सन्देहो द्वियोगे प्रथमन्दिनम्। यदा निशीथे पश्चाद्वेत्युत्तमो मध्यमोऽधमः। योगस्त्रिधापि पूर्वेद्युः संपूर्णत्वादुपोषणम्। विद्धाधिकायां प्रत्येकदिनयोगे स गृह्यताम्। द्वयोर्योगस्त्रिधाभिन्नो निशीथव्याप्तिभेदतः। तद्युक्तिर्दिन एकस्मिन्नुभयोर्नोभयोरिति। एकस्मिंश्चेत्तद्दिनं स्यात् पक्षयोरन्ययोः परा। बुधे सोमे जयन्ती चेद्वारे साऽतिफलप्रदा। तिथ्यृक्षयोर्द्वयोरन्ते उत्तमं पारणं भवेत्। एकस्यान्ते मध्यमं स्यादुत्सवान्तेऽधमं स्मृतम्। यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी तदा। अन्तर्भूता जयन्त्यां स्यादृक्षयोगप्रशस्तितः। नोपवासद्वयं कार्य्यमुपोष्यन्तु परं दिनम्"।

रघुनन्दनमते तु तद्व्यवस्था यथा

"यत्रैकदिने जयन्तीलाभस्तत्रैवोपवासः। उभयदिने चेत्तदा परदिने। जयन्त्यलाभे च रोहिणीयुक्ताष्टम्याम्। उभयदिने रोहिणीयुक्ताष्टमीलाभे परदिने। रोहिण्यलाभे तु निशीथसम्बन्धिन्यामष्टम्याम्। उभयदिने निशीथसम्बन्धे तदसम्बन्धे वा परदिन इति। उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम्। यदा तु महानिशायाः पूर्व्वमेकतरस्यावसानमन्यतरस्य महानिशायां तदनन्तरं वा तदैकतरावसाने पारणम्। यदा महानिशायामुभयस्थितिस्तदोत्सवान्ते प्रातःपारणमिति"।

तत्प्रमाणवाक्यानि ति० त० जन्माष्टमीतत्त्वेऽनुसन्धेयानि माधवरघुनन्दनमतयोर्युक्तत्वायुक्तत्वे सत्यपि देशविशेषवासिभिस्तत्तद्व्यवस्थे आदर्त्तव्ये एते च व्यवस्थे स्मार्त्तैरेवादर्त्तव्ये। वैष्णवैस्तु हरिभक्तिविलासाद्यनुसारिणी व्यवस्थादर्त्तव्या सा च जन्माष्टमीशब्दे दृश्या। कृष्णजन्माष्टमीशब्दोऽप्यत्र दर्शितकालमाधवीयव्यवस्थे उदा० दृश्यम्।

कृष्णिका स्त्री कृष्णोवर्णो भूम्नाऽस्त्यस्य ठन् कृष्णैव संज्ञायां कन्वा। (राइसरिषा) राजसर्षपे हेमच०

कृष्णेक्षु पु० कर्म्म०। (काजला)इक्षुभेदे कान्तारेक्षौ राजनि०। तद्गुणाः इक्षुशब्दे ९०९पृ०उक्ताः

कृष्णोदर पुंस्त्री० कृष्णमुदरमस्य। दर्वीकरसर्पभेदे "कृष्णसर्पो महासर्पः कृष्णोदरः" इत्यादि दर्वीकरसर्पभेदोक्तौ सुश्रु०। अहिशब्दे विवृतिः स्त्रियां जातित्वात् ङीष्।

कृष्णोदुम्बरिका स्त्री कृष्णस्य काकस्य प्रिया उदुम्बरिका। काकोदुम्बरिकायाम् राजनि०

कृष्य त्रि० कृष–कर्म्मणि अर्हार्थे क्यप्। कर्षणार्हे क्षेत्रादौ "कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धः" रघुः

कृसर पु० कृ–सर किच्च वा० न षत्वम्। "तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते" इ० प० उक्ते तिलखण्डमिश्रिते पक्वे तण्डुले (खेचडी) कृतान्नभेदे स्त्री भावप्र० कृतान्नशब्दे दृश्यम्

कॄ विक्षेपे तुदा० पर० सक० सेट्। किरति अकारीत्।

अकारिषाम् चकार चकरतुः चकरिव । करीता । क(रि)रीष्यति करी(रि)तव्यः कार्य्यः । कर्म्मणि कीर्य्यते अकारि अकारिषाताम् अकारि(क(रि)री) षाताम् किरन् कीर्य्यमाणः । कीर्णः कीर्णिः करी(रि)तुम्

अनु+पश्चात् क्षेपे अनुकिरति अनुकीर्णः

अप+हर्षजीवनभक्षणार्थतया खनने तत्र चतुष्पाजन्तु–पक्षि कर्त्तृके आ० सुट् च । अपस्किरते वृषो हृष्टः भक्ष्यार्थी कुक्कुटः. वासार्थी श्वा वा । हर्षाभावे तु न सुट् न वा तङ् । अपकिरति कुसुमम् ।

अव+अधःक्षेपणे दूरतःप्रक्षेपे च सक० अवकिरति मलार्थे सुट् अवस्करः । व्रतात् पतने अक० । अवकीर्णी

आ+समन्तात् क्षेपणे विस्तारे च सक० "आकीर्णमृषिपत्नीना मुटजद्वाररोधिभिः" रघुः

उद्+उत्खनने (गाड़ा) उत्कीर्णशब्दे उदा० [त्कीर्णे"रघुः

सम्+उद्+छेदने विदारणे हिंसायां च सक०"मणौ वज्रसमु-

उप+छेदने सुट् च । उपस्किरति

परा+सम्यक् क्षेपे व्याप्तौ च सक० पराकीर्णः

प्र+प्रक्षेपे सक० नानाजातीयैर्मेलने । प्रकीर्णम्

प्रति+हिंसायाम् सुट् च ।"उरोविदारं प्रतिचस्करे नखैः"माघः

वि+विक्षेपे सक० "व्यकीर्य्यत त्र्यम्बकपादमूले: कुमा०

सम्+मिश्रणे । सङ्करः सङ्कीर्णः

कॄ हिंसने क्र्यादि० उभ० सक० सेट् । कृणाति अकारीत् । चकार चकरे करीता करी(रि)ष्यति ते । कीर्णः कीर्णिः

कॄ विज्ञाने चुरा० आत्म० सक० सेट् । कारयते अचीकरत ।

कॄत संशब्दे सशब्दे चु० उभ० सक० सेट् । कीर्तयति–ते अचकीर्त्तत्–त कविकल्पद्रुमः ।

क्लृप्त त्रि० क्लृप–क्त । १रचिते, २नियते, 'क्लृप्तेन सोपानपथं-नेति" रघुः । ३छिन्ने च । 'क्लृप्तकेशनखश्मश्रुः" मनुः

क्लृप्तकील स्त्री क्लृप्तं कीलयति कीलि–अण् । व्यवस्थालिपौ त्रिका०

क्लृप्तधूप पु० क्लृप्तोधूपोयेन । सिल्हके जटा०

क्लृप्ति स्त्री क्लृप–भावे क्तिन् । १कल्पने २अवधारणे ३नैयत्ये च । "तेषां क्लृप्तिमन्वितरे कल्पन्ते" शत० ब्रा० १२।१।१।७ "संज्ञामूर्त्तिक्लृप्तिस्त्रिवृत्कुर्वतः" शा० सू०

क्लृप्तिक त्रि० क्लृप्तं मूल्यदानेन स्वत्वं देयत्वेनास्त्यस्य ठन् ततः आगतः कन् वा । २क्रीते हला० तस्य मूल्यदानेन स्वत्वनैयत्यापादकतया तथात्वम् ।

केकय पु० ब० व० देशभेदे । "अनन्तरं जनपदाद्विवोध गन्ता मम" इत्युपक्रमे "उपावृत्तानुपावृत्ताः सुराष्ट्राः केकयास्तथा" भा० उ० ६अ० । "उभौ भरतशत्रुघ्नौ केकयेषु परन्तपौ" रा०अ० ६७अ० "केकयांस्ते गमिष्यन्तीहयानारुह्य सन्मतान्" रामा० अ० ६०अ० "तथा केकयराजानं वृद्धं परमधार्म्मिकम् । श्वशुरं राजसिंहस्य सपुत्रं तमिहानय" रामा० आ०१३।१४ "अयं केकयराजस्य पुत्रोवसति पुत्रक ! त्वां नेतुमागतो वीरो युधाजित् मातुलस्तव" रामा०११।१६।

स च देशः वृ०सं० कूर्म्मविभागे उत्तरस्यामुक्तः । "उत्तरतः कैलासः इत्युपक्रमे "केकयवसातियामुनभोगप्रस्थार्जुनायनाग्नीध्राः" इति । केकयानां राजा अण् यादेरियादेशः । कैकेय तद्देशनृपे । बहुषु तस्य लुक् । केकयाः तद्देशनृपेषु ब०व० । सोऽभिजनोऽस्य अण् । कैकेय तद्देशवासिनि बहुषु तस्य लुक् । उपचारात् २केकयनृपे पु० "सन्तत्य केकयीपुत्रं केकयोधममादिशत्" "सत्कृत्य केकयो राजा भरतस्य ददौ धनम्"रा० अ० ७।२१।१९ । तस्यापत्यम् अण् । तदपत्ये पुंस्त्री० स्त्रियां तु भर्गा० न लुक् । कैकेयी"गच्छ तातानुजाने त्वां कैकेयी सुप्रजास्त्वया" रामा०अ०७०।१७।केकयात् जन्यजनकभावसम्बन्धसंयोगे ङीप् केकयी । ३केकयनृपकन्यायाम् स्त्री द्वापरयुगीये ४नृपभेदे पु० "यदा तु पञ्चालपतिर्महात्मा सकेकयश्चेदिपतिर्वयश्च" भा०भी० १२०अ० युधिष्ठिरं प्रति श्रीकृष्णोक्तिः

केकर त्रि०के मूर्द्ध्नि करोतु नेत्रतारां शीलमस्य कॄ–अच् अलुक् स०। निम्नोन्नताक्षियुक्ते १पुरुषे (टेरा) अमरः "पित्राविवदमानश्च केकरो मद्यपस्तथा"मनुः पाठान्तरे। उपचारात्२तयाचक्षुषि न० "तरक्षौ निहते चैव जायते केकरेक्षणः" शाता० । तद्धेतुतया तरक्षुवधदत्तः "चतुर्वर्षस्तु केकरः" विश्वसारतन्त्रोक्ते चतुवर्षात्मके ३मन्त्रे पु० कुमारशब्दे२१०६पृ० विवृतिः

केका स्त्री के मूर्द्ध्नि कायते कर्म्मणि ड अलुक्स० । मयूररवे अमरः "षड्जसंवादिनीः केकाः" रघुः । ततः अस्त्यर्थे इनिठनौ । केकिन् केकिक तद्युक्ते मयूरे पुंस्त्री इनौ स्त्रियां ङीप् ठनि टाप्

केकावल पुंस्त्री० केकां रवभेदं वलते स्तृणाति वल–अच् केका+वा० अस्त्यर्थे वलच् वा । मयूरे शब्दच० स्त्रियां जातित्वात् ङीप्

केचन अव्य० किमः+पुंसिजसिरूपं ततश्चन सुप्स० । केचिदित्यर्थे एवं चित्–केचिदित्यप्यत । "ये नाम केचिदिह

र्नः प्रथयन्त्वनघ्नाम्'' मालतीमा० । पाणिनिमते द्विपदम् अतएव चिह्नितपदघटितमन्त्रान् पदकाराः द्विपदतया पेठुः

केचुक न० कचु+स्वार्थे क पृषो० । कचुपदार्थे त्रिका० ।

केणिका स्त्री के मूर्द्ध्नि कुत्सितः अणकः स्वोर्थं लोकात् । पटकुट्याम् (तावु) पटमण्डपे हेमच० ।

केत मन्त्रणे निःश्रावणे (यथोचितभाषणे) च अद० चु० उ० सक० सेट् । केतयति ते अचिकेतत् त केतयाम् बभूव आस चकार चक्रे । केतितः सङ्केतः "चलचर्म्माण-मध्याङ्गौ केतयेत् कुलजं द्विजम्'' भा० आनु० १५८५ "केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः'' मनुः । सम्+इच्छाभेदे शब्दस्यार्थबोधकव्यापारे । "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च'' काव्यप्र० "साक्षात् सङ्केतितं योऽर्थम्'' सा० द० अभिप्रायसूचके चेष्टाभेदे (इसारा) सक० "नामगृहीतं कृतसङ्केतम्'' जय० "कान्तार्थिनी तु या याति सङ्केतं साऽभिसारिका'' अमरः

केत पु० कित-आधारे घञ् । १निवासे "अवजकुलिशाङ्कुश केतुकेतैः''भाग०१,१६,२६, भावे घञ् । २वासे च "अवाङ् मुखाः पक्षिगणाः विशन्ति केतार्थमिवाशु वृक्षम्'' भा० कु० ४२२८ । ३प्रज्ञायां निघण्टु० ४संकल्पे "देवासो अनु केतमायन्'' ऋ० ४,२६,२, । "केतं संकल्पम्'' भा० । ५मन्त्रणे च । "आविष्टगा पैजवनस्य केतम्'' ऋ०७,१८,२५, "केतं मन्त्रणम्'' भा० ६ज्ञातरि त्रि० । "प्रकेतोऽसि रुद्रेभ्यः'' ताण्ड्य० ब्रा०१,१९,१०, प्रकेतः प्रकृष्टं ज्ञातासि'' भा० । ७ध्वजे पु०

केतक पु०कित-निवासे ण्वुल् । "केतकः सूचिकापुष्पोजम्बुकः क्रकचच्छदः'' इत्युक्तलक्षणे १वृक्षे । २तत्पुष्पे न० । "स्फुरितभृङ्गमृगच्छवि केतकम्'' माघः । गौरादि० ङीष् । ३केतक्यपि तद्वृक्षे स्त्री । "सुवर्णकेतकी तुल्या लघुपुष्पा सुगन्धिनी'' भावप्र० । "केतकः कटुकः स्वादुर्लघुस्तिक्तः कफापहः'' भावप्र० । केतक्याः पुष्पम् अण् तस्य बहुलं लुक् लुकि स्त्रीप्रत्ययस्यापि लुक् । केतक ४तत्पुष्पे न० । बहुलग्रहणात् पाटलादिवत् स्त्रीप्रत्ययस्य क्वचित् न लुक् । "केतकीपत्रगर्भौ''अत्र येदित्यनुवृत्तौ "न केतक्या सदाशिवम्'' नैष० टी० मल्लिनाथधृतवाक्यम् । आ०त० शिवपूजनाधिकारे भविष्यपु० "केतकी चाति मुक्तश्च कुन्दो यूथी मदन्तिका । शिरीषसर्ज्जबन्धूककुसुमानि विवर्ज्जयेत्'' । एवं शिवपूजने तत्पुष्पस्य निषेधात् राजनि० शिवद्विष्टमिति तत्पर्य्याये उक्तम् । अतएव नैषधे "दिविन्द्रपत्राविगतालिकैतवान्स्मराङ्कचूडामणि-वर्जनार्जितम् । दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम्'' नैष० वर्णितम् वर्णितञ्च तस्याः क्रकचाकारपत्राद्यत्वादि यथा "वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत् । ततोदुराकर्षतया तदन्तकद्विगीयसे मन्मथदेहदाहिना । त्वदग्र-सूचीसचिवः स कामिनो मनोभवः सीव्यति दुर्यशःपटौ । स्फुटञ्च पत्रैः करपत्रमूर्त्तिभिर्वियोगिहृद्दारुणि दारुणायसे । धनुर्म्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन् । प्रसूनधन्वा शरसात्करोति मामिति क्रुधाऽऽक्रुश्यत तेन केतकम्'' । कैतकमित्यत्र अणो न लुक् । पुष्पफलभिन्ने तु नाणो लुक् । "अगमत् कैतकं रजः'' रघुः । केत+स्वार्थे क । ५ध्वजे पु० । "शारोह्यायुधकेतकान्''भा०क०२४अ०अत्र बहुव्रीहौ-कप् इति तु न्यायः

केतन न० कित-भावाधिकरणकर्म्मकरणेषु यथायथं ल्युट् । १निमन्त्रणे, २ध्वजे, ३अम० । ४चिह्ने, ५गृहे हेमच० । ६स्थाने शब्दरत्ना० । ७कृत्ये मेदि० । तत्र निमन्त्रणे "प्रतिगृह्य द्विजोविद्वानेकोद्दिष्टस्य केतनम्'' मनुः । "यावन्तः पतितास्विप्रा जडोन्मत्तास्तथैव च । दैवे वाप्यथ वा पित्र्ये तावद्वा घ्नन्ति केतनम्'' । मनुः वासे "न तत्र वृक्षच्छाया वा पानीयं केतनानि च'' भा०व०१२२६९ । ध्वजे । "भग्नं भीमेन मरुता भवतो रथकेतनम्'' वेणी० "समालम्बे वृषराजकेतनः'' कुमा० "व्यद्रवन्त रणे भीता विकीर्णायुधकेतनाः'' भा०व० १४२०० ।

केतु पु० चाय-तु क्यादेशः । १प्रज्ञायां निरु० २राहोरर्द्ध-देहात्मके ग्रहभेदे ज्यो० ३दीप्तौ हेमच० ४पताकायां चिह्ने ५ज्योतिषे प्रसिद्धे ६उत्पातभेदे च या ब० व० मेदि० तद्भेदश्च वृ० सं० ११अ० उक्तो यथा

"गार्गीयं शिखिचारं पाराशरमसितदेवलकृतं च । अन्यांश्च बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः । दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् । दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात् । अहुताशेऽनलरूपं यस्मिंस्तत् केतुरूपमेवोक्तम् । खद्योतपिशाचालय मणिरत्नादीन् परित्यज्य । ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वथान्तरिक्षास्ते । दिव्या नक्षत्रोत्था भौमाः स्युरतोऽन्यथा शिखिनः । शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् । बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम् यद्येको यदि बहवः किमनेन फलं तु सर्वथा वाच्यम्

उदयास्तमयैः स्थानैः स्पर्शैराधूमितैर्ज्वलितैः । यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकाः । मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः । ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थितः शुक्लः । उदितो वाऽप्यभिदृष्टः सुभिक्षसौख्यावहः केतुः । उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः । इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा । हारमणिहेमरूपाः किरणाख्याः पञ्चविंशतिः सशिखाः । प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः । शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः । आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः । वक्रशिखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः । दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च । दर्पणवृत्ताकारा विशिखाः किरणान्विता धरातनयाः । क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः । शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः सुताः शशिनः । उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः । ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः । अनियतदिक्सम्भवो विज्ञेयो ब्रह्मदण्डाख्यः । शतमभिहितमेकसमेतमेतदेकेन विरहितान्यस्मात् । कथयिष्ये केतूनां शतानि नव लक्षणैः स्पष्टैः । सौम्यैशान्योरुदयं शुक्रसुता यान्ति चतुरशीत्याख्याः । विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः । स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गभवाः । अतिकष्टफला दृश्याः सर्वत्रैते कनकसंज्ञाः । विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः । षष्टिः पञ्चभिरधिका स्निग्धा याम्याश्रिताः पापाः । नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः । बुधजास्तस्करसंज्ञाः पापफलास्त्वेकपञ्चाशत् । क्षतजानलानुरूपास्त्रिचूलताराः कुजात्मजाः षष्टिः । नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः । त्रिंशत्त्र्यधिका राहोस्ते तामसकीलका इति ख्याताः । रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम् । विंशत्याधिकमन्यच्छतमग्नेर्विश्वरूपसंज्ञानाम् । तीव्रानलभयदानां ज्वालामालाकुलतनूनाम् । श्यामारुणा विताराश्चामररूपा विकीर्णदीधितयः । अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः । तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ । द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः । कङ्का नाम वरुणजा द्वात्रिंशद्वंशगुल्मसंस्थानाः । शशिवत् प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः ।

षण्णवतिः कालसुताः कबन्धसंज्ञाः कबन्धसंस्थानाः । चण्डा भयप्रदाः स्युर्विरूपताराश्च ते शिखिनः । शुक्लविपुलैकतारा नव विदिशां केतवः समुत्पन्नाः । एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये । उदगायतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतुः । सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते । तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः । स्निग्धस्तादृक् प्राच्यां शस्त्राख्यो डमरमरकाय । दृष्टोऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः । प्राङ्नभसोऽर्धविचारी क्षुन्मरकावृष्टिरोगकरः । प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरूक्षताम्रार्चिः । नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः । अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया । गच्छेद्यथा यथोदक् तथा तथा दैर्घ्यमायाति । सप्त मुनीन् संस्पृश्य ध्रुवमभिजितमेव च प्रतिनिवृत्तः । नभसोऽर्धमात्रमित्वा याम्येनास्तं समुपयाति । हन्यात् प्रयागकूलाद् यावदवन्तीं च पुष्करारण्यम् । उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम् । अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः । दश मासान् फलपाकोऽस्य कैश्चिदष्टादश प्रोक्तः । प्रागर्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च । क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ । स्निग्धौ सुभिक्षशिवदावथाधिको दृश्यते कनामा यः । दश वर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम् । श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभागगतः । विनिवर्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते । आधूम्रया तु शिखया दर्शनमायाति कृत्तिकासंस्थः । ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते । ध्रुवकेतुरनियतगतिप्रमाणवर्णाकृतिर्भवति विष्वक् । दिव्यान्तरिक्षभौमो भवत्ययं स्निग्ध इष्टफलः । सेनाङ्गेषु नृपाणां गृहतरुशैलेषु चापि देशानाम् । गृहिणामुपस्करेषु च विनाशिनां दर्शनं याति । कुमुद इति कुमुदकान्तिर्वारुण्यां प्राक्शिखो निशामेकाम् । दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति । सकृदेकयामदृश्यः सुसूक्ष्मतारोऽपरेण मणिकेतुः । ऋज्वी शिखास्य शुक्ला स्तनोद्गता क्षीरधारेव । उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्धान् । प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम् । जलकेतुरपि च पश्चात् स्निग्धः शिखयाऽपरेण चोन्नतया । नव मासान् स सुभिक्षं करोति शान्तिं च लोकस्य । भवकेतुरेकरात्रं

दृश्यः प्राक् सूक्ष्मताकरः स्निग्धः। हरिलाङ्गूलोपमया प्रदक्षिणावर्त्तया शिखया। यावत एव मुहूर्त्तान् दर्शनमायाति निर्दिशेन्मासान्। तावदतुलं सुभिक्षं हन्ते प्राणान्तिकान् रोगान्। अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकाम्। सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि। आवर्त्त इति निशार्द्धे सव्यशिखोऽरुणनिभोऽपरे स्निग्धः। यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः। पश्चात् सन्ध्याकाले संवर्त्तो नाम धूम्रताम्रशिखः। आक्रम्य वियत्त्र्यंशं शूलाग्राऽवस्थितो रौद्रः। यावत एव मुहूर्त्तान् दृश्यो वर्षाणि हन्ति तावन्ति। भूपांश्च शस्त्रनिपातैरुदयर्क्षं चापि पीडयति। ये शस्तास्तान् हित्वा केतुभिराधूमितेऽथवा स्पृष्टे। नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्। अश्विन्यामश्मकपं भरणीषु किरातपार्थिवं हन्यात्। बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम्। औशीनरमपि सौम्ये५ जलजाजीवाधिपं तथार्द्रासु। आदित्ये७ऽश्मकनाथं पुष्ये मगधाधिपं हन्ति। असिकेशं भौजङ्गे९ पित्र्ये १०ऽङ्गं पाण्ड्यनाथमपि भाग्ये ११। औज्जयनिकमार्यम्णे १२ सावित्रे १३दण्डकाधिपतिम्। चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्तज्ज्ञः। काश्मीरककाम्बोजौ नृपती प्राभञ्जने १५न स्तः। इक्ष्वाकुरलकनाथो हन्येते यदि भवेद्विशाखासु। मैत्रे १७पुण्ड्राधिपतिर्ज्येष्ठास्वथ सार्वभौमवधः। मूलेऽन्ध्रमद्रकपती जलदेवे २०काशिपो मरणमेति। यौधेयकार्जुनायनशिविचैद्यान् वैश्वदेवे २१ च। नैमिषनृपं २२हन्यात् केकयनाथं २३पाञ्चनदम्२४। सिंहलाधिपं२५ वाङ्गम् २६ किरातं २७अश्विन्यादिषु षट्स्विमान् क्रमशः। उल्काभिताडितशिखः शिवः शिवतरोऽभिदृष्टो यः। अशुभः स एव चोलावगाणसितहूणचीनानाम्। नम्रा यतः शिखिशिखाभिहता यतो वा धूम्रं च यत् स्पृशति तत्कथितांश्च देशान्। दिव्यप्रभावनिहतान् स यथा गरुत्मान् भुङ्क्ते गतो नरपतिः परभोगिभोगान्"।

केतुविशेषाणां कालविशेषादनन्तरमुदयः पराशरवाक्यादिषु ज्ञेयस्तानि यथा

कपालकेतुः "अथादित्यजानां, कपालकेतुरुदयते अमावास्यायां पूर्व्वस्यां दिशि सधूम्रार्च्चिःशिखो नभसो विषयार्द्धचरो दृश्यते। पञ्चविंशवर्षशतं प्रोष्य तीव्र पश्चात् कृतिर्यस्य कुमुदकेतोश्चारान्ते स दृष्टएव। दुर्भिक्षानावृष्टिव्याधिभयं प्रत्युपद्रवान् सृजति। यावतो दिवसान् दृश्यते तावन्मासान्मासैः संवत्सरान् पञ्चप्रस्थं वर्षां धान्यस्यार्घं कृत्वा प्रजानामेकमुपयुङ्क्ते" परा०।

कालकेतुः "अथ दक्षयज्ञे रुद्रक्रोधोद्भवः कालकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोष्य उदयते। पूर्व्वेण वैश्वानरमार्गे इत्यमृतमयस्य मणिकेतोश्चारान्ते शूलाग्ररूक्षं ताम्रारुणां शूलाकारसदृशीं शिखां कृत्वा नभसस्त्रिभागचारी स शस्त्रभयरोगदुर्भिक्षानावृष्टिमरकैः यावन्मासान् दृश्यते तावद्वर्षाणि त्रिभागशेषां प्रजां कृत्वा शारदधान्यस्याढकमर्द्धं कृत्वा चास्तं व्रजति" परा०। तथा च वृद्धगर्गः "ज्येष्ठा मूलमनुराधा या वीथी संप्रकीर्त्तिता। तां च वीथीं समारुह्य केतुश्चेत् क्रीडते भृशम्। दक्षिणाभिनतां कृत्वा शिखां घोरां भयङ्कराम्। शूलाग्रसदृशीं तीक्ष्णां श्यावताम्रारुणप्रभाम्। पूर्व्वेण उदितश्चैव नक्षत्राण्युपधूपयेत्। घोरं प्रजास्तत्सृजति फलं मासे त्रयोदशे। त्रिभागं नभसो गत्वा ततो गच्छत्यदर्शनम्। यावतो दिवसांस्तिष्ठेत् तावद्वर्षाणि तद्भयम्। शस्त्राग्निभयरोगैश्च दुर्भिक्षमरकैर्हताः। घूर्णमानाः प्रजाः सर्व्वा विद्रवन्ति दिशो दश"।

चलकेतुः "अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्य उदितः पश्चिमेनाङ्गुलिपर्व्वमात्रां शिखां दक्षिणाभिनतां कृत्वा कालकेतोश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथोत्तरां व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्राह्मं नक्षत्रमुपसृत्य मनाक् ध्रुवं व्रजन् राशिं सप्तर्षीन् संस्पृश्य नभसोऽर्द्धमात्रं दक्षिणमनु परिक्रम्य अस्तं व्रजति। स स्वर्गे दारुणकर्म्मा स्वर्गप्राप्तित्वाद्देश वक्रास्तमभिनिर्हन्ति लोकमपि च। भूमिं कम्पयित्वा दश मासान् मध्यदेशे भूयिष्ठं जनपदमवशेषं कुरुते। तेष्वपि च क्वचित् क्वचित् शस्त्रदुर्भिक्षमरकव्याधिभयैः क्षिणोत्यष्टादशमासानिति" परा० तथा गर्गः। "क्षुच्छस्त्रमरकव्याधिभयैः संपीडयेत् प्रजाः। मासान् दश तथाष्टौ च चलकेतुः सुदारुणः"।

उद्दालकश्वेतकेतुः ककेतुश्च "अथोद्दालकः श्वेतकेतुर्दशोत्तरं वर्षशतं प्रोष्य भद्रकेतोश्चारान्ते पूर्व्वस्यां दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यस्तेनैव सह द्वितीयः कः प्रजापतिपुत्रः पश्चिमकेन ककेतुर्यूपसंस्थायी युगपद्दृश्येत। ततस्तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीडयेते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं

कुर्य्यात्। तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः” परा०।

काश्यपश्वेतकेतुः “अथ काश्यपः श्वेतकेतुः पञ्चदश वर्षशतं प्रोष्योदितः सोमसुतस्य वप्रकेतोश्चारान्ते याम्यावरुद्धो नभसस्त्रिभागमाक्रम्यापसव्यं निवृत्त्योर्द्ध्वं प्रदक्षिणजटाकारशिखः स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेशे आर्य्यगणानरमदोनामोदीच्यैर्भूयिष्ठस्त्रिभागशेषां प्रजामवशेषयति” परा०।

रश्मिकेतुः “अथ रश्मिकेतुर्विभावसुजः प्रोष्य वर्षशतमाशर्ककेतोश्चारान्ते उदितः कृत्तिकासु धूम्रकेतुः। अथानियतदिक्कालरूपवर्णप्रमाणसंस्थानो धूमकेतुः प्ररभविष्यतां देशानां राज्ञां जनपदानाञ्च वृक्षपर्वतवेश्मध्वजपताकाशस्त्रवर्म्मायुधावरणरथनागोष्ट्रपुरुषशयनासनभाण्डेषु च दृश्यते। स एव दिवि स्निग्धो निर्म्मलः प्रदक्षिणशिखो गजंनागवीथीनामुत्तरेण व्रजन् सुभिक्षक्षेमारोग्यं चावहति। दशैकविंशतिद्विषष्टिशतधा वा दर्शनमिच्छन्ति मुनयो धूमकेतोस्तस्य च प्रागुदयान्निमित्तान्यर्वाचीनचलनमग्नेः प्रभा मत्स्यप्रधूपनं दिशां शीतोष्णविपर्य्यय इति व्यभिचाराश्च सम्भवश्च” परा०।

जलकेतुः “अथ जलकेतुः पैतामहः यश्च चलकेतोर्नवमासावशिष्टे कर्म्मणि कृते प्रवर्त्तयति। पश्चिमेनोदितः स्निग्धः सुजातोऽनुपश्चिमाभिनतः। स च शिखी नव मासान् क्षेमसुभिक्षारोग्याणि प्रजाभ्यो धत्ते अन्यग्रहकृतानां चाशुभानां व्याघातायेति”। परा०

भवकेतुः “अथ जलकेतोः कर्म्मसमाप्तौ धूम्रादयः शीतान्ताःअष्टौ प्रादुर्भवन्ति तत्र त्रयोदश चतुर्द्दशाष्टादश वर्षान्तात् दृश्यन्ते सुभिक्षक्षेमाविपर्य्यया विपरीताः क्षुद्रजन्तूनाञ्च वधाय, तेषामष्टानां कर्म्मण्यतीते भवकेतुर्दृश्यते। पूर्वेणैकरात्रं यावत् कृत्तिकानामन्तरतो वा तत्प्रमाणया स्निग्धपारुष्याभया सिंहलाङ्गूलसंस्थानया प्रदक्षिणताम्रया शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षाय। रूक्षः प्राणहराणाञ्च रोगाणां प्रादुर्भावायेति” परा०

आवर्त्तकेतुः “अथावर्त्तकेतुः श्वेतकेतोः कर्म्मण्यतीतेऽपरेऽर्द्धरात्रेऽसव्योदितारुणाभया प्रदक्षिणेन ताम्रया शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् अतीव सुभिक्षं नित्यधर्म्मोत्सवं जगत्” परा०

संवर्त्तककेतुः “अथ संवर्त्तको वर्षसहस्रमष्टोत्तरं प्रोष्य पश्चिमेनास्तं गते सवितरि सन्ध्यायां दृश्यते तन्वीं ताम्ररूपां शूलाभां धूम विमुञ्चन्ती दारुणां शिखां कृत्वा नभस्त्रिभागमाक्रम्य यावन्मुहूर्त्तान् निशि तिष्ठति तावद्वर्षाणि हन्ति परस्परं शस्त्रौघमपि पार्थिवाः। यानि नक्षत्राणि समाश्रयति यत्र वोदेति तानि दारुणतरं पीडयति तदाश्रितांश्च देशानिति”। परा०। तथा गर्गः “येषां नक्षत्रविषये रूक्षः सज्वाललोहितः। दृश्यते बहुमूर्त्तिश्च तेषां विद्यात् महाभयम्। अर्घशस्त्रपारुष्यकोपं दुर्भिक्षमेव च। कुर्य्याच्च पतिपीडाञ्च स्वचक्रपरचक्रतः। यत्र तिष्ठति नक्षत्रे प्रवासं यत्र गच्छति। धूपयेद्वा स्पृशेद्वापि हन्याद्देशांस्तदाश्रयान्। यस्याभिषेकनक्षत्रं जन्मभं कर्म्मभं तथा। देशर्क्षं पीडयेद्वापि स शान्तिपरमो भवेत्। स्निग्धः प्रसन्नो विमलः प्रदक्षिणशिखस्तथा। दृश्यते येषु देशेषु शिवं तेषु विनिर्द्दिशेत्” परा०

सर्वशेषः। “यस्यां दिशि समुत्तिष्ठेत् तां दिशं नाभियोजयेत्। यतः शिखा यतो धूमस्ततो यायान्नराधिपः। प्रतिलोमोयतः केतुर्यया ध्यायति पार्थिवः। सामान्यशाहनबलस्तत्राशमभिगच्छति” परा०

अथ मासविशेषेषु नामविशेषास्तत्फलन्याह समयामृते “चैत्रवैशाखयोर्म्मध्ये कौवेरांस्तु विनिर्द्दिशेत्। उच्छ्रितैर्यूपवेदीभिरुच्छ्रितैर्ध्वजतोरणैः। हविर्धूमाकुला तत्र दृश्यते च वसुन्धरा। ज्यैष्ठे चैव तथाषाढे वायुपुत्रांश्च निर्द्दिशेत्। वान्ति चैव तथा वाता महायुद्धं महाभयम्। श्रावणप्रौष्ठपदयोर्वारुणांस्तु विनिर्द्दिशेत्। आरोहयन्ति ते मेघान् पूर्णां कुर्य्युर्वसुन्धराम्। धान्यं समार्घतां याति ईतयो न भवन्ति च। आश्विने कार्त्तिके चैव सूर्य्यपुत्रान् विनिर्द्दिशेत्। ततो दहति तीक्ष्णांशुः सर्वान्नानि दिवाकरः। म्रियन्ते च तदा गावः श्वापदाश्च विशेषतः। मार्गशीर्षे च पौषे च वह्निपुत्रान् विनिर्द्दिशेत्। शीघ्रं भवति दुर्भिक्षं हाहाभूतमचेतनम्। माघे च फाल्गुने चैव यमपुत्रान् विनिर्द्दिशेत्। छर्द्दिर्ज्वरातिसारश्च ग्लानिश्चैवाक्षिवेदना”।

नक्षत्रभेदेन देशभेदे तदुपद्रवादि तत्रैवोक्तं यथा “कृत्तिका रोहिणी सौम्य पृथिव्या मध्यमुच्यते। केतवो ह्यत्र दृश्यन्ते आग्नेया दश पञ्च च। आग्नेयेषु च दृष्टेषु लोकानां संक्षयो भवेत्। नित्योद्विग्नाः प्रजाः सर्वा भवन्ति हि न संशयः। पुनर्व्वसुस्तथा पुष्यः

पृथिव्याः पूर्ब्बमुच्यते। केतवो ह्यत्र दृश्यन्ते रौद्रास्तेऽप्येकविंशतिः। यदा रौद्राः प्रदृश्यन्ते दुर्भिक्षं निर्द्दिशेत्तदा। चूर्णन्ते च प्रजाः सर्वा मृत्युक्षुद्रोगपीडिताः। अश्लेषामित्य१०भाग्यानि ११विद्यादृक्षिणपूर्व्वतः। केतवो ह्यत्र दृश्यन्ते औद्दालकिसुता दश। सुभिक्षं क्षेममारोग्यं सुवृष्टिः शस्यसम्पदः। आर्य्यमृणादीनि १२।१३।१४च त्रीणि विद्याद्दक्षिणभागतः। केतवो ह्यत्र दृश्यन्ते काश्यपेयाश्चतुर्द्दश। अनावृष्टिभयं घोरं प्रजानामतिदारुणम्। स्वाती विशाखा मित्रश्च १७भागो दक्षिणपश्चिमः। केतवो ह्यत्र दृश्यन्ते चत्वारो मृत्युसम्भवाः। दुर्भिक्षं मरकं घोरमनावृष्टिस्तथैव च। उपद्रवश्च भूतानां तदा भवति दारुणः। ज्येष्ठा मूलमषाषाढा भाग उत्तरपश्चिमः। केतवो ह्यत्र दृश्यन्ते नवते सोमसम्भवाः। सुभिक्षञ्च सुवृष्टिश्च मही यज्ञोत्सवाकुला। उत्तरा २१श्रवणा चैव नक्षत्रं वसुदैवतम्२३। केतवो ह्यत्र दृश्यन्ते माहेयाः पञ्चविंशतिः। माहेयेषु च दृष्टेषु लोकानां संशयो ध्रुवम्। तदा राजसहस्राणां मही पिबति शोणितम्। वारुणञ्चैव २४ नक्षत्रं तथा भाद्रपदद्वयम्। केतवो ह्यत्र दृश्यन्ते वारुणास्त्रयएव ते। जर्म्मिकेतुः श्वेतकेतुर्धूमकेतुस्तृतीयकः। जर्म्मिकेतुर्यदा दृश्येत्तदाप्युदकजं भयम्। श्वेतकेतुर्यदा दृश्येत् श्वेतास्थिं कुरुते महीम्। तदा मानुषमांसानि भक्षयन्तीह मानुषाः। क्षुद्भयार्त्तं जगत् कृत्स्नं चक्रवद्भ्रमते तदा। धूमकेतुर्यदा दृश्येत्तस्य वक्ष्यामि कथणम्। स हन्ति शिखया योधान् राजानं मन्त्रिणं जनान्। रेवत्याश्वयुजश्चैव नक्षत्रं यमदैवतम्२। केतवो ह्यत्र दृश्यन्ते यमपुत्त्रास्त्रयोदश। यमपुत्त्रेषु दृष्टेषु लोकानां संशयो ध्रुवम्। चतुर्व्विधानां भूतानां संशयो जायते महान्"।

तेषां शान्तिस्तत्रैवोक्ता यथा

"केतूत्पाते तु सर्व्वस्मिन् समये समुपस्थिते। महाशान्तिं प्रकुर्व्वीत विविधां भूरिदक्षिणाम्। धनं वा सर्व्वमुत्सृज्य मृत्योर्म्मुच्येत बन्धनात्। दद्याद्वा पृथिवीं कृत्स्नां राजा शान्तिं नियच्छति। अकस्माद्दृश्यते केतुरुदयेऽस्तमयेऽपि वा। निहन्त्यन्तःपुरे राज्ञो ज्वरः पित्तोद्भवो भवेत्। दधिमधुघृताक्तानां पुष्पाणामयुतं ततः। जुहुयादिन्द्रनीलस्य केतुं दद्याद्द्विजातये। भूषितं हेमरत्नाद्यैस्ततः सम्पद्यते शुभम्"।

"ग्रहे रवीन्द्वोरवनीप्रकम्पे केतूद्गमे" इत्यादिना ज्यो० त० तदुद्गमेऽकाल उक्तः। "व्योम्नीव भ्रुकुटीच्छलेन वदने केतुश्चकारास्पदम्" माघः

नवग्रहमध्ये तस्य ग्रहत्वञ्च पी० धा० व्यवस्थापितं यथा "किं राहुकेत्वोर्ग्रहत्वाभावात् क्रूरग्रहत्वाभावाद्वा दृश्यग्रहत्वाभावाद्वा कर्त्तरी नास्ति नाद्यः। राहोर्ग्रहत्वं श्रौतस्मृतिप्रामाण्यसिद्धम्। तथा हि। "स्वर्भानुर्हवा आसुरिः सूर्य्यन्तमसा विव्याधेति" माध्यन्दिनी श्रुतिः। कश्यपश्च "छिन्नोऽपि विष्णुचक्रेण सुधामयशिरास्तमः। वैशवस्य वरेणासौ तथापि ग्रहताङ्गतः" इति। नारदोऽपि "अमृतास्वादनाद्राहुः शिरश्छिन्नोऽपि सोऽमृतः। विष्णुना तेन चक्रेण तथापि ग्रहताङ्गतः" इति। यद्यपि "अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः। शीघ्रमन्दोच्चपाताख्या ग्रहाणाङ्गतिहेतवः" इति सूर्यसिद्धान्ते पातानामदृश्यत्वोक्त्या तथापि चन्द्रपातस्य ग्रहत्वं वास्तविकमेव। "स्वभुवे कुमुदिनीपतिपातं राहुमाहुरिह केऽपि तमेवेति, भास्कराचार्योक्तेश्च। अतएव राहोर्नैरृतदिक्स्वामित्वं दानञ्च संहिताकारैरभिहितम्। राहोरर्द्धशरीरभागः केतुसंज्ञ इति पुराणप्रसिद्धम्। न द्वितीयः। ननु केन वचनेन राहुकेत्वोः क्रूरत्वमुच्यते। न च "क्षीणेन्द्वर्कयमाराः पापास्तैः संयुतः सौम्यः" इति वराहेणोक्तम् तदुपादानाभावात्। किञ्च पापग्रहत्वानभिधानाच्छुभग्रहत्वमेवावसीयते। न च "गुरुबुधशुक्राः सौम्याः सौरिकुजार्का निसर्गतः पापाः। शशिजोऽशुभसंयुक्तः क्षीणोऽपि निशाकरः पापः" इति कल्याणवर्म्मवाक्ये शुभग्रहमध्ये गणनाभावात् क्रूरत्वमिति वाच्यम्। पापग्रहमध्येऽपि गणना नास्तीति शुभग्रहत्वस्यापि दुर्वचत्वात्। उभयभ्रष्टत्वेन वा नरसिंहवज्जात्यन्तरस्यापि वक्तुं शक्यत्वादिति चेत्। सत्यम् "सूर्यभौमशनिराहुकेतवः पापसंज्ञखचराः क्षयिचन्द्रः। पूर्णचन्द्रगुरुशुक्रसोमजाः सर्वकर्मसु हि सौम्यखेचराः" इति वशिष्ठेन कण्ठतः क्रूरत्वाभिधानादस्ति क्रूरत्वम्। स्वरोदयेऽपि "बुधशुक्रेन्दुजीवाश्च सदा सौम्यग्रहामताः। शन्यर्कराहुमाहेयाः केतुः क्रूरग्रहा मताः" इति। न तृतीयः ननु स्वयमशक्तः कथं परान् साधयिष्यतीति न्यायात् सदा चाक्षुषदर्शनाभावमितस्य राहोः केतोर्वा फलदातृत्वा

सामर्थ्यादिति चेन्न अमावास्यायां प्रतिपदि वोत्पन्नस्य लग्नादिदुष्टस्थानस्थितचन्द्रस्यारिष्टमशुभफलजनकं भवन्मते निरर्थकमापद्येत। ननु "षष्ठेऽष्टमे चन्द्रः सद्योमरणाय पापसंदृष्टः। अष्टाभिः शुभदृष्टोमिश्रैर्वर्षैस्तदर्द्धेनेति" वराहोक्तेर्भविष्यतीति चेत् इहापि "स्वच्छन्दत्वं कदशनरतिर्वल्लभत्वं विशील्यं व्याधिः स्त्रीभीतिरथ सुखं गर्भपातप्रवृत्तिः। द्यूतासक्तिर्भवति रविजे वैभवे वक्त्ररोगः स्वर्भानौ वाप्यथ शिखिनि वा लग्नभावादिसंस्थे" इति वसिष्ठपद्ये शनिवद्राहुकेत्वोः शुभाशुभफलदातृत्ववचनं किं वायसैर्भक्षितम्। सारावल्याञ्च "राहुश्चतुष्टयस्थो निधनाय निरीक्षितो भवति पापैः। वर्षैर्वदन्ति दशभिः षोडशभिः केचिदाचार्याः। अजवृषकर्कटलग्ने रक्षति राहुः समस्तपीडाभ्यः। पृथ्वीपतिः प्रसन्नः कृतापराधं यथा पुरुषमिति" राहोः शुभाशुभफलाभिधानमस्ति। ननु वराहेण राहोः फलं कुत्रापि नोक्तमिति चेन्न "सोपप्लवे शशाङ्के सक्रूरे लग्नगे कुजेऽष्टमगे। माता सार्द्धं म्रियते चन्द्रवदर्केण शस्त्रेणेति" वराहपद्येऽपि राहुकेत्वोरन्यतराभिधानमस्ति! तथा हि किमिदं चन्द्रग्रहणं राहुसाहित्यकृतमुत केतुसाहित्यकृतमिति तत्र ग्रहणीयं, चन्द्रे लग्नगे सक्रूरे क्रूरसाहित्यमभिहितम् क्रूरास्तु सूर्यभौमशनय एव विवक्षिता इति चेत् सूर्यस्य तावद्योगाभावश्चन्द्रग्रहणे हि सप्तमराशिस्थत्वात्। भौमस्यापि योगः, कुजेऽष्टमग इत्युक्तेर्नास्ति। पारिशेष्याच्छनेरेव योगोवाच्यः। तत्र स्पष्टत्वार्थं शनिग्रहणमेव कस्मान्नाकारि। अतः सामान्यवाचिनः क्रूरशब्दस्य प्रयोगाद्राहुकेत्वोरन्यतरयोगोऽपि विवक्षितोऽपरस्य (सूर्य्यस्य) सप्तमराशिस्थत्वात्। योग एकराशिस्थत्वे स्यान्न तु भिन्नराशिस्थत्वे इति। एवं ग्रहणसम्बन्धिलग्नस्थसूर्यारिष्टेऽपि राहुकेत्वोरन्यतरयोगो व्याख्येयः। अतएव "राहुस्तमोऽसुरस्तुरश्च शिखीति केतुरिति पर्य्यायाभिधानं कृतम्। विवाहपटलेऽपि "मरणं लत्ता राहोः कार्यविनाशं भृगोर्वदन्तीति" कण्ठतो राहुलत्ताऽप्युक्ता। तस्माद्वराहमतेऽपि राहुकेतुयोगो विवक्षित एव। एवं सति जातके यथा राहोः शुभाशुभफलदातृत्वं वचनाद्बोध्यते। तथा विवाहेऽपि प्रागुक्तवसिष्ठवाक्यादपि तत्र तुल्यन्यायत्वात् कर्त्तरीदोषे सव्यापसव्यत्वे फलदातृता त्वयापि वक्तव्यैव। ननु "पापयोः कर्त्तरीकर्त्रोः शकुनीचण्टकस्थयोः। यदा त्वस्तगयोर्वापि कर्त्तरी नैव दोषदेति" कश्यपादुक्तेरस्तङ्गतत्वेन राहुकेत्वोः कर्त्तरीदोषो नास्तीति चेत् भ्रान्तोऽसि शृणु। "सम्भवे व्यभिचारे च स्याद्विशेषणमर्थवदिति" न्यायादस्तङ्गतत्वविशेषणं भौमस्य क्रूरयुक्तबुधस्य शनेर्वेति त्रयाणामेव सम्भवति न सम्भवति च। सूर्यस्तु नित्योदित एव राहुकेतू नित्यास्तमिताविति व्यभिचाराभावात्त्रयाणामेव विशेषणम्। किञ्च किमस्तगत्वं क्षितिजसन्निधिकृतमुत सूर्यसान्निध्यकृतं वेति। तत्र क्षितिजसन्निधिकृतं यत्तत् सूर्यादिसकलग्रहसाधारणम्। तथा सत्यस्तगतत्वविशेषणवैयर्थ्यं प्रागुक्तन्यायात्। राहोस्तु नारदादिवाक्याच्छिरोरूपमण्डलावगतेः "इन्दर्कमण्डलाकृतिरसितत्वात् किल न दृश्यते गगने" इति वराहोक्तेस्तमोरूपत्वात्तादृक्स्वरूपानुपलब्धेरगोचरत्वपरम्। स्थानमप्यस्य चन्द्रविमण्डक्रान्तिमण्डलस्वस्तिके, यदाह केशवार्कः "वेध्रस्य चास्य शशभृद्विमण्डलक्रान्तिमण्डलमिलच्चतुःपथः" इति। अतएव न विद्यन्ते गावः किरणायस्येत्यगुरन्वर्थताध्यवसीयते। अथ यदि सूर्यसन्निधिकृतमित्युच्येतेति चेत् न इतरग्रहवद्राहोरप्युदयास्तप्रसिद्ध्यभावात्। किञ्च कालांशानभिधानात् कदोदितः कदास्तमितश्चेति निर्णेतुमशक्यत्वात्। एवं केतोरप्येतत् द्रष्टव्यम्। ननु केतूदयोद्भुतोत्पातादौ प्रत्यक्षतोदृश्यत इति चेन्न तस्यानियतदिक्प्रभवत्वात् अनियतनक्षत्रप्रभवत्वाच्च। किञ्च केतूत्पातो हि लोके दुरदृष्टसूचकः अनियतेन बहुना स्वल्पेनापि वा कालेन भवेत्। सूर्यसान्निध्यकृतोदयास्तौ तु नियतकालावेवेति तयोः केत्वोर्भेदः स्वीकर्त्तव्यः"

केतुचक्रादिकं ज्यो० त० उक्तम् "सिंहस्त्रिकोणं धनुरुच्चसंज्ञं मीनोऽस्य गेहं शुक्रशनी विपक्षौ। सूर्यारचन्द्राः सुहृदः समानौ जीवेन्दुजौ षट्शिखिनः परांशाः"। तस्यानवर्ण्णगोलदेशादि ग्रहयज्ञशब्दे वक्ष्यते। विंशोत्तरीयदशायां तद्दशामानं ७वर्षाः तच्च दशाशब्दे वक्ष्यते। तस्य राशिभोगकालश्च १८मासाः। "केतुपप्लवभौममन्दगतयः षष्ठे तृतीये शुभाः" ज्यो० त०। ७दानवभेदे पु० केतुवीर्यशब्दे उदा० दृश्यम्

केतुकुण्डली स्त्री पञ्चस्वरोक्ते जन्मनक्षत्रभेदवशेन जन्मावध्येकैकवर्षे एकैकग्रहविशेषस्वामित्वज्ञापके चक्रभेदे सा च तत्रैव दर्शिता यथा

"अर्को बुधः कुजोजीवः सोमः शुक्रस्तथैव च। राहुः शनैश्चरश्चैव ज्ञातव्या केतुकुण्डली। अर्कसौम्यान्तरे केतुः कुजजीवान्तरेऽपि च। सोमशुक्रान्तरे केतूराहुसौरान्तरे तथा। दद्यादुत्तरभाद्रादि अष्टाविंशतिऋक्षकम्। त्रीणि त्रीणि च रव्यादौ एकैकम् केतुषु स्मृतम्। जन्मर्क्षात् प्रतिनक्षत्रं जन्माद्यब्दे प्रकीर्त्तिताः"। अयमर्थः यदि २६।२७।१ नक्षत्रेषु जन्म तदा सूर्य्यः प्रथमवर्षेशः। तदुत्तरं केतुप्रभृतयः शन्यन्ताः२। भरण्यां जन्मनि केतुः प्रथमं वर्षेशस्ततः बुधादयः सूर्य्यान्ताः।३।४।५ ऋक्षेषु बुधः प्रथमवर्षेशः ततः कुजादयः केत्वन्ताः।६।७।८। कुजः प्रथमं ततः केत्वादयः बुधान्ताः। ९ऋक्षे केतुः ततोजीवादयः कुजान्ताः १०।११।१२ऋक्षेषु जीवः ततः सोमादयः केत्वन्ताः। १३।१४।१५। सोमः ततः केत्वादयः जीवान्ताः। १६ऋक्षे केतुः ततः शुक्रादयः सोमान्ताः। १७।१८।१९।ऋक्षेषु शुक्रः ततः राहुप्रभृतयः केत्वन्ताः। २०।२१।०।२२ ऋक्षेषु राहुः ततः केत्वादयः शुक्रान्ताः २३केतुः ततः शन्यादयःराह्वन्ताः।२४।२५।२६ऋक्षेषु शनिः ततः सूर्य्यादयः केत्वन्ताः। सर्व्वत्र आरोहक्रमानन्तरमवरोहक्रमो ग्राह्यः। एवं द्वादशसु वर्षेषु तेषु पुनः सूर्य्यादीनां वर्षाः। ग्रहाणां फलविशेषस्तु केतुपताकाचक्रोक्तदिशोह्येयः। अत्र च बहुषु स्थानेषु केतोरवस्थानेन केतुप्राधान्यात् केतुकुण्डलीत्वम्।

केतुधर्म्मन् पु० त्रिगर्त्तेश्वरसूर्य्यवर्म्मानुजे नृपभेदे "केतुधर्म्मा तु तेजस्वी तस्यैवावरजो युवा। युयुधे भ्रातुरर्थाय पाण्डवेन यशस्विना" भा० आश्व० ७४अ०

केतुपताका केतोः पताकेव। जन्मनक्षत्रभेदेन जन्मावध्येकैकवर्षेशग्रहविशेषज्ञापके चक्रभेदे सा च पञ्चस्वरायां दर्शिता यथा

"अर्केन्दू कुजसौम्यार्किगुरवः स्युर्यथाक्रमम्। राहुः शर्वो भृगुश्चेति पताकाप्रभवा ग्रहाः। वामं केतुपताकायां कृत्तिकादिपरिभ्रमात्। जन्मर्क्षं खेचरे यत्र जन्माद्यब्दास्ततः क्रमात्। आदित्यसौरयोर्वेधो वेधश्चन्द्रगुरेज्ययोः। कुजराह्वोर्भृग्वोश्च केतुः किञ्चिन्न विध्यति" फलमाह। "रवेरब्दे मनुष्याणां भवेत् सर्व्वत्र निष्फलम्। शिरःशूलं ज्वररोगेहदाहो विघ्नः पदेपदे"। र०। "चन्द्रस्याब्दे लभेद्द्रौव्यं सुवर्णाभरणानि च०। कृषिः फलवती सिद्धिः सर्व्वत्रान्यैश्च पूज्यते" च०। "संवत्सरे महीजस्य कालादिव बिभेति च। गृहदाहोऽर्थहानिश्च चौरतो राजतोऽपि वा" म०। "बुधस्याब्दे सुगम्यः स्याज्ज्ञानादेवाधिपो भवेत्। बु० स्वर्णरौप्यधनं दानं पुण्यकर्मणि मानसम्" बु०। "मन्दस्याब्दे भवेद्दाहो बन्धनादि प्रपीडनम्। धनहानिः प्रहारश्च कलिः स्वजनबन्धुभिः" श०। "नाकनाथगुरोरब्दे बहुलोत्पत्तिसम्पदः। कृष्णलोहितवस्त्रेण स्तुतो भवति भूतले"। वृ०। राहुकेत्वोः सदा वन्धो नौका विप्लवते जले। व्रणं हस्ते पदे देहे स्थानं कर्त्तुं क्षेमेण च"। रा०के०। "दानवेन्द्रगुरोरब्दे महद्भिर्विभवैर्वृतः। गजाश्ववाहनैर्युक्त उत्साहश्च दिने दिने" शु०। अन्ये तु पठन्ति "रविर्भ्रामयते देशं नरं दुःखसमन्वितम्; सन्तापरोगं शोकञ्च करोति कृशतां तनोः" र० "बहुवित्तसुखं नित्यं बन्धुमित्रसमागमम्। समस्तास्पदसंपूर्णं चन्द्रः कुर्य्यात् दिनेदिने" च०। "मङ्गलो हन्ति सद्भावं क्रूरकर्म्मणि योजयेत्। व्रणं रोगश्च दुःखञ्च सन्तापञ्च मुहुर्मुहुः" म०। "अर्थलाभं जयं सौख्यं राजपूजाञ्च सम्पदम्; ददाति विपुलां लक्ष्मीं बुधो विद्यां वरस्त्रियम्" बु०। "रोगश्चार्थविनाशश्च कलहं भुजगाद्भयम्। स्थानत्यागं शनिः कुर्य्याज्जीवनं प्रति संशयम्" श०। "सुवर्णमणिमाणिक्यरत्नादिविपुलं धनम्। कन्यारत्नसमायोगं गुरुः कुर्य्याद्दिने दिने" वृ०। "राहुःशोणितसंस्रावं रोगशोकादिसंकुलम्! विदेशगमनं कुर्य्यात् वह्निशारिभयान्वितम्" रा०। "विग्रहं बन्धुभिः सार्द्धं रोगशोकादिसङ्कुलम्। व्याधिपीडां करोत्युच्चैः केतुर्वित्तविनाशनः" के०। "गजाश्ववाहनैर्युक्तं महद्भिर्विभवैर्वृतम्। वराङ्गनासमायुक्तं भृगुः कुर्य्याद्दिने दिने" शु०। "खयुग्मं२० शून्यबाणौ ५०च वसुयुग्मञ्च २८ षट्शरौ ५६। रामाग्नी ३३रामषट्के ६३। च विंशश्च सप्ततिस्तथा। विंशमेतेऽन्तर्दिवसाः केत्वाद्यर्कादिषु क्रमात्। शुभानां शोभना ज्ञेया अशुभानामशोभना। शुभानामशुभानाञ्च यत् फलं वत्सरे कृतम्। तत्फलं निर्द्दिशेत् सर्व्वं तेषामन्तर्दिनेष्वपि। वर्षे वर्षे रवेः स्वीयं प्रथमं दिनविंशकम्। ततश्चन्द्रस्य पञ्चाशदेवं शुक्रान्तमादिशेत्। शिशोर्वर्षे विधोः स्वीयं प्रथमं वत्सरे दिनम्। ततो भौमस्य वस्वग्नि एवं रव्यन्तमादिशेत्। कुजस्याब्दे कुजस्यान्तरष्टाविंशं निजं दिनम्। ततो बुधस्य षट्पञ्चाशदेवं चन्द्रान्तमादिशेत्। बुधादीनाञ्च सर्व्वेषामेवमेव क्रमेण तु। कुर्य्यादन्तर्दशाभागं प्रोक्तया दिनसंख्यया"। ज्योतिस्त० तल्लेखनप्रकारो दर्शितो यथा

"रविश्चन्द्रः कुजः सौम्यः शनिर्जीवस्तमोध्वगुः । इन्द्रेशाद्यष्टरेखासु मध्ये केतुरिमेऽष्टपाः । कृत्तिकादि त्रिरावृत्तिर्यथा केतौ मघा भवेत्" यथा १र०।४च०।५म०।६बु०।७श०।८वृ०।९रा०।१०केतुः । ११शु०, १२र०। १३च०।१४म० १५बु० १६श० १७वृ० १८रा० १९केतुः २०शु०। २१र० २२च० २३म० २४बु० २५श० २६वृ० २७रा० :केतुः २शु०। एवं जन्मनक्षत्रानुसारेण प्रथमादिवर्षेषु रव्यादयः शुक्रान्ताः दशमादिषु पुनः रव्यादयः शुक्रान्ताः। एवं चन्द्रस्य प्रथमाब्दाधीशत्वे रव्यन्ताः एवं क्रमेण सर्व्वत्र योज्यम्

"पताका कुण्डली केतोः कुण्डली च बृहस्पतेः । सर्व्वत्र पापसंयोगे संशयो जायते महान्" पञ्चस्वरा

केतुमत् त्रि॰केतुरस्त्यस्य मतुप् । १चिह्नादियुक्ते २प्रज्ञानयुक्ते "केतुमद्दुन्दुभिर्वावदीति" ऋ॰६,४७,३०,"केतुमत् प्रज्ञानवत्" भा॰ स्त्रियां ङीप् । ३काशीराजदिवोदासवंश्ये नृपभेदे पु॰ । "क्षेमस्य केतुमान् पुत्रः सुकेतुरस्य चात्मजः" हरिवं॰ ३२अ॰ दिवोदासवंशोक्तौ । वासुदेवमहिष्याः सुनन्दाया निवासरूपे ४प्रासादभेदे पु॰ "सुनन्दाया निवासोऽसौ प्रशस्तः सर्वदैवतैः । महिष्या वासुदेवस्य केतुमानिति विश्रुतः" हरिवं॰ १५७अ॰ ५धन्वन्तरिपुत्रभेदे "धन्वन्तरिर्दीर्घतमस आयुर्वेद प्रवर्त्तकः । यज्ञभुग्वासुदेवांशः स्मृतिमात्रार्त्तिनाशकः । तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्तथा" भाग॰ ९।१७।५ ६दानवभेदे । "तथा गगनमूर्द्धा च वेगवान् केतुमांश्च यः" भा॰आ॰७दानवोक्तौ । सुमालिनो राक्षसस्य भार्य्यायां स्त्री "सुमालिनोऽपि भार्य्यासीत् पूर्णचन्द्रनिभानना । नाम्ना केतुमती राम !" रामा॰ उ॰ ४स॰ । "असमे सजौ सगुरुयुक्ता केतुमती समे भरनगाद्गः" वृ॰ र॰ उक्तलक्षणे ८विषमवृत्ते छन्दोभेदे स्त्री ।

केतुमाल पु॰ । १आग्नीध्रनृपपुत्रभेदे २तन्नामके जम्बुद्वीपस्थे वर्षभेदे । तद्विवृतिः उत्तरकुरुशब्दे १०९४पृ॰ । कुरुशब्दे च २१२२पृ॰दृश्यम् । "मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते ! । जम्बुखण्डे च तत्रैव महाजनपदोनृप!" भा॰ भी॰ ६अ॰ । ३अवन्तिदेशस्थे नदीभेदे स्त्री "अवन्तिषु प्रतीच्यां वै कीर्त्तयिष्यामि ते दिशः" इत्युपक्रमे "केतुमाला च मेध्या च गङ्गाद्वारञ्च भूमिप !" भा॰ व॰ ८९ अ॰ ।

केतुमालि(लिन्) पु॰ शम्बरदैत्यस्य सेनाधिपभेदे। "दुर्द्धरः केतुमाली च शत्रुहन्ता प्रमर्द्दनः" इत्युपक्रमे "एतैः परिवृतो योधैः शम्बरः प्रययौ तदा" । "तेनैव तस्य चिच्छेद केतुमालेः शिरस्तदा" हरिवं॰ १६४अ॰ ।

केतुरत्न न॰ केतोः रत्नम् । वैदूर्य्यमणौ (लसुनिया) राजनि॰ तस्य तत्स्वामिकत्वात् तथात्वम् ।

केतुवीर्य्य पु॰ दानवभेदे । "विक्षोभणश्च केतुश्च केतुवीर्य्यः शतह्रदः" हरिवं॰ ३अ॰ दानवोक्तौ ।

केतुवृक्ष पु॰ केतुभूतोवृक्षः । मेरोश्चतुर्दिक्षु वर्त्तमानविष्कम्भपर्वतमन्दरादीनां चिह्नरूपे वृक्षभेदे । "विष्कम्भशैलाः किल मन्दरोऽस्य (मेरोः) सुगन्धशैलः (गन्धमादनः) विपुलः सुपार्श्वः। तेषु क्रमात् सन्ति च केतुवृक्षाः कदम्बजम्बूवटपिप्पलाख्याः" सि॰ शि॰ । "विष्कम्भा रचिता मेरोर्योजनायतमुच्छ्रिताः । पूर्वेण मन्दरोनाम दक्षिणे गन्धमादनः। विपुलः पश्चिमे भागे सुपार्श्वश्चोत्तरे स्मृतः । कदम्बस्तेषु जम्बुश्च पिप्पलोवट एव च । एकादशशतायामाः पादपाः गिरिकेतवः" विष्णु पु॰

केतुशृङ्ग पु॰ पौरवे नृपभेदे । "बलबन्धुर्निरामर्द्दः केतुशृङ्गो बृहद्बलः" भा॰आ॰ १अ॰

केदर पु॰के दृणाति दृ—अच् कैर्विदीर्य्यते दृ—अप् वा । १वृक्षभेदे अमरटीकायां भानुदीक्षितः । २टेरके केकरे शब्दचि॰

केदार पु॰ के शिरसि दारोऽस्य केन जलेन दारोऽस्य वा नि॰ एत्वम् । हिमालयस्थे पर्व्वतभेदे तत्स्थे २शिवलिङ्गभेदे न॰ तन्माहात्म्यादि स्कन्दपु॰ केदारखण्डे दृश्यं तस्यैव काशीक्षेत्रे आविर्भावात् काशीस्थे ३लिङ्गभेदे च न॰ तत्कथा काशीख॰ ७७अ॰ यथा

"श्रीपार्व्वत्युवाच। "नमस्ते देवदेवेश ! प्रणमत्करुणानिधे ! । वद केदारमाहात्म्यं भक्तानामनुकम्पया । तस्मिन् लिङ्गे सदा प्रीतिस्तव काश्यामनुत्तमा । तद्भक्ताश्च जना नित्यं देवदेव ! महाधियः । श्रीदेवदेव उवाच । अपर्णे ! ऽभिधास्यामि केदारेश्वरसंकथाम् । समाकर्ण्यापि यां पापोऽप्यपापोजायते क्षणात् । केदारं यातुकामस्य पुंसोनिश्चितचेतसः । आजन्मसञ्चितं पापं तत्क्षणादेव नश्यति । गृहाद्विनिर्गते पुंसि केदारगतिनिश्चिते । जन्मद्वयार्जितं पापं शरीरादपि निर्व्रजेत् । मध्यमार्गं प्रपन्नस्य त्रिजन्मजनितं त्वघम् । गेहाद्विनिः सृतस्यापि निराशं याति निश्चयात् । सायं केदारकेदार केदारेति त्रिरुच्चरन् । गेहेऽपि निवसन्मर्त्त्यो यात्राफलमवाप्नुयात् । दृष्ट्वा केदारशिखरं पीत्वा तत्रत्यमम्बु च जन्मजन्मकृतात् पापान्मुच्यते नात्र संशयः हरम्भा।

ह्रदे स्नात्वा केदारेशं प्रपूज्य च । कोटिजन्मार्जितैः पापैर्मुच्यते नात्र संशयः । सकृत् प्रणम्य केदारं हरम्पापकृतोदकः । स्थाप्य लिङ्गं हृदम्भोजे प्रान्ते मोक्षं गमिष्यति । हरम्पापह्रदे श्राद्धं श्रद्धया यः करिष्यति । उद्धृत्य सप्त पुरुषान् स्वर्गलोकं गमिष्यति । पुरा रथन्तरे कल्पे यदभूदत्र तत् शृणु । अपर्णे ! दत्तकर्णा त्वं वर्णयामि तथाग्रतः । एको ब्राह्मणदायाद उज्जयिन्या इहागतः । कृतोपनयनः पित्रा ब्रह्मचर्य्यव्रते स्थितः । स्थलीं पाशुपतीं काशीं स विलोक्य समन्ततः । द्विजैः पाशुपतैः कीर्णां जटामुकुटमण्डितैः । कृतलिङ्गसमार्चैश्च भूतिभूषितवर्ष्मभिः । भिक्षाकृतान्नसंतुष्टैः स्नुतैर्गङ्गोदकामृतैः । बभूवानन्दितमना व्रतं जग्राह चोत्तमम् । हिरण्यगर्भादाचार्य्यान्महत् पाशुपताभिधम् । स च शिष्योवशिष्ठोऽभूत् सर्व्वपाशुपतोत्तमः । स्नात्वा ह्रदे हरम्पापे नित्यं प्रातः समुत्थितः । विभूत्याऽहरहः स्नाति त्रिकालं लिङ्गमर्च्चयन् । नान्तरं स विजानाति शिवलिङ्गे गुरौ तथा । स द्वादशाब्ददेशीयो वशिष्ठो गुरुणा सह । ययौ केदारयात्रार्थं गिरिं गौरीगुरोर्गुरुम् । यत्र गत्वा न शोचन्ति किञ्चित् संसारिणः क्वचित् । प्राश्योदकं लिङ्गरूपं लिङ्गरूपत्वमागताः । असिधारं गिरिं प्राप्य वशिष्ठस्य तपस्विनः । गुरुर्हिरण्यगर्भाख्यः पञ्चत्वमगमत्तदा । पश्यतां तापसानां च विमाने सार्व्वकामिके । आरोप्य तं पारिषदाः कैलासमनयन् मुदा । यस्तु केदारमुद्दिश्य गेहादर्द्धपथेऽप्यहो । अकातरस्त्यजेत् प्राणान् कैलासे स चिरं वसेत् । तदाश्चर्य्यं समालोक्य स वशिष्ठस्तपोधनः । केदारमेव लिङ्गेषु बहुमंस्त सुनिश्चितम् । अथ कृत्वा स कैदारीं यात्रां वाराणसीमगात् । अग्रहीच्चियमं चापि यथार्थं चाकरोत् पुनः । प्रतिचैत्रं सदा चैत्र्यां यावज्जीवमहं ध्रुवम् । विलोकयिष्ये केदारं वसन् वाराणसीं पुरीम् । तेन यात्राः कृताः सम्यक्षष्टिरेकाधिका मुदा । आनन्दकानने नित्यं वसता ब्रह्मचारिणा । पुनर्यात्रां स वै चक्रे मधौ निकटवर्त्मनि । परमोत्साहसंतुष्टः पलिताकलितोऽप्यलम् । तपोधनैस्तद्विघनं शङ्कमानैर्निवारितः । कारुण्यपूर्णहृदयैरन्यैरपि च सक्तिभिः । ततोऽपि न तदुत्साहभङ्गोऽभूद् दृढचेतसः । मध्ये मार्गं मृतस्यापि गुरोरिव गतिर्मम । इति निश्चितचेतस्के वशिष्ठे तास्वे शुचौ । अम्बुदाम्बुपरिपुष्टे दृष्टोऽहं चण्डिके !

ऽभयम् । स्वप्ने मया स संप्रोक्तो वशिष्ठस्तापसोत्तमः । दृढव्रत ! प्रसन्नोऽस्मि केदारं विद्धि मामिह । अभीष्टं च वरं मत्तः प्रार्थयस्वाविचारितम् । इत्युक्तवत्यपि मयि स्वप्नो मिथ्येति सोऽब्रवीत् । ततोऽपि स मया प्रोक्तः स्वप्नो मिथ्या शुचिस्मिते ! । भवादृशामभिख्यैव स्वाध्यायवशवर्त्तिनाम् । वरं ब्रूहि प्रसन्नोऽस्मि स्वप्नशङ्कां त्यज द्विज ! । तव सत्यव्रतः किञ्चिन्ममादेयं न किञ्चन । इत्युक्तं मे समाकर्ण्य वरयामास मामिति । शिष्यो हिरण्यगर्भस्य तपस्विजनसत्तमः । यदि प्रसन्नो देवेश ! तदा मे येऽनुगा इमे । सर्व्वे मूलिन्ननुग्राह्या एष एव वरो मम । देवि ! तस्येदमाकर्ण्य परोपकृतिशालिनः । वचनं नितरां प्रीतस्तथेति तमुवाच ह । पुनः परोपकरणं तत्तपोद्विगुणीकृतम् । तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु । स वशिष्ठो महाप्राज्ञो दृढपाशुपतस्थितः । देवि ! मे प्रार्थयामास हिमशैलादिह स्थितिम् । ततस्तत्तपसा तुष्टः कलामात्रेण तत्र हि । हिमशैले स्थितश्चात्र सर्व्वभावेन संस्थितः । ततः प्रभाते संजाते सर्व्वेषां पश्यतामहम् । हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः । वशिष्ठं पुरतः कृत्वा सर्व्वसार्थसमायुतम् । हरम्पापह्रदे तीर्थे स्थितोऽहं तदनुग्रहात् । मत्परिग्रहतः सर्वे हरम्पापे कृतोदकाः । आराध्य मामनेनैव पुरुषाः सिद्धिमागताः । तदा प्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये । अविमुक्ते परे क्षेत्रे कलिकाले विशेषतः । तुषाराद्रिं समारुह्य केदारं वीक्ष्य यत् फलम् । तत् फलं सप्तगुणितं काश्यां केदारदर्शने । गौरीकुण्डं यथा तत्र हंसतीर्थञ्च निर्म्मलम् । तथा मधुस्रवा गङ्गा काश्यां तदखिलं तथा । इदं तीर्थं हरम्पापं सप्तजन्माघनाशनम् । गङ्गायां मिलितं पश्चाज्जन्मकोटिशताघहम् । अत्र पूर्व्वं तु काकोलौ युध्यन्तौ खाच्चिपेततुः । पश्यतां तत्र संस्थानां हंसौ भूत्वा विनिर्गतौ । गौरि ! त्वया कृतं पूर्व्वं स्नानमत्र महाह्रदे । गौरीतीर्थं ततः ख्यातं सर्वतीर्थोत्तमोत्तमम् । अत्रामृतस्रवा गङ्गा महामोहान्धकारहृत् । अनेकजन्मजनितं जाड्यध्वंसविधायिनी । मरसा मानसेनात्र पूर्व्वं तप्तं महत्तपः । अतस्तन्मानसं तीर्थं जने ख्यातिमिदं गतम् । अत्र पर्व्वं जनः स्नानमात्रेणैव प्रमुच्यते । पश्चात् प्रसादितश्चाहं त्रिदशैर्मुक्तिदर्शैः । सर्वे मुक्तिं गमिष्यन्ति यदि देवेह मानवाः । केदारकुण्डे सुस्नातास्तन्मुक्तिर्भविष्यति । सर्वेषा-

मेव वर्णानामाश्रमाणां च धर्म्मिणाम्। तस्मात्तुवि-
सर्गेण मोक्षं दास्यसि नान्यथा। ततस्तदुपरोधेन तथेति
च मयोदितम्। तदारभ्य महादेवि! स्नानात्, केदारकु-
ण्डतः। समर्च्चनाच्च भक्त्या वै मम नामजपादपि। नैः-
श्रेयसीं श्रियं दद्यामन्यत्रापि तनुत्यजाम्। केदारतीर्थे यः
स्नात्वा पिण्डान् दास्यति चात्वरः। एकोत्तरशतं सं-
गृह्य तस्य तीर्णा भवाम्बुधेः। भौमवारे यदा दर्शस्तदा यः
श्राद्धदो नरः। केदारकुण्डमासाद्य गयाश्राद्धेन किं?
ततः। केदारं गन्तुकामस्य बुद्धिर्देया नरैरियम्। काशग्रां
स्पृश त्वं केदारं कृतकृत्यो भविष्यसि। चैत्रकृष्णच-
तुर्दश्यामुपवासं विधाय च। त्रिगण्डूषीं पिबन् प्रात-
र्मल्लिङ्गनधितिष्ठति। केदारोदकपाने तु यथा तत्र फलं
भवेत्। तथाऽत्र जायते पुंसां स्त्रीणां चापि न संशयः।
केदारभक्तं संपूज्य वासोऽन्नद्रविणादिभिः। आजन्म-
जनितं पापं त्यक्त्वा याति ममालयम्। श्रावणमासं
त्रिकालं यः केदारेशं नमस्यति। तं नमस्यन्ति सततं
लोकपाला यमादयः। कलौ केदारमाहात्म्य योऽपि
कोऽपि न वेत्स्यति। योवेत्स्यति च पुण्यात्मा सर्वं
वेत्स्यति स ध्रुवम्। केदारेशं सकृत् दृष्ट्वा देवि! मेऽनु-
चरो भवेत्। तस्मात् काशग्रां प्रयत्नेन केदारेशं विलोकयेत्।
चित्राङ्गदेश्वरं लिङ्गं केदारादुत्तरे शुभम्। तस्यार्च्चनाच्च
रो नित्यं स्वर्गभोगानुपाश्नुते। केदाराद्दक्षिणे भागे नी-
लकण्ठविलोकनात्। संसारोरगदष्टस्य तस्य नास्ति
विषाद्भयम्। तद्वायव्ये ऽम्बरीषेशो नरस्तद्वलोकनात्।
गर्भवासं न चाप्नोति संसारे दुःखसङ्कुले। इन्द्रद्युम्नेश्वरं
लिङ्गं तत्समीपे समर्च्च्य च। तेजोमयेन यानेन सस्वर्गभु-
वि मोदते। तद्दक्षिणे नरोदृष्ट्वा लिङ्गं कालञ्जरेश्वरम्।
जराकालं विनिर्जित्य मम लोके वसेच्चिरम्। दृष्ट्वा कामे-
श्वरं लिङ्गमुदक् चित्राङ्गदेश्वरात्। सर्व्वत्र क्षेममाप्नोति
लोकेऽत्र च परं दिवि। श्रीस्कन्द उवाच। देवदेवेन!
विन्ध्यारे! केदारमहिमा महान्। इत्याख्यायि पुराऽ-
म्बायै मया ते ऽपि निरूपितः। केदारेश्वरलिङ्गस्य
श्रुत्वोत्पत्तिं कृती नरः। शिवलोकमवाप्नोति निष्पा-
पो जायते क्षणात्"। लिङ्गपरत्वे न०। केदारेशकेदारे-
श्वराद्योऽप्यत्र पु०। वदर्य्याश्रमस्यान्तिकस्थे २क्षेत्रभेदे
"केदाराख्ये महाक्षेत्रे देवी सा मार्गदायिनी" देवी-
गीता ४भूमिप्रदेशभेदे अमरः "मतङ्गस्य च केदारस्तत्रैव
कुरुनन्दन!" भा०व० ८४अ०। "केदारे चैव राजेन्द्र!
कपिलस्य महात्मनः" भा०८३अ०। जलनिवारणार्थे चतुः-
पार्श्वे सेतुबन्धयुक्ते ५क्षेत्रे ६आलवाले च मेदि० "यथा
"तड़ागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य
तद्वदेव चतुष्कोणाद्याकारं भवति" वेदा० प०। "भूमा-
वप्येककेदारे कालोप्तानि कृषीवलैः। नानारूपाणि
जायन्ते वीजानीह स्वभावतः" मनुः "स्थानच्छेदस्य के-
दारमाहुः शल्यवतोन्वगः" मनुः। केदाराणां समूहः
"केदाराद्यञ् च" "ठञ् कवचिनश्च" पा० यञ् वुञ् ठञ्
च। कैदार्य्यं कैदारकं कैदारिकं तत् समूहे न० "कैदा-
रिकाणामभितः समाकुलाः" माघः। अत्र केदारादिति
निर्द्देशात् नि०एत्त्वम्। तस्येदमण्। कैदार तत्सम्बन्धि-
जलतण्डुलादौ त्रि० तद्गुणाः "कैदारं क्षेत्रसुद्दिष्टं
कैदारं तज्जलं स्मृतम्। कैदारं शार्य्यभिप्रन्ति मधुरं गुरु
दोषकृत्" भावप्र०। "कैदारा वातवित्तपित्तघ्नाः गुरवः
कफशुक्रलाः। कषाया अल्पवर्च्चस्काः मेध्याश्चैव बला-
वहाः" भावप्र० केदारशाल्यादिगुणा उक्ताः

केदारक पु० केदारे भवः कन्। क्षेत्रजाते ब्रीहि-
भेदे षष्टिकवङ्कुकेत्युपक्रमे "कुरवककेदारकप्रभृतयः
षष्टिकाः" सुश्रुतः। केदारशब्दे गुणाउक्ताः

केदारकटुका स्त्री केदारस्य कटुकेव। कटुकाभेदे राजनि०

केदारखण्ड पु० व्यासप्रणीते स्कन्दपुराणान्तरगते अवन्ति-
खण्डस्थकेदारमाहात्म्यप्रतिपादके ग्रन्थभेदे।

केदारज त्रि० केदारात् जायते जन–ड। १क्षेत्रभूमिजाते
ब्रीहिभेदे केदारशब्दे तद्गुणा उक्ताः। २पद्मकाष्ठे
न० राजनि० केदारजातादयोऽप्यत्र

केन न० केनेत्युपक्रम्य प्रवृत्तम्। तलवकारोपनिषद्रूपे के-
नेषितमित्यादिके उपनिषद्भेदे "ईशा केन कठ प्रश्न मुण्ड-
माण्डूक्य तित्तिरिः" मुक्तिको० उपनिषच्छब्दे विवृतिः

केनती स्त्री के सुखार्थं नतिः बा० ङीप् अलुक्स०। स्मर-
लीलायां त्रिका०।

केनार पु० के मूर्द्ध्नि नारः नृ–वञ् अलुक्स०। १कुम्भीनाम-
नरके हेम०। २शिरसि ३कपोले ४सन्धौ च मेदि०।

केनिप पु० के सुखे निपतति नि+पत–ड अलुक्स०। मेधा-
विनि निघण्टुः "दधा केनिपानामिनो वृधे" ऋ०१०,४४,४,
"केनिपाना मेधाविनाम्" भा०। निघण्टौ अकेनिप
इति वा पाठः। तत्रार्थे।

केनिपात पु० के जले निपात्यते नि+पत–णिच्–कर्म्मणि
अच्। (हाल) नौकाचालने काष्ठनिर्म्मिते पदार्थौ अरित्रे

शब्दमा॰ तं हि जले पातयित्वा चालनेन नौकां चालयतीति तस्य तथात्वम्। स्वार्थे क। तत्रार्थे अमरः।

केन्दु पु॰ ईषत् इन्दुरिव कोः कादेशः। १तिन्दुकवृक्षे शब्दरत्ना॰। संज्ञायां कन्। (गाव) गावबृक्षे। "लघुद्वयं विरामान्तं ताले केन्दुकसंज्ञके" इति संगी॰दा॰ उक्ते २तालभेदे पु॰

केन्दुवाल पु॰ के जले इन्दोरिव अर्द्धेन्दोरिव वालश्चलनमस्य। अरित्रे (हाल) इति ख्याते नौकाचालने काष्ठभेदे। "अरित्रशब्दः केन्दुवालवाचकः" यजुर्वेददीपः

केन्दुविल्व पु॰ गीतगोविन्दग्रन्थकारकजयदेवनिवासे ग्रामभेदे (केन्दुली) "केन्दुविल्वसमुद्रसम्भवरोहिणीरमणेन" (जयदेवेन) गीतगो॰।

केन्द्र न॰ "वृत्तस्य मध्यं किल केन्द्रमुक्तम्। केन्द्रं ग्रहोच्चान्तरमुच्यतेऽतः। यतोऽन्तरे तावति तुङ्गदेशान्नीचोच्चवृत्तस्य सदैव केन्द्रम्" शि॰सि॰गोलाध्यायोक्ते १वृत्तस्य तस्य मध्यस्थाने २ग्रहाणामुच्चस्थानान्तरे च। तदानयनप्रकारः तस्य समविषमादिसंज्ञाभेदौ च सू॰सि॰ रङ्गनाथाभ्यां दर्शितौ यथा

"ग्रहं संशोध्य मन्दोच्चात् तथा शीघ्राद्विशोध्य च। शेषं केन्द्रपदं तस्माद्भुजज्या कोटिरेव च" सू॰। "ग्रहं राश्यादिकं मन्दोच्चात् प्रागानीतस्वकीयराश्यादिकं मन्दोच्चभागात् संशोध्योनीकृत्य शीघ्रात् प्रागानीतराश्याद्यादि शीघ्रोच्चात्, चः समुच्चये ऊनीकृत्य शेषं राश्याद्यात्मकं तथोच्चसम्बन्धेन केन्द्रं मन्दोच्चाद्धीनो ग्रहो मन्दकेन्द्रम्। शीघ्रोच्चाद्धीनो ग्रहः शीघ्रकेन्द्रं भवतीत्यर्थः। तस्मात् केन्द्रात् पदं राशित्रयात्मकं विषमं समं पदं ज्ञेयम्। त्रिराश्यन्तर्गतं चेत् प्रथमं विषमं पदम्। ततःषड्राश्यन्तर्गतं चेत् त्र्यूनं केन्द्रं द्वितीयं समं पदम्। ततो नवराश्यन्तर्गतं चेत् षडूनं तृतीयं विषमं पदम्। ततो नवोनं चतुर्थं पदं सममित्यर्थः। तस्मात् पदाद्भुजस्य ज्या कोटिः कोटेर्ज्या। चः समुच्चये। एवकारात्तदाकारद्वयं साध्यमित्यर्थः। अत्रोपपत्तिः। उच्चस्थानाभिमुखमुच्चदेवतैर्ग्रहाणामाकर्षणोक्तेरुच्चाद्ग्रहः कियदन्तरेणेति ज्ञानार्थमुच्चहीनो ग्रहः केन्द्रमुच्चग्रहणवशात् तदाख्यम्। तत्र भगवता स्वेच्छया ग्रहादुच्चं यदन्तरेण तत् केन्द्रं कृतम्। उभयथा भुजकोट्योस्तुल्यत्वात्। द्वादशराश्यङ्किते वृत्ते उच्चस्थानाच्चतुर्विभागात्मक एकैको भागो राशित्रयात्मकः पदसंज्ञः। अधोच्चस्थानाद्ग्रहः कस्मिन् पदेऽस्तीति ज्ञानार्थं त्रिभयोनं केन्द्रं कृतं, ज्यानां पदान्तर्गतत्वात्। ग्रहाधिष्ठितपदाद्भुजज्याकोटिज्ययोर्ज्ञानम्। तच्च ग्रहाणां राशंश्यकलाविकलादिस्थितिज्ञानार्थं स्पष्टताकरणसाधनं तत्रैव प्रसिद्धम्" रङ्ग॰।

एतत्साम्यात् लग्नावधिकद्वादशराशिषु त्रिराश्यन्तरस्थानरूपे लग्नचतुर्थसप्तमदशमस्थानरूपे ३स्थानचतुष्के। "लग्नाम्बुद्यूनकर्म्माणि केन्द्रमुक्तञ्च कण्टकम्। चतुष्टयञ्चात्र खेटो बली लग्ने विशेषतः" ज्यो॰ त॰। केन्द्रगतग्रहबलञ्च बलशब्दे वक्ष्यते। केन्द्रगतग्रहवशादायुस्तु केन्द्रायुरित्यभिधीयते तच्चाकरे दृश्यम्। "कामोल्लिमगते चन्द्रे केन्द्रस्थे सुरपूजिते। योगः केन्द्र इति ख्यातो यातुरिष्टार्थसिद्धिदः" ज्योतिषोक्ते ४यात्राशुभयोगभेदे पु॰। केन्द्रं स्थानत्वेनास्त्यस्य इनि। केन्द्रिन् तत्स्थे ग्रहे

केप चालने भ्वा॰ आत्म॰ सक॰ सेट। केपते अकेपिष्ट। ऋदित् केपयति ते अचकेपत्-त। प्रनिकेपते

केपि त्रि॰ कु+पू—इन् पृषो॰। "पुनाति कर्म्म कुत्सितं दुष्पूयं भवतीति" निरुक्तोक्ते निन्दितकर्म्मणि। "न ये शेकुर्यज्ञियां नावमारुहमीर्म्मैव ते न्यविशन्त केपयः" ऋ॰ १०, ४४, ६, "केपयः कुत्सितपूयकर्माणः" भा॰।

केमद्रुम पु॰ ज्योतिषोक्ते योगभेदे। स च योगः जातकपद्धतौ फलश्रुतिभ्यां सहितो दर्शितो यथा। "शीतांशोर्धनगैर्भवेद्धि सुनफा रिष्फस्थितैः साऽनफा। युग्मस्थैरथवर्जितैर्दुरधरा केमद्रुमोऽतोऽन्यथा"। तत्फलम् "नृपतेर्विजातोऽपि केमद्रुमभवोनरः। मलिनो दुःखितो नीचो निःस्वोदासः खलोभवेत्" तद्भङ्गस्तु तत्रैव "चन्द्रे केन्द्रगतेऽथवा ग्रहयुते सर्व्वैश्च दृष्टे विधौ सर्व्वैः कण्टकसंस्थितैर्ग्रहयुतैः केमद्रुमोनेष्यते। लग्नाद्विधोर्वा द्विस्थैः शुभैः सर्व्वं शुभं फलम्। द्वाभ्यां मध्यं तथैकेनाल्पं चेन्नास्ति दरिद्रता"

केमुक पु॰ के मूर्द्ध्नि अमयति अम—रोगे उक अलुक् स॰। (केँउ) १वृक्षभेदे। २कन्दशाकभेदे न॰ भावप्र॰। "केमुकं कटुकं पाके तिक्तं ग्राहि हिमं लघु। दीपनं पाचनं हृद्यं कफपित्तज्वरापहम्। कुष्ठकासप्रमेहास्रनाशनं वातलं कटु"। तत्र तद्गुणा उक्ताः तत्फलन्तु हविष्ये वर्ज्जनम् "फलं केमुकवर्ज्जितम्" स्मृतेः।

केयूर पु॰ के बाहुशिरसि याति या-ऊर किच्च अलुक्समा॰। (वाजु) (ताड़) १बाहुभूषणे अमरः। "विदूरे केयूरे कुरु करयुगे रत्नवलयम्" सा॰ द॰ "केयूरबन्धोच्छ्वसितैर्नुनोद" रघः। २रतिबन्धभेदे पु॰ स च द्विधा। "स्त्रीजङ्घे चैव

संपीड्य दोर्भ्यामालिङ्ग्य सुन्दरीम् । कारयेत् स्थापनं कामी बन्धः केयूरसंज्ञितः" स्मरदीपिका । "स्त्रीणां जङ्घान्तराविष्टो गाढमालिङ्ग्य सुन्दरीम् । कामयेद्विपुलं कामी बन्धः केयूरसंज्ञितः" । रतिमञ्जरी ।

केरक पु० ब० व० । देशभेदे । "एकपादांश्च पुरुषान् केरकान् वनवासिनः" भा० सभा० २०अ० । सहदेवदक्षिणदिग्विजये । अतः तद्देशस्य दक्षिणविभागस्थत्वम् ।

केरल पु० सगरेण म्लेच्छतां प्रापिते १क्षत्रियभेदे । तत्कथा हरिवं०१४अ०

"ततः शकान् सयवनान् काम्बोजान् पारदांस्तथा । पह्लवांश्चैव निःशेषान् कर्त्तुं व्यवसितः किल । ते बध्यमाना वीरेण सगरेण महात्मना । वशिष्ठं शरणं गत्वा प्रणिपेतुर्मनीषिणम् । वशिष्ठस्त्वथ तान् दृष्ट्वा समयेन महाद्युतिः । सगरं वारयामास तेषां दत्त्वाऽभयन्तदा । सगरः स्वाम्प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च । धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह । अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयत् । यवनानां शिरः सर्वं काम्बोजानां तथैव च । पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः । निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना । शका यवनकाम्बोजाः पारदाः पह्लवास्तथा । कोलिसर्पाः समहिषा दार्व्वाश्चोलाः सकेरलाः । सर्व्वे ते क्षत्रियास्तात ! धर्म्मस्तेषां निराकृतः । वशिष्ठवचनाद्राजन् ! सगरेण महात्मना" ।

२तदधिष्ठानदेशभेदे ब०व० । स च दक्षिणस्थः वृ०सं० कूर्म्मविभागे १४अ० । "दशपुरगोनर्द्दकेरलकाः" दक्षिणस्यामुक्तम् तत्रत्य पर्व्वतनद्यादि रघौ वर्णितं यथा "तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः । रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः । भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् । अलकेषु चमूरेणुः चूर्णप्रतिनिधीकृतः । मुरलामारुतोद्धूतमगमत् कतकं रजः" । ३होरायां ४ज्योतिर्ग्रन्थविशेषे च स्त्री गौरा० ङीष् शब्दरत्ना० । केरलज्योतिर्विद्यायाञ्च सङ्केतविशेषोदित्स्मात् दृश्यते । "वर्गवर्ण्णप्रमाणञ्च सस्वरं ताडितं मिथः । पिण्डसंख्या भवेत्तस्य यथाभागेषु कल्पना" गर्गसंहिता । अयमर्थः । अ क च ट त प य श इत्यष्टौ वर्गास्तेषामेकादिसंख्या यथा अवर्गे १ । कवर्गे २ । चवर्गे ३ । टवर्गे ४ । तवर्गे ५ । पवर्गे ६ । यवर्गे ७ । शवर्गे ८ । वर्णसंख्या च प्रतिवर्गं भिन्ना यथा अवर्गे १६ वर्णा यथा अ१आ२ इ३ई४उ५ऊ६ इत्यादि । कादौ पाल्ये वर्गे च पञ्च पञ्च संख्या । यवर्गे ४शवर्गे च४ । एवं च दाडिमफलनामप्रश्ने दकारस्य तवर्गत्वात् वर्गसंख्या ५ वर्णसंख्या ३ मिलित्वा ८ । डस्य वर्गसंख्या ४ वर्णसंख्या ३ मिलित्वा ७ । मस्य वर्गसंख्या६ वर्णसंख्या ५ मिलित्वा११ एवं वर्गवर्णसंख्या २६ । दाडिमपदे आ इ अ इति स्वरत्रययुक्ते अवर्गसंख्या १ आरूपसंख्या २ मिलित्वा ३ एवं इ ४ अ २ । मिलित्वा नवसंख्या तथा समष्टौ ३५ । पश्चात् यथोक्तक्रिया कार्य्या । प्रश्नशब्दे तद्गणनादि फलं च वक्ष्यते । क्वचित् स्वरसंख्यामनादाय अन्यथा सङ्केतो दर्शितो यथा । "कादयष्टादयोऽङ्काः स्युः पाद्याः पञ्च तथा मताः । याद्योऽष्टौ ङनां शून्यं गणकैः परिकीर्त्तितम्" इत्युक्तिमनुरुध्य कालमा० "सौरचान्द्रमसावनशशधरनाक्षत्रिकाः क्रमेण । मातुलपातालतुलविमलवरदाश्च संवत्सराः पञ्च" आयुर्वेदवाक्ये "गणकप्रसिद्धयाक्षरसंख्यया मातुलशब्दः पञ्चषष्ट्यधिकशतत्रयमाचष्टे तावद्दिवसपरिमितः कालः सौरः । पातालशब्द एकषष्ट्यधिकशतत्रयमाचष्टे तावद्दिवसपरिमितः चान्द्रसत्यः । अतुलशब्दः षष्ट्यधिकशतत्रयमाचष्टे तावद्दिवसपरिमितः सावनः । विमलशब्दः चतुःपञ्चाशदधिकशतत्रयमाचष्टे तावद्दिनपरिमितश्चान्द्रः, वरदशब्दश्चतुर्विंशत्यधिकशतत्रयमाह तावद्दिवसपरिमितो नाक्षत्रिकः संवत्सरः" इत्युक्तम् । अस्यायमर्थः । मातुलशब्दस्य स्वरत्यागे मस्य पकारात् पञ्चमत्वेन ५संख्या लभ्यते । तकारस्य टादितः षष्ठत्वेन ६संख्या लस्य यादौ तृतीयत्वेन ३संख्या अङ्कस्य वामागत्या तेषां यथाक्रमयोजने मातुलशब्दे ३६५संख्या निष्पद्यते । एवं पातालशब्दे पस्य आद्यत्वात् १संख्या तकारस्य टादितः षष्ठत्वात् ६संख्या लस्य प्राग्वत् ३संख्या । तेन पातालशब्दे ३६१संख्या । अतुलशब्दस्य नञादशाकारस्य शून्यवाचित्वात् ० । तकारस्य ६संख्या लस्य ३संख्या । तेन ३६०संख्या । विमलशब्दे च वस्य यादौ चतुर्थत्वात् ४संख्या मस्य प्राग्वत् ५संख्या लस्य ३संख्या यथा स्थानयोजने ३५४ संख्या । वरदशब्दे व ४ र २ द ३ यथाक्रमयोजने ३२४ संख्या । ईदृशकेरलसङ्केतमभिप्रेत्यैव मन्त्रविशेषपुटितसप्तशतीजपस्य एकादिनुदिने करणासामर्थ्ये ७३माहात्म्यात्मकसप्तशत्या दिनावयवेषु माहात्म्यसंख्याविशेषपाठार्थं टीकायां नागोजी·

मद्दने "पाठोऽयं विपर्कारः" इत्युक्तम् । तस्यायमाशयः पस्य पादावेकत्वात् १संख्या तेन प्रथमदिने १माहात्म्यं पाठ्यम् । ठस्य टादितः द्वितीयत्वात् २संख्या तेन द्वितीयदिने द्वे माहात्म्ये । यस्य यादावाद्यत्वात् १संख्या तेन तृतीयदिने १माहात्म्यं पाठ्यम् । यकारस्य यादौ चतुर्थत्वात् ४संख्या तेन चतुर्थदिने ४माहात्म्यानि । फस्य पादौ द्वितीयत्वात् २संख्या तेन पञ्चमदिने २द्वे माहात्म्ये । कस्य कादावाद्यसंख्यात्वात् १संख्या तेन षष्ठे दिने एकमाहात्म्यम् रस्य यादौ द्वितीयत्वात् २संख्या तेन सप्तमदिने २माहात्म्ये पाठ्ये । एवं सप्तभिर्दिनैः त्रयोदश माहात्म्यानि जप्यानीति । केरलोक्तदशा तु दशाशब्दे वक्ष्यते

केरव पुंस्त्री हंसे शब्दचि० । कैरवशब्दे व्युत्पत्तिर्दृश्या ।

केल चालने भ्वा० पर० सक० सेट् । केलति अकेलीत् । चिकेल । केलिः । ऋदित् णिचि अचिकेलत्-त ।

केलक पु० केल-ण्वुल् । खड्गधारादिनर्त्तके त्रिका० ।

केला विलासे कण्ड्वा० आ० अ० सेट् । केलायते अकेलायिष्ट केलायां बभूव आस चक्रे । केलायमानः

केलास पु० केला विलासः सीदत्यस्मिन् सद-आधारे बा० ड । स्फटिके शब्दचि० तत्तुल्यवर्णत्वात् । कैलासः

केलि पुंस्त्री० केल-इन् । १परीहासे, अमरः २क्रीडायां ३पृथिव्यां शब्दमाला । "विहारे सह कान्तेन क्रीडितं केलिरुच्यते" सा० द० उक्तलक्षणे स्त्रीणां कान्तेन सह ४विहारक्रीडनरूपे यौवनजालङ्कारे । एवं पुरुषस्य कान्तया सह ५विहारक्रीडने च । "उपचारः क्रिया केलिः स्पर्शो भूषणवाससाम् । सहखट्वासनञ्चैव सर्वं संग्रहणं स्मृतम्" मनुः स्त्रीत्वे वा ङीप् । तत्र पुंस्त्वे "गोपालानन्वशात् केलीन्" हरवंशो० स्त्रीत्वे "मालत्याः कुसुमेषु येन सततं केली कृता हेलया" भ्रमरा० "माद्यन्तः कलयन्तु चूतशिखरे केलीपिकाः पञ्चमम्" सा० द० । उभयत्र "कुमुदिनीकुलकेलिकलालसः" भ्रमरा०

केलिक पु० केलिः प्रयोजनमस्य ठन् । अशोकवृक्षे राजनि०

केलिकदम्ब पु० केलेः केल्यर्थः कदम्बः । स्वनामख्याते कदम्बवृक्षभेदे ।

केलिकला स्त्री केलिरूपा कला । १केलिरूपायां कलायां केलिना कला यत्र । २सरस्वतीवीणायां शब्दरत्ना०

केलिकिल पु० केलिना किलति किल-क्रीड़ायां क । २विदूषकरूपे नाट्ये शृङ्गारवयस्ये । २शिवस्यानुचरभेदे कुष्माण्डके च हेमच० । ३कामदेवपत्न्यां रतौ स्त्री त्रिका० ४परिहासकारके त्रि० "सत केलिकलो विप्रोभेदशीलश्च नारदः" हरिवं० ३२०६श्लो०

केलिकिलावती स्त्री सरभार्य्यायां त्रिका० [स्त्रियां टाप्

केलिकीर्ण पुंस्त्री० केलिना कीर्णोऽङ्गुलिभिः । १उष्ट्रे हेम०

केलिकुञ्चिका स्त्री० केलीनां कुञ्चिकेव । श्यालिकायां भार्य्याभगिन्यां त्रिका० तया सह केलिप्रादुर्भावात् तथात्वम्

केलिकोष पु० केलीनां कोषइव । नटे शब्दरत्ना०

केलिगृह न० ६त० । १केलिमन्दिरे २रत्यादिगृहे च केलिमन्दिरादयोऽप्यत्र । [प्रधाने नागरे नायकभेदे जटाधरः

केलिनागर पु० केलिप्रधानो नागरः शा० त० । भोग

केलिमुख पु० केलिः मुखमत्र । परीहासे त्रिका०

केलिरैवतक न० हल्लीशलक्षणयुक्ते नाटकभेदे । हल्लीलक्षणयुक्ता "केलिरैतकम्" सा० द० उदाहृतम्

केलिवृक्ष न० केलेः क्रीडार्थं वृक्षः । १केलिकदम्बवृक्षे शब्दरत्ना० । केलेस्तरवाश्रयत्वात् । २विदूषके शब्दमा०

केलिशुषि स्त्री केलिना शुष्यति शुष बा०कि । धरित्र्यां शब्दमा०

केलिसचिव पु० केलौ सचिवः सहायः । नर्मसचिवे क्रीडाविषये मन्त्रिणि विदूषकादौ शब्दमा० ।

केव सेवने भ्वा० आत्म० सक० सेट् । केवते अकेविष्ट, चिकेवे ऋदित् णिचि अचिकेवत् त ।

केवट पु० के जलार्थमवटः अलुक्स० । जलाधारार्थे गर्त्तरूपे कूपे निघ० "मा कीं सं शारि केवटे" ऋ० ६।५४।७ "केवटेकूपे" भा०

केवर्त्त पुंस्त्री० के जले वर्त्तते वृत-अच् अलुक्स० । कैवर्ते जातिभेदे स्त्रियां टाप् द्विरूपकोषः "अवराय केवर्त्तम्" यजु० ३०।१६ पुरुषमेधे बध्यकथने

केवल त्रि० केव-सेवने वृषा०कल, शिरसि बलयति चुरा० वल-प्रापणे अच् वा । १अद्वितीये असहाये एकमात्रे त्रिलिङ्गा "सद्यःकन्दसोरेव नित्यम्" ङीप् । "अघोत इन्द्रः केवलीर्विशो बलिहृतस्करत्" ऋ० १०।१७३।६ "यथैव ताः पुरः केवलीरोषधीरश्नन्ति केवलीरपः पिबन्ति" केवलमेव पयो दुह्रे" श० ब्रा०।१।६।१७।१५ "यथा पुरा ऽमावास्यातः पूर्व्व दिवसे ता गावः केवलीरन्द्रादुप्रवेशर्रहिता औषधीरपश्चाहारं कृत्वा केवलं चन्द्ररहितमेव पयो दुदुहे दुहते"भा०। लोके असंज्ञायां च टाप्। "सा स्वकामभुवं न केवलाम्" रघुः "किं तया क्रियते लक्ष्म्या

था वधूरिव केवला” पञ्चत० “नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने” कुमा० “निषेदुषी स्थण्डिल एव केवले” कुमा० “अविपर्य्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्” सा० का०, क्रियाविशेषणत्वे न० “अनन्यगुर्वा-स्तव केन केवलम्” माघः ३निर्णये ज्ञानभेदे ४अव-धारणे न० मेदि० “न केवलं सद्मनि मागधीपतेः” रघुः सद्मन्येवेत्यर्थः एवं सर्वत्र केवलार्थान्वितावधारणं बो-ध्यम्। ज्ञानभेदश्च प्रागुक्त सा०का० वाक्योक्तः। ५कुहने पु० मेदि० [अर्हद्विशेषे हेम०

केवलज्ञानिन् पु० केवलं शुद्धं ज्ञानमस्त्यस्य भूम्नि इनि।

केवलद्रव्य न० नि० क०। मरिचे शब्दचि० [विवृतिः

केवलव्यतिरेकिन् न० अनुमानभेदे केवलान्वयिशब्दे

केवलान्वयिन् त्रि० केवलमन्वयोऽस्त्यस्य इनि १कुत्रापि अभा-वरहिते वृत्तिमतोऽत्यन्ताभावाप्रतियोगिनि यथा प्रमे-यत्वादि तस्य न कुत्राप्यभावोऽस्ति। तथाच “साध्य-वदन्यावृत्तित्वं वा केवलान्वयिन्यभावात्” अनुमा० चि० “तथैवानुप संहारी केवलान्वयिपक्षकः” भाषा० “केव-लान्वयिधर्म्मावच्छिन्नकपक्षक इत्यर्थः। सर्व्वमभिधेयं प्रमेयत्वादित्यादौ सर्व्वस्यैव पक्षत्वात् सामानाधिकरण्य-ग्रहस्थलान्तराभावान्नानुमितिः” “केवलान्वयिसाध्यकत्वं तत्त्वमिति तु युक्तमिति” मुक्ता०। केवलोऽन्वयव्याप्तिर-स्त्यस्य इनि। २अनुमानभेदे। तद्विवृतिः अनु०चि० यथा “तच्चानुमानं त्रिविधं केवलान्वयिकेवलव्यतिरेक्यन्वयव्य-तिरेकिभेदात्। तत्रासद्विपक्षं केवलान्वयि तथाहि केव-लान्वयिनोऽभिधेयत्वस्य न विपक्षः अभिधानेऽनभिधाने च विपक्षव्याघातात्। अथ यथा आकाशशब्दाच्छब्दा-श्रयत्वमनभिधेयमप्युपतिष्ठते तथाभिधेयमप्युपतिष्ठते तथा भिधेयत्वविपक्षस्यानभिधेयत्वेऽपि पदादुपस्थितिः स्यात् एवञ्चाभिधेयत्वं कुतोऽपि व्यावृत्तं धर्म्मत्वात् गोत्वव-दिति चेन्न व्यावृत्तत्वस्याव्यावृत्तत्वे व्यावृत्तत्वमेव केवलान्व-यि, व्यावृत्तत्वे यत एव व्यावृत्तं व्यावृत्तत्वं तदेव केवलान्व-यीति धर्म्मत्वस्यानैकान्तिकत्वात्। एवमत्यन्ताभावप्रतियो-गित्वस्यात्यन्ताभावाप्रतियोगित्वे अत्यन्ताभावप्रतियोगित्व-मेव केवलान्वयि, अत्यन्ताभावप्रतियोगित्वे यन्निष्ठात्यन्ता-भावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं तदेव केवलान्वयि। न चात्यन्ताभावप्रतियोगित्वं व्यावृत्तत्वञ्च नानेति वाच्यम् अनुगतप्रतीतिबलेन गोत्ववत्तयोः सिद्धेः। तत्र न तावद-व्याप्यवृत्त्यत्यन्ताभावः केवलान्वयी तस्य प्रतियोग्यवच्छिन्ने-ऽप्यत्यन्ताभावात् अत्यन्ताभावाप्रतियोगिनश्च केवलान्वयि-त्वात् नाश्याश्रयनाशजन्यगुणनाशात्यन्ताभावः, तस्य नाश-स्य सर्व्वत्रात्यन्ताभावाद्विति वाच्यं यत्र हि प्रतियोगि-प्रागभावो वर्त्तते तत्र नाशप्रतियोगिसमानदेशे वर्त्तते तत्र न तदत्यन्ताभावो वर्त्तते तथाच नाशस्य प्रागभावो दत्र नाशप्रतियोगिसमानदेशे वर्त्तते तत्र कथं नाशात्य-न्ताभावो वर्त्ततां तर्हि नाशस्य तत्र वृत्तिः स्यादिति चेन्न पूर्व्वं तत्र नाशप्रागभावस्यैव सत्त्वादुत्तरकाले आश्रयस्यैवा-भावात्। नाप्याकाशात्यन्ताभावः केवलान्वयी तस्यापि प्र-तियोगिरूपात्यन्ताभावप्रतियोगित्वात् अभावात्यन्ताभावस्य भावत्वात्। अथाभावात्यन्ताभावो न प्रतियोगिरूपस्तथा-सत्यन्योऽन्याभावात्यन्ताभावः प्रतियोगिरूप इति प्रतियो-गिसमानदेशेऽन्योऽन्याभावो न स्यादिति चेन्न अत्यन्ता-भावस्तु प्रतियोगिवृत्तिरसाधारणो धर्मइति। उच्यते वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् आका-शात्यन्ताभावो यद्यपि प्रतियोगिरूपात्यन्ताभावप्रतियोगी तथापि स न वृत्तिमानित्याकाशात्यन्ताभावएव केव-लान्वयी तथा प्रमेयत्वाभिधेयत्वादि केवलान्वयि वृत्तिम-तोऽत्यन्ताभावस्याप्रतियोगित्वात्। ननु प्रमेयत्वं प्रमावि-षयत्वं तच्च न केवलान्वयि प्रमायाविषयत्वस्य चाननुग-मादिति वाच्यं प्रमात्वमेव हि परम्परासम्बन्धात् घ-टादौ प्रमेयत्वमनुगतं प्रमाजातीयविषयत्वं वा। तथापि केवलान्वयिनि संशयाभावात् कथमनुमितिः प्रमेयत्वमत्र वर्त्तते न वेति संशयश्च न प्रमेयपक्षकः किन्तु प्रमेयत्वप-क्षको भिन्नविषयकः प्रमेयत्वपक्षके चास्तित्वसाध्यस्यान्व-यव्यतिरेकित्वं तथाच घटः प्रमेयो न वेति संशयो मृ-ग्यते स च नास्त्येव। अथ पक्षः साध्यवान्न वा पक्षे साध्यमस्ति न वेति संशयौ समानविषयकावेव तदस्यास्य-स्मिन्निति मतुपोविधानादिति चेन्न विशेषणविशेष्यभा-वभेदेनार्थभेदात्, नैवं य एव हि संशयः पक्षे साध्यसि-द्धिविरोधी स एवानुमानाङ्गमाविशेष्यकत्वात् लाघवाच्च न तु समानविषयकत्वमपि तत्र तन्त्रं गौरवात् प्रमेयत्वं घटनिष्ठात्यन्ताभावप्रतियोगि न वेति संशयश्च घटः प्रमेय इति साध्यसिद्धिविरोधी भवत्येव यद्वा संशययोग्यतै-वानुमानाङ्गं संशयस्य तदानीं विनाशात् न च सापि साधकबाधकप्रमाणाभावः प्रमेयत्वाभावासिद्धौ तत्प्रमा-णासिद्धेस्तदभावासिद्धिरिति वाच्यं पक्षनिष्ठात्यन्ताभा-वाप्रतियोगित्वज्ञानस्यैव साध्यसाधकत्वेन तदभावस्यैव

योग्यतात्वात् । प्रमेयत्वमत्यन्ताभावप्रतियोगीति भ्राम्यतः संशयः इत्यन्ये । नन्वेकरूपविकलमिदं कथं गमकं तत्त्वे वा व्यतिरेकिविकलवत् रूपान्तरविकलमपि गमकं स्यादिति चेन्न अन्वयव्यतिरेकव्याप्त्योरन्यतरनिश्चयेनानुमित्यनुभवात् युगपदुभयव्याप्त्युपस्थितौ विनिगमकाभावेन उभयोरपि प्रयोजकत्वे व्यतिरेकोपासना व्यतिरेकस्य विपक्षवृत्तित्वशङ्कानिवृत्तिद्वारा व्यतिरेकव्याप्तावुपयुज्यते अत्र तु विपक्षाभावेन शङ्कैव नोदेति ।

केवलव्यतिरेकी त्वसत्सपक्षो यत्र व्यतिरेकसहचारेण व्याप्तिग्रहः । ननु व्यतिरेकि नानुमानं व्याप्तिपक्षधर्मताज्ञानस्य तत्कारणत्वात् यत्र व्यतिरेकसहचारः तत्र व्याप्तिरन्वयस्य पक्षधर्मता न च व्याप्तपक्षधर्मत्वं साध्याभावव्यापकाभावप्रतियोगित्वमुभयमप्यनुमितिप्रयोजकमिति वाच्यं अननुगमात् नचान्यतरत्वं तथा एकप्रमाणपरिशेषापत्तेः न च तृणारणिमणिन्यायेनानुमितिविशेषे तद्धेतुत्वमिति वाच्यं व्यतिरेकिसाध्येऽनुमितित्वासिद्धेः उभयसिद्धस्य तत्कारणस्याभावात् । न च साध्याभावव्यापकाभावप्रतियोगित्वमेवानुमितिप्रयोजकमिति वाच्यं गौरवात् केवलान्वयिन्यभावाच्च । अथ साध्याभावव्यापकाभावप्रतियोगित्वेन साध्यव्याप्यत्वमनुमेयम् एवं व्यतिरेकव्याप्त्यान्वयव्याप्तिमनुमाय यत्रानुमितिः स एव व्यतिरेकीत्युच्यते तन्न अन्वयव्याप्तेर्गमकत्वे व्यतिरेकव्याप्त्युपन्यासस्यार्थान्तरतापत्तेः अन्वयव्याप्त्यनुकूलतया च तदुपन्यासे अन्वयव्याप्तिमनुपन्यस्य तदुपन्यासस्याप्राप्तकालत्वमिति । उच्यते निरुपाधिव्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते प्रतियोग्यनुयोगिभावस्य नियामकत्वात् अन्वयव्यतिरेकवत् । नन्वेवं व्याप्तिग्रहएव पृथिवीतरभिन्नमपि भासितं नियतसामानाधिकरण्यरूपत्वाद्व्याप्तेरिति सत्यं गन्धवत्त्वावच्छेदेनेतरभेदस्य साध्यत्वात् । अतएवाचार्य्यः पक्षतावच्छेदकस्य न हेतुत्वमनुमेने । पृथिवीत्वमितरभेदव्याप्यमिति प्रतीतावपि सर्वपृथिवीतरभिन्नोऽपि पृथिवीविशेषप्रकारकबुद्धेर्व्यतिरेकिसाध्यत्वाच्च" ।

अत्र दिग्मात्रं दीधितिरुपन्यस्यते ।

"केवलान्वयीत्यादि केवलान्वयिसाध्यकादीत्यर्थः । तत्र-तेषु मध्ये, असिद्धिपक्षम् अत्यन्ताभावाप्रतियोगिसाध्यकं केवलान्वयि, एवमगृहीतान्वयव्यतिरेकिसाध्यकं केवलव्यतिरेकि, गृहीतान्वयव्यतिरेकिसाध्यकान्वयव्यतिरेकि, व्याप्तिग्राहकसहचारभेदाद्भेदे त्वन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं तच्च प्रकृतव्याप्तिग्राहकज्ञानविषयसहचारत्वव्यापकान्वयसहचारत्वकत्वं तादृशसहचारत्वव्यापकप्रकृतव्याप्तिघटकसहचारत्वकत्वं वा गृहीतव्याप्तिभेदाद्भेदे तु प्रकृतहेतुकप्रकृतसाध्यानुमितिहेतुज्ञानविषयव्याप्तित्वव्यापकप्रकृतसाध्यव्याप्तित्वकत्वं तत्त्वम् । जलं निर्गन्धं पृथिवीत्वव्यापकाभावप्रतियोगिमत्त्वादित्यादौ हेतुतावच्छेदिका च व्याप्तिर्न प्रकृतसाध्यानुमित्यौपयिकी तद्विशिष्टपक्षधर्म्मताज्ञानेऽपि व्याप्त्यन्तरबोधं विना निर्गन्धत्वानुमित्यनुदयादिति साव्याप्तिः । वह्न्यभाववान् वह्निव्यापकाभावप्रतियोगिमत्त्वादित्यादावन्वयव्याप्तेरवच्छेदिका व्यतिरेकव्याप्तिर्न तु सैवेति नाप्रसङ्गः । अतएवेतरव्यापकाभावप्रतियोगित्वेनाभावप्रतियोगित्वेन वा यल्लिङ्गज्ञानं न प्रकृतसाध्यानुमितिहेतुस्तत्केवलान्वयीत्यपि वदन्ति । एवं केवलव्यतिरेकित्वादिकमपि निर्वाच्यम्" ।

वेदान्तिभिस्तु अनुमानत्रैविध्यं नाङ्गीक्रियते यथोक्तं वेदा॰प॰ "तच्चानुमानमन्वयिरूपमेकमेव न तु केवलान्वयि, सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेनात्यन्ताभावाप्रतियोगिसाध्यकत्वरूपकेवलान्वयित्वस्यासिद्धेः नाप्यनुमानस्य व्यतिरेकिरूपत्वं साध्याभावे साधनाभावनिरूपितव्याप्तिज्ञानस्य साधनेन साध्यानुमितावनुपयोगात् । कथं तर्हि धूमादावन्वयव्याप्तिमविदुषोऽपि व्यतिरेकव्याप्तिज्ञानादनुमितिः अर्थापत्तिप्रमाणादिति वक्ष्यामः अतएवानुमानस्य नान्वयव्यतिरेकिरूपत्वं व्यतिरेकव्याप्तिज्ञानस्यानुमित्यहेतुत्वात्" ।

केवलिन् पु॰ केवलं शुद्धज्ञानमस्त्यस्य इनि । जैनभेदे हला॰

केवली स्त्री केवल–गौरा॰ ङीष् । १ज्ञानभेदे मेदि॰ । २केरलीशब्दार्थे हेम॰ तत्र रमध्यपाठः साधुः

केवाली अव्य॰ । ऊर्य्यादि । १हिंसायां गणरत्नम् । केवालीकृत्य हिंसित्वेत्यर्थः २हिंसके त्रि॰ स्त्रियां गौरा॰ ङीष् । केवाली [पुष्पभेदे सद्गन्धायां राजनि॰

केविका स्त्री केव– ण्वुल् टाप् । (केवेर) कोङ्कणप्रसिद्धे

केश पु॰ क्लिश्यते क्लिश्नाति वा क्लिश–अच् ललोपश्च कस्य जलस्य ब्रह्मणो वा ईशोवा । १वरुणे, विश्वः । २ह्रीवेरे (वाला) ३दैत्यभेदे, केशिनि ४विष्णौ, हेम॰ काशते काश अच् पृषो॰ । ५सूर्य्याग्निप्रभृतिरश्मौ (केशिन्) शब्दे विवृतिः "ब्रह्मविष्णुरुद्रसंज्ञाः शक्तयः केशसंज्ञिताः" इत्युक्ते ब्रह्मादौ ६परब्रह्मशक्तिभेदे केशवशब्दे विवृतिः । के शिरसि शेते शी–ड अलुक्स॰ । ७चिकुरे

च। अस्थिवातजातोपधातुविशेषोऽयं केशः। अस्मात् परवर्त्तिनः पाशादिशब्दाः केशभूयस्त्ववाचिनः। "बालास्तु तत्पराः पाशो रचना भारउच्चयः। हस्तः पक्षः कलापश्च केशभूयस्त्ववाचकाः" हेमचन्द्रोक्तेः। केशस्तु पितृतोजायते यथाह सुश्रुतः "गर्भस्य केशश्मश्रुलोमास्थिनखदन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि" "केशाः श्मश्रु च लोमानि नखा दन्ताः सिरास्तथा। धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि" भावप्र०। तस्य सर्व्वदा वृद्धिमत्त्वमाह तत्रैव "शरीरे क्षीयमाणेऽपि बर्द्धेते द्वाविमौ सदा। स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिः" "चेतनानामधिष्ठानं मनोदेहश्च सेन्द्रियः केशलोमनखाग्रान्तर्मलद्रव्यगुणैर्विना" तस्योत्पत्तिप्रकारः भावप्र० दर्शितो यथा "ततोऽस्थ्यग्निना पुनः पच्यमानं पञ्चाहोरात्रात् सार्द्धं दण्डञ्च यावदस्थ्येव तिष्ठति। ततः पच्यमानात् तस्मात् मलो निर्गच्छति। स च व्यानवायुना प्रेरितः सिराभिः मार्गेणागत्याङ्गुलिषु नखाः तनौ लोमानि च भवन्तीति" अत्र लोमसाम्यात् केशस्यापि तनौ प्ररोहादस्थिधातुजत्वमुच्चेयम्। एवं गर्भे षष्ठे मासि तस्य लोमसाम्यात् प्रादुर्भावः "षष्ठे बलस्य वर्णस्य नखलोम्नां च सम्भवः" या० उक्तेः। जनानां केशवत्त्वे कारणम् शत० ब्राह्मणे उक्तं तद्वाक्यञ्च (केशिन्) शब्दे वक्ष्यते। केशनाशकारणञ्च इन्द्रलुप्तशब्दे दर्शितम् केशकौक्ल्यहेतुस्तु "क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः। पित्तं च केशान् पचति पलितं तेन जायते" सुश्रुतेनोक्तः "लताप्रतानोद्ग्रथितैः स केशैः"। रघु० "अलक्तकाङ्कानि पदानि पादयोः" "विकीर्णकेशासु परेतभूमिषु" कुमा० "केशः काशस्तवकविकाशः" सा० द० "केशेषु चमरीं हन्ति" सि०कौ०। "क्लृप्तकेशनखश्मश्रुः" मनुः "केशश्मश्रु धारयतामग्र्या भवति सन्ततिः" शु० त०दानधर्म्मे। केशश्मश्रु इत्यत्र श्मश्रुशब्दस्य घ्यन्तत्वेऽपि राजद० परनिपातः। तस्य मूलं कर्णा० जाहच्। केशजाह तन्मूले न०। अस्य स्वाङ्गत्वात् उपसर्जनत्वे अतिकेशी सुकेशीत्यादौ स्त्रियां वा ङीष्। केशेषु प्रसितः(तत्परः) कन्। केशक तद्रचनातत्परे त्रि०।

केशकर्म्मन् न० केशानां कर्म्म रचनादि। केशानां रचनादिकरणेन संस्काररूपे व्यापारभेदे। "साहं ब्रुवाणा सैरिन्ध्री कुशला केशकर्म्मणि" भा० वि०३अ०। २केशान्तकर्म्मरूपे संस्कारभेदे च केशान्तशब्दे विवृतिः

केशकलाप पु० ६त०। केशसमूहे हेमच०।

केशकार पु० केशं केशाकारं करोति कृ–अण् उप०स०। इक्षुभेदे भावप्र० इक्षुशब्दे यत् कोशकृत इति तदशुद्धम् केशकृत इत्येव शुद्धम्

केशकारिन् त्रि० केशं तद्रचनां करोति कृ–णिनि। केशरचनाकारके स्त्रियां ङीप। "निहीनवर्णां सैरिन्ध्रीं बीभत्सां केशकारिणीम्" भा०वि०१४अ०।

केशकीट पु० ६त०। यूकाख्ये १केशकीटे। (उकुण) शब्दचि०। तद्धेतुश्च "अरूंषि बहुवक्त्राणि बहुक्लेदानि मूर्द्धनि। कफासृक्कृमिकोपेन नृणां विद्यादरुंषिकाम्" सुश्रुतोक्तः। केशश्च कीटश्च द्व०। २केशे कीटे च। "केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः" मनुः [त्रिका०

केशगर्भ(क) पु० केशः गर्भेऽस्य वा कप्। कबरीरूपे पदार्थे

केशग्रह पु० ६त०। १बलात्कारेण कचग्रहणे सुरतक्रीडाङ्गे २तद्ग्रहणे च। "केशग्रहान् प्रहारांश्च शिरस्येतान् विवर्ज्जयेत्" मनुः "कोपेन केशग्रहणप्रहारौ शिरसि वर्ज्जयेत् कोपनिमित्तत्वादात्मनः परस्य च प्रतिषेधः। अतएव सुरतसमये कामिनीकेशग्रहणानिषेधः" कुल्लू०। "रतेषु केशग्रहाः" कादम्बरी "सुरतेषु नतु युद्धेषु इत्यर्थः। कचग्रहादयोऽप्यत्र। ल्युट् केशग्रहणमप्यत्र न०। "शम्भोः केशग्रहणमकरोत्" मेघदूतम्

केशग्राहम् अव्य०। केशान् गृहीत्वा "स्वाङ्गेऽध्रुवे" पा० ग्रह–णमुल् उप० स०। केशान् गृहीत्वेत्यर्थे येन विना न जीवनं तदध्रुवं तद्भिन्ने इत्यर्थः। केशं विनापि जीवनस्य सम्भवात् तस्याध्रुवत्वात् स्वाङ्गत्वाच्च तत्र णमुल्।

केशघ्न न० केशान् हन्ति हन–हेत्वादौ टक्। इन्द्रलुप्तरोगे (टाक) हेमच० इन्द्रलुप्तशब्दे ९५०पृ० विवृतिः

केशच्छिद् त्रि० केशान् छिनत्ति छिद–क्विप् ६त०। १केशच्छेदके २नापिते पु० शब्दमा० क। केशच्छिदोऽप्यत्र

केशट पु० केशेषु केशान् वा अटति अट–अच् शक०।(उकुण) १मत्कुणे। २विष्णौ ३छागे च मेदि०। ४भ्रातरि शब्दर०। ५ कामदेवस्य शोषणाख्य बाणे विश्वः। ६शोनकवृक्षे (शोना) त्रिका०।

केशधर त्रि० केशान् धरति धृ–अच्। १केशवपनाकर्त्तरि व्रतप्राये २देशभेदे पु० ब० व०। स च देशः वृ०सं० कूर्म्मविभागे उत्तरस्यामुक्तः। "केशधरचिपिटनासिकदासेरकवाटधानाः"

केशधृत् पु० केशमिव धरति धृ—क्विप्। भूतकेशाख्ये तृणभेदे शब्दचि० [गन्धद्रव्यभेदे ह्रीवेरे अमरः

केशनामन् न० केशस्य नामेव नाम यस्य। (बाला) इति ग-

केशपक्ष पु० केशानां समूहः बा० पक्षादेशः केशः पक्ष इव वा। केशसमूहे अमरः "केशपक्षे परामृष्टा पापेन हतबुद्धिना" भा० आ० १७अ० "अभिद्रुत्य सुशर्म्माणं केशपक्षे परामृशत्" भा०वि०२१अ० केशभारोऽप्यत्र पु०

केशपर्णी स्त्री केश इव पर्णमस्याः जातित्वात् ङीप्। अपामार्गे शब्दरत्ना०

केशपाश पु० केशानां समूहः बा० पाशादेशः केशः पाश इव वा। केशसमूहे अमरः "करेण रुद्धोऽपि च केशपाशः" कुमा० रघुश्च। "तां काचन प्रधावन्तीं केशपाशे परामृशत्" भा० व० ४६१ एवं

केशप्रसाधनी स्त्री केशः प्रसाध्यते संस्क्रियतेऽनया प्र+साध—करणे ल्युट् ङीप्। (काँकुइ) (चिरुणि) ख्याते पदार्थे "केशप्रसाधनी केश्या रजोजन्तुमलापहा" सुश्रुते तत्सेवनगुणा उक्ताः।

केशभू स्त्री केशानां भूरुत्पत्तिस्थानम्। शिरसि राजनि० केशभूम्यादयोऽप्यत्र स्त्री "दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते। कफवातप्रकोपेन" सुश्रु०

केशमथनी स्त्री केशोमथ्यतेऽनया मथ—करणे ल्युट् ङीप्। शमीवृक्षे राजनि० तस्याः कण्टकेन तदन्तिकयातुः केशधर्षणात्तथात्वम्

केशमार्ज्जक न० केशान् मार्ष्टि मृज—ण्वुल्। (काँकुइ) (चिरुणि) ख्यातायां केशप्रसाधन्यां कङ्कतिकायां जटा०

केशमार्ज्जन न० केशो मृज्यतेऽनेन मृज—करणे ल्युट् वृद्धिः ६त०। १कङ्कतिकायां (चिरुणि) हेमच०। भावे ल्युट्। २केशसंस्कारभेदे (चुल आचड़ान)

केशमुष्टि पु० केशानां मुष्टिरिव। महानिम्बवृक्षे राजनि०

केश(स)र पुंन० के जले शिरसि वा शीर्य्यति शॄ अच् सरति सृ—अच् अलुक्स०केशः केशाकारोऽस्त्यस्य र वा। १किञ्जल्के पद्मादिपुष्पमध्यस्थे केशाकारपदार्थभेदे (सुमरि) अमरः। सकेश(स)रपुष्पवत्त्वात् २नागकेशरे ३बकुलवृक्षे ४पुन्नागवृक्षे ५सिंहादिस्कन्धस्थजटायां पु० मेदि० ६हिङ्गुवृक्षे न० भरतः "मृगपतिरिव स्कन्धावलम्बितकेशरमालः" काद० "व्याकीर्णकेशरकरालमुखाः मृगेन्द्राः" पञ्चत० "पुनः पुनः केशरदामकाञ्चीम्" कुमा० "नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः" मेघ० "दशनांशुकेशरभरैः" परितः" माघः "दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेशरान्" रघुः बकुले "सुरभिगन्धपराजितकेशरम्" रघुः "रक्ताशोकश्चलकिसलयः केशरश्चात्र कान्तः" मेघ०। ७कुङ्कुमे च तस्य किञ्जल्काकारवत्त्वेन जायमानत्वात् तथात्वं एतेषु उदाहरणेषु दन्त्यमध्योऽपि वा पाठः। दन्त्यमध्यस्तु तुरगस्कन्धस्थलोमपुञ्जरूपजटायां हेमच० कासीसे बीजपूरके पु० स्वर्णे न० राजनि० "अर्थाश्वाश्वैः ४,७,७, र्मभनयरयुगैर्वृत्तं मतं केसरम्" वृ०र० उक्ते छन्दोभेदे न०।

केशरचना स्त्री ६त०। १केशानां कवर्य्यादिविन्यासभेदे "कुर्व्वन्ति केशरचनामपरास्तरुण्यः" रत्नाव०। २केशसमूहे हेमच० [जवृक्षे (भीमराज) राजनि०।

केशरञ्जन पु०केशान् रञ्जयति रन्ज—णिच्—ल्यु। भृङ्गरा-

केशराज पु० केशा राजन्तेऽनेन राज—करणे घञ्। भृङ्गराजे (भीमराज) "भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः। भृङ्गराजः कटुस्तिक्तो रूक्षोष्णो कफवातनुत्। केश्यस्त्वच्यः क्रमिश्वासकासशोथामयापहृत्। दन्त्योरसायनोबल्यः कुष्ठनेत्रशिरोऽर्त्तिनुत्" भावप्र०।

केश(स)राम्लः पु० केश(स)रे तदवच्छेदेऽम्लः। धूस्तुरे जटा०

केश(स)रिन् पुंस्त्री केश(स)राः सन्त्यस्य इनि। १सिंहे, २अश्वे च अमरः स्त्रियां ङीप्। ३पुन्नागवृक्षे ४नागकेशरवृक्षे, पु०मेदि० ५बीजपूरकवृक्षे पु० जटाधरः। ६हनुमत्पितरि वानरभेदे पु०। "पिता हनुमतः श्रीमान् केश(स)री प्रत्यदृश्यत" रामा०

केश(स)रिसुत पु० ६त०। हनुमति केशरिक्षेत्रे अञ्जनायां पवनात् तस्योत्पत्तेस्तथात्वम् यथा "अहं केश(स)रिणः क्षेत्रे वायुना जगदायुना। जातः कमलपत्राक्ष! हनूमान्नाम वानरः" भा० व० १४७अ०। "सूर्य्यदत्तवरःस्वर्णः सुमेरुर्नाम पर्वतः। तत्र राज्यं प्रशास्त्यस्य केश(स)री नाम वै पिता। तस्य भार्य्या बभूवेष्टा ह्यञ्जनेति परिश्रुता। जनयामास तस्यां वै वायुरात्मजमुत्तमम्। शालिशूकनिभाभासं प्राशूतेमन्तदाञ्जना" रामा० उ० ६स० [वृक्षे राजनि०

केशरुहा स्त्री केश इव रोहति रुह—क। भद्रदन्तिका-

केशरूपा स्त्री केशस्येव रूपमस्याः। वन्दाकवृक्षे (परगाछा) राजनि०।

केशलुञ्च पु०केशान् लुञ्चति लुञ्च—अपनयने अण् उप० स०। केशानामपनेतरि मुण्डितमुण्डे जैनर्षिभेदे केशोच्छुञ्चको-

ऽप्यत्र "आः पापः पाषण्डापसद! चण्डालवेश! केशोल्लुञ्चक" प्रबोधचन्द्रोदयनाटकम्।

केशव त्रि०। केशाः प्रशस्ताः सन्त्यस्य "केशाद्वोऽन्यतरस्याम्" पा०व०। १प्रशस्तकेशयुक्ते। केशं—केशिनं वाति हन्ति वा—क। २विष्णौ "यस्मात् त्वया हतः केशी तस्मान्मच्छासनं शृणु। केशवोनाम नाम्ना त्वं ख्यातो लोके भविष्यसि" हरिवं०८१अ०। कश्च अश्च ईशश्च केशा ब्रह्मविष्णुरुद्रा नियम्यतया सन्त्यस्य कश्च ईशश्च केशौ पुत्रपौत्रत्वेन स्तोऽस्य वा व, तान् तौ वा वाति गच्छति तथात्वेन वा—क वा। ३परमेश्वरे। "शम्भोः पितामहो ब्रह्मपिता शक्राद्यधीश्वरः" इति पाद्मे तस्य तथात्वोक्तेः। तदभेदादपि वासुदेवेऽस्य वृत्तिः। अतएव वि-ष्णुस० "नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः" "त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः" इत्युक्तं तद्भाष्ये च केशवशब्दस्य निरुक्तिद्वयमाश्रित्य नामद्वयं समर्थितम् तत्राद्यवाक्ये "अभिरूपाः केशायस्य स केशवः कश्च अश्च ईशश्च केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते यस्य स केशवः। केशिवधाद्वा केशवः "यस्मात्त्वयैव दुष्टात्मा हतः केशी जनार्द्दन! तस्मात् केशवनाम्ना त्वं लोके ज्ञेयोभविष्यसीति" विष्णु पु०" भा०। द्वितीयवाक्ये "केशसंज्ञिताः सूर्य्यादिसंक्रान्ताः अंशवस्तद्वत्तया केशवः "अंशवोये प्रकाशन्ते मम ते केशसंज्ञिताः सर्व्वज्ञाः। केशवं तस्मात् प्राहुर्मां द्विजसत्तमाः" भारतम्। "केशः केशिनः" इतिस्मृतेः ब्रह्मविष्णुशिवाख्या हि शक्तयः केशसंज्ञिताः-मत्केशा वसुधातले" इति स्मृतेश्च। आदौ केशशब्दः शक्तिपर्य्यायत्वेन प्रयुक्तः। कोब्रह्मेति समाख्यात ईशोऽहं सर्व्वदेहिनाम्। आवां तवांशसंभूतौ तस्मात् केशवनामवान्" हरिवंशोक्तेः" भा०। तेनास्य बहुधा निरुक्तिः। ज्योतिर्विद्भेदे यस्य जातकादिना नानाग्रन्थाः सन्ति। चतुर्विंशतिविष्णुमूर्त्तिमध्ये ५विष्णुमूर्त्तिभेदे तस्य ध्यानं ध्यानशब्दे वक्ष्यते। अलुक्स०। ६जलस्थे शवे च "केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः। रुदन्ति पाण्डवाः सर्व्वे हाहा केशव केशव" विदग्धसु०(भेदे यथा तन्त्रसारे

केशवकीर्त्तिन्यास तन्त्रसारोक्ते विष्णुपूजाङ्गे न्यास "अं केशवाय कीर्त्त्यै नमो ललाटे। आं नारायणाय कान्त्यै नमो मुखे। इं माधवाय तुष्ट्यै नमो दक्षनेत्रे। ईं गोविन्दाय पुष्ट्यै नमो वामनेत्रे। नमः सर्वत्र। उं विष्णवे धृत्यै दक्षकर्णे। ऊं मधुसूदनाय शान्त्यै वामकर्णे। ऋं त्रिविक्रमाय क्रियायै दक्षनासापुटे। ॠं वामनाय दयायै वामनासापुटे। ऌं श्रीधराय मेधायै दक्षगण्डे। ॡं हृषीकेशाय हर्षायै वामगण्डे। एं पद्मनाभाय श्रद्धायै ओष्ठे। ऐं दामोदराय लज्जायै अधरे। ओं वासुदेवाय लक्ष्म्यै ऊर्द्ध्वदन्तपङ्क्तौ। औं सङ्कर्षणाय सरस्वत्यै अधोदन्तपङ्क्तौ। अं प्रद्युम्नाय प्रीत्यै मस्तके। अः अनिरुद्धाय रत्यै मुखे। कं चक्रिणे जयायै। खं गदिने दुर्गायै। गं शार्ङ्गिणे प्रभायै। घं खड्गिने सत्यायै। ङं शङ्खिने चण्डायै दक्षबाहुकरमूलसन्ध्यग्रेषु। चं हलिने वाण्यै। छं मुसलिने विलासिन्यै। जं शूलिने विजयायै। झं पाशिने विरजायै। ञं अङ्कुशिने विश्वायै, वामबाहुकरमूलसन्ध्यग्रेषु५ टं मुकुन्दाय विनदायै। ठं नन्दजाय सुनन्दायै। डं नन्दिने स्मृत्यै। ढं नराय ऋद्ध्यै। णं नरकजिते समृद्ध्यै दक्षपादमूलसन्ध्यग्रेषु। तं हरये शुद्ध्यै थं कृष्णाय बुद्ध्यै। दं सत्याय भुक्त्यै। धं सात्वताय मत्यै। नं शौरये क्षमायै वामपादमूलसन्ध्यग्रेषु। पं शूराय रमायै दक्षपार्श्वे। फं जनार्द्दनाय उमायै वामपार्श्वे। बं भूधराय क्लेदिन्यै पृष्ठे। भं विश्वमूर्त्तये क्लिन्नायै नाभौ। मं वैकुण्ठाय वसुदायै उदरे। यं त्वगात्मने पुरुषोत्तमाय वसुधायै हृदि। रं असृगात्मने बलिने परायै दक्षांसे। लं मांसात्मने बलानुजाय परायणायै ककुदि। वं मेदआत्मने बलाय सूक्ष्मायै वामांसे। शं अस्थ्यात्मने वृषघ्नाय सन्ध्यायै हृदादिदक्षकरे। षं मज्जात्मने वृषाय प्रज्ञायै हृदादिवामकरे। सं शुक्रात्मने हंसाय प्रभायै हृदादिदक्षपादे। हं प्राणात्मने वराहाय निशायै हृदादिवामपादे। लं जीवात्मने विमलाय अमोघायै हृदाद्युदरे। क्षं क्रोधात्मने नृसिंहाय विद्युतायै हृदादिमुखे। तथा च गौतमीये "केशवादिरयं न्यासोन्यासमात्रेण देहिनाम्। अच्युतत्वम् ददात्येव सत्यं सत्यं न संशयः"। मातृकार्णं समुच्चार्य्य केशवाय इति चरेत्। कीर्त्त्यै च नमसा युक्त मित्यादिन्यासमाचरेत्। केशवाय ततः कीर्त्त्यै कान्त्यै नारायणाय च" इत्यगस्त्यसंहितावचनाच्चायं क्रमः। नं तु केशवकीर्त्तिभ्यां नम इति। तथा भक्तियुक्ति मिच्छताऽयं न्यासः श्रीबीजादिः कर्त्तव्यः। यथा श्रीं अं केशवाय कीर्त्त्यै नम इत्यादि। तथा च "एवं प्रविन्यस्य सेन्द्राय लक्ष्मीबीजपुरः-

षरम्। स्मृतिष्टतिमहालक्ष्मीं प्राप्यान्ते हरितां व्रजेत्”।

केशपवनीय पु० अतिरात्रयागभेदे तत्करणप्रकारादि कात्या० श्रौ० १५।८।२० दर्शितः यथा “तदन्ते केशवपनीयोऽतिरात्रः पौर्णमासीसुत्यः” सू०। “तयोः पशुबन्धयोरन्ते केशवपनीयसंज्ञः अतिरात्रसंस्थः सोमयागो भवति स च पौर्णमासीसुत्यः। ज्यैष्ठ्यां पौर्णमास्यां तस्य सुत्या भवतीत्यर्थः” सं० व्या०। शत० ब्रा० ५, ५, ३, १, विशेषोदर्शितः “एतौ पशुबन्धौ इत्युपक्रमे “अभिषेचनीयेनेष्ट्वा। केशान्न वपते तद्यत् केशान्न वपते वीर्यं वा एतदपां रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्य केशान् प्रथमान् प्राप्नोति स यत् केशान् वपेतैतां श्रियं जिह्मां विनाशयेद्व्युदुह्यात्तस्मात् केशान्न वपते संवत्सरम्। संवत्सरसमिता वै व्रतचर्या तस्मात् संवत्सरं न वपते स एष व्रतविसर्जनीयोपयोगो नाम स्तोमो भवति केशवपनीयः। तस्यैकविंशं प्रातःसवनम्। सप्तदशं माध्यन्दिनं सवनं, पञ्चदशं तृतीयसवनं सहोक्थैः सह षोड़शिना सह रात्र्या त्रिवृद्रथन्तरः सन्धिर्भवति एष एवैकविंशो य एष तपति स एतस्मादेकविंशादपयुङ्क्ते स सप्तदशमभिप्रत्यवैति सप्तदशात् पञ्चदशं पञ्चदशादस्यामेव त्रिवृति प्रतिष्ठायां प्रतितिष्ठति तस्य रथन्तरं पृष्ठं भवति इयं वै रथन्तरमस्यामेवैतत् प्रतिष्ठायां प्रतितिष्ठत्यतिरात्रो भवति प्रतिष्ठा वा अतिरात्रस्तस्मादतिरात्रो भवति। स वै न्येव वर्तयते। केशान्न वपते वीर्यं वा एतदपां रसः सम्भृतो भवति येनैनमेतदभिषिञ्चति तस्याभिषिक्तस्य केशान् प्रथमान् प्राप्नोति स यत् केशान् वपेतैतां श्रियं जिह्मां विनाशयेद्व्युदुह्यादथ यन्निवर्तयते तदात्मन्येवैतां श्रियं नियुनक्ति तस्मान्न्येव वर्तयते केशान्न वपते तस्यैषैव व्रतचर्या भवति यावज्जीवं नास्यां प्रतितिष्ठति। आसन्द्या उपानहावुपमुञ्चते। उपानद्भ्यामधि यदस्य यानं भवति रथो वा किञ्चिद्वा सर्वं वा एष इदमुपर्युपरि भवत्यवरोऽस्मादिदं सर्वं भवति यो राजसूयेन यजते तस्मादस्यैव व्रतचर्या भवति यावज्जीवं नास्यां प्रतितिष्ठति” मू०। “तृतीये केशवपनीयातिरात्रस्य वैशेषिका धर्मा उच्यन्ते। पशुबन्धद्वयादनन्तरं केशवपनीयातिरात्रयागः कर्त्तव्यः। अभिषेचनीयसोमयागं कृत्वा संवत्सरपर्यन्तं केशवपनाकरणलक्षणं व्रतमाचर्य्यम् ततस्तद्व्रतविसर्जनार्थमेकः सोमयागः पौर्णमासीसुत्यः कार्यः स एव केशवपनीयातिरात्र उच्यते रात्रिमतीत्य वर्तत इत्यतिरात्रः अतिरात्रसंस्थया कार्य्य इत्यर्थः। विदुह्यात् गतसारोऽपि भवेत्। केशवपनार्थमुपयुज्यमानः क्रियमाणः स्तोमः एकविंशादिस्तोमवान् यागः केशवपनीयः। तत्र सामगैर्गीयमानेषु स्तोत्रेषु चोदकेन प्रातःसवनादिषु त्रिवृदादिस्तोमप्राप्तौ तानपवदितुं विशेषं दर्शयति तस्यैकविंशमिति। प्रातःसवनमेकविंशस्तोमयुक्तं कर्त्तव्यम् माध्यन्दिनं सप्तदशस्तोमकम् अस्य सोमयागस्यातिरात्रसंस्थानि तृतीयसवनेऽग्निष्टोमवद् द्वादश स्तोत्राणि तत उत्तरं त्रीण्युक्थस्तोत्राणि एकं षोड़शिस्तोत्रं रात्रिपर्यायस्तोत्राणि द्वादश तानि सर्वाण्यपि पञ्चदशस्तोमकानि कर्त्तव्यानि। स्तोमत्रिवृत्प्रचारस्तु प्राचीमारोहेत्यत्र दिक्समारोहणमन्त्रव्याख्यावसरे दर्शितः। किं च पूर्वदिवसरात्रिशेषे उत्तरदिवसस्योषःकाले यज्ञसंस्थापकमेकं चरमं स्तोत्रं तृतीयपर्यायस्यान्ते रथन्तरसाम्ना गातव्यम् तत् सन्धिस्तोत्रमित्युच्यते तत् स्तोत्रं त्रिवृत्स्तोत्रयुक्तं कार्य्यम्। एकविंशादवरोहणं त्रिवृत्पर्य्यन्तं यत् स्तोमकरणमुक्तं तत् सूर्य्यलोकादिक्रमाद् भूम्यवस्थानात्मना प्रशंसति एष एवैकविंश इति य एष तपति स एकविंशः सूर्य्य इत्यर्थः तस्मादपयुङ्क्ते अवरोहतीत्यर्थः सोऽवरुह्यावरुह्य त्रिवृद्रूपायामस्यां भूमिलक्षणायां प्रतिष्ठायां प्रतिष्ठितवान् भवति माध्यन्दिन सवने रथन्तरं बृहत्साम वा पृष्ठस्तोत्रं प्रकृतौ विकल्पितं अत्रैकं नियमयति तस्य रथन्तरमिति। अस्य सोमकाण्डस्यातिरात्रसंस्थात्वं प्रतिष्ठात्मना प्रशंसति अतिरात्र इति। अतिरात्रसंस्थात्मना ह्येतएष क्रतुः प्रतिष्ठारूपः। अस्य क्रतोः केशावापव्रतविसर्जनार्थं क्रियमाणत्वात्तदन्ते केशवापः कार्य्यः तत्र कञ्चिद्विशेषं विधत्ते स वै न्येवेति स यजमानो निवर्तयते केशांश्छिन्द्यादेव न वपेत् वपनं नाम मुण्डनं तन्न कुर्यात् निवर्तनं कर्तनं तत्कुर्यात् एषा केशकर्तनलक्षणा व्रतचर्या यावज्जीवनं कर्त्तव्या न केशमुण्डनं कार्य्यम् कदाचिदप्यनुपानत्कोऽपादुकः कस्यां चिदपि भूमौ उपानहौ पादुके न प्रतितिष्ठति अवस्थापनं न कुर्य्यात्। आसन्द्या अवरोहणसमयेऽपि उपानहौ पादुके उपमुञ्चते इतस्ततः संचरणसमये रथं वा यानं वारोहेत्”। भा०

केशवर्द्धनी स्त्री केशावर्द्ध्यन्तेऽनया वृध—करणे ल्युट् ङीप्। सहदेवीलतायाम् “उत स्य केशदृंहणीरथो ह केशवर्द्धनीः” अथ० ६।२१।२

केशवर्द्धिनी स्त्री केशान् वर्द्धयति वृध–णिच्–णिनि। सहदेवीलतायाम् राजनि०

केशवादित्य पु० काशीस्थे आदित्यभेदे तत्कथा काशीख० ५१अ० यथा "अतः परं शृणु मुने! केशवादित्यमुत्तमम्। यथा तु केशवं प्राप्य सविता ज्ञानमाप्तवान्। व्योम्नि सञ्चरमाणेन सप्ताश्वेनादिकेशवः। एकदाऽदर्शि भावेन पूजयन् शिवमीश्वरम्। कौतुकाद्दिव उत्तीर्य हरेरन्तिकमाविशत्। निःशब्दोनिश्चलः सुस्थोमहाश्चर्यसमन्वितः। प्रतीक्ष्यमाणोऽवसरं किञ्चित् प्रष्टुमना रविः। हरिं विसर्जितार्घ्यन्तु प्रणनाम कृताञ्जलिः। स्वागतन्ते हरिः प्राह बहुमानपुरःसरम्। स्वाभ्याशमासयामास भास्वन्तमुन्नतकन्धरम्। अथावसरमालोक्य लोकचक्षुरधोक्षजम्। नत्वा विज्ञापयामास कृतानुज्ञो मुरारिणा। रविरुवाच। अन्तरात्मासि जगतां विश्वम्भर! जगत्पते!। तथापि पूज्यः कोऽप्यस्ति जगत्पूज्यात्र माधव!। त्वत्तस्त्वाविर्भवेदेतत्त्वयि सर्वं प्रलीयते। त्वमेव पाता सर्वस्य जगतोजगतां निधे!। इत्याश्चर्यं समालोक्य प्राप्तोह्यत्र तवान्तिकम्। किमिदं पूज्यते नाथ! भवता भवतापहृत्!। इति श्रुत्वा हृषीकेशः सहस्रांशोरुदीरितम्। उच्चैर्मौल्य च सप्ताश्वं वारयन् करसंज्ञया। विष्णुरुवाच। देवदेवोमहादेवो नीलकण्ठउमापतिः। एक एव हि पूज्योऽत्र सर्वेषां सर्वकारणम्। अत्र त्रिलोचनादन्यं समर्च्चयति मोहधीः। सलोचनोऽपि स ज्ञेयो लोचनाभ्यां विवर्जितः। एकोमृत्युञ्जयः पूज्योजन्ममृत्युजराहरः। मृत्युञ्जयं किलाभ्यर्च्य लोको मृत्युञ्जयोभवेत्। कालकालं समाराध्य भृङ्गी कालं जिगाय वै। शिलादिमपि तत्याज मृत्युर्मृत्युञ्जयार्च्चकम्। विजिग्ये त्रिपुरं यस्तु हेलयैकेषुमोक्षणात्। तं समभ्यर्च्य भूतेशं को न पूज्यतमोभवेत्। त्रिजगज्जयिनस्तातस्त्र्यक्षस्याराधनं परम्। को नाराधयति ब्रध्न! हरस्य स्मरविद्विषः। यस्याक्षिपक्ष्मसङ्कोचाज्जगत् सङ्कोचमेत्यदः। विकस्वरं विकाशाच्च कथ पूज्यतमोन सः। शम्भोर्लिङ्गं समभ्यर्च्य पुरुषार्थचतुष्टयम्। प्राप्नोत्यत्र पुमान् सद्योनात्र कार्या विचारणा। समर्च्य शाम्भवं लिङ्गमधिजन्मशतार्ज्जितम्। पापपुञ्जं जहात्येव पुमानत्र क्षणाद्ध्रुवम्। किं किं न सम्भवेदत्र शिवलिङ्गसमर्च्चनात्। पुत्राः कलत्रं क्षेत्राणि स्वर्गमोक्षोऽप्यसंशयम्। त्रैलोक्यैश्वर्यसम्पत्तिर्मया प्राप्ता सहस्रगो!। शिवलिङ्गार्च्चनादेकात् सत्यं सत्यं पुनः पुनः। अयमेव परोयोगस्त्विदमेव परं तपः। इदमेव परं ज्ञानं स्थाणुलिङ्गं यदर्च्यते। यैर्लिङ्गं सकृदप्यत्र पूजितं पार्वतीपतेः। कुतोजन्मभयं तेषां संसारे दुःखभाजने। सर्वं परित्यज्य रवे! तल्लिङ्गं शरणं गतः। न तं पापानि बाधन्ते महान्त्यपि दिवाकर!। लिङ्गार्च्चने भवेच्छ्रद्धिस्तेषामेवात्र भास्कर!। येषां पुनर्भवच्छेदं चिकीर्षति महेश्वरः। न लिङ्गाराधनात् पुण्यं त्रिषु लोकेषु चापरम्। सर्वतीर्थाभिषेकः स्याल्लिङ्गस्नानाम्बुसेवनात्। तस्माल्लिङ्गं त्वमप्यर्क! समर्च्चय महेशितुः। संप्राप्नुं परमां लक्ष्मीं महातेजोविजृम्भिणीम्। इति श्रुत्वा हरेर्वाक्यं तदारभ्य सहस्रगुः। विधाय स्फाटिकं लिङ्गं मुनेऽद्यापि समर्च्चयत्। गुरुत्वेन तदाकल्प्य विवस्वानादिकेशवम्। तत्रोपतिष्ठतेऽद्यापि उत्तरेणादिकेशवात्। अतः स केशवादित्यः काश्यां भक्ततमोनुदः। समर्च्चितः सदा देयान्मनसोवाञ्छितं फलम्। केशवादित्यमाराध्य वाराणस्यां नरोत्तमः। परमं ज्ञानमाप्नोति येन निर्वाणभाग्भवेत्। तत्र पादोदके तीर्थे कृतसर्वोदकक्रियः। विलोक्य केशवादित्यं मुच्यते सर्वपातकैः। अमस्ते! रथसप्तम्यां रविवारो यदाप्यते। तत्र पादोदके तीर्थे आदिकेशवसन्निधौ। स्नात्वोषसि नरोमौनी केशवादित्यपूजनात्। सप्तजन्मार्ज्जितात् पापात् मुक्तो भवति तत्क्षणात्। यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु। तन्मे रोगञ्च शोकञ्च माकरी हन्तु सप्तमी। एतज्जन्मकृतं पापं यच्च जन्मान्तरार्ज्जितम्। मनोवाक्कायजं यच्च ज्ञाताज्ञातञ्च यत् पुन। इति सप्तविधं पापं स्नानान्मे सप्तसप्तिके। सप्तव्याधिसमायुक्तं हर माकरि! सप्तमि!। एतन्मन्त्रत्रयं जप्त्वा स्नात्वा पादोदके नरः। केशवादित्यमालोक्य क्षणान्निष्कल्मषो भवेत्। केशवादित्यमाहात्म्यं शृण्वन् श्रद्धासमन्वितः। नरोन लिप्यते पापैः शिवभक्तिञ्च विन्दति"।

केशवायुध न० ६त०। १विष्णोरस्त्रे। केशवस्यायुधं तदाकारोऽस्त्यस्य अच्। २आम्रवृक्षे पु० शब्दमाला

केशवार्क पु० ज्योतिषनिबन्धकारके विद्वद्भेदे

केशवालय पु०६त०। १अश्वत्थवृक्षे त्रिका०अश्वत्थशब्दे विवृतिः। २तस्य मन्दिरे च। केशवावासादयोऽप्यत्र पु०जटा०

केशवेश पु०केशस्य वेशः। १कबरीबन्धने अमरः। २केशानां

रचनाविशेषे च "यथाकुलधर्म्मं केशवेशान् कारयेत्" आश्व० गृ० १,१७,१७, "एकशिखस्त्रिशिखः पञ्चशिखो वा" इति बौधायनः पूर्व्वशिखः परशिखः इति कुलधर्म्माः तेषु योयस्य कुलधर्म्मः तेन तस्य केशसन्निवेशान् कारयेत्" नारा० वृ० ।

केशहन्तृफला स्त्री केशहन्तृ फलमस्याः । शमीवृक्षे शब्दच०

केशहन्त्री स्त्री केशान् हन्ति हन–टच् ङीप् । शमीवृक्षे राजनि०

केशहस्त पु० केशोहस्त इव । केशसमूहे अमरः "लक्ष्मीवान् वरवि रराज केशहस्तः" माघः । "केशहस्तेन ललना आगामाय विराजती" भा० व० ४६अ०

केशाकेशि अव्य० केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धं "तत्र तेनेदमिति सरूपे" पा० स० कर्म्मव्यतिहारे इच् समा० पूर्व्वदीर्घः तिष्ठद्गुप्रभृतित्वादव्ययत्वम् । अन्योन्यकेशग्रहणपूर्व्वकप्रवृत्तयुद्धे । एवं कचाकच्यादयोऽप्यत्र अव्य० । असरूपे तु नेदं प्रवर्त्तते । "आर्त्तानां बहुसंरम्भात् केशाकेशि रथारथि" भा०वि०३अ० "केशाकेश्यभवद्युद्धं रक्षसां वानरैः सह" भा० व० २८३अ०

केशान्त पु० केशानन्तयति छेदनात् हन्ति अन्ति (नामधातुः) अण् । द्विजातीनां षोडशादिषु वर्षेषु कर्त्तव्ये केशच्छेदनाख्ये गोदानकर्म्मणि । केशान्ताख्य गोदानकर्म्मप्रकारादि आश्व० गृ० १।१८।१। सूत्रादौ दर्शितं यथा "एतेन गोदानम्" सू० व्याख्यातमिति शेषः एतेनेति क्रत्स्नोपदेशः तत्रविशेषमाह । ना०वृ० । "षोडशे वर्षे" सू० । तृतीयस्यापवादः अत्र मातुरुपस्थोपवेशनं न भवति अयुक्तत्वात्" ना० वृ० । "केशशब्दे तु श्मश्रुशब्दान् कारयेत्" सू० । केशशब्देत्विति जातावेकवचनं श्मश्रुशब्दानिति व्यक्तिपरोनिर्देशः तेन यत्र श्मश्रुशब्दाः तत्र "अदितिः केशान् वपतु" । "वप्ता केशान्" "दक्षिणे केशपक्ष इति" त्रिषु ते कार्याः । तन्त्रगतस्य तृतीयस्य केशशब्दस्याभावाद्विधिगतस्य ग्रहणं तेन दक्षिणे श्मश्रुपक्ष इति साधितं भवति" वृ० । "श्मश्रूणीहोन्दति" सू० । "शिरस्युन्दनस्यापवादः" । वृ० । "शुम्भ शिरोमुखं मास्यायुः प्रमोषीरिति" सू० । "क्षुरनिमार्जनेऽयं विशेषः" वृ० । "केशश्मश्रुलोमनखान्युदक्संस्थानि संप्रव्यति" सू० । "शीतोष्णाभिरद्भिरवधं कुर्वाणोऽक्षुण्वन् कुशली केशश्मश्रुलोमनखान्युदक्संस्थानि कुर्विति नापितशासनम्" ना०वृ० । "आप्लुत्य वाग्यतः स्थित्वाऽहःशेषमाचार्यसकाशे वाचं विसृजेत् वरं ददामीति" सू० । "तत्र आप्लुत्य स्नात्वेत्यर्थः । वाग्यत इत्यमन्त्रयमाणः । स्थित्वेत्युपवेशन प्रतिषेधः । एवमहःशेषं स्थित्वाऽस्तमिते आचार्यसमीपे वरं ददामीति वाचं विसृजेत् । वरद्रव्यमाह" ना० वृ० । "गोमिथुनं दक्षिणा" सू० । ननु भिक्षुरयं कथमस्य गोमिथुनसम्भवः उच्यते यथास्य प्राग्रणादि सम्भवस्तथास्यापि" वृ० । "संवत्सरमादिशेत्" सू० । एवं गोदानं कृत्वा संवत्सरं व्रतमादिशेत् वक्ष्यमाणेन विधिना चरेत् । रात्रौ व्रतादेशाऽनुपपत्तेः अपरेद्युः कार्य्यम्" ना० वृ० ।

एतेनेत्यनेन चूडाविहितमन्त्रादिग्रहणातिदेशः यथाह मू० चि० "केशान्तं षोडशे वर्षे चौलोक्तदिवसे शुभम्" "षोडशे वर्षे चौलोक्तदिवसे चूडावर्षतृतीयात् प्रभवतीत्यादिना कथितशुभदिवसे गोदानपर्यायं केशान्त संज्ञं कर्म्म शुभं स्यात्" गावः केशा दीयन्ते खण्ड्यन्ते यस्मिन्निति व्युत्पत्तिः यदाह "केशान्तं षोडशे वर्षे कुर्य्याच्चौलोक्तभादिके" इति । महेश्वरोऽपि "कर्म केशान्त संज्ञं हि स्मृतं वर्षे तु षोडशे । चौलकर्मोक्तधिष्ण्याद्यौ" षोडश इत्येतद्ब्राह्मणविषयं द्रष्टव्यं क्षत्रियविशोस्तु द्वाविंशतिचतुर्विंशतितमवर्षयोः केशान्तमित्यर्थः तदुक्तं मनुना "केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः" पी०धा० । चूडोक्तनक्षत्रादि च चूडाशब्दे वक्ष्यते । अत्र कर्मपरतया क्लीवता । मनुवचने तु संस्कारपरतया पुंस्त्वमिति बोध्यम् । एतस्मात् पूर्वं महानाम्न्यादिव्रतत्रयं वर्षत्रये कर्त्तव्यं तच्च उपनिषच्छब्दे सप्रमाणं दर्शितम् । केशस्यान्तः । २केशस्य रूपे ३केशपाशे च । "केशान्तमन्तः कुसुमं तदीयम्" कुमा० ।

केशान्तिक त्रि० केशान्तः केशपर्य्यन्तः परिमाणमस्य ठञ् । केशान्तप्रमाणके "केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः । ललाटसंमितोराज्ञः स्यात्तु नासान्तिको विशः" मनुः । (करणे क । सहदेवीलतायां राजनि० ।

केशारुहा स्त्री केशा आरुहन्ति अनया आ+रुह घञर्थे

केशार्हा स्त्री केश केशवर्णमर्हति अर्ह–अण् उप० स० । महानीलीवृक्षे राजनि० ।

केशि पु० १दानवभेदे । वृषभः कालवदनः करालः केशिरेव च" हरि वं २६३ अ० । २केशिनि दानवे च "अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम्" हरिव० ४२अ० ।

केशिक त्रि० प्रशस्ताः केशोऽस्यस्य ठन् । प्रशस्तकेशयुक्ते जने

केशिका स्त्री केशीव कायति कै—क। शतावरीवृक्षे राजनि०

केशिध्वज पु० निमिवंश्ये नृपभेदे “कुशध्वजस्तस्य पुत्रस्ततो धर्मध्वजो नृपः। धर्मध्वजस्य द्वौ पुत्रौ कृतध्वजमितध्वजौ। कृतध्वजात् केशिध्वजः” भाग० ९।१३।१२।

केशिन् त्रि० केश+प्राशस्त्ये भूम्नि वा इनि। १प्रशस्तबहुकेशयुक्ते “वहतामिन्द्र केशिना” ऋ० ३।४१।९ स्त्रियां ङीप्। केशिन इदं स्वर्थे वा अण्।“गाथिविदथिकेशिगणि” इत्यादिना पा० प्रकृतिभावः। कैशिन तत्सम्बन्धिनि केशयुक्ते च स्त्रियां ङीप्। “कैशिनीरेवेमा अप्येतर्हि प्रजाः प्रजायन्ते” शत०ब्रा० ११।८।४।६। २केशतुल्यकाष्ण्युर्युक्ते त्रि०स्त्रियां ङीप्।“तमग्रुवः केशिनीः सं हि रेभिरे” ऋ० १,१४०,८, “केशिनीः केशस्थानीयोर्द्धभाविकाष्णर्पिताः ज्वालाः” भा०। केशिविद्याप्रकाशके ३गृहपतिस्वामिभेदे पु०। “केशीगृहपतीनाञ्च सम्राड् दुघा शार्दूलो जघान” इत्यादि शत० ब्रा० ११,८,४, उक्तम्। तत्सम्बन्धाच्च प्रजानां केशयुक्तत्वम् उपसंहारे “ततोहैव स उत्ससाद कैशिनीरेवेमा अप्येतर्हि प्रजाःजायन्ते” इत्युक्तत्वात्। “एवमुपदिष्टः स केशी ततोदेशात् उत्ससाद विनष्टोऽभूत्तस्मादेतर्हि इदानीमपि वर्त्तमानाः प्रजा कैशिनीरेव केशवत्यएव अथ वा केशिसम्बन्धिन्यो जायन्ते केशिना दृष्टिकरविद्यया लब्धत्वात्” भा०४ द्वापरयुगीये कृष्णनिहतेऽसुरभेदे केशिनिसूदनशब्दे विवृतिः

केशिनिसूदन न० केशिनं निसूदयति नि+सूद—ल्यु। वासुदेवे कृष्णे तन्निसूदनकथा च हरिवं० ८१अ० यथा “प्रागेव तु नरेन्द्रेण माथुरेणौग्रसेनिना। केशिनः प्रेषितो दूतो वधायोपेन्द्रकारणात्। स तु दूतवचः श्रुत्वा केशी क्रोधकरो नृणाम्। वृन्दावनगतो गोपान् बाधते स्म दुरासदः। मानुषं मांसमश्नानः क्रुद्धो दुष्टपराक्रमः। दुर्दान्तो वाजिदैत्योऽसावकरोत् कदनं महत्। निघ्नन् गा वै सगोपालान् गवां पिशितभोजनः। उद्दामकामचारी च स केशी निरवग्रहः। तदरण्यं श्मशानाभं नृणामस्थिभिरावृतम्। यत्रास्ते स हि दुष्टात्मा केशी तुरगदानवः। खुरैर्दारयते भूमिं वेगेनारुजते द्रुमान्। ह्रेषितैः स्पर्द्धते वायुं प्लुतैर्लङ्घयते नभः। अतिप्रवृद्धो मत्तश्च दुष्टाश्वो वनगोचरः। प्रकम्पितसटो रौद्रः कंसस्य चरितानुगः। इरिणं तद्वनं सर्वं तेनासीत् पापकारिणा। कृतं तुरगदैत्येन सर्वान् गोपान् जिघांसता। तेन दुष्टप्रचारेण दूषितं तद्वनं महत्। न नृभिर्गोधनैश्चापि सेव्यते वनवृत्तिभिः। निःसम्पातः कृतः पन्थास्तेन तद्विषयाश्रितः। मदाच्चलितवृत्तेन नृमांसान्यश्नता भृशम्। नृशब्दानुसरः क्रुद्धः स कदाचिद्दिनागमे। जगाम घोषसंवासं चोदितः कालधर्मणा। तं दृष्ट्वा दुद्रुवुर्गोपाः स्त्रियश्च शिशुभिः सह। क्रन्दमाना जगन्नाथं कृष्णं नाथमुपाश्रिताः। तासां रुदितशब्देन गोपानां क्रन्दितेन च। दत्त्वाऽभयन्तु कृष्णो वै केशिनं सोऽभिदुद्रुवे। केशी चाप्युन्नतग्रीवः प्रकाशदशनेक्षणः। ह्रेषमाणो जवोदग्रो गोविन्दाभिमुखो ययौ। तमापतन्तं सम्प्रेक्ष्य केशिनं हयदानवम्। प्रत्युज्जगाम गोविन्दस्तोयदः शशिनं यथा। केशिनस्तु तमभ्याशे दृष्ट्वा कृष्णमवस्थितम्। मनुष्यबुद्धयो गोपाः कृष्णमूचुर्हितैषिणः। कृष्ण! तात! न खल्वेष सहसा ते हयाधमः। उपसर्प्यो भवान् बालः पापश्चैवं दुरासदः। एष कंसस्य सहजः प्राणस्तात! बहिश्चरः। उत्तमश्च हयेन्द्राणां दानवोऽप्रतिमो युधि। त्रासनः परसैन्यानां तुरगाणां महाबलः। अवध्यः सर्वभूतानां प्रथमः पापकर्मणाम्। गोपानां तद्वचः श्रुत्वा वदतां मधुसूदनः। केशिना सह युद्धाय मतिञ्चक्रेऽरिसूदनः। ततः सव्यं दक्षिणञ्च मण्डलानि परिभ्रमन्। पद्भ्यामुभाभ्यां स हयः क्रोधेनारुजते द्रुमान्। मुखे लम्बसटे चास्य स्कन्धे केशघनावृते। वलयो भ्रूतरङ्गाभाः सुस्रुवुः क्रोधजं जलम्। सफेनं वक्त्रजश्चैव ववर्ष रजसावृतम्। हिमकाले यथा व्योम्नि नीहारमिव चन्द्रमाः। गोविन्दमरविन्दाक्षं हेषितोद्गारशीकरैः। सफेनैर्वक्त्रनिर्गीर्णैः प्रोक्षयामास भारत!। खुरोद्धूतावसक्तेन मधुकक्षोदपांशुना। रजसा स हयः कृष्णं चकारारुणमूर्द्धजम्। प्लुतवल्गितपादस्तु तक्षमाणो धरां खुरैः। दन्तान् निर्दशमानस्तु केशी कृष्णमुपाद्रवत्। स संसक्तस्तु कृष्णेन केशी तुरगसत्तमः। पूर्वाभ्याञ्चरणाभ्यां वै कृष्णं वक्षस्यताडयत्। पुनः पुनश्च स बली प्राहिणोत्पार्श्वतः खुरान्। कृष्णस्तु दानवो घोरं प्रहारममितौजसः। वक्त्रेण चास्य घोरेण तीक्ष्णदंष्ट्रायुधेन वै। अदशद्बाहुशिखरं कृष्णस्य रुषितो हयः। स लम्बकेशरसटः कृष्णेन सह सङ्गतः। रराज केशी मेघेन संयुक्तः खे इवांशुमान्। उरसास्योरसा हन्तुमियेष बलवान् हयः। वेगेन वासुदेवस्य क्रोधाद्द्विगुणविक्रमः। तस्योत्थितस्य बलवान् कृष्णोऽप्यमितविक्रमः। बाहुमाभोगिनं कृत्वा मुखे क्रुद्धः समादधत्।

स तं बाहुमशक्तो वै खादितुं भेत्तुमेव वा। दशनैर्मूलनिर्मुक्तैः सफेनं रुधिरं वमन्। विपाटिताभ्यामोष्ठाभ्यां कटाभ्यां विदलीकृतः। अक्षिणी विकृते चक्रे विवृते मुक्तबन्धने। निरस्तहनुराविष्टः शोणिताक्षविलोचनः। उत्कर्णो नष्टचेतास्तु स केशी बह्वचेष्टत। उत्पतन्नसकृत् पादैः शकृन्मूत्रं समुत्सृजन्। स्विन्नार्द्ररोमा श्रान्तस्तु निर्यत्नचरणोऽभवत्। केशिवक्त्रविलग्नस्तु कृष्णबाहुरशोभत। व्याभुग्न इव घर्मान्ते चन्द्रार्द्धकिरणैर्घनः। केशी च कृष्णसंसक्तः श्रान्तगात्रो व्यरोचत। प्रभातावनतश्चन्द्रः श्रान्तो मेरुमिवाश्रितः। तस्य कृष्णभुजोद्धूताः केशिनो दशना मुखात्। पेतुः शरदि निस्तोयाः सिताभ्रावयवा इव। स तु केशी भृशं श्रान्तः कृष्णेनाक्लिष्टकर्मणा। स्वभुजं स्वायतं कृत्वा पाटितो बलवत्तदा। स पाटितो भुजेनाजौ कृष्णेन विकृताननः। केशी नदन्महानादं दानवो व्यथितस्तदा। विघूर्णमानः स्रस्ताङ्गो मुखाद्रुधिरमुद्वमन्। भृशं व्यङ्गीकृतवपुर्भिन्नार्द्ध इवाचलः। व्यादितास्यो महारौद्रः सोऽसुरः कृष्णबाहुना। निपपात यथा कृत्तो नागो द्विविदलीकृतः। बाहुना कृत्तदेहस्य केशिनो रूपमावभौ। पशोरिव महाघोरं निहतस्य पिनाकिना। द्विपादपुच्छकटार्द्धे श्रवणैकाक्षिनासिके। केशिनस्ते द्विधा भूते द्वे त्वर्द्धे रेजतुः क्षितौ। केशिदन्तक्षतस्यापि कृष्णस्य शुशुभे भुजः। कृत्तस्ताल इवारण्ये गजेन्द्रदशनाङ्कितः। तं हत्वा केशिनं युद्धे कल्पयित्वा च भागशः। कृष्णः पद्मपलाशाक्षो हसंस्तत्रैव तस्थिवान्। तं हतं केशिनं दृष्ट्वा गोपा गोपस्त्रियस्तथा। बभूवुर्मुदिताः सर्वे हतविघ्ना हतक्लमाः। दामोदरन्तु श्रीमन्तं यथास्थानं यथावयः। अभ्यनन्दन् प्रियैर्वाक्यैःपूजयन्तः पुनः पुनः” “वैशम्पायन उवाच कथाऽऽन्तर्हितो विप्रो नारदः खगमो मुनिः। प्रीतोऽस्मि विष्णो! देवेति कृष्ण! कृष्णेति चाब्रवीत्। यदिदं दुष्करं कर्म कृतं केशिजिघांसया। त्वय्येव केवलं युक्तं त्रिदिवे त्र्यम्बकेऽपि वा। अहं त्वनेन गोविन्द! कर्मणा परितोषितः। हयादस्मान्महेन्द्रोऽपि बिभेति बलसूदनः। कुर्वाणस्य वपुर्घोरं केशिनो दुष्टचेतसः। यस्त्वया पाटितं देह भुजनावतपर्वणा। एषोऽस्य मृत्युरन्ताय विहितो विश्वयोनिना। यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु। केशवो नाम तस्मात् त्वं ख्यातिं लोके गमिष्यसि”। केशिहन् इत्यादयोऽप्यत्र। “त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः”विष्णु स०। “प्रकाशनात् केशाः रश्मयस्ततः अस्त्यर्थे इनि। ५परमेश्वरे ६सूर्य्यादित्रये च। “केशी केशा रश्मयस्तद्वान् भवति काशनाद्वा प्रकाशनाद्वेति” १२।२६। निरु० निरुच्यत्र “केश्यग्निं केशी विषं केशी बिभर्त्ति रोदसी। केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते” ऋ० १०।१३६। १ऋचमुदाहृत्य व्याकृतं यथा “केशी अग्निश्च विषञ्च विषमित्युदकनाम विष्णातेः विपूर्ब्बस्य स्नातेः शुद्ध्यर्थस्य विपूर्ब्बस्य वा सचतेः। द्यावापृथिव्यौ धारयति केशीदं सर्वमिदमभिरोहति केशीदं ज्योतिरुच्यते इत्यादित्यमाह अथाप्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्निः रजसा च मध्यमः”इत्युक्ता च तेषामेषां साधारणाभवतीत्युक्ता च। “त्रयः केशिन ऋतुथा विचक्षते संवत्सरे वपत एकएषाम्। विश्वमेको अभिचष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम्” ऋ० १।१६४।४४। ऋगुदाहृता; व्याख्याताचैषा भाष्ये

“केशस्थानीयप्रकृष्टरश्मियुक्तास्त्रयोऽग्न्यादित्यवायवः ते च ऋतुधा काले काले विचक्षते विविधलक्षणां भूमिं पश्यन्ति तेषां पृथक् पृथक् कार्य्यमाह एषां मध्य एकोऽग्निः संवत्सरेऽतीते सति संवत्सरं पर्य्यन्ते दाहेन केशस्थानीयोषधिवनस्पत्यादिकच्छेदनेन नापितकार्य्यं करोति एकः अन्यः आदित्यो विश्वं सर्वं जगत् शचीभिः स्वकीयैः प्रकाशवृष्ट्यादिकर्मभिरभिचष्टे सर्वतः पश्यति एकस्य वायोर्ध्राजिर्गतिर्ददृशे दृश्यते सर्वैः न रूपं अप्रत्यक्षत्वात् स्पर्शशब्दधृतिकम्पलिङ्गैर्गम्यत इति हि न्यायविदोवदन्ति” भा०

केशिनी स्त्री केशाः तदाकाराः जटाः सन्त्यस्य इनि ङीप्। १जटामांस्यां राजनि० २चोरपुष्पोवृक्षे (चोरकांचकी) अमरः। ३प्रशस्तकेशयुक्तायां स्त्रियां, ऋतुरूपनलं प्रति दमयन्तीप्रेरिते ४तद्दूतीभेदे “गच्छ केशिनि! जानीहि”“एवमुक्तास्य केशिन्या नलस्य कुरुनन्दन!”। “ततः सा केशिनी गत्वा दमयन्त्यै न्यवेदयत्” इति च भा० व०७४अ०। कश्यपपत्नीप्रधायाः ५कन्याकृपे अप्सरोभेदे। “प्रधाऽसूत महाभागा देवी देवर्षितः पुरा” इत्युपक्रमे“केशिनी च सुबाहुश्च सुरता सुरजा तथा” भा० आ०६५अ०। ६पार्व्वतीसहचरीभेदे “गौरी विद्याऽथ गान्धारी केशिनी मित्रसाह्वया। सावित्र्या सह सर्व्वाश्चः पार्व्वत्या यान्ति पृष्ठतः” भा० व० २२०अ०

७अजमीढन्टपपत्नीभेदे। "अजमीढोवरस्तेषां तस्मिन् वंशः प्रतिष्ठितः। षट् पुत्रान् सोऽप्यजनयत् तिसृषु स्त्रीषु। भारत!। ऋक्षं धूमिन्यथो नीली दुष्मन्तपरमेष्ठिनौ। केशिन्यजनयज्जह्नुं सुतौ व्रजनरूपिणौ"भा०आ०९४अ०। "अजमीढस्य केशिन्यां जज्ञे जह्नुः प्रतापवान्" हरिवं २२अ०। ८सुहोत्रन्टपभार्य्यायाम् "सौहोत्रिरभवज्जह्नुः केशन्या गर्भसम्भवः" हरिवं० २७अ०। ९सगरभार्य्याभेदे "हे भार्य्ये सगरस्यास्तां तपसा दग्धकिल्विषे। ज्येष्ठा विदर्भदुहिता केशिनी नाम विश्रुता। केशिन्यसूत सगरादसमञ्जसमात्मजम्" हरिवं०१६०। १०राक्षसमातरि कैकस्याम् "ततस्तौ राक्षसौ जातौ केशिन्यां विश्रवः-सुतौ। रावणः कुम्भकर्णश्च सर्व्वलोकोपतापनौ" भाग० ७।१।४२। कैकस्या नामान्तरमिदम्

केशी स्त्री केश—गौरा० ङीष्। १नीलीवृक्षे राजनि० २भूतकेशीवृक्षे ३अजलोमावृक्षे रत्नमा०

केशोच्चय पु० ६त०। केशसमूहे हेमच०

केश्य त्रि० केशाय हितः यत्। १केशहितकारके तत्कार्य्योत्पादके २पदार्थे। "तिलोहि पाके मधुरोबलिष्ठः" इत्युपक्रमे "स्निग्धोऽथ केश्योऽनिलहा गुरुश्च" "केश्यं रसायनं मेध्यं काश्मर्य्यं फलमुच्यते" "केशप्रसादनी (काँकइ) केश्या रजोजन्तुमलापहा" सुश्रु०। मधुररससेवनस्य केश्यत्वं तत्रोक्तं तदुपक्रमे "चक्षुष्यः केश्योवर्ण्यः" इति सुश्रु० २कृष्णागुरुणि न० ३भृङ्गराजे पु० राजनि० तयोः केशहितत्वात् तथात्वम्। [विष्टतिः

केसर न० के जले सरति सृ-अच्। केशरशब्दार्थे तत्र

केसरवर न० केसरेण किञ्जल्केन वृणाति वृ—अच्। कुङ्कुमे। राजनि०।

के(श)सराचल पु०भूपद्मस्य केसरे स्थितः केशराकरतया वा स्थितः। सुमेरुपर्वते। तस्य च भूरूपपद्मस्य कर्णिकारूपेण मध्यस्थितत्वात् तथात्वं यथोक्तं विष्णु पु० "जम्बुद्वीपः समस्तानां द्वीपानां मध्यतः स्थितः। तस्यापि मेरुर्मैत्रेय! मध्ये कनकपर्वतः" इत्युपक्रमे "भूपद्मस्यास्य शैलोऽसौ कर्णिकासंस्थितः स्थितः। तयोर्मध्यगतो मेरुः कर्णिकाकारसंस्थितः। भारताः केतुमालाश्च भद्राश्वाः कुरवस्तथा। पत्राणि लोकपद्मस्य मर्य्यादाश्चैव बाह्यतः" इति च विष्णु पु०। "सीता (नदी) तु ब्रह्मसदनात् केसराचलादिशिखरेभ्योऽधोऽधः स्रवन्ती" भाग० ५।७।८।

केसराम्ल पु० के जलनिमित्तं सरति अम्लो रसोऽस्य। वीजपूरके जम्बीरभेदे जटा०। दर्शनेनापि जिह्वाया रसनिःस्रावकत्वात्तस्य तथात्वम्।

केसरिका स्त्री के जले सरति साधुकारितया सृ—वुन् अलुक् स० टाप् अतइत्वम्। सहदेवीलतायां राजनि०।

केसरिन् पुंस्त्री केसरोऽस्त्यस्य इनि। १सिंहे २घोटके च अमरः "धनुर्द्धरं केसरिणं ददर्श" रघुः। स्त्रियां ङीप्। ३पुन्नागे ४नागकेसरे पु० मेदि०। ५रक्तशोभाञ्जने राजनि०। ६हनूमत्पितरि पु० (केशरिन्)शब्दे दृश्यम्

केसरिसुत पु० ६त०। हनूमति तत्कथा केशरिसुतशब्दे उक्ता केसरितनयादयोऽपि तत्रार्थे पु०। [शब्दे।

कै शब्दे भ्वा० पर० अक० अनिट्। कायति अकासीत्।

कैंशुक न० किंशुकस्येदम् "पुष्पफले बहुलम्" पा० बहुलग्रहणात् तस्य न लुक्। किंशुकपुष्पे "योषित् स्तन्यं यात कुष्मं विहष्टं क्षौद्रोपेतं कैंशुकञ्चापि पुष्पम्" सुश्रु० लुपि तु किंशुकमित्येव तत्रार्थे न० [र्थे तच्छब्दे उदा०दृश्यम्

कैकय पु०त०स्वार्थेऽण् बा०न यादेरियादेशः। केकयशब्दा-

कैकस पु०कीकसमस्थि सारतयाऽस्त्यस्य प्रज्ञा० अण्। १राक्षसे स्त्रियां शार्ङ्गरवा० ङीन् कैकसी। सा च २सुमालिकन्याभेदे "राका पुष्पोत्कटा चैव कैकसी च शुचिस्मिता कुम्भीनसी च इत्येताः सुमालेः प्रसवाः सुताः" रामा० उ०६स०। सा च रावणादिमाता तत्कथा रामा०उ० ९स० "किं तु मां विद्धि ब्रह्मर्षे! शासनात् पितुरागताम्। कैकसी नाम नाम्नाहं शेषं त्वं ज्ञातुमर्हसि। स तु गत्वा मुनिर्ध्यानं वाक्यमेतदुवाच ह। विज्ञातं ते मया भद्रे! कारणं यन्मनोगतम्। सुताभिलाषो मत्तस्ते मत्तमातङ्गगामिनि!। दारुणायां तु वेलायां यस्मात् त्वं मामुपस्थिता। शृणु तस्मात् सुतान् भद्रे! यादृशान् जनयिष्यसि। दारुणान्दारुणाकारान्दारुणाभिजनप्रियान्। प्रसविष्यसि सुश्रोणि! राक्षसान् क्रूरकर्मणः। सा तु तद्वचनं श्रुत्वा प्रणिपत्याब्रवीद्वचः। भगवन् नेदृशान् पुत्रांस्त्वत्तोऽहं ब्रह्मवादिनः। नेच्छामि सुदुराचारान् प्रसादं कर्तुमर्हसि। कन्यया त्वेवमुक्तस्तु विश्रवा मुनिपुङ्गवः। उवाच कैकसीं भूयः पूर्णेन्दुरिव रोहिणीम्। पश्चिमो यस्तव सुतो भविष्यति शुभानने!। मम वंशानुरूपः स धर्मात्मा च न संशयः। एवमुक्ता तु सा कन्या राम! कालेन केनचित्। जनयामास बीभत्सं रक्षोरूपं सुदारुणम्। दशग्रीवं महादंष्ट्रं नीलाञ्जनचयोपमम्।

ताम्बोर्द्ध विंशतिभुजं महास्यं दीप्तमूर्द्धजम्। तस्मिन् जाते ततस्तस्मिन् सज्वालाकवलाः शिवाः। क्रव्यादाश्चापसव्यानि मण्डलानि प्रचक्रमुः। ववर्ष रुधिरं देवो मेघाश्च खरनिःस्वनाः। प्रबभौ न च सूर्य्योऽत्र महोल्काश्चापतन् भुवि। चकम्पे जगती चैव ववुर्वाताः सुदारुणाः। अक्षोभ्यः क्षुभितश्चैव समुद्रः सरितां पतिः। अथ नामाकरोत् तस्य पितामहसमः पिता। दशग्रीवः प्रसूतोऽयं दशग्रीवो भविष्यति। तस्य त्वनन्तरं जातः कुम्भकर्णो महाबलः। प्रमाणाद्यस्य विपुलं प्रमाणं नेह विद्यते। ततः शूर्पणखा नाम संजज्ञे विकृतानना। विभीषणश्च धर्मात्मा कैकस्याः पश्चिमः सुतः"।

कैकेय पु० केकयानां राजा अण् यादेरियादेशः। १केकयदेशनृपे केकयशब्दे उदाहरणादि। तस्यापत्यम् अण् ङीप्। २भरतमातरि स्त्री "कैकेयीशङ्कयेवाह पलितच्छद्मना जरा" "दूषयामास कैकेयी शोकोष्णैः पार्थिवाश्रुभिः" "श्रुत्वा तथाविधं मृत्युं कैकेयीतनयः पितुः" रघुः

कैटज पु० कुटज+पृषो०। कुटजवृक्षे भावप्रकाश इति शब्दकल्पद्रुमः भावप्रकाशे तु कुटजः कूटजः इत्येव पाठः कूटजशब्दे दृश्यः

कैटभ पु० असुरभेदे तत्कथा हरिवं० ५२अ०
"अहमादौ पुराणेन संदिष्टा पद्मयोनिना। मान्ने कृत्वा कृतौ पूर्वं मृण्मयौ द्वौ महासुरौ। कर्णस्रोतोभवौ द्वौ हि विष्णोरस्य महाबलौ। महार्णवे प्रस्वपतः काष्ठकुड्यसमौ स्थितौ। तौ विवेश स्वयं वायुर्ब्रह्मणा साधुचोदितः। तौ दिवं छादयन्तौ तु ववृधाते महासुरौ। वायुप्राणौ तु तौ दृष्ट्वा ब्रह्मा परिमृशच्छनैः। एकं मृदुतरं मेने कठिनं वेद चापरम्। नामनी तु तयोश्चक्रे सवितुः कमलोद्भवः। मृदुस्त्वयं मधुर्नाम कठिनः कैटभोऽभवत्। तौ दैत्यौ कृतनामानौ चेरतुर्बलदर्पितौ। सर्वमेकार्णवं लोकं योद्धुकामौ सुनिर्भयौ। तावागतौ समालोक्य ब्रह्मा लोकपितामहः। एकार्णवाम्बुनिचये तत्रैवान्तरधीयत। स पद्मे पद्मनाभस्य नाभिमध्यात् समुत्थिते। रोचयामास वसतिं गुह्यं ब्रह्मा चतुर्मुखः। तावुभौ जलगर्भस्थौ नारायणपितामहौ। बहून् वर्षगणानप्सु शयानौ न चकम्पतुः। अथ दीर्घस्य कालस्य तावुभौ मधुकैटभौ। आजग्मतुस्तमुद्देशं यत्र ब्रह्मा व्यवस्थितः। दृष्ट्वा तावसुरौ घोरौ महाकायौ दुरासदौ। ब्रह्मणा ताडितौ विष्णुः पद्मनालेन वै पुरा। उत्पपाताशु शयनात् पद्मनाभो महाद्युतिः। तद्युद्धमभवद्घोरं तयोस्तस्य च वै तदा। एकार्णवे तदा लोके त्रैलोक्ये जलतां गते। तदाभूत्तुमुलं युद्धं वर्षसङ्ख्यासहस्रशः। न च तावसुरौ युद्धे तदा श्रममवापतुः। अथ दीर्घस्य कालस्य तौ दैत्यौ युद्धदुर्मदौ। ऊचतुः प्रीतमनसौ देवं नारायणं प्रभुम्। प्रीतौ स्वस्तव युद्धेन श्लाघ्यस्त्वं मृत्युरावयोः। आवां जहि न यत्रोर्वी सलिलेन परिप्लुता। हतौ च तव पुत्रत्वं प्राप्नुयाव सुरोत्तम!। यो ह्यावां युधि निर्जेता. तस्यावां विहितौ सुतौ! स तु गृह्य मृधे दोर्भ्यां दैत्यौ समपीडयत्। जग्मतुर्निधनञ्चापि तावुभौ मधुकैटभौ। तौ हतौ चाप्लुतौ तोये वपुर्भ्यामेकतां गतौ। मेदो मुमुचतुर्दैत्यौ मथ्यमानौ जलोर्मिभिः। मेदसा तज्जलं व्याप्तं ताभ्यामन्तर्दधे ततः। नारायणश्च भगवानसृजत् स पुनः प्रजाः। दैत्ययोर्मेदसा छन्ना मेदिनीति ततः स्मृता। प्रभावात् पद्मनाभस्य शाश्वती जगती कृता"।

कैटभजित् पु० कैटभं जितवान् जि—भूते क्विप्। विष्णौ अमरः तद्वधकथा च कैटभशब्दे उक्ता "उद्गर्भत्वं कैटभजितः शयनात्" कैटभद्विष् इत्यादयोऽप्यत्र "तनौ ममुस्तत्र न कैटभद्विषः" माघः १स०। कैटभारि तत्रार्थे अमरः। कैटभशत्रु प्रभृतयोऽप्यत्र पु०

कैटभी स्त्री कैटभे कैटभनाशकाले स्तुत्या अण् ङीप्। महाकाल्याम् योगनिद्रायाम्। "यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुकैटभौ" महाकालीध्याने तद्वधं तस्याः स्तुतिरुक्ता। तत्स्तुतिश्च "योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते आस्तीर्य्य शेषशयनं कल्पान्ते भगवान्प्रभुरित्युपक्रम्य देवीमाहात्म्ये दर्शिता।

कैटभेश्वरी स्त्री "कैटभं निहत्य कृत्वा गृहीता तत्पुरी यतः। तेन सा गीयते देवी पुराणे कैटभेश्वरीति देवीपु० ४५अ० उक्तनिरुक्तियुक्तायां दुर्गायाम्

कैटर्य्य पु० किट—त्रासे घञ् केटं राति अतितिक्तत्वात् रा+क स्वार्थे ष्यञ्। १भूनिम्बे, अमरः २कट्फले, रत्नमा० ३पूतिकरञ्जे ४मदनवृक्षे च राजनि०

कैडर्य्य पु० कैटर्य्य+पृषो०। कैटर्य्यशब्दार्थे राजनि०

कैतव न० कितवस्य भावः कर्म्म वा युवा० अण्। १शाठ्ये २द्यूते ३वैदूर्य्यमणौ राजनि०। स्वार्थे अण्। ४कितवे ५शठे ६द्यूतकारके ७धत्तूरे च पु० "कैतवेनाबलानां वा युद्धे

या नास्यतां धनुः" भा०व० ७८अ० । "दीव्य यत् कैतवं पाण्डव ! तेऽवशिष्टम्" भा० स० ६२अ० । "यद्वोच-स्तद्वैमि कैतवम्" कुमा०

कैतवेय पु० कितवायाः अपत्यं ढक् । अंशुमन्नृपसुते उलूके नृपभेदे "उलूकः कैतवेयश्च वीरश्चांशुमतः सुतः" हरिवं०९८अ० । वा० अञ् । कैतव्योऽप्यत्र "उलूकः गच्छ कैतव्य ! पाण्डवान् सहसोमकान्" भा० उ०५८अ० ।

कैन्दासायन पुंस्त्री० किन्दासस्य युवापत्यम् हरिता० फक् । निन्दितदासस्य यून्यपत्ये

कैन्नर त्रि० किन्नरः तन्नामवर्षमभिजनोऽस्य तक्षशिला० अञ् । पितृादिक्रमेण १किन्नरवर्षवासिनि । किन्नरस्येदम् अण् । २किंपुरुषसम्बन्धिनि त्रि० उभयत्र स्त्रियां ङीप् ।

कैमुतिक पु० किमुत इत्यर्थात् आगतः ठक् । किमुतेत्यर्थतः प्राप्ते न्यायभेदे । यथा बह्वायाससाध्यकर्मसमर्थस्य अल्पा-याससाध्यकर्म्मसामर्थ्यं तन्न्यायसिद्धमेवन्यदप्यूह्यम् ।

कैरलेय त्रि० केरलानां राजा बा०ढक् । केरलदेशनृपे "उ-त्तमौजास्तथा शाल्वः कैरलेयश्च कौशिकः" हरिवं०९९अ०

कैरव न० के जले रौति रु—अच् अलुक् स० केरवो हंस-स्तस्य प्रियम् अण् । १कुमुदे, शुक्लोत्पले, अमरः २शत्रौ पु० कैतवे न० मेदि० । "आप्तत्कुलं कैरवध्वंसं हू-सयते च या सुमनसामुल्लासिनी मानसे" चन्द्रालो० । "कस्मै नाथ ! समर्प्य कैरवकुलं व्योमान्तमालम्बसे" उद्भ-टः । ततः पुष्करा० इनि ङीप् । कैरविणी कुमुदयु-क्तलतायां तत्समूहे च स्त्री ।

कैरविणीखण्ड पु०समूहे कमला० खण्ड । कुमुदलतासमूहे

कैरविणीफल न०६त० । (बेरा) इति ख्याते कुमुदनीबीजे

कैरवेन् पु० कैरं प्रकाशयाऽऽऽस्त्यस्य इनि चन्द्रे शब्दमा०

कैरवी स्त्री कैरवस्य प्रिया अण् ङीप् । १चन्द्रिकायां मेदि० २मेथिकायां राजनि० [स्वार्थे अण् । स्थावरविषभेदे हेम०

कैराटक पु० किरं पर्य्यन्तभूमिमटति अट—ण्वुल् ६त० ततः

कैरात पु० किरात इव शूरः इवार्थे अण् । १बलवत्पुरुषे, किरातदेशे (पर्य्यन्तदेशे) भवः अण् । २भूनिम्बे शब्दच० ३शम्बरचन्दने न० राजनि० ४भूनिम्बे पु० राजनि० । किरातस्येदम् अण् । ५किरातसम्बन्धिनि त्रि० "कैरा-तं वेशमास्थाय" भा०व० ३९२अ० ।

कैराल न० किरं पर्य्यन्तभूमिमलति अल—अण् उप०स० ततः स्वार्थे अण् । १विडङ्गे वैद्यकम् । गौरा०ङीष् । २कैराली तदर्थे स्त्री राजनि० ।

कैलास पु० के जले लासो लसनं दीप्तिरस्य अलुक्स० केलस स्फटिकस्तस्येव शुभ्रः अण्, केलीनां समूहः अण्—कैलं तेनास्यतेऽत्र आस—आधारे घञ् वा । शिवकुवेरयोः स्थाने पर्व्वतभेदे । स च वृह० सं० कूर्म्मविभागे उत्त-रस्यामुक्तः "उत्तरतः कैलासोहिमवान् गिरिर्धनुष्मां-श्च" । स च अलकासमीपस्थितः "अलकां रमया चैव कैलासः शङ्करालयः" काशी० १२अ० । तत्स्वरूपञ्च हरिवं० २१७अ० वर्णितं यथा

"मन्दरश्चोच्चशिखरः, स्फाटिकैर्म्मणिभिश्चितः। वलगर्भै-र्निरालम्बैः स्वर्गोपम इवाबभौ । सह शृङ्गैश्च कैलासः शिलाधातुविभूषितः । तोरणैश्चैव निविडैः प्रांशुभि-श्चैव पादपैः । मयादयश्चिर्गन्धर्व्वैः किन्नरैश्च प्रगायि-भिः । देवकन्यासहायैश्च प्रक्रीडित इवाबभौ । मधुरै-र्वाद्यगीतैश्च नृत्यैश्चाभिनयोद्धृतैः । शृङ्गारैः सुप्र-हावैश्च कैलासो मदतीति" ।

तस्य विष्णुनाभिपद्मस्य गर्भाङ्कुरत्वं हरिवं० २०२ अ० वर्णित यथा

"तस्मिन् हिरण्मये पद्मे बहुयोजनविस्तृते । सर्व्वतेजो-गुणमये पार्थिवैर्लक्षणैर्युते । तच्च पद्मं पुराकल्पाः पृथि-वीरूपमुत्तमम् । नारायणात् समुत्पन्नं प्रवदन्ति महर्ष-यः । या तु पद्मासना देवी तां पृथ्वीं परिचक्षते । ये तु गर्भाङ्कुराः सारास्तान् दिव्यान् पर्व्वतान् विदुः । हिम-वन्तञ्च मेरुञ्च नीलं निषधमेव च । कैलासं क्रौञ्चवन्तञ्च तथाऽद्रिं गन्धमादनम् । पुण्यं त्रिशिखरं चैव कान्तं मन्दरमेव च । उदयञ्च गिरिश्रेष्ठं विन्ध्यमस्तञ्च पर्व्वतम् । एते देवगणानाञ्च सिद्धानाञ्च महात्मनाम् । आश्रयाः सर्वभूतानां पुण्याः कामयुजोऽद्रयः । एतेषामन्तरो देशो जम्बुद्वीप इति स्मृतः" ।

कैलासप्रमाणञ्च भाग० ५,१६,२९, उक्तं यथा "जठ-रदेवकूटौ मेरुं पूर्व्वेण द्वादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः एवमपरेण पवनपारियात्रौ" दक्षिणेन कैलासकरवीरौ प्रागायतौ" । "शुभ्रं पाण्डरमेघाभं कैलासञ्च नगोत्तमम्" हरि० २२६अ० । "कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः" मेघ०

कैलासनाथ पु० ६त० । १शिवे २कुवेरे च "कैलासनाथं तरसा जिगीषुः" रघुः । कैल.सपत्यादयोऽप्यत्र ।

कैलासयात्रा स्त्री कैलासयात्रामधिकृत्य कृतो ग्रन्थः अण् आख्यायिकायां तस्य लुक् । हरिवंशान्तर्गते "किमस्

भगवान् विष्णुर्देवदेवो जनार्द्दनः। गतः कैलासशिखरमालयं शङ्करस्य च” २६४अ० अध्यायावधिके २८१अध्यायपर्य्यन्ते ग्रन्थे। उपसंहारे अनुक्रमणिकाध्याये “कैलासयात्रा कृष्णस्य पौण्ड्रकस्य वधस्तथा” इत्युक्तं तेन गौड़पुस्तके कैलासयात्राध्यायाभावः प्रामादिक एव

कैलासौकस् पु० कैलास ओको यस्य। १शिवे २कुवेरे च हेमच०

कैवर्त्त पुंस्त्री के जले वर्त्तते वृत-अच् अलुक् स० ततः स्वार्थे अण्। “निषादो मार्गवं सूते दासं नौकर्म्मजीविनम्। कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः” मनूक्तायां(जेले)धीवरजातौ। “ब्राह्मणेन शूद्रायां जातो निषादः प्रागुक्तः प्रकृतायामायोगव्यां मार्गवं दासापरनामानं नौव्यवहारजीविनं जनयति। आर्य्यावर्त्तदेशवासिनः तं कैवर्त्तशब्देन कीर्त्तयन्ति” कुल्लू०

कैवर्त्तमुस्त न० के जले वर्त्तते वृत-अच् अलुक्स० स्वार्थे अण् कर्म्म०। मुस्तकभेदे (केउरिया) शब्दर० स्वार्थे क। तत्रार्थे भरतः [प्रसिद्धे लताभेदे वत्सरक्षायाम् राजनि०

कैवर्त्तिका स्त्री कैवर्त्ती स्वार्थे कन् ह्रस्वः। मालवदेश

कैवर्त्तिमुस्तक न०। कैवर्त्त्याः कैवर्त्तपत्न्याः प्रियं मुस्तकं संज्ञायां “ङ्यापोः” पा० वा ह्रस्वः। कैवर्त्तमुस्तके मुस्ताभावे कैवर्त्तीमुस्तकमप्यस्य (केउरया) ख्याते मुस्तकभेदे भरतः

कैवर्त्ती स्त्री के जले वर्त्तते वृत-अच् अलुक्स० कैवर्त्तो जलस्यासव स्वार्थे अण् ङीप्। (केउरिया) १मुस्तकभेदे वैद्यकम् पुंयोगे ङीप्। २कैवर्त्तपत्न्याञ्च [विष्णु० रत्नमा०

कैवल्ल न० के वलते यत्न-अच् अलुक् स० स्वार्थे अण्।

कैवल्य न० केवलस्य भावः ष्यञ्। १आत्यन्तिकदुःखविगमरूपे मुक्तिभेदे तत्स्वरूपतत्त्वादिकारणानि च सां०का०तत्त्वकौमुद्योर्दर्शितानि यथा “पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च” “इतश्चास्ति पुरुष इत्याह कैवल्यार्थं प्रवृत्तेश्च शास्त्रकाराणां महर्षीणाञ्च दिव्यलोचनानां कैवल्यमात्यन्तिकदुःखत्रयप्रशमलक्षणं न बुद्ध्यादीनां सम्भवति ते हि दुःखाद्यात्मकाः कथं स्वभावाद्वियोजयितुं शक्यन्ते तदतिरिक्तस्य त्वेतदात्मन आत्मनस्ततो वियोगः शक्यस्तस्मादः तस्मात्कैवल्यार्थं प्रवृत्तेरागमानां महर्षीणाञ्चास्ति बुद्ध्याद्यतिरिक्त आत्मेति सिद्धम्” तत्त्वकौमुदी “कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्त्तृभावश्च” सां०का० “आत्यन्तिकदुःखत्रयाभावः कैवल्यं तच्च स्वभावादेव त्रैगुण्यात् सुखदुःखमोहरहितत्वात् सिद्धम्” कौ० “पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य” का० “पुरुषस्त्रापेक्षां दर्शयति पुरुषस्य कैवल्यार्थम्। तथा हि प्रधानेन सम्भिन्नः पुरुषस्तद्गतं दुःखत्रयं स्वात्मन्यभिमन्यमानः कैवल्यं प्रार्थयते तच्च सत्वपुरुषान्यताख्यातिनिबन्धनम्। न च सत्वपुरुषान्यताख्यातिः प्रधानमन्तरेणेति कैवल्यार्थं पुरुषः प्रधानमपेक्षते। अनादित्वाच्च संयोगपरम्परायाः भोगाय संयुक्तोऽपि कैवल्याय पुनः संयुज्यते इति युक्तम्” त० कौ० विवृतञ्चैतदस्माभिः “अव्यवहितमपि पुरुषस्येति पदं कैवल्यार्थमित्यत्रान्वेतीत्याख्यातुं पुरुषस्यापेक्षामुत्थापयति पुरुषस्यापेक्षामिति प्रकृतेरिति शेषः। कैवल्यं केवलीभावः स च अनुभूयमानस्य बुद्धिधर्म्मस्य दुःखत्रयस्य विनाश एव, तदर्थं तदुद्देशेन पुरुषस्य प्रकृत्यपेक्षा। तथा हि इष्टविषयेच्छया इष्टसाधनाय प्रवर्त्तमानो दृष्टः। पुरुषश्च आत्मन्यनुभूयमानं दुःखत्रयं जिहासुस्तत्परिहारसाधनमर्थयते दुःखत्रयाभिघातश्च प्रकृतिपुरुषविवेकाधीन इति प्रकृतिं विना कथङ्कारं पुरुषस्तद्भेदमात्मनि प्रतीयादिति दुःखत्रयाभिघातार्थमपेक्ष्यमाणविवेकज्ञानसाधनत्वेन पुरुषस्य प्रकृत्यपेक्षा”।

“सम्यग्ज्ञानाधिगमाद्धर्म्मादीनामकारणप्राप्तौ। तिष्ठति संस्कारवशाच्चक्रभ्रमिवद्धृतशरीरः” सां० का० “तत्त्वसाक्षात्कारोदयादेवानादिरप्यनियतविपाककालोऽपि कर्म्माशयप्रचयो दग्धबीजभावतया न जात्याद्युपभोगलक्षणाय फलाय कल्पते। क्लेशसलिलावसिक्तायां हि बुद्धिभूमौ कर्म्मबीजान्यङ्कुरं प्रसुवते तत्त्वज्ञाननिदाघनिपीतसकलक्लेशसलिलायामूषरायां कुतः कर्म्मबीजानामङ्कुरप्रसवः। तदिदमुक्तं धर्म्मादीनामकारणप्राप्ताविति अकारणत्वप्राप्तावित्यर्थः। उत्पन्नतत्त्वज्ञानेऽपि च संस्कारवशात्तिष्ठति यथोपरतेऽपि कुलालव्यापारे चक्रं वेगाख्यसंस्कारवशाद्भ्रमत्तिष्ठति कालपरिपाकवशात्तूपरते संस्कारे निष्क्रियं भवति। शरीरस्थितौ च प्रारब्धपरिपाकौ धर्म्माधर्म्मौ संस्कारौ। तथाचानुश्रूयते “भोगेन त्वितरे क्षपयित्वाथ सम्पद्यते” इति “तावदेवास्य चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये” इति। प्रक्षीयमाणाविद्याविशेषस्य संस्कारस्तद्वशात्तत्सामर्थ्याद्धृतशरीरस्तिष्ठति” त० कौ० विवृतमेतदस्माभिः—

“इतरे उत्पन्नविवेकज्ञानाः भोगेन प्रारब्धकर्म्माणीति शेषः क्षपयित्वा नाशयित्वा समाप्येति यावत् अथ—प्रारब्धक-

र्भोगक्षयानन्तरं सम्पद्यते बन्धशून्यतया कैवल्यभाजनता-रूपेण सम्पद्यते। अस्य—उत्पन्नविवेकज्ञानस्य तावदेव चिरं कैवल्यप्राप्तौ विलम्बः, यावत् विमोक्ष्ये प्रारब्धकर्म्म-भिरिति शेषः विमोक्ष्ये ततोऽहमिति प्राप्स्यतीत्यर्थः। अथ प्रारब्धकर्म्ममोचनानन्तरं सम्पत्स्ये कैवल्यरूपेण सम्पन्नो भविष्यतीत्यर्थः”।

“प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तेः। ऐ-कान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति” सा॰ का॰।

“अनारब्धविपाकानां तावत्कर्म्माशयानां तत्त्वज्ञानाग्निना वीजभावोदग्धः प्रारब्धविपाकानां तूपभोगेन क्षये सति प्राप्ते शरीरभेदे विनाशे चरितार्थत्वात्कृतप्रयोजनत्वात्-प्रधानस्य तं पुरुषं प्रति निवृत्तावैकान्तिकमवश्यम्भावि आत्यन्तिकमविनाशीत्युभयं कैवल्यं दुःखत्रयविगमं प्राप्नोति पुरुषः” त॰ कौ॰। एतच्चैतदस्माभिः

“ज्ञानाग्निः सर्वकर्म्माणि भस्मसात् कुरुतेऽर्ज्जुन!” इति “ना भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति” वाक्ययोः प्रारब्धाप्रारब्धकर्म्मविषयकत्वेन व्यवस्थापिता-मित्याशयेनाह तत्त्वज्ञानाग्निनेत्यादि”।

पातञ्जले कैवल्यपादे कैवल्यकारणमुक्त्वा तत्स्वरूपमुक्तं यथा “विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः” सू॰। “यथा प्रावृषि तृणाङ्कुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्षमार्ग-श्रवणेन यस्य रोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति वि-शेषदर्शनबीजमपवर्गभागीयं कर्म्माभिनिर्वर्त्तितमित्यनु-मीयते तस्यात्मभावभावना स्वाभाविकी प्रवर्त्तते यस्या-भावादिदमुक्तं स्वभावं मुक्त्वा दोषाद्येषां पूर्व्वपक्षे रुचि-र्भवत्यरुचिश्च निर्णये भवति तत्रात्मभावभावना कोऽह-मासं, कथमहमासं, किं स्विदिदं मे, कथं स्विदहं, के भवि-ष्याम, इति’ सा तु विशेषदर्शिनो निवर्त्तते कुतः चित्त-स्यैव विचित्रः परिणामः पुरुषस्त्वसत्यामविद्यायां शुद्धश्चित्तधर्म्मैरपरामृष्ट इति ततोऽस्यात्मभावभावना कुशलस्य निवर्त्तते इति” भाष्यम्।

“तदा विवेकनिम्नं कैवल्यप्राग्भारञ्चित्तम्” सू॰।

“तदानीं यदस्य चित्तं विषयप्राग्भारमज्ञाननिम्न-मासीत्तदस्यान्यथा भवति कैवल्यप्राग्भारं विवेकजज्ञान-निम्नमिति” भाष्यम्। “प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्म्ममेघः समाधिः” सू॰। “यदायं ब्राह्मणः प्रसंख्यानेऽप्यकुसीदस्ततोऽपि न किंचित् प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्का-

रबीजक्षयान्नास्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्म्म-मेघोनाम समाधिर्भवति” भा॰। “ततः क्लेशकर्म्म-निवृत्तिः” सू॰। “तल्लाभादविद्यादयः क्लेशाः समूलकाष-कषिता भवन्ति कुशलाकुशलाश्च कर्म्माशयाः समूलघातं हता भवन्ति क्लेशकर्म्मनिवृत्तौ जीवन्नेव विद्वान् विमुक्तो भवति कस्मात्? यस्माद्विपर्य्ययो भवस्य कारणं न हि क्षीणविपर्य्ययः कश्चित्केनचित् क्वचिज्जातो दृश्यते” भा॰।

“तदा सर्वावरणमलापेतस्य ज्ञानस्यानन्त्यं ज्ञेयमल्पम्” सू॰ “सर्व्वैः क्लेशकर्म्मावरणैर्विमुक्तस्य ज्ञानस्यानन्त्यं भव-ति तमसाभिभूतमावृतज्ञानसत्त्वं क्वचिदेव रजसा प्रव-र्त्तितमुद्घाटितं ग्रहणसमर्थं भवति तत्र यदा सर्व्वैरा-वरणमलैरपगतमलम्भवति तदा भवत्यस्यानन्त्यं ज्ञानस्या-नन्त्याज्ज्ञेयमल्पं सम्पद्यते यथाकाशे खद्योतः, यत्रेदमुक्तम् “अन्धोमणिमविध्यत्तमनङ्गुलिरावयत्। अग्रीवस्तं प्रत्यमुञ्चत्तमजिह्वोऽभ्यपूजयदिति” भा॰।

“ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम्” सू॰। “तस्य धर्म्ममेघस्योदयात्कृतार्थानां गुणानां परिणाम-क्रमः परिसमाप्यते न हि कृतभोगापवर्गाः परिसमाप्त-क्रमाः क्षणमप्यवस्थातुमुत्सहन्ते” भा॰

“गुणाधिकारक्रमसमाप्तौ कैवल्यमुक्तन्तत्स्वरूपमवधार्य्यते” भा॰ “पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूप प्रतिष्ठा वा चितिशक्तिरिति” सू॰। कृतभोगापवर्गाणां पुरुषार्थशून्यानां यः प्रतिप्रसवः कार्य्यकारणात्मना गुणा-नान्तत्कैवल्यं स्वरूपप्रतिष्ठा पुनर्बुद्धिसत्त्वानभिसम्बन्धात्पु-रुषस्य चितिशक्तिरेव केवला तस्याः सदा तथैवावस्थानं कैवल्यमिति” भा॰।

“कैवल्यस्वरूपावधारणपरस्य सूत्रस्यावान्तरसङ्गतिमाह गुणाधिकारेति पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कै-वल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति। कुतः कर-णीयतया पुरुषार्थशून्यानां यः प्रतिप्रसवः स्वकारणे प्रधा-ने लयः, तेषां कार्य्यकारणात्मनां गुणानां व्युत्थानस-माधिनिरोधसंस्कारा मनसि लीयन्ते मनोऽस्मितायाम्, अस्मिता लिङ्गे, लिङ्गमलिङ्गे” इति योऽयं गुणानां का-र्य्यकारणात्मकानां प्रतिसर्गः तत् कैवल्यं, यं कञ्चित् पुरुषं प्रति प्रधानस्य मोक्षः स्वरूपप्रतिष्ठा पुरुषस्य वा मोक्ष इत्याह। स्वरूपेति। अस्ति हि महाप्रलयेऽपि स्वरूप प्रतिष्ठा चितिशक्तिर्न चासौ मोक्ष इत्यत आह पुन-रिति सौत्र इतिशब्दः शास्त्रपरिसमाप्तौ” वा॰ विवरणम्

वेदान्तिमते अविद्याकल्पितदेहादिप्रपञ्चनिवृत्तौ २अद्वितीयब्रह्मभावापत्तिरूपे केवलत्वे च। तच्च कैवल्यं द्विविधं जीवन्मुक्तिर्विदेहकैवल्यञ्च। तत्र जीवन्मुक्तिलक्षणम् विस्तरेण जीवन्मुक्तशब्दे वक्ष्यते दिङ्मात्र मत्राभिधीयते तत्र विवेकचूड़ामणौ जीवन्मुक्तलक्षण मुक्तोक्तं यथा

“विज्ञातब्रह्मतत्त्वस्य यथापूर्वं न संसृतिः। अस्ति चेन्न स विज्ञातब्रह्मभावो बहिर्मुखः। प्राचीनवासनावेगादसौ संसरतीति चेत्। न सदेकत्वविज्ञानाम्मन्दीभवति वासना। अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि। तथैव ब्रह्मणि ज्ञाते पूर्णानन्दे मनीषिणः। निदिध्यासनहीनस्य बाह्यप्रत्ययदृष्यते। ब्रवीति श्रुतिरेतस्य प्रारब्धफलदर्शनात्। सुखाद्यनुभवो यावत्तावत् प्रारब्धमिष्यते। फलोदयः क्रियापूर्वो निष्क्रियो न हि कुत्रचित्?। अहंब्रह्मेति विज्ञानात् कल्पकोटिशतार्जितम्। सञ्चितं विलयं याति प्रबोधात् स्वप्नकर्म्मवत्। यत् कृतं स्वप्नवेलायां पुण्यं वा पापमुल्वणम्। सुप्तोत्थितस्य किं तत् स्यात्? स्वर्गाय नरकाय वा। स्वमसङ्गमुदासीनं परिज्ञाय नभो यथा। न श्लिष्यति च यत्किञ्चित् कदाचिद्भाविकर्मभिः। न नभो घटयोगेन सुरागन्धेन लिप्यते। तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते। ज्ञानोदयात् पुराऽऽरब्धं कर्म ज्ञानान्न नश्यति। अदत्त्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत्। व्याघ्रबुद्ध्या विनिर्मुक्तो बाणः पश्चात्तु गोमतौ। न तिष्ठति छिनत्त्येव लक्ष्यं वेगेन निर्भरम्। प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः सम्यग्ज्ञानहुताशनेन विलयः प्राक्सञ्चितागामिनाम्। ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थितास्तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम्। उपाधितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि तिष्ठतोमुनेः। प्रारब्धसद्भावकथा न युक्ता स्वप्नार्थसम्बन्धकथेव जाग्रतः। न हि प्रबुद्धः प्रतिभासदेहे देहोपयोगिन्यपि च प्रपञ्चे। करोत्यहन्तां ममतामिदन्तां किन्तु स्वयं तिष्ठति जागरेण। तदाऽस्य मिथ्यार्थसमर्थनेच्छा न संग्रहस्तज्जगतोऽपि दृष्टः॥ तत्रानुवृत्तिर्यदि चेन्मृषार्थे न निद्रया मुक्त इतीष्यते ध्रुवम्। तद्वत् परे ब्रह्मणि वर्त्तमानः सदात्मना तिष्ठति नान्यदीक्षते। स्मृतिर्यथा स्वप्नविलोकितार्थे तथा विदः प्राशनमोचनादौ। कर्म्मणा निर्मितोदेहः प्रारब्धं तस्य कल्पताम्। नानादेरात्मनो युक्तं नैवात्मा कर्मनिर्मितः। अजोनित्यः शाश्वतश्च ब्रूते श्रुतिरमोघवाक्। यदात्मना तिष्ठतोऽस्य कुतः प्रारब्धकल्पना। प्रारब्धं सिध्यति तदा सदा देहात्मना स्थितिः। देहात्मभावो नैवेष्टः प्रारब्धं त्यज्यतामतः। शरीरस्यापि प्रारब्धकल्पनाभ्रान्तिरेव हि। अध्यस्तस्य कुतः सत्त्वम्? असत्यस्य कुतो जनिः?। अजातस्य कुतोनाशः? प्रारब्धमसतः कुतः?। ज्ञानेनाज्ञानकार्य्यस्य समूलस्य लयो यदि। तिष्ठत्ययं कथं देह! इति शङ्कावतो जड़ान्। समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिः। न तु देहादिसत्यत्वबोधनाय विपश्चिताम्। परिपूर्णमनाद्यन्तमप्रमेयमविक्रियम्। एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन। सद्घनं चिद्घनं नित्यमानन्दघनमक्रियम्। एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन। प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम्। एकमेवाद्वयमित्यादि। अहेयमनुपादेयमनादेयमनाश्रयम्। एकमेवाद्वयमित्यादि। निर्गुणं निष्कलं सूक्ष्मं निर्विकल्पं निरञ्जनम्। एकमेवाद्वयमित्यादि। अनिरूप्यस्वरूपं यन्मनोवाचामगोचरम्। एकमेवाद्वयमित्यादि। सत्समृद्धं स्वतः सिद्धं शुद्धं बुद्धमनीदृशम्। एकमेवाद्वयमित्यादि। निरस्तरागा निरस्तभोगाः शान्ताः सुदान्ता यतयो महान्तः। विज्ञाय तत्त्वं परमं तदन्ते प्राप्ताः परां निर्वृतिमात्मयोगात्। भवानपीदं परतत्त्वमात्मनः स्वरूपमानन्दघनं विचार्य्य। विधूय मोहं स्वमनःप्रकल्पितं मुक्तः कृतार्थो भवतु प्रबुद्धः। समाधिना साधुविनिश्चलात्मना पश्यात्मतत्त्वं स्फुटबोधचक्षुषा। निःसंशयं सम्यगवेक्षितश्चेच्छ्रुतः पदार्थो न पुनर्विकल्प्यते। स्वस्याविद्याबन्धसम्बन्धमोक्षात् सत्यज्ञानानन्दरूपात्मलब्धौ। शास्त्रं युक्तिर्देशिकोक्तिः प्रमाणं चान्तःसिद्धाः स्वानुभूतिः प्रमाणम्। बन्धोमोक्षश्च तृप्तिश्च चिन्तारोग्यक्षुधादयः। स्वेनैव वेद्या यज्ज्ञानं परेषामानुमानिकम्। तटस्थिता बोधयन्ति गुरवः श्रुतयो यथा। प्रज्ञयैव तरेद्विद्वानीश्वरानुगृहीतया। स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम्। संसिद्धः सन्सुखं तिष्ठेत् निर्विकल्पात्मनात्मनि। वेदान्तसिद्धान्तनिरुक्तिरेषा ब्रह्मैव जीवः सकलं जगच्च। अखण्डरूपस्थितिरेव मोक्षो ब्रह्माद्वितीये श्रुतयः प्रमाणम्”।

तदीयज्ञानाकारोऽपि तत्र दर्शितो यथा

“अकर्त्ताहमभोक्ताहमविकारोऽहमक्रियः। शुद्धबोध-

स्वरूपोऽहं केवलोऽहं सदाशिवः। द्रष्टुः श्रोतुर्वक्तुः कर्त्तुर्भोक्तुर्विभिन्नएवाहम्। नित्यनिरन्तरनिष्क्रियो निःसीमाऽसङ्गपूर्णबोधात्मा। नाहमिदं नाहमदोऽप्युभयोरवभासकं परं शुद्धम्। बाह्याभ्यन्तरशून्यं पूर्णं ब्रह्माद्वितीयमेवाहम्। निरुपममनादितत्त्वं त्वमहमिदमद इति कल्पनादूरम्। नित्यानन्दैकरसं सत्यं ब्रह्माद्वितीयमेवाहम्। नारायणोऽहं नरकान्तोऽहं पुरान्तकोऽहं पुरुषोऽहमीशः। अखण्डबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहञ्च निर्म्ममः। सर्व्वेषु भूतेष्वहमेव संस्थितो ज्ञानात्मनान्तर्बहिराश्रयः सन्। भोक्ता च भोग्यं स्वयमेव सर्व्वं यद्यत् पृथक् दृष्टमिदन्तया पुरा। मय्यखण्डसुखाम्भोधौ बहुधा विश्ववीचयः। उत्पद्यन्ते विलीयन्ते मायामारुतविभ्रमात्। स्थूलादिभावा मयि कल्पिता भ्रमादारोपितानुस्फुरणेन लोकैः। काले यथा कल्पकवत्सरायनर्त्त्वादयो निष्कलनिर्व्विकल्पे। आरोपितं नाश्रयदूषकं भवेत् कदापि मूढैरतिदोषदूषितैः। नार्द्रीकरोत्यूषरभूमिभागं मरीचिकावारिमहाप्रवाहः। आकाशवत् कल्पविदूरगोऽहमादित्यवद्भास्वरलक्षणोऽहम्। आहार्य्यवन्नित्यविनिश्चलोऽहमम्भोधिवत् पारविवर्जितोऽहम्। न मे देहेन सम्बन्धो मेघेनेव विहायसः। अतः कुतो मे तद्धर्म्मा जाग्रत्स्वप्नसुषुप्तयः। उपाधिरायाति स एव गच्छति स एव कर्म्माणि करोति भुङ्क्ते। स एव जीर्य्यन् म्रियते सदाहं कुलाद्रिवन्निश्चल एव संस्थितः। न मे प्रवृत्तिर्न च मे निवृत्तिः सदैकरूपस्य निरंशकस्य। एकात्मको यो निविडो निरन्तरो व्योमेव पूर्णः स कथं नु चेष्टते ?। पुण्यानि पापानि निरिन्द्रियस्य निश्चेतसो निर्विकृतेर्निराकृतेः। कुतो ममाखण्डसुखानुभूतेः ? ब्रूते ह्यनन्वागतमित्यपि श्रुतिः। छायया स्पृष्टमुष्णं वा शीतं वा सुष्ठु दुष्ठु वा। न स्पृशत्येव यत् किञ्चित् पुरुषं तद्विलक्षणम्। न साक्षिणं साक्ष्यधर्म्माः संस्पृशन्ति विलक्षणम्। अविकारमुदासीनं गृहधर्म्माः प्रदीपवत्। रवेर्यथा कर्म्मणि साक्षिभावो वह्नेर्यथा दाहनियामकत्वम्। रज्जोर्यथारोपितवस्तुसङ्गस्तथैव कूटस्थचिदात्मनो मे। कर्त्तापि वा कारयितापि नाहं भोक्तापि वा भोजयितापि नाहम्। द्रष्टापि वा दर्शयितापि नाहं सोऽहं, स्वयंज्योतिरनीदृगात्मा। चलत्युपाधौ प्रतिबिम्बलौल्यमौपाधिकं मूढधियो नयन्ति। स्वबिम्बभूतं रविवद्विनिष्क्रियं कर्त्तास्मि भोक्तास्मि हतोऽस्मि हन्ता। जले वापि स्थले वापि लुठत्वेष जड़ात्मकः। नाहं विलिप्ये तद्धर्म्मैर्घटधर्म्मैर्नभो यथा। कर्त्तृत्वभोक्तृत्वखलत्वमत्तताजडत्वबद्धत्वविमुक्ततादयः। बुद्धेर्विकल्पा न तु सन्ति वस्तुतः स्वस्मिन् परे ब्रह्मणि केवलेऽद्वये। सन्तु विकाराः प्रकृतेर्दशधा शतधा सहस्रधा वापि। किं मे सङ्गिभिरेभिर्न ह्यम्बुदा वरमम्बरं स्पृशन्ति। अव्यक्तादिस्थूलपर्य्यन्तमेतद्विश्वं यत्राभासमात्रं प्रतीतम्। व्योमप्रख्यं सूक्ष्ममाद्यन्तहीनं ब्रह्माद्वैतं यत्तदेवाहमस्मि। सर्व्वाधारं सर्व्ववस्तुप्रकाशं सर्व्वाकारं सर्व्वगं सर्व्वशून्यम्। नित्यं शुद्धं निश्चलं निर्विकल्पं ब्रह्माद्वैतं यत्तदेवाहमस्मि। यस्मिन्नस्ताशेषमायाविशेषं प्रत्यग्रूपं प्रत्ययागम्यमानम्। सत्यज्ञानानन्दमानन्दरूपं ब्रह्माद्वैतं यत्तदेवाहमस्मि। निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः। निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः। सर्व्वात्मकोऽहं सर्व्वोऽहं सर्व्वातीतोऽहमद्वयः। केवलाखण्डबोधोऽहमानन्दोऽहं निरन्तरम्। स्वाराज्यसाम्राज्यविभूतिरेषा भवत्कृपाश्रीमहिमप्रसादात्। प्राप्ता मया श्रीगुरवे महात्मने नमो नमस्तेऽस्तु पुनर्नमोऽस्तु”।

पुनस्तल्लक्षणं तत्रैवोक्तं यथा

“क्षुधां देहव्यथां त्यक्त्वा बालः क्रीड़ति वस्तुनि। तथैव विद्वान् रमते निर्म्ममो निरहं सुखी। चिन्ताशून्यमदैन्यभैक्ष्यमशनं, पानं सरिद्वारिषु, स्वातन्त्र्येण निरङ्कुशा स्थितिरभीर्निद्रा श्मशाने वने। वस्त्रं क्षालनशोषणादिरहितं दिग्वास्तु शय्या मही सञ्चारो निगमान्तवीथिषु विदां क्रीड़ा परे ब्रह्मणि। विमानमालम्ब्य शरीरमेतद् भुनक्त्यशेषान् विषयानुपस्थितान्। परेच्छया बालवदात्मवेत्ता योऽव्यक्तलिङ्गोऽननुषक्तबाह्यः। दिगम्बरो वापि च साम्बरो वा त्वगम्बरो वापि चिदम्बरस्थः। उन्मत्तवद् वापि च बालवद् वा पिशाचवद् वापि चरत्यवन्याम्। कामान्निष्कामरूपी संचरत्येकचरो मुनिः। स्वात्मनैव सदा तुष्टः स्वयं सर्व्वात्मना स्थितः। क्वचिन्मूढ़ो विद्वान् क्वचिदपि महाराजविभवः क्वचिद्भ्रान्तः सौम्यः क्वचिदजगराचारकलितः। क्वचित् पात्रीभूतः क्वचिदवमतः क्वाप्यविदितश्चरत्येवं प्राज्ञः सततपरमानन्दसुखितः। निर्धनोऽपि सदा तुष्टोऽप्यसहायो महाबलः। नित्यतृप्तोऽप्यभुञ्जानोऽप्यसमः समदर्शनः। अपि कुर्व्वन्नकुर्व्वाणश्चाभोक्ता फलभोग्यपि। शरीर्य्यप-

शरीर्य्येव परिच्छिन्नोऽपि सर्वगः। अशरीरं सदा सन्तमिमं ब्रह्मविदं क्वचित्। प्रियाप्रिये न स्पृशतस्तथैव च शुभाशुभे। स्थूलादिसम्बन्धवतोऽभिमानिनः सुखञ्च दुःखञ्च शुभाशुभे च विध्वस्तबन्धस्य सदात्मनो मुनेः कुतः शुभं वाप्यशुभं फलं वा। तमसा ग्रस्तवद्भानादग्रस्तोऽपि रविर्जनैः। ग्रस्त इत्युच्यते भ्रान्त्या ह्यज्ञात्वा वस्तुलक्षणम्। तद्वद्देहादिबन्धेभ्यो विमुक्तं ब्रह्मवित्तमम्। पश्यन्ति देहवन्मूढाः शरीराभासदर्शनात्। अहिनिर्ल्वयनीवायं मुक्तदेहस्तु तिष्ठति। इतस्ततश्चाल्यमानो यत्किञ्चित् प्राणवायुना। स्रोतसा नीयते दारु यथा निम्नोन्नतस्थलम्। दैवेन नीयते देहो यथाकालोपभुक्तिषु। प्रारब्धकर्मपरिकल्पितवासनाभिः संसारिवच्चरति भुक्तिषु मुक्तदेहः। सिद्धः स्वयं वसति साक्षिवदत्र तूष्णीं चक्रस्य मूलमिव कल्पविकल्पशून्यः। नैवेन्द्रियाणि विषयेषु नियुङ्क्त एष नैवापयुङ्क्त उपदर्शनलक्षणस्थः। नैव क्रियाफलमपीषदवेक्षते स स्वानन्दसान्द्ररसपानसुमत्तचित्तः। लक्ष्यालक्ष्यगतं त्यक्त्वा यस्तिष्ठेत् केवलात्मना। शिव एव स्वयं साक्षादयं ब्रह्मविदुत्तमः। जीवन्नेव सदा मुक्तः कृतार्थो ब्रह्मवित्तमः"।

विदेहकैवल्यमपि तत्र दर्शितं यथा "उपाधिनाशाद्ब्रह्मैव सन् ब्रह्माप्येति निर्द्वयम्। शैलूषो वेषसद्भावाभावयोश्च यथा पुमान्। तथैव ब्रह्मविच्छ्रेष्ठः सदा ब्रह्मैव नापरः। यत्र क्वापि विशीर्णं सत् पर्णमिव तरोर्वपुः पतनात्। ब्रह्मीभूतस्य यतेः प्रागेव तच्चिदग्निना दग्धम्। सदात्मनि ब्रह्मणि तिष्ठतो मुनेः पूर्णाद्वयानन्दमयात्मना सदा। न देशकालाद्युचितप्रतीक्षा त्वङ्मांसविट्पिण्डविसर्जनाय। देहस्य मोक्षो मोक्षो न दण्डस्य कमण्डलोः। अविद्याहृदयग्रन्थिमोक्षो मोक्षो यतस्ततः। कुल्यायामथ नद्यां वा शिवक्षेत्रेऽपि चत्वरे। पर्णं पतति चेत्तेन तरोः किं नु शुभाशुभम्?। पत्रस्य पुष्पस्य फलस्य नाशवद्देहेन्द्रियप्राणधियां विनाशः। नैवात्मनः स्वस्य सदात्मकस्यानन्दाकृतेर्वृक्षवदस्ति चैषः। प्रज्ञानघन इत्यात्मलक्षणं सत्यसूचकम्। अनूद्योपाधिकस्यैव कथयन्ति विनाशनम्। अविनाशी वा अरेऽयमात्मेति श्रुतिरात्मनः। प्रब्रवीत्यविनाशित्वं विनश्यत्सु विकारिषु। पाषाणवृक्षतृणधान्यकटाम्बराद्या दग्धा भवन्ति हि मृदेव यथा तथैव। देहेन्द्रियासुमनआदि समस्तदृश्यं ज्ञानाग्निदग्धमुपयाति परात्मभावम्। विलक्षणं यथा ध्वान्तं लीयते भानुतेजसि। तथैव सकलं दृश्यं ब्रह्मणि प्रविलीयते। घटे नष्टे यथा व्योम व्योमैव भवति स्फुटम्। तथैवोपाधिविलये ब्रह्मैव ब्रह्मवित् स्वयम्। क्षीरं क्षीरे यथा क्षिप्तं तैलं तैले जलं जले। संयुक्तमेकतां याति तथात्मन्यात्मविन्मुनिः"।

एवं विदेहकैवल्यं सन्मात्रत्वमखण्डितम्। ब्रह्मभावं प्रपद्यैष यतिर्नावर्त्तते पुनः। सदात्मैकत्वविज्ञानदग्धाविद्यादिवर्ष्मणः। अमुष्य ब्रह्मभूतत्वाद्ब्रह्मणः कुत उद्भवः?। मायाक्लृप्तौ बन्धमोक्षौ न स्तः स्वात्मनि वस्तुतः। यथा रज्जौ निष्क्रियायां सर्पाभासविनिर्गमौ। आवृतेः सदसत्त्वाभ्यां वक्तव्ये बन्धमोक्षणे। नावृतिर्ब्रह्मणः काचिदन्याभावादनावृतम्। यद्यस्त्यद्वैतहानिः स्यात् द्वैतं न सहते श्रुतिः। बन्धञ्च मोक्षञ्च मृषैव मूढा बुद्धेर्गुणं वस्तुनि कल्पयन्ति। दृगावृतिं मेघकृतां यथा रवौ यतोऽद्वयासङ्गचिदेकमक्षरम्। अस्तीति प्रत्ययो यश्च यश्च नास्तीति वस्तुनि। बुद्धेरेव गुणावेतौ न तु नित्यस्य वस्तुनः। अतस्तौ मायया क्लृप्तौ बन्धमोक्षौ न चात्मनि। निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने। अद्वितीये परे तत्त्वे व्योमवत् कल्पना कुतः?। न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः। न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता। सकलनिगमचूडास्वान्तसिद्धान्तगुह्यं परमिदमतिगुह्यं दर्शितं ते मयाद्य। अपगतकलिदोषं कामनिर्मुक्तबुद्धिं त्वमनुवद सकृत्त्वं भावयित्वा मुमुक्षुम्"। कैवल्यं स्वरूपत्वेनास्त्यस्य अर्श० अच्। ३कैवल्यस्वरूपे त्रि० "ज्ञानविज्ञानयुक्तानां निरूपाख्या निरञ्जना। कैवल्या या गतिर्ब्रह्मसदने सा गतिर्भवान्" भा० अनु० १६अ०। "कैवल्या मोक्षाख्या गतिः" नीलक०। केवल एव स्वार्थे ष्यञ्। ४अद्वितीये वस्तुनि न० "धातारमजमव्यक्तं यमाहुः परमव्ययम्। कैवल्यं निर्गुणं विश्वमनादिमजमक्षरम्" भा० आ० ६३अ०

कैशिक न० केशानां समूहः ठक्। १केशसमूहे। २नाटकप्रसिद्धे वृत्तिभेदे स्त्री ङीप् हेमच० शा० ट० सरस्वतीकण्ठाभरणे च कौशिकीत्येव पाठः। अलङ्कारशब्दे ३८८पृ० तल्लक्षणमुक्तम्। ३शृङ्गारे पु० जटा० तस्य केशवेशपूर्वकत्वेन तदधीनत्वात् तथात्वम्। ४नृपभेदे पु० "आहृतिः कैशिकश्चैव भीष्मकस्य नराधिपः" हरिवं० ८६अ०

कैशोर न० किशोरस्य भावः कर्म्म वा प्राणभृद्वयोवाचित्वात् अञ्। "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि।

कैशोरमा पञ्चदशात् यौवनं तु ततः परमिति" श्रीधरदर्शिते एकादशावधिपञ्चदशपर्य्यन्तवर्षवयसि "मल्लं वयसि कैशोरे भ्रमानुपहकारकम्" भाग०३।१८।१८ स्वार्थे क। तत्वार्थे "कैशोरकं मानयन्वै सह ताभिर्मुमोद ह" हरिवं० ७७ [ढक्। किशोर्य्या अपत्ये

कैशोरिकेय पुंस्त्री० कशोरी+स्वार्थे क ततः शुभ्रा० अपत्ये

कोक पुंस्त्री कुक—आदाने अच्। १चक्रवाके "हंसारवैः कोकरवैश्च" भा० आनु० २६अ० "विरहविधुरकोकद्वन्द्वशोकं विभिन्दन्" उद्भटः। २वृके "वने यूथपरिभ्रष्टा मृगी कोकै (वृकैः) रिवार्द्दिता" रामा०। ३भेके च स्त्रियां ङीष्। ४व्यैघ्राम् (टिकटिकी) ५खर्ज्जूरी वृक्षे च पु० मेदि०। ६विष्णौ पु० त्रिका०

कोकड पुंस्त्री कोकं तद्रवं लाति ला—क लस्य डः। विशेषयमृगभेदे चमरमृगे राजनि० स्त्रियां ङीष्।

कोकदेव पुंस्त्री कोकइव दीव्यति दिव—अच्। कपोते राजनि०

कोकनद न० कोकान् चक्रवाकान् नदति नादयति अन्तर्भूतण्यर्थे नद—अच्। १रक्तकुमुदे, २रक्तपद्मे च। "व्याकोषकोकनदतां दधते नलिन्यः" माघः। "सरसः कोकनदभ्रमादिव" नैष०

कोकनदच्छवि पु० कोकनदस्य छविरिव छविर्यस्य। १रक्तवर्णे २तद्वति त्रि० अमरः। [सूर्ये शब्दच०।

कोकबन्धु पु० कोकयोश्चक्रवाकयोर्मेलनकारित्वात् बन्धुरिव।

कोकरक पु० ब०व० देशभेदे। "वकाः कोकरकाः प्रोष्ठाः समवेगवशास्तथा" भा० भी० ६ देशकथने।

कोकवाच पुंस्त्री कोकस्य वाचेव वाचा वाक् रवोयस्य। विशेषयमृगभेदे राजनि०

कोकाग्र पु० कोकस्येवाग्रमस्य। सर्पिणक्षुपभेदे राजनि०

कोकामुख न० भारतप्रसिद्धे तीर्थभेदे "कोकामुखमुपस्पृश्य ब्रह्मचारी यतव्रतः। जातिस्मरत्वमाप्नोति दृष्टमेतत् पुरातनैः" भा० व०८४अ० "कोकामुखे विगाह्याथ" भा० आनु०। २५अ०

कोकाह पु० कोकइवाह्नि आ+हन—ड। श्वेताश्वे हेमच०

कोकिल पुंस्त्री कुक—इलच्। स्वनामख्याते पक्षिणि अमरः। "पुंस्कोकिलो यन्मधुरं चुकूज" कुम०। स्त्रियाम् जातित्वेऽपि—अजा० टाप्। "कोकिलाकलरवो वनेवने नूनमत्र निगडो भविष्यति" उद्भटः। "अवकुटः कोकिलिति" सि० कौ० "न तद्वृतपदेषु कोकिलाम्" कुमा० "कोकिलामञ्जुवादिनीम्" रघुः। अङ्गारे पु० त्रिका०

संज्ञायां कन्। "इयदशभिर्नजौ भजजला गुरु नर्कुटकम्। मुनिगुहकार्णवैः कृतयति वद कोकिलकम्" वृ० र० उक्ते छन्दोभेदे न०।

कोकिलनयन पु० कोकिलस्य नयनमिव रक्तं पुष्पमस्य। अतिरक्तपुष्पे (तालमाखना) (कुलेखाड़ा) वृक्षभेदे रमानाथः [(तालमाखना) वृक्षभेदे अमरः

कोकिलाक्ष पु० कोकिलस्याक्षीव रक्तं पुष्पमस्य पक्षसमा०।

कोकिलावास पु० ६त०। आम्रवृक्षे राजनि०

कोकिलासन न० रुद्रयामलोक्ते आसनभेदे तल्लक्षणम् यथा "अथान्यदासनं वक्ष्ये येन सिद्धो भवेन्नरः। निरुध्याद्वायुसञ्चारं कोकिलाख्यासनेन च। ऊर्द्धं हस्तद्वयं कृत्वा तदग्रे पादयोः सुधीः। बद्धाङ्गुष्ठद्वयं नाथ! शनैः शनैः प्रकारयेत्। पद्मासनं समाकृत्य कुर्परोपरि संस्थितः"

कोकिलेक्षु पु० कोकिल इव कृष्ण इक्षुः। (काजला)इक्षुभेदे। राजनि०

कोकिलेष्टा स्त्री०६त०। महाजम्बूवृक्षे राजनि०

कोकिलोत्सव पु० कोकिलानामुत्सवोऽत्र। आम्रवृक्षे राजनि० [(देशान्) भाग० ५।६।८

कोङ्क पु० ब०व०। देशभेदे। "चक्रमाणः कोङ्कवेङ्कटकान्"

कोङ्कण पु० ब०व०। देशभेदे स च देशः वृ० सं० कूर्मविभागे दक्षिणस्यामुक्तः "शिविकफणिकारकोङ्कणाभीराः"। "अथापरे जनपदा दक्षिणा भरतर्षभ!। कौकुट्टकास्तथा चोलाः कोङ्कणा मलयानराः" भा० भी० ९अ०। क्वचिदेकत्वम् "नाथं वर्ज्यः कोङ्कणे मागधे च" मु० चि० "मालवे गौडदेशे च सिन्धुदेशे च कोङ्कणे। व्रतं चूडां विवाहञ्च वर्ज्जयेन्मकरे गुरौ" पी० धा०। तेषां राजा अण्। कौङ्कण तद्राजशब्दे बहुषु तस्य लुक्। तत्र्यर्थे स्वार्थे क "कुन्तलांश्च तथा वङ्गान् शाल्वान् कोङ्कणकांस्तथा (विजिग्ये)" हरिवं० १४अ०

कोङ्कणासुत पु० कोङ्कणदेशोद्भवा अण् तस्य लुक् कोङ्कणा रेणुका ६त०। परशुरामे शब्दमा०

कोच त्रि० कुच—ज्वला० कर्त्तरि ण। १सङ्कोचके, । भावे घञ्। २सङ्कोचे "एकैकस्य त्वङ्कोचमदस्वपनाङ्गसादाः कुष्ठे महत्प्रवृत्ते भवन्ति" सुश्रु० अष्टाङ्गवे०पु० उक्ते ३जातिभेदे (कोँच) "तीवरस्यैव स पुत्रः नांशच्छेदि ससञ्जुटः। कोचजातिरिति हनि तत्रोक्ते:। स्त्रियां ङीप्। ४तत्प्रधाने देशे पु०। सोऽभिजनोऽस्य अण्। कौच तद्देशवासिनि बहुषु तस्य अयोलुक्।

कोजागर पु० कोजागर्त्ति इति लक्ष्म्या उक्तिरत्र काले पृषो०। आश्विनपौर्णमास्याम्। तत्कृत्यव्यवस्थादि ति० त० कल्पतरौ ब्रह्मपुराणम् "आश्वयुज्यां पौर्णमास्यां निकुम्भो बालुकार्णवात्। आयाति सेनया सार्द्धं कृत्वा युद्धं सुदारुणम्। तस्मात्तत्र नरैर्मार्गाः स्वगेहस्य समीपतः। शोधितव्याः प्रयत्नेन भूषितव्याश्च मण्डनैः। पुष्पार्घ्यफलमूलान्नसर्षपप्रकरैस्तथा। वेश्मानि भूषितव्यानि नानावर्णैर्विशेषतः। सुस्नातैरनुलिप्तैश्च नरैर्भाव्यं यथान्वयैः। दिवा तत्र न भोक्तव्यं मनुष्यैश्च विवेकिभिः। स्त्रीबालमूर्खवृद्धैश्च भोक्तव्यं पूजितैः सुरैः"। पूजितैः सुरैः पूजितसुरैरित्यर्थः। "पूज्याश्च सफलैः पुष्पैस्तथा द्वारोर्द्ध्वभित्तयः। द्वारोपान्ते सुदीप्तस्तु संपूज्यो हव्यवाहनः। यवाक्षतघृतोपेतैस्तण्डुलैश्च सुतर्पितः। संपूजितव्यः पूर्णेन्दुः पयसा पायसेन च। स्कन्दः सभार्य्यरुद्रश्च तथा नन्दीश्वरो मुनिः। गोमद्भिः सुरभिः पूज्या छागवद्भिर्हुताशनः। उरभ्रवद्भिर्वरुणो गजवद्भिर्विनायकः। पूज्यः साश्वैश्च रेवन्तो यथाविभवविस्तरैः। ततः पूज्यो निकुम्भोऽपि समांसैस्तिलतण्डुलैः। सुगन्धिभिर्घृतोपेतैः कृशराख्यैश्च भूरिभिः। ब्राह्मणान् भोजयित्वा तु भोक्तव्यं मांसवर्जितम्। वस्त्रपार्श्वगतैर्नैया दृष्टा क्रीड़ाः पृथग्विधाः"। ततश्च द्वारोर्द्ध्वभित्तिहव्यवाहपूर्णेन्दुसभार्य्यरुद्रस्कन्दनन्दीश्वरमुनयः सर्व्वे पूज्याः। द्वारोर्द्ध्वभित्तिशब्दोऽत्र बहुवचनान्तः। नन्दीश्वरो मुनिरेकः। गोमता सुरभिः, छागवता हुताशनः मेषवता वरुणः, हस्तिमता विनायकः, अश्ववता रेवन्तः सर्व्वैरेव निकुम्भः पूज्यः, महार्णवे लिङ्गपुराणम्। "आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि। कौमुदी सा समाख्याता कार्य्या लोकविभूतये। कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावते स्थितम्। सुगन्धिर्निशि सद्वेशो अक्षैर्जागरणं चरेत्"। तथा "निशीथे वरदा लक्ष्मीः कोजागर्त्तीति भाषिणी। तस्मै वित्तं प्रयच्छामि अक्षैः क्रीड़ां करोति यः। नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्च्चयेत्। बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत्"। अत्र निशीति निशीथ इति चाभिधानात् रात्रिकृत्यमिदम्। ततश्च "प्रदोषव्यापिनी ग्राह्या तिथिर्नक्तव्रते सदा। प्रदोषोऽस्तमयादूर्द्ध्वं घटिकाद्वयमिष्यते" इति वत्सवचनात् यद्दिने प्रदोषनिशीथोभयव्यापिनी पौर्णमासी तद्दिने कोजागरकृत्यम् उभयव्याप्त्यनुरोधात्। यदा तु पूर्वदिने निशीथव्याप्तिः परदिने प्रदोषव्याप्तिस्तदा परेद्युस्तत्कृत्यम्। प्रधानपूजाकालव्याप्त्यनुरोधात्। यदा तु पूर्व्वदिने निशीथव्याप्तिः परदिने न प्रदोषव्याप्तिस्तदा सुतरां पूर्व्वेद्युस्तत्कृत्यम् "अहःसु तिथयः पुण्याः कर्म्मानुष्ठानतो दिवा। नक्तादिव्रतयोगे तु रात्रियोगो विशिष्यते" इति वचनात्"। "नारिकेलोदकं पीत्वा अक्षैर्जागरणं निशि। तस्मै वित्तं प्रयच्छामि कोजागर्त्ति महीतले" कृत्यकौमुदी। तत्राक्षक्रीड़ा कार्य्या। अक्षक्रीडाविशेषश्च चतुरङ्गशब्दे वक्ष्यते। "या तु कोजागरे याते" ति० त० राजमार्त्तण्डः।

कोट पु० कुट—घञ्। १कौटिल्ये। आधारे घञ्। दुर्गे (गड) मेदि०। ततः चतुरर्थ्याम् अश्मा० र कोटर कोटसन्निकृष्टदेशादौ त्रि० [विवृतिः स्त्रियां ङीष्।

कोटक पुंस्त्री कुट—ण्वुल् जातिभेदे ब्रह्मवै० जातिशब्दे

कोटचक्र न० कोटस्य दुर्गस्य शुभाशुभज्ञापनार्थे अष्टविध चक्रभेदे चक्रशब्दे विवृतिः। "कोटचक्रमष्टविधं चतुरस्रादिभेदतः" इति नरपतिजयचर्य्या

कोटर पुंन० कोटं कौटिल्यं राति रा-क। वृक्षस्कन्धादिस्थगह्वरे। "चलत्फणाधरमिव कोटरं तरुः" माघः। "महाहङ्कारविटपइन्द्रियाङ्कुरकोटरः" भा० आश्व० ४७अ० २ दुर्गसन्निकृष्टदेशादौ त्रि० व्युत्पत्तिः कोटशब्दे दृश्या। कोटर दुर्गसन्निकृष्टं वनम् तथाभूतवृक्षाणां वा वनम् कोटरा० पूर्व्वपददीर्घः णत्वञ्च। कोटरावणम् वनभेदे न०।

कोटरादि पु० वनशब्दे परे पूर्व्वस्वरदीर्घनिमित्ते पा०ग० सूत्रोक्ते शब्दगणे स च गणः। "कोटर मिश्रक सिध्रक पुरग शारिक"।

कोटरी स्त्री कोटं कौटिल्यं रीणाति री—बधे गतौ च क्विप् १नग्नायां स्त्रियां २दुर्गायाञ्च अमरटीका।

कोटवी स्त्री कोटं कौटिल्यं दुर्गं वा याति वा—गतौ हिंसने क गौरा० ङीष्। १दुर्गायाम् धरणिः। २नग्नायां स्त्रियां अमरटीका।

कोटि स्त्री कुट—इञ्। १धनुषोऽग्रभागे अमरः २वस्तुमात्रस्याग्रभागे, ३अस्त्राणां कोणे ४उत्कर्षे ५शतलक्षात्मकसंख्यायां, ६तत्संख्येये च मेदि०। ७पृक्कायाम् (पिड़िङ्गशाक) अमरः ८संशयस्यालम्बने,वादे निर्णयार्थं कृते ९पूर्व्वपक्षे, वा ङीप् कोटीत्यप्यत्र। "धनुष्कोट्यावद्य कर्षेन वीरम्" भा० आ० १८०। "तेन

भूमिनिहितैककोटि तत्” (कार्म्मुकम्) रघुः। “आवर्जितजटामौलिविलम्बिशशिकोटयः” कुमा० “दूर्व्विस्खलत्तुहिनदीधितिकोटिमेनम्” माघः “विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः” संशयहेतूक्तौ गदाधरः। “इष्टाद्वाहोर्यः स्यात्तत्स्पर्द्धिन्यां दिशीतरो बाहुः। त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः” १०लीलावत्युक्ते त्रिकोणादिक्षेत्रावयवरेखाभेदे स्त्री “तद्वायते तद्भुजकोटिघातः” लीला० “त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्यादयुग्युग्मसंज्ञा च तेषाम्। अयुग्मे पदे यातम् एष्यन्तु युग्मे भुजो बाहुहीनं त्रिभं कोटिरुक्ता” सि०शि० उक्ते राशिचक्रस्य ११वृत्तीयांशे १२तत्रोक्ते छायानिरूपणार्थं कल्प्यमानक्षेत्रावयवरेखाभेदे यथा “दिक्सूत्रसम्पातगतस्य शङ्कोश्छायाग्रपूर्व्वापरसूत्रमध्यम्। दोर्दोःप्रभावर्गवियोगमूलं कोटिर्नरात् प्रागपरा ततः स्यात्” सि० शि०” “दिक्संपातस्यस्य शङ्कोर्भाग्रं यत्र पतति तस्य पूर्व्वापरसूत्रस्य च यदन्तरं स दोरित्युच्यते दोश्छाययोर्वर्गान्तरपदं पूर्व्वापरा कोटिरिति” प्रमि० १३चन्द्रस्य शृङ्गोन्नतिज्ञानार्थं तत्रैव दर्शिते क्षेत्रावयवभेदे च यथा “योऽधो नरो दिनकृतः स विधोरुदग्रशङ्कन्वितो मम मता खलु सैव कोटिः” सि० शि०

“यो रवेरधःशङ्कुरसौ विधोरूर्ध्वशङ्कुना युतः सैव कोटिर्मम मता अत्रोपपत्तिः। इहार्केन्द्वोर्याम्योत्तरभावेन यदन्तरं स भुजः। ऊर्ध्वाधरभावेन यदन्तरं सा कोटिः। सा चैवं भवति। उदयेऽस्ते वा यदि शृङ्गोन्नतिस्तदा रविशङ्कोरभावाच्छशिशङ्कुरेव कोटिः। यदा निशि रवेरधः शङ्कुस्तदा स शङ्कुर्विधोरुदयशङ्कुना युतो यावांस्तावत् तयोर्यत्रस्थयोरूर्द्धाधरमन्तरं सैव कोटिरुचिता। यतो द्रष्टा पुरुषेणात्मनोऽवस्थानवशेन शशिनः शृङ्गमुन्नतमवलोक्यम्। अतः स्वावस्थानसमसूत्रादूर्ध्वरूपिण्या कोट्या भवितव्यम्। भुजकोटिकर्णकृतं त्र्यस्रं दृष्टेरग्रत आदर्शवत् संमुखं यथा भवति तथा कल्प्यम्” प्रमि० तत्रैवोक्ते १४उदयास्तसूत्रकल्पितक्षेत्रावयवभेदे यथा “सूत्राद्विशङ्कुतलं यमांश यामग्रां गतं हि द्युनिशं कुजोर्द्धे। अधश्च सौम्यां निशि सौम्यमग्रात् तद्युक्तियुक्तं न्वतलं निरुक्तम्। सौम्यापकाग्रात्तलं हि याम्यं याम्यापकाग्रात् पुनरेव याम्यम्। तदन्तरैक्यं समवृत्तखेटमध्यांशजीवा भुवि बाहुमाहुः। दृग्ज्यां श्रुतिं चाथ तयोश्च कोटिं पूर्वापरां वर्गवियोगमूलम्” सि०शि०

“क्षितिजस्याहोरात्रवृत्तसंपातयोर्बद्धं सूत्रमुदयास्तसूत्रम्। यद्गस्थानाल्लम्बः शङ्कुः। तस्य तलमुदयास्तसूत्राद्दक्षिणतो भवति। यतः क्षितिजादुपरि दक्षिणतोऽहोरात्रवृत्तं गतम्। अधस्तूत्तरतो गतम्। अतो निश्युत्तरं न्वतलम्। अथ भुज उच्यते। उत्तरगोलेऽग्रोत्तरा न्वतलं याम्यमतस्तेनोनाग्रा बाहुर्भवति। बाहुर्नाम शङ्कुप्राच्यपरसूत्रयोरन्तरम्। यदाऽग्रा शङ्कुतलादूना तदा तयोरन्तरं दक्षिणं शङ्कुतलं बाहुः स्यात्। एवं समवृत्तप्रदेशादुपरि दक्षिणगोले त्वग्रा याम्या शङ्कुतलं च याम्यं तयोर्योगे कृते बाहुः स्यात्। रविसममण्डलयोरन्तरांशानां ज्या बाहुः। तत्र या दृग्ज्या स कर्णः। तयोर्वर्गान्तरपदं पूर्व्वापरा कोटिः” प्रमि०

“शतं शतसहस्राणां कोटिमाहुर्मनीषिणः” रामा०। तत्र संख्यायाम् “योनिकोटिसहस्रेषु सृतिं चास्यान्तरात्मनः” मनुः। “कोटिकोटिगुणितं दिवि दायि” नैष० । संख्यान्विते “कोटीश्चतस्रो दश चाहरेति” रघुः। ततो वारे क्रत्वसुच्। कोटिकृत्वस् कोटिवारार्थे अव्य०। कारकार्थवृत्तेस्ततः वीप्सार्थे शस्। कोटिशस् वीप्सान्वितकारकरूपे तदर्थे अव्य० कोटिशोददाति। [शोपकोटि जटाधरः.

कोटिक पु० कोट्या बहुधा कायति प्रकाशते कै—क। इन्द्र-

कोटिकास्य पु० कोटिकस्येवास्यमस्य। शिविवंश्ये सुरथपुत्रे नृपभेदे “अहन्तु राज्ञः सुरथस्य पुत्रः यं कोटिकास्येति विदुर्मनुष्याः” भा० व० २६४अ०। द्रौपदीं प्रति तदुक्तिः

कोटिजित् पु० कोटिं कविकोटिं, पणे कोटिमितं द्रव्यं वा जितवान् जि-भूते क्विप्। रघुवंशादिकाव्यकारे कालिदासे त्रिका०।

कोटिज्या स्त्री सू० सि० उक्ते ग्रहस्फुटतासाधनाङ्गे चापावयवभेदे तदानयनं यथा

“गताद्भुजज्या विषमे गम्यात् कोटिः पदे भवेत्। युग्मे तु गम्याद्बाहुज्या कोटिज्या तु गताद्भवेत्” सू०सि०। “विषमे पदे गताद्ग्रहस्य पदादितो यद्गतं राशित्रिभागात्मकं भाग ज्ञातं तस्मादित्यर्थः भुजज्या स्यात्। गम्याद्गतोनं त्रिभं पठ्यात् पदान्तावधिकमेत्यम्। तस्मात् कोटिः कोटिज्या स्यात्। युग्मे समे तुकारात् पदे एष्याद्भुजज्या, गतात् कोटिज्या स्यात् तुकारो विशेषद्योतकः। एकस्मादेवोक्तरीत्या द्वयं साधितमित्यर्थः। अत्रोपपत्तिः विषमपदे ग्रहोर्द्ध्वोर्ध्वाधररेखान्तरानुसारेण फलमुत्पद्यते गतो ग्रस्तानतस्तदन्तरमर्धज्या भुजरूपा तदर्द्धचाप तदन्तरंग्या

वृत्तभागस्था गताः। ऊर्ध्वाधररेखामत्स्यसम्पन्नतिर्यग्रेखाग्रद्वयोरन्तरसूत्रमर्द्धज्यापदान्तः कोटिज्या भुजोत्क्रमज्योनव्यासार्धरेखाग्रकोटितुल्यत्वात्। तदङ्कचापं भुजांशोनं त्रिभमिति गम्यात् कोटिज्या। समपदे ग्रहोर्ध्वाधररेखान्तर तिर्यगर्धज्या भुजज्येति तदर्धं चापं यद्येवं तिर्यग्रेखाग्रद्वयान्तरं तिर्यगर्धज्याकोटितुल्यत्वात् कोटिस्तच्चापं पदगतमित्युपपन्नं गतादियादि" रङ्गनाथः

कोटितीर्थ न० कोटिः तीर्थान्यत्र। १अवन्तिकेशमहाकालसन्निधिस्थे तीर्थभेदे। "महाकालं ततोगच्छेत् नियतो नियताशनः। कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत्" भा०व० ८२अ०। २पञ्चनदान्तर्गते तीर्थभेदे च। "ततः पञ्चनदं गत्वा नियतोनियताशनः। कोटितीर्थमुपस्पृश्य हयमेधफलं लभेत्" भा०८३अ०

कोटिपात्र न० कोटिरग्रं पात्रे जलाश्रयेऽस्य। केनिपातके हेमच० तदग्रस्य जले पातनेन नौचालनात्तस्य तथात्वम्। शब्दकल्पद्रुमे पुंस्त्वोक्तिः प्रामादिकी "केनिपातः कोटिपात्रमरित्रश्चोडुपः प्लव" इति हेमचन्द्रे क्लीवत्वनिर्देशात्।

कोटिफल न०६त०। त्रिकोणादिक्षेत्रावयवस्य कोटेः फले। सि०शि०तदायनप्रकारोदर्शितोयथा। "खेनाहते परिधिना भुजकोटिजीवे भांशै ३६० र्हृते च भुजकोटिफलाह्वये स्तः" मू०। "अत्रोपपत्तिः। यावत् केन्द्रप्रतिमण्डले तावदेव नीचोच्चवृत्ते स्यात्। अतः प्रतिमण्डलदोःकोटिज्ये अनुपातेन नीचोच्चवृत्ते परिणाम्येते यदिभांशवृत्ते ३६०एते दोःकोटिज्ये तदा परिध्यंशवृत्ते किमिति। अथवा त्रिज्याव्यासार्धे एते दोःकोटिज्ये तदान्त्यफलज्याव्यासार्धे किमिति। फलं तुल्यमेव" प्रमि०।

उक्तञ्च सू०सि० रङ्गनाथाख्यां यथा

"तद्गुणे भुजकोटिज्ये भगणांशविभाजिते। तद्भुजज्याफलधनुर्मान्दं लिप्तादिकं फलम्" सू० "भुजकोटिज्ये मन्दशीघ्रान्यतरसम्बन्धेन केन्द्रभुजकोटिज्ये तद्गुणे स्वीयस्फुटपरिधिना गुणिते भगणांशैः षष्ट्यधिकशतत्रयेण भक्ते भुजफलकोटिफले भवतः। मन्दकेन्द्रभुजज्योत्पन्नफलस्य धनुःकलादिकं मान्दं फलं भवति। अत्रोपपत्तिः। कक्षास्थोच्चस्थानस्थितदेवतया स्वहस्तस्थितसूत्रपोतं ग्रहबिम्बं स्वाभिमुखाकर्षणेन कक्षास्थमध्यग्रहस्थानात् परमफलज्यान्तरितस्थाने आकर्षणघृतमार्गरूपतिर्यक्कर्षमार्गे स्थाप्यते। तेन मध्यग्रहस्थानीयकक्षाप्रदेशादन्त्यफलज्याव्यासार्धेनोत्पन्नवृत्ते भगणांशाङ्किते भूमध्यग्रहसूत्रे रेखासक्तवृत्तप्रदेशरूपोच्चस्थानात् केन्द्रान्तरेण कक्षाविपरीतमार्गे तद्वृत्तपरिधौ ग्रहो भवति। तस्मिन्नीचोच्चवृत्ते ऊर्ध्वरेखाग्रद्वयोस्तिर्यगन्तरसूत्रमर्धज्याकारं परमफलज्यानुरूपं भुजफलम्। तस्मिन्नेव वृत्ते व्यासमिततिर्यग्रेखाग्रद्वयोरन्तरमूर्ध्वाधरमर्धज्याकारं परमफलज्यानुरूपं कोटिफलम्। एते तत्र कक्षास्थभुजज्याकोटिज्यारूपभुजकोटिरूपे इति। कक्षास्थभगणांशप्रमाणेनैते भुजज्याकोटिज्यारूपे भुजकोटी तदा कक्षास्थभागप्रमाणानुरूपप्राग्युक्तनीचोच्चपरिधिभागैः केइत्यनुपातेन फलरूपत्वाद्भुजफलकोटिफले" रङ्गनाथः

कोटिर पु० कोटिं राति रा-क। १इन्द्रे, २नकुले, ३इन्द्रगोपकीटे च मेदि०

कोटि(टी)वर्षा स्त्री० कोटिभिरग्रैर्वर्षति मधु वृष—अण्। (पिड़िङ्ग) १शाकभेदे। अमरः दीर्घमध्यस्तदर्थे शब्दच० २बाणासुरपुरे न० शब्दर०

कोटि(टी)श पु० कोट्या अग्रेण शृणाति शॄ—क। १लोष्टभेदनेऽस्त्र (मइ)(मुगर)इति वा ख्याते पदार्थे रत्नको०। २स्त्रमध्यः वासुकिवंशेत्र २नागभेदे पु० "कोटिशोमानसः पूर्णः शलः पालोहलीमकः" भा० आ०५७अ० वासुकिवंशोक्तौ

कोटी स्त्री० कुट—इन् ङीप्। (पिड़िङ्ग)१शाकभेदे शब्दरत्ना० २कोटिशब्दार्थे च "प्रतोदैश्चापि कोटीभिर्हुङ्कारैः साधुवाहितः" भा० द्रो० ८९अ०

कोटीर पु० कोटिमीरयति ईर-अण्। १किरीटे, हेमच० २जटायां त्रिका० "कोटीरबन्धनधनुर्गुणयोगपट्टेति" नैष०

कोट्ट पु० कुट्ट—घञ् नि० गुणः। दुर्गे (गड़) अमरः २पुरभेदे (कोटकाङ्गडा) ३राजधानीभेदे च न० हेमच०

कोट्टवी स्त्री० कोट्टं वाति वा—क गौरा० ङीप्। १नग्नायां मुक्तकेश्यां स्त्रियाम् २दुर्गायाञ्च जटा० ३बाणासुरमातरि च तत्र दुर्गायाम् हरिवं० १८५अ०

"कुमाररक्षणार्थाय विभ्रती सुतनुं तदा। दिग्वासा देववचनात् प्रातिष्ठद्य कोट्टवी। लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः। चित्रा कनकशक्तिस्तु सा च लम्बा स्थितान्तरे। अथान्तरा कुमारस्य देवीं दृष्ट्वा महाभुजः। पराङ्मुखस्ततो वाक्यमुवाच मधुसूदनः। भगवानुवाच अपगच्छापगच्छ त्वं धिक् तामिति च सोऽब्रवीत्। किमेवं कुरुषे विघ्नं निश्चितस्य वधम्प्रति। वैशम्पायन उवाच। श्रुत्वैव वचनं तस्य कोट्टवी तु तदा वि-

भाः। नैव वासः समाभन्ते कुमार रिरक्षणात्"। १८५अ० बाणमातरि भाग० १०।६३।२९ "तन्माता कोट्टवी नाम नग्ना मुक्तशिरोरुहा। पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया" उभयत्र नग्नत्वमुक्तकेशत्वविशेषणं तत्काले तथाभूतत्वज्ञापनाय अतस्तयोस्तदा नग्नत्वमुक्तकेशयुक्तत्वात्तथात्वम्

कोट्टवीपुर न० ६त० वाणासुरपुरे तन्मातुस्तत्र प्रधानत्वात् तयैव वाणासुरस्य रक्षणात् तत्पुरस्य तन्नामत्वम्।

कोट्टार पु० कुट्ट—आरक् पृषो०। १कूपे २नागरे ३पुष्करिण्याः पाटके च। (पाड) मेदि०

कोठ पु० कुठि—अच् नि० नलोपः। मण्डलाकारे कुष्ठरोगे। तल्लक्षणमुक्तं निदाने "असम्यग्वमनो दीर्णपित्तश्लेष्मान्ननिग्रहैः मण्डलानि" सकण्डूनि रागवन्ति बहूनि च। उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते" इति माधवकरः। रक्षितेन चान्ययोक्तम् "वरटीदष्टसंस्थानः कण्डूमान् लोहितोऽस्रकफपित्तात्। क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः" "उद्वर्त्तनन्तु विज्ञेयं कण्डूकोठानिलापहम्" "कण्डूकोठ निलस्तम्भमलरोगापहश्च सः" "उद्घर्षणं त्विष्टिकया कण्डूकोठविनाशनम्" इति च सुश्रुतः

कोठर पु० कुठि—अर पृषो०। अङ्कोठवृक्षे राजनि०

कोठरपुष्पी स्त्री कोठरस्य पुष्पमिव पुष्पमस्या ङीप्। वृद्धदारके राजनि०

कोण पु० कुण—करणे घञ् कर्त्तरि अच् वा। येन धनुराकृतिना काष्ठेन वीणादयोवाद्यन्ते तस्मिन् वादनसाधने १काष्ठभेदे २अस्रौ, अमरः। ३गृहादोनामेकदेशे, ४अस्त्राणामग्रभागे, ५लगुडे, मेदि० ६मङ्गलग्रहे हेम० ७शनिग्रहे विश्वः। द्वयो र्दिशोर्मध्यभागे ८विदिशि राजनि० "कनककोणैरभिहन्यमानः" काद० "भेरीमृदङ्गवीणानां कोणसंघटितः पुनः" रामा० "अष्टहस्ताङ्गुले तेन चत्वारः स्वर्णपूरिताः। कुम्भाश्चतुर्षु कोणेषु निगूढाः स्थापिता भुवि" कथास०। "सुवर्णकोणाभिहतः प्राणदद्गुणवद्गुन्दुभिः" रामा० "किन्तुलिकोणवत्कोणदवारदुग्मम्" तन्त्रसा०। समकोणं विषमकोणम् क्षेत्रम्

कोणकुण पु० कोणे गृहैकदेशे कुणति चलति कुण—क। मत्कुणे (उकुण) हेमच०

कोणाघात पु० "ढक्काशतसहस्राणि भेरीशतशतानि च। एकदा यत्र हन्यन्ते कोणाघातः स उच्यते" इति भरतोक्ते वाद्यसंघाते ३त०। काष्ठेन वीणादेस्ताडने च। "कोणाघातेषु गर्ज्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः" वेणी० [अमरः

कोणि त्रि० कुण—इन्। आदानशक्तिहीनहस्तयुक्ते (कोंपा)

कोथ पु० कुथ—पूतिभावे वञ्। १नेत्ररोगभेदे (कें घो)। कर्त्तरि अच्। २गलिते त्रि० मेदि० "मूढेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदाक्षगाढ़पुरीषोन्मिश्रमपानेनाधः प्रेरितमसम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः कोथ उपजायते" इति सुश्रुतोक्ते गुह्यक्षयकारके ३भगन्दररोगोपद्रवभेदे। भावे घञ्। ४गलने "तस्मिन् क्षते पृयरुधिरावकीर्णे मांसकोथे भूमाविव जलक्लिन्नायां क्रमयो जायन्ते" सुश्रुतः "तत्र सविषमत्स्यकीटदर्दुरमूत्रपुरीषकोथ जाताः" सुश्रु० "कीटमूत्रपुरीषाण्डशवकोथप्रदूषितम्" (जलम्) सुश्रु० "गोशकृत्कोथजा मन्दा, मध्याः काष्ठेष्टकोद्भवाः" सुश्रु०

कोदण्ड न० कु—शब्दे विच् कौःशब्दितोदण्डोऽस्य। १धनुषि, "विस्फूर्जन्नखण्ड कोदण्डः" भाग० ३।२१।५१। तत्तुल्यत्वात् २भ्रूलतायां, ३देशभेदे च। अमरः ४धनूराशौ च।

कोदार पु० ईषदुदारः कोःकादेशः। धान्यभेदे "न ग्राह्यं सर्व्वथा माषवरकोदारकोद्रवम्" कात्या० १,६,८, स्मृतभाष्ये कर्कधृतवाक्यम्

कोद्रव पु० कु—विच् कौः सन् द्रवति द्रु—अच् कर्म्म०। (कोदो) धान्यभेदे अमरः "कोद्रवोवातलो ग्राही हिमः पित्तकफापहः" भावप्र० तद्गुणाउक्ताः। "अयज्ञिया वै कोद्रवाः" श्रुतिः। "अतोऽन्यदपि संग्राह्यं सदृशं धान्यमात्रकम्। न ग्राह्यं सर्व्वथा माषवरकोदारकोद्रवम्" कात्या०श्रौ०१,६,८,स्म०भा० कर्कधृतवाक्यम्। तस्य वैश्वदेवे अग्राह्यता "पचनाग्निं समुज्ज्वाल्य वैश्वदेवं समाचरेत्। निष्पावान् कोद्रवान् माषान् कलायांश्चनकांस्त्यजेत्" काशी० ३५अ०। तस्याश्राद्धीयता भा० अनु० ४३६२ श्लोके उक्ता यथा "अश्राद्धीयानि धान्यानि कोद्रवाः पुलकास्तथा"

कोनालक पुंस्त्री कोने जलोने अलति अपर्य्याप्नोति अल—ण्वुल्। संप्लवचारिणि प्लवे कण्णुक्तं श्वेतोदरे जलचरपक्षिभेदे हंससारसेत्युपक्रमे कोनालकं पठित्वा "प्लवाः संप्लवचारिणः" सुश्रु०। इन् कोनालि अप्यत्र। "कुनावीकोनालिमप्लवीन् सेवेत" सुश्रु० स्त्रियां ङीप्।

कोन्दशिर पु० ब्राह्मणशापेन शूद्रत्वप्राप्ते क्षत्रियभेदे भा० अनु० ३५अ०

"सन्ति चाशीविषसमाः सन्ति मन्दास्तथाऽपरे। विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर!। मेकला द्रविडा लाटाः पौण्ड्राः कोन्वशिरास्तथा। शौण्डिका दरदा दार्व्वाश्चौलाः शवरवर्व्वराः। किराता यवनाश्चैव तास्ताः क्षत्त्रियजातयः। वृषलत्वमनुप्राप्ता ब्राह्मणानाममर्षणात्"।

कोप पु० कुप–भावे घञ्। १क्रोधे कामानाप्तिजे चित्तवृत्तिभेदे अमरः। "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" पा०। वधाद्यनुकूलश्चित्तवृत्तिभेदः कोपः। अमर्षशब्दे विवृतिः। "पादेन प्रहरन् कोपात्" मनुः। "मानः कोपः स तु द्वेधा प्रणयेर्ष्यासमुद्भवः। द्वयोः प्रणयमानः स्यात् प्रमोदे सुमहत्यपि। प्रेम्णः कुटिलगामित्वात् कोपो यः कारणं विना" सा० द० उक्ते शृङ्गाररसाङ्गे २प्रणयकोपे च

"अपकारिणि चेत् कोपः कोपे कोपः कथं नहि। धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनि" नीतिसा०। "रिपौ बन्धौ स्वदेहे च समैकात्म्यं प्रपश्यतः। विवेकिनः कुतः कोपः स्वदेहावयवेष्विवेति" ३धातुवैषम्यकारिदोषाणां विकारभेदे सुश्रु० "तत्र एते स्वभावत एव दोषाणां सञ्चयप्रकोपप्रशमप्रतीकारहेतवः" शारीराणां विकाराणामेष वर्गश्चतुर्विधः। चये कोपे शमे चैव हेतुरुक्तश्चिकित्सके" सुश्रु० "स्वदेशे निचिता दोषा अन्यस्मिन् कोपमागताः" सुश्रु०

कोपक्रम न० उपक्रम्यते कर्म्मणि घञ् ६त०। उपक्रमान्तत्वात् क्लीवता। कस्य ब्रह्मण उपक्रमे—उपक्रम्यमाणे १ब्रह्मणा आदौ ज्ञात्वा उपक्रम्यमाणायां जगतः सृष्टौ अमरः। कोपक्रममप्यत्र न०। ६त०। २कोपस्य क्रमे पु०

कोपन त्रि० कुप–ताच्छील्ये युच्। कोपशीले जटाध० "चण्डस्त्वत्यन्तकोपनः" अमरः। "आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्" भा०आ०२९अ०। "तपस्वी कोपनो भृशम्" भा०व०११०अ० "पादानतः कोपनयाऽवधूतः" कुमा० २असुरभेदे पु० "शरभः शलभश्चैव कुपनः कोपनः क्रथः" हरि० ४२अ० कुप–णिच्–भावे ल्युट्। ३कोपनिष्पादने ४दोषविकारकारकव्यापारभेदे न० "स्वदोषकोपनाद्रोगं लभते मरणान्तकम्" भा० आश्व० १७अ०। "यथोक्तैः कोपनैर्दोषाः कुपिताः कोष्ठमागताः" सुश्रु० कुप–णिच् कर्त्तरि ल्यु। ५कोपसाधके त्रि० "कोपनं कफवातानां दुर्नाम्नां चाधिकं दधि" सुश्रुतः

कोपनक पु० कोपनः कोपशील इव कायति कै–क। १चोरनामकगन्धद्रव्ये राजनि० स्वार्थे क। २कोपने त्रि०

कोपनीय त्रि० कुप–कर्म्मणि अनीयर्। द्वेषविषये "ते च शब्दादयउपस्थिताः परस्परेणाभिहन्यमानास्तदुपायाश्चाभिमाद्यः स्वरूपेणैव कोपनीया भवन्तीति" सां० त० कौ०

कोपयिष्णु त्रि० कुप–णिच् वा० इष्णुच्। परस्य कोपकारके "वैरायैव तदा [illegible] बलियान् कोपयिष्णुभिः" भा० आ० १३९अ०

कोपलता स्त्री कोपहेतुर्लता। कर्णस्फोटलतायां राजनि०

कोपिन् पुंस्त्री० अवश्यं कुप्यति णिनि। १जलपारावते २अवश्यकोपशालिनि त्रि० राजनि० स्त्रियां ङीप्। कोपयति णिजन्तात् णिनि। ३कोपसम्पादके त्रि० "सिद्धार्थकः शोणितपित्तकोपी" सुश्रुतः स्त्रियां ङीप्।

कोमल न० कु–कलच् मुट् च नि० गुणः। १जले। २मृदौ, अकठिने, च त्रि० मेदि० ३क्षीरिकायां स्त्री० टाप् शब्दच०। ४मनोहरे त्रि० शब्दर०। "निशा च शय्या च शशाङ्ककोमला" नैष०। शशाङ्कवन्मृदुला शय्या। शशाङ्केन मनोहरा निशा च इत्यर्थः। "अनन्तुतः कोमलरत्नराशीन्" माघः।

कोमलक त्रि० स्वार्थे क। १कोमलशब्दार्थे। संज्ञायां क। २मृणाले शब्दच०।

कोमलवल्कली स्त्री कोमलं वल्कलं यस्याः। लवलीलतायां (नोयाड़) शब्दचिन्ता०।

कोमलासन न० आसनशब्ददर्शितमृगादिचर्म्मनिर्म्मिते आसनभेदे "इदानीं शृणु देवेश! रहस्यं कोमलासनम्। योगसिद्धिप्रचाराय सिद्धौ चर्मासनं तु तत्" रुद्रया०।

कोमासिका स्त्री ईषदुमेव अतसीष्टव इव आस्ते आस–ण्वुल् टाप् अत इत्वम्। जालिकायाम् (फलेर जालि) हारावली।

कोम्य त्रि० कम–कर्म्मणि ण्यत् पृषो०। काम्ये। "अत्रो नः सन्तु कोम्या" ऋ० १।१७१।२। "कोम्या काम्यानि" भा०

कोयष्टि पु० कं जलं यष्टिरिवास्य पृषो० कत ओत्वम्। जलकुक्कुभे पक्षिणि। "प्लवान् जालपादांश्च कोयष्टिनखविष्किरान्" मनुः संज्ञायां कन् कोयष्टिक (टिटिर) टिट्टिभपक्षिणि "कपोतपारावतभृङ्गराजपरभृतेत्यादि प्रतुदपक्षिगणे कोयष्टिकमुक्त्वा "कषाया मधुरा रूक्षाः फलाहाराः मरुत्कराः। पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः" सुश्रुते तन्मांसगुणा उक्ताः।

कोर पु॰ कुल—संस्थाने अच् लस्य रः। १संस्थानवति कोरका कारे सुश्रुतोक्ते देहस्थसन्धिभेदे यथा
"त एते सन्धयोऽष्टविधाः। कोरोदूखलसामुद्रप्रतरतुन्नसेवनीवायसतुण्डमण्डलशङ्खावर्त्ताः। तेषामङ्गुलिमणिबन्धगुल्फजानुकूर्परेषु कोराः सन्धयः"। "नामभिरेवाकृतयः व्याख्याताः"। कुल—घञ्। २संस्थाने पु॰
कोरक पुं॰न॰ कुल-संस्थाने ण्वुल् लस्य रः। कलिकायाम्। "कलिका कोरकः पुमानित्यमरोक्तिः प्रायिकाभिप्राया"कोरकं कुड्मलेऽपि स्यात् कक्कोलकमृणालयोः" विश्वोक्तेः तेन "मधुपहरन् विचकार कोरकाणि" माघे क्लीव प्रयोगः "कोरकोऽस्त्री कुड्मले स्यात्" मेदि॰। २कक्कोले ३मृणाले च विश्वः। ४चोरनामगन्धद्रव्ये जटाध॰। ततः तारका॰ संजातेऽर्थे इतच्। कोरकित जातमुकुले त्रि॰
कोरङ्गी स्त्री॰ कुर्—अङ्गच् गौरा॰ ङीष्। १सूक्ष्मैलायाम् (छोटएलाइच) अमरः २पिप्पल्यां राजनि॰
कोरदूष पु॰ कोरं संस्थानं दूषयति दूषेर्ण्यन्तात् अण् उप॰ स॰। (कोँदो) ख्याते व्रीहिभेदे अमरः। "निष्पावाष्टक यवगोधूमकोरदूषेत्यादि" सुश्रु॰ "श्यामाककोरदूषाद्यं तक्रं पिण्याकसक्तुभिः" सुश्रु॰। ण्वुल्। कोरदूषकोऽप्यत्रार्थे। "देशोभविता लोको युगान्ते पर्य्युपस्थिते। वस्त्राणां प्रवरा शाणी धान्यानां कोरदूषकः" भा॰व॰१६०अ॰
कोल पु॰ कुल—संस्थाने अच्। १शूकरे २प्लवे(भेला) अमरः ३क्रोड़े ४शनिग्रहे ५चित्रके (चिता) ६अङ्कपालौ ७आलिङ्गने मेदि॰। ८देशभेदे पु॰ब॰व॰ शब्दरत्ना॰। ९अस्त्रभेदे पु॰ धर॰ "मेटान् धीवरकन्याजाते १०जातिभेदे ब्रह्मवै॰ पु॰। ११नृपभेदे "करूशमादयाक्रीडश्चत्वारस्तस्य चात्मजाः। पाण्ड्यश्च केरलश्चैव कोलश्चोलश्च पार्थिवः। तेषां जनपदाःस्फीताः पाण्ड्याः कोलाः सकेरलाः" हरिवं॰३२अ॰। १२मरिचे न॰ राजनि॰ १३चव्ये(चइ)वैद्य॰। १४तोलक परिमाणे वैद्यकम्। १५कर्कन्धूवृक्षे स्त्री॰ गौरा॰ ङीष्। तस्याः फलम् अण् तस्य लुक्।१६बदरीफले न॰। कर्कन्धूशब्दे विवृतिः "बदरीखण्डाकारोदन्तः सूक्ष्मफलोभवेत्। घटव्यामेव सा घोण्टा कोलबोरतीति योच्यते" स्वभूतिः "हालिकोलिर्गोपघोण्टा घोण्टा च बदरीच्छदा। स्वमालकोलिः कर्कन्धूः" रत्नकोषः "आद्यकोलतलितप्रकाशनैः"। "यः कोलतां बल्लवतात्र बिभ्रत्" माघः। कोलदलादि सुश्रुते अम्लवर्गे उक्तः। तत्र वाक्यं २२२४पृ॰ दृश्यम्
कोलक पु॰ कुल—ण्वुल्। १अङ्कोठवृक्षे, राजनि॰ २तक्कोलद्रव्ये जटाधरः (काँकला)च ३गन्धद्रव्यभेदे, ४मरिचे, ५कक्कोले च न॰ अमरः।
कोलकन्द पु॰ कोलइव कन्दोऽस्य। महाकन्दभेदे राजनि॰ "कोलकन्दः कटूष्णश्च कृमिदोषविनाशनः। वस्तिच्छर्द्दिप्रशमनः विषदोषानिलापहः" राजनि॰
कोलकर्कटिका स्त्री॰ कोलइव कर्कटिका। मधुखर्ज्जूरिकायां राजनि॰
कोलघोण्टा स्त्री। बदरीभेदे स्वभूतिः। [द्वये अमरः।
कोलदल न॰ कोलं बदरीफलमिव दलमस्य। नखीनामगन्ध-
कोलगिरि पु॰ दक्षिणदिक्स्थे पर्वतभेदे "कृतुस्तं कोलगिरिञ्चैव सुरभीपट्टनं तथा" भा॰ स॰ ३०अ॰ सहदेवदक्षिणदिग्विजये। कोलाचलादयोऽप्यत्र। कोलाचलमल्लिनाथेति तस्य विशेषणं तत्पर्वतस्थितत्वात् [इत्ये हारा॰
कोलनासिका स्त्री॰ कोलस्य शूकरस्य नासिकेव। रङ्गिणी-
कोलपुच्छ पु॰ कोलस्य शूकरस्येव पुच्छोऽस्य। कङ्कपक्षिणि हारा॰। [राजनि॰
कोलमूल न॰ कोलं बदरीफलमिव मूलमस्य। पिप्पलीमूले
कोलम्बक पु॰ कुल—अम्बच् कोलम्बमध्यः संज्ञायां कन्। नखीभिन्ने अलाबूदण्डतिसमुदाये वीणायाः अवयवे भरतः
कोलवल्ली स्त्री॰ कोलोवराह इव वल्ली तल्लोमतुल्यसूक्ष्मावत्त्वात्। गजपिप्पल्याम् राजनि॰। २शूकरपादिकायां राजनि॰
कोलशिम्बि स्त्री कोलपादाकारा शिम्बिरस्याः। (आल्कशीति) ख्यातायां शूकरपादिकायां लतायाम्। वा ङीप्। "कोलशिम्बी स्मीरघ्नी गुरूष्णा कफवातहृत्। शुक्राग्निमान्द्यहृत्या रुचिकृत् बद्धविड् गुरुः" इति भावप्र॰
कोला स्त्री कुल—ज्वला॰ ण टाप्। १पिप्पल्याम्,२चव्ये(चइ) मेदि॰३कोलिवृक्षे शब्दरत्ना॰। ४कोलापुरे च
कोलाख पु॰ ब॰व॰। देशभेदे शब्दरत्ना॰
कोलापुर न॰ दक्षिणदेशप्रसिद्धे लक्ष्मीदेव्याः स्थाने पुरभेदे
कोलाविध्वंसिन् त्रि॰कोलां पुरभेदे विध्वंसितुं यस्य शीलमस्य विग्रहेन धामोरन्यार्थपरत्वम्। पर्वतवासिनि म्लेच्छभेदे, "एवं पालयतस्तस्य म्लेच्छाः पर्वतवासिनः। कोलाविध्वंसिनः प्राप्ताः" इति देवीभागवतम्। "कोलाविध्वंसिनश्चैते" देवीमाहा॰। कोलाशब्दः कोलाहलवाचकस्तथा च कोलाहलैमेव राज्यविध्वंसं ये कुर्वन्ति। २तेषु च।
कोलाहल पु॰ कुल—घञ् तमाह्वलति अच्। बहुविधे दूरगामिन्यव्यक्ते शब्दे अमरः "शीघ्रं भेरीनिनादेन स्फुटकोलाहलेन वै" रामा॰

कोलि स्त्री कुल–इन्। बदर्य्याम् पक्षे वा ङीप् अमरः

कोलिसर्पः पु० सगरेण म्लेच्छतां प्रापिते क्षत्रियभेदे। उदा० केरलशब्दे हरिवं० वाक्यमुक्तम् "कोलिसर्पा माहिषका-स्तास्ताः क्षत्रियजातयः। वृषलत्वं परिगता ब्राह्मणाना-मदर्शनात्" भा० आनु० ६६ अ० [राजा अण् कौलूत तन्नृपे

को(कौ)लूत पु० कुलूतशब्दार्थे इ० स० पाठान्तरम्। तस्य

कोल्या स्त्री कोलमर्हति यत्। पिप्पल्यां रत्नमा०

कोल्ल पु० भारतवर्षस्थे पर्वतभेदे "भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः" इत्युपक्रमे "ऋषभः कूटकः कोल्लः महागिरिः" इत्यादि भाग० ५।१९।१० उक्तम्। स च गिरिः वृ०सं० कूर्म्मविभागे "अथ दक्षिणेन लङ्का" इत्युपक्रमे "कर्णाटकमहाटविचित्रकूटनासिककोल्लगिरिचोलाः" इति दक्षिणस्यामुक्तः। कोल्लगिर्य्यादयोऽप्यत्र। तत्र भवः तस्य राजा वा बा० ढक्। कौल्लगिरेय तत्रभवे तन्नृपे च। "अर्च्चितः प्रययौ भूयो दक्षिणं सलिलार्णवम्। तत्रापि द्राविडैरान्ध्रै रौद्रैर्माहिषकैरपि। तथा कौल्लगिरेयैश्च युद्धमासीत् किरीटिनः" भा० आश्व० ८३ अ०।

कोविद पु० कुङ् शब्दे–विच् कौर्वेदस्तं वेत्ति विद–क। १पण्डिते २विदुषि अमरः "समीक्ष्यकारिणं प्राज्ञं धर्म्मकामार्थकोविदम्" मनुः। "आत्मनैव गुणदोषकोविदः"। "कौममार्गसुखगानकोविदेति च" माघः।

कोविदार पु० कुं भूमिं विदृणाति–वि+दॄ–अण् पृषो०। १रक्तकाञ्चनारे (रक्तकाञ्चन)। अमरः। "कोविदारकलिकाऽतिकोमला तक्रसिद्धतिलतैलपाचिता। हिङ्गुवासकसुवाससंवासिता वेसवारलुलिताऽतिलोभदा" पाकशास्त्रम्। काञ्चनारशब्दे गुणा उक्ताः। "कशेरु कोविदारश्च तालकन्दस्तथा विषम्"। श्राद्धेदेयकथने वायुपु०। "श्वेतकाञ्चनसञ्ज्ञः कोविदारः" इति श्राद्धविवेकः। २पारिजाते च। हरिवं० १२६ अ० तदुत्पत्तिर्दर्शिता यथा "कोऽयं दारुरित्याङ्कुरज्ञाननोयतोजनाः। कोविदार इति ख्यातस्ततः स महातरुः। मन्दारः कोविदारश्च पारिजातस्य नामभिः। स वृक्षो ज्ञायते दिव्यो यस्यैतत् कुसुमोत्तमम्" पारिजातहरणे। "पारिजातान् कोविदारान् देवदारुद्रुमांस्तथा" भा०व० १५५ अ०। अत्र पारिजातभिन्नत्वेन निर्देशात् रक्तकाञ्चनपरता स्वार्थे कं। रक्तकाञ्चनट्वी "अमन्दैः पिचुमर्द्दैश्च मन्दारैः कोविदारकैः" काशी०।

कोश(ष) पुंन० कुश(ष)–आधारादौ घञ् कर्त्तरि अच् वा। १अण्डे शब्दर०। कृताकृतयोः २हेमरूप्ययोः अमरः। ३कुड्मले मुकुले ४खड्गपिधाने (खाप) ५समूहे ६दिव्यभेदे अमरः। मूर्द्धन्यमध्यस्तु अभिधानरूपे ७शब्दपर्य्यायज्ञापकग्रन्थे मेदि० ८धनाद्यागारे ९पानपात्रे चषके १०शिम्बायां हेमच०। पनसादिमध्यस्थे (कोया) ख्याते ११पदार्थे धर०। शब्दान्तरपूर्व्वस्तु गोलकाकारे १२पदार्थे यथा "नेत्रकोषः" क्षीरस्वामी। तत्र खड्गपिधाने "वैयाघ्रकोषे निहितो हेमचित्रत्सरुर्महान्"। "पृथुरश्मिकोशश्च तस्य हेममये कोषे सुतप्ते पावकप्रभे" भा०वि० ४२अ०। बहुशः प्रयोगः। धनागारे "निःशेषविश्राणितकोषजातम्" मुकुले "मार्गक्षिणोद् यत्र विभिन्नकोशैः" "भिन्नाद्रिगैरिकतटा इव दन्तकोशाः" रघुः १३त्वगाद्यावरणे कोषवदावरकत्वात् "शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका। कौषिकीति समाख्याता ततो लोकेषु गीयते" देवीमा०। १४पिधानमात्रे "सुजातयोः पङ्कजकोशयोः श्रियम्" रघुः। "कोशमङ्गुष्ठाङ्गुलिपर्व्वसु विदध्यात्" सुश्रु०। "योऽवा अयं द्वीपः कुवलयकमलकोशाभ्यन्तरकोशः" भाग० ५।१६।६। कोश(ष)पानदिव्यञ्च वीरमि० दर्शितो यथा "अथ कोश(ष)विधिः। तत्र "अतः परं प्रवक्ष्यामि कोश(ष)स्य विधिमुत्तमम्। शास्त्रविद्भिर्यथा प्रोक्तं सर्व्वकालाविरोधिनम्। पूर्व्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च। सशङ्कस्याऽव्यसनिनः कोशपानं विधीयते। इच्छतः श्रद्दधानस्य देवब्राह्मणसन्निधाविति"। सशङ्कस्य असत्येन दिव्यकरणेऽनिष्टशङ्कायुक्तस्य कोशपानम्। उग्रदेवतास्नानोदकपानं देवतास्नानोदकस्य प्रसृतित्रयं पाह्यमित्याह विष्णुः "उग्रान् देवान् समभ्यर्च्य तत्स्नानोदकात्प्रसृतित्रयं पिबेदिदम्मया न कृतमिति व्याहरन् देवताभिमुखः" इति। याज्ञवल्क्योऽपि "देवानुग्रान् समभ्यर्च्य तत्स्नानोदकमाहरेत्। संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयमिति"। उग्रान्देवान्दुर्गादित्यादीन्। तेषामन्यतमं देवं प्राड्विवाकः सोपवासो गन्धपुष्पादिभिः सम्पूज्य स्नापयित्वा तत्स्नानोदकं दिव्यदेशमानयेदित्यर्थः। नीत्वा च तत्र निधाय धर्म्मावाहनादि शोध्यशिरसि पत्रारोपणान्तं सर्व्वदिव्यसाधारणविधिं विधाय देवतायतनसमीपे मण्डलञ्च विधाय तत्र शोध्यं प्राङ्मुखं स्थापयित्वा तमसत्यै तद्दिव्यकरणेऽनिष्टं संश्राव्य जलविधानोक्तेन "तोय! त्वं प्राणिनां प्राणः" इत्यादिना मन्त्रेणाभिमन्त्र्य पूर्व्वनिहितोदकात् प्र

प्रसृतित्रयं पाययेत् । शोध्यश्च जलविधानोक्तेन "सत्यान्तत-विभागस्य" इत्यादिना मन्त्रेणाभिमन्त्र्य पिबेत् । तथा च नारदः "तमाहूयाभिशस्तन्तु मण्डलाभ्यन्तरे स्थितम् । आदित्याभिमुखं कृत्वा पाययेत् प्रसृतित्रयमिति" । पितामहोऽपि "प्राङ्मुखं कारिणं कृत्वा पाययेत् प्रसृतित्रयम् । पूर्व्वोक्तेन विधानेन स्नानमात्रोषितं शुचिमिति" । कारिणं दिव्यकारिणं शोध्यमिति यावत् । पूर्व्वोक्तेन सकलदिव्यसाधारणतया प्रागुक्तेनेत्यर्थः । नारदोऽपि "अर्च्चयित्वा तु तं देवं प्रक्षाल्य सलिलेन तु । एनश्च श्रावयित्वा तु पाययेत् प्रसृतित्रयमिति" । एनः पापम् । तच्च तत्प्रलापाभिधानमुखेन तेनैव दर्शितम् । "स्वेच्छया यः पिबेत्कोशं कश्चिद्दूषितो नरः । न संवदेन्नरो लोभात् छली भवति दुर्मतिः । जानानः कामकारेण कोशम्पीत्वा विसंवदेत् । दरिद्रो व्याधितो मूर्खः सप्तजन्मनि जायते" इति । सशिरस्केऽभियोगे अभियोक्तुः श्राव्यमनिष्टमप्याह स एव "बलात्कोशं हि यो दत्त्वा हितमिच्छेत चात्मनः । स विनाशो भवेत्तस्य तस्य कार्य्यं न सिद्ध्यतीति" । एवं यस्य कस्यचिद्देवस्य स्नानोदकमाहृत्य कोशानुष्ठाने प्राप्ते नियमार्थमाह पितामहः "भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् । समभावे तु देवानामादित्यस्य तु पाययेत् । दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः । भास्करस्य तु यत्तोयं ब्राह्मणं तत्र पाययेदिति" । उग्रदेवतायुधानि स्नापयित्वा तदुदकं स्वल्पेऽपराधे पाययेत् । तथा च कात्यायनः "स्वल्पेऽपराधे देवानां पाययित्वाऽऽयुधोदकम् । पाय्यो विकारे चाशुद्धो नियम्यः शुचिरन्यथेति" । पाय्यः पाययितव्यः । नियम्यो दण्ड्यः । आयुधग्रहणं ताम्रादिनिर्म्मितादित्यमण्डलस्याप्युपलक्षणम् अत एव वृहस्पतिः "यद्भक्तः सोऽभियुक्तः स्यात्तद्देवायुधमण्डलम् । प्रक्षाल्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयमिति" अत्र विशेषमाह पितामहः "दुर्गायाः पाययेच्छूलमादित्यस्य तु मण्डलम् । अन्येषामपि देवानां स्नापयेदायुधानि त्विति" । कृतकोशपानस्य किं तत्कालमेव शुद्धिर्नेत्याह कात्यायनः "अथ दैवविसंवादस्त्रिसप्ताहात्तु दापयेत् । अभियुक्तं प्रयत्नेन तमर्थं दण्डमेव चेति" । दैवविसंवादः दैविकव्याध्युद्भवः । दैविकव्याध्यादीनपि स एव दर्शयति "ज्वरातिसारविस्फोटाः शूलास्थिपरिपीडनम् । नेत्ररुग्गलरोगश्च तथोन्मादः प्रजायते । शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणामिति" । शुद्धिकालावधिं विष्णुरप्याह "यस्य पश्येद्द्विसप्ताहात् त्रिसप्ताहादथापि वा । रोगोऽग्निर्ज्ञातिमरणं राजदण्डमथापि वा । तमशुद्धं विजानीयात् तथा शुद्धं विपर्य्यये । दिव्ये च शुद्धं पुरुषं सत्कुर्य्याद्धार्म्मिको नृपः" इति । पितामहोऽपि "त्रिरात्रात्सप्तरात्राद्वा द्विसप्ताहादथापि वा । वैकृतं यस्य दृश्येत पापकृत्स तु मानवः । तस्यैकस्य न सर्व्वस्य जनस्य यदि तद्भवेत् । रोगोऽग्निर्ज्ञातिमरणं सैव तस्य विभावनेति" । तद्रोगवैकृतं कृतकोशपानस्यैकस्य यदि भवेत् तदैव स पापकृदिति न, किन्तु तदीयसर्व्वस्य जनस्य मध्येऽपि यदि कस्यचिद्भवेत् तदापीत्यर्थः । अतएव वृहस्पतिः "सप्ताहाद्वा द्विसप्ताहाद्यस्यार्त्तिर्न प्रजायते । पुत्त्रदारधनानाञ्च स शुद्धः स्यान्न संशयः" इति । याज्ञवल्क्योऽपि "अर्व्वाक् चतुर्दशादह्नो यस्य नो राजदैविकम् । व्यसनञ्जायते घोरं स शुद्धः स्यान्न संशयः" इति । एतेषाञ्च त्रिरात्रादीनां पक्षाणाम् अभियोगाल्पत्वमहत्त्वाभ्यां व्यवस्था ज्ञातव्या । अवधेरूर्द्ध्वन्तु रोगाद्युद्भवेऽपि न पराजयः तथा च नारदः "ऊर्द्ध्वं यस्य द्विसप्ताहाद्वैकृतन्तु महद्भवेत् । नाभियोज्यस्तु विदुषा कृतकालव्यतिक्रमादिति" । अत्र द्विसप्ताह इत्यवधिकालमात्रोपलक्षणम् कृतकालव्यतिक्रमहेतोरभिधानात् । तेनैकविंशतिरात्रस्यावधिकालत्वाश्रयणे चतुर्दशरात्रादूर्द्ध्वमपि वैकृतोत्पत्तौ पराजयः एवं त्रिरात्रसप्तरात्रात् प्रागपि वैकृतोत्पत्तौ पराजय इति सिद्धम्

१५ कोषवदावरकेषु वेदान्तप्रसिद्धेषु अन्नमयादिषु पञ्चसु पदार्थेषु अन्नमय प्राणमयः मनोमयः विज्ञानमयः आनन्दमयः इत्येते पञ्च पदार्था अनात्मकाः तेषामात्मतोऽविवेकार्थं वेदान्तिभिः कल्पिताः । तत्र पञ्चकोषविवृतिः विवेकचूड़ामणौ "देहोऽयमन्नभवनोऽन्नमयस्तु कोषश्चान्नेन जीवति विनश्यति तद्विहीनः । त्वक्चर्म्ममांसरुधिरास्थिपुरीषराशिर्नायं स्वयं भवितुमर्हति नित्यशुद्धः । पूर्व्वं जनेरपि मृतेरधुनायमस्ति जातक्षणः क्षणगुणोऽनियतस्वभावः । नैको जडश्च घटवत्परिदृश्यमानः स्वात्मा कथं भवति भावविकारवेत्ता । पाणिपादादिमान् देहो नात्मा व्यङ्गेऽपि जीवनात् । तत्तच्छक्तेरनाशाच्च न नियम्यो नियामकः । देहतद्धर्म्मतत्कर्म्मतदवस्थादिसाक्षिणः । स्वतएव स्वतःसिद्धं तद्वैलक्षण्यमात्मनः । शल्यराशिर्मांसलिप्तो मलपूर्णोऽतिकश्मलः । कथं भवेदयं वेत्ता स्वयमेतद्विलक्षणः । त्वङ्मांसमेदोऽस्थिपुरीषराशावहंमतिं मूढजनः करोति ।

विलक्षणं वेत्ति विचारशीलो निजस्वरूपं परमार्थभूतम्। देहोऽहमित्येव जडस्य बुद्धिर्देहे च जीवेऽविदुषस्त्वहंधीः। विवेकविज्ञानवतो महात्मनो ब्रह्माहमित्येव मतिः सदात्मनि। अत्रात्मबुद्धिं त्यज मूढबुद्धे! त्वङ्मांसमेदोऽस्थिपुरीषराशौ। सर्व्वात्मनि ब्रह्मणि निर्विकल्पे कुरुष्व शान्तिं परमां भजस्व। देहेन्द्रियादावसति भ्रमोदितां विद्वानहन्तां न जहाति यावत्। तावन्न तस्यास्ति विमुक्तिवार्त्ताप्यस्त्वेष वेदान्तनयान्तदर्शी। छायाशरीरे प्रतिबिम्बगात्रे यत् स्वप्नदेहे हृदि कल्पिताङ्गे। यथात्मबुद्धिस्तव नास्ति काचित् जीवच्छरीरे च तथैव मास्तु। देहात्मधीरेव नृणामसद्धियां जन्मादिदुःखप्रभवस्य बीजम्। यतस्ततस्त्वं जहि तां प्रयत्नात् त्यक्ते तु चित्ते न पुनर्भवाशा। कर्म्मेन्द्रियैः पञ्चभिरञ्चितोऽयं प्राणो भवेत् प्राणमयस्तु कोषः। येनात्मवानन्नमयोऽन्नपूर्णात् प्रवर्त्ततेऽसौ सकलक्रियासु, नैवात्मापि प्राणमयो वायुविकारो गन्ता गन्ता वायुवदन्तर्बहिरेषः। यस्मात् किञ्चित् क्वापि न वेत्तीष्टमनिष्टं स्वं वान्यं वा किञ्चन नित्यं परतन्त्रः। ज्ञानेन्द्रियाणि च मनश्च मनोमयः स्यात् कोषो ममाहमिति वस्तुविकल्पहेतुः। संज्ञादिभेदकलनाकलितो बलीयांस्तत्पूर्व्वकोषमभिपूर्य्य विजृम्भते यः। पञ्चेन्द्रियैः पञ्चभिरेव होतृभिः प्रचीयमानो विषयाज्यधारया। जाज्वल्यमानो बहुवासनेन्धनैर्मनोमयाग्निर्दहति प्रपञ्चम्। न ह्यस्त्यविद्या मनसोऽतिरिक्ता मनो ह्यविद्या भवबन्धहेतुः। तस्मिन् विनष्टे सकलं विनष्टं विजृम्भितेऽस्मिन् सकलं विजृम्भते। स्वप्नेऽर्थशून्ये सृजति स्वशक्त्या भोक्त्रादि विश्वं मन एव सर्व्वम्। तथैव जाग्रत्यपि नो विशेषस्तत्सर्व्वमेतन्मनसो विजृम्भणम्। सुषुप्तिकाले मनसि प्रलीने नैवास्ति किञ्चित् सकलप्रसिद्धेः। अतो मनःकल्पित एव पुंसः संसार एतस्य न वस्तुतोऽस्ति। वायुना नीयते मेघः पुनस्तेनैव नीयते। मनसा कल्प्यते बन्धो मोक्षस्तेनैव कल्प्यते। देहादिसर्व्वविषये परिकल्प्य रागं बध्नाति तेन पुरुषं पशुवद्गुणेन। वैरस्यमत्र विषवत् सुविधाय पश्चादेनं विमोचयति तन्मन एव बन्धात्। तस्मान्मनः कारणमस्य जन्तोर्बन्धस्य मोक्षस्य च वा विधाने। बन्धस्य हेतुर्मलिनं रजोगुणैर्मोक्षस्य शुद्धं विरजस्तमस्कम्। विवेकवैराग्यगुणातिरेकाच्छुद्धत्वमासाद्य मनो विमुक्त्यै। भवत्यतो बुद्धिमतो मुमुक्षोस्ताभ्यां दृढाभ्यां भवितव्यमग्रे। मनो नाम महाव्याघ्रो विषयारण्यभूमिषु। चरत्यत्र न गच्छन्तु साधवो ये मुमुक्षवः। मनः प्रसूते विषयानशेषान् स्थूलात्मना सूक्ष्मतया च भोक्तुः। शरीरवर्णाश्रमजातिभेदान् गुणक्रियाहेतुफलानि नित्यम्। असङ्गचिद्रूपममुं विमोह्य देहेन्द्रियप्राणगुणैर्निबध्य। अहंममेति भ्रमयत्यजस्रं मनः स्वकृत्येषु फलोपभुक्तिषु। अध्यासदोषात् पुरुषस्य संसृतिरध्यासबन्धस्त्वमुनैव कल्पितः। रजस्तमोदोषवतोऽविवेकिनो जन्मादिदुःखस्य निदानमेतत्। अतः प्राहुर्मनोऽविद्यां पण्डितास्तत्त्वदर्शिनः। येनैव भ्राम्यते विश्वं वायुनेवाभ्रमण्डलम्। तन्मनःशोधनं कार्य्यं प्रयत्नेन मुमुक्षुणा। विशुद्धे सति चैतस्मिन् मुक्तिः करफलायते। मोक्षैकसक्त्या विषयेषु रागं निर्मूल्य संन्यस्य च सर्वकर्म्म। सच्छ्रद्धया यः श्रवणादिनिष्ठो रजःस्वभावं स धुनोति बुद्धेः। मनोमयो नापि भवेत् परात्मा ह्याद्यन्तवत्त्वात् परिणामिभावात्। दुःखात्मकत्वाद्विषयत्वहेतोर्द्रष्टा हि दृश्यात्मतया न दृष्टः। बुद्धिर्बुद्धीन्द्रियैः सार्द्धं सवृत्तिः कर्त्तृलक्षणः। विज्ञानमयकोषः स्यात् पुंसः संसारकारणम्। अनुव्रजच्चित्प्रतिबिम्बशक्तिर्विज्ञानसंज्ञः प्रकृतेर्विकारः। ज्ञानक्रियावानहमित्यजस्रं देहेन्द्रियादिष्वभिमन्यते भृशम्। अनादिकालोऽयमहंस्वभावो जीवः समस्तव्यवहारवोढ़ा। करोति कर्म्माण्यपि पूर्ववासनः पुण्यान्यपुण्यानि च तत्फलानि। भुङ्क्ते विचित्रास्वपि योनिषु व्रजन्नायाति निर्यात्यध ऊर्द्ध्वमेषः। अस्यैव विज्ञानमयस्य जाग्रत्स्वप्नाद्यवस्थासुखदुःखभोगाः। देहादिनिष्ठाश्रमधर्म्मकर्म्मगुणाभिमानः सततं ममेति। विज्ञानकोषोऽयमतिप्रकाशः प्रकृष्टसान्निध्यवशात् परात्मनः। अतो भवत्येव उपाधिरस्य यदात्मधीः संसरति भ्रमाच्च। योऽयं विज्ञानमयः प्राणेषु हृदि स्फुरत्ययं ज्योतिः। कूटस्थः सन्नात्मा कर्त्ता भोक्ता भवत्युपाधिस्थः। स्वयं परिच्छेदमुपेत्य बुद्धेस्तादात्म्यदोषेण परं मृषात्मनः। सर्व्वात्मकः सन्नपि वीक्षते स्वयं स्वतः पृथक्त्वेन मृदो घटानिव। उपाधिसम्बन्धवशात् परात्मा ह्युपाधिधर्म्माननुयाति तद्गुणः। अयोविकारानविकारिवह्निवत् सदैकरूपोऽपि परः स्वभावात्। शिष्य उवाच। भ्रमेणाप्यन्यथा वाऽस्तु जीवभावः परात्मनः। तदुपाधेरनादित्वान्नानादेर्नाश इष्यते। अतोऽस्य जीवभावोऽपि नित्या भवति संसृतिः॥ न निवर्त्तेत, तन्मोक्षः कथं? मे श्रीगुरो! वद॥

श्रीगुरुरुवाच । सम्यक् पृष्टं त्वया विद्वन् ! सावधानेन तत् शृणु । प्रामाणिको न भवति भ्रान्त्या मोहितकल्पना । भ्रान्तिं विना त्वसङ्गस्य निष्क्रियस्य निराकृतेः । न घटेतार्थसम्बन्धो नभसो नीलतादिवत् । स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य प्रत्यगबोधानन्दरूपस्य बुद्धेः । भ्रान्त्या प्राप्तो जीवभावो न सत्यो मोहापाये नास्त्यवस्तुस्वभावः । यावद्भ्रान्तिस्तावदेवास्य सत्ता मिथ्याज्ञानोज्जृम्भितस्य प्रमादात् । रज्ज्वां सर्पो भ्रान्तिकालीन एव भ्रान्तेर्नाशे नैव सर्पोऽपि तद्वत् । अनादित्वमविद्यायाः कार्य्यस्यापि तथेष्यते । उत्पन्नायान्तु विद्यायामाविद्यकमनाद्यपि । प्रबोधे स्वप्नवत् सर्व्वं सहमूलं विनश्यति । अनाद्यपीदं नो नित्यं प्रागभाव इव स्फुटम् । अनादेरपि विध्वंसः प्रागभावस्य वीक्षितः । यद्बुद्ध्युपाधिसम्बन्धात् परिकल्पितमात्मनि । जीवत्वं न ततोऽन्यस्तत्स्वरूपेण विलक्षणः । सम्बन्धः स्वात्मनो बुद्ध्या मिथ्याज्ञानपुरःसरः । विनिवृत्तिर्भवेत्तस्य सम्यग्ज्ञानेन नान्यथा । ब्रह्मात्मैकत्वविज्ञानं सम्यक् ज्ञानं श्रुतेर्मतम् । तदात्मानात्मनोः सम्यग्विवेकेनैव सिध्यति । ततोविवेकः कर्त्तव्यः प्रत्यगात्मसदात्मनोः । जलं पङ्कवदत्यन्तं पङ्कापाये जलं स्फुटम् । यथा भाति, तथात्मापि दोषाभावे स्फुटप्रभः । असन्निवृत्तौ तु सदात्मना स्फुटं प्रतीतिरेतस्य भवेत् प्रतीचः । ततो निरासः करणीय एव सदात्मनः साध्वहमादिवस्तुनः । अतोनायं परात्मा स्याद्विज्ञानमयशब्दभाक् । विकारित्वाज्जड़त्वाच्च परिच्छिन्नत्वहेतुतः । दृश्यत्वात् व्यभिचारित्वात् नानित्योनित्य इष्यते"। आनन्दमयकोषस्तु आनन्दमयकोषशब्दे ७२६पृ० उक्तः धननिचयात्मककोषस्य राज्याङ्गतामाह "स्वाम्यमात्यौ पुरं राष्ट्रं कोषदण्डौ सुहृत्तथा । सप्त प्रकृतयोह्येताः सप्ताङ्गं राज्यमुच्यते । सप्तानां प्रकृतीनां तु राज्यस्यासां यथाक्रमम् । पूर्ब्बं पूर्ब्बं गुरुतरं जानीयाद्व्यसनं महत्" मनुः "स्वामी राजा अमात्योमन्त्र्यादिः । पुरं राज्ञः कृतदुर्गनिवासनगरं, राष्ट्रं देशः, कोषोवित्तनिचयः, दण्डो हस्त्यश्वरथपादातं, मित्रं त्रिविधं सामाध्यायोक्तमित्येते सप्त प्रकृतयोऽङ्गानि सप्ताङ्गमिदं राज्यमित्युच्यते । ततः किमतआह सप्तानामिति । आसां राज्यस्य प्रकृतीनां सप्तानां क्रमिकोक्तानामुत्तरस्याविनाशमपेक्ष्य पूर्ब्बस्याविनाशरूपं व्यसनं गरीयोजानीयात् । तथाहि मित्रव्यसनात् स्वबलव्यसनं गरीयः सम्पन्नबलस्यैव मित्रानुग्रहे सामर्थ्यात् । एवं बलात् कोषोगरीयान् कोषनाशे बलस्यापि नाशात् । कोषाद्राष्ट्रं गरीयः राष्ट्रनाशे कुतः कोषोत्पत्तिः । एवं राष्ट्राद्दुर्गं गरीयो दुर्गादेव यवसेन्धनादिसम्पन्नाद्राष्ट्ररक्षासिद्धेः । दुर्गादमात्यो गरीयान् प्रधानामात्यनाशे सर्वाङ्गवैकल्यात् । अमात्यादपि आत्मा सर्व्वस्यात्मार्थत्वात्" कुल्लू० ।

कोषसञ्चयस्यावश्यकता युक्तिकल्पतरौ दर्शिता यथा "कोषो महीपतेर्जीवो न तु प्राणाःकथञ्चन । द्रव्यं हि देहो भूपस्य न शरीरमिति स्थितिः । धर्म्महेतोः सुखार्थाय भृत्यानां भरणाय च । आपदर्थञ्च संरक्ष्यः कोषः कोषवता सदा । धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते । नाधनस्य भवेद्धर्म्मः कामश्चैव कथञ्चन । अधर्म्मान्निधनं कुर्य्यात्तद्धनं गृह्यते परैः । स्वयं पापस्य पात्र स्यात् र्धिंहो हस्तिवधादिव । तादात्मिको मूलहरः कदर्य्यस्त्रिविधो ऽर्जकः । उत्पन्नार्थव्ययकरो यो भविष्यद्धनाशया । स तादात्मिक आख्यातः कल्याणी तस्य नायतिः । यः पित्रार्ज्जितं वित्तमन्यायेन तु भक्षयेत् । स मूलहर आख्यातस्तदुदर्को ऽपि चाशुभः । स कदर्य्यस्तु भृत्यात्मपीड़नैरर्थसञ्चयी । तद्धनं राजदायादतस्कराणां निधिर्भवेत् । बिन्दुः च राजकोषस्य स्तोकस्तोकेन वर्द्धते । अञ्जनस्य धनस्यैव स्तोकस्तोकेन हीयते । कोषस्य साधनोपायो मुख्यं राष्ट्रमिति स्मृतम् । भूगुणैर्वर्द्धते राष्ट्रं तद्वृद्धिर्नृपवृत्तता । राज्ञोपायेन संरक्ष्या ग्रामे ग्रामे कृषीवलाः । तेभ्यः कृषिस्ततश्चार्था अर्थेभ्यः सर्वसम्पदः । शरीरकर्षणात् प्राणाः क्षीयन्ते प्राणिनां यथा । तथा वर्षेषु वर्षेषु कर्षणात् भूगुणक्षयः । एकस्यां गुणहीनायां कृषिमन्यत्र कारयेत्" ।

तत्सञ्चयोपायाश्च भा० शा० ८८अ० दर्शिताः यथा "यदा राजासमर्थोऽपि कोषार्थे स्यान्महामते! ।" इत्यादि युधिष्ठिरप्रश्ने भीष्मोक्तिः "यथादेशं यथाकालं यथाबुद्धि यथाबलम् अनुशिष्यात् प्रजा राजा धर्म्मार्थी तद्धिते रतः । यथा तासाञ्च मन्येत श्रेय आत्मन एव च । तथा कर्म्माणि सर्व्वाणि राजा राष्ट्रेषु वर्त्तयेत्" इत्युपक्रमे "मधुदोहमित्याद्युक्तं" तच्च करशब्दे १६८७पृ० दर्शितम् । तत्र ६०अ० इत्युक्तिः प्रामादिकी ८८अ० इत्येव साधु । ततः परं कियदन्तरे "प्रयोगं कारयेयुस्तान् यथा बलिकरांस्तथा । कृषिगोरक्षवाणिज्यं यच्चान्यत् किञ्चिदीदृशम् । पुरुषैः कारयेत्

कर्म्म बहुभिः कर्म्मभेदतः। मरुत्वेत् लपिगोरत्वाबाधिजग्रह्याप्यनुष्ठितौ। संशयं लभते किञ्चित्तेन राजा विगर्हयते। धनिनः पूजयेथाश्च पानाच्छादनभोजनैः। वक्तव्याश्चानुगृह्णीष्व प्रजाः सह मयेति वै। अङ्गमेतन्महद्राज्ञो धनिनो नाम भारत!। ककुदं सर्वभूतानां धनस्थो नात्र संशयः। प्राज्ञः शूरो धनस्थश्च स्वामी धार्म्मिक एव च। तपस्वी सत्यवादी च बुद्धिमांश्चापि रक्षति। तस्मात् सर्वेषु भूतेषु प्रीतिमान् भव पार्थिव!। सत्यमार्ज्जवमक्रोधमानृशंस्यञ्च पालय। एवं दण्डञ्च कोषञ्च मित्रं भूमिञ्च लप्स्यसे। सत्यार्ज्जवपरो राजन्मित्रकोषबलान्वितः"। १६तदाधारे गृहे जटा० (खाजमार्चर) "तस्मात्गृहेऽभ्योदत्त्वार्द्धमर्द्धं कोषे निवेशयेत्" मनुः। १७मेघे निघ०।

कोश(ष)कार पु० कोशं(षं)करोति कृ—ण्वुल् उप०स०। १खड्गाद्यावरणकारके स्त्रियां टाप् सि०कौ० तस्य पत्नी ङीष्। सुग्धबोधमते ईप्। "नैर्ऋत्यै कोषकारीम्" यजु० ३०।१४। "खड्गावरणकोश(ष)कारिणीम् स्त्रियम्" वेददी०। २इक्षुभेदे शब्दरत्ना०। कोषं स्ववेष्टनं तन्तुभिः करोति कृ—अण्। ३कीटभेदे (गुटिपोका)। "संवेष्टमानं बहुभिः मोहात्तन्तुभिरात्मजैः। कोषकारमिवात्मानं वेष्टयन्नावबुध्यते" भा०शा० ३३१अ०।

कोश(ष)कृत् त्रि० कोषं खड्गाद्यावरणं वेष्टनं वा करोति कृ—क्विप् ६तत्। १कोषकारार्थे। २इक्षुभेदे सुश्रुतः "नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत्" सुश्रु० इक्षुभेदोक्तौ

कोश(ष)वश्चु पु०कोशः चञ्चौ यस्य। सारसपक्षिणि शब्दच०

कोश(ष)पाल पु० कोषं राज्याङ्गधनसंचयं पालयति पालि—अण् उप०स०। कोषरक्षके तल्लक्षणमुक्तं हेमा० परि०ख० लक्षणसमुच्चये। "धात्वस्त्राजिनादीनां रत्नानां प्रविभागवित्। विज्ञाता फल्गुसाराणामसंहार्य्यः शुचिः सदा। निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः। आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नराः। व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता। आयव्ययज्ञो लोकज्ञो देशोत्पत्तिविशारदः। कृताकृतज्ञो भृत्यानां ज्ञेयः स्याद्दण्डरक्षकः"। "नियोन्तु कोश(ष)पालाश्च कुरुक्षेत्राश्रमं प्रति" भा० आश्र० २२अ०। ण्वुल् कोश(ष)पालकोऽप्यत्र।

कोश(ष)फल न० कोषे(षे)फलमस्य। कक्कोले अमरः २महाकोषातक्याम् स्त्री अजा० टाप्। ३वपुर्यां च स्त्री राजनि० गौरा० ङीष्।

कोशयी पु०कुश—या० अयी। स्वर्णादिपूरणे। "कोशयीर्देश वाजिनोऽदात्" ऋ० ६।४७।२२। छान्दसः प्रयोगः

कोश(स)ला स्त्री कुश(स) इणा० कल नि० गुणः। १सरयूतटस्थायामयोध्यायां पुर्य्यां २तद्युक्ते देशे पु०ब०व०। "कुन्तलाः काशिकोश(स)लाः" भा० भी०६अ० जनपदकथने। पूर्व्वदिकस्थदेशभेदेषु प्राच्यकोशलेषु पु०ब०व० ते च कोशलकारूर्ड मानश्च" ह०व० कर्म्मविभागे पूर्व्वस्थायुक्ताः। क्वचिदेकत्वमपि। "कोश(स)लोनाम मुदितः स्फीतोजनपदो महान्। निविष्टः सरयूतीरे पशुधान्यसमृद्धिमान्" रामा० १।५।५। कोशलदेशोद्विविधः प्राच्योत्तरभेदात् तत्र अयोध्यायुक्तदेशस्योत्तरकोशलत्वम् "पितुरनन्तरमुत्तरकोशलान्" "तस्मै निसृज्योत्तरकोश(स)लानाम्" "प्रियासखोरुत्तरकोशलेश्वरः" रघुः प्राच्यकोशलास्तु कोसलशब्दे वक्ष्यते। तद्देशस्य राजा अञ्। कौश(स)ल्य कोशलदेशन्दपे। "कौ(श)सल्यइत्युत्तरको(श)सलानाम्" रघुः स्त्रियां टाप् कौसल्या। "कौसल्यानन्दिवर्द्धनोरामः" रामा०

कोश(स)लात्मजा स्त्री कोश(स)लाः पूर्व्वकोश(स)लदेशः लक्षणया तदधिपः तस्यात्मजा। प्राच्यकोसलाधिपदुहितायाम् राममातरि शब्दर०

कोशलिक न०कुशलाय कर्म्मणे दीयते ठक् पृषो० औत्त्वम्। निजकार्य्यसाधनार्थं राजादिकार्य्यकरेभ्योदीयमाने उत्कोचे (घुष) हेम० कौशलिकमिति पाठान्तरं साधु

कोश(ष)वत् त्रि०कोषः(शः)अस्त्यस्य मतुप् मस्य वः। १कोश(ष)युक्ते। "धर्म्मात्मा कोषवांश्चापि देवराज इवापरः" भा० आनु० २अ०। स्त्रियां ङीप् कोश(ष)वती सा च २कोषातकीभेदे "दन्तीघृतं वा मगधोद्भवानां कल्कं पिबेत् कोषवतीरसेन" "शुकाख्याकोषवत्योश्च मूलं मदन एव च" "जीमूतकैः कोशवतीफलैश्च दन्तीद्रवन्तीविहितांश्च चैव" इति च सुश्रु०

कोश(ष)वासिन् पु० कोषे(षे)वसति वस—णिनि ७तत्। कोषाभ्यन्तरस्थे जन्तुभेदे "कोशवासिनां पादिनां च तद्वत्" (अनुपानम्) सुश्रु० कोशस्थशब्दे विवृतिः

कोश(ष)वृद्धि पु० कोषस्य अण्डकोषस्य वृद्धिर्यत्र। १कुरण्डक रोगे। ६तत्। २अण्डकोषवृद्धौ रोगभेदे ३धनसञ्चयवृद्धौ च स्त्री

कोश(ष)शायिका स्त्री कोषे(षे) पिधानमध्ये शेते शी ण्वुल् ७तत्० अतइत्त्वम्। क्षुरिकायां जटाधरः

कोश(ष)स्कृत् पु० कोशं(षं)करोति कृ—क्विप् नि० सुट्। कोषकारके जन्तुभेदे (गुटिपोका) "त्यजेत् कोश(ष)कृदेवेह

मानः" भाग० ७।४।११ "कोश(ष)स्थं कोशकारः" श्रीधरः

कोश(ष)स्थ पु० कोशे(षे) तिष्ठति स्था—क ७त०। सुश्रुतोक्ते शङ्खादिके जन्तुभेदे। "आनूपवर्गस्तु पञ्चविधः" इत्युपक्रम्य कोशस्था इत्युद्दिश्य "शङ्ख शङ्खनख शुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः पादिनश्च" इत्युक्त्वा कूर्म्मादींश्चोक्त्वा तन्मांसगुणा उक्ता यथा "शङ्खकूर्म्मादयः स्वादुरसगन्धा मरुन्नुदः। शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः"

कोशा(षा)गार न० ६त०। धनागारे (खाजनाघर) "कोषागारमायुधागारमश्वशालां हस्तिशालाञ्च कुरु" भा० व० १६७ कोश(ष)गृहादयोऽप्यत्र न० [कड़,)वुपभेदे हारा०

कोशा(षा)ङ्ग न० कोशः(षः) इवाङ्गमस्य। वङ्कमूले इत्कटौ(ओ-

कोशा(षा)तक पु० कोश(ष)मतति अत—क्वुन्। १कठवेदशाखाभेदे २पटोल्याम् घोषके (तरुइ) (भीङा) ख्याते शाकभेदे स्त्री मेदि० गौरा० ङीष्। भावप्र० इयं राजसेव्यत्वात् महत्त्वाद्वा राजोपपदा निर्द्दिष्टा "धामार्गवः पीतपुष्पा जालिनी क्षतवेधना। राजकोशातकी चेति तथोक्ता राजिमत्फला। राजकोशातकी शीता मधुरा कफवातला। पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत्" "कोषातकीवल्लिभवाऽप्यपल्लवास्तक्रेण युक्ताः सुघृतेन संस्कृताः। सम्भर्जिताः सैन्धवहिङ्गुसाधिते तैलेऽतिरुच्या बहुपुष्टिदायकाः" तस्याः फलम् अण् हरीतक्या० लुप्। तत्फले स्त्री "कोशातकीपुष्पगुलुच्छकान्तिभिः" नै० ध०

कोशा(षा)म्र पु० को(शे)षे आम्र इव। १फलप्रधानवृक्षभेदे (कोशान) "कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः। तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम्। पक्वं तु दीपनं रुच्यं लघूष्णं कफवातहृत्" भावप्र०। (केओड) २फलवृक्षे राजवल्लभः

कोशि(षि)न् त्रि० कोश(ष)+अस्त्यर्थे इनि। १कोश(ष)युक्ते आमोपपदकोषी तु सुश्रुतोक्ते कर्णवन्धनजे रोगभेदे "बद्धमात्रस्तु यः कर्णं सहसैवाभिवर्द्धयेत्। आमकोषी समाख्यातः क्षिप्रमेव विसर्प्यते"। २आम्रवृक्षे पु० शब्दमाला।

कोशि(षि)ला स्त्री कोश+अस्त्यर्थे पिच्छादित्वाद् इलच्। सूक्ष्मपर्ण्याम् राजनि०

कोशी(षी) स्त्री कुश—(कुष) अच् गौरा० ङीष्। १चर्म्मपादुकायाम् २धान्याद्यग्रभागे च (शुङ्गा) हेम०

कोश्य(ष्य) त्रि० कोशे हृदयकोशे(षे) भवः यत्। हृदयकोश मांसपिण्डे "भिङ्गानि कोश्याभ्याम्" यजु० ३९।८ "कोश्याभ्यां हृदयस्य मांसपिण्डाभ्याम्" वेददी०

कोष पु० न०। कुष—पचादि० अच्। १कोशशब्दार्थे कोशशब्दे विवृतिः। २ऋषिभेदे। "अथोह कोषा धावयन्तः" शत० ब्रा० १०।५।५।८ "कोषाणाम ऋषयः" भा०।

कोषक पु० कोष—स्वार्थे क। अण्डकोषे शब्दर०

कोषला स्त्री० कोप—अलच्। अयोध्यायां पुर्यां शब्दरत्ना०

कोष्ठ पु० कुष—थन्। १गृहमध्ये, २उदरमध्ये, ३धान्यादिस्थापने ४कुसूले च (कुठी) ५आत्मीये त्रि० मेदि० "स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च। हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते" ६सुश्रुतोक्ते आमाग्निपक्वमूत्ररुधिरस्थाने "प्रवाहिका शिरः शूलं कोष्ठशूलञ्च दारुणम्" "चले दोषे मृदौ कोष्ठे नेच्छेतात्र बलं न्यधात्" सुश्रु० "भुक्तं भुक्तमिदं कोष्ठे कथमन्नं विपच्यते" भा० आश्व० ५७ श्लो० "पतिं भार्य्योपतिष्ठेत ध्यायेत् कोष्ठगतं यथा" भा० भी० ६।१८। ५२। अकथहादिचक्रचतुःपार्श्वस्थरेखाचतुष्कान्विते ७स्थानभेदे अकथहशब्दे ३८पृ० उदा०। ८पदे स्थानमात्रे "पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम्। यत् पञ्चविषयम् चेलं पञ्चप्रज्ञानिसीधरम्। पञ्चेन्द्रियार्था आरामा द्वारः प्राणा नव प्रभो!। तेजोऽवन्नानि कोष्ठानि कुलमिन्द्रियसंग्रहः। विषयास्तु क्रियाशक्तिर्भूतप्रकृतिरव्यया" भाग० ४।२८।५१।५२।५२। कुसूले "जरत्कोष्ठाद्व्रीहीन्कूर्क्करार्भिमिश्रानाहरति" कौषीतकिब्रा०

कोष्ठागार न० कोष्ठमगारमिव। धान्यधनादेःस्थापने गृहे (कुठी) "कोष्ठागारायुधागारदेवतागारभेदकान्" मनुः "कोष्ठागारं तु ते नित्यं स्फीतं धान्यैः सुसंवृतम्। सदास्तु सत्सु संन्यस्तं धनधान्यपरोभव" भा० आ० ११९अ०

कोष्ठागारिक त्रि० कोष्टागरे भवः तत्र नियुक्तोवा वा० ठन्। १कोष्ठागारभवे। "अत्यर्थं स्रवति रक्तं कोष्ठागारिकाङ्गारसन्निभं स्तत्पिण्डेत्यादि" सुश्रु० २कोष्ठागारे नियुक्ते च।

कोष्ठागारिन् पु० कोष्ठरूपमगारमिवास्त्यस्य इनि। कीटभेदे "कोष्ठागारी क्रमिकरश्च मण्डलपुच्छकः" सुश्रुते प्राणनाशककीटोक्तौ

कोष्ण न० ईषदुष्णम् कोः कादेशः। १ईषदुष्णस्पर्शे २तद्वति त्रि० अमरः। "भुवं कोष्णेन पीनोभी शृङ्गभावध्वग्रादपि" रघुः "घृतेन सा शान्तिमुपैति जिह्वा कोष्णेन यष्टीमधुकान्वितेन" "शोथं सतोदं कोष्णेन सर्पिषा परिषेचयेत्" सुश्रु०

कोसल पु० ब०व०। कुस–अलच्। देशभेदे। तेऽभिजनोऽस्य तेषां राजा वा ष्यञ्। कौसल्य पित्रादिक्रमेण तद्देशवासिनि बहुषु तस्य लुक् कोशलाः। कोशलशब्दे विवृतिः। कोसलदेशश्च द्विविधः पूर्व्वोत्तरभेदात् "कोसलाधिपतिं चैव तथा वेणातटाधिपम्। कान्तारकांश्च समरे तथा प्राक्कोसलान्नृपान्" भा० स० ३०अ० "दक्षिणाये च पाञ्चालाः पूर्व्वाः कुन्तिषु कोसलाः" १३अ० उत्तरकोसलास्तु कोशलशब्दे दर्शिताः

कोहल पु० को हलति स्पर्द्धते अच् पृषो०। १वाद्यभेदे मेदि० २मद्यभेदे च हेम० ३नाटकशास्त्रकर्त्तृमुनिभेदे तस्यापत्यम् शिवा० अण्। कौहल तदपत्ये पुंस्त्री० डलयोरैक्यात् कोहडोऽप्यत्र

कोहनीय पु० ऋषिभेदे "उपयातायार्घ्यमिति कोहनीयाः" गोभि० गृ०सू०। उपयातायाचार्य्यं समीपं गतायार्घ्यं देयमिति कोहनीया आचार्य्या आहुः" सं०त०रघुनन्दनः

कोहित पु०। ऋषिभेदे। ततोऽपत्ये शिवा० अण्। कौहित तदपत्ये पुंस्त्री०

कौकिली स्त्री कोकिलेन दृष्टा अण्। कोकिलदृष्टायां सौत्रामण्याम्। "द्वे सौत्रामण्यौ कौकिली चरकसौत्रामणी च" लाट्या० श्रौ०सू०।

कौकुट्टक पु० ब०व०। देशभेदे स च दक्षिणस्थः। "अथापरे जनपदा दक्षिणा भरतर्षभ!" इत्युपक्रमे "कौकुट्टकास्तथा कोलाः कौङ्कणाः मालवानकाः" भा० भी० ९अ०।

कौकुन्तक पु० ब० व०। जनपदभेदे।

कौकुर पु० ब० व०। कुकुराणां देशः अण्। १देशभेदे। "अम्बष्ठाः कौकुरास्तार्क्ष्या वस्त्रपाः पह्लवैः सह" भा० सभा० ५१अ०। कुकुराः यादवभेदास्त एव स्वार्थे अण्। कुकुरवंश्ये २नृपभेदे। "श्रुत्वा विनष्टान् वार्ष्णेयान् सभोजान्धककौकुरान्" भा० मौ० ५अ०।

कौकृत्य न० कुत्सितं कृत्यं स्वार्थे ष्यञ्। १अयुक्तकरणे २अनुतापविषये च मेदि०।

कौक्कुटिक पु० कुक्कुटीं मायां, पादपतनदेशञ्च पश्यति ठक्। १दाम्भिके, कीटादिवधभीत्या पादक्षेपस्थानमात्रदृष्टरि संन्यासिनि च मेदि०। सन्यासी हि हिंसाभयात् पादन्यास प्रदेशपर्य्यन्तमेव पश्यन् दूरात् चक्षुः संयम्य यातीति तथात्वम्।

कौक्कुटिकान्दल पुंस्त्री कुक्कुटस्येयम् इञ् कौक्कुटिः स इव कन्दलः। (वेङामाछ) सर्पभेदे त्रिका० स्त्रियां ङीप्।

कौक्ष त्रि० कुक्षौ बद्धः असिभिन्नः। कुक्षिबद्धे अलङ्कारादौ

कौक्षक त्रि० कुक्षौ देशभेदे भवः धूमा० वुञ्। कुक्षिदेशभवे

कौक्षेय त्रि० कुक्षौ भवः "दृतिकुक्षीत्यादिना" पा०ढञ्। कुक्षौ भवे। "असिं कौक्षेयमुत्थस्य वक्रारापनसं सुखम्" भट्टिः

कौक्षेयक पु० कुक्षौ बद्धः असिः ढकञ्। कुक्षिबद्धे खड्गे "कौक्षेयकेण सन्निहितविषधरेणेव चन्दनलता" काद०। "बद्धतीक्ष्णकौक्षेयक." दशकुमा०।

कौङ्क पु० कोङ्क एव स्वार्थे अण्। कोङ्कणदेशे शब्दरत्ना०

कौङ्कण पु० ब० व०। कोङ्कण+स्वार्थे अण्। १कोङ्कणदेशे "कौङ्कणाः मालवानकाः" भा०भी० ९अ०। तस्य राजा अण् २तद्देशनृपे च।

कौङ्किण न० द०व०। कोङ्कण+पृषो०। कोङ्कणदेशे शब्दर०।

कौञ्च पु० क्रुञ्च एव स्वार्थे अण् पृषो०। क्रौञ्चपर्व्वते त्रिका०।

कौञ्जायन्य पु० कुञ्जा० गोत्रापत्ये च्फञ् ततः स्वार्थे ञ्य। १कुञ्जर्षिगोत्रापत्ये स्त्रियान्तु न ञ्य किन्तु गोत्रप्रत्ययान्तत्वात् ङीप् कौञ्जायिनी सा च २ब्राह्मण्याम् जटाधरः।

कौञ्जि पुंस्त्री० कुञ्जस्यर्षेरनन्तरापत्यम् अत इञ्। कुञ्जर्षेरनन्तरापत्ये स्त्रियां वा ङीप्।

कौट त्रि० कूटे अद्रिशृङ्गे भवः उत्सा० अञ्। १कुटजवृक्षे (कुरची) भावप्र० कुटजं प्रायभवः अण्। २स्वतन्त्रे त्रि०। कूटस्य भावः अण्। ३मिथ्याकथने ४मिथ्यासाक्ष्ये च

कौटकिक त्रि० कूटमेव कूटकं मांसकूटं तत्पण्यमस्य ठञ्। मांसविक्रेतरि शब्दरत्ना०

कौटज पु० कुटमेव कौटं तत्र जातः। कुटजवृक्षे रायमुकुटः

कौटजभारिक त्रि० कुटजस्य भारं हरति वहत्यावहति वा वंशा०ठञ्। १कुटजभारहारिणि २तद्वाहके ३तदावहके च

कौटजिक त्रि० कुटजं भारभूतं हरति वहति आवहति वा ठञ्। भारभूतकुटजस्य १हारके २वाहके ३आवाहके च

कौटतक्ष पु० कौटः स्वतन्त्रः तक्षा टच् समा०। स्वतन्त्रे तक्षणि

कौटल्य न० कुट-कलच् स्वार्थे ष्यञ्। कौटिल्यशब्दार्थे हेमच०

कौटसाक्ष्य न० कूटसाक्षिणोभावः कर्म्म वा ष्यञ्। मिथ्यासाक्ष्ये "कौटसाक्ष्यं सुहृद्वधः" मनुना सुरापानसमानतोक्त्या तस्यानुपातकता। कौटसाक्ष्यदण्डश्च मनुना दर्शितो यथा

"यस्मिन् यस्मिन् विवादे तु कौटसाक्ष्यं कृतं भवेत्। तत्तत् कार्य्यं निवर्त्तेत कृतञ्चाप्यकृतं भवेत्। लोभान्मोहाद्भयान्मैत्रात् कामात् क्रोधात्तथैव च। अज्ञानाद्बालभावाच्च साक्ष्यं वितथमुच्यते। एषामन्यतमे स्थाने यः साक्ष्यमनृतं वदेत्। तस्य दण्डविशेषांश्च प्रवक्ष्याम्य-

त्पूर्व्वशः। लोभात् सहस्र दण्ड्यस्तु मोहात् पूर्व्वन्तु साहसम्। भयाद्द्वौ मध्यमं दण्ड्यो मैत्रात् पूर्व्वं चतुर्गुणम्। कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम्। अज्ञानाद्द्वे शते पूर्णे बालिश्यात्छतमेव तु। एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान्मनीषिभिः। धर्म्मस्याव्यभिचारार्थमधर्म्म-नियमाय च। कौटसाक्ष्यन्तु कुर्व्वाणांस्त्रीन् वर्णान् धार्म्मिको नृपः। प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत्"।

कौटि पुंस्त्री कूटस्यापत्यम् इञ्। कूटस्य मिथ्याशंसिनोऽपत्ये स्त्रियां तु क्रौड्यादि॰ ष्यङ्। कौट्या

कौटिक त्रि॰ कूटेन मृगबन्धनयन्त्रेण चरति ठक्। मांस-विक्रयोपजीविनि अमरः। कूट+चतुरर्थ्यां कुमु॰ ठक्। कूटसन्निकृष्टदेशादौ त्रि॰।

कौटिलिक त्रि॰ कुटिलिका व्याधानां गतिभेदः कर्म्मारोपकरणभूतं लौहञ्च तया हरति मृगान् अङ्गारान् वा। "अण् कुटिलिकायाः" पा॰ अण्। १व्याधे २कर्म्मकारे च सि॰ कौ॰।

कौटिल्य न॰ कुटिलस्य भावः ष्यञ्। १वक्रीभावे "निवं कौटिल्ये गतौ" पा॰। "कौटिल्यं कचनिचये करचरणाधरदलेषु रागस्ते" का॰प्र॰ तच्चोपपातकम् "कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम्" या॰ स्मृतेः। उपपातकशब्दे विवृतिः। स्वार्थे ष्यञ्। २चाणक्यमुनौ पु॰ राजनि॰ "आकर्ण्य आःज्ञातम्। कौटिल्यः—कुटिलमतिः स एव येन क्रोधाग्नौ प्रसभमदाहि नन्दवंशः" मुद्राराक्षसम्

कौटीगव्य पुंस्त्री कुटीगोर्म्मुनेरेर्गोत्रापत्यम् गर्गा॰ यञ्। कुटीगोर्म्मुनेर्गोत्रापत्ये। तस्य छात्रः कण्वा॰ अण् यलोपः। कौटीगव, तच्छात्रे। [देशादौ

कौटीय त्रि॰ कूट+चतुरर्थ्यां कृशाश्वा॰ छण्। कूटसन्निकृष्ट-

कौटीर्य्य त्रि॰ कुटीरः केवल एव स्वार्थे ष्यञ्। केवले असहाये। कौटिरीर्य्यं यस्याः। २दुर्गायाम् स्त्री "कौटीर्य्यां मदिरां चण्डामिलां मलयवासिनीम्" हरिवं॰ १७८अ॰

कौटुम्ब त्रि॰ कुटम्बं तद्भरणं प्रयोजनमस्य अण्। कुटुम्बभरणोपयोगिद्रव्ये। आहरेदित्यनुवृत्तौ "अन्यथा कौटुम्बम्" आश्व॰ गृ॰ सू॰ २,६,१०,

कौटुम्बिक त्रि॰ कुटम्बे तद्भरणे प्रसृतः ठक्। कुटुम्बभरणे व्यापृते "कौटुम्बिकः क्रुध्यति वै जनाय" भाग॰ ५,५,१२,६,। कुटुम्बे भवः ठक्। २कुटुम्बमध्यपातिनि। "यत्र कौटुम्बिका दारापत्यादयो नाम्ना, कर्म्मणा वृकसृगाला एव" भाग॰ ५,१४,५,

कौट्या स्त्री कूटस्यापत्यम् इञ् स्त्री कौटिः सैव क्रौड्या ष्यङ्। १कूटापत्यस्त्रियाम् कूट+चतुरर्थ्याम्। संकाशा॰ ण्य। २कौट्य कूटसन्निकृष्टदेशादौ त्रि॰

कौठारिकेय त्रि॰ स्वल्पा कुठारी कुठारिका तस्याः इदम् शुभ्रा॰ ढक्। स्वल्पकुठारसम्बन्धिनि

कौडविक त्रि॰कुडवस्य वापः ठञ्। कुडववापयोग्ये क्षेत्रादौ कुडवं तत्परिमितमन्नं सम्भवति पचति अवहरति वा ठक्। २स्वस्मिन् कुडवमितान्नसमावेशके कटाहादौ ३तत्पाचके सूदादौ ४तदवहारके च स्त्रियां ङीप्। कुडवः परिमाणमस्य ठञ्। ५कुडवपरिमिते। संख्यापूर्व्वकत्वे पूर्व्वपदस्य न वृद्धिः द्विकौडविकः। अर्द्धपूर्व्वकस्य तु वा वृद्धिः आ(अ)र्द्धकौडविकः। असंज्ञायान्तु ठञोलुक्। द्विकुडवम् अर्द्धकुडवम् इत्यादि।

कौड्यक त्रि॰ कुड्य—काकश्यें वदत् संयोगादिलोपः कुड्या तत्र जातादि कच्छ्या॰ ढकञ् "कुड्याया यलोपश्च" पा॰ ग॰यलोपः। कार्कश्यकरणार्हायां भूमौ जातादौ

कौणकुत्स्य पु॰ ऋषिभेदे। "भरद्वाजः कौणकुत्स्य आर्ष्टिषेणोऽथ गौतमः" भा॰ आ॰ ८अ॰।

कौणप पु॰ कुणपः शवः भक्ष्यत्वेन विद्यतेऽस्य,अण् कुणपस्तद्भक्षणं शीलमस्य ण वा। राक्षसे अमरः"न कौणपाः शृङ्गिणो वा न देवा नच मानुषाः" भा॰आ॰१७०अ॰स्त्रियां ङीप्

कौणपदन्त पु॰ कौणपस्य दन्ताइव दन्ता अस्य। भीष्मे त्रिका॰

कौणपाशन पु॰ कौणपानामशननियाशनमस्य। सर्पभेदे "हस्तिपिण्डः पिठरकः सुमुखः कौणपाशनः" भा॰ आ॰ ३१अ॰ नागनामोक्तौ

कौण्डपायिन् पु॰ ब॰व॰ कुण्डमेव कौण्डं तेन पिबन्ति सोमं पा—णिनि। सोमयागकारियजमानभेदेषु।

कौण्डपायिन न॰ कुण्डपायिनामिदम् अण् नि॰ प्रकृतिभावः। कुण्डपायिनां (कुण्डेन सोमपायिनाम्)सम्बन्धिनि अयनरूपे सत्रभेदे कुण्डपायिनामयनशब्दे विवृतिः।

कौण्डल त्रि॰ कुण्डलमस्त्यस्य ज्योत्स्ना॰ अण्। कुण्डलयुक्ते त्रि॰ स्त्रियां ङीप्। [सन्निकृष्टदेशादौ

कौण्डलिक त्रि॰ कुण्डल+चतुरर्थ्यां कुमु॰ ठक्। कुण्डल

कौण्डाग्नक त्रि॰ कुण्डस्येदमण् कौण्डे अग्नौ भवः इत्रादाग्न्युत्तरपदत्वात् वुञ्। कुण्डसम्बन्ध्यग्निभवे

कौण्डायन त्रि॰ कुण्डस्यादूरदेशादि पक्षा॰ चतुरर्थ्यां फक्। कुण्डसन्निकृष्टदेशादौ [कुण्डिननगरजातादौ

कौण्डिनेयक त्रि॰ कुण्डिने जातादि कच्छ्या॰ ढकञ्

कौण्डिन्य पुंस्त्री कुण्डिनस्यर्षेः गोत्रापत्यं गर्गा॰यञ्। कुण्डिन गोत्रापत्ये। "कौण्डिन्यात् कौण्डिन्य" शत॰ब्रा॰१४।५।५।२०। स्त्रियां तु ङीपि यलोपः "पाराशरकौण्डिनीपुत्रात् पाराशरकौण्डिनीपुत्रः" शत॰ ब्रा॰ १४।६।४।३० वंशब्राह्मणे। कुण्डिनस्य युवापत्यम् गर्गा॰ यञि यञन्तात् फक्। कौण्डिन्यायन कुण्डिनस्य युवापत्ये पुंस्त्री "कौण्डिन्यायनाच्च कौण्डिन्यायनः" शत॰ ब्रा॰ १४।५।५।२०। कौण्डिन्यस्य छात्रः कण्वा॰ अण् यलोपश्च। कौण्डिन कौण्डिन्यस्य छात्रे। बहुषु अणो लुक् कुण्डिनादेशश्च कुण्डिनः। स्त्रियां तु न लुक् किन्तु गोत्रत्वात् ङीष्यलोपौ कौण्डिनी।

कौण्डिल्यक पु॰ १सुश्रुतोक्ते शरभगुलविषे जन्तुभेदे विषशब्दे विवृतिः। २तत्रोक्ते कीटभेदे च कीटशब्दे विवृतिः

कौण्डोपरथ पु॰। आयुधजातिसंघे ततः स्वार्थे छ। कौण्डोपरथीय तदर्थे। "आण्डीरथगर्त्तपर्श्वास्तु कौण्डोपरथदाण्डिकाः क्रौष्टुकिजालमानिश्च ब्रह्मगुप्तोऽथ जालकिः" सि॰ कौ॰। [तस्कुतोभवे।

कौतस्कुत त्रि॰ कुतः कुतोभवः अण् टिलोपः कस्का॰। कु-

कौतस्त त्रि॰ कुतस्त्येभवः अण् नि॰ वेदे यलोपः। कुतस्त्यभवे। "कौतस्तावध्वर्यू अरिमेजयश्च जनमेजयश्च" पारा॰ ब्राह्म॰।

कौतुक न॰ कुतुकस्य भावः युवादि॰ अण् प्रज्ञा॰ स्वार्थे अण् वा। १कुतूहले अमरः। तच्च अद्भुतजिज्ञासातिशयः। "कौतुकागारमागात्" कुमा॰। २मङ्गलार्थहस्तसूत्रे शाश्वतः "वैवाहिकैः कौतुकसंविधानैः" कुमा॰। ३उत्सवे ४अभिलाषे ५नर्म्मणि ६हर्षे ७परम्परायातमङ्गले ८गीतादिभोगे ९भोगकाले च हेम॰।

कौतूहल न॰ कुतूहलस्य तदन्वितस्य भावः कर्म्म वा युवा॰ अण् प्रज्ञादि॰स्वार्थे अण् वा। कुतूहले "विस्तरश्रवणे जातं कौतूहलमतीव मे" भा॰ आ॰ ६२अ॰। "महत् कौतूहलं मेऽस्ति हरिश्चन्द्रकथां प्रति" मार्क॰ ८।१।

कौतूहल्य न॰ कुतूहल+ब्राह्मणा॰ स्वार्थे ष्यञ्। कुतूहले

कौतोमत पु॰ कुतोमतस्यापत्यम् ऋष्यण्। ऋषिभेदे। "मह्रस्वाङ्गगौपत्य इति कौतोमतेन" गोपथब्राह्मणम्।

कौत्स पुंस्त्री॰ कुत्सस्य ऋषेरपत्यम् ऋष्यण्। कुत्सापत्ये "भूर्भुवः स्वरिति जपित्वा कौत्सोहिङ्करोति" आश्व॰श्रौ॰ सू॰ १।२।५। "कौत्साय दत्त्वा कन्यान्तु हंसीं नाम यशस्विनीम्" भा॰ आद॰ १२७अ॰। "कौत्सः प्रपेदे वरतन्तुशिष्यः" रघुः। बहुषु तस्य लुक्। कुत्साः तदपत्येषु। कुत्सेन दृष्टं साम अण्। कुत्सर्षिदृष्टे विकृतियागे गेये सामभेदे। तच्च साम वेशाखे १६प्र॰ २अर्द्धे १०गानम्। "कौत्सं भवति काण्वं भवति" श्रुतिः।

कौथुम त्रि॰ कुथुमं वेदशाखाभेदमधीते वेद वा अण्। १कुथुमशाखाध्यायिनि तद्वेत्तरि च। तस्य कार्त्तकौजपादित्वात् द्वन्द्वे पूर्वपदं प्रकृत्या। कठकौथुमाः इत्यादि। "अनुवादे चरणानाम्" पा॰ द्वन्द्वे एकवत् प्रत्ययात् कठकौथुमम्। "स्थेणोर्लुङि" वार्त्ति॰ स्थाधातोरिण्धातोश्च लुङ्प्रयोग एव तस्य तथात्वं नियमितम् [ब्रह्मवै॰जातिशब्दे विवृतिः

कौदालीक पुंस्त्री॰ रजक्यां तीवराज्जाते संकीर्णवर्णभेदे

कौद्रविक न॰ कोद्रवो निमित्तमस्य ठञ्। सौवर्चललवणे राजनि॰ [धान्यभवनयोग्ये क्षेत्रे अमरः

कौद्रवीण न॰ कोद्रवस्य भवनं क्षेत्रं कोद्रव+खञ्। कोद्रव

कौद्रा(न्द्रा)यण पुंस्त्री॰ कुद्र(न्द्र)स्य ऋषेर्युवापत्यम् इञन्तात् कौद्रि:(न्द्रि:) इञन्तत्वात् यून्यपत्ये फक्। कुद्रि(न्द्रि) नामर्षेर्युवापत्ये ततः अरीह॰ चतुरर्थ्यां वुञ्। कौद्रायणक तत्सन्निकृष्टदेशादौ त्रि॰

कौनख्य न॰ कुनखिनोभावः ष्यञ् टिलोपः। कुत्सितनखरूपे रोगभेदे तच्च सुवर्णस्तेयमहापातकजचिह्नम् "सुवर्णचौरः कौनख्यम्" मनूक्तेः। [निष्टप्तादौ

कौन्तायनि त्रि॰ कुन्ती+चतुरर्थ्यां कर्णा॰ फिञ्। कुन्ती-

कौन्तिक कुन्तः प्रहरणमस्य ठञ्। कुन्तास्त्रेण युद्धकारके अमरः। [पधौ अमरः

कौन्ती स्त्री कुन्तिषु देशेषु भवा अण् ङीप्। भरुकगन्धिन्यो-

कौन्तेय पु॰ कुन्त्या अपत्यम् ढक्। १युधिष्ठिरादिषु त्रिषु। "कौन्तेय! प्रतिजानीहि न मे कर्म्मफले स्पृहा" गीता २अर्ज्जुनवृक्षे राजनि॰ तस्य तत्तुल्यनामत्वात्तथात्वम्।

कौप त्रि॰ कूपस्येदमण्। कूपसम्बन्धिनि जलादौ "सक्षार पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु" सुश्रुते तद्गुणा उक्ताः। "वसन्ते कौपं प्रास्रवणं वा पीत्रेष्वेवम्" सुश्रुतोक्तकाले तस्य सेव्यता। स्त्रियां ङीप्।

कौपीन न॰ कूपे पतनमर्हति खञ् अकार्य्ये नि॰। १अकार्य्ये २पापे ३गुह्यप्रदेशे अमरः ४चीरे त्रिका॰ ५मेखलाबद्धे वस्त्रखण्डे (कपनी) मेदि॰ तद्वारणेन कूपे पतनात् तस्य तथात्वम्। अकार्य्यपदाच्छाद्यत्वात् ६पुरुषलिङ्गे शब्दचि॰ तदावरकतया वस्त्रखण्डस्य कौपीनत्वम्। "कौपीनवन्तः खलु भाग्यवन्तः" पुरा॰ "कौपीनाच्छादनं यावत्तावदिच्छेच्च

चीवरम्” भा० आ० ८१अ०। “अवतासस्तकौपीनाः सुहृदः सव्यजिष्णवः” भा०अनु०४६अ०। [रूपकोषः।

कौपोदकी स्त्री कौमोदकी पृषो०। विष्णुगदायां हि-

कौमार पु० अपूर्व्वपतिकां कुमारीमुपपन्नः पतिः “कौमारापूर्व्ववचने” पा० नि०। अपूर्व्वपतिकायाः कुमार्य्याः १वोढरि। कुमारस्य भावः“प्राणभृद्वयोवचनत्वात् अञ्। “जातः कुं पृथिवीं यस्त्रां मारयेत् स कुमारकः। इति प्रधानतो विद्धि कौमारं प्रागभवावदतः” इत्युक्तावधिके “कौमारं पञ्चमावधि” इत्युक्ते २वयोवस्थाभेदे न०। “देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा” गीता। “पिता रक्षति कौमारे भर्त्ता रक्षति यौवने” मनुः। कुमार एव स्वार्थे अण्। ३कुमारे शब्दचिन्ता०। कुमारस्य सनत्कुमारस्येदम् अण्। ४सर्गभेदे पु० स च सर्गः सनत्कुमारादिसर्ज्जनपूर्व्वकत्वात् तन्नामकः। “कौमार आर्षः प्राजापत्योमानव इत्यादि सर्गनामानि” श्रीधरः। “सएव प्रथमं देवः कौमारं सर्गमाश्रितः। चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्” भाग० १,३,७, “वैकारिकस्तु यः प्रोक्तः “कौमारस्तूभयात्मकः” भाग० ३,१०,२०,५. ५कुमारसम्बन्धिनि त्रि० “तत्र विद्याव्रतस्नातः कौमारं व्रतमास्थितः” भा० व० ८५अ०

कौमारायण पुंस्त्री० कुमारस्य गोत्रापत्यं नड़ा० फक्। कुमारनामकर्षिगोत्रापत्ये। [कानीने

कौमारिकेय पुंस्त्री० कुमारिकाया अपत्यं शुभ्रा० ढक्।

कौमारी स्त्री अप्राप्तेऽपि कुमारं पतिमुपपन्ना स्त्री “कौमारापूर्व्ववचने”पा०नि०ङीप्। १अगृहीतदारान्तरस्य पत्युः १भार्य्यायाम्। कुमारस्येयमण् ङीप्। २कुमार सम्बन्धिचेष्टादौ “कौमारीं दर्शयेच्चेष्टाम्” भाग०३,२,२८, कुमारस्य कार्त्तिकेयस्येयम् अण् ङीप्। ३कार्त्तिकेयशक्तौ। “कौमारी शक्तिहस्ता च मयूरवरवाहना। योद्धुमभ्याययौ क्रुद्धं रक्तबीजं महासुरम्” कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः” देवीमाहात्म्यम्

कौमुद पु०“कौ मोदन्ते जनायस्मिन् कौमुदस्तेन कीर्त्तितः” इत्युक्तलक्षणे १कार्त्तिकमासे। “एतैरन्यैश्च राजेन्द्रैः पुरा मांसं न भक्षितम्। शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः। कौमुदं तु विशेषेण शुक्लपक्षं नराधिप!। वर्ज्जयेत् सर्व्वमांसानि धर्म्मोऽत्र विधीयते” म०त०भार०

कौमुदी स्त्री कुमुदस्येयं प्रकाशकत्वात् प्रिया अण् ङीप्। १ज्योत्स्नायाम् अमरः। “शशिना सह याति कौमुदी” कुमा०।तद्वत्प्रकाशिकायाम् “त्वमस्य लोकस्य च नेत्रकौमुदी” कुमा० कौमुदस्येयम् अण् ङीप्। “कुशब्देन मही ज्ञेया मुद हर्षे० ततोद्वयम्। धातुज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता” इत्युक्तायां २कार्त्तिकपौर्णमास्यां “कौ मोदन्ते जनायस्याद्यानाभावैः परस्परम्। हृष्टास्तुष्टाः सुखायत्तास्तेन सा कौमुदी मता” इत्युक्तायाम् ३आश्विनपौर्णमास्याम्“आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि कौमुदी सा समाख्याता कार्य्या लोकविभूतये” ति० त० लिङ्गोक्तेः। ४दीपोत्सवतिथौ दीपोत्सवतिथिं प्रकृत्य भविष्योत्तरे “कौ मोदन्ते जनायस्यां तेन सा कौमुदी मता” “सखीजनोद्वीक्षणकौमुदीमुखम्” रघुः कौमुदी दीपोत्सवतिथिः” इति मल्लि०”५उत्सवे धरणिः” ६कार्त्तिकोत्सवे त्रिका०। स्वार्थे क। ह्रस्वे कौमुदिका ज्योत्स्नायाम्। संज्ञायां कन्। ७मासखीभेदे शब्दरत्ना० कुमुद+चतुरर्थ्यां कुमुदा० ठक्। कौमुदिक कुमुदसन्निकृष्टदेशादौ त्रि०

कौमुदीचार पुंन० कौमुद्या ज्योत्स्नायां चारः प्रायस्त्यमत्र काले। आश्विनपौर्णमास्याम् त्रिका०

कौमुदीपति पु० ६त०। चन्द्रे हारा०कौमुदीनाथादयोऽप्यत्र

कौमुदीवृक्ष पु० कौमुद्याः प्रकाशिकायाः दीपशिखाया वृक्ष इवाधारः। दीपवृक्षे (पिलसुज) हारा०

कौमोदकी स्त्री कोः पृथिव्याः पालकत्वात् मोदकः कुमोदको विष्णुः तस्येयम् अण्। विष्णुगदायाम् अमरः “कौमोदकी मोदयति स्म चेतः”माघः।“दैत्यैरनादियैर्य्यस्य गदा तस्यापरे करे। निक्षिप्ता कुमुदाचस्य नाम्ना कौमुदकीति सा” हरि० ८२अ०

कौमोदी स्त्री कुं मोदयति अण् कुमोदः विष्णुस्तस्येयमण् ङीप्। विष्णुगदायाम् शब्दरत्ना०

कौम्भकारि पुंस्त्री० कुम्भकारस्यापत्यं शिल्पित्वात् पक्षे इञ्। कुम्भकारापत्ये स्त्रियां वा ङीप्। पक्षे ञ्य। कौम्भकार्य्य तत्रार्थे।

कौम्भायन त्रि० कुम्भस्य सन्निकृष्टदेशादि पक्षा० फक्। कुम्भसन्निकृष्टदेशादौ [इदेशादौ

कौम्भायनि त्रि० कुम्भ+चतुरर्थ्यां कर्णा०फिञ्। तत्सन्निकृ-

कौम्भेयक त्रि० कुम्भ्यां जातादि कत्र्या० ढकञ्। कुम्भीः जातादौ कृष्टदेशादौ

कौम्भ्य त्रि० कुम्भ+चतुरर्थ्यां सङ्काशा० ण्य। कुम्भसन्नि-

कौरयाण पु०कुरयाणस्य (गवां प्रति कृतयानस्य)अयम् अण् वेदे पृषो०। गवां प्रति कृतयानस्य सम्बन्धिनि तत्पुत्रादौ

"पाकस्य मा कौरयाणः" ऋ०८।३।२१।तद्भाष्ये तथार्थोक्तेः

कौरव पुंस्त्री० कुरोरपत्यादि उत्सा० अञ् तद्देशस्य रा जा अण् तेषु भवो वा अण्। १कुरुवंश्ये "तस्यान्ववायः सुमहान् यस्य नाम्ना स्म कौरवाः। कुरोस्तु पुत्राश्चत्वारः" हरिवं ३२अ०। २तद्देशनृपे पु० ३कुरुसम्बन्धिनि ४तद्देशभवे च त्रि०। स्त्रियां ङीप्। "द्रुपदः कौरवान् दृष्ट्वा प्राधावत समन्ततः। शरजालेन महता मोहयन् कौरवीं चमूम्" भा० आ० १३८अ० "क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः" मेघदूतम्।

कौरवक त्रि० कुरौ तद्वंशे जातादि "विभाषा कुरुयुगन्धराभ्यां" पा० वा वुञ्। १कुरुवंशोद्भवे। कुरवकस्येदमण्। २कुरवकसम्बन्धिनि

कौरवायणि पुंस्त्री कुरोरपत्यम् तिका० फिञ्। कुरुवंश्ये

कौरवेय पुंस्त्री कुरोरपत्यं बा० ढक्। कुरुवंश्ये। "सभा हि कौरवेयाणां वयं ते चैव पुत्रक!" भा० आ० १४२अ०। "विमोक्ष्यन्ति विषं क्रुद्धाः कौरवेयेषु भारत!" भा० व० ८अ०।

कौरव्य पुंस्त्री० कुरोरपत्यम् कुर्व्वादि० ण्य। १कुरुवंश्ये। "कौरव्याः पशवः प्रियापरिभवक्लेशोपशान्तिः फलम्" वेणीसं०। तस्यापत्यं तिका० फिञ्। कौरव्यायणि कुरुकुलोत्पन्ने ब्राह्मणादावपत्ये पुंस्त्री कुरूणां राजा ण्य। २कौरव्य कुरुदेशराजे। स्त्रियां ङीप् कौरवी स्त्री। ण्यान्तत्वात् यून्यपत्ये फिञो लुक्। कौरव्यः पिता पुत्रश्च सि० कौ०।

कौरुकत्य पुंस्त्री कुरुकतस्यर्षेरपत्यम् गर्गा० यञ्। कुरुकतर्षेरपत्ये युवापत्ये फिञ्। कौरुकत्यायनि तदीय युवापत्ये पुंस्त्री

कौरुज(जा)ङ्गल त्रि० कुरुजङ्गले जातादि अण् उत्तरपदस्य वा वृद्धिः। कुरुजङ्गलभवे

कौरुपाञ्चाल त्रि० कुरुपञ्चालदेशे प्रसिद्धः अण् उभयपद वृद्धिः। कुरुषु पञ्चालेषु च प्रसिद्धे। "प्रख्यातं कौरुपाञ्चालं यदुत्तरवत्तम्" शत०ब्रा० १,७,२,८, कौरुपाञ्चालो वा अयं ब्रह्मा ११।४।१।२।

कौर्प्य पु० "क्रियताबुरिजितुमकुलीरलेयपाथेययूककौर्प्याख्याः। तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्" दीपिकोक्ते ८वृश्चिकराशौ।

कौर्म्म न० कूर्म्ममधिकृत्य कृतो ग्रन्थः अण्, कूर्म्मस्येदम् अण् वा। १कूर्म्मपुराणे २कूर्म्मसम्बन्धिनि त्रि०।

कौल त्रि० कुले भवः ऋष्यिद्धः अण्। सत्कुलभवे १कुलीने ढकञि तु कौलेयक इत्येव। कुले कुलाचारे रतः तं वेत्ति वा अण्। २तन्त्रोक्तकुलाचाररते ३तदाचारवेदिनि च। "दिव्यभावरतः कौलः सर्व्वत्र समदर्शनः" कुलार्णवः। 'पशोर्वक्त्राल्लब्धमन्त्रः पशुरेव न संशयः। वीराल्लब्धमनुर्वीरः कौलाच्च ब्रह्मविद्भवेत्" महानीलतन्त्रम्। कुल कुलाचारमधिकृत्य कृतो ग्रन्थः अण्। ४कुलाचारप्रवर्त्तके ग्रन्थे कौलोपनिषदादौ।

कौलक त्रि० कूले भवः सौवीरः धूमा०वुञ्। कूलभवे सौवीरे

कौलकेय त्रि० कुले सत्कुले भवः बा० ढक् कुक् च। १सत्कुलोद्भवे। कौलटेय+पृषो०। २असतीपुत्रे पुंस्त्री मन्दरत्वा०।

कौलटिनेय पुंस्त्री भिक्षुक्याः सत्या अपत्यम् ढक् इनादेशश्च। सत्या भिक्षुक्याः अपत्ये अमरः स्त्रियां ङीप्

कौलटेय पुंस्त्री कुलटायाः सत्याः असत्या वा अपत्यम् ढक्। सत्याः असत्याश्च भिक्षुक्याः अपत्ये अमरः। स्त्रियां ङीप्।

कौलटेर पुंस्त्री कुलटायाः असत्या अपत्यम् आचारेण क्षुद्रत्वात् ("क्षुद्राभ्यः")पा०ढ्रक्। बन्धक्याः अपत्ये अमरः।

कौलत्थ त्रि० कुलत्थेन संस्कृतम् अण्। कुलत्थसंस्कृते "पायसैश्चाल्पकौलत्थसुरासौवीरकादिभिः" सुश्रु०।

कौलत्थीन न० कुलत्थस्य भवनं क्षेत्रम् खञ्। कुलत्थोत्पत्तियोग्ये क्षेत्रे

कौलपुत्रक न० कुलपुत्रस्य भावः मनोज्ञा० वुञ्। कुलपुत्रभावे

कौलव पु० ववादिषु तृतीये तिथ्यर्द्धरूपे करणभेदे। करणशब्दे १६८० पृ० विवृतिः

कौलालक त्रि० कुलालेन कृतं संज्ञायां वुञ्। कुलालकृते शरावादौ असंज्ञायान्तु अण् कौलाल तत्कृते। तस्येदमण् कौलाल तत्सम्बन्धिनि त्रि० "रथचक्रं वा कौलालचक्रं वा" शत० ब्रा० ११।८।४।१

कौलिक त्रि०कुलादागतः ठक्। १कुलपरम्परागते आचारादौ। कुले कुलागमे सिद्धः ठक्। तन्त्रोक्ते २कुलाचारे। कौलं कुलधर्मं प्रवर्त्तयति ठक्। ३कुलधर्मप्रवर्त्तके शिवे। शब्दमा०। ४पाषण्डे त्रिका०। कुलं तदाचारः प्रयोजनमस्य ठक्।५कौले ब्रह्मविदि"शाक्तः कौलिकः" श्रुतिः

कौलितर पु० कुलितरस्यापत्यम् ऋष्यण्। शम्बरासुरे"उत दासं कौलितरं बृहतः पर्व्वतादधि।अवाहन्निन्द्र"शम्बरम्"ऋ०४।३।०१४ कुलितरनाम्नोऽपत्यं शम्बरमसुरम्"भा०

कौलिशायनि त्रि०कुलिश+चतुरर्थ्यां कर्णा० फिञ्। कुलिश सन्निकृष्टदेशादौ

कौलिशिक त्रि० कुलिश+अङ्गुल्या० इवार्थे ठक्। कुलिशसदृशे

कौलीन त्रि० कौ पृथिव्यां लीनः ७त०अलुक् स०। १भूमिलग्ने। कुलादागतः खञ्। २कुलक्रमागते "सद्भिः इयमर्य्यादां कौलीनां नायवर्त्तत" रामा०आ०८७अ०। ली-आने क्त कौ लीनं लयो यस्मात्, कुत्सितं भूमिलग्नपृष्ठेति अण् वा। भूमिलग्नताधायके ३अपवादे "कौलीनमात्माश्रयमाचचक्षे" "कौलीनभीतेन गृहान्निरस्ता" रघुः "मा कौलीनाद्दसितनयने! मय्यविश्वासिनी भूः" मेघः अपवादे हि भूमिलग्नइव लोकोभवतीति तस्य तथात्वम्। ४गुह्ये ५जन्ये (युद्धे) ६कुकार्य्ये ७पशुसर्पाणां युद्धे च न०मेदि० तेषां भूमिलग्नतासाधनत्वात्तथात्वम्।

कौलीरा स्त्री कुलीरः तदाकाराकारोऽस्त्यस्याः अच्। कर्कटश्रृङ्ग्याम् (काँकडाशिङा) राजनि०

कौलेय त्रि० कुले+भवः वा० ढक्। सत्कुलोत्पन्ने भरतः

कौलेयक पु० कुले भवः श्वा ढकञ्। १कुलागते कुक्कुरे। अमरः २सत्कुलीने मेदि०।

कौलेशभैरवी स्त्री त्रिपुराभैरवीभेदे। "सम्पत्प्रदाभैरवीवत् विद्धि कौलेशभैरवीम्। इच्छायाः सैव देवेशि! त्रिषु बीजेषु पार्वति!" ज्ञानार्णवः। "त्रिकूटे इच्छायाश्चेत् तदा कौलेशभैरवी भवति" तन्त्रसारः

कौल्माषिक त्रि० कुल्माषे साधु ठञ्। कुल्माषसाधने

कौल्माषीण न० कुल्माषाणां भवनं क्षेत्रम् खञ्। कुल्माषधान्योत्पत्तियोग्ये क्षेत्रे

कौल्य त्रि० कुले भवः ष्यञ्। सत्कुलीने हिमकोषः।

कौवल न०कुवलमेव प्रज्ञा०स्वार्थे अण्। कोलिफले हिमकोश०।

कौविदार्य्य त्रि० कोविदार+चतुरर्थ्यां प्रगद्या० ञ्य। कोविदारसन्निकृष्टदेशादौ।

कौवेर त्रि० कुवेरस्येदम्, कुवेरोदेवताऽस्य वा अण्। १कुवेरसंबन्धिनि २तद्देवताके च "कौवेरमथ याम्यञ्च चक्राते वरुणस्य च" देवीमा०। "यानं सस्मार कौवेरम्" रघुः। "कौवेरदिग्भागमपास्य मार्गम्" माघः। स्त्रियां ङीप्। "दक्षिणागे तु कौवेरी दिक् प्रियाप्रीतिदायिनी" ति०त० पु०। "ततः प्रतस्थे कौवेरीम्" रघुः। ३कुष्ठके (कुड़) न० शब्दरत्ना०। [रिकाया अपत्ये।

कौवेरिकेय पुंस्त्री० कुवेरिकाया अपत्यम् शुभ्रा०ढक्। कुवे-

कौश न० कुशाः भूम्ना सन्त्यत्र अण्। १कान्यकुब्जदेशे हेमच०। स्वार्थे ऽण्। २कुशद्वीपे "याति ततः शाल्मलमत्र कौशम्" सि० शि०। कुशशब्दे २१४५पृ० विवृतिः। कुशस्येदं तद्विकारो वा अण्। ३कुशसम्बन्धिनि ४तन्मये पवित्रादौ। "तत्र वासाय शयने कौशे सुखसुवास ह" भा०अनु० १६अ०। स्त्रियां ङीप्। "कौश्यां बृष्यां समासीनम्" भा० अनु० ५४अ०

कौशल न०कुशलस्य भावः युवा० अण्। दक्षतायाम् "सीमेव पद्मासनकौशलस्य" भट्टिः। "आन्वीक्षिकी कौशलानाम्" "योगः कर्म्मसु कौशलम्" गीता। "हावहारि हसितं वचनानां कौशलं दृशि विकारविशेषः" माघः।

कौशलि पुंस्त्री० कुशलाया अपत्यं बाह्वा० इञ्। कुशलाया अपत्ये स्त्रियां वा ङीप्। यून्यपत्ये फञ्। कौशलायनः तदोद्युवापत्ये पुंस्त्री

कौशलिका स्त्री कुशलस्य पृच्छा ठक्। १कुशलप्रश्ने। कुशलाय मङ्गलाय दीयते ठक्। २उपायने उपढौकने। त्रिका०। [ढौकने २कुशलप्रश्ने च त्रिका०।

कौशली स्त्री कुशलाय दीयते तस्य पृच्छा वा अण्। १उप-

कौश(स)लेय स्त्री कोश(स)लाया अपत्यं ढक् यलोपः। श्रीरामे दशरथपुत्रे

कौशल्य न० कुशलमेव ब्राह्म०ष्यञ्। १कुशले। भावे ब्राह्म० ष्यञ्। २दक्षतायाम्। "दृष्ट्वा कौशल्यमन्योन्यं रथचर्य्यास्वतस्मिरे" भा० व० २४४अ०

कौश(स)ल्या स्त्री कोश(स)लदेशे भवा ञ्य। कोश(स)लदेशभवायां श्रीराममातरि दशरथपत्नीभेदे। [दयोऽस्यत्र।

कौश(स)ल्यातनय पु० ६त०। सीतापतौ श्रीरामे तत्सुता-

कौश(स)ल्यायनि पु०कौश(स)ल्याया अपत्यम् फिञ्। श्रीरामे त्रिका० "वियामहे न गच्छामः कौश(स)ल्यायनिवल्लभाम्" भट्टिः। कौश(स)ल्य पर्य्यायकता जयमङ्गलया सुता।

कौशाम्ब त्रि० कुशाम्बेन निर्वृत्तः अण्। १कौशाम्बराजकृते २तत्कृते पुरीभेदे स्त्री ङीप्। "कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत् पुरीम्" रामा०। सा च पुरी गौडदेशान्तर्गतवत्सभूमिगता। "अस्ति वत्स इति ख्यातो देश इत्युपक्रमे" कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी" कथासरित्सागरः। "अस्ति गौडविषये कौशाम्बी नाम नगरी" हितो०। "निष्कौशाम्बिः" सि०कौ०

कौशाम्बेय पुंस्त्री कुशाम्बस्य गोत्रापत्यम् शुभ्रा०ढक्। कुशाम्बस्यापत्ये

कौशिक न०कुशिकस्यापत्यं कण्वादि कुशेन कृतः अध्या० ठञ्। कुशिके तद्वंशे भवः अण् वा। १इन्द्रे २भेचके पुंस्त्री० उभयत्र "अगाद्गुरुः मोहतमोरवोचनः सहस्रचक्षुर्दिवः

स्य दर्शनम् । प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः” माघः । इन्द्रस्य कुशिकपुत्रत्व-प्राप्तिकथा “कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमप्रभम् । लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् । स गाधि-रभवद्राजा मघवान् कौशिकः स्वयम्” हरिवं० १अ० । “कुशिकस्तु तपस्तेपे” इत्युपक्रम्य “अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः । समर्थं पुत्रजनने स्वमेवांशमवासयत् । पुत्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः । स गाधिर-भवद्राजा मघवान् कौशिकः स्वयम्” हरिवं० २७अ० । कुशैर्हतत्वाद्वा कौशिकत्वमस्य यथाह तत्रैव

“जातमात्रस्तु भगवानदित्यां स(शक्रः)कुशैर्हतः । तदा-प्रभृति देवेशः कौशिकत्वमुपागतः” हरि० २२७अ० । २गुग्गुलौ ४व्यालग्राहिणि (सापुडे) अमरः । ६नकुले ७कोषाध्यक्षे मेदि० । ८कोषकारे शब्दरत्ना० ९शृङ्गार-रसे त्रिका० १०मज्जनि हेम० ११अश्वकर्णवृक्षे राज-नि० । कुशिकस्य गोत्रापत्यम् विदा० अञ् । १२विश्वा-मित्रमुनौ स हि कुशिकपुत्रस्य गाधेरपत्यम् । कुशि-कशब्दे तन्मूलं दृश्यम् । “अपिवच्च ततः सोममिन्द्रेण सह कौशिकः” भा० आ० १७५अ० ।

१३पौरववंश्ये नृपभेदे । “पारीक्षितस्य द्वौ पुत्रौ” इत्युप-क्रमे “प्रतिष्ठायाश्च द्वौ पुत्रौ पैप्पलादिश्च कौशिकः” हरिव ९१अ० । जरासन्धनृपस्य हंसनामके १४सेनापतिभेदे “स तु(जरासन्धः) सेनापती ! राजा ससार भरतर्षभ ! । कौ-शिकं चित्रसेनञ्च तस्मिन् युद्धे उपस्थिते । ययोस्ते नामनी राजन् हंसेति डिम्भकेति च” भा० स० २१अ० । तस्य च कौशिकवंश्यत्वात् तथात्वम । १५असुरभेदे “सुसूमः शा-खवदनः करालः कौशिकः शरः” हरिव० ४२अ० । कुशिकवंशोद्भवत्वात् १६नदीभेदे स्त्री तस्या उत्पत्तिकथा रामा० आ० ३४अ०

“कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन ! । पूर्व्वजा भ-गिनी चापि मम राघव ! सुव्रता । नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता । सशरीरा गता स्वर्गं भर्त्तार-मनुवर्त्तिनी । कौशिकी परमोदारा प्रवृत्ता च महानदी । दिव्यपुण्योदका रम्या हिमवन्तमुपाश्रिता । लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम । ततोऽहं हिम-वत्पार्श्वे वसामि नियतः सुखम् । भगिन्यां स्नेहसं-युक्तः कौशिक्यां रघुनन्दन ! । सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता । पतिव्रता महाभागा कौशिकी सरितां वरा”

“तत्र मासं वसेद्वीर ! कौशिक्यां भरतर्षभ ! । अश्वमे-धस्य यत् पुण्यं तन्मासेनाधिगच्छति” भा० व० ८१अ० । “कुशि-कस्याश्रमं गच्छेत् सर्व्वपापप्रमोचनम् । कौशिकीं तत्र गच्छेत महापापप्रणाशिनीम् । राजसूयस्य यज्ञस्य फलं प्राप्नोति मानवः” तत्रैवाध्याये । “इयञ्च नदी हिमवतः निःसृता चम्पानगरसन्निकृष्टे उत्तरपारे गङ्गायां सङ्गता । “ततो गच्छेत राजेन्द्र ! चम्पकारण्यमुत्तमम्” ततद्युक्ते-स्तस्यास्तत्सन्निकृष्टत्वम् । १८यशोदाकन्यात्वेनोत्पन्नायां योगमायायाम् । कौशिकेन्द्रेण भगिनीत्वेन कल्प-नेन विष्णुना तस्यास्तन्नामकरणात्तथात्वं यथोक्तम् “तत्र त्वां शतदृक् शक्रो मत्प्रदिष्टेन कर्म्मणा । अभिषेकेण दिव्येन दैवतैः सह योक्ष्यसे । तत्रैव त्वां भगिन्यर्थे ग्रहीष्यति स वासवः । कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि” हरिवं० ५८अ० योगमायां प्रति विष्णूक्तिः । “आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी” भा० हरि० ५९अ० । पार्व्वत्याः शरीरकोष(षा)न्निःसृते १९दे-वीमूर्त्तिभेदे तस्य च शुम्भनिशुम्भघातिनीति भेदः तन्मूलं देवीमाहात्म्यवाक्यं तच्च कोषशब्दे दर्शितं गाठ्रे २०वृत्ति-भेदे अलङ्कारशब्दे लक्षणादिकं दृश्यम् [तथात्वम्

कौशिकप्रिय पु० ६त० । श्रीरामे विश्वामित्रप्रियाचरणात्तस्य

कौशिकफल कौशिक कोषस्थं फलमस्य । नारिकेले शब्दरा०

कौशिका स्त्री कोषएव स्वार्थे क अतइत्वम् । पानपात्रे चषके हेम० [शब्दमाला २विश्वामित्रपुत्रे च

कौशिकात्मज पु० ६त० । १इन्द्रपुत्रे जयन्ते २अर्ज्जुने च

कौशिकायनि पु० कुशिकस्यापत्यम् वा० फिञ् । यजुर्वेद-वंशब्राह्मणस्थे ऋषिभेदे “कौशिकायनेः कौशिकायनिः” शत० ब्रा० १४।५।५।२१

कौशिकायुध न० ६त० । इन्द्रचापे शब्दरत्ना०

कौशिकाराति पु० ६त० । १काके राजनि० तस्य पेचकारातित्वं च तेन सह नित्यविरोधित्वात् । तत्कथा काकोलू-कशब्दे दृश्या कौशिकारिप्रभृतयोऽप्यत्र पु०

कौशिकिन् पु० ब० व० कौशिकेन प्रोक्तमधीयते णिनि विश्वामित्रप्रोक्ताध्यायिषु

कौशिक्योज पु० कौशिक्या इव ओजोयस्य पृषो० सलोपः शालोटवृक्षे (सेओड़ा) राजनि०

कौशिज पु॰ ब॰ व॰ देशभेदे "पञ्चालाः कौशिजाश्चैव नैकपृष्ठाः धुरन्धराः" भा॰ भी॰ ९अ॰ जनपदकथने

कौशी(षी)धान्य न॰ कोशे(षे)भवा कौशी(षी) कर्म्मधा॰। कोश(ष)जाते धान्ये तिलादौ। "सर्व्वमेवैतदहः कौशी(षी)धान्यं विवर्ज्जयेत्" का॰श्रौ॰ २।१।१०

कौशे(षे)य न॰ कोशा(षा)दुत्थितम् ढञ्। कृमिकोषादिजाते वस्त्रे अमरः "निनाभि कौशे(षे)यमुपात्तबाणम्" कुमा॰ "कौशेयं व्रजदपि गाढतामजस्रम्" माघः "लाक्षालोहितकौशे(षे)यपरिधानम्" काद॰ "कौशेयाविकयोरूषैः" मनुना तच्छोधनद्रव्यमुक्तम्

कौश्य त्रि॰ कुशस्येदम् ष्यञ्। १कुशसम्बन्धिनि शयनादौ "प्रास्कन्दच्छयने कौश्ये दृष्ट्वा गात्रमिव प्लवम्" भा॰ अनु॰ ७१अ॰। कुशस्य गोत्रापत्यं वा॰ ष्यञ्। २कुशगोत्रजे ऋषिभेदे पु॰ "तं होवाच सुश्रवाः कौश्यः" शत॰ब्रा॰ १०।५।५।४ "कौश्यः कुशगोत्रजः" भा॰। तेन ब्राह्मणे कौषय इति मूर्द्धन्ययुक्तपाठस्तु प्रामादिकः।

कौशा(सा)रव पु॰ कुशा(षा)रोरपत्यम् ऋष्यण्। कुशा(षा)रोर्मुनेरपत्ये मैत्रेये "यावतः कृतवान् प्रश्नान् क्षत्ता कौशारवाग्रतः" भाग॰ ३।१३।२ "कौशारवस्य मैत्रेयस्याग्रतः" श्रीधरः "ननु ते तत्त्वसंराध्य ऋषिः कौशारवोऽन्तिके" भाग॰ ३।४।२ बाह्वा॰ इञ्। कौशारविरप्यत्र "यत्र कौशारवेस्तस्य संवादोऽध्यात्मसंश्रितः" भाग॰ २।१०।५२

कौषिकी स्त्री॰ कौषिक+ङीप्। १कौषिकशब्दार्थे मेदि॰ २दुर्गामूर्त्तिभेदे स्त्री "शरीरकोषाद्यत्तस्याः पार्वत्याः निःसृताम्बिका। कौशिकीति समाख्याता ततो लोकेषु गीयते" देवीमा॰ "कायकोषाद्विनिःसृता या कालिकायास्तु भैरव!। सा कौषिकीति विख्याता चारुरूपा मनोहरा" कालिका॰ पु॰ ६०अ॰

कौषीतक पु॰ कुषीतकस्यापत्यम् ऋष्यण्। कुषीतकर्षिपुत्रे बह्वृचां प्रत्यहं तर्पणीये ऋषिभेदे कहोडे "कहोडं कौषीतकमित्यादि" आश्व॰ गृ॰ ३।४।४।२२ ऋषितर्पणे। कुषीतकस्यापत्यम् इञ्। कौषीतकिरपि कहोडे ऋषौ "तदु होवाच कहोडः कौषीतकिः" शत॰ब्रा॰ २।४।२।१। तत्सम्बन्धित्वात् कौषीतकिब्राह्मणं कौषीतकी उपनिषच्च ऋग्वेदान्तर्गता।

कौषीतकिन् पु॰ ब॰ व॰। कौषीतकेन प्रोक्तमधीयते णिनि। कौषीतकेन प्रोक्ताध्यायिषु। "सदस्य सप्तदशं कौषीतकिनः समामनन्ति" आश्व॰गृ॰ ४।२३।५।

कौ(षी)तकी कुषीतकस्यापत्यम् ऋष्यण् ङीप्। अगस्त्यपत्न्यां त्रिका॰

कौषीतकेय पुंस्त्री॰ कुषीतक+बा॰ अपत्ये ढक्। कुषीतकस्यापत्ये कहोडे "अथ हैनं कहोडः कौषीतकेयः पप्रच्छ" शत॰ ब्रा॰ १४।६।४।१।

कौष्ठवितक त्रि॰ कुष्ठविदि तद्विद्यायां साधु कत्था॰ ठञ् इस्य चरत्वेन तान्ततया ठस्य कादेशे। कुष्ठविद्यासाधौ। इस्य चर्त्वाभावपक्षे तान्तत्वाभावेन कौष्ठविदिक इत्यन्ये तन्मतेनैव तथारूपं २१५४पृ॰ उक्तम्

कौसीद्य न॰ कुत्सितं सीदत्यस्मिन् सीद+बा॰ आधारे श स्वार्थे ष्यञ्। १आलस्ये २तन्द्रायाञ्च हेम॰। कुसीदस्य भावः ष्यञ्। २वृद्धिरूपकुसीदवृत्तौ शब्दचि॰

कौसुम न॰ कुसुमेन निर्वृत्तम् अण्। १पुष्पाञ्जने अमरः। तस्येदम् अण्। २पुष्पसम्बन्धिनि त्रि॰ "विनयति सुदृशो दृशोः परागं प्रणयिनि कौसुममाननानिलेन" माघः

कौसुम्भ पु॰ कुसुम्भ+स्वार्थे अण्। १अरण्यकुसुम्भे २शाकभेदे राजनि॰। कुसुम्भेन रक्तम् अण्। ३कुसुम्भरागरञ्जिते वस्त्रादौ त्रि॰ "कौसुम्भं पृथु कुचकुम्भसङ्गि वासः" माघः। तस्येदमण्। कुसुम्भसम्बन्धिनि त्रि॰ "रदनकरकरस्फुट्यमानकौसुम्भरागम्" माघः। उभयतः स्त्रियां ङीप्।

कौसुरुविन्द पु॰ दशरात्रसाध्ययागभेदे "कौसुरुविन्दः" कात्या॰श्रौ॰सू॰ २३।५।१८। "द्वितीयो दशरात्र एतत्संज्ञः" सं॰व्या॰। प्रायणीयदशरात्रानन्तरं कौसुरुविन्ददशरात्रस्य २प्रथमे त्र्यहे च "कौसुरुविन्दः प्रथमस्त्र्यहः" कात्या॰ २४।२।१

कौसुरुविन्दि पु॰ कुसुरुविन्दस्यापत्यम् इञ्। तदपत्ये उद्दालके मुनौ "कौसुरुविन्दिरुद्दालक आरुणौ ब्रह्मचर्य्यमुवास" शत॰ ब्रा॰ १२।२।२।१३।

कौसृतिक त्रि॰ कुसृत्या चरति ठक्। मायाकारके शाठ्ययु-[क्ते जटाध॰

कौस्तुभ पु॰ कुं भूमिं स्तुभ्नाति कुस्तुभो जलधिः तत्र भवः अण्। विष्णोर्वक्षःस्थे "कौस्तुभस्तु महातेजाः कोटिसूर्य्यसमप्रभः" इत्युक्तलक्षणे मणिभेदे। तस्य समुद्रादुत्पत्तिकथा हरिवं॰ २२अ॰

"सुरासुरगणाः सर्वे सहिता बलवत्तराः। मन्दरं पुष्करं कृत्वा नेत्रं वासुकिमेव च। ततः समुद्रं मथितं जग्मोषधिभिः सह। क्षीरभूतं समायोगादमृतं समपद्यत। तज्जहुरसुराः पूर्वमाक्रान्ता क्षोभमन्युना। तदा पश्चाज्जहुर्देवाः कामतेजोबलान्विताः। धन्वन्तरिस्तथा मद्यं श्रीर्देवी कौस्तुभो मणिः। मयाङ्को विमलश्चापि मङ्गलस्य

—मलतः" । "ततः शतसहस्रांशुर्मथ्यमानात्तु सागरात् । प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्ज्वलः । श्रीरनन्तर मुत्पन्ना घृतात् पाण्डुरवासिनी । सुरा देवी समुत्पन्ना तुरगः पाण्डुरस्तथा । कौस्तुभस्तु मणिर्दिव्य उत्पन्नो घृतसम्भवः । मरीचिविकचः श्रीमान् नारायण उरोगतः" भा०आ०१८अ० "उच्चैःश्रवा हयश्रेष्ठो मणिरत्नञ्च कौस्तुभम्" रामा० उक्तेः क्लीवत्वमपि "कौस्तुभाख्यमपांसारं बिभ्राणं वृहतोरसा" "सकौस्तुभं ह्रेपयतीव यत्र" रघुः । २तैलभेदे न० "घृतार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् । आज्यं, वा तदभावे तु साक्षात्तैलं प्रगृह्यते । तैलाभावे ग्रहीतव्यं तैलं जर्त्तिलसम्भवम् । तदभावेऽतसीस्नेहः कौस्तुभं सर्षपोद्भवम् । वृक्षस्नेहोऽथवा ग्राह्यः पूर्वाभावे परःपरः" कर्कधृतं मण्डनवाक्यम् । कौस्तुभमत्यत्र कौसुम्भमिति पाठस्तु सम्यक् । ३तन्त्रोक्ते मुद्राभेदे "अनामाङ्गुष्ठसंलग्ना दक्षिणस्य कनिष्ठिका । कनिष्ठयान्यया बद्धा तर्ज्जन्या दक्षया तया । वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके । अङ्गुष्ठमध्यमे भूयः संयोज्य सरलाः पराः । चतस्रोऽप्यत्र संलग्ना मुद्रा कौस्तुभसंज्ञिका" तन्त्रसारः ।

कौस्तुभवक्षस् पु० कौस्तुभोवक्षसि यस्य । विष्णौ हारा० कौस्तुभहृदयादयोऽप्यत्र पु० । एवं कौस्तुभलक्षणादयोऽप्यत्र ।

क्रथ वधे वा० चु० उभ० पक्षे भ्वा० पर० सक० सेट् घटादि । क्रथयति-ते क्रथति अचिक्रथत्-त अक्रथीत्-अक्राथीत् । क्रथयाम्-बभूव आस चकार—चक्रे-चक्राथ ।

क्रस दीप्तौ कौटिल्ये च दिवा० पर० अक० सेट् । क्रसति अक्रसीत्-अक्रासीत् चक्रास । घटा० क्रसयति-ते । अचिक्रसत्-त उदित् क्रसित्वा-क्रस्त्वा ।

क्रस दीप्तौ वा० चु० उभ० पक्षे भ्वा० अक० सेट् घटादि क्रसयति-ते । क्रसति । अचिक्रसत्-त अक्रसीत्-अक्रासीत् क्रसयां बभूव आस चकार चक्रे चक्रास । उदित् क्रसित्वा-क्रस्त्वा । "न्यङ्कूनां क्रमं कुसि भिदि च भाषणे कुस इत्यपि" योपदेवव्याख्याने "परोऽनुबन्धः पूर्वास्तेऽन्नाद्यस्यभावात्" इति तदुक्तिर्णाथिन्य भ्रान्त्या दुर्गादासेन क्रस इदित्त्वमुक्तम् तच्चिन्त्यम् । पा० धातुपाठे चुरादिषु "तसिपिसि कुसि दंसि क्रुशादिवा कुसिरेवेत्युक्तेः दिवादिषु च क्रुस इत्यवीतत्वाशिलेषुक्तेः घटादौ च जनीजृष क्रसु रञ्ज इति पाठात् तत्रस्य तथानदर्शनात् । अतः परानुबन्धस्य कौ खेवात्र प्रदत्तं देवात्र वा चुरादित्वम् अन्यथा कुसिवत् क्रसीयेय मूलतत् पठेत् । न च तथाऽपाठि अतस्तस्य नेदित्त्वम् ।

क्नूय दुर्गन्धे आर्द्रीभावे शब्दे च भ्वा० आत्म० अक० सेट् । क्नूयते अक्नूयिष्ट चुक्नूये । णिचि क्नोपयति ते । अस्य चेलार्थककर्म्मण्युपपदे णमुल् चेलक्नोपम् वस्त्रक्नोपम् । "यूनि गाढपरिरम्भिणि वस्त्रक्नोपमश्रु ववृषे मदनेन" माघः । 'वस्त्रं क्नोपयित्वा परिषिच्येत्यर्थः" मल्लि० । अभि+अतिव्याप्त्या आर्द्रीभावकरणे प्लीभावकरणे च सक० "आपो वै सर्वमन्नं ताभिर्हीदमभिक्नूयमिवाद्‌न्ति" शत० ब्रा० १४।१।१।१४। यान्तत्वात् तात्शीले नातोयुच् किन्तु तृच् । क्नूयिता इत्येव । [रीत् चकार ।

क्मर कौटिल्ये भ्वा० पर० अक० सेट् । क्मरति अक्मा(क्म)-

क्य त्रि० कः प्रजापतिस्तस्मै हितः यत् । प्रजापतिहिते । "चेत्व चत्वारि क्यानां क्यानीति" प्रश्ने "एतान्येव चत्वारि क्यानां क्यानि" शत० ब्रा० १०।२।४।२।४। भा०तथार्थतोक्ता

क्याम्बू स्त्री क्यं प्रजापतिहितमम्बु यत्र ऊङ् । दूर्वाभेदे "क्याम्बूरत्ररोहत शाण्डदूर्वा व्यल्कशा" ऋ०१०।१८।१३।६।

क्रंश प्रकाशने भ्वा० सक० सेट् क्रंशति अक्रंशीत् चक्रंश । "क्रंशतेर्वा प्रकाशयतिकर्म्मणः । निरुक्तकारः २।२१।

क्रकच पु०क्र इति कचति शब्दायते कच-शब्दे अच् । १ग्रन्थिलाख्ये वृक्षे मेदि० । २दारुदारणास्त्रे करपत्रे (करात) पु० न० अमरः । ज्योतिषोक्ते ३योगभेदे च । तल्लक्षणञ्च "षष्ठ्यादितिथयो मन्दात् विलोमं क्रकचः स्मृतः" इति "यथा शनौ षष्ठी, शुक्रे सप्तमी,गुरावष्टमी,बुधे नवमी,भौमे दशमी,सोमे एकादशी, रवौ द्वादशी,एते योगाः क्रकचाख्या ज्ञेयाः पीयू०धा० । यदाह नारदः "त्रयोदश स्युर्मिलने संख्ययोस्तिथिवारयोः" क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः" [क्रकचदलादयोऽप्यत्र

क्रकचच्छद पु० क्रकच इव छदो यस्य । केतकीवृक्षे त्रिका०

क्रकचपत्र पु०क्रकच इव पत्रमस्य । १शाकवृक्षभेदे राजनि० २केतकीवृक्षे च ।

क्रकचपाद(द्) पु० क्रकचमिव पादो यस्य वा अन्त्यलोपः । कृकलासे हारा० [त्वग्भेदे । त्रिका० ।

क्रकचपृष्ठी स्त्री क्रकच इव पृष्ठं यस्याः ङीष् । (कइ) म-

क्रकचव्यवहार पु० लीलावत्युक्ते क्रकचच्छेद्यवस्तुनोवेतन ज्ञानार्थे तत्फलज्ञापके गणितभेदे यथा

"क्रकचव्यवहारे करणसूत्रं वृत्तम् । पिण्डयोगदल-मग्रमूलयोर्दैर्घ्यसङ्गुणितमङ्गुलात्मकम् । दारुदारणपथैः

समाहृतं षट्खरेषुविहृतं करात्मकम् । उदाहरणम् ।
मूले नखा(२०)ङ्गुलमितोऽथ नृपा(१६)ङ्गुलोऽग्रे पिण्डः शताङ्गुलमितं किल यस्य दैर्घ्यम् । तद्दारुदारणपथेषु चतुर्षु किं स्याद्धस्तात्मकं वद सखे ! गणितं द्रुतं मे ।

(तदाकारदर्शनचित्रम्)



न्यासः

पिण्डयोग३६दलं । १८ । दैर्घ्येण १०० सङ्गुणितं १८०० । दारुदारणपथैश्चतुर्भिर्गुणितं ७२०० । षट्खरेषु ५७६ विहृत जातं करात्मकं गणितं २५/२ । क्रकचान्तरे करणस्त्वं सार्द्धहस्तम् । छिद्यते तु यदि तिर्य्यगुक्तवत्पिण्डविस्तृतिहतेः फलं तदा । इष्टिकाचितिदृषच्चितिखातक्राकचव्यवहृतौ खलु मूल्यम् । कर्म्मकारजनसम्प्रतिपत्त्या तन्मृदुत्वकठिनत्ववशेन । उदाहरणम् । यद्विस्तृतिर्द्दन्त ३२ मिताङ्गुलानि पिण्डस्तथा षोडश यत्र काष्ठे । छेदेषु तिर्य्यङ्नवसु प्रचक्ष्व किं स्यात् फलं तत्र करात्मकं मे ॥

न्यासः विस्तारः ३२ पिण्डः ।१६। पिण्डविस्तृतिहतिः

(तदाकारचित्रम् ।)



५१२ । दारुदारणमार्गैर्नवभिर्हता ४६०८ । षट्खरेषु ५७६ विहृता जातं फलं हस्ताः । ८ ।”

क्रकचा स्त्री क्रकचस्तदाकारोऽस्त्यस्याः अर्श० अच् टाप् । केतकीवृक्षे रत्नमा० ।

क्रकण पु० क्र इति कणति शब्दायते कण–अच् । (कयार) पक्षिभेदे अमरः स्त्रियां जातित्वात् ङीष् ।

क्रकर पु० क्र इति शब्दं कर्त्तुं शीलमस्य ताच्छील्ये ट । क्रकण (कयार) १पक्षिणि अमरः स्त्रियां ङीप् । २करीरवृक्षे ३करपत्रास्त्रे च पु० ४दीने त्रि० मेदि० “चोरयित्वा तु पत्रोर्णं क्रकरत्वं नियच्छति” भा० अनु० १११अ० । “चकोरकलविङ्कमयूरक्रकरेत्याद्युपक्रमे “विष्कराख्याः शीतमधुराः कषाया दोषशमनाश्च” इति सामान्यत उक्त्वा “वातपित्तहरा हृद्या मेधाग्निबलवर्द्धनाः । लघवः क्रकराः हृद्यास्तथा चैवोपचक्रकाः” सुश्रु० तन्मांसगुणा उक्ताः ।

क्रतु पु० क्र-कतु । १यूपसहिते सोमसाध्ये यज्ञे, २संकल्पे, ब्रह्मणोमानसे पुत्रे ३ऋषिभेदे, ४वैश्वदेवभेदे, ५इन्द्रियेषु च । ६विष्णौ तस्य सर्व्वयज्ञमयत्वेन सयूपयज्ञरूपत्वमपीष्टं यथाह “यज्ञइज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः” विष्णुस० । “सर्व्वयज्ञस्वरूपत्वात् यज्ञः यूपसहितोयज्ञः क्रतुरिति” भाष्यम् । तेन क्रतुशब्दस्य यूपसहितयज्ञबोधकता । अतएव तत्तद्यागे यूपविशेषाः शतपथब्राह्मणादौ उक्ताः । तत्र सोमसाध्ययागाश्च त्रयः क्रतवः “त्रीन् क्रतूनन्वाहाग्नेयद्युपस्थमाश्विनम्” सुतौ “इत्यग्नेयः क्रतुः अग्नोपस्थः” “अथाश्विनः” आश्व०सौ० ४।११।८।१४।१।१५।१। सूत्रेषु दर्शिताः । अन्येऽपि क्रतवो वेदेषु दर्शितास्ततएवावगम्याः । संकल्पश्च कामनाधीनः चित्तवृत्तिभेदः यथोक्तम् “कामः क्रतुः कर्म्म जन्मेत्येवमेषां क्रमोभवेत् । पुंसोया विषयापेक्षा स काम इति भण्यते । सएव वर्द्धमानश्चेत् क्रतुत्वं प्रतिपद्यते” । “रुचेरतिशयः काम्ये विषये क्रतुरीर्य्यते” इत्युक्ते ७रुचेराधिक्ये च । ८प्रज्ञायां निघ० । ९स्तवनादिकर्म्मणि च । “पुरुहूत ! क्रत्वा नः शग्धि” ऋ० ४।२१।१०। “क्रत्वा कर्म्मणा स्तुत्यादिहेतुना” भा० । क्रतुनामा मुनिश्च “ब्रह्मणोमानसाः पुत्रा विदिताः षण्महर्षयः । मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः” भा० आ०६५अ० उक्तः । “क्रतोरपि क्रियाभार्य्या वालखिल्यानसूयत । ऋषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा” भाग० ४।१।२२। तद्वंशाद्युक्तम् “ससर्ज सृष्टिं तद्रूपां स्रष्टुमिच्छन् प्रजापतीन् मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् । वसिष्ठञ्च महातेजाः सोऽसृजत् सप्त मानसान्” हरिवं० १अ० । विश्वेदेवाश्च त्रयोदश यथा

“आत्मार्थे चासृजत् पुत्त्रान् लोककर्त्तॄन् पितामहः । विश्वे प्रजानां पतयो येभ्यो लोका विनिःसृताः । विश्वेशं प्रथमं नाम महातपसमात्मजम् । सर्व्वाश्रमपदं पुण्यं नाम्ना

धर्म्मं स सृष्टवान्। दक्षं मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम्। वशिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्। अथर्वभूता इत्येते ख्याताश्चैव महर्षयः। त्रयोदश सुता येषां वंशा वै संप्रतिष्ठिताः" । हरिवं० २०४अ०,
जटाधरेण तु "विश्वेदेवा दश स्मृता" इत्युक्तम्। गणदेवता शब्दे तन्मूलं वक्ष्यते। कल्पभेदादविरुद्धम्
तत्र प्रज्ञा निश्चयः अध्यवसायः यथाह
"अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत" छा०उ०।
"कथमुपासीत। स क्रतुं कुर्वीत क्रतुर्निश्चयोऽध्यवसायश्च एवमेव नान्यथेति अविचलः प्रत्ययस्तं क्रतुं कुर्वीतोपासीतेत्यनेन व्यवहितेन सम्बन्धः। किं पुनः क्रतुकरणेन कर्त्तव्यं प्रयोजनम्? कथं वा क्रतुः कर्त्तव्यः? क्रतुकरणं चाभिप्रेतार्थसाधनं कथम्? इत्यस्यार्थस्य प्रतिपादनार्थमथेत्यादिग्रन्थः। अथ खल्विति हेत्वर्थः। यस्मात् क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवः। यथाक्रतुर्यादृशः क्रतुरस्य सोऽयं यथाक्रतुर्यथाध्यवसायो यादृङ्निश्चयोऽस्मिँल्लोके जीवन्निह पुरुषो भवति। तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति। क्रत्वनुरूपफलात्मको भवतीत्यर्थः एवं ह्येतच्छास्त्रतो दृष्टम्। "यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरमित्यादि" यत एवं व्यवस्था शास्त्रदृष्टाऽतः स एवं जानन् क्रतुं कुर्व्वीत यादृशं क्रतुं वक्ष्यामस्तम्। यत एवं शास्त्रप्रामाण्यादुपपद्यते क्रत्वनुरूपं फलमतः स कर्त्तव्यः क्रतुः" भा०। १०आषाढमासे चातुर्मास्यादियागारम्भकत्वात् तस्य तथात्वम् "वाजाय स्वाहा प्रसवाय स्वाहाऽपिजाय स्वाहा क्रतवे स्वाहा वसवे स्वाहाऽहर्पतये स्वाहाह्ने मुग्धाय स्वाहा मुग्धाय वैनंशिनाय स्वाहा, विनंशिन आन्त्यायनाय स्वाहान्त्याय भौवनाय स्वाहा भुवनस्य पतये स्वाहाधिपतये स्वाहा प्रजापतये स्वाहा" यजु०१८।२८। "वाजादीनि चैत्रादिमासानां नामानि तन्नाम गृहीत्वा होतव्यमित्यर्थः अन्नप्राचुर्य्याद्वै चैत्रोऽन्नरूपः, प्रसवायानुज्ञारूपाय जलक्रीडादौ अभ्यनुज्ञादानात् प्रसवो वैशाखः। अपिजाय अप्सु जायत इत्यपिजः सप्तम्या अलुक् जलक्रीड़ारतत्वादपिजो ज्यैष्ठः। क्रतवे यागरूपाय चातुर्मास्यादियागप्राचुर्य्यात् क्रतुराषाढ़ः" वेददी०।

क्रतुदोषनुद् पु० क्रतूनामिन्द्रियाणां दोषं नुदति क्विप्। प्राणायामे शब्दचि० "दह्यन्ते ध्मायमानानां धातूनाञ्च यथा मलाः। प्राणायामैस्तथा दोषाः शाम्यन्तीन्द्रियगोचराः" मनूक्तेस्तस्येन्द्रियदोषनाशकत्वम् [नास्तिके च

क्रतुद्रुह् पु० क्रतवे द्रुह्यति द्रुह-क्विप्। १असुरे जटाधरः

क्रतुद्विष् पु० क्रतवे द्वेष्टि द्विष-क्विप्। १असुरे त्रिका० २नास्तिके च।

क्रतुध्वंसिन् पु० क्रतुं दक्षयज्ञं ध्वंसयति ध्वन्स-णिच्-णिनि। शिवे अमरः। वीरभद्रद्वारा तद्यज्ञध्वंसनात्तस्य तथात्वम् तत्कथा काशी० ८९अ० यथा
"महावीरोऽसि रे भद्र! मम सर्व्वगणेष्विह। वीरभद्राख्यया त्वं हि प्रथितिं परमां व्रज। कुरु मे सत्वरं कार्य्यं दक्षयज्ञं क्षयं नय। ये त्वां तत्रावमन्यन्ते तत्साहाय्यविधायिनः। ते त्वयाप्यवमन्तव्या व्रज पुत्त्र! शुभोदय!। इत्याज्ञां मूर्द्ध्नि चाधाय स ततः पारमेश्वरीम्। हरं प्रदक्षिणीकृत्य जग्मिवानतिरंहसा। ततस्तदनुगान् शम्भुः स्वनिश्वाससमुद्भवान्। शतकोटिमितानुग्रान् गणानन्यानथासृजत्। ते गणा वीरभद्रं तं यान्तं केचित् पुरोगताः। केचित्तदनुगा याताः केचित्तत्पार्श्वतोऽययुः। अम्बरं तैः समाक्रान्तं तेजोविजितभास्करैः। शृङ्गाण्याशु गिरीणां च कैश्चिदुत्पाटितानि वै। आचूडमूलाः कैश्चिच्च विधृता वै शिलोच्चयाः। उत्पाट्य महतो वृक्षान् केचित् प्राप्तामख क्रुधम्। कैश्चिदुत्पाटिता यूपाः केचित् कुण्डान्यपूरयन्। मण्डपं ध्वंसयामासुः केचित् क्रोधपरा गणाः। व्यचीक्षरन् यज्ञवेदीः केचिद्वै शूलपाणयः। अभक्षयन् हवींष्यन्ये पृषदाज्यं पपुः परे। दध्यंशुरसराशींश्च केचित् पर्व्वतसन्निभान्। केचिद्वै पायसाहाराः केचिद्वै क्षीरपायिणः। केचित् पक्वान्नपुष्टाङ्गा यज्ञपात्राण्यचूर्णयन्। अमोचयन् स्रुचां दण्डान् केचिद्दोर्दण्डशालिनः। अभञ्जन् शकटान् केचित् पशून् केचिदलोलुपन्। अग्निं निर्वापयामासुः केचिदत्यग्नितेजसः। स्वयं परिदधुश्चान्ये दुकूलानि मुदा युताः। जगृहुः केचन पुनारत्नानां पर्व्वतं कृतम्। एकेन च भगो देवः पशुं स्वक्रे विलोचनः। पुष्णोदन्तावलीरन्यः पातयामास कोपनः। यज्ञः पलायितो दृष्ट्वा केनचिन्मृगरूपधृक्। शिरोविरहितश्चक्रे तेन चक्रेण दूरतः"।

क्रतुपुरुष पु०क्रतुः पुरुष इव। पुरुषाकारे क्रतुमये यज्ञवराहे। तद्रूपवर्णनञ्च हरिवं० २२४अ०
"वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः। अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः। अहरात्रेक्षणधरो वेदाङ्ग-

स्रुतिभूषणः । आज्यनासः स्रुवत्तुण्डः सामघोषस्वनो महान् । सत्यधर्ममयः श्रीमान् क्रमविक्रमसत्कृतः । क्रियासत्वमहावोणः पशुज्ञानुर्म्मखाकृतिः । उद्गात्रन्त्रो होमलिङ्गो बीजौषधिमहाफलः । वाय्वन्तरात्मा सत्रस्फिक् विकृतः सोमशोणितः । वेदस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् । प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः । दक्षिणाहृदयो योगी महासत्रमयो महान् । उपाकर्मौष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः । नानाच्छन्दोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः । भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशद्गुरुः" ।

"रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव! यदध्वरात्मकम् । छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम् । स्रुक्तुण्ड आसीत् स्रुव ईश! नासयोरिडोदरे चमसाः कर्णरन्ध्रे । प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणन्ते भगवन्नग्निहोत्रम् । दीक्षानुजन्मोपसदः शिरोधरं ते प्रायणीयोदयनीयदंष्ट्र! । जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते । सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव! धातवः! सत्राणि सर्वाणि शरीरसन्धयस्त्वं सर्वयज्ञक्रतुरिष्टिबन्धनः" । भाग० ३।१३अ० ।

"यज्ञात्मतां प्रपञ्चयन्तः स्तुवन्ति रूपमित्यादि चतुर्भिः छन्दांसि गायत्र्यादीनि यज्ञाङ्गभूतछन्दआद्यनुवादेन भगवदवयवता विधीयते बर्हिःशब्दे दीर्घाभाव आर्षः दृशि चक्षुषि चातुर्होत्रं होत्रादिचतुष्टयं कर्म । स्रुक् जुहूः । तुण्डे मुखाग्रे । स्रुवो नासिकयोः । इडा भक्षणपात्रं चमसा ग्रहाश्च सोमपात्राणि । प्राशित्रं ब्रह्मभागपात्रं ग्रस्यतेऽनेनेति ग्रसनं मुखान्तर्वर्त्ति छिद्रं चर्वणं भक्षणम् । दीक्षा दीक्षणीयेष्टिः । अनुजन्म वारं वारम् अभिव्याप्तिः । उपसदस्तिस्र इष्टयः शिरोधरं ग्रीवा । प्रायणीया दीक्षानन्तरेष्टिः उदयनीया समाप्तीष्टिः ते एव दंष्ट्रे यस्य । प्रवर्ग्यो महावीरः प्रत्युपसदः पूर्व्वं क्रियते । सभ्यो होमरहितोऽग्निः आवसथ्यः औपासनाग्निः ततो द्वन्द्वैक्यं तव क्रतुरूपस्य शीर्षकं शिरः । चितयः इष्टकाचयनानि पञ्च असवः प्राणाः । प्रातःसवनादीनि अवस्थितिरासनं बाल्याद्यवस्था वा । अग्निष्टोमोऽत्यग्निष्टोमः उक्थ्यः षोडशी वाजपेयोऽतिरात्रः आप्तोर्यामः इति सप्त संस्थाविभेदाः सप्त त्वङ्मांसादिधातवः । सत्राणि द्वादशाहादीनि बहुयागसङ्घातरूपाणि, असोमा-यज्ञाः ससोमाः क्रतवस्तद्रूपस्त्वं इष्टिर्यजनं अनुष्ठानञ्च तदेव बन्धनं यस्य सः" श्रीधरः । [प्राशस्त्यात् तथात्वम् ।

क्रतुपशु पु० क्रतोरङ्गं पशुः । अश्वे हारा० तस्य अश्वमेधे

क्रतुप्रा पु० क्रतून् कर्माणि प्राति प्रा-पूर्त्तौ क्विप् । कर्मपूरके "महश्चर्कर्म्यर्वतः क्रतुप्राः" ऋ० ४।३९।२ । "क्रतुप्राः कर्मणां पूरकः" भा० ।

क्रतुभुज् पु० क्रतुं क्रतुदेयं हविर्भुङ्क्ते भुज-क्विप् । देवे क्रतुदेयद्रव्यत्यागोद्देश्यत्वात्तेषामचेतनत्वेऽपि तद्भोगित्वं बोध्यम् चेतनत्वे तु तेषां मनुष्यादीनामिव भोगो नास्ति किन्तु दृष्टिमात्रेण यथाह "न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति" छा०उ० ।

क्रतुराज् पु० क्रतुषु राजते राज-क्विप् । १अश्वमेधे यज्ञे तस्य सर्वयज्ञानां श्रेष्ठत्वात् तथात्वम् । "यथाश्वमेधः क्रतुराट् सर्वपापापनोदनः" मनुः २राजसूये च शब्दचि० ।

क्रतुविक्रयिन् त्रि० क्रतुं तत्फलं विक्रीणाति वि+क्री-णिनि । स्वकीयक्रतुफलस्य अन्यदीयत्वस्थापनेन ततो धनग्राहके । "पिशुनानृतिनोश्चापि क्रतुविक्रयिणस्तथा" मनुः । [चाप्सरसौ" यजु० १५।१५ ।

क्रतुस्थला स्त्री अप्सरोभेदे "पुञ्जिकस्थला च क्रतुस्थला

क्रतुस्पृश् त्रि० क्रतुमिन्द्रियं स्पृशति क्विन् । इन्द्रियस्पर्शिनि "अपश्यन् हृदिस्पृक् क्रतुस्पृक्" आश्व०श्रौ० ५।१०५

क्रतूत्तम पु० क्रतुषूत्तमः । राजसूययज्ञे त्रिका० ।

क्रत्वर्थ पु० क्रतवेऽयम् अर्थेन सह नित्यस० विशेष्यलिङ्गता च, क्रतुरर्थोऽस्य वा । क्रतूपकारके । तल्लक्षणादिकञ्च जै० सू० भाष्ययोर्दर्शितं यथा

"अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा" सू० । "तृतीयेऽध्याये श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानैः शेषविनियोगलक्षणमुक्तम् । इह इदानीं क्रत्वर्थपुरुषार्थौ जिज्ञास्येते, —कः क्रत्वर्थः ? कः पुरुषार्थः ? इति, यापि प्रयोजकाप्रयोजकफलविध्यर्थवादाङ्गप्रधानचिन्ता, सापि क्रत्वर्थपुरुषार्थजिज्ञासैव । कथम् ? । अङ्गं क्रत्वर्थः, प्रधानं पुरुषार्थः, फलविधिः पुरुषार्थः, अर्थवादः क्रत्वर्थः, प्रयोजकः कश्चित् पुरुषार्थोऽप्रयोजकः क्रत्वर्थः । तस्मात् "क्रत्वर्थपुरुषार्थयोर्जिज्ञासा"—इति सूत्रितम् । तत्र अथातःशब्दौ प्रथमे एवाध्याये प्रथमसूत्रे वर्णितौ । अथेति प्रकृतं शेषविनियोगलक्षणमपेक्ष्यते । अतः—इति क्रत्वर्थपुरुषार्थजिज्ञासाविशेषं प्रस्तुते । क्रतवे यः, स

क्रत्वर्थः, पुरुषाय यः, स पुरुषार्थः। जिज्ञासाशब्दोऽपि तत एव समधिगतः,—ज्ञातुमिच्छा जिज्ञासा—इति। तदेतत् प्रतिज्ञासूत्रम्,—'क्रत्वर्थपुरुषार्थयोर्जिज्ञासा"—इति"।(४।१।१) शवरभाष्यम्

"यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वात्" सू०२।

"अथ किंलक्षणः क्रत्वर्थः, किंलक्षणः पुरुषार्थः इति लक्षणं वाच्यं, तथा हि लघीयसी प्रतिपत्तिः, उपदेशे गरीयसी तदुच्यते,—यस्मिन् प्रीतिः पुरुषस्य, (यस्मिन्कृते पदार्थे पुरुषस्य प्रीतिर्भवति) स पुरुषार्थः पदार्थः। कुतः?। तस्य लिप्सा अर्थेन च भवति, न शास्त्रेण, क्रत्वर्थौ हि शास्त्रात् अवगम्यते, न अन्यथा,अविभक्तो हि पुरुषार्थः प्रीत्या, यो यः प्रीतिसाधनः स पुरुषार्थः। पुरुषार्थे लक्षिते तद्विपरीतः क्रत्वर्थः—इति क्रत्वर्थस्य लक्षणं सिद्धम् (१वर्णकम्)।

एवं वा सूत्रं वर्ण्यते,—दर्शपूर्णमासयोराम्नायते,—'अनतिदृश्यं स्तृणाति अनतिदृश्यमेवैनं प्रजया पशुभिः करोति. इति तथा आहार्यपुरीषां पशुकामस्य वेदिं कुर्यात्, वत्सजानुम् पशुकामस्य वेदिं कुर्यात्,गोदोहनेन पशुकामस्य प्रणयेत्'—इत्येवमादीति। तत्र संशयः,—किम् एवञ्जातीयकाः क्रत्वर्थाः उत पुरुषार्थाः—इति। किं प्राप्तम्—क्रत्वर्थाः इति। कुतः? प्रत्यक्ष उपकारस्तेभ्यो दृश्यते क्रतोः, पुरीषहरणं वेदिस्तरणं च, तदुक्तं, (२।१।३सू०) द्रव्यगुणसंस्कारेषु वादरिः'—इति। तस्मात् क्रत्वर्थाः—एवं प्राप्ते ब्रूमः,-यस्मिन प्रीतिः पुरुषस्य स पुरुषार्थ एव इति, प्रीतिस्तेभ्यो निर्वर्त्त्यते,तस्मात् एते पुरुषार्थाः-इति। 'ननु प्रत्यक्षः उपकारः क्रतोर्दृश्यते—इत्युक्तम्'। उच्यते-सत्यं दृश्यते, न तु क्रतोरुपकाराय एभ्यः सङ्कीर्त्तितेभ्य,ः फलेभ्य एते श्रूयन्ते, न च य उपकरोति स शेषः, यस्तु यदर्थः श्रूयते, स तस्य शेषः—इत्युक्तं(३।१।२ सू०)'शेषः परार्थत्वात्'—इति। (२यवर्णकम्)

एवं वा, द्रव्यार्जनम् उदाहरणम्, इह द्रव्यार्जनं तैस्तैर्नियमैः श्रूयते, ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना। तत्र सन्देहः,-किं क्रत्वर्थो द्रव्यपरिग्रहः उत पुरुषार्थ इति। किं प्राप्तम् क्रत्वर्थो नियमात्, यद्येष पुरुषार्थः स्यात्, नियमोऽनर्थको भवेत्, प्रत्यक्षेण एतत् अवगम्यते,—नियमादनियमाच्चार्जितं द्रव्यं पुरुषं प्रीणयति—इति, तस्मात् क्रत्वर्थः कामश्रुतिभिश्चास्य सहैकवाक्यता दृष्टा, इतरथा, अनुमेयेन फलवाक्येन सहैकवाक्यतां यायात्। लिङ्गं चापि भवति,—'अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्, यस्याहिताग्नेः सतोऽग्निर्गृहान् दहेत्, यस्य हिरण्यं नश्येदाग्नेयादीनि निर्वपेत्—इत्येवमादि तद्धि द्रव्योपघाते चोद्यते यदि द्रव्यपरिग्रहः कर्मार्थः, तत्र एतदपि सति सम्बन्धे कर्मार्थम्—इत्युच्यते इतरथा असति सम्बन्धे कर्मार्थम्—इत्यनुमीयते फलं च अस्य कल्प्येत। तस्मात् यजतिश्रुतिगृहीतं द्रव्यार्जनं येन विना यागो न निर्वर्त्त्यते, स यागस्य श्रुत्या परिगृहीतः—इति गम्यते। तस्मात् क्रत्वर्थः—इति।

एवं प्राप्ते ब्रूमः,-पुरुषार्थः—इति। यस्मिन् कृते पदार्थे प्रीतिः पुरुषस्य भवति तस्मात् अस्य लिप्सा अर्थलक्षणा शरीरधारणार्था यस्य शरीरं ध्रियते व्यक्तं तस्यास्ति द्रव्यं शरीरिणां यागः श्रूयते तस्मात् विद्यमानद्रव्यस्य विनियोग उच्यते। न द्रव्यार्जनं श्रुतिगृहीतं विनापि हि द्रव्यार्जनवचनत्वेन शब्दस्य यागो निर्वर्त्त्यत एव, तस्मात् पुरुषार्थो द्रव्यपरिग्रहः।

अपि च, यदि शास्त्रात् कर्मार्थं द्रव्यार्जनं, तस्मात्तत्र विनियुज्येत तथार्जितम्, तत्र सर्वतन्त्रपरिलोपः स्यात्। अपि च उपक्रान्तानि सर्वकर्माणि द्रव्यार्जनेन भवेयुः, तत्र एतन्नोपपद्यते,—अपि वा एष सुवर्गाल्लोकाच्छिद्यते, यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वा अतिपातयेत्'—इति एवञ्च सति प्रयोगकालाद्बहिरेतदङ्गं सदनुपकारकं स्यात्। न च आधानवत् भवितुमर्हति,तत्र हि वचनं—वसन्तेऽग्निमादधीत—इति न चैतत् अङ्गम् अथ यदुक्तं—नियमवचनम् अनर्थकं पुरुषार्थे द्रव्यपरिग्रहे सति-इति। उच्यते, नैतावता पुरुषार्थता व्यावर्त्त्यते प्रत्यक्षा हि सा,त्वया च परोक्षया युक्त्यनुज्ञा व्यपदिश्यते, न च परोक्षं प्रत्यक्षस्य बाधकं भवति, तस्मात् नियमवचनात् काममपरमदृष्टं कल्प्येत न तु दृष्टहानम् तस्मात् यत् पुरुषस्य प्रयोजनं प्रीतिः तदर्थं धनस्य अर्जनम्-इत्येवं च सति व्रीहिणा यागः कर्त्तव्यः प्रीत्यर्थमर्जितेन वा क्रत्वर्थमर्जितेन वा न अत्र कश्चित् विशेषः प्रीत्यर्थम् उपार्जितोऽपि व्रीहिः व्रीहिरेव. कर्मार्थम् उपार्जितोऽपि व्रीहिः व्रीहिरेव। तस्मात् न प्रयोगचोदनागृहीतं द्रव्यार्जनम्। अथ यदुक्तम्-अनुमेयेनाप्रकृतेन वा शब्देन युगपत्पक्षे नियमस्य एकवाक्यता, क्रमपक्षे

तु दृष्टेन प्रयोगवचनेन-इति नैव दोषः अस्मत्पक्षेऽपि दृष्टेन भुजिना न फलवचनेन। 'कथं तर्हि-नियमाद्-दृष्ट भवति-इति गम्यते'। यथैव भवदीये पक्षे। आह अस्मत्पक्षे फलवत् एकवाक्यभावात् फलवत् उपकरोति इति गम्यते'। उच्यते अस्मत्पक्षेऽपि फलवत एवैकवाक्यभावः, एतावांस्तु विशेषः-तव श्रुतं फलं मम तु दृष्टम्। अथ यत् लिङ्गम् उक्तं—गृहदाहादिषु कर्म श्रूयते-इति। तत्र उच्यते यद्यपि न क्रत्वर्थं द्रव्यार्जनं तथापि दाहे निमित्ते फलाय वा कर्माङ्गभावाय वा क्षामवत्यादीनां विधानम् उपपद्यत एव। तस्मात् पुरुषार्थं द्रव्यार्जनं प्रीत्या हि तदविभक्तम्" भाष्यम् तत्र आरभ्य क्रत्वर्थाः पदार्थास्तत्र दर्शिताः ततएवावगम्याः

क्रत्वादि पु० पाणिन्युक्ते सोः परतः स्थितस्य आद्युदात्ततानिमित्ते शब्दगणे। स च गणः "क्रतु दृशीक प्रतीक प्रतूर्ति हव्य भग"।

क्रत्वीश्वर न० क्रतुना स्थापितमीश्वरलिङ्गम्। काश्याम् क्रतुना मुनिना स्थापिते शिवलिङ्गभेदे "वरणायास्तटे रम्ये क्रत्वीश्वरमनुत्तमम्। वाञ्छितमीश्वरश्चैव लभते वसतिं त्विह" काशी० १८अ०

क्रथ वधे भा० पर०सक० सेट् घटा०। क्रथति अक्रथीत्-अक्राथीत्। चक्राथ, णिच्—क्रथयति-ते। अचिक्रथत् त।

क्रथ प्रतिहर्षे चु० उभय० सक० सेट् घटा०। क्राथयति-ते अचिक्रथत्-त। क्रथयां-बभूव आस चकार चक्रे

क्रथन न० क्रथ-वधे ल्युट्। १मारणे २छेदने च "राजन्योद्यांसकूटक्रथनपटुरिति" प्रबोधचन्द्रोदयः। ३दानवभेदे पु०। "क्रथनश्च महावीर्य्यः" भा० आ० ६७अ०।

क्रथनक पुंस्त्री क्रथने दन्तकरणकरटकच्छेदने प्रभूतः क्रन्। उष्ट्रे अमरः स्त्रियां जातित्वात् ङीष्।

क्रथकैशि(शी)क पु०ब०व० देशभेदे "सपाण्ड्यान् क्रथकैशीकान्" भा० स० १३०श्लो० "अथेश्वरेण क्रथकैशिकानाम्" "प्रत्युज्जगाम क्रथकैशिकस्तम्" रघुः। तुस्समध्यात् संज्ञायां कन्। सितागुरुणि न० शब्दच०।

क्रद रोदने वैकल्ये अक० आह्वाने सक० भ्वा० पर० इदित् सेट्। क्रन्दति अक्रन्दीत् चक्रन्द। भावे क्रन्द्यते क्रन्दितम्। अव्यक्तशब्दकरणे "अक्रन्ददग्निः स्तनयन्निव द्यौः" यजु० १२।६। अक्रन्दत् क्रन्दति विस्फूर्जति" वेददी०। "यदक्रन्दः प्रथमं जायमानः" यजु० २९,१२। [यानि अनु+क्रन्दनेनानुगमने सक० अनुक्रन्दति पुत्रम् क्रन्दनेनानु-

अभि+आभिमुख्येन शत्रुप्रभृतेराह्वाने सक०। "अभिक्रन्दन् वृषायसे" ऋ० १०।२१।८। "अभिक्रन्दन् आभिमुख्येन युद्धार्थं शत्रूनाह्वन्" भा०। "आभिमुख्येन शब्दकरणे अक०। 'अभिक्रन्द स्तनय गर्भम्'" ऋ० ५।८३।७। "अभिक्रन्द भूम्यभिमुखं क्रन्द शब्दाय" भा०।

आ+आह्वानपूर्व्वकरोदने सक०। "आक्रन्दत् भीमसेनं वै" भा० व० १५७अ०। सम्यक्क्रन्दने च "आक्रन्दिषुः सखीनह्वन्" भट्टिः। "तदीयमाक्रन्दितमार्त्तसाधोः" रघुः।

सम्+आ+सम्यगाह्वानपूर्व्वकक्रन्दने "हा तात! धर्म्मराजेति समाक्रन्दन्नहाभये" भा० आश्र० १०७२श्लो०

नि+यथानामशब्दोच्चारणे। "न्यक्रन्दीज्जन्म प्रभुवाणी यथास्य शब्दस्तथा नामेरयति वाचम्" निरु० ६।४।

प्र+स्तवने "प्र वः, सडक्रन्त् सुविता यः" ऋ० ५।५९।१। "अक्रन् स्तौति" भा० वेदे गणव्यत्ययात् शपोलुक्।

वि+विशेषेण क्रन्दने। सम् सम्यक् क्रन्दने।

क्रद वैकल्ये भ्वा० आत्म० अक०सेट् घटादि०। क्रदते अक्रदिष्ट चक्रदे णिच् क्रदयति। यङ् वेदे कनिक्रद्यते यङ्लुकि कनिक्रत्ति कनिक्रदीति "उपस्थे वृषभः कनिक्रदत्" ऋ०९।७७।५। "कनिक्रदत् शब्दं कुर्वन्" भा०।

अनु+अनुगमने सक०। "संनयेयं द्यौरनुचक्रदे" ऋ० ८।३।१०। "अनुचक्रदे अनुगच्छति" भा०।

क्रन्द निरन्तरशब्दकरणे चुरा० अक० उभ०सेट्। प्रायेणाङ्पूर्व्वः आक्रन्दयति ते आचक्रन्दत् त। आक्रन्दयाम् बभूव आस चकार चक्रे।

क्रन्दन न० क्रदि—भावे ल्युट्। १शोकादिनाऽश्रुपातहेतुव्यापारे रोदने शब्दरत्ना० योधयोरुद्रेः २आह्वाने च अमरः ३विड़ाले पुंस्त्री शब्दमा०। स्त्रियां जातित्वात् ङीष्।

क्रन्दित न० क्रदि—भावे क्त। रोदने अमरः। आह्वाने मेदि० योधानां चीत्कारशब्दकरणे शब्दरत्ना०।

क्रप कृपायाम् भ्वा० अक० आत्म० सेट् घटादि। क्रपते अक्रपिष्ट चक्रपे णिचि क्रपयति ते। "उतस्त्वाहुर्मेववत्नक्रपिष्ट" ऋ०७।२०।९। वेदेऽस्य क्वचित् संप्रसारणम्। "उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः" ऋ० ९।९९।४। "विन्दन्त ज्योतिश्च कृपन्त धीभिः" ऋ० ४।१।१४। "मर्तानां चिदुर्वशीरकृपन्" ऋ० ४।२।१८। "विश्वे देवा अकृपन्त समीचोर्निष्पतन्त्यः" ऋ० १०।२४।५। "कोवं कृपमाणमक्षणुतं विचक्षे" ऋ० १।११६।१४।

क्रम पादविक्षेपणेन गतौ भ्वा०पर०सक० सेट्। अस्य सार्व्व-

धातुके वा श्यन् सेडमन्तत्वात् अतिङि णिति ञिति चिणि परे न वृद्धिः। कर्त्तरि क्रम्यति क्रामति। क्रम्येत्-क्रामेत्। क्रम्यतु क्रामतु। अक्रम्यत् अक्रामत्। अक्रमीत्। चक्राम। क्रमिता क्रम्यात् क्रमिष्यति। अक्रमिष्यत्। कर्म्मणि क्रम्यते। अक्रमि। णिचि ह्रस्व सुलो वा वृद्धिः। क्रमयति-ते। अचिक्रमत्-त। कर्म्मणि क्रम्यते। अक्र(क्रा)मि। क्र(क्रा)मितासे क्रमयितासे। कृत्सु क्रमणीयम्। क्रमितव्यम् क्रम्यम् क्रमणम्। क्रमकः। क्रमी। क्रमिता। क्रान्तिः। क्रमितुम्। उदित् क्रमित्वा क्रान्त्वा। संक्रम्य। क्रमं क्रमम्। णिचोणमुलि वा वृद्धिः क्र(क्रा)मं क्र(क्रा)मम्। क्रम्यन् क्रामन्। क्रमिष्यन् क्रमिष्यमाणः। णयन्तस्य क्रमयिता क्रमितः। क्रमयितुम्। क्रमयितव्यम्। स्त्रियामस्ति युच् क्रमणा। क्रम—यन् साणः क्रमयिष्यन्। कर्म्मणि क्रम्यमाणः। क्र(क्रा)मिष्यमाणः। क्रमयिष्यमाणः। सनि चिक्रमिषति आत्म० चिक्रंसते। "समुद्रात् पश्चिमे पूर्व्वं दक्षिणादपि चोत्तरा। क्रामत्यनुदिते सूर्य्ये वाली व्यपगतक्लमः" रामा० कि० ८० अ०। "देवा इमाल्लोँकानक्रमन्त" शत० ब्रा० ६।७।२।१० "विष्णुस्त्वा क्रमताम्" यजु० १।९। "पादेनाक्रम्यारोहतु" वेददी०। "हत्वा रक्षांसि लवितुमक्रमीन्मारुतिः पुनः" भट्टिः "इतोद्विजाग्र्यैरभिपूज्यमानः चक्राम वज्रीव दितेः सुतेषु" भा० आ० १९२ अ०। "क्रमं बबन्ध क्रमितुं सकोपः" "क्रान्त्वा क्रन्त्वा स्थितं क्वचित्" भट्टिः। परोपक्रमवत् अप्रतिबन्धादौ आत्म०। "न तत्र क्रमते मृत्युर्न जरा न च पावकः" भा० आनु० ८३ अ०। "हरेर्यदक्रामि पदैककेन खम्" नैषधे अक्रामीत्यसाधु। स्वार्थेणिचि कथञ्चित् साधु इत्यन्ये। निष्ठायां नेट् क्रान्त इत्यादि कौटिल्ये यङ् चंक्रम्यते नागः। "सोऽपि चंक्रम्यमाणः कूपे पपात" भा० आ० ७०० श्लो०।

अति+अतिक्रमणे उल्लङ्घने सक०। "स नदीः पर्व्वतांश्चापि सलिलानि सरांसि च। अचिरेणातिचक्राम खेचरः खे चरन्निव" भा० आ० ४६५२ श्लो०। "अत्यक्राममिमान् मासां स्तद्वधं परिचिन्तयन्" रामा० युद्ध० ८८ अ०।

अभि+अति+आभिमुख्येनातिक्रमणे सक०। "न दिष्टमभ्यतिक्रान्तुं शक्यं बुद्ध्या बलेन च" भा० स० १०५१ श्लो०।

वि+अति+वैपरीत्येन क्रमणे। "तद्बलः पुरमासाद्य व्यतिचक्राम तं जनम्" रामा० बाल० ७० अ०। विशेषेण अतिक्रमे च। "स लोकानाहिताग्नीनामृषीणां पुण्यकर्म्मणाम्। देवानाञ्च व्यतिक्रम्य ब्रह्मलोकमवाप ह" रामा० आर० ९ अ०। "एवं हि सुमहान् कालो व्यत्यक्रामत तस्य वै" भा० अनु० ४५५ श्लो०। "विवाहे च व्यतिक्रमः" उद्वा० त०

सम्+अति+सम्यगतिक्रमणे। "अवन्तीमृक्षवन्तञ्च समतिक्रम्य पर्व्वतम्" भा० व० २२१ श्लो०

अधि+आधिक्येन क्रमणे

अनु+परिपाट्या क्रमणे। "श्रद्धा रतिर्भक्तिरनुक्रमिष्यति" भा० ३।२५।२५५। "महर्षिभिरनुक्रान्तं धर्म्मपन्थानमास्थितः" रामा० उ० ४७ अ०। "परिपाटी त्वनुक्रमः" अमरः।

अप+ अपसरणे अक० "हित्वा सेनामपचक्राम चापि" भा० आ० ११७७ श्लो०।

अभि+आभिमुख्येन गमने सक० "तमभिक्रम्य सर्व्वेऽद्य वयं वार्य्यामहे वसु" भा० व० ८३१ अ०। "प्रदक्षिणमभिक्रम्य सर्व्वे प्राञ्जलयः स्थिताः" भा० अनु० ६०४७० आरम्भे च "नेहाभिक्रमनाशोऽस्ति" गीता अभिक्रमः आरभ्यमाणः।

अव+अपसरणे हिंसने च सक०। "अवक्रामन्तः प्रपदैरमित्रान्" ऋ० ६।७५।७। "अवक्रामन्तः हिंसन्तः" भा०।

अनु+अव+अनुगमने प्रवेशे च सक०। "एतास्तेजोमात्राः समभ्याददानो हृदयमेवान्ववक्रामति" शत० ब्रा० १४।७।२।१। "मृतिकाले हृदयस्थां बुद्धिमेवान्वागच्छति" भा०।

आ+बलपूर्व्वकास्कन्दने। "आक्रामन्नागभवने तदा नागकुमारकान्" भा० आ० ५०१८ श्लो०। आरोहणे च "आक्रान्तिसम्भावितपादपीठम्" कुमा०। उद्गमे अक० तत्र दीप्त्यान्वितस्योद्गमे आत्म०। "भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम्। तावद्गर्भं विजानीयात्तदूर्द्ध्वं तीरमुच्यते" प्रा० त० दानधर्म्मः। एवं सूर्य्य आक्रमते इत्यादि। अन्यत्र आक्रामति। अत्यादिपूर्व्वकस्याङस्तु तत्तदर्थविशिष्टारोहणादिद्योतकता। "सममेव समाक्रान्तं द्वयं द्विरदगामिना" रघुः

उत्+उदये अक०। "यज्ञस्य शीर्षाच्छिन्नस्य उदक्रामत्" शत० ब्रा० १४।१।२।१२। ऊर्द्ध्वक्रमणे च "न तस्य प्राणा उत्क्रामन्ति इहैव समवलीयन्ते" श्रुतिः। "कस्मिन्नुत्क्रान्ते सर्व्वमिदमुत्क्रान्तम्" श्रुतिः। "तान् हत्वा पतगश्रेष्ठः सर्व्वानुत्क्रान्तजीवितान्" भा० आ० ३२ अ०। "विग्रडन्या उत्क्रमणे भवन्ति" छा० उप०। उल्लङ्घने सक०। उत्क्रमः।—वैपरीत्येन क्रमणे अक० "क्रमोत्क्रमान्मेषतुलादिमानम्" ज्यो० त०

अनु+उद्+उत्क्रमणानुसरणे सक०। "प्राणमनूत्क्रामन्तं सर्व्वे प्राणा अनूत्क्रामन्ति" शत० ब्रा० ७।२।२।

वि+उद्+वैपरीत्येन विशेषेण च लङ्घने सक० ऊर्द्ध्वं गतौ अक०

"इन्द्रियाणि वीर्य्याणि व्युदक्रामन्" शत०ब्रा०१२।७।१।८। "व्युत्क्रान्तरजसोऽमलाः" भा० अनु० १३१९ श्लो०। "व्युत्क्रमात् प्रेतश्राद्धानि योनोहात् धर्म्ममोहितः" ति० त० देवलः।

उप+आरम्भे सक० आत्म०। उपक्रमते आरभते इत्यर्थः। "उपक्रमस्व पुरुरूपमाभर वाजम्" ऋ० ८।१।१४। "उपक्रमोपसंहारौ" वेदान्तसा०। "योयस्य विहितः कालः कर्म्मणस्तदुपक्रमे। तिथिर्योऽभिमता सा तु कार्य्या नोपक्रमोज्झिता" बौधा०। गत्यर्थमात्रद्योतकत्वे नात्मनेपदम् "भागधेयूपचक्राम भगवांश्चण्डकौशिकः" भा० स० १८अ०। अप्रतिबन्धे उत्साहे इद्धौ च आत्म०। क्वचिउपक्रमते बुद्धिः न प्रतिहन्यते इत्यर्थः अध्ययनाय उपक्रमते उत्सहते। उपक्रमन्ते शास्त्राणि स्फीतानि भवन्ति इत्यर्थः। एवं परापूर्वकस्य केवलस्य च एष्वर्थेषु अकर्म्मकता आत्मनेपदञ्च। अन्योपसर्गपूर्वकत्वे तत्तदर्थेषु, परोपपूर्व्वस्यार्थान्तरे च न तङ्। उपसर्गराहित्ये अन्यार्थेऽपि वा तङ्। क्रामति क्रमते इति। आङि तु ज्योतिरुद्गमने आत्मनेपदमिति भेदः। विपूर्वकस्य विशेषो वक्ष्यते समादिपूर्व्वकोपशब्दस्य तत्तदर्थविशिष्टारम्भद्योतकता। वक्तुं समुपचक्रमे।

नि+नितरां क्रमणे अवश्यक्रमणे। "कर्म्मन् वाजी न्यक्रमीत्" ऋ० ६।२६।१। "न्यक्रमीत् नितरामक्रमीत्" भा०

अनु+नि+अनुक्रमणे। "सप्तपदान्यनुनिक्रामति" शत० ब्रा० ३।२।१।१।

निर्(स्)+निस्सरणे "जिगीषया महीं पाण्डुर्निरक्रामत् पुरात् प्रभो!" भा०आ०११२अ०। अस्य क्वचिदात्मनेपदित्वम् "वातापे! निष्क्रमस्वेति पुनः पुनरुवाच ह" भा०व० ९९अ०।

अभि+निर्(स्)+आभिमुख्येन निःसरणे। "अभिनिष्क्रामति द्वारम्" पा०। "स्रुघ्नमभिनिष्क्रामति स्रौघ्नं कान्यकुब्जद्वारम्" सि० कौ० "प्रविश्य चाभिनिष्क्रान्तं सुग्रीवं वानरर्षभाः" राम० किष्कि० २५अ०

वि+निर्(स्)+विशेषेण निःसरणे "यथा मत्विश्चान्तरमन्तकस्य को वै मनुष्योहि विनिष्क्रमेत" भा०व०१०२७३अ०।

परा+बलेनाक्रमणे आत्म० सक०। "यत्र तपः पराक्रम्य व्रतं धारयत्युत्तरम्" अथ० १०।७।११। अप्रतिबन्धादौ उपोपसर्गवत्। तत्रोत्साहे "पानीयार्थे पराक्रान्ता यत्र ते भ्रातरोहताः" भा० मह्रा० ९।श्लो०। पराक्रमः।

परि+भ्रमणे अक०। "परिक्रामति संसारे चक्रवत् ब्रह्मवेदनः" भा० व० २०८अ०। परितोगमने सक०। "परिक्रामति यः सर्वांल्लोकान् संत्रासयन् बलात्" भा० ८६।१३।३०।

सम्+परि+सम्यक् वेष्टनाकारेण परितो गमने सक० "बहूनि संपरिक्रम्य तीर्थान्यायतनानि च" भा० आ० १२श्लो० पर्य्यटने अक०

प्र+आरम्भे आत्म०। "प्रचक्रमे वक्तुमनुज्झितक्रमः" रघुः। अनारम्भे तु न आत्म० "विष्णोर्यत्परमं पदं प्रदक्षिणं प्रक्रामन्ति" भाग०५ २२। १७श्लो०।

प्रति+प्रतिरूपक्रमे सक० "यं स्रुवेण प्रतिक्रामति" शत० ब्रा० ३।४।४।६। प्रतिकूलक्रमणे निवृत्तौ अक०। "भद्रे! प्रतिक्राम नियच्छ वाचम्" भा० व० २६८अ०।

वि+पादविहरणे अक० आत्म०। "साधु विक्रमते वाजी" सि० कौ० "त्रेधा विष्णुरुरुगायोविचक्रमे" तैत्ति०। पादाकरणके तु न तङ्। वाजिना विक्रामति। "ते विक्रमन्तः स्फुरता हढेन विक्षिप्यमाणा धनुषा नरेन्द्राः" भा० आ० १८अ०। इत्यत्र न तङ् "ततएनं महादेवः पीड्य गात्रैः सुपीडितम्। तेजसा व्यक्रमद्रोषात् चेतस्तस्य विमोहयन्" भा० व० ३९अ०। दीर्घाभाव आर्षः। वीर्य्यातिशयेन पराक्रमे अक०। "ते यूयं त्वरिताः सर्वे विक्रमध्वं प्लवङ्गमाः" रामा० किष्कि० ५८अ०। तङ् आर्षः। एवं "तांश्च विक्रमसे जेतुम्" भा०स० १९६श्लो० तङ् आर्षः। "वेः पादविहरणे" पा० योगविभागाद्वा कश्चिदन्यत्रापि तङ् इत्यन्ये।

अधि+वि+आधिक्येन पराक्रमे "यजमानायाधिविक्रमस्व" कात्या० २३।२।१।

निर्+वि+विशेषेण निःसरणे। "भित्त्वा कुक्षिं निर्विचक्राम विप्रः" भा० आ० ७६अ०

सम्+एकत्रस्थितस्यान्यत्र संचरणे सक० "कार्मुकं तु परित्यज्य झषं (मृगम्) संक्रमते रविः" ति०त०भवि० पु०। "रविसंक्रान्तिरेव च" तत्रैव। "जीवः संक्रमतेऽन्यत्र कर्म्मबन्धनिबन्धनः" भा०व०२०८अ०। तङार्षः। "औपसर्गिकरोगाः सङ्क्रामन्ति नरान्नरम्" सुश्रु०। "संक्रामन्ति हि पापानि तैलविन्दुरिवाम्भसि" पराशरः "कालोह्ययं संक्रमितुं द्वितीयम्" रघुः। सम्यक् क्रमणे सक० "संक्रामन्तौ बहून् देशान् शैलाञ्छैलं वनाद्वनम्" रामा० आर० ७६अ०।

अनु+सम्+आनुरूप्येण आनुपूर्व्येण च संक्रमणे। "इष्टापूर्त्तमनुसंक्राम विद्वन्!" अथ० १८।२।५।

उप+सम्+सामीप्येन संक्रमणे सक० "सविशेषत्वे हि विधि-

निषेधौ विशेषणमुपसंक्रामतः सति विशेष्ये बाधे" दीधितौ न्यायवाक्यम् "एतमन्नमयात्मानमुपसंक्रामति" तैत्ति० प्रति+सम्+प्रतिकूलसङ्क्रमणे निवृत्तौ "तावन्न संसृतिरसौ प्रतिसंक्रमेत" भाग० ३।९।१०श्लो०। "प्रतिसंक्रामयद्विश्वम्" ४।२४।४९श्लो० प्रतिसंक्रामयत् निवर्त्तयत् ।

क्रम पु० क्रम–भावकरणादौ यथायथं घञ् मान्तत्वादवृद्धिः । १पादविक्षेपे २पादे हेमच० अर्थानां नैयत्येन ३पूर्वापरावस्थाने। ४कल्पे अनुष्ठाने अमरः ५सामर्थ्ये (सामर्थ्यहेतुव्यापारे) ६आक्रमणे च मेदि० । ७वेदसंहितानुसारिपाठतद्विलोमरूपे पाठभेदे। ऋग्वेदशब्दे तत्स्वरूपभेदादिकं १४११पृ०चरणव्यूहवाक्यतद्भाष्याभ्यां दर्शितम् । ८विष्णौ "ईश्वरोविक्रमी धन्वी मेधावी विक्रमः क्रमः" विष्णुस० । 'क्रमणात् प्राणरूपेण गगनात् । क्रमणहेतुतया । (प्राणिगमनसाधनपादविन्यासहेतुभूतरथ्यादिप्रकाशनाधिष्ठातृसूर्यादिदेवरूपतया) वा क्रमः" भा० ९परिपाट्यां यथोचितसन्निवेशे मेदि० । शेषशेषिभावे अधिकृताधिकारे वा सत्येव वैदिककर्म्मणोरनुष्ठाने पौर्वापर्य्यरूपक्रम यहणमिति शा०भा०स्थितम् तन्नियामकश्च श्रुत्यर्थपाठप्रवृत्तिकाण्डमुख्यभेदात् षड्विधः तस्य च कर्म्मविशेषे विशेषेण व्याख्याता तद्विवृतिः मीमांसा ५अ०।१पा०भाष्ययोर्दर्शिता यथा "श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्" जै० १सू०

"चतुर्थेऽध्याये प्रयोजकाप्रयोजकलक्षणं वृत्तं, तच्च विस्मर्त्तव्यम्, इह इदानीं क्रमनियमलक्षणम् उच्यते,तत् श्रुत्यर्थपाठप्रवृत्तिकाण्डमुख्यैर्वक्ष्यते, श्रुत्यादीनाम् च बलाबलम् । आदितस्तु श्रुतिक्रमश्चिन्त्यते,–किं यथाश्रुति पदार्थानाम् क्रमआस्थेयः, उत अनियमेन ?–इति । किं प्राप्तम् ?–एकत्वात् कर्त्तुः, अनेकत्वाच्च पदार्थानाम्, अवश्यंभाविनि क्रमे लाघवात् प्रयोग आशुभावाच्च अनियमः–इत्येवं प्राप्ते ब्रूमः

"श्रुतिलक्षणम् आनुपूर्व्यं तत्प्रमाणत्वात्–इति श्रुतिर्ग्रहणम् अक्षराणां, तन्निमित्तं यस्य क्रमस्य, स साधु क्रमः । श्रुतिप्रमाणका हि वैदिका अर्थाः नैषामन्यत् प्रमाणमस्ति (१।१।२सू०)–इत्युक्तम् । किम् इह उदाहरणम् ? । सत्रे दीक्षाक्रमं विधत्ते, 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारं ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्द्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारम् उद्गातुः, मैत्रावरुणं होतुः, ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, अग्नीध्रं ब्रह्मणः, प्रतिहर्त्तारम् उद्गातुः. अच्छावाकं होतुः,ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः, ततस्तमन्यो ब्राह्मणो सुब्रह्मण्योदीक्षयति, ब्रह्मचारी वा आचार्य प्रेषितः–इति । अनियमेन क्रमः कर्त्तव्ये, यथा पूर्वः पक्षः, यथा तर्हि सिद्धान्तः, एष एव क्रमः कर्त्तव्यः–इति ।

तत्र आह, अन्याय्यं श्रुतिवचनम्–इति । उच्यते,-किमयं न साधुः ? न न साधुः–इति ब्रूमः । न्याय्यं तर्हि न ब्रूमः,–न साधुः क्रमः–इति, किं तर्हि ?–उक्तस्य पुनर्वचनमन्याय्यम्–इति । उच्यते,–साधोर्वचनं बहुशोऽप्युच्यमानं न्याय्यमेव, असाधोस्तु सकृदप्यन्याय्यम् । आह सकृद्वचनेन ज्ञातस्य पुनर्वचने न प्रयोजनम् इति, उच्यते भवति अविस्मरणमपि प्रयोजनम् इत्युक्तम् । वृत्तिकारेण तत् कार्यम्,–इति चेत् । सूत्रकारस्याप्यविशेषो वृत्तिकारेण । (१म वर्णकम्)

अथवा अर्थान्तरमेव इदम् तत्र हि अन्य एव संशयो विचारो निर्णयश्च,-श्रुतिप्रमाणकोधर्मः अन्यप्रमाणकोवा? इति संशयः । प्रत्यक्षादीनाम् अधिगम्यनिमित्तत्वात् न तत्प्रमाणकः, अतीन्द्रियत्वाच्चोदनालक्षणः–इति विचारः । चोदनालक्षणः एव-इति निर्णयः । इह तु सिद्धे तत्प्रमाण्ये व्यवहारक्रमस्य साधुत्वावधारणम्(।२य वर्णकम्)

अथ वा श्रुतिविचारोऽयं-किं पदार्थाः कर्त्तव्याः? इति विधानम् ? किं वा क्रमो विधीयते ?-इति । अनेकार्थविधानानुपपत्तेः क्रमे अनुवादः, पदार्थानां विधिः, अवदानवाक्येष्विव पादार्थविधानं श्रुत्या, क्रमविधानं वाक्येन, तस्मात् न क्रमो विधीयते-इयि पूर्वः पक्षः । ननु अवदानवाक्येषु क्रमो विधीयते सत्यं विधीयते, पाठेन, न श्रुत्या, ये ऋत्विजस्ते यजमानाः "इति तु दीक्षायाः प्राप्तत्वात् क्रमविधानार्था श्रुतिः-इति सिद्धान्तः । तस्मात् अपुनरुक्तम्-इति" (३म वर्णकम्) । भाष्यम्

"अर्थाच्च" २सू०

"किम् एष एव उत्सर्गः ? उत न, सर्वत्र श्रुतिवशेनैव भवितुमर्हति-इति उक्तं हि,–"चोदनालक्षणोऽर्थोधर्मः"

एवं प्राप्ते ब्रूमः-अर्थाच्च (सामर्थ्याच्च) क्रमो विधीयते-इति, गुणभूतोहि पदार्थानां क्रमोभवति, यश्च यस्य निर्वर्त्यमानस्य उपकरोति, स तस्य गुणभूतः, यस्मिंश्चाश्रीयमाणे पदार्थः एव न सम्पद्यते,न स गुणभूतः, विनापि

तेन, न वैगुण्यम्। एवं प्रयत्नक्रमस्य गुणभावो यत्र, तत्र अर्थेन स एवाश्रयितव्यः। यथा "जाते वरं ददाति, जातमञ्जलिना गृह्णाति जातमभिप्राणिति"-इति अर्थात् पूर्वमभिप्राणितव्यम् ततः अञ्जलिना गृहीतव्यः, ततो वरो देयः,-इति, तथा विमोकः पूर्वमाम्नातः, पश्चात्तद्योगः, अर्थात् विपरीतः कार्यः। याज्यानुवाक्ये तु विपर्ययेण आम्नाते, विपर्ययेण कर्त्तव्ये, न अत्र पाठक्रमोऽभीयते, यतो देवतोपलक्षणार्थाऽनुवाक्या, प्रदानार्था याज्या, "अग्निहोत्रम् जुहोति"-इति पूर्वमाम्नातम्, "ओदनं पचति"-इति पश्चात्, असम्भवात् पूर्वमोदनः पक्तव्यः। प्रैषप्रैषार्थौ तु विपर्ययेण आम्नातौ, तौ च विपर्य्ययेण कर्त्तव्यौ" भाष्यम्

"अनियमोऽन्यत्र" ३ सू०

अन्यस्मिन् विषये क्रमस्य नियमो नास्ति, यथा दर्शपूर्णमासयोर्याजमानानां प्रयाजानुमन्त्रणादीनाम् नानाशाखान्तरसमाम्नातानाम् "वसन्तमृतूनाम् प्रीणामि"-इत्येवमादीनाम्, 'एको मम,-इत्येवमादीनाञ्च" भा०

"क्रमेण वा नियामकता क्रत्वेकत्वे तद्गुणत्वात्" ४ सू०

"दर्शपूर्णमासयोराम्नातम्-'समिधो यजति तनूनपातं यजति इड़ो यजति बर्हिर्यजति स्वाहाकारं यजति"-इति। तत्र संशयः-किम् अनियतेनैव क्रमेण एषाम् अनुष्ठानम्? उत यः पाठक्रमः स एव नियम्येत?-इति। किंप्राप्तम्?-नियमकारिणः शास्त्रस्याभावात् अनियमः-इति। एवं प्राप्ते ब्रूमः-क्रमेण, एव नियम्येत एकस्मिन् क्रतौ-इति। कुतः?। तद्गुणत्वात्, तद्गुणत्वं हि गम्यते पदार्थानाम्, यथा, स्नायात् अनुलिम्पेत्, भुञ्जीत-इति च क्रमेण अनुष्ठानम् अवगम्यते, वाक्यात् पदार्थानाम्, यथा चादृष्टार्थेषु उपदिश्यमानेषु, कश्चित् ब्रूयात्,-'देवाय धूपो देयः पुष्पाण्यवकारितव्यानि चन्दनेनानुलेप्तव्यः उपहारोऽस्मै उपहर्त्तव्यः" एवं कृते देवस्तुष्यति,-इति, तमन्यः प्रतिब्रूते, नैतदेवं, न प्रथमं धूपो दातव्यः, प्रथमं पुष्पाणि अवकारितव्यानि-इति, एवं मन्यते-धूपदानस्य प्राथम्यम् अनेन उक्तम्-इति। तस्मात् वाचनिक एषाम् एष क्रमः-इति" भा०

"अशाब्द इति चेत्, स्वाहाकारशब्दत्वात्। ५ सू०

इति चेत्, पश्यसि, "अथैवं गम्यमाने अशाब्दः एव क्रमः। कथं? पदार्थपूर्वको वाक्यार्थः पदेभ्यश्च पदार्था एव अवगम्यन्ते न क्रमः। स्यात् एतदेवं, यदि पदार्थानाम् समूहस्य वाचकं प्रत्यायकम् अर्थस्य स्यात्, न तु समुदायः प्रत्यायकः-इत्युक्तं "तद्भूतानां क्रियार्थेन समाम्नायः" (१।१।२५ अ०)-इत्यत्र। तस्मात् क्रमस्य वाचकशब्दाभावात् व्यामोह एष क्रमोऽवगम्यते। एवं चापूर्वसन्निरनुग्रहीष्यते, इतरथा सापि विप्रलप्स्येत वटीयन्त्र इव। दर्शयिष्यति च,-"हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः, अथ वक्षसः,-इति। यदि नियामकः पाठक्रमः ततो न विधातव्यमेतत् नियामके हि पाठक्रमे पाठक्रमात् एव प्राप्नुयात्" भा०

"अर्थकृते वानुमानं स्यात्, क्रत्वेकत्वे परार्थत्वात् स्वेन त्वर्थेन सम्बन्धः, तस्मात्स्वशब्दमुच्येत" ६ सू०

"एकस्मिन् क्रतावेकत्वात् क्रतोः, अनेकस्मिन् पदार्थेऽर्थकृतत्वात् क्रमस्य, तत्र एष एव क्रमो नियम्येतानुमानेन। कुतः? परार्थत्वात् वेदस्य, परार्थो हि वेदो यद्यत् अनेन शक्यते कर्त्तुम्, तस्मै-तस्मै प्रयोजनाय एव समाम्नायते, शक्यते च अनेन पदार्थो विधातुम्, शक्यते च क्रियाकाले प्रतिपत्तुम्। तस्मात् वेदः पदार्थांश्च विधातुम् उपादेयः, क्रियाकाले च प्रतिपत्तुम्, न शक्यते विशेषः-विधातुमयं समाम्नायते, न प्रतिपत्तुम्-इति, अवस्यमाने विशेषे उभयार्थम् उपादीयते-इति गम्यते। प्रतिपत्तुं च अनेन क्रमेण शक्यते, नान्येन, अत एव च कृत्वा पाठक्रमापचारे, विनष्ट-इत्युच्यते, इतरथा हि यत् यस्य प्रयोजनं, तस्मिन् निर्वर्त्यमाने एव किं नष्टं स्यात्, अदृष्टं कल्प्येत, तच्च अन्याय्यं दृष्टे सति। तस्मात् स्वशब्दः क्रमः-य एव पदार्थानां वाचकः शब्दः स एव क्रमस्यापि" भा०

"तथा चान्यार्थदर्शनम्" ७ सू०

"एवं च अन्यार्थं दर्शयति,-'व्यत्यस्तमृतव्या उपदधाति"। "व्यत्यस्तं षोड़शिनं शंसति"। "आश्विनो दशमो गृह्यते तं तृतीयं जुहोति"-इति, यदि अनियमेन उपधानं शंसनं च, व्यत्यस्तवचनम् अनर्थकं स्यात्, न हि कथञ्चित् अव्यत्यासः-इति। तथा आश्विनस्य तृतीयस्य होमानुवादो न अवकल्पेत, यदि पाठक्रमेण नियमः-इति। तथा-'अभिचरता प्रतिलोमं होतव्यम्" प्राणानेव अस्य प्रतीचः प्रतियौति"-इति क्वचित् प्रतिलोमं विदधदनुलोमं दर्शयति, तदुपपद्यते, यदि पाठक्रमेण प्रयोगः, इतरथा, सर्वमनुलोमं स्यात् प्रतिलोमदर्शनं नोपपद्येत। तथा 'चतुर्होतृपयोः प्रतिक्रमानयति"-इति, उक्तं सति,

'अतिहायेडो बर्हिः प्रतिसमानयति,—इति उच्यते तेन बर्हिषः चतुर्थतां दर्शयति, सा पाठक्रमे नियामकोऽत्र कल्प्यते" भा॰

"प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्" ८सू॰

"वाजपेये "सप्तदश प्राजापत्यान् पशून् आलभते"—इति श्रूयते। तेषु पशुषु चोदकप्राप्ताःप्रोक्षणादयो धर्माः, तत्र प्रथमः पदार्थो यतः कुतश्चिदारब्धव्यः द्वितीयादिषु भवति संशयः,— किं तत एव द्वितीयोऽपि पदार्थ आरब्धव्यः ? उत द्वितीयादिषु अनियमः?—इति। किं तावत् प्राप्तम्? नियमकारिणः शास्त्रस्याभावात् अनियमः-इति। एवं प्राप्ते, ब्रूमः,—यतः पूर्व आरब्धः, ततएव द्वितीयादयोऽपि पदार्था आरब्धव्याः—इति। कुतः एतत्?। 'तदुपक्रमात्' सर्वे हि पदार्था प्रधानकालात् न विप्रकृष्टव्याः, प्रधानं हि चिकीर्षितं, कृतं वा तेषां निमित्त, सहवचनं हि भवति"-'पदार्थैः सह प्रधानं कर्त्तव्यम्'—इति। बहुपदार्थसमाम्नानात्तु अवश्यम्भावी विप्रकर्षः, तथापि तु यावद्भिर्नाव्यवहितः शक्यः पदार्थः कर्तुम्, तावद्भिर्व्यवधानम् अवश्यं कर्त्तव्यम्। ततोऽभ्यधिकेन न व्यवधातव्यम्—इति, यदि द्वितीयं पदार्थमन्यत आरभेत, ततोऽधिकैरपि व्यवदध्यात्, तथा प्रयोगवचनं बाधेत!। 'ननु तथा सति कश्चिदल्पैर्व्यवहितो भविष्यति'। उच्यते,—अननुमतानां व्यवधायकानां त्यागेन कश्चित् अभ्यधिको गुणो भवति—इति तस्मात् यतः पूर्वपदार्थ आरब्धः तत एव उत्तर आरम्भणीयः—इति" भा॰

"सर्वमिति चेत्" ९सू॰

"इति चेत् पश्यसि, प्रधानाविप्रकर्षेण प्रयोगवचनानुग्रहः—इति, सर्वं तर्हि—गुणकाण्डम् एकस्मिन् अपवर्जयितव्यं, यथा सौर्यादिषु" भा॰।

"नाकृतत्वात्" १०सू॰।

"नैतदेवम्, सहप्रयोगे एवं ह न अनुष्ठितः स्यात्"भा॰।

"क्रत्वन्तरवदिति चेत्"। ११सू॰

"अथ यदुक्तं,—यथा क्रत्वन्तरेषु सौर्यादिषु—इति, तत् परिहर्त्तव्यम्" भा॰

"नासमवायात्" १२सू॰

"न तेषामर्थात् क्रमः प्राप्नोति, यो नियम्येत, अङ्गाश्रयो हि नियमो भवितुमर्हति, अनङ्गसमाश्रयस्य स्वयमङ्गता कल्प्येत" भा॰

"स्थानाच्चोत्पत्तिसंयोगात्" १३ सू॰

"एकविंशेन अतिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकामम्" इत्येवमादि श्रूयते। तत्र आगमेन सङ्ख्यापूरणम्—इति वक्ष्यते। तत्र आगमे क्रियमाणे, किम् अनियमजक्रमाः सर्वा स्तुत आगमयितव्याः ? उत काण्डक्रमेभ्यः ? इति। किं प्राप्तम् ?—अनियमेन—इति। कुतः ? अतिरात्रे त्रिणवादिशब्दार्थैनैताः प्राप्नुवन्ति, तत्र एतासां प्राप्नुवतीनाम् पाठक्रमो नास्ति—इति। एवं प्राप्ते उच्यते,—यदासां सामाम्नाये स्थानं, तेनैता अत्र नियम्यन्ते याः पूर्वं समाम्नाताः, ताः पूर्वमेव प्रयोक्तव्याः, आनुपूर्व्यस्य हि दृष्टमेतत् प्रयोजनम्, यदुत्तरस्मरणं, तदपि चिकीर्षितमेव—इति। त्रिणवादिशब्दैः अतिरात्रे यौगपद्येन आसां प्राप्तेः पाठक्रमस्य अविषयः—इति अधिकरणान्तरम्—इति भवति मतिः। समाम्नायपाठक्रमादेव अत्र नियमः—इति पुनरुक्ततागम्यते—इति अन्यथा वर्ण्यते" १मव॰

"साद्यस्क्रे श्रूयते,—सह पशूनालभते,—इति अत्र एषोऽर्थः समधिगतः"—सवनीयकाले त्रयाणाम् आलम्भः—इति। अथ अत्र पाठक्रमात्, किम् अग्नीषोमीयः पूर्वम् आलब्धव्यः ? उत स्थानक्रमात् पूर्वं सवनीयः इति। कुतः ?। पाठक्रमात्। एवं प्राप्ते ब्रूमः,—सवनीयः पूर्वं, "स्थानात्, यदि पूर्वम् अग्निषोमीयः स्यात्, सवनीय स्थानं व्याहन्येत! "आश्विनं गृहीत्वा त्रिवृता यूपं परिवीय" इति। "ननु इतरथापि पाठक्रमोबाध्येत, बाध्यतां, तस्य हि प्रतिषेधार्थः सहशब्दः समाम्नातः, अप्रतिषिद्धं च आश्विनग्रहस्थानम्, तन्न बाधितव्यम्" (२वर्णकम्) भा॰

"मुख्यक्रमेण वाङ्गानां तदर्थत्वात्" १४सू॰

"सारस्वतौ भवतः एतत् वै द्विदैवत्यं मिथुनम्"—इति श्रूयते। तत्र सन्देहः,—किं स्त्रीदैवत्यस्य प्रथमं धर्माः ? उत पुंदैवत्यस्य ?—इति। नियमकारिणः शास्त्रस्य अभावात् अनियमः,—इति प्राप्ते ब्रूमः,—मुख्यक्रमेण वा नियमः स्यात्—इति स्त्रीदैवत्यस्य हि पूर्वं याज्यानुवाक्ययोः समाम्नानं, "प्रणो देवी सरस्वती"-इति। तस्मात् स्त्रीदैवत्यस्य पूर्वं प्रदानेन भवितव्यम्, तस्मात् स्त्रीदैवत्यस्य पूर्वं धर्माः कार्याः, तथा हि प्रधानकालता भवति अङ्गानाम्, इतरथा, यैः पदार्थैर्व्यवधानं सामर्थ्यात् अनुज्ञातं तेभ्योऽधिकैरपि व्यवधानं स्यात्")। भा॰

"प्रकृतौ तु स्वशब्दत्वात् यथाक्रमं प्रतीयेत" १५सू॰

"दर्शपूर्णमासयोः पूर्वमौषधधर्माः समाम्नाताः, ततः आज्यस्य। तत्र सन्देहः,—किम् अग्नीषोमीयधर्माणाम्, मुख्यक्रमेण पूर्वम् आज्यस्य धर्माः कर्त्तव्याः! उत यथापाठम् ?-इति। मुख्यक्रमानुग्रहेण आज्यस्य पूर्वम्,-इति प्राप्ते ब्रूमः,-प्रकृतौ यथापाठं प्रतीयेन, स्वशब्दो हि तेषां पाठक्रमः, सः अन्यथा क्रियमाणो बाधितः स्यात्, सकृत्वस्य पुनरुपसङ्ग्राहकः प्रयोगवचनः स्वक्रमेण पदार्थे संग्राहयकाणो न बाधितो भविष्यति। अपि च पाठक्रमे स्वशब्दः,—"स्वाध्यायोऽध्येतव्यः" मुख्यक्रमेण प्रयोगवचनैकवाक्यता सूक्ष्मा" भा०

"मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मात् उत्पत्तिदेशः सः" १६ सू०

"दर्शपूर्णमासयोः,आग्नेयस्य पूर्वं मन्त्रपाठः, उत्तरो ब्राह्मणस्य। तत्र सन्देहः-कतमः पाठो बलीयान्?-इति। उच्यते,-अनियमः, नियमकारिणः शास्त्रस्य अभावात्-इति।

एवं प्राप्ते ब्रूमः,-मन्त्रपाठो बलीयान्। कुतः ? प्रयोगरूपसामर्थ्यात्'—प्रयोगाय मन्त्रस्य रूपसामर्थ्यं, तदस्य सामर्थ्यं येन मन्त्रः प्रयुज्यते, तस्य च प्रयुज्यमानस्य क्रमो दृष्टाय भवति। "ननु च ब्राह्मणपाठस्य अपि तदेव प्रयोजनम्'। उच्यते-उत्पत्तिदेशः सः'-अपरमपि तस्य प्रयोजनं कर्मोत्पत्त्यर्थं भविष्यति" भा०

"तद्वचनाद्विकृतौ यथाप्रधानं स्यात्" १७ सू०

"अस्ति अध्वरकल्पा नामेष्टिः,—'आग्नावैष्णवम् एकादशकपालं निर्वपेत्, सरस्वती आज्यभागा स्यात् वार्हस्पत्यश्चरुः'—इति। तत्र सन्देहः—किम् आग्नेयविकारस्य वार्हस्पत्यस्य पूर्वं धर्माः कार्य्याः, चोदको बलवत्तरः, प्रयोगवचनात्, उत उपांशुयागविकारस्य प्रयोगवचनो बलवत्तरः, चोदकात् ?—इति। किम् प्राप्तम् ?—'विकृतौ' अस्यां 'यथाप्रधानं स्यात्' 'तद्वचनात्'—तेषां साक्षाद्वचनक्रमो विकृतौ, तेन सन्निहितानाम् उपसंहारकः प्रयोगवचनो हि प्रत्यक्षः, तद्धर्माणां च आनुमानिकः चोदकेन हि स प्राप्तः। तस्मात् प्रत्यक्षः प्रयोगवचनो बलवत्तरः, तेन चोदक आनुमानिको बाध्यते भा०

"विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति" १८सू०

मुख्याङ्गक्रम—विप्रतिपत्तौ वा यथा प्रकृतौ, तथैव विकृतौ भवितुमर्हति—इति। कुतः ?। 'प्रकृत्यन्वयात्' यादृशाः प्रकृतौ धर्माः, तादृशा एव विकृतौ भवितुमर्हन्ति—इति, मुख्यक्रमेण क्रियमाणा न प्रकृतिवत् कृताः स्युः ?। चोदको हि प्रयोगवचनात् बलवत्तरः, स हि उत्पादयति प्रापयति च। प्रापितान् अभिसमीक्ष्य प्रयोगवचन उपसंहरति, स प्राप्तेषु उत्पन्नः प्राप्तिनिमित्तक उत्तरकालं पूर्वप्राप्तं न बाधितुमर्हति चोदकं, प्रत्यक्षोऽपि सन्, बहिरङ्गत्वात्, यथाप्राप्तानेवोपसंहरिष्यति। तस्मात् पूर्वं वार्हस्पत्यस्य धर्माः. तत आज्यस्य" भा०।

एतच्च स्पष्टतया तत्त्वबोधिन्यां दर्शितं यथा

"अग्निहोत्रं जुहोति यवागूं पचतीत्यादौ अनुष्ठेयानामनुष्ठानक्रमनियमोऽस्ति नवेति। तत्र न क्रमनियमः तत्प्रापकप्रमाणाभावादिति प्राप्ते क्रमनियमप्रापकाण्याह श्रुत्यर्थपठनस्थानमुख्यप्रावर्त्तिकाः क्रमाः। १श्रुतिरानन्तर्य्यबोधकमथशब्दक्त्वाप्रत्ययादिकम्। २अर्थः प्रयोजनं,३पठनं पाठक्रमः ४स्थानं स्वस्थानस्थितिः, यथा आश्विनक्रत्वहसामीप्यं सवनीयपश्वोः,। स्थानं स्वोत्पत्तिवाक्यमिति केचित्। ५मुख्यं प्रधानं कर्म्म। ६प्रवृत्तिः प्रवर्त्तनक्रमः। प्रावर्त्तिकेति तद्धितेन प्रवृत्तिगम्यत्वाभिधायकेन श्रुत्यादिपदानां श्रुतिगम्यत्वादिपरत्वं सूचितं तथा च श्रुत्यादीनि क्रमप्रापकाणीति। अत्र श्रुत्यादीनां क्रमज्ञापकताबोधकसूत्राणि बहूनि उक्तानि-तानि च ग्रन्थगौरवभयात् निखिलप्रमाणसूत्रार्थविवेचनेन व्यक्तीभविष्यत्त्वाच्च न लिखितानि। तत्र श्रुतितोयथा "द्वादशाहसत्रयागे "अध्वर्य्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति तत उद्गातारं ततो होतारमिति" आनन्तर्य्यार्थकक्त्वाप्रत्ययेन क्रमोबोध्यते। यथा वा "हृदयस्याग्रेऽवद्यति, अथ जिह्वायः अथ वक्षसः" इति अथशब्देन। अयं च क्रमोऽन्येभ्यो बलवान् शब्दलभ्यत्वात्। एवमेषां पूर्व्वत उत्तरोत्तरं दुर्ब्बलं बोध्यम्। नन्वथादि शब्दादुपस्थितस्यापि क्रमस्य धात्वर्थरूपक्रियात्वाऽभावेन कथं विधेयत्वं तदिदमुक्तं प्रापकप्रमाणाभावादिति चेदुच्यते यथा दध्ना जुहोतीत्यादौ अक्रियारूपं दधिद्रव्यं क्रियाविशेषणं सद्विधीयते दधिसाधनकं होमं कुर्य्यादिति तथा इदमनेन क्रमेण कर्त्तव्यमिति क्रियाविशेषणतया क्रमोविधीयते। तथा च सूत्रम् "श्रुतिलक्षणमानुपूर्व्व्यं तत्प्रधानत्वात्" आनुपूर्व्यं श्रुतिगम्यं विधिगम्यं तस्य क्रमस्य प्रधानत्वात् दध्यादिवत् क्रियाविशेषणत्वेन विधेयत्वात। तत्र कचित् श्रुतशब्दादथादितः कचिन्नार्थादितोऽनुमानादिति विशेषः। इत्यञ्च श्रुतिगम्यं श्रुति

शब्दलभ्यमित्यर्थः सूत्रबोध्य इति भावः । 'श्रुतिगम्य' श्रुतिलभ्यमानुपूर्व्यं ग्राह्यमिति शेषः । "अथ अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति" इत्यादौ दीक्षैव विधीयते श्रुतितस्तद्विध्यवगमात् क्रमस्तु वाक्यार्थो न विधेय इति । तद्विध्यवगमाभावात् तदुक्तं "वाक्यार्थो विधिरन्याय्यः श्रुत्यर्थविधिसम्भवे । तस्माद्दीक्षाविधिः पाठाद्दीक्षाणां प्राप्यते क्रमः" । उच्यते । द्वादशाहसत्रे य एव यजमानास्तएव ऋत्विजः" इति ब्रह्मादीनां सर्वेषामृत्विजां यजमानत्वेन यजमानदीक्षां विधिप्राप्तामनूद्य अनेनाप्राप्तक्रमएव विधीयते । तदुक्तं "सर्वेषां यजमानत्वात् दीक्षप्राप्तेरचोदनात् । क्रमस्तु नान्यतः प्राप्त इति सोऽत्र विधीयते" ।

"अर्थाच्चेति" सूत्रम् । २अर्थात् यथाग्निहोत्रं जुहोति यवागूं पचतीत्यत्र यवागूपाकस्य होमः प्रयोजनं तस्य होमानन्तरपाके सति न सम्भवति होमोऽपि च यवागूं विना न निष्पद्यत इति पाकानन्तरं होमः । अतएव गृहपत्यादिदीक्षासु पाठप्राप्तक्रमस्यैवादृतत्वात् इहापि होमपाकयोः पाठप्राप्तक्रमोग्राह्य इति निरस्तं पाठक्रमग्रहणे विहितार्थानिष्पत्तेः । न च जुहोतीत्यस्य सामान्यप्राप्ताज्यादिद्रव्यकत्वमिति द्रव्यान्तरेण होमः यवागूपाकस्य च ऋत्विग्भक्षादिरूपप्रयोजनान्तरं कल्पनीयम् अथवा यवागूमित्यस्य जुहोतीत्यनेनान्वयात् पचतीत्यस्य कर्म्मान्तरमध्याहार्य्यमिति वाच्यं तत्कल्पकाभावात् गौरवात् विलम्बोपस्थितेः । द्वितीये यवाग्वा होमद्रव्यत्वाङ्गीकारेणार्थक्रमस्याभ्युपगमाच्च यवागूं जुहोतीत्यन्वये पाकं विना यवाग्वा असम्भवेन पाकस्यावश्यकत्वाच्च । अत एवार्थक्रमः पाठक्रमाद्बलवान् जुहोतीत्यनेनाकाङ्क्षितद्रव्यान्तरसाध्यहविरादिना होमनिश्चयात् तत्र प्रवृत्तिः यवागूपाकस्य च प्रयोजनान्तरमवगत्य तदर्थं पाके प्रवृत्तिरिति तादृशावगमस्य कल्पनासापेक्षत्वेन विलम्बितत्वात् आश्रुतिवशात् यवागूमित्यनेन जुहोतीत्यस्यान्वयात् यवागूपाकस्य होमप्रयोजनकत्वात्तस्य झटित्यवगमात् । अर्थात् युक्तेरिति कश्चित् तन्न । पठनस्थानादीनामपि युक्तिलभ्यत्वेन विभागानुपपत्तेः । अतएव प्रयोजनवशात्तु नियम इति शास्त्रदीपिका । माधवाचार्य्यस्तु "यवागूं पचति यवाग्वाग्निहोत्रं जुहोतीति श्रुतिमभिधाय तृतीयया यवाग्वा होमसाधनत्वमवगम्यत इत्याह ।

३पठनाद्यथा "समिधोयजति तनूनपातं यजतीत्यादिषु दर्शपौर्णमासाङ्गप्रयाजादिषु क्रमपठितानां क्रमेणानुष्ठानम् । नन्वत्र गृहपत्यादिदीक्षायामिव क्रमबोधकशब्दाभावात् यवागूपाकस्येव साध्याभावाच्च कथं क्रमनियम इति चेत् न, तथैव लोकप्रतिपत्तेः । तथा च सूत्रं "क्रमेण वानियम्येत क्रत्वेकत्वे तद्गुणत्वात्" । तदुक्तं "यथापाठमनुष्ठानं तथैव प्रतिपत्तितः । स्मृतिप्रयोगवेलायां वाक्यैरेव च कर्म्मणाम्" । आसनं स्वागतमित्यादिषु क्रमपाठस्थेषु आसनादिषु गन्धपुष्पादिषु तथैवानुष्ठानं लौकिकाः प्रतिपद्यन्ते । अयं स्थानादिक्रमतोऽबलवान् तदपेक्षया शीघ्रोपस्थितेः ।

४स्थानाद्यथा । साद्यस्क्रनामकः कश्चिद्यागविशेषः ज्योतिष्टोमविकृतिः । तत्र श्रूयते "सह पशूनालभते" इति तत्र च प्रकृतियागज्योतिष्टोमे अग्नीषोमीयपशुरावसथ्यपूर्व्वदिने आलभ्यते, सवनीयः पशुः सुत्यादिने प्रातःसवने आश्विनग्रहग्रहणादूर्द्ध्वमालभ्यते तथा च श्रुतिः "आश्विनग्रहं गृहीत्वा त्रिवृता यूपं परिवीय सवनीयमाग्नेयं पशुमुपाकरोतीति" अनुबन्ध्यपशुरावसथ्यादूर्द्ध्वमालभ्यते विकृतौ साद्यस्क्रे त्रयोऽपि पशवः सहालभ्यन्ते सहालभनमेकस्मिन् सवनीयस्थाने सुत्यादिने आलभनं तत्र च प्रकृतौ ज्योतिष्टोमे अग्नीषोमीयस्य प्रथममुपाकरणं ततोविकृतावपि अग्नीषोमीयस्य प्रथममुपाकरणमिति प्राप्ते "स्थानाच्चोत्पत्तिसंयोगात्" उत्पत्तिसंयोगात् । उत्पत्तिवाक्यात् प्राप्तात् स्थानात् उपाकरणस्थाने प्रथमं सवनीयपशोरालभनीयत्वेन सवनीयपशोः स्थानप्राथम्यात् । तथाचोक्तं सह पशुना आहतपरिपाट्या पशुना सह कार्य्यः" अयम्भावः सवनीयपशोः स्थानमपि ग्रहसमीपम् अन्ययोस्तु अन्यत्, तत्र प्रकृतौ "आश्विनग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयपशुमुपाकरोतीति" श्रूयते त्रिवृता कुशमेखलया त्रिरावृत्त्या परिवीय संवेष्ट्य इत्यर्थः । अत्र प्रकृतौ तया श्रुतेस्तदतिदेशात् विकृतावपि सवनीयपशूपाकरणात् पूर्व्वमाश्विनग्रहो ग्राह्यः । ततश्च गृहीते तस्मिन् समीपे स्वस्थानस्थितस्य सवनीयपशोरेव प्रथममुपस्थितिस्तस्यैव प्रथममुपाकरणं न तु प्रकृतौ प्रथममुपाकरणमग्नीषोमीयपशोः, तस्य प्रथममनुपस्थितेः इतरयोः सहोपाकरणानुरोधात् स्वस्थानात् सवनीयपशोः स्थानादितरयोरपि स्वस्थानभ्रष्टयोः ततः

प्रथमसुपस्थापकाभावात् प्रकृतिदृष्टक्रमेणालभनम् । तदुक्तम् "आश्विनग्रहणेनासौ पर्य्युपास्थाप्यते यतः । इतरस्त्वितः स्थानान्नोपस्थाप्येत केनचित् । तयोस्तु प्रकृतौ दृष्टः क्रमोग्राह्योमनीषिभिः" । यत्तु स्थानक्रमो यथा एकोद्दिष्टे पार्व्वणधर्म्मातिदेशात् कुशासनदानाद्यनुष्ठानं तत्र पार्व्वणे यस्मिन् स्थाने यत् क्रियते तस्य एकोद्दिष्टेऽपि तथेत्युदीचग्रेनोक्तं तन्न शास्त्रदीपिकादिमीमांसानिबन्धाननादृत्य स्वकपोलरचितत्वात् स्थानपदार्थमुख्यार्थत्यागात् मुख्यार्थत्वे स्थानस्यैव लाभेन क्रमालाभात् "प्रकृतिवद्विकृतिरिति न्यायेनैव तल्लाभात् स्थानक्रमानुपयोगाच्चेत्यलमाग्रहेण । मुख्यक्रमादयं बलवान् ।

५ मुख्याद्यथा । चित्रयागे सप्तहविषां मध्ये चतुर्थपञ्चमावित्यमाम्नायेते "सारस्वतौ भवतः" इति एतद्वैदेवत्यं मिथुनमिति" वाक्यशेषात् स्त्रीपुंदेवत्यं यागद्वयं विहितं तच्च सरस्वती च सरस्वांश्चेति समासे "पुमान् स्त्रिया" इति सूत्रेणैकशेषात् देवतार्थेन प्रत्ययाल्लभ्यते तयोश्च यागयोर्निर्व्वापादयो धर्म्मा विधिप्राप्ताः तत्र स्त्रीयागस्य पुंयागस्य वा प्रथमं निर्वापः कार्य्य इति संशयः । अत्रस्तुत्यर्थपठनस्थानप्रवृत्तीनां अन्यतमस्यापि प्रक्रमाभावादनियमात् स्वेच्छया कर्त्तव्य इति प्राप्ते आह "मुख्यक्रमेण वाङ्गानां तदर्थत्वात्" सू० । मुख्यस्य प्रधानस्य क्रमेणाङ्गानां क्रमोग्राह्यः तदर्थत्वात् अङ्गानां प्रधानार्थत्वात् प्रधानोद्देश्यकप्रवृत्तिसाधनत्वादिति यावत् हौत्रकाण्डे याज्यानुवाक्ये "प्रणोदेवी सरस्वतीति" पूर्वमाम्नातं "पीपिवांसः सरस्वतः" इति पश्चादाम्नातमिति याज्यानुवाक्यापाठक्रमात् स्त्रीदेवताकस्य होमस्य प्रथममनुष्ठानं पश्चाच्च पुंदेवताकस्यानुष्ठानं प्रतीयते अतस्तदङ्गनिर्वापादीनामपि तथैव पौर्वापर्य्यं युक्तमिति भावः । नन्वत्र येन क्रमेण याज्यानुवाक्ययोः प्रवृत्तिस्तेनैव निर्व्वापादीनामपीति प्रावृत्तिकनियमसम्भवे किमिति मुख्यक्रमादपि नियमः एवाश्रयतीति चेदुच्यते दर्शपौर्णमासयोः सान्नाय्यस्य दधिदुग्धहविषोर्धर्म्माः शाखाप्रहरणादयः पूर्वं प्रवर्त्तन्ते तत्राग्नेयस्य धर्म्मा निर्वापादयः याज्यानुवाक्ययोस्तु पाठवशात् प्रथममाग्नेयहोमः पश्चात् सान्नाय्यस्येति विपरीता प्रवृत्तिः तत्र किं मुख्यक्रमात् प्रथममाग्नेयस्याभिघारणादित्रयाणां मध्ये आग्नेयस्य प्रथमं प्रवृत्तिः? किंवा भूतभाविप्रवृत्तिद्वयवशादनियम इति प्राप्ते मुख्यक्रमाभिधानम् । तस्मात्तत्र मुख्यक्रमादाग्नेयस्य प्रथममभिघारणम् एवञ्च सति अङ्गप्रधानयोर्यावदनुज्ञातमेव व्यवधानं स्यादितरथा तु पश्चाद् भाविप्रधानस्य प्रथमं क्रियमाणमङ्गं प्रधानेनात्यन्तव्यवहितं स्यान्मुख्यक्रमेण नियमे । इयांश्च विशेषः मुख्यक्रमे प्रधानप्रवृत्तिरङ्गानां नियमकारणं, प्रवृत्तिक्रमे त्वङ्गानां मिथः प्रत्यासत्तिरिति ।

६ प्रवृत्तेर्यथा वाजपेये "सप्तदश प्राजापत्यान् पशूनालभेतेति" श्रूयते तेषाञ्चोपाकरणनियोजनादयः संस्कारा विहिता उपाकरणं प्रोक्षणं नियोजनं यूपेबन्धन तत्र चैदृशे पशावुपक्रमः ईदृशे च समाप्तिरिति नियमकारिणः शास्त्रस्याभावात् ऐच्छिकेन क्रमेणोपाकरणसंस्कारः उत उपकृतानाञ्च यूपे नियोजनसंस्कारः पश्चात् कर्त्तव्यः? इति तत्रापि नियमकारिणां स्तुत्यर्थपठनादीनामभावान्नास्ति क्रमनियमः ऐच्छिक एव क्रम इति प्राप्ते आह "प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात्" सू० तुल्यकालानामेककाल प्रवृत्तानां गुणानामङ्गानामुपाकरणादीनां प्रवृत्त्या उपाकरणप्रथमसंस्कारे स्वेच्छातः प्रवृत्तेः तत्क्रमेण तदुपक्रमात् प्रथमोपाकृतपशुक्रमात् प्रवृत्तिक्रमोग्राह्यः । अत्र ब्रूमः स्वेच्छातोयस्य पशोः प्रथममुपाकरणं क्रियते तस्यैव प्रथमनियोजनादि कार्य्यं, तदनन्तरं तदुत्तरोपाकृतस्य नियोजनमेवेत्यपरापरस्यापीत्यर्थः । प्रथमगुणारम्भत्यागे कारणाभावात् । अयमभिप्रायः प्रावर्त्तिकक्रमस्वीकारे प्रथमपशावुपाकरणनियोजनयोः प्रथमद्वितीयसंस्कारयोर्मध्ये पश्वन्तरेष्वनुष्ठितैरुपाकरणैः षोडशभिरेव व्यवधानं भवति तच्चाभ्यनुज्ञातं सप्तदशे विधानात् प्रावर्त्तिकं क्रमं परित्यज्य पश्वन्तराणां पूर्व्वं नियोजनं कृत्वा पश्चात् प्रथमपशोर्नियोजनं यदि क्रियते तदा द्वात्रिंशद्भिः पदार्थैर्व्यवधानं स्यात् तच्च नाभ्यनुज्ञातम् तदुक्तम्, "प्रवृत्त्या वा नियम्येत प्रत्यासत्तेरनुग्रहात् । अन्यथा व्यवधानं स्यादनुज्ञाताधिकैरपीति" ।

कात्यायनश्रौतसूत्र १।५।१ सूत्रादौ तद्भाष्ये च क्रमविशेषास्तेषां बलाबलञ्चोक्तं यथा

"कर्म्मणामानुपूर्व्यं न युगपद्भावात्" १ सू० । आनुपूर्व्यं पौर्वापर्य्यं क्रम इत्यनर्थान्तरम् कर्मणामिति अग्न्यन्वाधानादीनामङ्गकर्मणामनुष्ठाने आनुपूर्व्यं न भवति क्रमनियमो न भवति । कुतः ? युगपद्भावात् अतस्तान्यङ्गानि

मन्त्रेषु गुणानां भूयस्त्वात् गुणानां बाहुल्यात् यतः चोदनापाठापेक्षया मन्त्रेषु बहवो गुणाविद्यन्ते। तद्यथा कर्मकाले उच्चारणे पदार्थस्मारके यतो मन्त्रा अर्थवादादिकृतव्यवधानरहिताः क्रमेण पठ्यन्ते तेनोत्तरमुत्तरं पदार्थं झटिति स्मारयितुं शक्नुवन्ति नैवं चोदनापाठः विधेयार्थस्तावकवाक्यसंदर्भव्यवहितत्वेन मन्त्रवत् स्मारयितुमशक्तत्वात्। न च कर्मकाले तस्योच्चारणं विहितं मन्त्रवत्। श्रुतिरपि मन्त्राणां गुणभूयस्त्वमाह "तस्मादेतदृषिणाभ्यनूक्तमित्यादिना(शत०ब्रा०११।७।४।४।)यो हि स्वप्रतिपादितस्यार्थस्य प्रामाण्यार्थमन्यस्योक्तिं प्रदर्शयति स आत्मापेक्षया उत्कृष्टस्यैव दर्शयति नापकृष्टस्य तेन गुणभूयस्त्वं मन्त्रेषु अतो मन्त्रपाठ एव बलवानिति सिद्धम्। पदार्थानां क्रमनियमे श्रुत्यादीनि यानि प्रमाणान्युक्तानि तेषां विरोधे बलाबलं चोक्तम् अथेदं चिन्त्यते। यत्र बहूनि प्रधानानि सह क्रियन्ते यथा दर्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयैन्द्राग्नादीनि यथा चातुर्मास्यपर्वसु वाजपेयेऽतिरात्रपशुषु वा पृश्निसप्तदशप्राजापत्येषु च तत्रारादुपकारकाण्यङ्गानि सर्वेषां तन्त्रेण क्रियन्ते इति। वक्ष्यति कर्मणां युगपद्भावस्तन्त्रमित्यत्र(कात्या०१।७।१।)तेन न तेषु क्रमचिन्ता संनिपत्योपकारकाणि तु द्रव्यसंस्काररूपाणि प्रतिप्रधानभेदेन कर्त्तव्यानि तत्र चिन्त्यते तानि किमेकस्य सर्वाणि कृत्वापरस्य कर्त्तव्यानि? किं वा समान एकैकः पदार्थः सर्वेषां कर्त्तव्यः? इति। तत्रैकैकं प्रधानमव्यवहितानि स्वाङ्गान्यपेक्षते तस्माङ्गानां प्रधानकालत्वस्य न्याय्यत्वादेकैकस्मिन् गुणकाण्डमपवृज्यात इतरथा हि पदार्थानुसमये सति स्वप्रधानाद्विप्रकृष्येरन् यदैकस्यासादनं कृत्वापरस्य तदेव क्रियते तदा पूर्वस्यासादनयोर्व्यवायः स्यात् सहवचनं त्वारादुपकारकसाहित्यमात्रेणाप्युपपद्यते तस्मात्काण्डानुसमय एवेति प्राप्ते आह" भा० "तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात्" १०सू०। "तुल्यसमवायो तुल्यानां प्रधानानां सह प्रयोगे द्रव्यसंस्काररूपाणि संनिपत्योपकारकाण्यङ्गानि सामान्यपूर्वं कर्त्तव्यानि पूर्वः पूर्वः पदार्थः सर्वेषां समानः सदृशः कर्त्तव्यः। तद्यथा बहुषु हविःषु प्रथमं सर्वेषां विभक्तीकरणम् ततः सर्वेषां पात्रोत्थापनम् ततः सर्वेषां तत्र व्यभिधारः ततः सर्वेषां पात्रीपूपस्तारः ततः सर्वेषामुद्वासनम् ततः सर्वेषां वेद्यामासादनम् ततः सर्वेषामालम्भः इत्येवं पदार्थानुसमयः कर्त्तव्यः। यद्येकैकस्मिन् गुणकाण्डमपवृज्यते तदा सति क्रमेण प्रयोगात् प्रयोगवाक्यावगतस्य साहित्यस्य बाधः स्यात् न हि वचनेनाविशेषतः साहित्यमवगम्यमानं काल्पनिकेन प्रधानासत्तिमात्रेणारादुपकारकविषयमात्रं कल्पयितुं शक्यते। तस्मात्पदार्थानुसमयः। कुतः? आनुपूर्व्ययोगात् पदार्थानां तन्त्राणां च एवं क्रियमाणे पदार्था आनुपूर्व्येणानन्तर्येण युज्यन्ते तन्त्राणां च अन्यथोत्तरपदार्थकरणानन्तरं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात्। "पौर्णमास्यां पौर्णमास्या यजेत" इत्यनेन वाक्येन पौर्णमासीशब्दबोध्यानां तत्सम्बद्धानां त्रयाणां यागानां साङ्गानामेककालप्रयोगोऽवगम्यते अतो यस्मिन्नेव क्षणे एकस्याधिश्रयणं कर्तव्यमापतति तस्मिन्नेवापरस्याधिश्रयणं कर्तव्यं यदशक्यतया केवलं न क्रियते द्वितीये तु क्षणे न कश्चिद्धेतुर्येन पुरोडाशान्तरं नाधिश्रियेत अतः प्रथमं पदार्थं सर्वेषां कृत्वा ततो द्वितीयादिः पदार्थः सर्वेषां कर्त्तव्यः। एवं बहुषु प्रधानेषु सर्वत्र पदार्थानुसमय एव न्याय्यो न काण्डानुसमयो इति स्थितम्। यत्र तु प्रधानविरोधो भवति पदार्थानुसमये क्रियमाणे। तत्र काण्डानुसमय एवेति वाचनिकेन साहित्येन पदार्थानुसमयः प्राप्तोऽपि प्रधानविरोधात्त्यक्तव्यः। पुरोडाशाङ्गं ह्यधिश्रयणादयः तदङ्गं च क्रमः पदार्थानुसमयरूपः तदाश्रयणे च सुतप्तकपालसंयोगात् पुरोडाशशोषप्रसङ्गः। न चाङ्गानुरोधेन प्रधानबाधो युक्तः। तेनातिबहुषु हविःष्वेकैकस्य पुरोडाशस्याधिश्रयणं प्रथनमद्भिरभिमर्शनं चेत्यन्तं काण्डानुसमयः कार्यः। यत्र तु नास्ति प्रधानबाधः द्वित्रिचतुरादिहविःषु तत्र भवतु पदार्थानुसमयः। दाहसम्भवशङ्कायां तु उद्वासनमपि व्युत्क्रमेण कार्यम् यदुक्तम् पूर्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्वस्य व्यवधानमिति तत् सहत्वविधिबलात् परिह्रियते। एवं च गते वाजपेये आग्नेयैन्द्राग्नसारस्वतीवषाट्पृश्निसप्तदशप्राजापत्येषु द्वाविंशतिसंख्येषु पशुष्वेकविंशत्या पदार्थैः समानासमानजातीयैर्व्यवधानमिष्यते न न्यूनाधिकैः। अन्ये त्वसमानजातीयैरेव। अनेनैव मुख्यक्रमप्रावृत्तिकक्रमावुक्तौ भवतः। तथाहि यत्र बहूनि प्रधानानि भवन्ति तत्र यो मुख्यानां प्रधानानां क्रमस्तेनैव क्रमेण तदङ्गानां क्रमो भवति यथा पौर्णमास्यां प्रथममाग्नेययागः ततोऽग्नीषोमीययागः अत आग्नेयस्य प्रथमं ग्रहणम् ततोऽग्नीषोमीयस्य, एवं

प्रोक्षणादावपि। अयं मुख्यक्रमः अनेन क्रमेण यद्यङ्गा-
न्यनुष्ठीयन्ते तदाङ्गानां नियता प्रधानप्रत्यासत्ति-
रनुगृहीता भवति एवं ह्यङ्गप्रधानयोर्यावदनुष्ठान-
मेव व्यवधानं भवति इतरथा तु पश्चाद्भाविनः प्रधानस्य
प्रथमाङ्गं क्रियमाणं प्रधानेनात्यन्तं व्यवहितं स्यात्।

अथ प्रवृत्तिक्रम उच्यते यत्र बहूनि हवींषि भवन्ति
समानदैवतानि यथा वाजपेये पशवः तत्र चोपा-
करणादयः संनिपातिनः प्रतिपश्वावर्त्तनीयाः। तेषां
चावृत्तिरेकस्य पशोः कार्त्स्न्येन कृत्वा परस्यापि तथैव
क्रियन्त इत्येवम्। किं तर्हि? सर्व्वेषामुपाकरणं यतः
कुतश्चित् पशोरारभ्य कृत्वा ततः सर्व्वेषां नियोजन-
मित्युक्तम्। तत्र प्रथमे पदार्थे उपाकरणे अनियम एव
यतः कुतश्चित् पशोरारभ्य कर्त्तव्यः। द्वितीयस्तु पदार्थो
नियोजनरूपः किं प्रथमो यत आरब्धः तत एवारम्भ-
णीयः? उत तत्राप्यनियम एवेति? तत्र क्रमनियमका-
रणानां श्रुत्यर्थपाठानामभावदनियमे प्राप्ते उच्यते प्रवृत्त्यैव
नियमः। प्रथमः पदार्थो येन क्रमेण कृतः स एव क्रम उ-
त्तरेष्वपि नियोजनादिषु नियम्यते। कुतः? पदार्थैः सह
प्रधानं कर्त्तव्यमिति वचनात् सर्व्वे पदार्थाः प्रधानकालादा
विप्रकृष्टव्याः कथं? पदार्थैः सह प्रधानस्य वचनम् यावता
"दर्शपूर्णमासाभ्यां यजेत प्राजापत्यैश्चरन्तः" इत्यादिषु प्रधा-
नमात्रं श्रूयते उच्यते, समीहितं भावयेद्यागेनेत्यमिति हि
यजेतेत्यस्यार्थः। तत्र यस्यामेव वेलायां स्वर्गो भावने
कर्तृत्वं प्रतिपद्यते तस्मिन् क्षणे करणेतिकर्त्तव्यते अपि
व्याप्रियेते। अयमर्थः नात्र प्रधानं कर्तव्यं श्रूयते किं तु प्र-
धानेन स्वर्गः कार्य इति करणविभक्तिनिर्देशाद्यागेनेष्टं
कार्यमस्मिन्काले कुर्यादिति तेन स्वकार्यं सेतिकर्तव्य-
ताकेन कर्तुं शक्यते नान्यथा। तस्मात्त्रितयस्य फलकर-
णेतिकर्तव्यत्वस्य युगपद्यजेतेत्यनेन कर्तव्यतयोच्यते। ततोऽ-
न्यथा करणेतिकर्तव्यताकत्वमेव न स्यात् न हि पश्चाद्भा-
वि करणं भवति। तथा भविष्यति भाव्ये भूते च करणे
स एवैव दोषः न हि विनष्टं करणं भवतीति। तथा
करणेतिकर्तव्यतयोरपि मिथो विप्रकर्षे अयमेव दोषः। न
हि विनष्टमनागतं वानुग्राहकं भवति। तेन यावदवस्थ्या-
मेककालतैषां त्रयाणाम्। ततः प्रधाने सेतिकर्तव्यताके
एकस्मिन् क्षणे सह कर्तव्ये प्राप्ते सति एकः कर्ता बहूनि
प्रधानानि इतिकर्तव्यतां वा असमर्थः कर्तुं, यौगपद्येने-
त्यवश्यम्भावी क्रियानपि विप्रकर्षः। देशेनापि विप्रक-

र्षेण सहैव पदार्थाः कृता भवन्ति। प्रयोगवचनो हि
यावतः पदार्थाननुष्ठापयति तावद्भिरवर्जनीयतया यावान्
कालो व्याप्यते तावानेकः कालः तावति च काले स-
र्वेषां कालो विधीयते न त्वेकस्मिन् क्षणे अशक्यार्थवि-
धिप्रसङ्गात्। तेन प्रत्यासत्तिरेतेषां साहित्यम् नैकक्षण-
वर्तित्वम्। यद्येवम् प्रयोगवचनेनैव क्रमस्य सिद्धत्वात् श्रु-
त्यादिभिः किं क्रियते? अनियतक्रमेणानुष्ठानं प्राप्नोतीति
क्रमनियमे तेषां व्यापारः। यस्मात्प्रयोगविधिर्नैकक्षणव-
र्त्तित्वं विधत्ते प्रत्यासत्तिमात्रम्। तस्मात् प्रधानं चिकी-
र्षितमनागतं कृतं वा तेषां प्रधानार्थानामनुष्ठापकम्।
करिष्यमाणेन कृतेन वा प्रधानेन प्रत्यासत्तिमात्रमङ्गा-
नां तत्साहित्यम् नैकक्षणवर्तित्वम्। तत्राग्न्यन्वाधा-
नादीनां करिष्यमाणं प्रधानं निमित्तम् स्विष्टकृदादीनां तु
कृतम्। तेनैवमवश्यम्भाविनि विप्रकर्षे केचित्पदार्थाः क्ष-
णव्यवहिताः प्रधानेनापेक्ष्यन्ते केचिद्द्वाभ्यां क्षणाभ्यां
व्यवहिताः केचिद्बहुभिरिति। एवं वाजपेयपशुष्वपि अ-
ग्न्यन्वाधानादि प्रागुपाकरणात् साधारण्यं सर्वपशूनां सह
अनुभूतम्। उपाकरणादयोऽपि संनिपत्योपकारका-
स्तन्त्रेणाविभवादावर्तयितव्या अपि साहित्येनैव पशुभि-
रनुभवितव्याः। यदैकस्योपाकरणम् तदैवेतरेषामपि कुतः?
सहचोदितत्वात्पशूनां साङ्गानाम्। तत्रैव सहानुभवि-
तव्ये सति यस्य पशोः प्रथममुपाकरणं क्रियते तस्य प्रा-
कृतेन पठेन यद्यपि द्वितीयः पदार्थो नियोजनरूपः
स्याप्यते तथापि सहवचनादेव एकविंशतिक्षणव्यवहितं
द्वितीयं पदार्थमाकाङ्क्षति। द्वितीयस्तु पशुर्विंशत्योपा-
करणक्षणैर्व्यवहितमेकेन प्रथमस्य पशोर्नियोजनक्षणेन च
व्यवहितं स्वीयं द्वितीयं पदार्थमाकाङ्क्षति। एवं तृती-
यादयोऽपि पशवः सजातीयविजातीयव्यवहितानात्मीया-
न् पदार्थानपेक्षन्ते। अन्त्यस्तु विजातीयैः पूर्वोपाकृतानामेक-
विंशतेः पशूनां नियोजनक्षणैर्व्यवहितमेव द्वितीयं पदा-
र्थमपेक्षते। तदेवं संनिपत्योपकारकाणामालोच्य ईदृशी एक-
विंशतिक्षणव्यवधानामेवाप्रधानानां भवति। ततश्च याव-
द्भिर्नाव्यवहितः शक्यः पदार्थः कर्तुं तावद्भिर्व्यवधानमग-
त्यावश्यं कर्त्तव्यम्, अतोऽभ्यधिकैस्तु न व्यवधातव्यम्।
यद्येकं पदार्थमेकस्य कृत्वा द्वितीयोऽपि पदार्थस्तस्यैव
क्रियते ततः सहवचनं नोपपद्येत। एवं सर्वत्र तृती-
यादिष्वपि पदार्थेषु योज्यम्। प्रथमपदार्थक्रम एव द्विती-
यादिष्वपि समाश्रयितव्यः इतरथा कैवल्यं च न स-

मन्त्रेषु गुणानां भूयस्त्वात् गुणानां बाहुल्यात् यतः चोदनापाठापेक्षया मन्त्रेषु बहवो गुणा विद्यन्ते। तद्यथा कर्मकाले उच्चारणे पदार्थस्मारके यतो मन्त्रा अर्थवादादिकृतव्यवधानरहिताः क्रमेण पठ्यन्ते तेनोत्तरमुत्तरं पदार्थं झटिति स्मारयितुं शक्नुवन्ति नैवं चोदनापाठः विधेयार्थस्तावकवाक्यसंदर्भव्यवहितत्वेन मन्त्रवत् स्मारयितुमशक्तत्वात्। न च कर्मकाले तस्योच्चारणं विहितं मन्त्रवत्। श्रुतिरपि मन्त्राणां गुणभूयस्त्वमाह "तस्मादेतदृषिणाभ्यनूक्तमित्यादिना(शत०ब्रा०१।७।४।४।)यो हि स्वप्रतिपादितस्यार्थस्य प्रामाण्यार्थमन्यस्योक्तिं प्रदर्शयति स आत्मापेक्षया उत्कृष्टस्यैव दर्शयति न निकृष्टस्य तेन गुणभूयस्त्वं मन्त्रेषु अतो मन्त्रपाठ एव बलवानिति सिद्धम्। पदार्थानां क्रमनियमे श्रुत्यादीनि त्रीणि प्रमाणान्युक्तानि तेषां विरोधे बलाबलं चोक्तम् अथेदं चिन्त्यते। यत्र बहूनि प्रधानानि सह क्रियन्ते यथा दर्शपूर्णमासयोराग्नेयोपांशुयाजाग्नीषोमीयैन्द्राग्नादीनि यथा चातुर्मास्यपर्वसु वाजपेयेऽतिरात्रपशुयागपृश्निसप्तदशप्राजापत्येषु च तत्रारादुपकारकाण्यङ्गानि सर्वेषां तन्त्रेण क्रियन्ते इति। वक्ष्यति कर्मणां युगपद्भावस्तन्त्रमित्यत्र(कात्या०१।७।१।)तेन न तेषु क्रमचिन्ता संनिपत्योपकारकाणि तु द्रव्यसंस्काररूपाणि प्रतिप्रधानभेदेन कर्त्तव्यानि तत्र चिन्त्यते तानि किमेकस्य सर्वाणि कृत्वापरस्य कर्त्तव्यानि? किं वा समान एकैकः पदार्थः सर्वेषां कर्त्तव्यः? इति। तत्रैकैकं प्रधानमव्यवहितानि स्वाङ्गान्यपेक्षते तस्मादङ्गानां प्रधानकालत्वस्य न्याय्यत्वादेकैकस्मिन् गुणकाण्डमपवृज्यात् इतरथा हि पदार्थानुसमये सति स्वप्रधानाद्विप्रकृष्येरन् यद्येकस्यासादनं कृत्वापरस्य तदेव क्रियते तदा पूर्वस्यासादनयोर्व्यवायः स्यात् सहवचनं त्वारादुपकारकसाहित्यमात्रेणाप्युपपद्यते तस्मात्काण्डानुसमय एवेति प्राप्तेऽभ्याह" भा० "तुल्यसमवाये सामान्यपूर्वमानुपूर्व्ययोगात्" १०सू०। "तुल्यसमवायो तुल्यानां प्रधानानां सह प्रयोगे द्रव्यसंस्काररूपाणि संनिपत्योपकारकाण्यङ्गानि सामान्यपूर्वं कर्त्तव्यानि पूर्वः पूर्वः पदार्थः सर्वेषां समानः सदृशः कर्त्तव्यः। तद्यथा बहुषु हविःषु प्रथमं सर्वेषां विभक्तीकरणम् ततः सर्वेषां पात्रीस्थापनम् ततः सर्वेषां तत्र व्यभिघारः ततः सर्वेषां पात्रीपूपस्तारः ततः सर्वेषामुद्वासनम् ततः सर्वेषां वेद्यामासादनम् ततः सर्वेषामालम्भः इत्येवं पदार्थानुसमयः कर्त्तव्यः। यद्येकैकस्मिन् गुणकाण्डमपवृज्यते तथा सति क्रमेण प्रयोगात् प्रयोगवाक्यावगतस्य साहित्यस्य बाधः स्यात् न हि वचनेनाविशेषतः साहित्यमवगम्यमानं काल्पनिकेन प्रधानासत्तिमात्रेणारादुपकारकविषयमात्रं कल्पयितुं शक्यते। तस्मात्पदार्थानुसमयः। कुतः? आनुपूर्व्ययोगात् पदार्थानां तन्त्राणां च एवं क्रियमाणे पदार्था आनुपूर्व्येण अनन्तरेण युज्यन्ते तन्त्रत्वाच्च अन्यथोत्तरपदार्थकरणानन्तरं पूर्वेषु क्रियमाणेषु आनुपूर्व्ययोगो न स्यात्। "पौर्णमास्यां पौर्णमास्या यजेत" इत्यनेन वाक्येन पौर्णमासीशब्दबोध्यानां तत्सम्बद्धानां त्रयाणां यागानां साङ्गानामेककालप्रयोगोऽवगम्यते अतो यस्मिन्नेव क्षणे एकस्याधिश्रयणं कर्तव्यमापतति तस्मिन्नेवापरस्याधिश्रयणं कर्तव्यं यदशक्यतया केवलं न क्रियते द्वितीये तु क्षणे न कश्चिद्धेतुर्येन पुरोडाशान्तरं नाधिश्रियेत अतः प्रथमं पदार्थं सर्वेषां कृत्वा ततो द्वितीयादिः पदार्थः सर्वेषां कर्त्तव्यः। एवं बहुषु प्रधानेषु सर्वत्र पदार्थानुसमय एव न्याय्यो न काण्डानुसमयो इति स्थितम्। यत्र तु प्रधानविरोधो भवति पदार्थानुसमये क्रियमाणे। तत्र काण्डानुसमय एवेति वाचनिकेन साहित्येन पदार्थानुसमयः प्राप्तोऽपि प्रधानविरोधात्त्यक्तव्यः। पुरोडाशाङ्गं ह्यधिश्रयणादयः तदङ्गं च क्रमः पदार्थानुसमयरूपः तदाश्रयणे च सुतप्तकपालसंयोगात् पुरोडाशशोषप्रसङ्गः। न चाङ्गानुरोधेन प्रधानबाधो युक्तः। तेनातिबहुषु हविःष्वेकैकस्य पुरोडाशस्याधिश्रयणं प्रथनमद्भिरभिमर्शनं चेत्यन्तं काण्डानुसमयः कार्यः। यत्र तु नास्ति प्रधानबाधः द्वित्रिचतुरादिहविःषु तत्र भवतु पदार्थानुसमयः। दाहसम्भवशङ्कायां तु उद्वासनमपि व्युत्क्रमेण कार्य्यम् यदुक्तम् पूर्वस्य पदार्थे कृते तस्मिन्नेव द्वितीयस्य क्रियमाणे पूर्वस्य व्यवधानमिति तत् सहत्वविधिबलात् परिह्रियते। एवं च सति वाजपेये आग्नेयैन्द्राग्नसारस्वतीवणाष्ट्पृश्निसप्तदशप्राजापत्येषु द्वाविंशतिसंख्येषु पशुष्वेकविंशत्या पदार्थैः समानासमानजातीयैर्व्यवधानमिष्यते न न्यूनाधिकैः। अन्ये त्वसमानजातीयैरेव। अनेनैव मुख्यक्रमप्रवृत्तिक्रमावुक्तौ भवतः। तथाहि यत्र बहूनि प्रधानानि भवन्ति तत्र यो मुख्यानां प्रधानानां क्रमस्तेनैव क्रमेण तदङ्गानां क्रमो भवति यथा पौर्णमास्यां प्रथममाग्नेययागः ततोऽग्नीषोमीययागः अत आग्नेयस्य प्रथमं ग्रहणम् ततोऽग्नीषोमीयस्य, एवं

प्रोक्षणादावपि। अयं मुख्यक्रमः अनेन क्रमेण यद्यङ्गान्यनुष्ठीयन्ते तदाङ्गानां नियता प्रधानप्रत्यासत्तिरनुगृहीता भवति एवं ह्यङ्गप्रधानयोर्यावदनुष्ठानमेव व्यवधानं भवति इतरथा तु पश्चाद्भाविनः प्रधानस्य प्रथमाङ्गं क्रियमाणं प्रधानेनात्यन्तं व्यवहितं स्यात्।

अथ प्रवृत्तिक्रम उच्यते यत्र बहूनि हवींषि भवन्ति समानदैवतानि यथा वाजपेये पशवः तत्र प्रोक्षणोपाकरणादयः संनिपातिनः प्रतिपश्वावर्त्तनीयाः। तेषां चावृत्तिर्नैकस्य पशोः कार्त्स्न्येन कृत्वा परस्यापि तथैव क्रियन्त इत्येवम्। किं तर्हि? सर्व्वेषामुपाकरणं यतः कुतश्चित् पशोरारभ्य कृत्वा ततः सर्व्वेषां नियोजनमित्युक्तम्। तत्र प्रथमे पदार्थे उपाकरणे अनियम एव यतः कुतश्चित् पशोरारभ्य कर्त्तव्यः। द्वितीयश्च पदार्थो नियोजनरूपः किं प्रथमो यत आरब्धः तत एवारम्भणीयः? उत तत्राप्यनियम एवेति? तत्र क्रमनियमकारणानां श्रुत्यर्थपाठानामभावदनियमे प्राप्ते उच्यते प्रवृत्त्यैव नियमः। प्रथमः पदार्थो येन क्रमेण कृतः स एव क्रम उत्तरेष्वपि नियोजनादिषु नियम्यते। कुतः? पदार्थैः सह प्रधानं कर्त्तव्यमिति वचनात् सर्व्वे पदार्थाः प्रधानकालान्न विप्रकृष्टव्याः कथं? पदार्थैः सह प्रधानस्य वचनम् यावता "दर्शपूर्णमासाभ्यां यजेत प्राजापत्यैश्चरन्तः" इत्यादिषु प्रधानमात्रं श्रूयते उच्यते, समीहितं भावयेद्यागेनेत्यसि त हि यजेतेत्यस्यार्थः। तत्र यस्यामेव वेलायां स्वर्गो भावने कर्त्तृत्वं प्रतिपद्यते तस्मिन् क्षणे करणेतिकर्त्तव्यते अपि व्याप्रियेते। अयमर्थः नात्र प्रधानं कर्त्तव्यं श्रूयते किन्तु प्रधानेन स्वर्गः कार्य्य इति करणविभक्तिनिर्द्देशाद्यागेनेष्टं कार्य्यमस्मिन्काले कुर्य्यादिति तेन स्वकार्य्यं सेतिकर्त्तव्यताकेन कर्त्तुं शक्यते नान्यथा। तस्मात्त्रितयस्य फलकरणेतिकर्त्तव्यत्वस्य युगपद्यजेतेत्यनेन कर्त्तव्यतोच्यते। ततोऽन्यथा करणेतिकर्त्तव्यताकत्वमेव न स्यात् न हि पश्चाद्भावि करणं भवति। तथा भविष्यति भाव्ये भूते च करणे अयमेव दोषः न हि विनष्टं करणं भवतीति। तथा करणेतिकर्त्तव्यतयोरपि मिथो विप्रकर्षे अयमेव दोषः। न हि विनष्टमनागतं वानुग्राहकं भवति। तेन यावद्वस्तु व्यामेककालतैषां त्रयाणाम्। ततः प्रधाने सेतिकर्त्तव्यताके एकस्मिन् क्षणे सह कर्त्तव्ये प्राप्ते सति एकः कर्त्ता बहूनि प्रधानानि इतिकर्त्तव्यतो वा असमर्थः कर्त्तुं, यौगपद्येनेत्यवश्यम्भावी कियानपि विप्रकर्षः। द्वैरूपेणापि विप्रकर्षेण सहैव पदार्थाः कृता भवन्ति। प्रयोगवचनो हि यावतः पदार्थाननुष्ठापयति तावद्भिरवर्जनीयतया यावान् कालो व्याप्यते तावानेकः कालः तावति च काले सर्वेषां कालो विधीयते न त्वेकस्मिन् क्षणे अशक्यार्थविधिप्रसङ्गात्। तेन प्रत्यासत्तिरेतेषां साहित्यम् नैकक्षणवर्तित्वम्। यद्येवम् प्रयोगवचनेनैव क्रमस्य सिद्धत्वात् श्रुत्यादिभिः किं क्रियते? अनियतक्रमेणानुष्ठानं प्राप्नोतीति क्रमनियमे तेषां व्यापारः। यस्मात्प्रयोगविधिर्नैकक्षणवर्त्तित्वं विधत्ते प्रत्यासत्तिमात्रम्। तस्मात् प्रधानं चिकीर्षितमनागतं कृतं वा तेषां प्रधानार्थानामनुष्ठापकम्। करिष्यमाणेन कृतेन वा प्रधानेन प्रत्यासत्तिमात्रमङ्गानां तत्साहित्यम् नैकक्षणवर्तित्वम्। तत्राग्न्यन्वाधानादीनां करिष्यमाणं प्रधानं निमित्तम् स्विष्टकृदादीनां तु कृतम्। तेनैवमयत्नभाविनि विप्रकर्षे केचित्पदार्थाः क्षणाव्यवहिताः प्रधानेनापेक्ष्यन्ते केचिद्द्वाभ्यां क्षणाभ्यां व्यवहिताः केचिद्बहुभिरिति। एवं वाजपेयपशुष्वपि अग्न्यन्वाधानादि प्रागुपाकरणात् साधारण्यं सर्वपशूनां सह अनुभूतम्। उपाकरणादयोऽपि संनिपत्योपकारकास्तन्त्रेणाविभवादावर्त्तयितव्या अपि साहित्येनैव पशुभिरनुभवितव्याः। यदैकस्योपाकरणम् तदैवेतरेषामपि कुतः? सहचोदितत्वात्पशूनां साङ्गानाम्। तत्रैव सहानुभवितव्ये सति यस्य पशोः प्रथममुपाकरणं क्रियते तस्य प्राकृतेन पाठेन यद्यपि द्वितीयः पदार्थो नियोजनरूपः स्याप्यते तथापि सहवचनादेव एकविंशतिक्षणव्यवहितं द्वितीयं पदार्थमाकाङ्क्षति। द्वितीयस्तु पशुर्विंशत्योपाकरणक्षणैर्व्यवहितमेकेन प्रथमस्य पशोर्नियोजनक्षणेन च व्यवहितं स्वीयं द्वितीयं पदार्थमाकाङ्क्षति। एवं तृतीयादयोऽपि पशवः सजातीयविजातीयव्यवहितानात्मीयान् पदार्थानपेक्षन्ते। अन्त्यस्तु विजातीयैः पूर्वोपाकृतानामेकविंशतेः पशूनां नियोजनक्षणैर्व्यवहितमेव द्वितीयं पदार्थमपेक्षते। तदेवं संनिपत्योपकारकाणामालोच्य ईदृशी एकविंशतिक्षणव्यवधानापेक्षा प्रधानानां भवति। ततश्च यावद्भिरव्यवहितः शक्यः पदार्थः कर्त्तुं तावद्भिर्व्यवधानमगत्यावश्यं कर्त्तव्यम् अतोऽभ्यधिकैस्तु न व्यवधातव्यम्। यथोक्तं पदार्थमेकस्य कृत्वा द्वितीयोऽपि पदार्थस्तस्यैव क्रियते ततः सहवचनं नोपपद्येत। एवं सर्वत्र तृतीयादिष्वपि पदार्थेषु योज्यम्। प्रथमपदार्थक्रम एव द्वितीयादिष्वपि समाश्रयितव्यः इतरथा केषां चन ब-

र्न्यूनाधिकैरपि पश्वैर्व्यवहितानि स्युः। न च तद्युक्तम्; न चैवं केषांचिदल्पैर्व्यवधानं गुणो भविष्यतीति वाच्यम्, यथाधिकैर्व्यवधानेऽश्रुतकरणम् एवं न्यूनैरपि व्यवधाने अश्रुतकरणमेव। तस्मादेकविंशतेः पशूनां साहित्यसम्पत्तये प्रयोगविधिनायं क्रमः पदार्थानां मिथ एकविंशतिक्षणव्यवधानात्मकोऽपेक्षितः। स न्यूनैरधिकैश्च व्यवधाने बाध्येत। अतः सर्वेषां तुल्यप्रत्यासत्तिसिद्धौ प्रथमपदार्थक्रम एव द्वितीयादिष्वाश्रयणीय इति सिद्धम्। अत्राङ्गानां मिथः प्रत्यासत्तिर्नियमकारणम् मुख्यक्रमे तु अङ्गानां प्रधानप्रत्यासत्तिरिति विशेषः। मुख्यक्रमप्रवृत्तिक्रमयोर्विरोधे च मुख्यक्रमो बलीयान्। तद्यथा दर्शपूर्णमासयोः सांनाय्यधर्माः शाखाच्छेदनादयः पूर्वं प्रवर्त्तन्ते पश्चादाग्नेयधर्माः,प्रदानं त्वाग्नेयस्य प्रथमम् पश्चात्सांनाय्यस्य ततः स्विष्टकृदवदानं प्रयाजशेषाभिघारणं प्राशित्रावदानं वेद्यामासादनादिकं च किं प्रवृत्तिक्रमात् सांनाय्यस्य पूर्वं भवति? उत मुख्यक्रमादाग्नेयस्येति? संदेहादनियमे प्राप्ते मुख्यक्रमो बलीयानित्युच्यते। अस्मिन् हि आश्रीयमाणे अल्पीयांसः प्रथमपदार्थाः प्रधानाद्विप्रकृष्यन्ते अन्ये सर्वे संनिकृष्टा भवन्ति प्रवृत्तिक्रमे तु बहूनां विप्रकर्षः। पूर्वं तु हृदयप्रभृतिभ्यां बलीयसा पाठक्रमेण मुख्यक्रमो बाध्यते प्राशित्रावदानादिषु पाठक्रमाभावात् प्रवृत्तिक्रमो मुख्यक्रमेण बाध्यते। अथ स्थानप्रमाणमुच्यते। वाजपेये "सप्तदश पशूनालभेत" इति(शत०२२,३,१८,)श्रूयते साहित्यं च सवनीयस्य स्थाने। तत्र किमुपाकरणादौ अनियमः? उताग्नीषोमीयस्य प्रथममुपाकरणम्? अथवा सवनीयस्येति?। तत्र नियमकारणाभावादनियमे प्राप्ते प्रकृतिवदाग्नीषोमीयस्य प्राथम्ये प्राप्ते उच्यते सवनीयस्यैव प्रथममुपाकरणम्। अग्नीषोमप्रणयनानन्तरमग्नीषोमीयस्योपस्थानम्। स तेनोपस्थितोऽपि सहालम्भवचनेन तत्स्थानाच्चलितत्वादननुष्ठितोऽस्ति तु न तस्य किंचिदुपस्थापकमस्ति। सवनीयस्तु स्वस्थानादप्रचलितः सन्नाश्विनग्रहणादुपस्थितत्वात्तदनन्तरमुपाक्रियते। ततः साहित्यवचनादितरोपाकरणम्। अतः सवनीयस्यैव प्राथम्यम्। इतरयोस्तु कथं क्रमः? अनियम एव तयोरुपस्थाने विशेषाभावात्। अथवा प्राकृतदृष्टपौर्वापर्यसत्त्वे बाधेऽनुपहीतव्यमित्यग्नीषोमीयस्योपाकरणानन्तरमेवोपाकरणमिति। तदेवं श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिसंज्ञानि षट् प्रमाणानि क्रमनियमकारीण्युक्तानि तेषां परस्परविरोधे च पूर्वं-पूर्वं बलवत् उत्तरमुत्तरं च दुर्बलमिति। तदुक्तम् "श्रुत्यर्थपठनस्थानमुख्यप्रवृत्तिभिः। एकाख्यातगृहीतानां नियतः कर्मणां क्रमः। विरोधे पारदौर्बल्यमेतेषामपि पूर्ववदिति" भा० (पूर्ववत् श्रुतिलिङ्गादिवत्)

क्रमस्य विनियोगसाधनता जै० सू० भाष्ययोर्दर्शिता यथा "क्रमश्च देशसामान्यात्" ३।३।१२ सू०

"अथ किमेतावन्त्येव विनियोगकारणानि?। न,-इत्युच्यते। किं च क्रमश्च देशसामान्यात्, क्रमवतामानुपूर्व्येणोपदिश्यमानानां यस्य पर्याये यं धर्ममामनन्ति तस्य तं प्रति आकाङ्क्षा अनुमीयते, सत्यामाकाङ्क्षायामेकवाक्यभावः, तस्मात् ततो विनियोगः--इति। किमिहोदाहरणम्? किं च प्रयोजनम्?। आनुपूर्व्यवतां यागानामनुमन्त्रणेष्वाम्नातेषु उपांशुयाजस्य क्रमे "दब्धिर्नामासीति" समाम्नातः, तस्य आकाङ्क्षामुत्पाद्य तेन एकवाक्यतां यात्वा तत्र एव विनियोगमर्हति—इति, तथा च ऐन्द्राग्नं कर्म वियातसजातस्य अस्ति भ्रातृव्यवतः, तस्य याज्यानुवाक्यायुगलमध्याम्नायते ऐन्द्राग्नम्, "इन्द्राग्नी रोचनादिवः प्रवर्षणिभ्यः"—इत्येकम्, अपरं "इन्द्राग्नी नवतिं पुरः श्नथद्वृत्रम्"—इति। तत्र लिङ्गाद्विनियोगे सिद्धे विशेषविनियोगो भवति, पूर्वं युगलं पूर्वस्य ऐन्द्राग्नस्य, उत्तरमुत्तरस्य—इति, एतत् उदाहरणम् प्रयोजनञ्च" भा०

क्रमप्रकरणयोरेकत्र समवाये प्रकरणं बलीयः। क्रमसमाख्ययोस्तु क्रमो बलीयान् "श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" सू०। "श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि। सा प्रक्रिया या० कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या" पार्थसारथिमिश्रैर्विनियोगसाधकानां श्रुत्यादीनां लक्षणोक्त्या स्थानशब्दस्य क्रमवाचकतावगतेः। विवृतमेतत् तत्त्वबोधिन्यां यथा

"योगबलं प्रसिद्धावयवशक्ति--समाख्या यौगार्थेन प्रवृत्तं पदम्। यथा हौत्रमाध्वर्यवमौद्गात्रमिति। दर्शपौर्णमासादिषु याज्ययाजकपाठादयो धर्मा ऋग्वेदोक्ता हौत्रसंज्ञकाः; दोहननिर्वापादयो यजुर्वेदोक्ता, आध्वर्यवसंज्ञकाः, स्तोत्रपाठादयः सामवेदोक्ता औद्गात्रसंज्ञकाः पदार्था उक्ताः। तत्रामी ते धर्मा इति नियामकाभावात् स्वेच्छया सर्वेषां सर्वकरणप्रसक्तौ होतृ-

रिदं हौत्रमिति प्रकृतिप्रत्ययरूपावयवशक्तिलभ्यार्थयोगशब्दरूपसमाख्यया हौत्रादिकर्त्तव्यत्वं प्रतीयते। एवं. हौत्रं जुहोति औद्गात्रं जुहोतीत्यादौ” हौत्रादेर्होतृकर्त्तृत्वं प्रतीयते। होता ऋग्वेदी अध्वर्युर्यजुर्वेदी उद्गाता सामवेदी “अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमादिति” कोषात्। न च समुदाये शक्तिः प्रमाणाभावात् अतएवोक्तं भट्टपादैः “पाकन्तु पचिरेवाह कर्त्तारं प्रत्ययोऽप्यकः। पाकशिष्टः पुनः कर्त्ता वाच्यो नान्यस्य कस्यचित्”। पाकशिष्टः पाकविशिष्टः”

शवरभाष्ये उदा० यथा “अथ प्रकरणस्य क्रमस्य च विरोधे किमुदाहरणम्?। राजसूयप्रकरणेऽभिषेचनीयक्रमे शौनःशेपाख्यानादि आम्नातं, यदि प्रकरणं बलवत् सर्वेषां, तदङ्गम्, यदि क्रमः, अभिषेचनीयस्यैव। किं तावत्प्राप्तम्?—तुल्यबले एते कारणे—इति। कुतः?। न तावत् विशेषमुपलभामहे, नावगच्छाम इदं बलीयः-इति। तस्मात् तुल्यबले एते कारणे—इति। अपि च प्रकरणं वाक्येन बाधितं, तस्मात् बाध्येत क्रमेणापि—इति”। “एवं प्राप्ते ब्रूमः,—प्रकरणं क्रमात् बलीयः। कुतः!। अर्थविप्रकर्षात्। कोऽत्रार्थविप्रकर्षः!। प्रकरणवतः साकाङ्क्षत्वात् तत्सन्निधानाम्नातेन परिपूर्णेनाप्यवकल्प्येत एकवाक्यत्वम्, न तु क्रमवतः, क्रमेण आम्नातेन, अनेकस्याम्नायमानस्य सन्निधिविशेषाम्नानमात्रं हि क्रमः तत्र सन्निधिविशेषाम्नानसामर्थ्यात् क्रमवतः सन्निधावाम्नातस्यानुपलभ्यमानमेव आकाङ्क्षावत्त्वमस्ति—इत्यवगन्तव्यम्। प्रकरणे तु प्रकरणवतः प्रत्यक्षम्, न च प्रकरणवता क्रमवता च यौगपद्येन एकवाक्यता सम्भवत्याम्नातस्य—इति विरोधः। तत्र प्रकरणे प्रत्यक्षं साकाङ्क्षत्वं, क्रमश्चानुमानिको बाधितुमर्हति। साकाङ्क्षत्वात् एकवाक्यत्वम्, एकवाक्यत्वादभिधानसामर्थ्यं, सामर्थ्यात् श्रुत्यर्थः—इति सन्निकृष्टः प्रकरणस्य श्रुत्यर्थो, विप्रकृष्टः क्रमस्य। तस्मात् क्रमप्रकरणयोः प्रकरणं बलवत्तरम्—इति”।

“अथ यदुक्तं,—वाक्येनापि हि तत् बाधितम्, अतोऽन्येनापि तत् बाधितव्यम्—इति, नैतत्, बाधितस्यानुग्रहो न्याय्यो, न बाधितं बाधितव्यम्—इति”।

अथ क्रमसमाख्ययोर्विरोधे किमुदाहरणं! किं बलवत्तरम्!—इति। पौरोडाशिकम्—इति समाख्याते काण्डे सान्नाय्यक्रमे “शुन्धध्वं दैव्याय कर्मणे”—इति शुन्धनार्थो मन्त्रः समाम्नातः। तत्र सन्दिह्यते,—किं समाख्यानस्य बलीयस्त्वात् पुरोडाशपात्राणां शुन्धने विनियोक्तव्यः,(मन्त्रः) उत क्रमस्य बलीयस्त्वात् सान्नाय्यपात्राणाम्?—इति। किं तावत्प्राप्तम्?—तुल्यबले एते कारणे स्याताम्। कुतः? अविशेषात्, यदि वा समाख्यैव बलीयसी, बाधितो हि क्रमः प्रकरणेनापि इति”। “एवं प्राप्ते ब्रूमः,—क्रमो बलीयान्। कुतः?। अर्थविप्रकर्षात्। कः पुनरत्रार्थविप्रकर्षः?। निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे यत् सन्निधावाम्नायते, तत्र आकाङ्क्षा परिकल्प्यते, नैकवाक्यतेत्यवगम्यते, लौकिकश्च शब्दः समाख्या, न च, लोक एवंविधेषु अर्थेषु प्रमाणम्। तस्मात् क्रमो बलीयान्”

विवृतमेतत् तत्त्वबोधिन्यां यथा

“स्थानप्रकरणयोर्यथा। पश्विष्टिसोमयागा बहवः परस्परनिरपेक्षेणापि प्रत्येकं फलवन्तः समप्राधान्याः। ते च मिलिता राजसूयः। तन्मध्येऽभिषेचनीयाख्यः कश्चित् सोमयागविशेषः तत्सन्निधौ अक्षदेवनादिकं श्रूयते। यथा “अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेफमाख्यापयतीति”जिनाति जयति। शौनःशेफं बह्वृचब्राह्मणे आम्नातं शुनःशेफमुनिविषयमुपाख्यानमिति माधवाचार्य्यः। एतेन शुनःशेफमुनेश्चरित्रं पुराणप्रसिद्धमित्युदीच्यव्याख्यानं निरस्तं, वैदिके कर्म्मणि वैदिकोपाख्यानस्यैवोचितत्वाच्च “शौनःशेफं शृणोतीति” पाठकल्पनमपि कल्पनमेव माधवाचार्य्यादिभिर्वेदस्यैवाख्यापयतीत्यस्य लिखितत्वात्। तत्र च सान्निध्यरूपस्थानबलात् अक्षदेवनादेरभिषेचनीयाङ्गत्वं लभ्यते प्रकरणात्तु सर्व्वयागात्मकराजसूयस्य इति कर्त्तव्यताकाङ्क्षया अक्षदेवनादयो विहिता इति। प्रकरणबलात् राजसूयाङ्गत्वमक्षदेवनादेः राजसूयस्य बहुयागात्मक इति तत्र सर्व्वयागाङ्गत्वं, सर्व्वाङ्गत्वञ्च राजसूयघटकीभूतसर्व्वयागजन्यफलाशिरस्का पूर्व्वोपकारद्वारा सर्व्वोपकारकत्वम्। अत्र चाकाङ्क्षायाः कॢप्तत्वाद्वाक्यलिङ्गश्रुतिरूपत्रितयकल्पनं व्यवधानम् अभिषेचनीयस्याक्षदेवनादेराकाङ्क्षा नास्ति तस्य ज्योतिष्टोमविकृतित्वेन प्रकृतिवद्विकृतिन्यायात् अतिदिष्टैः प्रकृतीभूत ज्योतिष्टोमाङ्गैरेवेतिकर्त्तव्यताकाङ्क्षानिवृत्तेरिति सन्निधिपाठबलात् आकाङ्क्षामुत्थाप्य तद्द्वारा वाक्यलिङ्गश्रुतीनां कल्पनीयतया चतुर्भिर्व्यवहितमङ्गत्वमत्रेति प्रकरणाद्विलम्बेन ज्ञापकं स्थानं दुर्ब्बलमिति। तस्मात्

प्रकरणात् सर्व्वयागात्मकराजसूयाङ्गमच्चदेवनादिकमिति। नतु सर्व्वाङ्गमभिषेचनीयाङ्गमेव वा उभयथापि राजसूये तेषां कर्त्तव्यत्वाद्विचारोऽयमनुपयुक्त इति। न च प्रत्येकराजसूये प्रत्येकयागकाले तेषामनुष्ठानार्थं विचार इति वाच्यं तथा सति प्रत्येकाङ्गत्वेन प्रत्येकजन्यकलिकापूर्व्वोपकारकतया फलशिरस्कापूर्व्वानुपकारकत्वात् राजसूयाङ्गत्वानुपपत्तेः। न च कलिकापूर्व्वद्वारैव फलशिरस्कापूर्व्वोपकारकत्वमिति वाच्यं तत्तदङ्गापूर्व्वाणां प्रत्येकं षट्त्वस्य तेषाञ्च षट्कलिकापूर्व्वं प्रतिकारणत्वस्य कल्पनायां महागौरवात्। तस्माद्राजसूयाङ्गत्वेनाच्चदेवनादीनां सकृदनुष्ठानं तत्तदङ्गापूर्व्वद्वारा फलशिरस्कापूर्व्वोपकारकत्वं लाघवादितिचेत् सत्यं अच्चदेवनादीनामभिषेचनीयाङ्गत्वे यत्र प्रधानतया स्वतन्त्रेणाभिषेचनीयानुष्ठानं तत्राप्यच्चदेवनादिकरणापत्तेर्वारणार्थं विचारारम्भात्। अत एवाकाङ्क्षायाः कल्प्यत्वं स्थानप्राप्तौ दोष इति सङ्गच्छते अन्यथा राजसूयाङ्गत्वेनाभिषेचनीयेऽपि तस्याः क्लृप्तत्वात्। एवञ्चाभिषेचनीयसन्निधौ पाठस्तत्काले कर्त्तव्यताज्ञापनार्थमिति ध्येयम्। स्थानसमाख्ययोर्यथा। बहुमन्त्रानुक्त्वा "एतत् पौरोडाशिकं काण्डम्" इत्युक्तं पुरोडाशमन्त्रकाण्डे च "शुन्धध्वं दैव्याय कर्म्मणे देवयाज्यायै" इति मन्त्रः पठितः तत्र च शुन्धध्वमिति मन्त्रलिङ्गात् पात्रशोधने मन्त्रस्य विनियोग प्रतीयते स च पुरोडाशस्येदं पौरोडाशिकमिति प्रकृतिप्रत्ययार्थरूपसमाख्याबलात् पुरोडाशकाण्डोक्तानामुलूखलयज्ञादीनामपि तत्र पुरोडाशपात्रशोधने प्रतीयते अथ च सान्नाय्यहोमसन्निधाने मन्त्रः श्रूयते यथा "सान्नाय्यान् पात्रात् गृह्णाति" "शुन्धध्वं दैव्याय कर्म्मणे देवयाज्यायै सान्नाय्येन जुहोति" इत्यादिदध्योदनहोमसन्निधानपाठात् स्थानबलात् सान्नाय्यपात्रशोधनाङ्गत्वम्। तथाहि पौरोडाशिकमित्यत्र प्रकृत्या पुरोडाश उच्यते तद्धितेन च मन्त्रादिकलापरूपं काण्डमुच्यते तद्धितवाच्यकाण्डपदार्थमन्त्रादेः पुरोडाशसम्बन्धत्व तु न कस्यापि पदस्यार्थः, किन्तु समभिव्याहारलभ्यम्। तदुक्तम् "नैतदेवं समाख्या हि न सम्बन्धाभिधायिनी। पाकं हि प्रकृतिरेवाह कर्त्तारं प्रत्ययोऽप्यकः। पाकयुक्तः पुनः कर्त्ता वाच्योनैकस्य कस्यचित्"। तथा च पौरोडाशिकपदस्य तन्नामन्त्रसान्निध्यं विना तद्धितवाच्यकाण्डपदार्थे मन्त्रे पुरोडाशसम्बन्धत्व न लभ्यते समाख्यान्यथानुपपत्त्या पौरोडाशिकपदस्य मन्त्रसान्निध्यं कल्पनीयमन्यथा समाख्याया अकिञ्चित्करत्वम्। सान्नाय्यहोमस्यापि पुरोडाशकाण्डपातितया तत्सम्बन्धेऽपि समाख्यासम्भवाच्चेति सान्नाय्येन मन्त्रस्य सान्निध्यं कल्प्यमिति प्रकरणादिकल्पनाचतुष्टयमात्रव्यवहितमिति सिद्धं समाख्यातः स्थानं बलवदिति। तदुक्तम्। "एकद्वित्रिचतुःपञ्चवस्त्वन्तरप्रकाशनम्। लिङ्गादीनाञ्च वैषम्यं श्रुत्यपेक्षं विभीयते। बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा। मध्यमानान्तु बाध्यत्वं बाधकत्वमपेक्षया"। स्थानसमाख्ययोर्विरोधे पार्थसारथिमिश्रमाधवाचार्य्यदेवनाथप्रभृतिभिरेवं व्याख्यातम्"।

पौर्व्वापर्य्यरूपक्रमोद्विविधः कालिकोदैशिकश्च तत्र वैदिककर्म्मानुष्ठाने श्रुत्यादिभिः यः क्रमोनियमितः स सर्व्वोऽपि कालिकः। दैशिकस्तु "क्रमान्मेषादयः, स्मृताः" एव इत्यादौ राशिचक्रपूर्व्वापरदेशस्थत्वात्तेषां दैशिकक्रमवत्त्वम्। "वृत्तानुपूर्व्वे च नचातिदीर्घे" कुमा० इत्यत्रापि दैशिकक्रमः। कचित् उपदेशक्रमेण पदार्थानां क्रमवत्त्वम् यथा "वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा" या० स्मृ०। अत्र ब्राह्मणादीनां वर्णानां चतुर्णां क्रमेणोपदेशात् तत्क्रमेण ब्राह्मणादीनाम् क्रमिकत्वम्। एवं "तासां वर्णक्रमेणैव ज्यैष्ठ्यं पूजा च वेश्म च" मनुवाक्ये "अध्वर्य्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्" इत्यमरवाक्ये च उपदेशक्रमात् क्रमवत्त्वम्। गर्भाधानादीनां संस्काराणामुपदेशक्रमेणैव क्रमिकत्वम् कचित् पदार्थगतोत्पत्त्यादिक्रमेणापि पदार्थक्रमोऽभिधीयते इत्याद्यूह्यम्। सं एवम् लक्ष्यक्रमव्यङ्ग्य असंलक्ष्यक्रमव्यङ्ग्य इत्यादावपि तथात्वम्।

अत्र क्रमणे "सागरः प्लवगेन्द्रेण क्रमेणैकेन लङ्घितः" भा० व० ११८७श्लो०। "स्पर्द्धते तैरर्द्धं नभः कृतक्रमैः" नैष०। पादे "पदानि त्रीणि दैत्येन्द्र! सम्मितानि पदा मम" इत्युपक्रमे "त्रिभिः क्रमैरसन्तुष्टो द्वीपेनापि न पूर्य्यते" भाग० ८।१९।१९। बलिं प्रतिवामनोक्तिः। "अपि क्रमैरिमाल्लोकान् विश्वकायः क्रमिष्यति" तत्रैव २९श्लो० बलिं प्रति शुक्रोक्तिः। सामर्थ्ये "क्रमं बबन्ध क्रमितुं सकोप" भट्टिः "क्रमं सामर्थ्यं बबन्ध चकार क्रमितुं क्रमं यत्सामर्थ्यं तच्चकारेत्यर्थः" जयम०। सानथ्यकृद्व्यापारविशेष एव क्रमशब्दार्थ इति तु न्याय्यम्। अतएव "न क्रमः संज्जीलत कार्षीत्" "त्वया स-

ञ्जीकृतक्रमेण स्थातव्यम्” “तदुपग्रहणार्थं मया क्रमः सञ्जीकृतः” “सिंहोऽपि क्रमं कृत्वा निःसृतः” इति च पञ्चत० तत्परतैव । परिपाव्याम् “प्रचक्रमे वक्तुमनुज्झितक्रमः” रघुः “नेत्रक्रमेणोपरुरोध सूर्य्यम्” रघुः । नेत्रक्रमेणांशुपरिपाव्या” मल्लि०। आनुपूर्व्ये “क्रमाच्छतमन्थतरोर्य्योपमाः” “रघुः क्रमाद्यौवनभिन्नशैशवः” रघुः । आनुपूर्व्वी च वस्तुभेदात् भिन्ना तत्र शब्दस्यानुपूर्वी अव्यवहितोत्तरोच्चार्य्यमाणत्वम् इतरस्य तु अव्यवहितोत्तरकालवर्त्तित्वम् यथा प्रथमं शैशवं ततोयौवनं ततो जरेति वयोविशेषाणां, विद्यानान्तु वेदपूर्व्वकत्वमितरविद्यानां तथात्वात् । एवं पदार्थगतानुपूर्व्यं विशेषः यथायथमूह्यः । सच अयुगपद्भावः । “अर्थक्रियाकारित्वं च क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति” सर्व्व० स० बौ० द० । “क्रमस्थानं क्रमाभिधानव्याप्तम्” दायभागः । अनुष्ठाने । “इत्यमस्य विततक्रमे क्रतौ” माघः “विततक्रमे विततानुष्ठाने” मल्लि० । १०विन्यासे “उत्क्रान्तवर्णक्रमधूसराणाम्” रघुः । “उत्क्रान्तवर्णक्रमाः शीर्णवर्णविन्यासाः” मल्लि० । ११पंक्तौ च न० “क्रमः शक्तौ परीपाट्यां क्रमं चरणपङ्क्त्योरितिविश्वोक्तेः पादे क्लीवतापि ।

क्रमक त्रि० क्रमं वेदपाठभेदमधीते वेद वा क्रमा० वुन् । १वेदपाठविशेषरूपक्रमाध्यायिनि २तद्वेत्तरि च ।

क्रमजित् पु० नृपभेदे “अमूपराजोदुर्ष्षः क्रमजिच्च सुदर्शनः” भा० स० ४अ० ।

क्रमज्या स्त्री ग्रहाणां स्पष्टाधिकारे सू० सि० उक्ते चतुर्विंशत्यर्द्धजीवाभेदे तन्मानं तत्रोक्तं यथा

“तत्त्वाश्विनो नन्दसमुद्रवेदाश्चन्द्राद्रिषट्का गगनाङ्गनागाः पञ्चाभ्ररुद्रास्तिथिविश्वतुल्या आद्यैर्निरुक्ता नखबाणचन्द्राः । नन्दावनीशैलभुवो दिगङ्कचन्द्रा कृताशपक्षपूर्णदस्राः । तुरङ्गषट्काक्षतयः कुरामसिद्धाः शराष्टेपुयमाः क्रमेण । गजाश्विभाव्यङ्कशराष्टदस्रास्तुरङ्गखसप्तग्रहलोचनानि । अम्भोधिकृष्णत्रयगुणास्तुरङ्गशैलेन्दुरामा रसभूतदन्ताः । कुदन्तलोका द्वितुरङ्गदेवा गोऽभ्राब्धिलोकाः कुगुणाब्धिरामाः । भुजङ्गलोकाब्धिगुणाः क्रमज्या” सू०

“इह हि स्पष्टीकरणप्रभृति सर्वकर्माधज्याभिः प्रतिपाद्यते । यतो ग्रहवलये कोऽप्यर्धभूतः प्रदेशोमध्यशब्देनोच्यते । तस्मान्मध्यसूत्रात् तिर्यक्स्थोपग्रहो वलयेऽर्धज्याख्ये भवति । अतोऽर्धज्याभिः सर्वं कर्म । तत्र भगणकलाङ्कितवृत्तचतुर्थांशे द्वैशान्येव चतुर्विंशतिज्यार्धानि भवन्ति” प्रमिता० । २४क्रमज्याङ्काश्च यथा

२२५ । ४४९ । ६७१ । ८९० । ११०५ ।१३१५ ।१५२० । १७१९ । १९१० । २०९३ । २२६७ । २४३१ । २५८५ । २७२८ । २८५९ । २९७७ । ३०८४ । ३१७७। ३२५६ । ३३२१ । ३३७२ । ३४०९ । ३४३१ । ३४३८ ।

तासां तथामानं समर्थितं सू० सि० रङ्गनाथाभ्यां यथा “राशिलिप्ताष्टमो भागः प्रथमं ज्यार्धमुच्यते । तत्तद्विभक्तलब्धोनमिश्रितं तद्द्वितीयकम् । आद्येनैवं क्रमात् पिण्डान् भक्त्वा लब्धोनसंयुताः । खण्डकाः स्युश्चतुर्विंशज्ज्यार्धपिण्डाः क्रमादमी” सू० सि० ।

“एकराशिकलानामष्टादशशतानामष्टमोंऽशस्तत्त्वाश्विमितः २२५ प्रथममाद्यं ज्यार्धं सम्पूर्णजीवार्धपिण्डकः कथ्यते तदभिज्ञैः । ततः प्रथमज्यार्धात् तेन प्रथमज्यार्धेन भक्तालब्धेन हीनमन्यस्याप्रसङ्गात् प्रथमज्यार्धमनेन युक्तं तत् प्रथमज्यार्धं द्वितीयकं ज्यार्धं भवति द्विगुणप्रथममेकोनम् । तृतीयादीनामानयनार्थमुक्तप्रकारमतिदिशति आद्येनेति । प्रथमज्यार्द्धपिण्डेन । एवमुक्तरीत्या क्रमात् सिद्धपिण्डान् भक्त्वा लब्धैरूनमाद्यं खण्डमनेन युताः खण्डका अग्रिमाव्यवहितसिद्धज्यार्धपिण्डा अग्रिमपिण्डा भवन्ति । यथा प्रथमखण्डं २२५ प्रथमभक्तं फलं १ तेन हीनं खण्डं २२४ तेन युक्तं द्वितीयखण्डं ४४९ । तत्र प्रथमभक्तं फलम् २ अर्धाधिकावयवस्यैकाधिकत्वेन ग्रहणस्य साम्प्रदायिकत्वात् । फलैक्येन ३हीनं प्रथमम् २२२ अनेन द्वितीयखण्डो ४४९ युतस्तृतीयम् ६७१ । एवमिदं प्रथमखण्डभक्तं फलम् ३अनेन पूर्वफलैक्येन ३युतं जातं सर्व्वफलैक्यम् ६ अनेन प्रथमं खण्डं हीनम् २१९ अनेन तृतीय ६७१युतं चतुर्थम् ८९०। एवमिदं प्रथमखण्डभक्तं फलं ४ पूर्व्वलब्धैक्येन ५हीनं प्रथमखण्डरूपं २१९ ज्यान्तररूपखण्डकमतेन ४ हीनं २१५ चतुर्थं८९० युतं पञ्चमं ११०५ एवमन्येऽपि । अथोक्तरीत्याऽसङ्ख्यखण्डानां सम्भवात् खण्डनियममाह स्युरिति । एवं चतुर्विंशत्सङ्ख्याका ज्यार्धपिण्डाः कार्या न तदधिकाः । “एकविंशाच्च विंशाच्च षष्ठात् पञ्चदशादपि । सप्तमाद्द्वादशात् सप्तदशाच्चार्धोत्तरं मतम्” इति ब्रह्मसिद्धान्तोक्तस्थलेऽर्धाधिकावयवस्यैकाधिकत्वेन न ग्रहणम् इतिध्येयम् । गणितस्याविकृतत्वात् सिद्धाः पिण्डाः कथं नोक्ताः? इत्यत आह क्रमादिति । अमी सिद्धाः पिण्डाः क्रमात्

स्यमनन्तरमेवोच्यते । अत्रोपपत्तिः । समायां भूमौ वृत्तं भगणकलाङ्कितं तिर्य्यगूर्द्ध्वाधरव्यासमितरेखाभ्यां चतुर्भागं कार्य्यं तत्रोर्द्ध्वरेखाचक्रपरिधिप्रदेशादुभयत्र समविभागं विगणय्य तदग्रयोर्बद्धं सूत्रं वृत्ते द्विगुणविभागमितस्य सम्पूर्णचापस्य सम्पूर्णज्या । अत्र गणिते ऊर्द्ध्वरेखातोऽर्द्धज्याया एव प्रयोजनात् तदर्द्धचापस्यज्यार्द्धमर्द्धज्या । एवं वृत्तचतुर्थांशे ऊर्द्ध्वरेखातोऽभीष्टांशानां चापाग्रोभयाग्राणामर्द्धज्या अभीष्टा गण्याः । तत्र भगवता स्वेच्छया वृत्तचतुर्थांशे त्रिराशिमिते चतुर्विंशज्ज्याः कल्पितास्तत्स्थानं तु वृत्ते चक्रकलानामङ्कितत्वात् तत्परिधिव्यासार्द्धे त्रिराशिज्यान्तिमा ३४३८ । यद्वा भनन्दाग्निमितपरिधौ ३९२७खबाणसूर्यं १२५०मितो व्यासस्तदा चक्रकलापरिधौ क इत्यनुपातेन व्यासानयनम् । यथा चक्रकलाः २१६०० खबाणसूर्य्यै १२५०गुणाः २७०००००० भनन्दाग्नि ३९२७ भक्ता व्यासः ६८७६ एतदर्द्धमन्तिमा ज्या ३४३८ । अथ वृत्ते चापज्ययोर्विवेके तयोस्तुल्यत्वमपि भगवता कोऽपि वृत्तभागः समोऽस्त्यन्यथामलकादौ सर्षपाद्यवस्थानं न स्यादिति मत्वा तद्भागस्य ज्या तत्तुल्यैवेत्युक्तम् । "वृत्तस्य पत्रवत्यंशो दण्डवद्दृश्यते तु सः" इति शाकल्योक्तेः प्रथमज्या चक्रकलाद्वादशांशरूपैकराशिकलानामष्टमोंऽशस्तत्त्वाश्विमितः २२५ एतन्मितमेव प्रथमचापं तत एतदन्तरेणाभीष्टा ज्यास्तु वंशत् । अथ चतुर्विंशति जीवानां यथोत्तरमुपचयात् तदन्तररूपखण्डानां यथोत्तरमपचयस्य वृत्ते ज्याङ्कनेन प्रत्यक्षत्वाज्ज्यान्तररूपखण्डानामन्तरं यथोत्तरमुपचितमिति द्वाविंशतित्रयोविंशतिचतुर्विंशतिज्यानामन्तरयोरन्तरमिदं परमं खण्डान्तरं सूक्ष्मज्योत्पत्तिप्रकारेणावगतं ।५।१६ ।४८ । अथ यदि त्रिज्ययेदं खण्डकान्तरं तदा प्रथमज्यया किमित्यनुपातेन फलप्रमाणयोः फलेनापवर्त्त्य प्रमाणस्थाने तत्त्वाश्विनोऽनेन भक्तः प्रथमज्या फलं पूर्व्वद्वितीयखण्डयोरन्तरम् । अनेन पूर्व्वखण्डं हीनं द्वितीयखण्डं भवति । तत्र पूर्व्वखण्डं प्रथमज्यातुल्यमेव । द्वितीयखण्डं प्रथमज्यायां युतं द्वितीयज्या । एवमस्मात्तत्त्वाश्विभागलब्धं द्वितीयतृतीयखण्डकयोरन्तरमनेन द्वितीयखण्डमूनं तृतीयखण्डमित्यनेन द्वितीयज्या युता तृतीयज्या । एवं चतुर्थ्यादयः । तत्र पूर्व्वमर्द्धाभ्यधिकग्रहणे नोत्तरत्राधिकान्तरपातसम्भावनया क्वचित् क्वचिदर्द्धाभ्यधिकावयवस्यैकाधिकत्वेन ग्रहणम् इत्युपपन्नं श्लोक-

हयम्" रङ्ग० । उत्क्रमज्याशब्दात्तु ज्याशब्दे वक्ष्यन्ते

क्रमण पु० क्रामत्यनेन करणे ल्युट् । १चरणे हेम० । २यदुवंश्ये नृपभेदे "क्रमिश्च क्रमणश्चैव धृष्णुः शूरः पुरञ्जयः" हरिवं० ३८अ० । भावे ल्युट् । ३पादन्यासे न० । "पृष्ठे त्वधर्म्मं क्रमणेषु यज्ञम्" भाग० ८,१०,२१, "पदैश्चतुर्भिः क्रमणोऽपि तस्य नः" नैष० ।

क्रमजटा स्त्री ऋग्वेदशब्दे १ ।।५० दर्शिते वेदपाठप्रकार[भेदे ।

क्रमदण्डक पु० ऋग्वेदशब्दे १४११५०दर्शिते वेदपाठप्रकारभेदे

क्रमदीश्वर पु० संक्षिप्तसारव्याकरणकारके विद्वद्भेदे "संक्षिप्तसारमाचष्टे पण्डितः क्रमदीश्वरः" संक्षिप्तसारव्या० ।

क्रमपद पु० ऋग्वेदशब्दे १४११५० दर्शिते "क्रमपारः क्रमपदः क्रमजटा क्रमदण्डकश्चेति चतुष्पारायणमित्युक्ते वेदपाठप्रकारभेदे ।

क्रमपार पु० ऋग्वेदशब्दे १४११५० दर्शिते वेदपाठप्रकारभेदे

क्रमपूरक पु० क्रमेण पूरयति बीजम् पूरि-ण्वुल् । वकवृक्षे राजनि० तस्य पुष्पवृन्ते क्रमेण बीजपूरकत्वात्तथात्वम् ।

क्रमशस् अव्य० कारकार्थवृत्तेः क्रमात्+वीप्सायां शस् । क्रमं क्रमम्, क्रमेण क्रमेणेत्यादिकेऽर्थे "कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोवराः" मनुः ।

क्रमसंग्रह पु० श्रीकृष्णतर्कालङ्कारकृते दायाधिकारिक्रमज्ञापके ग्रन्थभेदे ।

क्रमसन्दर्भ पु० अनुष्ठानक्रमज्ञापके ग्रन्थभेदे ।

क्रमागत त्रि० क्रमेणागतः । १कुलादिपरम्परया आगते "तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः" मनुः "अस्वतन्त्राः स्त्रियः सर्व्वाः पुत्रदासपरिग्रहाः । अस्वतन्त्रस्तत्र गृही यस्तु तस्य क्रमागतमिति" व्यव०त० नारदः । २पित्रादिक्रमेण प्राप्ते च "आगमोऽभ्यधिको भोगाद्विना पूर्व्वक्रमागतात्" स्मृतिः । क्रमायातादयोऽप्यत्र

क्रमादि पु० वेत्त्यधीते वेत्यर्थे वुन् प्रत्ययप्रकृतिभूते पा० उक्ते शब्दगणभेदे स च गणः "क्रम पद शिक्षा मीमांसा"

क्रमि पु० क्रम-इन् । कृमिपदार्थे । द्विरूपको० "आमाटोपापचीश्लेष्मस्थूलक्रमिविकारिणाम्" सुश्रु०

क्रमिक त्रि० क्रमादागतः ठन् । कुलक्रमागते । "आप्तैरलुब्धैः क्रमिकैस्ते च (कर्म्मान्ताः) कश्चिदनुष्ठिताः" भा० स०५अ० । क्रमोविद्यतेऽस्य ठन् । २क्रमवर्त्तिनि । "क्रमिकं यत्रानयुगमेकार्थेऽन्यार्थबोधकम्" शब्दश० प्र०

क्रमिकण्टक न० क्रमौ कण्टकमिव तन्नाशकत्वात् । विडङ्गे २चित्रके (चिता) ३उडुम्बरे च मेदि०

क्रमिघ्न न० कृमिं हन्ति हन-ट १विडङ्गे रत्नमा०। २कृमिनाशकमात्रे त्रि० स्त्रियां ङीप्।

क्रमिज न० कृमिभ्योजायते जन-ड १अगुरुचन्दने अमरः २लाक्षायां स्त्री रत्नमाला०

क्रमिशत्रु पु० कृमेः शत्रुरिव। विड़ङ्गे रत्नमाला

क्रमु पु० कृम उन्। गुवाके द्विरूपकोषः

क्रमुक पु० कृम—उन् संज्ञायां कन्। १पट्टिकालोध्रे २गुवाकवृक्षे ३ब्रह्मदारुवृक्षे च अमरः ४भद्रमुस्तके ५कार्पासिकाफले न० मेदि० अयं शालसारादिगणे सुश्रुते उक्तः "शालसाराजकर्णखदिरकदरकालस्कन्दक्रमुकेत्याद्युक्त्वा "शालसारादिरित्येषः गुल्मकुष्ठविनाशनः। मेहपाण्डुमयहरः कफमेदोविशोषणः" सुश्रु० तद्गुणा उक्ता "आस्वादितार्द्रक्रमुकाः समुद्रात्" माघः गौरा० ङीष्। ६गुवाके स्त्री शब्दरत्नमाला

क्रमेतर त्रि० ५त०। क्रमात् वेदपाठप्रकारभेदात् भिन्ने। ततः उक्था० तद्ग्रन्थं वेत्ति अधीते वा ठक्। क्रामेतरक तद्वेत्तरि तदध्येतरि च त्रि०

क्रमेल पुंस्त्री० क्रामति क्रम—विच् एलति अच् कर्म०। उष्ट्रे स्वार्थे क। तत्रार्थे। उभयत्र जातित्वात् ङीष्।

क्रय पु० क्री—भावे अच्। पणपूरणादिमूल्यदानेन विक्रेतुः स्वत्वापनयनेन स्वत्वापादनव्यापारे (केना)। प्रतिरूपद्रव्यदानेन तथाचरणे तु न क्रयव्यवहारः इत्यतः द्रव्यपदमनुक्त्वा पणपूरणेत्युक्तम्। क्रयस्य स्वत्वहेतुत्वञ्च पूर्व्वस्वामिस्वत्वनाशादेव भवति सति तत्स्वत्वे सजातीयस्वत्वं प्रति सजातीयस्वत्वस्य प्रतिबन्धकत्वेन क्रेतुः स्वत्वोत्पत्त्यभावात् अतोमूल्यदानेन तत्स्वत्वापाकरणम्। तस्य च स्वत्वहेतुत्वम् "सप्त वित्तागमा धर्म्याः दायोलाभः क्रयोजयः। विभागः संप्रयोगश्च सत्प्रतिग्रह एव च" स्मृतेः "स्वामी रिक्थक्रयसंविभागपरिग्रहाधिगमेषु" गौतमस्मरणाच्च। क्रयादिरूपागमसहितभोगस्यैव स्वत्वे प्रामाण्यं वीरमि० व्यवस्थापितं यथा

"सप्त स्थावरागमोपायान् प्रदर्श्य तत्र भुक्तेः प्रामाण्यमाह बृहस्पतिः। विद्यया क्रयबन्धेन शौर्य्यभार्य्यान्वयागतम्। सपिण्डस्याप्रजस्यांशं स्थावरं सप्तधा मतम्। पित्र्यलब्धक्रयाधाने रिक्थशौर्य्यप्रवेदनात्। प्राप्ते सप्तविधे भोगः सागमः सिद्धिमाप्नुयात्"।

विद्यया प्रातप्रहादिकप्रयोजिकया, स्वत्वोपायःक्रयःप्रसिद्धः बन्धो बन्धकं सोपाधिकस्वत्वहेतुत्वे ऽपि तदवधि आत्यन्तिकस्वत्वहेतुस्तदप्युत्तरत्र विवेचनीयम्। क्रयबन्धेनेति समाहारद्वन्द्व एकत्वम्। शौर्य्यागतं युद्धार्जितम्। भार्य्यागतं विवाहकाले प्राप्तम्। अन्वयागतं पित्रादिक्रमोपात्तम्। अप्रजस्य सपिण्डस्यांशं रिक्थहरान्तराभावे पिण्डदानाद्यधिकारितया प्राप्तम्। पित्र्येत्यादिना प्रागुक्तानेव सप्तस्थावरागमोपायाननूद्य तत्र भोगस्य प्रामाण्यं विधीयते। तत्र प्रवेदनं विवाहः। स एव "क्रमागतः शासनिकः क्रयाधानागमान्वितः। एवं विधस्तु यो भोगः स तु सिद्धिमवाप्नुयात्। संविभागक्रयप्राप्तं पितृलब्धञ्च राजतः। स्थावरं सिद्धिमाप्नोति भुक्त्वा हानिमुपेक्षया। प्राप्तमात्रं येन भुक्तं स्वीकृत्यापरिपन्थिनम्। तस्य तत्सिद्धिमाप्नोति हानिश्चोपेक्षया तथा। अभ्यासनात् समारभ्य भुक्तिर्य्यस्याविघातिनी। त्रिंशद्वर्षाण्यविच्छिन्ना तस्य तां न विचालयेत्"।

मूल्यं दास्यामीति नियमं कृत्वाऽपि ग्रहणादपि क्रयसिद्धिः यथाह विवादचि० कात्या० "पण्यं गृहीत्वा योमूल्यमदत्त्वैव दिशं व्रजेत्। ऋतुत्रयस्योपरिष्टात्तद्धनं वृद्धिमाप्नुयात्" अत्र विषये लेख्यपत्रकरणमाह बृहस्पतिः "गृहक्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रं कार्यते यत्तु क्रयलेख्यं तदुच्यते"। तस्यानुशयकालश्च अनुशयशब्दे दर्शितः"। वैदिककर्म्माङ्गपरिक्रयादौ प्रायेण यजमानस्यैवाधिकारः यथाह क्रयाधिकरणे जै०सू०भा०

"स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात्"३।८।१ सू०।

"अस्ति परिक्रयः ज्योतिष्टोमे "द्वादशशतं दर्शपूर्णमासयोः अन्वाहार्यम्"। तत्र सन्देहः-किम् अध्वर्युणा परिक्रेतव्या ऋत्विजः, उत स्वामिना ?-इति। किं प्राप्तम्?-समाख्यानात् अध्वर्युणा,-इति प्राप्ते ब्रूमः,-'स्वामिकर्म परिक्रयः' कस्मात् ? कर्मणः तदर्थत्वात्,फलकामो हि यजमानः यश्च फलकामः, तेन स्वयं कर्त्तव्यम्, स यदि परिक्रीणीते, ततः स्वयं सर्वं करोति इति गम्यते, अथ न परिक्रीणीते, न सर्वं कुर्यात्। तस्मात् स्वामी परिक्रीणीते इति" शबरभाष्यम्

"वचनादितरेषां स्यात्" २सू०

"किम् एष एवोत्सर्गः ?	न-इत्युच्यते,-'वचनात् इतरेषां स्यात्'। यत्र वचनं भवति, तत्र वचनप्रामाण्यात् भवति परिक्रयः,-'य एतामिष्टकाम् उपदध्यात् स त्रीन् वरान् दद्यात्'-इति" भा०।

सोमादिक्रयस्य द्रव्यसाध्यतया स्त्रीणां पित्रा विक्रीतत्वात्

स्वामिना च क्रीतत्वात् द्रव्यस्वामित्वाभावे यज्ञाधिकारित्वं नास्तीत्याशङ्कायां सहपत्न्याऽधिकार इत्येतत् जै० ६।१।१० सूत्रादौ भाष्ये च व्यवस्थापितं यथा

"द्रव्यवत्त्वात्तु पुंसां स्यात्, द्रव्यसंयुक्तं, क्रयविक्रयाभ्याम् अद्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात्" १०सू०(पू०)

"पुंसां तु स्यात् अधिकारः, द्रव्यवत्त्वात्, द्रव्यवन्तो हि पुमांसो न स्त्रियः, द्रव्यसंयुक्तं च एतत् कर्म 'व्रीहिभिर्यजेत, यवैर्यजेत'—इत्येवमादि। कथम्? अद्रव्यत्वं स्त्रीणां' 'क्रयविक्रयाभ्यां क्रयविक्रयसंयुक्ता हि स्त्रियः,पित्रा विक्रीयन्ते,भर्त्त्रा च क्रीयन्ते,विक्रीतत्वाच्च पितृधनानामनीशिन्यः क्रीतत्वाच्च भर्तृधनानाम्। विक्रयो हि श्रूयते, 'शतमधिरथं दुहितृमते दद्यात्, "आर्षे गोमिथुनम्"-इति च। न च, एतत् दृष्टार्थे-सति आनमनेऽदृष्टार्थं भवितुमर्हति। एवं द्रव्यैः समानयोगित्वं स्त्रीणाम्''भा०"तथा च अन्यार्थदर्शनम्" ११सू०

'या पत्या क्रीता सती "अथान्यैश्चरति'-इति क्रीततां दर्शयति'' भा०

"तादर्थ्यात् कर्मतादर्थ्यम्" १२सू० (आ० नि०) 'आह, यदनया भर्त्त्रोपसर्पणेन वा कर्त्तनेन वा धनम् उपार्जितं, तेन यक्ष्यते,—इति। उच्यते,—तदप्यस्या न स्वं, यदा हि सा अन्यस्य स्वभूता, तदा यत् तदीयं, तदपि तस्यैव। अपि च, स्वामिनस्तया कर्म कर्त्तव्यं न तं परित्यज्य स्वकर्मार्हति कर्त्तुम्। यत् तया अन्येन प्रकारेण उपार्ज्यते, तत् पत्युरेव स्वं भवितुमर्हति—इति। एवं च स्मरन्ति, "भार्या दासश्च पुत्रश्च निर्धनाः सर्व एव ते। यत्ते समधिगच्छन्ति, यस्य ते तस्य तद्धनम्" इति' भा०

"फलोत्साहाविशेषात्तु" १३सू० (सि०) तुशब्दः पक्षं व्यावर्त्तयति। न च एतदस्ति,—निर्धना स्त्री—इति, द्रव्यवती हि सा, फलोत्साहाविशेषात्, स्मृतिप्रामाण्यात् स्वया तया भवितव्यं फलार्थिन्यापि, श्रुतिविशेषात् फलार्थिन्या यष्टव्यम्, यदि स्मृतिमनुरुध्यमाना परवशा निर्धना च स्यात्, 'यजेत'—इत्युक्ते सति न यजेत, तत्र स्मृत्या श्रुतिर्बाध्येत। न च एतत्—न्याय्यम्। तस्मात् फलार्थिनी सती स्मृतिमप्रमाणीकृत्य द्रव्यं परिगृह्णीयात् यजेत च—इति'' भा०

"अर्थेन च समवेतत्वात्" १४सू०

अर्थेन च अस्याः समवेतत्वं भवति, एवं दानकाले संवादः क्रियते,—"धर्मे च अर्थे च कामे च न अतिचरितव्यः'—इति। यत्तु उच्यते,-'भार्यादयो निर्धनाः'—इति स्मरणमाणमपि निर्धनत्वम् अन्याय्यमेव, श्रुतिविरोधात्। तस्मात् अस्वातन्त्र्यम् अनेन प्रकारेण उच्यते। संव्यवहारप्रसिद्ध्यर्थम्" भा०

"क्रयस्य धर्ममात्रत्वम्" १५सू०। (आ०नि०)

यत्तु क्रयः श्रूयते,—धर्ममात्रं तु तत्, नासौ क्रयः—इति, क्रयो हि उच्चनीचपण्यपणो भवति। नियतं त्विदं दानं शतमधिरथं, शोभनाम् अशोभनाञ्च कन्यां प्रति। स्मार्त्ते च श्रुतिविरुद्धं विक्रयं नानुमन्यन्ते। तस्मात् अविक्रयोऽयम्—इति भा०

"स्ववत्तामपि दर्शयति" १६सू०

'पत्नी वै पारिणाह्यस्य ईष्टे—पत्न्यैव गतमनुमतं क्रियते। तथा "भसदा पत्नीः संयाजयन्ति, भसद्वीर्या हि पत्नयः भसदाश्रा एताः परगृहाणाम् ऐश्वर्यमवरुन्धते" भा०।

"स्ववतोस्तु वचनादैककर्म्यं स्यात्" १७सू०

स्ववन्तावुभावपि दम्पती—इत्येवं तावत् स्थितम्। तत्र सन्देहः,—किं पृथक् पत्नी यजेत, पृथक् यजमानः उत सम्भूय यजेयाताम्!—इति। किं प्राप्तम्?—पृथक्त्वेन। कुतः?। एकवचनस्य विवक्षितत्वात्, उपादेयत्वेन कर्त्तरि 'यजेत'—इति श्रूयते तस्मात् एकवचनं विवक्ष्यते,—यथा न द्वौ पुरुषौ सम्भूय यजेयाताम्,तथा अत्रापि द्रष्टव्यम्। एवं प्राप्ते ब्रूमः,—"स्ववतोस्तु वचनात्तयोः सहक्रिया एवं स्मरन्ति,—'धर्मे चार्थे च कामे च नातिचरितव्यः'—इति, तथा 'सह धर्मश्चरितव्यः, सहापत्यम् उत्पादयितव्यम्'-इत्युच्यते,—स्मृतिवचनेन श्रुतिवचनं युक्तं बाधितुम्। न—इति ब्रूमः,—इह किञ्चित् कर्म,स्त्रीपुंसकर्तृकमेव, यथा दर्शपूर्णमासौ—ज्योतिष्टोमः—इति, यत्र पत्न्यवेक्षितेन यजमानावेक्षितेन च आज्येन होम उच्यते, तत्र अन्यतराभावे वैगुण्यम्।

"ननु पुंसो यजमानस्य यजमानावेक्षितमाज्यं, स्त्रिया यजमानायाः पत्न्यवेक्षितं भविष्यति'—इति। न—इति आह,—नायम् ईक्षितृसंस्कारः, ईक्षितुः संस्कारो यदि, तदैवं स्यात्,आज्यसंस्कारश्च अयं, गुणभूतौ ईक्षितारौ, तत्र अन्यतरापाये नियतं वैगुण्यं, सर्वाङ्गोपसंहारी च प्रयोगवचनः। तत्र एतत् स्यात्,—स्त्रीयजमाना पुमांसं परिक्रेष्यति आज्यस्य ईक्षितारं पुमांश्च स्त्रियमन्यवेक्षित्रीम्—इति। तच्च न, पत्नीति हि यज्ञस्य

स्वामिनी इत्युच्यते, न क्रीता पत्नी—इति सम्बन्धिशब्दोऽयं यजमानः-इति च स्वामी,क्रीतः। तस्मात् स्त्रीपुंसयोरेकम् एवञ्जातीयकं कर्म्म—इति।

“नन श्रुतिसामर्थ्यात्-‘यः-कश्चित्, यया कयाचित् सह सम्भूय यजेत’-इति प्राप्ते इदम् उच्यते,-‘यस्त्वया कश्चित् धर्म्मः कयाचित् सह कर्त्तव्यः, सोऽनया सह—इति, तेन न श्रुतिविरोधः स्मृतेः—इति गम्यते। अथ यदुक्तं,—केवलस्य पुंसोऽधिकारः केवलायाश्च स्त्रियाः, ‘यजेत’—इत्येकवचनस्य विवक्षितत्वात्—इति, तत् परिहर्त्तव्यम्। इदं तावदयं प्रष्टव्यः—‘यजेत’—इत्येकवचने विवक्षिते, षोड़शभिरृत्विग्भिः सहयागो भवति-इत्येवम् उच्यते, प्रतिकारकं क्रियाभेदः,याजमानानेव पदार्थान् परिक्रयादीन् कुर्वन् ‘यजते’ इत्युच्यते यजमानः, आध्वर्य्यवानेव कुर्वन् अध्वर्युर्यजति—इत्येवम् उच्यते,यथा सम्भरणमेव कुर्वती स्थाली पक्तिं करोति—इत्युच्यते, यस्य च कारकस्य य आत्मीयोव्यापारः, स एकवचने विवक्षिते एकेन कर्त्तव्यो भवति—इति। एवं चेत् यावान् व्यापारो यजमानस्य, स तावान् न सम्भूय कर्त्तव्यः, एकैको याजमानेऽपरेणापरः। द्वादशे वा शते एकेन षट्पञ्चाशत्, अपरेणापि षट्पञ्चाशत्—इति। इह तु पत्नीव्यापारः अन्य एव, न तत्र पत्नी प्रवर्त्तमाना यजमानस्य एकत्वं विहन्ति,यथा अध्वर्युराध्वर्य्यवेषु प्रवर्त्तमानः। अवश्यं च सह पत्न्या यष्टव्यं, मध्यगं हि इदं दम्पत्योर्धनं तत्र यागोऽवश्यं सह पत्न्या कर्त्तव्यः,इतरथा अन्यतरानिच्छयां त्याग एव न संवर्त्तेत,तथाहि द्वितीयया पत्न्या विना त्यागोनैवावकल्पते, यस्य द्वितीया पत्न्यस्ति, तत्र क्रत्वर्थान् एका करिष्यति। कर्त्तृसंस्कारार्थेषु नैव दोषः, सम्भवन्ति हि तानि सर्वत्र—इति” भा०

“लिङ्गदर्शनाच्च” १८सू०।

“लिङ्गं खल्वपि दृश्यते,‘योक्त्रेण पत्नीं सन्नह्यति मेखलया यजमानं मिथुनत्वाय”—इति। यदि स्त्रीपुंसावेकत्र, योक्त्रस्य मेखलायाश्च विभागो वाक्यात् गम्यते, मिथुनसम्भवश्च, तदेतत् स्त्रीपुंससाधनके कर्म्मण्युपपद्यते, न अन्यथा” भा०

‘क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते’ १९सू०

“स्थितादुत्तरमुच्यते। तुशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, यदुक्तं स्ववती स्त्री—इति, क्रीता हि सा, दृष्टार्थत्वात् अधिरथशतदानस्य,क्रीतो यदस्याः स्वामित्वम् उच्यते, तत् भक्त्या यथा पूर्वकोऽस्माकं बलीवर्द्दानाम् ईष्टे—इति, एवं पत्न्यपि पारिणाय्यस्य ईष्टे—इति” भा०

“फलार्थित्वात्तु स्वामित्वेनाभिसम्बन्धः” २०सू०

“नैतदस्ति, क्रयो मुख्यः, गौणं स्वामित्वम्-इति, फलार्थिनी हि सा, स्वर्त्तनादरिष्यते, स्मृत्यनुरोधात् अस्वा स्यात्, स्ववती श्रुत्यनुरोधात्” भा०

“फलवत्तां च दर्शयति” २१सू०

“सं पत्नी पत्या सुकृतेन गच्छतां यज्ञस्य धुर्यायुक्तावभूताम्, सञ्जानानौ विजहताम् अरातीर्दिवि ज्योतिरजरमारभेताम्”-इति दम्पत्योः फलं दर्शयति। तस्मात् अप्युभावधिकृतौ-इति सिद्धम्” शबरभाष्यम्।

“शूद्रान्नैपैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः” स्मृतिः।

क्रयनक्षत्राणि मु० चि० पी० धा० तनितानि यथा।

“क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न। पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः क्रये शुभाः” मु०चि०।

“अथ क्रयविक्रयनक्षत्रेषु परस्परनिषेधं वदन्क्रयविक्रयनक्षत्राण्यनुष्टुभाह क्रयर्क्षे इति। क्रयनक्षत्रे विक्रयो न कार्यः, तथा विक्रयर्क्षे क्रयोऽपि न कार्यः, नन्विदमयुक्तं विक्रयोनाम मौल्यं गृहीत्वा वस्तुदानं क्रयोनाम मौल्यं दत्त्वा स्वपहणं यदा येन क्रयः कर्त्तव्यः तदान्येन विक्रयोऽपि कर्त्तव्यस्तत्र क्रयविक्रयनक्षत्राणां महाभेदादुभयविधमुहूर्त्तानुपपत्तिः उच्यते विक्रेता यदा मुहूर्तोविक्रयार्थं गृह्णाति तदा क्रयिणोऽनुज्ञां लब्ध्वा यावदिष्टं वस्तु स्वगृहात्पृथक् क्रियते, तत्कर्म विक्रयशब्दवाच्यं यदा तु क्रयिणा क्रयमुहूर्त्तं प्राप्यते तदा विक्रेत्रे मूल्यद्रव्यं दत्त्वा पृथक् कृतविक्रेतृवस्तु गृह्णते तत्कर्म क्रयशब्दवाच्यमिति मत्वात्र समाधिः। अथवा क्रयिविक्रेत्रोरन्यतरस्य कदाचित्मुहूर्त्तसम्भवादुयोवनावश्यकत्वे। आवश्यकत्वे तु मुहूर्त्तगवेषणायां कालविलम्बनिष्पत्तावन्येन तृतीयेन मुहूर्त्तविचारमनङ्गीकृत्य समवस्तुप्राप्त्या वस्तुग्रहणासिद्धिसम्भवात् तदा विक्रेतुरेव मुहूर्त्तविचारः। एवं च क्रेतुरप्यवश्यविक्रेतव्यस्य वस्तुनो यदा गृहीता सम्भवेत्तदैव मुहूर्त्तमनालोच्य वस्तुदानमावश्यकम् मुहूर्त्तविचारतः कालविलम्बे तावद्व्यवाप्त्यनुपपत्तेः। तदा तु क्रयस्य एव मुहूर्त्तविचारः। नन्वेवमपि क्रयविक्रयनक्षत्राणां पार्थक्येनाभिधानाच्चयोः परस्परगतनिषेधो न युज्यते यथा राजदर्शनविहितनक्षत्रेभ्योऽन्यनक्षत्रेषु राजदर्शनं निषिद्धमि

यद्यपीष्यते, सर्वं "वाक्यं सावधारणं भवतीति" न्यायात् उच्यते। क्रयनक्षत्रे क्रयः कार्य इत्युक्तेः विक्रयस्य स्वतन्त्रकर्मत्वात् तत्र क्रयवन्निषेधाभावः एवं विक्रयदर्श्वपि क्रयनिषेधाभावः तत्र निषेधे सत्यन्यनक्षत्राणां मध्यमत्वावगतेः कदाचित् क्रयनक्षत्राणां मध्यमत्वमङ्गीकृत्य विक्रयस्य विहितमुहूर्तानुपलब्धौ तत्र मुहूर्त्तोमध्यमोऽपि ग्राह्यस्तद्वत्रापि वाचनिकस्तन्निषेधः अतः। क्रयविक्रयनक्षत्रेभ्योभिन्ननक्षत्रेषु क्रयविक्रयौ मध्यमावित्यनुमितः निषेधस्य वाचनिकत्वमुक्तं दीपिकायाम् "यमाद्यकाद्रिक्तताग्रपूर्वानेष्टाः क्रये विक्रयणेऽतिशस्ताः। पौष्णाऽश्विचित्रान्त्यवसातकर्णाः शस्ताः क्रये विक्रयणे निषिद्धाः" इति अथ क्रयमुहूर्त्त उच्यते। तत्र पौष्णं रेवती अम्बुपः शततारका अश्विनी वातः स्वाती श्रवणः चित्रा एतानि भानि क्रये शुभानि विक्रये निषिद्धानि च सम्मतिरत्नोक्तेव"।

क्रयण न० क्री–भावे ल्युट्। क्रये "वैश्यराजन्ययोः सोमे न्यग्रोधस्तिभीनुपनह्यो च्छन् भक्षाय क्रयणप्रभृत्यनुसोमम्" कात्या०श्रौ०१०,९,३०, क्रयणप्रभृति (सोम) क्रयणादारभ्य" कर्कः। क्रयणस्येदम् छ। क्रयणीय क्रयणसम्बन्धिनि। "अपसूक्ष्मभक्षायापनं क्रयणीयादौ" कात्या० श्रौ० १३,६,२३, आदौ क्रयणीयस्याङ्कः" सं० व्या०।

क्रयनियम पु० क्रये नियमः। क्रेतृविक्रेत्रोर्नियमभेदे। स च नियमः "भूयसा वस्नमचरत् कनीयोऽविक्रीतो अकानिषं पुनर्यन्। स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्रवाणम्" ऋ०४,२४,९, भाष्ये दर्शितो यथा– "अत्र षड्गुरुशिष्ये संप्रदायविद्भिः पूर्वाचार्यैः केचित् श्लोकाः पठ्यन्ते तएव लिख्यन्ते। "अल्पं यः पतिगृह्णाति मूल्यं पण्येन भूयसा। स क्रेतारं पुनर्गच्छन्नविक्रीतस्तथं मया। इति ब्रुवन् कामयते पुनर्मूल्यस्य पूरणम्। स विक्रेता पुनर्मूल्यं भूयसा न प्रपूरयेत्। हीनं न लभते वस्नं यदा विक्रीतवान् पुरा। यथासमयमेव स्यात्तयोर्न पुनरन्यथा। अयं विक्रय एवेति समयश्चेत् कृतोभवेत्। अथ सूत्रार्थमेतत् स्याद्विचार्यैव तु निर्णयः। इत्येवं समयोऽकारि तदा मूल्यं प्रपूर्यते। तस्मादादौ मया कार्य्यः समयोऽत्रेति चिन्तयेत्। वामदेवो वशीकृत्य शक्रं स्तोत्रेण भूयसा। विक्रीणन् समयं चक्रइन्द्रं क इममित्यृचा। अतश्च ह्यृच एकार्थौ भूयसा वस्नमित्ययमिति"। अयमर्थः प्रतिपाद्यते कश्चित् भूयसा भूम्ना पण्येन द्रव्येण कनीयोऽल्पतरं वस्नं पण्यमूल्यं धनमचरत प्राप्नोति पुनर्यन् क्रेतारं पुनर्गच्छन् स विक्रेतायमर्थो मया न विक्रीत इति ब्रुवन् न कानिषं मूल्यपूर्त्तिं कामयते व्यत्ययेनोत्तमपुरुषः। स विक्रेता भूयसा धनेन कनीयोऽल्पतरं मूल्यं नारिरेचीत् क्रेतुः सकाशान्न रिक्तीकरोति न लभत इत्यर्थः। दीना असमर्था दक्षाः समर्थाश्च याणं वचनं विप्रदुहन्ति यथोक्तं क्रयकाले तथैव लभन्ते"

"क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः यदा वृत्राणि जंघनदथैनं मे पुनर्ददत्" ऋ० ४,२४,१०, "मम मदीयमिदं स्वभूतमिन्द्रं धेनुभिः प्रीणयित्रीभिर्दशभिर्दशसंख्याकाभिः स्तुतिभिः कः क्रीणाति क्रयं करोति हे तदानीं क्रेतारो युष्माकं मध्य एवमपि समयः क्रियते यदाऽयमिन्द्रो वृत्राणि त्वदीयान् शत्रून् जंघनत् हन्यात् अथानन्तरमेवैनमिन्द्रं मे मह्यं पुनर्ददत् पुनर्दद्यात्" भा०।

"निश्चित्य वस्तु तन्मूल्यमुभयोः सम्मतौ शिवे!। परस्पराज्ञाकरणं क्रयसिद्धिस्ततो भवेदिति"। "क्रयसिद्धिरदुष्टानां गुणश्रवणतो भवेत्। विपर्यये तद्गुणानामन्यथा भवति क्रयः" महा० नि० त०

क्रयलेख्य न० ६त०। "गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रं कारयते यत्तु क्रयलेख्यं तदुच्यते" इत्युक्तलक्षणे क्रयसूचकपत्रे (कवाला)।

क्रयविक्रय पु०द्वि०व०। द्वन्द्वः। क्रये विक्रये च। "आगमं निर्गमस्थानं तथा वृद्धिक्षयावुभौ। विचार्य्य सर्वपण्यानां कारयेत् क्रयविक्रयौ। पञ्चरात्रे पञ्चरात्रे पक्षे पक्षेऽथवा गते। कुर्वीत चैषां प्रत्यक्षमर्घसंस्थापनं नृपः" मनुः। "आगमनियमोपयोगादेः पण्यानामनियतत्वात् अस्थिरार्घाणां पञ्चरात्रे पञ्चरात्रे गते, स्थिरतरार्घाणां पक्षे पक्षे गते वणिजामर्घविदां प्रत्यक्षं नृपतिराप्तपुरुषेण व्यवस्थां (मूल्यस्य) कुर्य्यात्" कुल्लू०। "क्रयविक्रयानुशयश्च विवादः स्वामिपालयोः" मनुः। क्रयसहितोविक्रयः शा० त०। २क्रयसहितविक्रये। "देवदानवगन्धर्वयक्षराक्षसपन्नगाः। नासन् कृतयुगे तात! तदा न क्रयविक्रयः" भा० व० १४९अ०। ३तद्युक्ते वाणिज्ये "ऋणदानं तथाऽऽदानं वस्तूनां क्रयविक्रयम्। न कुर्य्याद्गुरुणा सार्द्धं शिष्योभूत्वा कथञ्चन" तन्त्रसा०।

क्रयविक्रयानुशय पु० क्रये विक्रये चानुशयः पश्चात्तापः। मनूक्ते अष्टादशविवादान्तर्गते विवादभेदे। स च द्विविधः क्रीतानुशयो विक्रीतानुशयश्च। अनुशयशब्दे १८६पृष्ठे तद्विवृतिः दृश्या। अधिकं क्रीतानुशयशब्दे वक्ष्यते।

क्रयविक्रयिक पु० क्रयविक्रयाभ्यां जीवति ठञ्। वणिग्जने "वस्नक्रयविक्रयाट् ठन्" पा० क्रयविक्रयग्रहणं व्यस्तसमस्तविषयम् तेन व्यस्तादपि ठन्। क्रयिक विक्रयिक तेन जीविनि त्रि०।

क्रयशीर्ष न० कपिशीर्ष+पृषो०। कपिशीर्षे त्रिका०।

क्रयाक्रयिका क्रयसहितः अक्रयः शाक० स्वार्थे क अत इत्त्वम्। क्रये अक्रये च।

क्रयारोह पु० क्रयस्य क्रयार्थमारोहत्यत्र आ+रुह आधारे घञ् चतुर्थ्यर्थे ६त०। हट्टे (हाट) हारा०।

क्रयिक त्रि० क्रयेण जीवति क्रयात् व्यस्तादपि ठन्। १वणिग्जने "पर्य्यासत क्रयिकलोकमगण्यपण्यमित्यादि" माघः क्रय+प्रयोजनमस्त्यस्य ठन्। २क्रेतरि "धनेन क्रयिको हन्ति खादकश्चोपभोगतः। घातको बधबन्धाभ्यामित्येष त्रिविधो बधः" भा० आनु० ११५अ०

क्रय्य त्रि० क्रयाय क्रेतारः क्रीणीयुरितिबुद्ध्या प्रसारितम् क्री-यत् "क्रय्यस्तदर्थे" पा० नि०। क्रयनिमित्तं हट्टे प्रसारिते द्रव्ये "क्रय्यस्ते सोमो राजा इति क्रय्य इत्याह सोमविक्रयी" शत० ब्रा० ३,३,३,१।

क्रवण त्रि० क्रुङ-शब्दे ल्यु। १स्तुतिकर्त्तरि "अता न हार्दि क्रवणस्य रेजते" ऋ० ५,४४,९, "क्रवणस्य स्तुतिकर्त्तुः" भा० भावे ल्युट्। २शब्दकरणे न०

क्रविष्णु त्रि० क्रु-बा० इष्णुच्। क्रव्यादे राक्षसादौ "क्रव्यात् क्रविष्णुर्विचिनोतु वृक्णम्" ऋ० १,८७,४,

क्रविस् न० क्रम-इसुन् लस्य रः। मांसे क्रव्ये। "यदश्वस्य क्रविषो गन्धोऽस्ति" ऋ० १,१६२,९,१२, "क्रविषः मांसस्य" भा०

क्रव्य न० क्रम-यत् लस्य रः। आममांसे अमरः। "स्यपटगतमपि क्रव्यमव्ययमत्ति" मालती०। "क्रव्यादाः प्राणिनां क्रव्यं दुदुहुः स्वकलेवरात्" भाग० ४,१८,२२,। मांसभेदास्तद्गुणाश्च सुश्रुते उक्ता यथा

"अत ऊर्द्ध्वं मांसवर्गानुपदेक्ष्यामः तद्यथा—जलेशया आनूपा ग्राम्याः क्रव्यभुज एकशफा जाङ्गलाश्चेति षण्मांसवर्गास्तेषां वर्णाणामुत्तरोत्तरं प्रधानतमाः। ते पुनर्द्विविधा जाङ्गला आनूपाश्चेति। तत्र जाङ्गलवर्गोऽष्टविधः तद्यथा—जाङ्गला विष्किराः प्रतुदा गुहाशयाः प्रसहाः पर्णमृगा बिलेशया ग्राम्याश्चेति। तेषां जाङ्गलविष्किरौ प्रधानतमौ तावेणहरिणर्क्ष्यकुरङ्गकरालकृतमालशरभश्वदंष्ट्रापृषतचारुष्करमृगमातृकाप्रभृतयो जाङ्गला मृगाः कषाया मधुरा लघवो वातपित्तहरास्तीक्ष्णा हृद्या बस्तिशोधनाश्च। कषायो मधुरो हृद्यः पित्तासृक्कफरोगहा। संग्राही रोचको बल्यस्तेषामेणो ज्वरापहः। मधुरो मधुरः पाके दोषघ्नोऽनलदीपनः। शीतलो बद्धविण्मूत्रः सुगन्धिर्हरिणो लघुः। एणः कृष्णस्तयोर्ज्ञेयो हरिणस्ताम्र उच्यते। न कृष्णो न च ताम्रश्च कुरङ्गः सोऽभिधीयते। शीतासृक्पित्तशमनी विज्ञेया मृगमातृका। सन्निपातक्षयश्वासकासहिक्काऽरुचिप्रणुत्। लावतित्तिरिकपिञ्जलवर्त्तीरवर्त्तिकावर्त्तिकनप्तृकावार्त्तीकचकोरकलविङ्कमयूरक्रकरोपचक्रकुक्कुटसारङ्गशतपत्रककुतित्तिरिकुररात्युहकयवलकप्रभृतयस्त्वाहया विष्किरा लघवः शीतमधुराः कषाया दोषशमनाश्च। संग्राही दीपनश्चैव कषायमधुरो लघुः। लावः कटुविपाकश्च सन्निपाते च पूजितः। ईषद्गुरूष्णमधुरो वृष्यो मेधाग्निवर्द्धनः। तित्तिरिः सर्वदोषघ्नो ग्राही वर्णप्रसादनः। हिक्काश्वासानिलहरो विशेषाद्गौरतित्तिरिः। रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः। कफोत्थेषु च रोगेषु मन्दवाते च शस्यते। वातपित्तहरा वृष्या मेधाग्निबलवर्द्धनाः। लवाः क्रकरा हृद्यास्तथा चैवोपचक्रकाः। कषायः स्वादुलवणस्त्वच्यः केश्यो रुचिप्रदः। मयूरः स्वरमेधाग्निदृक्श्रोत्रेन्द्रियकार्श्यकृत्। स्निग्धोष्णोऽनिलहा वृष्यः स्वेदस्वरबलावहः। बृंहणः कुक्कुटो वन्यस्तद्वद्ग्राम्यो गुरुस्तु सः। वातरोगक्षयवमीविषमज्वरनाशनः। कपोतपारावतभृङ्गराजपरभृतकोयष्टिककुलिङ्गगृहकुलिङ्गगोक्षोडकडिण्डिमाणकशतपत्रकमातृनिन्दकभेदाशिशुकसारिकावल्गुलीगिरिशालट्टालट्टूषकसुगृहाखञ्जरीटकहारीतदात्यूहप्रभृतयः प्रतुदाः। कषायमधुरा रूक्षाः फलाहारा मरुत्कराः। पित्तश्लेष्महराः शीता बद्धमूत्राल्पवर्चसः। सर्वदोषकरस्तेषां भेदाशी मलदूषकः। कषायस्वादुलवणो गुरुः कालकपोतकः। रक्तपित्तप्रशमनः कषायविशदोऽपि च। विपाके मधुरश्चापि गुरुः पारावतः स्मृतः। कुलिङ्गो मधुरः स्निग्धः कफशुक्रविवर्द्धनः। रक्तपित्तहरो वेश्मकुलिङ्गस्त्वतिशुक्रलः। सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्जारशृगालमृगेर्वारुकप्रभृतयो गुहाशयाः। मधुरा गुरवः स्निग्धा बल्या मारुतनाशनाः। उष्णवीर्य्या हिता नित्यं नेत्रगुह्यविकारिणाम्। काककङ्ककुररचाषभासशशघात्युलूकचिल्लिश्येनगृध्रप्रभृतयः प्रसहाः। एते सिंहादिभिः सर्वे समाना वायसादयः। रसवीर्य्यविपा-

केषु विशेषाच्छेषितेषु हिताः। मद्गुमूषिकवृक्षशायिकावकुशपूतिघासवानरप्रभृतयः पर्णमृगाः। मधुरा गुरवो वृष्याश्चक्षुष्याः शोषिषु हिताः। सृष्टमूत्रपुरीषाश्च कासार्शःश्वासनाशनाः। श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुलमहाबभ्रुप्रभृतयो बिलेशयाः। वर्चोमूत्रं संहतं कुर्युरेते वीर्ये चोष्णाः पूर्ववत् स्वादुपाकाः। वातं हन्युः श्लेष्मपित्ते च कुर्युः स्निग्धाः कासश्वासकार्श्यापहाश्च। कषायमधुरस्तेषां शशः पित्तकफापहः। नातिशीतलवीर्यत्वाद्वाते साधारणो मतः। गोधा विपाके मधुरा कषायकटुका स्मृता। वातपित्तप्रशमनी बृंहणी बलवर्द्धिनी। शल्यकः स्वादुपित्तघ्नो लघुः शीतो विषापहः। प्रियको मारुते पथ्योऽजगरस्त्वर्शसां हितः। दुर्नामानिलदोषघ्नाः क्रिमिदूषीविषापहाः। चक्षुष्या मधुराः पाके सर्पा मेधाग्निवर्द्धनाः। दर्व्वीकरा दीपकाश्च तेषूष्णाः कटुपाकिनः। मधुराश्चातिचक्षुष्याः सृष्टविण्मूत्रमारुताः। अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदःपुच्छकप्रभृतयो ग्राम्याः। ग्राम्या वातहराः सर्वे बृंहणाः कफपित्तलाः। मधुरा रसपाकाभ्यां दीपना बलवर्द्धनाः। नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः। छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः। बृंहणं मांसमौरभ्रं पित्तश्लेष्मावहं गुरु। मेदःपुच्छोद्भवं वृष्यमौरभ्रंसदृशं गुणैः। श्वासकासप्रतिश्यायविषमज्वरनाशनम्। श्रमात्यग्निहितं गव्यं पवित्रमनिलापहम्। औरभ्रवत्सलवणं मांसमेकशफोद्भवम्। अल्पाभिष्यन्द्ययं वर्गो जाङ्गलः समुदाहृतः। दूरे जनान्तनिलया दूरे पानीयगोचराः। ये मृगाश्च विहङ्गाश्च तेऽल्पाभिष्यन्दिनो मताः। अतीवासन्ननिलयाः समीपोदकगोचराः। ये मृगाश्च विहङ्गाश्च महाभिष्यन्दिनस्तु ते। आनूपवर्गस्तु पञ्चविधः तद्यथा कूलचराः प्लवाः कोशस्थाः पादिनो मत्स्याश्चेति। तत्र गजगवयमहिषरुरुचमरसृमररोहितवराहखड्गिगोकर्णकालपुच्छकोन्द्रन्यङ्कुरङ्कुगवयप्रभृतयः कूलचराः पशवः। वातपित्तहरा वृष्या मधुरा रसपाकयोः। शीतला बलिनः स्निग्धा मूत्रलाः कफवर्द्धनाः। विरूक्षणो लेखनश्च वीर्योष्णः पित्तदूषणः। स्वाद्वम्ललवणस्तेषां गजः श्लेष्मानिलापहः। गवयस्य तु मांसं हि स्निग्धं मधुरकासजित्। विपाके मधुरं चापि व्यवायस्य तु वर्द्धनम्। स्निग्धोष्णमधुरो वृष्यो महिषस्तर्पणो गुरुः। निद्रापुंस्त्वबलस्तन्यवर्द्धनो मांसदार्ढ्यकृत्। रुरुमांसं समधुरं कषायानुरसं स्मृतम्। वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम्। तथा चमरमांसन्तु स्निग्धं मधुरकासजित्। विपाके मधुरं चापि वातपित्तप्रणाशनम्। सृमरस्य तु मांसञ्च कषायानुरसं स्मृतम्। वातपित्तोपशमनं गुरु शुक्रविवर्द्धनम्। स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरु। स्निग्धं श्रमानिलहरं वाराहं बलवर्द्धनम्। कफघ्नं खड्गिपिशितं कषायमनिलापहम्। पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम्। गोकर्णमांसं मधुरं स्निग्धं मृदु कफावहम्। विपाके मधुरञ्चापि रक्तपित्तविनाशनम्। हंससारसक्रौञ्चचक्रवाककुररकादम्बकारण्डवजीवञ्जीवकवकबलाकापुण्डरीकप्लवशरारीमुखनन्दीमुखमद्गूत्क्रोशकाचाक्षमल्लिकाक्षशुक्लाक्षपुष्करशायिकाकोनालकाम्बुकुक्कुटिकामेघरावश्वेतचरणप्रभृतयः प्लवाः संघातचारिणः। रक्तपित्तहराः शीताः स्निग्धा वृष्या मरुज्जितः। सृष्टमूत्रपुरीषाश्च मधुरा रसपाकयोः। गुरूष्णमधुरः स्निग्धः स्वरवर्णबलप्रदः। बृंहणः शुक्रलस्तेषां हंसो मारुतनाशनः। शङ्खशङ्खनखशुक्तिशम्बूकभल्लूकप्रभृतयः कोशस्थाः। कूर्मकुम्भीरकर्कटकृष्णकर्कटकशिशुमारप्रभृतयः पादिनः। शङ्खकूर्म्मादयः स्वादुरसपाका मरुन्नुदः। शीताः स्निग्धा हिताः पित्ते वर्चस्याः श्लेष्मवर्द्धनाः। कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः। शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा। मत्स्यास्तु द्विविधा नादेयाः सामुद्राश्च तत्र नादेयाः। रोहितपाठीनपाटलाराजीववर्मिगोमत्स्यकृष्णमत्स्यवागुञ्जारमुरलसहस्रदंष्ट्रप्रभृतयो नादेयाः। नादेया मधुरा मत्स्या गुरवो मारुतापहाः। रक्तपित्तकराश्चोष्णा वृष्याः स्निग्धाल्पवर्चसः। कषायानुरसस्तेषां शष्पशैवालभोजनः। रोहितो मारुतहरो नात्यर्थं पित्तकोपनः। पाठीनः श्लेष्मलो वृष्यो निद्रालुः पिशिताशनः। दूषयेद्रक्तपित्तन्तु कुष्ठरोगं करोत्यसौ। मुरलो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा। सरस्तडागसम्भूताः स्निग्धाः स्वादुरसाः स्मृताः। महाह्रदेषु बलिनः स्वल्पेऽम्भस्यबलाः स्मृताः। तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलकमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः। सामुद्रा गुरवः स्निग्धा मधुरा नातिपित्तलाः। उष्णा वातहरा वृष्या वर्चस्याः श्लेष्मवर्द्धनाः। बलावहा विशेषेण मांसाशित्वात् समुद्रजाः। तेषामप्य-

निम्नत्वाच्छौल्यकौपौ गुरूत्तरौ । स्निग्धत्वात् स्वादुपाकत्वात् तथैवाग्र्या गुरूत्तराः । नादेया गुरवो मध्ये यस्मात् पुच्छास्यचारिणः । सरस्तडागजानान्तु विशेषेण शिरोलघु । अदूरगोचरा यस्मात्तस्मादुत्सोदपानजाः । किञ्चिन्मुक्त्वा शिरोदेशमत्यर्थं गुरवस्तु ते । अधस्ताद्गुरवो ज्ञेया मत्स्याः सरसिजाः स्मृताः । उरोविचरणात्तेषां पूर्वमङ्गं लघु स्मृतम् । इत्यानूपो महाभिष्यन्दिमांसवर्गो व्याख्यातः । तत्र शुष्कपूतिव्याधितविषसर्पहतदिग्धविद्धजीर्णकृशबालानामसात्म्यचारिणां मांसान्यभक्ष्याणि यस्माद्विगतव्यापन्नापहृतपरिणतत्वादसंपूर्णवीर्य्यत्वाद्दोषकराणि भवन्ति । अरोचकं प्रतिश्यायं गुरु शुष्कं प्रकीर्त्तितम् । विषव्याधिहतं मृत्युं बालं छर्दिञ्च कोपयेत् । कासश्वासकरं वृद्धं त्रिदोषं व्याधिदूषितम् । क्लिन्नमुत्क्लेशजननं कृशं वातप्रकोपणम् । एभ्योऽन्यं ग्राह्यमुपादेयं मांसमिति । स्त्रीषु चतुष्पादेषु पुमांसो विहङ्गेषु महाशरीरेष्वल्पशरीरा अल्पशरीरेषु महाशरीराः प्रधानतमा एकैकजातीयानां महाशरीराः प्रधानतमाः । स्थानादिकृतं मांसस्य गुरुलाघवमुपदेक्ष्यामः तद्यथा—रक्तादिषु शुक्रान्तेषु धातुषूत्तरोत्तरेषु गुरुतरास्तथा सक्थिस्कन्धक्रोडशिरःपादकरकटीपृष्ठचर्म्मकालेयकयकृद्दन्त्राणि । शिरःस्कन्धं कटीपृष्ठं सक्थिनी चात्मपक्षयोः । गुरुपूर्वं विजानीयाद्धातवस्तु यथोत्तरम् । सर्वस्य प्राणिनो देहे मध्यो गुरुरुदाहृतः । पूर्वभागो गुरुः पुंसामधोभागस्तु योषिताम् । उरोग्रीवं विहङ्गानां विशेषेण गुरु स्मृतम् । पक्षोत्क्षेपात्समो दिष्टो मध्यभागस्तु पक्षिणाम् । अतीव रूक्षं मांसन्तु विहङ्गानां फलाशिनाम् । बृंहणं मांसमत्यर्थं खगानां पिशिताशिनाम् । मत्स्याशिनां पित्तकरं वातघ्नं धान्यचारिणाम् । जलजानूपजा ग्राम्याः क्रव्यादैकशफास्तथा । प्रसहा विलवासाश्च ये च जाङ्गलसंज्ञिताः । प्रतुदा विष्किराश्चैव लघवः स्युर्यथोत्तरम् । अल्पाभिष्यन्दिनश्चैव यथापूर्वमतोऽन्यथा । प्रमाणाधिकास्तु स्वजातौ चाल्पसारा गुरवश्च । सर्वप्राणिनां सर्वशरीरेभ्यो ये प्रधानतमा भवन्ति यकृद्देशवर्त्तिनस्तानाददीत प्रधानलाभाभावे मध्यमवयस्कं सद्यस्कमक्लिष्टमुपादेयं मांसमिति । भवति चात्र । वयः शरीरावयवाः स्वभावो धातवः क्रियाः । लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्षिता" ।

क्रव्यघातन पु॰ क्रव्यस्य क्रव्याय घात्यतेऽसौ हन—स्वार्थे णिच्—कर्म्मणि ल्युट् चतुर्थ्यर्थे ६त॰ । १मृगमात्रे शब्दच॰ । क्रव्यार्थं घातयन्ति घाति—ल्यु । मांसार्थघातके रुरुरूपे मृगभेदे "यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति" भाग॰ ५।२६।१५ तस्य तथात्वोक्तेः "क्रव्येण निमित्तेन मांसार्थम्" श्रीधरः

क्रव्यभुज् पु॰ क्रव्यं भुङ्क्ते भुज—क्विप् । १क्रव्यादे राक्षसे २क्रव्यादे रुरुरूपे मृगभेदे च "ससैन्धवः क्रव्यभुगेणमांसयोर्हितः ससर्पिः समधुः पुटाह्वयः" सुश्रु॰ । ३मांसभोक्तृमात्रे त्रि॰ ।

क्रव्याद् पु॰ क्रव्यं मांसमत्ति अद—क्विप् । १राक्षसे २मांसाशिनि त्रि॰ मेदि॰ "क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः । रघुः "क्रव्यादः श्वभ्रादयः" मल्लि॰ "क्रव्याद्भिश्च हतस्यान्यैः" मनुः "क्रव्याद्भिः व्याघ्रादिभिः" कुल्लू॰ "श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव" मनु॰ च ३शवदाहके अग्निभेदे "अपाग्ने अग्निमामादं जहि निष्क्रव्यादं सेधद्ध्ययं वा आमाद् येनेदं मनुष्याः पक्वाऽश्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति" शत॰ ब्रा॰ १।२।१।४। "हे अग्ने ! गार्हपत्य । आमादमग्निमपजहि परित्यज तथा क्रव्यादमग्निं निःशेष निःशेषं दूरे गमय" वेददी॰ "योऽग्निं क्रव्यात् प्रविवेश वो गृहम्" ऋ॰ १०।१६।१० क्रव्याद्योनिप्राप्तिश्च गुरुतल्पगमनमहापातकावशेषवतां मनूक्ता यथा "तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणां तथा । क्रूरकर्मकृताञ्चैव शतशो गुरुतल्पगः"

क्रव्याद पु॰ क्रव्यमत्ति अद-अण् उप॰ स॰ । १राक्षसे २मांसभोजिमात्रे त्रि॰ स्त्रियां टाप् सि॰कौ॰ । "क्रव्यादः शवभक्षणे" विधानपा॰ ५०पृ॰ उक्ते ३वह्निभेदे ।

वह्नेस्तु क्रव्यादत्वं भा॰ आ॰७अ॰ भृगुणा सर्वभक्षत्वे शापे अग्नये दत्ते तत्परिहारार्थं शवरूपक्रव्यादमादुक्तम् "कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा । हुतभुक् सर्वलोकेषु सर्वभक्षत्वमेष्यति" इत्युपक्रमे "लोकानामिह सर्वेषां त्वं कर्त्ता चान्त एव च । त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः । स तथा कुरु लोकेश ! नोच्छिद्येरन् यथा क्रियाः । कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन ! । त्वं पवित्रं सदा लोके सर्वभूतगतिश्च ह । स त्वं सर्वशरीरेण, सर्वभक्षत्वमेष्यसि । अपाने ह्यर्चिषो यास्ते सर्वं भोक्ष्यन्ति ताः शिखिन् ! । क्रव्यादा

च तन्मुखाँ ते स सर्वं भक्षयिष्यति। यथा सूर्य्यांशुभिः स्पृष्टं सर्वं शुचि विभाव्यते। तथा त्वदर्च्चिर्भिर्दग्धं सर्वं शुचि भविष्यति। त्वमग्ने! परमं तेजः स्वप्रभावाद्विनिर्गतम्। स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो!। देवानां चात्मनो भागं गृहाण त्वं मुखे हुतम्"। क्रव्याच्छब्ददर्शिते शत॰ ब्रा॰ वाक्येन ऋग्वेदवाक्येन च तस्य कर्म्मादावपसारणमुक्तम्। "क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्ञो गच्छतु रिप्रवाहः। इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्" ऋ॰१०,१६,९,भा॰ "आहिताग्निमरणे एतदादिके द्वे ऋचौ औपासनदाहासने विनियुक्ते तत्र प्रथमायाः पूर्व्वार्द्धेन दक्षिणस्यां दिशि चतुष्पथादावौपासनाग्निं निरस्यति उत्तरेण शान्तिकर्म्मार्थमादत्ते। "क्रव्यादं क्रव्यमामिषं तदत्तीति तीव्रमग्निं दूरं विप्रकृष्टे देशे प्रहिणोमि प्रगमयामि। रिप्रं पापं तस्य वोढा सोऽग्निः यमराज्ञो यमो राजा येषां तान् यमराजकान् प्रदेशान् गच्छतु प्राप्नोतु अथ शान्तिकर्म्मार्थमुपासने इतरः क्रव्यादादन्यो जातवेदा अग्निरिहैव देशे देवेभ्यो देवार्थं हव्यं वहतु" भाष्ये दक्षिणपश्चिमदेशे तस्याग्नेः प्रक्षेपणोक्तेः। ४मांसभक्षके मृगभेदे "यत्र निपतितं पुरुषं क्रव्यादा नाम रुरवस्तं क्रव्येण घातयन्ति" भाग॰ ५,२६,१५,।

क्रव्यादाश्च व्याघ्रादयस्तद्योनिप्राप्तिश्च अभक्ष्यभक्षणपापात् भवतीति मनुनोक्तं "हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षणात्" क्रव्यादा व्याघ्रादयः कुल्लू॰ क्रव्यादिन्प्रभृतयोऽप्यत्र स्त्रियां ङीप्।

क्रशि नामधातुः कृशं करोति णिच् ऋतोरः। क्रशयति ते अचक्रशत् त। क्त क्रशितः। "क्रशितं शरीरमशरीरशरैः" माघः। क्रशितं कृशीकृतम्।

क्रशिमन् पु॰ कृशस्य भावः दृढा॰ इमनिच् ऋतोरः। कार्श्ये "शम्भुर्यां क्रशिमशालिनि मध्ये" माघः।

क्रशिष्ठ त्रि॰ अतिशयेन कृशः इष्ठन् ऋतोरः। अतिशयकृशे। ईयसुन्। क्रशीयस् तत्रार्थे त्रि॰। स्त्रियां ङीप्।

क्रा त्रि॰ क्रम्-विट् मस्यात्। क्रान्तरि उदधिक्राः।

क्राकचिक त्रि॰ क्रकचः करपत्रं तत्क्रियया जीवति ठक्। करपत्रक्रियोपजीविनि (कराति)। "मायूरकाः क्राकचिकाः वेधकारोचकास्तथा" रामा॰ अयोध्याकाण्डे ८३अ॰

क्राथ पु॰ क्रथदेशानां राजा अण्। १राहुपक्षावतारे दक्षिणापथेश्वरे नृपभेदे "पक्षस्तु सुषुवे यस्तु शिशिरार्केन्दुमर्द्दनम्। स क्राथ इति विख्यातो बभूव मनुजाधिपः" भा॰ आ॰ ६७अ॰। "तमन्वयुर्द्ध पार्श्वैव दक्षिणापथवासिनः। क्राथोऽंशुमान् श्रुतर्वा च वेणुदारिश्च वीर्य्यवान्" हरिवं॰ ११८अ॰। २रामसेनापतिवानरभेदे च "नलनीलाङ्गदक्राथमैन्दद्विविदपालिता। ययौ सुमहती सेना राघवस्यार्थसिद्धये" भा॰ व॰ २८३अ॰। ३नागभेदे "ह्रादः क्राथः श्वितिकण्ठोग्रतेजास्तथा नागौ चक्रमन्दातिचण्डौ" भा॰ मौ॰ ४अ॰। क्रथ-भावे घञ्। ४मारणे पु॰ हेम॰

क्रान्त पुंस्त्री क्रम-कर्त्तरि क्त। १घोटके स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। कर्म्मणि-क्त। २आक्रान्ते ३आरूढे च त्रि॰ "क्रान्तं रुचा काञ्चनवप्रभाजा" माघः "अश्वक्रान्ते! रथक्रान्ते! विष्णुक्रान्ते! वसुन्धरे!" स्नानमन्त्रः। ४पादेन्द्रिये न॰। "मनसीन्दुं दिशः श्रोत्रे क्रान्ते विष्णुं बले हरम्" मनुः "क्रान्ते पादेन्द्रिये" कुल्लू॰। भावे-क्त। ५क्रमणे न॰। "तदभिहितो भावो द्रव्यवत् प्रकाशते" इत्युक्तेः ६क्रमणकर्म्मणि न॰ "विष्णोः क्रान्तमसीतीमे लोकाः विष्णोर्विक्रमणं विष्णोर्विक्रान्तं विष्णोः क्रान्तम्" शत॰ ब्रा॰ ५।४।२।६। कर्त्तरि क्त। ७बृहत्यां स्त्री राजनि॰ ८अतीते त्रि॰ क्रान्तदर्शी

क्रान्तदर्शिन् त्रि॰ क्रान्तमचक्षुर्ग्राह्येन्द्रियविषयतामतिक्रान्तं वस्तु भूतादि सर्व्वं वस्तु द्रष्टुं शीलमस्य दृश-णिनि। १अतीतादिवस्तुद्रष्टरि २सर्व्वज्ञे ब्रह्मणि न॰ कविशब्दे १८११पृ॰ दृश्यम्।

क्रान्ति स्त्री॰ क्रम-भावे क्तिन्। १पादविक्षेपे २गतौ च हेम॰ अयनशब्दे २२९पृ॰ दर्शिते ज्योतिषप्रसिद्धे अपमशब्दार्थे- तत्रानुक्रमणिकं सू॰ सि॰ रङ्गनाथाभ्यां दर्शितं यथा "ननु गोले वृत्ते द्वादशराशीनां सत्त्वादन्यथा चक्रकलानुपपत्तेरित्यत्रैकवृत्ताभावात् कथं राशिवृत्तं राशिविभागानुपपत्तिश्च अन्तरालभागस्याकाशात्मकत्वादित्यतो वृत्तकथनच्छलेन पूर्वोक्तं स्पष्टयन् सूर्य्यस्तद्वृत्ते भगणभोगं करोतीत्याह" रङ्ग॰। "अयनादयनं चैव कक्षा तिर्य्यक् तथाऽपरा। क्रान्तिसंज्ञा तया सूर्य्यः सदा पर्य्येति भासयन्" सू॰ सि॰। "अयनस्थानमारभ्यायनं परिवर्त्तनं तदयनस्थानपर्य्यन्तम्। चकार आरम्भसमाप्त्योर्भिन्नायनस्थाननिरासार्थकः। अपरा गोले आधारवृत्तप्रमाणा वृत्तरूपा कक्षा तथा राशिवृत्तमार्गेण। एवकारोऽन्यमार्गव्यवच्छेदार्थकः। तिर्य्यक् उक्तवृत्तानुसारविलक्षणानुकारा क्रान्तिसंज्ञा क्रमण क्रान्तिः चक्रगमनभोगत्वात् अर्थं वृत्तं तत्रअन्नतरकल्पितम्। अयनविषुवद्वृत्तयसंस्थं क्रान्तिवृत्तं द्वादशराश्य-

क्षितिजे गोले निमज्जयेदिति तात्पर्यार्थः। भासयन् भुवनानि प्रकाशयन् सन् सः सूर्य्यः। एतेन चन्द्रादीनां निरासः। सदा निरन्तरं मया क्रान्तिसञ्ज्ञया कक्षया पर्य्येति स्वशक्त्या गच्छन् भगणपरिपूर्त्तिभोगं करोति। सूर्य्यगत्यनुरोधेन नियतं क्रान्तिवृत्तं कल्पितमिति भावः। ननु चन्द्राद्याः क्रान्तिवृत्ते कुतो न गच्छन्तीत्यत आह" रङ्ग॰ "चन्द्राद्याश्च स्वकैः पातैरपमण्डलमाश्रितैः। ततोऽपकृष्टा दृश्यन्ते विक्षेपान्तेष्वपक्रमात्" सू॰ "चन्द्रादयोऽर्कव्यतिरिक्ता ग्रहाः स्वैः स्वकीयैः पातैः पाताख्यदैवतैरपमण्डलं क्रान्तिवृत्तमाश्रितैः स्वस्वगोलस्थानेऽधिष्ठितैस्ततः क्रान्तिवृत्तान्तर्गतग्रहभोगस्थानादित्यर्थः। चक्राद्विक्षेपान्तरेणापकृष्टा दक्षिणत उत्तरतो वा कर्षिता भवन्ति। अतः कारणादपक्रमात् क्रान्तिवृत्तान्तर्गतस्वभोगस्थानादित्यर्थः। दक्षिणत उत्तरतो वा विक्षेपान्तेषु गणितागतविक्षेपकलाग्रस्थानेषु भूस्थजनैर्दृश्यन्ते। तथा च क्रान्तिवृत्तं यथा विषुवन्मण्डलेऽवस्थितं तथा क्रान्तिवृत्ते पातस्थाने तत्षड्भान्तरस्थाने च लग्नमुक्तपरमविक्षेपकलाभिस्त्रिभान्तरस्थानादूर्द्ध्वाधःक्रमेण दक्षिणोत्तरतो लग्नं च वृत्तं विक्षेपवृत्तं चन्द्रादिग्रहानुरोधेन स्वं स्वं भिन्नं कल्पितं तत्र गच्छन्तीति भावः" रङ्ग॰

क्रान्तिस्पष्टताप्रकारस्य सू॰ सि॰ रङ्गनाथाभ्यां दर्शितो यथा "अथ दिनरात्रिमानज्ञानार्थं चरानयनं विवक्षुः प्रथमं तदुपयुक्तां स्पष्टक्रान्तिमाह" रङ्ग॰ "विक्षेपापक्रमैकत्वे क्रान्तिर्विक्षेपसंयुता। दिग्भेदे वियुता स्पष्टा भास्करस्य यथा गता" सू॰ सि॰

"यस्य ग्रहस्य स्पष्टक्रान्तिरभीष्टा तस्य ग्रहस्यायनांशसंस्कृतस्य भुजज्यातः परमापक्रमज्येत्यादिना क्रान्तिरयनांशसंस्कृतग्रहगोलदिक्का ज्ञेया। तस्य विक्षेपोऽपि पूर्वोक्तप्रकारेण पातोनगोलदिक्को ज्ञेयः। गोलस्तु मेषादिषट्कमुत्तरस्तुलादिषट्कं दक्षिणः। अथ शरक्रान्त्योरेकदिक्त्वेन क्रान्तिः कलाद्या कलात्मकविक्षेपेण युता तयोर्दिगन्यत्वे क्रान्तिर्विक्षेपेण वियुताऽन्तरिता शेषदिक्का स्पष्टा क्रान्तिः स्यात्। ननु सूर्य्यस्य विक्षेपाभावात् कथं स्पष्टा क्रान्तिर्ज्ञेयेत्यत आह भास्करस्येति। सूर्य्यस्य यथागता पूर्वागता क्रान्तिरेव स्पष्टा क्रान्तिः। अत्रोपपत्तिः। विषुवद्वृत्ताद्ग्रहबिम्बकेन्द्रपर्य्यन्तं याम्यमुत्तरं वान्तरं स्पष्टक्रान्तिरिति तयोरेकदिक्त्वे तद्योगतुल्यमन्तरं, भिन्नदिक्त्वे तदन्तरमितमन्तरमिति। अत्र शरस्य क्रान्तिसंस्कारयोग्यत्वसम्पादिका क्रिया लोकभ्रमभयात् स्वल्पान्तरत्वाच्चोपेक्षिता भगवता कृपावता। अन्यथा शरस्य ध्रुवाभिमुखत्वे भगवदुक्तमायनदृक्कर्म्म कथमव्याहतं स्यादित्यलम्" रङ्गनाथः।

रवेर्देशक्रान्तिवशेन दिनरात्रिभेदः सू॰ सि॰ रङ्गनाथाभ्याम् "हानिवृद्धी सदा वामं सुरासुरविभागयोः" इति दिनरात्र्योर्हानिवृद्धी सुरासुरविभागयोर्भवत इत्युपक्रम्य विशदीकृत्य दर्शितो यथा

"मेषादौ तु सदा वृद्धिरुदगुत्तरतोऽधिका। देवांशे च क्षपाहानिर्विपरीतं तथाऽऽसुरे। तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोरुभे। देशक्रान्तिवशान्नित्यं तद्विज्ञानं पुरोदितम्" सू॰ "मेषादौ षड्भे उदगुत्तरगोले सूर्य्ये सति उत्तरतो यथोत्तरं सदा यावदुत्तरगोले देवांशे जम्बूद्वीपेऽधिका, यथोत्तरमधिका वृद्धिर्निरक्षदेशीयदिने। तुलाराद्यथोत्तरं सूर्य्यस्योत्तरगमने यथोत्तरं दिने वृद्धिः परमोत्तरगमनात् परावर्त्तते। यथोत्तरं न्यूना वृद्धिरित्यर्थः। क्षपाहानी रात्रेरपचयः। चः समुच्चये। आसुरे समुद्रादिदक्षिणभागे तथा दिनरात्र्योः क्षयवृद्धी विपरीतं व्यस्तम्। दिने हानी रात्रौ वृद्धिरित्यर्थः। तुलादौ षड्भे दक्षिणगोले सूर्य्ये सति तयोर्जम्बूद्वीपसमुद्रादिदक्षिणभागयोर्दिनरात्र्योरुभे द्वे क्षयवृद्धी उपचयापचयौ वामं व्यस्तम्। अयमर्थः जम्बूद्वीपे दिनरात्र्योरुत्तरगोलस्थरविक्षयक्रमेण क्षयवृद्धी स्तः। समुद्रादिदक्षिणभागे दिनरात्र्योर्वृद्धिक्षयौ स्त इति। ननु क्षयवृद्ध्योः कियन्मितत्वमित्यतः पूर्व्वोक्तं स्मारयति देशक्रान्तिवशादिति। तद्विज्ञानं तयोः क्षयवृद्ध्योर्ज्ञानं सङ्ख्याज्ञानं नित्यं प्रत्यहं देशक्रान्तिवशात्। देशपलभा क्रान्तिरेतदुभयानुरोधात् पुरा पूर्वखण्डस्पष्टाधिकारे "क्रान्तिज्या विषुवद्भाघ्नी क्षितिज्या द्वादशोद्धृता। त्रिज्यागुणाहोरात्रार्द्धकर्णाप्ता चरजासवः"। तत्कार्मुकमित्यनेन दिनरात्र्योरर्द्धं उक्तम् तद्द्विगुणं दिनरात्र्योरित्यर्थसिद्धम्। अत्रोपपत्तिः। निरक्षदेशे ध्रुवद्वयलग्नक्षितिजवृत्तं तत्र उत्तरभागे स्वस्थानक्षितिजं स्वभूगोलमध्यस्थमुत्तरध्रुवादधो दक्षिणध्रुवाच्चोर्द्ध्वमित्यत उत्तरगोले निरक्षक्षितिजादधो दक्षिणगोल ऊर्द्ध्वमिति पञ्चदशघटिका निरक्षदेशदिनार्द्धं क्षितिजान्तरकूपचरेण गोलक्रमेण युतहीनं दिनार्द्धं रात्र्यर्द्धं च विपरीतम्। एवं दक्षिणभागेऽभीष्टदेशे क्षितिजमुत्तरध्रुवादुन्नतं दक्षिण-

भृशायतमिति निरक्षक्षितिजात्स्वनिरक्षक्षितिजं गोलकमेखोर्ध्वाध इत्युत्तरभागादग्रस्तम्। अथोक्तस्यावधिदेशं विवक्षुः प्रथमं तदुपयुक्तानि क्रान्त्यंशयोजनान्याह" रङ्ग० "भूवृत्तं क्रान्तिभागघ्नं भगणांशविभाजितम्। अवाप्तयोजनैरर्को व्यक्षाद्याव्युपरिस्थितः" सू० सि०।

"भूवृत्तं भूपरिधियोजनमानं प्रागुक्तमभीष्टक्रान्त्यंशैर्गुणितं द्वादशराशिभागैः षष्ट्यधिकशतत्रयमितैर्भक्तं लब्धयोजनैः कृत्वा सूर्य उपरि आकाशे स्थितो वर्तमानो दक्षिणत उत्तरतो वा याति गच्छति। क्रान्त्यभावे तु निरक्षदेशोपर्य्येव परिभ्रमति। अत्रोपपत्तिः। निरक्षदेशान्मेरोरुत्तरदक्षिणाभिमुखं सूर्य्यः क्रान्त्यंशैर्गच्छति। तद्योजनज्ञानं तु भगणांशैर्भूवृत्तनिरक्षदेशस्थभूपरिधियोजनानि तदा क्रान्त्यंशैः कानीत्यनुपातेनेत्युपपन्नम्। अथ दिनमानानयनगणितस्यावधिदेशज्ञानं श्लोकाभ्यामाह" रङ्ग०। "परमापक्रमादेवं योजनानि विशोधयेत्। भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः। अयनान्ते विलोमेन देवासुरविभागयोः। नाड़ीषष्ट्या सकृदहर्निशाप्यस्मिन् सकृत् तथा" सू० सि० "परमक्रान्तिभागाच्चतुर्विंशन्मितात् एवं पूर्वोक्तरीत्या योजनानि जातानि। भूपरिधेः पूर्वोक्तस्य चतुर्थांशात् परिवर्जयेत्। अवशिष्टानि यानि यत्सङ्ख्यामितानि योजनानि भवन्ति तैर्योजनैर्देवासुरविभागयोर्निरक्षदेशादुत्तरदक्षिणप्रदेशयोर्यौ देशौ तयोरित्यर्थः। अनयान्त उत्तरदक्षिणायनसन्धौ कर्कादिस्थे सूर्य्ये दक्षिणोत्तरायनसन्धौ मकरादिस्थे सूर्य्ये विलोमेन व्यत्यासेन सकृदेकवारं नाडीषष्ट्या घटीषष्ट्याहर्दिनमानं भवति। अस्मिन् तादृशे देशे तस्मिन्नेवायनसन्ध्यासन्ने सकृदेकवारं तथा षष्टिघटीमिता विलोमेन रात्रिर्भवति। अपिशब्दो दिनेन समुच्चयार्थः। एतदुक्तं भवति—कर्कादिस्थे सूर्य्ये निरक्षदेशादुत्तरतद्योजनान्तरितदेशे षष्टिघटीमितं दिनं तदैव निरक्षदेशाद्दक्षिणतद्योजनान्तरितदेशे षष्टिघटीमिता रात्रिः। मकरादिस्थे सूर्य्ये तादृशोत्तरभागे षष्टिघटीमिता रात्रिर्दक्षिणभागे तादृशे षष्टिमितं दिनमिति। अत्रोपपत्तिः—परमक्रान्तियोजनानि भूवृत्तचतुर्थांशयोजनेभ्यो हीनानि। निरक्षदेशात् तन्मितयोजनान्तरितो यो दक्षिणोत्तरदेशस्तस्मान्मेरोर्दक्षिणोत्तराग्रं क्रमेण परमक्रान्तियोजनान्तरितम्। अतस्तत्र लम्बांशाश्चतुर्विंशतिः पलांशाश्च षट्षष्टिरिति। तद्देशे क्रान्तिवृत्ताकारं क्षितिजमित्यु-

नान्ते पञ्चदशघटीमितमहोरात्रवृत्तचतुर्भागखण्डं निरक्षतद्देशक्षितिजयोरन्तरालरूपं चरमत उक्तरीत्या दिनार्धं रात्र्यर्धं योक्तरीत्या यथायोग्यं त्रिंशत् तद्द्विगुणं षष्टिघटीमिततन्मानं गणितरीत्योपपन्नम्। युक्तं चैतत् अयनान्ताहोरात्रवृत्तस्यैकस्य तत्क्षितिजप्रदेश एकत्रैव संलग्नत्वाद्द्विधा संलग्नत्वाभावात् प्रवहभ्रमितसूर्य्यपरिवर्त्तपूर्त्तेः षष्टिघटीभिर्दर्शनमदर्शनं यथायोग्यं तद्गोलस्थित्या प्रत्यक्षसिद्धमेवेति। अथोक्तदिनरात्रिमानगणितं तदवधिदेशपर्य्यन्तं दक्षिणोत्तरभागयोर्नाग्रे इत्याह" रङ्ग० "तदन्तरेऽपि षष्ट्यन्ते क्षयवृद्धी अहर्निशोः। परतो विपरीतोऽयं भगोलः परिवर्त्तते" सू० "तदन्तरे निरक्षदेशोक्तावधिदेशयोरन्तरालदक्षिणोत्तरविभागदेशे षष्ट्यन्ते षष्टिघटीमध्ये क्षयवृद्धी अपचयोपचयावुक्तरीत्या दिनरात्र्योर्यथायोग्यं भवतः। परतोऽवधिदेशादग्रिमदेशे दक्षिणोत्तरे दैत्यदेवस्थाननिकटेऽयं प्रत्यक्षो भगोलो नक्षत्राद्यधिष्ठितो मूर्त्तो गोलो विपरीतोऽवधिदेशान्तर्गतदेशसम्बन्धी गणितभिन्ना परिवर्त्तते भ्रमति। तत्रोक्तरीत्या दिनरात्र्योर्वृद्धिक्षयौ न भवत इत्यर्थः। त्रिज्याधिकाराच्चरानयनानुपपत्तेः चरस्वरूपासम्भवाच्च तथा विपरीतगोलस्थितिं श्लोकाभ्यां प्रदर्शयति" रङ्ग० "ऊने भूवृत्तपादे तु द्विज्यापक्रमयोजनैः। धनुर्मृगस्थः सविता देवभागे न दृश्यते। तथा चासुरभागे तु मिथुने कर्कटे स्थितः। नष्टच्छायामहीवृत्तपादे दर्शनमादिशेत्" सू० "द्विराशिज्या ये क्रान्त्यंशास्तेषां योजनैः पूर्वांशगतैर्भूपरिधिचतुर्थांशे हीने कृते सति। तुकारान्निरक्षदेशात् तद्योजनान्तरिते देशे देवभागे उत्तरभागे धनुर्मकरराशिस्थोऽर्कस्तद्देशवासिभिर्न दृश्यते। धनुर्मकरस्थेऽर्के तेषां रात्रिः सदा स्यादित्यर्थः। असुरभागे निरक्षदेशाद्दक्षिणप्रदेशे। चः समुच्चयार्थः। तुकारात् तद्योजनान्तरितप्रदेशे मिथुने कर्के कर्कराशौ स्थितोऽर्कस्तथा तद्देशवासिभिर्न दृश्यते। नष्टच्छायामहीवृत्तपादे अभावं प्राप्ता मध्योच्छाया भूच्छाया यत्र तादृशे भूपरिधिचतुर्थांशे सूर्य्यस्य दर्शनं सदा कथयेत्। यत्र भूच्छायात्मिका रात्रिर्नास्ति तत्र दिनमित्यर्थः। तथा च निरक्षदेशात् तद्योजनान्तरितोत्तरप्रदेशे कर्कमिथुनस्थोऽर्को दृश्यते तद्योजनान्तरितदक्षिणप्रदेशे धनुर्मकरस्थोऽर्को दृश्यते इति फलितार्थः। अतएव "लङ्काशयुङ्नवरसाः पलांशका यत्र तत्र विषये कदाचन। दृश्यते न मकरो न कार्मुकं

किन्तु कर्किमिथुनौ सदोदितौ” इति भास्कराचार्योक्तमङ्गीकृते” रङ्गनाथः।

क्रान्तिक्षेत्र न० क्रान्तिज्ञानार्थं क्षेत्रम्। सि० शि० उक्ते अपमक्षेत्राकारे पदार्थे यथा

“क्षेत्राणि वक्ष्येऽपमसंभवानि संक्षेपतोऽक्षप्रभवाणि चातः। भुजोऽपमः कोटिगुणो द्युजीवा कर्णस्त्रिभज्या त्रिभुजेऽपमोत्थे। मेषादिजीवाः श्रुतितोऽपवृत्ते तद्भूमिजे क्रान्तिगुणा भुजाः स्युः। तत्कोटयः स्वद्युनिशाख्यवृत्ते व्यासार्द्धवृत्ते परिणामितानाम्। चापेषु तासामसवस्ततो ये तेऽत्र वै विषुवा उदया निरक्षे” सि०शि०

क्रान्तिज्या स्त्री क्रान्तिवृत्तक्षेत्रस्य सि० शि० उक्ते अक्षक्षेत्रावयवभेदे। अक्षक्षेत्रशब्दे ४२४० अक्षक्षेत्राणि उक्तानि। तन्मानानयनम्।

“युक्तायनांशादपमः प्रसाध्यः कालौ च खेटात् खलु भुक्तभोग्यौ। जिनांशमौर्व्या १३९७ गुणितार्कदोर्ज्या त्रिज्यो ३४३८ द्धृता क्रान्तिगुणोऽस्य वर्गम्। त्रिज्याकृतेः ११८१९८४४ प्रोज्झ्य पदं द्युजीवा क्रान्तिर्भवेत् क्रान्तिगुणस्य चापम्। अक्षप्रभासंगुणितापमज्या तद्द्वादशांशो भवति क्षितिज्या सि० शि०।

“अत्र खेटादित्युपलक्षणम्। यस्मात् खेटाल्लग्नाद्वाऽपमः साध्यस्तस्मात् सायनांशादेव। तथा यस्मादुदयसम्बन्धिनौ भुक्तभोग्यकालौ साध्यौ तस्मादपि सायनांशादेव। सायनार्कस्य दोर्ज्या जिनभागज्यया गुणिता त्रिज्यया भक्ता क्रान्तिज्या स्यादित्यादि स्पष्टार्थम्।

अस्योपपत्तिः। विषुवत्क्रान्तिवृत्तयोर्याम्योत्तरमन्तरं क्रान्तिः। तयोः संपाते क्रान्त्यभावः। ततस्त्रिभेऽन्तरे परमा जिन २४तुल्यभागाः। अतस्तत्संपातादारभ्य क्रान्तिः साध्या। उदयाश्च तत एव। स तु संपातो मेषादेः प्रागयनांशतुल्येऽन्तरे। अतः सायनांशात् खेटात् क्रान्तिर्भुक्तभोग्यकालौ चेत्युक्तम्। यदि त्रिज्यातुल्यया भुजज्यया जिनांशज्यातुल्या क्रान्तिज्या लभ्यते तदेष्टज्यया किमिति। फलं क्रान्तिज्या विषुवद्वृत्तात् तिर्यग्रूपा भवति। क्रान्तिज्या भुजस्त्रिज्या कर्णस्तद्वर्गान्तरपदमहोरात्रवृत्तव्यासार्धम्। सैव द्युज्या” प्रमि०।

देशभेदे कालभेदेन रवेः क्रान्तिज्याज्ञानार्थं प्रश्नपूर्वकं सि० शि० निर्णीतं यथा

“मार्तण्डः सममण्डलं किल यदा दृष्टः प्रविष्टः सखे! काले पञ्चघटीमिते दिनगते यद्वा गते तावति। केनाप्युज्जयिनीगतेन तरणेः क्रान्तिं तदा वेत्सि चेन्मन्ये त्वां निपुणं सगर्वगणकोन्मत्तेभकुम्भाङ्कुशम्”।

“हे गणक! केनचित् किलोज्जयिनीगतेन यदा दिनगते पञ्चघटीमिते काले मार्तण्डः सममण्डलं प्रविष्टो दृष्टस्तदा कियती क्रान्तिज्येत्येकः प्रश्नः। अथान्यः तावति पञ्चघटीमिते नते वा काले समण्डलं प्रविष्टो दृष्टस्तदा च या क्रान्तिज्या तां त्वं चेद्वेत्सि तदा सगर्वगणकोन्मत्तेभकुम्भाङ्कुशं निपुणोद्धतं त्वामहं मन्ये” प्रमि०

“या स्याद्रवेरुन्नतकालजीवाभीष्टा हृतिः सा प्रथमं प्रकल्प्या। अर्का१२हताभावाहृताक्षकर्णाप्त्योद्धृता स्यादपमज्यकाऽस्याः। चरादिकेनेष्टहृतिः प्रसाध्या पुनस्तया क्रान्तिगुणोऽसकृच्च। तदाद्यहृत्या विहृतः स्फुटः स्यात् अहस्करेऽसौ सममण्डलस्थे” सि०शि०।

“रवेः सममण्डलप्रवेशे य उन्नतकाल उद्दिष्टस्तस्य जीवा सा तावत् प्रथममिष्टहृतिः कल्प्या। ततो द्वादशगुणया तया गुणया पलकर्णेन भक्तया। सा किल स्थूला क्रान्तिज्या भवति। तस्याः क्रान्तिज्याया द्युज्यां कुज्यां चरज्यां चरं च कृत्वा “अथोन्नतादूनयुताच्चरेण” इत्यादिनेष्टहृतिः साध्या। तया पूर्वमागता क्रान्तिज्या गुण्या। आद्यहृत्या कल्पितया भाज्या। फलं स्फुटा सदा क्रान्तिज्या भवति। अत्रोपपत्तिः। अत्रोन्नतकालजीवातुल्या प्रथमं तद्धृतिः कल्पिता। तस्या अनुपातेन शङ्कुः। यदि पलकर्णेन द्वादशकोटिस्तदा तद्धृतिकर्णेन किमिति। अत्र तद्धृतेर्द्वादशगुणः पलकर्णो हरः। फलं सममण्डलशङ्कुः। पुनरन्योऽनुपातः। यदि पलकर्णेनाक्षभा भुजो लभ्यते तदा सममण्डलशङ्कुतुल्येन कर्णेन किमिति। फलं क्रान्तिज्या स्थूला। अस्याः क्रान्तिज्यायाश्चरादिकेन “अथोन्नतादूनयुताच्चरेण” इत्यादिनेष्टहृतिः साध्या। तां तद्धृतिं प्रकल्प्य पुनः क्रान्तिज्या साध्या। एवमसकृद्यावदविशेषः। तत्रासकृत्कर्मणि त्रैराशिकेन क्रियोपसंहारः कृतः। यदि कल्पितया हृत्येयं क्रान्तिज्या लभ्यते तदेदानीमानीतया किमिति। एवं क्रान्तिज्या स्फुटा स्यादित्युपपन्नम्। इदानीं द्वितीयप्रश्नस्योत्तरमाह” प्रमि०

“तदा नतज्यात्रिभजीवयोर्यद्वर्गान्तरं तत् पलभाकृतिघ्नम्। तेनोद्धृतो व्यासदलस्य वर्गो वेदेन्द्र १४४निघ्नोऽथ सरूपलब्ध्या। व्यासार्धवर्गाद्विहृतात् पदं स्यात् क्रान्तिज्यका सा त्रिभशिञ्जिनीघ्नी। जिनांशमौर्व्या विहृताऽयनांशादपमे प्रवृत्ते च यदा रविः स्यात्” सि०शि०।

"यदा सममण्डलं प्रविष्टो इष्टस्तदा या नतघटिकास्तासां जीवा तस्या वर्गेण त्रिज्यावर्गो रहितः। ततः पलभावर्गेण गुण्यः। तेन भाज्यस्त्रिज्यावर्गः। किंविशिष्टः वेदेन्द्र १४४ गुणितः। तत्र यत् फलं लभ्यते तेन युक्तेन त्रिज्यावर्गाङ्कात्तादुयन्मूलं लभ्यते सा क्रान्तिज्या स्यात्। सा क्रान्तिज्या त्रिज्यागुणा जिनांशज्यया भक्ता यत् फलं तस्य चापादुयया रविर्भवति तथाग्रे वक्ष्ये" प्रमि०।

क्रान्तिज्याविशेषेण रव्यादिलग्नादिकमपि तत्रोक्तं विस्तरभयात् नोक्तम्। क्रमज्याशब्दे २२०२ पृ० दर्शिते ज्यारूपे पदार्थे च।

क्रान्तिपात पु० क्रान्त्यर्थं पातः विषुवत्क्रान्तिवलययोः अश्वघातादिवत् चतुर्थ्यर्थे ६त०। सि० शि० उक्ते क्रान्तिनिमित्ते विषुवत्क्रान्तिवृत्तयोः संपाते। सि० शि० तद्विवृतिर्यथा विषुवत्क्रान्तिवलययोः संपातः क्रान्तिपातः स्यात्। तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे। अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्। तत्पक्षे तद्भगणाः कल्पे गोऽङ्कर्तुनन्दगोचन्द्राः। तज्जातं पातं क्षिप्त्वा खेटेऽपमः साध्यः। क्रान्तिवशाच्चरमुदयाश्चरदललग्नागमे तत्र ज्ञेयः। सि० शि०। "क्रान्त्यर्थं पातः क्रान्तिपातः। पातो नाम संपातः। कयोः विषुवत्क्रान्तिवलययोः। नहि तयोर्मेषादावेव संपातः। किंतु तस्यापि चलनमास्ति येऽयनचलनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः। मेषादेः पृष्ठतस्तावद्भागान्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थः। नहि क्रान्तिपातो नास्तीति वक्तुं शक्यते प्रत्यक्षेण तस्योपलब्धत्वात्। उपलब्धिप्रकारमग्रे वक्ष्यति। तत् कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्तः? इति चेत्। तदा स्वल्पत्वात् तैर्नोपलब्धः। इदानीं बहुत्वात् साम्प्रतैरुपलब्धः। अत एव तस्य गतिरस्तीत्यवगतम्। यद्येवमनुपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिध्यादिवत् कथं तैर्नोक्तः? सत्यम् अत्र गणितस्कन्धे उपपत्तिमानेवागमः प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ताः? इति न च वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणैवोपलभ्यन्ते। तान्येव मन्दोच्चस्थानानि। यान्येव विक्षेपाभावस्थानानि तान्येव पातस्थानानि। किं तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम्। तत्र मन्दोच्चपातानां गतिरस्ति चन्द्रमन्दोच्चपातवदित्यनुमानेन सिद्धा। सा च कियती तदुच्यते। यैर्भगणैरुपलब्धिस्थानानि तानि गणितेनागच्छन्ति तद्भगणसंभवा वार्षिकी दैनन्दिनी वा गतिर्ज्ञेया। नन्वेवं यद्यन्यैरपि भगणैस्तान्येव स्थानान्यागच्छन्ति तदा कतरस्या गतेः प्रामाण्यम्। सत्यम् तर्हि साम्प्रतोपलब्ध्यनुसारिणी कापि गतिरङ्गीकर्तव्या। यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्माण एवोत्पत्स्यन्ते। ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति। अत एवायं गणितस्कन्धो महामतिमद्भिर्धृतः सन्ननाद्यन्तेऽपि काले खिलत्वं न याति। अतोऽस्य क्रान्तिपातस्य भगणाः कल्पेऽयुतत्रयं तावत् सूर्यसिद्धान्तोक्ताः। तथा मुञ्जालाद्यैर्यदयनचलनमुक्तं स एवायं क्रान्तिपातः। ते गोऽङ्कर्तुनन्दगोचन्द्रा १९९६६९ उत्पद्यन्ते। अथ च ये वा के वा भगणा भवन्तु। यदा येंऽशा निपुणैरुपलभ्यन्ते तदा स एव क्रान्तिपात इत्यर्थः। तं विलोमगं क्रान्तिपातं ग्रहे प्रक्षिप्य क्रान्तिः साध्या" प्रमिता०।

क्रान्तिवृत्त न० सि० शि० उक्ते-क्रान्तिवलयाकारे वृत्तभेदे। तन्निवेशनप्रकारादि च गोलबन्धे तत्रोक्तं यथा "याम्योत्तरक्षितिजवत् सुदृढं विदध्यादाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्। मध्ये च तत्र सममण्डलवत् तृतीयं नाड्याह्वयं च विषुवद्वलयं तदेव" सि०शि० यथा खगोले क्षितिजं याम्योत्तरं च तदाकारमपरमाधारवृत्तद्वयं ध्रुवयष्टिस्थं कृत्वा तदुपर्यन्यत् तृतीयं सममण्डलाकारं घटीषष्ट्याङ्कितं कार्यम्। तन्नाडीवृत्तं विषुवद्वृत्तसंज्ञं च "इदानीं क्रान्तिवृत्तमाह" प्रमि०। "क्रान्तिवृत्तं विधेयं ग्रहाङ्कं भमत्र भानुश्च भार्धे क्रमाभागतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपाताश्च तत्स्थानकान्यङ्कयेत्" सि०शि० "अथान्यत् तत्प्रमाणमेव वृत्तं कृत्वा तत्र मेषादिं प्रकल्प्य द्वादशराशयोऽङ्क्याः। तत् क्रान्तिवृत्तसंज्ञम्। तस्मात् वृत्ते रविर्भ्रमति। तथा रवेर्भार्धान्तरे भूभा च। तथा तत्र क्रान्तिपातो मेषादेर्विलोमं भ्रमति। तथा ग्रहाणां विक्षेपपाताः प्रस्फुटा विलोमं भ्रमन्ति। अतः क्रान्तिपातादीनां स्थानानि तत्राङ्क्यानि। इदानीं क्रान्तिवृत्तस्य निवेशनमाह" प्रमि०

"क्रान्तिपाते च पाताङ्कपट्कान्तरे नाडिकावृत्तलग्नं विदध्यादिदम्। पाततः प्राक् त्रिभे विक्षभागैरुदग् दक्षिणे तैश्च भागैर्विभागेऽपरे" सि० शि०

"क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यच्चिह्नं कार्यम्। ते चिह्ने नाडीवृत्तेन संसक्ते कृत्वा पातचिह्नादग्रतस्त्रिभेऽन्तरे नाडीवृत्ताद्भागचतुर्विंशत्योत्तरतो यथा भवत्यपरविभागे त्रिभेऽन्तरे दक्षिणतश्च, तैर्भागैर्यथा भवति तथा बध्नीयात्"। प्रमि० अविकं क्रान्तिशब्दे दृश्यम्। क्रान्तिवलयक्रान्तिमण्डलादयोऽप्यत्र।

क्रान्तिसाम्य न० ६त०। ग्रहाणां तुल्यक्रान्तौ। यद्यपि सर्वे ग्रहाणां क्रान्तिसाम्यमस्ति तथापि चन्द्रार्कयोः क्रान्तिसाम्यस्य मङ्गलकार्य्ये वर्ज्जनीयता १८६५पृ०उपग्रमशब्दे विस्तरेण दर्शिता। क्रान्तिसाम्ये च ग्रहाणामवनत्यभावः सू० सि० दर्शितोयथा "अक्षोदग्मध्यमक्रान्तेः साम्ये नावनतेरपि" सू० सि०

"अक्षांशा उत्तरा ये मध्यमस्य मध्यलग्नस्य क्रान्त्यंशाः। अत्र मध्यलग्नशब्देन दशमभावस्त्रिभोनलग्नं वा ग्राह्यमुभयपक्षेऽप्यदोषः। अनयोस्तुल्यत्वेऽवनतेर्नतेः अपिशब्दाद् सम्भवो न अभाव इत्यर्थः" रङ्गनाथः।

क्रान्तिसूत्र न० सि०शि० उक्ते ध्रुवस्पर्शिनि क्रान्तीनां सूत्राकारे योगभेदे। "सर्व्वतः क्रान्तिसूत्राणां ध्रुवे योगो भवेद्यतः। विषुवन्मण्डलप्राच्या ध्रुवे याम्या तथोत्तरा" सि० शि०।

क्रान्तु पुंस्त्री क्रम–तुन् वृद्धिश्च। पक्षिणि उज्ज्वलद०।

क्रायक त्रि० क्री ण्वुल्। १क्रेतरि अमरः २क्रयजीविनि भरतः तच्चिन्त्यं तत्र क्रयिक इत्येव साधु जीवतीत्यर्थे वस्त्रादपि क्रयशब्दात् ठन्विधानात्।

क्रावन् त्रि० क्रम–वनिप् "विड्वनोरनुनासिकस्यात्" पा० मस्यात् क्रान्तरि "दधिक्राव्णोऽकारिषं जिष्णोरश्वस्य वाजिनः"यजु०२३।३२। स्त्रियां ङीप् रश्चान्तादेशः क्रावरी।

क्रिमि पु० क्रम–इन् अतइत्त्व। १कृमौ क्षुद्रजन्तौ उज्ज्वल० २रोगभेदे कृमिशब्दे २१८४पृ० विवृतिः। "कृमयस्तु द्विधा प्रोक्ताः बाह्याभ्यन्तरभेदतः। बहिर्मलकफासृग्विड्जन्मभेदाच्चतुर्विधाः। नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः" "तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः। बहुपादाश्च सूक्ष्माश्च यूका लिक्षाश्च नामतः" माधवः। "क्रिमयः क्रिमिलं यथा" भाग० ३,३१,२८, [मेदि०

क्रिमिकण्टक न० क्रिमौ कण्टकमिव! कृमिकण्टकशब्दार्थे

क्रिमिघ्न पु० क्रिमिं हन्ति हन–टक्। १विडङ्गे रमानाथः। २कृमिनाशके त्रि० स्त्रियां ङीप्। सा च ३सोमराज्यां स्त्री शब्दच०। [२वार्त्ताक्यां स्त्री रत्नमाला।

क्रिमिज न० क्रिमेर्जायते जन–ड ५त०। १अगुरुचन्दने अमरः

क्रिमिशत्रु पु० क्रिमेः शत्रुरिव नाशकत्वात्। रक्तपुष्पके (पालदाभाँदार) शब्दच०। [खदिरे शब्दच०।

क्रिमिशात्रव पु० क्रिमेः शात्रव इव नाशकत्वात्। विट्–

क्रिमिशैल पु० क्रिमिनिर्म्मितः शैलः। वल्मीके (उइ–ढिपि) त्रिकाण्ड०

क्रिय पु० क्रिया ग्रहाणामाद्यगतिक्रिया विद्यतेऽत्र अच्। मेषराशौ दीपिका कौर्प शब्दे २२७८पृ० प्रमाणं दृश्यम्। "क्रियैणतौलीन्दुभतोनवांशाः" नील० ता०।

क्रिया स्त्री कृ–भावे करणादौ वा यथायथं श। १आरम्भे २निष्कृतौ (प्रायश्चित्ते) ३शिक्षायां ४पूजायां ५संप्रधारणे (विवादविचाराङ्गे साधने) ६सामाद्युपाये। ७न्यायादिमतसिद्धे उत्क्षेपणादौ कर्म्मणि व्याकरणमतसिद्धे ८धात्वर्थे ९चेष्टायां (परिस्पन्दे) १०चिकित्सायां च अमरः। ११करणे(अनुष्ठाने)हेम०। १२श्राद्धे क्षीरस्वामी। १३शौचे शब्दरत्ना०। १४प्रयोगे च तत्र न्यायमतसिद्धा क्रिया कर्म्मशब्दे १७५५पृ० दर्शिता। कर्म्मत्वलक्षणन्तु औलूक्यशब्दे सर्व्व०द० वाक्ये १५८६पृ० उक्तम् तत्र अनित्यमात्रसमवेतत्वे सतीति शुद्धम् नित्यमात्रसमवेतत्वाभावादित्यशुद्धम् अनित्यमात्रसमवेतत्वाभावादिति शुद्धम्। वैयाकरणमते तु धात्वर्थः क्रिया तत्स्वरूपशाब्दबोधप्रकारादि शब्दार्थरत्नेऽस्माभिर्निरूपितं यथा

"क्रिया च भावना उत्पादयितुर्व्यापाररूपा साध्यत्वेनाभिधीयमानेति बोध्यम्।"व्यापारो भावना सैवोत्पादना सैव च क्रियेति" हर्य्युक्तेः "यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते" इति"साध्यत्वेन क्रिया तत्र तिङ्पदैरभिधीयते" इति च वाक्यपदीयाच्च। "यावदिति सर्व्वमित्यर्थः तदेव विवृणोति सिद्धमसिद्धं वेति। सिद्धं वर्त्तमानध्वंसप्रतियोगि, तद्भिन्नमसिद्धं तच्च वर्त्तमानं भविष्यच्चेति द्विविधं तेनापचत् पक्ष्यति पचतीत्यादौ सर्वत्र साध्यत्वेन असत्वरूपत्वेनाभिधीयमाना क्रियेति क्रियाशब्दस्य रूढिरनेन दर्शितेति भावः। यौगिकत्वमप्याह आश्रितक्रमरूपत्वादिति। आश्रितःक्रमो रूपं यस्यास्तत्त्वात् पूर्वापरीभूतावयवकत्वादित्यर्थः। तदीयावयवानामधिश्रयणाद्यधःश्रयणपर्य्यन्तानां क्रमेणोत्पत्तेः क्रियापदेन तत्समुदायोऽभिधीयते यत्र च न क्रमिको व्यापारोऽस्ति तत्र रूढिरादरणीयेति पौर्वापर्य्यारोपेण वा सर्वत्र फलस्य स्वजन-

कव्यापारगतपौर्वापर्यारोपवत् यौगिकत्वम्। अतएव फलमात्रबोधकस्यापि क्वचित् धातुत्वसिद्धिरिति फलितार्थः। इयांस्तु विशेषः पाक इत्यादौ धातुना साध्यत्वेनोपस्थाप्यायाः क्रियायाः सिद्धक्रियारूपे घञर्थे विशेषणत्वं पचतीत्यादौ तु नैवमिति। अतएव "साध्यत्वेन क्रिया तत्र तिङ्पदैरभिधीयते" इति वाक्यपदीयकारिकाव्याख्यायां भूषणसारदर्पणे तिङ्पदैरित्यतद्गुणसंविज्ञानबहुव्रीहिणा तिङन्तपदैर्धातुभिरित्यभिहितम्। तेन सर्वत्र धातोः साध्यरूपक्रियाबोधकत्वम्। किन्तु क्रमिकावयवानामेकदाऽसत्त्वेऽपि यत्किञ्चिदवयवसत्त्वकाले वर्त्तमानत्वव्यवहारः अवयवावयविनोरभेदारोपात्। भूतभविष्यत्त्वव्यवहारस्तु सर्वेषामवयवानां भूतभविष्यत्त्वयोरेव, न तु यत्किञ्चित्क्रियाव्यक्तिभूतत्वादौ। उक्तञ्च वाक्यपदीये "गुणभूतैरवयवैः समूहः क्रमजन्मनाम्। बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते" इति। अस्यार्थः क्रमिकतत्तद्व्यापारं प्रति गुणभूतैर्गुणभावेन भासमानैरवयवैरुपलक्षितः बुद्ध्या एकत्वबुद्ध्या प्रकल्पितोऽभेदो यस्मिन् तद्रूपः क्रमजन्मनां व्यापाराणां समूहः क्रियेति। अत्र क्षणनश्वराणां व्यापाराणां मेलनासिद्ध्या बुद्ध्येत्युक्तम् तया च बुद्धिजन्यसंस्कारद्वारा तेषां मेलनसम्भव इति भावः। अतएव भाष्ये "क्रिया हि नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्यते पिण्डीभूता निदर्शयितुमिति" व्यापारसमुदायात्मिकायाः क्रियायाः दर्शनायोग्यत्वोक्त्या तदवयवानां तद्विषयत्वं व्यतिरेकमुखेन दर्शितम्। तस्याश्चाभिन्नैकबुद्धिविषयतया एकत्वव्यवहार इत्यपि बोध्यम्। अथवाऽनेकव्यापारव्यक्तिवृत्तिर्जातिरेव क्रियेति सिद्धान्तपक्ष आदरणीयः। तस्याश्च व्यक्तिद्वारैव साध्यत्वम् अस्ति च पचित्वादिकं जातिः पचतीत्याद्यनुगतव्यवहारात् तज्जातेरैक्यादेकत्वव्यवहार इति मन्तव्यम्। तदुक्तं वाक्यपदीये "जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम्। असाध्यां, व्यक्तिरूपेण सा साध्येवाभिधीयते" इति। युक्तञ्चैतत् सर्वत्रैव लाघवाज्जातिशक्तिस्वीकारेण पच्यादिधातूनामपि तत्रैव शक्तिरुचितेति दिक्। सा च क्रिया धातुवाच्या फलव्यापारोभयरूपा, तद्विशिष्टरूपा वा "फलव्यापारयोर्धातुः" इत्यभियुक्तवचनात्। व्यवस्थापयिष्यते च मतभेदे फलव्यापारयोः पृथक्शक्त्या विशिष्टशक्त्या वा धातुवाच्यता। अत्र फलांशस्य कर्त्तुरुद्देश्यत्वेऽपि प्राधान्याभावात् व्यापारस्यैव प्राधान्यं समुचितं तस्य च साध्यतया कर्मातिरिक्तसर्वकारकाणां तत्रैव स्वस्वव्यापारद्वारा साधकत्वेनान्वयः कर्मणस्तु फल एव, क्रियाजन्यफलाश्रयतयैव तस्योद्देश्यत्वादिति विवेकः। उक्तञ्च वाक्यपदीये "प्राधान्यात्तु क्रिया पूर्वमर्थस्य प्रविभज्यते। साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजकमिति"। अर्थस्य फलस्य तदपेक्षयेत्यर्थः। प्राधान्यात् विशेष्यत्वात् साध्यं प्रयुक्तं यैः तानि साध्यसाधकानि अङ्गानि कारकाणीत्यर्थः। अत्र फलस्य क्रियाप्रयोजकत्वाभिधानं तदुद्देशेनैव क्रियायां प्रवृत्तिरित्येवमभिप्राय। तथा च सर्वो लोकः स्वाभीष्टफलमभिप्रेप्सुः तत्साधनाय यतते लभते च ततस्तत्फलमुपायसंसाधनेन। एवं च क्रियाफलं विक्लित्त्यादिकमभीप्सुः पाकाय यतमानो जनः पाकसंसाधनेन फलं लभते। ततश्च फलसाधनतया पाकादेरपीष्टत्वात् साध्यत्वम्। फलावच्छिन्नक्रियाया धात्वर्थत्वमते तु विशिष्टत्वेनैवेष्टत्वात् विशिष्टस्यैव साध्यत्वमिति विशेषः। कारकान्वयस्तु तन्मते पूर्वोक्तदिशावसेयः एकदेशान्वयस्वीकाराच्च न कर्मणोऽनन्वय इति बोध्यम्। तथाचैवं रीत्या साध्यत्वेन क्रियां जानता जनेन तस्याः प्राधान्यबुबोधयिषयैवाख्यातान्तस्य धातुः प्रयुज्यते अन्यथा कृदन्तस्येति। एवञ्च भावकृदन्तस्थले धातुना साध्यरूपक्रियाबोधनेऽपि तस्याः प्रत्ययार्थसिद्धरूपक्रियाविशेषणत्वेन न प्राधान्यम् "भावप्रधानमाख्यातमित्यादि" निरुक्तवचनस्य, "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यमिति" न्यायस्य च परस्परं विरोधपरीहाराय न्यायस्य आख्यातातिरिक्तविषयत्वव्यवस्थापनम्। हरिणापि धातुभावकृतोः क्रियावाचित्वाविशेषेऽपि धातुना साध्यत्वेन, कृता तु सिद्धत्वेन क्रियाया बोधनमिति व्यवस्थापितं यथा "साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना। सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः" इति "आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता। प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः" इत्येताभ्याम्। भागाभ्यां पश्य मृगो धावतीत्यादौ तिङन्ताभ्यां साध्यसाधनवर्त्तितेति मृगो धावतीत्येतस्य साधनत्वमपरस्य साध्यत्वं क्रियाकारकभावेन तयोरन्वयात् घञर्थक्रियायास्तु इतरक्रियायामेव साधनत्वमिति विवेकः। साध्यत्वञ्च लिङ्गसंख्याऽनन्वयित्वं तद्विपरीतं सिद्धत्वं तथाच घञाद्युपस्थाप्यक्रियायाः लिङ्गसंख्यान्वयित्वेनापरक्रियायां साधनत्वम्। युक्तञ्चैतत् यत् घञन्तादौ द्विवि

धक्रियायाभानं कारकाणां साध्यक्रियायामेवान्वयोपगमात् कृदन्तस्थले कारकविभक्तिप्रयोगस्य सर्व्वजनीनतया साध्यत्वेन तदुपस्थितावेव कारकान्वयोपपत्तिः। "साध्यस्य साधनाकाङ्क्षेति" "नियतं साधने साध्यं क्रिया नियतसाधनेति" "साध्यत्वेन निमित्तानि क्रिया परममेच्यते" इति चाभियुक्तोक्तेः। अतएव स्तोकं पाक इत्यादौ द्वितीयान्ततोपपद्यते साध्यक्रियाफलस्य विशेषणेऽपि द्वितीयानुशासनात्। घञाद्युपस्थाप्यक्रियाविशेषणस्य तु विशिष्यलिङ्गतया प्रथमाद्यन्तता "कृदभिहितो भावो द्रव्यवत् प्रकाशते" इति भाष्योक्तेः। कृदभिहितः कृता बोधितः। भावो भावना धात्वर्थस्वरूपमिति यावत् द्रव्येण तुल्यं प्रकाशते द्रव्यधर्म्मान् लिङ्गसंख्याकारकत्वानि भजते इति यावत्। अत्र द्रव्यत्वं लिङ्गसंख्यान्वयित्वमेव योग्यत्वात् न तु पृथिव्याद्यात्मकत्वं स्नानपाकादौ तदभावात्। नापि "वस्तूपलक्षणं यत्र सर्व्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः" इति पारिभाषिकसर्व्वनामपरामर्शयोग्यत्वादिरूपं, साध्यक्रियाया अपि तथात्वे नाविशेषापत्तेः। किन्तु सत्वप्रधानानि नामानीत्येकवाक्यतया सत्वद्रव्ययोः पर्य्यायत्वस्य बहुषु स्थलेषु दर्शनात् सत्वभूतत्वमेव द्रव्यत्वमिति फलितार्थः "क्रिया न युज्यते" इत्यादिना लिङ्गाद्ययोगस्यासत्वलक्षणत्वाभिधानात् तद्योगस्यैव सत्वलक्षणत्वौचित्यादिति तु तत्त्वम्। वैयाकरणादिमते चल इत्यादौ क्रियायां शक्तिः "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" काव्यप्र० उक्तेः। "अयमव्ययतः कश्चिज्जातिद्रव्यक्रियागुणैः" माघः। प्रयोगे "तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिप्रहतक्रियाः" कुमा० "प्रतिहतक्रियाः विफलप्रयोगाः" मल्लि० करणे (अनुष्ठाने) "वचसस्तस्य सपदि क्रिया केवलमुत्तरम्" माघः। "यथाक्रमं पुंसवनादिकाः क्रियाः" रघुः। "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" "तद्भूतानां क्रियार्थेन समाम्नायः" जै० सू०। शिक्षायाम् "क्रिया हि वस्तूपहिता प्रसीदति" रघुः "चिकित्सायां "क्रियाः(मोघाः) सर्व्वा गतायुषः" सुश्रु०। कर्म्मणि(स्पन्दे) "क्षितिर्जलं तथा तेजः पवनो मन एव च। परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी" भाषा०। "यदाश्रया क्रिया तमविकुर्व्वती नैवात्मानं लभते" शा०भा०। "क्रियैव कालः इति मते सुतरां नाधिकरणता" ति० त० रघु०। संयोग विभागयोरसमवायिकारणतावच्छेदकतया क्रियात्वजातिसिद्धिः। "क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम्। गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः" भाषा० तेन योग्यवृत्तेस्तस्याः प्रत्यक्षता" धात्वर्थे व्यापारे "तेन तुल्यं क्रिया चेद्वतिः" क्रियासमभिहारे यङ्" "स्वरितञितः कर्त्रभिप्राये क्रियाफले" पा०। "क्रियया यमभिप्रैति" वार्त्ति० "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" "कर्त्तृकर्म्मव्यवहितामसाक्षाद्धारयत् क्रियाम्। उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्" "क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते"। "निर्द्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधाऽपादानमिष्यते" "धातूपात्तक्रिये नित्यं कारके कर्त्तृतेष्यते" इति च भर्त्तृहरिः। "क्रियासमभिहारेण विराध्यन्तं क्षमेत कः" माघः। धात्वर्थे फले। "कर्म्मवत् कर्म्मणा तुल्यक्रियः" पा० कर्म्मणा कर्म्मस्थक्रियया तुल्यक्रियः समानाधिकरणक्रियः कर्म्मस्थमात्रस्थक्रियारूपफलकइत्यर्थः। क्रियाविशेषणम्। अत्र च यथा फलस्य विशेषणत्वेऽपि द्वितीया तथा क्रियाविशेषणशब्दे वक्ष्यते। क्रियान्वयिनश्च हरिणा दर्शिता यथा

"संबोधनान्तं कृत्वोऽर्थाः कारकं प्रथमोक्तिः। धातुसम्बन्धाधिकारविहितमसमस्तनञ्। तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्। संम्बन्धस्याष्टकस्यास्य क्रियैवावधार्य्यताम्"। व्यवहाराङ्गक्रियायाम् उदा० क्रियापादशब्दे वक्ष्यते। श्राद्धे "चतुर्द्दश्यां क्रियाः कार्य्या अन्येषान्तु विगर्हिताः" म० त० मरीचिः। "मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः" शु० त० मरीचिः। "सपिण्डसन्ततिर्वापि क्रियार्हो नृप! जायते" तत्रैव विष्णुपु०। "ये सपिण्डीकृताः प्रेता न तेषां च पृथक्क्रिया" ति० तु० शाता०

क्रियाकल्प पु० क्रियायां चिकित्सायां कल्पोविधिः। सुश्रुतोक्ते उत्तरतन्त्रे अष्टादशाध्यायप्रतिपाद्ये क्रियाभेदे। "अथातः क्रियाकल्पं व्याख्यास्यामः" इत्युपक्रमात् तस्योक्तेस्तथात्वम्

क्रियाकार पु० क्रियां शिक्षारम्भं करोति कृ–अण् उप०स०। १नवच्छात्रे त्रिका० २कार्य्यकारकमात्रे त्रि० स्त्रियां टाप् सि० कौ०। मुग्ध० मते ङीप् इति भेदः।

क्रियाद्वेषिन् त्रि० क्रिया व्यवहाराङ्गसाधन साक्षिलेख्यादिकं द्वेष्टि द्विष–णिनि ६त०। विवादे पञ्चविधहीनान्तर्गतहीनप्रतिवादिनि "अन्यवादी क्रियाद्वेषी नोपस्थाता

निरुत्तरः । आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः” मिता॰ नारदः तल्लक्षणं यथा “लेख्यं च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः । तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते” वीरमि॰ कात्या॰ ।

क्रियापाद पु॰ क्रिया विवादसाधनं पादद्वयं । चतुष्पाद्व्यवहारे साध्यार्थसाधनरूपे तृतीये पादे । “१पूर्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः । ३क्रियापादस्तथान्यश्च तृतीयो ४निर्णयस्तथा” बृह॰ । तस्य व्यवहारपादत्वं तद्विशेषादि वीरमित्रोदये निर्णीतं यथा “अथ क्रियापादः । तत्र तदुपयोगिप्रत्याकलितं प्रथमं निरूप्यते । विज्ञानयोगिना तस्य व्यवहारपादत्वानभ्युपगमेऽपि क्रियादानोपयोगित्वाभ्युपगमात् । अन्यैस्तु व्यवहारपादत्वस्यैव स्वीकारात् क्रियापादप्रागभावस्तूभयसम्मतः । प्रत्याकलितं नाम भाषोत्तरयोरर्थिप्रत्यर्थिभ्यां लिखितयोः क्रियोपन्यसनमनयोर्मध्ये कस्य स्यात्का चास्मिन् वादे क्रिया स्वाधीनवादी वानयोर्मध्ये क इत्यादिः सभ्यप्राड्विवाकस्य सभापतेः सभ्यस्य प्राड्विवाकस्य वा परामर्श उच्यते । तथा च बृहस्पतिः “ये तु तिष्ठन्ति करणे तेषां सभ्यैर्विभावना । कलयित्वोत्तरं सभ्यैर्द्रष्टव्यैकस्य वादिनः” । करणे धर्माधिकरणे ये तिष्ठन्ति वादिनः प्रतिवादिनश्च तेषामुत्तरं मिथ्यादिचतुर्भेदं कलयित्वा विचार्य एतदुत्तरे कस्य क्रियोपन्यास उचित इति निर्धार्य विभाव्यते साध्यमनयेति विभावना क्रियाप्रमाणमिति यावत् । एकस्य वादिनोऽर्थिप्रत्यर्थ्यन्यतरस्य सभ्यैर्दातव्या उपन्यसनीयत्वेनाज्ञापयितव्येत्यर्थः । कात्यायनोऽपि “लिखिते शोधिते सम्यक् सति निर्दोष उत्तरे । अर्थिप्रत्यर्थिनोर्वापि क्रियाकरणमिष्यते” । क्रियाकरणं क्रियोपन्यासः । पुनर्बृहस्पतिः “श्रुत्वा पूर्वोत्तरं सभ्यैर्निर्दिष्टा यस्य भावना । विभावयेत् प्रतिज्ञातं सोऽखिलं लिखितादिना” । विभाव्यते साध्यते साध्यमनयेति विभावना क्रियैव । पूर्वोत्तरं पूर्वपक्षमुत्तरञ्चेत्यर्थः । द्वन्द्वैकवद्भावः । निर्दिष्टा ब्रूहीत्युपदिष्टा । कस्मिन्नुत्तरे कस्य क्रिया क्रियारहितञ्च किमुत्तरमित्यपेक्षायामाह व्यासः “प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम् । मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत्” । प्राङ्न्यायकारणोत्तरयोः प्राङ्न्याये कारणे च साधितेऽर्थिसाध्यस्य पक्षस्य धारणासाधकत्वात्तदर्थं साधनं प्रत्यर्थिनाऽभ्युपगमाच्चेति तत्रैव साध्यत्वाविशेषात्तदुपन्यासकारिण एव प्रत्यर्थिनः प्रमाणोपन्यासेन साधनापेक्षितः । अर्थिसम्बन्धविरुद्धप्रत्यर्थिसम्बन्धयोर्द्वयोरपि तेनैव निर्णयात् । मिथ्योत्तरे तु वादिनः प्रमाणमपेक्ष्य यदि प्रतिज्ञातेऽर्थे प्रमाणाभाव एव प्रत्यर्थ्यभिमतोऽर्थिप्रतिज्ञातसाध्यस्याभावः सिध्यतीति तत्परिहाराय भावाभावयोर्भावस्यैव साध्यत्वौचित्यादर्थिन एव क्रिया । सम्प्रतिपत्तौ तु नैकस्यापि साध्यमस्तीति निरर्थकत्वात् क्रियैव नास्तीत्यर्थः । बृहस्पतिः “प्रतिज्ञां भावयेद्वादी प्रत्यर्थी कारणं तथा । प्राग्वृत्तं वादिजयं जयपत्रेण भावयेत्” प्रतिज्ञां प्रतिज्ञातार्थम् । इदञ्च परिशेषान्मिथ्योत्तरविषयम् । प्राग्वृत्तं प्राङ्न्यायं जयपत्रेणेति प्राङ्न्यायदर्शिभिर्दत्त पत्रलक्षणम् । मनुः “अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि । अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्” । दिशति कथयति यथादृष्टमर्थमिति देश्यः साक्षी । मेधातिथिस्तु स्वर्णादिप्रयोगदेशवर्त्तिनः साक्षिणो देशशब्देन लक्ष्यन्त इत्याह । अन्यत्कारणं प्रमाणं साक्षिभिन्नं लेख्यादि । मेधातिथिना तु “करणं वा समुद्दिशेदिति” पठित्वा करणशब्दः प्रमाणसामान्यवाचकोऽपि गोबलीवर्दन्यायेन साक्षिभिन्नकरणमाचष्टे पृथगुपादानात् । कारणं वा समुद्दिशेदिति पाठेऽप्ययमेवार्थः” इत्युक्तम् । । यत्र मिथ्याप्रत्यवस्कन्दनयोः कृत्स्नपक्षव्यापिता । यथा कश्चित् कुङ्कुमाहिकया कश्चिदभियुङ्क्ते मदीयेयङ्गौरसुकस्मिन् काले नष्टास्य गृहे दृष्टा यतः । तत्राभियुक्त उत्तरयति मिथ्यैतत् । एतत्प्रदर्शितनाशकालात् प्रागेवास्या मद्गृहेऽवस्थितत्वादिति । इदन्त्वावत्पक्षप्रतिक्षेपक्षमत्वमित्यनुत्तरत्वानर्हम् । कारणोपन्यासान्न शुद्धं मिथ्योत्तरम् । एकदेशाभ्युपगमाभावान्नार्थिना लिखितोऽयं इत्यादि प्रागुक्तप्रत्यवस्कन्दनलक्षणं नास्कन्दति । साध्यभेदाय प्रतिज्ञाभेदापादकत्वाभावान्न पक्षैकदेशम् यत्तन्यमित्युत्तरं युगपद्व्यवहारासम्भवकृतं युगपदनुत्तरम् । तस्मात्सकारणं मिथ्योत्तरमेवेदम् अन्यतरसाधनेनापि विवादपर्यवसानात् । अत्र “मिथ्याक्रियापूर्ववादे” इति वचनात् “कारणे प्रतिवादिनीति” वचनाच्चान्यतरस्य यथारुचि क्रियोपन्यास इति भाति यद्यपि, तथापि मिथ्याक्रियेत्यादेः शुद्धमिथ्याविषयत्वेनैतद्विषयत्वाभावात् “कारणे प्रतिवादिनीति” वचनात् प्रतिवादिन एवात्र क्रिया । नचात्रापि शुद्धप्रत्यवस्कन्दनविषयत्वादेतद्विषयत्वाऽभावप्रसङ्गेन न कस्यापि क्रिया प्राप्नोतीति निर्णय-

षतिबन्ध एवेति वाच्यम्। यतः प्रसिद्धप्रत्यवस्कन्दनेऽपि ग्रहणाद्यभ्युपगमेन प्रतिदानादिकारणोत्तरतैवास्यासम्भाविनीति वाच्यम् एकदेशाभ्युपगमस्य प्रायिकत्वात्। कारणोपन्यासस्यैवोत्तरान्तरासङ्कीर्णतया तल्लक्षणत्वावश्यम्भावात्। एवं च कृत्स्नपक्षव्यापि सप्राङ्न्यायं मिथ्योत्तरमपि द्रष्टव्यम्। यथा प्राक्तनाभियोग एव। यद्येवं प्रतिपद्यते मिथ्यैतत्। यतः प्रागप्यस्मिन्नभियोगे मया व्यवहारमार्गेण पराजित इति। अत्रापि प्राङ्न्यायकारणोक्तौ” इत्यादिप्राक्प्रदर्शितवचनात् प्रत्यर्थिन एव क्रियोपन्यासः। प्राङ्न्यायसिद्धौ प्रतिज्ञायाः प्रकटमेव मिथ्यात्वपर्यवसानादस्य शुद्धप्राङ्न्यायविषयत्वासम्भवात्। देतादृशप्राङ्न्यायविषयतायाः अप्यवर्जनीयत्वात्। पक्षप्रतिक्षेपकत्वस्यास्य प्राग्वदेवानुत्तरत्वानर्हत्वात्। यत्र तु कारणप्राङ्न्याययोः कृत्स्नपक्षव्यापितयैकोत्तरत्वं तत्र प्रत्यर्थिना प्राङ्न्याय एव साधनीयः। कारणस्य साधनस्य तदन्तर्भूतत्वात्। यथा रूपकशतमनेन मामकं गृहीतमित्यभियुक्तः प्रतिवदति सत्यं गृहीतं प्रतिदत्तत्वादिदानीमस्मै न धारयामि। अस्मिन्नेवार्थे प्रागप्यनेनाहमभियुक्तस्तत्र व्यवहाररीत्यायमपराजितश्चेति। इदानीं हीनपरिज्ञानोपायः तत्र मनुः। “बाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम्। स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च”। स्वरो विकृतो गद्गदत्वादिः। वर्णोऽप्यस्वाभाविकः कृष्णत्वादिः। इङ्गितं स्वेदवेपथुरोमाञ्चादि। आकारो विकृतो भ्रुवः क्रियादिः। चक्षुः कातरम्। चेष्टितं वृथास्थानात् स्थानान्तरगमनादि। याज्ञवल्क्यः “देशाद्देशान्तरं याति सृक्किणी परिलेढि च। ललाटं स्विद्यते चास्य मुखं वैवर्ण्यमेति च। परिशुष्यत्स्खलद्वाक्यो विरुद्धम्बहु भाषते। वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि। स्वभावाद्विकृतिं गच्छेन्मनोवाक्कायकर्मभिः। अभियोगेऽथ साक्ष्ये वा दुष्टः स परिकीर्त्तितः।” मनोवाक्कायकर्मभिर्यः स्वभावाद्विकृतिङ्गच्छेत् न भयादिनिमित्तमसावभियोगे साक्ष्ये वा दुष्टः परिकीर्त्तितः। मन आदि विकृतीरेव विविच्य दर्शयति। देशान्तरं याति नचैकत्रावतिष्ठते। सृक्किणी ओष्ठप्रान्तौ परिलेढि जिह्वया पुनः पुनः परिवेष्टयतीति। कर्मणो विकृतिः। अस्य ललाटं स्विद्यते स्वेदबिन्दुवृन्दाङ्कितम्भवति। मुखं वैवर्ण्यं वर्णान्यत्वं पाण्डुत्वकृष्णत्वादि एति प्राप्नोतीति कायस्य। परिशुष्यत्स्खलद्वाक्यः परिशुष्यद्गद्गदं स्खलद्व्यस्त-

पदवर्णं वाक्यं यस्य सः। बहु अनुपयुक्तं विरुद्धं पूर्वापरविरोधवद्भाषते। परोक्तां वाचम्प्रतिवचनदानेन, इति वाचः। चक्षुश्च परस्य प्रतिवीक्षणेन न पूजयति नाभिनन्दतीति चक्षुषः। मनोविकृतेर्लिङ्गम्परकीयमनोविकृतेरप्रत्यक्षत्वात्। तथा ओष्ठौ निर्भुजति वक्रयत्युपर्यधोभावेन चालयतीति कायस्यैव विकृतिः। मनुरेव “आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च। नेत्रवक्त्रविकारैश्च गृह्यतेऽन्तर्गतं मनः” कात्यायनः “आकारेङ्गितचेष्टाभिस्तस्य भावं विभावयेत्। प्रतिवादी भवेद्धीनः सोऽनुमानेन लक्ष्यते। कम्पः स्वेदोऽथ वैवर्ण्यमोष्ठशोषाभिमर्षणम्। भूलेखनं स्थानहानिस्तिर्यगूर्द्ध्वनिरीक्षणम्। स्वरभेदश्च दुष्टस्य चिह्नान्याहुर्मनीषिणः”। प्रतिवादिशब्देन परस्परप्रतिपक्षवादित्वादुभयोर्ग्रहणम्। आभमर्षणाञ्जिह्वयोष्ठप्रान्तावलेहनं दन्तैकवद्भावः। श्रीरामायणे ‘आकारं छाद्यमानोऽपि न शक्यो विनिगूहितुम्। बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम्”। अनेन च पराजसम्भावनामात्रम्प्रतिपाद्यते तस्य च फलं क्रियादिपरामर्शे सभ्यादीनामत्यवधानेन व्यवहारशेषविचारः। नत्वेतावता पराजयनिश्चयो साध्यनिर्णयो वा, नैसर्गिकनैमित्तिकविकारयोर्वैलक्षण्यस्य विवेक्तुमशक्यत्वात्। यद्यपि कोऽपि निपुणतममतिर्विवेक्तुं शक्नुयात् तथापि न पराजयनिमित्तमसाक्षित्वनिबन्धनं वा दण्डादिकार्यं सम्भवति। न हि निपुणभिषगभियोगमूलकमरणनिश्चयेऽपि मृतकार्य्यमार्याः समाचरन्ति। योगीश्वरः “सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत्। न चाहूतो वदेत्किञ्चिद्धीनो दण्ड्यश्च स स्मृतः”। सन्दिग्धमधमर्णादिभिरनभ्युपगतमेवार्थं यः स्वतन्त्रः प्रमाणनिरपेक्ष एव साधयेदासेधादिना राजादिभ्योऽनिवेद्यैव तस्मान्निष्कृति तदुपरि दण्डाद्यापादयति वा स हीनो दण्ड्यो भवति। न परं प्रकृतार्थहानिमाप्नोति प्रत्युत स्वातन्त्र्यनिबन्धनं राजदण्डमपि दातुमर्हति। यश्च स्वयमभ्युपेते नेतं साधनं वा साधितं याच्यमानो निष्पतेत् पलायेत। सोऽपि तथा दण्ड्यः साधितं धनञ्च दाप्यः। यश्चाहूतोऽभियुक्तो राज्ञा चाहूतः सदसि न किञ्चिद्वदति स प्रकृतार्थहानिं दण्डञ्च प्राप्नोति। प्रकरणात् दुष्टपरिज्ञानमेव मा भूदिति दण्डग्रहणं दण्ड्योऽपि शास्योऽर्थान्न हीयत इति स्वार्थान्न हीयत इत्यर्थादहीनत्वदर्शनादन तन्माभूदिति हीन इत्युभयमनाप्तदोऽपि। “अन्यवादी

क्रियाद्वेषी नोपस्थाता निरुत्तरः । आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः । अन्यवादी तथा हीनः स एव विकृताननः । पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः । वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः” । कात्यायनेनापि “श्रावयित्वा यदा कार्यं त्यजेदन्यद्वदेद्वशौ । अन्यपक्षाश्रयस्तेन कृतो वादी स हीयते” । यत्र कश्चिदभियुज्य नाहमेनमभियुञ्जे इत्येवं विरुद्धमभिदधीत सोऽप्यन्यवादी तथा हीन इत्याह स एव “न मयाभिहितं कार्यमभियुज्य परं वदेत् । विब्रुवंश्च भवेदेव हीनत्वमपि निर्दिशेत्” । तथा पत्रे लिखितं पूर्वपक्षमप्यन्यथा कुर्वन्नन्यवादी तथा हीन इत्याह स एव “लेखयित्वा तु यो वाक्यमूनं वाऽभ्यधिकं पुनः । वदेद्वादी स हीयेत नाभियोगन्तु सोऽर्हति” । अभियोगं पूर्वपक्षं नार्हति वादित्वयोग्यो न भवतीत्यर्थः । क्रियाद्वेषिणोऽनुपस्थातुश्च हीनतायास्तेनैव विवरणं कृतम् “लेख्यं च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः । तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते । आह्वानादनुपस्थानात् सद्य एव स हीयते” । निरुत्तरतया हीनमप्याह स एव “ब्रूहीत्युक्तोऽपि न ब्रूयात् सद्यस्तद्दमनमर्हति । द्वितीयेऽहनि दुर्बुद्धेर्विद्यात्तस्य पराजयम्” । पराजयं तच्चिह्नं हीनताम् । अतएव हारीतः “सापदेशं हरेत्कालमब्रुवंश्चापि संसदि । उक्त्वा वचो विब्रुवंश्च हीयमानस्य लक्षणम्” । सापदेशं सव्याजम् । यथाह कात्यायनः “व्याजेनैव तु यत्रासौ दीर्घकालमतिक्रमेत् । सापदेशं तु तद्विद्याद्धानिकरं स्मृतमिति” । आहूतप्रपलायी अभियोगपरिहारार्थमाह्वानबुद्ध्या प्रच्छन्नचारी । एतेषामुत्तरोत्तरस्य हीनता गुर्वीति ज्ञापयितुं “हीनः पञ्चविध” इत्युक्तं न परिसंख्यार्थमन्येषामपि हीनत्वस्मरणात् । हीनतागुरुत्वज्ञापनं दण्डभूयस्त्वार्थम् । यथोक्तं कात्यायनेन “अन्यवादी पणान् पञ्च क्रियाद्वेषी पणान्दश । नोपस्थाता दश द्वे च षोडशैव निरुत्तरः । आहूतप्रपलायी च पणान्दाप्यस्तु विंशतिम्” । अत्रापि विशेष उक्तस्तेनैव “निराकृतमनायातमाहूतप्रपलायिनम् । पञ्चरात्रमतंक्रान्तं विनयेत्तं महीपतिः” कात्यायनेनैव प्रकारान्तरेणापि हीन उक्तः । “आवितव्यवहाराणामेकं यत्र प्रभेदयेत् । वादिनं लोभयेच्चैव हीनत्वमपि निर्दिशेत्” । आवितव्यवहाराणां सभ्यादीनां मध्ये एकमपि यः प्रभेदयेत् अर्थद्वारानुरोधाद्युत्पादनेनेत्यर्थः ।

बृहस्पतिरपि “भयं करोति भेदं वा भीषणं वा निरोधनम् । एतानि वादिनो यस्य व्यवहारे स हीयते” । भयादीनि व्यस्तसमस्तानि येन कृतानि स हीयत इत्यर्थः । भयं करोति भीषणामन्यमुखेन भयोत्पादनमिति शेषः । मनुरपि “अदेश्यं यश्च दिशति निर्दिश्यापह्नुते च यः । यश्चाधरोत्तरानर्थान् विगतान्नावबुध्यते । अपदिश्यापदेश्यञ्च पुनर्यस्त्वपधावति । सम्यक् प्रणिहितञ्चार्थं पृष्टः सन्नाभिनन्दति । असम्भाष्ये साक्षिभिश्च देशे सम्भाषते मिथः । निरुच्यमानं प्रश्नञ्च नेच्छेद्यश्चापि निष्पतेत् । ब्रूहीत्युक्तश्च न ब्रूयादुक्तञ्च न विभावयेत् । न च पूर्वापरं विद्यात्तस्मादर्थात् स हीयते । ज्ञातारः सन्ति मेत्युक्त्वा दिशेत्युक्तो दिशेन्न यः । धर्मस्थकारणैरेतैर्हीनत्वमपि निर्दिशेत्” । अदेश्यमनुपयोगासत्यत्वादिना निर्देशानर्हं दिशति कथयति यः । यश्च कथितमपि न मयेदमुक्तमित्यपलपति । यश्चाधरोत्तरानर्थान् पूर्वापराभिहितान्विगीतान्विरुद्धांस्तत्त्वेन नावबुध्यते । यश्चापदेश्यं व्याजं षोडशादिकमपदिश्योक्त्वा व्यापधावति अपसरति सभातः । यश्च सम्यक् प्रणिहितं सम्यक् प्रणिधानेनाकलितमपि परोक्तमर्थं पृष्टः सन्नाभिनन्दति अनुवादप्रत्युत्तरदानादिना नाद्रियते । मेधातिथिस्त्वदेश्यमिति पठित्वा भाषावादिलिखितदेशभिन्नमसम्भाविपं वा देशम् । यद्वाऽभियोक्ता दिशेद्देशमित्यत्रैव देशशब्देन साक्षिणो व्याख्याय साक्षिनिर्देशः । अकाले सम्भावितसाक्षिणो निर्दिशतीति” व्याचख्यौ । यश्च ज्ञातारः साक्षिणो ममोक्तेऽर्थे सन्तीति सभायामुक्त्वा के ते वदेत्युक्तो न वदेत्तान् । अत्र मा मां ज्ञातारः । यथार्थवादत्वेनेमिति जानानाः साक्षिण इति यावत् । द्वितीयैकवचनान्तस्यास्मच्छब्दस्य द्वितीयाया इत्यनेन माम् इत्यस्य मा इत्यादेशः । नतु मे इति षष्ठ्यन्तमेतत् । “[illegible]मिति” तन्निषेधात् । तेन मेति सन्धिरपि समाहित इति मेधातिथिः । आचार्यास्तु व्याकरणाधिकरणे सन्धिकरणमप्रापमग्रह इति पूर्वपक्षप्रसङ्गेन वदन्तः षष्ठ्यन्ततामेवास्य मन्यन्ते मे सन्तीति सम्बन्धान्न तृतीयासम्बन्धप्रयुक्तषष्ठीप्रतिषेधावकाश इति तेषामभिसन्धिः । सन्ति ज्ञातार इत्युक्त्वेति कल्पतरुलिखितपाठस्त्वनाकर एवाचार्यमेधातिथिभ्यामदृष्टत्वादिति ध्येयम् । सिद्धान्ते त्वाचार्याणां छान्दसत्वमत्र समाधिरभिमतः । एतैः कारणैर्व्यस्तैः समस्तैर्वा वादिप्रतिवादिनोरन्यतरं हीनं निर्दिशेदित्यर्थः हीनवादितया दण्डार्हतामात्रप्रक-

त्वार्थहानिरिति प्रमादपरिहारार्थमेवायं प्रपञ्चः "छलं निरस्येत्यादि" वचनात्। अतएव नारदोऽपि "सर्वेष्वर्थविवादेषु वाक्छले नावसीदति। परस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते"। अस्यार्थः अर्थविवादेषु सर्वेषु वाक्छले प्रमादाभिधाने पूर्व्वप्रपञ्चितेऽपि नावसीदति प्रकृतादर्थान्न हीयते। अत्रोदाहरणमात्रं परस्त्रीत्यादि। एतेषु प्रमादाभिधानेऽपि शास्योदण्ड्योऽपि यथा न प्रकृतार्थाद्धीयते इति एवं सर्वेष्वर्थविवादेष्वित्यर्थः। अन्यथा परस्त्रीत्यादेरानर्थक्यमेव भवेत्। अर्थविवादोपादानान्मन्युकृतेषु प्रकृतार्थादपि हीयतइत्यर्थादुक्तं भवति। यथाऽहमनेन शिरसि ताड़ित इत्यावेद्य भाषादिसमये हस्तेन पादे ताड़ित इति वदन् दण्ड्यः पराजितश्च भवति। मन्युकृतावेशादसदेव ताड़नादिकमयमस्मिन्नारोप्यावेदितवान् धर्म्माधिकरण इति प्रतीतेः। अतएव "दोषानुरूपं संग्राह्याः पुनर्वादो न विद्यते" इति वार्हस्पत्यः पुनर्वादनिषेधोऽपि मन्युकृतव्यवहारविषय एव। संग्राह्योदण्ड्य इत्यर्थात्। असम्भाष्ये सम्भाषणानर्हे विजन इति यावत्। नेच्छेत् श्रुतमप्यश्रुतवत्कुर्य्यात्। राजकार्य्यादिव्याजमुत्पाद्य ग्रामान्तरङ्गच्छेत्। ब्रूहीत्यादि गतार्थम्। अन्यादेशमित्यादौ ब्रूहीत्यादौ च बहुकृत्वोऽपि तथ्यं वदितव्यमिति शावरभाष्योक्तरीत्यास्मिन् प्रकरणे पुनरुक्तिर्नदोष इति भगवान्मेधातिथिराह। क्वचिदर्थविवादेऽप्यर्थहानि: सन्दिग्धार्थमित्यनेन दर्शिता। नारदोऽप्याह "अनिवेद्य तु यो राज्ञे सन्दिग्धेऽर्थे प्रवर्तते। प्रसह्य स विनेयः स्यात्स चाप्यर्थो न सिध्यति"। प्रवर्त्तते साधयति बलादिनेत्यर्थः। वृहस्पतिरपि "आहूतप्रपलायी च मौनी साक्षिपराजितः। स्ववाक्यप्रतिपन्नश्च हीनवादी चतुर्विधः"। साक्षिपराजितः साक्षिवचनाद्यः पराजितः, स्ववाक्यप्रतिपन्नः संप्रतिपत्त्युत्तरदाता, अनयोर्दृष्टान्तत्वेनोपादानम्। यथाऽनयोरविप्रतिपन्नार्थहानिस्तथान्ययोरपीत्यर्थः। अत्राप्युत्तरोत्तरहीनताधिक्यप्रतिपादनार्थं चतुर्विधग्रहणं परिसङ्ख्यार्थमन्यथान्येषान्तत्कथनं विरुध्येत। कस्मिन् कदा हीनकार्य्यमित्यत्र कालावधिरुक्तस्तेनैव "प्रपलायी त्रिपक्षेण मौनकृत् सप्तभिर्दिनैः। साक्षिभिश्चस्तत्क्षणेन प्रतिपन्नश्च हीयते" इति साक्षिभिश्चस्तत्पराजितः यस्य सामान्यान् साक्षिणो निर्दिश्य पश्चाद्विशेषान्निर्दिशेत् मनुना ख्यातारः इत्यनेन हीनतयोक्तेः तत्रापि कालावधिं वृहस्पतिरेवाह "साक्षिणस्तु समुद्दिश्य यस्तु तान्न विशोधयेत्। त्रिंशद्रात्रात् त्रिपक्षाद्वा तस्य हानिः प्रजायते" इति। दैविकराजिकान्तराये त्ववध्यतिक्रमेऽपि न दोष इत्यप्याह स एव "आचारकरणे दिव्ये कृत्वोपस्थाननिर्णयम्। नोपस्थितो यदा कश्चिच्छलन्तत्र न कारयेत्। दैवराजकृतो दोषस्तस्मिन् काले यदा भवेत्। अवधित्यागमात्रेण न भवेत् स पराजितः"। इति आचारकरणे व्यवहारकरणे। छलन्तत्र न कारयेदिति वदता यत्र वचनेनार्थहानिः प्रतिपादिता तत्रैव पुनर्विवादाभावोऽन्यत्र तु हीनतानिमित्तं दण्डं कृत्वा पुनर्वादः प्रवर्त्तनीय एवेति सूचितम्। यत आह कात्यायनः "पलायनानुत्तरत्वादन्यपक्षाश्रयेण वा। हीनस्य गृह्यते वादो न स्ववाक्यजितस्य च"। स्ववाक्यजितस्येति प्रकृतार्थहानिनिमित्तोपलक्षणन्तेनैव विवृतमिदम् "यो हीनश्चिह्नैरिङ्गितैस्तस्योद्धारं विदुर्बुधाः। स्ववाक्यहीनोयस्तु स्यात् तस्योद्धारो न विद्यते" इति। उद्धारः पुनर्व्यवहारः। अत्रापि स्ववाक्यहीन इति प्रकृतार्थहानिनिमित्तोपलक्षणम्। विवादमुपक्रम्य राजानं वञ्चयित्वाऽन्योन्यं यौ वादिप्रतिवादिनौ स्वयमेव विवादान्निवर्तेते तयोरुभयोरपि दण्ड्यत्वमाह वृहस्पतिः "पूर्वोत्तरे सन्निविष्टे विचारे सम्प्रवर्त्तिते। प्रशमं ये मिथो यान्ति दाप्यास्ते द्विगुणन्दमम्"। मिथ इत्यनेन राज्ञो निवेदनमकृत्वैवाऽन्योन्यप्रशमयानोक्तेः राज्ञेऽनिवेदनमवगम्यते। कात्यायनस्तु स्पष्टमाह "आवेद्याप्रगृहीतार्थं प्रशमं यान्ति ये मिथः। सर्वे द्विगुणदण्ड्याः स्युर्विप्रलम्भान्नृपस्य ते" इति। द्विगुणो दण्डस्तु पराजयनिमित्तदण्डापेक्षया न तु विवादास्पदीभूतद्रव्यापेक्षया अद्रव्यविवादेष्वव्याप्तेः। राज्ञे निवेद्याऽन्योन्यस्वेच्छया राजानुरोधेनैव वा सन्धिकरणे तु न दण्ड इत्यर्थसिद्धं स्फुटीकृतं वृहस्पतिना "पूर्वोत्तरेऽभिलिखिते प्रक्रान्ते कार्य्यनिर्णये। द्वयोरुत्तरयोः सन्धिः स्याद्ःखण्डयोरिव। साक्षिसभ्यविकल्पस्तु भवेत्तत्रोभयोरपि। दोलायमानौ यौ सन्धिं कुर्वातान्तौ विचक्षणौ। प्रमाणसमता यत्र भेदः शास्त्रचरित्रयोः। तत्र राजाज्ञया सन्धिरुभयोरपि शस्यते। धर्मार्थोपग्रहः कीर्त्तिर्भवेत्साम्येन भूभुजः। न क्लिश्यन्ते साक्षिसभ्या वैरञ्च विनिवर्त्तते। निग्रहानुग्रहं दण्डं धर्म्मं प्राप्य यशोऽयशः। विग्रहाज्जायते नृणां पुनर्दोषस्तथैव च। तस्मात्कुलगणाध्यक्षधर्मज्ञाः समदृष्टयः। अद्वेषलोभाद्ब्रूयु-

त्तकर्त्तव्यं विजानतेति"। साक्षिसभ्यविकल्प इति उभयोरर्थिप्रत्यर्थिनोः किमेते वक्ष्यन्तीति साक्षिसभ्यविषयको विकल्पो भवेत् तत्र कार्यनिर्णये दोलायमानौ सन्देहदोलारूढौ यावर्थिप्रत्यर्थिनौ सन्धिं कुर्यातान्तौ विचक्षणौ चतुरौ पराजयजनिताऽप्रतिष्ठादितिरोधानादिरर्थ इति कल्पतरुः। रत्नाकरस्तु "साक्षिणां सभ्यानाञ्च विकल्पः परस्परविरोधः" इत्याह। प्रमाणसमतेति। यत्र सभ्यानां वादिद्वयपक्षे प्रमाणं साम्यं प्रतिभाति। यत्र च शास्त्रचरित्रयोर्भेदः शास्त्रे शास्त्रान्तरेण चरित्रे व्यवहारे चरित्रान्तरेण भेदो विप्रतिपत्तिर्नतु शास्त्रव्यवहारयोः परस्परभेदः धर्मशास्त्राविरोधे व्यवहारस्यार्थशास्त्रत्वेन दुर्बलत्वात्" इति व्याचख्यौ। तत्र राजाज्ञया सन्धिः कार्यत्वेन प्रशस्यते धर्म्मार्थोपघातहेतुत्वात् निग्रहानुग्रहाद्यव्यवस्थानिवर्त्तकत्वाच्च। तस्मादित्यादिना राज्ञैव केवलं न सन्धिहेतुः कुलगणाध्यक्षादिकोऽपि राजवचनसममिति प्रतिपाद्यते। एतच्च प्रत्याकलितं सभ्यैरवश्यमादर्त्तव्यमित्याह नारदः "प्रमाणानि प्रमाणज्ञैः परिपाल्यानि यत्नतः। सीदन्ति हि प्रमाणानि प्रमाणैरव्यवस्थितैः"। अस्यार्थः स्मृतिचन्द्रिकाकारेणैवमुक्तः "अव्यवस्थितैः प्रमाणैः प्रमाणानि प्रमाणकर्त्तारः प्रमाणशब्देन लक्ष्यन्ते। ते सीदन्ति विनश्यन्ति निर्णयं नाप्नुवन्ति। अतः प्रत्याकलनकौशलेन प्रमाणज्ञैः सभ्यैर्यत्नतस्तानि प्रमाणानि परिपाल्यानि यथा अव्यवस्थादुःस्थितानि न भवन्ति तथा विवेचनीयानीत्यर्थ इति"। वयन्तु अव्यवस्थितैर्मूलशैथिल्यादिना दुःस्थितैः प्रमाणैः प्रमाणानुग्राहकैस्तर्कैः प्रमाणानि साक्ष्यादीनि सीदन्ति निर्णयाक्षमाणि भवन्ति, हि यतोऽतः प्रमाणज्ञैः प्रमाणानि यत्नतः परिपाल्यानि सत्तर्कपरिग्रहानुग्रहेण तत्त्वनिर्णयफलानि कार्य्याणीति व्याचक्ष्महे। अनयोश्च व्याख्यानयोस्तारतम्यन्तत्त्वविद्भिर्विवेचनीयम्। इदञ्च प्रत्याकलितं व्यवहर्त्तृसम्बन्धाभावात् व्यवहारदर्शिमात्रकर्त्तृकत्वाच्च व्यवहारपादचतुष्टयान्तर्भूतमिति मिताक्षराकारस्य सम्मतम् नत्वनुपादेयम्, एतदन्तरेण तृतीयक्रियापादावतारात्। तथाहि उत्तराभिधानानन्तरमर्थिप्रत्यर्थिनोः कस्य क्रिया का वा क्रियेति परामर्शलक्षणस्य प्रत्याकलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानाद्व्यवहर्त्तृसम्बन्धाभावाच्च न व्यवहारपादत्वमिति। अपरार्कस्तु "साध्यसिद्धिपदेन जयपराजयावधारणलक्षणं प्रत्याकलितं योगीश्वरवचने लक्षणया गृह्यत इति वदन् क्रियोपन्यासोत्तरकालीनविचारस्य सभ्यैः क्रियमाणस्य प्रत्याकलितरूपतामभिप्रैति"। "सम्प्रतिपत्त्युत्तरेण क्रियापादे नापि जयपराजयावधारणलक्षणप्रत्याकलितपाद इति द्विपात्त्वमेवेति" ब्रुवाणो वाचस्पतिरपि तदेवानुमन्यते। कल्पतरुस्मृतिचन्द्रिकाकारौ मिताक्षराकारदर्शितोत्तरलेखनान्तरभावितानां हीनपरिज्ञानसन्धिकरणक्रियादानानां क्रियापादप्राग्भाविनां प्रत्याकलितत्वमभिहितवन्तौ। व्यवहारोपयोगित्वाद् दृष्टसत्यादिवचनानां प्रागनुल्लिखितानामनुरोधाच्च व्यवहारपादत्वं परन्त्वनभ्युपगतवन्तौ क्रियापादप्राग्भावित्वमेव तु तस्य युक्तम्। ये तु तिष्ठन्ति करण इत्यादिवचनात् व्यवहारपादत्वमस्तु नवेत्यन्यदेतत्। यत्तु साध्यसिद्धेर्व्यवहारफलत्वात्तस्य व्यवहारपादत्वं युक्तमिति तन्न व्यवहारभावनया फलापवर्गित्वात् फलनिरूप्यत्वेन फलस्य तदंशत्वेन तत्पादत्वे बाधकाभावात्। अतएव त्र्यंशा भावनेति मीमांसकानामुद्घोषः। तात्पर्यपरिशुद्धावुदयनाचार्यस्तु प्रमाणोपन्यासमेव प्रत्याकलितमभिमन्यते यथाह "यद्यपि परीक्षायां न वादिप्रतिवादिनौ स्तः। पृच्छोपक्रममात्रेण द्वितीयोपयोगात्। सम्भवेऽपि तयोर्विषयोपस्थापनमात्रपर्यवसानात् स्थेयस्यैव परीक्षकत्वम्। तथापि पूर्वपक्षोत्तरपक्षप्रत्याकलितनिष्कर्षभेदेन चतुष्पाद्व्यवहारप्रवर्त्तनात् फलतो न कश्चिद्विशेषः। एककर्त्तृकत्वेऽपि तावत एव व्यापारकलापस्य विचारे विद्यमानत्वात् तस्मादभिनिपुणो देशकस्तथापि देश्यं सावगममेवेति"। वस्तुतस्तु न प्रमाणोपन्यासस्य प्रत्याकलितत्वेनाभिप्रेतः। किन्तु सभिकक्रतः प्रमाणोपष्टम्भकतत्तर्कादिपरामर्श एव। यतो न शास्त्रीयकथायां व्यवहारवत्पूर्वपक्षोत्तरपक्षौ स्वाभिमतसहेतुकसाध्यनिर्देशमात्रपरौ। किन्तु पूर्वपक्षिणा कण्टकोद्धारोत्तरपक्षदूषणपुरःसरं स्वपक्षे स्थिरीकृते सिद्धान्तिनादिना तदुभयप्रतिक्षेपेण स्वपक्षसाधकप्रमाणप्रख्यापनं प्रथमं क्रियते। ततः स्थेयैस्तदुभयविवेकाख्यप्रत्याकलितेन निष्कर्ष एकतरपक्षनिर्धारणरूपः क्रियते। तावता कथासमाप्तिर्वादे, जल्पवितण्डयोस्तु सभिकादीनामुत्तरोऽपि व्यापारो विद्यत इत्यादि लक्षणमाकरे। अत्र तु साक्ष्यादिविलक्षणं मानमुत्तरभेदेन नियतं प्रागुपन्यासनीयमिति न पूर्वोत्तरपादान्तर्गतिस्तस्य। अतएव प्रत्याकलितस्याग्रोत्तरे कस्य क्रियेत्यादिविमर्शस्य स्थेयकृतस्य प्रत्याकलितस्य प्राप्यत्वं

प्रमाणोपन्यासस्तत्र तु प्रतीच्यत्वमेव स्थेयकृतप्रमाणसाध्यसाधुतां विवेकरूपता चेत्यस्तु विस्तरः । एवं प्रत्याकलितमाकलितम् । अधुना क्रियापादो विविच्यते । तत्र कात्यायनः । "वादिना यदभिप्रेतं स्वयं साधयितुं स्फुटम् । तत्साध्यं साधनं येन तत्साध्यं साध्यतेऽखिलम् । सारभूतं पदं मुक्त्वा निःसाराणि बहून्यपि । संसाधयेत् क्रियायान्तु तास्तस्मात् सारवर्जिताम् । पक्षद्वयं साधयेद्वा साक्ष्याद्दुर्बलतः क्रियाम् । क्रियां बलवतीमुक्त्वा दुर्बलां योऽवलम्बते । स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियामिति" । तामबलवतीम् । तेन प्रागेव प्रबलं प्रमाणमुद्भाव्य दुर्बलप्रमाणावलम्बनेन पराजितस्य पश्चात्प्रबलप्रमाणोपन्यासावसरो नास्तीत्यर्थः । अतएवाह नारदः "निर्णिक्ते व्यवहारे तु प्रमाणमफलं भवेत् । लिखितं साक्षिणो वापि पूर्वमावेदितं नचेदिति" । निर्णिक्ते शोधिते अन्यतरजयपराजयान्यतरावधारणं प्रापित इति यावत् । पूर्वमेव दुर्बलप्रबलसकलप्रमाणोपन्यासे कृते तु सर्वप्रमाणानुसारेण कृतं निरस्येत्यभिधानात् निर्णयः । पश्चादुद्भावितन्तु कृत्रिम वादिपक्षाकलङ्कितमित्यनुपादेयमेवेत्यर्थः । अतएव पूर्ववाक्येऽपि मुक्त्वेति पुनरिति चोक्तम् । अतएव "यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः । निर्णिक्तव्यवहाराणां प्रमाणमफलं तथेति" । उत्तरे पत्रनिवेशिते साध्यसिद्धेः साधनाय तत्साधननिर्देशक्रमः कुर्यादित्यपेक्षिते याज्ञवल्क्य आह "ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधनम्" । तत उत्तरलिखनानन्तरमर्थी अर्थ्यत इत्यर्थः साध्यं सोऽस्यास्तीत्यर्थी साध्यवान् सद्यः एवाविलम्बेन प्रतिज्ञातस्य प्रतिज्ञाविषयस्यार्थस्य साध्यस्य साधनम् साध्यतेऽनेनेति साधनं प्रमाणम् । साधनादि लौकिकमलौकिकं वा लेखयेत् लेखकद्वारा । स्वयं वा लिखेदित्यपि द्रष्टव्यम् दृष्टार्थत्वात् अत्र सद्य इति पदमुत्तराभिधाने कालविलम्बनमप्यनुमन्यते । तच्च विशेषपरिभाषायां विवक्ष्यते । अर्थी लेखयेदित्यनेन सम्प्रतिपत्तौ न कस्यापि अर्थित्वमिति न कोऽपि साधनं लेखयेदिति पादद्वयेनैव व्यवहारनिर्वाहः तथाचोक्तम् "द्विपात्सम्प्रतिपत्तिस्तिष्ठति मिथ्योत्तरे पूर्ववादिन एवार्थित्वात् स एव साधनं लेखयेत् । कारणोत्तरप्राङ्न्यायोत्तरयोस्तु प्रत्यर्थ्येव साध्यवान् कारणप्राङ्न्याययोस्तस्यैव साध्यत्वादिति स एव लेखयेदित्युक्तं भवति । तेन 'प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम् । मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत् । मिथ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि । प्राङ्न्यायेऽपि तथैव स्यात् प्रतिपत्तौ न सा भवेदिति" व्यासादिस्मृत्युक्तोऽर्थिपदेन सङ्क्षेपतः सर्व एवोक्तो भवति । अत्र चण्डेश्वरः "साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम् । विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः" । इत्यत्र सद्यो विवादयेदुत्तरं दापयेदित्यनेन प्रत्यर्थिपक्षस्य लिखने विलम्बप्राप्तौ साहसादिषु तत्पक्षमपि सद्य एव लेखयेदिति योऽपवादः स यदि प्राग्भाषावादिपक्षलिखने विलम्बोक्त्यार्थप्राप्तः प्रत्यर्थिपक्षलिखनविलम्बः स्यात् तदैव घटते नान्यथेत्येतद्वाक्यव्याख्याने यदर्थिपदेन प्रत्यवस्कन्दनप्राङ्न्याययोः प्रत्यर्थ्येवाऽर्थी जात इति स एव साधनं लेखयेदिति । प्रत्यर्थिनोऽपि ग्रहणमिति मिताक्षराकारव्याख्यानं तत्पूर्वापरविरोधान्मन्दमित्याह" । तदतिसाहसम् भाषोत्तरवादिपक्षमात्रलेखनपरत्वं यद्यनयोर्वाक्ययोस्तर्हि साधनपदान्वये समासानुपपत्तेः सन्दर्भविरोधाच्च साधनलेखनस्यैवोत्तरलिखनोत्तरमाकाङ्क्षितत्वात् साहसादिष्वप्युत्तरभेदव्यवस्थया द्वयोरपि पूर्ववाक्योपात्तसाधनलेखने सद्यस्त्वर्थाक्षिप्तोत्तरलेखनविलम्बापवादोपपत्तेः । नचोत्तरलेखनं सर्वत्र प्रत्यर्थिन एवेति तद्विलम्बानुमतिविमत्योक्तं प्रत्येव प्रतिपादनार्हमिति वाच्यम् एतावतापि क्रियोपन्यासप्रतिपालवचनस्यार्थिपदेन भाषावादिमात्रग्रहणापत्ते नियामकाभावात् । प्रत्युत मिथ्याक्रियेत्यादिवचनार्थसंग्रहाय द्वयोरपि ग्रहणमर्थिपदेनेत्यस्यैव युक्तत्वात् । एवं सति मिताक्षरायां पूर्वापरविरोधापादनमज्ञानविलसितमेवेत्यास्तां तावत् । बृहस्पतिः "द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा । एकैकानेकधा भिन्ना मुनिभिस्तत्त्ववादिभिः । साक्षिलेख्यानुमानञ्च त्रिविधा मानुषी क्रिया" । साक्षिलेख्यानुमानमिति द्वन्द्वैकवद्भावः । "साक्षी द्वादशभेदस्तु लिखितं दशधा स्मृतम् । अनुमानन्तु द्विविधं नवधा दैविकी क्रिया" । इदं संख्याभिधानञ्च नियमाय भेदान्तराणामपि प्रमाणप्रकरणे वक्ष्यमाणत्वात् । कात्यायनः "लिखितं साक्षिणो भुक्तिः प्रमाणन्त्रिविधं विदुः । लेशोद्देशस्तु युक्तिः स्याद्दिव्यानीह विषादयः" । लेशोऽन्यथानुपपन्नो धर्मस्तस्योद्देशोऽविमर्शो युक्तिरित्यर्थः । "पूर्ववादेऽपि लिखिते यथाऽक्षरमशेषतः । अर्थी तृतीयपादे तु क्रियया प्रतिपादयेत्" । पूर्ववादो भाषालिखितं पूर्व-

पक्षतया लिखितं उत्तरमिति यावत्। तृतीयपादः प्रत्याकलिताख्यः तस्मिन् सति क्रियया प्रमाणेन प्रतिपादयेत् साध्यमिति शेषः। भाषोत्तरप्रत्याकलिताख्यपादत्रये सति क्रियया स्वकार्य्यमर्थी साधयेदिति तात्पर्य्यार्थः। कार्य्यक्रियाशब्दौ व्याचष्टे व्यासः "कार्य्यं हि साध्यमित्युक्तं साधनन्तु क्रियोच्यते। द्विभेदा सा पुनर्ज्ञेया मानुषी दैविकी तथेति"। साधनं प्रमाणं प्रत्याकलितस्य तृतीयव्यवहारपादत्वमभ्युपगच्छता स्मृतिचन्द्रिकाकारेणैवमिदं वचो व्याख्यातम्। मिताक्षराकारमते तु तृतीयपादक्रियेति स एवार्थः। साक्षी द्वादशभेद इत्यादिप्रमाणप्रकरणे प्रपञ्चयिष्यामः। याज्ञवल्क्यः "प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम्। एषामन्यतमाभावे दिव्यान्यतममुच्यते" इति। दिव्येष्वन्यतममित्यर्थः। कात्यायनः "यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम्। मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः। यद्येकदेशप्राप्तापि क्रिया विद्येत मानुषी। सा ग्राह्या न तु पूर्णापि दैविकी वदतां नृणाम्"। एकदेशप्राप्ता साध्यैकदेशविषया। अत्र यद्येको वादी मानुषीं साक्ष्याद्यन्यतमां क्रियां स्वपक्षसाधकतयोपन्यस्यत्यन्यस्तु तत्प्रतिपक्षतया दैविकीन्तदर्थादितरवादि-पक्षसिद्ध्यसिद्ध्योः सुलभत्वेन न दिव्यापेक्षेति प्रथमवचनार्थः। एवमेकोऽपि वादी साध्यानेकत्वे साध्यैकदेशमपि यदि प्रमाणेन साधयति तदैकदेशविभावितन्यायेनैकदेशान्तरस्यापि सिद्धेर्व्यप्रमाणत्वान्न दिव्यावसर इति द्वितीयवाक्यार्थः। दिव्यस्वरूपप्रमाणयोरागमैकगम्यत्वान्मानुषप्रमाणसम्भव एव दिव्यस्य प्रामाण्यमिति मुनिवचननिचयपर्य्यालोचनयावगम्यते। अन्यान्यपि क्वचित् क्वचित्केषाञ्चित् प्रमाणानां प्राधान्याभिप्रायेण व्यवस्थापकानि वचनान्यृषीणां यथा "क्रिया न दैविकी प्रोक्ता विद्यमानेषु साक्षिषु। लेख्ये च सति वादेषु न स्याद्दिव्यं न साक्षिणः" इति कात्यायनः। पितामहः "स्थावरेषु विवादेषु दिव्यानि परिवर्ज्जयेत्। साक्षिभिर्लिखितेनाथ भुक्त्या चैतान् प्रसाधयेत्"। इदमपि साक्ष्यादिसमक्षं स्थावरविषयविवादेषु सुलभमतस्तत्सम्भवान्वेषणमेव कार्य्यमित्येवम्परञ्च सर्वथा दिव्यपरिहारपरम्। सर्वथा साक्ष्याद्यसम्भवेऽपि दिव्याग्रहणे निर्णयाभावप्रसङ्गात्। कात्यायनः "दत्तादत्तेषु भृत्यानां स्वामिनां निर्णये सति। विक्रीयादानसम्बन्धे क्रीत्वा धनमनिच्छति। द्यूते समाह्वये चैव विवादे समुपस्थिते। साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम्। पूगश्रेणीगणादीनां या स्थितिः परिकीर्त्तिता। तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः। द्वारमार्गक्रियाभोगजलवाहादिषु क्रिया। भुक्तिरेव तु गुर्व्वी स्यान्न दिव्यं न च साक्षिणः"। दत्तादत्ते प्रतिश्रुत्याप्रदाने दत्त्वा पुनः प्रत्याहृत्य ग्रहणे वा दत्ताप्रदानिके विवादपद इति यावत्। भृत्यानामित्यादिना वेतनादाने। विक्रीयादानेत्यादिना क्रयविक्रयानुशये इतरद्व्यक्तम्। दत्तादत्तादिषु हृद्यानां लिखितकरणाप्रसिद्धेर्भुक्तेश्चासम्भवात् साक्षिणश्च तादृशविषये सुलभत्वान्मानुषप्रमाणसम्भवे च दिव्यासम्भवाच्च दिव्यं न च लेख्यकमित्युक्तम्। पूगादीनां संविदि तु बहुकर्त्तृकायां लिखितं विना न निर्वाहः सर्वेषां व्यवहर्त्तृत्वाच्चोदासीनसाक्षिसम्भवो मानुषसत्त्वे च दिव्यानवकाश इत्यभिसन्धायाभिहितञ्च दिव्यं च साक्षिण इति। द्वारमार्गादिष्वपि गमनागमनादिरूपभोगस्यैव परं भावात्मकलेख्यस्य चाप्रसिद्धेर्मानुषाभाव एव च दिव्यावकाशान्न दिव्यमित्यादि भुक्तिरेव तु गुर्व्वीति चोक्तम्। एवं सर्व्ववचनानि विवेचनीयानि। अतएव "अरण्ये निर्ज्जने रात्रावन्तर्वेश्मनि साहसे। न्यासापह्नवने चैव दिव्या सम्भवति क्रियेति" नारदेन सम्भवतीत्युक्तम्। स एव "यदा साक्षी न विद्येत विवादे वदतां नृणाम्। तदा दिव्यैः परीक्षेत शपथैश्च पृथग्विधैः। स्त्रीणां शीलाभियोगे च स्तेयसाहसयोरपि। एष एव विधिर्दृष्टः सर्व्वार्थापह्नवेषु चेति"। कात्यायनः "गूढसाहसिकानान्तु प्राप्तं दिव्यैः परीक्षणम्। युक्तिलेशेङ्गिताकारवाक्चक्षुश्चेष्टितैर्नृणाम्। अलेख्यसाक्षिके दैवी व्यवहारे विनिर्दिशेत्। दैवसाध्ये पौरुषेयीं न लेख्यं वा प्रयोजयेत्"। बृहस्पतिः "मणिमुक्ताप्रवालानां कूटकृन्न्यासहारकः। हिंसकोऽन्याङ्गनासेवी परीक्ष्यः शपथैः सदा। महापापाभिशापेषु निःक्षेपहरणे तथा। दिव्यैः कार्य्यं परीक्षेत राजा सत्स्वपि साक्षिषु। चिरन्तनोपांशुकृतचिरनष्टेषु साक्षिषु। प्रदुष्टेषु समानेषु दिव्यैः कार्य्यं विशोधयेत्"। अत्र सत्स्वपि साक्षिष्वित्यनेनैतादृशि विषये साक्षिण एव तावन्न सम्भवन्ति। सम्भवन्तोऽपि वा कथञ्चित्कूटतया प्रायः प्रदुष्टा इति विवक्षितं न तु यथाश्रुतम्। चिरन्तनकृते उपांशुकृते रहसि कृते इत्यनेन लेख्याद्यसम्भवमेवोपलक्षयति। अतएवाग्रे चिरनष्टेषु

प्रदुष्टेषु समानेष्वित्यनेनासाक्षिवच्चिह्नमितान्युपलक्षितवान्। व्यासः "प्रथमे यत्र भिद्यन्ते साक्षिणश्च तथाऽपरे। परेष्वपि तथाचान्ये तं वादं शपथैर्नयेत्"। भिद्यन्ते प्रभेदं प्रतिपद्यन्ते। कात्यायनः "समत्वं साक्षिणां यत्र दिव्यैस्तत्रापि शोधयेत्। प्राणान्तिकविवादेषु विद्यमानेषु साक्षिषु। दिव्यमालम्बते वादी न पृच्छेत्तत्र साक्षिणः"। साक्षिषु विद्यमानेष्वपि तत्र दोषावष्टम्भेन दिव्यमालम्बत इत्यर्थः। समत्वं साक्षिणां यत्रेति। यत्रोभाभ्यां भाषावादिभ्यामुपन्यस्तानां साक्षिणां गुणतः सङ्ख्यातश्च तुल्यत्वमित्यर्थः। व्यासः "न मयैतत्कृतं लेख्यं कूटमेतेन कारितम्। अधरीकृत्य तत्पत्रमर्थे दिव्येन निर्णयः"। लेख्यदोषोद्भावने लेख्ये निर्णयाक्षमे तदारूढसाक्षिषु सुतरां दण्डापूपकन्यायेन दोषोद्भावनान्मानुषासम्भवे दिव्येन निर्णयः कार्य्य इत्यर्थः। प्रजापतिः "यन्नामगोत्रैर्य्यल्लेख्यं तुल्यं लेख्यं कचिद्भवेत्। अगृहीतधने तत्र कार्य्यो दिव्येन निर्णयः"। मूललेख्येन नामगोत्रैस्तुल्यं लेख्यान्तरविपरीतार्थं यदा तदा तदप्रमाणीकृत्य दिव्येन निर्णयः कार्य्य इत्यर्थः। कात्यायनः "यत्र स्यात्सोपधं लेख्यं तद्वाक्ते श्राविते यदि। शोधयेत्तत्तु दिव्येन राजा धर्मासनस्थितः"। सोपधं यत्र छलकृतं यच्च मिथ्योत्तरे पूर्ववादिनः क्रियादानं नोत्तरवादिन इति प्रागुक्तं तत्र भाषावादिनो मानुषप्रमाणासम्भवादुत्तरवादिनश्च तदसम्भवान्मानुषसम्भवे च दिव्यानवसरादिति न्याय्यमूलमिति। यदि तत्रापि भाषावादिनो दिव्यभिन्नप्रमाणाभावस्तदा "न कश्चिदभियोक्तारं दिव्येषु विनियोजयेत्। अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैरिति" कात्यायनीयादुत्तरवादिन एव दिव्यं देयम्। पूर्वार्द्धेनार्थिनो दिव्यनिषेधात् प्रत्यर्थिनोऽर्थात्सिद्धौ पुनः परार्द्धेन तद्विधाने सिद्धे सत्यारम्भो नियमायेति न्यायेन निषेधदार्ढ्यार्थत्वम्। प्राङ्न्यायकारणोत्तरयोः क्रियापदमुभयक्रियापरमपि मिथ्योत्तरे मानुषमात्रपरं कात्यायनीयानुरोधात्। नचैवमनुषङ्गानुपपत्तिः तदर्थकतयोभयान्वयस्यानुषङ्गहेतुत्वन्न यावदर्थकत्वस्य विरुद्धार्थकत्वे व्यवायवत्सविधिबाधेनानुषङ्गस्य तुल्ययोगितानिबन्धनस्य भङ्गः किञ्चिदर्थानन्वयेऽपि तुल्ययोगत्वमायाः सत्त्वात्तदभङ्गात्। यदा तु प्रत्यर्थी सन्दिहानस्तदा तस्याधिकारनिश्चयाभावान्मानुषप्रमाणाभावेऽपि न दिव्यं किन्त्वर्थिनोऽधिकारनिश्चयादिति ध्येयम्। नच "न कश्चिदिति" कात्यायनवचनविरोधः अधिकारानिश्चये तत्प्रवृत्त्यसम्भवात्। 'धनं धनी साधयतीति' लोकप्रवादोऽप्योदृग्विषयाभिप्रायक एव। यत्र विवादविषये प्रत्यर्थी सन्दिहानस्तत्र तस्योत्तरानर्हतयेति व्यवहारतत्त्वलिखनन्त्वतत्त्वमेव अज्ञानरूपमिथ्योत्तरार्हत्वात्। अज्ञानस्य निश्चयाभावरूपस्य सन्देहेऽपि सम्भवात् प्रत्यर्थिन एव सर्वत्रोत्तरकर्तृत्वाच्च। यदा तु द्वयोरपि मानुषप्रमाणाभावो दिव्यानध्यवसायश्च तदा निर्णयोपायमाह पितामहः "लेख्यं यत्र न विद्येत न भुक्तिर्न च साक्षिणः। न च दिव्यावतारोऽस्ति प्रमाणं तत्र पार्थिवः। निश्चेतुं येन शक्याः स्युर्वादाः सन्दिग्धरूपिणः। तेषां नृपः प्रमाणं स्यात्सर्वस्य प्रभुरिष्यते" इति। तादृग्व्यवहारे नृपेणैवोभयापीडया स्वेच्छया काञ्चन व्यवस्थां कृत्वा देया सोभाभ्यामनतिक्रमणीयेत्यर्थः। दिव्यावान्तरभेदादि सर्वं दिव्यप्रकरणे वक्ष्यामः।

क्रियाफल न० ६त०। "उत्पत्तिराप्तिर्विकृतिः संस्कृतिश्च चतुर्विधम्। क्रियाफलं भाक्तरार्य्या" कैवल्ये तच्च विद्यते" वेदा० प्र० उक्ते १कर्म्मफले उत्पत्त्यादौ, २यागादिजन्ये पुण्यापुण्यादौ च। क्रियाजन्ये तृप्तिस्वर्गादिरूपे प्रयोजनापरपर्य्यायरूपे ३फले "स्वरितञितः कर्त्रभिप्राये क्रियाफले" पा०। विवृतश्चैतदस्माभिः शब्दार्थरत्ने यथा "स्वरितञिद्धातूत्तरतङः कर्तृगामिन्येव सति क्रियाफले कर्तृवाचकत्वं नान्यथा तत्र फलस्य न धातूपस्थाप्यं, जानात्यादीनां ज्ञानरूपफलस्य समवायेन कर्तृनिष्ठतया सर्वदैव जानीतेइत्येव प्रयोगापत्तेः जानातीत्यादेरप्रयोगापत्तेश्च नेष्यते तु तथा शास्त्रकारैः। नापि क्रियाजन्यवेतनदक्षिणारूपलाभादि गौणं फलमिह विवक्षितं तथा सति सूदादेस्तादृशफलवत्त्वेन सूदः पचते ऋत्विजोयजन्ते इत्यादिप्रयोगापत्तेः। किन्तु फलतीति व्युत्पत्त्या प्रयोजनापरनाम क्रियाजन्यं तृप्तिस्वर्गादिरूपमेव मुख्यं फलं ग्राह्यं यथोक्तं हरिणा 'यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत् प्रधानं फलं तासां न लाभादि प्रयोजनमिति"। प्रसिद्ध्यर्थं निष्पत्त्यर्थं पचादयः पाकादयः। तत् तासां पचादीनां प्रधानं फलमित्यर्थः। फलस्य प्राधान्यञ्चेतरापेक्षया बोध्यं तेन इतरेच्छानधीनेच्छाविषयत्वस्य तस्य सुखादिष्वेव सत्त्वेऽपि क्वचित्साक्षात्सुखादिरूप प्रयोजनालाभे तत्साधनरूपेतरफलस्यापि ग्रहणमिति द्रष्टव्यम्। तेन अपाहृद इत्यादिस्थलविहिततङः संख्यादि-

रूपमुख्यप्रयोजनाभावेऽपि कर्तृवाचकत्वम्। क्रियोद्देश्ये संयोगविभागादिरूपे फलविशिष्टव्यापारस्य धात्वर्थतावादिमते धात्वर्थतावच्छेदकरूपे ४फले पृथक्शक्तिवादिमते कर्म्माख्यातस्थले तद्धातूपस्थाप्ये धात्वर्थांशे विशेषणतया भासमाने तद्धातुजन्ये ५संयोगादिके फले च। इत्थमेव शब्दार्थरत्नेऽस्माभिर्दर्शितं यथा

"तत्र फलतीतिव्युत्पत्त्या फलं नाम तद्धात्वर्थजन्यं संयोगविभागादि, गम्यादौ विभागस्य फलत्ववारणाय तद्धातूपस्थाप्यत्वेन विशेषणेऽपि विभागाजन्यसंयोगस्य पतनफलत्वमते विभागस्य तद्धात्वर्थजन्यत्वात् तद्धातूपस्थाप्यत्वादतिव्याप्तिरतस्तद्धात्वर्थे विशेषणतया भासमानत्वेनैव विशेषणीयं गम्यादौ च विभागस्य तद्धात्वर्थे विशेषणतया भासमानत्वाभावात् न फलत्वप्रसङ्गः। मञ्जूषाकृन्मते तु कर्त्तृप्रत्ययस्थले तथाभासमानत्वमिति विवेकः। क्रियाविशेषणादेर्धात्वर्थे विशेषणत्वेऽपि तज्जन्यत्वाभावान्न फलत्वप्रसङ्गः। विशेषणत्वञ्च साक्षादेव विवक्षितं तेन घटं करोतीत्यादौ घटादेः धात्वर्थक्रियाजन्यस्य विभक्त्यर्थद्वारा तद्विशेषणत्वेऽपि न फलत्वापत्तिः" इति।

क्रियाभ्युपगम पु० क्रियायाः कर्षणादिक्रियार्थमभ्युपगमः चतुर्थ्यर्थे ६त०। अत्र क्षेत्रे उत्पन्नस्य शस्यस्य उभयोः फलभागितेतिनियमेन कर्षणाद्यर्थमन्यक्षेत्रस्वीकारे। "क्रियाभ्युपगमात्त्वेतद्बीजार्थं यत् प्रदीयते। तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च" मनुः।

क्रियाभ्यावृत्ति स्त्री क्रियाया अभ्यावृत्तिः। क्रियायाः पौनःपुन्ये। "क्रियाभ्यावृत्तिगणने कृत्वसुच्" पा०। विवृतमेतदस्माभिः शब्दार्थरत्ने यथा

"क्रियाया एव पौनःपुन्यसम्भवेनाभ्यावृत्तिपदेनैव क्रियाप्राप्तौ पुनः क्रियापदग्रहणेन इतरांशे विशेषणतानापन्नसाध्यक्रियाया एवाभ्यावृत्तौ तेषां साधुत्वज्ञापनात् पञ्चकृत्वःपचतीत्येव प्रयोगः नतु पञ्चकृत्वःपाक इत्यपि। केचित्तु "द्विर्वचनेऽचीति" पा० निर्देशात् साध्यरूपक्रियान्वये एव तेषां साधुत्वं तेन भावघञन्तादावपि धातुना साध्यक्रियाया अभिधानात् पञ्चकृत्वः पाक इत्यपि भवत्येव। सिद्धरूपक्रियायां तदन्वयविवक्षायां तु नैवं तेन तत्र पञ्च इत्येव स्यादिति प्राहुः"

क्रियायोग पु० क्रियैव योगः योगोपायः। "तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" इति पातञ्जलसूत्रभाष्यादावुक्ते योगोपायभूते क्रियाभेदे। तस्य योगोपायत्वादिदर्शकं तद्वाक्यं कर्म्मयोगशब्दे ४७११पृ०दर्शितम्। "ज्ञानयोगस्तु योगस्य यस्तु साधनमात्मनः। यस्तु बाह्यार्थसंयोगः क्रियायोगः स उच्यते। प्रधानं कारणं योगोमुक्तेर्द्विजवरोत्तम!। क्रियायोगस्तु योगस्य परमं तच्च साधनम्" अग्निपु०। मत्स्यपु०५२अ०विस्तरेणोक्तं यथा

"कर्म्मयोगञ्च वक्ष्यामि यथा विष्णुविभाषितम्। ज्ञानयोगसहस्राद्धि कर्म्मयोगः प्रशस्यते। कर्म्मयोगोद्भवं ज्ञानं तस्मात्तत्परमम्पदम्। कर्म्मज्ञानोद्भवं ब्रह्म न च ज्ञानमकर्म्मणः। तस्मात् कर्म्मणि युक्तात्मा तत्त्वमाप्नोति शाश्वतम्। वेदोऽखिलो धर्म्ममूलमाचारश्चैव तद्विदाम्। अष्टावात्मगुणास्तस्मिन् प्रधानत्वेन संस्थिताः। दया सर्वेषु भूतेषु क्षान्तीरक्षाऽऽतुरस्य तु। अनसूया तथा लोके शौचमन्तर्बहिर्द्विजाः!। अनायासेषु कार्येषु माङ्गल्याचारसेवनम्। न च द्रव्येषु कार्पण्यमार्तेषूपार्जितेषु च। तथाऽस्पृहा परद्रव्ये परस्त्रीषु च सर्व्वदा। अष्टावात्मगुणाः प्रोक्ताः पुराणस्य तु कोविदैः। अयमेव क्रियायोगो ज्ञानयोगस्य साधकः। कर्म्मयोगं विना ज्ञानं कस्यचिन्नेह दृश्यते। श्रुतिस्मृत्युदितं धर्ममुपतिष्ठेत् प्रयत्नतः। देवतानां पितॄणाञ्च मनुष्याणाञ्च सर्व्वदा। कुर्यादहरहर्यज्ञैर्भूतर्षिगणतर्पणम्। स्वाध्यायैरर्च्चयेच्चर्षीन् होमैर्विद्वान् यथाविधि। पितॄन् श्राद्धैरन्नदानैर्भूतानि बलिकर्म्मभिः। पञ्चैते विहिता यज्ञाः पञ्चसूनापनुत्तये। कण्डनी पेषणी चुल्ली जलकुम्भी प्रमार्जनी। पञ्च सूना गृहस्थस्य तेन स्वर्गं न गच्छति। तत्पापनाशनायामी पञ्च यज्ञाः प्रकीर्तिताः। द्वाविंशतिस्तथाष्टौ च ये संस्काराः प्रकीर्त्तिताः। तद्युक्तोऽपि न मोक्षाय यस्त्वात्मगुणवर्जितः। तस्मादात्मगुणोपेतः श्रुतिकर्म्म समाचरेत्। गोब्राह्मणानां वित्तेन सर्वदा भद्रमाचरेत्। गोभूहिरण्यवासोभिर्गन्धमाल्योदकेन च। पूजयेद् ब्रह्मविष्ण्वर्करुद्रवस्वात्मकं शिवम्। व्रतोपवासैर्विधिवत् श्रद्धया च विमत्सरः। योऽसावतीन्द्रियः शान्तः सूक्ष्मोऽव्यक्तः सनातनः। वासुदेवो जगन्मूर्त्तिस्तस्य सम्भूतयो ह्यमी। ब्रह्मा विष्णुश्च भगवान् मार्त्तण्डो वृषवाहनः। अष्टौ च वसवस्तद्वदेकादशगणाधिपाः। लोकपालाधिपाश्चैव पितरो मातरस्तथा। इमा विभूतयः प्रोक्ताश्चराचरसमन्विताः। ब्रह्माद्याश्चतुरो मूलमव्यक्ताधिपतिः स्मृतः। ब्रह्मणा चाथ सूर्येण विष्णुनाथ शिवेन वा। अभेदात् पूजितेन स्यात् पूजितं सचराचरम्।

ब्रह्मादीनां परन्धाम त्रयाणामपि संस्थितिः। वेदमूर्त्तिवतः पूषा पूजनीयः प्रयत्नतः। तस्मादग्निद्विजमुखान् कृत्वा संपूजयेदिमान्। दानैर्व्रतोपवासैश्च जपहोमादिना नरः। इति क्रियायोगपरायणस्य वेदान्तशास्त्रस्मृतिरतस्य सत्यस्य। विकर्म्मभीतस्य सदा न किञ्चित् प्राप्तव्यमस्तीह परे च लोके"। २क्रियासम्बन्धे "उपसर्गाः क्रियायोगे" पा॰ पद्मपुराणे क्रियायोगसारे विवृतिः।

क्रियार्थ त्रि॰ क्रिया अनुष्ठानमर्थोऽभिधेयोयस्य। कर्त्तव्यविधिबोधके वेदादिवाक्यभेदे तादृशवाक्यस्यैव प्रामाण्यम् मीमांसायां स्थापितं यथा

"आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" जै॰ सू॰। "क्रिया कथमनुष्ठेया इति तां वदितुं समाम्नातारो वाक्यानि समामनन्ति यानि क्रियां नावगमयन्ति क्रियासम्बद्धं वा किञ्चित् तान्येव भूतमर्थमन्वाचक्षते" "अतस्तेषामानर्थक्यम् (अप्रामाण्यम्)" इति च शवरभा॰। "चोदनालक्षणोऽर्थो धर्म्मः" जै॰ सू॰। "चोदनेति क्रियायाः प्रवर्त्तकं वचनमाहुः। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुं नान्यत् किञ्चनेन्द्रियमिति" भा॰। तेन क्रियाप्रवर्त्तकवेदभागानामेव प्रामाण्यम् अर्थवादानां भूतार्थानां तु क्रियार्थेन सहैकवाक्यत्वात् प्रामाण्यं यथाह तत्रैव "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" जै॰ सू॰। "वायव्यं श्वेतमालभेत भूतिकामः" "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागेनोपधावतीति स एवैनं भूतिं गमयतीति" वायुर्वै क्षेपिष्ठा देवतेत्यत्र यद्यपि क्रिया नावगम्यते क्रियासम्बद्धं किञ्चित्, तथापि विध्युद्देशेनैकवाक्यत्वात् प्रमाणं भूतिकाम इत्येवमन्तो विध्युद्देशः तेनैकवाक्यभूतो वायुर्वै क्षेपिष्ठा देवतेत्येवमादिः"। "पदानां साकाङ्क्षत्वात् विधेः स्तुतेश्चैकवाक्यत्वं भवति भूतिकाम आलभेत, कस्मात्? यतो वायुः क्षेपिष्ठेति"। "स्तुत्यर्थेन विधीनां स्युः स्तुतिशब्दाः स्तुवन्तः क्रियां, प्ररोचयमानाः अनुष्ठातॄणामुपकरिष्यन्ति क्रियायाः" इति च भा॰। "तद्भूतार्थानां तु क्रियार्थेन समाम्नायः" जै॰ सू॰ तेन सहैकवाक्यात् प्रामाण्यमिति स्थितम्। तदेतन्मतं विमतीकृत्य पूर्वपक्षीकृत्य शा॰ सू॰ भाष्याभ्यां निराकृतं यथा

"कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते? यावता 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम्, अतो वेदान्तानामानर्थक्यम्, अक्रियार्थत्वात्। कर्त्तृदेवतादिप्रकाशनार्थत्वेन वा क्रियाविधिशेषत्वमुपासनादिक्रियान्तरविधानार्थत्वं वा। न हि परिनिष्ठितवस्तुस्वरूपप्रतिपादनं सम्भवति प्रत्यक्षादिविषयत्वात् परिनिष्ठितवस्तुनः। तत्प्रतिपादने च हेयोपादेयरहिते पुरुषार्थाभावात्। अत एव "सोऽरोदीत्" इत्यादीनामानर्थक्यं मा भूदिति "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति स्तावकत्वेनार्थवत्त्वमुक्तम्। मन्त्राणाञ्च "इषे त्वा" इत्यादीनां क्रियातत्साधनाभिधायित्वेन कर्मसमवायित्वमुक्तम्। न क्वचिदपि वेदवाक्यानां विधिसंस्पर्शमन्तरेणार्थवत्ता दृष्टा उपपन्ना वा। न च परिनिष्ठिते वस्तुस्वरूपे विधिः सम्भवति, क्रियाविषयत्वाद्विधेः। तस्मात् कर्म्मापेक्षितकर्त्तृदेवतादिस्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानाम्। अथ प्रकरणान्तरभयान्नैतदभ्युपगम्यते तथापि स्ववाक्यगतोपासनादिकर्मपरत्वम्। तस्मान्न ब्रह्मणः शास्त्रयोनित्वमिति प्राप्ते उच्यते" भाष्यम्।

"तत्तु समन्वयात्" शारीरकसूत्रम्।

"तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। तद् ब्रह्म सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं वेदान्तशास्त्रादवगम्यते। कथम्? समन्वयात्। सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगतानि "सदेव सौम्येदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म" "आत्मा वा इदमेक एवाग्र आसीत्" "तदेतद् ब्रह्मापूर्वमनपरमनन्तरमवाह्यम्" "अयमात्मा ब्रह्म सर्व्वानुभूः" "ब्रह्मैवेदममृतं पुरस्ताद्" इत्यादीनि। न च तद्गतानां पदानां ब्रह्मस्वरूपविषये निश्चिते समन्वयेऽवगम्यमानेऽर्थान्तरकल्पना युक्ता, श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्। न च तेषां कर्त्तृदेवतादिस्वरूपप्रतिपादनपरतावसीयते। 'तत् केन कं पश्येद्" इत्यादिक्रियाकारकफलनिराकरणश्रुतेः। न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वम्। "तत्त्वमसि" इति ब्रह्मात्मभावस्य शास्त्रमन्तरेणानवगम्यमानत्वात्। यत्तु हेयोपादेयरहितत्वादुपदेशानर्थक्यमिति नैष दोषः हेयोपादेयशून्यब्रह्मात्मावगमादेव सर्वक्लेशप्रहाणात् पुरुषार्थसिद्धेः"। तत्रैव सूत्रे व्याख्यानशेषे

"यद्यपि शास्त्रतात्पर्यविदामनुक्रमणम्। "दृष्टो हि तस्यार्थः कर्मावबोधनमित्येवमादिः" तद्धर्म्मजिज्ञासाविषयत्वाद्विधिप्रतिषेधशास्त्राभिप्रायं द्रष्टव्यम्। अपि च "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" इत्येतदेकान्तेनाभ्युपगच्छतां भूतोपदेशानर्थक्यप्रसङ्गः प्रवृत्तिनिवृत्ति-

विधितच्छेषव्यतिरेकेण भूतञ्चेद्वस्तूपदिशति भव्यार्थत्वेन, कूटस्थनित्यं भूतं नोपदिशतीत्यत्र को हेतुः। न हि भूतमुपदिश्यमानं क्रिया भवति। अक्रियात्वेऽपि भूतस्य क्रियासाधनत्वात् क्रियार्थ एव भूतोपदेश इति चेत्, नैष दोषः क्रियार्थत्वेऽपि क्रियानिर्वर्त्तनशक्तिमद्वस्तूपदिष्टमेव। क्रियार्थन्तु प्रयोजनं तस्य। न चैतावता वस्त्वनुपदिष्टं भवति। यदि नामोपदिष्टं किं तव तेन स्यादिति? उच्यते, अनवगतात्मवस्तूपदेशश्च तथैव भवितुमर्हति, तदवगत्या मिथ्याज्ञानस्य संसारहेतोर्निवृत्तिः प्रयोजनं क्रियत इत्यविशिष्टमर्थवत्त्वं क्रियासाधनवस्तूपदेशेन। अपि च “ब्राह्मणो न हन्तव्यः” इति चैवमाद्या निवृत्तिरुपदिश्यते। न च सा क्रिया नापि क्रियासाधनम्। अक्रियार्थानामुपदेशोऽनर्थकश्चेत् ब्राह्मणो न हन्तव्यः” इत्यादिनिवृत्त्युपदेशानामानर्थक्यं प्राप्तं, तच्चानिष्टम्। न च स्वभावप्राप्तहन्त्यर्थानुरागेण नञः शक्यमप्राप्तक्रियार्थत्वं कल्पयितुं हननक्रियानिवृत्त्यौदासीन्यव्यतिरेकेण। नञश्चैष स्वभावो यत् स्वसम्बन्धिनोऽभावं बोधयति, अभावबुद्धिश्चौदासीन्यकारणं सा च दग्धेन्धनाग्निवत् स्वयमेवोपशाम्यति, तस्मात् प्रसक्तक्रियाया निवृत्त्यौदासीन्यमेव “ब्राह्मणो न हन्तव्यः” इत्यादिषु प्रतिषेधार्थं मन्यामहे अन्यत्र प्रजापतिव्रतादिभ्यः। तस्मात् पुरुषार्थानुपयोग्युपाख्यानादिभूतार्थवाक्यानामानर्थक्याभिधानं द्रष्टव्यम्। यदप्युक्तं कर्त्तव्यविध्यनुप्रवेशमन्तरेण वस्तुमात्रमुच्यमानमनर्थकं स्यात् (सप्तद्वीपा वसुमतीत्यादिवदिति) तत् परिहृतं रज्जुरियं नायं सर्प इति वस्तुमात्रकथनेऽपि प्रयोजनस्य दृष्टत्वात्” भा०। क्रिया अर्थः प्रयोजनं यस्य। २क्रियानिमित्ते त्रि०। “तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्” पा०।

क्रियावत् त्रि० क्रियाऽस्त्यस्य मतुप् मस्य वः। १क्रियाविशिष्टे २क्रियानिरते अमरः “यः क्रियावान् स पण्डितः” चाण०। “त्वं योनिः सर्वभूतानां त्वमाधारः क्रियावताम्” भा० व०२अ०। ३क्रियाश्रये कर्त्तरि च “यस्मात् क्रियावता कर्त्रा योगो भवति कर्म्मणा” हरिः। क्रतपूर्व्विशब्दे दृश्यम्।

क्रियावसन्न त्रि० क्रियया ऽवसन्नः। साक्ष्यादिप्रमाणेनावसन्ने पराजिते वादिनि प्रतिवादिनि च। “यस्योचुः साक्षिणः सत्यां प्रतिज्ञां स जयी भवेत्” इत्युपक्रम्य “स्वयमभ्युपपन्नोऽपि स्वचर्य्यावसितोऽपि सन्। क्रियावसन्नोऽप्यर्हति परं सभ्यावधारणम्” व्य० त० नारदः। क्रियावसन्नः साक्ष्यादिना प्राप्तपराजयः” रघुनन्दनः।

क्रियावादिन् त्रि० क्रियां क्रियासाध्यं वदति वद–णिनि। व्यवहारे साक्ष्यादिप्रमाणरूपक्रियासाध्ययुक्ते वादिनि (फैरादी) मिता०।

क्रियाविशेषण न०६त०। धात्वर्थसाध्यरूपक्रियायाः शाब्दबोधे विशेषणत्वेन भासमाने पदार्थे। शब्दार्थरत्ने विवृतिः “आख्यातं सकारकविशेषणमिति” भाष्योक्तवाक्यलक्षणे विशेषणपदस्य कारकविशेषणक्रियाविशेषणोभयपरतया कारकविशेषणानां क्रियाविशेषणानां कारकभिन्नसम्बोधनादीनां च वाक्यघटकत्वम्। तानि च वाक्यपदीये कतिचित् संगृह्य प्रदर्शितानि यथा “संबोधनान्तं क्रत्वोऽर्थः कारकं प्रथमोवतिः। धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ्। तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्। सम्बन्धश्चाष्टकस्यास्य क्रिययैवावधार्य्यताम्”। अत्र यद्यपि सम्बोधनस्य सर्व्वत्र प्रकृतक्रियान्वयित्वं न सम्भवति तथापि जानीहीत्यध्याहृतक्रियान्वयितया तस्याश्च प्रकृतक्रियायामन्वयात् परम्परया भवत्येव प्रकृतक्रियान्वयित्वम्। तथाहि “सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुख्यः सम्बोध्यः क्रियासु विनियुज्यते” इति वाक्यपदीये क्रियासु नियोज्यस्यैव संबोध्यतोक्त्या विनियोगविषयक्रियायामेव तस्य साधुत्वात् व्रजानि देवदत्तेत्यादौ तु देवदत्तस्य गमनक्रियायां विनियोगाभावेनाध्याहर्त्तव्यायां जानीहीत्यादिक्रियायामेवान्वयौचित्यात् तत्क्रियायाश्च व्रजानीत्यादिक्रियाविषयत्वादिसम्बन्धेन विशेषणत्वादेकवाक्यत्वम्। अन्यथा व्रजानि देवदत्तेत्यनयोरुभयवाक्यघटकत्वे तयोश्च परस्परमन्वयेनैकवाक्यत्वाभावेन समानवाक्यमात्रविषयनिघातानुपपत्तेः। तथाहि पदादित्यधिकृत्य सर्व्वमनुदात्तमपदादाविति”चोपक्रम्य आमन्त्रितस्य चेति”सूत्रेण अष्टमाध्याये पदादुत्तरवर्त्तिनोऽपादादिस्थितस्यामन्त्रितस्य षष्ठाध्यायविहिताद्युदात्तत्वं निहत्य सर्व्वानुदात्तत्वं विहितं वार्त्तिककारेण च “समानवाक्ये निघातयुष्मदस्मदादेशाः” इत्यनेन चाद्युदात्तत्वनिघातः एकवाक्यएव व्यवस्थापितोऽतः व्रजानि देवदत्तेत्यनयोरुक्तरीत्यैकवाक्यत्वएव निघातो नान्यथेति। उक्तञ्च वाक्यपदीये “संबोधनपदं यच्च तत् क्रियाया विशेषणम्। व्रजानि देवदत्तेति निघातोऽत्र

तयासनीति"। अत्रेदं बोध्यम् विशेष्यतेऽनेनेति व्युत्पत्त्या विशेषणपदं भेदाभेदान्यतरसम्बन्धेनान्वयिविशेषणपरं तत्र कारकादीनां भेदसम्बन्धेन क्रियायामन्वयात् भेदविशेषणत्वम् स्तोकं पचतीत्यादौ तु विक्लित्तिरूपधात्वर्थफले, द्रुतं गच्छतीत्यादौ धात्वर्थव्यापारे गत्यादौ च अभेदेनान्वयात्स्तोकादेरभेदविशेषणत्वम्। अतायं भेदः साध्यरूपक्रियाया विशेषणत्वे तस्याश्च लिङ्गसंख्यान्वयित्वाभावेन तद्विशेषणस्य सामान्यत्वात् क्लीबता उत्सर्गतोभावाख्यातवदेकवचनान्तता च तेन स्तोकं पच्यते इत्यादि साधु। घञाद्यन्ते तु साध्यसिद्धोभयक्रिययोर्धातुप्रत्ययाभ्यां बोधनस्य क्रियाशब्दे दर्शितत्वेन धातुबोध्यसाध्यरूपक्रियाविशेषणत्वविवक्षायामेकवचनक्लीबता घञाद्युक्तसिद्धक्रियान्वयविवक्षायां तु विशेष्यस्य लिङ्गसंख्यान्वयित्वेन तद्विशेषणस्य द्विवचनपुंस्त्वादि। अतएव "सञ्चारो रतिमन्दिरावधि सखी कर्णावधि व्याहृतमिति" "आगमोनिष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो" इति च प्रयोगः संगच्छते। फलविशिष्टस्य कर्मणः कर्मसंज्ञाविधानेन व्यपदेशिवद्भावपरिभाषया साध्यक्रियाविशेषणस्य कर्मत्वम् तेन स्तोकमित्यस्य कारकत्वं कल्प्यत् यत्। तत्र पदसाधुतामात्रार्थं द्वितीयामात्रविधाने तन्न स्यात् इति बोध्यम्। अस्य च एकवचनान्तत्वं क्लीबत्वौत्सर्गिकी क्वचित् द्विवचनादिप्रयोगोभवत्येव उक्तञ्च हरिणा "एकत्वेऽपि क्रियाख्याते साधनाश्रयसंख्यया। भिद्यते न तु लिङ्गाख्यो भेदस्तत्र तदाश्रय इति"। उत्सर्गतएकत्वे सत्यपि साधनाश्रयसंख्ययाख्याते क्रिया भिद्यते इत्यर्थः। अत्राख्यात इत्युपादानात् आख्यातार्थाश्रयसंख्ययैव क्रियाभेदो नतु तृतीयाद्युपस्थाप्याश्रयसंख्ययापि तेन चैत्राभ्यां सुप्यते इत्यादौ न द्विवचनादि० तथा नामार्थलिङ्गेन क्रियाभेदो लिङ्गस्येतरपदोपात्तत्वात्। एवञ्च लिङ्गसंख्यानन्वयित्वरूपासत्त्वलक्षणे संख्याविशेषस्य साक्षादनन्वयित्वविवक्षणाल्लिङ्गमात्रस्य वा तदन्वयविवक्षणाच्च दोष इत्यनुसन्धेयम्। उद्वासिका आसन्ते ऊतयायिकाः शयन्ते इत्यादि भाष्योदाहरणे च उपमानोद्वासनादिवाङ्गुल्येनोपमेयासनादेर्वाङ्गुल्यस्य विवक्षयाद्वावेऽपि बहुवचनादीत्याकरे स्पष्टम्। उद्वासिकापदस्य द्वितीयाबहुवचनान्तं क्रियाविशेषणतया द्वितीयोत्पत्तौ बाङ्गुल्ये नैयोपमानविवक्षणात् बहुवचनम्" अत्र मतभेदेन शब्दशक्ति प्र० विशेषोदर्शितो यथा "भावविहितानामपि घञादीनाकृत्यैव गतिः तत्रापि भावपदस्य धात्वर्थस्वरूपपरत्वात्। अन्यथा पाकं पश्येत्यादौ धात्वर्थस्य पचनादेः कर्मत्वाद्याश्रयापत्तेः शुद्धे धात्वर्थस्यान्वयस्याव्युत्पन्नत्वात् इत्यपि च स्तोकः पाक इत्यादिप्रयोगस्य परिशिष्टाद्युक्तस्य प्रामाण्यम् अन्यथा स्तोकादीनां धात्वर्थे विशेषणत्वे नियमतो द्वितीयापत्तेः अतएव "सञ्चारोरतिमन्दिरावधि सखीकर्णावधि व्याहृतम्" इत्यादिकं काव्यम् "आगमोनिष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो" इत्यादिः स्मृतिश्च सङ्गच्छतइति नव्याः। स्वोत्तरप्रत्ययार्थसाकाङ्क्षस्यैव धातोरर्थे विशेषणतापन्नस्य बोधने तदर्थकनाम्नोद्वितीयाद्यपेक्षा नतु धातुमात्रस्य तथा च स्तोकः पाक इत्यादिरेव प्रमाणं नतु स्तोकं पाकइत्यादिः। घृत्यरूपक्रियाया विशेषणं कर्मत्वाद्यनुशिष्टेरपि तत्रैव तात्पर्य्यात्। अतएव स्तोकं स्थीयते साधु गतं चकितं द्रष्टव्यमित्यादौ धात्वर्थस्य तिङाद्यर्थकालादिसाकाङ्क्षत्वाच्च तद्विशेषणस्य द्वितीयाद्युपपत्तिरिति तु शाब्दिकसम्प्रदायः"।

भेदसम्बन्धेन क्रियायामन्वयिविशेषणे तु पौनःपुन्येन गच्छति अतिशयेन पचति समेनैति विषमेनैतीत्यादिषु प्रकृत्यादि० तृतीया। क्वचित् धात्वर्थस्य करणत्वेनान्वये तद्विशेषणीभूतात् तृतीयादि यथा "स्वर्गकामोऽश्वमेधेन यजेत" इत्यादौ यागेनेष्टं भावयेदिति भाट्टमते यागस्य करणतया भावनायामन्वयात् अश्वमेधस्य तत्राभेदविशेषणत्वेन तद्विभक्तिकत्वम्। अन्यमते तु नाम्ना यजेत इत्यादिवत् अभेदे तृतीयेति भेदः। मुग्धबोधे "कर्मक्रियाविशेषणेत्यादि" कर्मसंज्ञाद्वितीयाविधानस्य अभेदान्वयिविशेषणपरम्। भेदविशेषणे तु तृतीयैव। तत्रादं विशेषः क्रियायाम् अभेदसम्बन्धेनान्वयविवक्षायां द्वितीया। अभेदप्रकारकान्वयविवक्षायां तु तृतीया।

क्रियाशक्ति स्त्री क्रियैव शक्तिः। जगदुत्पत्तिसाधने परमेश्वरस्य शक्तिभेदे। सा च त्रयीरूपा यथोक्तं शा० ति० पदार्थादर्शे च 'सच्चिदानन्दविभवात् सकलात् परमेश्वरात्। आसीच्छक्तिस्ततोनादोनादाद्विन्दुसमुद्भवः। परशक्तिमयः साक्षात् त्रिधाऽसौ भिद्यते पुनः। विन्दुर्नादोबीजमिति तस्य भेदाः समीरिताः। विन्दुः शिवात्मको बीजं शक्तिर्नादस्तयोर्मिथः। समवायः समाख्यातः सर्व्वागमविशारदैः। रौद्री विन्दोस्ततोनादाज्ज्येष्ठा बीजादजायत। वामा, ताभ्यः समुत्पन्ना रुद्रब्रह्मरमाधिपाः। ते ज्ञानेच्छाक्रियात्मानो वह्नीन्द्-

कम्बलखड्गादिषु:" शा॰ति॰ । व्याख्यातमेतत् पदार्थादर्शे "अविद्याशबलितत्वेन जडत्वे कथं तस्य सृष्टिकर्तृत्वमिति ? यद्वा वास्तवं सच्चिदानन्दविभवादिति अनेनाविद्योपहितत्वेऽपि तस्य न स्वरूपहानिरित्यर्थः । सकलात् शक्तिरासीदिति योजना । शक्तिसहितोदेयः पुनः शक्तिस्तस्मात् सा कथमासीदिति ? चेत् सत्यं या अनादिरूपा चैतन्याध्यासेन महाप्रलये सूक्ष्मा स्थिता तस्या गुणवैषम्यानुगुणतया सात्विकराजसतामसस्रष्टव्यप्रपञ्च-कार्य्यसाधने उच्छूनरूपत्वमेवोपचारादुत्पत्तिः । इदं सांख्यमतेनोक्तम् । प्रयोगसारे "तस्माद्विनिर्गता शक्तिः सर्वगा विश्वसम्भवा" । वायुसंहि॰ "शिवेच्छया परा शक्तिः शिवतत्त्वैकतां गता । ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिवेति" । पञ्चरात्रेऽपि "एवमालोच्य सर्गादौ सच्चिदानन्दरूपिणीम् । समस्ततत्त्वसंघस्यात् स्फूर्त्त्यधिष्ठानरूपिणीम् । व्यक्तां करोति तां नित्यां प्रकृतिं परमः पुमान्" तस्या एव नादबिन्दू सृष्ट्युपयोग्यवस्थारूपौ तदुक्तं प्रयोगसारे "नादात्मना प्रबुद्धा सा निरामयपदोन्मुखी । शिवोन्मुखी यदा शक्तिः पुंरूपा सा तदा स्मृता । सैव सर्गक्षमा" अन्यत्रापि "अभिव्यक्ता परा शक्तिरविनाभावलक्षणा । अखण्डा परचिच्छक्तिमेता चिद्रूपिणी विभुः । समस्ततत्त्वभावेन विवर्त्तेच्छासमन्विता । प्रयाति बिन्दुभावं च क्रियाप्राधान्यलक्षणम्" । इच्छाज्ञानादिरूपतया बिन्दोस्त्रैविध्यमाह परेति साक्षात् परशक्तिमयः अतः पञ्चाशद्वर्णात्मकत्वमेवोक्तम् असौ त्रिधा भिद्यते । एतौ नादबिन्दू प्रथमोक्तनादबिन्दुभ्यामन्यौ तदुक्तं "स बिन्दुर्भवति त्रिधा" । बिन्द्वादेर्भेदत्रयस्वरूपमाह बिन्दुरिति । तत्तस्मात् बिन्दोः रौद्री यतस्तस्याः शिवमयत्वम् अतोऽन्वर्थताऽपि । नादाज्ज्येष्ठेति । सर्वत्र तत्त्वे नादस्थितत्वेनान्वर्थता ज्ञेया । बीजाद्वामा अजायतेति सम्बन्धः तस्याः सुन्दरत्वादन्वर्थत्वम् । तदुक्तं प्रयोगसारे "बिन्दुः शिवात्मकस्तत्र बीजं शक्त्यात्मकं स्मृतम् । तयोर्योगे भवेन्नादस्तेभ्यो जातास्त्रिशक्तयः । रौद्री बिन्दोः समुद्भूता ज्येष्ठा नादादजायत । वामा बीजादभूच्छक्तिस्ताभ्यो देवास्त्रयोऽभवन्" । ते इति ज्ञानेच्छा क्रिया च तदात्मानस्ते रुद्रब्रह्मरमाधिपाः तेषामिच्छाशक्तिक्रियाशक्तिज्ञानशक्तिस्वरूपाः । अतएव रुद्रादयः निरोधकाले वह्नीन्दुर्क स्वरूपिणः यक्षे देवावस्थाविशेषा ज्ञेयाः एषामिच्छाक्रियाज्ञानात्मकत्वेन उत्पन्नत्वात् । पञ्चरात्रे च "इच्छाज्ञानक्रियात्मानः" इति । ईश्वरप्रत्यभिज्ञायाम् "यतइच्छति तज्ज्ञातुं कर्त्तुं वा मे च्छया क्रियाम् । अनन्तरं हि तत् कार्य्यं ज्ञानं दर्शनशक्तितः । सामर्थ्यशक्तया यद्योऽसौ स्थूलसञ्चयः । सा क्रियाशक्तिरुदिता यतः सर्वं जगत् सृजेत्" गोरक्षसंहितायाम् "इच्छा क्रिया तथा ज्ञानं रौद्री ब्राह्मी तु वैष्णवी । त्रिधा शक्तिः स्थिता यत्र तत्परं ज्योतिरोमिति"

क्रियासमभिहार पु॰ सम्+अभि+हृ—घञ् ६त॰ । क्रियायाः पौनःपुन्ये । "क्रियासमभिहारे घञ्" पा॰ "क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ?" इति माघः ।

क्रियास्नान न॰ क्रियाङ्गं स्नानम् । यन्त्रोक्ते स्नानविधिभेदे तत्प्रकारो यथा

"क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्व्वकम् । मृद्भिरद्भिश्च कर्त्तव्यं शौचमादौ यथाविधि । जले निमज्ज्य उन्मज्ज्य उपस्पृश्य यथाविधि । तीर्थस्यावाहनं कुर्य्यात्तत् प्रवक्ष्याम्यशेषतः । प्रपद्ये वरुणं देवमम्भसां पतिमर्च्चितम् । याचेत देहि मे तीर्थं सर्वपापापनुत्तये । तीर्थमावाहयिष्यामि सर्व्वाघविनिसूदनम् । सान्निध्यमस्मिन् तोये च क्रियतां मदनुग्रहात् । रुद्रान् प्रपद्ये वरदान् सर्व्वानप्सुषदस्तथा । सर्व्वानप्सुषदश्चैव प्रपद्ये प्रयतः स्थितः । देवमप्सुषदं वह्निं प्रपद्येऽघनिसूदनम् । आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा । रुद्राश्चाग्निश्च सर्पाश्च वरुणस्त्वाप एव च । शमयन्त्वाशु मे पापं माञ्च रक्षन्तु सर्व्वशः । हिरण्यवर्णेति ऋग्भिर्जगतीति चतसृभिः । शन्नोदेवीरिति च तथा शन्नआपस्तथैव च । इदमापः प्रवहतेत्यृचञ्च समुदीरयेत् । एवं सम्मार्जनं कृत्वा छन्दआर्षञ्च देवताः । अघमर्षणसूक्तस्य प्रपठेत् प्रयतः सदा । छन्दोऽनुष्टुप् च तस्यैव ऋषिश्चैवाघमर्षणः । देवता भाववृत्तश्च पापक्षये प्रकीर्त्तितः । ततोऽम्भसि निमग्नः स्यात्त्रिः पठेदघमर्षणम् । प्रदद्यान्मूर्द्ध्नि तथा महाव्याहृतिभिर्जलम् । यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः । तथाघमर्षणं सूक्तं सर्व्वपापप्रणाशनम् । अनेन विधिना स्नात्वा स्नानवान् धौतवाससा । परिवर्त्तितवासास्तु तीर्थनामानि संजपेत् । उदकस्यापरामात्तु स्नानशाटीं न पीडयेत् । अनेन विधिना स्नातस्तीर्थस्य फलमश्नुते" ।

क्रियेन्द्रिय न॰ क्रियायाः साधनमिन्द्रियम् । वाक्पादादौ कर्म्मेन्द्रिये हेम॰ ।

क्रिवि पु॰ कृवि-इन् नि॰ । १कूपे निघण्टुः २कर्त्तरि हिंसके

त्रि० "इन्द्र ! यत्ते क्रिविदरं नाम" यजु० १०।२०। ४असुरभेदे "अध्योमसा क्रिविं युधाः" ऋ० २,२२,२, "क्रिविं नामासुरम्" भा० । ५पञ्चालदेशे पु० ब० व० । "आप्नोर्यामोऽतिरात्रस्तेन हैतेन क्रैव्यः पञ्चालो राजा" "क्रिवय इति ह वै पुरा पञ्चालानाचक्षते" शत० ब्रा० १३, ५,४,७, [क्रिविर्दती" ऋ० १,१६६,६,

क्रिविस् त्रि० कवि—इस नि० । हिंसके "यत्रा वोदिद्युद्रदति

क्री क्रये (मूल्यादानेन द्रव्यग्रहणे) क्र्या० उभ० सक० अनिट् । क्रीणाति क्रीणीते अक्रैषीत् अक्रेष्ट । चिक्राय चिक्रिये क्रेतव्यः क्रयणीयः क्रेयः क्रयार्थे प्रसारिते क्रय्यः क्रायकः क्रेता क्रीणन् क्रीणानः । क्रीतः क्रीत्वा विक्रीय । क्रेतुम् । कर्मणि क्रीयते अक्रायि अक्रायिषाताम्—अक्रेषाताम् । चिक्रिये । "कइमं दशभिर्ममेन्द्रं, क्रीणाति धेनुभिः" ऋ० ४,२४,१०, "शुक्रं त्वा शुक्रेण क्रीणामि" यजु० ४,२६ । "क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्" मनुः "कच्चित् सहस्रैर्मूर्खाणामेकं क्रीणासि पण्डितम्" भा० स० कच्चिदध्यायः । "सोमं राजानमक्रीणंस्तस्मात् प्राच्यां दिशि क्रीयते" ऐत० १,१२, "मूल्यानीतैः क्रयक्रीतैः (जलैः) कर्म्म कुर्व्वन् पतत्यधः" स्मृतिः । अनुशयशब्दे उदा० ।

अप+मूल्यादिदानेन वशनयने । "सा चेदस्मै न दद्यात् काममेनामपक्रीणीयात्" शत० ब्रा० १४,९,४,७, "तदा एनां स्वपत्नीं वस्त्राभरणभोग्यादिदानेन कामं यथाशक्तिवैभवमपक्रीणीयात् वशं नयेत्" भा० ।

अभि+अभिलक्ष्यीकृत्य विक्रये संस्कारविशेषे च । "एकं वा एष क्रीयमाणोऽभिक्रीयते इन्द्रायैव राज्याय" शत० ब्रा० ३,३,२,१, "एषः क्रीयमाणः क्रयेण इन्द्राद्यभागः सोमः एकं वै एकं खलु प्रयोजनमभिलक्ष्य विक्रीयते अभिषवादिना स्वात्मना संस्क्रियते वा" भा० ।

अव+धनादिना वशनयने । "ब्राह्मणं क्षत्रियं वा सहस्रेण शतानेनावक्रीय" शाङ्खा० श्रौ० सू० १५,२०,१०

आ+ स्वत्वकृते । "भार्य्यां शुल्काक्रीताम्" दशकुमा०

उप+सामीप्येन क्रये । "घटादीनुपक्रीय" सिद्धा० ।

निस्+(र्) विक्रये क्रयानुरूपमूल्यदाने च । "न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते" मनुः । "निष्क्रयो-विक्रयः" उ०त०रघु० । "भोः केशव ! मदीयस्त्वमाकृष्टोऽसि मत्वया । स त्वं मामनुगच्छस्व कुरुष्व यदुनन्दनम् । प्रथमः कस्य इत्येवमब्रवीत् मधुसूदनः । मजन्तमसुवचाअभारदस्य जनार्द्दनः । परिहासात् बहुविधात् कृत्वा मुनिवरस्ततः । शिष्यस्य तस्यासीत् पुत्रा परिहासविचक्षणः । अपनीय ततः कण्ठात् पुष्पदामैनमब्रवीत् । कापलं मां समस्तां मे निष्क्रयार्थं प्रयच्छ मे । तितं नव्याज्ञिनं स्तूपं प्रयच्छ तप्रकाशनम् । यद्योऽस्य निष्क्रयः कस्य ! विहितो वृषकेतुना" हरि० १२५अ० २निष्कृतौ । "तपोदानोपहारेषु व्रतेषु नियमेषु च । इज्याध्यायनधर्म्मेषु योनाऽऽसक्तः स निष्क्रयः" वशिष्ठः

परि+नियतकालं भृत्या स्वीकारे अनियतकालस्वत्वोत्पादकात् क्रयात् तस्य नियतकालत्वेन न्यूनता । तद्योगे करणस्य वा सम्प्रदानसंज्ञा । "शतेन शताय वा परिक्रीतः" सि०कौ० । "सम्भोगाय परिक्रीतः कर्त्ताऽस्मि तव नाप्रियम्" भट्टिः "भक्त्यै मुक्तिः परिक्रीता सद्भिर्विष्णोरुपाऽऽरिभिः" मुग्ध० । "हतेनोपहतं वायोः परिक्रीणानमुत्थितम्" भट्टिः । क्रयशब्दे २२०५ पृ० दर्शितम् जै० सूत्रवाक्यादि उदा० ।

वि+मूल्यग्रहणेन स्वस्वत्वध्वंसपरस्वत्वापादकव्यापारे "वस्नेव विक्रीणावहा इषमूर्ज्जं शतक्रतो !" यजु० ३,४९, "विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मतः" मनुः अनुशयशब्दे भूरि उदा० ।

सम्+सम्यक् क्रये "न च मे विद्यते वित्तं संक्रेतुं पुरुषं क्वचित्" भा० आ० १६०अ० ।

"परिव्यवेभ्यः क्रियः" पा०

अकर्त्रृगामिन्यपि क्रियाफले तङ् ।

क्री त्रि० क्री—क्विप् । क्रेतरि कारकोपदत्वेऽपि संयोगोपधत्वात् न यण्, किन्तु इयङ् । यवक्रियौ यवक्रियः इत्यादि ।

क्रीड् खेलने भ्वा० पर० अक० सेट् । क्रीडति अक्रीडीत् । चिक्रीड क्रीडिता । क्रीडितव्यः क्रीड्यः क्रीडकः क्रीडिता । क्रीडः । क्रीडा । क्रीडितः । क्रीडनं क्रीडितुम् । क्रीडित्वा विक्रीड्य । "एष सोमो अधिश्रयचि गवां क्रीडत्यद्रिभिः" ऋ० ९,६६,२६, "माता च पिता च तेऽग्रे वृक्षस्य क्रीडतः" यजु० २३,२५, "चिक्रीड चैव प्रजहास चैव" भा० व० १०४२श्लो० "क्रीडारसं निर्विशतीव बाल्ये" कुमा० । अस्मादृशे प्रयोगे तङपि दृश्यते । मयूरशूरगकासंदेवनन्दैः पुनः पुनः । क्रीडसे त्वं नरव्याघ्र ! बालः क्रीडनकैरिव" भा० व० ५०४श्लो०

अन्वाद्युपसर्गे तत्त्वद्योत्यार्थविशिष्टे क्रीडने तङ् "क्रीडोऽनुसंपरिभ्यश्च" पा०उक्तेः चकारात् आङश्च तङ् "आक्षनुक्रीडमानानि पश्य द्वन्द्वानि पक्षिणाम्" भट्टिः । "आक्रीडमानोऽसृहात्मा भीमान् वायुसुतोयथा" भा० य०

१४६अ०। "फलान्यादत्स्व चित्राणि परिक्रीडस्व सानुषु" भट्टिः। "मरुतस्तमभितः परिचिक्रीडुः" शत० ब्रा० २,५,२,२०, आर्षस्तङभावः। समस्तु अकूजने अव्यक्तशब्दाभावे एव तङ्। "समोऽकूजने" वार्त्तिकक्रता नियमात् "हरः संक्रीडमानस्य उमया सह पर्व्वते" रामा० आ० ४७,१०, तेनास्य कूजनार्थताऽपि किन्तु तत्र न तङ् "संक्रीडति चक्रम्" सि०कौ०। "तैस्तैर्विहारैर्बहुभिर्दैत्यानां कामरूपिणाम्। समाः संक्रीडतां तेषाम्" भा० आ० २०९अ०। अत्र आर्षः तङभावः।

क्रीड पु० क्रीड–घञ्। परीहासे शब्दरत्ना०। [त्रिका०।

क्रीडक न० क्रीड–ण्वुल्। १क्रीडाकारके। २द्वाःस्थे सेवके

क्रीडचक्र न० "इदं क्रीडचक्रं सदीर्घं समस्तैर्यकारैः समेतम्" छ० र० उक्ते छन्दोभेदे।

क्रीडन न० क्रीड–भावे–ल्युट्। १खेलायाम् "उदकक्रीडनं नाम कारयामास भारत!" भा० आ० १२८अ०। "बालक्रीडनमिन्दुशेखरधनुर्भङ्गावधि" महाना०। करणे ल्युट्। २क्रीडासाधने। "यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः" भाग० २,१९,१४, स्वार्थे क। तत्रार्थे "क्रीडसे त्वं नरव्याघ्र! बालः क्रीडनकैरिव" भा० व० १२अ०।

क्रीडनीय त्रि० क्रीड–करणे वा० अनीयर् क्रीडनाय साधु छ वा। क्रीडासाधने। "क्रीडतः क्रीडनीयानि ददुः पक्षिगणांश्च ह" भा० अनु० ८६अ०।

क्रीडा स्त्री क्रीड–भावे अ। १परीहासे २खेलने च "क्रीडारसं निर्विशतीव बाल्ये" कुमा०। "आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द" छा० उप०। "तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः" मेघ० "क्रीडायासश्रमशमपटवः" माघः। क्रीडागृह, क्रीडाशैल, क्रीडोद्यानादयः क्रीडार्थ गृहादौ। क्रीडासचिव नर्मसचिवे

क्रीडाताल पु० "एकएव द्रुतोयत्र क्रीडातालः स कथ्यते" इति संगीतदामोदरोक्ते तालभेदे।

क्रीडानारी स्त्री क्रीडायाः क्रीडार्थं नारी अश्ववासादिवत् चतुर्थ्यर्थे ६त०। क्रीडार्थायां वेश्यारूपायां नार्य्याम्। "वेश्या निवेशिता वीर! द्वारवत्यां सहस्रशः। सामान्यास्ताः कुमाराणां क्रीडानार्य्यो महात्मनाम्" हरि०१४७अ०। [शब्द चि०

क्रीडायान न० क्रीडार्थं यानम् चतुर्थ्यर्थे ६त०। पुष्परथे

क्रीडारत्न न० क्रीडायां रत्नमिव। रतौ त्रिका०

क्रीडारथ पु० क्रीडायाः क्रीडार्थो रथः चतुर्थ्यर्थे ६त०। पुष्परथे "क्रीडारथोऽस्तु भगवन्न त सांग्रामिको रथः" भा० आ० ५२अ०

क्रीडारसातल न० श्रीगदितलक्षणयुते उपरूपकभेदे यथा

"प्रख्यातवृत्तमेकाङ्कं प्रख्यातोदात्तनायकम्।
प्रसिद्धनायकं गर्भविमर्शाभ्यां विवर्ज्जितम्। भारती वृत्तिबहुलं श्रीतिशब्देन संयुतम्। मतं श्रीगदितं नाम विद्वद्भिरुपरूपकम् यथा क्रीडारसातलम्" सा० द०

क्रीडि त्रि० क्रीड–इन्। क्रीडके। "आ क्रीडयो न मातरं तुदन्तः" ऋ० १०।९४।१४।

क्रीडिन् त्रि० क्रीड–ता०ताच्छील्ये इनि। १क्रीडाशीले २वायुभेदे पु० "क्रीडिभ्यः संसृष्टान् मरुद्भ्यः" यजु० २४। २६ "क्रीडी च शाकी चाज्जेषी" यजु० १७।८५ "क्रीडी सदाक्रीडाशीलोमरुत्" वेददी०।

क्रीडु त्रि० क्रीड उन्। क्रीडाकारके। "क्रीडुर्मखो न मंहयुः पवित्रं सोम! गच्छसि" ऋ० ९।२०।७

क्रीत त्रि० क्री–कर्म्मणि क्त। १मूल्यदानेन स्वत्वास्पदीभूते कृते। "शूद्रानीतैः क्रयक्रीतैः (जलैः) कर्म्म कुर्व्वन् पतत्यधः" स्मृतिः। २गौणपुत्रभेदे पु०। "क्रीतश्च नवमः स येन क्रीतः" विष्णु सं०। भावे क्त। ३क्रये न० क्रीतानुशयः। पुत्रभेदास्तल्लक्षणानि च योगीश्वरेण दर्शितानि यथा "औरसो धर्म्मपत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतोमतः। अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः। दद्यान्माता पिता वा यं स पुत्रोदत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः, कृत्रिमः स्यात् स्वयंकृतः। दत्तात्मा तु स्वयन्दत्तो गर्भे विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोऽपविद्धोभवेत् सुतः"। "अदूरबान्धवमिति देशभाषाविप्रकृष्टस्य प्रतिषेधः एवं क्रीतस्वयन्दत्तकृत्रिमेष्वपि योज्यं समानन्यायत्वात्। क्रीतस्तु विक्रीतः मातापितृभ्यां पूर्व्ववत् तथैकं पुत्रं ज्येष्ठञ्च वर्जयित्वा आपदि। सवर्ण इत्येव यत्तु मनुनोक्तम् "क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्। स क्रीतकः सुतस्तस्य सदृशोऽसदृशोपिऽवेति" तद्गुणैः सदृशोऽसदृशो वेति व्याख्येयं न जात्या "सजातीयेष्वयम्प्रोक्तस्तनयेषु मया विधिः" इत्युप संहारात्" मिता०। स्वार्थे क। तत्रार्थे। "कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।

स्वयं दत्तश्च शौद्रश्च षडदायादबान्धवाः” इति मनूक्तेः तस्य पितृमातृभिन्नदायानधिकारित्वम्। दत्तकमीमांसामते “औरसः क्षेत्रजश्चैव दत्तः कृत्रिम च” पराशरेण कलिधर्म्मप्रस्तावे चतुर्णामेव ग्राह्यतायाः उक्तेः दत्तकचकामते “दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः” इत्यादि पुराणे दत्तौरसभिन्नानां कलौ वर्ज्यत्वोक्तेश्च क्रीतपुत्रस्य न कलौ कर्त्तव्यता।

क्रीतानुशय पु॰ क्रीते क्रये अनुशयः। “क्रयविक्रयानुशयश्च” इति मनुक्ते अष्टादशविवादान्तर्गते विवादभेदे अनुशयशब्दे १८६ पृ॰ तद्विष्टतिर्दर्शिता। अधिकं वीरमित्रोदये दर्शितं यथा

“अथ क्रीतानुशयोव्यवहारपदम्। तत्स्वरूपमाह नारदः “क्रीत्वा मूल्येन यत् पण्यं क्रेता न बहु मन्यते। क्रीतानुशय इत्येतद्विवादपदमुच्यते” इति। न बहु मन्यते—समञ्जसमञ्जसमिति पूर्व्वं न विचार्य्य गृहीतमित्यर्थः। क्रीतं परीक्षणीयमित्याह वृहस्पतिः“परीक्षेत स्वयं क्रीतमन्येषाञ्च प्रदर्शयेत्। परीक्षितं बहुमतं गृहीता न पुनस्त्यजेदिति”। अन्येषां पण्यगुणदोषविदामिति शेषः। नारदोऽपि“क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत्पुनरिति”। चर्मादीनां परीक्षा सद्यः कार्या तथा च व्यासः “चर्म्मकाष्ठेष्टकासूत्रधान्यासवरसस्य च। वसुकुप्यहिरण्यानां सद्य एव परीक्षणमिति”। अत्र वसुशब्देन रूप्यं गृह्यते। कुप्यं रूप्यहेमव्यतिरिक्तं त्रपुसीसादिकम्। तथा च हेमरूप्ये प्रस्तुत्याहामरसिंहः “ताभ्यां यदन्यत्तत् कुप्यमिति”। क्रीतपण्यद्रव्यविशेषेण परीक्षणकालावधिमाह नारदः “त्र्यहाद्दोह्यं परीक्षेत पञ्चाहाद्वाह्यमेव तु। मुक्तावज्रप्रवालानां सप्ताहं स्यात्परीक्षणम्। द्विपदामर्द्धमासन्तु पुंसान्तद्द्विगुणं स्त्रियाः। दशाहं सर्वबीजानामेकाहं लोहवाससाम्। अतोऽर्वाक्पण्यदोषस्तु यदि सञ्जायते क्वचित्। विक्रेतुः प्रतिदेयं तत् क्रेता मूल्यमवाप्नुयादिति”। त्र्यहात् क्रयदिनादारभ्येति शेषः। पञ्चाहादित्यादावप्येवमेव शेषोऽवगन्तव्यः। त्र्यहं विक्रेतृप्रतिदेयमित्यादिविधिदर्शनात् त्र्यहाद्दोह्यमित्यादि परीक्षणं प्रीतिदोह्यादिद्रव्यविषयमिति गम्यते इति स्मृतिचन्द्रिका। दोह्यं महिष्यादिकम् वाह्यं बलीवर्दादिकम्। मुक्तापदेन रत्नोपलक्षणम्। द्विपदाम्पुंसान्दासानामित्यर्थः। तद्द्विगुणं मासादित्यर्थः स्त्रियादास्या इत्यर्थः। पूर्व्वोदाहृतचर्म्मकाष्ठेत्यादिव्यासवचनेन भक्षणाद्यर्थं गृहीतानां धान्यादीनां सद्यःपरीक्षणाभिधानात् सर्वबीजानामित्यत्र बीजशब्दोऽङ्कुरार्थं गृहीतधान्यपरः। अन्यथा सद्यःपरीक्ष्यत्वप्रतिपादकव्यासवचनविरोधः स्यात्। अतोऽर्वाक् त्र्यहादेरभ्यन्तर इत्यर्थः। कात्यायनोऽपि ““भूमेर्दशाहोऽनुशयः क्रेतुर्विक्रेतुरेव चेति”। भूमेर्गृहक्षेत्रादिरूपाया अनुशयः परावर्त्तनयोग्यः कालः परीक्षाकाल इति यावत्। यथोक्तपरीक्षाकालातिक्रमे दोषदर्शने न प्रतिदानमित्याह स एव ““अविज्ञातन्तु यत् क्रीतं दुष्टं पश्चाद्विभावितम्। क्रीतन्तत् स्वामिने देयम्पण्यं कालेऽन्यथा न त्विति”। अविज्ञातं परीक्षाशैथिल्यात्तत्त्वतोऽपरिज्ञातम्। दुष्टं विभावितं दोषवत्तया ज्ञातमित्यर्थः। काले परीक्षाकाले। अन्यथा तत्कालात्यये दुष्टतया परिभावितमपि तत् स्वामिने न देयम्। अविज्ञातन्तु यत्क्रीतमित्यनेन यत् क्रयात् प्राक् अपरीक्ष्य क्रीतन्तत् परीक्षासमये दोषदर्शने परावर्त्तनीयम्। यत्तु परीक्ष्य गृहीतं तन्न परावर्त्तनीयमिति। दर्शितमर्थं नारदश्चाह “क्रीत्वा नानुशयं कुर्य्याद्वणिक्पण्यविचक्षणः। क्षयं वृद्धिञ्च जानीयात् पण्यानामागमन्तथा। क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति”। अनुशयं पश्चात्तापम्। पण्यानां अश्वादीनां अस्मिन्देशे मूल्यहानिरस्मिन्देशे तदाधिक्यमिति क्षयवृद्धी एतद्देशसम्भवमित्यागमञ्च क्रयात् प्रागेव जानीयादित्यर्थः। दोषदर्शनमन्तरेण परीक्षाकाल एव प्रत्यर्पणे विशेषमाह कात्यायनः “क्रीत्वा चानुशयं पश्चात् त्यजेद्दोषादृते नरः। अजुष्टमेव काले तु स मूल्याद्दशमं वहेत्। क्रीत्वा गच्छन्ननुशयं क्रयी हस्तमुपागते। षड्भागन्तस्य मूल्यस्य दत्त्वा क्रीतं त्यजेन्नरः”इति। अजुष्टमनभिभुक्तम्। काले परीक्षाकाले अत्र मूल्यदशमभागदानं यदुपभुज्यमानमपि न नश्यति भूम्यादिकं तद्विषयम् उपभोगविनश्वरबीजादिविषयं षड्भागदानमिति व्यवस्था ज्ञेया। ननु विजानताऽप्यनुशयो न कार्यः “क्रीत्वा नानुशयम् कुर्य्यादिति” निषेधसद्भावादिति चेत्सत्यं अपवादस्य सत्त्वात् स चापवादोदर्शितो नारदेन “क्रीत्वा मूल्येन यत्पण्यं दुष्क्रीतं मन्यते क्रयी। विक्रेतुः प्रतिदेयं तत्तस्मिन्नेवाह्न्यविक्षतमिति”। मन्यत इत्यनेन वस्तुतो दोषाभाव उक्तः। द्वितीयादिदिवसे प्रत्यर्पणे विशेषमाह स एव ““द्वितीयेऽह्नि ददत् क्रेता मू-

स्यात्क्रियांशमाहरेत् । द्विगुणं तु तृतीयेऽह्नि परतः क्रेतुरेव तदिति” । परतः तृतीयाहात् परतः क्रेतुरेव तत् क्रीत्वा अनुशयादिकं न कुर्य्यादित्यर्थः । यत्तु मनुवचनम् “क्रीत्वा विक्रीय वा किञ्चिद्यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वेति” तदुपभोगे नश्वरताव्यवहार्य्यानुशयनादिविषयम् । वस्त्रूपभोगेन विकारप्रापितं सदोषमपि तत् परीक्षाकालमध्येऽपि न प्रतिदेयमित्याह नारदः “परिभुक्तन्तु तद्वासः क्लिष्टरूपं मलीमसम् । सदोषमपि तत् क्रीतं विक्रेतुर्न भवेत्पुनरिति” । वासोग्रहणमुपलक्षणमिति मदनरत्ने । वासोविषयतैवास्येति माधवीये । पण्यानां देशकाले उपचयापचयौ ज्ञातव्याविव्याह नारदः “क्षयं वृद्धिञ्च जानीयात्पण्यानामागमन्तथेति” । अश्वादिपण्यानामस्मिन् कालेऽस्मिन्देशे च क्षयं वृद्धिं वा जानीयात्तथागमं कुलीनत्वादिज्ञानार्थम् उत्पादकजन्मभूम्यादिकञ्च जानीयादित्यर्थः । क्रयकाले मूल्यक्षयवृद्धिदोषदर्शनमन्तरेण क्रीतविक्रीतयोः प्रत्यर्पणे पुनर्ग्रहणे दण्डमाह याज्ञवल्क्यः “वृद्धिं क्षयं वा वणिजा पण्यानामविजानता । क्रीत्वा नानुशयः कार्य्यः कुर्वन् षड्भागदण्डभागिति” । वृद्धिं मूल्यवृद्धिम् अविजानता क्रेत्रा एवं मूल्यक्षयमविजानता विक्रेत्रेत्यर्थः ।” परीक्षाकालातिक्रमेण प्रत्यर्पणे दण्डमाह मनुः “परेण तु दशाहस्य न दद्यान्नापि दापयेत् । आददानो ददच्चैव राज्ञा दण्ड्यः शतानि षडिति” । दशाहग्रहणं परीक्षाकालस्य पूर्व्वोक्तस्योपलक्षणम् । सर्वमेतत्परिभाषणाभावे परिभाषणे तु तदनुसारेणैव प्रतिदानं तदभावादिकं मन्तव्यम्” । क्रयानुशयोऽप्यत्र ।

क्रुङ् पुंस्त्री० क्रुन्च–क्विन् “दृष्टिगत्यादि०”पा०नि० नलोपाभावः(कोँचवक) १वकभेदे अमरः स्त्रियां टाप् । २हंसे च “अद्भ्यः क्षीरं व्यपिबत् क्रुङ्ङाङ्गिरसो धिया । ऋतेन सत्यमिन्द्रियम्”यजु०१९।७२ “आङ्गिरसः अङ्गानां रसः प्राणो यया क्रुङ् हंसोभूत्वा धिया प्रज्ञया अद्भ्यः सकाशात् क्षीरं दुग्धमपिबत् पिबति संसृष्टाभ्यां क्षीरोदकाभ्यां क्षीरमेव हंसः पिबतीति जातिस्वभावः” वेददी० ।

क्रुञ्च पुंस्त्री० क्रुन्च–अच् । (कोँचवक) वकभेदे अमरः “वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान्” यजु० २४।२२ “कर्णविक्षो लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा, वाचे क्रुञ्चः” यजु० २४।३१ स्त्रियां संयोगोपधत्वात् टाप् । पुंयोगे तु अजा०टाप् । टाबन्तः। २वीणाभेदे स्त्री शब्दरत्ना०। ततः चतुरर्थ्यां नडादि० छ कुक्चागमश्च । क्रुञ्चकीय तत्सन्निकृष्टदेशादौ । क्रुञ्चा वीणाऽस्त्यस्य क्रुञ्चावती अस्त्यत्र वा मतुप् यवादि० न मस्य वः । क्रुञ्चामत् तद्युक्ते त्रि० २क्रौञ्चपर्व्वते पु० हेमच० । स्वार्थे अण् । क्रौञ्च स्वनामख्याते पर्व्वते क्रौञ्चदारणः। वकभेदे च “ददर्श भगवांस्तत्र क्रौञ्चयोश्चारुदर्शनम्” “यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्” रामा० आ० २स० । स्त्रियां तु अणन्तत्वात् ङीप् । “निशम्य रुदतीं क्रौञ्चीमिदं वचनमब्रवीत्” रामा० आ० २स०

क्रुड निमज्जने घनीभावे च तु० कुटा० प० अक० सेट् । क्रुडति अक्रुडीत् चुक्रोड–क्रोडः ।

क्रुथ हिंसने क्र्या० प० सक० सेट् चान्द्राः । क्रुथ्नाति अक्रोथीत् चुक्रोथ । क्रोथः ।

क्रुध कोपे दिवा० पर० अक०. सोपसर्गः सक० अनिट् । क्रुध्यति भृत्यमभिक्रुध्यति ऌदित् अक्रुधत् । चुक्रोध-क्रोद्धा क्रोत्स्यति । क्रोद्धव्यम् क्रोध्यम् क्रोधनीयम् क्रोद्धा क्रोधी क्रुद्धः । क्रुध्यन् क्रोधः। क्रुद्धा संक्रुध्य” “चुक्रोध पुरुषादकः” भा० आ०१५३अ० “द्रुमेभ्यः क्रुध्यमानास्ते तपोदीपितमन्यवः” भाग०६,४,५, अत्र तङ् आर्ष: यक्रादेशो वा। “क्रुध्यन् कुलं धक्ष्यति विप्रवह्निः”भट्टिः “क्रोधं विभो! संहर संहरेति” कुमा० । ‘‘क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः” पा० कोपविषयस्य संप्रदानता । अरये क्रुध्यति ।“क्रुधद्रुहोरुपसृष्टयोः कर्म्म”पा० सोपसर्गस्य तस्य सम्प्रदानस्य कर्म्मता “क्रुध्यन्तं न प्रतिक्रुध्येत्’ मनुः। “भृत्यमभिक्रुध्यति”सि० कौ० अन्वाद्युपसर्गात् परस्तु तत्तदुपसर्गद्योत्यार्थयुक्तक्रोधे सक० प्रतिर्वैपरीत्येन क्रोधने सक०“क्रुध्यन्तं न प्रतिक्रुध्येत्”मनुः

क्रुध् स्त्री क्रुध–सम्प० भावे क्विप् । कोपे कामव्याघातहेतुके चित्तवृत्तिभेदे अमरः “इतिक्रुधाऽऽक्रुश्यत तेन केतकम्” नैष० । हलन्तत्वात् वा टाप् क्रुधा

क्रुध्मिन् त्रि०क्रुध–बा० मिनि किच्च । क्रोधयुक्ते “शुभ्रो वः शुष्मः क्रुध्मी मनांसि” ऋ० ७।५६।८

क्रुन्च(ञ्च) कौटिल्ये, अल्पीभावे च अक०पर०सेट् । क्रुञ्चति अक्रुञ्चीत् चुक्रोञ्च । क्रुङ्: क्विन् क्रुङ् अत्र “चोः कुः” पा० चवर्गान्तत्वेन कुत्वप्राप्तौ दृष्टिगत्यादिना क्विनं विधाय “क्विन् प्रत्ययस्य कुः”पा० क्विनन्तस्य पृथक् कुत्वविधानात् संयोगान्तलोपात् प्राक् कुः। भावे क्रुच्यते अक्रुञ्चि । केचित्तु दृष्टिगत्यादिसूत्रे क्रुञ्चामिति निर्देशात् क्रुञ्चेति क्रो-

वधं सोत्वं धातुमाहुः तन्मते भावे क्रुञ्चते इत्येव। एतन्मते क्रुङ् इत्यत्र क्विनि भावोपाभावे न निपातकल्पना

क्रुध्य क्रोधे क्षेपे च क्र्या॰ पर॰ अक॰ सेट्‌ हलायुधः। क्रुध्याति अक्रुध्यीत् चुक्रुध्य अयमपाणिनीयः

क्रुमु त्रि॰ क्रम–उन्‌ वेदे पृषो॰। सर्व्वत्र क्रमणशीले "क्रुमुर्मा वः सिन्धुर्निरीरमत्" ऋ॰५।५३।९। "क्रुमुः सर्व्वत्र क्रमणशीलः" भा॰

क्रुमुक पु॰ क्रम–उक वेदे पृषो॰। गुवाके "क्रुमुकमपि कुर्य्यात् एषा वा अग्नेः प्रिया तनुः यत्क्रुमुकः" तैत्ति॰५।१।९।५

क्रुश रोदने अक॰ आह्वाने आक्रोशे च सक॰ भ्वा॰ प॰ अनिट्‌। क्रोशति अक्रुक्षत्। चुक्रोश क्रोक्ष्यति। क्रोष्टा क्रुष्टः क्रोशन्‌ क्रोशः क्रोशनः क्रोष्टुः। "रसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते" ऋ॰ १०।१४६।४ "इहेहदन्ति मदिरेण मन्दिनेन्द्रं क्रोशन्तोऽविदन्नना मधु" ऋ॰१०।९४।४ "एष क्रोशति दात्यूहस्तं शिखी प्रतिकूजति" रामा॰ अयो॰५६अ॰। कर्म्मणि क्रुश्यते अक्रोशि "इतिक्रुधाक्रुश्यत तेन केतकम्" नैष॰

अन्यादुपसर्गात्‌ परस्तु तत्तदुपसर्गार्थयुक्ते रोदनादौ

अनु+दयायाम्‌ अनुरोदने च सक॰। अनुक्रोशः (दया) "न मायुमनुक्रोशन्ति क्षितयोभरेषु" ऋ॰ ४।३८।५ "किमनुक्रुश्य वैकल्यमुत्पादयसि मेऽनघ!" भा॰अनु॰५अ॰

आ+अप्रियकथने सक॰। "शतं ब्राह्मणमाक्रुश्य क्षत्रियोदण्डमर्हति" मनुः। "प्रत्याक्रोशेदिहाक्रुष्टः" भा॰ अनु॰ ४५६०श्लो॰। "आक्रुष्टः पुरुषः सर्व्वं प्रत्याक्रोशेदनन्तरम्" भा॰ व॰ १९१श्लो॰। "हा प्रिये! क्वासि नष्टासि आक्रोशन्नपतत् क्षितौ" रामा॰ आ॰ ८६अ॰

उद्+उच्चैराह्वाने सक॰ "उदक्रोशन्‌ स पाण्डवान्" भा॰ आ॰ ७४८श्लो॰। उच्चै रोदने च अक॰

क्रुश्वन् पुंस्त्री क्रुश–क्वनिप्। शृगाले उज्ज्वल॰ स्त्रियां ङीप्‌ रश्चान्तादेशः क्रुश्वरी। [तामिये २आहूते च त्रि॰।

क्रुष्ट न॰क्रुश–भावे क्त। १रोदनरवे। कर्म्मणि क्त। २कथि

क्रूड क्रूडवत्‌। क्रूडति अक्रूडीत्‌ चुक्रोड "तस्य रेतः परापतत्‌ तदग्निर्योनिनोपाग्टह्लादयसा तदक्रूडयत्तत्‌ क्रूडमानं गवि न्यदधत्‌ तदिदं पयः" श्रुतिः।

क्रूर त्रि॰ कृत–रक्‌ धातोः क्रूः। १निर्दये २कठिने अमरः ३हिंसके ४उष्णे च मेदि॰। "तस्याभिषेकसंभारं कल्पितं क्रूरनिश्चया" रघुः। "तस्मिन्नुपायाः सर्व्वेनः क्रूरे प्रतिहतक्रियाः" कुमा॰। "हठकारी मृदुर्दान्तः क्रूराचा-रैरसंवसन्" मनुः। तस्य भावः ष्यञ्‌ क्रौर्य्य न॰, तल्‌ क्रूरता स्त्री, त्व क्रूरत्व न॰, निर्दयत्वे हिंसने काठिन्ये उष्णत्वे च। "ओजोऽथ युग्मं विषमः समश्च क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च। चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टाः" दीपिकोक्ते मेषादिषु मध्ये ५विषमराशौ पु॰ "अर्कोनेन्द्वर्कसौरारराः पापाः सौम्यास्तथा परे। पापयुक्तोबुधः पापोराहुकेतू च पापदौ" ज्योति॰ उक्ते ६ग्रहभेदे च "यथा इष्टफला क्रूरास्तथा सौम्याः शुभप्रदाः। क्रूरयुक्तः पुनः सौम्योज्ञेयः क्रूरफलप्रदः" "इदञ्च सौम्यक्रूराणां फलं स्थानवशात् समम्। एतदेव फलं विद्धि सौम्यैः क्रूरैर्विपर्य्ययात्" "ग्रहाः सौम्यास्तथा क्रूरा वक्राः शीघ्रोच्चनीचगाः" इति "तिथिराश्यंशनक्षत्रं विद्धं क्रूरग्रहेण यत्। सर्व्वेषु शुभकार्य्येषु वर्ज्जयेत्तत् प्रयत्नतः। न नन्दति विवाहे च यात्रायां न निवर्त्तते। रोगाद्विमुच्यते रोगी क्षेमवेलाहतोद्यमः। रोगकाले भवेद्वेधः क्रूरवेधस्य सम्भवः" "क्रूरायक्रा महाक्रूरा इति च ज्यो॰ त॰ पापपदार्थपरतया क्रूरशब्दप्रयोगात्। क्रूरवेधप्रकारस्तु चक्रशब्दे सर्व्वतोभद्रचक्रे वक्ष्यते। ७रक्तकरवीरे पु॰८श्येनपक्षिणि ९कङ्कपक्षिणि च पुंस्त्री॰ राजनि॰ स्त्रियां जातित्वात्‌ ङीप्। १०रक्तपुनर्णवायां स्त्री राजनि॰

क्रूरकर्म्मन् त्रि॰ क्रूरं हिंसकं कर्म्म यस्य। १हिंसाकर्म्मकारिणि "क्रूरकर्म्मकृताञ्चैव शतशोगुरुतल्पगः" मनुः। २कटुतुम्बिनीवृक्षे पु॰ राजनि॰।

क्रूरकोष्ठ त्रि॰ क्रूरं कठिनं कोष्ठं यस्य। धातुवैषम्यहेतुबद्धकोष्ठाशये। "क्रूरकोष्ठस्याग्नितीक्ष्णाग्ने रल्पमौषधमल्पगुणं वा भक्षयत् पाकमुपैति तत्र समुदीर्णदोषा यथाकालमनिर्ह्रियमाणा व्याधिं बलविभ्रमञ्चापादयन्ति" सुश्रु॰।

क्रूरगन्ध पु॰ क्रूर उग्रोगन्धोऽस्य। १गन्धके राजनि॰ २तीक्ष्णगन्धमात्रे त्रि॰ क्रूरः गन्धएकदेशोऽस्याः टाप्। कन्थारीवृक्षे तीक्ष्णकण्टकायाम्‌ राजनि॰।

क्रूरदृश् त्रि॰क्रूरा दृग् यस्य, क्रूरं पश्यति दृश–क्विन्‌ २त॰ स॰ वा। १पिशुने खले २शनैश्चरग्रहे पु॰ मेदि॰। ३मङ्गलग्रहे "आरोवक्रः क्रूरदृक् चावनेयः" ज्यो॰त॰। कर्म्म॰। नील॰ ता॰ उक्ते स्थानविशेषस्थितानां ग्रहाणां स्थानविशेषे ४सुताख्यदृष्टौ रिपुदृष्टौ स्त्री। १५५पृ॰अरिशब्दे विवृतिः। क्रूरस्य ग्रहविशेषस्य दृक्। ५पापग्रहदृष्टौ स्त्री।

क्रूरधूर्त्त पु० क्रूरः कष्णत्वात् तत्सदृशः धूर्त्तः। कृष्णधत्तूरके राजनि०

क्रूरप्रसादन त्रि० क्रूरमपि प्रसादयति प्र+सद+णिच्–ल्यु। भक्ते सेवके शब्दचि०। [राजनि० स्त्रियां ङीप्।

क्रूरराविन् पुंस्त्री० क्रूरस्वं रौति रु-णिनि। द्रोणकाके

क्रूरलोचन पु० क्रूरं लोचनमस्य। शनिग्रहे हारा० तद्दृष्ट्याहिंसकत्वात् तस्य तथात्वम्। यथा च तद्दृष्ट्या घातकत्वं तथा कुभाननशब्दे ८८१पृ० उक्तम्

क्रूराकृति त्रि० क्रूरा आकृतिर्यस्य। १कठिनमूर्त्तिके २रावणे पु० शब्दमा०। कर्म्म०। ३कठिनायां मूर्त्तौ स्त्री

क्रेङ्कित न० क्रेङ्कित्यव्यक्तं शब्दं करोति णिच्–भावे क्त। क्रेङ्कित्यव्यक्तशब्दभाषणे "निरुध्यमाना चक्रेण चक्री क्रेङ्कितभाषणैः" काशीख०

क्रेणि त्रि० क्री–नि। क्रेतरि–शस्यक्रेणिः उज्ज्वलद०

क्रेय त्रि० क्री–कर्म्मणि यत्। क्रेतव्ये अमरः

क्रैडिन त्रि० क्रीडी मरुत् देवताऽस्य अण् वेदे नि० नलोपाभावः। क्रीडिदैवत्ये साकमेधीये तृतीयाहे प्रातःसवनिके अष्टादशकपालरूपे हविषि। "शिश्नान्येवास्य क्रैडिनं हविः शिश्नैर्हि क्रीडतीवायमेवावाङ् प्राणः" शत० ११,५,२,४ "अण्डौ लिङ्गं चेति त्रीणि शिश्नानि" भा० "तृतीयेऽहन्युपांशन्तर्यामौ हुत्वा पौर्णमास्यं प्रातः सवनिकेषु क्रैडिनम्" आश्व० श्रौ० ८।२।१५ तद्द्रव्यमधिकृत्य इष्टिः क्व। क्रैडिनीया इष्टिभेदे सा च इष्टिः कात्या० श्रौ० ५,७,१ सूत्रादौ दर्शिता। तस्याः पद्धतिश्च संक्षेपेण कर्कभाष्ये दर्शिता यथा

"अथ क्रैडिनीया हिविष्क्रिटिरुच्यते तत्र मरुद्भ्यः क्रीडिभ्यः सप्तकपालः, अदित्यै चरुः, इमे हविषी समानतन्त्रे भवतः प्रतीच्युद्धरणपक्षे क्रैडिम्यादित्येष्ट्यर्थमित्युद्धरणे क्रैडिन्यादित्येष्टिभ्यामहं यक्ष्ये इति। चरुश्च पात्रासादने सप्तकपालानि एका चरुस्थाली, दक्षिणा अन्वाहार्य्यः शतावदानानन्तरम्, मेक्षणम् विंशतिरिध्मकाष्ठानि पुरोडाशपात्र्येका अन्यत्सर्वं प्रकृतिवत्। यजुषे मरुद्भ्यः क्रैडिभ्यो जुष्टम्, अदित्यै जुष्टम्। प्रोक्षणे मरुद्भ्यः क्रीडिभ्यस्त्वा जुष्टम् अदित्यै त्वा जुष्टम्। नानाबीजपक्षे तद्धर्मा उक्ताः एकबीजपक्षे करणान्ते विभज्यानयः इदं मरुतां क्रीडिनाम्; इदमदित्याः। प्राशदाने मरुतः क्रीडिनो गच्छ अदितिं गच्छ, सप्तदशेन यज्ञेणेत्यवबाधने। उत्तमप्रयाजे इदमग्नये सोमाय मरुद्भ्यः क्रीडिभ्योऽदित्यै देवेभ्य इत्यादि। प्रधानयागे मरुद्भ्यः क्रीडिभ्योऽनुब्रूहि मरुतः क्रीडिनो यज इदं मरुद्भ्यः क्रीडिभ्यः, अदित्या अनुब्रूहि अदितिं यज इदमदित्यै, मेक्षणेन चरोरवदानम्। स्विष्टकृदादि पुरोडाशस्य प्राशित्रेडाव्यतिरिक्तं न भवति चरोस्तु सर्वं भवत्येव। व्यूहने मरुतां क्रीडिनामदित्या उज्जितिम् मरुतः क्रीडिनोऽदितिस्तमपनुदन्तु। प्रस्तरहोमे इदमग्नये सोमाय मरुद्भ्यः क्रीडिभ्योऽदित्यै देवेभ्य इति। अन्यत्कर्मापवर्गान्तं प्रकृतिवत् इति"

क्रैव्य पु० क्रिवीणां पञ्चालानां राजा वा० ञ्य। क्रिविदेशराजभेदे क्रिविशब्दे उदा०

क्रौञ्च पु० क्रुञ्च अच् वा० गुणः। "कैलासे धनदावासे क्रौञ्चः क्रौञ्चोऽभिधीयते" इति हड्डारावल्युक्ते क्रौञ्चपर्व्वते क्रौञ्चदारणः कार्त्तिकेयः इति रायमुकुटः

क्रोड पुंस्त्री० क्रुड–घनीभावे संज्ञायां घञ्। १सूकरे "क्रोडकुलदश्यमानभद्रमुस्तारसामोदः" काद० "नदी सैवालदिग्धाङ्गं हारिश्मश्रुजटाधरम्। जग्नौ गङ्कुनखैर्गात्रैः क्रोडैश्चित्रैरिवार्पितम्" भा० अनु० ५० अ०। २भुजयोरन्तरे (कोल) न० स्त्री० अमरः "कुपितकपिकपोलक्रोडताम्रस्तमांसि" उद्भटः ३वृक्षकोटरे "हा हा हन्त तथापि जन्मविटपिक्रोडे मनो धावति" उद्भटः। घनीभूते ४वक्षोमध्यभागे पु० "इन्द्रस्य क्रोडोऽदित्यै पाजस्यम्" यजु० २५,८ "क्रोडस्य घनीभूतवक्षोमध्यभागपरता वेददीपे उक्ता। क्रोडं तु वक्षोभुजान्तरे देहांशभेदः। "हृदयं जिह्वां क्रोडं सव्यसक्थि पूर्वनडकं पार्श्वे मतस्न एकोगुदमध्यं दक्षिणा श्रोणिरिति जौह्वानि" कात्या० श्रौतसू० ६,७,६ "क्रोडं वक्षोभुजान्तरम्" कर्कः "शेषमिडापात्र्यामासिच्य क्रोडमनस्थीनि च प्राश्यति श्रोणि वर्ज्जम्" कात्या० श्रौतसू० ६,८,१२,। ५अश्वानामुरसि ६उत्तरस्थग्रामभेदे शब्दचि० ७वाराहीकन्दे पु० राजनि० ८शनिग्रहे पु० मेदिनिः

क्रोडकन्या क्रोडस्य शूकरस्य कन्येव प्रियत्वात्। वाराहीकन्दे राजनि०। [(वड घुलकुडि) राजनि०

क्रोडचूडा स्त्री क्रोडे चूडा यस्याः। महाश्रावणिकायाम्

क्रोडपत्र न० क्रोडे उपचारात् मध्ये स्थितं पत्रम् ७त०। ग्रन्थलेखने भ्रमात् त्रुटितग्रन्थस्य परिपूरणाय ग्रन्थस्थपत्रयोर्मध्ये चिह्नविशेषेण लिखित्वा स्थापिते पत्रे।

क्रोडपर्णी क्रोडे कण्टकमध्ये पर्णं यस्याः गौरा० ङीष्। कण्टकारिकायाम् शब्दच०

क्रोडपाद पुंस्त्री क्रोडे पादोऽस्य। कच्छपे हेम० क्रोडाङ्घ्रिप्रभृतयोऽप्यत्र।

क्रोडादि पु० पाणिन्युक्ते उपसर्जनस्वाङ्ग-ङीष्निषेध निमित्ते शब्दगणे स च गणः "क्रोड नख खुर शाखा उखा शिखा बाल शफ गूद" क्रोडादिराकृतिगणः तेन भग गल घोण इत्यादयोऽपि ग्राह्याः

क्रोडी स्त्री क्रोड+जातौ, गौरा०वा ङीष्। १वराहजातिस्त्रियां २वाराहीकन्दे च राजनि०।

क्रोडीकरण न०क्रोड+च्वि+कृ—भावे ल्युट्। आलिङ्गने हला०

क्रोडीमुख पुंस्त्री क्रोड्याः शूकर्य्यामुखमिव मुखमस्य। गण्डके (गाण्डार) राजनि० स्त्रियां जातित्वात् ङीष्।

क्रोडेष्टा स्त्री क्रोडस्य इष्टा प्रिया। मुस्तके (मुथा) राजनि०

क्रोथ पु० क्रुथ—हिंसने भावे घञ्। हनने हेमच०

क्रोध पु०क्रुध-भावे घञ्। १परापकाराय चित्तवृत्तिभेदे, परानिष्टाभिलाषेण अनिष्टविषयद्वेषहेतुके चित्तवृत्तिभेदे। क्रोधश्च रौद्ररसस्य स्थायिभावः "रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः" सा० द० "कामएव कुतश्चित् प्रतिहतः क्रोधरूपेण परिणमते स च रजोगुणकार्य्यः "कामएष क्रोधएष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" गीतोक्तेः "यस्त्वया दृष्टो हेतुरेष काम एव। ननु क्रोधोऽपि पूर्वं त्वयोक्तः "इन्द्रियस्येन्द्रियस्यार्थे" इत्यत्र, सत्यं नासौ ततः पृथक् किन्तु क्रोधोऽप्येष एव, कामएव हि केनचित् प्रतिहतः क्रोधात्मना परिणमते। पूर्वं पृथगुक्तोऽपि क्रोधः कामज एवेत्यभिप्रायेणैकीकृत्योच्यते रजोगुणात् समुद्भवतीति तथा" श्रीधरः। तस्य कामजत्वमपि "सङ्गात् संजायते कामः कामात् क्रोधोऽभिजायते" गीतायामुक्तम्। तत्कार्य्याणि उक्तानि "न कर्म क्रोधान्धः प्रभवति विधातुं रणमृते" "अन्धीकरोति भुवनं बधिरीकरोति धीरं सचेतनमचेतनतां नयेत् क्रुत्। कृत्यं न पश्यति न चात्महितं शृणोति धीमानधीतमपि न प्रतिसन्दधाति" नीतिशा० "क्षमैव क्रोधविजये समर्थेति विवेकिनः। क्रोधः कार्य्यविभङ्गाय तस्मात्तं क्षमया जयेत्" शकुनशा० स च मृदुमध्याधिमात्रभेदेन त्रिधेति पा० साधन पादे २४सू० भा० स्थितम् "क्रोधं विभो! संहर संहरेति" कुमा०। "क्रोधे चलगणः शरे दृग्मुखः पाणौ प्रलम्बासुरः" सा० द०। "क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम्" वेणी०। "विषमस्थं जगत्सर्वं व्याकुलं समुदाहृतम्। जनानां जायते भद्रे! क्रोधे क्रोधः परत्परम्" इत्युक्तलक्षणे षष्टिवर्षान्तर्गते अष्टत्रिंशत्तमे २वर्षभेदे पु०।

क्रोधकृत् त्रि०क्रोधं करोति कृ-क्विप्। क्रोधकारिणि २परमेश्वरे पु० "क्रोधहा क्रोधकृत् कर्त्ता विश्वबाहुर्महीधरः" विष्णुसं० असाधून् प्रति क्रोधकर्तृत्वात् तस्य तथात्वम् "श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते। आज्ञाच्छेदी मम द्वेषी नरके प्रतिवर्त्तते" इति श्रुतिस्मृत्युदितकर्म्मानाचरणे ईश्वरद्विष्टत्वोक्तेः तस्य तादृशान् प्रति क्रोधकर्तृत्वम्। तच्च प्राणिनां स्वादृष्टविशेषात् भवति

क्रोधज त्रि० क्रोधात् जायते जन—ड ५त०। १क्रोधजाते २मोहे पु० मोहस्य क्रोधजत्वं गीतायामुक्तं यथा "क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः" क्रोधजाते द्विविधव्यसनान्तर्गते व्यसनाष्टके च यथाह मनुः "पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्। वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः"

क्रोधन क्रुध—युच्। १क्रोधशीले अमरः "यद्रामेण कृतं तदेव कुरुते द्रौणायनिः क्रोधनः" वेणी० "वाग्दुष्टः क्रोधनो हिंस्रः पिशुनः कविरेव च। स्वस्रमः पितृवर्त्ती च नामभिः कर्मभिस्तथा। कौशिकस्य सुता आसन् शिष्याः गर्गस्य भारत!" हरि० २१३ अ० उक्ते गर्गशिष्ये २कौशिकपुत्रभेदे। "रोगोमरणदुर्भिक्षं विरोधोत्तरसङ्कुलम्। क्रोधने विषमं सर्वं समाख्यातं हरप्रिये!" इत्युक्तलक्षणे षष्टिसंवत्सरान्तर्गते ऊनषष्टितमे ३वर्षभेदे। "कथिताङ्गोरुरुश्चण्ड उन्मत्तःक्रोधनस्तथा" इति तन्त्रोक्ते ४भैरवभेदे च पु०।

क्रोधमूर्च्छित त्रि० क्रोधो मूर्च्छितो वृद्धीभूतोऽस्य ३त० वा। १अतिकोपने "एवमुक्ता तु पार्थेन उर्वशी क्रोधमूर्च्छिता" भा०व० ४६अ० ५त०। २चोरनामगन्धद्रव्ये पु० शब्दर०

क्रोधवर्द्धन त्रि० क्रोधं वर्द्धयति वृध—णिच् ल्यु ६त०। १कोपस्य वर्द्धके अनिष्टसूचकवाक्यादौ २असुरभेदे पु० "चन्द्रहन्ता क्रोधहन्ता क्रोधवर्द्धन एव च" हरि० २६३अ० असुरकथने। स एव भारतयुद्धकाले दण्डधाराख्यपत्वेनाविर्भूतः यथा "क्रोधवर्द्धन इत्येव यस्त्वन्यः परिकीर्त्तितः। दण्डधार इति ख्यातः सोऽभवन्मनुजर्षभः" भा० आ०६७अ० अंशावतारे

क्रोधहन् पु० क्रोधं हन्ति हन्—क्विप्। १विष्णौ "क्रोधहा क्रोधकृत् कर्त्ता विश्वबाहुर्महीधरः" विष्णुसं० "साधूनां क्रोधं हन्मीति क्रोधहा" भा०। २कोपघातके त्रि०

क्रोधहन्तृ त्रि० क्रोधं हन्ति हन—तृच् ६त०। १कोपघातके

२असुरभेदे पु० स च वृत्रासुरस्यावरजः। "क्रोधहन्तेति यस्तस्य (वृत्रस्य) बभूवावरजोऽसुरः। दण्ड इत्यभिविख्यातः स आसीन्नृपतिः क्षितौ" भा० आ० ६७०। २असुरभेदे पु० क्रोधवर्द्धनशब्दे दृश्यम्

क्रोधसम्भव त्रि० सम्भवत्यस्मात् सम्+भू—अपादाने अप् क्रोधः सम्भवोऽस्य। कोपजाते "क्रोधात् भवति संमोहः" गीता० भावे अप् ६त०। २कोपोत्पत्तौ "मार्ज्जारमूषिकास्पर्शे आक्रुष्टे क्रोधसम्भवे" क्रोधसम्भवे कोपोत्पत्तौ" स्मा० त० रघुनन्दनः। [वलो निशाधिकारी" सुश्रुतः

क्रोधालु त्रि० क्रुध—आ० आलुच्। कोपशीले "क्रोधालुर्विपुल-

क्रोधिन् त्रि० क्रुध—णिनि। कोपयुक्ते मारुतप्रकृतेरेव तथात्वं भवति यथाह सुश्रुतः

"सप्त प्रकृतयो भवन्ति। दोषैः पृथक्‌द्वित्रिशः समस्तैश्च?। शुक्रशोणितसंयोगे यो भवेद्दोष उत्कटः। प्रकृतिर्जायते तेन तस्या मे लक्षणं शृणु। तत्र आतङ्कः शीतद्वेषी दुर्भगः स्तेनो मात्सर्यनार्य्यो गान्धर्वचित्तः स्फुटितकरचरणोऽतिरुक्षश्मश्रुनखकेशः क्रोधी दन्तनखखादी च भवति। अधृतिरदृढसौहृदः कृतघ्नः कृशपरुषो धमनीततः प्रलापी। द्रुतगतिरटनोऽनवस्थितात्मा वियदपि गच्छति सम्भ्रमेण सुप्तः। अव्यवस्थितमतिश्चलदृष्टिर्मन्दरत्नधनसञ्चयमितः। किञ्चिदेव विलपत्यनिबद्धं मारुतप्रकृतिरेष मनुष्यः"।

क्रोश पु० क्रुश—भावे घञ्। १रोदने २आह्वाने च। क्रोशति यतः अपादाने घञ्। "हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्रद्वितयेन तेषाम्" लीला० व० उक्तेः०००सहस्रकरमिते अध्वपरिमाणे "चतुर्हस्तो धनुर्दण्डो नालिका तद्युगेन च। क्रोशोऽष्टौः सहस्रेण गव्यूतिश्च चतुर्गुणा" हेमा० दा० मार्क० पु० उक्तेः, "गव्यूतिः स्त्री क्रोशयुगम्" अमरोक्तेश्च तस्य गव्यूतेरर्द्धमानता प्रतीयते हेमाद्रि० दा० आदित्यपुराणे च "धनुःसहस्रे द्वे चापि गव्यूतिरुपदिश्यते" इत्युक्त्या तु गव्यूतेर्द्विसहस्रधनुर्मितत्वात् तदर्द्धत्वेन चतुःसहस्रहस्तमितत्वमपि क्रोशस्य कार्य्यविशेषे दृश्यते इति भेदः। २शब्दे "दशदण्डे तु या पूजा ततसर्वं मत्ययं भवेत्। षष्ठे क्रोशे महेशानि! ततसर्वं ससन्तोषमम्। सप्तमे क्रोशके देवि! द्रव्यतुल्यं न संशयः। अतःपरं महेशानि! विप्रतुल्यं न संशयः" इति शक्तिस० त० ६पटले। "क्रोशार्द्धं प्रकृतिपुरस्सरेण गत्वा" रघुः

क्रोशताल पु० क्रोशं व्याप्य तालः शब्दोऽस्य। ढक्कायां हारा०

क्रोशध्वनि पु० क्रोशं व्याप्य ध्वनिरस्य। ढक्कायां हारा०

क्रोशयुग न० ६त०। क्रोशद्वयमिते गव्यूतौ अमरः

क्रोशिन् त्रि० क्रुश—णिनि। शब्दकारके उपमानपूर्वकतया समासे क्रोशिनि परे पूर्वपदस्याद्युदात्तता। उष्ट्रक्रोशी

क्रोष्टु पुंस्त्री क्रुश—तुन्। १शृगाले अमरः अस्य अस्त्रबुद्धौ सर्वनामस्थाने परे नित्यं तृतीयादावचि वा, स्त्रियां तु नित्यं तृज्वत्। क्रोष्टा क्रोष्टारौ हे क्रोष्टो!। क्रोष्टून्। क्रोष्ट्रा क्रोष्टुना क्रोष्टुभ्यामित्यादि स्त्रियां ङीप् क्रोष्ट्री। "क्रोष्टा मायोरिन्द्रस्य गौरमृगः" यजु० २४, ३२ "शार्दूलस्य पुत्रं शून्ये नीचः क्रोष्टाऽभिमर्दति" भा० आ० २११अ०। २यदुवंश्ये नृपभेदे पु०। "क्रोष्टोस्तु शृणु राजेन्द्र! वंशमुत्तममव्ययम्। यदोर्वंशधरस्याथ यज्वनः पुण्यकर्मणः। क्रोष्टोर्वंशं हि श्रुत्वेमं सर्वपापैः प्रमुच्यते। यस्यान्ववायजो विष्णुर्हरिर्वृष्णिकुलोद्वहः" "गान्धारी चैव माद्री च क्रोष्टोर्भार्य्ये बभूवतुः" हरि० ३४अ० स्वार्थे क। शृगाले "क्रोष्टुकश्चापि यद्नैर्द्ववर्षे सुसंस्तथा" भा० आ० १४०अ०। क्रोष्टुकपुच्छिका। क्रोष्टुर्गोत्रापत्यम् कुञ्जा० च्फञ्। क्रोष्टुः क्रौष्ट्र्य। क्रौष्टायन ततः स्वार्थे अस्त्रियां ञ्यः। क्रौष्टायन्य तद्गोत्रापत्ये पुंसि स्त्रियान्तु न ञ्यः। जातित्वात् ङीष् क्रौष्टायनी।

क्रोष्टुकपुच्छिका स्त्री क्रोष्टुकस्य शृगालस्य पुच्छमिव पुच्छमस्यास्य ठन्। १पृश्निपर्ण्याम् (चाकुलिया) (रामवासक) इत्यमरटीकायां स्वामी २गोलोमिकायाम् राजनि०

क्रोष्टुकमेखला स्त्री क्रोष्टुकस्य मेखलेवास्त्यस्याः अच्। पृश्निपर्ण्यां (चाकुलिया) रत्नमा०

क्रोष्टुकर्ण पु०। ग्रामभेदे सोऽभिजनोऽस्य तक्षशिला० अञ्। क्रौष्टुकर्ण पित्रादिक्रमेण तद्ग्रामवासिनि स्त्रियां ङीप्

क्रोष्टुकशिरस् न० "वातशोणितजःशोथः जानुमध्ये महारुजः। शिरःक्रोष्टुकपूर्वन्तु स्थूलं क्रोष्टुकमूर्द्धवत्" सुश्रुतोक्ते वातजे रोगभेदे। क्रोष्टुकशिरःखञ्जपङ्गुलवातवेदनास्त्वित्यादि" "श्वयथौ विशाची क्रोष्टुकशिरःखञ्जेत्यादि सुश्रु०

क्रोष्टुपाद पु० ऋषिभेदे तस्य गोत्रापत्यम् इञ्। क्रौष्टुपादि तद्गोत्रापत्ये अस्त्रियां बहुत्वे यस्का० तस्य लुक्। क्रोष्टुपादाः स्त्रियान्तु क्रौष्टुपादी। एवं क्रोष्टुमान, क्रोष्टुमायन्तौ ऋषिभेदयोः तदपत्ये इञ् बहुषु अस्त्रियाम् यस्कादि० तस्य लुक्।

क्रोष्टुपुच्छिका स्त्री क्रोष्टुःपुच्छमिवास्त्यस्याः ठन्। पृश्निपर्ण्याम् (चाकुलिया) रत्नमा०

क्रोष्टुपुच्छी स्त्री क्रोष्टोः पुच्छमिव पुच्छमस्याः ङीष्। पृश्निपर्ण्याम् (चाकुलिया) शब्दरत्ना०

क्रोष्टुफल पु० क्रोष्टोः प्रियं फलमस्य। इङ्गुदीवृक्षे राजनि०

क्रोष्टुविन्ना स्त्री क्रोष्टुना विन्ना प्राप्ता पुच्छाकारेण शत०। पृश्निपर्ण्याम् (चाकुलिया) अमरः। (शियालकाँटा) वृक्षे भरतः।

क्रोष्टेचु पु० क्रोष्टुः प्रिय इक्षुः शाक०। श्वेतेक्षौ राजनि०

क्रोष्ट्री स्त्री क्रोष्टुजातिस्त्री क्रोष्टुस्तृज्वत् ऋदन्तत्वात् ङीप्। १शृगालजातिस्त्रियाम् तत्प्रियत्वात् २श्वेतभूमिकुष्माण्डे अमरः। ३क्षणविदार्यां ४लाङ्गल्याम् च मेदि०

क्रौञ्च पुंस्त्री० कुङ्+शब्दे प्रज्ञा० अण्। (कोँचवक) बकभेदे स्त्रियाम् अदन्तत्वात् ङीप्। "निषस्य रुदतीं क्रौञ्चीम्" रामा०बा०२अ०। स्त्रियां टाप् इति वदन् भरतश्चिन्त्यः। अजादिषु क्रुञ्चशब्दस्यैव पाठात् तदप्रवृत्तेः। २हिमवतः पौत्रे पर्व्वतभेदे "धनुर्विकृष्य व्यक्तजहाणान् श्वेते महागिरौ। बिभेद स (कार्त्तिकेयः) शरैः शैलं क्रौञ्चं हिमवतः सुतम्" भा० व० २२४अ०। तस्य हिमवत्पौत्रत्वेऽपि सन्तानाभिप्रायेण सुतत्वोक्तिः। तस्य हिमवत्पुत्रमैनाकपुत्रत्वं हरिवं० १८अ० उक्तं यथा "एतेषां मानसी कन्या मेना नाम महागिरेः। पत्नी हिमवतः श्रेष्ठा यस्यां मैनाक उच्यते। मैनाकस्य सुतः श्रीमान् क्रौञ्चोनाम महागिरिः। पर्व्वतप्रवरः पुत्रो नानारत्नसमन्वितः"। ३द्वीपभेदे ४असुरभेदे। "क्रौञ्चे (द्वीपे) क्रौञ्चो घृतोदैत्यः क्रौञ्चाद्रौ हेमकन्दरे। स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना। स शैलस्तस्य दैत्यस्य ख्यातश्चित्रेण कर्म्मणा। केतुतामगमत्तस्य नाम्ना क्रौञ्चः स उच्यते" खगेन्द्रसंहिता। क्रौञ्चदैत्यश्च मयदानवपुत्रः यथाह हरि० ४७अ० "मयो ददर्श मायावी दानवान्दिवि दानवः। स शिलाजालविततां गण्डशैलाट्टहासिनीम्। पादपोत्कटकूटाग्रां कन्दराकीर्णकाननाम्। सिंहव्याघ्रगणाकीर्णां नदन्तीं दैत्ययूथपैः। ईहामृगगणाकीर्णां पवनाघूर्णितद्रुमाम्। निर्म्मितां स्वेन पुत्त्रेण क्रौञ्चेन दिवि कामगाम्। प्रथितां पार्व्वतीं मायां ससृजे स समन्ततः"। "अश्रुतपूर्वचरितमिव श्रूयमाणक्रौञ्चवनिताप्रलापम्, काद०। ५कुररीखगे राजनि०। ६अर्हतां ध्वजभेदे ७राक्षसभेदे च पु० हेम०। क्रौञ्चद्वीपस्थानञ्च "भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः। अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः" इत्युपक्रमे जम्बुद्वीपमुक्ता। "शाकं ततः शाल्मलमत्र कौशं क्रौञ्चं च गोमेदकपुष्करे च। द्वयोर्द्वयोरन्तरमेकमेकं समुद्रयोर्द्वीपमुदाहरन्ति" सि०शि० उक्तम्। तद्वृत्तिः विष्णुपु० "घृतोदश्च समुद्रो वै क्रौञ्चद्वीपेन संवृतः। क्रौञ्चद्वीपो महाभाग! श्रूयताञ्चापरो महान्। कुशद्वीपस्य विस्तारात् द्विगुणो यस्य विस्तरः। क्रौञ्चद्वीपे द्युतिमतः पुत्राः सप्त महात्मनः। तन्नामानि च वर्षाणि तेषाञ्चक्रे महीपतिः। कुशलो मन्दगश्चोष्णः पीवरोऽथान्धकारकः। मुनिश्च दुन्दुभिश्चैव सप्तैते तत्सुता मुने!। तत्रापि देवगन्धर्व्वसेविताः सुमनोरमाः। वर्षाचला महाबुद्धे! तेषां नामानि मे शृणु। क्रौञ्चश्च वामनश्चैव तृतीयश्चान्धकारकः। चतुर्थोरत्नशैलश्च स्वभाभिर्भासयन्नभः। दिवावृत् पञ्चमश्चैव तथान्यः पुण्डरीकवान्। दुन्दुभिश्च महाक्रौञ्चो द्विगुणास्ते परस्परम्। द्वीपा द्वीपेषु ये शैला यथा द्वीपानि ते तथा। वर्षेष्वेतेषु रम्येषु वर्षशैलवरेषु च। निवसन्ति निरातङ्काः सह देवगणैः प्रजाः। पुष्कराः पुष्कला धन्यास्तिष्याख्याश्च महामुने!। ब्राह्मणाः क्षत्त्रिया वैश्याः शूद्राश्चानुक्रमोदिताः। तैस्तत्र नद्यो मैत्रेय! याः पीयन्ते शृणुष्व ताः। सप्त प्रधाना शतशस्तथान्याः क्षुद्रनिम्नगाः। गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा। ख्यातिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः। तत्रापि वर्णैर्भगवान् पुष्कराद्यैर्जनार्द्दनः। योगी रुद्रस्वरूपस्तु इज्यते यज्ञसन्निधौ। क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च। आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः। दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः। क्रौञ्चद्वीपस्य विस्ताराद्द्विगुणेन महामते!"। "तथा वह्निः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परित उपक्लृप्तः। घृतो यथा कुशद्वीपो घृतोदेन। यस्मिन् क्रौञ्चो नाम पर्वतराजो द्वीपनामनिर्वर्त्तक आस्ते। योऽसौ गुहप्रहरणोन्मथितस्वकुञ्जोऽपि क्षीरोदेनाभिषिच्यमानो भगवता वरुणेनाभिगुप्तोविभयो बभूव। तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्रनामसु सप्त रिक्थादान् वर्षपान्निवेश्य स्वयं भगवतः परमकल्याणयशस आत्मभूतस्य हरेश्चरणारविन्दमुपजगाम। आमोमधुरुहो मेघपृष्ठः सुधामा भ्राजिष्ठो लोहितार्णो वनस्पतिरिति घृतपृष्ठसुताः। तेषां वर्षगिरयः सप्त सप्तैव नद्यश्चाभिख्याताः। शुक्लो वर्द्धमानो भोजन उपबर्हणो नन्दो नन्दनः सर्वतोभद्र इति। अभया

ऋस्तोया आर्य्यका तीर्थवती पवित्रवती शुक्लेति। यासामम्भः पवित्रममलमुपयुञ्जानाः पुरुषर्षभद्रविण-देवकसंज्ञावर्षपुरुषा आपोमयं देवमपांपूर्णेनाञ्जलिना यजन्ते" भाग० ५,२०,१२, अन्यथोक्तं कल्पभेदादविरुद्धम्। ८सामभेदे न० "क्रौञ्चानि भवन्ति" श्रुतिः तच्च साम गेयगाने १५प्र० २यार्द्धे ८,९गानम्। क्रौञ्चपर्वतश्च द्विविधः विष्णु-पुराणोक्तक्रौञ्चद्वीपान्तर्गतः श्वेतगिरेः सन्निकृष्टस्थः हिमवत्पौत्ररूपश्च तमेव प्रकृत्य "प्रालेयाद्रेरुपतटमति-क्रम्य तांस्तान् विशेषान् हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्" मेघदूते वर्णितम्"। क्रौञ्चादिव हंस-निवहो निर्ज्जगाम गुणगुणः" काद०

क्रौञ्चदारण पु० क्रौञ्चं पर्व्वतं दारयति दृ-णिच् ल्यु। १कार्त्तिकेये अमरः तद्दारणकथा क्रौञ्चशब्दे भा०व०२२४अ० वाक्यस्था। २परशुरामे च तत्कथा क्रौञ्चरन्ध्रशब्दे दृश्या

क्रौञ्चपदा "क्रौञ्चपदा भ्मौ स्भौ ननना नृगाविषुशरवसुमुनि विरतिरिह भवेत्" वृ० र० उक्ते पञ्चविंशत्यक्षरपादके छन्दोभेदे

क्रौञ्चपदी स्त्री भारतोक्ते तीर्थभेदे "अन्तःपृष्ठे पयस्याञ्च निरविन्दे च पर्व्वते। तृतीयां क्रौञ्चपद्याञ्च ब्रह्महत्यां विशुध्यति" भा० आनु० २५अ०

क्रौञ्चपुर न० यदुवंश्यसारमल्लपनिर्म्मिते पुरभेदे "सारसेनापि विहितं रम्यं क्रौञ्चपुरं महत्। चम्पकाशोकबकुलं वि पुलं ताम्रमृत्तिकम्। वनवासीति विख्यातः स्फीतोजन पदो महान्। पुरस्य तस्य तु श्रीमान् द्रुमैः सर्वर्त्तुकैर्वृतः। हरि० ९५अ० "ततः सह्याचलयुतं सहार्य्यं चाहमव्ययम्। आत्मद्वितीयः श्रीमन्तं प्रवेक्ष्ये दक्षिणापथम्। करवीर पुरञ्चैव रम्यं क्रौञ्चपुरं तथा" ९६अ० "तां (खट्वाङ्गीम्) तीर्त्वा निम्नगां तत्र तांश्च दृष्ट्वा तपोधनान्। रम्यं क्रौञ्चपुरं नाम गमिष्यामः पुरोत्तमम्" ९६अ०

क्रौञ्चबन्धम् अव्य० क्रौञ्चमिव बद्ध्वा "बन्धः संज्ञायायाम्" पा० णमुल् कषादिषु यथाविध्यनुप्रयोगः। क्रौञ्चमिव बद्ध्वा बद्ध इत्यर्थे

क्रौञ्चरन्ध्र न० क्रौञ्चस्य रन्ध्रम्। मानसस्थहंसनिर्गममार्गे क्रौञ्चपर्व्वतस्थे रन्ध्रे "हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम्" मेघ०। "मानसस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्ते इत्यागमः" मल्लि० क्रौञ्चादिव हंसनिवहो निर्जगाम गुणगणः" काद०। तच्च रन्ध्रं परशुरामेण कृतं यथा मेघदूतव्याख्याने मल्लिनाथध्याह "पुरा किल भगवतो देवात् धूर्जटेः धनुरुपनिषदम् अधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्द्धया क्रौञ्चं शिख-रिणम् अतिनिशितविशिखमुखेन हेलया मृत्पिण्ड भेदं भित्त्वा ततः क्रौञ्चभेदादेव सद्यःसमुज्जृम्भिते कस्मिन्नपि यशःक्षीरनिधौ निखिलमपि जगज्जालम् आप्लावितमिति" कथा श्रूयते"।

क्रौञ्चसूदन पु० क्रौञ्चं नामदैत्यमुतं सूदयति सूद-णिच-ल्यु। कार्त्तिकेये तस्य तथात्वं क्रौञ्चशब्दे स्कन्दसंहितायाः कथात् श्वेयम् "स ते स्कन्दः प्रसीदतु" इत्युपक्रमे "रम्यद्व्यम्बुर्देवः पातु त्वां क्रौञ्चसूदनः" सुश्रुते उक्तम्। क्रौञ्चनिसूदकादयोऽप्यत्र "ऋषभद्वीपमासाद्य सेव्यं क्रौञ्च-निसूदकम्। सरस्वत्यामुपस्पृश्य विमानस्थो विराजते" भा०व० ८४अ०

क्रौञ्चवत् पु० क्रौञ्चाः वकभेदा बाहुल्येन सन्त्यत्र मतुप् मस्य वः। पर्व्वतभेदे "कैलासं क्रौञ्चवन्तं च तथाद्रिं गन्धमादनम्" हरि० २०२अ०। क्रौञ्चयुक्तमात्रे त्रि० स्त्रियां ङीप्।

क्रौञ्चादन न० अद्यते कर्म्मणि ल्युट् ६त०। मृणाले २चि-ञ्चोटके (चेँचको) ३बेसुलिकायां (बेँचु) मेदिनि० ४पिप्पल्यां शब्दरत्ना० पद्मबीजे स्त्री० राजनि० ङीप्।

क्रौञ्चाराति पु० क्रौञ्चस्य दैत्यभेदस्यारातिः। १कार्त्तिकेये हला० २परशुरामे च शब्दमाला क्रौञ्चरिपुप्रभृतयोऽप्यत्र।

क्रौञ्चारण्य न० जनस्थानात् क्रोशत्रयान्तरे दण्डकारण्य पार्श्ववर्त्तिनि वनभेदे "ततः परं जनस्थानात् त्रिक्रोशं गम्य राघवौ। क्रौञ्चारण्यं विविशतुर्गहनं तौ महौ-जसौ" रामा० आर० ६९अ०। "ततः पूर्व्वेण गत्वा च त्रिक्रोशं भ्रातरावुभौ। क्रौञ्चारण्यमतिक्रम्य मतङ्गाश्र-मम् अन्तिके" तत्रैवोक्तेः तस्य मतङ्गाश्रमात् त्रिक्रोशान्त-रितपश्चिमस्थत्वम्।

क्रौशशतिक त्रि० क्रोशशतादभिगमनमर्हति ठञ्। १क्रोश-शतादागन्तरि भिक्षौ। क्रोशशतं गच्छति ठञ्। २क्रोश-शतगन्तरि त्रि०। उभतः स्त्रियां ङीप्।

क्रौष्टायण्य पुंस्त्री० प्रकृतिपक्षे लिङ्गविशिष्टस्यापि पक्षणात् क्रोष्टुत्रा गोत्रापत्यम् कुञ्जा० च्फञ् ततः स्वार्थे व्यस्त्रियाम् ञ्य। क्रौष्टायण्यः क्रोष्टुगोत्रोत्पन्नास्त्रियागोत्रापत्ये। बहुषु यस्का० लुक्। क्रौष्टायणाः तद्गोत्रापत्येषु। ततः आरी-हणा० चतुरर्थ्याम् वुञ्। क्रौष्टायणक तत्सन्निकृष्टदेशादौ त्रि०।

क्रौष्टुकि पुंस्त्री० क्रोष्टेव स्वार्थे अ तस्यापत्यम् इञ्। १क्रोष्टु-

कर्बुरपत्ने स्त्रियां ङीप्। रक्षोभेदे पु०। "तहको द्रविणोदाः ? इन्द्र इति क्रौष्टुकिः" निरुक्त० ८,२

क्लथ बधे वा चुरा० उभ०पक्षे भ्वा०प०सेट घटादि०। क्लथयति ते क्लथति, अचिक्लथत् अक्लाथीत् अक्लथीत्। क्लथयांबभूव आस चकार चक्रे चक्लाथ। मध्ये घृतस्रावपर्तने च। "पौष्णो विष्यन्दमाने मारुतः क्लथन्" यजु० ३९,५, "क्लथनं मध्ये घृतस्रावपर्तनम्"वेददीपः

क्लद रोदने अक० आह्वाने सक० इदित् भ्वा० पर० सेट्। क्लन्दति अक्लन्दीत्। चक्लन्द। क्लन्द्यते

क्लद वैकल्ये दि० आत्म० अक०सेट घटादि०। क्लद्यते अक्लादिष्ट चक्लदे। क्लदयति त अचिक्लदत् त।

क्लद रोदने भ्वा० उभ० इदित् अक० सेट्। क्लन्दति ते अक्लन्दीत् अक्लन्दिष्ट। चक्लन्द चक्लन्दे। क्लन्द्यते "याः क्लन्दास्तमिषीचयो ऽक्षकामामनो मुहः ताभ्यो गन्धर्वपत्नीभ्योऽप्सराभ्योऽकरं नमः" अथ० २,२,५

क्लप अव्यक्तवाक्ये चुरा० उभ० अक० सेट् घटा०। क्लपयति-ते अचिक्लपत्—त। क्लपयां बभूव आस चकार चक्रे

क्लम ग्लानौ दिवा०पर०अक०सेट् शमा०। क्लाम्यति अक्लमीत् चक्लाम। उदित् क्लमित्वा—क्लान्त्वा। क्लान्तः। घञि न वृद्धिः क्लमः। क्लम्यते अक्लमि। "क्लमं ययौ कन्दुकलीलयाऽपि या" "अक्लाम्य सा नियमजं क्लमसुत्ससर्ज" कुमा० "न चक्लाम न विव्यथे" भट्टिः "तपः क्लमं साधयितं य इच्छति" शकु०

क्लम ग्लानौ भ्वा० पर० अक० सेट्। क्लमति इरित् अक्लमत् अक्लमीत् चक्लाम। क्लमित्वा। क्लमितः।

क्लम पु० क्लम—भावे घञ् अवृद्धिः। "योऽनाय सः श्मनोद्देशे प्रवृद्धः श्वासमक्ततः। क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः"। भावप्र० उक्ते श्रमभेदे।

क्लमथ पु० क्लम-अथच्। आयासे अमरः।

क्लमिन् त्रि० क्लम-घिनुण् अवृद्धिः। क्लान्तियुक्ते।

क्लव भये दिवा० आत्म० अक० सेट् घटादि०। क्लव्यते अक्लविष्ट। चक्लवे। क्लवयति। वि-वैकल्ये विक्लवः।

क्लान्त त्रि० क्लम-क्त। श्रमार्त्ते। [यस्तदानीम्" माघः।

क्लान्ति स्त्री क्लम-क्तिन्। परिश्रमे "क्लान्तिच्छिदोवनवनस्तत-

क्लिद आर्द्रीभावे दिवा० पर० अक० वेट्। क्लिद्यति। इरित्। अक्लिदत्-अक्लेदीत्-अक्लेत्सीत्। चिक्लेद। क्लेदः। क्लिद्यन् क्लेदी। क्लेदयति ते। अचिक्लिदत् त। "तेन क्लिद्यति व्रणः" सुश्रु०। "कुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम्। योनिः क्लिद्यति नारीणाम्" स्मृतौ। "लुठन्ति भूमौ क्लिद्यन्ति बाष्पशा मे स्वपन्ति च" भट्टिः। "कुन्त्याः प्रस्रवसंयुक्तैरसैः क्लिन्नमुरोऽभवत्" भा० आ०१३५। "नचैनं क्लेदयन्त्यापो न शोषयति मारुतः। अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च" गीता। "रक्तैश्चिक्लिदद्भूमिम् सैन्यैर्घातस्तरद्धतैः" भट्टिः। उपसर्गविशेषपूर्वकस्तु तत्तदुपसर्गद्योत्यार्थविशिष्टे क्लेदे।

क्लिद रोदने इदित् भ्वा० उभ० अक० सेट्। क्लिन्दति ते अक्लिन्दीत् अक्लिन्दिष्ट। चिक्लिन्द चिक्लिन्दे। क्लिन्दितः। परिदेवने शोके सक०आत्म०। क्लिन्दते चैत्रम्"सि०कौ०।

क्लिन्न त्रि० क्लिद-कर्त्तरि क्त। आर्द्रे (भिजे) क्लिद्धातौ उदा०

क्लिन्नवर्त्मन् न० "अक्लिन्नं बाह्यतः शूनमन्तःक्लिन्नं स्रवत्यपि। कण्डूनिस्तोदभूयिष्ठं क्लिन्नवर्त्म तदुच्यते" सुश्रुतोक्ते नेत्रावयवभेदवर्त्माश्रये रोगभेदे।

क्लिब पु० क्लप् क्विप् पृषो०। लोके। "ओं क्रतो! स्मर क्लिबे स्मर कृतं स्मर" यजु० ४०,१५, "क्लिबे क्लृप्ताय लोकाय स्मर" माधवः। "कल्पते भोगाय क्लप् लोकः तस्मै स्मर जपादेश आर्षः छन्दस्युभयथेति"पा०"पदान्तत्वात्"वेददी०

क्लिश उपतापे दिवा० आ० अक० उपतप्तीकरणे सक० सेट् पा०। क्लिश्यते अक्लेशिष्ट। क्लिशित्वा क्लिष्ट्वा। क्लिशितः क्लिष्टः। अविकल्पमते अयमुभयपदी तेन "क्लिश्यन्नपि हि मेधावी" प्रत्याहरहुकारदीधितिकरक्लिश्यत्तमोवल्लयीति" न्यपालसौ चिक्लिशतुः सखीतौ" भट्टिः साधुः सकर्मकत्वे "इन्द्रियैः कामवृत्तैस्तु क्लिश्यते प्राकृतो यथा" रामा० कि० १६,२७, अकर्मकत्वे "क्लिश्यन्ते हि जनाः सर्व्वे: तरमाणाः पुनः पुनः"भा० व० १३१अ०। "चिरं क्लिशित्वा मर्म्मवित्" भट्टिः परस्मैपदित्वे "वयः परार्थे क्लिश्यन्ति साक्षिणः प्रतिभूः कुलम्" मनुः। "हिमक्लिष्टप्रभावानि ज्योतींषीव मुखानि वः" कुमा०। "क्लेशः फलेन हि पुनर्नवतां विधत्ते" कुमा०।

उपसर्गपूर्व्वकस्तु तत्तदुपसर्गविशेषद्योत्यार्थोपतापे

क्लिश बाधने सक०क्र्या०ऊदित् वेट्। क्लिश्नाति अक्लेशीत् अक्लिक्षत् चिक्लेश। क्लिष्टः। क्लेशः क्लिशित्वा क्लिष्ट्वा। क्लिशितः क्लिष्टः "इत्यमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम्" कुमा०। "अयं मां सुदृढं क्षुद्रः कौरवाणां यशोहरः। क्लिश्नाति नाहं तत् सोढुं चिरं शक्ष्यामि कौरव!" भा०स० ६७। "असुरस्तारकोनाम त्वया दत्तवरः प्रभो!। सुरान्दमीय क्लिश्नाति कथस्तस्य विधीयताम्" भा० आनु० ८५अ०

"क्लिश्नन्निवास्य भुजमध्यमुरःस्थलेन" रघुः। अत्र मल्लिनाथः क्लिश्नन्निति पठित्वा क्लिश्नातिरयं सकर्म्मकः "क्लिश्नाति भुवनत्रयमिति दर्शनादिति व्याचख्यौ। तेन टीकापुस्तके क्लिश्यन्निति पाठः प्रामादिक एव।
उपसर्गविशेषात्तु तत्तदुपसर्गद्योत्यार्थयुक्ते बाधने।
परि+सर्व्वतोबाधने। "परिक्लिश्यमाने" पा०।

क्लिशित त्रि० क्लिश–क्त वा इट्। १क्लेशयुक्ते २उपतापिते च

क्लिष्ट त्रि० क्लिश-क्त वा इडभावः। १क्लेशयुक्ते २पीडिते च। ३पूर्व्वापरविरुद्धार्थके वाक्ये न० अमरः

क्लिष्टा स्त्री क्लिष्टं क्लेशः अस्त्यस्याम् अच्। पातञ्जलोक्ते चित्तवृत्तिभेदे यथा
"वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः" सू०
"क्लेशहेतुकाः कर्म्माशयप्रचयक्षेत्रीभूताः क्लिष्टाः। ख्यातिविषया गुणाधिकारविरोधिन्योऽक्लिष्टाः क्लिष्टप्रवाहपतिता अप्यक्लिष्टाः। क्लिष्टच्छिद्रेष्वप्यक्लिष्टा भवन्ति। अक्लिष्टच्छिद्रेषु क्लिष्टा इति। तथाजातीयकाः संस्काराः वृत्तिभिरेव क्रियन्ते संस्कारैश्च वृत्तय इति एवं वृत्तिसंस्कारचक्रमनिशमावर्त्तते तदेवम्भूतं चित्तमवसिताधिकारमात्मकल्पेनावतिष्ठते प्रलयं वा गच्छतीति। ताः क्लिष्टाश्च पञ्चधा वृत्तयः" भा०
"स्यादेतत् पुरुषो हि शक्य, उपदिश्यते। न च वृत्तिनिरोधो वृत्तीरविज्ञाय शक्यो, न च सहस्रेणापि पुरुषायुषैरलमिमाः कैश्चित् परिगणयितुमसङ्ख्यातांश्च कथं निरोधव्या इत्याशङ्क्य तासामियत्तास्वरूपप्रतिपादनपरं सूत्रमवतारयति ताः दुर्निरोद्धव्या बहुत्वे सति चित्तस्य वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः। वृत्तिरूपोऽवयव्येकः। तस्य प्रमाणादयोऽवयवाः पञ्च ततस्तदवयवाः पञ्चतय्यः पञ्चावयवा वृत्तिर्भवति ताश्च वृत्तयश्चैत्रमैत्रादिचित्त-भेदात् बह्व्य इति बहुवचनमुपपन्नम् एतदुक्तं भवति चैत्रो वा मैत्रो वा कश्चित्सर्व्वेषामेव तेषां वृत्तयः पञ्चतय्यः एव नाधिका इति। चित्तस्येति चैकवचनं जात्यभिप्रायं चित्तानामिति तु द्रष्टव्यम्। तासामवान्तरविशेषमनुष्ठानोपयोगिनं दर्शयेति। क्लिष्टाऽक्लिष्टा इति। अक्लिष्टा उपादेयाः क्लिष्टा निरोद्धव्यास्ता अपि परेण वैराग्येणेति। अस्य व्याख्यानम्। क्लेशहेतुका इति। क्लेशाः अस्मितादयो हेतवः प्रवृत्तिकारणं यासां वृत्तीनान्तास्तथोक्ताः। यद्वा पुरुषार्थं प्रधानस्य रजस्तमोमयीनां हि वृत्तीनां क्लेशकारित्वेन क्लेशैरेव प्रवृत्तिः क्लेशः क्लिष्टम् तदासामस्तीति क्लिष्टा इति। यत एव क्लेशोपार्जनार्थममूषां प्रवृत्तिरत एव कर्म्माशयप्रचयक्षेत्रीभूताः प्रमाणादिकाः। स्वस्यं प्रतिपत्त्यर्थमवसाय तत्र सक्तोऽद्दिष्टो वा कर्म्माशयमाचिनोतीति भवन्ति धर्म्माधर्म्मप्रचयप्रसवभूमयो वृत्तयः क्लिष्टा इति अक्लिष्टा व्याचष्टे ख्यातिविषया इति। विधूतरजस्तमसो बुद्धिसत्त्वस्य प्रशान्तवाहिनः प्रज्ञाप्रसादः ख्यातिस्तया विषयिण्या तद्विषयं सत्त्वपुरुषविवेकमुपलक्षयति तेन सत्त्वपुरुषविवेकविषया यतः अतएव गुणाधिकारविरोधिन्यः कार्य्यकरणं हि गुणानामधिकारो विवेकख्यातिपर्य्यवसानश्च स इति चरिताधिकाराणां तु गुणानामधिकारं विरुन्धति इति अतस्ता अक्लिष्टाः प्रमाणप्रभृतयो वृत्तयः। स्यादेतत् वीतरागजन्मादर्शनात् क्लिष्टवृत्तय एव सर्व्वं प्राणभृतां न च क्लिष्टवृत्तिप्रवाहे भवितुमर्हन्त्यक्लिष्टवृत्तयः। नचामूषां भावेऽपि कार्य्यकारिता विरोधिमध्यपातित्वात्। तस्मात् क्लिष्टानामक्लिष्टाभिर्निरोधस्तासां च वैराग्येण परेणेति मनोरथमात्रमित्यत आह। क्लिष्टप्रवाहेति। आगमानुमानाचार्य्योपदेशपरिशीलनलब्धजन्मनी अभ्यासवैराग्ये क्लिष्टच्छिद्रान्तरे तत्र पतिताः स्वयमक्लिष्टा एव यद्यपि क्लिष्टप्रवाहपतिताः। न खलु विशालग्रामे किरातशतसङ्कीर्णे प्रतिवसन्नपि ब्राह्मणः किरातो भवति। अक्लिष्टच्छिद्रेष्विति निदर्शनम्। क्लिष्टान्तर्वर्त्तितया च क्लिष्टाभिरनभिभूता अक्लिष्टाः स्वसंस्कारपरिपाकक्रमेण क्लिष्टा एव तावदभिभवन्तीत्याह तथाजातीयका इति। अक्लिष्टाभिर्वृत्तिभिरक्लिष्टाः संस्कारा इत्यर्थः। तदिदं वृत्तिसंस्कारचक्रमनिशमावर्त्तते आनिरोधसमाधेः तदेवं भूतञ्चित्तं निरोधावस्थं संस्कारशेषं भूत्वात्मकल्पेनावतिष्ठत इत्यापाततः। प्रलयं वा गच्छतीति परमार्थतः। पिण्डीकृत्य सूत्रार्थमाह। ता इति पञ्चधेत्यर्थकथनमात्रं न तु धावद्वृत्तिव्याख्यानं तयपः प्रकारेऽस्मरणात्। ताः स्वसंज्ञाभिरुद्दिशति" विव०
"प्रमाणविपर्य्ययविकल्पनिद्रास्मृतयः" सू०
"निर्द्देशे यथावचनं विग्रहवाक्ये द्वन्द्वसमास इतरेतरयोग। यथाऽनित्याऽशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येत्युक्तेऽपि न दिङ्मोहालातचक्रादिविभ्रमा व्युदस्यन्ते। एवमिहापि प्रमाणाद्यभिधानेऽपि वृत्त्यन्तरराशङ्कावकाशान व्युदस्येति तन्निरासाय वक्तव्यं पञ्चतय्य इति एतावत्य एव वृत्तयो नापराः सन्तीति दर्शितं भवति" विव०

क्लिष्टि स्त्री क्लिश-क्तिन्। १क्लेशे २सेवायां च धर्णिः।

क्लीत पु० सुश्रुतोक्ते अग्निप्रकृतिके कीटभेदे । "क्लीतः क्रमिसरारी च" सुश्रुतः कीटशब्दे विवृतिः

क्लीतक न० क्लीव-क्विप् नि०वलोपः क्लियं तकति हसते अच् । मधूके (यष्टिमधु) । अमरः । "तत्र क्लीतकाश्वमारगुञ्जासुगन्धगर्गरककरघाटविद्युद्विवापिलयानीत्यष्टौ मूलविषाणि" सुश्रुतः । २करञ्जबीजे "आत्मनि मन्त्रान् संनमयेत्" "एकक्लीतकेन" आश्व० श्रौ०१,८,७,८, "करञ्जबीजस्य यत्रैकं बीजं तदेकक्लीतकम्" नारा० वृ० ।

क्लीतकिका स्त्री क्लीतादागतः कन् क्लीतकः विक्रयः निन्दायां ठन् रस्य लः । नीलग्रामौषधौ अमरः । नीलग्राः विक्रयस्य निनिन्दितत्वमाह मिता० आपस्तम्बः "रोमकूपे यदा गच्छेद्रसो नीलग्रास्तु कस्यचित् । त्रिवर्णेषु च सामान्यात्तप्तकृच्छ्रं विशोधनम् । पालनं विक्रयश्चैव तद्वृत्त्या चोपजीवनम् । पतनञ्च भवेद्विप्रे त्रिभिः कृच्छ्रैर्व्यपोहति"

क्लीतनक न० क्लीतं कीटभेदं नुदति नुद-बा० ड संज्ञायां कन् । मधूलिकायाम् अतिरसायाम् राजनि० ।

क्लीब(व) वैकल्ये अप्रागल्भ्ये च भ्वा० आत्म० अक० सेट् । क्लीब(व)ते अक्लीबि(वि)ष्ट । चिक्लीबे(वे) क्लीबि(वि)त्वा । धा० मते अयं पवर्गान्त्यः कविक० मते अन्त्यस्थान्त्यः । ऋदित् चङि अचिक्लीब(व)त् त ।

क्लीब(व) पु० न० । क्लीब(व)-क । पुंस्त्रीभिन्ने तृतीयप्रकृतौ षण्ढे । स च "न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति । मेढ्रं चोन्मादशुक्राभ्यां हीनः क्लीबः स उच्यते" इति कात्यायनोक्तलक्षणः । स च चतुर्द्दशविधः नारदेन दर्शितो यथा ।

"चतुर्द्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः । चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् । निसर्गषण्ढो१ ऽनषण्डश्च २पक्षषण्ड ३स्तथैव च । अभिशापात् गुरो ४रोगात् ५देवक्रोधात् ६तथैव च । ईर्ष्याषण्ढश्च ७स्तथाऽऽसेक्यो ८वातरेता ९मुखेभगः१० । आक्षिप्त ११मोघबीजश्च १२शालीनो १३ऽन्यापति १४स्तथा । तत्राद्यावप्रतीकार्य्यौ पक्षाख्यं मासमाचरेत् । अनुक्रमात्त्रयस्याथ कालः संवत्सरः स्मृतः । ईर्ष्या षण्डादयोयेऽन्ये चत्वारः समुदाहृताः । त्यक्तव्यास्ते पतितवत् क्षतयोन्या अपि स्त्रियाः । आक्षिप्त मोघबीजाभ्यां क्षतेऽपि पतिकर्म्मणि । पतिरन्यः स्मृतोनार्य्या वत्सरार्द्धं प्रतीक्ष्य तु । शालीनस्यापि दृष्टस्त्रीसंयोगाद्भ्रश्यते ध्वजः । तं हीनवेगमन्यस्त्रीबालाद्याभिरुपाचरेत् । अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति । लभेत सान्यं भर्त्तारमेतत्कार्य्यं प्रजापते । अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः । क्षेत्रं बीजवते देयं सबीजी क्षेत्रमर्हति" अत्र "नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" इति क्लीबपतिपरित्यागे प्राप्ते क्लीबस्य चिकित्स्याचिकित्स्यत्वभेदेन द्वैविध्यमुक्त्वा चिकित्स्यस्य कालविशेषपर्य्यन्तं सुश्रुताद्युक्तवाजीकरणादिना उपचर्य्यता अचिकित्स्यस्य तु सर्वथा त्याज्यता दर्शिता । तत्र निसर्गषण्डः प्रसूतो मातापित्रोः समवीर्य्यजातः । अनषण्डः अण्डहीनः छिन्नाण्डः हतक्लीबश्च तौ द्वौ अप्रतीकार्य्यौ अचिकित्स्यौ । पक्षाख्यं पक्षव्यापकषण्ड मासमाचरेत् चिकित्सेत् । त्रयस्य गुरोरभिशापरोगदैवकोपहतकर्क्लब्यस्य संवत्सरं चिकित्स्यत्वम् । ईर्ष्याषण्डादयस्तु चत्वारः अचिकित्स्यत्वात् पतिततुल्यत्वेन सर्वथा त्याज्याः न तत्र कालप्रतीक्षा । आक्षिप्ता बीजस्य ईर्षत्क्षेप्ता दर्शनमात्रादिना स्खलितवीर्य्यः मोघवीर्य्यः अपत्योत्पादनायोग्यबीजः एतौ द्वौ षण्मासं चिकित्स्यौ शालीनस्य तु चिकित्स्यत्वेन अत्याज्यता । अन्यपतेस्तु सर्वथा त्याज्यता । अत्र क्षतयोन्या इति विशेषणात् क्लीबपतित्यागवचनं वाग्दत्ताविषयमिति कल्पनं निरस्तम् । नष्टे मृतेइत्यादिवचनं युगान्तरविषयम् "दत्तायाश्चैव कन्यायाः पुनर्दानं वरस्य च" इत्यादित्यपुराणे कलिवर्ज्यधर्म्माभिधानात् इति माधवाचार्य्यः । अन्ये तु कलिधर्म्मप्रकरणे पराशरेण तथाविधानात् स्मृतेः पुराणात् बलवत्त्वेन कलावपि तत्प्रवृत्तिरित्याहुः । साम्प्रदायिकास्तु वेदार्थानुभयजन्यमुनिप्रणीतवाक्यस्यैव स्मृतित्वेन पुराणान्तर्गतधर्म्मविधायकनिषेधवाक्ययोरपि स्मृतित्वात् "द्वैधे बहूनां वचनमिति" न्यायेन बहूनां तथासम्मत्यभावात् शिष्टाचारविरोधाच्च पराशरवाक्यमनादृत्य बहुसम्मत एव पक्ष आदरणीय इत्याहुः । ईर्ष्याषण्डादिलक्षणं सुश्रुतोक्तम् । सुश्रुते तु नपुंसकोत्पत्तिकारणसहितास्तद्भेदा अन्यथा दर्शिता यथा

"पित्रोरत्यल्पबीजत्वादासेक्यः पुरुषो भवेत् । स शुक्रं प्राश्य लभते ध्वजोच्छ्रायमसंशयम् । यः पूतियोनौ जायेत स सौगन्धिकसंज्ञितः । स योनिशेफसोर्गन्धमाघ्राय लभते बलम् । स्वे गुदेऽब्रह्मचर्य्याद्यः स्त्रीषु पुं-

वत् प्रवर्त्तते। कुम्भीकः स च विज्ञेय ईर्ष्यकं शृणु चापरम्। दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्त्तते। ईर्ष्यकः स च विज्ञेयः षण्डकं शृणु पञ्चमम्। यो भार्य्यायामृतौ मोहादङ्गनेव प्रवर्त्तते। ततः स्त्रीचेष्टिताकारो जायते षण्डसंज्ञितः। ऋतौ पुरुषवद्वापि प्रवर्त्तेताङ्गना यदि। तत्र कन्या यदि भवेत् सा भवेन्नरचेष्टिता। आसेक्यश्च सुगन्धी च कुम्भीकश्चेर्ष्यकस्तथा। सरेतसस्त्वमी ज्ञेया अशुक्रः षण्डसंज्ञितः। अनया विप्रकृत्या तु तेषां शुक्रवहाः शिराः। हर्षात् स्फुटत्वमायान्ति ध्वजोच्छ्रायस्ततो भवेत्"।

तस्य दायानधिकारिता अनंशशब्दे १४२पृ०उक्ता। तत्राय विशेषः। "क्लीवोऽथ पतितस्तज्जः पङ्गुरुन्मत्तको जडः। अन्धोऽचिकित्स्यरोगाद्याभर्त्तव्याः स्युर्निरंशकाः" या० व्याख्या मिता० "एतेषां विभागात् प्रागेव दोषप्राप्तावनंशत्वं न पुनर्विभक्तानां, विभागोत्तरकालमप्यौषधादिना दोषनिर्हरणे भागप्राप्तिरस्त्येव "विभक्तेषु सुतोजातः सवर्णायां विभागभाक्" इत्यस्य समानन्यायात्। क्लीवान्धौ यदि जन्मत आरभ्य तदा विभागानर्हावेव यदि त्वन्तरा तदा, तदपगमश्चेदौषधादिना, तर्हि "दृश्याद्वा तद्विभागः स्यादायव्ययविशोधितादिति" रीत्या विभागार्हावेवेत्युक्तम्"। अत्र विशेषः क्लीवादीनामनंशत्वात्तत्पुत्राणामप्यनंशत्वे प्राप्त इदमाह" मिता० "औरसाः क्षेत्रजास्त्वेषां निर्दोषा भागहारिणः"। या० "एतेषां क्लीवादीनामौरसाः क्षेत्रजा वा पुत्रा निर्दोषा अंशग्रहणविरोधिक्लैव्यादिदोषरहिता भागहारिणः, अंशभागिनो भवन्ति। तत्र क्लीवस्य क्षेत्रजः पुत्रः सम्भवत्यन्येषामौरसा अपि। औरसक्षेत्रजयोर्ग्रहणं इतरपुत्रव्युदासार्थम्। क्लीवादिदुहितृणां विशेषमाह मिता०"। "सुताश्चैषां प्रभर्तव्या यावद्वै भर्तृसात्कृताः"। या० "एतेषां क्लीवादीनां सुता दुहितरो यावद्विवाहसंस्कृता न भवन्ति तावद्भरणीयाः। चशब्दात्संस्कार्याश्च। क्लीवादिपत्नीनां विशेषमाह मिता०" "अपुत्रायोषितश्चैषां भर्त्तव्याः साधुवृत्तयः। निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च" या०। "एषां क्लीवादीनामपुत्राः पत्न्यः साधुवृत्तयः सदाचाराश्चेद्भर्त्तव्या भरणीयाः। व्यभिचारिण्यस्तु निर्वास्याः। प्रतिकूलास्तथैव च निर्वास्या भवन्ति भरणीयाश्चाव्यभिचारिण्यश्चेत्। न पुनः प्रातिकूल्यमात्रेण भरणमपि न कर्त्तव्यम्" मिता०

वीरमित्रोदये विशेषः "क्लीवादीनामपि दारपरिग्रहेण पुत्रस्य भव उक्तो मनुना "यद्यर्थिता तु दारैः स्यात् क्लीवादीनां कथञ्चन। तेषामुत्पन्नतन्तूनामपत्यं दायमर्हति"। तन्तुरपत्यम्। नच क्लीवादेरुपनयनाभावेन पतितत्वात् कथं दारसम्बन्ध इति वाच्यम्। उपनयनानर्हतया अनुपनीतत्वे शूद्रवदपतितत्वात्"।

एतच्चिन्त्यं "सुखेभगाश्च ये केचित् क्लीवप्राया नपुंसकाः। ब्रह्मदण्डहता ये च ये च वै ब्राह्मणैर्हताः। महापातकिनो ये च पतितास्ते प्रकीर्त्तिता" शु० त० ब्रह्मपु० क्लीवस्य पतितत्वोक्तेः। केचित्तु तत्र उत्तरार्द्धे "पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः पातः कर्त्तव्यो नचाश्रुनाशो च सुदकक्रिया" इत्युक्तेरशौचाद्यभावाङ्गमिदं पातित्यं नान्यत्र। अतएव अनंशिगणनायां याज्ञवल्क्यादिभिः पतितात् पृथक् क्लीवस्य कीर्त्तनं सङ्गच्छते इत्याहुः। मनुनाऽस्यापाङ्क्तेयत्वमुक्तम् "आचारहीनः क्लीवश्च नित्ययाचनकस्तथा" इत्युपक्रमे "एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान्" इति। "अस्योत्पत्तौ कारणमुक्तं मनुना। "पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः। साम्येऽपुमान् पुंस्त्रियौ वा क्षीणाल्पे च विपर्य्ययः" "पुंसोबीजे अधिकेऽयुग्मास्वपि पुत्रो जायते स्त्रीबीजेऽधिके युग्मास्वपि दुहितैव। अतोवृष्याहारादिना निजबीजाधिक्यं भार्य्यायाश्चाहारलाघवादिना बीजाल्पत्वमवगम्यायुग्मास्वपि पुत्रार्थिना गन्तव्यमिति दर्शितं स्त्रीपुंसयोस्तु बीजसाम्येऽपुमान् नपुंसकं जायते पुंस्त्रियाविति यमौ निःसारेऽल्पे चोभयोरेव बीजे गर्भस्यासम्भवः" कुल्लू०।

कर्त्तव्यकर्म्मसु२निरुद्यमे ३अधीरे ४विक्रमहीने अमरः तस्य भावः ष्यञ्। क्लैव्य न०। तल् क्लीवता स्त्री। त्व क्लीवत्व न० तद्भावे "मा क्लैव्यं गच्छ कौन्तेय! नैतत्त्वय्युपपद्यते" गीता। "पुनरक्लीवतया प्रकाश्यताम्" रघुः। "अक्लीवतया धैर्य्येण" मल्लि०। "कोहि धर्म्मोऽस्ति ते भीष्म! ब्रह्मचर्य्यमिदं वृथा। यद्धारयसि मोहाद्वा क्लीवत्वाद्वा न संशयः" भा० स०४०अ०। क्लैव्यञ्च पुंस्त्वेन्द्रियोपघातः अशक्तिशब्दे ४७२ पृ० उदा०। जातस्य क्लीवताकारणं च सुश्रुते दर्शितं यथा "शुक्रवहे द्वे धमन्यौ तयोर्मूलं स्तनौ वृषणौ च तत्र विद्धस्य क्लीवता चिरात् प्रसेको रक्तशुक्रता च"। "क्लीवरूपांस्तिरीटिनः" अथ० ८,६,७, क्लीवइवाचरति क्यङ् क्विप् वा। क्लीवायते। क्ला-

३पि आत्मक्लीबते मुग्ध० । ४शब्दनिष्ठधर्म्मभेदे तद्विवृतिः शब्दार्थरत्ने यथा

"लिङ्गत्वञ्च प्राकृतगुणगतावस्थात्मको धर्म्म एव तद्विशेषश्च पुंनपुंसकत्वादिः । तथा हि सर्व्वेषां त्रिगुणप्रकृतिकार्य्यतया शब्दानामपि तथात्वेन गुणगतविशेषाच्छब्देषु लिङ्गविशेष इति कल्प्यते स च विशेषः शास्त्रे इत्यमभ्यधायि । विकृतसत्वादीनां तुल्यरूपेणावस्थानात् नपुंसकत्वं सत्वस्याधिक्ये पुंस्त्वम्, रजआधिक्ये स्त्रीत्वमिति । एवञ्च लिङ्गस्य शब्दधर्म्मत्वेऽपि शब्देन सहार्थाभेदारोपात् असति बाधके अर्थेऽपि साक्षात् तत्पारतन्त्र्येण वा सर्व्वत्र तस्य विशेषणत्वम् शाब्दबोधे शब्दभानस्येष्टत्वाच्च शब्दस्य नामार्थतावत् तद्गतलिङ्गस्यापि नामार्थतौचित्यात् "न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते" इतिप्रागुक्तेः "शब्दोऽपि यदि भेदेन विवक्षा स्यात्तदा तथा । नो चेत् श्रोत्रादिभिः सिद्धोऽप्यसावर्थेऽवभासते" इतिहर्य्युक्तेश्च शब्दाना नामार्थतावगतेः । तथा प्रातिपदिकार्थः । अभेदविवक्षायां तु श्रोत्रादिभिरेव सिद्धः ज्ञातः सन् अर्थे प्रकारतया भासते इति तदर्थः । युक्तञ्चैतत् पुंलिङ्गः शब्द इतिव्यवहारात् "स्वमोर्नपुंसकादिति" पा०सूत्रे शब्दस्यैव नपुंसकत्वव्यपदेशात् दारानित्यादौ पुंस्त्वान्वयबाधाच्च लिङ्गस्य शब्दधर्म्मत्वमन्यथैतेषु लिङ्गाद्यनन्वयापत्तेर्व्यवहारसूत्रनिर्द्देशासङ्गत्यापत्तेश्च । तथा अर्थभेदाच्छब्दभेदवत् लिङ्गभेदादपि शब्दभेद इति कल्प्यते प्रागुक्तधर्म्मविशेषरूपभेदकसद्भावात् । उक्तञ्च भाष्ये "एकार्थे शब्दान्यत्वाद् दृष्टं लिङ्गान्यत्वमिति" । एवञ्च तटादिशब्दानामनेकलिङ्गत्वव्यवहारः समानानुपूर्व्वीकत्वेनैव वस्तुतस्तेषां भिन्नानामेव भिन्नलिङ्गत्वमिति दिक्" । "अकारादि क्षकारान्तान् क्लीवहीनान् लिखेत्ततः । ऋॠवर्णद्वयं ऌॡद्वयं क्लीवं प्रचक्षते" अकडमचक्रे तन्त्रसारोक्ते ऋकारादिवर्णचतुष्के च

क्लु गतौ भ्वा० आ० सक० अनिट् । क्लवते अक्लोष्ट चुक्लुवे

क्लृप्त त्रि० क्लृप—क्त । १रचिते २कल्पिते ३विहिते ४निर्म्मिते च शब्दच० "पतिंवरा क्लृप्तविवाहवेषा" "क्लृप्तेन सोपानपथेन मञ्चम्" रघुः । ५वापिते च "क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः" मनुः ।

क्लृप्तकीला स्त्री क्लृप्तं कीलमत्र । (पाट्टा) इतिख्याते । निर्द्दिष्टकरग्रहणार्थं दत्तभूमिग्रहणोपयोगिस्वत्वज्ञापके पत्रभेदे त्रि० ।

क्लेद पु० क्लिद—भावे घञ् । १आर्द्रतायाम् । सा च जलविकारभेदः यथाह या० "रसात्तु रसनं शैत्यं स्नेहं क्लेदं समार्द्दवम्" । "रसादुदकात् रसनेन्द्रियं शैत्यमङ्गानां, स्नेहं स्निग्धताम् मृदुतासहितं क्लेदमार्द्रताम्" मिता० । देहस्थः क्लेदश्च श्लेष्मकार्य्यः क्लेदनशब्दे विवृतिः । "तदङ्गनक्लेदसमाकुलाक्षम्" "स तौ कुशलवोन्मृष्टगर्भक्लेदौ तदाख्यया" रघुः । २पूतीभावे शब्दचि० "पदस्थितस्य पद्मस्य बन्धू वरुणभास्करौ । पदाच्च्युतस्य तस्यैव क्लेदशोषकरावुभौ"

क्लेदक त्रि० क्लेदयति क्लिद णिच् ण्वुल् । १क्लेदकारके देहस्थकफे क्लेदनशब्दे विवृतिः । २क्लेदकारके जलादौ त्रि० । देहस्थदशवह्निमध्ये ३वह्निभेदे अग्निशब्दे ५० पृ० पदार्थादर्शवाक्यम् दृश्यम् । जलस्य क्लेदकत्वेऽपि तत्र अग्नेः साहचर्य्यादेव तथात्वम् ।

क्लेदन् पु० क्लेदयति क्लिद-णिच्—कनिन् (चन्द्रे उणा०)

क्लेदन पु० क्लेदयति क्लिद—णिच् ल्यु । क्लेदकारके देहस्थे श्लेष्मभेदे तद्विवृतिः भावप्रकाशे

"कफस्यैतानि नामानि क्लेदनश्चावलम्बनः । रसनः स्नेहनश्चापि श्लेष्मणः स्थानभेदतः । अथ क्लेदनादीनां स्थानान्याह "आमाशयेऽथ हृदये कण्ठे शिरसि सन्धिषु । स्थानेष्वेषु मनुष्याणां श्लेष्मा तिष्ठत्यनुक्रमात्" । दोषाणां सकलशरीरव्यापिनामपि पञ्च पञ्च स्थानानीति बाहुल्याभिप्रायेणोक्तानि । तथाच वाग्भटः "इति प्रायेण दोषाणां स्थानान्यविकृतात्मनाम । व्यापिनामपि जानीयात् कर्म्माणि च पृथक् पृथक्" । चरकश्च "ते व्यापिनोऽपि हृन्नाभ्योरधोमध्योर्द्ध्वसंश्रयाः" इति । अथ तत्तत्स्थानगतस्य श्लेष्मणः कर्म्माण्याह "क्लेदनः क्लेदयत्यन्नमाशयस्थान्यपराण्यपि । अनुगृह्णाति च श्लेष्मस्थानान्युदककर्म्मणा" । अयमर्थः क्लेदनोऽन्नं क्लेदयति तेन संहतमन्नं भेदं प्राप्नोति । अपराण्यपि श्लेष्मस्थानानि हृदयादीनि मार्गेण गत्वा तत्र तत्र हृदयालम्बनसन्धारणरसग्रहणसमस्तेन्द्रियतर्पणसन्धिसंश्लेषणादुदककर्म्मभिरनुगृह्णाति उपकरोति । तथा च "रसयुक्तात्मवीर्य्येण हृदयस्यावलम्बनम् । त्रिकसन्धारणं चापि विदधात्यवलम्बनः" । त्रिकं शिरोबाहुद्वयसन्धिः । "उभावपि ततः सौम्यौ तिष्ठतश्चान्तिके यतः । ततो रसान्विजानीयात् रसनारसनौ समौ" । रसना रसनेन्द्रियं रसनः कण्ठस्थकफः । "स्नेहनः स्नेहदानेन समस्तेन्द्रियतर्पणः ।

"क्लेशघ्नः सर्व्वसत्त्वानां संक्लेशं विदधात्यसौ"। २क्लेदकारके जलादौ त्रि०।

क्लेदु पु० क्लिद-उन्। १चन्द्रे उज्ज्वल० २सन्निपाते त्रिका०

क्लेश पु० क्लिश-भावे घञ्। उपतापे दुःखे क्लिश्नन्ति क्लिश्-बाधते कर्त्तरि अच्। पातञ्जलोक्तेषु अविद्यादिषु पञ्चसु। "क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः" पात० सू०। "अविद्यादयः क्लेशाः" भा०। "क्लिश्नन्ति खल्वमी पुरुषं सांसारिकं विविधदुःखप्रहारेणेति" विवरणम्। अविद्यादीनां यथाक्लेशहेतुत्वात् तच्छब्दवाच्यत्वम् तथा तेषां निरोधोपायश्च तत्रैव साधनपादे दर्शितो यथा

"अथ के क्लेशाः कियन्तोवेति" भा०

"अविद्याऽस्मितारागद्वेषाऽभिनिवेशाः पञ्च क्लेशाः" सू०।

"इति पञ्च विपर्य्यया इत्यर्थः। ते स्यन्दमाना गुणाधिकारं द्रढयन्ति परिणाममवस्थापयन्ति कार्य्यकारणस्रोत उन्नमयन्ति परस्परानुग्रहतन्त्रीभूत्वा कर्म्मविपाकं चाभिनिर्हरन्ति" भाष्यम्।

"पृच्छति अथेति। अविद्येति सूत्रेण परिहारः। अविद्यादयः क्लेशाः। व्याचष्टे पञ्च विपर्य्यया इति। अविद्या तावद्विपर्य्यय एव अस्मितादयोऽप्यविद्योपादानास्तदविनिर्भागवर्त्तिन इति विपर्य्ययाः। ततश्चाविद्यासमुच्छेदे तेषामपि समुच्छेदोयुक्त इति भावः। तेषामुच्छेत्तव्यताहेतुं संसारकारणत्वमाह ते स्यन्दमानाः। समुदाचरन्तो गुणानामधिकारं द्रढयन्ति बलवन्तं कुर्व्वन्ति अतएव परिणाममवस्थापयन्ति अव्यक्तमहदहङ्कारपरम्परया हि कार्य्यकारणस्रोत उन्नमयन्ति उद्भावयन्ति। यदर्थं सर्व्वमेतत् कुर्वन्ति तद्दर्शयति परस्परेति। कर्म्मणां विपाको जात्यायुर्भोगलक्षणः पुरुषार्थः तममी क्लेशा अभिनिर्हरन्ति निष्पादयन्ति। किं प्रत्येकं? नेत्याह परस्परानुग्रहेति कर्म्मभिः क्लेशाः क्लेशैश्च कर्म्माणीति" वाचस्पतिविवरणम्।

"अविद्याक्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्" सू०

"अत्राऽविद्या क्षेत्रं प्रसवभूमिरुत्तरेषामस्मितादीनां चतुर्विधकल्पितानां प्रसुप्ततनुविच्छिन्नोदाराणाम्। तत्र का प्रसुप्तिः? चेतसि शक्तिमात्रप्रतिष्ठानां बीजभावोपगमः तस्य प्रबोध आलम्बने संमुखीभावः प्रसंख्यानवतो दग्धक्लेशबीजस्य संमुखीभूतेऽप्यालम्बने नाऽसौ पुनरस्ति दग्धबीजस्य कुतः प्ररोह इति। अतः क्षीणक्लेशः कुशलश्चरमदेह इत्युच्यते तत्रैव सा दग्धबीजभावा पञ्चमी क्लेशावस्था नान्यत्रेति सतां क्लेशानां तदा बीजसामर्थ्यं दग्धमिति विषयस्य संमुखीभावेऽपि सति न भवत्येषां प्रबोध इत्युक्ता प्रसुप्तिर्दग्धबीजानाम् अप्ररोहश्च। तनुत्वमुच्यते प्रतिपक्षभावनोपहताः क्लेशास्तनवो भवन्ति। तथा विच्छिद्य विच्छिद्य तेन तेनात्मना पुनः पुनः समुदाचरन्तीति विच्छिन्नाः कथं? रागकाले क्रोधस्यादर्शनात्। न हि रागकाले क्रोधः समुदाचरति रागश्च क्वचित् दृश्यमानो विषयान्तरे नास्ति, नैकस्यां स्त्रियां चैत्रो रक्त इति अन्यासु स्त्रीषु विरक्तः, किन्तु तत्र रागो लब्धवृत्तिः, अन्यत्र भविष्यद्वृत्तिरिति स हि तदा प्रसुप्ततनुर्विच्छिन्नोभवति। विषये यो लब्धवृत्तिः स उदारः। सर्व्व एवैते क्लेशविषयत्वं नातिक्रामन्ति। कस्तर्हि विच्छिन्नः प्रसुप्तस्तनुरुदारो वा क्लेशः? इति, उच्यते सत्यमेवैतत् किन्तु विशिष्टानामेवैतेषां विच्छिन्नादित्वं यथैव प्रतिपक्षभावनातो निवृत्तं तथैव स्वव्यञ्जकाञ्जनेनाभिव्यक्तम् इति सर्व्व एवामी क्लेशा अविद्याभेदाः कस्मात्? सर्व्वेषु अविद्यैवाभिप्लवते यदविद्यया वस्त्वाकार्य्यते तदेवानुशेरते क्लेशाः विपर्य्यासप्रत्ययकाले उपलभ्यन्ते क्षीयमाणां चाविद्यामनुक्षीयन्त इति" भा०।

"हेयानां क्लेशानामविद्यामूलत्वं दर्शयति अविद्याक्षेत्रमित्यादि। तत्र का प्रसुप्तिरिति स्वोचितामर्थक्रियामकुर्व्वतां क्लेशानां सद्भावे न प्रमाणमस्तीत्यभिप्रायः पृच्छतः। उत्तरं चेतसीति। मा नामार्थक्रियां कार्षुः क्लेशाः विदेहप्रकृतिलयानां बीजभावं प्राप्तास्तु ते शक्तिमात्रेण सन्ति चोर इव दधिनोऽविवेकख्यातेरन्यदस्ति कारणं तद्बन्धुरतायाम् अतोविदेहप्रकृतिलया विवेकख्यातिविरहिणः प्रसुप्तक्लेशा न यावदवधिकालं प्राप्नुवन्ति, ततः प्राप्तौ तु पुनरावृत्ताः सन्तः क्लेशास्तेषु तेषु विषयेषु संमुखीभवन्ति। शक्तिमात्रेण प्रतिष्ठा येषां ते तथोक्ताः। तदनेनोत्पत्तिशक्तिरुक्ता बीजभावोपगम इति च कार्य्यशक्तिरिति। ननु विवेकख्यातिमतोऽपि क्लेशाः कस्मान्न प्रसुप्ताः? इत्यत आह प्रसंख्यानवत इति। चरमदेहो न तस्य देहान्तरमुत्पत्स्यते यदपेक्षयास्य देहः पूर्व इत्यर्थः। विदेहादिष्वित्यर्थः नान्यत्र ननु सतो नात्यन्तविनाश इति किमिति तदीययोगिबलेन विषयसंमुखीभावेन क्लेशाः प्रबुध्यन्ते इत्यत आह सतामिति। सन्तु क्लेशाः दग्धस्त्वेषां प्रसङ्ख्यानाग्निना बीजभाव इत्यर्थः। क्लेशप्रतिपक्षः क्रियायोगस्तत्र

भावनमनुत्थानं तेनोपहृतास्तनवः अथवा स यथाज्ञानमविद्यायाः प्रतिपक्षः, भेददर्शनमस्मितायाः माध्यस्थ्यं रागद्वेषयोः,अनुश्रवबुद्धिनिवृत्तिरभिनिवेशस्येति । विच्छित्तिमाह तथेति । क्लेशानामन्यतमेन समुदाचरताऽभिभवाद्वाऽयन्तविषयसेवया वा विच्छिद्यविच्छिद्य तेन तेनात्मना समुदाचरन्ति आविर्भवन्ति बीजीकरणाद्युपयोगेन वाभिभावकदौर्बल्येन वेति । वीप्सया च विच्छेदसमुदाचारयोः पौनःपुन्यं दर्शयता यथाज्ञात् प्रसुप्तात् भेद उक्तः । रागेण वा समुदाचरता विजातीयः क्रोधोऽभिभूयते सजातीयेन वा विषयान्तरवर्त्तिना रागेणैव विषयान्तरवर्त्ती रागोऽभिभूयत इत्याह रागेति भविष्यद्वृत्तिरस्त्रयी वृत्तिः यथायोगवेदितव्येत्याह । सहीति भविष्यद्वृत्तिकुशमात्रपरामर्शि सर्वनाम । न चैत्ररागपरामर्शि तस्य विच्छिन्नत्वादेवेति । उदारमाह विषय इति । ननु उदार एव पुरुषान् क्लिश्नातीति भवतु क्लेशो अन्ये त्वक्शनः कथं क्लेशा ? इत्यत आह । सर्व एवैत इति क्लेशविषयत्वं क्लेशपदवाच्यत्वं नातिक्रामन्ति उदारतामापद्यमानाः अतएव तेऽपि हेया इति भावः । क्लेशत्वेनैकता लभ्यमानश्चोदयति कस्तर्हि ? इति । क्लेशत्वेन समानत्वेऽपि यथोक्तावस्थाभेदाद्विशेष इति परिहरति उच्यते सत्यमिति स्यादेतदविद्यातो भवन्तु क्लेशाः, तथाप्यविद्यानिवृत्तौ कस्माच्चिवर्त्तन्ते ? न खलु पटः कुविन्दनिवृत्तौ निवर्त्तते इत्यत आह सर्व एवेति भेदा इव भेदास्तदविनिर्भागवर्त्तिन इति यावत् कस्मात् ? इति प्रश्नः । उत्तरं सर्वे ष्वपि तदेव स्फुटयति यदिति आकार्यते समारोप्यते शेषं सुगमम् “प्रसुप्तास्तत्त्वलीनानां तन्ववस्थाश्च योगिनाम् । विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनामिति” संग्रहः” विव० । “क्लेशप्रहाणमिह लब्धसबीजयोगाः” “क्लेशकर्मफलभोगवर्ज्जितम्” माघः । “दाशरथ्योः सपक्लेशः” रघुः “क्लेशः फलेन हि पुनर्नवतां विधत्ते” कुमा० “यन्मातापितरौ क्लेशं सहेते सम्भवे नृणाम्” मनुः । “तत्राजननिरेवास्तु जननीक्लेशकारिणः”माघः २कोपे ३व्यवसाये मेदि० । तयोरपि तद्धेतुत्वात्तथात्वम् । “अथे क्लेशतमसोः” पा० हत्ते:ड । क्लेशापहः पुत्र

क्लेशक त्रि० क्लिश-ण्वुल् । क्लेशयोगे “ण्वुला सिद्धे वुञ्विधानं ताच्छील्यादिषु वासरूपन्यायेन तृजादयो न सि० कौ० । तेन क्लेशितेत्यादि असाधु । कर्त्तरि णिनिस्तु भवत्येव । “निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीम्” माघः ताच्छील्ये इत्युक्ते कर्त्तरि तृच् भवत्येव तेन “विद्वांस्तथैव यः शक्तः क्लिश्यमानो न कुप्यति । अनाशयित्वा क्लेशारं परलोके च नन्दति”भा०श० २९अ०

क्लैतकिक न० क्लीतकेन निर्वृत्तम ठञ् । मद्ये शब्दचन्द्रिका।

क्लोमन् न० क्लु गतौ मनिन् । हृदयस्याधोभागे दक्षिणकुक्षिस्थे मांसपिण्डाकारे पदार्थे “तस्याधोवामतः प्लीहा फुप्फुसश्च दक्षिणतो यकृत् क्लोम” सुश्रुतः । “वपावसायहननं नाभिः क्लोम यकृत् प्लिहा” या० । अवहननं फुप्फुसः प्लीहा आयुर्वेदप्रसिद्धः तौ च मांसपिण्डाकारौ सव्यकुक्षिगतौ । यकृत् कालकं, क्लोम मांसपिण्डस्तौ च दक्षिणकुक्षिगतौ”मिता० । “वृक्कयोः प्लीह्नि यकृति हृदय क्लोम्नि वा तथा । श्वासो यकृति तृष्णा च पिपासा क्लोमजेऽधिका । नाभीष्टहृदय क्लोमनिवृत्ताश्वसादश्च” कण्ठहृदयनेत्रक्लोमनाडीषु मण्डलाः” शुष्कक्लोमगलाननः” इति च सुश्रुतः । सर्व्वे नान्ता अदन्ताः स्युरित्युक्तेः क्लोममप्यत्र भरतः । क्लोम च पिपासास्थानमिति वैद्यकम् । अतएव सुश्रुते पिपासा क्लोमजेऽधिका इत्युक्तम् “निष्कुतीव क्लोम” दशकुमा० “वल्मीकान् क्लोमभिः” यजु० २५,८,अस्य पुंस्त्वमपि । “यकृत् क्लोमानं वरुणोभिषज्यन्” यजु० १९,८५

क्लोश पु० क्रोश+रस्य लः । भये । “सिन्धूरिव प्रवण आशुया यतो यदि क्लोशमनुष्वणि” ऋ० ६,४६,१४, क्लोशेति भयनाम” भा०

क्व अ० किम्+अ किमः कुः । कस्मिन्नित्यर्थे “के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः”सा०द०“स्थायं स्थायं क्वचिद्यान्तं क्रान्त्वा च क्रन्त्वास्थितं क्वचित्” भट्टिः क्वशब्दौ स्वार्थान्वितयोर्महदन्तरं सूचयतः । “क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः” रघुः । सूर्य्यवंशकविप्रज्ञयोर्विषयविषयिभावोऽत्यन्तमसम्भवीति गम्यते । एवमन्यत्रापि यथायथमूह्यम् । ततो भवार्थे त्यप् त्यक् वा क्वत्य कस्मिन् भवे अर्थे त्रि० । ततः स्वार्थे क टापि। क्वत्यिका । मुग्धबोधमते अस्मात् चिञ्चनौ क्वचित् क्वचन । “क्वचित् क्वचित् विवरणे गूढभावः प्रकाश्यते” विवरणटीका । “क्वचन पतनयोग्यं देशमन्विष्यताधः” नैष० । अमरमते द्वे पदे इति भेदः तयोः समासे कादाचित्कपदसिद्धिः

क्वङ्कु पु० कु+अगि उन् । कङ्गौ(काङ्नी) धान्यभेदे हेमच०

क्वण अव्यक्तशब्दे भ्वा० पर० अक० सेट् । क्वणति अक्वाणीत्-अक्वणीत् चक्वाण । ज्वला० क्वणः क्वाणः । क्वणनम् ।

"विलोलघण्टाक्वणितेन नागाः" रघुः "दुःसहा हि परिच्छिन्नः क्वणद्भिरलिगायकैः" "अक्वाणिषुश्च्युतेतात्-साहाः" चक्वणाथद्भिनोयोद्धम्" "विभूषणानां क्वणित-श्च षट्पदः"भट्टिः "किञ्चित्क्वणः किन्नरमध्युवास" कुमा० उपा[?] प्रादिपूर्वः वीणायाः शब्दे अमरः। णिच् क्वणयति।

क्वण पु० क्वण–अप्। १वीणायाः शब्दे, अमरः २ध्वनिमात्रे हेमच०। कर्त्तरि अच्। ३शब्दकारके त्रि०

क्वणन न०क्वण–भावे ल्युट्। १वीणायाः शब्दे (कनकन) इति २शब्दभेदे। कर्त्तरि ल्यु। ३क्षुद्रघण्टिकायां (क्षोट-घण्टि) त्रिका०।

क्वथ निष्पचने (क्वाथशब्दोक्तपाकभेदे) भ्वा०पर०सक० सेट्। क्वथति एदित् अक्वथीत् चक्वाथ क्वाथः। क्वथ्यमानः। णिच् क्वाथयति "जलाशयेषु तप्तेषु क्वथ्यमानेषु वह्निना" भा० आ० २२६अ० "पञ्चान्नयोर्वाप्यश्नीयात् यवागूं क्वथितां सकृत्" मनुः

क्वथित त्रि० क्वथ–क्त। १अतिशयपक्वे व्यञ्जनादौ, २दशमूलपाचनादौ च हेमच०। भावप्र० क्वथितजलगुणा उक्ता यथा "क्वथितस्य जलस्य शीतलीकृतस्य विशेषमाह सुश्रुतः। "शृताम्बु तत् त्रिदोषघ्नं यदन्तर्वाष्पशीतलम्। अरुच्यमनभिष्यन्दि कृमिघट्ज्वरहृन्नवम्। धारापातेन विष्टम्भि दुर्जरं पवनाहतम्। भिनत्ति श्लेष्मसंघातं मारुतञ्चापकर्षति। अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि" अन्तर्वाष्पशीतलम् पिहितमेव शीतलम्"

क्वथिका स्त्री भावप्र० उक्ते (कढ़ी) इतिख्याते पदार्थे "स्थाल्यां घृते वा तैले वा हरिद्राहिङ्गु भर्जयेत्। अवलेहनसंयुक्तं तक्रन्तत्रैव निःक्षिपेत्। एषा सिद्धा समरीचा क्वथिता क्वथिता बुधैः। अवलेहनम्। (आरहन) इति लोके। "क्वथिता पाचनी रुच्या लघ्वी वह्निप्रदीपनी। कफानिलविबन्धघ्नी किञ्चित्पित्तप्रकोपिणी। अलीकमत्स्याः शुष्का वा किं वा क्वथितया पुनः। बृंहणा रोचना वृष्या बल्या वातगदापहा। कोष्ठशुद्धिकरी गुर्व्वी किञ्चित्पित्तप्रकोपनी। अर्हिते सहनुस्तम्भे विशेषेण हिता स्मृता"।

क्वल पु० कु+अल–अच्। प्रौढबदरफले "कुवलं यत् पूतीकैर्यत् पर्णवल्कैर्यत्सुरायाम् सौम्यं तद्यत् कुलैराक्षसं तत् तद्यत् तण्डुलैर्वैश्वदेवं तद्यदामन्त्रणेन मानुषं तद्यद्दध्ना यत् सैन्द्रस्यातनाय ऐन्द्रत्वाय" इति तैत्ति० २।५।२।५ "सोमवल्लीसमानाया लतायाः खण्डाः पूतीकाः। पलाशकाष्ठस्यांशाः पर्णवल्काः। प्रौढबदरफलानि कुलाः। ईषदम्लतक्रम तञ्चनं पूतीकादिभिरातञ्चनं सोमप्रियम्" भा०।

क्वाण पु०क्वण भावे घञ्। १शब्दे उपनिप्रादिपूर्व्वकस्तु वीणायाःशब्दे अमरः। ज्वला० कर्त्तरि ण। २शब्दकर्त्तरि त्रि०

क्वाथ पु० क्वथ-करणे घञ्। १अतिदुःखे हेम०। दुःखेन हि चित्तं क्वथ्यमानमिव भवतीति तस्य तथात्वम्, वैद्यकोक्ते जलादेः पाकभेदे यथा भावप्रकाशे

"पानीयं षोड़शगुणं क्षुण्णे द्रव्यपले क्षिपेत्। मृत्पात्रे क्वाथयेद् ग्राह्यमष्टमांशावशेषितम्। कर्षादौ तु पलं यावद्दद्यात् षोड़शिकं जलम्। ततस्तु कुड़वं यावत्तोयमष्टगुणं भवेत्। चतुर्गुणमतश्चोर्द्ध्वं यावत्प्रस्थादिकं जलम्। षोडशिकं षोड़शगुणम्। "तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम्। शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते"। क्वाथपानमात्रामाह "मात्रोत्तमा पले तत् स्यात् त्रिभिरक्षैस्तु मध्यमा। जघन्या च पलार्द्धेन स्नेहक्वाथौषधेषु च। तन्त्रान्तरे "क्वाथ्यद्रव्यपले वारि द्विरष्टगुणमिष्यते। चतुर्भागावशिष्टन्तु पेयं पलचतुष्टयम्। दीप्तानलं महाकायं पाययेदञ्जलिं जलम्। अन्ये त्वद्धं परित्यज्य प्रसृतिं तु चिकित्सकाः। क्वाथत्यागमनिच्छन्त-स्त्वष्टभागावशेषितम्। पारम्पर्योपदेशेन वृद्धवैद्याः पलद्वयम्"। अष्टभागावशेषितस्य चतुर्भागावशिष्टापेक्षया गुरुत्वात् दीप्तानलं महाकायं पलद्वयं पाययेन्मध्यमाग्निमल्पकायं पलमात्रं पाययेत् मात्रोत्तमा पलेनस्यादित्यादि वचनात्। "क्वाथे क्षिपेत् सितादांशैश्चतुर्थाष्टमषोडशैः। वातपित्तकफातङ्के विपरीतं मधु स्मृतम्। जीरकं गुग्गुलुं क्षारं लवणं च शिलाजतु। हिङ्गु त्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत्। क्षीरं घृतं गुडं तैलं मूत्रं चान्यत् द्रवं तथा। कल्क चूर्णादिकं क्वाथे निःक्षिपेत् कर्षसंमितम्। तत्रोपविश्य विश्रान्तः प्रसन्नवदनेक्षणः। औषधं हेमरजतमृद्भाजनपरिस्थितम्। पिबेत् प्रसन्नहृदयः पीत्वा पात्रमधोमुखम्। विधायाचम्य सलिलं ताम्बूलाद्युपयोजयेत्"।

क्वाथसेवनप्रकारादि भावप्र० दर्शितं यथा

"तत्रानुक्ते प्रभातं स्यात्कषायेषु विशेषतः। मुख्यभेषज्यसम्बन्धो निषिद्धस्तरुणज्वरे। तोयपेयादिसंस्कारे त्वदोषं तत्र भेषजम्"। मुख्यभेषजं क्वाथः तस्य सम्बन्धः पानम्। यतआह "न कषायं प्रशंसन्ति नराणां तरुणे ज्वरे।

कषायेणाकुलीभूता दोषा जेतुं सुदुस्तराः”। आकुलीभूताः मत्ताः स्वमार्गं परित्यज्य इतस्ततोगताः। अत्र कषायशब्देन क्वाथो गृह्यते। उक्तश्च क्वाथस्य पर्य्यायः। “शृतं क्वाथःकषायश्च निर्यूहः स निगद्यते, इति। “तोयपेयादिसंस्कारे निर्दोषं तत्र भेषजमिति”। तत्र तरुणज्वरे भेषजम् मुख्यभेषजं क्वाथरूपं न तु कल्कनमुद्दिश्य कषायः प्रतिषिध्यते इति कल्कनं तोयपेयायवाग्वादिकम्। ननु “स्वरसस्तथा कल्कः क्वाथश्च हिमफाण्टकौ। ज्ञेया कषायाः पञ्चैते लघवः स्युर्यथोत्तरम्” इति वचनात् स्वरसादयोऽपि कथं न निषिध्यन्ते। तत्राह “तत्र यस्तु कषायः स्यात्स वर्ज्यस्तरुणज्वरे” इति। चतुर्थभागावशेषकरणेनाष्टमभागशेषकरणे च कषायवर्णः कषायरसश्च स्यात्। स कषायः क्वाथः स तरुणज्वरे निषिद्धः। कषायस्य लक्षणमाह, “पादशिष्टः कषायः स्यात्”। अतः षडङ्गादिस्तरुणज्वरे न निषिद्धः पाकादूर्द्ध्वपाके चोक्तलक्षणाभावेन कषायत्वाभावात्। अथ तरुणज्वरे कषायस्य दोषमाह “दोषा बद्धाःकषायेण स्तम्भितास्तरुणज्वरे। स्तभ्यन्ते न विपच्यन्ते कुर्वन्ति विषमज्वरम्”। कषायेण स्तम्भिता प्रवृत्तये निवारिताः। यत आह कषायरसगुणात् “कषायः स्तम्भनः शीतोरूक्षः पित्तकफापहः” इत्यादि। स्तभ्यन्ते आध्मानं कुर्वन्ति न विपच्यन्ते सुखेन न विपच्यन्ते दुःखं दत्त्वा विलम्बेन विपच्यन्ते इति यावत्”। [अमरः।

क्वाथोद्भव न० क्वाथादुद्भवति उद्+भू-अच्। तुत्थाञ्जने

क्वेल कम्पे अक० गतौ सक० प० सेट् कवि०। क्वेलति अक्वेलीत् ऌदित् चङि अचिक्वेलत् त।

क्ष पु० क्षि-बा० ड। १संवर्त्ते २राक्षसे ३नरसिंहे ४विद्युति ५क्षेत्रे ६क्षेत्रपाले ७नाशे च मेदि०। तस्य वाचकशब्दाः तन्त्रशास्त्रे वर्णाभिधाने उक्ता यथा
“क्षः कोपस्तुम्बुकः कालोक्षः संवर्त्तकः परः। नृसिंहो विद्युता माया महातेजा युगान्तकः। परात्मा क्रोधसंहारी वर्णान्तो मेरुवाचकः। सर्वाङ्गः सागरः कामः संयोगान्तस्त्रिपूरकः। क्षेत्रपालो महाक्षोभो मातृकान्तोऽनलः क्षयः। मुखं कव्यवहानन्ता कालजिह्वा गणेश्वरः। छायापुत्रश्च संघातोमलवश्मीर्ललाटगः” अत्र संयोगान्त इत्युक्तेः शब्दकल्पद्रुमे क्षकारस्य वर्णान्तरत्वकल्पनम् लोकशास्त्रविरुद्धत्वादतीव प्रामादिकम्। तथाहि
अस्य कषयोः संयोगजत्वेन कादित्वम्। पृथग्वर्णत्वे क्षमे चुक्षोद चिक्षेपेत्यादिकपदं न सिद्ध्येत् असंयुक्ततया हलादिशेषप्रसक्तौ कवर्गादित्वाभावेन चुत्वाप्रसक्तेः। किञ्च संयुक्तवर्णात् पूर्व्वस्य गुरुत्वेन “निपीय यस्य क्षितिरक्षिणः कथाम्” नैषधे “लाङ्गूलविक्षेपविसर्पिशोभैः कुमारादौ काव्ये च “गजारूढोयातिक्षितिपतिरित्यादौ” “दक्षिणे कालिकेति” च भैरवतन्त्रोक्तकालीस्तवे च सर्वत्र तत्पूर्व्वस्य गुरुत्वे सत्येव छन्दोनुगुणता असंयुक्तवर्णत्वे सर्वत्र छन्दोभङ्गः स्यात्। न च तस्यासंयुक्ततया क्वचिदपि तत्पूर्व्वस्य लघुत्वं दृष्टम्। अतएव कविकल्पद्रुमे” “स्वदाद्यन्तादिमक्रमः” इति प्रतिज्ञाय कादिष्वेव क्षकारादिधातुपाठः मेदिन्यादौ कोषेऽपि तथैव कादिषु तस्य पाठः।
तन्त्रे तु कषयोः संयोगजत्वेऽपि मातृकावर्णानामेकपञ्चाशत्संख्यापरिपूर्त्त्यै लकारवत् पृथक् कीर्त्तनं न्यासादिकार्य्यार्थं “पञ्चाशल्लिपिभिर्माला विहिता सर्व्वकर्मसु। अकारादिक्षकारान्ता वर्णमाला प्रकीर्त्तिता। क्षर्णं मेरुमुखं तत्र कल्पयेन्मुनिसत्तम!। अनया सर्वमन्त्राणां जपः सर्वसमृद्धिदः” इति गौतमतन्त्रोक्तजपाङ्गमालाकल्पनार्थञ्च न वर्णान्तरत्वार्थम्। एवं सर्वसामञ्जस्ये वर्णान्तरत्वकल्पनं लोकशास्त्रविरुद्धत्वादुपेक्ष्यम्। “विशेषं कथयाम्यद्य प्रोच्चार्य्याः कण्ठतः स्वराः। कद्वयं जिह्वया मूर्ध्नि लद्वयं दन्तजिह्वया। मुखस्थानाल्लोवाच्याः क्षकारः कण्ठघातजः” इति वरदातन्त्रे १०पटले तस्य कण्ठस्थानोद्भवत्वोक्तिः आद्यककाराभिप्रायेण द्रष्टव्या। “अतएव षान्ताः स्युर्यदि वा क्षान्ता वर्णानामनुरोधतः। पृथक् क्रमेण वर्ण्यन्ते तथाऽप्येते समन्वयात्” विश्वप्रकाशे तस्य उभयरूपतासमन्वय उक्तः। तत्समन्वयश्चोक्तरीत्या बोध्यः। एतेन वङ्गानां खतुल्यत्वेन मैथिलानां च तस्य छकारत्वेनोच्चारणं प्रामादिकमेव।

क्षज कृच्छ्रजीवने इदित् चुरा० उभ० अक० सेट्। क्षञ्जयति ते अचक्षञ्जत् त। क्षञ्जयां बभूव आस चकार चक्रे।

क्षज वधे भ्वा० आ० सक० सेट् घटा०। क्षजते अक्षजिष्ट। चक्षजे षित् क्षजा। क्षजयति ते अचिक्षजत् त।

क्षज गतौ दाने च भ्वा० आत्म० इदित् सक० सेट्। क्षञ्जते अक्षञ्जिष्ट चक्षञ्जे। कर्म्मणि क्षञ्ज्यते घटा० क्षञ्जयति इणि अक्ष(क्षा)ञ्जि णमुलि क्षंञ्जं क्षञ्जं क्षाञ्जं क्षाञ्जम् अनुपधाया अपि दीर्घः

क्षण वधे तना० उभ० सक० सेट्। क्षणोति क्षणुते। अक्ष

णीत् अक्षणिष्ट। अक्षाण अक्षणे। उदित् क्षणित्वा क्षत्वा। क्षतिः क्षतः। क्षणः। नान्तत्वमतेऽपि रूपं तुल्यम् क्विपि क्षन् इति भेदः।

क्षण पु० क्षणोति दुःखं क्षण—अच्। १उत्सवे २मुहूर्त्तात्मक कालस्य द्वादशांशे त्रिंशत्कलारूपे कालांशभेदे अमरः ३प्रशस्ते मुहूर्त्ते दीपिका "ध्रुवमृदुचरवर्गैर्वाजिहस्ता समेतैः क्षणमुदयमथैषां सत्सु केन्द्रस्थितेषु" नाडीद्वयात्मके ४मुहूर्त्तरूपे कालांशे सि० शि० तद्वाक्यं १७८८पृष्ठे दर्शितम्। ५निमेषक्रियावच्छिन्नकालस्य चतुर्थभागे अर्द्धपि० तादृशार्थाभिप्रायेण "क्षणादिः स्यादुपाधितः" भाषा० व्या० मुक्तावलीवाक्यं तच्च कालशब्दे १९८५पृ० दर्शितम्। ६निर्व्यापारस्थितौ अमरः ७अवसरे ८मध्ये ९पराधीनतायां हेमच०। तत्र उत्सवकालभेदयोः "क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना" माघः। उत्सवे "गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्" उ०त०ब्रह्मपु०। "क्षणमुत्सवम्" उ०त०रघु०। कालांशे "क्व नु मां क्षणभिन्नसौहृदः" "स्थिताः क्षणं पक्ष्मसु ताडिताधराः" कुमा०। अवसरे "स्थानं नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः। तेन नारद! नारीणां सतीत्वमुपजायते" "दीयते स्म शयितुं शयनीये न क्षणः क्षणदयाऽपि वधूभ्यः" माघः। अत्र क्षणदयापि न क्षणो दत्त इति उत्सवार्थत्वेन विरोधस्य कालविशेषार्थत्वेन परिहारात् विरोधाभासः। "नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या" मेघः

क्षणक्षणा अव्य० बा० प्रकारे—द्वित्वम्। क्षणमात्रे त्रिका०

क्षणतु पु० क्षण—भावे ना० अतु। क्षते विदरणादौ हेम०

क्षणद पु० क्षणं यात्रादिमुहूर्त्तं उत्सवं वा ददाति दा-क। १मौहूर्त्तिके गणके मेदि० २जले न०हेम०। ३रात्रौ ४हरिद्रायाञ्च स्त्री अमरः "क्षणदापायशशाङ्कदर्शनः" रघुः "न क्षणः क्षणदयापि वधूभ्यः" माघः

क्षणदाकर पु० क्षणदां करोति हेतौ ट। निशाकरे चन्द्रे "आरुह्य नार्य्यः क्षणदासु यत्र" माघः

क्षणदाचर पुंस्त्री क्षणदायां चरति चर-ट। निशाचरे राक्षसे "सान्त्विता धर्म्मराजेन प्रसेदुः क्षणदाचराः" भा० व० ५५अ०। "सानुप्लवः प्रभुरपि क्षणदाचराणाम्" रघुः। स्त्रियां जातित्वात् ङीप्। २निशाचरे खगादौ त्रि० स्त्रियां ङीप्।

क्षणदान्ध्य न० क्षणदायामान्ध्यम्। रात्रिकाणत्वे। "स्रोतोजं सैन्धवं कृष्णां रेणुकाञ्चापि पेषयेत्। अजमूत्रेण ता वर्त्त्यः क्षणदान्ध्याञ्जने हिताः" सुश्रुतः

क्षणद्युति स्त्री क्षणं द्युतिरस्याः। क्षणप्रभायां विद्युति।

क्षणन न० क्षण—भावे ल्युट्। वधे हनने अमरः

क्षणनिःश्वास पुंस्त्री० क्षणात् मुहूर्त्तात् निःश्वासोऽस्य। शिशुमारे (शोशक) मत्स्यभेदे स्त्रियां जातित्वात् ङीष्।

क्षणप्रभा स्त्री क्षणं प्रभाऽस्याः। विद्युति चञ्चलायाम् अमरः

क्षणभङ्ग पु० क्षणात्परः भङ्गः ५त०। सर्व्वेषां भावानां क्षणिकत्वे क्षणनश्वरत्वे। स च सर्व्व०द०दर्शितो यथा।

"तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेनानुमातव्यं यत् सत् तत् क्षणिकं यथा जलधरपटलं सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात् व्यापकव्यावृत्त्या व्याप्यव्यावृत्तिन्यायेन व्यापकक्रमाक्रमव्यावृत्तावक्षणिकात् सत्त्वव्यावृत्तेः सिद्धत्वाच्च। तच्चार्थक्रियाकारित्वं क्रमाक्रमाभ्यां व्याप्तं न च क्रमाक्रमाभ्यामन्यः प्रकारः समस्ति "परस्परविरोधे हि न प्रकारान्तरस्थितिः। नैकतापि विरुद्धानामुक्तिमात्रविरोधतः" इति न्यायेन व्याघातस्योद्भटत्वात्। तौ च क्रमाक्रमौ स्थायिनः सकाशाद्व्यावर्त्तमानौ अर्थक्रियामपि व्यावर्त्तयन्तौ क्षणिकत्वपक्ष एव सत्त्वं व्यवस्थापयत इति सिद्धम्। नन्वक्षणिकस्यार्थक्रियाकारित्वं किं न स्यात्? इति चेत् तदयुक्तं विकल्पासहत्वात् तथा हि वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोः किमर्थक्रिययोः स्थायिनः सामर्थ्यमस्ति? न वा?। आद्ये तयोरनिराकरणप्रसङ्गः समर्थस्य क्षेपायोगात् यत् यदा यत्करणसमर्थं तत् तदा तत्करोत्येव यथा सामग्री स्वकार्य्ये समर्थश्चायं भाव इति प्रसङ्गानुमानाच्च। द्वितीयेऽपि कदापि न कुर्य्यात् सामर्थ्यमात्रानुबन्धित्वादर्थक्रियाकारित्वस्य, यत् यदा यन्न करोति तत् तदा तत्रासमर्थं यथा शिलाशकलमङ्कुरे, न चैष वर्त्तमानार्थक्रियाकरणकाले वृत्तवर्त्तिष्यमाणे अर्थक्रिये करोतीति तद्विपर्य्ययाच्च। ननु क्रमवत्सहकारिलाभात् स्थायिनः अतीतानागतयोः क्रमेण करणमुपपद्यते इति चेत् तत्रेदं भवान् पृष्टो व्याचष्टां, सहकारिणः किं भावस्योपकुर्वन्ति? न वा?। नो चेत् नापेक्षणीयास्ते अकिञ्चित्कुर्वतां तेषां तादर्थ्यायोगात्। उपकारकत्वपक्षे सोऽयमुपकारः किं भावाद्भिद्यते? न वा?। भेदपक्षे आगन्तुकस्यैव तस्य कारणत्वं स्यात् न भावस्याक्षणिकस्य

आगन्तुकातिशयान्वयव्यतिरेकानुविधायित्वात् कार्य्यस्य। तदुक्तम् "वर्षातपाभ्यां किं व्योम्नश्चर्म्मण्यस्ति तयोः फलम्?। चर्म्मोपमश्चेत् सोऽनित्यः खतुल्यश्चेदसत्फलः" इति। अथ भावस्तैः सहकारिभिः सहैव कार्य्यं करोतीति स्वभाव इति चेत् अङ्ग तर्हि सहकारिणो न जह्यात् प्रत्युत पलायमानानपि गले पाशेन बद्ध्वा कृत्यं कार्य्यं कुर्य्यात् स्वभावस्यानपायात्। किञ्च सहकारिजन्योऽतिशयोऽतिशयान्तरमारभते? न वा? उभयथापि प्रागुक्तदूषणपाषाणवर्षणप्रसङ्गः। अतिशयान्तरारम्भपक्षे बहुमुखानवस्थादौस्थ्यमपि स्यात्। अतिशये जनयितव्ये सहकार्य्यन्तरापेक्षायां तत्परम्परापातइत्येकानवस्था ऽऽस्थेया। तथाहि सहकारिभिः सलिलपवनादिभिः पदार्थसार्थैराधीयमाने बीजस्यातिशये बीजमुत्पादकमभ्युपेयम् अपरथा तदभावेऽप्यतिशयः प्रादुर्भवेत्, बीजञ्चातिशयमादधानं सहकारिसापेक्षमेवाधत्ते अन्यथा सर्वदोपकारापत्तौ अङ्कुरस्यापि सदोदयः प्रसज्येत। तस्मादतिशयार्थमपेक्ष्यमाणैःसहकारिभिरतिशयान्तरमाधेयं बीजे,तस्मिन्नप्युपकारे पूर्वन्यायेन सहकारिसापेक्षस्य बीजस्य जनकत्वे सहकारिसम्पाद्यबीजगतातिशयानवस्था प्रथमा व्यवस्थिता। अथोपकारः कार्य्यार्थमपेक्ष्यमाणोऽपि बीजादिनिरपेक्षः कार्य्यं जनयति तत्सापेक्षो वा। प्रथमे बीजादेरहेतुत्वमापतेत्। द्वितीये अपेक्ष्यमाणेन बीजादिना उपकारे अतिशय आधेय एवं तत्र तत्रापीति बीजादिजन्यातिशयनिष्ठातिशयपरम्परापात इति द्वितीयानवस्था स्थिरा भवति। एवमपेक्ष्यमाणेनोपकारेण बीजादौ धर्म्मिण्युपकारान्तरमाधेयमित्युपकाराधेयबीजातिशयाश्रयातिशयपरम्परापात इति तृतीयानवस्था दुरवस्था स्यात्। अथ भावादभिन्नोऽतिशयः सहकारिभिराधीयत इत्यभ्युपगम्यते तर्हि प्राचीनो भावोऽनतिशयात्मा निवृत्तः अन्यश्चातिशयात्मा कुर्वद्रूपादिपदवेदनीयो जायत इति फलितं ममापि मनोरथद्रुमेण। तस्मादक्षणिकस्यार्थक्रिया दुर्घटा। नाप्यक्रमेण घटते विकल्पासहत्वात्। तथाहि युगपत्सकलकार्य्यकरणसमर्थः स भावस्तदुत्तरकालमनुवर्त्तते न वा। प्रथमे तत्कालवत् कालान्तरेऽपि तावत्कार्य्यकरणमापतेत्। द्वितीये स्थायित्वाशा मूषिकभक्षितबीजादावङ्कुरादिजननप्रार्थनामनुहरेत्। यत् विरुद्धधर्माध्यस्तं तन्नाना यथा शीतोष्णे विरुद्धधर्माध्यस्तश्चायमिति जलधरे प्रतिबन्धसिद्धिः। न चायमसिद्धो हेतुः स्थायिनि कालभेदेन सामर्थ्यासामर्थ्ययोः प्रसङ्गतद्विपर्य्ययसिद्धत्वात्। तत्रासामर्थ्यसाधकौ प्रसङ्गतद्विपर्य्ययौ प्रागुक्तौ सामर्थ्यसाधकावभिधीयेते यद्यदा यज्जननासमर्थं तत्तदा तन्न करोति यथा शिलाशकलमङ्कुरम् असमर्थश्चायं वर्त्तमानार्थक्रियाकरणकाले अतीतानागतयोरर्थक्रिययोरिति प्रसङ्गः यद्यदा यत् करोति तत्तदा तत्र समर्थं यथा सामग्री स्वकार्य्ये, करोति चायमतीतानागतकाले तत्कालवर्त्तिन्यावर्थक्रिये भाव इति प्रसङ्गव्यत्ययः विपर्य्ययः। तस्माद्विपक्षे क्रमयौगपद्यव्यावृत्त्या व्यापकानुपलम्भेनाधिगतव्यतिरेकव्याप्तिकं प्रसङ्गतद्विपर्य्ययबलात् गृहीतान्वयव्याप्तिकं सत्त्वं क्षणिकत्वपक्ष एव व्यवस्थास्यतीति सिद्धम्। तदुक्तं ज्ञानश्रिया "यत् सत्तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी सत्ताशक्तिरिहार्थकर्म्मणि मिते सिद्धेषु सिद्धा न सा। नाप्येकैव विधान्यथा परमतेनापि क्रियादिर्भवेत् द्वेधापि क्षणभङ्गसङ्गतिरतः साध्ये च विश्राम्यतीति"। न च कणभक्षादिपक्षकक्षीकारेण सत्तासामान्ययोगित्वमेव सत्त्वमिति मन्तव्यं, सामान्यविशेषसमवायानामसत्त्वप्रसङ्गात्। न च तत्र स्वरूपसत्तानिबन्धनः सद्व्यवहारः, प्रयोजकगौरवापत्तेः अनुगतत्वाननुगतत्वविकल्पपराहतेश्च सर्षपमहीधरादिषु विलक्षणेषु क्षणेष्वनुगतस्याकारस्य मणिषु सूत्रवदनुगतस्य गुणवच्चाप्रतिभासनाच्च। किञ्च सामान्यं सर्व्वगतं, स्वाश्रयसर्व्वगतं वा? प्रथमे सर्ववस्तुसङ्करप्रसङ्गः अपसिद्धान्तापत्तिश्च यतः प्रोक्तं प्रशस्तपादेन "स्वविषयसर्वगतमिति" किञ्च विद्यमाने घटे वर्त्तमानं सामान्यमन्यत्र जायमानेन सम्बध्यमानं तस्मादागच्छत् सम्बध्यते अनागच्छद्वा आद्ये द्रव्यत्वापत्तिः द्वितीये सम्बन्धानुपपत्तिः। किञ्च विनष्टे घटे सामान्यमवतिष्ठते? विनश्यति? स्थानान्तरं गच्छति? वा प्रथमे निराधारत्वापत्तिः, द्वितीये नित्यत्ववाचोयुक्त्ययुक्तिः, तृतीये द्रव्यत्वप्रसक्तिः इत्यादि दूषणग्रहग्रस्तत्वात् सामान्यमप्रामाणिकम्। तदुक्तम् "अन्यत्र वर्त्तमानस्य ततोऽन्यस्थानजन्मनि। तस्मादचलतः स्थानाद्वृत्तिरित्यतियुक्तता। यत्रासौ वर्त्तते भावस्तेन सम्बध्यते न तु। तद्देशिनञ्च व्याप्नोति किमप्येतन्महाद्भुतम्। न याति न च तत्रासीदस्ति पश्चान्न चांशवत्। जहाति पूर्वं नाधारमहो व्यसनसन्ततिरिति"। अनुवृत्तप्रत्ययः किमालम्बन इति चेत् अङ्ग अन्यापोहालम्बन एवेति सन्तोष्टव्यमायुष्मतेति अलमतिप्रसङ्गेन"।

विवरणोपन्यासे चायं पक्षः पूर्व्वपक्षीकृत्य दूषितो यथा "अथैवं घटादिषु क्षणिकत्वं साध्येत विमताः उपान्त्या-दयो घटसत्ताक्षणाः स्वस्वानन्तरक्षणभाविघटनाश-व्याप्ताः घटसत्ताक्षणत्वादन्त्यघटक्षणवदिति' तन्न वि-मतो घटनाशक्षणो घटसत्तावान् कालत्वात् सम्मतवदि-त्याभासमानत्वात्। अत्र घटाभावानुभवविरोध इति चेत् तर्हि क्षणिकत्वानुमानेऽपि सोऽयं घट इति प्रत्यभिज्ञा-विरोधोऽस्त्येव। ननु सर्वे भावाः क्षणिकाः अर्थक्रिया-कारित्वात् व्यतिरेकेण शशविषाणवत् विपक्षे स्थायिनोऽर्थ-क्रियानुपपत्तिर्बाधिका। न च स्थायिन एव पदार्थस्य नि-मित्तसंयोगादन्यथाभूतस्यार्थक्रियापूर्व्वकं कार्य्यमुत्पाद-यितुं सामर्थ्यं न क्षणिकस्येति वाच्यम् किमसौ स्थायी पदार्थ एकमेव कार्य्यमुत्पादयेत्? उत युगपदनेकानि? अथवा क्रमेणानेकानि?, तत्र प्रथमद्वितीययोः कृतं स्था-यित्वेनासत्कार्य्योत्पादनस्य क्षणिकेनैव सिद्धेः। न तृतीयः समर्थस्य क्षेपायोगात्। अतो भावानामेकस्मिन्नेव क्षणे-ऽर्थक्रियाकारित्वं सत्त्वमिति, नैतद्युक्तं त्वन्मते अर्थ-क्रियाया दुर्निरूपत्वात्। किमर्थक्रिया नाम संविदां स्वगो-चरज्ञानजननं? किं वा क्षणान्तरोत्पादनम्? आद्येऽपि स्वसन्ताने तज्जननं? पुरुषान्तरसन्ताने वा? सर्व्वज्ञसन्ताने वा? नाद्यः संविदां स्वप्रकाशत्वेन तदसम्भवात्, अस्तु तर्हि द्वितीयः, देवदत्तसंवेदनं हि स्वप्रकाशमपि यज्ञदत्तसंवे-दनस्य विषयत्वाज्जनकं भविष्यतीति, तदसत् न तावत् प्रत्य-क्षज्ञानस्य विषयतया जनकमिति शक्यं वक्तुं, न हि पुरुषा-न्तरज्ञानं प्रत्यक्षतया क्वचिद्दृष्टं। नाप्यनुमानज्ञानविषय-तया जनकं त्वया पुरुषान्तरप्रत्यक्षज्ञानस्यैव विषयजन्यमित्य-ङ्गीकारात्। ननु तर्हि तृतीयोऽस्तु सर्व्वज्ञस्य हि प्रत्यक्षज्ञानं सर्वपुरुषगतसंवेदनानि विषयीकुर्व्वत् तैर्जन्यते, मैवं तथा-सति सोपप्लवैः सांसारिकसंवेदनैरीश्वरसंवेदनमप्युपप्लुतं स्यात् त्वन्मते ज्ञानज्ञेययोरभेदात्। अथ ईश्वरज्ञानमुपप्लुत-मपि नोपप्लवदोषं भजते तत्त्वज्ञानेनोपप्लवस्य बाधादिति चेत् मैवं न तदेव ज्ञानं सोपप्लवं बाधते उपप्लवस्यैकस्मि-न्नेव क्षणे प्राप्तिबाधयोरसम्भवात् नापि ज्ञानान्तरमुत्पाद्य उपप्लवं बाधितुं क्षमते पूर्व्वज्ञानोपप्लवस्य ज्ञानान्तरा-विषयत्वात् विषयत्वे पूर्व्वज्ञानान्तरमप्युपप्लुतं सत् कथं बाधकं स्यात्? नचोपप्लवांशं विहाय संवेदनांशस्यैवेश्वर-ज्ञानं प्रति विषयतया जनकत्वं, तस्मिन् सत्युपप्लवानभिज्ञः कथमीश्वर उपदिशेत्। नापि क्षणान्तरोत्पादनमर्थक्रियेति

द्वितीयः पक्षः, त्वत्प्रक्रियया चरमक्षणस्यासत्त्वप्रस-ङ्गात् तथा हि विज्ञानानि स्थायित्वकल्पनया द्रव्यगुणा-दिदोषैर्विषयैश्चोपप्लुतानि पूर्व्वपूर्व्वसजातीयविज्ञानलक्ष-णेभ्यः संस्कारेभ्य उत्तरोत्तराण्युत्पद्यन्ते तत्र सर्वमिदं क्षणिकमिति भावनया स्थायित्वकल्पना निवर्त्तते स्वलक्ष-णमिति भावनया द्रव्यगुणादिकल्पना नश्यति दुःख-मिति भावनया रागादिदोषप्रवृत्तिसुखदुःखोपप्लवाः क्षीयन्ते, शून्यमिति भावनया विषयोपप्लवविगमः। ततश्च भावनाभेदैश्चतुर्विधैश्चतुर्विधसंस्कारविरोधिभिश्चतुर्विधोप-प्लवे क्रमेण मन्दीकृते भावनाप्रकर्षस्यान्त्यभूतादुपान्त्य-प्रत्ययात् सर्वोपप्लवविरहि विज्ञानमुत्पद्यते तच्च संस्कार-सन्तानान्त्याच्चरमक्षण इति गीयते, तस्य च कार्य्या-भावादसत्त्वापत्तौ तथैव क्रमेण पूर्व्वपूर्व्वज्ञानानामप्यसत्त्वं प्राप्नुयात्। चरमक्षण ईश्वरज्ञानस्य जनकस्तद्विषयत्वादिति-चेत् तर्हि चरमक्षणसर्व्वज्ञज्ञानयोर्विशुद्धतया तुल्यस्वभाव-योरेकसन्तानत्वं स्यात् तुल्यस्वभावयोः कार्यकारणभावस्यै-कसन्तानलक्षणत्वात् ततश्च सन्तानाविच्छेदादनिर्मोक्षः स्यात्। सर्व्वज्ञसन्तानप्रवेश एव मोक्ष इति चेत् एवमपि चर-मक्षणस्य ईश्वरज्ञानविषयत्वं दुर्निरूपमिति, तज्जनकत्वं दूरापास्तं, भेदे हि सति संविदोर्विषयविषयिभावः न चेह भेदोऽस्ति। न तावत् संवित् संविदन्तरात् संविदाकारेण भिद्यते तथासति वैलक्षण्यसिद्धये प्रतियोगिनोऽसंवित्त्व-प्रसङ्गात् नाप्यसंविदाकारेण धर्म्मिणोरसंवित्त्वप्रसङ्गात् तस्माच्चरमक्षणस्य सर्व्वज्ञज्ञानोत्पादनलक्षणयाऽर्थक्रियया सत्त्वं दुःसम्पादम्। यद्यस्यार्थक्रिया कल्प्येत तदापि सा किं कारणस्य सत्त्वं सम्पादयेत? उत प्रतीतिम्? नाद्यः कार्य्यात् पूर्व्वमेव कारणस्य सत्त्वात् अन्यथा कारण-त्वायोगात्। द्वितीये तत् कार्य्यं स्वकार्य्येण प्रतिभासितं सत् कारणप्रत्यायकं तदपि तथैवेत्यनवस्था स्यात्। संवित् स्वयमेव स्वात्मानं प्रकाशयतीति नानवस्थेति चेत् तर्ह्यर्थ-क्रिया प्रतीतिहेतुरिति पक्षो हीयेत। स्वयमेव स्वार्थक्रिये-ति वदन आत्माश्रयं दुर्निवारम्। तदेवं न सत्त्वेनार्थक्रिया-कारित्वं किन्तु स्वाभाविकः कश्चिद्धर्मः, तथा चैकस्मिन् क्षणेऽर्थक्रियां कृत्वा पुनस्तूष्णींभूतस्यापि स्थायिनः सत्त्वं न विरुध्यते। यदुक्तं स्थायिनः क्रमेणानेककार्य्योत्पाद-कत्वं नास्ति समर्थस्य क्षेपायोगात् इति तदसत शक्तस्या-पि सहकारिसन्निधानविशेषक्रमापेक्षया कार्य्यक्रम उपपन्नः लोके तथैवानुभवात्। अथ मतम् शक्तस्य सहकार्य्य-

पेक्षाया अप्ययुक्तत्वात् अशक्ता एव सर्वे पदार्थाः परस्परापेक्षया सामग्रीं जनयन्ति सा च शक्ता कार्य्यमुत्पादयति, तदप्ययुक्तं सामग्रीं प्रत्यपि शक्तत्वे पदार्थानामन्योन्यापेक्षा न युक्ता अशक्तत्वे च तदजनकत्वात् निष्फलाऽन्योन्यापेक्षेति अनपेक्षैव सर्वत्र स्यात्। मा भूत्तर्हि कस्यापि सहकार्य्यपेक्षेति चेत् न अनुभवविरोधात्। नचानुभवोभ्रान्तः, बाधाभावात्,। यद्यपि शक्तस्याशक्तस्य वाऽपेक्षा न युक्तेत्युक्तं तथापि शक्तत्वाशक्तत्वविनिर्मुक्तवस्तुमात्रस्य सहकार्य्यपेक्षा स्यात् न्यायस्यास्य त्वयाप्यङ्गीकार्य्यत्वात्। तथा हि कार्य्यसत्त्वेऽसत्त्वहानिः असत्त्वे चासंबद्धता कारणविशेषेण कार्य्यविशेषस्य समवायानिरूपणात् सर्वं सर्वस्मादुत्पद्येतेति परेण चोदिते सत्त्वासत्त्वसम्बद्धत्वासंबद्धत्वविशेषं विसृज्य नियतपूर्व्वभावि कारणं नियतोत्तरभावि कार्यमिति त्वया निरूपणीयम् अन्वयव्यतिरेकौ तत्र निरूपकौ स्त इति चेत् सहकारिण्यपि तौ स्त एव तस्मादस्त्येव सहकार्यपेक्षा तत्कृतस्योपकारविशेषश्चिन्त्यताम्। यस्त्वेकदेशी मन्यते अन्वयव्यतिरेकसिद्धा भूम्युदकादिसहकारिणो बीजाख्ये कारणे विशेषमुच्छूनताख्यं जनयन्ति ततस्तद्बीजमङ्कुराख्ये कार्ये शक्तम् अन्यथानुपकारी भूम्यादिर्बीजेन नापेक्ष्येतेति, तदसत् बीजं स्वगतविशेषोत्पत्तौ शक्तं न चेत् सहस्रसन्निधानमपि न तं जनयेत् ततो नाङ्कुरोत्पादनेऽपि शक्ष्यति। अथ शक्तं तदापि यदि सहकारिसहकृतः विशेषान्तरं प्राप्योच्छूनतायां शक्नुयात् तदाऽनवस्था स्यात्। अथ तदप्राप्यैव तत्र शक्तं तदाङ्कुरेऽपि विशेषमन्तरेणैव शक्तं स्यात्। अथ मतम् अङ्कुरोत्पत्तिरुच्छूनत्वजन्मपूर्व्विका उच्छूनतोत्पत्तिस्तु सहकारिसन्निधिमात्रसाध्या तथैव दृष्टत्वादिति चेत् न तथासति शक्तिमता कारणेन स्वात्मन्यनुपकुर्वत्स्वपि सहकार्यपेक्ष्यत इति त्वयैव स्वमतव्याघात आपादितः स्यात्। तस्मान्नैकदेशिपक्षो युक्तिसहः। नन्वत एवास्मन्मतमादरणीयं न हि वयं तद्वत्कारणस्वरूपे सहकार्युपकारं ब्रूमः किं तर्हि क्षणिकान्मूलकारणादुत्पद्यमानं कार्यं सहकारिणमपेक्षते कार्यस्य बहुकारणसाध्यत्वादिति ब्रूमः। यद्यपि स्थायिकारणमतेऽप्येतावत् समानं तथापि तन्मते यावत् कारणसत्त्वं नैरन्तर्य्येण कार्योत्पत्तिर्दुर्वारा नियामकाभावात्। न च सहकारिसम्बन्धो नियामकः सम्बन्धस्यापि यावत्सम्बन्धिसत्त्वं भवितव्यत्वात्। न च तस्य सम्बन्धान्तरं नियामकम् अनवस्थापातात्। न च वाच्यं क्षणिकपक्षेऽपि न कारणसत्त्वक्षणे कार्यं जायते तयोर्यौगपद्यप्रसङ्गात् अन्यदा जन्माङ्गीकारे चानियमापत्तिरिति, कारणान्तरक्षणस्य कार्यनियामकत्वात् अतः क्षणिकत्वपक्ष एव श्रेयान्, मैवं सर्वत्र हि कार्यकारणभावो व्याप्तिबलेन निश्चेतव्यः तत्र किं त्वन्मते कार्य्यकारणव्याप्तिर्धूमाग्निव्यक्त्योः? उत तत्सन्तानयोः?। नाद्यः क्षणिकयोरन्वयव्यतिरेकबुद्धिद्वयकालावस्थानायोगात्। द्वितीयेऽङ्गारावस्थादप्यग्नेर्धूमोजायेत तत्सन्तानपातित्वाविशेषात् काष्ठाभावात्तदा जन्म नेति चेत् तस्यापि स्वसन्ताने विद्यमानत्वात् नचाग्निकाष्ठयोः सम्बन्धाभावः सन्तानद्वयनित्यत्वेन तस्याप्यनिर्व्वाच्यत्वात्। सम्बन्धः सम्बन्धान्तरपूर्व्वकत्वात् न सदातन इति चेत् न अनवस्थापत्तेः त्रिचतुरकक्षाविश्रान्त्यभ्युपगमेन नानवस्था इति चेत् तर्हि स्थायिकारणाभ्युपगमेऽप्यनवस्थाया। सुपरिहरत्वान्नोक्तदोषः। ननु स्थिरकारण उपकारकत्वाङ्गीकारे यदि स्थायित्ववादी स्वमतमपि समीकुर्यात् तर्हि तन्नाङ्गीकुर्म इति चेत् धूमकाष्ठयोः कार्यसहकारिणोरुपकार्य्योपकारकभावस्यान्वयव्यतिरेकसिद्धस्यावर्ज्जनीयत्वादन्वयव्यतिरेकयोश्चोपकार्योपकारकभावसाधकत्वं मूलकारणतत्कार्ययोरग्निधूमयोर्दृष्टं तस्मादुपकारके सहकारिणि मतद्वयेऽप्यपेक्षा समाना। तथा च क्षणिकपक्षे यथैकस्य वह्नेः सहकारिभेदात् देशभेदाच्च युगपदनेककार्यमभ्युपेयते वह्निः स्वदेशे वह्न्यन्तरं जनयति उपरिष्टाद्धूमम्, अधस्ताद्भस्म, पुरुषे विज्ञानञ्चेति तथा स्थायिपक्षेऽप्येकस्य कारणस्य कालभेदात् सहकारिभेदाच्चानेककार्यजनकत्वात् तत्र क्रमकारित्वं किं न स्यात्। नचैतावता क्षणिकस्थायिवादिनोर्मतसाङ्कर्यं शङ्कनीयं पूर्वस्य प्रतिकर्म्मव्यवस्थायादस्यान्ते निराकृतत्वात्। तदेवमतिदुष्टं क्षणिकविज्ञानवादिमतमुपेक्ष्य कूटस्थनित्यचैतन्ये सर्व्वमध्यस्ततया प्रतीयत इत्ययमेव वेदान्तवादोऽतिनिर्दोषत्वादादरणीय” इति।

आत्मतत्त्वविवेके च ‘‘अथ बाधकं भवदात्मानि क्षणभङ्गोवेत्यादिना” पञ्चविप्रतिपत्तीनाङ्क्षाविताना मध्ये प्रथमविप्रतिनिरासेऽस्य विवृतिर्दृश्या

क्षणभङ्गुर त्रि० क्षणं प्राप्य भङ्गुरः। क्षणमात्रेण विनाशशालिनि “यदि पुनरमी किमपि नाहमाभ्यदमस्ति किञ्चिदपि वस्तु स्थिरं, विश्वमेव क्षणभङ्गुरम्, अलीकं चेत्यवधारयेरन् न किञ्चिदपि कामयेरन्, न चाकामयमानाः

केचिदपि प्रवर्त्तन्ते” आत्मत० शिरोमणिः [शब्दमा०

क्षणरामिन पुंस्त्री० क्षणे क्षणे रमते रम–णिनि । पारावते

क्षणिक त्रि० क्षणः स्वसत्ता व्याप्यतयाऽस्त्यस्य ठन् । क्षणमात्र स्थायिनि । तल्लक्षणञ्च आत्मतत्त्वविवेकव्याख्याने रघुनाथ शिरमण्युक्तम् यथा

“क्षणिकत्वञ्च स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति कादाचित्कत्वम् उत्पत्तिमत्त्वं वा । उत्पत्तिश्च स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षण सम्बन्धः । क्षणश्च स्वाधेयपदार्थप्रागभावानाधारः समयः अधिकन्तु विधेयैर्योगिकानां प्रागभावे चरमध्वंसे च, निषेधस्य बौद्धानामलीके, स्वाधिकरणसमयप्रागभावाधिकरणक्षणावृत्तित्वं क्षणिकत्वमिति तु न्यायः” । अत्र गदाधरव्याख्या कादाचित्कशब्दे १८८२ पृ० दर्शिता अत्र कादाचित्कत्वं सत्त्वे सति किञ्चित्कालवृत्त्यभावप्रतियोगित्वम् । “क्षणिकत्वञ्च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्” मुक्ताव० । २विद्युति स्त्री हेम०

क्षणित त्रि० क्षणः संजातोऽस्य तार० इतच् । जातक्षणे

क्षणिन् त्रि० क्षणः विश्रान्तिकालः उत्सवोवाऽस्त्यस्य इनि । क्षणात् १विश्रान्ते २उत्सवान्विते च । “तं विश्रान्तं शुभे देशे क्षणिनं कल्यमच्युतम्” भा० स० १२अ० । स्त्रियां ङीप् सा च ३रात्रौ शब्दर०

क्षणेपाक पु० क्षणे पच्यते पच–कर्म्मणि घञ् न्यङ्क्वा कुत्वम् अलुक्स० । क्षणेन पच्यमाने पदार्थे । [च वाच्यम् ।

क्षत् स्त्री० क्षण–भावे सम्प० क्विप् । १हनने २विदारणे ३पीडने

क्षत त्रि० क्षण–क्त । १विदारिते २पीडिते ३र्धर्षिते च । “रक्षोरवःक्षतमथेन पत्रिणा हृदि क्षतोगोत्रभिदप्यमर्षणः” रघुः । ४क्षतियुक्ते “रुद्राणामपमूर्द्धानः क्षतहुङ्कारशंसिनः” कुमा० “क्षततिमिरेषु दिगवधूमुखेषु” भट्टिः क्षतयोन्या अपि स्त्रियाः” “कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता” इति च नारदः । विदारणञ्च शस्त्रादिभिरवयवविभागः, “अङ्गुलीवोरगक्षता” रघुः । सर्पेण दशनेनाङ्गुल्या अवदारणात्तथात्वम् । भावे क्त ।५विदारणे न० “नखक्षतानीव वनस्थलीनाम्” कुमा० “अनलङ्कृतोऽपि सुन्दर ! हरसि मनो मे यतः प्रसभम् किं पुनरलङ्कृतस्त्वं नखरक्षतैस्तस्याः” सा० द० । ६घर्षणे “क्षतोज्ज्वलाकुठनखांशुभिन्नया” माघः । उपचारात् तत्कार्य्ये ७दुःखादौ “क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः” रघुः उपचारात् (घा) इति प्रसिद्धे व्रणरूक्ते पूयादौ द्रवणे हेमच० “प्रकुपितास्तु दोषामेदोमांसपक्वमांसशोणिते प्रदूष्य कण्डूं जनयन्ति तत्र कण्डूयनात् क्षतं समुपजायते क्षते दुष्टमांसजाः प्ररोहाः पिच्छिल रुधिरस्राविणो जायन्ते कूर्चकिणोऽभ्यन्तरमुपरिष्टाद्वा” सुश्रु० “यस्तु क्षतेषूपयुज्यते स भूयः कल्क इति संज्ञां लभते” सुश्रु० व्रणशब्दे विवृतिः

क्षतनिमित्तमरणेऽशौचभेदमाह शु० त० व्यासः “क्षतेन म्रियते यस्तु तस्याशौचं भवेद्द्विधा । आ सप्तमाह्नात्त्रिरात्रं स्यात् दशरात्रमतः परम् । शस्त्रघाते त्र्यहादूर्द्ध्वं यदि कश्चित् प्रमीयते । अशौचं प्राकृतं तत्र सर्ववर्णेषु नित्यशः” । “अत्र शस्त्रघातपदं क्षतेनरणशस्त्रघातपरं पारिभाषिकशस्त्रघातपरमपि । यथा देवीपु० ‘पक्षिमत्स्यमृगैर्ये तु दंष्ट्रिशृङ्गिनखैर्हताः । पतनानशनप्रायैर्वज्राग्निविषबन्धनैः । मृता जलप्रवेशेन ते वै शस्त्रहताः स्मृताः’ । अन्यथा क्षतं विना पतनादिभिर्विलम्बमृतानां दिनपञ्चकेऽनध्ययवायः स्यात् । न च शास्त्रीये व्यवहारेऽन्तरङ्गत्वेन पारिभाषिकग्रहणस्यैव युक्तत्वमिति वाच्यम् श्राद्धे पारिभाषिकापारिभाषिकशस्त्रघातग्रहणवदत्रापि तथा युक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः” शु० त०

क्षतकास पु० ५त० । क्षतजाते कासभेदे “पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः” भावप्र० । कासशब्दे २०४२पृ० विवृतिः [शब्दच० । २लाक्षायां स्त्री हेम० ।

क्षतघ्न पु० क्षतं हन्ति हन हेतौ-क । (कुकुरसोँगा) १क्षुपभेदे ।

क्षतज न० क्षतात् जायते जन-ड । १रुधिरे “अमरः सच्छिन्नमलः क्षतजेन रेणुः” रघुः “क्षतजकणवर्षबभ्रुणा च भ्रमता” काद० २पूये हेम० । ३क्षतजातमात्रे त्रि० । सुश्रुतोक्ते ४कासभेदे कासशब्दे तद्विस्तार उक्तप्रायोऽपि स्पष्टार्थं सुश्रुतवाक्यमत्रोदाह्रियते यथा

“उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः । कासस्यापि च विज्ञेयास्त एवोत्पत्तिहेतवः । धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च । विमार्गगत्वादपि भोजनस्य वेगावरोधात् क्षवथोस्तथैव । प्राणोह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यस्वनतुल्यघोषः । निरेति वक्त्रात्सहसा सदोषः कासः स विद्वद्भिरुदाहृतस्तु । स वातपित्तप्रभवः कफाच्च क्षतात्तथान्यः क्षयजोऽपरश्च । पञ्चप्रकारः कथितो भिषग्भिर्विवर्द्धितो यक्ष्मविकारकृत् स्यात् । भविष्यतस्तस्य तु कण्ठकण्डूर्भोज्योपरोधो गलतालुलेपः । स्वशब्दवैषम्यमरोचकोऽग्निसादश्च लिङ्गानि भवन्त्यमूनि ।

हृत्कण्ठमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः। प्रसक्तवेगस्तु समीरणेन कासेत्तु शुष्कं स्वरभेदयुक्तः। उरोविदाहज्वरवक्त्रशोषैरभ्यर्दितस्तिक्तमुखस्तृषार्त्तः। पित्तेन पीतानि वमेत्कटूनि कासेत्स पाण्डुः परिदह्यमानः। विलिप्यमानेन मुखेन सीदन् शिरोरुगार्त्तः कफपूर्णदेहः। अभक्तरुग्गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन। यस्तोऽतिमात्रं विहतश्च यस्य व्यायामभाराध्ययनाभिघातैः। विश्लिष्टवक्षाः स नरः सरक्तं ष्ठीवत्यभीक्ष्णं क्षतजः स उक्तः। अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः। रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत्। स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम्। कण्ठेन रुजतात्यर्थं विभिन्नेनेव चोरसा। सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना। दुःखस्पर्शेन शूलेन भेदपीडाभितापिना। पर्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः। पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्"।

क्षतजव्रण पु॰ भावप्र॰ उक्ते व्रणभेदे "पृथक् समस्तदोषोत्था रक्तजागन्तुजौ तथा। व्रणशोथाः षडेते स्युःसंयुक्ताः शोथलक्षणैः। (शोथलक्षणैः पूर्वोक्तैः) विशिष्टं रूपमाह। "विषमं पच्यते वातात् पित्तोत्थश्चाचिरस्थिरम्। कफजः पित्तवच्छोथो रक्तागन्तुसमुद्भवौ"। अत्र रक्तजेत्युक्तेः क्षतजव्रण इत्येव शब्दस्यौचित्यात् शब्दकल्पद्रुमे क्षतव्रणशब्दकल्पनं प्रामादिकम्। भावप्र॰ उक्ते ५पिपासाभेदे स्त्री यथा

"भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्द्धं चितं पित्तविवर्द्धनैश्च। पित्तं सवातं कुपितं नराणां तालु प्रपन्नं जनयेत् पिपासाम्। स्रोतःस्वपांवाहिषु दूषितेषु दोषैश्च तृट् सम्भवतीह जन्तोः। तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्याऽऽमसमुद्भवा च। भक्तोद्भवा सप्तमिकेति तासां निबोध लिङ्गान्यनुपूर्व्वशस्तु"। नराणां चितं स्वस्थान एव सञ्चितं पित्तं सवातं पित्तविवर्द्धनैः कट्वम्लोष्णादिभिः कुपितं भयश्रमाभ्यां बलसंक्षयादुपवासादेव वातः कुपितः। तद्द्वयम् ऊर्द्धं प्रसरत् तालु प्रपन्नं सत् पिपासां जनयेत्। न केवलं तालुन्येव दूषिते तृष्णा भवति। किन्तु जलवाहिस्रोतःस्वपि अत आह स्रोतःस्वित्यादि। नन्वत्र बहुवचनं न युक्तम्। यतो जलवहे द्वे स्रोतसी सुश्रुतेनोक्ते। उच्यते। तयोरेवानेकप्रतानयोगान्न दोषः। अपांवाहिषु स्रोतःस्विति जिह्वादेरप्युपलक्षणम् यत आह चरकः "रसवाहिनीश्च धमनीर्जिह्वा हृदयगलतालु क्लोम च। संशोष्य नृणां देहेषु कुरुतस्तृष्णामतिप्रबलौ पित्तानिलाविति। संख्यामाह तिस्र इत्यादि। तृष्णायाः सामान्यलक्षणमाह। "सततं यः पिबेत्तोयं न तृप्तिमधिगच्छति। मुहुः काङ्क्षति तोयन्तु तं तृष्णार्दितमादिशेत्"। क्षतजामाह "क्षतस्य रुक्शोणितनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु"। क्षतस्य शस्त्रादिक्षतयुक्तस्य रुक् पीड़ा"।

क्षतविध्वंसिन् पु॰ क्षतं विध्वंसयति वि+ध्वन्स-णिच्-णिनि ङत॰। हस्तिदारकवृक्षे शब्द च॰

क्षतव्रत पु॰ क्षतं व्रतमस्य। स्खलितव्रतब्रह्मचारिणि अवकीर्णिनि अमरः तत्प्रायश्चित्तमाह प्रायश्चित्तविवेके "अथावकीर्णिप्रायश्चित्तम् "अथावकीर्णी मैथुनेन क्षतव्रतः यथाह याज्ञवल्क्यः "अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितमिति" प्रायश्चित्तमाहाङ्गिराः "अवकीर्णी निवसेत् ब्रह्महत्याव्रतञ्चरेत्। खरचर्म्मवासाः षण्मासात्कथा मुच्येत किल्विषात्"। अवकीर्णमवकीर्णता भावे क्तः। अत्र सार्द्धसप्तदिनवः। इदं प्रमादतस्त्रव एतद्विषय एव याज्ञवल्क्यः "अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम्। गर्द्दभं पशुमालभ्य नैरृतं स विशुद्ध्यति"। प्रयत्नात् स्त्रियमुत्पाद्य प्रवृत्ते तु मनुः "एतस्मिन्नेव संप्राप्ते वसित्वा गर्द्दभाजिनम्। सप्तागारांश्चरेद्भैक्ष्यं स्वकर्म्म परिकीर्त्तयन्। तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नैककालिकम्। उपस्पृशंस्त्रिषवणमब्देन स विशुध्यति"। एतद्विषयएवाभ्यासे शातातपः "अथातोऽवकीर्णिप्रायश्चित्तं व्याख्यास्यामः "ब्रह्मचारी यद्यवकीर्य्येत चतुर्थकालभक्तं भैक्ष्यं चरेदेवंपूतोभवतीति। तथा पैठीनसिरपि "अवकीर्णी गर्द्दभाजिनं वसेत् संवत्सरं प्राजापत्यं चरेत्" शङ्खलिखिताभ्यान्तु विकल्प एवोक्तः। तद्यथा "सप्तरात्रमवकीर्य्येत भैक्षाग्निकार्य्ये कुर्व्वन् सद्यः कामादुत्सर्गे रेतसोऽन्यत्र स्वप्नात् तत्र प्रायश्चित्तं महाव्याहृतिभिर्जुहुयात् ओङ्कारपूर्व्विकाभिः संवत्सरं वा नक्तं भैक्षञ्चरेत् चतुर्थकाले मितभुग्गायत्रीं तरत्समानुगाञ्जपेदिति"। गायत्रीमपि संवत्सरं जपेदित्यर्थः। महाव्याहृतिहोमश्च लघुत्वादातिदेशिकावकीर्णित्वेन भैक्षाग्नित्यागे स्त्रियं विना कामात् सकृद्रेतस्त्यागे व्यवतिष्ठते, स्त्रियं विनापि कामाद्रेतस उत्सर्गे प्रमादगमने च वशिष्ठः "ब्रह्मचारी चेत् स्त्रियमुपेयादरण्ये

चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्द्दभं पशुमालभेत नैर्ऋतं वा चरुं निर्व्वपेत् तस्य जुहुयात् कामाय स्वाहा कामकामाय स्वाहा । नैर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहा इति एतदेव रेतसः प्रयत्नोत्सर्गे दिवा स्वप्ने व्रतान्तरेषु च”। आसनावर्त्तनादूर्द्ध्वं तो विसर्गे दिवास्वप्ने चाभ्यासे ज्ञेयम्। पशोरभावे नैर्ऋतं चरुं निर्वपेदित्यर्थः । एतच्चामावास्यायां कर्त्तव्यमित्याह बौधायनः । “अथावकीर्णी मावस्यायां निशाग्निमुपसमाधाय संपरिस्तीर्य दार्व्वीं होमिकीं परिचेष्टां कृत्वा द्वे आज्याहुती जुहुयात्” । अत्र च व्रतान्तरेष्वित्यभिदधता वशिष्ठेन द्वादशाहादिकव्रतेषु पुण्यार्थचान्द्रायणादिषु च यथातिदिष्टं तथान्यैरतिदिष्टमविशेषात्। अतएव “कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः । अतिक्रमं व्रतस्याहुर्धर्म्मज्ञा ब्रह्मवादिनः” इति मनुना सामान्येनैवावकीर्णिलक्षणमन्वकारि अकामतो रेतसः स्रावे मनुः “स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः । स्नात्वार्कमर्च्चयित्वा तु पुनर्म्मामित्यृचं जपेत्”। ब्रह्मचारिणो गुरुदारगमने तु तद्गमनोक्तप्रायश्चित्तेनैव गुरुणा लघ्ववकीर्णिप्रायश्चित्तं कृतम्भवेत् । यथा दण्डनिपातप्रायश्चित्तेनैव गुरुणा तन्नान्तरीयकावगोरणप्रायश्चित्तं सम्पद्यते ।

क्षतहर न० क्षतं हरति हृ—हेतौ ट। क्षतहरणहेतौ १अगुरुचन्दने शब्दच०। २क्षतहारकमात्रे त्रि०

क्षताशौच न० क्षतनिमित्तमशौचम्। व्रणादिक्षतकृते स्मृत्युक्ते अशौचे। “सव्रणः सूतकी छर्दी मत्तोन्मत्तरजस्वलाः । मृतबन्धुरबन्धुश्च वर्ज्यान्यष्टौ स्वकालतः” प्रा०त० देवलः । अशुचित्वमप्याह तत्रैव सएव । “दन्तलग्नमसंहार्यं लेपं मन्येत दन्तवत् । न तत्र बहुशः कुर्यात् यत्नमुद्धरणे पुनः । भवेदशौचमत्यन्तं तृणवेधात् व्रणे क्षते । तृणवेधादित्युपलक्षणं व्रणहेतुत्वनमात्रस्य। अस्यापवादः “चन्द्रक्षयेपक्षे चैव मृतानां पिण्डकर्म्मणि । महातीर्थे तु संप्राप्ते क्षतदोषो न विद्यते” प्रा०त० पुलस्त्यः । मृतानां पिण्डकर्म्मणि नरवकाशत्वात् पितापिण्डोदकदानादौ । संप्राप्ते नियतशावादिना सम्यक्प्राप्ते ।

क्षति स्त्री क्षण-क्तिन् । १हानौ, २अपचयेऽक्षये च ।“हयानां न क्षतिः काचिन्न रथस्य न मातलेः”भा० व० १७२अ० । “द्विषां क्षतीर्या प्रथमे शिलीमुखाः”किरा०

क्षतोदर क्षतजाते उदररोगभेदे उदरशब्दे ११५० पृ० विवृतिः । शल्यमित्यादि तत्रत्यं सुश्रुतवाक्यं भावप्र० व्याख्याय चरकमुनि सम्मतिप्रदर्शनेन विशेष उक्तो यथा “शल्यं कण्टककर्करादि । अन्नोपहतं भुक्तं यत् अन्नं भिनत्ति तथा अन्यथा आगतं भोजनं विना आगतं, शर्कराभिरितरथापि यदन्नं भिनत्ति तत् । उपलक्षणम् । जृम्भणमत्यशनं वा यदन्त्रम्भिनत्ति । यतउक्तञ्चरकेण शर्करातृणकाष्ठास्थिकण्टकैरन्नसंयुतैः । भिद्येतान्त्रं यदा भुक्तं जृम्भयात्यशनेन चेत्”। तस्मात् भिन्नादन्त्रात् । गुदतस्तु भूयः अन्नात्संस्रुत्य पुनर्गुदतः स्रवेदित्यर्थः । दाल्यति विदार्य्यत एव । पदार्थद्विरार्थत्वात् । एतत् क्षतोदरमन्त्रान्तरे परिस्राव्युदरमदिष्टम्”

क्षत्तृ पु० स्त्री० क्षद-संभृतौ संज्ञायाम् तृच् अनिट् । १सारथौ २द्वाःस्थे ३क्षत्रियायां शूद्रेण जाते वर्णसङ्करे पुंस्त्री० अमरः स्त्रियां ङीप् । ४दासीपुत्रे ५नियुक्ते ६वेधसि पु० मेदि० ७मत्स्ये संक्षिप्तसा०। उपधादीर्घविधौ क्षत्तृशब्दस्य पृथग्ग्रहणात् औणादिकतृजन्तस्यान्यस्य निषेधेऽपि दीर्घः क्षत्तारौ “क्षत्तारौ ते प्रजापते। ताविहायतां स्फातिम्” २,२४,७, “यत् क्षत्तारं ह्वयत्या” अथ० ६,६,४६,आविचितस्याग्निः क्षत्ता विश्वेदेवाः सभासदः”शत०ब्रा० १२,५,४,६, “विविक्त्रे क्षत्तारम्” यजु० ३०,१२, । “क्षत्रिया मागधं वैश्यात् शूद्रात् क्षत्तारमेव च” या० उक्तेः “शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् । वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः । एकान्तरे त्वानुलोम्यादम्बष्ठोग्रौ यथा स्मृतौ । क्षत्तृवैदेहकौ तद्वत् प्रातिलोम्येऽपि जन्मनि” मनूक्तेश्च क्षत्रियायां विप्राज्जात इति अमरमतत्वेन शब्दक० उक्तिः प्रामादिकी । “क्षत्ता स्यात् सारथौ द्वाःस्थे, क्षत्रियायाञ्च शूद्रजे” इति नानार्थेऽमरोक्तेः मनुयाज्ञवल्क्यादिसंवादाच्च “माहिष्योऽर्य्यक्षत्रिययोः क्षत्तार्य्याशूद्रयोः सुतः” इत्यमरोक्तौ अर्य्याशूद्रजातस्य क्षत्तृत्वोक्तावपि तत्र अर्य्या स्वामिनी योग्यत्वात्तत्र क्षत्रिया, तेन न पूर्व्वापरविरोध इति भानुदीक्षितव्याख्या । अतएव मेदिन्याम् “क्षत्ता शूद्रक्षत्रियाजे प्रतीहारे च सारथौ । भुजिष्यातनयेऽपि स्यान्नियुक्तवेधसोः पुमान्”। तस्य वृत्तिमाह मनुः “क्षत्त्रुग्रपुक्कसानां तु बिलौकोवधबन्धनम्” । तत्र दासीपुत्रे “ततः प्रीतमनाः क्षत्ता (विदुरः) धृतराष्ट्रं विशाम्पते ! । उवाच दिष्ट्या कुरवोवर्द्धन्त इति विस्मितः । वैचित्रवीर्य्यस्तु नृपो निशम्य विदुरस्य तत्” भा०आ०२००अ०। विदुरस्य दासीपुत्रत्वं विदुरशब्दे वक्ष्यते “ततोऽपश्यत्

विदुरं तूर्णमाराद्भ्यायान्तं सवयस्य: स राजा। अथाब्रवीत् भ्रातरं भीमसेनं किं नु क्षत्ता वक्ष्यते न सनेत्य ?" भा० व० ५अ०। द्वाःस्थे। "तत द्वास्थः प्रविश्यैवेत्युपक्रमे "ततो हृष्टो मत्स्यराजः क्षत्तार-मिदमब्रवीत्" "क्षत्तारं कुरुराजस्तु शनैः कर्णमुपा-जत्" इति च भा० वि० ६८अ०। सारथौ "जानश्रुतिर्ह पौत्रायण उपशुश्राव सह संजिहान एव क्षत्तार-मुवाच" "सह क्षत्तान्विष्य नाविदमिति" "सह क्षत्ता-ऽविदमिति" च छा० उप०। इक्षोपाध्यक्षे च "अथ क्षत्ता पत्नाशतीमभिमेथति" शत० ब्रा० १३।५।२।८ "क्षत्तासन्निधिनः कोषाध्यक्षः" भा०

क्षत्र पुंन०। क्षतस्त्रायते त्रै—क ५त० क्षद-संभृतौ कर्त्तरि त्र वा अर्द्धर्चा०। १क्षत्रिये "यस्य ब्रह्म च क्षत्त्रं च उभे भवत ओदनः" श्रुतिः "यत्र ब्रह्म च क्षत्रञ्च सम्यञ्चौ चरतः सह" यजु०२०।२५। "क्षत्त्रं च तयजातिः" वेददी० "क्षतात् किल त्रायते इत्युदग्रः क्षत्त्रस्य शब्दो भुवनेषु रूढः" रघु:। अत्र मल्लि० "क्षणु हिंसायामिति धातोः सम्पदादित्वात् क्विप् गमादीनामिति वक्तव्यादनुनासिकलोपे तुगागमे च क्षदिति रूपं सिद्धम् क्षतः न शात् त्रायते इति क्षत्त्रः सुपीति योगविभागात् कः। तामेतां व्युत्पत्तिं कवि-रर्थतोऽनुक्रामति क्षतादित्यादिना। उदग्रः उन्नतः क्षत्त्रस्य क्षत्त्रवर्णस्य वाचकः शब्दः क्षत्रशब्द इत्यर्थः क्षतात् त्रायते इति व्युत्पत्त्या भुवनेषु रूढः किल प्रसिद्धः खलु नाश्वकर्णादिवत् केवलरूढः किन्तु पङ्कजा-दिवत् योगरूढः"। "नाब्रह्म क्षत्त्रमृध्नोति नाक्षत्त्रं ब्रह्म वर्द्धते। ब्रह्म क्षत्त्रञ्च संयुक्तमिहामुत्र च वर्द्धते" मनुः। क्षद्यते संभ्रियते राज्ञा, क्षद-कर्म्मणि त्र। २राष्ट्रे "क्षत्त्रं वा एष प्रपद्यते यो राष्ट्रं प्रपद्यते क्षत्त्रं राष्ट्रम्" शत० ब्रा० ।२२। क्षत्त्रस्य कर्म्म अण्। तत्कर्म्मणि, "क्षात्त्रं द्विजत्वञ्च परस्परार्थम्" भट्टिः तस्येदमण्। क्षात्त्र तत्सम्बन्धिनि त्रि० "क्षात्त्रं कर्म्म स्वभावजम्" गीता ३उदके ४धने च निघ० ५देहे उणादिको० ६तगरे न० राजनि०

क्षत्त्रकर्म्मन् न० ६त०। "शौर्यं तेजो धृतिर्दाक्ष्यम् युद्धे चा-प्यपलायनम्। दानमीश्वरभावश्च क्षत्रकर्म्म स्वभावजम्" गीतोक्ते कर्म्मभेदे। अत्र क्षात्त्रं कर्म्मेति वा पाठः

क्षत्त्रधर्म्म पु० ६त०। स्मृत्याद्युक्ते क्षत्त्रियस्य धर्म्मभेदे। यथाह हारीतः

"राज्यस्थः क्षत्त्रियश्चापि प्रजा धर्म्मेण पालयन्। कुर्य्या-दध्ययनं स यग्यजेद्यज्ञान् यथाविधि। दद्याद्दानं द्वि-जातिभ्यो धर्म्मबुद्धिसमन्वितः। स्वभार्य्यानिरतो नित्यं षड्भागार्हः सदा नृपः। नीतिशास्त्रार्थकुशलः सन्धि-विग्रहतत्त्ववित्। देवब्राह्मणभक्तश्च पितृकार्य्यपरस्तथा। धर्म्मेण यजनं कार्य्यमधर्म्मपरिवर्जनम्। उत्तमां गति-माप्नोति क्षत्त्रियोऽप्येवमाचरन्"।

"त्रीणि राजन्यस्याध्ययनं शस्त्रेण च प्रजापालनं स्वधर्म्मस्तेन जीवेत्" वशिष्ठः। पद्मपु० स्वर्गखण्डे २६अ० "क्षत्त्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव!। द-द्याद्राजा न याचेत यजेत न च याजयेत्। नाध्याप-येदधीयीत प्रजाश्च परिपालयेत्। नित्योद्युक्तो दस्यु-वधे रणे कुर्य्यात् पराक्रमम्। ये तु क्रतुभिरीजानाः श्रुत-वन्तश्च पार्थिवाः। ये तु युद्धे विजेतारस्ते तु लोक-जितो नृपाः। अविक्षतशरीरो हि संगराद्यो निव-र्त्तते। क्षत्त्रियस्य तु तत् कर्म्म नोभयत्र यशःप्रदम्। क्ष-त्त्रियाणामयं धर्म्मो निर्णीतो मुनिभिः परः। नास्य कृत्यतमं किञ्चिद्राज्ञो दस्युविनिग्रहात्। दानमध्ययनं यज्ञो राज्ञां श्रेयोऽभिधीयते। तस्माद्राज्ञा महाराज! योद्धव्यं धर्म्मशीलिना। प्रजाः स्वेषु च धर्म्मेषु स्था-पयेत महीपतिः। धर्म्मशास्त्रेव हि कर्म्माणि कारयेत् सततं प्रजाः। परत्रां कृतिमाप्नोति नृपतिः परिपाल-नात्। कुर्य्यादन्यन्न वा कुर्य्यान्मैत्रो राजन्य उच्यते। राजन्यानां करादानं विना वैवाहिकञ्च यः। प्रतिग्रहः स निन्द्योऽत्र परत्र चासुखप्रदः। युद्धे पलायनञ्चैव तथा कातरताऽर्थिषु। अपालनं प्रजानाञ्च दाने धर्म्मे विर-क्तता। अनवेक्षा स्वराष्ट्रस्य ब्राह्मणानामनादरः। अमा-त्यानामसम्मानस्तेषां कर्म्मानवेक्षणम्। भृत्यानाञ्च परी-हासो निषिद्धं क्षत्त्रजन्मनाम्। राजन्यस्तु महाराज! यथा क्षेममवाप्नुयात्। तत् शृणुष्व तवाख्यास्ये धर्म्मसं-ग्रहतत्परः। वेदानधीत्य धर्म्मेण राजशास्त्राणि चा-नघ!। सन्तानादीनि कर्म्माणि कृत्वा सोमं निषेव्य च। पालयित्वा प्रजाः सर्व्वा धर्म्मेण जयतां पर। राजसू-याश्वमेधादीन् मखानन्यांस्तथैव च। आहृत्य च यथा पाठं विप्रेभ्यो दत्तदक्षिणः। संग्रामे विजयं प्राप्य तथाल्पं यदि वा बहु। स्थापयित्वा प्रजापालं पुत्त्रं राज्ये च पार्थिवः। अन्यगोत्रं प्रशस्तं वा क्षत्त्रियं क्षत्त्रियर्षभ!। अर्च्चयित्वा पितॄन् सम्यक् पितृयज्ञे यथा-

र्थिव । देवान् यज्ञैर्ऋषीन् वेदैरर्च्चयित्वा प्रयत्नतः । अन्तकाले च सम्प्राप्ते य इच्छेदाश्रमान्तरम् । सोऽनुपूर्व्याश्रमान् राजन्! गत्वा सिद्धिमवाप्नुयात् । राजर्षित्वेन राजेन्द्र । भैक्ष्यचर्य्याश्रमेवया । अपेतगृहधर्म्मोऽपि चरेज्जीवितकाम्यया । न चैतन्नैष्ठिकं कर्म्म त्रयाणां भूरिदक्षिणम् । चतुर्णां राजशार्दूल ! प्राहुराश्रमवासिनाम् । बाह्वायत्तं क्षत्रियैर्मानवानां लोकश्रेष्ठं धर्म्ममासेवमानैः । सर्व्वे धर्म्माः सोपधर्म्मास्त्रयाणां राज्ञो धर्म्मा इति वेदाच्छृणोमि । एवं धर्म्मान् राजधर्म्मेषु सर्व्वान् सर्व्वावस्थं सम्प्रलीनान्निबोध । अल्पाश्रयानल्पफलान् वदन्ति धर्म्मानन्यान् वेदविदो मनुष्याः । महाश्रयं बहुकल्याणरूपं क्षात्रं धर्म्मं नेतरं प्राहुरार्य्याः । सर्व्वे धर्म्माः राजधर्म्मप्रधानाः सर्व्वे धर्म्माः पाल्यमाना भवन्ति । सर्व्वं त्यागो राजधर्म्मेषु राजंस्त्यागं धर्म्मञ्चाहुरग्र्यं पुराणम् । मज्जेत्त्रयी दण्डनीतौ हतायां, सर्व्वे धर्म्माः प्रक्षयेयुर्व्विरुद्धाः । सर्व्वे धर्म्माश्चाश्रमाणां हताः स्युः क्षात्रे त्यक्ते राजधर्म्मे पुराणे । सर्व्वे त्यागा राजधर्म्मेषु चोक्ताः सर्व्वा विद्या राजधर्म्मेषु युक्ताः । सर्व्वे लोका राजधर्म्मे प्रविष्टा यथा जीवाः प्राकृतैर्बध्यमानाः । धर्म्मश्रुतानामुपपीडनाय एवं धर्म्मा राजधर्म्मैर्वियुक्ताः । चातुराश्रम्यधर्म्माश्च यतिधर्म्माश्च पार्थिव ! । लोकवेदोत्तराश्चैव क्षात्रे धर्म्मे समाहिताः । सर्व्वाण्येतानि धर्म्माणि क्षात्रे राजन्यसत्तम ! । अप्रतापं बहुद्वारं धर्म्ममाश्रमवासिनाम् । क्षात्रेणैव हि धर्म्मेण प्रतप्तं क्रियते नृप ! । द्विजार्च्चनं क्षत्रियाणां तथा नारायणार्च्चनम् । राज्यानां पालनञ्चैव रणे निर्भयता तथा । नित्यं दानं ब्राह्मणेभ्यः शरणागतरक्षणम् । पुत्रतुल्यं प्रजानाञ्च दुःखिनां परिपालनम् । शस्त्रास्त्राणाञ्च नैपुण्यं रणे शौर्य्यं तथैव च । तपश्च धर्म्मकृत्यञ्च यत्नतः कुरुते मुदा । पण्डितं नीतिशास्त्रज्ञं नित्यञ्च परिपालयेत् । सभामध्ये वासयेच्च नित्यं सद्भिश्च संयुतः । हस्त्यश्वरथपादातं सेनाङ्गञ्च चतुष्टयम् । पालयेत् यत्नतो नित्यं यशस्वी च प्रतापवान् । रणेऽरिमन्त्रितश्चैव दानेनाभिमतो भवेत् । रणे यो वा त्यजेत् प्राणान् तस्य स्वर्गो यशस्करः" । विस्तरस्तु भा० शा० राजधर्म्मे

सक्षत्रधर्म्मन् पु० नहुषभ्रातुरनेनसोवंश्ये संकृतेः पुत्रे नृपभेदे । "संकृतेरपि धर्म्मात्मा क्षत्रधर्म्मा महायशाः । अनेनसः समाख्याताः क्षत्रवृद्धस्य मे शृणु" हरिवं० २९ अ०

क्षत्रस्य । धर्म्मः । २क्षत्रियस्य धर्म्मे युद्धादौ । क्षत्रे तत्सम्बन्धी धर्म्मो यस्य अनिच् समा० । ३क्षत्रियधर्म्मयुते । "शास्त्रेणाभिमुखोयस्तु बध्यते क्षत्रधर्म्मणा" मनुः

क्षत्रधृति पु० क्रतुभेदे "क्षत्रधृतिः" "तदुभयत एके त्रिष्टोमज्योतिष्टोमौ" कात्या० श्रौ० १५।९।२४।२५। "ततोमासान्ते श्रावण्याम् क्षत्रधृतिसंज्ञः क्रतुर्भवति । कुर्व्वन्ति एके उपरिष्टात् । अत्र च वैशाखामावास्यायां पशुबन्धौ, ज्यैष्ठमासपौर्णमास्यां केशवपनीयः, आषाढ्यां व्युष्टिद्विरात्रः, श्रावण्यां क्षत्रधृतिः" भाद्रपदाश्वयुजयोस्त्रिष्टोमज्योतिष्टोमौ, कार्त्तिक्यां सौत्रामणीति" कर्कः ।

क्षत्रबन्धु पु० क्षत्रं राष्ट्रं बन्धुरस्य । १क्षत्रिये "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्" । "आ द्वाविंशात् क्षत्रबन्धोरा चतुर्विंशतेर्विशः" मनुः । क्षत्रस्य बन्धुरिव । २क्षत्रियतुल्ये अपकृष्टक्षत्रिये । "क्षत्रबन्धुः सदानार्य्यो रामः परमदुर्म्मतिः" रामा० ल० ३३अ०

क्षत्रभृत् पु० क्षत्रं बिभर्त्ति भृ-क्विप् । क्षत्रियभरणकर्त्तरि अग्निभेदे । "अग्निर्ब्रह्मण्वानग्निः क्षत्रभृत्" आश्व० श्रौ० ४।१।२२। "विराडग्ने क्षत्रभृदा दिदीहि" यजु० २७।७। क्षत्रं भर्त्तव्यत्वेनास्त्यस्य मतुप् मस्य वः। क्षत्रवत् तत्रैव ।

क्षत्रवनि त्रि० क्षत्रं वनति "छन्दसि वनसनरक्षिमथाम्" पा० कर्म्मण्युपपदे इन् । १क्षत्रजातिभागिनि । "ब्रह्मवनि त्वा क्षत्रवनि रायस्पोषवनि" यजु० २७। सुपां सुलुगिति" पा० सर्वत्र अमो लुक् । क्वचित् कर्म्मणि वाच्येऽपि इनि । २क्षत्रसेव्य "ध्रुवमसि पृथिवीं दृंह ब्रह्मवनि त्वा क्षत्रवनिः" यजु० १।१७। "क्षत्रेण वन्यते पुरोडाशनिष्पत्त्यर्थं क्षत्रवनि" वेददी०

क्षत्रविद्या स्त्री ६त०। धनुर्वेदे । तस्य व्याख्यानः ऋगयना० अण् । क्षात्रविद्य १तस्याव्याख्याने ग्रन्थे तां वेत्ति अधीते वा अण् । "विद्यालक्षणकल्पान्ताच्चेति वक्तव्यम्" वार्त्ति० विद्यान्तत्वेन ठञि प्राप्ते "अङ्गक्षत्रधर्म्मत्रिपूर्व्वविद्यान्ताच्चेति" वार्त्ति० ठञो निषेधात् न ठञ् । क्षात्रवेद्य तद्विद्याध्येतरि तद्वेत्तरि च त्रि० ।

क्षत्रवृक्ष पु० क्षत्रः क्षत्रविशेषनामा वृक्षः । मुचकुन्दाख्ये वृक्षे राजनि० तस्य मुचकुन्दक्षत्रनामकत्वात्तथात्वम् ।

क्षत्रवृद्ध पु० आयुर्वंश्ये वृद्धशर्म्मनामान्तरके नृपभेदे "क्षत्रधर्म्मनृपन्दे दृश्यम् । "अनेनसः समाख्याता क्षत्रवृद्धस्य मे शृणु ।

क्षत्रवृद्धात्मजस्तत्र सुहोत्रोऽथ महायशाः” हरिवं०२९अ० क्षत्रवृद्ध अयत। “यः पुरूरवसः पुत्र आयुस्तस्याभवन् सुताः। नहुषः क्षत्रवृद्धश्च रजिराभश्च वीर्य्यवान्। अनेना इति राजेन्द्र! शृणु क्षत्रवृद्धोऽन्वयम्। क्षत्रवृद्ध सुतस्यासन् सुहोत्रस्यात्मजास्त्रयः” भाग० ९।१७ २ क्षत्रेषु इद्धः। २श्रेष्ठक्षत्रिये त्रयोदशस्य रुचनामकस्य मनोः ३पुत्रभेदे “त्रयोदशस्य पुत्रास्ते विज्ञेयास्तु रुचेः सुताः। चित्रसेनोविचित्रश्च नाभोधर्म्मभृतोधृतिः। सुनेत्रः क्षत्रवृद्धश्च सुतपा निर्भयो दृढः” हरिवं० ७अ०

क्षत्रसव पु० ६त०। क्षत्रियकर्त्तव्ये यज्ञभेदे

क्षत्रान्तक पु० ६त०। परशुरामे “क्षत्रान्तकस्याभिभवेन चैव” भट्टिः ६त०। क्षत्रान्तकारिन् अप्यत्र “महानन्दसुतः शूद्रागर्भोद्भवोऽतिलुब्धः परशुराम इव अपरोऽखिलक्षत्रान्तकारी भविता ततः प्रभृति शूद्रा भूपाला भविष्यन्ति” शु० त० विष्णुपु०

क्षत्रिय पुंस्त्री० क्षत्रे राष्ट्रे साधु तस्यापत्यं जातौ वा घः। १ब्राह्मणानन्तरवर्णे अमरः टाप्। “नृपायां नृपसंसर्गात् प्रच्छन्नात् गूढजातकः। सोऽपि क्षत्रिय एव स्यादभिषेके च वर्ज्जितः” उशनसोक्ते नृपात् अपरिणीतायां क्षत्रियजातिस्त्रियां गूढोत्पन्ने पुत्रे च”। पा० उक्तोक्तेस्तु जातावेव अपत्यमात्रे इञ्। क्षात्रि क्षत्रजातेरपत्यमात्रे पुंस्त्री स्त्रियां वा ङीप्। स्वार्थे क। तत्रार्थे स्त्रियां टापि यपूर्वत्वात् वा अत इत्त्वम्। क्षत्रियिका क्षत्रियका। ततो भावे त्व क्षत्रियत्व न० तल् क्षत्रियता स्त्री तद्भावे। ब्राह्मणत्ववत् क्षत्रियत्वस्य जातिविशेषत्वेऽपि गुणविशेषेण शूद्रस्यापि क्षत्रियत्वादि भवति। “शूद्रयोनौ हि जातस्य सद्गुणानुतिष्ठतः। वैश्यत्वं लभते ब्रह्मन्! क्षत्रियत्वं तथैव च। आर्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते” भा० व० २११ अ०। सद्गुणाश्च तत्रैवोक्ताः। “शूद्रस्येति कर्म्मणि षष्ठी वैश्यत्वादि कर्त्तृ सद्गुणवन्तं वैश्यत्वादयः स्वयमायान्तीति गुणकृत एव वर्णविभागो न जातिकृत इति भावः” नीलक०। तस्य पत्नी ङीष् वा आनुक्। क्षत्रियाणी क्षत्रियी अमरः। “अर्य्यक्षत्रियाभ्याम्” वा स्वार्थे आनुक ङीष् चेति सि० कौ०। पत्यान्तु ङीषेवेत्युक्तम्। जातौ तु योपधत्वात् न ङीष् किन्तु टाप्। क्षत्रिया क्षत्रपत्नी उदा०।

क्षत्रियहण पु० क्षत्रियं हन्ति अच् णत्वम्। परशुरामे। “किं न वै क्षत्रियहणो हरतुल्यपराक्रमः। विदितः पुत्र! रामस्ते यतस्त्वं योद्धुमिच्छसि” भा० उ० १७९अ०

क्षत्रियासन न० “क्षत्रियासनमावक्ष्ये यत्कृत्वा धनवान् भवेत्। केशेन पादयुगलं बद्ध्वा तिष्ठेदधोमुखः” रुद्रयामलोक्ते आसनभेदे

क्षद संभृतौ पेषणे भक्षणे च सौ० आ० सक० सेट्। क्षदते अक्षदिष्ट चक्षदे। “तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वाऽर्हत्युक्षाणं वा वेहतं वा क्षदन्त एवमेवास्मा एतत्” ऐत० ब्रा० १।१५ “शतं मेषान् वृक्ये चक्षदानम्” ऋ० १।११६।१६। “तस्मै इतं सुरां मध्वन्नमद्यं क्षदामहे” अथ०।१०।६।५

क्षद्मन् न० क्षद–भक्षणे–मनिन्। १उदके २अन्ने च निघ० “दाहहाणो वज्रमिन्द्रो गभस्त्योः क्षद्मेव तिग्ममसनाय संश्यत्” ऋ०१।१२०।४ “क्षद्मेवार्थेषु तर्तरीथ उग्रा” ऋ०१०।१०६।१७

क्षन्तृ त्रि० क्षम–तृच्। क्षमाशीले सहिष्णौ अमरः “ये क्षन्तारो नाभिजल्पन्ति चान्यान्” भा०अ०।१०२अ०।

क्षन्तव्य त्रि० क्षम–तव्य। १सोढव्ये “तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः” कर्पूरस्तवः, भावे क्त कर्त्तव्य २क्षमायां न० “क्षन्तव्यं प्रभुणा नित्यं क्षिपतां कार्य्यिणां नृणाम्”। मनुः “सर्व्वथा वर्त्तमानस्य राज्ञोऽश्रद्धिषैः सदा। क्षन्तव्यं पुत्र!” भा० अ० ४१अ०

क्षप क्षेपे अद०चुरा०उभ०सक० सेट्। क्षपयति ते अचिक्षपत् त। क्षपयाम् बभूव आस चकार चक्रे। “अरण्ये काष्ठवत् त्यक्त्वा क्षपयेयुस्त्र्यहं ततः” मनुः

क्षप सहने चुरा० इदित् उभ० सक० सेट्। क्षम्पयति ते अचक्षम्पत् त। क्षम्पयाम् बभूव आस चकार चक्रे। अयं मित् “तेन इणि क्षम्प-अक्षाम्पि। णमुलि क्षम्पं क्षम्पं-क्षाम्पं क्षाम्पम्” अनुपधाया अपि वा दीर्घः।

क्षप् स्त्री चु० क्षप-क्विप्। रात्रौ “स क्षपः परि षस्वजे” ऋ०८।४१।३। “क्षपोरात्रीः” भा० “क्षप उस्रा वरिवस्यन्तु देवाः” ६।५२।१५।

क्षप पु० चु० क्षप–कर्म्मणि अच्। उदके निघ०

क्षपण पु० क्षपयति विषयरागं क्षप-ल्यु। बौद्धसंन्यासिनि दिगम्बरे स्वार्थे क। तत्रार्थे “एकः क्षपणक! शाकाहर्त्ता तत्र क्षपणक! दश शाकायाः। यत्र क्षपणक! दश शाकायास्तत्र क्षपणक! का शाकाया” उद्भ० “स पथि नग्नक्षपणकमपश्यत्” भा० आ० ७८९श्लो० “नग्नक्षपणके देशे-

रजकः किं करिष्यति” पञ्चत० भावे ल्युट्। २चपणे “स-ब्रह्मचारिणेऽकाहमतीते क्षपणं स्मृतम्” “भुक्तातोऽन्य-तमस्यान्नमया क्षपणं त्र्यहम्” मनुः कर्त्तरि ल्यु। ३क्षपके त्रि० “चरितानि यत्र गायन्ति लोकशमलक्षपणा-नि भक्ताः” भाग० ३।१५।७०श्लो०

क्षपणी स्त्री क्षप-कर्म्मणि ल्युट् ङीप्। क्षेपण्याम् अमरटी०

क्षपण्यु क्षप-बा० अन्यु। अपराधे शब्दमा०।

क्षपा स्त्री क्षपयति चेष्टाम् क्षप-अच्। १रात्रौ २हरिद्रायां च अमरः “क्षपातमस्काण्डमलीमसं नभः”। “प्रतिक्षपं ह-र्म्यतलेषु यत्र” माघः “दिनक्षपामध्यगतेव सन्ध्या” रघुः।

क्षपाकर पु० क्षपां करोति कृ-ट। १चन्द्रे २कर्पूरे च अमरः क्षिप् क्षपाकृदयत्र।“विपद्दाम्रसकूटघटिताः क्षपाकृतः” माघः

क्षपाचर पुंस्त्री० क्षपायां चरति चर-ट। १राक्षसे “निर्याणे च मतिं कृत्वा निधायासिं क्षपाचरः” भा० व०२८८अ०। स्त्रियां जातित्वात् ङीष्। २रात्रिचरमात्रे त्रि०

क्षपाट पुंस्त्री० क्षपायामटति अट-पचा० अच्। १राक्षसे “ततः क्षपाटैः पृथुपिङ्गलाक्षैः” भट्टिः स्त्रियां ङीष्।

क्षपानाथ पु० ६त०। १चन्द्रे २कर्पूरे च “चिरं क्षपानाथ इवा-धिरूढः” माघः क्षपापत्यादयोऽप्यत्र।

क्षम सहने भ्वादि० आत्म०सक०वेट्। क्षमते अक्षमिष्ट अक्षंस्त चक्षमे क्षान्तः क्षान्तिः। क्षमिता क्षन्ता। “इन्द्र त्वा यज्ञः क्षममाणमानट्” ऋ०१०।१०३।३। योनित्यं क्षमते तात! बहून् लोकान् स विन्दति” भा०व० १२९ श्लो०। “का-र्पण्यात् साधुभावाच्च कान्तो राजन्न चक्षमे” भा० आ० १५७अ०। “क्षतेरवेः क्षालयितुं क्षमेत कः” माघः ‘कृतस्त्वं भीरु! यत्तेभ्योद्रुहन्तोऽपि क्षमामहे” भट्टिः। षित् क्षमा “तेजः क्षमा वानैकान्तम्” माघः वैदिके तु नि० चक्षमीति चक्षमिति। इति पा०।

क्षम सहने दिवा० पर०सक०शेट् शमादि० इरित्। क्षाम्यति अक्षमत् अक्षमीत्। चक्षाम ‘कामं क्षाम्यतु यः क्षमी” माघः।

क्षम न० क्षम-अच। १युद्धे। २शक्तौ, “रक्षितुं सहितं रणे—काकुत्स्थं भीरु! कः क्षमः” भट्टिः ध्यात्मकर्म क्षमं देहम्” रघुः “प्रियासु बालासु रतक्षमासु” च नैष० ४क्षमावति त्रि० “अनोऽस्य रहिते, किञ्चित् भवती बहुक्षमाम्” कुमा०।

क्षमता स्त्री० क्षमस्य भावः तल्। १योग्यतायां, शब्दनिष्ठ २अर्थप्रकाशनसामर्थ्ये च “स्मृतिर्द्वितीया च क्षमता न लिङ्गम्” भट्टकारिका।

क्षमा स्त्री क्षम अङ्। ‘बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित्। न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तिता” ‘आक्रुष्टोऽभिहतो वापि नाक्रोशेन्न च हन्ति वा। अदुष्टवाङ्मनःकायैस्तितिक्षोः सा क्षमा मतेति’ चोक्त-लक्षणायाम् तितिक्षायाम्. चित्तवृत्तिभेदे, “आक्रुष्टोऽ-भिहतो यस्तु नाक्रोशेन्न हनेदपि। अदुष्टवाङ्मनोकायैस्तितिक्षुः क्षमा स्मृता’ मात्स्ये १२० अ०। “विभा-गशीलः सततं क्षमायुक्तोदयान्वितः गृहस्थः स्यात् क्षमायुक्तो न गृहेण गृही भवेत्” “क्षमा दया च विज्ञानं सत्यञ्चैव दमः शमः। अध्यात्मनिरता ज्ञानं ज्ञानमेतद् ब्राह्मणलक्षणम्। विगर्हातिक्रमो हिंसाब-न्धवधात्मनाम्। अन्यमन्युसमुत्थानां दोषाणां वर्जनं क्षमा” कूर्म्मपु०१४अ०। २भूमौ च। अमरः। ३शान्तौ अव्य० त्वरा०। ट्यो० क्षाम् क्षमा क्षा क्षमि क्षामा इत्यादयोऽपि निघ०क्षमायां पठिताः “क्षामं तुभ्यं कृत्वा क्षणु वत्तं महना मनश्च द्यौः” ऋ० ४।१७।१ “द्यौ-श्च प्याज्मनिमन्त्रे जतुक्षाः” ४।२२।४ “अजो न क्षां दा-धार पृथिवीम्” ऋ०४।६७।५ “क्षां दासायोपबर्हणीं कः” १।१७४।६ ‘सुषुद्रयो वर्त्तते दक्षमि क्षाम्’ १।१८२।२ “दिवि क्षमा च” ५।५०।३। “क्षमा मन्महे रपो विश्वं नो अस्तु भेषजम्” अथ०६।५७।२ “अधिक्षमि विरूपं यदस्ति” ऋ० ७।२७।२ “अग्निर्यद्रोधति क्षमि” ऋ० ४।४२।६। “स परिक्षा त्वक्षसा क्षमो दिवश्च” १।१००।१५ “द्यावाक्षामा” ऋ०१।९६।५ “तुरगरमयति नैंततोऽतः क्षमा” इ० र० उक्ते १त्रयोदशाक्षरपादके छन्दोभेदे स्त्री “दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा” नमोऽस्तु ते” ४इत्युक्ते दुर्गाशक्तिभेदे ५राधिकासहचरीभेदे “मया पूर्वन्तु त्वं दृष्टो गोप्या च क्षमया सह” “क्षमा देहं परित्यज्य लज्जया पृथिवीं गता” ब्रह्मवैपु० प्रकृतिखं० ६अ०। ६खदिरे राजनि०

क्षमाज पु० क्षमातोजायते जन+ड ५त०। १मङ्गले २नरकासुरे ३जातमात्रे त्रि० क्षमाजातादयोऽप्यत्र

क्षमादंश पु० क्षमायाः दंश इव। शिग्रुवृक्षे राजनि०

क्षमापि क्षमं क्षमान्वितं करोति क्षम-णिच् सया० पुक् दी-र्घश्च। क्षमापयति ते अचि(च)क्षमापत् न क्षमापयाम्-बभूव आस चकार चक्रे। “तन्निमित्तं ब्राह्मणं क्षमा-पयति हेतुवचनोक्त्या” छा०उ०भा०। “क्षमापय महाभागं ततः शान्तिर्भविष्यति” भाग० ६।४।५२ श्लो०

क्षमाभुज् पु० क्षमां भुनक्ति भुज—अवने क्विप् । नृपे "सुर-वैरिणश्च उरसि क्षमाभुजः" माघः । क । क्षमाभुजोऽप्यत्र

क्षमावत् त्रि० क्षमा+अस्त्यर्थे मतुप् मस्य वः । क्षमायुक्ते । "एकः क्षमावतां दोषो द्वितीयोनोपपद्यते । यदेनं क्षमया युक्तमशक्तं मन्यते जनः" गरु० पु० ११४अ० स्त्रियां ङीप्

क्षमितृ त्रि० क्षम—तृच् । साढरि सहनशीले अमरः

क्षमिन् त्रि० क्षम-ताच्छील्ये घिनुण् । क्षमाशीले "कामं क्षाम्यतु यः क्षमी" माघः "अक्रूरः पेशलो दक्षोदक्षिणः क्षमिणां वरः" विष्णु स० स्त्रियां ङीप् ।

क्षय पु० क्षि—क्षये क्षि—निवासगत्योर्वा भावादौ यथायथम् अच् । त्रिवर्गान्तर्गते नीतिवेदिनां राज्ञाम् १अष्टवर्गापचये । अष्टवर्गश्च । "कृषिर्वणिक्पथोदुर्गं सेतुकुञ्जरबन्धनम् । धात्वाकरः करादानं सैन्यानाञ्च निवेशनम् । अष्टवर्गः स्मृतो राज्ञाम्"भरतः । "क्षयस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" अमरः । क्षयः अष्टवर्गस्यापचयः तस्यैवोपचयः वृद्धिः, स्थानं तस्य उपचयापचयहीनतया स्थितिः" २प्रलये तस्मिन् सर्व्वेषां क्षयात्तथात्वम् । ३अपचये सच भावविकारभेदः यास्कोक्तः यथा "षड् भावविकारा भवन्तीति वार्ष्यायणिः जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति । जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति, अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं, विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं, वर्धत इति स्वाङ्गाभ्युच्चयं, सांयौगिकानां कर्म्मणा वर्धते विजयेनेति वा वर्धते शरीरेणेति वा, अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति" । ४गृहे अमरः ५यक्ष्मरोगे यक्ष्मरोगस्य क्षयसंज्ञाकारणं यथा "क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः । राज्ञश्चन्द्रमसो यस्मादभूदेष महामयः । तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः" सुश्रु० । "रक्तपित्तात्भवेत् कासः कासात् संजायते क्षयः" वैद्यकम् "राजयक्ष्मपरिहाणिमाययौ" इत्युपक्रमे "राशितत् क्षणमभूत् क्षयातुरे" रघुः । ६रोगमात्रे राजनि० । षष्टिवर्षान्तर्गते षष्टितमे ७वर्षे तल्लक्षणं ज्यो०त० भवि०पु० "मेदिनी लभते देवि ! सर्वभूतं चराचरम् । देशभङ्गश्च दुर्भि क्षये संक्षीयते प्रजा । सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा । दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ! । कौमुदीनर्मदायाश्च यमुनानर्मदातटम् । विन्ध्यायां सैन्धवश्चापि विनश्यति न संशयः । सिंहलो मध्यदेशश्च कालञ्जरस्तथैव च । क्षये क्षयन्ति सर्वाणि नान्यथा वरवर्णिनि !" ।

ता० ब्राह्मणोक्ते ८स्तोत्रसंघे ९देवसंघे च यथा "रश्मिरसि क्षयाय त्वा क्षयं जिन्व सवितृप्रसूता बृहस्पतये स्तुत"ता०ब्रा० "तैत्तीरीयाणां पञ्चमकाण्डोक्तब्राह्मणे रश्मिरिति मन्त्राणामादित्यादिसृष्टिहेतुत्वाभिधानादादित्यादिपरतया रश्म्यादिशब्दाव्याख्येयाः तत्तु ब्राह्मणमुत्तरत्रोदाहरिष्यते । हे आदित्य ! त्वं रश्मिरसि रश्मियुक्तोऽसि देवा यस्मिन् क्षियन्ति निवसन्ति इति स्तोत्रसंघः क्षयः तस्मै क्षयाय तत्सङ्घाय तत्प्राप्त्यर्थं हे आदित्य ! त्वां स्मरामीति शेषः । ततः क्षयं देवसङ्घं जिन्व प्रीणय क्षयशब्दस्य देवविषयत्वं तैत्तिरीयास्तृतीयकाण्डोक्तब्राह्मणे समामनन्ति "रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्याह देवे क्षय इति" भा० । ज्योतिषोक्ते १०द्विसंक्रान्तियुक्ते शुक्लप्रतिपदाद्यमावस्यान्ते चान्द्रे मासे यथाह सि०शि०

"असंक्रान्तिमासोऽधिमासः स्फुटं स्याद्द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् । क्षयः कार्त्तिकादित्रये नान्यतः स्यात् तदा वर्षमध्येऽधिमासद्वयं च" ।

"यस्मिन् शशिमासेऽर्कसंक्रान्तिर्नास्ति सोऽधिमास इति प्रसिद्धम् । तथा यत्र मासे संक्रान्तिद्वयं भवति स क्षयमासो ज्ञेयः । यतः संक्रान्त्युपलक्षिता मासाः । अत एकस्मिन् मासे संक्रान्तिद्वये जाते सति मासयुगलं जातम् । स क्षयमासः कदाचित् कालान्तरे भवति । यदा भवति तदा कार्त्तिकादित्रय एव । तदा क्षयमासात् पूर्वं मासत्रयान्तर एकोऽधिमासोऽपरश्च मासत्रयान्तरितोऽन्यश्चासंक्रान्तिमासः स्यात् । अत्रोपपत्तिः । चन्द्रमासप्रमाणमेकोनत्रिंशत् सावनदिनान्येकत्रिंशत् घटिकाः पञ्चाशत् पलानि २९।३१।५० । तथार्कमासस्त्रिंशद्दिनानि षड्विंशतिघटिकाः सप्तदशपलानि ३०।२६।१७ । एतावद्भिर्दिनैरविर्मध्यगत्या राशिं गच्छति । यदार्कगतिरेकषष्टिः कलास्तदा सार्धैकोनत्रिंशता दिनैः २९।३० राशिं गच्छति । अतश्चान्द्रमासादल्पोऽर्कमासस्तदा स्यात् । एवं रविमासस्य परमाल्पता २९।२०।४० । सा चैकषष्टिगतिर्वृश्चिकादित्रयेऽर्कस्य । स ईदृशोऽल्पोऽर्कमासो यदा चन्द्रमासस्यान्तस्यान्तःपाती भवति तदैकस्मिन् मासे संक्रमणद्वयमुपपद्यते । अत उक्तं क्षयः कार्त्तिकादित्रय इति । पूर्वं

किल भाद्रपदेऽर्कसंक्रान्तिर्जाता ततोऽर्कगतेरधिकत्वान्मार्गशीर्षे द्विसंक्रान्तिः। ततः पुनर्गतेरल्पत्वाच्चैत्रोऽप्यसंक्रान्तिर्भवति। ततो वर्षमध्येऽधिमासद्वयमित्युपपन्नम्” प्रमिता०। मेषादिषु सूर्य्यस्य गतिभेदात् भोगकालस्तावद्दिनादिक मुच्यते

मे	वृ	मि	क	सि	क	तु	वृ	ध	म	कु	मी
३०	३१	३१	३१	३१	३०	२९	२९	२९	२९	२९	३०
५५	२४	३७	२८	२	२९	५७	२७	१५	२४	४९	२७
२२	५६	२२	२५	५२	४	२	३९	३	०	४२	३१

“इदानीं गणकानां प्रतीत्यर्थं क्षयमासकालान् गतागतान् कतिचिद्दर्शयति स” प्रमिता०।

“गतोऽब्ध्यद्रिनन्दै ९७४ र्मिते शाककाले तिथीशै १११५ र्भविष्यत्यथाङ्गाक्षसूर्यैः १२५६। गजाद्र्यग्निभूमि १२७८ स्तथा प्रायशोऽयं कुवेदेन्दु १४१वर्षैः क्वचिद्गोकुभिश्च १९।

“स्पष्टम्। अत्रोपपत्तिः। यदा किलैकविंशतिः शुद्धिस्तदा भाद्रपदोऽधिमासः। तस्मिन् जाते कार्त्तिकादित्रये क्षयमासः संभाव्यते। सा च तथाविधा शुद्धिः कुवेदेन्दु १४१ वर्षान्तरे काले पुनर्भवति। किन्तु सत्रिभागाभिः षड्भिर्घटिकाभिरधिका भवति। कदाचिदेकोनविंशत्या वर्षैस्तादृशी भवति। तत्र त्रिभागोनाभिश्चतुर्दशघटिकाभिरधिका भवति। कुवेदेन्दुवर्षेभ्यस्तथैकोनविंशतिवर्षेभ्यो-द्विघाद्वा द्विराम्नैः खरामैश्च भक्ता इत्यादिना लब्धेष्वधिमासेषु शेषतिथिषु शून्यं प्रथमस्थाने सत्र्यंशाः षड्घटिकाः स्युः ६। २०। द्वितीये वित्र्यंशाश्चतुर्दश १३। ४०। अत उक्तं प्रायशोऽयं कुवेदेन्दुवर्षैः क्वचिद्गोकुभिश्चेति। प्रागागतश्चेत्यथोदुक्तं स्यात्” प्रमिता०।

कालमा० उक्तं सि०शि० वाक्यं व्याख्याय विशेषोऽभिहितः “स्फुटमानेन योऽयमसंक्रान्तः सः स्फुटोऽधिमासः तेनैव मानेन यो द्विसंक्रान्तियुक्तः स क्षयाख्यः स च कार्त्तिकमार्गशीर्षपौषेष्वेव त्रिष्वन्यतमो भवति नान्येषु माघादिषु नवसु एवंविधक्षयमासयुक्ते वर्षे क्षयमासात् पूर्वेषु त्रिषु मासेषु मध्ये कश्चिदधिमासो भवति क्षयमासादूर्द्ध्वमपि मासत्रयमध्येऽपरोऽधिमासः। तदेवंविधमेकवर्षस्थं मलमासद्वयं चिरेण कालेन यदा कदाचिदायाति नत्वेकाधिमासवत् पुनः पुनः क्षयमासः समायाति तन्निर्णयागमनकालः सिद्धान्तशिरोमणौ दर्शितः। “गतोऽब्ध्यद्रीत्यादि (वाक्यं प्रागुदाहृतम्) अस्यायमर्थः। चतुःसप्तत्यधिकनवशतसंख्याकैर्वर्षैः परिमिते शाककाले कश्चिदुक्तमासत्रयोपेतो वत्सरोगतः। यथोक्तसंख्या चाब्ध्यद्रिनन्दैरित्यनेन पदेन विवक्षिता। अब्धयश्चत्वारः अद्रयः सप्त नन्दा नव। एतत्संख्यात्रयगमका अङ्का गणकप्रसिद्ध्या प्रातिलोम्येन लिखिता यथोक्तसंख्यायां पर्यवस्यन्ति। तिथीशैरित्यत्रापि तिथयः पञ्चदश ईशा एकादश तत्र गणकैरङ्केषु प्रक्षिप्तेषु पञ्चदशाधिकशतयुक्तसहस्रसंख्या सम्पद्यते। तावद्भिःशकवर्षैर्मिते काले, कश्चिदुक्तमासत्रययुतः संवत्सरः। अङ्गाक्षसूर्यैरित्यत्राङ्गानि षट् अक्षाणीन्द्रियाणि पञ्च सूर्या द्वादश तत्राङ्कप्रक्षेपे षट्पञ्चाशदधिकशतद्वयोपेतसहस्रसंख्या सम्पद्यते। तावद्भिर्वत्सरैर्मिते शककाले यथोक्तमासत्रयोपेतः कश्चित्संवत्सरः। तस्य चोदाहरणम्। पूर्व्वोदाहृत ईदृश संवत्सरः प्राचीनोभावी वा संवत्सरः। तत्र भाद्रपदबहुलामावास्यायां कन्यासंक्रान्तिस्तत ऊर्द्ध्वम् असंक्रान्तमेकमासमतीत्य उत्तरयोर्मासयोः क्रमेण तुलावृश्चिकसंक्रान्ती तत ऊर्द्ध्वमेकस्मिन्नेव मासे शुक्लप्रतिपदि धनुःसंक्रान्तिः तत ऊर्द्ध्वं दर्शे मकरसंक्रान्तिः। तत ऊर्द्ध्वं कुम्भसंक्रान्तिः समनन्तरे मासे दर्शे। तत ऊर्द्ध्वं ससंक्रान्तिमासमतीत्योत्तरस्यां शुक्लप्रतिपदि मीनसंक्रान्तिरेवं च एकस्मिन्नेव वत्सरे द्वावसंक्रान्तौ मासौ एकोद्विसंक्रान्तिमास इति यथोक्तमासत्रयं सम्पद्यते। गजाद्र्यग्निभूमिरित्यत्रापि गजा अष्टौ, अद्रयः सप्त, अग्नयस्त्रयः भूरेका तत्राङ्कप्रक्षेपे सत्यष्टसप्तत्यधिकशतत्रयोपेतसहस्रसंख्या सम्पद्यते। तावद्भिर्वत्सरैर्मिते शाककाले कश्चिदुक्तविधः सम्पत्स्यते वत्सरः। कुवेदेन्दुवर्षैरित्यत्र कुरेकः वेदाश्चत्वार इन्दुरेकस्तत्राङ्कप्रक्षेपेणैकचत्वारिंशदधिकशतसंख्या भवति एतावद्भिर्वर्षैः क्वचित्पूर्व्वोत्तरक्षयमासयोर्व्यवधानं भवति गोकुभिश्चेत्यत्र नपुंसकवर्जितेषु स्वरान्तेषु गण्यमानेष्वोकारो नवमः सम्पद्यते। कुरेका तत्राङ्कप्रक्षेपे सति एकोनविंशतिर्भवति तावद्भिर्वत्सरैः क्वचित्पूर्वोत्तरयोः क्षयमासयोर्व्यवधानमिति। अत्र द्विसंक्रान्तियुक्तस्य क्षयसंज्ञायामुपपत्तिरुच्यते। यदा धनुःस्थे रवौ दर्शपूर्त्तिस्तदा तस्य मेषादिस्थवचनेन मार्गशीर्षत्वं प्राप्तम्। तथा सति पूर्वोदाहृते द्विसंक्रान्ते मासे धनुःस्थे रवौ दर्शो न समाप्तः मकरस्थे तु रवौ समाप्तः। अतः पौषमासत्वं तस्य सम्पन्नम्। तथा च मार्गशीर्षस्य तत्र लुप्तत्वात् तस्य क्षयसंज्ञा युक्ता। अत एवैकमास-

प्राप्तित्वादंहसः पापस्य पतिरिति व्युत्पत्त्या स एवांहस्पतिः क्षयापि व्यवह्रियते। स च व्यवहारो बार्हस्पत्यज्योतिषेऽन्ये दृश्यते “यस्मिन् मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा। संसर्पांहस्पती मासावधिमासश्च निन्दितः” इति तत्र क्षयमासात् प्राचीनोयोऽसंक्रान्तः स संसर्पस्तस्यासंक्रान्तत्वेनेतराधिमासवत् कर्मानर्हः सन् सम्यक् सर्पतीति संसर्पः। तस्य कर्मानर्हत्वशास्त्रे रेवं स्मर्य्यते “सिनीवालीमतिक्रम्य यदा संक्रमते रविः। रविणा लङ्घितो मासोऽनर्हः सर्वकर्मस्विति”। तदपवादश्चैवं स्मर्य्यते। “मासद्वयेऽब्दमध्ये तु संक्रान्तिर्न यदा भवेत्। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः” इति संक्रान्तिरहितयोर्द्वयोर्मासयोर्यः पूर्वोऽसंक्रान्तः स प्राकृतः शुद्धः। कर्मार्ह इत्यर्थः। अस्मिन्नेवार्थे जाबालिः “एकस्मिन्नेव वर्षे चेद्द्वौ मासावधिमासकौ। प्राकृतस्तत्र पूर्वः स्यादुत्तरस्तु मलिम्लुचः” इति। अतः संसर्पत्वं तस्योपपन्नम्। असंक्रान्तमासद्वयमध्यवर्त्तिनः क्षयमासस्यांहस्पतित्वनिरुक्तिः पूर्वमेव दर्शिता। तदुत्तरभाविनोऽसंक्रान्तस्य कालाधिक्यादधिमासत्वम्। त एते त्रयोऽपि ज्योतिःशास्त्रप्रसिद्धा विवाहादौ निन्दिताः। यथोक्तप्रकारेणांहस्पतिनाम्नः क्षयमासस्य द्वितीयसंक्रान्तिप्रयुक्तनामसम्भवे सति शुद्धमासवत् स्वातन्त्र्याच्च पूर्वोत्तरमासशेषत्वशङ्कावकाशः”।

मलमा॰ चि॰ पी॰ तादृशमासत्रयस्य माङ्गल्यकर्मसु वर्ज्यतोक्ता यथा

“गृहप्रवेशगोदानस्थानाशनमहोत्सवम्। न कुर्य्यात् मलमासे तु संसर्पेऽंहस्पतौ तथा” मरीचिः “यदा क्षयमासो भवति तदा पूर्वोत्तरावधिमासौ भवतः तत्र पूर्वः संसर्पः द्वितीयोऽंहस्पतिः मासः” वाप्यादिषु वर्ज्जनीये “शशुत्वदृश्यसितयोर्न्यूनाधिमासे तथा” मुहू॰ चि॰।

अपचये। “सर्व पार्थिव धनान्यपि क्षयम्” माघः “क्षयं वृद्धिञ्च वणिजा पण्यानामविजानता” या॰ स्मृ॰ गृहे “दधतोऽसुलभक्षयागमाः” माघः “अवेक्ष्य निरये चैव यातनाश्च यमक्षये” मनुः। १०नाशे “कालोऽस्मि लोकक्षयकृत् प्रवृत्तः”। “कुलक्षये विनश्यन्ति कुलधर्माश्च शाश्वताः” गीता। “अन्वष्टकासु वृद्धौ च गयायां च क्षयाहनि” उ॰ त॰ भवि॰ पु॰

क्षयङ्कर त्रि॰ क्षयं करोति कृ—खच्। क्षयकारके। “मल्लपक्षक्षयङ्करः”। भा॰ शा॰ २६६॰ श्लो॰

क्षयज पु॰ क्षयात् जायते जन—ड। कासभेदे। यथा

“विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्। घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः। कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम्। स गात्रशूलज्वरदाहमोहान् प्राणक्षयञ्चोपलभेत कासी। शुष्यन् विनिष्ठीवति दुर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयम्। तं सर्वलिङ्गं भृशदुश्चिकित्स्यं चिकित्सितज्ञाः क्षयजं वदन्ति। वृद्धत्वमासाद्य भवत्यथो वै याप्यस्तमाहुर्भिषजस्तु कासम्” “क्षयजे क्षयमासाद्य कर्त्तव्यो बृंहणोविधिः” इति च सुश्रुतः। क्षयात् कासः। क्षयकासोऽप्यत्र।

क्षयतरु पु॰ क्षयस्य क्षयहेतुस्तरुः अश्वघासादिवत् चतुर्थ्यर्थे ६त॰। स्थालीवृक्षे राजनि॰

क्षयथु पु॰ क्षि-अथुच्। कासरोगे हेम॰।

क्षयनाशिनी स्त्री क्षयं रोगं नाशयति नश—णिच्—णिनि ङीप्। १जीवन्तीवृक्षे शब्दमाला। २क्षयरोगनाशके त्रि॰।

क्षयपक्ष पु॰ क्षीयते चन्द्रोऽस्मिन् क्षि-आधारे अच् कर्म॰। कृष्णपक्षे। “चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः” ज्यो॰ उक्तेस्तस्य तथात्वम्। [दृश्यम्।

क्षयमास पु॰ कर्म॰। द्विसंक्रान्ते चान्द्रे मासे क्षयशब्दे

क्षयरोग पु॰ क्षयहेतुः रोगः। यक्ष्मरोगे “क्रियाक्षयकरत्वाच्च क्षय इत्यभिधीयते” सुश्रुतः स विद्यतेऽस्य इनि। तद्रोगयुक्ते त्रि॰ “राजहा क्षयरोगी स्यादेषा तस्य च निष्कृतिः। गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः। घृतधेनुप्रदानेन तिलधेनुप्रदानतः। इत्यादिना क्रमेणैव क्षयरोगः प्रशाम्यति” शाता॰।

क्षयवायु पु॰ क्षयस्य प्रलयस्य वायुः। प्रलयवायौ “युष्मानचेतन् क्षयवायुकल्पान् इति” भट्टिः

क्षयिन् त्रि॰ क्षयो राजयक्ष्माऽस्त्यस्य इनि। १राजयक्ष्मयुक्ते २चन्द्रमसि पु॰ चन्द्रस्य यक्ष्मरोगश्च काश्यपशापात् तत्कथा राजयक्ष्मशब्दे दृश्या। राज्ञश्चन्द्रमसोयस्मादभूदेष महामयः। तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः” सुश्रु॰ “क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च” मनु॰ “श्वित्रिकुष्टि कुले जातां क्षयिणां मनुजेश्वर!”। भा॰ आनु॰ १०४अ॰। क्षि—ताच्छील्ये इनि, ३क्षयशीले त्रि॰ “स तु तत्समवृद्धिश्च न चाभूत् शशिवन्न क्षयी” रघुः

क्षयिष्णु त्रि॰ क्षि—वा॰ इष्णुच्। क्षयशीले “ध्वसेदक्षयिष्णुमायामयशूकरस्य” भाग॰ ६।१२।२४ अन्तर्भूतण्यर्थोऽत्र।

चर्य त्रि० चेतुं शक्यः चर—शक्यार्थे यत् "चर्य्यजर्य्यौ शक्यार्थे" पा० नि०। चेतुं शक्ये। शब्दक० क्लीवोक्तिः प्रामादिकी

चर सञ्चलने भ्वा० पर० अक० सेट्। चरति अचारीत्। चचार चरितः चरन् चारः। "इयं त इन्द्र! राति चरति हुन्वतः" ऋ०८,१२,४। "मधु चरन्ति सिन्धवः" मधुसूक्तम्। "यज्ञोऽनृतेन चरति तपः चरति कीर्त्तनात्" "इन्द्रियाणां हि च सर्वेषां यद्येकं चरतीन्द्रियम्। तेनास्य चरति प्रज्ञा" मनुः। "त्वत्प्रसादान्महादेव! तपोमे न चरेत वै" भा०व०७०११श्लो०। आर्षत्वात् पदव्यत्ययः। "अच्चारिषुः शरास्त्राणि तस्मिन् रक्षःपयोधराः" भट्टिः ज्वला० चरः चारः। उपसर्गपूर्वस्तु तदुपसर्गद्योत्यार्थयुक्ते चलने। आङ्पूर्ब्बकः णिजन्तस्तु आचारणे ६०२ पृ० दृश्यम्। घुञ्जनस्य मोचनं स्रवणं चलनं स्पन्दनञ्च तत्र मोचने सक० अन्यत्र अक०। तत्र मोचने "मधु चरन्ति सिन्धवः"। "स्रोतोभिस्त्रिदशगजा मदं चरन्तः" किरा०। स्रवणे "तपः चरतीत्यादि प्रागुक्तम्। वेदे नि० तिपि चरिर्ति।

चर न० चरति स्पन्दते सुस्रुति वा चर—जला० वा अच्। १जले २मेघे पु० मेदि०। ३चले त्रि० ४देहे "द्वाविमौ पुरुषौ लोके चरश्चाक्षर एव च। चरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते" गीतोक्तेषु ५सर्वप्राणिषु तेषां स्वोपाध्यन्तःकरणचलनेन औपाधिकचलनवत्त्वात्तथात्वम् भा० अनु० १७अ० जीवानां चरणप्रकार उक्तो यथा "आयुःकीर्त्तिकराणीह यानि कृत्यानि सेवते। शरीरग्रहणे यस्मिंस्तेषु क्षीणेषु सर्वशः। आयुःक्षयपरीतात्मा विपरीतानि सेवते। बुद्धिर्व्यावर्त्तते चास्य विनाशे प्रत्युपस्थिते। सत्त्वं बलञ्च कालञ्च विदित्वा चात्मनस्तथा। अनिवेलमुपाश्नाति स्वविरुद्धान्यनात्मवान्। यदाऽयमतिकष्टानि सर्वाण्युपनिषेवते। अत्यर्थमपि वा भुङ्क्ते न वा भुङ्क्ते कदाचन। दुष्टान्नामिषपानञ्च यदन्योन्यविरोधि च। गुरु चाप्यमितं भुङ्क्ते नातिजीर्णेऽपि वा पुनः। व्यायाममतिमात्रञ्च व्यवायञ्चोपसेवते। सततं कर्मलोभाद्वा प्राप्तं वेगं विधारयेत्। रसाभियुक्तमन्नं वा दिवास्वप्नञ्च सेवते। अपक्वानागते काले स्वयं दोषान् प्रकोपयेत्। स्वदोषकोपनाद्रोगं लभते मरणान्तिकम्। अपि वोद्बन्धनादीनि परीतानि व्यवस्यति। तस्य तैः कारणैर्जन्तोः शरीरं च्यवते तदा। जीवितं प्रोच्यमानं तद्यथावदुपधारय। ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः। शरीरमनुपर्य्येत्य सर्वान् प्राणान् रुणद्धि वै। अत्यर्थं बलवानूष्मा शरीरे परिकोपितः। भिनत्ति जीवस्थानानि कर्म्माणि विद्धि तत्त्वतः। ततः सवेदनो जीवः सद्यः प्रच्यवते क्षरात् (देहात्)। शरीरं त्यजते जन्तुश्छिद्यमानेषु मर्म्मसु। वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम!। जाता मरणसंविग्नाः सततं सर्वजन्तवः। दृश्यन्ते सन्त्यजन्तश्च शरीराणि द्विजर्षभ! गर्भसंक्रमणे चापि कर्म्मणामतिसर्पणे। तादृशीमेव लभते वेदनां मानवः पुनः। भिन्नसन्धिरथ क्लेदमद्भिः स लभते नरः। यथा पञ्चसु भूतेषु सम्भूतत्वं नियच्छति। शैत्यात् प्रकुपितः काये तीव्रवायुसमीरितः। यः स पञ्चसु भूतेषु प्राणापाने व्यवस्थितः। स गच्छत्यूर्द्ध्वगो वायुः कृच्छ्रान्मुक्त्वा शरीरिणम्। शरीरञ्च जहात्येवं निरुच्छ्वासश्च दृश्यते। स निरूष्मा निरुच्छ्वासो निःश्रीको हतचेतनः। ब्रह्मणा सम्परित्यक्तो मृत इत्युच्यते नरः। स्रोतोभिर्यैर्विजानाति इन्द्रियार्थान् शरीरभृत्। तैरेव च विजानाति प्राणानाहारसम्भवान्। तत्रैव कुरुते काये यः स जीवः सनातनः। तथा यद्यद्भवेद्युक्तं सन्निपाते क्वचित् क्वचित्। तत्तन्मर्म्म विजानीहि शास्त्रदृष्टं हि तत्तथा। तेषु मर्म्मसु भिन्नेषु ततः स समुदीरयन्। आविश्य हृदयं जन्तोः सत्त्वञ्चाशु रुणद्धि वै। ततः सचेतनो जन्तुर्नाभिजानाति किञ्चन। तमसा संवृतज्ञानः संवृतेष्वेव मर्म्मसु। स जीवो निरधिष्ठानश्चाल्यते मातरिश्वना। ततः स तं महोच्छ्वासं भृशमुच्छ्वस्य दारुणम्। निष्क्रामन् कम्पयत्याशु तच्छरीरमचेतनम्। स जीवः प्रच्युतः कायात् कर्म्मभिः स्वैः समावृतः। अभितः स्वैः शुभैः पुण्यैः पापैर्वाऽप्युपपद्यते। ब्राह्मणा ज्ञानसम्पन्ना यथावच्छ्रुतनिश्चयाः। इतरं कृतपुण्यं वा तं विजानन्ति लक्षणैः। यथाऽन्धकारे खद्योतं लीयमानं ततस्ततः। चक्षुष्मन्तः प्रपश्यन्ति तथा च ज्ञानचक्षुषः। पश्यन्त्येवंविधं सिद्धा जीवं दिव्येन चक्षुषा। च्यवन्तं जायमानञ्च योनिञ्चानुप्रवेशितम्। तस्य स्थानानि दृष्टानि त्रिविधानीह शास्त्रतः। कर्म्मभूमिरियं भूमिर्यत्र तिष्ठन्ति जन्तवः। ततः शुभाशुभं कृत्वा लभते सर्वदेहिनः। इहैवोच्चावचान् भोगान् प्राप्नुवन्ति स्वकर्म्मभिः। इहैवाशुभकर्म्माणः कर्म्मभिर्निरयं गताः। अवाग्गतिरियं कष्टा यत्र पच्यन्ति मानवाः। तस्मात् सुदुर्लभो मोक्ष आत्मा रक्ष्यस्ततो भृशम्। ऊर्द्ध्वन्तु जन्तवो गत्वा ये तु स्थानेष्ववस्थिताः। कीर्त्यमानानि तानीह त-

स्तृतः तन्निबोध मे। तच्छ्रुत्वा नैष्ठिकीं बुद्धिं विन्देथाः कर्मनिश्चयम्। ताराद्रूपाणि सर्वाणि यत्रैतच्चन्द्रमण्डलम्। यत्र विभ्राजते लोके स्वभासा सूर्य्यमण्डलम्। स्थानान्येतानि जानीहि जनानां पुण्यकर्मणाम्। कर्मक्षयाच्च ते सर्वे च्यवन्ते वै पुनः पुनः। तत्रापि च विशेषोऽस्ति दिवि नीचोच्चमध्यमः। न च तत्रापि सन्तोषो दृष्ट्वा दीप्ततरां श्रियम्। इत्येता गतयः सर्वाः पृथक् ते समुदीरिताः। उपपत्तिन्तु वक्ष्यामि गर्भस्याहमतः परम्। तथा तन्मे निगदतः शृणुष्वावहितो द्विज!"।

११अज्ञाने च "क्षरं त्वविद्या च मृतं तु विद्या" श्वेताश्व० उ०। १२परमेश्वरे "सदसत्क्षरमक्षरम्" विष्णुस०। "सर्वं खल्विदं ब्रह्मेति" श्रुतेस्तस्य सर्वभूतमयत्वात्तथा त्वम्। "कार्य्यकारणरूपं तु नश्वरं क्षरमुच्यते" इत्युक्तयोः १३कार्य्यकारणयोः।

क्षरे(र)ज त्रि० क्षरे जायते जन–ड वा सप्तम्या लुक्। मेघजाते

क्षरण न० क्षर–भावे ल्युट्। १स्रवणे २मोचने च "क्षरणात् क्षणनाद्वा क्षारः" सुश्रुतः "अङ्गुलीक्षरणसन्नवर्त्तिकः"। कर्त्तरि ल्यु। ३क्षरणशीले त्रि०।

क्षरिन् पु० क्षर–इनि। १वर्षाकाले हेमच०। २क्षरणयुक्ते त्रि० स्त्रियां ङीप्।

क्षल शोधने वा चु० उभ०पक्षे भ्वा० पर० सक० सेट्। क्षालयति ते क्षलति अचिक्षलत् त अक्षालीत्। क्षालयाम् बभूव आस चकार चक्रे चक्षाल। क्षलः० क्षलः क्षालः। "क्षते रवेः क्षालयितुं क्षमेत कः" माघः। "क्षालितमपि हृदयं मलिनं शोकोर्म्मिभिः क्रियते" प्रबो०। "क्षालयन्नपि वृक्षाङ्घ्रीन्नदीवेगो निकन्तति" हितो०। भ्वादिस्तु क्षाले चयने कवि० इति भेदः। प्राद्युपसर्गपूर्व्वस्तत्तदुपसर्गद्योत्यार्थयुक्तशोधने। "गात्राणि वाससी चैव प्रक्षाल्य सलिलेन सा" भा० व० १७अ०। "मुखं प्रक्षालयेत्ततः" स्मृतिः।

क्षव पु०क्षु–भावादौ अप्। १क्षुते (हाँचि) २राजिकायां (राइसर्षा)। अमरः। ३कासे शब्दरत्ना०।

क्षवक पु० क्षु–करणे अप् संज्ञायां क। १राजिकायाम् २अपामार्गे ३भूताङ्कुशे च राजनि०। [भावप्र०।

क्षवकृत् पु० क्षवं करोति कृ–क्विप्। क्षुपभेदे (छिक्कनी)

क्षवथु पु० क्षु–अथुच्। १क्षुते (हाँचि)। २कासे च मेदि०। क्षुतलक्षणं सुश्रुते उक्तं "घ्राणाश्रिते मर्मणि संप्रदुष्टे यस्यानिलो नासिकया निरेति। कफानुयातो बहुशः सशब्दं स रोगमाहुः क्षवथुं विधिज्ञाः"। "उद्वाततोयः क्षवथुर्निरेति" सुश्रुतः। क्षुतशब्दे २२५६ पृ० उदा०

क्षवपत्रा स्त्री क्षवः क्षुतहेतुः पत्रं यस्याः। द्रोणपुष्प्याम् राजनि०तत्पत्रघ्राणे हि क्षुतं जायते। क्षवपत्त्रेति वा पाठः।

क्षविका स्त्री क्षवः क्षुतं साध्यतयाऽस्त्यस्य ठन्। बृहतीभेदे राजनि०।

क्षात्त्र न० क्षत्त्रस्य कर्म भावो वा–अण्। "शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षात्त्रं कर्म स्वभावजम्" गीतोक्ते १क्षत्त्रियकर्मणि। तस्येदमण्। २तत्सम्बन्धिनि त्रि० "आत्मकर्मक्षमं देहं क्षात्त्रो धर्म इवाश्रितः" रघुः।

क्षत्तॄणां समूहः अण्। ३तत्समूहे न० "शतं क्षात्त्रसंग्रहीतानाम् पुत्राः" शत० ब्रा० १३,४,२,५, "क्षत्तारः कोषाध्यक्षाः तेषां समूहः क्षात्त्रम्" भा०।

क्षात्त्रि त्रि० क्षत्त्रस्यायं जातिभिन्न इञ्। क्षत्त्रसम्बन्धिनि जातौ तु क्षत्त्रिय इत्येव।

क्षान्त त्रि० क्षम–कर्त्तरि क्त। १सहिष्णौ केनचित्पीड़नेऽपि सामर्थ्ये सति तत्प्रतीकारपराङ्मुखे। कर्मणि क्त। २सोढे। ३निर्वैरो निर्वृतिः क्षान्तो निर्म्मन्युः क्षतिरेव च। विघसी मातृवर्त्ती च व्याधाः परमधार्म्मिकाः" हरिवं० २१अ० उक्ते सप्तव्याधमध्ये ३व्याधभेदे। ते च गुरोर्गोहरणात् क्रमेण मृगचक्रवाकादियोनिमाप्ताः तत्रैव तत्कथा। क्षान्ताशब्दे परे प्रिया० कर्मधारये न पुंवत्। परमक्षान्ता। उत्करा० चतुरर्थ्यां छ। क्षान्तीय तन्निर्वृत्तादौ त्रि०। ४ऋषिभेदे पु०। क्षान्तस्य गोत्रापत्यम् अश्वा० फञ्। क्षान्तायन तद्गोत्रापत्ये पुंस्त्री०

क्षान्ति स्त्री क्षम–भावे क्तिन्। क्षमायाम् सामर्थ्ये सत्यप्यपकारिणोऽप्यपकाराचिकीर्षायाम्। "क्षान्त्या शुध्यन्ति विद्वांसः" मनुः। "शमोदमस्तपः शौचं क्षान्तिरार्ज्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्" गीता "शमोदमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम्। ज्ञानं दयाच्युतात्मत्वं सत्यञ्च ब्रह्म लक्षणम्" भाग० ७।११.२२

क्षान्तु पु० क्षम–तुन् दृद्धिश्च। १क्षमाशीले उणादिकोषः २पितरि पु० संक्षिप्तसा०

क्षाम त्रि० क्षै–कर्त्तरि क्त। १क्षीणे २अल्पे शब्दरत्ना० "क्षामोविवर्णवक्त्रश्च नखैःकिञ्चिच्छिनत्त्यपि"। "क्षामेण क्षुद्रकोष्ठेन मन्दाग्निना" सुश्रुतः "क्षामच्छायं भवनमधुना मद्वियोगेन नूनम्" "मध्ये क्षामा चकितहरिणीप्रेक्षणा नि-

ग्नाभिः" मेघ०। अतिसूक्ष्मत्वात् ३परमेश्वरे "नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः" विष्णु स०। "क्षामा भिन्दन्तो अरुणीरपव्रन्" ऋ० ४।२।१६।४धरायां स्त्री निघ०। भावे क्त ५क्षये न०

क्षामन् त्रि० क्षै-मनिन्। १क्षयशीले २पृथिव्यां निघ०। "क्षपा क्षामन् रुरुच उषसो न भानुना" यजु० १७,१०, "तेन इन्द्रः पृथिवी क्षाम वर्द्धन्" ऋ० ५,५१,११। हिरण्ययं शकुनं क्षामणि स्थाम्" ६,८५,११

क्षामवत् त्रि० क्षामं दोषक्षयः साध्यतयाऽस्त्यस्य मतुप् मस्य वः। १अग्निभेदे। "गृहदाहेऽग्नये क्षामवते पुरोडाशः" कात्या० श्रौ०। २इष्टिभेदे स्त्री। "क्षामवत्यादिना यद्वत् कर्म्मणा प्रतनापते!। दैवदोषादकरणे जाते दोषकदम्बके। होमेनैकेन दोषाणां सर्व्वेषां क्षयमादिशेत्"। एवञ्चैकप्रायश्चित्तेनानेकदोषक्षये क्षामवतीष्टिः सर्व्वत्र दृष्टान्तः" प्रा० त०।

क्षामास्य न० क्षामस्य क्षयस्यास्यं स्थानम्। कुपथ्ये "अपथ्यमहितं रोग्यं क्षामास्यं परिकीर्त्तितम्" शब्दच०। क्षमस्यमिति वा पाठ पृषो०।

क्षार त्रि० क्षर-ज्वला० वा ण। १क्षरणशीले। २लवणरसे ३धूर्त्ते ४लवणे ५भस्मनि च पु० मेदि० ५गुडे हेम० ६टङ्कणे ७सर्जिकाक्षारे पु० राजनि०। ७विडलवणे ८यवक्षारे च न० त्रिका०। चक्रदत्तोक्ते ९भस्मभेदजाते औषधभेदे यथा "प्रशस्तेऽहनि नक्षत्रे कृतमङ्गलपूर्व्वकम्। कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत्। आढ़कन्त्वेकमादाय जलद्रोणे पचेद्भिषक्। चतुर्भागावशिष्टेन वस्त्रपूतेन वारिणा। शङ्खचूर्णस्य कुड़वं प्रक्षिप्य विपचेत् पुनः। शनैःशनैर्मृदावग्नौ यावत् सान्द्रतनुर्भवेत्। सर्जिकायवशूकाभ्यां शुण्ठी मरिचपिप्पली। वचा चातिविषा चैव हिङ्गुचित्रकयोस्तथा। एषां चूर्णानि निक्षिप्य पृथक्कोनाष्टमांशकम्। दर्व्या संघट्टितश्चापि स्थापयेदायसे घटे। एष वह्निसमः क्षारः कीर्त्तितः काश्यपादिभिः। तोये कालकमुष्ककस्य विपचेद्भस्माढकं षड़्गुणे पात्रे लौहमये दृढे विपुलधीर्दर्व्या शनैर्घट्टयन्। दग्ध्वाग्नौ बहुशङ्खनाभिशकलान् पूतार्पणे क्षिपेत् यद्घोरखड्गजनानपि दहति क्षारो वरो वाक्पतात्। प्रायश्चिभावशिष्टेऽस्मिश्चूर्णैश्चूल्यरक्तता। संजायते तदा स्राव्यं क्षाराम्भो यात्रुमिष्यते। तुर्य्यांशाष्टमकेन षोडशभवेनांशेन संव्यूहितो मध्यः स्यात् मृदुरिति क्रमेण त्रिविधः क्षारोदकाङ्कुशः। योऽतिसान्द्रो नातितनुः क्षारपाक उदाहृतः। दुर्नामकादौ निर्दिष्टः क्षारोऽयं प्रतिसारणः। पानीयो यस्तु गुल्मादौ तं क्षारानेकविंशतम्। स्रावयेत् षड्गुणे तोये केचिदाहुश्चतुर्गुणे"।

यवक्षारादिविशेषगुणाः सुश्रुते उक्ता यथा

"यवक्षारसर्जिकाक्षारपाकिमटङ्कणक्षाराः। गुल्मार्शोग्रहणीदोषशर्कराश्मरिविनाशनाः। क्षारास्तु पाचनाः सर्वे रक्तपित्तकराः स्मृताः। ज्ञेयौ वह्निसमौ क्षारौ सर्जिकायावशूकजौ। शुक्रश्लेष्मविबन्धार्शोगुल्मप्लीहविनाशनौ। उष्णोऽनिलघ्नः प्रक्लेदी ऊषक्षारो बलापहः। मेदोघ्नः पाकिमः क्षारो मूत्रवस्तिविशोधनः। विरूक्षणोऽनिलकरः श्लेष्मघ्नः पित्तदूषणः। अग्निदीप्तिकरस्तीक्ष्णष्टङ्कणः क्षार उच्यते"। मेदिन्युक्तं भस्म च शुष्ककदलीत्वगादिभस्म तच्च रजकस्य वस्त्रशोधकद्रव्यम्। "यथा क्षारोदकस्वच्छनिर्णोदनाभिर्वासांसि शुद्धिमुपयन्ति" प्रा० त० हारीतः। कालभेदे वस्त्रे क्षारयोजननिषेधमाह स्मृतिः "द्वादश्यां पक्षयोरन्ते संक्रान्त्यां श्राद्धवासरे। वस्त्रं न पीडयेत्तत्र न च क्षारेण योजयेत्"। ततः उत्करा० चतुरर्थ्यां छ। क्षारीय तत्सन्निकृष्टदेशादौ त्रि०

क्षारक पु० क्षर-ण्वुल्। १अचिरजाते फले (उा लि) अमरः। २पक्षिमीनादिपिठके (खाचा) मेदि०। क्षाराय तद्योजनाय साधु कन्। ३रजके शब्दमा०।

क्षारगुड पु० क्षारेण पक्वः गुडः शा० त०। च० द० उक्ते क्षारपक्वे गुडभेदे यथा

"पञ्चमूलं च त्रिफलामर्कमूलं शतावरीम्। दन्तीं चित्रकमास्फोतां रास्नां पाठां सुधां शठीम्। पृथग्दशपलान् भागान् दग्ध्वा भस्म समावपेत्। त्रिःसप्तकृत्वस्तद्भस्म जलद्रोणेन गालयेत्। तद्रसं साधयेदग्नौ चतुर्भागावशेषितम्। ततो गुड़तुलां दत्त्वा साधयेन्मृदुनाग्निना। सिद्धं गुड़न्तु विज्ञाय चूर्णानीमानि दापयेत्। वृश्चिकालीं द्विकाकोल्यौ यवक्षारं समां वचाम्। एतत् पञ्चपला भागाः पृथक् पञ्च पलानि च। हरीतकीं त्रिकटुकं सर्जिकां चित्रकं वचाम्। हिङ्ग्वम्लवेतसाभ्याञ्च द्वे पले तत्र दापयेत्। अक्षप्रमाणां गुटिकां कृत्वा खादेद्यथाबलम्। अजीर्णं जरयत्येष जीर्णं सन्दीपयत्यपि। भुक्तं भुक्तञ्च जीर्य्येत पाण्डुत्वमपकर्षति। प्लीहार्शःश्वयथुञ्चैव श्लेष्मकासमरोचकम्। मन्दाग्निविषमाग्नीनां कफे कण्ठोरसि स्थिते। कुष्ठानि च प्रमेहांश्च गुल्मञ्चाशु नियच्छति।

ख्यातः क्षारगुडो ह्येष रोगयुक्तो प्रयोजयेत्”।

क्षारतैल न० चक्र०उक्ते कर्णशूलनिवारके १पक्वतैलभेदे यथा “बालमूलकशुण्ठीनां क्षारो हिङ्गु सनागरम्। शतपुष्पवचाकुष्ठं दारुशिग्रुरसाञ्जनम्। सौवर्च्चलं यवक्षारः सर्जिकोद्भिदसैन्धवम्। भूर्जग्रन्थिविडं मुस्तं मधुशुक्तं चतुर्गुणम्। मातुलुङ्गरसश्चैव कदल्या रस एव च। तैलमेभिर्विपक्तव्यं कर्णशूलहरं परम्। बाधिर्य्यं कर्णनादश्च पूयस्रावश्च दारुणः। पूरणादस्य तैलस्य क्रिमयः कर्णसंश्रिताः। क्षिप्रं विनाशं गच्छन्ति कृष्णात्रेयस्य शासनात्। क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम्। मधुप्रधानं शुक्तन्तु मधुशुक्तं तथोपरम्। जम्बीरस्य फलरसं पिप्पलीमूलसंयुतम्। मधुभाण्डे विनिक्षिप्य धान्यराशौ निधापयेत्। मासेन तज्जातरसं मधुशुक्तमुदाहृतम्”। गारुडे १९८०अ० इत्यमेव। तत्रोक्ते निर्लोमतादिसाधने २तैलभेदे च यथा “शुक्तिशम्बूकशङ्खानां दीर्घवृन्तात् समुष्ककात्। दग्ध्वा क्षारं समादाय खरमूत्रेण गालयेत्। क्षाराष्टभागं विपचेत् तैलस्य सार्षपं बुधः। इदमन्तःपुरे देयं तैलमात्रेषु पूजितम्। बिन्दुरेका पतेद्यत्र तत्र रोमापुनर्भवः। मदनादिवर्णे देयमश्विभ्याञ्च विनिर्म्मितम्। अर्शसां कुष्ठरोगाणां पामादद्रुविचर्च्चिकाम्। क्षारतैलमिदं श्रेष्ठं सर्वकुष्ठहरं परम्।”

क्षारत्रय न० ६त० “सर्ज्जिकश्च यवक्षारः टङ्कणक्षारएव च क्षारत्रयञ्च त्रिक्षारम् क्षारत्रितयमेव च” राजनि०। उक्ते क्षारद्रव्यत्रये [राजनि०

क्षारदला स्त्री क्षारोदलेऽस्याः। चिल्लीशाके शुद्रवास्तूके

क्षारदशक न० ६त०। “शिग्रुमूलकपलाशचूक्रिका चित्रकार्द्रक रुनिम्बसम्भवैः। इक्षुगोक्षुरिकमोचिकोद्भवैः क्षारपूर्वदशकं प्रकीर्त्तितम्” राजनि० उक्ते दशविधक्षारद्रव्ये

क्षारदेश पु० क्षारप्रधानोदेशः शा० त०। क्षारप्रधाने देशे “जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः। किमाश्चर्यं क्षारदेशे प्राणदा यमदूतिका” उद्भटः

क्षारद्रु पु० क्षारप्रधानोद्रुः। घण्टापारुलिवृक्षे रत्नमा०

क्षारनदी स्त्री क्षारप्रधाना नदी। नरकविशेषस्थे नदीभेदे

क्षारपत्र पु० क्षारः पत्रेऽस्य। वास्तूकशाके राजनि०। वा कप्। तत्रार्थे हेमच०

क्षारपाक पु० सुश्रुतोक्ते क्षारद्रव्यस्य पाकभेदे तत्र क्षारभेदस्य गुणप्रयोगादिकमुक्त्वा तत्पाकविधिरुक्तो यथा “अथातः क्षारपाकविधिमध्यायं व्याख्यास्यामः। शस्त्रानुशस्त्रेभ्यः क्षारः प्रधानतमश्छेद्यभेद्यलेख्यकरणात्त्रिदोषघ्नत्वाद्विशेषक्रियावचारणाच्च। तत्र क्षरणात् क्षणनाद्वा क्षारः। नानौषधिसमवायात्त्रिदोषघ्नः शुक्लत्वात्सौम्यस्तस्य सौम्यस्यापि सतो दहनपचनदारणादिशक्तिरविरुद्धा स खल्वाग्नेयौषधिगणभूयिष्ठत्वात् कटुक उष्णस्तीक्ष्णः पाचनो विलयनः शोधनो रोपणः शोषणः स्तम्भनो लेखनः कृम्यामयकफकुष्ठविषमेदसामुपहन्ता पुंस्त्वस्य चातिसेवितः। स द्विविधः प्रतिसारणीयः पानीयश्च। तत्र प्रतिसारणीयः कुष्ठकिटिभदद्रुकिलासमण्डलभगन्दरार्बुददुष्टव्रणनाडीचर्म्मकीलतिलकालकव्यङ्गमशकबाह्यविद्रधिकृमिविषार्शःसूपदिश्यते सप्तसु च मुखरोगेषूपजिह्वाधिजिह्वोपकुशदन्तवैदर्भेषु तिसृषु च रोहिणीष्वेतेषु चैवानुशस्त्रप्रणिधानमुक्तम्। पानीयस्तु गरगुल्मोदराग्निसङ्गाजीर्णारोचकानाहशर्करास्मर्य्यभ्यन्तरविद्रधिकृमिविषार्शःसूपयुज्यते। अहितस्तु रक्तपित्तज्वरितपित्तप्रकृतिबालवृद्धदुर्बलभ्रममदमूर्च्छातिमिरपरीतेभ्योऽन्येभ्यश्चैवंविधेभ्यः। तद्वेतरक्षारवद्दग्ध्वा परिस्रावयेत्तस्य विस्तारोऽन्यत्र। स च त्रिविधो मृदुर्मध्यस्तीक्ष्णश्च। तं चिकीर्षुः शरदि गिरिसानुजं शुचिरुपोष्य प्रशस्तेऽहनि प्रशस्तदेशजातमनुपहतं मध्यमवयसं महान्तमसितमुष्ककमधिवास्यापरेद्युः पाटयित्वाभिमन्त्र्यानेन मन्त्रेण। अग्निवीर्य्य! महावीर्य्य! मा ते वीर्य्यं प्रणश्यतु। इहैव तिष्ठ कल्याण! मम कार्य्यं करिष्यसि। मम कार्य्ये कृते पश्चात् स्वर्गलोकं गमिष्यसि। श्वेतपुष्परक्तपुष्पसहस्रं जुहुयात्। खण्डशः प्रकल्प्याथ निर्वाते देशे निचितं कृत्वा सुधाशर्कराश्च प्रक्षिप्य तिलनालैरादीपयेदथोपशान्तेऽग्नौ तद्भस्म पृथग्गृह्णीयाद्भस्मशर्कराश्च। अथानेनैव विधानेन कुटजपलाशाश्वकर्णपारिभद्रकविभीतकारग्वधविल्वकार्कस्नुह्यपामार्गपाटलानक्तमालवृषकदलीचित्रकपूतीकेन्द्रवृक्षास्फोताश्वमारकसप्तच्छदाग्निमन्थान् गुञ्जाश्चतस्रश्च कोशातकीः समूलफलपत्रशाखा दहेत्। ततः क्षारद्रोणमुदकद्रोणैः षड्भिरालोड्य मूत्रैर्वा यथोक्तैरेकविंशतिवारान् विस्राव्य महति कटाहे शनैर्दर्व्या विघट्टयन् विपचेत्। स यदा भवत्यच्छो रक्तस्तीक्ष्णः पिच्छिलश्च तमादाय महति वस्त्रे परिस्राव्येतरं विसृज्य च पुनरग्नावधिश्रयेत्। तत एव च क्षारोदकात् कुडवमध्यर्द्धं वाऽपनयेत्। ततः कटशर्कराभस्मशर्कराक्षीरपाकशङ्खनाभीरग्निवर्णाः कृत्वाऽऽयसे

पात्रे तस्मिन्नेव क्षारोदके निषिच्य पिष्ट्वा तेनैव द्विद्रोणेऽष्टपलसंमितं शङ्खनाभ्यादीनां प्रमाणं प्रतिवापं कृत्वा सततमप्रमत्तश्चैनमवघट्टयन् विपचेत्। स यथा नातिसान्द्रो नातिद्रवश्च भवति तथा प्रयतेत। अथैनमपगतपाकमवतार्य्यानुगुप्तमायसे कुम्भे संवृतमुखे निदध्यादेष मध्यमः। एष एवाप्रतीवापः पक्वः संव्यूहिमो मृदुः। प्रतीवापे यथालाभं दन्तीद्रवन्तीचित्रकलाङ्गलकीपूतिकप्रबालतालपत्रीविडसुवर्चिकाकनकक्षीरीहिङ्गुवचातिविषाः समाः श्लक्ष्णचूर्णाः शुक्तिप्रमाणाः प्रतीवापः। स एव सप्रतीवापः पक्वः पाक्यस्तीक्ष्णस्तेषां यथाव्याधिबलमुपयोगः। क्षीणबले तु क्षारोदकमावपेद्बलकरणार्थम्। भवतश्चात्र। नैवातितीक्ष्णो न मृदुः शुक्लः श्लक्ष्णोऽथ पिच्छिलः। अविष्यन्दी शिवः शीघ्रः क्षारो ह्यष्टगुणः स्मृतः। अतिमार्दवशैत्यौष्ण्यतैक्ष्ण्यपैच्छिल्यसर्पिताः। सान्द्रताऽपक्वता हीनद्रव्यता दोष उच्यते। तत्र क्षारसाध्यव्याधिव्याधितमुपवेश्य निवाते देशेऽसम्बाधेऽग्रोपहरणीयोक्तेन विधानेनोपसम्भृतसम्भारं ततोऽस्य तमवकाशं निरीक्ष्यावघृष्यावलिख्य प्रच्छयित्वा शलाकया क्षारं पातयित्वा वाक्शतमात्रमुपेक्षेत। तस्मिन्निपतिते व्याधौ कृष्णता दग्धलक्षणम्। तत्राम्लवर्गः शमनः सर्पिर्मधुकसंयुतः। अथ चेत् स्थिरमूलत्वात् क्षारं दग्धं न शीर्य्यते। इदमालेपनं तत्र समग्रमवचारयेत्। अम्लकाञ्जिकबीजानि तिलान्मधुकमेव च। प्रपिष्य समभागानि तेनैवमनुलेपयेत्। तिलकल्कः समधुको घृताक्तो व्रणरोपणः। रसेनाम्लेन तीक्ष्णेन वीर्य्योष्णेन च योजितः। आग्नेयेनाग्निना तुल्यः कथं क्षारः प्रशाम्यति। एवं चेन्मन्यसे वत्स! प्रोच्यमानं निबोध मे। अम्लवर्ज्जान् रसान् क्षारे सर्वानेव विभावयेत्। कटुकस्तत्र भूयिष्ठो लवणानुरसस्तथा। अम्लेन सह संयुक्तः स तीक्ष्णलवणो रसः। माधुर्य्यं भजतेऽत्यर्थं तीक्ष्णभावं विमुञ्चति। माधुर्य्याच्छममाप्नोति वह्निरद्भिरिवाप्लुतः। तत्र सम्यग्दग्धे विकारोपशमो लाघवमनास्रावश्च। हीनदग्धे तोदकण्डूजाड्यानि व्याधिवृद्धिश्च। अतिदग्धे दाहपाकरागस्रावाङ्गमर्दक्लमपिपासामूर्च्छा दुर्म्मरणं वा। क्षारदग्धव्रणन्तु यथादोषं यथाव्याधि चोपक्रमेत्। अथ नैतेषु क्षारकृत्याः। तद्यथा दुर्बलबालस्थविरभीरुसर्वाङ्गशूनोदरिरक्तपित्तिगर्भिण्यृतुमतीप्रवृद्धज्वरिप्रमेहिरूक्षक्षतक्षीणतृष्णामूर्च्छोपद्रुतक्लीबापवृत्तोद्वृत्तफलयोनयः। तथा मर्म्मशिरास्नायुधमनीसन्धितरुणास्थिसेवनीगलनाभीनखान्तरशेफःस्रोतःस्वल्पमांसेषु च प्रदेशेष्वक्ष्णोश्च न दद्यादन्यत्र वर्त्मरोगात्। तत्र क्षारसाध्येष्वपि व्याधिषु शूनगात्रमस्थिशूलिनमन्नद्वेषिणं हृदयसन्धिपीडोपद्रुतं क्षारो न साधयति"।

क्षारभूमि स्त्री क्षारयुक्ता भूमिः। क्षाराम्बुधिसमीपस्थभूम

क्षारमध्य पु० क्षारो मध्येऽस्य। अपामार्गे रत्ना०

क्षारमृत्तिका स्त्री क्षारसंयुक्ता मृत्तिका। ऊषरस्थाने। अमरः। [राजनि०

क्षारमेलक पु० क्षाराणां मेलः संघः स्वार्थे क। क्षारसमूहे

क्षारमेह पु० सुश्रुतोक्ते पित्तजे मेहभेदे "पित्तान्नीलहरिद्राम्लक्षारमञ्जिष्ठाशोणितमेहाः षट् याप्याः" सुश्रु० "क्षारमेहिनं त्रिफलाकषायम्" सुश्रुतः

क्षारवृक्ष पु० क्षारप्रधानो वृक्षः। मुष्ककवृक्षे राजनि०

क्षारश्रेष्ठ न० क्षारः श्रेष्ठोऽत्र। १पलाशे २मुष्कके च राजनि०

क्षारषट्क न० ६त०। "धावापामार्गकुटजलाङ्गलीतिलमुष्ककैः। क्षारैरेतैस्तु मिलितैः क्षारषट्कादिको गणः। राजनि० उक्ते क्षारद्रव्यषट्के।

क्षारसमुद्र पु० क्षारप्रधानः समुद्रः। लवणसमुद्रे "सीता तु ब्रह्मसदनात् केसराचलादिशिखरेभ्योऽधोधः प्रस्रवन्ती गन्धमादनमूर्द्धसु पतित्वाऽन्तरेण भद्राश्वं वर्षं प्राच्यां दिशि क्षारसमुद्रमभि प्रविशति" भाग० ५.१७८,। क्षारसिन्धु क्षाराम्बुधिप्रभृतयोऽप्यत्र "भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः। अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये क्षारक्षीराद्यम्बुधीनां निवेशः" सि०शि०।

क्षारसूत्र न० चक्र० द० उक्ते क्षारभाविते सूत्रभेदे "भावितं रजनीचूर्णैः स्नुहीक्षीरे पुनः पुनः। बन्धनात् सुदृढं सूत्रं भिनत्त्यर्शोभगन्दरम्"।

क्षारागद पु० सुश्रुतोक्ते औषधभेदे यथा

"धवाश्वकर्णतिनिशपलाशपिचुमर्दपाटलिपारिभद्रकाम्रोदुम्बरकरहाटकार्जुनककुभसर्ज्जकपीतनश्लेष्मातकाङ्कोठामलकप्रग्रहकुटजशमीकपित्थाश्मन्तकार्कचिरविल्वमहावृक्षारुष्करारलुमधुकमधुशिग्रुशाकगोजीमूर्व्वातिल्वकेक्षुरकगोपघण्टारिमेदानां भस्मान्याहृत्य गवां मूत्रेण क्षारकल्पेन परिस्राव्य विपचेद्दद्याच्चात्र पिप्पलीमूलतण्डुलीयकवराङ्गचोचकमञ्जिष्ठाकरञ्जिकाहस्तिपिप्पलीमरिचोत्पलसारिवाविडङ्गगृहधूमानन्तासोमसरलाबाह्लीकगुहाकोशाम्रश्वेतसर्षपलवणप्रवालनिचुलकवर्द्धमानयष्टिलपुत्त्रश्रेणीसुपर्णदण्डकैलवालुकनागदन्त्यतिविषाभयाभद्रदारुकुष्ठहरि-

द्रावणचूर्णानि लोहानाञ्च समभागानि ततः क्षारवदागतपाकमवतार्य्य लोहकुम्भे निदध्यात्। अनेन दुन्दुभिं लिम्पेत् पताकातोरणानि च। श्रवणाद्दर्शनात् स्पर्शात् विषात् सम्प्रतिमुच्यते। एष क्षारागदो नाम शर्कराश्मरीषु च। अर्शःसु वातगुल्मेषु कासशूलोदरेषु च। अजीर्णे ग्रहणीदोषे भक्तद्वेषे च दारुणे। शोफे सर्व्वसरे चापि देयः श्वासे च दारुणे। एष सर्वविषार्त्तानां सर्व्वथैवोपयुज्यते। तथा तक्षकमुख्यानामयं दर्पाङ्कुशोऽगदः"।

क्षाराच्छ न॰ क्षारेणाच्छम्। सामुद्रलवणे हारा॰।

क्षारिका स्त्री क्षर-ण्वुल् टाप् अतइत्त्वम्। क्षुधायां हारा॰

क्षारित त्रि॰ क्षर-णिच्-क्त। १अपवादयुक्ते, प्राप्तदोषे, अमरः २स्राविते मेदि॰

क्षारोद(क) पु॰ क्षारमुदकमस्य वा उदादेशः। लवणसमुद्रे "क्षारोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः" भाग॰ ५।१०।३५ श्लो॰ "क्षारोदधिरथत "जम्बुद्वीपोऽयं यावत्प्रमाणविस्तारस्तावता क्षारोदधिः" भाग॰ ५।२०।२श्लो॰

क्षाल्य त्रि॰ क्षल-शोधने ण्यत्। १कर्त्तरि च। शोधनकर्त्तरि

क्षालन न॰ क्षल-भावे ल्युट्। शोधने "स्त्रीशूद्रौ प्रयतौ नित्यं क्षालनाच्च करोष्ठयोः" आ॰ त॰ ब्रह्मपु॰ "प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्" नीतिशा॰

क्षालित त्रि॰ क्षल-क्त। १शोधिते कृतप्रक्षालने च। "क्षालितं तु शमितञ्च वधूनां द्रावितं तु हृदयं मधुवारैः" माघः

क्षि क्षये अक॰ ऐश्वर्य्ये सक॰ भ्वा॰ पर॰ अनिट्। क्षयति अक्षैषीत् चिक्षाय क्षीयात्। क्षीणः क्षितिः। क्षयः। क्षयन् क्षेतुम्। भावे दैन्ये आक्रोशे च निष्ठातस्य वा नः दीर्घो वा। तत्र दैन्ये क्षितं क्षीणं वा तपस्विना। आक्रोशे क्षितायुः क्षीणायुः भूयात्। "क्षयन्तमस्य रजसः पराके" ऋ॰७,१००,१५, "यस्मिन् क्षयन्ति प्रदिवः" अथ॰१२,३,१, "ताहि मध्यं भराणामिन्द्राग्नी अधिक्षितः" ऋ॰८,४०, ३, कर्म्मकर्त्तरि क्षीयते "अपक्षीयते नश्यति" यास्कः "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" कठो॰। "शरीरकर्षणात्प्राणाः क्षीयन्ते प्राणिनां यथा। तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्षणात्" मनुः

क्षि हिंसायां स्वा॰ पर॰ सक॰ अनिट्। क्षिणोति, क्षिणुतः क्षिण्वः-क्षिणुवः। अक्षैषीत्। चिक्षाय। "खटिनी क्षिणोति" नैष॰। "यस्मात् तद्वाक्यशल्यैः क्षिणोषि" भा॰ व॰ २४अ॰। "सिंहीवैनं भूत्वाक्षिणोति" शत॰ ब्रा॰ १।५।१।२५। अयं क्र्यादिरपि तत्रार्थे। "क्षिणामि ब्रह्मणामित्रान्" अथ॰ ३।१९।३।

क्षि वासे अक॰ गतौ सक॰ तु॰ प॰ अनिट्। क्षियति। अक्षैषीत् चिक्षाय। "अन्तरीक्षं पृथिवीं क्षियन्ति" तैत्ति॰ २,१,१,७, "मतृस्य न दीन उदनि क्षियन्तम्" ऋ॰१०,६८,८, वेदे गणव्यत्ययात् क्वचित् शपो लुक्। "जयति क्षेति पुष्यति" ऋ॰ ७।३२।९। "क्षेति क्षेमेभिः साधुभिः" ८।७३।९।

क्षि त्रि॰ क्षि-वा॰ डि। १निवासे २गतौ ३क्षये च मेदि॰।

क्षिण हिंसायां तना॰ उभ॰ सक॰ सेट्। क्षिणोति क्षिणुते अक्षणीत् अक्षणिष्ट। चिक्षाण चिक्षिणे।

क्षित त्रि॰ क्षि-हिंसायां कर्म्मणि क्त। १हिंसिते। भावे क्त २हिंसायां न॰

क्षिति स्त्री क्षि-निवासे आधारे क्तिन्। १भूमौ, "निपीय यस्य क्षितिरक्षिणः कथाम्" नैष॰। भावे क्तिन्। २निवासे क्षि-क्षये भावे-क्तिन्। ३क्षये, कर्त्तरि क्तिच्। ४रोचनाख्योगन्धद्रव्ये शब्दच॰५मनुष्ये निघ॰॥ "इन्द्र! प्रराजसि क्षितीः" ऋ॰ ८,६,२६ "क्षितीर्मनुष्यान्" भा॰। "प्रजावता नः क्षितीः करतमूर्ज्जयन्तीम्" ऋ॰७,६६,२, "ध्रुवासु क्षितिषु क्षियन्तः" ऋ॰ ७,८८,७, "पञ्च क्षितीर्मानुषीर्बोधयन्ती" ७,७९,१। "क्षितीर्हि सा" अथ॰१२,५,१६। क्षि चये आधारे क्तिन्। ६प्रलयकाले मेदि॰। क्षितिशब्दनिरुक्तिः ब्रह्मवै॰पु॰प्र-ख॰७अ॰। "महालये क्षयं याति क्षितिस्तेन प्रकीर्त्तिता"। अस्मिन्पक्षे कर्त्तरि क्तिच् इति भेदः।

क्षितिकण पु॰ ६त॰। धूलौ त्रिका॰।

क्षितिकम्प पु॰ ६त॰ क्षितिधराणां चलननिमित्ते भूमेः कम्पे तत्र विशेषः अद्भुतसागरे, "मेषे हरिणकभे गजः प्रचलति व्यासादिभिः कथ्यते, वामे मीनकुलीरभे च वृषभे सत्यं चलेत् कच्छपः। यूके कुम्भधरे मृगेन्द्रमिथुने कन्यामृगे पन्नगस्त्वामेकतमो यदि प्रचलति क्षौणी तदा कम्पते। कच्छपे मरणं ज्ञेयं मरणञ्चापि पन्नगे। सर्व्वत्र सुखदश्चैव पृथिव्यां चलिते गजे। प्रथितनरेश्वरमरणं व्यसनान्याग्नेयमारुतयोः। क्षुद्भयमतिवृष्टिभिरुपपीड्यन्ते जनाश्चापि। त्रिचतुर्थपञ्चमदिने मासे पक्षे त्रिपञ्चके। भवति यदा भूकम्पः प्रधाननृपनाशनं कुरुते"। "क्षितिभृद्दिव क्षितिकम्पकीर्णशृङ्गः" भट्टिः।

क्षितिक्षम पु॰ क्षितौ क्षमते क्षम-अच्। खदिरवृक्षे राजनि॰

क्षितिक्षित् पु॰ क्षितिमीष्टे क्षि ऐश्वर्य्ये क्विप्। भूमीश्वरे-

राजनि । "अपदान्तरञ्च परितः क्षितिक्षिताम्" माघः । मही चदादयोऽप्यत्र ।

क्षितिज पु॰ क्षितेर्जायते जन—ड । १मङ्गले "क्षितिजा-त्मदेशं गतः" ज्यो॰ । २नरकासुरे । ३भूनागे उपरसभेदे र जनि॰ । ४महीरुहे वृक्षे च । ५भूमिजाते त्रि॰ सि॰शि॰ गोलबन्धाधिकारोक्ते ६वृत्तक्षेत्रभेदे यथा

पूर्वापरं विरचयेत् सममण्डलाख्यं याम्योत्तरं च विदि-शोर्वलयद्वयं च । ऊर्ध्वाधि एवमिह वृत्तचतुष्कमेतदावेष्य निर्यगपरं क्षितिजं तदर्धे" सि॰शि॰ ।

"एकं पूर्वापरमन्यद्याम्योत्तरं तथा कोणवृत्तद्वयमेवं वृत्तचतु-ष्टयमूर्ध्वाधोरूपमावेष्य तदर्धे वृत्तं क्षितिजाख्यं निवे-शयेत् । अत्र याम्योत्तरवृत्त उत्तरक्षितिजादुपरि यथा-शान्तर एकं ध्रुवचिह्नं कार्य्यम् । दक्षिणक्षितिजादधोऽ-न्यत् । इदानीमुन्मण्डलमाह" प्रमि॰ ।

"पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्ये ध्रुवे पललवैः क्षि-तिजादधःस्थे । सौम्ये कुजादुपरि चाक्षलवैर्ध्रुवे तदु-न्मण्डलं दिननिशोः चयवृद्धिकारि" सि॰शि॰ ।

"समवृत्तक्षितिजयोर्यौ पूर्वापरौ संपातौ तयोर्ध्रुवचिह्न-योश्च लग्नं यदिवध्यते तदुन्मण्डलसंज्ञम् । दिनरात्र्यो-र्हि क्षयवृद्धी तद्वशेन भवतः" प्रमि॰ ।

क्षितिजन्तु पु॰ क्षितेर्जन्तुरिव । भूनागे उपरसभेदे राजनि॰ ।

क्षितिदेव पु॰ क्षितौ देवश्च पूज्यत्वात् । ब्राह्मणे क्षितिदेव-तादयोऽपि तत्रार्थे । "अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः" व्या॰ त॰ पराशरः ।

क्षितिधर पु॰ क्षितिं धारयति धृ–णिच् अच् ह्रस्वः । १प-र्वते "क्षितिधरपतिकन्यामाददानः करेण" कुमा॰ । २कूर्मे वासुकिदिग्गजेषु च शब्दा॰ । [राजनि॰ ।

क्षितिनाग पु॰ क्षितिजातो नागः । उपरसभेदे भूनागे

क्षितिनाथ पु॰ ६त॰ । भूमिपाले राजनि क्षितिपत्यादयो-ऽप्यत्र । "क्षितिपतिमण्डलमन्यतो वितानम्" रघुः ।

क्षितिप पु॰ क्षितिं पाति पा—क । भूपाले राजनि "क्षितिपः चयितोद्धतान्वकः" माघः । "क्षितिपसमाजमगात् स्वयं-वरस्थम्" रघुः । "अहंयुनाऽथ क्षितिपः शुभंयुः" भट्टिः ।

क्षितिपाल पु॰ क्षितिं पालयति पालि-अण् उप॰स॰ । मही-पालके राजनि "शिलोच्चयोऽपि क्षितिपालमुच्चैः" रघुः । स्वार्थे क॰ । क्षितिपालकोऽप्यत्र । "शताक्रतेभ्यः क्षितिपालभा-गभ्यः" भट्टिः । "क्षितिपालं भजन्ते यानि दुतमेधनादीनि तेभ्यः क्षितिपालभागभ्यः" जयम॰ । अत्र शब्दक॰ क्षिति-पालभाक्शब्दस्य राजार्थकत्वकल्पनमतीव प्रामादिकम् ।

क्षितिपुत्र पु॰ ६त॰ । १मङ्गलग्रहे २नरकासुरे च तयोस्तत्-पुत्रत्वकथा आग्नेयशब्दे ८२६ पृ॰ कुजशब्दे २०६०पृ॰ दर्शिता "स मानुषेण मानेन क्षितिपुत्रः (नरकासुरः) यतं समाः" कालिकापु॰३८अ॰ । क्षितितनयादयोऽप्यत्र ।

क्षितिभृत् पु॰ क्षितिं बिभर्त्ति धारयति पालयति भृ धारण पोषणयोः क्विप । भूधरे १पर्वते "क्षितिभृदिव क्षिति-कम्पकीर्णदुमः" भट्टिः । २महीपाले राजनि । "अधुना धनैः क्षितिभृतेऽनिभृताः" किरा॰ भूभृदादयोऽप्यत्र । "प्रमथितभूभृतः प्रतिपदं मथितस्य भृशं महीभृता" माघः ।

क्षितिरन्ध्र न॰ ६त॰ । गर्त्ते शब्दचि॰ ।

क्षितिरुह पु॰ रोहति रुह-क ७त॰ । वृक्षे हेम॰ । "क्षि-तिरुहपल्लवपुष्पकर्णपूरे" माघः ।

क्षितिवदरी स्त्री क्षितौ सक्ता बदरी । भूबदर्य्याम् राजनि॰

क्षितिवर्द्धन त्रि॰ क्षितिं वर्द्धयति वृध-णिच् ल्यु । शवे मृते मेदि॰ । "करोषि क्षितिवर्द्धनम्" भट्टिः ।

क्षितिव्युदास पु॰ क्षितिं व्युदस्यति वि+उद्+अस—अण् उप॰ स॰ । गर्त्तस्यकट्टे शब्दचि॰

क्षितीश पु॰क्षितिमीष्टे ईश—क्विप् । भूमीश्वरे नृपे "आसमुद्र-क्षितीशानाम्" रघुः "पदमध्यं मे वीर्य्यमद्य क्षितीशाः" भा॰व॰ १६२अ॰ । १विष्णौ च "देवकीनन्दनः स्रष्टा-क्षितीशः पापनाशनः" विष्णुस॰ ।

क्षितीश्वर पु॰ ६त॰ । भूमीश्वरे नृपे "तदानन्दं चक्रतुरभि क्षितीश्वरः" "कौशिकेन स किल क्षितीश्वरः" रघुः ।

क्षित्यदिति स्त्री क्षितौ अदितिः । क्षितौ अदितेरवतारे देवक्यां वसुदेवपत्न्याम् । तत्कथा च हरिव॰ ५६अ॰ । "या च सा सुरभिर्नाम अदितिश्च सुरारणी । उभे ते तस्य वै भार्य्ये सह तेनैव यास्यतः । ताभ्यां सह स गोपत्वे कश्यपो भुवि रंस्यत । तदस्य कश्यपस्यांशस्ते-जसा कश्यपोपमः । वसुदेव इति ख्यातो गोषु तिष्ठति भूतले । गिरिर्गोवर्द्धनो नाम मथुरायास्त्वदूरतः । तत्रासौ गोष्वभिरतः कंसस्य करदायकः । तस्य भार्य्या-द्वयञ्चैव अदितिः सुरभिस्तथा । देवकी रोहिणी चैव वसुदेवस्य धीमतः । तत्रावतर लोकानां भवाय मधुसूदन ! । विष्णु॰ प्रति ब्रह्मोक्तिः ।

क्षित्वन् पु॰ क्षि—क्वनिप् तुक् च । भयौ उत्क्रान्तदृतः

क्षिद्र पु॰ क्षिद-रक् । १रोगे २सूर्य्ये रविवासे च संक्षिप्तसा॰ ।

क्षिप प्रेरणे तुदा॰ उभ॰ स॰ अनिट् । क्षिपति-ते अक्षै-

मक्षीत् अक्षिप । चिक्षेप चिक्षिपे । क्षिप्तः क्षेपकः । क्षेप्ता क्षिप्त्वा क्षिपः क्षिपन् । "क्षिपत्येकेन वेगेन पञ्च-बाणशतानि च" भा० क० १०१८श्लो० । "तूणमस्मात् शाय-कांस्तीक्ष्णान् क्षिपते च पुनः पुनः" भा० वि० ३३अ० । "पदाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम्" रामा० १।१।अ० "यदा तु कपयस्त्वेव शक्तिश्च स एकोन भविष्यति" भा० आ० ६७अ० "स यत् काष्ठं तृणं वापि शिलां वा क्षेप्स्यते मयि" भा० व० २८१अ० "चिक्षेप मारीचोरसि" रामा० बा० ३२अ० । आक्षेपे च "चिक्षेप च स तं धीमान् वाग्भिरुग्राभिरच्युतम्" भा० आश्व० १५अ० । प्रेरणे कश्चित् स्वार्थे च णिच् क्षेपयति ते अचिक्षिपत्-त

अति+अत्यन्तक्षेपे । "सन्धिमुक्तमुत्पिष्टं श्लिष्टं विवर्त्तितं मत्रक्षिप्तमतिक्षिप्तं तिर्य्यक्क्षिप्तमिति षड्विधम्" "अति-क्षिप्ते द्वयोःसन्ध्योरतिक्रान्तता वेदना" सुश्रुतः ।

अधि–तिरस्कारे "तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा" मनुः । "त्वं नाधिक्षेप्तुमर्हसि" भा० व० ८८अ० । अधिक्षेपशब्दे विवृतिः । [अवक्षेपणशब्दे विवृतिः

अव+अधःक्षेपणे "अवक्षिप दिवो अश्मानमुच्चाः" ऋ०२,५२,५

आ+आकर्षणे "आक्षिप्य केशान् वेगेन बाहोर्जग्राह पाण्ड-वम्" भा० वि० ७५०श्लो० । भर्त्सने । आक्षेपशब्दे ६०२पृ० विवृतिः । "आक्षिपन्तं प्रभां भानोः" भा० आ० ११०२ । "आक्षिप्तनोमिव प्रभां शशिनः स्वेन तेजसा" भा० व० ३११७श्लो० । [कुमा० ।

परि+आ+आवरणे तन्वने । "पर्य्याक्षिपत् काचिदुदारबन्धम्"

उद्+ऊर्द्ध्वक्षेपणे । "वलिमाकाश उत्क्षिपेत्" मनुः "शिर उत्क्षिप्य नागस्य पुनः पुनरवाक्षिपत्" भा० आ० ११२६श्लो० उत्क्षेपणशब्दे १०८६ पृ० विवृतिः

नि+नितरां क्षेपणे निधाने च । "अन्नं भूमौ श्वचाण्डाल वायसेभ्यश्च निक्षिपेत्" याज्ञ० । गात्राणि कान्तासु च नि-क्षिपन्तः" रामा० ५।११ निक्षेपशब्दे विवृतिः

निस्+निःशेषेण क्षेपे । "मक्षिकाव्रणजातस्य निःक्षिपन्ति सदा कृमीन्" सुश्रुतः ।

परि+परितः क्षेपे । "गङ्गास्रोतःपरिक्षिप्तम्" कुमा० ।

प्र+प्रकर्षेण क्षेपे "नामेध्यं प्रक्षिपेदग्नौ" मनुः

प्रति+प्रतिरूपक्षेपे । "अन्तः शिरायां श्वसनः स्थितोऽङ्गं प्रतिक्षिपन्" सुश्रु० । अधिक्षेपे निवारणे प्रेरणे च

वि+विशेषेण क्षेपे "विक्षिप्यमाणाः बहुधा नरेन्द्राः" भा० आ० ७०१२श्लो० । वातुलते उन्मादे, विक्षिप्तचित्तः । योगा-न्तरायकरणे चित्तवृत्तेरन्यत्र सञ्चारे च "अखण्डवस्त्वनव-लम्बनेन चित्तवृत्तेरन्यालम्बनं विक्षेपः" वेदान्तसा० "लये संबोधयेत् चित्तं विक्षिप्तं शमयेत् पुनः" तत्रस्था कारिका

सम्+सम्यक्क्षेपे विस्तीर्णस्य सङ्कोचापादने व्यापारे "आतपा-त्ययसंक्षिप्तनीवारासु निषादिभिः" रघुः । "संक्षिप्तैः प्रति-संस्कृतैः" अमरः । "संक्षिप्तसारमाचष्टे" संक्षिप्तसा०

क्षिप प्रेरणे दिवा० प० सक० अनिट् । क्षिप्यति-ते अक्षे-प्सीत् । चिक्षेप । "बलवान् युधि हस्तिभोगिगरीन् क्षिप्यत्सकलिमान्" "वाहयं कश्यपोऽक्षिप्यद्क्षिपद्रौद्र-मिन्द्रजित्" भट्टिः ।

उपसर्गभेदेनार्थविशेषः तौदादिकवत् ।

क्षिप् स्त्री क्षिप-क्विप् । अङ्गुलौ निघ० । "दश क्षिपः पूर्व्यं सीमजीजनन्" ऋ० २,२१,२, हलन्तत्वात् वा टाप् । "हिन्वन्ति धीराः दशभिः क्षिपाभिः ऋ० ८,८७,५७,

क्षिप त्रि० क्षिप-क । १क्षेपके । भावे भिदा० अङ् टाप् । क्षिपा । २क्षेपणे स्त्री ।

क्षिपक त्रि० क्षिप–क क्षिपः ततः अज्ञातादौ कन् । क्षेपके स्त्रियां टापि क्षिपका० नात इत्त्वम् । ततः निर्द्दृत्तादौ प्रेक्षादि० चतुरर्थ्याम् इनि । क्षिपकिन् तन्निर्वृत्तादौ त्रि० स्त्रियां ङीप् ।

क्षिपकादि पु० पा० उक्ते कापि इत्त्वनिषेधनिमित्ते शब्द गणभेदे स च गणः । क्षिपका ध्रुवका चरका सेवका करका चटका अवका लहका अलका कन्यका ध्रुवका एडका" आकृतिगणः ।

क्षिपण न० क्षिप-भावे बा० क्युन् । क्षेपणे शब्दा०

क्षिप(णि)णी स्त्री क्षिप्यतेऽनया क्षिप-अनि किच्च वा ङीप् । १नौकादण्डे (दांड) अमरटीका । कर्म्मणि अनि । २जालभेदे ३आयुधे च उज्ज्वल ४वडिशे शब्दचि० । ५अध्वर्य्यौ संक्षिप्तसा० । भावे अनि । ६क्षेपणे "उ तस्य वाजी क्षिपणिं तुरण्यति" ऋ० ४।४०।४। इत्मा-मुदाहृत्य "क्षिपणिं क्षेपणम्" इति ३।२८। निरुक्तोक्तम्

क्षिपणु पु० क्षिप–अनुङ् १वाते त्रिका० २व्याधे "मृगा इव क्षिपणोरीयमानाः" यजु० १७।४४ । "क्षिपणोः क्षिप-ति हिनस्ति क्षिपणुर्व्याधः" वेददी०

क्षिपण्यु पु० क्षिप–कन्युच् । १वसन्ते उज्ज्वल० २देहे पु० ३सुरभिगन्धे पु० ३तद्वति त्रि०मेदि०

क्षिपति(प्नु) पु० क्षिप–बा०करणे अति(प्नु) । बाहौ निघ०

क्षिप्त त्रि० क्षिप–क्त। १प्रेरिते, २त्यक्ते, ३विकीर्णे ४अवज्ञाते, ५रागद्वेषादिवशाद्विषयासक्ते ऽचले, ६वायुरोगयुक्ते च। ७निहिते निधानरूपेण स्थापिते "क्षिप्तः समीरैः सरितां पुरः पतन्" "केशरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः" माघः "तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि" भाग० १।१८।४८। "क्षिप्ता अवज्ञाताः" श्रीधरः। "आलस्यं क्षिप्तचित्तताम्" भा० स० ५अ०। "क्षतस्य भेषजमथो क्षिप्तस्य भेषजीम्" अथ० ६।१०९।३।८ रात्रौ स्त्री इत्वा०

क्षिप्तकुक्कुर पुंस्त्री कर्म्म०। अलर्के (क्षेपा कुकुर) स्त्रियां ङीष्।

क्षिप्तयोनि त्रि० क्षिप्ता योनिर्मातृरूपोत्पत्तिस्थानमस्य। क्षिप्तमातृके स्वभर्त्तृनाशक्तमातृके। "क्षिप्तयोनिरिति चैके" आश्व० गृ० सू० १,२२,१८ "क्षिप्तयोनिर्नाम यस्य माता स्वभर्त्तारं नावतिष्ठते" नारा० वृत्तिः। तस्य (तत्कर्त्तृकम्) आर्त्विज्यं न कार्य्यमित्यनुषङ्गः

क्षिप्नु त्रि० क्षिप–क्नु कुत्वा० न णत्वम्। क्षेपणशीले त्रि०

क्षिप्र न० क्षिप-रक्। १शीघ्रे क्रियाविशेषणत्वे क्लीवता "क्षिप्रं ततोऽध्वन्यतुरङ्गयायी" भट्टिः। २तद्वति त्रि० "अति क्षिप्रेव विध्यति" ऋ० ४।८।८। "पुष्याश्विन्यभिजिद्धस्ता लघु क्षिप्रं गुरुस्तथा" ज्यो० उक्ते पुष्यादिषु ३नक्षत्रेषु "रिक्ताभौमघटान् विना च विपणी मित्रध्रुवक्षिप्रभे" मुहू० चि० ४शीघ्रगे त्रि० "धृतज्येन क्षिप्रेण धन्वना" ऋ०२।२४।५। ततः अतिशायने इष्ठन् ईयसुन् रलोपे गुणः। क्षेपिष्ठ क्षेपीयस् अतिशयशीघ्रे त्रि० "वायुर्वै क्षेपिष्ठा देवता" श्रुतिः ईयसुनि स्त्रियां ङीप्। क्षेपीयसी।

क्षिप्रकारिन् त्रि० क्षिप्रं करोति कृ–णिनि। (चालाक) शीघ्रक्रियाकारके।

क्षिप्रपाकिन् पु० क्षिप्रं शीघ्रं पच्यते पच-बा० घिनुण्। (गर्द्धभाण्डलिया) १वृक्षभेदे रत्नमा०। २शीघ्रपाकवति त्रि०

क्षिप्रहोम पु० क्षिप्रं हूयते हु-मन्। सायं प्रातःकर्त्तव्ये होमे तद्विवृतिः सं० त० "द्विविधा होमा याज्ञिकप्रसिद्धाः क्षिप्रहोमास्तन्त्रहोमाश्च। तत्र क्षिप्रहोमाः क्षिप्रं हूयन्ते इति व्युत्पत्त्या सायंप्रातर्होमादयः। तन्त्रहोमाश्च परिसमूहनबर्हिरास्तरणाद्यङ्गविस्तारयुक्ताः। अत्र ये समिद्ध-विस्तारास्तन्त्रहोमाः यथ सुखप्रसवार्थं शोष्यन्तीहोमस्तेषु येषाञ्च वैश्वदेवसायंप्रातर्होमादीनामेतद्विधाख्यं द्रव्यं उपरि पश्चात् अथ इध्मानुकल्पयेत् इत्यनेन सूत्रेणोक्तं तेषु वा तत्पद्धतिषु क्षिप्रहोमेषु इध्मस्य निवृत्तिर्भवेदिति"। तत्र विशेषमाह व्यासः "दग्धे गृहे न कुर्वीत क्षिप्रहोमे त्विदं द्वयम्" द्वयं परिसमूहनमास्तरणं चेति। "विरूपं च न जपेत् प्रणवञ्च विवर्जयेत्" "क्षिप्रहोमेषु अब्राह्मणेषु सायं प्रातःशोष्यन्तीहोमादिषु ब्राह्मणम्" इमं स्तोममर्हते इत्यादिमन्त्रकरणं वा परिसमूहनं न कुर्य्यात्"।

क्षिया स्त्री क्षि–क्षये भावे भिदा० अङ्। १अपचये अमरः २धर्म्मव्यतिक्रमे सि०कौ०। "हेति क्षियायाम्" "क्षियाशीः प्रयोगेषु तिङाकाङ्क्षम्" पा० "क्षियायां धर्म्मव्यतिक्रमे" सि० कौ० यथा "स्वयं ह रथेन याति ३उपाध्यायं पदातिं गमयति" उदा० अत्राद्यतिङ् प्लुतः।

क्षिव निरसने भ्वा० पर० सक० सेट्। क्षेवति अक्षेवीत्। चिक्षेव उदित्। क्षिवित्वा क्ष्यूत्वा क्ष्यूतः क्ष्यूतिः। निरसनं फूत्कार इति भट्टमल्लः मुखेन श्लेष्मादेर्वमनमित्यन्ये

क्षिव निरसने दिवा० पर० सक० सेट्। क्षीव्यति अक्षेवीत् चिक्षेव। उदित् क्षेवित्वा क्ष्यूत्वा।

क्षी हिंसायां भ्वा० उभ० सक० अनिट्। क्षयति-ते अक्षैषीत् अक्षेष्ट। चिक्षाय चिक्षिये [क्षिक्षीज

क्षीज अव्यक्तशब्दे भ्वा० पर० अक० सेट्। क्षीजति अक्षीजीत्

क्षीजन न० क्षीज–भावे ल्युट्। कीचकवंशशब्दे हेम०।

क्षीण त्रि० क्षि–क्त। १दुर्बले, २कृशे च "अष्टमांशे चतुर्द्दश्याः क्षीणोभवति चन्द्रमाः" छन्दो०। "क्षीणे पुण्ये मर्त्त्यलोकं विशन्ति" श्रुतिः

भावप्र० वातादिधातुभेदेन क्षीणभेदास्तल्लक्षणादिकमुक्तम् "वातक्षयेऽल्पचेष्टत्वं मन्दवाक्यं विसंज्ञता। पित्तक्षयेऽधिकः श्लेष्मा वह्निमान्द्यं प्रभाक्षयः। सन्धयः शिथिलामूर्च्छा रौक्ष्यं दाहः कफक्षये। हृत्पीडा कण्ठशोषोऽथ त्वक् शून्या तृड् रसक्षये। शिराः श्लथा हिमाम्लेच्छा त्वक्पारुष्यं क्षयेऽसृजः। गण्डौष्ठकक्षरास्कन्धवक्षोजठरसन्धिषु। उपस्थशोथपिण्डीषु शुष्कता गात्ररूक्षता। मेदोधमन्यः शिथिलाः भवेयुर्मांससंक्षये। प्लीहाभिवृद्धिः सन्धीनां शून्यता तनुरूक्षता। प्रार्थना स्निग्धमांसस्य लिङ्गं स्यान्मेदसः क्षये। अस्थिशूलानि रौक्ष्यं नखदन्तत्रुटिस्तथा। अस्थिक्षये लिङ्गमेतद्वैद्यैः सर्व्वैरुदाहृतम्। शुक्राल्पत्वं पूर्व्वभेदस्तोदः शून्यं त्वनस्थिनि। लिङ्गान्येतानि जायन्ते नराणां मज्जसंक्षये। शुक्रक्षये रतेऽशक्तिर्व्यथा शेफसि मुष्कयोः। चिरेण शुक्रसेकः स्याल्लिङ्गे रक्ताल्पशुक्रता। अथौजःक्षयस्य निदानमाह "ओजः संक्षीयते कोपात्क्षुद्ध्यानशोकश्रमादिभिः। हरती

क्षारोष्णकटुकैः कर्षणैरपरैरपि। अथ क्षीणौज आदीनां लक्षणमाह। "बिभेति दुर्बलोऽभीक्ष्णं चिन्तयेद्व्यथितेन्द्रियः। अभ्युत्थानोन्मना रूक्षः क्षामः स्यादोजसः क्षये। पुरीषस्य क्षये पार्श्वे हृदये च व्यथा भवेत्। सशब्दस्यानिलस्योर्द्ध्वगमनं कुक्षिसंवृतिः"। कुक्षिसंवृतिः उदरसङ्कोचः "मूत्रक्षयेऽल्पमूत्रत्वं वस्तौ तोदश्च जायते। स्वेदनाशे त्वचो रौक्ष्यञ्चक्षुषोरपि रूक्षता। स्तब्धाश्च रोमकूपाः स्युर्लिङ्गं स्वेदक्षये भवेत्। आर्त्तवस्य स्वकाले चाभावस्तस्याल्पताथ वा। जायते वेदना योनौ लिङ्गं स्यादार्त्तवक्षये। अभावः स्वल्पता वा स्यात् स्तन्यस्य भयतस्तथा। म्लानौ पयोधरावेतल्लक्षणं स्तन्यसंक्षये। अनुन्नतो भवेत्कुक्षिर्गर्भस्यास्पन्दनन्तथा। इति गर्भक्षये प्राज्ञैर्लक्षणं समुदाहृतम्"। अथ क्षीणानां धातुदोषमलानां वर्द्धनमाह। "तत्तत्संवर्द्धनाहारविहारातिनिषेवणात्। तत्तत् प्राप्य नरः शीघ्रं तत्तत्क्षयमपोहति। ओजस्तु वर्द्धते नृणां सुस्निग्धस्वादुभिस्तथा। द्रव्यैरन्यैर्विशेषात्तु क्षीरमांसरसादिभिः"। अन्यच्च "दोषधातुमलक्षीणो बलक्षीणोऽपि मानवः। तत्तत्संवर्द्धनं यत्तदन्नपानं प्रकाङ्क्षति। यद्यदाहारजातन्तु क्षीणः प्रार्थयते नरः। तस्य तस्य स लाभेन तत्तत्क्षयमपोहति"। तत्र केन क्षीणः किमाकाङ्क्षतीत्याकाङ्क्षायामाह "कषायकटुतिक्तानि रूक्षशीतलघूनि च। यवमुद्गप्रियङ्गूंश्च वातक्षीणोऽभिकाङ्क्षति"। पित्तक्षीणः किं काङ्क्षतीत्याकाङ्क्षायामाह "तिलमाषकुलत्थादिपिष्टान्नविकृतिन्तथा। मस्तुशुक्ताम्लतक्राणि काञ्जिकञ्च तथा दधि। कट्वम्ललवणोष्णानि तीक्ष्णं क्रोधं विदाहि च। समयं देशसत्त्वञ्च पित्तक्षीणोऽभिकाङ्क्षति। मधुरस्निग्धशीतानि लवणाम्लगुरूणि च। दधि क्षीरं दिवास्वप्नं कफक्षीणोऽभिकाङ्क्षति। रसक्षीणो नरः काङ्क्षत्यम्भोऽतिशिशिरं मुहुः। रात्रिनिद्रां हिमं चन्द्रं भोक्तुञ्च मधुरं रसम्। इक्षुं मांसरसं मन्यं मधुसर्पिर्गुडौदनम्। द्राक्षादाडिमशुक्तानि सस्नेहलवणानि च। रक्तसिद्धानि मांसानि रक्तक्षीणोऽभिकाङ्क्षति। अन्नानि दधिसिद्धानि षाड़वांश्च बहूनपि। स्थूलक्रव्यादमांसानि मांसक्षीणोऽभिकाङ्क्षति"। षाड़वा मधुराम्लादिरससंयोगपाचिताः गुड़प्रभृतयः। "मेदःसिद्धानि मांसानि ग्राम्यानूपौदकानि च। क्षाराणि विशेषेण मेदःक्षीणोऽभिकाङ्क्षति। अस्थिक्षीणस्तथा मांसं मज्जास्थिस्नेहसंयुतम्। स्वाद्वम्लसंयुतं द्रव्यं मज्जाक्षीणोऽभिकाङ्क्षति। शिखिनः कुक्कुटस्याण्डं हंससारसयोस्तथा। ग्राम्यानूपौदकानाञ्च शुक्रक्षीणोऽभिकाङ्क्षति। यवान्नं यावकान्नञ्च शाकानि विविधानि च। मसूरमाषयूषञ्च मलक्षीणोऽभिकाङ्क्षति। पेयमिक्षुरसं क्षीरं सगुड़ं बदरोदकम्। मूत्रक्षीणोऽभिलषति त्रपुसैर्वारुकाणि च। अभ्यङ्गोद्वर्त्तने मद्यं निवातशयनासने। गुरु प्रावरणं चैव स्वेदक्षीणोऽभिकाङ्क्षति। कट्वम्ललवणोष्णानि विदाहीनि गुरूणि च। फलशाकानि पानानि स्त्री काङ्क्षत्यार्त्तवक्षये। सुराशाल्यन्नमांसानि गोक्षीरं शर्करान्तथा। आसवं दधि हृद्यानि स्तन्यक्षीणाऽभिवाञ्छति। मृगाजाविवराहाणां गर्भान्वाञ्छति संस्कृतान्। वसागूल्यप्रकारादीन् भोक्तुं गर्भपरिक्षये"।

क्षीणचन्द्र पु० कर्म्म०। उभयपक्षयोरष्टमीमध्यस्थे चन्द्रे "कृष्णाष्टमीदलादूर्द्ध्वं यावच्छुक्लाष्टमीदलम्। तावत्कालं शशी क्षीणः पूर्णस्तत्रोपरि स्मृतः" ज्यो०।

क्षीणाष्टकर्म्मन् पु० क्षीणान्यष्ट कर्म्माण्यस्य। जिने हेम०। अर्हच्छब्दे ३८६ पृ० विवृतिः "अष्टकर्म्मक्षयान्मोक्षः" "क्षीणाष्टकर्म्मणोमुक्तिः" इति तत्रत्यवाक्यम्

क्षीब(व) मदे भ्वा० आत्म० अक० सेट्। क्षीब(व)ते अक्षीबी(वी)त्। चिक्षीब(व)

क्षीब(व) त्रि० क्षीब(व)—क्त नि०। मत्ते। "क्षीबाः(वाः) कुर्वन्ति हास्यञ्च कलहं च तथाऽपरे" रामा०सु०६०स०।

क्षीर पु०न० क्षि-क्रन् दीर्घश्च, घस—अदने ईरन् किच्च उपधालोपे चर् वा अर्द्धर्चा०। १दुग्धे २जले अमरः ३सरलद्रव्ये शब्दच०। "आसप्तरात्रं प्रसवात् क्षीरं पेयूषमुच्यते। परतो मोरटं विद्यादप्रसन्नं कफात्मकम्" रत्नमा०। क्षीरवर्गशब्दे विवृतिः "शाकाम्लफलपिण्याककुलत्थलवणान्वितैः। करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते। स्निग्धं शीतं गुरु क्षीरं सर्वकालं न सेवयेत्। दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नष्टमेव च। क्षीरं न भुञ्जीत कदाप्यतप्तं तप्तञ्च नैतल्लवणेन सार्द्धम्। पिष्टान्नसन्धायकमाषमुद्गकोषातकीकन्दफलादिकैश्च"। "मत्स्यमांसगुड़मुद्गमूलकैः कुष्ठिनां वहति सेवितं पयः। शाकजाम्बवरसादिसेवितं मारयत्यबुधमाशु सर्पवत्" वैद्यके द्रव्यान्तरसंयोगे तस्य वर्ज्यतोक्ता।

"धेनुस्तनाद्विनिष्क्रान्तां धारां क्षीरस्य यो नरः। शिरसा प्रतिगृह्णाति स पापेभ्यः प्रमुच्यते" वरा०पु०"येषु क्षीरवहा

मद्योदुदाः पायसकर्द्दमाः। तान् लोकान् पुरुषा यान्ति क्षीरस्नपनका हरेः। आह्लादं निर्वृतिं स्वास्थ्यमारोग्यं चानुरूपताम्। सप्तजन्मस्वयाप्नोति क्षीरस्नानपरो हरेः। दध्यादीनां विकाराणां क्षीरतः सम्भवो यथा। तथैवा-शेषकामानां क्षीरस्नपनसत्तमम्। यथा च विमलं क्षीरं यथा निर्व्विकारकम्। तथास्य विमलं स्नानं भविष्यति फलप्रदम्। यद्वाप्यनुकूलतां पुष्टिं प्रियत्वञ्चाखिले जने। करोति भगवान् विष्णुः क्षीरस्नपनतोषितः। सर्वोऽस्य स्निग्धतामेति हरिमाप्नोति प्रसीदति। स्नानक्षीरेण देवेशे स्नपिते मधुसूदने"। वह्नि॰ पु॰ क्रियायोगनामाध्याये। तत्पाकविधिः भावप्र॰। "क्षीरमष्टगुणं द्रव्यात् क्षीराच्चीरं चतुर्गुणम्। क्षीरावशेषं तत्पीतं शूलमामोद्भवं जयेत्"

क्षीरक पु॰ क्षीरमिव कायति कै-क। क्षीरमोरटलतायाम् रत्नमा॰। [इत्यमे रत्नमा॰।

क्षीरकञ्चुकी स्त्री क्षीरं कञ्चुकमिव त्वगस्य। क्षीरीय

क्षीरकण्ठ पु॰ क्षीरं कण्ठे यस्य। स्तनन्धये बालके।

क्षीरकन्द पु॰ क्षीरमिव कन्दोयस्य। १क्षीरविदार्य्याम्, जटाधरः २क्षीरयन्त्रां स्त्री राजनि॰। "क्षीरकन्दोद्विधा प्रोक्तो विनालश्च सनालकः" राजनि॰।

क्षीरकाकोलिका स्त्री क्षीरमिव शुभ्रा काकोली। क्षीर-विदार्य्यां भावप्र॰ काकोलीशब्दे १५५४ दृश्यम्।

क्षीरकाण्डक पु॰ क्षीरान्वितं काण्डं यस्य कप्। १स्नुही-वृक्षे, २अर्कवृक्षे च अमरः।

क्षीरकाष्ठा स्त्री क्षीरप्रधानं काष्ठमस्याः। वटीवृक्षे राजनि॰

क्षीरकीट पु॰ ६त॰। दुग्धजाते कीटभेदे हारा॰

क्षीरचव पु॰ क्षीरं चवति चु-अच्। दुग्धपाषाणे राजनि॰

क्षीरखर्ज्जूर पु॰क्षीरवत् स्वादुः खर्ज्जूरः। पिण्डखर्ज्जूरे

क्षीरघृत न॰ क्षीरावस्थात उद्धृतं घृतम्। मथितदुग्धजाते घृते "क्षीरघृतं पुनः संग्राहि रक्तपित्तभ्रममूर्च्छाप्रशमनं नेत्ररोगहितञ्च"सुश्रुते तद्गुणा उक्ताः"द्राक्षारसं क्षीरघृतं पिबेद्वा" सुश्रुतः [माले स्त्रि॰

क्षीरज न॰ क्षीराज्जायते जन-ड। १दध्नि हेम॰ २दुग्धजात-

क्षीरतैल न॰क्षीरपक्वं तैलम्। सुश्रुतोक्ते तैलभेदे" श्लेष्मकाश्यपादांशगिरमयतार्य्य परिस्राव्य तैलेनोन्मिश्रय पुनरग्नावधि-श्रयेत् ततस्तैलं क्षीरानुगतमवतार्य्य शीतीभूतमभिमथ्नी यात्तत्र यः स्नेह उत्तिष्ठेत्तमादाय मधुरौषधसहक्षीरयुक्तं विपचेदेतत् क्षीरतैलमर्दितानुरागं पानाभ्यङ्गादिषू-पयोज्यम्। तैलहीनं वा क्षीरसर्पिर सतर्पणमिति"।

क्षीरदल पु॰ क्षीरं दले यस्य। अर्कवृक्षे (आकन्द) राजनि॰

क्षीरद्रुम पु॰क्षीरप्रधानोद्रुमः शा॰त॰। अश्वत्थवृक्षे राजनि॰

क्षीरधि पु॰ क्षीरं धीयतेऽस्मिन् धा—आधारे कि। क्षीर-समुद्रे क्षीरनिधिरप्यत्र। "इन्दुः क्षीरनिधाविव" रघुः

क्षीरधेनु स्त्री क्षीरनिर्म्मिता धेनुः। दानार्थकल्पितक्षीर-विहितधेन्वाम् तद्विधानादि हेमा॰ दा॰ ख॰स्क॰ पु॰यथा "क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप!। अनुलिप्ते महीपृष्ठे गोमयेन नरोत्तम!। गोचर्म्ममात्रमानेन कुशा-नास्तीर्य्य सर्वतः। तस्योपरि महाराज! न्यसेत् कृष्णा-जिनं बुधः। तस्योपरि कुण्डलीकां गोमयेन कृतामपि। क्षीरकुम्भं ततः स्थाप्य चतुर्थांशेन वत्सकम्। सुवर्ण-मुखश्टङ्गाणि चन्दनागुरुकाणि च। प्रशस्तपत्रश्रवणां तिलपात्रोपरि न्यसेत्। मुखं गुड़मयं तस्याः जिह्वा श-र्करया तथा। फलप्रदन्तदन्तांश्च मुक्ताफलमयेक्षणाम्। इक्षुपादां दर्भरोमां सितकम्बलकम्बलाम्। ताम्रपृष्ठां कांस्यदोहां पट्टसूत्रमयं तथा। पुच्छञ्च, नृपशार्द्दूल! नवनी-तमयस्तनीम्।, स्वर्णश्टङ्गीं रौप्यखुरां पञ्चरत्नमयीं भुवि। चत्वारि तिलपात्राणि चतुर्द्दिक्षपि स्थापयेत्। सप्तव्री-हिसमायुक्तां दिक्षु सर्वासु प्रक्षिपेत्। एवं लक्षणसंयुक्तां क्षीरधेनुं प्रकल्पयेत्। आच्छाद्य वस्त्रयुग्मेन गन्धपुष्पैः समर्च्चयेत्। धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत्। आच्छाद्यालङ्कृतं कृत्वा मुद्रिकाकर्णपत्रकैः। पादुको-पानहं छत्रं दत्त्वा दानं समर्पयेत्। अनेनैव तु मन्त्रेण क्षीरधेनुं प्रकल्पयेत्। या लक्ष्मीः सर्वभूतानामित्यादि नरपुङ्गव!। आप्यायस्वेति मन्त्रेण क्षीरधेनुं प्रदापयेत्। गृह्णामि त्वां देवि! भक्त्या याचको मन्त्रमुद्धरेत्। एवं धेनुं प्रदायाथ क्षीराहारोदिनं चरेत्। त्रिरात्रन्तु पयोभक्षो ब्राह्मणो राजसत्तम!। दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम्। एतां हेमसहस्रेण शतेनाथ स्वशक्तितः। शताद्र्धमथ वाप्यर्द्धं,तथैवार्द्धं यथेच्छया। दत्त्वा धनु म-हाराज! शृणु तस्यापि तत्फलम्। दिव्यं वर्षसहस्रन्तु ब्रह्मलोके महीयते। पितृपितामहैः सार्द्धं ब्रह्मणो-भवनं व्रजेत्। दिव्यं विमानमारूढो दिव्यगन्धानुलेपनः। क्रीड़ित्वा सुचिरं कालं विष्णुलोकं स गच्छति। द्वाद-शादित्यसङ्काशैर्विमानैरुपशोभितैः। गीतवादित्रनिर्घोषै-रप्सरोगणसेवितैः। तत्रोपविष्टोऽसौ राजा विष्णुसा-युज्यतां व्रजेत्। य इदं शृणुयाद्राजन्। पठेद्वा भक्तिभा-वितः। सर्वपापविनिर्म्मुक्तो विष्णुलोकं स गच्छति"

क्षीरनाश पु० क्षीरं नाशयति नश–णिच् अण् उप०स० । शाखोटकवृक्षे राजनि०। तद्दलदुग्धयोगादन्यदुग्धस्य नाशनं लोकसिद्धम् ।

क्षीरनीर न०क्षीरान्वितं नीरमिव । १आलिङ्गने शब्दमा०आलिङ्गने हि क्षीरनीरयोरिव संसर्गो भवति। समा०द्व०।२क्षीरनीरसमाहारे न० "क्षीरनीरसमं मित्रं प्रशंसन्ति विचक्षणाः । तत्र नीरं क्षोरयति"वेता०। क्षीरमिव नीरम्। ३क्षीरतुल्ये जले न० क्षीरनीरं धीयतेऽत्र धा-आधारे कि। क्षीरधि दुग्धसमुद्रे पु० ।

क्षीरप त्रि० क्षीरं पिबति पा–क । दुग्धपायिनि बालकभेदे पु० "तत्रोनषोडशवर्षा बालास्तेऽपि त्रिविधाः क्षीरपाः क्षीराद्वादा अन्नादा इति तेषु संवत्सरपराः क्षीरपाः द्विसंवत्सरपराः क्षीराद्वादाः परतोऽन्नादाः" सुश्रु० "क्षीरं तु बालवत्सानां ये पिबन्तीह मानवाः । न तेषां क्षीरपाः केचित् भवन्ति कुलवर्द्धनाः" भा०आनु०१२५अ०

क्षीरपर्णिन् पु०क्षीरयुक्तं पर्णमस्यस्य इनि। अर्कवृक्षे राजनि०

क्षीरपर्णी स्त्री क्षीरं पर्णेऽस्या गौ०ङीष् । अर्कवृक्षे शब्दच०

क्षीरपलाण्डु पु० क्षीरमिव शुभ्रः पलाण्डुः । श्वेतपलाण्डौ "स्निग्धो रुचिष्यः स्थिरधातुकर्त्ता बल्योऽग्निमेधाकरपुष्टिदश्च । स्वादुर्गुरुः स्वादितपित्तशस्तः सपिच्छलः क्षीरपलाण्डुरुक्तः" सुश्रुते तद्गुणा उक्ताः ।

क्षीरपाण पु० पीयते पा-कर्म्मणि ल्युट् क्षीरं पानंयस्य "पानं देशे" पाणत्वम् अत्र देशः देशस्थायिजनपरः । १उशीनरवासिजने सि०कौ०"वा भावकरणयोः"पा० भावे करणे च ल्युटि वा णत्वम् कृत०। २तत्पानकरणे त्रि० । ३तत्पानपात्र्यां स्त्री ङीष् । ४दुग्धस्य पाने न०।

क्षीरभृत पु० क्षीरेण भृतः । दुग्धमात्रभृतिके गोपाले भृत्यभेदे । "गोपः क्षीरभृतोयस्तु स दुह्याद्दशतो वराम् । गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः" मनुः "यो गोपालाख्यो भृत्यः क्षीरेण भृतो न भक्तादिना स स्वाम्यनुज्ञया दशभ्योगोभ्यः श्रेष्ठामेकां गां भृत्यर्थं दुह्यात् सा भक्तादिरहिते गोपाले भृतिः स्यात् । एवञ्चैकगवीक्षीरदानेन दश गाः पालयेदित्युक्तम्" कुल्लू०

क्षीरवर्ग पु० ६त० सुश्रुतोक्ते क्षीरभेदसंघे यथा "गव्यमाजन्तथा चोष्ट्रमाविकं माहिषञ्च यत् । अश्वायाश्चैव नार्य्याश्च करेणूनाञ्च यत्पयः । तत्त्वनेकौषधिरसप्रसादं प्राणदं गुरु । मधुरं पिच्छिलं शीतं स्निग्धं श्लक्ष्णं सरं मृदु । सर्वप्राणभृतां तस्मात्सात्म्यं क्षीरमिहोच्यते । तत्र सर्व्वमेव क्षीरं प्राणिनामप्रतिषिद्धं जातिसात्म्यात् । वातपित्तशोणितमानसविकारेष्वविरुद्धम् । जीर्णज्वरकासश्वासशोषक्षयगुल्मोन्मादोदरमूर्च्छाभ्रममददाहपिपासाहृद्वस्तिपाण्डुरोगग्रहणीदोषार्शःशूलोदावर्त्तातिसारप्रवाहिकायोनिरोगगर्भस्रावरक्तपित्तश्रमक्लमहरं पाप्मापहं बल्यं वृष्यं वाजीकरणं रसायनं मेध्यं सन्धानमास्थापनं वयःस्थापनमायुष्यं जीवनं बृंहणं वमनं विरेचनञ्च तुल्यगुणत्वाच्चौजसो वर्द्धनमिति बालवृद्धक्षतक्षीणानां क्षुद्व्यवायव्यायामकर्शितानाञ्च पथ्यतमम्। गोक्षीरमनभिस्यन्दि स्निग्धं गुरु रसायनम् । रक्तपित्तहरं शीतं मधुरं रसपाकयोः । जीवनीयं तथा वातपित्तघ्नं परमं स्मृतम् । गव्यतुल्यगुणं त्वाजं विशेषाच्छोषिणां हितम् । दीपनं लघु संग्राहि श्वासकासास्रपित्तनुत् । अजानामल्पकायत्वात् कटुतिक्तनिषेवणात् । नात्यम्बुपानाद्व्यायामात्सर्व्वव्याधिहरं पयः। रूक्षोष्णं लवणं किञ्चिदौष्ट्रं स्वादुरसं लघु । शोफगुल्मोदरार्शोघ्नं क्रिमिकुष्ठविषापहम् । आविकं मधुरं स्निग्धं गुरु पित्तकफावहम् । पथ्यं केवलवातेषु कासे चानिलसम्भवे । महाभिस्यन्दि मधुरं माहिषं वह्निनाशनम् । निद्राकरं शीतकरं गव्यात् स्निग्धतरं गुरु । उष्णं चैकशफं बल्यं शाखावातहरं लघु । नार्य्यास्तु मधुरं स्तन्यं कषायानुरसं हिमम् । नस्याश्च्योतनयोः पथ्यं जीवनं लघु दीपनम् । हस्तिन्या मधुरं वृष्यं कषायानुरसं गुरु । स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम् । प्रायः प्राभातिकं क्षीरं गुरु विष्टम्भि शीतलम् । रात्रौ सोमगुणत्वाच्च व्यायामाभावतस्तथा । दिवाकराभितप्तानां व्यायामानिलसेवनात् । वातानुलोमि श्रान्तिघ्नं चक्षुष्यं चापराह्णिकम् । पयोऽभिस्यन्दि गुर्व्वामं प्रायशः परिकीर्त्तितम् । तदेवोक्तं लघुतरमनभिस्यन्दि वै शृतम् । वर्जयित्वा स्त्रियाः स्तन्यमाममेव हि तद्धितम् । धारोष्णं गुणवत् क्षीरं विपरीतमतोऽन्यथा । तदेवातिशृतं सर्वं गुरु बृंहणमुच्यते । अनिष्टगन्धमम्लञ्च विवर्णं विरसञ्च यत् । वर्ज्यं सलवणं क्षीरं यच्च विग्रथितं भवेत्" । भावप्र० अत्र विशेष उक्तस्तत्रैव दृश्यं ।

क्षीरमोरट पु० क्षीरवत् स्वादुः मोरटः । मोरटभेदे मोरटशब्दे विवृतिः । "क्षीरमोरटमधूलिकाकुष्माण्डप्रभृतीनि समासेन मधुरोवर्गः" सुश्रु०सा च पीलुपर्ण्यामेके ।

क्षीरलता स्त्री क्षीरप्रधाना लता। क्षीरविदार्य्याम् राजनि०

क्षीरवत् पु० क्षीरमिव निर्यासोऽस्त्यस्य मतुप् मस्य वः १अश्वत्थादौ श्वेतनिर्यासयुक्ते वृक्षे । २दुग्धयुक्ते त्रि० "अपूपवान् क्षीरवांश्चरुमेह सीदतु" अथ० १८।४।१६ स्त्रियां ङीप् । सा च ७नदीभेदे "ततः क्षीरवतीं गच्छेत् पुण्यां पुण्यतमैर्वृताम् । पितृदेवार्चनपरो वाजपेयमवाप्नुयात्" भा० व० ८४अ०

क्षीरवल्ली स्त्री क्षीरा क्षीरवती वल्ली । क्षीरविदार्य्याम् राजनि०

क्षीरवारि पु० क्षीरमिव वारि यस्य । क्षीरसमुद्रे

क्षीरवारिधि पु० क्षीरमिव वारि धीयतेऽस्मिन् धा-आधारे कि । क्षीरसमुद्रे क्षीरसिन्धुप्रभृतयोऽप्यत्र

क्षीरविकृति स्त्री ६त० (क्षीरसा) कूर्चिकायाम् अमरः

क्षीरविदारी स्त्री क्षीरमिव शुभ्रा विदारी । १श्वेतभूमिकुष्माण्डे शब्दाचि० । क्षीरप्रधाना विदारी । २शुक्लकृष्णयोर्भूमिकुष्माण्डयोः राजनि०

क्षीरविषाणिका स्त्री क्षीरमिव विषाणमग्रमस्त्यस्य ठन् । १दृश्चिकालीवृक्षे (विछाटि) जटाध० । २क्षीरकाकोल्याम् राजनि०

क्षीरवृक्ष पु० क्षीरप्रधानोवृक्षः । १उदुम्बरे जटा० २क्षीरिकायां भरतः । ३राजादन्याम् राजनि० ४न्यग्रोधे ५अश्वत्थे ६मधूके (मौल) च सुश्रुतः । "चतुर्णां वा क्षीरवृक्षाणां न्यग्रोधोदुम्बराश्वत्थमधूकानाम्" सुश्रु० "पत्राणि क्षीरवृक्षाणाम्" सुश्रु० ।

क्षीरशर पु० क्षीरं शीर्य्यतेऽत्र शृ—आधारे अप् । आमिक्षायां हेमच० दधियोगात्तप्तोष्णपयसः अम्लेन जायमानत्वात् तथात्वम् । [भावप्र०उक्ते नष्टे दुग्धे (छेँ डा दुध)

क्षीरशाक न० "पक्वमेव हि यच्छष्टं क्षीरशाकं हि तत् पयः"

क्षीरशीर्ष पु०क्षीरमिव शीर्षमस्य । श्रीवासे चन्दनभेदे राजनि०

क्षीरशुक्ल पु० क्षीरमिव शुक्लः । शृङ्गाटके(पानीयफल)शब्दच० ।२राजादन्यां राजनि० । ३शुक्लभूकुष्माण्डे स्त्री अम०

क्षीरशुक्ला स्त्री क्षीरवत् शुक्ला । क्षीरकाकल्यां राजनि०

क्षीरश्री त्रि० क्षीरेण श्रीयते मिश्रीक्रियते श्री—कर्मणि क्विप् । क्षीरमिश्रिते सोमादौ "शुक्रः क्षीरश्रीः" यजु० ८।५७। "क्षीरमिश्रितः सोमः शुक्र एव भवति" वेददी० क्षीरस्य श्रीरिव श्रीरस्य । २दुग्धतुल्यशोभाके त्रि० । ६त० । ३दुग्धशोभायां स्त्री

क्षीरषट्पलक न० क्षीरेण षण्णां पञ्चकोलानां पलमत्र कप् । चक्र० उक्ते पक्वे घृते "पञ्चकोलैः ससिन्धूत्थैः पलिकैः पयसा समम् । सर्पिः प्रस्थं शृतं प्लीहविषमज्वरगुल्मनुत्"

क्षीरषष्टिक न० क्षीरेण पक्वं षष्टिकम् । क्षीरपक्वे षष्टिकधान्यान्ने । तत्र पठ्यन्ते बुधबलौ देयं यथाह याज्ञ० "गुडौदनं पायसञ्च हविष्यं क्षीरषष्टिकम् । दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च । दद्यात् ग्रहक्रमादेतत्" ।

क्षीरस पु० क्षीरं स्यति सो—क । क्षीरसरे राजनि०

क्षीरसन्तानिका स्त्री० क्षीरस्य सन्तानोऽस्त्यस्य ठन् । आमिक्षायां (छाना) राजनि० "क्षीरसन्तानिका वृष्या स्निग्धा पित्तानिलापहा" राजनि०

क्षीरसमुद्र पु० क्षीरतुल्यः स्वादुरसः समुद्रः । क्षीराम्बुधौ क्षीरसागरादयोऽप्यत्र ।"मथितःक्षीरसागरः"भाग०८।८।४

क्षीरसर्पिस् न० क्षीरेण पक्वं सर्पिः । सुश्रुतोक्ते क्षीरतैलपाकविधिना क्षीरेण पक्वे घृतभेदे । क्षीरतैलपाकविधिः क्षीरतैलशब्दे उक्तः । "तैलहीनं वा क्षीरसर्पिरस्तितर्पणम्"सुश्रु० "क्षीरसर्पिषा चैनमनुवासयेत्" सुश्रु०

क्षीरसार पु० क्षीरं सरति गच्छति कारणत्वेन सृ—अण् । क्षीरजाते शृङ्गाटकादिचूर्णमिश्रणेन (पालजात) ख्याते १पदार्थे । ६त० । २नवनीते च "क्षीरसारमपनीय शङ्कया स्वीकृतं यदि पलायनं त्वया" उद्भटः ।

क्षीरस्फटिक पु० क्षीरमिव शुभ्रः स्फटिकः । क्षीरवर्णे स्फटिकमणिभेदे हेम० ।

क्षीरस्वामिन् पु० अमरटीकाकारे शाब्दिके पण्डितभेदे

क्षीरहिण्डीर पु० ६त० । दुग्धफेने शब्दचिन्ता० ।

क्षीरह्रद पु० क्षीरपूर्णो ह्रदः । क्षीरपूर्णे ह्रदे । तत्रभवादौ शिवा०—अण् । क्षैरह्रद तद्भवादौ त्रि०

क्षीरा स्त्री क्षीरं तद्वर्णोऽस्त्यस्य अच् । काकोल्याम् राजनि०

क्षीराब्धि पु० क्षीरस्य दुग्धरसस्याब्धिः । क्षीरसमुद्रे एवं क्षीरसागरादयोऽप्यत्र ।

क्षीराब्धिज पु० क्षीराब्धौ जायते जन—ड । १चन्द्रे । २लक्ष्म्यां स्त्री३अमृतादौ यथायोग्यलिङ्गता ।४मौक्तिके ५सामुद्रलवणे न० मेदि० । "यथा भगवता ब्रह्मन्! मथितः क्षीरसागरः"इत्युपक्रमे भाग०८,८,अ०तेषामुत्पत्तिर्दर्शिता यथा "तस्मात् जगत्सु सर्वे तच्चेदं शङ्करो ऽग्रहीत् । नारायणाज्ञया तेन नीलकण्ठत्वमाप्तवान् । ऐरावतस्तु नागेन्द्रो हयश्चोच्चैःश्रवाः पुनः । द्वितीयावर्तनाद्राजन् तु पश्चाविति नः श्रुतम् । तृतीयावर्त्तनेऽप्सरोगणो जातः सुशोभनः । चतुर्थात् पारिजातस्य उत्पन्नः स महातरुः । पञ्चमात् हिमगुस्तस्मात् उत्थितः क्षीरसागरात् । तं भवः शिरसा धत्ते नारीव स्वमिव नृप ! । नाना-

नाविधानि रत्नानि दिव्यान्याभरणानि च । क्षीरोदधेस्तू-त्थितानि गन्धर्वाश्च सहस्रशः । एतान् दृष्ट्वा तदोत्पन्नान्यावर्य्यसमन्विताः । अभवन् जातहर्षास्ते तत्र सर्वे सुरासुराः । दैत्यपक्षे ततो मेघाः सम्यग्वर्षन्ति संस्थिताः । कृष्णाज्ञया तु वायुस्तु सुखं वाति सुरान् प्रति । विष्णु निःश्वासवातेन वासुकेश्चार्कतापनात् । निस्तेजसोऽभवन् दैत्या निर्वीर्याश्च महामते! । ततः श्रीरुत्थिता तस्मात् क्षीरोदाद्धृतपङ्कजा । विभ्राजमाना राजेन्द्र दिशः सर्वाः स्वतेजसा । ततस्तीर्थोदकैःस्नाता दिव्यवस्त्रैरलङ्कृता । दिव्यगन्धानुलेपैस्तु सुमनोभिः सुपूजिता । देवपक्षं समासाद्य स्थिता क्षणमरिन्दम! । हरिवक्षः स्थलं प्राप्ता ततः सा कमलालया । ततोऽमृतघटं पूर्णं गृहीत्वा पयसोनिधेः । धन्वन्तरिः समुत्तस्थौ" ।

क्षीराब्धितनय स्त्री दृत० । लक्ष्म्यां १तस्यास्तज्जातत्वात्तथात्वम् २चन्द्रे पु० क्षीराब्धिजशब्दे दृश्यम् ।

क्षीरावी स्त्री क्षीरमवति अव—अण् ङीप् । दुग्धिकायाम् (दुधी) अमरः स्वार्थे क । तत्रार्थे । अस्याः पत्रच्छेदने दुग्धवद्द्रवनिर्यासबहिर्भावात्तथात्वम् । सा च "शकुलतुल्यपत्रा" सुभूतिः । [त्रिका०

क्षीराह्व पु० क्षीरमाह्वयते स्पर्द्धते आ+ह्वे-क । सरलद्रुमे

क्षीरिका स्त्री क्षीरं तत्तुल्यस्वादोऽस्त्यस्य ठन् । १राजादने २पिण्डखर्जूरे अमरः । "क्षीरिकायाः फलं पक्वं गुरु विष्टम्भि शीतलम्"राजनि०।"क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमं गुरु । तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित्" भावप्र० । ३परमान्ने भावप्र० कृतान्नशब्दे २१८०पृ० दृश्यम्

क्षीरिद्रुमाद्य न० "क्षीरिद्रुमाद्योत्थरसे विपक्वं तज्जैश्च कल्कैः पयसा च सर्पिः । सितोपलार्द्धं मधुपादयुक्तं रक्तातिसारं शमयत्युदीर्णम्" चक्रदत्तोक्ते घृतभेदे

क्षीरिन् पु० क्षीरं तत्तुल्यनिर्यासोऽस्त्यस्य इनि । क्षीरतुल्यनिर्यासयुक्ते १वृक्षभेदे स च भावप्र० उक्तो यथा "न्यग्रोधोदुम्बराश्वत्थपारीषप्लक्षपादपाः । पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् । केचित्तु पारीषस्थाने शिरीषं वेतसं परे" वदन्तीति शेषः । "क्षीरवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः । रूक्षाः कषायामेदोघ्ना विसर्पशयनाशनाः । शोथपित्तकफास्रघ्नाः स्तन्याभग्नास्थियोजकाः । त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् तेषां पत्रं हिमं ग्राहि कफवातास्रकृल्लघु । विष्टम्भाध्मानजित् तिक्तं कषायं लघुलेखनम्" तद्गुणाः । २हिमजायां तिक्तदुग्धायां पीतदुग्धायां क्षीरिकायां स्त्री ङीप् जटा० "क्षीरिणी तिक्तपीता च रेचना शोकतापहृत् । क्रिमिदोषकफघ्नी च पित्तज्वरहरी परा" राजनि० । ३वराहक्रान्तायां शब्दचि० ४कुटुम्बिन्यां ५काश्मर्य्यां ६दुग्धिकायां च राजनि० दुग्धिकायां पुंस्त्री शब्दच० ७स्नुहीवृक्षे ८अर्कवृक्षे ९राजादन्याम् १०दुग्धपाषाणे ११प्लक्षे १२सोमलतायां १३स्थालीवृक्षे च पु० राजनि०

क्षीरी स्त्री० क्षीर+अस्त्यर्थे अच् गौरा०ङीष् । (षिरखोला) ख्याते वृक्षभेदे शब्दर० ।

क्षीरीश पु० क्षीरिणां वृक्षाणामीशः प्रधानत्वात् । वरपर्णे स्नुक्छदे मूलकाकारमूले खरगन्धे वृक्षभेदे रत्नमा० ।

क्षीरेयी स्त्री० क्षीरेण ईं शोभां याति या-क गौ० ङीप्, क्षीर+त्रा० भवार्थे ढञ् वा ङीप् । परमान्ने हला०

क्षीरोद पु० क्षीरमिव स्वादु उदकं यस्य उदादेशः । दुग्धसमुद्रे "ततः श्रीरुत्थिता तस्मात् क्षीरोदाद् धृतपङ्कजा" नृसिंहपु० । क्षीरोदमन्थनकथा यथा "मन्थानं मन्दरं कृत्वा नेत्रं कृत्वा तु वासुकिम् । दानवैः सहिता भूत्वा मथध्वं क्षीरसागरम् । अहञ्च तत्र साहाय्यं करिष्यामि दिवौकसः! । भविष्यत्यमृतं तत्र तत्पानाद्बलवत्तराः । भविष्यथ क्षणादेव अमृतस्य प्रभावतः । यूयं सर्वे महावीर्या भुञ्जिष्ठा रणविक्रमाः । इन्द्राद्यास्तु महोत्साहाः स्थानलब्धिसहानरीन् । ततो हि दानवान् जेतुं समर्था नात्र संशयः । इत्युक्ता देवदेवेन देवाः सर्वे जगत्पतिम् । प्रणम्यागम्य निलयं सन्धिं कृत्वाथ दानवैः । क्षीराब्धिमथने सर्वे चक्रुरुद्योगमुत्तमम् । बलिना चोद्धृतो राजन्! मन्दराख्यो महागिरिः । क्षीराब्धौ चेपतश्चैव तेनैकेन नृपोत्तम! । सर्वौषधिश्च प्रक्षिप्ता देवदैत्यैः पयोदधौ । वासुकिश्च ततस्तत्र राजन्! नारायणाज्ञया । सर्वदेवहितार्थाय विष्णुश्च स्वयमागतः । ततो विष्णुसमादेशात्तत्र सर्वे सुरासुराः! सनेत्य मित्रभावेन क्षीराब्धेस्तटमाश्रिताः । मन्थानं मन्दरं कृत्वा नेत्रं कृत्वाऽथ वासुकिम् । ततो मथितुमारब्धा नृपते! तरसाऽमृतम् । विष्णुना मुखभागे तु वासुकेर्दानवाः कृताः । देवाश्च पुच्छभागे तु मन्थनार्थं नियोजिताः । एवन्तु मन्थनात्तत्र मन्दराधः प्रविश्य वै । आधारेण विना राजंस्तं दृष्ट्वा सहसा हरिः । सर्वलोकहितार्थाय कूर्मरूपमधारयत् । आत्मानं सं-

प्रवेश्याथ मन्दरस्य गिरेरधः। प्रविश्य धृतवान् शैलं पृथग्रूपेण केशवः। उपर्य्याक्रान्तवान् शैलं पृथग्रूपेण केशवः। चकर्ष नागराजानं देवैः सार्द्धं जनार्द्दनः। असुरादिस्वरूपेण दैत्यमध्ये च केशवः। ततस्ते त्वरा-युक्ता ममन्थुः क्षीरसागरम्। यावच्छक्त्या न्तपश्चैव। बलवन्तः सुरासुराः। मथ्यमाने ततस्तस्मात् क्षीराब्धे-रभवत्रूप!। कालकूटमिति ख्यातं विषमत्यन्तदारुणम्"

क्षीरोदतनय पु० ६त०। १चन्द्रे २लक्ष्म्यां स्त्री क्षीरोदतना-दयोऽप्यत्र पुंस्त्री।

क्षीरौदन पु० क्षीरेणोपसिक्त ओदनः "अन्नेन व्यञ्जनम्" पा० स०। दुग्धोपसिक्ते भक्ते "क्षीरौदनं भुक्तमथानुवासोत्" सुश्रु०

क्षीव निरासे भ्वा० प०सक० सेट्। क्षीवति अक्षीवीत् चिक्षी-व। निरासः फूत्कारः तत्र अक०। मुखेन श्लेष्मादेर्वमनस्य तत्र सक० इति भेदः।

क्षु क्षुतौ पु०(हाँचि) अदा० अक० सेट्। क्षौति क्षुतः क्षुवन्ति अक्षावीत् चुक्षाव क्षविष्यति। उगन्तत्वात् क्तिति क्तति अ-निट् क्षुतम्। क्षुतिः क्षुत्वा। क्षवथुः "पुरां चुक्षाव चाशुभम्" भट्टिः। "सतकं कामिनि चुक्षुवे मृगाक्ष्या"माघः "सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वाऽनृतं वचः। पीत्वापोऽध्येष्य-माणश्च आचामेत् प्रयतोऽपि सन्"। "क्षुवतीं जृम्भमाणां वा" मनुः। "क्षतोत्पतनजृम्भसु" ति० त० पुरा०। "रात्रौ मयि क्षुतवति क्षितिपालपुत्र्या" चौरप०।

अव + अधःस्थस्य क्षवथुना दूषणे "अवक्षुतं केशपतङ्गकीटैः" यमः। अवक्षुतं उपरिक्षतक्षुतेन दूषितम्। "पतित्रान्न-मवक्षुतम्" मनुः "अवक्षुतम् उपरिक्षवक्षुतम्" कुल्लू०। अन्योपसर्गपूर्व्वस्तु तत्तद्द्योत्यार्थयुक्तक्षुतौ।

क्षु पु० क्षुद्–बा० डु। १अन्ने निघण्टुः "तत्तद्यदी मनसोवेनता वागृज्येष्ठाय वा धर्म्मणि क्षोरनीके" ऋ० ८।५।७।२२ क्षण–हिंसायां डु। २सिंहे एकाक्षरकोषः २स्तुत्यादिशब्दे क्षुमत्

क्षुण पु० क्षु–नक्। अरिष्टशब्दे शब्दच०

क्षुण्ण त्रि० क्षुद्–क्त। १अभ्यस्ते, २विहते ३चूर्णीकृते च जटा०। "अभीक्ष्णमक्षुण्णतयाऽतिदुर्गमम्" "क्षुण्णं यद-न्तःकरणेन दृष्टाः" "क्षुण्णं क्षणं यदुवर्षैर्दिवमाततांसुः" इति च माघः। "रेखामात्रमपि क्षुण्णात्" रघुः। "क्षुण्ण-भिन्नविपक्षकैः" भट्टिः

क्षुत् स्त्री क्षु–सं पं भावे क्विप्। क्षुते (हाँचि) अमरः।

क्षुत न० क्षु–भावे क्त। क्षवथौ (हाँचि) अमरः क्षवथुशब्दे वि-वृतिः। क्षुतस्य शुभाशुभसूचकत्वं, वसन्तराजशाकुने १प्र० "अथ क्षुताख्यं शकुनं क्रमेण महाप्रभावं प्रविभावयामः। नश्यन्ति यस्माच्छकुनाः समस्ता मृगाधिनाथादिव वनप्रसत्त्वाः। सर्व्वस्य सर्व्वत्र च सर्व्वकालं क्षुतं न कार्य्यं कचिदेव शस्तम्। यातुः क्षुते तेन न किञ्चिदेव कुर्य्यात् क्षुतं प्राणहरस्य गन्तुः। निषेधमप्येऽश्चिषु दक्षिणे च धनक्षयं दक्षिणकर्णदेशे। तत्पृष्ठभागे कुरुते ऽर्थहानिं क्षुतं कदाचित् शुभमावहन्ति। भोगाय वाम-श्रवणस्य पृष्ठे कर्णे च वामे कथितं जयाय। सर्व्वार्थलाभाय च वामनेत्रे जातं क्षुतं स्यात् क्रमशोऽष्टधैव। क्रमाद्विशेषं गमनस्य विघ्नं कलिं समृद्धिं क्षुतमुपरोगम्। करोति रोगक्षयमर्थनाशं दीप्तादिनाशञ्च क्षुतं करोति। प्राणाय्यपुंसः परतोऽपरा स्यात् पुनः पुनर्व्वर्त्तित एव जातम्। वृद्धाक्षयोर्व्वा कफतो हठाद्वा जातं क्षुतं केऽपि वदन्ति शस्तम्। स्वाद्यलयोर्न स्वजने प्रशस्तं क्षुतं प्रशंसन्ति न भोजनादौ। भवेत् कथञ्चिद्यदि भोजनान्ते भवेत्तदाप्यं न हि भोज्यलाभः। आदौ क्षुतश्चेत् शकुनैस्ततः किं जाताक्जातान् शकुना-न्निहन्ति। क्षुतं क्षणेनात्र न संशयोऽस्मिन् प्रयोजने यत्नकृतेऽपि जातम्। क्षुतं क्षणात्तद्विनिहन्त्यवश्य-मायात्मकेनापि मनाक्सदोषम्। तस्मादुपेक्ष्यं न विचक्षणेन क्षुतं यतस्तस्य फलं विधत्ते"। इति।

"छिक्काया श्रवणं यस्य लभेत् पूर्वे महाफलम्। आग्नेये शोकसन्तापौ, दक्षिणे हानिमाप्नुयात्। नैर्ऋते शोक-सन्तापौ, मिष्टान्नञ्चैव पश्चिमे। अन्नं प्राप्नोति वायव्ये, उत्तरे कलहो भवेत्। ईशाने मरणं प्रोक्तं, प्रोक्तं छिक्काफलाफलम्" गारुडपु० ६०अ०

तिथित० वर्षकृत्यवाक्यम "चित्तं शक्रदिशि,कार्यसिद्धिरतुला शक्रे, हुताशे भयं, याम्यामग्निभयं, सुरद्विषि कलि,र्लाभः समुद्रालये। वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे, ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने। क्षोणीरते क्षुतेऽप्येवमूचुः केचिच्च कोविदाः" इति।

कचित्तस्य शुभसूचकता यथा "आसने शयने दाने भोजने वस्त्रसंग्रहे। विवादे च विवाहे च क्षुतं सप्तसु शोभनम्" क्षुतनिमित्तं शुद्ध्यर्थमाचमनं कर्त्तव्यम् यथाह याज्ञ० "स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे। आचान्तः पुनराचामेत् वासोविपरिधाय च"। अशक्तौ स्मृतिः "क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने। कर्म्मस्थ एव

"प्राचामेत् दक्षिणं श्रवणं स्पृशेत्"। अन्यक्षुते जीवशब्दः प्रयोज्यः यथा मदनपारिजातधृतम् "जीवेति क्षवतो ब्रूयात् जीवेत्युक्तं त्वया मखेति" "क्षुतोत्पतनजृम्भासु जीवेत्तिशायुराशिध्वनिः। शब्दोरपि च कर्त्तव्योह्यन्यथा ब्रह्महा भवेत्"ति०त०। "दीर्घायुष्कृत् क्षुतं दीर्घं युगपद्ध तिपिपिण्डितम्" काशीख०स्त्रीलक्षणे। असंवृतमुखस्य क्षुत-करणं निषिद्धं यथा विष्णुध० "नासंवृतमुखः कुर्य्याद्धास्यं जृम्भां तथा क्षुतम्"। "स्तनितं प्रतिक्षुतमिवोपशुश्रुवे" माघः ताजकोक्तायाम् २अरिष्टे अरिशब्दे ३५५पृ० विवृतिः "क्षुताख्यदृष्ट्या न शुभं तदापि"। "क्षुतदृष्ट्या रिपोर्भ-यम्" नीलक०।

क्षुतक पु० क्षुताय साधु कन्। राजिकायाम् राजनि०।

क्षुताभिजनन पु० क्षुतमभिजनयति अभि+जन-णिच्-ल्यु। (राइ) कृष्णसर्षपभेदे अमरटीकायां स्वामी

क्षुत्करी स्त्री क्षुतं करोति कृ-ट ङीप्। सर्पाक्षी च शब्दच०

क्षुद गतौ निघ० भ्वा० प० सक० सेट्। क्षोदति अक्षोदीत् चुक्षोद। "उत क्षोदन्ति रोदसी महित्वा" ७,८५,१, "क्षोदन्त आपो रिणते वनानि" ऋ०५,५८,६,

क्षुद पेषणे रुधा० उभ० सक० अनिट् इरित्। क्षुणत्ति अक्षुदत् अक्षौत्सीत् अक्षुत्त। चुक्षोद चुक्षुदे। क्षुन्दन् क्षुन्दानः। क्षोदः। "क्षुण्णभिन्नविपन्नकैः" "क्षुन्नन्ति सर्पान् पाताले" भट्टिः। "ते त व्याघ्रेषुरक्षौत्सुः" "अक्षुद्यतामजिक्षुच्छरम्" भट्टिः "मदः स्वखण्डनखण्डखाद्यमुदञ्चचोदक्षमे" नैषधम्। उपसर्गपूर्वस्तु तत्तद्योत्यार्थयुक्ते पेषणे। [कविक०]

क्षुद् स्त्री क्षुद-सम्प० भावे क्विप्। चूर्णने "क्षुदिर चदि"

क्षुद्र त्रि० क्षुद-कर्त्तरि रक्। १कृपणे २अधमे ३क्रूरे ४अल्पे च मेदि०। ५दरिद्रे हेम०। ६तण्डुलीयशाके पु० संक्षिप्तसा०। "क्षुद्रेऽपि नूनं शरणं प्रपन्ने" कुमा० "क्षुद्राः संत्रासमेते विजहत हरयः" शा०द०। "कामात्मा विषयः क्षुद्रः" मनुः। ततः अतिशायने इष्ठन् ईयसुन् रलोपे गुणः। क्षोदिष्ठ क्षोदीयस् अतिशयकृपणादौ त्रि०। "वृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति" माघः

क्षुद्रकण्टकारी स्त्री नि० क०। अग्निदमनी वृक्षे राजनि०

क्षुद्रकण्टकी स्त्री क्षुद्रं कण्ठकं यस्याः गौ०ङीष्। १वृहत्याम् भावप्र० क्षुद्रभण्टाकीति वा पाठः

क्षुद्रकण्टिका क्षुद्रं कण्टकं यस्याः टाप् अत इत्वम्। कण्टकारिकायाम् शब्दचि०।

क्षुद्रकमानस न० काश्मीरदेशस्थे कुङ्कुमोत्पत्तिस्थानभेदे। "काश्मीरेषु सरोनाम्ना दिव्यं क्षुद्रकमानसम्" सुश्रु०

क्षुद्रकम्बु पु० कर्म०। शम्बूके (शामुक)। हेमच०

क्षुद्रकारवेल्ली स्त्री कर्म०। वनकारवेल्लीभेदे राजनि० स्वार्थे क० क्षुद्रकारवेल्लिकाप्यत्र राजनि०

क्षुद्रकुलिश पु० नि० कर्म०। वैक्रान्तमणौ राजनि०

क्षुद्रकुष्ठ न० कर्म० सुश्रुताद्युक्तेषु एककुष्ठादिषु एकादश कुष्ठभेदेषु कुष्ठशब्दे विवृतिः [क्षुद्रे राजनि०

क्षुद्रक्षुर पु० क्षुद्रक्षुरस्येवाकारोऽस्त्यस्य अच्। क्षुद्रगो-

क्षुद्रगोक्षुरक क्षुद्रगोक्षुरमिव कायति कै-क (छोटगोक्षुरी) गोक्षुरभेदे राजनि० [क्षिङ्गिण्याम् (घुङुर) अमरः

क्षुद्रघण्टिका स्त्री० घण्टा+अल्पार्थे कन् घण्टिका कर्म०।

क्षुद्रघोली स्त्री नि० कर्म०। १चिरिल्लिकाक्षुपे राजनि०

क्षुद्रचञ्चु पु० क्षुद्रं चञ्चुरिवाकारोऽस्य। क्षुपभेदे राजनि०

क्षुद्रचन्दन पु० नित्य कर्म०। रक्तचन्दने राजनि०

क्षुद्रचिर्भटी स्त्री नि० कर्म०। गोपालकर्कट्यां राजनि०

क्षुद्रचूड पुंस्त्री क्षुद्रा चूडा यस्य (गुण्शालिक) खगभेदे शब्दच०

क्षुद्रजन्तु पु० कर्म०। "क्षुद्रजन्तुरनस्थिः स्यादथ वा क्षुद्र एव वा। शतं वा प्रसृतौ येषां केचिदान कुलादपि" इत्युक्ते स्वल्पे १जन्तौ। २शतपद्यां शब्दमाला

क्षुद्रजम्बू स्त्री कर्म०। भूमिजम्ब्वाम् शब्दचि०।

क्षुद्रजातीफल पु० कर्म०। अमलके राजनि०

क्षुद्रजीरक न० कर्म०। कणजीरके, सुगन्धे शब्दच०

क्षुद्रजीवा स्त्री कर्म०। जीवन्तीवृक्षे राजनि०

क्षुद्रतुलसी स्त्री नि० कर्म०। बर्बरीभेदे राजनि०

क्षुद्रदंशिका स्त्री नि०कर्म०। (छोटडाँश) दंशभेदे जटा०।

क्षुद्रदुरालभा स्त्री नि०कर्म०। स्वल्पदुरालभाभेदे राजनि०

क्षुद्रदुस्पर्शा स्त्री नि० कर्म०। अग्निदमनीवृक्षे राजनि०

क्षुद्रधात्री स्त्री नित्य कर्म०। कर्कटवृक्षे राजनि०।

क्षुद्रधान्य न० कर्म०। तृणधान्ये कङ्गुप्रभृतौ भावप्र० "क्षुद्रधान्यं कुधान्यञ्च तृणधान्यमिति स्मृतम्। क्षुद्रधान्यमनुष्णं स्यात् कषाय लघु लेखनम्। मधुरं कटुकं पाके रूक्षञ्च क्लेदशोषकम् वातकृत् बद्धविट्कञ्च पित्तरक्तकफापहम्" तद्गुणा उक्ताः।

क्षुद्रनासिक त्रि० क्षुद्रा नासिकाऽस्य। ह्रस्वनासिके (खाँदा)

क्षुद्रपत्रा स्त्री क्षुद्रं पत्रं यस्याः टाप्। चाङ्गेर्याम् (चुको पालङ्ग)। हारा०। २स्वल्पपत्रान्विते त्रि०। गौरा० ङीष्। ३वचायां स्त्री राजनि०।

क्षुद्रपनस पु० नि० कर्म्म०। लकुचे (माँदार) राजनि०।

क्षुद्रपर्ण पु० क्षुद्रं पर्णमस्य। १अर्जके वर्वरीभेदे राजनि०। २स्वल्पपत्रयुक्ते त्रि०। [क्षुपभेदे राजनि०।

क्षुद्रपाषाणभेदा स्त्री नि० कर्म्म०। गिरिभवे कन्दरोत्थे

क्षुद्रपिप्पली स्त्री नित्य० कर्म्म०। वनपिप्पल्याम् राजनि०

क्षुद्रपृषती स्त्री नित्य० कर्म्म०। सूक्ष्मविचित्रविन्दुयुक्तायां पृषत्यां मृगीभेदे "पृषती क्षुद्रपृषती स्थूलपृषती मैत्रावरुण्यः" यजु० २४,२, अत्रत्यवेददीपे उक्तार्थकता दृश्या

क्षुद्रपोतिका स्त्री नि० कर्म्म०। मूलपोतिकायां राजनि०।

क्षुद्रफल(क) क्षुद्रं फलमस्य वा कप्। १जीवनवृक्षे शब्दच०। २भूमिजम्बुवृक्षे शब्दमा०। कबभावे। ३इन्द्रवारुण्यां ४गोपालकर्कट्याम् ५अग्निदमन्यां ६कण्टकारिकायां च स्त्री राजनि० टाप्।

क्षुद्रभण्डाकी स्त्री नि० कर्म०। बृहत्याम् राजनि०।

क्षुद्रमत्स्य पु० कर्म्म०। स्वल्पमत्स्ये (छोटमाछ) "क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः। लघुपाका रुचिकराः सर्वदा ते हिता मताः। अतिसूक्ष्माः पुंस्त्वहराः रुच्याः कासानिलापहाः" भावप्र० तद्गुणा उक्ताः।

क्षुद्रमुस्ता स्त्री नि० कर्म्म०। कसेरुक्षुपे राजनि०।

क्षुद्ररोग पु० कर्म०। सुश्रुतोक्ते चतुश्चत्वारिंशत्स्वल्परोगभेदे यथा "अथातः क्षुद्ररोगाणां निदानं व्याख्यास्यामः। समासेन चतुश्चत्वारिंशत् क्षुद्ररोगा भवन्ति। तद्यथा अजगल्लिका यवप्रख्याऽन्धालजी विवृता कच्छपिका वल्मीकमिन्द्रवृद्धा पनसिका पाषाणगर्द्दभो जालगर्द्दभः कक्षा विस्फोटकोऽग्निरोहिणी चिप्पं कुनखोऽनुशयी विदारिका शर्कराऽर्बुदं पामा विचर्च्चिका रकसा पाददारिका कदरमलसेन्द्रलुप्ते दारुणकोऽरुंषिका पलितं मसूरिका यौवनपिडका पद्मिनीकण्टको जतुमणिर्म्मशकश्चर्म्मकीलस्तिलकालको न्यच्छं व्यङ्गः परिवर्त्तिकाऽवपाटिका निरुद्धप्रकशो निरुद्धगुदोऽहिपूतनं वृषणकच्छूर्गुदभ्रंशश्चेति। स्निग्धा सवर्णा ग्रथिता नीरुजा मुद्गसन्निभा। कफवातोत्थिता ज्ञेया बालानामजगल्लिका१। यवाकारा सुकठिना ग्रथिता मांससंश्रिता। पिडका श्लेष्मवाताभ्यां यवप्रख्येति२ सोच्यते। घनामवक्त्रां पिडकामुन्नतां परिमण्डलाम् अन्धालजी३ मल्पपूयां तां विद्यात् कफवातजाम्। विवृतास्यां महादाहां पक्वोडुम्बरसन्निभाम्। विवृतामिति४ तां विद्यात्पित्तोत्थां परिमण्डलाम्। ग्रन्थयः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः। कफानिलाभ्यामुद्भूतां विद्यात्तां कच्छपी५मिति। पाणिपादतले सन्धौ ग्रीवायामूर्द्धजत्रुणि। ग्रन्थिर्वल्मीकवद्यस्तु शनैः समुपचीयते। तोदक्लेदपरीदाहकण्डूमद्भिर्व्रणैर्वृतः। व्याधिर्वल्मीक६ इत्येष कफपित्तानिलोद्भवः। पद्मपुष्करवन्मध्ये पिडकाभिः समाचिताम्। इन्द्रवृद्धान्तु ७ तां विद्याद्वातपित्तोत्थितां भिषक्। कर्णोपरि समन्ताद्वा पृष्ठे वा पिडकोग्ररुक्। शालूकवत्पनसिकां ८ तां विद्यात् श्लेष्मवातजाम्। हनुसन्धौ समुद्भूतं शोफमल्परुजं स्थिरम्। पाषाणगर्द्दभं ९ विद्याद्बलासपवनात्मकम्। विसर्पवत्सर्पति यो दाहज्वरकरस्तनुः। अपाकः श्वयथुः पित्तात्स ज्ञेयो जालगर्द्दभः१०। बाहुपार्श्वांसकक्षासु कृष्णस्फोटां सवेदनाम्। पित्तप्रकोपात्सम्भूतां कक्षामिति११ विनिर्दिशेत्। अग्निदग्धनिभाः स्फोटाः सज्वरा रक्तपित्ततः। क्वचित्सर्वत्र वा देहे स्मृता विस्फोटका१२ इति। कक्षाभागेषु ये स्फोटा जायन्ते मांसदारुणाः। अन्तर्दाहज्वरकरा दीप्तपावकसन्निभाः। सप्ताहाद्वा दशाहाद्वा पक्षाद्वा घ्नन्ति मानवम्। तामग्निरोहिणीं १३ विद्यादसाध्यां सन्निपाततः। नखमांसमधिष्ठाय पित्तं वायुश्च वेदनाम्। करोति दाहपाकौ च तं व्याधिं चिप्प१४मादिशेत्। तदेव क्षतरोगाख्यं तथोपनखमित्यपि। अभिघातात्प्रदुष्टो यो नखो रूक्षोऽसितः खरः। भवेत्तु कुनखं१५ विद्यात्कुलीनमिति संज्ञितम्। गम्भीरामल्पसंरम्भां सवर्णामुपरिस्थिताम्। कफादन्तःप्रपाकान्तां विद्यादनुशयीं१६ भिषक्। विदारीकन्दवद्वृत्तां कक्षावङ्क्षणसन्धिषु। रक्तां विदारिकां१७ विद्यात् सर्वजां सर्वलक्षणाम्। प्राप्य मांससिरास्नायुश्लेष्मा मेदस्तथाऽनिलः। ग्रन्थिं कुर्वन्ति भिन्नोऽसौ मधुसर्प्पिर्वसानिभम्। स्रवत्यास्रावमत्यर्थं तत्र वृद्धिं गतोऽनिलः। मांसं विशोष्य ग्रथितां शर्करां जनयेत्पुनः। दुर्गन्धं क्लिन्नमत्यर्थं नानावर्णं ततः सिराः। स्रवन्ति सहसा रक्तं तद्विद्याच्छर्करार्बुदम्१८। पामाविचर्च्चौ१९ २०कुष्ठेषु रकसा२१च प्रकीर्त्तिता। परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः। पादयोः कुरुते दारीं२२ सरुजां तलसंश्रिताम्। शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः। मेदोऽसृक्सानुगैश्चैव दोषैर्वा जायते नृणाम्। स कीलः कठिनो ग्रन्थिर्निम्नमध्योन्नतोऽपि वा। कोलमात्रः सरुक्स्रावो जायते कदरस्तु२३ सः। क्लिष्टाङ्गुल्यन्तरौ पादौ कण्डूदाहरुगन्वितौ। दुष्टकर्द्दमसंस्पर्शादलसं २४ तं विनिर्दिशेत्। रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम्। प्रच्यावयति

रोमाणि ततः श्लेष्मा सशोणितः । रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः । तदिन्द्रलुप्तं २५ खालित्यं रुज्येति च विभाव्यते । दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते । कफवातप्रकोपेण विद्याद्दारुणकन्तु २६ तम् । अरूंषि बहुवक्त्राणि बहुक्लेदानि मूर्द्धनि । कफासृक्कृमिकोपेन नृणां विद्यादरुंषिकाम् २७ । क्रोधशोकश्रमकृतः शरीरोष्मा शिरोगतः । पित्तञ्च केशान् पचति पलितं २८ तेन जायते । दाहज्वररुजावन्तस्ताम्राः स्फोटाः सपीतकाः । गात्रेषु वदने चान्तर्विज्ञेयास्ता मसूरिकाः २९ । शाल्मलीकण्टकप्रख्याः कफमारुतशोणितैः । जायन्ते पिडका यूनां ३० वक्त्रे या मुखदूषिकाः । कण्टकैराचितं वृत्तं कण्डुमत्पाण्डुमण्डलम् । पद्मिनीकण्टकप्रख्यैस्तदाख्यं ३१ कफवातजम् । नीरुजं समसुत्सन्नं मण्डलं कफरक्तजम् । सहजं रक्तमीषच्च श्लक्ष्णं जतुमणिं ३२ विदुः । अवेदनं स्थिरञ्चैव यस्य गात्रेषु दृश्यते । माषवत्कृष्णमुत्सन्नमनिलान्माषकं ३३ दिशेत् । समुत्थाननिदानाभ्यां चर्मकील ३४ प्रकीर्त्तितम् । कृष्णानि तिलमात्राणि नीरुजानि समानि च । वातपित्तकफोद्रेकात्तान्विद्यात्तिलकालकान् ३५ । मण्डलं महदल्पं वा श्यामं वा यदि वा सितम् । सहजं नीरुजं गात्रे न्यच्छ ३६ मित्यभिधीयते । क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः । सहसा मुखमागम्य मण्डलं विसृजेत्ततः । नीरुजं तनुकं श्यावं मुखे व्यङ्गं ३७ तमादिशेत् । मर्द्दनात्पीडनाच्चापि तथैवाप्यभिघाततः । मेढ्रचर्म यदा वायुर्भजते सर्वतश्चरः । तदा वातोपसृष्टन्तु चर्म प्रतिनिवर्त्तते । मणेरधस्तात्कोशश्च ग्रन्थिरूपेण लम्बते । सवेदनः सदाहश्च पाकञ्च व्रजति क्वचित् । मारुतागन्तुसम्भूतां विद्यात्तां परिवर्त्तिकाम् ३८ । सकण्डूः कठिना चैव सैव श्लेष्मसमुत्थिता । अल्पीयसीं यदा हर्षाद्बालां गच्छेत्स्त्रियं नरः । हस्ताभिघातादथ वा चर्मण्युद्वर्त्तिते बलात् । मर्द्दनात्पीडनाद्वापि शुक्रवेगविघाततः । यस्यावपाट्यते चर्म तां विद्यादवपाटिकाम् ३९ । वातोपसृष्टमेवन्तु चर्म संश्रयते मणिम् । मणिश्चर्मोपनद्धस्तु मूत्रस्रोतो रुणद्धि च । निरुद्धप्रकशे तस्मिन्मन्दधारमवेदनम् । मूत्रं प्रवर्त्तते जन्तोर्मणिश्च न विदीर्य्यते । निरुद्धप्रकशं ४० विद्यादरूढां चावपाटिकाम् । वेगसन्धारणाद्वायुर्विहतो गुदसाश्रितः । निरुणद्धि महत्स्रोतः सूक्ष्मद्वारं करोति च । मार्गस्य सौक्ष्म्यात् कृच्छ्रेण पुरीषं तस्य गच्छति । सन्निरुद्धगुदं ४१ व्याधिमेनं विद्यात्सुदुस्तरम् । शकृन्मूत्रसमायुक्तेऽधौतेऽपाने शिशोर्भवेत् । स्विन्नस्यास्नाप्यमानस्य कण्डूरक्तकफोद्भवा । कण्डूयनात्ततः क्षिप्रं स्फोटास्रावश्च जायते । एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनम् ४२ । स्नानोत्सादनहीनस्य मलो वृषणसंस्थितः । प्रक्लिद्यते यदा स्वेदात्स कण्डूं जनयेत्तदा । तत्र कण्डूयनात् क्षिप्रं स्फोटास्रावश्च जायते । प्राहुर्वृषणकच्छूं ४३ तां श्लेष्मरक्तप्रकोपजाम् । प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः । रूक्षदुर्बलदेहस्य तं गुदभ्रंशमादिशेत् ।

क्षुद्रल त्रि० क्षुद्राःक्षुद्ररोगाः सन्त्यस्य सिध्मा० लच् । क्षुद्ररोगयुक्ते

क्षुद्रवर्वरा स्त्री नित्यकर्म० । वरटायां राजनि०

क्षुद्रवल्ली स्त्री नित्यकर्म० । मूलपोतिकायाम् राजनि०

क्षुद्रवार्त्ताकिनी स्त्री नि०कर्म० । श्वेतकण्टकार्य्यां राजनि०

क्षुद्रवार्त्ताकी स्त्री नि० कर्म० । वृहत्याम् अमरः

क्षुद्रशङ्ख पु० नित्य कर्म० । शङ्खनखे(जोङ्ड़ा) अमरटीका

क्षुद्रशर्करा स्त्री नि०कर्म० । यावनालशर्करायाम् राजनि०

क्षुद्रशार्दूल पुंस्त्री नि० कर्म० । क्षुद्रव्याघ्रे (चिताबाग) राजनि० [वति त्रि०

क्षुद्रशीर्ष पु०क्षुद्रं शीर्षमस्य । १मयूरशिखावृक्षे, २स्वल्पशीर्ष-

क्षुद्रशुक्ति स्त्री नि० कर्म० । जलशुक्तिकायाम् । स्वार्थे क तत्रैवार्थे राजनि०

क्षुद्रश्यामा स्त्री नि० कर्म० । कटभीवृक्षे राजनि०

क्षुद्रश्लेषातक पु० नि० कर्म० । भूकर्बुदारकवृक्षे राजनि०

क्षुद्रश्वास पु० कर्म० । श्वासरोगभेदे

"क्षुद्रकृत्यमकस्मिन्नो महानूर्द्ध्वश्च पञ्चधा भिद्यते स महाव्याधिः श्वासएकोविशेषतः । प्राग्रूपं तस्य हृत्पीडा भक्तद्वेषोऽरतिः परा । आनाहः पार्श्वयोः शूलं वैरस्यं वदनस्य च । किञ्चिदारभमाणस्य यस्य श्वासः प्रवर्त्तते । निषण्णस्यैति शान्तिञ्च स क्षुद्र इतिसंज्ञितः" सुश्रु०

"रुक्षायासोद्भवः कोष्ठे क्षुद्रवातमुदीरयन् । क्षुद्रश्वासो न सोऽत्यर्थदुःखेनाङ्गप्रबाधकः । हिनस्ति न च गात्राणि न च दुःखं यथेतरे । न च भोजनपानानां निरुणद्ध्युचितां गतिम् । नेन्द्रियाणां व्यथाञ्चापि काञ्चिदुत्पादयेद्रुजम् । स साध्य उक्तो बलिनः सर्वे चाव्यक्तलक्षणाः" भावप्र०

क्षुद्रश्वेता स्त्री सुश्रुतोक्ते अर्कादिगणोक्ते ओषधिभेदे आस्फोट पुष्पी क्षुद्रश्वेता महाश्वेत्यादि" सुश्रुतः

क्षुद्रसहा स्त्री सह–अच् क्षुद्रस्य सहा ६त०। १शुक्लपर्ण्याम् २माञ्जिष्ठगन्धायाञ्च राजनि०

क्षुद्रसुवर्ण न० नि० कर्म्म०। पित्तले राजनि०

क्षुद्रहिङ्गुली स्त्री कर्म्म०। १कण्टकार्य्याम्। स्वार्थे क अणो ह्रस्वे टाप्। अत्रैवार्थे शब्दच०।

क्षुद्रा स्त्री क्षुद–रक्। १वेश्यायाम्, "क्षुद्राधिष्ठितभवनाः" काद० २कण्टकार्य्याम्, ३सरघायाम्, अमरः ४मक्षिकामात्रे, ५चाङ्गेर्य्याम्, ६हिंसायाम्, हेमच० ७गवेधुकायां (गड-गडेधान) रत्नमा० ८नादरतायाम्, शब्दर० "क्षुद्राभि-रक्षुद्रतराभिराकुलम्" माघः "क्षुद्राभिः सरघाभिः" मल्लि० ९व्यङ्गायाञ्च। क्षुद्राभिः निर्वृत्तम् अण्। क्षौद्र मधुनि "स क्षौद्रपटलैरिव" रघुः [कायाम् राजनि०

क्षुद्राग्निमन्थ पु० कर्म्म०(कोटगणिआरी) स्वल्पगणिकारि-

क्षुद्राञ्जन न० सुश्रुतोक्ते अञ्जनभेदे "गोमूत्रपित्तमदिरा यकृद्धा-त्रीरसे पचेत्। क्षुद्राञ्जनं रसे चान्यतयकृत् स्वैफलेऽपि वा। गोमूत्राज्यार्णवमलपिप्पलीक्षौद्रकट्फलं सैन्धवो-पहितं युक्तञ्चाविहितं वेणुगह्वरे। मेदो यकृद्घृतञ्चाजं पिप्पल्यः सैन्धवं मधु। रसमामलकञ्चापि पक्वं सम्यग्नि-धापयेत् कोषे खदिरनिर्म्माणे तद्वत् क्षुद्राञ्जनं हितम्"।

क्षुद्राण्डमत्स्यसंघात पु० क्षुद्राणामण्डमत्स्यानामण्डा-भिनवजातानां मत्स्यानां संघातः। (पोनार झाँक) पोताधाने अमरः

क्षुद्रादिकषाय पु० चक्रदत्तोक्ते कषायभेदे "क्षुद्रामृता-नागरपुष्कराह्वयैः कृतः कषायः कफमारुतोद्भवे। सश्वा-सकासारुचिपार्श्वरुग्भवे ज्वरे त्रिदोषप्रभवे च शस्यते"

क्षुद्रापामार्ग पु० नि० कर्म्म०। रक्तापामार्गे राजनि०

क्षुद्रामलकसंज्ञ पु० क्षुद्रामलकस्य संज्ञेव संज्ञा यस्य। कर्कटवृक्षे राजनि०

क्षुद्राम्र पु० नि० कर्म्म०। कोषाम्रे राजनि०

क्षुद्राम्रपनस पु० नि० कर्म्म०। लकुचे त्रिका०

क्षुद्राम्ला स्त्री अम्ला अम्लरसा कर्म्म०। १चाङ्गेर्य्याम् हारा० (चुकोपालङ्ग) स्वार्थे क। तत्रैवार्थे। २चयाण्डु-ल्याम् राजनि०

क्षुद्रिका स्त्री क्षुद्रेव क। दंशे(डाँश) राजनि०

क्षुद्रीय त्रि० क्षुद्र+उत्करा० चतुरर्थ्याम् छ। क्षुद्रनिर्वृत्तादौ

क्षुद्रदुर्दी स्त्री नित्यकर्म०। यवासे राजनि०

क्षुद्रोर्वारु पु० कर्म०। गोपालकर्कट्याम् राजनि०

क्षुद्रोदुम्बरिका स्त्री कर्म०। काकोदुम्बरिकायाम् राजनि०

क्षुद्रोपोदिका स्त्री नि० कर्म०। मूलपोतिकायाम् राजनि०

क्षुद्रोलूक पुंस्त्री कर्म०। उलूके राजनि०

क्षुध बुभुक्षायां दिवा० पर० सक० अनिट् लृदित्। क्षुध्यति अक्षुधत्। चुक्षोध क्षुत्। क्षुधा क्षुधितः। क्षुधित्वा। "क्षुध्यद्भ्योवय आसुतिदाः ऋ० १,१०४,७, मा क्षुधन्मा-तृषत्" अथ० २,२९,४, क्षुध्यन्तोऽभ्यपतन् व्यालाः"। "क्षुधित्वा पक्षिभिर्वनम्" भट्टिः। क्षुधाजातास्य तारका० इतच्। क्षुधित संजातक्षुधे त्रि०

क्षुध् स्त्री क्षुध–भावे संप० क्विप्। १बुभुक्षायाम्। कर्म्मणि क्विप्। २अन्ने निघ० पाठान्तरम्। "यस्य राज्ञस्तु विषये श्रोत्रियः सीदति क्षुधा" मनुः हलन्तात् वा टाप्। क्षुधाप्यत्र स्त्री क्षुधार्त्तः। "या देवी सर्वभूतेषु क्षुधा-रूपेण संस्थिता" देवीमा०। क्षुधा च प्राणिनां स्वाभा-विकदुःखहेतुर्यथोक्तं सुश्रुते "स्वाभाविकाः क्षुत्-पिपासाजरामृत्युनिद्रा प्रकृतयः"। इयञ्च प्राणधर्म्मः यथाह शा०ति० "बुभुक्षा च पिपासा च प्राणस्य,मनसः स्मृतौ। शोकमोहौ, शरीरस्य जरामृत्यू षडूर्म्मयः"। क्षुधा कार्य्याणि यथा "व्याधयो निर्जिताः सर्वे क्षुधया नृपसत्तम!। कुण्डली मुकुटी स्रग्वी तथैवालङ्कृतो नरः। क्षुधार्त्तो न विरा-जेत प्रेतवत्क्षुधितो नृणाम्। क्षीरलं विविधान् भोगान् वस्त्राण्याभरणानि च। न चेच्छति नरः किञ्चित् क्षुधया कलुषीकृतः। यथा भूमिगतं तोयं रविरश्मिभिः शुष्यति। शरीरस्थस्तथा धातुः शुष्यते जाठराग्निना। न शृणोति न चाघ्राति चक्षुषा न च पश्यति। दह्यते वेपते मूढः शुष्यते च क्षुधार्दितः। मूकत्वं बधिरत्वञ्च जडान्धत्वन्तु पङ्गुताम्। रौद्रं मर्य्यादहीनत्वं क्षुधा सर्वं प्रयच्छति। भगिनीं जननीं पुत्त्रं भार्य्यां दुहितरं तथा। भ्रातरं स्वजनं वापि क्षुधाविष्टो न विन्दति"।

क्षुधाकुशल पु० ७त०। बिल्वान्तरवृक्षे राजनि०

क्षुधाभिजनन पु० क्षुधामभिजनयति अभि+जन+णिच् ल्यु। १राजिकायां अमरः। २क्षुधाजननमात्रे त्रि०

क्षुधालु त्रि० क्षुध–बा० आलुच्। क्षुधायुक्ते

क्षुधावत् त्रि० क्षुधा–अस्त्यस्य क्षुधा साध्यतयाऽस्त्यस्याः वा मतु-प् मस्य वः। १क्षुधायुक्ते स्त्रियां ङीप्। भैषज्यरत्नाव-ल्युक्ते २गुटिकाभेदे स्त्री "रसाद्गोगन्धकाभ्राणि त्र्यूषणं त्रिफला वचा। यमानी शतपुष्पा च चविका जीरकद्व-यम्। प्रत्येकं समभागन्तु सप्ताकर्षा पुनर्नवा। मार्कवं

पञ्चिकञ्चेन्द्रवैधराजसुदर्शनाः। दण्डोत्पला त्रिवृद्दन्ती जामात्ररक्तचन्दनम्। भृङ्गापामार्गकुलका मण्डूकञ्च पलार्द्धकम्। शार्ङ्गकस्य रसेनाथ गुडिकां संप्रकल्पयेत्। बदरास्थिसमाञ्चैतां भक्षयित्वा पिबेदनु। वारि भक्तं अश्नश्चैव प्रातरुत्थाय मानवः। वटी क्षुधावती नाम सर्वाजीर्णविनाशिनी। अग्निञ्च कुरुते दीप्तं भक्तकञ्च नियच्छति। अम्लपित्तञ्च शूलञ्च परिणामकृतञ्च यत्। तत् सर्वं शमयत्याशु भास्करस्तिमिरं यथा। मन्दूरं वर्जयेदत्र विशेषात् क्षीरशर्करे"।

क्षुधासागररस पु॰ भैषज्यरत्नावल्युक्ते औषधभेदे "त्रिकटु त्रिफला चैव तथा लवणपञ्चकम्। क्षारत्रयं रसं गन्धं भागैकं पूर्ववद्भिषक्। गुञ्जामात्रां वटीं कुर्य्यात्स्वरङ्गैः पञ्चभिः सह। क्षुधासागरनामायं रसः सूर्य्येण निर्म्मितः"। [अमरः। "अन्नस्य क्षुधितः पातुम्"

क्षुधित त्रि॰ क्षुधा+जाताऽस्य तार॰ इतच्। क्षुधायुक्ते

क्षुधुन पुंस्त्री क्षुध—उन किच्च। म्लेच्छजातौ उज्ज्वल॰।

क्षुप मदे सौ॰ प॰ अक॰ सेट्। क्षोपति अक्षोपीत् चुक्षोप "स सद्यक्षुपवतः" भा॰ शा॰ १७१अ॰

क्षुप पु॰ क्षुप—क क्षु—पक् वा। ह्रस्वशाखाशिफे वृक्षे अमरः। वासुदेवस्य सत्यभामायां गर्भजातपुत्रभेदे। "अजिरे सत्यभामायां भानुर्भीमरथः क्षुपः" हरिवं॰ १६अ॰। इक्ष्वाकुपितरि ३राजभेदे च पु॰। "आसीत् कृतयुगे तात! मनुर्दण्डधरः प्रभुः। तस्य पुत्रो महाबाहुः प्रसन्धिरिति विश्रुतः। प्रसन्धेरभवत् पुत्रः क्षुप इत्येव संज्ञितः। क्षुपस्य पुत्र इक्ष्वाकुः" भा॰आश्व॰२अ॰। ४द्वारकापश्चिमस्थे ४पर्वतभेदे।

"बभौ रैवतकः शैलो रम्यसानुगुहाजिरः। पूर्वस्यां दिशि लक्ष्मीवान् मणिकाञ्चनतोरणः। दक्षिणस्यां लतावेष्टः पञ्चवर्णो विराजते। इन्द्रकेतुप्रतीकाशः पश्चिमस्यां तथा क्षुपः" हरि॰ १५७अ॰।

क्षुपडोडमुष्टि पु॰ दोडयति डुड—उत्क्षेपे अच् नाडयोडुषि रस्य पृषो॰ कर्म्म॰। विषमुष्टिक्षुपे राजनि॰

क्षुब्ध पु॰क्षुभ नि॰करणे क्तः। १मन्थानदण्डे हेम॰। "सुधैव मन्दरक्षुब्धक्षोभिताम्भोधिवर्णना" माघः २क्षोभयुक्ते त्रि॰। "पार्श्वौ परिपदे कृत्वा योनिं लिङ्गेन ताडयेत्। बाहुभ्यां धारणं गाढं बन्धोऽयं क्षुब्धसंज्ञकः" रतिम॰ उक्ते ३रतिबन्धभेदे पु॰

क्षुभ सञ्चलने भ्वा॰आत्म॰सक॰सेट् लृदित्। क्षोभते अक्षुभत् चुक्षुभे क्षोभ्यम्। क्षोभः क्षोभणम् क्षोभी "तामसो नापि-

चाक्षुभत् नाक्षुभद्राक्षसोऽभ्राट्"भट्टिः क्षुब्धः क्षुभितः। "क्षुब्धतोया महावेगाः श्वसमानादृषाशुगाः" भा॰ व॰ दअ॰। "क्षुभिताः सागराः सर्व्वे" रामा॰बा॰ ६५स॰। "चुक्षुभे द्विषतां मनः" रघुः "यदेतदादित्यस्य मध्ये क्षोभत इव" छा॰ उ॰। क्षोभमाणः।

क्षुभ सञ्चालने वा दिवा॰ क्र्या॰ अक॰ सेट्। क्षुभ्यति क्षुभ्नाति अक्षोभीत्। क्षुभितः। "क्षुभ्यन्ति प्रसभमहो विनापि हेतोः" माघः। क्षुभ्नातीत्यत्र क्षुभ्ना॰ न णत्वम्। प्राद्युपसर्गपूर्व्वकस्तत्तद्धात्वार्थयुक्ते क्षोभे

क्षुभ त्रि॰ क्षुभ—क। १क्षोभके २प्रवर्त्तके च "मठरारुणद्व्याद्यांस्तांस्तान् वन्देऽग्निक्षुभान्"भा॰व॰ ३अ॰ "अग्निक्षुभान् तत्प्रवर्त्तकान्" नीलक॰। ३सूर्य्यपारिषदभेदे स्त्री। "क्षुभया सहिता मैत्री याश्चान्याभूतमातरः" तत्रैव "क्षुभानिष्प्रहातुमकर्त्री देवता" नीलक॰

क्षुभित त्रि॰ क्षुभ—क्त। १आलोडिते, २व्याकुले, ३भीते च हेमा॰। "क्षुभितसैन्यपरागविपाण्डुरे" माघः "महाप्रलयमारुतक्षुभितपुष्करावर्त्तकेति" वेणी॰

क्षुभ्नादि पा॰ उक्ते निमित्ते सत्यपि णत्वनिवृत्तिनिमित्ते शब्दगणे स च गणः "क्षुभ्ना नृनमन नन्दिन् नन्दन नगर। एतान्युत्तरपदानि संज्ञायाम्प्रयोजयन्ति। हरिनन्दी हरिनन्दनः गिरिनगरम्। नृतिर्यङि प्रयोजयति। नरीनृत्यते। नर्त्तन गहन नन्दन निवेश निवास अग्नि अनूप एतान्युत्तरपदानि प्रयोजयन्ति। परिनर्त्तनम् परिगहनम् परिनन्दनम् शरनिवेशः शरनिवासः शराग्निः दर्भानूपः। आचार्य्यादणत्वञ्च। आचार्य्यभोगीनः। आकृतिगणोयम् क्षुभ्नादिः। "अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः "इति भाष्यम्" न भाभूपूकमीत्यादयस्तस्यैव प्रपञ्चः" इति कैयटः। पाठान्तरम् "क्षुभ्ना तृप्नु नृनमन नर नगर नन्दन यङ्न्नृति गिरिनदी गृहनमन निवेश निवास अग्नि अनूप आचार्य्यभोगीन चतुर्हायन इरिकादीनि वनोत्तरपदानि (संज्ञायाम्) इरिका तिमिर समीर कुबेर हरि कर्म्मार क्षुभ्नादिः"।

क्षुमत् त्रि॰ क्षु+अस्त्यर्थे मतुप्। १अन्नयुक्ते उपचारात् २अन्नवत्तुल्ये च। "आ तु इन्द्र! क्षुमन्तम्" ऋ॰ ८,८१,१, "क्षुमन्तं स्तुत्यम्" भा॰

क्षुमा स्त्री क्षु—मक्। (मसिना) (तिसी) १अतस्याम् अमरः। "क्षुमायो विधूनने क्षुमायां॰ यत्नेन कम्पयति पृषो॰। क्षुमा २शत्रुकम्पके त्रि॰ "क्षुमासि पातये-

मम्' यजु० १०,८ वेददीपे उक्तैव व्युत्पत्तिर्दर्शिता: २शणे शारदसुन्दरी ३नीलिकायाम् लताभेदे शब्दमा०। क्षुमाया इदम् अण्। क्षौम वस्त्रभेदे "क्षौमं शाणं वा ब्राह्मणस्य" शाता०

क्षुम्प गतौ भ्वा०प० सक०सेट्। क्षुम्पति अक्षुम्पीत् चुक्षुम्प

क्षुर विलेखने तुदा० पर० सक० सेट्। क्षुरति अक्षोरीत् चुक्षोर क्षुरः।

क्षुर पु० क्षुर-क क्षु-रक् वा।१नापितास्त्रे पश्वादीनां२शफे, (खुर) अमरटीकायां स्वामी ३कोकिलाक्षे अमरः ४गोक्षुरे, मेदि० ५महापिण्डीतके ६बाणे च राजनि० खट्वादिपादुकयाम् धरणिः "छेदयेल्लवशः क्षुरैः मनुः "संधाय धनुषि क्षुरम्" रा० आ०७२स०। 'क्षुरेण शितधारेण चकर्त्तास्य शरासनम्" रामा० ल० ८२अ०

क्षुरक पु० क्षुर-क्वुन्। १गोक्षुरे, (गोखुरी) २कोकिलाक्षे, मेदिनी ३तिलकद्रुमे अमरः ४भूताङ्कुशे राजनि० स्वार्थे क। क्षुरशब्दार्थे च

क्षुरकर्म्मन् न० क्षुरसाध्यं कर्म्म। केशच्छेदने। क्षुरकर्म्मणि विहितनक्षत्रादिकं मू० चि० पी० धा० उक्तं यथा "दन्तक्षौरनखक्रियात्र विहिता चौलोदिते वारभे पातङ्ग्यारखीन्विहाय नवमञ्चस्तञ्च सन्ध्यान्तथा। रिक्तां पर्वनिशां निरासनरणग्रामप्रयाणोद्यतस्नाताभ्यक्त कृताशनैर्नहि पुनः कार्य्या हितप्रेप्सुभिः"। मू० चि० "चौलोदितेषु चौलप्रोक्तेषु वारेषु नक्षत्रेषु उपलक्षणत्वात्तदुक्ते लग्नेऽपि च दन्तक्षौरनखक्रियात्र विहितोक्ता। "येषु येषु प्रशंसन्ति क्षुरकर्म्म महर्षयः। तेषु तेषु प्रशंसन्ति नखदन्तविलेखनमिति"। येषु येषु वारनक्षत्रलग्नादिष्वित्यर्थः। अथ क्षौरनिषिद्धकाल उच्यते। पातङ्गीति। पतङ्गः पक्षिसूर्य्ययोरित्यभिधानात् पतङ्गः सूर्यस्तस्यापत्यं पातङ्गिः शनिः आररवी गविजौ। तेषां वारान् विहाय त्यक्त्वा उपलक्षणत्वात् तेषां लग्नानि मकरकुम्भमेषवृश्चिकसिंहाख्यानि अंशकांश्च विहायेत्यर्थः। उक्तञ्च वशिष्ठेन "हस्तत्रये पुष्यपुनर्वसौ च शशाङ्कविष्णुत्रितयाश्विनीषु। पौष्णेन्द्रविष्णोत्र क्षुरकर्म शस्तं व्यर्कारमन्दं शकवारलग्ने" इति। अतः शुभपक्षायां वारलग्नांशे क्षौरं कार्य्यमिति फलितोऽर्थः। वारफलानि गर्गोक्तानि "भानुरायुः क्षपयति मासं, सप्त शनैश्वरः। भौमोमासाष्टकं हन्ति शेषस्त्वेकोनमासकम्। एकादश कविर्द्यात्कृते तु क्षौरकर्म्मणीति"। वस्त्वन्या यत्वाल्लग्नानामंशानां चैतानि फलान्यूह्यानि। न केवलमायुर्हानिः किन्तु शस्त्रघातोऽपि पापवारेषु। तदुक्तं वशिष्ठेन "आदित्यभौमार्किदिनेषु शीमान्न दन्तकाष्ठं क्षुरकर्म कार्य्यम्। कुर्वन्नवाप्नोति फलं समग्रं शस्त्रेण सम्यक् स्वशरीरघातम्"। तथा नवमं यस्तं च विहाय यद्दिने क्षौरं कृतं ततो नवमदिने पुनः क्षौरं न कार्य्यम्। "उत्कटे भूषिते चैव यानगो नवमेऽहनीति" नारदोक्तेः। यत्तु नवमे नवम्यामिति व्याकुर्वन्ति तदयुक्तं दिनपदोपादानाप्रसङ्गात्। दिनपदं तिथिपरमिति चेन्न रिक्तायाः वक्ष्यमाणस्वतन्त्रनिषेधानुपपत्तेः। ननु पृथगुपादानात् नवम्यां सर्वथा क्षौरं निन्द्यमेव चतुर्थीचतुर्दश्योस्तु तथा नेति चेन्न "चतुर्थीं चैव षष्ठीं च अष्टमीञ्च चतुर्दशीम्। तथा पञ्चदशीञ्चैव ब्रह्मचारी भवेत्सदा। श्मश्रुकर्म्म शिरोऽभ्यङ्गं दन्तधावनमैथुनम्। जन्तुश्चैतानि यः कुर्य्याल्लक्ष्मीस्तत्र न तिष्ठति"। क्षौरे व्यासवचने चतुर्थीचतुर्दश्योः सर्वथा निषेधाभिधानात्। अतएवामुमर्थं स्फुटमाह पराशरः "क्षौराहान्नवमं त्यक्त्वा नेष्टमात्ययिकेष्वपीति" तथा सन्ध्यां प्रातः सन्ध्यां सायं सन्ध्याञ्च विहाय एवं रिक्ताम् विहाय पर्वाण्यपि निशां रात्रिमपि विहायेत्यर्थः अथाधिकारिणो निरूप्यन्ते हितप्रेप्सुभिः शुभोदर्कमिच्छद्भिरेतादृशैः क्षौरक्रिया हि निश्चयेन न कार्या। कीदृशैः आसनङ्कम्बलादिः तद्रहितैः रणः संग्रामः ग्रामो जनपदविशेषः प्रयाणमर्थयात्रा एतदर्थमुद्यतैः कृतोद्योगैः स्नातैरनुष्ठितनित्यनैमित्तिककाम्यस्नानैः यत्तु क्षौरार्थमेव स्नानं विधीयते प्रायश्चित्तादौ च तत्र नायं निषेधस्तथैव तस्य विधानात्। अभ्यक्तैः कृततैलाभ्यङ्गैः कृताशनैः कृतभोजनैः सुवर्णाद्यलङ्कारभूषितैरित्यपि ध्येयम्। यदाह वराहः "न स्नातमात्रगमनोत्कटभूषितानामभ्यक्तभुक्तरणकालनिराशनानम्। सन्ध्यानिशाशनिकुजार्कदिने च रिक्ते क्षौरं हितं न नवमेऽह्नि न चापि विष्ट्यामिति" उत्कटानां कुक्कुटासनवदवस्थितानाम्। सन्ध्यालक्षणमपि वराहेणोक्तम् "अर्धास्तमितादुदितात् सूर्यादस्पष्टभं नभो यावत्"। बृहद्गर्गः "शन्यारवारेषु रात्रौ पाते व्रतेऽहनि। श्राद्धाहे प्रतिपद्रिक्ताभद्रा क्षौरं विवर्जयेत्। पञ्चमापूर्णिमापातचतुर्दश्यष्टमी तथा। आसु सन्निहितं पापं तैले मांसे क्षुरे भगे इति"। पी० धा०

"क्रतुप्राणप्रांशुमतिबन्धमोक्षणे क्षुरकर्म्म च द्विज-

नृपाज्ञया चरेत् । शववाहतीर्थगमसिन्धुमज्जनं क्षुरमाचरेन्न खलु गर्भिणीपतिः" । मू० चि०

"अथ केषाञ्चिन्निमित्तविशेषे क्षौरस्य विधिनिषेधौ मञ्जुभाषिणीच्छन्दसाह । क्रतुपाणीति अत्र पूर्व्वार्द्धे यद्यपि निषिद्धवारादौ एषु कर्म्मसु क्षुरकर्म क्षौरं सद्यः कार्य्यमिति वाक्यार्थः क्रतुः क्रतौ यज्ञे विप्राज्ञया क्षौरम् । तथा पाणिपीडो विवाहो लक्षणया ततः प्राग्भाविनि गोदानकर्म्मणि केचित्तु विवाहे श्मश्रुकर्मशाखास्थपरं क्षौरमित्याहुः अतएव शाखाविशेषेण विवाहे क्षौरमुक्तमित्यूचुः । तथा च श्रुतिः "मुण्डयितारः श्रविष्ठाय नावधूमूढामित्यादि" । मृतौ मातापित्रोर्मरणे बन्धमोक्षणे कारागृहे बन्धस्य यदामोचनं भवेत्तदा द्विजाज्ञया राजाज्ञादावपीति बोध्यम नृपो राजा तस्याज्ञया चौरादेः क्षौरं कार्य्यमेव यदाह नारदः "नृपविप्राज्ञया यज्ञे मरणे बन्धमोक्षणे । उद्वाहेऽखिलवारर्क्षतिथिषु क्षौरमिष्टदमिति" । धर्म्मशास्त्रे "गङ्गायां भास्करक्षेत्रे मातापित्रोर्मृतेऽहनि । आधाने सोमपाने च षट्सु क्षौरं विधीयते" इति । अथ शवेति गर्भिणी गर्भवती तस्याः पतिर्भर्त्ता शववाहं मृतकवहनं तीर्थयात्रां उपलक्षणत्वाद्विदेशगमनमपि । सिन्धुमज्जनम् समुद्रस्नानं, क्षुरं क्षुरकर्म एतानि कर्म्माणि न आचरेत्न कुर्य्यात् । यदाह वशिष्ठः "मृतहनिर्माणमुदधिस्नानं चौलं सुतस्य तु । तीर्थयात्रां नखश्मश्रु न कुर्य्याद्गर्भिणीपतिः" । "सिन्धुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनम् । विदेशगमनञ्चैव न कुर्य्याद्गर्भिणीपतिः" धर्म्मशास्त्रे तु विशेषतः "राजा योगी पुरन्ध्री च मातापित्रोस्तु जीवतोः । मुण्डनं सर्वतीर्थेषु न कुर्य्याद्गर्भिणीपतिः" अयञ्च क्षौरादिनिषेधो गुर्विणीपतेः सप्तमासादूर्ध्वं न प्राक्, यदुक्तं नारदीये "वपनं तीर्थयात्राञ्च वर्जयेद्गुर्विणीपतिः । श्राद्धञ्च सप्तमान्मासादूर्ध्वं नान्यत्र वेदवित्" । श्राद्धं श्राद्धभोजनम् । इदमुत्तरार्द्धं गर्भाधानप्रकरणे वक्तव्यमपि प्रसङ्गादत्रैवोक्तं पव्यक्तेति" । पी० धा

"नृपाणां हितं क्षौरभे श्मश्रुकर्म दिने पञ्चमे पञ्चमेऽस्योदये वा । षडग्निस्त्रिनेत्रोऽष्टकः पञ्चपित्रोऽब्दतोऽब्धत्र्यर्यमा क्षौरकृन्मृत्युमेति" । मू० चि०

"अथ क्षौरे राज्ञां विशेषं सर्वथा वर्ज्यनक्षत्राणि च भुजङ्गप्रयातेनाह नृपाणां हितमिति क्षौरभे क्षौरनक्षत्रे विहिते सति पञ्चमे पञ्चमे एव दिने श्मश्रुकर्म मुखशोभाकारि क्षुरकर्म नृपाणां राज्ञां हितं प्रशस्तं यदाह वशिष्ठः "महीभृतां पञ्चमे पञ्चमेऽह्नि क्षौरं च कार्य्यं हितमुक्तभेषु" ननु पञ्चमे इति वीप्सोक्त्या नियमप्रतीतेर्विहितनक्षत्राभावे च सति श्मश्रुकर्म कार्य्यमिति उक्तं च वसिष्ठेन "न लभ्यते चेच्च तदुक्तधिष्ण्यं तल्लोदये वा निखिलं विधेयमिति" उदयशब्देन मुहूर्त्त इति व्याख्याकुर्वते तदाह गर्गः "क्षौरकर्म महीशानां पञ्चमे पञ्चमेऽहनि । कर्त्तव्यं क्षौरनक्षत्रेऽप्यथवा तन्मुहूर्त्तके, इति तेषां क्षौरनक्षत्राणां ये स्वामिनस्तेषां मुहूर्त्ते इत्यर्थः । तांश्च मुहूर्त्तान् विवाहप्रकरणे वक्ष्यति । अत्र क्षौरपदं श्मश्रुकर्मपरम् । "राजा योगी पुरन्ध्री च मातापित्रोस्तु जीवतोः । मुण्डनं सर्वतीर्थेषु न कुर्य्याद्गर्भिणीपतिरिति" राज्ञो मुण्डननिषेधात् । अतएवोक्तं श्रीपतिना "श्मश्रुकर्म पञ्चमे च पञ्चमेऽह्नि च भूभृताम् । क्षौरभस्योदये वाऽपि स्यान्निन्द्यतारका न चेत्" इति । निन्द्यतारका जन्मविपदादितारका । अन्ये त्वेवं व्याचक्षते अस्योदये वेति अस्य क्षौरभस्योदये लग्ने । यथा मेषलग्नं त्रिंशद्भागात्मकं तत्राद्यास्त्रयोदशभागा १३,२० सविंशतिलिप्ता यावता कालेन मेषलग्ने उदयं यान्ति तावदश्विनीनक्षत्रमुदयं यातीत्यर्थः । तदनन्तरं तावन्त एवांशा यावता कालेनोदयं यान्ति तावद्भरण्युदय इत्यनेन न्यायेन सर्वेषां नक्षत्राणामुदया ज्ञेयाः । इयं च व्याख्या वराहपद्यव्याख्यावसरे भट्टोत्पलेनाभ्यधायि । पितृचरणास्त्वेवं व्याकुर्वते । यस्मिन्काले अश्विन्या उदयःक्षितिजसंबन्धः संपद्यते तं समयमारभ्य यावद्भरण्या उदयःक्षितिजसंबन्धस्तदन्तराले यावान्कालः सोऽश्विन्या उदय उच्यते । एवं सत्युदयन्नद्वयांशान्तरालाङ्गणितमार्गेण यावानिष्टकाल आगच्छेत्स एव तत्तन्नक्षत्रोदय इति निष्कृष्टार्थ इति । नक्षत्रस्योपलक्षणत्वाच्छुभवाराद्यभावेऽपि तद्धोरायां कार्यम् उक्तञ्च नारदेन "यस्य खेटस्य यत्कर्म वारे प्रोक्तं विधीयते । ग्रहस्य क्षणवारेऽपि तस्य तत्कर्म सर्वदेति" । क्षणवारः कालहोरा । एवं सति निषिद्धनक्षत्रवारेष्वपि प्रथमश्मश्रुकर्म कार्यमिति युक्तमुत्पश्यामः । षडग्निरिति । अग्निः कृत्तिका क्षौरादुत्थ्वा षड्वारं कृत्तिका यस्य । एवं त्रीणि मैत्राण्यनुराधायस्य अष्टौ का रोहिण्योयस्य । पञ्च पित्र्याणि मघायस्य । अब्धयश्चत्वारोऽर्यमाण उत्तराफाल्गुन्यो यस्य सप्ततादृशः क्षौरकृत् अब्दतः वर्षान्तरं मृत्युं

मरणमेति प्राप्नोति यदाह वसिष्ठः “अष्टाजकस्य पितृपञ्चकस्य षड्वह्निधिष्ण्यस्य चतुर्यमर्क्षः। त्रिमैत्रभः पद्मजसंनिभोऽपि क्षौरी नरोऽब्दान्निधनं गतः सः” इति। पद्मजो ब्रह्मा तत्सन्निभस्ताडृशस्तदुपादानं कैमुतिकन्यायसूचनार्थम् ननु रत्नमालापद्ये “षट्कृत्तिकः पञ्चमघस्त्रिमैत्रो ब्रह्माष्टकोयश्चतुरुत्तरश्च। क्षौरी स वर्षं चतुराननोऽपि न प्राप्नोतीति प्रचुरः प्रवादः” इत्येवं सामान्यतः तिसृणामप्युत्तराणां ग्रहणाद्विरोधः इति चेत् नैवं अत्राप्युत्तरापदेन प्रथमोपस्थितिकत्वाद्वसिष्ठवाक्येन चैकवाक्यतानुरोधाच्चोत्तराफाल्गुन्येव गृह्यते नाषाढभाद्रपदे। यत्र तु वचनान्तरविरोधो नास्ति पौष्णमारुतमघोत्तरान्वितैरित्यादौ तत्र सामान्यतः सर्वासामुत्तराणां ग्रहणं भवति” पी॰ धा॰

“प्राचीमुखः सौम्यमुखोऽपि भूत्वा कुर्य्यान्नरः क्षौरमनुत्कटस्थः। उत्तरात्रितयपाम्यरोहिणीरौद्रसार्पपितृभेषु चाग्निभे। श्मश्रुकर्म्म सकलं विवर्जयेत् प्रेतकार्य्यमपि बुद्धिमान्नरः” ज्यो॰ त॰

क्षुरधान न॰ क्षुरोधीयतेऽत्र धा–आधारे–ल्युट्। (भाँड) इति ख्याते नापितास्त्रस्थापने पात्रभेदे “आनखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः” शत॰ ब्रा॰ १४,४,२,१६ [पर्य्युक्तं २शरवणादौ त्रि॰ राजनि॰

क्षुरपत्र पु॰ क्षुर इव पत्रमस्य। क्षुरधारे बाणे, क्षुरतुल्य–

क्षुरपत्रिका स्त्री क्षुर इव पत्रं यस्याः कप् अतइत्वम्। पालङ्कशाके राजनि॰

क्षुरपवि त्रि॰ क्षुरतुल्या पविर्धाराऽस्य। तीक्ष्णाग्रभागे “ते ह स्म क्षुरपवी निमेषम्” शत॰ २,६,२,९ “क्षुरपवी क्षुरधारे” भाष्यम् निरुक्ते ५,५ पविशब्दस्य पूतार्थकत्वमाह” “पवीरथनेमिर्भवति यद्विपुनाति भूमिम्। “तं मरुतः क्षुरपविना व्ययुः”

क्षु(खु)रप्र पु॰ क्षरः (खुरः) इव प्रणाति छिनत्ति प्रृ–क। (खुरपी) इति ख्याते १घासच्छेदनास्त्रे, तत्तुल्याग्रफलके २शरभेदे च हेमच॰

क्षुरभाण्ड न॰ ६त॰। (भाँड़)ख्याते नापितास्त्रस्थापने पात्रभेदे “शीघ्रमानीयतां क्षुरभाण्डं क्षौरकर्मकरणाय गच्छामि” पञ्चत॰ [हेमच॰

क्षुरमर्द्दिन् पु॰ क्षुरं मृद्नाति घर्षयति मृद-णिनि। नापिते

क्षुरमुण्डिन् पु॰ क्षुरेण मुण्डयति मुण्ड-णिनि ३त॰। नापिते। शब्दचि

क्षुराङ्ग पु॰ क्षुर इवाङ्गमस्य। गोक्षुरे (गोक्षुरो)। राजनि॰

क्षुरिका स्त्री क्षुद्रः क्षुरः ङीप् स्वार्थे क। १छुरिकायां (पालङ्क) २शाकभेदे राजनि॰

क्षुरिकापत्र पु॰ क्षुरिका छुरिकेव पत्रमस्य। शरे राजनि॰

क्षुरिणी स्त्री॰ क्षुर + अस्त्यर्थे इनि ङीप्। १वराहक्रान्तायाम् २नापितभार्य्यायाञ्च शब्दच॰

क्षुरिन् पु॰ क्षुर + इनि। १नापिते, २पशौ च।

क्षुरी स्त्री स्वल्पः क्षुरः ङीप्। छुरिकायाम् हेम॰

क्षु(खु)ल्ल त्रि॰ क्षुत्(खुद) इक्विप् क्षुद्(खुद्) तां लाति ला-क। १अल्पे, २लघौ, ३कनिष्ठे च हेम॰ स्वार्थे क। तत्रार्थे

क्षुल्लक त्रि॰ क्षुधा लक्यते लक-आस्वादने घञर्थे क। १नीचे, २अल्पे च भरतः। २पामरे, हेमच॰ ४क्षुद्रशङ्खे राजनि॰

क्षुल्लतात पु॰ नित्यकर्म्म॰। पितृकनिष्ठभ्रातरि जटाध॰। एवं क्षुल्लपितामहादयोऽपि पितामहादिकनिष्ठभ्रातरि

क्षेत्र न॰ क्षि-ष्ट्रन्। १शस्याद्युत्पत्तिस्थाने केदारे (क्षेत) अमरः शस्यभेदेन तस्य नामभेदा शब्दरत्ना॰ उक्ता यथा “व्रीहिभवोचितं क्षेत्रं व्रैहेयं तत् समीरितम्। शाल्युद्भवोचितं यत्तु शालेयमभिधीयते। यव्यं यवोचितं क्षेत्रं यवक्यं यवकोचितम्। षष्टिकोद्भवनं यत्तु षष्टिक्यं तत् प्रकीर्त्तितम्। तिलोद्भवोचितं यत्तु तिल्यं तैलीनमित्यपि। एवं माषन्तु माषीणं कौद्रव्यं कौद्रवीणवत्। तथा भङ्गाया भाङ्गीनमुम्यमौमीनमित्यपि। अथ मौद्गञ्च मौद्गीनमणव्यमाणवीनवत्। मावकोद्रवभङ्गोमासुद्गाणुप्रभवोचितम्। बीजाकृतमुप्तकृष्टमुत नीतिसमाह्वये। सीत्यं कृष्टञ्च हल्यञ्च तृतीयाकृतमित्यपि। त्रिगुणाकृतमित्येवं त्रिवारकृष्टभूमिषु। शम्बाकृतं द्विहल्यञ्च द्विसीत्यं द्विगुणाकृतम्। द्वितीयाकृतमप्यत्र द्विवारकृष्टभूमिषु। द्रोणाढकर्कखार्य्यादिर्वापादौ द्रौणिकस्तथा। स्यादाढकिकखारीकौ उत्तमर्णादयस्त्रिषु। आदिभ्यां प्रास्थिकादिश्च पाकादौ द्रौणिकोऽपि च

२देहे ३अन्तःकरणे ४कलत्रे, ५सिद्धस्थाने च मेदि॰। सिद्धस्थानानि काशीक्षेत्रादीनि तानि भारतादौ प्रसिद्धानि कतिचित् संक्षिप्य प्रदर्श्यन्ते

तत्र वाराणसीक्षेत्रं यथा “आसन्नं युवयोः क्षेत्रमिदं वाराणसी तु यत्। कथितं नातिदूरे च वर्त्तते नरसत्तमौ”। कामरूपक्षेत्रं यथा। “नाचिरात् कामदं पुण्यं क्षेत्रं पीठं निगद्यते। चिरात्तु कामदो देवो नचिराद्यत्र मानदः। तत् क्षेत्रमिति लोके सङ्गद्यते

पूर्व्वसूरिभिः। कामरूपं महापीठं गुह्याद्गुह्यतमं परम्” कालिकापु० ५० अ०। गङ्गाक्षेत्रं स्कान्दे “तीराद्गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते”। नारायणक्षेत्रं यथा “प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम्। तत्र नारायणःस्वामी गङ्गागर्भान्तरे वरे। तत्र नारायणक्षेत्रे कुरुक्षेत्रे हरेः पदे। एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः। स च तीर्थप्रतिग्राही कुम्भीपाकं प्रयाति च” ब्रह्मवै० पु० प्र० ख० २७ अ०। भास्करक्षेत्रम् “गङ्गायां भास्करक्षेत्रे मातापित्रोर्म्मृते गुरौ। आधाने सोमपाने च वपनं सप्तसु स्मृतम्। इतिस्मृतिसमुच्चयलिखितवचनम्। “भास्करक्षेत्रं प्रयागः” इति प्रायश्चित्ततत्त्वम्। गयाक्षेत्रं यथा “पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः” इति वायुपुराणम्। पुरुषोत्तमक्षेत्रम्। “मुनय ऊचुः। पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम्”। “जैमिनिरुवाच। एतत्क्षेत्रवरं स्वाप्य वपुर्भूतं महात्मनः। स्वयं वपुष्मान् यत्रास्ते स्वनाम्ना ख्यापितं हि तत्” उत्कलखण्डम्। विष्णुक्षेत्राणि यथा “श्रीभगवानुवाच। शृणुष्वावहितो ब्रह्मन्! गुह्यनामानि मेऽधुना। क्षेत्राणि चैव गुह्यानि तव वक्ष्यामि यत्नतः। कोकामुखे वराहञ्च मन्दरे मधुसूदनम्। अनन्तं कपिलद्वीपे प्रभासे रविनन्दनम्। माल्योदये तु वैकुण्ठं महेन्द्रे तु नृपात्मजम्। ऋषभे तु महाविष्णुं द्वारकायान्तु भूपतिम्। पाण्डुसह्ये तु देवेशं वसुरूढे जगत्पतिम्। वल्लीवटे महायोगं चित्रकूटे नराधिपम्। नैमिषे पीतवासञ्च गवां निष्क्रमणे हरिम्। शालग्रामे तपोवासम् अचिन्त्यं गन्धमादने। कुब्जाम्रके हृषीकेशं गङ्गाद्वारे गदाधरम्। गरुडध्वजं तोमके च गोविन्दं नामसाह्वये। वृन्दावने तु गोपालं मथुरायां स्वयम्भुवम्। केदारे माधवं विद्यात् वाराणस्यान्तु केशवम्। पुष्करे पुष्कराक्षन्तु दृषद्वत्यां जयध्वजम्। तृणबिन्दुवने वीरमशोकं सिन्धुसागरे। कसे वटे महाबाहुममृतं तेजसो वने। विशाखयूप्ये विश्वेशं नारसिंहं वने वने। लोहकूले रिपुहरं देवशाले त्रिविक्रमम्। पुरुषोत्तमं दशपुरे कुब्जके वामनं विदुः। विद्याधरं वितस्तायां वाराहे धरणीधरम्। देवदारुवने गुह्यं कावेर्य्यां नागशायिनम्। प्रयागे योगमूर्त्तिञ्च पयोष्ण्यां सुन्दरं विदुः। कुमारतीर्थे कौमारं लौहित्ये हयग्रीवकम्। त्रिविक्रममुज्जयिन्यां लिङ्गस्फोटे चतुर्भुजम्। हरिहरं तुङ्गभद्रायां दृष्ट्वा पापात् प्रमुच्यते। विश्वरूपं कुरुक्षेत्रे मणिकुण्डे हलायुधम्। लोकनाथमयोध्यायां कुण्डिने रुक्मिणीपतिम्। मथुरे वासुदेवञ्च चक्रतीर्थे सुदर्शनम्। आद्यं विष्णुपदे विद्यात् शूकरे शूकरम् विदुः। कुशेशं मानसे तीर्थे दण्डके श्यामलं विदुः। त्रिकूटे नागमोक्षञ्च मेरुपृष्ठे च भास्करम्। विरजं पुष्पवत्याञ्च बालं चामीकरे विदुः। यशस्करं विपाशायां माहिष्मत्यां हुताशनम्। क्षीराब्धौ पद्मनाभञ्च विमले तु सनातनम्। शिवनद्यां शिवकरं गयायाञ्च गदाधरम्। सर्व्वत्र परमात्मानं यः पश्यति स मुच्यते। अष्टषष्टिस्तु नामानि कीर्त्तितानि मया तव। क्षेत्राणि चैव गुह्यानि कथितानि विशेषतः। द्रष्टव्यानि यथाशक्त्या क्षेत्राण्येतानि मानवैः। वैष्णवैस्तु विशेषेण तेषां मुक्तिं ददाम्यहम्” नारसिं० पु० ६२ अ०। ६ मेषादिद्वादशराशिषु। “राशिनामानि च क्षेत्रं भवनं गृहनाम च। मेषादीनाञ्च पर्य्यायं लोकादेव विचिन्तयेत्”। ग्रहाणां क्षेत्राणि ज्यो० त० च कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम्। जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः” ज्योति० त०। “इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः। इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत्क्षेत्रं समासेन सविकारमुदाहृतम्” गीतोक्तेषु ७पदार्थेषु क्षेत्राकारे दलीलावत्यादिप्रसिद्धे त्रिकोणचतुष्कोणादिके पदार्थे तादृशक्षेत्रभेदाश्च रेखाभेदसाध्या अतोरेखाभेदसंज्ञा निरूप्यते तत्रास्मद्गुरुचरणैः क्षेत्रतत्त्वदीपिकायामित्थमभ्यधायि यथा

१ यः पदार्थो लक्षयितुं शक्यः परिमाणस्थूलत्वदैर्घ्यविस्तारहितः स बिन्दुः। [(बिन्दुसमुदायो रेखा)

२ यः पदार्थो दीर्घो विस्तारस्थूलत्वाभ्यां रहितः स रेखा

३ यः पदार्थो विस्तारदैर्घ्ययुक्तः स्थूलत्वरहितः स धरातलम्

४ यः पदार्थो विस्तारदैर्घ्यस्थौल्ययुक्तः सः स्थूलपदार्थः।

५ रेखा च त्रिविधा सरला वक्रा मिश्रिता च।

६ तत्र या रेखा एकदिग्गमनेनैव चिह्नद्वयान्तराले तिष्ठति एवं ययोश्चिह्नयोरन्तराले कृतास्वनेकरेखास्वतिशयेनाल्पतमा सा सरला। यत्र रेखापदं तत्र सरलैव ग्राह्या।

७ या रेखा वर्त्तनेन प्रतिचिह्नं दिगन्तरं गच्छति सा वक्रा। (उभयलक्षणान्विता मिश्रिता)

८ रेखा च समानान्तरा विषमान्तरा लम्बः सम्पातरेखा च।

९ ययोः रेखयोरन्तरं समानम् एवं वर्त्तनेन तयोर्यः

कदापि न भवितुमर्हति सा समानान्तरा रेखा भवति ।

१० ययोरन्तरं विषमम् एवं यद्यग्रस्थान्तरं तर्ह्यपि वर्द्धने नोत्तरोत्तरमल्पान्तरं यावद्रेखायोगस्तदनन्तरमुत्तरोत्तरमल्पान्तरं विवर्द्धते योगश्च कदापि भवितुं न शक्नोति सा विषमान्तरा ।

११ एकरेखायामन्यरेखासंयोगादुत्पन्नौ कोणौ यदि समानौ भवतस्तदा ते रेखे मिथोलम्बरूपे भवतः ।

१२ या रेखा वृत्तपालिमिलिता सती पालिखण्डं न करोति सा सम्पातरेखा भवति । यद्वृत्तं वृत्तसम्पातेन खण्डितं न भवति स वृत्तसम्पातः ।

१३ एकचिह्नान्निःसृते द्वे रेखे यदि सम्मुखेतरभिन्नदिग्गते भवत स्तदा तच्चिह्ने कोणोभवति ।

१४ कोणस्त्रिविधः समकोणोऽल्पकोणोऽधिककोणश्च ।

१५ तत्र समानरेखायां लम्बयोगादुत्पन्नः कोणः समकोणः

१६ समातिरिक्तोविषमकोणोभवति ।

१७ समकोणान्न्यूनोऽल्पकोणोभवति ।

१८ समकोणादधिकोऽधिककोणो भवति ।

१९ धरातलं द्विविधं समं वर्त्तुलं च ।

२० तत्र यस्मिन्धरातले सरला रेखा सर्वतो भावेन संलग्ना भवति यद्वा यत्र कुत्रापि चिह्नद्वये लग्ना सरला रेखा सर्वतः स्पृशति तद्धरातलं समं ज्ञेयम् । समातिरिक्तं विषममिति ।

२१ सरलरेखाभिः कुटिलरेखाभिर्वा निबद्धसीमं धरातलं समधरातलक्षेत्रं भवति । यत्र क्षेत्रमध्यस्तत्र समधरातलक्षेत्रं ज्ञेयम् ।

२२ सरलरेखानिबद्धसीमं धरातलकं क्षेत्रं भुजैः कोणैर्वाऽभिधेयं भवति किन्तु यावन्तोभुजास्तावन्त एव कोणाः भवति । [णैर्वाऽनेकविधं भवति ।

२३ त्रिभिर्भुजैर्निबद्धसीमं धरातलं त्रिभुजक्षेत्रं भुजैः को-

२४ यस्य त्रयोबाहवः समानास्तत्समत्रिभुजं भवति ।

२५ यस्य द्वौ बाहू समानौ तत्समद्विभुजं ज्ञेयम् ।

२६ यस्य त्रयोबाहवोविषमास्तद्विषमत्रिभुजं भवति ।

२७ यस्यैकः समकोणस्तत्समकोणत्रिभुजं ज्ञेयम् ।

२८ समातिरिक्तकोणं विषमत्रिभुजं भवति ।

२९ यस्यैकोऽधिककोणस्तदधिककोणत्रिभुजं भवति ।

३० यस्य त्रयोऽपि न्यूनकोणास्तन्न्यूनकोणत्रिभुजं ज्ञातव्यम् ।

३१ चतुर्भुजैर्निबद्धसीमं धरातलं चतुर्भुजक्षेत्रं भवति ।

३२ यस्य चतुर्भुजस्य परस्परं सम्मुखौ भुजौ समान्तरौ भवतस्तत्समानान्तरभुजं चतुर्भुजं क्षेत्रं भवति । तद्व्यमाणाभिधानं चतुर्विधं तद्यथा ।

३३ यस्य चतुर्भुजस्य परस्परसम्मुखौ भुजौ समानौ एकमेकः समकोणश्च भवति तच्चतुर्भुजं समकोणायतं भवति।

३४ यस्य चत्वारोभुजा मिथःसमानाः कोणाश्च समास्तच्चतुर्भुजं समकोणसमचतुर्भुजं वर्गक्षेत्रं वा भवति ।

३५ यस्य परस्परं सम्मुखरेखाद्वयं समानं समानान्तरं च भवति । कोणाश्च विषमास्तच्चतुर्भुजं विषमकोणायतम्

३६ यस्य चत्वारोबाहवः समानाः समानान्तराश्च भवन्ति कोणाश्च विषमास्तद्विषमकोणसमचतुर्भुजं भवति ।

३७ यस्य च परस्परं सम्मुखौ भुजौ विषमान्तरौ तच्चतुर्भुजं विषमचतुर्भुजं भवति ।

३८ यस्य भुजद्वयं समानान्तरं तत्समानान्तरविषमचतुर्भुजम्

३९ चतुर्भुजस्यैकान्तरकोणसंलग्ना रेखा कर्णो भवति ॥

४० चतुर्भुजादधिकभुजैर्निबद्धं धरातलं सामान्यतोबहुभुजं क्षेत्रं तद्बहुविधं भुजानुसारेण कोणानुसारेण वा तेषां नामानि

४१ यथा पञ्चभुजं षड्भुजं सप्तभुजमष्टभुजं नवभुजं दशभुजमेकादशभुजं द्वादशभुजमित्यादीनि ॥

४२ तत्र बहुभुजक्षेत्रं यदि समभुजं भवति तस्य कोणा समानाभवन्ति तदा तत्क्षेत्रं समपञ्चभुजमित्याभिधानकं भवति तदितरत् विषमपञ्चभुजमित्यादि ।

४३ एवमेव समत्रिभुजे कोणाः समानाभवन्त्येवेति नियमः तत्त्रिभुजं समानकोणसमत्रिभुज भवति । यस्य चत्वारो भुजाः समानाः सन्ति तत्समचतुर्भुजं क्षेत्रं भवति ।

४४ यस्य क्षेत्रस्य भुजाः समानाभवन्ति तत् क्षेत्रं समभुजं यस्य कोणाः समानास्तत्समानकोणं क्षेत्रं यस्य भुजाः कोणाश्च समानाभवन्ति तत्क्षेत्रं समकोणसमभुजं भवति

४५ कुटिलरेखया निबद्धसीमं धरातलं वृत्तक्षेत्रं भवति सा रेखा परिधिसंज्ञिका पालिसंज्ञिका वा भवति तस्या मध्यविन्दुः केन्द्रसंज्ञकोभवति ॥

४६ केन्द्रान्निःसृता वृत्तपालिसंलग्ना रेखा व्यासार्द्धं भवति ।

४७ या रेखा उभयतः पालिसंलग्ना केन्द्रगा च भवति सा व्याससंज्ञिका भवति ॥

४८ परिधिखण्डश्चापसंज्ञकोभवति ॥

४९ चापोभयप्रान्तगा रेखा चापकर्णसंज्ञिका ज्यासंज्ञिका च

५० जीवाचापाभ्यां निबद्धधरातलकं क्षेत्रं धनुःक्षेत्रं चापक्षेत्रं वा भवति ॥

५१ यस्य चापस्य व्यासरेखा जीवा भवति तत् अर्द्धवृत्तम् ।

५२ केन्द्राद्बहिःस्थिते द्वे रेखे चापोभयप्रान्तसंलग्ने यदि भवतस्तदा तत्क्षेत्रं वृत्तांशसंज्ञकं वृत्तखण्डकं च भवति ॥

५३ यस्य चापः परिधिपादमितः केन्द्राद्बहिःस्थिताभ्यां रेखाभ्यां समकोणश्च भवति तद्वृत्तपादक्षेत्रं भवति ॥

५४ क्षेत्रस्योर्द्ध्वकोणादाधाररेखायां पतितलम्बमितमौच्च्यम्

५५ समकोणत्रिभुजे समकोणसम्मुखभुजः कर्णोऽभवत्यन्यौ पादौ भवतः किं वैक आधारोऽन्योलम्बः ॥

५६ अत्र कोणोपलब्धिः कल्पितत्रिभिर्वर्णैर्भवति किन्तु सदैव कोणसंलग्नोवर्णोमध्यउच्चारणीयः ॥

५७ परिधेः षष्ट्यधिकशतत्रयांशोऽंशसंज्ञकोभवति । अंशस्य षष्ट्यंशः कला । कलायाः षष्ट्यंशोविकला । विकलायाः षष्ट्यंशः प्रतिविकलेत्यादि ।

५८ कोणस्य परिमितिः कोणचिह्नकृतकेन्द्रात् कृते वृत्ते तत्कोणाकारकरेखयोरन्तरालचापगतांशतुल्या भवति स कोणस्तद्वृत्तस्य केन्द्रं भवति ॥

५९ तेषां चापानां केन्द्राद्दूरत्वं समानं भवति येषु केन्द्राद्बहिःस्थितोलम्बः समोभवति ॥

६० येषु दीर्घोलम्बः पतति तेषां दूरत्वं दीर्घं भवति ॥

६१ चापगतैकचिह्नाद्बहिःस्थिते द्वे रेखे तदन्यचापोभयप्रान्तमिलिते तदुद्भूतः कोणश्चापान्तर्गतकोणोभवति ॥

६२ अनन्तरोक्तकोणादपरदिग्भवः कोणस्तत्कोणसम्बे चापोपरिस्थः कोणोभवति किन्तु द्वयोः कोणयोः स्वरूपं समानं तयोः प्रथमोऽन्तर्गतोद्वितीयउपरिस्थइत्येष भेदः

६३ यत्कोणचिह्नं परिधिगतं भवति स प्रान्तिकोणोभवति यस्य तच्चिह्नं केन्द्रगतं स्यात् कोणः केन्द्रकोणोभवति ॥

६४ सरलरेखाकृतक्षेत्रस्य सर्व्वे कोणा यदि वृत्तमध्ये परिधिसंलग्नाभवन्ति तदा तत्क्षेत्रं वृत्तान्तर्गतं क्षेत्रोपरिगतवृत्तं वा भवति ॥

६५ यदि सरलरेखाकृतक्षेत्रस्य मध्ये सर्व्वभुजसंलग्नः परिधिस्तदा तद्वृत्तं क्षेत्रान्तर्गतं वृत्तोपरिगतक्षेत्रं वा,

६६ सरलरेखाकृतक्षेत्रस्य सर्व्वभुजसंलग्नायदि तद्बहिःस्थान्यक्षेत्रस्य सर्व्वे कोणाभवन्ति तदा तत्क्षेत्रं क्षेत्रान्तर्गतं क्षेत्रोपरिगतक्षेत्रं वा भवति ॥

६७ यद्रेखायाएकांशोवृत्तान्तर्गतोद्वितीयोबहिर्गतः स्यात् रेखा वृत्तखण्डिनी भवति ।

६८ ययोर्द्वयोस्त्रिभुजयोर्येषां सरलरेखाकृतक्षेत्राणां वा प्रतिदिग्भुजैः प्रतिदिग्भुजाः समानाः सन्ति तानि परस्परं समभुजानि भवन्ति ययोर्येषां वा प्रतिदिक्कोणैः प्रतिदिक्कोणाः समानास्तानि क्षेत्राणि परस्परं समानकोणानि भवन्ति ॥

६९ उभयोः क्षेत्रयोः परस्परं भुजाः कोणाश्च परस्परं भुजैः कोणैश्च समानाभवन्ति किं वैकस्य क्षेत्रस्य सर्व्वे भुजाः कोणाश्च द्वितीयक्षेत्रस्य सर्व्वैर्भुजैः कोणैश्च परस्परं समानाः यथा एकक्षेत्रोपरि द्वितीयक्षेत्रं स्थाप्यते तदा सर्व्वे भुजाः कोणाश्च सर्वभुजोपरि कोणोपरि च समानरूपेण पतिताः स्युः यथा द्वयोरेकरूपं स्यादीदृक्क्षेत्राण्येकरूपाणि भवन्ति ॥

७० येषां क्षेत्राणां प्रतिदिक्कोणाः समानाएवं प्रतिदिग्भुजा एकनिष्पत्तियुताभवन्ति तानि क्षेत्राणि सजातीयानि

७१ क्षेत्रस्याखिलभुजयोगः सीमासूत्रमित्युच्यते ॥

एवं रेखानिष्पन्नक्षेत्राणां भुजकोट्यादिमानफलस्थानादौ लीलावत्युक्तः क्षेत्रव्यवहारोऽत्र दर्श्यते यथा

"भुजकोटिकर्णानामन्यतमाभ्यामन्यतमानयनाय करणसूत्रं वृत्तद्वयम् । इष्टो बाहुर्यः स्यात्तत्स्पर्द्धिन्यां दिशीतरोबाहुः । त्र्यस्रे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः । तत्कृत्योर्योगपदं कर्णो,दोःकर्णवर्गयोर्विवरात् । मूलं कोटिः, कोटिश्रुतिकृत्योरन्तरात्पदं बाहुः ॥ उदाहरणम् । कोटिश्चतुष्टयं यत्र दोस्त्रयं तत्र का श्रुतिः । कोटिन्दोःकर्णतः, कोटिश्रुतिभ्याञ्च भुजं वद ।

न्यासः



कोटिः ।४। भुजः ।३। भुजवर्गः ९ । कोटिवर्गः । १६। एतयोर्योगात् ।२५।मूलम्।५। कर्णोजातः ॥

॥अथ कर्णभुजाभ्यां कोट्यानयनम् ॥

न्यासः

कर्णः ।५। भुजः ।३।अनयोर्वर्गान्तरम् ।१६। एतन्मूलं ।४। कोटिः

॥अथ कोटिकर्णाभ्यां भुजानयनम् ॥

न्यासः



कोटिः ।४। कर्णः ।५। अनयोर्वर्गान्तरम् ।९। एतन्मूलं। ३। भुजः "प्रकारान्तरेण तज्ज्ञानाय करणसूत्रं सार्द्धवृत्तम् ।

राश्योरन्तरवर्गेण द्विघ्ने घाते युते तयोः। वर्गयोगो भवेदेवं तयोर्योगान्तराहतिः। वर्गान्तरं भवेदेवं ज्ञेयं सर्वत्र धीमता ॥

कोटिश्चतुष्टयमिति पूर्वोक्तोदाहरणे।

न्यासः



कोटिः। ४ । भुजः । ३। अनयोर्घाते ।१२। द्विघ्ने ।२४। अन्तरवर्गेण ।१। युते वर्गयोगः ।२५। अस्य मूलं कर्णः ।५।

अथ कर्णभुजाभ्यां कोट्यानयनम् ।

न्यासः

कर्णः ।५। भुजः ।३। अनयोर्योगः ।८। पुनरेतयोरन्तरेणा।२। ऽऽहतोवर्गान्तरम् । १६ । अस्य मूलं कोटिः । ४ ।

अथ कर्णकोटिभ्यां भुजायनम् ।

न्यासः



कोटिः ।४। कर्णः ।५। (उक्तरीत्या) जातोभुजः । ३ ।

"उदाहरणम् । सार्द्धत्रयमितोबाहुर्यत्र कोटिश्च तादृशी। तत्र कर्णप्रमाणं किं गणक ! ब्रूहि मे द्रुतम् ॥

न्यासः



भुजः १३/४ कोटिः१३/४ अनयोर्वर्गयोर्योगः१६९/८ अस्य मूलाभावात्करणीगतएवायं कर्णः

अस्यासन्नमूलज्ञानार्थमुपायः वर्गेण महतेष्टेन हताच्छेदांशयोर्बधात्। पदं गुणपदक्षुण्णच्छिद्भक्तं निकटं भवेत् ॥

अयं कर्णवर्गः१६९/८अस्य छेदांशघातः१३५२अयुतघ्नः १३५२०००० अस्यासन्नमूलम् ३६७७ इदं गुणमूल १०० गुणितच्छेदेन ८०० भक्तं लब्धमासन्नपदं ४ भागाः ४७७/८०० अयं कर्णः। एवं सर्वत्र।

"त्र्यस्रजात्ये करणसूत्रं वृत्तद्वयम्। इष्टोभुजोऽस्माद्द्विगुणेष्टनिघ्नादिष्टस्य कृत्यैकवियुक्तयाप्तम्। कोटिः पृथक् सेष्टगुणा भुजोना कर्णोभवेत्त्र्यस्रमिदन्तु जात्यम् ॥ इष्टोभुजस्तत्कृतिरिष्टभक्ता द्विःस्थापितेष्टोनयुतार्द्धिता वा। तौ कोटिकर्णाविति कोटितोवा बाहुश्रुती वाऽकरणीगते स्तः।

उदाहरणम्। भुजे द्वादशके यौ यौ कोटिकर्णावनेकधा। प्रकाराभ्यां वद क्षिप्रं तौ तावकरणीगतौ।

न्यासः



भुजः। १२ । इष्टम् । २ । अनेन द्विगुणेन । ४ । गुणितोभुजः ।४८। इष्ट । २ ।कृत्या । ४ । एकोनया । ३ । भक्तोलब्धा । १६ । कोटिः इयमिष्टगुणा। ३२ ।भुजो। १२ । ना जातः कर्णः । २० ।

त्रिकेणेष्टेन वा।



कोटिः । ९ । कर्णः ।१५।

(उक्तरीत्यायातः)

पञ्चकेनेष्टेन वा



कोटिः । ५ । कर्णः । १३ । (उक्तरीत्यायातः)

अथ द्वितीयप्रकारेण ।

न्यासः



भुजः । १२ । अस्य कृतिः । १४४ । इष्टेन ।२। भक्ता लब्धम् । ७२ । इष्टेन । २ । ऊन । ७० । युतौ । ७४ । अर्द्धितौ जातौ कोटिकर्णौ । ३५ । ३७ ।

चतुष्टयेन वा ।



कोटिः । १६ । कर्णः । २० ।

(उक्तरीत्यायातः)

षट्केन वा ।



कोटिः । ९ । कर्णः । १५ ।

(उक्तरीत्यायातः)

अथेष्टकर्णात्कोटिभुजानयने करणसूत्रं वृत्तम् । इष्टेन निघ्नाद्द्विगुणाच्च कर्णादिष्टस्य कृत्यैकयुजा यदाप्तम् । कोटिर्भवेत् सा पृथगिष्टनिघ्नी तत्कर्णयोरन्तरमत्र बाहुः ॥
"उदाहरणम् । पञ्चाशीतिमिते कर्णे यौ यावकरणीगतौ । स्यातां कोटिभुजौ तौ तौ वद कोविद । सत्वरः

न्यासः



कर्णः । ८५ । अयं द्विगुणः ।१७०। द्विकेनेष्टेन हतः । ३४० । इष्ट० । २ । कृत्या । ४ ।सैकया । ५ । भक्तो जाता कोटिः । ६८ । इयमिष्ट२गुणा । १२६ । कर्णौ । ८५ । निता जातोभुजः ॥५१॥

चतुष्केणेष्टेन वा ।



कोटिः । ४० । भुजः । ७५ ।

(उक्त रीत्यायातः)

प्रकारान्तरेण तत्करणसूत्रं वृत्तम् । इष्टवर्गेण सैकेन द्विघ्नः कर्णोऽथ वा हृतः । फलोनः श्रवणः कोटिः फलमिष्टगुणं भुजः ॥
पूर्वोदाहरणे । न्यासः



कर्णः । ८५ । अत्र द्विकेनेष्टेन जातौ किल कोटिभुजौ । ५१ । ६८ ।

चतुष्केण वा ।



कोटिः । ७५ । भुजः ।४०। अत्र दोःकोट्योर्नामभेद एव केवलं न स्वरूपभेदः ।

अथेष्टाभ्यां भुजकोटिकर्णानयने करणसूत्रं वृत्तम् । इष्टयोराहतिर्द्विघ्नी कोटिर्वर्गान्तरं भुजः । कृतियोगस्तयोरेवं कर्णश्चाकरणीगतः ॥

उदाहरणम् । यैर्यैस्त्र्यस्रं भवेज्जात्यं कोटिदोःश्रवणैः सखे ! । त्रीनष्टविदितानेतान् क्षिप्रं ब्रूहि विचक्षण ! ॥

न्यासः



अत्रेष्टे । २ । १ । आभ्यां कोटि भुजकर्णाः । ४ । ३ । ५ ।

(उक्तरीत्यायातः)



अथवेष्टे । २ । ३ । आभ्यां कोटिभुज कर्णाः । १२ । ५ । १३ ।

(उक्तरीत्यायाताः)



अथवेष्टे । २ । ४ । आभ्यां कोटि-भुजकर्णाः । १६ । १२ । २० । एवमन्यत्रानेकधा ॥

कर्णकोटियुतौ भुजे च ज्ञाते पृथक्करणसूत्रं वृत्तम् । वंशाग्रमूलान्तर-भूमिवर्गो वंशोद्धृतस्तेन पृथग्युतोनौ । वंशौ तदर्द्धे भवतः क्रमेण वंशस्य खण्डे श्रुतिकोटिरूपे ।

उदाहरणम् । यदि समभुवि वेणुर्द्वित्रिपाणि प्रमाणो गणक ! पवनवेगादेकदेशे स भग्नः । भुवि नृप१६मितहस्तेष्वङ्ग लग्नं तदग्रं कथय कतिषु मूलादेष भग्नः करेषु ॥



वंशाग्रमूलान्तरभूमिर्भुजः । १६ । वंशः कोटिकर्णयुतिः । ३२ । जाते ऊर्द्धाधः खण्डे । २० । १२ ।

बाहुकर्णयोगे दृष्टे कोट्यां च ज्ञातायां पृथक्करणसूत्रं वृत्तम् । स्तम्भस्य वर्गोऽहिबिलान्तरेण भक्तः फलं व्यालबिडालरालात् । शोध्यं तदर्द्धप्रमितैः करैः स्याद्बिलाग्रतो व्यालकलापियोगः ॥

उदारणम् । अस्ति स्तम्भतले बिलं तदुपरि क्रीडाशिखण्डी स्थितः स्तम्भे हस्तनवोच्छ्रिते त्रिगुणितस्तम्भप्रमाणान्तरे । दृष्ट्वाहिं बिलमाव्रजन्तमपतत्तिर्यक् स तस्योपरि क्षिप्रं ब्रूहि तयोर्बिलात्कतिमितैः साम्येन गत्योर्युतिः ॥

न्यासः



स्तम्भः । ९ । अहिबिलान्तरम् । २७ । जाता बिलगत्योर्मध्यहस्ताः । १२ ।

कोटिकर्णान्तरे भुजे च दृष्टे पृथक्करणसूत्रं वृत्तम् । भुजाद्वर्गितात्कोटिकर्णान्तराप्तं द्विधा कोटिकर्णान्तरेणोनयुक्तम् । तदर्द्धे क्रमात्कोटिकर्णौ भवेतामिदं धीमताऽऽवेद्य सर्व्वत्र योज्यम् । सखे! पद्मतन्मज्जनस्थानमध्यं भुजः कोटिकर्णान्तरं पद्मदृश्यम् । नलः कोटिरेतन्मितः स्यादतोऽम्भो वदैवं समानीय पानीयमानम् ॥

उदाहरणम् । चक्रक्रौञ्चाकुलितसलिले क्वापि दृष्टं तडागे तोयादूर्द्ध्वं कमलकलिकाग्रं वितस्तिप्रमाणम् । मन्दं मन्दं चलितमनिलेनाहतं हस्तयुग्मे तस्मिन्मग्नं गणक ! कथय क्षिप्रमम्भःप्रमाणम् ॥ न्यासः



कोटिकर्णान्तरम्१/२ भुजः । २ । लब्धं जलगाम्भीर्यम् १५/४ इयं कोटिः इयमेव कलिकामानयुता जातः कर्णः १७/४

कोट्येकदेशेन युते कर्णे भुजे च दृष्टे कोटिकर्णज्ञानाय करणसूत्रं वृत्तम् । द्विनिघ्नतालोच्छ्रितिसंयुतं तत्सरोऽन्तरं तेन विभाजितायाः । तालोच्छ्रितेस्ताल-सरोऽन्तरघ्नादुड्डीनमानं खलु लभ्यते तत् ॥

उदाहरणम् । वृक्षाद्धस्तशतोच्छ्रयाच्छतयुगे वाप्यां कपिः कोऽप्यगादुत्तीर्य्याथ परो द्रुतं श्रुतिपथेनोड्डीय किञ्चिद्द्रुमात् । जातैवं समता तयोर्यदि गतावुड्डीनमानं कियद्विद्वन् ! चेत्सुपरिश्रमोऽस्ति गणिते क्षिप्रं तदाऽऽचक्ष्व मे ॥ ॥ न्यासः



वृक्षवाप्यन्तरम् । २०० । वृक्षोच्छ्रायः । १०० । लब्धमुड्डीनमानम् । ५० । कोटिः । १५० । कर्णः । २५० । भुजः । २०० ।

भुजकोट्योर्योगे कर्णे च ज्ञाते पृथक्करणसूत्रं वृत्तम् । कर्णस्य वर्गाद्द्विगुणां

द्विघ्नोभ्योदोःकोटियोगः स्वगुणोऽस्य मतम्। योगो द्विधा मूलविहीनयुक्तः स्यातां तदर्द्धे भुजकोटिमाने॥

उदाहरणम्। दशसप्ताधिकः कर्णस्त्र्यधिका विंशतिः सखे!। भुजकोटियुतिर्यत्र तत्र ते मे पृथग्वद॥

न्यासः



कर्णः। १७। दोःकोटियोगः।२३। जाते भुजकोटी। ८। १५।

उदाहरणम्। दोःकोट्योरन्तरं शैलाः कर्णो यत्र त्रयोदश। भुजकोटी पृथक्तत्र वदाशु गणकोत्तम॥

न्यासः



कर्णः। १३। भुजकोट्यन्तरम्। ७। लब्धे भुजकोटी। ५। १२।

लम्बाबाधाज्ञानाय करणसूत्रं वृत्तम्। अन्योऽन्यमूलाग्रगसूत्रयोगाद्वेण्वोर्वधे योगहृते च लम्बः। वंशौ स्वयोगेन हृतावभीष्टभूघ्नौ च लम्बोभयतः कुखण्डे॥

उदाहरणम्। पञ्चदशदशकरोच्छ्रायवेण्वोरज्ञातमध्यभूमिकयोः। इतरेतरमूलाग्रगसूत्रयुतेर्लम्बमानमाचक्ष्व॥

न्यासः



वंशौ। १५। १०। जातो लम्बः। ६। वंशान्तरभूः। ५। अत्र जाते भूखण्डे। ३। २ अथवा भूः। १०। खण्डे। ६। ४। वा भूः। १५। खण्डे। ९। ६। वा भूः।२०। खण्डे। १२। ८। एवं सर्वत्र लम्बः सएव।

यद्यत्र भूमितुल्ये भुजे वंशः कोटिस्तदा भूखण्डेन किमिति त्रैराशिकेन सर्वत्र प्रतीतिः।

अथ असम्भवलक्षणे वृत्तम्। धृष्टोद्दिष्टमृजुभुजं क्षेत्रं यत्रैकबाहुतः स्वल्पा। तदितरभुजयुतिरथवा तुल्या ज्ञेयं तदक्षेत्रं॥

उदाहरणम्। चतुरस्रे त्रिषड्द्व्यर्कमिता बाहवस्त्र्यस्रे त्रिषड्नवाः। उद्दिष्टा यत्र धृष्टेन तदक्षेत्रं विनिर्दिशेत्

एते अनुपपन्ने क्षेत्रे।





भुजप्रमाणाभिः ऋजुशलाकाः भूस्थानेषु विन्यस्यानुपपत्तिर्दर्शनीयेति।

आबाधादिज्ञानाय करणसूत्रमार्याद्वयम्। त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्ध्या। द्विःस्था भूरूनयुता दलिताऽऽबाधे तयोः स्याताम्॥

स्वाऽऽबाधाभुजकृत्योरन्तरमूलं प्रजायते लम्बः। लम्बगुणं भूम्यर्द्धं स्पष्टं त्रिभुजे फलं भवति॥

उदाहरणम्। क्षेत्रे मही मनुमिता त्रिभुजे भुजौ तु यत्र त्रयोदशतिथिप्रमितौ च मित्र!। तत्रावलम्बकमिति कथयावबाधे क्षिप्रं तथा च समकोष्ठमितिं फलाख्याम्॥ न्यासः



भूः। १४। भुजौ। १३। १५। लब्धे आबाधे। ५। ९। लम्बः। १२। क्षेत्रफलञ्च। ८४। ऋणाऽऽबाधोदाहरणम्। दशसप्तदशप्रमौ भुजौ त्रिभुजे यत्र नवप्रमा मही। अबधे वद लम्बकं तथा गणितं गाणितिकाशु तत्र मे॥



भुजौ।१०।१७। भूमिः। ९। अत्र त्रिभुजे भुजयोर्योगस्त्र्यादिना लब्धम्। २१। अनेन भूरूना न स्यात् अस्मादेव भूरपनीता शेषार्द्धमृणगताऽऽबाधा दिग्वैपरीत्येनेत्यर्थः। तथा जाते आबाधे। ६। १५। अतउभयत्रापि जातो लम्बः। ८। फलम्। ३६।

चतुर्भुजत्रिभुजयोरस्पष्टफलानयने करणसूत्रं वृत्तम्। सर्वदोर्युतिदलं चतुःस्थितं बाहुभिर्विरहितञ्च तद्वधात्। मूलमस्फुटफलं चतुर्भुजे स्पष्टमेवमुदितं त्रिबाहुके॥

उदाहरणम्। भूमिश्चतुर्दशमिता मुखमङ्कसङ्ख्या बाहू त्रयोदशदिवाकरसम्मितौ च। लम्बोऽपि यत्र रवि

संप्रकृष्य तत्र क्षेत्रे फलं कथय तत्कथितं यदाद्यैः

न्यासः



भूमिः । १४ । मुखम् । ९ । बाहू । १३ । १२ । लम्बः । १२ । उक्तप्रकारेण जातं क्षेत्रफलं करणी । १९८०० । अस्याः पदं किञ्चिन्न्यूनमेकचत्वारिंशदधिकशतम् १४१ । इदमत्र क्षेत्रे न वास्तवं फलम् किन्तु लम्बेन निघ्नं कुमुखैक्यखण्डमित्यादिवक्ष्यमाणकरणेन वास्तवं फलम् ।।१२८

अत्र त्रिभुजस्य पूर्वोदाहृतस्य

न्यासः



भूमिः । १४ । भुजौ । १३ । १५ । अनेनापि प्रकारेण त्रिबाहुके तदेव वास्तवं फलम् । ८४ । अत्र चतुर्भुजस्यास्पष्टोदितम् ।

अथ स्थूलत्वान्निरूपणार्थं सूत्रं सार्द्धवृत्तम् । चतुर्भुजस्यानियतौ हि कर्णौ कथं ततोऽस्मिन्नियतं फलं स्यात् । प्रसाधितौ तच्छ्रवणौ यदाद्यैः स्वकल्पितौ तावितरत्र न स्तः ॥ तेष्वेव बाहुष्वपरौ च कर्णावनेकधा क्षेत्रफलं ततश्च ॥ चतुर्भुजे हि एकान्तरकोणावाक्रम्यान्तःप्रवेश्यमानौ स्वसंसक्तं कर्णं सङ्कोचयतः इतरौ बहिरपसरन्तौ कोणौ स्वसंसक्तं कर्णं वर्द्धयतः अतउक्तन्तेष्वेव बाहुष्वपरौ च कर्णाविति । लम्बयोः कर्णयोर्वैकमनिर्दिश्यापरान् कथम् । पृच्छत्यनियतत्वेऽपि नियतञ्चापि तत्फलम् । स पृच्छकः पिशाचो वा वक्ता वा नितरान्ततः । यो न वेत्ति चतुर्बाहुक्षेत्रस्यानियतां स्थितिम् ॥ समचतुर्भुजाऽऽयतयोः फलानयने करणसूत्रं सार्द्धश्लोकद्वयम् । इष्टा श्रुतिस्तुल्यचतुर्भुजस्य कल्प्याथ तद्वर्गविवर्जिता या । चतुर्गुणा बाहुकृतिस्तदीयं मूलं द्वितीयश्रवणप्रमाणम् ॥ अतुल्यकर्णाभिहतार्द्धभक्ता फलं स्फुटं तुल्यचतुर्भुजे स्यात् । समश्रुतौ तुल्यचतुर्भुजे च तथाऽऽयते तद्भुजकोटिघातः ॥ चतुर्भुजेऽन्यत्र समान्तलम्बे लम्बेन निघ्नं कुमुखैक्यखण्डम् ॥

उदाहरणम् । क्षेत्रस्य पञ्चकृतितुल्यचतुर्भुजस्य कर्णौ ततः कथय तौ गणक ! प्रचक्ष्व । तुल्यश्रुतेश्च खलु तस्य तथायतस्य यद्विस्तृतौ रसमिताष्टमितं च दैर्घ्यम् ॥

प्रथमोदाहरणे ।

न्यासः



भुजाः ।२५।२५।२५। २५ । अत्र त्रिंशन्मिता ।३०। मेकां श्रुतिं प्रकल्प्य जाताऽन्या । ४० । फलञ्च । ६०० । (तथाहि भुजवर्गः ६२५ । चतुर्गुणा २५०० श्रुतिवर्गेण ९००हीनात् १६०० मूलम् ४०) द्वितीयं श्रुतिः । तयोः ३०।४०।स्तुल्योर्घातः १२०० द्विभक्तः६०० ।

अथ वा ।

न्यासः



चतुर्दशमितामेकां ।१४। श्रुतिं प्रकल्प्योक्तवत्करणेन जाताऽन्या श्रुतिः । ४८ । फलञ्च । ३३६ । (अत्र क्षेत्रे २४अङ्कोऽशुद्धः १४शुद्धम् इति)

द्वितीयोदाहरणे ।

न्यासः



तत्कृत्योर्योगपदं कर्णः इति जाता करणी सा एता श्रुतिः

उभयत्र तुल्यैव । गणितञ्च । ६२५ ।

अथायतस्य ;

न्यासः



विस्तृतिः ।६। दैर्घ्यम् । ८ । अस्य गणितम् । ४८ ।

उदाहरणम् । क्षेत्रस्य यस्य वदनं मदनारितुल्यं विश्वम्भरा द्विगुणितेन मुखेन तुल्या । बाहू त्रयोदशनखप्रमितौ च लम्बः सूर्य्योन्मितश्च गणितं वद तत्र किं स्यात् ॥ न्यासः



वदनम् । ११ । विश्वम्भरा ।२२। बाहू ।१३।२०। लम्बः ।१२।

अत्र सर्व्वदोर्युतिदलमित्यादिना स्थूलं फलम् ।२५०

वास्तवन्तु लम्बेन निघ्नं कुमुखैक्यखण्डमिति जातं फलम् ।१९८ । क्षेत्रस्य खण्डत्रयं कृत्वा फलानि पृथगानीय ऐक्यं कृत्वास्य फलोपपत्तिर्दर्शनीया खण्डत्रयदर्शनम् ।







प्रथमस्य भुजकोटिकर्णाः । ५।१२ ।१३। द्वितीयतस्य विस्तृतिः । ६ । दैर्घ्यं । १२। तृतीयस्य भुजकोटिकर्णाः ।१६ । १२ । २० ।

अत्र त्रिभुजयोर्भुजकोटिघातार्द्धं फलम् यथा प्रथमक्षेत्रे फलम् । ३० । द्वितीये । ७२ । तृतीये ।९६। एषामैक्यं सर्व्वक्षेत्रफलम् । १९८ ।

अथान्यदुदाहरणम् । पञ्चाशदेकसहिता वदनं यदीयं भूः पञ्चसप्ततिमिता प्रमितोऽष्टषष्ट्या । सव्याभुजोद्विगुणविंशतिसम्मितोऽन्यस्तस्मिन् फलं श्रवणलम्बमिती प्रचक्ष्व

न्यासः



वदनम् ।५१ । भूमिः । ७५

भुजौ । ६८

अत्र पाताश्रलम्बश्रुतीनां ज्ञानार्थं सूत्रं वृत्तार्द्धम् । ज्ञातेऽथ लम्बे श्रवणः श्रुतौ तु लम्बः फलं ज्ञायितव्यन्तु तत्र । कर्णस्यानियतत्वाल्लम्बोऽप्यनियत इत्यर्थः ।

लम्बज्ञानाय करणसूत्रं वृत्तार्द्धम् । चतुर्भुजान्तस्त्रिभुजेऽवलम्बः प्राग्वद्भुजौ कर्णभुजौ मही भूः ॥

अत्र लम्बज्ञानार्थं सव्यभुजाग्राद्दक्षिणभुजमूलगामी दृष्टः कर्णः सप्तसप्ततिमितः कल्पितस्तेन चतुर्भुजान्तस्त्रिभुजं कल्पितं तत्रास्मौ कर्णएकोभुजः । ७७ । द्वितीयस्तु सव्यभुजः । ६८ । भूः सैव ।७५ । अत्र प्राग्वल्लब्धो लम्बः ३०८/५

लम्बे ज्ञाते कर्णज्ञानार्थं सूत्रं वृत्तम् । यल्लम्बलम्बाश्रितबाहुवर्गविश्लेषमूलं कथिताऽबधा सा । तदूनभूवर्गसमन्वितस्य यल्लम्बवर्गस्य पदं स कर्णः ॥

अत्र सव्यभुजाग्राल्लम्बः किल कल्पितः ३०८/५ तदूनभूवर्गसमन्वितेत्यादिना जातः कर्णः । ७७ ।

द्वितीयज्ञानार्थं सूत्रं वृत्तद्वयम् । इष्टोऽत्र कर्णः प्रथमं प्रकल्प्यस्त्र्यस्रे तु कर्णोभयतः स्थिते ये । कर्णं तयोः क्ष्मामितरौ च बाहू प्रकल्प्य लम्बावबधे च साध्ये आबाधयोरेककपम्ययोर्य्यस्त्र्यादन्तरन्तत्कृतिसंयुतस्य । ल-

स्यैक्यवर्गस्य पदं द्वितीयः कर्णोभवेत्सर्वचतुर्भुजेषु ॥

न्यासः





अत्र चतुर्भुजे सव्यभुजाग्राद्दक्षिणभुजमूलगामिनः कर्णस्य मानं कल्पितम् । ७७ । तत्कर्णरेखावच्छिन्नस्य क्षेत्रस्य मध्ये कर्णरेखोभयतोये त्र्यस्रे उत्पन्ने तयोः कर्णं भूमिं तदितरौ च भुजौ प्रकल्प्य प्राग्वल्लम्बः आबाधा च साधिता । तद्यथा लम्बः ॥ ६०॥ द्वितीय लम्बः ॥२४॥ आबाधयो । ४५ । ३२ । रेककुप्स्थयो रन्तरस्य । १२ । कृते । १६८ । लम्बैक्य । ८४ । कृतेश्च ७०५६योगः।७२२५।तस्य पदं ।८५। द्वितीयकर्णप्रमाणम्

अतेष्टकर्णकल्पने विशेषोक्तिस्तत्र सार्द्धवृत्तम् ।

कर्णाश्रितस्वल्पभुजैक्यमुर्वीं प्रकल्प्य तच्छेषभुजौ च बाहू । साध्योऽथलम्बोऽथ तथान्यकर्णः स्वोर्व्याः कथंचिच्छ्रवणेन दीर्घः ॥ तदन्यलम्बान्न लघुस्तथेदं ज्ञात्वेष्टकर्णः सुधिया प्रकल्प्यः ॥ चतुर्भुजं हि एकान्तरकोणयोराक्रम्य सङ्कोच्यमानं त्रिभुजत्वं याति तत्रैककोणं लग्नलघुभुजयोरैक्यं भूमिरितरौ भुजौ च तल्लम्बादूनः सङ्कोच्यमानः कर्णः कथञ्चिदपि न स्यात् तदितरो भूमेरधिकोन स्यादेवमुभयथापि एतदनुक्तमपि बुद्धिमता ज्ञायते ।

विषमचतुर्भुजफलानयनाय करणसूत्रं वृत्तार्द्धम् । तत्र क्षेत्र कर्णोभयतः स्थिते ये तयोः फलैक्यं फलमत्र नूनम् । अथानन्तरोक्तक्षेत्रान्तस्त्र्यस्रयोः फले ।९२४। २२१० । अनयोरैक्यं । ३२३४ । तस्य फलम् ।

समानलम्बस्याबाधादिज्ञानाय करणसूत्रं वृत्तद्वयम् । समानलम्बस्य चतुर्भुजस्य मुखोनभूमिं परिकल्प्य भूमिम् । भुजौ भुजौ त्र्यस्रवदेव साध्ये तस्याबधे लम्बमितिस्ततश्च ॥ अबाधयोना चतुरस्रभूमिस्तल्लम्बवर्गैक्यपदं श्रुतिः स्यात् । समानलम्बे लघुदोःकुयोगान्मुखान्यदोःसंयुतिरल्पिका स्यात् ॥

उदाहरणम् । द्विपञ्चाशन्मितव्येकचत्वारिंशन्मितौ भुजौ । मुखन्तु पञ्चविंशत्या तुल्यं षष्ट्या मही किल । ॥ अतुल्यलम्बकं क्षेत्रमिदं पूर्वैरुदाहृतम् । षट्पञ्चाशच्चिषष्टिश्च नियते कर्णयोर्मितौ ॥ कर्णौ तत्राऽपरौ ब्रूहि समलम्बञ्च तच्छ्रुती ॥



अत्र इष्टं कर्णं त्रिषष्टिमितं प्रकल्प्य जातः प्राग्वदन्यः कर्णः । ५६ ।

अथ षट्पञ्चाशत्स्थाने द्वात्रिंशन्मितं कर्णं । ३२ । प्रकल्प्य न्यासः



प्राग्वत्साध्यमाने कर्णौ जातं करणीखण्डद्वयं । ६२१ । २७०० । अनयोर्मूलयोः २४/२५ ५१/२५ रैक्यं द्वितीयः कर्णः ७७/२५

न्यासः अथ तदेव क्षेत्रं समलम्बम् ।



तदा मुखोनभूमिं

(अत्र क्षेत्रे लम्बांशहारयोः षट्शते पतिते) न्यासः



अत्राबाधे जाते २/५ १७३/५ लम्बश्च करणीगतो जातः २८०१६/२५ आसन्नमूलकरणेन जातः ३८ ६२२/६२५

अयं तत्र चतुर्भुजे समलम्बः लम्बाऽऽबाधोनित-समभूमेर्लम्बस्य च वर्गयोगः । ५०४६ । अयं कर्णवर्गः एवं दृहदाबाधातोद्वितीयकर्णवर्गः । २१७६ । अनयो-रासन्नमूलकरणेन जातौ कर्णौ ७१/१/२०।४६१२/२० एवं चतुरस्रे तेष्वेव बाहुष्वन्यौ कर्णौ बहुधा भवतः एवमनियतत्वेऽपि नियतावेव कर्णावानीतौ ब्रह्मगुप्ता द्यैस्तदानयनं यथा ।

कर्णाश्रितभुजघातैक्यमुभयथाऽन्योऽन्यभाजितं गुण-येत् । योगेन भुजप्रतिभुजवधयोः कर्णौ पदे विषमे



न्यासः

कर्णाश्रितभुजघातेति एकवारमनयो । २५ । ३९ घात । ९७५ । तथा । ५२ । ६० । ऽनयोर्घातः। ३१२० । तयोर्द्वयोरैक्यम् । ४०९५ । तथा द्वितीय वारम् । २५ । ५२ । अनयोर्घाते जातम् । १३०० । तथा द्वितीयवारम् । ३९ । ६० । अनयोर्घाते । २३४० । घातयोर्द्वयोरैक्यम् । ३६४० । भुजप्रतिभुज । ५२ । । ३९ । घातः । २०२८ । पश्चात् । २५ । ६० । अनयोर्वधः । १५०० । तयोरैक्यम् । ३५२८ । अनेनैक्येन । ३६४० । गुणितं जातं पूर्व्वैक्यम् । १२८४१९२० । प्रथमकर्णाश्रितभुजघातैक्येन । ४०९५ । भक्तं लब्धम् । ३१३६। अस्य मूलम् । ५६ । एकः कर्णः तथा द्वितीय कर्णार्थं प्रथमकर्णाश्रितभुजघातैक्यं । ४०९५ । भुज-प्रतिभुजवधयोगः ३५२८ गुणितं जातम् । १४४४७१६०। अन्यकर्णाश्रितघातैक्येन । ३६४० । भक्तं लब्धम् । ३९६९ । अस्य मूलं । ६३ । द्वितीयः कर्णः । अस्य कर्णानयनस्य प्रक्रियागौरवं लघुप्रक्रियादर्शन-द्वारेणाह । अभीष्टजात्यद्वयबाहुकोटयः परस्परं कर्ण-हताभुजादति । चतुर्भुजे यद्विषमं प्रकल्पितं श्रुती स्त तत्र त्रिभुजद्वयात्ततः ॥ बाह्वोर्वधः कोटिवधेन युक् स्यादेका श्रुतिः कोटिभुजाद्वघैक्यम् । अन्या लघौ सत्यपि साधनेऽस्मिन् पूर्व्वैः कृतं यद्गुरु तन्न विद्मः ॥

जात्यक्षेत्रद्वयस्य

न्यासः



एतयोरितरेतरकर्णहताभुजाः कोटयः, इतरेतरकर्ण-हताः कोटयोभुजादति कृते जातं । २५ । ६० । ५२ । । ३९ । तेषां महती भूर्लघु मुखमितरौ बाहू इति प्र-कल्प्य क्षेत्रदर्शनं इमौ कर्णौ महतायासेनानीतौ । ६३ । ५६ । अस्यैव जात्यद्वयस्योत्तरोत्तरभुजकोट्यो र्घातौ जातौ । ३६ । २० । अनयोरैक्यमेकः कर्णः । ५६ । बाह्वोः । ३ । ५ । कोट्योश्च । ४ ।१२। घातौ । १५ । ४८ । अनयोरैक्यमन्यः । ६३ । एवं सुखेन श्रुती स्यातां अथ यदि पार्श्वभुजद्वयोर्व्यत्ययं कृत्वा न्यस्तं क्षेत्रम् न्यासः



तदा जात्यद्वयकर्ण-योर्वधः । ६५ । द्वि-यकर्णः । अथ सूचीक्षेत्रोदा-हरणम् । ते यत्र समलयं । ३०० । क्षितिमितिस्तत्त्वेन्दु । १२५ । तुल्यं मुखं बाहू खोत्कृतिभिः । ३६० । शरातिर्ष्टतिभि । १९५ । स्तुल्यौ च तत्र श्रुती । एका खाष्टयमैः । २८० । समा तिथिगुणै । ३१५ । रन्याऽथ तल्लम्बकौ तुल्यौ गोधृतिभि । १८९ । स्तथाजिनयमै । २२४ । र्योगाच्छ्योर्लम्बयोः ॥ तत्खण्डे कथयाधरे श्रवणयोर्योगाच्च लम्बाबधे तत् सूची निजमार्गहद्भुजयोर्योगाद्यथा स्यात्ततः । साबाधं वद लम्बकञ्च भुजयोः सूच्याः प्रमाणे च के सर्व्वं गाणितिक ! प्रचक्ष्व नितरां क्षेत्रेऽत्र दक्षोऽसि चेत् ।

२५२ 

सूचग्राबाधा १५२६/१७ सूचग्राबाधा २५६४/१७
(अत्र चित्रे १प्रथमपीठे २५२ इति शुद्धम् १५८इत्यशुद्धम्)

भूमानं ।२०० । मुखं ।१२५। बाहू । २६०। १९५ । कर्णौ । २८० । ३१५ । लम्बौ । १८९ । २२४ ।

अथ सन्ध्याद्यानयनाय करणसूत्रं वृत्तम् । लम्ब तदाश्रितबाह्वोर्मध्यं सन्ध्याख्यमस्य लम्बस्य । सन्धो ना भूः पीठं साध्यं यस्याधरं खण्डम् ॥ सन्धिर्द्विस्थः परलम्बश्रवणहतः परस्य पीठेन । भक्तो लम्बश्रुत्योर्योगात्स्यातामधःखण्डे ॥

लम्बः । १८९ । तदाश्रितभुजः । १९५ । अनयोर्मध्ये यल्लम्बलम्बाश्रितबाहुवर्गेत्यादिनाऽऽगता ऽऽबाधा सन्धिसंज्ञा । ४८ । तदूनितभूरिति द्वितीया ऽऽबाधा सा पीठसंज्ञा । २५२ ।

एवं द्वितीयलम्बः । २२४ । तदाश्रितभुजः ।२६० । पूर्ववत् सन्धिः ।१२२। पीठम् ।१६८ । खण्डं साध्यम् ।

अथाद्यलम्बस्य । १८९ अधःखण्डं साध्यम् ।
अस्य सन्धिः । ४८ । द्विःस्थः । ४८ । परलम्बेन । । २२४ । श्रवणेन च ।२८०। पृथग्गुणितः । १०७५२ । । १३४४० । परस्य पीठेन ।१६८ भक्तः ।

एवं द्वितीयलम्बस्य ॥ २२४ ॥ सन्धिः ॥ १२२ ॥ परलम्बेन १८९ ॥ कर्णेन च ३१५ पृथग्गुणितः परस्य पीठेन २५२ ॥ भक्तो लब्धं लम्बाधःखण्डम् ९९॥ श्रवणाधःखण्डञ्च १६५ ॥

अथ कर्णयोर्योगादधोलम्बज्ञानार्थं सूत्रं वृत्तम् । लम्बौ भूघ्नौ निजनिजपीठविभक्तौ च वंशौ स्तः । ताभ्यां प्राग्वच्छ्रुत्योर्योगाल्लम्बः कुखण्डे च ॥

लम्बौ ।१८९॥ २२४ ॥ भू ३०० घ्नौ जातौ ५६७०० ॥ स्वस्वपीठाभ्यां २५२, १६८ भक्तौ एवमत्र लब्धौ वंशौ ॥ २२५ ।४०० ॥ आभ्याम् अन्योऽन्यमूलाग्रगसूत्रयोगादित्यादिकरणेन लब्धः कर्णयोगादधोलम्बः । १४४ । भूखण्डे च । १०८। १९२ ।

अथ सूच्याऽऽबाधालम्बभुजज्ञानार्थं सूत्रं वृत्तत्रयम् । लम्बहृतो निजसन्धिः परलम्बगुणः समाह्वयो ज्ञेयः । समपरसन्ध्योरैक्यं हारस्तेनोद्धृतौ तौ च ॥ सम परसन्धी भूघ्नौ सूच्याऽऽबाधे पृथक् स्याताम् । हारहृतः परलम्बः सूचीलम्बोद्धृतौ सूच्याः । एवं क्षेत्रक्षोदः प्राज्ञैस्त्रैराशिकाज्ज्ञेयः ॥

अत्र किलायं लम्बः । २२४ । अस्य सन्धिः ।१२२ । अयं परलम्बेन । १८९ । गुणितो । २२४ । ऽनेन भक्तो जातः समाह्वयः ८९१/८ । अस्य परसन्धेश्च ४८ । योगोहारः १२७५/८अनेन भू । ३००। घ्नः समः २६७३००/८ परसन्धि १४४००/१ च भक्तो जाते सूचग्राऽऽबाधे २५६४/१७।१५२६/१७ एवं द्वितीयलम्बस्य १८९ सन्धिः ४८परलम्बेन २२४गुणितः १०७५२खलम्बेन १८९भक्तः) द्वितीयसमाह्वयः ५१२/९ (उक्तरीत्या) द्वितीयोहारः१७००/९अनेन३००भूघ्नःस्वीयःसमः१५३६००/९ परसन्धिश्च २९६००/१ भक्तोजाते सूचग्राऽऽबाधे १५२६/१७ २५६४/१७। परलम्बः । २२४ । भूमि ।३०० गुणोहारेण १७००/९भक्तोजातः सूचीलम्बः ६०४८/१७ सूचीलम्बेन भुजौ । १९५ । २६० । गुणितौ स्वस्वलम्बाभ्यां । १८९ । २२४ । यथाक्रमं भक्तौ जातौ समार्गद्वौ सूचीभुजौ ६२४०/१७ ७०२०/१७

एवमत्र सर्वत्र भागहारराशिं प्रमाणं गुणगुणकौ तु यथायोग्यं फलेच्छे प्रकल्प्य सुधिया त्रैराशिक सूत्रम् ॥

अथ वृत्तक्षेत्रे करणसूत्रं वृत्तम् । व्यासे भनन्दाग्नि । ३९२७ । हते विभक्ते खबाणसूर्यैः । १२५० । परिधिः स सूक्ष्मः । द्वाविंशतिघ्ने विहृतेऽथ शैलैः । ७ । स्थूलोऽथवा स्याद्व्यवहारयोग्यः ॥

उदाहरणम्। विष्कम्भमानं किल सप्त यत्र तत्र प्रमाणं परिधेः प्रचक्ष्व। द्वाविंशतिर्यत्परिधिप्रमाणं तद्व्याससङ्ख्यां च सखे! विचिन्त्य॥



व्यासः

व्यासमानं । ७ ।

लब्धं परिधिमानं
२१
१२३९
१२५०

स्थूलो वा परिधिर्लब्धः । २२ ।

अथवा परिधितो व्यासानयनाय व्यासः



गुणहारविपर्ययेण व्यासमानं सूक्ष्मं ७
११
३९२७
स्थूलं वा ।७।

वृत्तगोलयोः फलानयने करणसूत्रं वृत्तम्। वृत्ते क्षेत्रे परिधिगुणितव्यासपादः फलं यत् क्षुण्णं वेदैरुपरि परितः कन्दुकस्येव जालम्। गोलस्यैवं तदपि च फलं पृष्ठजं व्यासनिघ्नं षड्भिर्भक्तं भवति नियतं गोलगर्भे घनाख्यम्॥

उदाहरणम्। यद्व्याससुरगैर्मितः किल फलं क्षेत्रे समे तत्र किं व्यासः सप्तमितश्च यस्य सुमते! गोलस्य तस्यापि किम्। पृष्ठे कन्दुकजालसन्निभफलं गोलस्य तस्यापि किं मध्ये ब्रूहि घनं फलञ्च विमलाञ्चेदस्ति लीलावतीम्॥



वृत्तक्षेत्रफलदर्शनाय व्यासः
व्यासः । ७ ।
परिधिः २१
१२३९
१२५०
क्षेत्रफलम् ३८
२४२३
५०००

गोलपृष्ठफलदर्शनाय व्यासः

व्यासः । ७ ।



गोलपृष्ठफलम् १५३
११७३
१२५०

गोलान्तर्गतघनफलदर्शनाय व्यासः

व्यासः ।७।



गोलस्यान्तर्गतं घनफलम् १७९
१४८७
२५००

अथ प्रकारान्तरेण तत्फलानयने करणसूत्रं सार्द्धवृत्तम्। व्यासस्य वर्गे भनवाग्निनिघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते। रुद्राहृते शक्रहृतेऽथ वा स्यात् स्थूलं फलं तद्व्यवहारयोग्यम्॥ घनीकृतव्यासदलं निजैकविंशांशयुग्गोलघनं फलं स्यात्॥

व्यासः । ७ । अस्य वर्गः । ४९ । भनवाग्निनिघ्ने पञ्चसहस्रभक्ते तदेव सूक्ष्मं फलम् ३८
२४२३
५०००

अथवा व्यासस्य वर्गे । ४९ । रुद्राहते ११ । ५३९ । यमकृते १४लब्धं स्थूलं फलम् ३८
१
२

घनीकृतव्यासदलं३४३/२
निजैकविंशांशयुक् गोलस्य घनफलं स्थूलं १७९
२
३

शरजीवानयनाय करणसूत्रं सार्द्धवृत्तम् । ज्याव्यासयोगान्तरघातमूलं व्यासस्तदूनोदलितः शरः स्यात् । व्यासाच्छरोनाच्छरसङ्गुणाच्च मूलं द्विनिघ्नं भवतीह जीवा । जीवार्द्धवर्गे शरभक्तयुक्ते व्यासप्रमाणं प्रवदन्ति वृत्ते ॥

उदाहरणम् । दशविस्तृतिवृत्तान्तर्यत्र ज्या षण्मिता सखे ! । तत्रेषुं वद बाणाज्ज्यां ज्यावाणाभ्याञ्च विस्तृतिम् ॥ १८० ॥ न्यासः



व्यासः ।१०। ज्या ।६।योग ।१६। अन्तरं । ४ । घातः । ६४ । मूलम् । ८ । एतः दूनोव्यासः । २ । एतद्दलितः । १ । जातः शरः ।१।
व्यासात् । १० । शरोनात् । ९ । शर । १ । सङ्गुणात् । ९ । मूलम् । ३ । द्विनिघ्नं जाता जीवा । ६ ।

एवं ज्ञाताभ्यां ज्यावाणाभ्यां व्यासानयनं यथा जीवा ।६। अ।३। वर्गे । ९ । शर । १ । भक्ते ।९। शर ।१। युक्ते जातोव्यासः । १० ।

अथ वृत्तान्तस्त्र्यस्रादिनवास्रान्तक्षेत्राणां भुजमानानयनाय करणसूत्रं वृत्तत्रयम् । त्रिद्व्यङ्काग्निनभश्चन्द्रै १०३९२३ । स्त्रिवाणाष्टयुगाष्टभिः । ८४८५३ । वेदाग्निवाणखाश्वैश्च । ७०५३४ । खखाभ्राभ्ररसैः । ६०००० । क्रमात् ॥ बाणेषुनखवाणैश्च । ५२०५५ । द्विद्विनन्देषुसागरैः । ४५९२२ । कुरामदशवेदैश्च ४१०३१। वृत्तव्यासे समाहते ॥ खखखाभ्रार्क । १२००००। सम्भक्ते लभ्यन्ते क्रमशोभुजाः । वृत्तान्तस्त्र्यस्रपूर्वाणां नवास्रान्तं पृथक् पृथक् ॥

उदाहरणम् । सहस्रद्वितयव्यासं यद्वृत्तं तस्य मध्यतः ।

समत्र्यस्रादिकानां मे भुजान्वद पृथक् पृथक् ॥

अथ वृत्तान्तस्त्रिभुजे भुजमानानयनाय न्यासः



व्यासः ॥ २०००॥ त्रिद्व्यङ्काग्निनभश्चन्द्रै। १०३९२३। गुणितः । २०७८४६०००खखखाभ्रार्कैः । १२००० । भक्ते लब्धं त्र्यस्रे भुजमानम् १७३२
१
२०।

वृत्तान्तश्चतुर्भुजे भुजमानानयनाय

न्यासः



व्यासः । २००० । त्रिवाणाष्टयुगाष्टभि । ८४८५३ । गुणितः । १६९७०६००० । खखखाभ्रार्कैः । १२०००० भक्ते लब्धं चतुरस्रे भुजमानम् १४१४
१३
६०

वृत्तान्तःपञ्चभुजे भुजमानानयनाय

न्यासः

व्यासः।२०००। वेदाग्निवाणखाश्वैः । ७०५३४गुणितः ॥१४१०६८०००॥

खखखाभ्रार्कैः १२०००० भक्ते लब्धं पञ्चास्रे भुजमानम् ११७५
१७
२०

वृत्तान्तःषड्भुजे भुजमानानयनाय न्यासः



व्यासः २०००। खखाभ्राम्बरषै ६०००० गुणितः १२००००० खखखाभ्रार्कै १२०००० उक्तं लब्धं षडस्रे भुजमानम्॥१०००

वृत्तान्तःसप्तभुजमानानयनाय न्यासः



व्यासः २००० बाणेषुनवाणै ५२०५५ गुणितः ॥ १०४११०००० खखाभ्रार्कै १२००० भक्तं लब्धं सप्तास्रे भुजमानम् ८६७ $\frac{११}{२०}$

वृत्तान्तरष्टभुजे भुजमानानयनाय न्यासः



व्यासः २००० द्विद्विनन्देषुसागरैः ४५९२२ गुणितः ॥९१८४४००० ॥ ख० खखाभ्रार्कैः १२००० भक्तं लब्धमष्टास्रे भुजमानम् ७६५ $\frac{११}{२०}$

वृत्तान्तर्नवभुजे भुजमानानयनाय न्यासः



व्यासः २००० कुरामदशै ४१०३१ गुणितः ८२०६२०००। खखाभ्रार्कै ॥१२०००॥ भक्तं लब्धं नवास्रे भुजमानम् ६८३ $\frac{११}{२०}$

एवमिष्टव्यासादेभ्योऽन्याश्चपि जीवाः सिध्यन्तीति तास्तु गोले ज्योत्पत्तौ वक्ष्ये।

अथ स्थूलजीवाज्ञानार्थं लघुक्रियया करणसूत्रं वृत्तम्
चापोननिघ्नपरिधिः प्रथमाह्वयः स्यात्पञ्चाहतः परिधिवर्गचतुर्थभागः। आद्योनितेन खलु तेन भजेच्चतुर्घ्नव्यासाहतं प्रथममाप्तमिह ज्यका स्यात्।

उदाहरणम्। अष्टादशांशेन वृतेः समानमेकादिनिघ्नेन च यत्र चापम्। पृथक् पृथक्तत्र वदाशु जीवां खार्कैर्मितं व्यासदलञ्च यत्र। न्यासः



(अत्रचित्रे ४जीवामानं २२४ इत्यशुद्धम् १५४ इतिशुद्धम्)

व्यासः ॥२४०॥ अत्र किलाङ्कलाघवाय विंशतेः सार्धार्कशतांशमिलितः सूक्ष्मपरिधिः ७५४ अस्याष्टादशांशः ४२ अत्राप्यङ्कलाघवार्थं तयोरष्टादशांशयुतोष्ट-

हीतः । अनेन पृथक् पृथगेकादिगुणितेन तुल्ये धनुषि कल्पिते ज्याः साध्याः ।

अथवाऽत्र सुखार्थं परिधेरष्टादशांशेन परिधिं धनूंषि चापवर्त्य ज्याः साध्यास्तथाऽपि ता एव भवन्ति । अपवर्त्तिते न्यासः परिधिः १८ चापानि च ।१।२।३।४।५।६।७।८।९। यथोक्तकरणेन लब्धाजीवाः ।४२।८२।१२०।१५४।१८४।२०८।२२६।२३६।२४०।

अथ चापानयनाय करणसूत्रं वृत्तम् । व्यासाब्धिघातयुतमौर्व्विकया विभक्तोजीवाङ्घ्रिपञ्चगुणितः परिधेस्तु वर्गः । लब्धोनितात्परिधिवर्गचतुर्थभागादाप्ते पदे वृतिदलात्पतिते धनुः स्यात् ॥

उदाहरणम् । विद्धितादह ये गुणास्ततोवद तेषां मधुना धनुर्मितिम् । यदि तेऽस्ति धनुर्गुणक्रियागणिते गाणितिकातिनैपुणम् ॥

न्यासः । ४२ । ८२ । १२० । १५४ । १८४ । २०८ । २२६ । २३६ । २४० । अपवर्त्तितपरिधिः ।१८

जीवाङ्घ्रिणा २१/२ पञ्चभि । ५ । स परिधे । १८ । र्वर्गो ३२४ गुणितः । १७०१० । व्यास । २४० । ब्धि । ४ । घात । ९६० । युतमौर्विकयानया । १००२ । विभक्तोलब्धो । १७ । ऽलाङ्कलाघवाय चतुर्विंशतेद्र्यधिकसहस्रांशयुतोग्टहीतोऽनेनोनितात्परिधि । १८ । वर्ग । ३२४ । चतुर्थभागात् । ६४ । पदे प्राप्ते । ८ । वृति । १८ । दलात् । ९ । पतिते । १ । जातं धनुः । एवं जातानि धनूंषि । १ । २ । ३ । ४ । ५ । ६ । ७ । ८ । ९ । एतानि परिधिव्यष्टादशांशेन गुणितानि स्युः”

तत्र लीलावतीप्रदर्शितप्रथमक्षेत्रे कर्णस्य भुजकोटिवर्गयोगमूलात्मकत्वं यदुक्तं तत्रोपपत्तिः प्रदर्श्यते । समचतुर्भुजे हि क्षेत्रे “समश्रुतौ तुल्यचतुर्भुजे च तथायते तद्भुजकोटिघातः” इत्यनेन चतुर्हस्तमितभुजस्य कोटित्वेन कल्पितस्य इतरतथाविधभुजेन गुणिते १६ हस्तमितं क्षेत्रफलम् अतस्तद्भुजस्य क्षेत्रफलस्य १६ हस्तस्य मूलं ४ हस्तात्मको भुजः । एवं त्रिहस्तमितकोटेर्भुजरूपतया कल्पनेन समचतुर्भुजक्षेत्रकरणे उक्तरीत्या तत्फलं ९ हस्ताः क्षेत्रफलं कोटिरूपभुजस्य तन्मूल ३ हस्तरूपता । अनयो र्योगः २५ हस्ताः, यस्य च क्षेत्रस्य कर्णरूपभुजत्वेन कल्पने समचतुर्भुजकरणे पूर्वोक्तं २५ हस्तमितफलं तुल्यं भवति तादृशसमचतुर्भुजे क्षेत्रे २५ अङ्कस्य मूलरूपा कर्णमितिः । तथाहि पञ्चहस्तमितसमचतुर्भुजक्षेत्रे भुजकोटिरूपचतुर्भुजत्वेन कल्पनेन समचतुर्भुजक्षेत्रफलयोः १६,९, हस्तात्मकयोः समावेशः इत्यतः भुजकोटिवर्गयोगमूलरूपता कर्णस्य युक्ता । एवमन्यत्रापि उपपाद्यमिति बहवः ।

अन्यथाप्यत्रोपपत्तिः प्रदर्श्यते भुजं कोटिं कर्णञ्च व्यासस्थानीयं कृत्वा वृत्तार्द्धक्षेत्रकरणे तत्र भुजव्यासक वृत्तस्य “व्यासस्य वर्गे भनवाग्निनिघ्ने सूक्ष्मं फलं पञ्चसहस्रभक्ते । रुद्राहते शक्रहृतेऽथ वा स्यात् स्थूलं फलमिति” रीत्या भुज ४ रूपव्यासस्य वर्गे १६ रुद्र ११ गुणिते १७६ । शक्र १४ हृते १७६/१४ स्थूलंफलं तदर्द्धं १७६/२८, वृत्तक्षेत्रार्द्धस्य स्थूलं फलम् । एवं कोटिरूप ३ व्यासवर्गः ९ । ११ गुणितः ९९ । शक्र १४ भक्तः, ९९/१४ तदर्द्धं ९९/२८ तस्य क्षेत्रफलम् अनयोर्योगः २७५।२८ इदं कर्णव्यासकवृत्तक्षेत्रार्द्धफलतुल्यम् तादृशफलेन कर्णमानानयनञ्च गुणहारादिव्यत्ययेन कार्य्यं यथा २७५/२८ शक्र १४ गुणितः २७५।२ रुद्र ११ भक्तः २५/२ एतच्च तत्क्षेत्रफलं तच्च द्विगुणितं २५ तस्य मूलं ५ कर्णः । एवं सूक्ष्मफलं तु भुजकोटिकर्णव्यासके वृत्तक्षेत्रे व्यासस्य वर्गे भनवाग्नि ३९२७ गुणिते ५००० भक्ते भवति तत्रोक्तरीत्या भुजकोटिव्यासकक्षेत्रे फलयोग तुल्यता कर्णव्यासकवृत्तक्षेत्रफलस्येति कल्प्यम् । अयमेव पक्षः भास्कराचार्य्यस्याभिमतः कर्णस्य भुजकोटिवर्गयोगमूलात्मकत्वेन तेनाभिधानात् यथानिर्दिष्टवृत्तक्षेत्रफलस्य व्यासवर्गघटितत्वेन तेनाभिधानाच्च । अतस्तथा प्रत्यभिज्ञायते इत्यस्माभिः नवीनः उपपत्तिपथ उद्भावितः।

वृत्तान्तर्गतसमत्रिकोणानां ये भुजा उक्तास्तेषां तथा मानत्वे उपपत्तिर्दर्श्यते । तत्र क्रमज्याशब्दे २३०२ पृ० सिद्धान्तोक्ताः २४ अर्द्धजीवा दर्शिताः । तत्र चक्रकला २१६०० तुल्यः परिधिः । तास्त्र कलाः “व्यासे भनन्दाग्नि-३९२७ हते विभक्ते खबाणसूर्य्यैः १२५० परिधिः स सूक्ष्मः” इत्युक्तरीत्या वैपरीत्येन खबाणसूर्य्य १२५० हताः २७०००००० । भनवाग्नि ३९२७ भक्ताः । ६८७६ व्यासस्तदर्द्धं ३४३८ इयमन्तिमज्या त्रिज्येति चोच्यते । तत्रानुपातार्थं चक्रकलातुल्य २१६०० परिधिवृत्तस्यान्तः स्थत्रिकोणादीनां क्रमेण भुजाः साध्यन्ते । तत्र चक्रकलानां २१६०० क्रमेण त्रिचतुरादिभिर्भक्तानामर्द्धानि क्रमेण चापार्द्धानि स्युः । तानि च ३६००।२७००।२१६०।१८००।१५४३।१३५० । १२०० । क्रमेण एतत्कलामितानि । ‘तस्याश्विभक्ताअसवः कला वा यद्वत्वसंख्या

गतशिञ्जिनी. सा। गतैष्यजीवान्तरशेषघातात् तत्त्वाश्वि-
लब्ध्या सहितेप्सिता स्यात्" इत्युक्तरीत्या ताः कलाः
क्रमेण तत्त्वाश्वि २२५ भक्ताः क्रमेण त्र्यस्रे १६ चतु-
रस्रे।१२ पञ्चास्रे ६।१२५। शेषः षडस्रे ८।सप्तास्रे ६।१६२।
शेषः अष्टास्रे ६। नवास्रे ५।७५ शेषः तथाच त्रिकोणे
क्रमज्यासु पठिता षोड़शी २६७७। अर्द्धजीवा।
चतुरस्रे तत्रोक्ता द्वादशी २४३१ पञ्चकोणे तत्रोक्ता
नवमी १६१० गता एष्या दशमी २०६३। तयोरन्तरं
१८३। शेषकला १२५ तयोर्घातः २४७०५ तत्त्वाश्वि
२२५ भक्तो लब्धिः ११० अनया सहिता गतजीवा ।२०२०।
इयं अर्द्धजीवा। षड़स्रे तत्रोक्ता अष्टमी १७।६।
सप्तास्रे षष्ठी जीवा १३१५ गता। एष्या १५२० तयो-
रन्तरं २०५। शेषकलाः. १६२ अनयोर्घातः ३६५६५।
तत्त्वाश्विभक्ते १७५ लब्धिः अनया युक्ता गतजीवा १४६०
इयं सप्तास्रे अर्द्धजीवा। अष्टास्रे षष्ठी १३१५।
नवास्रे पञ्चमी ११०५ गता एष्या १३१५ तयोन्तरं २१०
शेषकला ७५। तयोर्घातः २२५० तत्त्वाश्विभक्तः लब्धिः
१० अनया सहिता गतजीवा ११०५। १११५ नवास्रे
अर्द्धजीवा। एताद्विगुणाः क्रमेण चक्रकला२१६०० तुल्य
परिधिकवृत्ते समत्र्यस्रादीनां भुजाः यथा ५६५४।४८६२
।४०४०।२४२८।२६८०।२६३०।२२३०। क्रमेण भुजाः। यदि
चक्रकलापरिधिव्यासार्द्धे ३४३८। क्रमेण एते भुजाः
तदा फलेच्छयोः समानजातीयत्वकरणेन षष्टिगुणित-
प्रकृतव्यासार्द्धे क इत्यनुपाते फल द्विगुणितं किञ्चिन्यूना-
धिका षष्टिगुणिते १२०००० व्यासे त्रिद्व्यङ्काग्निनभश्चन्द्रादयः
क्रमेणाङ्काः लब्धाः। यदि खखखार्क १२०००० व्यासवृत्ते एते
१०३६२३।६४८५३।७०५३४५।६००००।५२०५५।४५६२२।
४१०३१। क्रमेण भुजाः तदा इष्टव्यास २००० वृत्ते के
इत्यनुपातेन उक्तानि फलानि भुजमानानि
स्युरिति

अत्र वृत्तान्तर्गतं त्रिकोणञ्च समत्रिकोणं तत्र सर्वेषां
भुजानां तुल्यत्वात्। तथाहि परिधितृतीयांश
रूपाणां सर्व्वचापांशानां तुल्यतया तुल्यचापांशेषु
जीवास्थानीयभुजानां तुल्यत्वौचित्यात्।
अन्यान्यक्षेत्रेषूपपत्तिर्लीलावतीटीकायां दर्शिता विस्तर-
भयान्नोल्लिखिता।
९ स्थानमात्रे "धर्म्मक्षेत्रे कुरुक्षेत्रे" गीता। तत्र केदारे
"यादृशं तूप्यते वीजं क्षेत्रे कालोपपादिते" येऽक्षेत्रिणो
वीजवन्तः परक्षेत्रे प्रवापिणः" मनुः
कलत्रे "अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः" याज्ञ॰
देहे "इदं शरीरं कौन्तेय! क्षेत्रमित्यभिधीयते" गीता।
क्षेत्रज्ञः "क्षेत्रक्षेत्रज्ञयोरेवम्"। "गीता क्षेत्रेष्वेवमजोऽय-
मात्मा" श्रुतिः तीर्थस्थाने "प्रविशन्तस्तु तत्क्षेत्रं सर्वे स्यु-
र्विष्णुमूर्त्तयः"। उत्कलख॰। क्षेत्र विद्यतेऽस्य इनि क्षेत्रिन्,
ठन् क्षेत्रिक क्षेत्रस्वामिनि त्रि॰ "फलं त्वनभिसन्धाय
क्षेत्रिणां वीजिनां तथा" कुर्व्वन्ति क्षेत्रिणोयद्वद्" प्रत्यक्ष
क्षेत्रिकस्यार्थः" "क्षेत्रिकस्यैव तद्वीजम्" मनुः। एतस्मि-
न्नुपपदे कर्म्मभूते कर्त्तरि कृञः टः। क्षेत्रकर क्षेत्रकारिणि
त्रि॰ स्त्रियां ङीप्। [राजनि॰

क्षेत्रकर्कटी स्त्री क्षेत्रजाता कर्कटी। वालुक्यां कर्कटीभेदे

क्षेत्रचिर्भिटा स्त्री क्षेत्रजाता चिर्भिटा। पाण्डुफलायां
चिर्भिटाभेदे राजनि॰

क्षेत्रज पु॰ क्षेत्रे जायते जन-ड ७त॰। "यस्तल्पजः प्रमीतस्य
क्लीवस्य व्याधितस्य च। स्वधर्म्मेण नियुक्तायां स पुत्रः
क्षेत्रजः स्मृत": इति मनूक्ते १ पुत्रभेदे नियोगधर्म्मश्च
मनुनोक्त्वा निषिध्य च वाग्दानोत्तरमेव पतिमरणे
विहितः यथा

"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये। विधवायां
नियुक्तस्तु घृताक्तो वाग्यतो निशि। एकमुत्पादयेत्
पुत्त्रं न द्वितीयं कथञ्चन। द्वितीयमेके प्रजनं मन्यन्ते
स्त्रीषु तद्विदः। अनिर्वृत्तं नियोगार्थं पश्यन्तो
धर्म्मतस्तयोः। विधवायां नियोगार्थे निर्वृत्ते तु यथा-
विधि। गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम्। नि-
युक्तौ यौ विधिं हित्वा वर्त्तेयातान्तु कामतः। तावुभौ
पतितौ स्यातां स्नुषागगुरुतल्पगौ। नान्यस्मिन् विधवा
नारी नियोक्तव्या द्विजातिभिः। अन्यस्मिन् हि
नियुञ्जाना धर्म्मं हन्युः सनातनम्। नोद्वाहिकेषु म-
न्त्रेषु नियोगः कीर्त्त्यते क्वचित्। न विवाहविधावुक्तं
विधवावेदनं पुनः। अयं द्विजैर्हि विद्वद्भिः पशुधर्म्मो
विगर्हितः। मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशा-
सति। स महीमखिलां भुञ्जन् राजर्षिप्रवरः पुरा।
वर्णानां सङ्करं चक्रे कामोपहतचेतनः। ततः प्रभृति

यो मोहात् प्रमीतपतिकां स्त्रियम् । नियोजयत्यपत्यार्थं तं विगर्हन्ति साधवः । यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजो विन्देत देवरः । यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् । मिथो भजेताप्रसवात् सकृत् सकृदृतावृतौ” ।

बृहस्पतिना “उक्तो नियोगो मनुना निषिद्धः स्वयमेव हि” इत्यादिना तन्निषेधउक्तः । मिताक्षरायामप्ययं पक्षो द्व्यामुष्यायणप्रसङ्गे समर्थितः यथा
“अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः” या० । “अपुत्रो गुर्वनुज्ञातः” इत्याद्युक्तविधिना अपुत्रेण देवरादिना परक्षेत्रे परभार्य्यायां गुरुनियोगेनोत्पादितःपुत्रउभयोर्वीजक्षेत्रिणोरसौ रिक्थी रिक्थहारी पिण्डदाता च धर्मत इत्यस्यायमर्थः । यदाऽसौ नियुक्तोदेवरादिःस्वयमप्यपुत्रोऽपुत्रस्य क्षेत्रे स्वपरपुत्रार्थं प्रवृत्तोयं जनयति स द्विपितृकोद्व्यामुष्यायणोद्वयोरपि रिक्थहारी पिण्डदाता च । यदा तु नियुक्तःपुत्रवान् केवलं क्षेत्रिणःपुत्रार्थं यतते तदा तदुत्पन्नः क्षेत्रिणएव पुत्रोभवति न वीजिनः-स च नियमेन वीजिनोरिक्थहारी पिण्डदोऽपीति । यथोक्तं मनुना “क्रियाभ्युपगमात् क्षेत्रं वीजार्थं यत् प्रदीयते । तस्येह भागिनौ दृष्टौ वीजी क्षेत्रिकएवचेति” । क्रियाभ्युपगमादिति अत्रोत्पन्नमपत्यमावयोरुभयोरपि भवत्विति संविदङ्गीकरणाद्यत् क्षेत्रं क्षेत्रस्वामिना वीजिने वीजवपनार्थं दीयते तस्मिन् क्षेत्रउत्पन्नस्यापत्यस्य वीजक्षेत्रिणौ भागिनौ दृष्टौ महर्षिभिः । तथा । “फलं त्वनभिसन्धाय क्षेत्रिणां वीजिनां तथा । प्रत्यक्षं क्षेत्रिणामर्थो वीजाद्योनिर्वलीयसीति” मनुः । “फलं त्वनभिसन्धायेति अत्रोत्पन्नमपत्यमावयोरुभयोरस्त्वित्येवमनभिसन्धाय परक्षेत्रे यदपत्यमुत्पाद्यते तदपत्यं क्षेत्रिणएव । यतोवीजाद्योनिर्वलीयसी गवाश्वादिषु तथादर्शनात् । अत्रापि नियोगोवाग्दत्ताविषयएव इतरस्य नियोगस्य मनुना निषिद्धत्वात् “देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया । प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये । विधवायां नियुक्तस्तु घृताक्तोवाग्यतोनिशि । एकमुत्पादयेत्पुत्रं न द्वितीयं कथञ्चन” इत्येवं नियोगमुपन्यस्य मनुः स्वयमेव निषेधति । “नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभिः । अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युःसनातनम् । नोद्वाहिकेषु मन्त्रेषु नियोगः-कीर्त्त्यते क्वचित् । न विवाहविधावुक्तं विधवावेदनं पुनः । एवंद्विजैर्हि विद्वद्भिःपशुधर्मोविगर्हितः । मनुष्याणामपि प्रोक्तोवेने राज्यं प्रशासति । स महीमखिलां भुञ्जन् राजर्षिप्रवरःपुरा । वर्णानां सङ्करञ्चक्रे कामोपहतचेतनः । ततःप्रभृति योमोहात् प्रमीतपतिकां स्त्रियम् । नियोजयत्यपत्यार्थं गर्हन्ते तं हि साधवः” इति । नच विहितप्रतिषिद्धत्वाद्विकल्प इति मन्तव्यम् नियोक्तॄणां निन्दाश्रवणात् । स्त्रीधर्मेषु व्यभिचारस्य बहुदोषश्रवणात् संयमस्य प्रशस्तत्वाच्च । यथाह मनुरेव “कामं तु क्षपयेद्देहं पुष्पमूलफलैःशुभैः । नतु नामापि गृह्णीयात्पत्यौ प्रेते परस्य त्विति” जीवनार्थं पुरुषान्तराश्रयणं प्रतिषिध्य “आसीतामरणात् क्षान्ता नियता ब्रह्मचारिणी । योधर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् । अनेकानि सहस्राणि कौमारब्रह्मचारिणाम् । दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् । मृते भर्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः । अपत्यलोभाद्या तु स्त्री भर्त्तारमतिवर्त्तते । सेह निन्दामवाप्नोति परलोकाच्च हीयते” इति पुत्रार्थमपि पुरुषान्तराश्रयणं निषेधति । तस्माद्विहितप्रतिषिद्धत्वाद्विकल्पइति न युक्तम् । एवं विवाहसंस्कृतानियोगे प्रतिषिद्धे कस्तर्हि धर्म्मोनियोग इत्यतआह “यस्याम्रियेत कन्याया वाचा सत्ये कृते पतिः । तामनेन विधानेन निजोविन्देत देवरः । यथाविध्यधिगम्यैनां शुक्लवस्त्रां शुचिव्रताम् । मिथोभजेताप्रसवात्सकृत्सकृदृतावृताविति” । यस्मै वाग्दत्ता कन्या स प्रतिग्रहमन्तरेणैव तस्याः पतिरित्यस्मादेव गम्यते । तस्मिन् प्रेते देवरस्तस्य ज्येष्ठःकनिष्ठोवा निजःसोदरोविन्देत परिणयेत् । यथाविधि यथाशास्त्रमधिगम्य परिणीयानेन विधानेन घृताभ्यङ्गवाङ्नियमादिना । शुक्लवस्त्रां शुचिव्रतां मनोवाक्कायसंयमां मिथोरहस्यागर्भग्रहणात्प्रत्यृत्वेकैकं वारं गच्छेत् । अयञ्च विवाहोवाचनिकोघृताभ्यङ्गादिनियमवन्नियुक्ताभिगमनाङ्गमिति न देवरस्य भार्य्यात्वमापादयत्यतस्तदुत्पन्नमपत्यं क्षेत्रस्वामिनएव भवति न देवरस्य संविदा तूभयोरपि” अनेन सन्दर्भेण प्रमीतपतिकायां नियोगनिषेधात् सधवायामनिषेधः तेन पाण्डुराजेन कुन्त्यां माद्र्यां च नियोगद्वारा पुत्राणामुत्पादनं न विरुद्धम् ।

वस्तुतः “अनेकधा कृताः पुत्रा ऋषिभिर्यैः पुरातनैः न शक्यन्तेऽधुना कर्त्तुं शक्तिहीनैरिदन्तनैः” इति वृहस्प-

तिना शक्तिहीनानामेवेदानीन्तनानां तथाचरणस्य निषेधात् शक्तिशालिभिऋषिभिस्तस्याचरणं न निषिद्धं तेषां तपःप्रभावात् तत्पापक्षयसम्भवात्। अतएव मृतपत्निकयोरपि अम्बिकाम्बालिकयोर्विचित्रवीर्य्यभार्य्ययोर्नियोगात् व्यासेन धृतराष्ट्रपाण्डुरूपक्षेत्रजयोरुत्पादनं न विरुद्धम्। अतएवादित्यपुराणे कलिवर्ज्य-प्रकरणे "देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते" इत्युक्तं कालिकापुराणे च तत्प्रकरणे "दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः" इत्युक्तम्। धृतराष्ट्रादीनां तु कलियुगोत्पन्नत्वेऽपि वासुदेवस्य भूमावस्थितिपर्य्यन्तं कलिधर्म्माणां प्रादुर्भावाभावान्न विरोधः। अतः कलौ तस्य सर्व्वथा निषेधात् तद्विषये विशेषो नाभिहितः। २क्षेत्रजातमात्रे त्रि० ३श्वेतकण्टकार्य्यां ४शशाण्डुल्यां ५गोमूत्रिकायां ६शिल्लिकायां ७चविकायाञ्च स्त्री राजनि०

क्षेत्रज्ञ पु० क्षेत्रमात्मत्वेन सर्व्वज्ञत्वेन वा जानाति ज्ञा—क। १आत्मत्वेन देहाद्यभिमानिनि जीवे २सर्व्वज्ञे परमेश्वरे। "इदं शरीरं कौन्तेय! क्षेत्रमित्यभिधीयते। एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः। क्षेत्रज्ञञ्चापि मां विद्धि सर्व्वक्षेत्रेषु भारत!। क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम!। तत् क्षेत्रं यच्च यादृक् च यद्विकारि यतश्च यत्। स च यो यत्प्रभावश्च तत् समासेन मे शृणु। ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक्। ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः। महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः। इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः। एतत् क्षेत्रं समासेन सविकारमुदाहृतम्" गीता। "अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च" विष्णुस० ३साक्षिणि च। "प्रकृत्यास्तु विकारा ये क्षेत्रज्ञस्तैरधिष्ठितः" नचैनं ते प्रजानान्ति स तु जानाति तानि वै" भा०शा०२४२अ०। "यश्चात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते" इति मनूक्ते ४अन्तर्यामिणि "हृदि स्थितः कर्म्मसाक्षी क्षेत्रज्ञो यस्य तुष्यति" भा० आ० २०१६ श्लो०। ५वटुकभैरवे "क्षेत्रज्ञः क्षत्रियो विराट्" वटुकस्तवः। ६विदग्धे त्रि० मेदि० ७कृषके त्रि० शब्दरत्ना० ८क्षेत्रज्ञातरि त्रि० "तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्य्युपरि सञ्चरन्तो न विन्देयुः" छा०उ०। ततः ब्राह्मणा० भावे ष्यञ् क्षेत्रज्ञ्य युवा० अण्। क्षैत्रज्ञ तद्भावे न०।

क्षेत्रदूती स्त्री क्षेत्रे दूतीव। श्वेतकण्टकारिकायाम् राजनि०।

क्षेत्रपति पु० ६त०। क्षेत्रस्वामिनि "जीवं क्षेत्रपतिं प्राहुः केचिदन्यमथापरे। स्वतन्त्र एव स कश्चित् क्षेत्रस्य परिपास्यते" तन्त्र० क्षेत्रपतेरपत्यादि पत्युत्तरपदत्वेऽपि अश्वपत्यादौ पाठात् अण्। क्षैत्रपत तदपत्यादिषु त्रि०।

क्षेत्रपर्पटी स्त्री क्षेत्रे पर्पटीव। (क्षेतपापड़ा) इति ख्याते क्षुपभेदे वैद्यकम्।

क्षेत्रपाल त्रि० क्षेत्रं पालयति पालि—अण्। १क्षेत्ररक्षके त्रि०। २भैरवभेदे पु०। तद्भेदाः प्रयोगसारे उक्ता यथा "भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः। मातृकावीजभेदेन सम्भिन्ना नामभेदतः। अजरश्चापकुम्भश्च इन्द्रसुतस्ततःपरः। ईडाचारश्चोक्थसंज्ञ जम्भाद ऋषिसूदनः। ऋमुक्तो लुप्तकेशश्च लुप्तकश्चैकदंष्ट्रकः। ऐरावतश्चौघबन्धुरौषधेशस्तथैव च। अञ्जनश्चास्त्रवारश्च कवचः खरखानलः। गोमुख्यश्चैव घण्टादोऽङ्मनाश्चण्डवारणः। छटाटोपो जटालाख्यो झङ्कारश्च अडुम्बरः। टङ्कपाणिस्तथा-चान्यठानबन्धुश्च डामरः। ढक्कारवो णवर्णश्च तडिद्देह स्थिरस्तथा। दन्तुरो धनदश्चान्यो नतिक्रान्तः प्रचण्डकः। फट्कारो वीरसंघश्च भङ्गाख्यो मेघभासुरः। युगान्तो रौद्ररूपश्च लम्बोष्ठो वसुमांस्तथा। शूकनन्दः षडालाख्यः सुनामा ह्रम्बुकस्तथा। एते भेदाः समाख्याता मातृकाक्षरयोनिकाः"। क्षेत्रपालकथनप्रयोजनं यथा "नाम पद्यस्य वर्णानां यो वर्णो मातृकान्तरे। दृश्यते प्रथमं तत्र तत्रायं क्षेत्रपालकः। तत्र तत्र विशिष्टात्मा भेदैरेतैर्व्यवस्थितः। ततो विशिष्टो यष्टव्यः क्षेत्रपालस्तु सर्वतः। क्षेत्रपालमसंपूज्य यः कर्म कुरुते क्वचित्। तस्य कर्मफलं हन्ति क्षेत्रपालो न संशयः"। तन्त्रोक्ते २पश्चिमद्वारपाले भैरवभेदे च "गणेशं वटुकं चैव क्षेत्रपालञ्च योगिनीः। पूर्व्वादिक्रमयोगेन द्वारपालान् प्रपूजयेत्" तन्त्र० ३क्षेत्रपालके त्रि०

क्षेत्रफल न० क्षेत्रस्य फलम्। १भूम्यादिक्षेत्रजाते शस्यादौ। लीलावत्याद्युक्ते त्रिकोणादिक्षेत्रभवे २हस्तादिरूपे(कालि) फले क्षेत्रशब्दे विवृतिः। [यष्टायां वैद्यकम्।

क्षेत्रमालिका स्त्री क्षेत्रं मालयति मल—णिच्—ण्वुल्।

क्षेत्ररुहा स्त्री क्षेत्रे रोहति रुह—क। १वालुक्यां कर्कटीभेदे राजनि०। २क्षेत्रजातमात्रे त्रि०। [तत्त्वज्ञापके व्यवहारभेदे।

क्षेत्रव्यवहार पु० लीलावतीप्रदर्शिते त्रिकोणादिक्षेत्रफलादि-

क्षेत्रसम्भव त्रि० क्षेत्रे सम्भवति सम्+भू—अच्। १क्षेत्रजाते "क्षेत्रसम्भवफलं घनं भवेत्" लीला०। २भूमिजातमात्रे त्रि०। ३भिण्डाक्षुपे पु० राजनि०।

क्षेत्रसम्भूत पु० क्षेत्रे संभूतः। १कुन्दरे पु० शब्दचि० २भूमिभवे त्रि०।

क्षेत्रसाधस् त्रि० क्षेत्रं साधयति साधि—असुन्। क्षेत्रसाधके "सपर्य्यन्न पुरुप्रियं मित्रं न क्षेत्रसाधसम्" ऋ०८,३१,१४।

क्षेत्राजीव त्रि०क्षेत्रं तत्फलं यस्य आजीवति आ—जीव—अण्। कर्षके अमरः।

क्षेत्राधिदेवता स्त्री ६त०। सिद्धस्थानतीर्थाधिष्ठातृदेवताभेदे। तन्नामोच्चारणञ्च श्रीशब्दोच्चारणपूर्वं कार्य्यं यथाह सं०त० प्रयोगसारः "देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम्। सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत्"।

क्षेत्राधिप स्त्री ६त०। १मेषादिद्वादशराशिस्वामिषु कुजादिषु क्षेत्रशब्दे विवृतिः। २क्षेत्रस्वामिनि त्रि०। [शब्दमा०।

क्षेत्रामलकी स्त्री क्षेत्रे जाता आमलकी। भूम्यालक्याम्

क्षेत्रिक त्रि० क्षेत्रमस्त्यस्य ठन्। क्षेत्रस्वामिनि। "ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति। क्षेत्रिकस्यैव तद्बीजम्" मनुः। इनि क्षेत्रिन् अप्यत्र क्षेत्रशब्दे उदा०। "यावत्सस्यं विनश्येत्तु क्षेत्री तस्य फलं लभेत्" याज्ञ०।

क्षेत्रिय त्रि० परक्षेत्रे देहान्तरे चिकित्स्यः परक्षेत्रस्य क्षेत्रियजादेशः। देहान्तरे चिकित्स्ये अप्रतीकार्य्ये १रोगे "दण्डोऽयं क्षेत्रियो येन मय्यपातीति साऽब्रवीत्" भट्टिः। क्षेत्रमस्त्यस्य वा० घ। २क्षेत्रस्वामिनि त्रि०। "क्षेत्रियस्यात्यये दण्डो भागाद्दशगुणोभवेत्। ततोऽर्द्धदण्डोभृत्यानामज्ञानात् क्षत्रियस्य तु" मनुः क्षत्रियस्येत्यत्र क्षेत्रिकस्येति पाठान्तरम्। क्षेत्रे भवः वा० घ। ४क्षेत्रजाते तृणादौ त्रि० क्षेत्रे स्वपरक्षेत्रमात्रे प्रसितः वा०घः। ५परदाररते पुं मेदि०।

क्षेत्रेक्षु पुं०क्षेत्रे इक्षुरिव। यावनाले(जुन्नारी)ख्याते राजनि०

क्षेप पु० क्षिप—घञ्। १निन्दायां, २विक्षेपे, ३प्रेरणे, ४लेपने ५हेलायां ६लङ्घने हेम०। करणे घञ्। ६गर्वे मेदि० ७विलम्बे हेम०। कर्मणि घञ्। ८गुच्छे त्रिका०। तत्र निन्दायां "सत्यासत्यान्यतं स्तोत्रे न्यूनाङ्गेन्द्रियरोगिणाम्। क्षेपं करोति चेद्दण्ड्यः" याज्ञ०। "क्षेपसंप्राप्तयंस्तत्र प्रकृत्या कोपनः प्रभुः" भा०शा० ४६अ०। "क्षेपयुक्तैर्वचोभिः" भा०आ० ५५५ श्लो०। विक्षेपे दृष्टिक्षेप. अपटीक्षेपः। विलम्बे "क्षणक्षेपमुद्गैलताख्यमम्" माघः। कर्मणि घञ्। क्षिप्यमाणे काहकशब्दे पृ० २०७१ उदा० फलान्यधोवस्तदधो निवेश्यः" लीला० क्षेप+स्वार्थे कात्मार्थे "भाज्योहारः क्षेपकश्चापवर्त्त्यं" इत्यादि तत्र शब्दे लीलावतीवाक्यमुक्तम्।

क्षेपक त्रि० क्षिप—ण्वुल्। १विक्षेपकर्त्तरि ग्रन्थकृदकृतांशस्य तद्ग्रन्थमध्ये सन्निवेशके च। क्षेप+स्वार्थे क। क्षिप्यमाणे यथा लीलावत्यां "पादोनपद्याकतुल्यटङ्कैरित्यादि" श्लोकद्वयम्।

क्षेपण न० क्षिप—ल्युट्। १अपवादे २लङ्घने ३प्रेरणे ४विक्षेपे ५यापने च। "आयुषः क्षेपणार्थञ्च तु दातव्यं स्त्रीधनं विना" हारीतः "उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम्" मनुः। करणे ल्युट्। ६क्षेपसाधने मल्लव्यापारभेदे (फेकान) "क्षेपणैर्मुष्टिभिश्चैवावरोहोद्धूतनिःस्वनैः" भा०वि०१२अ० "क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यावनं हठात्" तद्व्याख्यायां नीलकण्ठधृतं मल्लशास्त्रम्।

क्षेपणि(णी) स्त्री क्षिप बा० अनि वा ङीप्। १नौकादण्डे (दांड़) अमरः। २जालभेदे (क्षेपलाजाल) मेदिनिः।

क्षेपणीय पु० क्षिप—अनीयर्। "क्षेपणीयोभिन्दिपालः खड्गोदीर्घमहाफलः" यादवोक्तलक्षणे १भिन्दिपालेऽस्त्रे, २क्षेप्यमात्रे पाषाणादिके त्रि०। "नाराचक्षेपणीयाश्मनिष्पेषपतितानलम्" रघुः। [शीघ्रतायाम्।

क्षेपिमन् पु० क्षिप्रस्य भावः पृथ्वा० इमनिच्" क्षेपादेशः।

क्षेपिष्ठ त्रि० अतिशयेन क्षिप्रः इष्ठन् क्षेपादेशः। अतिशयशीघ्रे "वायुर्वै क्षेपिष्ठा देवता" श्रुतिः। ईयसुन्। क्षेपीयस् तत्रार्थे त्रि० स्त्रियां ङीप्।

क्षेम पु० क्षि—मन्। १चोरनामगन्धद्रव्ये। २लब्धवस्तुनोरक्षणे पु० न० अर्द्धर्चादि० मेदिनिः। "उपेयादीश्वरञ्चैव योगक्षेमार्थसिद्धये" याज्ञ० लब्धस्य रक्षणं क्षेमः" व्या०त० रघु०। "यन्ता च मे धर्त्ता च मे क्षेमश्च मे" यजु०१८,७०, क्षेमः विद्यमानधनादे रक्षणशक्तिः" वेददी०। ३विद्यमानसत्ताकस्य वस्तुनः स्वाधिकरणे विशिष्टबुद्धिनियामकसम्बन्धविशेषव्यवस्थापने क्षेमिकशब्दे विवृतिः। ४कुशले न० ५तद्वति त्रि० अम०। "रहाण राज्यं विपुलं क्षेमं निहतकण्टकम्" भा० व० २५८७६ श्लो० "इतःक्षेमः पुनः पन्थाः" भा० व० ४४४श्लो० "श्वश्रूश्वशुरभर्त्तॄणां मम क्षेमास्तु शर्वरी" २६८अ०। ६मुक्तौ न० हेम० "भविता सहदेवस्य" इत्युपक्रमे "अथ मागधराजानो भाविनोये वदामि ते" "ततः श्रुतञ्जयाद्विप्र! शुचिस्तस्य भविष्यति। क्षेमोऽथ सुव्रतस्तस्माद्धर्मस्तत्र समन्ततः" भा०भा०९,२२,१०अ०उक्ते सहदेववंश्ये ७नृपभेदे पु०। "जन्मसम्पद्विपत्क्षेमं प्रत्यरिः साधकोवधः। मित्रं परममित्रं च" ज्यो० उक्ते स्वजन्मतारावधिके चतुर्थत्रयोदशद्वाविंशे नक्षत्रे च न०।

क्षेमक पु० क्षेम–स्वार्थे क। १चोरनामगन्धद्रव्ये जटा० २राक्षसभेदे, "एतस्मिन्नेव काले तु पुरीं वाराणसीं नृप! शून्यां निवेशयामास क्षेमको नाम राक्षसः" हरि०२९अ० ३पाण्डुवंश्ये नृपभेदे। "दण्डपाणिर्निमिस्तस्य क्षेमको भविता ततः" इत्युपक्रमे "क्षेमकं प्राप्य राजानं संस्थं प्राप्स्यति वै कलौ" भा० ९,२२,२९श्लो०।

क्षेमकर त्रि० क्षेमं करोति कृ–अच् ६त०। १मङ्गलकारके "पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः!" भा० आश्व० १५ अ०।

क्षेमकार त्रि० क्षेमं करोति कृ–अण् उप०स०। मङ्गलकारके "पितुः प्रियङ्करो भर्त्ता क्षेमकारस्तपस्विनाम्" भट्टिः

क्षेमकृत् त्रि० क्षेमं करोति कृ–क्विप् ६त०। १कृतमङ्गले २उपात्तस्य रक्षके परमेश्वरे पु०। "अनियन्ता निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः" विष्णुसं०।

क्षेमङ्कर त्रि० क्षेमं करोति "क्षेमप्रियमद्रेऽण् च" पा० चकारात् खच् मुम् च। क्षेमकारके।

क्षेमङ्करी स्त्री "क्षेमान् देवेषु सा देवी कृत्वा दैत्यपतेः क्षयम्। क्षेमङ्करी शिवेनोक्ता पूज्या लोके भविष्यसि" देवीपु० ४० अ० उक्ते १देवीभेदे, २शङ्खचिल्लपक्षिणि। "कुङ्कुमारुणसर्वाङ्गि! कुन्देन्दुधवलानने। मत्स्यमांसप्रिये! देवि! क्षेमङ्करि! नमोऽस्तु ते" इति तत्प्रणाममन्त्रः

क्षेमदर्शिन् त्रि० क्षेमं पश्यति दृश–णिनि। मङ्गलदर्शिनि स्त्रियां ङीप्। कोसलाधिपराजभेदे। "कोसलानामाधिपत्यं संप्राप्तं क्षेमदर्शिनम्" "स काकं पञ्जरे बद्धा विषयं क्षेमदर्शिनः" भा० शा० ८२ अ०।

क्षेमधन्वन् पु० रामवंश्ये राजभेदे। "रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः" इत्युपक्रमे "नभस्य पुण्डरीकस्तु क्षेमधन्वा ततः स्मृतः" हरि० १५ अ०। "स क्षेमधन्वानममोघधन्वा" रघुः।

क्षेमधूर्त्त पु० ब०व० वृह० सं० कूर्म्मविभागे "शङ्खमाकाः क्षेमधूर्त्ताश्च" इति उत्तरस्यामुक्ते देशभेदे।

क्षेमधूर्त्ति पु० कैकेयदेशाधिपे राजभेदे। "बृहत्क्षत्रमथायान्तं कैकेयं दृढविक्रमम्। क्षेमधूर्त्तिं महाराज! विव्याधोरसि मार्गणैः" भा० द्रो०१० ७अ०। "गणः क्रोधवशो नाम यस्ते राजन्! प्रकीर्त्तितः। ततः सञ्जज्ञिरे वीराः" इत्युपक्रमे "कारूक्षेमश्च राजानः क्षेमधूर्त्तिस्तथैव च" भा० आ० ६७अ०। [क्षेमाफलेति पाठे शब्दचि०।

क्षेमफला स्त्री० क्षेमं फलं यस्य। उडुम्बरवृक्षे शब्दच०।

क्षेममूर्त्ति स्त्री दुर्य्योधनभ्रातृभेदे "उग्रश्रवाः उग्रसेनः क्षेममूर्त्तिस्तथैव च" भा० आ० ६७ अ०।

क्षेमवृद्धिन् त्रि० क्षेमस्य वृद्धमस्त्यस्य इनि। क्षेमवर्द्धनये ततः बाह्वा० इञ्। क्षैमवृद्धि तदपत्ये पु० स्त्री०।

क्षेमा स्त्री १देवीमूर्त्तिभेदे "निक्षिसे पूजयेत् क्षेमां सर्वकामफलप्रदाम्" देवी०पु०४७अ०। २अप्सरोभेदे च "अम्बिका लक्षणा क्षेमा देवी रम्भा मनोरमा" भा० आ०१२३अ०।

क्षेमाधि पु० मिथिलाधिपे राजभेदे। "अरिष्टनेमिस्तस्यापि श्रुतायुस्तत् सुपार्श्वकः। ततश्चित्ररथोयस्य क्षेमाधिर्मिथिलाधिपः" भाग०९,१३,१४।

क्षेमासन न० "अथ क्षेमासनं वक्ष्ये यत् कृत्वा प्रेक्षयेद्दिवम्। दक्षहस्ते दक्षपादं केवलं स्थापयेत् सुधीः" इति रुद्रयामलोक्ते आसनभेदे।

क्षेम्य त्रि० क्षेमाय साधु यत्। शुभलयोग्ये "सायं मनुष्याश्च पशवश्च क्षेम्या भवन्ति" श्रुतिः।

क्षेय त्रि० क्षेतुं योग्यः क्षि–यत्। क्षेतुं योग्ये।

क्षेव सेवने भ्वा० पर० सक० सेट्। क्षेवति अक्षेवीत् चिक्षेव।

क्षै क्षये भ्वा० पर० अक० अनिट्। क्षायति अक्षासीत् चक्षौ। क्षेयं क्षाता क्षामः।

क्षैत त्रि० क्षितेरयम् अण्। १क्षितिसम्बन्धिनि २क्षीणतासम्बन्धिनि च "यशस्तरोयशसां क्षैतो अस्मे" ऋ०९,९७,१,

क्षैतयत पु० क्षैताय क्षीणतायै यतते यत–अच्। क्षीणतायै यतमाने ऋषिभेदे यस्कापत्यादि तिका० फिञ्। क्षैतयतायनि तदपत्यादौ

क्षैत्र न० क्षेत्राणां समूहः भिक्षा० अण्। १क्षेत्रसमूहे। स्वार्थे अण्। २क्षेत्रे च "वैश्वानरं क्षैत्रजित्याय देवाः" यजु० ११,६०। क्षेत्रमेव क्षैत्रं तस्य जित्यं जयस्तस्मै यजमानस्य क्षेत्राप्त्यै" वेददी०

क्षैमिक त्रि० क्षेमेण निर्वृत्तं ठञ्। १लब्धस्य रक्षणोपयोगिनि २विद्यमानसत्ताकस्य वस्तुनः स्वाधिकरणे स्वविशिष्टबुद्धिनियामकसम्बन्धव्यवस्थापननिर्वाह्ये जन्यत्वे च। यथा दुःखात्यन्ताभावस्य मोक्षत्ववादिमते अत्यन्ताभावस्याजन्यत्वेऽपि स्वप्रतियोगिदुःखानुत्पादनद्वारा स्वाधिकरणे स्वविशिष्टबुद्धिनियामकदुःखाकालीनस्वरूपसम्बन्धनिर्वाहकत्वं तत्त्वज्ञानस्येति दुःखात्यन्ताभावस्य क्षैमिकी तत्त्वज्ञानसाध्यता। एवं कृतिसाध्यत्वस्य विध्यर्थत्वमते "एकादश्यामुपवसेत्" इत्यादौ अहोरात्रभोजनाभावस्य क्षैमिकं कृतिसाध्यत्वम्। "भावोयथाऽ-

भावः कार्य्यस्य कारणं मतः” इत्युदयनाचार्य्यैरभावमात्रस्य दृष्टान्तविधया कार्य्यत्वोक्तिः क्षैमिकविषया। एतेन प्रायश्चित्तविवेकटीकायां श्रीकृष्णतर्कालङ्कारेणात्यन्ताभावस्य क्षैमिकजन्यत्वस्य निराकरणम् निरस्तम् प्रतियोग्यकालीनस्वरूपसम्बन्धविशेषस्यैवात्यन्ताभावविशिष्टबोधनियामकत्वेन तादृशसम्बन्धस्य तत्त्वज्ञानहत्यादिनिर्वाह्यत्वात् स्वाधिकरणे सति हि दुःखे भोजने वा तादृशस्वरूपसम्बन्धाभावात् विशिष्टबुद्धेरनुदयात् तस्य तत्त्वज्ञानादिप्रयोज्यत्वमेवमन्यत्रोह्यम्

क्षैरह्रद त्रि० क्षीरह्रदस्येदम् शिवा० अण्। क्षीरह्रदसम्बन्धिनि।

क्षैरेय त्रि० क्षीरे संस्कृतम् ढञ्। १क्षीरे संस्कृते परमान्ने न० हेम०। २यवाग्वां स्त्री ङीप्।

क्षोड़ पु० क्षोड़-घञ् पृषो०। १आलाने गजबन्धन्याम् शब्दचि०

क्षोण त्रि० क्षि—बा० डोन। क्षयशीले। “महः क्षोणस्याश्विना कण्वाय” ऋ०१,११७,८ क्षोणस्य क्षयणस्य निरु० ६,६,

क्षोणि(णी) स्त्री क्षै—बा० डोनि वा ङीप्। १पृथिव्यां निघ०। “मत्स्यो युगान्तसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः”भाग०२,७,१२। २एकसंख्यायाञ्च

क्षोद पु० क्षुद—घञ्। १चूर्णने पेषणे अमरः कर्म्मणि घञ्। २रजसि च हेम०। “आनेमिमग्नैः शितिकण्ठपक्ष क्षोदद्युतश्चुक्षुभिरे रथौघैः” माघः “षष्ठः खण्डनखण्डखाद्यसहजक्षोदक्षमे” नैष०।

क्षोदक्षम त्रि० क्षोदं क्षमते क्षम—अच्। विचारसहे “षष्ठः खण्डनखाद्यसहजक्षोदक्षमे” नैष०।

क्षोदस् न० क्षुद—असुन्। जले निघ०।

क्षोदित न० क्षुद—णिच्-क्त। १चूर्णिते पेषिते शब्दचि०।

क्षोदिमन् पु०क्षुद्रस्य भावः इमनिच् क्षोदादेशः। क्षुद्रतायाम्।

क्षोदिष्ठ त्रि० अतिशयेन क्षुद्रः इष्ठन् क्षोदादेशः। अतिक्षुद्रे।

क्षोदीयस् त्रि० अतिशयेन क्षुद्र ईयसुन् क्षोदादेशः। क्षुद्रतरे “बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति”। माघः स्त्रियां ङीप्। [प्रजाश्च भवन्ति” शत०ब्रा० १,५,२,७।

क्षोधुक त्रि० क्षुध— बा०उकञ्। क्षुधायुक्ते। “क्षोधुका हास्य

क्षोभ पु० क्षुभ-घञ्। १सञ्चलने “स नूपुरक्षोभपदाभिरासीत्” “रथक्षोभपरिश्रान्तः” रघुः। २विकारे च “क्षोभमाशु हृदयं न यदूनाम्” माघः। “अथेन्द्रियक्षोभमयुग्मनेत्रः” कुमा०।

क्षोभक पु०“दुर्जराख्यस्य पूर्वस्यां पुरं नाम वराशनम्। तद्दक्षिणे महाशैलः क्षोभको नाम नामतः” कालिकापु० ७अ० उक्ते कामाख्यतीर्थस्थनगरभेदे। क्षुभ—ण्वुल्। २क्षोभकारके त्रि०।

क्षोभण त्रि०क्षुभ-णिच्-ल्यु। १क्षोभजनके। २कामबाणविशेषे पु० पञ्चबाणशब्दे विवृतिः ३शिवे पु०। “नमो बुद्धाय लुब्धाय क्षुब्धाय क्षोभणाय च”. भा० शा० २८६अ० शिवसहस्रनाम। ४विष्णौ। “उद्भवः क्षोभणो देवः श्रुतगर्भोरमेश्वरः” विष्णुसं० तस्य च सृष्टिकाले प्रकृत्यादिक्षोभकत्वात्तथात्वम् यथाह विष्णुपु० “प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया प्रभुः। क्षोभयामास भगवान् सर्गकालेऽव्ययाव्ययौ”। भावे ल्युट्। ५क्षोभणे न०।

क्षोम न०क्षु-मन्। १मण्डपोपरिशालायाम्(चिलेवर)शब्दचि०। २अट्टे भरतः ३शणक्षासके पु० जटाधरः संज्ञायां कन् तत्रार्थे ४चोरनामगन्धद्रव्ये पु० शब्दचि०।

क्षौ(क्ष्मा)णी स्त्री क्षु—बा० नि वृद्धिश्च वा ङीप्। १धरण्याम् अमरः। अन्या व्युत्पत्तिः ब्रह्मवै०पु०२०७ अ०उक्ता यथा “इज्या च यागधाराश्च क्षौणी क्षीणा लवे यथा। महालये यत्र यान्ति क्षितिस्तेन प्रकीर्त्तिता” तेन क्षीणाशब्दात् पृषो० साधु। २एकसंख्यायाञ्च।

क्षौणीप्राचीर पु० क्षौणी प्राचीर इव यस्य। समुद्रे जटा०।

क्षौणीभुज् पु० क्षौणीं भुनक्ति अवति भुज-क्विप्। क्षितिपालके राजनि

क्षौद्र न०क्षुद्राभिः सरघाभिर्निर्वृत्तम् अण्। “मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतं मधु। मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलं भवेत्” इति भावप्र०उक्ते १मधुनि अमरः। “सक्षौद्रपटलैरिव” रघुः। “गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनं परम्” भावप्र०। २जले मेदि०। ३चम्पकवृक्षे पु० शब्दच०। ४क्षितिकणे पांशौ न० शब्दचि० ५मागध्यां जाते जातिसङ्करभेदे पु०स्त्री० “चतुरो मागधी सूते क्रूरान् मायोपजीविनः। मांसं स्वादुकरं क्षौद्रं सौगन्ध्यमिति विश्रुतम्” भा० अनु० ४८ अ०। क्षुद्रस्य भावः अण्। ६क्षुद्रतायां न०।

क्षौद्रक्य न० क्षुद्रकः आयुधजीविसंघः स्वार्थे ञ्यट्। आयुधजीविसंघे टित्त्वसामर्थ्यात् स्त्रियां ङीप्: क्षौद्रकीत्यप्यत्र स्त्री सि०कौ०।

क्षौद्रज न० क्षौद्रात् जायते जन-ड। (मोम) ख्याते १सिक्थके राजनि०। २मधुजातमात्रे त्रि०।

क्षौद्रधातु पु० कर्म०। माक्षिके उपधातुभेदे वैद्यकम्।

क्षौद्रप्रिय पु० क्षौद्रमिव प्रियः स्वादुत्वात्। १जलमधूकद्रुमे ह्व०। २मधुप्रिये त्रि०।

क्षौद्रमेह पु० क्षौद्रमिव मेहः। मधुमेहे इत्यु मेहशब्दे ६१० पृ० सुश्रुतवाक्ये तल्लक्षणं दृश्यम् “कषायं मधुरं रूक्षं क्षौद्रमेहं वदेत्बुधः” भावप्र०।

क्षौद्रेय न० क्षौद्रे भवः ठञ्। (मोम) सिक्थके राजनि०।

क्षौम न० क्षु–मन् प्रज्ञा० स्वार्थे अण्। १दुकूले पट्टवस्त्रे। “श्रियः पद्मनिषण्णायाः क्षौमान्तरितमेखले” रघुः “क्षौममाकुलतया विचकर्ष” माघः “वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च” मनुः। क्षुमाया अतस्या विकारः अण्। २शणभेदजातवस्त्रे स्त्रियां ङीप् क्षौमी कन्था। क्षौमेण दुकूलेन परिवृतो रथः अण्। ३दुकूलपरिवृते रथे पु०। ४हर्म्यभेदे पु०न० कौटिल्यः। अट्टे अमरः। अट्टश्च प्राकाराग्रस्थितबलगृहमिति केचित्। मण्डपोपरिनिर्म्मित गृहम् (चिलेघर) इत्यन्ये। [शब्दचि०।

क्षौमिक पु० क्षौममिव कायति कै–क। चोरनामगन्धद्रव्ये।

क्षौमी स्त्री क्षुमैव स्वार्थे प्रज्ञा० अण् ङीप्। १अतस्यां (मसिना) ख्याते वृक्षे। क्षुमाया विकारः कन्था अण् ङीप्। २क्षुमाजातशणकृतकन्थायां स्त्री।

क्षौर न० क्षुरेण निर्वृत्तम् अण्। १क्षुरकर्म्मणि केशकर्त्तने। तत्र विहितनक्षत्रादि क्षुरकर्म्मशब्दे २३८६ पृ० उक्तप्रायं विशेषोऽत्र कश्चिदभिधीयते “व्रतानामुपवासानां श्राद्धादीनाञ्च संयमे। न करोति क्षौरकर्म अशुचिः सर्वकर्मसु। स च तिष्ठति कुण्डेषु नखादीनाञ्च सुन्दरि!। तदेव दिनमानाब्दं तद्भोजी दण्डताड़ितः” ब्रह्म वै० पु०२७अ०। “चन्द्रशुद्धिर्यदा नास्ति तारायाश्च विशेषतः। अक्षौरभेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्दिने” ज्यो०त०। “मानं क्षौरे हन्ति गुरुः शुक्रं शुक्रो धनं रविः। आयुरङ्गारको हन्ति सर्वं हन्ति शनैश्चरः” श्रीपतिरत्नमाला। “आज्ञया नरपतेर्द्विजन्मनां दारकर्मसुत सूतकेषु च। बन्धमोक्षमखदीक्षणेष्वपि क्षौरमिष्टमखिलेषु चोडुषु” भोजदे०। “दक्षकार्ये पितृश्राद्धे रवेरंशपरिक्षये। क्षुरिकर्म न कुर्वीत जन्ममासे च जन्मभे” वृद्धगार्ग्यः, “केशवमावर्त्तपरं पाटलिपुत्त्रं पुरीमहिच्छत्राम्। दितिमदितिञ्च स्मरतां क्षौरविधौ भवति कल्याणम्” ज्यो० त०। अत्र क्रमो वराहपु० “श्मश्रुकर्म कारयित्वा नखच्छेदमनन्तरम्” ज्योति० त०। “केशश्मश्रुलोमनखानि वापयीत शिखावर्ज्जम्” शु० त० गोभिलः। “रोहिण्याञ्च विशाखायां मैत्रे चैवोत्तरासु च। मघायां कृत्तिकायाञ्च द्विजैः क्षौरं विवर्ज्जितम्। कृत्वा तु मैथुनं क्षौरं यो देवांस्तर्पयेत् पितॄन्। रुधिरं तद्भवेत्तोयं दाता च नरकं व्रजेत्” ब्रह्म० वै० पु० नापितगृहे क्षौरनिषेधो यथा “स्वयं माल्यं स्वयं पुष्पं स्वयं घृष्टञ्च चन्दनम्। नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम्” कर्म्मलोचनः।

क्षौरपव्य न० क्षुरं पविरिव स्वार्थे ष्यञ्। अतितीक्ष्णे “कचिद्धंसं चित्रकथं क्षौरपव्यं स्वयं भ्रमिम्” भाग० ६, ५,८।

क्षौरिक पु० क्षौरं शिल्पत्वेनास्त्यस्य ठन्। नापिते शब्दमा०

क्ष्णु तेजने अदा० पर० सक० सेट्। क्ष्णौति अक्ष्णावीत्। चुक्ष्णाव। क्ष्णविता क्ष्णुनः। “वाचं क्ष्णुवानोदमयन् सपत्नान्” अथ०५।२०।१। “उभयतो हीदं वाचः क्ष्णुतम्” शत० ब्रा० ६.३.१,२४।

क्ष्णुत त्रि० क्ष्णु–क्त। तीक्ष्णीकृते अमरः।

क्ष्णोत्र न० क्ष्णु–करणे त्रल्। अस्त्रतेजने शाणाख्ये यन्त्रभेदे। “क्ष्णोत्रेणेव स्वधितिर्मांसशीतम्” ऋ० २,३७,७।

क्ष्मा स्त्री क्षमते भारं क्षम–अच् उपधालोपश्च। १धरायाम्। अमरः “क्ष्मां लम्भयित्वा क्षमयोपपन्नम्” रघुः। “नचोदकप्रवेशेन न च क्ष्माशयनादपि” भा० व० १९९ अ०। “क्ष्मया चरति परि षा इषक्तु नः” निरु० धृता ऋक्। २एकसंख्यायाञ्च।

क्ष्माज पु० क्ष्माया जायते जन–ड। १मङ्गलग्रहे २नरकासुरे च।

क्ष्मापति पु० ६त०। भूपे क्ष्मानाथादयोऽप्यत्र।

क्ष्माभुज् पु० क्ष्मां भुनक्ति अवति भुज–क्विप्। भूमिपाले।

क्ष्माभृत् पु० क्ष्मां बिभर्त्ति पालयति धारयति वा भृ–क्विप् तुक् च। १राजनि २पर्वते च तस्य भूमिधरत्वात्तथात्वम्।

क्ष्माय विधूनने कम्पने भ्वा० आत्म० अक० सेट्। क्ष्मायते। अक्ष्मायिष्ट चक्ष्माये ईदित् क्ष्मातः। “अक्ष्मायन्त मही गृध्राः” “चक्ष्माये च महीं रामः” भट्टिः। णिचि पुक् यलोपश्च। क्ष्मापयति।

क्ष्मील निमेषे भ्वा० पर० अक० सेट्। क्ष्मीलति अक्ष्मीलीत् चिक्ष्मील। निमेषः पक्ष्मभिश्चक्षुषोरावृतिः।

क्ष्विड स्नेहे भ्वा० आत्म० अक० मोचने सक० सेट्। क्ष्वेडते लृदित् अक्ष्विडत्। चिक्ष्विडे ञीदित्। क्ष्वेडितम्। आदित् क्ष्वेड्म् क्ष्वेडितं तेन “नास्फोटयेन्नचाक्ष्वेडेत्” मनुः। परस्मैपदमात्रम् एवं “क्ष्वेडन्तोधावमानाश्च

प्रचेदुस्ते महाजवाः" रामा० कि० ४५ अ० । "क्ष्वेडन्ति घुघुरायन्ते ज्वलन्तीव च ये व्रणाः" सुश्रुतः । अव्यक्त दन्तशब्दकरणे अक० "क्ष्वेडितोत्कृष्टसङ्कुलः" भा० आश्व० ५९ अ० ।

क्ष्विद मोचने सक० स्नेहे अक० भ्वा० आ० सेट् । क्ष्वेदते इर्दित् अक्ष्विदत् ओदित् क्ष्विण्णः आदित् क्ष्विण्णं क्ष्वेदितं तेन ।

क्ष्विद कूजने दिवा० पर० अक० सेट् । क्ष्विद्यति । इरित् अक्ष्वेदीत् अक्ष्विदत् । आदित् क्ष्विण्णं क्ष्वेदितं तेन ।

क्ष्वेड पु० क्ष्विड—भावादौ घञ्, पचाद्यच् वा । १अव्यक्तदन्तशब्दभेदे २स्नेहे ३मोचने ४त्यागे । ५कर्णामयभेदे कर्णगतरोगशब्दे १७०८ पृ० विवृतिः । ६विषे पु० अम० ७पीतघोषाहक्षे रत्नमा० ८लोहितार्कपर्णफले न० मेदि० ९वंशशलाकायां १०सिंहनादे ११कोषातकीवृक्षे स्त्री राजनि०

क्ष्वेडित न० क्ष्विड भावे—क्त । सिंहनादे अमरः ।

क्ष्वेल संचालने, गतौ सक० क्रीडायाम् अक० भ्वा० पर० सेट् । क्ष्वेलति अक्ष्वेलीत् ऋदित् णिचि चङि न ह्रस्वः । अचक्ष्वेलत् । "ये तु विष्टभ्य गात्राणि क्ष्वेलन्ति च नर्दन्ति च" (ये हरियूथपाः) रामा० ६,२अ० "दृप्ताः मल्लांश्च संहृष्टाः क्ष्वेलन्त्यपि यथापुरम्" ६.२६ अ० । "ते तदा स्फोटयामासुः क्ष्वेलन्तश्च समन्ततः" २७ अ० ।

क्ष्वेला स्त्री क्ष्वेल—अ । क्रीडायाम् । स्वार्थे क क्ष्वेलिकाप्यत्र । "क्ष्वेलिकया मृषा समाचिना आमोदितदृशां प्रेमसंरम्भेण चकितचकित आगत्य पूर्वदशनविषाणाग्रेण लुठति" भाग० ५ स्क० ८ अ० । गौरा० ङीष् क्ष्वेलीत्यप्यत्र । "बाहुप्रसारपरिरम्भकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः । क्ष्वेल्यावलोकहसितैर्व्रजसुन्दरीणामुत्तम्भयन् रतिपतिं रमयाञ्चकार" भाग० १० स्क० २९ अ० ।

इति श्री तारानाथतर्कवाचस्पतिभट्टाचार्यविरचिते वाचस्पत्ये ककारादिशब्दार्थसङ्कलनम् ।

ख

खकारः "जिह्वामूले तु कुः प्रोक्तः" शिक्षोक्तेः कण्ठमूलोच्चार्य्यः जिह्वामूलपदस्य कण्ठमूलपरत्वात्। अस्योच्चारणे आभ्यन्तरप्रयत्नः स्पृष्टता (जिह्वामूलस्पर्शः) बाह्यप्रयत्नाश्च "खयां यमः खयः+कँ पौ विसर्गः शर एव च। एते श्वासानुप्रदाना अघोषाश्च विवृण्वते। कण्ठम्" इति शिक्षोक्तेः श्वासाघोषविवाराः "अयुग्मा वर्गयमगा यणश्चाल्पासवः स्मृताः" इति शिक्षोक्तेः वर्गमध्ये युग्मवर्णत्वात् महाप्राणश्च। खादिशब्दे परे पूर्वस्य विसर्गस्य स्थाने जिह्वामूलीयः यथा मणे+खनिः समासे तु वा सत्वञ्च। भा+खरः भाष्खरः भाःखर इति। वर्णाभिधाने अस्य वाचकाः शब्दाः दर्शिताः यथा "खः प्रचण्डः कामरूपी शुद्धिर्वह्निः सरस्वती। आकाशमिन्द्रियं दुर्गा चण्डी सन्तापिनी गुरुः। शिखण्डी दन्तोजातीशः कफोणिर्गरुडोगदी। शून्यं कपाली कल्याणी सूर्पकर्णोऽजरामरः। शुभाग्नेय चण्डलिङ्गे जनो भङ्गारखड्गकौ"। अस्य मातृकावर्णान्तर्गतत्वेन ध्येयरूपं वर्णोद्धारतन्त्रे उक्तं यथा "बन्धूकपुष्पसङ्काशां रत्नालङ्कारभूषिताम्। वराभयकरीं नित्यामीषद्धास्यमुखीं पराम्। एवं ध्यात्वा खस्वरूपां तन्मन्त्रं दशधा जपेत्"। मातृकान्यासे चास्य बाहौ न्यस्यता। श्लोकरचनायां तस्याद्यवर्णतयोपन्यासे ग्रन्थकर्त्तुः लक्ष्मीकरता "कः खोगोघश्च लक्ष्मीं वितरति वियशोङः सुखं चः सुखं छः" वृत्तर०टीकाधृतवाक्यात्।

ख पु० खर्व्व—खन—ड्रा० ड। १सूर्य्ये हेमच०। २इन्द्रिये ३पुरे ४क्षेत्रे ५शून्ये ६विन्दौ ७आकाशे ८संवेदने ९स्वर्गे १०कर्म्मणि च न० मेदि०। ११लग्नात् दशमे स्थाने ज्यो०त०। "आरे खस्थे चतुष्पाद्गोभयम्" नीलक०। "तनुनिधनखभेशाः केन्द्रकोणे त्रिलाभे" जातकप०। १२सुखे हेमच०। १३अभ्रके (आव) उपधातुभेदे राजनि०। "तत्रेन्द्रिये "ऊर्द्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्व्वशः" मनुः। आकाशे "नश्यतीषुर्यथा विद्धः खे विद्धमनुविध्यतः" मनुः खं "वायुर्ज्वलनोजलं क्षितिरिति त्रैलोक्यमुन्मीलति" प्रबो०। "एतस्माज्जायते—खं वायुर्ज्योतिरापश्च" श्रुतिः। "यावत् गिरः खे मरुतां चरन्ति" कुमा० १४परमानन्दस्वरूपे ब्रह्माकाशे। "कं ब्रह्म खं ब्रह्म" "यदेव कं तदेव खम्" इति च छा०उ०।

खकक्षा स्त्री सूर्य्यरश्मिप्रचारावधिके वेष्टनाकारे ब्रह्माण्डसुषिरे गगनपरिधौ। सि० शि० तत्परिमाणमुक्तं यथा "कोटिघ्नैर्नखनन्दषट्कनखभूभृद्भुजङ्गेन्दुभि १८७१२०६९२००००००००० ज्योतिःशास्त्रविदो वदन्ति नभसः कक्षामिमां योजनैः। तद् ब्रह्माण्डकटाहसंपुटतटे केचिज्जगुर्वेष्टनम् केचित् प्रोचुरदृश्यदृश्यकगिरिं पौराणिकाः सूरयः। करतलकलितामलकवदमलं सकलं विदन्ति ये गोलम्। दिनकरकरनिकरनिहततमसो नभसः स परिधिरुदितस्तैः" मू०। "एभिर्योजनैस्तुल्यां गणकाः खकक्षामाकाशपरिधिं वदन्ति। तत्र कथमनन्तस्याकाशस्येयत्ता वक्तुं शक्यत इत्याशङ्क्याऽहर्पतिद्युतियुजो नभसः परिधेरिदं वदन्ति। अत एव पौराणिका गणकास्ते ब्रह्माण्डपरिधिं वदन्ति। केचिल्लोकालोकं वदन्ति। यतस्तदन्तर्वर्त्तिन एवार्करश्मयः। एवमन्ये वदन्तीति नास्माकं मतमित्यर्थः प्रमाणशून्यत्वात्। करतलकलितसकलब्रह्माण्डगोला एवं वक्तुं शक्नुवन्ति। इदानीं खमतमाह" प्रमि०। "ब्रह्माण्डमेतन्मितमस्तु नो वा कल्पे ग्रहः क्रामति योजनानि। यावन्ति पूर्वैरिह तत्प्रमाणं प्रोक्तं खकक्षाख्यमिदं मतं नः" मू०। इदानीं ग्रहकक्षा आह। "ग्रहस्य चक्रैर्विहृता खकक्षा भवेत् स्वकक्षा निजकक्षकायाम्। ग्रहः खकक्षामितयोजनानि भ्रमत्यजस्रं परिवर्त्तमानः" मू०। "सा खकक्षा यस्य यस्य भगणैर्ह्रियते तस्य तस्य ग्रहस्य कक्षामितिर्लभ्यते। अस्योपपत्तिरूपं श्लोकस्योत्तरार्धमिति। यतः खकक्षाया ग्रहो भ्रमन्नजस्रं परिवर्त्तमानः खकक्षामितानि योजनानि पूरयति। अतो ग्रहभगणैर्भक्तायाः खकक्षाया यल्लभ्यते सा ग्रहकक्षामितिरित्युपपन्नम्।

खकामिनी स्त्री खं सुखमाकाशं वा कामयते कम—स्वार्थे णिङ्—णिनि ङीप्। १चर्च्चिकायां २चिल्लदयितायां च त्रिका०। [महादेवे त्रिका०। खकेशादयोऽप्यत्र।

खकुन्तल पु० खमाकाशः कुन्तलस्थानीयमिव यस्य। व्योमकेशे

खक्ख हासे भ्वा०पर०अक०सेट्। खक्खति अखक्खीत्। चखक्ख। प्रनिखक्खति।

खक्खट पु० खक्ख—अटन्। कठिन्यां (खडि) रायमु०।

खखोल्क पु० काशीस्थे आदित्यभेदे तत्कथा काशी० ५० अ० यथा "खखोल्कोनाम भगवानादित्यः परिकीर्त्तितः। त्रिपिष्टपोत्तरे भागे सर्वव्याधिविघातकः। यथा खखोल्कस्त्वाख्या तस्यादित्यस्य तच्छृणु" इत्युपक्रमे

"खखोल्का निपतेद्देवा भृशं गद्गदभाषिणी। मूर्च्छां गतवती पक्षपुटा भूत्वा विलोकिनी। खखोल्का निपतेद्देवा वक्तव्येऽप्यतिसंभ्रमात्। खखोल्केति यदुक्ता गौः कद्रुवा सम्भ्रान्तचेतसा। तदा खखोल्कनामार्कस्तुतो विनतया बहु" "तपस्यन्तीं दयालोक्य कदाचिद्विनतां प्रभुः। शिवस्यैव परोमूर्त्तिः खखोल्को नाम भास्करः। दत्त्वा वरं सुपापघ्नं शिवज्ञानसमन्वितम्। काशीवासिजनानेकरूपपापक्षयङ्करः। विनतादित्य इत्याख्यः खखोल्कस्तत्र संस्थितः। इत्थं खखोल्क आदित्यः काशीविघ्नतमोहरः। तस्य दर्शनमात्रेण सर्वपापैः प्रमुच्यते। काश्यां पैलङ्गिले तीर्थे खखोल्कस्य विलोकनात्। नरश्चिन्तितमाप्नोति नीरोगो जायते क्षणात्। नरःश्रुत्वैतदाख्यानं खखोल्कादित्यसम्भवम्। गरुडेशेन सहितं सर्व्वपापैः प्रमुच्यते" तत्रैवाध्यायशेषे

खग पुं० खे द० खे आकाशे गच्छति गम–ड ७त०। १सूर्य्ये २सूर्य्यादग्रहे ३देवे ४शरे ५पक्षिणि पुं० स्त्री० मेदि०। स्त्रियां जातित्वात् ङीष्। ६वायौ शब्दच० "तमांसीव यथा सूर्य्यो वृक्षानग्निर्घनान् खगः" भा०व०२६०अ०। ७शलभभेदे भरतः। ८आकाशगामिनि त्रि०। "सुरासुरैरवध्यं हि पुरमेतत् खगं महत्" भा० आ०१६२अ०। तत्र विहगे "खगचञ्चुपुटद्रोणीपूरणे तव कः श्रमः" चातका०। "अमुनीत खगः स नैकधा" "धृतरुद्राक्षमधुव्रतं खगः" नैष०। पक्षे "खापोल्लिमे यदि खगाः स किरेन्दुवारः" लीलाव०।

खगङ्गा स्त्री ६त०। आकाशगङ्गायां मन्दाकिन्यां त्रिका०।

खगण पुं० कुशवंश्ये नृपभेदे। "कुशस्य चातिथिस्तस्मात्" इत्युपक्रमे "ततो वनस्थलस्तस्माद्वज्रनाभोऽर्कसम्भवः। खगणस्तत्सुतस्तस्मात् विधृतिश्चाभवत् सुतः" भाग० ९,११,२, श्लोकः।

खगगति स्त्री० ६त०। पक्षिणां गमने तद्भेदाश्च भा०क० ४१अ० दर्शिताः यथा

'शतमेकञ्च पातानां पतितास्मि न संशयः। शतयोजनमेकैकं विचित्रं विविधं तथा॥ उड्डीनमवडीनञ्च प्रडीनं डीनमेव च। निडीनमथ संडीनं तिर्य्यक्डीनगतानि च। विडीनं परिडीनञ्च पराडीनं सुडीनकम्। अभिडीनं महाडीनं निर्डीनमतिडीनकम्॥ अवडीनं प्रडीनञ्च संडीनं डीनडीनकम्। संडीनोड्डीनडीनञ्च पुनर्डीनविडीनकम्॥ सम्पात समुड्डीनञ्च ततोऽन्यद्व्यतिरिक्तकम्। गतागतं प्रतिगतं बह्वीश्च निकुलीनकाः"॥ विवृतमेतत् नीलकण्ठेन यथा "पातानां शतमेकं गणयति उड्डीनमित्यादिना "उड्डीनं१मूर्द्ध्वगमनमवडीनं२मधोगतः। प्रडीनं३ सर्वतो यानं डीनं४ गमनमात्रकम्। निडीनं५ शनकैर्यानं संडीनं६ ललितं गतम्। तिर्य्यग्डीनं गतं प्राज्ञस्तिरःप्रचरणं बुधाः, तान्याद्यभेदभिन्नानि चत्वारि प्रतिजानते। तानि (तिर्य्यग्डीनानि४)१०। विडम्बितं विडीनं११ स्यात्परिडीनन्तु१२ सर्वतः। पश्चाद्गतः पराडीनं१३ स्वर्गगन्तु सुडीनकम्१४। आभिमुख्येन गमनमभिडीनं१५ प्रचक्षते। यानं महाडीन१६माहुः पवित्रामूर्जितां गतिम्। निर्डीनं१७ निश्चलं यानं प्रचण्डमतिडीनक१८म्"। (विडम्बितं मल्लवदुड्डीयोड्डीयगमनम्)। अवरोहोऽवडीनं१९ स्यात् प्रडीनं२० चित्रमुच्यते। गत्वा ललितया पूर्वमुपक्रम्य समन्ततः। परिक्रम्य प्रपतनं संडीनं२१ डीनडीनकम्२२। (समन्ततः प्रपतनं, संडीनं परिक्रम्य प्रपतनं डीनडीनकमित्यन्वयः) संडीनोड्डीनडीनं स्यात्तद्देशोर्द्ध्वप्रकल्पनात्२३। गतौ गत्यन्तरे छेदो भवेड्डीनविडीनकम्२४॥ क्षणात् रुङ्गत्य निष्क्रम्य पक्षसंपात२४मुच्यते। ऊर्द्धाधोगतिसंभेदः समुड्डीनं२५ प्रचक्षते। संकल्प्य पश्चगमनमुच्यते व्यतिरिक्तकम्२६। षड्विंशतिरमी भेदाः पातानामिह दर्शिताः। महाडीनं विहायैषां पातानां त्रिविधा गतिः७५। गतन्तत्र यथोद्दिष्टमागतं पुनरागमः। प्रत्यावृत्तिः प्रतिगतिरिति षट्सप्ततिः७६ स्मृताः। (गतागतप्रतिगतिभेदाद्गतित्रैविध्यम्)। तेषां निपाताः कथ्यन्ते प्रत्येकं पञ्चविंशतिः"१०१। (निकुलीनकाः निपाताः)। २ग्रहाणां गतौ च।

तत्र ग्रहभेदे गतिभेदाः सू० सि० सकारणम् उक्ता यथा "अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः। शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः"॥ तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः। प्राक् पश्चादपकृष्यन्ते यथासन्नं स्वदिङ्मुखम्॥ प्रवहाख्यो मरुत् तांस्तु स्वोच्चाभिमुखमीरयेत्। पूर्वापरापकृष्टास्ते गतिं यान्ति पृथग्विधाम्॥ ग्रहात् प्राग्भगणार्द्धस्थः प्राङ्मुखं कर्षति ग्रहम्। उच्चसञ्ज्ञोऽपरार्द्धस्थस्तद्वत् पश्चान्मुखं ग्रहम्॥ स्वोच्चापकृष्टा भगणैः प्राङ्मुखं यान्ति यद्ग्रहाः। तत् तेषु धनमित्युक्तमृणं पश्चान्मुखेषु तु॥

दक्षिणोत्तरतोऽप्येवं पातो राहुः स्वरंहसा । विक्षिपत्येष विक्षेपं चन्द्रादीनामपक्रमात् ॥ उत्तराभिमुखं पातो विक्षिपत्यपरार्द्धगः । ग्रहः प्राग्भगणार्द्धस्थो याम्यायामपकर्षति ॥ बुधभार्गवयोः शीघ्रात् तद्वत् पातो यदा स्थितः । तच्छीघ्राकर्षणात् तौ तु विक्षिप्येते यथोक्तवत् ॥ महत्त्वान्मण्डलस्यार्कः स्वल्पमेवापकृष्यते । मण्डलाल्पतया चन्द्रस्ततो बह्वपकृष्यते ॥ भौमादयोऽल्पमूर्त्तित्वाच्छीघ्रमन्दोच्चसंज्ञकैः । दैवतैरपकृष्यन्ते सुदूरमतिवेगिताः ॥ अतो धनर्णं सुमहत् तेषां गतिवशाद्भवेत् । आकृष्यमाणास्तैरेवं व्योम्नि यान्त्यनिलाहताः ॥ वक्रानुवक्रा कुटिला मन्दा मन्दतरा समा । तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः ॥ तत्रातिशीघ्रा शीघ्राख्या मन्दा मन्दतरा समा । ऋज्वीति पञ्चधा ज्ञेया या वक्रा सानुवक्रगा" सू° सि° ॥ वक्रानुवक्रेत्यादिकं रङ्गनाथेन विवृतं यथा ।

"भौमादिग्रहाणां विरविचन्द्राणामष्टप्रकारा गतिः । फलिता । तत्र वक्रेत्यादिसमेत्यन्तं षट्प्रकारा गतिः शीघ्रतरा शीघ्रेति गतिद्वयम् । तथा समुच्चये । आसां स्वरूपाण्यग्रे स्फुटम् । अथैनामष्टधा गतिं भेदद्वयेन क्रोडयति । तत्राष्टविधगतिष्वतिशीघ्रेत्यादिसमेत्यन्ता इत्येवं पञ्चधा गतिः । ऋज्वी मार्गी गतिर्ज्ञेया या गतिः सानुवक्रगानुवक्रगमनेन सह वर्त्तमाना पूर्वश्लोकेऽनुवक्रगतेर्वक्रकुटिलमध्याभिधानादुभययासन्नत्वाच्च वक्रानुवक्रा कुटिलेति गतिर्वक्रा ज्ञेया तथा च ग्रहाणां मार्गी वक्रेति गतिद्वयम्" ॥ शैघ्र्यमान्द्यादिप्रकारस्तु तत्रैव दृश्यः विस्तरभयान्नोदाहृतः ।

खगपति पु° खगान् पाति पा—क । गरुडे खगपत्यादयोऽप्यत्र । गरुडस्य खगपतित्वलाभकथा भा° आ° ३१ अ° यथा "अथापश्यदृषीन् ह्रस्वानङ्गुष्ठोदरवर्ष्मणः । पलाशवृन्तिकामेकां वहतः संहतान् पथि । प्रलीनान् स्वेष्विवाङ्गेषु निराहारांस्तपोधनान् । क्लिश्यमानान्मन्दबलान् गोष्पदे संप्लुतोदके । तान् सर्वान् विस्मयाविष्टो वीर्य्योन्मत्तः पुरन्दरः । अवहस्याभ्यगाच्छीघ्रं लङ्घयित्वाऽवमन्य च । तेऽथ रोषसमाविष्टाः सुभृशं जातमन्यवः । आरेभिरे महत् कर्म तदा शक्रभयङ्करम् । जुहुवुस्ते सुतपसो विधिवज्जातवेदसम् । मन्त्रैरुच्चावचैर्विप्रा येन कामेन तच्छृणु । कामवीर्य्यः कामगमो देवराजभयप्रदः । इन्द्रोऽन्यः सर्वदेवानां भवेदिति यतव्रताः । इन्द्राच्छतगुणः शौर्य्ये वीर्य्ये चैव मनोजवः । तपसो नः फलेनाद्य दारुणः सम्भवत्विति । तद्बुद्ध्वा भृशसन्तप्तो देवराजः शतक्रतुः । जगाम शरणं तत्र कश्यपं संशितव्रतम् । तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः । बालिखिल्यानुपागम्य कर्मसिद्धिमपृच्छत । एवमस्त्विति तञ्चापि प्रत्यूचुः सत्यवादिनः । तान् कश्यप उवाचेदं सान्त्वपूर्वं प्रजापतिः । अयमिन्द्रस्त्रिभुवने नियोगाद्ब्रह्मणः कृतः । इन्द्रार्थे च भवन्तोऽपि यत्नवन्तस्तपोधनाः । न मिथ्या ब्रह्मणो वाक्यं कर्त्तुमर्हथ सत्तमाः । भवतां हि न मिथ्याऽयं सङ्कल्पो वै चिकीर्षितः । भवत्वेष पतत्त्रीणामिन्द्रोऽतिबलसत्त्ववान् । प्रसादः क्रियतामस्य देवराजस्य याचतः । एवमुक्ताः कश्यपेन बालिखिल्यास्तपोधनाः । प्रत्यूचुरभिसम्पूज्य मुनिश्रेष्ठं प्रजापतिम् । बालिखिल्या ऊचुः । इन्द्रार्थोऽयं समारम्भः सर्वेषां नः प्रजापते ! । अपत्यार्थं समारम्भो भवतश्चायमीप्सितः । तदिदं सफलं कर्म त्वयैव प्रतिगृह्यताम् । तथा चैवं विधत्स्वात्र यथा श्रेयोऽनुपश्यसि । एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा । विनता नाम कल्याणी पुत्रकामा यशस्विनी । तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः । उपचक्राम भर्त्तारं तामुवाचाथ कश्यपः । आरम्भः सफलो देवि ! भविता यस्त्वयेप्सितः । जनयिष्यसि पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ । तपसा बालिखिल्यानां मम सङ्कल्पजौ तथा । भविष्यतो महाभागौ पुत्रौ त्रैलोक्यपूजितौ । उवाच चैनां भगवान् कश्यपः पुनरेव ह । धार्य्यतामप्रमादेन गर्भोऽयं सुमहोदयः । एतौ सर्वपतत्त्रीणामिन्द्रत्वं कारयिष्यतः । लोकसम्भावितौ वीरौ कामरूपौ विहङ्गमौ । शतक्रतुमथोवाच प्रीयमाणः प्रजापतिः । त्वत्सहायौ महावीर्य्यौ भ्रातरौ ते भविष्यतः । नैताभ्यां भविता दोषः सकाशात्ते पुरन्दर ! । व्येतु ते शक्र ! सन्तापस्त्वमेवेन्द्रो भविष्यसि । न चाप्येवं त्वया भूयः क्षेप्तव्या ब्रह्मवादिनः । न चावमान्या दर्पात्ते वाग्वज्रा भृशकोपनाः । एवमुक्तो जगामेन्द्रो निर्विशङ्कस्त्रिपिष्टपम् । विनता चापि सिद्धार्था बभूव मुदिता तथा । जनयामास पुत्रौ द्वावरुणं गरुडं तथा । विकलाङ्गोऽरुणस्तत्र भास्करस्य पुरःसरः । पतत्त्रीणाञ्च गरुड इन्द्रत्वेनाभ्यषिच्यत" ।

खगम त्रि° खे आकाशे गच्छति गम-खच् । आकाशगामिनि सिद्धगन्धर्वादौ । "ततो दिव्यास्समापन्ना गन्धर्वा हेम-

मालिनः” इत्युपक्रमे “ते कार्य्यमाणाः खगमाः शरवर्षैः समन्ततः” भा०द० २४४ अ० । [शब्दच० ।

खगवक्त्र पु० खगस्य वक्त्रमिवाकारोऽस्य । नकुचवृक्षे (मान्दार)

खगवती स्त्री खगः खगशब्दवाच्यम् आकाशमस्ति तत्त्वेनास्त्यस्याः मतुप् मस्य वः । भूमौ जटा० । तस्याः व्योम्नि स्थितत्वात् खगतुल्यत्वम् । “मध्ये समन्तादण्डस्य भूगोलः व्योम्नि तिष्ठति । बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्” सू०सि०उक्तेः । आर्य्यभट्टमते तु पृथिव्याः स्वकक्षायामाकाशगतिमत्त्वात् खगतुल्यगतित्वेन सादृश्यमिति भेदः । खगोलशब्दे विवृतिः ।

खगशत्रु पु० खगस्य शत्रुरिव । १पृश्निपर्ण्याम् (चाकुलिया) शब्दच० । ६त० । २श्येने पक्षिविहगे ।

खगस्थान न० ६त० । द्रुमस्य कोटरे शब्दच० ।

खगान्तक पु० अन्तयति अन्तं करोति णिच्–ण्वुल् ६त० । श्येनपक्षिविहगे राजनि० ।

खगासन पु० खगः गरुड़ आसनमस्य । १विष्णौ तद्वाहनत्वात्तदासनत्वं तस्य तत्कथा च भा० आ० ३३ अ० यथा “विष्णुना च तदाकाशे वैनतेयः समेयिवान् । तस्य नारायणस्तुष्टस्तेनात्यौल्येन कर्मणा । तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् । स वव्रे तव तिष्ठेयमुपरीत्यन्तरीक्षगः । उवाच चैनं भूयोऽपि नारायणमिदं वचः । अजरश्चामरश्च स्याममृतेन विनाप्यहम् । एवमस्त्विति तं विष्णुरुवाच विनतासुतम् । प्रतिगृह्य वरौ तौ च गरुड़ो विष्णुमब्रवीत् । भवतेऽपि वरं दद्यां वृणोतु भगवानपि । तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम् । ध्वजञ्च चक्रे भगवानुपरि स्थास्यतीति तम् । एवमस्त्विति तं देवमुक्त्वा नारायणं खगः । वव्राज तरसा वेगाद्वायुं स्पर्द्धन्महाजवः” । “बद्धं कृत्वा अधः शीर्षं यः करोति खगासनम् । खगासनप्रसादेन जम्बलोपोभवेद्दुतम्” रुद्रजा० उक्ते २आसनभेदे न० ।

खगेन्द्र पु० ६त० गरुड़े खगपतिशब्दे विवृतिः ।

खगेन्द्रध्वज पु० खगेन्द्रः गरुड़ोध्वजोऽस्य । विष्णौ तस्य गरुड़ध्वजस्वीकारकथा खगासनशब्दे दर्शिता ।

खगेश्वर पु० ६त० । गरुड़े अमरः ।

खगोल पु० सू०सि०उक्ते गोलाकारे आकाशस्य परिधौ सूर्य्यकिरणप्रचारयोग्यदेशे पदार्थाधारे वाह्यांशभेदे । यथा “ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम् । कटाहद्वितयस्येव सम्पुटं गोलकाकृतिः” सू० सि० । “एतत् प्रागुक्तं ब्रह्मणाधिष्ठितं ब्रह्माण्डं सुषिरमवकाशात्मकं, तत्रावकाश इदं जगत् भूर्भुवादिकं भूर्भुवःस्वर्गोलकान्तरस्थितं न वहिः । तन्मण्डस्य गोलाकारत्वे मान्तरप्रपायात्मकत्वं न सम्भवतीत्यत आह कटाहद्वितयस्येति । कटाहोऽर्धगोलाकारं लावकायं पात्रं तस्य द्वितयं द्वयं तस्य सम्पुटम् । एवकारो न्यूनाधिकव्यवच्छेदार्थः । सम्पुटमाभिमुख्येन मिलितं गोलकाकृतिर्गोलाकारः स्यात् । तथाच न क्षतिः । अथ ब्रह्माण्डान्तः परिधिं वदंस्तदन्तर्भपक्षादिकमाकाशे यथास्थानं परिभ्रमतीति श्लोकाभ्यामाह” र० ना० “ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभिधीयते । तन्मध्ये भ्रमणं भानामधोऽधः क्रमशस्तथा । मन्दामरेज्यभूपुत्रसूर्य्यशुक्रेन्दुजेन्दवः । परिभ्रमन्त्यधोऽधःस्थाः सिद्धविद्याधरा घनाः” सू० सि० । “ब्रह्माण्डान्तः परिधिस्तुल्यवृत्तमार्गो व्योमकक्षा वक्ष्यमाणाकाशकक्षोच्यते । तन्मध्ये ब्रह्माण्डमध्य आकाशे भानां नक्षत्राणां सर्वेषां सर्वतस्तुल्योर्ध्वान्तरितानां भ्रमणं भवति । तथा तदुर्ध्वान्तरेणाधो नक्षत्रेभ्योऽधोधः क्रमात् शनिबृहस्पतिभौमार्कशुक्रबुधचन्द्रा अधस्तात् परिभ्रमन्ति । सिद्धा विद्याधराश्चाधस्ताच्चन्द्रादधःस्थिता अधोऽधः क्रमेणाकाशे स्थिताः । एषां प्रवहवायाववस्थानाभावाच्चन्द्रादिवन्न परिभ्रमः । अथ भूम्यवस्थानमाह” र० ना० “मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति । बिभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्” सू० सि० । “अण्डस्य ब्रह्माण्डस्य समन्तात् सर्वप्रदेशान्मध्ये मध्यस्थाने केन्द्ररूपे आकाशे भूगोलस्तिष्ठति । नन्वाकाशे निराधारवस्तुनोऽवस्थानासम्भवात् कथमवस्थितो भूमिगोल इत्यतो भूगोलविशेषणमाह बिभ्राण इति । ब्रह्मणः परमां शक्तिं धारणात्मिकां निराधारावस्थानरूपां बिभ्राणो धारयन् । तथाच न क्षतिः । एतेन “भूः किमाकारा किमाश्रयेति” प्रश्नद्वयमुत्तरितम् । अथ कथं चास्य सप्त पातालभूमय इति प्रश्नस्योत्तरमाह” र० ना० “तदन्तरपुटाः सप्त नागासुरसमाश्रयाः । दिव्यौषधिरसोपेतारम्याः पातालभूमयः” सू० सि० तमाह “अनेकरत्ननिचयो जाम्बूनदमयो गिरिः । भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः । उपरिष्टात् स्थितास्तस्य सेन्द्रा देवा महर्षयः । अधस्तादसुरास्तद्वद्द्विषन्तोऽन्योऽन्यमाश्रिताः । ततः समन्तात् परिधिः क्रमेणायं महार्णवः । मेखलेव स्थितो धात्र्या

देवासुरविभागकृत् । समन्तान्मेरुमध्यात् तु तुल्यभागेषु तोयधेः । द्वीपेषु दिक्षु पूर्वादिनगर्यो देवनिर्मिताः । भूवृत्तपादे (१२५६) पूर्वस्यां यमकोटीति विश्रुता । भद्राश्ववर्षे नगरी स्वर्णप्राकारतोरणा । याम्यायां भारते वर्षे लङ्का तद्वन्महापुरी । पश्चिमे केतुमालाख्ये रोमकाख्या प्रकीर्त्तिता । उदक् सिद्धपुरी नाम कुरुवर्षे प्रकीर्त्तिता । तस्यां सिद्धा महात्मानो निवसन्ति गतव्यथाः । भूवृत्तपादविवरास्ताश्चान्योन्यं प्रतिष्ठिताः । ताभ्यश्चोत्तरगो मेरुस्तावानेव १२५६ सुराश्रयः । तासामुपरिगो याति विषुवस्थो दिवाकरः । न तासु विषुवच्छाया नाक्षस्योन्नतिरिष्यते । मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते । निरक्षदेशसंस्थानामुभये क्षितिजाश्रये । अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः । नवतिर्लम्बकांशास्तु मेरावक्षांशकास्तथा । मेषादौ देवभागस्थे देवानां याति दर्शनम् । असुराणां तुलादौ तु सूर्यस्तद्भागसञ्चरः । अत्यासन्नतया तेन ग्रीष्मे तीव्राः करा रवेः । देवभागे सुराणां तु हेमन्ते मन्दतान्यथा । देवासुरा विषुवति क्षितिजस्थं दिवाकरम् । पश्यन्त्यन्योन्यमेतेषां वामसव्ये दिनक्षपे । मेषादावुदितः सूर्यस्त्रीन् राशीनुदगुत्तरम् । सञ्चरन् प्रागहर्मध्यं पूरयेन्मेरुवासिनाम् । कर्कादीन् सञ्चरंस्तद्वदह्नः पश्चार्धमेव सः । तुलादींस्त्रीन् मृगादींश्च तद्वदेवासुरद्विषाम् । अतो दिनक्षपे तेषामन्योन्यं हि विपर्ययात् । अहोरात्रप्रमाणं च भानोर्भगणपूरणात् । दिनक्षपार्धमेतेषामयनान्ते विपर्ययात् । उपर्यात्मानमन्योन्यं कल्पयन्ति सुरासुराः । अन्येऽपि समसूत्रस्था मन्यन्तेऽधः परस्परम् । भद्राश्वकेतुमालस्था लङ्कासिद्धपुराश्रिताः । सर्वत्रैवं महीगोले स्वस्थानमुपरि स्थितम् । मन्यन्ते खे यतो गोलस्तस्य क्वोर्ध्वं क्व वाप्यधः । अल्पकायतया लोकाः स्वस्थानात् सर्वतोमुखम् । पश्यन्ति वृत्तामप्येतां चक्राकारां वसुन्धराम् । सव्यं भ्रमति देवानामपसव्यं सुरद्विषाम् । उपरिष्टाद्भगोलोऽयं व्यक्षे पश्चान्मुखः सदा । अतस्तत्र दिनं त्रिंशन्नाडिकं शर्वरी तथा । हानिवृद्धी सदा वामं सुरासुरविभागयोः । मेषादौ तु सदा वृद्धिरुदगुत्तरतोऽधिका । देवांशे च क्षपाहानिर्विपरीतं तथाऽऽसुरे । तुलादौ द्युनिशोर्वामं क्षयवृद्धी तयोरुभे । देशक्रान्तिवशान्नित्यं तद्विज्ञानं पुरोदितम्" ।

अथोक्तस्यावधिदेशं विवक्षुः प्रथमं तदुपयुक्तानि क्रान्त्यंशयोजनान्याह 'भूवृत्तं क्रान्तिभागघ्नं भगणांशविभाजितम् । अवाप्तयोजनैरर्को व्यक्षाद्यात्युपरिस्थितः" सू० सि० ॥ 'भूवृत्तं भूपरिधियोजनमानं (५०२६ स्थूलम् ४९६७ सूक्ष्मम्) प्रागुक्तमभीष्टक्रान्त्यंशैर्गुणितं द्वादशराशिभागैः षष्ट्यधिकशतत्रयमितैर्भक्तं लब्धयोजनैः कृत्वा सूर्य्यं उपरि आकाशे स्थितो वर्त्तमानो दक्षिणत उत्तरतो वा याति गच्छति । क्रान्त्यभावे तु निरक्षदेशोपर्य्येव परिभ्रमति । अत्रोपपत्तिः निरक्षदेशान्मेरोरुत्तरदक्षिणाभिमुखं सूर्यः क्रान्त्यंशैर्गच्छति । तद्योजनज्ञानं तु यदि भगणांशैर्मेषपदद्वयनिरक्षदेशस्पृष्टभूपरिधियोजनानि तदा क्रान्त्यंशैः कानीत्यनुपातेन स्पष्टमुपपन्नम् अथ दिनमानानयनगणितस्यावधिदेशज्ञानं श्लोकाभ्यामाह" र० ना० । "परमापक्रमादेव योजनानि विशोधयेत् । भूवृत्तपादाच्छेषाणि यानि स्युर्योजनानि तैः । अयनान्ते विलोमेन देवासुरविभागयोः । नाडीषष्ट्या सकृदहर्निशाप्यस्मिन् सकृत् तथा" सू० सि० ॥ "परमक्रान्तिभागाच्चतुर्विंशन्मितात् । एवं पूर्वोक्तरीत्या योजनानि जातानि ३३६ भूपरिधेः पूर्वोक्तस्य ५०२६ चतुर्थांशात् १२५६ परिवर्जयेत् । अवशिष्टानि यानि यत्सङ्ख्यामितानि योजनानि भवन्ति तैर्योजनैर्देवासुरविभागयोर्निरक्षदेशादुत्तरदक्षिणप्रदेशयोर्यौ देशौ तयोरित्यर्थः । अयनान्ते उत्तरदक्षिणायनसन्धौ कर्कादिस्थे सूर्ये दक्षिणोत्तरायणसन्धौ, मकरादिस्थे सूर्ये विलोमेन व्यत्यासेन सकृदेकवारं नाडीषष्ट्या घटीषष्ट्याऽहर्दिनमानं भवति । अस्मिन्नेतादृशे देशे दक्षिणोत्तरायणसन्ध्यासन्ने सकृदेकवारं तथा षष्टिघटीमिता विलोमेन निशा रात्रिर्भवति । अपिशब्दो दिनेन समुच्चयार्थः । एतदुक्तं भवति । कर्कादिस्थे सूर्ये निरक्षदेशादुत्तरतद्योजनान्तरितदेशे षष्टिघटीमितं दिनं तदैव निरक्षदेशाद्दक्षिणतद्योजनान्तरितदेशे षष्टिघटीमिता रात्रिः । मकरादिस्थे सूर्ये तादृशोत्तरभागे षष्टिघटीमिता रात्रिर्दक्षिणभागे तादृशे षष्टिघटीमितं दिनमिति । अत्रोपपत्तिः । परमक्रान्तियोजनानि ३३६ भूवृत्तचतुर्थांशयोजनेभ्यो १२५६ हीनानि ९२० । निरक्षदेशात् तन्मितयोजनान्तरितो यो दक्षिणोत्तरदेशस्तस्मान्मेरोर्दक्षिणोत्तराग्रं क्रमेण परमक्रान्तियोजनान्तरितम् । अतस्तत्र कक्षांशाश्चतुर्विंशतिः पलांशाः षट्षष्टिरिति तद्देशे क्रान्तिवृत्ताकारं क्षितिजमित्ययनान्ते पञ्चदशघटीमितमहोरात्रवृत्तचतुर्भागखण्डं निरक्षवद्देशक्षितिजयोरन्तरालरूपं चर-

मत उक्तरीत्या दिनार्धं रात्र्यर्धं चोक्तरीत्या यथायोग्यं त्रिंशत् तद्‌द्विगुणं षष्टिघटीमितं तन्मानं गणितरीत्योपपन्नम् । युक्तं चैतत् । अयनान्ताहोरात्रवृत्तस्यैकस्य तत्क्षितिजप्रदेश एकत्रैव संलग्नत्वाद्‌द्विधा संलग्नत्वाभावात् प्रवहभ्रमितसूर्यपरिवर्तपूर्तिः षष्टिघटीभिर्दर्शनमदर्शनं यथायोग्यं तद्गोलस्थित्या प्रत्यक्षसिद्धमेवेति । अथोक्तदिनरात्रिमानगणितं तदवधिदेशपर्यन्तं दक्षिणोत्तरभागयोर्नापि इत्याह" र०ना०। "तदन्तरेऽपि षण्मासे चयापचयौ अहर्निशोः । परतो विपरीतोऽयं भगोलः परिवर्तते" सू०सि०। 'तदन्तरे निरक्षदेशोक्तावधिदेशयोरन्तराले दक्षिणोत्तरविभागदेशे षण्मासे षष्टिघटीमध्ये चयापचयौ अपचयोपचयाबुक्तरीत्या दिनरात्र्योर्यथायोग्यं भवतः । परतोऽवधिदेशाद्‌ग्रिमदेशे दक्षिणोत्तरे दैत्यदेवस्थाननिकटेऽयं प्रत्यक्षो भगोलो नक्षत्राद्यधिष्ठितो मूर्त्तो गोलो विपरीतोऽवधिदेशान्तर्गतदेशसम्बन्धी गणितसिद्धः परिवर्तते भ्रमति । तत्रोक्तरीत्या दिनरात्र्योर्व्यवस्थौ न भवत इत्यर्थः त्रिज्याधिकाराद्धरानयनानुपपत्तेः चरखण्डासम्भवाच्च अथ विपरीतगोलस्थितिं श्लोकाभ्यां प्रदर्शयति" र०ना० । "ऊने भूवृत्तपादे तु द्विज्यापक्रमयोजनैः । धनुर्मृगस्थः सविता देवभागे न दृश्यते । तथा च सुरभागे तु मिथुने कर्कटे स्थितः । नष्टच्छाये महीवृत्तपादे दर्शनमादिशेत्" सू० सि० । "द्विराशिज्या ये क्रान्त्यंशास्तेषां योजनैः पूर्वागतैर्भूपरिधिचतुर्थांशे (१२५६) हीने कृते सति । तुकारान्निरक्षदेशात् यद्योजनान्तरिते देशे देवभाग उत्तरभागे धनुर्मकरराशिस्थोऽर्कस्तद्देशवासिभिर्न दृश्यते । धनुर्मकरस्थेऽर्के तेषां रात्रिः सदा स्यादित्यर्थः । असुरभागे निरक्षदेशाद्दक्षिणप्रदेशे । च: समुच्चयार्थः । तुकारात् तद्योजनान्तरितप्रदेशे मिथुने कर्कराशौ स्थितोऽर्कस्तथा तद्देशवासिभिर्न दृश्यते । नष्टच्छायेमहीवृत्तपादे । अभावं प्राप्ता छाया भूच्छाया यत्र तादृशे भूपरिधिचतुर्थांशे १२५६ सूर्यस्य दर्शनं सदा कथयेत् । यत्र भूच्छायात्मिका रात्रिर्नास्ति तत्र दिनमित्यर्थः । तथा च निरक्षदेशात् तद्योजनान्तरितदक्षिणप्रदेशे धनुर्मकरस्थोऽर्को दृश्यत इति फलितार्थः । अतएव । "तंत्रयुङ्नवरसाः ६९।१/२ पलांशका यत्र तत्र विषये कदाचन । दृश्यते न मकरो न कार्मुकं किन्तु कर्किमिथुनौ सदोदितौ" इति भास्कराचार्योक्तं सङ्गच्छते (तथा चात्र दशमासादिनं द्वौमासौ रात्रिः) अथान्यत्रापि विपरीतस्थितिं श्लोकाभ्यां दर्शयति" र०ना० । "एकज्यापक्रमानीतैर्योजनैः परिवर्जितैः । भूमिकक्षाचतुर्थांशे व्यक्षाच्छेषैस्तु योजनैः । धनुर्मृगालिकुम्भेषु संस्थितोऽर्को न दृश्यते । देवभागेऽसुराणां तु वृषाद्ये भचतुष्टये" सू०सि० । "एकराशिज्यायाः क्रान्त्यंशेभ्यो भूपरिधिचतुर्थांशे हीने कृते सति निरक्षदेशादवशिष्टैर्योजनैः । तुकारादन्तरिते देशे देवभाग उत्तरभागे धनुर्मकरवृश्चिककुम्भराशिषु स्थितः सूर्यस्तद्देशवासिभिर्न दृश्यते । असुराणां दैत्यानां निरक्षदेशात् तद्योजनान्तरितदक्षिणभागे वृषादिके राशिचतुष्टये स्थितोऽर्कस्तद्देशवासिभिर्न दृश्यते । तुकारादुत्तरभागे वृषादिचतुष्टयस्थितोऽर्कस्तद्देशवासिभिर्दृश्यते वृश्चिकादिचतुष्टयस्थितोऽर्को दक्षिणभागे तद्देशवासिभिर्दृश्यत इत्यर्थः । अतएव "यत्र साङ्‌घ्रिगजवाजिसम्मिता ७८।१/४, स्तत्र वृश्चिकचतुष्टयं न च । दृश्यते च वृषभाच्चतुष्टयं सर्वदा समुदितं हि लक्ष्यते" इति भास्कराचार्योक्तं सङ्गच्छते (तथा चात्र अष्टौमासादिनं मासचतुष्कं रात्रिः) अथ शून्यराशिक्रान्त्यानीतयोजनेभ्योऽवगतमेरुभागयोरपि स्थितिं वैलक्षण्यमाह" र०ना०। "मेरौ मेषादिचक्रार्धे देवाः पश्यन्ति भास्करम् । सकृदेवोदितं तद्वदसुराश्च तुलादिगम्" सू०सि०। "मेरावुत्तरपार्श्वस्थिता देवा मेषादिचक्रार्धे मेषादिराशिषट्केऽवस्थितमर्कं सकृदेकवारम् । एवकारादनेकवारनिरासनिश्चयः । उदितमदर्शनानन्तरं प्रथमदर्शनविषयं निरन्तरं पश्यन्ति । असुरा मेरुदक्षिणपार्श्वस्था दैत्याः । चो देवैः स मुच्चयार्थः । तुलादिराशिषट्कस्थं तद्वत् सकृदुदितं निरन्तरं पश्यन्ति । अथ निरक्षदेशादयनसम्बन्धी कियद्भिर्योजनैरूर्ध्वमर्को भवति तदाह" र०ना० ।

"भूमण्डलात् पञ्चदशे भागे देवेऽथ वाऽसुरे । उपरिष्टाद्व्रजत्यर्कः सौम्ययाम्यायनान्तगः" सू०सि० ॥ "देवे उत्तरभागे । अथवाऽसुरे दक्षिणभागे । निरक्षदेशाद्भूपरिधेः पञ्चदशे भागे तत्फल २४योजनान्तरिते २२६ देशे क्रमेण सौम्ययाम्यायनान्तग उत्तरायणान्तदक्षिणायनान्तस्थितोऽर्क उपरिष्टादूर्ध्वं व्रजति परिभ्रमति । तथा गोलसन्धौ निरक्षदेशे तथात्र भागद्वय इति फलितार्थः । अत्रोपपत्तिः । अयनान्तस्थे परमक्रान्तिश्चतुर्विंशत्यंशास्तद्योजनानि २२६ 'भूवृत्तं क्रान्तिभागघ्नं भगणांशविभाजितम्" इत्यत्र चतुर्विंशतिमितगुणभगणांशमितहरौ गुणेनापवर्त्य हरस्थाने पञ्चदशेति भूमण्डलात् पञ्चदशे भाग

इत्युक्तमुपपन्नम्" र०ना० ॥ अथ निरक्षदेशाद्भूपरिधिपञ्चदशभागपर्यन्तं (२४) सूर्यस्य दक्षिणोत्तरतो गमनमुक्त्वा तच्छायागमनं प्रतिपादयति" र०ना०। "तदन्तरालयोश्छाया याम्योदक् सम्भवत्यपि । मेरोरभिमुखं याति परतः स्वविभागयोः" सू० सि०। "तदनन्तरालयोर्निरक्षदेशात् पञ्चदशभागमध्यस्थितदक्षिणोत्तरदेशयोश्छाया द्वादशाङ्गुलशङ्कोर्मध्याह्नच्छायाभीष्टकालिकच्छायाग्रं वा दक्षिणाग्रमुत्तराग्रं वा सम्भवति । एतदुक्तं भवति निरक्षदेशात् पञ्चदशभागान्तरालोत्तरदेशे मध्याह्ननतांशानां दक्षिणत्वे छायाग्रमुत्तरम्, उत्तरत्वे छायाग्रं दक्षिणम् । एवं निरक्षदेशात् पञ्चदशभागान्तरालस्थितदक्षिणदेशे सूर्यस्योत्तरस्थत्वे छायाग्रं दक्षिणं दक्षिणस्थत्वे छायाग्रमुत्तरमिति। परतः पञ्चदशभागान्तरालदेशे स्वविभागयोर्दक्षिणोत्तरविभागयोर्मेरोरभिमुखं मेर्वग्रयोः सम्मुखं क्रमेण दक्षिणाग्रमुत्तराग्रं यथा स्यात् तथेत्यर्थः। छाया याति गच्छति भवतीत्यर्थः । अपिशब्दः पूर्वार्धेन समुच्चयार्थकः। अथ "कथं पर्येति भुवनानि विभावयन्निति प्रश्नस्योत्तरं श्लोकाभ्यामाह" र०ना०॥ "भद्राश्वोपरिगः कुर्याद्भारते तूदयं रविः । रात्र्यर्धं केतुमाले तु कुरावस्तमयं तदा भारतादिषु वर्षेषु तद्वदेव परिभ्रमन्। मध्योदयार्धरात्र्यस्तकालान् कुर्यात् प्रदक्षिणम्" सू०सि० ॥ "भद्राश्ववर्षोपरिगतः सूर्यो भारतवर्षे स्वोदयं कुर्यात् । तुकाराद्भद्राश्ववर्षे मध्याह्नं कुर्यात् । तदा तस्मिन् काले केतुमालवर्षेऽर्धरात्रं कुरौ कुरुवर्षेऽस्तमयं स्वास्तं कुर्यात् । तुकाराद्वक्तवर्षयोरन्तराले दिनस्य गतं शेषं वा रात्रेश्च तद् यथायोग्यं कुर्यादित्यर्थः। अतिस्थूलदेशप्रदर्शने यथाश्रुतमिदं मध्यं किञ्चित्सूक्ष्मदेशप्रदर्शने तु यमकोटिलङ्कारोमकसिद्धपुराण्यन्तर्गतानि तच्छब्दवाच्यानि ज्ञेयानि । "लङ्कापुरेऽर्कस्य यदोदयः स्यात् तदा दिनार्धं यमकोटिपुर्याम् । अधस्तदा सिद्धपुरेऽस्तकालः स्याद्रोमके रात्रिदलं तदैव" इति भास्कराचार्योक्तं भूगोले उक्तनगरीणां भूपरिधिचतुर्थांशान्तरत्वात् सङ्गच्छते । अथ भारतादिषु त्रिषु वर्षस्थानेषु भारतकेतुमालकुरुवर्षेषु तद्वद्भद्राश्ववर्षोपरिगवत् । एवकारात् तन्न्यूनाधिकव्यवच्छेदः । परिभ्रमन् परिभ्रमणेन स्वस्वाभिमतस्थानोपरिस्थितिं कुर्वन् सूर्यः प्रदक्षिणं यथा स्यात् तथा सव्यक्रमेण स्वस्थानादक्रमेणेति यावत् । उक्तचतुर्वर्षेषु मध्योदयार्धरात्र्यस्तकालान्मध्याह्नोदयार्धरात्र्यस्तसञ्ज्ञान् कालान् कुर्यात् । एतदुक्तं भवति । भारतवर्षोपरिगतेऽर्के भारतकेतुमालकुरुभद्राश्ववर्षेषु क्रमेण मध्याह्नसूर्योदयार्धरात्रास्ताः स्युः । केतुमालवर्षोपरिगतेऽर्के केतुमालकुरुभद्राश्वभारतवर्षेषु क्रमेण मध्याह्नसूर्योदयार्धरात्रास्ताः । कुरुवर्षोपरिगतार्के कुरुभद्राश्वभारतकेतुमालवर्षेषु क्रमेण मध्याह्नसूर्योदयार्धरात्रास्ता भवन्तीति" र० ना० ॥ ननु ग्रहाणां गतिसद्भावात् प्रतिदेशं याम्योत्तरयोर्भ्रमणं प्रतिक्षणं च विलक्षणं भासतां परन्तु नक्षत्राणां गत्यभावात् प्रतिक्षणं भ्रमणैकत्वावस्थानाभावेऽपि प्रतिदेशमेकरूपावस्थानं कुतो न?। एवं ध्रुवयोः परिभ्रमणस्याप्यभावात् सदा सर्वत्रैकरूपावस्थानदर्शनापत्तिरित्यत आह" र०ना०। "ध्रुवोन्नतिर्भचक्रस्य नतिर्मेरुं प्रयास्यतः। निरक्षाभिमुखं यातुर्विपरीते नतोन्नते" सू० सि०॥ "मेरुं मेरोरुत्तराग्रं दक्षिणाग्रं वा तदभिमुखं प्रयास्यतो गच्छतः पुरुषस्य ध्रुवोन्नतिः क्रमेणोत्तरदक्षिणयोर्ध्रुवयोरौच्च्यं भवति । भचक्रस्य नक्षत्राधिष्ठितगोलमध्यभागवृत्तस्य नतिः क्रमेण दक्षिणोत्तरयोर्नतत्वं भवति । मेरोर्निरक्षदेशाभिमुखं गच्छतः पुरुषस्य नतोन्नते पूर्वोक्ते व्यस्ते भवतः । उत्तरभागस्थपुरुषस्य निरक्षाभिमुखं गच्छतः पूर्वोक्तस्थानापेक्षयोत्तरध्रुवस्य नतत्वं पूर्वस्थानापेक्षया भचक्रस्योन्नतत्वम् । एवं दक्षिणभागस्थपुरुषस्य निरक्षाभिमुखं गच्छतः पूर्वस्थानापेक्षया दक्षिणध्रुवस्य नतत्वं भचक्रस्योन्नतत्वमिति" ।

अथ कुत एवमित्यतः "कथं पर्येति भगणः सग्रहोऽयं किमाश्रयः" प्रश्नस्योत्तरं भचक्रभ्रमणवस्तुस्थितिमाह" र०ना० । "भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः । पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम्" सू० सि० । "भचक्रं नक्षत्राधिष्ठितमूर्तगोलरूपं ध्रुवयोर्दक्षिणोत्तरस्थिरतारयोर्बद्धं ब्रह्मणा ।नबद्धं नियतत्व.युगतिना गोलाकारेण प्रतिबद्धं प्रवहानिलैः प्रवहवाय्वंशैः स्वस्वस्थानस्थैराक्षिप्तं स्वस्वस्थानाभिघातं प्राप्तं सदजस्रं निरन्तरं पर्येति । पश्चिमाभिमुखं भ्रमतीत्यर्थः । ननु नक्षत्रचक्रं वायुना भ्रमति ग्रहास्तवोऽधःस्थाः सम्बन्धाभावात् कथं भ्रमन्तीत्यत आह तन्नद्धा इति । ग्रहाणां शन्यादीनां कक्षा मार्गा वाय्वंशरूपा भचक्रान्तर्गता आकाशस्था यथाक्रममधोऽधस्तन्नद्धा प्रवहवायुगोलस्थापितभचक्रं वायुसूत्रेण निबद्धा अतो भचक्रेण सह भ्रमन्ति तत्रस्था ग्रहा अपि भ्रमन्तीति किं चित्रम् । तथाच

मवहवायुगोलमध्यस्थविषुवद्दृत्तपर्वापरनिरक्षदेशे धुवयोः क्षितिजस्थत्वाद्धचक्रस्य मस्तकोपरिभ्रमणाद् केवेद्याभिमुखं प्रयातुर्भुव उच्चो भवति। तत आसन्नत्वाद्भचक्रं नतं भवति। ततो दूरत्वाद्भुवो नताभचक्रमुन्नतं भवतीति सर्वं युक्तम्। "सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्" "कमर्थं या कथं वा स्यादिति"। "पित्र्यं मासेन भवतीति" प्रश्नयोरुत्तरमाह" र॰ ना॰। "सकृदुद्गतमब्दार्धं पश्यन्त्यर्कं सुरासुराः। पितरः शशिगाः पक्षं स्वदिनं च नरा भुवि" सू॰ सि॰। "यथा देवदैत्या एकवारमुदितं सूर्यं सौरवर्षार्द्धपर्यन्तं पश्यन्ति। तथा पितरश्चन्द्रबिम्बगोलोर्ध्वस्थिताः पक्षं पञ्चदशतिथिपर्यन्तं पश्यन्ति। नरा भूमौ स्वदिनपर्यन्तमर्कं पश्यन्त्यतः "पित्र्यं मासेन भवति षाडीषष्ट्या तु मानुषम्"। इति सर्वं युक्तम्। अतएव "विधूर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति। पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे दर्शे यतोऽस्मादुद्दलं तदैषाम्॥ भार्धान्तरत्वाच्च विधोरधःस्थं तस्माच्चिरोधः खलु पौर्णमास्याम्। कृष्णे रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्" इति भास्कराचार्येण विस्तीर्णोक्त सङ्गच्छते। अथ प्रसङ्गादूर्ध्वस्थस्याल्पभगणानामधःस्थस्याधिकभगणानां युक्त्या प्रतिपादनार्थं प्रथमं कक्षाया ऊर्ध्वाधःक्रमेण महदल्पत्वं तत्रस्थभागानां महदल्पत्वं चाह" र॰ना॰। "उपरिस्थस्य महती कक्षाऽल्पाधःस्थितस्य च। महत्या कक्षया भागा महान्तोऽल्पास्तथाल्पया" सू॰ सि॰॥ "ऊर्ध्वस्थस्य ग्रहस्य कक्षा वायुष्टतमार्गरूपा महती महापरिधिप्रमाणा। अधःस्थस्य ग्रहस्य कक्षा अल्पाऽल्पपरिधिप्रमाणा। चो निश्चयार्थे। लघुकक्षायां महाकक्षान्तर्गतत्वेन महाकक्षायां चान्तर्गतलघुकक्षात्मनोर्ध्वाधःस्थयोर्महदल्पपरिधित्वे कक्षे अन्यथाऽऽकाशस्वरूपानुपपत्तेः। एवं महति वृत्तपरिधौ द्वादशराशिभागानां समत्वेनाङ्कने भागा एकैकभागप्रदेशा महत्या कक्षया कृता महान्तो बहुस्थलात्मकाः, लघुनि वृत्ते तदङ्कने तथा भागा अल्पया कक्षया कृतास्तल्पा अल्पस्थलात्मकाः। क्रमेणैकैकभागप्रमाणमधिकाल्पं न सम चक्रांशपूर्त्त्युपपत्तेरिति तात्पर्यम्। अथोर्ध्वाधःक्रमेण ग्रहभगणभोगकालयोर्महदल्पत्वमाह" र॰ ना॰ "कालेनाल्पेन भगणं भुङ्क्तेऽल्पभ्रमणाश्रितः। ग्रहः कालेन महता मण्डले महति भ्रमन्" सू॰ सि॰। "अल्पभ्रमणाश्रितः। अल्पं भ्रमणं परिधिमानं यस्याः साल्पभ्रमणाऽधःस्थकक्षा। तत्स्थो ग्रहोऽल्पेन समयेन भगणं द्वादशराश्यात्मकं भुङ्क्तेऽतिक्रमते। महति मण्डले ऊर्ध्वस्थकक्षायामित्यर्थः। भ्रमन् गच्छन् महता बहुना समयेन द्वादश राशीन् भुङ्क्ते वक्ष्यमाणयोजनगतेरभिन्नत्वात्। अथातएवोर्ध्वाधःक्रमेण ग्रहयोर्भगणास्तुल्यकालेऽल्पा बहवो भवन्तीति सोदाहरणमाह" र॰ना॰ "स्वल्पयाऽतो बहून् भुङ्क्ते भगणान् शीतदीधितिः। महत्या कक्षया गच्छन् ततः स्वल्पं शनैश्चरः" सू॰ सि॰। स्वल्पप्रमाणया कक्षया। तत्कारादतिक्रामंश्चन्द्रो बहुप्रमाणान् भगणान् बहुवारं द्वादश राशीनित्यर्थः। भुङ्क्ते। महाप्रमाणया कक्षया गच्छन् शनिस्ततश्चन्द्रात् स्वल्प भगणमल्पप्रमाणान् भगणान् जात्यभिप्रायेणैकवचनम्। अल्पवारं द्वादश राशीन् भुङ्क्ते। अतएव शनैश्चर इत्युक्तम्। अथ "ग्रहर्क्षकक्षाः किंमात्राः" इति प्रश्नस्योत्तरं विवक्षुः प्रथमं नक्षत्राणां कक्षामानमाह" र॰ना॰ "भवेद्भकक्षा तिग्मांशोर्भ्रमणं षष्टिताडितम्। सर्वोपरिष्टाद्भ्रमति योजनैस्तैर्भमण्डलम्" सू॰सि॰। सूर्यस्य भ्रमणं कक्षापरिधिमानं योजनात्मकम् "खखार्थैकगुणार्णवाः" इति वक्ष्यमाणं ४३३१५०० षष्ट्या गुणितं २५९८९०००० नक्षत्राणां कक्षा नक्षत्राधिष्ठितगोलस्य मध्यवृत्तं स्यात्। तैश्च कक्षामितैर्योजनैर्भमण्डलं नक्षत्राधिष्ठितगोलमध्यवृत्तं सर्वोपरिष्टाच्चन्द्रादिसप्तग्रहेभ्य उपरि दूरं भ्रमति भूगोलादभितः परिभ्रमति। अत्रोपपत्तिः। नक्षत्राणां गत्यभावादाकनेरप्यत्यूर्ध्वं नक्षत्रमण्डलं तत्र यदि सूर्यगत्या सूर्यकक्षा तदा नक्षत्रगत्यभावेऽप्येककलागतिकल्पनयानुपातान्यथानुपपत्तितया "कल्प्यो हरो रूपमहारराशेः" इत्युक्तत्वात् फलहरत्वमेतिनत्वादुद्ग्रस्तानुपातो लाघवात् सूर्यगतिः षष्टिकलाभिता च भगवता कृता। नक्षत्रगतेरभावाद्वेति षष्टिताडितमित्युपपन्नम्। अथ ग्रहकक्षाणां मानज्ञानार्थमाकाशकक्षामानम् "कियती तत्करव्याप्तिः" इति प्रश्नस्योत्तरमाह र॰ना॰ "कल्पोक्तं चन्द्रभगणा गुणिताः शशिकक्षया। आकाशकक्षा सा ज्ञेया करव्याप्तिस्तथा रवेः" सू॰ सि॰। "कल्पोक्तचन्द्रभगणाः "एते सहस्रगुणिताः कल्पे स्युर्भगणादयः" इत्युक्ता दुग्चन्द्र गणाः ५७७५३३३६, सहस्रगुणिताः ५७७५३३३६००० कल्पचन्द्रभगणा" इत्यर्थः। चन्द्रकक्षया "खतयाब्धिद्विदहना" इति ३२४०००, दक्ष्माणया गुणिता तन्मिताकाशस्य कक्षा १८७१२०८०८६४००००००, परिधि-

हृणा ज्ञेया। धीमतेति शेषः। नन्वनन्ताकाशस्य कथं परिधिरियन्त आह। करव्याप्तिरिति। सूर्यस्य किरणप्रचारस्तयाकाशकक्षापरिमित इत्यर्थः। तथाच यद्देशावच्छेदेन सूर्यकिरणप्रचारस्तद्देशावच्छिन्नाकाशगोलस्य ब्रह्माण्डकटाहान्तर्गतस्य परिधिमानं सम्भवत्येवेति भावः। अत्रोपपत्तिः। समनन्तरमेव यद्भगणभक्ता खकक्षा तस्य कक्षा स्यादित्युक्तेर्भगणकक्षाघातो खकक्षा सिद्धा। अतश्चन्द्रभगणकक्ष्ययोर्घातः खकक्षातुल्य एवेति दिक्। अथ ग्रहाणां कक्षानयनं योजनगत्यानयनं चाह” र०ना० “सैव यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेत्। कुवासरैर्विभज्याप्ताः सर्वेषां प्राग्गतिः स्मृता” सू०सि०। “सार्ककरव्याप्ताकाशकक्षा यत्कल्पभगणैर्ग्रहस्य कल्पभगणैर्भक्ता फलं तस्य कक्षा भवेत्। एवकारो निश्चयार्थे। खकक्षा कल्पकुदिनैर्भक्ता प्राप्तं फलं सर्वेषामुक्तभगणसम्बन्धिनां ग्रहादीनामक्षो दिवसस्य दिनसम्बन्धिनीत्यर्थः। प्राग्गतिर्योजनात्मिका कथिता। अत्रोपपत्तिः। कल्पभगणकक्षाघातस्त्वाकाशकक्षा कल्पभगणभक्ता कक्षा स्यादेव। कल्पे खकक्षामितयोजनानि ग्रहः क्रमतीति यदि कल्पकुदिनैस्तदैकेनाकाशकक्षामितयोजनानि तदैककुदिनेन कानीत्यनुपातेन पूर्वगतिर्योजनात्मिका प्रत्यहं तुल्यैवेत्युपपन्नम्। अथ योजनात्मकगतेः कलात्मकगतं स्फीयामाह” र०ना० “भुक्तियोजनजा सङ्ख्या सेन्द्रोर्भ्रमणसङ्गुणा। खकक्षाप्ता तु सा तस्य तिथ्याप्ता गतिलिप्तिकाः” सू०सि०। “गतियोजनोत्पन्ना या सङ्ख्या चन्द्रस्य भगणसङ्गुणा कक्षया ३२४०००, गुणिता खकक्षयाभिमतग्रहस्य कक्षया भक्ता सा फलरूपा तिथ्याप्ता पञ्चदशभक्ता। तुकारात् फलं तस्याभिमतग्रहस्य गतिकला भवन्ति। अत्रोपपत्तिः। यदि कक्षायोजनैश्चक्र २१६००, कलास्तदा गतियोजनैः का इत्यनुपातेन गतिकलाः। तत्रापि चन्द्रकक्षा ३२४०००, पञ्चदशभक्ताश्चक्रकला २१६००, इति चक्रकलास्वरूपं धृतमित्युपपन्नम्। अथ किमन्तरेषा इति प्रश्नस्योत्तरमाह र० ना० “कक्षा भूकर्णगुणिता महीमण्डलभाजिता। तत्कर्णा भूमिकर्णोना ग्रहौच्च्यं स्वं दलीकृताः” सू० सि०। “ग्रहाणां योजनात्मिका कक्षा भूकर्णेन “योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि च” इत्युक्तभूव्यासेन षोडशशतैः(स्थूलेन)गुणिता भूपरिधिना (५०२६,१४/२५, स्थूलेन) तद्गतेन भक्ता फलं तस्याः कक्षायाः कर्णो व्यासो भवन्ति। एते भूव्यासेन हीना अर्धिताः सन्तः स्वस्वहीनव्याससम्बन्धिग्रहौच्च्यं ग्रहस्योन्नता भूमेः सकाशाद्भवति। अत्रोपपत्तिः। यदि भूपरिधिना भूव्यासस्तदा कक्षायोजनैः क इत्यनुपातेन कक्षाव्यासास्तेऽर्धिताः कक्षाव्यासार्धं भूगर्भकक्षापरिधिप्रदेशान्तरालरूपं भूपृष्ठात् तदन्तरज्ञानार्थं भूव्यासार्धेन हीनं भूपृष्ठात् कक्षौच्च्यं तत्र कक्षाव्यासो भूव्यासोना अर्धिताः कृता उभयथा समत्वात्। कक्षौच्च्यमेव ग्रहौच्च्यं ग्रहस्य तत्राधिष्ठानादिति। एतेन सिद्धग्रहोच्चेभ्यः परस्परान्तरज्ञानं सुगममिति श्रीपति वाक्ये (तन्मानं वक्ष्यमाणं स्पष्टम्) किमन्तरा इति प्रश्नस्योत्तरं स्वतः सिद्धमेवेति दिक्। अथोर्ध्वक्रमेण सिद्धाः कक्षा विवक्षु प्रथमं चन्द्रस्य कक्षां बुधशीघ्रोच्चस्य कक्षां चाह।“खत्रयाब्धिद्विदहनाः कक्षा तु हिमदीधितेः। शशीघ्रस्याङ्कखद्वित्रिकृतशून्येन्दवस्ततः” सू० सि०। “चन्द्रस्य कक्षा सहस्रगुणित्रिसप्तरामाः३२४०००। तुकारादागमप्रामाण्येनाङ्गीकार्या। अन्यथान्योन्याश्रयापत्तेस्ततश्चन्द्रादूर्ध्वं बुधशीघ्रोच्चस्य कक्षा नवखद्वित्रवेद दश:१०४३२०९। यद्यपि बुधशीघ्रोच्चमाकाशे प्रत्यक्षं नेति तत्कक्षोक्तिरयुक्ता तथापि बुधशीघ्रोच्चगणामीतकक्षायां गत्यनुरोधेन चन्द्रोर्ध्वगायां बुधो भ्रमति। पूर्वं सूर्यशुक्रेन्दुजेन्दवः” इति क्रमोक्तेः। अन्यथा भगणैक्यादेककक्षायां रविबुधशुक्राणामवस्थितौ मण्डलभङ्गापत्तेरिति सूचनार्थमुक्ता। अथ शुक्रशीघ्रोच्चस्य कक्षां सूर्यबुधशुक्राणामभिन्नां कक्षां चाह” र०ना० “शुक्रशीघ्रस्य सप्ताद्रिरसाब्धिरसषड्यमाः। ततोऽर्कबुधशुक्राणां खखार्थैकसुरार्णवाः” सू० सि०। “तदूर्ध्व शुक्रशीघ्रोच्चस्य कक्षाऽश्वाद्र्यङ्गवेदषट्रसपक्षाः२६६४६७७ शुक्रावस्थानसूचनार्थमुक्ता। ततस्तदूर्ध्वं सूर्यबुधशुक्राणां भगणैक्यादभिन्ना कक्षा खखपञ्चभूदेवाब्धयः४३३१५००। यद्यपि बुधशुक्रयोः सूर्याधःस्थत्वात् केवलं सूर्यकक्षोक्तुमुचिता तथापि यदि एतया कक्षयैको भगणस्तदा कल्पकुदिनैः खकक्षामितयोजनानि तदाहर्गणेन कानीत्यनुपातागतयोजनैः क इत्यनुपातेन सूर्यबुधशुक्राणामभिन्नत्वसिद्ध्यर्थं बुधशुक्रयोरप्युक्ता अन्यथा समत्वानुपपत्तेरिति। अथ भौमस्य कक्षां चन्द्रमन्दोच्चस्य कक्षां चाह” र० ना० “कुजस्याप्यङ्कशून्याङ्कषड्वेदैकभुजङ्गमाः। चन्द्रोच्चस्य कृताष्टाब्धिवसुद्वित्र्यष्टवह्नयः” सू० सि०। “भौमस्य। रविमन्दात् सूर्यादूर्ध्वकक्षा नवखनवषडिन्दुसर्पाः ८१४६९०९। चन्द्रमन्दोच्चस्य कक्षा वेदाष्टिवेदवसुपञ्च·

रामनागरामाः २८३२८४८४ । इयमप्याकाशे न दृश्या तथापि गतयोजनैश्चन्द्रोच्चस्यानायोक्ता । अथ गुरुराह्वोः कक्षे आह र०ना०। "ततस्तु मुनिपञ्चाद्रिगुणेन्दुविषया गुरोः। स्वर्भानोर्वेदतर्काष्टद्विशैलार्थखकुञ्जराः" सू० सि० । "बृहस्पतेर्भौमाद् चन्द्रस्याद्वोर्ध्वं कक्षा वेदाङ्कमुनिपञ्चस्वरराम चन्द्रशराः ५१२७५७६४ । राहोः कक्षा वेदाङ्कगजयमसप्तपञ्चाशीतयः ८०५७२८६४ । इयमदृश्यापि राहोर्गतियोजनैस्तानार्थमुक्ता । अत्रापि पातस्य चक्रशुद्धत्वमवधेयम् ॥ अथ शनेः कक्षां नक्षत्राधिष्ठितमूर्तगोलमध्यकक्षां चाह र०ना०। "पञ्चबाणाश्विनागर्तुरसाद्र्यर्काः शनेस्ततः। भानां रविखशून्याङ्कवसुरन्ध्रशराश्विनः" सू०सि० । "ततो बृहस्पतेराह्वोर्वोर्ध्वं शनेः कक्षा पञ्चपञ्चद्व्यष्टरसषप्तार्काः १२७६६८२५५ । नक्षत्राणां गोलमध्ये कक्षा शनेरूर्ध्वं द्वादशनवशताष्टनवतिसत्त्वानि २५९८९००१२ । यद्य प "भवेद्भकक्षा तीक्ष्णांशोर्भ्रमणं षष्टिताडितम्" इत्यनेनोक्त भकक्षाया द्वादशान्तरितत्वादयुक्तत्वं तथापि "सैव यत्कल्पभगणैः" इत्यनेन सूर्यकक्षाया उक्त्या द्वादशाधोऽवयवस्य निबन्धने त्यागेऽपि भकक्षार्थं भगवता गृहीतत्वाददोषः । एतेनाधोऽवयवस्यार्धन्यूनत्वेन त्यागोऽर्धाभ्यधिकत्वेनोर्ध्वमेकाधिकग्रहणं कक्षानिबन्धेन कृतमिति सूचितम् । ननु चन्द्रकक्षाया आगमप्रामाण्येनाङ्गीकारे सर्वकक्षाणामागमप्रामाण्यापत्त्या "सैव यत्कल्पभगणैर्भक्ता तद्भ्रमणं भवेत्" इति कक्षानयनं व्यर्थम् । अन्यथाकाशकक्षास्थानासम्भवापत्तेरित्यत आकाशकक्षैवागमप्रामाण्येनाङ्गीकार्येति वसन्ततिलकेनाह" र० ना० । "खव्योमखत्रयखसागरषट्कनागव्योमाष्टशून्ययमरूपनगाष्टचन्द्राः । ब्रह्माण्डसम्पुटपरिभ्रमणं समन्तादभ्यन्तरे दिनकरस्य करप्रसारः" सू० सि० ॥ १८७१२०८०८६४०००००० मितयोजनानि" र०ना० । कक्षादीनां योजनमानभेदेऽनुपदं वक्ष्यमाणस्य सि०शि० वाक्यस्य सूक्ष्मत्वादविरोधः) । खगोले अगस्त्यादीनां स्थानदेशमाह यथा

"अशीतिभागैर्याम्यायामगस्त्यो मिथुनान्तगः । विंशे च मिथुनस्यांशे मृगव्याधो व्यवस्थितः । विक्षेपो दक्षिणे भागैः स्वार्णवैः स्वादपक्रमात् । हुतभुग्ब्रह्महृदयौ वृषे द्वाविंशभागगौ । अष्टाभिस्त्रिंशता चैव विक्षिप्तावुत्तरेण तौ । गोलं बद्ध्वा परीक्षेत विक्षेपं ध्रुवकं स्फुटम्" सू० सि० "स्वकीयात् क्रान्तिविभागस्थानात्

(७४)दक्षिणस्यामशीत्यंशैस्ताराात्मकोऽगस्त्यो मिथुनान्तगः कर्काद्यभागे स्थितः । मृगव्याधनक्षत्रस्य राशित्रयं (९०) ध्रुवकः । दक्षिणविक्षेपोऽशीतिरित्यर्थः । मृगव्याधो लुब्धको मिथुनराशेर्विंशतिभागे (८०) स्थितः । चकारः समुच्चये । लुब्धकनक्षत्रस्य राशिद्वयं विंशतिभागा ध्रुवक इत्यर्थः । दक्षिणस्यां चत्वारिंशता भागैः परिमितस्तस्य च क्रान्तिवृत्तस्थानाद्विक्षेपः । वृषराशौ वह्निब्रह्महृदयौ द्वाविंशभागे स्थितौ (५०) वह्निब्रह्महृदयनक्षत्रयोर्द्वाविंश तभागाधिकैकराशिर्ध्रुवकः । तौ वह्निब्रह्महृदयौ । अष्टाभिस्त्रिंशता । चकारः क्रमार्थे । एवकारो न्यूनाधिकव्यवच्छेदार्थः । उत्तरेणोत्तरस्यामित्यर्थः । विक्षिप्तौ विक्षेपवन्तौ । वह्नेर्विक्षेपोऽष्टभाग उत्तरः । ब्रह्महृदयस्योत्तरो विक्षेपस्त्रिंश इत्यर्थः । नन्वेते ध्रुवाविक्षेपाश्च कालक्रमेण नियता अनियता वेत्यत आह गोलमिति । गोलं वक्ष्यमाणं बद्ध्वा वंशशलाकादिभिर्निबध्य स्फुटं विक्षेपं क्रान्तिसंस्कारयोग्यं ध्रुवाभिमुखं ध्रुवकं स्फुटमायनदृक्कर्मसंस्कृतं परीक्षेत । स्वस्वकाले दृग्गोचरसिद्धमङ्गीकुर्वीत । तथा च क्रान्तिसंस्कारयोग्यविक्षेपायनसंस्कृतध्रुवकयोरयनांशवशादस्थिरत्वादपि मयेदानीन्तनसमयानुरोधेन लाघवार्थमायनदृक्कर्मसंस्कृता ध्रुवाः क्रान्तिसंस्कारयोग्यविक्षेपाश्च नियता उक्ताः । कालान्तरे गोलयन्त्रेण वेधस्तु गोलबन्धोक्तविधिना गोलयन्त्रे कार्यः"। तत्र खगोलस्योपरि भगोलम् आधारवृत्तस्योपरि विषुवद्वृत्तम् । तत्र यथोक्तं क्रान्तिवृत्तं भगणांशाङ्कितं च बद्ध्वा ध्रुवयष्टिकीलयोः प्रोतमन्यच्चलं भवेधवलयम् । तच्च भगणांशाङ्कितं कार्यम् । ततस्तद्गोलयन्त्रं सम्यग्ध्रुवाभिमुखयष्टिकं जलसमक्षितिजवलयं च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यच्छिद्रगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते मीनान्तात् स्वकलान्तरितपश्चाद्भागे रेवतीतारायां निवेशितं मध्यगतयैव दृष्ट्याश्विन्यादेर्नक्षत्रस्य योगतारां विलोक्य तस्या उपरि तद्वेधवलयं निवेश्यम् । एवं कृते सति वेधवलयस्य क्रान्तिवृत्तस्य च यः सम्पातः स मीनान्तादग्रतो यावद्भिरंशैस्तावन्तस्तस्य नक्षत्रस्य ध्रुवांशा ज्ञेयाः । वेधवलये तस्यैव सम्पातस्य योगतारायाश्च यावन्तोऽन्तरेऽंशास्तावन्तस्तस्य विक्षेपांशा दक्षिणा उत्तरा वा वेद्याः । अथ रोहिणीशकटभेदमाह" र०ना० । "वृषे सप्तदशे भागे यस्य याम्योऽंशकद्वयात् । विक्षेपोऽभ्यधिको भिन्द्याद्रोहिण्याः शकटं तु सः" सू०सि

"वृषराशौ सप्तदशेंऽशे यस्य ग्रहस्य भागद्वयाधिको विक्षेपो दक्षिणः स ग्रहो रोहिण्याः शकटं शकटाकारसन्निवेशं भिन्द्यात्। तन्मध्यगतो भवेदित्यर्थः। तुकारादुग्रहविक्षेपो रोहिणीविक्षेपादल्प इति विशेषार्थकः। विक्षेपस्य दक्षिणस्य रोहिणीविक्षेपादधिकत्वे शकटाद्बहिर्दक्षिणभागे ग्रहस्य स्थितत्वेन तद्भेदकत्वाभावात्। अत्र शकटापिमनक्षत्रस्य ध्रुव एकराशिः सप्तदशांशाः४७। दक्षिणः शरो भागद्वयमिति वेधसिद्धा स्पष्टा युक्तिः" र०ना०। अथ ब्रह्मसज्ज्ञकनक्षत्रावस्थानमाह।

"पूर्वस्यां ब्रह्महृदयादंशकैः पञ्चभिः स्थितः। प्रजापतिर्वृषान्तेऽसौ सौम्येऽष्टत्रिंशदंशकैः" सू० सि०। "ब्रह्महृदयस्थानात् पूर्वभागे पञ्चभिरंशैः प्रजापतिस्ताराात्मको ब्रह्मा क्रान्तिवृत्ते स्थितः। कुत्रेत्यत आह। वृषान्त इति। वृषान्तनिकटे। एकराशिः सप्तविंशत्यंशा ५७ ब्रह्मध्रुवक इत्यर्थः। अस्य विक्षेपमाह। असाविति। ब्रह्मा उत्तरस्यामष्टत्रिंशद्भागैः स्थितः। अष्टत्रिंशद्भागा अस्य विक्षेप इत्यर्थः" र० ना०। "अपांवत्सस्तु चित्रायामुत्तरेंऽशैस्तु पञ्चभिः। बृहत्किञ्चिदतो भागैरापः षड्भिस्तथोत्तरे" सू० सि०। "चित्रायाः सकाशादपांवत्ससज्ज्ञकस्ताराात्मकः पञ्चभिर्भागैरुत्तरस्यां स्थितः। प्रथमतुकारश्चित्राध्रुवतुल्यध्रुवकार्थकः। द्वितीयतुकारश्चित्राविक्षेपस्य दक्षिणभागद्वयात्मकत्वादपांवत्सविक्षेप उत्तरस्त्रिभाग इति स्फुटार्थकः। अतोऽपांवत्सात् किञ्चिदल्पान्तरेण बृहत् स्थूलताराात्मक आपसज्ज्ञकः। तथाऽपांवत्सात् षड्भिरंशैरुत्तरस्यां स्थितचित्राध्रुवक एवापस्य उत्तरो नवांशः" र०ना०।

ताराखरूपादिकम् अश्लेषाशब्दे ४६९ पृ० दर्शितं तेषां ध्रुवकविक्षेपरूपशरयोरानयनविधा सू०सि०दर्शिता यथा "प्रोच्यन्ते लिप्तिका भानां स्वभोगोऽथ दशाहतः। भवन्त्यतीतधिष्ण्यानां भोगलिप्ता युता ध्रुवाः" सू० सि० "भानामश्विन्यादिनक्षत्राणामुत्तराषाढाभिजिच्छ्रवणधनिष्ठावर्जितानां लिप्तिका भोगसज्ज्ञाः कलाः प्रोच्यन्ते समनन्तरमेव कथ्यन्ते। अथानन्तरं स्वभोगः स्वाभीष्टनक्षत्रभोगः कलात्मको वक्ष्यमाणो दशभिर्गुणितः कार्यः। तत्र स्वाभीष्टनक्षत्रगतनक्षत्राणामश्विन्यादीनां भोगलिप्ताः। भभोगोऽष्टशती लिप्ता इत्युक्ताष्टशतकलाः प्रत्येकं युताः। अश्विन्याद्यतीतनक्षत्रसङ्ख्यागुणितकलाष्टशतं युतमित्यर्थः। ध्रुवा नक्षत्राणां भवन्ति" अथ प्रतिप्रता नक्षत्रभोगलिप्ता उत्तराषाढाभिजिच्छ्रवणधनिष्ठाव्यतिरिक्तानां तेषां ध्रुवकाख्यनक्षत्रशरांश्चाष्टश्लोकैराह" र०ना०। "अष्टार्णवाः शून्यकृताः पञ्चषष्टिर्नगेषवः। अष्टार्था अब्धयोऽष्टागा अङ्गागा मनवस्तथा। कृतेषवो युगरसाः शून्यबाणा वियद्रसाः। खवेदाः सागरनगा गजागाः सागरर्तवः। मनवोऽथ रसा वेदा वैश्वमाप्यार्धभोगगम्। आप्यस्यैवाभिजित्प्रान्ते वैश्वान्ते श्रवणस्थितिः। त्रिचतुःपादयोः सन्धौ श्रविष्ठा श्रवणस्य तु। स्वभोगतो वियन्नागाः षट्कृतिर्यमलाश्विनः। रन्ध्रादयः क्रमादेषां विक्षेपाः स्वापदक्रमात्। दिङ्मासविषयः सौम्ये याम्ये पञ्च दिशो नव। सौम्ये रसाः खं याम्येऽगाः सौम्ये खार्कास्त्रयोदश। दक्षिणे रुद्रयमलाः सप्तत्रिंशदथोत्तरे। याम्येऽध्यर्धत्रिककृता नवसार्धशरेषवः। उत्तरस्यां तथा षष्टिस्त्रिंशत् षट्त्रिंशदेव हि। दक्षिणे त्वर्धभागस्तु चतुर्विंशतिरुत्तरे। भागाः षड्विंशतिः खं च दस्रादीनां यथाक्रमम्" सू० सि०। "अश्विन्यादिनक्षत्राणां क्रमाद्भोगा एते। तत्राश्विन्याम् अष्टचत्वारिंशत् कलाः भरण्याश्चत्वारिंशत्। कृत्तिकायाः कलाः पञ्चषष्टिः। रोहिण्याः सप्तपञ्चाशत् कलाः। मृगशिरसोऽष्टपञ्चाशत्। आर्द्रायाश्चत्वारः। अत्राब्धय इत्यत्र गोऽब्धयो गोग्नय इति वा पाठस्त्वयुक्तः शाकल्यसंहिताविरोधात् "सौरोक्तरुद्रभस्यांशास्त्रयोऽगाब्धयः कलाः इति नार्मदोक्तं दशकलोनपञ्चदशभागा मिथुने सर्वजनाभिमतध्रुवको दशकलोनपञ्चदशभागाः पर्वताभिमतध्रुवकस्य निरस्तः। पुनर्वसोरष्टसप्ततिः। पुष्यस्य षट्सप्ततिः। अश्लेषायाश्चतुर्दश। तथेति छन्दःपूरणार्थम्। मघायाश्चतुःपञ्चाशत्। पूर्वफाल्गुन्याश्चतुःषष्टिः। उत्तरफाल्गुन्याः पञ्चाशत्। हस्तस्य षष्टिः। चित्रायाश्चत्वारिंशत्। स्वात्याः चतुःसप्ततिः। विशाखाया अष्टसप्ततिः। अनुराधायाश्चतुःषष्टिः। ज्येष्ठायाश्चतुर्दश। अनन्तरं मूलस्य षट्। पूर्वाषाढ़ायाश्चत्वारः। उत्तराषाढाया ध्रुवकमाह। वैश्वमिति। उत्तराषाढ़ादियोगतारानक्षत्रम्। आप्यार्धभोगगम्। आप्यस्य पूर्वाषाढानक्षत्रस्यार्धभोगः धनूराशेर्विंशतिभागस्तत्र स्थितं ज्ञेयम्। अष्टौ राशयो विंशतिभागा उत्तराषाढ़ायाध्रुवः इत्यर्थः। एतेन पूर्वाषाढ़ायोगतारायाः सकाशादुत्तराषाढ़ायोगतारा विंशतिकलोनसप्तभागान्तरिता। तेन पूर्वाषाढ़ाध्रुवकोऽष्टराशय-

चतुर्दश भागा विंशतिकलोनसप्तभागैर्युत उत्तराषाढ़ाया ध्रुवश्चत्वारिंशत्कलाधिकोऽङ्कध्रुव इति सर्वतोऽन्यमपास्तम् ब्रह्मसिद्धान्तविरोधात्। अभिजिद्ध्रुवकमाह। आप्यस्येति। पूर्वाषाढ़ाया अवसाने धनूराशेर्विंशतिकलोनसप्तविंशतिभागेऽभिजिद्योगतारा ज्ञेया। चत्वारिंशत्कलाधिकषड्विंशतिभागाधिका अष्टौ राशयोऽभिजितो ध्रुव इत्यर्थः। एवकारोऽन्ययोगव्यवच्छेदार्थः। तेन संहितासमातं श्रवणपञ्चदशांशस्थानं विंशतिविकलायुतत्रयोदशकलायुतचतुर्दशभागादिकनवराशयो निरस्तम्। श्रवणस्य ध्रुवकमाह। वैश्वान्त इति। उत्तराषाढ़ाया अवसाने श्रवणयोगतारायाः स्थानं ज्ञेयम्। नव राशयो दश भागाः श्रवणध्रुवक इत्यर्थः। धनिष्ठाया ध्रुवकमाह। त्रिचतुःपादयोरिति। श्रवणस्य तृतीयचतुर्थचरणयोः क्रमेणान्तादिसन्धौ मकरराशेर्विंशतिभागे श्रविष्ठा धनिष्ठा ज्ञेया। नव राशयो विंशतिभागा धनिष्ठाध्रुव इत्यर्थः। तुकारात् खेटान्तर्गतधनिष्ठास्थानं कुम्भस्य विंशतिकलोनसप्तभागा निरस्तम्। शततारायाः भोगमाह। स्वभोगत इति। धनिष्ठाभोगात् कुम्भस्य विंशतिकलोनसप्तभागावधेरित्यर्थः। शततारायाः अशीतिर्भोगः। अतः प्राग्वद्ध्रुव इति ज्ञापनार्थं स्वभोगत इत्युक्तम्। शततारायाः स्थानं शततारकध्रुव इति पर्यवसन्नम्। अवशिष्टनक्षत्राणां भोगानाह। षट्कृतिरिति। पूर्वभाद्रपदायाः षट्त्रिंशत् कला भोगः। उत्तरभाद्रपदाया द्वाविंशतिः। रेवत्या एकोनाशीतिः। अथ ध्रुवकानयनं यथा। अश्विन्या भोगः। ४८। दशगुणितः। ४८०। अतीतनक्षत्राभावाद्भोगयोजनाभावः। अतोऽश्विन्याः कलात्मको ध्रुवः ४८०। राश्याद्यस्तु ०।८। भरण्या भोगः। ०। दशाहतः। ४००। अतीतनक्षत्रस्यैकत्वादष्टशतयुतो भरण्याः परिभाषया राश्याद्यो ध्रुवः। ०। २०। एवमार्द्राभोगः। ४। दशाहतः। ४०। अतीतनक्षत्राणां पञ्चतया पञ्चगुणिताष्टशतेन। ४०००। चतुःसहस्रात्मकेन युतः कलाद्यो ध्रुवः। ४०४०। राश्याद्यस्तु। २। ७। २०। एवं पूर्वाषाढ़ाया दशगुणितो भोगः। ४०। एकोनविंशतिगुणिताष्टशतेन। १५२००। युतः परिभाषया राश्याद्यो ध्रुवः। ८। १४। शततारया दशगुणितो भोगः। ८००। त्रयोविंशतिगुणिताष्टशतेन। १८४००। युतश्चतुर्विंशतिगुणिताष्टशतरूपो। १९२००। जातो ध्रुवो राश्याद्यः। १०। २०। पूर्वभाद्रपदाया दशगुणितो भोगः। ३६०। चतुर्विंशतिगुणिताष्टशतेन। १९२००। युतो। १९५६०। जातो ध्रुवो राश्याद्यः। १०। २६। उत्तराषाढ़ाभिजिच्छ्रवणधनिष्ठानां स्वभोगस्थानात् पश्चात् स्थितत्वेनोक्तरीत्यसम्भवाद्भिन्नरीत्या ध्रुवका उक्ताः। स्वादिस्थानाद्योगतारा यदन्तरकलाभिस्स्थितास्ता लाघवाद्भोगप्रवर्तिता भोगरूपा उक्ताः। तथा च ब्रह्मसिद्धान्ते "अष्टौ विंशतिरर्धोन गजाग्निर्व्यर्धखेषवः। त्रितर्काः सतिभागाद्रिरसास्त्र्यङ्काश्च षट्शतम्॥ मघाशा नवसूर्याश्च वेदेन्द्राः शरबाणभूः। खात्यष्टिः खष्टतिर्गोऽतिधृतिर्विश्वाश्विनस्तथा॥ वेदाकृतिर्गोदशपक्षाः कुब्धिहस्ता युगार्थहक्। ख्योत्कृतिरन्त्रंग्रहीनाश्वरसचन्द्राः खहस्तिदक्॥ खगोऽश्विनः खदन्ताः षड्दन्ताः शैलगुणाग्नयः। मेषाद्यग्रादिमध्यांशाः षडंशोनाः खषड्गुणाः"॥ इति। अथ नक्षत्राणां विक्षेपभागानाह एषामिति। उक्तध्रुवकसम्बन्धिनामश्विन्यादिनक्षत्राणां यथाक्रमं क्रमादित्यर्थः। स्वात् स्वकीयापक्रमात् क्रान्त्यग्रात् क्रान्तिवृत्तस्थध्रुवकस्थानादित्यर्थः। विक्षेपा विक्षेपभागा दक्षिणा उत्तरा वा भवन्ति। तत्रोत्तरदिश्यश्विन्यादित्रयाणां दिङ्मासविषयाः क्रमेण दश द्वादश पञ्चेत्यर्थः। दक्षिणदिशि रोहिण्यादित्रयाणां पञ्चदश नव। उत्तरस्यां पुनर्वस्वोः षड्भागाः। पुष्यस्य खं विक्षेपाभावः। अत्र पञ्चमाचरणस्य गुरुत्वेन छन्दोभङ्ग आर्षत्वान्न दोषः। दक्षिणस्यामश्लेषायाः सप्त। उत्तरस्यां मघादित्रयाणां शून्यं द्वादश त्रयोदश। दक्षिणस्यां हस्तचित्रयोरेकादश द्वौ। अनन्तरं स्वात्या उत्तरदिशि सप्तत्रिंशत्। दक्षिणस्यां विशाखादीनां षण्णां सार्धैकः त्रयं चत्वारः। नव सार्धपञ्च पञ्च क्रमेण उत्तरदिशि तथा विक्षेपभागा अभिजितः षष्टिः। श्रवणस्य त्रिंशत्। धनिष्ठायाः षट्त्रिंशत्। एवकारो न्यूनाधिकव्यवच्छेदार्थः। चकारः पूरणार्थः। दक्षिणस्यां तुकारस्तथा। अर्धभागः शततारायाः। तुकारस्तथा। उत्तरस्यां पूर्वभाद्रपदायाश्चतुर्विंशतिः। तस्यामेव दिशि भागा विक्षेपभागा उत्तरभाद्रपदायाः षड्विंशतिः। रेवत्या विक्षेपाभावः। चकारः पूरणार्थः" र० ना०॥ अत्र स्पष्टत्वात् अनेकेषां नक्षत्राणां ध्रुवका न दर्शिताः। शि० शि० प्रमिताक्षरायां तु यथाक्रमं सर्वेषांस्वरूपतो ध्रुवका दर्शिता यथा

अ॰	भ॰	कृ॰	रो॰	मृ॰	आ॰	पु॰	पु॰	श्ला॰	म॰	पू॰	उ॰	ह॰	चि॰
०	०	१	१	२	२	३	३	३	४	४	५	५	६
८	२०	८	२२	६	७	३	१६	१८	९	२७	५	२०	३
०	०	२८	२८	०	२०	०	०	०	०	०	०	०	०

स्वा॰	वि॰	अ॰	ज्ये॰	मू॰	पू॰	उ॰	अ॰	श्र॰	ध॰	श॰	पू॰	उ॰	रे॰
६	७	७	७	८	८	८	८	९	९	१०	१०	११	०
१९	२	१४	१९	१	१४	२०	२५	८	२०	२०	२६	७	०
०	५	५	५	०	०	०	०	०	०	०	०	०	०

विक्षेप। यथा

अ॰	भ॰	कृ॰	रो॰	मृ॰	आ॰	पु॰	पु॰	श्ला॰	म॰	पू॰	उ॰	ह॰	चि॰
१०	१२	४	४	१०	११	६	०	७	०	१२	१३	१२	१
		१०	३०										४५
उ	उ	उ	द	द	द	उ	उ	द	उ	उ	उ	द	द

स्वा॰	वि॰	अ॰	ज्ये॰	मू॰	पू॰	उ॰	अ॰	श्र॰	ध॰	श॰	पू॰	उ॰	रे॰
३७	१	१	३	८	५	५	६२	३०	३६	०	२४	२६	०
	२०	४५	३०	२०	२०					२०			
उ	द	द	द	द	द	द	उ	उ	उ	द	उ	उ	उ

सि॰शि॰ग्रहकक्षा अन्यविधा उक्ता यथा

"सार्धाद्रिगोमनुगुणाब्धिमितार्ककक्षा ४३३१४९७१/२ चान्द्री सहस्रगुणिता जिनरामसंख्या ३२४०००। अभ्रेभिभाङ्कगजकुञ्जरगोऽश्वपक्षाः २५९८८९८५० कक्षां गणयन्ति गणका भगणस्य चेमाम्" सि॰शि॰ । शेषाणां ग्रहाणां कक्षाप्रमाणानि श्रीपतिनान्यथोक्तानि यथा "अष्टत्र्यङ्कषण्मनुगजाः ८१४६९१६ क्षितिनन्दनस्य शून्ये शदन्तशरखेन्दुमिता १०४३२११ च सूरेः । रूपाश्विनागयुगशैलगुणेन्दुबाणाः ५१३७४८२१ खाग्न्यङ्कसागररसोत्कृतयः २६६४६३० सितस्य, भूधराहिगगनागरसर्तुक्ष्माधराश्विशशिनः १२७६६८७८७ शनिकक्षा" रव्यादीनां मन्दोच्चादिपरिधिमानमुक्तं सि॰शि॰ 'मन्दोच्चनीचपरिधिस्त्रिलवोनशक्र १३।४० भागा रवेर्जिनकलोनरदा ३१।३६ हिमांशोः। खाश्वा ७० भुजङ्गदहना ३८ अमरा ३३ भवाश्च ११ पूर्णेषवो ५० निगदिताः क्षितिजादिकानाम्" सि॰शि॰। "इह ग्रहभ्रमणोपपत्त्यर्थं मन्दोच्चनीचवृत्तानि पूर्वैः कल्पितानि । तेषां प्रमाणान्येतावन्तो भागाः । अत्रोपपत्तिः । ग्रहस्य यन्त्रवेधविधिना यत् परमं फलमुत्पद्यते तस्य ज्या परमफलज्यान्त्यफलज्या चोच्यते । अन्त्यफलज्यातुल्यव्यासार्धेन यद्वृत्तमुत्पद्यते तन्नीचोच्चवृत्तम् । तत्परिधिस्त्रैराशिकेन । यदि त्रिज्याव्यासार्धे भांशाः ३६० परिधिस्तदान्त्यफलज्याव्यासार्धे किमिति लब्धं परिधिभागाः । एवमर्कादीनां त्रिलवोनशक्रा इत्यादय उत्पद्यन्ते । अथ भौमादीनां चलपरिधीनाह" प्रमि॰ सौरागमेण सूक्ष्मत्वान्नविरोधः ।

"एषां चलाः कृतजिनास्त्रिलवेन हीना २४३।४० दन्तेन्दवो १३२ वसुरसा ६८ वसुबाणदस्राः २५८ । पूर्णाब्धयो ४० ऽथ भृगुजस्य तु मन्दकेन्द्रदोःशिञ्जिनी द्विगुणिता त्रिगुणेन २४३८ भक्ता । लब्धेन मन्दपरिधी रहितः स्फुटः स्यात् तच्छीघ्रकेन्द्रभुजमौर्व्यथ बाणनिघ्नी। उत्तरस्यां सप्तर्षिस्थानं ऋषिशब्दे १४५२ पृ॰ दर्शितं तेषां शतवर्षैरेकैकनक्षत्रभोगस्तत्र प्रमाणं वराहसंहितावाक्यं तत्रोक्तम् । भचक्रस्य द्वादशधा विभक्तमपि अश्विन्यादिभिः सप्तविंशतिनक्षत्रात्मकं तत्र त्रिभिस्त्रिभिर्नक्षत्रैर्नव वीथयः बृह॰सं॰ उक्ता यथा "नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः । अश्विन्याद्याः कैश्चित् त्रिभाः क्रमाद्वीथयः कथिताः ॥ नागा तु पवनयाम्याग्नेयानि पैतामहात्त्रिभास्तिस्रः । गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भाद्रपदे ॥ जरद्गव्यां श्रवणात् त्रिभं मृगाख्या त्रिभं च मैत्राद्यम् । हस्तविशाखात्वाष्ट्राण्यजेत्यषाढाद्वयं दहना ॥ तिस्रस्तिस्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः । तासामप्युत्तरमध्यदक्षिणावस्थितैकैका ॥ वीथीमार्गानपरे कथयन्ति यथा स्थिता भमार्गस्य । नक्षत्राणां तारायाम्योत्तरमध्यमास्तद्वत् ॥ उत्तरमार्गो याम्यादि निगदितो मध्यमस्तु भाग्याद्यः । दक्षिणमार्गोऽषाढादि कैश्चिदेवं कृता मार्गाः" ॥

भचक्रस्थग्रहाणां प्राग्गतिभेदकारणमुक्तं सू॰सि॰ यथा "पश्चाद् व्रजन्तोऽतिजवान्नक्षत्रैः सततं ग्रहाः। जीयमानास्तु लम्बन्ते तुल्यमेव स्वमार्गगाः"॥ सू॰ सि॰ ।" "पश्चादनन्तरं पुनरावृत्त्या पश्चात् पश्चिमदिगभिमुखं नक्षत्रैस्तारकादिभिः सह ग्रहाः सूर्यादयोऽतिजवात् प्रवहवायुवत्त्वरगतिवशात् सततं निरन्तरं व्रजन्तो गच्छन्तः स्वमार्गगाः स्वकक्षास्थास्ता जीयमाना नक्षत्रैः पराजिता नक्षत्राणामग्रे गमनात् । अत एव लज्जयेव गुरुभूता इति तात्पर्यार्थः । तुल्यं समम् । एवकारादधिकन्यूनव्यवच्छेदः । लम्बन्ते स्वस्थानात् पूर्वस्मिन् लम्बायमाना भवन्ति । यथा लज्जितः पश्चाद्भवति नाग्रे ; तुकारादधोऽधःकक्षाक्रमानुरोधेन शन्यादिग्रहाणां चन्द्रान्तानां गुरुतापचयः शनि-

रविगुरुभूतस्तस्मात् किञ्चिन्न्यूनो गुरुस्तस्मादपि भौम इत्यादि यथोत्तरम्। यस्य कक्षा महती तस्य गुरुत्वाधिक्यं यस्य लघ्वी तस्य तदनुरोधेन गुरुत्वाल्पत्वमिति। एतदुक्तं भवति। ब्रह्मणा प्रवहवायौ नक्षत्राधिष्ठितो मूर्त्तो गोलः स्थापितस्तदन्तर्गताः स्वस्वाकाशगोलस्थाः शन्यादयो नक्षत्राधिष्ठितमूर्त्तगोलस्थक्रान्तिवृत्तस्थरेवतीयोगतारासन्नरूपमेषादिप्रदेशसमसूत्रस्थाः स्थापिताः। क्रान्तिवृत्तं तु मेषतुलास्थाने विषुवद्वृत्तलग्नसम्पातात् त्रिभान्तरितक्रान्तिवृत्तप्रदेशौ स्वासन्नविषुवद्वृत्तप्रदेशाभ्यां चतुर्विंशत्यंशान्तरेण दक्षिणोत्तरौ मकरकर्कादिरूपौ तदेवं द्वादशराश्यात्मकं वृत्तं ग्रहचारभूतम्। विषुवद्वृत्तं तु ध्रुवमध्यस्थ निरक्षदेशोपरिगम्। तत्र प्रवहवायुना स्वाघातेन मूर्त्तो नक्षत्रगोलो नाक्षत्रषष्टिघटीभिः परिवर्त्यते। तदन्तर्गतवायुभिस्तदाघातेन वा ग्रहा भ्रमन्तोऽपि नक्षत्रगोलस्थितक्रान्तिवृत्तीयमेषादिप्रदेशेन समं न गच्छन्ति वायूनां स्वल्पत्वात् तदाघातस्याप्यल्पत्वाद्बिम्बानां गुरुत्वाच्च। अतस्तत्स्थानाद्ग्रहाणां लम्बनं दृश्यते। अत एव नक्षत्रोदयकाले तेषां द्वितीयदिने नोदयः किन्तु ग्रहो लम्बितप्रदेशेन वायुना तदनन्तरमूर्द्धमागच्छतीत्यनन्तरमुदयः। लम्बनं तु शन्यादीनां कक्षानुरोधेन गुरुत्वाद्वायूनां तद्घातानां वा कक्षानुरोधेन बह्वल्पत्वात् तुल्यम्। यद्यपि वायोर्ध्रुवानुरोधेन सत्त्वाद्ग्रहावलम्बनं विषुवद्वृत्ते भवितुमुचितं न क्रान्तिवृत्ते, तथा च वक्ष्यमाणक्रान्त्यनुपपत्तिः क्रान्तिवृत्तस्थद्वादशराशिभोगेन वक्ष्यमाणानां भगणानामनुपपत्तिश्च। तथापि वायुनावलम्बितो ग्रहो विषुवन्मार्गगोऽपि तद्विषुवप्रदेशासन्नक्रान्तिवृत्तप्रदेशेन ग्रहाकाशगोल एव स्वसमसूत्रेणालक्ष्यत इति नानुपपत्तिः। अत एव स्वमार्गगा इति क्रान्तिवृत्तानुसृतस्वाकाशगोलस्थकक्षामार्गगता इत्यर्थकमुक्तमिति सङ्क्षेपः। अत एव ग्रहाणां लोके प्राग्गतित्वं सिद्धमित्याह" र॰ना॰।

"प्राग्गतित्वमतस्तेषां भगणैः प्रत्यहं गतिः। परिणाहवशाद्भिन्ना तद्वशाद्भानि भुञ्जते सू॰सि॰। "अतोऽवलम्बनादेव तेषां ग्रहाणां प्राग्गतित्वं प्राच्यां दिशि गतिर्येषां ते प्राग्गतयस्तद्भावः प्राग्गतित्वं सिद्धम्। लम्बनस्वरूपेण ग्रहाणां पूर्वगतिरुपपन्ना लोकैः कारणानभिज्ञैः प्रत्यक्षावगततया तच्छक्तिजनिता कल्पितेत्यर्थः। सा कियतीत्यत आह। भगणैरिति। वक्ष्यमाणभगणैः प्रत्यहं प्रतिदिनं गतिः प्राग्गमनरूपा भगणानां यदि गत्युपपन्नत्वाद्भगणसम्बन्धिवक्ष्यमाणदिनैः सूर्य्यसावनैर्ग्रहभगणा लभ्यन्ते तदैकेन दिनेन केत्यनुपातात् ज्ञेया। ननु ग्रहभगणानां तुल्यत्वाभावात् प्रतिदिनं ग्रहगतिर्भिन्नेति पूर्वं लम्बनरूपा ग्रहगतिरयुक्तोक्ता ग्रहलम्बनस्याभिन्नत्वादित्यत आह परिणाहवशादिति। परिणाहः कक्षापरिधिस्तद्वशात् तदनुरोधादियं ग्रहगतिर्भिन्नाऽतुल्या। अयमभिप्रायः। ग्रहाणां लम्बनं तुल्यप्रदेशे न, परन्तु स्वस्वकक्षायां तत्तत्प्रदेशे तुल्ये याः कलास्ता गतिकलास्तास्तु महति कक्षावृत्तेऽल्पा लघुकक्षावृत्ते बह्व्यः सर्वकक्षापरिधीनां चक्रकलाङ्कितत्वात् भगणास्तु गतिवशादेव यस्य कक्षावृत्तं महत् तस्याल्पा यस्य च लघु कक्षावृत्तं तस्य बहवस्तदुपपन्ना गतिरपि तथेति न विरोधः। नन्वेकरूपगतिं विहाय भिन्नरूपा गतिः कथमङ्गीकृतेत्यत आह। तद्वशादिति भिन्नगतिवशाद्भानि राशीन् नक्षत्राणि भुञ्जते ग्रहा भुञ्जन्तीत्यर्थः। तथा च ग्रहराश्यादिभोगज्ञानार्थमियमेव गतिरुपयुक्ता नैकरूपेति भावः। अथ भभोगे विशेषं वदन् वक्ष्यमाणभगणस्वरूपमाह" र॰ना॰। "शीघ्रगस्तान्यथाल्पेन कालेन महताल्पगः। तेषां तु परिवर्त्तेन पौष्णान्ते भगणः स्मृतः" सू॰सि॰। "अथशब्दः पूर्वोक्तविशेषसूचकः शीघ्रगतिग्रहस्तानि भान्यल्पेन कालेन भुनक्त्यल्पगतिर्ग्रहो बहुकालेन भुनक्ति तुल्यराश्यादिभोगो मन्दशीघ्रगतिग्रहयोस्तुल्यकालेन न भवतीति विशेषार्थः। तेषां राशीनां परिवर्त्तेन भ्रमणेन। तुकाराद्ग्रहादिगतिभोगजनितेन भगणः प्राग्रुक्तः। क्रान्तिवृत्ते द्वादशराशीनां सत्त्वात् तद्भोगेन चक्रभोगसमाप्तेर्यत् स्थानमारभ्य चलितो ग्रहः पुनस्तत् स्थानमायाति स चक्रभोगः परिवर्त्तसञ्ज्ञोऽपि द्वादशराशिभोगाद्भगण इत्यर्थः। ननु क्रान्तिवृत्ते सर्वप्रदेशेभ्यः परिवर्त्तसम्भवादत्र कः परिवर्त्तादिभूतः प्रदेश इत्यत आह पौष्णान्त इति। सृष्ट्यादौ ब्रह्मणा क्रान्तिवृत्ते रेवतीयोगताराऽऽसन्नप्रदेशे सर्वग्रहाणां निवेशितत्वात् तदवधितो ग्रहचलनाच्च पौष्णस्य रेवतीयोगताराया अन्ते निकटे प्रदेशे तथा च रेवतीयोगतारासन्नाग्रिमस्थानमेवाद्यन्तावधिभूतमिति भावः" र॰ना॰।

सूर्य्यादिग्रहाणां महायुगे भगणमानमप्युक्तं तत्रैव।

"युगे सूर्य्यज्ञशुक्राणां खचतुष्करदार्णवाः। कुजार्किगुरुशीघ्राणां भगणाः पूर्वयायिनाम्" सू॰सि॰। "महा-

युगे ४३२०००० वर्षे सूर्यबुधशुक्राणां खानां चतुष्कमेक-
स्थानादिषु दशस्थानान्तचतुःस्थानस्थितानि शून्यानि ततो-
ऽयुतादिप्रयुतस्थानपर्य्यन्तं दन्तसमुद्रास्तथा च युगे सौर-
वर्षाणि खाभ्रखाभ्रद्विरामवेदमितानि ४३२०००० भगणा
द्वादशराशिभोगात्मकपरिवर्त्तानां सङ्ख्या भवन्तीति शेषः ।
भौमशनिबृहस्पतीनां यानि शीघ्राणि शीघ्रोच्चानि तेषामेव
न्विता भगणाः । चकारः समुच्चयार्थकोऽनुसन्धेयः । अत्र
कक्षाक्रमेण चारक्रमेण वा गुरोः खलु मध्यगता भवतीति
न तयोर्द्वेषः स्वतन्त्रस्य नियोगानर्हत्वाद्वा । नन्वाकाश
एषां बिम्बाभावादवलम्बनाभावेन गत्यभावात् कथं भ-
गणा उक्ता इत्यत आह पूर्वशायिनमिति पूर्वगा-
मिनाम् । तथा च तेषामदृश्यरूपाणां पूर्वगतिसद्भावाद्भ-
गणोक्तौ न क्षतिः । एषां स्वरूपादिनिर्णयस्तु स्पष्टा-
धिकारे प्रतिपादयिष्यते । अथ चन्द्रभौमयोर्भगणा-
नाह" र० ना० । "इन्दो रसाग्नित्रित्रीषुसप्तभूधरमा-
र्गणाः । दस्त्रत्र्यष्टरसाङ्काक्षिलोचनानि कुजस्य तु" सू०
सि० । "पूर्वश्लोकोक्तभगणा इत्यत्रास्मिञ्छ्लोकेऽप्यन्वेति ।
भूधराः सप्त न तु पर्वतस्य धराभिधानत्वादेकसप्तति-
मार्गणाः शरास्तथा च चन्द्रस्य भगणाः षडग्निदेवपञ्च-
सप्तसप्तपञ्चमिताः५७७५३३३६ भौमस्य तुकारादाकाशस्थ-
बिम्बात्मकस्येति पुनरुक्तिभ्रमवारणार्थं दन्ताष्टषडक्षि-
मिताः२२९६८३२। अथ बुधशीघ्रोच्चगुर्वोर्भगणानाह" र०ना०।
"बुधशीघ्रस्य शून्यर्तुखाद्रित्र्यङ्कनगेन्दवः । बृहस्पतेः
खदस्राक्षिवेदषड्वह्नयस्तथा" सू०सि० । "बुधशीघ्रोच्चस्या-
दृश्यरूपस्य पूर्वगतेर्भगणाः षष्टिसप्ततित्र्यङ्कात्यष्टिमिताः
१७९३७०६० बृहस्पतेस्तथा बिम्बात्मकस्येति पुनरुक्तिभ्रम-
वारणाय नखद्विवेदषड्रामभिताः ३६४२२० । अथ शुक्र-
शीघ्रोच्चशन्योर्भगणानाह" र० ना० । "सितशीघ्रस्य
षट्सप्तत्रियमाश्विखभूधराः । शनेर्भुजङ्गषट्पञ्चरसवेदनिशा-
कराः" सू०सि० । "शुक्रशीघ्रोच्चस्यादृश्यरूपस्य पूर्वगते-
र्भगणाः षट्सप्तत्रिद्विद्विखसप्त ७०२२३७६ एतेन भूधरा
इत्यस्यैकसप्ततिरेकादश वार्थौ निरस्तः । शनेर्बिम्बात्मक-
स्याष्टषट्पञ्चरसेन्द्रमिताः१४६५६८ अथ चन्द्रस्योच्चपातयो-
र्भगणानाह" र० ना० । "चन्द्रोच्चस्याग्निशून्याश्विवसु-
सर्पार्णवा युगे । वामं पातस्य वस्वग्नियमाश्विशिखिदस्र-
काः" सू० सि० । "चन्द्रमन्दोच्चस्य पूर्वगतेरदृश्यरूपस्य
भगणा महायुगे रामनखाष्टाष्टवेदमिताः ४८८२०३ ।
पातस्य चन्द्रपक्षस्य सन्निहितत्वाच्चन्द्रपातस्यादृश्य-
रूपस्य वामं पश्चिमगत्या द्वादशराशिभोगात्मकपरि-
वर्त्तरूपभगणा महायुगे अष्टरामाक्षिनरामद्विमिताः२३२२३८
अत्र युगपदग्रहणं वक्ष्यमाणग्रहोच्चपातभगणसम्बन्धिकल्प-
वारणार्थम् । ग्रहोच्चपातभगणास्तु युगे युगे नोत्पन्ना
इत्यस्मिन् युगसम्बन्धप्रसङ्गे नोक्ताः । मन्दोच्चपातस्वरू-
पादिनिर्णयस्तु स्पष्टाधिकारे व्यक्तो भविष्यति" । अथ युगे
नाक्षत्रदिवसांस्तत्स्वरूपावगमाय ग्रहसावनदिनस्वरूपं
स्वसङ्ख्याज्ञानहेतुकं चाह" र० ना० । । "भानामष्टाक्षि-
वसुद्रित्रिद्विद्व्यष्टशरेन्दवः । भोदया भगणैः स्वैः स्वैरूनाः
स्वस्वोदया युगे" सू० सि० । "भानां नक्षत्राणां स्वतो
गत्यभावेऽपि प्रवहवायुना परिभ्रमणात् तत्सङ्ख्यातुल्या
भगणाः खदिनतुल्याः । अत एवात्र वाममिति पूर्वो-
क्तस्य युक्तोऽन्वयः । अष्टद्व्यष्टनगाग्निजातिगजतिथि-
मिताः १५८२२३७८२८ । ननु ग्रहाणामपि प्रवहवायुना
परिभ्रमणोदयसद्भावात् तेषां दिवसाः कथं ज्ञेया इत्यत
आह । भोदया इति । उदयन्त्यस्मिन्नहनि स्वाद्यन्ता-
वधिरूप इति व्युत्पत्त्योदयशब्देन दिनम् । तथा च भोदया
नक्षत्रदिवसा एते उक्ताः स्वैः स्वैः स्वकीयैः स्वकीयैर्भ-
गणैः प्रागुक्तैर्वर्जिताः सन्तः स्वस्वोदया निजनिजसावन-
दिवसा युगे भवन्ति । युग इत्यनेनाभीष्टकाले नाक्षत्रदि-
वसा ग्रहगतभोगादिना भगणादिनोना ग्रहसावनदिवसा
अभीष्टा भवन्ति । परन्तु राशीन् पञ्चगुणितानंशादिकं
दशगुणितं कृत्वा षष्ठ्यादिस्थाने हीनं कार्य्यमन्यथा
विजातीयत्वादन्तरानुपपत्तेरिति सूचितम् । अत्रोपपत्तिः
यदि ग्रहाणां प्राग्गमनावलम्बनं न स्यात् तर्हि ग्रहो-
दयनक्षत्रोदययोरेकहेतुकत्वान्नाक्षत्रसावनदिवसयोरभेदः स्यात्
अतो ग्रहाणां लम्बनेन नाक्षत्रादिदिवसेभ्यः सावनादि-
दिवसानामन्तरितत्वादवलम्बनजभगणान्तरेण युगे नाक्ष-
त्रदिवसेभ्यो ग्रहसावनदिवसा न्यूना भवन्ति । प्रवहेण
भगणतुल्यपश्चिमग्रहतुल्यानानकरणादिदमुपपन्नं भोदया
इत्यादि । अनेनैव भगणसाधनभोगो नाक्षत्रदिवसा
इत्यर्थसिद्धम्" र० ना० । महायुगे चान्द्रा दशाहदिन-
संख्यां तत्रोक्ता यथा
"भवन्ति शशिनो मासाः सूर्य्येन्दुभगणान्तरम् । रवि-
मासोनितास्ते तु शेषाः स्युरधिमासकाः" सू०सि० । "सूर्य-
चन्द्रभगणयोरन्तरं चन्द्रस्य मासा भवन्ति ते चान्द्रमासा
रविमासोनिताः । अत्र प्रथमं तुकारान्वयाद्द्वादश-
गुणितरविभगणरूपसौरमासाश्चान्द्रमासैरूनिताः सन्तः शेषा

अवशिष्टा ये चान्द्रमासास्तेऽधिमासा एव भवन्ति नान्ये। अनेन चान्द्रत्वमधिमासानां स्पष्टीकृतम् । अत्रोपपत्तिः । त्रिंशत्तिथ्यात्मकस्य रवीन्दुयुतिकालरूपदर्शान्तावधेश्चान्द्रमासस्य द्वादशराशिमितेन सूर्य्यन्तरेणैव सिद्धिः । कथमन्यथा दर्शान्ते मन्दशीघ्रयोः सूर्येन्द्वोर्योगस्य पुनर्दर्शान्ते सम्भवः । द्वादशराश्यन्तरं त्वेकं भगणान्तरमतो भगणान्तरेण चान्द्रो मासः सिद्धः । सौरमासापेक्षया यदन्तरेण चान्द्रमासानामधिकत्वं त एवाधिमासा इति स्वरूपमेव वक्ष्यमाणोपयोगात् परिभाषितम् । अथ वक्ष्यमाणावमसूर्यसावनयोः स्वरूपमाह” र० ना० । “सावनाहानि चान्द्रेभ्यो द्युभ्यः प्रोज्झ्य तिथिक्षयाः । उदयादोदयं भानोर्भूमिसावनवासराः” । चान्द्रेभ्यो द्युभ्यो वक्ष्यमाणचान्द्रदिवसेभ्यः सकाशादित्यर्थः । सावनाहानि सावनदिनानि प्रोज्झ्य त्यक्त्वावशेषं तिथिक्षयाः । तिथिषु चान्द्रदिनेषु सावनदिनानामवशेषतुल्यस्य क्षयो न्यूनत्वम् । यदा तिथिशब्देन सावनो दिवसस्तस्य चान्द्रदिवसात् क्षय इति स्वरूपमेव वक्ष्यमाणोपयोगात् परिभाषितम् । ननु भोदया भगणैरित्यादिना पूर्वं सर्वेषां सावनदिवसा उक्ता इत्यत कस्य ग्राह्या इत्यतः सूर्य्यसावनस्वरूपकथनच्छलेनोत्तरमाह । उदयादिति । सूर्य्यस्योदयकालमारभ्याव्यवहिततदुदयकालपर्य्यन्तं यः कालः स एको दिवसः । इति ये दिवसास्ते भूमिसावनवासराः । भूदिवसा उदयस्य भूसम्बन्धेनावगमात् । सावनादिवसा इत्यर्थः । तथा च निरुपपदसावनभूमिशब्दाभ्यां सूर्यस्य वासरा एव नान्येषां सोपपदत्वाभावादिति भावः । ते कियन्त इत्यतस्तत्प्रमाणं चान्द्रदिनप्रमाणं चाह”र० ना० “वसुद्व्यष्टाद्रिरूपाङ्कसप्ताद्रितिथयो युगे । चान्द्राः खाष्टखखव्योमखाग्निखर्तुनिशाकराः” सू० । “अष्टाश्विगजसप्तपञ्चभूमिता युगे सूर्यसावनदिवसाः । चान्द्रा दिवसा युगतिथय इत्यर्थः । अशीतिशून्यचतुष्कत्रिखरूपा एते त्रिंशद्भक्ताश्चान्द्रमासा उक्तप्रायाः । अनेनैव चान्द्रदिवसानामुपपत्तिः सूर्य्यचन्द्रयोर्भगणयोरन्तररूपचान्द्रमासास्त्रिंशद्गुणिता इति स्पष्टीकृता । अथाधिमासावमयोः सङ्ख्यामाह” र०ना० । “षट्त्रिंशत्त्रिकृताशाङ्कतिथयश्चाधिमासकाः । तिथिक्षया यमार्थाश्विद्व्यष्टव्योमशराश्विनः” सू० । “अधिमासकाः प्रागुक्तस्वरूपाः सकाशाद्युगे षड्वेदरामगोशरेन्दुमितास्तिथिक्षया दिनक्षया अवमानीत्यर्थः । अर्थाः पञ्च । एवं द्विशराश्व-

इष्टतत्त्वानि । ननु सूर्य्यमासात्पूर्वरधिमाससङ्ख्या कथं ज्ञातेत्यतो रविमाससङ्ख्यां स्वरूपेण कक्षांचाह” र०ना०। “खचतुष्कसमुद्राष्टकुपञ्च रविमासकाः । भवन्ति भोदयाभानुभगणैरूनिताः क्वहाः” सू० । “सूर्य्यमासा द्वादशगुणितरविभगणानुरूपाः शून्यचतुष्कसमुद्राष्टैकपञ्चमिताः । ननु सावनदिवससङ्ख्या प्रागुक्ता कथमवगतेत्याह । भवन्तीति । भोदया नाक्षत्रदिवसाः प्रागुक्ताः सूर्यभगणैः प्रागुक्तैर्वर्जिताः सन्तः क्वहा भूवासरा भवन्ति । भोदया इत्यादिप्रागुक्तेः ।

ननु सूर्य्यादिमन्दोच्चभौमादिपातानां युगे भगणानुत्पत्तेः कल्पभगणकथनमात्रशास्त्रकमतस्तत्पङ्क्त्यां प्रागुक्ता एते भगणादयः कल्प एव कथं नोक्ता इत्यत आह” र०ना०। “प्राग्गतेः सूर्य्यमन्दस्य कल्पे सप्ताष्टवह्नयः । कौजस्य वेदखयमा बौधस्याष्टर्तुवह्नयः । खखरन्ध्राणि जैवस्य शौक्रस्यार्थगुणेषवः । गोऽग्नयः शनिमन्दस्य पातानामथ वामतः” सू० सि० । प्राग्गतेः कल्प इत्यनयोः शनिमन्दान्तं प्रत्येकं सम्बन्धः । पूर्व्वगतेः सूर्य्यमन्दोच्चस्य कल्पे सप्ताष्टरामभिताः ३८७ शनिपातस्य भगणा इति वक्ष्यमाणस्य भगणा इति पदमत्र प्रत्येकमन्वेति । कौजस्य कुजसम्बन्धिनः सूर्य्यमन्दस्येत्यस्यैकदेशो मन्दस्येति मन्दोच्चस्येत्यर्थकमत्रान्वेति । तथा च भौममन्दोच्चस्य चतुरधिकं शतद्वयम्२०४ । बौधस्य बुधमन्दोच्चस्याष्टषष्टित्रिमिताः३६८ । जैवस्य गुरुसम्बन्धिनः । अत्र शनिमन्दस्येति वक्ष्यमाणस्यैकदेशो मन्दस्येति मन्दोच्चस्येत्यर्थकमन्वेत्येकवाक्यत्वात् । यद्वाद्यन्तयोर्मन्दस्येत्युक्तेरत्र मध्यस्थानामन्वयः सूपपन्न इति । तथा च गुरुमन्दोच्चस्य नवशतं ९०० शौक्रस्य शुक्रमन्दोच्चस्य पञ्चत्रिंशदधिकपञ्चशतं ५३५ शनिमन्दोच्चस्यैकोनचत्वारिंशत् ३९ । अथानन्तरं पातानां भौमादिपातानां वामतः पश्चिमगत्या भगणा उच्यन्त इति शेषः तान् श्लोकाभ्यामाह” र० ना० । “मनुदस्रास्तु कौजस्य बौधस्याष्टाष्टसागराः । कृताद्रिचन्द्रा जैवस्य त्रिखाङ्काश्च भृगोस्तथा । शनिपातस्य भगणाः कल्पे यमरसर्त्तवः । भगणाः पूर्वमेवात्र प्रोक्ताश्चन्द्रोच्चपातयोः” सू० सि० । “कुजसम्बन्धिनः । तकारात् पातस्य भौमपातस्य कल्पे भगणाश्चतुर्दशाधिकं शतद्वयम्२१४ । बौधस्य बुधसम्बन्धिनः शनिपातस्येत्यस्यैकदेशः पातस्येत्यत्रान्वेति । बुधपातस्य द्वादशोना पञ्चशती४८८ । जैवस्य गुरुपातस्य चतुःसप्तत्यधिकं शतम्१७४ । भृगोः शुक्रस्य

तथा च स्वश्विन्यकारात् पातस्य शुक्रपातस्येत्यर्थः। नव-धिका नवशती ९०३। शनिपातस्य द्विरसषट्का ६६२ भगणाः कल्पे भवन्ति। नन्वस्मिन् प्रसङ्गे चन्द्रस्योच्चपातयोर्भगणाः कथं नोक्ता इति मन्दाशङ्कापाकरणाय पूर्वोक्तं स्मारयति। भगणा इति। चन्द्रोच्चपातयोश्चन्द्र मन्दोच्चपातयोर्भगणा अत्रास्मिन्नधिकारे पूर्वं ग्रहयुगभगणकथने। एवकारो विस्मरण निरासार्थकः "प्रोक्ताश्चन्द्रोच्चस्येत्यादिश्लोकेनोक्ताः" र०ना०। कुजादिकक्षाणां भूमिमध्यत उच्छ्रुतिः श्रीपतिनोक्ता यथा भौमस्य गोकुरसपक्षनसूर्यसंख्या १२९६२१९ दन्ताभ्रषट्-षट्पमिता १६६०२२ श्रुतिरिन्दुजस्य। पूज्यस्य नागगुण-पक्षरसाद्रिभूमि नागाश्च ८१७६५२८ सर्पगजस्वाश्विय-माश्वयोऽथ ४२४०८८। शुक्रस्य, सूर्यतनयस्य कुपक्षनवाङ्क भूनभ्रचन्द्रमित २०२१९०७१ योजनकर्ण एषम्। नागाख-षड्रामरसाग्निकुवेदसंख्यो ४१३६२६५८ नक्षत्रमण्डलभवः श्रवणो निरुक्तः"। सि०शि० विशेष उक्तः। "सृष्टा भचक्रं कमलोद्भवेन ग्रहैः सहैतद्भगणादिसंस्थैः। शश्वद्भ्रमे विश्वसृजा नियुक्तं तदन्ततारे च तथा ध्रुवत्वे। ततोऽपराशाभिमुखं भपञ्जरे सखेचरे शीघ्र-तरे भ्रमत्यपि। तदल्पगत्येन्द्रदिशं नभश्चराश्चरन्ति नीचोच्चतरात्मवर्त्मसु" मू०। "यदेतद्भचक्रं ग्रहैः सह भ्रमद्दृश्यते तद्विश्वसृजा जगदुत्पादकेन कमलोद्भवेन ब्रह्मणा सृष्ट्यादौ सृष्टा ततः शश्वद्भ्रमेऽनवरतभ्रमणे नियुक्तम्। एतदुक्तं भवति। भान्यश्विन्यादीन्यन्यानि विशिष्टानि ज्योतींषि तेषां समूहश्चक्रं ग्रहाश्च सूर्या-दयस्तैः सह सृष्टम्। तानि भानि प्राक् संस्थया सम-न्तान्निवेशितानि। ग्रहास्तु भगणादावश्विनीमुखे निवे-शितास्त उपर्युपरि संस्थया। तत्रादौ तावदधश्चन्द्रः। तदुपरि बुधः। ततः शुक्रः। ततो रविः। तस्मा-द्भौमः। ततो गुरुः। ततः शनिः। सर्वेषामुपरि दूरे भचक्रम्। एषां कक्षाप्रमाणानि कक्षाध्याये प्रति-पादयिष्यन्ते। ननु यद्यूर्ध्वोर्ध्वस्था ग्रहास्तदुपरि दूरतो भगणस्तत् कथं भगणादिसंस्थैर्ग्रहैरित्युच्यते। सत्यम्। अत्र भूमध्ये सूत्रस्यैकमग्रं बद्धा द्वितीयमग्रं भचक्रेऽश्विनीमुखे किल निबद्धम्। तस्मिन् सूत्रे प्रोता मणय इव चन्द्रादयो ग्रहाः सृष्ट्यादौ ब्रह्मणा निवे-शिताः। भूमण्डलं द्वादशधा विभज्यैवं भूमध्यात् सूत्राणि प्रतिभागं नीत्वा किल बद्धानि तैः सूत्रैः सह ग्रहकक्षायां ये संपातास्ते तासु कक्षासु राश्यन्ताः।

तद्वत्प्रकारा राशय इति संक्षिप्तमिदमुक्तम्। कक्षाध्याये गोले च किञ्चिद्विस्तीर्य वक्ष्यामः। एवंविधं भचक्रं सृष्ट्वा ब्रह्मणा गगने निवेशितम्। यत्र निवेशितं तत्र प्रवहो नाम वायुः। स च नित्यं प्रत्यग्गतिः। तेन समाहतं भचक्रं सखेचरं पश्चिमाभिमुखभ्रमे प्रवृत्तम्। यत् तस्य प्रत्यग्भ्रमणं तच्छीघ्रतरम्। यत एकेनाह्ना भमण्डलस्य परिवर्त्तः। एवं तस्मिन् भपञ्जरे सखेचरे शीघ्रतरे भ्रमत्यपि खेचरा इन्द्रदिशं चरन्ति पूर्वाभिमुखं व्रजन्ति। नीचोच्चतरात्मवर्त्मसु। अनन्तरकथितेषु स्वस्व-मार्गेषु तेषां प्राग्भ्रमणम्। तत् तदल्पगत्या प्रत्यग्-गतेर्बहुत्वात् प्रागल्पगत्या व्रजन्तो नोपलक्ष्यन्ते इति भावः। तथा तस्य भपञ्जरस्य यौ दक्षिणोत्तरावन्तौ तत्र ये तारे ते ध्रुवत्वे नियुक्ते" प्रमिता०। सि०शि० ग्रहाणां केषां चित् कल्पे भगणा अन्ययोक्ता यथा। "अर्कशुक्रबुधपर्यया विधेरह्नि कोटिगुणिता रदाब्धयः ४३२०००००००। एत एव शनिजीवभूभुवां कीर्त्तिताश्च गजकेशवोद्भवाः। खाभ्रखाभ्रगगनामरेन्द्रियक्ष्माभरा-द्रिविषया ५७७५३२०००० हिमद्युतेः। युग्मयुग्म-शरनागलोचनव्यालपक्षनयमाऽश्विनो २२९६८२८५२२ ऽब्जजः। सिन्धुसिन्धुरनवाष्टगोऽङ्कषट्त्र्यङ्कसप्तशशिनो १७९३६९९८९८४ शशीभुजाः। पञ्चपक्षयुगषट्कलोचन-त्र्यश्विषड्गुणमिता ३६४२२६४५५ गुरोर्मताः। द्विनन्द-वेदाङ्कगजाग्निलोचनद्विभूम्यशेलाः ७०२२३८९४९२ सित-शीघ्रपर्ययाः। भुजङ्गनन्दद्विनगाङ्गबाणषट् शतेन्दवः १४६५६७२९८ सूर्यसुतस्य पर्ययाः। खाष्टाब्धयो ४८० ऽष्टाब्धगजेषुदिग्द्विपद्विपाब्धयो ४८८१०५८५८ इत्र्यङ्कयमा २९२ रदाग्नयः ३३२। शरेभिभा ८५५ स्त्र्यब्धरसाः ६५२ कृशानगराः ४१ स्युः पूर्वगत्या तरणेर्मृदुच्चजाः। गजाष्टिभर्गत्रिरदाश्विनः। २३३२१११६८ कुम्भद्वसाश्विनः २६७ कुद्विशराः ५२१ कृमर्त्तवः ६१। त्रिनन्दनागा ८९२ शुगकुञ्जरेषवो ५८४ निशाकरादत्रस्तगपातपर्ययाः" मू०। ग्रहाणां पूर्वगत्या गच्छतां कल्पे एतावन्तो भगणा भवन्ति। तथा मन्दोच्चानां चलोच्चानां च प्राग्गत्या एतावन्तः पर्यया भवन्ति। तथा पातानां पश्चिमगत्या एतावन्तो भवन्ति। अत्रोपपत्तिः। सा तु तत्तद्ग्रहाणां कृशवेन तत्तद्वेधसंस्थानवशेन स्फुतगोलेनैव श्रोतुं शक्यते नान्येन। ग्रहमन्दशीघ्रोच्चपाताः स्वस्वमार्गेषु गच्छन्तः एतावतः पर्ययान् कल्पे कुर्वन्तीत्यत्रागम एव प्रमाणम्। स

आगमो महता कालेन लेखकाध्यापकाध्येतृदोषैर्बहुधा जातस्तदा कतमस्य प्रामाण्यम्। अथ यद्येवमुच्यते गणितस्कन्धे उपपत्तिमानेवागमः प्रमाणम्। उपपत्त्या ये सिध्यन्ति भगणास्ते ग्राह्याः। तदपि न। यतोऽतिप्रयासेन पुरुषेणोपपत्तिर्ज्ञातुमेव शक्यते। न तया तेषां भगणानामियत्ता कर्त्तुं शक्यते पुरुषायुषोऽल्पत्वात्। उपपत्तौ तु ग्रहः प्रत्यहं यन्त्रेण वेध्यः भगणान्तं यावत्। एवं शनैश्चरस्य तावद्वर्षाणां त्रिंशता भगणः पूर्यते। मन्दोच्चानां तु वर्षशतैरनेकैः। अतो नायमर्थः पुरुषसाध्य इति। अत एवातिप्राज्ञा गणकाः साम्प्रतोपलब्ध्यनुसारिणं प्रौढगणकस्वीकृतं कमप्यागममङ्गीकृत्य ग्रहगणितमात्मनो गणितगोलयोर्निरतिशयं कौशलं दर्शयितुं तथान्यैर्भ्रान्तिज्ञानेनान्यथोदितानर्थांश्च निराकर्तुमन्यान् ग्रन्थान् रचयन्ति। ग्रहगणित इति कर्त्तव्यतायामस्माभिः कौशलं दर्शनीयं भवत्वागमो योऽपि कोऽप्ययमाशयस्तेषाम्। यथात्र ग्रन्थे ब्रह्मगुप्तस्वीकृतागमोऽङ्गीकृत इति। तर्हि तिष्ठतु तावदुपपत्त्या भगणानामियत्तासाधनम्। अथ यद्युपपत्तिरुच्यते तर्हि इतरेतराश्रयदोषशङ्कया वक्तुमशक्या। तथापि संक्षिप्तामुपपत्तिं वक्ष्यामः। इतरेतराश्रयदोषोऽत्र दोषाभासः। उपपत्तिभेदानां यौगपद्येन वक्तुमशक्यत्वात्। अथोच्यते अर्कशुक्रबुधपर्यया विधेरित्यादि। यावन्ति कल्पे वर्षाणि तावन्त एव सूर्यभगणा इत्युपपन्नम्। यतो भगणभोगकालो हि वर्षमुक्तम्। बुधशुक्रौ तु रवेरासन्नावेव कदाचिदग्रतः कदाचित् पृष्ठतस्तस्यानुचराविव सदा व्रजन्तौ दृश्येते। अतस्तयोरपि रविभगणतुल्या भगणा इत्युपपन्नम्। चलोच्चभगणोपपत्तिमग्रे वक्ष्यामः। अथ समायां भूमावभीष्टकर्कटकेन त्रिज्यामिताङ्कैरङ्कितेन वृत्तं दिगङ्कितं भगणांशैश्चाङ्कितं कृत्वा तत्र प्राचीचिह्नाद्दक्षिणतो नातिदूरे प्रदेशे उत्तरेऽयने वृत्तमध्यस्थितेन कीलेन रवेरुदयो वेध्यः। ततोऽनन्तरं वर्षमेकं रव्युदया गणनीयाः। ते च पञ्चषष्ट्यधिकशतत्रय ३६५ तुल्या भवन्ति। तत्रान्तिमोदयः पूर्वोदयस्थानादासन्नो दक्षिणत एव भवति। तयोरन्तरं विगणय्य ग्राह्यम्। ततोऽन्यस्मिन् दिने पुनरुदयो वेध्यः। स तु पूर्वचिह्नादुत्तरत एव भवति। तदप्युत्तरमन्तरं ग्राह्यम्। ततोऽनुपातः। यद्यन्तरद्वितयकलाभिरेकीकृताभिः षष्टि ६० घटिका लभ्यन्ते तदा दक्षिणेनान्तरेण किमिति। अत्र लभ्यन्ते पञ्चदश घटिकास्त्रिंशत् पलानि सार्धानि द्वाविंशतिर्विपलानि १५। ३०। २२। ३०। आभिर्घटीभिः सहितानि पञ्चषष्ट्यधिकशतत्रयतुल्यानि सावनदिनान्येकस्मिन् रव्यब्दे भवन्ति ३६५। १५। ३०। २२। ३०। ततोऽनुपातः। यद्येकेन वर्षेणैतावन्ति कुदिनानि तदा कल्पवर्षैः किमिति। एवं ये लभ्यन्ते ते सावनदिवसा भवन्ति कल्पे। अथ यदि तैरेव रवेर्वर्षान्तःपातिभिः कुदिनैश्चक्रकला लभ्यन्ते तदैकेन किमिति। फलं मध्यमा रविगतिरित्युपपन्नम्। अथ चन्द्रभगणोपपत्तिः। तत्रादौ तावद् ग्रहवेधार्थं गोलबन्धोक्तविधिना विपुलं गोलयन्त्रं कार्यम्। तत्र खगोलस्यान्तर्भगोल आधारवृत्तद्वयस्योपरि विषुवद्वृत्तम्। तत्र च यथोक्तं क्रान्तिवृत्तं भगणांशाङ्कितं च बद्ध्वा कदम्बद्वयकीलकयोः प्रोतमन्यद्ग्रहवेधवलयम्। तच्च भगणांशाङ्कितं कार्यम्। ततस्तद्गोलयन्त्रं सम्यग् ध्रुवाभिमुखयष्टिकं जलसमक्षितिजवलयं च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यचिह्नगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते यो मीनान्तस्तं रेवतीतारायां निवेश्य मध्यगतयैव दृष्ट्या चन्द्रं विलोक्य तद्वेधवलयं चन्द्रोपरि निवेश्यम्। एवं कृते सति वेधवृत्तस्य क्रान्तिवृत्तस्य च यः संपातस्तस्य मीनान्तस्य च यावदन्तरं तस्मिन् काले तावान् स्फुटचन्द्रो वेदितव्यः। क्रान्तिवृत्तस्य चन्द्रबिम्बमध्यस्य च वेधवृत्ते यावदन्तरं तावांस्तस्य विक्षेपः। ततो यावतीषु रात्रिगतघटिकासु वेधः कृतस्तावतीष्वेव पुनर्द्वितीयदिने कर्तव्यः। एवं द्वितीयदिने स्फुटचन्द्रं ज्ञात्वा तयोरन्तरं सा तद्दिने स्फुटा गतिः। अथ तौ चन्द्रौ "स्फुटग्रहं मध्यखगं प्रकल्प्येत्यादिना" मध्यमौ कृत्वा तयोरन्तरं या मध्यमा चन्द्रगतिः। तयाऽनुपातः। यद्येकेन दिनेनैतावती चन्द्रगतिस्तदा कुदिनैः किमित्येवं चन्द्रभगणा उत्पद्यन्ते। तथा चाह श्रीमान् ब्रह्मगुप्तः "ज्ञातं कृत्वा मध्यं भूयोऽन्यदिने तदन्तरं भुक्तिः। त्रैराशिकेन भुक्त्या कल्पग्रहमण्डलानयनम्" ॥ एवमन्येषामपि भगणोपपत्तिः। अथ चन्द्रोच्चस्य। एवं प्रत्यहं चन्द्रवेधं कृत्वा स्फुटगतयो विलोक्याः। यस्मिन् दिने गतेः परमाल्पत्वं दृष्टं तत्र दिने मध्यम एव स्फुटचन्द्रो भवति। तदेवोच्चस्थानम्। यत उच्चसमे ग्रहे फलाभावो गतेश्च परमाल्पत्वम्। ततश्च तस्माद्दिनादारभ्यान्यस्मिंश्चन्द्रपर्यये प्रत्यहं चन्द्रवेधात् तथैवोच्चस्थानं ज्ञेयम्। तत्र

पूर्वस्थानादग्रत एव भवति। यत् तयोरन्तरं तज्ज्ञात्वाऽनुपातः क्रियते। यद्येतावद्भिरन्तरदिनैरिदमुच्चयोरन्तरं लभ्यते तदैकेन किमिति। फलं तुङ्गगतिः। तयाऽनुपातात् कल्पभगणाः। अथ चन्द्रपातभगणोपपत्तिः। एवं प्रत्यहं चन्द्रवेधाद्दक्षिणविक्षेपे क्षीयमाणे यस्मिन् दिने विक्षेपाभावो दृष्टः क्रान्तिवृत्ते तत् स्थानं चिह्नयित्वा तत्र यावान् विधुः स भगणाच्छुद्धः पातः स्यादिति ज्ञेयम्। पुनरन्यस्मिन्नपि पर्यये दक्षिणविक्षेपाभावस्थानं ज्ञेयम्। क्रान्तिवृत्ते तत् स्थानं पूर्वस्थानात् पश्चिमत एव भवति। अतो ज्ञाता पातस्य विलोमा गतिः। सा चानुपातात्। यद्येतत्कालान्तरदिनैरेतावत् पातयोरन्तरं लभ्यते तदैकेन किमिति। फलं पातगतिः। तया प्राग्वत् कल्पभगणाः। अथ रवितुङ्गोपपत्तिः। मिथुनान्ते रवौ कस्मिंश्चिद्दिने रेवतीतारकोदयाद्यावतीभिर्घटिकाभीरविरुदितस्तावतीभिर्मीनान्ताल्लग्नं साध्यम्। यल्लग्नं स तदा स्फुटो रविर्ज्ञेयः। एवमन्यस्मिन् दिनेऽपि। तयोः स्फुटार्कयोरन्तरं स्फुटा गतिः। एवं प्रत्यहं स्फुटगतयो ज्ञातव्याः। यस्मिन् दिने गतेः परमाल्पत्वं तद्दिने यावान् रविस्तावदेव रवेरुच्चं भवति। तस्योच्चस्य चलनं वर्षशतेनापि नोपलभ्यते। किन्त्वाचार्यैश्चन्द्रमन्दोच्चवदनुमानात् कल्पिता गतिः। सा चेयम् यैर्भगणैः साम्प्रताहर्गणाद्वर्षगणाद्वा एतावदुच्चं भवति ते भगणा युक्त्या कुट्टकेन वा कल्पिताः। अथान्येषां शीघ्रोच्चोपपत्तिः। तत्र “एत एव शनिजीवभूभुवामित्यादि”। उच्चो ह्याकर्षको भवति। तेन स्वकक्षामण्डले भ्रमन् ग्रहः स्वाभिमुखमाकृष्यते। तेनाकृष्टः सन् कक्षामण्डले मध्यग्रहादग्रतः पृष्ठतो वा यावतान्तरेण दृश्यते तावत् तस्य फलं मान्द्यं शैघ्र्यं वा। अहो उच्चो नाम प्रदेशविशेषस्तेन कथमाकृष्यते? अतस्तस्य देवतारूपत्वमुक्तं सूर्यसिद्धान्ते। “अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिताः। शीघ्रमन्दोच्चपाताख्या ग्रहाणां गतिहेतवः। तद्वातरश्मिभिर्बद्धास्तैः सव्येतरपाणिभिः। प्राक् पश्चादपकृष्यन्ते यथासन्नं स्वदिङ्मुखम्” इत्यादि। एवमत्रोच्चस्य देवताविशेषत्वेनाङ्गीकृतत्वाददोषः। एतदुक्तं भवति। शनेर्जीवात् कुजाद्वा यदा रविरग्रे वर्त्तते तदा मध्यग्रहात् स्फुटग्रहोऽग्रतो दृश्यते। यदा तु पृष्ठगतोऽर्कस्तदा मध्यात् स्फुटग्रहः पृष्ठतो दृश्यते। अतस्तेषां त्रयाणां रविसमं शीघ्रोच्चं धीरैः कल्पितम्।

अतो रविभगणतुल्याः शीघ्रोच्चभगणा इत्युपपन्नम्। अथ मन्दोच्चोपपत्तिः। तत्र वेधेन स्फुटग्रहं ज्ञात्वा तं मन्दस्फुटं प्रकल्प्य ततः शीघ्रफलमानीय तत् तस्मिन् स्फुटे विलोमं कृत्वैवमसकृन्मन्दस्फुटो ज्ञेयः। एवं प्रत्यहं मन्दस्फुटमुपलभ्य स मन्दस्फुटो धनर्णं मन्दफले क्षीयमाणे यस्मिन् दिने मध्यमतुल्यो भवति तदा तत्तुल्यमेव मन्दोच्चं ज्ञेयम्। ततस्तस्माद्रविमन्दोच्चवद्भगणाः कल्प्याः। एवं सर्वेषाम्। अथ बुधशुक्रयोः शीघ्रोच्चोपपत्तिः। तत्र रविशुक्रयोः पूर्वस्यां दिशि चक्रयन्त्रवेधेनान्तरभागा ज्ञेयाः। ते तयोः स्फुटयोरन्तरांशा जातास्तैः स्फुटार्कादूनाधिकैः स्फुटः शुक्रो भवति। ततः शुक्रस्य मन्दफलमानीय तत् स्फुटे शुक्रे धनर्णं व्यस्तं कार्यम्। रविश्च मध्यमः कार्यः। तयोर्यदन्तरं तच्छीघ्रफलमृणं धनं च ज्ञेयम्। एवं प्रतिदिनवेधेन तच्छीघ्रफलं परमल्पं ज्ञातव्यम्। यत् तादृक् फलमर्कोन तिर्यक्स्थितेनोच्चेनाकृष्टस्य भवति। तच्च तिर्यक्स्थत्वं त्रिभान्तरितस्य स्यात्। अतस्तत्र त्रिभोनेन स्फुटशुक्रेण तुल्यं शीघ्रोच्चं ज्ञेयम्। एवं पुनरन्यस्मिन् पर्यये प्राच्यामेवान्यच्छीघ्रोच्चं ज्ञात्वानुपातः क्रियते। यद्येतत्कालान्तरदिनैस्तयोरुच्चयोरन्तरं लभ्यते तदैकेन किमिति। फलं तुङ्गगतिः। प्राग्वत् तया भगणाः। एवं बुधस्यापि। अथ भौमादीनां वेधेन प्राग्वद्दक्षिणविक्षेपाभावस्थाने यावान् मन्दस्फुटो ग्रहश्चक्रशुद्धस्तावान् पातः। बुधशुक्रयोस्तु तदा मन्दफलव्यस्तसंस्कृतं यावच्छीघ्रोच्चं चक्रशुद्धं तावान् पातो ज्ञेयः। ततः प्राग्वद्भगणकल्पना। अथ भभ्रमणाह” प्रमि०। “खखेषुवेदषड्गुणाकृतीभभूतभूमयः। शताहता १५८२२३६४५०००० भपश्चिमभ्रमा भवन्ति काहनि” काहनि ब्रह्मदिन एतावन्तो भानां पश्चिमभ्रमा भवन्ति। अत्रोपपत्तिर्गोले “समं भूस्थिताद्युदितावित्यादिना” कथिता व्याख्याता च। अथ सूर्याहांश्चान्द्राहांश्चाह” प्रमि०। “विधिदिने दिनकृद्दिवसाः करेन्द्रियशरेषुभुवोऽर्बुदसंगुणाः १५५५२०००००००० । नवनवाङ्ककराभ्ररसेन्दवः प्रयुतसंगुणिता १६०२९९९०००००० विधुवासराः” अत्रोपपत्तिः। रविवर्षाणि (४३२००००००० । ३६० गुणितानि) दिनीकृतानीति सुगमम्। चन्द्रार्कयोर्यावन्तः कल्पे योगास्तावन्तः किल शशिमासाः। ते तु योगा भगणान्तरतुल्याः स्युः उभयोरपि प्राग्गमनात्। अतो भगणान्तरतुल्याः शशिमासा भवन्ति। ते त्रिंशद्गुणाः शशिदिवसा

भवन्तीत्युपपन्नम्। अथ कुदिनान्याह। भूदिनानि शरवेदभूपगोऽश्वसप्ततिथयोऽयुताहताः १५७७९१६४५०००० । भभ्रमास्तु भगणैर्विवर्जिता यस्य तस्य कुदिनानि तानि वा” ॥ एषामुपपत्तिः प्रागेवोक्ता। एकस्मिन् रविवर्षे यावन्तो भभ्रमाः स्युस्तावन्त एवैकोना रविसावनदिवसा भवन्ति। यतो रविः प्राग्गत्या एकं पर्ययं गतः। अतो भगणसंख्ययोना भभ्रमाः कुदिना भवन्ति। एवमन्येषामपि ग्रहाणां कुदिनानि स्युरित्युपपन्नम्” प्रमि० इदानीं कलिगताद्यहर्गणादिकमाह। “कलिगताद्यया दिनसंचये दिनपतिर्भृगुजप्रभृतिस्तदा। कलिमुखध्रुवकेण समन्वितो भवति तद्द्युगणोद्भवखेचरः” सि०शि० “अत्र कलिगताहर्गणेऽयं विशेषः। शुक्राद्यो वारो गणनीयः। यतः कल्पगताहर्गणात् कलिमुखे शुक्रवारो भवति। तत्र च ये ग्रहास्ते ध्रुवसंज्ञाः कल्पिताः। तद्द्युगणभवः खेचरश्च कलिमुखध्रुवकेण समन्वितः कार्य इत्यत्र वासनापि सुगमा। इदानीं कलिमुखध्रुवकानाह” प्रमि०। “खाद्रिरामाग्नयः २२७० कलि-रामाङ्का ९२२१ वेदवेदाङ्कचन्द्रा १९४४ विलिप्ताः क्रमात्। षड्रसाङ्काब्धयो ४९६६ ऽङ्गाभ्रवेदाब्धयो ४४०६ वेदषट्कखभूपाभ्रभूसंमिताः १०१६०६४। वेदचन्द्रद्विवेदाब्धिनागाः ८४४२१४ करद्व्यब्धिवेदाब्धिशैलं ७४४´२२ भवेयुः कुजात्। द्वापरान्तध्रुवाश्चक्रशुद्धास्तथा सूर्यतुङ्गेन्दुतुङ्गेन्दुपातोद्भवाः” सि०शि०। “कुजादीनां सर्वेषां ध्रुवाश्चक्रशुद्धाः पठिता लाघवार्थम् स्पष्टार्थमिदम्” प्रमि०

कल्यादौ ग्रहाः।

मं.	बु.	गु.	शु.	श.	रतुं.	चंतुं.	चंपा
११	११	११	११	११	२	४	५
१९	२७	२९	२८	२८	१७	५	२
२	२४	२७	४२	४६	४५	२९	१२
५०	२९	२६	१४	२४	२६	४६	५८

अत्र बालावबोधार्थं रूपमहर्गणं कृत्वा ग्रहाणां सावनदिनगतयः साधिताः।

र	चं	मं	बु	गु	शु	श	उ	पा
०	१२	०	४	०	१	०	०	०
५९	१०	३१	५	४	३६	२	६	३
८	३४	२६	३२	५९	७	०	४०	१०
१०	५३	२८	१८	९	४४	२२	५३	४८
२१	०	७	२८	९	१५	५१	५६	२०

दिनगणः खषड्भ्यंशोनो भाग इति प्रत्यहमेकोनषष्टिः कला गृहीताः। शेषावयवेन सत्रिभागैः सप्तभिर्दिनैरेका कला भवति” प्रमि०।

खगोले सप्त वायुस्कन्धाः” सि०शि० उक्ताः यथा “भूवायुरावह इह प्रवहस्तदूर्द्ध्वः स्यादुद्वहस्तदनु संवहसंज्ञकश्च। अन्यस्ततोऽपि सुवहः परिपूर्वकोऽस्माद्बाह्यः परावह इमे पवनाः प्रसिद्धाः। भूमेर्बहिर्द्वादश योजनानि भूवायुरत्राम्बुदविद्युदाद्यम्। तदूर्द्ध्वगो यः प्रवहः, स नित्यं प्रत्यग्गतिस्तस्य तु मध्यसंस्था। नक्षत्रकक्षा खचरैः समेतो यस्मादतस्तेन समाहतोऽयम्। भपञ्जरः खेचरचक्रयुक्तो भ्रमत्यजस्रं प्रवहानिलेन”। श्रीपतिः “स्यादावहः प्रवह उद्वहसंवहौ च स्वादिवहः परिवहश्च परावहश्च। स्कन्धाः क्रमेण मरुतामिह सप्तसंख्या विश्वम्भरापवनभावहमाद्युरेते”।

मतभेदेन भूगोलभगोलयोश्चलाचलत्वविप्रतिपत्तौ भगोलस्यैव भ्रमणं सि० शि० भु०को० निरूपितं यथा “यान्तो भचक्रे लघुपूर्वगत्या खेटास्तु तस्यापरशीघ्रगत्या। कुलालचक्रभ्रमिवामगत्या यान्तो न कीटा इव भान्ति यान्तः” सि०शि०। आर्य्यभट्टमते तु भूमेरेव चलनं व्यवस्थापितं यथा “अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत्। अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्”। अनेन भूमेरेव गतिवशाद्भचक्रस्य भ्रमणभ्रम इत्युक्तम् तेन च भचक्रस्यान्तर्ग्रहाणामुदयास्तमयनिमित्तं भ्रमणमङ्गीकृतम् यथा “उदयास्तमयनिमित्तं प्रवहेन वायुना क्षिप्तः। लङ्कायां समपश्चिमगो भपञ्जरः सग्रहो भ्रमति” अत उदयास्तमयनिमित्तत्वेन ग्रहगतिस्वीकारेण कालभेदे शुक्रादीनामिव रवेरुदयास्तमयाभावात् न गतिमत्त्वं प्रत्यहमुदयास्तमयौ तु तस्य भूगत्यैव सम्भवतः भूमिष्ठस्याभ्राच्छादनादृश्यत्वाभावेनास्तत्वमिति भेदः। अत्रेदं बोध्यम् ग्रहगतिस्वीकारेणैव सर्वोपपत्तौ भूगतिस्वीकारोऽनर्थक इत्यभिप्रेत्य श्रीपतिना आर्य्यभट्टमतमुपन्यस्य तत्र दूषणमुक्त्वा भगोलस्यैव भ्रमणमुपपादितं यथा “नौस्थोविलोमगमनादचलं यथा वा मन्यते चलति नैवमिलाभ्रमेण। लङ्कासमापरगतिप्रचलद्भचक्रमाभाति सुस्थिरमपीति वदन्ति केचित्। यद्येवमम्बरचरा विहगाः स्वनीडमासादयन्ति न खलु भ्रमणे धरित्र्याः। किञ्चाम्बुदा अपि न भूरिपयोमुचः स्युर्देशस्य पूर्वगमनेन चिराय हन्त।

भूगोलवेगजनितेन समीरणेन केत्वादयोऽप्यपरदिग्गतयः सदा स्युः। प्रासादभूधरशिरांस्यपि संपतन्ति तस्माद्भ्रमत्यनुगणस्त्वचलाऽचलैव"। रङ्गनाथोऽपि "यदि च भ्रमति क्ष्मा तदा स्वकुलायं कथमाप्नुयुः खगाः। इषवोऽभिनभः समुज्झिता निपतन्तः स्युरपांपतेर्दिशि। पुरतोऽभिमुखे भ्रमे भुवो वरुणाशाभिमुखो व्रजेद्घनः। अथ मन्दगमात् तथा भवेत् कथमेकेन दिवा परिभ्रमः" इत्याह।

सि॰ शि॰ भूमेरेव स्थितत्वं व्यवस्थापितं यथा "भूमेः पिण्डः शशाङ्कज्ञकविरविकुजेज्यार्किनक्षत्रकक्षावृत्तैर्वृत्तो वृतः सन् मृदनिलसलिलव्योमतेजोमयोऽयम्। नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे निष्ठं विश्वं च शश्वत् सदनुजमनुजादित्यदैत्यं समन्तात्। सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः। कदम्बकुसुमग्रन्थिः केसरप्रसरैरिव" सि॰ शि॰। "योऽयं मृदनिलसलिलव्योमतेजोमय इति पाञ्चभौतिको भूमेः पिण्डो वृत्तो वर्त्तुलाकाररूढश्चन्द्रादिकक्षावृत्तैरावृतः सन्ननन्याधारः स्वशक्त्यैव नियतं निश्चितं वियत्याकाशे तिष्ठति। तत्पृष्ठनिष्ठं च जगत्। सदनुजमनुजादित्यदैत्यम्। दनुजा दानवाः। मनुजा मानवाः। आदित्या देवाः। दैत्या असुराः। तैः समेतं समन्तात् तिष्ठति। शेषं स्पष्टार्थम्" प्रमि॰। इदानीं पुराणेषु भूमेराधारपरम्परा या पठिता तां निराकुर्वन्नाह। "मूर्त्तो धर्त्ता चेद्धरित्र्यास्ततोऽन्यस्तस्याप्यन्योऽस्यैवमत्रानवस्था। अन्त्ये कल्प्या चेत् स्वशक्तिः किमाद्ये किं नो भूमेः साष्टमूर्त्तेश्च मूर्त्तिः" सि॰शि॰। कथमियं भूमेः स्वशक्तिरित्याशङ्कां परिहरन्नाह। "यथोष्णतार्कानलयोश्च, शीतता विधौ, द्रुतिः के कठिनत्वमश्मनि। मरुच्चलो भूरचला स्वभावतो यतो विचित्रा वत वस्तुशक्तयः। आकृष्टिशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या। आकृष्यते तत्पततीव भाति समे समन्तात् क पतत्वियं खे" सि॰शि॰। "आकृष्टिशक्तिश्च महीत्यनेन भूमेरधःपतनशङ्का तत्तिर्यगधःस्थितानां चाधःपतनशङ्का निरस्ता" प्रमि॰। तथान्यत्रापि युक्तिस्तत्र दर्शिता यथा "विलोक्याङ्का ध्रुवमत्स्य परिभ्रमम्"। "यदा भरणीस्थो रविर्भवति तदा तस्यास्तमयकाले ध्रुवमत्स्यस्तिर्यक्स्थो भवति। तस्य मुखतारा पश्चिमतः, पुच्छतारा पूर्वतः। तदा मुखताराग्रे रविरित्यर्थः। अथ निशावसाने मुखतारा परिवर्त्य पूर्वतो याति। पुच्छतारा पश्चिमतो याति। ततो मुखताराग्रगतस्यैवार्कस्योदयो दृश्यते" प्रमि॰। अस्यायमाशयः यदि भूमेरेव चलनं न भचक्रस्य चलनमुररीक्रियेत तदा ध्रुवमत्स्यस्य ध्रुवताराश्लिष्टस्थाने भचक्रे स्थितस्य स्थूलतारात्मकताराद्वयस्य ध्रुवचतुर्दिक्षु भचक्रभ्रमणवत् पश्चात् प्रत्यङ्मेकेनाह्ना परिभ्रमणं दृश्यते भरणीस्थे सूर्य्ये च कस्तमयकाले ध्रुवमत्स्य मुखतारायाः पश्चिमस्थत्वं पुच्छतारायाश्च पूर्वस्थत्वं दृश्यते दृश्यते च निशावसाने तयोर्दिग्विपर्य्ययः। भूमेरेव चलनात् तस्योदयास्तमयस्वीकारे यथास्थितैकरूपेणावस्थानमपि दृश्येत न च तथा दृश्यते। अतो भचक्रस्यैव चलनात् सर्वव्यवहारोपपत्तौ मुधा भूमिचलनाङ्गीकारेण। एवं सप्तर्षिमण्डलस्य मरीच्यादिक्रमेण निशामुखे उदयसमये पूर्वस्थत्वमस्तमयकाले निशावसाने च तद्विपर्य्ययेणावस्थानं भचक्रभ्रमणं विनाऽनुपपन्नमेव तेषां च राशिचक्रे यथा पूर्व्वादिक्रमेण स्थितिः शतवर्षेणैकैकनक्षत्रभोगस्तथा ऋषिशब्दे १४५१पृ॰ दर्शितम्। अत्र श्रीपतिना "प्रासादशिरांसि पतन्तीति" यदुक्तं तदापाततः भूमेः स्वोर्द्धाकाशविभागस्थानस्थानां तयाकृष्टमूर्त्तीनामेव भूमौ पतनमिति नियमेन स्वाधिष्ठिततया भूभागस्यैवाधोभागतत्त्वेन पतनसम्भवात् तेन न प्रासादशिरःपतनसम्भवः "काधःपतेदिति वाक्यापर्य्यालोचनया तथैवावगमादिति सुधीभिर्भाव्यम्। भूचलने अन्येऽपि दोषाः सम्भवन्ति। तथाहि पूर्वापरभागे तुल्ययन्त्रेणाकृष्य क्षिप्तशरयोः समगतिरेव प्रत्यक्षसिद्धा समया गत्या च तुल्य भूमिभागे एव तयोः पतनमुचितम्। भूमेः प्राग्गतित्वाङ्गीकारे च प्राक्क्षिप्तस्याधिकभूम्यन्तरे, पश्चात्क्षिप्तस्य चाल्पभूम्यन्तरे पतनं स्यात्। न च तथा लक्ष्यते। किञ्च द्वादशयोजनात्मकभूवायुना सार्द्धं भूमेः प्राग्गतिस्वीकर्त्तृणामिलण्डीयज्योतिर्विदां मतेऽपि प्राग्गतेः शरस्य वायुनुकूलत्वादपि अधिकगतित्वं प्रत्यग्गतेस्तु प्रतिकूल वायुना प्रतिरोधात् अल्पगतित्वमपि स्रोतोऽनुकूलप्रतिकूलगतिमतोर्गतिभेदवत् स्यात्।

किञ्च आर्य्यभट्टमते भूमेः स्वकक्षायामेव भ्रमणाङ्गीरेऽपि इलण्डीयज्योतिर्भिः मत्याह भूमेरेककारं प्राग्गतावपि वर्षेण च क्रमशः सूर्य्यमण्डलभ्रमणमुररीकृतं तथाऽङ्गीकारे च भूमेः विषुवत्स्थानावधि षड्राशिषु क्रमशो वेष्टनाकारेणोर्द्ध गत्या षण्मासोत्तरं सूर्य्यस्योर्द्धं स्थितिः स्यात्। तथा च तदानीं सूर्य्यस्य भूवृत्तापेक्षया यावदुच्चतप्रदेशे स्थिति स्तावद्भिर्योजनैः सूर्य्यस्योर्द्धं भूमेः स्थितिः अयनद्वये च

तिर्यक्स्थितिः स्यात् तथा खीकारे च ध्रुवतारयोरपि विषमतो-न्नतत्वोन्नतत्वेन दृश्यत्वापत्तिः अयनयोश्च तिर्य्यक्स्थितत्वा-पत्तिश्च नच तथा दृश्यते सदा एकरूपेणैव तयोर्दर्शनात् न च तयोरतिदूरस्थत्वात् न तथा लोकनं सम्भाव्यते इति वाच्यं भचक्रस्य ध्रुवलग्नत्वेन नक्षत्रकक्षाश्लिष्टतया ध्रुवस्य स्थिततया नक्षत्रकक्षायाश्च सूर्य्यकक्षायाः षष्टिगुणान्तरितत्वात् तदानीं सूर्य्योर्द्ध्वस्थितस्य भूमण्डलस्य ततोऽल्पान्तरेण स्थितेरतिदूरस्थत्वाभावात् सूर्य्याधःस्थिति-काले च अधिकान्तरे भूमेः सत्त्वावश्यकत्वापत्तेः। तावद्भि-र्योजनैः ध्रुवसन्निकृष्टपूर्णिमतारात्मकमत्स्यस्य नतोन्नत-तया तिर्य्यक्तया च दर्शनापत्तेर्दुर्ज्ञेयत्वात्। किञ्च सूर्य्यो-र्द्ध्वस्थितिकाले सूर्य्येण सहैकराशिगतानां कुजजीवशन्या-दीनामासन्नतातारतम्येन तेषां स्थूलत्वतारतम्येन दर्शना-पत्तिः। इत्यादि बहु वक्तव्यमस्ति विस्तरभयान्निरस्यते।

सि॰शि॰ भूवृत्तादिमानमुक्तं यथा "प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्गनन्दाब्धय४९६७स्तद्व्यासः कुभुजङ्गसा-यकभुवो१५८१ऽथ प्रोच्यते योजनम्। याम्योदक्पुरयोः पलान्तरहतं भूवेष्टनं भांश३६०हृत् तद्भक्तस्य पुरान्तराध्वन इह ज्ञेयं समं योजनम्" सि॰शि॰। "भूपरिधेरुपपत्ति-र्गोले कथिता। योजनलक्षणं गणिते कथितमस्ति। तथा-प्यत्र यदुच्यते तत्रेदं कारणम्। भूरेकैव किन्तु यत्त्वार्य-भट्टादिभिराचार्य्यैः सत्यपि नियामके पलांशदर्शनेऽन्यथा-न्यथा तत्प्रमाणमभिहितं तत्र षट्सप्ताष्टयवमङ्गुलं कनिष्ठिकादिभेदेन शास्त्रे दृश्यते। तेनाभिप्राये-णाऽन्येन वा तथोक्तम्। याम्योत्तरयोः पुरयोः पलांशान् वक्ष्यमाणप्रकारैर्ज्ञात्वा तेषामन्तरेणानुपातः। यदि भांशपरिधौ दक्षिणोत्तरमण्डले एतावत् पलान्तरं तदा भूपरिधौ पुरान्तरे किमिति। यल्लब्धं तावन्तो विभागाः पुरान्तरस्य क्रियन्ते। यावानेको विभागस्ता-वद्योजनं ज्ञेयम्। तादृशैर्योजनैर्देशान्तरं कर्तव्यमित्यर्थः" प्रमि॰। इदानीं भूपरिधिस्फुटीकरणं मध्यरेखां चाह। "लम्बज्यागुणितो भवेत् कुपरिधिःस्पष्टस्त्रिभज्याहृतो यद्वा द्वादशसंगुणः स विषुवत्कर्णेन भक्तः स्फुटः। यल्लङ्कोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः" सि॰शि॰। रेखापुराण्याह श्रीपतिः "लङ्का कुमारी नगरी च काञ्ची पानाटमद्रिश्च सितः षडास्यः। श्रीवत्सगुल्मं च पुरी ततश्च माहिष्मती चोज्जयिनी प्रसिद्धा॥ स्यादा-श्रमोऽस्मान्नगरं सुरम्यं ततः पुरं पट्टशिवाभिधानम्। श्रीगर्गराटं च सरोहिताख्यं स्थानेश्वरं शीतगिरिः सुमेरुः॥ इतीव याम्योत्तरगां धराया रेखामिमां गोल-विदो वदन्ति। अन्यानि रेखास्थितिभाञ्जि लोके ज्ञेयानि तज्ज्ञैः पुटभेदनानि"॥

ग्रहाणां प्रतिदिनं खकक्षायोजनगतिमानं सि॰शि॰ उक्तम् "कल्पोद्भवैः क्षितिदिनैर्गगनस्य कक्षा भक्ता भवेद्दिन-गतिर्गगनेचरस्य। पादोनगोऽश्वधृतिभूमितयोजनानि ११८५८।४५ खेटा व्रजन्त्यनुदिनं निजवर्त्मनीमे" सि॰शि॰ अत्रोपपत्तिः। यदि कल्पदिनैः खकक्षामितयोजनानि गच्छति तदैकेन किमिति। फलं दिनगतियोजनानि। तानि च स्थूलत्वेन तावत् पादोनगोऽश्वधृतिभूमितानि स्युः" ग्रहाणां दिनभुक्तिमाह प्रमि॰। "मद्दीमितादहर्गणात् फलानि यानि तत्कलाः। भवन्ति मध्यमाः क्रमा-न्नभःसदां द्युभुक्तयः। समा गतिस्तु योजनैर्नभः-सदां सदा भवेत्। कलादिकल्पनावशान्मृदुद्रुता चला स्मृता" सि॰शि॰। "अत्रोपपत्तिस्त्रैराशिकेन। पूर्वं गति-र्योजनात्मिका ग्रहाणां तुल्यैवोक्ता। इदानीमतुल्या या कलादिकल्पनावशात्। इदानीमतुल्यत्वे कारणमाह प्रमि॰ "कक्षाः सर्वा अपि दिविषदां चक्रलिप्ताङ्किताःस्यु-र्वृत्ते लघ्व्यो लघुनि महति स्युर्महत्यश्च लिप्ताः। तस्मा-देते शशिजभृगुजादित्यभौमेज्यमन्दा मन्दाक्रान्ता इव शशधराद्यान्ति यान्तः क्रमेण" सि॰शि॰। "यतः सर्वा अपि कक्षाश्चक्रलिप्ताभिरेवाङ्किताः। अतो महति वृत्ते महत्यो लिप्ताः स्युः। लघुनि लघ्व्यः। तद्यथा चन्द्र-कक्षा सर्वाधःस्था लघुः। तस्यामेका कला पञ्चदशभि-र्योजनैर्भवति। शनेः कक्षा सर्वोपरिस्था सा महती तस्यामेका कला योजनानां षड्भिः सहस्रैरेकसप्त-त्यैनै-५९२९ र्भवति। योजनं चतुःक्रोशमेव। अत-श्चन्द्रात् सकाशादूर्द्ध्वस्था बुधशुक्रादयः क्रमेण मन्दा-क्रान्ता मन्दगतय इव भान्ति" प्रमि॰।

ग्रहाणां तुङ्गादिपरिधिभेदकारणम् सि॰शि॰ उक्तं यथा "उच्चस्थितो व्योमचरः सुदूरे नीचस्थितः स्यान्नि-कटे धरित्र्याः। अतोऽणुबिम्बः पृथुलश्च भाति भानो-स्तथासन्नसुदूरवर्त्ती" सि॰शि॰। इदानीमन्यदप्युक्तं प्रका-रान्तरमाह" प्रमि॰। "उक्ता मयैषा प्रतिवृत्तभङ्ग्या युक्तिः पृथक् श्रोतुरसंभ्रमार्थम्। स्पष्टीकृतेस्तां पुनरन्य-याहं नीचोच्चवृत्तस्य च वच्मि भङ्ग्या" सि॰शि॰।

"इह किल स्फुटीकरणयुक्तिः प्रतिवृत्तभङ्ग्या मयोक्ता। अथ तामेव नीचोच्चवृत्तभङ्ग्या वच्मि। इदानीं तां भङ्गिमाह" प्रमि०। "कक्षास्यमध्यग्रहचिह्नतोऽथ वृत्तं लिखेदन्त्यफलज्यया तत्। नीचोच्चसंज्ञं रचयेच्च रेखां कुमध्यतो मध्यखगोपरिस्थाम्। कुमध्यतो दूरतरे प्रदेशे रेखायुते तुङ्गमिह प्रकल्प्यम्। नीचं तथासन्नतरेऽथ तिर्यङ्नीचोच्चमध्ये रचयेच्च रेखाम्। नीचोच्चवृत्ते भगणाङ्कितेऽस्मिन् मान्द्ये विलोमं निजकेन्द्रगत्या। शैघ्र्येऽनुलोमं भ्रमति स्वतुङ्गादारभ्य मध्यद्युचरो हि यस्मात्। अतो यथोक्तं मृदुशीघ्रकेन्द्रं देयं निजोच्चाद्द्युचरस्तदग्रे। दोर्ज्योच्चरेखावधिखेटतः स्यात् तिर्यक्स्थरेखावधि कोटिजीवा" सि०शि०। "प्राग्वत् कक्षावृत्तं चक्रांशाङ्कितं कृत्वा तत्र मध्यग्रहं च दत्त्वा ग्रहचिह्नेऽन्त्यफलज्याप्रमाणेनान्यवृत्तं लिखेत्। तन्नीचोच्चसंज्ञवृत्तम्। अथ भूमध्याद्ग्रहोपरिगता रेखा किञ्चिद्दीर्घा कार्या। सा नीचोच्चरेखा। नीचोच्चवृत्ते भूमेर्दूरतरे प्रदेशे रेखायुते उच्चं प्रकल्प्यम्। आसन्ने रेखायुते नीचम्। नीचोच्चचिह्नाभ्यां मत्स्यमुत्पाद्य तिर्यग्रेखा मध्ये कार्या। तस्मिन् वृत्ते केन्द्रगत्योच्चस्थानादारभ्य मध्यग्रहो भ्रमति। मान्द्ये विलोमं, शैघ्र्येऽनुलोमम्। अतः कारणान्मन्दकेन्द्रमुच्चाद्विलोमं देयम्। शीघ्रकेन्द्रमनुलोमम्। तदग्रे ग्रहः" प्रमि०।

ग्रहाणामस्तकालांशाश्च सि०शि० उक्ताः

तच्च वाक्यं १९९१पृ० कालशब्दे उक्तम्। ग्रहबिम्बानां गोलाकारत्वेऽपि सूर्याभिमुखानामेव द्युतिलाभः यथाहार्य्यभट्टः। "भूग्रहभानां गोलार्द्धानि यथा विवस्वानि। अर्द्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते"। सि०शि० रविचन्द्रराहुबिम्बमानमुक्तं यथा "बिम्बं रवेर्द्विद्विशरर्तु ६५२२ संख्यानीन्दोः खनागाम्बुधि४८० योजनानि। भूव्यासहीनं१५८१ रविबिम्बमिन्दुःकर्णाहतं भास्करकर्णभक्तम्। भूविस्तृतिर्लब्धफलेन हीना भवेत् कुभाविस्तृतिरिन्दुमार्गे" सि०शि०। "सूर्यस्य बिम्बं मध्यमं द्वियमबाणषट्कतुल्यानि ६५२२ योजनानि। इन्दोस्तु शून्यवसुवेद ४८० मितानि। राहोरुच्यते। रविबिम्बं ६५२२भूव्यासेन १५८१ हीनं कृत्वेन्दुकर्णेन स्फुटेन योजनात्मकेन संगुण्य रविकर्णेन स्फुटेन भजेत् फलेन भूव्यासो वर्जितश्चन्द्रकक्षायां भूभाव्यासो भवति। एतानि योजनबिम्बानि। अत्रोपपत्तिः। यस्मिन् दिनेऽर्कस्य मध्यतुल्यैव स्फुटा गतिः स्यात्। तस्मिन् दिने उदयकाले चक्रकलाव्यासार्धमितेन यष्टिद्वितयेन मूलमिलितेन तत्रस्थदृष्ट्या तद्यष्ट्यग्रे बिम्बप्रान्तौ विध्येत्। या यष्ट्यग्रयोरन्तरकलास्ता रविबिम्बकला मध्यमाः भवन्ति ताश्च द्वात्रिंशत् किञ्चिदधिकैकत्रिंशद्विकलाधिकाः ३२।३१ ३१। एवं विधोरपि पौर्णमास्यां यदा मध्यैव गतिः स्पष्टा सिध्येत् तस्यैवं किञ्चिदधिकाः द्वात्रिंशत् कलाः ३२।०।९ उत्पद्यन्ते बिम्बकलानां योजनीकरणायानुपातः। यदि त्रिज्याव्यासार्धे एतावत्प्रमाणं बिम्बं तदा पठितश्रुतियोजनैः किमित्येवमुत्पद्यन्ते द्विद्विशरर्तु ६५२२ संख्यानि योजनानि। विधोस्तु खनागाम्बुधिः ४८० मितानीति" "अत्र श्रीपतिः व्यासा रवीन्दुक्षितिगोलकानां क्रमेण तेजोजलमृण्मयानाम्। स्युर्योजनैराकनिशाणषड्भिः ६५२२ व्योमाष्टवेदैः ४८० कुगजेषुचन्द्रैः १५८५"। अन्येषां गुरुगुरुतरकक्षास्थितानां ग्रहाणां गुरुगुरुतरत्वादिकं बोध्यं न तु विशेष संख्या सौरागमेयूक्ता विष्णुपुराणादौ उक्ताऽपि उपपत्तिहीनत्वादत्र न प्रदर्शिता।

भास्कराचार्य्येण स्वल्पान्तरेणाङ्गीकृतानि मेषादिराशिस्थितेऽर्के सावनदिनानि।

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कु	मी
२०	३१	३१	३१	३१	३०	२९	२९	२९	२९	२९	३०
५५	२४	३७	२८	२	२९	५७	२७	१५	२४	४९	२२
२२	५६	२२	३५	५२	४	२	३९	३	०	४३	३१

एतन्निबन्धनश्लोकाश्च। "त्रिंशत् पञ्चशरा देवा मेषेऽर्के दिवसादिकम्। वृषे धराग्नयः सिद्धाः षट्शरा मिथुने क्रमात्॥ धराग्नयः सप्तरामा रदः कर्के धराग्नयः। गजाश्विनोऽक्षरामाश्च, सिंहे भूवक्रयो द्वयम्॥ द्विशराश्च, स्त्रियां त्रिंशद्नोऽश्विनः स्तनय, स्तुले। गोऽश्विनोऽद्रिशराः पक्षौ, गोऽश्विनो भानि गोऽग्नयः॥ कौर्प्ये, धनुषि गोदस्रास्तिथयो वह्नयो, मृगे। गोऽश्विनोऽब्धियमाः, कुम्भे गोदस्रा गोऽब्धयस्तथा॥ रामाब्धयो, झषे त्रिंशद्रामदस्रा धराग्नयः"।

सर्वेषां राशीनां त्रिंशद्भागात्मकत्वेऽपि कालभेदेनैव तेषामुदयो देशभेदात् भिन्नएव तेन देशभेदेन दिनरात्रिमानभेदश्च तत्र कारणं च सि०शि०निरूपितं यथा

"यो हि प्रदेशोऽपममण्डलस्य तिर्यक्स्थितोऽत्युदयं

तथास्तम् । सोऽल्पेन कालेन य ऊर्ध्वसंस्थोऽनल्पेन सोऽस्मादुदया न तुल्याः । य उत्क्रमे याम्यनतास्तुलाद्याः खस्वापमेनापि निरक्षदेशे । याम्याक्षतस्तेऽतिनतत्वमाप्ता उद्यान्ति कालेन ततोऽल्पकेन । कर्क्यादय· सौम्यनता हि येऽत्र ते यान्ति याम्याक्षवशादृजुत्वम् । कालेन तस्माद्बहुनोदयं ते तदन्तरे स्वच्चरखण्डमेव" सि°शि° । "विषुवदहोरात्रवृत्तानि लङ्कायां समपश्चिमगानि राशिषट्कं तु मकरादौ परमक्रान्त्या २४ विषुवन्मण्डलाद्दक्षिणतो मिथुनान्त उत्तरतो वग्नमतस्तिरश्चीनं तत्रापि मेषः स्वक्रान्त्या महत्त्वा तिरश्चीन उदेति अतोऽल्पकालोदय· वृषभस्तदल्पयातस्तस्मात्किञ्चिदधिककालः मिथुनस्तदल्पयातस्तदधिककालः एवं निरक्षेऽपि न समा उदयाः । अथ ये मकरादयो याम्ये नतास्ते याम्याक्षवशात् अतिनता उद्गच्छन्ति स्वदेशेऽतोऽल्पकालोदयाः. ये तु कर्क्यादयः स्वक्रान्त्या सौम्ये नतास्ते याम्याक्षवशादृजुत्वं गता उद्यन्ति अतश्चिरकालोदयाः लङ्कास्वदेशोदययोरन्तराले स्वच्चरखण्डमेव भवति यतस्तत्क्षितिजयोरन्तराले चरम् । अथ चरखण्डैरूनाधिकत्वं गोलभ्रमणोपरि यथा प्रतीयते तथाह" प्रमि° । "भचक्रपादास्त्रिशिनाडिकाभिः पृथक् समुद्यान्ति निरक्षदेशे । चक्रार्धमाद्यं च तथा द्वितीयं सर्वत्र पूर्णाग्निमिताभिरेव । मेषादेर्मिथुनान्तो नाडीभिस्त्रिंशिमिताभिरुद्भ्रूत । लगति कुजे तदधःस्थे प्रथनं ताभिश्चरोनाभिः । कन्यान्ताडनुषोऽन्तस्त्रिंशिमितनाडीभिरुद्गलये, लगति कुजे चोर्ध्वस्थे पश्चात्ताभिश्चराढ्याभिः । तद्रहितत्रिंशद्भिः कन्यान्तो वा झषान्तो या । चरखण्डैरूनाढ्यास्तेन निरक्षोदयाः स्वदेशे स्युः । क्षितिजेऽजादिं कृत्वा गोलं भ्रमयन् प्रदर्शयेत्सर्वम् । उक्तमनुक्तं चान्यत् शिष्याणां बोधजननार्थम्"। सि° शि° । चरखण्डकालमाह सि°शि°"उन्मण्डलक्ष्मावलयान्तराले द्युरात्रवृत्ते चरखण्डकालः। तज्ज्यात्र कुज्या चरशिञ्जिनी स्याद्व्यासार्धवृत्ते परिणामिता सा" सि°शि° । "क्षितिजोन्मण्डलयोर्मध्येऽहोरात्रवृत्ते यावान् कालः स चरखण्डकालः तत्रोन्मण्डलादुभयतश्चरतुल्येऽन्तरे चिह्नं कृत्वा तयोर्निबद्धसूत्रस्यार्द्धं कुज्या सैव त्रिज्यावृत्तपरिणता सती चरज्या स्यादित्यादि त्रिप्रश्ने व्याख्यातम्" प्रमि° ।

इदानीं लङ्कास्वदेशार्कोदययोरन्तरं चरकालमाह । "निरक्षदेशे क्षितिजाख्यवृत्तमुन्मण्डलं तज्जगुरन्यदेशे । स्वं स्वं कुजोऽर्कस्य समुद्गमोऽस्माच्चराद्र्धमर्कोदययोस्तु मध्ये" सि° शि° । चरफलस्य धनर्णवासनामाह । "आदौ स्वदेशेऽथ निरक्षदेशे सूर्योदयोऽस्माद्यमयोऽन्यथातः। ऋणं गृहेऽस्मादुदये स्वमस्ते फलं चरोत्थं रविसौम्यगोले । याम्ये विलोमं खलु तत्र यस्मादुन्मण्डलं स्वक्षितिजादधस्तात् । नाड्यास्त्रयादुत्तरयाम्यभागौ गोलस्य तावुत्तरयाम्यगोलौ" सि° शि° ।

चरस्थानञ्च सि°शि° दर्शित यथा

"यल्लङ्कोज्जयिनीपुरोपरि कुरुक्षेत्रादिदेशान् स्पृशत् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः । आदौ प्रागुदयोऽपरत्र विषये पश्चाद्धि रेखोदयात् स्यात् तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलम्" सि°शि° । "लङ्कायां मेरुपर्यन्तं नीयमाना रेखोज्जयिनीं कुरुक्षेत्रादिदेशान् स्पृशन्ती या याति सा मध्यरेखेत्युच्यते । रेखायां यदार्कोदयस्तत्कालात् पूर्वमेव पूर्वदेशे भवति । रेखोदयकालादनन्तरं पश्चिमदेशेऽर्कोदयः । तदन्तराल स्तदन्तरयोजनैः स्पष्टभूवेष्टनादनुपातेन ज्ञायते । यदि स्फुटपरिधियोजनैः षष्टि ६० घटिका लभ्यन्ते तदा रेखास्वपुरयोरन्तरयोजनैः किमितीति त्रैराशिकेन देशान्तरघटिका लभ्यन्ते । स्पष्टगत्या च या आनीता नाडीस्ताभिरनुपातः। यदि घटीषष्ट्या ग्रहस्य गतिकला लभ्यन्ते तदा देशान्तरघटीभिः किमिति । अथ योजनैरेवानुपातः । यदि स्फुटपरिधियोजनैर्गतिः प्राप्यते तदा देशान्तरयोजनैः किमिति । फलं कलाः प्राग्दृशं यतस्तत्रादावुदयः । पश्चाद्धनम् । यतस्तत्र रेखोदयादनन्तरमर्कोदय इत्युपपन्नम्" प्रमि° ।

चरखण्डानयनञ्च सि°शि° "एकस्य राशेर्बृहती ज्यका या द्वयोस्त्रिभस्यापि तुलीकृतानाम् । स्वस्वापमज्यासहितवर्जितानां मूलानि तासां त्रिगुणा २४२८ हतानि । स्वस्वद्युमौर्व्या विभजेत् फलानां चापान्यधोऽधः परिशोधितानि । क्रमोत्क्रमस्थानि निरक्षदेशे मेषादिकानामुदयासवः स्युः" सि°शि°। "एकस्य राशेर्बृहती ज्येत्यष्टमी १७१९ ज्या । द्वयोरिति षोडशी २९७७ ज्या । त्रिभस्येति ३४३८ त्रिज्या । आसां वर्गितानां स्वकीयस्वकीयक्रान्तिज्यावर्गैर्वर्जितानां मूलानि त्रिज्यागुणितानि स्वस्वद्युज्यया विभजेत् । फलानां चापान्यधोऽधः परिशोधितानीति तृतीयात् द्वितीयं द्वितीयात् प्रथमं शोध्यम् । प्रथमं तथाविधमेव । एवं लङ्कोदयासवः स्युः । अत्रोपपत्तिः अत्रोन्नत कान्तिवृत्तस्य तिर्यक्स्थितत्वात् तत्र-

ण्याणि चेत्राण्युत्पद्यन्ते। तद्यथा मेषान्तस्य ज्या क्रान्तिवृत्ते कर्णः, तत्क्रान्तिज्या बद्धाक्षितिजे भुजः। तद्वर्गान्तरपदं मेषान्तेऽहोरात्रवृत्ते कोटिः। एवं राशिद्वयस्य ज्या कर्णः, तत्क्रान्तिज्या भुजः, तद्वर्गान्तरपदं वृषभान्तेऽहोरात्रवृत्ते कोटिः। एवं त्रिराशिज्या कर्णः, परमा क्रान्तिज्या भुजः, परमाल्पद्युज्या कोटिः। एताः कोटयश्चापकरणार्थं त्रिज्यावृत्ते परिणामिताः। त्रिज्यागुणाः स्वस्वद्युज्यया भक्तास्तासां चापानि। प्रथमं मेषोदयस्य कालः। द्वितीयं राशिद्वयस्य। तृतीयं राशित्रयस्य। अतो विश्लेषितानीत्युपपन्नम्" प्रमि०। "इदानीं प्रकारान्तरेणाह। 'कीटादिराश्यन्तजकोटिजीवास्त्रिज्या ३४३८ गुणाः स्वस्वदिनज्ययाप्ताः। चापीकृताः प्राग्वदधो विशुद्धाः कीटादिकानामुदयासवो वा" सि०शि०। 'कीटादिराश्यन्तजकोटिजीवास्ता एकद्वित्रिराशिज्या भवन्ति १७१९।२९७७।३४३८ एतास्त्रिज्यया ३४३८ गुण्याः स्वस्वदिनज्ययाः भक्ता इति यैव वृषभान्ते द्युज्या सैव कीटान्तेऽपि ३२१८। यैव मेषान्ते द्युज्या सैव सिंहान्तेऽपि ३३६६। कन्यान्ते द्युज्या त्रिज्यैव ३४३८। क्रमिका भाज्याः। फलानां चापान्यधोऽधः शुद्धानि कीटादीनामुदयासवः स्युर्निरक्षे वा। त एव मिथुनवृषभमेषाणामित्यर्थः। अत्रोपपत्तिः। क्रान्तिवृत्ते वृषभान्ते सूत्रस्यैकमग्रं बद्धा द्वितीयमग्रं कीटान्ते निबध्यते तस्य सूत्रस्यार्धमेकराशेर्ज्या भवति। एवं सूत्रस्यैकमग्रं मेषान्ते बद्धा द्वितीयं सिंहान्ते तस्य सूत्रस्यार्द्धं राशिद्वयस्य ज्या भवति। एवं मेषतुलादौ बद्धसूत्रस्यार्द्धं त्रिज्या। एता एव वृषभान्तमेषान्तमानान्ताऽहोरात्रवृत्तानां ज्या भवन्ति। यतस्तत्सम्पातेषु क्रान्तिवृत्ते सूत्राणि बद्धानि। अतस्तासां त्रिज्यावृत्तपरिणतानां चापान्तराणि कीटादिकानामुदया भवन्तीति गोले प्रदर्शयेत्"। इदानीं पुनः प्रकारान्तरेणाह प्रमि०। "मेषादिजीवास्त्रिगृहद्युमौर्व्या ३१४१ गुणा हृताः स्वस्वदिनज्यया वा। चापीकृताः प्राग्वदधो विशुद्धा मेषादिकानामुदयासवो वा" सि०शि०। अस्योपपत्तिर्गोले कथितैव सुगमा च। अथ निष्पन्नांस्तानसूनाह। "तेऽभ्राद्रिभूपा १६७० गुणगोऽद्रिचन्द्राः १७९३ सप्ताग्निनन्देन्दुमिता १९३७ अथैते। क्रमोत्क्रमस्थाश्चरखण्डकैः स्वैः क्रमोत्क्रमस्थैश्च विहीनयुक्ताः। मेषादिषण्णामुदयाः स्वदेशे तुलादितोऽमी च विलोमसंस्थाः। उदेति राशिः समयेन येन तत्सप्तमोऽस्तं सहपैति तेन" सि०शि०। अत्र प्रथमप्रकारेण प्रथम उदयो गृह्यते। द्वितीयप्रकारेण द्वितीयतृतीयौ। "अत्रोपपत्तिः। निरक्षस्वदेशार्कोदययोरन्तरं चरम्। निरक्षे स्वदेशे च मेषादिः सममुदेति मेषान्त आदौ स्वक्षितिजे तत उन्मण्डले लगति। अतश्चरखण्डोनो मेषोदयः स्वदेशोदयो भवति। एवं वृषमिथुनयोरपि। कर्कादौ तु चरखण्डानामपचीयमानत्वादृणं तानि परिणमन्ति। तुलादौ तून्मण्डलस्याधःस्थितत्वाच्चरखण्डानि धनं भवन्ति। मकरादौ तु चरखण्डानामपचीयमानत्वादृणं परिणमन्ति। इत्यादि गोले सम्यगवलोक्यम्" प्रमि०।

दिननिशोर्लघुत्वमहत्त्वे हेतुमाह "अतश्च सौम्ये दिवसो महान् स्याद्रात्रिर्लघुर्व्यस्तमतश्च याम्ये। द्युरात्रवृत्ते क्षितिजादधस्थे रात्रिर्यतः स्याद्दिनमानमूर्द्धे। सदा समत्वं द्युनिशोर्निरक्षे नोन्मण्डलं तत्र कुजाद्यतोऽन्यत्" सि० शि०। "क्षितिजादुपरिस्थेऽहोरात्रवृत्तखण्डे यावान् कालस्तावान् दिवसः यावांस्तदधस्थे तावती रात्रिरिति" प्रमि०। इदानीं विशेषमाह "षट्षष्टिभागाभ्यधिकाः पलांशा यत्राथ तत्रास्त्यपरो विशेषः। लम्बाधिका क्रान्तिरुदक् च यावत्तावद्दिनं सन्ततमेव तत्र। यावच्च याम्ये सततं तमिस्रा ततश्च मेरौ सततं समार्द्धम्" सि०शि०। "यत्र देशे षट्षष्टे (६६) रधिकाः पलांशास्तत्रायं विशेषः अर्कस्योत्तरा क्रान्तिः (२४)र्यावत्कालं लम्बाधिका भवति तावत्कालं सततं दिनमेव याम्या क्रान्ति (२४)र्यावत् तावत्सततं रात्रिरेव तद्यथा यत्र किल सप्ततिः (७०)पलांशास्तत्र लम्बो विंशतिः(२०)तत्र देशे विषुवद्वृत्तं दक्षिणक्षितिजादुपरिभागविंशत्योत्तरक्षितिजादधश्च तावत यदा रवेरुत्तरा क्रान्तिभागविंशतिर्भवति तदोत्तरक्षितिजे रविविम्बमर्धोदितं भूत्वा मध्याह्ने दक्षिणक्षितिजादुपरि याम्योत्तरमण्डले भागचत्वारिंशतोन्नतं भवति तदा त्रिंशत्घटिका दिनदलम् अतोदिनं षष्टिः रात्रिः शून्यं ततो द्वितीयदिने उत्तरक्रान्तेरधिकत्वाद्रविरुत्तरक्षितिजं न स्पृशति एवं प्रतिपर्ययं परमक्रान्ति(२४)र्यावदुपर्युपरि परिभ्रमति एवं मिथुनान्ते उत्तरक्षितिजादुपरिभागचतुष्टयं याति पुनस्तेनैव क्रमेणावरोहति विंशतिभागाधिका क्रान्ति र्यावत्तावत्कालं रविः सततं दृश्यः तावद्दिनमेव अनयैव युक्त्या दक्षिणगोले क्षितिजादधस्थेऽर्के सततं रात्रिरिति अतएव मेरौ षण्मासं दिनम्" प्रमि०।

तेनात्र देशे सौम्ययाम्ययोर्दिनरात्रिमानं वर्षः।
"विषुवद्वृत्तं द्युसदां क्षितिजत्वमितं तथा च दैत्यानाम्। उत्तरयाम्यौ क्रमशो मूर्ध्वोर्द्ध्वगतौ ध्रुवौ यतस्तेषाम्। उत्तरगोले क्षितिजादूर्द्ध्वं परितो भ्रमन्तमादित्यम्। सव्यं त्रिदशाः सततं पश्यन्त्यसुरा अपसव्यगं याम्ये" सि॰शि॰। अयनकालभेदे संहितोक्तेरन्यार्थपरत्वमाह।
"दिनं सुराणामयनं यदुत्तरं निशेतरत्सांहितिकैः प्रकीर्त्तितम्। दिनोन्मुखेऽर्के दिनमेव तन्मतं निशा तथा तत्फलकीर्त्तनाय तत्। इन्द्वान्तमारोहति यैः क्रमेण तैरेव हस्तैरवरोहतीनः। यत्रैव दृष्टः प्रथमं स देवैस्तत्रैव तिष्ठन् विलोक्यते किम्?" सि॰शि॰। "सांहितिकानां न चेदयमभिप्रायस्तर्हि मेषादेरूर्ध्वं मिथुनान्तं यावत् यैर्हस्तै रेवारोहणं कुर्वन्नपि देवैर्दृष्टः तैरेव पुनरवरोहणं कुर्वन् किं न दृश्यत इति" प्रमि॰। तत्फलं दर्शितं श्रीपतिना "मृगादिराशिद्वयभानुभोगात् षट्चर्त्तवः स्युः शिशिरो वसन्तः। ग्रीष्मश्च वर्षा च शरच्च तद्वद्धेमन्तनामा कथितोऽत्र षष्ठः। शिशिरपूर्वमृतुत्रयमुत्तरं ह्ययनमाहुरहश्च तदामरम्। भवति दक्षिणमन्यदृतुत्रयं निगदिता रजनी मरुतां च सा। गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबन्धपूर्वम्। सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत् खलु दक्षिणे च"। इदानीं दिनरात्रिस्वरूपे पितृदिनञ्चाह "दिनं दिनेशस्य यतोऽत्र दर्शने तमी तमोहन्तुरदर्शने सति। कुपृष्ठगानां द्युनिशं यथा नृणां तथा पितॄणां शशिपृष्ठवासिनाम्" सि॰शि॰। पितृदिनस्योदयास्तकालानाह। "विधूर्ध्वभागे पितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति। पश्यन्ति तेऽर्कं निजमस्तकोर्ध्वे दर्शे यतोऽस्मात् द्युदलं तदेषाम्। भार्द्धान्तरत्वान्न विधोरधःस्थं तस्मान्निशीथः खलु पौर्णमास्याम्। कृष्णे रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम्" सि॰शि॰।
इदानीं देशविशेषेण राशिभेदान् सदोदितानुदितांश्चाह। "त्र्यंशयुङ्नवरसाः (६९।१/२०) पलांशका यत्र तत्र विषये कदाचन। दृश्यते न मकरो न कार्मुकं किन्तु कर्कमिथुनौ सदोदितौ। यत्र साङ्घ्रिगजवाजिसंमिता (७८।१/४) स्तत्र वृश्चिकचतुष्टयं न च। दृश्यतेऽथ वृषभाच्चतुष्टयं सर्वदा समुदितं च लक्ष्यते। यत्र तेऽथ नवतिः (९०) पलांशकास्तत्र काञ्चनगिरौ कदाचन। दृश्यते न भदलं तुलादिकं सर्वदा समुदितं क्रियादिकम्" सि॰ शि॰। "अयमर्थस्त्रिप्रश्ने "लम्बाधिका क्रान्तिरुदक् च याषात्तावद्दिनं सन्ततमेव तत्र" इत्यादिना सम्यक् कथित एव। यत्र वृश्चिकान्तक्रान्तितुल्यो लम्बस्तत्र ते पलांशाः" (६९।१/२०। तत्र धनुर्मकरौ क्षितिजादधस्थितावेव भ्रमतः" कर्कमिथुनौ तूपर्येव। (तेन देवभागे धनुर्मकरस्थसूर्यकौ द्वौ मासौ रात्रिः शिष्टा दश मासा दिनम्)। एवमसुरभागे तथा पलांशके कर्कादिस्थरविकौ द्वौ मासौ रात्रिः शिष्टा दशमासा दिनम्। यत्र तुलान्तक्रान्तितुल्यो लम्बस्तत्राष्टसप्ततिः पञ्चदशकलाधिकाः। ७८।१५। पलांशास्तत्र वृश्चिकादिचतुष्टयं क्षितिजादधो वृषभादिकमुपरि। "तेन देवभागे वृश्चिकादिस्थरविकाश्चत्वारो मासा रात्रिः शिष्टा अष्टौ मासा दिनम्। दैत्यभागे तु विपर्य्ययेण तथा दिनरात्री। एवं मेरौ नवतिः ९० पलांशास्तत्र तुलादिषट्कमधो मेषादिकमुपरीति (तेन मेषादिषड्राशिस्थरविकाः षण्मासा देवानां दिनं शिष्टा रात्रिः। एवं तुलादिषड्राशिस्थरविकाः षण्मासा दैत्यानां दिनं शिष्टा रात्रिः) सव्यं भगोले भ्रमिते सति दृश्यते" प्रमि॰। "इन्त्ववेधविधिना ध्रुवोन्नतिर्या नतिश्च भवतोऽक्षलम्बकौ। तौ क्रमाद्विषुवदङ्ग्रहृद्दले येऽथवा नतसमुन्नतालवाः" सि॰शि॰। "चक्रयन्त्रेण यष्टिवेधवत् ध्रुवं विध्येत् तत्र नेम्यां ये उन्नतांशास्तेऽक्षांशाः ये नतास्ते लम्बांशाः। अथ वा विषुवद्दिनार्धे येऽर्कस्य नतोन्नतांशास्तेऽक्षलम्बांशा इति युक्तियुक्तम्" प्रमि॰। सममराश्युदयास्तकालताहेतुमाह तत्रैव "योऽभ्युदेति समयेन येन तत् सप्तमोऽस्तमुपयाति तेन च। राशिरूर्ध्वमपमण्डलं कुजादर्धमेव सततं यतः स्थितम्" मू॰। "यो राशिर्येन कालेन उदेति तेन तत्सप्तमोऽस्तं याति ये मेषादीनामुदयास्ते तुलादीनामस्तमयाः ये तुलादीनामुदयास्ते मेषादीनामस्तमया इत्यर्थः। यतः अपमवृत्त क्षितिजादुपरि अर्धमेव भवति अर्धमधश्च अतो राश्योरुदयमस्तमयञ्च गच्छतोस्तुल्यकालता उपपद्यते इदानीं विशेषमाह" प्रमि॰। "यत्र लम्बजलवा जिना २४ नकास्तत्र नोदयचराद्यमुक्तवत्। नान्यसंस्थिततयान्यथोदितं येन नैष विषयो न्टगोचरः"। यस्मिन्देशे षट्षष्टिभागाधिकः पलस्तत्र केचन राशयः सदोदयाः केचन सदा अस्तमिताः केचन प्रान्तादुत्क्रान्ताः अतस्तत्र यथा कथितास्तथा उदया न भवन्ति यावत्सदोदितो रवि स्तावदहोरात्रवृत्तं क्षितिजं न स्पृशति अहोरात्रवृत्ते क्षितिजोन्मण्डलयोरन्तरं हि चरम् अतस्तत्र कुज्याचरज्यादिकमसत् शेषं स्पष्टम्" प्रमि॰।

कालविभागाः सि॰शि॰ दर्शिता यथा । "गुर्वक्षरैः खेन्दुमितै १० रसुः स्यात् षड्भिः पलं तैर्घटिका खषड्भिः। स्याद्वा घटीषष्टिरहः खरामैर्मासो दिनैस्तैर्द्विकुभिश्च वर्षम्""एकमात्रो लघुः । द्विमात्रो गुरुः ; तथाच "सानुस्वारोविसर्गान्तोदीर्घोयुक्तपरस्तु यः" इति छन्दोलक्षणप्रतिपादितम् यदक्षरं सानुस्वारं विसर्गान्तं दीर्घं यस्याक्षरस्य परतः संयोगस्तल्लघ्वपि गुरुसंज्ञं ज्ञेयम्। गुर्वक्षरस्योच्चार्य्यमाणस्य यावान् कालस्तद्दशकेनैकोऽसुः प्राणः प्रशस्तेन्द्रियपुरुषस्य श्वासोच्छ्वासान्तर्वर्त्ती काल इत्यर्थः । षड्भिः प्राणैरेकं पानीयपलम् पलानां षष्ट्या घटी । घटीनां षष्ट्या दिनम् । त्रिंशद्दिनैरेकोमासः मासैर्द्वादशभिर्वर्षमिति कालस्य विभागो दर्शितः" प्रमि॰ । भचक्रविभागस्तत्रैव विकलानां कला षष्ट्या तत्षष्ट्या भाग उच्यते । तत्त्रिंशता भवेद्राशिर्भगणो द्वादशैव ते" ।

ब्राह्मादि दिनभेदाः सू॰सि॰ उक्ता यथा

"ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा । सौरं च सावनं चान्द्रमार्क्षं मानानि वै नव । चतुर्भिर्व्यवहारोऽत्र सौरचान्द्रर्क्षसावनैः । बार्हस्पत्येन षष्ट्यब्दं ज्ञेयं नान्यैस्तु नित्यशः" सू॰सि॰ । "अत्र मनुष्यलोके सौरचान्द्रनाक्षत्रसावनैश्चतुर्भिर्मानैर्व्यवहारः कर्मघटना । षष्ट्यब्दं प्रभवादिषष्टिवर्षं जात्यभिप्रायेणैकवचनम् । बार्हस्पत्येन बृहस्पतिमानेन बृहस्पतिमध्यमराशिभोगात्मककालेन प्रत्येकं ज्ञेयम् । अन्यैरवशिष्टैर्ब्राह्मदिव्यपित्र्यप्राजापत्यैः । नित्यशः सदेत्यर्थः । व्यवहारो नास्ति । तुकारात् कादाचित्कत्वेन तैर्व्यवहारः" र॰ना । अथ सौरेण व्यवहारं प्रदर्शयति "सौरेण द्युनिशोर्मानं षडशीतिमुखानि च । अयनं विषुवच्चैव संक्रान्तेः पुण्यकालता" सू॰सि॰ । "अहोरात्रयोर्मानं सौरेण ज्ञेयम् । प्रात्यहिकसूर्य्यगतिभोगादहोरात्रं भवतीत्यर्थः । षडशीतिमुखानि वक्ष्यमाणानि । चः समुच्चये । तेन सौरमानेन ज्ञेयानि अयनं विषुवत् । चः समुच्चये । संक्रान्तेः पुण्यकालता सूर्य्यबिम्बकलासम्बद्धा सौरमानेन" र॰ना॰ । अथ षडशीतिमुखमाह "तुलादिषडशीत्याङ्गां षडशीतिमुखं क्रमात् । तच्चतुष्टयमेव स्याद्द्विस्वभावेषु राशिषु" सू॰सि॰। "तुलारम्भात् षडशीतिदिवसानां सौराणां षडशीतिमुखं भवति । तच्चतुष्टयं षडशीतिमुखस्य चतुःसङ्ख्या द्विस्वभावेषु राशिषु चतुर्षु क्रमादेवं वक्ष्यमाणा भवति" र॰ना॰ । "षड्विंशे धनुषो भागे द्वाविंशेऽनिमिषस्य च । मिथुनाष्टादशे भागे कन्यायास्तु चतुर्दशे" सू॰सि॰ । "धनुराशेः षड्विंशतितमेऽंशे षडशीतिमुखं, मीनराशेर्द्वाविंशतितमेऽंशे षडशीतिमुखम् । चकारः समुच्चयार्थकः प्रत्येकमन्वेति । मिथुनराशेरष्टादशेऽंशे षडशीतिमुखं, कन्यायाश्चतुर्दशे भागे षडशीतिमुखम् । अत एव तुलादितः षडशीत्यंशो गणनया येषु राशिषु भवति ते राशयो द्विस्वभावाः षडशीतिमुखसञ्ज्ञा संक्रान्तिप्रकरणे संहितिकैरुक्ताः" र॰ना॰ । अथ षडशीत्यंशगणनया चत्वारि षडशीतिमुखान्युक्त्वा भगणांशपूर्त्त्यर्थमवशिष्टांशाः षोडशातिपुण्या इत्याह "ततः शेषाणि कन्याया यान्यहानि तु षोडश । क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयम्" सू॰सि॰ । "ततः कन्यादिचतुर्दशभागानन्तरं शेषाणि भगणभागेऽवशिष्टानि कन्याया यान्यहानि सौरभागसमानि तानि षोडश । तुकारात् पूर्वदिनासमानि क्रतुभिर्यज्ञैः समानि । अतिपुण्यानीत्यर्थः । तत्र पितॄणां दत्तं श्राद्धादि कृतमक्षयमनन्तफलदं भवति" र॰ना॰ । "अथ राश्यधिष्ठितक्रान्तिवृत्ते चत्वारि स्थानानि पदसन्धिस्थाने विषुवायनाख्यां प्रसिद्धानीत्याह

"भचक्रनाभौ विषुवद्द्वितयं समसूत्रगम् । अयनद्वितयं चैव चतस्रः प्रथितास्तु ताः" सू॰सि॰ । "भचक्रनाभौ भगोलस्य ध्रुवद्वयाभ्यां तुल्यान्तरेण मध्यभागे विषुवद्द्वितयं विषुवद्द्वयं समसूत्रगं परस्परं व्याससूत्रान्तरितं ध्रुवमध्ये विषुवद्वृत्तस्थानात् तद्वृत्ते क्रान्तिवृत्तभागौ यौ लग्नौ तौ च क्रमेण पूर्वापरौ विषुवत्सञ्ज्ञौ मेषतुलाख्यौ चेत्यर्थः । अयनद्वितयमयनद्वयं कर्कमकरादिरूपम् । चः समुच्चये । तेन समसूत्रगं ता विषुवायनाख्याः क्रान्तिवृत्तप्रदेशरूपा भमयचतस्रश्चतुःसङ्ख्याकाः प्रथिता गणितादौ पदादित्वेन प्रसिद्धाः । एवकारादन्यराशीनां निरासः । तुकारात् तासां समसूत्रस्थत्वेऽपि विषुवायनत्वाभावात् पदादित्वेनाप्रसिद्धिरित्यर्थः" र॰ ना॰ । अथावशिष्टनामादिस्वरूपमन्यदप्याह ।

"तदन्तरेषु संक्रान्तिद्वितयं द्वितयं पुनः । नैरन्तर्यात् तु संक्रान्तेर्ज्ञेयं विष्णुपदीद्वयम्" सू॰सि॰ । "तदन्तरेषु विषुवायनान्तरालेषु । अत्रान्तरालानां चतुःस्थाने सद्भावाद्बहुवचनम् । संक्रान्तिद्वितयं द्वितयं पुना राश्यादिगागे ग्रहाणामाक्रमणं वारद्वयं भवति । तदन्तराले राश्याद्यादिभागौ द्वौ भवत इत्यर्थः । तथा हि मेषाख्य-

विषुवकर्कोत्थायनयोरन्तराले वृषमिथुनयोरादौ। कर्कतुलयोरन्तराले सिंहकन्ययोरादौ। तुलामकरयोरन्तराले वृश्चिकधनुषोरादौ। मकरमेषयोरन्तराले कुम्भमीनयोरादौ इति। एवं विषुवानन्तरं संक्रमणद्वयमनन्तरमयनं तदनन्तरं संक्रान्तिद्वयं तदनन्तरं विषुवमनन्तरं संक्रान्तिद्वयमनन्तरमयनमित्यादि पौनःपुन्येन ज्ञेयमित्यर्थः। संक्रान्तिद्वयमध्ये प्रथमसंक्रान्तौ विशेषमाह नैरन्तर्य्यादिति। निरन्तरतया सम्भूतायाः संक्रान्तेः सकाशाद्विष्णुपदीद्वयं तदन्तराले इत्यर्थः। अवगस्य प्रथमसंक्रान्तिर्विष्णुपदसञ्ज्ञा तयोर्द्वयं तदभ्यन्तरे प्रत्येकं भवतीति तात्पर्य्यार्थः। षडशीतिसञ्ज्ञं द्वितीयसंक्रमणं पूर्वसूचितं तयोरपि द्वयं तदन्तराले भवतीति ध्येयम्" र०ना०। अथायनद्वयमाह "भानोर्मकरसंक्रान्तेः षण्मासा उत्तरायणम्। कर्कादेस्तु तथैव स्यात् षण्मासा दक्षिणायनम्" सू०सि०। "सूर्यस्य मकरसंक्रान्तेः सकाशात् षट् सौरमासा उत्तरायणं भवति। कर्कादेः कर्कसंक्रान्तेः सकाशात् तथा सूर्यभोगात। एवकारादन्यपक्षनिरासः। षण्मासाः तुकारात् सौराः। दक्षिणायनं भवति" र०ना०। अथर्तुमासवर्षाण्याह "द्विराशिनाथा ऋतवस्ततोऽपि शिशिरादयः। मेषादयो द्वादशैते मासास्तैरेव वत्सरः" सू०सि०। "ततो मकरसंक्रान्तेः सकाशात्। अपिशब्दः उत्तरायणावधिना समुच्चयार्थकः। द्विराशिनाथा राशिद्वयस्वामिका राशिद्वयार्कभोगात्मका इत्यर्थः। शिशिरादयः शिशिरवसन्तग्रीष्मवर्षाशरद्धेमन्ता ऋतवः कालविभागविशेषा भवन्ति। एते सूर्यभोगविषयका मेषादयो राशयो द्वादश मासास्तैर्द्वादशभिर्मासैः। एवकारान्न्यूनाधिकव्यवच्छेदः। वत्सरः सौरवर्षं भवति" र०ना०। अथ प्रसङ्गात् संक्रान्तौ पुण्यकालानयनमाह। "अर्कबिम्बकलाः षष्ट्या गुणिता भुक्तिभाजिताः। तदर्धनाड्यः संक्रान्तेरर्वाक् पुण्यं तथापरे" सू०सि०। "सूर्यस्य बिम्बप्रमाणकलाः षष्ट्या गुणिताः सूर्यगत्या भक्तास्तस्य फलस्यार्द्धं तत्सङ्ख्याका घटिका इत्यर्थः। संक्रान्तेः सूर्यस्य राशिप्रवेशकालादित्यर्थः। अर्वाक् पूर्वं पुण्यं स्नानादिधर्मकृत्ये पुण्यघटिकाः पुण्यवृद्धिकारिकाः। अपरे संक्रान्त्युत्तरकाले तथा। स्नानादिधर्मकृत्ये पुण्यवृद्धिदा इत्यर्थः। अत्रोपपत्तिः। सूर्यबिम्बकेन्द्रस्य राश्यादौ सञ्चरणकालः संक्रमणकालस्तस्य सूक्ष्मत्वेन दुर्ज्ञेयत्वात् स्थूलकालः कोऽप्यभ्युपेयः स तु राश्यादौ बिम्बसञ्चरणरूपोऽङ्गीकृतो बिम्बसम्बन्धात्। अतो यदि सूर्य्यगत्या षष्टिसाधनघटिकास्तदा सूर्य्यबिम्बकलाभिः का इत्यनुपातानीता बिम्बघटिकाः संक्रान्तिकालः स्थूलैः प्राङ्नेमिसञ्चरणकालात् पश्चिमनेमिसञ्चरणकालपर्य्यन्तं तदर्द्धघटिका व्यासार्द्धघटिका इति। संक्रान्तिकालात् ताभिः पूर्वमपरत्र काले प्रागपरनेम्योः क्रमेण सञ्चरणात् पूर्वोत्तरकाले पुण्या इति" र०ना० अथ सौरमुक्त्वा क्रमप्राप्तं चान्द्रमानमाह। "अर्काद्विनिःसृतः प्राचीं यद्यात्यहरहः शशी। तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः" सू०सि०। "सूर्यात् समागमं त्यक्त्वा विनिर्गतः पृथग्भूतः सञ्चन्द्रोऽहरहः प्रतिदिनं यत् तत्सङ्ख्यामितं प्राचीं पूर्वां दिशं गच्छति तत् प्रतिदिनं चान्द्रमानं तत्तु गत्यन्तरांशमितम्। ननु सौरदिनं सूर्यांशेन यथा भवति तथैतद्रूपैर्भागैः कियद्भिः पूर्णं चान्द्रं दिनं भवतीत्यत आह अंशैरिति। भागैस्तुकारात् सूर्य्यचन्द्रान्तरोत्पन्नैः, तस्य तद्रूपत्वात् द्वादशभिर्द्वादशसङ्ख्याकैस्तिथिर्ज्ञेया। एकं चान्द्रं दिनं ज्ञेयमित्यर्थः। एतदुक्तं भवति। सूर्य्यचन्द्रयोगाच्चान्द्रदिनप्रवृत्तेः पुनर्योगे माससमाप्तेर्भगणान्तरेण चान्द्रे मासस्त्रिंशच्चान्द्रदिनात्मकः। अतस्त्रिंशद्भिर्भगणांशान्तरं तदेकेन किमिति। द्वादशभागैरेकं चान्द्रदिनम्। "दर्शः सूर्य्येन्दुसङ्गमः" इत्यभिधानाद्दर्शावधिकमासस्य त्रिंशत्तिथ्यात्मकत्वात् तिथिश्चान्द्रदिनरूपेति" र०ना०। अथ चान्द्रव्यवहारमाह "तिथिः करणमुद्वाहः क्षौरं सर्वक्रियास्तथा। व्रतोपवासयात्राणां क्रिया चान्द्रेण गृह्यते" सू०सि०। "तिथिः प्रतिपदाद्या करणं ववादिकमुद्वाहो विवाहः क्षौरं चौलकर्म। एतदाद्याः सर्वक्रिया व्रतबन्धाद्युत्सवरूपा व्रतोपवासयात्राणां नियमोपवासगमनानां क्रिया करणम्। तथा समुच्चयार्थकः। चान्द्रमानेन गृह्यते अङ्गीक्रियते" र०ना०। अथ चान्द्रमासं प्रसङ्गात् पित्र्यमानं चाह "त्रिंशता तिथिभिर्मासश्चान्द्रः, पित्र्यमहः स्मृतम्। निशा च, मासपक्षान्तौ तयोर्मध्ये विभागतः" सू०सि०। "त्रिंशता त्रिंशन्मितैस्तिथिभिश्चान्द्रो मासः। पित्र्यं पि सम्बन्धि। अहर्दिनम् निशा च रात्रिः पितृसम्बद्धा। चकारो व्यवस्थार्थकः। तेनोभयं नैकं प्रत्येकं, किन्तु मिलितम्। स्मृतमिति लिङ्गानुरोधेनोभयत्रान्वेति तथा च चान्द्रो मासः पित्र्याहोरात्रश्चेत्यर्थः फलितः। मासपक्षान्तौ मासान्तो दर्शान्तः, पक्षान्तः पूर्णिमान्तः

एतावित्यर्थः। विभागतः क्रमेणेत्यर्थः। तयोः पित्राह्नोरात्रयोर्मध्येऽर्द्धे भवतः। दर्शान्तः पितॄणां मध्याह्नः, पूर्णिमान्तः पितॄणां मध्यरात्रमित्यर्थः। अर्थात् कृष्णाष्टम्यर्द्धे दिनप्रारम्भः। शुक्लाष्टम्यर्द्धे दिनान्त इति सिद्धम्" र०ना०। अथ क्रमप्राप्तं नाक्षत्रमानं प्रसङ्गान्माससञ्ज्ञां चाह "भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते। नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्वान्तयोगतः" "नित्यं प्रत्यहं भचक्रभ्रमणं नक्षत्रसमूहस्य प्रवहवायुकृतपरिभ्रमः नाक्षत्रं नक्षत्रसम्बन्धि दिनं मानज्ञैः कथ्यते नित्यमित्यनेन चन्द्रभोगनक्षत्रभोगो नाक्षत्रमित्यस्य निरासः भचक्रभ्रमणानुपपत्तेः। माससञ्ज्ञा महानक्षत्रनाम्नेति। पर्वान्तयोगतः पर्वान्तः पूर्णिमान्तः तस्य योगात् तत्सम्बन्धात् नक्षत्रसञ्ज्ञया मासाः। तुकाराच्चान्द्रा अवगन्तव्याः पूर्णिमान्तस्थितचन्द्रनक्षत्रसञ्ज्ञो मासो ज्ञेय इति तात्पर्यार्थः। तथाहि यद्दर्शान्तावधिकश्चान्द्रो मासस्तदभ्यन्तरस्थितपूर्णिमान्तस्थितचन्द्रनक्षत्रसञ्ज्ञः। यथा चित्रासम्बन्धाच्चैत्रः। विशाखासम्बन्धाद्वैशाखः। ज्येष्ठासम्बन्धाज्ज्यैष्ठः। आषाढासम्बन्धादाषाढः। श्रवणसम्बन्धाच्छ्रावणः। भाद्रपदासम्बन्धाद्भाद्रपदः। अश्विनीसम्बन्धादाश्विनः। कृत्तिकासम्बन्धात् कार्त्तिकः। मृगशीर्षसम्बन्धान्मार्गशीर्षः। पुष्यसम्बन्धात् पौषः। मघासम्बन्धान्माघः। फाल्गुनीसम्बन्धात् फाल्गुन इति" र०ना०। ननु पूर्णिमान्ते तत्तन्नक्षत्राभावे कथं तत्सञ्ज्ञा मासानामुचितेत्यत आह "कार्त्तिक्यादिषु संयोगे कृत्तिकादि द्वयं द्वयम्। अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम्" सू०सि०। नक्षत्रसंयोगार्थमिति निमित्तसप्तमी। कार्त्तिक्यादिषु कार्त्तिकमासादीनां पौर्णमासीष्वित्यर्थः। कृत्तिकादि द्वयं द्वयं नक्षत्रं कथितं कृत्तिकारोहिणीभ्यां कार्त्तिकः। मृगार्द्राभ्यां मार्गशीर्षः। पुनर्वसुपुष्याभ्यां पौषः। आश्लेषामघाभ्यां माघः। चित्रास्वातिभ्यां चैत्रः। विशाखानुराधाभ्यां वैशाखः। ज्येष्ठामूलाभ्यां ज्यैष्ठः। पूर्वोत्तराषाढाभ्यामाषाढः। श्रवणधनिष्ठाभ्यां श्रावण इति फलितम्। अवशिष्टमासानामाह। अन्त्योपान्त्याविति। अत्र कार्त्तिकमासादित्वेन ग्रहणादन्त्य आश्विनः। उपान्त्यो भाद्रपदः। एतौ मासौ पञ्चमः फाल्गुनः। चकारः समुच्चये इति। मासत्रयं त्रिधा स्यात्तत्र क्रमम। रेवत्यश्विनीभरणीति नक्षत्रत्रयसम्बन्धादाश्विनः। शततारापूर्वोत्तराभाद्रपदेति नक्षत्रत्रयसम्बन्धाद्भाद्रपदः। पूर्वोत्तराफाल्गुनीहस्तेति नक्षत्रत्रयसम्बन्धात् फाल्गुन इति सिद्धम्" र०ना०। अथ प्रसङ्गात् कार्त्तिकादिवृहस्पतिवर्षाण्याह। "वैशाखादिषु कृष्णे च योगः पञ्चदशे तिथौ। कार्त्तिकादीनि वर्षाणि गुरोरस्तोदयात् तथा" सू०सि०। यथा पौर्णमास्यां नक्षत्रसम्बन्धेन तत्सञ्ज्ञो मासो भवति। तथेति समुच्चयार्थकम्। वृहस्पतेः सूर्यसान्निध्यदूरत्वाभ्यामस्तादुदयाद्वा वैशाखादिषु द्वादशसु मासेषु कृष्णपक्षे पञ्चदशे तिथौ अमावास्यामित्यर्थः। चकारः पौर्णमासीसम्बन्धात् समुच्चयार्थकः। योगो दिननक्षत्रसम्बन्धः कार्त्तिकादीनि द्वादश वर्षाणि भवन्ति। वैशाखकृष्णपक्षपञ्चदश्याममावास्यायां वृहस्पतेरस्त उदये वा जाते सति तद्दादि वृहस्पतिवर्षं कृत्तिकादिनक्षत्रसम्बन्धात् कार्त्तिकसञ्ज्ञम्। एवं ज्येष्ठाषाढश्रावणभाद्रपदाश्विनकार्त्तिकमार्गशीर्षपौषमाघफाल्गुनचैत्रमासेषु मृगपुष्यमघापूर्वफाचित्राविशाखाज्येष्ठापूर्वाश्रवणपूर्वभाश्विनीदिननक्षत्रसम्बन्धान्मार्गशीर्षादीनि भवन्ति। अत्रापि प्रोक्तनक्षत्रद्वयत्रयसम्बन्धः प्रागुक्तो बोध्यः। पञ्चदशे इत्युपलक्षणम्। तेन यद्दिने वृहस्पतेरुदयोऽस्तो वा तद्दिने यच्चन्द्राधिष्ठितनक्षत्रं तत्सञ्ज्ञं वार्हस्पत्यं वर्षं भवतीति तात्पर्य्यम्। संहितापन्थेऽस्तोदयग्राहणोक्तिः परमिदानीमुदयवर्षव्यवहारो गणकैर्गृह्यते "येनोदितेज्य इत्युक्तेरिति" र०ना० अथ क्रमप्राप्तं सावनमाह "उदयादुदयं भानोः सावनं तत् प्रकीर्त्तितम्। सावनानि स्युरेतेन यज्ञकालविधिस्तु तैः" सू०सि०। सूर्यस्योदयादुदयकालमारभ्याव्यवहितोदयकालपर्य्यन्तं यत् कालात्मकं तत् सावनं मानज्ञैरुक्तम्। एतेनोदयद्वयान्तरात्मकालस्य गणनया सावनानि वसुद्व्यष्टाद्रीत्यादिना मध्याधिकारोक्तानि भवन्ति। तद्व्यवहारमाह यज्ञकालविधिरिति। यज्ञस्य यः कालस्तस्य गणना तैः सावनैः। तुकारोऽन्यमाननिरासार्थकैवकारपरः" र०ना०। अथ व्यवहारान्तरमाह। "सूतकादिपरिच्छेदो दिनमासाव्दपास्तथा। मध्यमा ग्रहभुक्तिश्च सावनेनैव गृह्यते" सू०सि०। "सूतकं जन्ममरणसम्बन्धि। आदिपदग्राह्यं चिकित्सितचान्द्रायणादि। तस्य परिच्छेदो निर्णयः। दिनाधिपमासेश्वरवर्षेश्वराः। तथा समुच्चये ग्रहाणां गतिर्मध्यमा। तुकारात् स्पष्टगतेर्निरासः तस्याः प्रतिक्षणं वैलक्षण्याद्दिनसम्बन्धाभावात्। एतेन स्पष्टगत्या स्पष्टग्रहस्य

चालनं निरस्तं स्थूलत्वादिति सूचितम्। सायनमानेन एवकारादन्यमाननिरासः। गृह्यते सुधीभिरङ्गीक्रियते। अत्र बहुवचनानुरोधेन गृह्यत इत्यत्र बहुवचनं ज्ञेयम्। अथ दिव्यमानमाह। “सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्। यत् प्रोक्तं तद्भवेद्दिव्यं भानोर्भगणपूरणात्” सू॰सि॰। “पूर्वार्द्धं पूर्वं व्याख्यातम्। यदहोरात्रं पूर्वार्द्धोक्तं सूर्यस्य भगणभोगपूर्तेः प्रोक्तं पूर्वमनेकधा निर्णीतं तदहोरात्रं दिव्यमानं स्यात्” र॰ना॰। अथावशिष्टे प्राजापत्यब्राह्ममाने आह “मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम्। न तत्र द्युनिशोर्भेदो ब्राह्मं कल्पः प्रकीर्त्तितम्” सू॰सि॰।

दृष्टान्तभूगोलभगोलरचनाप्रकारः सू॰ सि॰ दर्शितो यथा

“भूभगोलस्य रचनां कुर्य्यादाश्चर्य्यकारिणीम्। अभीष्टं पृथिवीगोलं कारयित्वा तु दारवम्। दण्डं तन्मध्यगं मेरोरुभयत्र विनिर्गतम्। आधारकक्षाद्वितयं कक्षां वैषुवतीं तथा” सू॰ सि॰। “भगोलस्य भूगोलादभितः संस्थितस्य नक्षत्राधिष्ठितगोलस्य प्रागध्यायोक्तार्थस्य रचनां स्थितिज्ञानार्थं दृष्टान्तात्मकगोलस्य निर्मितिं सुधीर्गणको गोलशिल्पज्ञः कुर्य्यात्। ननु त्वदुक्तेन सर्वं ज्ञानं भवतीति दृष्टान्तगोलनिबन्धनं व्यर्थमेवेत्यत आह आश्चर्य्यकारिणीमिति। उक्तप्रतीत्युद्भूताद्भुतबुद्धिजनयित्रीं तथाचोक्तेन खाधस्तिर्य्यग्भागयोर्होरात्रस्थानस्य तद्भागस्थभगोलप्रदेशस्य च भूर्निराधारत्वादेश्च ज्ञानं मनसि सप्रतीतिकं न भवत्यतो दृष्टान्तगोले तन्निश्चयसम्भवात् तन्निबन्धनमावश्यकमिति भावः। कथं रचनां कुर्य्यादित्यत आह अभीष्टमिति। सुधी गोलमभीष्टं स्वेच्छाकल्पितपरिधिप्रमाणकं दारवं काष्ठघटितं सच्छिद्रं कारयित्वा काष्ठशिल्पज्ञद्वारा कृत्वेत्यर्थः। मेरोरनुकल्परूपं दण्डं काष्ठं तन्मध्यगं तस्य काष्ठघटितभूगोलस्य मध्ये छिद्रमध्ये शिथिलतया स्थितम्। उभयत्र भूगोलस्थव्यासप्रमाणच्छिद्रस्याग्राभ्यां बहिरित्यर्थः। विनिर्गतमेकाग्रादन्यतराग्रावशिष्टदण्डप्रदेशतुल्यं निःसृतम्। उभयाग्राभ्यां तुल्यौ दण्डप्रदेशौ यथा स्यातां तथा कुर्य्यादित्यर्थः। भगोलनिबन्धनार्थमाधारवृत्तद्वयमाह आधारकक्षाद्वितयमिति। भगोलनिबन्धनार्थमादावाश्रयार्थं वृत्तयोर्द्वितयमधऊर्ध्वतिर्य्यगवस्थानक्रमेणैकमेकमेवं द्वयमित्यर्थः। भूगोलादुभयतस्तुल्यान्तरेण दण्डप्रदेशयोः प्रोतमेकं वृत्तं कुर्य्यात्। तत्तुल्यं वृत्तमपरं तदर्द्धच्छेदेन दण्डप्रोतं कुर्य्यादिति सिद्धोऽर्थः। एतद्वृत्तद्वयव्यतिरेकेण भूगोलादभितो भगोलनिबन्धनानुपपत्तेः। भगोलनिबन्धनारम्भमाह कक्षेति। वैषुवतीं विषुवत्सम्बन्धिनीं कक्षां वृत्तपरिधिं विषुवद्वृत्तमित्यर्थः। तथाधारवृत्तद्वयस्यार्द्धच्छेदेन भगोलमध्यवृत्तानुकल्पेन गणकेन निबद्धामित्यर्थः” र॰ ना॰। अथ मेषादिद्वादशराशीनामहोरात्रवृत्तनिबन्धनमन्त्यदपि श्लोकपञ्चकेनाह “भगणांशाङ्गुलैः कार्य्या दलितैस्तिस्र एव ताः। स्वाहोरात्रार्द्धकर्णैश्च तत्प्रमाणानुमानतः। क्रान्तिविक्षेपभागैश्च दलितैर्दक्षिणोत्तरैः। स्वैः स्वैरपक्रमैस्तिस्रो मेषादीनामपक्रमात्। कक्षाः प्रकल्पयेत् ताश्च कर्कादीनां विपर्ययात्। तद्वत् तिस्रस्तुलादीनां मृगादीनां विलोमतः। याम्यगोलाश्रिताः कार्य्याः कक्षाधारद्वयोरपि। याम्योदग्गोलसंस्थानां भानामभिजितस्तथा। सप्तर्षीणामगस्त्यस्य ब्रह्मादीनां च कल्पयेत्। मध्ये वैषुवती कक्षा सर्वेषामेव संस्थिता” सू॰ सि॰। “भगणांशाङ्गुलैः द्वादशराशिभागैः षष्ट्यधिकशतत्रयपरिमिताङ्गुलैः दलितैः समविभागेन खण्डितैरङ्गुलैरित्यर्थः। ताः कक्षाः वंशशलाकावृत्तात्मिकास्तिस्रः त्रिसङ्ख्याकाः। एवकारादत्र वृत्ते च न्यूनाधिकव्यवच्छेदः। शिल्पज्ञेन गोलगणितज्ञेन कार्य्याः। एताः पूर्ववृत्तप्रमाणेन न कार्य्या इत्यभिप्रायेणाह स्वाहोरात्रार्द्धकर्णैरिति। स्वशब्देन मेषादित्रिकं तस्य प्रतिराश्यहोरात्रवृत्तस्यार्द्धकर्णा व्यासार्द्धं द्युज्या ताभिरित्यर्थः। चकारात् कार्य्याः। स्वस्वद्युज्यामितेन व्यासार्द्धेन मेषादित्रयाणां वृत्तत्रयं कार्य्यमित्यर्थः। ननु स्पष्टाधिकारोक्ताहोरात्रार्द्धकर्णानयने युक्त्यभावात् तैर्वृत्तनिर्माणं कुतः कार्य्यमित्यत आह तत्प्रमाणानुमानत इति। विषुवदेककक्षाप्रमाणानुमानाद्वृत्तत्रयं कार्य्यम्। यथा विषुवद्वृत्तं पूर्ववृत्तसमम्। तथा तदनुरोधेन मेषान्तवृत्तमल्पं तदनुरोधेन वृषान्तवृत्तमल्पं तदनुरोधेन मिथुनान्तवृत्तमल्पमित्युत्तरोत्तरमल्पव्यासार्द्धवृत्तम्। तच्चाहोरात्रवृत्तमिति द्युज्याव्यासार्द्धेन वृत्तनिर्माणं युक्तियुक्तं क्रान्तिज्यावर्गोनात् त्रिज्यावर्गान्मूलस्याहोरात्रवृत्तव्यासार्द्धत्वादिति भावः। वृत्तत्रयं सिद्धं कृत्वा दृष्टान्तगोले निबध्नीतः। क्रान्तिविक्षेपभागैरिति क्रान्तिवृत्तस्य विषुवद्वृत्तप्रदेशाद्दिक्सम्प्रदेशा यैरंशैः। चकारादाधारवृत्तस्यैर्दलितैः समविभागेन खण्डितैरङ्कितैः। दक्षिणोत्तरैर्विषुवद्वृत्त-

क्रान्तिवृत्तप्रदेशयोर्दक्षिणोत्तरान्तरात्मकैरुक्तलक्षणैः स्वकीयैः स्वकीयैः स्वराशिसम्बद्धैरपक्रमैः स्पष्टाधिकारानीतक्रान्त्यंशैर्मेषादीनां मेषादिराशित्रयान्तानां मेषान्तवृषान्तमिथुनान्तानामित्यर्थः। तिस्रस्त्रिसङ्ख्याकाः प्राङ्निर्मिता वृत्तरूपाः कक्षाः। अपक्रमात्। अपशब्दस्योपसर्गत्वात् क्रमादित्यर्थः। प्रकल्पयेत्। शिल्पज्ञगणकौ विषुवद्वृत्तानुरोधेनाधारवृत्तद्वये उत्तरतो निबध्नीयादित्यर्थः। कर्कादीनामाह ता इति। मेषादिकक्षा निबद्धाः कर्कादीनां कर्कसिंहकन्यानामादिप्रदेशानां विपर्ययात् व्यत्यासात्। चकारः समुच्चये। तेन प्रकल्पयेदित्यर्थः। मिथुनान्तवृत्तं कर्कादेः, वृषान्तवृत्तं सिंहादेः, मेषान्तवृत्तं कन्यादेरिति फलितम्। तुलादीनामाह तद्वदिति। तुलादीनां तुलावृश्चिकधन्विनां तिस्रः कन्यान्तसङ्ख्याकाः कक्षास्तद्वदेकद्वित्रिराशिक्रान्त्यंशैस्तुलान्तवृश्चिकान्तधनुरन्तानां याम्यगोलाश्रिताः। विषुवद्वृत्ताद्दक्षिणभागे आधारवृत्तद्वये निबद्धाः कार्याः। गणकेनेति शेषः। मकरादीनामाह। मृगादीनामिति। विलोमत उत्क्रमात् तुलादिसम्बद्धाः कक्षा मकरादीनां भवन्ति। धनुरन्तवृत्तं मकरादेः, वृश्चिकान्तवृत्तं कुम्भादेः, तुलान्तवृत्तं मीनादेरिति फलितम्। तारायां कक्षानिबन्धनमाह। कक्षाधारादिति। भानामश्विन्यादिसप्तविंशतिनक्षत्रबिम्बानां याम्योदग्गोलसंस्थानां विषुवद्वृत्ताद्दक्षिणोत्तरभागयोर्यथायोग्यमवस्थितानां यन्नक्षत्रध्रुवकस्पष्टक्रान्तिरुत्तरा तन्नक्षत्राणामुत्तरभागावस्थितानां येषां स्पष्टक्रान्तिर्दक्षिणा तेषां दक्षिणभागावस्थितानामित्यर्थः। द्वयोर्दक्षिणोत्तरभागयोः। अपिशब्दो याम्योत्तरनक्षत्रक्रमेण संबन्धार्थकः। कक्षाधारात् कक्षाणामाधारवृत्तद्वयात् तयोरित्यर्थः। सप्तम्यर्थे पञ्चमी। कक्षाः स्वस्पष्टक्रान्तिज्योत्पन्नद्युज्याव्यासार्द्धप्रमाणेन वृत्ताकाराः प्रकल्पयेत्। शिल्पज्ञो निबध्नीयात्। अन्येषामप्याह अभिजित इति अभिजिन्नक्षत्रबिम्बस्य सप्तर्षिबिम्बानामगस्त्यनक्षत्रबिम्बानां चकारोऽनुसन्धेयः। तथा कक्षा यथायोग्यं प्रकल्पयेदित्यर्थः। निबन्धनप्रकारमुपसंहरति मध्य इति। सर्वासामुक्तकक्षाणां मध्ये तुल्यभागेऽनाधारवृत्तमध्यप्रदेशे। एवकारादन्ययोगव्यवच्छेदः। वैषुवती कक्षा विषुवसम्बन्धिनी वृत्तरूपा संस्थिता यथाऽवस्थिता भवति तथा शिल्पज्ञः कक्षां निबध्नीयादित्यर्थः। विषुवद्वृत्तात् स्वस्पष्टक्रान्त्यन्तरेण स्वद्युज्याव्यासार्द्धप्रमाणेनाहोरात्रवृत्तमाधारवृत्तयोर्निबध्नीयादिति निष्कृष्टोऽर्थः” र० ना०। अथ गोले मेषादिराशिसन्निवेशं सार्द्धश्लोकेनाह “तदाधारयुतेरूर्द्ध्वमयने विषुवद्द्वयम्। विषुवत्स्थानतो भागैः स्फुटैर्भगणसञ्चरात्। क्षेत्राण्येवमजादीनां तिर्यग्ज्याभिः प्रकल्पयेत्” सू० सि०। “तदाधारयुतेस्तत्र विषुवद्वृत्तमाधारवृत्तं च तयोर्युतेः सम्पातादूर्द्ध्वमुपरि। अन्तिमाहोरात्राधारवृत्तयोः सम्पातेऽयने दक्षिणोत्तरायणसन्धिस्थाने भवतः अत्रोर्द्ध्वपदसञ्चाराधारवृत्तमूर्द्ध्वाधरं ग्राह्यं न तिर्यग्मण्डलाकारम्। तेनैतत् फलितम् विषुवद्वृत्तस्योर्द्ध्वाधराधारवृत्ते ऊर्द्ध्वभवश्च यत्र सम्पातस्तत्रोर्द्ध्वसम्पातान्मकराद्यहोरात्रवृत्तं चतुर्विंशत्यंशैस्तदाधारवृत्ते दक्षिणतो यत्र लग्नं तत्रोत्तरायणसन्धिस्थानम्। एवमधःसम्पातात् कर्काद्यहोरात्रवृत्तं चतुर्विंशत्यंशैस्तदाधारवृत्ते उत्तरतो यत्र लग्नं तत्र दक्षिणायनसन्धिस्थानमिति। अयनाद्विषुवत्त्व विपरीतस्थितत्वादूर्द्ध्वशब्दयोजितविपरीताधःशब्दसम्बन्धाद्विषुवद्द्वयं भवति। तात्पर्यार्थस्तु तिर्यङ्मण्डलाकाराधारवृत्तविषुवद्वृत्तसम्पातौ पूर्वापरौ क्रमेण मेषादितुलादिरूपौ विषुवत्स्थाने भवत इति। अथ राशिसाकल्यसन्निवेशमाह विषुवत्स्थानत इति। विषुवप्रदेशात् स्फुटैराशिसम्बन्धिभिस्त्रिंशन्मितैरंशैर्भगणसञ्चाराद्राशिसाकल्यसन्निवेशात् तिर्यग्ज्याभिरुक्तवृत्तानुकारातिरिक्तानुकारसूत्रवृत्तप्रदेशैरजादीनां मेषादीनाम्। एवमयनविषुवकल्पनरीत्या तदन्तराले क्षेत्राणि स्थानानि सुधीर्गणकः प्रकल्पयेदनुवर्त्तेत्। यद्यथा पूर्वदिक्स्थविषुवस्थानात्प्रोतवृत्तद्वादशांशखण्डप्रदेशेन मेषान्ताहोरात्रवृत्ते पूर्वभागे यत्र स्थानं तस्मात् तदन्तरेण वृषान्ताहोरात्रवृत्ते तदन्तरेण वृषान्तस्थानमस्मादयनसन्धिस्थानं तत्प्रदेशान्तरेण मिथुनान्तस्थानमस्मात् पश्चिमभागे कर्कान्ताहोरात्रवृत्ते तदन्तरेण कर्कान्तस्थानमस्मादपि सिंहान्ताहोरात्रवृत्ते तदन्तरेण सिंहान्तस्थानमस्मादपि तदन्तरेण पश्चिमविषुवस्थानं कन्यान्तस्थानमस्मादपि तुलान्ताहोरात्रवृत्ते तदन्तरेण तुलान्तस्थानमस्मादपि वृश्चिकान्ताहोरात्रवृत्ते तदन्तरेण वृश्चिकान्तस्थानमस्मादपि तदन्तरेण दक्षिणायनसन्धिस्थानं धनुरन्तस्थानमस्मात् कुम्भाद्यहोरात्रवृत्ते तदन्तरेण मकरान्तस्थानमस्मादपि मीनाद्यहोरात्रवृत्ते तदन्तरेण कुम्भान्तस्थानं मीनादिस्थानं च अस्मादपि पूर्वविषुवे मीनान्तस्थानं मेषादिस्थानं च तदन्तरेणेति व्यक्तम्” र० ना०। ननु गोले वृत्ते द्वा-

दशराशीनां सत्त्वादन्यथा चक्रकलानुपपत्तेरित्यलं कृतवृत्ताभावात् कथं राश्यङ्कनं ? राशिविभागानुपपत्तिश्च अन्तरालभागस्याकाशात्मकत्वादित्यतो वृत्तकथनच्छलेन पूर्व्वोक्तं स्पष्टयन् सूर्य्यस्तद्वृत्ते भगणभोगं करोतीत्याह "अयनादयनं चैव कक्षा तिर्य्यक् तथापरा । क्रान्तिसंज्ञा तया सूर्य्यः सदा पर्य्येति भासयन्" सू° सि° । "अयनस्थानमारभ्य परिवर्त्ततदयनस्थानपर्य्यन्तं चकार आरम्भस्थानयोर्भिन्नायनस्थाननिरासार्थकः । अपरा गोल आधारवृत्तसमा वृत्तरूपा कक्षा तथा राश्यङ्कमार्गेण । एवकारोऽन्यमार्गव्यवच्छेदार्थकः । तिर्य्यक् उक्तवृत्तानुकारदिक्षणानुकारा क्रान्तिसंज्ञा क्रमणं क्रान्तिः । ग्रहगमनभोगस्थानार्थं वृत्तं तत्संज्ञमनुकल्पितम् । अयनविषुवद्वयसंसक्तं क्रान्तिवृत्तं द्वादशराश्यङ्कितं गोले निबध्नीयादिति तात्पर्य्यार्थः । भासयन् भुवनानि प्रकाशयन् सन् स सूर्य्यः । एतेन चन्द्रादीनां निरासः । सदा निरन्तरं तया क्रान्तिसंज्ञया कक्षया पर्य्येति स्वगत्या गच्छन् भगणपरिपूर्त्तिभोगं करोति । सूर्य्यगत्यनुरोधेन नियतं क्रान्तिवृत्तं कल्पितमिति भावः" । ननु चन्द्राद्याः क्रान्तिवृत्ते कुतो न गच्छन्तीत्यत आह" र°ना° । "चन्द्राद्याश्च स्वकैः पातैरपममण्डलमाश्रितैः । ततोऽपकृष्टा दृश्यन्ते विक्षेपान्तेष्वपक्रमात्" सू° सि° । "चन्द्रादयोऽर्कव्यतिरिक्ता ग्रहाः स्वकैः स्वीयैः पातैः पाताख्यदैत्यैरपममण्डलं क्रान्तिवृत्तमाश्रितैः स्वस्वभोगस्थानेऽधिष्ठितैस्ततः क्रान्तिवृत्तान्तर्गतग्रहभोगस्थानादित्यर्थः । चकारादिच्छ पातान्तरेणापकृष्टा दक्षिणत उत्तरतो वा कर्षिता भवन्ति । अतः कारणादपक्रमात् क्रान्तिवृत्तान्तर्गतस्वभोगस्थानादित्यर्थः । दक्षिणत उत्तरतो वा विक्षेपान्तेषु गणितागतविक्षेपकलाप्रस्थानेषु भूस्थजनैर्दृश्यन्ते । तथाच क्रान्तिवृत्तं यथा विषुवन्मण्डलेऽवस्थितं तथा क्रान्तिवृत्ते पातस्थाने तत्षड्भान्तरस्थाने च लग्नमुक्तपरमविक्षेपकलाभिस्तत्त्रिभान्तरस्थानादूर्ध्वाधःक्रमेण दक्षिणोत्तरतो लग्नं च वृत्तं विक्षेपवृत्तं चन्द्रादिगत्यनुरोधेन स्वं स्वं भिन्नं कल्पितं तत्र गच्छतीति भावः" र° ना° । अथ त्रिप्रश्नाधिकारोक्तलग्नमध्यलग्नयोः स्वरूपमाह "उदयक्षितिजे लग्नमस्तं गच्छच्च तद्वशात् । लङ्कोदयैर्यथासिद्धं खमध्योपरि मध्यमम्" सू° सि° । "उदयक्षितिजे क्षितिजवृत्तस्य पूर्व्वदिग्देश इत्यर्थः । लग्नं क्रान्तिवृत्तं यत्प्रदेशे प्रवहवायुना संसक्तं तत्प्रदेशो मेषाद्यवधिभोगेनोदयलग्नमुच्यत इत्यर्थः । प्रसङ्गादस्तलग्नस्वरूपमाह अस्तमिति । तद्वशादुदयलग्नानुरोधादस्तमस्तक्षितिजं क्षितिजवृत्तस्य पश्चिमदिक्प्रदेशमित्यर्थः । क्रान्तिवृत्तं गच्छत् । यत्प्रदेशेन प्रवहवायुना संलग्नं तत्प्रदेशो मेषाद्यवधिभोगेनास्तलग्नमुच्यत इत्यर्थः । तथा च क्षितिजोर्द्ध्वं तथा क्रान्तिवृत्तस्य सद्भावादुदयास्तलग्नयोः षड्राश्यन्तरं सिद्धम् लङ्कोदयैर्निरक्षदेशीयराश्युदयासुभिः । यथा त्रिप्रश्नाधिकारोक्तप्रकारेण तत्सङ्ख्यामितं सिद्धं निष्पन्नम् । मध्यमं मध्यमलग्नं तत् खमध्योपरि खस्य दृश्यांशविभागस्य मध्यं मध्यगतदक्षिणोत्तरस्थलवृत्तानुकारप्रदेशरूपं न तु खमध्यं भास्कराचार्य्याभिमतं खस्वस्तिकं तल्लग्नस्य कादाचित्कत्वेन तदानुत्पत्तेः । तस्योपरि स्थितं क्रान्तिवृत्तं याम्योत्तरवृत्ते यत्प्रदेशेन लग्नं तत्प्रदेशो मेषाद्यवधिभोगेन मध्यलग्नमुच्यत इति तात्पर्य्यार्थः" र° ना° । अथ त्रिप्रश्नाधिकारोक्तान्त्यायाः स्वरूपं स्पष्टाधिकारोक्तचरज्यायाः स्वरूपं चाह "भमध्यात्क्षितिजयोर्मध्ये या ज्या सान्त्याभिधीयते । ज्ञेया चरदलज्या च विषुवत्क्षितिजान्तरम्" सू° सि° । "या उत्तरगोले त्रिज्या चरज्यायुतिरूपा दक्षिणगोले चरज्योनत्रिज्यारूपा त्रिप्रश्नाधिकारोक्ता । सा अन्त्या मध्ये याम्योत्तरवृत्तं क्षितिजं स्वाभिमतदेशक्षितिजवृत्तं तयोर्मध्येऽन्तरालेऽहोरात्रवृत्तस्यैकदेशप्रदेशे ज्या । उदयास्तसूत्रयाम्योत्तरसूत्रसम्पातादहोरात्रयाम्योत्तरवृत्तसम्पातावधिसूत्ररूपा ज्यासूत्रानुकारा न तु ज्या अहोरात्रक्षितिजवृत्तसम्पातद्वयबद्धोदयास्तसूत्रस्याहोरात्रवृत्तव्यासरूपत्वाभावात् । अतएवोत्तरगोलेऽन्त्या त्रिज्याधिका सङ्गच्छते । अभिधीयते गोलज्ञैः कथ्यते । नन्वन्त्योपजीव्यचरज्यैव किंस्वरूपा यया तत्सिद्धिरित्यत आह ज्ञेयेति । "उन्मण्डलं च विषुवन्मण्डलं परिकीर्त्त्यते" इति त्रिप्रश्नाधिकारोक्तेन द्वयोः शब्दयोरेकार्थवाचकत्वात् तिर्य्यगाधारवृत्तानुकारं स्थिरं निरक्षक्षितिजवृत्तमुन्मण्डलं क्षितिजं स्वाभिमतदेशक्षितिजवृत्तमनयोरन्तरम् । चकारो विशेषार्थकस्तुकारपरत्वेन तदन्तरालस्थिताहोरात्रवृत्तैकदेशस्यार्द्धज्यारूपमृजुसूत्रयोरन्तरविशेषात्मकम् । तथा च स्वनिरक्षदेशस्वदेशयोरुदयास्तसूत्रयोरन्तरमूर्द्ध्वाधरमिति फलितार्थः । चरदलज्या तदन्तरालस्थिताहोरात्रवृत्तैकदेशरूपचराख्यखण्डकस्य । न तु दलमर्द्धम् । ज्या चरज्येत्यर्थः । गोलज्ञैर्ज्ञातव्या" र° ना° । ननु पूर्व्वश्लोक-

इत्युक्तं क्षितिजज्ञानं विना दुर्बोधमित्यतः श्लोकार्धेन क्षितिजस्वरूपमाह "कृत्वोपरि स्वकं स्थानं मध्ये क्षितिजमण्डलम्" सू॰ सि॰। भूगोले स्वकं स्वीयं स्थानं भूप्रदेशैकदेशरूपमुपरि सर्व्वदेशेभ्य ऊर्द्ध्वं कृत्वा प्रकल्प्य मध्ये तादृशभूगोल ऊर्द्ध्वाधःखण्डसन्धौ यद्वृत्तं तत् क्षितिजवृत्तं तदनुरोधेन दृष्टान्तगोले क्षितिजवृत्तं स्थिरं संसक्तं कार्य्यमिति भावः" र॰ ना॰। अथैनं दृष्टान्तगोलं सिद्धं कृत्वास्य स्वत एव पश्चिमभ्रमो यथा भवति तथा प्रकारमाह "वस्त्रच्छन्नं बहिश्चापि लोकालोकेन वेष्टितम्। अमृतस्रावयोगेन कालभ्रमणसाधनम्" सू॰ सि॰। "बहिः गोलोपरीत्यर्थः। गोलाकारेण वस्त्रेण छन्नं छादितं दृष्टान्तगोलम्। चकाराद्वस्त्रोपरि तत्तद्वृत्ताद्यामहनं कार्य्यम्। लोकालोकेन वेष्टितं दृश्यादृश्यसन्धिस्थवृत्तेन क्षितिजाख्येन संसक्तम्। अपिः समुच्चये। एतेन क्षितिजं वस्त्रच्छन्नं न कार्य्यं किं तु वस्त्रोपरि क्षितिजं गोलसंसक्तं केनापि प्रकारेण स्थिरं यथा भवति तथा कार्य्यमिति तात्पर्य्यम्। अमृतस्रावयोगेनैतादृशं गोलं कृत्वा जलप्रवाहाभिघातेन कालभ्रमणसाधनं षष्टिनाक्षत्रघटीभिर्दृष्टान्तगोलस्य भ्रमणं यथा भवति तथा साधनं कारणं कार्य्यं स्वयंवहगोलयन्त्रं कार्य्यमित्यर्थः। एतदुक्तं भवति दृष्टान्तगोलं वस्त्रच्छन्नं कृत्वा तदाधारयष्ट्यग्रे दक्षिणोत्तरभित्तिक्षिप्तनलिकयोः क्षेप्ये। यथा यष्ट्यग्रं ध्रुवाभिमुखं स्यात्। ततो यष्ट्यृजुमार्गगतजलप्रवाहेण पूर्वाभिमुखेन तस्याधः पश्चाद्भागे घातोऽपि यथा स्यात् तथाऽस्य दर्शनार्थमेव वस्त्रच्छन्नत्वमुक्तम् अन्यथा गोलवृत्तान्तरवकाशमार्गेण जलाघातदर्शनभ्रमेण चमत्कारानुत्पत्तेः। आकाशाकारतासम्पादनार्थमपि वस्त्रच्छन्नत्वमुक्तम्। इदं वस्त्रमार्द्रं यथा न भवति तथा चिक्कणवस्तुना भस्मादिना लिप्तं कार्य्यम्। क्षितिजवृत्ताकारेणाधो गोलो दृश्यो यथा स्यात् तथा परिखारूपा भित्तिः कार्य्या। परन्तु दक्षिणयष्टिभागस्तत्र शिथिलो यथा भवति अन्यथा भ्रमणानुपपत्तेः। पूर्वदिक्स्थपरिखाविभागाद्बहिर्जलप्रवाहोऽदृश्यः कार्य्य इत्यादि स्वबुध्यैव ज्ञेयमिति" र॰ ना॰।

सि॰शि॰ अत्र विशेषोऽभिहितो यथा
"कृत्वादौ ध्रुवयष्टिमिष्टतरुजामृज्वीं सुवृत्तां ततो यष्टीमध्यगतां विधाय शिथिलां पृथ्वीमपृथ्वीं बहिः। बध्नीयाच्छशिसौम्यशुक्रतपनारेज्यार्किभानां दृढान् गोलांस्तदुपरितः स्थयो च नलिकासंस्थौ खदृग्गोलकौ" सि॰शि॰ "आदौ सारदारुमयीं यष्टिं कृत्वा तदर्द्धस्थाने तत्र प्रोताम् अपृथ्वीं सूक्ष्मां शिथिलां च पृथ्वीं विधाय तस्या बहिश्चन्द्रादीनां गोलान् यष्ट्या सह दृढान् बध्नीयात्। तेषां बहिर्नलिकासंस्थौ खदृग्गोलाविति साधारणेनोक्तम्" प्रमि॰। इदानीं सविशेषमाह "पूर्वापरं विरचयेत् सममण्डलाख्यं याम्योत्तरं च विदिशोर्वलयद्वयं च। ऊर्द्ध्वात्र एवमिह वृत्तचतुष्कमेतदावेष्ट्य तिर्य्यगपरं क्षितिजं तदर्द्धे" सि॰शि॰। "एकं पूर्वापरमन्यद्याम्योत्तरं तथा कोणवृत्तद्वयमेवं वृत्तचतुष्टयमूर्द्ध्वाधोरूपमावेष्ट्य तदर्द्धे वृत्तं क्षितिजाख्यं निवेशयेत्। अत्र याम्योत्तरवृत्त उत्तरक्षितिजादुपरि पलांशान्तर एकं ध्रुवचिह्नं कार्य्यम्। दक्षिणक्षितिजादधोऽन्यत्। इदानीमुन्मण्डलमाह" प्रमि॰ "पूर्वापरक्षितिजसंगमयोर्विलग्नं याम्ये ध्रुवे पललवैः क्षितिजादधःस्थे। सौम्ये कुजादुपरि चाक्षलवैर्ध्रुवे च तदुन्मण्डलं दिननिशोः क्षयवृद्धिकारि" सि॰शि॰। "सम-वृत्तक्षितिजयोर्यौ पूर्वापरौ संपातौ तयोर्ध्रुवचिह्नयोश्च सक्तं यद्विबध्यते तदुन्मण्डलसंज्ञम्। दिनरात्र्योर्वृद्धिक्षयौ तद्वशेन भवतः। इदानीं विषुवन्मण्डलमाह" प्रमि॰ "पूर्वापरस्वस्तिकयोर्विलग्नं खस्वस्तिकाद्दक्षिणतोऽक्षभागैः। अधश्च तैरुत्तरतोऽङ्कितं च यत्रात्र नाडीवलयं विदध्यात्" सि॰शि॰। "तयोरेव पूर्वापरसंपातयोर्विलग्नं तथा याम्योत्तरवृत्ते खस्वस्तिकाद्दक्षिणतोऽधःस्वस्तिकादुत्तरतोऽक्षांशान्तरे यद्वृत्तं निबध्यते तद्विषुवद्वृत्तम्। इदानीं दृङ्मण्डलमाह" प्रमि॰। "ऊर्द्ध्वाधरस्वस्तिककीलयुग्मे प्रोतं लघु दृग्वलयं तदन्तः। कृत्वा परिभ्राम्य च यत्र तत्र नेयं ग्रहो गच्छति यत्र यत्र" सि॰शि॰ "खस्वस्तिके चाधःस्वस्तिके चान्तःकीलकौ कृत्वा तयोः प्रोतं लघु दृग्वलयं कार्य्यम्। तत्तु पूर्ववृत्तेभ्यः किञ्चिन्न्यूनं कार्य्यम्। यथा खगोलान्तर्भ्रमति। यद्येक एव ग्रहगोलस्तदैकमेव दृङ्मण्डलम्। यो यो ग्रहो यत्र यत्र वर्त्तते तत्र तस्योपरिगमेव परिभ्राम्य विन्यस्य दृग्ज्याशङ्क्वादिकं दर्शनीयम्। अथ वा पृथक् पृथगष्टौ दृङ्मण्डलानि रचयेत्। तत्राष्टमं वित्रिभलग्नस्य। तच्च दृक्क्षेपमण्डलम्। अथ विशेषमाह" प्रमि॰। "ज्ञेयं तदेवाखिलखेचराणां पृथक् पृथग्वा रचयेत्तथाष्टौ। दृङ्मण्डलं वित्रिभलग्नकस्य दृक्क्षेपवृत्ताख्यमिदं वदन्ति" सि॰शि॰। व्याख्यातमेवेदम्। इदानीमेवं

खगोलबन्धप्रकारमुक्त्वा दृग्गोलबन्धप्रकारं दर्शयति। "बद्ध्वा खगोले नलिकाद्वयं च ध्रुवद्वये तन्नलिकास्थमेव। बहिः खगोलाद्विदधीत धीमान् दृग्गोलमेवं खलु वक्ष्यमाणम्॥ भगोलवृत्तैः सहितः खगोलो दृग्गोलसंज्ञोऽपममण्डलाद्यैः। दृग्गोलजातं खलु दृश्यतेऽत्र खेटं हि दृग्गोलमतो वदन्ति" सि॰शि॰। "तस्मिन् खगोले ध्रुवचिह्नयोर्नलिकाद्वयं बद्ध्वा तन्नलिकाधारमेव खगोलाद्बहिरङ्गुलत्रयान्तरे दृग्गोलं रचयेत्। कथितैः खगोलोक्तैर्वक्ष्यमाणैर्भगोलवृत्तैः क्रान्तिविमण्डलाद्यैर्यो निबध्यते स दृग्गोलः। कथमस्य दृग्गोलसंज्ञेति तदर्थमाह दृग्गोलजातमित्यादि। यतोऽजादिकुज्यासमपङ्क्त्याद्यच खेचाश्च दृग्गोलजातानि भगोलवृत्तैः खगोलवृत्तमिलितैस्तान्युत्पद्यन्ते। भिन्नगोलबन्धे सम्यङ्नोपलभ्यन्त इति दृग्गोलः कृतः। इदानीं भगोलबन्धमाह" प्रमि॰। "आद्य तरक्षितिजवत् सुदृढं विदध्यादाधारवृत्तयुगलं ध्रुवयष्टिबद्धम्। षष्ट्यङ्कमत्र सममण्डलवत् तृतीयं नाड्याह्वयं च विषुवद्वलयं तदेव" सि॰शि॰। यथा खगोले क्षितिजं याम्योत्तरं च तदाकारमपरमाधारवृत्तद्वयं ध्रुवयष्टिस्थं कृत्वा तदुपर्यन्यत् तृतीयं सममण्डलाकारं घटीषष्ट्या चाङ्कितं कार्यम्। तन्नाडीवृत्तं विषुवद्वृत्तसंज्ञं च" प्रमि॰। इदानीं क्रान्तिवृत्तमाह "क्रान्तिवृत्तं विधेयं खेटाङ्कं भ्रमत्यत्र भानुश्च भार्धे कुभा भानुतः। क्रान्तिपातः प्रतीपं तथा प्रस्फुटाः क्षेपपाताश्च तत्स्थानकान्यङ्कयेत्" सि॰शि॰। "अथान्यत् तत्प्रमाणमेव वृत्तं कृत्वा तत्र मेषादिं प्रकल्प्य द्वादशराशयोऽङ्क्याः। तत् क्रान्तिवृत्तसंज्ञम्। तस्मिन् वृत्ते रविर्भ्रमति। तथा रवेर्भार्धान्तरे भूभा च तथा तत्र क्रान्तिपातो मेषादेर्विलोमं भ्रमति। तथा ग्रहाणां विक्षेपपाताः प्रस्फुटाः विलोमं भ्रमन्ति। अतः क्रान्तिपातादीनां स्थानानि तत्राङ्क्यानि। इदानीं क्रान्तिवृत्तस्य निवेशनमाह" प्रमि॰।

"क्रान्तिपाते च पाताङ्कषट्कान्तरे नाडिकावृत्तलग्नं विदध्यादिदम्। पाततः प्राक् त्रिभे चिह्नभागैरुदग् दक्षिणे तैश्च भागैर्विभागेऽपरे" सि॰शि॰। क्रान्तिपातचिह्नात् षड्भेऽन्तरेऽन्यच्चिह्नं कार्यम्। ते चिह्ने नाडीवृत्तेन संसक्ते कृत्वा पातचिह्नात्पूर्वतस्त्रिभेऽन्तरे नाडीवृत्ताद्भागचतुर्विंशत्योत्तरतो यथा भवति, अपरविभागे त्रिभेऽन्तरे दक्षिणतश्च तैर्भागैर्यथा भवति तथा बध्नीयात्। इदानीं विमण्डलमाह" प्रमि॰। "नाडिकामण्डले क्रान्तिवृत्तं यथा क्रान्तिवृत्ते तथा खेटवृत्तं न्यसेत्। खेटवृत्तं तु राश्यङ्कितं तत्र च क्षेपपातेषु चिह्नानि कृत्वोक्तवत्। क्रान्तिवृत्तस्य विक्षेपवृत्तस्य च क्षेपपाते षड्भे च कृत्वा युतिम्। क्षेपपाताग्रतः पृष्ठतश्च त्रिभे क्षेपभागैः स्फुटैः सौम्ययाम्ये न्यसेत्। शीघ्रकर्णेन भक्तास्त्रिभज्यागुणाः स्युः परक्षेपभागा ग्रहाणां स्फुटाः। क्षेपवृत्तानि चैषां विदध्यात् पृथक् स्वस्ववृत्ते भ्रमन्तीन्दुपूर्वा ग्रहाः" सि॰शि॰। "अस्य समयस्य व्याख्यानम् यथा क्रान्तिवृत्तं पृथक् कृतमेवं विमण्डलमपि राश्यङ्कं पृथक् कृत्वा तत्र मेषादेर्व्यस्तं स्फुटं क्षेपपातं दत्त्वाग्रे चिह्नं कार्यम्। अथ क्रान्तिवृत्तस्य विमण्डलस्य च क्षेपपातचिह्नयोः संपातं कृत्वा तस्मात् षड्भान्तरेऽन्यं च संपातं कृत्वा क्षेपपाताग्रतस्त्रिभेऽन्तरे क्रान्तिवृत्तादुत्तरतः स्फुटैः क्षेपभागैः पृष्ठतश्च त्रिभेऽन्तरे तैरेव भागैर्दक्षिणतः स्थिरं कृत्वा विमण्डलं निवेशनीयम्। अथ पठिता ये विक्षेपभागास्ते त्रिज्यागुणाः शीघ्रकर्णेन भक्ताः स्फुटाः स्युः त्रैराशिकानुपातः। यदि कर्णेन एतावन्तस्तर्हि त्रिज्याग्रे कियन्त इति। यतो भगोले त्रिज्यैव व्यासार्धम्। एवं चन्द्रादीनां मण्डलानि कार्याणि च। स्वस्वविमण्डले ग्रहा भ्रमन्ति। इदानीं क्रान्तिं विक्षेपं चाह" प्रमि॰। "नाडिकामण्डलात् तिर्यगत्रापमः क्रान्तिवृत्तावधिः क्रान्तिवृत्ताच्छरः। क्षेपवृत्तावधिस्तिर्यगेवं स्फुटो नाडिकावृत्तखेटान्तरालेऽपमः" सि॰शि॰। क्रान्तिवृत्ते यत् स्फुटग्रहस्थानं तस्य क्रान्तिवृत्तादेव तिर्यगन्तरं स विक्षेपः। अथ बिम्बकेन्द्रस्य ग्रहस्य नाडीवृत्तादेव तिर्यगन्तरं सा स्फुटा क्रान्तिः। इदानीं क्रान्तिपातमाह" प्रमि॰ "विषुवत्क्रान्तिवलययोः संपातः क्रान्तिपातः स्यात्। तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे। अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्। तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः १९९६६९। तत्संगुणितं पातं क्षिप्त्वा खेटेऽपमः साध्यः। क्रान्तिवशाच्चरखण्डचरदललग्नागमे ततः क्षेप्यः" सि॰शि॰। "क्रान्त्यर्थं पातः क्रान्तिपातः; पातो नाम संपातः कयोः। विषुवत्क्रान्तिवलययोः। तयोर्मेषादावेव संपातः। किन्तु तत्रापि चलनमस्ति। येऽयनचलनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागाः। मेषादेः पृष्ठतस्तावत्स्वन्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थः। न हि क्रान्तिपातो नास्तीति वक्तुं शक्यते।

प्रत्यक्षेण तस्योपलब्धत्वात् । उपलब्धिप्रकारमग्रे वक्ष्यति। तत् कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत् तदा स्वल्पत्वात् तैर्नोपलब्धः, इदानीं बहुत्वात् साम्प्रतैरुपलब्धः। अत एव तस्य गतिरस्तीत्यवगतम् । यद्येवमनुपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिध्यादिवत् कथं तैर्नोक्तः । सत्यम् । अत्र गणितस्कन्धे उपपत्तिमानेवागमः प्रमाणम् । तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ता इति न च वक्तव्यम् । यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणैवोपलभ्यन्ते । तान्येव मन्दोच्चस्थानानि । यान्येव विक्षेपाभावस्थानानि तान्येव पातस्थानानि । किन्तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम् । तत्र मन्दोच्चपातानां गतिरस्ति चन्द्रमन्दोच्चपातवदित्यनुमानेन सिद्धा । सा च कियती तदुच्यते । यैर्भगणैरुपलब्धिस्थानानि यानि गणितेनागच्छन्ति तद्गणनसम्भवा वार्षिकी दैनन्दिनी वा गतिर्ग्राह्या । नन्वेवं बहुभ्यैरपि भगणैस्तान्येव स्थानान्यागच्छन्ति तदा कतरस्या गतेः प्रामाण्यम् । सत्यम् । तर्हि साम्प्रतोपलब्ध्यनुसारिणी कापि गतिरङ्गीकर्तव्या । यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्माण एवोत्पत्स्यन्ते । ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति । अतएवायं गणितस्कन्धो महामतिमद्भिर्धृतः सन्ननाद्यन्तेऽपि काले खिलत्वं न याति । अतोऽस्य क्रान्तिपातस्य भगणाः कल्पेऽयुतत्रयं तावत् सूर्यसिद्धान्तोक्ताः । तथा मुञ्जालाद्यैर्यदयनचलनमुक्तं स एवायं क्रान्तिपातः । ते गोऽङ्कर्त्तु-नन्दगोचन्द्रा १९९६६९ उत्पद्यन्ते । अथ च ये वा ते वा भगणा भवन्तु । यदा येऽंशा निपुणैरुपलभ्यन्ते तदा स एव क्रान्तिपातः इत्यर्थः । तं विलोमगं क्रान्तिपातं ग्रहे प्रक्षिप्य क्रान्तिः साध्या । इदानीं विक्षेपपातानाह" प्रमि० । "एवं क्रान्तिविमण्डलसंपाताः क्षेपपाताः स्युः । चन्द्रादीनां व्यस्ताः क्षेपानयने तु ते योज्याः । मन्दस्फुटो द्राक्प्रतिमण्डले हि ग्रहो भ्रमत्यत्र च तस्य पातः । पातेन युक्तादुगणितागतेन मन्दस्फुटात् खेचरतः शरोऽस्मात् । पातोऽथ वा शीघ्रफलं विलोमं कृत्वा स्फुटात् तेन युताच्छरोऽतः । चन्द्रस्य कक्षावलये हि पातः स्फुटाद्विधोर्मध्यमपातयुक्तात्" सि० शि० । "तथा क्रान्तिवृत्तविमण्डलयोः संपातः क्षेपपातः तं ग्रहे प्रक्षिप्य क्षेपः साध्यः । एतदुक्तं भवति क्रान्तिपातः प्रसिद्धः । यथा तं ग्रहे प्रक्षिप्य क्रान्तिः साध्यते । एवं विक्षेपपातं ग्रहे प्रक्षिप्य क्षेपः साध्य इत्यर्थः । अथ विक्षेपपातो मन्दस्फुटे यत् प्रक्षिप्यते तत्कारणमाह मन्दस्फुट इति । यतः शीघ्रप्रतिमण्डले मन्दस्फुटगत्या ग्रहो भ्रमति । तत्र च वृत्ते पातोऽतो गणितागतं पातं मन्दस्फुटे प्रक्षिप्य क्षेपः साध्यते । शेषं स्पष्टम् । इदानीं ज्ञशुक्रयोर्विशेषमाह" प्रमि० "ये चात्र पातभगणाः पठिता ज्ञभृग्वोस्ते शीघ्रकेन्द्रभगणैरधिका यतः स्युः । स्वल्पाः पुराणैरुदिताश्चलकेन्द्रयुक्तौ पातौ तयोः पठितचक्रभवौ विभेदौ । चक्रादिशोध्यः किल केन्द्रविहीनकेन्द्रे सपाते द्युचरस्तु योज्यः । अतश्चलात् पातयुताज्ज्ञभृग्वोः सुधीभिराद्यैः शरसिद्धिरुक्ता । स्फुटोनशीघ्रोच्चयुतौ स्फुटौ तयोः पातौ भगोले स्फुट एव पातः" सि० शि० । "ननु ज्ञशुक्रयोः शीघ्रोच्चपातयुतं केन्द्रं कृत्वा यो विक्षेप आनीतः स शीघ्रोच्चस्थान एव भवितुमर्हति । न ग्रहस्थाने । यतो ग्रहोऽन्यत्र वर्तते । अत इदमनुपपन्नमिव प्रतिभाति । तथा च ब्रह्मसिद्धान्तभाष्ये "ज्ञशुक्रयोः शीघ्रोच्चस्थाने यावान् विक्षेपस्तावानेव यत्र तत्रस्थस्यापि ग्रहस्य भवति । अत्रोपलब्धिरेव वासना नान्यत् कारणं वक्तुं शक्यत इति" । चतुर्वेदेनाप्यनध्यवसायोऽत्र कृतः । सत्यम् । अत्रोच्यते । येऽत्र ज्ञशुक्रयोः पातभगणाः पठितास्ते शीघ्रकेन्द्रभगणैर्युताः सन्तस्तद्भगणा भवन्ति । तथा च माधवीये सिद्धान्तचूडामणौ पठिताः "अतोऽल्पभगणभवः पातः स्वशीघ्रकेन्द्रेण युतः कार्यः" । शीघ्रोच्चाद्ग्रहे शोधिते शीघ्रकेन्द्रम् । तस्मिन् सपाते क्षेपकेन्द्रकरणार्थं ग्रहः क्षेप्यः । अतस्तुल्यशोध्यक्षेपयोर्नाशे कृते शीघ्रोच्चपातयोग एवावशिष्यत इत्युपपन्नम् ।

किञ्च मन्दस्फुटोनं शीघ्रोच्चं प्रतिमण्डले चलकेन्द्रम् तत्पाते क्षेप्तुं युज्यते । एवं कृते सति विक्षेपकेन्द्रं मन्दफलेनान्तरितं स्यात् । ग्रहच्छायाधिकारे "सितशपातौ स्फुटौ स्वचलकेन्द्रयुक्तौ" इत्यत्र मन्दस्फुटोनं शीघ्रोच्चं शीघ्रकेन्द्रपाते क्षिप्तम् । अतस्तत्र मन्दफलान्तरमङ्गीकृतमित्यर्थः इतरकेन्द्रस्यानुपपत्तेः । अतो मन्दफलं पातेऽव्यस्तं देयम् । यतोऽस्तुपातसिद्धं चलकेन्द्रं मध्यग्रहोनशीघ्रोच्चतुल्यं भवति । यत्तु भगोले क्रान्तिवृत्तं तत् कक्षावृत्तम् । तत्र यद्विमण्डलं तत्र स्फुटग्रहः । तद्

स्फुटपातयोगो हि विक्षेपकेन्द्रम्। अतः स्फुटपातस्थाने संपातं कृत्वा तत्त्रिभेऽन्तरे स्फुटीकृतैः परमविक्षेपांशैः प्राग्वदुत्तरे दक्षिणे च विन्यस्तम्। तथा न्यस्ते विमण्डले स्फुटग्रहस्थाने विक्षेपः स्फुटविक्षेपेण गणितागतेन तुल्यो दृश्यते नान्यथेत्यर्थः। इदानीं ग्रहगोले विशेषमाह" प्रमि०। "ग्रहस्य गोले कथितापमण्डलं प्रकल्प्य कक्षावलयं यथोदितम्। निबध्य शीघ्रप्रतिवृत्तमस्मिन् विमण्डलं तत् पठितैः शरांशैः। मध्योऽत्र पातो द्युसदां च भृग्वोः स्वशीघ्रकेन्द्रेण युतस्तु देयः" सि०शि०। "भगोल एव तावद्ग्रहगोलः कल्प्यः। तत्र स्फुट एव पातः। अथ यदि तदन्यो ग्रहगोलोऽन्यो निबध्यते तदा तत्र यथोक्तं विषुवद्वृत्तं क्रान्तिवृत्तं च बद्ध्वा तत् क्रान्तिवृत्तं कक्षामण्डलं प्रकल्प्य तत्र छेद्यकोक्तविधिना शीघ्रप्रतिमण्डलं बद्ध्वा तत्र प्रतिमण्डले गणितागतं पातं मेषादेर्विलोमं गणयित्वा तत्र चिह्नं कार्यम् अथ त्रिज्याव्यासार्धमेवान्यद्वृत्तं राश्यङ्कं विमण्डलाख्यं कृत्वा तत्रापि मेषादेर्व्यस्तं पाताग्रे चिह्नं कृत्वा प्रतिमण्डलविमण्डलयोः पातचिह्ने प्रथमं संपातं ततो भार्धान्तरे द्वितीयं च संपातं कृत्वा पातादग्रतः पृष्ठतश्च त्रिभेऽन्तरे परमविक्षेपांशैः पठितैः प्रतिवृत्तादुत्तरे दक्षिणे च विमण्डलं विन्यस्तम्। तत्र मन्दस्फुटगत्या पारमार्थिको ग्रहो भ्रमति। अतो मेषादेरनुलोमं मन्दस्फुटो विमण्डले देयः। स तत्रस्थः प्रतिमण्डलाद्यावतान्तरेण विक्षिप्तस्तावांस्तत्प्रदेशे विक्षेपः। यतो वृत्तसंपातस्थे ग्रहे विक्षेपाभावः। त्रिभेऽन्तरे परमो विक्षेपः। मध्येऽनुपातेन। अतो वृत्तसंपातग्रहयोरन्तरं ज्ञेयम्। तदन्तरं पातग्रहयोगे कृते भवति पातस्य विलोमगत्वात्। स योगः शरार्थं केन्द्रम्। यदि त्रिज्यातुल्यया केन्द्रज्यया परमः शरस्तदाभीष्टयाऽनया क इति फलं प्रतिमण्डलविमण्डलयोस्तिर्यगन्तरं स्यात्। विमण्डलस्थग्रहाद्यद्भूमध्यगं सूत्रं तद्भूग्रहान्तरम्। स च शीघ्रकर्णः। यदि भूमध्यात् कर्णाग्रे एतावान् विक्षेपस्तदा त्रिज्याग्रे कियानिति द्वितीयं त्रैराशिकम्। आद्ये त्रिज्या हरो द्वितीये गुणस्तयोर्नाशे कृते केन्द्रज्यायाः परमशरगुणायाः कर्णो हरः। फलं कक्षावृत्तवृत्तयोस्तिर्यगन्तरम्। स स्फुटः शरः। इदानीमहोरात्रवृत्तमाह" प्रमि०। "ईप्सितक्रान्तितुल्येऽन्तरे सर्वतो नाडिकाख्यादहोरात्रवृत्ताह्वयम्। तत्र बद्ध्वा घटीनां च षष्ट्यांशयेदस्य विष्कम्भखण्डं द्युजीवा मता" सि०शि०। "नाडीवृत्तादुत्तरतो दक्षिणतो वा सर्वत इष्टक्रान्तितुल्येऽन्तरे यद्वृत्तं निबध्यते तदहोरात्रवृत्तम्। तेन वृत्तेन तस्मिन् दिने रविर्भ्रमतीत्यर्थः। तस्य वृत्तस्य व्यासार्धं द्युज्या। इदानीमन्यदाह" प्रमि०। "अथ कल्प्या मेषाद्या अनुलोमं क्रान्तिपाताङ्कात्। एषां मेषादीनां द्युरात्रवृत्तानि बध्नीयात्। नाडीवृत्तोभयतस्त्रीणि त्रीणि क्रमोत्क्रमात् तानि" सि०शि०। क्रान्तिपाताङ्कादारभ्य त्रिंशता त्रिंशता भागैरन्यान् मेषादीन् प्रकल्प्य तदग्रेषु स्वस्वाहोरात्रवृत्तानि बध्नीयात्। तानि च नाडीवृत्तस्योभयतस्त्रीणि त्रीणि भवन्ति। तान्येव क्रमोत्क्रमतः सायनांशार्कस्य द्वादशराशीनाम्" प्रमि०। "एष भगोलः कथितः खेचरगोलोऽयमेव विज्ञेयः। अत्रापमण्डले वा सूत्राधारैरधश्च तस्यैव। शन्यादीनां कक्षा बध्नीयादूर्णनाभजालाभाः। बद्ध्वा भगोलमेवं यष्ट्यां यष्टिं खगोलनलिकान्तः। प्रक्षिप्य भ्रमयेत्तं यष्ट्याधारं स्थिरौ खदृग्गोलौ" सि०शि०। "यथायं भगोलो बद्धस्तथैव ग्रहगोला अपि बन्धनीयाः। किन्तु तेषां छेद्यकमन्तश्चालयितुं नायातीति बहिःस्थमेव दर्शनीयम्। अथ वा भगोले यदपमण्डलं तस्याधोऽधस्तन्निबद्धैः सूत्राधारैर्बद्ध्वा शन्यादीनां कक्षा दर्शनीयाः। एवंविधं भगोलं यष्ट्यां दृढं बद्ध्वा यष्ट्यग्रयोः प्रोते नलिकाद्वये निबद्धौ खगोलदृग्गोलौ कृत्वा भगोलभ्रमणं दर्शयेत्" प्रमि०।

तदयं खगोलस्थपदार्थसंक्षेपः।

कटाहद्वितयवत् सम्पुटाकारस्यान्तरवकाशवतो ब्रह्माण्डस्य मध्ये सूर्यकिरणसञ्चारावधिर्व्योमकक्षा। तदधः नक्षत्रकक्षा तदधः क्रमेण दृश्याः पूर्वगाः शनिजीवकुजसूर्यशुक्रबुधशशिनः अदृश्याश्च राहुपातादयः पश्चिमगतयः, वक्ष्यमाणस्वस्वकक्षायां स्थिताः। अश्विन्यादिनक्षत्राणि स्थिराण्यपि तत्समुदायात्मकं भचक्रं पश्चाद्गतिमता प्रवहवायुनाऽभिहतं पश्चात् भ्रमत् नाक्षत्रषष्टिघटिकाभिः भूगोलमेकवारं भ्रमति तत्स्था रव्यादयः ग्रहाश्च स्वगत्या पूर्वयायिनोऽपि तदाधारातिशीघ्रभचक्रपश्चाद्भ्रमणेन पश्चाद्भ्रमणभ्रमविषया भवन्ति।

राशिचक्रस्य ३६०.अंशैर्विभक्तमंशाश्च षष्टिकलाभि-

विभक्ताः, कलाश्च षष्टिविकलाभिर्विभक्तास्तेन ३६०अंशैः, २१६०० कलाभिः, १२९६०००विकलाभिर्विभक्तं भचक्रम्। भचक्रद्वादशविभागो राशिरित्युच्यते राशयश्च मेषादयः द्वादशमिताः। तेनैकैकराशौ त्रिंशदंशाः, १८०० कलाः १०८०००विकलाः सन्ति। मेषादिराशयोऽपि अश्विन्यादि २७ नक्षत्रात्मकाः। तेन सपादनक्षत्रद्वयैकैकोराशिः प्रतिनक्षत्रं च १३।२०। विंशतिकलाधिकास्त्रयोदश अंशाः सन्ति। तथाहि अश्विनी १३।२० भरणी १३।२० कृत्तिकाद्यपदश्च ३।२० मेषः। कृत्तिकान्त्यपादत्रयम् १०। रोहिणी १३।२०। मृगशिराद्यार्द्धञ्च ६।४०। वृषः। मृगशिरान्त्यार्द्धम् ६।४०आर्द्रा १३।२०। पुनर्वस्वाद्यपादत्रयं च १०। मिथुनम्। पुनर्वस्वन्त्यपादः ३।२०। पुष्यम् १३।२० अश्लेषा च १३।२०। कर्कः। मघा १३।२०। पूर्वफल्गुनी १३।२०। उत्तरफाल्गुन्याद्यपादश्च ३।२०। सिंहः। उत्तरफाल्गुन्यन्त्यपादत्रयं १०। हस्तः १३।२०। चित्राद्यार्द्धञ्च ६।४०। कन्या। चित्रान्त्यार्द्धं ६।४०। स्वातिः १३।२०। विशाखाद्यपादत्रयञ्च १०। तुला। विशाखान्त्यपादः ३।२० अनुराधा १३।२०। ज्येष्ठा च १३।२०। वृश्चिकः। मूलं १३।२०। पूर्वाषाढा १३।२० उत्तराषाढाद्यपादश्च ३।२०। धनुः। उत्तराषाढान्त्यपादत्रयं १०। श्रवणं १३।२०। धनिष्ठाद्यार्द्धञ्च ६।४०। मकरः। धनिष्ठान्त्यार्द्धं ६।४०। शतभिषा १३।२०। पूर्वभाद्रपदाद्यपादत्रयञ्च १०। कुम्भः। पूर्वभाद्रपदान्त्यपादः ३।२०। उत्तरभाद्रपदा १३।२० रेवती च १३।२० मीनः। उत्तराषाढायाः शेषपादश्रवणाद्यपञ्चदशघटिकाचतुष्टयस्याभिजित्संज्ञा किञ्चित् कार्य्यार्था। तस्य स्थानादि २८७ पृ० उक्तम्। एते च राशयः तत्रत्याश्विन्यादयश्च यथा पूर्वमवस्थिताः तेषां स्वरूपमश्लेषाशब्दे ४९९ पृ०, विक्षेपा ध्रुवकाश्च २४२२ पृ० दर्शिताः। वक्ष्यमाणभचक्रयोजनानि द्वादशधा विभक्तानि मेषादिराशीनां स्थानमानयोजनानि। २७विभक्तानि अश्विन्यादिनक्षत्रादीनां स्थानमानयोजनानि। ३६० विभक्तानि अंशस्थानमानयोजनानि। २१६०० विभक्तानि कलास्थानमानयोजनानि। भचक्रस्य शून्याद्यूर्द्धस्थत्वात् तदाश्रितनक्षत्राणामप्यूर्द्धस्थत्वम्। भचक्रवत् भूगोलस्य तावदंशकलाद्याद्यात्मकतया भूगोलांशकलादिस्थानसंलग्नसूत्रैकाग्रस्य निवेशने नक्षत्रकक्षायासंशकलाद्यात्मकस्थानेषु सूत्राग्रान्तरस्य निवेशने च तन्मध्यस्थानां शन्यादिकक्षाणामंशकलादिस्थानविभागः भचक्रकलादिस्थानाधःस्थानानां तत्तद्राशितदंशकलाविकलाद्यात्मकत्वं गौणम्

चन्द्रकक्षातोऽधः सिद्धविद्याधरघनाः क्रमेणाधोधःस्थिताः। ते च भूगोलात् द्वादशयोजनपर्य्यन्तमूर्द्धगामिनि आवह नाम्नि भूवायौ स्थितत्वात् प्रवहवाय्ववस्थानाभावाच्च न राशिचक्रगत्या पश्चात् गच्छन्ति। तदधः भकक्षायाः समानान्तरालाकाशप्रदेशरूपकेन्द्रस्थाने भूगोलः स्थितः। भूगोलशब्दे विवृतिः। संक्षेपेणेह किञ्चिदुच्यते। स च ब्रह्मणो धारणात्मकशक्त्याश्रयत्वात् निराधारः एवाकाशे स्थितः। तस्य च स्थिरत्वं भचक्रस्यैव चलत्वं च परमतनिरासेन २४२२ पृ० समर्थितम्। भूगोलमध्यगतो मेरुः स च भूगोलादूर्द्धाधोनिर्गतः। तत्र ऊर्द्धस्थे मेरौ देवानां वासः, अधःस्थे चासुराणाम्। स च भूगोलः देवासुरभागतया द्विधा विभक्तः तद्विभाजकश्च महार्णव एव। स च पृथिव्या मेखलेव चतुर्दिक्षु वेष्टनाकारेण स्थितः। मेरुमध्यात् चतुर्दिक्षु तुल्यभागेषु ९० अंशेषु समुद्रद्वीपमध्ये लङ्कादीनि भूमध्यवृत्तपाद १२४६ योजनान्तरदेशस्थितानि चत्वारि पुराणि। यथा पूर्वस्यां भद्राश्ववर्षे यमकोटी। दक्षिणस्यां भारतवर्षे लङ्का। पश्चिमायां केतुमालवर्षे रोमकपुरी। उत्तरस्यां कुरुवर्षे सिद्धपुरी। ताभ्यः पुरीभ्यः (१२५६) योजनान्तरे देवाश्रयः मेरुरुत्तरतः स्थितः। असुराश्रयश्च तथैव दक्षिणतः। विषुवस्थः सूर्य्यः तासामुपरिगो याति। तासु च विषुवच्छायापातो नास्ति न वा तदपेक्षया अन्यत्राक्षस्योन्नतिः तत्रैव भचक्रस्य सर्व्वोन्नतत्वात् शून्यतस्तासां निरक्षेति संज्ञा मेर्वोरुपरिस्थितैः ध्रुवतारे, मूर्द्धस्थिते निरक्षपुरीषु च ते क्षितिसंलग्ने दृश्येते। तत्स्थानात् उत्तरां गच्छतः क्रमशः उत्तरध्रुवः क्षितिजवृत्तादुन्नतो भवति दक्षिणध्रुवश्च क्षितिमध्यप्रविष्टो भवति। एवं दक्षिणां गच्छतः क्रमशः दक्षिणध्रुवस्योन्नतिः उत्तरध्रुवस्य नतत्वात् भूवृत्तेनाच्छादनम्। भूवृत्तस्य ३६० अंशात्मकत्वेन निरक्षस्थानेभ्यः पादान्तरितस्थानस्थितत्वेन मेरौ ९० अंशाः अक्षांशाः। तदन्तरदेशेषु त्रैराशिकेनानुपातात् अक्षांशा ज्ञेयाः। यदि ९० अंशैः १२५६ योजनानि तदा १अंशे किमिति। किञ्चिन्न्यून १४ योजनैः एकोऽक्षांशः। सौम्ययाम्ययोः सूर्यस्य भूवृत्तपञ्चदशांश एव निरक्षस्थानात् परमक्रान्त्यंशाः २४। तेन निरक्षस्थानात् १४-गुणिते २४ अंशे ३३६ एतद्योजनमितस्थानपर्य्यन्तं सूर्य्यस्य तयोर्दिशोरुपरिगमनम्। अवन्ती च लङ्कातः क्षितिषोडशांशे ३०१४ योजनान्तरे स्थिता। तेन तत्र २२।१/२ अक्षांशाः।

ततः ११।१/२ अंशान्तरिते २१ योजनान्तरितदेशपर्य्यन्तस्थितदेशोर्द्ध्वगः सूर्य्य उत्तरायणान्तगो गच्छति । ततः पूर्वस्यां पश्चाद्वा तत्सममण्डलपातस्थदेशेऽपि । राशिचक्रस्य निरक्षदेशोपरि पश्चाद्गत्या भ्रमदपि देवासुराभ्यां सव्यापसव्यगतिमत्तया, निरक्षदेशे क्षितिलग्नमध्यतया च दृश्यते । राशिचक्रमध्यस्थानमेव विषुवस्थानं तत्र सुरासुराणां क्षितिजवृत्तलग्नतया दृश्यम् । तत्र भचक्रे मेषादिषट्कमुत्तरोन्नतं तुलादिषट्कं च दक्षिणनतमत उत्तरमेरुस्थदेवैः मेषादिषट्कमेव दृश्यते तुलादिषट्कं तु भूवृत्तेनाच्छादनात् न दृश्यते । दक्षिणमेरुस्थदैत्यैस्तु तुलादिषट्कमेव दृश्यते मेषादिषट्कं तु भूवृत्ताच्छादनात् न दृश्यते । अतो मेषादिषट्कस्थरविकाः षण्मासा देवानां दिनम्, सूर्यदर्शनयोग्यकालस्यैव दिनत्वात् तुलादिषट्कस्थरविकाः षण्मासाः रात्रिः, सूर्य्यादर्शनयोग्यकालस्यैव रात्रित्वात् । दैत्यानां तु तुलादिषट्कस्थरविकाः षण्मासाः दिनं, मेषादिषट्कस्थरविकाः षण्मासा रात्रिः । निरक्षदेशात् सौम्ययाम्ययोः ६६ अंशान्तरितदेशे तु द्वादशमासा एव दिनम् रात्रिर्नास्ति तद्वासिभिः सूर्य्यस्य सदा दर्शनात् । तथाहि पूर्वापरयोरिव याम्यसौम्ययोरपि उभयत्र ९० अंशपर्य्यन्तदृष्टिप्रचारात् सौम्ययाम्ययोश्च २४ अंशपर्यन्तमेव रवेः परमक्रान्तेरुक्तत्वात् सौम्ये ६६ अंशान्तरितदेशस्थानाम् याम्ये २४ अंशपर्य्यन्तरवेःस्थितावपि मिलित्वा ९० रवेः अंशान्तरालस्थितत्वात् दृष्टियोग्यता । एवं याम्ये ६६ अंशान्तरितदेशस्थानामपि सौम्ये २४ अंशपर्य्यन्तदेशोपरिगरवेर्दृष्टियोग्यता ९० अंशमध्यस्थत्वात् । सौम्ये निरक्षस्थानात् ६८।१/२० पलांशान्तरितदेशे धनुर्मकरराशी न दृश्येते । अतः धनुर्मकरस्थरविकौ द्वौ मासौ तत्र रात्रिः शिष्टादश मासा दिनम् । याम्ये तु तदंशस्थदेशे कर्कमिथुने न दृश्येते अतस्तत्र कर्कमिथुनस्थरविकौ द्वौ मासौ रात्रिः शिष्टादश मासा दिनम् । निरक्षात् सौम्ये ७८।१/२ अंशान्तरितदेशे वृश्चिकादिराशिचतुष्कं न दृश्यते । तेन तत्स्थरविकाश्चत्वारोमासा रात्रिः । शिष्टा अष्टौ मासा दिनम् । याम्ये तु निरक्षात् तथान्तरितदेशे वृषादिचतुष्कं न दृश्यते । अतस्तत्स्थरविकाश्चत्वारो मासा रात्रिः । शिष्टा अष्टौ मासा दिनम् ।

सौम्ययाम्यायनवृत्तयोः सम्पातस्थानं विषुवद्द्वयं तच्च निरक्षोपरिगतम् । अयनवृत्तञ्च दृष्टिमारभ्य मिथुनान्तात् ६६।८कालेन प्राक् पश्चात् वा एवैकमंशमतीत्य चलतीति अयनशब्दे ११७५४० दर्शितम् । अयनवृत्तचलनाच्च तत्सम्पातस्थानादिकमपि भिद्यते । इदानीञ्च पश्चात् २१ अंशचलनम् तेन मिथुनस्य नवमांशे उत्तरायणान्तकालः । धनुषोनवमांशे च याम्यायनान्तकालः । तदनुसारेण तयोः सम्पातस्थानरूपविषुवस्थानद्वयमपि भिन्नम् । इदानीञ्च मीननवमांशे पूर्वविषुवस्थानं कन्यानवमांशे त्वपरविषुवस्थानम् । एवं विषुवायनमध्यगविष्णुपद्यादिस्थानमपि भिन्नम् । अयनञ्च द्विधा सौम्ययाम्यभेदात् । मीननवमांशात् कन्यानवमांशं यावत् सौम्यं, कन्यादशमांशात् मीननवमांशं यावच्च याम्यम् । एते एवायने देवासुरयोर्दिवारात्रिविभाग इनरात्रिमानज्ञानोपयोगि सुस्पष्टतया । धनुर्दशमांशात् मिथुननवमांशं यावत् सौम्यायनं मिथुनदशमांशात् धनुर्नवमांशं यावत् याम्यायनन्तु सौम्ययाम्यदिशोरर्कस्य गत्यारम्भकालतया चूड़ादिषु वर्ज्जनीयतया गोणं सौम्यायन एव चूड़ादिविधानात् याम्यायने तन्निषेधाच्च तथात्वमिति विवेचनीयम् । इदानीं मीननवमांशरूपविषुवस्थाने च भूवृत्ताद्विनिर्गतः सूर्य्यः क्रमेण मेषादीन् त्रीन् राशीन् ९० अंशान् मिथुननवमांशपर्य्यन्तम् उत्तरोत्तरमारोहन् देवानां पूर्वार्द्धं सम्पादयति मिथुनदशमांशात् कन्यानवमांशान्तञ्चावरोहन् अपरार्द्धम् । एवं कन्यादशमांशात् धनुर्नवमांशान्तं यावत् सञ्चरन् दैत्यानामहः पूर्वार्द्धं सम्पादयति धनुर्दशमांशात् मीननवमांशं यावत् सञ्चरंश्च उत्तरार्द्धमिति विवेकः ।

विधूर्द्ध्वभागस्थितपितृणाञ्च चान्द्रमासेनाहोरात्रम् । तथाहि सूर्य्याचन्द्रमसोरेकराशौ एकांशावच्छेदेन स्थितिकालरूपामावस्या । सूर्य्यस्य चन्द्रोपरिगततया तदानीं तेषां मध्याह्नकालः अतएवामावस्यायां पितॄणां श्राद्धविधानम् तत्तन्मध्याह्नस्यैव भोजनकालत्वात् । पौर्णमास्याञ्च चन्द्रापेक्षया सप्तमराशिस्थतया सूर्य्यस्य तदा चन्द्राधोवर्त्तमानतयाऽदृश्यत्वात् अर्द्धरात्रम् । इत्यादौ चन्द्रात् सूर्य्यस्याधःस्थत्वकीर्त्तनमपि पितॄणां दृष्ट्या पौर्णमास्यभिप्रायेण । तेन पञ्चदश्योरहोरात्रमध्यकालतया कृष्णाष्टम्यर्द्धसमये तेषां सूर्य्योदयः । शुक्लाष्टम्यर्द्धकाले चास्तमनमिति तद्दिनस्य चान्द्रमासरूपता ।

निरक्षदेशात् भूवृत्तस्य पञ्चदशभागपर्य्यन्तमेव सूर्य्यस्य सौम्ययाम्ययोः परमक्रान्तेरुक्तत्वात् । भूवृत्तपञ्चदशभागश्च ३६ योजनान्तरालोत्तरदेशे तदपेक्षया सूर्य्यस्य दक्षिणस्थत्वे

छायाग्रमुत्तरम्, उत्तरस्थत्वे छायाग्रं दक्षिणम्। निरक्षात् याम्ये तथान्तराल २३६ विभागस्थदेशे तदपेक्षया सूर्य्यस्य दक्षिणत्वे छायाग्रमुत्तरम् उत्तरत्वे छायाग्रं दक्षिणम्। ततोऽधिकयोजनान्तरिते तु देशे, सूर्य्यस्य सौम्ययाम्यस्थत्वेऽपि सदा छायाग्रं विभाजकमेरुमुखम्। तथा च सौम्ये तथाविधदेशे छायाग्रं सौम्यमेरुमुखं याम्ये तु याम्यमेरुमुखमिति भेदः। लङ्कापुरे यदा सूर्य्योदयः तदा यमकोट्यां मध्याह्नः, भारताधःस्थे सिद्धपुरेऽस्तकालः, रोमकेऽर्द्धरात्रम्। एवं सर्व्वत्र भूवृत्ते ऊर्द्धाधःस्थितदेशयोरुदयास्तकालौ स्वस्वतिर्य्यक्पूर्व्वस्थितदेशे भूवृत्तपादान्तरिते मध्याह्नकालः, स्वस्वतिर्य्यक्पश्चात्तथास्थितदेशेऽर्द्धरात्रम्। तदन्तरालस्थदेशानान्तु त्रैराशिकेनोदयास्तकाला वेदितव्याः। इत्थं राशिचक्रस्यानिशभ्रमणात् तद्गतसूर्य्यस्यापि तद्वशात् भ्रमणेन देशभेदेनैवोदयास्तादिकालव्यवस्था।

निरक्षदेशात् उत्तरमेरुं गच्छतः क्रमेण उत्तरध्रुव उन्नतो दृश्यते, दक्षिणस्तु भूवृत्तेनाच्छादनात् न दृश्यते। भचक्रमध्यं च क्रमेण नतं दृश्यते। सौम्यमेरुसन्निकृष्टदेशात् निरक्षं गच्छतश्च उत्तरध्रुवः क्रमेण नतः, भचक्रञ्च क्रमेणोन्नतं दृश्यते। एवं निरक्षात् दक्षिणमेरुं गच्छतश्च क्रमेण दक्षिणध्रुवः उन्नतः, भचक्रञ्च नतमुत्तरध्रुवस्तु भूवृत्तेनाच्छादनात् न दृश्यते। ततो निरक्षाभिमुखं गच्छतश्च क्रमेण दक्षिणध्रुवो नतो भचक्रञ्चोन्नतं भवति। तथा प्रवहवायुगोलस्थपूर्व्वापरविषुवद्वृत्ताधःस्थनिरक्षदेशे ध्रुवयोः क्षितिलग्नत्वभ्रान्तिः, तत्र च भचक्रस्य मस्तकोपरिभ्रमणं च दृश्यते। तेन मेर्व्वभिमुखं गच्छतः क्रमेण ध्रुव उच्चः, भचक्रं च नीचमिति युक्तम्।

भचक्रस्येव तदधोऽधःस्थानां ग्रहकक्षाणामपि तत्तुल्यांशकलाविकलाद्यात्मतयाऽङ्कने महत्याः कक्षाया अंशादेर्बहुस्थलात्मकत्वम्, अल्पकक्षायां च अल्पस्थलात्मकत्वं, तेन महाकक्षायां स्थितस्य बहुकालेन भगणपूर्त्तिर्लघुकक्षास्थितस्य स्वल्पकालेन। अतोविधोः सर्व्वाधोलघुकक्षानिष्ठत्वेन मासेनैव भचक्रभ्रमणं, शनेस्तु सर्व्वोपरिमहाकक्षास्थितत्वात् ३० वर्षैर्भचक्रभ्रमणम्। एवमन्येषां तदन्तरालस्थितानां भचक्रभ्रमणकालविशेषः त्रैराशिकेन कल्पनीयः।

खकक्षादिमानयोजनानि अधोऽधःस्थग्रहकक्षामानयोजनानि च सू॰ सि॰ उक्तानि तासां भूमध्यस्य चक्र।

खकक्षायाः १८७१२०८०८६४००००००

नक्षत्रकक्षायाः २५९८९०००० उ॰। ४१२६२६५८

शनिकक्षायाः १२७६६८२५५ उ॰। २०३१९०७१

अदृश्यराहुकक्षायाः ८०५७२८६४

गुरुकक्षायाः ५१३७५७६४ उ॰। ८१७६५३८

अदृश्यचन्द्रमन्दोच्चकक्षायाः ३८३२८४८४

कुजकक्षायाः ८१४६९०९ उ॰। १२९६६१९

बुधशुक्रसूर्य्यकक्षाणाम् ४३३१५०० उ॰। ३०३८९३७७

अदृश्यशुक्रशीघ्रोच्चकक्षायाः २६६४६७७ उ॰। ४३४०८८

अदृश्यबुधशीघ्रोच्चकक्षायाः १०४३२०९ उ॰। १६६०३२

चन्द्रकक्षायाः ३२४००० उ॰। ५१५६६

भूवृत्तपरिधेः ५०२६ स्थूलम् ४९६७ सूक्ष्मम्

अगस्त्यादीनां भचक्रस्थितिस्थानांशविक्षेपास्तु सू॰ सि॰ उक्ता यथा।

अगस्त्यः मिथुनान्ते भचक्रस्य ९० अंशे स्थितः। मिथुनान्तक्रान्तिवृत्तात् याम्ये ८० अंशास्तस्य विक्षेपः।

मृगव्याधः मिथुनविंशांशे भचक्रस्य ८० अंशे स्थितः तदीयक्रान्तिवृत्तात् ४० अंशास्तस्य याम्ये विक्षेपः।

वह्निनक्षत्रं वृषराशिद्वाविंशभागे भचक्रस्य ५२ अंशे स्थितम्। तस्याष्टावंशाः स्वक्रान्तिस्थानात् उत्तरे विक्षेपः।

ब्रह्महृदयम् वृष २२ भागे भचक्रस्य ५२ भागे स्थितं स्वक्रान्तिवृत्तात् सौम्येऽस्य ३० अंशाः विक्षेपः।

एतच्च मिथुनान्तेऽयनांशकाले, अयनांशचलने तु अन्यत्र विक्षेपः।

रोहिणीशकटम् वृषराशिसप्तदशांशे भचक्रस्य ४७ अंशे स्थितं स्वक्रान्तिस्थानात् अंशद्वये याम्येऽस्य विक्षेपः।

ब्रह्मनामनक्षत्रम् वृषसप्तविंशांशे भचक्रस्य ५७ अंशे स्थितम् स्वक्रान्तिस्थानात् सौम्ये ३८ अंशा अस्य विक्षेपः।

अपांवत्सनक्षत्रं चित्रातुल्यध्रुवके स्थितं चित्राविक्षेपात् अंशद्वयात् ५ अंशाः सौम्ये अस्य विक्षेपः।

आपसंज्ञनक्षत्रं चित्रायामेव स्थितं अपांवत्सात् ६ अंशान्तरेऽस्य सौम्ये विक्षेपः।

सप्तर्षयस्तु उत्तरस्यां स्थिताः विक्षेपभेदस्तु सौरागमे नोक्तः तेषां शतवर्षैरेकैकर्क्षभोगः वृ॰ सं॰ उक्तः ऋषिशब्दे १४५१ पृ॰ विवृतिः।

अश्विन्यादीनां योगताराद्विकमस्तेषांशब्दे ४९७ पृ॰ उक्तम् ध्रुवकविक्षेपास्तु २४५२ पृ॰ उक्ताः।

वीथिविवृतिः वृहत्संहितायां यथा

नागवीथिः अश्विनीभरणीकृत्तिकाः

गजवीथिः रोहिणीमृगशीर्षार्द्राः

ऐरावतवीथिः	पुनर्व्वसुपुष्याश्लेषाः
वृषभवीथिः	मघादित्रयम्
गोवीथिः	हस्तादित्रयम्
जरद्गववीथिः	विशाखादित्रयम्
मृगवीथिः	मूलादित्रयम्
अजवीथिः	श्रवणादित्रयम्
दहनवीथिः	पूर्वभाद्रपदादित्रयम्

सूर्य्यादिग्रहाणां ४३२०००० वर्षात्मकयुगे राशिचक्र भ्रमणसंख्या सू०सि० उक्ता यथा

रवेः	४३२००००	पूर्वगत्या
बुधस्य	४३२००००	तथा
शुक्रस्य	४३२००००	तथा
स्पष्टभौमशीघ्रोच्चस्य	४३२००००	तथा
स्पष्टगुरुशीघ्रोच्चस्य	४३२००००	तथा
स्पष्टशनिशीघ्रोच्चस्य	४३२००००	तथा
चन्द्रस्य	५७७५३३३६	तथा
भौमस्य	२५६८८३२	तथा
स्पष्टबुधशीघ्रोच्चस्य	१७९३७०६०	तथा
गुरोः	३६४२२०	तथा
स्पष्टशुक्रशीघ्रोच्चस्य	७०२२३७६	तथा
शनेः	१४६५६८	तथा
स्पष्टचन्द्रमन्दोच्चस्य	४८८२०२	तथा
स्पष्टराहोः (पातस्य)	२३२२३८	पश्चाद्गत्या

एत एव सहस्रगुणिताः कल्पे सूर्य्यादिभगणाः।
तत्र सि०शि०सूक्ष्मतयमानभेदेन उक्तः स च २४२९पृ०दर्शितः।

कल्पे सूर्यमन्दोच्चादिभगणसंख्या

	सू०सि० मते	सि०शि० मते
प्राग्गतेः सूर्यमन्दोच्चस्य	३८७	४८०
तथा कुजमन्दोच्चस्य	२०४	२९२
तथा बुधमन्दोच्चस्य	३७८	३३२
तथा जीवमन्दोच्चस्य	९००	८५५
तथा शुक्रमन्दोच्चस्य	५३५	६५३
तथा शनिमन्दोच्चस्य	३९	४१
पश्चाद्गतेः कुजपातस्य	२१४	२६७
तथा बुधपातस्य	४८८	५२१
तथा जीवपातस्य	१७४	६३
तथा शुक्रपातस्य	९०३	८९३
तथा शनिपातस्य	६६२	५८४

कल्पादौ पातं विहाय सर्वे ग्रहाः मीनान्ते मेषादौ प्राग्गत्या स्थिताः

पातस्तु विलोमगत्या तुलादौ स्थित इत्ति भेदः। तदुत्तरकाले तु स्वस्वगत्यनुसारेण राशिकलादौ स्थितिः प्राग्गत्या पश्चाद्गत्या वा बोध्या॥ चैत्रशुक्लप्रतिपदि शनिवारे कल्पारम्भः इदानीञ्च श्वेतवराहकल्पः। तत्र च वर्त्तमानकालपर्य्यन्ताहर्गणानयनम् अहर्गणशब्दे ५७७ पृ० दर्शितरीत्या ज्ञेयम्। अस्य कलेश्च शुक्रवारे प्रवृत्तिः।

महायुगे नाक्षत्रादिदिनसंख्या सू०सि० उक्ता

नाक्षत्रदिनसंख्या	१५८२२३७८२८
सावनदिनसंख्या	१५७१९१५७८२८
चान्द्रदिनरूपतिथिसंख्या	१६०३०००८०
सूर्य्यादिबिम्बमानयोजनानि	सि०शि० उक्तानि
रवेर्बिम्बव्यासयोजनानि	६५२२
चन्द्रमण्डलव्यासयोजनानि	४८०

भूमण्डलव्यासयोजनानि स्थूलानि १६००सू०सि० उक्तानि १५८१ सूक्ष्माणि सि०शि० उक्तानि। योजने करमानाङ्गुलस्य षट्सप्ताष्टयवमितत्वभेदेन योजनसंख्याभेदः। अन्येषां ग्रहाणां बिम्बमानं सौरागमे नोक्तम्। कल्यादौ ग्रहाणां ध्रुवकाः २४३२ पृष्ठे उक्ता ग्रहाणां सावनदिने मध्यगतिमानं तत्रैव पृष्ठे उक्तं, मेषादौ सूर्य्यस्य सावनमानेन भोगकालः ४२२४,२५ पृ० दर्शितः

दशगुर्व्वक्षरोच्चारणकालः प्राणः असुरिति चोच्यते ६ षड्भिः प्राणैः पलं विनाडी च, षष्ट्या पलैः नाडी-दण्ड इति चोच्यते षष्ट्या दण्डैर्नाक्षत्रमहोरात्रम्। भचक्रस्य तावता कालेन भूवृत्तभ्रमणात् तस्य नाक्षत्रत्वम्। 'सावनदिनं' सूर्य्योदयाद्द्वितीयसूर्य्योदयपर्य्यन्तकालरूपम् तच्च नाक्षत्रदिनात् सूर्य्यस्य स्वाक्रान्ततत्तद्राश्यंशादि भोगकालाधिकम्। सावनदिनमपि नाक्षत्रदिनवत् स्वपरिमाणानुसारिषष्टिदण्डात्मकमिति भेदः।

नक्षत्रचक्रस्य षष्ट्या दण्डैर्भूवृत्तभ्रमणेऽपि तस्य द्वादशराश्यात्मकतया षष्टिदण्डमध्ये द्वादशराशीनामुदयः। राश्युदयश्च स्वस्वदृष्टिगोचरकुजवृत्ते पूर्वस्यां प्राथमिकः दृष्टिगोचरयोग्यस्थानसम्बन्धः। राशीनां मध्ये यस्य यत्किञ्चित्कलाद्युदयः तस्योदय इति व्यवह्रियते। राशिचक्रस्य तिर्य्यक्स्थिततया देशभेदेन दृष्टियोग्यकालतारतम्येन कालभेदेनैव मेषादीनामुदयः न तु समकालेन। तत्र निरक्षदेशषु मेषादीनामुदयासवः सू०सि०उक्ता यथा

	असवः	पलानि	दण्डादि ।
मेषस्य	११७०	२७८।२/६,	४।२८।२/६
वृषस्य	१७९२	२९८।५।६	४।५८।५/६
मिथुनस्य	१९२७	३२२।५/६	५।२२।५/६
कर्कस्य	१९२७	३२२।५/६	५।२२।५/६
सिंहस्य	१७९२	२९८।५/६,	४।५८।५/६
कन्यायाः	१६७०	२७८।२/६,	४।२८।२/६
तुलायाः	१६७०	२७८।२/६	४।२८।२/६
वृश्चिकस्य	१७९२	२९८।५/६	४।५८।५/६
धनुषः	१९२७	३२२।५/६	५।२२।५/६
मकरस्य	१९२७	३२२।५/६	५।२२।५/६
कुम्भस्य	१७९२	२९८।५/६,	४।५८।५/६
मीनस्य	१६७०	२७८।२/६	४।२८।५/६.

मेषादीनामुदयकालभेदे कारणम् २४२६ पृ० दर्शितम् अन्यदेशेषु चरखण्डवशेन लग्नमानभेद उन्नेयः। चरस्थानञ्च द्विविधं सौम्ययाम्यं पूर्वापरञ्च। तत्र लङ्कातोमेरुपर्य्यन्तदेशः सौम्ययाम्यं चरस्थानं मध्यरेखातः समसूत्रपातस्थपूर्वापरदेशः पूर्वापरचरस्थानम्। चरखण्डानयनञ्च २४२६ पृ० दर्शितम्।

देशभेदेन सूर्य्योदयादिव्यवस्था सि॰शि॰ उक्ता लङ्कामारभ्य उत्तरमेकं नीयमाना रेखा अवन्तीकुरुक्षेत्रादिदेशान् स्पृशन्ती या याति सा मध्यरेखा। मध्यरेखायां यदा सूर्य्योदयः तत्पूर्वदेशे ततः पूर्वमेव तदुदयः। ततः पश्चिमे भागे तु पश्चात्। तत्र यदि ६० घटीभिः भूवृत्तयोजनानि लभ्यन्ते तदा रेखास्वपुरान्तरालयोजनानि क्रियया घट्या इत्यनुपातेनोदयकालज्ञानम्। सौम्यायने देवभागस्थदेशे दिवसो महान् तदुपरि सूर्य्यस्य गतत्वात्, रात्रिस्तु स्वल्पा। याम्यायने देवभागे दिनं स्वल्पं रात्रिर्महती। निरक्षे तु सर्वदैव अहोरात्रं समानम् पूर्वप्रदर्शितप्रमाणकोदयकालकानां मेषादीनां मध्ये यंकञ्चिदारभ्य दिनारम्भे त्रिंशद्घटिकामानत्वसिद्धेः। तत्र मेषादौ देवभागस्थतया सूर्य्यस्यासन्नत्वात् तत्रयदेशे घीष्मप्रधानता। तुलादौ तु दैत्यभागस्थत्वात् सूर्य्यस्य विप्रकृष्टतया देवभागे शिशिरप्रधानता। दैत्यभागे तु वैपरीत्येन शिशिरग्रीष्मते। द्वादशराशिषु मध्ये द्वयोः सौम्ययाम्यायनसंक्रान्ती द्वयोर्विषुवसंक्रान्ती अष्टसु विष्णुपद्यः संक्रान्तयः। तथाहि विषुवायनयोर्मध्ये द्वे विष्णुपद्याख्यौ संक्रान्ती। तेन मेषारम्भे पूर्वविषुवसंक्रान्तिः। वृषे विष्णुपदीसंक्रान्तिः मिथुनेऽपि विष्णुपदी संक्रान्तिः तस्यांशविशेषे च षडशीतिमुखं तेनेयं संक्रान्तिः षडशीतिमुखेऽतीते जायमानत्वात् षडशीतिरिति च भण्यते। मिथुनान्ते कर्कादौ याम्यायनसंक्रान्तिः सूर्य्यस्य दक्षिणगतेरारम्भात् तस्य दक्षिणायनत्वं तच्च चूडादिषु वर्ज्यतया गौणम्। सिंहे विष्णुपदी। कन्यारम्भे विष्णुपदी प्राग्वत् षडशीतिरिति च कथ्यते। कन्यान्ते तुलादौ अपरविषुवसंक्रान्तिः तुलान्ते वृश्चिकादौ विष्णुपदी, धनुरादौ विष्णुपदी प्राग्वत् षडशीतिरिति च। धनुरन्ते सौम्यायनसंक्रान्तिः सूर्य्यस्योत्तरगत्यारम्भात्। तच्च चूडादौ विहितत्वेन गौणम्। मकरान्ते कुम्भादौ विष्णुपदी, कुम्भान्ते मीनादौ विष्णुपदी षडशीतिरिति च कथ्यते। षडशीतिमुखत्वञ्च षडशीत्यंश मितान्तरकालस्थित्या। तथाहि तुलादितः षडशीतितमोऽंशः धनुषः षड्विंशोऽंशः तत्र प्रथमं तन्मुखम् तत आरभ्य मीनद्वाविंशेऽंशे द्वितीयं, ततोमिथुनस्याष्टादशांशे तृतीयं कन्यायाश्चतुर्दशांशे चतुर्थमिति भेदः। अतश्चराचरद्व्यात्मकराशिषु षडशीतिमुखसद्भावात् तिस्रः षडशीतयः। सुरासुराणां दिनरात्रिविभागकारि अयनन्तु मेषादिमारभ्य कन्यान्तं यावत् सौम्यायनं तुलादिमीनान्तं च याम्यायनमिति भेदः। संक्रान्तिश्च द्विविधा स्थिरा चला च विवृतिरयनसंक्रान्तिशब्दे ३३९ पृ० दृश्या। अयनचलनवत् विषुवविष्णुपद्यादीनां चलनात् कालभेदेन राशिविशेषाद्यंशभेदेनैव तत्तत्संक्रान्तिर्भवति।

इदानीञ्च मीनस्य पश्चात् एकविंशांशे अर्थात् तन्नवमांशे विषुवारम्भः मिथुननवमांशे च अयनारम्भः। इत्येवं सर्वसंक्रान्तीनां तत्तदंशभेदे चलसंक्रान्तिरित्यूह्येयम्।

राशिचक्रस्य ततस्थाश्विन्यादिसप्तविंशतिनक्षत्राणाञ्च एकस्यां रात्रौ दृष्टियोग्यता। तथाहि सूर्य्यस्य यस्मिन् राशौ यदंशादौ उदयः, ततः सप्तमे राशौ तथाविधांशादावस्तमनम्। तेन सूर्य्याक्रान्तांशापेक्षया १८० भचक्रांशाः क्रमेण दिवसे उदिता अपि सूर्य्यकिरणाच्छन्नतया दिवसे न दृष्टियोग्या अस्तमिते तु सूर्य्ये रात्र्यारम्भक्षणे ते सर्वे पूर्वकुजवृत्तात् पश्चिमकुजवृत्तमध्य नतोन्नततया दृश्यन्ते। यथा यदा मेषस्य प्रथमांशे सूर्य्योदयात् दिनारम्भः ततः पूर्वस्या मेषावशिष्टांशाः, वृषादिराशिपञ्चकं १५०अंशात्मकं तुलायाः प्रथमांशाद्यार्द्धं च क्रमेण दिने उद्-

च्छति। ततः रात्र्यारम्भे तुलायाः प्रथमांशद्वितीयार्द्धं, ततो धनुरादिपञ्चकम् १५०अंशात्मकं, मेषस्याद्यांशश्च क्रमेण रात्रौ उद्गच्छति ; अत एकस्यां रात्रौ सर्वराशिचक्रांशदर्शनम्। इयांस्तु विशेषः पूर्वकुजवृत्तात् स्वमस्तकोपरिस्थाकाशभागरूपं खस्वस्तिकं यावत् ९० अंशात्मकं राशित्रयं मध्याह्नकालमध्ये क्रमेणोन्नतं भवति अपराह्णे तु तदेव ९०अंशात्मकं राशित्रयं खस्वस्तिकात् पश्चिमकुजवृत्ताभिमुखं सत् नतं भवति। उन्नतांशानां मध्ये यस्य यस्य स्वापेक्षया पूर्वस्यैकनवतितमांशस्योदयः तस्य तस्य नतिर्भवति। नतांशानाञ्च मध्ये यस्य स्वापेक्षया १८१ पूर्वस्यैकाशीत्युत्तरशततमांशस्योदयः तस्य तस्य पश्चिमकुजवृत्तेनाच्छादनादस्तत्वम् भवति। राशिचक्रवत् तत्स्थानि अश्विन्यादीनि नक्षत्राणि तत्स्था भौमादिग्रहाश्च एकरात्रौ दर्शनयोग्या भवन्ति। अस्तंगतास्तु सूर्य्येण सह दिन एव उदिता अपि सूर्यकिरणाभिभूततेजस्कत्वात् न दृश्यन्ते। कालशब्दे १९९१पृ०दर्शितास्तांशमध्यवर्तिनस्तु सूर्य्यसन्निकर्षविशेषेण मन्दकिरणतया दृश्या अपि न सम्यक् दृश्यन्ते। चन्द्रस्य दर्शने त्वयं विशेषः चन्द्रो हि जलमयः तस्य स्वतोदीप्तिर्नास्ति तस्य दूरस्थतजलमयस्य दृश्ययोग्यत्वात्। सूर्य्यकिरणप्रवेशेनैव दीप्त्या दर्शनयोग्यता तन्मण्डलस्य सूर्य्याधःस्थितत्वेऽपि एकराश्येकांशावस्थितिकालरूपामावास्यान्तकालात् क्रमेण सूर्य्यात् पूर्वगतस्य तिर्य्यग्रूपेण स्थितत्वात् तत्प्रवेशः। तत्रापि ४८० योजनात्मकचन्द्रबिम्बस्य गोलाकृतितया सूर्य्याभिमुखार्द्ध एव सूर्य्यकरप्रवेशः नेतरार्द्धे। तथा च पूर्णिमान्तसमय एव तयोः सम्यक्तिर्य्यग्रूपेण स्थितत्वात्तदानीमेव चन्द्रबिम्बार्द्धे २४० योजनात्मके तत्करसंपूर्णप्रवेशः। पूर्णिमान्तकालश्च सूर्य्याक्रान्तराश्यंशादितः भचक्रस्य १८० अंशस्थे चन्द्रे भवति। स च पञ्चदशतिथिभिर्भवति तथा च यदि १५ दिनैः १८० अंशगत्या करप्रवेशपूर्त्तिकालः तदा एकेन दिनेन क इत्यनुपातेन फलम् १२ अंशाः। यदि १८०अंशगत्या २४०योजनात्मकपूरणं तदा द्वादशांशगत्या किमित्यनुपातेन फलं १६योजनात्मकं चन्द्रबिम्बार्द्धस्य पञ्चदशांशरूपकलापूरणं लभ्यते ततश्च चन्द्रबिम्बार्द्धस्य पूर्वगतौ पञ्चदशांशात्मक १६योजनरूपायाः कलायाः पश्चिमस्य सूर्य्यापेक्षया तिर्य्यक्स्थित्या सूर्य्यकिरणप्रवेशानुकूलतया तत्क्रियात्व मारोप्यते। पञ्चदशकलात्मकचन्द्रमण्डलस्य तु शुक्लप्रतिपद्यपि सूर्य्याक्रान्तांशादितो दिभागाद्यनुकूलक्रियारूपनिःसरणस्य सत्त्वात् न केवलैकादिमात्रकलाक्रिया, तथाङ्गीकारे च केवलायास्तस्या बिम्बं विहाय गत्यसम्भवात् न तन्निःसरणं सम्भवति न वा दृश्यते। दृश्यते च द्वितीयादौ सूर्य्याक्रान्तांशादिभ्योबहुदूरतया चन्द्रबिम्बस्य स्थितिः। किञ्च प्रथमादि दिने प्रथमादिकलामात्रस्य पूर्वतोनिःसरणस्वीकारे चन्द्रबिम्बस्य पूर्वादिकलानामेव दृश्यतापत्तिः। न च तथा दृश्यते प्रत्युत पश्चिमस्थकलानामेव क्रमशः दृष्टिर्जायते। अतः सूर्य्यकिरणप्रवेशयोग्यत्वसम्पादिका तिर्य्यक्स्थित्यनुकूलैव प्रथमादिकलाक्रियेति वस्तुस्थितिः। तत्रामावस्यान्त्यक्षणे सूर्य्याक्रान्तराश्यंशादिसाम्येन तदधःस्थचन्द्रस्य सर्वथाऽदर्शनम् सूर्य्येण सह दिन एव तस्योदयात्। ततः शुक्लप्रतिपदि द्वादशांशान्तरितत्वेन तस्य सूर्य्यात् पूर्व्वगत्या १६ योजनात्मकचन्द्रबिम्बार्द्धकलायाः तिर्य्यक्स्थितत्वेऽपि कालशब्दे १९९० पृ० दर्शितास्तांशमध्यवर्त्तित्वात् अस्तांशमध्यवर्त्ति भौमादीनामिव न दृष्टिः। एवं कृष्णचतुर्द्दश्यामपि द्वादशांशान्तरित्वेन पश्चात्तिर्य्यक्स्थित्यापि न दृष्टियोग्यता। शुक्लद्वितीयायान्तु सूर्य्याक्रान्तराश्यंशात् दिनद्वयेन २४ अंशान्तरितत्वेन पूर्व्वापेक्षया सूर्य्यादधिकतिर्य्यक्स्थित्या २४ योजनात्मकस्य चन्द्रबिम्बार्द्धपञ्चदशांशरूपकलाद्वयस्य सूर्य्यकिरणप्रवेशात् दृष्टियोग्यता। एवं तृतीयादिष्वपि क्रमेण सूर्य्यकिरणप्रवेशाधिक्यात् अंशविशेषे दीप्तिपरिवृद्धिः। शुक्ले पक्षे सूर्य्याक्रान्तराशितः द्वित्रादिराश्यन्तरितत्वेन स्थितस्य दिवोदितस्यापि चन्द्रबिम्बस्य सूर्य्यकिरणविशेषप्रवेशेऽपि सौरालोकेनाभिभूतत्वात् धूम्रतयैव दृष्टियोग्यता। पूर्णिमायान्तु चन्द्रस्य सूर्य्याक्रान्तराशितः १८० भचक्रांशगत्या परमतिर्य्यक्स्थित्या सर्वकलासु २४० योजनात्मिकासु सूर्य्यकिरणप्रवेशः। कृष्णप्रतिपदि तु द्वादशांशान्तरितत्वेन सूर्य्यात् पश्चात् स्थित्या तिर्य्यग्गत्यल्पतया १५ योजनरूपप्रथमकलायां न सूर्य्यकरप्रवेश इत्यतस्तस्य न दर्शनम् तत्र सूर्य्यकराप्रवेशनानुकूलतिर्य्यग्गतिभेद एव कृष्णपक्षीयकलाक्रियेति भेदः। अधिकमिन्दुशब्दे ९३० पृ० उक्तम्।

तिथिकरणयोगनक्षत्रवारेशादिस्वरूपादिकं तत्तच्छब्दे दृश्यमित्यदिक्।

खग्गड पु० खे आकाशे गलति गल–अच् पृषो० लस्य डः। (खागडा) ख्याते तृणभेदे रत्नमा०। [कूर्पकुन्तके हेमच०।

खङ्कर पु० खन्यते खन–क्विप् कीर्य्यते क–अप् कर्म्मधा०।

खच पूतौ उत्पत्तौ च अतिक्रान्तोत्पत्तौ सि०कौ० क्र्या० प०अक०सेट्। खच्ञाति अखचीत्-अखाचीत्। गण-व्यत्यासात् "खचद्भूतावलीढम्" कथास०।

खच बन्धने अद० चुरा० उभ० सक० सेट्। खचयति ते अचखचत् त। "शकुन्तनीडखचितं बिभ्रज्जटामण्डलम्" शकु० "रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः" मेघदू० उद्+खच बन्धने। "अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव" रघुः। "उत्खचिता सह ग्रथिता" मल्लिना०।

खचमस पु० खे आकाशे चम्यतेऽसौ चम-असच्। चन्द्रे त्रिका० "एष सोमोराजा देवानामन्नं देवा एनं भक्षयन्तीति" श्रुतेः स्वर्गवासिभिस्तस्यादनात्तस्य तथात्वम्।

खचर पु० खे आकाशे चरति चर-ट। १मेघे शब्दच०। २वायौ ३सूर्य्ये च। ४राक्षसे पु०स्त्री मेदि०स्त्रियां ङीष्। "खचरस्य सुतस्य सुतः खचरः खचरस्य पिता न सुनः खचरः। खचरस्य सुतेन हतः खचरः खचरी परिरोदिति हा खचर!" इति शब्दकल्पद्रुमे द्रोणपर्व्वीयतया लिखितं तत्तु घटोत्कचवधपर्व्वण्येव सम्भवदपि तत्र न दृश्यते। तस्य श्लोकस्यायमर्थः खचरस्य वायोः सुतस्य भीमस्य सुतः पुत्रः खचरः घटोत्कचः। खचरस्य राक्षसस्य तस्य पिता भीमः न खचरः राक्षसः। खचरः घटोत्कचः खचरस्य सूर्य्यस्य सुतेन कर्णेन हतः। खचरी हिडम्बा तन्माता राक्षसी हा खचरेत्युक्त्वा रोदितीति। ५आकाशगामिमात्रे देवपक्षिशरग्रहादौ त्रि० स्त्रियां ङीप्। "पवमोदिक्पतिर्भूमिराकाशं खचरामराः"। संकल्पादौ पाठ्यमन्त्रः। अत्र खचरशब्देन ग्रहा उच्यन्ते अमरपवनयोः पृथङ्निर्द्देशात्। "खचरनगरकल्पं त्रासयन् पाण्डवानाम्" भा०द्रो०७अ०। "पुरं सुरमणीयञ्च खचरं सुमहाप्रभम्" भा०व० १७२ अ०। खपुरशब्दे विवृतिः। "जितकाशिनश्च खचराश्चारताश्च महारथाः" भा०व०२४२ अ०। खचरा गन्धर्वाः॥ वृ०स० १४ अ० कूर्म्मविभागे उत्तरस्यामुक्ते ६देशभेदे पु०ब०व०। "उत्तरतः कैलासः" इत्युपक्रमे "हेमतालराजन्यखचरगव्याश्च" "खचरो रङ्गताले स्यात् गुरुरादौ लघुस्तथा। शान्तेऽथ वा हास्यरसे भवेदेष दयाचरः" संगीतदा० उक्ते ७गीतभेदे पु०।

खचारिन् त्रि० खे आकाशे चरति-चर-णिनि। १आकाशगामिनि पक्षिसूर्य्यादौ स्त्रियां ङीप्। २कार्त्तिकेये पु० "खचारी ब्रह्मचारी च शूरः शरवणोद्भवः" भा०अ०१२०अ०

खचित त्रि० खच-क्त। १संयुक्ते त्रिका० २व्याप्ते शब्दच०। ३खुरते जटाध०। [णिचि ह्रस्वः खजयति।

खज मन्थे भ्वा०पर०सक०सेट्। खजति अखा(ख)जीत् वटा०

खज पङ्गुतायां भ्वा० इदित् पर० अक० सेट्। खञ्जति अखञ्जीत्। खञ्जः। पङ्गुता चेहैकपादविकलता।

खज पु० खजति मथ्नाति खज-अच्। १मन्थानदण्डे। "पयस्यन्तर्हितं सर्पिर्यद्वन्निर्मथ्यते खजैः। शुक्रं निर्मथ्यते तद्वद्देहसंकल्पजैः खजैः" भा०शा० २१४ अ०। "दध्नः सौम्य! मथ्यमानस्य योऽणिमा स ऊर्द्ध्वः समुदीषति तत्सर्पिर्भवति" छा०उ०। "वायुसहितेन खजेन मथ्यमानस्य दध्नः" भा०शा०। "खजोमन्थानः तेन मथ्यमानस्य दध्नः" आन० (हाता) २दर्व्याम् भरतः ३युद्धे च तत्र शत्रोर्मर्द्दनात् तथात्वं "अलर्षि युध्म खजकृत् पुरन्दर!" ऋ०८।१।७, "खजकृत् युद्धकर्त्तः!" भा० स्वार्थे क। खजक। मन्थानदण्डे हेम०। [ज्वलद०।

खजप न० खज्यते मथ्यते खज-कर्म्मणि कपन्। घृते उ-

खजल न० खे आकाशे सञ्चितं, खात् पतितं वा जलं शाक० त०। १नीहारे त्रिका० २आकाशपतिते जले च "वर्षासु चरन्ति घनैः सहोरगा वियति कीटभूतास्ते। तद्विषजुष्टमपेयं खजलमगस्त्योदयात् पूर्व्वम्" राजवल्लभः।

खजा स्त्री खज-घटा० भावे अ। १मन्थने (मओता) २मारणे हेम०। कर्त्तरि अच् टाप्। चमसाकारे ३पाकसाधनद्रव्ये मेदि०। "खजाश्च दर्व्यः करेण धारयन्" भा० वि० ७अ०।

खजाक पुंस्त्री खज-आकन्। १पक्षिणि उज्ज्वलद० खजा-स्वार्थे क। २चमसाकारे पाकसाधने द्रव्ये स्त्री अमरः।

खजिका स्त्री खजैव स्वार्थे क वा अत इत्त्वम्। खजायां चमसाकारे पाकसाधनभेदे शब्दचि०।

खजित् पु० खेन शून्यभावनया जयति संसारं जि-क्विप्। बुद्धभेदे स हि "सर्व्वं शून्यं शून्यमिति" भावनया जगतां स्थिरत्वनिराकरणेन संसारं जयतीति" तस्य तथात्वं बुद्धशब्दे विवृतिः। [राड नि०।

खज्योतिस् पु० खे आकाशे ज्योतिरस्य। खद्योते कीटभेदे

खञ्ज त्रि० खजि गतिवैकल्ये अच्। (खोंडा) एकपादविकले। तस्य लक्षणादिकं भावप्र० उक्तं यथा "वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद् यदा। खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात्। सक्थ्नः कट्यादि-

गुल्फस्थ, कण्डरां कलायखञ्जम् आक्षिपेत् गमनादौ कम्पयेत् । बधात् गमनादिक्रियाघातात्" । तथाच एकपादविकलत्वे खञ्जः द्विपादविकलत्वे पङ्गुरिति भेदः । तस्यैव भेदः कलायखञ्जः तल्लक्षणं तत्रोक्तं यथा "कम्पते गमनारम्भे खञ्जन्निव च लक्ष्यते । कलायखञ्जं तं विद्यान्मुक्तसन्धिप्रबन्धनम् । गमनारम्भे कम्पते । एतस्य खञ्जादयमेव भेदः कलायखञ्ज इति शास्त्रे रूढा संज्ञा न तु यौगिकी"। तस्य कर्मविशेषविपाकत्वम् शातातपेनोक्तं यथा "हरिणे निहते खञ्जः शृगाले तु विपादकः"। विपादकः पादद्वयगतिशून्यः पङ्गुरित्यर्थः ।"काणं वाप्यथ वा खञ्जमन्यं वापि तथाविधम् । तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम्" मनुः तस्य दैवपैत्रकर्मकरणकालेऽपसार्य्यतामाह" मनुः "खञ्जो वा यदि काणो दातुः प्रेष्योऽपि वा भवेत् । हीनातिरिक्तगात्रो वा तमप्यपनयेत्ततः" जन्मतः खञ्जत्वे सुश्रुतेन कारणमुक्तं यथा "दौहृदविमाननात् कुब्जं कुणिं खञ्जं जडं वामनं विकृताक्षमनक्षं वा नारी सुतं जनयति" । स्वार्थे क खुल् वा । खञ्जक तत्रार्थे हेम० । अस्य कडारादिपाठात् वा पूर्वनिपातः खञ्जवाहुः कलायखञ्ज इत्यादि ।

खञ्जकारि पु० खञ्जकस्यारिः (खेंसारि) धान्यभेदे राजनि० तत्सेवनात् खञ्जत्वं नश्यतीति तस्य तथात्वम् ।

खञ्जखेट पुंस्त्री खञ्ज इव खेटति खिट-गतौ अच् । खञ्जन विहगे शब्दमा० । स्त्रियां जातित्वात् ङीष् ।

खञ्जखेल पुंस्त्री खञ्ज इव खेलति खेल-अच् । खञ्जनखगे स्त्रियां जातित्वात् ङीष् ।

खञ्जन न० खजि—भावे ल्युट् । १विकलगतौ मेदि० कर्त्तरि ल्यु । २खनामख्याते पक्षिभेदे पुंस्त्री० स्त्रियां ङीष् । स्वार्थे क । तत्रार्थे । तस्य दर्शने शुभाशुभफलाद्युक्तं वृ०सं० ४५ अ० यथा "खञ्जनको नामायं यो विहगस्तस्य दर्शने प्रथमे । प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि । स्थूलोऽभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः । आ कण्ठमुखात् कृष्णः सम्पूर्णः पूरयत्याशाम् । कृष्णो गलेऽस्य विन्दुः सितकरटान्तः स रिक्तकृद्रिक्तः । पीतो गोपीत इति क्लेशकरः खञ्जनो दृष्टः । अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु । करितुरगभुजगमूर्ध्नि प्रासादोद्यानहर्म्येषु । गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे । हस्तितुरङ्गमशालाच्छत्रध्वजचामराद्येषु । हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु । दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते । पङ्के स्वाद्वन्नाप्तिर्गोरससम्पच्च गोमयोपगते । शाद्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः । गृहपटलेऽर्थभ्रंशो वध्रे बन्धोऽशुचौ भवति रोगः । पृष्ठे त्वजाविकानां प्रियसङ्गममावहत्याशु । महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्करादिस्थः । प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः । पक्षौ धुन्वन्न शुभः शुभः पिबन् वारि निम्नगासंस्थः । सूर्योदयेऽथो शस्तो नेष्टफलः खञ्जनोऽस्तमये । नीराजने निवृत्ते यया दिशा खञ्जनं नृपो यान्तम् । पश्येत्तया गतस्य क्षिप्रमरातिर्वशमुपैति । तस्मिन्निधिर्भवति मैथुनमेति यस्मिन् यस्मिंस्तु छर्दयति तत्र तलेऽस्ति काचः । अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य तत्कौतुकापनयनाय खनेद्धरित्रीम् । नृतविकलविभिन्नरोगितः स्वतनुसमानफलप्रदः खगः । धनकृदभिनिलीयमानको वियति च बन्धुसमागमप्रदः । नृपतिरपि शुभं शुभप्रदेशे खगमवलोक्य महीतले विदध्यात् । सुरभिकुसुमधूपयुक्तमर्घं शुभमभिनन्दितमेवमेति वृद्धिम् । अशुभमपि विलोक्य खञ्जनं द्विजगुरुसाधुसुरार्चने रतः । न नृपतिरशुभं समाप्नुयान् न यदि दिनानि च सप्त मांसभुक् । आ वर्षात् प्रथमे दर्शने फलं प्रतिदिनं तु दिनशेषे । दिक्स्थानमूर्त्तिलग्नर्क्षशान्तदीप्तादिभिश्चोह्यम्" ति०त० । "कृत्वा नीराजनं राजा बलवृद्ध्यै यथाबलम् । शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ । (तद्दर्शनमन्त्रः)"नीलग्रीव ! शुभग्रीव ! सर्वकामफलप्रद ! । पृथिव्यामवतीर्णोऽसि खञ्जरीट ! नमोऽस्तु ते"। वसन्तराजे"दृष्टोऽदितेऽगस्त्यमुनौ सुदेशे सुचेष्टितं खञ्जनकोविदध्यात्" इत्युपक्रम्य "त्वं योगयुक्तो मुनिपुत्रकस्त्वमदृश्यतामेषि शिखोद्गमेन । सं दृश्यसे प्रावृषि निर्गतायां त्वं खञ्जनाश्चर्य्यमयो नमस्ते" । एतद्वचनात् यदा शिरसि शिखोद्गमस्तदा खञ्जनो न दृश्यते अगस्त्योदयानन्तरं शिखाविगमात् पुनर्दृश्यते । दर्शनफलम् "अब्जेषु गोषु गजवाजिमहोरगेषु । राज्यप्रदः कुशलदः शुचिशाद्वलेषु । भस्मास्थिकेशनखलोमतुषेषु दृष्टो दुःखं ददाति बहुशः खलु खञ्जरीटः" । वर्षकृत्ये "वित्तं ब्रह्मणि कार्यसिद्धिरतुला शक्रे हुताशे भयं, याम्ये त्वग्निभयं सुरद्विषि कलिः लाभः समुद्रालये । वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे ऐशान्यां मरणं ध्रुवं निगदितं दिग्लक्षणं खञ्जने" ।

"अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम्" नैष० "युष्मत्कृते खञ्जनगञ्जनाक्षि ! शिरोमदीयं यदि याति यातु" "एकोहि खञ्जनवरोनलिनीदलस्थः" इति च उद्भटः। ततः शिवादि० अपत्यादौ अण्। खाञ्जन तदपत्यादौ

खञ्जनरत न० खञ्जनस्येव गोप्यं रतम्। यतीनां गोप्ये मैथुने हारा०।

खञ्जना स्त्री खञ्जन इवाचरति खञ्जन+ङ्त्र क्विप्। खञ्जनाकारायां पक्षिपयाम् सर्षप्याम्" मेदि०।

खञ्जनाकृति पुंस्त्री खञ्जनस्येवाकृतिरस्य।१खञ्जनाकारे पक्षिभेदे शब्दच०। ६त०। २खञ्जनस्याकारे स्त्री।

खञ्जनासन न०"खञ्जनासनमाख्यं यत्कृत्वा सुस्थिरोभवेत्। पृष्ठे पादद्वयं कृत्वा हस्तौ भूमौ प्रधापयेत्। भूमौ हस्तद्वयं नाथ ! पातयित्वाऽनिलं पिबेत्। पृष्ठे पादद्वयं बद्ध्वा खञ्जनेन जयी भवेत्" रुद्रयामलोक्ते आसनभेदे।

खञ्जनिका स्त्री खञ्जनस्तदाकारोऽस्त्यस्याः ठन्। खञ्जनाकारे पक्षिभेदे त्रिका०।

खञ्जरीट पुंस्त्री खञ्ज इव ऋच्छति ऋ-गतौ बा० कीटन्। खञ्जनविहगे अमरः स्त्रियां जातित्वात् ङीष्।

खञ्जा स्त्री "शिखिगुणितदशलघुरचितमपगतलघुयुगलमपरमिदमखिलम्। सगुरु शकलयुगलकमपि सुपरिघटितललितपदविततिं भवति शिखा। विनिमयविनिहितशकलयुगलकलितपदविततिविरचितगुणनिचया। श्रुतिसुखकृदियमपि जगति जि जशिर उपगतवति सति भवति खजा। छ०रत्नाकरोक्ते मात्रावृत्तभेदे अस्यार्थः "शिखिभिस्त्रिभिर्गुणिता दश लघवस्तैः त्रिंशल्लघुभिरित्यर्थः। रचितम्। अपगतं लघुयुगलं यस्मात् तत् अष्टाविंशतिलघुकमित्यर्थः एवं आद्यखण्डमित्येवं रूपम् अपरं द्वितीयं शकलमखिलं सम्पूर्णलघुरूपमित्यर्थः। अन्ते गुरुवर्णेन सहितं शकलयुगलं खण्डद्वयं यस्य तथाभूतं शिखा नाम छन्दः। तस्याएवार्द्धविनिमयेन जि जशिरः उपगतवति सति खजा खञ्जा नाम छन्दः।

खञ्जार पु० खजि-आरन् खञ्ज इव ऋच्छति वा ऋ-अच् वा। ऋषिभेदे तस्य गोत्रापत्यम् अश्वादि० फञ्। खाञ्जारायण तद्गोत्रापत्ये पुंस्त्री०। ततः शिवा० अपत्यादौ अण्। खाञ्जार तदपत्यादौ त्रि०।

खञ्जाल पु० खजि-कालन् खञ्ज इवालति अल-अच् वा। ऋषिभेदे ततः गोत्रापत्ये अश्वा० फञ्। खाञ्जालायन तद्गोत्रापत्ये पुंस्त्री०।

खट काङ्क्षायां भ्वा०पर०सक० सेट्। खटति अखाटीत्-अखटीत् चखाट। प्रनिखटति।

खट पु० खट-अच्। १अन्धकूपे, २कफे, ३टङ्के, ४घासभेदे च मेदि०। ५तृणे हेमच०। ६लाङ्गले ७कतृणे इत्यजयपालः।

खटक पु० खट बा० वुन्। १नागवीटे २घटके त्रिका०। ३कुञ्चितपाणौ शब्दमाला०। [शब्दचि०।

खटकामुख पु० खटकस्येवामुखमत्र। शराकर्षणमुद्राभेदे

खटिक पु० खट-अस्त्यस्य ठन्। कुञ्चितपाणौ हेम०।

खटिका स्त्री खट-अच् टाप् संज्ञायां कन् अत इत्त्वम् वा। १लेखनसाधनद्रव्यभेदे (खड़ी) २कर्णच्छिद्रे ३वीरणे (वेणारमूल) विश्वः। "खटिका चिनोति" नैष०। खटिका गुणाश्च भावप्र० उक्ता यथा

"खटिका कठिनी चापि लेखनी च निगद्यते। खटिकादाहजिच्छीता मधुरा विषशोथजित्। लेपादेतद्गुणा प्रोक्ता भक्षिता मृत्तिकासमा। खटी गौरखटी द्वे च गुणैस्तुल्ये प्रकीर्त्तिते"।

खटिनी स्त्री खट-बा० इनि ङीप्। लेखनद्रव्ये (खड़ी)। राजनि०। "न पतति खटिनो ससम्भ्रमा यस्य" इत्युद्भटः।

खटी स्त्री खट-अच् गौरा० ङीष्। (खड़ी) लेखनसाधनद्रव्यभेदे त्रिका०।

खट्ट वृतौ चुरा०उभ०सक० सेट्। खट्टयति-ते अचखट्टत् त।

खट्टन त्रि० खट्ट-कर्मणि ल्युट्। खर्वे (खाट) हेमच० स्वस्येव वस्तुना तस्यावरणात् तथात्वम्।

खट्टा स्त्री खट्ट-कर्मणि अच्। खट्वायां शब्दच०। स्वार्थे क संज्ञायां कन् वा अत इत्त्वम्। तत्रार्थे खट्टाभेदे त्रि० शययाने त्रिका० अभाषितपुंस्कत्वात् वाऽत इत्त्वम् इत्त्वाभावे आत्, ह्रस्वो वा। खट्टका खट्टाकाप्युक्तार्थे। ह्रस्वार्थे कन्। क्षुद्रखट्वायाम्।

खट्टाश पुंस्त्री० खट्टः सन् अश्नुते अश-व्याप्तौ अच्। (खाटाश) इति वनजन्तुभेदे शब्दरत्ना० स्त्रियां ङीष्।

खट्टास पुंस्त्री खट्ट इवासति दीप्यते अस-दीप्तौ अच्। खट्टाशे शब्दरत्ना०।

खट्टि पु० खट्ट-इन्। शवशय्यायाम् त्रिका०।

खट्टिक त्रि० खट्टनमावरणं खट्टः स शिल्पत्वेनास्त्यस्य ठन्। जालादिना पक्षिमारके (पाखिमारा) शाकुनिके शब्दमा०

खट्टेरक त्रि० खट्ट-बा० कर्मणि एरक। खर्वे शब्दमाला।

खट्वा स्त्री खट्यते निद्रालुभिः खट-आकाङ्क्षायाम् क्वन्।

काष्ठनिर्म्मिते शयनसाधने द्रव्यभेदे । तस्या अङ्गादिनिरूपणेन रचनाप्रकारः आकारादिभेदेन नामभेदादिकं च युक्तिकल्पतरौ उक्तं यथा

"अष्टाभिः काष्ठखण्डैश्च खट्वेति प्रतिपद्यते । तिष्ठेत् यदालम्ब्य खट्वा तज्ज्ञेयं चरणाद्वयम् । शिरःस्थं व्युपधानं स्यात् अधःस्थं स्यात् निरूपकम् । आलिङ्गने उभे पार्श्वे प्राह भोजमहीपतिः । आलिङ्गने चतुर्हस्ते व्युपधाननिरूपके । तदर्द्धेन, तदर्द्धेन चत्वारश्चरणा इति । सर्वषोड़शिका खट्वा सर्व्वत्राभयदायिका । आलिङ्गने सार्द्धवेदे व्युपधाननिरूपके । सार्द्धद्वये, च चरणा हस्तैकपरिसम्मिताः । सर्वाष्टादशिका खट्वा सर्व्वकामफलप्रदा । आलिङ्गने पञ्चहस्ते व्युपधाने निरूपके । तदर्द्धेन, तदर्द्धेन चत्वारश्चरणा इति । सर्व्वविंशतिका खट्वा धनधान्यजयप्रदा । आलिङ्गने पञ्चहस्ते व्युपधाने निरूपके । त्रिहस्तसम्मिते पादा हस्तैकपरिसम्मिताः । सर्वैकविंशिका खट्वाप्येवमप्युपजायते । आलिङ्गने सार्द्धपञ्चे व्युपधाने निरूपके । तदर्द्धेन, तदर्द्धेन चत्वारश्चरणा इति । सर्वद्वाविंशिका खट्वा सर्व्वसम्पत्प्रदायिनी । आलिङ्गने च षड़्हस्ते व्युपधाने निरूपके । त्रिहस्तसम्मिते, पादाश्चतारश्चरणा इति । चतुर्विंशतिका खट्वा सर्व्वरोगक्षयङ्करी । आलिङ्गने सप्तहस्ते व्युपधाने निरूपके । त्रिहस्ते, सार्द्धहस्ताश्च चत्वारश्चरणा इति । सर्वषड्विंशिका खट्वा सर्व्वसौभाग्यकारिका । आलिङ्गने सार्द्धसप्ते व्युपधाने निरूपके । सार्द्धत्रिहस्ते, सार्द्धाश्च चत्वारश्चरणा इति । सर्वाष्टाविंशिका खट्वा सर्व्वभोगप्रदायिका । आलिङ्गने चाष्टहस्ते व्युपधाने निरूपके । चतुर्हस्ते, सार्द्धहस्ताश्चत्वारश्चरणा इति । सर्व्वत्रिंशतिका खट्वा सर्व्वकामार्थदायिनी । एवमष्टविधाः खट्वाः समासेनोपदर्शिताः । कादत्रादिदशाजानां नृणां सम्पत्तिदायिकाः । कार्य्याः शिल्पिभिरेतास्तु त्रिविधाकृतिकल्पनाः । सर्वषोड़शिका खट्वा सर्व्वेषामेव युज्यते । अष्टौ खण्डानि यस्याः स्युश्चतुर्हस्तयुतानि च । सोऽसर्व्वमङ्गला नाम खट्वैषा पृथिवीपतेः । इयं यदा सप्तदशा तदा सर्व्वजयाभिधा । यात्रासिद्धिः सर्व्वसिद्धार्थजया चाष्टमङ्गला ॥ एकैकहस्तवृद्ध्या तु भवेम्मासमतःपरम् । जयोऽथ मङ्गलः प्रेयान् चित्रकान्तः परो महान् ॥ एकैकहस्तवृद्ध्या तु सद्मामामिति लक्षणम् । सा तुङ्गा हानितुङ्गा च शिखरी शिवयेक्षणा । एकैकहस्तवृद्ध्या तु टङ्क इत्यभिधीयते । यात्रासिद्धिं समारभ्य येऽमी षोड़श कीर्त्तिताः । आदित्यादिदशाजानामाद्यन्तैकद्वयं क्रमात् । दूरदर्शी दीर्घदर्शी दुर्ल्लङ्घ्योऽथ दुरासदः । यथोत्तरं दशगुणाः पादैकपरिणाहिनः । प्रासादसंज्ञकाः कार्य्या राज्ञा सुखमभीप्सता । चत्वारस्ते च सर्व्वेषां भूपतीनां सुखावहाः" । भोजमते तु "सर्व्वत्रिंशतिकां यावत् आरभ्याभयषोड़शीम् । खट्वानामिति नामानि अष्टौ हस्तद्वयाधिकाः । मङ्गला विजया पुष्टिः क्षमा तुष्टिः सुखासनम् । प्रचण्डा सर्व्वतोभद्रा खट्वानामाष्टकं विदुः" । ज्योतिःपराशरसंहितायां तु "अष्टाभिः काष्ठखण्डैस्तु योऽङ्गपिण्डोऽभिजायते । स चेत् समो भवेत् खट्वा प्रशस्ता स्यादतोऽन्यथा । समे सर्व्वसम्पत्तिर्विषमे विषमास्परम् । तस्मात् खट्वाङ्गपिण्डोयः समः कार्य्यः स सूरिभिः" । तस्या दोषगुणा यथा "खट्वायां यो गुणोदोषोमानस्य परिकीर्त्तितम् । तेनैव खट्वा काष्ठोत्था तथैव गुणभावहेतु । अनेनैव विधानेन कायर्त्रं वस्त्वयिधासमम् । विना नौकासनं कार्य्यं सर्व्वत्रैवासनं गुरु" युक्तिक० । वृहत्संहितायां ७९ अ० तस्याः काष्ठविशेषेण शुभाशुभदायकत्वादिकं नामभेदास्तत्तत्फलञ्चोक्तं यथा

"सर्व्वस्य सर्व्वकालं यस्मादुपयोगमेति शास्त्रविदाम् । राज्ञां विशेषतोऽतः शयनासनलक्षणं वक्ष्ये । असनस्पन्दनचन्दनहरिद्रसुरदारुतिन्दुकीशालाः । काश्मर्य्यञ्जनपद्मकशाका वा शिंशपा च शुभाः ।' अशनिजलानिलहस्तिप्रपातिता मधुविहङ्गकृतनिलयाः । चैत्यश्मशानपथिजोर्द्ध्वशुष्कवल्लीनिबद्धाश्च । कण्टकिनो वा ये स्युर्महानदीसङ्गमोद्भवा ये च । सुरभवनजाश्च न शुभा ये चापरयाम्य दक्पतिताः । प्रतिसिद्धवृक्षनिर्म्मितशयनासनसेवनात् कुलविनाशः । व्याधिभयव्ययकलहा भवन्त्यनर्थाश्च नैकविधाः । पूर्व्वच्छिन्नं यदि वा दारु भवेत्तत्परीक्ष्यमारम्भे । यद्यारोहेत्तस्मिन् कुमारकः पुत्रपशुदं तत् । सितकुसुममत्तवारणदधिक्षतपूर्णकुम्भरत्नानि । मङ्गल्यान्यन्यानि च दृष्ट्वारम्भे शुभं ज्ञेयम् । कर्माङ्गुलं यवाष्टकमुदरासक्तं तुषैः परित्यक्तम् । अङ्गुलशतं नृपाणां महती शय्या जयाय कृता । नवतिः सैव षड्ूना द्वादशहीना त्रिषट्कहीना च । नृपात्मजमन्त्रिबलपतिपुरोधसां स्युर्यथासङ्ख्यम् । अर्द्धमतोऽष्टांशोनं विष्कम्भो विश्व-

कर्म्मणा प्रोक्तः। आयामत्र्यंशसमः पादोच्छ्रायः सकुक्षिशिराः। यः सर्वैः श्रीपर्ण्याः पर्य्यङ्को निर्मितः स धनदाता। असनकृतो रोगहरस्तिन्दुकसारेण वित्तकरः। यः केवलशिंशपया विनिर्मितो बहुविधं स वृद्धिकरः। चन्दनमयो रिपुघ्नो धर्म्मयशोदीर्घजीवितकृत्। यः पद्मकपर्य्यङ्कः स दीर्घमायुः श्रियं श्रुतं वित्तम्। कुरुते, शालेन कृतः कल्याणं शाकरचितश्च। केवलचन्दनरचितं काञ्चनगुप्तं विचित्ररत्नयुतम्। अध्यासनपर्य्यङ्कं विबुधैरपि पूज्यते नृपतिः। अन्येन समायुक्ता न तिन्दुकी शिंशपा च शुभफलदा। न श्रीपर्णी न च देवदारुवृक्षो न चाप्यसनः। शुभदौ तु शाकशालौ परस्परं संयुतौ पृथक् चैव। तद्वत् पृथक् प्रशस्तौ सहितौ च हरिद्रककदम्बौ। सर्वैः स्पन्दनरचितो न शुभः प्राणान् हिनस्ति चाम्रकृतः। असनोऽन्यदारुसहितः क्षिप्रं दोषान् करोति बहून्। आम्रस्पन्दनचन्दनवृक्षाणां स्पन्दनाच्छुभाः पादाः। फलतरुणा शयनासनमिष्टफलं भवति सर्व्वेण। गजदन्तः सर्वेषां प्रोक्ततरूणां प्रशस्यते योगे। कार्य्योऽलङ्कारविधिर्गजदन्तेन प्रशस्तेन। दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम्। अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित्। श्रीवत्सवर्द्धमानच्छत्रध्वजचामरानुरूपेषु। छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि॥ प्रहरणसदृशेषु जयो नन्द्यावर्त्ते प्रनष्टदेशाप्तिः। लोष्टे त्वलब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः। स्त्रीरूपे स्वविनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः। कुम्भेन निधिप्राप्तिर्यात्राविघ्नं च दण्डेन। कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुवशत्वम्। गृध्रोलूकध्वाङ्क्षश्येनाकारेषु जनमरकः। पाशेऽथ वा कबन्धे नृपमृत्युर्जनविपत् स्रुते रक्ते। कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति। शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः। अशुभशुभच्छेदा ये शयनेष्वपि ते तथा फलदाः। ईषायोगे दारु प्रदक्षिणाग्रं प्रशस्तमाचार्य्यैः। अपसव्ये कृदिगग्रे भवति भयं भूतसंजनितम्। एकेनाधोवक्त्रिणा भवति हि पादेन पादवैकल्यम्। द्वाभ्यां न जीर्यतेऽन्नं त्रिचतुर्भिः क्लेशवधबन्धाः। सुषिरेऽथ वा विवर्णे ग्रन्थौ पादस्य शीर्षगे व्याधिः। पादे कुम्भो यश्च ग्रन्थौ तस्मिन्नुदररोगः। कुम्भाधस्ताज्जङ्घा तत्र कृतो जङ्घयोः करोति भयम्। तस्याश्चाधारोऽधः क्षयकृद्द्रव्यस्य तत्र कृतः। खुरदेशे यो ग्रन्थिः खुरिणां पीडाकरः स निर्दिष्टः। ईषाशीर्षण्ययोश्च त्रिभागसंस्थो भवेन्न शुभः। निष्कुटमथ कोलाक्षं सूकरनयनं च वत्सनाभं च। कालकमन्यद्धुन्धुकमिति कथितश्छिद्रसङ्क्षेपः। घटवत् सुषिरं मध्ये सङ्कटमास्ये च निष्कुटं छिद्रम्। निष्पावमाषमात्रं नीलं छिद्रं च कोलाक्षम्। शूकरनयनं विषमं विवर्णमध्यर्धपर्वदीर्घं च। वामावर्त्तं भिन्नं पर्वमितं वत्सनाभाख्यम्। कालकसंज्ञं कृष्णं धुन्धुकमिति यच्च वेहनिर्भिन्नम्। दारुसवर्णं छिद्रं न तथा पापं समुद्दिष्टम्। निष्कुटसंज्ञे द्रव्यक्षयस्तु कोलेक्षणे कुलध्वंसः। शस्त्रभयं शूकरके रोगभयं वत्सनाभाख्ये। कालकधुन्धुकसंज्ञं कीटैर्विद्धं च न शुभदं छिद्रम्। सर्वं ग्रन्थिप्रचुरं सर्वत्र न शोभनं दारु। एकद्रुमेण धन्यं वृक्षद्वयनिर्मितं च धन्यतरम्। त्रिभिरात्मजवृद्धिकरं चतुर्भिरर्थो यशश्चाग्र्यम्। पञ्चवनस्पतिरचिते पञ्चत्वं याति तत्र यः शेते। षट्सप्ताष्टतरूणां काष्ठैर्घटिते कुलविनाशः" बृ॰सं॰।

सुश्रुतोक्तेषु चतुर्दशसु व्रणबन्धविशेषेषु खट्वाकारे २बन्धभेदे "तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डलस्थगिकायमकखट्वाचीनविबन्धवितानगोफणाः पञ्चाङ्गी चेति चतुर्दश बन्धविशेषाः। तेषां नामभिरेवाकृतयः प्रायेण व्याख्याताः" तस्य बन्धस्योपयोगस्तत्रैवोक्तो यथा "हनुशङ्खगण्डेषु खट्वाम्"

खट्वाका खट्वा—स्वार्थे क "आदाचार्य्याणाम्" पा॰ वा आत इत्। खट्वायाम्। अल्पार्थे कन्। २स्वल्पखट्वायाम्। इत्त्वाभावे वा ह्रस्वः पक्षेऽतद्रूपम्। खट्वका खट्विकाप्यत्र।

खट्वाङ्ग न॰ ६त॰। (खाटेरखुर) १खट्वाशभेदे तदाकारे २शिवस्यास्त्रभेदे। "खट्वाङ्गवरधारकः" शिवस्तवः। "खट्वाङ्गैः पट्टिशैः शूलैर्लाङ्गलैर्मुशलैरलम्" काशीख॰ ३सूर्य्यवंश्ये नृपभेदे पु॰। "सुतः पञ्चजनादासीदंशुमानिति विश्रुतः। दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः" हरिवं॰ १५अ॰। भागवते तु ९।९।२९ श्लो॰ "ततो दशरथस्तस्मात् पुत्र ऐडविडिस्ततः। राजा विश्वसहो यस्य खट्वाङ्गश्चक्रवर्त्त्यभूत्" इत्यनेन अन्यपुत्रता तस्याभिहिता कल्पभेदादविरोधः। प्रायश्चित्तीयधार्य्ये खट्वाङ्गाकृतौ ४पात्रभेदे न॰ "एककालं तु भुञ्जीत चरन् भैक्ष्यं स्वकर्मकृत्। कपालपाणिः खट्वाङ्गी ब्रह्मचारी सदोद्यतः" भा॰ शा॰ ३५ अ॰। "खट्वाङ्गी चीरवासाश्च" मनुः।

खट्वाङ्गधर पु॰ खट्वाङ्गं धरति धृ—अच्। शिवे। भृ—क्विप्। खट्वाङ्गभृदप्यत्रार्थे। १खट्वाङ्गधारिणि त्रि॰।

खट्टाङ्गमुद्रा स्त्री तन्त्रोक्ते मुद्राभेदे तल्लक्षणं यथा "पञ्चाङ्गुल्योदक्षिणस्य मिलिताद्यूर्द्धमुन्नताः। खट्टाङ्गमुद्रा-विख्याता देवस्य सुप्रिया मता" रुद्रया० ।

खट्टाङ्गवन न० नित्यक० । वनभेदे "अहं हि खट्टाङ्गवने नारदेन समागतः" हरिवं० ७९ अ० ।

खट्टारूढ़ त्रि० खट्टा+आरूढ़ अलौकिकविग्रहे द्वितीयान्तस्य-क्तान्तेन नित्यसमासः निन्दायाम् । जाल्मे सि०कौ० । प्रष्टद्वादि० अन्तोदात्तताऽस्य । "इतस्त्वं पात्रेसमितैः खट्टा-रूढः प्रमादवान्" भट्टिः । "खट्टारूढः उत्पथप्रस्थितः" जयमङ्गला । तेन २तदर्थे च ।

खड मन्थने भञ्जने च भ्वा०आत्म० इदित् सक० सेट्। खण्डते अखण्डिष्ट। चखण्डे खण्डनं खण्डः खण्डितः।

खड भेदने चुरा०उभ०सक० सेट् । खाडयति-त अचीखडत् त खाडयाम् बभूव आस चकार चक्रे । खण्डयन् ।

खड न० खड अच् । १तृणभेदे (खड) २पानकभेदे, पु० मेदि० तच्च पानकं वैद्यके प्रसिद्धम् तत्करणप्रकारः वैद्याज्ज्ञेयः यथाह सुश्रुतः "खडाः खडयवाग्वश्च खाडवाः पानकानि च । एवमादीनि चान्यानि क्रियन्ते वैद्यवाक्यतः" स च भोजनकाले प्रस्तरमाले पेयो यथोक्तं सुश्रुते "सूक्तानि च खडांश्चैव सर्वशैलेषु दापयेत्" । खड+ चातुरर्थ्यामनद्यामपि मतुप् मस्य वः । खडवत् खडस-न्निकृष्टदेशादौ त्रि० स्त्रियां ङीप् । ३ऋषिभेदे पु० तस्य गोत्रापत्यम् अश्वा० फञ् । खाडायन तद्गोत्रापत्ये पुंस्त्री० ।

खडक न० खड+संज्ञायां कन् । स्थाणौ "स्थाणुः खडक-मुच्यते" कात्या०श्रौ० १४।२।१२ सू० व्याख्यायां कर्कः ।

खडक्की स्त्री खडक् इत्यव्यक्तशब्दं करोति कृ-बा०ड गौ० ङीष् । पक्षद्वारे (खिड्कि) । स्वार्थे क ह्रस्वः । खड-क्किका तत्रार्थे हारा० ।

खडतु पु० खड+अतु । बाहुजङ्घातरणे संक्षिप्तसारः ।

खडयवागू स्त्री खडपक्वा यवागूः । पानकभेदे खडशब्दे विवृतिः "खडयूषयवागूषु पिप्पल्याद्येव योजयेत्" सुश्रुतः

खडयूष पु० "तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः। सुपक्वं खडयूषोऽयमयं चाम्बलिकोऽपरः" चक्रदत्तोक्ते पक्वतक्रभेदे ।

खड़िक त्रि० खडमस्त्यस्य ठन्। खडयुते । ततः सुतङ्गमा० चतुरर्थ्याम् इञ् । खाड़िकि तत्सन्निकृष्टदेशादौ त्रि० ।

खडी स्त्री खड-अच् गौ० ङीष् । खटिकायाम् शब्दच० । स्वार्थे क ह्रस्वः। खडिका तत्रार्थे ।

खडु स्त्री खड-कु- । मृतशय्यायां संक्षिप्तसारः ।

खडूर त्रि० खडमस्त्यस्य बा० ऊरच् । खडयुक्ते । "खडूरे अविचङ्क्रमां खर्विकां खर्ववासिनीम्" अथर्व० ११।९।१६ । ततः शुभ्रा० अपत्ये ढक् । खाडूरेय तदपत्ये पुंस्त्री०

खडोन्मत्ता स्त्री खडेन उन्मत्ता । खडभक्षणेनोन्मत्तायाम् । ततः शुभ्रा० अपत्ये ढक् । खाडोन्मत्तेय तदपत्ये पुंस्त्री० ।

खड्ग खड-भेदने गन् । असिशब्दे ५५१ पृ० दर्शितलक्षणके लौहादिमये १प्रहरणास्त्रभेदे । "न हि खड्गो विजानाति-कर्मकारं स्वकारणम्" उद्भटः (खाग्) इति ख्याते २पदार्थे ३गण्डकशृङ्गे ४गण्डके (गाण्डार) पुंस्त्री० । ५बुद्धभेदे पु० मेदि० ६चोरनामगन्धद्रव्ये पु० राजनि० । खड्ग-स्योत्पत्तिः शब्दकल्पद्रुमे ब्रह्मयज्ञाग्नित उक्ता तत्-प्रमाणस्य मूलन्तग्यम् । तस्य चालने गतिभेदस्त्रयोदशविधः महाभारते उक्तो यथा "मण्डलाकारतः खड्गभ्रामणं भ्रान्त १मुच्यते । तदेव बाहुमुद्यम्य क्षतमुद्भ्रान्त २मीरि-तम् । भ्रामणं स्वस्य परितः खड्गस्याविद्ध ३मुच्यते । परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम् । शत्रोराक्रमणा-र्थाय गमनन्त्वाप्लुतं ४मतम् । खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं ५मतम् । वञ्चयित्वा रिपौ शस्त्रपातनं गदितं सृतम्६ । परिवृत्तं ७भवेच्छत्रोर्वामदक्षिणतो गतिः । पश्चात् यदापसरणं निवृत्तं ८सम्प्रचक्षते । अन्योन्य ताड़नं प्राहुः सम्पात९मुभयोरपि । आधिक्यमात्मनो यत् तत्समुदीर्ण१०मुदीरितम् । अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं ११स्मृतम् । विचित्रखड्गसञ्चारदर्शनं कौशिकं१२ स्मृतम् । निलीय चर्मनिक्षेपो यदसेः सात्त्वतं १३हि तत्" वह्निपुराणे खड्गचर्मयुद्धे द्वात्रिंशत्स्थानान्युक्तानि यथा "भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम् । सम्पातं समुदीर्णञ्च श्येनपात-मथाकुलम् । उद्धूतमवधूतञ्च सव्यं दक्षिणमेव च । अनालक्षितविस्फोटौ करालेन्द्रमहा-सखौ । विकरालनिपातौ च विभीषणभयानकौ । समग्रार्द्धतृतीयांशपादपादार्द्धवारिजम् । प्रत्यालीढमथा-लीढं वराहललितं तथा । इति द्वात्रिंशतो ज्ञेयाः खड्गचर्मविधौ रणे" । गण्डकरूपखड्गस्य पञ्चनखत्वेऽपि भक्ष्यतामाह मनुः "श्वाविधं शल्यकं गोधां खड्गकूर्मशशां-स्तथा । भक्ष्यान् पञ्चनखेष्वाहुः" । अस्य मांसस्य श्राद्धे प्रशंसामाह" मनुः "कालशाकं महाशल्कः खड्ग-लौहामिषं मधु । आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्वशः" । "प्रायोविषाणपरिमोक्षलघूत्तमाङ्गान् खड्गां-

चकार नृपतिर्निशितैः क्षुरप्रैः" रघुवंशमहाकाव्य।

खड्गिधेनु स्त्री खड्गिनी धेनुः जातित्वात् युवतिपोटेत्यादि कर्म० पूर्वनिपातः पुंवच्च। गण्डकजातिधेन्वाम्। "खड्गिधेनुकानां त्रासपरिभ्रष्टपोतान्वेषिणीनाम्" काद०।

खड्गिन् पुंस्त्री खड्गः तदाकारं शृङ्गमस्त्यस्य इनि। १गण्डके "एतत् खड्गिकुलक्रीड़ितम्" काद०। स च सुश्रुते आनूपवर्गे कूलचरतयोक्तः यथा "तत्र गजगवयमहिषरुरुचमरसृमर रोहितवराहखड्गिगोकर्णवालपुच्छकोन्द्रन्यङ्कुरण्यगवयप्रभृतयः कूलचराः पशवः"। तन्मांसगुणास्तत्रोक्ता यथा "कफघ्नं खड्गिपिशितं कषायमनिलापहम्। पित्र्यं पवित्रमायुष्यं बद्धमूत्रं विरूक्षणम्। स्त्रियां ङीप् २असिधारके त्रि०। ३मञ्जुघोषे पु० शब्दचि०। ४महादेवे पु० ५अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान्" भा० आनु० १७ शिवसहस्रनामोक्तौ [खड्गाकारपत्रके लताभेदे शब्दच०।

खड्गिमार पु० खड्गिनं मारयति मृ–णिच्–अण् उप०स०।

खड्गीक न० खड्गो तत्कर्मणि कुशलः बा० ईक। दात्रे शब्दरत्ना०। तस्य खड्गकार्यकारित्वात् तथात्वम्।

खण्ड पु० खडि–घञ्। १भेदे "खण्डं खण्डं ययुर्घनाः" देवीमाहात्म्यम्। २विड्लवणे, ३इक्षुविकारभेदे (खाँड) न० राजनि०। खण्डगुणाः इक्षुशब्दे ९१० पृ० उक्ताः। "षष्ठःखण्ड नखण्डखाद्यसहजक्षोदक्षमे" नैष०। कर्मणि घञ्। ६एकदेशे पु०न० अमरः। "ताराधिपखण्डधारी" कुमा० काशीखण्डः केदारखण्ड इत्यादि। ७मणिदोषभेदे मेदि०। कर्मणि वञ्। ८खण्डिते त्रि० "खण्डाशौचिपितृस्तौ" स्मृतिः "न खण्डे खण्डमिष्यते" स्मृतिः ततः पृथ्वा० भावे इमनिच्। खण्डिमन् खण्डभावे पु०। उत्करा० चतुरर्थ्यां छ। खण्डीय खण्डसन्निकृष्टदेशादौ त्रि०।

खण्डक पु० खण्डेन निर्वृत्तादि खण्ड+ऋश्या० क। खण्डनिर्मिते सिताखण्डे शर्कराभेदे राजनि०। खण्डयति खडि–ण्वुल्। २छेदके त्रि०। [त्रिका०।

खण्डकथा स्त्री० खण्डः खण्डिता कथा। स्वल्पकथायाम्

खण्डकर्ण पु० खण्ड इव कर्णः कन्दो यस्य। (शकरकन्द) आलुभेदे। हेमच०।

खण्डकाद्यलौह पु० चक्रदत्तोक्ते खण्डपक्वलौहभेदरूपे औषधभेदे तल्लक्षणं यथा

"शतावरीच्छिन्नरुहावृषमुण्डतिकाबलाः। तालमूली च गायत्री त्रिफलायास्त्वचस्तथा। भार्गी पुष्करमूलञ्च पृथक् पञ्च पलानि च। जलद्रोणे विपक्तव्यमष्टमांशावशेषितम्। दिव्यौषधहतस्यापि माक्षिकेन हतस्य वा। पलद्वादशकं देयं रुक्मलौहस्य चूर्णितम्। खण्डतुल्यं घृतं देयं पलषोड़शिकं बुधैः। पचेत् ताम्रमये पात्रे गुड़पाको यथामतम्। प्रस्थार्द्धं मधुनो देयं शुभाश्मजतुकं त्वचम्। शृङ्गी विड़ङ्गं कृष्णा च शुण्ठ्याजाजीपलं पलम्। त्रिफला धान्यकं पत्रं द्व्यक्षं मरिचकेशरम्। चूर्णं दत्त्वा सुमथितं स्निग्धे भाण्डे निधापयेत्। यथाकालं प्रयुञ्जीत विड़ालपदकं ततः। गव्यक्षीरानुपानञ्च सेव्यं मांसरसं पयः। गुरुवृष्यानुपानानि स्निग्धं मांसादिबृंहणम्। रक्तपित्तं क्षयं कासं पक्तिशूल विशेषतः। वातरक्तं प्रमेहञ्च शीतपित्तं वमिं क्लमम्। श्वयथुं पाण्डुरोगञ्च कुष्ठं प्लीहोदरन्तथा। आनाहं रक्तसंस्रावं चाम्लपित्तं निहन्ति च। चाक्षुष्यं बृंहणं वृष्यं माङ्गल्यं प्रीतिवर्द्धनम्। आरोग्यपुत्रदं श्रेष्ठं कामाग्निबलवर्द्धनम्। श्रीकरं लाघवकरं खण्डकाद्यं प्रकीर्त्तितम्। छागं पारावतं मांसं तित्तिरिः क्रकराः शशाः। कुरङ्गाः कृष्णसाराश्च तेषां मांसानि योजयेत्। नारिकेलपयःपानं सुनिषण्णकवास्तुकम्। शुष्कमूलकजीराख्यं पटोलं बृहतीफलम्। फलं वार्त्ताकुपक्वाम्रं खर्ज्जूरं स्वादु दाड़िमम्। ककारपूर्वकं यच्च मांसञ्चानूपसम्भवम्। वर्जनीयं विशेषेण खण्डकाद्यं प्रकुर्वता। लौहान्तरवदत्रापि पुटनादिक्रियेष्यते"। [आलुभेदे शब्दच०।

खण्डकालु पु० खण्ड इव कायति कै–क कर्म०। (शकरकन्द)

खण्डकाव्य न० "खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च" सा०द० उक्ते काव्यभेदे तच्च महाकाव्यस्य अष्टाधिकसर्गतया ततो न्यूनसर्गात्मकं यथा मेघदूतादि'।

खण्डकुष्माण्डक पु० खण्डेन पक्वं कुष्माण्डमत्र कप्। कुष्माण्डरसायनशब्दे १०५ पृ० चक्रदत्तोक्तलक्षणे औषधभेदे।

खण्डखर्ज्जूर न० खण्डेन पक्वं खर्जूरम्। खण्डपक्वे १खर्जूरफले। खण्ड इव स्वादु खर्जूरम्। २स्वादुखर्जूरे च

खण्डज पु० खण्ड इव जायते जन-ड। यवासशर्करायां गुड़भेदे राजनि०।

खण्डजोद्भवज पु० खण्डज उद्भवोऽस्य तस्मात् जायते जन-ड। यवासशर्करारचिते खण्डभेदे राजनि०

खण्डताल पु० "द्रुतमेकं भवेद्यत्र खण्डतालः स उच्यते

अपरं नियतं विना" इत्युक्तलक्षणे एकतालरूपे संगीतो तालभेदे (एकताला) संगीतदामो०।

खण्डधारा स्त्री खण्डे एकदेशे धारा यस्याः। कर्त्तर्य्याम् (कातारी) अस्त्रभेदे शब्दमाला।

खण्डन न० खडि–भावे ल्युट्। १भेदने, २छेदने, ३निराकरणे च। "अरसत्वं रसखण्डनवर्जितम्" "दर्शनेनकृतखण्डनव्यथम्" रघुः। भावे युच्। तत्रार्थे स्त्री शब्दार्थानिर्वचनखण्डनया नयन्तः" श्रीहर्षखण्डनम्। खडि-करणे ल्यु। परमतादिनिराकरणे ५शास्त्रभेदे यथा श्रीहर्षखण्डनं शिरोमणिपदार्थखण्डनम्।"पदः खण्डनखण्डखाद्यसंहजन्योदयमें" नैष०। कर्त्तरि ल्यु। ६खण्डके त्रि० "स्मरगरलखण्डनम् मम शिरसिमण्डनम्" गीतगो०

खण्डनखण्डखाद्य न० खण्डनं पदार्थस्य निर्वचनीयतानिराकरणं खाद्यम् खण्ड इव। श्रीहर्षप्रणीते सर्वपदार्थानाम् निर्वचनीयताप्रतिपादके चतुःपरिच्छेदात्मके ग्रन्थभेदे तत्र प्रथमपरिच्छेदे प्रमाणतदाभास निर्वचनखण्डनम्। द्वितीये हेत्वाभासनिग्रहस्थाननिर्वचनखण्डनम्। तृतीये सर्वनामार्थनिर्वचनखण्डनम्। चतुर्थे भावाभावविशेषसत्तादिपदार्थानां निर्वचनखण्डनम्

खण्डपरशु पु० खण्डयतीति खण्डः परशुरस्य। १शिवे ततोलब्धतत्परशुके २जामदग्न्ये च मेदि०। "येनैव खण्डपरशुर्भगवान् प्रचण्डः खण्डीपतिस्त्रिभुवनेषु गुरुः, प्रकृष्टः" वीरच० ३विष्णौ "इधन्वा खण्डपरशुः" विष्णुस०। "शत्रूणां खण्डनात्खण्डः परशुरस्य जामदग्न्याकृतेरिति" भा०

खण्डपाल पु० खण्डं पालयति खण्डित्वसाधनतया पालि-ण्वुल्। गुडविकारनिर्मातरि शिल्पिभेदे (मयरा)

खण्डप्रलय पु० खण्डस्य भूम्यादिखण्डस्य प्रलयः। चतुर्युगसहस्ररूपब्राह्मदिनावसाने भूम्यादिखण्ड लयाधारे कालभेदे "हृद्भिर्विभेदिक्षि भुवः समन्तात् स्वाद्योजनं भूभवभूतपूर्वैः। ब्राह्मे लये योजनमात्रवृद्धेर्नाशो भुवः प्राकृतिकेऽखिलायाः" सि०शि०। "अत्र लयो नाम भूतविनाशः। प्रत्यहस्तत्पद्यते। स दैनंदिन उच्यते। यो ब्रह्मदिनान्ते चतुर्युगसहस्रावसाने लोकत्रयस्य संहारः स ब्राह्मलय उच्यते। तत्राक्षीणपुण्यपापा एव लोकाः कालवशेन ब्रह्मशरीरं प्रविशन्ति। तत्र मुखं ब्राह्मणाः, बाह्वन्तरं क्षत्रियाः, ऊरुद्वयं वैश्याः, पादद्वयं शूद्राः। ततो निशावसाने पुनर्ब्रह्मणः सृष्टिं चिन्तयतो मुखादिस्थानेभ्यः कर्मपुटान्तरत्वाद्ब्राह्मणादयस्तत एव निःसरन्ति। तस्मिन् प्रलये भुवो योजनमात्रवृद्धेर्विलयो नाखिलायाः" प्रमि०।

खण्डप्रलयप्रकारश्च हरिवं० १८८। १८९अ० उक्तो यथा "द्व्यं द्वादशसाहस्रं यदेतद्युगमुच्यते। तदेकसप्ततिगुणं मन्वन्तरमिहोच्यते। एतद्युगसहस्रान्तं ब्राह्ममिहोच्यते। ततोऽहनि गते तस्मिन् सर्वेषामेव देहिनाम्। शरीरनिर्हृतिस्त्वर्थं रुद्रः संहारबुद्धिमान्। देवतानाञ्च सर्वेषां ब्राह्मणानां महीपते!। दैत्यानां दानवानाञ्च यक्षकिन्नररक्षसाम्। देवर्षीणां ब्रह्मर्षीणां तथा राजर्षीणामपि। गन्धर्वाणामप्सरसां भुजगानां तथैव च। पर्वतानां नदीनाञ्च पशूनाञ्चैव भारत!। तिर्य्यग्योनिगतानाञ्च सत्त्वानां क्रिमीणां तथा। महाभूतपतिर्द्देवः पञ्च भूतानि भूतकृत्। जगत्संहरणार्थाय कुरुते वैशसं महत्। भूत्वा सूर्य्यश्चक्षुषी चाददाति भूत्वा वायुः संहरन् प्राणिजालम्। भूत्वा वह्निर्निर्दहन् सर्वलोकान् मेघो भूत्वा भूय एवाभ्यवर्षत् १८८अ०। वैशम्पायन उवाच। भूत्वा नारायणो योगी सप्तमूर्त्तिर्विभावसुः। गभस्तिभिः प्रदीप्ताभिः संशोषयति सागरान्। पीत्वार्णवांश्च वै सर्वान् नदीः कूपांश्च सर्वशः। पर्वतानाञ्च सलिलं सर्वमादाय रश्मिभिः। भित्त्वा सहस्रशश्चैव महीं गत्वा रसातलम्। रसातलगतं कृत्स्नं पिबते रसमुत्तमम्। अपश्च सृजन् क्लेदमन्यद्ददाति प्राणिनां ध्रुवम्। तत् सर्वमरविन्दाक्ष आदत्ते पुरुषोत्तमः!। वायुश्च बलवान् भूत्वा स विधूयाखिलं जगत्। प्राणोदयं सुराणाञ्च वायुना कुरुते हरिः। ततो देवगणानाञ्च सर्वेषामेव देहिनाम्। ये चेन्द्रियगणाः सर्वे ये चान्ये भूतसम्भवाः। तथा घ्राणं शरीरञ्च पृथिवीमाश्रिता गुणाः। जिह्वा रसश्च स्नेहश्च संश्रिताः सलिलं गुणाः। रूपं चक्षुर्विपाकश्च ज्योतिरेवाश्रिता गुणाः। स्पर्शः प्राणश्च चेष्टा च पवनं संश्रिता गुणाः। परमेष्ठिनमेते वै सूक्ष्मीकेशं समाश्रिताः। ततो भगवता तत्र रश्मिभिः परिवारिताः। वायुना क्षुभ्यमाणाश्च रूपान्योऽन्यसमाश्रयात्। तेषां सङ्घर्षजाज्जातः पावकः शतधा ज्वलन्। अदहत्त्रिखिलान् लोकांस्तपः संवर्त्तकोऽनलः। स पर्वतान् द्रुमान् गुल्मान् लतावल्लीस्तृणानि च। विमानानि च दिव्यानि पुराणि विविधानि च। आश्रमांश्च तथा पुण्यान् दिव्यान्यायतनानि च। यानि चाश्रयणीयानि

तानि सर्वाणि चादहत्। भस्मीभूतांस्ततः सर्वान् लोकान् लोकगुरुर्हरिः। भूयो निर्वापयामास जलयुक्तेन कर्मणा। सहस्रदृङ्महातेजा भूत्वा कृष्णो महाघनः। दिव्यतोयेन हविषा तर्पयामास मेदिनीम्। ततः क्षीरनिकाशेन स्वादुना परमाम्भसा। शिवेन पुण्येन मही निर्वाणमगमत् परम्। तेन सा जलसञ्छन्ना पयसा सर्वतो धरा। एकार्णवजला भूत्वा सर्वसत्त्वविवर्जिता। महाभूतान्यपि च तं प्रविष्टान्यमितौजसम्। नष्टार्कपवनाकाशे सूक्ष्मे जगति वर्जिते। संशोषयित्वा पीत्वा च कल्पयित्वा च देहिनम्। दग्ध्वा सन्तापयित्वा च सत्त्वेषः सनातनः। पौराणं रूपमास्थाय किमप्यमितबुद्धिमान्। एकार्णवजलावासी योगी योगमुदासते। अयुतानां सहस्राणि शतान्येकार्णवाम्भसि"।

खण्डफण पु॰ खण्डा खण्डिता फणाऽस्य। दर्वीकरस्पसर्पभेदे "तत्र दर्वीकराः" इत्युपक्रमे "गवेधुकः परिसर्पः खण्डफण" इत्यादि सुश्रुतः।

खण्डमोदक पु॰ खण्ड इव मोदयति मुद–णिच्–ण्वुल्। सिताखण्डे यवासशर्करायाम्"राजनि॰। [कृष्टदेशादौ।

खण्डर त्रि॰ खण्ड+चतुरर्थ्याम् अश्मादि॰ र। खण्डसन्नि-

खण्डल पुंन॰ खण्डं लाति ला–क अर्द्धर्चादि। खण्डधरे।

खण्डलवण न॰ खण्ड्यते खडि–कर्मणि घञ् कर्मधा॰। विड्लवणे राजनि॰।

खण्डशर्करा स्त्री खण्ड इव शर्करा। शर्कराभेदे। "यो यो मत्स्यण्डिकाखण्डशर्कराणां स्मृतो गुणः। तेन तेनैव निर्द्दिश्यस्तेषां विस्रावणो गुणः" सुश्रुते तद्गुणोक्तिः।

खण्डशाखा स्त्री खण्डा खण्डिता शाखाऽस्याः। कहिषवल्लीलताभेदे राजनि॰। [सिताखण्डे राजनि॰।

खण्डसर पु॰ खण्ड इव सरति सृ–अच्। यवासशर्करायां

खण्डाभ्र न॰ कर्म॰। १छिन्नमेघे। खण्डः अभ्रमिव। २दन्तक्षतविशेषे च मेदि॰।

खण्डामलक न॰ खण्डं खण्डितमामलकम्। १आमलकचूर्णे मेदि॰। खण्डपक्वमामलकम्। (आमलकीरमोरब्बा) इति ख्याते २खण्डपक्वे आमलकीफले च।

खण्डाली स्त्री खण्डं पद्मादिखण्डमालाति आ+ला-क गौरा॰ ङीष्। १सरस्याम्। खण्डं दन्तनखादिखण्डनमालाति आ+ला–क ङीष्। २कामुकस्त्रियां ३तैलमानभेदे च मेदि॰

खाण्डिक पु॰ खण्ड+अस्त्यर्थे ठन्। १कलाये, २ऋषिभेदे, स च उद्धरिपुत्रः यथाह "खाण्डिक एषौद्धरिरस्य प्रायश्चित्तिं वेद"शत॰ ११।८।४।१। ३कक्षे हेम॰। ४क्रुद्धे त्रि॰। "खण्डिकोपाध्यायः शिष्याय चपेटं ददातीति" पा॰ भाष्यम्। ततः पुरोहिता॰ भावादौ यक्। खाण्डिक्य तद्भावे न॰। खण्डिकानां समूहः खण्डिका॰ अञ्। खाण्डिक तत्समूहे न॰।

खण्डिकादि पा॰ग॰ उक्ते समूहार्थे अञ्प्रत्ययनिमित्ते शब्दसमूहे स च गणः। खण्डिक वडवा क्षुद्रक (मालवात्) सेना (संज्ञायाम्) भिक्षुक शुक उलूक-श्वन् अहन् युगवरत्न हलबन्ध।

खण्डित त्रि॰ खडि–क्त। १भेदिते २छिन्ने, ३द्विधाकृते च "ज्ञातान्यसङ्गविकृतेः खण्डितेर्ष्याकषायिता" इत्युक्तचिह्नायां ४स्त्रियां स्त्री "प्रियमिति वनिता नितान्तमागः स्मरणगतेषकषायितायताक्षी। चरणगतसखीवचोऽनुरोधात् किल कथमप्यनुकूलयाञ्चकार" माघः सा॰द॰ तु "पार्श्वमेति प्रियोयस्याः अन्यसंभोगचिह्नितः। सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता"लक्षयित्वा"तदवितथमवादीर्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यद्दुकूलं दधानः। मदधिवसतिमागाः कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन"माघपद्यमुदाहृतम्। ५खण्डिताङ्गे हीनाङ्गे त्रि॰ खण्डिताङ्गत्वं च दुष्टवचनकर्मविपाकः यथाह शातातपः "दुष्टवादी खण्डितः स्यात् स वै दद्याद्द्विजातये। रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम्"। अत्र खण्डिक इत्येव पाठ इत्यन्ये क्रुद्धप्रकृतेर्दुष्टवचनकर्मविपाकौचित्यात्। तत्र निराकृते छिन्ने च "सपदि तरुणपल्लवेन वध्वा विगतदयं खलु खण्डितेन मम्ले" माघः "खण्डितेन छिन्नेन तरुणपक्षे निराकृतेन" मल्लि॰। ततः चतुरर्थ्यां सुतङ्गमा॰ इञ्। खाण्डिति प्रगद्यादि ञ्य। खाण्डित्य तन्निर्वृत्तादौ त्रि॰।

खण्डिन् त्रि॰ खण्डयति खडि–णिनि। १खण्डके खण्डोऽस्त्यस्य इनि। २खण्डवति स्त्रियां ङीप सा च ३पृथिव्यां शब्दमा॰ तस्याः नवखण्डवत्त्वात् तथात्वम्।

खण्डी स्त्री खडि–अच् गौरा॰ ङीष्। वनमुद्गे हेम॰। [हेम॰।

खण्डीर पु॰ अपकृष्टा खण्डी शुण्डादित्वात् र। पीतमुद्गे।

खण्डु त्रि॰ खण्डयति खडि–उन्। खण्डके ततः वराह॰ चतुरर्थ्याम् वुञ्। खाण्डवक तन्निर्वृत्तादौ त्रि॰।

खतमाल पु॰ खे तमाल इव। १धूमे, २मेघे च मेदि॰।

खद स्थैर्य्ये अक॰वधे सक॰भ्वा॰पर॰सेट्। खदति अखादीत्-

अखदीत् चखाद । प्रनिखदति । "तथाखदन्निःसरण-यत्नवति तथा निसरति" शत०ब्रा० १।७।४।१० अल्पतर-त्वादस्थिरमगाढबलम्" भाष्यम् ।

खद पु० खद-बा० भावे अप् । १स्थिरत्वे । तस्मै हितमादि गवादि० यत् । खद्य स्थिरत्वहिते त्रि० । खद्यपत्नी ।

खदिका स्त्री खे आकाशे दीयते दो-खण्डने घञर्थे क टाप् ततः संज्ञायां कन् । लाजेषु त्रिका० तेषां भर्ज्ज-नपात्रात् ऊर्द्ध्वाकाशे एव स्फोटनात् तथात्वम् ।

खदिर पु० खद-किरच् । (खएर) ख्याते १वृक्षभेदे तस्य सारे स्थिरत्वात्तथात्वम् । २इन्द्रे त्रिका० शत्रुहिंसकत्वात् तथात्वम् । खे आकाशे दीर्य्यते इष्टापूर्त्तकारिभिर्यतः ट-अपादाने किरच् । ३चन्द्रे मेदि० । इष्टापूर्त्तकारि-भिर्हि चन्द्रमण्डलात् आरब्धाब्भ्रदेहविदारेणाकाशे पतनात् तस्य तथात्वं अवरोहशब्दे ४४० पृ० विवृतिः खदिरवृक्षभेदपर्य्यायगुणा भावप्र० उक्ता यथा

"खदिरो रक्तसारश्च गायत्री दन्तधावनः । कण्टकी बालपत्रश्च बहुशल्यश्च यज्ञियः । खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् । तिक्तः कषायो मेदोघ्नः कृमि-मेहज्वरव्रणान् । श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत् । खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः । कदरो विशदो वर्ण्यो मुखरोगकफास्रजित् । इरिमेदो विट्खदिरः कालस्कन्धोऽरिमेदनः । इरिमेदः कषायोष्णो मुखदन्तगदास्रजित् । हन्ति कण्डूविषश्लेष्मकृमिकुष्ठ विषव्रणान्" खदिररसादिविधानं सुश्रुते उक्तं यथा "अतः खदिरविधानमुपदेक्ष्यामः । प्रशस्तदेशजातमनुपहत मध्यमवयसं खदिरं परितः खानयित्वा मध्यममूलं छित्त्वायोमयं कुम्भं तस्मिन्नन्तरे निदध्याद्यथा रस-ग्रहणसमर्थो भवति । ततस्तं गोमयमृदावलिप्तमवकीर्य्य-काष्ठैर्गोमयाग्निभिरादीपयेत् । यथास्य दह्यमानस्य रसो द्रवत्यधस्ताद्यदा जानीयात्पूर्णं भाजनमित्यथैवमुद्धृत्य परिस्राव्य रसमन्यस्मिन् पात्रे निधायानुगुप्तं निदध्यात् ततो यथायोगं मात्रामामलकरसमधुसर्पिर्भिः संसृज्योप युञ्जीत जीर्णे भल्लातकविधानवदाहारः परिहारश्च । प्रस्थे चोपयुक्ते शतं वर्षाणामायुषोऽभिवृद्धिर्भवति ॥ खदिरसारतुलामुदकद्रोणे विपाच्य षोडशांशावशिष्टमव-तार्य्यानुगुप्तं निदध्यात् तमामलकरसमधुसर्पिर्भिः संसृ-ज्योपयुञ्जीत । एष एव सर्वेवृक्षसारेषु कल्पः । खदिर-सारचूर्णतुलां खदिरसारकाथमात्रां वा प्रातः प्रातरुप-सेवेत खदिरसारकाथसिद्धमाक्षिकं वा सर्पिः । अमृत-वल्लीस्वरसं काथं वा प्रातःप्रातरुपसेवेत तत्सिद्धं वा सर्पिः अपराह्णे ससर्पिष्कमोदनमामलकयूषेण भुञ्जी-तैवं मासमुपयुज्य सर्वकुष्ठैर्विमुच्यत" इति ।

"कृष्णतिलभल्लातकतैलामलकरससर्पिषां द्रोणं शालसारा-दिकषायस्य च त्रिफलात्रिकटुकपरूषकफलमज्जविडङ्गफल-सारचित्रकार्कावल्गुजहरिद्राद्वयत्रिवृद्दन्तीन्द्रयववष्टीमधुका-तिविषरसाञ्जनप्रियङ्गूनां पलिकान् भागांस्तानेकध्यं स्नेहपाकविधानेन पचेत् तत्साधुसिद्धमवतार्य्य परिस्रा-व्यानुगुप्तं निदध्यात् तत उपसंस्कृत्य शरीरं प्रातः प्रात-रुत्थाय पाणिशुक्तिमात्रं क्षौद्रेण प्रतिसंसृज्योपयुञ्जीत जीर्णे मुद्गामलकयूषेणालवणेन सर्पिष्मन्तं खदिरोदक सिद्धं स्रुद्दोदनमश्नीयात् खदिरोदकसेवीत्येवं द्रोणमुप-युज्य सर्वकुष्ठैर्विमुक्तः शुद्धतनुः स्मृतिमान् वर्षशतायुर-रोगो भवति" । खदिरवृक्षस्योत्पत्तिः श्रूयते । "प्रजा-पतेः प्राणेषूत्क्रान्तेषु शरीरं श्वयितुमध्रियत" इत्युपक्रम्य "अस्थिभ्य एवास्य खदिरः समभवत् तस्मात् स दारुणो बहुसारोदारुणमिव ह्यस्थि तेनैवेनं तद्रूपेण समर्द्धयति अन्तरे वैल्वा भवन्ति बाह्ये खादिरा अन्तरे हि मज्जानो बाह्यान्यस्थीनि" शत०ब्रा० १३।४।४।६ "विना खदिर-सारेण हारेण हरिणीदृशाम् । नाधरे जायते रागो-नानुरागः पयोधरे" उद्भटः । खदिरस्य विकारः अण् । खादिर खदिरवृक्षजाते त्रि० । "खादिरे पशुं बध्नीत खादिरं वीर्य्यकामस्य यूपं कुर्वीत" श्रुतिः । स्त्रियां ङीप् । "अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः । उडुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात्" याज्ञ० उक्तेः तस्य सूर्यग्रहसमित्त्वम् । "अभावे खदिरविल्वरौहितकान्" "खदिराभावे सोमद्रुतरान्" । कात्या० ६।१।८।१० पलाशाभावे खदिरादीन् यूपान् कुर्वीत सोमयागे खदिर एव मुख्यः । तदभावे विल्वादि इति भेदः । ४ऋषि-भेदे च तस्य गोत्रापत्यम् अश्वादि० फञ् । खादि-रायण तद्गोत्रापत्ये पुंस्त्री० । ततः ऋश्यादि० चतु-रर्थ्यां क । खदिरक तत्सन्निकृष्टादौ त्रि० । खदिरोविद्यते-ऽस्य मतुप् मस्य वः अजिरा० न पूर्वदीर्घः । खदिरवत् खदिरयुते त्रि० स्त्रियां ङीप् खदिरवती नदीभेदे स्त्री "अन्तोऽवत्याः" पा० अस्यान्तोदात्तता । खदिरात् परव-नशब्दस्य असंज्ञायामपि णत्वं खदिरवणम् । खदिरस्य पाकः पील्वा० कुणच् । खदिरकुण तत्पाके पु० । ततः

उत्करादि चतुरर्थ्याम् छ। खदिरीय तत्सन्निकृष्टदेशादौ त्रि०। वराहा० चतुरर्थ्यां कक्। खादिरक तन्निर्वृत्तादौ त्रि०

खदिरपत्त्रिका स्त्री खदिरस्य पत्त्रमिव पत्त्रमस्याः कप् कापि अत इत्त्वम्। १अरिखदिरे २लज्जालुलतायाञ्च राजनि० कवभावे ङीप्। खदिरपत्त्री लज्जालुलतायां स्त्री जटा०। [“विना खदिरसारेण” उद्भटः।

खदिरसार पु० ६त०। खदिरद्रुमस्य निर्यासजे सारे (खएर)

खदिरा स्त्री खदिरः तत्पत्त्राकारोऽस्त्यस्याः पत्त्रे अच्। लज्जालुलतायाम् राजनि०।

खदिरिका स्त्री खदिरः खदिररसस्समरसोऽस्त्यस्याः ठन्। १लाक्षायां तस्या हि खदिरतुल्यनिर्यासवत्त्वात् तथात्वम्। २लज्जालुलतायांञ्च राजनि०।

खदिरी स्त्री खद–किरच् गौरा० ङीष्। लज्जालुलतायाम् शाकभेदे, (हाड़जोड़ा) २लतायाञ्च जटा०। [रत्नमा०।

खदिरोपम न० खदिर उपमा यस्य। (काँटायावला) द्रुमभेदे

खदूरक त्रि० खद–बा० ऊरच् संज्ञायां कन्। ऋषिभेदे। ततः शिवा० अपत्यादौ अण्। खादूरक तदपत्यादौ।

खदूरवासिनी खे आकाशे दूरे वसति वस–णिनि ङीप्। बुद्धशक्तिभेदे त्रिका०।

खद्यपत्त्री स्त्री खदे स्थैर्ये हितं गवा० यत्, खद्यं पत्त्रमस्य गौरा० ङीष्। खदिरे राजवल्लभः।

खद्योत पु० खे द्योतते द्युत–अच्। १कीटभेदे (जोनाकी-पोका) “खद्योतवदभिव्याप्तं तन्मया विस्मयान्वितम्” भा० व० १२२ अ०। “खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम्” मेघदू०। खं द्योतयति द्युत-णिच्–अण् उप०स०। २सूर्य्ये जटाधरः।

खद्योतक पु० खद्योत इव कायति कै–क। १फलविषवृक्षभेदे सुश्रु०। “कुमुद्वतीरेणुकाकरम्भमहाकरम्भकर्कोटकरेणुकखद्योतकचर्म्मरीभगन्धासर्पघातिनन्दनसारपाकानीति द्वादश फलविषाणि”। २सूर्य्ये पु०। [जटा०।

खद्योतन पु० खमाकाशं द्योतयति द्युत–णिच्–ल्यु। सूर्य्ये

खधूप पु० खमाकाशं धूपयति धूप–अण् उप०स०। खे धूप इव वा। आकाशगामिनि अग्निशिखायुक्ते (हाउइ) इति ख्याते पदार्थे “ससृजुः खधूपान्” भट्टिः।

खन विदारे भ्वा०उभ०सक० सेट्। खनति ते–अखानीत्-अखनीत् अखनिष्ट खायात्-खन्यात्। चखान चख्नतुः चख्ने, खातम् खनित्वं खेयम्। खनिता। खनित्वा-खात्वा खानः। खनित्रम्। खनन् खनमानः। खायते खन्यते खनिः खनकः। “इमां खनाम्योषधिम्” ऋ० १०।१४५।१। “अभ्रिरसि नार्य्यसि त्वया वयमग्निं शकेम खनितुम्” यजु० ११। “त्वां गन्धर्वा अखनन्” यजु० १२,९८। “यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति” मनुः। “अगस्त्यः खनमानः खनित्रैः” ऋ० १,१७९६।

अभि+आभिमुख्येन सर्वतश्च खनने। “यो ह्येहाभिखनेदप एवाभिविन्देत्” शत०ब्रा० ११,१,६,१६।

अव+अधःखनने। अवखनति अवखातः।

आ+समन्तात् खनने आखरः आखनः आखुः।

उद्+उत्पाटने “फलैः संवर्द्धयामासुरुत्खातप्रतिरोपिताः” (कलमाः)। “त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः!” “वङ्गानुत्खाय तरसा उत्खातलोकत्रयकण्टकोऽपि” रघुः।

नि+निधाने सक० “निचखान जयस्तम्भम्” वसुधायां निचख्नतुः” “अष्टादशद्वीपनिखातयूपः” रघुः। “विषादशङ्कुश्च मतौ निचख्ने” भट्टिः।

निस्+निर्+निष्क्रामणे “समुद्रान्निरखनं स्तोच्यामिरभ्रिभिः” शत०ब्रा० ७।५।२।५२।

परि+परितः खनने परिखा उत्पाटने च “कण्टकिक्षीरिणस्तु समूलान् परिखायाद् वासयेदपामार्गम्” आश्व०२।७ ५

वि+विशेषेण खनने। “यत्ते भूमिं विखनामि क्षिप्रं तदपि रोहतु” अथ० १२।१।३५।

खनक पु० खन–वुन्। १मूषिके, २सन्धिचौरे च। ३भूविदारके (कोड़ा) त्रि० हेम० “विदुरस्य सुहृत् कश्चित् खनकः कुशलोऽस्म्यहम्” भा०आ० १४७ अ०। ४स्वर्णाद्युत्पत्तिस्थाने आकरे मेदि०। “पुरी समन्ताद्विहिता सपताका सतोरणा। सचक्रा सहुड़ा चैव सयन्त्रखनका तथा” भा०व०१५अ०।

खन(मा)पान अनुवंश्ये क्षत्रियभेदे “खन(मा)पानोऽङ्गदीजस्ते तस्माद्दिविरथस्ततः” भाग० ९।२३।२।

खनयित्री स्त्री खन–णिच्-नि० इडभावः तृच् ङीप्। (खुन्ती) इति ख्याते अस्त्रभेदे सा च जिगीषुणा यात्रायामग्रे चालनीया यथाह नारदपञ्चरात्रे “खनयित्री शुभा यात्रा जयार्थं युद्धकाङ्क्षिभिः। पञ्चवर्णांशुकयुता चालनीया पुरःस्थिता”

खनित्र न० खन-इत्र। (खोन्ता) अस्त्रभेदे। “यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति” मनुः। स्वार्थे क तत्रार्थे हारा०।

ख(नि)नी स्त्री खन–इन् वा ङीप्। धातुरत्नाद्युत्पत्तिस्थाने

१आकरे "खनिभिः सुषुवे रत्नम्" "रत्नोपहारैरुदितैः खनिभ्यः" रघुः। २भूविदारणे च। ३आधारमात्रे "धरिः पट् च धरा योषित् अङ्गुलक्षणसत्खनी" काशी० २७अ०। ४खाते गर्त्ते "घृतगम्भीरखनीखनीलिम" नैष०।

खनित्रिम त्रि० खननेन निर्वृत्तम् खन-भावे वा० क्त्रि-मप् च। खननिर्वृत्ते। "खनित्रिमा उत वा याः स्वयंजाः" ऋ० ७।४९।२।

खनिनेत्र पु० इक्ष्वाकुवंश्ये नृपभेदे "विविंशतेः सुतोरम्भः खनिनेत्रोऽस्य धार्मिकः" भाग० ९,२।२६।

खन्य त्रि० खन-वेदे नि० यत्। खननीये खेयत्। खान्य इत्यपि तत्रार्थे। लोके तु खेय इत्येव।

खपुर पु० खं पिपर्त्ति उच्चतया पृ-क। १गुवाके अमरः। खमिन्द्रियं पिपर्त्ति-पृ-क। २अलसे त्रि० मेदि०। खेन पूर्य्यते कर्मणि क। ३भद्रमुस्तके पु० मेदि० ४व्याघ्रनखद्रव्ये राजनि० खे आकाशे उदितं पुरं शा०त०। अशुभसूचनायाकाशोदिते ५गन्धर्वनगरे। तस्योत्तरादि-दिग्भेदेनोदये फलभेदः वृ०सं० ५६अ० उक्तो यथा "उदगादि पुरोहितनृपबलपतियुवराजदोषदं खपुरम्। सितरक्तपीतकृष्णं विप्रादीनामभावाय। नागरनृपति-जयावहमुदग् विदिक्स्थं विवर्णनाशाय। शान्तायां दृष्टं सतोरणं नृपतिविजयाय। सर्वदिगुत्थं सततो-त्थितं च भयदं नरेन्द्रराष्ट्राणाम्। चौराटविकान् हन्याद्धूमानलशक्रचापाभम्। गन्धर्वनगरमुत्थितमा-पाण्डुरमशनिपातवातकरम्। दीप्ते नरेन्द्रमृत्युर्वामे-ऽरिभयं जयः सव्ये। अनेकवर्णाकृति खे प्रकाशते पुरं पताकाध्वजतोरणान्वितम्। यदा तदा नागमनुष्य-वाजिनां पिबत्यसृग् भूरि रणे वसुन्धरा।"

खं आकाशे चरं पुरं शाक०त०। ६आकाशगामिनि दैत्यपुरभेदे तदुत्पत्तिकथा "पुलमा नाम दैतेयी कालका च महासुरी। दिव्यं वर्षसहस्रन्ते चेरतुः परमं तपः। तपसोऽन्ते ततस्ताभ्यां स्वयम्भूरददद्वरम्। अगृह्णीतां वरन्ते तु सुतानामल्पदुःखिताम्। अवध्यताञ्च राजेन्द्र! सुरराक्षसपन्नगैः। पुरं सुरमणी-यञ्च खचरं सुमहाप्रभम्। सर्वरत्नैः समुदितं दुर्धर्षममरैरपि। महर्षियक्षगन्धर्व्वपन्नगासुरराक्षसैः। सर्वकामगुणोपेतं वीतशोकमनामयम्। ब्रह्मणा भरत-श्रेष्ठ। कालकेयकृते कृतम्। तदेतत् खपुरं दिव्यं चरत्यमरवर्ज्जितम्। पौलोमाध्युषितं वीर। काल-काञ्जैश्च दानवैः" भारते वनपर्व्वणि १७३ अध्याये। "विध्वस्ते खपुरे तस्मिन् दानवेषु हतेषु च" भा० व० १७३ अ०। ७हरिचन्द्रपुरे त्रिका०।

खपुष्प न० ६त०। आकाशकुसुमे तस्य यथा मिथ्यात्वमेवं मिथ्यात्वद्योतनाय खपुष्पेणोपमा शास्त्रेषु दीयते खकुसुमादयोऽप्यत्र।

खभ्रान्ति पु०स्त्री खे आकाशे भ्रान्तिर्भ्रमणं मांसान्वेष-णाय यस्य। चिल्ले त्रिका०। तस्य मांसान्वेषणाय खे भ्रमणात्तथात्वम्। स्त्रियां वा ङीप्।

खमणि पु० खे आकाशे मणिरिव प्रकाशकत्वात्। सूर्य्ये [त्रिका०।

खमीलन न० खानामिन्द्रियाणां मीलनम्। तन्द्रायाम्। शब्दच० तत्र सर्वेषां बहिरिन्द्रियाणां स्वस्वकार्य्ये व्या-पाराभावात् निमीलनं भवतीति तस्यास्तथात्वम्।

खमूर्त्ति पु० खं मूर्त्तिरस्य। अष्टमूर्त्तिधरे १शिवमहेशे शिवे खस्य ब्रह्मणोमूर्त्तिः स्वरूपम्। २ब्रह्मस्वरूपे स्त्री "स ब्रह्मपरमभ्येति वायुभूतः खमूर्त्तिमान्" मनुः।

खमूली स्त्री खं शून्यभूतं मूलमस्याः ङीप्। कुम्भिकायां (पाना) त्रिका० तस्याः मूलशून्यत्वात् तथात्वम्। पृषो० वा ह्रस्वः। खमूलि तत्रार्थे। स्वार्थे क ह्रस्वः। खमूलिका तत्रार्थे शब्दच०।

खम्ब गतौ भ्वा०पर०सक० सेट्। खम्बति अखम्बीत् चखम्ब।

खर पु० ख सुखविरुमतिशयेनास्यस्य र खमिन्द्रियं लाति ला-क वा रलयोरेकत्वम्। १गर्द्दभे। २अश्वतरे अमरः ३राक्षसभेदे च हेम० 'चेरतुः खरदूषणाये'ति भट्टिः। "वसतस्तस्य रामस्य ततः शूर्पणखाकृतम्। खरे-णासीत् महद्वैरं जनस्थाननिवासिना,। रक्षार्थं ताप-सानान्तु राघवो धर्म्मवत्सलः। चतुर्द्दश सहस्राणि जघान भुवि राक्षसान्। दूषणञ्च खरञ्चैव, निहत्य सुमहाबलौ। चक्रे क्षेमं पुनर्धीमान् धर्मारण्यं स राघवः" भा०व० २७६ अ०। ४कण्टकिभेदे, शब्दच० ५काके, अजयपालः ६कङ्कपक्षिणि, ७कुररपक्षिणि, राजनि० ६०संवत्सरमध्ये पञ्चविंशतितमे वर्षभेदे तत्फलं यथा। "उपद्रुतं जगत्सर्वं तस्करैर्नृपिकैः खगैः। पीडिताश्च प्रजाः सर्वाः देशभङ्गः खरे प्रिये!" ज्यो०त०। ९दर्वि-पार्श्वचरे १०पर्य्यमहारम्भके शब्दच० ११तिग्मस्पर्शे च। १२तद्वति, त्रि० अमरः। खरकिरणः खरांशुः १३कठिने च त्रि० 'खरविशदमभ्यवहार्य्यं भक्ष्यमिति" पा० भाष्यम्। १४देवताडवृक्षे स्त्री टाप् अमरः १५धर्मे मेदि०। १६निष्ठुरे हेम०। १७दैत्यभेदे त्रिका०। जातित्वे सर्वत्र स्त्रियां ङीप्।

खरकर पु० खरस्तीव्रः करोऽस्य। सूर्य्ये खरकिरणखरांशु-प्रभृतयोऽप्यत्र। [दृत्यम्। बलायामौषधौ राजनि०।

खरकाष्ठिका स्त्री खरमुग्रं काष्ठं यस्याः कप् कापि अत

खरकुटी स्त्री खरा तीक्ष्णा क्षुरवत्त्वात् कुटी। १नापितगृहे त्रिका० तस्याः क्षुरवत्त्वात्तथात्वम्। ६त०। गर्द्दभगृहे च खरगृहादयोऽप्यत्र।

खरकोण पुंस्त्री खरं तीव्रं कोणयते शब्दायते कुण-सङ्कोचे धातूनामनेकार्थत्वात् इह शब्दार्थता अण् उप०स०। तित्तिरिपक्षिणि हेम०। जातित्वात् स्त्रियां ङीष्।

खरगन्धनिभा स्त्री खरगन्धेन नितरां भाति नि+भा-क। नागबलायां नागबलाम् (पान) जटा०।

खरगन्धा स्त्री खरो गन्धोयस्याः। नागबलायाम् राजनि०

खरघातन पु० खरहृद्यरोगं, तन्नामराक्षसं वा घातयति हन-स्वार्थे णिच्-ल्यु। १नागकेशरे, २श्रीरामे च शब्दच०।

खरच्छद पु० खरः छदः पत्रमस्य। (उलुखड़) १तृणभेदे रत्नमा०। २कुन्दरवृक्षे राजनि०।

खरज्रु त्रि० खरं जीर्य्यति जृ-बा० कु। तीक्ष्णगतौ "अभूनापत् खरमज्रा खरज्रुः" ऋ० १०,१०६,७।

खरणस् त्रि० खरस्य नासेव खरा वा नासा अस्य नसादेशः णत्वम्। १खरतुल्यनासिके २तीव्रनासिके च। कप् समा०। खरणसोऽप्यत्रार्थे अमरः। [भावप्र०।

खरत्वच् पु० खरा कठिना त्वक् दस्य। १लज्जालुभेदे।

खरदण्ड न० खरः उग्रः कण्टकावृतत्वात् दण्डोऽस्य। पद्मे धरणी।

खरदला स्त्री खरं दलं यस्याः। काष्ठोदुम्बरे शब्दच०।

खरदूषण पु० खरस्पर्शं दूषणं म्नादकताहेतुदोषो यत्र। १धत्तूरे (धुतुर) २बहुदोषे त्रि०। शब्दरत्ना०। इ०। राक्षसभेदयोः द्विव० "खरदूषणयोर्भ्रात्रोः" भट्टिः।

खरधार त्रि० खरा उग्रा धाराऽस्य। तीव्रधारे अस्त्रभेदे करपत्राभदस्य खरधारस्य च शस्त्रादौ प्रयोगे दोषः यथाह सुश्रुतः "तत्र वक्रं कुण्ठं खण्डं खरधारमतिस्थूलमत्यल्पमतिदीर्घमतिह्रस्वमित्यष्टौ शस्त्रदोषाः। अतो विपरीतगुणमाददीतान्यत्र करपत्रात्तद्धि खरधारमस्थिच्छेदनार्थम्"।

खरध्वंसिन् पु० खरं खरनामानं राक्षसं ध्वंसयति ध्वंस-णिच्-णिनि। श्रीरामे। खरहन्त्रादयोऽप्यत्र। रामस्य खरध्वंसकथा खरशब्दे दृश्या।

खरनादिन् त्रि० खरं नदति नद-णिनि। तीव्रशब्दकारके स्त्रियां ङीप्। सा च २रेणुकाख्यगन्धद्रव्ये शब्दच०। खर इव नदति नद-णिनि। ३गर्द्दभतुल्यनादकारके त्रि० "उपमाने शब्दार्थप्रकृतावेव" पा० अस्यादुदात्तता। खरनादिनोऽपत्यं बाह्वादि० इञ्। खारनादि तदपत्ये पुंस्त्री०।

खरनाल न० खरं नालमस्य। पद्मे "नाविगगतस्तत्खरनालनालनाभिं विचिन्वंस्तदविन्दताजः" भाग० ३,८,२१।

खरप पु० खरं पिबति पा-क। १ऋषिभेदे ततो नडादि० गोत्रापत्ये फक्। खारपायण तद्गोत्रापत्ये पुंस्त्री०। बहुषु तस्य यास्का० लुक्। खरपास्तद्गोत्रापत्येषु।

खरपत्र पु० खरं पत्रमस्य। १शाकवृक्षे (सेगुन) २कुठेरकवृक्षे च रत्नमा०। ३यावनालशरे ४मरुबके ५हरिदर्भे च राजनि०। वा कप्। खरपत्रक। तिलकवृक्षे शब्दच०।

खरपत्री स्त्री खरं पत्रमस्याः गौ० ङीष्। १गोजिह्वावृक्षे २काकोदुम्बरिकायाञ्च राजनि०।

खरपात्र न० खरं पात्रम् कर्म०। लौहपात्रे त्रिका०।

खरपादाढ्य पु० खरैः पादैर्मूलैराढ्यः। कपित्थद्रुमे शब्दच०

खरपुष्प पु० खरं पुष्पमस्य। मरुबके रत्नमा०।

खरपुष्पा(ष्पी) स्त्री खराणि पुष्पाण्यस्याः वा ङीप्। बर्बराशाके (बाबुइ तुलसी) अमरः।

खरप्रिय पुंस्त्री खलो धान्यादिमर्द्दनस्थानं प्रियोऽस्य लस्य रः। पारावते शब्दमा० स्त्रियां जातित्वेऽपि योपधत्वात् टाप्।

खरमञ्ज पु० खरं मञ्जयति मञ्ज-र। अत्यन्तशोधके। खरज्रुशब्दे उदा०।

खरमञ्ज(रि)री स्त्री खरा मञ्जरी यस्याः समासान्तविधेरनित्यत्वात् न कप् ह्रस्वः वा ङीप्। अपामार्गे अमरः। तत्र ह्रस्वान्ते "पलाशपुष्पे खरमञ्जरेर्वा" "फलानि पिप्पोः खरमञ्जरेर्वा"। "खरमञ्जरिपिष्ट्याह्लम्बैश्चशामरद दमिः" सुश्रु०। दीर्घान्ते "वि क्रखरमञ्जरीमधुशिग्रु सूर्य्यवल्लीत्यादि० सुश्रुतः।

खररोमन् त्रि० खरं रोमाऽस्य। कठिनरोमयुक्ते स्त्रियां वा डाप्। खररोमत्वं गर्द्दभहत्याकर्मविपाकः यथाह शाता० "खरे विनिहते चैव खररोमा प्रजायते" इति। २नागभेदे पु० जटा०। [काभावे खरवल्लीत्यप्यत्र रत्नम०

खरवल्लिका स्त्री खरा वल्ली इव स्वार्थे क। नागवल्लाम्

खरशब्द पु० खर उग्रः शब्दोऽस्य। १कुररखगे। ६त०। २गर्द्दभशब्दे पु०। कर्म०। ३उग्रशब्दे पु०। [भावप्र०।

खरशाक पु० खरं शाकमस्य । (वामनहाटि) भार्ग्याम् ।

खरशाल न० खराणां शाला नपु० । गर्दभग्टहे । शब्दचि० तत्र जातार्थस्य लुक् । खरशाल । तत्र भवे त्रि० ।

खरसोनि स्त्री खे आकाशे रसमूनयति उनि–इन् । लोहिकालतायां हारा० । [लौहपात्रे त्रिका० ।

खरसोन्द पु० खं शून्यभूतः रसोन्दः रसक्लेदनमत्र । खरपात्रे

खरस्कन्ध पु० खरः स्कन्धोऽस्य । १प्रियालद्रुमे । २खर्ज्जूर्य्यां स्त्री टाप् । राजनि० । [मल्लिकायां रत्नमा० ।

खरस्वरा स्त्री खरं स्वरति उपतापयति स्वृ–अच् । वन-

खरा स्त्री खमाकाशं लाति ला–क लस्य रः । देवताडवृक्षे अमरः । [देवताड़वृक्षे रायमुकुटः ।

खरागरी स्त्री खरमागिरति आ+गॄ–अच् गौरा० ङीष् ।

खराब्दाङ्कुरक न० खराब्दात् तीव्रगर्जनमेघात् अङ्कुरयति अङ्कुरि–ण्वुल् । वैदूर्य्यमणौ राजनि० तस्य नवमेघशब्दात् जायमानाङ्कुरत्वात्तथात्वम् ।

खराश्वा स्त्री खरैरश्यते भुज्यते अश-भोजने बा० व । मयूरशिखायाम् (रुद्रजटालता) अमरः ।

खराह्वा स्त्री खरं तीव्रं गन्धमाह्वयति आ+ह्वे–क । अजमोदायाम् राजनि० । [चूर्णाकृतिकस्तूरीभेदे राजनि० ।

खरिका स्त्री खं राति रा–क संज्ञायां कन् अत इत्वम् ।

खरीजङ्घ पु० खर्य्या गर्द्दभ्या इव जङ्घा यस्य । १ऋषिभेदे २शिवे पु० । ततोऽपत्ये इञ् । खारीजङ्घि तदपत्ये पुंस्त्री० ततो युवापत्ये बहुषु तस्य लुक् । खरीजङ्घास्तद्युवापत्येषु ।

खरु पु० खन–कु रश्चान्तादेशः । १शिवे २दर्पे, ३अश्वे, ४दन्ते, मेदि० ५कामदेवे उणा० । ६श्वेतवर्णे ७श्वेतवर्णवति, ८निषिद्धैकरुचौ, हेम० । ९निर्बोधे, १०क्रूरे त्रि० उणा०वृ० ११पतिं वरायां कन्यायां स्त्री । हेम० गुणवाचित्वेऽपि पर्य्युदासान्न ङीष् । १२तीक्ष्णे त्रि० संक्षिप्तसारः । [चखर्ज्ज ,]

खर्ज व्यथायां भ्वा०अक०पर० सेट् । खर्ज्जति । अखर्ज्जीत् ।

खर्ज्जन न० खर्ज–ल्युट् । कण्डूयने । [शब्दच० ।

खर्जिका स्त्री खर्ज्ज–ण्वुल् अत इत्वम् । उपदंशरोगे

खर्जु पु० खर्ज–उन् । १कण्डूभेदे (चुलकानि) २खर्ज्जूरीवृक्षे ३कीटभेदे च हेमच० ।

खर्ज्जुर न० खर्ज–उरच् । रौप्ये रत्नमा० । [उणादिको० ।

खर्ज्जू स्त्री खर्ज्ज–ऊ । १कण्डूभेदे (चुलकानि) २कीटभेदे

ख(र्जु)र्ज्जूघ्न पु० खर्जुं(र्जूम्) कण्डूयनं हन्ति हन–टक् । १चक्रमर्द्दे, (दादमर्द्दन) २अर्कद्रुमे च राजनि० ।

खर्ज्जूर पुंस्त्री खर्ज्ज ऊरच् स्त्रीत्वे गौरा० ङीष् । (खेजुर) वृक्षे तस्य फलम् अण् तस्य लुप् । तत्फले न० तद्भेदगुणाश्च भावप्र० उक्ताः यथा "भूमिखर्ज्जूरिका स्वाद्वी दुरारोहा मृदुच्छदा । तथा स्वल्पफला काककर्कटी स्वादुमस्तका । पिण्डखर्ज्जूरिका त्वन्या सा देशे पश्चिमे भवेत् । खर्ज्जूरी गोस्तनाकारा परद्वीपादिहागता । जायते पश्चिमे देशे सा छोहारेति कीर्त्यते । खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः । स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु । तर्पणं रक्तपित्तघ्नं पुष्टिकृच्चापि शुक्रदम् । कोष्ठमारुतहृद्बल्यं वान्तिवातकफापहम् । ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकम् । मदमूर्च्छामरुत्पित्तमद्योद्भूतगदान्तकृत् । महतीभ्यां गुणैरल्पा स्वल्पखर्ज्जूरिका स्मृता । खर्ज्जूरीतरुतोयन्तु मदपित्तकरं भवेत् । वातश्लेष्महरं रुच्यं दीपनं बलशुक्रकृत्" "खर्ज्जूरीस्कन्धनद्धानाम्" रघुः । २रौप्ये ३हरिताले न० हेमच० । ४खगे (खामार) मेदि० । ५तृणजातिभेदे स्त्री अमरः । (वनखेजुर) ।

खर्ज्जूरवेध पु० एकार्गलापरपर्य्याये विवाहे वर्ज्जनीययोगभेदे उपयमशब्दे १२६६ पृ० विवृतिः ।

खर्द्द दंशने भ्वा०पर०सक०सेट् । खर्द्दति अखर्द्दीत् । चखर्द्द ।

खर्पर पु० कर्परशब्दवत् पृषो० खत्वम् । १तस्करे, २धूर्त्ते, ३भिक्षापात्रे कपाले ४भिन्नमृण्मयखण्डे च मेदि० ५उपधातुभेदे, तुत्थाञ्जने (तुँते) च न० शब्दच० ।

खर्परी स्त्री खर्परं उपधातुभेदः कारणत्वेनास्त्यस्य अच् गौरा० ङीष् । खर्परीतुत्थे अमरः । ठन् खर्परिकाप्यत्र ।

खर्परीतुत्थ न० कर्म० । तुत्थभेदे (तुँते) राजनि० तत्पाकप्रकारगुणाः भावप्र० उक्ता यथा । "नरमूत्रेण गोमूत्रे सप्ताहं रसकं (पारदम्) पचेत् । दोलायन्त्रेण शुद्धः स्यात् ततः कार्य्येषु योजयेत् । खर्परं कटुकं क्षारं कषायं वामकं लघु । लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् । विषाश्मकुष्ठकण्डूनां नाशनं परमं मतम्" ।

खर्व(र्ब) गतौ भ्वा० पर० सक० सेट् । ख(र्व)र्वति अख-र्वी(र्बी)त् । चख(र्व)र्व । गतिरत्र नीचतगतिः खर्वशब्ददर्शनात् । अन्त्यस्यान्त्यस्तु गर्वे इति भेदः ।

खर्व(र्ब) पु० खर्व–गर्वे अच् । १कुबेरनिधिविशेषे शब्दरत्ना० । २कुब्जक वृक्षे अन्त्यस्थमध्यः राजनि० तस्य गन्धशोभ-

कटतया गर्वहेतुत्वात् तथात्वम्। खर्व-गतौ अच्। वर्ग्यमध्यः ३ह्रस्वे ४वामने त्रि० अमरः "खर्वे ! गर्वसमूहपूरिततनो !" तारास्तोत्रम्। ५संख्याभेदे (सहस्रकोटौ) "अर्बुदमब्जं खर्वनिखर्वे"मिति लीलावती। ६तत्संख्याते च

खर्ब(र्व)ट पु० खर्ब(र्व)-अटन्। "एकतो यत्र तु ग्रामो नगरं चैकतः स्थितम्। मिश्रं तु खर्ब(र्व)टोनाम नदीगिरिसमाकुलः" भाग० टीकायां श्रीधरोक्ते ग्रामभेदे।

खर्बशाख त्रि० खर्वाशाखा तत्तुल्यस्य हस्तपादादयोऽस्य। वामने हेम०।

खर्बित त्रि० खर्ब-नीचगतौ कर्त्तरि क्त। ह्रस्वे स्त्रियां टाप्। साच अमावास्याभेदे, "संमिश्रयेन्नतद्दर्श्या अमावास्या भवेत् कचित्। खर्बितां तां विदुः केचिद्गताध्वामिति चापरे" कर्मप्रदी० पूर्वदिनस्थिततिथ्यपेक्षया परदिने २ऽल्पकालस्थिततिथिमात्रे च।

खर्बरा स्त्री खर्व उरच्। तरदीवृक्षे राजनि०।

खर्बु(र्वु)ज न० खर्बु(र्व) उन् तथा भूता जायते जन-ड। (खरमुज) लताफलभेदे। तस्य गुणा भावप्र० उक्ता "खर्बु(र्वु)जं मूत्रलं बल्यं कोष्ठशुद्धिकरं गुरु। स्निग्धं स्वादुत्तरं शीतं वृष्यं पित्तानिलापहम्। तेषु यच्चाम्लमधुरं सक्षारञ्च रसाद्भवेत्। रक्तपित्तकरं तत्तु मूत्रकृच्छ्रकरं परम्"।

खल चलने स्खलने च भ्वा० पर० अक० सेट्। खलति अखालीत् खलति प्रनिखलति खलः।

खल पुंन० खल-अच् अर्द्ध र्चा०। धान्यमर्द्दनस्थाने हेम०। (खामार) धान्यखलः गोधूमखलः यवखलः। "खलात् क्षेत्रादगाराद्वा यतोवाप्युपलभ्यते" मनुः। खलयज्ञः खलेकपोतः। "खले न पर्षान् प्रतिहन्मि भूरि" ऋ० १०,१८,७, २धूलिराशौ च ३भुवि ४स्थानमात्रे च। खलस्य साद्यस्क्रेषु यज्ञेषु उत्तरवेदित्वेन विहितो यथा "साद्यस्क्रे पूर्वरा वेदिः "खल उत्तरवेदिः" आश्व० श्रौ० ७,१२,१४, तत्र खलशब्दनिर्द्धारणं कातीये यथा "खल उत्तरवेदिः धान्यखलः प्रत्ययात्" कात्या० श्रौ० २२,३,४३,४४, खल इत्युक्ते धान्यखलः प्रतीयते यतः" कर्कः। "ये वेदिमभितस्तानुत्तरवेदिदेशे स्तृद्गन्ति" कात्या०श्रौ० ४५, "धान्यखलमभितः सन्निधानात् वेदिमभितो ये शस्यविशेषास्तानुत्तरवेदिदेशे स्तृद्गन्ति मर्द्दयन्ते स्तम्बेभ्यो विमोकार्थमनुडुद्भिः परितो गच्छद्भिराक्रामयन्तीत्यर्थः कर्कः। इति पूर्वपक्षः "पांशुखलो वा प्रत्ययाविशेषात्" ४७सू०। वाशब्दः पक्षान्तरे पांशुखलोवोत्तरवेदिर्भवति तत्रापि खलशब्दप्रयोगप्रत्ययौ" कर्कः "पांशुखलो धूलिराशिः प्रत्येतव्यः कुतः खल इत्युक्ते धान्यखलोऽपि प्रतीयते पांशुखलोऽपि प्रतीयते"स०व्या० इति सिद्धान्तः। ५तिलकल्के पु० (खलि) ६नीचे ७अधमे ८दुर्जने त्रि० "सर्पः क्रूरः खलःक्रूरः सर्पात् क्रूरतरः खलः। मन्त्रौषधिवशः सर्पः खलः केन निवार्य्यते" चाणक्यः। "स्वप्राणान् यः परप्राणैः सुपुष्णात्यघृणः खलः" भाग० १,७,३७,। ९इतरे च त्रि० अमरः। खे लीयते ली-ड। १०सूर्य्ये। खं तद्वर्णं लाति ला-क। ११तमालवृक्षे पु० शब्दच०। १२प्रस्तरमये औषधमर्द्दनपात्रभेदे वैद्यकम्। १३खडे डलयोरैक्यात्। "खलाः सपञ्चमूलाश्च गुल्मिनां भोजने हिताः" सुश्रुतः। खलकाम्बलिकौ हृद्यौ तथा वातकफे हितौ" सुश्रुतः। खलएव अङ्गुल्या० स्वार्थे ठक्। खालिक खलशब्दार्थे। [शब्दच०।

खलक पु० ख शून्यं मध्ये लाति ला-क संज्ञायां कन्। कुम्भे

खलकुल -० खलकौ खलभूमौ लीयते ली-बा० ड। कुलत्थकलाये "दश ग्राम्याणि धान्यानि भवन्ति ब्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च खल्वाः खलकुलाश्च" वृ०उ० "खलकुलाः कुलत्थाः" भा०।

खलता स्त्री खस्य लता। १आकाशलतायाम्। खलस्य भावः तल्। २दुर्जनत्वे च। "अनिवारिततापसम्पदं कुलहीनां सुमनोभिरुज्झिताम्। खलतां खलतामिवासतीं प्रतिपद्येत कथं बुधोजनः" माघः। खलता च "अद्रोहिणि तथा शान्ते विद्वेषः खलता स्मृता" इत्युक्तलक्षणा।

खलति पु० स्खलन्ति केशाः अस्मात् भीमा० अपादाने अति प्रत्ये०। (टाक) १इन्द्रलुप्तरोगे तच्छब्दे विवृतिः। २तद्वति त्रि० स्त्रियां वा ङीप्। तद्रोगयुक्तपरत्वे कडा० कर्मधा० परनि०। युवखलतिः खलतियुवा। "अवभृथेष्ट्यन्ते इत्युपक्रमे "पिङ्गलखलतिविक्लिधशुक्लस्य मूर्द्धनि जुहोति" कात्या० श्रौ० २०,८,१८, "खलतिः खल्वाटः" कर्कः।

खलतिक पु० खलतिरिव कायति कै-क। पर्वते "खलतिकादिषु वचनम्" वार्त्ति०। खलतिकः पर्वतस्तत्र भवानि खलतिकं वनानि" बहुत्वेऽपि एकवचनम् सि०कौ०।

खलधान पु० खलाः खडा धीयतेऽस्मिन् धा-आधारे ल्युट्। (खामार) ख्याते खलपदार्थे हेमच०।

खलपू त्रि० खलं भूमिं पुनाति पू-क्विप्। स्थानशोधनकारिणि (फराश)। अमरः।

खलयज्ञ पु० खले कर्त्तव्यो यज्ञः। खले कर्त्तव्ये यज्ञभेदे

लाट्यायनश्रौ॰ सू॰ ४,१,२५, खलादौ तस्य विवृतिः।

खलाजिन न॰ खलस्थितमजिनम्। खलस्थितचर्मणि ततः उत्करा॰ चतुरर्थ्यां छ। खलाजिनीय तत्सन्निकृष्ट-देशादौ त्रि॰।

खलादि पु॰ का॰ वार्त्तिकोक्ते समूहार्थे इनिप्रत्ययनिमित्ते शब्दसमूहे स च गणः। खल डाक कुटुम्ब द्रुम ध्वङ्क्ष गो रथ कुण्डल” खलिनी डाकिनीत्यादि तत्समूहे।

खलाधारा स्त्री खल आधारो यस्याः। तैलपायिका) “तैल-पायिकायाम्” जटाध॰।

खलि स्त्री खल–इन्। (खलि) इति ख्याते तैलकिट्टे राजनि॰ वा॰ ङीप्। “स्थाल्यां वैदूर्य्यमय्यां पचति तिल-खलीं चन्दनै रिन्धनौघैः” भारतरत्ना॰ “तालमूले रत्नभा॰।

खलि(ली)न पुंन॰ खे अश्वमुखच्छिद्रे लीनं पृषो॰ वा ह्रस्वः अर्शआद्यच्। अश्वमुखस्थायां कविकायां (कड़िआल)। ह्रस्वमध्यः इति रायमुकुटः। “उभयतः खलीन-कनककटकावलग्नाभ्यां पदेपदे कृताकुञ्चनप्रयत्नाभ्यां पुरुषाभ्यामवकृष्यमाणम्” (अश्वम्) काद॰। दीर्घमध्यः २खाकाशलीने त्रि॰।

खलिवर्द्धन पु॰ “मारुतेनाधिकोदन्तो जायते तीव्रवेदनः। खलिवर्द्धनसंज्ञोऽसौ जायते रुक् न शाम्यति” इति भावप्र॰ उक्ते दन्तगदभेदे।

खलिश पु॰ खे आकाशे जलादूर्द्ध्वभागे लिशति लिश–क। (खलशा) मत्स्यभेदे शब्दरत्ना॰। तद्गुणाश्च “खलिशस्तु मतोग्राही कषायो वातकोपनः। रूक्षो लघुः स्थूलहरः किञ्चिदामविनाशनः” राजवल्लभः। पृषो॰ खल्लिशः पाठोऽप्यत्र।

खलीकार पु॰ खल+अभूततद्भावे च्वि–कृ–भावे घञ्। १अपकारे जटाधरः। २भर्त्सने च। खलीकृधातोरस्तद-र्थकताऽपि तेन “परोक्षे खलीकृतोऽयं द्यूतकरः “खलीक्रियते” मृच्छ॰ खलीक्रियते भर्त्स्यते इत्यर्थः।

खलु अव्य॰ खल–उन्। निषेधे एतदर्थयोगे धातोः क्त्वा “निर्द्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम्” माघः “खल्विति १निषेध २वाक्यालङ्कार ३जिज्ञासा ४ऽनुनय ५नियमेषु” गणरत्नोक्तेषु वाक्यालङ्कारादिषु च तत्र वाक्यालङ्कारे “खलु वाचिकम्” जिज्ञासायां “स खल्व-धीते वेदम्”। अनुनये “न खलु न खलु मुग्धे! साहसं कार्य्यमेतत्”। नियमे (अवधारणे) “प्रवृत्तिसाराः खलु मादृशां धियः” प्रवृत्तिसारा एवेत्यर्थः” गणरत्नम्। जिज्ञासार्थे “न खलूग्ररुषा पिनाकिना” कुमा॰। ६निश्चये ७वाक्यपादपूरणे दर्वीपसायायां शब्दरत्ना॰। तत्र निश्चये “न खलु प्रेम चलं सुहृज्जने” कुमा॰। “न खलु वय-मसुष्य दानयोग्याः” माघः। “न खल्वनिर्जित्य रघुं कृती भवान्” रघुः। वाक्यालङ्कारे “सर्वं प्रियं खलु भव-त्यनुरूपचेष्टम्” माघः। “ध्वंस्या गुणाः खल्वपि लोक-कान्ताः” रघुः। वीप्सा व्याप्तिः “काले खलु समारब्धाः फलं बध्नन्ति नीतयः” रघुः। काले समारब्धानीतयः फलजननव्यापिका इत्यर्थः।

खलुक् पु॰ खमिन्द्रियं नेत्रव्यापारं लुञ्चति लुञ्च–अपनये क्विप्। अन्धकारे त्रिका॰।

खलुरेष पुंस्त्री खलु रिष्यते बध्यतेऽसौ खलु+रिष–वधे कर्मणि घञ् सुप्सुपेति स॰। मृगभेदे शब्दच॰।

खलूरिका स्त्री अव्युत्पन्नोऽयम्। शस्त्राभ्यासे हेमच॰।

खलेकपोत पु॰ ब॰व॰ खले पतन्तः कपोताः शा॰त॰ अलुक् स॰। खलेपतत्सु कपोतेषु। तत्तुल्यः न्यायः खलेकपोत न्यायः यथा खले कपोता युगपत् पतन्ति तथा परस्पर-विशेष्यविशेषणभावानापन्ना एकत्रान्विताः यथा क्रियायां कर्मादिकारकाणां सर्वेषामेव युगपदन्वयः न तु विशेष्ये-विशेषणमिति रीत्या “गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्” जै॰सू॰। अयमेव न्यायः एकत्र-द्वयमिति संज्ञकोऽपि। यथा महानसीयवह्निर्नास्तीत्यतः एकस्मिन् अभावप्रतियोगिनि महानसीयत्वं वह्नित्व-ञ्चेत्युभयं प्रकारविधया भासते इति जगदीशः। गदा-धरमते तु निर्द्धर्मितावच्छेदकभानास्वीकारेण वह्नित्वं धर्मितावच्छेदकीकृत्यैवात्र महानसीयत्वं भासते इति तत्र न एकत्रद्वयमिति रीत्या बोधः किन्तु क्रियाकारकान्वय एव तथा बोधः इति भेदः सएव खलेकपोतन्यायः।

खलेधानी स्त्री खले धीयन्ते वृषभा अत्र धा–आधारे ल्युट् ङीप्। मेधिकाष्ठे जटाधरः। २थूलौ हेम॰।

खलेयव अव्य॰। खले यवोयत्र काले तिष्ठद्गु॰ स॰। खले-स्थितयवकाले,

खलेवाली स्त्री खले वाल्यन्ते चाल्यन्ते वृषभा यत्र वल-चालने आधारे घञ् गौरा॰ ङीष्। शस्यमर्द्दनभूमिमध्यस्थे काष्ठभेदे (मेरकाठ)। “खलेवाली यूपो लाङ्गलेषा” कात्या॰ श्रौ॰ २२,२,४८, खलमध्ये निखाता मेधिभूता खलेवाली” इति सं॰व्या॰। आश्व॰ श्रौ॰ ६,७,१५, तु सूत्रव्याख्यायामन्या व्युत्पत्तिरुक्ता यथा खलेवाली

यूपः" मू० । खलेऽनडुद्गमने तद्बन्धनार्था मेधिः खले-वालीत्युच्यते खलेऽनडुहोवारयतीति खले वाली"नारा० मेध्यां हि बन्धनेनानडुहां वारणात् तथा भवति" रलयोरैक्यात् तथात्वम् ।

खलेबुस अव्य० खले बुसमत्र काले तिष्ठद्गु०स०। खलेस्थित बुसकाले

खलेश पु० स्त्री खे जलादूर्द्ध्वाकाशे लिशति संश्लिष्यति गति-काले लिश—अच् ७त० । (खलिसा) मत्स्यभेदे हारा० स्त्रियां जातित्वात् ङीष् ।

खलेशय पु० स्त्री खलेशं जलादूर्द्ध्वस्याकाशसंसर्गं याति या—क । (खलिशा) मत्स्यभेदे शब्दरत्ना० । स्त्रियां जातित्वेऽपि योपधत्वात् टाप् । [(खामार समूह) ।

खल्या स्त्री खलानां समूहः यत् । खलसमूहे अमरः

खल्ल पु० खलति क्विप् खल् तं लाति ला—क । १ वस्त्रभेदे २ गर्त्ते ३ चर्म्मणि ४चातकविहगे पु०स्त्री० मेदि० । स्त्रियां जातित्वात् ङीष् । ५ दृतौ चर्म्मभयपात्रे (मसक) हेम०। ६ औषधमर्द्दनपात्रे (खल) वैद्यकम् ।

खल्लिका स्त्री खल—क्विप् तं लाति—ला—क ततः संज्ञायां कन् कापि अत इत्त्वम् । अजीषे भर्जनपात्रे (भाजनाखोला) शब्दच० । शब्दचिन्तामणौ अयं वमध्यः पठितः तत्र वातेः क इति भेदः

खल्ली स्त्री खल—क्विप् तं लाति ला—क गौरा० ङीष् । "खल्ली तु पादजङ्घोरुकरमूलावमोटनी" इति भावप्र-काशोक्ते रोगभेदे ।

खल्लीट पु० खल्लीव टलति टल—विक्लवे वा० ड । १खलति-रोगे २तद्वति त्रि० त्रिका० पृषो० ह्रस्वः खल्लिटोऽप्यत्र शब्दरत्ना० । "खल्लीटः परनिन्दावान् धेनुं दद्यात् सकाञ्चनाम्" शातातपेन तस्य परनिन्दनकर्मविपा-कतोक्ता । खल्वाट इत्येव पाठः साधुः । तत्र खल्व इवाटति अट—अच् इति व्युत्पत्तिः ।

खल्व पु० खल—क्विप् तं वाति वा—क । निष्पावे ग्राम्यधान्य-भेदे "दश ग्राम्याणि धान्यानीत्युपक्रमे "खल्वाश्च खल-कुलाश्च" छ०उ० । "खल्वाः निष्पावाः वल्ला इति प्रसिद्धाः" शङ्करमाधवौ "व्रीहयश्च मे इत्युपक्रमे "मुद्-गाश्च मे खल्वाश्च मे" यजु० १८,१२, खल्वाश्चणकाः वेददीपः । तेन २चणके च ।

खल्वाट पु० खल—क्विप् तं वटति वेष्टयते वट—वेष्टे अण् उप०स०। इन्द्रलुप्तरोगे (टाक) २तद्रोगवति त्रि० हेमच०

खव सम्यग्भावविनतयोः प्रादुर्भावे, च क्र्या० पर०अक०सेट् ।

अखवीत् अखावीत् अखवीत् । चखाव । प्रनिखव्नाति ।

खवल्ली स्त्री खे शून्ये वल्ली । मूलशून्यायाम् १आकाशवल्ल्याम् राजनि०। खवल्लरीखलतादयोऽप्यत्र २आकाशलतायाञ्च ।

खवारि न० खात् पतितं वारि शा०त०। दिव्योदके राजनि० खजलादयोऽप्यत्र ।

खवाष्प पु० खस्य वाष्पम् । हिमजलकणे (ओस) हारा० ।

खस(श) पु०देशभेदे त्रिका०। तस्य दन्त्यमध्यता मन्वादौ दृश्यते क्वचित् तालव्यमध्यता च तेनोभयरूपता । स च देशः वृ०स० कूर्म्मविभागे १४अ० पूर्वस्यामुक्तः "अथ पूर्वस्यामि-त्युपक्रमे "खशमगधशिविरगिरिमिथिलसमतटोड्राश्व-वदनदन्तुरकाः" । सोऽभिजनोऽस्य, तद्देशस्य राजा वा अण् । खास(श) । तद्देशवासिनि तद्देश नृपे च बहुषु तु अणो लुक् । ख(शा)सास्तद्देशवासिनः तन्नृपाश्च । ते च शनकैः क्रियालोपात् वृषलत्वं गताः यथाह मनुः "शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः । वृषलत्वं गता लोके ब्राह्मणादर्शनेन च । पौण्ड्रकाश्चौड्रद्रविड़ाः काम्बोजा जवनाः शकाः । पारदापह्लवाश्चीनाः किराता दरदाः खशाः" । "खसांस्तु खारांश्चोलांश्च मद्रान् किष्कि-न्धकांस्तथा हरि० १४ अ० । "खसा एकासनाह्यर्हाः प्रदरादीर्घवेणवः" भा० स० ५१ अ० । "अङ्गवङ्गखसेष्वेव नान्यदेशे कदाचन" मू०चि०। ३सुरानामगन्धद्रव्ये शब्दच० ४कश्यपपत्नीभेदे दक्षकन्यान्तरे स्त्री यथा गरुडपु० ६अ० "धर्म्मपत्न्यः समाख्याताः कश्यपस्य वदाम्यहम् । अदिति र्दितिर्दनुः काला अतायुः सिंहिका मुनिः । कद्रूः प्रधा इरा क्रोधा विनता सुरभिः खशा(सा)" । "इरा वृक्ष लतावल्लीतृणजातीश्च सर्वशः । खशा(सा) च यक्ष रक्षांसि मुनेरप्सरसस्तथा" तत्रैव तत्प्रजोक्तिः ।

खशीर पु० १देशभेदे २तद्देशवासिनि ३तन्नृपे च बहुव० । "खशीराश्चान्तचाराश्च पह्लवा गिरिगह्वराः" भा० आ० ९ अ० उत्तरस्थजनपदकथने ।

खशेट पुंस्त्री खं शेटति शिट—अनादरे अण् । (खलिसा) मत्स्ये त्रिका० तस्य गतिकाले खस्यानाधारत्वेन गतियोग्यत्वाभावेऽपि तस्य तथात्वानादरेण गमनात्तथात्वम्

खश्वास पु० खस्य श्वास इव । वायौ त्रिका० ।

खष वधे भ्वा० पर० सक० सेट् । खषति अखाषीत्-अख-षीत् । चखाष ।

खष्प पु० खन—प नि० नस्य षः । १ क्रोधे २ बलात्कारे च । खष्पौ क्रोधबलात्कारौ" सि० कौ० उज्ज्वः शब्दक०

त्वद्रुमे तस्य शब्दस्य क्लीवतोक्तिः प्रामादिकी ।

खस पु० खानि इन्द्रियाणि स्यति निश्चलीकरोति सो—क । (खोस) (पाचड़ा) ख्याते १रोगभेदे । २देशभेदे ३सवर्णायां व्रात्यक्षत्रियाजाते जातिभेदे "झल्लो मल्लश्च राजन्याद्व्रात्याल्लिच्छिविरेव च । नटश्च करणश्चैव खसो द्रविड एव च" मनुः । (खसखस) इति ख्याते वृक्षे भावप्र० खसतिलशब्दो दृश्यः ।

खसकन्द पु० खस इव कन्दोऽस्य । क्षीरकञ्चुकीवृक्षे रत्नमा० । खसगन्ध इति पाठान्तरेऽपि तथार्थता । खसस्येव गन्धोऽस्य तत्र वाक्यम् ।

खसतिल पु० खसः खसपूयइव तिलति स्निह्यते शुक्लत्वहत्वात् तिल—स्नेहे क । (पोस्ता) अहिफेननिर्यासके (खस्खस) ख्याते वृक्षे राजनि० । तस्य तैलस्य खसपूयतुल्यशुभ्रवर्णत्वात्तथात्वम् ।

खसतिलतत्फलतन्निर्यासादिगुणा भावप्र० उक्ता "तिलभेदः खसतिलः कासश्वासहरः स्मृतः । स्यात् खाखसफलोद्भूतं वल्कलं शीतलं लघु ॥ ग्राहि तिक्तं कषायञ्च वातकृच्च कफास्रहृत् । धातूनां शोषकं रूक्षं मदकृद्वाग्विवर्द्धनम् ॥ मुहुर्मोहकरं रुच्यं सेवनात् पुंस्त्वनाशनम् । उक्तं खसफलक्षीरमाफूकमहिफेनकम् । आफूकं शोधनं ग्राहि श्लेष्मघ्नं वातपित्तलम् ॥ तथा खसफलोद्भूतवल्कलप्रायमित्यपि । उच्यन्ते खसबीजानि ते खाखसतिला अपि । खसबीजानि बल्यानि वृष्याणि सुगुरूणि च ॥ जनयन्ति कफम् तानि शमयन्ति समीरणम्" ।

खसम पु० खं शून्यं समं यस्य । बुद्धे त्रिका० । तस्य सर्वस्य शून्यभावनयाऽस्थिरत्वचिन्तनेन जगतःस्थिरत्वनिराकारणात् सर्वशून्यतस्वीकारेण तस्य तथात्वम् ।

खसम्भवा स्त्री खे सम्भवति सम्+भू—अच् । आकाशमांसी वृक्षे राजनि० । { बुद्धशब्दे विवृतिः ।

खसर्पण पु० खे बन्धच्छेदेन ऊर्द्ध्वदेशे सर्पणमस्य । बुद्धे त्रिका० ।

खसात्मज पु० खसायाः कश्यपपत्नीभेदस्य आत्मजः । राक्षसे त्रिका० तस्य तत्पुत्रत्वकथा खसशब्दे दृश्या ।

खसूचिन् खं सूचयति सूच—णिनि । प्रश्नविस्मारणाय आकाशस्य नैर्मल्यादिसूचके निन्दिते वादिनि । वैयाकरणखसूचिः सि०कौ० ।

खसृम पु० सिंहिकासुते असुरभेदे "सिंहिकायां समुत्पन्ना विप्रचित्तिसुतास्तथा । व्यंशः शल्यश्च बलवान् नभश्चैव महाबलः ! । वातापिर्नमुचिश्चैव इल्वलः खसृमस्तथा । अन्धको नरकश्चैव कालनाभस्तथैव । निवातकवचा दैत्याः प्रह्लादस्य कुलेऽभवन्" गारुडपु० ६ अ० । "खसृमः शालवदनः करालः कौशिकः शरः" हरि० ४२ अ० ।

खस्खस पु० खसप्रकारः द्वित्वम् पृषो० । खसतिले (पोस्ता) वृक्षभेदे राजनि० ।

खस्खसरस पु० ६त० । अहिफेने राजनि० ।

खस्तनी स्त्री खमाकाशः स्तन इव यस्याः । पृथिव्यां त्रिका०

खस्फटिक पु० खमिव निर्मलःस्फटिकः । १सूर्यकान्तमणौ २चन्द्रकान्तमणौ च हेमच० ।

खस्वस्तिक न० खं मूर्द्धोर्द्ध्वस्थित आकाशः स्वस्तिकमिव । समसूत्रपातेन मस्तकोपरिस्थे आकाशविभागे प्रमिताक्षरा खगोलशब्दे दृश्यम् ।

खहर पु० खं शून्यं हरोयस्य । बीजगणितोक्ते शून्यहारके राशिभेदे । "अस्मिन् विकारः खहरे न राशावपि प्रविष्टेष्वपि निःसृतेषु । बहुष्वपि स्याल्लयसृष्टिकालेऽनन्तेऽच्युते भूतगणेषु यद्वत्" । [कर्त्तरि विट् आत् । २खनितरि त्रि० विसखाः ।

खा स्त्री खन—कर्मणि विट् आत् । नद्याम् निघ० खन—

खाखस पु० खस+प्रकारे द्वित्वम् पृषो० । खसतिले भावप्र० यद्बीजं (पोस्ता) । खसतिलशब्दे विवृतिः ।

खाङ्गाह पु० खे आकाशेऽङ्गमाहन्ति गतिकाले आ+हन—ड । श्वेतपिङ्गलाश्वे शब्दचि० ।

खाजिक पु० खे ऊर्द्ध्वदेशे आजः! क्षेपः तत्र साधुः ठन् । लाजेषु हारा० । तस्य भर्जनपात्रात् ऊर्द्ध्वदेशे स्फोटनेन तथात्वम्

खाट पु० खे ऊर्द्ध्वमार्गे अटत्यनेन अट—करणे घञ् । शवरथे शवहरणशय्यायाम् शब्दरत्ना० ।

खाटि स्त्री खट—काङ्क्षायाम् बा० इञ् । १किणे (वेंटा) २असदृग्वहे ३शवरथे च मेदि० । ४शुष्कव्रणस्थाने उज्ज्व० । संज्ञायाम् कन् । खाटिका शवरथे स्त्री शब्दरत्ना० ।

खाट्वाभारिक त्रि० खट्वाभारं हरति वहति आवहति वा ठञ् । १खट्वाभारहारके २तद्वाहके ३तदावाहके च । भारभूतखट्वाहारकादौ खाटिक इत्येव ।

खाडव न० भावप्रकाशोक्ते चूर्णविशेषे यथा "कोलामलकजं चूर्णं शुण्ठ्येलाशर्करान्वितम् । मातुलुङ्गरसेनाक्तं शोषितं सूर्यरश्मिभिः । एवन्तु बहुशोऽभ्यक्तं शोषितञ्च पुनः पुनः । ईषल्लवणसंयुक्तं चूर्णं खाडवमुच्यते । खाडवं मुखवैशद्यकारकं रुचिधारणम् । हृद्रोगशमनञ्चेति मुखवैरस्यनाशनम् । भोजनान्ते विशेषेण भोक्तव्यं खाडवं सदा" ।

खाण्ड न० खण्डस्य भावः पृथ्वा० भावे पक्षे अण्। खण्डभावे खण्डस्य विकारः अण्। २खण्डविकारे च।

खाण्डव त्रि० खाण्डं खण्डविकारं वाति वा-क। खण्डविकारयुक्ते मोदकादौ। "रसालापूपकांश्चित्रान् मोदकांश्च सखाण्डवान्" भा० आनु० ५३ अ०।

२वनभेदे। तच्च वनं पुरा शक्राद्यावासस्थानं तच्च छित्त्वा सोमवंश्येन सुदर्शनेन राज्ञा खाण्डवी पुरी कृता पुनः सा काशीराजेन विजयेन जित्वा शक्रनिदेशात् वनतां प्रापिता यथाह कालिकापु० ७८ अ०।

"सोमवंशेऽभवद्राजा महात्मा स महाबलः। वीरः सुदर्शनो नाम चारुरूपः प्रतापवान्। स वै हिमवतो नातिदूरे भङ्क्त्वा महावनम्। सिंहान् व्याघ्रान् समुत्सार्य्य कांश्चिच्चापि तपोधनान्। खाण्डवीं नाम नगरीमकरोत्तत्र शोभनाम्। त्रिंशद्योजनविस्तीर्णामायतां शतयोजनम्"॥ "असहिष्णुर्नरपतिर्विजयस्तं सुदर्शनम्। कृतापचारं बहुधा देवानाञ्च तथा नृणाम्। वाराणसीपतिं वीरं विजयं जयशालिनम्। सन्धाय कृत्वा साचिव्यं तत्रैवैष न्ययोजयत्। विजयो विवरं प्राप्य महाबलपराक्रमः। सुदर्शनस्य नृपतेरवस्कन्दमथाकरोत्। नासहत् सोऽप्यवस्कन्दं विजयस्य सुदर्शनः। चतुरङ्गबलेनाशु युद्धायाभिमुखोऽभवत्। विजयो रथमारुह्य नियुज्य चतुरङ्गिणीम्। सेनां सुदर्शनं योद्धुं सम्मुखोऽभवदञ्जसा। तदा महद्युद्धमासीद्विजयेन महात्मना। सुदर्शनस्य नृपतेर्वृत्रवासवयोरिव। ततः सुदर्शनो राजा दारितो गदयाऽपतत्॥ उत्फुल्लनयनो राजा विजयः परवीरहा। मेनेऽमरावतीं तान्तु पुरीं क्षितिगतामिव"। "तं वीक्षन्तं नरपतिं नगरीं तां सुरेश्वरः। समेत्य विजयं प्राह सान्त्वयन् श्लक्ष्णया गिरा। इन्द्र उवाच। राजन्! महद्वनमिदमासीद्देवगणावृतम्। नरगन्धर्व्वयक्षाणां मुनीनाञ्च मनोहरम्। सर्व्वानुत्सार्य्य देवादीन्मम चाप्यप्रिये रतः। भङ्क्त्वा वनमिदं शुद्धं समुत्सार्य्य तपोधनम्। खाण्डवीं नगरीं चक्रे हठाद्राजा सुदर्शनः। तदिदं पुनरेव त्वं वनं कुरु नृपोत्तम!। तत्राहं विहरिष्यामि त्वत्कृतेन समं रहः। मुनीनाञ्च तपःस्थानं मण्डलं ते प्रसादतः। भविष्यति च यक्षाणां किन्नराणाञ्च पार्थिव!। मार्कण्डेय उवाच। एतत् श्रुत्वा वचस्तस्य शक्रस्य विजयस्तदा। वनमेवाकरोत्तान्तु खाण्डवीं शक्रगौरवात्। गच्छन्तु भो यथास्थानं प्रजाः सर्व्वा यथेच्छया। येषां वाञ्छास्ति लोकानां मद्राज्यगमने पुनः। वाराणसीं ते गच्छन्तु मयैव प्रतिपालिताम्॥ ततस्तस्य वचः श्रुत्वा जनाः केचिन्निजं पदम्। जग्मुर्वाराणसीं केचिद्विजयेनाभिपालिताम्"॥ "अष्टाविंशतिमे प्राप्ते युगे द्वापरशेषतः। वह्निर्ब्राह्मणरूपेण भिक्षां जिष्णुमयाचत। दातुमङ्गीकृते भिक्षां तदा पाण्डुसुतेन वै। वह्निस्वरूपमास्थाय जिष्णुं वचनमब्रवीत्। अहमग्निः पाण्डुपुत्र! यज्ञमागातिभोजनात्। व्याधितोऽहं ततो व्याधिं मम त्वं नाशयाधुना। खाण्डवं नाम विपिनं सपक्षिमृगराक्षसम्। यदि त्वं मां भोजयितुं शक्नोषि श्वेतवाहन तदा ममाप्यसौ व्याधिरपयास्यति नोचिरात्। पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम्। भङ्क्त्वा वनं ततश्चक्रे तेन तत् खाण्डवं वनम्। यदर्थं देवविहितं वः तच्छ्वेतवाहन!। विरोधात्तत्तु शक्रस्य न स्वयं भोक्तुमुत्सहे। तन्मां त्वाहि महाभाग! वने तस्मिन्नियोजय। यथाहं सकलं भोक्तुं प्राप्नोमि त्वत्प्रसादतः। तस्य तद्वचनं श्रुत्वा सव्यसाची महाबलः। दाहयामास विपिनं तत् सर्वं प्राणिसंयुतम्। देवकीतनयोपेतो वासुदेवेन पालितः। खाण्डवं दाहयामास ज्वलनस्य हिते रतः"। २तन्नामपुर्य्यां स्त्री।

खाण्डवप्रस्थ पु० इन्द्रप्रस्थे युधिष्ठिरवासस्थानभेदे "अस्माभिः खाण्डवप्रस्थे युष्मद्वासोऽभिचिन्तितः" भा० आ० ६१ अ०। इन्द्रप्रस्थशब्दे तत्कथा दृश्या।

खाण्डवायन पु० ऋषिभेदे "व्यभजन्त तदा राजन्! प्रख्याताः खाण्डवायनाः" भा० व० ११७ अ०।

खाण्डविक पु० खाण्डवं मोदकादि शिल्पमस्य ठञ्। मोदककारके (मयरा) "आरालिकाः सूपकाराः ये च खाण्डविकास्तथा" भा० आश्र० १ अ०।

खाण्डवीरणक त्रि० खण्ड इव वीरणः खण्डवीरणः ततः अरीहणा० चतुरर्थ्यां वुञ्। खाण्डवीरणसन्निकृष्टदेशादौ। [मोदककारके हारा०।

खाण्डिक स्त्री खण्डं मोदकादि शिल्पमस्य ठञ्।(मयरा)

खात न० खन-भावे क्त। १खनने कर्म्मणि क्त। २पुष्करिण्यादौ त्रि० "पूर्त्तं खातादिकर्म्म च" अमरः। तडागशब्दे विवृतिः। खातवेतनादिदानार्थं क्षेत्रफलज्ञानोपयोगी खातव्यवहारो लीला० उक्तो यथा।

"अथ खातव्यवहारे करणसूत्रं सार्द्धार्य्या। गणयित्वा

विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या । स्थानकमित्या सममितिरेवं दैर्घ्ये च वेधे च । क्षेत्रफलं वेधगुणं खाते घनहस्तसङ्ख्या स्यात् ॥ उदाहरणम् । भुजवक्रतया दैर्घ्यं दशेशार्ककरैर्मितम् । त्रिषु स्थानेषु षट्पञ्चसप्तहस्ता च विस्तृतिः ॥ यस्य खातस्य वेधोऽपि द्विचतुस्त्रिकरः सखे ! । तत्र खाते कियन्तः स्युर्घनहस्ताः प्रचक्ष्व मे ॥



अत्र स मि तकरणेन विस्तारे हस्ताः । ६ । दैर्घ्ये ११ वेधे । ३ ।
तत् क्षेत्रदर्शनम् यथा



यथोक्तकरणेन लब्धा घनहस्तसङ्ख्या । १९८ ।
खातान्तरे करणसूत्रं सार्द्धवृत्तम् । मुखजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड्भिः ॥ क्षेत्रफलं सममेतद्वेधगुणं घनफलं स्पष्टम् । समखातफलत्र्यंशः सूचीखाते फलं भवति ॥
उदाहरणम् । मुख दशद्वादशहस्ततुल्यं विस्तारदैर्घ्यन्तु तले तदर्द्धम् । यस्याः सखे ! सप्तकरश्च वेधः का खातसङ्ख्या वद तत्र वाप्याम् ॥



मुखजं क्षेत्रफलम् ।१२०। तलजम्।३०। तद्युतिजम्। त७० । एषामैक्यम् । ४२०।

षड्भिः । ६ । हृतं जातं समफलम् ।७० । वेध । ७। हृतं जातं खातफलं घनहस्ताः । ४९० ।

द्वितीयोदाहरणम् । खातेऽथ तिग्मकरतुल्यचतुर्भुजे च किं स्यात् फलं नवमितः किल यत्र वेधः । वृत्ते तथैव दशविस्तृतिपञ्चवेधे सूचीफलं वद तयोश्च पृथक् पृथङ्मे ॥



भुजः । १२।वेधः ।९
जातं यथोक्तकरणेन खातफलं घनहस्ताः ।१२९६।
सूचीफलम् । ४३२।

वृत्तखातदर्शनाय,



व्यासः । १० । वेधः । ५ । अत्र सूक्ष्मपरिधिः ३९२७/१२५ सूक्ष्मक्षेत्रफलम् ३९२७/५

वेधगुणं जातं सूक्ष्मखातफलं ३९/१०/२७ सूक्ष्मसूचीफलं १३०९/१० यद्वा स्थूलखातफलं २७५०/७ सूचीफलं स्थूलं वा २७५/२१ ।”
कुण्डशब्दे उदा० । ३कूपे निघ० । ४खननकर्ममात्रे त्रि० “खातखुरैर्द्रुमभुजां विपथे” माघः ।

खातक न०खात+संज्ञायां कन्। १परिखायाम् (खाद) हेमच०। "उत्तमर्णोधनस्वामी अधमर्णस्तु खातकः" इत्युक्ते २अधमर्णे ३परसैन्यविदारके च "खातकव्यूहतत्त्वज्ञं बलहर्षणकोविदम्" भा० शा० ११८ अ०। "खातकाः परसैन्यविदारकाः" नीलक०।

खातभू स्त्री खातयुक्ता भूः।१परिखायां २प्रतिकूपे च हारा०

खाति स्त्री खन—खै—वा भावे—क्तिन् आत्। खनने।

खात्र न० खन—ष्ट्रन् किच्च आत्। १खनित्रे २जलाधारे च सि०कौ० ३वने ४जले च संक्षिप्तसारः।

खाद भक्षणे भ्वा० पर० सक० सेट्। खादति अखादीत् चखाद। खाद्यः खादकः खादनम्। णिचि। खादयति अचिखादत् त। "सक्तून् खादति यस्त तस्य रिपवोनाशं प्रयान्ति ध्रुवम्" ति० त० "न खादेः परमन्नानि" ईशोत्सर्गमन्त्रः।"देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाक्"मनुः। "स हि (उषस्तिः) कुल्माषान् खादन्तं बिभिक्षे" छा०उप०।"मांसानि च न खादेद्यस्तयोः पुण्यं समं स्मृतम्"मनुः। "आयच्छमानो वैदेहीं खादितां निहतां मृताम्"भट्टिः।"तादृशं भवति प्रेत्य यथा मांसानि खादकः" मनुः। भक्ष्यभावस्य खादस्य। खादनस्य हिंसाव्यभिचरितत्वात् हिंसार्थत्वात् अभिव्यक्तेऽपि वा० चुरा० तेन स्वार्थे णिच् खादयति। "दुर्बलं बलवन्तो हि मत्स्यामत्स्यं विशेषतः। खादयन्ति" मत्स्यपु० "मां खादत मृगश्रेष्ठ! दुःखादस्मा द्विमोचय" भा०व० ६१ अ०। "देवराजो मया दृष्टो वारिवारणमस्तके। खादयन्नर्कपत्राणि" विदग्धमु०। अस्य भक्षणार्थत्वेऽपि आदिखाद्योर्न"वार्त्ति० णिचि प्रयोज्यकर्त्तुः न कर्मत्वम्। खादयति अन्नं वटुना" "वयोभिः खादयन्त्यन्ये" "तां श्वभिः खादयेद्राजा" मनुः।"भारयिष्यामि वैदेहीं खादयिष्यामि राक्षसैः"भट्टिः। खादनञ्च कठिनादि द्रव्यस्य गलाधःसंयोगानुकूलव्यापारविशेषः प्रतिषिद्धभक्षणविषये तु यत्नमात्रप्रवेशेऽपि प्रायश्चित्तार्द्धमिति भेदः यथाह प्रा०त० "यद्यपि अन्नादीनां कण्ठादधोनयनमेव भक्षणं न तु निष्ठीवनाय मुखद्वारादेः कपोलधारणं, तथाविधे प्रयोगाभावात्। तथापि पापविषये तथाविधानुबन्धेऽपि प्रायश्चित्तं, ब्रह्मवधे तथा दर्शनात् यथा याज्ञवल्क्यः"चरेद्व्रतमहत्वाऽपि घातार्थञ्चेत् समागतः"। अत्र हननप्रतिषेधेन यथा तदङ्गभूताध्यवसायादेरपि प्रतिषिद्धत्वात् प्रायश्चित्तविधानं तथाऽत्रापि भक्षणप्रतिषेधेन तदङ्गभूताव्यभिचारिताशादिसंयोगस्यापि प्रतिषिद्धत्वेन दोषस्य विद्यमानत्वात् भवत्येव प्रायश्चित्तं, मिताक्षरायामप्येवम्। अतएवोक्तं "जिघ्रन्नपि सुरां कश्चित् पिबतीत्यभिधीयते। यावन्न क्रियते वक्त्रे गण्डूषस्य प्रवेशनम्" इति। अत्र वक्त्रे गण्डूषस्य प्रवेशनेन पानातिदेशवद्भक्षणोद्यमेऽपि भक्षणातिदेशः। ततश्च विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने" इति याज्ञवल्क्योक्तेः दण्डोद्यमे दण्डनिपातप्रायश्चित्तार्द्धवत् भक्षणोद्यमे कण्ठादधोनयनसम्भावनारहिते अर्द्धं प्रायश्चित्तं श्रेयम्"

खादक त्रि०खाद—ण्वुल्।१भक्षके।"वृथा मांसानि खादकः" मनुः"यदि चेत् खादको न स्यात् न तदा घातको भवेत्" भा० आनु० ५६२४ श्लो०। २अधमर्णे च "खादको वित्तहीनः स्यात् लग्नको वित्तवान् यदि। मूलं तस्य भवेद्देयम्" नारदः "खादकोऽधमर्णः" मिता०।

खादतमोदता खादत मोदत इत्युच्यते यस्यां क्रियायाम् मयू०स०। खादनमोदनाय निदेशक्रियायाम्।

खादन पु० खादत्यनेन खाद—करणे ल्युट्। १दन्ते हेम०। भावे ल्युट्। २भक्षणे न०। "अन्नानां खादनेनाहमर्थी नान्येन केनचित्" रामा०२,५०स०४५ श्लोकः।

खादि त्रि० खाद—कर्मणि इन्। भक्ष्ये "अंसेष्वा वः प्रपथेषु खादयः" ऋ०१,१६६,९,। "खादयः भक्ष्याः" भा० खाद—धातूनामनेकार्थत्वात् नाशे कर्त्तरि इन्। २नाशके। "हस्तेषु खादिश्च कृतिश्च संदधे" ऋ०१, १६८,३। "हस्तेषु खादिः हस्तत्राणकः" भा०।

खादित त्रि० खाद—क्त। भक्षिते अमरः। "आयच्छमानो वैदेहीं खादितां निहतां मृताम्" भट्टिः।

खादिन् त्रि० खाद—णिनि। भक्षके स्त्रियां ङीप्। "क्रोष्टमर्द्दी तथाच्छेदी नखखादी च यो नरः" मनुः।

खादुक त्रि० खाद—उञ् संज्ञायां कन्। हिंसाशीले हेम०।

खादोअर्णस् स्त्री खाद—कर्मणि असुन् खादः खाद्यमर्णं जलं यस्याः पृषो० पूर्वरूपैकादेशाभावः नद्यां। निरु०।

खाद्य त्रि० खाद—कर्मणि ण्यत्। भक्ष्ये। "मांसप्रकारैर्विविधैः खाद्यैश्चापि तथा नृप!" भा०स० ४अ०।

खान न० खै—धातूनामनेकार्थत्वात् भक्षणे भावे ल्युट्। भक्षणे।"सद्भावेन हि तुष्यन्ति देवाः सत्पुरुषा द्विजाः। इतरे खानपानेन वाक्प्रदानेन पण्डिताः" गरु० पु० १०९ अ०।"खाने पाने च दातव्यम्"दत्ता० तन्त्रम् खै—खनने हिंसने च भावे ल्युट्।१खनने २हिंसने च।

खानक त्रि० खन–ण्वुल् । खनके "व्याधान् शाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान्" मनुः ।

खानि स्त्री खनिरेव पृषो०वृद्धिः । स्वर्णाद्युत्पत्तिस्थाने आकरे हेमच० । वा ङीप् तत्रार्थे शब्दच० । [त्रिका० ।

खानिक न० खानेन खननेन निर्वृत्तं ठञ् । कुड्यछेद्ये गर्त्ते

खानिल पु० खानं खननं शिल्पत्वेनास्त्यस्य वा० इलच् । सन्धिचौरे भित्तिभेदनेन चोरयितरि त्रिका० ।

खानिष्क पु०"दीप्ताग्नीनां सदा पथ्यः खानिष्कः कफहा गुरुः" सुश्रुतोक्ते मांसभेदे । [त्रिका० ।

खानोदक पु० खानाय भोजनाय उदकमत्र । नारिकेले

खापगा स्त्री खस्याकाशस्यापगा । गङ्गायाम् हेम० खधुनी खनदीप्रभृतयोऽप्यत्र ।

खार पु० खमवकाशमाधिक्येन ऋच्छति ऋ–अण् उप० स० । खारीपरिमाणे उज्ज्वल० ।

खारि(री) स्त्री खं मध्यावकाशमाराति आ+रा-क गौरा०ङीष् वा ह्रस्वः । द्रोणषोडशात्मके धान्यादिमानभेदे । "पलञ्च कुडवः प्रस्थः आढको द्रोण एव च । धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः । द्रोणैः षोडशभिः खारी विंशत्या कुम्भ उच्यते" हेमा० दा०विष्णुध० । अर्द्धशब्दात् संख्यायाश्च परतोऽस्य समासे वा टच् । अर्द्धखारम् अर्द्धखारि । द्विखारं द्विखारि । अर्द्धखारेण क्रीतम् ठञ् पूर्वपदस्य वा वृद्धिः । अ(आ)र्द्धखारिकम् । अध्यर्द्धशब्दात् संख्यायाश्च परतःखार्य्याः क्रीताद्यर्थे ईकन् । अध्यर्द्धखारीकं द्विखारीकम् । केवलाया अपि ईकन् तत्रार्थे खार्य्या क्रीतम् खारीकम् । [ह्रस्व । खारीध्मायके ।

खारिन्धम त्रि० खारीं धमति ध्मा–खश् धमादेशः मुम्

खारिम्पच त्रि० खारीं तन्मितधान्यं पचति पच–खश् मुम् ह्रस्व । खारीमितान्नपाचके ।

खारीक त्रि० खारीं खारीवापमर्हति ईकन् । खारीवाप योग्ये क्षेत्रे अमरः २खारीमितधान्यादिक्रीते च ।

खारीवाप त्रि०खारी तन्मितधान्यम् उप्यतेऽत्र वप–आधारे घञ् । खारीमितधान्यवपनयोग्ये क्षेत्रादौ अमरः । खारीं वपति वप–कर्त्तरि अण् उप०स० । खारीमितधान्यादिवापके त्रि० स्त्रियां टाप् सि०कौ० । मुग्ध० मते अण् अतः स्त्रियाम् ईप् इति भेदः ।

खार्कार पु० गर्द्दभजातिशब्दे "खार्काररभसा मत्ताः पर्य्यधावन् वरूथशः" भाग० ३,१७,१२ तस्य तत्रार्थतामाह श्रीधरः ।

खार्बुजेय त्रि० खर्बुजस्येदम् वा० ढक् । १खर्बुजसम्बन्धिनि । २रसालभेदे न० । "मधुरदधनि मध्ये शर्करां सन्नियोज्य शुचि विदलितखण्डं मर्दयेत् खार्बुजेयम् । करविलुलितमेवैवासितं नाभिगन्धैर्जगमिषुजठराग्निं स्थापयत्येव नूनम् । रसालं खर्बु(र्बू)जस्येदं विष्टम्भरुचिकारकम् । हृद्यञ्च कफदं बल्यं पित्तघ्नं मूत्रकृत् सरम्"भावप्र० ।

खालत्य न०खलतेर्भावः ष्यञ् । इन्द्रलुप्तरोगे"जरा खालत्यं पालित्यं शरीरमनुप्राविशन्" अथ० ११।८।१९ । पृषो० इमध्यतापत्वे यथाह सुश्रुतः "रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् । प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः । रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः । तदिन्द्रलुप्तं खालित्यं रुज्येति च विभाव्यते" ।

खिखिर पुंस्त्री खिङ्खिर–पृषो० । (खेंकशेयाली) शिवाभेदे त्रिका० । [शेयाली) शिवाभेदे त्रिका० ।

खिङ्खिर पु० खिमित्यव्यक्तं शब्दं किरति कॄ–क । (खेंक-

खिट भये भ्वा० पर० अक० सेट् । खेटति अखेटीत् । चिखेट । खेटकम् ।

खिद परितापे तुदा० पर०अक०अनिट् मुचादि । खिन्दति खिन्दतः । अखैत्सीत् चिखेद । खिन्नः ।

खिद दैन्ये दिवा० रुधा० च आत्म० अक० भीषायां सक० अनिट् । खिद्यते खिन्ते अखित्त चिखेद । खिन्नः । "स्वल्पनिरभिलाषः खिद्यते लोकहेतोः" शकु० । "हरिरित्यखिद्यत नितम्बिनीजनः" माघः । "खिन्ते तेष्वेव ये द्रव्यं दीयमानं न गृह्णति" कविरहस्यम् । "अखिन्दानस्य तेजसा" भट्टिः । "प्रहस्तश्चिखिदे न च" भट्टिः "खिदञ् ध्यौ दैन्यके"इत्येव वोपदेवे पाठः अतएव "रक्तं न्यषीवदक्लाम्यदखिद्यद्दुर्वाजिकुञ्जरम्" भट्टिः

आ+प्रकर्षेण खेदने । "आखेदते प्रखिदते च नमः" यजु० १६।४६।"आखेदते प्रकर्षेण खेदयति पापिनः"वेददी० । वेदे गणव्यत्यासः अन्तर्भूतण्यर्थता च ।

उद्+उत्पाटने । "प्रजापतिरात्मनोवपामुदखिदत्" श्रुतिः । "अथ वपामुत्खिदन्ति" शतब्रा० ३।८।२।५। "इमां वपामुत्खिदन्ति मध्यतः" ३।८।२।२। "वपामुत्खिदतोत्युत्खिद्य" ४।५।११।२। सर्व्वत्र गणव्यत्ययः ।

परि+समन्तात् खेदे । "कान्तावियोगपरिखेदितचित्तवृत्तिः । "परिखेदितविन्ध्यवीरुधः" भट्टिः। "लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः" भाग० ३।६।२८।

सम्+सम्यक्तापे अक०उत्पाटने सक०। "यथा उक्तयः मयूखी

शङ्कून् संखिदेत् एवमितरान् समखिदत्” का०उ० ।

खिदिर पु० खिद्यते कृष्णपक्षे खिद–किरन् । चन्द्रे उज्ज्व० ।

खिद्यमान त्रि० खिद–ताच्छील्ये चानश् ।१दैन्ययोगे२खेद-युक्ते च ।

खिद्र त्रि० खिद–दैन्ये रक् । १रोगे २दरिद्रे च उज्ज्वल० । “वलित्था पर्वतानां खिद्रं बिभर्षि पृथिवि !”ऋ०५।८४।१।

खिद्वन् त्रि० खिद–अन्तर्भूतण्यर्थे क्वनिप् । खेदकारके । “कस्ते किरयो दस्र खिद्वः” ऋ० ६।२२।४। “खिद्वः ! शत्रूणां खेदयितः!” भा० ।

खिन्न त्रि० खिद–क्त । १दैन्ययुक्ते, २अवसन्ने,३खेदयुक्ते च । “खिन्नः कार्य्येऽथवा नृपः !” मनुः “तयोपचाराञ्जलि-खिन्नहस्तया” रघुः ।

खिरहिट्टी स्त्री महासमङ्गायाम् राजनि० ।

खिल कणश आदाने तुदा० पर० सक० सेट् । खिलति अखेलीत् । चिखेल ।

खिल त्रि०खिल–क । इगुपधलक्षणः (?) इत्यादिना १अकृष्टे क्षेत्रादौ२सारतः संक्षिप्ते पूर्व्वतानुक्तपरिशिष्टे, यथा ऋग्वेदे श्रीसूक्तादि, यजुर्वेदे शिवसंकल्पादि, महाभारते हरिवंशः । खिलेषु हरिवंश इति पुष्पिकाव्याख्याने “खिलो नारायणः प्रोक्तस्तद्गुणा इमवः स्मृताः” इति नीलकण्ठेनोक्तेः ४नारायणे पु०। ततः अभूततद्भावे भूधातुना कृधातुना च समासः । खिलीभवति खिलीकरोति त्रि० । “खिलीभूते विमानानां तदापातभयात् पथि” कुमा० । “तौ सुकेतु-सुतया खिलीकृते” रघुः । “पीड्यिष्यति न मां खिलीकृता स्वर्गपद्धतिरभोगलोलुपम्”रघुः । “विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभाः” माघः । “धर्मशास्त्राणि चैव हि । आख्यानानीतिहासांश्च पुराणानि खिलानि च” मनुः । “अर्थं दग्धैर्मैत्रीनैः खिलानां शिवमस्तु वः” भाग० ६।४।१५ ।

खिल्य त्रि० खिले भवः यत् । खिलभवे लवणादौ । “यथा सैन्धवखिल्यः उदके प्रास्त उदकमेवानुविलीयेत” शतब्रा०१४,५,४।१२।“स्यन्दनात् सिन्धुरुदकं तस्य विकार-स्तत्रभवो वा सैन्धवः स चासौ खिल्योलवणशकलश्चेति सैन्धवखिल्यः”भा०। २खिले परिशिष्टे पठिते च ।“इदानीं खिल्यान्युच्यन्ते, वेददी० । तानि च “अग्निश्च पृथिवी च सन्नते” इत्यादीनि यजु० २६अ० गतानि । एवमृ-ग्वेदे खिल्यानि दशमखण्डे द्रष्टव्यानि ।

खिलेषु पु० खिलस्य हरेरिषुरंशो यत्र । हरिवंशे । तत्र हरिगुणाधिक्यवर्णनात्तथात्वम् । “खिलेषु हरि-वंशे” हरिवंशस्याध्यायसमाप्तिषु पुष्पिका ।

खील पु० कील+पृषो० । कीलके । “त्रीणि शतानि शङ्कवः षष्टिः खीला अविचाचला ये” अथ०१०।८।४ । [चुखुवे ।

खु ध्वनौ भ्वा० आत्म० अक० अनिट् । खवते अखोष्ट ।

खुङ्गाह पु० खुमित्यव्यक्तं शब्दं कृत्वा गाहते गाह–अच् । कृष्णपिङ्गलश्वेतवर्णेऽश्वे हेमच० ।

खुज स्तेये भ्वा० पर० सक० सेट् । खोजति अखोजीत् । चुखोज उदित् खोजित्वा खूक्त्वा खुग्नः ।

खुज्जा(ञ्जा)क पु० खुज–वा० आक वा० नुगागमो नुमा-गमो वा । देवतालवृक्षे रत्नमा० ।

खुड भङ्गे इदित् भ्वादि० आत्म०अक० सेट् । खुण्डते अखु-ण्डिष्ट । चुखुण्डे । खुण्डते ।

खुड भेदने चुरा० उभ० सक० सेट् । खोडयति–ते अचूखु-डत्–त । खोडयाम् बभूव मास चकार चक्रे ।

खुड भेदे चुरा० इदित् उभ० सक० सेट् । खुण्डयति ते अचुखुण्डत् त ।

खुडक पु० खुलकः लस्य डः । गुल्फभागभेदे खुलकशब्दे दृश्यः “न्यस्ते तु विषमे पादे रुजः कुर्य्यात् समीरणः । वातकण्टक इत्येष विज्ञेयः खुडकाश्रितः” सुश्रु० भावप्र० तु “रुक् पादे विषमे न्यस्ते श्रमाद्वा जायते यदा । वातेन गुल्फमाश्रित्य तमाहुर्वातकण्टकम्” स-मानप्रकरणे खुडकाश्रित इत्यस्य स्थाने गुल्फाश्रयतोक्ते-स्तस्य गुल्फांशार्थता ।

खुद भेदने सक० पर० अनिट् । खोदति अखोदीत् चुखोद । “चोदयत खुदत वाजसातये” ऋ० १०।१०१।१२ । माधवस्तु खुर्दधातोरेव तद्रूपमुक्त्वा रलोपश्छान्दस इत्याह वोपदेवधातुपाठे तु अयं धातुर्नास्ति ।“वनीखुदद् यथा सपम्”आश्व०श्रौ० २।१०।१४। [खुरः ।

खुर विलेखने तुदा०पर०सक०सेट् । खुरति अखोरीत् चुखोर

खुर पु० खुर–क । १शफे पशूनां पादस्योपरिस्थिते नखाधारे पदार्थे २कोलदले ३नखीनामगन्धद्रव्ये मेदि० । करणे घञर्थे क । ४नापितास्त्रभेदे शब्दर०। ५खट्वापादे(खाटेर खुरा) धरणी । “उद्यत्कृशानुशकलेषु खुराभिघातात्” माघः । “रजःकणैः खुरोद्धृतैः” रघुः । खुरशब्दस्य बह्वा०ङीष् वा खुरी । तेन स्त्रीत्वमप्यस्य ।

खुरक पु० खुर इव कायति कै–क । तिलवृक्षे शब्दच० ।

खुरणस्(स) त्रि० खुर इव नासिकाऽस्य नसादेशः टच्

समा० चात्वञ्च । चिपिटनासिके । अमरः । [स्वामी ।

खुरप्र पु० खुर इव प्राति–पूरयति प्रा–क । क्षुरप्रशब्दार्थे

खुरली स्त्री खुर इव लाति–ला–क गौरा० ङीष् । १शरा-भ्यासे त्रिका०। शस्त्रप्रयोगे २अभ्यासस्थाने च । “खुरली कलहे गणानाम्” महावीरच० ।

खुराक पु०स्त्री खुर–आकन् । पशौ उज्ज्वा० ।

खुरालक पु० खुर इवालति पर्य्याप्नोति अल–ण्वुल् । लौह-मयवाणे शब्दमा० ।

खुरालिक पु० खुराणामालिभिः कायति प्रकाशते कै–क । (भाड)१नापितास्त्रभाण्डे,२नाराचास्त्रे ,३उपधाने च मे०

खुरासान पु०“हिङ्गुपीठं समारभ्य यावद्भान्तं महेश्वरि !। खुरासानाभिधो देशो म्लेच्छमार्गपरायणः” इत्युक्ते देशभेदे

खु(खू)र्द्द क्रीड़ायां भ्वा०आ० अक० सेट् । खु(खू)र्द्दते अचु-(खू)र्द्दिष्ट चुखु(खू)र्द्दे ।

खुलक पु०खुर–कुन् स्वार्थे क । गुल्फाधोभागे “आ गुल्फ-कण्ठात् प्रमितस्य जन्तोस्तस्याष्टभागं खुलकाद्विभज्य” सुश्रु०।

खुल्ल न० क्षुद–संप०क्विप् तां लाति ला–क पृषो० । १नखी-नामगन्धद्रव्ये शब्दच०। २क्षुद्रे ३अल्पे ४कनिष्ठे च त्रि० स्वार्थे क । तत्रार्थे निष्ठुरे दरिद्रे खले च अमरः।

खुल्लतात पु०खुल्लः कनिष्ठस्तातस्य नि०पूर्वनि०। पितुः कनिष्ठ-भ्रातरि शब्दच०एवं खुल्लपितामहादयोऽपि पितामहादेः कनिष्ठभ्रातरि ।

खुल्लम पु०खुल्लेन मीयते मा बा० घञर्थे क । पथि त्रिका० ।

खृगल न० तनुत्राणे “खृगलेव विस्रसः पातमस्मान्” ऋ० २।३९।४ । खृगला“तनुहिंसाया रक्षतः”भा० “पिशङ्गे सूत्रे खृगलं तदा बध्नन्ति वेधसः” अथ० ३।९।२ ।

खेखीलक पु० खे आकाशे खीलक इव लस्य रः । शब्दवत्यां यष्ट्राम् हारा० । [कण्ठविहगे शब्दमा० ।

खेगमन पुंस्त्री खे आकाशे गमनमस्य अलुक् स० । काल-

खेचर पु० खे चरति चर–ट अलुक्स०। १शिवे, शब्दर० २विद्याधरे जटा० ३पारदे राजनि० ४सूर्य्यादिग्रहे, ५आकाशगामिमात्रे त्रि० । स्त्रियां ङीप् । ६हृचे न० रत्ना० हृचस्य वात्यया खे गतिमत्त्वात्तथात्वम् । ७घोटके पुंस्त्री भूरिरत्ना० ८योगाङ्गे मुद्राभेदे स्त्री यथाह काशीख० ४०अ० । “कपालकुहरे जिह्वा प्रविष्टा विपरीतगा । भ्रुवोरन्तर्गता दृष्टिर्मुद्रा भवति खेचरी । न पीड्यते स रोगेण न च लिप्येत कर्म्मणा । बाध्यते न च कालेन यो मुद्रां वेत्ति खेचरीम् । चित्तं चरति खे यस्मात् जिह्वा चरति खे गता । तेनैषा खेचरी नाम मुद्रा सिद्धैर्निषेविता । याव-द्बिन्दुः स्थिरो देहे तावत् मृत्युभयं कुतः । यावद्बद्धा च सा मुद्रा तावद्बिन्दुर्न गच्छति” ९तन्त्रोक्ते पूजाङ्गे मुद्राभेदे यथा “सव्यन्दक्षिणदेशेषु सव्यदेशे तु दक्षि-णम् । बाहुं कृत्वा महादेवि! हस्तौ द्वौ परिवर्त्त्य च। कनिष्ठानामिके देवि! युक्ते तेन क्रमेण च । तर्ज्ज-नीभ्यां समाक्रान्ते सर्वोर्द्धमपि मध्यमे । अङ्गुष्ठौ तु महेशानि! सरलां वापि कारयेत् । इयं सा खेचरी नाम्ना पार्थिवस्थानयोजिता” तन्त्रसा०। १०मेषादिराशौ पु० । “खेचराश्च सर्वे” ज्यो० त० । सर्वे राशयः ।

खेट भोजने अद० चु० उभ० सक० सेट् । खेटयति ते अ-चिखेटत् त ।

खेऽट पु० खेऽटति अट–अच् खिट–अच् वा । १सूर्य्या-दिग्रहे, “यस्मिन्नृक्षे स्थिताः खेऽटाः” इति ज्यो०त० । २तुनिन्दके त्रि० विश्वः । ३अधमे त्रि० अमरः ४कर्षकग्रामे पु० मेदि०“खेटखर्वटवाटीश्च वनान्युपवनानि च” भाग० १,७,११ । “खेटाः कर्षकग्रामाः” श्रीधरः । ५अस्त्रभेदे पु०। “यष्टिरूपेण खेट ! त्वमरिसंहारकारकः। देवीहस्तस्थितोनित्यम्” तत्पूजा मन्त्रः । स्वार्थे क । तत्रार्थे पु०न०“दिव्याम्बरधरां देवीं खड्ग खेटकधारिणीम्” भा० वि० ६अ० । “अनयोः स्त्रियौ च कार्ये खेटक-निस्त्रिंशधारिणौ” वृह०सं० । अनयोःशाम्बप्रद्युम्नयोः, “खेटकं पूर्णचापञ्च” दुर्गाध्यानम् । “खेटकास्तु हस्त-स्थितमेवारीन् घ्नन्ति यथाह “हस्तघ्नोविश्वावयुनानि” यजु० १९,५१ । “हस्ते स्थितो हन्ति हस्तघ्नः खेटकः” वेददी० स च यष्टिरूपः । ६चर्मणि मेदि०। खिट भये करणे घञ् । ७मृगयायाम् पुंन० आखेटकम् । कर्त्तरि अच् । ८तृणे न० हेमच०। कु(क)णपास्त्रस्याधःस्थिते ९फलकाकारे काष्ठभेदे न० तन्मानमुक्तं हेमा०परि०ख० लक्षणसमुच्चये “तत्र खेटकमपि कु(क)णपस्य त्रिविधमुत्तमं द्वादशाङ्गुलं दशाङ्गुलं मध्यममष्टाङ्गुलं निकृष्टम् वाला-नामेतत् खेटकमवालानान्तु विंशत्यङ्गुलमुत्तममष्टादशाङ्गुलं मध्यमं षोडशाङ्गुलं निकृष्टमिति” औशनसनीतिः । १०धनहद्विजीविनि त्रि० हारा० ११बलदेवमदायामि-त्यन्ये, १२कफे मेदिनिः ।

खेटाङ्ग खेऽटमङ्गं यस्य । उपद्रावकजन्तुभेदे, “डाकिनी शाकिनीभूतगणवेतालराक्षसाः । पद्मस्थाण्डखेटाङ्गाः

कालकर्णी शिशुपहाः। ज्वरापस्मारविस्फोटतृतीयक चतुर्थकाः। सर्वे प्रशममायान्ति शिवतीर्थजलोक्षणात्” काशी०ख० २२ अध्या०।

खेटिताल पु० खे ऽटति खिट-इन् खे ऽटति अट—इन् वा खेटिः तालोऽस्य। वैतालिके बोधकरे शब्दमा०।

खेटिन् पु० खिट-णिनि। १नागरे २कामिनि शब्दमा०।

खेड भक्षणे अद० चु०उभ०सक०सेट्। खेडयति ते अचखेडत्

खेद पु० खिद्—भावे घञ्। १शोके हेम० २अवसादे जटा०। खिद—णिच् कर्त्तरि अच्। ३रोगे कैयटः। “खेदो-रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमम्” सा०द० तस्य रति-मार्गगत्यादिकार्य्यता श्वासनिद्रादिकारणता चोक्ता “रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्य्ययः” सा०द०। “नि-यमितपरिखेदा तच्छिरश्चन्द्रपादैः” कुमा०।

खेदि पु० खिद—अपादाने इन्। १किरणे निघण्टुः।

खेदिन् त्रि०खिद—णिच्—णिनि। १दैन्यकारके स्त्रियां ङीप् सा च २अपवपर्णीलतायाम् शब्दच०।

खेय त्रि०खन—कर्मणि यत् ईत्वं। १खननीये २परिखायां न० अमरः। ३सेतुभेदे “सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च। तोयप्रवर्त्तनात् खेयः” मिता०नारदः। सेतुशब्दे विवृतिः। “नाऽखेयः सागरोऽप्यन्यस्तस्य सद्भक्त्यशालिनः” भट्टिः।

खेल चलने अक०गत्यां सक० भ्वा०पर० सेट्। खेलति अखे-लीत्। ऋदित् अचिखेलत् त। “माऽस्मिन् खलः खेलतु” नैष०। खेला खेलनम् खेलः। “लीला-खेलमनुप्रापुर्महोक्षास्तस्य विक्रमम्” रघुः “खे खेल-गामी तमुवाह वाहः” कुमा०। खेलितम् “स्फुट-कमलोदरखेलितखञ्जनयुग्मम्” गीतगो०।

खेलन न०खेल—ल्युट्। १क्रीड़ायाम् हलायु०। आधारे ल्युट् ङीप्। २शारिफलके (छक) स्त्री हेम०। करणे ल्युट्। ३क्रीड़ासाधने।

खेला विलासे कण्ड्वा०प०अक०सेट्। खेलायति अखेलायीत् खेलायां बभूव आस चकार। “खेलायन्नपि शं नापि सन्तुःस्त्य रतिं वसेत्” भट्टिः।

खेला स्त्री खेल—भावे अ। क्रीड़ायाम् अमरः।

खेऽलि स्त्री खे आकाशे अलति अल—इन्। १गाने २वाणे ३सूर्य्ये ४विहगे च पु० ५आकाशगामिमात्रे त्रि०।

खेव सेवने भ्वा०आ०सक०सेट्। खेवते अखेविष्ट ऋदित् अचि-खेवत् त।

खेसर पु०स्त्री खे आकाश इव शीघ्रगामित्वात् सरति सृ-ट अलुक् स०। गर्द्दभादश्वीजाते अश्वाद्गर्द्दभीजाते वा अश्वतरे पशुभेदे राजनि०। [खायति अखासीत् चखौ।

खै स्थैर्य्ये अक० खनने हिंसायाञ्च सक० भ्वा०पर० अनिट्।

खैमख पु०खे आकाशे कर्त्तव्यः मखः स्वार्थे अण्। आकाश-कर्त्तव्ये यज्ञभेदे “खमखाद् खैमखाद् मध्ये तदुरिः” अथ० ४।१५।१५। खैमखे इत्यत्र स्तोभयोगात् अग्ने इत्यत्र अग्नाइ इति तद्रूपम्। [रत्नादौ।

खैलायन त्रि० खिल+चतुरर्थ्यां पक्षा० फक्। खिलनिर्वृ-

खोङ्गाह पुंस्त्री। श्वेतपिङ्गलवर्णे अश्वे हेमच०।

खोट गतिप्रतिघाते भ्वा०पर०अक०सेट्। खोटति अखोटीत्। चुखोट खोटः खोटनम् खोटितम्। ऋदित् चङ्ग्र हस्वः। अचुखोटत् त। [खोटत् त।

खोट क्षेपे अद०चुरा० उभ०सक० सेट्। खोटयति ते अचु-

खोटि(टी) स्त्री खोट—इन् वा ङीप्। १चतुरनार्य्यां १पालङ्कीहक्षे च शब्दच०।

खोड गतिप्रतिघाते भ्वा०पर०अक०सेट्। खोडति अखोडीत् चुखोड। ऋदित् णिचि चङ्ग्रहस्वः अचुखोडत् त।

खोड क्षेपे अद०चु०उभ०सक०सेट्। खोडयति ते अचुखोडत् त

खोड त्रि० खोड—गतिप्रतिघाते अच्। खञ्जे। (खोंड़ा)। कडारा० कर्म०वा पूर्व्वनिपातः। खञ्जखोडः खोडखञ्जः।

खोडकशीर्षक न०खोड क्षेपे ल्युट् तथाभूतं शीर्षमस्य कप्। कपिशीर्षहक्षे त्रिका०।

खोर गतिवैकल्ये भ्वा० पर० अक० सेट्। खोरति अखो-रीत्। चुखोर। ऋदित् चङि अह्रस्वः अचुखोरत् त।

खोर त्रि० खोर—अच्। खञ्जे हेमच० संज्ञायां कन्। खोरक इयानां ज्वरे ज्वरशब्दे विवृतिः।

खोल गतिवैकल्ये भ्वा० पर० अक० सेट्। खोलति अखो-लीत् चुखोल ऋदित् च अह्रस्वः अचुखोलत् त।

खोल त्रि० खोल—अच्। खञ्जे शब्दसा०।

खोलक पु० खोल—अच् संज्ञायां कन्। पाकपात्रभेदे (खोला) २शिरसो भागभेदे (खोपडा)३वल्मीके ४गुवा-कफलकले मेदि०।

खोलि स्त्री खोल—इन्। तूणे शब्दमा०।[मङ्गलग्रहे त्रिका०।

खोल्मुक पु० खे आकाशे उल्मुक इव रक्तवर्णत्वात्।

ख्या प्रसिद्धौ दीप्तौ अक०कथने प्रकाशने ज्ञाने च सक० अद० पर०अनिट्। ख्याति अख्यत्। आर्द्धधातुके चक्षिङ्आदेशः ख्याधातुस्तु उभ०। अख्यत् अख्यात-अख्यास्त। चख्यौ चख्ये। ख्यातः ख्यततः ख्यानम्। ख्येयम्। ख्याता

तत्र कथने "अख्यन्मुनिस्तस्य शिवं समाधेः" भट्टिः। कर्म्मणि ख्यायते अख्यायि। "हिरण्यपुरमित्येव ख्यायते नगरं परम्" भा०। खपुरशब्दे दृश्यम्। "विभीषणेन सोऽख्यायि" भट्टिः। "शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति सा ख्याता कुलकोटीः समुद्धरेत्" ति० त०। [२२।१४।

अति+अतिक्रम्य कथने। "परोरुद्रावतिख्यतम्" ऋ० ८।

अनु+अनुकर्षणे। "अनु पूर्वाणि चख्ययुर्युगानि" ऋ० ७। ७०।४। "अनुचख्युः अनुक्रष्टवन्तावनुपहार्यम्" भा०। अनुवादे च। [२१८ पृ० दृश्यम्।

अनु+आ+तात्पर्य्यावधारणार्थं व्याख्याने अन्वाख्यानशब्दे

अभि+आभिमुख्येन दर्शने "स्वलीकं सुमना अभिख्यम्" ऋ०७। ८६।२। "अभिख्यमभिपश्यद्येयम्" भा०। "अभिख्याय तं तिगितेन विध्य" ऋ०२।३०।९। "अभिख्याय संवीक्ष्य" भा०। अभितः ख्यातौ च "पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत !" भा०आनु०८६अ०। दीप्तौ अक० अभिख्या। "काप्यभिख्या तयोरासीत्" रघुः।

अव+अवाक्प्रेक्षणे। "अव हि ख्यताधिकुलादिवस्पशः" ऋ०-८।४७।२। न्यक्कारेण दर्शने च "यदा वाख्यत्स मरणम्" ऋ० १०।२७।२। "अवाख्यत् अवाक्तनं न्यक्कृतमहं पश्यामि" भा०।

आ+कथने। "आख्याहि मे को भवानुग्ररूपः" गीता। "आख्यातमाख्यातेन क्रियासातत्ये" पा०। "स दृष्टः सर्वतो वार्त्तमाख्यद्राज्ञे न सन्ततिम्" रघुः। "अनाख्याय ददत् दोषं दण्ड्य उत्तमसाहसम्" याज्ञ०। "सैवा स्ववृत्तिराख्याता" मनुः। [१।१।२।४

उद्+आ+उदाहरणे। "दश वीर्य्याण्युदाख्याय" शत०ब्रा०

उप+आ+पुरावृत्तकथने। उपाख्यानम्। उत्तरदानेन व्याख्याने च। "यदुताहं त्वया पृष्टो वैराजात् पुरुषादिदम्। यदासीत् तदुपाख्यास्ये प्रश्नानन्यांश्च कृत्स्नशः" भाग० २।८।४५।

प्रति+आ+निवारणे "यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद !" भा०व० ५६अ०। "अभिप्रेतमनापन्नः प्रत्याख्यातुमनीश्वरः" भाग० ३।३१।२५।

वि+आ+विवरणे शब्दान्तरेण तदर्थकथने। "अथातः पुत्रपरिग्रहविधिं व्याख्यास्यामः" शौनकः। "व्याख्यातं कुशलाः केचित् अन्यान् धारयितुं परे" भा० आ० १अ०। विशेषेण कथने च "आचक्षुरस्यैव शुभं प्रशस्तम्"।

अनु+वि+आ+। उक्तस्य पुनः व्याख्याने "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" छा०उप०।

उप+वि+आ+उपासनादिविभूतिफलकथने "ओमित्युद्गायति तस्योपव्याख्यानं भवति" छा० उ०। "तस्याक्षरस्योपव्याख्यानमेवमुपासनम् एवं विभूति एवं फलमित्यादि कथनमुपव्याख्यानम्" भा०। "खल्वेतस्यैवाक्षरस्योपव्याख्यानम्" छा०उ०।

सम्+आ+ सम्यक्कथने। "तिथयस्ताः समाख्याताः षोडशैव वरानने !" स्कन्दपु० प्रभासख०।

परि+परितः सर्वतो वा ख्यातौ "सूतपुत्र ! यथा तस्य भार्गवस्य महात्मनः। च्यवनत्वं परिख्यातं तन्ममाचक्ष्व पृच्छतः" भा०आ० ५अ०। "अञ्जनेति परिख्याता पत्नी केशरिणः कपेः" रामा०सु० २।१४।

सम्+परि+सम्यक् सर्वतः ख्यातौ। "यथावत् संपरिख्यातो गन्धर्वाप्सरसां तथा" भा० आ० ६५ अ०।

प्र+प्रकर्षेण कथने। "यस्तु देव मनुष्येषु प्रख्यातः स्वकैर्गुणैः" भा० व० ३५ अ०।

वि+विशेषेण ख्यातौ "संह्राद इति विख्यातः प्रह्रादस्यानुजस्तु यः" भा० आ० ६७ अ०।

सम्+सम्यक् कथने "दश पितामहान् सोमपान् संख्याय" शत०ब्रा० ४।३।२। एकादिसंख्याभेदेन गणने "संख्यास्यामि फलान्यस्य पश्यतस्ते जनाधिप !" भा०व०७अ०।

अन्वादिपूर्वकस्य समं तदुपसर्गद्योत्यार्थसहितसंख्याने "अतः कालं प्रसंख्याय संख्यामेकत्र पिण्डयेत्" सू० सि०। प्रतिसंख्या प्रत्येकसंख्या अतीतसंख्या वेत्यर्थः।

ख्यात त्रि० ख्या—क्त। १कथिते २विश्रुते च अमरः। भावे क्त। ४कथने ५घोषणायाम् न०। "तथा ख्यातविधानस्य योगसञ्चार एव च" भा० शा० ५९ अ०। "ख्यातमभिमन्त्रितदुन्दुभिनादेन प्रयाणकथनम्" नीलक०।

ख्यातगर्हण त्रि० ख्याता गर्हणा निन्दाऽस्य। प्रसिद्ध निन्दे अपगीते अमरः।

ख्यातगर्हित त्रि० गर्हितं गर्हणं भावे क्त ख्यातं गर्हितमस्य। प्रसिद्धनिन्दे जटा०।

ख्याति स्त्री ख्या+क्तिन्। १प्रशंसायाम्, २प्रसिद्धौ ३कथने च अमरः। ४प्रकाशे ५ज्ञाने च। "ख्यातिञ्च सत्त्वपुरुषान्यतयाऽधिगम्य वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्" माघः। "सत्त्वपुरुषयोः प्रकृतिपुरुषयोरन्यतया अन्यत्वेन मिथो भिन्नत्वेन ख्यातिं ज्ञानं चाधिगम्य प्रकृतिपुरुषौ

भिन्नाविति ज्ञात्वेत्यर्थः प्रकृतिपुरुषयोर्विवेकाग्रहणात् संसारः विवेकात् मुक्तिरिति साङ्ख्याः। अथ तां ख्यातिमपि निरोद्धुं निवर्त्तयितुं वाञ्छन्ति वृत्तिरूपान्तां निवर्त्य स्वयमप्रकाशतयैव स्थातुमिच्छन्तीत्यर्थः" मल्लि०। ज्ञानरूपा ख्यातिश्चतुर्विधा असत्ख्यातिशब्दे ५२१ पृ० दर्शिता। "प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः"पात०सू०। "यदायं ब्राह्मणः प्रसङ्ख्यानेऽप्यकुसीदस्ततोऽपि न किञ्चित् प्रार्थयते तत्रापि विरक्तस्य सर्वथा विवेकख्यातिरेव भवतीति संस्कारबीजक्षयान्नास्य प्रत्ययान्तराण्युत्पद्यन्ते तदास्य धर्म्ममेघनामसमाधिर्भवति"भा०। "मनोमहान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः" इति या०भा० दर्शिते हिरण्यगर्भबुद्धिरूपे ६महत्तत्त्वे च। "स्वप्ने यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी" साङ्ख्यप्रवचनभाष्यधृतवाक्यम्।

ख्यापक त्रि० ख्या–ज्ञाने प्रकाशे णिचि ण्वुल्। १ज्ञापके २प्रकाशके "नित्यपुरुषख्यापकान् हेतून्" सुश्रुतः।

ख्यापन न० ख्या–प्रकाशे णिच्–भावे ल्युट्। प्रकाशने "ख्यापनेनानुतापेन तपसा ध्यानेन च। पापकृन्मुच्यते पापात् तथा दानेन चापदि" मनुः।

इति वाचस्पत्ये खकारादिशब्दार्थ सङ्कलनम्।

२४६१पृष्ठस्य क्रोड़पत्रम् खड्गिधेनुशब्दस्यपूर्व्वमिदम्

खड्गकोष पु० खड्ग इव कुष्णाति कुष–अच्। खड्गाकारपत्रे लताभेदे शब्दचि०। ६त०। (खाप) इति ख्याते खड्गावरके काष्ठचर्म्मादिनिर्म्मिते २पदार्थे अस्मार्थे तालव्यान्तोऽपि।

खड्गट पु० खड्गे इव टलति अत्र टल–विक्लवे वा० आधारे ड। १इक्षुकाण्डे हारा०। तस्याङ्गस्पर्शे असिवत् पीड़ाकरत्वात्तथात्वम्।

खड्गधेनु स्त्री खड्गो धेनुरिव यस्याः। छुरिकायाम् तस्या असिपुत्रिकात्वात्तथात्वम्। खड्गा गण्डकी धेनुः जातित्वात् पोटेत्यादिना पा० कर्म्मधा० पूर्व्वनिपातः पुंवद्भावश्च। २धेनुरूपगण्डक्यां मेदि०।

खड्गपत्र पु० खड्ग इव तीक्ष्णं पत्रमस्य। खड्गलताख्ये लताभेदे शब्द०।

खड्गपरीक्षा स्त्री खड्गस्य परीक्षा। खड्गस्य रूपघटनादिना शुभाशुभज्ञानोपयोगिन्यां परीक्षायाम् सा च युक्तिकल्पतरौ उक्ता यथा "खड्गरूपं तथा जातिर्नेत्रारिष्टे च भूमिका। ध्वनिर्मानमिति प्रोक्तं खड्गज्ञानात्मकं शुभम्। अभिन्ने दृश्यते यादृक् विच्छिद्य घटिते तथा। यदेव दृश्यते चिह्नं तदङ्गं सम्प्रचक्षते। नीलकृष्णादिकं खड्गं रूपमित्यभिधीयते। तेनैव यत् प्रतीतं स्यात् तत् जातिरिति गद्यते। अङ्गातिरिक्तं यज्जातिस्तन्माहात्म्योपसूचकम्। तन्नेत्रमिति जानीयात् खड्गे खड्गविशारदः। अङ्गातिरिक्तं खड्गादेर्यच्छुद्रत्वांशसूचकम्। तदरिष्टमिति प्राहुर्भूमिरङ्गादिधारणम्। यः खड्गे जायते शब्दोनखदण्डादिनाहते। स ध्वनिस्तुलना मानम् ज्ञानमष्टविधन्त्विदम्। पश्चाद्वा निपुणैः खड्गे सम्भाव्यन्तेऽपि कल्पिमाः। अन्यासङ्गविनौ ज्ञेयौ तावेव सहजाविति। शतमङ्गानि चत्वारि रूपाणि जातयस्तथा। त्रिंशन्नेत्राणि जानीयादरिष्टानि तथैव च। भूमिश्च द्विविधा ज्ञेया ध्वनिरष्टविधो मतः। मानन्तु द्विविधं प्रोक्तमित्येषां सङ्ग्रहो मतः"। अधिकमसिशब्दे दृश्यम्।

खड्गपिधान न० खड्गोऽपिधीयते आच्छाद्यतेऽनेन अपि+धा–करणे ल्युट् अपेरल्लोपः। (खाप) असिकोषे हलायु०। स्वार्थे क। तत्रार्थे हेम०।

खड्गपुत्रिका स्त्री खड्गस्य पुत्रिकेव। छुरिकायां मेदि०।

खड्गफल(क) पु०खड्गः फलमिव त्वगादृतत्वात् मध्ये यस्य वा कप्। (खाप) इति ख्याते असिपिधाने त्रिका०।

खड्गमुद्रा स्त्री "कनिष्ठानामिके बद्धा स्वाङ्गुष्ठेनैव दृश्यते। शिष्टाङ्गुली तु प्रसृते संश्लिष्टे खड्गमुद्रिका" तन्त्रसारोक्ते शक्तिपूजनाङ्गे मुद्राभेदे।

खड्गारीट पु० खड्गस्यारिरिव एटति गच्छति इट–गतौ क। (ढाल) ख्याते चर्म्ममये फलके। खड्गं तद्धारातुल्यव्रतमार्च्छति आ+ऋ–गतौ कीटन्। असिधाराव्रतधारिणि त्रि० मेदि०। तच्च व्रतमसिधाराव्रतशब्दे ५५० पृ० दर्शितम्।

खड्गिक पु० खड्गं खड्गाकारोऽस्त्यस्य ठन्। महिषीक्षीरफेने तस्य खड्गाकारवत् शुभ्रतया तथात्वम्। खड्गेन चरति ठन्। १यौगिके खगयौ च मेदि०।

ग

गकारः व्यञ्जनवर्णभेदः तस्योच्चारणस्थानं जिह्वामूलरूपकण्ठदेशः, आभ्यन्तरप्रयत्नः जिह्वामूलस्पर्शः, बाह्यप्रयत्नाः संवारनादघोषाः अल्पप्राणश्च। मातृकान्यासेऽस्य दक्षिणमणिबन्धे न्यासः। अस्य ध्येयरूपदेवतादिकं कामधेनुतन्त्रे उक्तं यथा“गकारं परमेशानि! पञ्चदेवात्मकं सदा। निर्गुणं त्रिगुणातीतं निरीहं निर्मलं सदा। पञ्चप्राणमयं वर्णं सर्वशक्त्यात्मकं प्रिये!। अरुणादित्यसङ्काशं कुण्डलीं प्रणमाम्यहम्”। हृदयस्थद्वादशदलकमलस्य कादिठान्तद्वादशवर्णयुततया अस्य तन्मध्यगत्वम्। अस्य वाचकशब्दा वर्णाभिधाने उक्ता यथा“गो गौरी गौरवं गङ्गा गणेशो गोकुलेश्वरः। शार्ङ्गी पञ्चात्मको गाथा गन्धर्वः सर्वगः स्मृतिः। सर्वसिद्धिः प्रभा धूम्रा द्विजाख्यः शिवदर्शनः। विश्वात्मा गौः पृथग्रूपा मणिबन्धस्त्रिलोचनः। गीतं सरस्वती विद्या भोगिनी नकुलीश्वरा। तेजस्वती च हृदयं गाम जालन्धरो जयः”। काव्यादिरचनायामस्य संयुक्ततया प्रथमविन्यासे लक्ष्मीः फलम्। “कः शोभेयच लक्ष्मीम्” संयुक्तं चेड न स्यात् सुखभरणपटुर्वर्गविन्यासयोगः। पद्यादौ गद्यवक्त्रे वचसि च सकले प्राकृतादौ समोऽयमिति” वृ॰र॰टी॰ सर्वेषामतयोक्तेः।

ग न॰ गै–क। १गीते २गणेशे ३गन्धर्वे पु॰एकाक्षरको॰ ४गुरुवर्णे “म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः” वृत्तर॰। “गुरुरेको गकारस्तु लकारो लघुरेककः” छन्दोम॰। “यरामन्तगलौ सतौ”“गौ स्त्री”वृत्तर॰। “सुप्युपपदे गमे ड। हृद्ग हृदयगामिनि कण्ठग कण्ठगामिनि इत्याद्यर्थे त्रि॰“हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः” मनुः। सुप्युपपदे गै–क। सामग सामगातरि छन्दोग छन्दोगातरि त्रि॰।

गकार पु॰ग+स्वरूपे कार। गस्वरूपे वर्णे “गुरुरेको गकारस्तु लकारो लघुरेककः” छन्दो॰।

गगन न॰ गम–युच् गोऽन्तादेशः। णत्वं प्रामादिकम् “फाल्गुने गगणे फेने णत्वमिच्छन्ति बर्बराः” इत्युक्तेः। १आकाशे २शून्याङ्के। ३लग्नापेक्षया दशमराशौ तस्य उदितराश्यपेक्षया स्वस्वस्तिकस्थितत्वात् तथात्वं तथा हि पूर्वस्यामेव राशीनामुदयेन ततः दशमराश्युदये तस्य मस्तकम् दशमराशिस्तु तदा स्वस्वस्तिकस्थितः इति तस्य मूर्द्धस्याकाशस्थितत्वात् तथात्वम्। तद्गुणादेः आकाशशब्दे ५६२ पृ॰ विवृतिः। सुश्रुते देहस्य पाञ्चभौतिकत्वाङ्गीकारेण “आन्तरीक्षास्तु शब्दः शब्देन्द्रियं सर्वच्छिद्रसमूहो विविक्तता चेति”देहस्याकाशधर्मा उक्ताः “पृथिव्यप्तेजोवाय्वाकाशानां समुदायात् द्रव्याभिनिर्वृत्तिः”इत्युपक्रम्य द्रव्यगता गगनधर्मास्तत्रोक्ता यथा “श्लक्ष्णसूक्ष्ममृदुव्यवायिविविक्तमव्यक्तरसं शब्दबहुलमाकाशीयम् तन्मार्द्दवशौषिर्य्यलाघवकरम्”। तथाकाशगुणभूयिष्ठं संशमनम्”इत्युपक्रम्य भूतविशेषसान्निध्येन धातुविशेषसंशमनकारित्वं तस्य दर्शितं सुश्रुतेन यथा “खतेजोऽनिलजैः श्लेष्मा शममेति शरीरिणाम्। वियत्पवनजाताभ्यां वृद्धिमाप्नोति मारुतः” “तस्याकाशगुणभूयिष्ठं मृदुत्वम्” इति च। तस्य धर्मविशेषाः भा॰शा॰ उक्ता यथा “आकाशस्य गुणः शब्दो व्यापित्वम् छिद्रमेव च। अनाश्रयमनालम्बमव्यक्तमविकारिता। अप्रतीघातिता चैव भूतत्वं विकृतानि च”। “गगनं गणाधिपतिमूर्त्तिरिति” माघः। “अवोचदेनं गगनस्पृशा (स्वरेण) रघुः। “प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीः” मेघ॰।

गगनगति पु॰ गगने गतिर्यस्य। १देवे २सूर्य्यादिग्रहे ३आकाशगामिनि त्रि॰। ७त॰। ४आकाशे गतौ स्त्री।

गगनचर त्रि॰ गगने चरति चर–ट। आकाशगामिनि देवसूर्य्यादिग्रहविहगादौ। तत्र विहगे “निसूदयन् बहुविधमत्स्यजीविनो बुभुक्षितो गगनचरेश्वरः (गरुड़ः) तदा” भा॰ आ॰ २८ अ॰। [हेमच॰

गगनध्वज पु॰ गगनस्य ध्वज इव। १मेघे, हारा॰ २सूर्य्ये

गगनप्रिय पु॰ दैत्यभेदे। “प्रह्लादोऽश्वशिराः कुम्भः संह्लादो गगनप्रियः” हरि॰ ४२ अ॰।

गगनमूर्द्धन् पु॰ दानवभेदे। “तथा गगनमूर्द्धा च वेगवान् केतुमांश्च यः” भा॰ आ॰ ६५अ॰। दनुवंशकथने। “तथा गगनमूर्द्धा च कुम्भनाभो महासुरः” हरि॰ ३अ॰।

गगनसद् त्रि॰ गगने सीदति गच्छति सद–क्विप्। गगनगामिनि देवग्रहविहगादौ। “बालत्वं वृद्धता वा यदि गगनसदां जन्मकाले नराणाम् प्रणाशान्द्रम्” जातकालङ्कारः। “त्रिस्रोतान् गगनसदः करोत्वभिन्” माघः। गगनविहारिनृप्रभृतयोऽप्यत्र स्त्रियां ङीप्।

गगनसिन्धु स्त्री ६त॰। मन्दाकिन्याम् “गगनसिन्धुफेनपटलजालान्तरस्थ” काद॰। गगननद्यादयोऽप्यत्र।

PK
925
T37
v.3

Tarkavachaspati, Taranatha
Vācaspatyam

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY